Mallavādi and Siṃhasūri Gaṇi Vādi

# Dvādaśāraṃ Nayacakram

— Nyāyāgamānusāriṇī

SARIT

SARIT

# Contents

Contents i

I तार्किकचक्रचक्रवर्ति-प्रवचनप्रभावकाचार्यभगवच्छ्री मल्लवादिक्षमाश्रमणप्रणीतं श्रीमत्सिंहसूरिगणिवादिक्षमाश्रमणसन्दृब्धया न्यायागमानुसारिण्या नयचक्रवालवृत्त्या समलङ्कृतं द्वादशारं नयचक्रम् । टीकान्तर्गतप्रतीकाद्यनुसारेण सङ्कल्पितम् ३

१ प्रथमो विध्यरः :न्यायागमानुसारिणी नयचक्रवालवृत्तिः ५

२ अथ द्वितीयो विधिविध्यरः । १६२

३ अथ तृतीयो विध्युभयारः । ३३८

४ अथ चतुर्थो विधिनियमारः । ४५९

५ अथ पञ्चम उभयारः । ५१२

६ अथ षष्ठो विधिनियमविध्यरः । ५६३

७ अथ सप्तम उभयोभयारः । ६१५

८ अथाष्टम उभयनियमारः । ७५२

९ अथ नवमो नियमारः । ९९७

१० अथ दशमो नियमविध्यरः । १०३०

११ अथैकादशो नियमोभयारः । १०६६

१२ अथ द्वादशो नियमनियमारः । १०८१

१३ अथ द्वाद्वशारान्तरम् । ११४०

१४ अथ नयचक्रतुम्बम् ११६३

The TEI Header ११८१

1/mj

ऑं अर्हम् § 1
॥ णमो त्थु णं समणस्स भगव+ओ महावीरस्स ॥ § 2
॥ नमः श्री+अन्तरिक्षपार्श्वनाथाय ॥ § 3

# Part I

[

तार्किकचक्रचक्रवर्ति-प्रवचनप्रभावकाचार्यभगवच्छ्री मल्लवादिक्षमाश्रमणप्रणीतं श्रीमत्सिंहसूरिगणिवादिक्षमाश्रमणसन्दृब्धया न्यायागमानुसारिण्या नयचक्रवालवृत्त्या समलङ्कृतं द्वादशारं नयचक्रम् । टीकान्तर्गतप्रतीकाद्यनुसारेण सङ्कल्पितम्]तार्किकचक्रचक्रवर्ति-प्रवचनप्रभावकाचार्यभगवच्छ्रीमल्लवादिक्षमाश्रमणप्रणीतं श्रीमत्सिंहसूरिगणिवादिक्षमाश्रमणसन्दृब्धया न्यायागमानुसारिण्या नयचक्रवालवृत्त्या समलङ्कृतं द्वादशारं नयचक्रम् । टीकान्तर्गतप्रतीकाद्यनुसारेण सङ्कल्पितम्

# १ प्रथमो विध्यरः : न्यायागमानुसारिणी नयचक्रवालवृत्तिः

॥ ओँ नमो वीतरागाय ॥ ऐँ नमः ॥ § 4

## मूलम्

व्याप्येकस्थमनन्तमन्तवदपि न्यस्तं धियां पाटवे
व्यामोहे न, जगत्प्रतानविसृतिव्यत्यासधीरास्पदम् ।
वाचां भागमतीत्य वाग्विनियतं गम्यं न गम्यं क्वचि
ज्जैनं शासनमूर्जितं जयति तद् द्रव्यार्थ-पर्यायतः ॥§ 8

जयति **नयचक्र**निर्जितनिःशेषविपक्षचक्रविक्रान्तः ।
**श्रीमल्लवादि**सूरिर्जिनवचननभस्तलविवस्वान् ॥§ 10

2/mj

तत्प्रणीतमहार्थयथार्थ**नयचक्रा**ख्यशास्त्रविवरणमिदमनुव्याख्यास्यामः

## टिप्पणम्

सिद्धचक्रं नमस्कृत्य हृदये प्रणिधाय च । नयचक्रमहाशास्त्रे टिप्पणं क्रियते मया ॥ । स भगवानैदंयुगीनोपपत्तिरुचिभव्यजनानुग्रहार्थ-

११ नुव्याख्यास्यामः ] भगवन्तः श्री**मल्लवादि**क्षमाश्रमणपूज्यपादाः **विधि-नियमभङ्गवृत्ती**त्यादिवक्ष्यमाणैककारिकामात्रं मूलभूतमतिसङ्क्षिप्तार्थं गाथा**सूत्रं** व्याचिख्यासवः सर्वमिदं **भाष्या**त्मकं विवरणं विरचयामासुः । अस्यापि च विवरणस्यातिगभीरस्य बोधागाधस्य महासमुद्रभूतस्य दुरवगाहत्वात् तदुत्तितीर्षूणामुपकारार्थं श्री**सिंहसूरि**गणिवादिक्षमाश्रमणपूज्या नौयानभूतां **न्यायागमानुसारिणीं** टीकां प्रणीतवन्तः । एवं च श्री**मल्लवादि**क्षमाश्रमणविरचितभाष्यात्मकविवरणस्य अनुव्याख्यानरूपत्वादस्य टीकाग्रन्थस्य अनुव्याख्यास्यामः इत्यभिहितं टीकाकृद्भिः । अनु पश्चादर्थे, भगवान् **मल्लवादी** व्याख्यास्यति, अयं च टीकाकृदनुव्याख्यास्यति इति भावः ॥

मर्हत्प्रवचनानुसारि **नयचक्र**शास्त्रमारिप्सुर्मङ्गलार्थं शासनस्तवं वक्ष्यमाण-वस्तूपसंहारार्थमाद्यं वृत्तमाह --**व्याप्येकस्थ**मित्यादि । व्याप्नोतीति व्याप्तुं शीलमस्येति वा व्यापि, औणादिकस्ताच्छीलिको वा । किं व्याप्यम् ? अविशेषितत्वात् सर्वं परमाण्वादि वस्तु । तत् कथं जैनेन शासनेन व्याप्यत इति चेत्, **द्रव्यार्था**देशात् । तद्यथा--एकपरमाणुर्वर्ण-गन्ध-रस-स्पर्शपरिणामैः सप्रभेदैः स्वाभाविकैः पुरस्कृतैः पश्चात्कृतैश्च द्व्यणुकादिभिः सांयोगिकैर्महास्क-न्धपर्यन्तैर्वैस्रसिकैः प्रायोगिकैश्च कार्मणशरीरादिभिरभिसम्बध्यते । यथोक्त-म्—

एक्कदवियम्मि जे अत्थपज्जया वयणपज्जया वा वि ।
तीताणागतभूता ताव+इ+अं तं हव+इ दव्वं ॥ सन्मति॰ १
। ३१ § 13

तथा गति-स्थित्यवगाह-वर्तनालक्षणैर्धर्माधर्माकाशकालैरापेक्षिकैः जीवानामपि स्वाभाविकपारभाविकैरुपयोग-शरीरादिभिः । अतस्तस्य तस्य वस्तुनो द्रव्यार्थादिष्टस्य तेषु तेषु परिणामेषु अव्यावृत्तस्वरूपत्वात् तेषां च तथा तदभेदात् सर्वेषां द्रव्य-पर्यायाणां परस्परतश्च सदविशेषात् तादात्म्यम् । अतस्तत् तद् व्याप्नोतीति व्यापि इत्युच्यते । § 14
3/mj

एवं च सति अतिसम्मुग्धत्वाद् वस्तुनस्तद्विषययोरभिधान-प्रत्यययोर्व्यव-हार-विनिश्चयफलयोरभावादिदोषाः स्युः । मा भूवन्निति **पर्याया**देश आश्रीयते --**एकस्थ**मिति, प्रत्येकपरिसमाप्तेरसाधारणधर्माणां भावानामसङ्कीर्णरूपत्वेन स्ववृत्तिप्रतिलम्भात्, न हि कश्चित् कश्चिदपेक्ष्य भवितुमर्हति भाव इत्येक-

---

१ मा] अत्र लोपोऽभ्यासस्यपा॰ ७ । ४ । ५८ इति सूत्रेण आरिप्सुः इति सिद्धम् ॥
२ स्तू] अनेकान्त एव परमार्थः, तत्प्रतिपादकत्वाच्च जैनमेव शासनं सत्यम् इति वक्ष्यमाणं वस्तु ॥
२ व्या] व्याप्येहस्थितमि॰nayacakra-ms-ya । व्याप्येतस्थमि॰ nayacakra-ms-bhā ॥
२ व्या] व्याप्नोति व्याप्तुं शील॰nayacakra-ms-ya । व्याप्नोतीति व्याप्तिः शील॰ nayacakra-ms-bhā ॥
३ वा] व्याप्तुं शीलमस्येति ताच्छील्ये द्योत्ये सुप्यजातौ णिनिस्ताच्छील्ये पा॰ ३ । २ । ७८ इति सूत्रेण व्यापि इति सिध्यति । अद्योत्ये तु ताच्छील्ये औणादिकं रूपम् ॥
७ न्तैर्वैस्र] ॰श्रसिकैः प्र॰ ॥
९ द] ॰दवि+अम्मिnayacakra-ms-bhā ॥
१० तीताणाग] ॰गयभूता ताव+इयं हो+इ तं दव्वंnayacakra-ms-bhā ॥
१३ प] प-रिमाणेषुnayacakra-ms-bhānayacakra-ms-līṃ विना ॥
१४ द्र] द्रव्याप-र्या॰nayacakra-ms-ḍenayacakra-ms-raṃ । द्रव्यानापर्या॰ nayacakra-ms-pā ॥
१६ स] सत्यपितिस-न्मुग्ध॰nayacakra-ms-bhā ॥
१७ हार] ॰रनिश्चय॰nayacakra-ms-bhā ॥

मेकमेव वस्तु । तदर्पणात् एकस्थम् इति चोच्यते शासनम्, तस्य तस्य पृथक् पृथगर्पणात् स्व-पररूपतः । समग्रादेशवशाद् व्यापीति व्यापि च एकस्थं चैकमेव तत् । एवमुत्तरेष्वपि । § 15

**अनन्तमन्तवदपि,** द्रव्य क्षेत्र-काल-भावादेशैरविशेषितत्वाद् विशेषितत्वाच्च । यथोक्तम्-- § 16

**एवं दुवालसंगं गणिपिडगं दव्वतो एगं पुरिसं पडुच्च सादियं सपज्ज-वसियं, अणेगे पुरिसे पडुच्च अणादियं अपज्जवसियं । खेत्ततो भरतेर-वते पडुच्च सादियं सपज्जवसियं, महाविदेहे पडुच्च अणादियं अपज्जव-सियं । काल+ओ उस्सप्पिणि-अवसप्पिणी+ओ पडुच्च सादियं सपज्ज-वसियं, णो+उस्सप्पिणिअवसप्पिणी+ओ पडुच्च अणादियं अपज्जवसियं । [भाव+ओ] जे जदा जिणपण्णत्ता भावा** इत्यादिना **सादियं सपज्जवसितमेव** नन्दिसू° ४२ । § 17

अथवा नास्मिन्नन्तोऽस्तीति अनन्तम्, अन्तोऽस्तीति अन्तवत् । कस्य ? अविशेषितत्वात् सर्वस्य । तद्यथोक्तम्-- § 18

**इमा णं भंते ! रयणप्पभा पुढवी किं सासया असासता ? गोतमा ! सिया सासया सिया असासया ? से केणट्ठेणं भंते ! एवं वुच्च+इ--सिया सासया सिया असासयत्ति ? *गोतमा ! दव्वट्ठता+ए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं संठाणपज्जवेहिं असासता**जीवाभि° सू° ३ । १ । ७८ इत्यादि । § 19

---

१ ए] एवात्मस्थम्nayacakra-ms-ya ॥
१ त] तस्य तस्य तस्य पृथक्nayacakra-ms-bhā । तस्य पृथक् nayacakra-ms-ya ॥
२ व] °वशाद् व्यापि चैकमेव तत्nayacakra-ms-bhā । अत्र समग्रादेशवशाद् व्यापि चैकस्थं चैकमेव तत् इति पाठः साधुरिति प्रतीयते । द्रव्यार्थदिशाद् व्यापि, पर्यायार्थदिशादेकस्थम्, **समग्रादेशवशात्**-- द्रव्यार्थ-पर्यायार्थोभयादेशवशात् तद् व्यापि च एकस्थं च इत्यभिप्रायः ॥
६ ए] एकंnayacakra-ms-bhā ॥
७ सियं] °अं nayacakra-ms-ya । एवमग्रेऽपि nayacakra-ms-ya प्रतिषु °यं इत्यस्य स्थाने °अं इति पाठोऽवसेयः ॥
९ का] काल+उ उसप्पि+उसप्पिणी+उ nayacakra-ms-bhā ॥
९ उस्स] °सप्पि° प्र° । एवमग्रेऽपि ॥
१० णो+उस्स] °सप्पिणि-णुस-प्पि°nayacakra-ms-bhā ॥
१५ असास] nayacakra-ms-bhā विनाऽन्यत्र --°सया गोयमा सि+अ nayacakra-ms-vi । °सया गो सिय nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
१६ सिया] सि+अnayacakra-ms-ya । एवमग्रेऽपि ॥
१७ य] °यत्तिnayacakra-ms-ya ॥
१७ *] गो दव्वट्ठया+ए सासयाnayacakra-ms-ya ॥
१८ असास] °सयाnayacakra-ms-ya ॥

**न्यस्तं धियां पाटवे । न्यस्तं** निक्षिप्तं **धिया**माभिनिबोधिकभेदानां पटुतायां कर्तव्यायां कारणत्वेनेत्यर्थः । यथोक्तम् **--जत्थाभिनिबोहि+अनाणं तत्थ** 4/mj **सु+अनाणं । जत्थ सु+अनाणं तत्थाभि निबोहि+अनाणं** नअत्र जत्थ आभिणिबोहियणाणं तत्थ सुयणाणं । जत्थ सुयणाणं तत्थाभिणिबोहियणाणं । दोऽवि एया+इं अण्णमण्णमणुगया+इं--इति नन्दिसूत्रे पाठः । अस्य व्याख्या--जत्थेत्यादि । यत्र पुरुषे आभिनिबोधिकज्ञानं तत्रैव श्रुतज्ञानमपि । तथा यत्र श्रुतज्ञानं तत्रैवाभिनिबोधिकज्ञानम् । आह--यत्राभिनिबोधिकज्ञानं तत्र श्रुतज्ञानमित्युक्ते यत्र श्रुतज्ञानं तत्राभिनिबोधिकज्ञानमिति गम्यत एव, ततः किमनेनोक्तेन ? इति; उच्यते--नियमतो न गम्यते, ततो नियमावधारणार्थमेतदुच्यत इत्यदोषः । नियमावधारणमेव स्पष्टयति--द्वे अप्येते आभिनिबोधिक-श्रुते अन्योन्यानुगते परस्परप्रतिबद्धे । --नन्दिसूत्रमलय° वृ° ॥न्दिसू° २४ *ति । श्रुतज्ञानसंस्कृतधियां नित्य एव, अनित्य एव, अवक्तव्य एव इत्येवमाद्येकान्तवादिग्राहेषु घटादेः कुम्भकारादिवेतनदानाद्यभावप्रसङ्गान्न नित्य एव, चिकीर्षा-स्मरण-प्रत्यभिज्ञान-संरक्षणाद्यभावप्रसङ्गान्नानित्य एव, स्वरूपानवधारणे वाग्व्यवहारोच्छित्तिप्रसङ्गात् अवक्तव्यः इति वक्तव्यत्वावक्तव्यत्वयोः स्ववचनविरोधान्नावक्तव्य इत्येवमादिदोषप्रदर्शनेन, स्यान्नित्यः, स्यादनित्यः, स्यादवक्तव्यः(?') इत्यनेकान्ताभ्युपगमाद् यथाप्रमाणं धर्म-धर्मिव्यवस्थानात् तद्दोषपरिहारेण वस्तुस्वरूपोपपादनेन परमतनिषेधानुज्ञानाभ्यां प्रवादिनां परस्परविरोधनिरोधैकवाक्योपानयनाद् मध्यस्थसाक्षिवत् प्रमाणीभूतम्, तेषामपि तत्त्वावबोधपाटवाधानसमर्थत्वात् ।

§ 20

स्यान्मतम्--नन्वत एव स्थाणु-पुरुषादिविषयसंशय-विपर्ययवद् नित्यानित्याद्येकान्तविकल्पात्मकत्वाद् **व्यामोहहे**तुरपि, काल-नियति-स्वभाव-पुरुष-*दैवेश्वर-यदृच्छाद्येकान्तकारणविकल्प**जगत्प्रतानविसृतिद**र्शनादिति । अत्रोच्यते **--न; व्यत्यासधीरास्पद**त्वात् । एकपुरुषपितृ-पुत्रत्वादिवज्**जैनं** हि **शासनं** कालादिजगत्प्रभेदैकान्तगतीर्व्यत्यस्य व्यावर्त्य परस्परविरोधनिवारणेन अनेकान्तात्मकप्रतिष्ठानसमाधानकारणमेकान्तानेकवादसमाहारात्मकैकप्रतिपत्तिकं पर-

१ वे] **पाटवे** इत्यत्र निमित्तसप्तमी, तेन धियां पाटवस्य हेतुरिति भावः । एवं **व्यामोहे न** इत्यस्याऽपि वक्ष्यमाणमूलग्रन्थस्य न व्यामोहहेतुः इत्यर्थः ॥
२ त्थाभिनिबोहि+अ] °**णिबोधियणाणं**nayacakra-ms-bhā । एवमग्रेऽपि ॥
३ सु] **सुतणाणं**nayacakra-ms-bhā । एवमग्रेऽपि ॥
१२ *] इतेः स्वरात् तश्च द्विःप्रा° व्या° १ । ४२ इति सूत्रेण इतिशब्दस्य आदेरिकारस्य लुक् ॥
१२ श्रु] श्रुतज्ञानसंस्कृतधियाम् इत्यस्य वक्ष्यमाणेन प्रवादिनाम् इत्यनेन सम्बन्धः प्रतिभाति ॥
२२ न] **नत्वत**nayacakra-ms-ya ॥
२३ *] **दैवथेरयद°**nayacakra-ms-ya ॥
२४ ता] °**तारवि°**nayacakra-ms-ya ॥
२४ न] र **व्यत्या°**nayacakra-ms-ya ॥

मतनिषेधानुमोदनाभ्यामेव । न काल एव, न नियतिरेव, एककारणवादिनां कारणसत्त्ववत् कार्यसत्त्वेऽनैकान्तिकत्वात्, कारणस्यापि कारणवत्त्वेऽनवस्थादोषादनेककारणत्वप्रसङ्गादनेककारणत्वस्य सिद्धेः, अनेककारणत्वेऽपि सदाद्यविशेषादनन्वयस्याभावादित्यादिदोषात् कालोऽपि, नियतिरपि इत्यादि, एकान्ते दोषदर्शनादनेकान्ते चादोषप्रदर्शनाद् लौकिकवादसंवादि । यथोक्तम्-- § 21

क्वचिन्नियतिपक्षपातगुरु गम्यते ते वचः
स्वभावनियताः प्रजाः समयतन्त्रवृत्ताः क्वचित् ।
स्वयङ्कृतभुजः क्वचित् परकृतोपभोगाः पुन-
*र्न वा विशदवाद ! दोषमलिनोऽस्यहो विस्मयः ॥ सिद्ध॰
द्वा॰ ३ । ८ इति ।§ 25

**तदेवंविधं शासनमूर्जितम्,** स्वातन्त्र्यात् परमतोपजीवनवैक्लव्यरहितत्वात् परैराघ्रातस्य सुसिद्धान्तान्तस्यात्यागात् कल्पनान्तराश्रयणाभावादनाकुलत्वाच्च । जेतृत्वाद्वा ऊर्जितम् । अनन्तरोक्तैर्हेतुभि**र्जयति,** परस्परानुवर्तिनयोत्साहबलसम्पदुपेतत्वाद्वा जयत्येव, उदितपुण्यनयोपेतचक्रवर्तिशासनवत् । § 26
5/mj

तत्तु सर्वथा योगिनां **गम्यम्,** सर्वनयप्रपञ्चसंस्कृतधियामननुविषयप्रज्ञत्वात् तेषाम् । अस्मदादिभिरेकदेशमाहात्म्यदर्शनाच्छेषमाहात्म्यमनुमानेन गम्यते । **न गम्यं क्वचिदिति,** यथैकदेशागम्यत्वेऽनभिभवनीयत्वेऽपि अन्यत्र गम्यता विषयखण्डपतेस्तथा मा भूदिति न गम्यं क्वचित् । अथवा गमनीयं **गम्यं** प्रतिपादनीयम् । न **गम्यं** प्रतिपादनीयम्, लोकप्रसिद्धव्यवहारानुपातिस्याद्वादपरिग्रहस्फुटपदार्थत्वादेकदेशगतेः शेषसुगमत्वात् । अयोग्यपुरुषापेक्षया वा न गमयितव्यम्, यथा-- § 27

स्थूलमतये न वाच्याः सूक्ष्मा अर्थाः स तानगृह्णानः ।
व्याकुलितमना मिथ्यात्वं वा गच्छेदपरिणामात् ॥ § 29

---

२ ण] ॰णत्वे nayacakra-ms-ya ॥
१० *] ॰र्न
चाददोषnayacakra-ms-bhā ॥
११ तोप]
॰जीविनवै॰nayacakra-ms-ya ॥
१२ सु]
सुसिद्धतात्यागात्nayacakra-ms-bhā
॥
१५ धियाम]
॰मतनु॰nayacakra-ms-vi ।
विषयानुगामिनी प्रज्ञा अनुविषयप्रज्ञा, योगिनस्तु अननुविषयप्रज्ञाः । ते हि न एकदेशमाहात्म्यदर्शनाच्छेषमाहात्म्यमनुमानेन अवगच्छन्ति इति **अननुविषयप्रज्ञत्वात्** इति पाठस्य आशयः प्रतिभाति । अथवा **अननुमानविषयप्रज्ञत्वात्** इत्यपि पाठोऽत्र स्यादिति सम्भाव्यते ॥
१७ म्य]
॰त्वेनाभि॰nayacakra-ms-pā ।
॰त्वेनाभे॰ nayacakra-ms-vi ॥
१८ ता] **विषयखण्डयतेस्तथा** प्र॰ । अत्र विषयो देशः इत्यर्थः ॥
२३ म] **॰मन्य मिथ्या॰** विसं॰ विना ॥

अथवा प्रागसमीक्ष्योक्तार्थसमीकरणार्थं कल्पनान्तरैर्न गमनीयं क्वचित् । यथा **बौद्धे** सर्वं क्षणिकम् इति प्रतिज्ञाय स्मृत्यभिज्ञान-बन्ध-मोक्षाद्यभाव-दोषपरिहारार्थं सन्तानकल्पना । प्रधाननित्यतां प्रतिज्ञाय परिणामकल्पना व्यक्तात्मना **कापिले । क्रियावद् गुणवत् समवायिकारणम्** वै° सू° १ । १ । १५ इति सामान्यद्रव्यलक्षणं प्रतिज्ञाय एकान्तनित्यानित्यवादे च तदव्याप्तिप-रिहारार्थम् अद्रव्यमनेकद्रव्यं च द्विविधं द्रव्यम् इति द्रव्यत्वं च सामान्य-विशेषाख्यं तत्त्वम् इति द्रव्य-पर्यायनयद्वयाश्रयणेन पदार्थप्रणयनं **काणभुजे** । तथा द्रव्य-गुण-कर्माणि नाना इति प्रतिज्ञाय तदत्यन्तभेदे नीलोत्पलादि-
6/mj सद्द्रव्यादिसामानाधिकरण्य-[विशेषण]विशेष्यत्वादिव्यवहाराभावदोषभयात्

* * *

शेषशासनन्यग्भावेनैव जेष्यति तद् यदेवम्विधम् । एवम्विधतैव तु प्रतिपाद-नीया । किमेव प्रतिपाद्यमस्ति ? द्रव्यार्थ-पर्यायार्थद्वित्वाद्यनन्तान्तविकल्पो-

* * *

**तत्सिद्ध्यर्थं सदिति यतो द्रव्य-गुण-कर्मसु द्रव्य-गुण-कर्मभ्योऽर्थान्तरं सा सत्ता** वै° सू°सदिति यतो द्रव्य-गुण-कर्मसु सा सत्ता । द्रव्य-गुण-कर्म-भ्योऽर्थान्तरं सत्ता--इति **वैशेषिकसूत्रे** पाठः । सदिति यतो द्रव्य-गुण-क-र्मसु सा सत्ता । इतिकारेण प्रत्यय-व्यवहारयोः प्रकारमुपदिशति । तथा च द्रव्यादिषु त्रिषु सत् सत् इतिप्रकारको यतः प्रत्ययः सदिदं सदिदम्

---

२ बौ] **बौद्धैः** nayacakra-ms-bhā विसं° । **बौद्धौ** nayacakra-ms-bhā विसं° विना । अत्र पूर्वापरसन्दर्भानुसारेण **बौद्धे** इत्येव पाठः समुचितः टीकाकृदभिप्रेतश्चेति भाति ॥

२ मोक्षा] **°क्षाभाव°**nayacakra-ms-ya ॥

३ रिहारा] **°रार्थसंता°** प्र° ॥

४ क्तात्म] **°त्मता**nayacakra-ms-bhā । हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥ **--साङ्ख्यका°** ॥

४ क्रिया] क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्--इति **वैशेषिकसूत्रे** पाठः ॥

५ वा] nayacakra-ms-vi विनाऽन्यत्र **--°वादं च** nayacakra-ms-bhā nayacakra-ms-pā । **°वाद च** nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥

९ व्यादिसा] तथा तम् [=स्याद्वादम्] अन्तरेण सामानाधिकरण्यं विशेषण-विशेष्यभावोऽपि नोपपद्यते । तथा हि भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकत्रार्थे वृत्तिः सामानाधिकरण्यम् । तयोश्चात्यन्तभेदे घट-पटयोरिव नैकत्र वृत्तिः । नाप्यत्यन्ताभेदे, भेदनिबन्धनत्वादस्य, न हि भवति--नीलं नीलमिति । किञ्च नीलशब्दादेव तदर्थप्रतिपत्तौ उत्पलशब्दानर्थक्यप्रसङ्गः । तथैकं वस्तु सदेवेति नियम्यमाने विशेषण-विशेष्यभावाभावः । विशेषणं विशेष्यात् कथञ्चिदर्थान्तरभूतमवगन्तव्यम् । अस्तित्वं चेह विशेषणं, तस्य विशेष्यं वस्तु तदेव वा स्यादन्यदेव वा ? न तावत् तदेव, न हि तदेव तस्य विशेषणंष्यं भवितुमर्हति । असति च विशेष्ये विशेषणत्वमपि न स्यात्, विशेष्यं विशिष्यते येन तद् विशेषणमिति व्युत्पत्तेः । अथ अन्यत्, तर्हि अन्यत्वाविशेषात् सर्वं सर्वस्य विशेषणं स्यात् । अतो नासावत्यन्तं भेदेऽभेदे वा सम्भवतीति भेदाभेदलक्षणः स्याद्वादोऽकामेनाप्यभ्युपगन्तव्य इति ।**--सिद्धहेम°** लघुन्यासे पृ° २-- १ ॥

इत्याकारकः शब्दप्रयोगो वा यदधीनः सा सत्ता ॥ ननु द्रव्य-गुण-कर्मभ्यः पृथग्भावेन सत्ता नानुभूयतेऽतो द्रव्याद्यन्यतमदेव सत्ता...इत्यत आह -- द्रव्य-गुण-कर्मभ्योऽर्थान्तरं सत्ता । द्रव्यादयोऽननुगताः, सत्ता चानुगता । तथा च अनुगतत्वाननुगतत्वलक्षणविरुद्धधर्माध्यासेन तेभ्यो भेदस्य सिद्धत्वात् । --वैशे० सू० उप० पृ० ४० ॥ १ । २ । ७--८ इत्याश्रितपदार्थव्याजेन द्रव्यार्थ-पर्यायार्थाश्रयणं सङ्करदोषपरिहारार्थं च सामान्यस्यान्त्यविशेषस्य च परिकल्पनेति । § 30

**वाचां भागमतीत्य वाग्विनियत**मिति, प्रज्ञापनीयेष्वेव भावेषु अनन्तासङ्ख्येयसङ्ख्येयभागगुणहानिवृद्धिभ्यां क्षयोपशमविशेषापेक्षया मतिविशेषाभ्युपगमाद्यतुर्दशपूर्वधराणामेव परस्परतः, अद्यतनपुरुषेन्द्रियशक्त्युत्कर्षापकर्षवत् । उक्तं च-- § 31

जं चोद्दसपुव्वधरा छट्ठाणगया परोप्परं होंति ।
*तेण तु अणंतभागो पण्णवणिज्जाण जं सुत्तं ॥ § 33

पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं ।
पण्णवणिज्जाणं पुण अणंतभागो सु+अणिबद्धो ॥ § 35

अक्खरलंभेण समा ऊणहिया होंति म+इविसेसेहिं ।
ते वि य म+ईविसेसे सु+अणाणब्भंतरे जाण ॥ विशेषाव० भा० ६३, ६२, ६४ § 37

**शेषशासनन्यग्भावेनैवे**त्यादि । परवादतिरस्करणेन **जेष्यत्येव तदवश्यम्**, स्तुतिद्वारेण भवता तत्सामर्थ्याङ्गीकरणात्, नूनमेतत् प्रतिपादयिष्यति

---

९ म] समिति°nayacakra-ms-ya ॥
१२ चो] च+उदस°nayacakra-ms-ya ॥
१२ प] परुप्परंnayacakra-ms-ya ॥
१३ *] तेणं अणत°nayacakra-ms-ya । तेणं तु अणंत° nayacakra-ms-bhā । तेण उ अणंत° --विशेषाव° nayacakra-ms-bhā ॥
१३ ण्ण] पन्न°nayacakra-ms-ya । एवमग्रेऽपि ॥
१४ उ] तुnayacakra-ms-bhā ॥
१५ सु] सुत°nayacakra-ms-bhā । सुय° --विशेषाव° nayacakra-ms-bhā ॥
१६ हिया] °हि+आ हुंतिnayacakra-ms-ya ॥
१६ म] म+इविसेसेणnayacakra-ms-bhā । म+इविसेसेहिं --विशेषाव° nayacakra-ms-bhā ॥
१७ य] अnayacakra-ms-ya ॥
१७ म] मती°nayacakra-ms-bhā ॥
१७ सु] सुतणाण°nayacakra-ms-bhā । सुयणाण° --विशेषाव° nayacakra-ms-bhā ॥
१८ न्य] °न्य-ग्भावेनेवेत्यादिnayacakra-ms-bhā । °न्यग्भावेन वेत्यादि nayacakra-ms-ya ॥

भवान्--न तदनुरोधेनैव कस्यचिदिति । किं तत् कस्यचित् प्रसादेन जयति ? विवदमानस्य गले पादं कृत्वा जयतीत्यभिप्रायः । **यदेवम्विध**मिति, यद् योगिनामेव सर्वथा **गम्यम्, न गम्यं क्वचिद**प्यन्येषाम्, वाचां भागमतीत्य वाग्विनियतम्, व्याप्येकस्थमनन्तमन्तवदपि, न्यस्तं धियां पाटवे, व्यामोहे
7/mj [न], जगत्प्रतानविसृतिव्यत्यासधीरास्पदं

* * *

पक्लृप्तविधि-भेदपदार्थैकवाक्यविधिविधानादशेषज्ञानावयवमवबोधसमुद्रावयवीभूतं शासनमेवम्विधमेव ।

* * *

जगत्प्रतानविसृतिव्यत्यासेन धीरमास्पदमचलं प्रतिष्ठानं च यस्य तत्र किमाश्चर्यं जयत्यूर्जितं च इति ? किं तर्हि ? **एवम्विधतैव तु प्रतिपादनीया** अन्यमतासाधारणगुणता । सैव विरोधधर्मसम्भावनाऽभावाद् दुष्प्रतिपादेत्यभिप्रायः । § 38

अत्राचार्य आह --***किमेव प्रतिपाद्यमस्ति ?** प्रतिपादितमेव तत् । यस्माद् **द्रव्यार्थपर्यायार्थे**त्यादि । द्रव्येणार्थो द्रव्यार्थः, द्रव्यमर्थोऽस्येति वा । अथवा द्रव्यार्थिकः, द्रव्यमेवार्थो यस्य सोऽयं द्रव्यार्थः, स्वार्थिकोऽयं ठन् प्रत्ययः द्रव्यार्थिकः । एवं पर्यायार्थः पर्यायार्थिको वा । अर्था**चासन्निहिते** पा॰ वार्ति॰ ५ । २ । १३५ इति वचनादर्थि-प्रत्यर्थिवदिनिरेव स्यादिति चेत्, न; असन्निधानाभावात् तदर्थस्य । अथवा अस्ति इत्यस्य मतमास्तिकः, द्रव्य आस्तिको द्रव्यास्तिकः । तयोर्द्वयोर्भावो **द्वित्वं** न, तदा**दयोऽनन्तान्ता**
- /ms **विकल्पाः**, वचनपथतुल्यसङ्ख्यापरसमयतुल्यसङ्ख्य- त्वान्नयानाम् । § 39

जाव+इया वयणपहा ताव+इ+आ चेव होंति णयवाया ।

---

१ भ] **भवान् तदनु॰ प्र॰** ॥
११ स] **॰संभावनाभावाद् दुःप्रति॰**nayacakra-ms-ya । **॰संभावाद् दुःप्रति॰** nayacakra-ms-bhā ॥
१३ अ] **अत्राचार्य आह** इति पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१३ *] **किमव**nayacakra-ms-bhā । **किमेवं** nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
१५ ठ] अत इनिठनौ**पाणिनिव्या॰** ५ । २ । ११५ ॥
१९ त] अत्र **तयोर्द्वयोर्भावो द्वित्वम्, तदादयोऽनन्ता विकल्पाः** इत्यपि पाठः स्यादिति सम्भाव्यते । यथाश्रुतं तु तयोर्द्वयोर्भावो द्वित्वमेव केवलं न; किं तर्हि ? तदादयोऽनन्तान्ता विकल्पाः इत्यर्थाभिप्रायेण सङ्गमनीयम् ॥
१९ योऽन] **॰नंतान्नाविकल्पाः**nayacakra-ms-bhānayacakra-ms-vi विना । **॰नंतात्रा विकल्पाः** nayacakra-ms-bhā nayacakra-ms-vi । अत्र **अनन्ता अत्र विकल्पाः** इत्यपि पाठः स्यादिति सम्भाव्यते, तथा सम्भावनायां च मूलमपि **॰द्वित्वाद्यनन्तविकल्पोपक्लृप्त॰** इति सम्भावनीयम् । **अनन्तान्ताः** इति पाठे तु अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि इति **हैमकोशा**नुसारेण **अन्त**शब्दस्य स्वरूपवाचित्वमवयववाचित्वं वा गृहीत्वा सङ्गमनीयम् ॥
२० तु] **॰तुल्यत्वान्नयानां**nayacakra-ms-ya ॥
२१ जाव] **॰वतिया** nayacakra-ms-bhā । एवमग्रेऽपि ॥
२१ व] **वयणपधा**nayacakra-ms-bhā ॥
२१ चेव] **हुंति**nayacakra-ms-ya ॥

जाव+इ+आ णयवाया ताव+इ+आ चेव परसमया ॥
सन्मति॰ ३ । ४७ § 41

एवंविध**विकल्पोपक्लृप्त**नयजालोपष्टम्भ**विधि-भेदपदार्थानामेकवाक्यविधिः**, तस्य **विधानादशेषज्ञानान्यवयवा** अस्य सर्वनयजनितानि । अवबोधसमुद्र एवाभेदेनावयवीभूतो यस्मिंस्त**दवबोधसमुद्रावयवीभूतं शासनं** दुरवगाहगम्भीराक्षोभ्यपदार्थरत्नाकरत्वसामान्यात्, **एवम्विधमेवे**ति, उक्तनयतरङ्गभङ्गसङ्ग्रह-प्रस्तारात्मकमविकलपदार्थावद्योतनादनेकादित्यसमूहवत् कृतप्रकाशं तमसोऽवकाशाभावात् सवितृसहस्रवद् भास्वरत्वादनभिभवनीयम् । § 42
8/mj

शेषशासनिवचनानि प्रत्यक्षानुमानविनिश्चेयपदार्थविपर्ययप्रणयनेन अश्रावणशब्दवादिवचनवदाशङ्कामपि सत्यत्वे न जनयितुमलम् । § 43

लौकिकव्यवहारोऽपि न यस्मिन्नवतिष्ठते ।
तत्र साधुत्वविज्ञानं व्यामोहोपनिबन्धनम् ॥§ 45

**तद्व्यतिरिक्ताः शासनिनः** कपिल-व्यास-कणाद-**शौ**द्धोदनि-मस्करिप्रभृतयः, तेषां **वचनानि । प्रत्यक्षानुमानविनिश्चेयपदार्था** रूपादयो घटादयोऽग्न्यादयश्च । तेषां विपर्ययेण प्रणयनं तैः कृतम् । तेन **विपर्ययप्रणयनेन** निरुक्तीकृतं विसंवादत्वम् । तत् कथम् ? प्रत्यक्षविनिश्चेयास्तावद् युगपद्भाविषु प्रतिनियतेन्द्रियविषयेषु घटाद्याधारादृते ग्रहणाभावान्न रूपादय एव, रूपाद्यन्यतमधर्मग्रहणद्वारमन्तरेण घटाद्यग्रहणात् तदभावे तदभावाच्च न द्रव्यमात्रमेव । अयुगपद्भाविष्वपि पिण्ड-शिवकादिषु मृदग्रहणे पिण्ड-शिवकाद्यग्रहणात्

१ वा] ॰वादाnayacakra-ms-bhā ॥
२ ष्ट] ॰ष्टंभविण्वभेद॰nayacakra-ms-bhā ॥
४ मुद्राव] ॰वयविभूतंnayacakra-ms-bhā । अयं nayacakra-ms-bhā प्रतिपाठोऽपि साधुरेव भाति । अत्र च पाठे अवबोधसमुद्र एवाभेदेन अवयवी भूतो यस्मिंस्तदवबोधसमुद्रावयविभूतम् इति विग्रहः कार्यः, अभूततद्भावाविवक्षायां च्विप्रत्ययायोगात् इकारस्य दीर्घत्वाभावेऽपि न क्षतिरिति ध्येयम् ॥
६ प] पदार्थावद्योतमद्योतमादनेका॰nayacakra-ms-bhā । ॰पदार्थावबोधतमद्योतनादनेका॰ nayacakra-ms-raṃ nayacakra-ms-hī । ॰पदार्थावव्योतमद्योतमादनेका॰ nayacakra-ms-bhā nayacakra-ms-raṃ nayacakra-ms-hī विना ॥
१५ निरु] निरुक्तंnayacakra-ms-bhā ॥
१६ विनिश्चेया] ॰यस्तावद् प्र॰ । ॰येषु तावत् इत्यपि पाठः स्यादत्र ॥
१७ घ] ॰घटद्योवारादृतेnayacakra-ms-bhā । घटद्योवारादने nayacakra-ms-ya ॥

मृदभावे पिण्ड-शिवकाद्यभावात् न पर्याया एव । मृदोऽपि शिवकाद्यन्यतमावस्थाविशेषावस्थानमन्तरेण अग्रहणादभावाच्च न द्रव्यमेव । एतेनाग्न्यादि- - /ms धूमादिलिङ्ग-लिङ्गिव्यवहारो व्याख्यातः कार्यानुमानविनिश्चयेऽपि न विशेषा एव, निर्मूलत्वात्, खपुष्पवत् । न सामान्यमेव, अविशेषितत्वात्, खपुष्पवत् । तस्मादेवं प्रत्यक्षानुमानविनिश्चेयपदार्थेषु सर्वलोकप्रसिद्धेषु विपर्ययप्रणयनमन्यशासनिनाम्— रूपादय एव घटः, घट एव रूपादयः, रूपादयश्च घटश्च रूपादिगुणोऽवयवीत्यर्थः, न रूपादयो न घट इति वा । **अश्रावणशब्दवादिवचनव**दिति सर्वलोकप्रसिद्धेन्द्रियप्रत्यक्षविरोधिवचनोदाहरणादनुमानविरोधाद्यप्युदाहृतमेव । **आशङ्कामपि सत्यत्वे न जनयितुमल**मिति, निःसन्दिग्धमेवासत्यत्वं तेषामित्यर्थः । § 46

अपि च --[*]**लौकिकव्यवहारो**ऽपीत्यादि यावद् **व्यामोहोपनिबन्धन**मिति । सातिशयबुद्धिभिरपि परीक्षकैर्निरतिशयलोकप्रसिद्ध्यनुवर्तिभिः परात्ममतविशेषप्रतिपत्तिनिराकरण-तत्त्वप्रतिपादने कार्ये, इतरथा साक्षिविरहितव्यवहारवदनियतार्थैव परीक्षा स्यात् । लौकिकास्तु नित्यानित्यावक्तव्याद्यनेकान्तरूपमेव घटादिकमर्थमव्युत्पन्ना अपि प्रतिपद्य व्यवहरन्तो दृश्यन्ते । तदपह्नवप्रवृत्तयश्चैकान्तवादाः नित्य एव, अनित्य एव, अवक्तव्य एव घटः इत्यादयः । **तत्र** शेषशासनेषु साध्विदं साधु त्विदम् इति विचारो व्यामोहस्यैव **निबन्धनं** हेतुरित्यर्थः, विचारानवकाशाद् विसंवादाच्च । § 47

१9/mj

लोकप्रत्यक्षादिनिश्चेयेऽपि शेषशासनविसंवदनजनितास्थं च प्रमाणद्वयसंसिद्धिसम्पादितप्रत्ययप्रतिष्ठापितात्यन्तपरोक्षार्थश्रद्धानं जिनशासनम् । § 48

१. शिबिका॰nayacakra-ms-ya । एवमग्रेऽपि ॥

२ विशेषा ] एतच्चिह्नान्तर्गतः ॰वस्थानमन्तरेण इत्यत आरभ्य न विशेषा इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
३ धूमादिलि ] ॰लिंगलिंगलिंगिव्यवहारोnayacakra-ms-bhā ॥
३ कार्यानुमा ] ॰मानविनिश्चयेपिnayacakra-ms-bhā ॥
५ स ] सर्वलोके प्र॰nayacakra-ms-bhā ॥
६ रू ] रूपादयं च घटं च प्र॰ ॥
८ णा ] ॰दनुमानुविरो॰nayacakra-ms-ya । ॰दनुविरो॰ nayacakra-ms-bhā ॥
९ ज ] जनयतितुमलnayacakra-ms-bhā ॥
११ * ] उक्तं हि --लौकिकव्यवहारोऽपि न यस्मिन्नवतिष्ठते । तत्र साधुत्वविज्ञानं व्यामोहोपनिबन्धनम् ॥ इत्येवमुद्धृता सम्पूर्णा कारिका उत्तराध्ययनसूत्रबृहद्वृत्तौ पृ॰ २-- १ प्रवचनसारोद्धारटीकायां पृ॰ २-- १ च ॥
१२ सातिश ] ॰शययुद्धिभि॰ प्र॰ ॥
१३ का ] काये प्र॰ ॥
१४ द ] ॰वदिनियतार्थैव प्र॰ ॥
१५ व्युत्प ] ॰त्पन्न अपि प्र॰ ॥
१५ व्य ] व्यवहारंतोnayacakra-ms-bhā । व्यवहारतो nayacakra-ms-ya ॥
१५ प ] ॰पह्नेव प्रवृ॰ प्र॰ ॥
१७ सा ] साध्वेदं प्र॰ ॥
१७ व्या ] व्यामोहस्येव निब॰ प्र॰ ॥

अस्य चार्थस्य पूर्वमहोदधिसमुत्पतितनयप्राभृततरङ्गागमप्रभ्रष्टश्लिष्टार्थकणिकमात्रमन्यतीर्थकरप्रज्ञापनाभ्यतीतगोचरपदार्थसाधनं नयचक्राख्यं सङ्क्षिप्तार्थं गाथासूत्रम्-- § 49

विधि-नियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवत् ।
जैनादन्यच्छासनमनृतं भवतीति वैधर्म्यम् ॥§ 51

**लोकप्रत्यक्षादिनिश्चयेऽपि**, किं पुनरतीन्द्रियार्थे ? **शेषशासनविसंवदनजनितास्थं च**, शेषशासनानां विसंवदनेन जनिता आस्था अस्मिन् **जिनशासनेऽस्माकम्** इदं वरिष्ठम् इति परपक्षदोःस्थित्यादेव स्वपक्षसिद्धिरावीतेनेति । अथवा स्वपक्षसौस्थित्यानुमानमप्यस्तीत्याह --**प्रमाणद्वयसंसिद्धी**त्यादि । लौकिकपरीक्षकाणां प्रत्यक्षानुमानप्रामाण्यं प्रत्यविसंवादात् पूर्वन्यायेन स्थितास्थितमृत्त्वपृथुबुध्नादिसंस्थानो- पादानकारणाभ्यां द्वयेन द्वयस्य वा प्रत्यक्षेणानुमानेन च तद्विनिश्चयपदार्थद्वयस्य संसिद्धिः, तया **सम्पादितः प्रत्ययः** प्रमाणं जैन्यां प्रक्रियायाम्, तत एव च **प्रतिष्ठापितमत्यन्तपरोक्षे**ऽप्यर्थे मेरूत्तरकुरुद्वीप-समुद्र-विमान-भवन-नरकप्रस्तारप्रमाणादौ **श्रद्धानं** यस्मिंस्तदिदम् ऊर्जितं जयति इति प्रत्याम्नायते, अन्यथा प्रामाण्याभावात् । यथोक्तम् --**प्रत्यक्षग्राहे च सिध्यति परोक्षग्राहः सिध्येत् । तदसिद्धौ सम्भावनाऽभाव एव, प्रत्यक्षविसंवादित्वात्, उन्मत्तवाक्यवत्** इति । § 52 - /ms

**अस्य चार्थस्ये**त्यादि यावद् **गाथासूत्रमि**त्यनेन शास्त्रारम्भ-सम्बन्ध-प्रयोजनाभिधानम् । **पूर्वमहोदधिसमुत्पतितनयप्राभृततरङ्गागमप्रभ्रष्टश्लिष्टार्थकणिकमात्रमि**ति सम्बन्धः, न स्वमनीषिकयोच्यते, प्रमाणागमपरम्परागतमेवेदमित्यर्थः । **अन्यतीर्थकरप्रज्ञापनाभ्यतीतगोचरपदार्थसाधनं** प्रयोजनम्, शिष्यानुग्रहस्यान्यथा कर्तुमशक्यत्वात् । **नयचक्राख्य**मारभ्यं शास्त्रम्, तदन्तरेण तदसिद्धेः । शिष्यस्य प्रसङ्गविप्रसृतधियो मा भूद्व्यामोह इति **सङ्क्षिप्तार्थं गाथासूत्रमिदम्** --**विधि-नियमे**त्यादि । अन्यशासनानृतत्वप्रतिपादनसाधनमिदम् । अर्थापत्त्या तु **भवतिशुद्धपदोच्चारणवद्** विधि-नियमभङ्गवृत्तियुक्तत्वाज्जैनं वचः सत्यमिति गम्यते । § 53

10/mj

---

६ क्षा ] °क्षादिनिश्चयेपि प्र° ॥
११ का ] °करणाभ्यां प्र° ॥
१२ त ] तथा सम्पा° प्र° ॥
१३ प्र ] प्रमाणंnayacakra-ms-ya ॥
१६ प ] परोक्षाग्राहः प्र° ॥
१६ ग्राहः ] सिध्यति
तदसिद्धौnayacakra-ms-ya ॥
१९ त ] °तरङ्गामगप्रभ्रष्ट° प्र° ॥
२१ प्र ]
°प्रज्ञानाभ्य°nayacakra-ms-bhā ॥

२४ नानृ ] °नृतत्वाप्रतिपा° प्र° ॥
२५ म् ] एतच्च नयचक्रवृत्तिकार एव ग्रन्थान्ते इत्थं स्पष्टीकरिष्यति--इत्येवमनेन समस्तेन ग्रन्थेनैतदभिहितम्--विधि-नियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवज्जैनादन्यच्छासनमनृतम् । जैनमेव शासनं सत्यम्, विधिनियमभङ्गवृत्त्यात्मकत्वात्, भवतिवद् घटवद्वेति --नयचक्रवृ° पृ° ५६८-- १ ॥

विधिराचारः स्थितिः... ...। नियमः... ...। तयोर्भङ्गाः--१ विधिः, २ विधिविधिः, ३ विधेर्विधि-नियमम्, ४ विधेर्नियमः, ५ विधि-नियमम्, ६ विधि-नियमस्य विधिः, ७ विधि-नियमस्य विधि-नियमम्, ८ विधिनियमस्य नियमः, ९ नियमः, १० नियमस्य विधिः, ११ नियमस्य विधिनियमम्, १२ नियमस्य नियमः । तेषां वृत्तिः स्वविषयसम्पातनेन भावना अर्थानाम् । जैनसत्यत्वसाधनवृत्ता तु वृत्ति- § 54

तद्याचक्षाणः **सूरिः** विधि-नियमशब्दावलौकिकौ इति परो मा मंस्तेति - /ms तत्पर्यायशब्दानुच्चारयति **--विधिराचार** इत्यादि । विधीयत इति विधिर्भावसाधनोऽध्याहृतकर्त्रर्थः । यो विदधाति स कर्ता द्रव्यार्थः । को विदधाति ? पिण्डशिवकादिभावान् मृद्विदधाति । तया हि मृदा शिवकादयो विधीयन्ते । लक्षणतस्तु अनपेक्षितव्यावृत्तिभेदार्थो द्रव्यार्थो **विधिः**, लोके दृष्टत्वात् । *आदानमर्यादया चार **आचार** आत्मरूपापरित्यागः पररूपानपेक्षः । एवं **स्थित्यादिषु** योज्यम् । पर्यायार्थतस्तु **नियमः**, **निराधिक्ये**, आधिक्येन यमनं नियमः परस्परप्रतिविविक्तभवनादिधर्मलक्षणः प्रतिक्षणनियतोऽवस्थाविशेषो युगपद्भाव्ययुगपद्भावी वा रूपादिः शिवकादिश्च यो यो भवति स एव स एवेति । पर्यायशब्दानां शेषाणामप्ययमर्थो यथाक्षरं योज्यः । § 55

**तयोर्भङ्गा** **विधिर्विधि[विधि]**रित्यादि । तत्र **विधिर**नपेक्षितभेदानुगतिव्यावृत्तिव्यापारो यथा गौरिति । ***विधिविधिस्तु** शुक्लादिभेदनियमवादिनं प्रत्यभेदप्रतिपादनव्यापृतः--कोऽयं शुक्लादिभेदो नाम गोत्वव्यतिरिक्तः ? इति । ***विधेर्नियमो**ऽतिप्रसक्तस्य विशेषेऽवस्थापनं विधिप्रधानस्यैव तदंशेऽवस्थापनम्, यथा गां शुक्लामानयेति । तदुभयात्मकं ***विधेर्विधि-नियमम्** । **विधि-नियमं** तु विधिश्च नियमश्च विधि-नियमम्, द्वन्द्वैकवद्भावः, तुल्यकक्षौ विधिनियमावेव सहितौ, द्व्यात्मकं सर्वमिति । शेषा यथायोगमेत-

---

१० साध] °धनो व्याहृ° प्र° ‖
१३ *] आदानं
मर्यादयाnayacakra-ms-ya ‖
१३ चा] चार
आत्मरूपा°nayacakra-ms-ya । चार
आचार आचार आत्मरूपा°
nayacakra-ms-bhā ‖
१६ द्भा] °द्भावी
रूपादिnayacakra-ms-ya ‖
१६ रूपादिः] शिवकादिं
चnayacakra-ms-bhā । शिबिकादि
च nayacakra-ms-ya ‖
१९ त]
तयोर्भगाnayacakra-ms-bhā ।
तयोर्भाग nayacakra-ms-ya ‖
२० *] एतच्चिह्नान्तर्गतो विधिविधिस्तु
इत्यत आरभ्य उभयं इत्यन्तः पाठो
nayacakra-ms-bhā प्रतौ नास्ति ‖
२१ व्या]
°व्यावृत्तnayacakra-ms-ya ‖
२२ *]
विधिर्नियमोnayacakra-ms-ya ‖
२३ *]
विधिर्विधेर्नियमंnayacakra-ms-ya ‖

द्व्याख्यानुसारेण व्याख्येया भङ्गाः । सामान्येन तु कारणं विधिः, कार्यं नियमः, उभयं विधि-नियमम्, शेषास्तद्विकल्पा एव । § 56

एवं भङ्गान् व्यवस्थाप्येदानीं वृत्तिं व्याख्यातुकाम आह --**तेषां** विधि-नियमभङ्गानां **वृत्तिरि**ति । तस्यास्तु लक्षणम् --**स्वविषयसम्पातनेन भावना अर्थानाम्,** आत्मीय आत्मीये विषये विषयेऽवतार्य यया तदर्था भाव्यन्ते । तथाहि--तथा भवन्ति नान्यथेति, नित्य एवाकृतकत्वादाकाशवत्, अनित्य एव कृतकत्वाद् घटवद् वेति । यथोक्तम् --**द्रव्यस्यानेकात्मनोऽन्यतमैकात्माव-धारणमेकदेशनयनान्नयः** इति । प्रत्यक्षानुमानाभ्यां पूर्ववत् स्थितास्थित-मृत्त्वपृथुबुध्नादिसंस्थानोपादानकारणाभ्यां वृत्ति 11/mj

* * *

र्विवक्षितद्वादशविकल्पविशेषणा, अन्यथा अवृत्तित्वमेव वक्ष्यमाणवत् । सा च विध्यादिप्रत्येकवृत्तिरूपाख्यानसमधिगम्या ।

तत्र विधिवृत्तिस्तावद् यथालोकग्राहमेव वस्तु, स्वपरविषयतायां सामान्यविशेषयोरनुपपत्तेरसंस्ततो विवेकयत्नः शास्त्रेष्विति ।

सामान्यविशेषौ हि स्वविषयौ परविषयौ वा स्याताम् । तत्र सामान्यं तावदेकस्य सर्वत्वाद् यदि स्वविषयम्, सामान्यविरोधः । यदि सामान्यम्, तत

* * *

तत्त्वमित्यत आह --**जैनसत्यत्वसाधनवृत्ता तु वृत्तिर्विवक्षितद्वादशविक-ल्पविशेषणे**ति, तत्समा- हारैकरूपतया तत्त्वान्वाख्यानमित्यर्थः, अनेक- - /ms सम्बन्धिदेवदत्तपितृपुत्रत्वादिधर्मसमाहारैकरूपवस्तुतत्त्वान्वाख्यानवत् । **अन्य-थे**त्येकान्तावधारणे प्रत्येकं स्वरूपानवधारणात् **अवृत्तित्वमेव वक्ष्यमाण-व**दिति, तदित्थमिदमेव शास्त्रं वर्त्स्यतीति परस्परव्याहतत्वात्त्वस्ववृत्तय एव ता इत्यर्थः । वृत्तितत्त्वविनिश्चिचीषायां **सा च विध्यादिप्रत्येकवृत्तिरूपाख्यानस-मधिगम्ये**ति तद्व्याख्या कार्या । किं कारणम् ? तत्समुदायकार्यत्वात् तस्याः । § 57

इममर्थं विस्तरेण व्याख्यातुकाम उद्दिशति --**तत्र विधिवृत्तिरि**त्यादि । **तत्र** एतास्वनन्तरोद्दिष्टासु विध्यादिवृत्तिषु **विधिवृत्तिस्तावद् यथालोकग्राहमेव वस्तु** । लोकस्य ग्राहः, ग्राहवद् ग्राहः, यथा जलचरो ग्राहः प्राण्यन्त-राण्यभ्यात्माकर्षति तथा लोकोऽपि स्वाभिप्रायसकाशं सर्वमाकर्षति । यो यो लोकग्राहो यथालोकग्राहम्, **ए**वेत्यवधारणाल्लोकाभिप्रायं नातिवर्तते व-स्त्वित्यर्थः । परीक्षकाभिमानिनां तु तीर्थ्यानां **स्वपरविषयतायां सामान्यविशेष-**

---

३ भ ] भंगाद्यवस्थाप्ये° प्र° ॥
४ ल ] लक्षणं विषयसम्पा°nayacakra-ms-ya ॥
५ ता ] °वताय प्र° ॥
८ क्षानुमानाभ्यां ] पूर्वावस्थिता°nayacakra-ms-ya ॥
९ का ] °करणाभ्यांnayacakra-ms-bhā ॥
१८ वृ ] °वृत्तानुवृत्ति° प्र° ॥
१९ त ] तत्त्वाद्व्याख्यान° प्र° ॥
२० स ] °संबंधेदेव प्र° ॥

**योरनुपपत्तेरसंस्ततो** लोकाभिप्रायाद् **विवेकयत्नः शास्त्रेष्विति** । **इतिशब्दो** हेत्वर्थे, यस्मादेतमर्थं प्रतिपादयिष्यामस्तस्माद् यथालोकग्राहमेव वस्तु, ततो लोकाभिप्रायाद्विवेकयत्नानर्थक्यम् । § 58

तत् कथमिति चेत्, उच्यते **--सामान्यविशेषौ हि स्वविषयौ परविषयौ वा स्याताम्**, वस्तुनः सामान्यं घटादेर्वस्तुन आत्मनि वर्तेत, परस्य वा पटादेरात्मनि घटाद्व्यतिरिच्यमाने । चतुर्ष्वप्येषु विकल्पेषु **साङ्ख्या**दीनां दोष इति मन्यमानो लौकिकः पक्षं ग्राहयति दुदूषयिषुः सोपपत्तिकम् **--तत्र** आद्यं **सामान्यं तावदेकस्य सर्वत्वाद् यदि स्वविषयम्** । सर्वमेकमेकं च

- /ms सर्वम्, कस्मात् ? कारणस्य वैश्वरूप्यात् । यथाह-- § 59

**सर्वं सर्वात्मकम् । यद्येवं कस्मात् सर्वमेकत्र नोपलभ्यते सर्वत्र चैकमिति ? उच्यते--देशकालाकारनिमित्तावबन्धात्तु न समानकालमात्माभिव्यक्तिः । ते मन्यामहे जलभूम्योरप्येतत् पारिणामिकं रसादिवैश्वरूप्यं स्थावरस्य जङ्गमतां गतस्य जङ्गमाभ्यवहृतवनस्पत्यादेर्जङ्गमशरीरपरिणामापन्नस्य, जङ्गमस्यापि स्थावरतां गतस्य स्थावराभ्यवहृतस्य तत्परिणतस्य, एवं स्थावरस्य स्थावरतां गतस्य जङ्गमस्य जङ्गमतां गतस्य । तस्मात् सर्वं सर्वात्मकम्** । § 60

12/mj

आत्मा न भवति, अनेकार्थविषयत्वात् सामान्यस्य; अथ आत्मा, ततो न सामान्यम्, एकत्वादात्मनः; सेनाहस्तिनोरिव । § 61

अथोच्येत--आत्मैव सामान्यम् । सत्त्वादिर्घटादेरात्मा, स हि तत्समुदायकार्य- § 62

तत एकस्य सर्वत्वात् सर्वस्य चैकत्वात् स्वविषयं सामान्यं घटस्यात्मनि वर्तत इति परमतं प्रदर्श्योत्तरमाह--यद्येवम्, **सामान्यविरोधः** सामान्यस्य विरोधः सामान्येन च विरोधः । § 63

तत् कथम् ? उच्यते **--यदि सामान्यम्, तत आत्मा न भवति, अनेकार्थविषयत्वात् सामान्यस्य** । कश्चिदर्थः केनचिदर्थेन कैश्चिद्धर्मैः समानो भवतीति कृत्वानेकार्थविषयं सामान्यम् । तस्मादनेकार्थविषयत्वात् सामान्यस्य वस्तुनः स्वमात्मा घटादेरेकरूपस्य न भवति, एकत्वादात्मनः, सामान्यस्य च निवृत्तेरात्मनश्च आत्माभावात् कस्य सामान्यम् ? । **अथ**

१ लोकाभिप्रा ] °प्रायोद्विवेक° प्र° ॥
७ प ] पक्ष्यंnayacakra-ms-bhā ॥
७ दु ] उदूष°nayacakra-ms-bhā ॥
८ स ] सर्वमेकं चnayacakra-ms-ya ॥
१२ र ] रसादिधैण्वरूपंnayacakra-ms-ya । रसादिधैथेरूप्यं nayacakra-ms-bhā ॥
१४ राभ्य ] °व्यवहृत° प्र° ॥
२८ सा ] सामान्यवस्तुनःnayacakra-ms-bhā ॥

मा भूदेष दोष इत्यात्मेष्यते, ततोऽपि न सामान्यम्, एकत्वादात्मनः केन सामान्यं तस्य ? इत्यात्मनः सामान्येन विरोधः, समानभावो हि सामान्यम् । सेनाहस्तिनोरिवेति, हस्त्यश्वरथपदातिसमूहः सेनेत्यनेकार्थापेक्षां दर्शयति, हस्तीति चैकार्थतां दर्शयति । § 64

अथोच्येतेति स परिहर्तुकामस्य परस्याभिप्रायमाह । स्यादेव विरोधो यदि आत्मनः सामान्यम् इति भेदेन स्वत्वमभ्युपगम्येतेति । यद्यपि व्यतिरेकार्थषष्ठीप्रापितः स्वस्वाम्यादिभेदः तथाप्यदोषः, व्यपदेशिवद्भावात् राहोः शिरः इत्याद्यव्यतिरेकषष्ठीदर्शनादिति । किं तर्हि ? ब्रूमः--इह तु आत्मैव सामान्यम् । किं तत् ? घटादेः सत्त्वादिरात्मा । यथोक्तम्-- § 65 - /ms

आध्यात्मिकाः कार्यात्मका भेदाः शब्द-स्पर्श-रस-रूप-गन्धाः पञ्च त्रयाणां सुख-दुःख-मोहानां सन्निवेशमात्रम् । कस्मात् ? पञ्चानां पञ्चानामेककार्यभावात्, सुखानां शब्द-स्पर्श-रस-रूप-गन्धानां प्रसादलाघवाभिष्वङ्गोद्धर्षप्रीतयः कार्यम्, दुःखानां शोषतापभेदोपष्टम्भोद्वेगापद्वेषाः, मूढानां वरणसदनापध्वंसनबैभत्स्यदैन्यगौरवाणीति । तथा करणात्मकाः श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणवाग्-हस्त-पाद-पायू-पस्थ-मनांस्येकादश तैर्यग्योन-मानुष-दैवानि बाह्याश्च भेदाः सत्त्वरजस्तमसां कार्यं समन्वयदर्शनात् इति । एवं पृथिव्यादि गवादि घटादि । तस्मात् सत्त्वादिर्घटादेरात्मा । स हि तत्समुदायकार्यत्वात् सामान्यम् । तस्मादात्मैव सामान्यमिति । § 66

13/mj

त्वात् सामान्यम् । एवं सति आत्मभेदः--सुखं सुखं च सुखादिसमुदयश्च, तदात्मत्वात् । एवं शेषावपि । ततश्च त्रिगुणविपरिणामकारणकल्पनावैयर्थ्यम् । § 67

---

८ व्य ] व्यतिकार्थषष्ठीप्रापितस्वस्वा॰ प्र॰ ॥
१४ ताप ]
॰भेदापष्वम्भो॰nayacakra-ms-bhā । भेदापस्तम्भो॰ nayacakra-ms-ya । अत्र ॰भेदापष्टम्भो॰ इति ॰भेदापस्तम्भो॰ इति ॰भेदावष्टम्भो॰ इति वा पाठोऽपि भवेत् । किन्तु अधुना उपलभ्यमानेषु प्रायः सर्वेष्वपि साङ्ख्यसिद्धान्तप्रतिपादकग्रन्थेषु उपष्टम्भशब्दस्य उपस्तम्भशब्दस्य वा प्रयोगदर्शनादस्माभिरपि स आदृत इति ज्ञेयम् । मुद्रितन्यायकुमुदचन्द्रस्य टिप्पण्यां तु पृ॰ ३५० उपष्टम्भशब्दस्थाने ब॰ ज॰ भां॰ श्र॰ प्रतिषु अवष्टम्भ इति पाठान्तरमपि उल्लिखितमस्तीति ध्येयम् ॥
१६ श ]
तैर्ययोन॰nayacakra-ms-bhā । तैर्ययौन॰ nayacakra-ms-ya ॥
१७ का ]
कार्यसमन्वय॰nayacakra-ms-ya ॥ कायं समन्वय॰ nayacakra-ms-bhā । अत्र कार्यम् इति पाठश्चेत् सम्भाव्यते तर्हि बाह्याश्च भेदाः सत्त्वरजस्तमसां कार्यम्, समन्वयदर्शनात् इति योजनीयम् । nayacakra-ms-ya प्रतिपाठानुसारेण तु त्रयाणां सुखदुःखमोहानां सन्निवेशमात्रम् इति पूर्वतनवाक्यमनुवर्त्य बाह्याश्च भेदाः त्रयाणां सुखदुःखमोहानां सन्निवेशमात्रम्, सत्त्वरजस्तमसां कार्यसमन्वयदर्शनात् इति योजनीयम् ॥
१८ का ] ॰कायत्वा सामा॰nayacakra-ms-bhā ॥

नित्यमेव त्र्यात्मकमिति चेत्, एकत्वनित्यत्वात् प्रकाश-प्रवृत्ति-नियमभेदाभावादनारम्भः । उभयस्य चाभावः । यथा च प्रधानावस्थायां त्रित्वैकत्वादिविरोधधर्मसम्बन्धोऽव्यतिरिक्तत्रिगुणैकरूपता चेष्यते सदा त्रिगुणैकत्वात् त्रित्वे- § 68

अत्र ब्रूमः --**एवं सत्यात्मभेदः**, समुदायैककार्यत्वात् सुखादि एकमसामान्यमितीष्टस्य सामान्यस्य भेदः । तत् कथमिति चेत्, उच्यते --**सुखं सुखश्च सुखादिसमुदयश्च** । सत्त्वं सुखम्, रजो दुःखम्, तमो मोहः । तत् त्रयमैकात्म्यापन्नमेकमेवेति सुखस्य सुखत्वं तत्समुदायत्वं च प्राप्तम् । किं कारणम् ? **तदात्मत्वात्**, यस्मात् सुखाद्यात्मकः समुदायः समुदायात्मकं च सुखम् । **एवं शेषावपी**ति दुःखमोहावतिदिशति । एवं दुःखं दुःखश्च दुःखादिसमुदायश्च, मोहो मोहश्च मोहादिसमुदयश्च । ततः को दोष इति चेत्, **ततश्च त्रिगुणविपरिणामकारणकल्पनावैयर्थ्यम्** । समुदायैककार्याणां

- /ms त्रयाणामेकत्वाभ्युपगमादेकस्तत्साम्यावस्थाविशेषः, तस्माच्चावस्थाविशेषादप्रच्युतत्वात् कुतो गुणानां वैषम्यम् ? वैषम्याभावे कुतः प्रकृतेर्महदहङ्कारतन्मात्रभूतेन्द्रियादिपूर्वोत्तरहेतुकार्यभावः ? § 69

अत्राशङ्का --**नित्यमेव त्र्यात्मकमिति चेत्**, प्रधानावस्थायामपि त्रिगुणत्वान्नित्यं सर्वकालं **त्र्यात्मकं** सत्त्वरजस्तम+आत्मकम[तो] गुणवैषम्य-विपरिणाम-कारणत्वान्युपपद्यन्ते सुखादिसमुदायात्मकत्वेऽप्यात्मभेददोषश्च नास्तीति । एतदपि वाङ्मात्रत्वादनुत्तरम्, तथापि तु सुतरां तथा, **एकत्वनित्यत्वात् प्रकाश-प्रवृत्ति-नियमभेदाभावादनारम्भः** । एकत्वस्य नित्यत्वात् एकत्वेन वा नित्यत्वात्, सदैकत्वादित्यर्थः । प्रकाश-प्रवृत्ति-नियमकार्यभेदः सत्त्वरजस्तमसां योऽभ्युपगम्यते भवद्भिराचार्य-पवन-पाषाणवत्, तद्यथा--नाटकाचार्यः स्वहस्तोत्क्षेपणादिना प्रकाशात्मना आत्मनो नर्तिकायाश्च व्यवतिष्ठते, पवनः पर्णचलनादिना स्वपरप्रवर्तनेन व्यवतिष्ठते, नौस्तम्भनपाषाणकः स्वपरनियमनेन व्यवतिष्ठते तथा सत्त्वरजस्तमांसि इत्येतन्नोपपद्यते, सर्वकाल**मेकत्वनित्यत्वात्** त्रित्वाभावः, तत**स्तदनारम्भः** प्रधानावस्थायामिव गुणानां सर्वकालं कार्यानारम्भो निर्व्यापारत्वात् । वैषम्यनिर्मूलता च, आरम्भाभावात् । **उभयस्य चाभावः** कारणस्य कार्यत्वस्य च, अथवा आत्मनः सामान्यस्य च, सुखादेः समुदायिनस्तत्समुदायस्य च प्रधानस्य । किं कारणम् ? अन्यतराव्यवस्थानेऽन्यतरस्याव्यवस्थानात् । तत् कथं भाव्यत इति चेत्, उच्यते --**यथा च प्रधानावस्थाया**मित्यादि यावत् **त्रित्वैकत्वादिव्यतिक्रमेणे**ति

---

८ मैकात्म्याप ] °पन्नमेवेतिnayacakra-ms-bhā ‖
८ प्रा ] प्राप्तं च किं प्र° ‖
१७ स ] सर्वंnayacakra-ms-bhā ‖
२४ निय ] °नियमेन व्यव°nayacakra-ms-ya ‖
२६ त्वा ] °त्वात्तित्वा°nayacakra-ms-bhā । °त्वात्तत्वा° nayacakra-ms-ya ‖
२६ त्रित्वाभा ] °भावस्तदनारम्भःnayacakra-ms-ya ‖

। **त्रित्वैकत्वादी**त्युक्तपरामर्शः, यथा त्रित्वमेकत्वं च विरुद्धौ धर्माविष्येते एवमवयवा अवयवी च, अन्यदनन्यच्च, आत्मा चानात्मा च, सर्वमसर्वं चेत्यादि - /ms, 14/mj
। **आदि**ग्रहणात् सूक्ष्मं

* * *

कत्वादिव्यतिक्रमेण, एवं शब्दादौ त्रिगुणाव्यतिरेकैकरूपत्वं विरोधधर्मसम्बन्धश्च तन्मयत्वात् । ततश्च सर्वस्यावस्थानात् कारणकार्यनियमाभावाद् यदृच्छामात्रत्वादङ्गीकृतपुरुषार्थयत्नार्थहानिः ।

सामान्यविशेषयोश्च सम्बन्धित्वादेकतराभ्युपगमेऽन्यतरस्यावश्यापेक्ष्यत्वात् सामान्याभ्युपगमे नियमपक्षापत्तिरपि ।

परविषयतायामपि असमानावस्थानादसामान्यम् । किं कारणम् ? अनवधृतैकतरकारणत्वाद् द्रव्यादीनाम् ।

* * *

स्थूलं चेत्यादि सामर्थ्यादापादनीयम् । एष दृष्टान्तः । साधर्म्यं **सदा त्रिगुणैकत्वादिति** । यथा तत्र **त्रित्वैकत्वाद्या**त्मस्वतत्त्व**व्यतिक्रमेणे**ति **विरोधधर्मसम्बन्धोऽव्यतिरिक्तत्रिगुणैकरूपता चेष्यत** इति प्रधानस्यैव दृष्टान्तस्य वर्णनम् । **एवं शब्दादा**विति दार्ष्टान्तिकोपनयः, **त्रिगुणाव्यतिरेकैकरूपत्वं विरोधधर्मसम्बन्धश्च** शब्दतन्मात्रादिषु, तत्कार्येष्वाकाशादिषु भूतेष्वेकगुणादिवृद्धेषु, तद्विकारेषु च गवादिघटादिषु च, श्रोत्रादिष्वेकादशस्विन्द्रियेषु च प्रधानधर्मा आपाद्याः । किं कारणम् ? **तन्मयत्वात्,** सत्त्वादिगुणमयं हि तत् । **ततश्च सर्वस्यावस्थानात्** प्रधानावस्थायामिव न किञ्चित् सूत्रादि पटादि वा कस्यचित् **कारणं कार्यं** वा प्रमाणं प्रमेयं वेति **नियमाभावात्** सर्वत्र यादृच्छिकी प्रवृत्तिः प्रसक्ता, यदृच्छामात्रत्वान्न प्रधानमहदहङ्कारादिकारणकार्यनैयम्यम् । ततश्च **यदृच्छामात्रत्वादङ्गीकृतपुरुषार्थयत्नार्थहानिः** । पुरुषश्चैतन्यस्वरूपः, तस्यार्थो द्विविधः--शब्दाद्युपलब्धिरादिः गुणपुरुषान्तरोपलब्धिरन्तः, तत् कृत्वा तद्विनिवर्तत इति तस्मै पुरुषार्थाय यत्नः प्रधानस्य, तस्य यत्नस्य **अर्थः** प्रयोजनम्, तस्य हानिर्यादृच्छिकत्वात् । तस्य च हानौ प्रधान-पुरुष-संयोग-त्रित्वपरिज्ञानार्थशास्त्रयत्ना[र्थ]हानिरपि । § 70

---

१ विरु] **विरुद्धौ च धर्मा**°nayacakra-ms-bhā ‖
१३ य] **यथा त्रित्वैकत्वा**°nayacakra-ms-ya ‖
१३ त] °**तत्त्वतिक्रमेणेति** प्र° ‖
१४ व] **वर्णनमेव शब्दादाविति** प्र° ‖
१७ वादिघ] °**घटादिष्वेकादश**°nayacakra-ms-bhā ‖
१९ प] **पदादि**nayacakra-ms-ya । **पदाटादि** nayacakra-ms-bhā ‖
२० का] **कारणं वा कार्यं वा**nayacakra-ms-ya ‖
२० मेयं] **चेति**nayacakra-ms-ya ‖
२३ ब्धिर] °**रतः**nayacakra-ms-ya । प्रधानस्य पुरुषार्था प्रवृत्तिः । स च पुरुषार्थो द्विविधः--शब्दाद्युपलब्धिरादिर्गुण-पुरुषान्तरोपलब्धिरन्तश्च --**साङ्ख्यका**° **माठरवृ**° पृ° ७९ ‖
२३ त] अत्र **तत् कृत्वा** इति पाठः सामान्ये नपुंसकमित्यभिप्रायेण सङ्गमनीयः, अन्यथा तं कृत्वा इति स्यात् ‖

**सामान्यविशेषयोश्च सम्बन्धित्वा**दित्यादि यावद् **नियमपक्षापत्तिरपि**। सा- - /ms मान्यं विशेष इत्येतौ परस्परसम्बन्धिनौ, आद्यन्तवत् पितापुत्रवद्वा । तत्र यदि सामान्यमभ्युपगम्यते विशेषापेक्षित्वात् सामान्यस्य विशेषोऽवश्यैष्यः, पितृत्वाभ्युपगमे पुत्रत्वाभ्युपगमवत् । विशेषाभ्युपगमे च सामान्याभ्युपगमस्त-द्वदेवेत्यतस्ते बलादेव विशेषपक्षापत्तिरपि **नियमपक्षापत्ति**रित्यर्थः । **अपिश-**ब्दात् प्रागुक्तदोषापत्तिः । एवं तावत् स्वविषयत्वे सामान्यस्य दोषा उक्ताः ।

§ 71

**परविषयतायामप्यसमानावस्थानादसामान्यम्**। अमुख्यसामान्यानां स-15/mj दृशानुप्रवृत्तिव्यावृत्ति

* * *

तत्र द्रव्यमपि भवनलक्षणं युगपदयुगपद्भेदभाविमृद्भवनपरमार्थरूपादिशिव-कादिवृत्ति व्यापि ।

* * *

लक्षणानां परेष्टानां परेष्टानां परविषयाणामसम्भवात् स्वेष्टसमानभवनलक्ष-णसामान्यसम्भवात् परकीयमसामान्यमेवेत्युपरि उपसंहरिष्यति लौकिकः, तत् सिद्धं कृत्वा तावदाह --**असमानावस्थानादसामान्य**मिति । तत् पुनर्द्र-व्यक्षेत्रकालभावविषयम्, ते हि द्रव्यादयः परे परैरिष्यमाणा घटादेर्वस्तुनः, तदपि परसत्तदपेक्षया समानमित्युच्यते नात्मानमेवेति परविषयम् । **किं** पुनः **कारणं** तदसामान्यम् ? इत्यत आह --**अनवधृतैकतरकारणत्वा**दिति, नावध्रियते द्रव्यमेव क्षेत्रमेव काल एव भाव एव वा कारणमिति । एवं तर्हि एकतमकारणत्वात् इति वाच्यम्; न चात्र डतरडतमौ प्राप्नुतः, कस्मात् ? **अन्य-किं-यत्-तदो निर्धारणे द्वयोरेकस्य डतरच्** । **वा बहूनां जातिप-रिप्रश्ने डतमच्** पा० ५ । ३ । ९१-९२ इत्यत्र एकशब्दस्यापठितत्वात् । एवं तर्ह्यातिशयिकः तरप्प्रत्ययः । समानगुणेषु हि स्पर्द्धा भवति, गुणवच-नाभावान्नेति चेत्, कारणत्वगुणतोऽतिशयो भविष्यति । एवं तर्हि तमबस्त्विति

३ स्य ] विशेषषोवस्यैष्यःnayacakra-ms-bhā । विशेषेषोत्वस्यैष्यः nayacakra-ms-ya ॥
४ ग ] °गमत्वात् प्र° ॥
१३ प ] परेष्टानां परविषया°nayacakra-ms-bhā ॥
१४ प ] परकीयसामान्य° प्र° ॥
१४ रिष्य ] °ष्यतेnayacakra-ms-ya । एतत्पाठानुसारेण तु उपसंहरिष्यते । लौकिकस्तत् सिद्धं कृत्वा तावदाह इति योजनीयम् ॥
१५ मा ] °मानादस्थानाद-सामान्य°nayacakra-ms-ya । °मानादसामान्य° nayacakra-ms-bhā ॥
१७ त्त ] अत्र नात्मानमेव इति सङ्गमयितुं तदपेक्ष्य इति पाठः स्याच्चेत् साधु ॥
१९ ना ] नावध्रियंते nayacakra-ms-bhā ॥
२१ त ] °त-दोर्निर्धाnayacakra-ms-bhānayacakra-ms-raṃnaya विना ॥
२२ इ ] इनाचैकंश°nayacakra-ms-bhā । इत्यचैकश° nayacakra-ms-ya ॥
२३ र्ह्यातिश ] °शायिकःnayacakra-ms-bhā ॥
२४ त ] तमव-स्त्विति nayacakra-ms-raṃnayacakra-ms-vi विना ॥

चेत्, द्वयोर्द्वयोः प्रकर्षविवक्षायां तरबित्यदोषः । अथवा **एकाच्च प्राचाम्** पा॰ ५ । ३ । ९४ इति जातिपरिप्रश्नेऽस्त्येव डतरजित्यदोषः । केन **अनवधृत-** - /ms **मेकतरकारणत्वं द्रव्यादीनामि**ति चेत्, उच्यते--लौकिकैर्व्यवहारनयप्रधानैः, स च आर्हतनयैकदेश एव । न पुनर्यथा शास्त्रकाराः सामान्यमेव विशेष एव द्रव्याद्यन्यतमदेव वा कारणं कार्यं वेत्यवधारयन्ति । § 72

कथं पुनर्द्रव्यादिकारणतावधार्यते न वेति ? उच्यते--द्रव्यं तावत् **तत्र द्रव्यमपि भवनलक्षणं व्यापीत्यभिसम्भन्त्स्यते** । **अपि**शब्दात् क्षेत्रमपि । सर्वतन्त्रसिद्धान्ते व्याकरणे **द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४ इत्युक्तत्वाद् भवतीति भव्यं भवनयोग्यं वा द्रव्यम् । द्रवति द्रोष्यति दुद्रावेति द्रुः, द्रोर्विकारोऽवयवो वा द्रव्यम्, **दु द्रु गतौ** पा॰ धा॰ ९४४--९४५, सदैव गत्यात्मकत्वाद् विपरिणामात्मकं हि तत् । न तु यथा **गुणसन्द्रावो द्रव्यम्** पातञ्जलम॰ ५ । १ । ११९ **क्रियावद् गुणवत् समवायिकारणमिति द्रव्य-लक्षणम्** वै॰ सू॰ १ । १ । १५ इति वा । कथं भवतीति चेत्, भिद्यते इति भेदः, भेदेन भवितुं शीला तस्या धर्मो वा साधु भवतीति [वा] भेदभाविनी मृत्, तस्या भवनं भेदभाविमृद्भवनम्, तदेव परमोऽर्थः, कोऽसौ ? रूपादयः शिवकादयश्च । ते पुनर्यथासङ्ख्यं युगपदयुगपच्च भेदभाविमृद्भवनपरमार्थरूपादिशिवकादयः, समानाधिकरणसमासः । पुनरपि ते वृत्तिरस्य तेषु वा वृत्तिरस्य तदिदं **युगपदयुगपद्भेदभाविमृद्भवनपरमार्थरूपादिशिवकादिवृत्ति** । किं तत् ? द्रव्यम् । व्याप्नोतीति **व्यापि,** 16/mj

* * *

क्षेत्रमपि सर्वगतिनिवासवृत्तिस्त्वतत्त्वमेकैकभावार्थसङ्घातसमवस्थानात्मा रूपादिग्रीवाद्येकगमनसमवस्थानव्यवस्थापितपृथिव्यादि-घटादि व्यापि विश्वस्य सद्रव्ययुगपदयुगपद्भाविरूपादिशिवकादिभावविस्पन्दितस्य ।

* * *

**न** क्वचिदपि न प्रवर्तते । यथा रूपादिशिवकादयो मृदो भवनमात्रं तथा युगपद्भूतं पृथिव्यादि परमार्थः पृथिव्यप्तेजोवाय्वाकाशादि द्रव्यभवनमात्रम् । पृथिव्याश्चाश्मलोष्टादि, तथाऽपां हिमकरकादि, तेजसोऽप्यर्चिरादिस्वभेदा - /ms इत्यादि । अयुगपद्भूतं व्रीहि-बीजा-ङ्कुर-पत्र-नाल-काण्ड-पुष्प-फल-शूक-क-

---

१ त] तरपित्य॰ प्र॰ ॥
५ का] कार्यं चेत्य॰nayacakra-ms-ya । कायं वेत्य॰ nayacakra-ms-bhā ॥
६ न] अत्र तवेति इति पाठः समीचीनः प्रतिभाति, तथा च तव पक्षे कथं पुनर्द्रव्यादिकारणतावधार्यते इति प्रष्टुराशयो भाति ॥
६ त] तत्व द्रव्यमपि प्र॰ ॥
८ द्र] द्रव्ये चnayacakra-ms-bhā । द्रव्य च nayacakra-ms-ya ॥
११ न] ननु यथाnayacakra-ms-ya ॥
१४ वितुं] शीलस्तस्या प्र॰ ॥
२५ पृथिव्या] ॰व्यादेः पर॰ प्र॰ ॥
२५ द्र] द्रव्यं भवन॰ प्र॰ ॥
२६ पृ] पृथिव्यां चाश्म॰ प्र॰ ॥
२७ ना] ॰ताल॰nayacakra-ms-ya ॥
२७ शू] ॰शृक॰ प्र॰ ॥

ण-तुषादि परमार्थ इति सर्वं द्रव्यभवनमात्रम्, एकपुरुषपितृपुत्रत्वादिव-सात्तांवत्तांस्तान् भावान् भवतीति द्रव्यम् । § 73

**क्षेत्रमपि** व्याकरणसिद्धान्तगत्यैव **क्षि निवासगत्योः** पा० धा० १४०७ इति सर्वस्य सिद्धं **सर्वगतिनिवासवृत्तिस्वतत्त्वम्** । **गतिर्व्याप्तिः** । **निवासस्त-थावस्थानम्** । सर्वभावानां प्राप्त्यवस्थानोपकारेण वर्तत इति तद्वृत्तिस्वत-त्त्वम् । प्रदेशरचनाविशेषो हि क्षेत्रम् । **एकैकभावार्थसङ्घातसमवस्थानात्मा,** एकैकस्य घटपटादेर्भावस्यार्थे पृथुबुध्नादिरूपेण संहत्य समवस्थितस्य **आत्मा** स्वरूपतत्त्वं प्रधानमित्यर्थः । किं कारणम् ? क्षेत्राभावे तदभावात् क्षेत्रानुग्र-हादेव तद्भावात् । यथासङ्ख्यं **रूपादि-ग्रीवाद्येकगमनसमवस्थानव्यवस्थापित-पृथिव्यादि-घटादि** । यथास्वप्रक्रियं **वैशेषिकादीनाम् रूप-रस-गन्ध-स्पर्शवती पृथिवी** वै० सू० २ । १ । १, शब्द-स्पर्श-रूप-रस-गन्धात्मा पृथिवी, कक्ख-टलक्षणा वेति । एवं घटोऽप्यवयवी, गुणसमुदयमात्रम्, प्रज्ञप्तिसन् वेति विकल्पनामात्रम् । लोकनयेन तु [त] एव हि रूपग्रीवाद्यवयवा रूपादयो ग्रीवादयश्चैकगतयस्तथा तथा समवस्थिताः पृथिव्यादीन् घटादींश्च व्यवस्थाप-यन्ति यत्र तत् क्षेत्रम् । किं हि तत् पृथिव्याः पृथिवीत्वं रूपाद्येकगतिसमव-स्थानादन्यत्, घटस्य वा ग्रीवाद्येकगतिसमवस्थानादन्यद् घटत्वम् ? तस्मात् सर्वगतिनिवासवृत्तिस्वतत्त्वं तत् । **व्यापि विश्वस्येत्यादि** याव***द्विस्पंदितस्य** । ***विश्वं सद्द्रव्यं** च व्याप्नोति **युगपदयुगद्भाविरूपादिशिवकादिभावविस्पंदितं** पृथिव्यबादि घटपटादि विपरिणामजातं चेत्यर्थः । § 74

17/mj

१ भ] **भवंतीति** प्र० । द्रव्यमिति भव्यमाह । द्रव्यं च भव्ये । भव्यमिति प्राप्यमाह । भू प्राप्तावात्मनेपदी पा० धा० १८४५ । तदेवं प्राप्यन्ते प्राप्नुवन्ति वा द्रव्याणि--इति **तत्त्वार्थभाष्ये** १ । १ । ५ । **१८४५ भू** प्राप्तावात्मनेपदी भावयते भवते । णिचूसन्नियोगेनैव आत्मनेपदमित्येके । भवति । --nayacakra-ms-pā **सिद्धान्तकौमुदी** ॥

९ प्र] **०प्रक्रियां** प्र० ॥

१० क] **करकट०** प्र० । **क्ख** इत्यक्षरं **रक** इत्येवमालिख्यते स्म प्राचीनलिप्यामिति ध्येयम् । निष्ठुरः कक्खटः क्रूरः पुरुषः कर्कशः खरः ॥ दृढः कठोरः कठिनो जरठः... ... ...।--इति **अभिधानचिन्तामणौ** ६ । २२--२३ । कतमश्च महाराज ! आध्यात्मिकः पृथिवीधातुः ? यत् किञ्चिदस्मिन् कायेऽध्यात्मं कक्खटत्वं खरगतमुपात्तम् । तत् पुनः कतमत् ? तद्यथा--केशा रोमाणि नखा दन्ता इत्यादि । अयमुच्यते आध्यात्मिकः पृथिवीधातुः । कतमश्च महाराज ! बाह्यः पृथिवीधातुः ? यत् किञ्चिद् बाह्यं कक्खटत्वं खरगतमनुपात्तमयमुच्यते बाह्यः पृथिवीधातुः--इति **शिक्षासमुच्चये** पृ० २४५ ॥

११ प्ति स] **०सत्वेति** प्र० ॥

१२ न] **०नये तु त एव** इत्यपि पाठः स्यादत्र ॥

१३ घ] **पटादीं** चnayacakra-ms-bhā ॥

१६ व्यापि] **विण्वस्ये०**nayacakra-ms-ya ॥

१६ *] **०द्विस्यंदि०**nayacakra-ms-bhā ॥

१७ *] **विण्वं**nayacakra-ms-ya ॥

१८ पृथिव्] **०व्यपादि०** प्र० ॥

कालोऽपि युगपदयुगपत्कालस्वतत्त्वभूतपदार्थनिरूपितवृत्तिः--अनेकप्रभेदोपवर्ण्यास्तिकायपृथिव्यादियुगपद्वृत्तिः, आदान-धारण-पाचन-निसर्जनसलिलनिर्वर्त्यव्रीहिकणौदनादिनिर्वृत्तिवृत्तिषु अयुगपद्वृत्तिः । § 75

द्रव्याद्यपि तु रूपादिशिवकादियुगपदयुगपद्भाविभावाः, उक्तवदेव तथा § 76

**कालोऽपीत्यादि** । कालोऽपि परविषयं सामान्यम् । परिणामवती क्रियैव कालः, कलनं कालः, कलासमूहो वा । यथा--मासमास्ते गोदोहमास्त इति । वर्तनं भवनमिति तत्पर्यायो वर्तनालक्षणो वा द्रव्यात्मा । स च **युगपदयुगपत्कालस्वतत्त्वभूतपदार्थनिरूपितवृत्तिः**, पूर्वोक्तरूपादिशिवकादिपरिणतिवद् वक्ष्यमाणास्तिकायसलिलनिर्वर्त्यपृथिवी व्रीहिकणौदनादिवद्वा । तद्यथा--युगपद्वृत्तिस्तावद**नेकप्रभेदोपवर्ण्ये**त्यादि यावद् **युगपद्वृत्तिः** । **साङ्ख्या**दिप्रक्रियोपवर्ण्यास्त एव हि धर्माधर्माकाशपुद्गलजीवा**स्तिकायाः** सप्रभेदाः, अथवा **पृथिव्यादय** एव **अस्तिकायाः** विद्यमानकायाः, ते यत्र युगपद्वर्तन्ते स तद्युगपद्वृत्तिः कालः । यत्र च **आदान-धारणे**त्यादि याव**न्निर्वृत्तिवृत्तिष्वयुगपद्वृत्ति**रिति । यथोक्तम्— - /ms

आदानीयास्त्रयो मासास्त्रयो मासास्तु धारणाः ।
पाचनीयास्त्रयो मासास्त्रयो मासा विसर्जनाः ॥ § 79

इति । इप्रदान्याः पूर्व उत्तरः पूर्वोत्तरश्च वायवः, शेषाः शोषकाः । अत्रापि प्रतिप्रक्रियमादित्यसन्तापापीतसलिलधारण-पाचन-[नि]सर्जनवत्, धूम-ज्योतिः-सलिल-मरुत्सङ्घातमेघादान-धारण-पाचन[नि]सर्जनवत्, विस्रसापरिणतपुद्गलविकाराभ्रत्वादिवद्वा, पुद्गलाविनाभावाद् देववैक्रियादेरपि आदानाद् धारणम्, धारणात् **पाचनम्**, पाचना**न्निसर्जनम्** । निसृष्टस्य स-

---

६ क ] **कालनं कालः कालसमूहो वा** प्र° ॥

९ रिण ] **°णतवद्**nayacakra-ms-ya ॥

९ पृथिवी ] **°व्रीहिनरौदनादिवद्वा** इति सर्वास्वपि प्रतिषु पाठ उपलभ्यते, किन्त्वत्र **नर**शब्दस्यासङ्गतत्वाद् युगपदयुगपत्कालस्वतत्त्वभूतपदार्थनिरूपणप्रस्तावे युगपद्भाविनां पृथिव्याद्यस्तिकायानामयुगपद्भाविनां च व्रीहि-कणौ-दनादीनां विवक्षितत्वाच्च **°व्रीहिकणौदनादिवद्वा** इति पाठः सम्भावितोऽस्माभिः । अथवा निसृष्टस्य सलिलस्य कार्याणि भूमिद्रवीभाववनस्पत्योषधि**प्ररोह**पुष्पफलप्राणिशरीराप्यायनादीनि इत्यनन्तरं वक्ष्यमाणत्वात् तदनुसारेण **°व्रीहिप्ररोहणादिवद्वा** इत्यपि पाठोऽत्र स्यादिति ध्येयम् ॥

१० व ] **°वर्णेत्यादि** प्र° ॥

१६ मासा ] **धिसर्जनाः**nayacakra-ms-ya ॥

१७ इ ] **इदात्याः**nayacakra-ms-ya । एतदनुसारेण **इहान्त्याः** इत्यपि पाठः सम्भवेदत्र । अस्मिंस्तु पाठे **इह** आदानीयादिषु चतुर्षु **अन्त्या** विसर्जनाः पूर्व उत्तरः पूर्वोत्तरश्च वायवः इत्यर्थसङ्गतिर्द्रष्टव्या । अत्र **इहाऽऽप्याः** इत्यपि पाठश्चिन्त्यः ॥

१७ पूर्वोत्त ] **°त्तरं च** प्र° ॥

लिलस्य कार्याणि भूमिद्रवीभाववनस्पत्योषधिप्ररोहपुष्पफलप्राणिशरीराप्यायनादीनि । ततोऽपि कार्यान्तराण्याहारबलवपुःस्थामादीनि घटपटादिनिर्वृत्तयश्चेत्यादि । **निर्वृत्तयः** कार्याणि, तासां निर्वृत्तीनां **वृत्तिष्वयुगपद्वृत्तिः** काल एव, तदुपष्टम्भजन्यत्वात् तेषां भावानामिति । § 80

इदानीं भाव उच्यते । स तु पूर्वोक्तेषु द्रव्यादिषु भवनं भाव इत्युक्तत्वादुक्त एव । तद्दर्शयन्नाह --**द्रव्याद्यपि त्वि**त्यादि । **गुणपर्यायवद् द्रव्यम्** तत्त्वार्थसू° ५ । ३७ इत्युक्तम् । गुणा **रूपादयः**, **शिवकादयः** पर्यायाः, ते **युगपदयुगपद्भाविनः**, त एव **भावाः** । क्षेत्रकालौ च द्रव्यमेव, भवनसामान्याद्भाव एव वा । तस्मान्न तानि द्रव्यादीनि युगपदयुगपद्भाविभाव-
18/mj व्युदासेन भवितुमर्हन्ति

* * *

भवनात् तेषाम्, अन्यथा द्रव्यादीनां वन्ध्यापुत्रवदभावत्वापत्तेः । भावोऽपि सर्ववस्तुतत्त्वव्यापी ।

अत एतानि घटादिवस्त्वात्मसामान्यपक्षग्राहिणाप्यवश्यापेक्ष्याणि, प्रत्यक्षत एव तथात्मत्वात्; किमु परविषयमुख्यसामान्यपक्षवादिना ? प्रत्यक्षत एव तथा तथा परविषयस्य समानस्य भवनात्, परेण समानेन भूयते ।

* * *

कथञ्चिदपीति **उक्तवदेव** इत्यतिदिशति । **तथाभवनात् तेषामि**ति तदेव भवनं हेतुत्वेन व्यापारयति । **अन्यथे**ति भवनसामर्थ्याभावे **द्रव्यादीनां वन्ध्यापुत्रवदभावत्वापत्तेः**, न सन्ति द्रव्यादीनि भवनशून्यत्वाद् वन्ध्यापुत्रवत् । पञ्चमीनिर्देशात् तद्वैधर्म्येण भवनहेतुत्वमावीतेनाह । नेष्यते च द्रव्यादीनामभावत्वम्, भावत्वमेवैषाम् । भावश्च भवनसम्बन्धी घटवत् । अतो द्रव्यादीनि भवनसम्बन्धीनि । भवनं द्रव्यादीन् व्याप्नोतीत्यत आह --**भावोऽपि सर्ववस्तुतत्त्वव्यापीति** । § 81

**अत एतानी**त्यादि यावद**पेक्ष्याणी**ति । एतस्मात् प्रतिपादितोपपत्तिबलाद् द्रव्यादीनि भावपर्यन्तानि भवनप्रधानान्यप्रत्याख्येयानि तस्माद् **घटादिवस्त्वात्मसामान्यपक्षग्राहिणापि** स्वविषयसामान्यवादिनेत्यर्थः । **अपि**शब्दात् स्वग्राहरक्तमनसापि सता त्वया **अवश्यापेक्ष्याणि** सारं सारमेषितव्यानीत्य-

२३ पुःस्था] °स्थावादीनि प्र° ‖
२३ टादिनिर्वृत्त] °त्तयण्चेत्यादिnayacakra-ms-bhā । °त्तय एवेत्यादि nayacakra-ms-ya ‖
३ इ] इत्युक्तत्वात् क्त एव प्र° ‖
६ का] °कालौ द्रव्यमेवnayacakra-ms-ya ‖
१५ थाभ] °भावनात्तेषां°nayacakra-ms-bhā । °भावना तेषा° nayacakra-ms-ya ‖
१६ व] वंध्यादिपुत्र°nayacakra-ms-ya ‖
१८ हेतु] हेतुमावीतेनाहnayacakra-ms-ya ‖
१९ भा] भावं च प्र° ‖
२२ ए] एवानीत्यादि प्र° ‖
२३ प्र] °प्राधान्यप्रत्या°nayacakra-ms-ya ‖
२४ श] °शब्दाश्च ग्राह° प्र° ‖
२५ श्या] श्यापेक्षाणि प्र° ‖
२५ सा] मारसषितव्यानी°nayacakra-ms-bhā । मारमषितव्यानी° nayacakra-ms-ya ‖

र्थः । किं कारणम् ? **प्रत्यक्षत एव तथात्मत्वात्** । दृश्यते एव हि द्रव्याद्येकरूपभवनसामान्यतोक्तविधिना । **किमु परविषयमुख्यसामान्यपक्षवादिनेति,** द्रव्यादीनां परस्परभिन्नानां समानभवनान्मुख्यं सामान्यम्, *लोकश्चैवंविधसामान्यवादी, व्यवहारनयानुयायित्वात् । न तु यथा - /ms
साङ्ख्यादिषु सादृश्यान्यापोहतत्त्वादि प्रमाणविरुद्धम् । तच्चोपचरितं भवितुमर्हति न मुख्यम्, सादृश्यानुवृत्तीनां लोके समानेन भूयते इति सामान्यलक्षणस्यादृष्टत्वाद् दृष्टत्वाच्चास्मदिष्टस्य लौकिकस्य सामान्यस्येत्यत आह— **प्रत्यक्षत एव तथा तथा परविषयस्य समानस्य भवनात्,** तेन तेन प्रकारेण द्रव्यक्षेत्रकालभावापेक्षयुगपदयुगपद्भाविभावस्य रूपादिशिवकादिरूपस्य समानस्य भवनात् । सर्वतन्त्रसिद्धान्तेन व्याकरणेन लोकानुवृत्तिना निरुक्तिं तत्त्वानुवादिनीमप्याह **--परेण समानेन भूयत** इति, समानो भवतीत्यर्थः । समानभावः सामान्यम्, यद् भवन्ति सर्वभावाः स तेषां भाव इति स्वार्थिको भावप्रत्ययः । स्वभावसम्बन्धार्था चात्र कर्तृलक्षणा षष्ठी तस्य भावः इति । यथा--शिलापुत्रकस्य शरीरम् इति । § 82

19/mj

तथा च सर्वस्यास्य जगतो द्रव्याद्यपेक्षया तथा तथा विशेषणैकता, तद्भेदत्वसम्बन्धत्वाभ्याम्, विकचसुरभिशरन्नीलोत्पलवत् । तत्रान्यस्य कस्यचिदपोह्यस्य सदृशस्य तत्तत्त्वस्य वा समानस्याभावात् सामान्यानुपपत्तिः । उदितदोषानुबद्धा एकसर्वत्वात् स्वसामान्यापत्तिर्वा । § 83

एवं सामान्यं व्याख्यायेदानीं तदर्थोपसंहारेणानुमानमाह **--तथा चे**त्यादि यावद् **विशेषणैकता** । **तथा चे**ति एवं च कृत्वा प्रतिपादितपरस्परभेदत्वे परस्परसम्बन्धैक्यापत्तौ च **सर्वस्यास्य जगतो द्रव्यदेशकालभावापेक्षया** तेन तेन प्रकारेण **विशेषणैकता** । द्रव्यं क्षेत्रेण कालेन भावेन च विशिष्यते,

---

२६ प्र] **प्रत्यक्ष एव** प्र॰ ॥
२ *] **लोकंविवंविध॰** प्र॰ ॥
२ न] **ननु यथा** प्र॰ ॥
३ सा] **सांख्यादीषूसादृ॰**nayacakra-ms-bhā । एतदनुसारेण **सांख्यादीष्टसादृ॰** इत्यपि पाठोऽत्र स्यात्, यतः दृष्टत्वाचाऽ**स्मदिष्टस्य** लौकिकस्य सामान्यस्य इति वक्ष्यतेऽनन्तरमेव ॥
३ प्र] **प्रमाणावि॰**nayacakra-ms-bhā ॥
३ त] **तच्चोपवनितं** प्र॰ ॥
६ प्र] **प्रत्यक्ष एव** प्र॰ ॥
७ रू] **रूपाशिवकादि** प्र॰ । अत्र **रूपशिवकादि॰** इत्यपि पाठः सम्भवेत् ॥
८ निरु] **निरुक्तित-त्वादिवादिनाप्याह**nayacakra-ms-ya ॥
१८ त] **तदर्थोप्रसारेणा॰**nayacakra-ms-ya ॥
१९ स्प] **॰स्परभेदात्त परस्पर॰**nayacakra-ms-bhā । **॰स्परभेदंते परस्पर॰** nayacakra-ms-ya ॥
२१ भा] **भावेन विशि॰**nayacakra-ms-ya ॥

द्रव्येण क्षेत्रमितरौ च, एवं तैस्तत् परस्परतश्च तानि । यथाङ्गुलिर्वक्रप्रगुण-तादययुगपद्भाविभावै रूपादियुगपद्भाविभावैः देशेन तंद्रतद्द्रव्यान्तरैश्च विशिष्यते अङ्गुलिर्वक्रा ऋज्वी प्रदेशेऽस्मिन्नाकाशस्य वर्तते प्रदेशिनी अधुना इत्यादि तथैकैकमपि वस्तु घटपटादि न केनचिन्नाभिसम्बध्यते तथा तथा *विशिष्य-ते च **तद्भेदत्वसम्बन्धत्वाभ्याम्** । प्रयोगश्चात्र--द्रव्यादिविशेषणसम्बन्धी घटः, - /ms वस्तुभेदत्वे सति तत्सम्बन्धत्वात्, **विकचसुरभिशरन्नीलोत्पलवत्** । **विकच**-मुकुलितादि क्षेत्रविशेषणम्, **सुरभिनील**तादि सहक्रमभाविरूपादिभाव-विशेषणम्, **शर**दिति कालविशेषणम् । **उत्पल**मिति द्रव्यम्, तदपि तेषां विशेषणमेव व्यवच्छेदकत्वात् । § 84

एवमनेकत्वसामान्यमापाद्य प्राक् प्रतिज्ञातं **परविषयतायामप्यसमानाव-स्थानादसामान्यं** परेषामिति तद्दर्शयति **--तत्रान्यस्य कस्यचिदपोह्यस्य स-दृशस्य तत्त्वस्य वा समानस्याभावात् सामान्यानुपपत्तिः** । एवमापादितप-रस्परविशिष्टैकत्वजगतो घटैकत्वमात्रत्वेऽर्थान्तराभावात् कुतोऽर्थान्तरापोहल-क्षणं विद्वन्मन्याद्यतनबौद्धपरिक्लृप्तं सामान्यम् ? कुतो वा समानं दृश्यत इति सदृशम्, सदृशभावः सादृश्यमिति सादृश्यलक्षणं सामान्यम्, सदृशस्य तस्याभावात् ? कुतो वा तत्त्वम् ? तस्य भावस्तत्त्वम्, तत्त्वमस्य तत्त्व-म्, तत्तु भिन्ने भवति समानानेकार्थानुवृत्तिलक्षणं सत्त्वद्रव्यत्वगुणत्वकर्मत्वादि । § 85

स्यान्मतम्--परस्परविशिष्टैकत्वादेव तत्समुदयः परविषयसामान्यमिति । एतच्चायुक्तमित्यत आह— **उदितदोषानुबद्धैकसर्वत्वात् स्वसामान्यापत्तिर्वा** । यदुक्तं प्राक् **स तत्समुदायकार्यत्वात् सामान्यम्** इत्यत्र एवं **सत्यात्मभेदः-** 20/mj **-सुखं सुखं च सुखादिसमुदयश्च, तदात्मत्वात्** । एवं **शेषावपि**

---

२२ एवं] तैभूत् पर॰nayacakra-ms-ya ॥
१ द्भाविभावैः] अत्र **देशेन द्रव्यान्तरैश्च** इत्यपि पाठः सम्भाव्यते ॥
३ न] केनचिंताभि॰nayacakra-ms-bhā ॥
३ *] विशेष्यतेnayacakra-ms-ya ॥
४ च] चातद्भेद॰nayacakra-ms-bhā ॥
४ द्र] द्रव्यादिविशेषेणnayacakra-ms-ya ॥
६ भि] ॰मीलनादिnayacakra-ms-ya ॥
७ श] **शरदिति कालविशेषणम्** इति पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
९ प्र] प्रीतिज्ञानंnayacakra-ms-bhā । प्रतिज्ञान nayacakra-ms-ya ॥
९ प] परविषयिता॰ प्र॰ । दृश्यतां पृ॰ १४ पं॰ ६ ॥
११ स] सामानस्यnayacakra-ms-bhā ॥
१३ प] परिक्लिप्तं nayacakra-ms-bhā । परिक्षिप्तं nayacakra-ms-ya ॥
१४ स] सदृशस्यातस्यnayacakra-ms-bhā । अस्मिंस्तु nayacakra-ms-bhā पाठे न सः असः इति नञ्तत्पुरुषं कृत्वा षष्ठ्यन्तं रूपं ज्ञेयम् **अतस्य** इति, तद्भिन्नस्येत्यर्थः । तथा च सदृशस्यान्यस्याभावात् इति nayacakra-ms-bhā पाठानुसारेणार्थः प्रतीयते ॥
२० स] दृश्यतां पृ॰ १२ पं॰ ३ ॥
२० कार्य] ॰कायत्वसामान्यम्nayacakra-ms-ya । कायत्वमासान्यम् nayacakra-ms-bhā ॥

* * *

सङ्घातावस्थानभेदाद्वा घटपटवदत्यन्तभेद एव सर्वार्थानाम् । तथाहि--परमाण्वादीनां घटो भवति, घटस्य वा कपालानि । अनवस्थाने वा नित्यप्रवृत्तत्वात् सर्वार्थानां समयमपि तथा समवस्थानं नास्ति यथा समानता निरूप्येत ।

अथान्तरेण रूपप्राप्तिमुक्तिप्रत्ययाभ्यां दण्डिवद् व्यक्तिभिन्नार्थसिद्धि-

* * *

इत्यादि यावत् **सामान्यविशेषयोश्च तत्सम्बन्धित्वादेकतराभ्युपगमे नियमपक्षापत्तिरपि** इति । **स्वविषयसामान्यापत्तिर्वेति वाशब्दो** विकल्पार्थः स्वसामान्यपक्षाभिहितसर्वपूर्वोत्तरपक्षविकल्पप्रदर्शनार्थः, द्रव्यं द्रव्यं च द्र- - /ms व्यादिसमुदयश्च इत्यादि विकल्पजातं सर्वमिहापि संभवतो योज्यम् । § 86

तथा **सङ्घातावस्थानभेदाद्वा घटपटवदत्यन्तभेद एव सर्वार्थानाम्** । यदि सङ्ग्रहनयदर्शनेन *सर्वमेकम्, अथ ऋजुसूत्रनयदर्शनेन सर्वं भिन्नम्, तथापि सङ्घातेनावस्थितानां घटपटवदत्यन्तं परस्परतो भेद एव, नैकत्वं सर्वार्थानाम् । ननूक्तम्--सङ्ग्रहनयदर्शनेनैकमिति, सत्यमुक्तम्, तत्तु सङ्घातेनावस्थितानां नोपपद्यते दृष्टविरुद्धत्वादित्यभिप्रायः । ततः किमिति चेत्, **तथाहि**--एवं च कृत्वा, किं ? **परमाण्वादीनां घटो भवति घटस्य वा कपालानि,** पिता पुत्रः कः सम्बन्ध इत्यर्थः । **घटस्य वा कपालानी**ति तद्विनाशजन्यत्वस्याप्यसम्बन्धं दर्शयति । **आदिग्रहणाद्** द्व्यणुकत्र्यणुकादीनां ग्रीवादीनां चान्यत्र सङ्घातसमवस्थानभेदात् समवस्थानकृत एव तेषां सम्बन्धः, तथा च समानं भवन्ति ते । § 87

स्यान्मतम्--एवं व्याख्यातुस्तवैव मतेन परस्परविलक्षणानामर्थानां भेदादेवानवस्थानं प्राप्तम्, द्रव्यादिभेदभिन्नानामन्योन्यनिरपेक्षाणां सङ्घातसमवस्थानाभावादिति । अत्रोच्यते **--अनवस्थाने वा नित्यप्रवृत्तत्वात् सर्वार्थानां समयमपि तथा समवस्थानं नास्ति यथा समानता निरूप्येत,** परस्परनिरपेक्षोत्पादविनाशत्वादित्यर्थः । § 88

एवं सर्वैकभिन्नपक्षयोः सामान्याभाव उक्तः । पक्षान्तरेऽपि वक्तुकामः ग्राहयति **--अथान्तरेण रूपप्राप्ति**मित्यादि यावत् **सिद्धिरिष्यत** इति । अन्तरेणैकरूपप्राप्तिं भेदरूपप्राप्तिं वा **उक्तिप्रत्ययाभ्यां दण्डिवदि**ति, नागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते, विशेषप्रत्ययानामनाकस्मिकत्वाच्च दण्डनिमित्तदण्डिप्रत्ययाभिधानवत्, दण्डोऽस्यास्तीति दण्डी इत्यत्र हि दण्डसंयोगनिमित्तौ देवदत्ते दण्ड्युक्तिप्रत्ययौ यथा दृष्टावेवं द्र- - /ms

---

७ सा ] दृश्यतां पृ° १४ पं° ४ ॥
१० मिहा ] °हापि तंभवतो प्र° ॥
१२ * ] एतच्चिह्नान्तर्गतः **सर्वमेकम्** इत्यत आरभ्य **सर्वार्थानाम् । न°** इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१९ भ ] भवति तेnayacakra-ms-bhā ॥
२३ स्था ] °स्थानभावादिति प्र° ॥
२६ सा ] सामान्यभाव प्र° ॥
२८ उक्तिप्र ] °प्रत्यया दण्डिवदितिnayacakra-ms-ya ॥

व्यक्त्वघटत्वादिसामान्यविशेषसमवायनिमित्तौ द्रव्यघटाद्युक्तिप्रत्ययौ स्याताम्, नान्यथा । **व्यक्तिभिन्नार्थसिद्धिरिष्यत** इति, उक्तिप्रत्ययाभ्यां द्रव्यघटादिव्यक्तितो भिन्नस्य द्रव्यत्वघटत्वादेरर्थस्य सिद्धिरिष्यते । एवं गुणकर्मणोश्च सङ्ख्योत्क्षेपणादिव्यक्तिभिन्नतत्तत्त्वार्थसिद्धिरेषितव्या, भिन्नेष्वर्थेष्वभिन्नोक्तिप्रत्ययदर्शनादिति । § 89

21/mj

रिष्यते । न, अन्यतोऽपि तयोः सिद्धेः । तौ हि कस्मिंश्चिदेव आकारादिमात्रे, सामयिकत्वाच्छब्दादर्थे प्रत्ययस्य वृद्धव्यवहारादाकारादिमात्रे प्रतिपत्तेः । तथाहि-- § 90

अत्रोच्यते--त**न्न, अन्यतोऽपि तयोः सिद्धेः । अपि**शब्दान्नियमाभावेन लोकसिद्धं नामादिकमप्युक्तिप्रत्ययकारणमाह । कयोः सिद्धिः ? उक्तिप्रत्यययोः । तन्नियमाभावं दर्शयति --**तौ हि कस्मिंश्चिदेवाकारमात्रे । आदि**ग्रहणान्नाममात्रे । आकरणमाकारः, बुद्ध्या यो यथा परिगृह्यतेऽर्थः नाम्ना वा निर्दिश्यते स एव तस्याकारः । स च तावन्मात्रो न ततोऽधिकः, यथा--आकाशं डित्थ इति वा, स वान्यथा वान्यथा वा, आकाशादिषु विनानुवृत्त्या आकाशकालदिशां त्वन्मतेऽप्येकत्वात् कुतो भिन्नेष्वभिन्नाभिधानप्रत्ययौ ? कुतो वाकाशादितत्त्वानीति ? दृश्येते चात्राप्युक्तिप्रत्ययौ । तस्मान्नास्ति सामान्यम् । घटत्वादिसामान्योपचारात्तेष्वभिधानप्रत्ययाविति चेत्, न, मुख्यसामान्यासिद्धेः साधर्म्याभावाच्चोपचाराभावात् तत्त्वपरीक्षायामुपचारस्यावकाशाभावाद् मिथ्याभिधानप्रत्ययत्वप्रसङ्गादाकाशादिष्विति । § 91

किञ्चान्यत् --**सामयिकत्वाच्छब्दादर्थे प्रत्ययस्य** । समयाय प्रभवति समयः प्रयोजनमस्य समयभवो वा सामयिकः । यथोक्तम् --**सामयिकः शब्दादर्थे प्रत्ययः** वै॰ सू॰ ७ । २ । २० इति, न सामान्यनिमित्त इति । तौ चाभिधानप्रत्ययौ लोकवृद्धव्यवहारात्मकौ वृद्धव्यवहारं दृष्ट्वा बालानामभिधानप्रत्ययौ भवतोऽशिक्षितविचित्रशास्त्रव्यवहाराणामपि अन्वयव्यतिरेकात्मकाद्वृद्धव्यवहारादेव । न तत्त्वानुवृत्ति- व्यावृत्तिकृतौ, लोकस्य तत्तत्त्वाद्यज्ञानात् । न तत्तत्त्वात्, तत्तत्त्वाज्ञानात्तेषाम् । § 92

- /ms

---

३ क] °कर्मग-वाश्च nayacakra-ms-bhā nayacakra-ms-raṃ nayacakra-ms-hī । °कर्मगवाश्च nayacakra-ms-bhā nayacakra-ms-raṃ nayacakra-ms-hī विना ॥
९ त] नत्त अन्यतो° nayacakra-ms-ya । नित्त अन्यतो° nayacakra-ms-bhā ॥
१० ना] नामादिमप्युक्ति° प्र° ॥
११ देवा] °वाह्वारमात्रे nayacakra-ms-bhā ॥
१४ ना] वान्यथा वाकाशादिषु nayacakra-ms-ya ॥
१६ दृ] दृश्यते प्र° ॥
२० त्वाच्छ] °च्छब्दार्थे nayacakra-ms-ya ॥
२४ भ] भवतो शिक्षित° nayacakra-ms-ya । भवतो शिक्षित nayacakra-ms-bhā ॥

स्यान्मतम् **--संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम्, प्रत्यक्षपूर्वकत्वात् संज्ञाकर्मणः** वै॰ सू॰ २ । १ ।१८-१९ इत्युक्तं शास्त्रे । तस्माद् **मन्वाद**-योऽन्तरालप्रलय-महाप्रलयेषु व्युच्छिन्नव्यवहाराणामपि शब्दार्थानां सम्बन्धं पश्यन्ति । तस्माद् घट-घटत्वसमवायसम्बन्धोऽपि सामयिकः अस्यायं वाचकः इति यथा अयं पनसः इति समयं ग्राह्यते बाल इति । एतच्चायुक्तम्, अनवस्थाप्रसङ्गात्--येन शब्देन समयः क्रियते तस्यान्येन कार्य इत्यनुषक्तः, उत्तरस्यार्थाप्रतीतौ अस्य समयो न प्रकल्पते । तत्समयानपेक्षा स्वाभाविकी यस्यार्थे वृत्तिः स नित्य इति च शब्दार्थसम्बन्धपरिज्ञानप्रयोगव्यवहारपरम्पराया अव्यवच्छेदादुक्तम् । यथाह **पतञ्जलिः--न हि तदेव नित्यं यत् तद्ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि । किं तर्हि ? तदपि हि नित्यं यस्मिंस्तत्त्वं न विहन्यते । तद्भावस्तत्त्वम् । आकृतौ चापि तत्त्वं न विहन्यते** पातञ्जलम॰ १ । १ पस्पशा॰ इति । समयप्रत्याख्यानवत् प्रतिपादनप्रत्याख्यानातिदेशो **वृद्धव्यवहारादाकारादिमात्रे प्रतिपत्तेरित्यदोषाय,** न शब्दादेव इति वक्ष्यमाणत्वात् । § 93

22/mj

अन्तरेण तत्त्वमारब्धद्रव्याभावेऽपि छिद्रबुध्नघटादौ घटाभिधानप्रत्ययौ दृष्टौ । आभामात्रेऽपि तु तौ तत्र तत्त्वोपनिलयनात् कृताविति चेत्, स्थाणु-मृगतृष्णिकयोर्नर-सलिलत्वप्रसङ्गः, तत्र तदभिधानप्रत्ययसद्भावात् । नरत्वसलिलत्वानुपनिपाते नरसलिलोक्तिप्रत्ययौ मा भूताम् । अनुपचरितकिञ्चिद्भूताकारात्तु किञ्चिदुक्तिप्रत्ययौ स्याताम् । § 94

तथा विशेषोऽपि । यदि स्वविषयः, विशेषविरोधः । यदि विशेषस्तत आत्मा § 95

तत्त्वसम्बन्धादृतेऽप्यभिधानप्रत्यययोः प्रवृत्तिं दर्शयंश्चाह **--तथा ह्यन्तरेणेत्यादि** । **तत्त्वं** हि द्रव्ये समवैति । द्रव्यश्च द्विधा--अद्रव्यमनेकद्रव्यश्च । अद्रव्ये त्वाकाशादौ तत्त्वाभावेऽप्युक्तिप्रत्ययावुक्तौ । अनेकद्रव्यमारब्धद्रव्यम्,

---

२ म] मान्वादयोन्तरालप्रत्ययमहा॰ प्र॰ ॥
४ घ] घटपटत्वसम॰ प्र॰ ॥
७ उ] उत्तरास्यार्थाप्रतीतौ ऽस्य समयोnayacakra-ms-bhā । उत्तरास्यार्थाप्रतीतौ स्वसमयो nayacakra-ms-ya ॥
७ प्र] प्रकल्प्यते nayacakra-ms-bhānayacakra-ms-ram विना ॥
९ त] तद्ध्वं प्र॰ ॥
१० विका] ॰विकायनुत्पत्त्यवृद्ध्यद्वययोगि प्र॰ ॥
१३ वृ] वृद्ध्यव्यव॰ प्र॰ ॥
२४ त] तत्वं हि द्रव्यसमवैतिnayacakra-ms-bhā । तत्वं च द्रव्ये समवैति nayacakra-ms-ya ॥
[illegible] भावे ऽप्युक्तिप्रत्ययाबुद्धौ । अनेक॰ प्र॰ ॥

तच्च समवाय्यसमवायिकारणैरारभ्यते । समवायिकारणं घटस्य कपालानि, - /ms असमवायिकारणं तत्संयोगाः । आङ् इति च विध्युपायमर्यादोपसङ्ग्रहार्थः । को विधिः ? स्वतः स्वात्मनि च, क उपायः ? संयोगादिनिमित्तान्तर-सहितानि, का मर्यादा ? आ अन्त्यावयविद्रव्यात् द्रव्याणि द्रव्यान्तरमार-भन्ते । विनाशोऽपि कारणविभागात् कारणविनाशाद्वा । **तत्रच्छिद्रबुध्ने घटे** कारणविभागादुत्पन्ने संयोगाभावा**दारब्धद्रव्याभावेऽपि घटाभिधानप्रत्ययौ दृ-ष्टौ,** तथा कुड्यलिखिते समवाय्यसमवायिकारणाभावे शिशूनां च क्रीडनके लोष्टपाषाणादौ सद्भावासद्भावस्थापनाकृते । भवेदेतत् **--आभामात्रेऽपि तु** आकारमात्रे संस्थानमात्रे सादृश्यमात्र इत्यर्थः, **तौ** चोक्तिप्रत्ययौ **तत्र त-त्त्वस्य घटत्वस्योपनिलयनात् कृतमिकृताविति चेत्,** तत्र तत्त्वाभाव उक्तः, सत्यपि च तत्त्वेऽस्मदिष्टाकारमात्रोक्तिप्रत्ययौ चोक्तौ, अथाप्याभामात्रे त-त्त्वोपनिलयनमिष्यते त्वया ततः **स्थाणु-मृगतृष्णिकयोर्नर-सलिलत्वप्रसङ्गः, तत्र तदभिधानप्रत्ययसद्भावात्** तत्तत्त्वोपनिलयनाच्च, घटत्वोपनिलयनाद् घटवत् । **अनुपनिपाते नरत्वस्य** स्थाणौ **सलिलत्वस्य** मृगतृष्णिकायां **नरसलिलोक्तिप्र-त्ययौ मा भूताम्,** तौ च दृष्टौ, कथमगृहीतविशेषणत्वान्नरत्वसलिलत्वानुप-निपाते नायुक्तौ ? तत्रोपचारलभ्यौ हि तौ, इह तु लोकनये विनोपचारेण लभ्यौ । कथमिति चेत्, **अनुपचरितकिञ्चिद्भूताकारात्तु किञ्चिदुक्तिप्रत्ययौ स्यातां** भवितुमर्हतः, आकारस्यासम्पूर्णस्य दृष्टत्वादेव । भवत्पक्षे पुनर्न हि तत्त्वं किञ्चिन्निलीनं *किञ्चिन्न निलीनमित्यस्ति । § 96

- /ms एवं तावत् सामान्यं विकल्पद्वये विचारितम्, विशेषोऽधुना विचार्यः । तत आह **--तथा विशेषोऽपीति** । सोऽपि द्वयीं कल्पनां नातिवर्तते--स्व-विषयः परविषयो वेति । तत्र **यदि स्वविषयः, विशेषविरोधः** । विशेषस्य 23/mj विरोधो विशेषाभावापत्तेः, विशेषेण विरोध आत्माभावापत्तेः । किं वाङ्गा

* * *

न भवति, अन्यत्वाद् विशेषस्य गुणतः कालतो वा; अन्यथा घटादौ सामान्यापत्तेः । अथ आत्मा, ततो विशेषो न भवति, एकत्वादात्मनः

---

२ इ] इत च विध्युपायमर्यादायसंग्रहार्थः प्र° ॥
३ क] क इति पाठः प्रतिषु नास्ति ॥
५ च्छिद्र] °द्रचुन्ने प्र° ॥
६ विभागा] °भागा उत्पन्ने प्र° ॥
७ च] क्रीडन-केलाबुपाषाणादौnayacakra-ms-ya ॥
८ भ] भवेदेतदातामात्रे°nayacakra-ms-ya । भवेदेतामात्रे nayacakra-ms-bhā ॥
११ मा] °मात्राऽक्तिप्र°nayacakra-ms-bhā । °मात्र उक्तिप्र इत्यपि स्यादत्र पाठः ॥
११ अथाप्याभा] °भासमात्रेnayacakra-ms-ya ॥
१३ य] °यनात्व घट°nayacakra-ms-bhā ॥
१६ निपा] °पातनेनायुक्तौnayacakra-ms-ya ॥
१६ ल] लभ्यौ इ तौnayacakra-ms-bhā ॥
१७ किञ्चिद्भूताका] °कारातु प्र° ॥
१९ *] किंचिन्निलीनमित्य-स्तिnayacakra-ms-ya ॥

।

अथोच्येत--नैकत्वान्यत्वविरोधदोषौ, आत्मैव विशेषः इत्यनपादानादिप्रतिज्ञानात् । यद्यात्मापेक्ष एव विशेषः एक एवान्य इत्यात्मनोऽन्यथाभवनादनात्मत्वं रूपादिरूपेण घटरूपादिपूर्वोत्तराणामभावत्वम् । तथा चोभयाभावः ।

* * *

त्रेण ? नेत्युच्यते, **यदि विशेषस्तत आत्मा न भवति, अन्यत्वाद्विशेषस्य ।** *विशेषेण विरोधस्तावद् **यदि** घटादावात्मनि **विशेषो** वर्तते स्वविषयः **तत आत्मा न, अन्यत्वाद्विशेषस्य** रूपादेर्देशतः परस्परतो विशिष्यमाणस्येति तद्दर्शयति --**गुणत** इति । **कालतो वा** प्रतिक्षणान्यान्योत्पत्त्या विनंष्टृषु रूपादिषु कस्तदात्मा ? इत्यात्माभावः । तदभावे कस्य विशेषः ? **अन्यथा घटादौ सामान्यापत्तेः । अन्यथेति** रूपादीनां समुदायैक्यापत्त्यभ्युपगमे विशेषपक्षत्यागः सामान्यपरिग्रहश्चापद्यते, तत्र चोक्ता दोषाः **सुखं सुखं च सुखादिसमुदयश्च** इत्यादयः, त एवात्र रूपं रूपं [च] रूपादिसमुदयश्च इत्यादयः । मा भूदात्माभावदोषः तस्मिंश्चात्माभावे विशेषाभावदोष इति पक्षान्तरं गृह्णीयात् --**अथात्मा** सविशेषः, आत्मा एक एव स एवानन्य इति । **ततो विशेषो न भवति, एकत्वादात्मनः**, घटादेर्वस्तुन एकत्वादात्मनस्तत्त्वादित्यर्थः, अन्यो हि विशेषः । § 97

एतद्दोषपरिहारार्थ**मथोच्येत** परेण --**नैकत्वान्यत्वविरोधदोषौ** । आत्मनो विशेषः इति सम्बन्धापादानयोः षष्ठीपञ्चमीनिर्देशे भेदेन आत्मनि विशेषः इत्यधिकरणसप्तम्या निर्देशे वा स्यातामेतौ दोषौ । किं तर्हि ? **आत्मैव विशेषः इत्यनपादानादिप्रतिज्ञानान्नै**कत्वान्यत्वविरोधदोषौ ममेति । अत्रोच्यते - /ms
--**यद्यात्मापेक्ष एव विशेष** इति तत्प्रत्युच्चारणम्, द्वितीयविकल्प आयातो विशेषस्य विरोध इति । अत्राप्ययं दोषः --**एक एवान्य इत्यात्मनोऽन्यथाभवनादनात्मत्वं रूपादिरूपेण** । किं वाङ्मात्रेण ? नेत्युपपत्तिमाह --**अन्यथाभवनादि**ति । तन्निदर्शयति --**घटरूपादिपूर्वोत्तराणामभावत्वम्** । तत् कथम् ? अन्येऽन्ये रूपादय एव भवन्तीति घटाभावः, तदभावे कस्य विशेषः ? घट

---

८ *] विशेषेण विरोधस्तावद् यदि घटादावात्मनि विशेषेण विरोधस्तावद् यदि घटादावात्मनि इति सर्वासु प्रतिषु द्विर्भूतः पाठः ॥
९ आ] आत्मनोन्यत्वाद्वि°nayacakra-ms-ya । आत्मानोऽन्यत्वाद्वि° nayacakra-ms-bhā ॥
१० णा] °णान्यान्योत्पत्य nayacakra-ms-ya । °णानान्योत्पत्त्य nayacakra-ms-bhā ॥
१० त्या] विनंष्टृपुरुषादिषु कस्तदात्मा प्र° ॥
१२ मुदायैक्याप] °पत्त्याऽभ्युप°nayacakra-ms-bhā । °पत्याऽभ्युप° nayacakra-ms-ya ॥
१३ रिग्र] °ग्रहं चाप° प्र° ॥
१३ सु] पृ° १३ पं° १ ॥
२१ म्या] निर्देश वा प्र° ॥
२७ अ] अन्योन्यरूपा°nayacakra-ms-ya । अन्ये रूपा° nayacakra-ms-bhā ॥
२७ स्य] विशेषाःnayacakra-ms-bhā ॥

एव वान्यथा भवतीति रूपाद्यभावः । ततश्चोत्तरेषां शिवकादीनां पिण्डावस्थातः पूर्वेषां च मृत्त्वादीनामभावः । अथवा घटतोऽन्यत् पटत्वम्, रूपतोऽन्यच्छब्दादित्वम्, तेन प्रकारेण **अन्यथाभवनाद्** घटाभावो रूपाद्यभावश्च । **तथा चोभयाभावः**, आत्माभावो विशेषाभावश्च अथवा रूपाद्यभावप्रापितो घटात्माभावो घटात्माभावप्रापितो रूपाद्यभाव इति । § 98

१24/mj

एतदनिष्टतायां तु परापेक्षपक्षापत्तिः । तथापि द्रव्यभेदः । का हि वृत्तिसाहायकादृते सिद्धवृत्तेर्घटस्य पटाद्यपेक्षा ? तथात्मैवास्य भिद्येत । अथ वा पार्थिवत्वादपेक्षा, समानजातित्वादपेक्ष्यते घटेन पटः; विजातीयात् तर्हि विशेषाभाव उदकादेः । द्रव्यत्वापेक्षा तत्रापीति चेत्, विजातीयाभ्यां गुणकर्मभ्यामविशेषः । तत्रापि सत्तापेक्षेति चेत्, विजातीयात् तर्ह्यत्यन्तासतो जातेरिवाजातेः कार्याद्वा कथम् ? इति भावाभावयोरविशेषः । तथापि चोभयाभावः । § 99

**एतदनिष्टतायां तु परापे[क्षप]क्षापत्ति**रिति । घटादेरात्मनोऽन्यथाभवनादनात्मत्वं ततश्च विशेषस्यात्मनश्चाभावः इत्युक्तविरोधदोषानभ्युपगमे **परापेक्षपक्षः** परविषयो विशेषो न स्वविषयः इत्यापन्नः । स किन्नामको दोष इति चेत्, स्वपक्षपरित्यागनामकः । उपचर्य च एवमभ्युपगम्यमानेऽप्ययमपरो दोषः --**तथापि द्रव्यभेदः**, द्रव्यस्य घटादेरात्मनः स्वरूपपररूपाभ्यां द्विधात्मावस्थानं प्रसक्तं परापेक्षत्वाद्विशेषस्य । स्यान्मतम्--पटाद्यवृत्त्यात्मक एव घटः पटाद्यपेक्षत इति । तन्नेत्युच्यते --**का हि वृत्तिसाहायकादृते सिद्धवृत्तेर्घ[टस्य प]टाद्यपेक्षा** । सहाय[भावः साहाय]कम्, वृत्तेः साहायकं वृत्तिसाहायकम्, घटवृत्तेः सहायभावं पटस्य मुक्त्वा स्वत एव सिद्धवृत्तेः
- /ms
पूर्वमेव घटस्य कान्या उत्तरकाला पटाद्यपेक्षा ? नास्त्येवेत्यर्थः । किं

१. °भवनात्मत्वं nayacakra-ms-ya ॥

१ ए] एवान्यथाnayacakra-ms-bhā ॥
१ भ] भवंतीति प्र° ॥
३ टाभा] °भावौ रूपाद्यभावं च प्र° ॥
४ भाव] °प्राप्तितोnayacakra-ms-ya ॥
१४ ता] °तायां मु परापेक्षोपपत्तिरितिnayacakra-ms-ya ॥
१५ नात्म] °त्मत्वं नतंच विशेष°nayacakra-ms-bhā ॥
°त्मकत्वं नतंच विशेष° nayacakra-ms-ya ॥
१७ उ] उपचयं चnayacakra-ms-bhā ॥
२१ सा] सहायकं प्र° । योपधाद् गुरूपोत्तमाद् वुञ् ५--१--१३२ इति पाणिनिसूत्रेण साहायकम् इत्येव साधु ॥
२२ वृत्तिसा] °वृत्तिसहा°nayacakra-ms-ya ॥

कारणम् ? प्रयोजनाभावात् । **तथात्मैवास्य भिद्येत,** तेन प्रकारेण **तथा** घटस्वरूपमेव भिद्येत, सहायापेक्षवृत्तित्वात्, शिबिकोद्वाहात्मवृत्तिवत् । § 100

**अथ वा पार्थिवत्वादपेक्षा,** अस्ति घटस्य पटाद्यपेक्षेत्याह । का सा ? समाना जातिः । **समानजातित्वादपेक्ष्यते घटेन पटः** । का समानजातिः ? पार्थिवत्वम् । विशेषः कथमिति चेत्, घटात्मत्वाद्विशेषः पटादेरिति । अत्रोच्यते --**विजातीयात् तर्हि विशेषाभाव उदकादेः** । यदि समानजात्यपेक्षया विशेष इष्यते एवं तर्ह्यसमानजातीयादुदकादेर्घटस्य विशेषाभावः प्राप्नोति । अनिष्टं चैतत् । **द्रव्यत्वापेक्षा तत्रापीति चेत्,** द्रव्यत्वसामान्यापेक्षया घटस्य उदकादेर्विशेषो भविष्यतीति चेत् । **विजातीयाभ्यां गुणकर्मभ्यामविशेषः,** न हि विजातीययोर्गुणकर्मणोर्द्रव्यत्वापेक्षास्ति, ताभ्यामपि च घटस्य विशेष इष्यते । **तत्रापि सत्तापेक्षेति चेत्, विजातीयात् तर्हि अत्यन्तासतः** अविशेषः इति वर्तते । एवमपि खरविषाणादेरत्यन्तासतो विशेषाभावः स्यात्, अपेक्ष्याभावात् । किमिव ? **जातेरिव अजातेः** । पार्थिवत्वजातेश्च भवत्सिद्धान्तेन अपगतजातेर्जात्यन्तरापेक्षा नास्ति, तस्याः कथं जात्यन्तरादुदकादेर्वा व्यक्त्यन्तराद् विशेषो भवति, अपेक्षाभावात् ? **कार्याद्वा कथं** विशेषः इति वर्तते । कार्यं हि भवत्सिद्धान्ते प्रागविद्यमानं समवाय्यसमवायिकारणसान्निध्ये पश्चादुत्पद्यते, क्रियागुणव्यपदेशाभावादसत् कार्यम् इति सिद्धान्ताभ्युपगमात्, कारणावस्थायां कारणानां कार्यस्यासत्त्वादेव अपेक्षा नास्तीति * - /ms 25/mj

* * *

पार्थिवत्वादितुल्यत्वाच्च तद्वत् तदात्मत्वं, तत्तत्त्वेन अपेक्ष्यत्वादिति विवेक-

* * *

विशेषाभावः प्राप्तः । निष्पन्ने चोपरतव्यापारावस्थायां सिद्धत्वात् कार्यस्य कारणानां कारणत्वाभावात् कार्यकारणविशेषाभावः । **इतिशब्दो** हेतूपसंहारार्थः, इत्युक्तहेतुपारम्पर्याद् **भावाभावयोरविशेषः,** यथा पूर्वोक्तविधिना सतोऽसदपेक्षाऽभावाद् विशेषाभावः, एवमसतोऽपि सदपेक्षाऽभावादविशेषः । असतो वा कापेक्षा ? एवमनयोरविशिष्टत्वात् सत्त्वमेव वा अभावस्य भाववत्, असत्त्वमेव वा भावस्य अभाववत् । **तथापि चोभयाभावः,** भावाभावयोरभावः सामान्यविशेषयोरात्मविशेषयोर्वा घटादेरिति । § 101

---

८ द्र] द्रव्यत्वं सामा° प्र° ॥
११ त] तत्रापि त्तापेक्षेति प्र° ॥
११ अ] अत्यंतासतासतःnayacakra-ms-ya । अत्यंतासतासतासतः nayacakra-ms-bhā ॥
१४ त] तस्या कथंnayacakra-ms-bhā । तस्यां कथं nayacakra-ms-raṃ nayacakra-ms-hī विना nayacakra-ms-ya । तस्यात्कथं nayacakra-ms-raṃ nayacakra-ms-hī ॥
१५ अ] अपेक्ष्याभा-वात्nayacakra-ms-raṃnayacakra-ms-hī ॥
१८ *] पंचात्पद्यते प्र° ॥
२४ स] सतोदसदपेक्षा° प्र° ॥
२५ स] तदपेक्षा°nayacakra-ms-ya ॥
२६ स] सत्वमेवावभावस्य प्र° । सत्त्वमेवाभावस्य इत्यपि पाठः सम्भवेदत्र ॥

एवं तावद् घटादेः पार्थिवत्वाद्यपेक्षा न युक्ता । अभ्युपेत्यापि तदपेक्षां **पार्थिवत्वादितुल्यत्वाच्च तद्वत् तदात्मत्वम्** । कार्यस्य घटस्य कारणेन मृदा सह **पार्थिवत्वेन** धर्मेण **तुल्यत्वात् तद्वद्**दिति घटस्य घटभवनात्मत्ववत् **त-दात्मत्वं** मृत्त्वं, पार्थिवत्वात्मघटत्ववद्वा । किं कारणम् ? **तत्तत्त्वेनापेक्ष्यत्वात्** । तस्य भावः तत्त्वम्, भवनं भावः, तस्य तत्त्वं तत्तत्त्वम्, **तत्तत्त्वेनापेक्ष्यत्वात्,** घटभवनवदपेक्ष्यते हि पार्थिवत्वम्, तस्मात् प्राप्तं **तदात्मत्वं** घटत्वं पार्थिवत्वस्य घटात्मवद् घटत्वेनापेक्ष्यत्वात् । **इति**शब्दो **हे**त्वर्थे, अतस्तदात्मत्वादपेक्ष्यमाण-स्य **विवेकयत्नार्थहानिः** विशेषार्थापेक्षाप्रतिपादनयत्नहानिः । **अविशेष** इति, एवं च **कृ**त्वा स एव अविशेषः । **आदि**ग्रहणात् द्रव्यत्वादितुल्यत्वात् सत्त्वतुल्य-त्वादित्येवमेवाविशेष आपाद्यः । § 102

स्यान्मतम्--अयं विशेष एव न भवति, आपेक्षिकत्वात् सामान्यविशेषाणां द्रव्यत्वादीनामौपचारिकत्वाच्च । **द्रव्यत्वं गुणत्वं [कर्मत्वं] च सामान्यानि विशे-षाश्च** वै° सू° १ । २ । ५ इत्युक्तानि, किं पुनर्गोत्वघटत्वादीनीति ? कस्तर्हि विशेषो मुख्यः ? अन्त्य एव । सामान्यमपि मुख्यं भाव एवेत्यभिप्रायः । यस्मादणुष्वेकाकाशदेशातीतप्राप्तेषु अन्यत्वज्ञानाभिधानप्रभावविभावितोऽन्त्यो विशेषः, न हि आकस्मिकावन्योक्तिप्रत्ययौ, तस्मादस्त्यसौ । स एव च विशेषो मुख्यः । यथोक्तम् --**अन्यत्रान्त्येभ्यो विशेषेभ्यः** वै° सू° १ । २ । ६ इति । तथा भाव [एव] च मुख्यसामान्यम्, **सदिति यतो द्रव्यगुणकर्मसु द्रव्यगुणकर्मभ्योऽर्थान्तरं सा सत्ता** वै° सू° १ । २ । ७--८ इति वचनात् । द्रव्यत्वादीनामौपचारिकत्वात्तद् द्व्यात्मतयोपपादितमिति । § 103

- /ms

26/mj

---

२ त्वा ] °त्वाच्चा तद्वत्nayacakra-ms-bhā ॥
३ घ ] घटभावनात्सत्ववत् प्र° ॥
४ त्त्वेना ] °नापेक्षत्वात् प्र° ॥
६ व ] °वदनपेक्ष्यते हिnayacakra-ms-bhā । °वदनपेक्ष्यत्वे हि nayacakra-ms-ya ॥
६ घ ] घटत्वंnayacakra-ms-bhā प्रतौ नास्ति ॥
७ दा ] °दात्मतादपे प्र° ॥
९ स ] सत्यतुल्य°nayacakra-ms-ya ॥
१५ णुष्वेकाका ] °काशवेशाती°nayacakra-ms-ya । °काशवेत्साती° nayacakra-ms-bhā । आकृतिः संस्थानम् । परिमण्डलसंस्थानाः सर्व एव परमाणव इति तुल्याकृतित्वं पार्थिवाणूनां पार्थिवाणुभिः सर्वैः समानगुणत्वम् । अणुमनसोश्चाद्यं कर्म वै° सू° ५-२-१३ इत्यदृष्टकारितक्रियावत्त्वं सर्वेषां समानमिति । आधारोऽप्येकदेशः । तस्मादाकाशदेशात् कश्चित् परमाणुरतिक्रान्तः, कश्चित्र तत्समकालमेव तत्र आयातः । तत्र अयमन्यः पूर्वस्मात् इति अन्यप्रत्ययो निर्निमित्तः परमर्षेरपि न भवति । दृष्टश्च अन्यप्रत्ययः । तस्य अन्यप्रत्ययस्य यो हेतुः सोऽन्त्यविशेषस्तस्मात् परमाणुद्रव्यादन्य इत्येवं नैगमनयस्य बुद्धिः--इति **विशेषावश्यकभाष्यस्य कोट्टार्यवादिगणिमहत्तर**विरचितायां **वृत्तौ** पृ° १५५-२ ॥
१८ स ] दृश्यतां पृ° ६ टि° १ ॥
२० चारिक ] °कत्वात्तद्व्यात्मतयो° प्र° ॥

यन्नार्थहानिः, अविशेषः । अन्त्येऽपि तद्द्रव्यादिप्रभेदगतिग्राह्यत्वात्, अन्यथा योगिनामज्ञानप्रसङ्गात् । § 104

अत्रोच्यते --**अन्त्येऽपि तद्द्रव्यादिप्रभेदगतिग्राह्यत्वात्** । अन्ते भवोऽन्त्यः, अन्त्येऽपि तस्मिन् विशेषे विशेषाभाव इति **अपि**शब्दात् सम्बन्धः । को हेतुः ? **तद्द्रव्यादिप्रभेदगतिग्राह्यत्वात्** । द्रव्यमादिर्येषां त एते द्रव्यादयः द्रव्यक्षेत्रकालभावाः, तेषां प्रभेदः तत्प्रभेदः, तत्प्रभेदेन **गतिः** परिणामो वृत्तिर्विकल्पः, यथा अस्य कार्यस्येयं गतिः इति दृष्टत्वात् । तया गत्या ग्राह्यत्वम्, कस्य ? अन्त्यविशेषस्य । तस्मात् तद्द्रव्यादिप्रभेदगतिग्राह्यत्वाद् नान्त्यविशेषः कल्प्यः, द्रव्याडिव्यतिरेकेण प्रत्यक्षानुमानाभ्यामग्राह्यत्वात् तत्स्वरूपेणैव ग्राह्यत्वाच्च । तद्यथा--योगी प्रत्यक्षेणैकं परमाणुं पश्यन् द्व्यणुकत्वात् प्रच्युतं पश्यति अन्यं त्र्यणुकत्वात् प्रच्युतमन्यं द्व्यणुकसमवेतमन्यं त्र्यणुकसमवेतं च, द्रव्यतः स्वत एव च भिन्नानि तानि परमाण्वादिद्रव्याणि पश्यति, तत्र किमन्त्यविशेषेण ? एवं क्षेत्रतो प्यूर्धभागस्थितमेकमपरमर्वाग्भागस्थितम् । कालतोऽपि कश्चित् - /ms प्रथमे समये स्थितम्, अन्यं द्वितीये स्थितमागतं वा । युगपदागतस्थितयोरपि द्रव्यक्षेत्रभावकृतं नानात्वमस्त्येव । भावतः कश्चित् कृष्णं शुक्लं कश्चित् सुरभिमसुरभिं तिक्तं कटुकं वेत्यादि, अथवा कृष्णमन्यं कृष्णतरं कृष्णतमं द्विगुणत्रिगुणसङ्ख्येयासङ्ख्येयानन्तगुणकृष्णादिं वा । एवं शेषवर्णैर्गन्धरसस्पर्शैश्च सप्रभेदैर्दर्शनं वाच्यम् । **अन्यथेति** परस्परविशिष्टद्रव्यादिविशेषाभावे विष-

---

३ त] nayacakra-ms-līṃ विनान्यत्र --तत्तद्रव्यादि° nayacakra-ms-ya । तद्रव्यादि nayacakra-ms-bhā ॥ ३ अ] **अन्त्ये भवो** प्र° । अन्तेषु भवा अन्त्याः प्रशस्त° भा° पृ° १६८ इति **प्रशस्तपादभाष्या**नुसारिण्येव **अन्त्य**शब्दव्याख्या प्रायः सर्वत्रापि बहुमता स्वीकृता च । **शङ्करमिश्रस्तु वैशेषिकसूत्रोपस्कारे** मतद्वयमत्रोपन्यस्यति--अन्तेऽवसाने भवन्तीत्यन्त्याः, यतो न **व्यावर्तकान्तरमस्तीत्याचार्याः** । उत्पादविनाशयोरन्ते अवसाने भवन्तीत्यन्त्या नित्यद्रव्याणि । तेषु भवन्तीत्यन्त्या विशेषा इति **वृत्तिकृतः** --**वै° सू° उप°** १ । २ । ६ ॥ ४ त] **तस्मिं विशेषाताव इति**nayacakra-ms-bhā ॥ ७ य] **यथास्य कायस्येयं**nayacakra-ms-bhā । **यथा कायस्येयं** nayacakra-ms-ya । अत्र **कायस्य** शरीरस्य इत्यर्थाभिरुचौ तु यथाश्रुतो nayacakra-ms-bha प्रतिपाठः साधुरेवेति ध्येयम् ॥

११ प्र] **प्रच्युताशनं द्व्यणुक°**nayacakra-ms-ya । **प्रच्युद्युताशनां द्व्यणुक°** nayacakra-ms-bhā । अत्र **प्रच्युतात्मानं द्व्यणुक°** इति पाठोऽपि सम्भवेत् ॥ ११ त्र्य] **त्र्यगुणसम°**nayacakra-ms-bhā ॥ १३ एवं] **क्षेत्रतोपूर्वभागस्थितमेकपरमवाभाग°**nayacakra-ms-bhā । **क्षेत्रतोपूर्वभागस्थितमेकपरमर्वाग्भाग°** nayacakra-ms-ya । **ऊर्ध्व**शब्दसमानार्थक एव **ऊर्ध**शब्दोऽपि शब्दकोषेष्वस्ति । अत्र च **नयचक्रवृत्तौ** प्रायः सर्वत्रापि **ऊर्ध्व**शब्दस्थाने **ऊर्ध**शब्द एव दृश्यत इति ध्येयम् । **अवाग्भाग** अधोभाग इत्यर्थः ॥ १३ क] **किंचित्** प्र° ॥ १४ दा] **°दागतयोरपि**nayacakra-ms-ya ॥ १५ क] **किंचित्**nayacakra-ms-ya ॥ १७ कृ] **कृष्णादि वा** प्र° ॥

यनिरपेक्षत्वाद् **योगिनामज्ञानप्रसङ्गात्** । अवश्यं द्रव्यादयो विषयाः स्वत एव विशिष्टा एषितव्याः । न चेत्, योगिनो मिथ्याज्ञानप्रसङ्गः, अन्यथास्थितस्यार्थस्य अन्यथादर्शनात् । अन्त्यविशेषाणां च परस्परविशेषोक्तिप्रत्ययप्रवृत्तौ निमित्तान्तरं कल्प्यम् । स्वत एव विशिष्टत्वेऽन्त्यविशेषस्य कल्पना वा त्याज्या, परमाणूनामपि तद्वद् विशेषो निमित्तनिरपेक्षः किं नेष्यते ? विशेषेष्वपि निमित्तान्तराणि चेत्, अनवस्थाप्रसङ्गः, ततश्च विशेषोक्तिप्रत्ययानुपपत्तिरेवेत्यलं प्रसङ्गेन । स्थितम्--न स्वविषयो विशेष इति । § 105

परविषयविशेषपरीक्षावसरः, तत आह --**परविषयतायां तु विशेषस्यानवस्थानादविशेषः** । ननु प्रागप्युक्तम् --**परापेक्षपक्षापत्तिर्वा** इति, सत्यम्,
27/mj तत्र उपात्तपरित्यागादहृदयत्वापादनद्वारेण प्रसङ्गतोऽन्येऽपि

* * *

परविषयतायां तु विशेषस्यानवस्थानादविशेषः । इह द्रव्यादिप्रत्यपेक्षया सर्वस्यास्य सम्बद्धत्वादेकैकस्य निरवशेषमिदं जगद् विशेषणं स्यात्, एकघटसंहतनानावस्थगुणवत् । तत्र सर्वार्थानां नित्यप्रवृत्तत्वात् समयमपि नास्ति तेषां समवस्थानं यदाश्रयो विशेषार्थोऽवस्थाप्येत, आत्तवत् ।

* * *

दोषा उक्ताः, इह तु प्राधान्येनैव अन्येन च प्रकारेण दोषाभिधानं प्रक्रियते । **अनवस्थानादविशेष** इति साधयिष्यमाणमनवस्थानं सिद्धं कृत्वाह । यथा च प्राक् **असमानावस्थानादसामान्यम्** इति प्रक्रम्य सामान्याभावः प्रतिपादितस्तथेहापि तद्विपर्ययेण तदेव प्रकरणं योज्यम् -- **किं कारणम् ? अनवधृतैकतरकार्यत्वा**दित्यादि सर्वं तादृगेव यावत् **तत**
- /ms **एतानि घटादिवस्त्वात्मविशेषपक्षग्राहिणाप्यवश्यापेक्ष्याणि, प्रत्यक्षत एव तथा तथा परेण विशिष्टत्वादात्मनः; किमु परविषयमुख्यविशेषवादिना ? प्रत्यक्षत एव तथा तथा परविषयस्य विशेषस्य भवनात् परेण विशिष्टेन भूयत** इति । **इहे**ति परविषयविशेषपक्षे **द्रव्यादिप्रत्यपेक्षया सर्वस्यास्य सम्बद्धत्वादेकैकस्य निरवशेषमिदं जगद् विशेषण**मिति, पूर्ववदेव द्रव्यं द्रव्यान्तराणि क्षेत्रं कालं भावं च प्रत्यपेक्षते स्वप्रभेदान् परप्रभेदांश्च, एवं क्षेत्रं कालो भावश्चेति सर्वं सर्वेण सम्बद्धम्, तस्मात् सर्वस्य सम्बद्धत्वात् पूर्ववत् सहक्रमवृत्तिरूपादिशिवकादिपृथिव्यादिव्रीह्याद्यङ्कुरादिसमवस्थानाद् द्रव्याणां क्षेत्रतोऽपि तेषामेकगतिसमवस्थानात् कालतोऽप्यनेकप्रभेदोपवर्ण्यध-

---

९ प] पृ॰ २४ पं॰ १ ॥
१० त्र] **तै**
उपात्त॰nayacakra-ms-ya । तऽपात्त॰ nayacakra-ms-bhā ॥
१८ अ] दृश्यतां पृ॰ १४ पं॰ ६ ॥
२० अ] **अनवृत्तिकतरकायत्वात्**nayacakra-ms-bhā । **अनिवृत्तिकतरकायत्वात्** nayacakra-ms-ya । दृश्यतां पृ॰ १४ पं॰ ६ ॥
२० त] दृश्यतां पृ॰ १८ पं॰ ३ ॥
२१ ग्रा] **॰ग्राहिणाप्यवश्यापेक्ष्याणि प्रत्यक्षग्राहिणाप्यवश्यापेक्ष्याणि प्रत्यक्ष॰** इति nayacakra-ms-ya प्रतिषु द्विर्भूतः पाठः ॥
२८ स] **साह॰** प्र॰ ॥

र्मा[द्य]स्तिकायपृथिव्यादिपानीयादानधारणादिसमवस्थानाद् भावतोऽपि पूर्ववद् द्रव्यादिरूपादिशिवकादिभवनसमवस्थानात् **स्यादेकघटसंहतनानावस्थगुणवदिति** । यथोक्तम् --**द्रव्यमेव हि तथावस्थानाद् रूपादिभावं लभते, एकपुरुषपितृपुत्रत्वादिवत्** , द्रव्यमेव हि घटाख्यं रूपं रसो गन्धः स्पर्शः सङ्ख्या संस्थानं शुक्लं नीलं तिक्तं कटु सुरभि मृदु कर्कशं शुक्लतरं शुक्लतमं चेत्यादिविशेषणतां नातिवर्तते । त एव ह्येते गुणाः पर्यायाश्च नानावस्थाः परस्परविशिष्टाः परस्परस्य द्रव्यस्य च विशेषणम्, द्रव्यमेव गुणाः पर्यायाश्च । तथान्येऽपि द्रव्यक्षेत्रकालभावाः सप्रभेदा इति । **स्याच्छब्दात्** पुनः स्यादेतदेवं यद्येतद् वक्ष्यमाणदोषेण न व्याहन्येतेत्यत आह --**तत्र सर्वार्थानां नित्यप्रवृत्तत्वात् समयमपीत्यादि** यावद् **यदाश्रयो विशेषार्थोऽवस्थाप्येतेति** । एवं परस्परविशेषणत्वेन सर्वेऽर्था नित्यं प्रवृत्ता एवेति समयमात्रमपि **नास्ति तेषां समवस्थानम्** । समवस्थानाश्रयो हि विशेषोऽवस्थाप्येत, तदभावात् कुतो विशेषः ? **आत्त- वदिति** तत्कालावगृहीतक्षणोत्पन्नविनष्टभाववदित्यर्थः । ततः - /ms
किमिति चेत्, समवस्थानाभावान्निराश्रयः खपुष्पवन्नास्ति विशेषः । § 106

स्यान्मतम्--सम्बन्धदेशो न दूष्यते, उपेक्ष्यत इति । किमुक्तं भवति ? सम्बन्धदेशान् द्रव्यादीन् मुक्त्वा निराश्रयत्वाद् विशेषो मा भूत्, सम्बन्धदेशस्थानां तु घटपटादीनां किमिति मुधा विशेषो न स्यात् 28/mj

* * *

सम्बन्धदेशोपेक्षायामुपात्तत्यागोऽकस्मात्, तुल्यत्वात् सामान्याभ्युपगमात् । रूपादिभेदसम्बन्ध एव विशेषः, न, अन्यासम्बन्धेऽरूपादित्वाच्छुद्धानां क्वचिदप्यभावात् । लोके दृष्टो ननु च वायुः शुद्ध एव स्पर्शः, तत्रापि हि क्षेत्रादिद्रव्यस्य रूपादयो न गृह्यन्ते, अनभिव्यक्तिसौक्ष्म्यात्, द्रव्यादिवत् ।

* * *

तदाश्रयत्वाद् विशेषस्य ? इति । अत्रोच्यते --**सम्बन्धदेशोपेक्षायामुपात्तत्यागोऽकस्मात्** । एवं सति अकस्मादेवोपात्तस्य विशेषस्य त्यागः, **सामान्याभ्युपगमात्** । कथं सामान्यमभ्युपगतमिति चेत्, **तुल्यत्वात्** सम्बन्धदेशस्थानां द्रव्यक्षेत्रकालभावप्रत्यासत्तितुल्यलक्षणत्वात् सामान्यस्य समानभावस्य । § 107

अत्राह --**रूपादिभेदसम्बन्ध एव विशेष** इति । रूपरसगन्धस्पर्शसङ्ख्यासंस्थानादीनां सप्रभेदानां सम्बन्ध एव विशेष उच्यते, त एव हि प-

८ स्या ] स्यादेवंnayacakra-ms-bhā ॥
१३ णोत्प ] °त्पन्यविनंष्टnayacakra-ms-bhā । °त्पत्त्यविनष्ट° nayacakra-ms-ya ॥
१४ स ] संस्थानाभावा° प्र° ॥
१७ मु ] मुत्वा प्र° ॥
२३ देशोपेक्षायामु ] °मुपांत्यत्यागो°nayacakra-ms-ya ॥
२४ स्मादेवोपा ] °वात्तस्यnayacakra-ms-bhā । °पांत्यस्य nayacakra-ms-ya ॥
२६ त्तितु ] °तुल्यक्षणत्वात्nayacakra-ms-ya ॥
२६ सा ] सामानभवनस्यnayacakra-ms-bhā ॥

रस्परतो विशिष्यमाणा विशेषाख्या इति । अत्रोच्यते --**तद् न, अन्यासम्बन्धेऽरूपादित्वात्** । अन्यैर्द्रव्यादिभिरसम्बन्धे तेषामरूपादित्वं प्रसज्यते, यस्मात् सर्वे सर्वत्र सर्वदा सर्वथा द्रव्यक्षेत्रकालभावाविभागसम्बद्धरसा एव हि रूपादयः । किं कारणम् ? **शुद्धानां क्वचिदप्यभावात्**, प्रागुक्तं द्रव्यादिसम्बन्धाभावे रूपादिस्वरूपाभावात् तत्सम्बद्धानामेव दृष्टत्वात् सप्रभेदद्रव्यादिसम्बन्धाभावे रूपादयो न सन्त्येवेत्यरूपादित्वं तेषां प्रसक्तम् । § 108

इतर आह --**लोके दृष्टो ननु च वायुः शुद्ध एव स्पर्शः** । स्यादरूपादित्वं यदि द्रव्यक्षेत्रकालरूपरसादिभिरसम्बन्धे रूपाद्यभाव एव इत्ययमेकान्तः स्यात्, स्याद्यानुमानं यदि दृष्टेन न बाध्यते, दृष्टश्च वायुः स्पर्शमात्र एव, न हि दृष्टाद् गरिष्ठं प्रमाणमस्तीति । अत्रोच्यते --**तत्रापि हि क्षेत्रादिद्रव्यस्य रूपादयो न गृह्यन्ते, अनभिव्यक्तिसौक्ष्म्यात्,** वैधर्म्येण **द्रव्यादिवत्** । यथा द्रव्यादयो गृह्यन्ते प्रत्यक्षेण न तथा वायौ रूपरसगन्धादयोऽनभिव्यक्तिसौक्ष्म्याद् गृह्यन्ते । किं कारणम् ? चक्षुरादीन्द्रियग्राह्यत्वपरिणत्यभावाद् हेत्वनुमेयताभावात् । यथोक्तं सङ्ग्रहान्तरे—

मूर्तिः कथं न वायोर्नास्वाद्येत च कथं न रूप्येत ।
तद्व्यक्तिग्रहणं प्रति न शक्नुयात् त्विन्द्रियैः कश्चित् ॥ इति

§ 111

गन्धवन्तोऽबग्निवायवः, मूर्तत्वात्, पृथिवीवत् । एवं रसवन्तौ अग्निवायू, मूर्तत्वात्, भूम्यम्बुवत् । रूपवान् वायुः, मूर्तत्वात्, अग्निभूमिजलवत् । रूपरसगन्धस्पर्शवन्ति वाय्वग्निजलानि, मूर्तत्वात्, पृथिवीवत् । इहापि च साधर्म्यदृष्टान्त उच्यते--वातायनरेणुस्पर्शरसरूपगन्धादिवद् न गृह्यन्त इति, तेषां हि *रविकरोद्द्योतव्यक्तानां रूपमेव ग्राह्यम् । § 112

अथोच्येत--एककालसहावस्थानादर्थानां विशेषो भविष्यति, अवतिष्ठते हि किञ्चित् कश्चित् कालम् । एवमपि

२ न्धेऽरूपादित्वा ] °**त्वादन्यैर्द्रव्यादिभिरसंबंध तेषामरूपादित्वादन्यैर्द्रव्यादिभिरसंबंधे तेषामरूपादि°** इति द्विर्भूतः पाठः सर्वासु प्रतिषु ॥
३ भावाविभाग ] एतच्चिह्नान्तर्गतः °**सम्बद्धरसा** इत्यत आरभ्य **द्रव्यादि°** इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
४ शु ] **शुद्धानं**nayacakra-ms-ya ॥
१२ वा ] **वायो रूप°**nayacakra-ms-bhā । अत्र **वायो** इत्यस्य षष्ठ्यन्तत्वे nayacakra-ms-bhā प्रतिपाठोऽपि साधुरेव ॥
१३ ग्रा ] **°ग्राह्यपरि°**nayacakra-ms-ya ॥
१५ मू ] **मूर्ति कथं** प्र° ॥
१५ वा ] **वायोर्नास्वाप्येत**nayacakra-ms-ya । **वायोर्णास्वाप्येत** nayacakra-ms-bhā ॥
१६ क्नुया ] **°या त्विन्द्रियैः कंचित्** प्र° ॥
१७ व ] **°वन्तो । पग्नि°**nayacakra-ms-bhā । **°वन्तोपग्नि°** nayacakra-ms-ya ॥
२१ * ] **रविकारो°** प्र° ॥

तथाभूतसामान्याभ्युपगमादविशेषत्वमेव । सर्वसामानाधिकरण्याच्च एकविकारेऽपि सर्वस्यान्यथात्वं जायते, तन्मात्रेऽन्यत्वात्, गन्धोनाधिकभ्वम्भोवत् । § 113

अथ तु तद्बुद्ध्यासन्नमेव ग्रहीष्यते सामान्यविशेषयोः, एवं तर्हि द्रव्यगुणकर्मणां न सामान्यं नापि विशेषः, तेषां परस्परासत्त्यभावात् । तद्बुद्ध्या- § 114

**अथोच्येत** परेण--यदि सम्बन्धदेशसमवस्थानादर्थानां विशेषो न भवति, **एककालसहावस्थानादर्थानां विशेषो भविष्यति,** यस्मा**दवतिष्ठते हि किञ्चित् कञ्चित् कालम्,** यथा पूर्वापरस्थितघटपटाविति । ननु विशेषकारणमत्र वक्तुं प्राप्तम्, इदं तु सामान्यकारणमेव आशङ्कितमिति । अत्रोच्यते— सामान्यद्वारेण विशेषः सिद्ध्यतीति तदसिद्धिद्वारेण विशेषासिद्धिरिति सर्वत्र ग्राह्यम् । अत्राप्याचार्य उत्तरमाह **--एवमपि तथाभूतसामान्याभ्युपगमादविशेषत्वमेव** । पराभ्युपगम एव उत्तरत्वमापद्यते, एककालावस्थाने कालसामान्याभ्युपगमाद् देशसम्बन्धसामान्याभ्युपगमवदुपात्तत्यागोऽकस्मात् **तुल्यत्वा**दित्यविशेषत्वमेव । § 115

किञ्चान्यत्--प्रागुक्तविधिना **सर्वसामानाधिकरण्याच्च** विशेषस्त्वतत्त्वस्य परस्परापेक्षत्वाद् विशिष्यमाणत्वाद् भावानां परस्परतः सर्वं जगदेकाधिकरणम्, तत्रै**कविकारेऽपि सर्वस्य** शेषस्याप्यशेषस्य तदपेक्षत्वा**दन्यथात्वं** विकारो **जायते** । कुतः ? **तन्मात्रेऽन्यत्वात्** । को दृष्टान्तः ? **गन्धोनाधिकभ्वम्भोवदि**ति, यथा भ्वम्भसोरयथासङ्ख्येन गन्धोनस्य अम्भसो गन्धाधिकायाश्च भुवः तद्धीनाधिकभावेन विकारो दृष्टः--गन्धहीना आपः तदधिका भूरिति । तस्मान्नास्त्येव अनवस्थानान्निराश्रयः खपुष्पवद् विशेष इति । § 116

**अथ तु तद्बुद्ध्यासन्नमेव ग्रहीष्यते सामान्यविशेषयो**रिति । अथेत्यधिकारान्तरे । तुर्विशेषणे प्राक्तनादेशकालासत्त्यधिकाराद् बुद्ध्यासत्त्यधिकारं

- /ms

८ हाव ] °वस्थानार्थानां प्र° ॥
१४ स्था ] °स्थाने ककाल°nayacakra-ms-ya ॥
१४ मा ] °मादेश° प्र° ॥
१५ व ] °वद्रपांतत्यागो°nayacakra-ms-ya । °वद्दृष्टांतत्यागो° nayacakra-ms-bhā । दृश्यतां पृ° २८ पं° १ ॥
१६ ण्या ] °ण्यात्व विशेष°nayacakra-ms-bhā ॥
१७ त्वा ] °त्वाद्वि विशि°nayacakra-ms-ya ॥
१८ स्य ] °स्याशेषस्याप्य°nayacakra-ms-ya । °स्य शेषस्य शेषस्याप्य° nayacakra-ms-bhā ॥
१८ द ] °दन्यथात्वधिकारो प्र° ॥
१९ न्धोनाधिक ] °कत्वंभावदिति यथा भ्वंभसोरयथासंख्येन न गंधोनस्य प्र° ॥
२१ त ] तर्हिनाधिक° प्र° ॥
२१ भावेन ] धिकारोnayacakra-ms-ya । ऽधिकारो nayacakra-ms-bhā ॥
२३ ग्र ] गृही°nayacakra-ms-ya ॥
२४ कालास ] °सत्य° प्र° । एवमग्रेऽपि ॥

विशिनष्टि । बुद्ध्या आसन्नं, सः इति बुद्धिस्तद्बुद्धिः, योऽसौ प्रथमो घटः स एव द्वितीय इति बुद्धिः । का सा ? तत्त्वानुवृत्तिबुद्धिः, व्यावृत्तिबुद्धिरपि तद्बुद्ध्यासत्त्या द्रव्यत्वबुद्धौ प्रसक्तायाम् नापो न सिकता न शिवकादिर्घट एव इति । यथोक्तम् --**अनुवृत्तिप्रत्ययकारणं सामान्यम्, व्यावृत्तिबुद्धिहेतुर्विशेषः**

इति । अत्र ब्रूमः --**एवं तर्हि द्रव्यगुणकर्मणां न सामान्यं नापि विशेषः** । किं कारणम् ? **तेषां परस्परासत्त्यभावात्** । तया तद्बुद्ध्या द्रव्यस्य गुणस्य कर्मणो वासत्तिर्गृह्यते, किं द्रव्यबुद्ध्या गुणो गृह्यते कर्म वा ? द्रव्यबुद्ध्या

30/mj हि तद् द्रव्यमेव,

* * *

सन्नता हि द्रव्यस्य द्रव्यस्य च, तत्रैव सामान्यविशेषौ स्याताम्, न गुणकर्मणोः । एवं च तयोः सत्त्वसामान्य-द्रव्यारम्भादिविशेषाभावः । तथासत्तिः सिकतानां वज्रस्य च, तेषां सामान्यविशेषौ स्याताम्, न भूम्यम्भसोः; यावत् तुल्यजाति-

* * *

तदासन्नत्वाद् द्रव्यम् इति गृह्यते, **तत्रैव** च **सामान्यविशेषौ स्यातां न गुणकर्मणोः** । कस्मात् ? यस्मात् **तद्बुद्ध्यासन्नता द्रव्यस्य द्रव्यस्य च,**

- /ms न द्रव्यस्य गुणस्य च, तथा न द्रव्यस्य कर्मणां च, न गुणस्य कर्मणश्चेति सामान्याभावो विशेषाभावश्च, तद्बुद्ध्यासत्त्यभावात् । **एवं च** कृत्वा **तयोः सत्त्वसामान्य-द्रव्यारम्भादिविशेषाभावः** । तयोः द्रव्यगुणयोर्गुणकर्मणोर्द्रव्यगुणकर्मणां च तयोश्च तयोश्चेत्यावृत्त्या सत्त्वलक्षणं सामान्यं मा भूत् । तस्मात् सत् इति त्रयाणामविशेष इत्ययुक्तम् । तथा अनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवत् इति च सामान्यं द्रव्यगुणकर्मणां मा भूत् । उक्तं च वः शास्त्रे — **सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः** वै० सू० १ । १ । ८ । एवं तर्हि अनानात्वं द्रव्यगुणकर्मणां प्राप्तम् इति चोदिते विशेष उच्यते--नाविशेष एव, आरम्भानारम्भभेदात्, **द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्** । **कर्म कर्मसाध्यं न विद्यते** वै० सू० १ । १ । १०--११ इति । किञ्चान्यत्--लक्षणभेदात्, **क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम्, द्रव्याश्रयी अगुणवान् संयोगविभागेष्व[कारणमनपेक्ष इति गुणलक्षणम्, एकद्रव्यमगुणं**

---

२५ बु] **बुद्ध्यासन्नः स इति बुद्धिर्योऽसौ** nayacakra-ms-ya ‖
६ क] **कर्माणं वा**nayacakra-ms-bhā ‖
१३ गृ] **गृह्येत**nayacakra-ms-ya ‖
१३ विशे] **°विशेषे स्यातां**nayacakra-ms-ya । **विशेषस्थातां** nayacakra-ms-bhā ‖
१५ क] **कर्मणश्च** इति स्यादत्र पाठः ‖
१६ विशेषाभा] **°भावं च** प्र° ‖
१७ स] **सत्त्वं**nayacakra-ms-ya ‖
१७ त्व] एतच्चिह्नान्तर्गतः **°सामान्य°** इत्यत आरभ्य **सत्त्वलक्षणं** इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ‖
२४ आ] **आरंभमारंभभेदात्**nayacakra-ms-ya ‖
२७ विभा] **°भागेष्वनपेक्षं** प्र° ‖

**संयोगविभागेष्व]नपेक्षं कारणमिति कर्मलक्षणम्** वै॰ सू॰ १ । १ । १५-१६-१७ । तथा **विरोधाविरोधभेदात्, कार्याविरोधि द्रव्यं कारणाविरोधि च, उभयथा गुणः, कार्यविरोधि कर्म** वै॰ सू॰ १ । १ । १३-१४ । इत्येवमादिद्रव्यगुणकर्मनानात्वहेतुकलापश्च विशेषाभावादनर्थक आपद्यते । एवं तावद् द्रव्यस्य [द्रव्यस्य] च **सामान्यविशेषौ स्याताम्, न गुणकर्मणोः** । § 117

इतर आह--यथा द्रव्ययोः प्रत्यासत्तिर्द्रव्यत्वाभिसम्बन्धात् तथा सत्त्वाभिसम्बन्धाद् द्रव्यगुणकर्मणां भविष्यति । यथोक्तम् --**सदिति यतो द्रव्यगुणकर्मसु द्रव्यगुणकर्मभ्योऽर्थान्तरं सा सत्ता** वै॰ सू॰ १ । २ । ७-८ इति । अत्र ब्रूमः--द्रव्ययोरपि त्वदनुकम्पाद्रवीकृतचेतसा मया त्वयि चित्तानुवृत्त्या उक्तम्, तत्राप्याशां मा कृथाः, तदपि नोपपद्यते बुद्ध्यासत्तिकृतसामान्यविशेषवादिनो भवतः सामान्याभावे विशेषाभावात् । **तथासत्तिः सिकतानां वज्रस्य च,** पार्थिवत्वसामान्यानुविद्धत्वादश्मसिकतालोष्टवज्रादीनाम् । **तेषां सामान्यविशेषौ स्याताम्, न भूम्यम्भसोः,** अन्यतरस्य पार्थिवत्वाभावात् । तेनैव हेतुक्रमेण तथासत्तिः पिण्डघटयोः, न मृत्-सिकतानाम्; एवं परतः - /ms
परतो **यावत् तुल्यजाति-** 31/mj

* * *

गुणक्रिययोरण्वोरेव, न तु तयोरपि अन्त्यविशेषसमवायेन अपक्षिप्तप्रत्यासत्त्योः । तस्मात् सामान्याभावाद् विशेषाभावः, सर्वत्रैवोभयाभावः ।

अर्थाश्लेषलक्षणायां त्वासत्तौ पृथिवीघटरूपादीनामेव स्यात् सामान्यविशेषता, नेतरसामान्यविशेषयोः ।

* * *

**गुणक्रिययोरण्वोरेव स्यातां सामान्यविशेषौ** इति वर्तते । तथासत्तिः घटकपालयोः, न पिण्डघटयोः; एवं कपालशकलयोः, न घटशकलयोः; शकलशर्करयोः, न घटशर्करयोः; पांशुशर्करयोः, न शकलशर्करयोः; पांशुधूल्योः, न धूलीशर्करयोः; धूलीत्रुट्योः, न पांशुत्रुट्योः; त्रुटिपरमाण्वोः, न धूलीपर-

---

१ का] **कारणविरोधि च** प्र॰ । न द्रव्यं कार्यं कारणं च वधति --**वै॰ सू॰** १ । १ । १२ । अस्य व्याख्या--द्रव्यं न स्वकार्यं हन्ति न वा स्वकारणं हन्ति, कार्यकारणभावापन्नयोर्द्रव्ययोर्वध्यघातकभावो नास्तीत्यर्थः, आश्रयनाशारम्भकसंयोगनाशाभ्यामेव द्रव्यनाशादिति भावः । वधतीति सौत्रो निर्देशः --**वै॰ सू॰ उप॰** पृ॰ २० ॥
२ गु] गुणाः--**वै॰ सू॰** ॥
२ का] **कार्यं वि॰** प्र॰ ॥
९ ब्रू] **क्रमः** प्र॰ । एवमग्रेऽपि ॥
१० त] **नेत्राप्या॰** प्र॰ ॥
१३ पार्थिव] **॰वत्वाल-त्वाभावात्**nayacakra-ms-bhā ॥
२१ योर] ॰रणवारेवnayacakra-ms-bhā । ॰रण्वादेरेव nayacakra-ms-ya ॥
२१ व] **वर्तेते** प्र॰ ॥
२२ श] **॰वाकल-योः**nayacakra-ms-pānayacakra-ms-vi ॥
२४ धूलीत्रु] ॰तुट्योःnayacakra-ms-bhā । एवमग्रेऽपि । nayacakra-ms-ya प्रतिष्वपि प्रायः सर्वत्राप्यग्रे **तुटिशब्द** एव दृश्यते ॥

माण्वोः । अथवा घटस्य च घटस्य च, न घटस्य कपालस्य चेत्यादि । तयोरपि अण्वोः पार्थिवशुक्लगतिसमवायिनोरेवाण्वोः, न आप्यपार्थिवादिनीलशुक्लगतिस्थितिजातिगुणक्रिययोः । **न तु तयोरपीत्यादि** याव**दपक्षिप्तप्रत्यासत्त्यो**रिति । तुल्यजातिगुणक्रियासमवायिनोरन्यत्वप्रत्ययप्रभावोल्लिङ्गिता**न्त्यविशेष**योः तत्**समवायेनापक्षिप्ता** अपहृता **प्रत्यासत्ति**स्तयोरपि इति कृत्वा कुतस्तद्बुध्यासन्नप्रकरणम् ? **तस्मात् सामान्याभावाद् विशेषाभावः, सर्वत्रैवोभयाभाव** इति **द्रव्यगुणकर्मणां न सामान्यं नापि विशेषः** इत्यतः प्रभृति यावत् **अण्वोः** इत्येतदवधिमध्याभिहितोपपत्तिबलाद् यथोपपादितसामान्यविशेषाभावं स्मारयति । § 118

अत्राह--सा द्विधा प्रत्यासत्तिः, अर्थसम्बन्धादनर्थसम्बन्धाच्च । तत्रानर्थलक्षणा सद्-द्रव्यपृथिवी-मृद्-घटादितत्त्वानुवृत्तिबुद्धिग्रहणा यथोक्ता, सामान्यविशेषसमवायानामर्थत्वाभावात् । अर्थलक्षणा तु द्रव्यगुणकर्मसम्बन्धात्मिका, तेषामर्थसंज्ञितत्वात् । यथोक्तम् --**अर्थ इति द्रव्यगुणकर्मसु** वै॰ सू॰ ८ । २ । ३ । तत्र **क्रियावत्** वै॰ सू॰ १ । १ । १५ इत्यादि द्रव्यलक्षणम्
- /ms । तद्भेदलक्षणं च --**रूपरस- गन्धस्पर्शवती पृथिवी, रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च, तेजो रूपस्पर्शवत्, वायुः स्पर्शवान्** वै॰ सू॰ २ । १ । १-४, यत्र रूपादिचातुर्गुण्यं सा पृथिवी, गन्धहीना द्रवस्नेहाधिकाश्चापः, द्रवस्नेहरसगन्धहीनं तेजः, रूपहीनो वायुः, **द्रव्याश्रय्यादि**लक्षणो गुणः । **श्रोत्रग्रहणो योऽर्थः स शब्दः** वै॰ सू॰ २ । २ । २१ । चक्षुर्ग्रहणो योऽर्थः स रूपम् । इत्याद्यर्थलक्षणनियतया प्रत्यासत्त्या सामान्यविशेषौ स्यातामिति । § 119

अत्रोच्यते --**अर्थाश्लेषलक्षणायां त्वासत्तौ पृथिवीघटरूपादीनामेव स्यात् सामान्यविशेषता,** लक्षणोद्देशनिर्देशकृतैवेत्यर्थः । **नेतरसामान्यविशेषयोः**
32/mj सामान्यविशेषता इति वर्तते, सत्त्व

* * *

तथापि स्वविषयसामान्यविशेषापत्तिः । सा चोक्तदोषा ।

तस्मात् सर्वथान्तरङ्गं स्वमूर्तिस्थं प्रधानं व्यवस्थितमनपेक्षम्--न हि तस्य

* * *

द्रव्यत्वपृथिवीत्वगुणत्वरूपत्वाद्यनुवृत्तिव्यावृत्तिबुद्धिलक्षणयोर्न स्यात् । इष्यते

---

२ वा] °वायिनोरेवण्वोःnayacakra-ms-bhā । °वायिनोरण्वोः nayacakra-ms-ya ॥
५ द्बु] °द्बुध्यासंतप्रहरणं प्र॰ ॥
७ द्र] पृ॰ २९ पं॰ ५ ॥
७ अ] पृ॰ ३१ पं॰ १ ॥
१३ क] °कर्मवस्तुnayacakra-ms-ya ॥
१४ क्रि] क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम्--वै॰ सू॰ ॥
१६ स्निग्धा] स्निग्धाः--वै॰ सू॰ ॥
१६ वा] स्पर्शवान् वायुः--वै॰ सू॰ ॥
१८ द्र] द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्--वै॰ सू॰ १ । १ । १६ ॥
१८ श्रोत्र] °ग्रहणोऽर्थः स शब्दःnayacakra-ms-bhā । °ग्रहणोऽर्थः शब्दः nayacakra-ms-ya ॥
२८ गु] °गुणरूपत्वा°nayacakra-ms-ya ॥

च तयोरपि **वैशेषिकैः** गुणसमुदायद्रव्यवादिभिश्च सादृश्यानुवृत्तिनिवृत्तिलक्षणसामान्यविशेषता । कोऽभिप्रायः ? अर्थाश्लेषलक्षणासत्तिकृतसामान्यविशेषाभ्युपगमे तत्त्वानुवृत्तिव्यावृत्तिबुद्धिग्रहणौ न स्याताम् । तत्त्वानुवृत्तिनिवृत्तिकृतयोर्वाभ्युपगमेऽर्थाश्लेषकृतप्रत्यासत्त्योरभाव इति विरोधाद् न प्रकल्पते इत्ययमभिप्रायः । § 120

किञ्चान्यत् --**तथापि स्वविषयसामान्यविशेषापत्तिः** । अर्थाश्लेषलक्षणासत्तौ सत्यामपि स्वविषयमेव सामान्यम्, स्वविषय एव विशेषः इत्येतौ प्रागुक्तौ विकल्पावापन्नौ । **सा चोक्तदोषा,** सापि च स्वविषयसामान्यविशेषापत्तिरुक्तदोषैव --**यदि स्वविषयम्, सामान्यविरोधः । यदि सामान्यं तत आत्मा न** - /ms **भवति, अनेकार्थत्वात् सामान्यस्य । अथ आत्मा ततो न सामान्यम्, एकत्वादात्मनः । अथ आत्मैव सामान्यम्, रूपादिर्घटादेरात्मा तत्समुदायकार्यत्वात्;** एवं सत्यात्मभेदः--**रूपं रूपं च रूपादिसमुदयश्च** इत्यादि । **तथा विशेषोऽपि । यदि स्वविषयः, विशेषविरोधः । यदि विशेषस्तत आत्मा न भवति, अन्यत्वाद्विशेषस्य गुणतः कालतो वा, अन्यथा घटादौ सामान्यापत्तेः । अथ आत्मा ततो विशेषो न भवति, एकत्वादात्मनः । अथोच्येत--नैकत्वान्यत्वविरोधदोषौ, आत्मैव विशेषः इत्यनपादानादिप्रतिज्ञानात्; यदि आत्मापेक्ष एव विशेषः, एक एव अन्य इत्यात्मनोऽन्यथाभवनादनात्मत्वमि**त्यादिपूर्वोक्तदोषसम्बन्धिनी स्वविषयसामान्यविशेषापत्तिः । § 121

अत्राह संसर्गवादी--यदि आत्मैव सामान्यम्, आत्मैव विशेषः इति ब्रूयां **साङ्ख्य-बौद्ध**वत् स्युरेते दोषा ममापि । न पुनरहमेवंपक्षः । मम तु सामान्यविशेषौ द्रव्यगुणकर्मभ्योऽर्थेभ्योऽत्यन्तभिन्नौ, नागृहीतविशेषणा विशेष्ये बुद्धिरस्तीति सत्त्वाभिसम्बन्धात् सत्, द्रव्यत्वाभिसम्बन्धाद् द्रव्यम् इत्यादिसामान्यविशेषवादिनः कथं स्वविषयसामान्यविशेषपक्षदोषाः ? इति

---

३ त्त्वानु] °नुवृत्तिबुद्धि°nayacakra-ms-ya ॥
५ प्र] प्रकल्प्यतेnayacakra-ms-ya । अत्र प्रकल्पेते इति nayacakra-ms-bhā पाठे सामान्यविशेषौ न प्रकल्पेते इत्यर्थो ज्ञेयः । प्रकल्प्यते इति nayacakra-ms-ya पाठे तु सामान्यविशेषता न प्रकल्प्यते इत्यभिसम्बन्धो ज्ञेयः ॥
७ इ] nayacakra-ms-bhā विनान्यत्र --इत्येतो प्रागुक्तौ विक° nayacakra-ms-ḍe nayacakra-ms-līṃ । इत्युतो प्रागुक्तौ विक° nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-hī । इत्युक्तौ विक° nayacakra-ms-vi ॥
९ य] दृश्यतां पृ° ११ पं° ६ ॥
१२ त] पृ° २२ पं° ६ ॥
१६ दो] °दोषोnayacakra-ms-hī विना ॥
१७ ए] एक एक एवnayacakra-ms-bhā ॥
१९ वा] °वावीnayacakra-ms-ya ॥
२० व] °वत्स्यरितेnayacakra-ms-bhā । °वत्परेते nayacakra-ms-ya ॥
२१ क] कर्मभ्योत्यंतभिन्नौnayacakra-ms-ya ॥
२१ ना] नागृहीतविशेषणविशेषणविशेष्येnayacakra-ms-bhā ॥

। अत्रापि परविषयसामान्यविशेषवादिप्रत्याख्यानात् का गतिः ? इत्यलं प्रसङ्गेन । § 122

**तस्मा**दित्युक्तदोषोपसंहारार्थः, एतद्दोषापेतं **सर्वथान्तरङ्गं वस्तु इति प्रतिपत्तव्यं** घटादि इत्यभिसम्भन्त्स्यामः । सर्वेण प्रकारेण **सर्वथा** यां तां गतिं गत्वा सामान्यमेव, विशेष एव इत्येवमादिना विचार्य विचार्य **अन्तरङ्गं वस्तु** घटस्य केनचित् प्रतिविशिष्टेनाकारेण उदकाद्याहरणधारणादिसमर्थेन भवनं समानेन चार्थान्तरैस्तदेवाश्रयणीयम्, न बहिरङ्गं सत्त्वद्रव्यत्वादि स्वपरविषयसामान्यविशेषवादि

33/mj

* * *

अनुवृत्त्यपेक्षा घटान्तरेषु । यदि स्यात् ततोऽनुवर्तेत स तेष्वपि, ततश्च सर्वसामान्यात् स एव स स्यात्, तद्यथा--पूर्वाह्णापराह्णयोरेक एव घटः । तत्सन्निवेशस्वरूपा-

* * *

परिकल्पितम् । यथोक्तम् --**अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान्** । **य एष प्रेक्षापूर्वकारी पुरुषः स प्रातरुत्थाय प्रत्यङ्गवर्तीनि स्वानि कार्याणि कुरुते, ततः सम्बन्धिनाम्, ततः सुहृदाम्, ततः शेषाणाम्** पा॰असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इति । बहुप्रयोजनैषापरिभाषा । अवश्यमेवैषा कर्तव्या । सा चाप्येषा लोकतः सिद्धा । कथम् ? प्रत्यङ्गवर्ती लोको लक्ष्यते । तद्यथा--पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत् करोति, ततः सुहृदाम्, ततः सम्बन्धिनाम्--इति पाठः पातञ्जलमहाभाष्ये ॥ म॰ भा॰ १ । १ । ५६ इति । तदन्तरङ्गत्वं कुतः ? **स्वमूर्तिस्थ**त्वात्, स्वा मूर्तिर्ग्रीवाद्यात्मिका, तत्रस्थत्वाज्जलाद्याहरणसमर्थस्य भवनस्य । **प्रधान**त्वाच्च तदेव ग्राह्यम् । कुतः प्रधानम् ? तदर्थत्वात् सामान्यविशेषयोः, कन्यार्थवस्त्रालङ्कारवत्, घटार्थो हि सामान्यविशेषकल्पनाव्यापारः । व्रीहिकणार्थपलालादिवदप्रधानत्वात् सामान्यविशेषयोस्त्याज्यता । **व्यवस्थित**त्वाच्च तदेव घटभवनं ग्राह्यम् । व्यवस्थितं च आत्मन्येव स्थितत्वात्, न यथा तौ सञ्चारिणौ सामान्यविशेषावव्यवस्थितौ परापेक्षत्वादव्यवस्थितत्वाच्चावस्तु वन्ध्यापुत्रवत् । क्व पुनः सञ्चारिणौ ? सद्द्रव्यादिषु । **सद्-द्रव्य-पृथिवी-मृद्-घटत्वाभिसम्बन्धात् अस्ति द्रव्यं पार्थिवो मार्तिको घटः इति घटे**

४ यां] **यां गतां गतिं**nayacakra-ms-ya । एवं यां तां गतिं गत्वा कल्पयित्वापि **सर्वथा** सर्वप्रकारेण --**नयचक्रवृ॰** पृ॰ ९२-- २ ॥
५ विचार्य] **विचारांतरंगं**nayacakra-ms-ya ॥
८ विशेष] **॰षतादिपरि॰**nayacakra-ms-ya ॥
२१ मू] **मूर्तिग्रीवा॰** प्र॰ ॥
२१ स्थ] **॰स्थत्वाजला॰** प्र॰ ॥
२२ त] **प्रधानत्व** । **तदेव**nayacakra-ms-bhā । **प्रधानत्वाच्च देव** nayacakra-ms-ya ॥
२४ प] **॰पलादि॰** प्र॰ ॥
२५ आ] **आत्मन्यवस्थितत्वात्**nayacakra-ms-ya ॥

सम्प्रत्ययः इत्युक्तं ह्याचार्येण । घटभवनस्योदकाद्याहरणासक्तात्मनः पुनः क्व सञ्चरणम् ? § 123

**अनपेक्षत्वाच्च, तदेव वस्तु** इत्यभिसम्भन्त्स्यते प्रत्येकं सर्वत्र । तद्धि घटभवनं न घट इति वा पट इति वा घटपटादिद्रव्यान्तरमपेक्षते यथा अनुवृत्तिव्यावृत्तिसामान्यवादिमते तदर्थं घटपटाद्यर्थान्तरापेक्षा व्यावृत्तिविशेष-वादिमते च तदर्थं पटादिद्रव्यान्तरापेक्षा । लौकिकानुवर्तिव्यवहारनयवादिमते तु सन्निहितस्वाधीनवृत्तित्वाद् घटात्मभवनस्य न तदपेक्षास्तीति त दर्शयति **--न हि तस्यानुवृत्त्यपेक्षा घटान्तरेषु** । अर्थापत्त्या न व्यावृत्त्यपेक्षा पटादिद्र-व्यान्तरेषु । **यदि स्यादपेक्षा ततोऽनुवर्तेत स घटः तेष्वपि** घटान्तरेष्वपि । - /ms
न पुनरपेक्षास्ति, तस्य स्वसामर्थ्येनैव सिद्धत्वाद् घटात्मनः । यद्यपेक्षेत घटो घटान्तराणि, घटान्तरेष्वप्यनुवर्तेत । **ततश्च सर्वसामान्यात् स एव स स्यात्,** घटान्तरमपि घटात्मैव स्यात्, तत्तत्त्वानुवृत्तेः, घटात्मवत् इति दोषः स्याद् देशभिन्नेष्वपि घटेषु कालभिन्नघटवत् । तन्निदर्शयति — **तद्यथा--पूर्वाह्णाप-राह्णयोरेक एव घट** इति । नापि घटस्तत्त्वानुवृत्तिमपेक्षते, घटात्मन्यसिद्धे तत्त्वानुवृत्त्यसिद्धेः; तत एव च न पटादिव्यावृत्तिमपेक्षते, तदायत्तत्वादित्यत आह **--तत्सन्निवेशस्वरूपा-** 34/mj

* * *

पेक्षत्वाच्च तस्यास्तदपेक्षा व्यर्था, इतरेतराश्रयदोषापादनात् । तथा विशेषेऽप्य-स्य नापेक्षा, तथाहि स एव न स्यात्, उक्तवत् ।--पूर्वं यथालोकप्रसिद्ध-मनपेक्षितपूर्वापरप्रभेदं प्रकृतिः इति वा अन्यत् इति वा वर्तमानं नित्यं न प्रलयभाक् सद् वर्तते भावो योऽसौ तदेव वस्त्विति प्रतिपत्तव्यम् । किं न एतेन ? यदि कारणम्, यदि कार्यम् ।

* * *

**पेक्षत्वाच्च तस्याः तदपेक्षा व्यर्था** । घटावयवसन्निवेशस्वरूपमपेक्षते घटान्त-रानुवृत्तिः पटादिव्यावृत्तिश्चेति युक्ता अनुवृत्तेर्घटापेक्षा व्यावृत्तेश्च पटादेः ।

---

१ यः ] एतच्च **आचार्यीयं** वचनं **नयचक्रवृत्तिकारः** पुनरप्यग्रे उद्धरिष्यतीत्थम्— यथोक्तम् **--सद्द्रव्यपृथिवीमृद्घटादिभिसम्बन्धादस्ति द्रव्यं पार्थिवो मार्तिको घट इति घटे सम्प्रत्ययः** इति **--नयचक्रवृ°** पृ° ४२२-१ ॥
१ काद्याह ] °हरणसक्ता°nayacakra-ms-pā ॥
५ रा ] °रापेक्ष्या प्र° ॥
७ घ ] घटाताभव° प्र° ॥
८ स्यानुवृ ] °वृत्त्य घटा°nayacakra-ms-ya ॥
१० य ] पद्यपेक्षेतnayacakra-ms-bhā । पटाद्यपेक्षेत nayacakra-ms-ya ॥
११ सा ] °सामान्याश्च एव nayacakra-ms-bhānayacakra-ms-pā । सामान्यांश्च एव nayacakra-ms-bhā nayacakra-ms-pā विना । तुलना--ततश्च सर्वविशिष्टत्वात्स एव न स्यात् **--नयचक्रवृ°** पृ° ३४ पं° १३ ॥
१६ निवेश ] °शास्वरू°nayacakra-ms-ya ॥
२४ व्या ] °व्यावृत्तिरेवतिnayacakra-ms-bhā । °व्यावृत्तिरेवेति nayacakra-ms-ya ॥
२४ व्या ] व्यावृत्ते+एव पटादेः प्र° ॥

घटस्य पुनरनुवृत्तिव्यावृत्त्यपेक्षा व्यर्था, स्वत एव सिद्धत्वात् । स्यान्मतम्--घटोऽपि घटत्वापेक्षात्मलाभः, तत्त्वानुवृत्तिरपि घटात्मलाभापेक्षेति । एतच्चायुक्तम्, **इतरेतराश्रयदोषापादनात्** । घट-घटत्वानुवर्तनयोरितरेतराश्रयत्व-दोषमापादयत्येषा कल्पना, इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते, तद्यथा--नौर्नावि बद्धा नेतरत्राणाय । इत्युक्तम्--सामान्यं नापेक्षत इति । **तथा विशेषेऽप्यस्य नापेक्षेति** । यथा सामान्यापेक्षा नास्ति घटात्मलाभस्य तथाविशेषेऽपीति प्रोक्तहेतुविधिनातिदिशति । तथा च योजितमस्माभिरर्थतः । ग्रन्थतो योजनापि **--तथा हि स एव न स्यादुक्तवदिति । न हि तस्य व्यावृत्त्यपेक्षा पटादिषु । यदि स्यात्, स तेभ्योऽपि व्यावर्तेत । ततश्च सर्वविशिष्टत्वात् स एव न स्याद् घटोऽपि, घटपटयोरिव । तत्सन्निवेशस्वरूपापेक्षत्वाच्च तस्याः तदपेक्षा व्यर्था, इतरेतराश्रयदोषापादनादिति** सर्वमतिदेश्यम् । § 124

किञ्चान्यत् **--पूर्वत्वाच्च** घटात्मभवनस्य । सामान्यविशेषाभ्यां हि **पूर्वं**
- /ms घटभवनम् । तत् कथमिति चेत्, **यथालोकप्रसिद्धम्** । लोके प्रसिद्धं लोकप्रसिद्धम्, यथैव लोके प्रसिद्धं तथा घटभवनम्, आकारादिमात्रमेव च घट इति लोके प्रसिद्धम्, तदेव पूर्वम्, **अनपेक्षितपूर्वापरप्रभेद**त्वात् । के पुनः पूर्वापरप्रभेदाः ? घटादारभ्य यावत् प्रकृतिस्ते पूर्वप्रभेदाः **साङ्ख्या**नाम्, सत् इति वा **वैशेषिका**णाम्, अपरे प्रभेदाः यावदन्त्यविशेषकृतमन्यत्, इति **साङ्ख्यवैशेषिका**भ्यां कल्पितम्, अत आह **--प्रकृतिरिति वान्यदिति वा** । **बौद्धे**न वा क्षणिकत्वादत्यन्तमन्यदिति । **वर्तमान**त्वाच्च, वर्ततेरस्त्यर्थत्वात्, **अस्तिभवतिविद्यतिपद्यतिवर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इति वचनात् । अत एव **नित्यं** जलाहरणादिव्यवहारसन्निपाति सततमतीतानागतकालयोरपि घटपटाद्यवस्थानात् । **न प्रलयभा**गिति, न अम्भस्तरङ्गवत् स्वात्मप्रवेशम्,

---

३ य] °यत्वादोष° प्र° ॥
४ प्र] प्रक-ल्प्यंतेnayacakra-ms-bhānayacakra-ms-bhūnayacakra-ms-līṃ विना ॥
५ नेत] nayacakra-ms-bhā विनान्यत्र --तरतारणाय° nayacakra-ms-ḍe nayacakra-ms-līṃ । °तरवारणाय nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । तदिदमितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति --इति पातञ्जलमहाभाष्ये १ । १ । १ ॥
८ स्या] स्याद्रक्तवदिति प्र° ॥
८ न] दृश्यतां पृ° ३२ पं° २ ॥
९ प] पदादिषु प्र° ॥
१३ पू] पूर्वघट° प्र° ॥
१४ लो] लोकप्र-सिद्धंnayacakra-ms-bhānayacakra-ms-vi ॥
२१ स] nayacakra-ms-bhā विनान्यत्र --सत्वार्थाः nayacakra-ms-pā । सप्तार्थाः nayacakra-ms-ḍe nayacakra-ms-līṃ । सस्वार्थाः nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
२३ प] °पटयोवस्था°nayacakra-ms-ya ॥
२३ स्त] °स्तरंगधत् प्र° ॥

न प्रदीपज्वालानलवदत्यन्तविनाशम्, द्विविधमपि प्रलयं न भजते, द्रव्यस्य पर्यायान्तरेण पर्यायस्यापि द्रव्याविनाभावादेव, एकान्तासदुत्पत्तिविनाशवादयोरहेतुदृष्टान्तत्वादेकान्तनित्यवादे च धर्माविर्भावतिरोभावाभावात् । तद्धि तेन रूपेण सर्वकालं **सद्,** वर्ततेः सत्तार्थत्वादिति तदेव व्याचष्टे — 35/mj

* * *

को हि वादानामन्तं कर्तुं शक्नुयात् ? आह च--

णिययवयणिज्जसच्चा सव्वणया परवियालणे मोहा ।
ते पुण+अदिट्ठसमयो विभज+इ सच्चे व अलि+ए वा ॥
सन्मति° १ । २८
को ह्येतद् वेद ? किं वाऽनेन ज्ञातेन ? § 128

* * *

**वर्तत** इति । **भाव** इति वृत्तिभवनयोः प्रागुक्तं पर्यायशब्दत्वं दर्शयति । **योऽसाविति** प्रत्यामनति, य एवं व्याख्यातो भावः सोऽसौ **तदेव वस्तु** नान्यदिति **प्रतिपत्तव्य**मिति निगमयति । **तदन्तरङ्गं प्रधानमनपेक्षं पूर्वं वर्तमानं च** तद् वस्तु । **इतिशब्दः** परिसमाप्त्यर्थोऽवधारणार्थो वा, इत्यानेव पर्याप्तोऽर्थः, नातोऽधिको न्यूनो वा, येऽन्येऽन्यत् कल्पयन्ति--कारणमेव, कार्यमेव, सामान्यमेव, विशेष एव, तदुभयमेव, अन्यतरोपसर्जनप्रधानमेव, नैव वास्त्युभयमिति । **किं न एतेन ? यदि कारणम्, यदि कार्यम्,** ततः को दोषः ? दृश्यते हि कारणमपि कार्यमपि, यथा--परमाणुकारणं द्व्यणुकादि मृत्पिण्डशिवकादीनां कार्यमपि, तद्भेदजत्वात् । एवं द्व्यणुकत्र्यणुकादीनामपि कारणकार्यभावः सङ्घातभेदाभ्याम् । सामान्यं द्रव्यक्षेत्रकालभावानां स्वपरभवनसामान्यानतिवृत्तेः । स्वपरविशिष्टभवनात्मकत्वाद् विशेषः । एवमुभयमन्यतरोपसर्जनप्रधानत्वं सहक्रमस्वातन्त्र्यपारतन्त्र्यविवक्षावशात् । न चास्त्युभयम्, एकान्तरूपस्य परस्पराप्रतिबद्धस्यासिद्धेरसिद्ध्यादिशून्यतानुभवनात् । § 129 - /ms

---

२ द्र] द्रव्याविभावादेवnayacakra-ms-bhā ॥
३ वा] °वादे वnayacakra-ms-pānayacakra-ms-vi विना । °वादेन nayacakra-ms-vi ॥
३ विर्भाव] °तिरोभावाभावाभावात्nayacakra-ms-bhā । °तिरोभावात् nayacakra-ms-vi nayacakra-ms-līṃ ॥
४ रू] भूपेणnayacakra-ms-bhā ॥
४ व] वर्तते सत्ता°nayacakra-ms-ya ॥
१२ प्र] म्ना अभ्यासेपा° धा° ९२९ इति धातोः प्रत्यापूर्वकस्य रूपमिदम् ॥
१३ पू] पूर्ववर्त° प्र° ॥
१५ ना] नातो न्यूनोधिको वाnayacakra-ms-bhā ॥
२१ क] °कत्वा विशेषः प्र° ॥
२२ त] °तन्त्र्याविवक्षा°nayacakra-ms-bhā ॥

स एव व्यवहारनयाश्रयाल्लौकिको ब्रूते **--को हि वादाना**मिति एकान्तवादानाम् **अन्तं कर्तुं शक्नु यात्**--उच्छेदं शक्नुयात् कर्तुमिति । किं कारणम् ? न हि **साङ्ख्याभिहिताः** सत् कारणे कार्यम्,

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥
साङ्ख्यका० ९ § 132

इत्येवमादयो हेतवः, न वा **वैशेषिकोक्ताः क्रियागुणव्यपदेशाभावादसत्** वै० सू० ९ । १ । १ इत्यादयः, क्षणिका घटादयः प्रत्ययायत्तजन्मत्वात् इत्यादयो वा **बौद्धोक्ताः** परस्परेणोच्छेत्तुं शक्यन्ते, अभियुक्तबुद्ध्युत्कर्षपरम्पराया अदृष्ट (Edtext outside numbered paragraph)निष्ठत्वात् । एतस्मिन्नर्थे ज्ञापकमाह **--आह चे**ति, नाहमेव स्वमनीषिकया ब्र (Edtext outside numbered paragraph)वीमि, किं तर्हि ? अन्येऽप्येवं ब्रुवते ।

णिययवयणिज्जसच्चा सव्वणया परवियालणे मोहा ।
ते पुण अदिट्ठसमयो विभज+इ सच्चे व अलि+ए वा ॥
सन्मति० १ । २८§ 134

स्वविषयसत्यत्वादेवाविचाल्या इति तच्चालने मोघाः । तेषामनेकान्तस्थितिस्वतत्त्वानवबोधात् सत्यमेव, असत्यमेव वा इत्यदृष्टसमयस्तान् विभजते इत्याचार्य**सिद्धसेनः** । § 135
36/mj

तथा च कारणे कार्यसदसत्त्वानियमः, कारणे सत्येव भावाभावाभ्यामसति च सेवाद्युद्योगफलानियमात् । तद्यथा--वातकर्कोटकीपुष्पं दृष्टमसत्कार्यम् । अव्यक्त- § 136

तथान्येऽपि—

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ वाक्यप० १ । ३४ इति
।§ 139

---

१ याश्र ] °याल्लौकिकाnayacakra-ms-ya ॥
३ ङ्ख्याभिहिताः ] °हिता सत्nayacakra-ms-ya ॥
७ स ] °सम+उंnayacakra-ms-bhā ॥
९ त्य ] °त्यमेवेत्यदृष्ट°nayacakra-ms-ya ॥

अनुमानान्तरबाध्यत्वेऽनवस्थितानुमानत्वाल्लोकप्रसिद्धिरेव प्रमाणमित्यर्थः । **को ह्येतद् वेद** इत्यशक्यप्राप्तिं दर्शयति **किं वानेन ज्ञातेन** इति प्रयोजनाभावं च । यस्मात् प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनानां जिज्ञासासंशय-शक्यप्राप्ति-प्रयोजनपूर्वाणां संशयव्युदासः फलमन्ते भविष्यतीति दशावयववादिनां मतम्, तथा च व्यवहारप्रसिद्धिः । तस्मात् त्यज्यन्तामव्यतनाव्याप्त्यतिप्रसङ्गागमकाक्षरदरिद्रकुसृतिकाररचितन्यायलक्षणानीति । § 140

**तथा च कारणे कार्यसदसत्त्वानियमः** । एवं च कृत्वानेन न्यायेन यथा कारणमेव, न कार्यम्; कार्यमेव, न कारणम्; सामान्यमेव, न विशेषः; विशेष एव, न सामान्यम्; उभयम्; अन्यतरोपसर्जनम्; उभयाभावो वा इत्ययं नियमो नास्त्युक्तविधिना तथा कारणे कार्यस्य सत्त्वमेव असत्त्वमेवेत्ययमपि नियमो नास्ति । कथम् ? यदि कार्यं सत् ततः कारणमेव इति नास्ति, कार्यस्यापि सत्त्वात् । कथम् ? क्रियानिमित्तकत्वात् कारणकार्यत्वयोः कार्याभावे कारणाभावः कारणाभावे कार्याभाव इति । तथा यदि कारणं सत्, ततः कार्यमेव न भवति, कारणस्यापि सत्त्वात् । एवं सामान्यविशेषोभयान्यतरोपसर्जनोभयाभावेष्वपि भावनीयम् । तत्र तावत् कारणे कार्यं सदेव असदेव सदसच्चैव इति वा ये ब्रुवते तेषां नियमाभाव उक्तः अन्यतरोपसर्जनोभयाभावयोरप्युक्त एव भवतीत्यभिप्रायः । कारणे कार्यं सदेव, असदेव इत्यनियमः । को हेतुः ? **कारणे सत्येव भावाभावाभ्यामित्ययथासङ्ख्यं** हेतू । सत्येव भावात् असत् कारणे कार्यम् इत्यनियमः, सत्येवाभावात् सदेव इत्यनियमः । **असति च** कारणे कार्यस्य सदसत्त्वानियमः इति वर्तते । कुतः ? **सेवाद्युद्योगफलानियमात्** । दृष्टो

---

१ र] °रपाध्यत्वेऽनुवस्थिता°nayacakra-ms-bhā । °रपाध्यत्वेनुवस्थिता° nayacakra-ms-ya ॥
२ ज्ञा] ज्ञानेन प्र° ॥
३ जिज्ञासा] °संशयसम्यक्प्राप्ति°nayacakra-ms-ya । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः न्यायसू° १ । १ । ३२ । दशावयवानेके नैयायिका वाक्ये सञ्चक्षते जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति--इति **न्यायसूत्रभाष्ये** १ । १ । ३२ ॥
६ नाव्या] °व्यास्यव्यास्यतिप्रस°nayacakra-ms-ya । °व्याप्यतिप्रस° nayacakra-ms-bhā ॥
७ का] कार्यसदसत्त्वानिवसःnayacakra-ms-ya । कार्यसत्त्वानिवसः nayacakra-ms-bhā ॥
१० अ] असत्वमेव त्ययमपिnayacakra-ms-bhānayacakra-ms-līṃ । अत्र असत्त्वमेव वेत्ययमपि इत्यपि पाठः स्यात् ॥
११ का] कार्यात्सत्ततः प्र° ॥
१३ का] कारर्णभावेnayacakra-ms-bhā ॥
१७ स] °सर्जनाभावयो° प्र° ॥
१९ भावाभावाभ्या] °भ्यामिति यथासंख्यं प्र° ॥
२० स] सत्येवात्nayacakra-ms-bhā । सत्येव भावात् nayacakra-ms-ya ॥

-/ms हि लोके कृषीवलवणिग्राजपुरुषशिल्प्यादीनां कृषिवाणिज्यसेवाशिल्पादिषु कारणेषूद्युक्तानां फलानियमः । स सत्स्वसत्सु च दृष्टः । तद्यथा **--वातकर्कोटकीपुष्पं** फलकारणं सत्कार्यम्, पुष्पत्वात्, आम्रपुष्पवदित्यनुमानप्रसङ्गेऽपि च **दृष्टमसत्कार्यम्** । असत् कार्यं पुष्पफलमस्मिन्नित्यसत्कार्यम् । तस्याफलत्वदर्शनाद् दृष्टविरुद्धमनुमानम् । अतोऽसत्कार्यं तदिति । § 141

**अव्यक्तमिति चेत्** । स्यान्मतम्--अव्यक्तानि वातकर्कोटकी-वञ्जुल-ज-
37/mj पाकुसुमादीनां फलानि

* * *

मिति चेत्, न, व्यक्तिकार्यस्य अव्यक्तकार्यत्वादसत्त्वतुल्यत्वात् । बीजादीनामप्यकारणतैव क्वचिदकरणादिति कारणमप्यकारणमेव, कार्यकारणाव्यभिचाराभावात् । कार्यसदसत्त्वानियमात्तु कारणे कारणतायामेव करणाकरणे कार्यस्य, अविदितवेदनार्थविधिपरतायां वाक्यप्रवृत्तेस्तस्यामवस्थायामनुपजनितविषयत्वादपवाद-

* * *

कार्याणीति । एतच्चायुक्तम्, **व्यक्तिकार्यस्य अव्यक्तकार्यत्वादसत्त्वतुल्यत्वात्** । व्यक्तिः कार्यमस्येति व्यक्तिकार्यम् । किं तत् ? कार्यम् । तस्य कार्यस्य अव्यक्तकार्यत्वात्, असत्त्वेन तुल्यम्, तद्भावोऽसत्त्वतुल्यत्वम्, तस्मादसत्त्वतुल्यत्वान्नाव्यक्तं कार्यमस्तीति । अथवा व्यक्तिश्च सा कार्यं तद् व्यक्तिरेव कार्यम्, तदव्यक्तं कार्यमव्यक्तकार्यम्, तस्याव्यक्तकार्यत्वादसत्त्वतुल्य[त्व]म्, तस्मादसत्तद् वातकर्कोटक्यादिपुष्पफलम्, नाव्यक्तं कार्यमिति । § 142

स्यान्मतम्--करोतीति कारणम् । यथोक्तम्—

*ष्ठिवसिव्योर्ल्युद्वरयोर्दीर्घत्वं वष्टि भागुरिः ।
करोतेः कर्तृभावे च सौनागाः सम्प्रचक्षते ॥ § 145

तस्मात् स्वकार्यस्याकरणादकारणत्वमेवेति । एतदपि नोपपद्यते, यस्माद् **बीजादीनामप्यकारणतैव क्वचिदकरणा**दिति प्राप्तम् । **इति**शब्दो हेत्वर्थे

१ कृ ] **कृषीबल°** प्र° । एवमग्रेऽपि ॥
१ शिल्प्या ] **°शिल्पादीनां** प्र° ॥
१ कृषिवाणिज्य ] **°ज्यासेवा°**nayacakra-ms-ya ॥
१ सेवाशिल्पा ] **°शिल्पादिषूद्युक्तानां**nayacakra-ms-ya ॥
२ वा ] **वातकर्क्केटिकी°**nayacakra-ms-bhā । **वातककोटिक°** nayacakra-ms-ya ॥
६ क ] **°कर्कोटिकी°** प्र° ॥
१७ व्य ] **व्यक्तिंच** प्र° ॥
१८ तुल्य ] अत्र तदव्यक्तं कार्यमव्यक्तकार्यं तस्याव्यक्तकार्यत्वादसत्त्वतुल्यम् इति योजनायां यथाश्रुतमपि समीचीनमेवेति भाति ॥
२१ * ] **ष्ठिवसीव्योर्लुद्वर°**nayacakra-ms-ya । **ष्ठिव्सीव्योर्लुद्वर°** nayacakra-ms-bhā । ष्ठिवु निरसने **--पा° धा°** ५६०, १११० । षिवु तन्तुसन्ताने **--पा° धा°** ११०८ । ष्ठिविषिव्योर्ल्युटि वा दीर्घः--इति अमरकोषटीकायां क्षीरस्वामी ॥
२३ स्या ] **°स्याकरणात्कारणत्वमे°**nayacakra-ms-ya । **°स्याकारणाकारणत्वमे°** nayacakra-ms-bhā ॥
२४ चिद ] **°दकारणा°** प्र° ॥

। यस्मात् तेषामपि बीजानां त्रिवर्षपरमोषितानामङ्कुराद्युत्पादने शक्त्यभावः, **आदिग्रहणाद्** मृदादेर्घटाद्युत्पादने । ततः को दोषः ? **कारणमप्यकारणमेवास्तु कार्यकारणाव्यभिचाराभावादिति** । एवं च सति कृषीवलादीनां सकृद्दृष्टबीजाङ्कुरादिकारणकार्यभावव्यभिचाराणां तदर्थप्रवृत्तेः पुनरनारम्भात् करणाभावे कारणाभाव एव स्यात्, अनिष्टं चैतत् । लोके पुनरुपपद्यते -- **कार्यसदसत्त्वानियमात्तु कारणे** बीजादौ **कारणतायामेव** सत्यां **करणाकरणे** सन्निहिते तन्त्वादौ कारणे **कार्यस्य** पटादेश्च, कादाचित्कयोः करणाकरणयोर्दर्शनात् । § 146

स्यान्मतम्--कारणे कार्यस्य सदसत्त्वयोः करणाकरणयोश्चानियमे किमर्थं पुनः करोतीति कारणम् इति शब्दव्युत्पत्तिराश्रीयते ? *इति । अत्रोच्यते --**अविदितवेदनेत्यादि** । अज्ञातज्ञापनमविदितवेदनमर्थोऽस्य विधेरिति **अविदितवेदनार्थो विधिः**, तत्परतायां **वाक्यप्रवृत्तेः तस्यामवस्थायामनुपजनितविषयत्वादपवादस्पर्शस्य** । तदा हि करोतीति कारणम् इति कारणत्वविधानमात्रं क्रियते देशकालादिविशेषाविशेषणादसति स्वविषये कमर्थमपवादः स्पृशेत्--किं करोत्येष न करोत्यपि क्वचित् कदाचिदिति ? 38/mj

* * *

स्पर्शस्य, नीलोत्पलवत् । तथा न्यग्रोधफलमसत्कारणं दृष्टम् । आम्रपुष्पफले सत्कार्यकारणे दृष्टे ।

सर्वसर्वात्मकत्वसर्वकारणत्वात् सेवादिक्रियाकलापो यथा अर्थप्राप्तेः कारणं तथा क्लेशप्राप्तेरपि ।

नन्वत एव क्लेशोऽपि भवतीति चेत्, एवं सतीप्सितेन तावद्भवितव्यम्, सन्निहिततच्छक्त्यभीहितत्वात्, सर्वशास्त्रज्ञान्यतरव्याख्यानवत् ।

* * *

तदा स मन्यते वक्ता--इदं तावत् प्रतिष्ठां यातु करोतीति कारणम् इति । प्रतिष्ठिते चास्मिंस्तत उत्तरकालं सिद्धे सति कारणत्वे सम्भवतः कार्य-

---

१ त्रि ] त्रिवर्षे
परमोषितामंकुराद्यु+उत्पादनं ।
शक्त्य°nayacakra-ms-bhā ।
त्रिवर्षपरिमोषितामंकुराद्य+उत्पादनाशक्त्य°
nayacakra-ms-ya । विधिदृष्टेन
यज्ञेन धर्मस्तेषु महान्भवेत् । यज बीजैः
सहस्राक्ष त्रिवर्षपरमोषितैः ॥ --महाभा°
आश्वमे° ९१ । १६ ॥
२ मृ ] मृदादिघटा° प्र° ॥
३ का ]
कार्यकरणाव्य°nayacakra-ms-bhā
॥
४ त ] तदर्था[याः ?] प्रवृत्तेः प्र° ॥
५ क ] कारणाभावे प्र° ॥
६ का ] कायसदसदस-
त्त्वानिय°nayacakra-ms-bhā ।
कासद्दसत्वानिय° nayacakra-ms-ya
॥
६ का ] करणे प्र° ॥
९ ण ] °णयो+एवानियमे प्र° ॥
१० * ] इत्युच्यते
अविदित°nayacakra-ms-ya ॥
२४ स ] सम्भवतः इति पञ्चम्यर्थे
तसिप्रत्ययान्तः शब्दप्रयोगः,
कार्यसत्त्वासत्त्वयोः सम्भवादित्यर्थः ॥

सत्त्वासत्त्वयोः तेन विशेषणप्रकारेण करोत्येव न करोत्येवेति विकलादेशवशान्नियमोपपत्तेर्विशेषणमाश्रीयते । को दृष्टान्तः ? **नीलोत्पलम्** । यथा हि नीलोत्पलं भवति इति तद्भवनमात्रं विधीयते नीलमेव, उत्पलमेव इति वा नियमविशेषानाश्रयणात्, तथा करोतीति कारणम् इति क्रियाभावनमात्रं विधीयते करोत्येव, न वा इत्यनाश्रित्य विशेषनियमम् । यथा वा नीलं तिल-कम्बलादिविशेषानपेक्षम् उत्पलमपि रक्तादिविशेषानपेक्षं परस्परविशिष्टमुभयमुच्यते तथा करोतीति कारणम् इति करणमात्रं देश-कालादिकार्यप्रतिबन्धाप्रतिबन्धनिरपेक्षमुच्यते । अथवा शबलोत्पलत्वे सत्यपि तस्य धर्मभेदानपेक्षं नीलोत्पलम् इत्युच्यते, तथा करणभावाभावभेदधर्मनिरपेक्षं क्रियामात्रं करोतीति कारणम् इत्युच्यते । § 147

**तथा न्यग्रोधफलम्** । तेन प्रकारेण **तथा**, यथा प्रागुक्त**सदसत्त्वानियमात्तु कारणे कार्यस्य कारणतायामेव करणाकरणे** तथा कार्यकरणाकरणानियमात्तु कारणस्य कार्यस्य कार्यत्वानियमः । वटन्यग्रोधोदुम्बरादिफलानां फलत्वात् पुष्पकार्यत्वानुमानप्रसङ्गे फल**मसत्कारणं दृष्ट**मिति पूर्ववद् व्यभिचारः । **आम्रपुष्पफले सत्कार्यकारणे दृष्टे** इत्यत्रापि कादाचित्कयोरेव कार्यकारणयोर्दर्शनात् कार्यकारणसदसत्करणाकरणानियममेव दर्शयति । § 148

- /ms

इतश्च कार्यकारणसदसत्त्वानियमः **--सर्वसर्वात्मकत्वसर्वकारणत्वात्** । स्थावरजङ्गमाभ्यवहृतान्योन्यरसरुधिरादिरूपादिपरिणामापत्तिवैश्वरूप्यदर्शनात् सर्वं सर्वात्मकम्, तत एव सर्वं सर्वस्य कारणं कार्यं चेति कृत्वा **सेवादिक्रियाकलापो यथा अर्थप्राप्तेः कारणं तथा क्लेशप्राप्तेरपि** प्रकल्प्यत एव कारणम् । तदपि च फलमर्थक्लेशप्राप्त्यादि अनियतम्, उभयत्र व्यभिचारात् । § 149

इतर आह **--नन्वत एव क्लेशोऽपि** कार्यसत्त्वादेव **भवतीति** नियतं कारणे कार्यम् इत्यापन्नं *चेदित्येवं चेन्मन्यसे । **एवं सति ईप्सितेन तावद् भवितव्यम्** । किं च तदीप्सितं फलम् ? अर्थप्राप्तिः, न क्लेशः **सेवकस्य** । किं कारणम् ? **सन्निहिततच्छक्त्यभीहितत्वात्** । सन्निहिता सा शक्तिरस्य सोऽयं सेवकः **सन्निहिततच्छक्तिः** अप्रोषितार्थप्राप्तिशक्तिः, *सेवा

- /ms

१ क] करोत्येव वेतिnayacakra-ms-ramnayacakra-ms-hā । करोत्येव न करोत्येवेवेति nayacakra-ms-pā । अत्र करोत्येव न करोत्येव वेति इत्यपि पाठः स्यात् ॥
९ क] कारणभावा॰nayacakra-ms-ya ॥
११ त] तथा तथा प्रागुक्त॰nayacakra-ms-ya । तथा प्रागुक्त॰ nayacakra-ms-bhā ॥
११ प्रागुक्त] पृ॰ ३७ पं॰ ३ । अत्र प्रागुक्तं इत्यपि पाठः स्यात् ॥
१४ दृ] दृष्टवदिति पूर्ववद् प्र॰ ॥
१६ स] सत्करणाकारणनियम॰ प्र॰ ॥
१९ रू] ॰रूपदर्शनात्nayacakra-ms-pā विना ॥
२१ प्र] प्रकृत्यत प्र॰ ॥
२५ *] वेदिव्यचेन्मन्यसेnayacakra-ms-ya ॥
२८ *] सवा वाnayacakra-ms-ya ॥

वा सन्निहिता, सा शक्तिरस्याः सा सन्निहितत्च्छक्तिः, तया **अभीहितत्वात्** चेष्टितत्वादिति वृत्तिवृत्तिमतोरनन्यत्वात् सेवा 39/mj

* * *

तत्र देशकालाकारनिमित्तावबद्धत्वान्नेष्टमेव फलमवाप्यते, ज्ञाव्याख्यानवत् । अथ देशादयः किम् ? यदि ते कार्यं ततस्तेषामकारणत्वादसर्वत्वादतन्त्रत्वाद-प्रतिबन्धकत्वम् । अथ ते कारणं ततः सर्वकारणत्वसर्वात्मकत्वात् किमिति सर्वं न भवति, समुदितकारणत्वात्, संयुक्ततन्तुपटवत् ?

अथ वा सर्वं न भवति, अनभिव्यक्तत्वाद्देशादेः, प्रधानसाम्यावस्थानवद्

* * *

सेवकयोर्यथेष्टं विग्रहसम्बन्धौ । युक्तं हि ताभ्यामीप्सितार्थप्राप्तियुक्ताभ्यां भवितुम्, नानीप्सितक्लेशभाग्भ्याम् । को दृष्टान्तः ? **सर्वशास्त्रज्ञान्यतर-व्याख्यानवत्** । यथा सर्वशास्त्रज्ञः पुरुषो व्याकरणाद्यन्यतमच्छास्त्रमीप्सित-मेव व्याचष्टे तथैतदिति । § 150

अत्र ब्रूमः --**तत्र देशकालाकारनिमित्तावबद्धत्वान्नेष्टमेव फलमवाप्य-ते** सेवकेनेव प्रसन्ननृपादपि, स्वनगरभाण्डागारादिक्षेत्रप्रतिबन्धवत् श्वःप्र-भातादिकालप्रतिबन्धवत् प्रसाददानाभिमुख्याकारावबन्धवत् द्वितीयकर्मण्य-ताप्रदर्शनादिनिमित्तावबन्धवत् । शास्त्रज्ञदृष्टान्तस्यापि तादृग्विधावबन्धसद्भावे सति अव्याख्यानवदनियम एव फलस्येत्यत आह --**ज्ञाव्याख्यानवत्**, सर्व-शास्त्रज्ञोऽप्येभिरेवावबन्धैरीप्सितं न व्याचष्ट इति । § 151

लौकिको ब्रवीति --**अथ देशादयः किम् ?** इति । विकल्पद्वयान्तःपातेन निरोत्स्याम्येतदित्यभिप्रायः । ये देशादयोऽवबन्धकाभिमतास्**ते यदि कार्य**त-येष्टा**स्ततस्तेषामकारणत्वादसर्वत्वम्** । कारणभावाद्धि सर्वं सर्वात्मकं स्यात्, तदभावादसर्वत्वं देशादीनां प्राप्तम् । असर्वत्वाच्च तेषामतन्त्रत्वं तेषु, कस्यचित् तदधीनवृत्तित्वाभावात् । ततोऽतन्त्रत्वाद**प्रतिबन्धकत्व**मपि । § 152

**अथा**चक्षीथाः --**ते** देशादयः **कारण**मिति । **ततः** कारणं चेत्, **सर्वकार-णत्वात् सर्वात्मकत्वात् किमिति सर्वं न भवति ?** भवत्येवेत्यर्थः । कस्मात् ? **समुदितकारणत्वात्**, समुदितकारणत्वं सर्वकारणत्वात् सर्वात्मकत्वाच्च । अत्र प्रयोगः--सर्वं सर्वत्र स्यात्, समुदितकारणत्वात्, **संयुक्ततन्तुपटवत्** । यथा तन्तूनां परस्परसंयोगे सति नियमात् पटो भवति स्वकारणत्वसंनिधानादेवं सर्वकारणत्व- सर्वात्मकत्वसद्भावे को देशादिप्रतिबन्धो नाम अन्य इति - /ms
किमिति मुधा सर्वं न भवेदिति ? § 153

१४ व] °वत् धेःप्रभाता° प्र° ॥
१६ शा] शास्त्रज्ञादृष्टान्त-स्यापिnayacakra-ms-ya । शास्त्रस्यापि nayacakra-ms-bhā ॥
१७ अव्याख्या] °ख्यानवादनि°nayacakra-ms-ya ॥
१७ स] सर्वज्ञशास्त्रज्ञो°nayacakra-ms-ya ॥
२० य] यदे कार्य° प्र° ॥
२१ स्तेषाम] °मकारत्वाद° प्र° ॥
३० मु] मुवाnayacakra-ms-bhā । मुचा nayacakra-ms-ya ॥

**अथ वा सर्वं न भवतीत्यादि** स एव लौकिक आशङ्कते । अथ मतं भवतः **साङ्ख्यस्य**--सर्वं न भवति शरीरक्लेशसुखार्थानर्थप्राप्त्यादि । कुतः ? **अनभिव्यक्तत्वात् । अञ्जू व्यक्तिम्रक्षणगतिषु** पा० धा० १४५९, म्रक्षितमभिव्यक्तं स्फुटीकृतम्, अनभिव्यक्तमस्फुटम्, अनभिव्यक्तत्वाद् **देशादेः** कारणस्य सर्वं न भवति । को दृष्टान्तः ? **प्रधानसाम्यावस्थानवत्** । **यथा** प्रधानं सत्त्वरजस्तमस्त्रिगुणत्वसाम्यावस्थानेऽनभिव्यक्तत्वात् सर्वकारणमपि सत् सर्वान् भावान्न प्रकरोति घटपटादीन्, अथ च प्रकरणात् प्रकृतिः प्रधीयन्ते भावास्तत इति प्रधानम् इत्यादिभिर्नामभिरुच्यते, तस्य चानभिव्यक्तत्वं त-

40/mj त्साम्यावस्थानान्म

* * *

मयूराण्डकरसगतग्रीवादिवद्वा । ननु च देशादेः सर्वत्वात् सर्वात्मकत्वाद् वैषम्यावस्थैव इति लौकिकप्रकृतित्वमेव प्रकृतेः, सर्वात्मकत्वात्, देशादिवत् ।

अनभिव्यक्तिसाम्यावस्थाने चायुक्ते, अप्रयोजनत्वात्, निर्वृत्तानिर्वृत्तार्थक्रियोदासीन्यवत् । प्रकृतिकारणत्यागेन कारणान्तरस्य वा तथाप्रणेतुरापत्तिः ।

* * *

न्येथाः तथा हि देशादिकारणं साम्यावस्थानादनभिव्यक्तं प्रधानवत् सर्वं कार्यं न कुरुते । लोकप्रसिद्धमप्यत्रोदाहरणम् --**मयूराण्डकरसगतग्रीवादिवत्** । यथा मयूराण्डकरसावस्थायामेव मेचकवर्णग्रीवाद्यवयवानभिव्यक्तिः तत्साम्यावस्थानात्, अतः सर्वं न भवति मयूराण्डकरसावस्थायामिव तद्ग्रीवादीति । § 154

अत्रोच्यते--मैवं मंस्थाः, **ननु चेत्यादि** । **नन्वित्यनुज्ञापने**, त्वयाप्येतदिष्ट-

- /ms म्--सर्वं देशादीति । तस्माद् **देशादेः सर्वत्वात्** सर्वात्मकत्वम्, **सर्वात्मकत्वाच्च वैषम्यावस्थैव** । **इतिशब्दो** हेत्वर्थे, यस्मा**ल्लौकिकप्रकृतित्वमेव प्रकृतेः** सूक्ताभिमतायाः । कथम् ? यथा हि लौकिकी प्रकृतिर्देशादिर्विषमावस्थैव सती सर्वकारणात्मिका कार्यात्मिका विषमा समा च व्यक्ता चाव्यक्ता च तथा **साङ्ख्य**परिकल्पितप्रकृतिरपि स्यात् । किं कारणम् ? **सर्वात्मकत्वात्, देशादिवद्** मयूराण्डकरसवद् वा वैषम्यावस्थैवेत्यर्थः । साम्यावस्थैव वा देशादेरपि, सर्वात्मकत्वात्, प्रकृतिवदिति । § 155

---

३ अ] अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु--पा० धा० १४५९ । अञ्जौप् व्यक्तिम्रक्षणगतिषु --हैमधा० ७ । १६ ॥
६ म] ०मपि न् भावान्न nayacakra-ms-bhā । ०मपि सत् सर्वा भावान्न nayacakra-ms-ya ॥
१८ व] ०वर्णाग्रीवा० प्र० ॥
१९ स्थाना] ०नादतः सर्वं न भवति मयूराण्डकरसादतः सर्वं न भवति मयूराण्डावस्थायामिवnayacakra-ms-ya ॥
२३ प्र] प्रकृतेष्टक्ताभिमतायाः प्र० । तुलना--समस्ततन्त्रार्थविघटनमेवेति किमवशिष्यते वार्षगणे तन्त्रे ? सुभाषिताभिमतस्त्याज्योऽयमनुपपन्नपरोक्षार्थवादः --नयचक्रवृ० पृ० २३२-२ ॥
२४ कृतिर्देशा] ०र्देशादिविषमा० प्र० ॥
२५ कार्यात्मिका] विषमा च व्यक्ता चा०nayacakra-ms-bhā ॥

किञ्चान्यत्--एते अपि च कल्पने **नोपपन्ने**--देशादीना**मनभिव्यक्तिः** प्रकृतेः **साम्यावस्थान**मिति । कस्मात् ? **अप्रयोजनत्वात्** । न हि देशादीनामनभिव्यक्तौ प्रयोजनमस्ति, पुरुषविमोक्षणहेतोर्व्यक्तरूपतया प्रवर्तमानानां तथा पुरुषार्थसिद्धेः, अनिर्वृत्तौदनस्य पचिक्रियायामौदासीन्यवत् । नापि निर्वर्तितार्थायाः प्रकृतेः पुनरात्मानमुपसंहृत्य साम्यावस्थाने किञ्चित् प्रयोजनमस्ति, सिद्धौदनस्य ओदनार्थरन्धनादिप्रवृत्तिवत् । अथवा प्रकृतेरेव **अनभिव्यक्तिसाम्यावस्थाने न युक्ते, अप्रयोजनत्वात्** । अप्रयोजनत्वं निर्वृत्तानिर्वृत्तार्थत्वात् । यदि निर्वृत्तार्था, सिद्धौदनरन्धनवदयुक्तं साम्यावस्थानम् । अनिर्वृत्तार्थं चेत् प्रधानम्, असिद्धौदनौदासीन्यवदयुक्तं साम्यावस्थानम् । तथानभिव्यक्तिः । किं कारणम् ? प्रकाशनार्थं प्रवृत्ताया व्यक्तिवैषम्याभ्यां तदर्थसिद्धेः, ताभ्यामृते चासिद्धेः, अनभिव्यक्तिसाम्यावस्थानयोरपि प्रवृत्तिविशेषत्वात्, द्विधाप्यप्रयोजनत्वादयुक्तमिति । अथवाऽप्रयोजना अनभिव्यक्तिः, निर्वृत्तार्थत्वात्, देशादिरूपेण प्रकाशितात्मवृत्तिः किमर्थं नाभिव्यज्यते ? किमर्थं वा सर्वं पुरुषार्थमकृत्वा साम्येन अवतिष्ठते ? **साङ्ख्यैश्च द्विविधपुरुषार्थसिद्धौ प्र-** - /ms कृतिप्रवृत्तिरिष्टा, नाकस्मिकी यदृच्छावादिमतवत् । न चेश्वरस्वभावादिकारणवादिमतवद् वा कारणान्तरम् । यथासङ्ख्यं चात्र दृष्टान्तद्वयं दर्शयति -- **निर्वृत्तानिर्वृत्तार्थक्रियौदासीन्यव**दिति, पचनापचनवदोदनस्येत्यर्थः । स्यान्मतम्--तस्याः प्रकृतेरव्यक्तिसाम्यावस्थाने कालनियतियदृच्छास्वभावेश्वराद्यन्यतमकारणवशादिति । एतच्चायुक्तम्, **प्रकृतिकारणत्यागेन** अभ्युपेतविरोधदोष 41/mj

* * *

आत्मान्तरत्वप्रकाशनं हि ज्ञानार्थस्य स्वतन्त्रस्य अप्रतिहतसर्वगतत्वस्य प्रधानस्य धर्मः । अतस्तेन नित्यप्रवृत्तेनैव भवितव्यम्, तत्स्वभावत्वात्, यथा

* * *

सम्बन्धिनी यस्मात् **कारणान्तरस्य वा तथाप्रणेतुरापत्तिः**, कारणादन्यत् कारणं कारणान्तरम्, प्रकृतेरन्यत् कारणं यत् प्रकृतिं तथा प्रणयति तदस्ति स्वभावनियतिकालयदृच्छेश्वरादीनामन्यतमदित्यापन्नम्, अनिष्टं चैतत् । § 156

कारणान्तरनिरपेक्षस्य कारणस्य स्वकार्याकरणं च युक्तिविरुद्धमित्यत आह --**आत्मान्तरत्वप्रकाशनं ही**त्यादि यावत् **प्रधानस्य धर्म** इति । आत्म-

२ स्था] °स्थानामिति प्र° ॥
४ पुरुषा] °षार्थसिद्धिःnayacakra-ms-bhā ॥
४ अ] अनिवृत्तौ° प्र° ॥
४ निर्वृत्तौद] °वनस्पते क्रियाया°nayacakra-ms-vi ॥
६ ना] ओदनाथोरन्धनादि°nayacakra-ms-bhā । ओदनाथोरचनादि° nayacakra-ms-ya ॥
८ अनिर्वृत्ता] °त्तार्था चेत् nayacakra-ms-ya ॥
१० प्र] प्रवृत्तयोnayacakra-ms-raṃnayacakra-ms-hī विना ॥
१३ प्र] प्रकाशिका तावा ?त्मवृत्तिः प्र° ॥
१९ कृतिका] °कारणित्वत्यागेनnayacakra-ms-bhā ॥
२४ प्र] प्रकृति तथाnayacakra-ms-ya ॥

नोऽन्य आत्मा आत्मान्तरम्, तस्य भाव आत्मान्तरत्वं परस्परविभिन्नमहदहङ्काराद्यवस्थान्तरत्वम्, तस्य प्रकाशनम् । **हि**शब्दो यस्मादर्थे, यस्मादनभिव्यक्तेः साम्यावस्थानस्य च प्रतिपक्षोऽवस्थान्तरप्रकारत्वेन आत्मप्रकाशनमयं प्रकृतेर्धर्मः । स्यान्मतम्--उपायानभिज्ञत्वात् कारणान्तरं साचिव्यगुणोपेतमपेक्षत इति, एतच्चायुक्तम्, **ज्ञानार्थ**त्वात् । उक्तं च --**धर्मज्ञानवैराग्यैश्वर्याणि बुद्धिधर्मःर्मा अधर्माज्ञानावैराग्यानैश्वर्याणि च । तेषामष्टानां सप्तभिर्बध्नाति एकेन मोचयति** इति **तस्य** प्रधानस्य **ज्ञानार्थस्य** परिणत्यवस्थात्मकस्यायुक्ता सचिवापेक्षा । स्यान्मतम्--परतन्त्रत्वात् सहायान्तरमपेक्षते, तच्च न, **स्वतन्त्र**त्वात् । स्यान्मतम्--क्वचित् प्रधानं कारणं क्वचिदन्यत्, अव्यापित्वात्, लौकिककालादिकारणवदिति । एतच्चायुक्तम्, **अप्रतिहतसर्वगतत्वा**त् तस्य ।

§ 157

अथवा **आत्मान्तरत्वप्रकाशन**मिति आत्मा पुरुषः, आत्मनोऽन्य आत्मा आत्मान्तरम्, तस्य भाव आत्मान्तरत्वं पुरुषाद्भिन्नं त्रिगुणस्वभावं स्वमात्मानं
- /ms प्रधानं पुरुषाय प्रकाशयति । पुरुषाद्वान्यः पुरुष आत्मान्तरम्, तस्य भाव आत्मान्तरत्वं पुरुषान्तरत्वम्, तस्मै पुरुषाय प्रकाश्य आत्मस्वरूपं पुरुषान्तराणां प्रकाशयति, पुरुषान्तरत्वं वा चैतन्यस्वरूपमध्यस्थशुद्धकेवलत्वैः परस्परभिन्नैः पुरुषान्तरस्थैः पुरुषान्तरेषु प्रकाशितेष्वपि अन्येषां पुरुषाणां यत् पुरुषान्तरत्वं तैरेव चैतन्यादिभिर्युक्तं प्रकाशयति । प्रकृतेर्वा स्वयमचेतनाया आचैतन्यस्वरूपस्य प्रकाशनम् । अयं **हि धर्मस्तस्य ज्ञानार्थस्य स्वतन्त्रस्य अप्रतिहतसर्वगतत्वस्य प्रधानस्य ।** § 158

एवं तस्य स्वभावधर्मं समर्थ्य इदानीमनभिव्यक्तिसाम्यावस्थानप्रतिपक्षभूतं नित्यप्रवृत्तत्वं प्रधानस्यानुमिमीते --**अतस्तेन नित्यप्रवृत्तेनैव भवितव्य**मिति प्रतिज्ञा । **अत** इत्यनन्तरोक्तधर्मत्वात् प्रधानस्य, तद्धर्मत्वमिदानीं हेतुत्वेन व्यापारयितुमाह सामान्यतः --**तत्स्वभावत्वा**दिति, स स्वभावो धर्मो यस्य तत् तत्स्वभावं प्रधानं पूर्वोक्तैर्हेतुभिर्विशेषितमतस्तन्नित्यप्रवृत्तं भवितुम-
42/mj र्हति । इह यद् यद् यत्स्वभावं तत् तत्

---

४ उ] **उपायानभिक्षत्वात्**nayacakra-ms-ya । **उपयानभिक्षत्वात्** nayacakra-ms-bhā ॥
६ र्माज्ञा] **॰ज्ञानवैराग्या॰** प्र॰ ॥
६ स] **सयुक्तिर्बध्नाति** प्र॰ । रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः । सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ साङ्ख्यका॰ ६३ । रूपैरिति सप्तभी रूपैः प्रकृतिरात्मानं बध्नाति । कतमैः ? तदुच्यते--धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि एतानि सप्त रूपाणि । एतैः सप्तभी रूपैरात्मानं बध्नाति ।... ...। सैव च पुरुषार्थं विमोचयत्येकरूपेण । किं तदेकरूपम् ? ज्ञानम् । तेन ज्ञानेन आत्मानं पुरुषाद् विमोचयति एकेन --जे॰ साङ्ख्यका॰ वृ॰ B ॥
९ अ] **अव्याप्तित्वात्** प्र॰ ॥
१२ आ] **आत्मान्तरप्रका॰** प्र॰ ॥
१५ प्र] **प्रकाशाष्यात्मस्वरूपं**nayacakra-ms-bhā । **प्रकाशाय्यात्मस्वरूपं** nayacakra-ms-ya ॥
१९ आ] **अचैतन्य॰** nayacakra-ms-ya ॥
२६ य] **यद्यत्स्वभावं तत्तेनैव**nayacakra-ms-ya ॥

* * *

अग्निर्दहनप्रकाशनप्रवृत्तः ।

ननु भस्मच्छन्नोऽग्निरपि न दहति न प्रकाशयति । अथ कथं जीवति ? कथं ज्ञायते अग्निः इति अदहन्नप्रकाशयन् वा तावत् कोशकादि स्वाश्रयमात्रम्, गृहप्रदीपकवत् ? छादनाभावोऽपि च प्रधाने ।

* * *

तेनैव स्वभावेन नित्यप्रवृत्तं दृष्टम्, **यथाग्निर्दहनप्रकाशनप्रवृत्तः** । यत् पुनर्नित्यप्रवृत्तं न भवति न तत् तत्स्वभावम्, यथा न किञ्चित् तादृगिति ।

§ 159

दहनादितत्स्वभावस्याग्नेस्तथाप्रवृत्त्यदर्शनात् साध्यधर्मवैकल्यं दृष्टान्तदोष इति तन्निदर्शयन्नाह — **ननु भस्मच्छन्नोऽग्निरपि न दहति न प्रकाशयती**ति, दहनतपनयोरभेदादिति । अत्रोच्यते --**अथ कथं जीवति ?** इति । जीवनमग्नेश्चेतनत्वात्, चैतन्यमाहारलाभालाभयोः पुष्टिग्लान्यादिदर्शनाद् मनुष्यवत् । स चेन्धनं दहन् जीवति, स्थितेर्जीवितपर्यायत्वात् स्थितेरिन्धनदहनाविनाभावात् । - /ms अचेतनत्वमभ्युपगम्यापि स्थितिप्रकाशनेन्धनदहनात्मकस्याग्नेः प्रत्यक्षानुमानविषयस्य सतस्तथा प्रत्यक्षानुमानाभ्यामग्रहणेऽस्तित्वे प्रमाणान्तरासिद्धेः **कथं ज्ञायते अग्निः इति अदहन्** अप्रकाशमानः **अप्रकाशयन् वा** द्रव्यान्तरं **तावत् कोशकादि स्वाश्रयमात्रम् ?** तत् परिमाणमस्य तावत्, स्वपरिमाणमात्रमपि स्वाश्रयद्रव्यं कोशकादि अप्रकाशयन् कथम् अग्निः इत्युच्यते ? **कोशक** इत्युच्यतेऽन्नपुलिका । दृष्टान्तो **गृहप्रदीपकः** । गृहे प्रज्वालितः प्रदीपको गृहप्रदीपकः, यथा गृहप्रदीपकोऽन्नपुलिकामात्रमपि यदि न प्रकाशयति प्रकाशात्मकः सन्न प्रदीपः इति ज्ञायते; अग्निवैधर्म्यदृष्टान्तो वा--गृहप्रदीपो गृहं प्रकाशयन्नस्ति, यदि न तथाग्निः स्वमाश्रयं प्रकाशयति प्रकाशात्मकः संस्ततो नास्तीति गम्यते । किञ्चान्यत्, भस्मच्छन्नाग्निसाधर्म्याभावोऽपि च प्रधानस्य

---

१३ स] **स चेनं**nayacakra-ms-bhā । **स चेतनत्वनं** nayacakra-ms-ya ॥
१५ स्थितिप्र] **°प्रकाशनेत्वमदहना°** प्र° ॥
१७ अ] **अदहनप्रकाशमानः** प्र° ॥
१८ प] **परिणमस्य** प्र° । यत्तदेतेभ्यः परिमाणे वतुप् --nayacakra-ms-pā ५ । २ । ३९ ॥
२० इत्युच्य] **°च्यतेऽत्रपुलिका**nayacakra-ms-ya । **°च्यतेत्रपुलिका** nayacakra-ms-bhā । सर्वास्वपि प्रतिषूपलभ्यमानस्य **अत्रपुलिका** इति पाठस्यात्र कोऽर्थ इति सम्यग् न विज्ञायते, तथापि भाजनविशेषोऽत्राभिप्रेतः स्यादिति मत्वा **अन्नपुलिका** इति पाठोऽत्र सम्भाव्यते । **अत्र** इति **पुलिका** इति च पृथक् पदद्वयं तु नैवात्र जाघटीति । अग्रेऽपि **गृहप्रदीपकोऽत्रपुलिकामात्रमपि** पं° १५ इति वचनात् तत्र च **अत्र** इति पृथक् पदस्य सर्वथा अनावश्यकत्वादसङ्गतत्वाच्चेति ध्येयम् ॥
२० गृह] **गृहीदीपकः** प्र° ॥
२१ दीप] **°पकःऽत्रपुलिका°** प्र° ॥
२२ ज्ञा] **ज्ञायतेग्निरिति वैधर्म्य°**nayacakra-ms-ya । nayacakra-ms-ya प्रतिपाठानुसारेणात्र ज्ञायते तथा न ज्ञायतेऽग्निरिति । वैधर्म्यदृष्टान्तो वा इत्यपि पाठः स्यात् ॥
२४ भ] **भस्म°**nayacakra-ms-ya । एवमग्रेऽपि ॥

च्छादनाभावादित्यत आह --**छादनाभावोऽपि च प्रधान** इति । अग्नेर्भस्मवत् प्रकृतेरावरणाभावाद् भस्मच्छन्नाग्नितुल्यं न भवति प्रधानमतो विशेष्य ब्रूमः-- निरावरणाग्निदहनप्रकाशनवत् तत्स्वभावत्वान्नित्यप्रवृत्तेनैव भवितव्यम् । इति तदवस्था नित्यप्रवृत्तता । ततश्चानभिव्यक्तिसाम्यावस्थानानुपपत्तिः । § 160

स्यान्मतम्--यद्यपि प्रधानं महदादिभावेनात्मान्तरत्वप्रकाशनार्थं पुरुषस्य प्रवर्तते तथापि केषाञ्चित् पुरुषाणां कृते प्रयोजनेऽन्येषामकृते कालक्रमेण 43/mj व्यक्त्यव्यक्तिसाम्यवैषम्यावस्थाः प्रतिपद्यते, सा चास्य

* * *

कालादिकारणान्तरनिरपेक्षस्य तस्य स्वतन्त्रत्वात् सर्वपुरुषार्थप्रवृत्तत्वाच्च निरवशेषपुरुषविषये स्वान्यत्वज्ञापने कृते कृतकृत्यत्वात् किं साम्यावस्थानेन ? अकृतेऽप्यकृतकृत्यत्वात् किं प्रतिनिवृत्त्या प्रयोजनम् ?

अनभिव्यक्तिसाम्यावस्थानानुपपत्तेश्च किमिति सततसमवस्थितसमनुप्रवृत्ति प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावमेवेदं जगन्नाभ्युपगम्यते ? मृत्पिण्ड-

* * *

प्रवृत्तिः स्वभावाद् नियतेः कालाद् यदृच्छाया वेति । एतदपि नोपपद्यते, - /ms **कालादिकारणान्तरनिरपेक्षस्ये-** त्यादि । प्रधानं हि कारणं नियतिकालस्वभावेश्वरयदृच्छाद्यन्यतमानपेक्षं कारणं जगतोऽभ्युपगतं भवता, न तु यथा लोकनये क्वचित् कालोऽपि नियतिरपीत्यादि । **स्वतन्त्रत्वाच्च तस्य** प्रकृतिपुरुषयोः स्वरूपभेदपरिज्ञापनस्य स्वार्थस्यानुरूपश्रोत्राद्येकादशेन्द्रियग्रामस्य शब्दबुद्ध्यादिविकल्पग्रामस्य वचनादानविहरणानन्दोत्सर्गकर्मशब्दाद्यर्थग्रामस्य च निर्वर्तने स्वतन्त्रत्वान्न कारणान्तरापेक्षास्ति । **सर्वपुरुषार्थप्रवृत्तत्वाच्च** कृतार्थस्याकृतार्थस्य च यथासङ्ख्यं साम्यावस्थाने निवृत्तौ च प्रयोजनाभाव इत्यत आह --**निरवशेषपुरुषविषये स्वान्यत्वज्ञापने कृते कृतकृत्यत्वात् किं साम्यावस्थानेन ? अकृतेऽप्यकृतकृत्यत्वात् किं प्रतिनिवृत्त्या प्रयोजनम्,** असिद्धौदनसूपकारनिवृत्तिवत् ? इति तदवस्थमप्रयोजनत्वम् । अत्र चोद्यम्--ननु प्रागुक्तम् --**अनभिव्यक्तिसाम्यावस्थाने चायुक्ते, अप्रयोजनत्वात्, निर्वृत्तानिर्वृत्तार्थक्रियौदासीन्यव**दिति, अतः पुनरुक्तमिति । अत्र ब्रूमः--न, कारणान्तरापेक्षाप्रतिषेधपरत्वादस्य, प्रवृत्तिनिवृत्त्योः प्रधानस्य अप्रयोजनत्वमात्रप्रतिपादनपरत्वात् तस्येत्यदोषः । § 161

**अव्यक्तिसाम्यावस्थानानुपपत्तेश्चे**ति । अप्रयोजनत्वादिभिरनभिव्यक्तिसाम्यावस्थाने अनुपपन्ने, ततश्चाव्यक्तिसाम्यावस्थानानुपपत्तेः **किमिति** किं कारणं जगदेवंस्वभावमिति न गृह्यते ? इत्यभिसम्बन्धः । **सततसमवस्थितस-**

१ अ] अग्निर्भि॰ प्र॰ ॥
१५ य] यदृच्छायद्यत्यतदपि प्र॰ ॥
२२ स्थाने] निवृत्ते च प्र॰ ॥
२६ म] पृ॰ ४० पं॰ ३ ॥
२६ चा] वायुक्तेnayacakra-ms-ya ॥
३१ स्थानानु] नुपपत्तिः प्र॰ ॥

**मनुप्रवृत्ती**ति, सततं सर्वकालं समवस्थिता नित्यानुपरता समनुप्रवृत्तिः कारणकार्यप्रवृत्त्यात्मिका प्रकर्षेण वृत्तिर्यस्य तदिदं जगत् सततसमवस्थितसमनुप्रवृत्ति । **प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभाव**मिति, प्रत्यक्षाणि च तानि कारणानि च प्रत्यक्षकारणानि मृत्पिण्डदण्डचक्रोदकसूत्र- कु- - /ms लालादीनि घटादीनां कार्याणाम्, तानि नानाजातीयानि, तन्तुतुरीवेमकुविन्दादीनि पटादीनामित्येवंप्रकाराणि, तेषां भेदाः प्रत्यक्षकारणनानाभेदाः, तैस्तेषां वाभिव्यक्तिर्घटपटादिकार्यरूपेण, सैव स्वभावो यस्य तदिदं प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावम् । किं तत् ? **जगत्** । **एवे**त्यवधारणे, किमवधारयति ? प्रत्यक्षदृष्टशुक्रशोणिताहारादिकारणान्येव इत्यवधारयति । किमतो निरस्तम् ? अव्यक्तादि अदृष्टं कारणान्तरम् । तस्माद् दृष्ट**कारणनानाभेदाभिव्यक्तिस्वभावमेवेदं जगत् किमिति नाभ्युपगम्यते ?** किमित्यदृष्टं कारणान्तरं परिकल्प्यते ? इति । एवं तावत् कारणे कार्यसदसत्त्वानियम उक्तः । § 162

44/mj

शिवकस्थासकोसकुशूलघटकपालशकलशर्करिकापांशुवातायनरेणुपुनरुपचयप्राप्तानन्त्यस्कन्धपांशुमृत्पिण्डादेरनियतादिसदसद्भूतकारणाध्यासाविमुक्त्यनिर्मूलत्वं कार्यस्य । § 163

अतोऽवगम्यतां न किञ्चिदन्यत् फलं तच्छास्त्रेण क्रियते यल्लोकव्यवहार- § 164

कार्यानियमोऽपि च । कार्यमेव सदसद्भूतकालादिविशेषकारणमेवेत्यनियमः प्रधानादिशास्त्रकारपरिकल्पितकारणपूर्वकमेवेति वा । किं कारणम् ? तथानुगम्यमानदृष्टान्ताभावात् । किं तर्हि ? एतावान्नियमः -- **कारणाध्यासाविमुक्त्यनिर्मूलत्वं कार्यस्ये**ति, तथानुगम्यदृष्टार्थत्वात्, **मृत्पिण्डशिवके**त्यादि**पांशुमृत्पिण्डादे**रित्यन्तस्य दण्डकस्योपरि **अनियतादिसदसद्भूतकारणाध्यासाविमुक्त्यनिर्मूलत्व**मिति वक्ष्यमाणसम्बन्धत्वात् । कार्यमेव, स-

---

१ नित्या ] नित्या
अनुप॰nayacakra-ms-bhā ॥
३ नुप्र ] ॰प्रवृत्ति
क्षकारणनानाभेदादिव्यक्ति॰ प्र॰ ॥
४ च ] च तानि
प्रत्यक्ष॰nayacakra-ms-bhā ॥
९ इ ]
इत्यवधारयंतेnayacakra-ms-bhā ।
इत्यवधार्यंते nayacakra-ms-pā
nayacakra-ms-ḍe
nayacakra-ms-līṃ । इत्यवधार्यते
nayacakra-ms-vi
nayacakra-ms-raṃ
nayacakra-ms-hī ।
तुलना--एवेत्यवधारणे, किमवधारयति ?
लोकेऽर्थमवधारयति --नयचक्रवृ॰ पृ॰
३९-- २ ॥
१० अ ] अदृष्टकारणा॰
nayacakra-ms-bhānayacakra-ms-vi
विना ॥
१९ का ] कार्यमेव सद्भूतकालादि॰ प्र॰ ॥
२२ णाध्या ] ॰ध्यासाधिमुक्त्य॰ प्र॰ ॥
२३ रित्य ]
॰त्यंत्यस्यnayacakra-ms-ya ।
॰त्यस्य nayacakra-ms-bhā ॥

देव असदेव वा कारणं कालादि, सादिकारणमित्यस्य वाऽनियमप्रदर्शनार्थमुदाहरणमाह --**मृत्पिण्डशिवके**त्यादि यावत् **पांशुमृत्पिण्डादे**रिति, एषां - /ms मृत्पिण्डाद्यवस्थाविशेषाणां वातायनरेणुपर्यन्तानामेव लोके दृष्टत्वात् पुनरुपचयात् प्राप्तमानन्त्यं येषां स्कन्धानां ते **पुनरुपचयप्राप्तानन्त्यस्कन्धाः** वातायनरेणुभ्यः प्रभृति पुनरुपचयक्रमेण पांशु-मृत्पिण्ड-शिवक-स्थास-कोसक-कुशूल[घट-कपाल-]शकल-शर्करिका-पांशु-वातायनरेणव इति चक्रकक्रमेण कारणकार्यानियमो दृष्टः । उत्क्रमेणापि च सङ्घातभेदाभ्यां कार्यकारणसदसत्त्वानियमो दृष्टः, पिण्डमुपमृद्य शिवककरणात् शिवकं चोपमृद्य पिण्डकरणात् स्थासकादीनामन्यतममवस्थाविशेषमुपमृद्यापि पिण्डादिकरणात् क्रियाक्रियाफलक्रमेण च कदाचित् कारणकार्यानियमदर्शनादि**त्यनियतादि,** इत्थमनियत आदिरस्येत्यनियतादि, जगदिति सम्बध्यते, तदेव अनियतसदसद्भूतकारणकार्यम्, अ[नियतादिसद]सद्भूतं कारणम्, तस्य अध्यासस्तेन वा कारणेन अध्यासोऽधिष्ठानम् । तेन कारणाध्यासेन अविमुक्तिरत्यागः कारणसामान्याविनाभावः, न तु अत्यन्तनिर्मूलोत्पत्तिविनाशलक्षणकार्यत्वं खपुष्पवत्, तथैव लोके दृष्टत्वात् । तया अविमुक्त्या अनिर्मूलत्वं कार्यभूतस्य जगतः । § 165

**अतः** प्रोक्तहेतोर्दृष्टकार्यकारणसदसत्त्वानियमात् परपरिकल्पितप्रधानाद्यदृष्टैककारणानुपपत्तेः कालादिविशेषकारणैक्यानुमानाभावाच्च कारणसामान्यमात्रानुमानाच्चा**वगम्यताम्--न किञ्चिदन्यत् फलं तच्छास्त्रेण क्रियते,** निरर्थकानि शास्त्राणीत्यर्थः । किं तत् ? **यल्लोकव्यवहारफलादतिरिच्य वर्तेत,** - /ms यदपेक्ष्य शास्त्राणि सार्थकानि स्युः । तस्मादवगम्यताम्--इदं जगल्लोकप्रसिद्धमेव अनियतानुपरताद्यन्तदृष्टकारणकार्यप्रबन्धमिति । न तु यथान्यैः कल्पितम्--उपरतव्यापारं सत् प्रधानमतीन्द्रियं पुनरिन्द्रियग्राह्यत्वादिभावेन जगत् सृजति, पुनरात्मानं संहृत्य उपरतव्यापारं तिष्ठति । न चात्यन्तासत्कार्यं क्षणोत्पन्नविनष्टमसम्बद्धमूलं वैतदिति । **इति**शब्दो हेत्वर्थः । को हेतुः 45/mj ? शास्त्रनैरर्थक्यम् । कस्मिन् साध्ये ?

* * *

फलादतिरिच्य वर्तेत इति वृथैवमादौ शास्त्रारम्भः । अत्र तु शास्त्रमर्थवत् स्यात्— इदङ्काम इदं कुर्यादिति । अर्थ्यो हि क्रियाया एवोपदेशः,

१ वा] वा कालादि कालादि सादिnayacakra-ms-bhā ॥
५ कोस] °कोसकुशूलशर्करिका°nayacakra-ms-ya ॥
६ पां] °पांसु°nayacakra-ms-bhā ॥
१० का] कारणाकार्या° nayacakra-ms-bhā ॥
१३ स्तेन] °स्तेन कारणेन प्र° ॥
१९ किञ्चिद] °दन्यत्र फलं प्र° ॥
२० का] °काणि शास्त्रा°nayacakra-ms-ya ॥
२२ ताद्य] °द्यन्तरदृष्ट°nayacakra-ms-ya ॥
२४ उ] उपहृतव्यापारंnayacakra-ms-ya ॥
२५ हेत्व] हेत्वर्थोnayacakra-ms-bhā । अत्र हेत्वर्थे इति पाठः समीचीनतर इति भाति ॥

चित्रादिवत्, न तु लौकिके एव गृह्यमाणेऽर्थे इदमेवं नैवं वेति विचारः । अनुपहतेन्द्रियमनःप्रत्यक्षेण लोके यथासौ

* * *

शास्त्रारम्भवृथाभावे, अत आह **--वृथा एवमादौ शास्त्रारम्भः** । **क्व** तर्हि शास्त्रमर्थवत् स्यादिति चेत्, अतीन्द्रिये पुरुषार्थसाध्यसाधनसम्बन्धे । कोऽसौ ? इत्यत आह **--अत्र तु शास्त्रमर्थवत् स्यात्— इदङ्काम इदं कुर्यादिति** । **इदं** शब्देन सर्वनाम्ना सामान्यवादिना सर्वाः क्रियाः फलेच्छाप्रेरितास्तत्साधनीः सूचयति अग्निहोत्रं जुहुयात् स्वर्गकामः, पुत्रकामो यजेत, पशुकामो यजेत, अन्नाद्यकामो यजेत इत्याद्याः, क्रियाक्रियाफलसम्बन्धस्यातीन्द्रियत्वात् । उक्तं च **--अप्राप्ये शास्त्रमर्थवत्** मीमांसाद° ६ । २ । १८, प्रत्यक्षादिप्रमाणैरनधिगम्ये इत्यर्थः । § 166

**अर्थ्यो** हीत्यादि । अर्थादनपेतोऽर्थ्यः । **हि**शब्दो यस्मादर्थे, यस्मात् **क्रियाया एवोपदेशोऽर्थ्यः** ससाधनायाः फलादिसम्बन्धिन्याः, **चित्रादिवत्** । **आदि**ग्रहणाच्चित्रपुस्तकाष्ठकर्मादिवत् । यथावयवस्थानविन्यासवर्णसंयोगप्रविभागविषयविनियोगाद्युपदेश एवोपयोगात् सार्थकः, न कुड्यवर्णचित्रकारादिस्वरूपोपदेशः तत्र तदनुपयोगात्, तथा नित्यक्षणिकत्वादितत्त्ववर्णनं घटपटादेः त्रिगुणकारणपूर्वकत्वादिवर्णनं जगतः सततसंप्रवृत्तिक्षणिकानुपाख्यत्वादिवर्णनं वा । स्यान्मतम्--प्रधानक्षणभङ्गादिवादारम्भोऽप्रत्यक्षविषयत्वात् सार्थकः, क्रियाक्रियाफलसम्बन्धोपदेशवदिति । एतदपि नोप-

---

७ वा] °वा-
विनाnayacakra-ms-ḍenayacakra-ms-līṃ
। अत्र **°वाचिना** इति पाठः समीचीनतर
इति भाति ॥
९ इ] **इत्याद्याः क्रियाः क्रियाफल°**
nayacakra-ms-ya ।
nayacakra-ms-bhā प्रतौ तु
**इत्याद्याः क्रि°** इति पाठादनन्तरः
**अर्थादनपेतोऽर्थ्यः** इत्यन्तः सर्वोऽपि पाठो
नास्त्येवात्र । तुलना—
क्रियाक्रियाफलक्रमेण च पृ° ४४ पं° १५
। क्रियाक्रियाफलसम्बन्धोपदेशवदिति पं°
१५ ॥
१० त्वा] **°त्वादुक्तं**
**धप्राप्ये**nayacakra-ms-ya । अशास्त्रा
तूपसम्प्राप्तिः शास्त्रं स्यान्न प्रकल्पकम् ।
तस्मादर्थेन गम्येताप्राप्ते वा **शास्त्रमर्थवत्**
॥--इति **जैमिनि**प्रणीते **मीमांसादर्शने** पाठः
॥
१२ य]
**यस्मादर्थो**nayacakra-ms-bhā ॥

१३ प] **°पदेशोर्थः**nayacakra-ms-ya
। **°पदेशार्थः** nayacakra-ms-bhā ॥
१३ लादिस]
**°सम्बन्धेत्याः**nayacakra-ms-bhā ।
**°सम्बन्धत्याः** nayacakra-ms-raṃ
nayacakra-ms-hī । **सम्बन्धेव्याः**
nayacakra-ms-raṃ
nayacakra-ms-hī विना
nayacakra-ms-ya ॥
१६ क्ष] **°क्षणिकचादित्वतत्ववर्ण-
नं**nayacakra-ms-raṃnayacakra-ms-hī
। **°क्षणिकवादित्वतत्ववर्णनं**
nayacakra-ms-raṃ
nayacakra-ms-hī विना
nayacakra-ms-ya ।
**°क्षणिकवादितत्ववर्णनं**
nayacakra-ms-bhā ॥
१९ सा] **सार्थकः क्रियाफलसम्ब-
न्धो°**nayacakra-ms-bhā
॥

पद्यते, यस्माद् **न तु लौकिक एव गृह्यमाणेऽर्थे इदमेवं नैवं वेति** सार्थको **विचार** इत्यभिसम्बन्धः, प्रसिद्धार्थविषयस्य विचारस्यानिष्ठादोषनिष्ठत्वात् । **नेति** प्रतिषेधे, **तुर्विशेषणे** लोके भवो लौकिकः, देशकालपुरुषक्रिया- - /ms विशेषाद्यपेक्षरूपादिमदर्थे कार्यकारणमृत्पिण्डादिघटाद्याकारादिके प्रत्यक्षत एव गृह्यमाणे इदं सर्वं सत्त्वरजस्तमःसंज्ञत्रिगुणात्मकमेव, न चैतदेवम्; क्षणभङ्गजन्मात्मकम्, न वैवम् इत्यादिविचारः किंसम्बन्धः ? किम्फलः ? को वात्र पुरुषार्थसाधनपरिज्ञानोपयोगः ? इति विमृश्यतां भवद्भिरेव । § 167
46/mj

व्यवस्थितस्तथा गृह्यत एव । तत्र पुनर्वचनं प्रत्यक्षप्रसिद्धेर्बाधकमापद्यते अनुवादादिभावाभावे सिद्धे सत्यारम्भो नियमार्थः इति लोके दृष्टत्वात्--न यथेदं लोकेन गृह्यत इति । § 168

प्रत्यक्षाप्रमाणीकरणे सर्वविपर्ययापत्तिस्तर्कतः--अलोमा हरिणः, चतुष्पात्त्वे सत्युत्लुत्य गमनात्, मण्डूकवत् । मण्डूकोऽपि लोमशः, तस्मादेव, हरिणवत् । § 169

स्यान्मतम्--लोकदर्शनमप्रमाणम्, अव्युत्पन्नलोकप्रत्यक्षव्यभिचारात्, मृगतृष्णिकादिष्विवेति । अत्रोच्यते--तथा सति प्रत्यक्षस्य अप्रमाणीकरणं प्रमाणज्येष्ठस्य । मा च मंस्थाः--मृगतृष्णिकादिप्रत्यक्षज्ञानव्यभिचारात् सर्वं प्रत्यक्षं व्यभिचरतीति । किं तर्हि ? **अनुपहतेन्द्रियमनःप्रत्यक्षं** यत् तन्न व्यभिचरतीति गृह्यताम् । तादृशा च **प्रत्यक्षेण लोके** घटपटादि**र्यथासौ** येन प्रकारेण येन स्वरूपेण **व्यवस्थितस्तथा गृह्यत एव** स्वस्थेन्द्रियमानसैः, **तत्र** तादृशेऽर्थे **पुनर्वचनम् इदमेवं नैवं वेति, प्रत्यक्षप्रसिद्धेर्बाधकमापद्य-**

---

१ इ] **इदमेवं वेति** प्र° । लौकिक एव गृह्यमाणेऽर्थे **इदमेवं नैवं चेति** विचारोऽर्थवान्न भवति । यदि भवेत् चतुष्पात्त्वे सति उत्लुत्य गमनात् लोमशो हरिणवद् मण्डूकः, तत एव निर्लोमा हरिणो मण्डूकवत् स्यादिति प्रसिद्धिविपरीतं सिध्येल्लोकाप्रामाण्यकरण इति तत् प्रसक्तमिहापीत्यत आह--न तु लौकिक एव गृह्यमाण इत्याद्युक्तदर्शनवदिति । इति वक्ष्यते **नयचक्रवृत्तौ** पृ° ९८-- २ ॥
२ विष] **°षयस्य निष्ठादोषनिष्ठत्वात्**nayacakra-ms-bhā । **°षयस्य विचारस्यानित्वादोषनिष्टत्वात्** nayacakra-ms-ya । अत्र अनिष्ठा अनवस्था, तथा च अनवस्थादोषवत्त्वादित्यर्थः ॥
३ तु] **तुविशेषणे**nayacakra-ms-ya ॥
४ रूपादिम] **°मर्थे** nayacakra-ms-ya ॥
४ टाद्या] **°द्याकाशादिके** प्र° ॥
५ मःसंज्ञ] **°संज्ञित्रि°**nayacakra-ms-bhā ॥
६ न] **न चैवम्**nayacakra-ms-ya ॥
१५ न] **°नगप्रमा°** प्र° ॥
१६ तृष्णिका] **°कादिष्वेवेति** प्र° ॥
१७ मा] **मा व मंस्थाः** प्र° ॥
१७ तृष्णिकादिप्र] **°प्रत्यक्षं ज्ञान°** प्र° ॥
२० मा] **°मानसेस्तत्र** प्र° ॥

ते यदि तद् वचनं प्रमाणं स्यात् । न पुनस्तत् प्रमाणम्, तया प्रसिद्ध्या स्वयमेव बाध्यमानत्वात् । प्रसिद्धार्थं वचनं न नियमादनुवादाद् वा अन्यत्र प्रमाणं स्यादित्यतो ज्ञापकमाह --**अनुवादादिभावाभावे** यः **सिद्धे सति आरम्भो नियमार्थः** स **इति** परिभाषाया **लोके दृष्टत्वात्,** लोकव्यवहारानुवादि व्याकरणादिशास्त्रमपि लोकत एवेति कृत्वा । कीदृक् पुनस्तद् वचनम् ? इत्यत आह --**न यथेदं लोकेन गृह्यत इति । इति**शब्दः प्रदर्शने, इदं तद्वचनं प्रसिद्धेर्बाधकाभिमतमिति प्रदर्श्यते । कथम् ? **ने**ति प्रतिषेधे, येन - /ms
प्रकारेण **यथा,** यथा मृत्पिण्डदण्डचक्रसूत्रोदककुलालपरिस्पन्दनिर्वृत्तो घटः पृथुकुक्ष्यादिस्वरूप उदकाद्याहरणसमर्थ इति लोकेन चक्षुरादिभिर्गृह्यते नायमेवंस्वभावः । किं तर्हि ? **यथाहं** ब्रुवे सर्वसर्वात्मकत्वात् पटकटरथादिरूपोऽपि, गुणकर्मसामान्यविशेषसमवायाश्रयः परमाण्वाद्यस्मदत्यन्तापरोक्षपार्थिवद्रव्यारब्धस्तद्यतिरिक्तोऽवयवी, रथाङ्गादिवद् बुद्ध्या विभज्यमानो विभज्यमानो न परमाणुषु न रूपादिषु न बुद्धिमात्रे वा तिष्ठति निरुपाख्यत्वादिति वा, **त**था तथा भवतीति । शास्त्रविद्वचनं मा भूदनर्थकमिति **प्रसिद्धेर्बाधकमापद्यते** इति न्याय्यमुच्यते । यथोक्तम्—

प्रमाणानि प्रवर्तन्ते विषये सर्ववादिनाम् ।
संज्ञाभिप्रायभेदात्तु विवदन्ते तपस्विनः ॥ सिद्ध° द्वा° २० । ४
इति ।§ 172

तस्मादप्रमाणं प्रत्यक्षविरुद्धत्वाच्छास्त्रकारवचनम् । § 173

शास्त्रकारवचनप्रामाण्ये वा प्रत्यक्षाप्रामाण्यम् । एवं च सति को दोषः ? तत्र **प्रत्यक्षाप्रमाणीकरणे सर्वविपर्ययापत्तिस्तर्कतः**, सर्वभावानां प्रत्यक्षप्रमाणसिद्धानां विपर्यय आपादयितुं शक्यते । तद्यथा --**अलोमा हरिणः, चतुष्पात्त्वे सत्युत्प्लुत्य गमनात्, मण्डूकवत् । मण्डूकोऽपि लोमशः, तस्मादेव** हेतोः, **हरिणवत्** । यूका पक्षिणी, षट्पात्त्वात्, भ्रमरवत् । भ्रमरोऽपक्षः, षट्पात्त्वात्, 47/mj

* * *

पृथिवी अवसुधा, पदार्थत्वात् महाभूतत्वात्, आकाशवत् । एवं शेषपदार्थेष्वपि दृष्टान्तभेदात् ।

---

१ प्र] प्रमाणतया प्र° ॥
७ प्र] प्रतिषेधnayacakra-ms-bhā । प्रतिषेधः nayacakra-ms-ya ॥
९ इति] लोके चक्षु°nayacakra-ms-bhā ॥
१२ र] रथाङ्गादिबद्बुद्ध्या प्र° ॥
१३ मा] °माणुपु न प्र° ॥
१३ बुद्धिमा] °मात्रे या तिष्ठति प्र° ॥
१५ प्र] अत्र प्रत्यक्षप्रसिद्धेर्बाधकमापद्यते इत्यपि पाठः स्यात् ॥
२० स] सर्वविषययापत्ति°nayacakra-ms-bhā । सर्वविषयापत्ति° nayacakra-ms-ya ॥
२२ ण्डूकोऽपि] लोमश[शो ?] वैतस्मा°nayacakra-ms-bhā ॥
२३ ट्] पद्यात्वात्nayacakra-ms-ya । षद्दत्वात् nayacakra-ms-bhā ॥
२४ ट्] पद्यात्वात्nayacakra-ms-ya ॥

शास्त्वनिरूपणविपरीतमप्रमाणं न हरिणस्वरूपादि, निरपवादत्वात् । न,

* * *

यूकावत् । तथा ***पृथिव्यवसुधा, पदार्थत्वात्, आकाशवत्** । असाधारणधर्मसम्बन्धेनापि रूपरसगन्धस्पर्शधर्मसम्बन्धिनी न भवति । *पृथिव्यवसुधा, **महाभूतत्वात्,** आकाशवत् । आकार-गौरवरौक्ष्यादिधर्मसम्बन्धिनी न भवति, तत एव, तद्वत् । तथा बौद्धमतेऽपि पृथिवी न भूः, महाभूतत्वाद् रूपत्वाच्च, जलवत्; न कक्खट-धारणधर्मा, तत एव, तद्वत् । **एवं शेषपदार्थभेदेष्वपीति** जलानला- निलेषु व्योमनीन्द्रियादिषु आत्मादिषु यथाप्रक्रियं यथासम्भवं च स्वरूपनिराकरणम्, असाधारणधर्मनिराकरणे च पदार्थत्वमहाभूतत्वरूपत्वादिहेतुकानि साधनानि योज्यानि महदहङ्कारतन्मात्रेन्द्रियशब्दादिषु आत्मनि च द्रव्यगुणकर्मसामान्यविशेषसमवायेषु सप्रभेदेषु नामरूपयोः संज्ञाविज्ञानवेदनासंस्कारेषु क्षित्युदकज्वलनपवनेषु चक्षुरादिषु रूपादिषु च । **दृष्टान्तभेदादिति** भूमेराकाशदृष्टान्तवदाकाशस्य भूम्यादिदृष्टान्तेन तथा जलादेरपि परस्परतस्ते ते धर्मा निराकार्या इतरमितरस्य दृष्टान्तं कृत्वेति । § 174

- /ms

तार्किक आह --**शास्त्वनिरूपणविपरीतमप्रमाण**मित्यादि । शास्त्रेण निरूपणं शास्त्रे निरूपणं वा शास्त्वनिरूपणम् । सन्दिग्धविपर्यस्ताव्युत्पन्नबुद्ध्यनुग्र हार्थं हि शास्त्रेण निरूपयन्ति सन्तो वस्तु अनुग्राह्येभ्यः शिष्येभ्यः- -प्रकृतिपुरुषावेव, क्षणभङ्गः, विज्ञानमात्रमेव, द्रव्यगुणादि वा, इति शास्त्रस्यापवादत्वाच्छास्त्रेणापोदिताद् विपरीतं वस्तूच्यमानमप्रमाणम्, शास्त्रस्य सन्देहाद्यपवादत्वात् । **न** हरिणादिस्वभावादि अप्रमाणम्, तत्र शास्त्रेण मोह एव व्यापार इति तन्निरपवादं **हरिणस्वरूपादि,** तस्य **निरपवादत्वात्** तत्तु लोकेन यथा गृहीतं तथैव । **आदि**ग्रहणाद् मण्डूकस्वरूपादि । तत् प्रमाणमेव,

---

३ *] **पृथिव्यप्सुधा**nayacakra-ms-ya । **पृथिव्यच्सुधा** nayacakra-ms-bhā ॥

४ *] एतच्चिह्नान्तर्गतः **पृथिव्यवसुधा** इत्यत आरभ्य **न भवति** इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

७ क] **करकट°**nayacakra-ms-ya । दृश्यतां पृ° १६ टि° ८ । खरस्वभावा न मही, भूतत्वात्, तद्यथा अनिल इत्यादिषु हेत्वाद्यसिद्धिः स्वत एव योज्या । **--माध्यमिकवृ°** पृ° ३३ ॥

९ निराक] **°करणं असाधा°** प्र° । अत्र स्वरूपनिराकरणेऽसाधारणधर्मनिराकरणे च इत्यपि पाठः स्यात् ॥

१६ स्ता] **°स्तात्युत्पन्नबुद्ध्यनु°**nayacakra-ms-ya । **°स्तायुत्पन्नबुद्धिनु°** nayacakra-ms-bhā ॥

१७ नुग्र] **°ग्रहार्थं किं शास्त्रेण** प्र° । अत्र पूर्वापरसन्दर्भानुसारेण **किं**स्थाने **हि** इत्येव शुद्धं प्रतीयते । प्राचीनलिप्यां ककारहकारयोः समानलेखदर्शनात् **हि** इत्यस्यैव **किं** इति विकृतिर्जातेति प्रतिभाति ॥

१९ व] **वस्तूभ्यमानप्रमाणं**nayacakra-ms-bhā । **वस्तूभ्यनुमानप्रमाणं** nayacakra-ms-ya ॥

२० शास्त्रेण] **नोह एव**nayacakra-ms-vi विना । अस्मिन् पाठे तु न ऊह एव इत्यर्थः स्यात् ॥

२२ आ] **त्र्यादिग्र°**nayacakra-ms-ya ॥

निरपवादत्वात्, अग्नेरिवौष्ण्यमिति । अत्रोच्यते --**न, सर्वस्यैवापोदितत्वात्** । यथा हि शास्त्रं घटादिवस्तु परिकल्प्य अपवादप्रवृत्तं तथा हरिणादिस्व-रूपं प्रत्यक्षतो लोकप्रसिद्धमप्यपवदति निरङ्कुशत्वात् । तत् कथमिति चेत्, **देशकालकृतविशेषैकान्तिन** इत्यादि । § 175

अथवा **शास्त्रनिरूपणविपरीतमप्रमाणम्,** निरपवादत्वात् इति वक्ष्यते, शास्त्रनिरूपणं पृथिवीगन्धवत्त्वादि प्रकृतिपुरुषादि वा, तस्य वा विपरीतं तर्कतः प्रतिपाद्यमानमप्रमाणम्, प्रत्यक्षतर्कयो- - /ms, 48/mj

* * *

सर्वस्यैवापोदितत्वाद्देशकालकृतविशेषैकान्तिनः । सर्वसर्वात्मकैकान्ते म-ण्डूकोऽपि लोमश एव, अर्थानर्थविषयसामान्यविशेषनानात्वैकान्तेऽतदात्म-कत्वात्

* * *

रविषयार्थत्वाच्छास्त्रस्य केनापोद्यते शास्त्रम् ? **न हरिणस्वरूपादि** । विपरीत-मप्रमाणम् इति वर्तते, कस्य ? प्रत्यक्षप्रसिद्धेः । कस्मात् ? सापवादत्वात् । तद्धि हरिणालोमत्वादि प्रत्यक्षप्रसिद्धेन लोमशत्वादिना निराक्रियमाणत्वाद-प्रमाणमेवेति । लौकिक आह --**न, सर्वस्यैवापोदितत्वा**दिति । शास्त्रेष्वपि हि **हरिणस्वरू**पादि प्रत्यक्षसिद्धमपोद्यत एव, कथं निरपवादत्वं शास्त्राणाम् ? वरं हरिणस्वरूपादिविपरीतप्रतिपादनं तर्कतः तन्मात्रापवादात्, तार्किकैस्तु शास्त्रेण सर्वमपोद्यते प्रत्यक्षतो लोकप्रसिद्धं कारणं कार्यं च । तत् कथमिति चेत्, **देशकालकृतविशेषैकान्तिनः**, *देशकृतः कालकृतश्च विशेषो देशकाल-कृतविशेषः, स एवैकान्तः, स यस्यास्त्यसौ देशकालकृतविशेषैकान्ती, तस्य वादिनः प्रतिदेशं प्रतिसमयं च सर्वं विशिष्टमेव न समानं किञ्चित् । अतो यावदणुशो रूपादिशो विज्ञानमात्रशो निरुपाख्यत्वशश्च भेदात् कुतो हरिणः ? कुतस्तस्य लोमाद्यवतिष्ठते ? अतः सर्वमपोदितम्, *किं वा नापोदितम्

---

१ स] सर्वस्येवा॰nayacakra-ms-vi विना ॥
२ टादिव] ॰वस्तु परपरिकल्प्यापवा॰nayacakra-ms-ya । ॰वस्तु परिकल्पापवा॰ nayacakra-ms-bhā ॥
४ का] ॰कालकृतविशेषैकान्निकंन इत्यादिnayacakra-ms-bhā । ॰कालविशेषैकान्निकंत इत्यादि nayacakra-ms-ya ॥
६ पृ] पृथिवीयत्ववत्वादि प्र॰ ॥
६ वा] चा विप॰nayacakra-ms-bhā ॥
१२ र] ॰रविषयत्वार्थद्रशास्त्र-स्यnayacakra-ms-bhā । ॰रविषयार्थत्वाच्छाच्छास्त्रस्य nayacakra-ms-ya । अत्र ॰रविपर्ययार्थत्वाच्छास्त्रस्य इत्यपि पाठः सम्भवेत् ॥
१३ प्र] प्रत्यक्षसिद्धेःnayacakra-ms-ya ॥
१४ त्वा] ॰त्वादिवा निरा॰nayacakra-ms-bhānayacakra-ms-ḍe ॥
१९ *] प्रदेश॰ प्र॰ ॥
२१ स] सर्व-विशिष्ट॰nayacakra-ms-ḍenayacakra-ms-līṃ विना ॥
२३ *] किं वा नापोदितम् इति पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥

? किं वात्र प्रत्यक्षमनुमानं चेति ? § 176

तथा **सर्वसर्वात्मकैकान्ते मण्डूकोऽपि लोमश एव, स्थावरस्य जङ्गमतां गतस्य स्थावरस्य स्थावरतां जङ्गमस्य स्थावरतां जङ्गमस्य जङ्गमतां गतस्य**

इति वचनादिति । ननु तेन वादिना सर्वं समर्थितम्, नापोदितमिति चेत्, सर्वस्य सर्वात्मकत्वे सर्वैक्यात् किं तत् सर्वम् ? इत्यपोदितमेवेति, भिन्नार्थसमूहवाचित्वात् सर्वशब्दस्य । § 177

- /ms **अर्थानर्थविषयसामान्यविशेषनानात्वैकान्ते** । अर्थविषयं सामान्यम्, अर्थविषयश्च विशेषः । तद्यथा--द्रव्यस्य पृथिव्यादेरर्थविषयं सामान्यम् --**रूपरसगन्धस्पर्शवती पृथिवी** वै॰ सू॰ २ । १ । १, यत्रैतच्चातुर्गुण्यं सा पृथिवी, रूपस्पर्शरसद्रवस्नेहवत्य आपः, एवं यत्र रूपस्पर्शौ तत् तेजः, यत्र स्पर्श एव स वायुरिति सामान्यम् । विशेषः पुनरितरेतरधर्मव्यावृत्तिभिरितरत्र चतुःपञ्चद्व्येकगुणत्वं यथासङ्ख्यम् । तेषामेवानर्थसामान्यं पृथिवीत्वम्, तत्सम्बन्धलभ्यत्वात् पृथिवीबुद्ध्यभिधानयोः, एवमप्तेजोवायुत्वानि सामान्यानि, *विशेषाश्चेतरेतरेभ्यस्त एव, स्वसामान्यभेदा वा विशेषाः । तानि द्रव्याणि गुणाः कर्म सामान्यानि विशेषाः तत्समवायलक्षणश्च सम्बन्ध इत्येते पदार्था
49/mj नाना, स्वतत्त्व-प्रयोजन-लक्षण-मत्यभिधान

* * *

कुतोऽणुहरिणमण्डूककारणकार्यधरणिसंयोगगुणोत्प्लवनकर्मभवनव्यावृत्तितथासमवायाः, द्रव्यादीनामितरेतरानात्मकत्वादत्यन्तमन्यत्वान्निर्मूलत्वात् सर्वथा तत्त्ववृत्तिव्यतीतत्वात्, खपुष्पवत्; अन्यथा बालकुमारवत् ।

* * *

भेदादिति ये वदन्ति तेषां तन्नानात्वैकान्ते **अतदात्मकत्वात् कुतोऽणुहरिणमण्डूककारणकार्यधरणिसंयोगगुणोत्प्लवनकर्मभवनव्यावृत्तितथासमवायाः ?**

---

८ विष] **॰विषयं च** प्र॰ ॥
११ व्यावृत्तिभिरित]
॰रित्यत्रnayacakra-ms-bhā ॥
१४ *]
**विशेषाण्वेतरे॰**nayacakra-ms-bhā ।
**विशेषावेतरे॰** nayacakra-ms-ya ॥
१४ वा] **विशेषा**
**एतानि**nayacakra-ms-ya ॥
१५ गु] **गुणाकर्म** ।
**सामान्यानि**nayacakra-ms-bhā ॥
१६ ना] **नानात्वस्वतत्व॰** प्र॰ । अत्र **नाना, स्वस्वतत्त्व॰** इत्यपि पाठः स्यात् ॥
१६ म] **॰मित्य॰** प्र॰ । **मतिः** बुद्धिः इत्यर्थप्रत्यवेक्षया अत्र **॰मत्य॰** इति शुद्धं प्रतीयते । **॰मित्य॰** इति यथाश्रुतपाठेऽभिरुचौ तु मानं मितिः इति व्युत्पाद्य **मितिः** प्रमितिः यथार्था बुद्धिरित्यर्थो ज्ञेयः । तुलना--अभिहाणबुद्धिलक्खणभिन्ना वि जहा सदत्थ+ओऽणन्ने । दिक्काला+इविसेसा तह दव्वा+ओ गुणा+इ+आ ॥ विशेषाव॰ भा॰ २११० । एतदेव हि विशेषाणां विशेषत्वं यत्ते परतो विशिष्यन्ते । एतदेव लक्षणं भेदानां संज्ञा-स्वालक्षण्य-स्वतत्त्व-प्रयोजन-**मति**भेदात्--इति **विशेषावश्यकभाष्यस्य कोट्टार्य**गणिवादिमहत्तरविरचितटीकाया हस्तलिखितप्रतौ पृ॰ १७४-- २ ॥
२१ कु]
**कुतोऽणुमण्डूकहरिणकारणकायधरणि॰** प्र॰ । अत्र पूर्वापरसन्दर्भपर्यालोचनेन **कुतोऽणुहरिणमण्डूककारणकार्यधरणि॰** इति पाठ एव समीचीन इति प्रतीयते । दृश्यतां पं॰ २२ ॥
२२ वा] **॰वाय** ।
**अणु॰**nayacakra-ms-bhā । **॰वाय अणु॰** nayacakra-ms-ya ॥

अणुग्रहणेन हरिणमण्डूकसमवायिकारणद्रव्यग्रहणं परमतेन । हरिणमण्डूकग्रहणेन सम्बद्धाणुद्व्यणुकाद्यारम्भनिर्वृत्तावयविद्रव्यं कार्यं गृह्यते । तस्य हरिणमण्डूकादिद्रव्यस्य धरण्यां संयोगो गुणः, उत्प्लवनं कर्म, भवनं भावः सत्ता, व्यावृत्तिरन्यभवनविलक्षणो विशेषः, तेषां तथासमवायः सम्बन्ध इति षडप्येते पदार्था वक्ष्यमाण**खपुष्प**दृष्टान्ता न सन्ति । का तर्हि भावना ? नास्ति परपरिकल्पितं द्रव्यम्, गुणकर्मसामान्यविशेषानात्मकत्वात्, खपुष्पवत्, तेभ्योऽ- त्यन्तमन्यस्वभावत्वाद्वा । न गुणकर्मणी स्तः, अद्रव्यात्मत्वात्, खपुष्पवत् । एवं सामान्यविशेषसमवायाः । न द्रव्यं सत्, अगुणकर्मत्वात्, खपुष्पवत्; असामान्यविशेषात्मत्वात्, खपुष्पवत् । न पृथिवी पृथिवी इति व्यपदेश्या, पृथिवीत्वा**दत्यन्तमन्यत्वात्,** जलवत् । पृथिवीत्वं पृथिवीत्वम् इति न व्यपदेश्यम्, पृथिव्या अत्यन्तमन्यत्वात्, जलतावत् । न सन्ति गुणकर्मसामान्यविशेषसमवायाः, अद्रव्यात्मकत्वात्, खपुष्पवत् । एवमेकैकमपि **इतरानात्मकत्वात्** खपुष्पवन्नास्ति, इतरस्वरूपवद् वा न स्वात्मस्वरूपमिति शेषपदार्थदृष्टान्तभेदादायोज्यमिति । द्रव्यं भव्यम्, **द्रव्यं च भव्ये** पा० ५ । ३ । १०४ इति वचनाद् भवतीति भव्यं द्रव्यम्, भवनं च भावः । भवनादन्यत्वाद् द्रव्यादयो न सन्त्येव वन्ध्यापुत्रवत् । भवनमपि द्रव्यादन्यत्वाद् नास्त्येव वन्ध्यापुत्रवत् । न भवति वा द्रव्यम्, भवनस्वरूपानापत्तेः, वन्ध्यापुत्रवत् । एवं भवनमपि द्रव्यस्वरूपानापत्तेः तद्वत् । एवं गुणादयोऽपि । एवं व्यावृत्तिः समवायश्चेति । § 178 - /ms

अथवा क्रियागुणव्यपदेशाभावादसदेव कार्यं पश्चाज्जायते इति, तन्नोपपद्यते, **निर्मूलत्वात्,** खपुष्पवत् । न सन्ति गुणकर्मसामान्यविशेषसमवायाः, अद्रव्यत्वात्, खपुष्पवत् । एवमगुणत्वाद् गुणादन्ये, असामान्यत्वात् सामान्यादन्ये, अविशेषत्वाद् विशेषादन्ये, अकारणत्वात् कारणादन्यत्, अकार्यत्वात् कार्यादन्यद् नास्ति । एतेभ्यो हेतुभ्यः **कुतोऽणुहरिणमण्डूककारणकार्यधरणिसंयोगगुणोत्प्लवनकर्मभवनव्यावृत्तितथासमवायाः ?** न सन्तीत्य-

---

२ स] **संबंधाणु**nayacakra-ms-bhānayacakra-ms-vi विना ॥
४ व्यावृत्तिर] **°रप्यभवन°**nayacakra-ms-ya ॥
५ व] अत्र वक्ष्यमाणखपुष्पदृष्टान्तान्न सन्ति इत्यपि पाठः स्यात् ॥
६ ख] एतादृशचिह्नान्तर्गतः **खपुष्पवत्** इत्यत आरभ्य **अगुणकर्मत्वात् खपुष्पवत्** इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
८ अ] अत्र **अगुणाकर्मत्वात्** इत्यपि पाठः स्यात् । तुलना--अगुणाकर्मत्वादिभ्यो हेतुभ्यः पूर्वोक्तवदभाव एव पृ० ५३ पं० ५ ॥
१३ स्वा] **स्वात्मरूप°**nayacakra-ms-bhā ॥
१४ भेदा] **°भेदाद्योज्य°**nayacakra-ms-bhā ॥
१४ द्र] **द्रव्यं भव्यं द्रव्यवदभव्य इति**nayacakra-ms-bhā । **द्रव्यं द्रव्यवदभव्य इति** nayacakra-ms-ya ॥
२० प] **पंचज्ञोयत इति**nayacakra-ms-ya । **पचाज्ञायत इति** nayacakra-ms-bhā ॥
२४ कुतोऽणुह] **°हरिणामण्डूकाकारणकार्यधरणि°**nayacakra-ms-ya । **°हरिणामण्डूकाकारणाकार्याधरणि** nayacakra-ms-bhā ॥

- /ms, 50/mj थः । तदुपसंहृत्योच्यते **--सर्वथा तत्त्ववृत्तिव्यतीतत्वात्** । तस्य भावस्तत्त्वम्, तत्त्वस्य वृत्तिस्तदतत्त्वेन तत्स्वरूपान्यस्वरूपेण च वृत्तिः,

* * *

हरिणादिस्वरूपविपरीतोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेवातथात्वमिति चेत्, न, उक्तवत् तुल्यत्वाल्लोकस्य चाप्रमाणीकृतत्वादेवं वचनेऽभ्युपगमविरोधात् ।

लोमशालोमशैक्ये सपक्षासपक्षावृत्तिवृत्त्योरतर्क इति चेत्, न, दृष्टान्तस्य

* * *

यथा द्रव्यमेव वर्तते तथा तथा रूपरसादिगुणस्थितिगत्यादिक्रियाभवनव्यावृत्तिसम्बन्धि, एकपुरुषपितृपुत्रत्वादिधर्मसम्बन्धित्ववदिति । तां वृत्तिं सर्वथा व्यतीतत्वादणुद्रव्यादिषड्पदार्थानां सविकल्पानामसत्त्वम् । **खपुष्पवदित्यन्ते** दृष्टान्त उपदिष्टः सर्वत्र द्रष्टव्यः, तथा च योजितम् । **अन्यथेति** वैधर्म्येण **बालकुमारवत्** । यदस्ति तत् तदतत्स्वरूपतत्त्वव्यतीतं न भवति, यथा बाल एव कुमारः कुमार एव च बालः, अन्यौ च तौ अवस्थाभेदात्, बालत्वमूलं कुमारत्वं कुमारत्वान्यच्च बालत्वमिति तदतत्त्वरूपा तत्त्ववृत्तिः, तां व्यतीत्य न स बालः कुमारो वेति, स च संस्तत्त्ववृत्तिव्यतीतो न भवतीति । § 179

**हरिणादिस्वरूपवितथोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेवातथात्वमिति चेत्** । चेदित्याशङ्कायाम्, स्यादाशङ्का--हरिणस्वरूपं लोमशत्वम्, तस्य वितथोक्तिरलोमा हरिण इति, तस्यां वितथोक्तौ प्रसिद्धिविरुद्धा प्रतिज्ञा यस्य स प्रसिद्धिविरुद्धप्रतिज्ञः, तद्भावः प्रसिद्धिविरुद्धप्रतिज्ञत्वम्, तस्मादेव अतथात्वमिति । अत्रोच्यते **--न, उक्तवत् तुल्यत्वात्** । नेति प्रतिषेधे, नैतदप्युपपद्यते । *किंवत् ? **उक्तवत्**, उक्तेन तुल्यमुक्तवत् । यथोक्तम् **--शास्त्वनिरूपणविपरीतमप्रमाणं निरपवादत्वादिति**, तेनैतदपि तुल्यम्— हरिणादिस्वरूपवितथोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेव अतथात्वम् इति, अत्रापि उत्तरस्यापि
- /ms तुल्यत्वात् । कथमिति चेत्, **न, सर्वस्यैवापोदितत्वादित्यादि** सर्वं तदेव यावत्

---

१ त] तद्रूप॰nayacakra-ms-bhā ॥
७ सादिगु]
॰गुणास्थिति॰nayacakra-ms-ya ।
॰गुणेस्थिति॰ nayacakra-ms-bhā ॥
८ तां] ता वृत्तिंnayacakra-ms-ya ॥
९ त्वा] ॰त्वात्
गुणद्रव्यादि॰nayacakra-ms-ya ।
कुतोऽणुहरिणमण्डूककारणकार्यधरणिसंयोगगुणोत्प्लवनकर्मभवनव्यावृत्तितथासमवायाः पृ॰ ४९ पं॰ १ इत्यत्र उल्लिखिता अणुद्रव्यादयः षट् पदार्था अत्राभिप्रेता इति बोध्यम् ॥
१२ बा]
बालत्वमूलंnayacakra-ms-ya ।
बालत्वमलं nayacakra-ms-bhā ॥
१३ कुमार] ॰रत्वान्यं
चnayacakra-ms-ya । ॰रत्वात्पंच
nayacakra-ms-bhā ॥
१५ प्र] ॰प्रतिज्ञात्वा॰ प्र॰ ॥
१६ स्या] स्यादाशंक्यहरिकहरिण॰ प्र॰ ॥
१८ प्र] ॰प्रतिज्ञात्वम्
nayacakra-ms-bhā ॥
१८ अ]
अतथातथात्व॰nayacakra-ms-ya ॥
१९ नैत]
॰दप्युपद्यतेnayacakra-ms-bhā ।
॰दप्युत्पद्यते nayacakra-ms-ya ॥
२० *] किंवद्रक्तवत् प्र॰ ॥
२० थोक्त] दृश्यतां पृ॰ ४७ पं॰ ३ ॥
२२ प्र] ॰प्रतिज्ञात्वादेव प्र॰ ॥
२३ न] दृश्यतां पृ॰ ४७ पं॰ ३ ॥

**खपुष्पवत्, अन्यथा बालकुमारवदिति** । किञ्च, **लोकस्य चाप्रमाणीकृतत्वात्तथा** कुतः प्रसिद्धिविरोधः ? क्व वा तत् प्रसिद्धमिति । किञ्चान्यत् **--एवं वचनेऽभ्युपगमविरोधात्** । ननु भवतामेकान्तवादिनां लोकमप्रमाणीकृत्य लोकप्रसिद्धिविरुद्धप्रतिज्ञत्वदोषापादनमभ्युपगमविरोधाय कल्पते, तस्मादयुक्तमेवं वक्तुमिति । § 180

स्यान्मतम्--*प्रतिज्ञादोषद्वारेण हरिणस्वरूपादिविपरीतप्रतिपादनाप्रामाण्यं न शक्यते मयाभ्युपेतविरोधात्, हेतुदोषद्वारेण शक्नोमीत्यत आह **--लोमशालोमैक्ये सपक्षासपक्षावृत्तिवृत्त्योरतर्क इति चेत्** । चतुष्पात्त्वे सति उत्प्लुत्य गमनाद् हरिणो निर्लोमा, लोमशो मण्डूकः इत्युभयोरुभय 51/mj

* * *

प्रत्यक्षप्रसिद्धिविषयत्वाल्लोकस्याप्रमाणीकृतत्वात् प्रत्यक्षस्य च इहेव तवैव सर्वत्रापि सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वापत्तेः । अविशेषैकान्ते तावत् कुतोऽन्यपक्षोऽसपक्षो

* * *

धर्मापत्तौ लोमशालोम्नोरैक्ये सति अयं हेतुर्धर्मपरिकल्पकृताद्भेदाद् हरिणालोमत्वे साध्ये सपक्षे निर्लोमन्यवृत्तेः असपक्षे च लोमशे वृत्तेर्विरुद्धो हेतुः चतुष्पात्त्वे सति उत्प्लुत्य गमनात् इत्यापद्यते, सपक्षासपक्षवर्तित्वात् साधारणानैकान्तिको वा, लोमशालोमैक्ये पक्षाभेदाद् धर्माभेदे च सपक्षासपक्षाभावादसाधारणानैकान्तिको वा । तस्मादेषोऽतर्कः । अतर्कत्वाच्चास्य हरिणादिस्वरूपविपरीतप्रतिपादनमप्रमाणम् । चेदित्याशङ्कायाम्, एवं चेन्मन्यसे, तन्न, **दृष्टान्तस्य प्रत्यक्षप्रसिद्धिविषयत्वात्** । दृष्टान्तो हि लोके प्रत्य-

---

१ ख ] दृश्यतां पृ° ४९ पं° ३ ॥
१ माणीकृ ] अत्र °कृतत्वात्तथा कुतः इति पाठः स्यादिति सम्भाव्यते ॥
२ क्व ] क्ष वा प्र° ॥
२ प्र ] प्रसिद्धिमितिnayacakra-ms-ya ॥
३ ए ] nayacakra-ms-bhā विनान्यत्र --एवं वने nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । एवं चने nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
४ प्र ] °प्रतिज्ञ+एत्वदोषा° प्र° ॥
४ दोषापा ] °पादान°nayacakra-ms-ya ॥
६ * ] प्रतिज्ञादोषद्वारेण स्वरूपादि°nayacakra-ms-bhā । प्रतिज्ञादोषट्द्वारेण स्वरूपादि° nayacakra-ms-ya ॥
७ याभ्यु ] °पेतविधात् हेतु°nayacakra-ms-bhā । °पेतविधात हेतु° nayacakra-ms-ya ॥
८ क्षा ] °क्षवृत्ति°nayacakra-ms-ya ॥
९ ग ] गमनाद् इति पाठः सर्वासु प्रतिषु नास्ति ॥
९ रिणो ] निलोमा प्र° ॥
१६ व ] वर्तित्वाधारणा° प्र° ॥
१८ क्षाभा ] °भावसाधारणा° प्र° ॥
१९ तिपा ] °पादनप्रमाणम्nayacakra-ms-ya । °पादितप्रमाणम् nayacakra-ms-bhā ॥
२० त ] तत्र प्र° ॥

क्षप्रमाणप्रसिद्धो घटपटादिरर्थः, तद्विषयं च साध्यसाधनसमन्वयव्यतिरेक-विभावनम्, सर्वानुमानस्य सर्वावयवानां च तद्बलेन साध्यसिद्धौ सामर्थ्य-सिद्धेः । यथोक्तम् **--दृष्टान्तबलाद्ध्यवयवसिद्धिः, तदाश्रयत्वात् सर्वावयवानाम् । तेन दृष्टान्तस्वतत्त्वमन्विष्यते । प्रत्यक्षत्वाच्च तस्य तद्वद् वस्तुप्रतिपत्तेरशेषं तव सिद्धान्तदर्शनमवभोत्स्यते । प्रत्यक्षग्राहे च सिध्यति परोक्षग्राहः सिध्येत्,**
- /ms **तदसिद्धौ सम्भाव- नाऽभाव एव** इति । ततस्तस्य दृष्टान्तस्यासिद्धिः, **लोकस्याप्रमाणीकृतत्वात् प्रत्यक्षस्य च** । दृष्टान्तस्याभावे कुतो दार्ष्टान्तिक-साध्यसाधनसमन्वयव्यतिरेका इति प्रत्यक्षनिराकरणे तर्कासिद्धिरेव, कुत-स्तर्कातर्कत्वविचारः ? इति तदवस्थो हरिणादिस्वरूपविपरीतापत्तिदोषः ।

§ 181

किञ्चान्यत् **--इहेवे**त्यादि याव**दसत्त्वापत्ते**रिति । **यथा** हरिणस्वरूप-निराकरणे भवान् यं यं दोषं ममापादयति स स **तवैव,** अत्र च वीप्सार्थो द्र-ष्टव्यः--तव तवैव एकान्तवादिनः, **एव**कारोऽवधारणे, **यथास्मिन्** साधने मम दोषो नास्ति, तवैव इति त्वदभ्युपगमानुरूप्येणोपपादितं **तथा** नात्रैव, किं तर्हि ? **सर्वत्रान्यत्रापि** पक्षहेतुदृष्टान्तेषु दोषास्तवैव न ममेत्यर्थः । **अप्रमाणीकृत-त्वाल्लोकस्य प्रत्यक्षस्य च** इति वर्तते, कारणान्तरोपन्यासोऽप्येषोऽभिधीयते **--सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वापत्तेः** । यदिष्टं भवतामन्वयव्यतिरेकाभ्याम-र्थानुमानम्, तौ च सपक्षासपक्षयोर्वृत्त्यवृत्ती, तद्बलेन साध्यसिद्धिः, तयोरेव चासत्त्वमापद्यते । ततस्तस्याः सपक्षासपक्षवृत्त्यवृत्त्योर्यथासङ्ख्यमसत्त्वापत्तेः तवैव अविशेषैकान्तवादिनो विशेषैकान्तवादिनः तदुभयानेकत्वैकान्तवादिनो वेति हेतूद्देशमात्रमेतत् । तदिदानीं प्रत्येकं विधीयते--तत्र **तावदविशेषैकान्ते कुतोऽन्यपक्षः, असपक्षः, व्यावृत्तिर्वा ?** अविशेषः सामान्यम्, अविशेष एव इत्येकान्तः सर्वं सर्वात्मकमिति, तस्मिन्नविशेषैकान्ते तव ग्राहे कुतोऽन्यपक्षः,
52/mj अन्यस्य पक्षोऽन्यपक्षः, प्रति

* * *

४ म] **°मन्विध्यते** प्र° ॥
५ त] **तत्सिद्धान्तदर्शनमेवं भोत्स्यते**nayacakra-ms-ya ॥
६ स] **संभावनाभाव एव** प्र° ॥
८ त] **तर्कासिद्धेरेव कुतसुतर्कातर्क-त्व°**nayacakra-ms-bhā
॥
११ इ] **इहैवे°** प्र° । अत्र पूर्वापरप्रत्यवेक्षया **इहेव** इति पाठ एव साधुरित्याभाति । तुलना--इति साधूच्यते--तवैव अविशेषैकान्तवादिनः सप-क्षासपक्षवृत्त्यवृत्त्योर्हरिणादिस्वरूपविपरीता पादनसाधनेष्विव असत्त्वापत्तिरिति--पृ° ५२ पं° १३ ॥
११ य] **तथा हरिण°** प्र° ॥
१२ वान्] **यं यं दोषं यं ममापादयति** nayacakra-ms-bhā । **यं यं दोषमापादयति** nayacakra-ms-ya ॥
१३ ए] **एकान्तरवादिनः** प्र° ॥
१४ त] **तथा मात्रैव** प्र° ॥
१९ चा] **वासत्वमा°** प्र° ॥
१९ स्त] तस्याः इति पञ्चम्यन्तमेतत् । तस्या असत्त्वापत्तेरित्यभिसम्बन्धः ॥
२० वादिनो] **विशेषैकान्तवादिनः** इति पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२३ त] **तन्मित्रविशेषांते तव** प्र° ॥

व्यावृत्तिर्वा, तत्त्व एव तथाभिव्यक्तेः ? विशेषैकान्ते कुतस्तत्पक्षः सपक्षस्तत्सत्त्वं वा, तथाऽस्थितेः ? उभयानेकत्वैकान्ते साध्यसाधनधर्मधर्मिण एव कुतः, तथाऽपूर्वत्वात् ?

* * *

वादिनोऽन्यस्याभावात् तवापि चान्येनाविशेषात् सर्वसर्वात्मकैकत्वाविशेषात् - /ms । अथवा अन्यस्य वचनस्याभावात् त्वद्वचनात्मकत्वादेव सर्ववचनानां त्वदन्यवचनत्वविशेषाभावादेव वा । अथवा किं नः परवादिवचनयोरभावाभ्युपगम-निष्ठुरवचनाभ्याम् ? अन्यश्चासौ पक्षश्चेत्यन्यपक्षोऽर्थोऽस्तु, स कुतः, त्वत्पक्षसर्वैकात्मकत्वादर्थाविशेषैकान्तात् ? एवं नित्यः शब्दः, अकृतकत्वात्, आकाशवत् इति वादिनोऽनित्यशब्दपक्षवक्तृवचनवाच्यानामभावः । तद्वत् तदनित्यधर्मसामान्येन समानस्य घटादेरभावान्नित्यैकान्तवादिनोऽसपक्षाभावः । तदभावाद् व्यावृत्त्यभावः । **वाशब्दात्** कुतः स्वपक्षः सपक्षः तद्वृत्तिर्वा, सर्वसर्वात्मकैकत्वाभेदादेव ? स्यान्मतम्--आविर्भावतिरोभावयोरभूत्वा भावाद् भूत्वा चाभावादनित्यत्वकृतकत्वे स्त एव अविशेषवादिनोऽपीति । एतच्चायुक्तम्, कुतः ? **तत्त्व एव तथाभिव्यक्तेः** । तत्त्वमेकत्वम्, तस्मिंस्तत्त्व एव **तथा** तेन प्रकारेण तथा अभिव्यक्तेः । किमुक्तं भवति ? मृद एवाभिन्नाया अन्तर्लीनाविर्भावतिरोभावमात्रत्वादङ्गुलिवक्रप्रगुणावस्थयोरिव अवस्थाविशेषाभिव्यक्तेः किमन्या मृत् सा पिण्डशिवकघटाद्यवस्थासु ? तस्मात् तत्त्व एव तथाभिव्यक्तेः कुतोऽन्यपक्षोऽसपक्षो व्यावृत्तिस्तत्पक्षः सपक्षस्तत्सत्त्वं चेति साधूच्यते--*तवैव अविशेषैकान्तवादिनः सपक्षासपक्षवृत्त्यवृत्त्योर्हरिणादिस्वरूपविपरीतापादनसाधनेष्विव असत्त्वापत्तिरिति । § 182

तथा **विशेषैकान्ते कुतस्तत्पक्षः सपक्षस्तत्सत्त्वं वा ?** देशतः परमाणुशो रूपादिशो विज्ञानमात्रशोऽनुपाख्यत्वशश्च भेदात् कालतोऽत्यन्तपरमनिरुद्धक्षणादूर्ध्वमनवस्थानाच्च कुतस्तत्पक्षः, अत्रापि तस्य पक्षो वक्तुर्वचनस्य वा, - /ms

४ वादिनोऽन्य ] °न्यस्यभावात् प्र° ॥
६ व ] °वचनत्वंविशेषा°nayacakra-ms-ya ॥
६ वा ] किं न पर° प्र° ॥
६ व ] °रचनयो°nayacakra-ms-bhā ॥
६ योर ] °रभावाद्युपगमनिष्ठुरवचनान्याम् प्र° ॥
८ त्व ] त्वत्पक्षं सर्वै° प्र° । अत्र त्वत्पक्षे सर्वै° इत्यपि पाठः स्यात् ॥
८ का ] °कात्मत्वाद°nayacakra-ms-ya ॥
८ नित्यः ] नित्यशब्दः प्र° ॥
१३ चा ] चाभावानित्यत्व° प्र° ॥
१७ स्था ] °विशेषोभिव्यक्तेःnayacakra-ms-ya ॥
१७ घ ] °घटाव्यवस्थासु प्र° ॥
१८ कुतोऽन्य ] °न्यपक्षे । सपक्षे । व्यावृत्ति°nayacakra-ms-bhā । °न्यपक्षे सपक्षाव्यावृत्ति° nayacakra-ms-ya ॥
१९ * ] ते चैवnayacakra-ms-ya । दृश्यतां पृ° ५१ पं° १ ॥
२० वृ ] वृत्त्यवृत्त्याहरिणा°nayacakra-ms-ya ॥
२१ वा ] वा देरातः पर°nayacakra-ms-bhā । चादेरातः पर° nayacakra-ms-ya ॥
२३ णादू ] दृश्यतां पृ° २६ टि° ७ ॥
२३ प ] पक्षे । वक्तु°nayacakra-ms-bhā । पक्षेर्वक्तु° nayacakra-ms-ya ॥

स एव पक्षः इत्यर्थ एव वा, अनित्यः शब्दः इति धर्मधर्मिणोर्विशेषणविशेष्ययोश्चासम्भवात् । कुतः सपक्षः, अर्थान्तरसम्बद्धसामान्याभावात्, साध्याभावसामान्याभ्युपगमे सपक्षासपक्षाविशेषप्रसङ्गात् । कुतः सत्त्वं तत्र, तदभावात् कृतकत्वादिसविकल्पधर्मान्तराभावात् परस्परविलक्षणनिर्व्यापारधर्ममात्रत्वात् सर्वधर्माणां निरुपाख्यत्वशून्यत्वपरमार्थत्वाच्च । पूर्ववच्च प्रतिवादिपक्षासपक्षव्यावृत्त्यभावो **वाशब्दात्** । *पूर्ववच्चोपसंहृत्य तदर्थावबोधनो हेतुरुच्यते **--तथाऽस्थितेः** । तेन प्रकारेण **तथा** क्षणिकनिर्व्यापारशून्यत्वप्रकारेण अस्थितेः कस्यचिदर्थस्येति विशेषैकान्तेऽपि सर्वत्र सपक्षवृत्त्याद्यसत्त्वापत्तिरित्थमिति । § 183

तथा **उभयानेकत्वैकान्ते** । **उभयमिति** सामान्यविशेषौ, तदुभय**मनेकं** भिन्नं परस्परतः इत्येतस्मिन्नप्ये**कान्ते साध्यसाधनधर्मधर्मिण एव कुतः ?**
53/mj साध्यस्य तावदनित्यत्वस्याभावः, धर्ममात्रस्य

* * *

दृष्टान्ताभ्युपगमात् प्रत्यक्षप्रमाणीकरणाल्लोकत्वापत्तेः प्रतिज्ञातव्याघातः ।

शास्त्रत्वादलोकत्वमिति चेत्, न, लोकाश्रयत्वात् तेषां शास्त्राणाम् । तानि हि शास्त्राणि सामान्यविशेषकारणकार्यमात्राणां सर्वत्राध्यारोपेण प्रणीतानि ।

* * *

निर्मूलत्वात्, खपुष्पवत्; तथा साधनस्यापि कृतकत्वस्य । कृतमित्यनुकम्पितं कुत्सितमज्ञातं वा कृतकम् । निर्मूलत्वं पुनर्द्रव्यादत्यन्तभिन्नत्वादिति धर्मयोरभावः । धर्मिणोरपि शब्दघटयोः अगुणाकर्मत्वादिभ्यो हेतुभ्यः पूर्वोक्तवदभाव एव । तत्सङ्ग्रहहेतुरप्युच्यते **--तथाऽपूर्वत्वात्** । अपूर्वत्वममूलत्वम्, द्रव्यगुणादीनां परस्परतोऽत्यन्तमन्यत्वात् । एवं तावत् सपक्षासपक्षवृत्त्यवृत्तिविपरीतत्वात् तथैव अतर्कत्वदोषो दृष्टान्तबलात् तर्कसिद्धेरित्यविशेषविशेषोभयानेकत्वैकान्तवादेषूक्ता दोषाः । § 184

किञ्चान्यत्, दृष्टान्तस्य प्रत्यक्षत्वात्, अनुमानत्वाद्धेतोः, उपनयस्य उप-
- /ms मानत्वात्, आगमत्वात् प्रतिज्ञायाः, **दृष्टान्ताभ्युपगमात् प्रत्यक्षप्रमाणीकरणमापन्नम्** । तस्माच्च **लोकत्वम्,** दृष्टान्तसंवादित्वप्रतिपादनार्थत्वाच्छास्त्रार्थस्य तार्किकाणां तर्कैरुपतिष्ठतां व्याख्यार्थम् । यथोक्तम् **--लौकिकपरीक्षकाणां**

---

३ स ] सपक्षासपक्षविशेष°nayacakra-ms-ya ‖
५ निरुपा ] °पाख्यशून्यत्व°nayacakra-ms-bhā ‖
५ च्च ] प्रतिवादिपक्षव्यावृत्त्यभावो प्र° । यथा पूर्वं वाशब्दात् स्वपक्ष-सपक्ष-तद्वृत्त्यभावो विवक्षितस्तथात्रापि वाशब्दात् प्रतिवादिपक्षासपक्षव्यावृत्त्यभावो विवक्षित इति भावः । दृश्यतां पं° ८ ‖
६ * ] पूर्वावच्चो° nayacakra-ms-ya ‖
१० त्वैका ] °कान्तेन उभयमितिnayacakra-ms-ya ‖
१० म ] °मनेकांभिन्नंnayacakra-ms-bhā । °मनेकाभिन्नं nayacakra-ms-ya ‖
१२ ता ] तावनित्वस्याभावः प्र° ‖
२४ वा ] °वादेष्टक्ता प्र° ‖
२८ व्या ] व्याख्यार्थयथोक्तलौकिक° प्र° ‖

**यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः** न्यायसू० १ । १ । २५ इति । तथा लोको दृष्टान्तः, तद्विरुद्धं यदभिधीयते तद् दृष्टान्तविरुद्धमिति । ततः को दोष इति चेत्, **प्रतिज्ञातव्याघातः** । किं प्रतिज्ञातम् ? **शास्त्वनिरूपणविपरीतमप्रमाणम्, न हरिणस्त्वरूपादि, निरपवादत्वा**दिति, तद्व्याहन्यते शास्त्वप्रमाणीकरणे, प्रत्यक्षबलाल्लोकस्य प्रवृत्तत्वात् । § 185

**शास्त्रत्वादलोकत्वमिति चेत्** । स्यान्मतम्--ननूक्तं **शास्त्रकाराः स्वदृष्टार्थप्रतिपादनकुशला बुद्धिसंवादार्थं दृष्टान्तप्राणैस्तर्कैः शास्त्रार्थान् प्रतिपादयन्ति, न पुनः शास्त्रार्था लोके प्रत्यक्षीकर्तुं शक्याः । तत एव तदर्थवाचीनि शास्त्राण्यलोकः** इति । तच्च **न, लोकाश्रयत्वात् तेषां शास्त्राणाम्** । **तानि हि शास्त्राणि,** यस्मादर्थे हिशब्दः, यस्मात् तानि **सामान्यविशेषकारणकार्यमात्राणां** सामान्यमात्रस्य दध्नि कारणमात्रस्य स्नेहशौक्ल्यादेर्दृष्टस्य विशेषमात्रस्य चार्चिष्षु नवनवोत्पादविनाशरूपस्य दृष्टस्य **सर्वत्राध्यारोपेण प्रणीतानि** । क्षीरस्यैव स्नेहादिसामान्यस्य कारणाख्यस्य संस्थानमात्रं दृष्ट्वा दध्याद्यवस्थाविशेषमन्तरेण तस्य सामान्यस्य स्थित्यभावमपश्यद्भिः यथेदं संस्थानमात्रम्, न कार्यं न विशेषस्तथान्येऽपि घटपटादयोऽर्थास्त्रिगुणप्रधानसंस्थानमात्रम् इति सर्वत्राध्यारोप्य तदर्थानि शास्त्राणि प्रणीतानि कारणमेव सामान्यमेव सर्वत्र इत्येतस्यार्थस्य प्रतिपादनप्रसङ्गेन । तथा अर्चिषां प्रतिक्षणोत्पत्तिविनाशपार्थक्यानि दृष्ट्वा रूपरसस्पर्शगन्धमूर्त्यादिसामान्यावस्थानमन्तरेण तदसम्भवमपश्यद्भिः यथेदं विशेषमात्रम्, न सामान्यं न कारणं तथान्येऽपि महीमहीध्रसरित्समुद्रद्वीपगगनतारानक्षत्रग्रहगणादयो भावाः इति सर्वत्राध्यारोप्य तदर्थानि शास्त्राणि तत्प्रतिपादनप्रसङ्गवचनरचनाविभङ्गतरङ्गापारतोयसमुद्रीभूतानि प्रणीतानि । § 186 - /ms

54/mj

अन्यत्र दृष्टस्याध्यारोपाद् घटतत्त्ववदलौकिकत्वमिति चेत्, न, व्यामोहस्य मृगतृष्णिकादिवदलौकिकत्वात्तथा । § 187

---

१ त] यथा लोकोnayacakra-ms-ya ॥
२ त] तद्विरुद्धपदभिधीयतेnayacakra-ms-ya ॥
३ शा] दृश्यतां पृ० ४७ पं० ३ ॥
४ द्व्याह] °हन्यते प्रमाणी°nayacakra-ms-bhā ॥
८ शास्त्रार्था] लोकप्रत्यक्षीकर्तुंnayacakra-ms-bhānayacakra-ms-vi । लोकं प्रत्यक्षीकर्तुं nayacakra-ms-bhā nayacakra-ms-vi विना ॥
९ शा] शास्त्रान्यलोकः प्र० ॥
११ द] दग्निकारण°nayacakra-ms-ya ॥
१२ त्रा] °त्राव्यारोपेणnayacakra-ms-bhā । त्राप्यारोपेण nayacakra-ms-ya ॥
१५ योऽर्थास्त्रिगु] °र्थास्ति गुण°nayacakra-ms-bhā । °र्थास्तेगुण° nayacakra-ms-ya ॥
१८ पा] °पार्थस्यानिnayacakra-ms-ya ॥
२२ प्र] प्रापितानि प्र० ॥

तथाच तत्र प्रतिज्ञादीनामप्यनुपपत्तिः, यदि यथा लोकेन गृह्यते न तथा वस्तु, प्रतिज्ञा तावद् यथा गृह्यमाणा अविशेषादेर्न तथा स्यात् । ततश्चांशे § 188

**अन्यत्र दृष्टस्याध्यारोपाद् घटतत्त्ववदलौकिकत्वमिति चेत्** । स्यान्मतम्--लौकिकम् इति इन्द्रियग्राह्यमुच्यते घटरूपादिवत् । यदत्र घटे घटतत्त्वं पृथुकुक्ष्याद्याकारविशेषस्तदन्यत्र घटान्तरेऽध्यारोप्यते, तच्च नास्ति अध्यारोपादेव । लोकसंवादात्तु प्रतिपादनार्थोऽध्यारोपः । एवं शास्त्राणामप्यध्यारोपादेवालौकिकत्वमिति नास्ति प्रतिज्ञातव्याघातदोषो यं भवान् मन्यते **लोकत्वापत्तेरिति** । अत्र ब्रूमः **--न, व्यामोहस्य मृगतृष्णिकावदलौकिकत्वात् तथा** । तेन प्रकारेण **तथा,** सत्यम्, भवति तदलौकिकमविशुद्धत्वाद् मृगतृष्णिकादिज्ञानवत् । विशुद्धलोकस्य न पुनरुपपद्यते, मृगतृष्णिकाचदेव तस्य व्यामोहस्याप्रामाण्यप्रसङ्गात् । ऊषरभूप्रदेशे ग्रैष्मोष्मसन्तप्तचक्षुषो रविकिरणाः पतिताः प्रत्युत्पतन्तो दूराद् व्यामोहहेतवस्तोयवदाभासन्ते । तस्माच्छास्त्रविज्ञानस्य मृगतृष्णिकाविज्ञानवदप्रामाण्यप्रसङ्गादसमञ्जसोद्ग्राहम् ।

§ 189

किञ्चान्यत् **--तथा च तत्र प्रतिज्ञादीनामप्यनुपपत्तिः** । न केवलं शास्त्रविज्ञानाप्रामाण्यमेव, किं तर्हि ? तेन प्रकारेण **तथा च** एवं च कृत्वा तत्र सति तस्मिन्नलौकिके मृगतृष्णिकावत् प्रतिज्ञादीनामप्यवयवानामनुपपत्तिः । कथम् ? **यदि यथा लोकेन गृह्यते न तथा वस्तु** । **यदीति** पराभ्युपगमं दर्शयति, यदि प्रतिपादनकौशलेन प्रतिपादनबुद्धिसंवादमात्रत्वेन दृष्टान्तमुपादाय यथाहं युक्त्योपपादयामि शास्त्रेण च तथा तद् वस्तु न तु यथा लोकेन गृह्यते तथेति भवतोऽभिप्रायः । तत्र **प्रतिज्ञा तावद् यथोक्ता गृह्यमाणा अविशेषादेर्न तथा स्यात्** । अविशेषैकान्तवादे तावत् सर्वस्य सर्वात्मकत्वात् नित्यः शब्दः इति प्रतिज्ञा यथा श्रोत्रेण गृह्यते न तथा भवितुमर्हति । किं कारणम् ? नेत्रादिग्राह्यरूपाद्यात्मिकापि सेति कृत्वा ।

- /ms

४ अ] **अन्यत्र दृष्टस्याध्यारोद् घटतत्वदवलौकिक°** प्र° ॥
५ य] **यद+उ घटे** प्र° ॥
५ त] **°तत्वं धिकुक्ष्याद्या°** प्र° । अग्रेऽपि किञ्चिदीदृश एव अशुद्धः पाठ इत्थं दृश्यते--घटेनैव घटः क्रियत इति मृत्पिण्डघटेन ऊर्द्धग्रीवकुण्डलौष्ठ**पृथि**थु**कुक्षि**बुध्नादिघटः क्रियते प्रकाश्यते, करोतेः प्रकाशार्थत्वात् **--नयचक्रवृ°** पृ° २१५-- २ । एतदनुसारेण अत्रापि **पृथुकुक्ष्या°** इति शुद्धं सम्भाव्यते । यथाश्रुताग्रहे तु **विकुक्ष्या°** इति पाठः कल्प्यः, विशाला कुक्षिर्विकुक्षिः पृथुकुक्षिः इति च तदर्थो ज्ञेयः ॥
७ अध्यारोपा] **°पाद्येव**nayacakra-ms-ya ॥
९ लोक] दृश्यतां पृ° ५३ पं° १ ॥
१२ ऊ] **जटरभू°**nayacakra-ms-bhā ॥
१४ स्माच्छा] **°च्छास्त्रविज्ञान-स्य**nayacakra-ms-bhā ॥
१६ प] **°पत्तिः केवलं**nayacakra-ms-ya ॥
१७ ए] **एवं कृत्वा**nayacakra-ms-ya ॥
१८ वाना] **°नामुपपत्तिः**nayacakra-ms-bhā ॥

एवं विशेषैकान्तवादेऽपि अनित्यः शब्दः इति प्रतिज्ञा अकारनिकारादिवर्णविज्ञानानां देशकालकृतात्यन्तनानात्वक्षणिकत्वशून्यत्वनिरुपाख्यत्वात् परस्परापेक्षाभावे सर्वभावाभावे च यथा गृह्यते न तथा स्यात् । एवमुभयानेकत्वैकान्ते पूर्ववदन्यतरग्राह्यस्य इतरपक्षनिरपेक्षस्याभावात् । § 190

**ततश्चांशे प्रत्यक्षविरोधः । ततश्चेति** तस्मादेव हेतोर्लोके गृह्यमाणस्य विपरीतत्वादविशेषैकान्ते तावत् प्रत्यक्षविरोधः, **अंशे भागे,** तस्यैव वस्तुनः अविशेषैकान्तवादिपरिकल्पितस्य प्रत्यक्षोपलभ्यस्य विशे 55/mj

* * *

प्रत्यक्षविरोधः, अंशे स्ववचनविरोधः, अंशेऽभ्युपगमविरोधः, स्वोक्तविपर्ययरूपाभ्युपगमात् । अथ तथा ततो न तर्हि लोकगृहीतमन्यथा ।

किञ्चित् तथा किञ्चिदन्यथा उन्मत्तप्रतिपत्तिवदिति चेत्, एवं तर्हि साक्षाल्लोकपक्षापत्त्याभ्युपगमविरोधः, किञ्चिद्ग्रहणात्तथाग्रहणादन्यथाग्रहणाच्च । भेदवद-

* * *

षत्वात् प्रत्यक्षविरोधः । **अंशे स्ववचनविरोधः,** तत्काले प्रतिपादनशब्दविशेषत्वेष्टेः । **अंशेऽभ्युपगमविरोधः,** स्वशास्त्रे सर्वत्र प्रसिद्धेन पूर्वकालाभ्युपगतेन सर्वात्मकत्वेनाधुनातनधर्मधर्मिविशेषस्य विरोधात् । **स्वोक्तविपर्ययरूपाभ्युपगमादित्यन्ते** कारणमुक्तम्, प्रत्यक्षस्ववचनाभ्युपगमानामभ्युपगमाविशेषात् । - /ms
एवं विशेषैकान्ते श्रोत्रेन्द्रियग्राह्यस्य शब्दस्य तावन्मात्रकालावस्थातुः पूर्वोत्तरवर्णसम्बन्धतद्बुद्ध्यवस्थानसोपाख्यत्वप्रत्यक्षत्वात् प्रत्यक्षविरोधः । तथैव स्ववचनस्योपपत्तेः स्ववचनेन अनित्यशब्दप्रतिज्ञा विरुध्यते । अत एव चाभ्युपगमेन विरोधः । पूर्ववत् स एव हेतुरत्रापि । तथा उभयानेकत्वैकान्ते प्रागभिहितसाधनान्येवात्र व्यापार्याणि अद्रव्यत्वाद् वन्ध्यापुत्रवद् नानित्यत्वम्, न शब्दोऽस्ति इत्यादिस्वरूपाभावः । **अचाक्षुषप्रत्यक्षगुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्, सतो लिङ्गाभावात्** वै॰ सू॰ २ । २ । २५--२६ **कार्यत्वात् कारणतो विकारात्** इत्यादिशास्त्रविहितहेतुव्याख्यानार्थं प्रतिपादनकाले त-

---

१४ श ]
°शब्दनिःशेषत्वेष्टेःnayacakra-ms-bhā
॥
१६ स ]
**सर्वात्मकत्वेन्यधुना**nayacakra-ms-ya
। **सर्वात्मकत्वेभ्यधुना**
nayacakra-ms-bhā ॥
१७ स्व ] **°स्ववचनान्यपगमा°** प्र° ॥
१८ कालाव ] **°वस्थास्तु** प्र° ॥
१९ स्थान ] **°नसोवाख्यत्व°** प्र° ॥
१९ प्र ]
**प्रत्यविरोधः**nayacakra-ms-ya ॥
१९ त ] **तथैव च**
**तस्योपपत्तेः**nayacakra-ms-ya ॥
२३ स ] **सतोपसर्गः** प्र° ॥
अचाक्षुषप्रत्यक्षगुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् । सतो लिङ्गाभावात् । नित्यवैधर्म्यात् । अनित्यश्चायं कारणतः । न चासिद्धम्, विकारात् । --**वै॰ सू॰** २ । २ । २५--२९ ॥
२४ का ] **कायत्वात्** प्र° ॥
२५ हेतुव्या ] nayacakra-ms-bhā
विनान्यत्र --**°व्याख्यातार्थं प्रति°**
nayacakra-ms-pā

त्प्रयोगात् प्रत्यक्षीकरणाच्चानित्यत्वशब्दत्वाद्यभावात् प्रत्यक्षविरोधः । स्ववचनस्य तत्कालस्य तथावस्थानाभ्युपगमात् स्ववचनविरोधः । पूर्वाभ्युपगमेन चेदानीन्तनस्य विरोधादभ्युपगमविरोधः । पूर्ववत् **स्वोक्तविपर्ययरूपाभ्युपगमादिति सर्वत्र हेतुरिति** । § 191

**अथ तथा** । अथैते दोषा मा भूवन् वितथत्वाश्रया इति तथैव इत्यभ्युपगम्यते परैः । **ततो न तर्हि लोकगृहीतमन्यथा** इत्यापन्नम् । लोकत्वाच्च प्रतिज्ञातव्याघातस्तदवस्थ इति । § 192

**किञ्चित् तथा किञ्चिदन्यथा, उन्मत्तप्रतिपत्तिवदिति चेत्** । स्यान्मतम्-- किञ्चिल्लोकेन गृहीतं तथैव भवति प्रतिज्ञादि, किञ्चिदन्यथा घटादि, लोकस्यापरीक्षकत्वात् । परीक्षकाश्च पद-वाक्य-प्रमाणविदः । दृष्टान्त उन्मत्तप्रतिपत्तिः । यथोन्मत्तोऽपरीक्षकः पदवाक्यप्रमाणानभिज्ञः किञ्चित् तथा प्रतिपद्यते किञ्चिदन्यथा, तत्प्रतिपत्तिश्चाप्रमाणं सदसतोरविशेषाद् यदृच्छोपलब्धेश्च, त-
- /ms द्वल्लोकप्रतिपत्तिरपीति । § 193

अत्रोच्यते --**एवं तर्हि साक्षाल्लोकपक्षापत्त्याभ्युपगमविरोधः** । **साक्षादिति** प्रत्यक्षत एव लोकपक्षापत्तिः । कथम् ? **किञ्चिद्ग्रहणात् तथाग्रहणादन्यथाग्रहणाच्च** । किञ्चित्त्वादेव न सर्वं सर्वात्मकम्, सर्वासर्वत्वसिद्धिश्च विभागनिर्देशात्
56/mj किञ्चित् इति । एवं तेन प्रकारेण **तथा** इति स चान्य

* * *

भेदपदार्थोपादानाच्च न तथा इति पुनर्नवोऽभ्युपगमविरोधः ।

* * *

स्तयोश्च कश्चिद्धर्मः प्रकारव्यपदेशभागेषितव्यः, तेषु त्रिष्वपि सिद्धेषु यस्मात् तथा इति घटते । एवम् अन्यथा इत्यपि, अयमन्यस्मादन्यः, अन्यश्च अस्मादन्यः इति सर्वासर्वत्वसिद्धेर्लोकपक्षापत्तिः । एवं विशेषैकान्ते देशकालकृतात्यन्तभेदनिरुपाख्यशून्यत्वेषु किं तत् स्यात् किञ्चित् इति विभज्य अन्यस्मादवस्थितादनवस्थितमसद्वान्यदिति वोच्येत विलक्षणमिति ? एवं तथा अन्यथा इति च न घटेते । एवमुभयानेकत्वैकान्ते पूर्ववद् **द्रव्यादीनामितरेतरानात्मकत्वात्** सामान्यविशेषयोः कार्यकारणयोर्वा **निर्मूलत्वादिभ्यो** वा हेतुभ्योऽसत्त्वाद् वस्तुनः किञ्चित्तथान्यथा इत्यनुपपत्तेर्लोकपक्षापत्तिः । तया

---

nayacakra-ms-ḍe nayacakra-ms-līṃ । °व्याख्यानार्थप्रति° nayacakra-ms-raṃ nayacakra-ms-hī । °व्याख्यातार्थप्रति° nayacakra-ms-vi ॥
१४ सा] **साक्षाल्लोकपह्याभ्युपगम°** प्र° । अत्र **साक्षाल्लोकपक्षापत्त्याभ्युपगम°** इत्येव पाठो युक्तः, टीकायां तथैव व्याख्यातत्वात् । दृश्यतां पृ° ५७ पं° १९ ॥
१५ क] **कथंचिद्ग्रहणात्** प्र° ॥
१६ स] **सर्वसर्वात्म°** प्र° ॥
२१ क] **कंचिद्धर्मः** प्र° ॥
२५ दिति] **चोद्येत**nayacakra-ms-ya । **वोद्येत** nayacakra-ms-bhā । वद व्यक्तायां वाचि पा° धा° १००९ इति धातोरत्र विवक्षायां तु प्रतिस्थो यथाश्रुतपाठोऽपि साधुरेव ॥
२६ द्र] दृश्यतां पृ° ४९ पं° २ ॥
२८ किञ्चित्त] **°त्तथा अन्यथा**nayacakra-ms-bhā ॥

च सह सर्वसर्वात्मकत्वादिशास्त्राभ्युपगमो विरुध्यते । एवं तावत् प्रतिज्ञा दुष्टा । प्रतिज्ञावद्धेतुदृष्टान्तावपि दुष्टावेव, तदसाधकत्वात् । उन्मत्त इति च दृष्टान्तो लोकपक्षपाताद‍ृते न सिध्यति, उत्कृष्टो मद उन्माद इति मदान्तरापेक्षो विमदत्वापेक्षो वा निर्देशः, स च लौकिक एव, तमभ्युपगम्य तन्निराचिकीर्षव एवोन्मत्ततरा इति । § 194

एवं तावद् वाक्यविषयो दोषः । इदानीमेकपदविषय उच्यते --**भेदवदभेदपदार्थोपादानाच्च न तथा इति पुनर्नवोऽभ्युपगमविरोधः** । भेदोऽस्यास्तीति भेदवान्, नास्य भेद इत्यभेदः, भेदवांश्च अभेदश्च स एवेति भेदवदभेदः, कोऽसौ ? **पदार्थः** वृक्ष इत्यादिः स्वार्थ-द्रव्य-लिङ्ग-सङ्ख्या-कर्मादिकारकरूपः । यदुक्तं क्रम-यौगपद्यचिन्तायाम्— - /ms

स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् ।
समवेतस्य तु वचने लिङ्गं सङ्ख्यां विभक्तिं च ॥§ 197

अभिधाय तान् विशेषानपेक्षमाणस्तु कृत्स्नमात्मानम् ।
प्रियकुत्सनादिषु तथा प्रवर्ततेऽसौ विभक्त्यन्तः ॥ पा॰ म॰ भा॰ ५ । ३ । ७४§ 199

इति व्याकरणे सर्वतन्त्रसिद्धान्ते । तत्र स्वार्थ इति जातिराकारो [वो]च्येत स्व एवार्थः स्वार्थ इति सोऽन्यापेक्षत्वादन्येन विना न स्वः इति स्यात्, अतो द्रव्यादिसिद्धेर्भेदवान् पदार्थः । तेषामेव च स्वार्थादीनामत्य-

---

२ दु] द्रष्टाः प्र॰ ॥
२ दु] द्रष्टावेवnayacakra-ms-bhā । इष्टावेव nayacakra-ms-ya ॥
२ सा] ॰साधत्वात्nayacakra-ms-ya ॥
३ म] मादnayacakra-ms-ya । मदोऽनुपसर्गे पा॰ ३ । ३ । ६७ इति **सूत्रण** अप्प्रत्ययस्य विधानात् **मद** इति nayacakra-ms-bhā पाठ एव साधुः । मदनं मदः व्यधजपमद्भ्यः सिद्धहेम॰ ५-३-४७ इत्यल् --**अभि॰ चिन्ता॰ स्वो॰** २ । २२६ ॥
५ त] **तस्माल्लोकाभ्युपगमाल्लोकप्रमाणीकृत एव किंचिदकिंचित्तथान्यथेत्यादिपरस्परविलक्षान्निरा॰**nayacakra-ms-vi । अत्र च nayacakra-ms-vi प्रतिपाठे **॰स्मा॰** इत्यत आरभ्य **॰विलक्षा॰** इत्यन्तः पाठांशोऽग्रेतनात् पृ॰ ५७ पं॰ १७ स्थानात् उत्पत्य इह आगतः सर्वथा निरर्थकोऽशुद्धः परित्याज्य एव ॥
८ भेद] **॰वाण्व**nayacakra-ms-bhā ॥
९ वृ] **वृक्ष इत्यादिस्वार्थ॰**nayacakra-ms-ya । अत्र **वृक्षजात्यादिः स्वार्थ॰** इत्यपि पाठः स्यात् ॥
१२ स] समवेतस्य च वचने लिङ्गं वचनं विभक्तिं च । अभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानम् । प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः--इति **पातञ्जलमहाभाष्ये** पाठः ॥
१६ च्येत] **व्येत**nayacakra-ms-bhā ॥
१६ विना] nayacakra-ms-bhā विनान्यत्र --**न भ्व इति** nayacakra-ms-pā । **न भू इति** nayacakra-ms-ḍe nayacakra-ms-līṃ । **न त्व इति** nayacakra-ms-raṃ nayacakra-ms-hī । **नन्न इति** nayacakra-ms-vi ॥

न्तभेदेऽन्योन्यानात्मकत्वात् खपुष्पवदभावः स्यात्, देशकालाद्यभेदोपलब्धेश्च अभेदसिद्धेरभिन्नः पदार्थः । तस्माद् भेदवदभेदपदार्थ उपात्तः पदं प्रयुञ्जानेन शास्त्रविदा स्वार्थमात्रवादिनापि । तथा द्रव्ये

* * *

अथ प्रतिज्ञैवाभ्युपगमः, तस्या लोकाप्रामाण्यात् । नन्वविशेषादिष्वसतः पक्षादेरुपादानाल्लोकाभ्युपगमात् लोकवदेव चार्थः इति व्यवस्थाप्य शब्द-

* * *

लिङ्गे सङ्ख्यायां कारके कुत्सादौ पदार्थे च योज्यं क्रमेण युगपद्वा वाच्ये । तमभ्युपगम्याविशेषवादिनो विशेषवादिन उभयानेकत्ववादिनो वा न तथा इति तमेव पुनर्ब्रुवतो नवोऽभ्युपगमविरोधः । **नव** इति न स्वशास्त्राभ्युपगमेन, किं तर्हि ? तत्कालाभ्युपगमेनेत्यर्थः । स च सर्वत्राभ्युपगमविरोध इति । § 200

**अथ प्रतिज्ञैवाभ्युपगमः** । स्यान्मतम्--न हि पदप्रयोगविषयोऽभ्युपगमोऽस्ति, पदार्थाभावात्, पदार्थस्य उत्प्रेक्षाविषयत्वाद् वाक्यार्थाधिगमोपायत्वेन - /ms उद्धृत्य वाक्यार्थाद् व्याख्येयत्वात् । वाक्यमेव शब्दः, तदर्थ एव च शब्दार्थः । तस्मात् प्रतिज्ञैवाभ्युपगमः, तत्साधनार्थत्वाच्छेषवाक्यावयवव्यापारस्य । कस्मात् ? **तस्या लोकाप्रामाण्यात्** । ततः **तस्याः** प्रतिज्ञायाः हेतुभूतायाः, तद्बलादित्यर्थः, **लोकाप्रामाण्यात्** लोकस्याप्रमाणत्वसिद्धेः । नित्यः शब्दोऽकृतकत्वादाकाशवत् इति नित्यत्वे सिद्धे तद्बलाद् नित्यानित्याद्यनेकरूपैकवस्तुप्रतिपत्तिर्लोकोऽप्रमाणीभवतीति । § 201

अत्रोच्यते **--नन्वविशेषादिष्वसतः पक्षादेरुपादानाल्लोकाभ्युपगमा**दिति । सर्वं सर्वात्मकम् इत्येतस्मिन्नविशेषैकान्तेऽभ्युपगते पुनः नित्यः शब्दः इत्य-

---

१ भेदेऽन्योन्या ] **॰न्येन्यानात्म॰**nayacakra-ms-ya ॥ ७ यु ] **युगपद्वाच्यां**nayacakra-ms-bhā । **युगपद्वाच्यं** nayacakra-ms-ya । अपोद्धारपरिकल्पनाव्यवस्थामाश्रित्य स्वार्थमभिधायशब्दो निरपेक्षो द्रव्यमाह समवेतम् इति प्रतिपत्तिक्रमनियमानुगममात्रं क्रियते । न हि शब्दस्य क्रमवती विरम्य विरम्य स्वार्थादिषु वृत्तिः सम्भवति, सकृदुच्चारणादर्थेन च नित्यमवियोगात् । प्रतिपत्तिक्रमो ह्ययं श्रोतुरभिधातुर्वा न व्यवस्थितः । सर्वविशेषणविशिष्टं हि वस्तु संसर्गिणीनां मात्राणां कलापं यौगपद्येन एकस्या बुद्धेर्विषयतामापन्नमुत्तरकालमिच्छन् बुद्ध्यन्तरैः प्रविभजते--इति **भर्तृहरि**विरचितायां **वाक्यपदीयस्ववृत्तौ** १ । २६ ॥

९ न ] **नवाभ्यु॰**nayacakra-ms-ya ॥ ९ न ] **नवति न शास्त्रा॰**nayacakra-ms-ya । **न स्वशास्त्रा॰** nayacakra-ms-bhā ॥ १४ वा ] **वाक्यार्थ-द्**nayacakra-ms-raṃnayacakra-ms-hī । **वाक्यार्थोद्** nayacakra-ms-raṃ nayacakra-ms-hī विना ॥ २० न ] **नत्व-विशेषा॰**nayacakra-ms-bhānayacakra-ms-pānayac । **तत्वविशेषा॰** nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥ २१ स ] **सर्वसर्वात्मकत्वम्**nayacakra-ms-vi । **सर्वसर्वात्मकम्** nayacakra-ms-vi विना ॥

स्य पक्षस्य तद्धेतोर्दृष्टान्तस्य चाभावः पूर्वोक्तेभ्यो हेतुभ्यो निर्विशेषत्वादिभ्यः । तथा विशेषैकान्ते पूर्वोक्तहेतुभ्य एव पक्षादीनामभावो निर्मूलत्वादिभ्यः । उभयानेकत्वैकान्तेऽपि परस्परविभिन्नस्वभावानां सामान्यविशेषकार्यकारणानामभाव इत्युक्तम् । तस्मादविशेषादिष्वसतः पक्षादेर्लोकमतसिद्धस्योपादानाल्लोक एव पुनरभ्युपगतो भवति अगतिभिः शास्त्रविद्भिः । तस्माल्लोकाभ्युपगमाल्लोकः प्रमाणीकृत एव किञ्चिदकिञ्चित्तथान्यथा इत्यादिपरस्परविलक्षणव्यवहाराभ्युपगमाच्च लोकाप्रामाण्यं न सिध्यतीति ते यूयं सुदूरमपि गत्वा लोकमेव शरणं गन्तुमर्हथ शास्त्रविदः । एवं शास्त्रव्यवहारो लोकदर्शनमन्तरेण न सिध्यतीति वाक्यविषयः पदविषयो वा ततः साक्षाल्लोकपक्षापत्त्याभ्युपगमविरोध इत्युक्तः । § 202

तथा तद्विषयः स्ववचनविरोधोऽपि प्रतिपत्तव्यः । कस्मात् ? **लोकवदेव चार्थ इति व्यवस्थाप्य शब्दप्रयोगात्** । लोकेन तुल्यं वर्तते लोकस्येव लोक - /ms
इव वा लोकवत्, **एवे**त्यवधारणे, किमवधारयति ? लोकेऽर्थमवधारयति नार्थे लोकम्, शास्त्रविदामपि लोकत्वात् । पृथक्त्वेऽप्यर्थलोकयोरुभयत्र वाय**मेव**कारो द्रष्टव्यः--लोकवदेवार्थः अर्थवदेव लोक इति, द्वयोरपि परस्पराव्यभिचारात् शास्त्रविदां लोकपृथक्त्वे 58/mj

* * *

प्रयोगात् तथासत्यत्वसिद्धे शब्दार्थे पुनः न यथालोकग्राह्यं वस्तु इति विरुध्येत स्ववचनेन । लोकविरोधस्तु प्रस्तुत एव, तदविरोधेऽप्रवृत्तेः । लोकाप्रामाण्ये च सर्वत्र प्रत्यक्षानुमानविरोधावुपस्थितावेव, तत्स्थत्वात्तयोः ।

* * *

लौकिकार्थपृथक्त्वे च तत्कल्पितार्थानाम् । **इति**शब्दः प्रकारे, अनेन प्रकारेण इत्थं **व्यवस्थाप्य** बुद्ध्या अभ्युपगम्य स्वनिश्चितार्थप्रतिपादनार्थं परेषां शब्दप्रयोगात्, पदावधिको वाक्यावधिको वा शब्दप्रयोगव्यवहारो लोकानुपातीत्यमिष्टं तैरपि शास्त्रकारैः । तत्र च **तथासत्यत्वसिद्धे शब्दार्थे**, तेन प्रकारेण **तथा**, येन प्रकारेण मृद्रूपादिपृथुकुक्ष्यादिकेऽर्थे घटशब्दो लोकेन प्रयुक्तस्तेनैव प्रकारेण सत्यत्वेन सिद्धे सत्यत्वसिद्धे लोके शब्दं प्रयुञ्जानैः शास्त्रविद्भिः

१ चा ] चाभावःnayacakra-ms-bhā ‖
२ प ] परोक्षादी॰ प्र॰ ‖
३ विशेष ] ॰षाकार्य॰ प्र॰ ‖
४ क्षादेर्लोक ] ॰र्लोकमसिद्ध॰nayacakra-ms-ya ‖
७ माच ] लोकप्रामाण्यंnayacakra-ms-ya ‖
८ न्तुम ] ॰मर्हेच शास्त्र॰ प्र॰ ‖
१३ इ ] इ वा लोकवत् प्र॰ ‖
१४ पृ ] पृथक्त्वप्यर्थ॰ प्र॰ ‖
२३ लोकानुपा ] ॰पातीत्यमिष्टन्नैरपिnayacakra-ms-bhā । ॰पातीत्यनिष्टन्नैरपि nayacakra-ms-pā । ॰पातीत्यनिष्टान्नैरपि nayacakra-ms-ḍe nayacakra-ms-līṃ । ॰पातीत्यनिष्टकैरपि nayacakra-ms-vi । ॰पातीत्यलिंष्टक्तैरपि nayacakra-ms-raṃ nayacakra-ms-hī ‖
२६ स ] सत्यसिद्धे प्र॰ ‖

लोकोऽभ्युपगतोऽस्माभिः इत्युक्तमेव भवत्यर्थात् । ततः **पुनः न यथालोकग्राहं वस्तु इति विरुध्येत** । लोकस्य ग्राहो लोकग्राहः, ग्राह इव ग्राहः, यो यो लोकग्राहो यथालोकग्राहम् । किं तत् ? वस्तु । यथैवागोपालप्रसिद्धं वस्तु ब्रुवाणो वादी यो यः प्रयुज्यते मया शब्दः स स न तथार्थः स्यात् इत्यनेन **स्ववचनेनैव** विरुद्धमाह, स्वेन वचनेन तत्तद्वचनं विरुध्येत । - /ms **विरुध्येत** इति **आशंसावचने लिङ्** पा॰ ३ । ३ । १३४, कथं मुखनिष्ठुरं विरुध्यत एव इत्यवधार्योच्यते ? कथञ्चिद् विरुध्येत इति दाक्षिण्यमाचार्यः स्वकं दर्शयति । एवं तावत् स्ववचनविरोधः । § 203

**लोकविरोधस्तु प्रस्तुत एव** । रूढिविरोधो लोकविरोधः, स तु प्रस्तुत एव । **तदविरोधेऽप्रवृत्तेः**, तेन लोकेन अविरोधे शास्त्राणामप्रवृत्तेः, तस्या रूढेः शब्दप्रयोगादेवाभ्युपगताया विरोधमनुपपाद्य शास्त्राणामविशेषविशेषोभयानेकत्वैकान्तप्रतिपादनार्थानामप्रवृत्तेः । कथमप्रवृत्तिः ? तानि रूढमेवार्थमनुब्रूयुः, अरूढं वा व्युत्पादयेयुः ? यदि रूढमनुवदन्ति, व्यर्थानि । अथारूढं व्युत्पादयन्ति रूढिविरोधिनमर्थम्, विरुध्यन्त एव लोकेन निःसंशयमिति साधूच्यते --**तदविरोधेऽप्रवृत्तेर्लोकविरोधः प्रस्तुत एवे**ति । § 204

किञ्चान्यत् --**लोकाप्रामाण्ये च** शास्त्रकाराणां **सर्वत्र** पदे पदे वाक्ये वाक्ये **प्रत्यक्षानुमानविरोधावुपस्थितावेव** । तत्र तावत् ***अंशे प्रत्यक्षविरोध** इत्याद्यभिहितं पूर्वम्, इदानीं सर्वत्र प्रत्यक्षविरोधो वाच्य इति विशेषः । अनुमानविरोधो वा नोक्तः सोऽभिधेयः, तदनुषङ्गेण पुनः प्रत्यक्षविरोधवचनं च तत्पूर्वकत्वादनुमानस्येति । शास्त्रकारप्रवृत्तेर्लोकविरुद्धत्वादेव प्रत्यक्षानुमानविरोधावप्युपस्थितावेव । **एवे**त्यवधारणे, न न भवतः, भवत एवेत्यर्थः । किं कारणम् ? **तत्स्थत्वात् तयोः** । लोकनाद्धि लोकोऽनुपहतेन्द्रियमनस्कः प्राणिगणो लोक इत्युच्यते । तयोः तस्मिँल्लोके स्थितत्वात् प्रत्यक्षानुमानयोः लोकश्चेदप्रमाणं लोकस्थे प्रत्यक्षानुमाने प्रागेवाप्रमाणे । - /ms अथवा स एव स्थितस्तत्स्थः, **सुपि स्थः** पा॰ ३ । २ । ४ इति वचनात्, लोक एव प्रामाण्येन व्यवस्थितः । क्व ? तयोः प्रत्यक्षानुमानयोः । स एव लोकः प्रत्यक्षानुमानज्ञानाधारत्वात् तद्रूपापत्तेश्च प्रत्यक्षमनुमानं च, ततस्तदप्रामाण्ये तयोरप्रामाण्यमिति । § 205

59/mj

६ आ] आशंकावचने लिट् प्र॰ ॥
९ विरोध] ॰धस्तुत एव प्र॰ ॥
१३ अ] अरूढं वा प्युत्पा॰nayacakra-ms-bhā । अरूढ वा युत्पा॰ nayacakra-ms-ya ॥
१३ नु] ॰नुवंदितिnayacakra-ms-ya ॥
१४ विरुध्य] ॰ध्यत एवnayacakra-ms-ya ॥
१६ लोका] लोकप्रामाण्येnayacakra-ms-ya ॥
१७ *] पृ॰ ५४ पं॰ ४ ॥
१९ सोऽभिधेयः] ॰य तदनु॰nayacakra-ms-ya ॥
२४ योः] लोकं चेद॰ प्र॰ ॥
२५ वा] ॰वा एवnayacakra-ms-ya ॥
२७ नुमा] ॰मानश्चnayacakra-ms-bhā ॥

शास्त्रवदेव तयोरप्यलौकिकत्वकल्पनार्थं लक्षणान्तरं कल्प्यं सामान्यविशेषैकान्तसंवादि । घटादिकल्पनापोढं प्रत्यक्षम् । अथ का कल्पना ? नामजातिगुण- § 206

स्यान्मतं भवताम्--कथं प्रमाणज्येष्ठं प्रत्यक्षं न प्रमाणीक्रियेत ? इति । तत्र वः सम्प्रधारमिमं प्रयच्छामि--तदपि च प्रत्यक्षमेवं कल्प्यं **शास्त्रवदेवे**त्यादि । शास्त्रे ज्ञातेऽपि तद्विहितक्रियासाध्यत्वात्तदिष्टफलस्य क्रियायाश्चाव्यभिचाराज्ज्ञाने, यथोक्तम्—

जानानाः सर्वशास्त्राणि च्छिन्दन्तः सर्वसंशयान् ।
न च ते तत् करिष्यन्ति गच्छ स्वर्गं न ते भयम् ॥ इति
|§ 209

तस्मात् ज्ञानं फलस्याव्यभिचारि कारणं क्रियासाधनवादिनोऽपि, किमङ्ग पुनर्ज्ञानमात्रसाधनवादिनः ? इति तदेव विचार्यते --**शास्त्रवदेवे**त्यारभ्य यावद् **व्यञ्जनकाय** इति । शास्त्र इव शास्त्रवत्, यथा शास्त्रेऽभिहिताः पदार्था अत्यन्तविलक्षणास्तथा प्रत्यक्षमपि लौकिकप्रत्यक्षविलक्षणं तथानुमानं चास्तु, **तयोरप्यलौकिकत्वकल्पनार्थं** प्रत्यक्षानुमानयोरप्यलौकिकत्वस्य कल्पनार्थं **लक्षणान्तरं कल्प्यम्** । किं तत् ? **सामान्यविशेषैकान्तसंवादि,** सामान्यं च विशेषश्च सामान्यविशेषौ, सामान्यविशेषौ च सामान्यविशेषौ च सामान्यविशेषा इत्येकशेषः सरूपत्वात् सामान्यमेव, न विशेषः; विशेष एव, न सामान्यम्; तौ परस्परविलक्षणौ वा इति त एव एकान्ता लौकिकपदार्थविलक्षणाः शास्त्रेषु कल्पिताः । तैः संवदितुं शीलमस्य तदिदं सामान्यविशेषैकान्तसंवादि । घट आदिर्यस्याः कल्पनायाः सा **घटादिकल्पना** घटसङ्ख्योत्क्षेपणसत्ताघटत्वाद्यध्यारोपात्, तस्याः ततः कल्पनाया **अपोढं प्रत्यक्षं** कल्पनीयम् । स्यादाशङ्का-- कल्पनापोढं प्रत्यक्षं विशेषैकान्तवादिन एव मतं नेतरयोः, तयोः कथमलौकिकत्वमिति चेत्, अत्रोच्यते— यत् तावद् विशेषमात्रं स्वलक्षणविषयमनिर्देश्यं प्रत्यक्षं तत् कल्पनापोढत्वादलौकिकं तत् सामान्यानात्मकत्वात् खपुष्पवदसदिति

---

५ स] संप्रवारंnayacakra-ms-bhā । संप्रचारं nayacakra-ms-ya । एवं तावत् कल्पितमेव भवत्सिद्धान्ते किं सम्प्रधारणया अत्र--इति वक्ष्यते परमतोपन्यासान्तेऽत्रैव **नयचक्रवृत्तौ** पृ॰ ६२ पं॰ २६ ॥
६ शा] शास्त्रे ज्ञानेपिnayacakra-ms-ya । शास्त्रे । ज्ञानेपि nayacakra-ms-bhā ॥
७ क्रियाया] ॰याश्च । व्यभि॰nayacakra-ms-bhā । ॰याश्च व्यभि॰ nayacakra-ms-ya ॥
११ सा] ॰साधकवादिनः प्र॰ ॥
१२ का] ॰कार्य इतिnayacakra-ms-pā । ॰कार्यति nayacakra-ms-ḍe nayacakra-ms-līṃ । ॰कार्येति nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-vi ॥
१३ प] पदार्थात्यंत॰ प्र॰ ॥
१४ चा] वास्तु प्र॰ ॥

सिद्धम् । तथा विशेषानात्मकत्वात् खपुष्पवत् सामान्यमात्रं सर्वं सर्वात्मकं कल्पनापोढं वस्तु तदसत्, असत्त्वात् तज्ज्ञानमपि तद्वत् । तथोभयानेकत्वैकान्ते तयोरितरेतरानात्मकत्वात् खपुष्पवदभाव इत्यलौकिकत्वम् । यद्यपि सामान्यविशेषव्यपाश्रयं लक्षणमभिहितम् --**श्रोत्रादिवृत्तिः प्रत्यक्षम्** षष्टित°, **आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यद् निष्पद्यते तदन्यत्** वै° सू° ३ । १ । १८ इत्यादि, तथापि सामान्यविशेषैकान्तवादिनां बलात् तदेव कल्पनापोढमलौकिकं चेत्यापन्नम्, तस्य चोभयात्मकत्वाभ्युपगमे प्रतिज्ञाहानिः । अथवा तेनैव दूषितत्वात् कस्तौ हतौ हनिष्यति ? इति तस्यैवोपरि बध्यते परिकर इत्यनेनाभिप्रायेण पूर्वमेव ताव[त्त]त्परिकल्पितप्रत्यक्षलक्षणमुपन्यस्य दूषयितुकामः **सूरि**रित्यलमतिप्रसङ्गेन । § 210

प्रकृतमुच्यते --**अथ का कल्पना** ययापोढं ज्ञानं प्रत्यक्षमिति ? अत्रोच्य-
60/mj ते --**नाम-जाति-गुण-**

* * *

क्रियाद्रव्यस्वरूपापन्नवस्त्वन्तरनिरूपणानुस्मरणविकल्पना । ततोऽपोढमक्षाधिपत्योत्पन्नमसाधारणार्थविषयमभिधानगोचरातीतं प्रत्यात्मसंवेद्यं ज्ञानं प्रत्यक्षम् । चक्षु-

* * *

**क्रिया-द्रव्यस्वरूपापन्नवस्त्वन्तरनिरूपणानुस्मरणविकल्पना । ततोऽपोढम्** अपेतम् । नाम संज्ञा शब्दः इत्यनर्थान्तरम्, तद्द्वारिका कल्पना । सा द्विविधा समासतः--यादृच्छिकी नैमित्तिकी च । नामग्रहणाद् यादृच्छिकी जात्यादिग्र-
- /ms हणाद्य नैमित्तिकी गृहीता । निमित्तनिरपेक्षं नाम यादृच्छिकं डित्थो डवित्थः इत्यादि । शब्दद्वारत्वे सत्यपि जात्यादिनिमित्तापेक्षा भिन्ना । तत्र गौः इति जात्या शुक्लः इति गुणतः मतुब्लोपादभेदोपचाराद्वा विशेषणस्वरूपापन्नं ततो विशेषणादन्यद् वस्तु तयोर्विशेषणविशेष्ययोरभेदसम्बन्धनात्मिकया कल्पनया पूर्वं मनसा निरूप्यते पश्चादनुस्मर्यते । तथा डित्थादिष्वपि अस्येदम्,

---

५ आ] आत्मेन्द्रियार्थसन्निकर्षाद्--इति मुद्रिते **वैशेषिकसूत्रे** पाठः, किन्तु अपपाठ एव सः । तुलना--आत्मेन्द्रियमनोर्थानां सन्निकर्षात्प्रवर्तते । व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ॥ --**चरकसं°** १ । ११ । २० ॥
८ दू] **हृषितत्वात्**nayacakra-ms-ya । **हृषितत्वात्** nayacakra-ms-bhā ॥
१७ णानु] **°नुस्मरणं विकल्पना**nayacakra-ms-ya । निरूपणानुस्मरणविकल्पेनाऽविकल्पकाः । --**अभि° को°** १ । ३३ ॥
१९ या] nayacakra-ms-bhā विनाऽन्यत्र --**यादृत्तिकी** nayacakra-ms-pā । **यावृत्तिकी** nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
२१ द्वा] **द्वारत्वे सत्यपि**nayacakra-ms-bhā । **द्वाराद्य सत्यपि** nayacakra-ms-ya ॥
२२ स्व] **°स्वरूपायत्तं ततो प्र°** ॥
२३ त्मिक] nayacakra-ms-bhā विनान्यत्र **°काया कल्पनया** nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi । **°काया कल्पनाया** nayacakra-ms-raṃ nayacakra-ms-hī ॥

सोऽयम् इति वा भिन्नयोरर्थाभिधानयोरभेदसम्बन्धनया निरूपणानुस्मरणे, शब्दार्थयोर्निमित्तनैमित्तिकयोर्भिन्नयोरभेदाध्यारोपात् । क्रियाशब्देषु पाचकः इत्यादिषु नाभेदोपचारः अभिन्नरूपत्वात् क्रियाक्रियावतोः, अतो न निरूपणं किन्तु अनुस्मरणमेव । सर्वत्र च शब्दार्थभेदोपचारान्निरूपणानुस्मरणे स्त एव । तथा द्रव्यशब्देषु संयोगसमवायनिमित्ताद् दण्डी, विषाणी इत्यादिषु । तस्याः कल्पनाया अपोढम् । **अक्षाधिपत्योत्पन्न**मिति,

रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्तते ।
विज्ञानं मणि-सूर्यांशु-गोशकृद्भ्य इवानलः ॥ § 213

चक्षुः प्रतीत्य रूपं च आलोकं च बाह्यं समनन्तरनिरुद्धं मनःसंज्ञितं चित्तं चित्तान्तरावकाशदानात्मकं प्रतीत्य चक्षुर्विज्ञानमुत्पद्यते, **चतुर्भिश्चित्त-चैत्ताः** अभि॰ को॰ २ । ६४ इति सिद्धान्तात् । तथापि च अधिपतिना चक्षुषा व्यपदिश्यते चक्षुर्विज्ञानम् इति, असाधारणकारणत्वात्, यथा यवाङ्कुर इति *बीजर्तुवारिमारुताकाशसंयोगे सत्यपीति । **असाधारणार्थविषय**मिति, चक्षुरादिज्ञानानां परस्परविविक्तरूपादिनिर्विकल्पस्वलक्षणविषयत्वात् । **अभिधानगोचरातीतम्,** मनोनिरूपितार्थविषयत्वादभिधानस्य तद्गोचरातीतम् । किं कारणम् ? **प्रत्यात्मसंवेद्यत्वात्,** आत्मानमात्मानं प्रति प्रत्यात्म, प्रत्यात्मना संवेद्यते नान्यस्मै शक्यमाख्यातुं शूलादिवेदनास्वरूपवत् । **ज्ञान**मिति कल्पनाया अन्यत्रासम्भवात् सम्बन्धः । **प्रत्यक्षम्,** अक्षमक्षं प्रति वृत्तेः पञ्चेन्द्रियजम् । § 214

---

२ पा] पारकः प्र॰ ॥
३ निरूप] ॰प-णांnayacakra-ms-bhānayacakra-ms-vi । ॰पणा nayacakra-ms-bhā nayacakra-ms-vi विना ॥
४ स] सर्वत्र च शब्दार्थभेदोnayacakra-ms-bhā । सर्वत्र शब्दार्थभेदो॰ nayacakra-ms-ya ॥
७ म] ॰नमस्कार॰nayacakra-ms-vi ॥
९ आ] आलोकं बाह्यंnayacakra-ms-ya ॥
९ निरु] ॰रुर्द्धमनः॰nayacakra-ms-ya ॥
१० तुर्भिश्चि] ॰त्तवेत्ता प्र॰ ॥
१३ *] बीजर्तुंवारि॰nayacakra-ms-bhā । बीर्जंतुवारि॰ nayacakra-ms-ya । यच्चासाधारणं तद्व्यपदेशभाग् भवति, तद्यथा--ऋत्वादिकारणात् प्रादुर्भवन्नंकुरो न ऋत्वादिभिर्व्यपदिश्यते, अपि त्वसाधारणेन बीजेन व्यपदिश्यते यवाङ्कुरः इति । तथेहापीत्यदोषः ।— **न्या॰ वा॰** १ । १ । ४, पृ॰ ९९ । जलकर्षणबीजर्तुसंयोगात् सस्यसम्भवः । **--चरकसं॰** १ । ११ । २३ ॥
१४ रूपादिनिर्विक] **॰कल्पस्य लक्षण॰** nayacakra-ms-ya ॥
१८ क] **कल्पनायाऽन्यत्र**nayacakra-ms-bhā । **कल्पनमन्यत्र** nayacakra-ms-ya । स्वरूपविप्रतिपत्तिनिराकरणार्थमाह--प्रत्यक्ष-मित्यादि । अक्षं प्रतिगतं प्रत्यक्षम् । इदं लक्ष्यम् । कल्पनापोढमिति लक्षणम् । कल्पनापोढनिर्देशाच्च तज्ज्ञानात्मकमिति प्रतीयते । यस्माज्ज्ञाने एव कल्पनासंसर्गोऽस्ति तस्मात् तत्प्रतिषेधेन तदेव प्रतीयते । यथा अवत्सा धेनुरानीयताम् इति वत्सप्रतिषेधेन गोधेनुरेव प्रतीयते, नान्या । **--प्र॰ समु॰ टीका** १ । ३ । कल्पनाप्रतिषेधाच्च ज्ञानस्य सामर्थ्यलब्धत्वात्, अवत्सा धेनुरानीयतामिति यथा वत्सप्रतिषेधेन गोधेनोः **--तत्त्वसं॰ पं॰** पृ॰ ३६७ ॥

61/mj

विज्ञानसमङ्गी नीलं विजानाति नो तु नीलम् इतिअभिधर्मागमोऽपि । प्रकरणपादेऽप्युक्तम्—

नीलः स नाम नीलं न नीलार्थोऽनक्षरः स च ।
नीलमिति भाषमाणो नीलस्यार्थं न पश्यति ॥§ 217

एतस्यैवार्थस्य भावना तु--अर्थेऽर्थसंज्ञी, न त्वर्थे धर्मसंज्ञी अभि॰ पि॰ । अर्थे रूपादिके § 218

**चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलम् इति अभिधर्मागमोऽपी**ति *विश्वस्तमेव लौकिकप्रत्यक्षविलक्षणं कल्प्यमानमचीक्लृपः, तवागमोऽप्येवमेवेति दर्शयति । **चक्षुर्विज्ञानसमङ्गी** चक्षुर्विज्ञानसमन्वयी सन्तानः, **अगि रगि लगि गत्यर्थाः** पा॰ धा॰, चक्षुर्विज्ञानं समङ्गितुं शीलमस्येति चक्षुर्विज्ञानसमङ्गी, एवं श्रोत्रादिविज्ञानसमङ्गिनः । **नीलं विजानाति**, रसादिविविक्तं रूपं स्वलक्षणं विजानाति । **नो तु नीलम् इति** विजानाति, **इति**शब्दस्य शब्दपर्यायत्वात् इदं तद् नीलम् इति शब्दनिर्देश्यं न विजानाति, अपटुत्वादिन्द्रियविज्ञानस्य कुतः शक्तिरेवं कल्पयितुम् । § 219

**प्रकरणपादेऽप्युक्त**मिति भवत्संमतागमव्याख्यानग्रन्थान्तरेऽप्येतदर्थानुवादिन्यभिहितमिति दर्शयति । **नीलः स नाम नीलं [ने]**ति श्लोकः । यदेतन्नीलमेत-

---

८ *] विश्वस्तमेत लौकिक॰nayacakra-ms-bhā । विधेस्तमेत लौकिक॰ nayacakra-ms-ya । अत्र विश्वस्तमेतल्लोकिक॰ इत्यपि पाठः सम्भवेत् ॥
८ क] कल्प्यांमान-चीकृपःnayacakra-ms-bhā । कल्प्यंमानंचीकृपः nayacakra-ms-pā । कल्प्यंमानचीकृपः nayacakra-ms-bhā nayacakra-ms-pā विना ॥
१० अ] १२८ उख १२९ उखि १३० वख १३१ वखि १३२ मख १३३ मखि १३४ णख १३५ णखि १३६ रख १३७ रखि १३८ लख १३९ लिखि १४० इख १४१ इखि १४२ ईखि १४३ वल्ग १४४ रगि १४५ लगि १४६ अगि १४७ वगि १४८ मगि १४९ तगि १५० त्वगि १५१ श्रगि १५२ श्लगि १५३ इगि १५४ रिगि १५५ लिगि गत्यर्थाः--इति पाणिनीयधातुपाठे ॥
११ स] ॰समंगिलः निलं प्र॰ ॥
१३ न] विजानात्पटुत्वा॰ प्र॰ ॥
१५ पा] ॰पदेnayacakra-ms-ya । यच्च शास्त्रमिति अभिधर्मशास्त्रमभिप्रेतम् । तत्तु सानुचरम्... ...। अन्ये तु व्याचक्षते शास्त्रमिति ज्ञानप्रस्थानम् । तस्य शरीरभूतस्य षट् पादाः --प्रकरणपादो विज्ञानकायो धर्मकायः प्रज्ञप्तिशास्त्रं धातुकायः संगीतिपर्याय इति । अतस्तदपि शास्त्रं सानुचरमेव । --अभि॰ को॰ स्फु॰ व्याख्या १ । २ ॥
१५ भ] भवत्संगतागम॰ प्र॰ ॥
१५ न्थान्त] ॰न्तरेण्यतदर्थानुवादिन्यभि॰ nayacakra-ms-bhā । ॰न्तरेण तदर्थानुवादिनाभि॰ ॥
१६ स] स नाम नीलं ति स्तोकः पदेतन्नी॰nayacakra-ms-ya । स नाम नीलं ति स्तोकः पदेतन्नी॰ nayacakra-ms-bhā ॥

दिति नाम्ना निर्देशो नीलमस्य नाम एतन्निरूपणविकल्पकृतम् । **न नीलार्थः** नीलस्य रूपस्य वस्तुनश्चक्षुरिन्द्रियविषयस्य परमार्थः स्वरूपतोऽ**नक्षरः** अक्ष-रैर्व्यञ्जन-पद-नामकायैरनभिलपनीयः । **स च** पुरुषो निरूपणकाले स्वयं निश्चिन्वन्ननुस्मरणकाले वानुस्मरन् परं प्रतिपिपादयिषन् वा **नीलमिति** वाचं **भाषमाणो नीलस्यार्थ**मनभिलाप्यस्वरूपं स्वज्ञानांशवदविकल्पं **न पश्यति,** त-दा तत्स्वरूपविषयस्याविकल्पस्य नीलार्थविज्ञानस्य च निरुद्धत्वात् तदान्यस्य - /ms
नीलशब्दाभिलाप्यस्याध्यारोपितस्य सामान्यस्य इन्द्रियगोचरानागतेः । § 220

**एतस्यैवार्थस्य भावना तु** । तुशब्दो विशेषणार्थः, एनमेवार्थं भावन-याऽनया विशेषयति । भवति एषोऽर्थः, तं भवन्तं भव भव इति बुद्धौ भावयति यया व्याख्यया सा भावना । का पुनः सा ? **अर्थेऽर्थसंज्ञी, न त्वर्थे धर्मसंज्ञीति** । एतस्य भावनावाक्यस्य पुनर्व्याख्या --**अर्थे रूपादिके** प्रत्यक्षविज्ञानविषये 62/mj

* * *

स्वरूपसंज्ञी, अर्थस्वरूपविशेषमात्रालम्बनया संज्ञया निर्विकल्पया सम्प्रयुक्तं स्वलक्षणविषयमस्य सन्तानस्येति । न त्वर्थे रूपादिके यदृच्छादिनामसंज्ञी । एवमभिधर्मे उक्तम्--धर्मो नामोच्यते नामकायः पदकायो व्यञ्जनकायः ।

कल्पितमपि त्विदमफलमलौकिकत्वात् । स्ववचनव्यपेक्षाक्षेपदुस्तर-विरोधपरि-

* * *

रूपरसगन्धशब्दस्प्रष्टव्यलक्षणे **स्वरूपसंज्ञी** रूपादिमात्रसंज्ञी, संजानातीति संज्ञी, स्वरूपसंज्ञा अस्यास्तीति वा स्वरूपसंज्ञी । किमालम्बना सा संज्ञा किंस्वरूपा वा यया सम्प्रयुक्तं तत् प्रत्यक्षं रूपादिचित्तं निर्विकल्पं चैतसिक्या सम्प्रयुक्तकधर्माख्यया योगात् संज्ञया संज्ञीत्युच्यते तत्सन्तानः ? इत्यत

---

१ नाम्ना ] अत्र निर्देशे इत्यपि पाठः सम्भवेत् ॥
२ व ] वस्तुनं चक्षु॰ प्र॰ ॥
३ का ] ॰कालोnayacakra-ms-ya ॥
४ प्र ] प्रतिपिपादयिषित्वा नील॰nayacakra-ms-ya । प्रतिपादयिषत्वा नील॰ nayacakra-ms-bhā ॥
५ ज्ञानांश ] ॰शचवद॰nayacakra-ms-bhā ॥
६ स्याविक ] ॰कल्पनीलार्थ॰nayacakra-ms-bhā ॥
७ ब्दाभिला ] ॰लाप्यसाध्यारोपि॰ प्र॰ ॥
८ भा ] nayacakra-ms-ḍenayacakra-ms-līṃ विनान्यत्र --भावनात् तुशब्दो nayacakra-ms-bhā nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । भवेत् तुशब्दो nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
८ णा ] ॰णार्थं भाव॰nayacakra-ms-bhā ॥
८ भा ] भावनयानया प्र॰ ॥
९ ए ] एवोर्थःnayacakra-ms-ya ॥
२१ य ] यथा सम्प्र॰nayacakra-ms-ya ॥
२२ यु ] ॰युक्तधर्मा॰nayacakra-ms-ya ॥
२२ योगात् ] संज्ञायाnayacakra-ms-bhā ॥

आह --**अर्थस्वरूपविशेषमात्रालम्बनया निर्विकल्पया संज्ञया सम्प्रयुक्त**मिति गतार्थं व्याख्यातत्वाद् **भाष्येण** । तदेव **स्वलक्षणविषयम्,** स्वमेव विशेष एव लक्षणम्, लक्ष्यत इति लक्षणम्, **कृत्यल्युटो बहुलम्** पा° ३ । ३ । १७३ इति कर्मणि ल्युट्प्रत्ययः, स्वलक्षण[विषय]मनन्यविषयमित्यर्थः । **अस्य सन्तानस्ये**ति चक्षुर्विज्ञानसमङ्गिनः, चक्षुर्विज्ञानवत् चक्षुरादिपञ्चविज्ञान-काया व्याख्याता इत्थं कल्पनापोढा इति प्रदर्श्यते । यत् पुनरुक्तं कल्प-नात्मकं ज्ञानं न तत् प्रत्यक्षम्, अर्थस्वलक्षणाविषयत्वात्, गवि अश्वज्ञानवत् इति साधनम् । इतश्च सविकल्पकं नीलमिदम् इत्यादिज्ञानं न प्रत्यक्षम्, - /ms विशेषणाध्यारोपात्, उत्पलाधारसुरभ्यादिज्ञानवदिति । **इति** परिसमाप्त्यर्थः, अर्थेऽर्थसंज्ञी इत्येतस्य व्याख्यानमिति परिसमाप्तम् । § 221

न त्वर्थे धर्मसंज्ञी इत्यस्य व्याख्या --**न त्वर्थे** । नेति प्रतिषेधे, **तु** विशेषणे, तमर्थमध्यारोपविशिष्टं प्रतिषेधति । तस्मिन्नेव **रूपादिके**ऽर्थे न तु **यदृच्छादिनामसंज्ञी** यदृच्छा-जाति-गुण-क्रिया-द्रव्यशब्दसंज्ञी, धर्मशब्दस्य शब्दशब्दार्थपर्यायत्वात् धर्मसंज्ञी न भवति शब्दसंज्ञी न भवतीत्यर्थः । नैषा स्वमनीषिकोच्यते, किं तर्हि ? **एवमभिधर्म उक्तम्** अभिधर्मपिटकेऽभिहितम् । किमुक्तम् ? **धर्मो नाम उच्यते नामकाय** इत्यादि । नामैव नामकायः, कायवत् प्रतिक्षणं शरारुत्वाच्चतुर्भूतसङ्घातत्वाच्च नाम्नां वा विज्ञानादीनां सङ्घात-त्वात्, संज्ञाशब्दानां क्षणिकानामपि संहतानामेव उत्पत्तिविनाशाभ्युपगमात् । यथोक्तम्—

वर्णो गन्धो रसः स्पर्शश्चत्वारोऽपि च धातवः ।
अष्टावेतेऽविनिर्भागाः सहोत्पादाः सहक्षयाः ॥ § 224

इति सिद्धान्तात् । पदानि नामाख्यातोपसर्गनिपाताः, तत्कायः **पद-कायः** । व्यञ्जनानि अक्षराणि, अर्थस्य व्यञ्जकत्वात् । तत्कायो **व्यञ्जनकाय** इति । § 225

---

१ या] संज्ञायाnayacakra-ms-bhā ॥
१ स] संयुक्त°nayacakra-ms-vi विना ॥
६ इ] nayacakra-ms-bhā विनान्यत्र --इति प्रदर्शने nayacakra-ms-vi । इतिः प्रदर्शने nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
६ य] अत्र यत् पुनरुक्तकल्पनात्मकं इत्यपि पाठः सम्भवेत् ॥
१० अ] अर्थेऽर्थःसंज्ञी प्र° ॥
१२ न] मतु यदृच्छा°nayacakra-ms-bhā । मनु यदृच्छा° nayacakra-ms-ya ॥
१५ म] °मभिधर्मस्य उक्तम्nayacakra-ms-vi । °मभिधर्मप+उक्तम् nayacakra-ms-pā ॥
१६ ध] धर्म्यो प्र° ॥
१६ ना] अत्र नामैव कायो नामकायः इत्यपि पाठः स्यात् ॥
१७ रारुत्वा] °च्चतुर्भूतीसङ्घातत्वाच्च प्र° ॥
२१ अ] अष्टावेते विनि°nayacakra-ms-ya ॥

एवं तावत् कल्पितमेव भवत्सिद्धान्ते, किं सम्प्रधारणया अत्र ? इदानीं परमार्थो विचार्यते— **कल्पितमपि तु इदमफल**मित्यादि । नास्य फलमिति अफलम् । किं कारणम् ? **अलौकिकत्वात्,** खरविषाणकुण्ठतीक्ष्णादिकल्पनवत् । कस्मादलौकिकत्वमिति चेत्, **स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधपरि-** 63/mj

* * *

हारं त्वदुक्तिवदेवेदमप्रत्यक्षम्, कल्पनात्मकत्वान्निरूपणविकल्पात्मकत्वादालम्बनविपरीतप्रतिपत्त्यात्मकत्वादध्यारोपात्मकत्वात् सामान्यरूपविषयत्वात् तदतद्विषयवृत्तित्वात् सदसदभेदपरिग्रहात्मकत्वात् सर्वथा साधारणार्थत्वादेः, अनुमानादिज्ञानवत् ।

* * *

**हारम्** । यस्मात् स्वं वचनं स्ववचनं प्रत्यक्षलक्षणवादिनो **दिन्न**भिक्षोः, स्ववचनस्य स्ववचने वा **व्यपेक्षा** प्रत्यवमर्शः स्ववचनव्यपेक्षा, सैव आक्षेपः, तेन आक्षेपेण दुस्तरो विरोधस्य परिहारोऽस्येति स्ववचन- व्यपेक्षाक्षेप- - /ms
दुस्तरविरोधपरिहारम्, स्वेनैवैतद्वचनेन पौर्वापरेण प्रत्यवमृश्यमानेन विरुध्यते सदाहं मौनव्रतिकोऽस्मि, पिता मे कुमारब्रह्मचारी इत्यादिवचनवत्, न तु अस्मदुपपत्तिवद् दूष्यमिदम्, तदर्थे दृष्टान्तमाह **--त्वदुक्तिवदेवेदम्,** यथेयं त्वदुक्तिः कल्पनात्मिका सती न प्रत्यक्षं तथैवे**दमप्रत्यक्ष**मिति प्रतिज्ञा । कल्पनापोढलक्षणलक्षितं ज्ञानमत्र धर्मि, तदप्रत्यक्षत्वधर्मविशिष्टं साध्यते । को हेतुः ? **कल्पनात्मकत्वात्** । नन्विदमसिद्धं कल्पनात्मकत्वं तस्य ज्ञानस्य कल्पनापोढत्वात् । अत्रेदं तत्साधनार्थमभिधीयते धर्मान्तरम्--तत् कल्पनात्मकं **निरूपणविकल्पात्मकत्वात्,** इदम् इत्थम् इति ज्ञानं निरूपणम्, स एव विकल्पः, तदात्मकं तत् प्रत्यक्षं घटत्वादिज्ञानवदिति । आह--निरूपणविकल्पात्मकत्वमप्यसिद्धमिन्द्रियज्ञानस्येति, आचार्योऽत्र तत्साधनार्थमाह **--आलम्बनविपरीतप्रतिपत्त्यात्मकत्वात्** । तत्रालम्बनं द्रव्यसन्तो नीलादिपरमाणवो न तत्समूहो नीलपीताद्याकारवान्, संवृतिसत्त्वात् । तस्यापि नीलपीताद्याकारस्य प्रत्येकं तारतम्यवत्त्वात् यथा प्रतिपत्तिर्न तथालम्बनमित्यालम्बनविपरीतप्रतिपत्त्यात्मकं तत् । यदालम्बनविपरीतप्रतिपत्त्यात्मकं न तत् प्रत्यक्षम्, यथा स्थाणौ पुरुषप्रतिपत्तिरिति । स्यान्मतम्—

---

१३ स्वे ] **स्वेनैवेतद्वच°**nayacakra-ms-ya ॥
१४ दाहं ] **यौनप्रतिकौस्मि** प्र° ॥
१७ त्व ] **°त्वविशिष्टं**nayacakra-ms-ya ॥
१८ सा ] **साद्यते** प्र° ॥
१८ नात्म ] **क तस्य**nayacakra-ms-ya ॥
२२ आ ] **आचार्योतु तत्साध°** प्र° ॥
२३ त ] अत्र एतादृशचिह्नान्तर्गतो यः **तत्रालम्बनं** इ आरभ्य **नीलपीताद्याकारत्वान्न** इत्यन्तः पाठस्तत्स्थाने सर्वास्वपि nayacakra-ms-ya प्रतिषु एवंविधः पाठ उपलभ्यते **--यथा प्रतिपत्तिरिति स्यान्मतं द्रव्यसतामेवाणूनां नीलपीताद्याकारवान् संवृतिसत्त्वात् तस्यापि नीलपीताद्याकारस्य प्रत्येकं तारतम्यवत्त्वात् यथाप्रतिपत्तिरिति स्यान्मतं द्रव्यसतामेवाणूनां नीलपीताद्याकारत्वान्न** । अयं nayacakra-ms-ya प्रतिस्थः पाठः खण्डितत्वात् परिभ्रष्टत्वात् क्वचिद्द्विर्भूतत्वाद्यासङ्गत इति परित्या एव ॥

द्रव्यसतामेवाणूनां नीलपीताद्याकारत्वान्न विपरीता प्रतिपत्तिरिति, एतच्चायुक्तम्, - /ms आकारस्य **अध्यारोपा- त्मकत्वात्,** माणवके सिंहत्वाध्यारोपवत् । स चाध्यारोपित इति कुतो गम्यते ? **सामान्यरूपविषयत्वात्** । तत्सामान्यं च कारीष-तौष-तार्ण-पार्णादिविशेषानाश्रिताग्नित्ववत् । तदपि असिद्धमिति चेत्, सिद्धमेव, **तदतद्विषयवृत्तित्वात्** । स च असश्च विषयस्तदतद्विषयौ, तत्र वृत्तिरस्येति तदतद्विषयवृत्ति तद् ज्ञानम्, अनेकपरमाणुसमूहजत्वात् तस्य समूहे तेषु च वृत्तत्वात्, समूहस्य असत्त्वात् समूहिनामेव द्रव्यसतामणूनां सत्त्वात् तयोश्च अभेदेन नीलाद्याकारपरिग्रहेण ज्ञानोत्पत्तेः । समूहासत्त्वं च तदग्रहे तद्बुद्ध्यभावात्, बलाकापङ्क्ति-मुष्टि-ग्रन्थ्यादिवत् । उक्तं च—

गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत् तु दृष्टिपथप्राप्तं तन्मायेव सुतुच्छकम् ॥ षष्टित॰ इति
64/mj ।§ 228

* * *

उक्तं वोऽभिधर्मे एव--सञ्चितालम्बनाः पञ्च विज्ञानकायाः, रूपादिपरमाणोरेकस्यासञ्चितस्यालम्बनस्य घटनीलादिष्वभावात् । तथा सम्भावनेऽपि तेषामतीन्द्रियत्वादालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां रूपादिपरमाणुसङ्घात एवालम्बनम् । ततः प्रत्येकमालम्बनपरमाणूनां परमार्थसतामेषामविषयता ।

* * *

अतः **सदसदभेदपरिग्रहात्मकत्वात्** तैमिरिक (Edtext outside numbered paragraph)केशोण्डुकादिज्ञानवत् तदतद्विषयत्वमस्य । किञ्चान्यत् — **सर्वथा साधारणार्थत्वात्** । साधारणोऽर्थोऽस्य ज्ञानस्येति साधारणार्थम् । तत्साधारणार्थत्वमभेदपरिग्रहात्मकत्वात् । आ (Edtext outside numbered paragraph)दिग्रहणात् अन्वयव्यतिरेकार्थविषयत्वात् सामान्यविशेषात्मकार्थविषयत्वात् इत्यादिभ्यो हेतुभ्यः । दृष्टान्तोऽनुमानादिज्ञा (Edtext outside numbered paragraph)नानि त्वयैवोदाहृतानि—

भ्रान्तिसंवृतिसज्ज्ञानमनुमानानुमानिकम् ।
स्मार्ताभिलाषिकं चेति तदाभासं सतैमिरम् ॥ प्र॰ समु॰ १ । ८ इति ।§ 230

---

२ स] सदाध्यारोपित प्र॰ ॥
५ स] स च सश्चnayacakra-ms-bhā । स चासंश्च nayacakra-ms-ya ॥
७ स] समूहस्यात्सत्वात् प्र॰ ॥
११ सु] सतुच्छकंnayacakra-ms-vi । समुत्थकं nayacakra-ms-pā ॥

१२ भ्रान्तिसंवृतिस] ॰संज्ञान॰ प्र॰ ॥
१३ स्मा] स्माभिलाषिकंnayacakra-ms-ya ॥
१३ त] प्रत्यक्षाभं सतैमिरम् --प्र॰ समु॰ ॥

तस्माद्धेतुपारम्पर्येण कल्पनात्मकत्वसिद्धेरेकैकस्माद्वोक्तहेतोरप्रत्यक्षमिदं कल्पनापोढलक्षणलक्षितं ज्ञानम्, **अनुमानादिज्ञानवदिति**, यथा अनुमानादिज्ञानं कल्पनात्मकत्वादप्रत्यक्षं तथा भवतेष्टमिन्द्रियज्ञानम् । § 231

मा मंस्थाः प्रोक्तकल्पनात्मकत्वादिहेत्वसिद्धिः इति । यस्मादुक्तं **वोऽभिधर्म एव** अभिधर्मपिटक एव **बुद्ध**वचनेऽभिहितम् --**सञ्चितालम्बनाः पञ्च विज्ञानकाया** इति । *नित्यं सम्प्रयुक्तकधर्मैर्युक्तत्वाद् रागादिभिः काया इत्युच्यन्ते पञ्च चक्षुरादिविज्ञानानि । **रूपादिपरमाणोरेकस्य असञ्चितस्य** अन्यैः समानजातीयैरसङ्गतस्य **आलम्बनस्य** विषयस्येन्द्रियबुद्धिग्राह्यत्वस्य **घटादिषु** घटपटरथादिषु **नीलादिषु** रूपरसगन्धस्पर्शब्देषु तद्गुणेषु प्रत्यक्षाभिमतेषु संवृतिसत्सु **अभावात्** सञ्चिताणुघटनीलाद्याकार एव गृह्यते चक्षुरादिभिः । तस्यां चावस्थायां परमाणुत्वेन अवस्थानम् **आर्हतान्** प्रत्यसिद्धम्, परिणामान्तरापत्त्यभ्युपगमात् । **वैशेषिकाणां** परमाण्वारब्धावयविद्रव्यम् । **साङ्ख्यानां** समवस्थानविशेषापन्नाः सत्त्वादयो गुणाः । लौकिकानां तु स्थूलकार्यानुमिततज्जातीयसूक्ष्मकारणमात्रसम्भावनम्--सन्ति केचित् सूक्ष्मा बहवः स्थूलस्य कारणभूताः पटस्येव तन्तव इति । सम्भावितानां **तथासम्भावनेऽपि तेषां** सङ्घात-परिणामाभ्यामृते चाक्षुरत्वाद्यभावो लोकव्याप्ताणुवत्, अतो**ऽतीन्द्रियत्वादा**लम्बनत्वानुपपत्तिः । अतश्चा**लम्बनत्वानुपपत्ते**र्द्रव्यसतां परमाणूनामेतत् प्रतिपत्तव्यम् --**चक्षुरादिविज्ञानानां रूपादिपरमाणुसङ्घात एव आलम्बन**मिति । **आदि**ग्रहणाद् रसादिपरिमण्डलादिपरमाणुसङ्घात एव आलम्बनम् । ततः किमिति चेत्, **ततः प्रत्येकमालम्बनपरमाणूनाम्**, आलम्बनार्थाः परमाणव आलम्बनपरमाणवः, तेषां **परमार्थसतामेषाम्**, त एव हि परमार्थसन्तो न समूहो नीलादिर्घटादिश्च संवृतिसत्त्वात्, भवत्सिद्धान्तेनैव **अविषयता** परमाणूनाम् । § 232

- /ms

- /ms

65/mj

तत्र प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वे रूपसङ्घाते इन्द्रियसन्निकृष्टे आलम्बनविपरीता येयं प्रतिपत्तिरव्यपदेश्यैकात्मक-

---

३ भ] भवतीष्ट॰ प्र॰ ॥
४ त्वा] ॰त्वादिहेत्तसिद्धि॰ ॰ ।
त्वादिहेतुसिद्धि॰ nayacakra-ms-ya ॥
६ *] नित्यसंप्र॰nayacakra-ms-ya ॥
७ क्षुरादिविज्ञाना] ॰नानि तानि हि रूपादिपरमाणो॰nayacakra-ms-ya ॥
७ अ] असंचितस्यान्यैः समान॰nayacakra-ms-bhā । असंचितस्यत्नैः समान॰ nayacakra-ms-ya ॥
८ न] ॰नस्याविषय॰ nayacakra-ms-ya ॥
८ य] ॰यसेंद्रिय॰ प्र॰ ॥
८ बुद्धिग्रा] अत्र ॰ग्राह्यस्य इति पाठः सम्भाव्यते ॥
१२ प] परिमाणांतरा॰nayacakra-ms-ya ॥
१६ व्या] ॰व्याप्त्याणु॰nayacakra-ms-ya ॥
१७ त्वा] ॰त्वाद्यलंबन॰nayacakra-ms-bhā । ॰त्वाद्यालंबन॰ nayacakra-ms-ya ॥
१८ माणुस] ॰संबोधत प्र॰ ॥

**नीलरूपविषया ननु हेत्वपदेशव्यपदेश्यैव सा । यतः सञ्चयग्रहणापदेशेन व्यपदेश्यं धूमेनेवाग्निरिव गृह्यते ततोऽन्यत् कल्पितमेकं सामान्यं नीलरूपं तद्द्वारेण ।** § 233

**तत्र प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वे,** प्रत्येकं विविक्तानि रूपान्तराणि प्रतिपरमाणु वा रसादिभेदेन वा, तेषामेव रूपान्तराणामविविक्तं स्वतत्त्वं यस्य सोऽयमविविक्तस्वतत्त्वः । कोऽसौ ? रूपसङ्घातः, रूपधातुभेदपरमाणुसङ्घातः अधिकृतचक्षुर्विषयाभिमतरूपसङ्घातो वा । तस्मिन् **रूपसङ्घाते इन्द्रियसन्निकृष्टे** स्वविषय्याभिमुख्येन उपस्थिते **आलम्बनविपरीता** परमार्थत आलम्बनभूतेभ्यः परमाणुभ्यः नीलम् इति वा घटः इति वा **येयं प्रतिपत्तिः** सा विपरीता, तदग्रहे तद्बुद्ध्यभावात्, बलाकासु पङ्क्तिज्ञानवत्, **अव्यपदेश्यैकात्मकनीलरूपविषया,** व्यपदेश्यानेकपरमाण्वालम्बनेभ्योऽन्योऽव्यपदेश्य एक आत्मा अस्येति अव्यपदेश्यैकात्मकम्, किं तत् ? नीलरूपम्, तद् विषयोऽस्या इति **अव्यपदेश्यैकात्मकनीलरूपविषया** अभिमता प्रतिपत्तिः इति वर्तते । सैव वा प्रतिपत्तिरव्यपदेश्या एकात्मकानेकपरमाणुनीलरूपविपरीतैकनीलरूपविषया, तद्व्याख्यानार्थम**भिधर्मपिटके** भवतां यथोच्यते --**नीलं विजानाति, नो तु नीलम् इति** । नाव्यपदेश्या सा प्रतिपत्तिरित्यभिप्रायः, तं प्रदर्शयति --**ननु हेत्वपदेशव्यपदेश्यैव सा** । यस्मादुक्तम् --**हेतुरपदेशो निमित्तं लिङ्गं प्रमाणं कारणमित्यनर्थान्तरम्** वै० सू० ९ । २ । ४ इति । न चावश्यं शब्दाभिधेयमेव व्यपदेश्यम्, किं तर्हि ? यद्यदर्थान्तरेणाधिगम्यते तत्तद्व्यपदेश्यम्, अर्थान्तरस्य हेत्वपदेशनिमित्तादिपर्यायत्वात् । तवापि च **यतः सञ्चयग्रहणापदेशेन** निमित्तान्तरजन्यमि- न्द्रियज्ञानमिष्टं तस्माद् **व्यपदेश्यं** तत् । तथा चोक्तम् --**सञ्चितालम्बनाः पञ्च विज्ञानकायाः** अभि० पि० इति, न सञ्चयालम्बना इति । एतस्यार्थनिदर्शनार्थमुदाहरण-

- /ms

४ त] तच प्रति°nayacakra-ms-bhā ‖
४ राविविक्त] °क्तस्य तत्त्वेnayacakra-ms-ya ‖
५ स्व] स्वं तत्त्वंnayacakra-ms-bhā । स्वतंत्वं nayacakra-ms-vi ‖
६ विविक्त] °क्तंस्व°nayacakra-ms-ya ‖
८ स्व] स्वविषयाभि°nayacakra-ms-ya ‖
१० अ] अद्यपदे° प्र° ‖
११ म्ब] °म्बनेभ्योन्येन्यपदेश्य प्र° ‖
१४ ए] एकात्मिकानेक°nayacakra-ms-ya । एकाऽनेक° nayacakra-ms-bhā । अत्र यद्यपि nayacakra-ms-ya प्रतिषु एकात्मिका° इति पाठ उपलभ्यते तथापि प्रतिपत्तेरेकात्मकत्वस्य आलम्बनविपरीतप्रतिपत्तित्वासाधकत्वात् एकात्मकनीलरूपविषयत्वस्यैव तत्साधकत्वाच्च एकात्मकानेक° इत्येव पाठोऽत्र समीचीन इति भाति ‖
१५ माणु] नीलविपरीतै°nayacakra-ms-bhā ‖
१८ म्] हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् --वै° सू° ‖
१९ य] यदर्थो° nayacakra-ms-ḍenayacakra-ms-līṃnayacakra-m । मदर्थो° nayacakra-ms-raṃ nayacakra-ms-hī ‖
२१ त] तथापि च प्र° ‖
२१ ज] °जनामि° प्र° ‖

माह --**धूमेनेव अग्निरिव गृह्यते,** यथा धूमेन अर्थान्तरभूतेन अग्निरत्र इति ज्ञानमुत्पद्यमानं व्यपदेश्यं दृष्टं तथैतदपि नीलरूपादिविषयं चक्षुरादिविज्ञानं परमाणुभिरर्थान्तरैर्जनितत्वाद् व्यपदेश्यम् । **ततोऽन्यदित्यादि** । तत एव यथा व्यपदेश्यं तथा धूमादग्निरिव तद् **नीलरूपं ततः** परमाणुभ्यः परमार्थसद्भ्यः **अन्यत् कल्पितमकल्पितेभ्य एकं** बहुभ्यः **सामान्यं** विशेषेभ्यः, न साक्षादिन्द्रियैरव्यवहितं गृह्यते, किं तर्हि ? व्यवहितमेवार्थान्तरैः परमाणुभिः **तद्द्वारेण** परमाणुद्वारेण गृह्यते, न स्वत एवेति । § 234

66/mj

नन् च सञ्चयस्य कारकहेतुत्वेनापदेशः प्रत्यक्षप्रतिपत्तेर्न धूमवज्ज्ञापकहेत्वपदेशतया अग्नेरिवार्थान्तरस्यैकरूपत्वस्य । नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिः, यदीदं प्रत्यक्षं स्यात् कारकादेव स्वार्थादालम्बनाद्धेतोर्जायेत दाहानुभवनवत् प्रत्यक्षत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्य स्वलक्षणविषयत्वादनध्यारोपात्मकत्वादिति यावत् । § 235

अत्राह --**ननु च सञ्चयस्ये**त्यादि याव**दर्थान्तरस्यैकरूपत्वस्ये**ति । **न**न्वित्यनुज्ञापने, **च**शब्दः प्रसिद्धभेदसमुच्चये, नन्विदं प्रसिद्धम्--अन्यः कारको हेतुरन्यो ज्ञापक इति । तस्मादणूनां तत्सञ्चयस्य नीलस्य च कारकसम्बन्धाद् धूमस्याग्नेश्च ज्ञापकसम्बन्धात् प्रत्यक्षानुमानप्रतिपत्त्योर्वैषम्यमतः साध्यधर्मवैकल्यं दृष्टान्तस्य इष्टविघाताद् विरुद्धता हेतोरिति वाक्यार्थः । अक्षराण्युक्तानार्थान्येवेति न विवृण्महे । § 236

अत्राचार्यो दोषद्वयं परिहरन्नाह **--नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिः** । नैतदनिष्टमस्माकं न वा साध्यधर्मवैकल्यं यत् सञ्चयस्य ज्ञापकत्वप्रसङ्गात् प्रत्यक्षप्रतिपत्तेस्तद्दोषद्वयमस्मान् प्रत्यापाद्येत । न पुनरेवमेतत्, अस्यैव प्रतिपिपादयिषितत्वात् । तदुच्यते **--यदि** भवन्मतमिदं **प्रत्यक्षं स्यात्, कारकादेव** निष्पादकादेव चक्षुरादिविज्ञानस्य नील- - /ms

५ अ ] अन्यकल्पित° प्र° ॥
१४ र्था ] °र्थान्त-
स्यैक°nayacakra-ms-bhānayacakra-ms-vi
विना । दृश्यतां पृ° ७७-- २ ॥
१७ स ] °संबद्धाधूमस्य प्र° ॥
१७ प्र ] °प्रतिपत्त्योर्थैषगम्यतः
साध्य°nayacakra-ms-ya ॥
१८ ध ] °धर्मविकल्पं प्र° ॥
१८ दृष्टान्त ]
°न्तस्यैष्ट°nayacakra-ms-vi विना ॥
२२ प्र ]
प्रत्यापाद्येवnayacakra-ms-bhā ।
प्रत्यपाद्येव nayacakra-ms-ya ॥
२३ रेव ] nayacakra-ms-bhā
विनान्यत्र --°वमेवदस्यैव
nayacakra-ms-pā
nayacakra-ms-vi । °वमेवचस्यैव
nayacakra-ms-ḍe
nayacakra-ms-līṃ । °वमेववस्यैव
nayacakra-ms-raṃ
nayacakra-ms-hī ॥
२४ स्या ] nayacakra-ms-bhā
विनान्यत्र --स्यादकारका°

पीतादेः **स्वार्थाभिमतादालम्बनभूताद्धेतोर्जायेत** सञ्चयाख्यात् संवृतिसतः, न परमार्थसतोऽण्वादेरपि स्यात्, भवति तु । तस्मान्न प्रत्यक्षम्, ज्ञापक-धूमाद्यपेक्षाग्निज्ञानवत्, वैधर्म्येण **दाहानुभवनवत्** । स्वार्थमात्रालम्बनं वा स्यात् **प्रत्यक्षत्वाद्** दाहानुभवनवत् । यथोक्तम्—

अन्यथा दाहसम्बन्धाद्दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥ वाक्यप॰ २ ।
४२१§ 239

**अव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्ये**ति तस्यैवोपचयहेतुः, अर्थान्तरेणाव्यपेतस्यार्थस्य ग्राहकं प्रत्यक्षं दृष्टम्, यथा दाहानुभवः, तथा तस्य स्वलक्षणविषयत्वात् प्रत्यक्षस्यार्थान्तरनिरपेक्षता स्यात्, न पुनरस्तीति **स्वलक्षणविषयत्वादनध्यारोपात्मकत्वादिति यावत्**, सर्वत्रार्थान्तराध्यारोपवृत्त्यर्थान्तरहेयतयोत्पन्नं न ज्ञानमिति यावदुक्तं भवति तावदुक्तं भवति **स्वलक्षणविषयत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षत्वा**दित्यादि । अर्थान्तरनिमित्तग्राह्यं चाप्रत्यक्षं दृष्टम्, यथा दाहशब्दजनितज्ञानमिति । एवं तावत् कारकतां सञ्चयस्याभ्युपगम्य दोष आपादितः । § 240
67/mj

कारकतापि च सञ्चयस्य नैव तस्य, परमार्थतोऽसत्त्वादलातचक्रवत् प्रत्यवयवव्यवस्थानमात्रत्वात् । लोकवत्तु सञ्चयसत्त्वे विशिष्टोऽपदेशो व्यपदेशो ग्राह्यादन्यः, तेन व्यपदेशेन व्यपदेश्यं प्रमेयमनुमेयं न प्रत्यक्षम्, धूमानुमिताग्निवत्, § 241

इदानीं कारकतामपि दूषयितुकाम आह --**कारकतापि च सञ्चयस्य नैवास्ति तस्ये**ति प्रतिज्ञा, **परमार्थतोऽसत्त्वा**दिति हेतुः । **अलातचक्रव**दिति दृष्टान्तः । परमार्थतोऽसत्त्वं संवृतिसत्त्वाद् भवन्मतेन घटवत् । यथोक्तम्—

---

nayacakra-ms-vi
nayacakra-ms-ḍe
nayacakra-ms-līṃ । स्यावकारका॰
nayacakra-ms-raṃ
nayacakra-ms-hī । स्मावकारका॰
nayacakra-ms-pā ॥
३ पेक्षाग्निज्ञा ] ॰ज्ञावत्nayacakra-ms-bhā विना ॥
५ अ ] अन्यथैवाग्निसम्बन्धाद्दाहं दग्धोऽभिमन्यते । अन्यथा दाहशब्देन दाहाद्यर्थः प्रतीयते ॥ --**वाक्यप॰** ॥
१० ध्या ] ॰ध्यारोपत्वादितिnayacakra-ms-ya ॥
१० र्थान्त ] ॰न्तराहपतयोत्पन्नं तज्ञानामितिnayacakra-ms-ya । ॰न्तराह ॥ पतयोसन्नं तज्ञानमिति nayacakra-ms-bhā ॥ अत्र अर्थान्तराध्यारोपवृत्ति अर्थान्तरहेयतयोत्पन्नं न ज्ञानम् इत्यर्थः प्रतिभाति । अर्थान्तरहेयतया अर्थान्तरगम्यतयेत्यर्थः, हि गतौ पा॰ धा॰ १२५८ इति हिधातोर्गत्यर्थत्वात् सर्वेषां गत्यर्थानां च ज्ञानार्थत्वात् । तुलना--अतस्तदर्थत्रयमुपसंहृत्य हेतुहेयनिगमनार्थमाह --**नयचक्रवृ॰** पृ॰ ९७-- २ । अर्थान्तरनिमित्तग्राह्यं चाप्रत्यक्षं दृष्टम् पं॰ २३ इति च वक्ष्यते ॥
१२ त्वा ] ॰त्वादेर्व्यव॰nayacakra-ms-bhā ॥
१३ चा ] वा[ऽ]प्रत्यक्षं प्र॰ ॥

यस्मिन् भिन्ने न तद्बुद्धिरन्यापोहे धिया च तत् ।
घटाम्बुवत् संवृतिसत् परमार्थसदन्यथा ॥ अभि° को° ६ ।
४ इति ।§ 244

यथा उल्मुकं भ्रमद् भ्रान्तदृष्टेश्चक्रवदाभाति, न तच्चक्रमस्ति, अग्निकणानां नैरन्तर्याभावात्, चक्रस्य पर- मार्थतोऽसत्त्वाच्च चक्रविज्ञानस्य अकारकता एवं सञ्चयस्य संवृतिसत्त्वान्नीलविज्ञानस्य अकारकता । तथा अतीन्द्रियत्वादणुनीलानाम् । इतश्च सञ्चयस्य अकारकता, **प्रत्यवयवव्यवस्थानमात्रत्वात्,** अवयवमवयवं प्रति प्रत्यवयवम्, अवयवा नीलादिपरमाणवः, तेषामेव संहत्यैकत्र परस्परासत्त्या व्यवस्थानमात्रं सञ्चयो न तेभ्योऽर्थान्तरमिष्टं भवताम् । अतः परमार्थतो नास्त्येवासौ सञ्चयो नाम कश्चित् । तस्य असतः खरविषाणस्येव का कारकता ? § 245

अभ्युपेत्यापि सञ्चयस्य सत्त्वं दोषं ब्रूमः **--लोकवत्तु सञ्चयसत्त्वे,** यथा लोकस्य अव्युत्पन्नस्यापि समुदायिव्यतिरेकेण सन्नेव अवयवी परिणामान्तरं तत्समुदायो वा योऽस्तु सोऽस्तु परैर्व्युत्पादितः सन्नेवासौ तन्तुपटादिषु बुद्धि-शक्ति-कार्या-ऽभिधान-सङ्ख्यादिभेददर्शनादिष्टः, तत्राक्षरार्थानुसारेण व्यपदेशोऽस्त्येवेति गृह्यताम् । ततश्च अव्यपदेश्यो विषयः प्रत्यक्षस्य, प्रत्यक्षं चाव्यपदेश्यम् इत्युभयमनृतम् । तत् कथमिति चेत्, **विशिष्टोऽपदेशो व्यपदेश** इति **विशब्दस्य** विशिष्टार्थताम् **अपदेश**शब्दस्य हेत्वर्थतां च दर्शयति

---

१ य] यत्र भिन्ने--इति **अभिधर्मकोशे** पाठः ॥
१ द्बुद्धिर] °रन्यापोहधियाnayacakra-ms-ya ॥
१ त] यत् प्र° । अत्र तत् इति **अभिधर्मकोशे** पाठस्तथैव च व्याख्यातो वसुबन्धुना तद्भाष्ये । नयचक्रवृत्तिकृतामपि तत् इति पाठ एव सम्मतः, यतस्तैरेव अस्य श्लोकस्य विवरणावसरे इत्थं व्याख्यास्यते--यस्मिन् घटे भिन्नेऽवयवशो न तद्बुद्धिर्भवति **तद्** घटवत् संवृतिसत् --नयचक्रवृ° पृ° ६६-- १ ॥
२ टाम्बु] °म्बु-वृत्nayacakra-ms-bhānayacakra-ms-vi विना ॥
३ दा] °दाहातिnayacakra-ms-bhā ॥
४ मा] °मार्थतोसत्वाच्च-क्र°nayacakra-ms-pānayacakra-ms-ramnayacakra-ms-hī- । °मार्थसतोसत्वाच्च चक्र° nayacakra-ms-bhā ॥
५ त्वा] °त्वान्नीलंविज्ञा°nayacakra-ms-ya ॥
६ प्र] °प्रत्यवयवस्थान° प्र° ॥
७ व] °मवयं प्रतिnayacakra-ms-ya ॥
८ तेषामेव] संहतैकत्र प्र° ॥
९ ना] नाम कंचित्nayacakra-ms-bhā । न मे कंचित् nayacakra-ms-ya ॥
१० ख] खरविषाणस्यैवnayacakra-ms-bhā । रसविषाणस्यैव nayacakra-ms-ya ॥
१२ प] परिणामान्तरत् । तत्समु°nayacakra-ms-bhā । परिमाणान्तरवत् । तत्समु° nayacakra-ms-ya । दृश्यतां पृ° ६४ पं° ११ ॥
१३ स] सन्नेवासौnayacakra-ms-bhā ॥
१४ नादिष्टः] °ष्टसूत्राक्ष° प्र° ॥
१५ गृ] गृह्यतान् ।nayacakra-ms-bhā ॥
१७ स्य] हेत्वर्थतां त दर्श°nayacakra-ms-ya । हेत्वर्थतां दर्श° nayacakra-ms-bhā ॥

। विशिष्टोऽन्य इत्यर्थः । कुतोऽन्य इति चेत्, उच्यते --**ग्राह्यादन्यः**, ग्राह्यो नीलादिः, तस्मादन्यः सञ्चयस्तद्व्यपदेशः । **तेन** सञ्चयेन **व्यपदेशेन** हेतुना **व्यपदेश्यम्,** किं तत् ? **प्रमेयं** नीलादि त्वदभिमतप्रत्यक्षप्रमाणगम्यम् । किं भवति तन्नीलादिरूपम् ? **अनुमेयं** प्राप्नोति, व्यपदेशव्यपदेश्यत्वात्, **न प्रत्यक्षम्** । तस्य ज्ञेयस्यास्मादेव हेतोः प्रत्यक्षत्वाभावोऽनुमेयभावश्च साध्य-
- /ms ते, तद्वज्ज्ञानस्य अप्रत्यक्षता अनुमानता च साध्यते । को दृष्टान्तः ?
68/mj **धूमानुमिताग्निवत्** । यथा धूमेन व्यपदेशेन साधितोऽग्नि

* * *

कारकतायामकारकतायां वा वस्तुनः पितृधूमादिवत् ।

अभिधानाव्यपदेश्यतैकात्मकत्वे अपि च नैव, अनुमिताग्निवद् बहुविषयत्वाद् नीलस्य ।

तद्धि नीलरूपनिरूपणं विकल्पः, प्रतिपरमाणुपरस्परप्रतिभिन्नस्वतत्त्वानेक-

* * *

रनुमेयोऽप्रत्यक्षश्च तथा नीलरूपम् । यथा च धूमालम्बनोत्पादिताग्निज्ञानमनुमानमप्रत्यक्षं च तथा नीलज्ञानं संयोगोत्पादितमिति । § 246

किञ्चान्यत्--सर्वथा तद् नीलादिज्ञानं तेन सञ्चयेन व्यपदेश्यं तदविनाभावात् तस्य, **कारकतायामकारकतायां वा** न कश्चिद् विशेषो व्यपदेश्यत्वसिद्धौ **वस्तुनः** । कुतः ? अर्थान्तरनिमित्तादेव, **पितृधूमादिवत्,** यथा पिता पुत्रस्य जनकः, तेन व्यपदिश्यते कारकेण पुत्रः धूमेन ज्ञापकेन अग्निः, अविशिष्टत्वाद्वस्तुनः । ततस्तुल्ये व्यपदेश्यत्वहेतौ अप्रत्यक्षत्वानुमानत्वसाधनसमर्थे सत्यव्यपदेश्यनिरोधकोऽयमनर्थको विचारः कारको ज्ञापक इति कारकत्वमभ्युपेत्याप्येष दोषोऽभिहितः । एवं तावदर्थकृतोऽस्य नीलस्य व्यपदेशः सिद्धो यत्सिद्धेरप्रत्यक्षानुमेयत्वे सिद्धे । तत्सिद्धेश्च तज्ज्ञानस्य अनुमानत्वं सिध्येत् अव्यपदेश्यत्वादिलक्षणविरोधश्च । एवं तावदर्थतो व्यपदेश्यमेव । § 247

यदपीष्टम्--अभिधानतो न व्यपदेश्यं तन्नीलादिपरमाणुरूपं परमाणुसमूहाभेदादेकं चेति, एते द्वे **अभिधानाव्यपदेश्यतैकात्मकत्वे अपि च**

२ न्यः] °न्य सञ्च° प्र° ‖
३ प्र] अमेयं प्र° ‖
४ प] °पदेश ।
त्वात्nayacakra-ms-bhā ।
°पदेशत्वात् nayacakra-ms-ya ‖
६ त]
तद्वज्ज्ञानस्यnayacakra-ms-bhā ।
तज्वज्ञानस्य nayacakra-ms-ya ‖
६ अनुमा] °मानत्यव साध्यते प्र° ‖
१५ था] नीलं
रूपम्nayacakra-ms-ya ‖
१८ क] °कतया
वाnayacakra-ms-ya ‖
१९ य] थथाnayacakra-ms-bhā ‖
२१ स्तु] °स्तुल्यो प्र° ‖
२१ त्वानुमा] °मानसाधन°
nayacakra-ms-ya ‖
२२ देश्य] °निरोधिकोऽयम° प्र° ‖
२४ त] तद्ज्ञानस्यnayacakra-ms-ya
। तज्ज्ञानस्य nayacakra-ms-bhā ‖
२८ मूहाभेदादेकं] वेति प्र° ‖

**नैव** स्तो नीलरूपस्य इति प्रतिज्ञा । दृष्टान्तो**ऽनुमिताग्निव**दिति प्रतिपत्तिसौकर्यात् प्रागेव हेतोर्दृष्टान्त उक्तः, तद्बलावयवसिद्धेः । हेतुसमर्थनार्थत्वात् दृष्टान्तस्य हेतुस्तर्हि क इत्यत्रोच्यते --**बहुविषयत्वात्** । यथा धूमज्ञानानुमितोऽग्निरबादिविनिवृत्त्युपलक्षितो देशकालादिभेदभिन्नोऽपि अभिधानव्यपदेश्योऽनेकात्मकत्वापन्न एव गृह्यते तथा **नीलार्थो**ऽपि स्याद् बहुपरमाणुविषयत्वात्, तथा ज्ञानमपीति । § 248 - /ms

इदानीं प्रागभिहितकल्पनात्मकत्वादिभिर्हेतुभिरनुमानात् पापीयस्त्वं तस्य प्रत्यक्षस्य प्रतिपादयितुकाम आह --**तद्धि नीलरूपनिरूपण**मित्यादि । तदिति प्रागपदिष्टं विकल्पात्मकत्वम्, **हि**शब्दो यस्मादर्थे, यस्मान्नीलरूपस्य निरूपणमुक्तन्यायेन अर्थव्यपदेशेन शब्दव्यपदेशेन वा दृष्टम्, स च **विकल्प** एवेत्यविकल्पकत्वं नास्ति, अतः कल्पनापोढम् इति दुष्टं लक्षणं ज्ञानार्थयोः । अध्यारोपाच्च निरूपणं तस्य, तत् कथमिति चेत्, उच्यते --**प्रतिपरमाणु** परमाणुं परमाणुं प्रति प्रतिपरमाणु **परस्परतः प्रतिभिन्नानि स्वानि तत्त्वानि** । यो यस्य भावः स तस्य तत्त्वम्, न सोऽन्यत्र भवति, भवनमेव हि तत्त्वम्, अतो विभिन्नानि प्रतिपरमाणु तत्त्वानि, एकैकस्य परमाणोः परमाण्वन्तरेभ्योऽत्यन्तभिन्नं स्वं तत्त्वम्, भावान्तरमनपेक्ष्य 69/mj

* * *

रूपैकतत्त्वैकरूपाध्यारोपाद् रूपान्तरसामान्यरूपविषयत्वात् तदतद्विषयवृत्तत्वादतदनपोहाद् नाग्न्यनुमानवत् तत्सामान्यात्मकतैव, प्रज्ञप्तिपरमार्थस्थितसञ्चयपरमाणुपरिग्रहाभेदात्मकत्वात् सर्वथा साधारणार्थता, कल्पनात्मकत्वान्न प्रत्यक्षम्, अप्रत्ययप्रत्ययात्मकत्वात्, शब्दाश्रावणत्वप्रत्ययवत् । संवृत्यतीन्द्रियत्वाभ्यां हि

* * *

स्वरसेनैव भवनाद् भावानामेकवचदसाधारणभवनत्वात् परमाणूनां स्वानि

---

२ त] तद्बला चासौ अवयवसिद्धिश्चेति तद्बलावयवसिद्धिः इति समासे यथाश्रुतपाठः सङ्गच्छते । तद्बलादवयवसिद्धेः इत्यपि सम्भवेदत्र पाठः, दृश्यतां पृ° ५१ पं° ९ ॥

४ ज्ञानानुमितोऽग्निर] °रपादि° प्र° ॥

७ त्वा] °त्वादिभिहे°nayacakra-ms-ya । °त्वादितिहे° nayacakra-ms-bhā ॥

१० दृ] दृष्टnayacakra-ms-ya ॥

११ दु] दृष्टंnayacakra-ms-ya । द्रष्टंव्यं nayacakra-ms-bhā ॥

१४ न] नासो° प्र° ॥

१६ म] °मनंवेक्षnayacakra-ms-raṃ । °मनंपेक्ष nayacakra-ms-hī । °मनवेक्ष्य nayacakra-ms-raṃ nayacakra-ms-hī विना ॥

२३ स्व] स्वरसोनेवnayacakra-ms-ya ॥

२३ भा] भावनामेकवचसाधारणभवनत्वाद्भवनत्वत्वात्पर°nayacakra-ms-bhā । भावानामेकवचसाधारणभवनत्वा २ त्पर° nayacakra-ms-ya । अत्र भावानामेकवदसाधारणभवनत्वादसाधारणभवनत्वात् परमाणूनाम् इत्यपि पाठः nayacakra-ms-ya प्रतिपाठानुसारेण सम्भाव्यते । एकैकवत् सर्वेषां परमाणूनामत्यन्तभिन्नं स्वतत्त्वमित्यभिधातुम् असाधारणभवनत्वादसाधारणभवनत्वात् इति वीप्सया प्रयोग इति भाति । अथवा भावानाम्, एवं चासाधारणभवनत्वात् परमाणूनाम् इत्यपि पाठोऽत्र स्यात् ॥

तत्त्वानि भिन्नानि । तथा तेषां परमाणूनां नीलादिरूपाण्यप्य**नेकरूपाण्**येव । तेषां च स्वतत्त्वानां तेषां च नीलादिस्वरूपाणामनेकरूपाणामेक-द्वित्रिगुणादिभिन्नानां यथासङ्ख्यम् **एकतत्त्वैकरूपाध्यारोपात्** सर्वपरमाणुतत्त्वानामेकस्वतत्त्वाध्यारोपात् सर्वपरमाणुरूपाणामेकनीलरूपाध्यारोपादर्थान्त-
- /ms रनिरूपणम् । स चाप्यध्यारोपो **रूपान्तरसामान्य- रूपविषयत्वात्,** रूपादन्यद् रूपं रूपान्तरम्, परमाणुरूपात् परमाण्वन्तररूपं रूपान्तरम्, एवं सर्वाणि परमाण्वन्तररूपाणि, तेषां रूपं नीलमित्यभेदेन यत् सामान्यं बुद्ध्या गृह्यते सोऽध्यारोपस्तद्विषयः । तदपि सामान्यं **तदतद्विषयवृत्तत्वात्** सामान्यमित्युच्यते, स चान्यश्चार्थो विषयोऽस्येति कृत्वा । ततश्चात्र प्रत्यक्षेऽन्यस्यानपोहः, अनुमाने त्वनग्नेरग्नेरन्यस्यापोहः । तस्मा**दतदनपोहात्** प्रत्यक्षमविविक्तविषयं स्वविषयाभिमतेऽन्यत्र चापरित्यागेन अभेदेन च वृत्तेः, नानुमानं स्वविषये सामान्यमात्र एव वृत्तेः । अतोऽनुमानात् परपरिकल्पितं प्रत्यक्षं पापीयः सङ्कीर्णतरविषयत्वादिति । तस्माद् **नाग्न्यनुमानव**दिति तत् अग्न्यनुमानतुल्यमपि तन्न भवति, अपोह्यार्थापोहशक्तिशून्यत्वात् । तस्मात् **तत्सामान्यात्मकतैव ग्न्य**नुमानस्य, न प्रत्यक्षस्येति तस्य नीलादेरर्थस्य प्रत्यक्षविषयस्य तज्ज्ञानस्य च तदवस्था सङ्कीर्णरूपता । § 249

किञ्चान्यत्--तदतद्विषयवृत्ततापि न नीलरूपादेस्तज्ज्ञानस्य वोपपद्यते । किं कारणम् ? सदसतोः सम्बन्धाभावात्, घटखपुष्पवत् । तत उपचरितमेव तदतद्विषयवृत्तत्वमपीति तत्प्रदर्शनार्थमाह **--प्रज्ञप्तिपरमार्थस्थितसञ्चयपरमाणुपरिग्रहाभेदात्मकत्वात्** । प्रज्ञप्तिसन् सञ्चयः, परमार्थसन्तस्तु तथास्थिताः परमाणवः, तेषां परिग्रहः सदसदभेदात्मकः, तस्मात् सदसत्परिग्रहाभेदात्मकत्वात् तदतद्विषयवृत्तता । सा च **सर्वथा साधारणार्थता,** सर्वथा एतेष्वनन्तरोक्तेषु हेतुषु । ततो मूलहेतुः **कल्पनात्मकत्वात्** इति स एवैतैः साधितः, तस्मा**न्न** तत् **प्रत्यक्षं** न चानुमानवदसङ्कीर्णस्वविषयमित्येत-
- /ms दर्थभावनार्थाः पुनस्त एव हेतवो व्यापारिताः प्रत्येकमपि पूर्ववदेतस्मिन्नर्थे योज्याः । इतश्च तज्ज्ञानमप्रत्यक्षम्, **अप्रत्ययप्रत्ययात्मकत्वात्, शब्दाश्रावण-**
70/mj **त्वप्रत्ययव**दिति । प्रत्ययः कारणं हेतुरित्यर्थः, न प्रत्ययोऽस्येति अप्रत्ययः,

---

१ त] तथा तथा तेषांnayacakra-ms-bhā ॥
७ सा] सामान्यबुद्ध्याnayacakra-ms-ya ॥
१० त्व] त्वनग्नेरन्यस्या॰nayacakra-ms-bhā ॥
१० द] ॰दतनपो॰nayacakra-ms-bhā ॥
१२ ना] ॰नानुमात्रं प्र॰ । यथा प्रत्यक्षमविविक्तस्वविषयं तथा नानुमानमविविक्तस्वविषयम्, स्वविषये सामान्यमात्रे एव वृत्तेः इत्याशयोऽत्र भाति ॥
१३ व] ॰वददि तत्nayacakra-ms-ya । अत्र ॰वदपि तत् इत्यपि पाठः स्यात् ॥
१६ त] तज्ञानस्य प्र॰ ॥
१९ च] ॰चरितमंच तद॰ प्र॰ ॥
२० रिग्र] ॰ग्रहभेदा॰nayacakra-ms-ya ॥
२२ णा] ॰णार्थताnayacakra-ms-bhā ॥
२३ इ] इति एवैतैःnayacakra-ms-ya ॥

* * *

नाणुषु न सञ्चये प्रत्ययता तथाप्रतिपत्तिं प्रति । अनुमानज्ञानमपि च तन्न प्रतिपूर्यते सम्बद्धगृहीतस्यान्यथाप्रतिपत्तेः, विरुद्धादिज्ञानवत् ।

तिष्ठतु तावत् प्रत्यक्षविधिविधानाभ्युपगमेन स्वलक्षणमात्रविषयप्रत्यक्षत्व-स्य

* * *

कोऽसौ ? प्रत्ययः, प्रत्ययो विज्ञानम्, द्वितीयस्य **प्रत्यय**शब्दस्य विज्ञानार्थ-त्वात्, अकारणज्ञानत्वादित्युक्तं भवति । कथं पुनरकारणं तज्ज्ञानम् ? **संवृत्य-तीन्द्रियत्वाभ्यां** यस्मा**न्नाणुषु न सञ्चये प्रत्ययता तथाप्रतिपत्तिं प्रति,** द्रव्य-सतामविषयत्वात् तस्य, द्रव्यसन्तो हि परमाणवोऽतीन्द्रियत्वादेव न प्रत्यक्ष-ज्ञानहेतवः; तथा नीलत्वादयः संवृतिसन्तः, तत्सञ्चयोऽसत्त्वादेव अकारणम् । तस्मादुभयथापि अप्रत्ययः स प्रत्ययः नीलं रूपम् इति । को दृष्टान्तः ? यथा अश्रावणः शब्दः इति प्रत्ययोऽप्रत्ययोऽप्रत्यक्षं च तथेदमपीति । § 250

स्यान्मतम्--कल्पनात्मकत्वादिभ्य एव हेतुभ्योऽनुमानज्ञानं तर्हि च-क्षुरादिविज्ञानं भविष्यतीति । अत्रोच्यते --**अनुमानज्ञानमपि च तन्न प्रतिपूर्यते** । कर्मकर्तर्यात्मनेपदं यक् च, तत्प्रतिषेधाद् न प्रतिपूर्यते इति रूपम्, य-थाऽयमोदनो विपन्नत्वात् पूतिमांसवदात्मानं न भोजयति न भुज्यते स्वयमेव तथेदमपि ज्ञानमात्मानं न प्रतिपूरयति न प्रतिपूर्यते । कस्माद्धेतोः ? **सम्ब-द्धगृहीतस्यान्यथाप्रतिपत्तेः** । सम्बद्ध एव गृहीतः, तस्य सम्बद्धगृहीतस्यान्य-थाप्रतिपत्तेः, तस्य ज्ञानस्य अन्यथाप्रतिपद्यमानसम्बद्धगृहीतार्थत्वादित्यर्थः । - /ms यद् ज्ञानं सम्बद्धमेवार्थं गृह्णत् तमेवार्थमन्यथा प्रतिपद्यते तद् ज्ञानं नानुमान-मपि सम्पूर्णं भवति । तद्यथा --**विरुद्धादिज्ञानम्** । यथा कृतकत्वान्नित्यः शब्दः इति पक्षधर्मज्ञानं शब्दसम्बन्धि घटादिष्वनित्यानुगमसम्बद्धं गृहीत्वा

७ पु] पुनः कारणं तद् ज्ञानम्nayacakra-ms-ya । पुन कारणं तज्ज्ञानम् nayacakra-ms-bhā ॥
१२ इ] इति प्रत्ययोऽप्रत्यक्षं च प्र॰ ॥
१३ त्वा] ॰त्वादिभ्यो हेतुभ्योnayacakra-ms-ya ॥
१४ त] तत्र प्रति॰nayacakra-ms-ya ॥
१५ य] यक्च तत्प्रति॰ प्र॰ । भावकर्मणोर्यग्विधाने कर्मकर्तर्युपसङ्ख्यानम् --nayacakra-ms-pā वा॰ ३ । १ । ६७ । कर्मवत् कर्मणा तुल्यक्रियः पा॰ ३ । १ । ८७ । कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यात्, कार्यातिदेशोऽयम्, तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । कर्तुरभिहितत्वात् प्रथमा । पच्यते ओदनः । भिद्यते काष्ठम् । --nayacakra-ms-pā सिद्धान्तकउ ३ । १ । ८७ ॥
१७ त] तश्वदमपिnayacakra-ms-bhā ॥
१८ स] सम्बद्धागृही॰nayacakra-ms-ya ॥
२० य] यज्ज्ञानं nayacakra-ms-bhā ॥
२० स] सम्बद्धम-र्थंnayacakra-ms-bhānayacakra-ms-ḍenayacakra-ms-līṃ । सम्बद्धमवार्थं nayacakra-ms-bhā nayacakra-ms-ḍe nayacakra-ms-līṃ विना ॥
२० गृ] गृह्णत्तामवार्थ॰nayacakra-ms-bhā ॥
२० त] तज्ज्ञानंnayacakra-ms-bhā ॥
२२ स] ॰संबंधे घटादिस्वनित्या॰ प्र॰ ॥

नित्यं शब्दं प्रतिपद्यमानं विरुद्धहेत्वाभासज्ञानं भवति, **आदिग्रहणात्** प्रमेय-श्रावणत्वद्वारं नित्यज्ञानं वा शब्दविषयमनैकान्तिकाभासं यथा तथेदमपि न सम्पूर्णमनुमानज्ञानमपीति । § 251

अथवा **तिष्ठतु तावदित्यादि** यावत् **प्रत्यक्षविषयत्वाभ्युपगमविरोध** इति । स्थितं तावदस्तु विदूरस्थेन आगमेनाभ्युपगतेन प्रत्यक्षविषयत्वस्य विरोध इत्येतत् । इदमेवास्मिन् प्रकरणे यदुदाहृतं पूर्वं **चक्षुर्विज्ञानसमङ्गी** इत्यादि तदेव न घटत इति वाक्यार्थः । **प्रत्यक्षस्य विधिः** प्रत्यक्षस्य जन्म, तस्य **विधानं** व्याख्यानम् --**सञ्चितालम्बनाः पञ्च विज्ञानकायाः** अभि॰ पि॰ इति, स एव **अभ्युपगमः** प्रत्यक्षविधिविधानाभ्युपगमः । **स्वलक्षणमात्रविषयप्रत्यक्षत्व**मेव, स्वलक्षणमात्रं विषयो यस्य तत् स्वलक्षणमात्रविषयम्, किं तत् ?
71/mj प्रत्यक्षम्, तस्य भावः स्वलक्षणमात्रविषयप्रत्यक्षत्वम्, **तस्य प्रत्यक्षविधि-**

* * *

विरोधः प्रत्यक्षविषयत्वाभ्युपगमविरोधः । चक्षुर्विज्ञानसमङ्गिनीलविज्ञानम् इत्येतदेव तु न घटते प्रत्यक्षलक्षणोदाहरणम् ।

एवं ते सञ्चयस्य रूपमात्रत्वात् तद्ग्रहणे तत्प्रत्यक्षत्वात् सञ्चितालम्बनक-ल्पनावैयर्थ्यादतन्मात्रत्वे संवृतिसत्त्वादरूपत्वाच्च चक्षुर्नैव चक्षुः स्यात्, उभय-थापि रूपाग्राहित्वात्, घटादिवत् ।

* * *

**विधानाभ्युपगमेन विरोधः** समनन्तरग्रन्थोपपादितोऽसौ स्थित एव । **चक्षुर्विज्ञानसमङ्गिनीलविज्ञानमित्येतदेव तु न घटते** । तुशब्दो विशेषणे, किं विशिनष्टि ? पूर्वस्माल्लक्षणवाक्यादागमस्यास्याशुद्धतरतां विशिनष्टि । चक्षुषः चक्षुषि चक्षुषा वा विशिष्टं ज्ञानं विज्ञानमसाधारणविषयम्, तत् समङ्गति समन्वेतीति **चक्षुर्विज्ञानसमङ्गी**, कः ? सन्तानः, विज्ञानस्य तदर्थैकगमनात् तद्द्वारेण तत्सन्तानोऽपि समङ्गतीत्युच्यते । तत्समङ्गिनो **नीलविज्ञानम्** । तदेव प्रत्यक्षं कल्पनापोढमनिर्देश्यं स्वलक्षणविषयम् इत्यादि वचनं तेन लक्षितस्य
- /ms **उदाहरणम्** इदं तत् इति प्रत्यक्षीकरणं प्रदर्शनम्, यथा **वृद्धिरादैच्** पा॰ १ । १ । १ इत्युपलक्षितस्य आश्वलायनः इत्युदाहरणम् । § 252

---

१ श ] शब्द प्रति॰nayacakra-ms-ya ॥
५ ता ] तावदस्तुnayacakra-ms-ya ॥
६ दुदाहृतं ] पूर्वक्षुर्विज्ञा॰nayacakra-ms-pā । पूच्चक्षुर्विज्ञा॰ nayacakra-ms-bhā nayacakra-ms-ḍe nayacakra-ms-līṃ । तच्चक्षुर्विज्ञा॰ nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-vi । दृश्यतां पृ॰ ६० पं॰ २ ॥
८ स ] दृश्यतां पृ॰ ६४ पं॰ १ ॥
९ प्र ] ॰प्रत्यक्षणमात्रं विषयो यस्यnayacakra-ms-bhā । अत्र प्रत्यक्षत्वम्, एवं स्वलक्षणमात्रं विषयो यस्य इत्यपि पाठः स्यात् ॥
११ त्व ] ॰त्वन् । तस्यnayacakra-ms-bhā ॥
१९ च ] चक्षुर्विज्ञानमित्येतदेव तु घटते प्र॰ ॥
२६ क्षित ] ॰तस्याण्वलायनnayacakra-ms-bhā

कथं तन्न घटते ? तत आह --**एवं ते सञ्चयस्ये**त्यादि यावत् **सञ्चितालम्बनकल्पनावैयर्थ्या**दिति । **एवं ते** उदाहरणत्वेष्टौ सत्यां **सञ्चयस्य रूपमात्रत्वात्,** किं भवति ? सञ्चितालम्बनकल्पनावैयर्थ्यं स्यादित्यभिसम्भन्त्स्यते । रूपमात्रत्वं सञ्चयस्य कुत इति **तद्ग्रहणे तत्प्रत्यक्षत्वात्,** यद्ग्रहे यस्य प्रत्यक्षत्वं तत् तावन्मात्रमेव दृष्टम्, यथा दाहग्रहे दाहप्रत्यक्षत्वे दाहमात्रमेव नातोऽन्योऽर्थ इष्ट एवं सञ्चयग्रहे नीलरूपमात्रमेव । अतः किम् ? सञ्चितालम्बनकल्पनावैयर्थ्यम्, सञ्चयाभावात् । सञ्चयाभावो रूपमात्रत्वात् । सञ्चितालम्बनकल्पनावैयर्थ्याच्चोदाहरणमेव तु न घटते चक्षुर्विज्ञानसमङ्गी इत्यादि । § 253

**अतन्मात्रत्वे संवृतिसत्त्वा**दित्यादि याव**दुभयथापि रूपाग्राहित्वाद् घटादिवत्** । अथ मा भूदेष दोष इति न रूपमात्रं सञ्चयः, स एव च गृह्यत इतीष्यते, ततः सञ्चयस्य संवृतिसत्त्वादरूपत्वं खरविषाणवत् । संवृतिसत्त्वं प्रागुपपादितम् । **अरूपत्वाच्च** न चक्षुर्ग्राह्यः स्यात् सञ्चयः, रूपादन्यत्वात्, शब्दवत् खपुष्पवद्वा । ततः को दोष इति चेत्, उच्यते --**चक्षुर्नैव चक्षुः स्यात्,** रूपस्याग्राहकत्वात्, घटवत् जिह्वावत् त्वग्वदित्यादि । कथं रूपस्याग्राहकं चक्षुः इति दृष्ट-प्रसिद्धिविरुद्धमुच्यत इति चेत्, तवैव दृष्टप्रसिद्धिविरोधावापादयेते मया - /ms । किं कारणम् ? **उभयथा रूपाग्राहित्वा**त्तस्य । यदि सञ्चयस्तथाप्यसन्नरूप एवेत्युक्तत्वादचक्षुर्विषयो रूपम्, ततो रूपस्याग्राहकत्वाच्चक्षुरचक्षुः श्रोत्रवत् । अथासञ्चितमेव परमाणुनीलरूपमिष्टं तथाप्यतीन्द्रियत्वादचक्षुर्विषयो रूपम्, अतो रूपस्याग्राहकत्वाच्च चक्षुर्न च चक्षुः स्यादुक्तवदिति सूक्तम्--उभयथापि रूपस्याग्राहकं चक्षुरिति । एवं तावत् चक्षुर्विज्ञानसमङ्गी इत्यत्र चक्षुषोऽचक्षुष्ट्वाच्चक्षुर्ग्रहणमनर्थकम् । § 254
72/mj

विज्ञानमपि न विज्ञानं स्यात्, अन्यथार्थप्रतिपत्तेः, अलातचक्रादिज्ञानवत् । न च चक्षुर्विज्ञानं समङ्गीति, रूपादन्यत्रासम्भवात् । न हि सञ्चयो रूपम् । यदपि च तद्रूपं तद्विषयमपि चक्षुर्विज्ञानस्य समङ्गनं नास्ति, अविषयत्वात्, अन्येन्द्रियविषयवत् । सञ्चयविषयमपि संवृतिसत्त्वात् खपुष्पवत् । § 255

---

। °तस्या+एवलायन nayacakra-ms-ya । अश्वलो नाम मुनिः, तस्य अपत्यमाश्वलायनः । नडादिषु परिगणितात् अश्वलशब्दात् नडादिभ्यः फक् पा° ४ । १ । ९९ इति सूत्रेण फक्प्रत्यये विहिते तद्धितेषु अचामादेः पा° ७ । २ । ११७ इति सूत्रेण वृद्धिरादैच् पा° १ । १ । १ इति वृद्धौ आश्वलायनः इति रूपम् ॥

४ न्त्स्य ] °न्त्स्यंते भूपमात्रत्वंnayacakra-ms-bhā ॥
६ इ ] द्रष्टnayacakra-ms-ya ॥
१० रू ] रूपादि-ग्राहि°nayacakra-ms-pānayacakra-ms-vi ॥
१७ थाप्य ] °प्यासन्नरूप एवेत्यक्त°nayacakra-ms-ya ॥

**नीलविज्ञानसम्बन्धी न भवति तत्सन्तानः, तदाकारज्ञानोत्पत्तिहेत्वभावात्, अदग्धस्य दाहाज्ञानवत् ।** § 256

विज्ञानग्रहणमप्यत एवानर्थकमित्यत आह --**विज्ञानमपि न विज्ञानं स्यादित्यादि** यावत् **खपुष्पवदिति** । *विशेषेण ज्ञानं विज्ञानं तद्भवदभिमतं प्रत्यक्षं मुख्यं विज्ञानं न स्यात्, इतरथा कथमाचार्यश्री**मल्लवादी** (?')विज्ञानं न स्यादिति स्ववचनविरोधं **मायेय-दिन्ना**विव ब्रूयात् ? किं कारणं पुनर्विज्ञानं तन्न स्यात् ? **अन्यथार्थप्रतिपत्तेः**, अरूपस्य सञ्चयस्य रूपत्वेन प्रतिपत्तेः सञ्चयत्वेन वा रूपमात्रस्य प्रतिपत्तेः । को दृष्टान्तः ? **अलातचक्रादिज्ञानवत्** । यथोल्मुकाग्निकणमात्रमार्थं चक्रम् इति प्रतिपद्यमानं न विज्ञानमेवं तदपि । **आदि**ग्रहणात् स्थाणौ पुरुषज्ञानमित्यादि । एवं तावच्चक्षुरिति विज्ञानमिति च द्वयं दूषितम् । चक्षुर्विज्ञानसमङ्गी इत्यत्र समङ्गित्वमपि दूषयितुकाम आह --**न च चक्षुर्विज्ञानं समङ्गतीति**, तद्द्वारेण पुरुषाख्यसन्तानैकगमनं समङ्गनं ततस्तन्निषेधः । कस्मान्न समङ्गति ? चक्षुर्विज्ञानस्य **रूपादन्यत्रासम्भवात्**, न वा तत्सन्तानोऽन्यत्र सम्भवति, उक्तं हि --**सति सम्भवे**

- /ms **व्यभिचारे च विशेषणविशेष्यभावः** इति । सञ्चयापेक्षो व्यभिचारोऽस्त्यतो विशेष्यत इति चेत्, तन्न, यस्मान्न **सञ्चयो रूपम्** । अरूपत्वाच्चक्षुर्विज्ञानसङ्गत्यभावः । स्यान्मतम्--नीलरूपाव्यभिचारादेव तदेकगमनात् समङ्गीत्युच्यते चक्षुर्विज्ञानमिति, एतच्चायुक्तम्, तस्याप्यतीन्द्रियत्वाच्चक्षुर्विज्ञानाविषयत्वादरूपत्वम् । अभ्युपेत्यापि त्वन्मतेन **यदपि च तद्रूपम्**, रूपत इति रूप्यम्, चक्षुर्विज्ञानेन किल रूप्यत इति, **तद्विषयं** स विषयो यस्य तत् तद्विषयम्, किं तत् ? **एकगमनम्**, कस्य ? **चक्षुर्विज्ञानस्य, तदपि नास्ति** । कस्मात् ? **अविषयत्वात्** । अविषयत्वमतीन्द्रियत्वात् प्रस्तुतप्रत्यक्षस्य । **अन्येन्द्रियविषयवत्**, यथा शब्दोऽन्येन्द्रियविषयश्चक्षुर्विज्ञानेन न समङ्ग्यते तथा तदपि रूपमिति । स्यान्मतम्--सञ्चयश्चक्षुर्विज्ञानसङ्गतियोग्यः स्यादिति, अत्र ब्रूमः --**सञ्चयविषयमपि चक्षुर्विज्ञानस्य समङ्गनं नास्ति** इति वर्तते । कस्मादसत्त्वम् ? **संवृतिसत्त्वात् खपुष्पवदिति** सङ्गमनाभावसाधर्म्येण दृष्टान्तः । एवं तावद् रूपम्, चक्षुः, विज्ञानम्, समङ्गी इत्येतानि दूषितानि । § 257

इदानीं नीलम्, विजानाति इति च दूष्यम् । तत्र नीलं पदार्थतो दूषितमेव, विजानातीति च दूषितमेव पदार्थतः, रूपचक्षुर्विज्ञानानां सङ्गतेश्च दूषितत्वात् । मा भूदक्षरस्थानं दूषणशून्यमिति कृत्वा वाक्यार्थतोऽपि दूष्यते --**नीलविज्ञानसम्बन्धी न भवति तत्सन्तानः, तदाकारज्ञानोत्पत्तिहेत्वभावात्**

---

४ *] विशेषणज्ञानं प्र॰ ॥
५ स्या] स्यादितिरथा प्र॰ ॥
८ च] °चक्रज्ञान°nayacakra-ms-ya ॥
१० स्था] स्थाणुपुरुष°nayacakra-ms-ya ॥
१० क्षुरिति] वज्ञान°nayacakra-ms-ya ॥
१२ न] न चक्षु°nayacakra-ms-bhā ॥
१३ रू] रूपाद्यन्यत्रा° प्र॰ ॥
२६ स] सङ्गमना° प्र॰ । समङ्गना° इत्यपि पाठः स्यादत्र ॥

। स आकारोऽस्येति तदाकारं ज्ञानं नीलाकारम्, तस्योत्पत्तिस्तदाकारज्ञानोत्पत्तिः, तस्या हेतुः सञ्चयो नीलरूपं वा स्यात्, उभयमपि तन्न भवत्युक्तविधिनैव, अतस्तदाकारज्ञानोत्पत्तिहेत्वभावात् । 73/mj

* * *

नीलं च सञ्चयं च प्रत्येकसमुदितकारणत्वाद् विज्ञास्यतीति चेत्, न, युगपज्ज्ञानासम्भवात्, ज्ञानस्य क्रियावैधर्म्यात् ।

तयोरेकज्ञानत्वादेकज्ञेयत्वे इतरेतरत्वे सर्वसर्वात्मवादिता । सर्वनीलैक्ये हि समवायग्रहणे प्रत्येकैकनीलग्रहणं स्यात् । ततश्च यथात्र सन्द्रावात् सर्वनीलैकता

* * *

को दृष्टान्तः ? **अदग्धस्य दाहाज्ञानवत्,** यथा अदग्धस्य दाहानुभवज्ञानं तदाकारज्ञानोत्पत्तिहेत्वभावान्नास्ति तथा नीलविज्ञानसम्बन्धी न भवति तत्सन्तान इति । एवं नीलरूपतत्सञ्चययोरन्यतरविषय- त्वेष्टौ दोषा उक्ताः । - /ms

§ 258

इदानीं प्रत्येकं त एव समुदिता इत्युभयैकविषयत्वे दोषं वक्तुकामः पक्षान्तरं ग्राहयति **--नीलं च सञ्चयं च प्रत्येकसमुदितकारणत्वाद्विज्ञास्यतीति चेत्,** स्यान्मतम्--त एव हि नीलपरमाणवः प्रत्येकं शिबिकोद्वाहन्यायेन समुदिताश्च कारणं न चैकैकः, न च समुदायस्तद्व्यतिरिक्तोऽस्तीत्युभयकारणत्वं ज्ञानस्य, तस्माज्ज्ञानोत्पत्तिहेत्वभावासिद्धिरिति । एतन्न, **युगपज्ज्ञानासम्भवात्,** द्वयोरर्थयोर्युगपदेकज्ञानाभावादेकैकस्मिंश्चार्थे युगपज्ज्ञानयोरभावाद्भवतः । यथोक्तम्—

विजानाति न विज्ञानमेकमर्थद्वयं यथा ।
एकमर्थं विजानाति न विज्ञानद्वयं तथा ॥ चतुःश० २६८ इति

|§ 261

स्यान्मतम्--हस्तेन अनेकबदरामलकाद्यर्थग्रहणवत् स्यादिति । एतद्यायुक्तम्, **ज्ञानस्य क्रियावैधर्म्यात्** । ज्ञानं च प्रत्यक्षमुच्यते, कल्पनाया ज्ञानाव्यभिचारात्, **प्रत्यक्षं कल्पनापोढं यज्ज्ञानमर्थे रूपादौ** न्याआत्मप्रत्यायनार्थं तु प्रत्यक्षमनुमानं च द्वे एव प्रमाणे । तत्र प्रत्यक्षं कल्पनापोढं यज्ज्ञानमर्थे रूपादौ नामजात्यादिकल्पनारहितं तदक्षमक्षं प्रति वर्तत इति प्रत्यक्षम्--न्यायप्र० पृ० ७ ॥यप्र० इति वचनात् । एवं रूपरूपसमुदाययोर्नानात्वे दोषः । § 262

---

३ अ ] अस्तदा° प्र° ॥
१२ योर ] अन्यतरविषयत्वस्य इष्टौ इत्यर्थः ॥
१७ तिरिक्तोऽस्ती ] °स्तीत्युरुषकार°nayacakra-ms-bhā । °स्तीतिपुरुषकार° nayacakra-ms-ya ॥
१९ प ] °पदेदज्ञाना° प्र° ॥
१९ ज्ञानाभावा ] °वादेकस्मिं°nayacakra-ms-bhā ॥
२४ क ] दृश्यतां पृ° ६० टि° १५ ॥

यद्यपि स्यात् **तयोरेकज्ञानत्वादेकज्ञेयत्वम्**, एकं ज्ञानमनयोरित्येकज्ञाने, तयोरेकज्ञानत्वात् एकमेव ज्ञेयं तद्भाव एकज्ञेयत्वं दाहानुभववत्, तस्मि**न्नेक-ज्ञेयत्वे इतरेतरत्वे** अन्योन्यात्मापन्नत्वे सति **सर्वसर्वात्मवादिता** । कथम् ? समुदायानर्थान्तरत्वाद् रूपं समुदाय एव समुदायस्वरूपवत्, समुदायो वा रूपमेव रूपानर्थान्तरत्वाद् रूपस्वरूपवत् । एवं रसादि-घटादि-रूपादिस-मुदायान्तराभिमतार्थानामनर्थान्तरत्वात् सर्वसर्वात्मकत्ववादिता । तस्मात् **स-**
- /ms **र्व**परमाणु**नीला**नां सञ्चयानर्थान्तरत्वा**दैक्ये** सति **समवाय- ग्रहणे** युवतिकेश-पाशसमुदाये गृह्यमाणे, हिशब्दो यस्मादर्थे, यस्मात् **सर्वनीलैक्यं** तस्मादेक-मेव नीलं रूपमेककेशगतं गृह्येत, एकमेकं प्रति **प्रत्येकैकनीलग्रहणं स्यात्**, एकनीलवालग्रहणेऽपि च सर्वनीलकेशपाशग्रहणमेकनीलात्मकत्वात् समुदायस्य । **ततश्च यथात्र सन्द्रावात् सर्वनीलैकता**, गुणसन्द्रावो द्रव्यम्, नार्थान्तरम्, सन्द्रुत्य सर्वनीलगुणा एकतामापन्नाः, **तथा रूपादिपञ्चकस्यापि** रूपरसगन्धस्पर्शशब्दपञ्चकस्यापि सन्द्रावादेकता स्यात् इति वर्तते । क-स्माद्धेतोः ? **गुणत्वात्**, धर्मत्वादित्यर्थः, न हि **वैशे**षिकवद् द्रव्यगुणभेदोऽस्तीति
74/mj कृत्वा । दृष्टान्तो **नीलैकत्ववत्**, यथा सर्वनीलानां गुणत्वाद्धर्मत्वा

* * *

तथा रूपादिपञ्चकस्यापि, गुणत्वात्, नीलैकत्ववत् । ततश्च गुणसन्द्रावद्रव्य-त्वात् सर्वथा पृथिव्यादीनाम्, तेषामपि रूपादिपरमार्थत्वात् सर्वसर्वात्मकत्वम् ।

अयं तु सन्द्रावातिशयो मायेयीयः, सञ्चितालम्बनाभ्युपगमाद् रूपादिप-रमाणूनां सञ्चितानामसञ्चितानां प्रागनभ्युपगमात् । आगम एवोक्तं हि वः-- सङ्घाता एव सङ्घातान् स्पृशन्ति, सावयवत्वात्  । तत्र परस्परस्पर्शनिरूपणे सर्वात्म-

* * *

देकत्वं तथा रूपरसाद्येकत्वम् । **ततश्च** सन्द्रावसिद्धौ गुणानां रूपाद्यैक्ये सति को दोषः ? उच्यते — **गुणसन्द्रावद्रव्यत्वात्** गुणानां सन्द्रुतिमात्रमेव य-स्माद्द्रव्यं तस्मात् **सर्वथा पृथिव्यादीनां** पृथिव्यप्तेजोवाय्वादीनाम् एकत्वम् इति वर्तते । किं कारणम् ? तदेव रूपाद्येकत्वं कारणम्, तत आह --**तेषामपि रूपादिपरमार्थत्वा**दिति, रूपादय एव परमार्थो गुणसन्द्रावद्रव्यत्वात्, तेषां चैक्यम्, अतः पृथिव्यप्तेजोवायुघटपटसरित्समुद्रज्योतिरादेः सर्वस्य लोक-स्य तदात्मकत्वादैक्यं प्राप्तमिति । तदुपसंहृत्यैवाह --**सर्वसर्वात्मकत्व**मिति

---

२ मेव ] ज्ञेयत° प्र° ॥
९ प्र ] प्रति प्रति
प्रत्येके°nayacakra-ms-bhā ॥
१० वा ] °बाल° प्र° ॥
११ स ] सद्भावात् प्र° ॥
११ गु ] दृश्यतां पृ° १५ पं° २० ॥
१२ स ] संहृत्यnayacakra-ms-ya ॥
१३ स ] °गन्धशब्दस्पर्शशब्दपंचक° प्र° ॥
१३ स ] सद्भावा°nayacakra-ms-ya ॥
२४ स ] सद्भाव° प्र° । एवमग्रेऽपि ॥
२५ स ] संहृति°nayacakra-ms-ya ॥

। अतः साधूच्यते--सर्वसर्वात्मवादितैव विशेषैकान्तवादिनोऽप्यविशेषैकान्तवादिन इवेति । § 263

अविशेषैकान्तवादिनमतिशेते च विशेषैकान्तवादीति तद्व्याचिख्यासुराह - /ms गुणसन्द्रावात्मकद्रव्यत्वापादनाय --**[अयं] त्वित्यादि यावन्न स सञ्चयादृते सम्भवतीति** । तुशब्दो विशेषणार्थः, किं विशिनष्टि ? रूपादीनामैक्यापत्तेः प्राक् पृथक्स्वरूपैस्तन्मात्रैः शब्दादिभिराहङ्कारिकैराकाशाद्यारम्भाभ्युपगमवादिनामविशेषैकान्तवादिनां कदाचिदसञ्चिताः सन्त्यपि रूपादय इति प्रक्रिया, विशेषैकान्तवादिनां तु सञ्चिततयैक्यापत्तिरेव क्वचित् पृथगसञ्चितरूपाद्यनभ्युपगमात् सर्वसर्वात्मकवादातिशय इति विशिनष्टि व्याख्यातार्थं **सन्द्रावातिशयोऽयं मायेयीयः सञ्चितालम्बनाभ्युपगमाद्रूपादिपरमाणूनामिति** ग्रन्थम् । तत्सञ्चयत्वकारणप्रदर्शनार्थमाह --**सञ्चितानामसञ्चितानां प्रागनभ्युपगमात्**, प्रागसञ्चिताः परमाणुरूपादयः पश्चात् सञ्चित्य आलम्बनीभूता इति नाभ्युपगम्यते यस्माद् मायासूनवीयैः । अवश्यं चैतदेवं भवद्भिरभ्युपगतमेतदिति तदर्थोपप्रदर्शनार्थम् **आगम एवोक्तं हि वः** । हिशब्दो यस्मादर्थे, यस्मादुक्तं हि वः सिद्धान्ते, किमुक्तम् ? **सङ्घाता एव सङ्घातान् स्पृशन्ति सावयवत्वादित्युक्तम्** । **किं परमाणवः परस्परं स्पृशन्ति ? न स्पृशन्ति ? स्पृशन्तोऽपि किं देशेन देशं स्पृशन्ति ? सर्वं वा ? सङ्घातं वा ? सङ्घाता वा सङ्घातान् स्पृशन्तो देशेन वा देशं सर्वं वा स्पृशन्ति ?** इति परिप्रश्नोपक्रमं तत्र **परस्परस्पर्शनिरूपणे** इत्यादि, **सर्वात्मस्पर्शनास्पर्शनयोर्दोषापादनेन** निर्द्धारितम् --**सङ्घाताः सङ्घातान् देशेन स्पृशन्ति देशमेव** इति । यदि परमाणुः परमाणुं स्पृशेद् देशाभावात् सर्वात्मना स्पृशेत्, ततश्च स तत्प्रवेशेन - /ms **पिण्डोऽणुमात्रकः** स्यात् सप्रतिघत्वहानं चास्य स्यात् । तथा सङ्घातोऽपीति 75/mj

* * *

१ वा] °वाचितैव प्र° ॥
४ ना] °नायाnayacakra-ms-vi ॥
४ न्न] °न्न संचया°nayacakra-ms-bhā ॥
६ रूपैस्त] °स्तन्मात्रैःnayacakra-ms-bhā । °स्तस्मात्रै nayacakra-ms-vi । °स्तस्मात्वे nayacakra-ms-bhā nayacakra-ms-vi विना ॥
७ वा] °वादिनाविशेषै° प्र° ॥
८ स] सञ्चितयैक्या° प्र° ॥
१० न्द्रावातिश] °शयोयnayacakra-ms-ya ॥
१० मा] मायेर्यायः प्र° ॥
११ ग्र] ग्रंथां प्र° ॥
११ य] °यत्वंका°nayacakra-ms-ya ॥
१२ प] पंचात् प्र° ॥
१२ स] संचितालम्बनी°nayacakra-ms-ya ॥
१७ स] संघातं वा इति पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२१ प] परमाणुऽपरमाणुं स्पृशेद्nayacakra-ms-bhā । परमाणुं स्पृशेद् nayacakra-ms-ya ॥
२२ स्या] स्यात्मप्रतिपद्यत्वहानं प्र° । सनिदर्शन एकोऽत्र रूपं सप्रतिघा दश । रूपिणोऽव्याकृता अष्टौ त एवारूपशब्दकाः ॥ १ । २९ ॥ सप्रतिघा दश रूपिण इति रूपिग्रहणमरूपिनिरासार्थम्, रूपणं रूपम्, तदेषामस्तीति रूपिणः । दशेति चक्षुर्धात्वादयः पञ्च तद्विषयधातवश्च पञ्चेति । --अभि° को° स्फुटा° १ । २९ ॥

स्पर्शनास्पर्शनयोः पिण्डाणुमात्रकत्वसप्रतिघत्वाभावादिदोषापत्तेर्देशस्पर्श एवोपात्तः । न स सञ्चयादृते सम्भवति ।

यत्तूक्तं नो नीलमिति एतदेवैकं संवदति, कदाचिदपि नीलपरमाण्वाकारनियतज्ञानोत्पत्तिहेत्वभावात्, समुदायस्यानीलत्वात् । भेदतत्त्वाभिमतप्रत्येकसमुदायपरिग्रहेऽपि तेषामितरेतरनीलत्वेनानीलत्वादतद्रूपत्वाज्ज्ञात्याकारादिना अनन्यत्व-

* * *

सर्वात्मना स्पर्शाभावः । अस्पर्शनेऽपि **सप्रतिघत्वाभावः** । परमाणुषु चाविद्यमानः प्रतिघातः सिकतास्विवासत् तैलं तत्सङ्घातेऽपि न स्यात्, स च दृष्टः सङ्घाते, तस्मान्नास्त्यस्पर्शनं परमाणूनां सङ्घातानां च । तस्मात् सङ्घाता एव सङ्घातान् देशेन स्पृशन्ति । **आदि**ग्रहणाद् गतिप्रतिबन्धाभावदोषस्तेषां स्यात्, ततश्च सङ्घाताभावादालम्बनाभावः स्यादि**त्यादिदोषापत्तेः देशस्पर्श एवोपात्तः** । **सोऽपि** च **स्पर्शो न** च **सञ्चयादृते स सम्भवति** कथञ्चिदिति साधूच्यते--सन्द्रावातिशयो **मायेयीय** इति । एवं नीलं विजानाति इति वाक्यार्थोऽपि न घटत इत्युक्तम् । § 264

एतत्तु तस्मि**न्नभिधर्मे** प्रत्यक्षलक्षणोदाहरणवाक्ये संवदत्यर्थतः । केनार्थेन कतमत् ? **यत्तूक्तं नो नीलमिति** विजानाति इति वर्तते । अ-मा-नो-नाः प्रतिषेधे, नीलं न विजानाति इति **एतदेवैकं संवदति** नान्यत् किञ्चित् । किं कारणम् ? **कदाचिदपि नीलपरमाण्वाकारनियतज्ञानोत्पत्तिहेत्वभावात्** । ये तावत् परमाणवो नीला उच्यन्ते तेषां कदाचिदपि नीलाकारे नियतस्य ज्ञानस्योत्पत्तौ हेतुत्वं न भूतं न भवति न भविष्यति चातीन्द्रियत्वात्, अतोऽसौ त्वदभिमतचक्षुर्विज्ञानसमङ्गी न कदाचिन्नीलं विजानातीति सुनिश्चितोपपत्तिकं वचः । स्यान्मतम्--सञ्चयस्येन्द्रियविषयत्वान्नीलात्मकत्वाच्च तस्य नीलं विजानातीति, एतच्चायुक्तम्, **समुदायस्यानीलत्वात्** । यदि स-
- /ms मुदाये संवृतिसति नीलत्वं स्यात् स्यादेतदेवम्, न पुनरभावस्य नीलतास्तीति न विजानाति नीलम् इत्येतदेवात्र सुभाषितमिति । § 265

स्यान्मतम्--न विजानीयान्नीलं यद्येकैकं परमाणुमतीन्द्रियं पश्यतीति ब्रूयात् तत्समुदायं वा खपुष्पस्थानीयमिति, किं तर्हि ? तानेव परमाणून् प्रत्येकं भिन्नान् संहतान् सर्षपप्रचयवदेकस्थान् पश्यतीति । एतच्चायुक्तम्,

---

७ चा ] वा[ऽ]विद्य॰ प्र॰ ॥
१० दोष ] ॰षतेषां स्यात् ततं च प्र॰ ॥
१२ यादृ ] ॰दृते संभवतिnayacakra-ms-bhā ॥
१६ नो ] नीलविजानाति nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃnayacakra-m । नीलं विजानाति nayacakra-ms-vi ॥
१९ नीलाका ] ॰कारनियत॰nayacakra-ms-ya ॥
२२ स्या ] स्यान्मतं चयस्ये॰nayacakra-ms-ya ॥
२३ त ] तस्या प्र॰ ॥
२४ स्या ] स्यातेदेवम्nayacakra-ms-ya ॥
२६ य ] यद्येकंnayacakra-ms-ya ॥
२७ मा ] ॰माणू प्रत्येकं प्र॰ ॥

**भेदतत्त्वाभिमतेत्यादि** । भेदा एव तत्त्वं भेदतत्त्वम्, तद्भावस्तत्त्वम्, भेदतत्त्वम् इत्यभिमताः **प्रत्येकं** त एव **समुदायः**, न समुदायप्राधान्यम्, किं तर्हि ? भेदप्रधान एव समुदायः **प्रत्येकसमुदायः** सः, **तत्परिग्रहेऽपि** भेदस्वरूपपरस्परविशिष्टसमुदायपरिग्रहेऽपि, शिबिकोद्वाहकन्यायेन प्रत्येकमसामर्थ्येऽपि तत्प्रधानसमुदाये नीलज्ञानोत्पत्तिहेतुसामर्थ्यमस्त्वित्येतस्मिन्नपि च पक्षे परिगृह्यमाणे नीलाभावान्न नीलं विजानाति । कस्मात् ? **तेषामितरेतरनीलत्वेनानीलत्वात्** । तानि नीलत्वानि प्रतिपरमाणु भिन्नानि स्वाश्रयपरमाणुतोऽन्यत्र न वर्तन्ते, स्वरसोत्पत्तिभङ्गवत्त्वादर्थान्तरासम्बन्धाच्च भावानाम् । तस्मादितरस्य नीलत्वमितरत्र नास्ति, तस्यापि नीलत्वमितरत्र नास्ति । किं कारणम् ? **अतद्रूपत्वात्,** 76/mj

* * *

करस्यानुपपत्तेरत्यन्तव्यावृत्तार्थत्वाद्द्व्यसद्रूपत्वाद् ग्रहणाभावान्न नीलं विजानाति ।

अत एव प्रत्यक्षविधिविधायकवाक्यस्यैषोऽर्थ आपद्यते--चक्षुर्विज्ञानसमङ्गी सञ्चितालम्बनः सन्तानः सश्चयं संवृतिसन्तं नीलं विजानाति, तस्यासतश्चक्षुषा

* * *

तदेव रूपं तद्रूपम्, न तद्रूपमतद्रूपम्, तद्भावोऽतद्रूपत्वम्, तस्मादतद्रूपत्वात् । न हि तन्नीलमितरनीलरूपं भवति । यदि भवेत् तदेव तत् स्यात्, तद्रूपत्वात्, तद्वत्; न तु भवति । अथवा तद्रूपमस्य तद्रूपम्, न तद्रूपमस्य रूपमित्यतद्रूपम् । केन रूपेण ? **जात्याकारादिना,** न हि तन्नीलमितरनीलरूपं जात्या नीलत्वलक्षणया सामान्यभूतया आकारेण वा संस्थानविशेषेण - /ms वृत्तपरिमण्डलादिना, जातिरूपेणाकाररूपेण वा यत् स्यादनन्यत्वकरं तयोर्नीलयोः परमाण्वोस्तस्य त्वन्मतेन कस्यचिदनुपपत्तेरतद्रूपत्वम् । अतो न नीलं नीलान्तररूपेणास्ति, तद्वन्नीलान्तरमपि तद्रूपेण नास्ति । **आदिग्रहणात्** प्रथमक्षणदृश्यं द्वितीयक्षणदृश्यरूपं न भवति, तदपीतररूपं न भवतीति । देशतोऽपि देशान्तरदृश्यं देशान्तरदृश्यरूपं न भवति । **अतोऽनन्यत्व-**

---

३ सः ] सस्तत्परि॰nayacakra-ms-ya ॥
८ स्व ] स्वरस्थोत्प॰nayacakra-ms-bhā । स्वरस्योत्प॰ nayacakra-ms-ya ॥
९ त ] तस्यापि नीलत्वमितरत्र नास्ति इति पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१७ न ] न तद्रूपं तद्भावो॰nayacakra-ms-ya ॥
१८ मित ] ॰तरस्य नील॰nayacakra-ms-ya ॥
१८ त ] त स्यात्nayacakra-ms-bhā ॥
२२ स्या ] स्यादनत्वकरं तयो॰ nayacakra-ms-bhā । स्यादनत्वकरतयो॰ nayacakra-ms-ya ॥
२३ त्व ] तन्मतेनnayacakra-ms-ya ॥
२३ अ ] अत्ये नnayacakra-ms-bhā । अन्ये न nayacakra-ms-ya ॥
२५ पीत ] ॰तरूपं प्र॰ ॥

**करस्यानुपपत्तेरतद्रूपत्वम्** । **अनन्यत्वकरस्यानुपपत्तिरत्यन्तव्यावृत्तार्थत्वात्** । **अर्थ** इति परमार्थसन् नीलपरमाणुरेव, ते च परमाणवोऽत्यन्तमितरेतर-व्यावृत्तासाधारणरूपाः । कस्मात् ? **द्रव्यसद्रूपत्वात्,** द्रव्यसतो ह्येतद् रूपं यदन्यनिरपेक्षविविक्तस्वरूपत्वम्, तत्र यथा तद् रसरूपेण गन्धरूपेण वा नास्ति द्रव्यसद्रूपत्वात् तथा नीलान्तररूपेणापि नास्ति । तदपि च द्र-व्यसद्रूपमाणीषाद्यभावे रथाभाववत् नीलान्तररूपाभाववद्वा तदभावेऽपि न भवत्येव, नीलत्वशून्यत्वाद्वा नीलान्तरनीलवत् । तदपि परनीलं तद्वदनील-म् । अतः कतरत् तन्नीलं स्याद्यद्विज्ञायेत चक्षुषा चक्षुर्विज्ञानसमङ्गिना ? इति **ग्रहणाभावान्न नीलं विजानाति** चक्षुर्विज्ञानसमङ्गी । अनन्यत्वकरस्य जात्यादेरभावादेव वा रूपमिति वा रस इति वात्यन्तभिन्नानां परमाणूनाम-भेदेन द्रव्यसतां ग्रहणाभावान्न नीलं विजानाति । इतरेतराभावपरमार्थ-त्वाद्वोक्तन्यायेनैव न नीलं नीलान्तरं चास्ति रूपरसादिवद[न]न्यरूपमिति न नीलं विजानाति इत्येतदेव संवदतीति सूक्तमिति । § 266

**अत एवेत्यादि** । **अत** इत्यनन्तरनिर्दिष्टनीलार्थचक्षुर्विज्ञानसमङ्ग-नाभावात्, **एवे**त्यवधारणे, वक्ष्यमाणवाक्यार्थापत्तिः, **प्रत्यक्षविधेः** प्रत्यक्षज-
- /ms न्मनो **विधायकस्य वाक्यस्यैषोऽर्थ आपद्यते,** नो तु नीलमिति इत्यत्र इतिशब्दस्य प्रकारार्थवाचित्वादेवंप्रकारो वाक्यार्थ आपद्यत इति । कतमस्य वाक्यस्येति स्फुटीकरणार्थं प्रस्तुतमेव प्रत्यक्षलक्षणोदाहरणवाक्यं प्रत्युच्चार्य प्रदर्शयति --**चक्षुर्विज्ञान** इत्यादि तदेव । **चक्षुर्विज्ञानसमङ्गी सञ्चितालम्बनः** पूर्वोक्तः **सन्तानः** चक्षुर्विज्ञानसमङ्गी सञ्चितमालम्बनमस्येति सञ्चितालम्बनः **सञ्चयं संवृतिसन्तं नीलं** रूपं ***विजानात्यसदवस्तु** नीलाभिमतं जानाति, न सत् किञ्चिदित्ययमर्थो जायते । किं कारणम् ? **तस्य** नीलस्य सञ्चयस्य
77/mj **असतः चक्षुषा** चक्षुरिन्द्रियेण

* * *

ग्रहणात् । नो तु नीलमेवं भवति, परमार्थसत्परमाणुनीलत्वात् ।

भावना त्वस्य--अनर्थेऽर्थसंज्ञी, न च कदाचित् कश्चिदप्यर्थे धर्मसंज्ञी । अनर्थे संवृतिसति समुदाये द्रव्यसन्नीलसंज्ञी, न त्वर्थेऽर्थसंज्ञी, न त्वर्थे एव द्रव्यसति अर्थसंज्ञी तस्यातीन्द्रियत्वात् । न च कदाचित् कश्चिदप्यर्थे धर्मसंज्ञी, अतीन्द्रियत्वादत्यन्तं सर्वकालमग्राह्यत्वात् । अनर्थे एव धर्मसंज्ञी,

३ व्यावृ ] °वृत्ताऽसाधा°nayacakra-ms-bhā । °वृत्त्यासाधा° nayacakra-ms-raṃ nayacakra-ms-hī ॥
६ मा ] **°माणीयाद्यभावे** प्र° । अक्षाग्रकीले त्वण्याणी । अक्षस्य नाभिक्षेप्यस्य काष्ठस्याग्रेऽन्ते बन्धार्थं कीलस्तत्र, अणति शब्दायते अणिः, आणिः कृशृकुटि उणादि° ६१९ इति वा णिदिः — **अभि° चिन्ता° स्वो°** ३ । ४२० । ईषा रथावयवः ॥
८ स ] **°समंगिने ग्रहणाभावान्न** नीलंnayacakra-ms-bhā । °समंगिनेति नीलं nayacakra-ms-ya ॥
१३ सू ] दृश्यतां पृ° ७५ पं° ३ ॥
१६ वाक्य ] **°स्यैर्थोर्थ** प्र° ॥
२१ * ] विज्ञानात्यत्य°nayacakra-ms-bhā । विज्ञानान्य° nayacakra-ms-ya ॥

अनर्थे एवासति नामादिधर्मसंज्ञ्यपि, सञ्चयस्य नामादीनां च कल्पनात्मकत्वात् कल्पनापोहासम्भवात् ।

* * *

**ग्रहणात् । नो तु नीलमेवं भवति,** एवम्प्रकारमसद्रूपं नीलं न भवति, सदेव हि तन्नीलं न जानाति परमार्थसत् । किं कारणं तन्नीलं न भवतीति चेत्, **परमार्थसत्परमाणुनीलत्वात्,** परमार्थसन्तो हि परमाणव एव नीला न सञ्चयः । तस्मान्न नीलं विजानाति चक्षुर्विज्ञानसमङ्गीति । § 267

**भावना त्वस्ये**त्यादि । उक्तोपपत्तिबलादेव त्वदुक्ता भावना न घटते --**अर्थेऽर्थसंज्ञी, न त्वर्थे धर्मसंज्ञी** अभि° पि° इति । कथं तर्हि घटते ? इत्यत्राह --**भावना त्वस्य अनर्थेऽर्थसंज्ञी, न च कदाचित् कश्चिदप्यर्थे धर्मसंज्ञीति** । तद्व्याचष्टे --**अनर्थे संवृतिसति समुदाये** । अनर्थो हि संवृतिसत्त्वात् समुदायः, तदग्रहे तद्बुद्ध्यभावात्, यथोक्तं **यस्मिन् भिन्ने न तद्बुद्धिः** अभि° को° ६ । ४ इति श्लोकः, पङ्क्त्यादिवत् । इति त्वन्मतेनैव तस्मिन्नसल्लक्षणे समुदाये **द्रव्यसन्नीलसंज्ञी** परमार्थसत्परमाणुनीलसंज्ञी, तेषामेवार्थत्वात् । अनर्थेऽर्थसंज्ञी इत्येतस्माद्भावनावाक्यादर्थाक्षिप्तमेतल्लभ्यते **--न त्वर्थेऽर्थसंज्ञीति** । तद्व्याचष्टे **--न त्वर्थ एव द्रव्यसति** परमाणुनीले एव **अर्थसंज्ञी** भवति । कस्मात् ? **तस्यार्थस्यातीन्द्रियत्वा**दित्येतत् कारणं पुष्कलमस्त्यस्मिन्नस्मत्कल्पितभावनावाक्य इति दर्शयति । यद्येवमर्थे धर्मसंज्ञी भवतु, नेत्युच्यते, **न च कदाचित् कश्चिदप्यर्थे धर्मसंज्ञी । कदाचिदि**ति समुदायस्यैवेन्द्रियविषयत्वात् तद्ग्रहणकाले इतरकाले वा न धर्मसंज्ञ्यप्यर्थे भवितुमर्हति । अथवा प्रत्यक्षकालेऽनुमानकाले वा । किं कारणम् ? **अतीन्द्रियत्वात्, अत्यन्तं सर्वकालं** कदाचित् इत्यस्य व्याख्यानम्, **अग्राह्यत्वात्** । कस्य ? परमाणुनीलादेः । ततोऽर्थादितदप्यापन्नम् **--अनर्थ एव धर्मसंज्ञीति** । तद्व्याचष्टे **--अनर्थ एवासति नामादिधर्मसंज्ञ्यपि** । किं कारणम् ? **सञ्चयस्य नामादीनां च कल्पनात्मकत्वा**दनर्थेऽनर्थसंज्ञीति यावत्, कल्पनात्मके सञ्चयेऽनर्थेऽनर्थकल्पनात्मकशब्दादिधर्मसंज्ञी । कस्मात् ? **कल्पनापोहासम्भवात्** समुदाये समुदायाश्रयनामादिषु वा, नामजात्यादियोजना च कल्पना, तदपोहस्तस्य ज्ञानस्य कल्पितसमुदायतन्नामादिविषयस्य न सम्भवत्येव । तस्मादस्मदुक्तैषा भावना घटते । अथवा त्वदीयैरेवाक्षरैरेषोऽर्थो भाव्यते **--अर्थेऽर्थसंज्ञी न,** अर्थे नीलादौ परमार्थसत्यर्थसंज्ञी न भवत्यतीन्द्रियत्वात् तस्य । तुशब्दो विशेषणे, **अर्थे धर्मसंज्ञी** न इति वर्तते, यस्तावदर्थ एवार्थ- - /ms

---

८ त्व] दृश्यतां पृ° ६१ पं° ४ ॥
८ न] न त्वते प्र° ॥
१२ य] दृश्यतां पृ° ६७ पं° ७ ॥
२० का] °कालेऽत्त+इत्त-र°nayacakra-ms-bhā । °कालेत्त+इत्वर° nayacakra-ms-ya । अत्र °काले उत्तरकाले वा इत्यपि पाठः स्यात् ॥
२० संज्ञ्य] °संज्ञाप्यर्थे प्र° ॥
२४ संज्ञ्य] °संज्ञपि प्र° ॥
२५ द] °दनर्थेऽनर्थ यावत्nayacakra-ms-ya ॥

संज्ञी न भवतीति स कुतोऽर्थे धर्मसंज्ञी भवति ? इति विशेषस्तुशब्दात् । अर्थापत्त्या पूर्ववदनर्थेऽर्थसंज्ञी तस्मिन्नेव च धर्मसंज्ञीति । § 268

78/mj

ततः शून्यशून्यप्रत्युत्पादनावदसद्विषयत्वान्निर्मूलकल्पनामात्रसत्यता । § 269

यच्चाप्यभिहितमभिधर्मकोशे--यदेतदनेकप्रकारभिन्नं रूपायतनं तत्र कदाचिदेकेन § 270

- /ms ततः किं जातम् ? **शून्यशून्यप्रत्युत्पादनावदसद्विषयत्वं** दोषजातमपि तस्याः कल्पनायाः । यथा शून्यं शून्येन गुणितं जातं शून्यमेवेति यथा गणकानां क्वचित् कल्पनमसद्विषयं शिष्यमतिपरिकर्मार्थं तथेदमसद्विषयम् । ततश्च **असद्विषयत्वान्निर्मूलकल्पनामात्रसत्यता,** *निर्बीजा समुदयकल्पना तद्धर्मकल्पना च, निर्मूले द्वे अपि कल्पने, ते प्रमाणमस्य तन्मात्रम्, तन्मात्रमेव सत्यम्, नान्यत् किञ्चित् सत्यं भवत्कल्पिते प्रत्यक्षे । तस्मान्निर्मूलकल्पनामात्रसत्यत्वाल्लौकिकेष्टसत्सलिलादिबीजमृगतृष्णिकादिकल्पनाभ्योऽपि पापीयस्यौ प्रत्यक्षानुमानकल्पने युष्मदीये । § 271

**यच्चाप्यभिहितमभिधर्मकोशे यदेतदनेकप्रकारभिन्नमित्यादि** यावदनेकव-
79/mj र्णसंस्थानं पश्यत

---

७ शू ] शून्यशून्यप्रत्युपादना°nayacakra-ms-ya । शून्यप्रत्युपादना° nayacakra-ms-bhā । अत्र प्रत्युत्पादना गुणनमित्यर्थः ॥
८ य ] तथा nayacakra-ms-ya ॥
१० * ] निर्बीजात्समु°nayacakra-ms-ya ॥
१३ त्वाल्लौकिकेष्ट ] °ष्टमत्सलिला°nayacakra-ms-bhā । °ष्टमंसलिला° nayacakra-ms-ya ॥
१५ य ] यतदनेक° प्र° । अभिधर्मकोशस्य तद्भाष्यस्य च वसुबन्धुप्रणीतत्वादभिधर्मकोशशब्देन अभिधर्मकोशभाष्यमेवात्र विवक्षितम् । तत्र च विद्वद्वरश्रीवासुदेवविश्वनाथगोखलेमहोदयानां प्रयासेन भदन्तश्रीशान्तिभिक्षुमहोदयसाहाय्येन च विद्वद्वरश्रीप्रह्लादप्रधानमहोदयानां सौजन्यात् समुपलब्धे हस्तलिखितेऽभिधर्मकोशभाष्ये एवम्विधः पाठः-- --- रूपं द्विधा विंशतिधा शब्दस्त्वष्टविधो रसः । षोढा चतुर्विधो गन्धः स्पृश्यमेकादशात्मकम् ॥ १ । १० ॥ निर्दिष्टानि पञ्चेन्द्रियाणि । अर्थाः पञ्च निर्देश्याः । तत्र तावद् **रूपं द्विधा**--वर्णः संस्थानं च । तत्र वर्णश्चतुर्विधो नीलादिः, तद्भेदा अन्ये । संस्थानं सप्तविधं दीर्घादि विसातान्तम् । तदेव रूपायतनं पुनरुच्यते **विंशतिधा,** तद्यथा--१ नीलम्, २ पीतम्, ३ लोहितम्, ४ अवदातम्, ५ दीर्घम्, ६ ह्रस्वम्, ७ वृत्तम्, ८ परिमण्डलम्, ९ उन्नतम्, १० अवनतम्, ११ सातम्, १२ विसातम्, १३ अभ्रम्, १४ धूमः, १५ रजः, १६ महिका, १७ छाया, १८ आतपः, १९ आलोकः, २० अन्धकारमिति । केचिद् नभश्चैकवर्णमिति एकविंशतिं सम्पठन्ति । तत्र सातं समस्थानम्, विसातं विषमस्थानम्, महिका नीहारः, आतपः सूर्यप्रभा, आलोकः चन्द्रतारकाग्न्योषधिमणीनां प्रभा, छाया यत्र रूपाणां दर्शनम्, विपर्ययादन्धकारम् । शेषं सुगमत्वान्न विपञ्चितम् । अस्ति रूपायतनं वर्णतो विद्यते न संस्थानतः नीलपीतलोहितावदातच्छायातपालोकान्धकाराख्यम् । अस्ति संस्थानतो न वर्णतः दीर्घादीनां प्रदेशः कायविज्ञप्तिस्वभावः । अस्त्युभयथा

* * *

द्रव्येण चक्षुर्विज्ञानमुत्पाद्यते यदा नीलादितत्प्रकारव्यवच्छेदो भवति, कदाचिदनेकेन यदा न तत्प्रकारव्यवच्छेदः, तद्यथा दूरान्मणिसमूहमनेकवर्णसंस्थानं पश्यतः । अत्रापि कथमनेकप्रकारभिन्न-

* * *

इति **बुद्ध**वचनं प्रत्यक्षलक्षणानुषङ्गागतं चक्षुर्विज्ञानसमङ्गिनीलविज्ञानोदाहरणसभावनवाक्यवन्नोपपद्यते एवेत्युपपादयिष्यन्नुपन्यस्यति । इदं पुन**र्बुद्ध**वचनं प्रमाणम् इति **अभिधर्मकोशे** निदर्शितं तद्विचार्यम् । तत्रा**नेकः प्रकारः** प्रकृष्टः कारः, कोऽसौ ? अन्योन्यातुल्यत्वम् । केन प्रकारेण **भिन्नं रूपायतनम्** ? नीलपीतादिप्रकारभिन्नम् । **तत्र** तस्मिन् रूपायतनेऽनेकप्रकारभिन्ने **कदाचिदेकेन द्रव्येण चक्षुर्विज्ञानमुत्पाद्यते** । कदा पुनरेकेन द्रव्येणोत्पाद्यते ? **यदा नीलादितत्प्रकारव्यवच्छेदो भवति,** नीलमेवेदं न

---

परिशिष्टं रूपायतनम् । आतपालोकावेव वर्णतो विद्येते इत्यपरे, दृश्यते हि नीलादीनां दीर्घादिपरिच्छेद इति । कथं पुनरेकं द्रव्यमुभयथा विद्यते ? अस्ति उभयस्य तत्र प्रज्ञानात्, ज्ञानार्थो ह्येष विदिः, न सत्तार्थः । कायविज्ञप्तावपि तर्हि प्रसङ्गः । उक्तं रूपायतनम् । **शब्दस्त्वष्टविधः** उपात्तानुपात्तमहाभूतहेतुकः सत्त्वासत्त्वाख्यश्चेति चतुर्विधः । स पुनर्मनोज्ञामनोज्ञभेदादष्टविधो भवति । तत्रोपात्तमहाभूतहेतुको यथा हस्तवाक्छब्दः । अनुपात्तमहाभूतहेतुको यथा वायुवनस्पतिनदीशब्दः । सत्त्वाख्यो वाग्विज्ञप्तिशब्दः । असत्त्वाख्योऽन्यः । उपात्तानुपात्तमहाभूतहेतुकोऽप्यस्ति शब्द इत्यपरे, तद्यथा--हस्तमृदङ्गसंयोगज इति । स तु यथैकवर्णपरमाणुर्न भूतचतुष्कद्वयमुपादायेष्यते तथा नैवेष्टव्य इति उक्तः शब्दः । **रसः षोढा,** मधुराम्ललवणकटुकतिक्तकषायभेदात् । **चतुर्विधो गन्धः,** सुगन्धदुर्गन्धयोः समविषमगन्धत्वात् । त्रिविधस्तु शास्त्रे--सुगन्धो दुर्गन्धः समगन्ध इति । **स्पृश्यमेकादशात्मकम्,** स्प्रष्टव्यमेकादशद्रव्यस्वभावम्--चत्वारि महाभूतानि श्लक्ष्णत्वं कर्कशत्वं गुरुत्वं लघुत्वं शीतं जिघत्सा पिपासा चेति । तत्र भूतानि पश्चाद् वक्ष्यामः । श्लक्ष्णत्वं मृदुता । कर्कशत्वं परुषता । गुरुत्वं येन भावास्तुल्यन्ते । लघुत्वं विपर्ययात् । शीतमुष्णाभिलाषकृत् । जिघत्सा भोजनाभिलाषकृत्, कारणे कार्योपचारात्, यथा--बुद्धानां सुख उत्पादः सुखा धर्मस्य देशना । सुखा सङ्घस्य सामग्री समग्राणां तपः सुखम् ॥ इति । तत्र रूपधातौ जिघत्सापिपासे न स्तः, शेषमस्ति । यद्यपि तत्र वस्त्राण्येकशो न तुल्यन्ते सञ्चितानि पुनस्तुल्यन्ते । शीतमुपघातकं नास्ति, अनुग्राहकं किलास्ति । **यदेतद् बहुविध रूपमुक्त तत्र कदाचिदेकेन द्रव्येण चक्षुर्विज्ञानमुत्पद्यते यदा तत्प्रकारव्यवच्छेदो भवति । कदाचिद् बहुभिर्यदा न व्यवच्छेदः,** n79/mj **तद्यथा-सेनाव्यूहमनेकवर्णसंस्थानं मणिव्यूहं चावा दूरात् पश्यतः** । एवं श्रोत्रादिविज्ञानं वेदितव्यम् । कायविज्ञानं तु परं पञ्चभिः स्प्रष्टव्यैरुत्पद्यते इत्येके चतुर्भिर्महाभूतैरेकेन च श्लक्ष्णत्वादिना । सर्वैरेकादशभिरित्यपरे । **ननु चैवं समस्तालम्बनत्वात् सामान्यविषयाः पञ्च विज्ञानकायाः प्राप्नुवन्ति, न स्वलक्षणविषयाः । आयतनस्वलक्षणं प्रत्येते स्वलक्षणविषया इष्यन्ते न द्रव्यस्वलक्षणमित्यदोषः** । इदं विचार्यते--कायजिह्वेन्द्रिययोर्युगपद् विषयप्राप्तौ सत्यां कतरद् विज्ञानं पूर्वमुत्पद्यते ? यस्य विषयः पटीयान् । समप्राप्ते तु विषये जिह्वाविज्ञानं पूर्वमुत्पद्यते भोक्तृकामतावर्जितत्वात् सन्ततेः । उक्ताः पञ्चेन्द्रियार्था यथा च तेषां ग्रहणम् । १ । १० ॥

६ यिष्य ] ०ष्यन्न पश्यतिnayacakra-ms-ya । ०ष्यन्न पव्यति nayacakra-ms-bhā । अत्र ०ष्यन् पठति इत्यपि पाठः स्यात् ॥

९ त ] ०तने नैक० प्र० ॥

पीतादि, पीतमेवेदं न नीलादि इत्येकप्रकारव्यवच्छेदो यदा भवति तदा चक्षुर्विज्ञानमेकेन द्रव्येणोत्पाद्यते । **कदाचिदनेकेन,** कदा पुनरनेकेन ? **यदा न तत्प्रकारव्यवच्छेदो भवति,** नीलादिप्रकारव्यवच्छेदो यदा न भवति तदा चक्षुर्विज्ञानमनेकेन द्रव्येणोत्पाद्यते । अस्मिन्नर्थ उदाहरणमप्याह --**तद्यथा दूरान्मणिसमूह**मित्यादि । विप्रकृष्टदेशस्थितं मणीनां समूह**मनेक-**
- /ms **वर्णसंस्थान**मनेकेन वर्णेन संस्थानं व्यवस्थानमस्य तमनेकवर्णसंस्थानं **पश्यतः,** अनेकवर्णमनेकसंस्थानं च पश्यत इति वा । यो नीलपीताद्यनेकवर्णो वृत्तत्र्यस्राद्यनेकसंस्थानो वज्रेन्द्रनीलमरकतसस्यकपुष्परागपद्मरागस्फटिकादिमणिसमूहोऽनेकप्रकारभिन्नस्तं पश्यतः पुरुषस्य दूरान्न व्यवच्छेदो भवति, आरात्तु व्यवच्छेदो भवति--अयमिन्द्रनीलो वज्रादीनामन्यतमो वेति । § 272

तत्र कल्पनापोढस्वलक्षणविषयप्रत्यक्षलक्षणचोद्योपक्रमप्रसङ्गेन **यत्तर्हीदं सञ्चितालम्बनाः पञ्च विज्ञानकायाः** अभि° पि° **इति तत् कथं यदि तदेकतो न विकल्पयति ?** इति, यच्चोक्तमनेकप्रकारभिन्नैकानेकद्रव्योत्पाद्यज्ञानतेत्यत्र कल्पनात्मकत्वप्रसङ्गोऽस्वलक्षणविषयत्वप्रसङ्गश्चेति चोदिते तत्परिहारार्थम् — **आयतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणम्** अभि° को° भा° १ । १० **इति कथं तत्** कल्पनापेतम् ? इत्यत्र विचारः करिष्यते । इदमेव तावद्विचारयामो **बुद्धवचनम्**--कदाचिदेकेन द्रव्येण ज्ञानमुत्पाद्यते
80/mj कदाचिदनेकेनेति । **अत्रापि कथमनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायां**

* * *

सामान्यवृत्तिरूपायतनतायां तद्रूपायतनं पश्यतस्तस्य तद्विषयत्वात् स्वलक्षणविषयाः पञ्चविज्ञानकायाः पठ्यन्ते इति वक्तव्यम् । कथं चेति सञ्चितालम्बनतायामविभागसमवस्थसमूहात्मकत्वादेकप्रकारावच्छेदो मणिसमूहप्रभानुविद्धवर्णसंस्थानवत् ?

---

२ क] कय पुन°nayacakra-ms-vi विना । कथं पुन° nayacakra-ms-vi ‖
३ य] यदा तत्प्रकार°nayacakra-ms-ya ‖
८ वृ] वृत्त्यत्रस्रा° प्र° ‖
१० भ] भवयत्यमिन्द्रnayacakra-ms-ya ‖
१२ य] एवं प्रत्यक्षं कल्पनापोढमुपपन्नम्, अभिधर्मेऽप्युक्तम्--चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमिति । अर्थेऽर्थसंज्ञी न त्वर्थे धर्मसंज्ञी इति । यत्तर्हीदं सञ्चितालम्बनाः पञ्च विज्ञानकायाः अभि° पि° इति तत् कथं यदि तदेकतो न विकल्पयति ? यच्चोक्तम्--आयतनस्वलक्षणं प्रत्येते स्वलक्षणाविषया न द्रव्यस्वलक्षणं प्रति अभि° को° भा° १ । १० इति तत् कथम् ? इति चेत्, तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम् । अनेकद्रव्योत्पाद्यत्वात् तत् स्वायतने सामान्यगोचरमित्युच्यते न तु भिन्नेष्वभेदकल्पनात् ।--इत्युक्तमिदं चोद्यतत्परिहारादिकं दिङ्नागविरचितायां प्रमाणसमुच्चयस्ववृत्तौ १ । ४ ‖
१४ ल्प] °ल्पयंतीति यच्चो°nayacakra-ms-bhā । °ल्पयति यच्चो° nayacakra-ms-ya ‖
१४ ज्ञा] °ज्ञानेत्यत्रnayacakra-ms-ya ‖
१८ इ] इदमेतावद्वि°nayacakra-ms-ya ‖

एकस्य च द्रव्यस्य कदाचिदग्रहणादेकेन द्रव्येण कथं चक्षुर्विज्ञानमुत्पाद्यते, रसानास्वादनरसाज्ञानवत् । एकद्रव्यज्ञानोत्पादने तु सञ्चितालम्बनकल्पना निरर्थिकैव, तदभ्युपगमविरोधः ।

* * *

यावत् **पठ्यन्त इति वक्तव्यम्** । **कथं वक्तव्य**मिति सम्बन्धः । अनेकप्रकारे भिन्ने सामान्ये वृत्तिरस्य रूपायतनस्य तदनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनम्, तद्भावस्तादृग्रूपायतनता, तस्यां सत्यामनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायां **तद्रूपायतनं पश्यतः** समूहात्मकं तदालम्बनत्वात् **तस्य** चक्षुर्विज्ञानस्य **तद्विषयत्वात्** सामान्याख्यसमूहरूपायतनविषयत्वात् कथं स्वलक्षणविषयं तदुच्यते ? तथासर्वरूपादिपञ्चविज्ञानकाया रूपायतनत- - /ms द्विज्ञानयोरुदाहरणमात्रत्वात् **कथं स्वलक्षणविषयाः पञ्च विज्ञानकायाः पठ्यन्त इति वक्तव्यो**ऽत्र समाधिः । आयतनस्य सामान्यरूपत्वान्न स्वलक्षणतेत्यर्थः । § 273

**कथं चे**तीत्यादि याव**देकप्रकारावच्छेद** इति । **कथ**मिति हेतुपरिप्रश्ने, **च**शब्दो दोषसमुच्चये, केन हेतुना तस्यामनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायाम्, **इति**शब्दः प्रकारवाची, इत्थं नानारूपं रूपायतनं पश्यतः **सञ्चितालम्बनतायामविभागसमवस्थसमूहात्मकत्वात्,** अविभागेनैक्यापत्त्या समवस्था यस्य समूहस्य सोऽयमविभागसमवस्थसमूहः, तदात्मकत्वाद्रूपायतनस्य कथ**मेकप्रकारावच्छेदः** ? न भवितुमर्हतीत्यर्थः । किमिव ? **मणिसमूहप्रभानुविद्धवर्णसंस्थानवत्,** यथा नानावर्णानां मणीनां समूहे तत्प्रभयानुविद्धे वर्णसंस्थाने नास्त्येकप्रकारावच्छेदस्तथैकद्रव्यावच्छेदाभाव इति । § 274

किञ्चान्यत् --**एकस्य च द्रव्यस्य कदाचिदग्रहणात्** एकस्य च द्रव्यस्य परमाणोः सर्वदाप्यतीन्द्रियस्य ग्रहणाभावा**देकेन द्रव्येण कथं चक्षुर्विज्ञानमुत्पाद्यते** ? न कदाचित् कथञ्चिदुत्पाद्यत इत्यर्थः । तस्मात् **कदाचिदेकेन द्रव्येण ज्ञानमुत्पाद्यते यदा नीलादिप्रकारव्यवच्छेदो भवति** इति किमेतदबुद्धवचनं **बुद्धवचनम्** ? इति चिन्त्यताम् । किमिव पुनरेकस्य द्रव्यस्य कदाचिदग्रहणाच्चक्षुर्विज्ञानं नोत्पाद्यते इति चेत्, उच्यते --**रसानास्वादनर-** - /ms **साज्ञानवत्,** रसनेन्द्रियेणानास्वादिते यथा रसज्ञानं नोत्पद्यत एवं चक्षुषा न गृहीते चक्षुर्विज्ञानं नास्ति । यदि चास्य **बुद्धवचनस्य बुद्धवचनत्वसिद्ध्य-**

---

५ प ] पच्यंत प्र° ॥
५ अ ] अत्र अनेकप्रकारभिन्ने इत्यपि पाठः स्यात् ॥
११ प ] पव्यंतnayacakra-ms-bhā ॥
१२ त्वा ] °त्वान्न च लक्षण° nayacakra-ms-bhā । °त्वात्तच्चलक्षण° nayacakra-ms-ya ॥
१५ प्र ] °प्रकारसामान्य° प्र° । दृश्यतां पं° ९ ॥
१६ ना ] नानारूपिnayacakra-ms-ya ॥
२५ क ] दृश्यतां पृ° ७८ पं° २ ॥
२८ ग्र ] °ग्रहणचक्षु° प्र° ॥
२८ उ ] उच्यते सानास्वादन° प्र° । अत्र उच्यते रसनानास्वादने इत्यपि पाठः स्यात् ॥

र्थमेकेन द्रव्येण ज्ञानमुत्पाद्यत इत्यभ्युपगम्यते तत **एकद्रव्यज्ञानोत्पादने तु सञ्चितालम्बनकल्पना निरर्थिकैव** । यदा चैवं प्रत्येकं चक्षुर्विषयता अणूनामिष्यते तदेदमपरं **बुद्धवचनमबुद्धवचनं** निरर्थकं च जायते । कतमत् ? **सञ्चितालम्बनाः पञ्चविज्ञानकायाः** अभि° पि° इति । एतस्य वा सत्यत्वे तदसत्यता स्थितैवेति परस्परतो वचनद्वयविषयोऽभ्युपगमविरोध इत्यत आह --**तदभ्युपगमविरोधः** । § 275

81/mj

प्रकारावच्छेदानवच्छेदानेकप्रकारभिन्नत्वज्ञानान्यपि न स्युः, रूपायतनस्य सञ्चितगतेरेव, नरसिंहवत् । नरसिंहानेकप्रकारगतिरपि हि नरत्वसिंहत्वसञ्चययोः पूर्वं भेदेन दर्शनात् । असञ्चये तु तद्द्रव्येष्वणुषु प्रकारग्रहणमेव नास्ति, असञ्चितस्यादर्शनात्; कुत एव तद्व्यवच्छेदादि ? § 276

अनेकेन इति वचनात् संवृतिसत्सामान्यासत्कल्पनविषयाः पञ्च विज्ञानकायाः, § 277

किञ्चान्यत् --**प्रकारावच्छेदे**त्यादि यावत् **सञ्चितगतेरेव** । **न प्रकारः, अवच्छेदः, अनवच्छेदः, अनेकप्रकारभिन्नत्वम्** इत्येतान्यपि **ज्ञानानि** भवितुमर्हन्ति । कस्मात् ? **रूपायतनस्य सञ्चितगतेरेव,** सञ्चितमेव हि रूपायतनं गम्यते नासञ्चितम् । अतो न प्रकारः इति ज्ञानं घटते प्रकृष्टः कारः प्रकारः नीलः पीत इति, अयमस्माद्विशिष्ट इति परस्परतोऽत्यन्तभेदाभावे प्रकाराभावात्, अभेदगतेः सामान्ये न तु प्रकारज्ञानं घटते, तथावच्छेदोऽन्यस्मादन्यस्य भेदाभेदविकल्पनात्, तथानवच्छेदः, अनेकः इति, अनेकेन च प्रकारेण भिन्नः इति भिन्नानामभेदगतिः । सञ्चितगतेरभेदगतेश्च न प्रकारादिज्ञानानि अकल्पनात्मकानि स्वलक्षणविषयाणि च भवितुमर्हन्ति । किमिव ? **नरसिंहवत्,** यथा नरस्याकारोऽधस्त्यः सिंहस्याकारः शिरोभागः, तदुभयाभेदगतेर्नरसिंह इत्युच्यते एवं प्रकारादिज्ञानान्यपि भिन्ने- - /ms ष्वभेदकल्पनादेव स्युर्नान्यथेति । नरे सिंहे च नरसिंहाविति भिन्नयोरभेदगत्यभावाददृष्टान्ततेति चेत्, न, सञ्चययोरेवाभेदरूपत्वात् । **नरसिंहानेकप्रकारगतिरपि हीत्यादि,** तयोर्हि प्रत्येकं नर इति सिंह इति च भिन्नयोरपि

१ इ] इत्यन्युप°nayacakra-ms-vi । इत्यनुप° nayacakra-ms-vi विना ॥
१ म्य] °गम्यते त एक°nayacakra-ms-bhānayacakra-ms-pā ॥
५ वा] चाnayacakra-ms-ya ॥
१४ ग] °गतेरिवnayacakra-ms-ya ॥
१७ ग] गम्यते वासंचितम्nayacakra-ms-ya ॥
१९ प्र] प्रकारभावात् प्र° ॥
२१ स] संत्विगते°nayacakra-ms-ya ॥
२७ न] नरसिंह इति चnayacakra-ms-ya ॥

प्रकारगतिर्यस्मा**न्नरत्वसिंहत्वसञ्चययोः**, नीलादिपरमाण्वादिद्रव्याणां पूर्वं भेदेन दर्शनादभेदकल्पनात्मिका भेदगतिरिति युक्ता, न तथा तु । § 278

अभ्युपेत्यापि नरसिंहप्रकारगतिमेव च **असञ्चये तु तद्द्रव्येष्वणुष्वित्यादि** । **सञ्चितालम्बनाः पञ्च विज्ञानकाया** इति यदुक्तं त्वया तद्विस्मृत्येदमुक्तम् --**यदेतदनेकप्रकारभिन्नं रूपायतनं तत्र कदाचिदेकेन द्रव्येण ज्ञानमुत्पाद्यत** इति । **चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमिति** एतदपि विस्मृत्येदमुक्तम् --**कदाचिदनेकेन यदा तद्व्यवच्छेदो न भवति, तद्यथा--मणिसमूहमनेकवर्णसंस्थानं पश्यत** इति, नीलपीताद्यनेकरूपस्य युगपद्ग्रहणाभ्युपगमे नीलैकरूपविज्ञानविरोधादित्यलं प्रसङ्गेन । प्रकृत- मुच्यते--द्र- - /ms
व्यसत्सु **अणुषु** नीलपीतादि**प्रकारग्रहणमेव नास्ति** तदसञ्चये । किं कारणम् ? **असञ्चितस्यादर्शनात्** । असञ्चितानामदर्शनमतीन्द्रियत्वादित्युक्तम् । **कुत एव तद्व्यवच्छेदादि ?** सति हि दर्शने तद्व्यवच्छेदानवच्छेदप्रकारभिन्नत्वज्ञानानि सम्भाव्येरन्, असति दर्शने दूरादेव तानि न स्युः । एवं तावत् एकेन द्रव्येण इत्ययुक्तम् । § 279

यदपि चोक्तम् अनेकेन द्रव्येण कदाचिज्ज्ञानमुत्पाद्यते इति, एतस्मात् **अनेकेन इति वचनात्** तस्यानेकद्रव्यस्य **संवृतिसत्त्वात्** सामान्यता, **सामान्यत्वादसत्कल्पनं** तत्, तद्विषयाः **पञ्च विज्ञानकायाः**, असत्कल्पनविषयत्वादनुमानतदाभासज्ञानवदप्रत्यक्षमप्रमाणं वा दूरान्मणिसमूहदर्शनवद्वेति 82/mj

* * *

न स्वलक्षणविषयाः, एकविज्ञानानेकविषयतापि ।

यदपि च बुद्धेनोक्तम्--द्वयं प्रतीत्य विज्ञानस्योत्पत्तिर्भवति । कतमद् द्वयं प्रतीत्य ? चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानम् । श्रोत्रं प्रतीत्य शब्दांश्चोत्पद्यते श्रोत्रविज्ञानम् । घ्राणं प्रतीत्य गन्धांश्चोत्पद्यते घ्राणविज्ञानम् । जिह्वां प्रतीत्य रसांश्चोत्पद्यते जिह्वाविज्ञानम् । कायं प्रतीत्य स्प्रष्टव्यांश्चोत्पद्यते कायविज्ञानम् । मनः प्रतीत्य धर्मांश्चोत्पद्यते मनोविज्ञानम् । अत्रापि यदि व्यक्त्यपेक्षो निर्देशः सञ्चयवचनाय ततोऽयमेव दोषः । अथ द्रव्योक्तये तत इहाभ्युपगमविरोधः । बुद्ध्यादेरपि चैन्द्रियकत्वम्, अतीन्द्रियत्वात्, रूपवत् । यश्चात्र विरोधः स तुल्यः परमाण्वैन्द्रियकत्वेन । अतीन्द्रियत्वादनुमानविरोधः ।

---

१ पू] पूर्वभेदेन प्र० ॥
२ यु] युक्तांnayacakra-ms-raṃnayacakra-ms-hī ॥
३ अ] अभ्युपेत्यादि नर०nayacakra-ms-bhā । अभ्युपेत्येत्यादि नर० nayacakra-ms-ya ॥
४ स] दृश्यतां पृ० ६४ पं० १ ॥
५ य] दृश्यतां पृ० ७८ पं० २ ॥
६ क्षुर्विज्ञा] दृश्यतां पृ० ६१ पं० १ ॥
७ क] दृश्यतां पृ० ७९ पं० १ ॥
१२ ए] एतद्व्यच्छे० प्र० ॥
१४ इ] इत्युक्तम्nayacakra-ms-ya ॥
१५ अ] दृश्यतां पृ० ७९ पं० १ ॥
१६ त] तस्यनेकद्रव्य-संवृति०nayacakra-ms-ya ॥

* * *

**न स्वलक्षणविषयाः** प्रसक्ताः । न च केवलमस्वलक्षणविषयतैव दोषः, किं तर्हि ? **एकविज्ञानानेकविषयतापि** दूरदर्शनवदेवेति । § 280

बुद्धवचनासमञ्जसत्वप्रतिपादनप्रसङ्गेनेदमप्युपन्यस्तम् --**यदपि च बुद्धेनोक्तमित्यादि** यावद् **धर्मांश्चोत्पद्यते मनोविज्ञानमिति** । यद्यनेकेन द्रव्येण ज्ञानमुत्पाद्यते, साक्षाद् बुद्धेनोक्तं यदपि च **द्वयं प्रतीत्येत्यादि** विरुध्यत इत्यभिसम्बन्धः । आध्यात्मिकमायतनं बाह्यं च **द्वयं प्रतीत्य विज्ञानस्योत्पत्तिर्भवति** इत्युक्त्वा स्वयमेव पुनः प्रतिपृच्छय व्याकरोति --**कतमद्द्वयं प्रतीत्य ? चक्षुः प्रतीत्य रूपाणि च** प्रतीत्य इत्यादि विभज्य वाच्यं गतार्थमेव तत् । द्वयषट्काद् विज्ञानषट्कमुत्पद्यत इति पूर्वपक्षः । तथा चाह-- § 281
- /ms

विजानाति न विज्ञानमेकमर्थद्वयं यथा ।
एकमर्थं विजानाति न विज्ञानद्वयं तथा ॥ चतुःश० २६८ इति
|§ 283

अत्रोत्तरमाह --**अत्रापि** चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानस्योत्पत्तिर्भवति इति द्वयी गतिर्बहुवचननिर्देशस्य--सञ्चयापेक्षयातीन्द्रियाणामपि रूपाणां व्यक्तिपदार्थाश्रयः स्यात् ? **जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्** पा० १ । २ । ९ इति जातिपदार्थाश्रयो वा ? तत्र **यदि व्यक्त्यपेक्षो निर्देशः सञ्चयवचनाय ततोऽयमेव संवृतिसत्सामान्यासत्कल्पनविषयाः पञ्च विज्ञानकाया न स्वलक्षणविषया** इति **दोषः । अथ द्रव्योक्तये** तज्जातीयाः परमाणव एकरूपनिर्देशेन सर्वे निर्दिष्टव्या इत्येकस्मिन् बहुवचनं **तत इहाभ्युपगमविरोधः**, अभ्युपगतं त्वया अतीन्द्रियाः परमाणवः इति, तेन विरोधः । अस्मिंश्चाभ्युपगमेऽन्यदप्यनिष्टापादनमुच्यते --**बुद्ध्यादेरपि चेन्द्रियकत्वम्, अतीन्द्रियत्वात्, रूपवदिति** । बुद्धिसुखदुःखेच्छाद्वेषवेदनादयो धर्माश्चाक्षुषाः स्युर्भवत्परिकल्पिताः, अतीन्द्रियत्वात्, रूपवत् । रूपं वा न चक्षुर्ग्राह्यं स्यात्, अतीन्द्रियत्वात्, बुद्ध्यादिवत् । ब्रूयास्त्वम्--नन्वतीन्द्रियत्वं चक्षुर्ग्राह्यत्वं च परस्परतो विरुध्येते इति । तन्मा मंस्थाः, भवतोऽनिष्टापादनपरत्वाद् भवद्बुद्धिनिवर्तनफलत्वाच्चास्य प्रयोगस्येति । अथापि **यश्चात्र विरोधः**

२ च] केवल अस्वलक्षण° प्र० । अत्र केवलोऽस्वलक्षण° इत्यपि पाठः स्यात् ॥
३ द] °दर्शनमवदेवेति प्र० ॥
४ स] °सस्त्वप्रति°nayacakra-ms-ya ॥
८ क] कतद्द्वयं प्र० ॥
९ च] चद्दुःnayacakra-ms-ya ॥
१४ यातीन्द्रियाणा] णामपिरूपाणामरूपाणां प्र० ॥
१७ स] संचयवरनाय ततो°nayacakra-ms-ya । संचय ततो° nayacakra-ms-bhā ॥
१७ मेव] दृश्यतां पृ० ८१ पं० ५ ॥
२५ तो] विरुध्येतेतिnayacakra-ms-ya ॥

**सम्भाव्येत स तुल्यः परमाण्वैन्द्रियकत्वेन,** परमोऽणुः परमाणुः, 83/mj

* * *

उक्तभावनावत् स्ववचनविरोधोऽपि ।

वादपरमेश्वरसंश्रयश्चैवम् । न च नस्तेन सह विरोधः, तस्य लोकनाथत्वात् । स हि विलुप्यमानस्य लोकतत्त्वस्य त्राता । कथं संश्रय इति चेत्, अनेकात्मकरूपायतनाभ्युपगमात् ।

* * *

अणुशब्दः सूक्ष्मपर्यायः, परमशब्दस्तदतिशयवाची, स चातीन्द्रियत्वे घटते, तस्यातीन्द्रियस्यैन्द्रियकत्वं चाक्षुषत्वं यथा विरुद्धमेवमिदमपि बुद्ध्याद्यैन्द्रियकत्वं तुल्यमिति समानदोषतया विरोधोद्भावनमस्तु को दोषः ? किञ्चान्यत्, चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानमुत्पद्यते इति **चातीन्द्रियत्वादनुमान- विरोधः,** स्थूलानां सूक्ष्मपूर्वकत्वात् कार्यानुमानसिद्धाः परमाणवः, - /ms
तस्मान्नित्यानुमेयानां तेषां चक्षुर्विषयत्वाभ्युपगमे वचनयोरनुमानविरोधिता । किञ्चान्यत् --**उक्तभावनावत् स्ववचनविरोधोऽपि,** [उअत्र उक्ता भावना, तद्वदुक्तभावनावत् इत्यपि पाठः स्यात् ‖क्ता भावना] उक्तभावना, तद्वदुक्तभावनावत्, अनयैव परमाणुरतीन्द्रियत्वाच्चाक्षुषश्चेत्यनुमानविरोधभावनयोक्तया तुल्यत्वात् अतीन्द्रियाभिमतः परमाणुश्चक्षुर्विषयतामायाति इति ब्रुवतः स्ववचनविरोधोऽपि । § 284

**वादपरमेश्वरसंश्रयश्चैवम्** । एवं च भवत एकान्तवादिनस्तत्त्यागेनानेकान्तवादाश्रयः । वादाः सर्व एव लोकं स्वसात्कर्तुं समर्थत्वाल्लोकस्य ईशते एकान्ता अपि । तेषां तु सर्वेषामनेकान्तवादः परमेश्वरस्तद्वशवर्तिनामीष्टे । तेषां स्वार्थोन्नयनसमर्थानामपि परस्परविरोधदोषवतामुदासीनमध्यमनृपतिवत् सन्ध्यादिषाड्गुण्यान्यतमगुणाश्रयिणां विजिगीषूणां परार्पणलक्षणसंश्रयगुणाधारः परमेश्वरः स्याद्वादः, तत्संश्रयेणैव स्ववृत्तिलाभात् तदसंश्रये परस्परकार्यविलोपात् स्वयं विनाशाच्च तेषाम् । लौकिको व्यवहारनय आह

---

१ मा] °माण्वेंद्रिय° प्र° ‖
१ प] परमाणुः परमाणु
अणुशब्दःnayacakra-ms-ya ।
परमाणुः परमाणुशब्दः
nayacakra-ms-bhā ‖
१३ व] अतीन्द्रियश्चाक्षुषश्च इति वचनयोः
‖
१६ तीन्द्रिय]
°यच्चाक्षुष°nayacakra-ms-bhā ।
°यत्वाक्षुष° nayacakra-ms-raṃ
nayacakra-ms-hī ‖
१६ भा] °नायोक्तया प्र° ‖
२३ स] संव्यादि° प्र° । षाड्गुण्यस्य
प्रकृतिमण्डलं योनिः ।
सन्धि-विग्रहा-ऽऽसन-यान-संश्रय-द्वैधीभावाः
षाड्गुण्यम् इत्याचार्याः ।... ...तत्र पणबन्धः
सन्धिः १, अपकारो विग्रहः २,
उपेक्षणमासनम् ३, अभ्युच्चयो यानम् ४,
परार्पणं संश्रयः ५, सन्धि-विग्रहोपादानं
द्वैधीभावः ६ इति षड् गुणाः ।
परस्माद्धीयमानः सन्दधीत १ ।
अभ्युच्चीयमानो विगृह्णीयात् २ । न मां परो
नाहं परमुपहन्तुं शक्त इत्यासीत ३ ।
गुणातिशययुक्तो यायात् ४ । शक्तिहीनः
संश्रयेत ५ । सहायसाध्यकार्ये द्वैधीभावं
गच्छेत् ६ इति गुणावस्थापनम् ।--इति
**कौटिलीयार्थशास्त्रे** ७ । १८-१९ ‖
२५ का]
°कायविलो°nayacakra-ms-ya ।
°कार्यावलो° nayacakra-ms-bhā ‖

**--न च नस्तेन सह विरोधः** । कस्मात् ? **तस्य लोकनाथत्वात्** । *लोको हि व्यवहारनयस्तद्वशवर्तित्वेन तन्मतविलोकनात्, तस्य लोकस्य नाथत इति लोकनाथः स्याद्वादः । कस्मात् ? **स हि** इतोऽमुतो **विलुप्यमानस्यै**कान्त-वादिभि**र्लोकतत्त्वस्य** लोकसारस्य सम्यग्दर्शनरत्नस्य **त्राता** त्राणशीलस्त्राणध-र्मा साधु त्राणकारी वेति । कथं त्रातेति चेत्, **सर्ववादभेदे**त्यादि, लोकभूतानां सर्ववादानां भेदाः सर्ववादभेदा नित्यानित्याद्येकान्ताः, तेषां **याथार्थ्यानि** य-
- /ms थार्थभावाः स्वविषयसमर्थनानि, तेषां लोकसंवादेनोपग्राहयितृ- त्वात् पर-स्परसाम्यावस्थापनेन **परिपालनात्** त्रातेत्युच्यते । § 285

इतर आह **--कथं संश्रय इति चेत्** । अस्तु तावद्वादपरमेश्वरत्वं लोक-त्राणात् स्याद्वादस्य लोकत्राणं च परस्पराविरोधोपपादनेनैकीकरणाच्च तेषाम्, वादपरमेश्वरसमाश्रयः कथमेकान्तवादानाम् ? इत्यत्रोच्यते— **अनेकात्म-करूपायतनाभ्युपगमात्** । अनेक आत्मा यस्य तदिदमनेकात्मकं रूपायतनं
84/mj यत् तदेकेन

* * *

अत्र चैकरूपायतनाधारतया तत्रशब्देन अनन्तरनिर्दिष्टमेव रूपायतनमुक्तं तस्यैवोभयरूपता पुनर्दर्शिता । एवं च तस्यैवैकानेकता, तथाऽविभक्ततत्त्वेन ज्ञानोत्पत्तेः । ततश्च स्यादेकं रूपायतनं स्यादनेकं रूपायतनम्, उक्तहेतुवत् ।

* * *

द्रव्येण कदाचिज्ज्ञानमुत्पादयति कदाचिदनेकेनेति तद्यवच्छेदाव्यवच्छेदाभ्यामिति, तदभ्युपगमात् स्याद्वादसमाश्रयः । स्याद्वादैकदेशाश्च नया एकान्तवादाः, यथोक्तम् **--भद्दं मिच्छद्दंसण** सन्मति० ३ । ५९ गाहा । नैताः स्व-मनीषिकाः, लक्षणमपि तथैव नयानाम्, उक्तं हि **--द्रव्यस्यानेकात्म-कत्वेऽन्यतमात्मकैकान्तपरिग्रहो नयः स्वप्राधान्येनार्थनयनान्नयः** , स च मिथ्यादृष्टिरनेकाकारार्थस्य विपरीतप्रतिपत्तित्वात्, अनेकात्मकवस्तुप्रतिप-त्तित्वात् स्याद्वादस्य याथार्थ्यम् । कथं पुनर्लोकभूतेन व्यवहारनयेनैकान्त-वादिनो निगृह्यन्त इति चेत्, लोकनाथसमाश्रितत्वात् तेषां लोकनाथपक्ष-समाश्रय एव प्रतिवादिपक्षाभ्युपगमः, स निग्रहस्थानमेकान्तवादिनामभ्युप-

---

१ *] कलोकोnayacakra-ms-ya ‖
४ वा] ०वादिनेभि०
nayacakra-ms-ya ‖
४ त्रा] तात्ताnayacakra-ms-ya ।
ताता nayacakra-ms-bhā ‖
६ या]
यथार्थ्यानिnayacakra-ms-bhā ।
यथार्थानि nayacakra-ms-ya ‖
७ स] समर्थभानिला तेषां
nayacakra-ms-ya ‖
७ ग्रा] ०ग्राहयित्वात्पर० प्र० ‖
८ स्थाप] ०पनेन
पालनात्nayacakra-ms-ya ‖
१० त्रा] ०त्राणास्याद्वादस्या प्र० ‖
१९ द्र] दृश्यतां पृ० ७८ पं० २ ‖
२५ या]
यथार्थांnayacakra-ms-bhā । यथार्थं
nayacakra-ms-ya ‖
२६ वा]
०वादिभिगृह्यन्तnayacakra-ms-ya ।
०वादिभिर्गृह्यन्त nayacakra-ms-bhā
‖

गमसमकालमेवावसितो वाद इति । § 286

**अत्र चैकरूपायतनाधारतयेत्यादि** । त्वयापि स्याद्वादत्वभ्युपगतानेकात्म- - /ms कवस्त्वेकानेकत्वानेकान्तवादोऽभ्युपगत एव, यस्मा**दनेकप्रकारभिन्न**मित्यादि याव**दनेकवर्णसंस्थानं पश्यत** इत्यत्र च वाक्ये एकमेव रूपायतनं ज्ञानाधार इतीष्टम्, यस्मात् तदाधारतया पुनः **तत्र** इत्यधिकरणवाचिप्रत्ययान्तेन **तत्रशब्देनानन्तरनिर्दिष्टमेव रूपायतनमुक्त**मव्यतिरेकमभेदं तस्य वस्तुन आगृह्योक्तम् । **तस्यैवोभयरूपता पुनर्दर्शिता** कदाचिदेकेन द्रव्येण कदाचिदनेकेन ज्ञानमुत्पाद्यते इति ब्रुवता । रूपायतनस्यैवैकानेकसङ्ख्यानिर्देश्यत्वमनभ्युपगच्छता कथं तत्रशब्दसामानाधिकरण्यमापादयितुं शक्यते ? यदि तदेकमनेकं च न स्यात्, तथा इतरथा तत्र च रूपायतनेऽन्यत्र वेति स्यात्, न तु भवति । § 287

**तस्मादेवं चे**त्यादि । **एवं चोक्त**विधिना **तस्य** त्वयैवोक्तस्य रूपायतनस्यैकस्यै**वैकतानेकता च** अतस्त्वयैवोक्ता । कस्मात् ? **तथाऽविभक्ते**त्यादि । तेन प्रकारेण **तथा, अविभक्तं तत्त्वं** तद्भावस्तत्त्वं यस्य तदिदमविभक्ततत्त्वम्, तद्भावस्तत्त्वमेकानेकत्वाद्यविभक्तवस्तुतत्त्वम्, तेन **तथाऽविभक्ततत्त्वेन ज्ञानोत्पत्ते**रिति हेतुः । कस्मिन् साध्ये ? **तस्यैवैकानेकता**याम् । दृश्यते हि तदेव रूपायतनमेकमनेकं च परमाणवस्तत्समूहश्चेति ज्ञानोत्पत्तिः । **दूरान्मणिसमूहमनेकवर्णसंस्थानं पश्यत** इत्युदाहरणमप्येवमेवैकानेकरूपद्रव्यरूपायतनत्वे साध्ये चक्षुर्विज्ञानाधारस्य वस्तुनः साधर्म्यदृष्टान्तत्वं भजते, न एकान्तैकानेकरूपत्वे । **ततश्चावश्यमेषोऽर्थ** आपद्यते **--स्यादेकं रूपायतनं स्यादनेकं रूपायतन**मिति । कस्मात् ? स्निग्धरूक्षत्वाभ्यां बन्धैक्यपरिणामापत्तेस्तत्समूहग्राह्यत्वादेकम्, द्रव्यार्थावस्थानात् परमाणूनां स्वरूपभिन्नानां भेदादनेकम् । तत एव द्रव्यम्, रूपादिगुणपर्यायपरिणामापत्तेर- - /ms द्रव्यम् । प्रतिस्वमसाधारणरूपादिपरिणामापेक्षया स्वलक्षणविषयम् । साधारणीभूतभेदसमूहापेक्षचाक्षुषत्वादिपरिणामापत्तेः सामान्यविषयम्, 85/mj

* * *

---

१ वा] वाद प्रति nayacakra-ms-ya ॥
३ द] दृश्यतां पृ० ७८ पं० २ ॥
५ इ] इति- ष्टंnayacakra-ms-raṃnayacakra-ms-hī । इमिष्टं nayacakra-ms-raṃ nayacakra-ms-hī विना ॥
५ त] दृश्यतां पृ० ७८ पं० २ ॥
७ त] तस्यैवोरूपरूपताnayacakra-ms-ya । तस्यैवोरूपरूपरूपता nayacakra-ms-bhā ॥
९ ण्य] अत्र ०ण्यमुपपादयितुं शक्यते इति पाठः स्यादिति भाति ॥
१५ व] ०वस्तुत्वम् nayacakra-ms-bhā ॥
१७ ज्ञानोत्प] ०त्पत्ति प्र० ॥
१८ दू] दृश्यतां पृ० ७९ पं० २ ॥
२० स्या] स्यादेकं पररूपा०nayacakra-ms-ya ॥
२१ त्वा] ०त्वाभ्यां चवैक्यपरि० प्र० । स्निग्धरूक्षत्वाद् बन्धः --तत्त्वार्थसू० ५ । ३२ ॥
२५ मूहा] ०हापेक्षं चाक्षुष०nayacakra-ms-ya ॥

ननु कदाचिच्छब्दः कालान्तरवचनः, न, एककाल एवोभयरूपत्वात् स्यात् तत् तत् स्यान्न तत् तत्, ग्रहणापदेशविशिष्टार्थत्वात्, अनेकवर्णमणिरूपवदेकपुरुषपितृपुत्रत्वादिवद्वा ।

अतोऽनपेक्षितत्वाभ्युपगममनेकान्तदूषणमापद्यते । अविभावितैवमर्थ्यपूर्वा-

* * *

यथोक्तम् --**भेदसङ्घाताभ्यां चाक्षुषाः** तत्त्वार्थ० ५ । २८ इति । **उक्तहेतुवदिति**, तथाऽविभक्ततत्त्वज्ञानोत्पत्तेर्भेदाभेदात्मकज्ञानोत्पत्तिवदेतदपि वस्तु भेदाभेदात्मकमिति । § 288

इतर आह --**ननु कदाचिच्छब्दः कालान्तरवचनः** । तस्मिन्नेव हि वस्तुनि कदाचित् कालान्तरे ज्ञानमेकाकारमुत्पद्यते कदाचिदनेकाकारम्, ज्ञानस्यैवाकारवत्त्वान्निराकारबाह्यवस्तुपक्षे इति । अत्रोच्यते— **तन्न, एककाल एवोभयरूपत्वात्** । एकस्मिन्नेव हि काले नीलपरमाणुसमूहाकारज्ञानस्य भेदाभेदात्मकत्वं दृष्टम्, अतो न सम्यगुक्तम्--कदाचिच्छब्दः कालान्तरवचनः, तस्मादेकाकारं कदाचित् कदाचिदनेकाकारं ज्ञानमुत्पद्यते तस्मिन्नेव वस्तुनि इति । तस्माच्चैककाल एवोभयरूपत्वात् **स्यात् तत् तत्**, तदेव तद्वस्तु परमाणुद्रव्यसमूहाभेदात् । **स्यान्न तत् तत्**, रूपादिपरिणामभेदात् । हेत्वन्तरमप्यत्रोच्यते --**ग्रहणापदेशविशिष्टार्थत्वात्**, ग्रहणं ज्ञानम्, ज्ञानमेवापदेशो हेतुः, तेन हेतुना विशिष्टो ग्रहणापदेशविशिष्टश्चासावर्थश्च, तद्भावो ग्रहणापदेशविशिष्टार्थत्वम् । यस्माच्चक्षुर्विज्ञानाद्धेतोर्विशिष्टोऽर्थो रूपं समुदायसमुदाय्यात्मकं गृह्यते तस्मादनेकात्मकं तद्वस्तु । को दृष्टान्तः ? **अनेकवर्णमणिरूपवत्**, एक एव वा मणिर्मेचकस्फटिकाद्यन्यतमस्तद्रूपवत्, नानावर्णानां - /ms वा मणीनां समूहस्य रूपवत् । यथा तद् ग्रहणापदेशविशिष्टं ज्ञानपरिच्छिन्नं विभिन्नरूपं तथा चक्षुर्विषयाभिमतं वस्तु । **एकपुरुषपितृपुत्रादिवद्वेति** ग्रहणापदेशविशिष्टत्वसाधर्म्यदृष्टान्तान्तरम् । यथैकः पुरुषोऽनेकसम्बन्धिजनापेक्षया पिता पुत्रो भागिनेयो मातुलः इत्येवमादिव्यपदेश्यत्वं भजते न चास्य विरोध-सङ्करा-ऽनवस्थाप्रसङ्गदोषा ग्रहणापदेशविशिष्टार्थत्वादेवं चक्षुर्विज्ञानविज्ञेयं वस्तु प्रतिपत्तव्यम् । § 289

---

६ चा ] चाक्षुष इतिnayacakra-ms-bhā ॥
७ त्तिव ] °वदेपदपि वस्तु भेदात्मकमिति प्र० ॥
१२ का ] काल नील० प्र० ॥
१८ ग्र ] ग्रहणाविशिष्ट°nayacakra-ms-ya ॥
१८ श्चासा ] °साधर्थश्च प्र० ॥
१९ स ] °दायात्मकंnayacakra-ms-ya ॥
२१ णिर्मेच ] °चकः स्फटिका°nayacakra-ms-ya ॥
२२ देश ] °शविशिष्टं ज्ञानं परिच्छिन्नं विभिन्नरूपंnayacakra-ms-bhā । °शविशिष्टज्ञानं परिच्छिन्नविभिन्नरूपं nayacakra-ms-ya ॥

**अतोऽनपेक्षितेत्यादि** । अत एव कारणाद् येऽत्र चोदयन्ति **परस्परविरुद्धानां कथमेकत्र सम्भवः** इति, तेषां तद**नपेक्षितस्वाभ्युपगममनेकान्तदूषणमापद्यते,** स्वोऽभ्युपगमः स्वाभ्युपगमः, स नापेक्षितो यस्मिन् दूषणे तदनपेक्षितस्वाभ्युपगममनेकान्तदूषणम् । तद्यथा--सर्वं सर्वात्मकमविशिष्टं प्रतिज्ञाय परिणामभेदव्याख्यानं चानपेक्ष्यानेकान्तदूषणम्, देशकालकृतात्यन्तविशिष्टत्वं प्रतिज्ञाय सन्तानाविशेषव्याख्यानं चानपेक्ष्यानेकान्तदूषणम्, असत्कार्योत्पत्तिं प्रतिज्ञाय तुल्यजातीयद्रव्यगुणान्तरारम्भनियमव्याख्यानं चानपेक्ष्यानेकान्तदूषणं च । कस्माद्धेतोः ? **अविभावितैवमर्थ्यपूर्वाभ्युपगमत्वात्त्वेकान्तवादिनाम्** । उक्तानेकान्तस्वरूपोऽर्थ एवमर्थः, तद्भाव ऐवमर्थ्यम्, - /ms, 86/mj
अविभावितमैवमर्थ्यं पूर्वाभ्युपगमश्च यैस्त

* * *

भ्युपगमत्वात्त्वेकान्तवादिनां न विशेषदोषः कस्यचिदपि ।

आयतनस्वलक्षणं प्रत्येते स्वलक्षणविषयाः, न द्रव्यस्वलक्षणं प्रति अभि° को° भा° १ । १० इत्येतत्तु प्राक् चोदितमेव दोषं प्रतिष्ठापितवानसि । यत्तु समस्तालम्बनं विज्ञानं सामान्यविषयं प्राप्नोति, न स्वलक्षणविषयम् इत्येतत् प्रतिष्ठापितमेव कृतम् । एष तु विशेषदोषः --अज्ञानत्वप्रसङ्गः स्फुटतरकः... ... ...कुतः प्रत्यक्षत्वम् ?

योऽपि चैकाकारपरिकल्पनात् प्रत्यक्षस्य कल्पनात्मकत्वप्रसङ्गोऽस्वलक्षणविषयत्वप्रसङ्गश्च सञ्चितालम्बनतायामिति चोदिते समाधिरभिधीयतेऽस्वलक्षणत्वदोषपरिहारः—

अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम् ।§ 291

अनेकद्रव्योत्पाद्यत्वात् तत् स्वायतने सामान्यगोचरम् इत्युच्यते, न तु भिन्नेष्वभेदकल्पनात् प्र° समु° वृ° १ । ४ तेषु पृथक् पृथग्ग्रहणाभावात् । यथा हि शमीशाखापत्रेषु सर्व-

* * *

इमेऽविभावितैवमर्थ्यपूर्वाभ्युपगमा एकान्तवादिनः, तद्भावादविभावितैवमर्थ्यपूर्वाभ्युपगमत्वादुन्मुग्धभ्रान्तमत्तादिवदनपेक्षितस्वाभ्युपगममनेकान्तदूषणम् । तस्मात् कस्य वयं विशेष्य अयमेव उन्मुग्धो भ्रान्त उन्मत्तो वा इति दोषं ब्रूमः ? सर्व एव यूयमेवं दोषदुष्टाः, किं तपस्विना विशेषैकान्तवादिनैवाप-

३ स्वो ] स्वाभ्युप° प्र° ॥
३ ना ]
नापेक्षतोnayacakra-ms-bhā ।
नापेक्षते nayacakra-ms-ya ॥
४ त ] तदान°nayacakra-ms-ya ॥
६ चा ] सानपेक्ष्या° प्र° ॥
९ ऐव ] एवमर्थ्यम् प्र° ॥
१० अविभा ]
°भातमै°nayacakra-ms-ya ॥
२७ ग ] °गमनेकान्त° प्र° ॥
२९ मेवं ]
दोषद्रष्टाःnayacakra-ms-bhā ।
दोषद्रष्टारः nayacakra-ms-ya ॥

राद्धं वादपरमेश्वरपरिरक्ष्यलोकतत्त्वविलोपनोद्यमिना ? इत्यत आह **--न विशेषदोषः कस्यचिदपीति** प्रागभिहितम् । § 292

सम्बन्धागतकल्पनात्मकत्वापादनचोद्यदूषणमनुक्त्वा तदभ्युपगमेन परिहारोक्तिः **आयतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणं प्रति इत्येतत्तु** व्याख्यानं **प्रागुच्चार्य चोदितमेव दोषं** चलयित्वा **प्रतिष्ठापितवानसि** स्थिरीकृतवानसीत्यर्थः । **यत्तु समस्तालम्बन**मित्यादि यावदित्येतत् **प्रतिष्ठापितमेव कृतमिति** । **एष तु विशेषः** कल्पनात्मकत्वदोषादन्यो **दोषः** । कतमः ? **अज्ञानत्वप्रसङ्गः** । तद्यथा **--स्फुटतरक** इत्यादि यावत् **कुतः प्रत्यक्षत्व**मित्येतदुपदर्शितमिति गतार्थम् । § 293

**योऽपि चैकाकारे**त्यादि चोद्यप्रत्युच्चारणमेतद् यावत् **सञ्चितालम्बनतायाम्** । एतदुक्तं भवति— यदि तदेकतो न विकल्पयति कथं सञ्चितालम्बनता ? कल्पनानान्तरीयिका हि सा कल्पनामन्तरेण न सम्भवतीति **चोदिते** तत्रोत्तरो वक्ष्यमाणो यः **समाधिरभिधीयते** स एव च किल

- /ms **अस्वलक्षणत्वदोषपरिहारो**ऽभिमतोऽर्थद्वयवाचित्वाविरोधादस्य वाक्यस्येति तत् प्रत्युच्चारयति सव्याख्यानम् **--अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचर**मित्यादि यावत् **तेषु पृथक् पृथग्ग्रहणाभावा**दिति गतार्थम् । पिण्डार्थस्तु— यद्यपि परमाणुसमूहजन्यत्वान्न ज्ञानमर्थतः सामान्यगोचरं तथापि रूपं रसो वा स्वार्थोऽन्यापृक्तत्वादर्थान्तरकल्पने तस्य ज्ञानस्यापटुत्वात्, तच्च विज्ञानमुत्पादयितुं शिबिकोद्वाहवत् संहत्य समर्थाः परमाणवो नान्यथेति सामान्यगोचरतास्तु, को दोषः । यदि तद् भिन्नेष्वभेदं कल्पयदुत्पद्येत स्यात्

87/mj कल्पना

* * *

पत्रालम्बनं ज्ञानमविवेकेनोत्पद्यते, न च सङ्घातः कश्चिदेकोऽस्ति तेषामनारब्धलक्षणकार्यत्वात्, एवमणुष्वपि । अयमसमाधिरेव, अङ्गीकृतार्थविनाशित्वात्, शब्दकृतकत्वाभिव्यक्तिस्थापनार्थप्रवृत्तवैशेषिकवत् स्वविषयतां प्रतिज्ञाय तदतद्भूतसामान्यगोचरोपसंहारात् । नन्वत एव न तत् प्रत्यक्षम्, स्वार्थे सामान्यगोचरत्वात्, अनुमानवत् । अनुमानमपि वा न ।

* * *

३० रा] °परात्वंnayacakra-ms-ya ‖
३० वा] वादिपरमेश्वर° प्र° । दृश्यतां पृ° ८३ पं° २ ‖
३ त] °तनं स्वल° प्र° । दृश्यतां पृ° ७९ पं° २४ ‖
५ स] दृश्यतां पृ° ७९ पं° २३ ‖
९ चैका] दृश्यतां पृ° ७९ टि° ७ ‖
१० भ] भवताnayacakra-ms-bhā ‖
११ नाना] °नन्तरी° प्र° ‖
१३ ऽभिम] °मतोर्थयद्वाचित्वा°nayacakra-ms-ya ‖
१३ वा] वाकस्येतिnayacakra-ms-ya । वावस्येति nayacakra-ms-bhā ‖
१७ स्वा] स्तार्थोऽन्यापृथक्त्वाद°nayacakra-ms-vi । स्तार्थोन्यापृक्तत्वाद° nayacakra-ms-vi विना ‖

त्मकम्, न तु भिन्नेष्वभेदैकाकारपरिकल्पनात् तदुत्पद्यते इति । अस्यार्थस्य दृष्टान्तः --**यथा हि शमीशाखापत्रेष्वि**त्यादि । यथा **सर्वपत्रालम्बनं ज्ञानम-न्तादिमध्याविवेकेनोत्पद्यते** एवं प्रत्यक्षमपि । स्यान्मतम्— तद्व्यतिरेकेण पत्रे समुदाये च यथा ज्ञानं प्रत्यक्षमपि तथा स्यादिति । एतच्चायुक्तम् --**न च सङ्घातः कश्चिदेकोऽस्ति, तेषामनारब्धलक्षणकार्यत्वात्** । न हि समुदायो **वैशेषिक**कल्पितकार्यद्रव्यवत् पृथगस्ति । नापि परिणामान्तरमापन्नम्, तेषां कारणभूतानां क्षणिकत्वादारम्भनिष्ठाकालभेदावस्थानाभावादिति । **एवमणुष्व-पीति** दार्ष्टान्तिकं निदर्शयति । § 294

अत्रोत्तरमुच्यते --**अयमसमाधिरेव** । कुतः ? अर्थस्यास्य जर-त्कुटीरवदारोटनाक्षमत्वात् त्वद्वाक्यजनितस्य प्राक्चोदितदोषस्यायं समाधिर-प्यसमाधिरेव, **अङ्गीकृतार्थविनाशित्वात्, शब्दकृतकत्वाभिव्यक्तिस्थापनार्थप्र-वृत्तवैशेषिकवत्** । वैशेषिकस्येव वैशेषिकवत्, **अचाक्षुषप्रत्यक्षस्य गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्, सतो लिङ्गाभावात्**वै॰ सू॰ २ । २ । २५--२६ कार्यत्वात् इत्यादिभिरनित्यत्वं वैशेषिकत्वात् सिद्धं कृतकत्वं च, तस्याभिव्यक्तिस्थापनार्थं प्रवृत्तस्य वैशेषिकस्येवाङ्गीकृतार्थनाशित्वमेवम् अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम् इत्यर्थवचनयोर्दोषः । तद्व्याचष्टे, कुतस्तत्साधर्म्य- मिति चेत्, उच्यते --**स्वविषयतां प्रतिज्ञाय तदतद्विषयतया तदतदभूतसामान्यगोचरोपसंहारात्** । स चासश्च विषयोऽस्य स तदतद्विष-यः, तद्भावस्तदतद्विषयता । तदतदभूतं सामान्यम्, तद् गोचरोऽस्य विषय उपसंहारस्य, तस्मादुपसंहारात् । स चान्यश्च विषयः सामान्यस्येति तद-न्यतरत्रैव न प्रवर्तते एकतरत्रादृष्टत्वात्, त्वन्मतेनैव प्रतिस्वं नियतत्वाद्भावानां नैकरूपमपि तन्न च तत्र वृत्तं न चातोऽन्यत्र । तत्रावृत्तत्वात् तन्न भवति, अतत्रावृत्तत्वादतन्न भवति । ततस्तदतदभूतं सामान्यं गोचरोऽस्योपसंहारस्य यः स तदतद्विषयतया त्वयेदानीं क्रियते । तस्मात् तदतद्विषयतया तदतद-भूतसामान्यगोचरोपसंहारादङ्गीकृतप्रत्यक्षविनाश इत्यत आह --**नन्वत एव न तत् प्रत्यक्षं स्वार्थे सामान्यगोचरत्वादनुमानवत्** । स्वार्थे इति स्वविषये स्वग्राह्ये वस्तुनि, यत् स्वग्राह्ये वस्तुनि सामान्यगोचरं तज्ज्ञानमप्रत्यक्षं दृष्टं

- /ms

---

१ स्या ] एतच्चिह्नान्तर्गतः **स्यान्मतम्** इत्यत आरभ्य **प्रत्यक्षमपि** इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
३ का ] **॰काय॰** प्र॰ ॥
४ का ] **॰काय॰** प्र॰ ॥
६ दार्ष्टान्तिकं ] निर्दर्दि ?शति nayacakra-ms-bhā ॥
८ व ] **॰वादा॰** प्र॰ । रुट प्रतिघाते, प्रतिघाताक्षमत्वादित्यर्थोऽत्र भाति ॥
८ प्राक्चोदित ] **॰तपेषस्यायं** प्र॰ ॥
१२ का ] **॰कायत्वात्** प्र॰ । दृश्यतां पृ॰ ५५ पं॰ १२ ॥
१७ त ] तदभावस्तदतद्वि॰ nayacakra-ms-ya । तदतद्वि॰ nayacakra-ms-bhā ॥
१७ त ] तदतद्भूतं nayacakra-ms-ya ॥
१९ प्र ] **प्रतिष्टं** प्र॰ ॥
२० त ] तत्र nayacakra-ms-ya ॥
२४ न ] **न त्प्रत्यक्षं** nayacakra-ms-ya ॥
२५ य ] **यत् स्वग्राह्ये वस्तुनि** इति पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२५ गोच ] **॰चरात्तद् ज्ञानम॰** प्र॰ ॥

यथानुमानमिति । **अनुमानमपि वा नेति,** नानुमानमपि तत् स्यात्, स्वार्थे सामान्यगोचरत्वात्, प्रत्यक्षवत् । § 295
88/mj

**स्ववचनविरोधि कुमारब्रह्मचारिपितृवचनवच्चैतत् अस्वार्थविशिष्टे स्वार्थे स्वविषये रूपादिप्रकारे सामान्यगोचरम् इति, यस्मादर्थविषयशब्दौ लक्षणार्थाविव, उक्तं हि त्वयैव--प्रत्यक्षमनुमानं च प्रमाणे । यस्माल्लक्षणद्वयं प्रमेयम् । न हि स्वसामान्यलक्षणाभ्यामन्यत् प्रमेयमस्ति । स्वलणक्षविषयनियतं प्रत्यक्षम्, सामान्यलक्षणविषय-** § 296

स्वार्थे सामान्यगोचरम् इत्येतत् **स्ववचनविरोधि** । किमिव ? **कुमारब्रह्मचारिपितृवचनवच्चैतत्,** यथा कश्चिद् ब्रूयात् पिता मे कुमारब्रह्मचारी इति, तस्य तद्वचनं स्वत एव विरुध्यते--यदि पिता कथं कुमारब्रह्मचारी ? अथ कुमारब्रह्मचारी कथं पिता ? इति, तथेदमपि यदि तज्ज्ञानं स्वार्थे
- /ms कथं सामान्यगोचरम् ? अथ सामान्यगोचरं कथं तत् स्वार्थे ? स्वार्थ इति च त्वया न चक्षुषोऽन्यस्य वेन्द्रियस्य विषय इति विशेषमाश्रित्य लक्षणमभिधीयते, किं तर्हि ? प्रमेयमुच्यते सामान्यतो वस्तु स्वलक्षणं स्वार्थः इति । तथा सामान्यलक्षणमिति न धूमानुमेयाग्निमात्रम्, किं तर्हि ? लिङ्गगम्यं सर्वम् । एतस्यार्थस्य प्रतिपादनार्थमाह स्वार्थलक्षणमेव निरूपयन् **--अस्वार्थविशिष्टे,** स्वोऽर्थः स्वार्थः, न स्वार्थोऽस्वार्थः स्वार्थादन्यः, ततो विशिष्टः स्वार्थः, तस्मिन् **स्वार्थे,** तमेवार्थं पर्यायेणाह **--स्वविषये,** किमुक्तं भवति ? एकस्मिन् **रूपादिप्रकारे** प्रकृष्टे कारे रूपे रसेऽन्यस्मिन्नेव **सामान्यगोचरमिति,** सामान्यविषयं च स्वार्थे ज्ञानमिति च विस्पर्धितमेतत् परस्परतो द्वयम् । **यस्मादर्थविषयशब्दौ लक्षणार्थाविव** लक्षणशब्दपर्यायवाचिनौ तस्मात् स्वार्थः स्वविषयः स्वलक्षणमित्येतद्विवक्षितं भवतः, तद्विस्मृत्य भ्रान्तेन नेन्द्रियग्राह्यस्वार्थसामान्यभेदकल्पनात् परिहारो युज्यते वक्तुम् । कस्मात् ? प्रत्यक्षव्याख्याविषयत्वात् स्वार्थस्वलक्षणस्वविषयशब्दानाम् । § 297

मा मंस्थाः--नैतदेवं भवतीति, **उक्तं हि** प्रमाणसङ्ख्यानिरूपणे **त्वयैव--प्रत्यक्षमनुमानञ्च प्रमाणे** इत्यादि । प्रमाणद्वित्वं नियम्यते, प्रमेयद्वित्वात्,

---

७ च ] °चनविरोधे प्र° ॥
१४ सा ] सामान्यं लक्ष° प्र° ॥
१६ विशिष्टः ] °ष्टः तस्मिंnayacakra-ms-bhā ॥
१८ ए ] एकस्मिन्नपादि° प्र° ॥
१९ स्वा ] सार्थे प्र° ॥
२१ विष ] °षय स्वलक्षणमित्येतद्विपक्षितं प्र° ॥
२२ क ] °कल्पना परि° प्र° ॥
२३ प्र ] एतच्चिह्नान्तर्गतः प्रत्यक्ष° इत्यत आरभ्य त्वयैव इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२४ नैत ] नैतदेवं न भवतीतिnayacakra-ms-ya । अत्र नैतदेवं संभवतीति इत्यपि पाठः स्यात् । nayacakra-ms-bhā प्रतौ तु अत्र सर्वोऽपि पाठो नास्त्येव ॥
२५ प्र ] प्रत्यक्षमनुमानं च प्रमाणे द्वे एव । यस्माल्लक्षणद्वयं प्रमेयम् । न हि

परिमेयद्वित्वनियतप्रस्थतुलादिपरिमाणद्वित्ववत् । तद्दर्शयति — **यस्माल्लक्षण-द्वयं प्रमेयम्** । स्यान्मतम्--प्रमेयान्तरं स्वसामान्यद्विरूपलक्षणम्, तदपेक्षया प्रमाणान्तरं स्यादिति । तन्निवारणार्थमाह **--न हि स्वसामान्यलक्षणाभ्याम-न्यत् प्रमेयमस्ति,** प्रत्यक्षानुमानाभ्यामग्रहणात्, खरविषाणवत् । स्यान्मत-म्--तत्रैव विषयद्वये विकल्पसमुच्चयाङ्गाङ्गिभावैः प्रत्यक्षानुमानागमादीनां प्र- - /ms
माणानां वृत्तिर्भविष्यतीति, तन्न भवति, यस्मात् **स्वलक्षणविषयनियतं प्रत्यक्षं सामान्यलक्षणविषयनियतमनुमानमित्युक्तम्** । कथं पुनर्लक्षणशब्दोऽर्थप-र्यायः ? अर्यते गम्यत इत्यर्थः । तथा लक्ष्यत इति लक्षणं कर्मसाधन-त्वाल्लक्षणशब्दस्य । तच्च लक्षणं वस्तु स्वभावः स्वरूपमर्थः प्रमेयमिति पर्यायाः । तत् पुनर्द्विरूपं परिच्छेद्यं द्वाभ्यां प्रमाणाभ्यां परिच्छेद्यत्वात्, प्रमाणं प-रिच्छेदकं प्रमेयं परिच्छेद्यमित्यर्थः । 89/mj

* * *

नियतमनुमानम् प्र॰ समु॰ वृ॰ १ । २ । प्रमेयाधिगमनिमित्तं हि प्रमाणम् । न चैतददृष्टार्थम् । न च प्रमाणयोर्विषयसङ्कर इत्यधिगम्यस्य द्वित्वात् तद-धिगमनिमित्तं द्विरूपमित्येवं व्यवस्थापिते सामान्यगोचरव्यावृत्तार्थेन स्वार्थेन भवितव्यम् । ततः स्वार्थे सामान्यगोचरम् इत्येतद् विरुध्यते ।

सामान्ये स्वविषये प्रत्यक्षं ज्ञानमुत्पद्यते इति चेत्, सामान्यमेव स्व-विषयः, स्वलक्षणं नास्ति । अतो लक्षणद्वयाभावात् प्रमेयप्रमाणद्वित्वावधार-णकल्पना व्यर्था, प्रमाणयोर्वा विषयसङ्करः प्राप्तः । प्रत्यक्षमपि वानुमान-भेद एव स्यात्, अनेकार्थजनितसामान्यगोचररूपादिप्रकारपरिग्रहात्, धूम-बलाकालिङ्ग-

* * *

यस्माल्लोके दृष्टं प्रमेयाधिगमनिमित्तं प्रमाणम्, हिशब्दस्य हेत्वर्थत्वात्, **प्र-मेयाधिगमनिमित्तं हि प्रमाणमिति । न चैतत् अग्निहोत्रं जुहुयात् स्वर्गकामः, दानं दद्याद्धर्मकामः** इत्येवमाद्यागमव**ददृष्टार्थम्,** प्रत्यक्षदृष्टार्थमेवैतदुपल-म्भकत्वादुपलभ्यस्य द्विविधस्य दृष्टत्वात् । **न च प्रमाणयोर्विषयसङ्कर** इति प्रागुक्तयुक्तिकां विविक्तविषयतां दर्शयति । **इति**शब्दः प्रदर्शने, एतावानत्र सङ्क्षेपेणार्थः, तद्विस्तरोऽपरो ग्रन्थ इति सूचयति । § 298

इदानीं व्यवस्थापितार्थोपसंहारार्थमिदं वाक्यमाह **--अधिगम्यस्य द्वि-त्वात् तदधिगमनिमित्तं द्विरूपमित्येवं व्यवस्थापिते** लक्षणशब्दोऽर्थपर्याय-

---

स्वसामान्यलक्षणाभ्यामन्यत् प्रमेयमस्ति ।
स्वलक्षणविषयं हि प्रत्यक्षम्,
सामान्यलक्षणविषयं ह्यनुमानम्--प्र॰ समु॰ वृ॰ १ । २ ॥
२ सामान्य ] ॰न्यद्वित्वरूप॰nayacakra-ms-ya ॥
५ याङ्गा ] ॰ङ्गाङ्गीभावैः प्र॰ ॥

८ अ ] अयते प्र॰ । ऋ गतौ पा॰ धा॰ इति धातोः अर्यंते इति रूपम् । अर्यतेऽसौ अर्थः --अभि॰ चिन्ता॰ स्वो॰ २ । १०६ ॥
१० द्वा ] स्वाभ्यांnayacakra-ms-bhā ॥
२४ व ] ॰वद्दृष्टार्थंnayacakra-ms-ya ॥
२४ प्र ] प्रत्यक्षं दृष्टार्थ॰ प्र॰ ॥

वाची नेन्द्रियग्राह्यविशेषार्थप्रकृत इत्येतस्मिंश्चार्थे स्थिते प्रत्यक्षानुमानयोः स्वरूपाभावः स्ववचनविरोधश्च दोषाः स्वार्थे सामान्यगोचरम् इति ब्रुवतः प्रोक्तविधिनेति स्थितम् । पुनश्चात्र दोषः--एवमवस्थिते **सामान्यगोचरव्यावृत्तार्थेन स्वार्थेन भवितव्यम्** । **ततः** को **दोषः** ? **स्वार्थे सामान्यगोचरम् इत्येतद्विरुध्यते,** न हि तादृशः स्वार्थस्य सामान्यतासम्बन्धोऽस्ति, नापि सामान्यस्य स्वार्थसम्बन्ध इति । § 299 - /ms

मा भूदेष दोष इति तस्मिन्नेव **सामान्ये स्वविषये स्वार्थे प्रत्यक्षं ज्ञानमुत्पद्यत इति चेत्,** तत एवं **सामान्यमेव स्वविषयः स्वलक्षणं नास्ति** । अतः परिभाषितासाधारणस्वलक्षणविषयाभावादेवं कल्प्यमाने **लक्षणद्वयं** नास्ति, एकमेव सामान्यलक्षणम्, **द्वयाभावात्** तद्विषयमेकमेवानुमानं प्रमाणं स्यात् । ततश्च **प्रमेयप्रमाणद्वित्वावधारणकल्पना व्यर्था,** मा भूदवधारणवैयर्थ्यमिति, स्वार्थे सामान्ये च प्रत्यक्षं प्रवृत्तं तथानुमानं चेति **प्रमाणयोर्वा विषयसङ्करः प्राप्तः** । **वाशब्दादेकस्य** ज्ञानस्य **द्व्यर्थता** वा । **प्रत्यक्षमपि वा** परपरिकल्पित**मनुमानभेद एव स्यात्** । कस्माद्धेतोः ? **अनेकार्थजनितसामान्यगोचररूपादिप्रकारपरिग्रहात्** । मा ज्ञासीदसिद्धोऽयं हेतुरिति, त्वयैवोक्तं हि—

तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम् । प्र॰ समु॰ १ । ४ इति । § 301

अनेकेन भिन्नेनार्थेन अभिन्नमेकं सामान्यं रूपं रस इत्यादिप्रकारं परिगृह्योत्पद्यमानं ज्ञानं तेन जनितं तत्, तस्मादनेकार्थजनितसामान्यगोचररूपादिप्रकारपरिग्रहात् तस्य ज्ञानस्य । को दृष्टान्तः ? **धूम-**

* * *

जनितज्ञानवत् । अस्वलक्षणविषयत्वं चोभयत्र ।

अनेकैकत्वापत्तिसामान्यगोचरस्वलक्षण एवासावर्थ इति चेत्, न, आरात्परान्तमध्यवर्णप्रमाणसंस्थानविविक्तवृत्त्यवस्थपत्रविशेषस्वलक्षणविषयसामान्यानात्मकत्वात् । न च सङ्घातः कश्चिदस्ति, तेषामनारब्धलक्षणकार्यत्वात् । एवमणुष्वपि,

* * *

**बलाकालिङ्गजनितज्ञानवत्,** धूमादत्राग्निः, बलाकाभ्योऽत्र जलम् इति लिङ्गजनितयोरग्निजलज्ञानयोरपि स्वरूपतोऽनुमानत्वाभेदः, एवं रूपादिषूत्पद्यमानानां प्रत्यक्षाभिमतानामनुमानत्वाभेदः । एतस्मादेव हेतो**रस्वलक्षणविषयत्वं च,** अस्वलक्षणविषयं प्रत्यक्षम्, अनेकार्थजनितसामान्यगोचररूपादिप्रकार-

३० प्र] ॰प्राकृत प्र॰ । अत्र ॰प्रवृत्त इत्यपि पाठः स्यात् ॥
१ विरोध] ॰ध च प्र॰ ॥
२ व्यावृत्ता] ॰त्तार्थेन भवितव्यम् nayacakra-ms-ya ॥
४ स्वा] स्वार्थस्य प्र॰ ॥
९ ल] ॰लक्षणद्वया॰ nayacakra-ms-ya ॥
१० धा] ॰धारणे nayacakra-ms-ya ॥

परिग्रहात्, अनुमानवत् । **उभयत्रे**त्यनेन अनुमानेऽप्यस्वलक्षणविषयत्वम्, तत एव हेतोः, अनन्तरभावितप्रत्यक्षवत् । अथवा **उभयत्रे**ति स्वलक्षणे सामान्यलक्षणे चास्वलक्षणविषयत्वम् । कथम् ? स्वलक्षणाभिमतमस्वलक्षणम्, अनेकैकीभावात्, समुदायवत् । तत्सामान्यमपि न स्वलक्षणम्, अत एव, अनन्तरोक्तसमुदायवत् । सामान्यास्वलक्षणत्वं सिद्धं साध्यत इति चेत्, न, स्वार्थ एव सामान्यगोचरम् इति वचनात् स्वार्थत्वेनाभ्युपगतत्वादिति । अवश्यं चैतदेवमभ्युपगन्तव्यम्, यतः शमीशाखापत्रसङ्घाताविशेषदर्शनोदाहरणेन च स्फुटमेव दर्शितमप्रत्यक्षत्वमननुमानत्वमप्रमाणत्वमस्वलक्षणविषयत्वं विषयसङ्कर इत्येवमादि दोषजातम् । § 302

*__अनेकैकत्वापत्तिसामान्यगोचरस्वलक्षण एवासावर्थ इति चेत्__ । स्यान्मतम्--अनेकस्यैकत्वापत्तिः सामान्यम्, स एव गोचरोऽस्येति अनेकैकत्वापत्तिसामान्यगोचरः, स एव स्वलक्षणः सामान्यगोचर एव स्वलक्षणः, असावेवार्थः प्रत्यक्षस्येत्येषा भवत आशंसा चेत्, **न, आरात्परान्तमध्ये**त्यादि यावत् **स्वलक्षणविषयसामान्यात्मकत्वात्** । नैतदुपपद्यते, पूर्वपरादिपरस्परविविक्तावस्थपत्रविषयसामान्यात्मकत्वात् । आरादन्तः, परान्तः, मध्यः, नीलप्रकर्षादि**र्वर्णः**, ह्रस्वदीर्घाल्पमहत्त्वादि **प्रमाणम्**, वृत्तादि **संस्थानं** च, तैर्विविक्ता वृत्तयोऽवस्थाश्च येषां पत्रविशेषाणां ते **तैर्विविक्तवृत्त्यवस्थपत्रविशेषाः**, त एव स्वलक्षणाः, ते विषयोऽस्य सामान्यस्य तत् स्वलक्षणविषयं सामान्यमात्मा स्वरूपमस्य, तद्भावः सामान्यात्मकत्वम्, तस्मात् सामान्यात्मकत्वात् । एतदुक्तं भवति--देशाकृतिवर्णप्रमाणसंस्थानादिभिरत्यन्तविशिष्टानां स्वलक्षणानामेव सामान्यात्मकत्वम्, नान्यत् सामान्यमस्ति, - /ms

---

३१ भा] **॰विप्रत्य॰** प्र॰ ॥
१ चा] **च स्व॰** प्र॰ ॥
४ स्वा] **स्वार्थत्वेचाभ्यु॰** प्र॰ ॥
५ देव] **॰वभ्युप॰**nayacakra-ms-bhā ॥
६ म] **॰मनुमानत्व॰** प्र॰ । प्रत्यक्षमपि वानुमानमेद एव स्यात् पृ॰ ८९ पं॰ ७ इति वचनानुसारेण **॰मनुमानत्व॰** इति सर्वप्रतिषु दृश्यमानस्य पाठस्यात्र सङ्गतत्वेऽपि शमीशाखापत्रसङ्घाताविशेषोदाहरणानन्तरम् नन्वत एव न तत् प्रत्यक्षम्, स्वार्थे सामान्यगोचरत्वात्, अनुमानवत् । अनुमानमपि वा न पृ॰ ८७ पं॰ ४ इत्यभिहितत्वात् **॰मननुमानत्व॰** इति पाठोऽत्र समीचीनतर इति प्रतिभाति ॥
८ *] एतच्चिह्नान्तर्गतः **अनेकैकत्वा॰** इत्यत आरभ्य **॰ऽस्येति** इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१० त्तिसामान्य] **॰न्यं गोचरः** प्र॰ ॥
१० क्ष] **॰क्षण सामा॰**nayacakra-ms-ya ॥
११ आ] **आसं चेत्**nayacakra-ms-bhā ॥
११ आ] **आचात्परान्त॰** प्र॰ ॥
१२ पू] **पूर्वापरा॰**nayacakra-ms-bhā ॥
१३ विविक्ताव] **॰वस्थापत्रवि॰**nayacakra-ms-bhā । **॰वस्थापन्नवि॰** nayacakra-ms-ya ॥
१४ स्व] **॰दीर्घाभ्यमह॰**nayacakra-ms-ya ॥
१६ त्र] **॰पत्रशेषाः** प्र॰ ॥
१६ क्ष] **॰क्षणाः स्वविषयो**nayacakra-ms-ya । **॰क्षणाः । स विषयो** nayacakra-ms-bhā ॥
१८ देशाकृ] **॰कृतियोवर्ण॰**nayacakra-ms-ya । **॰कृतियोर्वर्ण॰** nayacakra-ms-bhā ॥

अतोऽनुपपन्नम्--अनेकैकापत्तिसामान्यगोचरस्वलक्षण एवार्थ इति । ननूक्तमनेकैकापत्तिसामान्यगोचरमिति, तन्न, यस्माद् **न च सङ्घातः कश्चिदस्ति ।** 91/mj **चशब्दान्नावयवी, न च परिणामान्तरं तद्व्यतिरिक्तं त्वन्मतेन । कस्माद्धेतोः ?**

* * *

न हि तदनेकद्रव्योत्पाद्यम् । न च सञ्चयः कश्चिदस्ति, अत एव न प्रत्ययस्यालम्बनं युज्यते, अनालम्बनत्वाच्चाभासार्थोऽपि न तत्रास्ति वन्ध्यापुत्रपुत्रत्वानाभासनवत् ।

स्वाभासां हि विज्ञप्तिं जनयदालम्बनं युज्यते । अस्वत्वात्त्वस्य अद्रव्यत्वात् कुत आभासविज्ञापनम् ? स्वे तु परमाणवो नाभासमुत्पादयितुमलम्, अतीन्द्रियत्वात् । इति प्रत्यक्षज्ञानं नोत्पद्यते, निरालम्बनत्वात्, खपुष्पवत् ।

* * *

**तेषां पत्राणामनारब्धलक्षणकार्यत्वात्** । न हि पत्रविशेषैरारब्धं किञ्चित् कार्यान्तरमस्ति, त एव ह्यनारब्धलक्षणाः पत्रविशेषाः सञ्चित्य कार्यीभूताः, तस्मान्न तेष्वन्यत् सामान्यमस्ति । **एवमणुष्वपि,** परमाणुष्वपि तथा न किञ्चित् सामान्यमस्ति । तस्मान्न स्वार्थे सामान्यगोचरं तज्ज्ञानमिति । § 303

यदपि चोक्तम् **--अनेकद्रव्योत्पाद्यत्वात् तत् स्वायतने सामान्यगोचरमित्युच्यते न तु भिन्नेष्वभेदकल्पनात्** प्र॰ समु॰ वृ॰ १ । ४ इति, सा त्वदिष्टा सामान्यगोचरतापि च न घटते, यस्मान्न **तदनेकद्रव्योत्पाद्यम्** । कुतस्तर्ह्युत्पद्यते ? सञ्चयात् । **न च सञ्चयः** सामान्यम्, ततो न च स रूपादिभ्यो भेदेन **कश्चिदस्ति** रूपादिसञ्चयः । **अत एव न प्रत्ययस्यालम्बनं युज्यते,** प्रत्ययो ज्ञानम् । किं कारणम् ? अभूतत्वाद् वन्ध्यापुत्रवत् । स्यादाशङ्का--स्वाभासज्ञानोत्पत्तेरालम्बनं भविष्यति समुदायोऽकारणत्वे सत्यपीति । एतत् कुतः ? अकारणत्वादेवालम्बनत्वाभावे का प्रत्याशा आभासार्थस्य ? इत्यत आह — **अनालम्बनत्वाच्च आभासार्थोऽपि न तत्रास्ति** । किमिव ? **वन्ध्यापुत्रपुत्रत्वानाभासनवत्** । यथा ह्यसत्त्वादनालम्बनं वन्ध्यापुत्रोऽनालम्ब-
- /ms नत्वाच्चानाभासस्तथा सञ्चय इति । § 304

---

२० त्तिसा ] ॰सामान्यसामान्यगोचर॰nayacakra-ms-ya ॥
१० नार ] ॰रब्धस्वलक्षणकायत्वात् प्र॰ । तुलना--तेषामनारब्धलक्षणकार्यत्वात् पृ॰ ८७ पं॰ १ ॥
११ त ] त ए ह्यना॰nayacakra-ms-ya ॥
११ का ] कार्यीभूताःnayacakra-ms-vi विना ॥
१३ त ] तज्ज्ञान॰ प्र॰ ॥
१४ चोक्त ] दृश्यतां पृ॰ ८६ पं॰ १० । पृ॰ ७९ टि॰ ७ ॥
१९ न्ध्या ]
स्यादंशंकाnayacakra-ms-ya ॥
२२ आ ]
आभार्थोपिnayacakra-ms-bhā ॥
२३ न्ध्यापु ] ॰पुत्रे॰ प्र॰ ॥

**स्वाभासां** हीत्यादि । **विषयो हि नाम यस्य ज्ञानेन स्वभावोऽवधार्यते** आलम्बनपरीक्षावृ° १ इति त्वदुक्तोपपत्तिरेवात्र व्यापार्यते । तत् पुनः कुतः ? **अस्वत्वा**दनात्मकत्वात् । यस्वात्मना स्वभावेनासिद्धः स विषयः स्याज्ज्ञानस्येति का युक्तिः ? **अस्वत्वात्वस्याद्रव्यत्वात्** परमार्थसत्त्वाभावात् **कुत आभासविज्ञापनं** परवाचोयुक्त्या, विज्ञापनं विज्ञप्तिर्बुद्धिरिति पर्यायाः, दूरत एव नास्तीत्यर्थः । एवं तर्हि **स्वे तु परमाणव** आत्मानः ते विषयतां यान्तु, नेत्युच्यते, ते **नाभासमुत्पादयितुमलमतीन्द्रियत्वात्** । अतीन्द्रियत्वं निराभासत्वाद् वियद्वदिति । **इतिशब्द** उपसंहारे, इतीत्थमनालम्बनत्वं सञ्चयस्याणूनां च सिद्धं प्रत्यक्षज्ञानस्य, तस्मात् **प्रत्यक्षज्ञानं नोत्पद्यते, निरालम्बनत्वात्, स्वपुष्पवत्** । अतः प्रत्यक्षस्य निरालम्बनस्य खपुष्पवदनुत्पत्तेरुक्तोपपत्तिविधिना कल्पनापोढस्य सविषयस्य प्रत्यक्षस्य ज्ञानस्य वाऽभावे प्रतिपादिते स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधप्रस्तुतेश्च कल्पनापोढं प्रत्यक्षम् इत्येतल्लक्षणमनर्थकं स्यात्, लक्ष्यस्याभावात्, खरविषाणकुण्ठतीक्ष्णादिनिर्णयवत् । § 305
92/mj

अभ्युपेतेऽपि तु सञ्चितालम्बनप्रत्ययत्वे नैवास्य प्रत्यक्षता, तदाभासत्वात् कल्पनात्मकत्वाद् भ्रान्तिज्ञानात्मकत्वात् संज्ञासंस्थानसङ्ख्यावर्णान्यथाकल्पनात्, मृगतृष्णिकाप्रत्ययवदलातचक्रप्रत्ययवद् द्विचन्द्रप्रत्ययवत् कामलोपहतचक्षुषो नीलरूपपीतप्रत्ययवत् । अत इदं नैव प्रत्यक्षम्, अतथाभूतार्थाध्यारोपात्मकत्वात्, भ्रान्तिवत् संवृतिसज्ज्ञानवत्, यथा गोपाल... ... ...तथा संवृतिसति... ... ...। यथोक्तम्--
§ 306

यस्मिन् भिन्ने न तद्बुद्धिरन्यापोहे धिया च तत् ।
घटाम्बुवत् संवृतिसत् परमार्थसदन्यथा ॥ अभि° को° ६ । ४ § 308

२५ स्वा ] स्वाभासं nayacakra-ms-hīnayacakra-ms-ya ॥
२५ स्व ] स्वाभावोववायत इतिnayacakra-ms-bhā । स्वभावोववाय इति nayacakra-ms-ya ॥
३ आभास ] °सविज्ञानंnayacakra-ms-bhā ॥
३ विज्ञा ] विज्ञपनंnayacakra-ms-raṃnayacakra-ms-hī विना ॥
४ आ ] आत्मनः nayacakra-ms-ya ॥
६ श्र ] °शब्दोपसं° प्र° ॥
९ ज्ञा ] ज्ञानस्योनावेऽप्रति°nayacakra-ms-bhā ॥

अभ्युपेतेऽपि तु विषये दोषः । स चाभ्युपगम्यमानोऽपि विषयः सञ्चय एव सम्भाव्येत, न परमाणवोऽतीन्द्रियत्वात् । स चालम्बनप्रत्ययो ज्ञानस्य सञ्चयः, तस्मिन्नभ्युपेतेऽपि तु **सञ्चितालम्बनप्रत्ययत्वे नैवास्य प्रत्यक्षता सिध्यति** त्वन्मतेनैव, **तदाभासत्वात्** । तदाभासत्वं **कल्पनात्मकत्वात्**, उक्ता च - /ms कल्पनात्मकता । तदुभयमपि **भ्रान्तिज्ञानात्मकत्वात्** । भ्रान्तिः ***संज्ञासंस्थानसङ्ख्यावर्णान्यथाकल्पनात्**, *संज्ञा च संस्थानं च सङ्ख्या च वर्णश्च, तेषां तैर्वान्यथाकल्पनात् । अन्यथाप्रतिपत्तिरेवात्र कल्पनाभिमता । संज्ञासंस्थानसङ्ख्यावर्णानामन्यथाप्रतिपत्ते**र्मृगतृष्णिकाप्रत्ययवदलातचक्रप्रत्ययवद् द्विचन्द्रप्रत्ययवत् कामलोपहतचक्षुषो नीलरूपपीतप्रत्ययवदि**ति यथासङ्ख्यं दृष्टान्ताः यथाक्रमं च हेतवो भ्रान्तिज्ञानात्मकत्वे साध्ये ततश्च प्रत्यक्षत्वाभावे साध्ये । तत्समर्थनार्थ उत्तरो ग्रन्थः । तदर्थमुपसंहृत्यान्ते साधनम् --**अत इदं नैव प्रत्यक्षम्, अतथाभूतार्थाध्यारोपात्मकत्वात्, भ्रान्तिवत्**, नावारूढस्य तीरवृक्षधावनदर्शनात्मिकामेकां क्रियाभ्रान्तिं मुक्त्वा प्रोक्तचतुर्विधभ्रान्तिवत् । उपनयस्तु व्यवहारप्रसिद्धस्य परमाणुनीलत्वग्रहणस्य सर्वत्रातथाभूतार्थप्रतिपत्तिसाधर्म्यात् । अथवा तत एव हेतोः **संवृतिसज्ज्ञानवदप्रत्यक्षम्** । तद्व्याख्या --**यथा गोपाले**त्यादिना दृष्टान्तं समर्थ्य **तथा संवृतिसती**त्यादिना दार्ष्टान्तिकसमर्थनम् । § 309

संवृतिसल्लक्षणे ज्ञापकमाह --**यस्मिन् भिन्ने** श्लोकः । यस्मिन् घटे भिन्ने कपालशकलशर्करादिभावेन घटाभिमताद्वस्तुनोऽन्येष्वप्यपोढेषु कपालादिषु
93/mj न घटबुद्धिरस्ति, तदग्रहे तद्बुद्ध्यभावात्, अङ्गुल्य

१ *] संज्ञासंख्यासंस्थानवर्णा°nayacakra-ms-ya ॥
२ *] संज्ञा च संस्थानं च वर्णं च प्र° ॥
३ त्तिरेवा] °वात्कल्पना° प्र° ॥
५ दृ] दृष्टान्तःnayacakra-ms-ya ॥
६ च] हेतोर्वा भ्रांति°nayacakra-ms-ya ॥
९ क्रियाभ्रा] भ्रान्तिमुक्त्वा प्र° ॥
१४ य] दृश्यतां पृ° ६७ पं° ७ । चत्वार्यपि सत्यान्युक्तानि भगवता द्वे अपि सत्ये--संवृतिसत्यं परमार्थसत्यं च । तयोः किं लक्षणम् ? यत्र भिन्ने न तद्बुद्धिरन्यापोहे धिया च तत् । घटाम्बुवत् संवृतिसत् परमार्थसदन्यथा ॥ ६ । ४ ॥ यस्मिन्नवयवशो भिन्ने न तद्बुद्धिर्भवति तत् संवृतिसत्, तद्यथा--घटः । तत्र हि कपालशो भिन्ने घटबुद्धिर्न भवति । यत्र चान्यानपोह्य धर्मान् बुद्ध्या तद्बुद्धिर्न भवति तच्चापि संवृतिसद् वेदितव्यम्, तद्यथा--अम्बु । तत्र हि बुद्ध्या रूपादीन् धर्मानपोह्य अम्बुबुद्धिर्न भवति, तेष्वेव तु सा संवृतिसंज्ञा कृता इति संवृतिवशाद् घटश्च अम्बु चेति ब्रुवन्तः सत्यमेवाहुः न मृषेति एतत् संवृतिसत् । अतोऽन्यथा परमार्थसत्यम् । यत्र भिन्नेऽपि तद्बुद्धिर्भवत्येव अन्यधर्मापोहेऽपि बुद्ध्या तत् परमार्थसत्, तद्यथा--रूपम् । तत्र हि परमाणुशो भिन्ने वस्तुनि रसादीनपि च धर्मानपोह्य बुद्ध्या रूपस्वभावबुद्धिर्भवति । एवं वेदनादयोऽपि द्रष्टव्याः । एतत् परमार्थेन भावात् परमार्थसत्यमिति । यथा लोकोत्तरेण ज्ञानेन गृह्यते तत्पृष्ठलब्धेन वा लौकिकेन तथा परमार्थसत्यम्, यथान्येन तथा सत्यं संवृतिसत्यमिति पूर्वाचार्याः । उक्तानि त्यानि ।--इति विद्वद्वरश्री**प्रह्लादप्रधन**महोदयैः सौजन्यतः प्रदत्तेऽभिधर्मकोशभाष्ये ६ । ४ ॥
१५ स्तुनोऽन्येष्व] °ष्वपो°nayacakra-ms-bhānayacakra-ms-ḍenayacakr ॥

* * *

रज्ज्वां सर्प इति ज्ञानं रज्जुदृष्टावनर्थकम् ।
तदंशदृष्टौ तत्रापि सर्पवद् रज्जुविभ्रमः ॥ हस्तवालप्र॰ १§ 312

यच्चोक्तम्--आयतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणं प्रति इति तत् कथमिति चेत्,

तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम् ।§ 314

अनेकद्रव्योत्पाद्यत्वात् तत् स्वायतने सामान्यगोचरमित्युच्यते, न तु भिन्नेष्वभेदैकाकारपरिकल्पनात् प्र॰ समु॰ वृ॰ १ । ४ । अत्राप्यनेकार्थविषयैकप्रत्ययत्वात् सामान्यरूपत्वादस्वलक्षणविषय-

* * *

भावे मुष्टिबुद्धिवत् । अतोऽङ्गुलिव्यतिरेकेण मुष्ट्यभाववत् कपालादिव्यतिरेकेण घटाभाव इति संवृतिसन् घटः । एवं क्रियासम्भवे क्रियया अपोहे । यत्रापि क्रिययाऽपोहो न सम्भवति तत्रापि धियाऽपोहेऽन्येषां रूपादीनां घटस्य समुदायाद् न तद्बुद्धिरस्ति । रूपादिसमुदायस्य च परमाणुरूपाद्यपोहे **न तद्बुद्धिरस्ति** इति वर्तते, दृष्टान्तः --**अम्बुवत्,** एकस्मिन्नपि जलबिन्दौ जलबुद्धिदर्शनात्, रूपादिषु पुनर्बुद्ध्यापोढेषु न तोयबुद्धिरस्तीत्येतत् संवृतिसतो लक्षणम् । अथवा यस्मिन् घटे भिन्नेऽवयवशो न तद्बुद्धिर्भवति **तद् घटवत् संवृतिसत्** । यत्र चाम्बुबुद्ध्याऽर्थान्तरापोहे न तद्बुद्धिरर्थान्तरनिवृत्तिरूपस्य वस्तुनः स्वरूपाभावादग्निवाय्वादिनिवृत्तिमात्रं व्यवहारप्रसिद्धाम्बुवत् तदपि संवृतिसत् । **परमार्थसदन्यथा,** एतद्विपरीतलक्षणं स्वत एव विविक्तरूपं यद्विद्यते रूपं रस इत्यादि तत् परमार्थसत् प्रत्यक्षगोचरमिति । § 315 - /ms

एतदपि परमार्थसदित्यभिमतं संवृतिसल्लक्षणानतिवृत्तेरसदेव, यथोक्तविधिना संवृतिसदेव सर्वमपीत्यत्रापि ज्ञापकोदाहरणं तत्संवाद्यभिहितम् --**रज्ज्वां सर्प इति ज्ञानम्,** तावदेव रज्ज्वां सर्प इति विपर्ययज्ञानं भवति यावदस्पन्दादिविशेषलिङ्गादर्शनम् । विशेषतस्तु तदवधारण**दृष्टौ** सत्यां प्राक्तनं सर्पदर्शनं जायते**ऽनर्थकम्** । सापि रज्जुबुद्धिस्तदवयवे दृष्टौ सत्यां यथा सर्प इति ज्ञानमनर्थकं तथानर्थिका, तत आह --**तदंशदृष्टौ तत्रापि सर्पवद् रज्जुविभ्रम** इति । एवमनया कल्पनया सर्वपिण्डज्ञानानां संवृतिसद्विषयतैवेति साधूक्तम्--अप्रत्य-

---

९ अ] अपोढे प्र॰ ॥
१० घ] घटास्यख्य ?स-मु॰nayacakra-ms-bhā ॥
१२ व] वर्तते प्र॰ ॥
१६ हा] ॰हाराप्रसि॰nayacakra-ms-bhā ॥
२२ द] ॰दस्पंदस्पंदादि॰nayacakra-ms-bhā ॥
२५ त] तददृष्टौnayacakra-ms-ya ॥

क्षं नीलादिविषयं चक्षुरादिविज्ञानं **शाक्यपुत्रीयं** भ्रान्तिवदिति । एवं तावत् कल्पनापोढप्रत्यक्षलक्षणसञ्चितालम्बनपञ्चविज्ञानकायग्रन्थविरोधोद्भावनचोद्योपक्रमायातपरिहारार्थस्यानेकार्थजन्यस्वार्थसामान्यगोचरवाक्यस्य सप्रसङ्गो दोषोऽभिहितः । § 316

अधुना **यदेतदनेक[प्रकारभिन्न]रूपे**त्यादिग्रन्थचोद्यद्वारायातकल्पनात्मकपरिहारार्थं **यच्चोक्तम् आयतनस्वलक्षणं [प्रत्येते स्वलक्षणविषया न द्रव्य-** - /ms **स्वलक्षणं] प्रति इति तत् कथ**मित्येतत्परि- हारार्थस्य तस्य वाक्यस्य दोषं वक्तुकामः परपक्षमेव तावत् प्रत्युच्चारयन् व्याचष्टे **सूरिष्टीकाकार**लिखितं लिखन् याव**देकाकारपरिकल्पना**दिति गतार्थम् । उत्तरं तु **अत्रापि,** अपिशब्दात् पूर्वस्मिन्नर्थविकल्पे व्याख्याता दोषास्तेऽत्रापि सम्भवन्ति । कथमिति चेत्, **अनेकार्थविषयैकप्रत्ययत्वात्,** अनेकोऽर्थः परमाणवः, तद्विषय एक इति प्रत्ययः सोऽनेकार्थविषयैकप्रत्ययः, तद्भावादनेकार्थविषयैकप्रत्ययत्वात्
94/mj ।

* * *

त्वात् । प्रत्यक्षस्याप्रत्यक्षत्वसाधने च द्वे लेशेनोन्नीते त्वयैव--त्वदभिमतप्रत्यक्षमप्रत्यक्षमनेकार्थजन्यत्वादनुमानवत् । अनुमानमपि हि पक्षधर्माद्यनेकार्थजन्यम् ।

ज्ञापकः स हेतुरिति चेत्, कारकादपि अनेकस्मादर्थाज्जायते साध्यसाधनधर्मान्वयैकान्तवतः ।

न, असञ्चितानेकार्थजन्यत्वादनुमाने । ननु धूमादिरपि सञ्चय एव गृहीतोऽ-

* * *

तेषु परमाणुषु प्रत्येकमतीन्द्रियेषु समुदितेष्वसमुदितेषु वा प्रत्ययाभावात् तत्समूहेऽनेकार्थविषयः स एवैकः प्रत्ययः, समूहालम्बनतदाभासज्ञानोत्पत्त्यभ्युपगमात् । अर्थभेदविषयज्ञानाभ्युपगमे च **विजानाति न विज्ञानम्** चतुःश॰ २६८ इत्यादि विरुध्येत । तस्मादेकः प्रत्ययोऽनेकार्थविषय एकार्थरूपः । तत एव **सामान्यरूप**स्तदतद्विषयतया तदतद्भूतसामान्यगोचरः । ततश्च **अस्वलक्षणविषयः,** त एव हि परमाणवः स्वलक्षणं न तत्समूहः सामान्यत्वात् । अत एव संवृतिसंश्च सः । तस्माद**स्वलक्षणविषयत्वात्** कल्पनात्मको निर्देश्यश्चेत्येवमाद्यस्माभिः प्राक् प्रक्रान्तं तत् सुतरामशेषं त्वयैव भावितम् **अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम्** प्र॰ समु॰ १ । ४ इति परिहारं

---

३० ङ्गो ]
दोभिहितःnayacakra-ms-ya ॥
१ य ] दृश्यतां पृ॰ ७८ पं॰ २ ॥
२ य ] दृश्यतां पृ॰ ७९ पं॰ २४ । पृ॰ ७९ टि॰ ७ ॥
१९ ज्ञानोत्प ]
॰त्पत्त्युपगमात्nayacakra-ms-bhā ॥

२० म ] दृश्यतां पृ॰ ७३ पं॰ १३ ॥
२३ ल ] ॰लक्षणाविषयः प्र॰ ॥
२३ मू ] ॰मूहसामा॰ प्र॰ ॥
२४ संवृ ] ॰संचय स त-
स्मा॰nayacakra-ms-pānayacakra-ms-ḍenayacakr
। ॰संचयः स तस्मा॰
nayacakra-ms-vi ॥

ब्रुवता । § 317

किञ्चान्यत्, भवदभिमत**प्रत्यक्षस्याप्रत्यक्षत्वसाधने च द्वे लेशेनोन्नीते त्वयैव,** मा भूत् स्वाभ्युपगमदोषव्यक्तिरिति कुशलजनतर्कगम्ये, न स्फुटे । कतमे द्वे ? अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरत्वादिति चैते द्वे । तत्र तावत् प्रथमं साधनम् --**त्वदभिमतप्रत्यक्षमप्रत्यक्षम्, अनेकार्थजन्यत्वात्, अनुमानवत्** । दृष्टान्तेऽनुमानेऽनेकार्थजन्यत्वमसिद्धमिति मा मंस्थाः, - /ms यस्मा**दनुमानमपि पक्षधर्माद्यनेकार्थजन्यम्,** पक्षधर्मः सपक्षानुगमो विपक्षव्यावृत्तिरित्यनेकार्थेन जन्यतेऽग्न्यनित्याद्यनुमानज्ञानं तथेदमपि प्रत्यक्षमनेकपरमाण्वर्थजन्यमिति । **ज्ञापकः स हेतुरिति चेत्** । स्यान्मतम्--अनुमाने पक्षधर्मादिरनेकोऽप्यर्थो धूमकृतकत्वादिरग्न्यनित्यादिज्ञानस्य न कारकः, किं तर्हि ? पूर्वप्रसिद्धमेवाविनाभाविनं सम्बन्धं स्मारयतीति ज्ञापकः स हेतुः, इतरस्तु प्रत्यक्षज्ञानस्य कारकोऽर्थः, तस्माद्वैधर्म्याददृष्टान्त इति । एतच्चायुक्तम्, अत्रापि तुल्यत्वात्, **कारकादपी**त्यादि, अनुमानमपि इति वर्तते, अनुमानमपि स्वार्थं कारका**दनेकस्मादर्थाज्जायते** । कतमस्मात् ? **साध्यसाधनधर्मान्वयैकान्तवतः** पक्षधर्मसपक्षानुगमविपक्षव्यावृत्तिमत ऐकान्तिकात्, अग्निमान् प्रदेशो धूमवत्त्वाच्चुल्लीमूलवत्, अनित्यः शब्दः कृतकत्वाद् घटवत्, न नदीवन्नाकाशवत् इति कारकहेतुतैवानुमानेऽपि तदर्थस्य । § 318

इतर आह --**न, असञ्चितानेकार्थजन्यत्वादनुमाने** । नैतत् साधर्म्यमुपपद्यते, कस्मात् ? असञ्चितानेकार्थजन्यत्वादनुमानस्य सञ्चितानेकार्थजन्यत्वाच्च प्रत्यक्षस्य । देशकालभिन्नसन्निहितासन्निहितार्थविषयं ह्यनुमानम्, तद्विपरीतविषयं प्रत्यक्षमिति । अत्रोच्यते --**ननु धूमादिरपि सञ्चय एव गृहीतोऽ-** 95/mj

* * *

ग्न्यादिमणूनिव गमयति ।

हेतुप्रत्ययोऽसौ, अनधिपतिप्रत्ययः कल्पनाया इति चेत्, कारकादप्यनेकस्मादर्थाज्जायते साध्यसाधनधर्मान्वयैकान्तवतः ।

अथ कथमसावनधिपतिः ? इन्द्रियाविषयत्वात् । ननु सञ्चयहेतुप्रत्ययोऽप्यनधिपतिरिन्द्रियाविषयत्वात् । तथा स्वार्थे सामान्यगोचरत्वादनुमानवदप्रत्यक्षम् । अनुमानं वा प्रत्यक्षं स्यात्, अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरत्वात्, प्रत्यक्षवत् । द्वयमप्येतदेकमेव, एकलक्षणत्वात् ।

* * *

**ग्न्यादिमणूनिव गमयति । नन्वि**ति प्रसिद्धानुज्ञापने, ननु धूमोऽग्निमत्त्वविशिष्ट-

---

२८ द्वे] लेशेन्नीते प्र° ॥
२९ व्य] °व्यतिरिति प्र° ॥
२९ ग] °गम्यते न स्फुटेnayacakra-ms-bhā । अत्र °गम्ये ते, न स्फुटे इत्यपि पाठः स्यात् ॥
२ त्व] तदभिमत° प्र° ॥
७ त्वादिर] °रग्निनित्यादि° प्र° ॥
१० व] वर्तंतेnayacakra-ms-bhā ॥
११ क] कतस्मात्nayacakra-ms-ya ॥
१३ धू] धूमत्वाच्चु° प्र° ॥

प्रदेशधर्मश्चतुर्भूतसङ्घातोऽन्वयव्यतिरेकसहितोऽग्निमत्त्वविज्ञानं प्रदेशे जनयत्यणुसमुदय इव रूपविज्ञानम्, **गमयत्यग्निं** तज्ज्ञानं जनयतीति ज्ञानोत्पत्तौ कारकत्वाव्यभिचारादुभयत्रेति । § 319 - /ms

**हेतुप्रत्यय** इत्यादि । स्यान्मतम्--*हेतुः प्रत्ययो निमित्तमनालम्बनमित्यर्थः, **असौ** धूमोऽनुमाने निमित्तम् । **अनधिपतिप्रत्ययः, कल्पनाया** हेतोः, निर्विकल्पं हि ज्ञानमधिपतिप्रत्ययं प्रत्यक्षम्, न तथानुमानम्, अतो वैधर्म्यान्न दृष्टान्त **इति चेत्,** एवं चेन्मन्यसे । § 320

अत्र परेणैवोत्तरं वाचयितुकाम आह --**अथ कथ**मित्यादि । इदमसि त्वं प्रष्टव्यः --**कथमसावनधिपति**र्धूम इति, अनालम्बनमित्यर्थः । इतर आह --**इन्द्रियाविषयत्वा**द्धेतुप्रत्येयस्यार्थस्याग्न्यादिलक्षणस्य । आचार्य आह --**ननु सञ्चयहेतुप्रत्ययोऽप्यनधिपतिरिन्द्रियाविषयत्वात्** । परमाणुसञ्चय एव प्रत्यक्षेऽप्यनधिपतिः, तस्मादेव हेतोरिन्द्रियाविषयत्वात्, सञ्चयस्य परमाणुव्यतिरिक्तस्यासत्त्वादिति विस्तरेण प्रागभिहितमेतत् । तस्मात् सर्वथा तुल्यमुभयं कारकत्वेनेति । **तथा स्वार्थे सामान्यगोचरत्वादनुमानवदप्रत्यक्ष**मित्येतस्मिन् साधने कारकहेतुत्वप्रतिपादनार्थः प्रपञ्चस्तुल्य इत्यतिदिशति । § 321

**अनुमानं वे**त्यादि । **वा**शब्दो विकल्पार्थः, यदि प्रतिपादितमिदं युक्तिवशात् प्रत्यक्षस्य त्वदभिमतस्यानुमानत्वं मया तत् त्वया स्वग्राहरक्तमनसा स्वसमयप्रसिद्ध्यनुपातिना नेष्यते प्रत्यक्षत्वमेवेष्यते ततस्तस्मात् साधर्म्या**दनुमानं वा प्रत्यक्षं स्यादनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरत्वा**दित्येताभ्यामेव हेतुभ्यां **प्रत्यक्षव**दित्येते अपि द्वे साधने लेशेनोन्नीते, न स्फुटमिति । § 322

किञ्चान्यत्, एतस्मादेव हेतुद्वयाद्विषयैक्यापत्तेः प्रमाणैक्यमित्यत आह --**द्वयमप्येतदेकमेव, एक- लक्षणत्वात्** । स्वसामान्यलक्षणं ह्येकमेव वस्तु विषयोऽस्य प्रमाणद्वयस्येत्युक्तविधिना प्रसक्तत्वात् प्रत्यक्षमेवैकं प्रमाणं तदुभयं स्यात्, अनेकार्थजन्यसामान्यैकगोचरत्वात्, चक्षुरादिद्वारजन्मप्रत्यक्षभेदप्रत्यक्षत्ववत् । अनुमानमेव वा स्यात्, तत एव कारणात्, धूमकृतकत्वाद्यनुमिताग्न्यनित्यादिज्ञानानुमानवत् । § 323 - /ms

96/mj

३० त्य ] °त्यग्निं न ज्ञानं जनयतीति प्र° ‖
१ * ] अत्र हेतुप्रत्ययो इत्यपि पाठः स्यात् ‖
१ यो ] निमित्तमालम्बन° प्र° । अत्र निमित्तं नालम्बन° इत्यपि पाठः स्यात् ‖
५ इ ] इदमसिद्धं द्रष्टव्यं कथं साधनधिनऽधिपतिधूमः nayacakra-ms-bhā । इदमसिद्धं द्रष्टव्यं कथं साधनधिपतिधूमः nayacakra-ms-ya ‖
८ स ] संचयनहेतु° nayacakra-ms-ya ‖
८ तिरिन्द्रिया ] °यविषयत्वात् प्र° ‖
९ प्र ] प्रत्यक्षोप्यन° प्र° ‖
१३ यु ] युक्तिवक्तात्प्रत्य° nayacakra-ms-bhā । युक्तिवत्तात्प्रत्य° nayacakra-ms-ya ‖
२३ नुमिताग्न्य ] °ग्न्यमित्यादि° प्र° ‖

अनेकार्थजन्यत्वाच्च स्वार्थसामान्यगोचरतायां यदाभासं तेषु ज्ञानमुत्पद्यते तथा त आलम्बनम्, प्रत्येकं परमाणुरूपस्य बुद्धावसन्निवेशात् समुदयकृततन्निर्भासतयालम्बनमिति प्राप्तम् । एवं च सति अर्थसन्निकर्षादक्षं प्रति यदुत्पद्यते तज्ज्ञानं § 324

इदानीं **वसुबन्धोः स्वगुरोः ततोऽर्थाद् विज्ञानं प्रत्यक्षम्** वादवि° इति ब्रुवतो यदुत्तरमभिहितं परगुणमत्सराविष्टचेतसा तत्त्वपरीक्षायां परमोदासीनचेतसा तु येन केनचिदभिप्रायेण स्वमतं दर्शितमेव **दिन्नेन वसुबन्धु**प्रत्यक्षलक्षणं दूषयता, तस्य पुनरर्थो योऽस्तु सोऽस्तु किं नोऽनेन ? इदमेव तावदस्तु --**रूपादिष्वालम्बनार्थो वक्तव्यः** प्र° समु° वृ° १ । १५ इति विकल्प्य विकल्पद्वये दोषजातं तल्लक्षणे प्रक्रान्तं तत् तवापि समानमिति प्रतिपादयिष्यन् **नयचक्रकारः** सविशेषं तन्मतविरोधहेतुं स्ववचनजनितमाह --**अनेकार्थजन्यत्वाच्च स्वार्थसामान्यगोचरतायामित्यादि शिष्याचार्ययोस्तुल्योत्तरत्वात्** । स्वार्थ इति नीलादिः, स एव किल सामान्यमनेकार्थजन्यत्वात्, अनेकोऽर्थः परमाणवः तज्जन्यं नीलविषयं प्रत्यक्षमत इन्द्रियस्य स्वार्थ इत्येतस्यामनेकार्थजन्यत्वाच्च स्वार्थसामान्यगोचरतायां **यदाभासं तेषु ज्ञानमुत्पद्यते तथा त आलम्बनं** रूपादय इति नीलपीतादित्वेन यथैवाभासन्ते तथैवालम्बन-

१ व] ततोऽर्थाद् विज्ञानं प्रत्यक्षम् इति प्रत्यक्षलक्षणं **वादविधौ** बौद्धाचार्येण **वसुबन्धुना**ऽभिहितम् । वसुबन्धोः शिष्यो **दिन्नः** । **दिन्नः** इति च **दिङ्नागस्यैव** नामान्तरम् । दिन्नेन स्वगुरोर्वसुबन्धोः प्रत्यक्षलक्षणं दूषयितुकामेन **प्रमाणसमुच्चये** तद्वृत्तौ च विस्तरेण प्रक्रान्तमित्थम्--ततोऽर्थाद्विज्ञानं प्रत्यक्षम् वादवि° इत्यत्र **ततोऽर्थादिति सर्वश्चेद् येन तत् तत एव न** । यदि ततः इत्यनेन सर्वः प्रत्यय उच्यते, यज्ज्ञानं यस्माद्विषयाद्भवति तस्य व्यपदिश्यते, तत एव तु न भवति, आलम्बनप्रत्ययादेव ज्ञानं न भवति चतुर्भिश्चित्तचैत्ताः अभि° को° २ । ६४ इति सिद्धान्तात् । **आलम्बनं चेत् स्मृत्यादिज्ञानं नान्यदपेक्षते** ॥ १५ ॥ यदि ततोऽर्थात् इत्यनेन विषयमात्रम्, स्मृत्यनुमानाभिलाषादिज्ञानमपि आलम्बनान्तरं नापेक्षते, अग्न्यादिज्ञानं हि न धूमाद्यालम्बनम् । रूपादिष्वालम्बनार्थो वक्तव्यः--किं यदाभासं तेषु ज्ञानमुत्पद्यते तथा ते आलम्बनम्, अथ यथा विद्यमाना अन्याभासस्यापि ज्ञानस्य कारणं भवन्ति ? ततः किमिति चेत्, यदि यदाभासं तेषु ज्ञानमुत्पद्यते तथा पञ्चानां विज्ञानकायानां सञ्चितालम्बनत्वात् संवृतिसदेवालम्बनमितीष्टं नीलाद्याभासज्ञानेषु ततोऽर्थाद् विज्ञानत्वात् प्रत्यक्षत्वं भवति, तथाहि--तेषु तत्समुदायाध्यारोपे सत्यपि द्रव्यसदाकारो लभ्यते । द्रव्यसङ्ख्याद्याकारोऽपि लप्स्यते, त एव हि द्रव्यादित्वेनाभासन्ते । अथ यथा विद्यमाना अन्याभासस्यापि ज्ञानस्य कारणं भवन्ति तथा सति द्रव्यादिप्रसङ्गदोषो नास्ति तथा तेषामसत्त्वात्, तथापि येन तस्य व्यपदेश इत्येतन्न लभ्यते, प्रत्येकं च ते समुदिताः कारणं न समुदायो व्यवहारसत्त्वात् । एतदेवाह --**यदाभासा न सा तस्माच्चितालम्बं हि पञ्चकम् । यतः सा परमार्थेन तत्र न व्यपदिश्यते** ॥ १६ ॥ इत्यवसरकारिका । चक्षुरादीनामप्यालम्बनत्वप्रसङ्गः, तेऽपि हि परमार्थतोऽन्यथा विद्यमाना नीलाद्याभासस्य द्विचन्द्राद्याभासस्य च ज्ञानस्य कारणीभवन्ति --प्र° समु° वृ° १ । १५--१६ ॥

७ त] **तन्मतविरोधं हेतुं**nayacakra-ms-ya ॥

९ ए] **एव विकल°**nayacakra-ms-ya ॥

९ अ] **अनेकार्थ**nayacakra-ms-ya ॥

मित्येतदिष्टम् । किं कारणं त एव नीलादिपरमाणवो नालम्बनमिति चेत्, उच्यते --**प्रत्येकं परमाणुरूपस्य बुद्धावसन्निवेशात्,** एकमेकं प्रति प्रत्येकं परमाणूनां यन्नीलादिरूपं तस्यातीन्द्रियत्वाद्बुद्धौ न सन्निवेशः, तस्मात् किं प्राप्तम् ? **समुदयकृततन्निर्भासतयालम्बनमि**त्येतत् **प्राप्तम्,** नीलादिरूपस्य तत्समुदायात्मकत्वात् । § 325 - /ms

**एवं च** सति परमाणुसञ्चयनीलादिनिर्भासतयालम्बनत्वे सति प्रत्यक्षार्थ एवं जायते, तद्यथा — **अर्थसन्निकर्षादक्षं प्रति यदुत्पद्यते तज्ज्ञानं प्रत्यक्षमिति ज्ञानमर्थेन विशेष्यते, अर्थेनेन्द्रियस्य सन्नि**

97/mj

* * *

प्रत्यक्षम् । न तदुपपद्यते, तस्यार्थस्याभावात् । न च सञ्चयोऽर्थः, संवृतिसत्त्वात् । अतो नासावुत्पत्तिप्रत्यय इष्यत इति विशेषणविशेष्यत्वाभावाज्ज्ञानत्वप्रत्यक्षत्वाभ्युपगमहानिः ।

चक्षुरादिज्ञानेष्वतः स्वनिर्भासव्यतिरिक्तप्रमेयाभावादसत्सत्प्रतिपत्तेरप्रत्यक्षत्वेन प्रसिद्धेन प्रत्यक्षत्वनिराकरणादनुमानविरोधः ।

यथा चात्र समानानेकार्थजन्येन्द्रियस्वार्थाद्यदुत्पद्यते तदपि च तैमिरकवद-

* * *

कर्षादुत्पद्यमानं ज्ञानमक्षं प्रति वृत्तेः प्रत्यक्षमिति ज्ञानेऽर्थस्य विशेषणता । सन्निकर्षाद्वा अक्षं प्रति यो वर्ततेऽर्थः स प्रत्यक्षः, अर्थेन्द्रियसन्निकर्षादक्षं प्रति वृत्तेः प्रत्यक्षमितत्वादुपचरितवृत्तिरर्थोऽक्षेण विशेष्यते इति । अत्रोत्तरमुच्यते --**न तदुपपद्यते** प्रत्यक्षं **तस्यार्थस्याभावात्** । एवं च सति इत्युच्चार्य सञ्चयः प्रसक्त इत्यभ्युपगम्य दूषयति--यस्मा**न्न च सञ्चयोऽर्थः** । किं कारणं नार्थः सञ्चय इति चेत्, **संवृतिसत्त्वात्** । संवृतिसत्त्वमद्रव्यत्वाद् वान्ध्येयवत् । **अत** एतस्मात् कारणाद् **नासावुत्पत्तिप्रत्यय इष्यते,** उत्पत्तौ प्रत्यय आलम्बनप्रत्यय इत्यर्थः, सोऽसत्त्वान्नेष्यते । **इतिशब्दो** हेत्वर्थे, एतस्मात् कारणात् सोऽर्थो न विशेषणेन विशेष्यस्तस्मा**द्विशेषणविशेष्यत्वाभावाज्ज्ञानत्वप्रत्यक्षत्वाभ्युपगमहानिः,** ज्ञानं प्रत्यक्षम् इत्येतदभ्युपगतं विशेषणस्य विशेष्यस्य चार्थस्याभावात् किम्विषयं ज्ञानं प्रत्यक्षं च स्यादिति हीयते । § 326

किञ्चान्यत् --**चक्षुरादिज्ञानेष्वत** इत्यादि याव**दनुमानविरोधः** । चक्षुरादीन्द्रियबुद्धयः स्वविषयनिर्भासस्वरूपमात्रा एव, ज्ञानत्वात्, वस्तुत्वात्, सत्त्वात्, तैमिरिकादिज्ञानवत् । अतश्चक्षुरादिविज्ञानेषु **स्वनिर्भासव्यतिरिक्त-** - /ms

---

१४ ए] एकमेकं प्रत्येकं प्र° ॥
२ जा] ज्ञायते प्र° । दृश्यतां पृ° ७६ पं° २७ ॥
३ र्थेन] विशिष्यतेnayacakra-ms-ya ॥
१४ र्थोऽक्षेण] विष्यते प्र° ॥
१६ ग] °गमप्य दूष°nayacakra-ms-bhā ॥
१८ ना] नासाधूत्पत्तिnayacakra-ms-ya । नासात्पत्ति° nayacakra-ms-bhā ॥
१८ इ] हीष्यतेnayacakra-ms-vi ॥
२३ क्षुरा] °रादिषु ज्ञाने°nayacakra-ms-ya ॥

**प्रमेयाभावः** । ततश्च तैमिरिकस्य केशोन्दुक-मशक-मक्षिका-द्विचन्द्रादिदर्शनवत् सा तु **असत्सत्प्रतिपत्तिरेव**, असदवस्तु सद्वस्तु इति प्रतिपत्तिः । तस्माद्धेतो**रसत्सत्प्रतिपत्ते**र्विपर्ययप्रतिपत्तेस्तस्य ज्ञानस्याप्रत्यक्षत्वं प्रसिद्धमलातचक्रादिज्ञानवत्, तेन **अप्रत्यक्षत्वेन प्रसिद्धेन** त्वया प्रतिज्ञातं त**त्प्रत्यक्षत्वं** निराक्रियते, **तन्निराकरणादनुमानविरोधः** । ननु प्रत्यक्षनिराकरणात् प्रत्यक्षविरोधोऽयं कथमनुमानविरोधः ? इत्यत्रोच्यते--त्वन्मतेन प्रत्यक्षधर्मस्य विकल्पस्योक्तानुमानेन निराकरणान्निर्विकल्पकप्रत्यक्षत्वाभावात् कतमत् तत् प्रत्यक्षं येन निराक्रियेत यद्वा निराकुर्यात् ? अतोऽनुमानविरोध एवायम् ।

§ 327

किञ्चान्यत्--घटसङ्ख्योत्क्षेपणसत्ताघटत्वाद्याकारज्ञानानामपि प्रत्यक्षत्वप्रसङ्गः । कथमिति चेत्, उच्यते **--यथा चोत्रे**त्यादि दार्ष्टान्तिकं मुक्त्वा दृष्टान्तं तत्साधर्म्यं च वर्णयति । यथा चात्र भवन्मतेन **समानानेकार्थजन्येन्द्रियस्वार्थात्**, समानेन नीलवर्णेनाऽनेकेन परमाणुसङ्घातलक्षणेनार्थेन जन्य इन्द्रियस्वार्थः, नासाधारणो वस्त्वभिमतस्वलक्षणस्वार्थः, कस्मात् ? तत्त्यक्त्वा **तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरं ज्ञानम्** प्र° समु° १ । ४ इति वचनादन्यादृशः स्वार्थस्येष्टत्वात्, तादृशः स्वार्थाद् **यदुत्पद्यते** 98/mj

* * *

प्रमाणम्, समानानेकार्थातथाभूतार्थान्नीलादिसङ्घातात् प्रज्ञप्तिसत आलम्बनात् परमार्थसदाकारो लभ्यते, त एव हि परमाणवो नीलादित्वेनाभासन्ते इति तद्विषयं ज्ञानं प्रत्यक्षमिष्टं तथा घटसङ्ख्याद्याकारेभ्यः प्रत्यक्षज्ञानजनकार्थसधर्मभ्यः समानानेकार्थजन्येन्द्रियस्वार्थेभ्यः समानानेकार्थातथाभूतार्थेभ्यः परमार्थसदाकारो लप्स्यते इति घटादिज्ञानं प्रत्यक्षं स्यात्, संवृतिसदालम्बनत्वात्, नीलादिज्ञानवत् । नीलादिज्ञानं वा न प्रत्यक्षं स्यात्, घटादिज्ञानवत् । त एव हि ते परमाणव आभासन्ते । एवमुभयोस्तुल्ये जनकत्वे कुत एतत्--नीलाद्याभासं ज्ञानं प्रत्यक्षं न घटाद्याभासमिति । यथैव हि परमाण्ववयवसमुदाये त एवाभासन्ते तथा घटादिज्ञानेष्वपि समुदितास्त एवाभासन्ते, तथास्थेष्वेव घटबुद्धिः प्रवर्तते प्रज्ञप्तिश्च एवं तथास्थेष्वेव नीलादिरूपबुद्धिः प्रवर्तते प्रज्ञप्तिश्च ।

---

२७ प्र] प्रतिपत्तितस्तस्मा°nayacakra-ms-ya ॥
२ तेन] °न सत्पक्षधर्मस्य विकल्पस्यो°nayacakra-ms-bhā । °न सत्पक्षधर्मस्य विपक्षस्यो° nayacakra-ms-ya ॥
३ प्र] °प्रत्यत्वाभावात्nayacakra-ms-bhā ॥
४ प्र] प्रत्यक्ष येनnayacakra-ms-ya ॥
७ दा] दार्ष्टान्तिकमुक्त्वाnayacakra-ms-ya ॥
८ स] समानासमानानेका° प्र° ॥
११ त] अत्र तन्त्यक्त्वा इत्यपि पाठः स्यात् ॥
११ स्वा] स्वार्थसामान्य°nayacakra-ms-ya ॥

* * *

ज्ञानम् इत्यभिसम्भन्त्स्यते, **तदपि च तैमिरकवदप्रमाणम्,** तिमिरे भवं तैमिरम्, यथा द्विचन्द्रदर्शनं तथा समानेनाप्यनेकवर्णमणिसमूहेन जन्य - /ms इन्द्रियस्वार्थो मेचकस्तस्मादुत्पद्यमानं तदपि च तैमिरकवदप्रमाणम् । कुतः ? यस्मात् समानानेकार्थात् तस्मादतथाभूतार्थात् तन्नीलादिसङ्घाताज्ज्ञानमुत्पद्यते, अतथाभूतार्थत्वमस्य संवृतिसत्त्वमत आह --**समानानेकार्थातथाभूतार्थान्नीलादिसङ्घातात् प्रज्ञप्तिसत आलम्बनात्** संवृतिसतः **परमार्थसदाकारो** नीलादिको **लभ्यते,** यतस्त एव हि परमार्थसन्तः **परमाणवो नीलादित्वेनाभासन्त इति तद्विषयं ज्ञानं** नीलादिप्रत्यक्षमिष्टम् । तथा निराकृतेभ्यः प्रत्यक्षत्वेन **घटसङ्ख्याद्याकारेभ्यो** घटसङ्ख्योत्क्षेपणसत्ताघटत्वाद्याकारेभ्यः **प्रत्यक्षज्ञानजनकार्थसधर्मभ्यः,** कतमेन साधर्म्येण सधर्मभ्य इति चेत्, उच्यते --**समानानेकार्थजन्येन्द्रियस्वार्थेभ्य** इत्येतत्सधर्मभ्यः । किमुक्तं भवति ? **समानानेकार्थातथाभूतार्थेभ्यः, परमार्थसदाकारो लप्स्यते** नीलादिसङ्घातव**दित्य**तस्तदुपसंहृत्य साधनमाह --**घटः** संयुक्तो वियुक्तः परोऽपरः स्पन्दत **इत्यादि ज्ञानं प्रत्यक्षं** स च तद्विषयः प्रत्यक्षः **स्यात्, संवृतिसदालम्बनत्वात्, नीलादिज्ञानवत्** । **नीलादिज्ञानं** तदर्थश्च **न प्रत्यक्षे वा स्याताम्,** संवृतिसत्त्वात्, **घटादिज्ञानार्थवत्** । **वा**शब्दस्य विकल्पार्थत्वादुभयत्र ज्ञानोत्पादकार्थाविशेषात् । तत् समर्थयति --**त एव हि ते परमाणवो** य एव घटादित्वे**नाभासन्ते** य एव नीलादित्वेनाभासन्त इति । **एवमुभयोर्नीलादिघटादिज्ञानयोस्तुल्ये जनकत्वे** तत् **कुत** एतत्--**नीलाद्याभासं ज्ञानं प्रत्यक्षं न घटाद्याभासमिति ?** स्वरुचिमात्रादन्यत् कारणं नास्तीत्यर्थः । § 328

**यथैव** हीत्यादि यावत् **समुदितास्त एवाभासन्त** इति बुद्धावाभासनसामर्थ्याविशेषाच्च जनकहेत्वविशेषमेव दर्शयति । अत्र च यथा **परमाण्ववयवसमुदाये त एव** नीलप्रत्यवभासत्वाज्ज्ञानस्याकारसन्निवेशविशिष्टाः सामान्यत - /ms **आभासन्ते तथा घटादिज्ञानेष्वपि** आकारविशेषेण **समुदितास्त एवाभासन्ते,** नान्यो घटो नामास्ति यस्तथाभासेत । **तथास्थेषु** तेन प्रकारेण स्थितेषु 99/mj रूपादिष्वेव घट

* * *

२५ तैमिर ]
°रिकवद°nayacakra-ms-ya ॥
२७ तैमिर ]
°रिकवद°nayacakra-ms-ya ॥
१ त ] तन्नादिसंघातजनमुत्पाद्यते प्र° ॥
२ स ] समानासमानानेका° प्र° ॥
६ निराकृ ] °कृतेभ्यः सत्पक्षत्वेन घट°nayacakra-ms-ya । °कृतेभ्या घट° nayacakra-ms-bhā ॥
७ सा ] साधर्म्येनnayacakra-ms-ya ॥
८ स ] समानासमानानेका°nayacakra-ms-ya ॥
९ स ] समानासमानानेका°nayacakra-ms-ya ॥
१७ रुचिमात्राद ] °दन्यत्र प्र° ॥
२० स ] °समुदायनाव नीलप्रत्य° प्र° ॥
२१ ए ] एव भासंतेnayacakra-ms-ya ॥

अथोच्येत--नीलादिसमुदाये द्रव्यसदाकारो विद्यते, तदण्वात्मकत्वात् तथासत्त्वात् तत्प्रत्यक्षत्वं न्याय्यम् । न तु घटाद्याकारः, अतत्परमाणुत्वात् तथाऽसत्त्वात् । एतच्च तुल्यमुभयत्राविशेषात् । यथैव तस्मिन् घटाद्यनाकारता तदनणुत्वात् तथाऽसत्त्वात् एवं रूपाद्याकारस्यानाकारता सञ्चितस्यैन्द्रियकत्वादालम्बनत्वात् तदनणुत्वात् तथाऽसत्त्वादन्यथाऽविषयत्वादनालम्बनत्वादप्रत्यक्षत्वात् ।

पक्षान्तरापत्तिश्चैवं यथा ते विद्यन्ते तथा त आलम्बनमिति । यथा चोक्तं प्रत्येकं

* * *

इति **बुद्धिः प्रवर्तते प्रज्ञप्तिश्च एवं तथास्थेष्वेव** परमाणुषु **नीलादिरूपबुद्धिः प्रवर्तते प्रज्ञप्तिश्चे**ति सर्वमुभयत्र तुल्यम् । § 329

अत्र परेणोभयोर्वैधर्म्यप्रदर्शनार्थ**मथोच्येत--नीलादिसमुदाय** इत्यादि यावत् **तदण्वात्मकत्वात् तथासत्त्वा**दिति । **नीलादिसमुदाये** नीलादि**द्रव्यसदाकारः** परमार्थसदाकारः स **विद्यते** । किं कारणम् ? **तदण्वात्मकत्वात्** तेषां नीलादीनामण्वात्मकत्वात् अणूनां द्रव्य**सत्त्वात्** । **तत्प्रत्यक्षत्वं न्याय्यम्,** न्यायादनपेतं न्याय्यं युक्तमित्यर्थः, तद्विषयस्य च ज्ञानस्य प्रत्यक्षत्वं तत्प्रत्यक्षत्वम् । **न तु घटाद्याकारो** न त्वस्ति घटसङ्ख्योत्क्षेपणाद्याकारः, **अतत्परमाणुत्वात्,** तस्याकारस्य परमाणुत्वं तत्परमाणुत्वम्, न तत्परमाणुत्वमतत्परमाणुत्वम्, अतोऽतत्परमाणुत्वात् । ततः किम् ? **तथाऽसत्त्वात्,** तेन प्रकारेणासत्त्वात् परमाणुत्वेन तेषां घटाद्याकाराणामसत्त्वात् । § 330

अत्राचार्य उत्तरमाह **--एतच्च तुल्यमुभयत्राविशेषात्,** परमाणुजन्यत्वादेव नीलादिघटाद्याकारप्रत्यक्षयोः । **यथैव तस्मिन्** रूपादिसमुदाये **घटाद्यनाकारता तदनणुत्वात्,** तस्य घटाद्याकारस्यानाकारता तस्याकारस्यानणुत्वात्, **तथाऽसत्त्वाद**नणुसत्त्वेन घटाद्याकारेणासत्त्वादणुत्वेनैवासत्त्वात् । **एवं रूपाद्याकारस्यानाकारता** अनन्तरोक्तहेतोः **सञ्चितस्यैन्द्रियकत्वात्** परमाणुसमुदायस्यैन्द्रियकत्वात् तस्यैवाल**म्बनत्वात्,** असञ्चितस्यातीन्द्रियत्वादत एवानालम्बनत्वात्, **तदनणुत्वात्** तस्य सञ्चितस्यैन्द्रियकस्यालम्बनस्यानणुत्वात् **तथाऽसत्त्वाद**नणुत्वादेवासत्त्वात्, **अन्यथा[ऽ]विषयत्वात्** परमाणुत्वेना- विषयत्वात्, अविषयत्वादेव **अनालम्बनत्वात्,** अत एव **अप्रत्यक्षत्वात्** । § 331 - /ms

किञ्चान्यत् **--पक्षान्तरापत्तिश्चैवम्** । **यदाभासं तेषु ज्ञानमुत्पद्यते तथा त आलम्बनम्** प्र° समु° वृ° १ । १५ इत्येवं पक्षं परित्यज्य **यथा ते विद्यन्ते तथा त आलम्बनमि**त्ययं पक्ष आश्रितो भवति, पक्षान्तरगमनं च वादावसानायेति । किञ्चान्यत्, अस्मिन्नपि च पक्षे त्वयैव **वसुबन्धुं** प्रत्युक्ता

---

६ नीलादिस ] °समुदयेत्यादि प्र° ॥
१८ त्त्वाद ] °दणुत्वेनैव सत्त्वात्nayacakra-ms-bhā ॥
१९ श्चित ] °स्यैन्द्रियिकत्वात्nayacakra-ms-ya ॥
२१ श्चित ] °स्यैन्द्रियिक° nayacakra-ms-bhā ॥
२४ य ] दृश्यतां पृ° ९६ पं° २५ ॥

ये दोषास्ते तवापि स्युः । यस्मात् त्वयापि चायं पक्षोऽङ्गीकृत एव । कथमिति चेत्, तद्दर्शयति **--यथा च** प्रत्यक्षोत्पत्तिबीजसञ्जननार्थ**मुक्तम्--प्रत्येकं च ते समुदिताः कारणमिति । तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम्** प्र॰ समु॰ १ । ४ इत्यस्य व्याख्यायां पुनर्**वसुबन्धुं** दूषयितुकामेन विकल्पितः स एवार्थः**--किं यथा विद्यमाना अन्याभासस्यापि विज्ञानस्य कारणं भवन्ति** तथा प्रत्यक्षस्यालम्बनं रूपादयः इति पूर्वपक्षत्वेन । एतयोश्च
100/mj वचनयोरेकाकारार्थत्वादसावपि पक्षोऽभ्युपगतस्त्वया । ततः को

* * *

च ते समुदिताः कारणम् प्र॰ समु॰ वृ॰ १ । १५ । एवमपि न त आलम्बनमतीन्द्रियत्वात् । एवम्विधालम्बनतायां च धूमोऽग्निप्रत्यक्षज्ञानालम्बनं स्यात्, तथा विद्यमानत्वेऽन्यथाभासस्यापि ज्ञानस्य कारणीभवनात्, त्वदुक्तप्रत्यक्षालम्बनवत् । चक्षुराद्यपि वालम्बनं स्यात् ।

न च ग्राह्यस्य नीलादेर्विषयस्य चक्षुरादिविज्ञानस्य नीलादिपरमाणव आल-

* * *

दोष इति चेत्, **एवमपि न त आलम्बनमतीन्द्रियत्वा**दिन्द्रियगोचरातीतत्वाद् **गगनव**दिन्द्रियज्ञानालम्बनं न भवन्ति परमाणवः । § 332

किञ्चान्यत्, उत्तरदोष उच्यतेऽभ्युपगम्यापि **एवंविधालम्बनतायां चे**त्यादि यावत् **त्वदुक्तप्रत्यक्षालम्बनव**दिति । अन्यथा विद्यमानाः परमाणवोऽतीन्द्रियत्वेन विद्यमानाः समूहाभासस्यापि ज्ञानस्य कारणं भवन्ति इत्येवंविधाल-
- /ms म्बनतायां सत्यां **धूमोऽग्निप्रत्यक्षज्ञानालम्बनं स्यात्, तथा विद्यमानत्वेऽन्यथाभासस्यापि ज्ञानस्य कारणीभवनात्** । धूमत्वेन विद्यमानो धूमोऽग्न्याभासस्यान्याभासस्यास्वाभासज्ञानस्य कारणीभवन्नुपलभ्यत इति पक्षधर्मत्वमस्यस्य । **त्वदुक्तप्रत्यक्षालम्बनव**दिति दृष्टान्ते तस्य सपक्षानुगमनं दर्शयति । यथा त्वदुक्तस्य प्रत्यक्षस्यालम्बनं परमाणवोऽन्यथा विद्यमानाः परमाणुत्वेन विद्यमानाः समूहाभासज्ञानस्य कारणं भवन्ति तथा धूमोऽपि तत्साधर्म्यात् तज्जनितज्ञानालम्बनस्याग्नेः प्रत्यक्षालम्बनतया व्याप्तत्वात् प्रत्यक्षालम्बनतामात्मनः साधयति । धूमनिमित्ताग्निज्ञानं वा प्रत्यक्षं स्यात्, तथा विद्यमानत्वेऽन्याभासविज्ञानजनकार्थालम्बनत्वात्, त्वदुक्तप्रत्यक्षवत् । तत्साधर्म्यादेव वा त्वदुक्तप्रत्यक्षं सहार्थेनाप्रत्यक्षं स्याद् धूमजनिताग्न्यर्थज्ञानवत् । § 333

३१ व्या] व्याख्याया nayacakra-ms-ya । व्याख्यया nayacakra-ms-bhā ॥ ३२ किं] दृश्यतां पृ॰ ९६ पं॰ २६ ॥ ११ ग] गमनव॰ प्र॰ ॥ २३ र्म्यादेव] ॰र्म्यादेव वा तदुक्त॰nayacakra-ms-bhā । ॰र्म्यादेव तावदुक्त॰ nayacakra-ms-ya ॥

२४ स] nayacakra-ms-bhā विनान्यत्र— सहात्सहार्थेन nayacakra-ms-vi । सहात्महार्थेन nayacakra-ms-pā । सतात्महार्थेन nayacakra-ms-ḍe nayacakra-ms-līṃ । nayacakra-ms-raṃ nayacakra-ms-hī प्रत्योस्तु अयं पाठ एव नास्ति ॥

किञ्चान्यत्, तस्मादेव हेतोश्चक्षुराद्यपि **वालम्बनं स्यात्,** एवमयमतिप्रसङ्गदोष एवंवादिनः । यदि कारणमालम्बनं विज्ञानस्यान्याभासस्यापिष्टं ततश्चक्षुरादीन्द्रियाणि चक्षुरादिविज्ञानानामालम्बनानि स्युः, अन्यथा विद्यमानत्वेऽन्याभासस्यापि विज्ञानस्य कारणीभवनाच्चक्षुरिन्द्रियं चक्षुर्विज्ञानस्यालम्बनं स्याद् रूपादिपरमाणुवत् । तज्ज्ञानं वा चक्षुरिन्द्रियालम्बनं स्यात्, तज्जन्यत्वे सत्यन्याभासत्वात्, परमाणुजन्यरूपविज्ञानवत् । एवं श्रोत्रादिज्ञानानि । परमाण्वालम्बनत्वमभ्युपगम्यायं दोष उक्तः । § 334

**न च ग्राह्यस्य नीलादेर्विषयस्येत्यादि** । चक्षुरादिभिर्ग्राह्यस्य नीलादेः समूहात्मकस्य, विषयो गोचरः, सम्बन्धि **चक्षुरादिविज्ञानम्, तस्य नीलादिपरमाणवो न आलम्बनम्, अन्यथा परमार्थतो विद्यमानत्वात्** । ***अन्यथेति** स्वाभासादन्यथाभासन्ते न तथा परमार्थतो विद्यन्ते परमार्थतस्तु स्वलक्षणा अप्यग्राह्या विद्यन्ते, तस्मादन्यथा परमार्थतो विद्यमानत्वात् **चक्षुरादिवन्नी**लादिग्राह्यविषयज्ञानालम्बना न भवन्ति परमाणवः । यथा चक्षुरादीन्द्रियाण्यन्यथा परमार्थतोऽनीलादिपरमाण्वात्मकानि सन्ति अन्यथा नीलादिज्ञानोत्पत्तौ हेतुभावं बिभ्रति नालम्बनानि तथा परमाणव इति । इतश्च परमाण्वालम्बनं न भवति - /ms 101/mj

* * *

म्बनम्, अन्यथा परमार्थतो विद्यमानत्वात् तदसाधारणविषयत्वाद्वा, रसज्ञानवत् ।

ननु च प्रत्येकमेव ते समुदिताः कारणम्, तथासन्त एव समुदिताः परमाणवश्चक्षुरादिज्ञानोत्पत्तिहेतुत्वादालम्बनम्, तदवस्थानां ज्ञानोत्पादनशक्त्यभिव्यक्तेः, चक्षुरादिपरमाणूनामिव । न ह्येक इन्द्रियपरमाणुर्विषयपरमाणुर्वा विज्ञानमुत्पादयितुमलम्, न तत्समुदायः प्रज्ञप्तिसत्त्वात् । प्रत्येककारणतायामणूनां समुदाये दर्शनशक्तिव्यक्तिः, शिबिकावाहकसमुदायवहनशक्तिवत्, अन्धपङ्क्तिवत् प्रत्येकादर्शनवैलक्षण्येन ।

* * *

चक्षुर्विज्ञानम्, **तदसाधारणविषयत्वाद्वा,** तस्यासाधारणविषयत्वाच्चक्षुर्विज्ञानस्य । असाधारण एकैको नीलपरमाणुर्विषयोऽस्येति तदसाधारणविषयत्वम्, तच्च सिद्धम्, **प्रत्येकं च ते समुदिताः कारणम्** प्र॰दृश्यतां पृ॰ ९६ पं॰ ३० ॥ समु॰ वृ॰ १ । १५ इति वचनात् । तस्मादसाधारणविषयत्वाद्वा **रसज्ञानवत्,** यथा रसज्ञानमसाधारणविषयत्वान्नीलपरमाण्वालम्बनं न भवत्येवं चक्षुर्विज्ञानमपि । **वाशब्दात्** तन्नीलपरमाणवश्चक्षुर्विषया न भवन्ति,

---

२५ क्षुरा ] ॰रादपि प्र॰ ॥
२६ स्या ] ॰स्याभास॰ प्र॰ ॥
२ म्ब ]
॰लम्बनमभ्यु॰nayacakra-ms-ya ॥

६ * ] एतच्चिह्नान्तर्गतः **अन्यथेति** इत्यत आरभ्य ॰मानत्वात् इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
७ प ]
परमानत्वात्nayacakra-ms-bhā ॥
२१ त ] **तस्य साधा॰** प्र॰ ॥

**असाधारणविषयत्वात्,** असाधारणाश्च ते विषयाश्च, **रसज्ञानवत्,** रसज्ञाने इव रसज्ञानवत्, यथा रसज्ञाने रसलक्षणोऽर्थोऽसाधारणविषयत्वात् त्वन्म-तेनैव चक्षुर्विज्ञानविषयो न भवति एवं नीलपरमाणव इति । § 335

इतर आह --**ननु च प्रत्येकमेव ते समुदिताः कारणमित्यादि** यावद**-न्धपङ्क्तिवत् प्रत्येकादर्शनवैलक्षण्येने**ति । ननु मया विशेष्योक्तम्--प्रत्येकमेव - /ms ते समुदिताः कारणमिति । किमुक्तं भवति ? **तथासन्त एव** परमाणुत्वेन परमार्थसन्त एव **समुदिताः परमाणवश्चक्षुरादिज्ञानोत्पत्तिहेतुत्वादालम्बनम्** । किं कारणम् ? **तदवस्थानां ज्ञानोत्पादनशक्त्यभिव्यक्तेः,** समुदाय अव-स्था येषां ते तदवस्थाः, तदवस्था एव हि ज्ञानमुत्पादयितुं शक्ताः, सा हि ज्ञानोत्पादनशक्तिः प्रत्येकं विद्यमानापि नाभिव्यज्यते, समुदायेऽभिव्यज्यते । को दृष्टान्तः ? **चक्षुरादिपरमाणूनामिव** प्रत्येकं रूपदर्शनशक्तानामपि न सा शक्तिरभिव्यज्यते समुदाये त्वभिव्यज्यते, तद्वदालम्बनपरमाणूनामपि । विष-य-विषयिपरमाणूनां प्रत्येकं तच्छक्तीनामप्यसमुदितानां शक्त्यभावं तुल्यं द-र्शयति --**न ह्येक इन्द्रियपरमाणुर्विषयपरमाणुर्वा विज्ञानमुत्पादयितुमल**मिति । **न तत्समुदायः प्रज्ञप्तिसत्त्वात्,** नापि तेषामिन्द्रियविषयपरमाणूनां समुदायो विज्ञानमुत्पादयितुमलं प्रज्ञप्तिसत्त्वात् परमार्थतोऽसत्त्वादित्यर्थः । तस्मादेक-मेकं प्रति कारणभावः प्रत्येककारणता, तस्यां सत्यामेव **प्रत्येककारण-तायामणूनां समुदाये दर्शनशक्तिव्यक्तिः** । किमिव ? **शिबिकावाहकसमुदाय-वहनशक्तिवत्,** यथा शिबिकावाहकानां प्रत्येकं विद्यमानैव सा वहनशक्तिः समुदायेऽभिव्यज्यते तथेन्द्रियविषयपरमाणूनां दर्शनदृश्यशक्तिः । वैधर्म्येण **अन्धपङ्क्तिः प्रत्येकादर्शनवैलक्षण्येन,** यथान्धानां प्रत्येकमसती दर्शनशक्तिव्य-क्तिस्तत्पङ्क्तावपि न भविष्यति तथेहेन्द्रियविषयद्रष्टृदृश्यशक्तयो नाभविष्यन्, भवन्ति तु । तस्मात् प्रत्येकं विद्यमानशक्तय एवेन्द्रियविषयपरमाणवः स-- /ms मुदायेऽ- भिव्यक्तशक्तयो भवन्तीति । § 336

102/mj

नन्वेवमभ्युपगतनिराकरणफलैवेयं प्रत्यक्षव्यवस्था, असञ्चितपरमाण्वालम्बनश्रयणात् प्रत्येकदर्शनशक्तिख्यापनाज्ज्ञनकानन्यथात्वात् सञ्चयाभावात् । § 337

आदिप्रतिज्ञानवत् स्वलक्षणविषयत्वप्रतिसमाधानेन निर्वहणमेतदनेकार्थजन्यस्वार्थसामान्यगोचरनिरसनम् । प्रत्यवेक्षितपूर्वापरानुमतनिगमनपरिग्रहेण वा § 338

---

३० या] यावदत्वपंक्तिव प्रत्येका॰nayacakra-ms-bhā । यावदत्वपंक्ति च प्रत्येका॰ nayacakra-ms-ya ‖

५ मा] ॰मानाभिव्यज्यतेnayacakra-ms-ya ‖

१६ द] दर्शनीशक्ति॰ प्र॰ ‖

१७ त] तथेन्द्रि॰nayacakra-ms-ya ‖

अत्रोच्यते --**नन्वेवमभ्युपगतनिराकरणफलैवेयं प्रत्यक्षव्यवस्था** । अभ्युपगतं **सञ्चितालम्बनाः पञ्च विज्ञानकायाः** अदृश्यतां पृ॰ ६४ पं॰ १ ॥भि॰ पि॰ इति, तस्याभ्युपगतस्य निराकरणं फलमस्याः प्रत्यक्षव्यवस्थायाः । कुतः ? **असञ्चितपरमाण्वालम्बनश्रयणात्,** प्रत्येकं दर्शनशक्तिमतामिन्द्रियविषयपरमाणूनां दर्शनशक्तिव्यक्तिरित्यस्यां कल्पनायां नन्वसञ्चिताः परमाणवश्चक्षुर्विज्ञानोत्पादनशक्ता इत्येतदाश्रितं भवति पञ्चानां विज्ञानकायानामसञ्चितालम्बनत्वम् । तच्चाभ्युपगतं निरुणद्धि सञ्चितालम्बनत्वमिदं कल्पनान्तराश्रयणम् । किं कारणम् ? **प्रत्येकदर्शनशक्तिख्यापनात्,** शिबिकावाहकसाधर्म्यात् त एव हि दर्शनशक्तियुक्ताः प्रत्येकमिति भवति । स्यान्मतम्--ननु प्रत्येकशक्तानामेव सञ्चये तच्छक्त्यभिव्यक्तिरित्युक्तम् । आचार्य आह--सत्यम्, उक्तमेतत्, अयुक्तम्, किं कारणम् ? **जनकानन्यथात्वात्,** न हि ज्ञानस्य जनकेभ्यः परमाणुभ्योऽन्यः सञ्चयोऽस्तीति प्रागेतद् विस्तरेण प्रतिपादितम्, तस्माज्जनकानन्यथात्वात् **सञ्चयाभावात्** प्रत्येकं दर्शनशक्त्यभिव्यक्तिप्रत्यक्षव्यवस्था अभ्युपगतनिराकरणफलैवेयम् । अथवा जनकानामन्यः प्रकारोऽन्यथा, तद्भावोऽन्यथात्वम्, तत्प्रतिषेधो जनकानन्यथात्वम्, तस्माज्जनकानां परमाणूनामतीन्द्रियाणामनन्यथात्वादैन्द्रियकत्वव्यवस्थानाभावात् सञ्चयस्यार्थान्तरभूतस्याभावादसञ्चितपरमाण्वालम्बनश्रयणं तदवस्थम् । § 339

अथवा युक्तैषा कल्पना त्वयाश्रयितुं स्वलक्षणविषयं प्रत्यक्षम् इत्येतत्प्रतिज्ञानसंवादित्वात् तन्निर्वोढुकामेन । यस्मात् **प्रत्येकं ते समुदिताः कारणम्** - /ms *प्र॰ समु॰ वृ॰ १ । १५ इत्येतत् प्रत्यक्षविषयसमर्थनवचनमादिप्रतिज्ञानेन तुल्यं वर्तत इति **आदिप्रतिज्ञानवत्,** आदिप्रतिज्ञानानुरूपम्, या हि प्रतिज्ञा स्वलक्षणविषयं प्रत्यक्षम् इति सैतेन वचनेन निरुह्यते, यस्मात् **स्वलक्षणविषयत्वप्रतिसमाधानेन निर्वहणमेतत्** स्वलक्षणविषयं प्रत्यक्षम् इति आदौ प्रतिज्ञाय **प्रत्येकं ते समुदिताः कारणमिति** ब्रुवताऽणूनां स्वलक्षणत्वात् प्रत्य-

---

१ क्षुर्विज्ञानोत्पाद ]
॰दनशक्त्याnayacakra-ms-ya ।
॰दननशक्ता nayacakra-ms-bhā ॥
२ तं ] निरुद्धि प्र॰ ॥
२ श्चिताल ]
॰लंबननत्वमिदंnayacakra-ms-ya ।
॰लंबमनत्वमिदं nayacakra-ms-bhā ॥
६ स ] सत्यम्, उक्तमेतत्, अयुक्तं तूक्तम् इत्यपि पाठः सम्भवेदत्र ॥
६ कान ] ॰नन्यथात् प्र॰ ॥
८ कान ]
॰नन्यत्वात्nayacakra-ms-ya ॥
९ भिव्य ]
॰व्यक्तप्रत्यक्ष॰nayacakra-ms-vi । अत्र ॰व्यक्तेः प्रत्यक्ष॰ इति सम्भवेत् पाठः ॥
१० कारोऽन्य ]
॰न्यथान्यथाnayacakra-ms-bhā ।
॰न्यथा २ nayacakra-ms-ya ॥
११ थात्व ]
॰त्वादैन्द्रियिकत्व॰nayacakra-ms-bhā ॥
१२ स्थानाभा ] ॰भावा संचय॰ प्र॰ ॥
१२ स्याभावाद ] ॰दसतिपरमाण्वा॰ प्र॰ ॥
१६ * ] दृश्यतां पृ॰ ९६ पं॰ ३० ॥
२० तिज्ञाय ] दृश्यतां पृ॰ ९६ पं॰ ३० ॥
२० प्र ] प्रत्यवेक्षितप्योर्थोपर्यसाध्य॰nayacakra-ms-bhā । प्रत्यवेक्षितव्योर्थोपर्यसाध्य॰ nayacakra-ms-ya ॥

वेक्षितपौर्वापर्यसाध्यसाधनसम्बन्धं हि वक्तव्यम् । अहो साधु, किन्तु पुनरत्र देवानांप्रिय भवतो दोषजातम् । किं तत् ? **अनेकार्थजन्यस्वार्थसामान्यगोचरनिरसनम्, तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरम्** प्र° समु° १ । ४ इति चोद्योत्तरपक्षपरिग्रहेण प्रत्यवेक्षितपौर्वापर्यसौस्थित्यार्थनिगमनवच-
103/mj नमनेन तु निरस्यते । अथ मा भूदेष दोष इति **प्रत्यवेक्षितपूर्वापरानुमत-**

* * *

आदिप्रतिज्ञातार्थनिरसनम् ।

अनेकान्तवद्द्वयोरन्तयोरवस्थातव्यम्--प्रत्येकतायां चावस्थेयमग्न्यम्भोवच्च तदशक्यशक्ते समुदाये, साक्षात् त्वदुक्ततत्त्वत्वादनेकैकत्वभृशगत्यर्थसमुदायपरिग्रहाच्च ।

इतरथापि चैषां समुदाय एव न स्यात्, प्रत्येकमभूतत्वात्, वन्ध्यापुत्रवत् । बौद्धैरेवोक्ता त्रयातिरिक्तसंस्कृतक्षणिकानित्यत्वाभ्युपगमेन सहासङ्गतिरस्य, प्रत्येक-

* * *

**निगमनपरिग्रहेण वा आदिप्रतिज्ञातार्थनिरसनम्** । **वा**शब्दस्य विकल्पत्वात् स्वलक्षणविषयप्रत्यक्षत्वं वा निरस्यते, अनेकार्थजन्यस्वार्थसामान्यगोचरता वा, उभयं वा निरस्यत इति । § 340

किञ्चान्यत्, **प्रत्येकं ते समुदिताः कारण**मिति वचनादव्यस्ता इत्येतदर्थादापन्नमिति तदेव पुनः स्मारयति दोषान्तरैः --**अनेकान्तवद् द्वयोरन्तयोरवस्थातव्यम्** । द्वावन्तौ द्वौ देशौ, द्वयोर्देशयोरवस्थेयं तैः परमाणुभिरेकतः प्रत्येकसमुदितैः । किमिव ? अनेकान्तवत् । अनेकान्तेन तुल्यं वर्तत इत्यनेकान्तवत्, यथा द्रव्यान्तपर्यायान्तयोरवतिष्ठमानाः परमाणवस्त एव तत्समुदायश्चेति व्यपदिश्यन्ते तथा **प्रत्येकतायां चावस्थेय**मित्यनेकान्तसाधर्म्यं
- /ms दर्शयति । **चशब्दः** समुच्चये, किं समुच्चिनोति ? समुदायमुपरितनम्, प्रत्येकतायां च समुदाये चावस्थातव्यमिति । **अग्न्यम्भोवच्च तदशक्यशक्ते समुदाये**, अग्नेः शक्यं दहनादि ह्लादनस्नेहनाद्यशक्यम्, अम्भसस्तु स्नेहनह्लादनादि शक्यमशक्यं दहनादि, तदशक्ये शक्तस्तदशक्यशक्तः प्रत्येकाशक्ये शक्तः समुदायः । वाक्यार्थस्तु लोकव्यापिनोऽपि परमाणवः सङ्घातभेदपरिणामापेक्षा एव चाक्षुषत्वादिभाजो भवन्ति नान्यथेत्युभयान्तात्यागवादिनो

२४ प्र] प्रत्यवेक्षितयाथापयं सौस्थित्या° प्र° ॥
११ स्य] विलक्षणत्वात् स्वल°nayacakra-ms-ya ॥
१४ प्र] दृश्यतां पृ° ९६ पं° ३० ॥
१५ त] तदेवंnayacakra-ms-ya ॥
१५ स्मा] स्मरयति प्र° ॥
१५ द्व] द्वयोरन्तरयो°nayacakra-ms-ya ॥
१८ प] °पर्यायांतरयो°nayacakra-ms-ya ॥
२१ चा] वावस्था° प्र° ॥
२१ अ] अग्न्यंभावच्चnayacakra-ms-bhā । अग्न्यभावच्च nayacakra-ms-ya ॥
२५ प] °परिमाणापेक्षाnayacakra-ms-ya ॥
२५ थेत्युभ] °भयानां त्याग° प्र° ॥

जैना यद् वदन्ति तदेव तवाप्यापन्नम् । कुतः ? **साक्षात्त्वदुक्ततत्त्वत्वात्,** त्व-यैव साक्षादुक्तं तत्त्वमेषां परमाणूनाम् प्रत्येकं चक्षुर्विज्ञानोत्पादने न शक्ताः, समुदिताः शक्ताः इति । एवं तावत् साक्षादनेकान्ताभ्युपगमः । अर्थापत्त्या वाभ्युपगत एव, **अनेकैकत्वभृशगत्यर्थसमुदायपरिग्रहाच्च** । समित्येकीभावे, स चैकीभावोऽनेकस्य, **इण् गतौ** पा॰ धा॰ १०४५, अयनं गमनं ग-तिराय इति पर्यायाः, उत्कटाय उदायः, सङ्गतो भृशमायः, समुदायशब्दस्य तत्परिग्रहात् प्रत्येकं ते समुदिता अनेकैकीभूतभृशगतयः इत्यर्थः कृतः, तस्माच्चानेकान्तवादाभ्युपगमः । § 341

किञ्चान्यत्, **इतरथापि चैषां समुदाय एव न स्यात्,** न्यायतोऽपीत्यर्थः, एतत् प्रतिज्ञानम् । समुदाय एव न स्यात्, **प्रत्येकमभूतत्वात्, वन्ध्यापुत्र-वदित्येष** न्यायः, यथा प्रत्येकमभूतानां वन्ध्यापुत्राणां समुदायो नास्ति तथा परमाणूनामिति । नन्वयमन्यायः प्रत्येकमभूतत्वासिद्धेः परमाणूनामिति चेत्, नेत्युच्यते, **बौद्धैरेवोक्ता त्रयातिरिक्तसंस्कृतक्षणिकानित्यत्वाभ्युपगमेन सहास-ङ्गतिरस्य ।** 104/mj

* * *

त्वप्राप्त्यनन्तरमेव विनष्टत्वात् । प्रत्येकत्वप्राप्तिरपि चैवं नैव, असत्त्वात्, व-न्ध्यापुत्रवत् । सहोत्पाददोष इति चेत्, न, तुल्यत्वात् । किं भूतस्य सहता ? अभूतस्य ? यदि भूतस्य भवनानन्तरविनष्टत्वात् कुतः सहता, उक्तवदसत्त्वापत्तेरेव ?

* * *

यदुक्तं वः सिद्धान्ते—

बुद्धिबोध्यं त्रयादन्यत् संस्कृतं क्षणिकं च तत् । इति ।§ 343

आकाश-प्रतिसङ्ख्या-ऽप्रतिसङ्ख्यानिरोधाख्यात् त्रयादन्यत् प्रत्ययज-नितत्वात् संस्कृतम्, संस्कृतत्वाच्च क्षणिकानित्यम्, क्षणोऽस्यास्तीति क्षणिक-म्, क्षणमात्रमेवास्य कालो न परत इति क्षणिकानित्यमेव न कालान्त-रावस्थाय्यनित्यत्वं लौकिकाभिमतघटादिवदित्येतेनाभ्युपगमेन सह **प्रत्येकं**

---

२६ सा ] साक्षात्तदुक्ततत्त्वत्वात् तयैव प्र॰ ॥
२७ श ] शक्तः प्र॰ ॥
२८ अर्थाप ] ॰पत्य-वाभ्यु॰nayacakra-ms-vinayacakra-ms-bhā । ॰पत्यु वाभ्यु॰ nayacakra-ms-vi nayacakra-ms-bhā विना ॥
३ उ ] उदाय संगतो भृशं आयः प्र॰ ॥
१८ न्य ] ॰दन्य सं॰ प्र॰ । अपिच वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्रयादन्यत् संस्कृतं क्षणिकं च इति । तदपि च त्रयं प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधावाकाशं चेत्याचक्षते । त्रयमपि चैतदवस्तु अभावमात्रं निरुपाख्यमिति मन्यन्ते । बुद्धिपूर्वकः किल विनाशो भावानां प्रतिसङ्ख्यानिरोधो नाम भाष्यते, तद्विपरीतोऽप्रतिसङ्ख्यानिरोधः, आवरणाभावमात्रमाकाशमिति --ब्रह्मसूत्रशाङ्करभा॰ ४ । २२ ॥
१९ आ ] आकास्या प्रति॰nayacakra-ms-bhā । आकाशस्याप्रति॰ nayacakra-ms-ya ॥
१९ ङ्ख्यानिरोधाख्या ] ॰ख्या त्रया॰ प्र॰ ॥
२२ स्था ] ॰स्थाय्येनि॰ प्र॰ ॥
२२ प्र ] दृश्यतां पृ॰ ९६ पं॰ ३० ॥

**ते समुदिताः कारण**मित्यस्याभ्युपगमस्य सङ्गतिर्नास्ति । किं कारणम् ? **प्रत्येकत्वप्राप्त्यनन्तरमेव विनष्टत्वात्,** एकैकस्य परमाणोः स्वरूपलाभसमनन्तरमेव विनष्टत्वात् कः प्रत्येकसमुदायः ? को वा देशतोऽत्यन्तं रूपादिभेदेन यावदनभिलाप्यतथावस्थानां भिद्यमानानां प्रत्येकं भावः ? इति सिद्धं प्रत्येकमभूतत्वं देशतः कालतश्चावस्थान्तराप्राप्तेरिति । **प्रत्येकत्वप्राप्तिरपि चैवं नैव,** निर्मूलत एव परमाणूनां यापि प्रत्येकत्वप्राप्तिः सापि चैवमुक्तविधिना नैवास्ति, स्वरूपप्राप्तिमात्रदेशकालाप्रतीक्षित्वविनाशित्वा**दसत्त्वात्, वन्ध्यापुत्रवत्,** यथा वन्ध्यापुत्राणां प्रत्येकत्वप्राप्तिर्नास्ति तथा परमाण्वभिमतानां तथानवस्थानामभावान्न प्रत्येकत्वप्राप्तिरिति । § 344

**सहोत्पादाददोष इति चेत्,** तेषां परमाणूनामसत्त्वमसिद्धं तथानवस्थानामपि देशैक्येन कालैक्येन च सहोत्पादाभ्युपगमात्, तस्मादस्ति प्रत्येकत्वप्राप्तिरिति । एतच्च **न, तुल्यत्वात्** परमाण्वसत्त्वस्य, देशकालभेदोत्पादासत्त्वेन सहोत्पादासत्त्वस्य तुल्यत्वात्, विकल्पद्वयेऽपि यौगपद्यासिद्धेरिदमसि त्वं प्रष्टव्यः **--किं भूतस्य सहता ? अभूतस्य ?** इति - /ms विकल्पद्वयानतिवृत्तेरेष प्रश्न उभयथापि न घटत इत्युत्तरं वक्तुमनसः । इतर आह--अभूतस्य सहतेत्ययुक्तो विकल्पः, क एवं ब्रूयात् अभूतस्य खपुष्पस्येव सताऽसता वा सहता इति यतः स विकल्पः पूर्वपक्ष्यते ? तस्माद्भूतस्य सहतेति ब्रूमः । अत्राचार्य आह--त्वमेवैतद्विकल्पद्वयं तथावस्थाः प्रत्येकं समुदिताः कारणं परमाणवः इति ब्रुवाणश्चिन्तय क एवमाहेति । किं न एतेन ? यो ब्रवीति स ब्रवीतु, **यदि भूतस्य** यदि तावद् भूतस्य सहोत्पादः, **भवनानन्तरविनष्टत्वात्** क्षणिकवादे **कुतः सहता ?** नास्त्यत्र कारणं सहत्वे कस्यचित् केनचिदित्यर्थः । **उक्तव**दित्यतिदेशाद्देशकालाभ्यामत्यन्तभेदे निरभिलाप्यस्वभावानां प्रत्येकत्वप्राप्तिरेव नास्तीत्युक्तं तथा तेषा**मसत्त्वापत्ते**रेवाणूनां कुतः सहता इत्यभिसम्बन्धः । प्रतिलब्धसहत्वस्य चो- 105/mj त्पाद उच्यते त्वया, तत्तु

* * *

---

२४ प्रा ] °प्राप्तानन्त°nayacakra-ms-bhā । °प्रानन्त° nayacakra-ms-ya ॥
२५ त्ये ] प्रत्येकं समु°nayacakra-ms-ya ॥
१ थाव ] °वस्थानं nayacakra-ms-ya । °वस्थं nayacakra-ms-bhā ॥
४ कालाप्र ] °प्रतीक्षितविना°nayacakra-ms-bhā ॥
७ होत्पा ] °त्याददोष प्र° ॥
८ कालैक्ये ] °क्येन सहो°nayacakra-ms-ya ॥
११ द्यासिद्धेरिद ] °मसिद्धं द्रष्टव्यःnayacakra-ms-bhā । °मसिद्धं द्रष्टव्यं nayacakra-ms-ya ॥
१२ तिवृ ] °वृत्तेरेय प्र° ॥
१३ ल्पः ] °ल्पः एवंnayacakra-ms-ya ॥
१४ प ] °पक्षते प्र° ॥
१७ ए ] एतेम प्र° ॥
१८ वा ] °वादेःnayacakra-ms-bhā । °वादः nayacakra-ms-ya ॥
२१ त्त्वाप ] °पत्तेरणूनांnayacakra-ms-ya ॥

अथाभूतस्य वन्ध्यापुत्रसमुदायोऽपि स्यात्, अभूतत्वादस्थितत्वात्, अणुसमुदायवत् । सन्तानादिति चेत्, सोऽप्येवमेव ।

अथोच्येत--बाह्यवस्तुस्वतत्त्वप्रतिपत्तिजनितः सर्व एवैष विरोधसंक्लेशः । विज्ञानमात्रकमिदं त्रिभुवनम् । न द्रव्यसंवृत्यादि ततो भिन्नमस्ति ।

ननु देवानांप्रिय ! त्वन्मतवदेव विज्ञानवादविध्वंसनार्थ एवायमारम्भः ।

* * *

सहत्वं यौगपद्यमप्रतिलब्धमसत्त्वापत्तेरेव । तस्मात् सहोत्पादाददोषः इत्यपरिहारः । **अथाभूतस्यो**त्पादो यौगपद्येनेष्यते सापि सहता नोपपद्यतेऽनिष्टप्रसङ्गात् । किमनिष्टम् ? **वन्ध्यापुत्रसमुदायोऽपि स्यादि**त्यनिष्टम् । कुतः ? **अभूतत्वादस्थितत्वादणुसमुदायव**दितीदं साक्षादनिष्टापादनम् । अणुसमुदायोऽपि न स्यादभूतत्वादस्थितत्वाद्वन्ध्यापुत्रसमुदायवत् । अभूतत्वमस्थितत्वं च हेतुद्वयं शून्यक्षणिकवादिनोः सिद्धत्वादुक्तम् । **सन्तानादिति चेत्,** स्यान्मतम्--अभूतत्वमस्थितत्वं चेष्यते तेषाम्, तथापि जन्मविनाशसन्तानस्याव्यवच्छेदात् स्थितत्वमस्त्यतः सहोत्पादाददोष इति । एतच्चायुक्तम्, यस्मात् **सोऽप्येवमेव,** सोऽपि सन्तानो भूतो वा स्यादभूतो वा ? यदि भूतः कुतः सहता, उक्तवद् भवनानन्तरविनष्टेभ्योऽन्यस्य सन्तानस्याभावात् ? अस्ति चेत् तद्विलक्षणो नित्योऽन्य इति सर्वक्षणिकप्रतिज्ञाहानिः । अथाभूतः, वन्ध्यापुत्रवदित्याद्यभिहितदोषाकाङ्क्षमेव । - /ms § 345

**अथोच्येत--बाह्यवस्तुस्वतत्त्वे**त्यादि यावत् **ततो भिन्नमस्ती**ति । **अथे**त्यधिकारान्तरे, अथ सञ्चितालम्बनविषयज्ञानपक्षे कल्पिताः कल्पिता उपपत्तयो विफला भवन्ति सदोषाश्चेति तं परित्यज्येदमुच्येत **--सर्व एवैष विरोधसंक्लेशो बाह्यवस्तुतत्त्वप्रतिपत्तिजनितः,** विज्ञानाद् बाह्यं वस्तुतत्त्वमस्ति इति प्रतिपत्तौ सत्यां जायतेऽयं संक्लेशः । यदि परमाणव आलम्बनं ततोऽतीन्द्रियत्वसञ्चितालम्बनत्वाद्यभ्युपगमविरोधः; अथ समुदायः, असत्त्वात् खपुष्पवदनालम्बनमेव; प्रत्येकं ते समुदिताः, स्ववचनविरोधादिदोषः प्रोक्तन्यायेनेत्येवमादिविरोधोद्भावनजनितेन चित्तसंक्लेशेन किमर्थं बाध्यामहे ? एवं तु सर्वदोषविनिर्मुक्तमिदं कल्पनान्तरमाश्रयामहे **--विज्ञानमात्रकमिदं त्रिभुवनम्** । यदुक्तम्—

---

२ होत्पादा] °दावदोषःnayacakra-ms-ya ॥
३ स] सहिताnayacakra-ms-ya ॥
६ मुदा] °दायापिnayacakra-ms-ya । °दापि nayacakra-ms-bhā ॥
६ स्या] स्यादतो त्वादस्थित° प्र° ॥
८ अभूत] °ततत्व°nayacakra-ms-ya ॥
८ स] °सन्तानसाध्यवच्छे° प्र° ॥
१० य] यविnayacakra-ms-ya ॥
११ स] सहेतोक्तवद् प्र° ॥
१२ णो] नित्यान्यnayacakra-ms-ya ॥
१४ बा] वाक्यवस्तु° प्र° ॥
१५ स] संहिताल°nayacakra-ms-vi विना । सहिताल° nayacakra-ms-vi ॥
२१ बा] वाच्यामहे प्र° ॥

द्यौः क्षमा वायुराकाशं सागराः सरितो दिशः ।
अन्तःकरणतत्त्वस्य भागा बहिरिव स्थिताः ॥ वाक्यप० ३ । ७ । ४१ इति ।§ 348

**न द्रव्यसंवृत्यादि,** न पुनरेतस्यां कल्पनायामेवम्विधः संक्लेशोऽस्ति यत् इदं संवृतिसदिदं परमार्थसदिदमैन्द्रियकमतीन्द्रियमित्यादि विकल्प्यमानं विज्ञानाद्व्यतिरिक्तमर्थजातमिच्छतां स्यात्, न तु तत् **ततो भिन्नमस्ति** । तस्मादनर्थको विचार इति । § 349

अत्रोच्यते **--ननु देवानांप्रिय त्वन्मतवदेव विज्ञानवादविध्वंसनार्थ एवाय-**
106/mj **मारम्भः** । यथेदं

* * *

तिष्ठतु तावद् बाह्यार्थाभावे विज्ञेयत्वाभावो विज्ञेयत्वाभावे च विज्ञानत्वाभावः । विज्ञानं हि प्रत्यक्षादि । तत्र कतमद् विज्ञानमात्रमिदं सर्वं त्रैधातुकम् ? न तावत् प्रत्यक्षविज्ञानमात्रम्, तस्यैवमवस्थत्वात् । नानुमानविज्ञानमात्रम्, तस्यापि तत्पूर्वकत्वात् तदसिद्धावसिद्धेरतन्त्वपटवत् । न संशयभ्रान्त्यादिकल्पनाविज्ञानमात्रं

* * *

कल्पनापोढं प्रत्यक्षमित्येतस्य त्वन्मतस्य तत्संवादिनो **बुद्धवचनस्य** च
- /ms विध्वंसनार्थोऽयं ममारम्भस्तथा विज्ञानमात्रवादविध्वंसनार्थोऽप्ययमेवारम्भः, त्वत्तीर्थकराभिहितत्वात् तस्यापि । अथवा तत्परमार्थत्वात् तत्प्रतिपादनार्थत्वाच्च सर्वदेशनानां **बौद्धीनां** तद्विध्वंसनार्थ एवायमारम्भः । एतदपि प्रमाणाभावादयुक्तमिति ग्राह्यम्, प्रमाणाभावश्च प्रमेयाभावादिति स दोषः स्थित एवेति दर्शयति **--तिष्ठतु तावदित्यादि** । तं चोपायेन दर्शयिष्यन्नाह **--बाह्यार्थाभावे विज्ञेयत्वाभावः**, तस्य विज्ञानमात्रत्वात् । **विज्ञेयत्वाभावे च** तस्य **विज्ञानत्वमपि नास्ति,** विजानातीति हि विज्ञानम्, किं विजानाति विज्ञेयाभावे ? ततः प्रमेयत्वाभावात् प्रमाणत्वाभावः प्रत्यक्षस्येति ज्ञेय-ज्ञान-प्रमाण-प्रमेयत्वविलक्षणं खपुष्पवत् किं तत् प्रत्यक्षं नाम ? इत्येष दोषो दुर्निवारः, स तावत् तिष्ठतु । इदं तावदस्तित्वाभ्युपगमेनैवान्यथा विचार्यते **--विज्ञानं हीत्यादि** । **हिशब्दो** दृष्टान्तार्थे, दृष्टं हि लोके **विज्ञानं प्रत्यक्षादि,** प्रत्यक्षमनुमानं च प्रमाणे विज्ञाने । **आदि**ग्रहणात् संशयविपर्ययानध्यवसायलक्षणानि च विज्ञानानि प्रमाणाभासाभिमतानि । इदमसि त्वं प्रष्टव्यः **--तत्र**

---

२४ सा] **सागरः** nayacakra-ms-ya । द्यौः क्षमा वायुरादित्यः सागराः सरितो दिशः । अन्तःकरणतत्त्वस्य भागा बहिरवस्थिताः ॥--इति मुद्रिते **वाक्यपदीये** पाठः ॥

१ द्र] **द्रव्यं संवृत्यादि न**nayacakra-ms-bhā । **द्रव्यसंवृत्या न** nayacakra-ms-ya ॥

२ य] अत्र **य इदं** इत्यपि पाठः स्यात् ॥

१४ रा] **°राभिहत°** प्र° ॥

१५ बौ] **बौद्धानां**nayacakra-ms-ya ॥

२२ ग] **°गमेवानान्यथा** प्र° । अत्र °गमेनान्यथा इत्यपि पाठः स्यात् ॥

निर्धार्यं **कतमद् विज्ञानमात्रमिदं सर्वं त्रैधातुकमि**ति, नैकमपि विज्ञानमात्रं भवतीत्यभिप्रायः । ब्रूयास्त्वम्--प्रत्यक्षविज्ञानमात्रमिति, **तन्न तावत्**
- /ms **प्रत्यक्षविज्ञानमात्रं तस्यैवमवस्थत्वात्,** तस्य प्रत्यक्षविज्ञानस्यैवमवस्था यथास्माभिर्व्याख्याता न रूपादिविषया न समुदायविषया न चक्षुरादिनिमित्ता संवृत्या परमार्थेन वा युज्यते इति तस्मान्न प्रत्यक्षविज्ञानमात्रम् । स्यान्मतम्--अनुमानविज्ञानमात्रमिति । तदपि **नानुमानविज्ञानमात्रम्** । किं कारणम् ? **तस्यापि तत्पूर्वकत्वात्,** तस्याप्यनुमानस्य तत्पूर्वकत्वात् प्रत्यक्षपूर्वकत्वात् । प्रत्यक्षपूर्वकं हि स्वानुभवोत्तरभाविविकल्पात्मकमविकल्पज्ञानसमनन्तरजन्माऽनुमानं मानसमैन्द्रियमयोगिमानसप्रत्यक्षपूर्वकमेवेष्यते, तस्यैव प्रत्यक्षस्यासिद्धौ कुतोऽनुमानसिद्धिः ? अतो नानुमानमात्रमत आह --**तदसिद्धावसिद्धिरतन्त्वपटवत्** । यथा तन्तुपूर्वकस्य पटस्य तन्त्वसिद्धावसिद्धिस्तत्पूर्वकत्वात् तथा प्रत्यक्षासिद्धावसिद्धिरनुमानस्य । एवं तावत् प्रमाणविज्ञानमात्रत्वासिद्धिः । एवं तर्हि संशयभ्रान्त्यादिकल्पनाविज्ञानमात्रमस्तु, तदपि **न संशयभ्रान्त्यादिकल्पनाविज्ञानमात्रं वा,** न संशयमात्रं न भ्रान्त्यादिमात्रम्, **आदि**ग्रहणान्न स्वप्नानुभवानुभूतानुकारमात्रं न तैमिरिककेशोन्दुकाद्याकारमात्रम्, सर्वस्यास्य कल्पनात्मकस्य प्रमाणाभासस्य **अत एव** प्रत्यक्षपूर्वकत्वादेव तदसिद्धाव 107/mj

* * *

वा, अत एव । नानध्यवसायमात्रम्, अनवग्रहात्मकत्वात् तस्य । तस्मान्न विज्ञानमात्रमित्यलमतिविकाशिन्या सङ्कथया ।

अनयैव च दिशा स्ववचनव्यपेक्षैवाक्षेपोऽविशेषैकान्तवादिनोऽपि । सर्वसर्वात्मकतायां श्रोत्रादिवृत्तिः प्रत्यक्षम् षष्टित° इति ब्रुवतो निर्विकल्पत्वाद्विभागाभावात्

* * *

सिद्धेः । स्यान्मतम्--अनध्यवसायमात्रमस्त्विति । तदपि **नानध्यवसायमात्रम्,** न असञ्चेतिताव्यक्तसुखदुःखादिस्वरूपमित्यर्थः । किं कारणम् ? **अनवग्र-**

---

२६ क] °मत् विज्ञा°nayacakra-ms-bhā । °मत्तविज्ञा° nayacakra-ms-ya ॥ २६ स] सर्वत्रैधातु° प्र° ॥ २८ विज्ञान] °स्येवमव-स्थाnayacakra-ms-raṃnayacakra-ms-hī । °स्येयमवस्था nayacakra-ms-vi । स्येयमवस्था nayacakra-ms-bhā nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ ॥ ४ नुमान] °नस्य पूर्वकत्वात् प्रत्यक्षपूर्वकत्वात्nayacakra-ms-ya । °नस्य प्रत्यक्षपूर्वकत्वात् nayacakra-ms-bhā ॥ ६ मा] °समिन्द्रिय° प्र° ॥ ६ प्र] °प्रत्ययंक्षपू°nayacakra-ms-bhā ॥ ७ स्या] °स्यापिस्याप्य ?सिद्धौ प्र° ॥ १० त] तदपि संशयभ्रान्त्यादि कल्पनादिमात्रं वा प्र° ॥ १३ अ] अंत प्र° ॥ २२ अ] असंचेतिवाव्यक्तnayacakra-ms-ya ॥

**हात्मकत्वात् तस्य,** न हि तदत्यन्तासश्चेतितं नाम ज्ञानमस्ति । यद्यप्यव्यक्तज्ञानमस्ति अपटुत्वात् तदर्थावग्रहात्मकं न भवत्यतो विज्ञानमेव न भवति, यस्माद् विजानातीति विज्ञानमिष्टम्, तच्च न किञ्चिद् विजानातीति नानध्यवसायविज्ञानमात्रम् । **तस्मान्न विज्ञानमात्रम्,** प्रमाणप्रमाणाभासविज्ञानेष्व- - /ms नन्तर्भावात् कतमद् विज्ञानमात्रमिदं सर्वम् ? एतेभ्यश्च विज्ञानेभ्यो व्यतिरिक्तस्यान्यस्य विज्ञानस्याभावान्न किञ्चिदेतद्विज्ञानमात्रं सर्वम् । **इत्यलमतिविकाशिन्या सङ्कथये**ति सङ्क्षिप्योपसंहरति प्रत्यक्षलक्षणस्य सर्वथा दूषितत्वात्, इतरथा ह्यद्यापि दूषणवचनप्रपञ्चस्यानेकस्यावकाशोऽस्तीति । एवं तावद्विशेषैकान्तवादिना कल्पितं लौकिकप्रत्यक्षविलक्षणं प्रत्यक्षं न घटते, स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधत्वात् । § 350

**अनयैव च दिशा स्ववचनव्यपेक्षैवाक्षेपो** द्रष्टव्य इति वाक्यशेषः । एषोऽतिदेशः कस्य *चेत्, **अविशेषैकान्तवादिनोऽपि । अपि**शब्दादनन्तरोक्तस्य विशेषवादिनोऽसम्भवात् उभयवादिनोऽपि । तत्र यद् विशेषवादिनः प्रागुक्तं दोषजातं कल्पनापोढं प्रत्यक्षम् इच्छतः कल्पनात्मक[त्व]मेव हेतुपरम्परयाऽऽपाद्य अप्रत्यक्षत्वम्, अनुमान[त्व]म्, उभयैक्यम्, सङ्करः, अभावः, निर्देश्यत्वम्, अस्वलक्षणता च, कारकज्ञापकाविशेषापादनादभिधानार्थव्यपदेश्यता च पश्चाच्च कल्पनापोढतामभ्युपेत्यापि स्वसामान्ययोर्लक्षणयोरभावाच्चक्षुषो रूपस्य तद्विज्ञानस्य चाभावः इत्यादि लक्षणवाक्यमुद्दिश्य तदिदानीमुत्क्रमेण वाच्यमिति तद्दिशं दर्शयति --**सर्वसर्वात्मकतायामित्यादिना** यावद**नक्ष**मिति । एवं हि लक्षणदूषणातिदेशः--सर्वं सर्वात्मकम् इत्यविशेषमिच्छतः **साङ्ख्यस्यापि** सर्वात्मकस्यैकस्य वस्तुनो रूपरसादिभेदेन श्रोत्रादिभेदेन च विकल्पयितुमशक्यत्वाद् विशेषैकान्तवादिन इव निर्विकल्पपर- - /ms मार्थपरमाणुमात्र- साधर्म्यादविकल्पकत्वम् । अविकल्पकत्वाद् यथा पूर्वं प्रत्यक्षलक्षणोदाहरणवाक्ये दोषाः चक्षुर्नैव चक्षुः, रूपं नैव रूपम्, विज्ञानं नैव विज्ञानम् इत्यादयस्तथा **श्रोत्रादिवृत्तिः प्रत्यक्षं** श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां

---

२३ त] **तस्या न हि तदत्यंचासंचेतितं** प्र° ॥

२३ य] अत्र यदप्य° इत्यपि पाठः स्यात् ॥

२६ माण] **°णंप्रमा°** प्र° ॥

२६ माणाभा] **°भाविज्ञाने°**nayacakra-ms-ya ॥

३ विका] **°कासिन्या**nayacakra-ms-bhā ॥

४ ह्य] **भेद्यापि**nayacakra-ms-bhā ॥

८ *] **चित्** प्र° ॥

९ वादिनोऽस] **°सम्भवत उभ°**nayacakra-ms-bhā ॥

११ अ] **अभावं** प्र° ॥

१२ च] **च इकारक°**nayacakra-ms-bhānayacakra-ms-vi विना ॥

१३ भ्युपेत्या] **°त्यादि**nayacakra-ms-ya ॥

१४ भावाच्च] दृश्यतां पृ° ७१ पं° ४ ॥

१४ स्य] **°स्येचाभावः**nayacakra-ms-bhā । **°स्येवाभावः** nayacakra-ms-ya । पृ° ७२ पं° १ ॥

१७ र्वात्म] **°त्मकैकस्य**nayacakra-ms-ya ॥

१९ विक] **°कल्पकम्** प्र° ॥

२० च] दृश्यतां पृ° ७१ पं° ४ ॥

मनसाऽधिष्ठिता वृत्तिः शब्दस्पर्शरूपरसगन्धेषु यथाक्रमं ग्रहणे वर्तमाना प्रमाणं प्रत्यक्ष**मिति ब्रुवतः** सर्वसर्वात्मकत्वे **निर्विकल्पत्वाद्विभागाभावात् किं श्रोत्रं** यत् त्वगादिभ्यो विभक्तम् ? **किमश्रोत्रं** त्वगादि यच्छ्रोत्राद्विभक्तम् ?
108/mj यच्चोक्तं श्रोत्रादि इति, तत्र **क आदिः** सर्वात्मकैकवस्तुत्वे

* * *

किं श्रोत्रम् ? किमश्रोत्रम् ? क आदिः ? कोऽनादिः ? का वृत्तिः ? का वाऽवृत्तिः ? किं प्रति ? किमप्रति ? किमक्षम् ? किमनक्षमित्यादि ?

लोके शास्त्रे च हि वस्तुस्वतत्त्वसाक्षात्प्रतिपत्तिः प्रत्यक्षम् । तत्तु त्वन्मतवन्न त्वेवंलक्षणम् प्रत्यक्षम्, निर्विकल्पत्वासिद्धेः कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवत् ।

सञ्चितालम्बनस्थान उक्तवद् रूपादेरेकस्यासर्वस्यालम्बनस्यासञ्चितवद् घट-

* * *

प्रथमद्वितीयाद्यन्योन्यापेक्षविभागाभावात् ? **कोऽनादिर्मध्योऽन्तो** वा ? **का वृत्ति**स्तेषां श्रोत्रादीनां पूर्वमप्रवृत्तानां पश्चाद्वृत्तिः कालभेदेनावस्थान्तरत्वेन च विशिष्टा ? **का वाऽवृत्ति**र्वृत्त्युपरमलक्षणा विभागाभावादेव ? **किं प्रति,** कतमोऽन्यो भावो यमपेक्ष्य तं प्रत्यक्षमित्युच्यते ? नपुंसकलिङ्गस्याव्यक्तगुणसन्देहविषयत्वात् किं प्रति इति प्रश्नः । **किमप्रति,** सर्वसर्वात्मकैकत्वे कैः किं नापेक्ष्यते ? **किमक्ष**मिन्द्रियं यद् विषयव्यतिरिक्तं श्रोत्रादि परस्परव्यतिरिक्तं वा ? **किमनक्ष**मिन्द्रियव्यतिरिक्तं विषयो रूपादि परस्परतो वा ? **इति** प्रदर्शने, इत्थं विभागाभावाद् विभागेन लक्षणप्रणयनं स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधम् । **आदि**ग्रहणात् किं शब्दादि ? किं मनः ? किमधिष्ठेयं केन ? इति । § 351

किञ्चान्यत्, त्वन्मतेनैव प्रत्यक्षलक्षणायोगादयुक्तम् । **लोके शास्त्रे च हि वस्तुस्वतत्त्वसाक्षात्प्रतिपत्तिः प्रत्यक्षम्,** वस्तुनः स्वं तत्त्वमसाधारणमात्मीयं रूपम्, या तस्य साक्षात्प्रतिपत्तिर्न व्यवहिता सा प्रत्यक्षम् । **तत्तु त्वन्मतवन्न त्वेवंलक्षणं प्रत्यक्षम्,** त्वन्मत इव त्वन्मतवत्, यथा

---

१० भा] भावोन्यमपेक्ष्यnayacakra-ms-ya । भावोऽन्यमपेक्ष्य nayacakra-ms-bhā ॥
११ र्वात्म] °त्मकत्वकैकत्वे के कं नापेक्ष्यतेnayacakra-ms-bhā । °त्मकत्वकैकत्वे कैकं नापेक्ष्यते nayacakra-ms-ya ॥
१५ व्य] °व्यपेक्षदुस्तर°nayacakra-ms-ya ॥
१५ विरोध] °धनादिग्र° प्र° ॥
१७ णा] °णायोगायदुक्तं लोकशास्त्रेnayacakra-ms-ya ॥
१८ च] वहि प्र° ॥
१८ प्र] nayacakra-ms-raṃ विनान्यत्र --प्रत्यक्ष nayacakra-ms-hī । प्रत्यक्षा nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi nayacakra-ms-bhā ॥
२० त] तनु त्वन्मत°nayacakra-ms-raṃnayacakra-ms-hī ॥

सर्वसर्वात्मकत्वे त्वन्मते श्रोत्रादिवृत्तेः सर्वसर्वात्मकवस्त्वेकदेशशब्दादिविष- - /ms यत्वात् समुदायरूपत्वाद्वस्तुस्वतत्त्वस्य विभागाभावाच्छ्रोत्रादिवृत्तिर्न सम्भवतीत्युक्तं तथा तस्य निर्विकल्पस्य वस्तुनो वस्तुस्वतत्त्वसाक्षात्प्रतिपत्त्यभिमतं लौकिकं सामयिकं च प्रत्यक्षलक्षणं न घटते, **निर्विकल्पत्वासिद्धेः**, नैव तन्निर्विकल्पं प्रत्यक्षं शब्दादिविभागविकल्पविषयत्वात्, अविभागरूपं च सर्वसर्वात्मकं वस्तुस्वतत्त्वम्, तद्विषयं च तन्न भवति, ततश्च कल्पनात्मकम्, **कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवद्** न प्रत्यक्षम् इति वर्तते, कल्पनात्मकत्वान्निरूपणविकल्पात्मकत्वादालम्बनविपरीतप्रतिपत्त्यात्मकत्वादध्यारोपात्मकत्वादसामान्यरूपविषयत्वात् तदतद्विषयवृत्तित्वात् सदसद्भेदपरिग्रहात्मकत्वात् सर्वथा साधारणार्थत्वात्, भ्रान्तिसंशयानुमानादिज्ञानवदिति । § 352

**सञ्चितालम्बनस्थान उक्तवदित्यादि यावन्नीलादिष्वभावा**दित्यनेनाऽतिदिष्टग्रन्थार्थभावनोपायदिक्प्रदर्शनं करोति मा भूद् व्यामोह इति । यादृक् सञ्चितालम्बनस्थानेऽस्माभिरुक्तम् परमाणुनीलादीनां सञ्चयः सामान्यं संवृतिसत्त्वादसत् इति, इह तु तद्विपरीतं समुदायपरमार्थत्वं
109/mj नीलादिसंवृतिसत्त्वम् ।

* * *

नीलादिष्वभावात् तथासम्भावनेऽपि तस्यातीन्द्रियत्वादालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां रूपादिसङ्घात आलम्बनमिति प्राप्तम् । ते च प्रत्येकं परमार्थतोऽसन्त इति तेषामविषयतेत्याद्यशेषं यथाभागमत्र योज्यं भेदाभेदसंवृतिपरमार्थस्थानव्यवस्थापनया ।

* * *

संवृतिसन्तो नीलादय ऐन्द्रियाः, न परमार्थसत्समुदायः । किं कारणम् ? तस्य रूपाद्यात्मकत्वात् तदेकदेशभूतस्य **रूपादे**रपरमार्थसतोऽप्यविभागावस्थस्य **एकस्यासर्वस्यालम्बनस्यासञ्चितवत्** न ह्येकोऽसर्वः कदाचिदालम्बनं रूपं रसः शब्दो वा यथाऽसञ्चिताः परमाणवः पूर्वस्मिन् वादे नैन्द्रियका
- /ms एवमसञ्चित- वदस्मिन् वादे लोकलोकोत्तरव्यवहारप्रत्यक्षाभिमतेषु **घटादिषु नीलादिषु चाभावान्न** प्रत्यक्षं तद्विषयं ज्ञानमित्यभिसम्बन्धः । किमुक्तं भवति ? रूपादयः सर्वैकात्मरूपा एव सन्ति न पृथक्स्वरूपाः । ततस्तद्विषयं ज्ञानमभावविषयत्वादप्रत्यक्षं वन्ध्यासुतादिविषयज्ञानप्रत्यक्षवदिति । अनया दिशा यदाभासं प्रत्यक्षं न सोऽस्ति विषयः, योऽस्ति न तदाभासं प्रत्यक्षम् इत्यादि

---

२४ त्वा ] °त्वात्सिद्धेः प्र° ॥
२५ न्निर्विक ] °कल्पकंnayacakra-ms-ya ॥
२५ ल्प ] °विषयित्वात् प्र° ॥
३ ल्पात्म ] °त्मकवत्वा° nayacakra-ms-ya । दृश्यतां पृ° ६३ पं° १ ॥
७ उ ] दृश्यतां पृ° ६४ पं° १ ॥
१७ मा ] °मार्थसमु°nayacakra-ms-bhā ॥
१८ तोऽप्य ] °प्यविव ?भासावस्थस्य प्र° ॥
२० श ] शब्दो यथाnayacakra-ms-ya ॥

विशेषैकान्तवादिनं प्रति योऽभिहितः प्रपञ्चः स सर्वो योज्यः । **तथासम्भावनेऽपि चेत्यादि**, रूपादेरेकस्य सत्त्वरजस्तमोगुणसाम्यावस्थानलक्षणप्रधानाख्यपदार्थत्वसम्भावनेऽपि । नैव तत्साम्यावस्थानं शब्दादिभेदैकसर्वात्मकत्वाभावरूपं सम्भाव्यते, सम्भाव्यमानेऽपि च तस्मिन्नव्यक्ते **तस्या**ऽव्यक्तस्यातीन्द्रियत्वादालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां **रूपादिसङ्घात आलम्बनमिति प्राप्तम्** । **ते च** रूपादयः **प्रत्येकं परमार्थतोऽसन्तः, इति**शब्दो हेत्वर्थे, इत्यतः कारणाद्रूपादिसङ्घातालम्बनत्वात् **तेषां** प्रत्येकं परमार्थसत्त्वाभावा**न्न विषयता** । रूपादयो न चक्षुरादिविषयाः, परमार्थतोऽसत्त्वात्, वन्ध्यासुतवत् । रूपादिविषयं वा न प्रत्यक्षम्, परमार्थतोऽसद्विषयत्वात्, वन्ध्यासुतज्ञानवत् । तस्माद् योनि-बीज-प्रकृति-बहुधानक-प्रधाना-ऽव्यक्तादिपर्यायाख्यं यद् वस्तु तदतीन्द्रियत्वादप्रत्यक्षम् । यदिन्द्रियविषयं तत्परिणामभेदे सङ्घाते रूपादि न तत् परमार्थसत् । **इत्या- द्यशेषं** विशेषैकान्तवादिमते **यथाभागं** योग यो भागो यथाभागं तद्विपर्ययेणाविशेषैकान्तवादेऽत्र यद् यत्र भजते तत् तथानुसृत्य **योज्य**मित्यतीतं ग्रन्थार्थं स्मारयति । तद्योजनोपायदिङ्मात्रप्रदर्शनार्थमप्याह— **भेदाभेदसंवृतिपरमार्थस्थानव्यवस्थापनये**ति । ये तत्र भेदरूपाः परमाणवः परमार्थसन्तस्तेऽत्र संवृतिसन्तः सर्वसर्वात्मकपरमार्थवादे, यस्तत्राभेदः परमाणुसमुदायः संवृतिसन् सोऽत्र परमार्थसन्नित्यनया व्यवस्थापनया योज्यम् । § 353

- /ms

पुनरुत्तरोऽपि ग्रन्थो योज्यः । तद्यथा --सर्वसर्वात्मकैकरूपान्तराविविक्तस्वतत्त्वे रूपादिसत्त्वादिसङ्घात इन्द्रियसन्निकृष्ट आलम्बनविपरीतैकरूपेयं प्रतिपत्तिः व्यपदेश्यानेकात्मकनीलरूपविषया, न च हेत्वपदेशाव्यपदेश्यैषा, यतः सर्वात्मकग्रहणापदेशेन धूमेनेवाग्निसामान्यवद् गृह्यते नानिर्देश्यरूपम् । 110/mj

* * *

नानात्वैकान्तवादेऽपि आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत् वै० सू० ३ । १ । १८ द्रव्यादिनिर्मूलत्वात् किमात्मादि ? इति न प्रत्यक्षम्, द्रव्यरूपादिभवनविशेषकारण-

---

२७ रूपादेरेक ] ०कस्या प्र० ॥
८ त ] ०नुष्टत्यnayacakra-ms-ya । ०नुष्वत्य nayacakra-ms-bhā ॥
९ स्थाप ] ०पनायेति प्र० ॥
१० न्त ] ०न्तः । तत्रnayacakra-ms-bhānayacakra-ms-ramnayacakra-ms-pā । ०न्तःतत्र nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi nayacakra-ms-hī ॥
११ संवृतिस ] ०सतृ सोत्रnayacakra-ms-ya । ०स शौत्र nayacakra-ms-bhā ॥
१४ त ] ०तथे प्र० । दृश्यतां पृ० ६५ पं० १ ॥
१४ स ] ०सन्निष्ट nayacakra-ms-ya ॥
१५ [illegible] ] अत्र ०[illegible]व्यप० इति समीचीनं भाति ॥
१५ प ] ०पदेश । व्यप०nayacakra-ms-bhā । ०पदेशव्यप० nayacakra-ms-ya ॥

* * *

किं कारणम् ? ततोऽन्यत् कल्पितमेकं रूपम् । ननु सर्वस्य कारकहेतुत्वेनापदेशः प्रत्यक्षप्रतिपत्तेः, न धूमवज्ज्ञापकहेत्वपदेशतयाग्नेरिवाऽर्थान्तरस्यानेकरूपत्वस्य । नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिः, यदीदं प्रत्यक्षं स्यात् कारकादेव स्वार्थादालम्बनाद्धेतोर्जायेत दाहानुभववत् प्रत्यक्षत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्य स्वलक्षणविषयत्वादनध्यारोपात्म- /ms कत्वादिति यावत् । अपि च कारकतापि सर्वस्य नैव तत्र, द्वितीयचन्द्रवत् परमार्थतोऽसत्त्वादनुपात्तव्यावृत्तिव्यवस्थानमात्रत्वात् । लोकवत्तु सर्वसत्त्वे विशिष्टोऽपदेशो व्यपदेशो ग्राह्यादन्यः, तेन व्यपदेशेन प्रमेयं व्यपदेश्यमनुमेयं न प्रत्यक्षम्, धूमानुमेयाग्निवत्, अकारकतायां कारकतायां वा वस्तुनः पितृधूमादिवत् । § 354

अभिधानाव्यपदेश्यानेकात्मकत्वे अपि च नैव, अनुमिताग्निवदेवैकानेकविषयत्वान्नीलस्य । तद्धि नीलरूपनिरूपणं विकल्पः, प्रतिपरमाणुपरस्परप्रतिभिन्नस्वतत्त्वानेकरूपैकतत्त्वैकरूपाध्यारोपात् सर्वसर्वात्मकैकरूपवस्तुरूपाद्यनेकरूपाध्यारोपाद्वा रूपान्तरसामान्यरूपविषयत्वात् तदतद्विषयवृत्तत्वादनपोहादपोहाद्वाऽग्न्यनुमानवत् तत्सामान्यात्मकतैव परमार्थस्थितसञ्चयप्रज्ञप्तिनीलाणुभेदपरिग्रहात्मकत्वात् साधारणार्थविविक्तकल्पनात्मकत्वान्न प्रत्यक्षमप्रत्ययप्रत्ययात्मकत्वाच्छब्दाश्रावणत्वप्रत्ययवत् । संवृत्यतीन्द्रियत्वाभ्यां हि न नीलादिषु न च सञ्चये कारणता तथाप्रतिपत्तिं प्रति । अनुमानज्ञानमपि च तन्न प्रतिपूर्यते, सम्बद्धगृहीतस्यान्यथाप्रतिपत्तेः, विरुद्धादिज्ञानवदिति समानमेतत् कल्पनात्मकत्वात् । अन्यदपि यथासम्भवं तत्प्रक्रियापतितं मुक्त्वा यदुभयोः सामान्यं तत् सर्वं योज्यम् । एवं तावद्विशेषाविशेषैकान्तवादयोः स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधत्वाल्लौकिकप्रत्यक्षविलक्षणं प्रत्यक्षं कल्पितमपि त्वयुक्तमित्युक्तम् । § 355

**नानात्वैकान्तवादेऽपि सामान्यविशेषयोः**अयुक्तं प्रत्यक्षम् इति वर्तते । कीदृशं वा तत् प्रत्यक्षं कथमयुक्तं वा ? इति, **आत्मेन्द्रियमनोर्थसन्निकर्षाद्** - /ms **यन्निष्पद्यते तदन्यत्**, आत्मा मनसा मन इन्द्रियेण इन्द्रियमर्थेनेति चतुष्टयत्रयद्वयसन्निकर्षादुत्पद्यमानं प्रत्यक्षमित्येतदपि नानात्वैकान्तवादिमतं **द्रव्यादिनिर्मूलत्वात् किमात्मादि ? इति न प्रत्यक्षम्**, द्रव्यमादिर्येषां त इमे

२२ तोऽन्य ] °न्यत कल्पि° प्र° ॥
२२ न ] तुलना पृ° ६६ पं° १ ॥
२५ दाहानुभ ] भवत्nayacakra-ms-ya ॥
१ अ ] तुलना पृ° ६७ पं° १ ॥
४ अ ] तुलना पृ° ६८ पं° १ ॥
८ रू ] °रूपरूपैक° प्र° ॥
८ त्वैक ] °कगपाध्या°nayacakra-ms-bhā । दृश्यतां पृ° ६९ पं° १ ॥
१२ म ] °मप्रत्ययात्मकत्वा° प्र° । दृश्यतां पृ° ६९ पं° ४ ॥
१४ विरुद्धा ] °द्धावदिति प्र° ॥
१७ म ] °मपि च युक्त°nayacakra-ms-ya ॥
२० आ ] दृश्यतां पृ° ५९ पं° २२ ॥
२२ वा ] °वादिनमतंnayacakra-ms-ya ॥
२३ त्वात् ] किमादीनि नnayacakra-ms-ya ॥

द्रव्यादयो द्रव्यगुणकर्मसामान्यविशेषसमवाया अद्रव्यत्वात् [द्रव्येभ्योऽन्ये] खपुष्पवन्न स्युः, एवं गुणेभ्योऽन्ये न स्युरगुणत्वात्, अकर्मत्वात् कर्मणोऽन्ये, असामान्यत्वात् सामान्यतोऽन्ये, अविशेषत्वाद् विशेषेभ्योऽन्ये, असमवायत्वात् समवायादन्ये, निर्मूलत्वाच्च खपुष्पवत् सर्वे । तस्य निर्मूलत्वं चापरिणामित्वाद् वन्ध्यापुत्रवत् । अतोऽसत्त्वादात्मादीनामात्ममनोऽक्षार्थभावे किमात्मादि, यत्सन्निकर्षाज्ज्ञानमुत्पद्येत ? कस्य तत्, आत्मद्रव्याभावात् ? किं तत्, गुणाभावात् ? **इतिशब्दो** हेत्वर्थे, राजपुरुषोऽस्मीति न बिभेमि इति यथा तथा **इति न प्रत्यक्षम्,** आत्मादिद्रव्याणां ज्ञानादिगुणानां चाभावान्नास्ति प्रत्यक्षमित्यर्थः । तेषां चात्मादीनामन्यथा परमार्थतो विद्यमानानामनेकान्तात्मकानामेकान्तात्मतया कल्पनादन्यथाध्यारोपात् कल्पनात्मकत्वादिभ्यो हेतुभ्यो भ्रान्त्यादिवन्न प्रत्यक्षमिति पूर्वोक्तं तदेव व्याचष्टे --**द्रव्यरूपादी**त्यादि यावत्**कल्पनात्** । 111/mj

* * *

कार्यतदतत्पदार्थानेकान्तस्वतत्त्वान्यतमैकान्तकल्पनात् कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवत् ।

अतः सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहवदेव सामान्यविशेषौ घटादिविषयाविति विधिः ।

एष च वेदवादिभिरपि लोकप्रमाणक आज्ञानिकवाद उपजीव्यते यस्याय-

* * *

**द्रव्य**ग्रहणेन पृथिव्यादीनां तत्कल्पितानां सर्वगुणानां गुणग्रहणेन **भवन**ग्रहणेन सत्तायाः **विशेष**ग्रहणेन गोत्वादीनां यावदन्त्यविशेषस्य **कारण**ग्रहणेनावयवादिद्रव्याणां संयोगादिगुणानां कर्मणां च ग्रहणम् । **कार्य**ग्रहणेन - /ms द्व्यणुकाद्यवयविद्रव्याणां चित्रादिगुणानां च ग्रहणम् । तत्र परमार्थतः **स च असश्च पदार्थो**ऽनन्तरोक्तो द्रव्यादिः, तस्या**नेकान्तः स्वतत्त्वं** द्रव्यमपि रूपाद्यपि भवनमपि विशेषोऽपि कारणमपि कार्यमपीति । तस्य **तस्यान्यतमैकान्तकल्पना**दतत्त्वं द्रव्यमेव गुण एव कर्मैव भवनमेव विशेष एव *नेतरस्वतत्त्वमपीति । तस्मात् कल्पनात्मकत्वं सिद्धम् । ततः **कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवद**प्रत्यक्षम् । कल्पनात्मकत्वादयः प्रागुक्ताध्यारोपात्मकालम्बनविपरीतप्रत्ययत्वादयः । § 356

**अतः सर्वप्रमाणाविरोधी**त्यादि याव**द्विधिरि**ति । **अत** इत्यनन्तरोक्तसर्वोपपत्तिप्रपञ्चतो यत् प्राक् प्रतिज्ञातं **यथालोकग्राहमेव वस्तु** इति त-

---

२ चा ] च भावा° प्र° ॥
३ कानामेका ] °कात्तामेतया प्र° ॥
१७ न्त ] °न्तरोक्तो
व्यादिःnayacakra-ms-bhā ।
°न्तरोक्ता व्यादिः nayacakra-ms-ya
॥

२० * ] नतर°nayacakra-ms-ya ॥
२१ प्रा ]
°क्ताऽध्यारो°nayacakra-ms-ya ॥
२४ प्राक् ] पृ° ११ पं° ३ ॥

न्निगमयति सोपपत्तिकं **सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहवदेवेति**, प्रत्यक्षानुमानागमप्रमाणैरनवधारितकारणकार्योभयानुभयात्मकं तस्य तस्य वस्तुनो भावस्तत्त्वमविरोधि, तस्मिंस्तत्त्वे तत्त्वस्य तत्त्वेन वा व्यवहारः, तस्मिन् समवस्था यस्य लोकस्य तस्य लोकस्य परिग्रहः स सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहः, तद्वत् तेन तुल्यं वर्तत इति । **एवे**त्यवधारणे, तादृग्लोकपरिग्रहवदेव **सामान्यविशेषौ**, न तु सामान्यमेव विशेष एव परस्परतो भिन्नावभिन्नावेवेति वा यथा शास्त्रेषु कल्पिताविति । अथवा सर्वप्रमाणाविरोधिनि तत्त्वव्यवहारे समवस्था यस्य स लोकः सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थः, तस्य परिग्रहवदेव सामान्यविशेषौ नान्यथेति यथा प्रतिपादितं लोकवदेव **घटादिविषयाविति**,
- /ms यथा लोके घटादिभवनमेव सामान्यं विशेषश्च द्रव्यक्षेत्रकालभावरूपभवनाविशेषविशेषाभ्यामुक्तविधिना कार्यकारणादिभेदेन वा नियतौ सर्वत्र न मर्यादयेत्यनवधृतस्वभावौ । **इति** *विधिः, इति प्रदर्शने, एष विधिरित्थं विचारितो यः पृथगुद्दिष्टः । § 357

**एष च वेदवादिभिरपि लोकप्रमाणक आज्ञानिकवाद उपजीव्यत** इति । नयानामेकैकस्य शतधा भेदात् सप्तनयशतानि **आर्षे** व्याख्यायन्ते, तेषां
112/mj पुनश्चतुर्धा सङ्क्षेपः क्रिया-ऽक्रिया-ऽज्ञान-विनय

* * *

मन्यो भेदः--सर्वमिदमज्ञानप्रतिबद्धमेव जगत् पृथिव्यादि । इन्द्रियाण्यपि च तन्मयान्येवाचेतनानि । तत्करणत्वात् तैः प्रकाशितं स्थूलमज्ञं प्रतिपद्येत ज्ञः । तस्यापि चेन्द्रियसन्निकृष्टस्यासाधारणस्वरूपस्य न निरूपणोपायोऽस्ति, प्रत्येकं समुदाये वा

* * *

वादसमवसरणवचनात् तत्रोक्तः, आज्ञानिकवादः किञ्चिन्न ज्ञायते, *को ह वैतद् वेद ? किं वाऽनेन ज्ञातेन ? इत्यशक्यप्राप्त्यफलत्वाभ्यां वस्तुतत्त्वविचारो न युज्यते, क्रियाया एवोपदेशोऽतः श्रेयान् इति लेशेनाभ्युपगतत्वात्

---

२५ स्थ] °स्थालोक° प्र° ॥
२९ स्थ] °स्थालोकेप° प्र° ॥
३१ स्प] °स्परो भिन्नौ प्र° ॥
२ स्थः] °स्थस्य परि° प्र° ॥
५ विशेषा] °षास्यामुक्त° प्र° ॥
६ धृ] °धृतेस्वभावौ प्र° । अत्र °धृतेकस्वभावो इत्यपि पाठः स्यात् ॥
६ *] विधेः प्र° ॥
७ पृ] प्रथद्दिष्टःnayacakra-ms-bhā । अत्र प्रथम उद्दिष्टः इत्यपि पाठः स्यात् ॥
८ च] वेदनादिभि° प्र° ॥
९ आ] आर्थेnayacakra-ms-bhā । अर्थे nayacakra-ms-ya ॥
१० स] संक्षेपः क्रियाज्ञान° प्र° । चत्तारि वा+इसमोसरणा पण्णत्ता, तं जहा--किरियावा+ई अकिरियावा+ई अण्णाणियवा+ई वेण+इयवा+ई इति स्थानाङ्गसूत्रे चतुर्थस्थाने ॥
१६ त] तत्रोक्तं तेज्ञानिकवादःnayacakra-ms-ya । तत्रोक्तान्तज्ञानानिकवादः nayacakra-ms-bhā ॥
१६ *] कोहंnayacakra-ms-ya ॥
१८ लेशेनाभ्यु] दृश्यतां पृ° ३५ पं° ४, पृ° ४५ पं° २ ॥

। **यस्यायमन्यो भेद** इति तस्यैवाज्ञानवादस्यान्योऽयं भेदः । कतमोऽसौ भेदः ? **सर्वमिदमज्ञानप्रतिबद्धमेव जगत् पृथिव्यादी**ति । कथम् ? रूपादिमत्त्वाद् घटादिवत् । **आदि**ग्रहणात् पृथिव्यप्तेजोवायवः । नन्वेते पदार्था अज्ञा एव, किमर्थमज्ञानप्रतिबद्धं जगत् पृथिव्यादीत्युच्यते ? उच्यते--आकाशकालदिगात्मेन्द्रियमनःप्रभृतीनामपि तद्व्यतिरेकेणानुपलब्धेर्न सन्ति तन्मयत्वादेव च तद्वदचेतनान्यत आह --**इन्द्रियाण्यपि च तन्मयान्येवाचेतनानी**ति । तन्मयत्वानुमानं च **भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने । तथापस्तेजो वायुश्च रसरूपस्पर्शेषु रसरूपस्पर्शविशेषात्** वै॰ सू॰ ८ । २ । ५-६ इति । § 358 - /ms

स्यान्मतम्--प्रत्यभिज्ञानाहङ्कारेच्छादिविशेषलिङ्गदर्शनादात्मा तद्गुणस्तद्व्यतिरिक्तोऽस्तीति । एतच्चायुक्तम्, गुणगुणिनोर्भेदमिच्छतां ज्ञानादन्यत्वसाम्यात् पृथिव्यादिगुणत्वेऽपि तुल्यानुमानत्वात् । अभ्युपेत्यापि आत्मादिव्यतिरेकं **तत्करणत्वात्** तेषामिन्द्रियाणां करणत्वात् तानि वाऽस्य करणानि तत्करणो ज्ञः, **तैः** करणैः **प्रकाशितं** घटादि**स्थूलमज्ञं** प्रकाश्यत्वादेव चान्यमप्यर्थं प्रकाश्य प्रतिपद्यमानोऽपि **प्रतिपद्येत ज्ञः**, सम्भाव्यमानप्रतिपत्तिरपि पुरुषः स्थूलमेवार्थं प्रतिपद्येताज्ञानात्मकम् । करणानि चाज्ञानि । अचेतनकरणप्रकाशितमप्यचेतनं प्रदीपप्रकाशितघटादिवदेव स्यात् स्थूलं च, न परमाण्वादि सूक्ष्मं शुद्धं चेतनस्वरूपपुरुषादि वा स्यादज्ञानाप्रतिबद्धम् । **तस्यापि चेन्द्रियसन्निकृष्टस्ये**त्यादि । सत्यपि च तस्य स्थूलस्य ग्राह्यत्वे तत्स्वरूपाज्ञानादज्ञानसम्बद्धमेव । तस्येन्द्रियसन्निकृष्टस्य द्रव्यान्तरव्यतिरिक्त**मसाधारणं** यत् **स्वरूप**मात्मादेर्वातीन्द्रियस्य तस्य क्वचित् कदाचिददृष्टत्वात् इदमिदम् इति **न निरूपणोपायोऽस्ति** । निरूपणं निर्णयज्ञानमिष्टम् । किं कारणं न निरूपणोपायोऽस्ति इदमिदम् इति चेत्, उच्यते --**प्रत्येकं समुदाये वा तद्दृष्ट्यनुपपत्तेः**, तस्यासाधारणरूपस्यापूर्वस्यापूर्वत्वादेव दृष्ट्यनुपपत्तिर्निर्णयानुपपत्तिश्च ।

---

१९ म] ॰मन्येnayacakra-ms-ḍenayacakra-ms-līṃ । ॰मन्य nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-vi ॥
१९ त] तस्यैव ज्ञान॰ प्र॰ ॥
२० मिद] ॰दज्ञान॰ nayacakra-ms-bhā । ॰दं ज्ञान॰ nayacakra-ms-ya ॥
२१ अ] अज्ञान एवnayacakra-ms-ya ॥
२ इन्द्रिया] ॰याद्योपि च तन्मयानेवा॰ प्र॰ ॥
३ त] तथा तेजो प्र॰ । तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात्--इति मुद्रिते वैशेषिकसूत्रे पाठः ॥
८ त्क] ॰णोऽज्ञःnayacakra-ms-bhā ॥
१० प्र] प्रतिपद्यमानेपि प्रतिपद्येत ज्ञःnayacakra-ms-ya । प्रतिपद्यत ज्ञः nayacakra-ms-bhā ॥
११ र] कारणानि च ज्ञानिnayacakra-ms-ya ॥
१३ ज्ञा] ॰ज्ञानादिप्रति॰nayacakra-ms-ya ॥
१५ न्निकृ] ॰कृष्टद्रव्यान्तर॰ प्र॰ ॥
१६ मात्मादेर्वातीन्द्रिय] ॰न्द्रियस्य क्वचित् प्र॰ ॥
१८ दृष्ट्य] ॰ष्टानुप॰nayacakra-ms-ya ॥
१९ दृष्ट्य] ॰ष्टानुप॰nayacakra-ms-ya ॥

प्रत्येकं तावन्न हि घट एकैकः कृष्णादिरूपोऽपूर्वत्वाद्दृश्यते स्वरूपतः, तत एव प्रत्येकमनिरूपितस्वरूपाणां कुतो निरूपणं समुदाये, सिकतासु प्रत्येकमनिरूपितस्य समुदाये तैलस्य निरूपणाभाववत् ? निश्चयेन रूपणं [निरूपणम्], तदुपायाभावात् अज्ञानप्रतिबद्धमेव सर्वम् इति साधूक्तम् ।
§ 359

113/mj

**तद्दृष्ट्यनुपपत्तेः । स्वसंवेदनेनोच्छ्वसनाभ्यवहृतपरिणतिसुप्तादिचलनकण्डूयनस्फुरणघ्राणरसनादिक्रिया असञ्चेतिताः । इत्थं कल्पिताकल्पिततथाभूतप्रत्ययानुपपत्तेरज्ञानानुविद्धमेव सर्वं ज्ञानम् । परिच्छेदार्थश्च प्रमाणव्यापारः । न चेत्थं तत्परिच्छेदोऽस्ति ।** § 360

**न च अज्ञानम् इत्युक्तविरोधः, राधकपूर्णकमातृव्यपदेशवद्विशेष्यप्राधान्यादनवधारणाज्ज्ञानाज्ञानयोरविशेषात् संशयविपर्ययानध्यवसायनिर्णयावगमावबोधार्थत्वात् ।** § 361

स्यान्मतम्--अनुभवितुर्बाह्यविषयम् इदमिदम् इति निरूपणं मा भूद्
- /ms यदि न भवति, स्वसंवेदनं त्वान्तरं सुखदुःखादिषु किं निरूपणं न भवति ? इति । उच्यते --**स्वसंवेदनेनोच्छ्वसनाभ्यवहृतपरिणती**त्यादि, व्यभिचारान्न भवति, प्राणापानावसञ्चेतयन्नेव हि कुरुते सर्वो लोकः, अभ्यवहृतमपि खलरसभावेन रसरुधिरादिभावेन च परिणमयन्न सञ्चेतयति स्वयमेव । तथा **सुप्तादीनां चलनकण्डूयनस्फुरणादिक्रियाः** कुर्वतामसञ्चेतयमानानामेव ताः क्रिया दृश्यन्ते । सुप्त-मत्त-मूर्च्छित-गर्भाः सुप्तादयः । तथान्यमनसामव्यक्तचलनकण्डूयनमशकदंशस्पर्शसंवेदनं गन्धादिज्ञानं सुप्तादीनां चाम्लद्रव्यास्वादनमसञ्चेतितम् । **रसन**मास्वादनमित्यर्थः । **आदि**ग्रहणात् क्षुतजृम्भितकासितादयः । यथैताः क्रिया **असञ्चेतिता**स्तथा स्वसंवेदनमपि । **इत्थं कल्पिताकल्पिततथाभूतप्रत्ययानुपपत्तेः**, कल्पितस्तावत् कल्पितत्वादेव तथाभूतो न भवति प्रत्ययः, अकल्पितोऽपीत्थमुक्तविधिना नोपपद्यते तथाभूतः प्रत्ययः शुद्ध इत्यर्थः । तस्मात् कल्पिताकल्पिततथाभूतप्रत्ययानुपपत्ते**रज्ञानानुविद्धमेव सर्वं ज्ञान**मिति । **परिच्छेदार्थश्च प्रमाणव्यापारः**, प्रमाणं हि व्याप्रियमाणं यथार्थपरिच्छेदार्थमिष्यते, **न चेत्थं तत्परिच्छेदोऽस्ती**ति वैधर्म्यं दर्शयति । § 362

स्यान्मतम्--अज्ञानप्रतिबद्धम् इत्यज्ञानशब्दोच्चारणादेव ज्ञानाभ्युपगमः कृतो भवति प्रतिषेधस्याऽब्राह्मणवदन्यत्र प्रसिद्धविषयत्वात्, अन्यथा प्र-

---

२० ता ] तावंत हि प्र° ॥
९ ना ] °नाद्यवहृत° प्र° ॥
१० प्राणापा ] °पानार्थसञ्चेत° प्र° ॥
१५ र ] रसेन° प्र° ॥
१६ का ]
°काश्विता°nayacakra-ms-ya ॥

तिषेधानुपपत्तेः स्ववचनविरोधाच्च । तदपि **न चाज्ञानमित्युक्तविरोधः ।** *किमिव ? **राधकपूर्णकमातृव्यपदेशवत् ।** कुतः ? **विशेष्यप्राधान्यादनवधारणात्,** का भावना ? **यथा** राधकस्य पूर्णकस्य वैकैव माता विवक्षिता भवति तदा राधकमाता इति राधकेन विशिष्यमाणा पूर्णकमाता इति पूर्णकेन वा अथ राधकपूर्णकमाता इत्युभाभ्यां वा, सर्वथा राधकस्यैव पूर्णकस्यैव वा मातेत्यवधारणं नास्ति, विशेष्यप्राधान्यात्, **तथा** ज्ञानाज्ञानाभ्यां तदेव विशिष्यते वस्त्विति विशेष्यप्राधान्यान्नोक्तिविरोधो **ज्ञानाज्ञानयोरविशेषात्** । न तु यथा विशेषणप्राधान्यादवधारणं नीलमुत्पलम् इति । अतस्तेषामवबोधार्थाभेदाज्ज्ञानत्वमज्ञानत्वं चाविशिष्टमिति तत् प्रदर्शयन्नाह --**संशयविपर्ययानध्यवसायनिर्णयावगमावबोधार्थत्वात् । गमॢ सृपॢ गतौ** पा० धा० ९८२--९८३, अव पूर्णगमनमवगमः, अवगमश्चावबोधः, **अबुध वगमने** पा० धा० ८५८, ११७२ इति वचनात् । सर्वेषां संशयविपर्ययनिर्णयानध्यवसायानामवगमार्थत्वादवगमस्य चाववबोधपर्यायत्वात् । § 363

114/mj

तस्मादेतस्मिन्नयभङ्गेऽज्ञात एव शब्दस्यार्थः । यथा चाहुः—

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवताशब्दैः सममाहुर्गवादिषु ॥ वाक्यप० २ । १२१ § 366

सर्वाणि च पदानि वाक्यार्थः । § 367

व्यवहारदेशत्वाच्चास्य द्रव्यार्थता । द्रव्यशब्दो द्रुगतिर्यात्रा व्यवहारो लोकस्य § 368

**तस्मादेतस्मिन् नयभङ्गेऽज्ञात एव शब्दस्यार्थः ।** भङ्गग्रहणं भङ्गान्तरसूचनार्थम्, परस्परनिरपेक्षाणां भङ्गानां वृत्तेर्मृषात्वात् तद्विपर्ययायाः सत्यत्वात् तेषां च विधिनियमयोरेव भङ्गत्वान्नयानाम् । तस्मादस्मिन्नेव नयभङ्गे शब्दस्याज्ञातोऽर्थः, नान्येषु, तेष्वप्यन्येऽन्येऽर्था इति । एतस्य दर्शनस्य ज्ञापकमाह— **यथा चाहुः--अस्त्यर्थः सर्वशब्दानामिति** श्लोकः । सत्तामात्रमर्थः सर्वशब्दानाम्, कोऽप्यस्यार्थोऽस्ति, न निरर्थकः शब्दः, स पुनरर्थो न निरूप-

२६ *] किमव प्र० ॥
२६ प्राधान्याद ] °दन्यव°nayacakra-ms-ya ॥
२७ य ] यथा यथाnayacakra-ms-ya ॥
२७ रा ] राधकपूर्णकस्य प्र० ॥
३० ज्ञा ] ज्ञानाभ्यां प्र० ॥
७ म ] °मस्य बाधबोधपर्या° प्र० ॥
१५ प ] परस्पर+इप्रतिनिर-पेक्षाणांnayacakra-ms-ya ॥
१५ त ] तद्विपर्यायाः प्र० ॥
१८ य ] यथा बहुः प्र० ॥

यितुं शक्यः अयमयम् इति, एतत् **प्रत्याय्यलक्षणम्** । तत्र दृष्टान्तोऽ**पूर्वदेवतास्वर्ग**शब्दानामर्थाः, यथा तेषामत्यन्तापरिदृष्टत्वात् ईदृशोऽपूर्वः स्वर्गो देवता वेदृशी इति न प्रतिपद्यामहे निरूपणेन तथा गवादिशब्दानामप्यर्थैस्तत्समैरेव भवितव्यम्, न हि गमनगदनगर्जनादिष्वर्थव्यवस्था विशेषरूपेति कश्चिदस्त्यर्थः इत्येतावत् प्रतिपत्तव्यम् । एतस्मिन्नेव नयभङ्गे **सर्वाणि च पदानि वाक्यार्थः** । तद्यथा--देवदत्त ! गामभ्याज शुक्लां दण्डेन इत्यत्र परस्पराविवेकेन सङ्कीर्णरूपाणि पदानि एकार्थानि अन्वयव्यतिरेकाभ्यामनुगम्यमानं सम्पिण्डितमेवार्थं ब्रूयुर्न पृथग्भूतम् । तस्मात् सर्वाणि पदानि वाक्याय वाक्यार्थः, पदान्येव वाक्यार्थः, नैकैकं न तद्व्यतिरिक्तम् । यथोक्तम् --**अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्** मीमांसासू॰ २ । १ । ४६ इति । न तु यथान्यैः कल्प्यतेऽन्यथा— - /ms

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥§ 371

पदमाद्यं पृथक् सर्वं पदं सापेक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥ वाक्यप॰ २ । १--२§ 373

इति, अलौकिकत्वादशक्यप्राप्त्यफलत्वाभ्यामेव । § 374

क्व पुनरयं नयोऽन्तर्भाव्यते, किं द्रव्यनयभेदे ? पर्यायनयभेदे ? उच्यते --**व्यवहारदेशत्वाद्यास्य द्रव्यार्थता, लौकिकसम उपचारप्रायो विस्तृतार्थो**
115/mj **व्यवहारः** तत्वार्थभा॰ १ । ३५ इति वचनात् तस्य

---

२१ त्ताप] ॰परदृष्ट॰ प्र॰ ॥
२२ ब्दानाम] ॰प्यर्थो तत्समै॰nayacakra-ms-ya ॥
२३ ग] **गमनागदन॰** प्र॰ । केश्चिन्निर्वचनं भिन्न गिरतेर्गर्जतेर्गमेः । गवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितम् ॥ २ । १७५ ॥ यथैव हि गमिक्रिया जात्यन्तरैकार्थसमवायिनीभ्यो गमिक्रियाभ्योऽत्यन्तभिन्ना तुल्यरूपत्वविधौ त्वन्तरेणैव गमिमभिधीयमाना गौरिति शब्दव्युत्पत्तिकर्मणि निमित्तत्वेन आश्रीयते तथैव गिरति गर्जति गदति इत्येवमादयः साधारणाः सामान्यशब्दनिबन्धनाः क्रियाविशेषास्तैस्तैराचार्यैः गोशब्दव्युत्पादनक्रियायां परिगृहीताः— इति वाक्यपदीयस्ववृत्तौ २ । १७५ । गच्छति गदति गर्जति वा गौः--इति पातञ्जलमहाभाष्यस्य भर्तृहरिविरचितायां त्रिपाद्याख्यायां वृत्तौ ॥

१ तिप] ॰पत्तव्यं तस्मिन्नेवnayacakra-ms-ya । ॰पत्तव्यतस्मिन्नेव nayacakra-ms-bhā ॥
४ मेवा] ॰मिवार्थं प्र॰ ॥
४ प] **पदानि वाक्यार्थः पदान्येव वा वाक्यार्थः**nayacakra-ms-ya । nayacakra-ms-bhā प्रतिपाठे तु चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः पा॰ २ । १ । ३६ इति सूत्रानुसारेण वाक्याय इति वाक्यार्थः इति चतुर्थीतत्पुरुषोऽत्र विवक्षितो विशेष्यलिङ्गवचनानुसारिता तु नादृतेति भाति ॥
९ नु] ॰संदृतिःnayacakra-ms-bhā । ॰संवृतिः nayacakra-ms-ya ॥
१३ प] **पर्यय॰**nayacakra-ms-bhā ॥
१४ द्र] **द्रव्यार्थतो** प्र॰ ॥

* * *

तस्या अवयव एकदेशोऽसमस्तवृत्तिरन्यथावृत्तित्वात् । लोके हि तदेकदेश-वृत्तिता मृद्घटादिसामान्यविशेषत्वद्रव्यत्वानामिति दिक् ।

तस्मादन्यत्ववस्तु, अलौकिकत्वात्, खकुसुमवत्, व्यतिरेके घटवत् ।

निबन्धनं चास्य--आता भंते ! णाणे, अण्णाणे ? गोतमा ! णाणे णियमा आता, आता पुण सिया णाणे सिया अण्णाणे । भगवतीसू° १२ । ३ । ४६७

* * *

द्रव्यार्थभेदत्वात् । लोकव्यवहारविषयो हि व्यवहारः, तदेकदेशो विधिनयः, तस्माद्द्रव्यार्थभेदः । यथा—

दव्वट्ठियणयपगती सुद्धा संगहपरूवणाविस+ओ ।
पडिरूवं पुण वयणत्थणिच्छ+ओ तस्स ववहारो ॥ सन्मति° १ । ४§ 377

तस्य शब्दार्थव्युत्पत्तिदर्शनार्थमाह --**द्रव्यशब्द** इति, द्रोरवयवो द्रव्यम् इति व्युत्पादितत्वात् अथ द्रुः कः ? **दु द्रु गतौ** पा° धा° ९४४, ९४५, तत्तुल्यार्थमव्युत्पन्नं प्रातिपदिकम्, **द्युद्रुभ्यां मः** पा° ५ । २ । १०८ इति निपातितत्वात्, तस्यार्थो **द्रुर्गतिर्यात्रा व्यवहारो लोकस्येति** । **तस्या** यात्राया **अवयव एकदेश** इत्यर्थकथनम् । स एकदेशः क इति चेत्, - /ms उच्यते--एकदेशो**ऽसमस्तवृत्तिरन्यथावृत्तित्वात्**, समस्तलोकव्यवहारविपरीत-वृत्तित्वान्मिथ्यादृष्टिरित्यर्थः । सा पुनरस्या विधिवृत्तेरेकदेशवृत्तिता कुतः परिच्छिद्यत इति चेत्, लोकत एव परिच्छिद्यत इत्यर्थः । यस्मा**ल्लोके तदेकदेशवृत्तिता मृद्घटादिसामान्यविशेषत्वद्रव्यत्वानाम्**, मृत् सामान्यम्, घटो विशेषः, मृदः सामान्यं द्रव्यत्वम्, घटविशेषश्छिद्रबुध्नखण्डौष्ठ-सम्पूर्ण-रक्त-कृष्णतादिः । सर्व एवैषोऽपरित्याज्योऽर्थकलापः समस्तवृत्तौ नयानां यथास्वं च प्रमाणवशाद्व्यवस्थाप्यः । तस्याज्ज्ञानानुविद्धत्वैकान्ताद्वक्ष्यमाणदोषसम्बन्धाच्च लौकिकस्याप्यस्याऽयुक्तिः । **इति** परिसमाप्तौ, विधिनयशतभेदे **दिगिति** ।
§ 378

---

२३ द्र] द्रव्यार्थभेदात् प्र° ॥
२ प] °पग+ईnayacakra-ms-ya ॥
२ प] °परूपणा°nayacakra-ms-bhā ॥
६ द्यु] दुद्रुभ्यां प्र° ॥
७ तिर्यात्रा] °र्यत्रा प्र° ॥
८ थ] °कथनांnayacakra-ms-bhā । °कथना nayacakra-ms-ya ॥
९ विप] °रीतवर्त्तित्वान्मि° प्र° ॥
१४ य] यथास्व च प्रमाण°nayacakra-ms-bhā । यथास्वप्रमाण° nayacakra-ms-ya ॥
१६ स्या] °प्यन्या[य्या ?]युक्तिःnayacakra-ms-ya । °प्यत्यायुक्तिः nayacakra-ms-bhā ॥
१६ श] °शत-भेदोnayacakra-ms-raṃnayacakra-ms-hī विना । °शतभेदा nayacakra-ms-raṃ nayacakra-ms-hī ॥

तस्मादन्यत् **त्ववस्तु, अलौकिकत्वात्, खकुसुमवदिति** गतार्थम् । अभिप्रायार्थः--स तु मन्यते लोकोऽलौकिकैकान्तं **साङ्ख्यादिपरिकल्पित-** मवस्त्विति । **व्यतिरेके घटवदिति,** यद्वस्तु तल्लौकिकमेव यथा घटः कार्यं वा कारणं वा सामान्यं वा विशेषो वा यो वा स वास्तु यथालोकप्रसिद्धि पृथुबुध्नादिप्रागुक्तसामान्यविशेषभवनात् स च लौकिक इति । **व्यतिरेके वैधर्म्ये** । § 379

सर्वनयानां जिनप्रवचनस्यैव निबन्धनत्वात् किमस्य निबन्धनमिति चेत्,
116/mj, उच्यते, **निबन्धनं चास्य— आता भंते ! णाणे, अण्णाणे ?** इति स्वामी
- /ms **गौतमस्वामिना** पृष्टो व्याकरोति ***गोतमा ! णाणे णियमा आता,** ज्ञानं नियमादात्मा ज्ञानस्यात्मव्यतिरेकेण वृत्त्यदर्शनात् । **आता पुण सिया णाणे सिया अण्णाणे,** आत्मा पुनः स्याज्ज्ञानम्, स्यादज्ञानमप्यसौ ज्ञानावरणीयकर्मवशीकृतत्वात् संशयविपर्ययानध्यवसायबाहुल्यादित्यस्मात् सूत्रादेतद् मिथ्यादर्शनं निर्गतमज्ञानोक्तिविरोधसमाधिमदिति । § 380

इ[१]ति विधिभङ्गारः प्रथमो द्रव्यार्थभेदः समाप्तः ॥

# २ अथ द्वितीयो विधिविध्यरः ।

117/mj

ओँ अर्हम् § 382

## अयमपि तु विधिवृत्त्येकान्तो विप्रतिषेधादयुक्तः । तद्यदि लोकतत्त्वमज्ञेयमेव लोकतत्त्वव्यावर्तनं तर्ह्यप्रत्ययमेव । यदि तज्ज्ञानमफलमेव किमिति शास्त्रविहितार्थ- § 383

**अयमपि तु विधिवृत्त्येकान्तो विप्रतिषेधादयुक्त** इति । कः पुनः सम्बन्धः ? स्वविषयसम्पातनेनार्थानां भावनात्मभिर्विधिनियमवृत्तिभिर्विदित-

१. इतिnayacakra-ms-ya प्रतिषु नास्ति ॥

१९ ते ] लोकोकान्तं प्र° ॥
२० का ] कार्यं कारणं वाnayacakra-ms-ya ॥
२२ भ ] °भावनात् प्र° । अस्मिन् पाठे तु स्वारस्ये °भावितत्वात् इत्यर्थमभिप्रेत्य सङ्गमनीयम् ॥
२ आ ] आया भंते नाणे अन्नाणेnayacakra-ms-ya ॥
३ *] गो° नाणे नियमा अतोnayacakra-ms-ya ॥
४ आ ] आया पुण सिय नाणे सि+अ अन्नाणेnayacakra-ms-ya ॥
७ माधिम ] °मवदिति प्र° । अत्र °मवददिति इत्यपि पाठः स्यात् ॥

५ विधिवृत्त्येका ] °कान्तो पिप्रति° प्र° ॥
६ स ] °संघात° प्र° ॥
६ भा ] भावानान्म-भि°nayacakra-ms-pānayacakra-ms-ḍenayacakra । भावान्नात्मभि° nayacakra-ms-vi । दृश्यतां पृ° १० पं° ५ ॥
६ वृ ] °वृत्तिभिवि-दित°nayacakra-ms-pānayacakra-ms-ḍenayacakr । °वृत्तिभिरविदित° nayacakra-ms-raṃ nayacakra-ms-hī । °वृत्तिभिरनेकान्तविदित° nayacakra-ms-vi ॥

प्रत्येकतत्त्वाभिः समधिगम्या जैनसत्यत्वसाधनवृत्ता विवक्षितद्वादशविकल्पविशेषणैकैव वृत्तिरधिकृतेत्यनन्तरोक्ताया विधिवृत्तेरपि प्रत्येकवृत्ताया मिथ्यादृष्टित्वादयमपि तु विधिवृत्त्येकान्तस्त्याज्यः । कस्मात् ? अयुक्तत्वात्, अयुक्तत्वं विप्रतिषेधात् । विरुद्धः प्रतिषेधो विप्रतिषेधः, **सर्वमुक्तं मृषा** इति प्रतिषेधवत् । **अपि**शब्दात् सामान्यविशेषोभयवादैकान्तः प्रथमनयदूषितोऽनुमत इत्ययमभिसम्बन्धः । § 384

कथं विप्रतिषेध इति चेत्, उच्यते--यदुक्तं त्वया **सर्वमज्ञानानुविद्धमेव ज्ञानम्, न च ज्ञानाज्ञानयोः कश्चिद्विशेषोऽस्ति संशयविपर्ययानध्यवसायनिर्णयानामवबोधैकार्थत्वात्, न लोकतत्त्वं ज्ञातुं शक्यम्, विफलश्च विवेकयत्नः** शास्त्रेषु इति । **तद्यदि लोकतत्त्वमज्ञेयमेव सर्वशास्त्रविहितलोकतत्त्वव्यावर्तनं तर्ह्यप्रत्ययमेव** अशक्यप्राप्यफलत्वाभ्याम्, प्रतिषेधस्य प्रतिषेध्यस्वरूप- - /ms ज्ञानविषयत्वाच्च किं त्वयैवेदं विदित्वाऽविदित्वा वा **सामान्यविशेषौ स्वविषयौ परविषयौ वा स्याताम्**इत्यादि लोकतत्त्वं शास्त्रान्तरेषु कल्पितं दूषितम् ? विदित्वा चेत्, न तर्हि तन्मतं न विदितम् । अथाविदित्वा ततः कथं दूषितम् ? इत्युभयथापि न युज्यते प्रतिषेधो विरुद्धत्वात्, प्रतिषिध्यते प्रतिषेध्यं च न ज्ञायत इति हास्यमेतत् । स्यान्मतम्--प्रतिषेध्यं ज्ञायते, *तैस्तस्य वस्तुनः सत्त्वादिगुणत्रयात्मकक्षणसद्रूप-द्रव्यादिषद्वदार्थात्मकादितया बहुधा कल्पितस्यानुपपत्तेरिति । एतदपि विप्रतिषिद्धम्, तेषामपि मतानां लोकतत्त्वान्तःपातिनां मिथ्याविधिकत्वं ज्ञातमज्ञातं वा स्यात् ? इति तुल्यविकल्पत्वात्, ज्ञाता 118/mj

* * *

प्रतिषेधप्रयासः ? क्रियोपदेशन्याय्यत्वाभ्युपगमोऽपि चैवं विघटेत, संसेव्यविषयस्वतत्त्वानुपातिपरिणामविज्ञानविरहितत्वात्, अवैद्यौषधोपदेशवद् बालकाहिग्रहणवत् ।

* * *

ज्ञातत्वयोश्च तद्दोषाविमोक्षात् । सामान्यं स्वविषयं परविषयं चेत्थमित्थं च न युज्यते तथा विशेष इति प्रपञ्चितत्वादज्ञातं चेत् तत् सर्वम्, अप्रत्ययत्वान्न

---

७ त] °तत्ताभिःnayacakra-ms-ya ॥
८ विशेष] °षणैकैव प्र° ॥
१० विरुद्धः] °द्धप्रति° प्र° ॥
१ स] दृश्यतां पृ° ११३ पं° ३ ॥
२ न] दृश्यतां पृ° ११३ पं° ६ ॥
३ विफ] दृश्यतां पृ° ११ पं° ४ ॥
५ य] °यमेवमशक्य° प्र° ॥
५ त्वा] °त्वाभ्यां प्रतिषेध्यस्वरूप°nayacakra-ms-ya ॥
६ यैवेदं] वेदित्वा प्र° ॥
६ सा] दृश्यतां पृ° ११ पं° ५ ॥
१० प्र] प्रतिषेधं nayacakra-ms-ya ॥
११ *] तैःस्तस्यnayacakra-ms-ya । तेस्य nayacakra-ms-bhā ॥
११ क्ष] °क्षणतद्रूप°nayacakra-ms-ya । °क्षणद्रूप° nayacakra-ms-bhā ॥
१२ तिषिद्ध] द्धस्तेषामपि nayacakra-ms-ya । °द्धः षेमपि nayacakra-ms-bhā ॥
१३ तानां] लोकसत्वान्तः° प्र° ॥
२० ज्ञातं] चेत्तर्हि सर्वम्°nayacakra-ms-ya ॥
२० त्वा] °त्वाचnayacakra-ms-bhā । त्वाद्य nayacakra-ms-ya ॥

प्रतिषेध इत्युक्तम् । ज्ञातं चेत् कथं ज्ञातुमशक्यं लोकतत्त्वम् ? इत्यप्रत्ययमेव । स्वयमसमीक्षितवाच्यवाचकसम्बन्धत्वात् ते वचस उन्मत्तवदेव तावत् अशक्यं प्राप्तुं लोकतत्त्वम् इत्युक्तम्, *विप्रतिषेधात् । § 385

यदप्युक्तम् --**अनर्थको विवेकयत्नः शास्त्रेष्विति**, तत्रापि विप्रतिषेधात्, **यदि तज्ज्ञानमफलमेव किमिति शास्त्रविहितार्थप्रतिषेधप्रयासः ?** शास्त्रविहितार्थज्ञानं तत्प्रतिषेधोपायज्ञानं चावधार्यम्--किं सफलम् ? अफलम् ? यद्यफलं विज्ञानम्, शास्त्रविहितार्थान् प्रतिषिषेधिषतः प्रयासोऽप्यफल एवाज्ञातत्वात् पूर्ववत् । अथ सफलम्, अफलमेव लोकतत्त्वज्ञानम् इति व्याहन्यते । अतः **को ह वैतद्वेद ? किं वाऽनेन ज्ञातेन ?** इत्येतदयुक्तमुक्तम्, विप्रतिषेधात् । § 386

- /ms

यदप्युक्तं वस्तुतत्त्वाशक्यप्राप्तेः क्रियाया एवोपदेशो न्याय्यस्तत्पूर्वकत्वात् सुखावाप्तेः इत्यत्रोच्यते — **क्रियोपदेशन्याय्यत्वाभ्युपगमोऽपि चैवं विघटेत,** विघटत एव इति कथं निष्ठुरमुच्यते ? विघटेत *इति तत्सम्भावनयोच्यते दाक्षिण्यलोकज्ञानाभ्याम् । को हेतुर्विघटने ? ***संसेव्यविषयस्वतत्त्वानुपातिपरिणामविज्ञानविरहितत्वात्*** । सम् इत्येकीभावे, आत्मसाद्भावेन सेव्यमानस्य विषयस्य स्वतत्त्वमाहारादेः शब्दस्पर्शरसरूपगन्धात्मकस्य स्वरूपं वातादिप्रकोपशमोपचयप्रलयावहम्—

> नागरातिविषामुस्ताक्वाथः स्यादामपाचनः । चरकसं° ६ । १५ । १८ इति ।§ 388

तत्तत्त्वानुपाती परिणामः, तदनुपतितुं शीलमस्येति, किमुक्तं भवति ? आसेव्यमानस्य वस्तुनस्तत्क्रियात एव स्वरूपानुपातेन विपाकः प-

---

२२ त्वात् ] ते नचसnayacakra-ms-ya ॥
२३ *] विप्रतिषेधात् यद्यप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति तत्रापि विप्रतिषेधात्तु तद् ज्ञानमफल- मेवnayacakra-ms-raṃnayacakra-ms-hī nayacakra-ms-ḍenayacakra-ms-līṃ । विप्रतिषेधोप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति तत्रापि विप्रतिषेधात् । यद्यप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति तत्रापि विप्रतिषेधात्तु तद् ज्ञानमफलमेव nayacakra-ms-pā nayacakra-ms-vi ॥
१ अ ] दृश्यतां पृ° ११ पं° ४ ॥
३ चा ] च वधार्यम्nayacakra-ms-bhā । च वधार्थम् nayacakra-ms-ya ॥
४ प्र ] प्रतिषिधित्सतःnayacakra-ms-bhā । प्रतिषेधित्सतः nayacakra-ms-ya ॥
५ ए ] एव ज्ञातत्वात्nayacakra-ms-ya ॥
६ को ] को हंnayacakra-ms-ya । दृश्यतां पृ° ११२ पं° ४ ॥
६ ज्ञातेन ] दृश्यतां पृ° ३५ पं° ४ ॥
८ क्रिया ] दृश्यतां पृ° ४५ पं° २ ॥
१० *] इति न संभावनयोच्यते प्र° ॥
११ हेतुर्विघ ] °घटतेnayacakra-ms-ya ॥
११ *] ससेव्य° प्र° ॥
१३ य ] °यस्य तत्त्वमा° प्र° ॥
१६ त्वानुपा ] °पातिnayacakra-ms-ya ॥
१६ रिणा ] °णामत- द°nayacakra-ms-pānayacakra-ms-raṃnayacakr । णामं तद° nayacakra-ms-ḍe nayacakra-ms-līṃ । °णामविज्ञानतद° nayacakra-ms-vi ॥

रिणामः । तद्विज्ञानविरहितत्वम् । स इत्थं विपाकः सुखाय दुःखाय वेत्येतद्विज्ञानं हिताहितप्राप्तिपरिहारार्थम्, तत्तु भवतां नास्त्येव । अतस्तद्विरहितत्वात् क्रियोपदेशोऽपि अग्निहोत्रं जुहुयात् स्वर्गकामः, तण्डुलान् पचेद्व्रोक्तुकामः इत्यादिर्दृष्टादृष्टार्थो न घटते, अज्ञातसंसेव्यवस्तुतत्त्वपरिणामत्वात्, **अवैद्यौषधोपदेशवत्,** यथा कस्यचिदविज्ञातरसवीर्यविपाकप्रभावद्रव्यगुणविशेषभागाभागसंयोगस्य देश

* * *

उपदेशादेव तज्ज्ञानयोग इति चेत्, न, उभयथापि पौरुषेयत्वाद्वेद-

* * *

कालातुरप्रकृतिसात्म्याग्निबलाबलवातादिरोगसमुत्थाननिदानादिलक्षणानभिज्ञस्यौषधोपदेशो न घटते तथा अग्निहोत्रं जुहुयात् स्वर्गकामः इत्याद्युपदेशः । अथवा हिताहितप्राप्तिपरिहारार्थत्वात् सर्वोपदेशानां तद- भावात् क्रीडितमेवास्त्वितीदं **बालकाहिग्रहणवत्** तज्ज्ञानविरहितस्योपदेशश्रवणग्रहणधारणतर्कणानुष्ठानादि अनर्थानुबन्ध्येव स्यादितीदमर्थप्रदर्शनार्थं द्वितीयमुदाहरणम् । § 389

**उपदेशादेव तज्ज्ञानयोग इति चेत्** । स्यान्मतम्--पुरुषस्यातीन्द्रियार्थदर्शनशक्तिशून्यत्वात् स्वर्गापूर्वकर्मसम्बन्धज्ञाने पूर्वविज्ञानकारणाभावाद्वन्ध्याया दौहित्रस्मरणवत् । द्रव्य-गुण-रस-वीर्य-विपाकादिज्ञानस्यानुमानं पूर्वविज्ञान-

---

१९ त] ततुnayacakra-ms-bhā । ननु nayacakra-ms-ya ॥
२ इत्या] °दिर्दृष्टार्थो प्र° ॥
२ अज्ञात] °तसंवेव्य°nayacakra-ms-bhā । °तवैव्यद्य° nayacakra-ms-pā । °तवैव्य° nayacakra-ms-ḍe nayacakra-ms-līṃ । °तवेध्यद्य° nayacakra-ms-raṃ nayacakra-ms-hī । °तवेधव्य° nayacakra-ms-vi ॥
२ रिणा] °णामवान्nayacakra-ms-ya ॥
४ भा] °षभागसंयो°nayacakra-ms-bhā ॥
८ लाब] °बलवतोरोग°nayacakra-ms-ya ॥
८ णा] °णाभिज्ञ°nayacakra-ms-ya ॥
११ बा] बालकादिग्र°nayacakra-ms-ya ॥
१२ त] °तर्कमानु° प्र° ॥
१२ णानुष्ठा] °ष्वानादिnayacakra-ms-bhā । °षानादि nayacakra-ms-pā nayacakra-ms-vi । °धानादि nayacakra-ms-raṃ nayacakra-ms-hī । °थानादि nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
१३ र] °हरणार्थमुपदेशादेव न ज्ञानयोग प्र° ॥
१४ द] °दर्शनां शून्यत्वात्nayacakra-ms-ya ॥
१५ पू] अत्र स्वर्गापूर्वकर्मसम्बन्धज्ञाने वन्ध्याया दौहित्रस्मरणवत् पूर्वविज्ञानकारणाभावात् उपदेशादेव तज्ज्ञानयोगः इत्यर्थमभिप्रेत्य सङ्गमनीयोऽयं पाठः । अन्यथा पूर्वविज्ञानकारणाभावो वन्ध्याया दौहित्रस्मरणवत् इति पाठः स्यात् । धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् । १ । ३ । १ । ... ...शब्दलक्षणोऽर्थो धर्म इत्युक्तम्, चोदनालक्षणोऽर्थो धर्म इति, अतो निर्मूलत्वान्नापेक्षितव्यमिति । ननु ये विदुः इत्थमसौ पदार्थः कर्तव्यः इति कथमिव ते वदिष्यन्ति अकर्तव्य एवायम् इति ? स्मरणानुपपत्त्या । न ह्यननुभूतोऽश्रुतो वा पदार्थः स्मर्यते । न

कारणं सम्भाव्येत । तस्मादुपदेशादेवाग्निहोत्रकर्मस्वर्गफलाभिसम्बन्धादिज्ञानमिति । एतच्चायुक्तम्, **उभयथापि पौरुषेयत्वात्,** दृष्टादृष्टार्थत्वेनोपदेशज्ञानस्यापि पौरुषेयत्वात्, ज्ञानतो वचनतश्च पुरुषाधीनत्वादिति वा; यथा त्वमतीन्द्रियेष्वर्थेषु पूर्वविज्ञानकारणाभावं मन्यसे पुरुषस्य पुरुषज्ञानवचनानां तद्विषयाणां चाप्रामाण्यं रागादियोगात्तथा सर्वोपदेशस्योपदेष्टृज्ञानस्य श्रोतृज्ञानवचनयोश्च ज्ञानत्ववचनत्वाभ्यां पौरुषेयत्वानतिवृत्तेर्भारतरामायणादिवदप्रामाण्यम् । अग्निहोत्राद्युपदेशस्यातीन्द्रियार्थस्य प्रामाण्यवत् **साङ्ख्याद्यतीन्द्रियार्थोपदेशप्रामाण्यं** वा । वानरमूलिकादिपरिज्ञानवत् कस्यचित् किञ्चिद्विषयं तत्त्वज्ञानं स्यात्, न तु सर्वौषधादिविषयैकपुरुषज्ञानम्, अतो वैद्यकादिष्वपि पूर्वज्ञानकारणाभावः । तद्विषयैकपुरुषविज्ञानवदतीन्द्रियेन्द्रियग्राह्यसर्वपदार्थविषयैकपुरुषविज्ञानाभ्युपगमो वावश्यम्भावी, किं कारणम् ? **वेदवचनयोरन्यथानुपपत्तेः,** पुरुषमन्तरेण वेदनं
- /ms वेदो ज्ञानमित्यर्थः तेन च ज्ञातस्य वचनं परप्रत्यायनं तदुभयं प्रत्ययनं प्रत्यायनं च नोपपद्यते, तयोः पुरुषसमवायित्वात् । उक्तं च—

रूपं निबन्धः सम्बन्धः प्रामाण्यं प्रत्ययः क्रिया ।
शब्दस्य पुरुषाधीना ज्ञानं चानन्यदात्मनः इति ।§ 392

* * *

वचनयोरन्यथानुपपत्तेः । उपदेशाप्रसिद्धिरपि चैवं भवतः, सर्वस्योपदेशस्य साङ्ख्याद्युपदेशवल्लोकतत्त्वान्वेषणादृते सम्भवाभावात् । तस्यापि त्वनवस्थाने

* * *

औषधोपदेशाज्ञानवदग्निहोत्राद्युपदेशाज्ञानम्, तज्ज्ञानवत् तदपि वा प्रमाणान्तरगम्यमिति । एवं तावत् क्रियोपदेशमभ्युपगम्य दोष उक्तः । § 393

---

चास्य वैदिकस्य अलौकिकस्य च स्मरणमुपपद्यते पूर्वविज्ञानकारणाभावादिति । या हि वन्ध्या स्मरेदिदं मे दौहित्रकृतमिति न मे दुहितास्तीति मत्वा न जातुचिदसौ प्रतीयात् सम्यगेतज्ज्ञानमिति **--मी॰ शाबरभा॰** १ । ३ । १ ॥
१ फ] **॰फलांभिसम्ब॰**nayacakra-ms-ya । **॰फलादिसम्ब॰** nayacakra-ms-bhā ॥
३ व] **वचनश्च** प्र॰ ॥
५ रागादियोगा] **॰योगास्तथा** प्र॰ ॥
५ स] **सर्वज्ञोप॰** nayacakra-ms-ya । अत्र **सर्वस्योप॰** इत्यपि पाठः स्यात् ॥
६ स्य] **॰पदेष्टज्ञा॰**nayacakra-ms-vi विना॰ । **॰पदिष्टज्ञा॰** nayacakra-ms-vi ॥
८ व] **॰वत् तस्यत्तद्विषयं**nayacakra-ms-ya ॥
९ त] **तत्तद्ज्ञानं**nayacakra-ms-vi । **तत्त+इज्ञानं** nayacakra-ms-pā ॥
११ द] **॰दतीन्द्रियग्राह्य॰**nayacakra-ms-ya ॥
१३ त्याय] **॰यनं च तदु॰** nayacakra-ms-ya ॥
१४ स] **॰समायित्वात्**nayacakra-ms-pānayacakra-ms-ḍenayaca । **॰सामायित्वात्** nayacakra-ms-bhā ॥
१५ रू] **रूपन्निबन्धः** प्र॰ ॥

अनभ्युपगम्यापि **उपदेशाप्रसिद्धिरपि चैवं भवतः**, त्वन्मतेनैवेति वाक्यशेषः, **सर्वस्योपदेशस्य साङ्ख्याद्युपदेशवल्लोकतत्त्वान्वेषणादृते सम्भवाभावात्**, उपदेशो व्याख्या, असौ च व्याख्या पदविषया वाक्यविषया प्रमाणविषया तद्विषयवस्तुविषया वा **वेदव्याकरणसाङ्ख्या**दिशास्त्रविकल्पिता यथास्वं प्रक्रियाभिः । तत्र यथा **साङ्ख्या**दिप्रक्रियाभिर्वस्तुतत्त्वं घटादेर्लोकतत्त्वान्वेषणपरया व्याख्यया विना नाधिगम्यतेऽतस्तथा व्याख्यायते एवमग्निहोत्रादि संज्ञासंज्ञिसम्बन्धव्युत्पादनेन व्याख्यायते, प्रकृतिप्रत्ययादिविभागेन पदविषयं वाक्यविषयं प्रमाणविषयं च प्रत्यक्षानुमानागमबाधाभ्युच्चयविकल्पाङ्गाङ्गिभावविकल्पादि लोकतत्त्वान्वेषणमन्तरेण नाधिगन्तुं शक्यमित्युपदेशस्तत्त्वान्वेषणपरः सर्वः प्रवर्तते । तत्र यथा **साङ्ख्या**द्युपदिष्टार्थेष्वशक्यप्राप्तिरुपदेशानर्थक्यं - /ms च तथा **वेदव्याकरणमी**मांसाद्युपदेशानामपीत्युपदेशाप्रसिद्धिः । अथ लोकतत्त्वान्वेषणपराणां तेषामुपदेशानां शक्यप्राप्त्यर्थोपदेशसाफल्ये शक्येते, कः पराभ्युपगमे प्रद्वेषः ? इहापि च यथा लोकत एव प्रत्यक्षानुमानगम्यघटपटादितत्त्वपरिच्छेदः शक्यते कर्तुमेवं पदवाक्यप्रमाणपरिच्छेदोऽपि शक्यः, घटादिपदाच्छब्दार्थप्रत्ययविषयस्य लोकत एव वर्णानुपूर्व्यादिनियतवाच्यवाचकप्रत्ययाव्यभिचारस्य प्रसिद्धेः । एवं वाक्ये प्रमाणे च योज्यम् । उक्तं च—

प्रमाणानि प्रवर्तन्ते प्रमेयैः सर्ववादिनाम् ।
संज्ञाभिप्रायभेदात्तु विवदन्ते तपस्विनः ॥ सिद्ध° द्वा° २० । ४
इति ।§ 396

तस्मादुपदेशानां त्वन्मतेनैव सर्वेषामप्रामाण्यसिद्धिः, लोकतत्त्वान्वेषणपरत्वे सति अशक्यप्राप्त्यफलत्वेनाभ्युपगतत्वात्, **साङ्ख्या**दिशास्त्रकारोपदेशवत् । अतो दृष्टादृष्टार्थक्रियोपदेशे पदवाक्यप्रमाणविषयविषयव्याख्यावैयर्थ्यप्रसङ्गान्न वेदशास्त्रोपदेशसिद्धिर्लोकतत्त्वान्वेषणपरत्वानतिवृत्तेः, तर्कशास्त्रवाच्यलोकतत्त्वविचारविज्ञानसाफल्यं वा । उपदेशाप्रसिद्धौ परीक्षकत्वहानिः, पदवाक्यप्रमाणविषयविषयाव्यभिचारज्ञानार्थत्वात् परीक्षायाः । परीक्षैव चोपदेशः, परीक्षाव्याख्ययोरनर्थान्तरत्वात् । स चोपदेशस्त्वन्मतेनैवैवं नावतिष्ठते, लोकतत्त्वान्वेषणात्मकत्वात् । § 397

२२ ग]
°गमस्यापिnayacakra-ms-ya ॥
१ विष] °षया वा
प्रमा°nayacakra-ms-bhā ॥
२ त]
तद्वस्तुविषयाnayacakra-ms-ya ॥
३ क्रिया] °यादिर्वस्तु° प्र° ॥
४ व्या] व्याख्याया प्र° ॥
४ म्य] °म्यते इत° प्र° ॥
१० सा] °साफलो वाक्येते प्र° ॥
१३ दा] °दात्
शब्दार्थि°nayacakra-ms-ya ।
°दाशब्दार्थ° nayacakra-ms-bhā ॥
१४ च]
चायोज्यम्nayacakra-ms-bhā ॥
१५ प्र] दृश्यतां पृ° ४६ पं° २२ ।
प्रमाणान्यनुवर्तन्ते विषये सर्ववादिनाम् ।
--सिद्ध° द्वा° ॥
१९ माण] °णविषयव्याख्या° प्र° ।
दृश्यतां पृ° १२० पं° ७ ॥
२२ माण] °णविषयाव्य-
भि°nayacakra-ms-bhānayacakra-ms-raṃnayacakra-ms-h
। दृश्यतां पृ° १२० पं° ७ ॥

स्यान्मतम्--पदवाक्यप्रमाणानामपि सामान्यविशेषादिघटादिजगत्तत्त्वविचारवदव्यवस्थैव, प्रमाणानामपि प्रमाणान्तराधिगम्यत्वेऽनवस्थादोषप्रसङ्गादिति । - /ms अत्रोच्यते--प्रमाणानवस्था तावन्नास्ति, चन्द्रार्कमणिप्रदीपादिवत् स्वपरावभासित्वात् प्रमाणानाम् । पदादीनामभ्युपगम्यापि त्वन्मतेनाऽनवस्थामाह -- 121/mj **तस्यापि**

* * *

क्रियाविधाय्यपि शास्त्रं नावतिष्ठेतेति तत्प्राप्यपुण्याद्यभावः, यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इति विधेरप्रसिद्धार्थविषयविधायितयाऽसंव्यवहार्यत्वात्तद्विहितक्रियाफलसम्बन्धाभाव आरोग्यार्थिडित्थभक्षणोक्तिवत् ।

अथोच्येत--कर्तव्यतां विधाय इतिकर्तव्यताविधानात् एवम्प्रकारमेवाग्निहोत्रं नाम कर्म भवति इति प्रसिद्धं भविष्यति तस्येतरार्थाविचारेण ।

* * *

**त्वनवस्थाने** जगत्तत्त्वस्य प्रमाणविचारस्य वा **क्रियाविधाय्यपि शास्त्रं नावतिष्ठेत,** तस्यापि लोकतत्त्वान्वेषणात्मकत्वानतिवृत्तेरप्रमाणत्वात् । **इतिशब्दो** हेत्वर्थे, अयं हेतुः क्रियाविधायिशास्त्रानवस्थानात् इति, अत**स्तत्प्राप्यपुण्याद्यभावः,** क्रियाविधायिशास्त्रोपदिष्टक्रियाभिव्यङ्ग्यापूर्वाभाव इत्यर्थः । कतमत् पुनस्तत् क्रियाविधायि शास्त्रम् ? उच्यते, **यथा--अग्निहोत्रं जुहुयात् स्वर्गकामः** इत्येतच्छास्त्रम् । इदं तु पुनः किं विधिः, अनुवादः, अर्थवादः ? उच्यते --**विधिः** । कथमुपलक्ष्यते विधिरिति ? **अप्रसिद्धार्थविषयविधायितया** लक्ष्यते । अत्राप्रसिद्धमग्निसम्प्रदानं हवनं विधीयते, स्वर्गस्य सुखसंज्ञस्य तत्प्राप्त्याश्रयस्य विशिष्टदेशाद्यात्मकस्य वा तदभिलाषस्य च कर्तरि सिद्धत्वात् स्वर्गावाप्तावुपायोऽग्निहवनम् इत्युपायस्यापूर्वत्वात् । कथं पुनस्तत्क्रियाभिव्यङ्ग्यापूर्वाभावः ? त्वन्मतादेवोक्तवत् । इतश्च तर्कोत्थापितलोकतत्त्वज्ञानानपेक्षत्वात् तस्य विधेरसंव्यवहार्यत्वम्, **असंव्यवहार्यत्वात् तद्विहितक्रियाफलसम्बन्धाभावः,** दृष्टान्त **आरोग्यार्थिडित्थभक्षणोक्तिवत्,** यथा आरोग्यार्थिने

---

२ तेना ] °नावस्था°nayacakra-ms-ya ‖
१२ मा ] °माणात् प्र° ‖
१३ स्था ] °स्थाना इतिnayacakra-ms-ya । °स्थान इति nayacakra-ms-bhā ‖
१५ अ ] अग्नौ ज्योतिर्ज्योतिरग्ना इत्यग्निहोत्रं जुहुयात्, एतद्वै वाचस्सत्यम्... ...। द्वादश रात्रीरग्निहोत्रं जुहुयाद् या वा अग्नेर्जातवेदास्तनूस्तयैष प्रजा हिनस्ति । इति कृष्णयजुर्वेदस्य **काठक**संहितायाम् ६ । ७ । यस्याहुतेऽग्निहोत्रेऽपरोऽग्निरनुगच्छेत् तत एव प्राञ्चमुद् धृत्यान्ववसायाग्निहोत्रं जुहुयात्, अथाभिमन्त्रयेत । इति कृष्णयजुर्वेदस्य **मैत्रायणी**संहितायाम् १ । ८ । ८ ‖
१६ इ ] इदं पुनःnayacakra-ms-bhā ‖
२१ ता ] °देवो°nayacakra-ms-raṃ nayacakra-ms-hī विना° ‖
२१ र्कोत्था ] °स्थापितलोकतत्त्वाज्ञाना° प्र° ‖
२२ हा ] °हार्यत्वात् तद्विहित°nayacakra-ms-ya ‖
२३ आरोग्या ] °र्थिनि पुंसिnayacakra-ms-ya ‖

पुंसे डित्थं भक्षय इत्युक्तिस्तत्क्रिया च विफले अप्रसिद्धत्वादेवं त्वदुक्तिक्रिये अशक्यप्राप्त्यर्थे चेत्यशक्यप्राप्त्यादिमत्साङ्ख्यादिविवेकयत्नतुल्यत्वं तवापि । § 398

**अथोच्येतेत्यादि** । अत्राह--मा मंस्थाः **साङ्ख्यादियत्नतुल्यत्वमेतस्य,** किं कारणम् ? वैधर्म्यात्, तद्यथा **--कर्तव्यतां विधाय इतिकर्तव्य-** - /ms **ताविधानात्,** तत्र अग्निहोत्रं जुहुयात् इति कर्तव्यतयाग्निहोत्रं विधीयते, ततः पुनरुत्तरत्र विशेष्य इतिकर्तव्यता विधीयते तदग्निहोत्रमेवमेवं च कर्तव्यम् इति यद्यथाग्निष्टोमादिसंस्थाविशेषैर्द्रव्य-गुण-देवता-कर्तृ-काम-काल-देशादिविशेषैश्च, वसन्ते ब्राह्मणो यजेत, ग्रीष्मे राजन्यः, शरदि वाजपेयेन वैश्यः । *होलाका प्राच्यैः, उद्वृषभयज्ञ उदीच्यैः । 122/mj

* * *

ननु चैवमपि कर्तव्यताप्रतिपत्तिर्लौकिककर्तव्यताद्यर्थतत्त्वानुसृतेरेव, कर्तव्यताविधानानन्तरं चेतिकर्तव्यतावसरः, यथा घटादिकर्तव्यतायां विहितायां घटं कुरु इति ततः पुनरितिकर्तव्यताक्रमः--एवं निर्वर्तयेरिति । न तु घटवदग्निहोत्रशब्दः

* * *

बायव्यं श्वेतमालभेत भूतिकामः, वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति, स एवास्मिन् भूतिं निधत्ते तै° सं° २ । १ । १ इत्यादि त्वया

---

२४ त्व ] **त्वयुक्तं क्रिये** प्र° ॥
४ अ ] **अग्निं जुहुयात्** प्र° ॥
५ पु ] **पुन-पुरु°**nayacakra-ms-vinayacakra-ms-pānayacakra-ms-raṃnayacakra-ms-hī ॥
५ त्र ] **विशेषेति°**nayacakra-ms-ya ॥
५ ग्निहोत्र ] **°त्रमेवं रेवं च**nayacakra-ms-ya । **°त्रमेवं च** nayacakra-ms-bhā ॥
६ क ] **°क-र्तृकामाकाला°**nayacakra-ms-ḍenayacakra-ms-līṃ । **°कर्तृकार्मकला°** nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । **°कर्तृकाल°** nayacakra-ms-bhā ॥
७ व ] ब्राह्मणो वसन्त आदधीत, ब्रह्म हि वसन्तः । तस्मात् क्षत्रियो ग्रीष्म आदधीत, क्षत्रं हि ग्रीष्म । तस्माद्वैश्यो वर्षासु आदधीत, विड् हि वर्षाः । इति **शुक्लयजुर्वेदसम्बन्धिनि शतपथब्राह्मणे** २ । १ । ३ । ५ । वसन्तो ब्राह्मणस्याधानकालः । ग्रीष्मो हेमन्तश्च राजन्यस्य । शरद्वैश्यस्य । इति कृष्णयजुर्वेदसम्बन्धिनि **सत्याषाढश्रौत्रसूत्रे** ३ । २ ॥
७ वा ] **वाजयेत**nayacakra-ms-ya ॥
७ ५ ] **होलाका प्रान्यैः**nayacakra-ms-bhā । **होलाको प्राज्ञैः** nayacakra-ms-ya । तस्माद् होलाकादयः प्राच्यैरेव कर्तव्याः, आह्नीनैबुकादयो दाक्षिणात्यैरेव, उद्वृषभयज्ञादय उदीच्यैरेव **--शाबरभा°** १ । ३ । १५ । होलाकादयः प्राच्यैरेव क्रियन्ते । वसन्तोत्सवो होलाका ।... उद्वृषभयज्ञादय उदीच्यैः, ज्येष्ठमासस्य पौर्णमास्यां बलीवर्दानभ्यर्च्य धावयन्ति सोऽयमृद्वृषभयज्ञः--इति **जैमिनीयन्यायमालायाः सायणमाधवीये** भाष्ये १ । ३ । ८ । १५--२३ ॥
१५ स ] **स एवास्मिं** प्र° ॥
१५ भू ] **भूमिं निध-त्ते**nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃna । **भूमिं विधत्ते** nayacakra-ms-vi । **भूमिं धत्ते** nayacakra-ms-bhā । स एवैनं भूतिं गमयति--इति **कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां** पाठः २ । १ । १ । स एनं भूत्यै **निनयति**--इति **कृष्णयजुर्वेदस्य मैत्रायणीसंहितायां** पाठः २ । ५ । १ ॥

प्रतिपत्स्यत इति शिष्यमनुशास्ति । तत उत्तरकालम् **एवम्प्रकारमेवाग्निहोत्रं नाम कर्म भवति[इति]** विशेषविधायिनार्थप्रतिपत्तिबलेन **प्रसिद्धं भविष्यति तस्य** शिष्यस्य **साङ्ख्यादिविवेकप्रयत्नवैलक्षण्येन इतरार्थाविचारेण** घटपरमाण्वादिकार्यकारणसामान्यविशेषादिस्वरूपाविचारेणेति । § 399

अत्रोच्यते --**ननु चैवमपीत्यादि** । नन्वित्यनुज्ञापने, कर्तव्यता इति या **कर्तव्यताप्रतिपत्ति** रग्निहोत्रादिविषया सा प्रतिपत्तित्वा**ल्लौकिककर्तव्यताद्यर्थतत्त्वानुसृतेरेव,** प्रत्येकं पतनं प्रतिपत्तिः, सा द्विविधा--आध्यात्मिकी बाह्या चेति, तत्राध्यात्मिकी इदं कर्तव्यमिदं न कर्तव्यम् इत्यादिका बुद्धिरेव, बाह्या तु द्विपदचतुष्पदधनधान्याद्यर्थं ममीक्रिया । सा द्विविधापि लोकप्र- - /ms सिद्धमेवार्थमनुसृत्य भवितुमर्हति नाप्रसिद्धम्, तस्मादग्निहोत्रादिप्रतिपत्तिरपि लोकतत्त्वानुसृतेरेव, नान्यथा । अन्यथा किम्विषया सा स्यान्नालिकेरद्वीपजातवृद्धस्य गोधेनुप्रतिपत्त्यभाववत् ? इति तद्दर्शयति **--कर्तव्यताविधानानन्तरं चेतिकर्तव्यतावसरः,** लौकिककर्तव्यताद्यर्थतत्त्वानुसृतेरेव इति वर्तते । प्रसिद्धकर्तव्यताप्रतिपत्त्यनन्तरं प्रसिद्धेतिकर्तव्यताप्रतिपत्त्यवसर इति न्यायः, तदुभयमलौकिकत्वादग्निहोत्रसामान्यस्याग्निष्टोमादिविशेषस्य द्रव्यमन्त्रदेवतार्त्विग्नियमाद्यात्मनश्चाप्रसिद्धेरयुक्तम् । किञ्चान्यत्, तन्न्यायासम्भवश्च । तद्व्यावर्तनार्थं लोकप्रसिद्धकर्तव्यतेतिकर्तव्यतावैधर्म्यं दर्शयन्नाह **--यथा घटादिकर्तव्यतायां विहितायां घटं कुर्विति ततः पुनरितिकर्तव्यताक्रमः,** एवमिति प्रकारनिर्देशं दर्शयति, मृत्पिण्डं चक्रमूर्द्धनि संस्थाप्य दण्डेन भ्रमयित्वा द्वाभ्यां पाणिभ्यां शिवकाद्याकारविशेषक्रमेण **निर्वर्तयेरिति** प्रसिद्धकर्तव्यताविधानोत्तरकालं प्रसिद्धेतिकर्तव्यताविधानं घटादिविषयमुपपन्नं प्रसिद्धार्थत्वात्, न त्वग्निहोत्रकर्तव्यतायाः पशुवधादीतिकर्तव्यतायाश्च प्रसिद्धिः,

---

१६ कार ]
°रमग्नि°nayacakra-ms-bhā ॥
१ विशेष ]
°विधानार्थप्रति°nayacakra-ms-ya ॥
१ प्र ] सुसिद्धं प्र° ॥
२ क्ष ] °क्षाप्येनnayacakra-ms-bhā
। °क्ष्यत्वेन nayacakra-ms-ya ॥
३ माण्वादिका ]
°कार्या°nayacakra-ms-ya ।
°कार्षा° nayacakra-ms-bhā ॥
६ त ] °तथानु° प्र° ॥
६ तिप ] °पत्तिस्या प्र° । °पत्तिः स्या
nayacakra-ms-bhā ॥
७ बाह्या ] चे
तत्रा°nayacakra-ms-ya । वेक
तत्रा° nayacakra-ms-bhā ॥
११ स्य ] °स्य
धेनु°nayacakra-ms-ya ॥
११ व्य ]
°व्यविधा°nayacakra-ms-ya ॥
१३ व्य ] °व्य
प्रति°nayacakra-ms-ya ॥
१५ ता ]
°तत्विग्नि°nayacakra-ms-ya ॥
१५ किञ्चान्य ] °न्यस्तन्यायासंभवं
चnayacakra-ms-ya ।
°न्यत्तन्याय्यासंभवं च
nayacakra-ms-bhā ॥
१६ ना ] °नार्थलोक° प्र° ॥
१८ कार ]
°रनिर्देश्यंnayacakra-ms-bhā ॥
१९ काद्याकार ] °विशेषाक्रमेण प्र° ॥
२१ न ] नव-
ग्नि°nayacakra-ms-pānayacakra-ms-ḍenayacakra
। °नग्नि° nayacakra-ms-bhā ॥
२१ प ]
°पशुबंधादी°nayacakra-ms-bhā ॥

अप्रसिद्धत्वादग्निहोत्रशब्दस्य काञ्चिदपि इतिकर्तव्यतां कर्तव्यतां वा वक्तुमशक्तत्वात्, अत आह **--न तु घटवदग्निहोत्रशब्दः काञ्चिदपि कर्तव्यतां ब्रवीति, अपि**शब्दादितिकर्तव्यतामपीति । § 400
123/mj

काञ्चिदपि कर्तव्यतां ब्रवीति । जुहोतेर्हि धातोरयं प्रत्यय उत्पन्नः स तत्कर्तव्यतां हित्वा पदान्तरकर्तव्यतायां कथं प्रवर्तेत ? अथ तदेव तत्, प्रसिद्धिविरुद्धं पुनरुक्तं च । § 401

पदान्तरकर्तव्यतायां तावत् परिहारः--हवनं पदान्तरकर्तव्यतामपेक्षते वाक्यन्यायेन सामर्थ्यात् । सामर्थ्यं घटवदग्निहोत्रशब्दस्याप्यर्थवत्त्वायेष्यते । न चेदेवं § 402

स्यान्मतम्--जुहुयात् इत्ययं तर्हि ब्रवीति, **हु दानादनयोः** पा॰ धा॰ १०८३ इत्यस्याः प्रकृतेः क्रियावाचिन्या विध्यर्थलिङ्प्रत्ययान्तत्वात्, तच्च हवनमग्निविषयम्, अतस्तत्कर्तव्यतां जुहुयात् इत्येष शब्दो ब्रवीति । अत्रोच्यते--एवमपि तदवस्थम्, सत्यमयं ब्रवीति तत्कर्तव्यताम्, किन्तु हवन- मात्रस्य, तस्याप्यप्रसिद्धस्यैव, न त्वग्निहोत्रकर्तव्यताम्, जुहुयात् इत्याख्यातस्य पूर्वापरीभूतानिष्पन्नावयवक्रियार्थवाचित्वात्, नाम्नां पिण्डितनिष्पन्नार्थवाचित्वात् । किं कारणम् ? *विविक्तार्थवाचित्वाभिमतानां शब्दानां पदान्तरार्थावृत्तेः । तत आह **--जुहोतेर्हि धातोरयं प्रत्यय उत्पन्नः स तत्कर्तव्यतां हित्वा पदान्तरकर्तव्यतायां कथं प्रवर्तेत ?** प्रत्ययग्रहणं **प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः** पा॰ म॰ भा॰ ३ । १ । ६७ इति परिभाषितत्वादाप्तेः । § 403 - /ms

स्यान्मतम् **--अथ तदेव तत्,** यदेवाग्निहात्रं तदेव हवनं यदेव हवनं तदेवाग्निहोत्रमिति । एतत् तावदनयोरैकार्थ्यं **प्रसिद्धिविरुद्धम्,** नामाख्यातयोर्भिन्नार्थत्वप्रसिद्धेः । अभ्युपेत्याप्येकार्थवाचित्वमनयोः पौनरुक्त्यपरिहारार्थं लाघवार्थं च जुहुयात् इत्येवास्तु, किम् अग्निहोत्रम् इत्यनेन ? § 404

इतरोऽप्रसिद्धिपौनरुक्त्यपरिहारार्थमाह **--पदान्तरकर्तव्यतायां तावदित्यादि** । तावच्छब्दः क्रमार्थे, यत् तावदुक्तं **पदान्तरकर्तव्यतायां कथं प्रवर्तेत** इत्यत्र

---

२२ व्य] ॰व्यता
कर्तव्यतांnayacakra-ms-ya ॥
१० लिङ्] ॰लिङ्प्रत्यया॰ प्र॰ ॥
१३ ग्नि] ॰होत्रे कर्त॰ प्र॰ ॥
१५ *] विवक्ता॰ प्र॰ ॥
१६ उ] उत्पन्नः
सत्कर्तव्यतांnayacakra-ms-bhā
nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-hṃ
। उत्पन्नः सकर्तव्यतां
nayacakra-ms-vi
nayacakra-ms-raṃ
nayacakra-ms-hī । अत्र
उत्पन्नस्तत्कर्तव्यताम् इत्यपि पाठः स्यात् ॥
१७ प्र] प्रत्यया
सहnayacakra-ms-ya ॥
२३ इ] इतराप्र॰nayacakra-ms-ya
॥
२४ मा] क्रमार्थोnayacakra-ms-ya
॥
२४ मा] प्रवर्तेऽन्य
त्रnayacakra-ms-bhānayacakra-ms-pānayacakra-ms-ḍen
। प्रवर्ततेऽन्यत्र nayacakra-ms-vi ।
प्रवर्तते इत्यत्र nayacakra-ms-raṃ
nayacakra-ms-hī ॥

**परिहारः** । अस्मिन् परिहारेऽभिहिते पौनरुक्त्याप्रसिद्धिदोषावपि **तदेव तत्**
इत्येतत्पक्षगतौ परिहृतावेवेत्यभिप्रायः । तत्र **हवनं पदान्तरकर्तव्यतामपेक्षते,**
केन न्यायेन ? **वाक्यन्यायेन,** को वाक्यन्यायः ? *भेदसंसर्गाभ्यां परस्प-
राकाङ्क्षा सम्बन्धः, तयाकाङ्क्षया पदान्तरार्थे वर्तते पदम्, यथा सब्रह्मचारिणा
सहाधीते इत्युक्ते येन समानो ब्रह्मचारी सब्रह्मचारी तेन सब्रह्मचारिणा य
एवाधीते तेनैव समान इत्याकाङ्क्षा भवति **सामर्थ्यात्,** नान्येन केनचित् ।
**सामर्थ्यमपेक्षेत्यर्थः** । न तु यथा पदार्थे परिच्छिन्ने घट इति न पदार्थान्त-
- /ms रमपेक्ष्यते पदेन । सा पुनरपेक्षा **घटवत्** घटशब्दवत्, अभेदनिर्देशाद् घ-
टार्थत्वेन घटशब्द उक्तः, घटशब्दस्यार्थवत्त्ववद**ग्निहोत्रशब्दस्याप्यर्थवत्त्वायेष्यते,**
124/mj अन्यथाग्निहोत्रशब्दोऽनर्थकः स्यात्, तन्मा भूदानर्थक्य

* * *

ततोऽग्निहोत्रशब्दः प्रमादाधीत आपद्येत । तत एवं वचनव्यक्तिर्भवति अग्नि-होत्राख्यं हवनं कुर्यात् इति, यथा घटं कुर्यादित्युक्ते घटक्रियां कुर्यादिति ।

एतदयुक्तं दृष्टान्तवैषम्यात् । न हि किञ्चिदग्निहोत्रं नाम हवनं घटवत् प्रसिद्धं यदनूद्योच्येत यदग्निहोत्रसंज्ञकं हवनं तत् कुर्यादिति, नापि हवनं यत् कुर्यात् तदग्निहोत्राख्यमिति, वाक्यान्तरेण प्रमाणान्तरेण वाऽप्रसिद्धत्वात् । अत एव तूभय-

* * *

मित्याकाङ्क्ष्यते । **न चेदेवं ततो** दोष इति, यदि तु निरपेक्षोऽग्निहोत्र-शब्दो हवनप्रकृत्यर्थमात्र एव वर्तते ततः को दोषः ? ततो**ऽग्निहोत्रशब्दः**

---

१ रिहारेऽभिहिते ] °भिहितो प्र° ॥
२ रिहृता ] °हृतवेवे°nayacakra-ms-bhā । °हृतं चेवे° nayacakra-ms-ya ॥
३ *] भेदः सं°nayacakra-ms-ya ॥
४ या ] तयादूकांक्षयाnayacakra-ms-ya ॥
४ रार्थे ] वर्तेतेnayacakra-ms-bhā ॥
५ स ] सब्रह्मचारीnayacakra-ms-ya प्रतिषु नास्ति ॥
५ चा ] °चारिणो प्र° ॥
७ न ] न-नुnayacakra-ms-bhānayacakra-ms-vi । नमु nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ । समु nayacakra-ms-raṃ nayacakra-ms-hī ॥
९ घ ] घटः शब्दnayacakra-ms-ya ॥
९ स्या ] °स्यार्थवत्त्वविद° nayacakra-ms-pānayacakra-ms-ḍenayacakra-m । °स्यार्थवित्त्वनियमाद° nayacakra-ms-raṃ nayacakra-ms-hī । °स्यार्थवद° nayacakra-ms-bhā ॥
९ ग्निहोत्र ] °होत्रसर्वस्याप्यर्थवत्त्वा° nayacakra-ms-bhā । °होत्रशब्दोसर्वस्याप्यर्थवत्त्वा° nayacakra-ms-ya ॥
९ त्वा ] °त्वापेक्षतेnayacakra-ms-vi ॥
११ मित्या ] °कांक्षष्य-तेnayacakra-ms-pānayacakra-ms-ḍenayacakra-m । °कांष्यते nayacakra-ms-raṃ nayacakra-ms-hī । °कांक्षते nayacakra-ms-vi ॥
२० व ] वर्तेते°nayacakra-ms-bhā ॥

**प्रमादाधीत आपद्येत,** अग्निशब्दस्य च न पृथक् कश्चिदर्थो हवनप्रकृत्यर्थमात्रत्वात् स्यात्, ततश्च दशदाडिमादिश्लोकावयववत् प्रमादाधीत आपद्येत निराकाङ्क्षत्वात्, न पुनरेवमिष्यते । **तत एवं वचनव्यक्तिर्भवति--अग्निहोत्राख्यं हवनं कुर्यात्** अग्निहोत्रसंज्ञक्रियाकाङ्क्षहवनं कुर्यादिति । किमिव ? **यथा घटं कुर्यात् इत्युक्ते** सामान्यचोदनायाः प्लवनाद् विशेषाभिसम्बन्धमन्तरेण नैरर्थक्यं स्यात्, तन्मा भूदिति घटं कुर्याद् **घटक्रियां कुर्यादिति** वचनव्यक्तिस्तथाग्निहोत्रं जुहुयादिति । § 405

आचार्य आह **--एतदयुक्तं दृष्टान्तवैषम्यात्,** अर्थभेदासिद्धेः, अभ्युपेत्यापि आकाङ्क्षाकृतमर्थभेदमग्निहोत्रहवनयोरप्रसिद्धेर्दृष्टान्तेन प्रसिद्धेन घटेन वैषम्यमिति तद्दर्शयति **--न हि किञ्चिदग्निहोत्रं नाम हवनं घटवत् प्रसिद्धं यदनूद्योच्येत,** यथा घटं लोके प्रसिद्धमनूद्य तद्विषयं कर्म कुर्याद् घटं कुर्यादित्युच्यते न तादृगनुवदनमत्रोपपन्नमप्रसिद्धत्वादग्निहोत्रहवनयोर्नाप्याकाङ्क्षाकृतमैक्यमस्तीति तद्दर्शयति वैधर्म्येण **--यदग्निहोत्रसंज्ञकं हवनं तत् कुर्यादिति,** अग्निहोत्रहवनयोरैक्येन प्रसिद्धौ सत्यां तद्विषयं करणमनुविधीयेत । **नापि हवनं यत् कुर्यादिति** हवनक्रियामनूद्य **तदग्निहोत्राख्यमित्यैक्येन** विधानं युज्येत **वाक्यान्तरेणा**ग्निहोत्रस्य हवनस्य वा अविहितत्वाल्लोके शास्त्रान्तरेषु वा **प्रमाणान्तरेण वाऽप्रसिद्धत्वा**दग्निहोत्रहवनक्रिययोः कथमनूद्य विधानं घटते ? § 406 - /ms

**अत एव तूभयमप्यशक्यम्** । अत इत्येतस्मादनन्तरोक्ताद्धेतोर्वाक्यान्तरेण प्रमाणान्तरेण वाऽप्रतीतत्वादुभयमप्यशक्यं विशेषणं विशेष्यं च प्रधानमुपसर्जनं च विधिरनुवादश्च शेषः शेषी च उत्सर्गोऽपवादश्च, अन्यतरस्याप्यर्थाप्रतीतेः । किं हवनक्रियाविशेषणमग्निहो[त्रं विशेष्यम् ? अग्निहो]त्रविशेषणं हवनं विशेष्यम् ? एवं विध्यनुवादप्रधानोपसर्जनोत्सर्गापवादशेषशेषिभावादिषु ख-

---

२ आ] आपद्यते nayacakra-ms-ya ॥
३ च] °चनं°nayacakra-ms-bhānayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ । °चने° nayacakra-ms-vi ॥
४ होत्र] °संज्ञाक्रियाकांक्षाक्ष्य ?हवनं प्र° ॥
८ ए] एतदुक्तंnayacakra-ms-ya ॥
९ आ] आकांक्षतमर्थ°nayacakra-ms-ya ॥
११ घ] घटnayacakra-ms-ya । घटा nayacakra-ms-bhā ॥
१२ म] °मात्रो° प्र° ॥
१३ योर्नाप्याकाङ्क्षा] °क्षाष्णकृ°nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃnayacakra-ms-hī । °क्षात्मकृ° nayacakra-ms-vi ॥
१३ ति] वै हि धर्म्येणnayacakra-ms-ḍenayacakra-ms-līṃ । न हि धर्म्येण nayacakra-ms-pā । नाहि धर्म्येण nayacakra-ms-raṃ nayacakra-ms-hī । न हि धर्म्येण nayacakra-ms-vi ॥
१३ ग्निहोत्र] °त्रं संज्ञिकंnayacakra-ms-ya ॥
१६ यु] युज्येत रेणाग्निहोत्रस्य प्र° ॥
१८ विधा] विधान प्र° ॥
२३ शेष] °शेषीभावादिषु nayacakra-ms-ya । अत्र °शेषिभावदि खपुष्प° इत्यपि पाठः स्यात् ॥

125/mj पुष्पखरविषाणयोरिवायुक्तमिति । **तुशब्द** एव

* * *

मप्यशक्यम्, यदि विशेष्येत एवं विशेषणीयम्--हवनं कुर्यात् तच्चाग्निहोत्रसंज्ञकमग्निहोत्रं वा हवनमिति, एतदयुक्तम्, अनुवादविधिविषयत्वे वाक्यभेदापत्तेः । नापि घटादि कर्तव्यतायामिव काचित् क्रिया प्रसिद्धा ययाग्निहोत्राख्यता हवनस्यातिदिश्येत हवनाख्यता वाग्निहोत्रस्य ।

* * *

कारार्थविशेषणे, प्रोक्तवदेव विशेषणत्वादि न घटत इति विशिनष्टि । कथमशक्यमिति चेद्दर्शयति **--यदि विशेष्येत एवं विशेषणीयम्--हवनं कुर्यात् तच्चाग्निहोत्रसंज्ञकमिति** हवनक्रिययाग्निहोत्रं विशेष्येत, **अग्निहोत्रं वा हवनमिति** यदग्निहोत्रं तद्धवनं कर्म इत्यग्निहोत्रेण हवनं विशेष्येत । **इति** प्रदर्शने, इत्थं विशेष्येत यदि विशेषणविशेष्यतया प्रयोजनमवश्यम्, तच्च नैवं शक्यमप्रसिद्धार्थत्वात् । यदप्युक्तम् अनूद्याग्निहोत्रं हवनक्रिया विधीयते, हवनं वानूद्याग्निहोत्रं विधीयते इति, **एतदयुक्तं** वाक्यभेदापत्तेरित्यत आह — **अनुवादविधिविषयत्वे वाक्यभेदापत्तेरिति**, तत्रैकमनुवादकमेकं विधायकम्, तयोरन्यतरद् यथेष्टं तेऽस्तु, ततो भिन्नार्थत्वाद् वाक्यभेदोऽनयोरापद्यते, य-

- /ms था कुशलोऽयं देवदत्तो ज्ञेयः इति प्रसिद्धमर्थमनूद्य आनयैनम् इत्यानयनं विधीयते, देवदत्तमानय इति देवदत्तानयनं वा विधाय अविदुषे यः कुशलतरोऽनयोः इत्यनुवादे प्रसिद्धाप्रसिद्धार्थानुवादविधिविषये द्वे वाक्ये, एवमेकस्यानुवादत्वेऽन्यस्य च विधित्वे वाक्यभेदापत्तिः, अतो नैषोऽपि व्याख्यानाध्वा शोभन इति । § 407

स्यान्मतम्--न वाक्यभेदापत्त्यादिदोषाः सम्भवन्ति, क्रियाया एव विधेयत्वात् । यथोक्तम् **--नैतद्विचार्यते--अनड्वान् नानड्वानिति । किं तर्हि ? आलब्धव्यो नालब्धव्य इति** पा° म° भा° १ । १ । ४३, तथा **स्वभावसिद्धं द्रव्यम्, क्रिया चैव हि भाव्यते** पा° म° भा° १ । ३ । १

१ ए] एवकार्थत्वे विशेषेणnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-vi । एवकार्थत्वे विशेषणे nayacakra-ms-raṃ nayacakra-ms-hī । एकार्थत्वे विशेषेण nayacakra-ms-bhā ॥ १० त] तद्धवनकर्मnayacakra-ms-vi ॥ ११ विशेष] °षेण° प्र° ॥ १३ ए] एतदुक्तंnayacakra-ms-ya ॥ १४ त्रैक] °कं अनु°nayacakra-ms-raṃnayacakra-ms-hīnayacakra-ms-vi । °कं दूह्य ?नु° nayacakra-ms-bhā nayacakra-ms-ḍe nayacakra-ms-līṃ । °कं द्यह्य ?नु° nayacakra-ms-pā ॥ १५ कु] कुशलयोदे°nayacakra-ms-pānayacakra-ms-ḍenayacakr... । कुशलयोर्दे° nayacakra-ms-vi ॥ १८ प्र] प्रसिद्धार्थानु° प्र° ॥ १८ सिद्धार्थानुवा] °वादेnayacakra-ms-ya ॥ १८ ए] एकमेक°nayacakra-ms-ya ॥ १९ व्याख्याना] °नाद्वा प्र° ॥ २१ त] °तम् ...nayacakra-ms-ya ॥ २२ अ] अनत्वान्नात्वानिति किं तर्ह्यालप्तव्यो प्र° ॥

इति । तस्मादग्निविषया हवनक्रियैव विधीयते, अतो दृष्टान्तवैषम्यं नास्ति द्रव्यस्याविधेयप्रतिषेध्यत्वात् घटं कुर्यात्, मा कार्षीत् इति, किं तर्हि ? घटक्रियां कुर्यादिति, तथा हवनं कुर्यादग्निहोत्रं कुर्यादिति हवनाग्निहोत्रक्रिययोरतिदेशो न्याय्य इति । अत्रोच्यते --**नापि घटादिकर्तव्यतायामि**त्येवमादि । यथा घटादिविषया कर्तव्यता मृदानयनमर्दनाद्युपक्रमात्मिका लोके प्रसिद्धा न तथा **काचि**दग्निहवनकर्तव्यता नाम प्रोक्षणबर्हिरास्तरणाज्यप्रक्षेपाद्युपक्रमात्मिका मन्त्रपूर्व**क्रिया** क्रमवती **प्रसिद्धा यया** कर्तव्यतया**तिदिश्येत** हव**नाख्ययाग्निहोत्राख्यता** अग्निहोत्राख्यया वा **हवनाख्यता**तिदिश्येतेति । § 408

**अथ पुन**रित्यादि । **अथे**त्यधिकारान्तरे, पक्षान्तरमधिकारान्तरम् । अनन्तरोक्तविधिना **न निर्वहति** हवनं कुर्याज्जुहुयात् इति हवनविधाव- - /ms, 126/mj
ग्निहोत्रानुवाद इत्यस्मिन्नर्थेऽप्रसिद्धत्वाद्विशेषणविशेष्यताद्यभावाद्वाक्य-

* * *

अथ पुनरेवमनिर्वहत्युच्येत--नैव हवनं कुर्यादिति पक्षः, किं तर्हि ? अग्निहोत्रं कुर्यादिति पक्षान्तरमाश्रीयते, अग्निहोत्रशब्दे जुहोतेर्धातोर्दर्शितार्थत्वात् कर्तृप्रत्ययार्थे च कृञः ।

एवमपि कर्तृप्रत्ययकृञ्दर्शनेन जुहोत्यर्थत्यागभेदाभ्यां जुहोत्यर्थत्यागभेदवत् सर्वधात्वर्थविशेषत्यागात्तत्त्यागापत्तिरपि, विशेषाभावे निराश्रयस्य सामान्यस्या भावात् ।

* * *

भेदापत्तेश्च द्रव्यस्य क्रियाया वा विधाने निर्वोढुमशक्ये परेणो**च्येत--नैव हवनं कुर्यादिती**त्यादि कर्तव्यतावाक्यतात्यागेन परिहारं मन्यते । पक्षान्तरसंश्रये सोपपत्तिकं निर्दोषं च कतमत् पुनः पक्षान्तरम् ? इत्यत आह --**किं तर्हि ? अग्निहोत्रं कुर्यात् इ**त्येतत् **पक्षान्तरमाश्रीयते** । उपपत्तिश्चात्र --**अग्निहोत्रशब्दे जुहोतेर्धातोर्दर्शितार्थत्वात् कर्तृप्रत्ययार्थे च कृञो** दर्शितार्थत्वात् । अयं हि जुहुयात् इति हुधातुर्लिङ्प्रत्ययान्तः, स च लिङ् कर्तरि विहितः, **कर्तरि कृत्ः कर्मणि च** पा॰कर्तरि कृत् ३ । ४ । ६७ ।, भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ३ । ४ । ६८ ।, लः कर्मणि भावे चाकर्मकेभ्यः

३ कुर्याद ] ॰ग्निहोत्रं कुर्यादिति हवनाग्निहोत्रं कुर्यादिति हवना॰ प्र॰ ॥
३ क्रिय ] ॰योरतिदेश्योnayacakra-ms-bhā । ॰योरितिदेश्यो nayacakra-ms-ya ॥
४ ना ] दृश्यतां पृ॰ १०७-- २ ॥
५ ना ] ॰नाभ्युप॰ प्र॰ ॥
९ अ ] दृश्यतां पृ॰ १०७-- २ ॥
९ धिकारान्त ] ॰न्तरोपक्षान्तर॰nayacakra-ms-bhā । ॰न्तरापेक्षान्तर॰ nayacakra-ms-ya ॥
१९ क्रि ] क्रिययाnayacakra-ms-ya ॥
२१ प ] ॰पत्तिके प्र॰ ॥
२३ जु ] जुहोतिधातो॰nayacakra-ms-bhā ॥
२३ कृञो ] कुच्छोnayacakra-ms-ya ॥
२३ अ ] अयं जुहु॰nayacakra-ms-ya ॥
२४ धातु ] ॰र्लिट्॰ प्र॰ ॥

३ । ४ । ६९ ।--इति पाणिनीयव्याकरणे ॥ ३ । ४ । ६७, ६९ इति, कर्तृशब्दश्च कृञ्प्रकृतिस्तृजन्तः, कर्तरि क्रियाया निर्वर्तकेऽर्थेऽभिधेये कृतो लकाराश्च भवन्तीति । तथा कर्मणि विहितोऽपि कृल्लकारो वा कृञर्थं नातिवर्तते । भावे विहितस्तु क्रियामात्रार्थत्वात् कृञर्थे एव । किं करोति ? इति सर्वक्रियाविशेषेषु पचत्यादिषु विशेषणप्रश्नप्रदर्शनात् जुहुयात् इत्ययं कुर्यादर्थ एव, तथा भूयते देवदत्तेन सुप्यते देवदत्तेन इत्येवमाद्यकर्मकेष्वपि स्वपिति भवतीति । अग्निहोत्रशब्देन पुनस्तद्विशेषभूतो जुहोतेरर्थोऽभिहित एव, तस्मात् अग्निहोत्रं कुर्यात् इत्ययमर्थ इति । § 409

अत्रोच्यते --**एवमपि कर्तृप्रत्ययकृञ्दर्शनेनेति** परोक्तं प्रत्युच्चारयति । **एवमिदानीं** कुर्यादग्निहोत्रमित्येतत् पक्षान्तरं होत्रशब्दोक्तहवनार्थता कर्तृप्रत्ययान्तकृञर्थता च जुहोतेरित्येतत् त्वयोक्तं मया युक्त्या सहावधारितं
- /ms
तथापि **जुहोत्यर्थस्य त्यागोऽर्थभेदश्च,** जुहोत्यर्थत्यागस्तावत् कर्तृविशिष्टक्रियासामान्यमात्रवाचित्वाभ्युपगमात् जुहोतेश्च क्रियाविशेषत्वात् सामान्यविशेषयोश्चान्योन्यतो भिन्नत्वात् कुर्याच्छब्दार्थं जुहुयाच्छब्दो ब्रवीति इति वचनाद् होत्रशब्देन दर्शितार्थत्वाज्जुहोतिरनर्थक इति त्वयैव त्यक्तत्वात् । ततश्च जुहुयाच्छब्दोऽपि होत्रशब्दार्थं होत्रशब्दोऽपि जुहुयाच्छब्दार्थं ब्रवीतीति नामाख्यातयोः प्रत्येकं द्व्यर्थवृत्तित्वाद्भेदश्च होत्रशब्दः क्रियावाची नामवाची च तथा जुहुयाच्छब्दोऽपीति । *एवं सति शब्दार्थसङ्करः प्रसिद्धिविरोधश्च जायते, यथा --**पूर्वापरीभूतं भावमाख्यातेनाऽऽचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यवसानं मूर्तं सत्त्वं नामभिर्व्रज्या पक्तिः** निरुक्तः १ । १ इति
127/mj
। ततश्च **जुहोत्यर्थत्यागभेदाभ्यां** हेतुभ्यां

* * *

आसन्नश्रुताग्निहोत्रकर्तव्यत्वान्नेति चेत्, न, आसन्नतरश्रुतजुहोत्यर्थत्यागात् ।

---

२ कृतिस्तृ ] °स्त्वजन्तः प्र° । ण्वुल्तृचौ --nayacakra-ms-pā ३ । १ । १३३ ॥
३ कृ ] कृत्सर्वं प्र° ॥
४ कृ ] कर्तर्थेnayacakra-ms-bhā । कर्त्रर्थे nayacakra-ms-pā । कर्त्रर्थे nayacakra-ms-vi । कर्त्तर्थ nayacakra-ms-raṃ nayacakra-ms-hī । कत्रार्थ nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
५ त्यादिषु ] विशेषेणnayacakra-ms-bhā । अत्र अविशेषेण इत्यपि पाठः स्यात् ॥
९ कृ ] °कृद्दर्श° प्र° ॥
१५ त्वाज्जु ] °ज्जुहोते°nayacakra-ms-ya ॥
१८ *] एवं शब्दार्थ°nayacakra-ms-ya ॥
१९ व्र ] प्रजतिnayacakra-ms-bhānayacakra-ms-ḍenayacakra । प्रेजति nayacakra-ms-vi । परंजति nayacakra-ms-raṃ nayacakra-ms-hī ॥
२० प ] पत्तिःnayacakra-ms-ya । पंक्तिः nayacakra-ms-bhā । पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्तिः--इति यास्कनिरुक्ते पाठः ॥
२१ त ] ततश्चnayacakra-ms-ya प्रतिषु नास्ति ॥

परपदार्थविधानेऽपि च पदान्तरपरिश्रुतहोत्रमात्रवृत्तत्वाज्जुहुयादर्थमात्रमेवेति

* * *

जुहोत्यर्थत्यागभेदवत् सर्वधात्वर्थविशेषत्यागः, यथा जुहोतिः कर्तृप्रत्ययान्तकृञ्प्रकृत्यर्थवाच्येवं पचतिपठत्यादयः सर्वे धातवो धातुत्वात् तद्वाचिनः, तस्मात् सर्वधात्वर्थविशेषास्त्यक्ताः, विशेषशब्दस्य भेदार्थत्वान्नामाख्यातद्व्यर्थवृत्तित्वात् पूर्वोक्तकरोत्यर्थवद् भिन्नार्थता च । ततश्च **सर्वधात्वर्थविशेषत्यागात् तत्त्यागापत्तिरपि,** तस्य कृञर्थस्य सर्वधात्वर्थसामान्यभूतस्यापि त्याग आपद्यते । किं कारणम् ? **विशेषाभावे निराश्रयस्य सामान्यस्याभावात्,** करोति इत्युक्ते किं करोति ? जुहोति पचति पठति इत्यादिविशेषसंश्रयेण विना करोतेरर्थाभावात् । **अपिशब्दात्** **सङ्कर-प्रसिद्धिविरोध-पौनरुक्त्यदोषाश्च** । § 410

**आसन्नश्रुताग्निहोत्रकर्तव्यत्वान्नेति** चेत् । स्यान्मतम्--संसर्गादिभेदभिन्नात् सामर्थ्याच्छब्दार्थ- व्यवच्छेदो विशेषलिङ्गाद् भवति । यथाह— - /ms

संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥§ 413

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दस्यार्थव्यवच्छेदे विशेषस्मृतिहेतवः ॥ वाक्यप° २ ।
३१७--३१८ इति ।§ 415

तत्र यच्छब्दसन्निधिसंज्ञकं सामर्थ्यं तद् व्यवच्छेदकारणमिहाप्यस्ति, तद्यथा--आसन्नश्रुतोऽग्निहोत्रशब्दः, तच्चोदितकर्तव्यतैवात्र सम्बध्यते । तस्मान्न

---

४ त्या] °त्यागभेदत्यागवत् प्र° ॥
५ कृ] °कृत्सप्र°nayacakra-ms-bhā । °त्तत्सर्वप्र° nayacakra-ms-ya ॥
५ वा] °वान्येवं प्र° ॥
८ कृ] कृत्सर्वस्य प्र° ॥
११ रु] °रुक्तदो° प्र° ॥
१२ श्रुता] °श्रु-तोऽग्नि°nayacakra-ms-pānayacakra-ms-vi । °श्रुतिग्नि° nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
१२ र्गा] °र्गाभेद° nayacakra-ms-ya ॥
१३ र्थ्याच्छ] °च्छपृछ-ब्दार्थ°nayacakra-ms-ḍenayacakra-ms-līṃ । °च्छब्दपृद्धब्दार्थ° nayacakra-ms-pā । °च्छब्द पृच्छार्थ° nayacakra-ms-vi । °कृष्टब्दार्थ° nayacakra-ms-raṃ nayacakra-ms-hī ॥
१६ व्य] व्यक्तिस्व°nayacakra-ms-ya ॥
१७ स्या] °स्यार्थस्यव्य°nayacakra-ms-ya ॥
१९ श्रु] °श्रुत्ता-ग्नि°nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ । °श्रुताग्नि° nayacakra-ms-raṃ nayacakra-ms-hī ॥
१९ ब्दः] °शब्दास्तद्यो°nayacakra-ms-ya ॥

जुहोत्यर्थस्त्यक्तस्तत्कर्तृप्रत्ययकृञर्थदर्शने सत्यपि अग्निहोत्रं कुर्यात् इति हवनविषयस्यैव करणस्योपादानात् । **चेदित्याशङ्कायाम्,** एवं चेन्मन्यसे, तदपि **न, आसन्नतरश्रुतजुहोत्यर्थत्यागात्,** यद्यासन्नश्रुताग्निहोत्रसान्निध्यात् तदर्थोपादानं न्याय्यं मन्यसे ततोऽप्यासन्नतरश्रुतजुहोतिशब्दार्थोपादानं न्याय्यतरं किं न मन्यसे ? स चार्थस्त्यक्तस्त्वया, तदुपादानेऽपि चाप्रसिद्धतादिदोषास्तदवस्थाः, स्वपदार्थं त्यक्त्वा पदान्तरार्थे कथं वर्तेतेति चोक्तम् । § 416

अभ्युपेत्यापि पदान्तरार्थाभिधानं दोष उच्यते --**परपदार्थविधानेऽपि च पदान्तरपरिश्रुतहोत्रमात्रवृत्तत्वाज्जुहुयादर्थमात्रमेवेति कुर्यादर्थोपादानमभेदकम्** । पदान्तरेऽग्निहोत्रपदे परिश्रुतं परिगतं ज्ञातम्, किं तत् ? *होत्रमात्रम्, न तद्व्यतिरिक्तमर्थान्तरं गम्यते, अतो जुहुयादित्येतस्य शब्दस्य योऽर्थस्तन्मात्र एव वृत्तः कुर्याच्छब्दः, **इति**शब्दो हेत्वर्थे, अस्माद्धेतोर्जुहुयाच्छब्दार्थमात्र-
128/mj त्वाद्धोत्रं कुर्यादित्यस्यार्थ

* * *

कुर्यादर्थोपादानमभेदकं तिङ्गत्ययार्थैकीभूतप्रकृत्यर्थत्वादग्निसमासासत्त्वात्, अपशब्दश्चायमस्मिन्नर्थे ।

* * *

- /ms स्योपादानमभेदकम्, नास्ति भेदोऽस्येत्यभेदकमभिन्नार्थम् । कुतो भिन्नार्थं न भवतीति चेत्, हवनं कुर्यात् इत्यस्माद्वाक्यार्थात् । तस्मात् त एव दोषाः । स्यान्मतम्--मात्रग्रहणासिद्धिरग्निपदविशिष्टसमासत्वात् । न हि होत्रमात्रमेव श्रूयते, किं तर्हि ? अग्नेरग्नावग्नये वा होत्रमग्निहोत्रम्, तत् कुर्यादिति भिन्नोऽर्थ इति । एतच्चायुक्तम्, ***तिङ्गत्ययार्थैकीभूतप्रकृत्यर्थत्वाद्** होत्रमात्रवृत्तत्वं सिद्धमेवेत्यर्थः । यत्र तिङ्गत्ययार्थेनैकीभूतः प्रकृत्यर्थस्तत्र प्रकृत्यर्थमात्रवृत्तिर्दृष्टा, यथा प्रलम्बतेऽध्यागच्छतीति । वैधर्म्येण कुम्भकारवत् काण्डलाववत् समासत्वात् । कुम्भकारवदेव विशिष्टार्थत्वमिति चेत्, तदपि

---

१ स्त्य] °स्त्यक्तसत्कर्तृ°nayacakra-ms-bhā । °स्तक्तसात्कर्तृ° nayacakra-ms-ḍe nayacakra-ms-līṃ । °स्तक्तस्तत्कर्तृ° nayacakra-ms-vi । °स्तक्तत्कर्तृ° nayacakra-ms-raṃ nayacakra-ms-hī ॥
१ कृ] °कृत्सर्वदर्शने प्र° ॥
३ य] यथासन्न° प्र° ॥
६ व] वर्तितेति प्र° । दृश्यतां पृ° १२३ पं° २ ॥
७ अभ्युपेत्या] °त्यादि प्र° ॥
७ प] परपदान्तरपरिश्रुत°nayacakra-ms-bhā । अत्र परपदार्थाभिधानेऽपि इत्यपि पाठः स्यात् ॥
९ *] होतृमात्रंnayacakra-ms-ya ॥
१२ त्वा] °त्वाद्धो कुर्या° प्र° ॥
१८ णा] °णात्सिद्धिःnayacakra-ms-ya ॥
१९ हि] होममात्र°nayacakra-ms-ya ॥
२० ए] एवतच्चा°nayacakra-ms-ya ॥
२० *] तिप्प्रत्य°nayacakra-ms-bhā ॥
२२ वृ] °वृत्तिर्वा दृष्टाnayacakra-ms-ya ॥
२२ म्ब] °म्बनेव्यागच्छ° प्र° ॥

नोपपद्यते, **अग्निसमासासत्त्वात्,** न ह्यस्ति अग्निशब्दस्य होत्रशब्देन तिङ्प्रत्ययार्थसाकाङ्क्षेण समासः, **सुप् सुपा समर्थेन सह समस्यते** पा० म० भा० २ । १ । ४ इति वचनात् । तिङन्तेन अस्तिक्षीराश्नीतपिबतादिषु समासदर्शनाददोष इति चेत्, न, परिगणितेभ्योऽन्यत्राभावात् तिङन्तप्रतिरूपकनिपातसुबन्तत्वाच्च तेषाम्, **अस्ति नास्ति दिष्टं मतिः** पा० ४ । ४ । ६० इति प्रातिपदिकवत् । अन्यथा देवदत्तः पचति इत्यत्रापि समासः स्यात्, न तु भवति । सामर्थ्याभावाच्च समासानुपपत्तिः, **समर्थः पदविधिः** पा० २ । १ । १ इत्यधिकारात् । असामर्थ्यं च सापेक्षत्वात्, यथा शङ्कुलाखण्डप्रातिपक्ष्येण पश्य शङ्कुलया खण्डः इति समासानुपपत्तिस्तद्वत् । न च प्राधान्याभावात् देवदत्तस्य गुरुकुलम् इत्यनेन तुल्यम्, तत्र तु प्रधानत्वाद्भवति समासः । उक्तं तु --**भवति हि प्रधानशब्दस्य सापेक्षस्यापि समासः** पा० म० भा० २ । १ । १ इति । न चात्राग्निशब्दस्य होत्रशब्दस्य वा प्राधान्यमस्ति, कुर्याज्जुहुयादिति तिङन्तस्य क्रियावाचिनः प्राधान्यात् साधनानां साध्यसिद्ध्यर्थप्रवृत्तित्वात् । **अपशब्दो** हि नाम अर्थविशेषविवक्षायां - /ms तदभिधायित्वरूपातिक्रमात् । यथा गोणीशब्दो हि सास्नादिमत्यर्थेऽपशब्दः, स तु आवपने शब्द एव । तथा गावीशब्दोऽपि गव्यवसेयेऽशक्तिः गावी इत्यस्मिन्नर्थे शब्द एव । तथा चोक्तम्—

> यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारयुक्ते ।
> सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥ पा०
> म० भा० १ । १ । १§ 419

१ अ] °समाससत्वात्nayacakra-ms-bhā । °समासत्वात् nayacakra-ms-ya ॥
१ ब्देन] तिट्° प्र° ॥
२ सु] सह सुपा ॥ २ । १ । ४ ॥...योगविभागः करिष्यते--सह । सह सुप् समस्यते, केन ? समर्थेन । अनुव्यचलत् । अनुप्राविशत् । ततः सुपा, सुपा च सह सुप् समस्यते ।--इति पातञ्जलमहाभाष्ये पाठः २ । १ । ४ ॥
३ अ] अस्तिक्षीरास्तीतपिवता°nayacakra-ms-bhā । अस्तिक्षारास्तीतपिवता° nayacakra-ms-ya ॥
५ क] °निपातंत्वाच्चnayacakra-ms-ḍenayacakra-ms-līṃ ॥
५ सु] °सुपंतत्वाच्चnayacakra-ms-bhā । °मुपातंत्वाच्च nayacakra-ms-pā nayacakra-ms-vi । °नुपातंत्वाच्च nayacakra-ms-raṃ nayacakra-ms-hī ॥
९ श] संकुला° प्र° ॥
९ प्रातिप] °पक्ष्यण परय संकुलया प्र° ॥
१४ अ] अपिशब्दो हि नामार्थ° प्र° ॥
१५ त्य] °त्यर्थे सत्वधेयनो शब्द एवnayacakra-ms-ya ॥
१६ व] °वसेयंसक्तिः प्र° ॥
१९ श] °शब्दःnayacakra-ms-ya ॥

तस्मादपशब्दश्चायमस्मिन्नर्थे **कुर्यादर्थोपादानं चाभेदक**मिति साधूक्तम् । § 420

१129/mj

त्यक्तजुहोतिकर्त्रर्थग्रहे तु निष्क्रियकर्तृत्वात् कुर्यादर्थाभावः । जुहोतिप्रयोगासत्त्वम्, त्याज्यत्वात्, व्याधिवत् । क्रियानामस्ववृत्तित्यागोपादानाभ्यां धातुप्रातिपदिकप्रकृतिभेदोऽपि, न पदभेद एव पदान्तरविषयत्वात्, अज्ञातस्याग्निहोत्रस्य क्रियाविशेषणत्वेनानुवादात् । § 421

**त्यक्तजुहोतिकर्त्रर्थग्रहे तु निष्क्रियकर्तृत्वात् कुर्यादर्थाभावः** । अथाचक्षीथाः--एतद्दोषभयात् त्यक्त्वा जुहोत्यर्थं निष्क्रियं कर्त्रर्थमात्रमेव गृह्यते कुर्यात् इति कर्तव्यतामात्रचोदनार्थः । एवं च सति त्यक्तजुहोतिकर्त्रर्थग्रहे तु, **तु**शब्दो विशेषणे, अत्यन्तमर्थाभावेनैव विशेषयति, करोति, कुर्यात् इत्येवमादिशब्दानां कृञ्प्रकृतीनां घटादिकर्मापेक्षामन्तरेण किं करोतु, किं कुर्यात् इत्यनिर्णीतार्थत्वात् कोऽर्थः स्यात् ? कृञर्थाभाVए कर्त्रर्थस्य निःसाध्यस्य वाऽकर्तृत्वं स्यात् । अतः कुर्याच्छब्दो निरर्थकः, त्यक्तस्वप्रकृत्यर्थत्वात् तादृग्विधस्य कृभ्वादिप्रकृतिरहितस्य यादादिप्रत्ययान्तस्य प्रयोगस्यादर्शनात् । अभ्युपेत्यापि प्रयोगं **जुहोतिप्रयोगासत्त्वं** ब्रूमः, असत्त्वमप्रशस्तत्वम्, कुतः ? **त्याज्यत्वात्,** त्याज्यत्वं त्वया त्यक्तत्वादस्मन्मतेनाऽर्थाभावात् । अर्थाभावश्चोक्तविधिना सिद्ध एव । तस्मात् त्याज्यत्वादसत्त्वं जुहुयात् इत्यस्य प्रयोगस्य । दृष्टान्तो **व्याधिवत्,** यथा व्याधिस्त्याज्यत्वादप्रशस्तस्तथा जुहोतिशब्दोऽपि सार्थ इति । किञ्चान्यत्, **क्रियानामस्ववृत्ती**त्यादि । आख्यातस्य क्रियार्थ- - /ms

१. भवति च प्रधानस्य सापेक्षस्यापि समासः इति पातञ्जलमहाभाष्ये पाठः २ । १ । १ पृ॰ ११, ४८ ॥

१ ब्द ] ॰ब्दा- श्चाnayacakra-ms-raṃnayacakra-ms-hī विना ॥
१ र्थोपा ] ॰पदानं प्र॰ ॥
८ तु ] निःक्रिया॰ प्र॰ ॥
९ जुहोत्य ] ॰त्यर्थनिःक्रियं प्र॰ ॥
११ न्त ] ॰न्तामर्थाभावेनैवnayacakra-ms-ya । ॰न्तमर्थाभावेन nayacakra-ms-bhā ॥
१३ इ ] इत्यनिर्णिक्तार्थत्वात् कार्थः स्यात्nayacakra-ms-bhā । इत्यनिर्णिकार्थत्वात् कार्यः स्यात् nayacakra-ms-ya ॥
१३ कृ ] कृत्सर्वाभावे प्र॰ ॥
१४ निःसाध्य ] ॰ध्यस्यककर्तृत्वंnayacakra-ms-bhā । ॰ध्यस्ववाकर्तृत्वं nayacakra-ms-raṃ । ॰ध्यस्वधाकर्तृत्वं nayacakra-ms-hī । ॰ध्यस्वककर्तृत्वं nayacakra-ms-pā nayacakra-ms-vi । ॰ध्यस्वकर्तृत्वं nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
१५ कृ ] कृद्वादि॰ प्र॰ ॥
२० स्य ] क्रियार्थं च रूढ- स्यnayacakra-ms-raṃnayacakra-ms-hī विना । क्रियार्थनरूढस्य nayacakra-ms-raṃ nayacakra-ms-hī ॥

त्वरूढस्य स्वार्थं विप्रकीर्णावयवकलापं त्यक्त्वा पिण्डितहोत्रसत्त्वार्थोपादानम्, न च तमप्युपादाय तत्रैवावतिष्ठते, किं तर्हि ? पुनरपि सत्त्वार्थं त्यक्त्वा क्रियार्थोपादानम् । एवं नामशब्दस्यापि सत्त्ववृत्तिं स्वां त्यक्त्वा क्रियार्थोपादानं क्रियार्थं त्यक्त्वा सत्त्वार्थोपादानमिति । ताभ्यामेव च **त्यागोपादानाभ्यां** कुर्यात्, जुहुयात् इत्येतयोरपि शब्दयोः सामान्यविशेषार्थयोरितरेतरार्थवृत्त्या भेदः स्वप्रकृतिबलेन पिण्डनविप्रकिरणात् तद्भेदवत् तद्बलेनाऽस्यापि । तथा तद्वाचिन्योः प्रकृत्योरपि भेदस्ताभ्यां त्यागोपादानाभ्याम् । कयोः प्रकृत्योरिति चेत्, धातुप्रातिपदिकयोः, अत आह --**धातुप्रातिपदिकप्रकृतिभेदोऽपि, न पदभेद एव,** स कुतः पदभेद इति चेत्, **पदान्तरविषयत्वात्,** पदान्तरस्य विषयोऽस्येति पदान्तरविषयं तत् पदमाख्यातं नाम वा, तद्भावात् पदान्तरविषयत्वात् कुर्याज्जुहुयादिति । अथवा वाक्यार्थविचारप्रधानस्य **मीमांसकस्य** यदुक्तं प्राक् वाक्यभेदो विध्यनुवादत्वापत्तेः इति, स तु न केवलो वाक्यभेदः पदभेद एव वा, किं तर्हि ? **धातुप्रातिपदिकभेदोऽपी**त्यभिसम्बध्यते, न इत्यनुवर्तनात् । तत्र को हेतुरिति चेत्, **अज्ञातस्याग्निहोत्रस्य क्रियाविशेषणत्वेनानुवादात्,** अज्ञातार्थो 130/mj

* * *

एवं च श्रुतेर्यासौ प्रतिपत्तिस्तस्य अभावः । स्वप्रत्यवेक्षानुवादन्यायेन च तत्त्यागात् कर्त्राद्यर्थप्रतिपत्तिवशेन शब्दार्थस्थापनाद् नृज्ञानमेव प्रमाणीकृतम् ।

एवं तर्हि यथाश्रुति अग्निहोत्रवद्धवनमपि ग्रहीष्यते । नन्वर्थद्वयविधानमशक्यमेकेन वाक्येन ।

* * *

विधिः, ज्ञातार्थोऽनुवादः, अग्निहोत्रमज्ञातत्वाद् विधीयते, तत् कुर्यात्, जुहु-

---

१ होत्र] °त्रसस्वार्थो°nayacakra-ms-bhā । °त्रस्यस्वार्थो° nayacakra-ms-ya ॥
३ स] सत्त्वावृत्तिंnayacakra-ms-raṃnayacakra-ms-hī विना । सत्तावृत्तिं nayacakra-ms-raṃ nayacakra-ms-hī ॥
३ क्रियार्थोपादा] दानं क्रियार्थोपादानुं क्रियार्थnayacakra-ms-ya ॥
६ णा] °प्रकरणात् प्र° ॥
७ त] तद्वाधिन्योःnayacakra-ms-bhā । तद्वाधिन्याः nayacakra-ms-ya ॥
८ दिक] °योर्निरतnayacakra-ms-ḍenayacakra-ms-līṃ । °योर्निस्ता nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-vi । °योर्निस्तं nayacakra-ms-pā ॥
८ प्र] °प्रकृतिप्रकृति°nayacakra-ms-ya ॥
८ न] न स्रद-भेदnayacakra-ms-raṃnayacakra-ms-hī । न लदभेद nayacakra-ms-ḍe nayacakra-ms-līṃ । न तदभेद nayacakra-ms-vi । न भेद nayacakra-ms-pā ॥
११ धा] °धानमीमां° nayacakra-ms-ya ॥
१२ प्रा] दृश्यतां पृ° १२५ पं° २ ॥
१३ न] नत्यनु°nayacakra-ms-ya ॥

यात्, हवनं कुर्यात् इति जुहोतिक्रियया विशेष्य प्रसिद्धस्य विहितस्यैवानुवदनादिति प्रागुदितमर्थमुपपत्तित्वेनोपदर्शयति । § 422

ततश्च किम् ? **एवं चेत्यादि** यावत् **तस्या अभावः** । **एवं चेत्यनन्तर**- - /ms निर्दिष्टक्रियानामस्ववृत्तित्यागोपादानाभ्यामेव श्रुतेर्यासौ प्रतिपत्तिर्जुहुयादित्यस्याः पदश्रुतेर्हवनक्रियाविधानमर्थो जुहुयाद् हवनं कुर्यादिति **तस्या अभावः**, सा न भवति, अन्यथार्थाधिगतेः, **यच्छब्द आह तन्नः प्रमाणम्** पा॰शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्--इति पातञ्जलमहाभाष्ये पस्पशाह्निके समर्थः पदविधिः पा॰ २ । १ । १ इति सूत्रस्य भाष्ये च पाठः ॥ म॰ भा॰ २ । १ । १ इति च हीयते । नामाख्यातयोरर्थभेदत्यागोपादानदोषेभ्यश्च शब्दाव्यवस्थानात् पुरुषबुद्धिवशेन शब्दार्थावस्थानम्, कुतः ? **स्वप्रत्यवेक्षानुवादन्यायेन च तत्त्यागात्**, स्वयं प्रत्यवेक्षितोऽर्थस्त्वया अयमस्य शब्दोऽस्यार्थ एवं भवति न वेति दोषवत्त्वादयं त्याज्योऽयं गुणवत्त्वादाश्रयणीयः इति विचार्य स्वमतिप्रमाणीकरणेन श्रुतिप्रामाण्यत्यागः कृतः । ततस्तत्त्यागात् **कर्त्राद्यर्थप्रतिपत्तिवशेन शब्दार्थस्थापनाद् नुः** पुरुषस्य **ज्ञानमेव प्रमाणीकृतम्**, तस्यैव विध्यर्थवदवस्थितस्यानुवदनात् । अतश्च ते वादावसानं निग्रहस्थानं पुरुषज्ञानप्रामाण्याश्रयेण क्रियोपदेशवाक्याप्रमाणीकरणात् प्रतिज्ञात्यागप्रतिज्ञान्तरगमनलक्षणम् । एष च प्रतिज्ञात्यागप्रतिज्ञान्तराश्रयणदोष इतरत्राप्यर्थव्याख्याने हवनं कुर्यात् इत्येतस्मिन् भवति, कस्मात् ? स्वप्रत्यवेक्षानुवादेन च तत्त्यागात् कर्त्राद्यर्थनियतप्रतिपत्तिवशेन शब्दार्थस्थापनादेवमेव सप्रकृतिप्रत्यय एवाग्निहोत्रशब्दोऽवबोध्यते शब्दप्रामाण्यत्यागेन स्वमतिप्रामाण्यावलम्बनात् । § 423

**एवं तर्हि यथाश्रुति अग्निहोत्रवद्धवनमपि ग्रहीष्यते** । आह--न शब्दार्थं त्यजामि, उक्तदोषभयात् । किं तर्हि ? या या श्रुतिर्यथाश्रुति, यथाग्निहोत्र- - /ms शब्दश्रवणात् तदर्थो गृह्यते तथा हवनमपि जुहुयाच्छब्दश्रवणाद्ग्रहीष्यते, ततो न दोषोऽस्तीति । तदेकत्र हवनमग्निसम्प्रदानविशिष्टकर्मकारकतयोच्यते,

---

३ त ] तस्य प्रभावः प्र॰ ॥
५ त ] तस्याभावः प्र॰ ॥
६ अ ] अन्यर्थार्थाधि॰nayacakra-ms-ya । अर्थाधि॰ nayacakra-ms-bhā ॥
१० स्था ] ॰स्थानात् तदव्यवस्थानात्nayacakra-ms-vi । ॰स्थात् तदव्यवस्थानात् nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
११ त्य ] ॰त्यक्षानु॰ प्र॰ ॥
११ वेक्षानुवा ] ॰वादेन्या॰nayacakra-ms-ya ॥
११ त्य ] ॰त्यपेक्षि॰ प्र॰ ॥
१२ श ] शब्दोब्द ?स्यार्थ प्र॰ ॥
१४ ब्दा ] ॰र्थास्थापनां नुःnayacakra-ms-bhā । ॰र्थास्थापनां नु nayacakra-ms-ya ॥
१६ देश ] ॰देशिवाक्यो॰nayacakra-ms-bhā । ॰देशवाक्यो॰ nayacakra-ms-ya ॥
१९ त्य ] ॰त्यपेक्षा॰ प्र॰ ॥
२० श ] ॰शब्दोवाबाध्यतेnayacakra-ms-ya । ॰शब्दोवाध्यते nayacakra-ms-bhā ॥

अन्यत्र स्वविशिष्टकर्तृकतयेति । अत्रोच्यते **--नन्वर्थद्वयविधानमशक्यमेकेन वाक्येन** अग्निसम्प्रदानकस्य कर्मभूतस्य हवनस्य तद्विशिष्टस्य च कर्तृत्वस्य, यथा ब्राह्मणसम्प्रदानकहविर्दानवाक्येन शुक्लगवानयनमपि । § 424
131/mj

नैव हवनं विधीयते, किं तर्हि ? अग्निहोत्रशब्देन विहितं हवनमनूद्यते । प्राप्तमनूद्यते वाक्यान्तरेण, अप्राप्तं च विधीयते । न च प्राप्तिरस्ति हवनस्य, अविहितत्वात् । यदग्निहोत्रं हवनमेव तत्, पुनरुक्तं तर्ह्येवम्, अनयोरविशेषात् । विधिविहितस्य ह्यनुवदनमनुवादः । अग्निहोत्रहवनविधेयत्वादनुवादायोग्यता ।
§ 425

अथ त्विच्छयैवानुवादो यथाकथञ्चित् स्यात् ततः पुनरुक्तदोषाभाव एव स्यात् । उक्तं हि—

अनुवादादरवीप्साभृशार्थविनियोगहेत्वसूयासु ।
ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम् ॥ § 428

इदं त्वनुवादाक्षमम्, विधीयमानत्वात्, आख्यायमानपण्डितत्ववत् । विहित- § 429

इतर आह **--नैव हवनं विधीयत** इत्यादि । जुहुयाच्छब्देन नैव हवनं विधीयते, **किं तर्हि ? अग्निहोत्रशब्देन विहितं हवनमनूद्यते,** विध्यनुवादयोर्भिन्नलक्षणत्वात् । किं तयोर्लक्षणमिति चेत्, उच्यते **--प्राप्तमनूद्यते वाक्यान्तरेण,** यथा पण्डितस्तिष्ठति इति शास्त्रज्ञः पण्डितः इति वाक्यान्तरविहितपाण्डित्यस्य स्थानानुवादात् । **अप्राप्तं च विधीयते,** यद् वाक्यान्तराप्रापितमविज्ञातं प्रमाणान्तरेण तद् विधीयते, यथा स्वर्गकामो जुहुयादिति । अत्रोच्यते--यद्येतद्विध्यनुवादयोर्लक्षणं नानुवादो हवनस्य युज्यते, यस्मान्न **च प्राप्तिरस्ति हवनस्य, अविहितत्वात्** । इतर आह--अस्ति प्राप्तिर्हवनस्य, अग्निहोत्रस्य हवनत्वात् तस्य च विहितत्वादित्यत आह **--यदग्निहोत्रं हवनमेव तत्, पुनरुक्तं तर्ह्येवमनयो**रग्निहोत्रहवनविधानयो**रविशेषात्** । एतच्चार्थपुन-

२ क] कर्तृकत्वस्यnayacakra-ms-ya ॥
१६ ब्दे] °ब्दे नैवnayacakra-ms-ya ॥
२१ राप्रा] °प्रापितमवि°nayacakra-ms-bhā । °प्राप्तिमतवि° nayacakra-ms-ya ॥
२३ स्ति] °प्रापितमवि°nayacakra-ms-bhā । °प्राप्तिमतवि° nayacakra-ms-ya ॥
२४ न] °नमेतत्nayacakra-ms-ya ॥

रुक्तम्, पुनरुक्तं च नानुवाद उन्मत्तवाक्यवत् । अनुवादलक्षणाभावं चास्य दर्शयति --**विधिविहितस्य हि अनुवदनमनुवाद** इति, हिशब्दो यस्मादर्थे, यस्माद् विधिवाक्यविहितस्यार्थस्य पश्चादर्थविशेषप्रापणार्थो वादोऽनुवादः ।
- /ms तदत्र लक्षणं न घटते, **अग्निहोत्रहवनविधेयत्वात्,** अग्निहोत्रस्य हवनस्य चैकीभूतयोर्विधेयत्वात् । तन्निगमयति --**अनुवादायोग्यतेति** । § 430

**अथ त्विच्छयैवानुवादो यथाकथञ्चित् स्यात्** । स्यान्मतम्--वक्तुर्विवक्षितपूर्विका शब्दप्रतिपत्तिरित्यस्य हवनस्य विधानं न विवक्ष्यते, अनुवादो विवक्ष्यत इति । एतदपि यथाकथञ्चित् स्याद् विहितार्थाभावात्, विवक्षेच्छयोरनर्थान्तरत्वादिच्छामात्रतश्च निरुपपत्तिकस्यार्थस्यासिद्धेर्न स्यादित्यभिप्रायः । यद्यपि यथाकथञ्चित् स्यात् ततः **पुनरुक्तदोषाभाव एव स्यात्,** इष्यते च पौनरुक्त्यं शब्दतोऽर्थतश्च, **उक्तार्थशब्दार्थकथनमविशेषेण पुनरुक्तमन्यत्रादरादिभ्यः** इति पौनरुक्त्याभावः । § 431

**उक्तं हीति** पुनरुक्तापवादमर्थविशेषापेक्षं दर्शयति **अनुवादादर** । पण्डितमानय इत्युक्ते पण्डितो देवदत्त इत्यनुवादो न पुनरुक्तम् । एवमादरे
132/mj स्वामिन् स्वामिन्निति । वीप्सायां ग्रामो ग्रामो रमणीयः ।

* * *

मेव त्वनूद्यते च विशेषविधानार्थम् । न चात्र कश्चिज्जुहोतिपुनर्वचनेन विशेषो जन्यते । ततश्च प्राक्तनमेव सञ्जातम् । सर्वथा किमतिरिच्यते पौनरुक्त्यदोषव्यपेतम् ? विधिलिङ्कर्ता आस्ते । अतो नानुवादः, उत्तरविशेषासम्बन्धनात्, विधीयमानपण्डितत्ववत् ।

अथोच्येत--विधिलिङ्कर्त्रर्थे प्रत्ययार्थेऽवशिष्यमाणेऽवश्यवाच्ये प्रकृतिपरव्यव-

* * *

भृशार्थे घनं घनं मृदु मृदु शनैः शनैरिति । विनियोगे घटं कुरु घटं कुर्विति । हेतौ कृतकत्वादनित्यो घटः, तस्मात् कृतकत्वादिति । असूयायां विपर्यस्याऽऽस्यं हसति हसतीति । ईषदीषदिति, स्तोकं स्तोकमिति । सम्भ्रमे स्वागतं स्वागतमिति । विस्मये विद्याधरो विद्याधर इति । गणने एकमेकं द्वे द्वे इति । स्मरणे आ ! विदितो विदितः पाटलिपुत्रे दृष्टो दृष्टोऽसीति

---

१ रुक्त ] ॰क्तं च नानुवाद॰nayacakra-ms-ya ‖
३ णा ] ॰णार्थानुवादोऽनुवादःnayacakra-ms-ya ‖
५ अनुवा ] ॰वादयो॰ प्र॰ ‖
६ अ ] अर्थात्वच्छदौवानु॰nayacakra-ms-bhā । अर्थात्वच्छब्दोवानु॰ nayacakra-ms-ya ‖
७ स्य ] विधान विव॰nayacakra-ms-bhā । विधानं विव॰ nayacakra-ms-ya ‖
२३ घ ] द्यूनं द्यूनंnayacakra-ms-pānayacakra-ms-ḍenayacakra । दानं द्यनं nayacakra-ms-bhā । द्यतद्यूनं nayacakra-ms-raṃ nayacakra-ms-hī ‖
२४ असूयायां ] विपर्ययस्यास्यंnayacakra-ms-ya । विपर्यस्यं nayacakra-ms-bhā ‖

। एवमाद्यर्थविशेषाभावे पुनरुक्तदोषावश्यम्भावाद् न चेदनुवादत्वमस्य पौनरुक्त्यमेवास्य । पौनरुक्त्याभावे नानुवादत्वम् । तस्मादिदं **त्वनुवादाक्षमम**योग्यमित्यर्थः, कतमत् ? जुहुयादित्येतत् पदम् । कुतः ? **विधीयमानत्वात्,** - /ms
योऽर्थो विधीयते न सोऽनूद्यते, **आख्यायमानपण्डितत्ववत्,** यथायं पण्डितो देवदत्त इति विधीयमानपाण्डित्यो देवदत्तो नानूद्यते तथा जुहुयादित्येतदपि अपूर्वोपदेशत्वादनुवादवैधर्म्याद्यास्य तल्लक्षणाभावात् । किं तल्लक्षणमिति चेत्, **विहितमेव त्वनूद्यते च विशेषविधानार्थम्,** यथा--पटुर्देवदत्तः, पयसैनं भोजयेति । तल्लक्षणाभावात् किम् ? तल्लक्षणाभावान्नानुवादोऽपूर्वविधानात्, यत्र न विशेषो विधीयते मौलविधिरेव सः । § 432

एवं तर्हि विशेषविधानादनुवादोऽस्तु तद्वदिति चेत्, तन्न भवति, यस्माद् **न चात्र कश्चिज्जुहोतिपुनर्वचनेन विशेषो जन्यते,** जुहुयात् इत्यनेन शब्देन अग्निहोत्रशब्दाभिहितादर्थान्न कश्चिदन्यो विशिष्टोऽर्थोऽभिधीयते यतोऽनुवादः स्यात् । **ततश्च प्राक्तनमेव सञ्जातं** यावदेव अग्निहोत्रं कुर्यात् इति वाक्यविकल्पेऽभिहितं तावदेव अग्निहोत्रं जुहुयात् इत्यत्रापि वाक्ये, ततोऽधिकं न किञ्चिदस्ति । एवं यां तां गतिं गत्वा कल्पयित्वापि **सर्वथा** सर्वप्रकारेण अग्निहोत्रं जुहुयात् इत्यस्मिन् वाक्येऽग्निहोत्रकर्मण्येवान्तर्भावितहवने जुहुयाच्छब्दप्रकृत्यर्थे **किमतिरिच्यते पौनरुक्त्यदोषव्यपेतम् ? विधिलिङ्गर्तास्ते,** विधौ विहितस्य लिङ्प्रत्ययस्य कर्तृकारकस्य तन्मात्रार्थ आस्ते न दूषितः, अन्यत् सर्वं पुनरुक्तादिदोषदुष्टमेवेत्यर्थः अग्निहोत्रं कुर्यात्, अग्निहोत्रं - /ms
जुहुयात् इत्येतयोर्वाक्यार्थविकल्पयोरुक्तदोषत्वात् । **अतो नानुवादः,** उक्तदोषसम्बन्धादित्यर्थः । कथमिति चेत्, **उत्तरविशेषासम्बन्धनाद् विधीयमानपण्डितत्ववदि**त्येतदनन्तरोक्तार्थसमाहारार्थं साधनं गतार्थम् । तस्मात् कर्त्रर्थमात्रमवशिष्यते, शेषं पुनरुक्तम् । § 433

**अथोच्येते**ति परमतमाशङ्कते । अथ त्वयोच्येत --**विधिलिङ्कर्त्रर्थः** प्रत्ययार्थोऽनुक्तत्वादवशिष्यते, अवश्यं च वाच्योऽसौ, तस्मिन् **प्रत्ययार्थेऽवशिष्यमाणेऽवश्यवाच्ये, प्रकृतिपरव्यवस्थाया** इति 133/mj

* * *

स्थाया आवश्यके प्रकृत्युपादाने प्राप्ते वरमासन्ना प्रकृतिरुपात्ता, अर्थः पुनरस्या न विवक्ष्यते गतार्थत्वात् । एवं तर्हि वरतरकं प्रत्यासन्नतराऽविवक्षितार्था कृञ्प्रकृतिरुपात्ता, वचनस्योपात्तार्थप्रत्यायनार्थत्वात् । सापि चापक्षिप्तवाच्यार्थस्थितिरुक्तवत् ।

---

६ त ] तरल्लक्ष°nayacakra-ms-pānayacakra-ms-ramnayacakra-ms-hī ‖
७ द्य ] °द्यंते चnayacakra-ms-vi विना ‖
८ भावान्नानुवा ] °वादो द्यत्र नnayacakra-ms-ya ‖
९ मौल ] °विधे° प्र° ‖
१६ कारेण ] °णाहोत्रंnayacakra-ms-ya ‖
२४ अथोच्ये ] °च्यतेतिnayacakra-ms-ya ‖

अस्मिंस्तु न्यायेऽतिलङ्घ्यमाने क्रियोपदेशवादोऽपि तत्त्ववादवदेव त्यक्तः स्यात्, तत्रापि यदृच्छाभ्युपगमात् । को ह वैतद्वेद बालप्रलापवद् व्यवस्थापेतम्-

* * *

हेत्वर्थे पञ्चमी, **प्रकृतेः परः प्रत्ययः प्रयोक्तव्यः** पा॰प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः इति पातञ्जलमहाभाष्ये पाठः ॥ म॰ भा॰ ३ । १ । २ इतीयं व्यवस्था, तस्या व्यवस्थाया मर्यादायाः स्थितेर्हेतोरावश्यकं प्रकृत्युपादानम्, तस्मिंश्चावश्यके **प्रकृत्युपादाने प्राप्ते** कतमा प्रकृतिरुपादातुं योग्या इत्येवं विचारयत इदं मे योग्यमिति प्रतिभाति --**वरमासन्ना प्रकृतिरुपात्ता, अर्थः पुनरस्या न विवक्ष्यते गतार्थत्वात्,** तस्मादविवक्षितार्था सा, सत्यपि नान्तरीयकत्वे प्रत्यासन्नप्रकृत्युपादाने विलक्षणामन्यां परित्यज्याऽविलक्षणा जुहोतिप्रकृतिरेवोपात्तेत्यवसेयम्, प्रयोगोऽग्निहोत्रं जुहुयादिति । अत्रोच्यते --**एवं तर्हि वरतरकमित्यादि** । *चेन्मन्यसे वरमासन्नप्रकृत्युपादानं नान्तरीयकत्वादिति, तत्राहमेव ते वरतरकं साहायकं ददामि बुद्धेः--कर्तृप्रत्ययार्थसमार्थैव **प्र-**
- /ms **त्यासन्नतरा** पौनरुक्त्यपरिहारार्थ**मविवक्षिता-** र्थाऽनुक्तार्था **कृञ्प्रकृतिरुपात्ता** । किं कारणम् ? **वचनस्योपात्तार्थप्रत्यायनार्थत्वात्,** अर्थं प्रत्याययिष्यामीति हि शब्दः, कर्तृप्रत्ययान्तया कृञ्प्रकृत्या प्रत्याय्यते स्फुटतरम्, अतोऽग्निहोत्रं कुर्यादित्येवास्तु । इतर आह--**त्वयैव** समर्थितत्वादेवमेवास्तु । आचार्य आह--स्यादेवं यदि सापि चार्थस्थितिर्निर्दोषा स्यात्, किन्तु **सापि चापक्षिप्तवाच्यार्थस्थितिरुक्तवत्,** तस्यामप्यर्थस्थितौ निराकृतो वाच्योऽर्थः **जुहोत्यर्थत्यागभेदाभ्याम्** इत्यादिप्रबन्धेन उक्तवद् यथाश्रुतार्थाभावादिदोषात् पौरुषेयत्वादिप्रसङ्गाच्च । एवं तावन्न्यायेन परीक्ष्यमाणमेतद्वाक्यं न युज्यते पुरुषतर्कलक्षणेन । § 434

**यद्यपि** पुरुषतर्कलक्षणं न्यायमतिलङ्घ्यापौरुषेयो नित्यो वेदाख्यः क्रियोपदेशः पुरुषगतरागादिदोषाशङ्काहेतुविनिर्मुक्तः प्रमाणम्, पु-

८ प्र] **प्रत्युपा॰**nayacakra-ms-ya ॥
८ इ] **इत्येव** प्र॰ ॥
१० ग] **गतार्थात्वात्**nayacakra-ms-ya ॥
१२ व] अत्र ॰वसेयं प्रयोगेऽग्निहोत्रं जुहुयादिति इत्यपि पाठः स्यात् ॥
१२ जुहुया] **॰दितिऽचोच्यते** nayacakra-ms-bhā । **॰दिति चोच्यते** nayacakra-ms-ya ॥
१३ *] **त्वन्मन्यसे**nayacakra-ms-bhā । **त्वनान्यसे** nayacakra-ms-ya ॥
१४ व] **वरवरकं** प्र॰ ॥
१४ स] **समार्थेव** nayacakra-ms-ya । **॰समर्थैव** nayacakra-ms-bhā ॥

१५ कृ] **कृत्सप्रकृ॰** प्र॰ ॥
१७ श] अत्र कश्चित् पाठस्त्रुटित इव प्रतिभाति । तुलना--अर्थगत्यर्थः शब्दप्रयोगः । अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते । तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्, उक्तार्थानामप्रयोग इति--इति पातञ्जलमहाभाष्ये ॥
१८ त्व] **त्वयैवं**nayacakra-ms-bhā ॥
१९ चा] **चार्यस्थि॰** प्र॰ ॥
१९ वा] **वाच्यर्थ॰** प्र॰ ॥
२१ भेदाभ्याम्] दृश्यतां पृ॰ १२६ पं॰ ४ ॥
२४ म] **॰मिति॰** प्र॰ ॥
२५ पुरुष] **॰षं** प्र॰ ॥

रुषकृतानि हि वाक्यानि अविद्यारागाद्यवियुक्तपुरुषवदप्रमाणानि अफलाशक्यप्राप्तिनित्यानित्यादिवस्तुतत्त्वविचारविषयाणि, सफलशक्यप्राप्तिपुरुषहितोपायक्रियोपदेशात्तु वेदवादः श्रेयानितीष्टम्, **तथापि त्वद्वचनादेवास्मिंस्तु न्यायेऽतिलङ्घ्यमाने क्रियोपदेशवादोऽपि तत्त्ववादवदेव त्यक्तः स्यात्** । किं कारणम् ? **तत्रापि यदृच्छाभ्युपगमात्,** अविद्यारागाद्यवियोगादेव सर्वपुरुषाणां वक्तृश्रोतृपुरुषाधीनत्वाच्चोपदेशपरम्पराया न कश्चिद्बुद्धिपूर्व उपदेशः, अतः सुप्तमत्तादिविप्रलापवद् यदृच्छया - /ms 134/mj

* * *

दितम् ? किं वाऽनेन ज्ञातेन यदेतज्ज्ञा एवमुक्तवन्तोऽव्यक्तं यद्यज्ञानाद् यदि द्वेषादेः ?

को वाऽऽह ज्ञवचनमेतत् ? यदि संशयादियोगान्न ज्ञः प्रमाणं तर्हीदमज्ञोक्तत्वादुन्मत्तवाक्यवत् । अचेतनत्वात् कुतोऽस्य प्रामाण्यम् ? कुतोऽस्य वचनम् ? काष्ठशब्दवदित्थमचेतनत्वेऽपि न घटते वेदवाक्यप्रामाण्यम् ।

* * *

भ्युपगतो वेदो वैदिकैः । अत इदमापन्नम् --**को ह वैतद्वेद** अग्निहोत्रं जुहुयात् स्वर्गकामः इत्येतद् वाक्यं सार्थकं निरर्थकं वेति ? । *किमिव न ज्ञायते ? **बालप्रलापवत्,** यथा हि बालैरनियतक्रियाकारकसम्बन्धमुक्तमबुद्धिपूर्वत्वाज्ज्ञातुमशक्यं केनार्थेनाऽर्थप्रत्यायनार्थवत् ? इति । किं कारणम् ? **व्यवस्थापेतत्वात्,** शब्दप्रयोगो ह्यर्थप्रत्यायनार्थः स्वनिश्चितार्थप्रतिपादनसमर्थनियतवर्णानुपूर्वीकः प्रत्यपेक्षितवाच्यवाचकसम्बन्ध इतीयं लोकशास्त्रव्यवस्था, ततोऽपेतं ब्रह्मादिसर्ववेदवादिवचनमविद्यारागाद्यवियोगात्तेषामित्यशक्यप्राप्तिरग्निहवनविधानादिवाक्यार्थस्य । तस्मात् **को ह वैतद् वेद बालप्रलापवद् व्यवस्थापेतमुदितम्** ? किञ्चान्यत्, अफलं चैतदित्यत आह --**किं वाऽनेन ज्ञातेन यदेतज्ज्ञा** वेदज्ञा अग्निहोत्रकर्मज्ञा **एवमुक्तवन्तः** अग्निहोत्रं जुहुयात् इति वाक्य**मव्यक्त**मव्यक्तार्थमस्फुटार्थम्, यस्मादव्यक्तज्ञाना एव ते पुरुषत्वादविद्यायोगाच्च दशदाडिमादिश्लोकवादिवत् । अविद्यायोगं दर्शयति --**यद्यज्ञानादिति** । रागादियोगं च दर्शयति --**यदि द्वेषादेः** । § 435

इतर आह--विफलोऽयं प्रयासोऽनिष्टापादने ते, अभ्युपगमत्वात् । **को वाऽऽह--ज्ञवचनमेतत्,** ननु प्रागुक्तं संशयविपर्ययानध्यवसायसम्पृक्त-

१ पुरुष] °प्रामाण्यानि प्र° ॥
१ प्र] °प्राप्तिनित्यादिवस्तु°nayacakra-ms-ya ॥
२ प्रा] °क्रियार्थोपदे°nayacakra-ms-bhā ॥
३ हितोपाय] तद्वचना° प्र° ॥
३ थापि] तद्वचना° प्र° ॥
१५ *] किमिव ज्ञायते प्र° ॥
१६ क्रियाका] °कारकसम्बद्धमुक्त° प्र° । अत्र °कारकमसम्बद्धमुक्त° इत्यपि पाठः स्यात् ॥
१९ प्र] प्रत्युपे°nayacakra-ms-ya ॥
२३ य] यदेतज्ञा प्र° ॥
२६ य] यद्यद् ज्ञाना°nayacakra-ms-ya ॥
२८ प्रागु] दृश्यतां पृ° ११३ पं° ६ ॥

-/ms त्वान्निर्णयस्याप्यज्ञानत्वमेवेति । अथवा **को वाऽऽह ज्ञवचनमेतदिति** ज्ञस्य पुरुषस्य सर्वत्र प्रमाणभूतस्याभावात्, किं तर्हि ? शब्दस्यैव च निर्दोषत्वादिति । अत्राचार्य आह --**यदि संशयादियोगान्न ज्ञः प्रमाणं तर्हीदमज्ञोक्तत्वादुन्मत्त-वाक्यवदिति** क्रियोपदेशसाफल्यवादः क्व गच्छतीति चिन्त्यताम् । एवं तावद् बुद्धिपूर्वकमकारादिवर्णानुपूर्व्या शब्दोच्चारणं चेतनोदीरितं काकवाशितं पुरुष-वाशितं वा तुल्यम् । अथाचक्षीथाः--काष्ठपाषाणादिसङ्घट्टजनिताचेतनशब्द-वत् सर्वमचेतनम् । तथा**प्यचेतनत्वात् कुतोऽस्य प्रामाण्यम्,** अचेतनत्वात्, आकाशवत् । एवं च कृत्वाऽचेतनत्वात् **कुतोऽस्य वचनम् ? यच्छब्द आह तद् नः प्रमाणम्** पा°दृश्यतां पृ° १३० टि° ४ ॥ म° भा° इतीष्टं भवता, भाषणं वचनमुक्तिः शब्दोच्चारणम्, भावसाधनत्वाद्वचनशब्दस्य, अचेतनत्वाद्व-कृत्वमस्य नास्तीत्यर्थः । कथम् ? अज्ञोदीरितत्वादेव च वचनत्वमस्य ना-स्ति, वाच्यार्थप्रतिपादनाभिसन्धिपूर्वकं हि तत्, तदभावेऽनुक्तमित्यत आह --**काष्ठशब्दवदित्थमचेतनत्वेऽपि न घटते वेदवाक्यप्रामाण्यम्** । § 436

अत्राह--यदुक्तं प्राक् को वाऽऽह ज्ञवचनमेतत् इति द्वितीयो विक-ल्पो न ब्रूमः सर्ववक्तृवचनाप्रामाण्यमिति, स्ववचनविरोधदोषात् । किं तर्हि ? सर्वज्ञवीतरागाद्यभावाद् ग्रन्थस्य सर्वभावस्वभावविषयस्य कर्तुरप्रामाण्य-म्, न तु वक्तुरनादिनिधनस्य वक्तृपरम्परागतस्य, वक्तृवचनयोः क्वचित् 135/mj प्रामाण्यादिति ।

* * *

आदिवक्तृवद्योत्तरवक्तर्यपि वातिकमन्त्रादिवज्ज्ञवचनानाश्वासतुल्यता ।

क्वचिच्चार्थे सत्येव अर्थाविवक्षा न्याय्या दृष्टा, तयोः क्वार्थवत्त्वेन दृष्ट-योस्तदविवक्षया च सार्थकत्वं दृष्टम् ? अतोऽन्याय्यमेतदुक्तम् अविवक्षितार्थ-स्य नान्तरीयकत्वात् प्रयोगः इति, प्रयुक्तस्यानर्थकत्वाभावप्रसङ्गात् । विव-क्षाविवक्षयोरनियमेन शब्दप्रवृत्तौ सत्यामप्रयोजनायां चाविवक्षायामग्न्याद्य-विवक्षाऽभावे विशेष-

* * *

अत्रोच्यते --**आदिवक्तृवद्योत्तरवक्तर्यपि** । यथाऽऽदिवक्तारोऽप्रमाणमसर्व-ज्ञत्वादवीतरागत्वाच्च शास्त्राणां सर्वभावस्वभावविषयाणां यथार्थज्ञानवचन-हीनास्तथाऽऽदिमदनादिप्रसिद्धीनां शास्त्राणामध्येतारो यथार्थज्ञान- वचन- -/ms हीनाः, तस्मादुभयेषां ज्ञातृत्ववक्तृत्वयोरयथार्थयोरनाश्वासस्तुल्यः । किमिव ?

६ वा ] °वासितं nayacakra-ms-bhā ॥
९ भ ] अत्र **भवताम्** इत्यापि पाठः स्यात् ॥
१२ न्धि ] °पूर्वकं तत्nayacakra-ms-ya ॥
१२ भा ] °भावेनुक्तमि°nayacakra-ms-bhā । भावे उक्तमि° nayacakra-ms-ya ॥
१४ इति ] अत्र द्वितीये विकल्पे इत्यपि पाठः स्यात्, दृश्यतां पं° १६--१७ ॥
२७ कृव ] °**द्योतुरवक्तृर्यपि** प्र° ॥
२८ भा ] °**भासस्व**° प्र° ॥
२९ हीनास्त ] °**स्तथाहिमद**° प्र° ॥
३० कृत्व ] °**त्वयोर्यथार्थयो**° प्र° ॥

वातिकमन्त्रादिवत्, यथा धातुविषयबलादिवातिकानां ज्ञानानि मन्त्रवचनानि च विप्रलम्भभूयिष्ठत्वादनाश्वासनानि, आदिग्रहणाद् वशीकरणमन्त्रयोगादिवत् । तत आह --आदिवक्तृवद्योत्तरवक्तर्यपि वातिकमन्त्रादिवज्ज्ञवचनानाश्वास-तुल्यतेत्यलमतिप्रसङ्गिन्या कथया । § 437

*किञ्च, यदुक्तम्--अविवक्षितार्थानर्थिकापि कर्तृप्रत्ययसाहायककारिणी जुहोतिप्रकृतिरुपात्तेति । एतदपि न्यायविरोधादयुक्तम्, कथम् ? क्वचिच्चेत्यादि । क्वचिच्चेति न सर्वत्र, यथा नक्षत्रं दृष्ट्वा वाचो विसृजन्ति इति, कतरद्देवदत्तस्य गृहम् ? अदो यत्रासौ काकः इति नक्षत्रेक्षणे पक्षिणि चोपयुक्तार्थयोरेव [नक्षत्रं]दृष्ट्वा-काकशब्दयोः सार्थकयोः काल-गृहोपलक्षणेऽर्थे सत्येव नक्षत्रदर्शन-काकार्थाविवक्षा न्यायादनपेता न्याय्या दृष्टा नानर्थकस्यैवोन्मत्तप्रलपितादेस्तथा तयोरग्निहोत्रहवनयोः क्वार्थवत्त्वेन दृष्टयोस्तदविवक्षया च सार्थकत्वं दृष्टम् ? अतो न्यायापेतमेतदुक्तम्--अविवक्षितार्थस्य नान्तरीयकत्वात् प्रकृतेः प्रयोगो जुहुयाच्छब्दस्येति । किं कारणम् ? प्रयुक्तस्यानर्थकत्वाभावप्रसङ्गात्, यद्येष न्यायः शब्दानां प्रयोगे नियतो न स्यान्नान्तरीयकत्वादपि प्रयोगे साधुत्वमेव स्यात् ततश्च प्रमादादप्रमादाद्वा प्रयुक्तस्य शब्दस्यानर्थकत्वाभाव एव स्यात् प्रमत्ताप्रमत्तवक्तृविशेषश्च स्यात्, न त्वेवं भवति दृष्टशिष्टेष्टविरुद्धत्वात् । स्यान्मतम्--उपलक्षणादिप्रयोजनायां विशेषविवक्षायां किमनया स्वार्थाविवक्षया ? सर्वस्य शब्दप्रयोगस्य वक्तुर्विवक्षितपूर्वकत्वात् - /ms
प्रवृत्तेरविवक्षा विवक्षा वेति । एतदयुक्तम्, विवक्षाविवक्षयोरनियमेन शब्दप्रवृत्तौ सत्यामप्रयोजनायां चाविवक्षायामग्न्याद्यविवक्षाऽभावे विशेषहेतुर्वाच्यः, अग्निशब्दस्यापि जुहोतिप्रकृत्युपादानवन्नान्तरीयकत्वात् प्रयोगोऽर्थोऽस्याविवक्षित इति प्राप्तम् । ततश्च भस्महोत्रं जुहुयात् * 136/mj

१ वा] धातिक° प्र° ॥
१ य] °याब-लादिवादिकानांnayacakra-ms-ya । °यावलादिवादिकानां nayacakra-ms-bhā ॥
२ ना] °नास्थासनानिnayacakra-ms-vi nayacakra-ms-bhā विना ॥
३ न्त्रादिव] °वत् जुवचना° प्र° ॥
५ *] किंच दुक्तम् प्र° ॥
८ न] नक्षत्रेच्छ्राणपक्षिणि प्र° ॥
८ चो] वापयुक्ता°nayacakra-ms-bhā । वोवयुक्ता° nayacakra-ms-ya ॥
१० र्था] °र्थापिवक्ष्या प्र° ॥
११ क्वा] कार्थवत्त्वेन प्र° ॥
१२ क्ष] °क्षया त्व-सार्थ°nayacakra-ms-raṃnayacakra-ms-hi ॥
१२ न्या] न्यायोपेत°nayacakra-ms-ya ॥
१२ क्षिता] °तार्थस्यानन्तरी° प्र° । अत्र अविवक्षितार्थाया नान्तरीयकत्वात् प्रकृतेः इत्यपि पाठः स्यात् ॥
१६ त्त] °त्तवज्ञवि° प्र° ॥
१८ प्र] °प्रयोगवक्तु°nayacakra-ms-ya ॥
१८ क्षित] पूर्विकत्वात् प्र° ॥
१९ क्षा] विवक्षयेतिnayacakra-ms-ya । विवक्षचेति nayacakra-ms-bhā ॥
१९ ब्द] शब्दासंवृत्तौ प्र° । अत्र शब्दानां वृत्तौ इत्यपि पाठः स्यात् ॥
२१ जुहोतिप्र] °प्रत्युपादा°nayacakra-ms-ya ॥
२२ *] ज्ञाय° प्र° ॥

* * *

हेतुर्वाच्यः । युक्ततरी तु तदविवक्षा वक्ष्यमाणन्यायदर्शनादर्थतत्त्वतन्त्रत्वात्तस्याः ।

एवं तावदप्रत्यायकत्वमस्य, अप्रत्यवेक्षितार्थयाथातथ्योक्तेः, बालप्रलापवत् ।

त्वदभिप्रायवत्तु हवनानुवादविशिष्टाग्निहोत्राभ्युपगमेऽपि चाग्निहोत्रस्य आत्मादिवस्तुतत्त्ववदप्रसिद्धस्वरूपत्वात् करणासिद्धिः ।

अथोच्येत--विध्यन्तरविधानशैल्या तत्सिद्धिः, यथा यूपं छिनत्ति... ... ...

* * *

इत्येतद्वाक्यं साधीयः अग्निहोत्रं जुहुयात् इत्येतत् साधीय इति केन हेतुना परिच्छेद्यम् ? किञ्चान्यत्, **युक्ततरी तु तदविवक्षा** अग्न्याद्यविवक्षा । किं कारणम् ? **वक्ष्यमाणन्यायदर्शनात्,** वक्ष्यमाणो हि विधिविधिनयेऽयं न्यायो द्रक्ष्यते भवता **पुरुष एवेदं सर्वम्** ऋग्वेद० १० । ८ । ९० इत्यादि, तद्दर्शनाच्चेदमग्न्यादिविकल्पासत्त्वान्नाग्निहोत्रं न होतेत्यर्थाभावादेवाऽविवक्षा न्याय्या, किं कारणम् ? **अर्थतत्त्वतन्त्रत्वात् तस्याः**, अर्थवशाद्धि विवक्षाऽविवक्षा वा भवितुमर्हति, नान्यथेति । § 438

तदुपसंहृत्याह **--एवं तावदित्यादि** । **एवमनन्तरोक्तोपपत्तिविधिना** अग्निहवनं कुर्यात् इत्येतस्मिन्नर्थे प्रदर्शितदोषत्वादथवा अग्निहोत्रं कुर्यात्, अग्निहोत्रं जुहुयात्, हवनं कुर्यात्, अग्निहोत्रं हवनं कुर्यात्, जुहुयात् इत्येवमाद्यर्थेषु प्रदर्शितदोषत्वात् । **तावच्छब्दः** क्रमार्थः, दोषान्तराभिधानमपि भविष्यति, एष तावद्दोष इति । **अप्रत्यायकत्वमस्य** वाक्यस्य, कुतः ? **अप्रत्यवेक्षितार्थयाथातथ्योक्तेर्बालप्रलापवत्,** यथातथाभावो याथातथ्यम्, अर्थस्य याथातथ्यमर्थयाथातथ्यम्, तस्मादर्थयाथातथ्यात् तस्याप्रत्यवेक्षितस्यार्थस्याविचारितस्य किंस्वरूपोऽयमर्थः ? प्रमाणम् ? प्रमेयः ? केन वा रूपेण प्रमाणं प्रमेयो वा ? इत्यप्रत्यवेक्षितस्यार्थस्योक्तेः शब्दस्यार्थस्य वा प्रत्यायकस्वरूपमप्रत्यवेक्ष्योक्तत्वात् तदप्रत्यायकत्वम् । अर्थत्वाच्च शब्दस्तदभिधेयो वा प्रत्यवेक्षितयाथातथ्योक्तेरेव प्रत्यायकः प्रधानादिवदिति वैधर्म्येण

- /ms

---

११ रिच्छे ] °च्छेद्यांnayacakra-ms-ya । °च्छिद्यां nayacakra-ms-bhā ॥
१२ मा ] °माणे हिnayacakra-ms-bhā ॥
१५ व ] °वशाद्विविक्षा अवितुमर्हतिnayacakra-ms-bhā ॥ °वशाद्वा विवक्षा वा भवितुमर्हति nayacakra-ms-ya ॥
१७ ता ] तावमित्यादि प्र° ॥
२२ अप्र ] °त्यावेक्षितार्थयथा° प्र° ॥
२४ स्या ] °स्यावस्या° प्र° ॥
२५ प्र ] प्रमाणप्रमेयो प्र° ॥
२६ त्य ] °त्यपेक्ष्यो° प्र° ॥
२७ द ] °भिधेयोऽवाnayacakra-ms-bhā ॥
२७ थ्योक्तेरेव ] °रेर्वा nayacakra-ms-bhā । °रेवा nayacakra-ms-ya ॥

। तस्मादप्रत्यवेक्षितार्थयाथातथ्योक्तेर्यदि शब्दद्वारेण यद्यर्थद्वारेणोभयथाप्यप्रत्यायकत्वं सिद्धम्, अतश्चाप्रत्यायकत्वादनुपदेशत्वं बालप्रलापवदेव । § 439

किञ्चान्यत्--अग्निहोत्रं हवनं कुर्यात् इत्यस्मिन्नेवानन्तरोक्तेऽर्थे दोषान्तरं ब्रूमः --**त्वदभिप्रायव**दित्यादि । त्वदभिप्रायेण तुल्यं त्वदभिप्राय इव त्वदभिप्रायवत्, यथा त्वदभिप्रेते अग्निहोत्रं हवनं कुर्यात् इत्येतस्मिन्नर्थे **हवनानुवादेन विशिष्टेऽग्निहोत्रेऽभ्युपगम्य**मानेऽ**ग्निहोत्रस्य** त्वदिष्टस्य कर्मणः **साङ्ख्या**दिपरपरिकल्पिता**त्मादिवस्तुतत्त्व**स्यालौकिकस्याप्रसिद्धस्य दुर्ज्ञानत्ववदलौकिकत्वा**द-प्रसिद्धस्वरूपत्वाद्** दुर्ज्ञानत्वम्, अविज्ञातस्य च **करणासिद्धिः**, सा हवनक्रिया न सिध्यतीत्यर्थः । § 440

अत्र परेणाथोच्येत परिहारः **--विध्यन्तरविधानशैल्या तत्सिद्धि**रिति । अग्निहोत्रं जुहुयादित्येतस्माद्विधेरन्यो विधिर्विध्यन्तरं यूपं छिनत्ति इत्यादि । तस्य विधानमविवक्षितनिरूपणं पूर्वं पश्चादिति 137/mj

* * *

... ... ...पालाशमष्टाश्रिमित्यादि । एतदपि न, वैषम्यात् । कालतस्तावन्न हि स छेदनक्रियाकाल एव यूपः, छेदनादिभिः संस्कृतः सन् भविष्यति यूपः, तस्य तदा यूपत्वेनासतो युक्तं यूपस्वरूपं कालान्तरभाव्युपेक्षितुं न पुनरग्निहोत्रस्य तदैव सतः ।

ननु तच्छब्दता तादर्थ्यात्, यथेन्द्रार्था स्थूणा इन्द्रः । छेदनस्य संस्कारता न विहिता स्यात्, यूपस्य निर्वृत्तत्वात् । असत्यां च संस्कारतायां छिदिरविवक्षितार्थः

* * *

कर्तव्यताभिर्निरूपणम्, शैली स्वभावः, शैल्या दृष्टया विधित्वादस्यापि विधेरेषा शैली इत्यनुमानात् सिद्धिर्भवति । कस्य पुनर्विधेर्विध्यन्तरविधानशैल्या सिद्धिर्दृष्टा ? **यथा यूपं छिनत्ती**त्यादि यावत् **पालाशमष्टाश्रिमित्यादी**ति शैल्य- - /ms

---

४ त्व] दृश्यतां पृ॰ १०८-- १ ॥
४ भिप्रा] ॰प्रायेnayacakra-ms-bhā ॥
५ द] ॰भिप्रेताग्निहोत्रं प्र॰ । ॰भिप्रेतऽग्निहोत्रं nayacakra-ms-bhā ॥
६ सा] **सांख्यादिपरिक-ल्पि॰**nayacakra-ms-bhā ॥
१२ विधा] ॰नविव॰nayacakra-ms-ya ॥
१३ पा] यथा यूपं छिनत्ति इति अविवक्षितनिरूपणं पूर्वं पश्चादितिकर्तव्यताभिर्निरूपणं वैत्वं पालाशमष्टाश्रिमित्यादि इत्येवं मूलमत्र सम्भाव्यते ॥
२१ स्यापि] विधेरेपाnayacakra-ms-bhā । विधेरया nayacakra-ms-pā ॥
२३ यू] आज्यशेषमादाय सतक्षा गच्छति यूपम् । ६ । १ । ५ । पालाशं बहुलपर्णमशुष्काग्रमूर्ध्वशकलशाखं मध्याग्रोपनतमव्रणम् । ६ । १ । ८ । अभावे खदिरबिल्वरौहितकान् । ६ । १ । ९ । अष्टाश्रिं करोत्युपरवर्जम् । ६ । १ । २६ । इति **कात्यायनश्रौतसूत्रे** यूप्या वृक्षाः पलाशखदिरबिल्वरौहितकाः । ७ । १ । १६ । अष्टाश्रिरनुपूर्वोऽग्रतोऽणीयान् प्रज्ञाताग्निष्ठाश्रिरस्थूलोऽनणुः । ८ । ३ । २ । इति **आपस्तम्बश्रौतसूत्रे** च विस्तरेण वर्णितं यूपस्वरूपम् ॥

नुमाने दृष्टान्तमाह । यथात्र पूर्वमविवक्षितनिश्चयावधारणात्मिका कर्तव्यता चोदिता पश्चात् अष्टाश्रिं पालाशं बैल्वं वा इत्यादीतिकर्तव्यताचोदनया स्वरूपे व्यवस्थाप्यते तथेहापि । आचार्य आह **--एतदपि न, वैषम्यात्,** दृष्टान्त-दार्ष्टान्तिकयोः शैलीवैषम्यात् । तद्वैषम्यं कालतः प्रसिद्धितोऽवधारणतश्च । तत्र **कालतस्तावन्न हि स च्छेदनक्रियाकाल एव यूपः,** भवतीति वाक्य-शेषः, छेदनाद्यानर्थक्यप्रसङ्गात् । किं तर्हि ? **छेदनादिक्रियाभिः संस्कृतः सन् भविष्यति यूपः** । इत्थंस्वरूपस्य **तस्य** काष्ठस्य **तदा यूपत्वेनासतो युक्तं यूपस्वरूपं कालान्तरे भाव्युपेक्षितुम्, न पुनरग्निहोत्रस्य तदैव सतः** संस्कारनिरपेक्षस्य कालान्तराभाव्यर्थोपेक्षणमिति वैषम्यम् । § 441

इतर आह **--ननु तच्छब्दतेत्यादि** यावत् **स्थूणेन्द्र** इति । यथात्र **तादर्थ्यात्** ताच्छब्द्यमेवं यूपार्थं दारु यूप इति तत्कालत्वात् । अत्रोच्यते **--छेदनस्य संस्कारता न विहिता स्याद् यूपस्य निवृत्तत्वात्,** तन्निर्वर्तनार्थो हि च्छेदनसंस्कारः, तस्या**मसत्यां च संस्कारतायां छिदिरविवक्षितार्थः स्यात्,** असंस्कारार्थत्वेऽनर्थक एव च्छिदिः स्यादित्यर्थः । तस्माद् यावदेव **यूपं स्वीकरोति** स्वत्वेन परिगृह्णातीत्युक्तं भवति तावदेव **छिनत्तीत्यु**क्तं भवति, छिनत्तेः संस्कारार्थरहितत्वात् । मा भूदयं दोषो दृष्टविरुद्धत्वात्, **अदृष्टार्थो वा** स्यात् इति वर्तते । न चादृष्टार्थस्तत्फलत्वात् । एवं तावत् काल-तः शैलीवैषम्यादयुक्तमुक्तम् **--विध्यन्तरविधानशैल्या तत्सिद्धिः, यूपं छिनत्ति**
- /ms **पालाशमष्टाश्रिमि- त्यादिवदि**ति । § 442
138/mj

स्याद् यूपं छिनत्ति स्वीकरोतीति यावत्, अदृष्टार्थो वा ।
§ 443

अवधारणवैषम्यमप्यतः । इयं भावना--या तत्र भावना यूपं छिनत्ति च्छेदनेन यूपं स्वीकरोतीति, न च च्छेदनमेवेत्यवधार्य-

१ नुमा ] ॰मादनेnayacakra-ms-ya ‖
१ व्य ] ॰ताचोदितापि-श्चात्nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃnayacakra
। ॰ता पश्चात् nayacakra-ms-bhā ‖
२ पा ] पलाशंnayacakra-ms-ya ‖
३ ए ] दृश्यतां पृ॰ १०८-- २ ‖
७ यू ] यूपत्वेनामतोnayacakra-ms-ya । यूपत्वनामतो nayacakra-ms-bhā ‖
८ कालान्त ] ॰न्तरो प्र॰ ‖
१० न ] ननु वत्सद्वत्तेत्यादिnayacakra-ms-bhā । ननु वत्सद्वत्तेत्यादि nayacakra-ms-ya । तादर्थ्यात् ताच्छब्द्यं भविष्यति, यथा इन्द्रार्था स्थूणा इन्द्र इति इति पातञ्जलमहाभाष्ये ६ । १ । ३७ ‖
१२ त ] तन्निर्वर्तर्थो प्र॰ ‖
१५ स्व ] सत्वेनnayacakra-ms-ya ‖
१७ चादृष्टा ] ॰र्थस्ततफलत्वात्nayacakra-ms-pā nayacakra-ms-raṃnayacakra-ms-hī । ॰र्थस्तफलत्वात् nayacakra-ms-ḍe nayacakra-ms-līṃ ‖
१८ मुक्त ] दृश्यतां पृ॰ १३६ पं॰ ५ ‖

तेऽष्टाश्रिकरणादीनामसंस्कारत्वप्रसङ्गात्, किन्तु करोत्येवेत्यवधार्यते, सेह न शक्याश्रयितुमवधारणासम्भवात्, हवनेन ह्यग्निहोत्रं करोति न प्रव्रज्यादिना, न च करोत्येवेत्यवधार्यते स्वर्गादिकामाभावे करणाभावात् । § 444

अत एव प्रसिद्धिवैषम्यमपि, तस्याप्रसिद्धस्य क्रियाकलापाभिमतार्थनामधेयमात्रत्वात् । शैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात् । § 445

**अवधारणवैषम्यमप्यत इयमित्यादि** । अनन्तरोक्ता येयं भावना, अनयैव भावनयावधारणवैषम्यमपि भावयिष्यामि, अत आह --**या तत्र भावना यूपं छिनत्ति च्छेदनेन यूपं स्वीकरोतीति** छिदेः संस्काराभावे यूपस्वीकरणार्थताया उक्तत्वात् । तत्र च कथमवधार्यम् ? उच्यते --**न च च्छेदनमेवेत्यवधार्यते,** करोतीति वर्तते । कस्तत्र दोष इति चेत्, यत एवकारस्ततोऽन्यत्रावधारणम्, **अष्टाश्रिकरणादीनामसंस्कारत्वप्रसङ्गः**, तदत्र प्रसक्तम्, तत् तु नेष्यते । **किन्तु करोत्येवेत्यवधार्यते** स्वत्वेनापरिग्रहमात्रप्रतिषेधार्थम् । एषावधारणभावना यूपे । **सेह** हवनविधिवाक्ये **न शक्याश्रयितुम्** । किं कारणमशक्येति चेत्, **अवधारणासम्भवाद्धवनेनाग्निहोत्रं करोतीति** । कथं पुनरसम्भवः ? यस्माद्**धवनेनाग्निहोत्रं करोति न प्रव्रज्यादिना, न च करोत्येवेत्यवधार्यते स्वर्गादिकामाभावे करणाभावा**दित्यवधारणवैषम्यम् । § 446

हवनेनाग्निहोत्रं करोतीति हवनादन्यस्याग्निहोत्रस्याभावाद**त एव प्रसिद्धिवैषम्यमपि, तस्या**ग्निहोत्रस्या**प्रसिद्धस्य क्रियाकलापाभिमतार्थनामधेयमात्रत्वात्** प्रसिद्धयूपद्रव्यच्छेदनादिवैषम्यम् । **मात्र**ग्रहणं नामधेयत्वसामान्यमेवानुमीयेत नार्थविशेषः इदं तदग्निहोत्रं नाम वस्तु इति । तस्मात् प्रसिद्धप्रसिद्धिभ्यामपि वैषम्यमिति । § 447 - /ms

अतस्तदर्थत्रयमुपसंहृत्य हेतुहेयनिगमनार्थमाह --**शैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात्** । शैलीप्रामाण्ये चावलम्ब्यमानेऽस्याग्निहोत्र-

---

८ म्य ]
°म्यप्यतnayacakra-ms-bhā ।
°म्येप्यत nayacakra-ms-ya ॥
९ म्य ] °म्यपिnayacakra-ms-ya ॥
१२ न ]
°नमवेध्यवधार्यnayacakra-ms-ya ।
°नमवेध्यर्यते nayacakra-ms-bhā ॥
१३ अ ] अत्र
अतोऽष्टाश्रिकरणादीनामसंस्कारत्वप्रसङ्गः
इत्यपि पाठः स्यात् ॥
१४ स्व ] **स्वत्वेन परि** प्र° ॥
२० ना ] **°नाद्यन्य°** प्र° ॥
२१ नाम ] **°मवेयत्रत्वात्** प्र° ॥
२३ ना ]
**नामस्त्विति**nayacakra-ms-ya ॥
२५ हेतुहेय ] हि गतौ पा° धा° १२५८,
सर्वेषां गत्यर्थानां ज्ञानार्थत्वाद् हिनोति
गमयतीति हेतुर्लिङ्गमित्यर्थः, तथा च हेयं
गम्यं साध्यमित्यर्थः ॥
२६ शैलीप्रा ]
**°प्रमाण्यं**nayacakra-ms-ya ॥
२६ मा ] **°मानस्याग्निहोत्रस्य यूपक्रियाया**
प्र° ॥

स्य शैल्या यूपक्रियाया उक्तविधिनैवायाथार्थ्यात्, यथार्थभावो याथार्थ्यम्, न याथार्थ्यमयाथार्थ्यम्, तस्मादयाथार्थ्याद् यूपक्रियया अग्निहोत्रक्रियायाः शैलीसाम्यं नास्ति । अतो न युक्तम् **--विध्यन्तरविधानशैल्या तत्सिद्धिर्यूपच्छित्त्यादिव**दिति । अथवा *शैलीप्रमाणं शैल्यनुमानम्, तस्मिंश्च शैली-
139/mj प्रामाण्येऽभ्युपगम्यमाने चाग्निहोत्रस्य शैल्या यूपक्रियाया

* * *

ननु सेवादिवत् क्रियामात्रत्व इतिकर्तव्यताभ्यः प्रतिपत्तिः, न, भजनार्थसेवाङ्गातत्वे तासां सेवार्थत्वात् । इतरथा प्रतिक्रियं पृथक्त्वापत्तेः ।

नात्रापि दानाद्यर्थत्वाद्वैषम्यमुत्तरक्रियामात्रत्वाच्च । एतदपि न, लोकविदितदानाद्यर्थानुबद्धेतिकर्तव्यतामात्रार्थतापत्तेरग्निसम्प्रदानविरोधात् (?')न तु लौकिक एव

* * *

अयाथार्थ्यात् कथङ्कारं विधिविध्यन्तरशैल्योस्तुल्या प्रसिद्धिः, अलौकिकत्वादनुमानानुपपत्तेः ? लोके हि दृष्टमनुमीयते, न तु यूपकरणमष्टाश्र्यादिरूपमग्निहोत्रकर्मधर्मस्वरूपपृथग्भूतं प्रसिद्धमस्ति यतस्तच्छैल्याग्निहवनशैल्यनुमीयेत । तस्माच्छैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात् तत्सिद्धिरयुक्तैव । हवनाग्निहोत्रयोर्भेदेऽपि हवनानुवादविशिष्टाग्निहोत्रविधित्वे चोक्तन्यायेन दृष्टान्तवैषम्यान्न शैल्यनुमानमिति । § 448

आह **--ननु सेवादिवत् क्रियामात्रत्व इतिकर्तव्यताभ्यः प्रतिपत्तिः** । यद्यप्यग्निहोत्रक्रियामात्रत्वे यूपच्छेदादिशैलीवैषम्यं तथापि सेवादिक्रियावदेव तद्भविष्यति । यथा हि सेवेत्युपस्थानाञ्जलिकरणादिस्वाम्याज्ञानुवृत्तिभजनार्था विशेषे[ण] मनोवाक्कायपरिस्पन्दभेदात्मिका एकैव स्वामिचित्तानुरोधलक्षणा सेवा एवमग्निहोत्राख्यैका क्रिया, न सा स्वावयवकलापव्यतिरिक्ता काचिद-
- /ms स्ति । तस्मात्ता एव पश्वालम्भन- प्रोक्षणादिक्रियाः अग्निहोत्रम् इत्यभेदेनोच्यन्ते । **आदि**ग्रहणात् कृषिवाणिज्यादिक्रियामात्रत्वे स्वाभ्य एव इतिकर्तव्यताभ्यः प्रतिपत्ति स्तथेहापीति । § 449

३ विध्य] दृश्यतां पृ° १३६ पं° ५ ॥
४ *] nayacakra-ms-bhā प्रतौ एतच्चिह्नान्तर्गतः पाठो नास्त्येव ॥
५ शैलीप्रा] °प्रमाण्ये°nayacakra-ms-bhā ॥
१२ शैल्योस्तु] °स्तुल्या प्रसिद्धेरलौकि°nayacakra-ms-bhā । °स्तुल्यार्थौ प्रसिद्धौरलौकि° nayacakra-ms-ya ॥
१४ ष्टा] °ष्टाश्वादि° nayacakra-ms-vi विना । °ष्टाश्रादि° nayacakra-ms-vi ॥
१५ यू] यूपक्रियायायाथार्थ्यात्nayacakra-ms-ya । यूपक्रियायायार्थ्यात् nayacakra-ms-bhā । दृश्यतां पृ° १०८-- २ ॥
१७ विधित्वे] वोक्त°nayacakra-ms-bhā ॥
१८ इ] दृश्यतां पृ° १०९-- १ ॥
१९ मा] °मात्रत्व प्र° ॥
२४ स्वा] स्वाभ्यnayacakra-ms-ya ॥

अत्रोच्यते--तन्न, **भजनार्थसेवाज्ञातत्वे तासां सेवार्थत्वात्,** अत्रापि दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादित्यभिसम्बन्धः । तद्दर्शयति--भजनं भक्तिः, सैवार्थः सेवाया इति भजनार्था सेवा, तस्याः सेवाया ज्ञातत्वे तासां तदवयवाभिमतानामुपस्थानाञ्जलिकरणादीनां सेवार्थत्वात्, अज्ञातत्वे तदर्थाप्रतिपादनात्, ज्ञाता एव हि ताः सेवा इति प्रतिपत्तिं जनयन्ति, नान्यथा । न त्वेवमग्निहोत्रावयवक्रिया ज्ञाताः, तस्माद्वैषम्यम् । अवश्यं चैतदेवम्, **इतरथा प्रतिक्रियं पृथक्त्वापत्तेः,** यथा कृषिसेवयोः परस्परं तदङ्गक्रियाणां च पृथक्त्वं तदङ्गत्वेनाज्ञातत्वादेवमग्निहोत्रस्य तदङ्गक्रियाणां च स्यात्, न तु भवति तदङ्गभावेनाज्ञातत्वादग्निष्टोमादीनामिति । § 450

आह **--नात्रापि दानाद्यर्थत्वाद्वैषम्यम्** । किं कारणम् ? अत्रापि **हु दानादनयोः** पा॰ धा॰ १०८३ इति दानाद्यर्थत्वाद्धवनादीनां ज्ञातत्वम्, अतोऽग्निहोत्रस्यापि ज्ञातदानाद्यङ्गक्रियत्वात् साम्यमेव सेवादिभिः । किञ्चान्यत् **--उत्तरक्रियामात्रत्वाच्च,** यथा सेवाया उत्तरक्रियामात्रत्वमुपस्थानादीनामेवमग्निहोत्रस्याग्निष्टोमादीतिकर्तव्यतानामिति । **एतदपि न, लोकविदितदानाद्यर्थानुबद्धेतिकर्तव्यतामात्रार्थतापत्तेः** । एवमपि लोकविदितैर्दानाद्यर्थैरनुबद्धाया इतिकर्तव्यताया योऽर्थस्तन्मात्रार्थत्वमापन्न- - /ms, 140/mj

* * *

गृह्यमाणे(?') इत्याद्युक्तदर्शनवत् । नैव सा तथाभूतार्था हवनक्रिया, तदाभत्वात् । प्रधानादिवादसाधुता च, प्रसिद्धिविपरीततत्त्वस्थितार्थत्वात्, वेदवादवत् । वेदवादासाधुता वा तद्वत् ।

अथ अग्निहोत्रम् इत्यस्यापूर्वविशेषाभिधानार्थतैव कल्प्येत तथा सति अपूर्वाभिधाने कोऽर्थः कृतः स्यात् ? यः स्वर्गकामः स हवनेन स्वर्गं भावयेदित्ययमर्थः

* * *

मग्निहोत्रस्य । लोके ह्यनुग्रहार्थं स्वस्यातिसर्गो दानम्, सङ्कल्प्य प्रीत्या दानमस्मिंस्तत् सम्प्रदानम्, तस्मै दानं यत्र स्वपरानुग्रहो विद्यते तादृशस्यागो दानम्, न तु यत्र क्वचन मूत्रपुरीषादिविसर्गवद् द्रव्यविसर्गो भस्मनि वा सर्पिःप्रक्षेपवत् । तस्मात् स्वपरोपकारकमेव अग्नौ सर्पिरादिविसर्जनं सर्वं स्यात्, न चैतदिष्टं दृष्टं वा । किं कारणम् ? **अग्निसम्प्रदानविरोधात्,** तस्याग्नेर्दहनात्मकस्य सर्वद्रव्याणां विनाशकस्य सम्प्रदानत्वविरोधात्, छिन्नपाणेर्मत्स्याभयदानवत् मुषितस्य वा चौराभयप्रदानदानवत्, अग्नये इति

---

२ वैंष] दृश्यतां पृ॰ १३७ पं॰ १ ॥
७ प्र] प्रतिक्रियां प्र॰ ॥
१५ मात्रा]
॰त्रार्थापत्तेःnayacakra-ms-bhā ॥
२७ स]
सर्पिःनिक्षेप॰nayacakra-ms-bhā ॥

३० चौ]
चौरभय॰nayacakra-ms-ya ।
चौरभऽय॰ nayacakra-ms-bhā ।
अत्र चौराभयप्रदानवत् इत्यपि पाठः स्यात् ॥

सम्प्रदानविशेषोक्तेर्लोकयज्ञतुल्यत्वाल्लौकिक एव गृह्यमाणेऽर्थे इदमेवं नैवं चेति विचारोऽर्थवान्न भवति, यदि भवेच्चतुष्पात्त्वे सत्युत्प्लुत्य गमनाल्लोमशो हरिणवद् मण्डूकस्तत एव निर्लोमा हरिणो मण्डूकवत् स्यादिति प्रसिद्धिविपरीतं सिध्येल्लोकाप्रमाणीकरणे इति तत् प्रसक्तमिहापीत्यत आह --न तु लौकिक एव गृह्यमाणे इत्याद्युक्तदर्शनवदिति । § 451

**नैव सेत्यादि** अत्राप्यनिष्टापादनसाधनम्, **नैव सा तथाभूतार्था हवनक्रिया तदाभत्वात्,** तदाभत्वमस्याः परमार्थेन अदानात्मिकाया दानत्वेनादानात्, तच्च सिद्धम् । यथा बालरमणकादिक्रियायां स्वाद्वन्नादिसंज्ञादिक्रियायामन्योन्यदानभोजनादिक्रियास्तदाभा एव एवमिदमपि - /ms दानमग्नौ प्रक्षेप इति । इदं चात्रानिष्टापादनम् **--प्रधानादिवादसाधुता च प्रसिद्धिविपरीतेत्यादि,** प्रसिद्धेर्विपरीतं तत्त्वम्, तद्भावस्तत्त्वम्, प्रसिद्धिविपरीते तत्त्वे स्थितोऽर्थोऽस्य वादस्य, तद्भावात् **प्रसिद्धिविपरीततत्त्वस्थितार्थत्वाद् वेदवादवत्** साधुता स्यात् प्रधानसंसर्गक्षणभङ्गाद्यात्मकादिवादानाम् । प्रधानादिवादानां वा असाधुताभ्युपगमवदुक्तहेतो**र्वेदवादासाधुता वा** स्यादित्युभयथाप्यनिष्टापादनम् । § 452

**अथाग्निहोत्रमित्यादि । अथे**त्यधिकारान्तरे, अथैतेषु विकल्पेष्वग्निहोत्रशब्दस्य क्रियावाचित्वे सर्वथा दोषोत्पादभीतेन परेण **अग्निहोत्रम् इत्यस्यापूर्वविशेषाभिधानार्थतैव कल्प्येत ।** न पूर्वोऽपूर्वोऽदृष्टो धर्मविशेषः, तदभिधानमर्थः प्रयोजनं व्यापारः, तद्भावोऽपूर्वविशेषाभिधानार्थतैव कल्प्येत । **विशेष**शब्दात् परस्परविशिष्टाभिर्यज्ञसंस्थाभिरग्निष्टोमादिभिरिष्टिभिश्चाभिव्यक्त-
141/mj व्यापूर्वा अपि विशेष्यन्ते द्रव्य *

* * *

कृतः स्यात्, किमूनीकृतमर्थाविद्यायाः ? यावदेव स्वर्गकामो जुहुयादित्युक्तं भवति तावदेव अपूर्वं जुहुयात् स्वर्गकाम इत्युक्तं भवति, ततो भावन-

---

१ दान] °विशेषोर्लोकnayacakra-ms-ya ॥
१ त्वा] °त्वादलौकिक° प्र° । दृश्यतां पृ° ४५ पं° २ ॥
४ सिध्येल्लोका] °काप्रामाण्यक° प्र° । तुलना पृ° ४६ पं° ४ ॥
६ नैव] नैव स्येत्यादि प्र° ॥
६ नैव] नैवं सा nayacakra-ms-ya ॥
९ दा] °दाभाव एवमिदमपि प्र° ॥
१० दा] दानमन्यै प्रेक्षे इतिnayacakra-ms-ya । दानमन्यैः प्रेक्षे इति nayacakra-ms-bhā ॥
१२ त] तथैnayacakra-ms-bhā । तथैव nayacakra-ms-ya ॥
१२ सिद्धिविप] °रीतत्वस्थि° प्र° ॥
१३ वा] °वादत्nayacakra-ms-bhā । °वादात् nayacakra-ms-ya ॥
१५ वादा] दृश्यतां पृ° १०९-- १ ॥
१८ पूर्वोऽ] °पूर्वः दृष्टो प्र° ॥
२० श] °शब्दः पर° प्र° ॥
२० ग्निष्टोमादिभिरिष्टिभिश्चा] °श्चाभिर्व्यक्तव्याऽपूर्वापि प्र° ॥
२१ अपि] विशेष्यतेnayacakra-ms-ḍenayacakra-ms-līṃ । विशिष्यते nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
२१ *] °ल्लोममोnayacakra-ms-ya । °ल्लोमनो nayacakra-ms-bhā ॥

स्य गतार्थत्वात् । न च स प्रत्यक्षोऽपूर्वो यतस्तेन निरूपणमारभ्येत--येन हवनेनापूर्वो निर्वर्तते तदनुष्ठातव्यम् ।

* * *

मन्त्रदेवतादिविशिष्टाभिः । मा भूद् यज्ञसंज्ञायाः क्रियाया एव धर्मत्वं यथा केश्चिन्मीमांसकैरेवं व्याख्यायते **--यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्** ऋग्वेद० १० । ९० । १५ इति, किं कारणम् ? तस्मिन्नर्थे प्रत्यक्षत एवानित्यायाः क्रियाया अनन्तरं फलसम्बन्धादर्शनात् क्रियावैफल्यदोषप्रसङ्गाच्च अग्निहोत्रम् इति धर्मः क्रियाभिव्यङ्ग्य उच्यते कार्ये कारणोपचारादग्निहोत्राभिव्यङ्ग्योऽग्निहोत्रमिति । ततः अग्निहोत्रं धर्मं जुहुयाद् भावयेत् स्वर्गकामः इत्येष वाक्यार्थो निर्दोष इत्येतमर्थं स्पष्टीकारयितुं विधिविधिनयः पृच्छति **--तथा सति अपूर्वाभिधाने कोऽर्थः कृतः स्यात् ?** अर्थशब्दस्य प्रयोजनाभिधेययोर्दृष्टत्वात् कोऽर्थः साधितः, किं प्रयोजनं कृतं स्यात् ? कोऽभिधेयः समर्थितः स्यात् ? *विधिनयो ब्रवीति **--यः स्वर्गकामः स हवनेने**तिकर्तव्यताविशेषेण **स्वर्गं भावयेदित्ययमर्थः कृतः** साधितः समर्थितः **स्या**दित्यर्थः । विधिविधिनय आह--विद्यापर्यायतत्त्वज्ञानोत्पादनार्थत्वादविद्यानिराकरणार्थत्वाच्च शब्दप्रयोगस्य **किमूनीकृतमर्थाविद्याया** इति, न किञ्चिदूनीकृतमित्यभिप्रायः । तत् समर्थयति **--यावदेवे**त्यादि, यदुक्तं **भवति यः स्वर्गं कामयते स जुहुयादि**ति तदुक्तं **भवति अपूर्वं जुहुयात् स्वर्गकाम इति,** नापूर्वोऽर्थोऽधिकोऽग्निहोत्रशब्देन लभ्यते, हवनेनैव तस्याभिव्यङ्ग्यत्वात् जुहुयात् स्वर्गकामः इत्येतावतैव गतार्थत्वात् जुहुयाद् धर्मं भावयेत् स्वर्गकामः इत्येतस्यां वाक्यार्थव्यक्तौ कोऽग्निशब्देन होत्रशब्देन चार्थः ? इत्यत आह **--ततो भावनस्य गतार्थत्वात्,** भवन्तं धर्मं भावयतो हेतुकर्तृसाधनसाध्यस्य धात्वर्थस्य भावनस्य जुहुयाच्छब्दप्रयोगादेव गतार्थत्वान्नार्थः कश्चिदग्निहोत्रमित्यनेन । § 453 - /ms

एवं तावदग्निहोत्रशब्दस्य प्रयोगो निरर्थकः । प्रसिद्धिविरुद्धा चेयं कल्पना, लोके वेदे वा तस्य तदर्थाभावात् । अभ्युपेत्यापि अपूर्वविशेषाभिधानमप्रत्यक्षत्वात् तन्निरूपणं हवनेन नोपपद्यत इति ब्रूमः, निरूपणवैधर्म्यात् ।

---

५ मांस] °कैरेवnayacakra-ms-bhā ‖
६ मान्या] °न्यासंति प्र° ‖
८ प्र] °प्रसंणत्वnayacakra-ms-bhā । °प्रसंगत्व nayacakra-ms-ya ‖
८ क्रियाभिव्य] °व्यंग्य इत्युच्यते nayacakra-ms-ya ‖
१० इ] इत्येवमर्थ प्र° ‖
११ अ] अत्र अपूर्वाभिधानेन इत्यपि पाठः स्यात् । दृश्यतां पृ° १५२ पं° १४ ‖
१२ योज] °जनं कथं स्यात् प्र° ‖
१३ *] विधेः नयो प्र° ‖
१४ ह] हवनेनं वेतिकर्त°nayacakra-ms-bhā ‖
१४ ता] °विशेषणेन प्र° ‖
१४ सा] साधितः साधितः स्यादित्यर्थःnayacakra-ms-ya ‖
१६ त्वा] °त्वादिविद्या° प्र° ‖
१६ प्र] °योगसाकिमनी°nayacakra-ms-bhā । °योगेः स किमनी° nayacakra-ms-ya ‖
१८ का] °कामयति प्र° ‖
२७ त्वा] °त्वातन्निरू°nayacakra-ms-bhā । °त्वान्निरू° nayacakra-ms-ya ‖

इह हि यद् घटादि वस्तु मृदानयनमर्दनादिक्रियया निरूपणार्थं प्रत्यक्षत उपलब्धचरं [तद्] व्यपदिश्यते अनया क्रियया घटो निर्वर्तते, अस्यास्तत् कार्यम्, इदं कारणम् इति, दृष्टकारणकार्यसम्बन्धत्वात् । न तु जात्वदृष्टपूर्व- - /ms स्य साधर्म्यदृष्टान्ताभावेऽनुमानाभावात् । अत आह **--न च स प्रत्यक्षोऽपूर्वो यतस्तेन निरूपणमारभ्येत** हवनस्य कार्यं स इदं चास्य कारणमिति । निरूपणं व्याख्येत्यर्थः । सा कथं व्याख्येति चेत्, उच्यते **--येनं हवनेन** 142/mj दृष्टापूर्वनिर्वर्तनशक्तिना निर्वर्त्योऽग्निहोत्राख्योऽ**पूर्वो**

* * *

अथोच्येत--अस्यास्तावत् प्राप्तेः प्रसिद्धिर्भविष्यति, तदनुबन्धाच्चेतिकर्तव्यतैव कर्तव्यता । न तर्हि पुनः जुहुयात् इति वाच्यं स्यात् ।

अपि चैवमुत्तरोत्तरविरोधपरिहारविचारप्राप्यार्थपरिग्रहात् पुरुषप्रमाणकस्तर्क

* * *

**निर्वर्तते तत् त्वयानुष्ठातव्यं** हवनम्, यथा मृदानयनादिक्रिया घटनिर्वर्तनार्थमिति । तत्तु न युज्यते, अत्यन्तमदृष्टकारणकार्यसम्बन्धत्वादनयोः ।

§ 454

सम्भावनयैतदपि कृत्वा कल्पनात्मिकयोक्तमपि न सम्भवतीति येऽभिहिता दोषास्तत्परिहारमनादृत्य परेण प्रसिद्धमात्रप्रतिपादनार्थ**मथोच्येत--अस्यास्तावत् प्राप्तेः प्रसिद्धिर्भविष्यती**ति ततो दोषपरिहारो भविष्यतीति । **प्राप्ते**रिति, **स्त्रियां क्तिन्** पा॰ ३ । ३ । ९४ इत्यत्र आबादीनां च इति वक्तव्यं **गुरोश्च हलः** पा॰ ३ । ३ । १०३ इति अप्रत्ययेनापवादेन मा भूद् बाधेति प्रापणात् प्राप्तेर्वाक्यान्तरप्रापिता प्रसिद्धिर्भविष्यति । अग्नये होत्रमग्निहोत्रमिति चतुर्थीसमासः, योगविभागादश्वघासादुपसङ्ख्यानाद्वा रूपसिद्धिस्तदर्थप्रसिद्धिश्च, ततः करणं तत्फलसम्बन्धश्च कर्तुरिति सर्वमुपपन्नम् । कतमस्माद्वाक्यात् प्रापिता प्रसिद्धिरिति चेत्, वक्ष्यमाणे वाक्यान्तरे **यदग्नये च प्रजापतये च सायं जुहोति** मै॰ प्रेयमेधा वै सर्वे सह ब्रह्माविदुः,

---

२ ल] °लब्धिचरं प्र॰ ॥
४ स्य] निरूपणमिति शेषः ॥
४ सा] साधर्म्यार्म्यं ?दृष्टान्ता°nayacakra-ms-ya । साधर्म्यादष्टान्ता° nayacakra-ms-bhā ॥
५ चा] वास्यnayacakra-ms-bhā ॥
१३ त] दृश्यतां पृ॰ १५२ पं॰ १५ ॥
१४ त] तत्र न प्र॰ । अत्र तच्च न इत्यपि पाठः स्यात् ॥
१७ प्र] अत्र °प्रसिद्धिमात्र° इत्यपि पाठः स्यात् ॥
१९ प्रा] प्राप्तिरिति प्र॰ ॥
१९ क्ति] क्तिरित्यत्र अपादीनां प्र॰ । स्त्रियां क्तिनित्यत्र आबादिभ्यश्चेति वक्तव्यम् इति पातञ्जलमहाभाष्ये ३ । ३ । ९४ ॥
२२ विभागाद] °दस्त्वमाद्युप° प्र॰ । विकृतिः प्रकृत्येति चेत्, अश्वघासादीनामुपसङ्ख्यानं कर्तव्यम् इति पातञ्जलमहाभाष्ये २ । १ । ३६ ॥
२४ य] यदग्नये र प्रजा° प्र॰ । शास्त्रान्तरेण प्राप्तत्वात् । किं तच्छास्त्रान्तरमिति चेत्, यदग्नये च प्रजापतये च सायं जुहोति इति केचित् इति अर्थसङ्ग्रहे पञ्चमपरिच्छेदे ॥

तेऽग्निहोत्रेण समराधयंस्तेषां त्रिरेकोऽजुहोद् द्विरेकः सकृदेकंस्तेषां यस्त्रिरजुहोत् तमपृच्छन् कस्मै त्वमहौषीरिति, सोऽब्रवीत्--त्रेधा वा इदम् अग्नये प्रजापतये सूर्यायेति । अथ यो द्विरजुहोत् तमपृच्छन् कस्मै त्वमहौषीरिति, सोऽब्रवीद् द्वेधा वा इदम् अग्नये च प्रजापतये च सायं सूर्याय च प्रजापतये च प्रातरिति । अथ यः सकृदजुहोत् तमपृच्छन् कस्मै त्वमहौषीरिति, सोऽब्रवीद् एकधा वा इदं प्रजापतय एवेति । तेषां यो द्विरजुहोत् स आर्ध्नोत् तस्येतरे साजात्यमुपायन् ऋध्नोति य एवं विद्वानग्निहोत्रं जुहोति उपास्य समानाः साजात्यं यन्ति । इति कृष्णयजुर्वेदस्य मैत्रायणीसंहितायां पाठः ॥सं० १ । ८ । ७ इति, **घृतेन पयसा दध्ना जुहुयात्** इति । **तदनुबन्धाच्च इतिकर्तव्यतैव कर्तव्यता,** तस्याः प्राप्तेर्वाक्यान्तरप्रापिताया अनुबन्धात् सम्बन्धादनुपरताकाङ्क्षादुत्तराः सर्वा इतिकर्तव्यता एव कर्तव्यताः । तासां चेतिकर्तव्यतानां प्रसिद्धिरग्निहोत्रस्य प्रसिद्धिस्तदात्मकस्येति । अत्रोच्यते --**न तर्हि पुनः जुहुयात् इति वाच्यं स्यात्,** अग्निहोत्रशब्देनैव अग्निप्रजापत्यादिसम्प्रदानजुहोत्यादीतिकर्तव्यतेनोक्तार्थत्वात् पुनरपि प्रागभिहितो यो **न हि कश्चिज्जुहोतिपुनर्वचनेन** इत्यादिग्रन्थार्थः स एव दोषप्रपञ्चोऽस्मिन्नपि व्याख्याध्वन्युपस्थितः । § 455 - /ms

अग्निहोत्रहवनयोः पौनरुक्त्यादिदोषाद्विरोध इत्युक्ते अ (Edtext outside numbered paragraph)नुवादविधित्वे न इति परिहारः, पु (Edtext outside numbered paragraph)नरप्रसिद्धत्वाद्विरोध इत्युक्ते कु (Edtext outside numbered paragraph)र्यादर्थो जुहुयाच्छब्दः इत्येवमादिविचारैः प्राप्योऽर्थस्त्वया परिगृहीतः, अतः स्वबुद्धिप्रामाण्यावलम्बनात् **पुरुषप्रमाणकस्तर्क आश्रितो भवति,** तर्कलक्षणं च **अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः** न्या० सू० १ । १ । ४० इति । किमिव ? **सामान्याद्यर्थैकान्तवदेव,** यथा सामान्यमेव, विशेषा एव, सामान्यं विशेषाश्च इत्येकान्तार्थपरिग्रहे प्रागुक्तविधिना पूर्वोत्तरविरोधपरिहारप्राप्योऽर्थोऽशक्यप्राप्तिरफलः पुरुषप्रमाणत्वात् तथाऽयमपि तर्कः । **स चा (Edtext outside numbered paragraph)निष्ठ** इति, अपि च तर्कोऽप्रतिपूर्णो यदि न भवेदाश्रीयेत, किन्तु (Edtext outside numbered paragraph) न प्रतिपूर्णः । कस्मात् ? दोषत्रयात् । कतमस्माद्दोषत्रयात् ? **पौनरुक्त्यादेरसत्कार्यवादाभ्युपगमात् पुनस्तत्त्यागात्** । जुहुयादुक्तेः पौनरुक्त्यादिदोषाः प्रागुक्तवत् । § 456

**अपि चैव**मित्यादि । किञ्चान्यत्, अत्रापि पुरुषप्रमाणकवादापत्तिः । किं

---

९ घृतेन] आज्येन जुहुयात् तेजस्कामस्य, तेजो वा आज्यम्, तेजस्वी एव भवति । पयसा पशुकामस्य, एतद्वै पशूनां रूपम्, रूपेणैवास्मै पशूनवरुन्धे, पशुमानेव भवति । दध्नेन्द्रियकामस्य, इन्द्रियं वै दधि, इन्द्रियाव्येव भवति । इति तैत्तिरीयब्राह्मणे २ । २ । ५ । ३८ ॥

१४ न] दृश्यतां पृ० १३२ पं० १ ॥

कारणम् ?

आश्रितो भवति सामान्याद्यर्थैकान्तवदेव । स चानिष्ठः, पौनरुक्त्यादेरसत्कार्यवादाभ्युपगमात् पुनस्तत्त्यागात् ।

एकावस्थामात्रविच्छिन्नपूर्वापरतत्त्वाग्न्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्च कुर्यादिति कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात् सर्वगतसत्कार्यकारणवृत्तित्वे

* * *

143/mj परिहारविचारप्राप्यार्थपरिग्रहात्,**उत्तरोत्तरविरोध**

* * *

आश्रितो भवति सामान्याद्यर्थैकान्तवदेव । स चानिष्ठः, पौनरुक्त्यादेरसत्कार्यवादाभ्युपगमात् पुनस्तत्त्यागात् ।

एकावस्थामात्रविच्छिन्नपूर्वापरतत्त्वाग्न्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्च कुर्यादिति कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात् सर्वगतसत्कार्यकारणवृत्तित्वे

* * *

परिहारविचारप्राप्यार्थपरिग्रहात्,

असत्कार्याभ्युपगमप्रदर्शनार्थमाह --**एकावस्थामात्रविच्छिन्न**त्यादि यावत् **कुर्यादिति कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात्** । **एकावस्थामात्रविच्छिन्नपूर्वापरतत्त्वाग्न्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्च**ेति, **च**शब्दाज्जुहुयादुक्तेश्च, एकस्यैवावस्था एका च सावस्था च एकावस्था, तत्परिमाणमेकावस्थामात्रं तिमितसरःसलिलवदविच्छिन्नम्, तस्यैव पुनस्तत्त्वं विच्छि-
- /ms न्नं पूर्वस्यापरस्य चेन्धनादेरग्न्यादे- र्भस्मादेर्घटपटादेश्च परविषयसामान्यवादिमतवत्, सर्वैक्यापन्नस्य सतोऽग्न्यादेर्भिन्नवस्तुत्वेनाभिनिवेशस्तदभ्युपगमोऽग्निरिति परमाणुद्व्यणुकादिभूम्यबादिसंयोगसम्भूतवनस्पतीभूताग्निभस्मत्रुटिपरमाण्वादिविच्छिन्नावस्थामात्रत्वे सति अग्निरिति भवति क्रमेण परिणामभेदाभ्युपगमात्, तस्य विधानात्, अग्निहोत्रं जुहुयात् इति च हवनक्रियानुष्ठानं तत्फलाभिमतः स्वर्गस्तयोश्च सम्बन्ध इति परस्परं विघटितत्वान्नोपपद्येत पूर्वापराभ्युपगमयोः । किं कारणं विघटितत्वमिति चेत्, उच्यते --**कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमा**दिति विघटनप्रदर्शनम् । एवं हि कारणे घृतादौ कार्यस्याग्निहवनकर्मणस्तत्कार्यस्य च स्वर्गादेरसत्त्वे सति

---

१६ पूर्वाप ] **॰परत्वाग्न्यादि॰** प्र॰ ॥
१६ च ]
**तशब्दा॰**nayacakra-ms-bhā । **तत्शब्दा॰** nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī । **तच्छब्दा॰** nayacakra-ms-vi ॥
१८ स्थामात्रं ] तिम ष्टिम ष्टीम आर्द्रीभावेपा॰ **धा॰** ॥
१९ स्य ]
**बंधनादे॰**nayacakra-ms-ya ॥
२१ ग ] **॰गमे॰**nayacakra-ms-ya ॥
२१ णुकादिभू ] **॰भूम्यत्वादि॰** प्र॰ ॥
२२ त्रु ]
**॰त्रुटितपर॰**nayacakra-ms-ya ॥
२५ त्वान्नोप ]
**॰पपद्येत**nayacakra-ms-bhā ॥
२५ विघ ] **विघटितमिति** प्र॰ । अत्र विघटनमिति इत्यपि पाठः स्यात् ॥

करणमुपपद्यते, तच्च सति नोपपद्यते सिद्धौदनपचनवत्, विशिष्टैकाग्न्याद्यवस्थाभ्युपगमे च पुरुषादिकारणात्मकसर्वैक्याभ्युपगमविरोधिनि सत्युपपद्यते नान्यथेत्यत आह --**सर्वगतसत्कार्यकारणवृत्तित्वे भेदविधिनिर्विषयत्वात्,** सुप्तसुषुप्तजागरिततुरीयावस्थाक्रमेणैकमेव युगपद्वा सर्वगतं पुरुषाख्यं कारणम्, तच्च सत्कार्यम्, 144/mj

* * *

भेदविधिनिर्विषयत्वात् सर्ववस्तुसन्निधिसद्भूतैव सा भेदसाधनसम्बन्धाभिनिर्वर्त्येति विधीयते, तदनु यथाभागकारकविन्यासात्मिकयेतिकर्तव्यतयानुष्ठीयते । अतोऽसौ प्राग् नासीत्, कार्यत्वेन परिगृहीतत्वात्, विशेषैकान्तिवस्तुवत् । स चाप्रतिपूर्णस्तर्कः, असिद्धहेतुकत्वात् प्रतितर्केण बाध्यत्वाच्च ।

न तु तत्त्वमेवं वस्तुनोऽसत्कार्यत्वम् व्यङ्ग्यत्वात्, पिण्डकालघटवत्, तत्त्व

* * *

सर्वगतं च तत् सत्कार्यकारणं च तदिति विग्रहात्, वक्ष्यमाणविधिविधिनयदर्शनेन तद्वृत्तित्वे अग्निहोत्रं कुर्यात् इति भेदविधिनिर्विषयत्वमग्न्याद्यभावात् । यथोक्तम्-- § 457

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ति ॥ - /ms
कैवल्योप॰ ३ § 459

तथा—

पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ शुक्लयजुःसं॰ अ॰ ३१ । २ § 462

इत्यादि, एतद्दर्शनं प्रतिपादयिष्यते । अतः **सर्ववस्तुसन्निधी**त्यादि, सर्ववस्तूनां सन्निधौ **सद्भूतैव सा** हवनक्रिया तथापि **भेदाः** साधनान्यस्याः, **घृतेन पयसा जुहुयात्** इत्यादिभेदक्रिया एवाग्निहवनक्रियायाः साधनानि तान्यन्तरेण तदभावात् **साधनसम्बन्धाभिनिर्वर्त्येति विधीयते,** *केन ? उपदेष्ट्रा स्वर्गकामं पुरुषं प्रति वचनेन त्वया कर्तव्येति विधीयते । **तदनु** अनुष्ठात्रापि तदुपदिष्टभेदसाधननिष्पाद्येत्यभ्युपगम्य यो यो भागो यथाभागं कारकाणां

---

४ जाग ] ॰रितत्वदीयावस्थंक्रमेणै॰nayacakra-ms-ya । ॰रितत्वदीया वस्थाक्रमेणै॰ nayacakra-ms-bhā । दृश्यतां पृ॰ १३२-- २ ॥
१३ त ] तद्वृत्तित्वेनाग्निहोत्रंnayacakra-ms-ya ॥
१३ भेद ] ॰विधिर्नि- र्वि॰nayacakra-ms-bhānayacakra-ms-vi विना ॥
१५ न ] न कर्मणा प्रजायन धनेन त्यागेनैकेन अमृतत्वमानसः प्र॰ ॥
२१ घृतेन ] दृश्यतां पृ॰ १४२ टि॰ ९ ॥
२३ * ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

विन्यास आत्मा यस्या इतिकर्तव्यतायाः सा **यथाभागकारकविन्यासात्मिका,** तया **इतिकर्तव्यतया** गवालम्भनाज्यप्रक्षेपादिप्रकाररूपया**नुष्ठीयते,** सामर्थ्यादतो**ऽसौ प्राग् नासीदि**त्याश्रिता । कस्मात् ? **कार्यत्वेन परिगृहीतत्वात्,** कुर्याज्जुहुयात् इत्यादिवचनात् कार्यत्वेन निर्वर्त्यत्वेन परिगृहीतैव सा । दृष्टान्तो **विशेषैकान्तिवस्तुव**दिति, यथा विशेषैकान्तवादिना कार्यमेव, न कारणम् इति प्रतिक्षणोत्पत्तिविनाशात्मकत्वात् प्रतिपन्नं वस्तु तत् प्राग् नास्ति, तच्च त्वयाभ्युपगतं क्रियाभ्युपगमादिति त्वां प्रति साध्यसाधनधर्मान्वितो दृष्टान्तः, मयापि च तदभ्युपगम्योक्तत्वादिति साध्यसाधनम् । एवमनेन तर्केणासत्कार्यवादोऽभ्युपगतस्त्वया भवति । **स चाप्रतिपूर्णस्तर्कः, असिद्धहेतुकत्वात् प्रतितर्केण बाध्यत्वाच्च ।** § 463

**न तु तत्त्वमेवं वस्तुनोऽसत्कार्यत्वम्,** किं कारणम् ? **व्यङ्ग्यत्वात्,** व्यङ्ग्या हि सा क्रिया न कार्या, अविवक्षितप्रत्येकसमुदितघृतादिद्रव्यधर्मत्वेनाभिव्य-
- /ms क्तेः । को दृष्टान्तः ? **पिण्डकालघटवत्,** यथा मृत्पिण्डकाल एव घटो विद्य-
145/mj मानोऽपि साधनान्तरापेक्षाभिव्यक्तित्वान्नोपलभ्यते, शुक्रशोणितावस्थायामिव

* * *

एवातथाभूतेर्घटस्वात्मवत् । अत एव च कारणमात्रमसौ सह फलेनापि, तदात्मत्वात् तन्निर्वृत्तत्वात्, घटमृत्त्ववत् ।

* * *

वा देवदत्तस्तदवस्थाविशेषान्तरत्वे सति उत्तरकालमुपलभ्यत्वात्, कार्यत्वादेव वा प्रकाश्यघटवदभिव्यञ्जनस्यैव करणाख्यत्वात् । इतरथा वन्ध्यापुत्रोऽपि क्रियताम्, असत्कार्यत्वात्, घटवत् । एवं तर्हि सत्त्वरजस्तमसां साम्यवैषम्यवद् व्यक्ताव्यक्तता एककारणत्वस्य बाधिका स्यादिति चेत्, नेत्युच्यते, कुतः ? **तत्त्व एवातथाभूतेः,** न ह्यव्यक्तावस्था नाम काचिदस्ति, किं तर्हि ? तत्त्व एवान्यथाभावोऽस्ति, तस्य भावस्तत्त्वम्, तस्मिंस्तत्त्व एव तद्भावावस्थायामेवान्यथाभवनात्, तदेव हि वस्तु स्वरूपावस्थायामेवान्यथा भवति, यद्यन्यदन्यथा भवेद् मृत्पिण्डोऽपि पटो भवेत्, न तु भवति । साधर्म्यदृष्टान्तश्च **घटस्वात्मवत्** । यथा घटो घटस्वात्मन्येव स्थितो नवः पुराणतयोत्पद्यते तथा स एव मृत्पिण्डोऽन्यो घटो भवति, न तु **साङ्ख्या**भिमताऽव्यक्तता नाम काचिदस्ति, यदि स एव घटो नवः पुराणतयाऽन्यो न भवेद् न पुराणः स्यात्, नव एव स्यात्, ततोऽन्यो वा पटादिः पुराणघटः

---

२ ना ] °नाजप्रक्षे° nayacakra-ms-bhā nayacakra-ms-pā ॥ °नातप्रक्षे° nayacakra-ms-bhā nayacakra-ms-pā विना ॥
५ विशेषैका ] °कान्तव° nayacakra-ms-ya ॥
८ त ] त्वदभ्यु° प्र° ॥
१४ रापेक्षाभिव्य ] °व्यक्तत्वा° nayacakra-ms-ya ॥
२० न्ध्यापुत्रोऽपि ] क्रियतांमसत्का° nayacakra-ms-raṃ nayacakra-ms-hī । क्रियतां सत्का° nayacakra-ms-pā nayacakra-ms-vi । क्रियये ?तासत्का° nayacakra-ms-bhā । क्रियसत्का° nayacakra-ms-ḍe nayacakra-ms-līṃ ॥

स्यात्, नैव वा कश्चिदपि भवेत्, तस्मात् तत्त्व एवातथाभूतेर्नाव्यक्तावस्था नाम काचिदस्ति । अत्राह--घटस्वात्मवत् इत्ययं दृष्टान्त उपपद्यते नवत्वावस्थानन्तरं पुराणत्वावस्थानुभवात्, मृत्पिण्डकालघटवत् इति न युज्यते तत्त्व एवान्यथाभावाभावात्, पिण्डानन्तरं हि शिवको भवति न घटो न स्तूपकच्छत्रकस्थालककोशककुशूलका इति । अत्रोच्यते--तुल्यप्रत्यासत्तित्वाद् यथा घटो भवति कुशूलकात् तथा कुशूलकः कोशकात्, कोशकः स्थालकात्, स्थालकश्छत्रकात्, छत्रकः स्तूपकात्, स्तूपकः शिवकात्, शिवकः पिण्डात्, पिण्डो मृदः, इति मृद एव तथा तथा भूतेः । अथवा किमनया - /ms साङ्ख्यसृष्टिक्रमकाङ्क्षनुमत्या ? तस्यामेव मृत्पिण्डावस्थायां घटो भवतीति प्रतिपद्यस्व स्तिमितसरःसलिलवत्तरङ्गवत् तत्त्व एवान्यथाभवनान्नास्त्यत्रापि क्रम इत्यतस्तदुपदर्शनार्थमाह--मृत्पिण्ड[काल]घटवदिति । अथवा **तत्त्व एव तथाभूतेरिति** पाठः, तत्त्व एव तद्भाव एव सति तेन तेन प्रकारेण भवनात्, पिण्ड एव मूर्तिस्वभावरूपाद्यात्मके शिवकाद्यात्मना नीलरक्ताद्यात्मना च भवनादिति । § 464

**अत एव च कारणमात्रमसौ,** तत्त्व एवातथाभूतेस्तथाभूतेर्वा कारणप्रमाणमसौ हवनक्रिया घृतादिकारणेभ्यो न व्यतिरिक्ता, उक्तहेतोरसत्कार्याभावात् कारणमात्रमसौ क्रिया इति प्रतिपत्तव्यमवश्यम् । न केवलं क्रियैव कारणमात्रम्, **सह फलेनापि** सा कारणमात्रम्, फलमप्यस्याः स्वर्गाख्यं सुखादि घृतादिकारणान्यथाभवनमात्रम् । अत्रोपचयहेतू प्रतिपादितार्थाविव **तदात्मत्वात् तन्निर्वृत्तत्वा**दिति, तस्यात्मा स आत्मास्येति वा तदात्मा, तेन तस्मिंस्तस्य स एव वा निर्वृत्तः, तद्भावस्तन्निर्वृत्तत्वं तदात्मत्वं च, तस्मात् तदात्मत्वात् तन्निर्वृत्तत्वाद् **घटमृत्त्ववत्,** घटस्य मृत्त्वं घटमृत्त्वं मृदेव घटः, घट एव मृद् यथा प्रतिपादितं 146/mj

* * *

एकान्तवादस्वाभाव्यादितिकर्तव्यताकर्तव्यताभ्युपगमात्तु पूर्वोत्तरावस्थानुबन्धात् सर्पस्फटाटोपमुकुलप्रसारणकुण्डलीकरणवद् यज्ञोपवीतसूत्रतन्तुत्वपटत्ववद्वा संस्थानमात्रभिन्नकारणकार्यत्वाभ्युपगम आपद्यत इति कार्यत्याग इति स्वशब्दार्थापत्तिविषयविपरीतार्थत्वाद् विवक्षाभेदव्याघातः ।

यदीतिकर्तव्यता जनयति ततः सा तज्जन्या न, जनकत्वात् कारणत्वात्

---

१ ए] एवतथा॰nayacakra-ms-ya ॥
३ स्थानुभ]
॰भवनात्nayacakra-ms-bhā ॥
४ एवान्य] ॰न्यथाभावात् प्र॰ ॥
५ कोश]
॰कोशकशूलकाnayacakra-ms-bhā
। ॰कोशकुशूलका
nayacakra-ms-ya ॥
९ का]
॰कात्कनु॰nayacakra-ms-ya ।
॰कात्कनु॰ nayacakra-ms-bhā ॥
१० लिल] ॰लवव-
त्त॰nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ
॥
११ दु] ॰दुपप्रद॰
nayacakra-ms-ya ॥
११ मृ] दृश्यतां पृ॰ १४४ पं॰ ५ ॥
१२ स] सति तेन
प्रकारेणnayacakra-ms-bhā ॥

* * *

तत्त्व एवातथाभूतेस्तथाभूतेर्वेति तद्वत् । तस्मात् कारणमेव क्रिया क्रियाफलं च । एवं तावदप्रतिपूर्णस्तर्कः प्राग् नासीत् क्रिया कार्यत्वेन परिगृहीतत्वात् इति, असिद्धहेतुत्वात् प्रतितर्केण बाध्यत्वाच्चेति सुष्ठूच्यते । § 465

- /ms किञ्चान्यत्, स्वयमेव त्वया परित्यक्तत्वाच्चाप्रतिपूर्ण एव, कस्मात् ? **एकान्तवादस्वाभाव्यात्**, एवंस्वभावा ह्येकान्तवादाः सर्वोक्तमृषात्ववादवत्, यथोक्तं त्वया **तदनुबन्धाच्चेतिकर्तव्यतैव कर्तव्यता** इति ब्रुवता कारणे कार्यस्य सत्त्वमभ्युपगम्यासत्त्वं च त्यक्तं भवति, अतो ब्रूमः --**इतिकर्तव्यताकर्तव्यताभ्युपगमात्त्वि**त्यादि । **इति**शब्दस्य प्रकारार्थवाचित्वादित्थमित्थं च कर्तव्यं **घृतेन जुहुयात् पयसा जुहुयात्** इत्यादिप्रकारा कर्तव्यता इतिकर्तव्यता, सैव कर्तव्यता कारणभूतास्ता एव प्रोक्षणादिक्रियाः अग्निहोत्रम् इत्यभ्युपगमात्, **पूर्वोत्तरावस्थानुबन्धाद्** विच्छिन्नपूर्वोत्तरावस्थस्य कस्यचिदभावात् कारणमेव कार्यं **सर्पस्फटाटोपमुकुलप्रसारणकुण्डलीकरणवद् यज्ञोपवीतसूत्रतन्तुत्वपटत्ववद्वा**, सूत्रमेव यथा यज्ञोपवीताख्यां लभते तथासमवस्थानात् तथा तन्तव एव पटस्तद्वत् **संस्थानमात्रभिन्नस्य कारणस्यैव कार्यत्व**मित्ययम**भ्युपगम आपद्यते इति**, इतिशब्दो हेत्वर्थे, एतस्मात् संस्थानमात्रभिन्नकारणकार्यत्वाभ्युपगमापत्तेर्हेतोः कार्यस्य त्यागः **कार्यत्यागः**, कुर्यात् इत्ययं हि शब्दः कार्यार्थे सति अर्थवान् भवति, नान्यथा । पुन**रिति**शब्दो हेत्वर्थे, ततश्च कुर्यादर्थत्यागात् **स्वशब्दार्थापत्तिविषयविपरीतार्थत्वाद् विवक्षाभेदव्याघातः**, अग्निहोत्रं जुहुयात् इत्यनेन स्वशब्देनैवासत्कार्यवादोऽभ्युपगतः, **तदनुबन्धाच्चेतिकर्तव्यतैव कर्तव्यता** इत्यर्थापत्त्या कारणात्मककार्यवादोऽभ्युपग-
- /ms तः, तयोरन्योन्यविपरीतार्थत्वाद्विरुद्धत्वाद् विवक्षाभेदो व्याघातश्च । विवक्षाभेदस्तावदसत्कार्यवाचिनः शब्दस्य कारणात्मककार्याभिधानाभ्युपगमात् कारणात्मककार्यवाचिनश्चासत्कार्याभिधानाभ्युपगमात् । अत एव च परस्परतो विरोधाद् व्याघातोऽनयोः । अथवार्थद्वयस्य स्वशब्दार्थापत्तिविषयस्याभ्युपगमाद् विवक्षाभेदोऽयं पुरुषबुद्धिवशाद् वेदवादप्रामाण्यमपौरुषेयं व्याहन्तीति विवक्षाभेदव्याघातः, स च त्वया तत्त्वानपेक्षणदोषान्नेक्ष्यते वस्तुतत्त्वविचारप्रद्वेषिणा यः कार्यकारणस्वरूपानपेक्षिणोऽपि बलादयं कारणकार्यतत्त्ववाद आपद्यतेऽनेकान्तरूपो वस्तुनस्तादात्म्यादनपेक्ष्यमाणोऽपि स्वमतव्याघातीति । § 466

३ द] दृश्यतां पृ० १४४ पं० ३, ४ ॥
७ न्धाच्चेतिक] ०**कर्तव्यतैव** प्रतिषु नास्ति । दृश्यतां पृ० १४२ पं० १ ॥
८ म्या] ०**म्य सत्त्वं** प्र० ॥
८ च] **च** तत्यक्तंnayacakra-ms-bhā ॥
८ ताक] ०**कर्तव्यत्वाभ्युपगमास्त्वित्यादि** प्र० ॥

१० घृतेन] दृश्यतां पृ० १४२ टि० ९ ॥
१७ का] **कार्यत्यागः**nayacakra-ms-ya प्रतिषु नास्ति ॥
२१ क] ०**कर्तव्यतैव** प्रतिषु नास्ति । दृश्यतां पृ० १४२ पं० १ ॥
२८ द्वेषिणा] ०**षिणये कार्य०** प्र० ॥

एवं कारणात्मकत्वेऽभ्युपगतेऽपि **यदीतिकर्तव्यता जनयती**ति इष्यते ततो न सा कर्तव्यता घृतादि 147/mj

* * *

पूर्वत्वाद् विधायकत्वात्, मातृवद् वचनवत् । अथ जन्या सा, एवं तर्हि न जनिका, जन्यत्वादिभ्यः, पुत्रादिवत् ।

प्रतीतिकर्तव्यतं च कर्तव्यतासमाप्तेरितिकर्तव्यतान्तरानारम्भः । प्रत्येकं त्वसमाप्तावकारणभावादतथाता च । समुदायस्यापि च तन्मात्रत्वात्, उक्तवत् ।

* * *

कारणेतिकर्तव्यताव्यतिरिक्ता काचिदस्ति **ततः सा तज्जन्या न** भवति क्रिया, नात्मनैवात्मानं जनयतीत्यर्थः । कस्मात् ? **जनकत्वात् कारणत्वात् पूर्वत्वाद् विधायकत्वाद् मातृवत्**, यथा माता नात्मानं जनयति, किं तर्हि ? ततोऽन्यां दुहितरं जनयति, एवमियमितिकर्तव्यता जनिका सती । तथा **कारणत्वात् पूर्वत्वाद् विधायकत्वा**दिति व्याख्येयानि । **वचनव**दित्यत्र यथा वचनमपि नात्मानं जनयति बुद्धिं तु ततोऽन्यां वाच्यविषयां जनयति तथा इतिकर्तव्यतेति । अथ मा भूदेष दोष इति जनकत्वमसिद्धं तस्या जन्यत्वात्, जन्या हि सेत्यत्रोच्यते **--अथ जन्या सा एवं तर्हि न जनिका** न कारणम्, **जन्यत्वादिभ्यः**, जन्यत्वात् कार्यत्वादपूर्वत्वाद् विधेयत्वात्, **पुत्रादिवत्** । आदिग्रहणाद् वाच्यार्थज्ञानवत् । तस्मात् स्वविहितदोषत्वाज्जन्यत्वे जनकत्वे वा दोषानतिवृत्तेरयुक्तमुक्तम् **--इतिकर्तव्यतैव कर्त- व्यता तदनुबन्धा**दिति - /ms
। § 467

किञ्चान्यत्, कारणमात्रत्वे सति कर्तव्यता प्रतीतिकर्तव्यतं परिसमाप्ता वा स्यात्, अपरिसमाप्ता वा ? तत्र तावद् यदि प्रत्येकमितिकर्तव्यतासु कर्तव्यता परिसमाप्ता ततः **प्रतीतिकर्तव्यतं च कर्तव्यतासमाप्तेरितिकर्तव्यतान्तरानारम्भः**, एकया **घृतेन जुहुयात्** इत्यनयैव इतिकर्तव्यतया तन्मात्रपरिसमाप्तायाः कर्तव्यतायाः कृतत्वात् **पयसा दध्ना** इत्यादीनामितिकर्तव्यतान्तराणामारम्भो निरर्थकः प्राप्तः । अनारम्भ एव वा तस्या अपि कारणमात्रत्वात् **इतिकर्तव्यतैव कर्तव्यता** इति त्वयैवाभ्युपगतत्वात् न्यायतश्च घृतादिकारण-

---

१७ त्वा ] °त्वादित्य जन्यत्वात्nayacakra-ms-ya ॥
१८ वा ] वाक्यार्थ°nayacakra-ms-ya ॥
१९ यु ] °युक्तम्nayacakra-ms-ya ॥
१९ इ ] दृश्यतां पृ° १४२ पं° १ ॥
२१ तीतिक ] °कर्तव्यंताnayacakra-ms-pā । °कर्तव्यता nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
२३ व्य ] °व्यतासमाप्ते°nayacakra-ms-ya ॥
२४ घृतेन ] दृश्यतां पृ° १४२ टि° ९ ॥
२५ प ] दृश्यतां पृ° १४२ टि° ९ ॥
२७ इ ] इतिकर्तव्यतेति त्वयैवा°nayacakra-ms-ya ॥
२७ ता ] दृश्यतां पृ° १४२ पं° १ ॥

द्रव्यमात्रत्वस्य क्रियायाः प्रतिपादितत्वात् सिद्धौदनपचनवदनारम्भ एव प्राप्तः । एवं तावत् प्रत्येकपरिसमाप्तौ दोषः । **प्रत्येकं त्वसमाप्तावकारणभावादतथाता च**, यदि शिबिकावाहककारणत्ववत् प्रत्येकमसमाप्ता च कर्तव्यता इतिकर्तव्यतासु तथाप्यकारणता, प्रत्येकमकारणत्वात्, सिकतातैलवत् । इतिशब्दस्य एवमर्थत्वात् एवंशब्दस्य च प्रकारार्थत्वादेवं कर्तव्यमितिकर्तव्यम्, घृतादिप्रक्षेपस्वरूपकर्तव्यता तथाता, न तथाता अतथाता, तत्तथात्वं न प्राप्नोति प्रत्येकमकारणत्वादित्यतथाता च । ननूक्तं शिबिकावाहकवहनशक्तिवत् समुदाये सेतिकर्तव्यताशक्तिरिति, अत्रोच्यते --**समुदायस्यापि च तन्मात्रत्वा**दवयवमात्रत्वा**दुक्तव**दिति, उक्तं हि **तत्त्व एवातथाभूतेस्तथाभूतेर्वे**ति, अवयवा एव हि समुदायीभवन्तो दृश्यन्ते, नो चेत् सिकतातैलवदेव न स्यात् तिलसमुदायतैलमपि । § 468
148/mj

अभिमतविध्यनुवादवैपरीत्यदोषप्रसङ्गश्च । तन्मात्रहवनार्थत्वाद् घृतादिवद् हवनस्य विधायकता, अनुवादता च घृतादेः कारणमात्रवृत्तित्वाद् हवनवत् । एवं चावाक्यत्वम्, अननुवादत्वादविधायकत्वात्, विच्छिन्नार्थपदवत् काकरुतवत् । ज्ञाताज्ञाताविशेषाच्चैवं घटज्ञानवज्ज्ञाताज्ञातालम्बनविध्यनुवादार्थयुगपद्वि- § 469

किञ्चान्यत्, **अभिमतविध्यनुवादवैपरीत्यदोषप्रसङ्गश्च** । तत्र तावत् **घृतेन जुहुयात् पयसा जुहुयात्** इत्यादिवाक्येषु घृतादेर्विधेयत्वाभिमतस्य कारणमात्रस्य हवनकार्यस्यान्यस्य **तन्मात्रे**तिकर्तव्यतामात्र**हवनार्थत्वात्** अग्निहोत्रं जुहुयात् इत्यत्र श्रुतहवनानुवादाभावोऽपि, हवनस्य घृतादिव्यतिरिक्तस्याभावात् । ततश्च **घृतादि**विधानव**ज्ज्ञातार्था**भिमतस्य **हवन**वाक्य**स्य विधायकतैव स्यात्**, नानुवादता । **अनुवादता च घृतादे**रज्ञातार्थविधायकाभिमत-

२ ण ] °णभावातथाता च यदिnayacakra-ms-bhā । °णाभावातथातावद्यदि nayacakra-ms-vi । °णाभावात्तथातावद्यदि nayacakra-ms-bhā nayacakra-ms-vi विना ॥
३ क ] °काकारणत्ववत् प्र° ॥
३ माप्ता ] °प्ता कर्त° nayacakra-ms-bhā ॥
६ त ] यथाताnayacakra-ms-bhā ॥
६ अ ] अतथात् प्र° ॥
७ त्वादित्य ] °त्यतथातावन्ननूक्तं प्र° ॥
८ मुदाये ] सति°nayacakra-ms-ya ॥
९ त ] दृश्यतां पृ° १४५ पं° १, ११ ॥
१० मुदायीभ ] भवन्तो नो चेत्nayacakra-ms-ya ॥
१८ घृ ] दृश्यतां पृ° १४२ टि° ९ ॥
१९ त्वा ] °त्वादिमतस्य प्र° ॥
२० का ] °कार्यश्चान्यस्य तन्मा°nayacakra-ms-bhā । °कार्यस्वातन्मा° nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
२१ नानुवादाभा ] °भावो हवनस्यnayacakra-ms-bhā ॥

स्यापि, **कारणमात्रवृत्तित्वाद् हवनवदि**ति, कारणमात्रे वृत्तिरस्य तत् कारणमात्रवृत्ति घृतादि हवनं च, उक्तविधिना कार्याभावस्य प्रतिपादितत्वात् । तस्मात् कारणमात्रवृत्तित्वाद् हवनवद् घृतादेरनुवादता घृतादिवद्धवनस्य विधायकतेति । **एवं चे**ति, विध्यनुवादयोरन्योन्यस्वभावसङ्कराव्यवस्थितात्मस्वभावत्वान्न विधिर्नानुवादोऽस्ति, अत एवमुक्तप्रकारेणा**वाक्यत्वम्, अननुवादत्वादविधायकत्वात्, विच्छिन्नार्थपदवत्** । यथा विच्छिन्नार्थमेकं पदमधिकृतपदार्थान्तरासम्बन्धं गाम् इत्येतन्न वाक्यमत एव विध्यनुवादत्वाकाङ्क्षार्थाभावात् तथा अग्निहोत्रं जुहुयात् स्वर्गकामः, घृतेन पयसा जुहुयात् इत्यादीनि । यस्यापि पदार्थो नास्त्येव तं प्रति **काकरुतव**दिति दृष्टान्तः । यथा काकरुतमर्थान्तराकाङ्क्षारहितमवाक्यमविध्यनुवादत्वात् तथेदमपि । § 470

यथासङ्ख्येन ज्ञातालम्बनोऽनुवादः, अज्ञातालम्बनो विधिः, तयोरर्थयोर्युगपद्वक्तुमिच्छा युगपद्विवक्षा, एकस्मिन्नर्थे तस्या वृत्तिः, असौ द्व्यर्थता वाक्यभेदः, देवदत्ताख्यानवाक्यस्यैव गवानयनचोदनायां देवदत्तान्वाख्यानवदनुवादो गवानयनविधानवाक्यस्य वा देवदत्ताख्यानवाक्यवद् देवदत्त- (Edtext outside numbered paragraph) विधानमिति (Edtext outside numbered paragraph)येयमेकस्य शब्दस्य युगपदर्थद्वयाभिधानशक्त्यभावाद्वाक्यभेददोषपरिकल्पना तस्याः परिश्लथता, अर्थभेदाभावात् । अतोऽसाधुतापि शब्दानां नास्ति, सर्वे साधवोऽसाधवो वा शब्दाः प्रसक्ता इति । § 471

**ज्ञाताज्ञातविशेषाच्चैवं घटज्ञानवत्** । एवमिति कारणमात्रकार्यत्वाभ्युपगमे साधुतासाधुतयोः साधुता तावत् गौः इत्यादेः पदस्य अग्निहोत्रं जुहुयात् - /ms इत्यादेर्वाक्यस्य विधित्वमनुवादत्वं च नोपपद्यते । शब्दो हि ज्ञातार्थोऽज्ञातार्थो वा प्रयुज्यते, ज्ञातार्थोऽनूद्याज्ञातार्थविधानार्थं प्रयुज्यते, स पुनर्ज्ञातार्थः स्वत एव प्रत्यक्षादिना प्रमाणेन ज्ञातेऽर्थे प्रयुज्येत वाक्यान्तरेण वा परेण ज्ञापितेऽर्थे, यथा अयं देवदत्तः इति अयंशब्दस्य प्रत्यक्षदृष्टार्थवाचित्वादनूद्य देवदत्तत्वं विधीयते, वाक्यान्तरवेदितार्थानि वा पदान्यनूद्य अभ्याजनं विधीयते देवदत्त ! गामभ्याज शुक्लाम् इति ज्ञाताज्ञातार्थता पदानां वाक्यानां च साधुत्वाभिमतानां प्रत्येकं सर्वेषां द्व्यर्थता दृष्टा । को दृष्टान्तः ? **घटज्ञान-**

---

३ ह] हवनघृतादे॰ प्र॰ ॥
३ नुवा] ॰वादकताnayacakra-ms-ya ॥
५ अ] अनुवाद॰ प्र॰ ॥
७ रा] ॰रसंबंधं प्र॰ ॥
८ इ] अत्र इत्यादीति इत्यपि पाठः स्यात् ॥
९ य] तथा प्र॰ ॥
११ ज्ञा] ज्ञातावि॰nayacakra-ms-bhā । ज्ञाताज्ञातवि॰ nayacakra-ms-ya ॥
१३ स्य] विधेत्व॰nayacakra-ms-bhā । विधेयत्व॰ nayacakra-ms-ya ॥
१५ रेण] ॰णपिते॰nayacakra-ms-bhānayacakra-ms-pānayacakra-ms-ḍ । ॰णापिते॰ nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥

**वत्** । यथा घटस्यारातीया भागाश्चक्षुराद्युपलभ्या ज्ञाताः परान्तर्बुध्नादिभागा न ज्ञाताः । *सैषा लोकप्रसिद्धा साधुता पदवाक्यशब्दानां कारणात्मकार्यवादेऽस्मिन्न घटेत, सर्वस्यैकात्मकत्वे ज्ञाताज्ञातभेदानुपपत्तेः, एकस्यैव वा तदुभयाभावाद्विध्यनुवादत्वाभावस्योक्तत्वात् काकरुतादिवदिति । नाप्यसाधुता वाक्यभेदानर्थक्यादिदोषसम्बद्धा घटते, यस्मात् कारणात्मककार्यवादेऽर्थान्तराभावा

वक्षावृत्तिवाक्यभेददोषपरिकल्पनापरिश्लथता । श्रुतिभेदोऽपि वृथैवं साध्वसाधुत्वाभ्याम्, एकार्थत्वात्, घटकुटवत् । इदं चाज्ञातमपि सत् त्वया तत्त्वमेवैवं विवेक्तारं प्रति प्रदर्शितं घुणाक्षरवत् ।

अथोच्येत--कारणमात्रकार्यदर्शनमिह निर्मूलापविद्धक्रियावाक्यप्रबन्धमिति

* * *

श्लथता,**ज्ञाताज्ञातालम्बनविध्यनुवादार्थयुगपद्विवक्षावृत्तिवाक्यभेददोषपरिकल्पनापरि** *

149/mj

* * *

वक्षावृत्तिवाक्यभेददोषपरिकल्पनापरिश्लथता । श्रुतिभेदोऽपि वृथैवं साध्वसाधुत्वाभ्याम्, एकार्थत्वात्, घटकुटवत् । इदं चाज्ञातमपि सत् त्वया तत्त्वमेवैवं विवेक्तारं प्रति प्रदर्शितं घुणाक्षरवत् ।

अथोच्येत--कारणमात्रकार्यदर्शनमिह निर्मूलापविद्धक्रियावाक्यप्रबन्धमिति

* * *

श्लथता,

किञ्चान्यत्, न केवलं वाक्यभेददोषो भेदाभावदोषश्चापदार्थात्मकः, **श्रुतिभेदोऽपि वृथैवं साध्वसाधुत्वाभ्याम्** । एवमिति कारणात्मककार्यवादाभ्युपगमप्रकारेणोक्तमतिदिश्य सङ्क्षिप्य साधनमाह सोदाहरणम् --**एकार्थत्वाद् घटकुटव**दिति, यथा प्रतीतार्थयोर्घटकुटशब्दयोरेकार्थत्वादन्यतरप्रयोगो वृथा साधुत्वाभिमतयोः, असाधुत्वाभिमतस्य गोशब्दमात्रस्य वाचा-दिशा-

१ ट] श्चेषाnayacakra-ms-bhā ‖
२ *] °पत्तिःnayacakra-ms-ya ‖
३ प] °स्योक्तेःnayacakra-ms-ya ‖
४ त्वाभाव] [In the print edition there is a footnote reference but no corresponding note.]
१४ *] घटज्ञानस्या°nayacakra-ms-ya ‖
२२ दार्थात्म] °त्मक-
श्रुति°nayacakra-ms-pānayacakra-ms-ḍenayacakr
‖
२६ वा] वाचादिसाग्रादिमदर्थेnayacakra-ms-pānayacakra-ms-ḍenayacakra-r
। वाचादिसाग्रादियमदर्थे nayacakra-ms-bhā ।
वाचादिग्रादितमदर्थे nayacakra-ms-raṃ nayacakra-ms-hī ‖

साम्नादिमदर्थेषु युगपत् प्रयुक्तस्य चैकार्थत्वात् अर्थभेददोषपरिकल्पनापरिश्लिष्टता इति वर्तते । तस्मात् पदवाक्यशब्दयोः साधुत्वासाधुत्वाविशेषाच्छिष्टेतरलोकव्यवहाराविशेषः । एवं ते जुहुयादुक्तेः पौनरुक्त्यस्ववचनविरोधौ स्वशब्दोक्तासत्कार्यवादत्यागः कारणात्मकसत्कार्यावादाभ्युपगमश्चेत्यप्रतिपूर्णतर्कता सदोषत्वादित्युक्तम् । § 472

यदप्येतत् त्वयाभ्युपगतं कारणात्मकसत्कार्यत्वं तदप्यसमीक्ष्याबुद्धिपूर्वकमेवोक्तमित्यतस्तत्प्रदर्शनार्थमाह **--इदं चाज्ञातमपि सत् त्वया तत्त्वमेवैवं विवेक्तारं प्रति प्रदर्शितं घुणाक्षरवत्** । यथा घुणः काष्ठमुत्किरन्नक्षराकारमपि रेखामुत्किरति यदृच्छया तथा त्वयेदं तत्त्वमेवैवं कारणात्मकसत्कार्यत्वं प्रदर्शितम् **इतिकर्तव्यतैव कर्तव्यता** इति ब्रुवता । तत् पुनर्विवेक्तारं प्रति प्रदर्शितम्, इत्थमसत्कार्यं भवति, इत्थं सत्कार्यम् इति यो वाच्यवाच- - /ms कसाधनस्वरूपविवेकज्ञस्तं प्रत्येव प्रदर्शितं नात्मतुल्यबुद्धीन् प्रति, दर्शयन्नपि स्वयं तद्विवेकं न चेच्छति । § 473

**अथोच्येत--कारणमात्रकार्यदर्शनमिहे**त्यादि यावद्**वचनच्छला**दिति । अथ त्वयैवमुच्येत--न मया कारणमात्रकार्यदर्शनैकान्तोऽभ्युपगम्यते यतस्त्वयैते दोषा मां प्रत्यापाद्यन्ते । किं तर्हि ? मयाभ्युपगम्यते 150/mj

* * *

असत्कार्यं विवक्ष्यते, अलब्धवृत्तित्वात्, खपुष्पवत् । तद् द्विविधम्--अनितिकर्तव्यतात्मकमितिकर्तव्यतात्मकं च । तत्रानितिकर्तव्यतात्मकं घटादि यूपादि च । इतिकर्तव्यतात्मकं पुनः प्राप्तिसंवादि, यथा सेवादि । तच्च न कारणमात्रम्, कुर्यात्प्रतिपादितादसत्कार्यवादादादौ मध्येऽन्ते च कर्तव्यताभ्युपगमाद् यदुच्यते त्वया दोषजातं तद् वचनच्छलात् ।

* * *

न कारणमेव न कार्यमेव नोभयमेव नानुभयमेवेत्यविचार्य वस्तुतत्त्वैकान्तपरिग्रहमकृत्वा कारणं कार्यमुभयमनुभयं वाभ्युपगम्यते । अस्मिन् अग्निहोत्रं जुहुयात् स्वर्गकामः इति वाक्ये यत् कारणमात्रकार्यप्रदर्शनमनुपात्तापरित्यक्तमिह विधिनये सदपि यत् तदत्र **निर्मूलापविद्धक्रियावाक्यप्रबन्ध-**

---

१ यु] युगदप्रयुक्तस्य चैकार्थत्वात्nayacakra-ms-bhā । युगपदप्रयुक्तचैकार्थत्वात् nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ । युगपदप्रयुक्तावैकार्थत्वात् nayacakra-ms-raṃ nayacakra-ms-hī । युगपदं प्रयुक्तं चैकार्थत्वात् nayacakra-ms-vi ॥
३ हा] °हारवि° प्र° ॥
६ य] यद्यप्ये°nayacakra-ms-ya ॥
६ त्का] °त्कार्यात्वnayacakra-ms-raṃnayacakra-ms-hīnayacakra-ms-pā ॥
९ णात्म] °त्मसत्का°nayacakra-ms-ya ॥
१० इ] दृश्यतां पृ° १४२ पं° १ ॥
१२ रूप] विधिकज्ञ° प्र° ॥
१३ न] न वे° प्र° ॥
२५ नु] °नुयात्वापरि°nayacakra-ms-ya ॥

म्, निर्मूलमपविद्धः क्रियाप्रबन्धो वाक्यप्रबन्धश्च यस्मिंस्तदिदं निर्मूलापविद्धक्रियावाक्यप्रबन्धम् । *इतिशब्दो हेत्वर्थे, यस्मान्निर्मूलापविद्धक्रियावाक्यप्रबन्धं तस्मात् कारणमात्रकार्यदर्शनस्य तद्दोषपरिहारार्थमिष्यते विवक्ष्यतेऽनवधारितैकान्तदर्शनत्वात् कारणमात्रत्वं त्यक्त्वा यत् कार्यासत्त्वं तदेव अग्निहोत्रं जुहुयात् इति वाक्ये कारणमात्रकार्यदर्शनमेव सत् **असत् कार्यम्** इति **विवक्ष्यते**ऽभ्युपगम्यते च । किं कारणम् ? **अलब्धवृत्तित्वात्,** अलब्धा वृत्तिरनेनेत्यलब्धवृत्ति कार्यम्, तस्मादलब्धवृत्तित्वात् **खपुष्पवत्,** यथा खपुष्पमलब्धवृत्तित्वादसत्तथा कार्यं स्वर्गापूर्वादि अलब्धवृत्तित्वादसत् । लब्धवृत्तित्वे कुर्याज्जुहुयात् इति न चोद्येत, सिद्धौदनार्थं पचेत् इत्यचोदनावत् । अतोऽसत् कार्यमागृह्य स्वर्गादि तत्प्राप्त्यर्थं क्रियाश्रीयते— अग्निहोत्रं कुर्यादिति । **तद् द्विविधम्,** तच्च कार्यं द्विविधम् --**अनितिकर्तव्यतात्मकमितिकर्तव्यतात्मकं च । तत्रानितिकर्तव्यतात्मकं** कार्यं **घटादि यूपादि च** लोके वेदे च दृष्टम्, मृदानयनमर्दनदण्डग्रहणचक्रभ्रमणादीतिकर्तव्यतात्मकं घटाख्यं कार्यं न भवति तदुपरमेऽपि पृथगुपलब्धेः, तथाष्टाश्रिकरणादीतिकर्तव्यतात्मको न भवति यूपः । **इतिकर्तव्यतात्मकं पुनः** कार्यं **प्राप्तिसंवादि,** प्राप्त्या संवदितुं शीलमस्य प्राप्तिसंवादि, **यथा सेवादि,** उपस्थानाञ्जलिकरणादिरूपैव सेवा ताभ्यः पृथगनुपलब्धेः । **तच्च** कार्यं **न कारणमात्रं** *नेतिकर्तव्यतात्मकं घटादियूपादिवत्, **कुर्यात्प्रतिपादितादसत्कार्यवादात्,** कुर्याच्छब्दप्रतिपादितात् अग्निहोत्रं कुर्यात् इत्यत्र कुर्याच्छब्देन प्रतिपादितात् घटं कुर्यात् इति प्रतिपादितघटासत्कार्यार्थवाक्यवदिदमपि वाक्यं स्फुटतरासत्कार्यार्थम् । किं कारणम् ? **आदौ मध्येऽन्ते च कर्तव्यताभ्युपगमात्,** अतोऽसत्कार्यवादस्य उपक्रमप्रभृत्यपवर्गपर्यवसानेषु क्रियाविशेषेष्वभ्युपगतत्वाद् **यदुच्यते त्वया दोषजातं तत् त्वद्वचनात् प्राप्तिप्रापितेतिकर्तव्यतैव कर्तव्यता** इति **वचनच्छलात्,** कारणमात्रकार्यत्वापत्तिस्ततो विध्यनुपपत्तिरित्यादि सर्वं दोषजातं नास्तीति । § 474

- /ms

प्राप्त्यनुबन्धप्रापितेतिकर्तव्यताकर्तव्य (Edtext outside numbered paragraph)तार्थस्याग्निहोत्रहवनक (Edtext outside numbered paragraph)रणार्थस्य वाक्यस्य वाक्यता । कुतः ? **इतिक-**

---

२ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ‖
३ मिष्य] ॰मिष्टतो विवक्षते॰ प्र॰ ‖
६ ऽभ्यु] ॰भ्युपगमे च प्र॰ ‖
९ ना] ॰नव-त्nayacakra-ms-bhānayacakra-ms-vin ‖
१२ तात्म] ॰त्मकं च कार्यंnayacakra-ms-ya ‖
१२ यू] यूपादिव लोके प्र॰ ‖
१७ ता] ताभ्य इतिकर्तव्यताभ्य इत्यर्थः ‖
१७ त] तत्कार्यंnayacakra-ms-ya ‖
१७ *] नेवेतिक-र्ते॰nayacakra-ms-ḍenayacakra-ms-līṃnayacakra
ayacakra-ms-ḍenayacakra-ms-līṃ ‖
२० त] ॰तरंnayacakra-ms-vi ‖
२३ प्रा] दृश्यतां पृ॰ १४२ पं॰ १ ‖

**र्तव्यतावाक्यासिद्धौ तदसिद्धेस्तत्सिद्धौ तत्सिद्धेः,** तत् पुनरितिकर्तव्यतावाक्यम्, तदवाक्यत्वे तद्बलप्रतिष्ठाप्यकर्तव्यतावाक्यमप्यवाक्यम् । तत्र तावत् घृतेन जुहुयात् इत्येत**दितिकर्तव्यतावाक्यमवाक्यम्, अ** (Edtext outside numbered paragraph)**ननुवादत्वात्, उन्मत्तप्रलापवत् ।** यथा कामोन्मत्तस्य पक्षी इति द (Edtext outside numbered paragraph)र्शने भ्रान्तेः हा प्रिये ! हा प्रिये ! इत्यादिर्विप्रलापो न वाक्यं प्रसिद्धार्थानुवादाभावादेवं घृतेन जुहुयात् इत्यस्यापि तदभावात् तत्कर्तव्यतावाक्याभावः । अ (Edtext outside numbered paragraph)ननुवादत्वं चा (Edtext outside numbered paragraph)स्य घृतसम्प्रदानकहवनविधानाद् विधिवाक्यस्य, विध्यनुवादयोश्चान्योन्यनिराकाङ्क्षयोरन्यतराभावः । स्यान्मतम्--विधिमात्रस्य द्वा (Edtext outside numbered paragraph)रं द्वारम् इति अनुवादमात्रस्य उद्घाट्यताम् इति दृष्टत्वाद् ना (Edtext outside numbered paragraph)पेक्षेतेति चेत्, न, तत्रापि बहिरङ्गस्थितप्रकरणादिभ्यस्तत्सिद्धेरपेक्षैव । तस्मादिह **इ** (Edtext outside numbered paragraph)**तिकर्तव्यतैव कर्तव्यता** इति वचनात् कर्तव्यतावाक्यस्यैवा (Edtext outside numbered paragraph)सिद्धेः घृतेन जुहुयात् इत्यस्य प्र (Edtext outside numbered paragraph)सिद्धार्थस्यानुवादत्वाभावादवाक्यत्वम्, तदवाक्यत्वात् तद्बलप्रतिष्ठाप्याग्निहोत्रहवनकर्तव्यताविधिवाक्यासिद्धिः, अत आह --**जुहुयात् इत्यस्य उक्तवदेवे**त्यादि, जुहुयात्, अग्निहोत्रं कुर्यात्, हवनं कु (Edtext outside numbered paragraph)र्यात्, अग्निहोत्रं हवनं कुर्यात्, प्राप्त्यनुबन्धप्रापितघृतादीतिकर्तव्यतात्मककर्तव्यताग्निहोत्रं कुर्यात्, अग्निहोत्रमपूर्वं कुर्यात् इत्युक्तविकल्पेषु प्रागभिहितदोषसम्बन्धादेतैः **सर्वैः** प्रकारैः **प्रयोगस्य** (Edtext outside numbered paragraph) **परीक्षायां** निर्मूलार्थत्वमविषयत्वात्, अविषयत्वमपूर्वार्थत्वात्, अपूर्वार्थत्वमज्ञातार्थत्वात्, अज्ञातार्थत्वं प्र (Edtext outside numbered paragraph)माणान्तरेण वाक्यान्तरेण वा प्रागविहितत्वादिति । तमुपसंहृत्याह --**इतिकर्तव्यतावाक्यप्रत्ययापि न कर्तव्यता** (Edtext outside numbered paragraph)**गतिः** । § 475

एतदपि नोपपद्यते, विधिविधिनयदर्शनोपपादयिष्यमाणकारणमात्रत्ववादात् । अभ्युपेत्यापि - /ms

असत्कार्यवादोक्तावपि नैवास्य वाक्यता, इतिकर्तव्यतावाक्यासिद्धौ तदसिद्धेस्तत्सिद्धौ तत्सिद्धेः । इतिकर्तव्यतावाक्यमवाक्यम्, अननुवादत्वात्, उन्मत्तप्रलापवत् । जुहुयात् इत्यस्योक्तवदेव सर्वप्रयोगपरीक्षायामर्थाभावादितिकर्तव्यतावाक्यप्रत्ययापि न कर्तव्यतागतिः ।

क्वेदमभिहितं जुहुयात् इति ? हवनापूर्वकरणार्थतयोः प्रधानाग्निहोत्रश्रुति-

* * *

151/mj त्कार्यवादोक्तावपि नैवास्य वाक्यताअस

* * *

असत्कार्यवादोक्तावपि नैवास्य वाक्यता, इतिकर्तव्यतावाक्यासिद्धौ तदसिद्धेस्तत्सिद्धौ तत्सिद्धेः । इतिकर्तव्यतावाक्यमवाक्यम्, अननुवादत्वात्, उन्मत्तप्रलापवत् । जुहुयात् इत्यस्योक्तवदेव सर्वप्रयोगपरीक्षायामर्थाभावादितिकर्तव्यतावाक्यप्रत्ययापि न कर्तव्यतागतिः ।

क्वेदमभिहितं जुहुयात् इति ? हवनापूर्वकरणार्थतयोः प्रधानाग्निहोत्रश्रुति-

* * *

त्कार्यवादोक्तावपि नैवास्य वाक्यता

इ (Edtext outside numbered paragraph)त्याद्यभिसम्बध्यते, क्रमोल्लङ्घनेन विकल्पद्वयोपन्यासस्तुल्योत्तरत्वात्, हवनं कुर्यात्, अग्निहोत्राख्यमपूर्वं कुर्यात् इत्येतयोरर्थविकल्पयोः प्रधानस्याग्निहोत्रशब्दस्य तदर्थस्य च त्याग आपद्यते । घृतेन जुहुयात् इत्यादिषु अनुवादसफलीक्रियार्थम् अग्निहोत्रं जुहुयात् इत्यत्र जुहुयाच्छब्दस्य स्वप्रकृत्यर्थस्य सार्थकत्वेऽग्निहोत्रशब्दः पौनरुक्त्यान्निरर्थक आपद्यते । अथ प्रधानत्वादग्निहोत्रस्य मा भूदग्निहोत्रशब्दो * (Edtext outside numbered paragraph)निरर्थक इति जुहुयाच्छब्दो निरर्थक (Edtext outside numbered paragraph) इष्यते ततो जुहुयाच्छ (Edtext outside numbered paragraph)ब्दनैरर्थक्यात् प्रयोगो नोपपद्यते विहितार्था (Edtext outside numbered paragraph)भावेऽनुवाद (Edtext outside numbered paragraph)त्वाभावात् । प्रधानत्वं चाग्निहोत्रस्य साक्षात् स्वर्गादिकाम्यपुरुषार्थसाधनत्वेन विधानात्, जुहोतिप्राधान्ये च तदनुपपत्तिः । अत्र च **न** (Edtext outside numbered paragraph) **तु घटवदग्निहोत्रशब्दः काश्चिदपि कर्तव्यतां ब्रवीति** इ (Edtext outside numbered paragraph)त्यादिः सर्वो ग्रन्थः पूर्वोत्तरपक्षप्रसङ्गतो योज्यो यावत् **ना** (Edtext outside numbered paragraph)**पि घटादिकर्तव्यतायामिव काचित् क्रिया प्रसिद्धा ययाग्निहोत्राख्यता हवनस्यातिदिश्येत हवनाख्यता वाग्निहोत्रस्य** इति हवनं कुर्यात् इत्ययमुक्तोत्त (Edtext outside numbered paragraph)रोऽर्थविकल्पः । अपूर्वार्थपक्षेऽपि अग्निहोत्रशब्दस्य जुहुयाच्छब्द (Edtext outside numbered paragraph)स्य चैकार्थत्वात् प्रधानापूर्वत्वा (Edtext outside numbered paragraph)च्चग्निहोत्रशब्दस्य त्यागस्तथैव । विशेषस्तु **अथ अग्निहोत्रम् इत्यपूर्वविशेषाभिधानार्थतैव क** (Edtext outside numbered paragraph)**ल्प्यते तथा सति अपूर्वाभिधानेन कोऽर्थ** इत्यादि यावत् **त** (Edtext outside numbered paragr-

aph)**दनुष्ठातव्यम्** इति ग्रन्थश्च योज्यः । **आदि**ग्रहणात् पुरुषप्रमाणकता शब्दप्रा (Edtext outside numbered paragraph)माण्यत्याग इत्यादिदोषः । ततः **प्र** (Edtext outside numbered paragraph)**धानाग्निहोत्रश्रुतित्यागाद्यापत्तेरर्थाभावात् क्वेदमभिहितमित्यादि** । § 476

**क्वेदमभिहितं जुहुयात् इति** ? यदुच्यते त्वया यज्जुहुयात् तद् घृतादिना इति हवनमनूद्य घृतादिना तद्विधानं क्रियेत यथा घटं कुर्यात् इति प्रसिद्धं घटमनूद्य तत्करणविधानम्, तत्तु न प्रसिद्धम् । कथं न प्रसिद्धम् ? अग्निहोत्रं जुहुयात् इत्यत्र हवनस्योक्तत्वादिहानुवदनं ननूपपन्नमिति चेत्, न, तस्यैव **सर्वप्रयोगपरीक्षायामर्थाभावात्** । तत्र तावद्

त्यागाद्यापत्तेरग्निहोत्रोभयकरणार्थतयोरपि जुहोतित्यागाद्यापत्तेः ।

**शैलीप्रसिद्धौ** छिदिवदहवनात्मकाग्निहोत्रत्वादनग्निहोत्रत्वप्रसङ्गात् प्रधानस्वर्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनम् ?

* * *

द्यापत्तेः अर्थाभावात्**हवनापूर्वकरणार्थतयोः प्रधानाग्निहोत्रश्रुतित्यागा** 152/mj

* * *

**त्यागाद्यापत्तेरग्निहोत्रोभयकरणार्थतयोरपि जुहोतित्यागाद्यापत्तेः ।**

**शैलीप्रसिद्धौ छिदिवदहवनात्मकाग्निहोत्रत्वादनग्निहोत्रत्वप्रसङ्गात् प्रधानस्वर्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनम् ?**

* * *

द्यापत्तेः अर्थाभावात्

**अग्निहोत्रोभयकरणार्थतयोरपि जुहोतित्यागाद्यापत्तेः**,अग्निहोत्रं कुर्यात्, अग्निहोत्रं हवनं कुर्यात् इत्येतयोरपि विकल्पयोस्तुल्योत्तरत्वात्, उभयार्थविकल्पस्य अग्निहोत्रं कुर्यात्, हवनं कुर्यात् इत्येतयोः पक्षयोरुक्तदोषदुष्टत्वात् समानोत्तरत्वादिति । अत्रापि **अथ पुनरेवमनिर्वहति** इत्यादिग्रन्थो योज्यः सप्रपञ्चो यावत् **त्वदभिप्रायवत्तु हवनानुवादविशिष्टाग्निहोत्राभ्युपगमेऽपि चाग्निहोत्रस्यात्मादिवस्तुतत्त्ववदप्रसिद्धस्वरूपत्वात् करणासिद्धिः** । § 477

**शैलीप्रसिद्धौ छिदिवदि**त्यादि, छिदाविव च्छिदिवत्, यथा छिदौ दृष्टलौकिकयूपमात्रफलत्वं नादृष्टालौकिकहवनात्मकाग्निहोत्रत्वं तथा, अग्निहोत्रं

५ स] दृश्यतां पं॰ ३ ॥
१० द्याप] °पत्तिःnayacakra-ms-ya ॥
१० अ] दृश्यतां पृ॰ १५१ पं॰ ३ ॥
१६ द्याप] °पत्तिःnayacakra-ms-ya ॥
१६ अ] दृश्यतां पृ॰ १५१ पं॰ ३ ॥
१८ अ] अग्निहोत्रnayacakra-ms-ya ॥
२० त्वा] °त्वा-त्दितिnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃnayacakra-ms-hī ॥
२० अ] दृश्यतां पृ॰ १२६ पं॰ १ ॥
२१ त्तु] दृश्यतां पृ॰ १३६ पं॰ ३ ॥
२२ स्तु] °स्तुस्वतत्व°nayacakra-ms-bhā ॥
२२ क] कार॰ प्र॰ ॥
२४ का] °ग्निहोत्रत्वं तथाग्निहोत्रत्वं तथा nayacakra-ms-bhānayacakra-ms-vi । °ग्निहोत्रत्वं प्रतथाग्निहोत्रत्वं तथा nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥

153/mj जुहुयात् इत्यस्यापि तच्छैल्यैवाग्निहोत्रमहवनात्मकम्,

* * *

प्राप्तिप्रतिपाद्यप्रसिद्धावग्निहोत्रे जुहोतिप्रयोगो दानादिप्रसिद्ध्युपरोधेन दाहन एव तावद्विधेय इति तथाऽप्रसिद्धेरविधायक एव, कुतस्तदनुवादः ?

तथाभूतार्थाभ्युपगमे च प्राप्तेर्व्युदासो जुहोतिप्रयोगादप्रमत्तप्रयुक्तत्वात्, इषे त्वादिवदक्षरविद्यावत् ।

* * *

**अहवनात्मकाग्निहोत्रत्वाद्यानग्निहोत्रत्वं** प्रसक्तं छिदिनिर्वर्त्ययूपवत् । अत्र च **एतदपि न वैषम्यात्** इत्यादिग्रन्थो योज्यो यावत् ***शैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात्** इति । ततश्चा**नग्निहोत्रत्वप्रसङ्गाद्** यदग्नये होत्रं तदग्निहोत्रमिति तावन्मात्रार्थत्वात् प्रधानस्य स्वर्गसाधनताभिमतस्यानग्निहोत्रत्वाद् घृतेन जुहुयात् इत्यनेनानुवादेन **प्रधानस्वर्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनम् ?** इतिकर्तव्यताकर्तव्यतया प्रधानेन स्वर्गकामेन विना किं तया ? यथोक्तम्—

कातरसतेण सूरं सूरसहस्सेण पंडितं भरसु ।
अलसं जेण व तेण व णवर कतग्घं परिहराहि ॥ § 480

इति प्रधानार्थमप्रधानत्यागदर्शनात् । § 481

**प्राप्तिप्रतिपाद्यप्रसिद्धावग्निहोत्रे,** प्राप्त्या प्रतिपाद्या प्रसिद्धिरस्य तदिदं प्राप्तिप्रतिपाद्यप्रसिद्धि, तस्मिन् प्राप्तिप्रतिपाद्यप्रसिद्धौ, क्व ? अग्निहोत्रे, **यदग्नये च प्रजापतये च सायं जुहोति** इत्यनया प्राप्त्या प्रतिपाद्यप्रसिद्धौ तु तस्मिन् **जुहोतिप्रयोगो दानादिप्रसिद्ध्युपरोधेन दाहन एव तावद् विधेयः,** तावच्छब्दः क्रमार्थे, जुहोति इत्ययं धातुर्लोकप्रसिद्धदानादनार्थो न भवति, किं तर्हि ? दहनेनाग्निना दाहयेद् घृतादि द्रव्यम् इत्युक्तं भवति अग्निहोत्रं जुहुयात् इत्येतदिति परिभाव्य पश्चात् प्रसिद्धे दाहने घृतेन जुहुयात्,
- /ms घृतं दाहयेदग्निम्, अग्निना घृतं दाहयेत्, अग्निर्घृतं दहेत् इति ज्ञातार्थमनूद्य इतिकर्तव्यताविधिर्योक्ष्यते लोकप्रसिद्धिवैपरीत्येन व्युत्पादनात्, नान्यथा

७ द्या] °द्याग्निहो°nayacakra-ms-ya ॥
८ एत] दृश्यतां पृ° १३७ पं° १ ॥
८ *] दृश्यतां पृ° १३८ पं° ८ ॥
१० त्वा] **°त्वाप्रधानस्य स्वर्गासाध°** प्र° ॥
१२ इ] इतिकर्तव्यतयाnayacakra-ms-bhā ॥
१४ स] °सतेनnayacakra-ms-ya ॥
१८ य] दृश्यतां पृ° १४२ टि° ८ ॥
२० त] **तस्मिन्न** प्र° ॥
२१ दा] हु दानादनयोः इति पाणिनीयधातुपाठे १०८३ ॥
२३ दा] **दहने** प्र° ॥
२४ येद] **°दग्निं** । nayacakra-ms-bhā । **°दाग्निं°दग्नौ** ? nayacakra-ms-ya ॥
२५ व्युत्पा] **°त्पादनान्यथा**nayacakra-ms-ya । **°त्पादा°त्पादने ? नान्यथा** nayacakra-ms-bhā ॥

। अन्यथा तु लोके दाहनादिष्वदृष्टत्वात् कथं दाहनमनूद्य घृतादीतिकर्तव्यता विधीयते ? **[इति] तथाऽप्रसिद्धेरविधायक एव, कुतस्तदनुवादः ? इति**शब्दो हेत्वर्थे, इत्येतस्मात् कारणात् तथा तेन प्रकारेण दाहनार्थत्वेनाप्रसिद्धेः अग्निहोत्रं जुहुयात् इत्यत्रैव तावज्जुहुयाच्छब्दो दाहनस्याविधायकः, दूरत एवानुवादः । अत्रैव **ननु सेवादिवत् कर्तव्यताप्रतिपत्तिरितिकर्तव्यताभ्यः** इत्युपक्रम्य ग्रन्थो योज्यो यावत् **वेदवादासाधुता वा तद्वत्** इति । एवं तावज्जुहुयाच्छब्दस्य दाहनार्थत्वाभावादयुक्तत्वं होत्रशब्दस्य वा । § 482

**तथाभूतार्थाभ्युपगमे** **चेति**, अभ्युपेत्यापि दाहनात्मकमेव दानमिति दोषं ब्रूमः, कोऽसौ ? **प्राप्तेर्व्युदासः**, येयं प्राप्तिः **यदग्नये च प्रजापतये च सायं जुहोति** इति यया प्रापितमग्नौ प्रक्षेपो दानमिति तस्याः प्राप्तेर्व्युदासः, कस्मात् ? घृतेन जुहुयात् इत्यत्र **जुहोतिप्रयोगात्**, अन्यथा प्राप्तौ 154/mj

* * *

एवं तर्हि प्राप्तिवाक्यवृत्तजुहोत्यनुवाद इति चेत्, न, तत्र विधिलिङ्विषयस्यावृत्तेरज्ञातत्वात् ।

व्यत्ययादस्य तद्विषयतेति चेत्, न, अज्ञातत्वादेवाननुवादत्वात् कोश-

* * *

श्रुतेन जुहोतिनोक्तत्वात् तदर्थस्य गतत्वादप्रयोगार्हत्वात् पौनरुक्त्यमस्य स्यात्, प्रयुक्तस्तु अयम्, अतो ज्ञायते प्राप्तिश्रुतजुहोतिरनर्थक इति । तस्मात् प्राप्तेर्व्युदासो जुहोतिप्रयोगात् । यदा वायं घृतेन जुहुयात् इति प्रयुज्यते तदा ह्ययमगतार्थ इति विज्ञायेत यद्यन्येन शब्देनास्यार्थोऽनभिहितः स्यात् । किं कारणम् ? **अप्रमत्तप्रयुक्तत्वात्**, अप्रमत्तेन हि वेदेन प्रमत्तात् - /ms पुरुषाद्विलक्षणेन रागाविद्यादियोगरहितेन प्रयुक्तोऽयं त्वन्मतेन, लौकिकेनैव वा पुरुषेणाप्रमत्तेन विदुषा प्रयुक्तत्वादस्मन्मतेन, मा भूत् सर्वपुरुषाप्रामाण्ये शब्दानां च पुरुषाधीनोपलब्धित्वादप्रामाण्यमेवेति । अयं हि घृतेन जुहुयात् इत्यत्र जुहोतिशब्दोऽप्रमत्तप्रयुक्तः, न येन केनचिद् बालगोपालादिप्रयुक्तकल्पेन तुल्यः काकरुतादिकल्पेन वा तुल्यः । क इव ? **इषे त्वादिवत्**, यथा **इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय**

---

१ दा ] दह° प्र° ॥
३ दा ] दह° प्र° ॥
५ दू ] द्वत एवा°nayacakra-ms-pā । हत एवा° nayacakra-ms-ḍe nayacakra-ms-līṃ । ह्रत एवा° nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
५ न ] दृश्यतां पृ° १३९ पं° १ ॥
६ वेद ] दृश्यतां पृ° १४० पं° २ ॥
७ यु ] °युक्तक्तंnayacakra-ms-bhā । °युक्तं nayacakra-ms-ya ॥
८ मे ] वेतिnayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-ra ॥
१८ य ] यदायंnayacakra-ms-bhā ॥
२४ यु ] °युक्तेन येनnayacakra-ms-bhā । °युक्तेन येन nayacakra-ms-ya ॥
२५ रुतादिक ] °कल्पेन तुल्यः प्र° ॥
२६ वा ] वावयवस्थोपायवस्थ प्र° ॥

कर्मणे यजुर्वेद° १ । १ इत्यादिशब्दा अगतार्था इति विज्ञायन्ते तथायं घृतेन जुहुयात् इति वाक्ये जुहोतिरप्रमत्तप्रयुक्तत्वादगतार्थ इति विज्ञायेत, नान्यथा । अथवा **अक्षरविद्यावत्**, यथा **द्वे विद्ये वेदितव्ये--परा चापरा च । अथ परा यया तदक्षरमधिगम्यते यत् तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं पुरुषं पुराणं विश्वात्मानं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः** मुण्डको° १ । १ इतीयमक्षरविद्या क्वचिद-गतार्थेति विज्ञायतेऽप्रमत्तप्रयुक्तत्वात् तथाऽयमपि जुहोतिप्रयोगः, नान्यथा । तद्यदि प्राप्तिप्रापितदानार्थः अग्निहोत्रं जुहुयात् इत्यत्र होत्रशब्दो जुहोतिशब्दो वा ततोऽयं घृतेन जुहुयात् इति पुनर्जुहोतिर्न प्रयुज्येत, प्रयुक्तस्तु, तस्मात् प्राप्तिर्व्युदस्तेति । § 483

- /ms **एवं तर्हि प्राप्तिवाक्यवृत्तजुहोत्यनुवाद इति चेत्** । स्यान्मतम्--प्राप्तिवाक्ये अग्नये जुहोति इति श्रुतस्याग्निसम्प्रदानकस्य दानार्थस्य जुहोतेरनुवादोऽयं घृतेन जुहुयात् इति जुहोतिरिति । एतच्च **न, तत्र विधिलिङ्विषयस्यावृत्तेर-ज्ञातत्वात्** । नैवमप्युपपद्यते, तत्र प्राप्तिवाक्ये जुहोति इत्यस्याव्यापार्यमाण-कर्तृसाधनदानार्थजुहोतिधातुप्रयोगस्य विधिलिङो विषये व्यापारणार्थे वृत्त्य-भावात् अस्य च जुहुयाच्छब्दस्य विधिलिङ्विषयस्य नियोगार्थस्य नियोगर-हिते जुहोतिशब्दार्थे तत्रावृत्तेरयं विधानार्थो न विदित एव, तस्मादज्ञात-त्वात् प्राप्तिवाक्यवृत्तजुहोत्यर्थानुवादायोग्यता, **प्राप्तमनूद्यतेऽप्राप्तं विधीयते** इति वचनात् । तस्मादनुवादायोग्यत्वादयुक्तमुक्तम्--प्राप्तिवाक्यवृत्तजुहोत्य-नुवाद इति । § 484

**व्यत्ययादस्य तद्विषयतेति चेत्** । स्यान्मतम्--लक्षणशास्त्रेऽभिहितं **व्य-**
155/mj **त्ययो बहुलम्** पा° ३ । १ । ८५ ।

* * *

पानप्रत्याय्यार्थत्वाच्च, हवनाच्च भावनमेवमनवगमितमेवाभिप्रेतस्य स्यात् ।

प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्य स्वर्गकामकर्मत्वाभिधानादवगमित-कामानुरूपकर्मोक्तेस्तद्विधक्रियाविशेषगतेः क्रियाप्राप्यत्वाच्च कामस्य अन्ध-लकावगमित-

* * *

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।

---

१ अ] अवगतार्था प्र° ॥
२ जु] जुहोतिप्रमत्त°nayacakra-ms-ya ॥
४ त] तददेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् इति मुण्डकोपनिषदि पाठः ॥
१२ क] °कस्यादानार्थस्याजुहोतिरनु° प्र° ॥
१४ इ] इत्यथ्याव्यापा° प्र° ॥
१५ व्या] व्यापारेणार्थेnayacakra-ms-bhā । व्यापारेणार्थ nayacakra-ms-ya ॥
१८ प्रा] दृश्यतां पृ° १३१ पं° २ ॥
२१ व्य] विद्यविधिव्य ?त्ययादस्यnayacakra-ms-bhā । विध्यत्ययादस्य nayacakra-ms-ya ॥

व्यत्ययमिच्छति शास्त्रकृदेषां तदपि च सिध्यति बाहुलकेन ॥
पा॰ म॰ भा॰ ३ । १ । ८५§ 487

इति । तस्माज्जुहोत्यर्थे जुहुयाच्छब्दप्रयोगात् प्राप्तमेवानूद्यते तद्विषयत्वादेवास्यापीति । एतदपि **न, अज्ञातत्वादेवाननुवादत्वात्,** सव्यापारणार्थशब्ददर्शनान्न निर्व्यापारणार्थप्रतिपत्तिर्युक्ता व्यवस्थालोपप्रसङ्गात् । तस्मादज्ञातार्थत्वादननुवादतैव, अननुवादत्वान्नैतदपि युक्तमिति । किञ्चान्यत्, **कोशपानप्रत्याय्यार्थत्वाच्च** । इदं त्वया सन्निहितदेवताकोशपानेन प्रत्याय्यम्, विशेषलिङ्गाभावात् कुत एव ज्ञायते जुहोत्यर्थे जुहुयाच्छब्दः प्रयुक्तो न स्वार्थ एव, जुहोतिर्वा जुहुयादर्थे प्रयुक्त इति ? तस्मादविदितार्थत्वाद् विधित्वम्, विधित्वाच्च नानुवादः, अननुवादत्वाच्चैवमपि न युक्तम् । अभ्युपेत्यापि जुहोत्यर्थे जुहुयाच्छब्दस्य वृत्तिं दोषं ब्रूमः --**हवनाच्च भावनमेवमनवगमितमेवाभिप्रेतस्य स्यात्** । विध्यर्थाभावात् पुरुषो हवनकर्मणि अनियोजित एव, ततो भावनं स्वर्गाख्यस्य विशिष्टसुखलक्षणस्य देशविशेषस्य वा विशिष्टसुखसाधनभूतस्याभिप्रेतस्यार्थस्य नावबोधकं स्याद् यदर्थमभिवृत्तमिदं वाक्यम्, स्वर्गाख्यफलसाधनेऽग्निहोत्रकर्मणि पुरुषं नियोक्ष्यामीति तदर्थं हि वाक्यम् अग्निहोत्रं जुहुयात् इत्येतत् प्रवृत्तम्, एतेनैव कर्मणा स्वर्गो भाव्यते, तस्मात् इदं कुरु इति तदर्थज्ञापनाभावे किमनेन वाक्येन जुहोति जुहोति इत्युक्तेन ? § 488

अत्राह--प्रागभिहिताग्निहोत्रकरणवाक्यार्थविकल्पगतदोषपरिहारार्थमियमर्थव्याख्याश्रीयते **प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्ये**त्यादि । इदं तावद् व्यवस्थितं **यदग्नये च प्रजापतये च सायं जुहोति** इत्यनया प्राप्त्या विहितमग्निहोत्रस्य स्वरूपं सिद्धम्, अतः प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्य कर्मत्वेन च श्रवणात्, कस्य ? कर्तुः **स्वर्गकामस्य कर्मत्वाभिधानात्** । ततः किमिति चेत्, स्वर्गशब्दाभिहितविशिष्टकर्मविषयकामाभिधायिशब्दश्रवणात् कर्मापि तदग्निहोत्राख्यं तदनुरूपं विशिष्टमेवेत्युक्तं भवति, अतः **स्वर्गकामकर्मत्वाभिधानादवगमितकामानुरूपकर्मोक्तेः** स्वर्गकामशब्दावबोधितकामानुरूपस्यैव कर्मण उक्तत्वादेव **तद्विधक्रियाविशेषगतेः,** विशिष्टफलविषयकामः पुरुषः कर्ता, कर्मापि तदनुरूपत्वाद् विशिष्टमेव, तद्विधैव क्रियापि, अप्रसिद्धफ- - /ms

---

४ द] °**दर्शनान** प्र॰ । अत्र °**दर्शने न** इत्यपि पाठः स्यात् ॥
४ णा] एतच्चिह्नान्तर्गतः °**र्थप्रतिपत्तिर्युक्ता** इत्यत आरभ्य °**प्रत्याय्या**° इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
७ ए] अत्र एवं ज्ञायते इत्यपि पाठः स्यात् ॥
१२ वा] **वा** प्रतिषु नास्ति ॥
१४ नियोक्ष्या] अत्र °**मीत्येतदर्थं हि** इति पाठः समीचीनो भाति ॥
१५ वृत्त] °त्तमंतेनैवnayacakra-ms-pā । °त्तमतेनैव nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
२० य] दृश्यतां पृ॰ १४२ पं॰ १२ ॥
२५ र्मो] °**कर्मोक्तः** प्र॰ ॥
२६ त] **तद्विध्य**° प्र॰ ॥

लविषयकामसम्बन्धि कर्माप्रसिद्धं यथा तथा तदनुष्ठानव्यापारविशेषोऽपि विशिष्टोऽप्रसिद्ध एवेति गम्यते । किं कारणम् ? तत एव शब्दात् तस्य क्रियाविशेषस्य गतेर्वाक्यान्तराभावात् तद्विशेषगतिः, अतः क्रियाविशेषगतेः
156/mj **क्रियाप्राप्यत्वाच्च कामस्य,** न ह्यन्यः कश्चि

* * *

कामरटनवत् जुहुयात् इत्यर्थापन्नार्थानुवाद इतीयं व्याख्या न्याय्या आदिवाक्ये प्रधानश्रुत्यत्यागगुणकृदपीति चेत्, तन्न, अर्थापन्नस्वशब्दार्थपुनरुक्तत्वादनुवादा-

* * *

दुपायोऽस्ति कामप्राप्तौ क्रियातः क्रियया शब्देन वा तदर्थावगमनात्, यथा अन्धलकस्य वीथीमध्यपतितस्य हस्तं प्रसार्य कपर्दिकां कपर्दिकां देहि देहि भो इति वा रारट्यमानस्य कामोऽवगमितः क्रियया शब्देन वा प्रकरणविशेषसम्बन्धात्, सा च क्रिया नोपदेशमन्तरेण सिध्यति, **अन्धलकावगमितकामरटनवत्** अग्निहोत्रं स्वर्गकामः इत्युक्ते कुर्यात् इत्यर्थादापन्नो विध्यर्थोऽवगमितकामत्वात्, यथा तस्यान्धलकस्य याच्ञार्थः । स च विशेषसम्बन्धो वाक्यन्यायेन भवति, यथा सब्रह्मचारिणा सहाधीत इति समानेन ब्रह्मचारिणा सहाधीते, केन सामान्येन समानेन ? प्रकृतविशेषणत्वात् प्रकृताध्ययनक्रियेणेति गम्यते एवमिदमपि वाक्यम्, अनेन वाक्यन्यायेन प्रकृतस्वर्गकामाग्निहोत्रकर्मानुरूपविध्यर्थक्रियोपदेशताऽस्येति गम्यते, अतो हेतुहेतुमद्भावप्रतिपादितं **प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्येत्यादि**
- /ms **यावज्जुहुयादित्यर्थापन्नार्थानुवादः** अग्निहोत्रं स्वर्गकामः इत्येतावता कुर्याद्वाक्यशेषेण वाक्येन गतार्थत्वात् । § 489

तदेवं जुहुयात् इत्यनुवादो न **विधिरितीयं व्याख्या न्याय्या,** व्यक्तार्थोपपत्तित्वात् प्रागभिहितव्याख्याविकल्पसमुत्थदोषाभावाच्च न्याय्येति मन्तव्या, यस्मा**दादिवाक्ये प्रधानश्रुत्यत्यागगुणकृदपीति,** यदभिहितं प्राक् अग्निहोत्रं जुहुयात् इत्यस्य वाक्यस्य अग्निहोत्रं कुर्यात् इत्यर्थव्याख्याविकल्पे विध्यर्थवाचित्वाभिमतश्रुतप्रधानजुहोत्यर्थत्यागस्ततः पुरुषप्रमाणकता, तदत्यागे वाक्यभेदापत्तिः *पौनरुक्त्यादिदोषजातम्, तदप्यत्र नास्ति जुहुयाच्छब्दस्यानुवादत्वादेव, हवनं कुर्यात् इत्यत्राप्यग्निहोत्रप्रधानत्याग इत्यादिदोषजातं तदपि नास्ति, तस्मादियं व्याख्या आदिवाक्ये प्रधानश्रुत्यत्यागगुणकृद-

---

१ स] °संबद्धि प्र° ॥
११ वा] चा प्र° ॥
१४ त्वा] °त्वातस्यान्धलकस्य याचार्थःnayacakra-ms-pā विना । °त्वात्स्यान्धलकस्य याचार्थः nayacakra-ms-pā ॥
१६ चारिणा] °णा अहाधीतेnayacakra-ms-bhā । °णाऽधीते nayacakra-ms-ya ॥
२० र्थाप] °न्नार्थोनुवादो प्र° ॥
२२ न] विधे° प्र° ॥
२६ जु] दृश्यतां पृ° १३० पं° २ ॥
२७ वा] दृश्यतां पृ° १३० पं° ३ ॥
२७ *] दृश्यतां पृ° १३१ पं° ५ ॥
२८ प्र] दृश्यतां पृ° १५१ पं° १ ॥

पीति, तस्य जुहोतेरनुवादत्वेन पौनरुक्त्य-त्याग-भेदाद्यभावात् । **चेदि**त्याश-ङ्कायाम्, एवं चेन्मन्यस इत्येवं परं पृष्ट्वाचार्य उत्तरमाह **--तन्न, अर्थापन्ने**त्यादि । एषापि व्याख्या नोपपद्यते, किं कारणम् ? **पुनरुक्तत्वात** प्रयोगायोग्यत्व-म्, ततश्चानुवादत्वासम्भवः, तस्मा**दनुवादासम्भवात्** तन्नेत्यभिसम्बन्धः । इदं च पुनरुक्तमर्थापन्नस्वशब्दार्थं पुनर्वचनलक्षणे पुनरुक्ते निग्रहस्थानविकल्पे । द्विविधं पुनरुक्तं निग्रहस्थानम्, तद्यथा— **शब्दार्थयोः पुनर्वचनं पुनरुक्तम्,** - /ms
**अर्थादापन्नस्य स्वशब्देन पुनर्वचनं च** न्या॰ सू॰ ५ । २ । १४--१५ इति । तस्मादिदमर्थादापन्नस्य पुनर्वचनम्, विशेषविधानमन्तरेणार्थापन्नार्थस्य स्वश-ब्देनोच्चारणात् । घृतेन जुहुयात् इत्यत्र न स्यात् पुनरुक्तम्, घृतविशिष्टहवन-विधानात् । इह तु स्वर्गकामानुरूपकर्मानुरूपक्रियाविशेषविध्यर्थताया उप-देशवृत्तेरेव गतार्थतयाभ्युपगतत्वाद् घृतविशिष्टहवनविधानजुहोत्यनुवादतायाश्च मूलवाक्यगतजुहोत्य 157/mj

* * *

सम्भवात् साक्षाच्छ्रुतविधिजुहुयात्त्यागेन चार्थापन्नार्थाश्रुतानूदितजुहुयात्क-ल्पनाद् विधीयमानवाक्यार्थविषयानुवदनाच्च वाक्यभेदपुनरुक्तदोषाङ्गीकर-णादनुवादानुवादस्य च प्राप्तविशेषणपरार्थविषयार्थत्वाद्विधिविषयविप्रकृष्टीभूतार्थ-त्वात् । इति

* * *

र्थासिद्धेरननुवादतैव । किञ्चान्यत्, जघन्यतरा चेयं व्याख्या । क-स्मात् ? **साक्षाच्छ्रुतविधिजुहुयात्त्यागेन चार्थापन्नार्थाश्रुतानूदितजुहुयात्कल्प-नात्** स एव पुरुषप्रमाणकत्वदोषः शब्दाप्रामाण्यदोषश्च । जुहुयात् इत्यस्य क्रियाशब्दस्य विध्यर्थस्य साक्षाच्छ्रुतस्य प्रत्यक्षस्य त्यागं कृत्वा **अर्थाप-न्नार्थस्य** अर्थादापन्नोऽर्थोऽस्येत्यर्थापन्नार्थः, कोऽसौ ? स एव जुहुयाच्छ-ब्दोऽनुवादाभिमतः, तस्य **अश्रुतस्यार्थापन्नार्थस्यानूदितविकल्पना**दनुवादक-ल्पनात् **तन्न** इति वर्तते । किञ्चान्यत्, **विधीयमानवाक्यार्थविषयानुवदनाच्च,** विधीयमानो वाक्यार्थो विधीयमानवाक्यार्थः, स विषयोऽस्येति विधीयमान-वाक्यार्थविषयः स एव जुहुयाच्छब्दः, तस्यैवानुवदनं स एवानुवादः, तस्माद् विधीयमानवाक्यार्थविषयानुवदनाच्च किं संवृत्तम् ? **वाक्यभेदस्य पुनरुक्तस्य चाङ्गीकरणम्,** न हीदमेव वाक्यं स्वर्गकामाभिसम्बद्धाग्निहोत्रविधानं तदनुवद-नं च कर्तुं शक्नोति स्वर्गकामकर्तृकस्याग्निहोत्रकर्मणो वाक्यान्तरेणाप्रापितत्वात् । यथा अयं देवदत्तः इत्यत्र न देवदत्त एवानूद्यते विधीयते च, प्रत्यक्षसिद्धस्तु - /ms

२ पृ] दृष्ट्वा॰ प्र॰ ॥
५ न्न] ॰न्नस्वशब्दार्थ-पुन॰nayacakra-ms-vinayacakra-ms-ramnayacakra-ms-hi ॥
७ च] ॰चनं वेति प्र॰ ॥
१८ साक्षाच्छ्रुत] ॰विधे॰ प्र॰ ॥
१८ जु] ॰जुहुयाकल्पनात् प्र॰ । अत्र ॰जुहुयाद्विकल्पनात् इत्यपि पाठः स्यात् ॥
२१ च] अत्र स एव चानुवादः इत्यपि पाठः स्यात् ॥
२७ हीद] हीदमेव वा स्वर्ग॰ प्र॰ ॥

इदमो विषयोऽनूद्यते, एवमिह प्रसिद्धार्थोऽपेक्ष्यः, स तु नास्ति । तस्मादुभयार्थकल्पनादेकस्य वाक्यस्य तदसम्भवाच्च वाक्यभेददोषः । पौनरुक्त्यं तु विशेषविधानाभावात्, विशेषविध्यर्थो ह्यनुवादो युक्तः, यथा अयं देवदत्तः इति अयंशब्दप्रत्यक्षप्रसिद्धार्थमनूद्य देवदत्तविधानम्, न तु तथात्र कश्चिद् विशेषो विधीयते, तस्मादविशेषाभिधानात् पौनरुक्त्यम् । तस्मात् अग्निहोत्रं जुहुयात् इत्यस्य वाक्यस्य प्रथमत्वादेकवाक्यगतत्वाच्चानयोर्विध्यनुवादयोरर्थापन्नाग्निहोत्रकर्मविधित्वे जुहोतेरनुवादत्वे [वा] **वाक्यभेदपुनरुक्तदोषाङ्गीकरणाद्** न इत्येवाभिसम्बध्यते । एवं तावत् अग्निहोत्रं जुहुयात् इत्यत्र जुहुयाच्छब्दो नानुवादो घटते, न च अग्निहोत्रं स्वर्गकामः इति विधिः । किञ्चान्यत्, **अनुवादानुवादस्य च प्राप्तविशेषणपरार्थविषयार्थत्वात्** । अनुवादत्वं हि प्राप्तविषयार्थम्, यथा अयं देवदत्तः इति अयंशब्दार्थः प्राप्तार्थोऽप्राप्तो देवदत्तार्थोऽधुना प्रापणीयः । एवं प्रसिद्ध्यप्रसिद्धिभ्यां विशेषणविशेष्यौ, तावेवोपकारकोपकार्यत्वाभ्यां परार्थस्वार्थौ । न तथा अग्निहोत्रं जुहुयात् इत्यत्र प्राप्तविशेषणपरार्थविषयत्वमग्निहोत्रंजुहुयाच्छब्दयोः, अतोऽप्राप्ताविशेषणापरार्थत्वात् साम्यादनुवादत्वाभावः । अभ्युपगम्यापि प्राप्तादि दोष उच्यते--यत्
- /ms पश्चादुच्यते कर्तव्यताप्रसिद्ध्यर्थमिति- कर्तव्यतावाक्यं घृतेन जुहुयात् इति
158/mj तस्य **विधिविषयविप्रकृष्टीभूतत्वं** जुहुयाच्छब्दस्यानुवादाभिमतस्य ।

* * *

घटितविघटितप्रतिसमाधेये तत्प्रतिसमाधानार्थमुद्यतेन त्वया चिकित्सयैव गण्डस्योपरि स्फोट आपादितः ।

लौकिकजुहोत्यर्थानुष्ठानप्रवृत्तोपदेशविषय एव त्वयं परमनुवादः स्यात्, स चानुपपन्ननियमार्थ उपदेशः प्राप्तिविहितेतिकर्तव्यतानतिरिक्तहवनक्रियानाम-

* * *

किं कारणम् ? प्राप्तविशेषणपरार्थविषयत्वादनुवादस्य अप्राप्तविशेष्यस्वार्थविषयत्वाद्विधेरादिवाक्यगत एव तावज्जुहुयाच्छब्दोऽनुवादो न घटते प्राप्तत्वाद्यभावात्, तस्यानुवादस्तु घृतेन जुहुयात् इत्यत्र जुहुयाच्छब्द इष्टः स्यात् तत्प्रतिरूपकस्तस्यार्थः प्रतिशब्दकस्येवेत्यापन्नोऽप्राप्ताविशेषणापरार्थ-

२ वा ] वाक्यस्यnayacakra-ms-ya प्रतिषु नास्ति ॥
४ अ ] अयंशब्दः प्रत्यक्ष° प्र° ॥
७ नुवा ] °वादकत्वेnayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-vinayacakra-ms-bhānayacakra-ms-raṃnayacakra-m[illegible] ॥
११ प्रा ] प्राप्त्यर्थ- प्राप्तोnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-vi । प्राप्त्यर्थः प्राप्तो nayacakra-ms-līṃ । प्राप्त्यर्थं प्राप्तो nayacakra-ms-raṃ nayacakra-ms-hī । प्रर्थप्राप्तो nayacakra-ms-bhā । अत्र अयंशब्दार्थः प्राप्तः, देवदत्तार्थोऽधुना प्रापणीयः इत्यपि पाठः स्यात् ॥
१४ म ] [illegible] nayacakra-ms-bhā ॥
१५ रा ] °रार्थत्वासाम्या° प्र° । अत्र °रार्थत्वसाम्या° इत्यपि पाठः स्यात् ॥
२५ [illegible] ] [illegible] घटतेnayacakra-ms-ya ॥
२७ स्या ] °स्यार्थप्रति° प्र° ॥

त्वाद् विधिविषयविप्रकृष्टीभूतार्थश्चेति । ततश्च विधिविषयविप्रकृष्टीभूतार्थत्वान्न कर्तव्यताविषयत्वमितिकर्तव्यतायाः, यथा दशदाडिमादिश्लोकावयवानाम् । किञ्चान्यत्, **इति [घटित]विघटितेत्यादि** यावद् **गण्डस्योपरि स्फोट आपादितः** । **इति**शब्दो हेत्वर्थे, यस्मादित्थं कर्तव्यविषयविप्रकृष्टत्वमितिकर्तव्यतायाः इत्यादि दोषजातं विध्यनुवादत्वाभावात् तस्माद् **घटितविघटितम्,** प्रागीषद् घटितमासीत् **सेवादिवदितिकर्तव्यतैव कर्तव्यता** इति, तदप्यनया **प्राप्तिविहितस्वरूपसिद्धेः** इत्यादिकया कल्पनया विघटितमुक्तविधिनैव । ततश्च **प्रतिसमाधेये** *विरुद्धतरदोषापादनं ***विधिविषयविप्रकृष्टीभूतार्थत्वा**दिति । ततश्च प्रतिसमाधेये तस्मिन्नेव वाक्येऽनुवादत्वाभावादवाक्यत्वादिदोषदुष्टे **तत्प्रतिसमाधानार्थमुद्यतेन त्वया** अहो परमविदुषा चिकित्सकेनानपेक्षितपूर्वापरक्रियाविधिविपाकेन **चिकित्सयैव गण्डस्योपरि स्फोट आपादितः** । तस्मादप्रसिद्धार्थत्वान्न मौलो जुहोतिर्नोत्तरो वानुवादो घटते । § 490 - /ms

यदि भवतो घृतेन जुहुयादित्यस्यानुवादत्वमिष्टं ततोऽहमेव ते बुद्धिसंविभागं करोमि, श्रूयताम्— **लौकिकजुहोत्यर्थानुष्ठानप्रवृत्तोपदेशविषय एव त्वयं परमनुवादः स्यात्,** लौकिको हि दानादनार्थो जुहोतिः, तदर्थानुष्ठानप्रवृत्तोपदेशो यद्यस्य विषयः स्याद् दद्यात्, अद्यात् इति तदर्थप्रसिद्धेस्तद्विषयोऽनुवादो युज्यते विधिर्वा । यस्मै कस्मैचिद्यदि किञ्चिद्दद्यात् घृतं दद्यात् तेन जुहुयात्, यदि भुञ्जीत घृतेन जुहुयादित्येतस्मिन्नर्थेऽनुवादो घटते । **स चानुपपन्ननियमार्थ उपदेशः,** समीकृत्य व्याख्यातोऽर्थोऽस्य शब्दस्य ते मया तथापि तु पुनस्त्वदिष्टविरुद्धार्थमेतदापद्यते, लोकेऽनुपपन्ननियमोपदेशार्थत्वदर्शनाद् विचित्रयोर्दानभोजनयोः स्वपरप्रीतिहेतुत्वाद् यथोपपत्ति घृतेन पयसा दध्ना गुडेन च भुञ्जीत तान्येव च बुभुक्षवे दद्यादिति । न तु यथा **अक्षिवेद्यके** त्रिफलां घृतेनैव भक्षयेत्, न गुडेन, गुडस्य चाक्षुष्यत्वात् । यथोक्तम्-- § 491

प्रभूतकृमिमज्जासृङ्मेदोमांसकरो गुडः । चरकसं॰ १ । २७ । २३८

चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मणो भयम् । चरकसं॰ १ । ५ । १६ इति ।§ 493

159/mj

६ सेवा] दृश्यतां पृ॰ १३९ पं॰ १ ॥
७ प्रा] दृश्यतां पृ॰ १५५ पं॰ ३ ॥
८ *] विरुतर॰ प्र॰ ॥
८ *] दृश्यतां पृ॰ १५७ पं॰ ३ ॥
१० मु] ॰मुच्यतेनnayacakra-ms-ya ॥
१३ भ] भवतेnayacakra-ms-ya । भवति nayacakra-ms-bhā ॥
१४ प्र] ॰प्रकृत्तो॰nayacakra-ms-bhā । ॰प्रकृतो॰ nayacakra-ms-ya ॥
१४ वृत्तोप] ॰पदेश एवnayacakra-ms-ya ॥
१७ किञ्चिद्द] ॰द्द्यात्तnayacakra-ms-bhā । ॰द्द्यान्न nayacakra-ms-ya ॥
२५ स्य] विशेषाच्छ्लेष्मतो इति चरकसंहितायाम् ॥

मात्रार्थः । तन्मात्रत्वात्तु तस्याः प्रकरणानुबन्धनाद्धित्वा जुहोतिप्रयोगबाहुल्यं कृञ्प्रकृतिलिङ्कर्तृता प्रदर्शयितव्या--यदग्नये च प्रजापतये च सायं जुहोति तद् घृतादिना स्वर्गकामः कुर्यादिति । § 494

त्वद्वचनात्त्वप्रमाणनियमागमोऽनुपदेशकश्च विवेक्तुरपीति सम्भाव्येत, अप्रत्यवेक्षितार्थत्वात् पौर्वापर्ययोगाप्रतिसम्बद्धार्थत्वाद् घटितानुमतविध्वंसनादुन्मत्त- § 495

किञ्चान्यत्, इदं **चाग्निहोत्रं जुहुयात्** कादृश्यतां पृ° १२३ टि° ३ ॥ठकसं° ६ । ७ **यदग्नये च प्रजापतये च सायं जुहोति** मै° सं° १ । ८ । ७ **घृतेन जुहुयात्** कादृश्यतां पृ° १४२ टि° ९ ॥ठकसं° ६ । ३ । ५ **शूर्पेण जुहोति तेन ह्यन्नं क्रियते** तै° ब्रा° १ । ६ । ५ इत्येवमादिविध्यनुवादार्थवादवाक्यगतो जुहोतिः श्रूयमाण उपस्थानादीतिकर्तव्यतानतिरिक्तसेवनक्रियानामधेयमात्रार्थत्ववत् **प्राप्तिविहितेतिकर्तव्यतानतिरिक्तहवनक्रियानाममात्रार्थः**, विप्रकीर्णावयवकलापा- - /ms कारा क्रियैवास्यार्थोऽसिद्धरूपः, न सिद्धरूपो यथा यूपघटादि । **तन्मात्रत्वात् तु तस्याः** क्रियायाः **प्रकरणानुबन्धनात्** प्रकरणेन अनुबन्धयन् वक्ता ब्रूते श्रोता च प्रतिपद्यते--क्रियामात्रमवश्यमनेन शब्देन कर्तव्यमित्येतावच्चोद्यत इति । तस्मात् क्रियामात्रत्वात् प्रकरणानुबन्धनाद् **हित्वा** त्यक्त्वा **जुहोतिप्रयोगबाहुल्यं** सर्वजुहोतिप्रयोगान्, क्रियामात्रे प्रतिपाद्ये नान्तरीयकत्वात् **कृञ्प्रकृतिलिङ्कर्तृता प्रदर्शयितव्ये**ति तत्प्रतिपादनार्थम्, अभिमतवाक्यार्थतास्य स्यादेवं कल्प्यमाने । तन्निदर्शयति **--यदग्नये च प्रजापतये च सायं जुहोति तद् घृतादिना स्वर्गकामः कुर्यादिति**, एतावता तदर्थस्य सुगमत्वाज्जुहोतिप्रयोगबाहुल्यमप्रत्ययरटितमेव पुनरन्यत्रान्यत्र जुहुयात्, जुहोति इत्यादि । § 496

किञ्चान्यत्, **त्वद्वचनात्तु अप्रमाणनियमागमोऽनुपदेशकश्च विवेक्तुरपीति सम्भाव्येत** । योऽप्यज्ञप्रयुक्तशब्दार्थोन्नयनसमर्थो विवेक्ता पुरुषः पदवाक्यप्रमाणज्ञस्तं प्रत्यप्ययं वाक्यप्रयोगोऽप्रमाणनियमागमोऽनुपदेशकश्च । अप्रमाणनियमागमः प्रत्यक्षानुमानगम्यार्थासंवादात् । अनुपदेशकस्त्वगमकत्वात् । तत् पुनः सम्भावयामि भवेदेवम्, मा मंस्था निष्ठुरम् अप्रमाणनियमागमोऽनुपदेशकश्च इत्यवधार्येवोच्यत इति । कुतः ? **अप्रत्यवेक्षितार्थत्वात्** - /ms **पौर्वापर्ययोगाप्रतिसम्बद्धार्थत्वाद् घटितानुमतविध्वंसनात्** । अप्र- त्यवेक्षितार्थ-

८ चा] वाग्नि°nayacakra-ms-pā ॥
९ द] दृश्यतां पृ° १४२ टि° ८ ॥
११ शू] सूर्येण प्र° ॥
१९ त्य] त्यक्त्वा होति° प्र° ॥
२० कृतिलिङ्क] °कर्तृता च दर्श°nayacakra-ms-ya ॥
२३ पु] पुनरन्यत्र जुहु°nayacakra-ms-bhā ॥
३१ टितानुम] °मतिवि° प्र° ॥
३१ त्य] °त्यपेक्षिता जुहोति° प्र° ॥

ता जुहोतिबाहुल्यप्रयोगनिर्विषयत्वादिभिः । पूर्वापरसम्बन्धरहितता पृथगर्थाभिमतानां विध्यादिशेषाभावात् । घटितविध्वंसनम् **इतिकर्तव्यतैव कर्तव्यता** इति घटितस्य आदिवाक्यगतजुहोत्यनुवादाभ्युपगमाद् घटितानुमतविध्वंसनम् । इत्येतेभ्यो हेतुभ्योऽप्रमाणनियमागमोऽनुपदेशकश्च वाक्यप्रयोगः । दृष्टान्त **उन्मत्तप्रलापवत्,** यद्वाक्यमुन्मत्तादिप्रलपितं पुरुषोच्चारितशब्दसामान्यात् सद्वाक्यवदाभासमानमप्रमाणनियममगमकं च, यथा—

शङ्खः कदल्यां कदली च भेर्यां तस्यां च भेर्यां सुमहद्
विमानम् ।
तच्छङ्खभेरीकदलीविमानमुन्मत्तगङ्गाप्रतिमं बभूव ॥ § 499

* * *

प्रलापवत्, प्रत्यवेक्षाप्रामाण्ययोर्ज्ञानविषयत्वात्, त्वन्मतात्तु वेदो न ज्ञानं ततोऽप्रमाणनियमोऽनुपदेशकश्च, अचेतनत्वात्, आकाशवत् ।

यदपि च प्रसह्य कारणेषु फलस्य खपुष्पवदसत्त्वमुच्यते एवंविधेष्वेकान्तेन तदपि चान्याय्यमेव । यदेतदसत्त्वं नाम त्वया क्वचिन्मन्यते ततोऽन्यत् कार्यम्,

* * *

इति, तथेदमपि विवेक्तुरप्यर्थप्रतिपादनसमर्थं न भवतीति । एवं विचार्यमाणमिदं वाक्यं दोषेभ्यो न मुच्यते । अथवा नैवायं दोषो न च विचारयोग्योऽयमुद्ग्राहः **प्रत्यवेक्षाप्रामाण्ययोर्ज्ञानविषयत्वात्,** ज्ञानं हि प्रमाणमप्रमाणं वेति विचार्यते प्रत्यवेक्ष्यते च तत्र प्रामाण्यस्य मुख्यत्वात्, न ह्यत्र कुदुपादिप्रामाण्यवत् प्रामाण्यमङ्गीक्रियते । तस्मात् प्रत्यवेक्षायाः प्रामाण्यस्य च ज्ञानविषयत्वात् त्वन्मतादेव वेदस्याज्ञानाभिमतत्वान्न विचारो न प्रमाणभावो वास्ति अज्ञानत्वाद्वेदस्य । त्वया हि प्रागेवोत्पततोक्तम्--न हि किञ्चिज्ज्ञानं निश्चितं विशुद्धं चास्ति सर्वस्य संशयाद्यज्ञानानुविद्धत्वादिति । तद्दर्शयन्नाह **--त्वन्मतात्तु वेदो न ज्ञानं** न ज्ञानत इति, न यथा ज्ञानकार्यत्वाज्ज्ञानात्मात्मप्रयुक्तशब्दचैतन्यमपि कार्ये कारणोपचारादन्नकार्यप्राणान्नत्ववदिति वा । ततः किमिति चेत्, **अप्रमाणनियमोऽनुपदेशकश्च** वेदः, **अचेतनत्वात्, आकाश-**

२ व्य] दृश्यतां पृ° १४२ पं° १ ॥
१७ प्र] प्रत्यपे° प्र° ॥
१७ वेक्षाप्रामाण्य] °योर्निर्विषयत्वात्nayacakra-ms-ya ॥
१९ कु] नुदुपादि°nayacakra-ms-ya । अत्र कुडपादिवत् इत्यपि पाठः स्यात् ॥
१९ प्र] प्रत्यपे° प्र° ॥
२० वेद] वेदस्य ज्ञाना°nayacakra-ms-ya ॥
२१ प्रा] दृश्यतां पृ° ११३ पं° ६ ॥
२३ ता] त्वन्मतात्तवेदो न ज्ञानन्न ज्ञानव इति नऽव इतिnayacakra-ms-bhā । त्वन्मतात्तदो न ज्ञानन्न ज्ञानव इति nayacakra-ms-ya ॥
२३ त्वा] °त्वाज्ज्ञानात्मप्रयुक्त°nayacakra-ms-ya ॥
२४ प्रा] °प्राणेन्नत्व° nayacakra-ms-bhā ॥

वत् । यथा आकाशमचेतनत्वादप्रमाणं कूटस्थनित्यत्वाच्च न ज्ञानवद्वचनमेवं वेदोऽपीति प्रामाण्योपदेशाभावः । § 500

**यदपि च प्रसह्येत्यादि** । प्रसह्य बलात्कारेण परं कश्चित् पुरुषमगणयता एकवीरंमन्येनाक्रम्य परिभूयास्मन्मतं यदपि च अग्निहोत्रं जुहुयात् इत्यत्र **कारणेषु** घृतादिष्वितिकर्तव्यतात्मसु स्वर्गादि**फलस्य खपुष्पवदसत्त्वमुच्यते एवंविधेष्विति** सर्वेतिकर्तव्यतानामादिमध्यावसानेषु, तत् पुनरसत्त्व**मेकान्तेन** कथञ्चित् कार्यादिसत्त्वमपि इत्येतत्पक्षनिरपेक्षं सर्वथा नास्त्येव इति त्वयेष्टं **तदपि चान्याय्यमेव** । यतो **यदेतदसत्त्वं नाम त्वया क्वचिन्मन्यते, नामेति** मिथ्याकल्पितनाममात्रमेव तद् यत् त्वया क्वचित् सत्त्वनिरपेक्षमसदिति चिन्त्यते । कथं पुनरन्याय्यं तदसत्त्वमिति चेत्, उच्यते, न्यायेन

- /ms बाध्यत्वात् । कतमो न्याय इति चेत्, एवं तर्हि ब्रूमः **--ततोऽन्यत् कार्यम्,** असतोऽन्यदित्यर्थः । कुतः ? **तदसमर्थविकल्पत्वात्,** असङ्गतार्थोऽसमर्थोऽसम्बद्धो विकल्पः, तेनासता सहासम्बद्धो विकल्पोऽस्येति तदसमर्थविकल्पं कार्यम्, तस्य कार्यस्यासमर्थविकल्पत्वात् ततोऽन्यत्वम् । किमिव ? **घटपटवत्,** यथा घटविकल्पाः पृथुबुध्नोर्ध्वग्रीवादयो मृदुचतुरस्रादिभिः पटविकल्पैरसङ्गताः पटविकल्पाश्च तैरित्यन्यौ घटपटौ परस्परत एवमसद्विकल्पैरसङ्गतं कार्यं तस्मात् ततोऽन्यदिति । § 501

161/mj

तदसमर्थविकल्पत्वात्, घटपटवत् । विकल्पासामर्थ्यं चासत्कार्ययोः सिद्धमेव । चतुर्षु विकल्पेषु कार्यखपुष्पयोरुभयोरसत्त्वं कार्यासत्त्वमेव वेत्येतद् विकल्पद्वयं स्यात्, उभयसत्त्वकार्यसत्त्वयोः प्रतिपक्षाभ्युपगम एवेति वादाभावात् । § 502

तद्यदि तावदुभयासत्त्वं ततोऽसत्त्वाविशेषादेवाविशेषे कार्याविर्भाववत् खपुष्पाविर्भावोऽप्यायत्यां स्यादसत्कार्यवत् । § 503

अथ न कार्यप्रादुर्भाववत् खपुष्पप्रादुर्भावोऽसच्च कार्यमिति निश्चितम्, तद्वैलक्षण्यान्न तर्ह्यसत् खपुष्पम्, सदसद्विलक्षणत्वाद् घटवत्, इतर उदुम्बरपुष्पवत् । ननु घटासत्त्वं पटासत्त्वविलक्षणम्, न, सतो वैलक्षण्यात् । § 504

---

३ म] °मवग°nayacakra-ms-ya ‖
४ एक] °वीरम° प्र° । आत्ममाने खश्च । ३ । २ । ८३ ‖ स्वकर्मके वर्तमानान्मन्यतेः सुपि खश् स्यात् । चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितंमन्यः । --nayacakra-ms-pā सिद्धान्तकउ ‖
६ मेका] °कान्तेन न कथंचित्nayacakra-ms-ya ‖
१२ त] तसमर्थ° प्र° । दृश्यतां पृ° ४७८-- २ ‖
१३ विक] विकल्पतः तेना°nayacakra-ms-ya ‖
१६ तैरित्य] °त्यनौ घट° प्र° ‖

स्यान्मतम्--असद्विकल्पासङ्गतत्वं कार्यस्यासिद्धम्, तन्न, सिद्धमेव, यस्माद् **विकल्पासामर्थ्यं चासत्कार्ययो**रसतः कार्यस्य च **सिद्धमेवे**ति गृहाण, विकल्पचतुष्टये द्वयोरेव सम्भवात् । असत् खपुष्पम्, कार्यमङ्कुरादि, तयोर्विकल्पाश्चत्वारः--१ खपुष्पमसत् कार्यमप्यसत्, २ खपुष्पं सत् कार्यमसत्, ३ खपुष्पमसत् कार्यं सत्, ४ खपुष्पं सत् कार्यमपि सत्, इत्येषु **चतुर्षु विकल्पेषु कार्यखपुष्पयोरुभयोरसत्त्वं कार्यासत्त्वमेव वेत्येतद्विकल्पद्वयं स्यात्** सम्भवेत् । किं कारणम् ? **उभयसत्त्वकार्यसत्त्वयोः प्रतिपक्षाभ्युपगम एव,** सत्कार्यवादः प्रतिपक्षोऽसत्कार्यवादस्य, **इति**शब्दो हेत्वर्थे, इत्यस्माद्धेतोर्वादाभावः, तस्माद् **वादाभावादु**भयाभावकार्याभावविकल्पावेव सम्भवेताम्, नेतरौ । § 505

ततश्च तयोरुभयासत्त्वकार्यासत्त्वविकल्पयो**स्तद् यदि तावदुभयासत्त्वं ततोऽसत्त्वाविशेषादेवाविशेषः** खपुष्पकार्ययोः, असत्त्वाविशेषादेवा**विशेषे कार्याविर्भाववत् खपुष्पाविर्भावोऽप्यायत्यां स्यात्,** एष्यति कालान्तरेऽस्माद् - /ms
वर्तमानात् क्षणादन्यस्मिन् क्षणे भवेत् । दृष्टान्तः --**असत्कार्यवत्,** बीजादङ्कुरवत् । न चैतद्दृष्टमिष्टं वा खपुष्पप्रादुर्भावः इति । § 506

**अथै**तस्मादनिष्टापत्तिदोषाद् दृष्टेष्टविरोधादपसर्पन् ब्रूयास्त्वम् --**न कार्यप्रादुर्भाववत् खपुष्पप्रादुर्भाव** इष्यते, **असच्च कार्यमिति निश्चितम्** । ततः को दोष इति चेत्, उच्यते --**तद्वैलक्षण्यान्न तर्ह्यसत् खपुष्पम्,** असत्कार्यवैलक्षण्यान्नेदानीमसत् खपुष्पम्, किन्तु **सदि**ति प्राप्तम् । असत्कार्यवैलक्षण्यं खपुष्पस्यायत्यामप्रादुर्भावः, तस्मादसत्कार्यवैलक्षण्यादायत्यामप्रादुर्भावान्न तर्ह्यसत् खपुष्पम्, किं तर्हि ? सत्, को हेतुः ? **असद्विलक्षणत्वात्,** असता कार्येण सह विलक्षणत्वात् । दृष्टान्तो **घटवत्,** यथा घटोऽसद्विलक्षणत्वात् सन्नेवं खरविषाणमप्यायत्यां प्रादुर्भवता कार्येण वैलक्षण्यात् सत् प्रसक्तम् । **इतर उदुम्बरपुष्पवत्,** इतर इति वैधर्म्यदृष्टान्तः, यदसत् तदसद्विलक्षणं न भवति यथोदुम्बरकुसुममिति परस्यानिष्टापादनार्थत्वादसद्वैधर्म्यं खपुष्पस्येति
। **ननु घटासत्त्वं पटासत्त्वविलक्षणम्** । स्यान्मतम्--घटस्या 162/mj

* * *

अथैवमपि वैलक्षण्ये खपुष्पासत्त्वनिश्चयो न निवर्ततेऽप्रादुर्भावात्मकं च तत्, न तर्हि प्रादुर्भावात्मकत्वात् कार्यमसद् निर्वृत्तघटवत् । असत्त्व आयत्यां न प्रादुर्भवेत्, असत्त्वात्, खपुष्पवत् । शेषं पूर्ववदेव विपर्ययेण ।

* * *

१ त] तत्रnayacakra-ms-ya ॥
६ कार्यास] °सत्त्वमेवेत्येतद्वि° प्र° ।
दृश्यतां पृ° ३०५-- २ ॥
९ विक] °कल्पाभाववेव संभवेतां नेतरो प्र° ॥
१६ दृष्टेष्ट]
°ष्टविरुद्धाद°nayacakra-ms-bhā ॥
२४ इ] इतरे प्र° ॥
२६ प]
पक्षासत्त्व°nayacakra-ms-bhā ।
पुष्पसत्त्व° nayacakra-ms-ya ॥

सत्त्वं पटात्मना, पटासत्त्वं घटात्मनेति तयोरितरेतराभावलक्षणासत्त्वं वैलक्षण्यं च परस्परतो दृष्टम्, तौ च घटपटौ सन्तौ, तस्मादसद्वैलक्षण्यस्य सत्यपि दर्शनादनैकान्तिकतेति चेत्, उच्यते **--न, सतो वैलक्षण्यात् ।** - /ms नानैकान्तिकतास्य हेतोः, सतो वैलक्षण्यात् । सत एव वैलक्षण्यम्, तद्धीतरेतराभावात्मकं वैलक्षण्यं सत एव, नासतः । तस्मादसतो वैलक्षण्यं न भवति, किं तर्हि ? सद्वैलक्षण्यमपि तत् सत एवेतरापेक्षया तद्रूपेणासत्त्वात् । अयं तु कार्यस्यायत्यां प्रादुर्भावोऽसता खपुष्पेणात्यन्तविलक्षणोऽप्रादुर्भावश्च खपुष्पस्य कार्येणासतेति नास्ति सतो वैलक्षण्यं सता तद्विशेषधर्मत्वाद् रूपादिविशेषधर्मावैलक्षण्यवत् । अथवा **सतोऽवैलक्षण्यात्,** सतः अवैलक्षण्यात् । सतस्तु घटादेः पटादिना सह वैलक्षण्यं नास्त्येव, सत्त्वान्वयाविशेषाद् देशकालाकारादिमात्रविशेषस्याविशेषत्वात्, अङ्गुल्यादिविशिष्टाकाशाविशेषवत् । § 507

अथवा **न तर्ह्यसत् खपुष्पम् ।** कस्माद्धेतोः ? **सदसद्विलक्षणत्वात्,** सताऽसता च विलक्षणत्वात् । सच्च द्विविधम्--तुल्यजातीयं घटस्य घट एव, अतुल्यजातीयं पटादि । असच्च कार्यमायत्यां भावादङ्कुरादि । खपुष्पमत्यन्ताप्रादुर्भावात् कार्येणासता विलक्षणं सता च घटपटादिना त्वन्मतेन इतरेतराभाववैलक्षण्येन तुल्यजातीयेन [अअतुल्यजातीयेन इति पाठो यद्यपि कुत्रापि प्रतिषु नास्ति तथाप्यावश्यक इति भाति ॥तुल्यजातीयेन] च भावानां परस्परवैलक्षण्यवद्, दृष्टान्तो **घटवदिति,** यथा घटस्तुल्यजातीयेभ्यो घटान्तरेभ्योऽतुल्यजातीयेभ्यश्च पटादिभ्यः सद्भ्यो विलक्षणोऽसतश्च खपुष्पादेः - /ms संश्च दृष्टस्तथा खपुष्पं घटवत् सदसद्विलक्षणत्वान्नासत्, सदेवेत्यर्थः, द्विः प्रतिषेधः प्रकृतिं गमयतीति कृत्वा । **इतर उदुम्बरपुष्पवत्,** यदसत् तन्न सदसद्विलक्षणम्, यथोदुम्बरपुष्पम् । त्वन्मत्यैवात्रापि वैधर्म्यदृष्टान्तः, खपुष्प-

---

३ ना ] °नादिकैकान्तिक-तेतिnayacakra-ms-vi । °नादेकैकान्तिकतेति nayacakra-ms-vi विना ॥
४ ना ] नामैकान्ति°nayacakra-ms-vi विना ॥
६ त ] तत्स-त्तnayacakra-ms-ḍenayacakra-ms-līṃ । तत्सतं nayacakra-ms-pā । तदाक्षं nayacakra-ms-raṃ nayacakra-ms-hī । तत्सत्वं nayacakra-ms-vi ॥
७ पुष्पेणात्य ] °त्यन्तं वि°nayacakra-ms-vinayacakra-ms-ramnayacakra-ms-hī ॥
८ का ] कार्येण सतेति प्र° ॥
९ स ] सतोवै° प्र° ॥
११ अङ्गुल्यादिविशिष्टा ] ष्टकोगाविशेषवत्nayacakra-ms-vi विना । °ष्टकांताविशेषवत् nayacakra-ms-vi ॥
१५ अ ] असच्चर कार्य° प्र° ॥
१९ ण्य ] °ण्यवद दृ-ष्टांतोnayacakra-ms-bhānayacakra-ms-vi । °ण्यवच दृष्टांतो nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
२० टादिभ्यः ] °भ्यश्च सद्भ्योnayacakra-ms-ya ॥
२१ त्वान्ना ] °त्वान्नसत्सदेवेत्यर्थः प्र° ॥
२२ य ] यदसत्तंत सद्विलक्षणम् प्र° ॥

खरविषाणोदुम्बरपुष्पादीनामसत्त्वाविशेषादनिष्टापादनसाम्यात् साध्यान्तःपाती । तस्माद् वैधर्म्यदृष्टान्तेन नार्थः । अस्तु तदा सद्विलक्षणत्वमितरेतराभावापेक्षत्वात्, कथमसद्विलक्षणं खपुष्पमिति चेत्, आयत्यां प्रादुर्भवता कार्येणासता वैलक्षण्यस्य त्वयैवाभ्युपगतत्वात् त्वन्मतनिवारणार्थत्वादस्य प्रयासस्य नास्माकं दोष इति । § 508

**अथैवमपीत्यादि** । अथ ते प्रादुर्भावाप्रादुर्भाव**वैलक्षण्ये** सत्यपि कार्यखपुष्पयोः असदेव खपुष्पम् इत्ययं **निश्चयः** असद्वैलक्षण्याद् घटवत् सद् भवतु इत्यस्मान्न्यायान्निवर्त्यमानोऽपि **न निवर्तते, अप्रादुर्भावात्मकं च** तत् खपुष्पम् इत्येतच्च वैलक्षण्यमिष्यत एव, **प्रादुः प्राकाश्ये जन्मनि च, तथाऽऽविः** 163/mj

* * *

अतः कार्यं सत्, आविर्भावात्मकत्वात्, निर्वृत्तघटवत्; वैधर्म्येण आकाशघटवत् । असच्च खपुष्पम्, अनाविर्भावात्मकत्वात्, खघटवत्; वैधर्म्येण निर्वृत्तघटवत् ।

तुल्ये वाऽसत्त्वे विशेषो वक्तव्यः, अविशेषे वैलक्षण्यानुपपत्तेर्घटघटस्त्वात्म-

* * *

, प्रादुर्भवति प्रकाशं भवति गृह्यते ज्ञायते उत्पद्यते जायत इति वा तथाविर्भवतीति, एवं चाप्रादुर्भावात्मकस्य खपुष्पस्यासत्त्वेऽर्थादापन्नम् **--न तर्हि प्रादुर्भावात्मकत्वात् कार्यमसत्,** सदेवेत्यर्थः । को दृष्टान्तः ? **निर्वृत्तघटवत्,** यथा निर्वृत्तो घटः प्रादुर्भावात्मकत्वात् प्रकाशात्मकत्वात् सन्नेव तथा कार्यमपि सत् । अस्याश्चार्थापत्तेरैकान्तिकत्वान्न जात्युत्तरता, यथा गेहे देवदत्तस्याभावे स्थितिमतो बहिर्भावानुमानमर्थापन्नमैकान्तिकत्वान्न जातिवादः । अस्माकं त्वत्राभिप्रायः--सदेव कदाचिदुपलभ्यते जायते वा नात्यन्तास- - /ms
दिति, दर्शनादर्शने च सद्विषये नात्यन्तासद्विषये इत्येतदुत्तरत्र दर्शयिष्यामो विचारस्यास्य तत्फलत्वात् । अथैवमपि त्वया कार्यस्य सत्त्वं नेष्यते ततोऽस**त्त्वे** कार्यस्यायत्यां **न प्रादुर्भवेत्** कार्यम**सत्त्वात् खपुष्पवत्,** प्रादुर्भवति तु, तस्मात् सत् । **शेषं पूर्ववदेव विपर्ययेणे**त्यतीतग्रन्थमतिदिशति । **विपर्ययेणेत्य-**

---

१ साध्यान्तःपा ] °पाति प्र° । अत्र साध्यान्त पातित्वात् इत्यपि पाठः स्यात् ॥
४ त ] °तविचारणार्थ°nayacakra-ms-bhā ॥
१६ प्र ] प्रकाशंnayacakra-ms-bhā ॥
१६ उ ] उद्यतेnayacakra-ms-ya ॥
१७ त ] ते-थावि°nayacakra-ms-pānayacakra-ms-raṃnayacakra-ms-kī । तेष्वावि° nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
१७ क ] °कस्त्वपुष्प°nayacakra-ms-bhā ॥
१७ त्त्वेऽर्थादाप ] °पनम् प्र° ॥
२१ स्थितिम ] °मतो हिभावानु°nayacakra-ms-ya ॥
२३ ना ] नात्यन्तासद्विषयेnayacakra-ms-ya प्रतिषु नास्ति ॥
२५ स ] सत्त्वात्nayacakra-ms-bhā ॥

र्थतः शब्दतस्तद्द्वयोर्विपर्ययेण योज्यः । तद्यथा--अथ न खपुष्पाप्रादुर्भाववत् कार्याप्रादुर्भावोऽसच्च कार्यमिति निश्चितम्, न तर्ह्यसत् कार्यम्, सदेव तत्, असद्विलक्षणत्वाद् घटवत्, इतर उदुम्बरपुष्पवत् । ननु घटासत्त्वं पटासत्त्वविलक्षणम्, न, सतो वैलक्षण्यात् । अथैवमपि वैलक्षण्ये कार्यासत्त्वविनिश्चयो न निवर्तते प्रादुर्भावात्मकं च तत्, न तर्हि प्रादुर्भावात्मकत्वादसत् कार्यं निर्वृत्तघटवत्, असत्त्वे आयत्यां न प्रादुर्भवेदसत्त्वात् खपुष्पवदिति । § 509

तदुपसंहारार्थमाह --**अतः कार्यं सत्, आविर्भावात्मकत्वात्, निर्वृत्तघटवत्; वैधर्म्येण आकाशघटवत्,** आकाशमेवाकाशस्याकाशे वा घट आकाशघटः, स त्वनाविर्भावात्मकत्वान्नास्ति, न तथा कार्यमनाविर्भावात्मकम्, तस्मात् तत् सदिति । **असच्च खपुष्पम्, अनाविर्भावात्मकत्वात्, खघटवत्; वैधर्म्येण निर्वृत्तघटव**दिति तयोः सदसतोः कार्यखपुष्पयोर्वैलक्षण्यं दर्शयति । § 510

यदि भवन्मतेन कार्यखपुष्पयोरसत्त्वमेव तुल्यं **तुल्ये वाऽसत्त्वे विशेषो वक्तव्यः**--अस्माद् विशेषहेतोः कार्यमसत्त्वे सत्यपि प्रादुर्भवति न
- /ms तु खपुष्पमिति । नोच्यते चेद् विशेषहेतुः, अविशेषोऽनयोः । अविशेषे च वैलक्षण्यानुपपत्तिः खपुष्पखरविषाणयोरिवासतोः, दृष्टं च वैलक्षण्यमायत्यां प्रादुर्भावाप्रादुर्भावाभ्याम्, तत्तु अविशेषे तयोर्नोपपद्यते । तस्माद्धेतोर**विशेषे वैलक्षण्यानुपपत्तेर्घटघटस्वात्मवत्,** यथा घट एव घटस्वात्मेति तयोर्न वैलक्षण्यमविशिष्टत्वादेवमविशेषः स्यात्, न तु भवति दृष्टत्वादुक्तत्वाद्याविर्भावानाविर्भावयोः । तस्मात् तयोर्यथासङ्ख्यं सत्त्वमसत्त्वं चावश्य-
164/mj मेषितव्यम् । इतर आह--नैवास्त्यविशेषोऽसतोऽपि,

* * *

वत् । विशेषोन्नयनेऽपि तु विशेषस्य सदाश्रयत्वात् सत्त्वं घटवदिति सामान्यमेव ।

अथैतत् साम्यमुभयासत्त्वान्मा भूदित्यन्यतरासत्त्वं कार्यसत्त्वाभ्युपगमपरिहारेण कार्यमेवासदिति, अत्र कार्यसमीप एवकार इत्यन्यत्र प्रतियोगिन्यसत्त्वे नियमः--असत्त्वं कार्ये एव नान्यत्रापीति । ततश्च न खपुष्पमसत् । तथा च सतो-

* * *

यस्माच्चतुर्विधोऽसन्निष्यते प्राक्प्रध्वंसेतरेतरात्यन्ताभावाख्यो घटस्य मृत्पिण्डादिकपालादिपटादिखरविषाणादिवदिति । अत्रोच्यते --**विशेषोन्नयनेऽपि तु विशेष-**

---

१ अ ] तुलना पृ° १६१ पं° ६ ॥
१० त्वा ] °त्वात्त्वघटवत्nayacakra-ms-bhā । °त्वात् घटवत् nayacakra-ms-ya ॥
१३ भ ] भवन्मनेnayacakra-ms-bhā । अत्र भवन्मते इत्यपि पाठः स्यात् ॥
१४ का ] **कार्यमत्वे** प्र° ॥
१७ प्रा ] **प्रादुर्भावात्य तत्तु** nayacakra-ms-bhā । **प्रादुर्भवत्यां तत्तु** nayacakra-ms-ya ॥
२० त्वाद्या ] **°द्याविर्भावयोः** प्र° ॥
२४ अ ] दृश्यतां पृ° १६७ पं° २६ ॥
२९ प्रा ] **प्राक्प्रध्वंसेतरात्यन्ता°** प्र° ॥

**स्य सदाश्रयत्वात् सत्त्वं घटवदिति** । **अपिशब्दो**ऽनभ्युपगमं दर्शयति, नैवाभावस्य खरविषाणवन्ध्यासुतादेः परस्परतो विशेषोऽस्त्यवस्तुत्वात् त्वन्मतेनैव, अस्मन्मतेन तु वस्तुत्वमभावस्यापि कस्यचित् प्रमेयत्वसामान्यविशेषवत्त्वादिहेतुभ्यस्त्वदभ्युपगतेभ्यः प्रमाणवत् । अतस्त्वन्मतेनैवाभावस्य भावाद् विशेषः परमार्थतो नास्ति । अभ्युपेत्यापि ब्रूमः--विशेषोऽन्नयनेऽपि तु येन केनचित् प्रकारेण सदाश्रयोऽसावभावस्त्वत्परिकल्पितश्चतुर्विधोऽपि विशेषत्वाद् रूपादिवद् घटवत् । ततश्च विशेषस्य सदाश्रयत्वात् सत्त्वं घटवत्, यथा घटः सन्तं पृथिव्याद्यर्थमाश्रित्य वर्तमानः सन्नेव स्वमेव वात्मानमाश्रित्य वृत्तेः सन्नेवं विशेषोऽपि सदाश्रयत्वात् सन्निति । **इतिशब्दो** हेतुदृष्टान्तदार्ष्टान्तिकोपसंहारे, इत्थं भावाभावयोः **सामान्यमेव,** न विशेष इति । एवं तावत् - /ms
कार्यखपुष्पयोरुभयोरसत्त्वमेव वेति साम्यमापादितम् । § 511

द्वितीयविकल्पो विचार्यते --**अथैतत् साम्य**मित्यादि । अथैतदापादितं सामान्यमनिच्छता कार्यसत्त्वपरिहारेण उभयासत्त्वाभ्युपगमादायातमिद**मन्यतरासत्त्वं कार्यसत्त्वपरिहारेणा**भ्युपगम्यते प्रतिपक्षवादादन्यत् पूर्वोक्तद्वयान्यतरविशिष्टम्, किं तत् ? **कार्यमेवासदिति,** अवश्यं द्वयोरन्यतराभ्युपगमेऽवधारणमापद्यते, तच्चावधारणं **यत एवकारस्ततोऽन्यत्रावधारणम्** इति परिभाषितत्वाच्छास्त्रेषु लोके च दृष्टत्वादवधारणफलत्वाच्च वाक्यस्यैतदुपपद्यते --**कार्यसमीप एवकार इति** कार्यमेवासत् इति कार्यशब्दसमीप एवकारप्रयोगात्, **इतिशब्दस्य** हेत्वर्थत्वात्, **अन्यत्र प्रतियोगिनि असत्त्वे नियमः,** असच्छब्दवाच्येऽर्थे खपुष्पादौ नियमस्तत्र एवकाराभावात्, न कार्यशब्दार्थे । यथा वृक्षश्चूत इत्यत्र चूतो नियमाद्वृक्षः, वृक्षस्तु चूतोऽन्यो वा स्यादित्यनियमः, तथेहापि कार्यमेवासत्, न खपुष्पाद्यकार्यमसत्, किं तर्हि ? सत्, न तु असदेव कार्यम् इति नियम्यते, यदि सदपि कार्यं स्यादस्तु, को दोषः ? इति तद्दर्शयति— **असत्त्वं कार्य एव, नान्यत्रापी**त्यकार्ये खपुष्पादाविति । **इतिशब्दो** हेत्वर्थे, अस्मादवधारणाद्धेतोरित्यर्थः । एवं सति को दोष इति चेत्, उच्यते --**ततश्च न खपुष्पमस**दिति प्रसक्तं दृष्टेष्टविरुद्धं सत्त्वं

---

२ तो] **विशेषोस्यवस्तुत्वात्** प्र° ॥
४ भावा]
भावाभावाद्nayacakra-ms-bhā ॥
६ दाश्र]
°**श्रयाभावस्त्व**°nayacakra-ms-ya ॥
८ स्त्व] **स्त्वस्त्वी ?यमेव** प्र° ॥
१२ अ] **अथैव तत्साम्य**° प्र° । दृश्यतां
पृ° १६७ पं° २६, ३०६-- २ ॥
१३ निच्छ] °**च्छत** प्र° ॥
१३ यास]
°**सत्वभ्युप**°nayacakra-ms-bhā ।
अत्र अथ कार्यसत्त्वपरिहारेण
उभयासत्त्वाभ्युपगमादायातमेतदापादितं
सामान्यमनिच्छता इत्यन्वयविवक्षायाम्
उभयासत्त्वाभ्युपगमात् इति
nayacakra-ms-ya प्रतिपाठः साधुरेव
। कार्यसत्त्वपरिहारेण
उभयासत्त्वाभ्युपगमादायातमिदमन्यतरासत्त्वं
कार्यसत्त्वपरिहारेण इत्यन्वयविवक्षायां तु
**उभयासत्त्वानभ्युपगभात्** इत्येव पाठोऽत्र
कल्पनीयः, स एव च शुद्ध इति ध्येयम् ॥
१५ र] °**तररा ?वशिष्टम्**
nayacakra-ms-bhā ॥
२१ वृक्ष] **वृक्षश्च इत्यत्र**
**भूतो**nayacakra-ms-ya ॥
२२ स] **सत्तद्यसदेव कार्यम्** प्र° ॥

165/mj खपुष्पस्येत्यर्थः

* * *

ऽसदिति असतश्च सदिति संज्ञा क्रियते, कार्यासत्त्वं खरविषाणविपरीतघटादीनामसत्त्वेन तुल्यम्, नाममात्रे विसंवादः । कार्यसत्त्वनिवृत्त्येकान्तत्यागाच्च स्ववचनादिविरोधापत्तिः । असदेवकारे त्वसदनवधृतेः पूर्वदोष एव ।

अथोच्येत--असत्त्वादेव तयोः कारणकाले न कश्चिद् विशेषोऽस्ति, यदेव

* * *

**तथा चेत्यादि** यावद् **नाममात्रे विसंवादः** । एवं च कृत्वा कार्यमसत् - /ms खरविषाणं सदिति सङ्गीत्या **सतोऽसदिति असतश्च सदिति संज्ञा क्रियते । कार्यासत्त्व**मिति ततः **खरविषाणविपरीता** ये निर्वृत्ता घटादयस्तेषां **घटादीनामसत्त्वेन तुल्यम्,** कार्यस्यासत्त्वं सतामेवासत्त्वेन तुल्यं विपरीतं नाममात्रमग्नेर्मङ्गलनामवत्, न चात्र कश्चिदर्थस्य सत्त्वे विसंवादोऽसत् कार्यमिति । किञ्चान्यत्, **कार्यसत्त्वनिवृत्त्येकान्तत्यागाच्च स्ववचनादिविरोधापत्तिः ।** कार्यसत्त्वनिवृत्तिः कार्यासत्त्वम्, तदवधारणमेकान्तः, कार्यमेवासदिति तस्य त्यागोऽनन्तरोक्तविधिना प्राप्तः, ततश्च कार्यसत्त्वनिवृत्त्येकान्तत्यागाच्च स्ववचनादिविरोधापत्तिः । स्ववचनविरोधस्तावत् तदेव कार्यमसदित्युक्त्वा तस्यैवकारसामर्थ्यात् सत्त्वापादनात् तदेव सत् तदेवासदिति ब्रुवतः । अथवा **यदि कार्यं कथमसत् ? अथासत् कथं कार्यम् ? क्रियते घटो घटतया व्यज्यते दीपेनेव क्रिययेति** वक्ष्यति । तथाभ्युपगमादभ्युपगमविरोधः । तथा लोके प्रसिद्धत्वाल्लोकविरोधः । तत्त्व एव तथाभूतेरनुमानविरोधः । तथा मृत्पिण्डघटादिकारणकार्यदर्शनात् प्रत्यक्षविरोधः । एवं तावत् कार्यमेवासत्, न खपुष्पादि इत्यवधारणदोषः । § 512

कार्यमेवासत्, न कारणम् इत्यस्यावधारणस्य प्रतिपक्षवादापत्तेरथैवमवधार्यते कार्यमसदेव इति । तत्रापि **यत एवकारस्ततोऽन्यत्रावधारण**मित्यसत्समीप - /ms एवकारात् कार्यमसत्त्वेनावधार्यते कार्यं नियमादसत्, असत्तु कार्यं वा स्यात् खपुष्पादि वा इत्येव**मसदेवकारे त्वसदनवधृतेः पूर्वो दोषो** योऽ**सत्त्वाविशेषा**दित्यादिः स **एव,** कार्यखपुष्पयोरसत्त्वे आयत्यामाविर्भावानाविर्भावकृतो विशेषो न स्यादित्यविशेषापत्तिदोषः प्रागुक्तः स एवात्रापि । § 513

८ ङ्गी ] संगत्याnayacakra-ms-ya । दृश्यतां पृ° ५०९-- १ ॥
११ चा ] चाव प्र° ॥
१६ का ] °कारणसा°nayacakra-ms-bhā ॥
१७ क ] प्रथमसत्nayacakra-ms-vi । प्रथमंसत् nayacakra-ms-vi विना ॥
१८ ते ] दीत्यमेव क्रियेति प्र° । दृश्यतां पृ° १२४-- १ ॥
२० मेवा ] °वसत्nayacakra-ms-ya ॥
२१ धा ] अवधारणकृतो दोष इत्यर्थः । तुलना पृ° १६६ पं° ९ ॥
२४ का ] कार्यनयमासदत्nayacakra-ms-bhā । कार्यनयमासत् nayacakra-ms-ya ॥
२५ म ] दृश्यतां पृ° १६८ पं° ५, ३०६-- २, ५०९-- २ ॥
२६ स ] दृश्यतां पृ° १६१ पं° ४ ॥

**अथोच्येते**त्यादि । अविशेषापत्तिदोषस्य च परिहारार्थमथोच्यते त्वयेति परमतमाशङ्कते, कथम्, **असत्त्वादेव तयोः** कार्यखपुष्पयोः **कारणकाले** विशेषासम्भवः, यथा खपुष्पमसत् तथा कारणकाले कार्यमप्यसदेवेति नानयोः **कश्चिद् विशेषोऽस्ति,** न ह्यसतो निरुपाख्यस्य खपुष्पस्य वृन्तफलकेसराद्यवयवसौरभादिविशेषाः खरविषाणकुण्ठतीक्ष्णत्वादिभ्यो भिन्नलक्षणाः सन्त्युभयेषामवस्तुत्वान्निरुपाख्यत्वाच्चेत्यस्मा 166/mj

* * *

कार्यासत्त्वं तदेव खपुष्पासत्त्वमपीति नावधारणकृतो दोषो नापि पूर्वस्तुल्यत्वापत्तिदोषः, अनेकविषयत्वात्तुल्यत्वस्य ।

एवमप्येकत्वाद्विशेषाभावः । यथैव हि खपुष्पमनुपादानमबुद्धिसिद्धं निःसामान्यं निर्विशेषं च एवं कार्यस्योपादानं बुद्धिसिद्धत्वं सामान्यविशेषवत्त्वं च न स्यात् ।

अथ सामान्यविशेषोपादानबुद्धिसिद्धत्वसद्भावासद्भावौ कार्यखपुष्पयोरिष्येते खपुष्पवदभवदपि तदसदेव, निर्वृत्तमपि तर्ह्यसत् सामान्यविशेषवत्त्वात् कारण-

* * *

दविशेषात् कारणकाले **यदेव कार्यासत्त्वं तदेव खपुष्पासत्त्वमपीति** । ततः किं परिहृतमिति चेत्, **नावधारणकृतो दोष** इत्यवधारणदोषः परिहृतो भवति । कार्यमेवासत्, असदेव कार्यम् इत्यवधार्यमाणे खपुष्पसत्त्वं कार्यखपुष्पयोरविशेष इत्येतौ दोषौ तयोरविशेषाभ्युपगमान्न स्त इति । **नापि पूर्वस्तुल्यत्वापत्तिदोषः** कार्यस्यायत्यामनाविर्भावः खपुष्पस्याविर्भाव इत्यविशेषः । - /ms अस्यापि तुल्यत्वापत्तिदोषस्याभावोऽसतो विशेषाभावाद**नेकविषयत्वात् तुल्यत्वस्य,** अयमनेनाभ्यामेभिरिमाविमे वार्तास्तुल्याः इति हि तुल्यत्वमनेकविषयं दृष्टम्, न हि तदेव तेन तुल्यमिति । § 514

अत्रोच्यते --**एवमप्येकत्वाद् विशेषाभाव** इति, त्वयैव कार्यखपुष्पयोरसत्त्वाविशेषोऽभ्युपगत एकरूपत्वादवस्तुन इति तदवस्थ एवाविशेषदोषः । तस्यैवेदानीमविशेषदोषस्यापादनार्थं विकल्प्यतेऽन्यदनिष्टापादनम् --**यथैव हीत्यादि** । यथैव खपुष्पस्योपादानं पूर्वदृष्टश्रुतानुभूतं बुद्धौ सिद्धं वाकारादिविशिष्टत्वं नास्तीत्य**नुपादानमबुद्धिसिद्धं च खपुष्पम्,** ततः किम् ? अनुपादानाबुद्धिसिद्धत्वाभ्यां तद् **निःसामान्यं निर्विशेषं** चेति सिद्धमेवं घ-

---

१ अ] दृश्यतां पृ॰ १६३ पं॰ ७ ॥
१ म] अत्रोच्येत्येत्यादि सविशेषा॰nayacakra-ms-ya । अत्रोच्येत्योदि सविशेषा॰ nayacakra-ms-bhā । दृश्यतां पृ॰ ३०६-- २ ॥
१ म] ॰मथोच्यतेततेऽत्र ?त्वयेतिnayacakra-ms-bhā । ॰मर्थोच्यतेतत्वयेति nayacakra-ms-ya ॥
२ प] परमार्थमाशङ्कतेnayacakra-ms-ya ॥
२० का] दृश्यतां पृ॰ १६२ पं॰ २ ॥
२० ख] दृश्यतां पृ॰ १६१ पं॰ ५ ॥
२१ तु] तुल्यस्य प्र॰ ॥
२२ वा] ॰पादाबुद्धि॰nayacakra-ms-ya ॥

टादेः **कार्यस्य** मृदाद्युपादानं **बुद्धिसिद्धत्वं सामान्यविशेषवत्त्वं च न स्यात्,** तच्च मृद एव येनाकारेण भवनं देशकालनवपुराणकृष्णरक्तत्वादिघटभेदेऽपि तुल्यतया सामान्यं विशेषश्च पटादिभ्यः । तच्च खपुष्पस्योपादानबुद्धिसिद्धत्वसामान्यविशेषवत्त्वं च स्यात्, उभयोर्निरुपाख्यत्वात् । न त्वेतदिष्टम् । तस्मादस्त्यनयोर्विशेष इति सत् कार्यम् । § 515

अथ **सामान्यविशेषोपादानबुद्धिसिद्धत्वसद्भावासद्भावौ कार्यखपुष्प-**
- /ms **योरिष्येते** त्वया विशेषौ, **खपुष्पवदभवदपि तदसदेव** । खपुष्पवदिति येन प्रकारेण खपुष्पं न भवति नोत्पद्यते तेन प्रकारेणाभवदपि अन्यथा भवदपि उत्पद्यमानं कदाचिद्दृश्यमानमपीत्यर्थः, उपादानबुद्धिसिद्धत्वसामान्यविशेषवत्त्वप्रकारेण भवदपि तत् कार्यमसदेवेष्यते, ततश्चैवं सति अयमपरो दोषः --**निर्वृत्तमपि तर्ह्यसत्** कार्यम् इति वर्तते, सोपादानबुद्धिसिद्धत्वसद्भावेऽपि । कस्मात् ? **सामान्यविशेषवत्त्वात् कारणकालकार्यवत्,** यथा कारणकाले
167/mj कार्यमसत् त्वन्मतेन सामान्यविशेषवदपि सोपादानं बुद्धिसिद्धमपि तथोत्तर

* * *

कालकार्यवत् । कार्यवच्चाभवदपि खपुष्पमसन्न स्याद् निःसामान्यनिर्विशेषत्वात् सामान्यविशेषवत्, कार्यासत्त्ववैलक्षण्याद्वा कारणवत् ।

अथ न कार्योपादानादिमत्त्ववत् खपुष्पस्याप्युपादानादिमत्त्वमसच्च कार्यमिति निश्चितमित्यादि पूर्ववच्चक्रकद्वयप्रवर्तनम् । उपादानादिमत्त्वविशेषणकृतो विशेषः ।

* * *

कालं निर्वृत्तमपि तदसदेव स्यात् कारणकालवदिति । **कार्यवच्चाभवदपि खपुष्पमसन्न स्यात्,** कार्यप्रादुर्भावप्रकारेणाभवदपि तस्मिन्नभवनप्रकारविशेषे सत्यपि सत् प्राप्नोति खपुष्पं **निःसामान्यनिर्विशेषत्वात्,** तद्धि खपुष्पं निःसामान्यं निर्विशेषं चेति सिद्धम्, अतस्तस्य निःसामान्यनिर्विशेषत्वात् सत्त्वं स्यात् । को दृष्टान्तः ? **सामान्यविशेषवत्** । कार्यवदिति सिद्धे **वैशेषिक**मतालम्बनेन सामान्यविशेषदृष्टान्तो निःसामान्यनिर्विशेषाणां सामान्यविशेषाणां वस्तुत्वं खपुष्पतुल्यमेवेति काक्वा दर्शितं भवति । प्रकृतार्थोपनयस्तु यथा सामान्यविशेषो घटत्वादिर्निःसामान्यो निर्विशेषश्च संश्चेति सिद्धस्तथा खपुष्पमपि सत् स्यात् । किञ्चान्यत्, **कार्यासत्त्ववैलक्षण्याद्वा कारणवत्** असन्न स्यात् खपुष्पम् इति वर्तते । कार्यस्य घटादेरसत्त्वेन खपुष्पस्याप्रादुर्भावानुपादानाबुद्धिसिद्ध-
- /ms त्वनिःसामान्यविशेषत्ववैलक्षण्यात् खपुष्पमपि सत्  स्यात् कारणवत् । एतैश्च

१ सामान्य] **॰विशेषत्वं च** प्र॰ ॥
२ एव] अत्र **तेनाकारेण** इत्यपि पाठः स्यात् ॥
३ त] **वच्च** प्र॰ । अत्र तच्च खपुष्पस्योपादानं बुद्धिसिद्धत्वं सामान्यविशेषवत्त्वं च स्यात् इत्यपि पाठः स्यात् ॥
६ बुद्धिसिद्ध] **॰द्धत्वसद्भावौ कार्य** प्र॰ ॥
१५ का] दृश्यतां पृ॰ १६८ पं॰ ५ ॥
२४ ताल] **॰लम्बनसामान्य॰** प्र॰ ॥
३० विशेष] **॰षवैल॰** प्र॰ ॥

प्रकारैः सिद्धमेव कार्यासत्त्ववैलक्षण्यमिति सिद्धो हेतुः । निर्वृत्तत्वादिप्रकारेण च कारणस्य तद्वैलक्षण्यं सिद्धमिति साधर्म्यं कारणखपुष्पयोः । कारणं वा खपुष्पवत् कार्यासत्त्ववैलक्षण्यादसत् स्यात् कार्यस्यासत्त्वं वा त्याज्यमित्यभिप्रायः । § 516

पुनरपि अ (Edtext outside numbered paragraph)सदेवकारे त्वसदनवधृतेः पूर्वदोषः । अ (Edtext outside numbered paragraph)थोच्यत इत्यादि यावत् का (Edtext outside numbered paragraph)र्यासत्त्ववैलक्षण्याद्वा कारणवदिति स एव ग्रन्थः । उपादानादिमत्त्वविशेषणकृतो विशेष इति, अतः कार्यं सदु (Edtext outside numbered paragraph)पादानादिमत्त्वात् कारणस्वात्मवत्, वैधर्म्येणाकाशघटवत् । असच्च खपुष्पमनुपादानत्वात् खघटवत्, इतरो निर्वृत्तघटवत् । तथा सत् कार्यं बुद्धिसिद्धत्वाद् निर्वृत्तघटवत्, इतरो नभोघटवत् । असच्च खपुष्पं बुद्ध्यसिद्धत्वा (Edtext outside numbered paragraph)त् खघटवत्, इतरो निर्वृत्तघटवत् । एवं सामान्यविशेषाभ्यामपि योज्यम् । तस्मात् कार्यं सत् कारणवत्, न तु खपुष्पमित्यर्थः । § 517

अथ न कार्योपादानादिमत्त्ववदित्यादि । अथ भवता खपुष्पसत्त्वप्रसङ्गदोषभयाद् युक्तप्रतिपादनमपि कार्योपादानादिमत्त्ववत् खपुष्पस्याप्युपादानादिमत्त्वं नेष्यते, आदिग्रहणाद् बुद्धिसिद्धसामान्यविशेषवत्त्वानि नेष्यन्ते, इदं कार्यस्यासाधर्म्यं खपुष्पेण सहेष्यते, असच्च कार्यमिति निश्चितमित्यादि पूर्ववच्चक्रकद्वयप्रवर्तनमिति ग्रन्थमतिदिशति तमेव । कथं पुनर्भाव्यते, यदि कार्योपादानादिमत्त्ववत् खपुष्पस्योपादानादिमत्त्वं नेष्यते कार्यं चासदिति निश्चितम्, तद्वैलक्षण्यादनुपादानादिवैलक्षण्याद् न तर्ह्यसत् खपुष्पम्, सदसद्विलक्षणत्वाद् घटवत्, इतर उदुम्बरपुष्पवत् । ननु घटासत्त्वं पटासत्त्वविलक्षणम्, न, सतो वैलक्षण्यात् । अथैवमपि वैलक्षण्ये खपुष्पासत्त्वविनिश्चयो न निवर्ततेऽनुपादानादिमत्त्वात्, न तर्ह्युपादानादिमत्त्वात् कार्यमसत्, असत्त्वे नोपादानादिमत् स्यात् खपुष्पवत्, एतदविपर्ययचक्रकम् । शेषं पूर्ववदेव विपर्ययेण । अतः सत् कार्यमु- पादानादिमत्त्वाद् निर्वृत्तघ- - /ms टवत्, वैधर्म्येणाकाशघटवदित्यादिरपि यावत् सदाश्रयत्वात् सत्त्वं घटवदिति, एतद्विपर्ययचक्रकमेवमुभयासत्त्वे । अन्यतरासत्त्वे तु अथैतत् साम्यमुभयासत्त्वान्मा भूदित्यन्यतरासत्त्वं कार्यसत्त्वाभ्युपगमपरिहारेण कार्यमेवासदिति,

५ अ] अन कार्यो॰ प्र॰ ॥
६ यु] ॰युत्त्फप्रति॰nayacakra-ms-bhā ॥
१२ स] तदसद्विल॰ प्र॰ । दृश्यतां पृ॰ १६१ पं॰ ७ ॥
१४ र्ह्युपादानादिम] ॰मत्कार्यमसत्nayacakra-ms-bhā ॥
१५ ए] एतदपिपर्यय॰ प्र॰ ॥
१७ दित्या] इत्यादिरपि ग्रन्थ इत्याशयः ॥
१७ स] दृश्यतां पृ॰ १६४ पं॰ १ ॥
१८ अ] दृश्यतां पृ॰ १६४ पं॰ २ ॥

**अत्र कार्यसमीप** इत्यादि यावत्

तस्मात् कार्यं सत् कारणवत् । ननु सत्त्वेऽपि कारणवत् प्रत्यक्षत्वं प्रसज्यते, न, अव्यक्तत्वाद् वितटीखातहस्तीव पूर्वं खननाद् भूगन्धवत् । अत एव च प्रकरणचिन्ता--किं घटादि कार्यं सत् ? असत् ? अप्रत्यक्षत्वस्य सत्यसति च दर्शनादनेकान्तात् ।

* * *

168/mj विरोधापत्तिः ।**स्ववचनादि**

* * *

तस्मात् कार्यं सत् कारणवत् । ननु सत्त्वेऽपि कारणवत् प्रत्यक्षत्वं प्रसज्यते, न, अव्यक्तत्वाद् वितटीखातहस्तीव पूर्वं खननाद् भूगन्धवत् । अत एव च प्रकरणचिन्ता--किं घटादि कार्यं सत् ? असत् ? अप्रत्यक्षत्वस्य सत्यसति च दर्शनादनेकान्तात् ।

* * *

विरोधापत्तिः ।

आह **--ननु सत्त्वेऽपि कारणवत् प्रत्यक्षत्वं प्रसज्यते** । त्वत्परिकल्पितं मृत्पिण्डावस्थायां कार्यं घटाख्यं प्रत्यक्षं स्यात्, सत्त्वात्, कारणवत् मृत्पिण्डवदित्यर्थ इति । अत्रोच्यते **--न, अव्यक्तत्वात्** । नैष दोषः, कस्मात् ? अव्यक्तत्वात्, तस्यां हि मृत्पिण्डावस्थायां घटोऽनभिव्यक्तत्वादिन्द्रियैर्नोपलभ्यते **वितटीखातहस्तीव पूर्वं खननात्**, त एव हि मृदवयवा भित्तिगताः खननात् प्रागपि विद्यमानाः खननोत्तरकालं हस्त्याकारव्यपदेशं लभन्ते, न
- /ms च ते प्रागभिव्यक्तेरनुपलब्धत्वान्न सन्ति । अथवा कार्ये सत्यपि ह्यव्यक्ते **भूगन्धवद**प्रत्यक्षत्वं कार्यस्य, यथा भुवो गन्धो विद्यमानोऽपि न घ्राणेन्द्रियगोचरमागच्छत्यव्यक्तत्वात्, सलिलसिक्तस्तूत्तरकालमभिव्यक्त उपलभ्यते, तथा मृदवस्थायामप्रत्यक्षो घटः कुलालप्रयत्नदण्डचक्रसूत्रादिकारणाभिव्यञ्जितः पश्चादुपलभ्यते, अतस्तस्य प्रत्यक्षत्वं भवतीति को दोषः ? **अत एव च प्रकरणचिन्ते**ति प्रकरणसमदोषोऽनेकान्तात्, उक्तमनैकान्तिकत्वमस्य हेतोः । **यत एव प्रकरणचिन्ता स निर्णयार्थमपदिष्टः सन् प्रकरणसमः** न्या॰ सू॰ १ । २ । ७, इह हि घटादेः कार्यस्याप्रत्यक्षत्वादेव चिन्ता समुत्पन्ना **--किं घटादि कार्यं सत् ? असत् ?** इति, **अप्रत्यक्षत्वस्य सति असति च**

१८ ना] ॰नात् एव हिnayacakra-ms-bhā । ॰नात् एवं हि nayacakra-ms-ya ॥ १९ ख] खननेनोत्तरकालंnayacakra-ms-bhā ॥ २५ दोषोऽनेका] ॰कान्तत्वात्nayacakra-ms-ya । अत्र अनैकान्तिकत्वात् इत्यपि पाठः स्यात् ॥ २८ का] ससोदसदिति अप्रत्य॰nayacakra-ms-ya । ससोदसति अप्रत्य॰ nayacakra-ms-bhā ॥

**दर्शनाद्** मूलोदकादौ खरविषाणादौ चेत्यतो व्यभिचरत्यप्रत्यक्षत्वं तथा सत्त्वमपि प्रत्यक्षाप्रत्यक्षयोर्दर्शनात् सतोऽप्रत्यक्षस्य मेरूत्तरकुरुद्वीपग्रहगृहीतग्रहादेः खरविषाणादेश्चासत इत्य**नेकान्तादि**ति । एवं तर्हि दर्शनादर्शनयोः प्रादुर्भावाप्रादुर्भावयोश्च समानः प्रकरणसमदोष इति चेत्, न, जन्मप्रकाशविषयविशेषस्योक्तत्वात् । उपादानादिमत्त्वाविशेषाच्च त्वत्पक्षे न समानो दोष इति । § 518

169/mj

एवं तर्हि मयापि शक्यं वक्तुम्--यदेतत् सन्नाम ततोऽन्यत् कार्यं तद्विकल्पासामर्थ्याद् घटपटवत् । चतुर्षु विकल्पेषु द्वयोः प्रतिपक्षवादापत्तेस्त्यागादुभयसत्त्वमन्यतरसत्त्वं च स्यात् । तद्यदि तावदुभयसत्त्वं ततः सत्त्वाविशेषादेवाविशेषे सर्वत्वैकत्वभेदो न स्यात्, कार्यैकत्ववत् कारणैकत्वमपि स्यात् । अथ न कार्यैकत्ववत् कारणैकत्वं सच्च कार्यमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो निर्वृत्तघटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न असतो वैलक्षण्यादितरेतरासत्त्वात् । अथैवमपि वैलक्षण्ये कारणसत्त्वनिश्चयो न निवर्ततेऽनेकात्मकं च तत्, न तर्ह्येकात्मकत्वात् कार्यं सत् । सत्त्व एकात्मकं न भवेत्, सत्त्वात्, कारणवत् । शेषं पूर्ववद्विपर्ययेण । तथानुवृत्तिव्यावृत्त्या- § 519

**एवं तर्ही**त्यादि यावत् **तथोपसंहारमेव** । इतर आह--त्वदुक्तसाधनप्रपञ्चस्य कार्यासत्त्वेऽपि तुल्यत्वाद् **मयापि शक्यं वक्तुम्**, कार्यसत्त्वस्य कारणे त्वन्मतस्य निवारणे कृते कार्यासत्त्वं भवितुमर्हति । तत्साधनं श्रूयताम् --**यदेतत् सन्नाम** कारणं **ततोऽन्यत् कार्यम्, तद्विकल्पासामर्थ्यात्, घटपटवत्** । अत्रापि १ कारणं सत् कार्यं सत्, २ कारणं सत् कार्यमसत्, [३ कारणमसत् कार्यं सत्,] ४ कारणमसत् कार्यमसदिति **चतुर्षु विकल्पेषु द्वयोः** पूर्ववत् **प्रतिपक्षवादापत्तेस्त्यागादुभयसत्त्वमन्यतरसत्त्वं च स्यात्** । - /ms तत्रोभयसत्त्वे तावत् **तद् यदि तावदुभयसत्त्वं ततः सत्त्वाविशेषादेवाविशेषे सर्वत्वैकत्वभेदो न स्यात्** । मृदेव सर्वं पिण्डशिवकादिघटपिठरकपालादि,

---

१ विषाणादौ ] वेत्यतोnayacakra-ms-pānayacakra-ms-hīnayacakra-ms-ḍenayacakra-ms-rāṃnayacakra-ms-bhā nayacakra-ms-vi ॥

१ त्य ] °त्यप्रत्यक्षणं तथाnayacakra-ms-pānayacakra-ms-ramnayacakra-ms-hīnayacakra-ms-bhā । °त्यप्रत्यक्षाणं तथा

२२ स ] nayacakra-ms-ya । दृश्यतां पृ० १६० पं० ४ ॥

कार्यं त्वेकमेव पिण्ड इति वा शिवक इति वाऽनन्यदेकम् । एवं तु **कार्यैकत्ववत् कारणैकत्वमपि स्यात् । अथ न कार्यैकत्ववत् कारणैकत्वं सच्च कार्यमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो निर्वृत्तघटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यादितरेतरासत्त्वात् । अथैवमपि वैलक्षण्ये कारणसत्त्वनिश्चयो न निवर्तते**ऽनेकात्मकं च तत् सर्वात्मकमित्यर्थः, **न तर्ह्येकात्मकत्वात् कार्यं सत् । सत्त्व एकात्मकं न भवेत् सत्त्वात् कारणवत्,** एतत् प्रथमचक्रकम् । **शेषं पूर्ववद्विपर्ययेणे**त्यादि यदुक्तं तदपि, अथ न कारणसर्वत्ववत् कार्यसर्वत्वं सच्च कारणमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो घटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यादितरेतरासत्त्वात्; एतद् द्वितीयं चक्रकम् । अतः सर्वात्मकत्वसतः कारणादन्यत् कार्यमेकात्मकत्वात् कुम्भादिव एककणः । एकात्मकत्वसतश्च कार्यादन्यत् कारणं सर्वात्मकत्वात् कणादिव कुम्भ इति । § 520

**तथानुवृत्तिव्यावृत्ती,** अनुवृत्तिः मृद् मृद् इति पिण्डशिवकादिषु, व्यावृत्तिः 170/mj घटः पिठरः

* * *

दिविचारेण पूर्ववच्चक्रकद्वयप्रवर्तनं तथोपसंहारमेव ।

न, असिद्धत्वात् । यदि हि घटो मृत्पिण्डादन्यः, तद्वदेव पिण्डादेरप्यसर्वत्वं

* * *

- /ms इति । तद् यदि तावदुभयसत्त्वं सत्त्वाविशेषादेवाविशेषे कार्यव्यावृत्तिवत् कारणव्यावृत्तिरपि स्यात् सत्त्वाद् घटवत् । अथ न कार्यव्यावृत्तिवत् कारणव्यावृत्तिः सच्च कार्यमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो निर्वृत्तघटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यात् । अथैवमपि वैलक्षण्ये कारणसत्त्वविनिश्चयो न निवर्ततेऽनुवृत्त्यात्मकं च तत्, न तर्हि व्यावृत्त्यात्मकत्वात् कार्यं सत्, सत्त्वे न व्यावर्तेत सत्त्वात् कारणवत्; द्वितीयं चक्रकमविपर्ययेण

---

३ अ ] असस‍तद्विल-क्ष°nayacakra-ms-pānayacakra-ms-bhā । असतद्विलक्ष nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī । असकृद्विलक्ष° nayacakra-ms-vi ‖
४ घ ] घटत्वं प्र° ‖
६ का ] कारणकार्यसत्व° प्र° ‖
१० का ] कार्यमसद्विलक्ष° प्र° ‖
११ घ ] घटसत्त्वविलक्षणं प्र° ‖
११ रेत ] °तरात् सत्वात्nayacakra-ms-bhā । °तरातसत्त्वात् nayacakra-ms-ya ‖
२३ व्यावृ ] °वृत्तिस्तत् प्र° ‖
२५ इ ] इतरो र्वृत्त°nayacakra-ms-bhā । इतरो वृत्त° nayacakra-ms-ya ‖
२८ च ] चक्रमवि° प्र° ‖

। शेषं पूर्ववद् विपर्ययेणेत्यादि, अथ न कारणानुवृत्तिवत् कार्यानुवृत्तिः सच्च कारणमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो घटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यात्; प्रथमं विपर्ययचक्रकम् । अथैवमपि वैलक्षण्ये तत्सत्त्वविनिश्चयो न विनिवर्ततेऽनुवृत्त्यात्मकं च तत्, न तर्हि व्यावृत्त्यात्मकत्वात् कार्यं सत्, सत्त्वे न व्यावर्तेत सत्त्वात् कारणवत्; एतद् द्वितीयं चक्रकं विपर्ययेण । अतोऽनुवृत्तिसतः कारणादन्यत् कार्यम्, व्यावृत्तत्वात्, पङ्क्तेरिवैकः । व्यावृत्तिसतश्च कार्यादन्यत् कारणम्, अनुवृत्तत्वात्, एकस्मादिव पङ्क्तिः ।

§ 521

**आदि**ग्रहणादसदनुक्रान्ताविर्भावानाविर्भावचक्रकद्वयमपि योज्यम् । यदि तावदुभयसत्त्वं ततः सत्त्वाविशेषादेवाविशेषे प्राक् कार्यानाविर्भाववत् कारणानाविर्भावोऽपि स्यात् । अथ न प्राक् कार्यानाविर्भाववत् कारणानाविर्भावः - /ms सच्च कार्यमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वाद् घटवत्, इतर उदुम्बरपुष्पवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यात् । अथैवमपि वैलक्षण्ये कारणसत्त्वविनिश्चयो न विनिवर्तते नित्याविर्भावात्मकं च तत्, न तर्हि सततानाविर्भावात्मकत्वात् कार्यं सत्, सत्त्वे प्रागप्याविर्भवेत् सत्त्वात् कारणवत्; प्रथमम् । शेषं पूर्ववदेव विपर्ययेण--अथ न कारणसतताविर्भाववत् कार्यसतताविर्भावः सच्च कारणमिति निश्चितम्, तद्वैलक्षण्यान्न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो घटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यात्; द्वितीयं चक्रकम् । इत्येवमाविर्भावानाविर्भावविचारेण द्वे चक्रके मते इति । § 522

अत्रोच्यते **--न, असिद्धत्वात्** । नैतदुपपद्यतेऽस्मत्पक्षसाधनवत् त्वत्पक्षसाधनम्, किं कारणम् ? असर्वत्वादिहेतूनामसिद्धत्वात्, यस्मादस्माकं सर्वमेव अनुवृत्तिरेव कारणमेव उपादानमेव बुद्धिसिद्धमेव 171/mj

* * *

सर्वस्मादन्यत्वात् । तस्मात् सर्वस्याप्यसर्वत्वात् सर्वत्वैकत्वभङ्गचतुष्टयाभावः । तथानुवृत्त्याद्यभावश्च तत एव नास्ति ।

---

२ का] **कारमिति** प्र॰ ॥
२ का] **कार्यमसद्विल॰** प्र॰ ॥
६ च] **चक्रकं पर्ययेण** प्र॰ ॥
१० पि] **योज्यम** प्र॰ ॥
१३ का] **कारणमसद्विल॰** प्र॰ ॥
१४ त्वाद्] एतच्चिह्नान्तर्गतो **घटवत्, इतर** इति पाठो यद्यपि सर्वास्वपि प्रतिषु दृश्यते तथापि नायं कथञ्चिदपि सङ्गतः प्रतीयते ततः परित्याज्य एव । वस्तुतस्तु **सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो घटवत्** इत्येवात्र वक्तुमुचितम्, दृश्यतां पृ॰ १६९ पं॰ १८, २३, पृ॰ १७० पं॰ ५, ९, २१
॥
१६ स] सतताविर्भावात्मकत्वस्याभावादित्यर्थः ॥
१७ प्र] प्रथमं चक्रकमित्यर्थः ॥
१८ का] **कारणसतताविर्भावः सच्च कारणमिति** प्र॰ ॥
२० व] ॰वत् **इतरो घटसत्वविलक्षणं** nayacakra-ms-bhā । ॰वत् **ननु घटसत्वं पटसत्वविलक्षणं** nayacakra-ms-ya ॥

स्वोक्तविरोधादि च । यदि कार्यं कथमसत् ? अथासत् कथं कार्यम् ? मृदेव हि घटः क्रियते घटतया व्यज्यते दीपेनेव क्रियया । तथा च विशेषणविशेष्याप्रसिद्धिरपि ।

* * *

इतीष्टं तस्मादसर्वत्वादेरसिद्धत्वात् तद्विकल्पाभावात् तदसमर्थविकल्पत्वासिद्धिः । ततः कारणात् कार्यमन्यदित्येतन्न सिध्यतीति । तत्रासर्वत्वासिद्धौ प्रतिपादितायां व्यावृत्त्यादीनामप्यसिद्धिरापादितैव भविष्यतीत्यसर्वत्वाभावमेवापादयितुमाह --**यदि हि घटो**ऽसर्वकार्यत्वाभिमतो **मृत्पिण्डात्** सत्वाभिमता**दन्य** इतीष्यते **तद्वदेव** घटवदेव कार्यवदेव **पिण्डादेरप्यसर्वत्वं** विप्रकृष्टस्यापि, किमुत सन्निकृष्टस्य शिवकादेः ? **सर्वस्मादन्यत्वाद्** घटवत् । **तस्मादेकैकस्यासर्वत्ववत् सर्वस्याप्यसर्वत्वात्** सर्वत्वाभाव इति **सर्वत्वैकत्वभङ्गचतुष्टयाभावः** । तदसमर्थविकल्पत्वमप्यत एव नास्ति । **तथानुवृत्त्याद्यभावश्च तत एव नास्ति,** यथैकस्य घटस्य मृदनुवृत्त्यभावस्तथा सर्वघटेषु तथा शिवकादिष्वप्यभाव इत्यनुवृत्त्यभावादनुवृत्तिव्यावृत्तिकृतविकल्पाभावश्च । एवं कारणोपादानबुद्धिसिद्धसामान्यैः सप्रतिपक्षैर्विकल्पचतुष्टयासिद्धिस्तदसमर्थविकल्पासिद्धिश्चापादनीया । ततः कारणादन्यत् कार्यमित्येतन्न सिध्यति । § 523

- /ms

किञ्चान्यत्, **स्वोक्तविरोधादि च,** स्ववचनाभ्युपगमलोकव्यवहारप्रत्यक्षानुमानविरोधा **आदि**ग्रहणात् । **प्रमाण**ग्रहणात् प्रत्यक्षानुमानग्रहणम् । विशेषस्वरूपविरोधौ च कण्ठोक्तौ वक्ष्यति । तत्र स्ववचनविरोधस्तावद् **यदि कार्यं** घटवत् क्रियते तत् **कथमसत्** खपुष्पवत् कार्यं च ? स्वेन वचनेन स्वमेव वचनं विरुध्यते । **अथासत्** खपुष्पवत् **कथं कार्यं** घटवत् ? इति सैव स्ववचनविरोधभावना विपर्ययेण तयोरेव शब्दयोर्विरोधदर्शनार्था । यस्माद् **मृदेव हि घटः क्रियते** । हिशब्दो यस्मादर्थे, यस्मात् सर्पस्फटाटोपकुण्डलीभवनवद् मृद एव घटीभवनं तथा प्रकाशनं व्यक्तिर्विमलता क्रियते । करणं यथा पृष्ठं कुरु पादौ कुरु इति । तद्दर्शयन्नाह --**घटः क्रियते घटतया व्यज्यते** विद्यमान एव व्यक्तीभवति । को दृष्टान्तः ? स एव घटो

---

९ स] **सत्वाभि°** प्र° । अत्र **सर्वत्वाभि°** इति पाठः समीचीनतर इति भाति ॥
९ व] **°वदेव दण्डादेरप्य°** प्र° । अत्र सर्वप्रतिषु **दण्डादे°** इति पाठोपलम्भेऽपि **पिण्डादे°** इत्येव पाठः समीचीनो भाति ॥
१५ स] **सत्प्रति°**nayacakra-ms-ya ॥
१९ प्र] दृश्यतां पृ° १७२ पं° २ ॥
२० य] दृश्यतां पृ° १६५ पं° १२ ॥
२२ स्व] **स्वयमेव**nayacakra-ms-bhā ॥
२५ कु] **°कुण्डलकीभव°**nayacakra-ms-bhā ॥
२५ काश] **°श-नां**nayacakra-ms-raṃnayacakra-ms-hī । **°शतां** nayacakra-ms-raṃ nayacakra-ms-hī विना ॥
२६ क] करोतिरभूतप्रादुर्भावे दृष्टो निर्मलीकरणे चापि वर्तते । पृष्ठं कुरु । पादौ कुरु । उन्मृदान इति गम्यते । इति पातञ्जलमहाभाष्ये १ । ३ । १ ।, ६ । १ । ९ ।, ६ । १ । ४५ ॥

**दीपेनेव क्रियया** व्यज्यते दण्डादिव्यापारणात्मिकया । **तथा च विशेषणविशेष्याप्रसिद्धिरपि,** कार्यमसत् इति व्याघातात् प्रोक्तस्ववचनविरोधभावनात एव खपुष्पनिर्वृत्तघटयोरिव न कार्यमसता विशेष्यं नाप्यसत् कार्येणेति न परस्परतो विशेषणं विशेष्यं वेति विशेषणविशेष्याप्रसिद्धिरस्मादेव कारणात् । § 524 - /ms

172/mj

अत एव यत्नेन महता प्रतिपादनार्थं न क्रियायां खेदः कर्तव्यो भवति । § 525

अज्ञानप्रतिबद्धैकान्तेऽपि च स्ववचनविरोधः । प्रमाणविरोधस्तु प्रस्तुत एव । ज्ञापकत्वाद्विशेषविरोधः । अप्रयोगप्रसङ्गात् स्वरूपविरोधः । § 526

अतः पूर्वोदितदोषासम्बन्धेनेदं प्रतिपत्तव्यम्--आत्मैव सामान्यं स्वावस्था- § 527

**अत** **एवे**त्यादि यावत् **खेदः कर्तव्यो भवति** । यत् त्वया व्याख्यानमनुष्ठितम् **इतिकर्तव्यतैव कर्तव्यता** इति **यत्नेन महता** पूर्वोत्तरचोद्यपरिहारपक्षाव्यवच्छेदवता **प्रतिपादनार्थं न क्रियायां** क्रियाव्याख्यानार्थः **खेदः कर्तव्यः** । किं कारणम् ? सामान्यादिवस्तुविचारखेदस्याव्यवस्थितपरमार्थत्वात् सर्वस्य **क्रियाया एवोपदेशो न्याय्य** इत्यस्याभ्युपगमस्योपरोधात् । एवं तावज्ज्ञानपूर्वकक्रियोपदेशपक्षे स्ववचनविरोध उक्तः । यस्मिन्नपि अग्निहोत्रं जुहुयात् इत्यादिक्रियोपदेशोपजीवनं नास्ति अज्ञानप्रतिबद्धमेव सर्वम् इत्येकान्तस्तस्मिन्न**ज्ञानप्रतिबद्धैकान्तेऽपि चा**ज्ञानप्रतिबद्धत्वे **स्ववचनस्य विरोधः,** असत् कार्यम् इति ज्ञात्वोक्तं चेन्न तर्हि सर्वमज्ञानप्रतिबद्धमेवास्य ज्ञानप्रसिद्धत्वात् । अथाज्ञात्वा कथं प्रतिपादकं साधकं च ? इति **स्ववचनविरोधः** । त्वयापि एतदेवम् इति निश्चित्याभ्युपगम्योक्तत्वादज्ञानप्रतिबद्धाभ्युपगमस्य च तेन विरोधात् एवम् इत्यवगमादभ्युपगमविरोधः कृतः । लोके ज्ञानव्यवहारात् तद्विरोधः, ज्ञानपूर्वको हि लोकव्यवहारः, ततस्तस्याज्ञानप्रतिबन्धाभ्युपगमाप्रतीतेर्लोकरूढिविरोधः । **प्रमाणविरोधस्तु प्रस्तुत एवे**ति, प्रत्यक्षविरोधस्तावत् तथा लोके दृष्टत्वात्, क्रिययाभिव्यज्यमानस्य घटादेः कार्यस्य दीपेनेव सत उपलब्धेरनुमानविरोधः । **ज्ञापकत्वाद् विशेषविरोध** इति,

२ व्याघा] °घाताप्रोक्त° nayacakra-ms-vi विना । °घातः प्रोक्त° nayacakra-ms-vi ॥
४ विशेष्यं] चेति nayacakra-ms-vi nayacakra-ms-ra nayacakra-ms-hi विना ॥
१३ या] यावखेदः nayacakra-ms-vi
१४ इ] दृश्यतां पृ° १४२ पं° १ ॥
१७ क्रि] दृश्यतां पृ° ४५ पं° २ ॥
१९ अ] दृश्यतां पृ° ११२ पं° १ ॥
२० [illegible] ॥
२८ त्वाद्] दृश्यतां पृ° ४७८-- २ ॥

-/ms अस्य असत् कार्यम् इति ज्ञापकवाक्यस्य ज्ञापकत्वविशेषेष्टेः प्रत्यक्षस्ववचनादिविरोधेषु धर्मविशेषविपर्ययसिद्धेर्विशेषविरोधः । तेष्वेवा**प्रयोगप्रसङ्गाद्** धर्मस्वरूपस्य प्रतिपिपादयिषितस्य निराकरणाद् धर्म**स्वरूपविरोधः** । एवं धर्मिस्वरूपविरोधस्तदुभयस्वरूपविरोधश्च यथायोगमापाद्य इत्यलमतिप्रसङ्गिन्या कथया । तस्मादयुक्तोऽसत्कार्यवादः अग्निहोत्रं जुहुयात्, इतिकर्तव्यतैव कर्तव्यता, कुर्यात् इति चाभ्युपगतः परेणेति । § 528

**अत** इत्यादि । अत एतेभ्यो दोषेभ्यो निःसृत्य किं प्रतिपत्तव्यम् ? उच्यते --अतः **पूर्वोदितदोषासम्बन्धेन,** ये पूर्वमुदिता विधिवादिना सामान्यैकान्तवादे विशेषैकान्तवादे सामान्यविशेषनानात्ववादे दोषा मयापि च ये दोषा उक्ताः सामान्यादिविचारप्रत्याख्यायिनः क्रियोपदेशवादिनोऽज्ञानवादिनश्च तेषामुभयेषामपि दोषाणामसम्बन्धेन **इदं प्रतिपत्तव्यम्--आत्मैव सामान्यमिति** । ननु पूर्वत्र दूषितमेवैतद् मतम् **आत्मैव सामान्यम्** इति **सुखं सुखं च सुखादिसमुदयश्च** इत्यादिपूर्वोत्तरपक्षप्रपञ्चेनेति, अत्रोच्यते--न, आत्मशब्दस्य पुरुषपर्यायत्वादवयवानभ्युपगमात् समुदायवादपरिहारेणास्य पुरुषसामान्यस्यावस्थावतोऽवस्थाभ्योऽनन्यस्य तत्स्वरूपावस्थानात् तद्वैधर्म्यात् । आत्मा
173/mj इति न वस्तुस्वरूपपर्यायवाचिनोऽत्र

* * *

नाम्, घटग्रीवादिरूपादिनवादिभेदाभेदसमवस्थावत् । एवं च कल्प्यमानं सर्वसर्वात्मकत्वसत्कार्यत्वमूलरहस्यानतिक्रमेण कल्पितम् । अविचारोऽपि च तत्त्वेनैक्यमाश्रित्य न्याय्यः, नाज्ञानप्रतिबन्धात् ।

अयं तस्य प्रवृत्तिपर्यायस्य विधेर्विधिः, एवं प्रवृत्तिरित्यर्थः । विधिना भवतीति

* * *

ग्रहणम्, किं तर्हि ? अतति सततं गच्छति तांस्तानवस्थानविशेषान् स्वरूपापरित्यागेनेति आत्मा, स एव सामान्यं चैतन्यलक्षणम् । एवं तर्हि
-/ms विशेषाभावे कस्य सामान्यम् ? इति सामान्याभावप्रसङ्गः, स मा भूदिति विशेषा वक्तव्याः । उच्यते--सामान्यं पुरि शयनात् पुरुषः, विशेषास्तु तस्यैवावस्थावतोऽवस्था जाग्रत्सुप्तसुषुप्ततुरीयाख्याः । तासां **स्वावस्थानां** पुरुषः सामान्यमिति । किं निदर्शनमिति चेत्, **घटग्रीवादिरूपादिनवादिभेदाभेदसमवस्थावत्,** यथा घटस्य स्थूला ग्रीवाबुध्नमध्यावस्थाः सूक्ष्माश्च रूपादयो देशभेदभिन्नाः कालभेदभिन्नाश्च नवपुराणावस्थाः, तेषामेवावस्थाभेदानामभेदेन समवस्था घट इति तद्वदात्मैव स्वावस्थानां सामान्यम् । **एवं च कल्प्यमानं**

४ विरोध] **°धास्तदुभयस्वरूपविरोधाश्च** प्र° ‖
४ मापा] °पाद्याnayacakra-ms-bhā ‖
५ इ] दृश्यतां पृ° १४२ पं° १ ‖
६ कु] दृश्यतां पृ° १२६ पं° २ ‖
१२ आ] दृश्यतां पृ° १२ पं° ३ ‖
१२ सु] दृश्यतां पृ° १३ पं° १ ‖
१५ त] पूर्वविवक्षितात्मतो वैधर्म्यादित्यर्थः ‖

सर्वसर्वात्मकत्वसत्कार्यत्वमूलरहस्यानतिक्रमेण कल्पितमिति गुणश्चात्र विद्यते, एवं हि सर्वं सर्वात्मकं सच्च कार्यम् इति मूलरहस्यमेतन्नातिक्रान्तं भवति पुरुषात्मकत्वात् सर्वस्य तद्विकारमात्रत्वाच्च भेदानां तत्रैवान्तर्लयाविर्भावात् सर्वकार्याणां कृकलासवर्णविशेषाणामिव कृकलासे । § 529

**अविचारोऽपि चेत्यादि** । यदपि च **अनर्थको विवेकयत्नः शास्त्रेषु** इत्यविचार इष्यते सोऽप्यनेनैव युक्तिमार्गेण **तत्त्वेनैक्यमाश्रित्य न्याय्यः**, तस्य भावस्तत्त्वम्, आत्मनो भावेनैक्यमाश्रित्य न्यायादनपेतो न्याय्यः, **नाज्ञानप्रतिबन्धात्** । यद्यज्ञानप्रतिबन्धादविचारस्ततः स्वयमविज्ञाते प्रमाणप्रमेयभावाभावादयुक्तमित्युक्तम् । इह तु ज्ञानात्मकपुरुषस्वरूपैक्यापत्तिसन्निश्चये निश्चितमेवैतत्, किं विचारेण गतार्थत्वात्, न तु ज्ञातुमशक्यत्वादिति । § 530 - /ms

**अयं तस्य प्रवृत्तिपर्यायस्य विधेर्विधिः** । *__विधिः स्थितिराचारः प्रवृत्तिर्मर्यादा__ इत्यस्य विधिनयस्यायमेव विधिराचारः स्थितिरित्यादि । **एवं प्रवृत्तिरित्यर्थः**, या चैतन्यात्मस्वरूपा प्रवृत्तिः सा *विधेर्विधिरित्येतमर्थं व्याचष्टे । यः पुनर्विधिः प्राक्तनः स न युज्यते, यस्माद् **विधिनेत्यादि** । **भवतीति भावो** भूप्रकृतिः कर्त्रर्थः, **प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः** पा॰ म॰ भा॰ ३ । १ । ६७ इति वचनात् । भावे घञो विहितत्वाद् भूयत इति भावः, न भवति इति कर्त्रर्थ इति चेत्, तत्रापि येन भूयते समानेन समानो भवतीति भावो णप्रकरणे भुवश्चोपसङ्ख्यानमिति वा कर्ता सामान्यमित्येवं व्यवस्थितेऽर्थे सर्वतन्त्र 174/mj

* * *

भावो भेदाभेदनानातासु न भावो भवितुरभाव इति विविच्यते, न च विविच्यते च । तथा न भवत्येव विधित्वं विधेः, लोकवदिति विधानाद्विधिरुत्सर्ग एवं न भवति । यथा तत् तथान्यथा च भवति तथा वक्तव्यमिति विधिर्विहितो भवत्युत्सृष्टः ।

* * *

---

५ अ] दृश्यतां पृ॰ ११ पं॰ ४ ॥
६ विचार] °रयिष्यतेnayacakra-ms-ya । °रद्वयिरस्त्वये ?ष्यते nayacakra-ms-bhā ॥
९ त्तिस] °सन्निश्रयेnayacakra-ms-bhā ॥
११ स्य] °स्य विधिर्विधिविधिः स्थितिःnayacakra-ms-ya । °स्य विधिः स्थितिः nayacakra-ms-bhā ॥
११ *] दृश्यतां पृ॰ १० पं॰ १ ॥
१३ *] विधेर्विधिरि°nayacakra-ms-vi विना ॥
१४ भ] भवती भावःnayacakra-ms-bhānayacakra-ms-pā । भवति भावः nayacakra-ms-bhā nayacakra-ms-pā विना ॥
१५ भू] भूप्रकृतिकर्त्रर्थःnayacakra-ms-bhā ॥
१८ ण] विभाषा ग्रहः पा॰ ३ । १ । १४३ व्यवस्थितविभाषा चेयम् । एतज्जलचर इत्यादिना स्पष्टीकरोति । भवतेश्चेति वक्तव्यम् । भवतेश्च विभाषा णो भवतीत्येतदर्थरूपं व्याख्येयम् । व्याख्यानं तु विभाषेति योगविभागात् कर्तव्यम् । इति पाणिनीयव्याकरणस्य जिनेन्द्रबुद्धिविरचितायां काशिकावृत्तौ ॥

सिद्धान्तेन व्याकरणेन तत्र विशेषमात्रवादे देशकालभेदे परस्परविविक्तद्रव्य-देशकालभावभिन्ने भवनेऽभेदे च द्रव्यादितया भवनमात्रे सामान्यवादे नाना-भावे च सामान्यविशेषयो**र्भेदाभेदनानातासु** यथासङ्ख्यं **बौद्धसाङ्ख्यवै**शेषिक-मतासु दोषा**न्न भावः,** भवितुरभावात् तत्प्रकृत्यर्थकर्तुरभावात्, **इति**शब्दस्य हेत्वर्थत्वात् पञ्चमीमप्रयुज्य **भवितुरभाव** इत्युक्तं प्रागुक्तन्यायेन भवितुरभावात् । भवतीति भावो घटादिरिति व्याकरणदृष्टेन निरुक्त्यर्थेन समर्थितो विधिना *__विविच्यते च__ सादृश्यासादृश्याभ्याम् । सादृश्यात् समानो भवतीति पृथक् प्रतिज्ञायते, तेषु विकल्पेषु दोषाणामभिहितत्वाद् निर्दोषभवनोक्तेश्च विविच्यते विधिना । किमेवं विविच्यत एव ? नेत्युच्यते, **[न च विविच्यते] चे**ति, - /ms प्रतिज्ञा सा पुनरविविक्तैव कृता **को ह वैतद्वेद, किं वानेन ज्ञातेन** इति वचनात् । स एष विधेर्विधिर्न भवति विविच्यमानार्थविधानात् स्ववचनविरोध-दोषादंशेन विवेकादविवेकाच्च । यत्राप्यंशेन विवेकस्तत्र विविच्यमानांशेऽपि च यथा भवता विधिनयवादिनाभिहितं तद्वद् विविच्यते न च विविच्यते चापि परमतदूषणात् स्वमतसाधनाच्च घटादिर्भावो विविच्यते न च विविच्यते **तथा न भवत्येव विधित्वं विधेः,** न विधिर्विहित एवमित्यभिप्रायः । कथं पुन-र्विधीयते इति चेत्, लोकवत्, *लोक इव लोकवत्, **लोकवदिति विधानाद्** यदि लोकवदेव विधीयते **विधिरुत्सर्ग एवं न भवति** । कथं न भवति ? *किं **न एतेन यदि कारणम् ?** यदि न च विविच्यते प्रतिज्ञापि तदंशद्वारिका न कार्या इत्याद्यविचार्य विधानान्न भवति । किं तर्हि ? यदुक्तसूक्ततया सर्वात्मकत्वेन विधिरुत्सर्गः सिध्यति, तद्यथा **यथा तत् तथान्यथे**त्यादि । अथवा यथा लोके दृष्टं तथा विधेर्विधिर्भवति । कथं पुनर्लोके विधेर्विधिः ? उच्यते --**इति विधि**रित्यादि । **इति** इत्थमनन्तरं वक्ष्यमाणो *विधिर्विधिर्भव-ति लोके, **यथा तत् तथान्यथे**त्यादि, मृत्पिण्डशिवकादिप्रकारेण तथान्यथा

---

७ *] विविद्यते च सादृश्याभ्यां सादृश्या समानो भवतीति प्र॰ । अत्र विविच्यते च सादृश्यासादृश्याभ्याम् । समानो भवतीति इत्यपि पाठः स्यात् ॥
१० ज्ञा] दृश्यतां पृ॰ ३५ पं॰ ४ ॥
१२ दोषा] ॰दंशेनविवेकात् २ च यत्राप्यंशेन विवेकस्त-त्रnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līmnayacakra-ms-vi । ॰दंशेन विवेकात् च यत्राप्यंशेन विवेकस्तत्र nayacakra-ms-raṃ nayacakra-ms-hī । ॰दंशेनाविकेस्तत्र nayacakra-ms-bhā । अत्र ॰दंशेन विवेकाच्च । यत्राप्यंशेन विवेकस्तत्र इत्यपि पाठः स्यात् ॥
१३ विविच्य] ॰च्यते वपि प्र॰ ॥
१६ *] लोके nayacakra-ms-bhā ॥
१७ ए] एवnayacakra-ms-ya ॥
१८ *] दृश्यतां पृ॰ ३४ पं॰ ४ ॥
१८ त] तदर्शद्वारिका प्र॰ ॥
२० त्वेन] विधेरु॰nayacakra-ms-ya ॥
२१ था] विधिर्विधि॰ प्र॰ ॥
२१ र्लोके] विधिर्विधिःnayacakra-ms-bhā । विधिः nayacakra-ms-ya ॥
२२ *] विधिधे ?र्विधि॰nayacakra-ms-bhānayacakra-ms-vi । विधिविधि॰ nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ । विधि॰ nayacakra-ms-raṃ nayacakra-ms-hī ॥

च भवति यथा तथा वक्तव्यम्, तच्चातच्च ययोपपत्त्या भवति तथा वक्तव्यम्, एष विधेर्विधिः । एवं सोऽविवक्षितव्यावृत्तिरनङ्गीकृतभेदस्तिरकृतविशेषो निर्व्यावृत्तिरेव विधिर्विहितो भवत्युत्सृष्ट इति पर्यायशब्देनोत्सर्गो विधिरिति सर्वत्रास्य विधिलक्षणस्य दर्शयति । § 531

175/mj

तद्यथा--पुरुषो हि ज्ञाता ज्ञानमयत्वात् । तन्मयं चेदं सर्वं तदेकत्वात् सर्वैकत्वाच्च भवतीति भावः । को भवति ? यः कर्ता । कः कर्ता ? यः स्वतन्त्रः । कः स्वतन्त्रः ? यो ज्ञः । § 532

ननु क्षीररसादि दध्यादेः कर्तृ, न च तज्ज्ञम्, न, तत्प्रवृत्तिशेषत्वाद् गोप्रवृत्तिशेषक्षीरदधित्ववत्, ज्ञशेषत्वाद्वा चक्रभ्रान्तिवत् । § 533

ननु चक्रभ्रान्तावपि को भविता ? इति प्रत्यपेक्षायां घटभवनव्यवहारवद् मृद् § 534

कोऽसौ ? निदर्श्यतामिति चेत्, उच्यते --**तद्यथा पुरुषो** हीत्यादि । उक्तनिरुक्तः पुरुषशब्दः, **हि**शब्दो यस्मादर्थे, यस्मादसौ **ज्ञाता** ज्ञानशीलो ज्ञानधर्मा साधुज्ञायी वा पुरुष एव । ज्ञातृत्वं च **ज्ञानमयत्वात्,** ज्ञानावयवो ज्ञानविकारो वा ज्ञानमयः स उपयोगलक्षणत्वात् । ततः किमिति चेत्, **तन्मयं चेदं सर्वं** देवमनुजतिर्यङ्नरकपृथिव्यादिघटादिभेदभिन्नं जगत्, **तदेकत्वात्** तस्य पुरुषस्यैकत्वात् वस्तुत्वात् तदेकत्ववत् सर्वैकत्वम्, **सर्वैकत्वाच्चै**कं स च जगच्च सर्वं **भवतीति भावः,** न तु घटपटादिभेदेन भवति ज्ञानमयपुरुषात्मकत्वात् । येन भूयते स एव भवतीति भावः । स आत्मैव सामान्यं समानो भवतीति । तन्निर्णयार्थं प्रश्नोत्तरक्रमेण ग्रन्थः **--को भवतीत्या**दिर्गतार्थो यावत् **कः स्वतन्त्रः ? यो ज्ञ** इति, अज्ञस्यास्वातन्त्र्यादेव कर्तृत्वाभावात्, काष्ठादिविप्रकीर्णपचननिर्वर्तनवत्, यथा काष्ठैः स्थाल्यामोदनं देवदत्तः पचतीत्यत्र देवदत्त एव पचनस्य निर्वर्तको ज्ञातृत्वात् न काष्ठादीनि तथा पुरुष एव भवतीति भावः । § 535 - /ms

इतर आह **--ननु क्षीररसादि दध्यादेः कर्तृ** । क्षीराद्दधि भवत्यज्ञात् कर्तृणः, रसाद् गुडः, **न च तत्** क्षीरं रसो वा **ज्ञमिति** ज्ञकर्तृत्वम-

---

२ एष ] विधिर्विधिःnayacakra-ms-bhā । विधिविधिः nayacakra-ms-ya ॥
३ त्यु ] °त्युत्सृ इति प्र° ॥
४ त्रा ] त्रास्या प्र° ॥
१४ य ] यस्मादर्थे प्रतिषु नास्ति ॥
२२ त्या ] °त्यादिग° प्र° ॥
२३ क ] कर्तृभावात् प्र° ॥
२४ का ] काष्ठादीतिnayacakra-ms-vi विना ॥
२६ त्य ] °ज्ञादकर्तृणःnayacakra-ms-bhā । °ज्ञाचकर्तृणः nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ । °ज्ञानकर्तृणः nayacakra-ms-raṃ nayacakra-ms-hī ॥

नैकान्तिकमिति । एतच्च **न, तत्प्रवृत्तिशेषत्वात्,** तस्यैव ज्ञस्य प्रवर्तमानस्य प्रवृत्तेरपरिसमाप्तायाः शेषत्वात् । कालक्रमभेदकृतस्तु विशेषो न निवार्यते । यथोक्तम्—

शर्करासमवीर्यस्तु दन्तनिष्पीडितो रसः ।
दन्तनिष्पीडितः श्रेष्ठो यान्त्रिकस्तु विदाहकृत् ॥ इति ।§ 538

**गोप्रवृत्तिशेषक्षीरदधित्ववत्,** यथा गोर्धेनोः प्रवृत्तेरपरिसमाप्तायाः क्षीरदधिनवनीतघृतनिष्पन्दनादि शेषस्तथा पुरुषप्रवृत्तिशेष एव जगदिति । **ज्ञशेषत्वाद्वा चक्रभ्रान्तिवत्** । का वा सा प्रवृत्तिः प्रवर्तमानपुरुषव्यतिरिक्ता, सर्वस्य ज्ञशेषत्वात् ? दृष्टान्तश्चक्रभ्रान्तिः, यथा कुलालप्रयत्नभ्रमितस्य चक्रस्य भ्रान्तौ कुलालप्रवृत्तिशेषत्वं ज्ञशेषत्वमेवं दध्यादेरपि ज्ञशेषत्वम्, गोर्ज्ञस्य शेषत्वं दध्नः, गोभुक्ततृणाद्याहारस्य रसरुधिरादिपरिणतस्य ज्ञमन्तरेण क्षीरदध्यादिभावो नास्ति । § 539

**नन्वित्यनुज्ञापने, चक्रभ्रान्तावपि को भविता ? इति प्रत्यपेक्षायां** जिज्ञासायां मूलभविता 176/mj

* * *

येन भूयते तदेव । इतरथासौ नैव स्याद् भवितुरभावात् । ज्ञस्यैव सुप्तावस्थत्वाद् न च चक्रदण्डादि करणनिरीहत्वात्, दधीव पयसः, ज्ञशेषसुप्तावस्थत्वात् ।

यथैव हि रूपादयोऽमूर्तत्वेन सूक्ष्मां वृत्तिमत्यजन्त एव स्वप्रवृत्तिप्रभावावबद्धमूर्तत्वप्रक्रमान् परमाणूनध्यास्य नानाप्रभेदपृथिव्यादिभेदस्थूलरूपा जायन्ते

* * *

वश्यापेक्ष्यो **घटभवनव्यवहारवद् मृत्,** यथा पिण्डशिवकाद्यवस्थाक्रमेण घटभवनव्यवहारे मृदेवाद्या भवित्री तथेहापि चक्रभ्रान्तौ भवनव्यवहारत्वाद् मूलभवितृ द्रव्यमपेक्ष्यं परतः परतोऽपि **येन भूयते** यद् भवति **तदेव,** मौलं कारणं तदेवेत्यर्थः । तस्माद् घटभवने मृद्वद् भ्रान्तिभवने कुलालोऽपेक्ष्यः, कुलालशेषभ्रान्तिवच्च ज्ञशेषं सर्वम्, **इतरथासौ नैव स्याद् भवितुरभावाद्** वन्ध्यापुत्रवदमूलत्वादित्यर्थः । § 540

स्यान्मतम्--अचेतनानामपि अभ्रादीनां चेष्टादर्शनाज्ज्ञप्रयोगमन्तरेण प्रवृत्तिर्दण्डादीनामिति । एतच्चायुक्तम्, **ज्ञस्यैव सुप्तावस्थत्वात् न च चक्रदण्डादि करणनिरीहत्वात्,** न च चक्रदण्डादि स्वत एव भवति करणनिरीहत्वात्, करणत्वान्निरीहाणि, निरीहत्वान्न स्वत एव ज्ञातुर्यत्नमन्तरेण तद्यत्नशेषं

---

४ श्र] वक्त्रप्रह्लादनो हृष्यो दन्तनिष्पीडितो रसः । गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्तितः ॥ १ । ४५ । १५७ ॥ इति मुद्रितायां सुश्रुतसंहितायां पाठः । जेज्जटविरचितायां तद्वृत्तौ तु शर्करासमवीर्यस्तु दन्तनिष्पीडितो रसः । इति पाठः ॥
२९ सुप्ताव] °वस्थात् nayacakra-ms-bhā ॥

वान्तरेण तस्यैव सुप्तावस्था दण्डचक्रादि निष्पन्दभूता निश्चेतनीभूता भवितुमर्हति । तस्मात् सापि सुप्तावस्था ज्ञस्य चेतनस्यैव वृत्तिर्भवितुमर्हति, **दधीव** - /ms **पयसः**, यथा दधि पयसोऽवस्था तथा दण्डचक्रादि ज्ञस्यैव कुलालस्य । एतेन दध्याद्यपि ज्ञभवनमाख्यातमेव, **ज्ञशेषसुप्तावस्थत्वात्** तस्यापि दध्यादेः कुलालयत्नशेषचक्रदण्डादिवज्ज्ञयत्नं ज्ञयत्नशेषं वान्तरेण प्रवृत्त्यभावाज्ज्ञप्रवृत्तिमात्रत्वमेवेत्यर्थः § 541

एतस्यार्थस्य भावनार्थं दृष्टान्तमाह **--यथैव** **ही**त्यादि । यथैव रूपरसगन्धस्पर्शशब्दा **अमूर्तत्वेन सूक्ष्मां वृत्तिमत्यजन्त** एवेत्यादि, सूक्ष्मपूर्वकत्वात् स्थूलस्य सूक्ष्मतां निरूप्य स्थूलत्वं निरूपयति, न हि ते रूपादयः प्रतिनियतचक्षुरादिविज्ञानप्रभावितस्वरूपा मूर्ताः स्थूला इति वा केनचिदिष्टास्तस्मादमूर्ताः, तद्भावोऽमूर्तत्वम्, तेन अमूर्तत्वेन वृत्तिः, सैव च सूक्ष्मा, तामत्यजन्तोऽजहत एव **स्वप्रवृत्तिप्रभावावबद्धमूर्तत्वप्रक्रमान्** स्वया प्रवृत्त्या प्रभावेन चावबद्धो मूर्तत्वेन प्रक्रमो येषां ते स्वप्रवृत्तिप्रभावावबद्धमूर्तत्वप्रक्रमाः परमाणवः, रूपादीनामात्मीयया प्रवृत्त्यावबद्धो मूर्तत्वेन प्रक्रमः परमाणूनां सभेदानाम्, तान् **परमाणूनध्यास्ये**ति सृष्टेः क्रमं दर्शयति दृष्टान्तरूपेण । तत उत्तरकालं **नानाप्रभेदपृथिव्यादिभेदस्थूलरूपा जायन्ते** रूपादय एव । पृथिव्या अश्म-लोष्ट-सिकता-वज्रादयः प्रभेदाः, हिमकरकादयोऽपाम्, ज्वालाङ्गारमुर्मुरादयस्तेजसः, उत्कलिका-मण्डल-गुञ्जा-झञ्झादयो वायोः, वृक्षगुल्मवल्लीलतावितानवीरुधो वनस्पतेः, कृमि-पिपीलिका-भ्रमरादि-मनुष्य-देव-नारका जङ्गमानाम् । एतत् प्रवृत्तेर्निदर्शनम् । प्रभावो - /ms ह्यचिन्त्यः, प्रभावस्याचिन्त्यत्वादमूर्तेर्मूर्तसम्भवः । रस-वीर्य-विपाक-प्रभावाश्च वस्तुनः प्रवर्तमानस्य विपरिणामाः, तत्र निदर्शनम्—

*चित्रकः कटुकः पाके वीर्योष्णः कटुको रसे ।
तद्वद् दन्ती, प्रभावात्तु विरेचयति सा नरम् ॥ चरकसं॰ १ । २६ । ६८ इति ।§ 544

यथैते पृथिव्यादयः सूक्ष्मा मूर्तरूपादिपूर्वकाः स्थूलत्वात् तन्तुपूर्वपटवदेवं **ततोऽपि** परतोऽपि **परं**

* * *

एवं ततोऽपि परं कारणं रूपादिभावमापद्यत इति रूपादिप्रविभक्तमप्रविभक्तस्वतत्त्वं यत् तद् भवति तदेव तत्त्वम् ।

---

२ सुप्ताव ] ॰वस्थान्यस्य चेतन॰nayacakra-ms-ya । ॰वस्थान्यचेतन nayacakra-ms-bhā ॥
४ सुप्ताव ] ॰वस्थात्वात्nayacakra-ms-bhā ॥
५ भावाज्ज ] ॰ज्ञवृत्ति॰nayacakra-ms-ya ॥
२१ मू ] ॰मूर्तेर्मूर्त॰ प्र॰ ॥
२३ *] कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः । इति चरकसंहितायां पाठः ॥

तत् किम् ? ननु ज्ञानस्वतत्त्व आत्मेति रूपादिभिरेव निरूपितं तत्, तद्धि रूपणं रूपं ज्ञानमेव विभक्ताविभक्तं ग्रहणमेव, न तु रूप्यते तत् तेन तस्मिन् वेत्यादि रूपम्, रसादेर्गुणगणाद् द्रव्याद्वा विभक्तस्यानवस्थानाद्रूपस्य पुरुषभिन्नपुत्रत्वादिवत् ।

द्विधापि रूपस्याविभक्ततत्त्वात्मकतायामपि रूपादन्येषां रसादीनां प्रत्यक्षतो

* * *

रूपादिभ्यः परतोऽप्यपरमन्यत् परं वरिष्ठं प्रधानं **कारणं रूपादिभावमापद्यते** इति प्रतिपत्तव्यम् । तच्च परं यत् कारणमात्मानममूर्तसूक्ष्मरूपादित्वेन स्थूलमूर्तपरमाणुद्विप्रदेशादिस्कन्धपृथिव्यादित्वेन च प्रविभजमानं प्रवर्तते । किञ्च, **इति रूपादिप्रविभक्तमप्रविभक्तस्वतत्त्वं** परमाणुद्विप्रदेशादिपृथिव्यादिष्वप्रविभक्तस्वरूपादितत्त्ववत् । किं पुनस्तस्य स्वतत्त्वम् ? तस्य भावस्तत्त्वम्, स्वार्थिको भावप्रत्ययः, तद्दर्शयति --**यत् तद् भवति तदेव तत्त्वम्** । स्वं च स्वप्रभेदापेक्षया, तत्त्वता अनुसृतत्वात्, परतत्त्वाभावेन विशेष्यते स्वतत्त्वमिति परमतापेक्षया चेति । § 545

इतर आह --**तत् किमिति निरूप्यम्** । आचार्य आह --**ननु ज्ञानस्वतत्त्व आत्मेति रूपादिभिरेव निरूपितं तत्** परं कारणम् । आत्मा ज्ञानस्वतत्त्वः, स पुना रूपादिभिरेव निरूपितः, **रूप रूपक्रियायाम्** पा॰ धा॰ १९३४, रूपितं निर्णीतं तु ज्ञातम्, निर्णयो रूपणमित्येकोऽर्थः । **तद्धि रूपणं रूपमिति** यस्मात् कारणाद् रूपणं रूपमित्येकोऽर्थः । **आदि**ग्रहणाद् रसनमास्वादनं रसः, एवं शेषाणामपि रूपणकृतात्मलाभनिरुक्तत्वाद् रूपणता, **ज्ञानमेव** रूपणपर्यायत्वाज्ज्ञानस्य, **विभक्ताविभक्तं ग्रहणमेव,** विभक्तग्रहणं रूपं रसो गन्धः शब्दः स्पर्श इति ज्ञानम्, रूपमित्यविभक्तं सर्वेषु, तद् द्विविधमपि ग्रहणमेव रूपं भावसाधनत्वाद् रूपशब्दस्य । **न तु रूप्यते तत् तेन तस्मिन् वेत्यादि रूपम्,** न तु कर्मकर्तृकरणाधिकरणसाधनत्वम्, **आदि**ग्रहणात् [नअथवा न तु कर्मकर्तृकरणाधिकरणसाधनत्वमादिग्रहणात्तस्मै तस्माद्रूपमिति इति यथाश्रुतपाठोऽपि न तु इत्यस्य अनुवृत्तिं विवक्ष्य सङ्गमनीयः ॥] तस्मै तस्माद् रूपमिति सम्प्रदानापादानकारकभेदेभ्यो रूपमिति भवितुमर्हति । किं कारणम् ? रस्यते स्पृश्यत इत्यादेरपि तत्रैव दर्शनाद् रूपणोपलक्षितस्य ज्ञानात्मनो वस्तुनो **रसादेर्गुणगणाद् द्रव्याद्वा** गुणगणव्यतिरिक्ता**द्विभक्तस्यानवस्थानाद् रूपस्य पुरुषभिन्नपुत्रत्वादिवत्,** अनेकसम्बन्धिनः पुरुषात् पितृपुत्रभ्रातृभागिनेयमातुलत्वादिधर्माः पृथग् नावतिष्ठन्ते तथा रूपणात्मकं रूपं र-

- /ms

९ य ] यच्चnayacakra-ms-ya ॥
१२ स्व ] स्वतंत्रं प्र॰ ॥
१५ या ] अत्र वेति इत्यपि स्यात् ॥
१८ स ] स्वपुनरूपा॰ प्र॰ ॥
१९ रूपितं ] निर्णीतंnayacakra-ms-ya प्रतिषु नास्ति ॥
२९ रू ] रूपेणो॰ प्र॰ ॥
३० सादेर्गुण ] ॰र्गुणगण्य द्र॰ प्र॰ ॥
३१ म्ब ] ॰म्बन्धेन प्र॰ ॥

सादिगुणव्यतिरेकेण तद्व्यतिरिक्तपरमाण्वादिद्रव्यव्यतिरेकेण वा नावतिष्ठते परमार्थतः । तस्मादविभक्तरूपणतत्त्वात्मका रसादिपरमाण्वादिपृथिव्यादिभेदाः । § 546

एवं तर्हि रूपणाविभक्ततत्त्वात्मकानां रूपवदविभक्तग्रहणं चक्षुषैव स्यात्, रसनादिभिश्च ग्रहणदर्शनात् प्रत्यक्षविरुद्धेयं कल्पनेति चेत्, न, तस्य तत्त्वस्यानेकात्मकत्वाभ्युपगमाद् **द्विधापि** रसाद्यभेदेन द्रव्याभेदेन वा **रूपस्याविभक्ततत्त्वात्मकतायामपीत्यादि यावद्द्रव्याद्रसा ?दीति शक्यं वक्तुम्,** 178/mj

* * *

दर्शनाद् रूपमेव न रसादि इति शक्यं वक्तुम्, न रूपादिभ्यो भिन्नमिदमेकं द्रव्यमेवेति, रूपादिव्यतिरिक्तादर्शनात् । आत्मतत्त्वाविभक्तग्रहे तु प्रत्यक्षाविरोधः । चैतन्यमेकमेव रूपादिविभक्तमप्यविभक्तम्, तथा तदनुभवदर्शनात् । स एव तु व्यतिरेकस्यानुपपत्तेर्ज्ञानस्वतत्त्वात्मैव ग्राह्यो ग्राहकश्चैषितव्यः, अभिमतात्मप्रतिपत्तिवत् । बुद्ध्यादिरूपादीनां सूक्ष्मस्थूलत्वादि क्षीराद्यत्यन्तापरिदृष्टतत्त्वप्रविभागव्यवस्थावत् तत्त्व एव ।

* * *

रूपं रस इति प्रत्यक्षं भेदेन दर्शनात् तस्यानेकात्मकस्य स्वप्रवृत्तिप्रभावावबद्धस्य प्रभेदानामुक्तत्वात् । एवं तावद् रसादिगुणगणसमुदायो नास्त्यन्यः - /ms परस्परतस्ते चान्ये रूपादयः, किन्तु रूपणस्वरूपभेदा एवेत्युक्तम् । स्यान्मतम्--रूपादिभ्यो भिन्नमेकं द्रव्यं पृथग्ग्रहणापदेशादिति, एतच्च **न रूपादिभ्यो भिन्नमिदमेकं द्रव्यमेवेति,** शक्यं वक्तुमिति वर्तते । कस्मात् ? **रूपादिव्यतिरिक्तादर्शनात्** । पूर्वत्र रूपादन्येषां रसादीनां प्रत्यक्षतो दर्शनाद् रूपमेव न रसादय इति शक्यं वक्तुम्, इह तु रूपादिभ्यो भिन्नं द्रव्यमिति प्रत्यक्षेणादर्शनादशक्यमिति । § 547

कस्यां पुनः कल्पनायां प्रत्यक्षविरोधो नास्ति ? उच्यते --**आत्मतत्त्वाविभक्तग्रहे तु प्रत्यक्षाविरोधः** । तत् कथम् ? भाव्यते --**चैतन्यमेकमेव रूपादिविभक्तमप्यविभक्तं** चैतन्याव्यवच्छेदान्वयाद् रूपणसामान्येनाविभक्तमेवैकत्वात्, रूपादिरूपेण ग्रहणविभागाद् विभक्तमपि सत् तदेकमेव । अनेकात्मकत्वाद् विभक्तमविभक्तं चेति प्रत्यक्षदर्शनं रसादिभेदरूपं रूपणाभेदरूपं च न विरुध्यते रूपादिरूपत्वाच्चैतन्यस्य । यस्माच्च यथा परैः

---

२ रू] °रूपेण°nayacakra-ms-ya ॥

६ स्यानेकात्म] °त्मत्वाभ्यु°nayacakra-ms-ya ॥

७ या] यद्यपि सर्वास्वपि प्रतिषु **यावद्द्रव्यादीति** इति पाठ उपलभ्यते तथापि **यावद्रसादीति** इति पाठश्चेत् स्यात् तर्हि समीचीनमिति भाति । दृश्यतां पृ° १७८ पं° ११ । अथवा कश्चित् पाठोऽत्र त्रुटित इति भाति ॥

१६ ना] नास्त्यन्यो प्र° ॥

१९ द्र] द्रव्यमेवेतिnayacakra-ms-ḍenayacakra-ms-līṃ ॥

२४ प्र] प्रत्यक्षविरोधः प्र° ॥

२८ य] यस्माच्चnayacakra-ms-bhā प्रतौ नास्ति ॥

परिकल्पितं भिन्नमिति तत्र च रूपादि चैतन्येभ्यो भिन्नमत्र दर्शनविरोधकारि सम्भवति बाह्यं रूपरसादिगुणसमुदायात्मकं तदाश्रयद्रव्यात्मकं वा । किन्तु तदेव रूपादि चैतन्यात्मतत्त्वाविभक्तग्रहे तु दर्शनाविरोधकारि, चैतन्यस्यैव विभक्ताविभक्तात्मकत्वात् **तथा तदनुभवदर्शनात्** स्वपरिच्छेदे ततोऽन्यस्य प्रमाणस्यासम्भवात् । किं तर्हि ? **स एव तु व्यतिरेकस्यानुपपत्तेर्ज्ञानात्** पृथग्भूतार्थस्यानुपपत्ते**र्ज्ञानस्वतत्त्वात्मैव ग्राह्यो ग्राहकश्चैषितव्योऽभिमतात्मप्र-**
- /ms **तिपत्तिवत्,** यथा त्वदभिमतः प्रतिशरीरं शरीरादिव्यतिरिक्तमात्मैव आत्मानं शरीरादींश्च बाह्यानर्थान् प्रतिपद्यमानोऽपि स्वात्माधिगमे प्रमाणान्तराभावाद् ग्राह्यो ग्राहकश्च [तथा] रूपादिभेदेन ज्ञानसुखादिभेदेन च स्वयमेव विपरिवर्तमान इति । § 548

निदर्शनमप्याह --**बुद्ध्यादी**त्यादि, बुद्धिसुखदुःखेच्छाद्वेषादिकालाकाशदिगात्माद्यमूर्तं सूक्ष्ममुच्यते, रूपादयस्तु स्थूला एव प्रत्यक्षत्वात् । **सूक्ष्मस्थूलत्वादि** च तेषां यथासङ्ख्यं बुद्ध्यादीनां रूपादीनां च तत्त्व एवेत्यभिसम्भन्त्स्यते । **क्षीराद्यत्यन्तापरिदृष्टतत्त्वे**त्यादि, युगपद्भाविनः क्षीरावस्थायामत्यन्तापरिदृष्टा
179/mj धर्मा

* * *

एवं च सार्वज्ञ्यमयत्नेन लब्धं पुरुषात्मकत्वात् सर्वस्य । ज्ञत्वमेवोत्कर्षपर्यन्तवृत्तं तारतम्यात् पर्वतोन्नतिवत् क्षेत्रप्रमाणवत् प्रत्यवगमकात्मकत्वात् खद्योतादितारतम्यवृत्तोद्योतवत् ।

ननु वक्तृत्वादीनामसार्वज्ञ्याव्यभिचारादसर्वज्ञतैव, न, वक्तृत्वस्यापि तार-

* * *

स्तत्त्व एव दृश्यन्ते, तद्यथा--आ द्रवो रसः, आ कठिनं दधि, मूलमद्दुः कठिनः, मस्तु द्रवमेव । **आदि**ग्रहणात् क्षीरमपि धेनावत्यन्तापरिदृष्टम्, धेन्वभ्यवहृततृणगोरक्तादावत्यन्तापरिदृष्टा धेनुगतरसरुधिरादिपरिणतिविशेषक्रमागतप्रश्नवादय**स्तत्त्व एव प्रविभागेन** व्यवस्थिताः, तेषां **व्यवस्थावत्** सर्वस्य चेतनाचेतनस्य जगतश्चेतनात्मनि पुरुषेऽत्यन्तापरिदृष्टस्य व्यवस्था युगपदेव । यथा च तस्यैव क्रमभुवोऽन्ये धर्मा माधुर्याम्लादयस्तथा पर्यायास्तत्त्व एव ज्ञानात्मके तस्यैव चावस्थाः । नैताः स्वमनीषिका उच्यन्ते, किं तर्हि ? जिनवचनार्णवविप्रुष एवैताः, तद्यथा --से किं **भावपरमाणू ? भावपरमाणू**

---

१ द ] दर्शनाविरो° प्र° ॥
४ स्व ] स्व[रू?]पपरिच्छेदेnayacakra-ms-vi विना ॥
५ स्या ] °स्यसम्भ° प्र° ॥
७ त्व ] त्वभि°nayacakra-ms-ya ॥
१३ बु ] बुद्ध्यादीनां रूपादीनां रसतत्व एवे°nayacakra-ms-bhā । बुद्ध्यादीनां रतत्व एवे° nayacakra-ms-ya ॥
२१ स्त ] °स्तत्तत्वnayacakra-ms-bhā ॥
२१ मू ] मूलम-दुःnayacakra-ms-bhānayacakra-ms-vi विना ॥
२४ प्र ] प्रतिभा°nayacakra-ms-ya ॥
२७ चा ] तावस्थाः प्र° ॥

वण्णवंते गंधवंते रसवंते फासवंते भगवतीसू० २० । ५ । ६० इति वर्णादीनां तत्त्व एवानेकात्मके तदात्मनां भावात् । § 549

एवं चेत्यादि । अस्मिन् ज्ञानात्मकैककारणविवर्तमात्रभेदवादे युक्त्यन्तरप्रतिपाद्यं सार्वज्ञ्यमयत्नेन लब्धं पुरुषात्मकत्वात् सर्वस्य, न हि पुरुषः कश्चिदात्मानं न वेत्ति, यथा तृणादिष्वत्यन्तापरिदृष्टं दधित्वं तत्कारणत्वात् तदात्मकं तथा सर्वज्ञताप्यस्य । का सा सर्वज्ञता ? ज्ञत्वमेवोत्कर्षपर्यन्तवृत्तम्, तदेव ज्ञत्वमुत्कर्षपर्यन्तं निरतिशयं क्वचित् प्राप्नोति, तारतम्यात्, तरतमभावस्तारतम्यं ज्ञतरो ज्ञतम इति परस्परत उत्कर्षभेदः, तेन तारतम्येन युक्तत्वात् तत्पर्यन्तेन निरतिशयेन विना न भवितुमर्हति । पर्वतोन्नतिवत्, यथा पर्वतानामुन्नतिस्तारतम्ययुक्तत्वाद् विन्ध्यसह्योज्जयन्तपारियात्रेन्द्रपदमलयमहेन्द्रहिमवत्कैलाशादीनामन्यतमस्य उत्कर्षपर्यन्तं प्राप्तया निरतिशययोन्नत्या विना न भवत्येवं ज्ञत्वमपि । योऽपि कैलाशं मन्दरं वा नाभ्युपगच्छति तस्यापि शुषिरस्यावकाशदानसमर्थस्य पृथिव्याद्याश्रयस्य क्षेत्रस्य सद्भावात् तस्य च समन्ततोऽनन्तत्वाद् महद् महत्तरं महत्तममिति प्रमाणोत्कर्षस्य तत्र निरतिशयस्य दर्शनात् क्षेत्रप्रमाणवदिति दृष्टान्तः । अस्यामेव प्रतिज्ञायां हेत्वन्तरम् --प्रत्यवगमकात्मकत्वात्, प्रत्यवगमयतीति प्रत्यवगमकं तदेव ज्ञत्वम्, ततश्च निरतिशयोत्कर्षपर्यन्तं तत् । दृष्टान्तः खद्योतादितारतम्यवृत्तोद्योतवदिति, यथा खद्योतमण्यग्निप्रदीपतारकादिषु तारतम्येन वृत्तत्वादुद्योतो भास्करे निरतिशयोत्कर्षपर्यन्तो दृष्टस्तथा ज्ञानमपि क्वचिदिति । § 550 -/ms

इतर आह --ननु वक्तृत्वादीनामित्यादि । ननु वक्तृत्वशरीरित्वनामवत्त्वजातिमत्त्वादीनां धर्माणामसार्वज्ञ्याव्यभिचारादसर्वज्ञतैव । किञ्चान्यत्, अत्रैवेन्द्रियप्रत्यक्षानुमानयोर्विषये प्रकर्षनिकर्षदर्शनाच्चा 180/mj

* * *

तस्यादुत्कर्षवृत्तेः सातिशयपरिमाणकं वस्तु सप्रतिपक्षं भावविशेषत्वाद् घटवत् । असर्वातथ्याभिधायिताभ्यां विपर्ययेण भवितव्यम्, असर्वज्ञताया वक्तृत्वासर्वज्ञताया वा अवस्थात्वाद् वस्तुत्वाद् विशेषत्वात्, ज्ञत्वाज्ञत्वावस्थावद् नीलोत्पलरक्तोत्पलत्ववत् ।

धूमवत्त्वाग्निमत्त्वावस्थाविपर्ययेणापि तर्हि भवितव्यं तत्त्वतः । को विचारः ? निश्चितमेवैतत्, तेनापि तत्त्वतो भवितव्यम् । तेन तु ज्ञानात्मकत्वादात्मनस्तद्विजृम्भितविकल्पत्वाच्च शब्दस्य पुरुषस्वरूपस्यैव तस्य वचनं युज्यते उक्तत्वाद्

---

१ र] रसवंते प्रतिषु नास्ति । भावपरमाणूणं भंते ! क+इविहे पण्णत्ते ? गोयमा ! च+उव्विहे पण्णत्ते, तं जहा वण्णमंते गंधमंते रसमंते फासमंते इति भगवतीसूत्रे पाठः ॥

२ त] तदात्मनाnayacakra-ms-bhā ॥

८ स्प] ०स्पर उत्क० प्र० ॥

१० प] पर्वतानुन्नति० प्र० ॥

१८ म]
०मप्यग्नि०nayacakra-ms-ya ॥

१९ ट] दृष्टः यथा प्र० ॥

* * *

सर्वज्ञतैवेति । एतच्च **न, वक्तृत्वस्यापि तारतम्यादुत्कर्षवृत्तेर्विपर्ययेण** भवितव्य- मित्यभिसम्बध्यते । वक्तृत्वादेव सार्वज्ञ्यं तावद् ब्रूमः, वक्ता वक्तृतरो वक्तृतम इत्युत्कर्षपरम्पराया निरतिशयनिष्ठत्वात् सर्वस्य वक्ता तथ्यस्य चेत्यवश्य- मेषितव्यम् । तच्च सर्वस्य तथ्यस्य च वक्तृत्वात् तज्ज्ञ इति वक्तृत्वादेव सार्व- ज्ञ्योत्कर्षसिद्धेरयुक्तः सार्वज्ञ्यप्रतिषेधः । यदपि चेन्द्रियविषये तत्पूर्वकानुमान- विषये चोत्कर्षतारतम्यमुक्तं तदपि नित्यानुमेयमहापरिमाणाकाशदृष्टान्त- साधर्म्याददोषाय । स्यान्मतम्--आकाशासिद्धेरदृष्टान्तमिति, एतच्चायुक्त- मनुमानसद्भावात्, **सातिशयपरिमाणकं वस्तु सप्रतिपक्षं भावविशेषत्वाद् घ- टवदिति** विभक्तपदार्थवादिमतापेक्षयैतदनुमानम् । अविभक्तैककारणविवर्त- नाद्भेदवादे वक्ष्यत्युत्कर्षनिरतिशयत्वम् । तारतम्ययुक्तत्वात् साधितं साध- यिष्यमाणार्थानुसारेण प्रतिजानानो भावितार्थोपनयनार्थमाह **--असर्वात- थ्याभिधायिताभ्यां विपर्ययेण भवितव्यमसर्वज्ञताया वक्तृत्वासर्वज्ञताया वा अवस्थात्वात्,** वक्तृत्वाव्यभिचारिण्या असर्वज्ञताया वाक्यरूपेणानुमानात्मक- तया स्थिताया इतरस्याः पदार्थतयेष्टाया वा अवस्थात्वात्, सा द्विविधाप्य- सर्वज्ञता अवस्थैव, तथा **वस्तुत्वाद् विशेषत्वा**दित्यादि हेतुसौलभ्यं दर्शयति । निदर्शनं **ज्ञत्वाज्ञत्वावस्थावत्,** ज्ञं चेतनं स्थावरजङ्गमम्, अज्ञमरण्यकाष्ठादि, तद्वत्, विधिविधिनयदर्शनेन जाग्रत्सुषुप्तावस्थे ते च, एतत् पदार्थविषयं निद- र्शनम्, वाक्यविषयं **नीलोत्पलरक्तोत्पलत्ववत्** । यथा ज्ञमज्ञेन अज्ञं च ज्ञेन विना न भवति नीलोत्पलमनीलेनानुत्पलेन रक्तोत्पलेन वा विना न भवति तद्विपर्ययेण वाक्यार्थेन तथा सार्वज्ञ्यमसार्वज्ञ्येन विना न भवति असार्वज्ञ्यं वा सार्वज्ञ्येनेति । § 551

इतर आह **--धूमवत्त्वाग्निमत्त्वावस्थाविपर्ययेणापि तर्हि भवितव्यं तत्त्व- तः,** धूमस्यावस्थात्मकार्यस्याग्न्यव्यभिचारिणः क्वचित् कदाचिदप्यनग्नावदर्श- नादवस्थात्वं संशयहेतुरित्यभिप्रायः । आचार्य आह — **को विचारः ? निश्चितमेवैतत्,** अनग्निरपि भवत्येवेत्यर्थः । **तेनापि** विपर्ययेणापि **तत्त्वतो भवितव्यम्,** नन्विदमेव वर्तते ज्ञानात्मकैककारणस्याग्न्यनग्न्यादित्वावस्थात्म- कत्वप्रतिपादनस्य प्रस्तुतत्वात्, एवमग्निं व्यभिचारयिष्यामः, परमते तावत् प्रतिज्ञार्थं भावयामः **--तेन त्वित्यादि, ज्ञानात्मकत्वादात्मनस्तद्विजृम्भितविक-**

८ दृ ] दृष्टान्तरहितमित्यर्थः ॥
९ स ] सतिपक्षंnayacakra-ms-ya ॥
११ य ] ॰यत्वं भावतारतम्य॰nayacakra-ms-ya । दृश्यतां पृ॰ १७९ पं॰ २ ॥
१४ रूपेणानुमाना ] ॰त्मतयाnayacakra-ms-ya ॥
१६ व ] वस्तुतत्वाद्nayacakra-ms-ya ॥
१७ ज ] ॰जङ्गमं[अज्ञमचेतनम् ?]अरण्यकाष्ठादि तद्विधिविधि॰ प्र॰ ॥
२१ त ] तथा सार्वज्ञ्येनासार्वज्ञ्यं विनाnayacakra-ms-ya । तथा सार्वज्ञोनासर्वज्ञं विना nayacakra-ms-bhā । अत्र तथाऽसार्वज्ञ्येन सार्वज्ञ्यं विना न भवति इत्यपि पाठः कथञ्चित् सङ्गच्छेत ॥

**त्पत्वाच्च शब्दस्य** यदुच्यते **यच्छब्द आह तदस्माकं प्रमाणम्** पा॰दृश्यतां पृ॰ १३० टि॰ ४ ॥ म॰ भा॰ २ । १ । १ इति 181/mj

* * *

व्याकरणवत् पौरुषेयं सर्वस्य तदात्मकत्वात् तदवस्थामात्रत्वाद् वस्तुत्वादपि । इतरथा स नैव स्यात् ।

ननु तस्यैवैकस्य वस्तुनोऽग्नित्वमनग्नित्वं च प्रत्यक्षादिविरुद्धम् । ननु प्रत्यक्षत एव व्रीह्यादि एकं वस्तु एकस्मिन्नेव काले भूम्यबादि, सर्वात्मकत्वाद् व्रीहेः ।

तत्काले तथाऽग्रहणादप्रत्यक्षतेति चेत्, सर्वाप्रत्यक्षता तर्हि सदापि । न हि यद् यथा भवति तथेन्द्रियैर्गृह्यते, तुषकणादिरूपादिमात्रग्रहणवृत्तत्वाद् व्रीह्यादिचक्षुरादिप्रत्यक्षस्य यावद्रूपग्रहणवृत्तत्वाद्रूपादिप्रत्यक्षस्य ।

* * *

सोऽपि शब्दो न पुरुषप्रवृत्तिमन्तरेण भवितुं वक्तुं वार्हतीति **पुरुषस्वरूपस्यैव तस्य वचनं युज्यते** नान्यथेत्यस्मिन्नर्थे कारणमाह **--उक्तत्वाद्** वचनत्वाद् **व्याकरणवत् पौरुषेयमिति** सर्वस्य पुरुषात्मकत्वं दर्शयति । हेतुसौलभ्यं च यावद् **वस्तुत्वादपीत्यनेन** दर्शयति । **सर्वस्य तदात्मकत्वात् तदवस्थामात्रत्वादित्यादि** सर्वो हेतुरस्मिन्नर्थे भवति । **इतरथा स नैव** वचनं **स्याच्छ**ब्दोऽपौरुषेयत्वात् खरविषाणवत् । *किं वा वचनं न वचनमित्यनेन ? नैव वा स्यादपुरुषात्मकत्वाद् वन्ध्यापुत्रवत् । § 552

आह **--नन्वित्यादि** । यदुच्यते त्वया एकस्मिन्नेव काले **तस्यैवैकस्य वस्तुनोऽग्नित्वमनग्नित्वं** चेति [तत्] **प्रत्यक्षादिविरुद्धं** सामस्त्येनाभावात् । **आदि**ग्रहणादनुमानागमलोकव्यवहारविरुद्धमिति । आचार्य आह **--ननु प्रत्यक्षत** इत्यादि, सर्वप्रमाणज्येष्ठमूलप्रत्यक्षत **एव व्रीह्यादि,** आदिग्रहणादाम्रजम्बूफलादि **एकं वस्त्वेकस्मिन्नेव** व्रीह्यवस्थान**काले भूम्यबादि, सर्वात्मकत्वाद् व्रीहेः** । कतमोऽसौ व्रीहिः क्षित्युदकबीजादिगतवर्णगन्धरसस्पर्शादिधर्मपरिणतिमन्तरेण ? इति भूम्यादेः परस्परधर्मापत्तेः सर्वात्मकत्वम् । सर्वात्मकत्वात् तन्मयस्य व्रीहेरप्यबादिवत् सर्वात्मकत्वम् । तस्मादबादिरेव व्रीहिस्तेन विनाऽभावात् तस्य तथा भवनात् व्रीहिस्वात्मवत् । तस्मान्नास्ति प्रत्यक्षादिविरोधः । § 553 - /ms

---

१४ मिति ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥ १४ हेतुसौल ] ॰लभ्यं च यावप्रस्तुत्वा॰nayacakra-ms-ḍenayacakra-ms-līṃ ॥ ॰लभ्यं वयोवद्वस्तुत्वा॰ nayacakra-ms-pā । ॰लभ्यं यथावद्वस्तुत्वा॰ nayacakra-ms-vi ॥

१७ * ] किंचाnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ ॥ nayacakra-ms-ramnayacakra-ms-hī २४ क्षित्युद ] ॰दकगतवर्ण॰nayacakra-ms-bhā ॥

**तत्काले तथाऽग्रहणादप्रत्यक्षतेति चेत्** । स्यान्मतम्--व्रीहिकाले भूम्यबाद्यात्मकस्य वस्तुनस्तथा भूम्यबादिप्रकारेणाग्रहणान्न तर्हि तद्वस्तुप्रत्यक्षं स्यात्, न हि तद्वस्तु व्रीहिमात्रमेवेति । उच्यते --**सर्वाप्रत्यक्षता तर्हि सदापीत्यादि**, सर्वस्य वस्तुनः सदापि सर्वेणात्मस्वरूपेण ग्रहणाभावाद् न कस्यचित् प्रत्यक्षत्वं स्यात् । तद्दर्शयति --**न हि यद् यथा भवतीत्यादि** । व्रीहेरपि प्रत्यक्षत्वं नास्ति यथा विद्यते **तथेन्द्रियैर्**ग्रहणाभावात्, इन्द्रियेण तु तुषमात्रदर्शनात् तन्मात्रस्याव्रीहित्वात् कणाद्यदर्शनात्, कणमात्रस्याप्यव्रीहित्वात् कुण्डकाद्यदर्शनादित्यादि, रूपरसगन्धस्पर्शानामन्यतमस्यैवेन्द्रियविषयत्वात्, अत आह --**तुषकणादिरूपादिमात्रग्रहणवृत्तत्वाद् व्रीह्यादिचक्षुरादिप्रत्यक्षस्य** । स्यान्मतम्--रूपस्य रूपमात्रत्वात् तर्हि प्रत्यक्षत्वमिति,
182/mj एतच्चायुक्तम्, **यावद्रूपग्रहणवृत्तत्वाद् रूपादिप्रत्यक्षस्य,** रूपरसगन्धशब्दस्पर्शा

* * *

तस्य च चतस्रोऽवस्था जाग्रत्सुप्तसुषुप्ततुरीयान्वर्थाख्याः । ताश्च बहुधा व्यवतिष्ठन्ते । सुखदुःखमोहशुद्धयः सत्त्वरजस्तमोविमुक्त्याख्या ऊर्ध्वतिर्यगधोलोकाविभागाः संज्ञ्यसंज्ञ्यचेतनभावा वा । नियता एवैता विमुक्तिक्रमात्, सर्वज्ञता वा तुरीयं निरावरणमोहविघ्नं निद्रावियोग आत्यन्तिको निद्रासम्बन्धिजाग्रदाद्यवस्थाविलक्षणमात्मस्वतत्त्वम् । स एव परमात्मा ।

* * *

- /ms रूपादयः, ते हि परस्पराविनिर्भागवृत्तयः, तेषु रूपमात्रग्रहणं कथं यथार्थं प्रत्यक्षं स्यात् ? इति नास्ति प्रत्यक्षम् । तस्मात् स्थितमेतत्--सर्वं सर्वात्मकं ज्ञानस्वतत्त्वैककारणविजृम्भितमात्रं चेति । § 554

तस्यैवेदानीं स्वरूपोपदर्शनार्थमुच्यते --**तस्य च चतस्रोऽवस्थाः** । तस्य अनन्तरप्रतिपादितचैतन्यतत्त्वस्य इमाश्चतस्रोऽवस्था **जाग्रत्सुप्तसुषुप्ततुरीयान्वर्थाख्याः**, जाग्रदवस्था सुप्तावस्था सुषुप्तावस्था तुरीयावस्था, एताश्चान्वर्थाः । **ताश्च बहुधा व्यवतिष्ठन्ते,** चतुर्थीमवस्थां मुक्त्वा तिसृणामेकैकस्याः प्रतिप्रक्रियं संज्ञादिभेदाल्लोकव्यवहारभेदाच्चानेकभेदत्वात् । चतुर्थी पुनरेकस्वरूपैव विशुद्धत्वात्, अथवा सापि स्वरूपसामर्थ्यात् सर्वात्मनैवानेकधा विपरिवर्तते, तद्यथा—

जं जं जे जे भावे परिणमति पयोगवीससादव्वं ।

---

१ भू] भूम्याबाद्या°nayacakra-ms-ya । भूम्यावाद्या° nayacakra-ms-bhā ‖ २ भू] भूम्यांवाम्यम्ब्वा ?दि° प्र° ‖ ६ त] तथेन्द्रिय°nayacakra-ms-ya ‖ २१ त] तस्य चतस्रोnayacakra-ms-ya ‖ २५ रेक] °रेकरूपैवnayacakra-ms-bhā ‖ २६ अ] अथवापि स्वरूप° प्र° ‖ २८ प] प+ओग°nayacakra-ms-ya ‖

तं तह जाणाति जिणो अपज्जवे जाणणा णत्थि ॥ आव॰ नि॰ ७९४ § 557

कास्ताः ? उच्यन्ते **--सुख-दुःख-मोह-शुद्धयः सत्त्व-रजस्-तमो-विमुक्त्याख्याः** । कार्याणि चासां यथासङ्ख्यं तिसृणां तद्यथा--प्रसादलाघवप्रसवाभिष्वङ्गोद्धर्षप्रीतयो दुःखशोषतापभेदापस्तम्भोद्वेगापद्वेषा वरणसदनापध्वंसनबीभत्सदैन्यगौरवाणि । चतुर्थ्यास्तु शुद्धं चैतन्यं सकलस्वपरिवर्तप्रपञ्चसर्वभावावभासनम् । अथवा **ऊर्ध्वतिर्यगधोलोकाविभागा** वा, यथासङ्ख्यमेव, ऊर्ध्वलोको जाग्रदवस्था, तिर्यग्लोकः सुप्तावस्था, सुषुप्तावस्था अधोलोकः, अविभागावस्था तुरीयावस्था । ***संज्ञ्यसंज्ञ्यचेतनभावा वा,** संज्ञिनः समनस्का देवमनुष्यनारकपञ्चेन्द्रियतिर्यञ्चो जाग्रति, सुप्ता असंज्ञिनः पृथिव्यबग्निवायुवनस्पतिद्वित्रिचतुरिन्द्रियामनस्कपञ्चेन्द्रियाः, काष्ठकुड्यादयः सुषुप्ताः, भवनमात्रं भावः सर्वत्राविभागा तुरीयावस्थेति । § 558

अत्राह--अविभागात्मनस्तस्यैवात्मनश्चतुरवस्थत्वात् कालभेदाभावाच्च चतस्रोऽपि प्रथमद्वितीयतृतीयतुरीयाख्याः स्युरिति, एतदयुक्तम्, यस्मा**न्नियता एवैता विमुक्तिक्रमात्, सर्वज्ञता वा तुरीयमिति**, सुषुप्तावस्थायाः स्थिरीभूतचैतन्यायाः सुप्तावस्था विमुक्तमलत्वाद् द्वितीया मिथ्यादृष्ट्यादिका, तृतीया सम्यग्दर्शनज्ञानचारित्रात्मिका मुक्तिप्रत्यासत्तेः, सर्वज्ञता चतुर्थी । तत् पुनस्तुरीयं **निरावरणमोहविघ्नम्,** निर्गता ज्ञानदर्शनावरणमोहविघ्ना अस्मिन्निति निरावरणमोहविघ्नम्, मोहस्यैव महास्वापत्वात्, एकेन्द्रियादिषु 183/mj

* * *

महामोहनिद्राक्षयोपशमशक्त्या निर्वृत्त्युपकरणेन्द्रियप्रत्ययं चैतन्यं प्रत्यक्षादिप्रत्यवेक्षणात्मकत्वाज्जाग्रदवस्था करणात्मा चेतनात्मा द्रव्यपुरुषवत्, अर्थस्य च तथा तथा तत्त्वाज्ज्ञानमेव । तथा सुप्तावस्थापि ज्ञानमेव संशयादि ईषत्सुप्तता वस्तुनस्तथा तथा तत्त्वात् । तथा विपर्ययोऽपि ज्ञानमेव तथा तथा तत्त्वात्,

* * *

स्त्यानर्द्ध्युदयसद्भावाद्विशेषेण स्वापः, अविशेषेण तु सर्वप्राणिनां समोहानां मिथ्यादृष्ट्यचारित्राणां स्वापात्, यथोक्तम् **--सुत्ता अमुणी सया, मुणिणो सया जागरंति** आचाराङ्गसू॰ १ । ३ । १ इति । तच्च तुरीयं कैवल्यं विगतावरणमोहविघ्नं रागद्वेषमोहप्रतीघातेभ्यो विविक्तता दर्शनं विशुद्धं

---

३ का] दृश्यतां पृ॰ १२ पं॰ ११ ॥
६ धोलोका] ॰लोका+अविभागा प्र॰ ॥
८ *] संज्ञि+असंज्ञि+अचेतनभावा प्र॰ ॥
१२ अ] अत्राह विभागा॰nayacakra-ms-ya ॥
१५ सु] सुषुप्तावस्था प्र॰ ॥
१५ त्वा] ॰त्वाद्वितीया २ nayacakra-ms-ya । ॰त्वाद्वितीयाद्वितीया nayacakra-ms-bhā । अत्र विमुक्तमलत्वाद् द्वितीया, द्वितीया मिथ्यादृष्ट्यादिका इत्यपि पाठः स्यात् ॥
१६ स] सर्वताnayacakra-ms-ya ॥
२५ स] सदाnayacakra-ms-bhā ॥
२६ स] सदाnayacakra-ms-bhā ॥

प्रतिपूर्णमेकत्वमिति तत्पर्यायाः । किंरूपं तदिति चेत्, **निद्रावियोग आत्यन्तिकः** । तद्व्याख्यानम् **--निद्रासम्बन्धिजाग्रदाद्यवस्थाविलक्षणमात्मस्वतत्त्वम्**, निद्रासम्बन्धिन्यस्तिस्रोऽवस्था जाग्रत्सुप्तसुषुप्ताख्याः, तत्तद्विलक्षणमात्मनः स्वं तत्त्वं शुद्धं चैतन्यम् । **स** एवानेन व्याख्याविकल्पेन **परमात्मा** विमुक्तः सर्वज्ञ एव व्याख्यातो वेदितव्यः । § 559

करणात्मानं कार्यात्मानं च व्याख्यास्यामः, तत्र ताव**न्महामोहे**त्यादि
- /ms यावत् **करणात्मा** । दर्शन- चारित्रमोहोदये यस्मात् सुप्ता मिथ्यादृष्टयोऽचारित्राश्च प्राणिनस्तस्माद् महामोह एव निद्रा, तदुदये स्वापः, तत्क्षये विबोधः । यथोक्तम्—

यदा तु मनसि क्लान्ते बुद्ध्यात्मानः श्रमान्विताः ।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः ॥ चरकसं° १ ।
२१ । ३५ इति ।§ 562

तस्या **निद्रायाः क्षयोपशमो**ऽनन्तानां पुरुषपरिणत्यापन्नाष्टादशविधतद्घातिकर्मणामुदितानां क्षयादनुदितानामुपशमाल्लब्धि**शक्ति**रुत्पद्यते तस्मिन्नेव पुरुषे ज्ञानदर्शनवीर्यविकल्पा, तया घातिकर्म**क्षयोपशमशक्त्या** निर्वर्तितानि कृष्णसारशबलपक्ष्मपुटाकारेण चक्षुः शेषेन्द्रियाणि च यथास्वमाकारैः, तान्येव चोपकृतानि उपकरणत्वेन मसूरकक्षुरप्रातिमुक्तचन्द्रकयवनालिकानेकसंस्थानैः, तत**स्तत्प्रत्ययं** लब्धिजनितनिर्वृत्त्युपकरणेन्द्रियप्रत्ययं **चैतन्य**मुपयोगो जायते, **लब्ध्युपयोगौ भावेन्द्रियम्** तत्त्वार्थ° २ । १८ इति वचनात् । तच्च **प्रत्यक्षादिप्रत्यवेक्षणात्मकत्वात्**, आदिग्रहणादनुमानागमात्मकत्वा**ज्जाग्रदवस्था**, सैव **करणात्मा** । सुप्तजाग्रदवस्थयोश्चान्तरावस्था सुप्तजागरिका, तत्र स्वप्नदर्शनं भवति । यथोक्तम् **--णो सुत्ते सुमिणं पासति, सुत्तजागरिया+ए वट्टमाणे सुमिणं पासति** भगसुत्ते णं भंते ! सुविणं पासति, जागरे सुविणं पासति, सुत्तजागरे सुविणं पासति ? गोयमा ! नो सुत्ते सुविणं पास+इ, नो जागरे सुविणं पास+इ, सुत्तजागरे सुविणं पास+इ इति भगवतीसूत्रे

१ मेक ]
°कस्त्वमितिnayacakra-ms-ya ॥
४ ए ] एवान्येन प्र° ॥
१० बुद्ध्या ] कर्मात्मानः क्लमान्विताः इति चरकसंहितायां पाठः ॥
१२ न्ना ]
°न्नाष्टाविध°nayacakra-ms-bhā ।
°न्नाष्टविध° nayacakra-ms-ya । य उक्तः क्षायोपशमिको भावोऽष्टादशविकल्पस्तद्भेदनिरूपणार्थमाह-- ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ २ । ५ ॥...चत्वारि ज्ञानानि त्रीण्यज्ञानानि त्रीणि दर्शनानि पञ्च लब्धय इति । सर्वघातिस्पर्धकानामुदयक्षयात् तेषामेव सदुपशमाद् देशघातिस्पर्धकानामुदये क्षायोपशमिको भवति इति तत्त्वार्थाधिगमसूत्रस्य पूज्यपादाचार्यदेवनन्दिविरचितायां सर्वार्थसिद्धिवृत्तौ २ । ५ ॥
१४ न ] वीर्याविकल्प प्र° ॥
१९ त्य ] °त्यपेक्ष° प्र° ॥
२१ पा ] पास+इ सुत्तजागरि+आ+एnayacakra-ms-ya ॥

पाठः ॥वतीसू° १६ । ५ । ५७७ । सा चापि जाग्रद

* * *

चेतनात्मा सुप्तत्वाद् द्रव्यपुरुषवत् । तथानध्यवसायोऽपि विशिष्टस्वापो ज्ञानमेव चेतनात्मकत्वाज्जागरितवत्, चेतनाचेतनात् संशयादिवत् सुप्तवत् ।

* * *

वस्था करणात्माख्या **चेतनात्मा** *चेतना एवात्मा, तस्यैवार्थस्य जागरणात्मत्वात् । **द्रव्यपुरुषवत्,** द्रव्यपुरुषो भूतो भावी वा यथायं राजासीद् भविष्यति वेति राजैव इत्युच्यते करचरणगतचक्रपद्माद्याकृतिरेखादिलक्षणदर्शनात्, तदेव हि हि शरीरमनुभूतराज्यं भविष्यद्राज्यं वा राजा तथा करणात्मानः स्वपन्तो जाग्रतो वा चेतनात्मैव । अनुपयुक्तो वा द्रव्यपुरुषः, तस्मिन् ज्ञेयेऽनुपयुक्तत्वात्, यथानुपयुक्त ओदनेऽनात्मत्वेन परिणमित आत्मस्वरूपज्ञानत्वेनापरिणमितो द्रव्यपुरुषो द्रव्यात्मैव तथा करणात्मा ज्ञानोपयोगरहितोऽपि चेतनात्मैवेति । एवं तर्हि परमात्मनः शुद्धचेतनात्मत्वात् सर्वात्मकत्वाच्च तस्य करणात्मावस्थानुपपत्तिरिति चेत्, नेत्युच्यते, चैतन्यस्य सर्वात्मकतायामपि सनिद्रग्रहणात् सुप्तोत्थितस्य सावशेषनिद्रस्यैव यज्ज्ञानं सा जागरावस्था करणात्मा, व्यपगतनिद्रस्यैव सर्वज्ञावस्था, इत्यनयोः करणात्मपरमात्मावस्थयोर्विशेषः । स्यान्मतम्--अर्थस्वरूपाग्रहणात् करणात्मावस्थायाः परमात्मात्यन्तवैरूप्यमिति, एतच्चायुक्तम्, कस्मात् ? **अर्थस्य च तथा तथा तत्त्वाज्ज्ञानमेव,** स ह्यर्थः पुरुषसृष्टेरनेकरूपतायाः प्रतिपादितत्वादेकात्मविपरिवर्तोऽप्यनेकरूप एव तेन तेन प्रकारेण तस्य भवनात् तथा तथा तत्त्वात्, तदपि करणज्ञानं ज्ञानमेव करणमपि ज्ञानमेव वा ज्ञानविपरिवर्तत्वात् । एवं तावज्जाग्रदवस्था करणात्मा ज्ञानमेव । § 563

यथा चेदं ज्ञानं **तथा** जाग्रदवस्थाशेषः सुप्तावस्थाप्रारम्भमात्रं **सुप्तावस्था, सापि ज्ञानमेव संशयादि ईषत्सुप्तता,** अयमपि करणात्मा संशयादि ज्ञानम्, **आदिग्रहणाद्** विपर्ययानध्यवसायौ । सा च सुप्तावस्थापि सतीषत्सुप्तता ज्ञानमेव, पूर्ववदेव सर्वात्मकतायां **वस्तुनस्तथा तथा तत्त्वात्** । स्थाणुः स्यात् पुरुषः स्यात् ? इत्यूर्ध्वतासामान्यस्य वस्तुत्वात्, यदि स्थाणुर्व- - /ms

५ *] चेतनाः एवात्मा
चेतनैवात्माnayacakra-ms-bhā ॥
६ य] यथा राजाnayacakra-ms-ya
॥
९ णात्मा] °त्मनःnayacakra-ms-ya
॥
९ वा] चेन्नात्मैव nayacakra-ms-ya
॥
१० यु] °युक्त उंदनोउन्दनेऽ
?नात्मत्वेनnayacakra-ms-bhā ।
°युक्त पुदनोनात्मत्वेन
nayacakra-ms-ya ॥
१४ निद्र]
°स्यैवnayacakra-ms-raṃnayacakra-ms-hī
॥
१५ निद्र] °द्रस्यैव प्र° ॥
१७ मा]
°मात्मंतवै°nayacakra-ms-ya ॥
२३ सा] सोपि प्र° । अस्मिंस्तु पाठे
स्वारस्ये सोऽपि करणात्मा इत्यर्थो ज्ञेयः ॥

योनिलयनादिविशेषात् यदि उत्थायोपविष्टत्वकरचरणचलनादिविशेषात् पुरुष इत्युभयथापि तस्य वस्तुनस्तथा तथा तत्त्वात् स्थाणुत्वपुरुषत्वाभ्याम् । **तथा विपर्ययोऽपि ज्ञानमेव तथा तथा तत्त्वा**दर्थस्य स्थाणुपुरुषत्वाभ्यां विपर्ययेण चेति सैव व्याख्यात्रापि, साधनम् --**चेतनात्मा सुप्तत्वाद् द्रव्यपुरुषवत्,** पूर्ववदेव व्याख्या सुप्तत्वं जाग्रत्त्वं वा चेतनस्यैव भवति नाचेतनस्य कस्यचित् । यथा चैतज्ज्ञानं **तथानध्यवसायोऽपि,** न अध्यवसायोऽनध्यवसायोऽनभिव्यक्तबोधः, सोऽपि संशयविपर्ययाभ्यां **विशिष्यमाणः स्वापः** सुप्तत्वा**ज्ज्ञानमेव, चेतनात्मकत्वाज्जागरितवत्,** यथा जागरितावस्था ज्ञानमेव चेतनात्मकत्वात् तथानध्यवसायोऽपि । **चेतनाचेतनात्,** यस्मात् तदेव चेतनमचेतनं च तस्यैव बह्वचेतनत्वादल्पचेतनत्वाच्चेतनं च तदचेतनं चेति विग्रहाच्चेतनाया एवाचेत-
185/mj नाद्वा, **संशयादिवत्,** आदिग्रहणाद्विपर्ययनिर्णयौ गृह्येते तद्वच्चेतनाचेतनाज्ज्ञान

* * *

यथा चैतत् तथानध्यवसायमपि द्रव्येन्द्रियपृथिव्यादि कार्यात्मा ज्ञानमेव, सुषुप्तावस्थात्मकत्वात्, हालाहलानुविद्धमदिरापानापादितनिद्राप्रसुप्तवदनध्यवसायवत् । योऽसौ पुरुषस्तदेव तत्, तेनात्मत्वेन परिणमितत्वात् तद्द्रव्यत्वाद् भूम्यबादिव्रीहित्ववत्, तत्कार्यत्वात् पटतन्तुवत्, तेन विनाऽभूतत्वात् तद्व्यतिरेकेणा-

* * *

मेवानध्यवसायः । अथवा **सुप्तवत्,** यथा हि सुप्त उच्छ्वासनिःश्वासादिक्रियासु अव्यक्तं चेतयमानोऽपि ज्ञातैवमनध्यवसायोऽपि करणात्मैव व्यक्ततरः स्वापः विशिष्टस्वाप इत्यर्थः । एवं करणात्मा व्याख्यातः । § 564

इदानीं कार्यात्मा व्याख्यायते --**यथा चैत**दित्यादि । यथा चैतदनन्तरव्याख्यातमनध्यवसायविपर्ययसंशयावितथप्रत्यक्षादि ज्ञानं चैतन्यं **तथानध्यवसाय**मपगताध्यवसायमनध्यवसायमचेतनाभिमतं **द्रव्येन्द्रियपृथिव्यादि कार्यात्मा** आत्मा, आत्मनैवात्मत्वेन परिणमितत्वादित्यादयो हेतवो वक्ष्य-
- /ms न्ते । सा च सुप्तावस्था द्रव्येन्द्रियम्, निर्वृत्त्युपकरणद्रव्येन्द्रिये व्याख्याते प्राक्, ते च पुरुषेणात्मत्वेन परिणमिते । भावेन्द्रियं त्वात्मैव लब्धियुक्त उपयुक्तो वा । पृथिव्यादि च विपरिवर्तमानात्मत्वपरिणामापन्नमेव, पृथिव्यप्तेजोवायुवनस्पतिद्वीन्द्रियादि तत् कार्यात्मा सुषुप्तावस्था, तदपि **ज्ञानात्मकमेव सुषुप्तावस्थात्मकत्वात्, हालाहलानुविद्धमदिरापानापादित-**

---

१ च] °वल-
नादि°nayacakra-ms-bhānayacakra-ms-denayacakra-ms-līnayacakra-ms-raṃnayacak
॥

१० स्यैव]
बहूचेतन°nayacakra-ms-bhā ।
बहुचेतन° nayacakra-ms-ya ॥

११ णा] °णात् पर्यय° प्र° ॥

१३ [illegible]] अत्र [illegible]सुप्तवत् इत्यपि
पाठः स्यात् ॥

१९ सा] °सायेपि प्र° ॥

२३ सा] °सायचेतना° प्र° ॥

२४ व] दृश्यतां पृ° १८५ पं° ३ ॥

**निद्राप्रसुप्तवत्,** यथा हालाहलविषेण सद्योमारकेणानुविद्धां मदिरां पीत्वा तदापादिताया निद्राया वशमुपगम्य सुषुप्तश्चेतन एव सन्न किञ्चित् चेतयते पुरुषस्तथा द्रव्येन्द्रियपृथिव्यादि कार्यात्मा । अथवा **अनध्यवसायवत्,** यथा जागरादिपूर्वव्याख्यातावस्थाभ्यो विशिष्टा सुप्तावस्थानध्यवसायाख्या ज्ञानमेव तद्वत् कार्यात्मावस्था द्रव्येन्द्रियपृथिव्यादि ज्ञानमेव । यथा निद्रानिद्रानिद्रा-प्रचला-प्रचलाप्रचला-स्त्यानर्द्धिवेदनीयानामुत्तरोत्तरोत्कर्षभेदादावृतज्ञानशक्तेराचैतन्यविशेषस्तदावरणापगमविशेषापादितचैतन्यविशु त्कर्षपर्यन्तप्राप्तसार्वज्ञ्यवद्वा चैतन्यावरणप्रकर्षपर्यन्तप्राप्तं पृथिव्यादि ज्ञानमेव । कर्मणश्चाष्टविधस्य सप्रभेदस्य पुरुषपरिणामैक्यापत्तेर्ज्ञानात्मत्वमिति चैतन्यमेव पृथिव्यादेः । § 565

अत आह --**योऽसौ पुरुषस्तदेव तद्** द्रव्येन्द्रियपृथिव्यादि, **तेनात्मत्वेन परिणमितत्वात्** । को वात्र भेदः परिणामकपरिणम्ययोः ? इत्याह --**तद्द्रव्यत्वात्,** स एव द्रव्यं तद्द्रव्यं सप्रभेदं कर्म, तस्मात् तद्द्रव्यत्वात् । **भूम्यबादिव्रीहित्ववत्,** यथा भूम्यम्ब्वाद्येव व्रीहिर्व्रीहित्वेन परिणतत्वात् तद्द्रव्यत्वाद् व्रीहिर्भूम्यादिरेव भूम्यादिभिरेवात्मत्वेन परिणमितत्वाद् व्रीहिर्भूम्यादिरेव तथा पृथिव्यादि पुरुष एव चेतनात्मकः । इतश्च योऽसौ पुरुषस्तदेव तत् **तत्कार्यत्वात्,** यद् यस्य कार्यं तदेव तत् **पटतन्तुवत्,** यथा तन्तूनां कार्यत्वात् पटस्तन्तुरेव तथा पुरुष एव पृथिव्यादि, पुरुषपूर्वकत्वप्रतिपादनस्य कृतत्वात् । इतश्च **तेन विनाऽभूतत्वात्,** तदेव तत् तेन विनाऽभूतत्वात्, यद् येन विना न भवति तदेव तत्, 186/mj

* * *

भावात् तद्देशत्वाच्च घटस्वतत्त्वप्रत्यग्रादित्ववत् ।

चैतन्यादात्मा पृथिव्यादिसुषुप्तावस्थाया विपर्ययेण वृत्तो रागाद्युपयुक्त उपयोगस्वातन्त्र्येण बद्धात्मनात्मानमस्वतन्त्रीकरोति, कर्मबन्धेन रूपादिमत्त्वमनाद्यनन्तश्च आपद्यते । अनाद्यनन्तशः सूक्ष्मस्थूलशरीरादिरूपादिमत्त्वं प्रतिपद्यते

* * *

यथा रूपादय एव पृथिव्यादयः पृथिव्यादय एव रूपादयः, तेऽन्योन्यैर्विना न भूतत्वादन्योन्यात्मकास्तथा पुरुष एव काष्ठाद्यपि । किञ्चान्यत्, **तद्व्यतिरेकेणाभावात्,** यद्धि यद्व्यतिरेकेण न भवति तदेव तत्, यथा घटस्वतत्त्वप्र-

१ निद्रा] अत्र °निद्रासुषुप्तवत् इत्यपि पाठः स्यात् ॥
१ ल] °**विशेषण**nayacakra-ms-vi विना । °**विशेषेण** nayacakra-ms-vi ॥
६ य] **यथा निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धि°** प्र° ॥
७ भेदा] °भेदावृत°nayacakra-ms-ya ॥
७ विशेष] अत्र °**षस्तथावरणा°** इत्यपि पाठः स्यात् ॥
८ सा] °**सार्वज्ञवद्वा** प्र° ॥
१४ भू] **भूम्यपादि°** प्र° ॥
१४ म्बा] °**द्येव बहुव्रीहित्वेन परि°** प्र° ॥
१७ य] **यस्य न कार्यं नदेव** प्र° ॥

त्यग्रादित्वम् । **तद्देशत्वाच्च,** तस्य देशस्तद्देशः, तत्पुरुषस्यैव देशोऽवयवः स्वात्मा रथ्यापुरुषपाण्यादिवत्, तद्देशत्वं सृष्टेस्तत्पूर्वकत्वादिति हेतुः । यो यद्देशः स तत्स्वतत्त्व एव, किमिव ? **घटस्वतत्त्वप्रत्यग्रादित्ववत्,** यथा घटस्य प्रत्यग्रयुवमध्यमपुराणता च घटस्वतत्त्वमेव तथा पृथिव्याद्य चेतनमपि चेतनपुरुषस्वतत्त्वमेव । यदुक्तमचिन्त्यप्रभावामूर्तसूक्ष्माज्ञकारणरूपादिमूर्तस्थूलविपरिवर्तवत् पुरुषविपरिवर्तमात्रं पृथिव्यादीति युक्त्योपपादितम् । § 566

तत्रैव पुनः संसारसिद्ध्यै युक्त्योपपादनार्थं प्रस्तूयते --**चैतन्यादात्मेत्यादि** - /ms यावद् **विपरिवर्तानन्त्यवत्** । चेतनभावश्चैतन्यम्, तस्माच्चैतन्यादात्मा **पृथिव्यादिसुषुप्तावस्थाया विपर्ययेण वृत्तस्तत** ईषद्विशुद्धावस्थ इत्यर्थः, चैतन्यस्य रागादिविपरिणामाद् **रागादेर्बन्धकारणत्वात् तदुपयुक्त उपयोगस्वातन्त्र्येण,** उपयोगो हि चेतना, तस्य स्वातन्त्र्यं कर्तृत्वात्, **मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः** तत्त्वार्थ० ८ । १ इति वचनाद् रागाद्यात्मककषायविकल्पात्मकत्वान्मिथ्यादर्शनादीनां तेन स्वातन्त्र्येण **बद्धात्मनात्मानमस्वतन्त्रीकरोति,** तेनैव च स्वयं कृतेन बन्धेन अस्वतन्त्रीक्रियते मद्येनेव स्वयं पीतेन मद्यपः, स्वयं पूरितवेगया डोलयेव वा पुरुषो भ्रम्यते कर्मडोलया, **कर्मबन्धेन रूपादिमत्त्वमनाद्यनन्तश्च आपद्यते** । एवमेतदुभयं सन्तत्याऽनाद्यनन्तं च द्रव्यार्थतया, यथोक्तम् --**पुव्विं भंते ! कुक्कुडी पच्छा अंड+ए ? पुव्विं अंड+ए पच्छा कुक्कुडी ? रोहा ! जा सा कुक्कुडी सा कतो ? अंडगातो । जे से अंड+ए से कतो ? कुक्कुडीतो । एवं रोहा ! पुव्विं पि एते पच्छा वि एते, दो वि एते सासता भावा, अणाणुपुव्वी एसा रोहत्ति** भगवतीसू० १ । ६ । ५३ । तथा **सव्वजीवा णं भंते ! एक्कमेक्कस्स मातत्ता+ए पितित्ता+ए भातित्ता+ए भज्जत्ता+ए पुत्तत्ता+ए धीतित्ता+ए ? गोतमा ! असति अदुवा अणंतखुत्तो** भगअयं णं भंते ! जीवे सव्वजीवाणं मा+इत्ता+ए पितित्ता+ए भा+इत्ता+ए भगिणित्ता+ए भज्जात्ता+ए पुत्तत्ता+ए धूयत्ता+ए सुण्हता+ए उववण्णपुव्वे ? हंता गोयमा ! जाव अणंतखुत्तो इति भगवतीसूत्रे पाठः ॥वतीसू० १२ । ७ । ४५८ इत्यादि । तच्च द्विविधं रूपादि--सूक्ष्मं स्थूलं च

३ घ] **घटवस्वतत्वप्रत्ययादि०** प्र० ॥
४ म] **मध्यपुरा०**nayacakra-ms-ya ॥
४ पु] **०पुरुषत्वमेव** प्र० ॥
५ म] दृश्यतां पृ० १७६ पं० ३ ॥
५ सू] **०सूक्ष्मज्ञ०** प्र० ॥
१८ क] **कुतो** प्र० । पुव्विं भंते ! अंड+ए पच्छा कुक्कुडी ? पुव्विं कुक्कुडी पच्छा अंड+ए ? रोहा ! से णं अंड+ए क+ओ ? भयवं ! कुक्कुडी+ओ । सा णं कुक्कुडी क+ओ ? भंते ! अंडया+ओ । एवामेव रोहा ! से य अंड+ए सा य कुक्कुडी पुव्विं पेते, पच्छा पेते, दुवेते सासया भावा, अणाणुपुव्वी एसा रोहा इति भगवतीसूत्रे पाठः ॥
१९ क] **कुतो**
**कुक्कुडी+ओ**nayacakra-ms-ya ॥
२० सा] **सासया**nayacakra-ms-ya ॥
२० त्ति] दृश्यतां पृ० ४ टि० २ ॥
२१ त्ता+ए]
**पितत्ता+ए**nayacakra-ms-bhā ॥
२२ अ]
**अस+ई**nayacakra-ms-bhā ॥

। कर्मादि सूक्ष्मम्, **आदि**ग्रहणादुच्छ्वासनिःश्वासभाषामनस्त्वादिकार्मणतैज-साहारकशरीरादि च तदात्मत्वगत्या । स्थूलं पृथिव्यादि औदारिकवैक्रिय 187/mj

* * *

चैतन्यं कार्यात्मत्वाद् मृद्घटकपालशकलशर्कराधूलिपांशुत्रुटिपरमाणुरूपादिप-रमाण्वादिद्रव्यादित्वविपरिवर्तानन्त्यवत् ।

नन्वेवमनाद्यनन्तत्वे सति अविवेके चैतन्यरूपादिमत्त्वयोस्तुल्ये किमर्थं ज्ञानात्मकमित्युच्यते, किं रूपादिमदात्मकमिति नोच्यते सर्वम् ? नैवं प-रिग्रहेऽपि कश्चिद्दोषः, अस्यैवार्थस्य सिसाधयिषितत्वात् । तथाहि--ज्ञस्यैव भवनस्योपपत्तेस्तदन्वयाच्च देशकालाभ्यां भवनं सिध्यति । तद्भिन्नपदार्थप-रिग्रहे तु घटभवनं न सिध्यति ।

* * *

शरीरात्मकत्वगत्या तदात्मत्वात् । एतत् प्रक्रिययैव प्रतिपादितमपि सुख-ग्रहणार्थं प्रतिज्ञायते **--अनाद्यनन्तशः सूक्ष्मस्थूलशरीरादिरूपादिमत्त्वं प्रतिप-** - /ms
**द्यते चैतन्यमिति** । कुतः ? **कार्यात्मत्वात्,** कार्यात्मत्वं च तस्य सिद्धं रूपादिपृथिव्यादिभेदरूपेण विपरिवृत्तेः साधितत्वात्, इह त्वनाद्यनन्तशः सेति साध्यते, यो यः कार्यात्मा स सोऽनाद्यनन्तशो विपरिवर्तमानो दृश्यते, तद्य-था **मृद्घटे**त्यादि, द्रव्यं मृद् भवति, मृद् घटो भवति, घटः **कपालानि,** ततः क्रमेण **शकल-शर्करा-धूलि-पांशु-त्रुटि-परमाणवः**, ततो **रूपादयः**, रूपादिभ्यः पुनरुत्क्रमेण **परमाण्वादयो** यावद्**द्रव्यादित्वविपरिवर्तानन्त्यम्** । आदिग्रहणाद् गुणकर्मसत्तादित्वेन विपरिवर्तवत् । एवंप्रकारस्य भवनस्य स्वजात्यपरित्याग-रूपस्य देशकालभेदैकान्ताभ्युपगमेऽनन्तरं वक्ष्यमाणदोषत्वान्नान्यथैतदिति प्र-तिपत्तव्यम् । § 567

अत्राह **--नन्वेव**मित्यादि । नन्वेवमनादित्वात् कुक्कुट्यण्डकयोरिवान-न्तत्वाच्च कुत्सिता कुटिः कुक्कुटिरित्यर्थे कुक्कुटिशब्दस्य शरीरार्थव्याख्यानाच्च मुक्तस्यापि रूपाद्यर्थज्ञानपरिणामाद**विवेके चैतन्यरूपादिमत्त्वयोस्तुल्ये किमर्थं ज्ञानात्मकमित्युच्यते,** किं वा कारणं **रूपादिमदात्मकमिति नोच्यते सर्वम् ?** विशेषहेतुर्वा वाच्य इति तद्दर्शयन्नाह परः **--नन्वेवमनाद्यनन्तत्वे सती**ति गतार्थम् । आचार्य आह **--नैवं परिग्रहेऽपि कश्चिद्दोषः**, किं कारणम् ? **अस्यैवार्थस्य सिसाधयिषितत्वा**च्चतुरवस्थात्मकत्वात् तस्य, तत एव रूपादिद्र-व्येन्द्रियपृथिव्यादिरूपः स एवोच्यते, तथा च सृष्टेः पूर्वमुक्तत्वात् । § 568

आह--चेतनाचेतनयोरैक्यापादनप्रस्तुतेः ज्ञः पुरुषः, तन्मयं चेदम्, स एव स्वतन्त्रो भवति इति च विशेष्य ज्ञग्रहणं स्वतन्त्रग्रहणं च किमर्थमिति - /ms

११ रीरा ]
°रात्मगत्याnayacakra-ms-bhā ॥
११ दात्म ] °त्मत्वा प्र° ॥
१७ त्रु ] °तुटि°nayacakra-ms-bhā
॥
२० व ] दृश्यतां पृ° १८८ पं° १ ॥
२२ न ] नन्विद- त्थ ?मनादित्वात् प्र° ॥

। आचार्य आह --**तथाही**त्यादि, भावयिष्यते । भवतीति भाव इत्युक्तम्, भावस्वरूपप्रदर्शनार्थं तु यो भवति स वाच्य इति ज्ञग्रहणम्, तदपि **तथाही**त्यादिना च एवं च कृत्वा यत् प्रागुक्तं देशकालभेदे भवनाभावदोषो वक्ष्यमाणः इति तत्परिहारेण **ज्ञस्यैव भवनस्योपपत्तेस्तदन्वयाच्च** सर्वदेशकालात्मसान्निध्याद् **देशकालाभ्यां भवनं सिध्यति**, तथा हि वस्तु भवतीति शक्यं वक्तुम् । **तद्भिन्ने**त्यादि, देशकालभिन्नपृथिव्यादिभेदभूत**पदार्थपरिग्रहे तु** अन्यथा तु **घटभवनं** यदेतत् प्रत्यक्षसम्प्रसिद्धं तदपि **न सिध्यति** । § 569

188/mj

देशभेदप्रत्ययेन तावद् ग्रीवादिभेदभावे घटभवनं न । श्वेतिकाद्येकदेशभावे न मृत् । अश्मादिभेदान्न पृथिवी । पृथिव्यादिभेदान्न द्रव्यं गुणकर्मभेदाद्वा । द्रव्यादिभेदान्नैकं सत्त्वम् । कालभेदप्रत्ययेनापि प्रतिक्षणमव्यपदेश्यभवनात् कतरद् घटभवनम्, मृद्भूतव्रीह्याद्यम्ब्वादिकालभिन्नभावभेदे मृदभावात् परतोऽपि कपालादिपांशुव्रीह्यादिभूतेः । घटादिसर्वात्मकस्यैकस्य सत्त्वस्याभावात् प्रत्येकत्वस्य चेतरेतरासत्त्वात्मकत्वात् कुतो भवनं भवितुर्घटादेः ? § 570

यथा तु रूपादिभेदेन सर्वभेदपर्यन्तं भेदं विधाय विज्ञानमात्रमेव व्यवस्थाप्यते § 571

तत् कथम् ? **देशभेदप्रत्ययेन ताव**दित्यादि, ग्रीवापृष्ठकुक्षिबुध्नौष्ठादीनां देशभिन्नानां कपालशकलादीनां च यावत् परमाणुशो रूपादिशो निरुपाख्यत्वशश्च **भेदभावे घटभवनं न**, सिध्यतीति वर्तते । एवं **न श्वेतिका**पीतिका**द्येकदेशभावे मृत् । अश्मादिभेदान्न पृथिवी । पृथिव्य**प्तेजोवाय्वा**दिभेदान्न द्रव्यं गुणकर्मभेदाद्वे**ति, तदेव हि द्रव्यं रूपगमनादिगुणकर्मभेदाद् यावन्निरुपाख्यत्वभेदात् समुदायाभावाच्चासम्बन्धान्न द्रव्यम् । **द्रव्यादिभेदाद्** द्रव्यगुणकर्मनानात्वाद् **नैकं सत्त्वम्** । एवं तावद् देशभेदे घटभवनं न स्यात्, द्रव्यादीनामनुपपत्तेः । § 572

**कालभेदप्रत्ययेनापि प्रतिक्षणमव्यपदेश्यभवनात् कतरद् घटभवनं** क्षणे क्षणेऽत्यन्तमसम्बद्धायःशलाकाकल्परूपाद्यात्मकत्वानुपपत्तेः ? किं कारणम् ? **मृद्भूतव्रीह्याद्यम्ब्वादिकालभिन्नभावभेदे मृदभावात्**, अस्मन्मतेन मृद्भूतो

- /ms

१ भा ] भाव इष्यते, ? ‖
३ प्रा ] दृश्यतां पं० १४ ‖
३ काल ]
०भेदभवनाभावदोषेnayacakra-ms-ya
‖
५ कालात्म ]
०त्मस्यन्निव्याद्nayacakra-ms-bhā ।
०त्मस्यन्निद्याद् nayacakra-ms-ya ‖
२३ मुदायाभावाच्चा ] **०च्चसंबंधाद्रव्यम्** प्र०
‖

व्रीह्यादिरम्ब्वादिश्चैक एव कालान्तरावस्थाने सति तत्परिणामोपपत्तेः, त्वन्मतेन तु कालभिन्नभावभेदे क्षणे [क्षणे] नवनवार्थासम्बन्धाद् भावभेदे व्रीहिरेव विनष्टो मृन्न भवति, न चोदकादि विनष्टं मृद् भवतीति निर्बीजत्वान्मृदभावः । मृदभावाच्च को घटः ? भवनं वा किं स्यात् ? अस्माकं तु सामान्यान्वयाद् व्रीह्यादय उदकादय एव वा मृद् भवति घटो भवतीत्यादि युज्यते, **परतोऽपि कपालादिपांशुव्रीह्यादिभूतेः**, घटभवनात् परतोऽपि घट एव कपालादि भवति, कपालादेरपि परतो यावच्छर्कराभवनात्, पांश्वादेरपि परतो व्रीह्यादेर्भवनात् । तस्माद् घटादि सर्वात्मकमेव भवति । न चेदेतदिष्यत एवम्प्रकारकं भवनं तत एवं **घटादिसर्वात्मकस्यैकस्य** देशकालव्यापिनः **सत्त्वस्याभावात्** त्वन्मतेनैव **प्रत्येकत्वस्य** चेष्टस्य त्वया **इतरेतरासत्त्वात्मकत्वात् कुतो भवनं भवितुर्घटादेः ?** घटः पटात्मना नास्ति पटोऽपि घटात्मनेति देशतः कालतश्च प्राक् पश्चाद्वा [न] स एवेति न पटोऽस्ति न घट इति प्रत्येकं भिन्नत्वे भावानामभावात् को घटः ? किं वा भवनम् ? § 573

**यथा तु रूपादी**त्यादि याव**दस्मदुपवर्णनवदेवाभिहितं भवति** । यैश्च वर्ण्यते विज्ञानमात्रत्वं देशभेदाद् घटो भिद्यमानो **रूपादिभेदेन** भिद्यते यावद् निरुपाख्यशः कालभेदेन च भिद्यमानः परमनिरुद्धक्षणोत्पत्तिविनाशनिरुपाख्यशो भिद्यत इति तैः **सर्वभेदपर्यन्तं भेदं विधायापि विज्ञानमात्रमेव** 189/mj

* * *

तथास्मदुपवर्णनवदेवाभिहितं भवति । ज्ञानस्यापि त्वभावाभ्युपगमे रूपाद्यपलापबीजनिरूपणादिनिर्मूलत्वात् प्रत्यक्षादिविरोधाः ।

अत एवोक्तवत् सर्वत्र सन्निपत्याराद्दूरादुपकारित्वेभ्य आत्मबुद्धीन्द्रियप्रकाशरूपघटौषधाहारादिषु ज्ञानवृत्तिर्भवति । अन्वाह च--

पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ शुक्लयजु° सं° ३१ ।
२§ 576

* * *

नान्यत्किञ्चिदिति **व्यवस्थाप्यते** । यथा तु तद् व्यवस्थाप्यते **तथास्मदु**क्तवदुपवर्णितमभिन्नमेकं विज्ञान- मित्युक्तं भवति, ततश्च रूपरसादिघटपटादिविश्व- - /ms
भेदात्मकत्वात् तस्य, रूपादिपरस्परविविक्तत्वे तु तद्विज्ञानान्वयाभावाद् रूपरसादिभेदपरिकल्पनाभावस्तदंशकल्पनाभावो निरुपाख्यत्वकल्पनाभाव इति विज्ञानमात्रता न भवति । § 577

---

३ चो ] वोदकादिnayacakra-ms-bhā ॥
७ पां ] पांस्वा°nayacakra-ms-bhā ॥
८ व्रीह्या ] व्रीह्यादिर्भ?वनात्nayacakra-ms-bhā ॥
१० स्य ] चेष्टस्यnayacakra-ms-ya प्रतिषु नास्ति ॥

अथ कश्चिद् ब्रूयात्--तदपि विज्ञानमसत् सर्वभावशून्यत्वादिति, एतच्चायुक्तम्, **ज्ञानस्यापि त्वभावाभ्युपगमे रूपाद्यपलापबीजनिरूपणादिनिर्मूलत्वात् प्रत्यक्षादिविरोधाः**, रूपादयो न सन्तीति यदपलापबीजं निरूपणं तदपि नास्तीति रूपादिप्रतिषेधो न सिध्यति, प्रत्यक्षतश्च स्वानुभवेन रूपस्य निरूपणमुपलभ्यते प्रतिस्वम्, **आदि**ग्रहणादास्वादनघ्राणस्पर्शनश्रवणानुभवा उपलभ्यन्ते, अतः प्रत्यक्षविरोधः । तदनुस्मरणदर्शनादनुमानविरोध **आदि**ग्रहणात्, अनुस्मरणं हि स्वयमनुभूतस्यार्थस्य नाननुभूतस्य । तस्मादवश्यमात्मा ज्ञानस्वभाव एकः सर्वभावव्यापी विपरिवर्तमानोऽवस्थितः कारणमिति सिद्धम् ।
§ 578

**अत एवोक्तवदित्यादि** । एतस्मादेव आत्मव्याप्तिविपरिवृत्तिव्यवस्थितत्वाद्धेतोरुक्तेन तुल्यमुक्तवद् रूपादीनां तत्त्वाद् रूपणात्मकत्वाज्ज्ञानस्वभावात्मावस्थाविशेषमात्रत्वात् **सर्वत्र** सर्वभावेषु एष विशेषस्तस्यैव कारणपदार्थस्योपकारविशेषेभ्योऽपरो द्रष्टव्यः--सन्निपत्योपकारिणी बुद्धिरात्मनः
- /ms साक्षादव्यवहिता भावानां स्वपरिवर्तविशेषाणामुपभोगे, भोक्ता तु स्वयमेव स्वपरयोः । आरादिन्द्रियाणि करणत्वात् दूरात् प्रकाशादयोऽनुग्राहका इन्द्रियाणां दवीयांसो रूपादयो दविष्ठा घटादय औषधव्यञ्जनादीनि इन्द्रियाणां पाटवजननादुपकार्युपकारित्वेन तदुपोद्बलकराश्चाहाराः सर्वभावगतासु ज्ञानवृत्तिष्वित्यत आह **--सर्वत्र सन्निपत्याराद्दूरादुपकारित्वेभ्यो** हेतुभ्य **आत्मबुद्धीन्द्रियप्रकाशरूपघटौषधाहारादिषु ज्ञानवृत्तिर्भवतीति** । § 579

**अन्वाह चे**ति ज्ञापकम्, एतस्मिन्नर्थे पूर्वोक्तमेव जैनैर्वक्ष्यमाणज्ञापकार्थम् **एकोऽप्यहमनेकोऽप्यहम्** भगएगे भवं दुवे भवं अक्खु+ए भवं अव्व+ए भवं अवट्ठि+ए भवं अणेगभूयभावभवि+ए भवं ? सोमिला ! एगे वि अहं जाव अणेगभूयभावभवि+ए वि अहं इति भगवतीसूत्रे पाठः १८ । १० । ६४७ । "एगे भवं दुवे भवं अणेगे भवं अक्खु+ए भवं अव्व+ए भवं अवट्ठि+ए भवं अणेगभूयभावभवि+ए वि भवं ? सुया ! एगे वि अहं दुवेवि अहं जाव अणेगभूयभावभविवतीसू° १८ । १० । ६४७ इत्यादिकम्, अतोऽपि लौकिकस्तदनुसारेणाह न स्वमहिम्नेति । **पुरुष एवेद**मित्यादि, एवेत्यवधारणे, भवितुरन्यस्याभावादुक्तवत् तस्यैव च भवनात् । **इद**मिति
190/mj दृश्यस्पृश्यादि इन्द्रिय

* * *

अत एव तस्य सर्वत्वसम्प्रसिद्ध्या आत्माद्याख्यता, मृदनुत्तीर्णघटपिठरादिवद् भ्वस्त्यर्थादिभ्यः सर्वस्यानुत्तरात् सर्वस्यासावात्मा स्वरूपं तत्त्वमित्यर्थः ।

* * *

गोचरं लिङ्गगम्यं वा निर्दिशति । **सर्वमित्यशेषं** तस्यैव सामान्यविशेषभेदप्र-

१ पि ] विज्ञानसत्nayacakra-ms-ya ॥
११ स्थित ] °स्थितत्वात्व ?हेतो° प्र° ॥
१६ औष ] औषधाव्यन्य ?ञ्जनादीनि प्र° ॥
२० अ ] अत्राहnayacakra-ms-ya ॥

भेदानन्त्येऽपि सङ्गृहीतं बुद्ध्या । इदं च देशतः प्रदर्शनम् --**इदं सर्वमिति** । कालतस्तु **भूतं भाव्यमिति** अतीतानागतवर्तमानानां प्रदर्शनम्, भूतशब्दस्य वर्तमानातीतवाचित्वात् । **उत** पश्य प्रेक्षस्वेत्यर्थः । **अमृतत्वस्य** अक्षयत्वस्य **ईशानः** प्रभविता, स ह्यक्षयोऽजरोऽमरः पुरुषो ज्ञानस्याविनाशित्वात् सोऽक्षयत्वमनुभवतीत्यर्थः । यथोक्तम् — **अक्खरस्स अणंतभागो णिच्चुग्घाडित+ओ सव्वजीवाणं** नन्दिसू° ४२ ति । तद्व्याख्याननिदर्शनं च

तं पि जदि आवरिज्जिज्ज तेण जीवो अजीवयं पावे ।
सुट्ठु वि मेहसमुदये हो+इ पभा चंदसूराणं ॥ नन्दिसू° ४२
इति ।§ 582

**यदिति** यस्मात् कारणा**दन्नेनातिरोहति,** अद्यते भुज्यतेऽश्यत इत्यन्नं पुद्गलद्रव्यं तेनैवात्मनानाद्यनन्तशोऽपि विपरिवर्तितत्वात्, तेनान्नेनासावतिरोहति वर्धत उपचीयते तत्स्वारूप्याद् बालक इव नवनीताहारेण तेन ज्ञानक्रिययोरुपष्टम्भोपलम्भात् करणकायविवृद्धेश्च । यथोक्तम् --**अन्नं वै प्राणाः, अन्नमयो ह्ययं पुरुषः, पुरि शयनात् पुरुषः** , नाङ्गस्यैतत् सर्वं घटतेऽतिरोहति भृशं रोहतीति । § 583

किञ्चान्यत्, **अत एवेत्यादि** । एतस्मादेव कारणात् **सर्वत्वसिद्धिस्तस्य** तत्त्वज्ञानस्वरूपस्य, तया च पुनः **सर्वत्वसम्प्रसिद्ध्या आत्माद्याख्यता** । सततमतति गच्छति जानीते परिणमतीति चात्मा । सतो भावः सत्त्वम्, स एव सन् भवति चेत्यर्थः । भूतस्तथा सदा भवतीति वा । पुरि शयनात् पुरुषः शरीरे जगति वा स्वविजृम्भितविकल्पात्मके । पूरणाद् गलनाच्च पुद्गलः पुमांसं गिलतीति वा पुद्गलः, जीवशरीरतया विभज्य भोक्तृभोग्यभावाद् वृद्धिहानिभ्यामुत्पत्तिविनाशाभ्यां पूरणगलनाभ्यामित्यर्थः । जायते तैस्तैर्भावैरिति जन्तुः । पञ्चेन्द्रियमनोवाक्कायबलायुरुच्छ्वासनिःश्वासाख्यदशप्राणधारणात् प्राणी जीव इति चोच्यते इत्येवमाद्यभिख्याः सर्वत्वे सति घटन्ते तेन तेन धर्मेण व्यपदेशाविरोधात् । **मृदनुत्तीर्णघटपिठरादिवत्,** यथा मृदोऽनुत्तीर्णा घटपिठरादयो भवन्ति सन्ति वर्तन्त इत्यादिभ्यो भ्वस्त्याद्यर्थेभ्यो नोत्तरन्ति भवनानुत्तरात् सर्वधातूनां च भ्वाद्यर्थत्वादेवं ज्ञानस्वरूपः

---

६ ति ] दृश्यतां पृ° ४ टि° २ ॥
७ अजीव ] °व+अंnayacakra-ms-bhā ॥
८ इति ] दृश्यतां पृ° ४ टि° २ ॥
१० न्त ] °शोविपरिवर्त्तत्वात्nayacakra-ms-bhā ॥
१२ क्रिय ] °योपष्ट°nayacakra-ms-ya ॥
१२ अ ] अन्नं वै चन्द्रमाः, अन्नं प्राणाः, उभयमेवोपैत्यजामित्वाय इति तैत्तिरीयब्राह्मणे ३ । २ । ३ । ११ ॥
१३ ना ] नान्यस्यै°nayacakra-ms-bhā ॥
१७ म ] °मति चात्माnayacakra-ms-ya ॥
२० भोक्तृ ] °भोज्यभावाद्nayacakra-ms-raṃnayacakra-ms-hī विना ॥

- /ms कर्ता भवति अस्ति वर्तते ज्ञानस्वरूपभवनानुत्तरात् । अत आह **--भ्वस्त्यर्थादिभ्यः सर्वस्यानुत्तरात्,** अस्तिभवतिविद्यतिपद्यतिवर्ततयः सन्निपातषष्ठाः सत्तार्थाः, भ्वादयश्च सर्वधातवस्तदर्थं नातिवर्तन्त इति यावदेव किञ्चिदुत्पद्यते विनश्यति व्यवस्थितं वा तस्य **सर्वस्यासावात्मा स्वरूपं तत्त्वमित्यर्थ** इति पर्यायैः स्वरूपोपनयः । § 584

यथा तन्त्रवायकीटः स्वशरीरजयैव लालया तन्त्रं प्रसारयत्युपसंहरति च न चान्यतः कुतश्चित् तथात्मन एव संहारविसर्गौ । उक्तं हि **--यथोर्णना (Edtext outside numbered paragraph)भिः सृजते गृह्णीते च यथा पृथिव्यामौषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमा**नीति वा, **य (Edtext outside numbered paragraph)था सुदीप्तात् पावकाद्विस्फुलिङ्गा भवन्ति तथाक्षरात् सम्भवतीह विश्वम्** मुयथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् ॥ १ । १ । ७ ॥...तदेतत् सत्यम्--यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥ २ । १ । १ ॥ इति मुण्डकोपनिषदि पाठः ॥ण्डकोप॰ इति । बन्धमोक्षावपि यथा कोशकारकीटक आत्मानं वेष्टयति स्वशरीरविनिर्गतेन कोशेन पुनश्च तत्रैव प्रलीयते कश्चिच्च कोशकं छिद्रीकृत्य निर्गच्छत्येवमात्मनो बन्धमोक्षौ नान्यत इति । किञ्चान्यत्, **य (Edtext outside numbered paragraph)था च सुदीप्ता**दित्यादि, अयमपि दृष्टान्तोऽग्निस्वतत्त्वान (Edtext outside numbered paragraph)तिवृत्त्याग्निरूपसम्भवात् पुरुषस्य तत्साधर्म्यप्रदर्शना (Edtext outside numbered paragraph)र्थम्, य (Edtext outside numbered paragraph)थाऽन्वाह **--य (Edtext outside numbered paragraph)था सुदीप्तात् पावका**दित्यादि । एवं तावत् पुरुष एव सर्वमित्युक्तम् । § 585

स्यान्मतम्--स्वात्मनि वृत्तिविरोधात् कथमात्मनात्मानं सृजत्युपसंहरति च बध्यते मुच्यते च ? न ह्यङ्गुल्यग्रमङ्गुल्यग्रं स्पृशति नासिरात्मानं छिनत्तीति, एतच्चायुक्तम्, शक्तिभेदात् कारकभेदोपपत्तेः,

तन्त्रवायककोशकारककीटवच्च तदात्मका एवैते संहारविसर्गबन्धमोक्षाः । यथा च सुदीप्तात् पावकाद्विस्फुलिङ्गा भवन्ति... ... ...।

स एव कलनात् कालः । प्रकरणात् प्रकृतिः । रूपणादिनियमनान्नियतिः

---

१ नानुत्त] ॰त्तारात् प्र॰ ॥
२ स्यानुत्त] ॰त्तारात् प्र॰ ॥
२ अ] दृश्यतां पृ॰ ३४ पं॰ २० ॥
५ रूपोप] ॰पनयnayacakra-ms-bhā । ॰पनयं nayacakra-ms-ya ॥
७ ह्य] **ह्यंगुल्यग्रं स्पृश**तिnayacakra-ms-pānayacakra-ms-bhānayacakra ॥
१० य] अत्र यथा च सुदीप्तात् पावकाद् विस्फुलिङ्गा भवन्ति तथाक्षरात् सम्भवतीह विश्वम् । इति मूलं सम्भाव्यते ॥

। स्वेन रूपेण भवनात् स्वभावः । येन यत्र यथा यस्माद् यदा यदर्थं च प्रवर्तितव्यं

* * *

वायककोशकारककीटवच्च तदात्मका एवैते संहारविसर्गबन्धमोक्षाः,**तन्त** * 191/mj

* * *

तन्तवायककोशकारककीटवच्च तदात्मका एवैते संहारविसर्गबन्धमोक्षाः । यथा च सुदीप्तात् पावकाद्विस्फुलिङ्गा भवन्ति... ... ...।

स एव कलनात् कालः । प्रकरणात् प्रकृतिः । रूपणादिनियमनान्नियतिः । स्वेन रूपेण भवनात् स्वभावः । येन यत्र यथा यस्माद् यदा यदर्थं च प्रवर्तितव्यं

* * *

वायककोशकारककीटवच्च तदात्मका एवैते संहारविसर्गबन्धमोक्षाः,

स एवोच्यते कालोऽपि, **स एव ज्ञत्वात् कलनात् कालः, कल सङ्ख्याने** पा॰ धा॰ ४९७, १८६६, कलनं ज्ञानं सङ्ख्यानमित्यर्थः । यथा चाहुरेके --**कालः पचति भूतानि**[१] इति श्लोकः । **प्रकरणात् प्रकृतिः** स एवेति वर्तते । सत्त्वरजस्तमःस्वतत्त्वान् प्रकाशप्रवृत्तिनियमार्थान् गुणानात्मस्वतत्त्वविकल्पानेव भोक्ता प्रकुरुते इति प्रकृतिः, यथाहुरेके-- - /ms

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः
॥ श्वेताश्व॰ ४ । ९ । ५५§ 588

इति । **रूपणादिनियमनान्नियतिः**, रूपणाच्चक्षुषो विषयो रूपमेव न रसादयः, रसनाद् रसो रसनविषयो न रूपादय इत्यादि नियमनान्नियतिः । स्वो भाव आत्मनैव **स्वेन रूपेण भवनात् स्वभावः** । यथाहुरेके-- § 589

*कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः प्रयत्नः ॥
इति ।§ 591

१192/mj

१. कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ इति संपूर्णः श्लोकः ॥

४ वा] **॰वायकाश॰**nayacakra-ms-bhā ॥
४ *] **॰द्याख्याता** प्र॰ ॥
६ य] अत्र यथा च सुदीप्तात् पावकाद् विस्फुलिङ्गा भवन्ति तथाक्षरात् सम्भवतीह विश्वम् । इति मूलं सम्भाव्यते ॥
११ वा] **॰वायकाश॰**nayacakra-ms-bhā ॥
१२ ज्ञ] **ज्ञात्वा कल॰** प्र॰ ॥
१३ य] **यथा बहुरेके** प्र॰ ॥
१५ प्र] **प्रकाशवृत्ति॰** प्र॰ ॥
१७ लोहित] **॰तकृष्णशुक्लां** प्र॰ ॥
१७ स] **विरूपाः** प्र॰ ॥
१९ णा] **॰दिन्निय॰** प्र॰ ॥
२२ *] एतच्चिह्नान्तर्गतस्य पाठस्य स्थाने **कः कण्टकानामित्यादि** इत्येव nayacakra-ms-ya प्रतिषु पाठः ॥

तेन तत्र तथा तस्मात्तदा तदर्थं च प्रवृत्तिः । तदन्तरेव तस्य, न ततो व्यतिरिक्तम्, स एव हीदं वृत्तमविवृत्तं च बहुधानकं चेतनाचेतनादिप्रभेदरूपम् । अन्वाह च-- § 592

तदेजति तन्नैजति तद् दूरे तदुपान्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥
शुक्लयजु॰ वा॰ सं॰ ४० । ५§ 594

अर्हणबोधनेत्यादेर्विशुद्धिप्रकर्षविशेषाद् देवता अपि स एव, यावदर्हन्नपि भवतिति सम्भाव्यते । § 595

सत्यम् । भवनं कर्तुः, भवनस्य क्रियात्वात्, पचिवत् । यत्तु स ज्ञ इति § 596

**येन** हेतुना **यत्र** क्षेत्रे **यथा** येन प्रकारेण **यस्मादाश्रयाद्** वस्तुनो **यदा** यस्मिन् काले **यदर्थं च** यत् प्रयोजनमुद्दिश्य **प्रवर्तितव्यं तेन तत्र तथा तस्मात्तदा तदर्थं च प्रवृत्तिः**, तद्यथा--राज्ञाज्ञप्तः सूपकारः स्थाल्यामोदनं कुशूलात् तण्डुलानाहृत्य मृदुविशदमोदनं पेयात्यैपूर्वकं क्षुत्प्रशमनार्थं च पचतीति । तत् पुनः प्रवर्तनं **तदन्तरेव तस्य** पुरुषस्य, **न ततो व्यतिरिक्तं** बहिर्भूतम् । **स एव हीदम्,** स एव पुरुषो यस्मादिदं सकलं जगद् **वृत्तं** ततः प्रसृतं नानाभेदेन विवर्तमानम्, **अविवृत्तं च** तत्स्वरूपापरित्यागात् । **बहुधानकं** बहूनामाश्रयः । चेतनाचेतनादिप्रभेदा रूपमस्येति **चेतनाचेतनादिप्रभेदरूपम्,** यच्च चेतनं नरतिर्यगमरनारकादि तत्प्रभेदाश्च रूपमस्य काष्ठकुड्यघटपटाद्यचेतनं च सप्रभेदमस्य रूपम् । § 597

**अन्वाह चे**ति जैनमतानुसारेणैवेत्यर्थः । **तदेजति** चलति स्पन्दते, **नैजति**
- /ms न चलति न स्पन्दते । **तद् दूरे** तिर्यग्लोकेऽधोलोकेऽलोके च । **तदुपान्तिके** तदेवास्मिन् प्रदेशे दृश्यस्पृश्यादि । **तदन्तरस्य** घटपटादेः **सर्वस्य** वस्तुनः

२ स] अथापरे विवृत्ताविवृत्तं बहुधानकं चैतन्यमित्याहुः । इति भर्तृहरिविरचितायां वाक्यपदीयवृत्तौ १ । ८ ॥
४ त] अथापरे विवृत्ताविवृत्तं बहुधानकं चैतन्यमित्याहुः । इति भर्तृहरिविरचितायां वाक्यपदीयवृत्तौ १ । ८ ॥
१२ प्र] **प्रवृत्तिस्तथा** प्र॰ । अत्र प्रवृत्तिः, यथा राज्ञाज्ञप्तः इत्यपि पाठः स्यात् ॥
१३ त] **तंदुलाकृत्य मृदुविशद॰**nayacakra-ms-ya । **तंदुविशद॰** nayacakra-ms-bhā ॥
१३ नं] अत्र पेयापूर्वकम् इति पाठः सम्भाव्यते ॥
१४ न्त] **॰रेचेतस्य** प्र॰ ॥
१४ पु] **पुरुषस्य**nayacakra-ms-ya प्रतिषु नास्ति ॥
१७ ब] **बहूधानामां श्रयः**nayacakra-ms-bhā । **बहुधानाश्रयः** nayacakra-ms-ya ॥
१८ य] **यच्चेतनं**nayacakra-ms-ya ॥
२१ त] अत्र **तद्वन्तिके** इति यजुर्वेदे पाठः, एवं चात्र नयचक्रवृत्तौ **तदु चान्तिके** इत्यपि पाठः स्यात् ॥
२२ त] **तदेकस्मिन्** प्र॰ ॥

साकारानाकारोपयोगलक्षणस्यात्मनस्तत्परिणतेरप्रतिघातात् । **तदु सर्वस्यास्य बाह्यतः**, तस्यैवालोकेऽपि सद्भावात्, सर्वस्यास्य इति लोकगतभावनिर्देशात् तस्य बाह्यमलोक इति । § 598

**अर्हणबोधनेत्यादेर्विशुद्धिप्रकर्षविशेषाद् देवता अपि स एव**, अर्हति सर्वलोकातिशयपूजा इत्यर्हन्, बुध्यत इति बुद्धः, वर्धनाद् बृहत्त्वाद् ब्रह्मा वर्धमानो वा, व्याप्नोतीति विष्णुर्ज्ञानात्मनैव सर्वानर्थान्, ईशनादीश्वरः, एतेभ्यश्च ज्ञानविशुद्ध्युत्कर्षभेदेभ्यस्तत्पर्यन्तप्राप्तेर्**यावदर्हन्नपि भवतीति सम्भाव्यते**, दुष्प्रापत्वादार्हन्त्यस्य सम्भावनयोच्यते, शेषपदप्राप्तिस्तु सुलभैवेति, तामपि च दुरापां सर्वज्ञावस्थां परमविशुद्धां परमर्ष्याख्यां स एव प्राप्तुमर्हतीति । एवं विधिविधिनयविकल्पः पुरुषवादः । § 599

अधुना नियतिवादो विधिविधिनयदर्शनाश्रयोऽभिधीयते **--सत्यम्, भवनं कर्तुरित्यादि** । सत्यं युक्तमेतदुच्यते त्वया--तन्न भवतः स्वातन्त्र्यमुपलभ्यमानं पचाविव शक्यमपह्नोतुम् । किं कारणम् ? 193/mj

* * *

सम्प्रधार्यमेतत् । स यदि ज्ञः स्वतन्त्रश्च, नात्मनोऽनर्थमनिष्टमापादयेद् विद्वद्राजवत् ।

न, निद्रावदवस्थावृत्तेः पुरुषताया एवास्वातन्त्र्यात्, आहितवेगवितटपातवत् । ननु तज्ज्ञत्वाद्ययुक्ततैवेषा समर्थ्यते, युक्तत्वाभिमतत्वेऽपि चायमेव नियमः कर्त्रन्तरत्वापादनाय । भवति कर्ता... ... ...अचेतनोऽपि भवति । तन्नियमकारिणा

* * *

**भवनस्य क्रियात्वात्,** या क्रिया सा भवितुरेव घटादेः परमाण्वादेर्वा, यथा पचिक्रिया पक्तुरेव भवति स्वतन्त्रस्य । भवनमपि च क्रिया, क्रियात्वाद् भवित्रा विना न भवति, **पचिवत्** । भविता च कर्ता, कर्ता च स्वतन्त्रः, कर्तृत्वादेव न केनचिदसौ भाव्यते कार्यते वा स्वातन्त्र्यात् कर्तृत्वात् । **यत्तु स ज्ञ इति सम्प्रधार्यमेतत्,** यत् पुनरुच्यते स्वातन्त्र्यात् कर्ता ज्ञ एव इत्यवधार्य तत्र त्वया सहैतत् सम्प्रधार्यं विचार्य- मस्ति, सर्वज्ञमेव इत्ययुक्तमित्यभिप्रायः -/ms
। किं कारणमयुक्तम् ? सर्वज्ञस्यैव भवनाभ्युपगमे दोषदर्शनात्, कर्तृत्वात् स्वातन्त्र्यमस्तु, को वारयति ? **स यदि ज्ञः स्वतन्त्रश्चे**त्युभयगुणसम्पन्न इष्यते यदि ज्ञः सन् स्वतन्त्रोऽपि स्याद् **नात्मनोऽनर्थमनिष्टमापादयेत्** ज्ञत्वे सति स्वतन्त्रत्वात् । को दृष्टान्तः ? **विद्वद्राजवत्,** यथा हि दैवपौरुषगतिज्ञो देशकालसहायसाधनसम्पन्नः पराक्रमवान् राजा नात्मनोऽनर्थमनिष्टमरणपराजयादिमापादयत्येवमसावपि नात्मनोऽनर्थमनिष्टमापादयेत्, दृष्टस्त्वयमनर्थोऽनिष्टो जन्मजरामरणरोगशीतोष्णादिः शारीरो मानसश्च शोकभय-

१ स] **सर्वस्य बा॰** प्र॰ ॥
२४ का] **कार्यते** क्रियाभेक्रियते ?वाnayacakra-ms-bhā ॥
२८ म] ॰मस्त प्र॰ ॥
३२ साव] ॰वप्यnayacakra-ms-ya । ॰वप्या nayacakra-ms-bhā ॥

विषादेर्ष्यासूयादिः, तस्मादयुक्तमस्य ज्ञत्वमिति । § 600

एतच्च **न, निद्रावदवस्थावृत्ते**रित्यादि । नैतदुपपद्यते अनर्थानिष्टापादनानुपपत्तिर्ज्ञस्यात्मनः इति, कस्मात् ? **निद्रावदवस्थावृत्तेः,** निद्रावत्यवस्था निद्रावदवस्था, तया वृत्तिर्निद्रावदवस्थावृत्तिः, तस्या वृत्तेः **पुरुषताया एवास्वातन्त्र्यात्,** ज्ञस्यापि स्वकृतनिद्रावदवस्थावृत्तिवशादस्वातन्त्र्यात् । **आहितवेगवितटपातवत्,** यथा कश्चित् पुरुषः स्वयमेव पूरितवेगस्तं वेगं निवर्तयितुमशक्तो वितटे पतति तथा स्वतन्त्रमपि ज्ञमपि तत् परं कारणमात्मनोऽनिष्टमनर्थमापादयेत्, को दोषः ? इति अत्र दोषकुतूहलं चेद् ब्रूमः --**ननु तज्ज्ञत्वे**त्यादि, नन्वेवं त्वया निद्रावदवस्थावृत्तिवशादाहितवेगवितटपातवदवस्थाऽस्वातन्त्र्यादनर्थानिष्टानयनम् इति ब्रुवता **तज्ज्ञत्वाद्ययुक्ततैवैषा समर्थ्यते,** तेन अनया पूरितवेगया शीघ्रगमनक्रियया वितटपातो भविष्यति इत्यज्ञातत्वात्, ज्ञातत्वे वितटपातः स्वतन्त्रस्य नोपपद्यत इति स एव दोषः । तस्मात् तदवस्थमयुक्तत्वम् । § 601

**युक्तत्वाभिमतत्वेऽपि चे**त्यादि । यद्यपि स्वातन्त्र्यज्ञत्वाविनाभाविभवनब- - /ms लोपबृंहितमात्ममयत्वमेवास्य सर्वस्य मन्यसे तथापि तु **अयमेव नियमः कर्त्रन्तरत्वापादनाय** भवतीति वाक्यशेषः । कथं कृत्वा तद् भाव्यत इति चेत्, उच्यते --**भवति कर्ते**ति प्रागभिहिताक्षरार्थन्यायं तदीयमेवोच्चारयति याव**दचेतनोऽपि भवती**ति त्वयैव कारणान्तरास्तित्वमेवं ब्रुवता समर्थितं भवति किञ्चिदासामवस्थानाम्, पचाविव ज्ञाज्ञस्वतन्त्रास्वतन्त्रस्वविषयनियतकर्तृकर- 194/mj णाधिकरणकर्मादिनियतशक्तिदर्शनाद् देवदत्तकाष्ठस्थालीतन्दुलोदकादीनां

* * *

कारणेनावश्यं भवितव्यं तेषां तथाभावान्यथाभावाभावादिति नियतिरेवैका कर्त्री । न हि तस्यां कदाचित् कथञ्चित् तदर्थान्यरूप्यमेकत्वव्याघाति । अन्वाह च—

प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः सोऽवश्यं भवति नृणां
शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने नाभाव्यं भवति न
भाविनोऽस्ति नाशः ॥ § 604

न च मूर्तामूर्तादितथातथाप्रविभक्ताप्रविभक्तसर्वार्थयाथातथ्यस्थापनैकरूपत्वान्निय-

* * *

**तन्नियमकारिणा कारणेनावश्यं भवितव्यम्** । किं कारणम् ?

५ निद्रा] °द्रावस्थावृत्ति° प्र° ॥
७ क्तो] विपतटे प्र° ॥
९ वेग] विटपात° प्र° ॥
१७ प्रा] दृश्यतां पृ° १७५ पं° २ ॥
२० स्थालीत] अत्र °तन्दुलौदनादीनां इति पाठः स्यात् ॥

**तेषां तथाभावान्यथाभावाभावात्,** देवदत्तोऽधिश्रयणोदकसेचनतन्दुलावपनैधोऽपकर्षणादिव्यापारस्वातन्त्र्य एव नियतो न ज्वलनसम्भवनधारणविक्लित्त्यादिव्यापारस्वातन्त्र्ये, एवं शेषाणामपि काष्ठादीनां करणादिस्वव्यापारविषयस्वातन्त्र्यनियमस्तथाभावः । तेषामेव कारकाणां स्वव्यापारविपरीतशक्तिः परस्परतोऽन्यथाभावः । तयोस्तथाभावान्यथाभावयोरभावादभावप्रसङ्गादिति यावत् । दृष्टौ चेमौ तथाभावान्यथाभावौ । तस्मान्नियतत्वान्नियमकारिकारणापेक्षनियमा एव भावाः, तच्च कारणं नान्यदतो भवितुमर्हति नियतेरित्यत आह **--इति नियतिरेवैका कर्त्री,** इतिशब्दो हेत्वर्थे, अस्माद्धेतोर्नियमकारिकारणाविनाभावाद् भावनियमस्य नियतिरेवैका कर्त्री इत्यस्तु निर्दोषा कल्पना । कथम् ? यस्माद् **न हि तस्यां कदाचित् कथ-** - /ms **ञ्चित् तदर्थान्यरूप्यमेकत्वव्याघाति** । ज्ञानात्मकैककारणवादे पृथिव्याद्यचेतनमकारणानुरूपमित्यस्ति व्याघातोऽवस्थासु चतसृष्वपि कल्पितासु, कारणपूर्वत्वाभ्युपगमात् कार्याणाम् । न हि नियतेर्नियममात्रस्य कर्त्र्या भावानां सारूप्यवैरूप्यभेदेऽपि व्याघातोऽस्ति । **कदाचि**दित्यवस्थान्तरेऽपि, **कथञ्चि**दिति प्रकारान्तरेऽपि । तस्मात् कारणैकत्वेऽपि वैरूप्यदोषपरिहारसमर्थत्वान्नियतिकारणकल्पना श्रेयसीति । **अन्वाह चे**ति जिनवचनोपजीवनमेतदपि ज्ञापकं पूर्ववत् । **प्राप्तव्यो नियतिबले**त्यादि, कृतेऽपि यत्ने कार्यविपत्तिदर्शनादकृतेऽपि निध्यादिदर्शनसम्पत्तिदर्शनात् कार्यस्य कारणानुरूपगुणस्तद्वैरूप्यविरोधपरिहारसमर्थोऽस्ति । § 605

किमयमेव गुणः ? अन्योऽप्यस्ति ? अस्तीत्युच्यते । कतमोऽसौ ? अयत्नप्रतिपाद्यतागुणः, स च मूर्तामूर्ताद्ययुक्तविरुद्धधर्मापत्तिपरिहारेणेति तद्दर्शयति **--न च मूर्तामूर्ते**त्यादि यावद् **यत्नप्रतिपाद्य[त्व]मस्ती**ति । तत्रोपपत्तिः--उभयथा **तथातथाप्रविभक्ते**त्यादि यावद् **नियतेः** । तेन तेन प्रकारेण तथा तथा मूर्तत्वेन अमूर्तत्वेन चेतनत्वेन अचेतनत्वेन सौक्ष्म्येण स्थौल्येन

१ देव] [In the print edition there is a footnote reference but no corresponding note.]

६ स्मा] कोऽसौ प्रतिकारकं क्रियाभेदः पचादीनाम् ? अधिश्रयणोदकासेचनतण्डुलावपनैधोऽपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः । अधिश्रयणोदकासेचनतण्डुलावपनैधोऽपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते । तत्र तदा पचिर्वर्तते । एष प्रधानस्य कर्तुः पाकः । एतत् प्रधानकर्तुः कर्तृत्वम् । द्रोणं पचत्याढकं पचतीति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाकः । द्रोणं पचत्याढकं पचतीति सम्भवनक्रियां [= ग्रहणक्रियां] धारणक्रियां च कुर्वती स्थाली पचति इत्युच्यते । तत्र तदा पचिर्वर्तते । एषोऽधिकरणस्य पाकः । एतदधिश्रयणस्य कर्तृत्वम् । एधाः पक्ष्यन्ति आ विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः । एधाः पक्ष्यन्ति आ विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्ति इत्युच्यन्ते । तत्र तदा पचिर्वर्तते । एतत् करणस्य कर्तृत्वम् । इति पातञ्जलमहाभाष्ये १ । ४ । २३ ॥

१४ दा] **°न्नियतत्वा°**nayacakra-ms-bhā प्रतौ नास्ति ॥

१६ ञ्चि] **°ञ्चिदिति व्यवस्था°**nayacakra-ms-ya ॥

१८ णानुरू] **°जीविनमे°** प्र° ॥

२१ मू] अत्र **°रूप्यगुण°** इति पाठः स्यात् ॥

२३ त] **मूर्ताद्ययुक्त°** प्र° ॥

च ऐश्वर्येण दारिद्र्येण चेत्यादिना प्रविभक्तानामर्थानां सर्वं वस्तु ज्ञेयं सदर्थः
195/mj इत्यादिना चाप्रविभक्तानां सर्वेषामर्थानां यथातथाभावो याथा *

* * *

तेर्यत्वप्रतिपाद्यत्वमस्ति । प्रयत्नसाध्येष्वर्थेषु कृतकेष्वपि च तद्विषयक्रियाफलस्य तथानियतेर्व्यापिता नियतिकारणत्वस्य ।

परमार्थतोऽभेदासौ कारणं जगतः, भेदवद्बुद्ध्युत्पत्तावपि परमार्थतोऽभेदात्, बालादिभेदपुरुषत्ववत् । कथम् ? अभेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानाद् भेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानादेव व्यवच्छिन्नस्थाणुपुरुषत्ववत् ।

* * *

तथ्यम्, तेन याथातथ्येन तस्य तस्यार्थस्य सर्वस्य नियमेन तिष्ठतः प्रयोजकत्वं हेतुकर्तृत्वं स्थापनम्, तच्चैकरूपमेव सर्वत्र तस्या नियतेः, तस्माद्धेतोस्त-**थातथाप्रविभक्ताप्रविभक्तसर्वार्थयाथातथ्यस्थापनैकरूपत्वान्नियतेर्**नेदानीं निय-
- /ms मनमात्रैकव्यापाराया नियतेर्हेतुत्वप्रतिपादनाय यत्नः कश्चिदास्थेयः । § 606

**प्रयत्नसाध्येष्वर्थेषु कृतकेष्वपि च तद्विषयक्रियाफलस्य तथानियतेर्व्यापिता नियतिकारणत्वस्य** । स्यान्मतम्--नियतिनिबद्धत्वात् सर्वभावानां क्रियाक्रियाफलयोरनियम इति, तन्न भवति, तद्विषयस्य घटादिविषयस्य मृत्पिण्डदण्डचक्रादिसाधनस्य प्रयत्नसाध्यस्य घटात्मनिर्वृत्तिरूपस्य क्रियाफलस्य तेन प्रकारेण नियतेर्नियतिरेवात्र कारणमिति । § 607

इदानीं तस्या नियतेः स्वरूपं चिन्त्यते--किं तावत् तेषामेव भावानां स्वं स्वं रूपं प्रतिभावं भिन्नं नियतिरुच्यते, उत अभेदा सा ? इति । अत्र **परमार्थतोऽभेदासौ कारणं जगतः**, नास्या भेद इत्यभेदा । कस्मात् ? **भेदवद्बुद्ध्युत्पत्तावपि परमार्थतोऽभेदात्** । अथवा कोऽसौ भेदो नाम नियतेरपि ? क्रियासाध्यासाध्यार्थरूपत्वाद् भावानां नियम इति चेतनाचेतनत्वादिबुद्ध्युत्पत्तावपि सत्यां परमार्थतो नियतिरित्येवाभिन्नत्वादभेदा, भेदबुद्धिस्तु तद्विकल्पमात्रभावापेक्षा । किमिव ? **बालादिभेदपुरुषत्ववत्**, यथा बाल्यकौमारयौवनमध्यमावस्थाभेदबुद्ध्युत्पत्तावपि पुरुषत्वमभिन्नमेवं नियतिरपि क्रियाक्रियानियतफलभेदबुद्ध्यादिभेदेष्वभिन्नेति । § 608

---

२ *] तथाप्रवि° प्र° ॥
११ त्वं] तत्प्रयोजको हेतुश्च । १ । ४ ।
५५ ॥ कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च
स्यात् । इति
पाणिनीयव्याकरणसिद्धान्तकौमुद्याम् ॥
१२ थाप्र] °प्रविभक्तसर्वार्थ° प्र° ॥
२० स्वं] स्वं स्व-
रूपंnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ
। स्वस्वरूपं nayacakra-ms-vi ।
स्वरूपं nayacakra-ms-raṃ
nayacakra-ms-hī ॥
२३ क्रि] क्रियासाध्य-
साध्यार्थ°nayacakra-ms-bhānayacakra-ms-pā
। क्रियाक्रियासाध्यसाध्यार्थ°
nayacakra-ms-bhā
nayacakra-ms-pā विना ॥
२४ त्ता] °त्तावसत्यां प्र° ॥
२७ पि]
nayacakra-ms-vinayacakra-ms-raṃnayacakra-r
विनान्यत्र । क्रियाक्रियाक्रियानियत°
nayacakra-ms-pā
nayacakra-ms-ḍe
nayacakra-ms-līṃ । क्रियानियत°
nayacakra-ms-bhā ॥

आह--कथं परमार्थतो नास्ति भेदो भेदबुद्ध्याभासभावेऽस्याः ? दृश्यमाने हि भेदबुद्ध्याभासभावे किञ्चित् क्रियया साध्यं किञ्चिन्नेति किञ्चित् स्वत एव किञ्चित् परत इति । अथवा परमार्थतस्तु भेद एवास्तु सत्यप्यभेदबुद्ध्याभासभावे सतीति आचार्यो द्विधापि चोदिते परिहारमाह **--कथ**मित्यादि । यदि भेदोऽभिमतस्तत्र कथं परमार्थतो भेदः ? **अभेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानात्** त्वयैव, अभेदवदाभासते भेद एवेति । अथाभेद इष्टः कथमभेदः - /ms ? **भेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानादेव** । यद्येकान्तबुद्धिस्त्वन्मतेन परमार्थविषयत्वे तदा तदाभासाद् द्विधापि चाभेदस्याभ्यनुज्ञानादेवा 196/mj

* * *

सा च तदतदासन्नानासन्ना, तस्या एव तदतदासन्नानासन्ननानावस्थद्रव्यदेशादिप्रतिबद्धभेदात्, मेघगर्भवत् । नाभाविभावो न भाविनाशः ।

न कालादयं विचित्रो नियमः, वर्षारात्रादिष्वपि क्वचिदयथर्तुप्रवृत्तेः । न च स्वभावात्, बाल्यकौमारयौवनस्थविरावस्थाः सर्वस्वभावत्वाद् युगपत् स्युः, भेदक्रमनियतावस्थोत्पत्त्यादिदर्शनान्न स्वभावः कारणम् । तथा तु तत् तथानियति वस्तु ।

* * *

भेदा सेति गृह्यताम् । किमिव ? **व्यवच्छिन्नस्थाणुपुरुषत्ववत्,** परमार्थतः स्थाणुरेव वा पुरुष एव वेति व्यवच्छिन्ने वस्तुनि यथोर्ध्वतासामान्यस्याभेदस्य दर्शनादभेद एवं सर्वनियतिषु क्रिया-क्रियाफलरूपास्विति । § 609

सा पुनर्नियतिर्भेदाभेदरूपा, कस्मात् ? इति सकारणं स्वरूपनिरूपणमस्या उच्यते **--सा चे**त्यादि । सा च नियति**स्तदे**व, सर्वनियतिषु तस्या एवाविशेषात् । **अतच्च,** *क्रियाऽक्रियानियत्यादिवैलक्षण्यात् । **आसन्ना,** प्रत्यक्षोपलभ्येष्वर्थेषु प्रत्यासत्त्या नियतत्वात् । **अनासन्ना,** कार्यानुमानागमगम्येषु दूरत्वात् । इह च स्वर्गादिषु च तथानियतेरासन्नानासन्ना च । किं कारणम् ? **तस्या एव तदतदासन्नानासन्ननानावस्थद्रव्यदेशादिप्रतिबद्धभेदात्,** सा च असा च आसन्नानासन्ना च नानावस्था येषां ते तदतदासन्नानासन्ननानावस्था द्रव्यदेशादयः, तैः प्रतिबद्धायास्तस्या एव नियतेर्भेदाद्द्रव्यादित्वेन । **आदि**ग्रहणात् कालभावाभ्यां च । सैव नियतिर्द्रव्यतो घटरूपेण सा भवति, पटरूपेणासा । घटान्तरस्यासन्ना आकारप्रत्यासत्त्या, पटाकारेणाप्रत्यासन्ना । क्षेत्रतो यस्मिंश्चक्रमूर्धनि क्रियते तस्मिन्नेव यत्र वा भूप्रदेशे तिष्ठति

---

३ बुद्ध्या ] °द्ध्यावभास° प्र° ॥
७ न्म ] °न्मते परमार्थविषयत्वे तदा तदाभासा द्विधापिnayacakra-ms-ya । °न्मतेन परमार्थविषये तदातदातदाभासा द्विधापि nayacakra-ms-bhā ॥
१७ ए ] एवेति प्र° ॥
१९ र्निय ] °तिर्भेदादभेदरूपाnayacakra-ms-vi विना ॥
२१ * ] क्रियाक्रियानि° प्र° ॥
२४ तिब ] °बंध°nayacakra-ms-bhānayacakra-ms-vi । °बध° nayacakra-ms-bhā nayacakra-ms-vi विना ॥
२५ अ ] असा च प्रतिषु नास्ति ॥
२६ द्वा ] °द्धाया एवnayacakra-ms-ya ॥

ग्रीवादिदेशे वा तत्रैव नान्यत्रेति, कालतो यावत्कालेन निर्वर्तते यावन्तं
- /ms वा कालं तिष्ठति सा कालनियतिः, भावतो यैर्वर्णाकृत्यादिभिर्यथा भवति तथैवेति नियतिः, एवं द्रव्यदेशादिप्रतिबद्धभेदाद् वस्तुविरचना नियत्येकत्वेऽपि । किमिव ? **मेघगर्भवत्,** यथा मेघा गर्भं गृह्णन्तो यादृग् यावच्च जलं गृह्णन्ति यथा च तादृक् तावत् तथैव च विसृजन्ति द्रव्यतः, क्षेत्रतो यत्र गृह्णन्ति देशे तत्रैव निसृजन्ति, कालतो मार्गशिरमासे गृहीतं वैशाखे निसृजन्तीत्यादि, भावतो यथा गृहीतं क्षारमधुरादि तथैव विसृजन्ति सत्त्वौषधिवनस्पतिशोष-पोषकरादीति । तदुपसंहरति --**नाभाविभावो न भाविनाश** इति प्राक्तनेन वृत्तेन गतार्थम् । § 610

स्यान्मतम्--अयं नियमः कालात्, कालस्य क्रमाख्यत्वात् पूर्वोत्त-रादिकालक्रमनियतपरिणामत्वाच्च भावानामिति । एतच्च **न कालादयं विचित्रो नियमः** । कस्मात् ? **वर्षारात्रादिष्वपि क्वचिदयथर्तुप्रवृत्तेः** । दृश्यते ह्यङ्कुर-किशलयपत्रपुष्पफलगर्भप्रसवादिव्यभिचारो वनस्पत्यादीनां सत्त्वानां च स्वतः प्रयोगतश्च वर्षाशरद्धेमन्तशिशिरवसन्तनिदाघेषु स्वपरिणामकालेष्वप्रवृत्तिदर्श-नादस्वकालेषु च क्वचित् प्रवृत्तिदर्शनात् । § 611

यद्यपि मन्येत स्वभावादिति, **तन्न च स्वाभावादित्यादि** याव**दभ्युपगम-विरोधः** । वनस्पतिसत्त्वाद**ेर्बाल्यकौमारयौवनस्थविरावस्थाः** सर्वोऽसावस्य स्वो
197/mj भावः स्वभाव इत्यतो बालादिकाल एव

* * *

तदनभ्युपगमे सर्वाविवेकेऽवस्थास्वभावाद्यभावादभ्युपगमविरोधः ।

यथा लोक इत्येकत्व एव पर्वताद्याकारावग्रहो यथा ज्ञानमेकत्वेऽप्य-नेकबोध्याकारं भवति अन्यथा ज्ञानात्मलाभाभावात् तथा नियमात्मकत्वात् सा व्रीहिरित्येकस्मिन् वस्तुन्येका अनेका चाङ्कुरादि भवति ।

उत्पातादिष्वनियमदर्शनादनियतिकारणत्वम्, दृष्टं हि प्रसवादिवैकृतमिति चेत्, न, अत्रापि तथानियतिवशेन... ... ...प्रसवादिधर्मव्यतिक्रम उपल-भ्यते ।

* * *

युवताद्यवस्था **युगपत् स्युः,** न च भवन्ति । तस्माद् बालकाल एव युवादियुगपदभावे **भेदक्रमेण नियता** यास्तासाम**वस्थानामुत्पत्तेः** स्थितेश्च्युतेश्च
- /ms **दर्शनान्न स्वभावः कारणम्** । किं तर्हि ? नियतिरेव कारणम- भ्युपगन्तव्यम्, **तथा तु** तेन हेतुना तेन प्रकारेण दृष्टोत्पत्त्याद्यवस्थाभेदक्रमनियमेन **तत् त-थानियति वस्तु** । **तदनभ्युपगमे सर्वविवेके** सर्वावस्थानामविवेकेऽभ्युपगम्य-

१ या] याव-कालेनnayacakra-ms-bhānayacakra-ms-pā nayacakra-ms-ramṇayacakra-ms-ḍe ॥
३ त] तत्रैवेति प्र° ॥
९ वृ] दृश्यतां पृ° ११४ पं° ३ ॥
११ त्वा] °त्वाच्च पूर्वो° प्र° ॥
१२ य] °यच्चतुप्रवृत्तेः प्र° ॥
१७ स] दृश्यतां पृ° २०६ पं° १४ ॥

माने **स्वभावाद्यभ्युपगमे** सति ता अवस्था न स्युः, ते चावस्थारूपाः स्वभावा न स्युर्देवदत्तादेर्बाल्याद्याः सुप्ताद्या वा, ततो**ऽवस्थास्वभावाद्यभावाद**भ्युपगत एव स्वभावो न स्यात् । ततो**ऽभ्युपगमविरोध**स्ते जायते स्वभाववादिनः । **आदि**ग्रहणात् तत्तदवस्थासहवर्तिनः पाण्याद्यवयवस्वभावस्य रूपादिबाह्यगुणस्वभावस्य पटुजडताद्यान्तरगुणस्वभावस्य वाऽभावादभ्युपगमविरोधः । अथवा **आदि**ग्रहणात् कालस्यापि पूर्वोक्तन्यायेन युगपदभावेन वाऽभावादभ्युपगमविरोधः कालकारणिनोऽपि । तस्मादिदं प्राप्तमभ्युपगन्तुं तद्विनियमो नियतेरन्यतो नावतिष्ठत इति । § 612

तस्या एव नियतेरेकत्वानेकत्वविरोधपरिहारार्थं दृष्टान्तमाह **--यथा लोक इत्येकत्व एव पर्वताद्याकारावग्रहः** । एक एव लोकः सरित्समुद्रमहीमहीध्रग्रामारामादिभिराकारैरवगृह्यमाणो भिद्यते [तथा] भेदाभेदरूपेण नियतिः, - /ms
एतद् बाह्यं निदर्शनम् । आन्तरं तु **यथा ज्ञानमेकत्वेऽप्यनेकबोध्याकारं भवति** । किं कारणम् ? **अन्यथा** घटपटाद्याकारमन्तरेण **ज्ञानात्मलाभाभावात्** । एतस्योदाहृतस्यार्थस्य भेदाभेदस्वरूपभावनेयमुच्यते **--तथा नियमात्मकत्वा**दित्यादि यावद**ङ्कुरादि भवती**ति । **सा** नियतिर्व्रीहिरित्येकस्मिन् वस्तुन्येका मूलादिभेदे वाङ्कुर इत्येवाभिन्ना । अङ्कुरकिशलयपत्रकाण्डादित्वाद्यवस्थाभेदाद् भिन्ना रूपरसादिभेदाद्वा भिन्ना । अनेकस्मिंश्च पृथिव्यम्बुवाय्वादिस्वरूपेऽर्थे पृथिव्यादीनामेव तद्भावापत्तेर्व्रीहिरित्येकत्वादभेदा । एकापि सती भिन्ना, अनेकापि सती न भिन्ना तथातथानियतार्थवशात् । § 613

---

१ स्युः ] स्युः न
चाव॰nayacakra-ms-vi विना । स्युः
न वाव॰ nayacakra-ms-vi ॥
२ त्तादेर्बाल्या ]
॰ल्यादौnayacakra-ms-ya । ॰ल्यादोः
nayacakra-ms-bhā ॥
५ वा ] चाभावा॰
nayacakra-ms-bhānayacakra-ms-vi
॥
६ वा ] चा-
भावा॰nayacakra-ms-bhānayacakra-ms-denayacakra-ms-līm
॥
८ न्य ]
॰न्यतोवतिष्ठतnayacakra-ms-bhā ।
॰न्यतावतिष्ठत nayacakra-ms-vi
nayacakra-ms-raṃ
nayacakra-ms-hī । ॰न्यततवतिष्ठत
nayacakra-ms-pā
nayacakra-ms-ḍe
nayacakra-ms-līṃ ॥
९ य ] एकत्वस्याविरोधेन शब्दतत्त्वे ब्रह्मणि
समुचिता विरोधिन्य आत्मभूताः शक्तयः ।
तद्यथा--भिन्नार्थप्रत्यवभासमात्रायामेक-
स्यामुपलब्धावर्थाकारकप्रत्यवभासमात्राः
पृथिवीलोका इति । न हि ज्ञेयगतो
वृक्षाद्याकारावग्रहो ज्ञानस्यैकत्वेन विरुध्यते,
नास्याकारात् तदाकारस्यात्मभेदोऽस्ति
तेषामेकज्ञानतत्त्वानतिक्रमात् । इति
भर्तृहरिविरचितायां वाक्यपदीयवृत्तौ १ । २
॥
११ माणो ] अत्र भिद्यते, भेदाभेदरूपेण
[illegible] इत्यपि पाठः
स्यात् ॥
१४ था ]
नियतात्मक॰nayacakra-ms-bhā ॥
१७ रू ]
॰रूपर्थेnayacakra-ms-bhā ।
॰रूपमर्थे nayacakra-ms-ya ॥
१९ स ] सती
भिन्नाnayacakra-ms-ya ॥

द्रव्यदेशकालभावानामुत्पातादिष्वनियमदर्शनादनियतिकारणत्वम्, **दृष्टं हि प्रसवादिवैकृतम्,** आदिग्रहणात् प्रसवनिलयाहारक्रियाप्रकृतिवैकृतानि, 198/mj नरतिरश्चां विपर्ययेण सङ्ख्याकृतिवर्णावयवा

* * *

वस्तुस्वभावव्यतिक्रमश्च नियतिवशादेव । किञ्चित् सदसाध्यम्, किञ्चिदसदसाध्यम्, किञ्चिदसत् साध्यम्, किञ्चिच्च सत् साध्यम् । सदपि चाकाशं भूगन्धवदनभिभवं सन्तमसस्थघटवत् प्रदीपादिनेव अव्यङ्गम् । इदं तु तद्व्यवस्थाविपरीतनियति वन्ध्यापुत्राद्यसाध्यमेव, क्रिया हि साधनेषु वर्तमाना सन्तमर्थं साध्यमाविशति प्रत्यर्थनियतत्वात् साधनानुषङ्गस्य, साध्यस्याभावाद्वन्ध्यासुतादेः स्त्रीपुंससम्प्रयोगक्रिया किमाविशतु ? इदं पुनरसत् साध्यं घटादि प्राक् तथाऽवृत्तम् । इदम-

* * *

दिजन्मानि अभक्ष्यभक्षित्वं ग्राम्यारण्यकजलस्थलजन्मनां तच्चारिणां च वसत्यादिविपर्ययः । रोषक्षमादिशीलविपर्ययः । पलितस्यैवोत्पत्तिरित्याद्यवस्थाविपर्ययः । *वर्णगन्धादिस्वभावविपर्ययः । इत्येवमादिवैकृतदर्शनान्न नियतिरेव कारणमिति चेत्, नेत्युच्यते, **अत्रापि तथानियतिवशेनेत्यादि** यावद्व्य**तिक्रम उपलभ्यत** इति सापि तादृशी नियतिरेव कारणमिति । § 614

किञ्चान्यत्, न केवलं प्रसवादिधर्मव्यतिक्रम एव, किं तर्हि ? **वस्तुस्वभावव्यतिक्रमश्च नियतिवशादेव । किञ्चित् सदसाध्य**मित्यादि चतुर्भङ्गी - /ms स्फुटार्थत्वान्न विव्रियते, सा चोद्दिष्टा निर्देक्ष्यमाणा च । तथा च पुरुषो नियतेरेव तथा वृत्तत्वात् तत्साध्यासाध्यत्वे प्रतिपद्यते । तत्र सदसाध्यत्वे निदर्शनम् --**सदपि चाकाशं भूगन्धवदनभिभवम्,** नास्याभिभवोऽस्तीत्यनभिभवं सलिलसेकेनेव न साध्यमित्यर्थः । **सन्तमसस्थघटवत् प्रदीपादिनेवाव्यङ्गम्,** किं तत् ? आकाशादि, सत्त्वात् साध्यं भूगन्धवदिति प्राप्तेऽप्यसाध्यमेव । **इदं तु** स्त्रीपुंसयोगात् साध्यमवन्ध्यापुत्रवदिति प्राप्ते **तद्व्यवस्थाविपरीतनियति वन्ध्यापुत्राद्यसाध्यमेव** नियतिवशादेवासत्त्वात् । तन्न नियत्या सत् नियत्यैवासत् साध्यतामर्हति । किं कारणम् ? साधनाविष्टक्रियासाध्यत्वात् साध्यानां साधनाविष्टायाः क्रियायास्तत्रावेशाभावः, तत्साधनानां साधनशक्तिशून्यत्वात् । तस्माद् वन्ध्यापुत्रादीनामसाध्यत्वं स्त्रीपुंसयोगक्रिययाप्यसाध्यत्वेन नियत-

---

१ नाद ] °नियतकार°nayacakra-ms-bhā ॥
१२ अ ] अत्र **अभक्ष्यभक्ष्यत्वम्** इति पाठः समीचीनो भाति अभक्ष्यो ग्रामशूकरः, पञ्च पञ्चनखा भक्ष्याः इत्यादिप्रसिद्धेः, अथवा नरा अभक्ष्याः, तिर्यञ्चो भक्ष्याः इत्यर्थो ज्ञेयः ॥
१४ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१९ च ] °**न्धदिति** प्र° ॥ नास्य व्यङ्गो व्यक्तिरस्तीत्यव्यङ्गम् ।
२२ लिल ] **च**nayacakra-ms-bhā प्रतौ नास्ति ॥
२२ लिल ] °**सेनेव** प्र° ॥
२२ दीपादिनेवाव्य ] °**न्धदिति** प्र° ॥ नास्य व्यङ्गो व्यक्तिरस्तीत्यव्यङ्गम् ।
२५ निय ] नियत्याऽसत् ? ॥
२७ नाविष्टा ] °**ष्टायास्तत्रा**°nayacakra-ms-ya ॥
२८ योग ] °**क्रियाया**° प्र° ॥

त्वात्, साध्यार्थाभावे च साधनानां साधनत्वाभाव इति तद्दर्शयति --**क्रिया** हीत्यादि, **हिशब्दो** यस्मादर्थे, यस्मात् क्रिया **साधनेषु** काष्ठादिषु **वर्तमाना सन्तमर्थं साध्यं** विक्लेद्यतन्दुलविपरिणामात्मकमोदनादिकमर्थम**ाविशति प्रत्यर्थनियतत्वा**ज्ज्वलनाद्युपनिधानार्थेषु प्रत्येकं नियतत्वात् काष्ठादि**साधनानुषङ्गस्य, साध्यस्याभावाद्वन्ध्यासुतादेः** सा **स्त्रीपुंससम्प्रयोगक्रिया किमाविशतु** ? तस्मात् तद्व्यवस्थाविपरीतनियति असाध्यं वन्ध्यापुत्रादि । § 615

**इदं पुनरित्यादि, असत् साध्यं घटादि** । इतर आह--यद्यसत् कथं साध्यं खपुष्पवदुक्तासद 199/mj

* * *

न्यत् सततोपलब्धिनियतं यष्टिसाधनवदृजुत्वेन मृद्द्रव्यमूर्ध्वादित्वक्रमापाद्यघटत्वेन भेदेनैव वा सत् साध्यं पुरुषादि स्थाण्वादिपरिग्रहापनयनेन ।

एतच्च साध्यमानमनयैव क्रियया साध्यते, एतस्याश्च एतान्येव कारकाणि, एवं नियतिस्थितेः कारकान्तरसमवस्थितितुल्यतायामपि पुरुषस्तथा प्रतिपद्य प्रत्यर्थं

* * *

साध्यविकल्पानतिवृत्तेश्चेति । अत्रोच्यते--नैष दोषः, सतोऽन्यदसत् इत्यतोऽन्यत्रविधानप्रतिषेधपक्षाश्रयणाद् द्रव्यार्थविकल्पत्वान्नियतेरसत्त्वाभावादित्यत आह --**प्राक् तथा अवृत्तं** तेन घटत्वप्रकारेणावृत्तम्, सच्छब्दस्य वृत्त्यर्थत्वात्, **अस्तिभवतिविद्यतिपद्यतिवर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इति वचनादसदित्यवृत्तमित्यर्थः, मृत्पिण्डाद्यवस्थानकाले तत्कालेऽव्यक्त्या नियतं - /ms
साध्यम् । **आदि**ग्रहणात् पटकटादीति, एतत् कालभेदेन उपलब्ध्यनुपलब्धिभ्यां नियतम् । § 616

**इदमन्यत् सततोपलब्धिनियत**मित्यादि, तद्वदिदं च सदाव्यक्तिनियति सत् साध्यमित्यभिसम्बन्धः । *किंवत् ? **यष्टिसाधनवदृजुत्वेन,** यष्टिर्हि विद्यमानैरेवावयवैः सदा व्यक्ता संस्थानविशेषेण साध्यते सती साध्यते ऋजूक्रियते । इदमन्यत् सततोपलभ्यमेव सत् साध्यं **मृद्द्रव्यमूर्ध्वादित्वक्रमापाद्यघटत्वेन,** पूर्वस्मिन्नुदाहरणे मनागाकृत्यन्तरभेदेन इह त्व-

३ ना] °दिमर्थ°nayacakra-ms-bhā ॥ ४ नाद्युप] अत्र °निधानाद्यर्थेषु इत्यपि पाठः स्यात् ॥ ५ स्य] °स्यासाध्यस्याभावा°nayacakra-ms-bhā । °स्यासाध्यत्वाभावा° nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । °स्यसाध्यत्वाभावा° nayacakra-ms-ḍe nayacakra-ms-līṃ ॥ ६ त] तद्विपरीत°nayacakra-ms-ya ॥ १८ अ] दृश्यतां पृ° ३४ पं° २० ॥ १९ त्का] °ले अव्यक्त्याnayacakra-ms-bhā ॥ २२ ब्धिनिय] °नियमित्यादि प्र° ॥ २३ *] किंतत् प्र° ॥

त्यन्तभिन्नाकारभेदेनेति विशेषः, तद्दर्शयन्नाह — **मृदूर्ध्वादित्वेन भेदेनैव वा सत् साध्यमिति** । अथवा **भेदेनैव वा सत् साध्यम्,** इदं चान्यदिति वर्तते । यद् बुद्ध्यैव साध्यते न क्रियया परिस्पन्दात्मिकया विद्यमानं **पुरुषादि स्था[ण्वादि]परिग्रहापनयनेन** तद्विषयसंशयविपर्ययपरिग्रहापनयनेन, नात्र किञ्चिन्निर्वर्तते पुरुषादि, किन्तु विद्यमानमेवानुपलब्धमुपलब्ध्या साध्यते, एषा तु नियतिर्ज्ञानरूपैवेति पूर्वविलक्षणा । § 617

एतासां क्रियाणां तत्साध्यानां च नियतिकृतत्वप्रतिपादनार्थमाह --**एतच्च साध्यमान**मित्यादि । ओदनविषयेयं पचिक्रिया घटादिविषयक्रियाविलक्षणा, एतच्चोदनादि साध्यमानमप्यन्यविषयगमनादिक्रियाविलक्षणयाऽ**नयैव** प**चिक्रियया साध्यते** नान्ययेति क्रियानियत्या साध्यते । **एतस्याश्च** पचिक्रियाया **एतान्येव** काष्ठादीनि **कारकाणि** न मृत्पिण्डदण्डादीनीति साध्यसाधनार्थ-
- /ms नियतिः । **एवमित्यादि** । एवं च कृत्वा यथा अर्थगतप्रतिविशिष्टसाध्यसाधननियमाभिव्यङ्ग्याया **नियतेः स्थिति**र्व्यवस्था तथा तस्याः **स्थितेर्हे**तोः कारणगुणपूर्वकतामनुमानप्रसिद्धां कार्यस्य प्रतिपद्य बुद्ध्या **कारकान्तरसमवस्थितितुल्यतायामपि** दण्डादिकारकान्तराणां साध्यनिर्वर्तनसमवस्थितेस्तुल्यतायामपि सत्यां पचिक्रियासमवस्थित्या सह नियतिप्रसिद्धेरेव बलात् **पुरुषस्तथा प्रतिपद्य प्रत्यर्थं कारकाणि प्रयुङ्क्ते,** यथास्वसाध्यार्थमित्यर्थः । तानि च कारकाणि **नियतानि** तस्या एव नियतायाः क्रियायाः । **यथाप्रयोगनियमम्,**
200/mj *यो यः प्रयोगनियम इति

* * *

कारकाणि प्रयुङ्क्ते नियतानि यथाप्रयोगनियममेकविमर्दप्रवृत्तानि परस्परनियतानुग्रहोद्भावनवृत्तानि । न तु तदुपायसिद्धेरन्यथा तत्सिद्धिरस्ति । सिद्धिर्हि नियमेनानुद्भूतानां सम्मूर्छितानां स्वनियतेरेवाभिव्यक्तिः । तच्च स च तानि च नियतेरेव प्रवर्तन्ते न वा । तथा च दृश्यन्ते क्रियाणां विपत्तयोऽप्रवृत्तयश्च । अतस्तत् कृतमपि पूर्वनियतिस्थत्वादकृतं विनष्टमप्यविनष्टं तथानियतिस्थत्वात्, एवं तु विनश्येद् यदि

* * *

१ न्ना] °न्नाह मूहर्ध्वादित्वेन भेदेनैवnayacakra-ms-bhā । °न्नाह मूर्धादित्वं घत्वेन भेदेनैव nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī । °न्नाह मूर्धादित्वं घटत्वेन भेदेनैव nayacakra-ms-vi । अत्र मृदूर्ध्वादित्वघटत्वेन भेदेनैव इत्यपि पाठः स्यात् ॥
५ नात्र] किंचिन्निवर्तते प्र° ॥
६ ए] एषा मु नियति°nayacakra-ms-bhā । एषामनियति° nayacakra-ms-ya ॥
१७ सा] °साध्यार्थः तानिnayacakra-ms-bhā । °साध्यार्थोयमित्यर्थः तानि nayacakra-ms-ya । अत्र यथास्वसाध्यार्थोपायमित्यर्थः इत्यपि पाठः स्यात् ॥
१९ *] पौर्यः प्रयोग° प्र° ॥

*स्वे स्वे विषये देशकालविशिष्टे प्रयुक्तानीत्यर्थः । **एकविमर्दप्रवृत्तानि** एकप्रयोजनेनान्योन्यापेक्षेण व्यापारेण प्रवृत्तानि परस्परापेक्षं नियतं परस्परानुग्रहमुद्भावयन्ति प्रवर्तन्ते, अत उच्यते --**परस्परनियतानुग्रहोद्भावनवृत्तानीति** स्वविषयक्रियाप्रसाध्यमर्थमभिनिर्वर्तयन्ति । तेषां वृत्तिर्विषयस्तानि तत्फलं च सर्वं नियतमेव, ततो नियतिरेव सर्वस्य कारणम् । **न तु तदुपायसिद्धेरन्यथा तत्सिद्धिरस्ति,** काष्ठज्वलनादिसाधनपचिक्रियानिर्वर्त्यस्यौदनस्य न दण्डचक्रभ्रमणादिसाधनात् तत्सिद्धिर्न वा घटाद्यर्थस्य काष्ठज्वलनादिसाध्यतास्तीति ।

§ 618

का सिद्धिस्तर्हीति चेत्, उच्यते --**सिद्धिर्हीत्यादि** । **नियमेनो**क्तलक्षणेन **अनुद्भूताना**मनभिव्यक्तव्यापाराणां बीजावस्थायामङ्कुरादित्वेन रूपादीनां **सम्मूर्च्छितानां** साङ्गत्येन समुदेत्य स्थितानां **स्वनियतेरेवाभिव्यक्ति**र्वर्णाकृत्यादिनियत्या जनिर्या पूर्वमनभिव्यक्तानामभिव्यक्तिः सा सिद्धिरित्युच्यते । तत्रायं मिथ्याभिमानः इदं मया कृतम् इति पुरुषस्य । आह--किं कारणं मिथ्याभिमानो ननु मया कृतो घट इति ? तत्क्रियाविनाभावासिद्धजन्मत्वाद् घटस्य युक्तोऽभिमान इति । अत्रोच्यते --**तच्च स चे**त्यादि, तत्प्रवृत्त्यप्रवृत्त्योः सिद्ध्यसिद्ध्योश्च व्यभिचारदर्शनात् **तच्च** कार्यं घटादि **स च** कर्ता कुलालः **तानि च** कारकाणि दण्डादीनि **नियतेरेव प्रवर्तन्ते न वा,** तस्य चिकीर्षा कदाचिद् भवति कदाचिन्न, चिकीर्षुरप्यालस्यादिभिः प्रवर्तते न वा, प्रवृत्तोऽप्यकृत्वैव घटं विनिवर्ततेऽन्यद्वा करोति विघ्नो वास्य भवति । तथान्यकारकाण्यपि वाच्यानि, तच्च कार्यं कदाचित् सिध्यति कदाचिन्न, अन्यार्थप्रवृत्तावन्यत् सिध्येन्न वा सिध्येत् । **तथा च दृश्यन्ते क्रियाणां विपत्तयोऽप्रवृत्तयश्चे**ति लोकप्रसिद्धं व्यभिचारं दर्शयति । § 619 - /ms

**अतस्तत् कृतमपि** लोकप्रतीत्या **पूर्वनियतिस्थत्वादकृतं** पूर्वमेव नियत्या तथा स्थितत्वात् । **विनष्टमप्यविनष्टं तथा नियत्यो**त्तरकालं कपालादित्वेनाव**स्थितत्वात्** कपालादित्वेनैव घटस्य विनाशात् तन्त्वादित्वेनाविनाशात् । **एवं तु विनश्येदित्यादि, यदि प्रविशीर्णो** विशीर्य विशीर्यमाणो विशीर्णो वा **तां नियतिं** कपालादिक्रमापत्तिरूपघटविनाशां **नापद्यते** खरविषाणवदत्यन्ताभावीभवेन्न वा विनश्येद् घटत्वेनैव तिष्ठेत् । ततो

१ *] स्वेस्वविषयेnayacakra-ms-ya । स्वविषये nayacakra-ms-bhā ॥
१ ए] एकप्रष्य-हेनान्योन्यापेक्षेणnayacakra-ms-bhā । एकप्रप्याहनान्योन्यापेक्षेण nayacakra-ms-ya ॥
३ होद्धा] °द्धावमवृत्तानीतिnayacakra-ms-ya । °द्धावनवृत्तीनीति nayacakra-ms-bhā ॥
६ प] °पचिनिर्व°nayacakra-ms-bhā ॥
१० अ] अनुद्भ्द्व ?ताना° प्र° ॥
१३ त] तत्र यस्मिन् मिथ्या°nayacakra-ms-ya ॥
२६ त] नंत्वादित्तेविनाशात्nayacakra-ms-bhā । nayacakra-ms-ya प्रतिषु तु अयं पाठो नास्त्येव ॥

विनश्येत्, न त्वेवमस्ति । तस्मान्न विनाशः । लक्षणतो ह्यन्यथाता विनाशः, स च नियतेरलङ्घ्यत्वात् कपालाद्यवस्थानरूपायाः । एवमुत्पत्तिरपि । § 620
201/mj

प्रविशीर्णस्तां नियतिं नापद्यते । तथा चाम्रबीजाङ्कुरादीनां व्यवस्थावकाशक्रमेण व्यवस्थितपूर्वरूपा एव प्रवृत्तयस्तेषां तेषां मायाकारपताकिकावत्, यावदन्ते नियतिप्रवृत्तफलावस्थामनुभूय पुनर्बीजमेव, तस्मादपि बीजात् पुनरपि तथैव । अन्यथा च तथा तथा प्रादुर्भाववृत्तयो यवतिलभस्मादीनाम् । ताश्च पुरुषकारेणाप्यलङ्घ्याः । पाककालस्यापि नियतिदर्शनात् षष्टिकाः षष्टिरात्रेण पच्यन्ते...। § 621

एवं च व्यवस्थित एवार्थेऽव्यक्तस्यैवार्थस्य व्यक्तेः सर्वं नियतमेव । तस्य स्वव्यक्तेः सर्वकालं व्यवस्थितादर्थादन्यो मया कृत इति मिथ्याभिमान एषः । न तु नियतौ किञ्चिन्नास्ति । § 622

**तथा चाम्रबीजे**त्यादि, दृश्यन्त इति वर्तते । स्वया नियत्या लीनानां - /ms मूलाङ्कुरपत्रनालकाण्डशाखा- प्रशाखास्कन्धपुष्पादीनां व्यवस्थावकाशक्रमेण व्यवस्थितपूर्वरूपैव प्रवृत्तिः, रक्तश्यामादिवर्णानामाम्रफलस्य तुवराम्लषाडवादीनां च रसानां **तेषां तेषा**मिति अवस्थायामवस्थायां ये ये भवन्त्यन्येऽन्ये तेषां तेषां विद्यमानानामेव नियतानाम् । किमिव ? **मायाकारपताकिकावत्,** यथा मायाकारः पताकिका गुलिकादिरूपीकृत्य पूर्वग्रस्ताः क्रमेण स्ववदनान्निष्काशयति नानावर्णनानाकारास्तथेहाप्याम्रबीजे, **यावदन्ते नियतिप्रवृत्तफलावस्थामनुभूय पुनर्बीजमेव, तस्मादपि बीजात् पुनरपि तथैवे**त्यङ्कुरादिप्रवृत्तिं प्रागभिहितां दर्शयति । सेयं व्यवस्थिता नियतिसन्ततिरनाद्यनन्ता । § 623

स्यान्मतम्--ननु दग्धे बीजेऽङ्कुराद्यत्यन्ताप्रादुर्भावान्नियतिकृतप्रादुर्भावतिरोभावव्यभिचार इति । अत्रोच्यते--दाहनियत्युदयेऽपि सा प्रतिनियतैव, **अन्यथा च तथा दृश्यन्त** इति वर्तते, कास्ताः ? **तथा तथा प्रादुर्भाववृत्तयः,** केषाम् ? **यवतिलभस्मादीनाम्,** अन्यादृग् यवभस्म अन्यादृक् तिलभस्मेत्यत्रापि प्रादुर्भावतिरोभाववृत्तयो नियता एव । **ताश्च पुरुषकारेणाप्यलङ्घ्याः,**

---

१४ दृ] अवलोक्यतां पृ° २०° पं° ४ ॥
१५ काश] °शाक्रमेण प्र° ॥
२१ तिप्र] प्रवृत्तेत्तेः ?nayacakra-ms-bhā ॥
२६ अ] अन्यथान्यथा च दृश्यन्तnayacakra-ms-bhā ॥
२६ त] अवलोक्यतां पृ° २०° पं° ४ ॥
२८ कारेणाप्य] °प्युल्लंघ्याःnayacakra-ms-ya ॥

तत्त्वान्तरेण सिद्धाः पुरुषकारं चान्तरेण सिद्धाः । किं कारणम् ? **पाककाल-स्यापि नियतिदर्शनात् षष्टिकाः षष्टिरात्रेण पच्यन्त** इत्युदाहरणानि गतार्थानि देशकालकर्तृकरणादिनियत्यैव पाकादिदर्शनात् । § 624

एवं चेत्युपनयति, अनेनोक्तविधिना **व्यवस्थित एवार्थेऽव्यक्तस्यैवार्थस्य** तत्र **व्यक्तेः सर्वं नियतमेव** तत् तत् । **तस्य स्वव्यक्ते**र्व्यतिरेकमतेः पुरुष-स्य **सर्वकालं व्यवस्थितान्नियतादर्थादन्यो** मृद्द्रव्याद् घटो **मया कृत इति मिथ्याभिमान एष** षष्टिकादयो वा केदारादिसंस्कारविधिना पाचिता इति, - /ms यस्मान्न **तु नियतौ किञ्चिन्नास्ति,** सर्वं विद्यमानमेव तिरोभूतं क्रियया विना वा क्रिययाभिव्यज्यते कालादिनियत्यनुगृहीतम् । § 625

202/mj

कथमस्ति यदा भूम्यम्ब्वादेर्विना न भवति केवलाया एव बीजनियतेराम्रफलपाकादि ? कालातपवातादिभ्यः पाकः, भूमिखननादिभ्यः फलादीनामप्राप्तेऽपि काले पाकदर्शनात्, काले चापि न भवति पाको द्रव्यान्तरसंयोगस्तम्भनादिभ्यः । अन्यच्च, तथा तथा ज्ञातुरिच्छानुविधानेन वस्तुनियतिमतीत्य पुष्पादीनां वर्णसंस्थानादिवैपरीत्यम् । योनिप्राभृतादिभ्यश्चान्यथैव सर्वयोन्युत्पत्तय इति नियमाभावः । नियमाभावात् कृतकत्वानित्यत्वाभ्यां नियत्यभाव इति । § 626

न, तथानियतित्वात् । बीजादिनियतिरेव हि उदकादिषु वर्तते, तन्नियमानु- § 627

अत्राह --**कथमस्ती**त्यादि याव**न्नियत्यभाव इति** । यदुक्तं त्वया नियतौ सर्वमस्ति इति तत् कथमस्ति **यदा भूम्यम्ब्वादेर्विना न भवति केवलाया एव बीजनियतेराम्रफलपाकादि ?** रूपरसगन्धस्पर्शसङ्ख्यासंस्थानानि **आदि**ग्रहणात् । भूमिरम्बु वायुरातपः काल इत्येतानि भूम्यम्ब्वादीनि, तद् व्याचष्टे --**कालातपवातादिभ्यः पाकः,** तस्माद् भूम्यम्बुकालवातातपाद्यपेक्षत्वान्न बीजनियतावस्त्यङ्कुरादि तत्फलपाकादि चेति । तथा अकालेऽपि काल-

---

१ रेण ] °णासि-द्धाःnayacakra-ms-pānayacakra-ms-ḍe nayacakra-ms-līṃ । nayacakra-ms-bhā प्रतौ तु तत्त्वान्तरेण सिद्धाः इति पाठो नास्त्येव ॥ ५ व्य ] °क्तेर्व्यतिरेकम-तिःnayacakra-ms-bhānayacakra-ms-vinayacakra-ms-ramnayacakra-ms-hī । °क्तेर्व्यतिरिकमतिः nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ ॥ ६ का ] °कालेnayacakra-ms-pā ॥ ८ तिरोभूतं ] क्रियया विना वाnayacakra-ms-ya प्रतिषु नास्ति ॥ २३ भू ] भूम्यादीनिnayacakra-ms-bhā ॥ २५ पाकादि ] चेत् प्र° ॥

नियतेर्व्यभिचारो दृश्यते **भूमिखननादिभ्यः फलादीनामप्राप्तेऽपि काले पाकदर्शनात्, आदि**ग्रहणात् कोद्रवपलालवेष्टनव्रणकरणादिभिः । **काले चापी**ति प्राप्तेऽपि पाककाले **न भवति पाको द्रव्यान्तरसंयोगेन स्तम्भितानाम्,** यथा शाखायां बद्धायां **वृक्षायुर्वेद**विधानेन द्रव्यान्तरसंयोगेनैव द्रावणाद्वा सहकारतैलग्रहणार्थं कोमलस्य प्राप्तगन्धावस्थस्य द्रवीभावात् तैलत्वेन, **आदि**ग्रहणात् पक्षिखशरीटादिसत्कभक्षणात् । **अन्यच्चे**त्यादि, न केवलमात्मस्वरूपापरित्यागेनैव पाकाभावः, किं तर्हि ? **अन्यच्च तथा तथा,** यथा यथा पुरुषो ज्ञाता स्वयमिच्छति तथा तथा तस्य **ज्ञातुरिच्छानुविधानेन वस्तुनियतिमतीत्य पुष्पादीनां वर्णसंस्थानादिवैपरीत्यम्,** यथोत्पलस्य पार्श्वे रक्तता पार्श्वे नीलता, मातुलिङ्गफलस्य रक्ततादिवर्णता तद्वासितबीजस्य, तथा कूष्माण्डफलस्य घटवर्धितस्य घटाकारता । **योनिप्राभृतादिभ्यश्चान्यथैव स-** - /ms **र्वयोन्युत्पत्तयः,** द्विविधा योनिर्योनिप्राभृतेऽभिहिता--सचित्ता अचित्ता च । तत्र सचित्तयोनिद्रव्याणि संयोज्य भूमौ निखाते दन्तरहितमनुष्यसर्पादिजात्युत्पत्तिः । अचित्तयोनिद्रव्ययोगे च यथाविधि सुवर्णरजतमुक्ताप्रवालाद्युत्पत्तिरिति । **इति नियमाभावः,** इत्थं काले चापाकादकाले च पाकादर्थान्तरापेक्षत्वात् पुरुषेच्छायत्नानुविधानाच्च नियमाभावः, **नियमाभावात् कृतकत्वं** पाकादेः, कृतकत्वा**च्चानित्यत्वम्,** अभूत्वा भावो भूत्वा चाभाव इत्यर्थः । ताभ्यां च **नियत्यभावः । इति** परिसमाप्त्यर्थः । एष पूर्वपक्षः । § 628

अत्रोच्यते **--न तथानियतित्वात्** यथोक्तं त्वया सापेक्षनियतित्वात् कालाप्रवृत्तिनियतित्वादकालप्रवृत्तिनियतित्वाच्च नियत्यभावः, तद्दर्शयति -- 203/mj **बीजादिनियतिरेव ही**त्यादि, **हि**शब्दो यस्मादर्थे, यस्मात्

* * *

रोधेन हि तेषां सर्वेषां नियता प्रवृत्तिः । तथा ह्याह--सभावकं निर्भावकं वोदकं पतितमिति । यदा हि बीजनियतिरभि तदा तस्या देश उदकस्थ एव अङ्कुरोद्भावने प्रवर्तमानः सभावक इत्युच्यते, तद्भावांशापेक्षयोदकमपि सभावकमित्युच्यते, अन्यदा तु विपर्ययः । एवं भूमिवायुकालप्रभृतिष्वपि सभावकाभावकत्वे ।

पुरुषो व्यग्रोऽव्यग्र इत्यादि नियतेरेव । करणादीनां क्षमत्वाक्षमत्वसान्निध्या-

---

४ शा ] शाखायां चाद्धायांnayacakra-ms-bhā । शाखायां चाद्वयां nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi । शाखायां बाम्रयां nayacakra-ms-raṃ nayacakra-ms-hī ॥
९ य ] यथोलस्य प्र° ॥
१६ त्वानुविधानाच्च ] नियमाभावःnayacakra-ms-bhā प्रतौ नास्ति ॥
१९ था ] °नियतत्वात्nayacakra-ms-bhā ॥
१९ सा ] सापेक्षं प्र° ॥
२० तित्वाच्च ] नियत्याः भावःnayacakra-ms-bhā । नियत्या भावः nayacakra-ms-ya ॥

* * *

सैव हि बीजादिनियतिरेकैव **उदकादिषु वर्तते,** काले वायावातपे पुरुषे तदिच्छाप्रयत्नयोश्च वर्तते, **आदि**ग्रहणादुदकादिनियतिश्च बीजादिषु वर्ततेऽन्योन्यव्यतिहारेण, **तन्नियमानुरोधेन हि** परस्परनियमानुरोधेन, **हि**शब्दो यस्मादर्थे, यस्मादेवंरूपा तेषां सर्वेषां नियतिस्तस्मात् **तेषां सर्वेषा**मितरेतरनियत्या ***नियता प्रवृत्ति**रन्योन्याविनाभावात् तथैव प्रवर्तन्त इत्यर्थः ।

§ 629

**तथा ह्याहे**ति लोकसिद्धं ज्ञापकं दर्शयति । सह भावेन वर्तत इति **सभावकम्,** निर्गतो भावोऽस्मादिति **निर्भावकम्,** किं तत् ? **उदकं पतितमिति** । तद्भावना --**यदा हि बीजनियतिरभि** अङ्कुराभिव्यक्तेर्यदाभिमुखीभूता बीजनियतिर्भवति **तदा तस्या** नियतेर्**देशों**ऽशो भागोऽवयवः स **उदकस्थ एव** सन्नङ्कुरोद्भावने **प्रवर्तमानः सभावक इत्युच्यते, तद्भावांशापेक्षया उदकमपि सभावकमित्युच्यते** भेदविवक्षायां बहुव्रीहिसमासाश्रयणात् मतुब्लोपाद्वा - /ms
अभेदोपचाराच्च भाव एवोदकमिति । स च भावोऽङ्कुरादिर्वनस्पत्यौषध्यादेः, मतुप्प्रत्ययनिर्देशोऽपि भेदेनोपपद्यते, तद्यथा--अस्ति अस्मिन्नस्य वा भावोङ्कुरस्तस्मिन्नुदके तस्मात् तत् सभावकमिति । **अन्यदा तु विपर्ययः,** क्षाराम्लाद्युदकेऽङ्कुरादयो न सन्तीति नियतत्वाद् विपर्ययः, तस्मादभावकमुच्यते तज्जलमिति । § 630

एवं **भूमिवायुकालप्रभृतिष्वपि सभावकाभावकत्वे** । उषरभूमावभावः सस्यादेः, पादसौकुमार्यादेर्भावः, सुकृष्टे केदारादौ वा सर्वबीजानामङ्कुरादिभावः । पूर्ववायावभावोऽङ्कुरादेः, भावस्तु महिषीकर्पासप्रसूत्यादेः; अन्यस्य पुष्पादेरन्यस्य फलादेर्मनुष्याणां च पूर्ववायावभावः, तद्यथोक्तम्—

दिवास्वप्नमवश्यायं प्राग्वातं चात्र वर्जयेत् । § 632

सस्यानामुत्तरे वायौ न भावः, प्रावृष्युप्तानां भावः, वैशाखादिष्वभावः । **प्रभृति**ग्रहणेन आतपेऽतिमृदावतितीक्ष्णे चाभावः, समे भावः, आतपाभावेऽप्यभाव एवेति । एवं तावदबुद्धिप्रवृत्तेषु कालाङ्कुरादिष्वचेतनेषु नियतिरुक्ता । § 633

बुद्धिमत्स्वपि नियतिरेव । यदुक्तं प्राक् त्वया **पुरुषस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिवैपरीत्यम्** इति तन्नोपपद्यते, तत्रापि नियतेरेव कारणत्वात् । कुतः ? **पुरुषो व्यग्रोऽव्यग्र इति नियतेरेव** यतो भवति, साप्यापेक्षिकी

---

६ *] नियत्यप्रवृत्ति° प्र° ॥
१० तिर] °रति प्र° ॥
१० दा] °दाभितुररीभूता प्र° ॥
१२ रोद्भा] °द्भावेन प्र° ॥
१५ निर्देशोऽपि] भेदनोप° प्र° ॥

२३ चा] वात्र प्र° । क्षारं दधि दिवास्वप्नं प्राग्वातं चात्र वर्जयेत् । इति चरकसंहितायाम् १ । ७ । ४५ ॥
२८ प्रा] दृश्यतां पृ° २०२ पं° ४ ॥

तादृशी नियतिरेव । **आदि**ग्रहणात् कुशलोऽकुशलः पुरुष इत्याद्यपि नियतेरेवेति । एवमप्रयुक्तेषु स्वातन्त्र्यादेव परनियोगानपेक्षप्रवृत्तिषु नियतिः ।
204/mj प्रयुक्तेष्वपि नियतिरेव, **करणादीनां**

* * *

सान्निध्यादेरङ्कुराद्युत्पत्त्यनुत्पत्त्योर्नियतिरेव कारणम् । एतेन पाकादिदोषाः प्रत्युक्ताः ।

सर्वज्ञोऽपि च तामेवाखिलामनादिमध्यान्तां स्वरूपेणाविपरिणामां वस्तुनियतिमेकामनेकरूपां बन्धमोक्षप्रक्रियानियतिसूक्ष्मां पश्यन् नियतेरेव भवतीति ।

* * *

- /ms करणाधिकरणकर्तृकर्मसम्प्रदानापादानानां **क्षमत्वं** तत्क्रियासाधनसमर्थत्वम-**क्षमत्व**मसमर्थत्वम्, यथोक्तम् --एतत् **परशोः सामर्थ्यं यन्न तृणेन** पा॰उद्यमननिपातनानि कर्तुश्छिदिक्रिया पा॰ वा॰ । उद्यमननिपातनानि कुर्वन्नेव देवदत्तश्छिनत्तीत्युच्यते । तत्र तदा छिदिर्वर्तते । एष प्रधानकर्तुश्छेदः । एतत् प्रधानकर्तुः कर्तृत्वम् । यन्न तृणेन तत् परशोश्छेदनम् पा॰ वा॰ । यत् तत् समाने उद्यमने निपातने च परशुना छिद्यते, न तृणेन, तत् परशोश्छेदनम् । अवश्यं चैतदेवं विज्ञेयम् । इतरथा ह्यसितृणयोश्छेदनेऽविशेषः स्यात् पा॰ वा॰ । यो हि मन्यते उद्यमननिपातनादेवैतद् भवति च्छिनत्तीति, असितृणयोश्छेदने न तस्य विशेषः स्यात्, यदसिना छिद्यते तृणेनापि तच्छिद्येत । इति पाणिनीयव्याकरणे कात्यायनविरचितवार्तिकोपरि पातञ्जलमहाभाष्ये १ । ४ । २३ ॥ वा॰ १ । ४ । २३ इत्यादि । तेषामेव **सान्निध्यं** कर्त्रा प्राप्तिः, **असान्निध्य**मप्राप्तिः । **आदि**ग्रहणात् प्राप्तानामपि करणादीनामन्तरे विघ्ना इत्येवमादेः कारणादङ्कुराद्युत्पत्त्यनुत्पत्त्योर्नियतिरेव कारणं तथानियतत्वादिति । **एतेन पाकादिदोषाः प्रत्युक्ताः** प्रतिषिद्धाः, यदुक्तं त्वया काले न पाकोऽकाले पाक इत्यादयो दोषा इति तदपि **तथानियतित्वात्** इत्येतेनैव न दोषाय कालाकालयोरपाकेन पाकेन च तेषां तेषां भावानां नियतत्वात् सैव नियतिस्तथा तथा नियतं भवतीति । § 634

किञ्चायत्, **सर्वज्ञोऽपि चेत्यादि** । यदपि च सम्यग्दर्शनज्ञानचारित्रतपोभिर्ज्ञानावरणाद्यशेषकर्मक्षयात् केवलज्ञानप्राप्तिः सार्वज्ञ्यं पौरुषेण इति मन्यसे तदपि मा मंस्था नियतिमन्तरेणेति । कथं तर्हि मन्तव्यम् ? सार्वज्ञ्यं नियतेरेव भवतीति, **तामेवासौ** नियति**मखिलां पश्यन्** सर्वज्ञो भवतीति तयैव च नियत्या नान्यथेति । स हि भव्याभव्यसिद्धादिभेदेषु पुरुषेषु गतिस्थित्यवगाहवर्तनारूपरसादिशरीरवाङ्मनःप्राणादिपरिणतिरूपामस-

२३ य ] दृश्यतां पृ॰ २०२ पं॰ २ ॥
२४ त ] दृश्यतां पृ॰ २०२ पं॰ ७ ॥
२६ तिस्त ] ॰स्तथा नियतं nayacakra-ms-bhā ॥
३१ सिद्धा ] ॰दिविभागेषुnayacakra-ms-bhā ॥
३२ गा ] ॰गाहे प्र॰ ॥
३२ वाङ्म ] ॰मनसःप्रा॰ प्र॰ ।

ङ्कीर्णा**मनादिमध्यान्तां** कालत्रयेऽपि अनुत्पत्तिमविनाशां स्वेन रूपेणा**विप-रिणामां** लोकस्थित्यनतिक्रमेणाप्रच्युतस्वरूपां **वस्तुनियतिं** बीजादिनियताङ्कुरादिवस्त्वात्मिका**मेकां** सर्वभेदेष्वभिन्ना**मनेकरूपां** तेषु तेषु भेदेषु तद्रूप- - /ms
नियतित्वादनेकां **बन्धमोक्षप्रक्रियानियतिसूक्ष्मां** जीवकर्मणोरनाद्येन सम्बन्धेन सम्बद्धयोः कार्यकारणभूतैर्मिथ्यादर्शनादिभिर्नियतिवशात् सन्तत्यानाद्यो बन्धो भव्येषु बन्धोद्वर्तनसमर्थसम्यग्दर्शनादिभावनियतिविवर्ताद् मोक्षहेतोरमूर्तस्वभावस्य ज्ञानदर्शनवीर्यसुखादिस्वात्मनः स्वात्मनि अवस्थानं मोक्ष इत्येतां बन्ध-बन्धक-बन्धनीय-बन्धविधानाद्यनेकभेदप्रभेदां बन्धप्रक्रियां व्रतसमितिगुप्तिधर्मा 205/mj

* * *

एवं तर्हि त्वदुक्तभावनयैव युगपदयुगपन्नियतार्थवृत्तेः काल एव भवतीति भावितं भवति । इह युगपदवस्थायिनो घटरूपादयो न केचिदपि वस्तुप्रविभक्तितो युगपद्वृत्तिप्रख्यानात्मकं कालमन्तरेण । एवं घटो ग्रीवादयस्तथावृत्तेस्तथाभवनात्, मृल्लोष्टादयः, पृथिवी मृदादयः, द्रव्यं पृथिव्यादयः, द्रव्यादयो भावः । अयुगपद्वा-

* * *

नुप्रेक्षापरीषहजयचारित्रसंवरां द्वादशविधतपोऽनुष्ठाननिर्जरां क्षेत्रकालगतिलिङ्गतीर्थप्रत्येकबुद्धबुद्धबोधितज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वाद्युपायव्याख्येयां कृत्स्नकर्मक्षयाव्याबाधात्यन्तैकान्तसुखात्मिकां च मोक्षप्रक्रियां परमसूक्ष्मां पश्यन्ननन्तकालमव्याबाधसुखं तिष्ठति । एषा च बन्धमोक्षप्रक्रिया दिङ्मात्रमुपदर्शिता अतिसूक्ष्मत्वाद् बहुवक्तव्यत्वाच्च नात्र परीक्षाकाले शक्या वक्तुम् । यथोक्तम्—

लोगम्मि जीवचिंता सव्वागमकाको ?सिया दुरोगाहा ।
तत्तो वि कोसियतरी चिंता बंधे य मोक्खे य ॥ § 637

**इति** परिसमाप्त्यर्थः, इत्थं नियतिवादः परिसमाप्तः । § 638

अपरो द्रव्यार्थो विधिविधिनयविकल्प आह--नायमपि नियतिवादः परितोषकरः, **एवं तर्हीत्यादि** । येयमुक्ता ज्ञाज्ञं स्वतन्त्रास्वतन्त्रं वा न ज्ञमेव - /ms

---

गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः । १७ । आकाशस्यावगाहः । १८ । शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् । १९ । सुखदुःखजीवितमरणोपग्रहाश्च । २० । परस्परोपग्रहो जीवानाम् । २१ । वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य । २२ । स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । २३ । इति तत्त्वार्थाधिगमसूत्रे पञ्चमाध्याये ॥
८ व्र] हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् । ७ । १ । आस्रवनिरोधः संवरः । ९ । १ । स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः । ९ । २ । तपसा निर्जरा च । ९ । ३ । क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबुद्धबोधितज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वतः साध्याः । १० । ७ । कृत्स्नकर्मक्षयो मोक्षः । १० । ३ । इति तत्त्वार्थाधिगमसूत्रे ॥
२२ का] °**कासिया** प्र° ॥
२३ य] **मुक्खे**nayacakra-ms-ya ॥

भवितुमर्हति, किं तर्हि ? नियत्यैव युगपदयुगपच्चानेकधा क्रियादिकार्यकारणभावनियतमेतत् इति भावनाऽनयैव त्वयोक्तया **युगपदयुगपन्नियतरूपादिबीजाङ्कुराद्यर्थेष्टेर्न** नियतिरेव भवति, किं तर्हि ? **काल एव भवतीति भावितं भवति, अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि** वै० सू० २ । २ । ६ इति वचनाद् युगपदयुगपन्नियतार्थानां वृत्तेर्भवनार्थत्वाद् वर्तनस्य काललक्षणत्वादिति । तद्भावनार्थमाह **--इह युगपदवस्थायिनो घटरूपादयः,** ते किं परस्परप्रविभक्तितः स्वेनैव भवन्ति उत कालसामर्थ्यात् ? इति । वस्तुरूपेण तावच्चिन्त्यते--तत्र तावन्न **केचिदपि वस्तुप्रविभक्तितो** भवन्तीति वाक्यशेषः, रूपरसगन्धस्पर्शशब्देभ्यः प्रविभक्त्या प्रविभागेन तद्रूपेण प्रविभक्तितो वा कारणान्न भवति तैः सहोपलभ्यमानमपि तद्व्यतिरेकेणाभावात् । भिन्नेन्द्रियग्राह्यत्वादेव च ते[षाम्] ऐक्याभावाद् यौगपद्यं नानात्वं च सिद्धम्, न ह्यभिन्नस्य यौगपद्यम्, युगस्य स्कन्धयोः पतनं युगपदेवमन्यत्रापि अनेकाश्रयं यौगपद्यम्, अतो रूपादयो युगपद् वर्तन्त इत्येषा वृत्तिप्रख्यातिर्दृष्टा अर्थतः । शब्दतोऽपि च वर्तनं कलनं सङ्ख्यानं प्रथनं बुद्ध्या शब्देन वा निरूपणमिति वृत्तिरेव । तस्मात् कलनं काल इत्यक्षरार्थानुसारेण वर्तनं कालः, तं **कालात्मानं युगपद्वृत्तिप्रख्यानात्मकमन्तरेण** न ते केचिद्रूपादयो युगपद् भवितुमर्हन्ति, तस्माद् रूपादयो युगपदित्येतत् कालसामर्थ्यात् । एवं सूक्ष्मा रूपादय उक्ताः । स्थूला अप्येवं **घटो ग्रीवादयः, तथावृत्तेर्युगपद्वृत्तेः,** कस्य ? कालात्मन एव । वृत्तिश्च भवनमित्यत आह **--तथाभवनादिति** । **मृल्लोष्टादयः,** मृदिति लोष्टादय एव युगपद्वृत्तेः । **पृथिवी**
206/mj **मृदादय**

* * *

विनोऽपि भवितुकामस्य वर्तनादतिरिक्तस्य कस्यचिदप्यनुपपत्त्यापत्तेः कालात्मकता ।

नियतेस्तु सर्वात्मकत्वात् सर्वाकारता स्यात् सदा सर्वस्य, कालाभावेऽतीतानागतवर्तमानाविशेषात् । अपि च तथापि नैव कालातिक्रमः । इति स्वीक्षितमपि

* * *

- /ms एव तथावृत्तेः, एवं मृल्लोष्टवज्राश्मसिकतादयः । एवं **द्रव्यं पृथिव्यादयः,** पृथिव्यप्तेजोवाय्वाकाशादयो युगपद्वृत्तयो द्रव्यम् । **द्रव्यादयो भावः,** द्रव्यगुणकर्मणां सप्रभेदानां भाव इत्याख्या युगपद् भवनात् । एवं तावद्

---

५ वृ] वृत्तिर्भ°nayacakra-ms-ya ॥
६ ल] °लक्षत्वा° प्र° ॥
७ स्प] °स्परं प्रवि° nayacakra-ms-ya ॥
११ च] च ते ऐक्या°nayacakra-ms-ya । च ने ऐक्या° nayacakra-ms-bhā ॥
१६ का] दृश्यतां पृ० १५८--१ ॥
२० ए] एवंnayacakra-ms-bhānayacakra-ms-raṃnayacak ॥

युगपद्वृत्तिः काल एव भवतीति भावितम् । § 639

क्रमवृत्तिनियतिरपि काल एव भवतीति भाव्यते, तत आह --**अयुगपद्भाविनोऽपीत्यादि यावदापत्तेः** । अयुगपद् भवितुं शीलमस्येत्ययुगपद्भावि, तस्यायुगपद्भाविनो **भवितुकामस्य** भवनाभिमुखस्य **बीजाङ्कुरादेर्वस्तुनो** यदि वृत्त्यात्मककालभावो नाभ्युपगम्यते ततो **वर्तनादतिरिक्तस्य कस्यचिदप्यनुपपत्तिरापद्यते** वर्तनाभावाद् वन्ध्यासुतवत् । ततश्चा**नुपपत्त्यापत्तेः** सति च वर्तनात्मके काले तदुपपत्तेः **कालात्मकता** । एवं तावन्नियतार्थाभ्युपगमः कालमन्तरेण न भवतीति युगपदयुगपद्वृत्त्यात्मकः काल एव भवतीत्युक्तम् । § 640

इदानीं नियतिवादिनो दोषोऽभिधीयते --**नियतेस्त्वि**त्यादि यावत् **सदा सर्वस्य** । य उक्तस्त्वया स्वभाववादिनं प्रति बाल्यकौमारयौवनमध्यमाद्यवस्था युगपत् स्युः सर्वाकारस्वभावत्वाद्देवदत्तादेः, अङ्कुरपत्रकाण्डाद्यवस्थाश्च युगपत् स्युर्व्रीह्यादेः इत्युपालम्भः स एव नियतेः सर्वात्मकत्वात् कस्मात् सर्वाकारनियतैव न भवति इति स्वभावोपालम्भवन्नियत्युपालम्भोऽपि त्वामपि प्रति नियतिवादिनं समानः, **सदा** सर्वकालं **सर्वस्य** वस्तुनस्तस्य तस्येति, **कालाभावेऽतीतानागतवर्तमानाविशेषात्,** दृष्टा चातीतानागतानाकारता वर्तमानाकारता च, वृत्त्यात्मककालाभावाद् नियतेश्चाविशेषादतीतानागतानाकारतावद् वर्तमानानाकारता स्यात् वर्तमानाकारतावदतीतानागताकारतापि स्यात्, न च दृष्टा अतीतानागताकारता वर्तमानानाकारता वा । § 641

स्यान्मतम्--अतीतानागताकारता वर्तमानाकारतावद् नियतौ विद्यमानैव - /ms तिरोभूतत्वान्नोपलभ्यते, वर्तमानाकारता त्वाविर्भूतत्वादुपलभ्यत इत्युक्तत्वादनुत्तरमिति । अत्रोच्यते --**अपि च तथापि नैव कालातिक्रम** इति । एवमपि त्र्याकारताया युगपद्वृत्तायाः क्रमेणाविर्भावतिरोभावावतीतमनागतमिति *चैतत् सर्वं कालवाचिशब्दार्थसामर्थ्यप्रतिपादितं कलनं वर्तनं भवनमन्तरेण न स्यात्, अतः कालस्यानतिक्रमणीयता । § 642

सप्ताहं कललं भवति, ततः सप्ताहमर्बुदम्, एवं पेशी घनम् इत्येवमादिक्रमेण गर्भादिषु पूर्वोक्तावस्थानां पूर्वस्या (Edtext outside numbered paragraph) अनन्तरावस्था अभिव्यज्यत इत्यनयैव नियताभिव्यक्त्या कालमभ्युपगतमपि **नियतिमात्रग्राहदोषेण** स्वपक्षरागाद्या (Edtext

४ द्भा] °द्भाविनो भाविनो भवितु°nayacakra-ms-bhānayacakra-ms-vi ॥

६ स] सति वर्त°nayacakra-ms-ya ॥

८ प] °पद्यावृत्त्या°nayacakra-ms-bhā । अत्र °पद्वा वृत्त्या° इत्यपि पाठः स्यात् ॥

११ य] यत उक्त° प्र° ॥

[illegible] पं° ४ ॥

१७ चातीतानाग] °गताकारता प्र° ॥

२३ त्वाद] °दनन्तरमिति ? ॥

२५ *] चेत्तत्nayacakra-ms-ḍenayacakra-ms-līṃ ॥

outside numbered paragraph)निच्छता त्वया आत्मा तेभ्यो गुणवत्कालपक्षपातकृतगुणेभ्योऽपनीयते । मा भूद् ग्रा (Edtext outside numbered paragraph)ह इत्युक्तेऽतिनिष्ठुरत्वाच्चित्तपीडेति ग्राहवद् ग्राह इति प्राग्व्याख्यातगौणशब्देनोच्यते । अथवा ग्राहोऽभिप्रायः, ग्राहयतीति ग्राहः, तस्याभिप्रायस्य दोषेण स्ववचनाभ्युपगतमपि कालमपश्यन् कालतत्त्ववादित्वावाप्ययशोधर्मादिगुणगणादात्मानमपनयसि । § 643

**इति स्वीक्षितमपीत्यादि** । एतेन प्रकारेण सुष्ठु परीक्षितमपि कालादृते नान्यत् कारणमवस्थानां बाल्यादीनामङ्कुरादीनां च क्रमेणावस्थापकं रूपादीनां वा युगपदवस्थापकमालक्ष्यते । तस्मात्त्वया

नियतानन्तरव्यक्त्यैवाभ्युपगतमपि कालं नियतिमात्रग्राहदोषेणानिच्छता त्वया आत्मा गुणवत्कालपक्षपातकृतगुणेभ्योऽपनीयते ।

यदि नियतिकृतैवार्थानां प्रवृत्तिः, इदं पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते सर्वेषां बीजादौ नियतेः सन्निहितत्वात् ।

नियतेरेवेति चेत्, न, आनर्थक्यात् । किमिह पूर्वादिभिः ? एवमादिविकल्प-

* * *

207/mj न्तरव्यक्त्यैवाभ्युपगतः कालः,**नियतान**

* * *

नियतानन्तरव्यक्त्यैवाभ्युपगतमपि कालं नियतिमात्रग्राहदोषेणानिच्छता त्वया आत्मा गुणवत्कालपक्षपातकृतगुणेभ्योऽपनीयते ।

यदि नियतिकृतैवार्थानां प्रवृत्तिः, इदं पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते सर्वेषां बीजादौ नियतेः सन्निहितत्वात् ।

नियतेरेवेति चेत्, न, आनर्थक्यात् । किमिह पूर्वादिभिः ? एवमादिविकल्प-

* * *

न्तरव्यक्त्यैवाभ्युपगतः कालः,

**यदि नियतिकृतेत्यादि** यावद् **न युज्यते** । नैवमभ्युपगन्तुं शक्यं **नियतिकृतैवार्थानां प्रवृत्तिरि**ति, अनन्तराभिहितदोषसम्बन्धात् कालकृतत्वस्योक्त-
- /ms त्वाच्च । अभ्युपेत्यापि नियतिकृतत्वं दोषं ब्रूमः --**इदं पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते,** पूर्वादयः कालत्रयवाचिनः, युगपत् इत्यभिन्नकालवाची शब्दः, तत्तु कालमन्तरेण लोकप्रसिद्धं व्यवहारजातं न युज्यते । कारणान्तरमप्याह --**सर्वेषां** *तेषां तेषां **बीजादौ नियतेः सन्निहितत्वात्,** बीजे मूलाङ्कुरपत्रनालादीनां नियतेः सन्निहितत्वात् शुक्रशोणिताव-

२ ण] ॰णवस्थानां प्र॰ ॥
२१ का] कालत्वस्योक्तत्वावचnayacakra-ms-ya । कालत्वास्योक्तत्वावच्च nayacakra-ms-bhā ॥
२५ *] तेषां बीजादौnayacakra-ms-ya ॥

स्थायामेव कललार्बुदगर्भार्भकादीनां नियतेः सन्निहितत्वात् पूर्वादिक्रमवृत्तिता युगपद्वृत्तिता वेति न युज्यते । § 644

किञ्चान्यत्, **सर्वसङ्ग्रहेणैव वा,** यत् [कारण तत्] पूर्वम्, यत् कार्यं तत् (Edtext outside numbered paragraph)पश्चात्, क्रमवर्तिनां भावानां कारणकार्यत्वेन सङ्ग्रहात् पूर्वापरयोः कारणकार्यत्वा (Edtext outside numbered paragraph)त् कालत्वाच्च काल एव भवतीति । एतस्य **क्रमव्यवहारस्य सिद्ध्यर्थं** त्वयानुक्रमार्थं पुरुषं स्वभावमन्यद्वा कारणं तत्कार्यं चाश्रित्याप्यवश्यं **पूर्वादय आश्रयणीया एव,** नियत्यादिमात्रेण पूर्वाद्यनपेक्षेण व्यवहारा (Edtext outside numbered paragraph)सिद्धेः । **नियतेरेवासिद्धेर्व्यवहारासिद्धिरन्यथे**ति, पूर्वादिभिर्विना बीजादीनामनियतत्वात् स्वभाववद् नियत्य (Edtext outside numbered paragraph)भावः, नियत्यभावाद् व्यवहारासिद्धिरिति । मम पुनः कालवादिनः **पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते ?** सिध्यत्येव नियत्या विनापि क्रमव्यवहारः पूर्वादिभिरेव कृतत्वादित्यर्थः । § 645

**नियतेरेवेति चेत्, न, आनर्थक्यात् ।** स्यान्मतम्--एतदपि नियतेरेव युगपद्वर्तनं पूर्वादिक्रमवर्तनं चेत्यादि, **एव**कारात् कालादिनिराकरणम् । **ने**ति, एतच्चायुक्तम्, **नैरर्थक्यात्,** नियतेः पूर्वादीनां वा नैरर्थक्यात् । यदि नियतिरेव कारणं पूर्वं पश्चादिदानीं युगपदिति कालवाचिशब्दोपादानं तदर्थाश्रयणं चानर्थकम्, तदर्थाभावे सति नियत्यैव कृतप्रयोजनत्वात् । तदुपादाने वा नियत्यानर्थक्यम् । इह तु नियत्यानर्थक्यमेवेति मन्यस्व, कालं प्रत्येकार्थव्यापारार्थानां पूर्वादीनामवश्याभ्युपगम्यत्वात् तैरेव च कृतप्रयोजनत्वात् किं नियत्या प्रयोजनम् ? **किमिह पूर्वादिभिः ?** इत्याद्यक्षरैर्भावितार्थत्वाद् यदर्थं नियतिरुपादीयेत तन्नास्तीत्यभिप्रायः, तत्तु पूर्वादिभिः कृतमेव, यत् पूर्वं तद् बीजादि यत् पश्चात् तदङ्कुरादि इत्येतयोः पूर्वापरशब्दयोः क्रमात्मकालवाचित्वादिति । तन्निदर्शयति

व्यवहारेषु काल एव भवतीति भावितं सर्वसङ्ग्रहेणैव वा । क्रमव्यवहारसिद्ध्यर्थं पूर्वादय आश्रयणीया एव, नियतेरेवासिद्धेर्व्यवहारासिद्धिरन्यथा,

१ ग] ॰गर्भाभेकादीनां प्र॰ ॥
४ कालादिनिराक] ॰रणं नेतिnayacakra-ms-ya । nayacakra-ms-bhā प्रतौ तु एतच्चिह्नान्तर्गतः पाठो नास्ति । अत्र कालादिनिराकरणं चेति, एतच्चायुक्तम् इत्यपि पाठः स्यात् ॥
६ प] ॰दित्या[दि ?]काल॰nayacakra-ms-bhā । दित्यकाल॰ nayacakra-ms-raṃ nayacakra-ms-hī । ॰दित्यत्काल॰ nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
८ का] कालप्रत्येकालवृत्त्ये ?कार्थ॰ प्र॰ ॥
९ त्वात्] तैरेव कृत॰nayacakra-ms-ya ॥
१२ पू] पूर्वपर॰ प्र॰ ॥

पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते ?

**त्वन्न्यायेन तु विदुषां हिताहितप्राप्तिपरिहारार्थावाचारोपदेशावनर्थकौ स्यातां चक्षूरूपग्रहणनियतिवत्, अयत्नत एव तथासिद्धेः । यत्नोऽपि नियतित एवेति चेत्, ततः सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानर्थक्याल्लोकागमविरोधौ**

* * *

208/mj भवतीति भावितम् ।--**एवमादिविकल्पव्यवहारेषु काल एव**

* * *

व्यवहारेषु काल एव भवतीति भावितं सर्वसङ्ग्रहेणैव वा । क्रमव्यवहारसिद्ध्यर्थं पूर्वादय आश्रयणीया एव, नियतेरेवासिद्धेर्व्यवहारासिद्धिरन्यथा, पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते ?

त्वन्न्यायेन तु विदुषां हिताहितप्राप्तिपरिहारार्थावाचारोपदेशावनर्थकौ स्यातां चक्षूरूपग्रहणनियतिवत्, अयत्नत एव तथासिद्धेः । यत्नोऽपि नियतित एवेति चेत्, ततः सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानर्थक्याल्लोकागमविरोधौ

* * *

भवतीति भावितम् ।

किञ्चान्यत्, नियतिवादे **त्वन्न्यायेन तु** त्वदीयेनैव न्यायेन **विदुषां हिताहिते**त्यादि, हितप्राप्त्यर्थ आचारो लौकिकः कृषिवाणिज्यसेवादिरोदनपचनभोजनादिश्च दृष्टार्थः, तदुपदेशश्च एतत् कुरु, इदं ते श्रेयः इति । लोकोत्तरश्चादृष्टार्थो यमनियमादिः । अहितप्रतिषेधार्थश्च लौकिकः क्षारविषकण्टकाग्निशस्त्रादिपरिहारार्थः, तदुपदेशश्च बालादीनां मा कार्षीः इति । लोकोत्तरश्चादृष्टार्थो हिंसानृतस्तेयाब्रह्मादिभ्यो विरतिः श्रेयसीति । तावेता**वाचारोपदेशावनर्थकौ स्याताम्**, नियत्यैव यद्यवश्यम्भावी अर्थोऽनर्थो वा किमाचारोपदेशाभ्याम् ? किमिव ? **चक्षूरूपग्रहणनियतिवत्**, यथा चक्षुषा रूपं पश्यन्तं पुरुषं नियत्या स्वभावतोऽन्येन वा केनचित् कारणेन त्वदभिमतेन सिद्धत्वात् पुरुषकारादृते यो ब्रूयात् चक्षुषा रूपं पश्य मा द्राक्षीर्जिह्वया इति किं तेन कृतं स्यात् ? तथा नियत्या सिध्यत्सु

- /ms असिध्यत्सु वा किं यत्नोपदेशाभ्याम् ? किं कारणम् ? **अयत्नत एव तथा सिद्धे**रोदनकवलाद्यास्यप्रवेशोऽपि प्रक्षेपयत्नादृते त्वन्मतेन सिध्येत्, अप्रक्षिप्ते कवले क्षुत्प्रतीकारः स्यादित्यादि योज्यम् । § 646

**यत्नोऽपि नियतित एवेति चेत्** । स्यान्मतम्--योऽप्यसौ यत्नो नियतित एवैषोऽपि आचारोपदेशरूपस्तृप्तिप्रयोजनौदनपचनास्यप्रक्षेपादिरूपश्च तथा तथा नियतित्वादित्येवं चेन्मन्यसे, ततः **सर्वलोकशास्त्रारम्भप्रयोज-**

१८ कृषिवाणिज्य ] °ज्यांज्या ?सेवा° nayacakra-ms-bhā । °ज्यं सेवा nayacakra-ms-ya ॥

२७ द्रा ] द्राक्षीज्ञिह्वया प्र° ॥

२९ था ] सिद्धेवोदन° प्र° ॥

**नाभिधानानर्थक्याल्लोकागमविरोधौ,** यथासङ्ख्यं लोकविरोध आगमविरोधश्च, सर्वलोकस्य सर्वशास्त्राणां चारम्भप्रयोजनयोस्तदभिधानस्य चानर्थक्यम्, बुभुक्षाप्रतीकारप्रयोजन ओदनपाकारम्भः 209/mj

* * *

भावस्यान्यथाभावाभावात्, क्रियाया एवौदनतृप्त्यादिफलप्रसूतेः प्रत्यक्षविरोधः ।

एवंनियतेरेवैवमिति चेत्, न, कालानर्थान्तरक्रियाया एवैवं क्रियानियतिरिति संज्ञामात्रे विसंवादात्, कालानर्थान्तरत्वात् क्रियायाः ।

नियतिप्रतिपादनपरिक्लेशाभ्युपगमाच्च तेऽवश्यम्भाव्यव्यभिचारदर्शनविपर्य-

* * *

सह प्रयोजनेन तृप्त्यादिना तदुपदेशवचनारम्भप्रयोजनानि चानर्थकानि लोके, शास्त्रेषु च धर्मार्थकाममोक्षास्तदर्थाश्च शास्त्रारम्भास्तदुपदेशाश्चानर्थकाः प्राप्नुवन्ति । किं कारणम् ? **भावस्यान्यथाभावाभावात्,** यस्मात् तेनैव भाविनो नाभावः, अभाविनश्च न भावः, तस्माद् भावस्यान्यथाभावाभावात् सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानर्थक्यम्, तस्माच्च लोकागमविरोधौ लोके सर्वागमेषु चारम्भप्रयोजनाभिधानानां प्रसिद्धत्वात् । किञ्चान्यत्, **क्रियाया एवौदनतृप्त्यादिफलप्रसूतेः प्रत्यक्षविरोधः ।** क्रियात एवौदनसिद्धिः, नौदासीन्येन आसितुः कदाचिन्नियतेरेव केवलायाः । सिद्धस्य चौदनस्य फलं तृप्तिः सापि मुखे कवलप्रक्षेपग्रसनादिक्रियात एव भवन्ती **दृष्टा,** ओदनजन्यतृप्तिबलवर्णारोग्यादि फलं चान्तर्गतात्मरसरुधिरादिविभागपरिणमनक्रियातः । तस्याश्च क्रियाप्रसाध्यतृप्त्यादिहेत्वोदनसिद्धौदनजन्यतृप्तिबलवर्णारोग्यादिफलप्रसूतेः प्रत्यक्षत्वाद् नियतित एव इति वादे प्रत्यक्षविरोधः । § 647

**एवंनियतेरेवैवमिति चेत्** । एवंविधैवैषा नियतिः क्रियानियतिरित्युच्यते, अस्याः क्रियानियतेरो- दनतृप्त्यादिफलप्रसूतिनियतिरिति । एतच्चायुक्तम्, **कालानर्थान्तरक्रियाया एवैवं क्रियानियतिरिति संज्ञामात्रे विसंवादात्,** - /ms अभ्युपगतं तावत् त्वया एवंनियतेरेवैवम् इति ब्रुवता काष्ठादिसाधनसन्दर्भया लौकिक्या पचिक्रिययैव ओदनसिद्धितृप्त्यादिफलप्रसूतिनियतिरिति, एवंशब्दस्य तदर्थत्वात् । सा च क्रियानियतिः कालक्रियापर्यायत्वात् कालनियतिः, नियतिक्रिययोश्चैकार्थत्वात् । तस्मादावयोः संज्ञामात्रे विप्रतिपत्तिर्नार्थे

---

३ बुभुक्षाप्र] प्रतिका°nayacakra-ms-ya ॥ १२ य] यस्मान्न तेनैवnayacakra-ms-raṃnayacakra-ms-hī विना । यस्मान्न तेवैव nayacakra-ms-raṃ nayacakra-ms-hī ॥ १६ क्रिया] क्रिया एवौ°nayacakra-ms-bhānayacakra-ms-pā ॥ १८ ए] एवाभवन्तीnayacakra-ms-ya । एवं भवन्ती nayacakra-ms-bhā ॥ १९ रिण] °णामन° प्र° ॥ २० न] °सिद्धो°सिद्धो ?दन°nayacakra-ms-ya ॥ २८ तिक्रि] °यायाश्चै° प्र° ॥

। अत्राह--एवमपि क्रियासिद्धौ कालासिद्धिरिति, अत्रोच्यते, तन्न, **कालानर्थान्तरत्वात् क्रियायाः**, क्रिया काल इत्यनर्थान्तरम्, कालेनैव क्रियाख्येन एवंनियतिरिति ब्रवता स एव काल इत्युक्तं भवति, कालक्रिययोरनर्थान्तरत्वात् कालनियतिः क्रियानियतिरिति संज्ञामात्रे विसंवादात् पूर्ववदिति । § 648

किञ्चान्यत्, **नियतिप्रतिपादनपरिक्लेशाभ्युपगमाच्च तेऽवश्यम्भाव्यव्यभिचारदर्शनविपर्ययार्थप्रवृत्तेरभ्युपगमविरोधः** । पुरुषकालस्वभावादिदर्शनानां नियत्यैवाव्यभिचारिण्या तदविनाभाविनामव्यभिचारादेव त्वयाभ्युपगतानां परवादिभिश्च स स एवेत्यभ्युपगतानां त्वया पुनस्तद्विपर्ययः नियतिरेव कारणं न कालादयः इति प्रतिपादनार्थं प्रवृत्तिरङ्गीकृता । यदि तानि दर्शनान्यनया त्वदीयया प्रवृत्त्यापनीयन्ते नावश्यम्भावीनि तानि, अथावश्यम्भावीन्येव नापनीयन्तेऽनयापि प्रवृत्त्या ततो नियत्यर्थं परदर्शनविपर्ययमापादयामि इत्ययमभ्युपगमो निवर्तते इत्युभयथाभ्युपगमविरोधः । § 649

- /ms
210/mj

यार्थप्रवृत्तेरभ्युपगमविरोधः । स्ववचनपक्षधर्मत्वादीनां च प्रवृत्त्यैव निराकरणम् । एवं दृष्टान्तोऽपि । § 650

अतो धर्मार्थकाममोक्षाः कालकृता उक्तभावनावत् । तथा ब्राह्मणस्य वसन्तेऽग्न्याधानम्, वणिजां मद्यस्य, ईश्वराणां क्रीडादीनाम्, निष्क्रमणं कृत्वा यावद्विमोक्षं विमोक्षणस्य कालो यतीनाम् । § 651

**स्ववचनपक्षधर्मत्वादीनां च प्रवृत्त्यैव निराकरणम्** । येयं पक्षहेतुदृष्टान्ताद्यवयवोच्चारणे प्रवृत्तिस्तया स्ववचनं परमतनिराकरणसमर्थमिति मतं प्रवृत्त्युपलभ्यं स्वत एव नावश्यं भवतीति निराक्रियते । अथावश्यं स्वत एव भवति, प्रवृत्तिरनर्थिका प्रतिपादनासमर्थवचनिका प्रवृत्तिवचनयोरनियतार्थत्वात् । हेतुः पक्षधर्मो हेयार्थप्रतिपत्तिनियतोऽवश्यम्भावी प्रवृत्तिमन्तरेण चेत् प्रवृत्तिरनर्थिका, नावश्यम्भावी चेत् नियत्यभावः । **एवं दृष्टान्तो**ऽपीति व्याख्येयम् । अतः प्रवृत्त्यैवाभ्युपगतया वचनहेतुदृष्टान्तानां निराकरणं प्रमाणान्तरमन्तरेणापीति । § 652

कथं पुनराचारोपदेशानर्थक्यदोषाभावो लोकागमादिविरोधाभावश्च ? इत्येतत्प्रतिपादनार्थमाह **--अत** इत्यादि । अतः प्रागभिहितकालकार्य-

---

१ अत्रोच्य] °च्यतेतेनच्यते, न, ?काला° प्र° ॥
६ माच्च] °च्चानेवश्यंभावाव्यभि° प्र° ॥
२० त्वा] °दीनां वृत्त्यैवnayacakra-ms-ya ॥
२१ वोच्चा] °च्चारणं प्र° ॥
२१ स्व] स्वबंधनं प्र° ॥
२२ व] °तीति क्रियतेnayacakra-ms-ya ॥
२४ हेया] दृश्यतां पृ° १३८ टि° ९ ॥
२५ चेत्] नित्यभावः प्र° ॥

त्वाद्धेतोः सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानां सर्वशास्त्रार्थत्वायेयं पुनर्भावनोच्यते **--धर्मार्थकाममोक्षाः कालकृताः**, एवं चतुर्वर्गसाध्यसाधनसम्बन्धार्थाः सर्वशास्त्रारम्भाः कालसामर्थ्यादेव सफला नान्यथेति प्रतिपद्यस्व । कथम् ? **उक्तभावनावत्**, उक्ता भावना रूपादिघटादियुगपद्वृत्त्यात्मककालरूपं बीजाङ्कुरादिपूर्वोत्तरक्रमवृत्त्यात्मककालरूपं च जगदनियतपरिणति चेति । तस्मादुक्तभावनावदनियतेर्धर्माद्यर्थानामाचाराणां पूर्वापरीभूतक्रियात्वात् क्रियार्थत्वाद्योपदेशानां कालस्य च पूर्वापरीभूतस्य क्रियात्वात् सार्थकाः शास्त्रारम्भाः । § 653

निष्क्रमणादेः काल इति, यथोक्तम् **--अप्पणो निक्खमणकालं आ** (Edtext outside numbered paragraph)**भो+एत्ता च+इत्ता रज्जं** कल्पसू० ११२ इत्यादि । तथा दण्डकपाटरुचकमन्थलोकपूरणक्रिया (Edtext outside numbered paragraph)भिस्तत्काले कर्मत्रिकस्यायुषा समीकरणमित्यादि । § 654

**तथा ब्राह्मणे**त्यादि । एवं च कृत्वा कालकृतत्वात् क्रिया-क्रियाफ- - /ms
लानां धर्मार्थकाममोक्षार्थैः शास्त्रैरेव विहिताः क्रियाः, तद्यथा यथाक्रमं धर्मादिषु, **ब्राह्मणस्य वसन्तेऽग्न्याधानम्, वसन्ते ब्राह्मणो यजेत, ग्रीष्मे राजन्यः, शरदि वाजपेयेन वैश्यः** इत्यादिवचनात् । तथा **वणिजां मद्यस्य, आधानमि**ति वर्तते । **ईश्वराणां क्रीडादीनाम्,** उद्यानगमनं वासन्तिकवस्त्रालङ्कारमाल्यगन्धभोजनादिसेवनं रमणमित्यादीनाम्, **आदि**ग्रहणात् सन्धिविग्रहासनयानादिगुणानुष्ठानमित्यादि । **निष्क्रमण**मित्यादि यावद् **यतीनाम्,** निष्क्रमणकालादारभ्य **यावद् विमोक्षं विमोक्षणस्य** आत्मकर्मवियोगफलस्य मोक्षस्य

अनियतचेतनाचेतनत्वपृथिव्यादित्वेन अनाद्यनन्तवर्तनात्मस्वतत्त्वानां वृत्तेः

* * *

**यतीनांकालो** 211/mj

* * *

अनियतचेतनाचेतनत्वपृथिव्यादित्वेन अनाद्यनन्तवर्तनात्मस्वतत्त्वानां वृत्तेः

* * *

यतीनां

**अनियतचेतनाचेतनत्वे**त्यादि यावत् **कलनं कालः**, स्वरूपतदात्मकत्वभावनैव वर्तते । अनियतं चैतन्यमुपयोगरूपादित्वेन रूपे चेतनाया उप-

१ त्वा] °त्वात ?हेतोः प्र० ॥
१ स] अत्र **सर्वशास्त्रार्थत्वायेयं** इत्यस्य स्थाने **सार्थकत्वायेयं** इत्यपि पाठः स्यात् ॥
२ कृ] **°कृताः एवं चतुर्थवर्ग** प्र० । अत्र° कृता एव, चतुर्वर्ग° इत्यपि पाठः स्यात् ॥
२ च] रेवंnayacakra-ms-bhānayacakra-ms-vi विना ॥
१० शास्त्रैरेव] दृश्यतां पृ० १२१ पं० २० ॥
११ व] दृश्यतां पृ० ८३ टि० ५ ॥
२५ का] **कालस्वरूपातदात्मकत्वा°** प्र० ॥
२६ योग] **°गादि-रूपा°**nayacakra-ms-vinayacakra-ms-ḍenayacakra-ms-līṃ । **°गारूपा°** nayacakra-ms-pā ॥

युक्तत्वात् । अचेतनत्वमप्यनियतं चैतन्योपयोगापत्त्योपयुक्तत्वात् । अथवा तृणादेर्गवाद्यभ्यवहृतस्य सुखदुःखादिचैतन्यापत्तेर्द्रव्यप्राणाद्यापत्तेर्द्रव्यप्राणातिपातादिभावः कालक्रमागतपरिणतिवशात् उपशमक्षयक्षयोपशमोदयपरिणामभावैश्च 212/mj जीवपुद्गलयोरनाद्यनन्तशो वर्तनात् ।

* * *

कलनात्मकं रूपं भूयो भूयो विपरिवर्तते ध्रुवादिसर्वनित्यलक्षणम् । तस्माद्विश्वविकल्पविवर्तवर्तनायाः कलनमस्मदाद्यसर्वज्ञं प्रति अनुमानमात्रगम्यमविविक्तममितपूर्णकोष्ठागारधान्यवत् सर्वज्ञं च प्रति विविक्ताया वर्तनायाः कलनं कालः ।

स तथाभूतेन कलनार्थेन वर्तनामेव सामान्यमत्यजन् भूतो भवति भविष्यं-

* * *

न केवलं चेतनाचेतनयोः परस्पररूपापत्तिकृतैव वृत्तिः, किं तर्हि ? अचेतनस्यापि **पृथिव्यादित्वेनापि** तथा, तद्यथा--एकजातित्वात् पुद्गलानां पृथिव्युदक- /ms ज्वलनपवनवनस्पत्यादित्वेन विपरिवर्तमानपरिणतीनामनाद्यनन्तश एव वृत्तिर्वर्तनम्, तस्यात्मा स्वं तत्त्वं येषां परमाणूनां ते परमाणवः, तेषा**मनाद्यनन्तवर्तनात्मस्वतत्त्वानां वृत्तेः कलनात्मकं रूपं भूयो भूयो विपरिवर्ते**तेऽभ्यावर्तते, रूपरसादिभेदपरिवर्तनवद्गुणभेदेनाप्येकद्वित्रिसङ्ख्येयासङ्ख्येयानन्तगुणभागहीनवृद्धकृष्णशुक्लत्वादिना वाभ्यावृत्तिः, एकांशस्यापि परमसूक्ष्मरूपादिभावपरमाणोरपि अनाद्यनन्तशोऽभ्यावृत्तिः । अतस्तदतीतानागतवर्तमानात्मकमेकं कूटस्थमविचालि अनपायोपजनविकारि अवृद्धि व्यायायोगीत्यादि **आदिग्रहणात्**, **ध्रुवादिसर्वनित्यलक्षण**मेतदेव कलनात्मकङ्कारणमुपपद्यते, नाणुपुरुषनियत्यादिनित्यत्वम्, पूर्वापरीभावात्मकविपरिवर्तकल-

---

१ त्व ] °त्वेनाप्य°nayacakra-ms-ya ॥
३ का ] कालाक्रमा° प्र° ॥
१२ रूपाप ] °त्तिनृतैव वृत्तेःnayacakra-ms-bhā । °त्तिः वृतैव वृत्तेः nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi । °त्तिः मृतैव वृत्तेः nayacakra-ms-raṃ nayacakra-ms-hī ॥
१६ नात्म ] °त्मकरूपंnayacakra-ms-ya ॥
१७ न ] °नतद्गुण° प्र° ॥
२० अ ] अवृद्धिव्ययगोगी°nayacakra-ms-bhā । अत्र अवृद्ध्यव्यययोगीत्यादि इति पाठः समीचीन इति भाति, दृश्यतां पृ° २१ पं° २२ । अथवा नेदमेव नित्यलक्षणं ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत् तन्नित्यमिति । तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते । किं पुनस्तत्त्वम् ? तद्भावस्तत्त्वम् । इति पातञ्जलमहाभाष्ये पस्पशाह्निके ॥
२१ क ] °कषड्कारण°nayacakra-ms-bhā । °कः षड्कारण° nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī । कषड्कारक° nayacakra-ms-vi ॥

नस्य आदिमध्यावसानादर्शनादेवंलक्षणस्य नित्यत्वस्य । **तस्माद् विश्वविकल्पविवर्तवर्तनायाः कलनं** काल इत्यभिसम्भन्त्स्यते । तच्च कलनं द्विविधम्, अस्मदाद्यसर्वज्ञं प्रति **अनुमानमात्रगम्यमविविक्तं** सर्ववस्तुसामान्यमात्रग्रहणम्, **अमितपूर्णकोष्ठागारधान्यकलनवत्,** यथा धान्यममित्वा कोष्ठागारे पूरितं कुम्भशतसहस्राद्यन्यतमपरिमाणम् इत्युद्देशतो गृह्यते तथोद्देशमात्रतोऽतीतानागतवर्तमानवर्तनाकलनमस्मदादिभिः । **सर्वज्ञं च प्रति** परमनिरुद्धे काले समये समये वृत्तायाः **विविक्ताया वर्तनायाः** सङ्ख्यानं **कलनं** तत् **कालः, कल सङ्ख्याने** पा॰ धा॰ ४९७, १८६६ इति प्रतीतेः । यथोक्तम्—

जं जं जे जे भावे परिणमति पयोगवीससादव्वं ।
तं तह जाणाति जिणो अपज्जवे जाणणा णत्थि ॥ आव॰ नि॰ ७९४ इति ।§ 657

एतद् वर्तनस्वतत्त्वकालनिरूपणम् । § 658

**स तथेत्यादि** । स एव काल**स्तथाभूतेन** वर्तनारूपेण **कलनार्थेन** समाधिकरणेन तां **वर्तनामेव सामान्यमभिन्नामत्यजन् भूतो भवति भविष्यंश्च** - /ms **इति विशेषव्यपदेशं लभते,** नान्यः कश्चिदकलनात्मकः पदार्थो नियत्यादिरसत्त्वात् । **स एव तु** कलनलक्षणो भाव**स्त्रिधा भिद्यते** तत्समाधिकरणत्वात् सत्त्वात्मकत्वाद् घटवत्, न व्यधिकरणो भूतो भवति भविष्यंश्चाकाल एव व्यधिकरणोऽतद्रूप एव । 213/mj

* * *

श्चेति विशेषव्यपदेशं लभते । स एव तु त्रिधा भिद्यते, अन्यथान्यस्याभावात् । स एव तथा कलयन् वर्तनेन कलयति, स एव कल्यते, तेन तस्मै चेत्यादि ।

एवमेव च स वर्तमानातीतयोः कारणावस्थयोरेव कार्याख्याभिमुख्येन गृह्यते एकत्र मेघादिरेकत्र पटादिः । ग्रहणवच्च स एव क्रियते तथा वृत्तेः क्रियया कल्यते ।

* * *

किं कारणम् ? **अन्यथान्यस्याभावात्,** इह ह्यन्यदन्यथा न भवति, यथा कुसुमं खपुष्पं न भवति खपुष्पं वा कुसुमं न भवति, घटो वा पटतया न भवति घटतया पटो वा न भवति । किं तर्हि ? तदेव तद् भवति,

---

१ विक]
°विकल्प°nayacakra-ms-ya प्रतिषु नास्ति ॥
६ स] सर्वं च
प्रतिnayacakra-ms-bhā । सर्वं प्रति nayacakra-ms-ya ॥
११ ण] नत्थिnayacakra-ms-ya ॥
१३ व] वर्तमाना॰ प्र॰ ॥
१४ माधिक] °रण्येन प्र॰ ॥
१५ नात्म]
°त्मकप°nayacakra-ms-ya ॥
२८ घ] पटतया घटे समभव-
तिnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ

कुसुममेव कुसुमम्, तदेव चान्यथापि भवति यथा कुसुममेव मुकुलितार्ध-विकसितसमस्तविकसितजरत्ताम्लानादित्वादिना । एवं तावत् काल एव भाव इत्यभेदेन भवनं व्याख्यातम् । कारणभेदेनापि **स एव तथा कलयन् व-र्तनेन कलयतीति** कलनस्य कर्तृत्वमनुभवतीति कलनं भवतीत्यर्थः । **स एव कल्यते** क्रियते कर्म भवतीत्यर्थः पूर्वापरतया कार्यकारणभावात् । **तेन च तस्मै चेत्यादि** तस्यैव कलनस्य शक्तिभेदात्, तेन क्रियत इति करण-ता, तस्मै क्रियत इति सम्प्रदानता । **[आदि]**ग्रहणात् तस्मात् तस्मिन्निति अपादानाधिकरणभावावपि । § 659

तस्यैवेदानीं कालस्य त्रिधा भिन्नस्याप्यभेदोपदर्शनार्थं ज्ञानेन क्रियया चैक्यमुच्यते --**एवमेव चेत्यादि** ज्ञानेन तावदेकत्वं दृश्यते यावदे**कत्र मे-घादिरि**ति । एवमेवेति यथैव कर्तृकर्मकरणादिशक्तिभेदेऽप्यभिन्नः कालस्तथा
- /ms **स वर्तमानातीतयोः कारणावस्थयोरेव** सप्तम्यन्तोऽयं निर्देशः **कार्याख्याभि-मुख्येन गृह्यते** कार्याङ्गीकरणेन तत्प्राधान्येन तादात्म्येनेति यावत्, वर्त-मानावस्थायां कार्याख्याभिमुख्येन अतीतावस्थायां चोत्तरावस्थाभिमुख्येन स एव कालो गृह्यते, किमुक्तं भवति ? कल्यते ज्ञायते । यथासङ्ख्य**मेकत्र पटादिरेकत्र मेघादिः**, वर्तमाने पटादिरतीते मेघादिः । तद्यथा--पुरुषो हि पूर्वाह्णे पटं पश्यन्नपराह्णेऽपि पट एवायं श्वोऽप्यपरेद्युरुत्तरेद्युरपि पट एवेति वर्तमानकालेऽपि पटमेष्यत्कालेऽपि पटमेव मन्यते । मेघे चोन्नतमात्रे वर्षति अयं ततः प्रलहीबीजमुत्पद्यते, मूलाङ्कुरादि भवति, ततः प्रलहीपोण्डम्, ततः कर्पासः, ततः सूत्रम्, ततः पटः इत्यतीतकाल एव एष्यत्कालं पटं मन्यते इत्यतः कार्याख्याभिमुख्येन स एव कालोऽतीतो वर्तमानश्चाभेदेन गृह्यमाणो दृष्टस्तस्मादभिन्नः । एवं ज्ञानेनैक्यमापाद्य क्रिययाप्यैक्यमापादयति अतिदेशेन --**ग्रहणवच्च स एव क्रियते** । किं कारणम् ? **तथा वृत्तेः**, एवं हि वर्तनम्, सैव हि क्रिया यथा गृह्यते तथा क्रियतेऽप्यसावेवाभेदेनेति तत्कारकार्थं दर्शयति --**क्रियया कल्यत** इति । एवं तावदतीतवर्तमानयोः कारणयोः का-र्याख्याभिमुख्येन ग्रहणकरणाभ्यामैक्यम्, **आख्या**शब्दः शब्दमात्रेणैव भेदात् । **तयोरप्यनागते**, तयोः कारणयोरप्यनागते कार्येऽतीतवर्तमानयोः **कार-**
214/mj **णाख्याभिमुख्येन**

* * *

। पटतया घटतया न भवति nayacakra-ms-vi । पटतया घव्योम भवति nayacakra-ms-raṃ nayacakra-ms-hī । nayacakra-ms-bhā प्रतौ तु इदं वाक्यमेव नास्ति ॥
३ का] कारकभेदेनापीत्यर्थः ॥
४ क] कलनnayacakra-ms-ya ॥
५ पू] पूर्वपर॰ प्र॰ ॥
६ त] तस्य चे॰ प्र॰ ॥
६ क] करणकार[क?]ताnayacakra-ms-ya ॥
८ ण] ॰णभावपि प्र॰ ॥
१२ यो] ॰यो-रेवंnayacakra-ms-pānayacakra-ms-raṃnayacakr
॥
१३ ता] तदात्मनेनितिnayacakra-ms-ya ॥

तयोरप्यनागते कारणाख्याभिमुख्येन कल्यमानता दृश्यते संयोगतन्त्वाद्युदकगर्भसर्जनपाचनादिवर्तनपटत्ववत् ।

अत एव च कलनमेव ह्येकं कार्यकारणवृत्तित्वेन विपरिवर्तितुं क्षममपुरुषकारमस्वभावमनियति संसारि अनादि । कालवृत्तेरेव पुरुषवाद्युक्तमुक्तिक्रमार्थतुरीयवचनादेव कालसामर्थ्यात् क्रमात्मलाभो घटते । मिथ्यादर्शनादिभिस्तत्प्रदोषनिह्नवादिभिश्च कर्मबन्धप्रक्रियोपपत्तेः संसारानादिता सन्तानाव्यवच्छेदाद्युज्यते । पुरुषवादिनः पुनः परमात्मनः शुद्धान्न युज्यते संसारो बन्धाभावात् । बन्धाभावः

* * *

कार्याख्याभिमुख्यकारणैक्यवद् ग्रहणकरणयोः समाना **कल्यमानता दृश्यते,** ततोऽप्यैक्यमेव । तद्यथा— **संयोगतन्त्वाद्युदकगर्भसर्जनपाचनादिवर्तनपटत्ववत्,** यथा तन्तूनां संयोगं दृष्ट्वा रुतकर्पासप्रलहीपोण्डप्रलहीमूलाङ्कुरादिजलसर्जनपाचनधारणमेघकलनानि वृत्तानि तथा च क्रियन्त इति तान्येव वर्तनानि पट इत्येष्यत्पट एव तथा तन्तुवायस्य ग्रहणकरणाभ्यां प्रवृत्तत्वाद् वर्तमानातीतपटता दृष्टा इत्यैक्यमेव । § 660 - /ms

कूटस्थादिनित्यात् कार्यकारणे द्वे अपि व्यतीतान्न **युज्यते संसारो बन्धाभावात्, बन्धाभावः का** (Edtext outside numbered paragraph)**रणाभावादशरीरत्वादकरणत्वाच्च,** चशब्दात् सर्वगतत्वादेकत्वान्नित्यत्वाच्चेत्यादयोऽपि हेतवः, प्रदोषादिकारणाभा (Edtext outside numbered paragraph)वे **प्रदोषाभावात् कर्माभाव** इत्यादि गतार्थं यावत् **संसारानादिता** । § 661

**अत एव चे**त्यादि । एतस्मादेव कारणाद् वर्तनस्याप्रतीघाताद् व्यापित्वाच्च कारणान्तरापेक्षा नास्ति, **कलनमेव ह्येक**मनन्यसाधनं स्वयमेव **कार्यकारणवृत्तित्वेन विपरिवर्तितुं क्षमम्, अपुरुषकारं** चेतनाचेतनेषु वृत्तेरभेदात्, **अस्वभावं** जीवाजीवात्मकपरिणतिक्रमविवृत्त्यजस्रत्वात्, **अनियति** तथान्यथाभावविपरिवर्तवर्तनात्मकत्वादेव, **संसारि** रूपद्व्यणुकत्र्यणुकादिभूम्यम्बुव्रीह्याद्याहाररसरुधिरादिविपरिवर्तनस्वभावान्तरसङ्क्रमणलक्षणत्वात् संसारस्य, अत एव**अनादि,** अनादित्वेन दूरमपक्षिप्ता नियत्यादिकारणान्तरापेक्षा अनेन कलनेन । तस्मादनादित्वात् कालवृत्तिः, अस्या एव **कालवृत्तेरेव** केवलायाः कारणान्तरनिरपेक्षाया हेतोः यदप्युच्यते पुरुषवादिना पुरुषक्रियात एव सर्वम् इति तदस्मादेव कालाद् भवति न पुरुषकारात्, अनादी-

---

९ ग्र] ग्रहकरणयोः प्र° ॥
१० प] °पटवत्nayacakra-ms-ya ॥
१२ च] कायंतेnayacakra-ms-ya ॥
१३ ट] सप्तम्यन्तोऽयं निर्देशः ॥
१८ क] कंपरणति°nayacakra-ms-ya ॥
१९ विप] °रिवर्तनात्म°nayacakra-ms-bhā ॥
२० रिव] °वर्तनस्य भावा° प्र° ॥
२३ पु] पुरुष एवादिना प्र° ॥

नां यौगपद्यादादिमतां पौर्वापर्ययुक्तवृत्तित्वात् तयोश्च कालत्वात् किल तेनैव पुरुषवादिना कालस्य समर्थितत्वादित्यत आह --**पुरुषवाद्युक्तमुक्तिक्रमार्थ-तुरीयवचनादेव,** सुषुप्तावस्था विशुध्यन्ती सुप्तावस्था भवति, सुप्तावस्था च जाग्रदवस्था भवति, जाग्रदवस्था विशुद्धा सती तुरीया मुक्त्यवस्था भवतीति **कालसामर्थ्यात् क्रमात्मलाभो घटते,** तस्मात् सुषुप्तादेरवस्थाविशेष-
- /ms व्यवस्थानस्य अनादिकालप्रवृत्त्यात्मकत्वं परमात्मनो वर्तनतत्त्वस्य अस्मन्मत एवमेव घटते, न पुरुषवादे, क्रमाक्रमविकल्पाभावात् । अन्यथा अवस्थाचतुष्टयस्य एकसर्वगतनित्याक्रमकारणात्मकस्य कतमावस्था प्रथमा द्वितीया तृतीया तुरीया चेति ? किञ्चान्यत्, वृत्तिक्रमापादितकार्यकारणावस्थयोः कार्यकारणभावोपपत्ते**र्मिथ्यादर्शनादिभिः** सामान्यहेतुभिः **तत्प्रदोषनिह्नवादिभिश्च** विशेषहेतुभिः

कारणाभावादशरीरत्वादकरणत्वाच्च । प्रदोषाभावात् कर्माभावः... ... ...संसारानादिता ।

नापि तस्य नियतेः संसारानादिता, अतत्त्वात् । यद् यदतत् तत् तन्न तन्नियति दृष्टम्, घटपटवत् । एवमेव तस्य स्वभावात् ।

तस्मात्त्वनादिवर्तनात्मकत्वात् कालस्य पृथिव्यादिव्रीह्यादिवृत्तिविवृत्तिप्रबन्ध-

* * *

दाद् युज्यते । पुरुषवादिनः पुनः परमात्मनः शुद्धात्**कर्मबन्धप्रक्रियोपपत्तेः**
215/mj **संसारानादिता सन्तानाव्यवच्छे**

* * *

कारणाभावादशरीरत्वादकरणत्वाच्च । प्रदोषाभावात् कर्माभावः... ... ...संसारानादिता ।

---

२५ प] °पद्यादिमतां प्र° ॥
९ र्मिथ्या] मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः । ८ । १ । इति तत्त्वार्थाधिगमसूत्रे ॥
९ त] कायवाङ्मनःकर्म योगः । १ । स आस्रवः । २ । शुभः पुण्यस्य । ३ । अशुभः पापस्य । ४ । तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः । ११ । दुःखशोकतापाक्रन्दनवधपरिदेवनानि आत्मपरोभयस्थानि असद्वेद्यस्य । १२ ।
n215/mj भूतव्रत्यनुकम्पा दानं सरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य । १३ । केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य । १४ । कषायोदयात् तीव्रात्मपरिणामश्चारित्रमोहस्य । १५ । बह्वारम्भपरिग्रहत्वं च नारकस्यायुषः । १६ । माया तैर्यग्योनस्य । १७ । अल्पारम्भपरिग्रहत्वं स्वभावमार्दवार्जवं च मानुषस्य । १८ । निःशीलव्रतत्वं च सर्वेषाम् । १९ । सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य । २० । योगवक्रता विसंवादनं चाशुभस्य नाम्नः । २१ । विपरीतं शुभस्य । २२ । दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्णं ज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी सङ्घसाधुसमाधिवैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकृत्त्वस्य । २३ । परात्मनिन्दाप्रशंसे सदसद्गुणाच्छादनोद्भावने च नीचैर्गोत्रस्य । २४ । तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य । २५ । विघ्नकरणमन्तरायस्य । २६ । इति तत्त्वार्थाधिगमसूत्रे षष्ठाध्याये ॥

नापि तस्य नियतेः संसारानादिता, अतत्त्वात् । यद् यदतत् तत् तन्न तन्नियति दृष्टम्, घटपटवत् । एवमेव तस्य स्वभावात् ।

तस्मात्त्वनादिवर्तनात्मकत्वात् कालस्य पृथिव्यादिव्रीह्यादिवृत्तिविवृत्तिप्रब-न्ध-

* * *

दाद् युज्यते । पुरुषवादिनः पुनः परमात्मनः शुद्धात्

अत्राह नियतिवादी--तस्य संसारस्यैव तथानियतेः संसारो भवति पुरुष-पुद्गलयोरिति । अत्र ब्रूमः --**नापि तस्य नियतेः संसारानादिता,** कस्माद्धेतोः ? **अतत्त्वात्,** तद्भावस्तत्त्वम्, न तत्त्वमतत्त्वम्, तस्मादतत्त्वात् तन्नियतेर्न भ-वति संसारः, अतत्त्वं चास्य संसारस्य क्वचिदुपरमाभ्युपगमात्, स्वहेतोः साध्याविनाभावित्वोपप्रदर्शनार्थमाह **--यद् यदतत् तत् तन्न तन्नियति दृष्टम्,** यथा घटः पटनियतिर्न भवति पटोऽपि घटनियतिर्न भवति, तस्माद् **घ-टपटवद**तत्त्वान्नापि तस्य नियतेरिति साधूक्तम् । किञ्चान्यत्, **एवमेव तस्य स्वभावात्** । यदि ब्रूयात्--तस्य स्वभावात् संसारानादितेति, एतच्च नापि तस्य स्वभावात्, अतत्त्वात् । अतत्त्वमस्य पूर्ववद् मुक्त्यवस्थाभ्युपगमात् सिद्धम् । यद्यदतत् तत् तन्न तत्स्वभावं घटपटवदिति । एवं तावदनादिसंसारिता - /ms
नोपपद्यते नियत्यादिवादे कालमन्तरेणेत्युक्तम् । § 662

इदानीं कालवादे तदुपपत्तिरुपवर्ण्यते **--तस्मात् त्वनादिवर्तनात्मक-त्वा**दित्यादि यावन्न **न युज्यत** इति । **तस्मा**दिति प्रस्तुतात् कालात् **संसा-रानादिता न न युज्यत** इति सम्भन्त्स्यते । **तु**शब्दो विशेषणे, कालवाद एवैतदुपपद्यतेऽनादिसंसारित्वम्, यौगपद्यपर्यायत्वादनादित्वस्य यौगपद्यस्य च कालप्रभावाविनाभावित्वात् कलनवृत्तिपर्यायत्वाच्च कालस्येति तत्प्रदर्शनार्थं हेतुमाह **--अनादिवर्तनात्मकत्वात् कालस्य,** कालो हि युगपदनादिवृत्त्यात्म-कः । नन्विदं प्रागुक्तेन विरुद्धं पूर्वपरादिवृत्तेरयौगपद्यादिति चेत्, न, वर्तनस्य यौगपद्यात्, तद्यथा **--पृथिव्यादिव्रीह्यादिवृत्ती**त्यादिर्दृष्टान्तदण्डकः । यथा पृ-थिव्य 216/mj

* * *

स्वात्मविषयक्रियाबन्धसंसरणवज्जीवपुद्गलयोरभिन्नवर्तनस्वतत्त्वयोः स्वत एव ब-न्धक्रिया संसारक्रिया च वर्तनाभेदेन रूपभेदेन च कालस्यात्मस्वात्मन्येव क्रिया अनात्मस्वात्मनि वा युगपदेव बन्धसंसरणविहिता बन्धसंसारानादिता न न युज्यते ।

इत्यनादिवर्तनाप्रभेदपूर्वापरादिक्रमाद् भावान्तराणि क्रमेण प्राप्तानि

८ न्निय ] °यतिर्न प्र° ॥
९ चा ] चास्य न भवति संसारस्य प्र° ॥
२१ प्र ] °प्र-भाविनाभावित्वात्nayacakra-ms-ya । °प्रभावित्वात् nayacakra-ms-bhā ॥
२१ क ] कलनावृ°nayacakra-ms-ya ॥
२३ रा ] °दिविवृत्ते°nayacakra-ms-bhā ॥
२४ त्या ] °दि दृ-ष्टा°nayacakra-ms-bhānayacakra-ms-vi ॥

भूम्यम्ब्वादियोगो बीजोद्भेदो मूलमङ्कुरः... ... ...कुण्डकतन्दुलौदनः । जीवपुद्गलवृत्तिपरिवृत्तिभेदेन वर्तनैव आरम्भप्रवृत्तिनिष्ठाः । तदेव हि वर्तनं परिवृत्त्यपरिवृत्तिषु ।

* * *

म्बुवाय्वाकाशपुरुषादयो युगपत् समेता लोकाख्यां लभमाना अनादयः, त एव च व्रीहियवगोधूमचूतपनसादित्वेन स्त्रीपुरुषमहिषाजगवयगवादित्वेन च वर्तन्ते सहैव, भूम्यादिव्रीह्यादित्वेन तादृश्योर्वृत्तिविवृत्त्योरव्यवच्छेदेन **स्व एवात्मा विषयो**ऽस्याः **क्रिया**याः सा तेषां व्रीह्यादिभूम्यादीनां **वृत्तिविवृत्तिप्रबन्धेन** आत्मस्वरूपविषया **क्रिया**, सैव च **बन्धः** स्निग्धरूक्षवृत्त्या तेषां संश्लेषात्, अन्यान्यरूपापत्तिः **संसरणम्**, तच्च अनादि युगपदुभयं बन्धनं संसरणं दृष्टम्, तथा **जीवपुद्गलयोरभिन्नवर्तनस्वतत्त्वयोः** स्वसाध्येभ्य एव साधनात्मभ्यः हेतुकार्यभूतेभ्यः कारणेभ्यः परस्परसंश्लेषवर्तनेभ्य इव भूम्यादिव्रीह्यादीनां - /ms हेतुभ्यः **स्वत एव बन्धक्रिया संसारक्रिया च वर्तनाभेदेन रूपभेदेन** चेति दृष्टान्तप्रसिद्धार्थव्याख्यानम् । दार्ष्टान्तिकव्याख्यानं तु **कालस्यात्मस्वात्मन्येव क्रिया अनात्मस्वात्मनि** वेति, कालस्य अभिन्नवर्तनस्वतत्त्वस्य भूम्यादिव्रीह्यादिबन्धसंसरणवदेव आत्मस्वात्मनि जीवस्वरूपे क्रिया अनात्मस्वात्मनि पुद्गलस्वरूपे वा **युगपदेव बन्धसंसरणविहिता** कालकृतबन्धसंसारविहिता तत्कृता विधातुरन्यस्याभावात्, सैषा संसारिता युगपदभिन्नानादिवृत्त्यात्मिका जीवपुद्गलयोः परस्परं स्वात्मपरात्मवृत्तिकृत**बन्धसंसारानादिता न न युज्यते** विरोधाभावादित्यभिप्रायः । एवं तावद् यौगपद्यलिङ्गकालकृतसंसारानादिता । § 663

इति, किं पुनर्विद्वद्भिरित्यर्थः, **तथा तथा** यथा यथासौ कालो व्यवतिष्ठते तथा तथा पुरुषः पर्युपास्ते, **आविर्भूतश्चूताङ्कुरकालो न तावदाविर्भूत** इत्याविर्भूतानाविर्भूतात्मा । § 664

पूर्वपरादिलिङ्गकालकृतसंसारानादिताप्यस्मिन् दर्शने न विरुध्यत एवेत्यत आह --**इत्यनादिवर्तनाप्रभेदेत्यादि** । **इति**शब्दार्थ इत्थमर्थे, इत्थमुपपादितानादिताया एव वर्तनायाः प्रभेदास्ते **पूर्वापरादिक्रमात्**, त एव **भावान्तराणि क्रमेण प्राप्तानि** । कानि तानीति चेत्, **भूम्यम्ब्वादियोगो बी-**

६ स्व] स्वत एवात्मnayacakra-ms-ya ॥
८ स्नि] स्निग्धरूक्षत्वाद् बन्धःतत्त्वार्थसू° ५ । ३२ ॥
९ अ] अन्योन्ये रूपा°nayacakra-ms-ya । अन्येरूपा° nayacakra-ms-bhā ॥
११ स्प] °स्परंnayacakra-ms-bhā ॥
१५ भूम्यादिव्रीह्या] °दिवत्वसं° प्र° ॥
२२ इ] इत्यादिनावर्तना°nayacakra-ms-ya ॥
२२ इ] इत्थमुपपादिताया एवnayacakra-ms-bhā । इत्थमुपपादिता अनादिताया एव nayacakra-ms-ya ॥
२३ रादिक्र] °क्रमास् त एवnayacakra-ms-pānayacakra-ms-ḍenayacakra । °क्रमास्त एव ? ॥
२४ भा] भवा° प्र° ॥

**जोद्भेदो मूलमङ्कुर** इत्यादि गतार्थं यावत् **कुण्डकतन्दुलौदन** इति । ओदनादप्यभ्यवहृताद् रसादि यावत् कडेवरम्, कडेवराद् मृत्, मृदो मृत्पिण्डः, मृत्पिण्डाच्छिवकः, पुनर्यावद् भूम्यादित्वेन परमाण्वद्व्यणुकादिसङ्घाताः, **जीवपुद्गलवृत्तिपरिवृत्तिभेदेन वर्तनैव** आरभते प्रवर्तते नितिष्ठतीत्या**रम्भप्रवृत्तिनिष्ठाः** पुनर्विपरिणामोऽन्यरूपेणाविर्भावः स आरम्भः, प्रवर्तनं स्थितिः, निष्ठा तिरोधानम्, इत्येतदनुपरतं धर्मत्रयचक्रकमयुगपद्वृत्तावपि युगपद्वृत्तावपि, पूर्वाभिहितबन्धसंसरणवदुत्पत्तिस्थितिभङ्गा अपि वर्तनस्वात्मैव, **तदेव हि** - /ms
**वर्तनं परिवृत्त्यपरिवृत्तिष्वि**त्यविरोधं कालकारणवादस्य दर्शयति । तत्प्रसिद्धिप्रदर्शनार्थमाह

ननु कृषीवलादिभिरपि पर्युपास्यते तथा तथा आविर्भूतश्चूताङ्कुरकालो न तावदाविर्भूत इति ।

तस्मादेव चावगमितद्रव्यक्षेत्रभावात्मनः सुषमादिभेदात्मकाद् भावभेदाः सम्भवन्ति कालस्य प्रभुविभुत्वाभ्याम् । एकसमायामपि संवत्सरवर्तनात् सुभिक्षदुर्भिक्षादिभावभेदाः... ... ...एकमुहूर्तेऽपि लग्नवर्तनाद् भावभेदाः । तस्मादेव

* * *

कृषीवलादिभिरपि पर्युपास्यत--**ननु** 217/mj

* * *

ननु कृषीवलादिभिरपि पर्युपास्यते तथा तथा आविर्भूतश्चूताङ्कुरकालो न तावदाविर्भूत इति ।

तस्मादेव चावगमितद्रव्यक्षेत्रभावात्मनः सुषमादिभेदात्मकाद् भावभेदाः सम्भवन्ति कालस्य प्रभुविभुत्वाभ्याम् । एकसमायामपि संवत्सरवर्तनात् सुभिक्षदुर्भिक्षादिभावभेदाः... ... ...एकमुहूर्तेऽपि लग्नवर्तनाद् भावभेदाः । तस्मादेव

* * *

कृषीवलादिभिरपि पर्युपास्यत

**तस्मादेव चे**त्यादि । तस्मादेव च वर्तनालक्षणात् कालादवगमितद्रव्यक्षेत्रभावा आत्मानोऽस्य तस्मा**दवगमितद्रव्यक्षेत्रभावात्मन** अवगमितद्रव्यक्षेत्रभावात्मकादित्यर्थः । प्राग् निमित्तं द्रव्यं भूम्यादिव्रीह्यादि, द्रव्यात्मा काल इति, घटो ग्रीवादय इति क्षेत्रम्, भावो रूपादयः, **न केचिद् युगपदात्मिकां वृत्तिप्रख्यातिं कालमन्तरेण** इति कालत्वावगमनं वर्तत एव ।

---

२५ कु] अत्र कुण्डकतन्दुलौदनाः इत्यपि पाठः स्यात् ॥
३ वृत्तिप] °परिवर्त्ति° nayacakra-ms-raṃ nayacakra-ms-hī विना । °परिवत्ति° nayacakra-ms-raṃ nayacakra-ms-hī ॥
२७ प्रा] प्रागभिहितं द्रव्यं भूम्यादिव्रीह्यादि इत्यपि पाठोऽत्र स्यादिति भाति ॥
२८ न] दृश्यतां पृ° २०५ पं° २ ॥

तस्माद्द्रव्याद्यात्मकात् कालात् सुषमसुषमादिभ्य उत्सर्पिण्यवसर्पिण्याख्य-
कालभेदेभ्यः परमनिरुद्धसमयत्वेनाभिन्नादपि **सुषमादिभेदात्मकाद् भावभे-
दाः सम्भवन्ति,** तद्यथा--सुषमसुषमायां सुषमायां सुषमदुष्षमायां चा-
त्रैव भारते क्षेत्रे देवलोकवद् भवन्ति प्रतनुक्रोधमानमायालोभास्त्रिद्व्येकग-
व्यूतोच्छ्रितदेहास्तावत्पल्योपमजीविन्यो मिथुनधर्मिकाः प्रजा मण्यङ्गादिकल्प-
तरुकल्पितोपभोगविधयः, स्वादुसुरभिजला चतुरङ्गुलहरिततृणा निम्नोन्नतव-
र्जिता सुरभिस्वादुरसा सुखस्पर्शादिगुणा भूमिरित्यादि । स एष पुनरनुभावः
**कालस्य प्रभुविभुत्वाभ्याम्,** काल एव हि प्रभवति विभवति च सर्व-
- /ms भावभेदानामुत्पत्तिस्थितिप्रलयेष्वात्मप्रभेदमात्राणाम् । तथा दुष्षमसुषमायां
सुखदुःखसमत्वाद् भूयिष्ठसुखत्वाद् धर्माचारभूयिष्ठत्वाच्च मनुष्यलोकवद् भाव-
भेदाः । दुःषमायामाहारभयमैथुनपरिग्रहसंज्ञाप्राचुर्यादधर्मकर्मोन्मार्गप्रस्थान-
भूयिष्ठत्वाच्च तिर्यग्लोकवत् । दुःषमदुःषमायां नरकलोकवद् दुःखैकरसत्वात् ।
तथा कृत-त्रेता-द्वापर-कलियुगसंज्ञाविभागेषु व्याख्याविकल्पमात्रभेदेषु युगेषु
। किञ्चान्यत् — **एकसमायामपि** भावभेदास्तत्प्रभुविभुत्वाभ्यामेव, **संवत्स-
रवर्तनाद् सुभिक्षदुर्भिक्षादिभावभेदाः,** एवमुक्तानार्था भावभेदा नेया याव**देक-
मुहूर्तेऽपि लग्नवर्तनात्** नालिका-लवादिभेदेन च **भावभेदा** नेया यावत् पर-
मनिरुद्धे समयवर्तनेऽन्यस्मिन्नन्यस्मिन्निति । एकस्मिन्नपि काल उत्पातादिव-
218/mj र्तनाद् भावभेद

* * *

मुहूर्तजातानामपि पुरुषाणां तन्मात्रभेदप्रभेदस्वामिभृत्यादि । तस्यैव च व्यापित्वात् तथा तथा युगपदेव पश्यतामर्हतां प्रवचने कालज्ञानमवितथं दृश्यतेऽद्यतनेष्वपि केषुचित् पुरुषेषु । अतिसौक्ष्म्याच्चास्य तज्ज्ञानाभिमुखानां क्वचिद् वचनविसंवदनमपि । अत एव च साशङ्कमन्वाहुरन्ये--

कालः पचति भूतानि कालः संहरति प्रजाः ।
कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ॥ § 667

---

३० त] एतस्माद्nayacakra-ms-bhā ॥
३० का] कालायुषमसुषमसुषमादिभ्यnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-ya lim ॥
१ सु] अत्र **सुषमसुषमादि॰** इत्यपि पाठः स्यात् ॥
५ च] विप्फुरिदपंचवण्णा सहावम+उया य मधुररसजुत्ता । च+उरंगुलपरिमाणा तणत्ति जा+एदि सुरहिगंधड्ढा ॥ ३२२ ॥ इति **तिलोयपण्णत्तिग्रन्थे** चतुर्थे महाधिकारे ॥
८ दु] दुःषम॰nayacakra-ms-ya ॥
९ सु] सुखसमत्वाद्nayacakra-ms-bhā । सुखमदुःखसमत्वाद् nayacakra-ms-ya ॥
९ भू] भूयिष्य-सु॰nayacakra-ms-pānayacakra-ms-ḍenayacakra । भूयिष्टासु॰ nayacakra-ms-vi । भूयिष्ठासु॰ nayacakra-ms-bhā ॥
९ भू] ॰भूयिष्यत्वाच्चnayacakra-ms-ya ॥
१६ निरु] ॰रुद्धं प्र॰ ॥
१६ न्य] ॰न्यथास्मिन्निति प्र॰ ॥

* * *

व्यभिचार इति चेत्, न, कालदोषाभावात्, उत्पातोपघातस्यापि कालकृतत्वात् कस्यचिद् भावस्य व्याध्युपघातात् कालेऽपि शुनो मैथुनाभाववत् तस्य व्याधिकालमरणकालादीनां तथाभावात् । § 668

**तस्मादेवे**त्यादि । तस्मादेव आवलिकादिस्वरूपवर्तनभेदादेव **मुहूर्तजातानामपि पुरुषाणां तन्मात्रभेदप्रभेदस्वामिभृत्यादि,** कश्चित् स्वामी कश्चिद् भृत्यो भवतीति जन्मकालभेदाद् भावभेदा अनुमातव्या धूमादग्निवत् । **आदि**ग्रहणात् सुरूपदूरूपसुभगदुर्भगप्राज्ञाप्राज्ञादिभावभेदाः । **तस्यैव च व्यापित्वात्, च**शब्दात् प्रभविष्णुत्वाच्च, एवं हि कालकारणस्य प्रभुता व्यापिता च, यत एतद्वर्तनावर्तविपरिवर्तभेदप्रभेदा**स्तथा तथा युगपदेव पश्यतां** विश्वदृश्वना**मर्हतां प्रवचने कालज्ञानमवितथं** प्रमाणीभूतं तद्विषयं **दृश्यतेऽद्यतनेष्वपि केषुचित् पुरुषेषु** कलिबलमलीमसप्रज्ञेष्वपि । स्यान्मतम्— क्वचिद् विसंवदनदर्शनात् कालज्ञानाप्रामाण्यमिति, एतच्चायुक्तम्, **अतिसौक्ष्म्याच्चास्य तज्ज्ञानाभिमुखानां क्वचिद् वचनविसंवदनमपि** प्रणिहितधियामपि पुंसां क्वचिज्ज्ञानविसंवादात्, कालसौक्ष्म्यं दुरुपलक्ष्यत्वात् कारणम्, छद्मस्थानां ज्ञेयानन्त्यादज्ञानबहुत्वाज्ज्ञानपरिमितत्वाच्च सर्वस्य सरागस्य ज्ञानादज्ञानं बहुलमिति । तथा च-- § 669 - /ms

*के+ई णिमित्ता तहिया भवंति केसिं च तं विप्पडि+एति णाणं । सूत्रकृताङ्ग १२ । १० § 670

**अत एव च साशङ्कमन्वाहुरन्ये,** न विनिश्चितं प्रसह्य, यथा **कालः पचतीत्यादि,** भूतानां वर्तनात्मकात् कालादन्यत्वाभ्युपगमादनन्यत्वेन कालवर्त-

---

३ व्या ] व्यव्युपघा॰nayacakra-ms-ya । व्यत्युपघा॰ nayacakra-ms-bhā ॥
६ न्मात्र ] ॰भेदप्रभवात्स्वामि॰nayacakra-ms-bhā ॥
८ दू ] ॰दुरूप॰ प्र॰ ॥
१४ अतिसौक्ष्म्या ] ॰क्ष्म्यात्तस्यnayacakra-ms-ya ॥
१८ * ] केयं णिमित्ता तयिया प्र॰ । के+ई निमित्ता तहिया भवंति केसिंचि तं विप्पडि+एति णाणं । ते विज्ञभावं अणहिज्ञमाणा आहंसु विज्ञापरिमोक्खमेव ॥ १२ । १० ॥ ननु व्यभिचार्यपि श्रुतमुपलभ्यते, तथा हि--चतुर्दशपूर्वविदामपि षड्स्थानपतितत्वमागम उद्घुष्यते, किं पुनरष्टाङ्गनिमित्तशास्त्रविदाम् ? अत्र चाङ्गवर्जितानां निमित्तशास्त्राणामानुष्टुभेन छन्दसा अर्धत्रयोदश शतानि सूत्रम्, तावन्त्येव सहस्राणि वृत्तिः, तावत्प्रमाणलक्षा परिभाषेति । अङ्गस्य त्वर्धत्रयोदश सहस्राणि सूत्रम्, तत्परिमाणलक्षा वृत्तिः, अपरिमितं वार्तिकमिति । तदेवमष्टाङ्गनिमित्तवेदिनामपि परस्परतः षड्स्थानपतितत्वेन व्यभिचारित्वमत इदमाह --**के+ई**त्यादि, छान्दसत्वात् प्राकृतशैल्या वा लिङ्गव्यत्ययः, कानिचि**न्निमितानि तथ्यानि** सत्यानि **भवन्ति** । **केषाञ्चि**त्तु निमित्तानां निमित्तवेदिनां वा बुद्धिवैकल्यात् तथाविधक्षयोपशमाभावेन **तद्** निमित्तज्ञानं विपर्यासं **व्यत्ययमेति** । इति शीलाङ्काचार्यविरचितायां सूत्रकृताङ्गवृत्तौ ॥
१८ च ] च णं वि॰nayacakra-ms-ya ॥
१९ ए ] एव साश॰nayacakra-ms-ya ॥

नात्मकत्वेनैव न विनिश्चितम् । तथा प्रजानामन्यत्वे संहरणं सुप्तानां जाग्रतां 219/mj वा तदन्यत्वेन निर्देशादविनिश्चितत्वात् साशङ्कमेव भेददर्शनानुपातेनोक्तत्वात् ।

* * *

ये पुनर्विनिश्चितधियस्त एवं वदन्ति--

काल एव हि भूतानि कालः संहारसम्भवौ ।
स्वपन्नपि स जागर्ति कालो हि दुरतिक्रमः ॥§ 673

ननु तैः सर्वैः स्वभाव एव भवति इति भाव्यते । यत् पुरुषादयो भवन्ति स तेषां भावः, तैर्भूयते यथास्वम् । तथा च स्वभावे सर्वस्वभवनात्मनि भवति

* * *

**ये पुनर्विनिश्चितधियस्ते** प्रसह्यैवं **वदन्ति,** तद्यथा --**काल एव हि भूतानि** भूतत्वेन कालस्यैव वर्तनात् । **कालः संहारसम्भवौ,** यथोक्तं प्राक् **रूपादयो न केचित् कालमन्तरेण** इति भूम्यादिव्रीह्यादिवदात्मन्येव सम्भवसंहारक्रिये इति च **बन्धसंसारौ** इति वचनाच्च । **स्वपन्नपि जागर्ति,** स एव स्वपिति जागर्ति च, न तु स्वपद्भ्यो जाग्रद्भ्यो वा व्यतिरिक्तः कश्चित् ते वा ततः, स्वप्रभेदक्रमसहवृत्तिमात्रत्वाज्जाग्रत्स्वपदवस्थयोः, सुप्तवृत्त्यानाविर्भूतात्मनस्तस्यैव कालस्य जाग्रद्वृत्त्याभिव्यक्तविक्रमत्वात् क्वचित् क्रमेण भेदवृत्तिविजृम्भितत्वात् सामान्यवर्तनस्य सुप्तविबुद्धादिस्वप्रभेदेषु अव्याघातादिति कालकारणवादो विधिविधिविकल्प एव समाप्तः । § 674

तद्विकल्प एव स्वभावभावोऽधुना --**ननु तैः सर्वै**रित्यादि । ज्ञः स्वतन्त्र- - /ms श्च पुरुष एव भवतीति स्वातन्त्र्ये सत्यपि ज्ञाज्ञरूपारूपक्रियाऽक्रियादिनियमान्नियतिरेवेति सर्वत्र वर्तनतत्त्वः प्रभुविभुत्वाभ्यां काल एव भवतीति च एतैर्वादिर्नन्नु **स्वभाव एव भवतीति भाव्यते,** भवन् भाव्यते तैरेव प्रतिपाद्यते । किं कारणम् ? द्रव्यार्थप्रसवाद् **यत् पुरुषादयो भवन्ति स तेषां भावः, यथा सर्वभावाः स्वेन भावेन भवन्ति स तेषां भावः पा° वा° ५ । १ । ११९** इति वचनाद् येन भावेन यो भवति स तस्य भावस्तत्त्वमात्मीयो भावः

---

१ सु] सुप्तानां जाता वा प्र° ॥
८ स] अत्र **सर्वभावस्व°** इत्यपि पाठः स्यात् ॥
१२ रू] दृश्यतां पृ° २०५ पं° २ ॥
१४ ब] दृश्यतां पृ° २१६ पं° २ ॥
१६ स्थ] **°स्थायाः** प्र° ॥
२३ भा] **भाव्यते रेव प्र°**nayacakra-ms-ya । **भाव्यते रैव प्र°** nayacakra-ms-bhā ॥
२५ य] अत्र **यद्वा** इति पाठः समीचीनो भाति **पात**ञ्जलमहाभाष्यानुसारेण । यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने पा° वा° । किमेभिस्त्रिभिर्भावग्रहणैः क्रियते ? एकेन शब्दः प्रतिनिर्दिश्यते, द्वाभ्यामर्थः । यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थ इति तदभिधाने त्वतलौ भवत इति वक्तव्यम् । इति **पा**णिनीयशब्दानुशासनस्य **का**त्यायनविरचितवार्तिकोपरि **पा**तञ्जलमहाभाष्ये पाठः ॥
२६ नाद्] **येन येन**nayacakra-ms-ya ॥

स्वभाव इत्यनर्थान्तरम्, ततश्च तत्र ते भवन्तीति तदात्मानोऽभिसम्बध्यन्ते पुरुषादीनामात्मानो भवन्ति, **तैर्भूयते यथास्व**मिति भावेन तेषामभिसम्बन्धः । ते भवनस्य कर्तृत्वमनुभवन्ति ज्ञानस्वातन्त्र्य-नियम-वर्तनात्मकं तत् तदिति वदद्भिः स स स्वभाव एव परिगृहीतो भवति । § 675

एवं च स्वभावपरिग्रहे सति कारणान्तरपरिकल्पना व्यर्थेत्यत आह **--तथा च स्वभावे सर्वे**त्यादि यावत् **के ते ? सर्व**भावानां पुरुषादीनां स्वं स्वं भवनमात्मा यस्य सोऽयं **सर्वस्वभवनात्मा,** तस्मिन् स्वभावे **भवति** भवनस्यानुभवितरि कर्तरि स्वतन्त्रे भवति भवतेर्वा कर्तरि सति **सिद्धे** स्वभावे 220/mj

* * *

सिद्धेऽर्थान्तरनिरपेक्षे के ते ? तेषामपि हि स्वत्वं स्वभावापादितमेव, अन्यथा ते त एव न स्युरनात्मत्वाद् घटपटवत् । एवमेव तत्र तत्र पुरुषादिस्वभावानतिक्रमात् सर्वैकत्वमभिन्नं तद्भाववत्त्वादेव वर्ण्यते इति स्वभावः प्रकृतिरशेषस्य ।

पुरुषादीनां च स्वत्वे सत्त्वानपोहात् तुल्ये काल एव भवनात्मा न पुरुषादय इति न स्वभावादृते सिध्यति ।

* * *

सिद्धस्यासाध्यत्वात् सिद्धौदनव**दर्थान्तरनिरपेक्षे** तैरेव वादैः प्रतिपादिते **के ते** पुरुषादयः ? न ते भवन्तीत्यर्थः, किं तैर्विना स्वभावस्य न प्रतिप्राप्तं कार्यम् ? । स्यान्मतम्--तेषां स्वो भाव आत्मीयः स्वभाव इति तानपेक्षत इति, एतच्चायुक्तम्, यस्मात् **तेषामपि स्वत्वं स्वभावापादितमेव,** ते ह्यात्मानः स्वे, तद्भावः स्वत्वम्, तद्धि तेषां स्वत्वं पुरुषादीनां केनापादितम् ? स्वात्मभिरेव । यद्येवं स्वः स्वो भावः स्वभावः परस्परविविक्तः स्व- - /ms
भाव एवेत्यापादितं स्वात्मभिरेव तत् । **अन्यथा** यदि तदात्मत्वं तेषामात्मभावापादितमेव न स्यात् ततस्ते **त एव न स्युरनात्मत्वाद् घटपटवत्,** यथा घटः पटानात्मत्वात् पटो न भवति पटोऽपि घटानात्मत्वाद् घटो न भवति एवं पुरुषादयोऽप्यात्मानात्मत्वादात्मानो न स्युः, न स्युरेव वा अनात्मत्वात् खपुष्पवत् । तस्य स्वभावकारणत्वस्य व्याप्तिप्रदर्शनार्थमाह **--एवमेवे**त्यादि, इत्थमेवैतत्, अवश्यमत्रेव **तत्र तत्र** यथात्र स्वभाववादे स्वभावानतिक्रमात् स्वभाव एवेत्यभिन्नं स्वभावव्यतिरिक्तार्थाभावात् तस्य चाभिन्नत्वात् तथा तत्र

१ त] तदात्मनो° प्र° ॥
२ पुरुषा] °षादात्मानोnayacakra-ms-ya ॥
३ क] कर्तृमनु° प्र° ॥
७ स] अत्र सर्वभावस्व° इत्यपि पाठः स्यात् ॥
२१ प] परवि°nayacakra-ms-bhā ॥
२३ भा] °भावादि° प्र° ॥
२६ त] ष-स्यnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃn । ष्स्य nayacakra-ms-bhā । परस्य nayacakra-ms-raṃ nayacakra-ms-hī ॥
२७ म] °मत्रैव प्र° ॥
२७ वा] °वादे व स्व°nayacakra-ms-ya ॥

तत्र पुरुषनियतिकालादिवादेषूक्तविधिना **पुरुषादिस्वभावानतिक्रमात् सर्वैकत्वमभिन्नं तद्भाववत्त्वादेव वर्ण्यते,** ज्ञात्मभवनस्य नियमात्मभवनस्य वर्तनात्मभवनस्यान्यस्य वा तस्य तस्य स्वभावादेव वर्णनात् । **इतिशब्दो** हेत्वर्थे, अस्मादुक्तहेतोः **स्वभावः प्रकृतिरशेषस्य** योनिर्बीजं प्रभवः कारणमित्यर्थः ।
§ 676

तत्स्वतत्त्वस्य सत्त्वाविनाभावात्, कालोदाहरणं तु कालवादिदूषितपुरुषादिवादानामपि तद्दूषणेन दूष्यत्वात् तत्प्रतिपादनवत् प्रतिपाद्यत्वाच्च । यथोक्तम्-- § 677

किञ्चान्यत्, **पुरुषादीनां च स्वत्व** इत्यादि, द्रव्यार्थस्य कश्चिदपरित्यज्य वृत्तेर्नयानां पूर्वविरोधित्वादुत्तरानुवृत्तेश्च कालस्य पुरुषाद्यपरित्यागेन वृत्तिं तावद् दर्शयति, कालवादे पुरुषादीनां स्वत्वं सत्त्वानपोहात्, कथं सत्त्वमनपोढम् ? संसार्यनादित्वाभ्युपगमात् पुरुषत्वम् । तस्मिन्नेव काले नियतेरप्यात्मत्वं सत्त्वानपोहात्, सत्त्वानपोहश्च युगपदयुगपन्नियतार्थाभ्युपगमात् । एवं कालवादे नियतिपुरुषयोः सत्त्वाभ्युपगमः । तथा पुरुषवादे नियतेः
- /ms कालस्य चात्मत्वं सत्त्वानपोहात्, कथं सत्त्वानपोहः ? मुक्तिक्रमाभ्युपगमात् कालसत्त्वानपोहः, अवस्थानियमाभ्युपगमान्नियतिसत्त्वानपोह इत्यादि । एवं नियतिवादे कालपुरुषयोः स्वत्वमात्मत्वं सत्त्वानपोहात्, कालसत्त्वानपोहः **अनादिमध्यान्तां नियतिम्** इति कालसत्त्वाभ्युपगमात् **तां सम्प्रपश्यन् सर्वज्ञ** इति पुरुषसत्त्वाभ्युपगमात् । एष द्रव्यार्थस्य सर्वत्र सर्वसत्त्वात् स्वभाव इत्युद्ग्राहः कृतो भवति, तत्र **सत्त्वानपोहात्** सत्त्वे

न, अतुल्यत्वात् सत्त्वस्य, कालस्यैवैकस्य व्रीहिवत् तथा तथा भवनात् पुरुषादेश्च पृथक् पृथग्भिन्नभावात्मकभवनात् । नन्वेवमपि कालस्यैव नान्यस्य इति स्वभाव एव परिगृहीतो भवति, तथा च पुरुषादीनां कारणकार्यनियमात् ।

कालस्यैव तत्त्वात् कारणकार्यविभागाभावात् सामान्यविशेषव्यवहाराभाव एवेति चेत्, एवमपि स एव स्वभावः । पूर्वादिव्यवहारलब्धकालाभावश्चैवम्, अपूर्वा-

* * *

221/mj स्वभावादृते सिध्यतितुल्ये **काल एव भवनात्मा न पुरुषादय इति न**

* * *

**न, अतुल्यत्वात् सत्त्वस्य, कालस्यैवैकस्य व्रीहिवत् तथा तथा भवनात् पुरुषादेश्च पृथक् पृथग्भिन्नभावात्मकभवनात् । नन्वेवमपि कालस्यैव नान्यस्य इति स्वभाव एव परिगृहीतो भवति, तथा च पुरुषादीनां कारणकार्य-**

३ वा ] च तस्यnayacakra-ms-ya ॥
८ स ] **सतत्वान**° प्र° ॥
९ पु ] पुरुषस्वत्वम् इत्यपि पाठोऽत्र स्यात् ॥
१३ त्त्वान ] °नपोहात्nayacakra-ms-ya ॥
१५ अ ] दृश्यतां पृ° २०४ पं° २ ॥
१५ स ] दृश्यतां पृ° २०४ पं° २ ॥
१७ स ] अत्र **स्वत्वे** इत्यपि पाठः स्यात् ॥

नियमात् ।

कालस्यैव तत्त्वात् कारणकार्यविभागाभावात् सामान्यविशेषव्यवहाराभाव एवेति चेत्, एवमपि स एव स्वभावः । पूर्वादिव्यवहारलब्धकालाभावश्चैवम्, अपूर्वा-

* * *

स्वभावादृते सिध्यति

समनन्तरानुलोमाः पूर्वविरुद्धा निवृत्तनिरनुशयाः । इति

§ 678

कालवाद्याह **--न, अतुल्यत्वात् सत्त्वस्य,** कालसत्त्वपुरुषसत्त्वयोरन्योन्येनातुल्यत्वात् । कथमतुल्यता ? **कालस्यैवैकस्य व्रीहिवत्तथा तथा भवनात् पुरुषादेश्च पृथक् पृथग्भिन्नभावात्मकभवनात्,** यथा व्रीहिरेवैको मूलाङ्कुरादिभावेन भवति तथा काल एव तथा तथा वर्तनात्मा भवति व्रीहिवद् मूलाङ्कुरादित्वेन, न तथा पुरुषादयो भिन्नात्मभवनादिति । अत्रोच्यते **--नन्वेवमपि कालस्यैव नान्यस्येति** कालस्यैव भवनं न पुरुषादेः इति वचनात् सुतरां कालस्यासौ भवनात्मेति **स्वभाव एव परिगृहीतो भवति** । यथा च त्वयोच्यते सत्त्वातुल्यता कालस्यैव व्रीह्यादिवदङ्कुरादिवच्च पुरुषादीनां भवनमिति **तथा च पुरुषादीनां कारणकार्यनियमा**दपि चैवंस्वभावः कालः कारणं व्रीह्यादिवत्, कार्यं पुरुषादयोऽङ्कुरादिवत्, नियमात् स स तस्य स्वभाव इति स एव स्वभावः परिगृह्यते परैः । पूर्वत्र सत्त्वस्य हेतुत्वेन विवक्षितस्य सत्त्वाविनाभावित्वेन भावना, इह सिद्धस्यैव स्वभेदेष्वभेदेन व्यवस्थितस्य सामान्यविशेषव्यवहारप्रसिद्धिभावनेति विशेषः । § 679 - /ms

**कालस्यैव तत्त्वा**दित्यादि याव**दभाव एवेति चेत्** । स्यान्मतं भवतः--त्रैकाल्यैककूटस्थत्वात् कालस्यैव तत्त्वात् कालवादे कारणं कार्यम् इति विभागाभावादसौ **सामान्यविशेषव्यवहाराभाव एव,** मिथ्यात्वाच्चास्य व्यवहारस्यासद्विषयत्वादिति चेत्, **एवमपि स एव स्वभावः** भवतीति वाक्यशेषः, कालस्यैव हि स स्वभावो यदसौ भवतीति स्वभावपरिग्रहः । किञ्चान्यत्, व्यवहारप्रत्याख्याने प्रागभिहितकालास्तित्वानुमानप्रत्याख्यानदोषः, तद्यथा **--पूर्वादिव्यवहारलब्धकालाभावश्चैवमपूर्वादित्वान्नियतिवत्** । यथा पूर्वपरादिकारणकार्यव्यवहाराभावाद् नियतिर्नास्तीत्युच्यते तथा कालोऽपि तदभावान्नास्तीति प्राप्तम् । यदपि च कालानुमानं युगपदयुगपद्वृत्त्या घटरूपादीनां व्रीह्यङ्कुरादीनां चोच्यते तदपि स्वभावानुमानमेव सम्पद्यते, यस्माद् **युगपदयुगप**दित्यादि, युगपद्वर्तनात् क्रमवर्तनाच्चातिरिक्तस्य कस्यचिदभावात्

८ विरुद्धा ]
निवृत्तिनिर°nayacakra-ms-ya ॥
१३ मूलाङ्कुरा ] °दित्वेन
तथाnayacakra-ms-ya ॥
१८ निय ] °मात्ममात् ?स तस्य प्र° ॥
२० स ] सस्व ?त्वावि° प्र° ॥

काल एव इत्युद्दिश्य निर्देशार्थं घटरूपादि व्रीह्यङ्कुरादि चोदाहृतं तस्योद्देश्यस्य निर्देश्यस्य च भावस्य तेन तेनात्मना भवतो भवनादेव तु विशेषेणैव स्वभावोऽभ्युपगत इति दर्शनार्थम् । § 680
222/mj

दित्वात्, नियतिवत् । युगपदयुगपद् घटरूपादीनां व्रीह्यङ्कुरादीनां च तथा तथा भवनादेव तु स्वभावोऽभ्युपगतः । § 681

तथा च दृश्यते तेष्वेव तुल्येषु भूम्यम्ब्वादिषु भिन्नात्मभावं प्रत्यक्षत एव कण्टकादि । तदेव तीक्ष्णादिभूतम्, न पुष्पादि तादृग्गुणम् । तच्च वृक्षादीनामेव । तथा मयूराण्डक... ... ...मयूरादिबर्हाण्येव विचित्राणि । अन्वाह च-- § 682

कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं
मृगपक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः
प्रयत्नः ॥§ 684

केनाञ्जितानि नयनानि मृगाङ्गनानां को वा करोति
रुचिराङ्गरुहान् मयूरान् ।
कश्चोत्पलेषु दलसन्निचयं करोति को वा करोति
विनयं कुलजेषु पुंसु ॥ § 686

यदि स्वभाव एव कारणं किं न स्वभावमात्रादेव भूम्यादिद्रव्यविनिर्वृत्तिनिरपेक्षा कण्टकाद्युत्पत्तिर्भवेत् ? किमन्यथापि न स्यात् ? कण्टकः किमर्थं विध्यति ? § 687

अथवा नैतद् युक्तिगम्यं स्वभावकारण्यम्, **तथा च दृश्यते तेष्वेव तुल्येषु भूम्यम्ब्वादिषु** हेतुषु **भिन्नात्मभावं प्रत्यक्षत एव कण्टकादि,** कण्टकस्य मूलतः क्रमहीनतनुरायता, **आदि**ग्रहणात् पत्राङ्कुरादि संस्थानवर्णादि भिन्नात्मभावम् । पुन**स्तदेव** कण्टकादि **तीक्ष्णादिभूतम्** तीक्ष्णं तीक्ष्णतरं कुण्ठं
- /ms

३ तु]
तुर्विशेषणैवnayacakra-ms-bhā ।
अत्र तुर्विशेषणे, विशेषेणैव इत्यपि पाठः
स्यात् ॥
४ ग] °गम प्र° ॥
१२ कः] दृश्यतां पृ° १९१ पं° २२ ॥

कुण्ठतरं सविषं निर्विषमित्यादि, **न पुष्पादि तादृग्गुणं** सुकुमारादिस्वभावं सुरभिदुर्गन्धादिस्वभावं च । **तच्च वृक्षादीनामेव,** तच्च कण्टकादि वृक्ष-वल्ली-क्षुपादीनामेव, तत्रापि वर्वलादीनामेव न न्यग्रोधादीनाम् । न चैषा मयूरचन्द्रकादिता वृक्षादीनाम्, न च बर्हिणपारापतादीनां कण्टकादि । **तथा मयूराण्डके**त्यादि यावद् ***विचित्राणि,** बर्हादीनामेव पञ्चवर्णता नोदकादीनाम्, तान्यपि च **मयूरादिबर्हाण्येव विचित्राणि** न शुकादिबर्हाणीति । **अन्वाह चे**ति पूर्ववज्जिनवचनानुसारेणैव । **कः कण्टकाना**मित्यादि **केनाञ्जितानी**त्यादि च गतार्थे वृत्ते । § 688

कुसुमं किं न विध्यति ? **किमर्थं च कदाचिद् विध्यती**ति, तीक्ष्णोऽपि (Edtext outside numbered paragraph)वेधस्वभावोऽपि सर्वकालं किं न विध्यति कण्टकः ? **किमर्थं किञ्चिदेव विध्यति,** न सर्वम् ? त (Edtext outside numbered paragraph)दपि किं (Edtext outside numbered paragraph) क्वचिदेव प्रदेशे विध्यति न सर्वत्र ? इत्यत्र विशेषहेतुर्वाच्यः । दृष्टश्चायं नियमोऽर्थान्तरापेक्षः, स तु स्वभावस्यार्थान्तरनिर- (Edtext outside numbered paragraph) पेक्षत्वान्नोपपद्यते इति । § 689

इतर आह --**यदि स्वभाव एव कारण**मित्यादि यावत् **किञ्चिच्च ने**ति । अर्थान्तरव्यपेक्षोत्पत्तिदर्शनान्न स्वभाव एव कारणम्, आस्ये कवलप्रक्षेपवत् । दृष्टा च कण्टकादेरुत्पत्तिर्भूम्यादिद्रव्यविनिर्वृत्तिव्यपेक्षैवानपह्नवनीया । सा च न स्याद् भूम्यादिद्रव्यनिर्वृत्तिव्यपेक्षोत्पत्तिः स्वभावादेव, स्वभावस्यार्थान्तरनिरपेक्षकारणत्वात् । यदि च स्वभाव एव कारणं **किं** कारणं **न स्वभावमात्रादेव भूम्यादिद्रव्यविनिर्वृत्तिनिरपेक्षा कण्टकाद्युत्पत्तिर्भवेत् ? किं** च कारण**मन्यथापि न स्यात् ?** भूम्याद्यन्तरेण निर्वृत्तिः कण्टकस्य किं न स्यात् ? किं वा कण्टकस्य सौकुमार्यं कुसुमस्य वा तैक्ष्ण्यं न स्यात् ? सोऽपि

किमर्थं च कदाचिद् विध्यति ? किमर्थं किञ्चिदेव विध्यति किञ्चिच्च न ? ननूत्पातादिस्वभावनियमवशादनपेक्षितद्रव्यकालादिरपि दृष्टैव कण्टकाद्युत्पत्तिः । अपि च भूम्यादिद्रव्यविनिर्वृत्त्यपेक्षैव कण्टकनिर्वृत्तिरिति ब्रुवता

---

३ वृ ] वृक्षो महीरुहः शाखी... ...। ४ । ५ ।... ...ह्रस्वशाखाशिफः क्षुपः । ४ । ८ ।... ... वल्ली तु व्रततिर्लता... ...। ४ । ९ । इति **अमरकोशे** ॥
४ ग्रोधादीना ] एतच्चिह्नान्तर्गतो **°नाम्** इत्यत आरभ्य **बर्हादी°** इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
५ का ] **°कादीना वृ°**nayacakra-ms-vi विना । **°कादीनां वृ°** nayacakra-ms-vi ॥
६ म ] **मयूरांगके°** प्र° । तथा मयूराण्डकरसादुत्पन्नत्वे समानेऽपि बर्हादीनामेव पञ्चवर्णता, मयूरादिबर्हाण्येव च विचित्राणि इत्यर्थकं मूलमत्र सम्भाव्यते ॥
६ *] **वैचित्र्याणि**nayacakra-ms-vinayacakra-ms-raṃnayacakra-ms-hi ॥
७ ता ] **नान्यदपि च** प्र° ॥

स्वभावसिद्धिस्त्वयैव वर्ण्यते, भूम्यादिभ्य एव कण्टको भवतीति तत्स्वभाववर्णनात् ।

यथा पृथिव्यादिस्वभावो विश्वथा कण्टकादिरेवं निमित्तानामपि निमित्तता

* * *

223/mj विध्यति ?**कण्टकः किमर्थं**

* * *

किमर्थं च कदाचिद् विध्यति ? किमर्थं किञ्चिदेव विध्यति किञ्चिच्च न ? ननूत्पातादिस्वभावनियमवशादनपेक्षितद्रव्यकालादिरपि दृष्टैव कण्टकाद्युत्पत्तिः । अपि च भूम्यादिद्रव्यविनिर्वृत्त्यपेक्षैव कण्टकनिर्वृत्तिरिति ब्रुवता स्वभावसिद्धिस्त्वयैव वर्ण्यते, भूम्यादिभ्य एव कण्टको भवतीति तत्स्वभाववर्णनात् ।

यथा पृथिव्यादिस्वभावो विश्वथा कण्टकादिरेवं निमित्तानामपि निमित्तता

* * *

विध्यति ?

अत्रोच्यते --**ननूत्पातादिस्वभावे**त्यादि यावद् **दृष्टैव** । यदुच्यते भूम्यादिद्रव्यविनिर्वृत्त्यपेक्षैवोत्पत्तिर्दृष्टा इत्येतत्तदुपेक्षोत्पत्तिदर्शनात् स्वभावाव्यभिचाराच्च स्वभाव एवेति मन्तव्यम् । तद्यथा--उत्पातादिषु अकण्टकानां वृक्षादीनां कण्टकाः कण्टकिनां चाकण्टका निध्यादिलिङ्गत्वेन दृष्टाः । यथोक्तम्—

अकण्टकाः कण्टकिनः कण्टकाश्चाप्यकण्टकाः ।
विपर्ययेण दृश्यन्ते वदन्ति निधिलक्षणम् ॥ इति ।§ 692

इत्थं सत्यामपि भूम्यादिद्रव्यनिर्वृत्तौ कण्टकाभावादसत्यामपि एतद्द्रव्यकालादिनिर्वृत्तौ कण्टकदर्शनाच्च नापेक्षास्ति स्वभावस्य । किन्तु **उत्पातादिस्वभावनियमवशादनपेक्षितद्रव्यकालादिरपि दृष्टैव कण्टकाद्युत्पत्तिः**, न पुनस्तं तं स्वभावमन्तरेण सा उत्पत्तिरस्तीति स्वभाव एवाव्यभिचाराद् व्यापित्वाच्च कारणमेषितव्यम् । किञ्चान्यत्, **अपि चे**त्यादि । अपि च त्वया **भूम्यादिद्रव्यविनिर्वृत्यपेक्षैव** भूम्यादीन्येव वृक्षत्वेन कण्टकद्रव्यत्वेन तैक्ष्ण्यादित्वेन च निर्वर्तन्ते, तत्समायोगनिर्वृत्त्यपेक्षा **कण्टकनिर्वृत्तिरिति ब्रवता** ननु सैव **स्वभावसिद्धिस्त्वयैव वर्ण्यते** । किं कारणम् ? **भूम्यादिभ्य एव** भूम्यम्बुक्षेत्रबीजाङ्कुरादिद्रव्यनिर्वृत्तिभ्य एव **कण्टको भवतीति तत्स्वभाववर्णनात्**, अन्यथा स्वभावात् किमन्यदत्र शक्यं वक्तुं कारणम् ? भूम्यम्बुक्षेत्रबीजाङ्कुरादिभ्य एव कण्टको भवति न मृत्पिण्डादिभ्य इत्येव तेषां स्वभाव इति स्वभावस्यैव समर्थनं तदपि तेषां तत्तत्स्वाभाव्यात् । § 693

---

१६ विनिर्वृत्त्य ] °पेक्षोवोत्प° nayacakra-ms-bhānayacakra-ms-vi विना । °पेक्षोचोत्प° nayacakra-ms-bhā ॥

१६ स्व ] स्वभावव्य° प्र° ॥

२६ वृ ] वृक्षत्वे कण्ट° प्र° ॥

किञ्चान्यत्, **यथा पृथिव्यादी**त्यादि याव**न्निमित्तानामपि निमित्तता स्वाभाविकीति** । यथैवायं **विश्वथा** सर्वथानेकप्रकारं बीजाङ्कुरादिक्रमनिर्वृत्तः कण्टकादिः - /ms पृथिव्यादिस्वभावः पुरुषप्रयत्ननिरपेक्षोऽप्रयत्नत एव भवति, अथवा पृथिव्यादीनामेव प्रागभिहितन्यायेन वृक्षघटादिस्वभावाभ्युपगमाद् यथा स्वभाव एव **एवं निमित्तानामपि** घटपटाद्युत्पत्तौ पुरुषकारसाध्याभिमतायां मृत्पिण्डदण्डचक्रसूत्रोदककुलालादिनिमित्तानां **निमित्तता** सापि **स्वाभाविकी,** ततो न स्वभावव्यतिरिक्तं किञ्चित् । एवं च सर्वस्य स्वाभा 224/mj

* * *

स्वाभाविकी, तत्र कुत उत्पत्तिरपि ? प्रतिवस्तु स्वभाव एवायं वयःक्षीरादिवत् । यदि चासौ न स्यात् तत उत्तरत्रापि न भवेदेव अभूतत्वाद् वन्ध्यापुत्रवत् । एवं मृदादिषु विद्यमानानां घटादीनां निमित्तापेक्षस्वभावैवोत्पत्तिः, नाकाशादिषु ।

दृष्टा घटादीनां क्रियाया उत्पत्तिरिति चेत्, न, प्रागनभिव्यक्तेः । सा सति अग्रहणनिमित्ताभावे किमिति चेत्, स्वभावादेव अतिसन्निकृष्टमतिविप्रकृष्टं वा

* * *

विकल्पेन तत्र कुत उत्पत्तिरपि ? या प्रागुक्ता त्वया भूम्यादिद्रव्यविनिर्वृत्त्यपेक्षैवोत्पत्तिरिति सा कुतः ? नास्त्येव कारणम्, तस्मान्नास्ति सा, प्रागेवाभिव्यक्तये विरचितलीनावस्थत्वात् । तस्मात् सोत्पत्तिः **प्रतिवस्तु स्वभाव एवायम्,** वस्तु वस्तु प्रतिवस्तु स्वो हि भावः स्वभाव इति निरुक्त्या प्रतिवस्तु आत्मीयं भावमाचष्टे । **वयःक्षीरादिवदिति** दृष्टान्तः, यथा बाल्यकौमारादिवयोऽवस्थाः पूर्वविरचिता एव आविर्भवन्ति यथा क्षीरदध्युदश्विन्नवनीतघृताद्यवस्थास्तथा घटादयो निमित्तस्वभावापेक्षाभिव्यङ्ग्यविरचितस्वभावा आविर्भवन्ति । **यदि चासावित्यादि** यावद् **वन्ध्यापुत्रवत्** । **यदि चासा**वुत्पत्तिस्वभावोऽस्मदभिहितो **न स्यादि**त्थं पूर्वावस्थायामेव **तत उत्तरत्रापि न**

---

२ निर्वृत्तः ] °त्तिः कंटकादि nayacakra-ms-ya ॥
३ पृथिव्या ] nayacakra-ms-bhā विनान्यत्र °दिश्वभावः nayacakra-ms-pā । °दिश्वभावः nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
३ त्न ] °त्नक एवnayacakra-ms-ya ॥
१० विद्य ] दृश्यतां पं° १४ ॥
१६ विक ] °कत्वे तत्रnayacakra-ms-bhā ॥
१७ त ] तस्यास्मान्नास्तिnayacakra-ms-bhā । अत्र नास्त्येव कारणं तस्याः, तस्मान्नास्ति इत्यपि पाठः स्यात् ॥
२२ भावा ] °पेक्ष्यभिव्यंग°nayacakra-ms-bhā । °पेक्ष्याभिव्यंग्य° nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī ॥
२३ चा ] वासा° प्र° ॥
२३ चा ] वासा° प्र° ॥

भवेदेव अभूतत्वाद् वन्ध्यासुतवत् । अस्यैवार्थस्य भावनार्थमाह --एवं मृदादिष्वित्यादि गतार्थं यावन्नाकाशादिषु । § 694

**दृष्टा घटादीनां क्रियाया उत्पत्तिरिति चेत्** । स्यान्मतम्--दृष्टविरुद्धमुक्तं त्वया **विद्यमानानां घटादीनां निमित्तापेक्षस्वभावैवोत्पत्तिरि**ति, क्रियाया एव
- /ms कुलालस्य घटादेरर्थस्योत्पत्तेर्दर्शनादिति । एतच्च **न, प्रागनभिव्यक्तेः**, क्रियायाः प्राक् सोत्पत्तिरनभिव्यक्ता अपवरकघटवत् प्रदीपेनेव क्रिययाभिव्यज्यते नोत्पाद्यत इत्यदोषः । **सा सति अग्रहणनिमित्ताभावे किमिति चेत्**, सा सति अर्थेऽनभिव्यक्तिरग्रहणनिमित्तानामत्यासन्नविप्रकृष्टव्यवहितसमानाभिहाराभिभवसौक्ष्म्येन्द्रियदौर्बल्यमनोवैयग्र्यपित्तोपघातादीनामभावे सति किमर्थं भवतीति चेन्मन्यसे, वयमत्र ब्रूमः --**स्वभावादेवे**त्यादि यावच्च-
225/mj **क्षुरादिना न गृह्यते** ।

* * *

अञ्जनमन्दरादि चक्षुरादिना न गृह्यते, यथा स स्वभावस्तथायमपि । तथा किञ्चिदत्यन्तानुपलब्धिस्वभावमेव भवति आत्मादि । तन्न पुरुषकामचारप्रयत्नादिभ्यः किञ्चिदपि निर्वर्तते । तत्र कुतः कस्यचिदर्थिनोऽप्येवं वा विपर्यय एव वारम्भक्रियानिर्वृत्तयः ? तथा चाहुः--

कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः ।
तद्वद् दन्ती, प्रभावात्तु विरेचयति सा नरम् ॥ चरकसं० १ । २६ । ६८§ 697

---

८ मित्तानाम] अतिदूरात् सामीप्यादिन्द्रियघाताद् मनोऽनवस्थानात् । सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥ ७ ॥ इह सतोऽर्थस्यातिदूरादनुपलब्धिर्दृष्टा यया विप्रकृष्टेऽध्वनि वर्तमानः शकुनिर्नोपलभ्यते । न च यस्मान्नोपलभ्यते किमसौ नास्तीति ? अतिदूरान्नोपलभ्यते । अत्राह--यन्नातिदूरे तत् कस्मान्नोपलभ्यते ? अत्रोच्यते--सामीप्यात्, यदा देवदत्त आत्मचक्षुःस्थमञ्जनं नोपलभते किं तन्नास्ति ? अत्राह--यन्नातिदूरे नातिसामीप्ये तत् कथं नोपलभ्यते ? अत्रोच्यते--इन्द्रियघातात्, यथा बधिरः शब्दं न शृणोति अन्धो रूपं न पश्यति, किं ते शब्दरूपे न स्तः ? अत्राह--यस्य अनुपहतमिन्द्रियं स कस्मान्नोपलभत इति ? अत्राह--मनोऽनवस्थानात्, अनवस्थितमना हस्तिनं परिक्रामन्तं न पश्यति, अस्ति चासौ, वक्तारो भवन्ति--व्यग्रमनसा नावधारितमिति । यस्याव्यग्रं मनः...स कस्मान्नोपलभते ? अत्रोच्यते--सौक्ष्म्यात्, धूमोष्णनीहारा आकाशगता नोपलभ्यन्ते, किं ते न सन्तीति ? अत्राह--ये नातिसूक्ष्मास्ते कस्मान्नोपलभ्यन्ते ? अत्रोच्यते--व्यवधानात्, कुड्येन घटादयो व्यवहिताः । ये चाव्यवहिताः ते कस्मान्नोपलभ्यन्ते ? अभिभवात्, यथा आदित्यप्रकाशेन ग्रहनक्षत्रचन्द्रताराणां प्रकाशा अभिभूतत्वाद् नोपलभ्यन्ते, किं ते न सन्तीति ? अत्राह--ये नाभिभूतास्ते कस्मान्नोपलभ्यन्त इति ? अत्राह— समानाभिहाराच्च, समानाः सदृशा इत्यर्थः, तेषां समभिहारो राशिः, तस्मात्... ...एवं सतामर्थानां अष्टविधानुपलब्धिः ।जे० साङ्ख्यका० A । अत्राह--ये नाभिभूतास्ते कस्मान्नोपलभ्यन्ते ? अत्रोच्यते--समानाभिहाराच्च, समानाः सदृशा इत्यर्थः, यथा माषराशौ माषाः प्रक्षिप्ता मुद्गराशौ मुद्गा कपोतगणमध्यगो वा कपोतः । किं ते माषादयो न सन्ति ? समानाभिहारान्नोपलभ्यते । तदेवं सतामप्यर्थानामष्टविधा ह्यनुपलब्धिः । जे० साङ्ख्यका० B ७ ॥

१७ क] दृश्यतां पृ० २५६-- १, पृ० १७६ टि० ६ ॥

* * *

न त्वस्माभिरेव तद् वक्तव्यम् **--स्वभावादेव,** अग्रहणहेतुषु असत्स्वपि सतोऽर्थस्यानभिव्यक्तौ स्वभाव एव कारणमिति । कस्मात् ? त्वयैवाभ्युपगतत्वात्, अतिसन्निकृष्टमतिविप्रकृष्टं व्यवहितं वा चक्षुरिन्द्रियं रूपमञ्जनमन्दरादि न गृह्णात्यत्यन्तम् इत्यत्र केन त्वया एतत् कारणेन प्रतिपन्नम् ? इति पृष्टेनावश्यं स्वभावादिति वक्तव्यम्, अयं हि चक्षुषः स्वभावो यदतिसन्निकृष्टमञ्जनादि न पश्यति अतिविप्रकृष्टं वा मेर्वादीति शेषेन्द्रियाणामपि स्वभावादेवातिविप्रकृष्टाद्यग्रहणं स्वविषयनियमश्चेति । किञ्चान्यत्, **यथा स स्वभावस्तथायमपि,** यथा चक्षुरादीन्द्रियाणामात्मनोऽत्यन्तमतिसन्निकृष्टाद्यग्रहणं स्वभावस्तथानभिव्यक्ताग्रहणं स्वभाव इति किं न गृह्यते ? § 698

किञ्चान्यत्, यथैतत् **तथा किञ्चिदत्यन्तानुपलब्धिस्वभावमेव भवति आत्मादि,** आत्माकाश- कालदिगादयः कार्यत एव नित्यमनुमेयाः पदार्थाः - /ms
सौक्ष्म्याद् बाह्येन्द्रियाविषयास्तत्स्वभावाः । तत्र नास्त्यात्मा नास्ति कालः धर्माधर्माकाशदिगादयो वार्था न सन्तीति वृथैव विवदन्ते शाक्यादयः स्वभावभेदमविद्वांसः । तस्माद् यदुच्यते त्वया क्रियातो घटादि निर्वर्तत इति **तन्न पुरुष-काम-चार-प्रयत्नादिभ्यः किञ्चिदपि निर्वर्तते,** पुरुषात् तदिच्छातस्तत्प्रवृत्तेस्तत्प्रयत्नाद् वीर्यादित्यर्थः । **आदि**ग्रहणान्न तद्बुद्धेः न स्वामिनियोगादिभ्यः सर्वत्र व्यभिचारदर्शनात् । किं तर्हि ? भूम्यम्ब्वादिव्रीह्यङ्कुरादिमृद्घटाद्यभिव्यक्त्यनभिव्यक्तिस्वभावो घटोऽपि पृथिव्यादिस्वभाव एव वस्तुत्वात् तदात्मत्वात्, यथा--आपो द्रवाः, स्थिरा पृथिवी, चलोऽनिलः, मूर्तिहीनमाकाशम्, उष्णोऽग्निरित्यादिषु स्वभाव एव, **तत्र कुतः कस्यचिदर्थिनोऽप्येवं वा विपर्यय एव वारम्भ-क्रिया-निर्वृत्तयः,** आपो द्रवा भवन्तु, स्थिरा पृथिवी, चलोऽनिलः, अग्निरुष्णः, वियदमूर्तं भवतु इत्येवमर्थिनोऽपि पुरुषस्य नारम्भो न चेष्टा न च निर्वृत्तिर्वा तथा विपर्ययेऽपि मा भूद् द्रवं जलम्, स्थिरा भूः, चलोऽनिलः, अग्निरुष्णः, अमूर्तमाकाशम् इत्यारम्भः क्रिया निर्वृत्तिर्वा स्वभावस्यान्यथाकर्तुमशक्यत्वात् । एवं घटादिष्वपि योज्यं स्वाभाविकत्वम् ।
§ 699

**तथा चाहु**रिति स्वाभाविकत्वे ज्ञापकमाह । कटुकरसः कटुविपाक उष्णवीर्यश्चित्रकः, तद्वद् दन्ती कटुकरसा कटुविपाका उष्णवीर्या, विशेषस्त्वस्याश्चित्रकात् प्रभावेन विरेचयति, प्रभाव इति स्वभावपर्यायत्वाद् रसादेरपि

२ न] nayacakra-ms-bhā विना न चस्मा° nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-hī । न चास्मा° nayacakra-ms-vi nayacakra-ms-ḍe nayacakra-ms-līṃ ॥
९ क्षुरादीन्द्रियाणामात्म] °त्मषोत्यन्त° प्र° ॥
१७ णा] °णात्तद्बुद्धेः प्र° ॥
१८ भू] भूम्यांत्वादि°nayacakra-ms-bhā ॥
२८ क] दृश्यतां पृ° २५६-- १, पृ° १७६ टि° ६ ॥

स्वभावत्वात् स एव सामान्यविशेषाभ्यां तथा तथा वर्ण्यत इति, तस्माद् यत् त्वयोक्तं **क्रियातो घटाद्युत्पत्तिः** इति तत्र पृथिवीमृत्पिण्डशिवकादिक्र- - /ms, 226/mj मापत्तव्यघटात्मनः स्थैर्यात्मवत्न स्त उत्पत्ति-

* * *

इति कथं घटोत्पत्त्यादि सम्भाव्यते ? प्रवृत्तिमृदां स स्वभाव एव । फलस्वभावानुरूपाः प्रवृत्तयोऽत एव व्यवस्थिता इति प्रयासोऽनर्थकः । स्वभावादेव प्रवर्तितव्यमित्येव प्रवर्तन्तेऽप्रतर्कतो वस्तूनि, अक्षिनिमेषधातुकण्टकादिवत् ।

* * *

विनाशावुक्तहेतुत्वात् । **इतिशब्दो** हेत्वर्थे, अस्माद्धेतोः **कथं घटोत्पत्त्यादि सम्भाव्यते ? आदिग्रहणाद्** वक्ष्यमाणौ विनाशविपरिणामावपि कथं सम्भाव्येते ? नैव सम्भावनीयं तत्त्रयमित्यर्थः । § 700

स्यान्मतम्--कुलालप्रयत्नप्रवृत्तिदण्डचक्रसूत्रोदकमृदादीनां पुरुषाभिसन्ध्यनुरूपघटाद्युत्पत्तिविनाशविपरिणामफलैः सम्बन्धदर्शनान्न स्वभाव एवेति । एतच्चायुक्तम्, यस्मात् **प्रवृत्तिमृदां स स्वभाव एव,** यथोक्तं प्राक् **निमित्तानां निमित्तता स्वाभाविकी** इति, तस्मात् स्वभाव एव । किञ्चान्यत्, **फलस्वभावानुरूपाः प्रवृत्तयोऽत एव व्यवस्थिताः,** स्वभावबलादेव मृत्पिण्ड-दण्डादिभिरेव घटो भवतीति ज्ञात्वा चक्रमूर्ध्नि मृत्पिण्डं संस्थाप्य दण्डग्रहणचक्रभ्रमणादिव्यापारा घटफलयोग्याः क्रियास्तदनुरूपा व्यवस्थिताः । तथा तुरीवेमशलाकादिसाधनाः सूत्रोपादान-तन्तुसन्तान-पायन-वयनक्रियाः पटफलस्वभावानुरूपा व्यवस्थिताः । एवं कृषिसेवावणिज्यापरिव्रज्यादिप्रवृत्तयः स्वभावमेव हेतुं समर्थयन्त्यो दृश्यन्ते लोके व्यवस्थिताः, आसां नाप्युत्कर्षो नाप्यपकर्षः कश्चित् । फलानुरूपाः प्रवृत्तयः प्रवृत्त्यनुरूपं फलं तत्र तत्रेति व्यवस्थितफलप्रवृत्तिता स्वभावादेवेति । § 701

स्यान्मतम्--व्यवस्थितप्रवृत्तिफलस्वभावे भावे पुरुषप्रयासस्तर्ह्यनर्थक - /ms इति चेत्, सत्यमेतत्, **इति प्रयासोऽनर्थकः,** यथा त्वं ब्रूषे तथैव स्वभावसामर्थ्यादेव प्रवृत्तेर्निवृत्तेश्च फलसिद्ध्यसिद्ध्योरनर्थक एव प्रयास इति त्वया सदोषाभिमतोऽप्ययं पक्षो मया तत्त्ववादभ्रंशभयान्न त्यज्यते । इत्थमनर्थकोऽप्यसौ प्रयासः पुरुषस्यास्त्येव, सन्नेव स्वभावादेव । यथोक्तम्—

---

२ क्रिया ] दृश्यतां पृ° २२४ पं° ४ ॥
८ विनाशा ] उत्पत्तिविनाशाभावे हेतुः पूर्वमुक्तः, दृश्यतां पृ° २२४ पं° १ ॥
११ पुरुषाभिस ] **°संबध्य°**nayacakra-ms-bhā । **°संबंध्य°** nayacakra-ms-ya ॥
१३ प्रा ] पृ° २२३ पं° ५ ॥
१८ न्तुस ] **सन्तान्त ?ननपा°**nayacakra-ms-ya । इह यत् तन्तुवायैरुभयपार्श्वयोः कीलकयुगलं निखाय तानकरूपतया तन्तवस्तन्यन्ते तत् तननम्, यत् पुनरधस्तनोपरितनयोस्तानकतन्तुसन्तानयोरन्तराले नलकप्रयोगेण तन्तव उभयतो वितन्यन्ते व्यूयन्ते तद् वितननम्,... ...यद् वस्त्रं कूर्चिकेण खलिकां पाय्यते तत् पायनम् । इति बृहत्कल्पसूत्रस्य भाभा° प्रतौ, गा° ६२५ ॥
२५ वृत्तेर्निवृ ] **°वृत्ते-श्च**nayacakra-ms-bhānayacakra-ms-vi ॥

स्वभावतः प्रवृत्तानां निवृत्तानां स्वभावतः ।
नाहं कर्तेति भावानां यः पश्यति स पश्यति ॥ § 704

इति प्रवृत्तिनिवृत्त्योर्भावानां स्वभावस्वातन्त्र्यमेव, स हि स्वो भाव आत्मा वस्तूनां निर्वृत्तानामित्युक्तत्वात् । प्रवृत्तिनिवृत्त्योरानर्थक्ये किङ्कृता किम्फला वा प्रवृत्तिः ? अतः स्वभावानुरूपप्रवृत्तिप्रतिज्ञाव्याघात इति चेत्, न व्याघातः, तत्स्वाभाव्यादेव यस्मात् **प्रवर्तितव्यमित्येव प्रवर्तन्तेऽप्रतर्कतो वस्तूनि,** प्रकृष्टस्तर्कः प्रतर्कः, अनेनोपायेनार्थस्य सिद्धिः इति य ऊहः स तर्कः, न प्रतर्कोऽप्रतर्कः, अप्रतर्कत एव वस्तूनि प्रवर्तितव्यमित्येव प्रवर्तन्ते स्वभावादेव, तद्यथा --**अक्षिनिमेषधातुकण्टकादिवत्,** यथा अक्षिनिमेषोन्मेषा

* * *

एवं च यदि हेतुतो यद्यहेतुतो घटकण्टकादि उभयथापि स्वभावानतिवृत्तिः । आत्मभवनमनादिप्रवृत्तं कारणं जगतः ।

एवं च तत्रानादिप्रवृत्तस्वभावविपर्ययेण यद्युत्पत्तिर्विनाशो विपरिणामो वा ततोऽनादिप्रवृत्तकारणस्वभावव्यत्यासे हिताहितप्राप्तिपरिहारार्थशास्त्रव्यर्थता पुरुषस्य क्रियायाः फलस्य च तथाऽस्वभावत्वात् । अन्यथोत्पादविनाशविपरिणामेभ्यो घटार्थं प्रवृत्तेषु तत्पट उत्पद्यते तद्विनाशार्थं प्रवृत्तेष्वविनाशो विपरिणामार्थं प्रवृत्तेष्वविपरिणामश्च । अतः शास्त्रार्थवत्त्वाय वरमिदमेव कारणं स्व एव भावः

* * *

वनर्थकावबुद्धिपूर्वो च पुरुषस्याहृताहाररसरुधिरमांसमेदोस्थिमज्जशुक्रादित्वेन विभजनं कण्टकतीक्ष्णभवनं चेत्येवमादिप्रवृत्तयस्तथा घटादिफलस्वभावानुरूपाः प्रवृत्तयोऽप्रतर्कत एवेति । § 705

**एवं चे**त्यादि । एवं च कृत्वा लोकप्रसिद्धिवशाद् **यदि हेतुतो यद्यहेतुतो** यथासङ्ख्यं **घटकण्टकादि** बुद्ध्यबुद्धिपूर्वनिर्वृत्ताभिमतं यदस्तु तदस्तु **उभयथापि स्वभावानतिवृत्तिः** । एवमेतदात्मभवन**मनादिप्रवृत्तं कारणं जगतः,** पृथिव्यब्बीजाङ्कुरादिषु स्थिरद्रवादिस्वभावाविर्भावतिरोभावादिरूपेण एकं नित्यं च नोत्पद्यते न विनश्यति न चान्यथा भवतीति प्रतिपत्तव्यम्, उत्पादविनाशविपरिणामानामनादिप्रवृत्तस्वभावकारणविरोधित्वात् । § 706 - /ms

**एवं च तत्रानादिप्रवृत्तस्वभावे**त्यादि यावद् **विपरिणामो वे**ति पूर्वपक्ष उत्तानार्थः । उत्तरपक्षस्तु **ततोऽनादिप्रवृत्तकारणस्वभावव्यत्यासे** इति

४ व] वस्तुनां निवृत्तानामित्युक्त°nayacakra-ms-ya । वस्तूनामित्युक्त° nayacakra-ms-bhā । अत्र वस्तूनां प्रवृत्तनिवृत्तानामित्युक्तत्वात् इत्यपि पाठः स्यात् ॥
६ प्र] प्रवर्तन्ते स्वभावप्रतर्कतोnayacakra-ms-pānayacakra-ms-vinayacakra-ms-raṃnayacakra-ms-hī । प्रवर्तन्ते स्वभावादेवाप्रतर्कतः इत्यपि पाठोऽत्र स्यात् ॥
८ र्कोऽप्र] °ऽप्रतर्कत एवnayacakra-ms-bhānayacakra-ms-ḍenayacakra-ms-līṃ । °ऽप्रतर्क एत एव nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
९ भावा] °दे तद्यथा प्र° ॥

प्रत्युच्चारणम्, आत्मभवनविपर्यये दोषः, **हिताहितप्राप्तिपरिहारार्थशास्त्रव्यर्थता,** धर्मार्थकाममोक्षफलप्राप्त्युपायविधानार्थानि तदपायपरिहारार्थानि च शास्त्राणि व्यर्थानि स्युः । किं कारणम् ? **पुरुषस्य क्रियायाः फलस्य च तथाऽस्वभावत्वात्,** कर्तृकरणकर्मादिसाधनानां तदङ्गसम्पन्नायाः क्रियाया धर्मार्थकाममोक्षाणामन्यतमस्य तत्फलस्य चान्योन्यानुरूपेण अनात्मत्वादित्यर्थः । परस्परानुरूपानभ्युपगमेऽन्यथोत्पादोऽन्यथा विनाशोऽन्यथा विपरिणामश्चाननुरूपेणेति यावत् । ततो**ऽन्यथोत्पादविनाशविपरिणामेभ्य** इति पुरुषादिसाधनक्रियाफलानां तथाऽनात्मत्वं समर्थयति, **घटार्थं प्रवृत्तेषु** घटोत्पत्त्यर्थं प्रवृत्तेषु **तत्पट उत्पद्यते तद्विनाशार्थं प्रवृत्तेष्वविनाशो विपरिणामार्थं प्रवृत्तेष्वविपरिणामश्चे**ति, स्वभावानियमान्नोत्पादविनाशविपरिणामाः सन्ति, यदि स्युरयथाभिप्रेताः स्युः स्वभावानियमादिति स्वभावापरिग्रहे शास्त्राणामर्थवत्ता न युज्यते । **अत**स्तस्मात् सिद्धशास्त्राणामनतिशङ्क्यत्वादनिष्टत्वाच्चानर्थक्यस्य शास्त्रार्थवत्त्वसिद्ध्यर्थं च घटादेः कारणमन्वेषणीयम्, तच्च कारणमन्विष्यमाणं **शास्त्रार्थवत्त्वाय वरमिदमेव कारणं** स्वभावः, नातोऽन्यद् विमर्दरमणीयतरमस्ति । कुतोऽन्यन्नास्ति ? यत्तत्कारणं **स्व एव** आत्मीय एव

- /ms, 228/mj आत्मैव वा **भावः**, कतमोऽसौ ? सङ्ग्रहेण

* * *

द्विधा प्रतिवस्तु जीवाजीववदवस्थितः, योऽस्ति स भावः य आत्मा स भावः स्वभावः ।

स चैकोऽपि कारकभेदं स्वशक्तिभेदादेव लभते, स एवानुभवति सोऽनुभूयते । स्वद्रव्यसंयोगविभागस्वाभाव्येन स एव भवतीति संसारमोक्षौ स्वभावतः ।

* * *

**द्विधा प्रतिवस्तु जीवाजीववदवस्थितः, योऽस्ति स भावः य आत्मा स भावः स्वभाव** इति च परभावनिराकरणार्थमुच्यते । यथोक्तम् --**किमिदं भंते ! अत्थित्ति वुच्चति ? गोयमा ! जीवा चेव अजीवा चेव** स्थाजदत्थि णं लोगे तं सव्वं दुप+ओ+आरं, तं जहा-जीव च्चेव अजीव च्चेव, तसे चेव थावरे चेव, सजोणिय च्चेव अजोणिय च्चेव, सा+उय च्चेव अणा+उय च्चेव, स+इंदिय च्चेव अणिंदि+ए चेव, सवेयगा चेव अवेयगा चेव, सरूवि चेव अरूवि चेव, सपोग्गला चेव अपोग्गला चेव, संसारसमावन्नगा चेव असंसारसमावन्नगा चेव, सासया चेव असासया चेव, आगासे चेव नो आगासे चेव, धम्मे चेव अधम्मे चेव, बंधे चेव मोक्खे चेव, पुण्णे चेव पावे चेव, आसवे चेव संवरे चेव, वेयणा चेव णिज्जरा चेव । इति स्थानाङ्गसूत्रे २ । १ । ५७--५९ ॥नाङ्गसू°, तथा **किमिदं भंते ! सम+एत्ति वुच्-**

---

२ च ] **च** प्रतिषु नास्ति ॥
९ त ] वत्पटnayacakra-ms-vi ।
अत्र च पट उत्पद्येत इत्यपि पाठः स्यात् ॥
११ था ]

°भिप्रेतास्युःnayacakra-ms-bhā nayacakra-ms-vi विना ॥

ति ? गोतमा ! जीवा चेव अजीवा चेव स्थासमयाति वा आवलियाति वा जीवाति या अजीवाति या पवुच्च+इ, आणापाणूति वा थोवाति वा जीवाति या अजीवाति या पवुच्च+इ, खणाति वा लवाति वा जीवाति या अजीवाति या पवुच्च+इ, एवं मुहुत्ताति वा अहोरत्ताति वा पक्खाति वा मासाति वा उ+उति वा अयणाति वा संवच्छराति वा... ...उसप्पिणीति वा ओसप्पिणीति वा जीवाति या अजीवाति या पवुच्च+इ ।...गामाति वा णगराति वा...पुढवीति वा उदहीति वा...दीवाति वा समुद्दाति वा...वासाति वा वासहरपव्वयाति वा कूडाति वा कूडागाराति वा विजयाति वा राय-हाणीति वा जीवाति या अजीवाति या पवुच्च+इ । इति स्थानाङ्गसूत्रे २ । ४ । ९५ । किमियं भंते ! पा+ईणत्ति पवुच्च+इ ? गोयमा ! जीवा चेव अजीवा चेव । भगवतीसू° १० । १ । ३९४ ॥नाङ्गसू°, एवमाव-लिकोच्छ्वासनिःश्वासप्राणस्तोकलवमुहूर्ताहोरात्रकालविभागा रत्नप्रभादिभूमयो द्वीपाः समुद्राः पर्वताद्याश्च नेयाः । § 707

**स चैकः** स्वभावः पूर्ववदशेषनित्यत्वलक्षणयुक्तोऽपि कर्तृकर्मकर-णादि**कारकभेदं स्वशक्तिभेदादेव लभते,** तद्यथा--स्वसाधनविशेषस्वभावादेव विशेषो भवति, **स एवानुभवति सोऽनुभूयते,** एतद्व्याख्यार्थोदाहरणत्वेन कार-कद्वयं कर्तृकर्मकारकभेदा एव शेषकारकाणीति दर्शनार्थम् । **सोऽनुभव-ति** कृत्वा फलमनुभवति कर्मफलं भुङ्क्ते । **सोऽनुभूयते** स्वभावभेदेनात्मनैव भुज्यतेऽपि । स एव कथमनुभवति अनुभूयते च ? इति तदर्थप्रदर्शनार्थमाह **--स्वद्रव्येत्यादि** । स्वयमेव द्रव्याणि आत्मैव कर्मकर्मित्वस्वभावानि द्रव्याणि संयुज्यन्ते वियुज्यन्ते च, तेषामेव स्वभावभेदानां द्रव्याणां **संयोगविभागौ** ब-न्धमोक्षौ देशसर्वविकल्पौ, तद्विकल्पविचित्रसुखदुःखजन्ममरणवैषम्ये, तयोः **स्वाभाव्येन स एव भवतीति संसारमोक्षौ स्वभावतः,** यथा व्रीहिरेव अङ्कुर-त्वाद्यनुभवनात्मानुभवति अनुभूयते च । अन्योन्यसंयोगवियोगविपरिवर्तेन कर्मकर्मिस्वाभाव्येन विपरिवर्तमानोऽपि स्वभावात्मा व्याधेः साध्यासाध्य- - /ms
द्वैतरूपवत् स्वजात्यपरित्यागादद्वैतत्वाद् व्यवस्थित एव सर्वत्र भव्याभव्य-जीवराश्योः । को दृष्टान्तः ? यथा कनकाश्मनि सुवर्णं द्विधाविर्भवत् क्रिया-ऽक्रियाभ्यां तत्स्वभावः, क्वचिन्नास्त्येव कनकमिति सोऽपि स्वभावः, तथा केषाञ्चित् स्वयमेवापगमादात्मविशुद्ध्याविर्भावः 229/mj

* * *

अन्तरेणापि धातुवादं कनकाविर्भावस्तथा कर्मविवेकस्वाभाव्यादेव भव्य-जीवानामात्माविर्भावः, सम्यग्दर्शनज्ञानपूर्विकया तु क्रियया प्राचुर्येण कैव-

---

१६ ए] एवानुभूयते एत°nayacakra-ms-ya ॥
१८ कृ] कृत्वा फलमनुभवतिnayacakra-ms-ya प्रतिषु नास्ति ॥
२० आ] आत्मैवnayacakra-ms-ya । आत्मव nayacakra-ms-bhā ॥
२५ व्या] व्याधः साध्यद्वैत°nayacakra-ms-bhā । व्याधः साध्यासाध्याद्वैत° nayacakra-ms-ya ॥
२९ ग] °गमात्म°गमात् ?विशु° प्र° ॥

ल्यप्राप्तिर्धातुवादक्रिययेव कनकोत्पत्तिः, केषाञ्चिदनाविर्भाव एव कर्माविवेकस्वाभाव्यात् ।

एवं च तदुभयस्वभाववर्णनादभव्यजीवकर्मणोः... ... ...। भव्यस्य तु विशुद्धि... ... ...। यदि हेतुरन्यो मृग्येत तेनानन्त्यमस्यापि स्यात्, अनादित्वात्, आकाशवत् । तदन्तवत्त्वे वाकाशमपि सान्तं स्यात्, अनादित्वात्, भव्यकर्मवत् । अथाप्यस्यानादित्वेऽहेतुरन्तो भवति तथा आदिः सिद्धकर्मसन्तानस्य कस्मान्न भवति ? इति स्वभाव एव शरणं तदुपायस्वभावो मोक्ष इति । एवं सर्वचोद्येषु ।

* * *

केवल्यं यथा भरतमरुदेव्यादीनामित्यत आह तद्दृष्टान्तत्वेन **--अन्तरेणापि धातुवादं कनकाविर्भावस्तथा** कर्मविवेकस्वाभाव्यादेव भव्यजीवानामात्माविर्भावः, सम्यग्दर्शनज्ञानपूर्विकया तु क्रियया प्राचुर्येण कैवल्यप्राप्तिर्धातुवादक्रिययेव कनकोत्पत्तिरिति स्वभाववैचित्र्यादेव, तथा केषाञ्चिदनाविर्भाव एव कर्माविवेकस्वाभाव्यात् । § 708

त्यतिदेशः, यथा भव्याभव्यसंसा (Edtext outside numbered paragraph)रोच्छित्त्यनुच्छित्त्योर्विशेषहेतुर्वाच्यः इति चोदिते स्वभावादेवेति व्यवस्थोक्ता तथा जीवाजीवरूप्यरूपिस (Edtext outside numbered paragraph)क्रियाक्रियत्वादिविशेषाः कुतः इति चोदिते स्वभावादेव व्यवस्थाव (Edtext outside numbered paragraph)श्यमाश्रयणीया । § 709

**एवं च तदित्यादि** । एवं च कृत्वा स्वभावनयबलेन आम्नाता जीवा द्विविधाः--भवसिद्धिकाश्च अभवसिद्धिकाश्चेति **तदुभयस्वभाववर्णनात् अभव्यजीवकर्मणो**रित्यादि **भव्यस्य तु विशुद्धी**त्यादि च गतार्थं वाक्यद्वयम् । अनादेर्जीवकर्मसन्तानस्य व्यवच्छेदाव्यवच्छेदौ स्वभावादेवेति नात्र कश्चिद् भव्यकर्मसन्तानसान्ततायामभव्यकर्मसन्तानानन्ततायां वा हेतुः शक्यो वक्तुमन्यः स्वभावात् । **यदि हेतुरन्यो मृग्येत तेन आनन्त्यमस्यापि स्यात्**, कस्य ? भव्यकर्मसन्तानस्याप्यनन्तत्वं स्यात् । कस्मात् ? **अनादित्वादाकाशवत्**, स्वभावमनिच्छद्भिरनादित्वहेतुरभ्युपगन्तव्यो जायते सोऽनिष्टानन्तत्वसाधनाय भवति । अधुनाऽनादित्वहेतुसद्भावेऽपि तत्सान्ततेष्टावाकाशसान्ततेत्यत आह **--तदन्तवत्त्वे वाकाशमपि सान्तं स्यादनादित्वाद् भव्यकर्मव**दिति स्वभाव

३ व्य ]
अभव्यजीवकर्मणोरनादिसन्तानस्याव्यवच्छेदः स्वभावादेव । भव्यस्य तु विशुद्धिस्वभावादेव अनादिकर्मसन्तानस्य व्यवच्छेदः इत्याशयकमत्र किमपि मूलं स्यादिति सम्भाव्यते ॥
१६ अ ]
अभव्यजीवकर्मणोरनादिसन्तानस्याव्यवच्छेदः स्वभावादेव । भव्यस्य तु विशुद्धिस्वभावादेव अनादिकर्मसन्तानस्य व्यवच्छेदः इत्याशयकमत्र किमपि मूलं स्यादिति सम्भाव्यते ॥
१९ स ] **संततानन्ततायां** प्र° ॥
२३ अ ] **अधुनादित्व°** प्र° । अत्र भवति । अनादित्वहेतुसद्भावेऽपि इत्यपि पाठः स्यात् ॥

एवान्तवत्त्वे कारणम्, न हेतुरन्योऽस्ति हेतुवादेन विमृग्यमाणः । **अथाप्यस्य भव्यसंसारस्यानादित्वे** सति **अहेतुरन्तो भवति** निर्हेतुकहेतुकोऽन्त इष्यते **ततो** यथा चास्यानादित्वे संसारस्याहेतुरन्तो भवति तथा कस्मात् तस्य विरोधी पुनर्निर्हेतुकहेतुकान्तवत्त्ववद् भव्यकर्मसन्तानस्य निर्हेतुकहेतुकादिः **सिद्धकर्मसन्तानस्य कस्मान्न भवति ?** इति वाच्यमत्र विशेषकारणमस्व- भावहेतुवादिना, मम तु पुनः स्वभाववादिनः स्वभाव एव सर्वत्र कारणं व्यापित्वात् । **इतिशब्दो** हेत्वर्थे, इत्यतः कारणादित्थं **स्वभाव एव शरणं** कारणवादिनाम् । कथं कृत्वा ? **तदुपायस्वभावो मोक्ष इति** सम्यग्दर्शनादिर- त्नत्रयोपायसम्पन्नभव्यकर्मसन्तानात्यन्तोच्छेदस्वभावो मोक्ष इति । एवं तावद् भव्यसंसारोच्छित्तावभव्यसंसारानुच्छित्तौ च हेतुवादे चोदिते स्वभावाश्रयेण परिहार उक्तः ।  - /ms

स्वभावानभ्युपगमे तु न साधनं न दूषणं च स्वभावापेतावयवार्थ- वादित्वादिति वादहानं ते ।

अयं सर्वोऽपि यत्नः सोऽन्यभिन्नस्वरूपोपादानेनैव स्वाभिमतिनिराकर- णाय भवति । पुरुषवादे तावज्ज्ञानमयो न रूपादिमयः, रूपादीनां तन्मयत्वात् । कार्या-

* * *

सर्वचोद्येष्विएवं 230/mj

* * *

स्वभावानभ्युपगमे तु न साधनं न दूषणं च स्वभावापेतावयवार्थवादित्वादिति वादहानं ते ।

अयं सर्वोऽपि यत्नः सोऽन्यभिन्नस्वरूपोपादानेनैव स्वाभिमतिनिराकर- णाय भवति । पुरुषवादे तावज्ज्ञानमयो न रूपादिमयः, रूपादीनां तन्मयत्वात् । कार्या-

* * *

सर्वचोद्येष्वि

**स्वभावानभ्युपगमे त्वि**त्यादि यावद् **वादहानं ते** इति । यदि स्व- भावो नाभ्युपगम्यते ततः साधनदूषणाभावस्ततो वादत्यागः, तद्यथा--पक्ष- हेतुदृष्टान्तादयः स्वेन भावेन सम्पन्नाः साधनम्, पक्षः साध्यत्वेनेप्सितो यदि विरुद्धार्थानिराकृतः, हेतुः पक्षधर्मः सपक्षे सन् विपक्षाद् व्यावृत्तः, दृष्टान्तः साध्यानुगतहेतुप्रदर्शनमसति साध्ये हेत्वसत्त्वप्रदर्शनं च । तद्विपर्यये त- दाभासा इति साभासं साधनं स्वेन भावेन भवति । तत्साधनदोषोद्भावनं दूषणं तदन्यथोक्तिर्दूषणाभास इति च स्वेन भावेन व्यवस्थितमभ्युपगम्य साधनं दूषणं च साभासं विवदिषुरसि संवृत्तः, अन्यथा न साधनं न दूषणं  - /ms

२ निर्हेतुक] °कथहे° प्र° ॥
४ स्य]
निर्हेतुकादिःnayacakra-ms-bhā ॥
५ ण] °णस्व°nayacakra-ms-ya ॥
६ म] मेम प्र° ॥
३० हेतु] °तुदर्शन° प्र° ॥
३२ णाभा] °भासा प्र° ॥

च स्वभावापेतावयवार्थवादित्वादिति वादत्यागस्ते प्राप्तः । तस्मात् स्वभाव एव प्रभुविभुत्वाभ्यां कारणं जगत इति । एवं तावत् स्वभाववादः । § 710

अनया च दिशा शब्दब्रह्मतत्त्वभेदसंसर्गरूपविवर्तमात्रमिदं जगदिति । यथोक्तम्—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ वाक्यप° १ । १§ 713

इत्यादिकारणवादा भिद्यन्ते संज्ञादिभेदात् । ते पुनः सर्वेऽपि परमार्थद्रव्यार्थस्य विधिविधिनयस्य स्वरूपमस्पृशन्त एव प्रवर्तन्ते, यस्मात् सङ्क्षेपेणायं **सर्वोऽपि यत्नः सोऽन्यभिन्नस्वरूपोपादानेनैव स्वाभिमतिनिराकरणाय भवति,** तद्यथा--पुरुषवादिनः पुरुषादन्यदवस्तु अपुरुषत्वाद् वन्ध्यापुत्रवत् तथा नियतेरन्यदनियतित्वाद् वर्तनादन्यदवर्तनत्वात् स्वभावादन्यदस्वभावत्वाद् वन्ध्यासुतवदवस्तु इति ब्रुवतां पुरुषनियतिकालस्वभाववादिनामात्मात्मवस्तुनो द्रव्यार्थवृत्तस्य तत्परमार्थस्य तत्त्वानां सर्वैकत्वनित्यत्वकारणमात्रत्वसर्वगतत्वानां धर्माणां प्रतिपादनार्थमुद्यतानां वादिनाम् अन्यदवस्तु इति स्वतो भिन्नान्यार्थाभ्युपगमेनैव तत्प्रतिपादनं नान्यथेति तत्प्रतिपादनार्थो यत्नः सोऽयमन्यभिन्नरूपोपादानमन्तरेण नास्तीति स यत्नः स्वाभिमतपुरुषाद्यर्थनिराकरणायैव भवत्यन्यभिन्नार्थाभ्युपगमात् । § 714

- /ms कथम् ? इति तद्दर्शयति --**पुरुषवादे तावज्ज्ञानमयो न रूपादिमय** इति, **रूपादीनां** तत्सुषुप्तावस्थामात्रत्वाभिमतानां **तन्मयत्वात्** ज्ञानात्मकपुरुषमयत्वात् । तानि च रूपादीनि कार्यात्मानः, कार्या
231/mj

* * *

त्मनां तन्मयत्वे कार्यत्वानेकत्वानित्यत्वासर्वत्वानि पुरुषस्यैव प्राप्तानि । अवस्थावच्च पूर्वादिनियत्यादिष्वपि ।

स्वभाववादे तु अतिशयश्चायम्, आदावेव भेदोपादानात् सम्भववद्व्यभिचारवृत्त्यनुमत्या भावविशेषणस्वशब्दोपादानात् तथैव चार्थस्य निरूपणात् । यदयं भवति भूयतेऽनेनेति वा भावः । स्वशब्दोऽस्वव्यावर्तनार्थ इतरेतराभावमात्रविष-

* * *

**त्मनां तन्मयत्वे** चेतनैककारणात्मत्वे **कार्यत्वानेकत्वानित्यत्वासर्वत्वानि पुरुषस्यैव प्राप्तानि** तन्मयत्वात् प्रत्येकपरिसमाप्तत्वाच्च तेषां प्रत्यक्षत उपलभ्यत्वाच्च । तस्मात् पुरुषस्यैकनित्यकारणसर्वत्वानि निराक्रियन्तेऽवस्थानां कार्यकारणात्मनां पुरुषमयत्वादित्युक्तः पुरुषात्मकत्वप्रतिपादनयत्नस्य द्रव्यार्थवृत्तसर्वैकत्वाद्यभिमतिनिराकरणदोषोऽवस्थाश्रयणात् । **अवस्थावच्च पू-**

११ व] °वर्त-
नात्वात्nayacakra-ms-bhānayacakra-ms-pā
॥
१५ ग] °मेनैवं प्र° ॥
२५ स्व] अत्र स्वोऽस्वव्यावर्तनार्थः इत्यपि स्यात् ॥

वादिनियत्यादिष्वपीत्यतिदेशेन नियतिकालस्वभावेष्वपि स्वाभिमतिनिराकरणं तेषामपि दर्शयति । **अवस्थावच्चे**ति यथा सुप्तसुषुप्तजाग्रद्विमुक्त्यवस्थाभेदेन भिन्नान्यरूपोपादानेनैव स्वाभिमतिनिराकृतिः पुरुषवादेऽभिहिता तथा बाल्यादिपूर्वोत्तरावस्थासु तथानियतिवर्तनास्वभावादिभेदाभ्युपगमादेव स्वाभिमतनियत्यादिनिराकरणम् । § 715

स्वो भावोऽस्वो भावो न भवतीत्यस्वव्यावर्तनं तस्यार्थः, स्वशब्दश्च भावस्यैवात्मपर्यायस्य वाचकः, तस्माद् विशेषणत्वादस्वव्यावर्तनार्थः सम्पद्यते । तदर्थत्वाच्च **इतरेतराभावमात्रविषयः**, स्वः परो न भवति परोऽपि स्वो न भवतीति स्वपराभावादितरेतराभा (Edtext outside numbered paragraph)वोऽर्थाभावो भावाभाव इति यावत् । ततश्चार्था (Edtext outside numbered paragraph)**भावार्थत्वादस्वाभवने वर्तेत** अस्वो न भवति इत्येषोऽस्य मुख्योऽर्थो जायते न तु भावस्वरूपप्रतिपादनमिति भावार्थासंस्पर्शान्न किञ्चिदनेन । § 716

**स्वभाववादे** तु,तुशब्दो विशेषणे, *विशेषोऽस्य स्वमतनिराकरणदोषाद**तिशयश्चायम्** । किं कारणम् ? **आदावेव भेदोपादानात्,** इतरे सृष्टिप्रदर्शनद्वारेण दूरं गत्वा पश्चाद् भेदमुपाददते, स्वभाववादी पुनरुत्थान एव भेदमुपादत्त इत्ययमतिशयः । कुतो भेदोपादानमिति चेत्, **सम्भवव्यभिचारवृत्त्यनुमत्या भावविशेषणस्वशब्दोपादानात्** । सति सम्भवे व्यभिचारे च विशेषणम्, यथा नीलमुत्पलमिति नीलत्वं चेदुत्पले सम्भवति व्यभिचरति च कदाचित्, रक्तमपि तद् दृष्टमुत्पलं भ्रमरादिषु च नीलत्वम्, अतो विशेषणं - /ms भवति नीलं च तदुत्पलं च तदिति एवं भेदवृत्त्यनुमत्या विना विशेषणोपादानाभावात्, **त**थेहापि भावशब्दवाच्यस्यार्थस्य स्वशब्दाभिधेयविशेषणार्थं स्वशब्दोपादानं भेदाधारसम्भवव्यभिचारवृत्त्यनुमत्यैव सहितम्, यथा सम्भवानुमत्या विना न विशेषणं तथा नान्तरेण व्यभिचारमपि विशेषणं भवति । तत्र व्यभिचारो विरुध्यते द्रव्यार्थवादस्यैक्यादित्यभिप्रायार्थः । **तथैव चार्थस्य निरूपणा**दिति, न केवलं स्वशब्दोपादानमात्रादेव भेदोऽङ्गीकृतः, किं तर्हि ? अर्थोऽपि भूम्यादिकण्टकादित्वेन तथा निरूप्यते उत्तरेण ग्रन्थेन भेदप्राधान्येनैव भावीकृतेनार्थोऽपि भिन्नो विशेषणत्वेनोपादातुं योग्यः, तद्यथा— **यदयं भवती**त्यादि, तत्र स्वशब्दभावशब्दयोरर्थव्युत्पत्त्योर्भावशब्दार्थव्युत्पत्तिस्तावद् भाववादिनः स्वभाववादिनश्चावयोः शब्दार्थव्युत्पत्तिर्भावशब्दस्य

---

१ पूर्वादिनिय ] °र्नियत्या°nayacakra-ms-bhā ॥
६ * ] विशेषास्य प्र° ॥
१३ भ ] भवतीतिnayacakra-ms-ya ॥
१५ स ] °सम्भवद्यभि° प्र° ॥
२० प्राधान्येनैव ] °वाभावीकृतेना°nayacakra-ms-ya । वाभावीकृतेर्ना° nayacakra-ms-bhā ॥
२० ण ] °णत्वेन नोपा°nayacakra-ms-ya ॥
२१ व्युत्प ] °त्पत्त्योभा° nayacakra-ms-bhā । °पत्तोभा° nayacakra-ms-ya ॥

भवतीति भावो **भूयतेऽनेनेति वा भाव** इति तुल्या, तस्यां च तुल्यतायां न कश्चिद् विसंवादः । **स्वशब्दो**ऽर्थो वा विशेषणत्वेन प्रवर्तमानश्चिन्त्यः, *सो

योऽर्थाभावार्थत्वादस्वाभवने वर्तेत, स तत्रोपक्षीणशक्तित्वात् स्वभवनस्य न प्रयोजकः । एतदपि चास्वभवनव्यावर्तनं स्वशब्दस्य नैवास्ति, अस्वस्याभूतत्वात् । न चाभूतो व्यावर्तनाय । अथ स तथाभूत एव ततः स भाव एव, किं व्यावृत्त्या अनर्थिकया ? तद्भावत्वप्रसङ्गात्, अब्राह्मणवचने ब्राह्मणत्ववत् । यदपि व्यावर्त्यते तदपि च भवेदेव, असतोऽप्रसक्तत्वादप्रसक्तस्य चाव्यावर्त्यत्वात् खपुष्पवत्,

* * *

232/mj नार्थः,ऽ**स्वव्यावर्त** *

* * *

**योऽर्थाभावार्थत्वादस्वाभवने वर्तेत, स तत्रोपक्षीणशक्तित्वात् स्वभवनस्य न प्रयोजकः । एतदपि चास्वभवनव्यावर्तनं स्वशब्दस्य नैवास्ति, अस्वस्याभूतत्वात् । न चाभूतो व्यावर्तनाय । अथ स तथाभूत एव ततः स भाव एव, किं व्यावृत्त्या अनर्थिकया ? तद्भावत्वप्रसङ्गात्, अब्राह्मणवचने ब्राह्मणत्ववत् । यदपि व्यावर्त्यते तदपि च भवेदेव, असतोऽप्रसक्तत्वादप्रसक्तस्य चाव्यावर्त्यत्वात् खपुष्पवत्,**

* * *

नार्थः,

स्यान्मतम्--भावमपि ब्रूत इति, एतच्चायुक्तम्, यस्मात् **स तत्रोपक्षीणशक्तित्वात् स्वभवनस्य न प्रयोजकः**, अतिभार एष हि शब्दस्य यदेकः स्वशब्दः परभवनव्यावृत्तिं स्वभवनप्रतिपादनं च युगपत् सकृदुच्चरितः कुर्यात्, अतो न प्रयोजको न वाचक इत्यर्थः । अर्थो वास्य स्वशब्दस्य स्वशब्दं न प्रयोजयति शब्दवृत्तिविरोधात् । तस्मादस्वभवनव्यावर्तनमेवार्थः । **एतदपि चास्वभवनव्यावर्तनं स्वशब्दस्य नैवास्ति** । किन्त्वर्थाद्गतेरभ्युपेत्य एतद् विचारितम् । किमर्थं नास्तीति चेत्, उच्यते --**अस्वस्याभूतत्वात्** स्वस्यैव भूतत्वाद् भावस्यैव भूतत्वादित्यर्थः । स्वशब्दार्थाभावान्न स्वशब्दं प्रयोजयति वन्ध्यापुत्रवत् । तदभावाद् भावशब्दव्यतिरिक्तार्थविषयाभिमतः स्वशब्दोऽपि नास्तीत्यत आह --**न चाभूतो व्यावर्तनाय** प्रभवतीति वाक्यशेषः, अभूतत्वाद् वन्ध्यासुतवत् ।

§ 717

व्या (Edtext outside numbered paragraph)वर्त्यत्वादब्राह्मणवत्, वैधर्म्येण नासत् तत्, कुतः ? **असतोऽप्रसक्त-** (Edtext

१ स्व ] स्वशब्दार्थोnayacakra-ms-ya ॥

१ *] अत्र स्वोऽस्वव्यावर्तनार्थः इत्यपि पाठः स्यात् ॥

९ *] भेदेन प्रा॰nayacakra-ms-ya ॥

२१ वा ] वाभ्यnayacakra-ms-ya । वाच्य nayacakra-ms-bhā ॥

२२ वृ ] ॰वृत्तवि॰ प्र॰ ॥

२४ भू ] भूतत्वा भावस्यैवnayacakra-ms-ya प्रतिषु नास्ति ॥

outside numbered paragraph) **त्वादप्रसक्तस्य चाव्यावर्त्यत्वात् खपुष्पवत्** । व्यावर्त्यस्य सत्त्वेऽनुमानान्तरमप्याह --**किञ्चित्त्वाद् वस्तुत्वादर्थत्वात्, आदि**ग्रहणात् प्रमेय-ज्ञेय-सत्त्वादिभ्योऽपि । दृष्टान्तः **स्ववदि**ति, यथा स्वं व्यावर्त्याद् विभक्तत्वात् किञ्चिद् वस्तु अर्थः प्रमेयं ज्ञेयं सच्च तथा व्यावर्त्यमपि सज्ज्ञेयं प्रमेयमर्थो वस्तु किञ्चिद्वा प्रसक्तत्वादेव, तस्माद् भवेदेव ।

§ 718

**अथ सोऽर्थोऽस्वस्तथाभूत एव ततः स भाव एव,** भावादेव तस्य स्वशब्दवाच्यार्थस्य भावशब्दवाच्यार्थवत् **किं व्यावृत्त्यानर्थिकया ?** इति स्वशब्दस्य व्यावर्त्याभावाद् व्यावृत्तिरनर्थिका, व्यावर्त्यार्थाभावश्च तस्य भावत्वाद् भाववदित्युक्तः । स्यान्मतम्--तस्य व्यावर्त्यस्याभावाद् व्यावर्त्यता विशेषणार्थवत्ता चेति, एतच्चायुक्तम्, **तद्भावत्वप्रसङ्गात्,** न ह्यसतः प्रसङ्गोऽस्ति, अप्रसक्तस्य च व्यावर्त्यता नास्ति **अब्राह्मणवचने ब्राह्मणत्ववत्,** न ह्यब्राह्मणवचने ब्राह्मणोऽप्रसक्तो व्यावर्त्यते, यथोक्तं **नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थ[गतिः]** पा° वा° ३ । १ । १२ इति । भावशब्दार्थव्युत्पत्त्यर्थं कर्त्रर्थोपादानाद् यदयं भवति इति भावशब्दस्य अयंशब्दविशिष्टस्य स्वरूपोक्तः स्वशब्दोऽप्यनर्थकः । तस्माद्

किञ्चित्त्वाद् वस्तुत्वादर्थत्वादिभ्यः स्ववत् ।

अयं च स्वभावः किं व्यापी प्रतिवस्तु परिसमाप्तो वा ? व्यापित्वे त्यक्तस्वपरविशेषणः स्यात् । प्रतिवस्तुत्वे किं तेन कल्पितेनाभिन्नफलेन लोकवादात् । प्रत्येकमात्रवृत्ति च वस्तु घटाद्येव घटादीतीतरेतराभावात् परस्परमस्वभवनपरिग्रहात् कुतः क्व चासौ स्वभावः स्यात् ? भावविषयैकार्थे स्वत्वे न किञ्चिदन्यत् स्वं नामेति किमत्र भेदेन क्रियते घटादिना पटादिभावविशिष्टेन ? सोऽपि यदि भाव एव कोऽयं

* * *

व्यावर्त्यते तदपि च भवेदेव**यदपि** 233/mj

* * *

किञ्चित्त्वाद् वस्तुत्वादर्थत्वादिभ्यः स्ववत् ।

अयं च स्वभावः किं व्यापी प्रतिवस्तु परिसमाप्तो वा ? व्यापित्वे त्यक्तस्वपरविशेषणः स्यात् । प्रतिवस्तुत्वे किं तेन कल्पितेनाभिन्नफलेन लोकवादात् । प्रत्येकमात्रवृत्ति च वस्तु घटाद्येव घटादीतीतरेतराभावात् परस्परमस्वभवनपरिग्रहात् कुतः क्व चासौ स्वभावः स्यात् ? भावविषयैकार्थे स्वत्वे न

---

१ अथ]
**सोश्वस्तथा°**nayacakra-ms-ya ॥
४ भा] **भाववादित्युक्त** प्र° ॥
७ न] नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः पा° वा° । नञ्युक्तमिवयुक्तं वा यत् किञ्चिदिह दृश्यते तत्रान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते, तथा ह्यर्थो गम्यते, अब्राह्मणमानय इत्युक्ते ब्राह्मणसदृश एवानीयते, नासौ लोष्टमानीय कृती भवति । इति पातञ्जलमहाभाष्ये पाठः ३ । १ । १२ ॥
१९ व्या] **व्यावर्त्यत तदपि**nayacakra-ms-ya । **व्यावर्त्यंत तदपि** nayacakra-ms-bhā ॥

किञ्चिदन्यत् स्वं नामेति किमत्र भेदेन क्रियते घटादिना पटादिभावविशिष्टेन ? सोऽपि यदि भाव एव कोऽयं

* * *

व्यावर्त्यते तदपि च भवेदेव

किञ्चान्यत्, **अयं च स्वभाव** इत्यादि । अयं च त्वदिष्टः स्वशब्दविशिष्टो भावः स्वभावः **किं व्यापी प्रतिवस्तु परिसमाप्तो वा ?** यदि व्यापी सर्वगत एक एव तस्मिन् **व्यापित्वे त्यक्तस्वपरविशेषणः स्यात्,** एकरूपत्वात् तस्य पररूपाभावात् स्वशब्दोपादानं परशब्दोपादानं च निरर्थकमेव । अथ वस्तुनि वस्तुनि परिसमाप्तः प्रतिवस्तु ततः **प्रतिवस्तुत्वे किं तेन कल्पितेनाभिन्नफलेन लोकवादात् ?** लोकवादो हि घटस्य घटत्वमेव स्वभावो नान्यः, पटस्य पट एव इति श्रूयते, घटादिपृथग्भूतो न कश्चिदेक इति । स यदि तथा प्रतिवस्तु कल्प्यते न कश्चित् तेन लोकवादाभिन्नफलेनार्थः कल्पितेन । तस्मान्नैकः कश्चित् स्वभावो यथा पूर्वं स्वभाववाद्युपवर्णितः सिध्यति । किं तर्हि ? लौकिक एव सिध्यति । किञ्चान्यत्, स्वभावाभाव एव प्रसक्तः, तद्यथा **--प्रत्येकमात्रवृत्ति च वस्तु घटाद्येव घटादी**ति, घट एव घटः पट एव पटः पटे घटो नास्ति न घटे पट **इतीतरेतराभावात्** परस्परमस्वभवनपरिग्रहः कृतो भवति, ततः **परस्परमस्वभवनपरिग्रहात् कुतः क्व चासौ स्वभावः स्यात् ?** यद्युपपत्तिद्वारेणार्थः तत इदमुपपत्तिमुखमस्य, **भावविषयैकार्थे स्व-**
- /ms **त्वे** स्वत्वादनन्यो भावः, य एव भावः स एव स्व इत्यनयोरनर्थान्तरत्वमेवेति सत्यं **न किञ्चिदन्यत् स्वं नामेति,** इतिशब्दो हेत्वर्थे, ततः **किमत्र भेदेन क्रियते घटादिना पटादिभावविशिष्टेन ?** द्रव्यार्थस्वरूपस्याभिन्नत्वात् । भेदेन यदुच्यते घट इति पटादिना भावव्यावर्तनार्थं भेदेन घटस्य भावो न पटस्य इति स्वो भावो न परभावः इति च पुरुषादिवादवद् भेदाधारं तेन किं कल्पितेन द्रव्यार्थस्वरूपविरोधिना भेदाधारेणेति । **सोऽपि यदी**ति सोऽपि
234/mj च घटादिर्भेदो भावो वा यदि **भावः** भवतीति भाव **एव** भावस्वरूपादभिन्न

* * *

भेदो नाम घटादिर्भावव्यतिरिक्तः ? अथ न भवति तदस्तित्वमेव न । ननु घटस्य भाव इति पटादिव्यतिरेकेण घट एव, न, भावस्यैव तथा तथा भवनात् । न हि हस्तादौ भवति कुर्वति वा देवदत्तो न भवति न करोति वा । अतो भावत्वेऽभावत्वे वा नास्त्येव भेदो घटादिः । यं तं भुवोऽर्थमभिदधति सर्वधातवः ।

---

३ व्या ] व्यावर्त्यत तदपिnayacakra-ms-ya । व्यावर्त्यंत तदपि nayacakra-ms-bhā ‖
११ न ] न किंचित्तेन प्र॰ ‖
१२ पू ] पूर्वस्वभाव॰ प्र॰ ‖
१४ व ] वस्तुnayacakra-ms-ya प्रतिषु नास्ति ‖
१४ टा ] ॰दीनि प्र॰ ‖
२२ भेदा ] भेदावारं तेर किं कल्पतेन प्र॰ ‖
२४ टा ] ॰दिभेदोnayacakra-ms-ya ‖
२४ भा ] भावो वाप्यदे भावो वा यदि प्र॰ ‖

तच्च प्रत्यवस्तमितनिरवशेषविशेषणं भवनं सर्ववस्तुगर्भः सर्वबिम्बसामान्यमभिन्नं बीजम् । तदेव हि भवनं व्रीह्यादि मृदादि च साध्यं साधनमेकमहेयमप्रच्युतं

* * *

एव अतः **कोऽयं भेदो नाम घटादिर्भावव्यतिरिक्त** इति स्वयमेवोक्तो भेदाभावः । **अथ न भवति** भेदः भावो न भवति नानुभवति भवनं न वा भाव एवाभ्युपगम्यते **तदस्तित्वमेव नाभ्युपेमः**, अभवनात् खरविषाणात्मवत् तत् । § 719

इतर आह **--ननु घटस्य भावः** ***इत्यव्यतिरेकषष्ठ्या** व्यपदिश्यमानत्वात् **पटादिव्यतिरेकेण घट एवेति** स्वतोऽपृथग्भूतेन भवनेन, ततः पटादिभेदेन भवनस्य कर्ता घट एवेति । अत्रोच्यते **--न, भावस्यैव तथा तथा भवनात्**, न ब्रूमो घटस्य भवनं न पटस्येति भेदव्यपदेशो नास्तीति, स पुनरुपचरितो घटादिभिरभिन्नस्यैकस्य भावस्यैव तथा तथा तेन [तेन] प्रकारेण घटपटादिना भवनात्, अन्यथा पटादयो न भवन्त्येव भवनव्यतिरिक्तत्वादित्युक्तम् । स एव हि भावो घटपटादिर्भवति हस्तादिभवनकरणयोः पुरुषभवनकरणवत् घटादीनां भावाव्यतिरेकात् पुरुषाव्यतिरिक्तहस्तादिभवनवदिति । तद्दर्शयति **--न हि हस्तादौ भवति कुर्वति वा देवदत्तो न भवति न करोति वा**, हस्तादौ भवनकरणयोः कर्तृत्वं प्रतिपद्यमाने तत्समुदायस्यावश्यं तत्प्रतिपत्तेः समुदयसमुदयिनोश्चानन्यत्वात् । तदुपसंहरति **--अतो भावत्वेऽभावत्वे वा नास्त्येव भेदो घटादि**रिति । भवने प्रस्तुते करोतिग्रहणं किमर्थम् ? सर्वधातूनां भवनार्थत्वप्रदर्शनार्थम्, तत आह **--यं तं भुवोऽर्थमभिदधति सर्वधातव** इति । एतस्माद् भावान्न घटादिर्भिन्न इति । § 720 - /ms

**तच्च प्रत्यस्तमितनिरवशेषविशेषणं भवनम्**, निमग्नानि निलीनानि प्रत्यस्तमितानि तत्रैव भावे निरवशेषाणि विशेषणानि स्व इति पर इति वा घटः पट इत्यादि वा । तच्च **सर्ववस्तुगर्भः**, तदेव भवनं सर्ववस्तूनां मूलदलिकम् । **सर्वबिम्बसामान्यम्**, मुद्राप्रतिमुद्रान्यायेन भिद्यमानानामात्मरूपाणां स्फटिकवदनेकधा दृश्यमानानां बिम्बभूतानां प्रतिबिम्बभूतानां च सामान्यम्, **अभिन्नं बीज**मित्यादितत्स्वरूपवर्णनानि एवम्प्रकाराणि निर्विशेषणस्याप्यंशपरिकल्पनयेति । तत् कथं भाव्यते इति चेत्, उच्यते **--तदेव हि भवनं व्रीह्यादी**त्यादि यावत् **साधनमेकम्** । भवनमेव व्रीहिबीजम्, **आदि**ग्रहणाद-

---

७ त] तत्nayacakra-ms-ya प्रतिषु नास्ति ॥
८ *] इति व्यतिॱnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-imnayacakra-ms-vi ॥
२३ घ] घटपट प्रॱ ॥
२४ त] तत्र सर्ववस्तुदाभा तदेव प्रॱ ॥
२४ मू] मूलकंदली सर्वॱnayacakra-ms-ya ॥
२६ नेक] ॱकवाधाॱकधा वा ?दृश्यॱnayacakra-ms-ya । ॱकवा दृश्यॱ nayacakra-ms-bhā ॥
२७ स्या] ॱस्याद्यंशॱ प्रॱ ॥
२९ न] ॱमेव भवनॱnayacakra-ms-ya ॥

म्बुक्षेत्रकालादि अङ्कुरादि वा । तदेव च **मृदादि** मृल्लोष्टवज्राश्मसिकतादि च भवनमेव इति वर्तते, **साध्यं साधनं** च भवति, पुरुषवादिव्याख्यानन्यायेन 235/mj स्वयमेव विश्वमादि वर्तते, यथा तदभिन्नकर्तृकरणादि साधनं साध्यं च

* * *

सदा, हस्त्यादिप्रपञ्चेन पुरुषस्यैव हस्त्यादिमृदादिभवनवत् । घटादेरभवनस्य भेदस्यासत्त्वमेव, भावाद् भिन्नत्वात् खरविषाणवत्, अघटत्वादात्मनाऽभावात् पटवत् ।

विकल्पो हि भेदसंसर्गपरिणामैर्भवेत् । न चास्य भेदो न संसर्गो न विपरिणामः, एकतत्त्वात्मकत्वात्, प्रतिस्वत्ववत् । विकल्पेन च भाव एव, नाभावः

* * *

तथा भवनमेव आत्माव्यतिरिक्तं साधनं साध्यं चैकमेव तथा तथा, **अहेयम**-परित्याज्यं भवनमेव व्रीह्यादिविकल्पानन्त्येऽपि तदवस्थमेव, **अप्रच्युत**मात्म-स्वरूपाद् भवनात् **सदा** सर्वकालम् । को दृष्टान्तः ? **हस्त्यादि** याव-द् **भवनवत्**, यथा नटादिरभिनयपुरुषो हस्त्यश्वपर्वतसरित्समुद्रादिप्रपञ्चान-- /ms भिनयति स्वतः सृजत्युप- संहरति च तथा तथा भवनात्, *ते च न हस्त्यादयोऽन्ये ततः केचिद् भेदेन भवन्ति, हस्त्यादिप्रपञ्चेन तु पुरुष एव **हस्त्यादिर्मृदादिश्च भवति**, आदिग्रहणाच्चित्रलेप्यकाष्ठपुस्तादिर्भवति, तथा भ-वनमेव पृथिव्यम्बुमृदादि भवति, न भेदः कश्चिद् भवनाद् घटादेः, किं कारणम् ? एकत्रैवोपयुक्तार्थत्वात् । **घटादेरभवनस्य भेदस्यासत्त्वमेव भावाद् भिन्नत्वात् खरविषाणवत्** । भावाद् भिन्नोऽपि घटो भवत्येव चेत्, तस्य भव-ने वन्ध्यापुत्रोऽपि भवेत् । एतस्य दिङ्मात्रत्वा**दघटत्वादात्मनाऽभावात् पटवत्**, घटभवनं हि घटः, तदभावो भावाभावश्चाघटः, तस्मा**दघटत्वाद्** घटात्म-नाऽभावात् । एतमेवार्थं व्याचष्टे --**आत्मनाऽभावा**दिति, साधनान्तरमेव वा अन्यात्मना भावादिति यावत् । **पटवत्**, यथा पटो घटात्मनाऽभवन् घ-टो न भवत्येवं घटोऽपि घटात्मना अभवनाद् घटो मा भूत्, घटात्मना अभवनं च भावाद् भिन्नत्वाभ्युपगमात् सिद्धम् । न चेदेवम्, वन्ध्यापुत्रोऽपि

३० अङ्कुरा] °दि चnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līnayacakra-ms-vi ॥
१० त] तथा अहेय°nayacakra-ms-raṃnayacakra-ms-bhā ॥
१२ ह] हस्तादि यावद्nayacakra-ms-bhā । हस्ता यावद् nayacakra-ms-ya ॥
१३ न] नघटादि°nayacakra-ms-bhā । घटादि° nayacakra-ms-ya ॥
१४ *] चेतन हस्त्या° प्र° ॥
१५ द] [illegible] प्र° ॥
१६ स्त्या] °दिमृदा° प्र° ॥
१७ मृदा] °दिर्भवतिnayacakra-ms-bhā ॥
१७ ना] °ना घटादेः प्र° ॥
१८ घ] घटादिरभवनस्य भेवनस्य भेदस्या°nayacakra-ms-bhā । घटादिरभवनस्तस्याभवनस्य भेदस्या° nayacakra-ms-ya ॥
२२ ए] एवमेवार्थं प्र° ॥

भवेद् घटात्मनाऽभवनात् पटवत् । घटवदेव वा तद्भावाद् भेदाभावः, घटादिभेदाभावाच्च भाव एवाविकल्पोऽत्र सत्यः । § 721

इदानीं भेदकारणदिशमुद्भाव्य दूषयिष्यन्नाह --**विकल्पो ही**त्यादि । विकल्पो न सत्यः, स तु भवन्नेभिस्त्रिभिः कारणैर्भवेद् **भेद-संसर्ग-परिणामैः** । तत्र भेदेन घटाद् भिद्यमानात् कपालानि परस्परतो भिन्नानीति गृह्यन्ते । संसर्गेण तन्तूनां सङ्घातेन पटस्तन्तुभ्योऽन्य उत्पन्न इति । परिणामेन क्षीरं दधित्वेन परिणतम्, दधि क्षीरादन्यत्, एतेषां चान्यता उक्तिप्रयोजनादिनानात्वाल्लोके प्रसिद्धेति, एता भेदवाद्युपपत्तयो भवन्त्यो भवेयुः । तत्र **न चास्य भेदो न संसर्गो न विपरिणाम** इत्येतास्तिस्रः प्रतिज्ञा एक- हेतुसाध्याः । कोऽसौ - /ms
हेतुः ? उच्यते --**एकतत्त्वात्मकत्वात्**, तस्य भावस्तत्त्वम्, एकं तत्त्वमनन्यत्, स एवात्मास्य भाव इत्येकतत्त्वात्मा, तद्भावादेकतत्त्वात्मकत्वात्, **प्रतिस्वत्ववत्**, यथा स्वं स्वं प्रति प्रतिस्वं त्वन्मतेन भिन्नानामसाधारणः स्वात्मा यः स तु भाव इत्येवैकतत्त्वात्मकत्वान्न भेदसंसर्गपरिणामात्मक 236/mj

* * *

खपुष्पादिरसत्त्वात् । इति तत्त्वादेव कुतोऽत्र विकल्पः ?

ननु भेदः प्रत्यक्षत एव गृह्यते पूर्वोत्तरादिदिक्कालोत्पत्तिविनाशवस्तुप्रविभक्तत्वात्, अभेदश्च न गृह्यते ।

अस्ति किञ्चिदिति भावव्यतिरेकेण पूर्वोत्तरादिदिक्कालोत्पत्तिविनाशवस्तुप्रविभागाभावात् स एव ह्युत्पाताद्युदकाग्नित्ववदन्यथा वर्तमानोऽन्यथापि वर्तत एव, न

* * *

स्तथा भावोऽपीति नास्ति विकल्पो भावस्य । अथापि स्याद्विकल्पः सोऽस्मन्मतेनैव न भेदाभ्युपगमेनेत्यत आह --**विकल्पेन च भाव एव, नाभावः खपुष्पादिरसत्त्वा**दिति भाववदेवासौ भाव एकनित्यसर्वगतत्वादिधर्मा, तस्यैव घटपटादिना भवनम्, नास्य भेदः कश्चित्, भेदश्चाभावो भावानात्मकत्वादित्युक्तम् । तस्मादसत्त्वादसौ न विकल्प्येत भेदः खपुष्पवत् । अतः सम्भाव्यमानश्च स्वभाव एव विकल्पितः त्वन्मतेऽपि तस्यापि भावस्य **इति तत्त्वादेव** प्रागुक्तहेतुप्रकारेण तत्त्वादेकत्वादेव **कुतोऽत्र** भावे **विकल्पः** । § 722

---

२६ भ ] भवतिnayacakra-ms-bhā ॥
२६ द्भावाद् ] भेदभाव घटादिभेदभावाच्चnayacakra-ms-ya । भेदभावाच्च nayacakra-ms-bhā ॥
३ ल्पो ] नरात्यnayacakra-ms-ya । नारात्य nayacakra-ms-bhā ॥
१० एवात्मा ] °त्मा भावnayacakra-ms-ya ॥
१२ इ ] इत्येचैक°nayacakra-ms-bhā nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ । इत्येत्वैक° nayacakra-ms-raṃ nayacakra-ms-hī । इत्येष्वैक° nayacakra-ms-vi । अत्र इत्येकैक° इत्यपि पाठः स्यात् ॥
२२ च ] च नाभाव एव नाभावःnayacakra-ms-bhā ॥
२६ स्व ] स्वस्वभावnayacakra-ms-bhā । सम्भाव्यमानश्च स भाव एव इत्यपि पाठोऽत्र स्यात् ॥

इतर आह --**ननु भेदः प्रत्यक्षत** इत्यादि याव**दभेदश्च न गृह्यते** । पूर्वोऽयमुत्तरो घट इति दिग्भेदेन, **आदि**ग्रहणादूर्ध्वाधोदक्षिणापरभेदेन च गृह्यते घटादिः, तथा उत्पन्नो विनष्ट इत्युत्पत्तिविनाशाभ्याम्, वस्तुतोऽपि घटपटादिरूपरसादिस्वरूपभेदेन कृष्णो रक्तः खण्डः शकल इत्यादि, एभिः कारणैः प्रविभक्तत्वादर्थानां भेदेन गृह्यमाणानां कथं भेदाभावः ? **पूर्वोत्त-रशब्दाभ्यां** देशकालपरिणामक्रमा अपि गृहीताः । एवं प्रत्यक्षतो ग्रहणं भेदानाम्, **अभेदश्च न गृह्यते** प्रत्यक्षत एव इति वर्तते । § 723

- /ms अत्रोच्यते --**अस्ति किञ्चि**दित्यादि । पूर्वोत्तरादिभेदाभावं प्रतिपाद्य प्रत्यक्षत्वाभावं च प्रतिपादयिष्यन् भेदाभावप्रतिपादनार्थं तावदाह --**अस्ति किञ्चि-दिति भावव्यतिरेकेण** पूर्वमुत्तरं वा नास्त्येव प्रागुक्तकारणत्वात्, ततः किं तदपूर्वं यदुत्पद्यते पूर्वं वा विनश्यति ? इति पूर्वोत्तरयोरभावादेवोत्पत्तिविनाशौ न स्तः, तत एव वस्तुप्रविभागोऽपि नास्ति । तस्मात् **पूर्वोत्तरादिदिक्कालोत्प-त्तिविनाशवस्तुप्रविभागाभावात्** किं तत् प्रविभक्तं प्रविभज्यते प्रविभक्ष्यते वा ? यत् तदेवंधर्म तदेव नास्तीति नापूर्वं भावादन्यत् पूर्वोत्तराद्यस्ति, अतो नाभावो भेदो भवति । कथं तर्हि भेदप्रत्यक्षतेति चेत्, उच्यते --**स एव ह्युत्पाताद्युदकाग्नित्वव**दित्यादि याव**दन्यथापि वर्तत एव** । यथोत्पाते ज्वलनमुदकस्य शीतद्रवादिगुणस्य, स तोये तद्विरोध्यग्नित्वधर्मापत्त्या दृष्टो भेदोऽन्यथा वर्तमानस्यान्यथा वर्तनम् । **आदि**ग्रहणाद् निध्युपलिङ्गत्वेन भूम्यबादिवर्तनं भेदेन । तद्यथोक्तम् --**महाकालगत ऊष्मा सहस्रसङ्ख्ये धूमो लक्षे ज्वलनं कोटौ** इति । तथा चित्रकर्मादिहसनरोदनस्थानसङ्क्रान्त्यादिभेदरूपेण स एव भावो भवतीति तस्मान्नास्ति भेदः । भिद्यमानं हि वस्तु एवं भिद्यते

237/mj स्वरूपाद् विपर्ययगत्या यद्यभावो भवेद् भावः, स तु न *

* * *

भिद्यते कथञ्चिदुपचितापचितभवनो वेति न काचिदवस्था दधिघटादिरादिनिधनविभागवती । यदि स्यात्, खपुष्पावस्थापि तन्त्रयधर्मा स्यात् सर्वतो व्यावृत्तत्वाद् दधिघटवत् । घटो वा आदिनिधनविभागरहितः स्यात्, अत एव, खपुष्पवत् । महापृथिवीवियदवस्थे सादिनिधनविभागे स्याताम्, इतरेतरासत्त्वात्, घटवत् । घटोऽपि वा अनाद्यादिः, अत एव, आकाशमहापृथिवीवत् ।

ग्रहणमपि नैव भेदस्य, भेदस्याभावादेव, खपुष्पग्रहणवत् कल्पनात्म-

९ स्तुप्र ] °प्रतिभागोऽपि नापि तस्मात्nayacakra-ms-ya । °प्रतिभागोऽपि तस्मात् nayacakra-ms-bhā ॥ १५ बा ] महाकालगतो ऊष्माnayacakra-ms-vinayacakra-ms-ramnayacakra-ms-hī । महाकालमतो ऊष्मा nayacakra-ms-bhā nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ ॥ १९ य ] यद्यभावो भावो भवेद्भावःnayacakra-ms-ya । यद्यभावो भवो भावो भवेद्भावः nayacakra-ms-bhā ॥ १९ * ] °पादि° प्र° ॥

कत्वात् । देशकालभेदग्रहणमसदध्यारोपात्मकं देशकालभेदाभावात् खपुष्पवत् ।

* * *

*भिद्येऽहमिति कथञ्चिदभावोऽपि भवति, भावादभावो हि भिन्न उपचितापचितभवनो वेति स एव भावो **न भिद्यत** इति **कथञ्चिदुपचितापचितभवनो वेति** सम्बन्धः, यावद् भवितव्यं तावदेव न न्यूनो नाधिको वा भवति स भावः । **इतिशब्दो** हेत्वर्थे, उपचितापचितभवनाभावे दधिघटाद्यवस्थानामादिनिधनविभागाभावदर्शनादिति हेतुः, तं दर्शयितुमाह **--इति न काचिदवस्था दधिघटादिरादिनिधनविभागवती,** आदिः प्रागविद्यमानस्योत्पत्तिः, निधनं विद्यमानस्य विनाशः, विभागोऽन्यत्वम्, एते चादिनिधन- विभागा दधिघटाद्यव- - /ms स्थानां न सन्ति पूर्वोत्तरोत्पत्तिविनाशवस्तुप्रविभागाभावस्य प्रतिपादितत्वात् । ततस्तदभावान्नोपचीयते नापचीयते चासौ भावः क्षीरदध्याद्यवस्थास्वेकरूपत्वाद् भवनस्य मृत्पिण्डघटाद्यवस्थासु चेति । एतस्य हेतोरसिद्धिं परिहरन् परपक्षेऽनिष्टापादनेन साधयति **--यदि स्यादित्यादि**, आदिनिधनविभागवती यदि स्यात् सा दधिघटाद्यवस्था **खपुष्पावस्थापि** तत्र **तन्त्रयधर्मा स्यात् सर्वतो व्यावृत्तत्वाद् दधिघटवत्,** सर्वतो व्यावृत्तत्वं च सिद्धं घटस्य दधिघटाद्यवस्थानां च भेदाभ्युपगमात्, तथानिच्छतस्तद्विपर्ययेण खपुष्पधर्मापादनं घटस्य गतार्थं साधनद्वयम् । **महापृथिवीवियदवस्थे सादिनिधनविभागे स्याताम्, इतरेतरासत्त्वाद् घटवत् । घटोऽपि वाऽनाद्यादिः** अनादिरनिधनो निर्विभागश्च स्यादत एव इतरेतरासत्त्वादेव **आकाशमहापृथिवीवदि**ति घटभेदाभ्युपगमेनैवैतत् साधनमनिष्टापादनमिति । एवं तावदुपचितापचितभेदाभावः । § 724

यदप्युक्तं **प्रत्यक्षत एव भेदो गृह्यत** इति तद् **ग्रहणमपि नैव भेदस्य, भेदस्याभावादेव, खपुष्पग्रहणवत्** । अभावः **कल्पनात्मकत्वात्** तस्य, भावैक्यस्य साधितत्वाद् भेदः कल्पनात्मकः, कल्पनात्मकं चासद् वस्तुनोऽन्यथात्वात् । सा च कल्पना देशतः कालतो वा स्वरूपत एव वा भिन्नेष्वर्थेष्वभेदकल्पनाद्वा स्यात्, देशकालाद्यभेदे वा भेदकल्पनात् स्यात्, उभयथाप्यसद्रूपत्वात् कल्पनायाः, इह तु त्वन्मतेन देशकालाभ्यामभेदो - /ms नास्ति, भेद एव, घटादेः कपालादित्वेन भिद्यमानस्य वस्तुनो यावत् परमाणुशो रूपादिशोऽनभिलाप्यत्वशश्च भेदादभेदाभावः कालतश्च क्षणे क्षणेऽन्यत्वात् । तस्मादनभिलाप्यपरमार्थस्य च वस्तुनो घट इति रूपादि इति

१ *] भिद्यहमितिnayacakra-ms-ya ॥
६ प्रा] प्रागभिद्य° प्र° ॥
९ स्था] °स्थाद्येकरू° प्र° ॥
१२ त] तत्र तत् त्रय°nayacakra-ms-pānayacakra-ms-ḍe । तत्र वत् त्रय° nayacakra-ms-bhā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī । अत्र खपुष्पावस्थापि तत्त्रयधर्मा स्यात् इत्यपि पाठः स्यात् ॥
२० प्यु] दृश्यतां पृ° २३६ पं° २ ॥
२४ ल्प] °ल्पना स्यात् प्र° ॥
२८ ] nayacakra-ms-līṃ रूपादिरितिnayacakra-ms-bhā ॥

वा **ग्रहणमसदध्यारोपात्मकं देशकालभेदाभावात् खपुष्पवत्,** 238/mj

* * *

अभेद एव तु गृह्यते प्रत्यक्षतः, भावस्याभिन्नत्वाद् गृह्यमाणस्य च भावत्वात् ।

अथ समस्त एव कस्माद् भावो न गृह्यते ? अथ भेदपक्षे किं समस्त एव घटो न गृह्यते ? समानदोषत्वादचोद्यमेतत् । स्वपक्षे विशेषं पश्यत एतद्युज्येत वक्तुम्, न तु सर्वत्रैवादर्शनभाक्पक्षस्य ।

तत्तु अदर्शनमत्रैव निवर्तते, नान्यत्र । इहाभेदे भावे य एकदेशस्तस्य ग्रहणे तस्यैव ग्रहणम्, ततोऽभिन्नत्वात् तद्भावत्वात्, देशस्वात्मवत् । तस्य ह्येकोऽपि प्रथनं

* * *

खपुष्प इव खपुष्पवत् तत् प्रत्यक्षाभासमेवेत्यर्थः । यदप्युच्यते अभेदश्च न गृह्यते प्रत्यक्षतः इति तदपि न, यस्माद**भेद एव तु गृह्यते प्रत्यक्षतः** । किं कारणम् ? **भावस्याभिन्नत्वाद् गृह्यमाणस्य च भावत्वात्,** नाभावो गृह्यते यतः खपुष्पादिः । § 725

ब्रूयास्त्वम् --**अथ समस्त एव कस्माद् भावो न गृह्यत** इति । अत्र तु समस्तग्रहणं वक्ष्यामः सकारणम्, त्वद्ग्राहविनिवृत्त्यर्थं तावत् त्वां किञ्चित् पृच्छामो नाऽनाहतमुखो मूर्खस्तिष्ठतीति --**अथ भेदपक्षे** पश्यता त्वया घटं **किं समस्त एव घटो न गृह्यत** इति, परान्तादिभागाः किं न प्रत्यक्षाः ? आराद्भागा एव किं प्रत्यक्षाः ? इत्यत्र विशेषकारणं कथयेति । किञ्चान्यत्, **समानदोषत्वादचोद्यमेतत्,** उभयोः समानो दोषो नासावेकतश्चोद्यते--भावस्य सर्वगतस्याप्रत्यक्षत्वदोषो मम नास्तीति । **स्वपक्षे** भेदस्य प्रत्यक्षत्वादि**विशेषं पश्यत एतद् युज्येत वक्तुम्** इत्थं भवति तथा न भवति इति । एतदपि सम्भावनयोच्यते, **न तु सर्वत्रैव** अदर्शनभाक् पक्षो यस्य तव तस्य न तु युज्यत एवेत्यर्थः, सर्वत्रैव न घटे न रूपादौ वा न क्वचित् प्रत्यक्षता युज्यत इत्यर्थः । अथवा स्वपरपक्षयोः सर्वत्रैव । एतदुक्तं भवति--एवं हि स्वपक्षरागाविष्टो भवान् परमत्सरेण स्वदोषं नैव पश्यति स्वचरणलग्नपाशाद- - /ms र्शी प्रयोजनावस्थितामिषदर्शी इव शकुनिः, त्वत्पक्षेऽत्यन्तदर्शनासम्भवादेव घटादेः प्रत्यक्षत्वाभावः । § 726

* (Edtext outside numbered paragraph)देशस्य स्वात्मा

---

९ प्यु ] दृश्यतां पृ॰ २३६ पं॰ ३ ॥
१५ मु ] ॰मुखोर्मूर्स्तिष्ठत इतिnayacakra-ms-ya । ॰मुखोर्मूमुखो मूक ?स्तिष्ठति nayacakra-ms-bhā ॥
१६ प ] दृश्यतां पृ॰ ९० पं॰ १८ ॥
१७ क ] कथयति प्र॰ ॥
१९ त्वा ] ॰त्वादि वि- शेषंnayacakra-ms-ḍenayacakra-ms-līṃ । ॰त्वादिति विशेषं nayacakra-ms-bhā nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥

देशस्य भावः स्वं तत्त्वं भावादभिन्नत्वात् तद्भावाद् गृह्यते भाववत् तथा देशग्रहणे समस्तो भावस्तद्भावत्वाद् गृह्यते । § 727

इदानीमभेदपक्ष एव दर्शनं सम्भवति नान्यत्र इति वक्ष्याम इति यदुक्तं तद्दर्शयिष्यन्नाह --**तत्तु अदर्शन**मिति । तत् पुनरदर्शनम्, **तु** विशेषे, विशेषेणा**त्रैव** अभेदपक्ष एव **निवर्तते, नान्यत्रे**ति न भेदपक्षे यावन्निरभिलाप्यत्वशो भेदादित्युक्तम् । दर्शनं तर्हि कथम् ? इति तत् समर्थयति --**इहाभेदे भावे** यदेतत् सर्वं तद् भाव एवाभिन्नत्वात्, **तस्याभिन्नस्य** भावस्य **य एकदेशो घटस्तस्य ग्रहणे** घटस्य ग्रहणे **तस्यैव ग्रहणम्** भावस्यैव ग्रहणं समस्तस्य । किं कारणम् ? **ततोऽभिन्नत्वात्,** ततो भावाद् घटस्याभिन्नत्वात् घटाद्वा भावस्याभिन्नत्वात् । तद् व्याचष्टे --**तद्भावत्वात्,** तस्यापि भावत्वात् तद्भावत्वात् पर्यायान्तरेण हेत्वन्तरं वा, घटोऽपि भाव एव चाभिन्नत्वात्, यो यो भावः स स तद्ग्रहणे गृह्यते । दृष्टान्तो

प्रति देशः सर्वाविभक्तभवनवृत्त्यात्मकत्वात् सार्वरूप्यमनतिक्रान्तः, न चास्योर्ध्वाधस्तिर्यग्दिक्षु मूर्तिविवर्तप्रत्यङ्गानामेकत्वाभिमतभेदवत् क्वचिदवच्छेदो विद्यते । इति स ध्रुवः कूटस्थोऽविचाल्यनपायोपजनोऽविकार्यनुत्पत्तिरवृद्धिरव्यय उक्तवत् ।

* * *

स्वात्मवत्,**देश** 239/mj

* * *

प्रति देशः सर्वाविभक्तभवनवृत्त्यात्मकत्वात् सार्वरूप्यमनतिक्रान्तः, न चास्योर्ध्वाधस्तिर्यग्दिक्षु मूर्तिविवर्तप्रत्यङ्गानामेकत्वाभिमतभेदवत् क्वचिदवच्छेदो विद्यते । इति स ध्रुवः कूटस्थोऽविचाल्यनपायोपजनोऽविकार्यनुत्पत्तिरवृद्धिरव्यय उक्तवत् ।

* * *

स्वात्मवत्,

एतद्भावनार्थमाह --**तस्य ह्येकोऽपि प्रथनं प्रति देशः, हि**शब्दो यस्मादर्थे, यस्मात् तस्यैकोऽपि देशः प्रख्यान् **सर्वाविभक्तभवनवृत्त्यात्मकत्वात्** सर्वेण समस्तेन भावेनाविभक्तः भवनम् इत्येवैकां वृत्तिमनुभवत्यात्मरूपामिति सोऽपि देशः सर्वभावात्मा प्रागुक्तप्राण्याद्यवयवपुरुषात्मत्ववत्, अत आह --**तस्य ह्येकोऽपि प्रथनं प्रति देशः सर्वाविभक्तभवनवृत्त्यात्मकत्वात् सार्वरूप्यमनतिक्रान्तः** । ततोऽनेन न्यायेन देशग्रहणे समस्तग्रहणमित्यभेदपक्ष - /ms

---

४ द] तदतद्द
?र्शनंnayacakra-ms-bhā ॥
५ य] स एकदेशो प्र° । दृश्यतां पृ° २४० पं° ६ ॥
२३ स्माद]
°दर्थोnayacakra-ms-bhā ॥

२७ सा] अपि खलु ब्रह्मविद आहुः--प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च इति । इति भर्तृहरिविरचितायां वाक्यपदीयवृत्तौ १ । १ ॥
२८ त] ततोन्येन प्र° ॥

एव दर्शनं नान्यत्रेति । नन्वेकदेशश्च स एव चेति विप्रतिषिद्धमिति चेत्, तन्न, ज्ञायमानत्वापेक्षयोक्तत्वात्, त्वन्मत्या सावयव इव निरवयवोऽपि प्रख्यातीति मया तथोक्तम्, परमार्थतस्तु निर्विभाग एवासावुक्तो वक्ष्यते च । अथवा प्रथनं विस्तारः, विस्तीर्णत्वात् तस्य भावस्य प्रथनं देशं प्रति इत्यदोषः । तस्माच्चाविभक्त इत्युक्तम् । अत आह --**न चास्योर्ध्वाधस्तिर्यग्दिक्षु मूर्तिविवर्तप्रत्यङ्गानामेकत्वाभिमतभेदवत् क्वचिदवच्छेदो विद्यते दक्षिणोत्तरमथुरयोरपि**, किमु घटपटयोर्भवनैकमूर्तिविवर्तानवच्छेदादिति । **यथैकत्वाभिमतस्य** भेदस्य घटादेर्मूर्तेः शरीरस्य विवर्तानां विभागानामूर्ध्वाधस्तिर्यग्दिक्तयाङ्गावयवतया नापरः किन्तु प्रत्यङ्गतया च पुरुषपाण्यादिवत् कपालादित्वेन आभासमानानामेकोऽन्त्याभेदश्चक्षुरादिग्राह्याभिमत एकत्वाद् निर्विभाग**स्त**था भावविवर्तप्रत्यङ्गानां तदेकत्वाद् निर्विभागः । तस्माद् भावस्य न क्वचित् त्वदभिमतभेदवदेकत्वादवच्छेदो विद्यत इति यदि घटादित्वेन यदि रूपादित्वेन त्वदिष्टभेदवदेव । **इति**शब्दो हेत्वर्थे, यस्माद् विभागावच्छेदाभावाद्धेतोः स भावो **ध्रुव**स्त्रिष्वपि कालेषु, **कूटस्थो** माषराशिस्थमाषवत् सर्वेणैकीभूत एव, **अविचाली** न स्थानात् स्थानान्तरं सङ्क्रामति, **अनपायोपजनः** कोष्ठागारधान्यवद् निर्गमप्रवेशावपायोपजनौ भावस्य न स्तः, **अविकार्य**पि स्वस्थानस्थस्यापि नर्तकीभ्रूक्षेपादिवद् विकाराभावात्, **अनुत्पत्तिः** प्रागभूत्वा घ-
- /ms टादिवदुत्पत्त्यभावात्, **अवृद्धि**रङ्कुरपत्रवदुपचया- भावात्, **अव्ययो** वृक्षादिपत्राद्यवयवखण्डादिवद् व्ययाभावात् । एतानि हि नित्यविशेषणानि भावस्यैव घटन्ते न पुरुषादीनाम्, अत्र भावे ध्रुवादिनित्यलक्षणयोगः परपरिकल्पितभेदासम्भविधर्मत्वेन व्याख्यातः स्वरूपतो निदर्शनाभावात् । **उक्तवदिति** च पूर्वोत्तरोत्पत्तिविनाशवस्तुप्रविभागाभावाद् युक्तो नित्यैकसर्वात्मकत्वातिदेशः ।
§ 728

240/mj

अस्य प्रत्यक्षप्रमाणसिद्धिरिहैव, अन्यत्रानुमानतैव सम्बन्धैकदेशप्रत्यक्षत्वप्रत्ययशेषसिद्ध्यात्मकत्वात् । कुतोऽनुमानतापि

२९ मिति] चेत्तत्र
ज्ञा°nayacakra-ms-bhā । चेनत्र
ज्ञा° nayacakra-ms-ya ॥
३ स्माद्या] °द्यापि
वि°nayacakra-ms-bhā ॥
३ न] न चास्योर्ध्वमधस्तिर्यग्वा
मूर्तिपरिवर्तप्रत्यङ्गानां
क्वचिदवच्छेदोऽभ्युपगम्यते । इति
भर्तृहरिविरचितायां वाक्यपदीयवृत्तौ १ । १
॥
४ क्षिणोत्त]
°त्तरयोरपिnayacakra-ms-ya ॥
८ नाना] °मेकोंत्यामेकोऽन्त्यो
?भेद°nayacakra-ms-bhā ।
°भेकोत्याभेद° nayacakra-ms-pā
nayacakra-ms-ḍe
nayacakra-ms-līṃ
nayacakra-ms-raṃ
nayacakra-ms-hī । °मेकोत्यभेद°
nayacakra-ms-vi ॥
९ त्व] तदभि° प्र° ॥
१२ ध्रु] दृश्यतां पृ° २१ पं° २२, पृ°
२१२ टि° ४ ॥
१४ कोष्ठागार] °रधावद् प्र° ॥
१९ व्या] व्याख्यातो स्व° प्र° ॥

? सम्बद्धयोः कदाचिदग्रहणात् प्रत्यक्षपूर्वकत्वे तत्सम्भवात् तदभावे तदसिद्धेः । कुतोऽज्ञानमपि ? प्रत्यक्षपूर्वका- § 729

किञ्चान्यत्, **अस्य प्रत्यक्षप्रमाणसिद्धिरिहैव,** अभिन्नभावपक्षे प्रत्यक्षत्वाद् भावस्य प्रत्यक्षं प्रमाणं सिध्यति, उक्तवत् इति वर्तते । यथोक्तं **तस्य ह्येकोऽपि प्रथनं प्रतिदेशः सर्वाविभक्तभवनवृत्त्यात्मकत्वात् सार्वरूप्यमनतिक्रान्तः, ततस्तद्भावत्वात् ततोऽभिन्नत्वात् तस्य य एकदेशस्तस्य ग्रहणे तस्यैव ग्रहणं देशस्वात्मव**दित्युक्तं भावप्रत्यक्षत्वम् । ततः सर्वप्रमाणज्येष्ठप्रत्यक्षप्रमाणसिद्धिरिहैव यथार्थवस्तुविषयत्वात् । **अन्यत्रानुमानतैव,** भावैकवस्तुपक्षादन्यत्र भेदपक्षेऽनुमानतैव प्रत्यक्षाभिमतस्यापि । किं कारणम् ? **सम्बन्धैकदेशप्रत्यक्षत्वप्रत्ययशेषसिद्ध्यात्मकत्वात्,** द्वयोः सम्बद्धयोः सम्बन्धे तदेकदेशप्रत्यक्षत्वे तत्प्रत्ययाच्छेषसिद्धिरात्मा अनुमानस्येति तदात्मकं तत्, **सम्बद्धैकदेश** इति वा पाठः, यथोक्तम्—

सम्बद्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम् । § 731

सम्बद्धानां भावानां स्वस्वामिभावेन वेत्यादिना सप्तविधेन कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति । तस्मादिदानीमिन्द्रियप्रत्यक्षाच्छेषस्य अप्रत्यक्षस्यार्थस्य या सिद्धिरनुमानं तत्, यथा धूमदर्शनात् अग्निः इति ज्ञानम् । तथा आत्मेन्द्रियमनोऽर्थसन्निकर्षजपूर्वकं त्रिविधं पूर्ववदित्यादिलक्षणमेव तत्र सम्भवति । देशग्रहणस्य आराद्भागविषयस्याशेषतद्रस्वसंस्पर्शादिकदेशग्रहणेन शेषग्रहणमनुमानमेव । तस्यानुमानत्वेऽपि मा स्थिरां बुद्धिं कार्षीरित्यत आह --**कुतोऽनुमानताऽपि** प्रोक्तन्यायेन प्रत्यक्षत्वासिद्धेः । कथमिति चेत्, **सम्बद्धयोः कदाचिदप्यग्रहणात्,** प्रत्यक्षकाले हि सम्बद्धयोर्युगपद् ग्रहणादुत्तरकालमेकदेशग्रहणाद् विषाणादिव गवि अनुमानं स्यात्, तदेव तु प्रत्यक्षदर्शनं नास्तीत्युक्तम् । **प्रत्यक्षपूर्वकत्वे तत्सम्भवात्** प्रत्यक्षसिद्धौ तद्बलेन

२ व ] वर्ततेnayacakra-ms-ya प्रतिषु नास्ति ॥
२ त ] दृश्यतां पृ॰ २३८ पं॰ ६ ॥
४ द्भा ] दृश्यतां पृ॰ २३८ पं॰ ६ ॥
५ प्र ] ॰प्रमाज्येष्ठ॰ प्र॰ ॥
६ य ] यथावस्तु॰nayacakra-ms-ya ॥
१२ स्व ] स्वस्वामिभावेन वा प्रकृतिविकारभावेन वा कार्यकारणभावेन वा निमित्तनैमित्तिकभावेन वा मात्रामात्रिकभावेन वा वध्यघातकभावेन वा कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति इति वक्ष्यतेऽत्र नयचक्रवृत्तौ पृ॰ ४४५--२ । एतेनैव मात्रानिमित्तसंयोगिविरोधिसहचारिभिः । स्वस्वामिवध्यघाताद्यैः साङ्ख्यानां सप्तधानुमा ॥ १ ॥ इत्यपि पराकृतं वेदितव्यम् । इति न्यायवार्तिकतात्पर्यटीकायाम् १ । १ । ५ ॥
१५ आ ] इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् । अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च ।न्यायसू॰ १ । १ । ४, ५ ॥
२० विषाणा ] ॰णादिवnayacakra-ms-vi विना । ॰णादेव nayacakra-ms-vi ॥

अनुमानसिद्धिः सम्भाव्येत, **तदभावे तदसिद्धेः** प्रत्यक्षत्वासिद्धेरनन्तरोक्तत्वादेव कुतोऽनुमानतापि ? । § 732

> *यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।सङ्कीर्णमिव
> मात्राभिश्चित्राभिरभिमन्यते ॥§ 734

> तथेदममृतं ब्रह्म निर्विकारमविद्यया ।कलुषत्वमिवापन्नं भेदरूपं
> प्रकाशते ॥§ 735

> तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।अङ्गारकितमुत्पाते
> वारिराशेरिवोदकम् ॥§ 736

> प्रकृतित्वमनापन्नान् विकारानाकरोति सः ।ऋतुधामेव ग्रीष्मान्ते
> महतो मेघसम्प्लवान् ॥ § 737

**सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद्** (Edtext outside numbered paragraph)

* * *

ज्ञानत्रयेऽन्तर्भावाभावात् संशयनीयविपर्येतव्यविषयप्रत्यक्षात्यन्ताभावादाधिक्याव-सायासम्भवाच्चानध्यवसायासम्भवात् ।

अन्वाह च--

* * *

विशेषस्मृतेश्च संशयः

> *यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।सङ्कीर्णमिव
> मात्राभिश्चित्राभिरभिमन्यते ॥§ 739

---

२२ स] सम्भाव्यतेnayacakra-ms-ya ॥
२२ द] तदसिद्धेरनन्तरो॰nayacakra-ms-bhā । तदसिद्धेः प्रत्यक्षत्वात्सिद्धेरनन्तरो॰ nayacakra-ms-vi ॥
१ *] तथा ह्युक्तम्--यः सर्वपरिकल्पानामाभासेऽप्यनवस्थितः । तर्कागमानुमानेन बहुधा परिकल्पितः ॥ १ ॥ व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ । सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते ॥ २ ॥... ...प्रकृतित्वमपि प्राप्तान् विकारानाकरोति सः । ऋतुधामेव ग्रीष्मान्ते महतो मेघसम्प्लवान् ॥ ४ ॥ तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते । अङ्गारकितमुत्पाते वारिराशेरिवोदकम् ॥ ५ ॥... ...यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः । सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥ १० ॥ तथेदममृतं ब्रह्म निर्विकारमविद्यया । कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥ ११ ॥ इत्युद्धृतमिदं कारिकाचतुष्टयं भर्तृहरिणा वाक्यपदीयवृत्तौ १ । १ ॥
७ *] तथा ह्युक्तम्--यः सर्वपरिकल्पानामाभासेऽप्यनवस्थितः । तर्कागमानुमानेन बहुधा परिकल्पितः ॥ १ ॥ व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ । सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते ॥ २ ॥... ...प्रकृतित्वमपि प्राप्तान् विकारानाकरोति

तथेदममृतं ब्रह्म निर्विकारमविद्यया ।कलुषत्वमिवापन्नं भेदरूपं प्रकाशते ॥§ 740

तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।अङ्गारकितमुत्पाते वारिराशेरिवोदकम् ॥§ 741

प्रकृतित्वमनापन्नान् विकारानाकरोति सः ।ऋतुधामेव ग्रीष्मान्ते महतो मेघसम्प्लवान् ॥ § 742

वै॰ सू॰ २ । २ । १७, तथा **समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः** न्यायसू॰ १ । १ । २३ इति सामान्यविशेषयोः प्रत्यक्षपूर्वकत्वे समानानेकधर्मत्वादीनि विशेषणानि स्युर्नान्यथा स्थाणुपुरुषादिष्विति संशयनीयार्थाभावान्न संशयः । तत एव * (Edtext outside numbered paragraph)विपर्येतव्याभावान्न विपर्ययस्त्वन्मतेनैवेत्यत आह --**संशयनीयविपर्येतव्यविषयप्रत्यक्षात्यन्ताभावात्** । अनध्यवसायोऽध्यवसायपूर्वः, स चाधिकोऽवसायोऽध्यवसायः प्रत्यक्षज्ञानम्, एतदभावस्योक्तत्वाद् नाध्यवसायोऽनध्यवसाय **इत्याधिक्यावसायासम्भवाच्च** तद्व्यावृत्तिविषया**नध्यवसायासम्भवाद्** कुतोऽनध्यव- (Edtext outside numbered paragraph) सायः ? तस्माद् यदुक्तं पु (Edtext outside numbered paragraph)**ढविकायिकादी जीवा अन्धा मूढतमपविट्ठा** भइमे भंते असन्निणो पाणा तं जहा--पुढविका+इया जाव वणस्स+इका+इया छट्ठा य एग+इया तसा, ए+ए णं अंधा मूढा तमंपविट्ठा तमपडलमोहजालपडिच्छण्णा अकामनिकरणं वेयणं वेदेंतीति वत्तव्वं सिया ? हंता गोयमा ! जे इमे असन्निणो पाणा पुढविका+इया जाव वणस्स+इकायिया छट्ठा य जाव वेयणं वेदेंतीति वत्तव्वं सिया । इति भगवतीसूत्रे पाठः ७ । ७ । २९२ ॥गवतीसू॰ ७ । ७ । २९२ इत्यादि तत् सत्यम् । § 743

* * *

५ विशेषस्मृतेश्च संशयः

**अन्वाह चे**ति तस्मिन् जिनप्रवचनप्रसिद्धाभेदभावनिर्विकल्पविधिविधिनयदर्शने भेदाभासप्रत्यक्षानुमानसंशयविपर्ययानध्यवसायासम्भवमनुवर्तमानोऽन्योऽप्याह

---

सः । ऋतुधामेव ग्रीष्मान्ते महतो मेघसम्प्लवान् ॥ ४ ॥ तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते । अङ्गारकितमुत्पाते वारिराशेरिवोदकम् ॥ ५ ॥... ...यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः । सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥ १० ॥ तथेदममृतं ब्रह्म निर्विकारमविद्यया । कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥ ११ ॥ इत्युद्धृतमिदं कारिकाचतुष्टयं भर्तृहरिणा वाक्यपदीयवृत्तौ १ । १ ॥

७ मानो] ॰मानोनो-प्याहnayacakra-ms-ḍenayacakra-ms-līṃ विना । ॰मानोऽप्याह nayacakra-ms-ḍe nayacakra-ms-līṃ ॥

। **यथा विशुद्धमाकाश**मिति दृष्टान्तसमर्थनम्, तिमिरोपप्लुतदृष्टेर्विशुद्धे नभसि केशोन्दुकमशकमक्षिकामयूरचन्द्रिकादि**मात्राभि**रवयवैर्विततमिति निरवयवेऽप्यसङ्कीर्णे **सङ्कीर्णदर्श**नं भवति । **तथेद**मिति दार्ष्टान्तिको भावैकपरमार्थः, 242/mj अमरणाद**मृतम**विनाशाद् बृहत्त्वाद्

* * *

एषु विधिविधिषु अविकल्पः शब्दार्थः, न त्वज्ञातः सर्वस्यैकत्वाद् यस्य कस्यचिज्ज्ञाने सर्वस्य ज्ञातत्वात् । अन्वाह--

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ॥
अनागमविकल्पा तु स्वयं विद्योपवर्तते ॥ वाक्यप० २ । २३५§ 746

* * *

**ब्रह्म निर्विकारं** *स्तिमितं व्योमवदेव स्थितम्, नपुंसकनिर्देशः सर्वभेदाभिमतासद्विकारसाधारणत्वादव्यक्ते गुणसन्देहे नपुंसकलिङ्गप्रयोगवचनात्, भवनापेक्षया वा नपुंसकम् । अकलुषमपि सदविद्यया ज्ञानाभासेन **कलुषत्वमिवापन्न**मनापन्नमपि अभेदरूपं सद् भेदरूपमाभाति । एवं तावदमलं मलरूपेणाभातीत्युक्तम् । इदानीमेकं सदनेकधा प्रविभज्यत इति ब्रूमः --**तस्यैकमपी**त्यादि । यथा उदन्वतां तोयमुत्पातेऽङ्गारराशिवत् प्रज्वलदुपलक्ष्यते तथास्यानेकरूपता मिथ्यैव । **प्रकृतित्व**मिति, प्रकर्षेण कृतिः **प्रकृति**र्घटपटादिप्रकारो भेदः, तद्भावमनापन्नानेव विकारांस्तानेव घटपटादीनात्मभावादप्रच्युतानेव नर्तकहस्तभ्रूक्षेपादिकल्पानाकरोति स स्वतः स्वात्मानं भाव एवाकाररूपेण सृजति उपसंहरति च, को दृष्टान्तः ? **ऋतुधामेव,** ऋतूनां - /ms धाम इन्द्रः, इन्द्र इव । निर्मलमाकाशं दृष्ट्वा वक्तारो भवन्ति--महावर्षस्य गर्भ इति, कुतो निर्मले नभसि वर्षसम्भवः ? तथापि तन्नैर्मल्याविनाशनेनैव शक्रः शक्रकार्मुक-शतह्रदा-महाघन-स्तनित-वर्षित-करका-धारावर्षादीन् सृजत्युपसंहरति चेत्युच्यते क्षणेनैव पुनस्तादृग्वैमल्यदर्शनान्नभसः । यथेयं ऋतुधाम्नः सृष्टिः शुद्धगगनापृथग्भूतजलप्रकृतित्वाभिमतमेघादिरूपा तथा सर्वघटादिगवादिरूपा सृष्टिर्भावादेवोपसंहारश्चेति भावविधिविधिनयः समाप्तः ॥

---

८ *] स्तिमिरं प्र० ॥
८ स्तिमितं] व्योमदेवnayacakra-ms-bhā । व्योमादवि nayacakra-ms-ya ॥
८ क] °निर्देश सर्वं भेदा°nayacakra-ms-ya । °निर्देशा सर्वं भेदा° nayacakra-ms-bhā ॥
९ त्वाद] एवं हि दृश्यते लोके--अनिर्ज्ञातेऽर्थे गुणसन्देहे च नपुंसकलिङ्गं प्रयुज्यते । किं जातम् इत्युच्यते, द्वयं चैव हि जायते--स्त्री वा पुमान् वा । तथा विदूरेऽव्यक्तं रूपं दृष्ट्वा वक्तारो भवन्ति--महिषीरूपमिव ब्राह्मणीरूपमिव । इति पातञ्जलमहाभाष्ये १ । २ । ६९ ॥
१५ टा] °दिप्ररो भेदःnayacakra-ms-bhā । °दिपरो भेदः nayacakra-ms-ya ॥
१६ न] र्तनकहस्त° प्र° ॥
२० श] विद्युत् ॥
२३ सृ] सृष्टिर्भावा° प्र° ॥

§ 747

एवं तावद् वस्त्वर्थतो विधिविधिनयविकल्पाः पुरुष-नियति-काल-स्वभाव-भावा व्याख्याताः । अनया दिशा शब्दब्रह्मविधिविधिनयग्रहाद्येककारणवादा उन्नयनीयाः । इदानीं तेषु शब्दार्थो वक्तव्यः, स च सामान्येनोच्यते सर्वेषां तुल्यत्वात् । स च द्विविधः--पदार्थो वाक्यार्थश्च । तत्र पदार्थस्तावत् **--एषु विधिविधिष्वविकल्पः शब्दार्थः**, उक्तेषु पुरुषादिवादेष्ववस्थाद्युपचरितप्रक्रियाभेदकल्पितविकल्पासत्त्वात् तद्वस्तुनिर्विकल्पत्वात् । **न त्वि**त्यादि, नाज्ञातः, सर्वस्यैकत्वाद् यस्य कस्यचिज्ज्ञाने सर्वस्य ज्ञातत्वात् । एतेन वक्तृत्वाद्यसमन्वयो व्याख्यातो दृष्टान्ताभावात् सर्वस्य सर्वज्ञत्वाद् भेदाभावात् । एतमर्थमन्योऽप्य**न्वाह— शास्त्रेषु प्रक्रिया । साङ्ख्ययोगवैशेषिकवेदशिरः**प्रभृतिषु नृप्रकृतिपुरुषद्रव्यगुणादिनित्यानित्याद्वैतद्वैतत्रैतादिपदार्थप्रक्रियाभेदैर्विकल्पात्मकपदार्थप्रणयने यथाप्रक्रियमविद्यैवोपवर्ण्यते विकल्पस्यावस्तुत्वात् । विद्या तु तत्त्वज्ञानं सा आगमविकल्परूपा न - /ms
भवितुमर्हति, वाग्गोचरातिक्रान्तत्वात् तत्त्वज्ञानविषयानन्तात्मकैकपर 243/mj

* * *

ये त्वेते घटादिशब्दा मेघस्तनितवदेते शब्दा एव केवला नार्थस्वरूपस्य वाचका मयूरविरुतवत् सङ्केताद् व्यवहारानुपातिनस्तस्यैव चैकस्य ब्रह्मणो लक्षणार्थाः तदेकदेशत्वात् प्रागभिहितप्रत्यक्षसिद्धिवत् । एवं च कृत्वाहुः--सर्वधातवो भुवोऽर्थमभिदधति इति ।

* * *

मार्थस्य । यथोक्तम् **--पण्णवणिज्जा भावा** आव॰ नि॰ ४८८ इत्यादि । आगमाभ्यासात्तु सम्यग्दर्शन-ज्ञानचारित्र-तपोविशेषविशेषिताविद्यस्य सर्वभावविषया विद्या स्वयमेव स्वात्मनैव उपवर्तते, नाविद्यमाना कुतश्चिदानीयते, सा चानागमविकल्पेत्यत आह **--अनागमविकल्पा तु स्वयं विद्योपवर्तते** । तथा चान्यः-- § 748

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
तेषामत्यन्तसम्बन्धो नार्थाञ्शब्दाः स्पृशन्त्यपि ॥§ 750

---

२६ ह्म ] ॰ह्मविधिन॰ प्र॰ ॥
४ पुरुषा ] ॰दिवाष्वेव-स्थाभ्युप॰nayacakra-ms-bhā । ॰दिष्वेवस्थाभ्युप॰ nayacakra-ms-ya । अत्र ॰दिवादेष्वेवावस्थाद्युप॰ इत्यपि पाठः स्यात् ॥
६ व ] दृश्यतां पृ॰ १७९ पं॰ ४ ॥
७ त्वा ] ॰त्वात् भेदा॰nayacakra-ms-bhā । ॰त्वात् सदा॰ nayacakra-ms-ya ॥
८ भृतिषु ] ॰षुतृप्र-कृति॰nayacakra-ms-raṃnayacakra-ms-hī विना । nayacakra-ms-raṃ nayacakra-ms-hī प्रत्योस्तु ॰षु प्रकृति॰ इति पाठः, स च समीचीन एवेति भाति ॥
१७ प ] दृश्यतां पृ॰ ६ पं॰ ११ ॥
१८ पोविशेष ] **विशेषिताविद्यस्य** विनाशिताविद्यस्य विशोषिताविद्यस्य विश्लेषिताविद्यस्येत्याशयः ॥
२३ ना ] **नार्थाशब्दाः** प्र॰ । दृश्यतां पृ॰ ४९८--१ ॥

शब्दा इति शब्दगडुमात्रप्रतिपत्तिहेतव इत्यत आह **--ये त्वेते घटादिशब्दा मेघस्तनितवदेते शब्दा एव केवलाः, नार्थस्वरूपस्य वाचकाः,** घटादिप्रतिपादनसमर्थाभिमता न प्रतिपादका इत्यर्थः । नन्विदं प्रसिद्धप्रस्तुतव्यवहारविरुद्धं त्वयोक्तम्--अर्थस्याप्रतिपादका घटादिशब्दा मेघस्तनितवच्छ्रोत्रग्राह्यत्वादिति, घटादिशब्दा इति च त्वद्वचनादेव तेषां घटाद्यर्थप्रतिपादनदर्शनादिति । अत्रोच्यते--न ब्रूमः अप्रतिपादकाः इति । *किं तर्हि ? अवाचका इति ब्रूमः, प्रतिपत्तृसङ्केतवशात् तदुपलक्षणत्वेन प्रतिपादकत्वं विकल्पात्मार्थविषयं न विरुध्यते, यस्माद् **मयूरविरुतवत् सङ्केताद् व्यवहारानुपातिनः,** यथा मयूरविरुतं त्रासमदहर्षस्थानगमनाद्यन्यतमावस्थाविशेषसहचरं श्रुतचरं तथोत्तरकाले कृतसङ्गीतेः पुरुषस्य तादृग् विज्ञानमादधाति एवं पुरुषोऽपि घटपटादिशब्दोच्चारणेन पूर्वसङ्केतवशात् पुरुषान्तराय स्वाभिप्रायमर्पयतीति न प्रसिद्धिव्यवहारविरोधौ, तथैव अचेतनशब्देष्वपि कालाकालमेघस्तनितादिषु
- /ms सङ्केतादेव शुभाशुभादिपरिज्ञानं दृश्यते । अथवा किमनेन प्रसिद्धिव्यवहारविरोधपरिहारपरिक्लेशेन ? नन्वयमेव सुश्लिष्टः परिहारो व्यापी च, तद्यथा--ते सर्व एव शब्दा**स्तस्यैव चैकस्य ब्रह्मणः** पुरुषाद्यन्यतमविधिविधिनयविकल्पस्य यथोपपादितं त्वया रुचितस्यान्यतमस्य **लक्षणार्थाः तदेकदेशत्वात् प्रागभिहितप्रत्यक्षसिद्धिवत्** । यथा गौर्विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावान् इति यथैते विषाण्यादिशब्दा गोरेकदेशवाचित्वात् तदुपलक्षणार्थाः प्रसिद्धसङ्केतवशाद् गोरेव वाचकास्तदवयवानां तस्मादभिन्नत्वादेवं सर्वशब्दास्तदवयवानां ततोऽपृथक्त्वात् तस्यैव ब्रह्मणो वाचका इति वाचकत्वेऽप्युपपन्नः प्रसिद्धिव्यवहाराविरोधः । अभिन्नैकभवनब्रह्मोपलक्षणार्थत्वे सर्वशब्दानां शब्दलक्षणविन्मतिसंवादि ज्ञापकमाह **--एवं च कृत्वाहुः** शब्दलक्षणविद इति वाक्यशेषः । **सर्वधातवो भुवोऽर्थमभिदधती**ति तेषामप्यस्मिन्नेव दर्शने करोत्यादिधातूनां
244/mj सत्तार्थानिति

* * *

स एकोऽनवयवः शब्दो वाक्यार्थः, न तु सर्वाणि । सङ्ग्रहदेशत्वाच्चास्य द्रव्यार्थता । भवति भवनं भावो द्रवतीति द्रव्यम्, न विकारावयवौ ।

* * *

क्रमे भ्वर्थवचनमुपपद्यते, भुवं वदन्ति इति भूवादयः, वादिशब्दस्य

---

२४ ग] °गतुमात्र° प्र° ॥
३ *] किं तर्हि अवाचका इतिnayacakra-ms-ya प्रतिषु नास्ति ॥
६ द] °दर्षस्था°nayacakra-ms-ya । °दषस्था° nayacakra-ms-bhā ॥
७ का] °कालंnayacakra-ms-bhā ॥
११ प] °रिक्लेशेनत्वयमेव प्र° ॥
१९ तिसंवा] °वादेnayacakra-ms-bhā ॥
२५ भ्व] स्वर्थ°nayacakra-ms-ya । स्वार्थ° nayacakra-ms-bhā ॥
२५ प] °पद्य भुवं प्र° ॥
२५ भू] भूवादयो धातव इति । कथम् ? नेदमादिग्रहणम् । वदेरयमौणादिक इञ् कर्तृसाधनः--भुवं वदन्तीति भूवादय इति । इति पातञ्जलमहाभाष्ये ॥

औणादिकेऽन्तत्वात् तथा भूवादिशब्दव्याख्यानात्, नान्यथा । इत्युक्तः पदार्थः । § 751

इदानीं वाक्यार्थ उच्यते --**स एकोऽनवयवः शब्दो वाक्यार्थः**, वाक्यं च वाक्यार्थश्च वाक्यार्थः, वाक्येन युक्तोऽर्थो वाक्यार्थः, वाक्यसम्बधी वाक्याद् वाक्यस्यैवार्थः । यथाहुः—

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥§ 754

पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि । - /ms
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥ वाक्यप॰ २ । १, २ इति ।§ 756

तत्र यैः **एकोऽनवयवः शब्दः** इत्युक्तं तैर्विनिश्चित्योक्तं भवनस्यानवयवत्वात् तथैव पदवाक्यशब्द (Edtext outside numbered paragraph)तदर्थाद्यात्मत्वादिति । **न** (Edtext outside numbered paragraph) **तु सर्वाणि** एकस्यैव सर्वत्वादिति च (Edtext outside numbered paragraph)रितार्थ एष द्रव्यार्थो विधिविधिनयः, हेतोर्वास्मात् **सङ्ग्रहदेशत्वाद्यास्य द्रव्यार्थते**ति, सङ्ग्रहो द्रव्यार्थः, स पुनर्द्विविधः--स (Edtext outside numbered paragraph)र्वसङ्ग्रहो देशसङ्ग्रहश्च, इत्येवमादिशतप्रस्तारोऽसावार्षे शतभेदश्रुतेर्नयानाम् । यथोक्तम् --**एक्किक्को य सत** (Edtext outside numbered paragraph)**विधो सत्त णयसता ह** (Edtext outside numbered paragraph)**वंत्येवं** आव॰ नि॰ ७५९ इति । सङ्ग्रहस्यापि द्रव्यार्थता

तित्थकरवयणसंगहविसेसपत्थारमूलवाकरणी ।
दव्वट्ठि+ओ य पज्जवणयो य सेसा विकप्पा सिं ॥ सन्मति॰ १ । ३ *तिवचनात् ।§ 758

द्रव्यार्थसमासश्च आदिनये व्याख्यातः । तस्मात् सङ्ग्रहदेशत्वात् तदवयवत्वादस्य द्रव्यार्थतेति । § 759

द्रव्यशब्दस्य कोऽर्थः ? द्रवतीति द्रव्यम्, **गुणसन्द्रावो द्रव्यम्** पा॰ म॰ भा॰ ५ । १ । ११९, द्रव्यं भव्यं योग्यं **भू प्राप्तौ** पा॰ धा॰ १८४५ इति प्राप्तियोग्यमिष्टार्थप्राप्तियोग्यं दारु, *क्रियावदादिलक्षणं द्रव्यम्, इत्येवमादि

---

२६ औ] वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् । ५७४ ॥ इति पाणिनीयव्याकरणे उणादिषु चतुर्थपादे ॥
२ स] °**संबंधा** प्र° ॥
३ वा] वाक्याद् वाक्यस्यैव वार्थः इत्यपि पाठोऽत्र स्यात् ॥
९ *] दृश्यतां पृ॰ ४ टि॰ २ ॥
१० आ] दृश्यतां पृ॰ ७ पं॰ ८ ॥
१४ *] क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम् ।**वै॰ सू॰** १ । १ । १५ ॥

यथासम्भवं लक्षणं वाच्यम् । इह तु **भवति भवनं भावः । भवति** प्राच्यचतुष्टये पुरुषादिस्वभावान्ते, **भवनं भावो**ऽन्त्ये पूर्वोक्तवत्, पूर्वविरुद्धत्वान्नयानां द्रवति भवति गच्छति सततमिति **द्रव्यं** गत्यात्मकत्वात् **द्रव्यं च भव्ये** पा० ५ । ३ । १०४ इति वचनात्, **न विकारावयवाविति** विधिनयायुक्तत्वाद् गतार्थम् । § 760
245/mj

निबन्धनमस्य--किं भवं एके भवं, दुवे भवं, अक्खु+ए भवं, अव्व+ए भवं, अवट्ठि+ए भवं अणेकभूतभव्वभवि+ए भवं ? सोमिला ! एके वि अहं दुवे वि अहं अक्खु+ए वि अहं अव्व+ए वि अहं अवट्ठिते वि अहं अणेकभूतभव्वभवि+ए वि अहं भगवतीसू० १८ । १० । ६४७ । § 761

किमेतत् सामर्थ्यवादिना स्वमनीषिकयोच्यते त्वया, आहोस्विदार्षेऽपि निबन्धनमस्य दर्शनस्यास्ति यत एतद् निर्गतमिति ? अत्र अस्ति इत्युच्यते, **निबन्धनमस्य** सोमिलब्राह्मणप्रश्ने **किं भवं एके** भवमित्यादिके व्याकरणे **सोमिला ! एके वि अहं, दुवे वि अहं, अक्खु+ए वि अहं, अव्व+ए वि अहं, अवट्ठिते वि अहं, अणेकभूतभव्वभवि+ए वि अह**मित्यादि निबन्धनमिति । § 762

एवं द्वितीयो विधिविध्यरः सविकल्पो नयचक्रस्य समाप्तः ॥

# ३ अथ तृतीयो विध्युभयारः ।

246/mj

ओँ अर्हम् § 764

अथ किं भवता पुरुषादिवादेषु प्रतिस्वं तथा तथा या एता अवस्था उक्ताः पुरुषादि तत्त्वं तल्लक्षणम्, उत पुरुषादिलक्षणास्ताः ? § 765

यद्यवस्थास्वात्मैव पुरुषादि, न पुरुषाद्यात्मा अवस्थाः, ततः पुरुषो नाम न कश्चिच्चतुरवस्थाव्यतिरिक्तः, समुदयिमात्रसमुदायाभ्युपगमाद् रूपादिसमुदायवत् § 766

१७ भ] भवतिnayacakra-ms-bhā प्रतौ नास्ति ॥
१ वा] °वाविधिविधिनया°nayacakra-ms-ya ॥
३ ए] दृश्यतां पृ० १८९ टि० ५ ॥
७ अहं] दृश्यतां पृ० १८९ टि० ५ ॥
१० ए] एको प्र० ॥
१२ वि+ए] °ए पि अह° प्र० ॥

कमलदलविपुलनयना कमलमुखी कमलगर्भसमगौरी ।
कमले स्थिता भगवती ददातु श्रुतदेवता सिद्धिम् ॥§ 768

इदानीं विध्युभयारावसरः । यद्ययं विधिविधिनयारोक्तो भावो निर्दोषः स्यादरान्तरारम्भोऽनर्थकः स्यात्, स तु सदोष एवेति प्राप्तावसरं तद्दोषमुक्त्वोत्तरत्र विध्युभयारं निर्दिदिक्षुः प्राच्यदोषाभिधानार्थमेव तावदाह **--अथ किं भवता** इत्यादि । **अथे**त्यधिकारोपन्यासे, अनन्तरोक्तपुरुषादिवाददूषणाधिकारोपन्यासार्थोऽथशब्दः । **किं**शब्दः प्रश्ने, सामान्येन पुरुष-नियति-काल-स्वभाव-भावेषु अनन्तरोक्तेषु **प्रतिस्व**मात्मनो ग्राहे **तथा तथा** तेन तेन प्रकारेण पुरुषः सुप्तादिचतुरवस्थः, नियतिरेव पूर्वपरादिक्रियाऽक्रियादिनियतावस्थारूपा, काल एव क्रमयौगपद्यभूतभवद्भाविव्यवस्थातत्त्वः, स्वभाव एवात्मप्रविभागमात्रप्रतिविविक्तभवनभेदतत्त्वः, भाव एव स्वत्वास्वत्वाद्यविद्याविकल्पविनिर्मुक्तसत्तामात्रव्याप्यनञ्जनशब्दार्थज्ञानाद्यवस्थाविशेषजगत्तत्त्व इति **या एताः** प्रतिस्वमशेषा व्रीह्यङ्कुरादिघटपटादिवस्तुव्याप्तिवृत्तयो**ऽवस्था**स्तस्य तस्य पुरुषादिदर्शनस्य व्यापित्वप्रदर्श- - /ms
नार्थ**मुक्तास्तासु किं पुरुषादि तत्त्व**मवस्थालक्षणं ***तल्लक्षणम् ?** तानि च लक्षणं तस्याः, न सोऽस्ति तद्व्यतिरिक्तः, यथा रूपादय एव घट इति । **उत पुरुषादिलक्षणास्ताः ?** पुरुषाद्येव सत्यम्, न ताः काश्चिदवस्थाः, यथा घट एव रूपादयः न रूपादयो नाम केचिद् घटव्यतिरेकेण, इति द्वयोर्विकल्पयोरन्यतरोऽवधार्यः । § 769

*किञ्चातः ? **यद्यवस्थास्वात्मे**त्यादि यावत् **समुदयमात्रवाद एवायमन्यः** । यदि पुरुषादि न किञ्चिदस्ति, अवस्थास्वात्मैव तल्लक्षणम्, ता एव सत्याः, **न पुरुषाद्यात्मावस्थाः** पुरुषादिस्वरूपास्ता अवस्था न भवन्ति इत्येवमभ्युपगतं भवति ततः **पुरुषो नाम न कश्चिच्चतुरवस्थाव्यतिरिक्त** इत्येतदा 247/mj

* * *

समुदायमात्रवाद एवायमन्यः, तुरीयत्वप्रतिपादनार्थाभ्युपगतमुक्तिक्रमवत्तु अयुगपदवस्थावृत्तेः क्षणिकवादः वासोवत्, चतुर्ज्ञानमात्रत्वात् कल्पनाज्ञानमात्रसत्यं न किञ्चित् तदाभासज्ञानबहिर्भूतं स्वप्नवदिति विज्ञानव्यतिरिक्तार्थशून्यवादः ।

अचिन्त्यमेवेदं चिन्त्यते । ऊर्ध्वमधस्तिर्यक् क्वचित् तत्त्वैक एव व्यवस्थितः

---

४ भ] भव-तnayacakra-ms-raṃnayacakra-ms-hī ॥
५ न्या] °न्यासोर्थे°nayacakra-ms-bhā । °न्यासोर्थो° nayacakra-ms-ya ॥
९ द्भा] °द्भाविविवस्थात्ततःnayacakra-ms-ya । °द्भाविवृवस्थात्ततः nayacakra-ms-bhā ॥
९ प्र] °प्रतिविवक्त°nayacakra-ms-ya ॥
११ तिस्व] °स्वनशेषः प्र° ॥
१३ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१८ *] किं वातः प्र° ॥

पुरुषः, अनतिरिक्तपरापराणीयोज्यायोरूपात्मकत्वात्, वृक्षवत् ।

* * *

पन्नम् । **पुरुषादि** इति सामान्येनोपक्रम्य **पुरुषो नाम** इति पुरुषस्यैवाभाववचनं विधिविधिनयविकल्पानां पुरुषस्य प्रथमत्वात् तद्दूषणेनातिदेक्ष्यमाणत्वात् । पुरुषवादे प्रस्तुते कथं पुरुष एवासन्नित्यापाद्यत इति चेत्, उच्यते--यस्मात् **समुदयिमात्रसमुदायाभ्युपगमाद् रूपादिसमुदायवत् समुदायमात्रवाद एवायमन्यः**, स एवायं बौद्धपरिकल्पितरूप-वेदना-विज्ञान-संस्कार-संज्ञास्कन्धसमुदायः पुरुषोऽङ्गुलिमुष्टिवत् बलाकापङ्क्तिवत् अक्षोद्धिचक्रपञ्जराणीषाक्षपरयुगसमिलादिरथवदिति समुदयवाद ईषन्मषीम्रक्षितकुक्कुटवत् पुरुषप्रत्याख्यानफलोऽन्यवदाभाति सुप्तसुषुप्तजाग्रत्तुरीयावस्थासंज्ञाभेदात् । युगपद्भाविरूपादिगुणसमुदायवादतुल्यो युगपदवस्थचतुरवस्थासमुदयवाद इति - /ms एष देशभिन्नरूपादिसमुदयवादतुल्यः । नायं देशभिन्नरूपादि- समुदयवादतुल्य एव, किं तर्हि ? कालभेदभिन्नायुगपद्भाविसततसंवृत्तजननिधननामरूपवादतुल्यः क्षणिकवादोऽपि, यस्मात् **तुरीयत्वप्रतिपादनार्थाभ्युपगतमुक्तिक्रमवत्त्वयुगपदवस्थावृत्तेः क्षणिकवाद** इति, सुषुप्तसुप्तजाग्रत्परमविनिद्रावस्थाविशुद्धिक्रमान्यथावृत्त्यभ्युपगमादवस्थाक्षयोऽन्यथात्वम्, अन्ते च क्षयदर्शनादादौ क्षयोऽनुमेयोऽवस्थानामिति क्षणिकवादः । को दृष्टान्तः ? **वासोवत्**, यथा वस्त्रं क्षणे क्षणे जीर्यज्जीर्यदन्ते विशीर्यते तथावस्था अपि । न केवलं समुदयक्षणिकवादावेव, किं तर्हि ? शून्यवादोऽपि, तद्यथा --**चतुर्णाज्ञा** ?नेत्यादि, यथा पुरुषवादिना चतस्रोऽवस्थाः पृथक् परिगृह्य तास्वपि ज्ञानमेव सुप्तत्वात् सुप्तपुरुषवत् सुषुप्तत्वाद् मदिरामत्तवदित्यादिना प्रतिपादितम्, तथा तथा रूपाद्यमूर्तमूर्त्यापत्त्या त्वयैव रूपणाद् रूपम् इति च ज्ञानात्मना चैतन्यस्वरूपादनपेता रूपरसादिघटादिसृष्टिश्चानेकधोपपादिता, सा च कल्पनाज्ञानम्, तन्मात्रमेव सत्यम्, न रूपादि किञ्चित् तदाभासज्ञानबहिर्भूतं **स्वप्नवत्**, यथा स्वप्ने सिंहाद्याभासज्ञानमात्रम् न सिंहादिः कश्चित् तद्बहिर्भूतस्तथा जाग्रद्विज्ञानमपि ज्ञानमात्रमेव ग्रामारामस्त्रीपुरुषादिरूपाद्याकारज्ञानमात्रं तद्व्यतिरिक्तार्थशून्यस्वप्नविज्ञानवद्वेत्येतदापन्नम् । अतः कल्पनाज्ञानमात्र-

---

३ रूपादिस] °समुदायवत्nayacakra-ms-ya प्रतिषु नास्ति ॥
४ ए] एव एवायमन्यः प्र° ॥
५ मुदा] °दाय पु° प्र° ॥
५ रा] °णीयाक्ष° nayacakra-ms-bhā । °णीयोक्ष° nayacakra-ms-ya । दृश्यतां पृ° ७६ टि° ९ ॥
८ व] °वस्यदिवस्थायि ?चतु°nayacakra-ms-bhā ॥
११ तु] °तुल्य क्ष° प्र° ॥
१३ अ] अन्ते क्षय°nayacakra-ms-ya ॥
१४ क्ष] क्षयोनुमयावस्था° प्र° ॥
१९ त] तथा तथा तथाnayacakra-ms-bhā ॥
२२ क] कश्चित्तद्बहि°nayacakra-ms-bhā । कश्चिद्बहि° nayacakra-ms-ya ॥
२४ शू] °शून्यं ? ॥

सत्यमिति विज्ञानव्यतिरिक्तार्थशून्यवादः, विज्ञानमात्रवादस्यापि ग्राह्यग्राहक-विकल्पातीतनिर्विकल्पत्वाश्रयस्य शून्यत्वापत्तेः । § 770

पुरुषवाद्याह --**अचिन्त्यमेवेदं चिन्त्यत** इत्यादि । मद्वचनापरिज्ञानादसम्बद्धं दूषणम्, मया हि पुरुष एवेदम् इत्यवधार्योक्तम्, नोक्तम् इदमेव पुरुषः इति प्रत्यक्षाः सुप्ताद्यवस्था उद्दिश्येति । अत्र - /ms, 248/mj

* * *

नन्वयमेकावस्थामात्रस्वतत्त्व एव व्यवस्थापितः, चैतन्यानतिवृत्तिवर्णनात् । तच्च विनिद्रावस्थातोऽनन्यदिति विनिद्रावस्थालक्षण एव पुरुष आत्यन्तिक-निद्राविगमरूपनिरूप्यत्वाद् विनिद्रावस्थास्वात्मवत् । न ह्यसावितरात्मिका, स्ववृत्तित्यागापत्तेः । तन्मात्रत्वे तु पुरुषस्यापि तद्वज्जाग्रदाद्यवस्थानात्मकत्वाद-सर्वगतत्वम् ।

* * *

प्रयोगः --**ऊर्ध्वमधस्तिर्यक् क्वचित् तत्त्वेक एव व्यवस्थितः पुरुष** इति प्रतिज्ञा, **अनतिरिक्तपरापराणीयोज्यायोरूपात्मकत्वाद् वृक्षव**दिति, यथोक्तम्—

> यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित् ।
> वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥
> श्वेताश्व॰ ३ । ९ इति ।§ 773

यस्मादन्यत् परं नास्त्यनन्यदद्वैतमेवेत्यर्थः । अथवा **यस्मात् परं** प्रधानं प्रकृष्टम् अपरमप्रकृष्टमन्यद्वा **नास्ति** ऊर्ध्वाधस्तिर्यक्परापरविभागाभावाद-विभागात्मना तस्यैव व्यवस्थानात् । **नाणीयो न ज्यायोऽस्ति किञ्चि**दिति सूक्ष्मस्थूलविभागाभावात् ताद्रूप्येणाविभक्तस्यापि तस्यैवावस्थानादिति । शेषं गतार्थम् । § 774

अत्रोच्यते --**नन्वय**मित्यादि । ननु त्वयायं पुरुषोऽवस्थात्मकत्वम-नतिक्राम**न्नेकावस्थामात्रस्वतत्त्व एव व्यवस्थापित**श्चतुरवस्थास्वरूपोपवर्णन-द्वारेणैव तन्निरूपणादवस्थास्वात्मक एवासाविति, तत्रापि च विशेषेण **एकाव-स्थामात्रस्वतत्त्व**स्तुरीयावस्थातत्त्व इत्यर्थः । तत् कुत इति चेत्, **चैतन्यान-तिवृत्तिवर्णनात्,** सर्वत्र ज्ञानमयोऽसौ पुरुषः इति प्रतिज्ञाय तद्व्याप्तिप्रद-र्शनार्थं चैतन्यमेव वृक्षतृणकुड्यपुरुषादि, सुप्तत्वात् सुषुप्तत्वाज्जागरितृत्वात्,

---

२५ वा] ॰वास्यापि प्र॰ ॥
३ दिति] दृश्यतां पृ॰ २०१-- १ ॥
८ त] **तत्त्वेक** एवnayacakra-ms-bhā । **तत्त्वेक** एक एव nayacakra-ms-ya ॥
१२ ना] नास्त्यनन्यद्वैत॰nayacakra-ms-bhā । ॰नास्त्यन्यत् वैत॰ nayacakra-ms-ya ॥
१३ राप] ॰परविभागाभावादिग्विभागात्म-नाnayacakra-ms-ya । ॰परविभागात्मना nayacakra-ms-bhā ॥
१५ ता] ताद्रूपेणा॰nayacakra-ms-bhā ॥
२१ व] ॰वर्तनात् प्र॰ ॥
२२ वृ] वृक्षानृशकुट्य॰ प्र॰ ॥

सुप्तादिपुरुषवत् इति वार्णितं चैतन्यमेव । **तच्च विनिद्रावस्थातोऽनन्यत्,** तच्च चैतन्यं विनिद्रावस्थैव, यथोक्तम्—

पुरुषस्य न केवलोदयः पशवश्चाप्यनिवृत्तकेवलाः ।
- /ms न च सत्यपि केवले प्रभुस्तव चिन्त्येयमचिन्त्यवद् गतिः ॥
सिद्ध° द्वा° ४ । २२ इति ।§ 777

**इतिशब्दो** हेत्वर्थे, अस्माद्धेतो**र्विनिद्रावस्थालक्षण एव पुरुषः**, एतदेवास्य लक्षणम्, **उपयोगो लक्षणम्** तत्त्वार्थ° २ । ८ इति वचनात् । एतत् प्रतिज्ञामात्रम् । अत्र हेतुरुच्यते --**आत्यन्तिकनिद्राविगमरूपनिरूप्यत्वात्,** सर्वत्र सर्वदा वान्तमतीतोऽत्यन्तः, तत्र भव आत्यन्तिको निद्राविगमः, स एव रूपं तत्त्वम्, तेन तत्त्वेन निरूप्यत्वात्, यथा निरूपितं पुरुषवादिनैव सर्वं सर्वत्र सदा सर्वथा चेतनात्मकमेवेति सिद्धो हेतुः । को दृष्टान्तः ? **विनिद्रावस्थास्वात्मवत्,** यथा विनिद्रावस्थां चतुर्थी शुद्धचैतन्यात्मानं नातिवर्तते प्रोक्तरूपेण निरूप्यत्वात् पुरुषस्तथा शेषावस्थास्वपि तद्धर्मताननिवृत्त्यैवेति एवमेषा विनिद्रावस्थैव सर्वत्रापादिता । **न ह्यसावितरात्मिका,** यथा सुप्ताद्यवस्थास्तुरीयावस्थैव न तथा सा तदात्मिका । कस्मात् ? **स्ववृत्तित्यागापत्तेः,** यदि सा विनिद्रावस्था सुप्ताद्यवस्थापि स्यात् ततस्तया विशुद्धावस्था स्ववृत्तिस्त्यक्ता स्यात्, न त्वस्ति स्ववृत्तित्यागोऽवस्थासङ्करस्वरूपनिर्णयाभावादिदोषात् । अतः सा तन्मात्रैव, तस्याश्च **तन्मात्रत्वे तु पुरुषस्यापि** तदवस्थामात्रत्वमतो विनिद्रावस्थामात्रत्वम्, **तद्वज्जाग्रदाद्यवस्थानात्मक**

* * *

अथ विनिद्रावस्थालक्षणोऽपि पुरुषः सर्वत्वान्न विनिद्रावस्थामात्र एव, विनिद्रावस्थापि विनिद्रावस्थात्मिका सती सर्वत्वान्न विनिद्रावस्थामात्रैव स्याद् विनिद्रावस्थालक्षणत्वात् पुरुषस्वात्मवत् । ततश्च प्रत्यवस्थं तस्या एव सर्वात्मकत्वात् तृणाद्यपि सर्वगतमिति किं पुरुषैकत्वप्रकल्पनया ? अतल्लक्षणत्वाद्वा विनिद्रावस्थाया अभावः, ततश्च तत्तत्त्वचतुरवस्थसर्वात्मकपुरुषाभावः ।

अथ विनिद्रालक्षणविपरीतोऽपि पुरुषः पुरुष एवावधारणभेदात्, विनिद्रावस्था-

* * *

त्वम्, **तस्माज्जाग्रदाद्यवस्थानात्मकत्वाद्** विनिद्रावस्थामात्रत्वात् सुप्तादिदृष्टशेषावस्थासु **अवृत्तेरसर्वगतत्वमिति** चाव्यापित्वदोषः पुरुषकारणवादस्य ।

---

२३ वा] दृश्यतां पृ° १८३, १८४ ॥
२ र्विनिद्रा] दृश्यतां पृ° २०१-- १ ॥
८ च] चतुर्थं प्र° ॥
९ त] तद्धर्मताम्-निवृत्त्यैवेतिnayacakra-ms-ya । तद्धर्मत्त्यैवेति nayacakra-ms-bhā ॥
१३ या] विशुद्धा स्ववृत्ति°nayacakra-ms-ya ॥
१६ अ] दृश्यतां पृ° २०१-- १ ॥
२१ अ] दृश्यतां पृ° २०१-- १ ॥
२४ सुप्तादिदृ] °दृष्टमेषावस्थास्ववृत्तेरसर्वगतत्वमिति प्र° ॥

§ 778

**अथ विनिद्रे**त्यादि । मा भूत् पुरुषासर्वगतत्वदोष इति **विनिद्रावस्थालक्षणोऽपि** सन् **पुरुषः सर्वत्वान्न विनिद्रावस्थामात्र एव,** किं तर्हि ? सुप्तादिवृत्तिरपीतीष्यते, ततो **विनिद्रावस्थापि विनिद्रावस्थात्मिका सती सर्वत्वादेव न विनिद्रावस्थामात्रैव स्यात्,** सुप्ताद्यवस्थापि स्यादित्यर्थः । हेतुः - /ms **विनिद्रावस्थालक्षणत्वात् पुरुषस्वात्मवत्,** यथा पुरुषो विनिद्रावस्थालक्षणत्वात् सर्वगत इष्यते तथा विनिद्रावस्थाऽऽत्मस्थैव स्यात् सर्वगता स्यात्, विनिद्रावस्थालक्षणा हि सापीति । **ततश्चे**त्यादि, एवं च सत्यन्योऽपि दोषः, अवस्थामवस्थां प्रति **प्रत्यवस्थं** विनिद्रावस्थावृत्तेः सुप्तसुषुप्तजाग्रदवस्थास्वपि **तस्या एव** विनिद्रावस्थाया एवाविशेषेण सर्वगतत्वात् सुषुप्तावस्थापि तृणादि सर्वगतं स्यात् **सर्वात्मकत्वाद्** विनिद्रावस्थावत्, सर्वात्मकत्वं विनिद्रावस्थालक्षणत्वात् पुरुषवदित्युक्तम् । तस्मात् **तृणाद्यपि सर्वगतमिति किं पुरुषैकत्वप्रकल्पनया ?** कः पुरुषवादविशेषाभिमानः ? तृणमेवेदं सर्वं यद् भूतं यच्च भाव्यम्, यस्मात् परं नापरमस्ति किञ्चित् इत्यादि तेनेदं पूर्णं तृणेन सर्वम् इति च कस्मान्न पठ्यते ? इति । § 779

किञ्चान्यत्, **अतल्लक्षणत्वाद्वे**त्यादि । लक्षणं विशेष्य अर्थान्तरादवच्छिद्य स्वरूपेऽवस्थापकं नीलोत्पलवत्, तत् पुनः स्वात्मन्यस्थितत्वान्नास्ति लक्षणं प्रत्यवस्थं सर्वात्मसु वृत्तत्वात् । ततोऽतल्लक्षणत्वाद्वा **विनिद्रावस्थाया अभावः** स्यात् स्वात्मन्यस्थितत्वात् खपुष्पवत् । **ततश्च तत्त्वे,** तासां तत्त्वं चतसृणामवस्थानां सैव, तत्त्वे **चतुरवस्थाऽभावः,** ता एव च सर्वम्, तदभावात् सर्वाभावः, सर्वाभावात् तदात्मकस्य सर्वात्मकस्य पुरुषस्याप्यभाव इत्यत आह --**ततश्च तत्त्वचतुरवस्थसर्वात्मकपुरुषाभावः,** चैतन्यमेव हि पुरुषस्यावस्थानां च लक्षणम्, तदभावे पुरुषस्यावस्थानां चाभावे किमवशिष्यते ? § 780 - /ms

**अथ विनिद्रालक्षणे**त्यादि । अथ मतं भवतः--विनिद्रावस्थापुरुषाभावदोषयोः परिहारे सर्वदोषपरिहारः, स चावधारणवैपरीत्येनेति, तद्यथा -- **पुरुषस्तु पुरुष एव विनिद्रावस्थालक्षणविपरीतोऽपि,** किं कारणम् ? **अवधारणे भेदात्** । कथमवधारणभेदः ? उच्यते --**विनिद्रावस्थास्वात्मनि** अवधार्यमाणे 250/mj

---

२८ पुरुषः ] °षः श्चासर्व°nayacakra-ms-vi विना । °षश्चासर्व° nayacakra-ms-vi ॥
१ सुप्तादिवृत्तिर ] °रपीष्यतेnayacakra-ms-bhā ॥
१४ न्य ] **न्यवस्थि°** प्र° । अत्र **स्वात्मन्येवास्थितत्वा°** इत्यपि पाठः स्यात् ॥
१६ स्वा ] **स्वात्मन्यवस्थितत्वात्**nayacakra-ms-bhā । दृश्यतां टि° ६ ॥
१९ स्थ ] °स्थासर्वा°nayacakra-ms-bhā ॥
२४ एव ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२४ अ ] **अवधारणभेदात् ?** ॥
२५ अ ] **अवधार्यमाण**nayacakra-ms-bhā ॥

* * *

स्वात्मनि विनिद्रावस्थैव लक्षणम्, पुरुषे तु लक्षणमेव अन्यासामप्यत्यागात्, स ह्यनेकरूपो मेचकवत् । न, उक्तवदवधारणभेदस्यान्याय्यत्वात् प्रतिज्ञातव्याघाताद् घटरूपादित्ववत्, पुरुषत्वं प्रागुक्तमवस्थानाम्, अधुना तु पृथक्स्वात्मानस्ता उच्यन्त इति तत्त्वं पुरुषस्य रूपादिघटत्ववत् । यदा च तासामेव तत्त्वं ततस्तासां

* * *

**विनिद्रावस्थैव लक्षणं** नान्या काचिदवस्थेति स्वात्मनो लक्षणत्वमवस्थाया नियतम्, सा त्वन्यावस्थात्मनोऽपि लक्षणत्वान्न नियतेति न विनिद्रावस्थायास्तावदभावोऽस्ति । पुरुषस्याप्यभावो नास्ति, **पुरुषे तु लक्षणमेवे**त्यवधारणाद् विनिद्रावस्था लक्षणमेव पुरुषस्य नालक्षणमिति पुरुषो लक्ष्यत्वेनानियतोऽन्याभिरप्यवस्थाभिर्लक्ष्यत्वा**दन्यासामप्यत्यागा**ल्लक्षणत्वेन पुरुषस्येति भेदेनावधारणम् । यस्मात् **स ह्यनेकरूपो मेचकवत्** पुरुषः, वर्णसङ्करो हि मेचकः, स नीलोऽपि पीतोऽपि शेषवर्णोऽपि तथा पुरुषो विनिद्रावस्थालक्षणोऽपि सुप्ताद्यन्यतमावस्थालक्षणोऽपीति । § 781

अत्रोच्यते **--न, उक्तव**दित्यादि । नैतदुपपन्नम्, **उक्तवदवधारणभेदस्यान्याय्यत्वात्,** उक्तेन तुल्यमुक्तवत् तेनैव प्रागुक्तप्रकारेण तेनैव न्यायेनावधारणभेदस्यावसर एव नास्ति, न्यायादनपेतं न्याय्यम्, न न्याय्यमन्याय्यम् । कुतः ? **प्रतिज्ञातव्याघातात्,** यद्यवधारणं भिन्नार्थविषयमाश्रीयते चैत- - /ms न्यात्मकैकपुरुषमयमिदं सर्वम् इति प्रतिज्ञा हीयते, अथैकपुरुषमयत्वप्रतिज्ञा परिपाल्यते भिन्नार्थविषयाधारावधारणोपपत्तिर्विशीर्यते, कथम् ? **घटरूपादित्ववत्,** यथा घट एव रूपादयः इत्येतस्मिन् पक्षे न रूपादयो नाम केचित् सन्ति घटादर्थान्तरभूताः, तत्र रूपस्वात्मनो रूपावस्थैव लक्षणं न रसाद्यवस्थापि, घटात्मनस्तु रूपावस्था लक्षणमेव इतरासामत्यागात् इति कोऽर्थः स्याद् रूपाद्यभावात् ? तथेहापि विनिद्रैकावस्थालक्षणपुरुषव्यतिरिक्तार्थाभावादितरासां सुप्ताद्यवस्थानामभावादेव कोऽवधारणार्थावकाशः ? इत्यवधारणाभावः प्रतिज्ञाव्याघातो वेत्येतदुभयं प्रदर्शयति **--पुरुषत्वं प्रागुक्तमवस्थानाम् अधुना तु पृथक्स्वात्मानस्ता उच्यन्ते**ऽवस्था इति प्रागुक्तवदवधारणभेदस्यान्याय्यत्वं प्रतिज्ञाव्याघातश्चेति । **इति तत्त्व**मिति अस्माद्धेतोः प्रतिज्ञाव्याघातादवधारणभेदान्याय्यत्वाच्चोभयथापीष्टविपरीतं **तत्त्व**मवस्थात्वं **पुरुषस्य** अवस्था एव पुरुषः, न पुरुष एवावस्थाः इत्येतत् प्राप्तं **रूपादिघटत्ववत्,** यथा रूपादय एव घटः इत्येतस्मिन् पक्षे न घटो नाम कश्चित् इत्ययमर्थः, तत्र रूपमेव, न रसः इत्याद्यवधारणमुपपद्यते भिन्नार्थविषयत्वात् तथा यद्यवस्था एव पुरुष इत्युच्येत युज्येतावधारणं पुरुषाभावेऽवस्थानामेव भिन्नानामितरावस्थानिवृत्त्यर्थमेकावस्थावधारणम्, तत् तु न युज्यते चैतन्यात्मकैकपुरुषमयत्वप्रतिज्ञाव्याघातादिति । § 782

१६ प] °त्तिर्विशीर्य कथम् प्र° ॥
२२ प्र] प्रतिव्याघातो प्र° ॥
३१ तिज्ञाव्याघा] °घातादि प्र° ॥

किञ्चान्यत्, **यदा च तासामेव तत्त्व**मित्यादि यावल्लो**कवदेव तत्त्वापत्ति**रिति - /ms । यदा च तासां भावस्तत्त्वम्, *भाव एव ताः, ताभिरेव भूयते, भेदेनावधार्यमाणत्वाद् विनिद्रावस्थैव विनिद्रावस्थास्वात्मनि लक्षणम्, पुरुषे तु सा लक्षणमेव, न तु सैव लक्षणं पुरुषस्यान्यासामप्यवस्थानां तल्लक्षणत्वात्यागात् । तथा 251/mj

* * *

तथा तथेतरेतरात्मसु अभावादवधारणभेदाद् भिन्नभिन्नार्थत्वान्नु तदेव सर्वासर्वगतत्वमिति लोकवदेव तत्त्वापत्तिः ।

अथाविकल्पशब्दार्थत्वादलक्षण एव न त्वज्ञाततत्त्वत्वात्, कथं तर्हि चतुरवस्थावर्णनमनेकात्मकसर्वगतत्वभावनं च ? यद्यस्यैकैका प्रत्येकमवस्था न भवति ततोऽसत्त्वात् कुतोऽस्य तदेकत्वापत्त्यात्मिका अविकल्परूपता ? न हि पृथगवृत्ते

* * *

तथा तासामितरेतरात्मसु अभावः, अवधारणभेदात् । **तथा तथा** इति वचनादुत्तरोत्तरभेदानामपीतरेतरात्मसु नास्ति भावः, तद्यथा--रूपावस्थास्वात्मनि रूपावस्थैव लक्षणम् घटस्त्वात्मनि तु रूपावस्था लक्षणमेव रसाद्यवस्थानामपि तल्लक्षणत्वात्यागात्, तथा पृथिवीलोष्टादीनामितरेतरात्मसु अभावाल्लोष्टावस्थास्वात्मावधारणे लोष्टावस्थैव लोष्टावस्थास्वात्मा, पृथ्वीस्वात्मावधारणे तु सा लक्षणमेव, न तु सैव वज्रादीनामप्यत्यागादिति सर्वत्रास्त्यवधारणभेदः । ततोऽवधारणभेदात् त्वदुक्तादेव **तथा तथेतरेतरात्मसु अभावादवधारणभेदा**दत्यन्तं भिन्नार्थत्वम्, अतो **भिन्नभिन्नार्थत्वात्** सामान्याभावः, सामान्याभावाद् विविक्तानेकभेदावस्थामात्रत्वात् **सर्वमसर्वगतम्** घटो घट एव, रूपं रूपमेव, रसो रस एव, पटः पट एव इत्यादि प्राप्तम् । ततो **ननु तदेव** दर्शनमेतदप्यापन्नं यदुक्तं **यथालोकग्राहमेव वस्तु, शास्त्रेष्वनर्थको विवेकयत्नः** इत्यादि स्वपरविषयसामान्यविशेषनिराकरणेन लौकिकमेव यथाद्रव्यक्षेत्रकालभावभवनमेव च वस्त्विति तदेव तत्त्वम् **इति लोकवदेव तत्त्वापत्ति**रिति । § 783

**अथाविकल्पशब्दार्थत्वा[द]लक्षण एव, न त्वज्ञाततत्त्वत्वात्** । तस्य निर्विकल्पस्याविभागस्य संसर्गभेदपरिणामशून्यस्य मेघस्तनितादिकल्पशब्दगोचरातीतस्य मयूरविरुतवत् सङ्केताद् व्यवहारानुपातिभिर्वा शब्दैरनुपलक्ष्यस्य गोर्विषाणादिवत् स्वांशकल्पनामात्रभिन्नशब्दार्थाभिमानविकल्पस्य--न

---

३३ *] ताव एव प्र° ॥
३३ भेदेना] °नवधा° प्र° ॥
३४ स्थास्वा] °स्वात्मेति प्र° ॥
५ अ] दृश्यतां पृ° २०१-- २ ॥
१५ व] च
ज्ञानादी°nayacakra-ms-ya ॥
१५ त्रा] °त्रास्वावधारण° प्र° ॥
२० य] दृश्यतां पृ° ११ पं° ३ ॥
२४ न] त
त्वज्ञाततत्व°nayacakra-ms-bhā ।
तत्वज्ञानतत्व° nayacakra-ms-ya ॥
२७ स्य] दृश्यतां पृ° २४३ पं° ११--२४
॥

तु लौकिकवदज्ञात- सामान्यविशेषव्यवस्थाविचाररूपस्य--तत्त्वस्य कुतो वा लक्षणम् ? कुतोऽवस्था ? इति । एतच्चायुक्तं चतुरवस्थावर्णनात्, यदि ताश्चतस्रोऽप्यवस्था असत्या एव **तद्वर्णनं** खपुष्पसौरभवर्णनवत् **कथ**मुपपद्यते ? इति । किञ्चान्यत्, सर्वगतत्वभावनाऽभावप्रसङ्गात्, तद्दर्शयन्नाह --**अनेकात्मकसर्वगतत्वभावनं च** कथम् इति वर्तते । सर्वं गतं सर्वगतम्, **सृ गतौ** पा॰ धा॰ ९३५, १०९५, सर्वम् इत्ययमेव सर्वशब्दो गमनार्थदेशान्तरप्राप्तिलक्षणां क्रियां भिन्नविकल्पार्थविषयामाह यदन्यच्च अन्यच्च तदशेषं सर्वम् इति, ततश्च तत् तदशेषं गतं सर्वगतम्, तद्भावः सर्वगतत्वमर्थानेकात्मकत्वाविनाभावि, अनेकात्मकं हि सर्वम्, भिन्नानेकविकल्पकृत्स्नार्थगतं सर्वगतमित्येषा भावना निर्विकल्पैकात्मकत्वे न युज्यत इति । - /ms

§ 784

तत् पुरुषतत्त्वमेकमविकल्पम् इत्यविकल्पता स्यात् ? भिन्नविकल्पैकापत्त्यात्म (Edtext outside numbered paragraph)कत्वाद- विकल्परूपतायाः सा वाऽ**विकल्परूपता** कुतः ? नास्त्येवेत्यर्थः । को दृष्टान्तः ? पृथक् पृथगवृत्तसितासितादिवर्णे (Edtext outside numbered paragraph)क्यापत्त्यात्मकमेचकवर्णाभाववत्, पृथक्सिद्धवर्णाभावे मेचकवर्णाभावात् । तद्दर्शयति --**न हि पृथगवृत्ते रूपे** द्वे अपि सितासिते स्वेन रूपेण **मेचके भवतः**, भेदात्मलाभाविनाभा (Edtext outside numbered paragraph)व्येकापत्त्यभावात् । एवमवस्था अपि पृथक् स्वरूपेणासिद्धा निर्विकल्पैकरूपा न भवितुम (Edtext outside numbered paragraph)र्हन्तीति । एवं तावदवस्थानामभावे चतुरवस्थावर्णनानेकात्मकसर्वगतत्वभावननिर्विकल्परूपत्वाभावदोषाः । § 785

किञ्चान्यत्, निर्विकल्पत्वाभावप्रसङ्गात्, **यद्यस्यैकैके**त्यादि यावद् **मेचकात्मके भवतः** । यदि अस्य पुरुषस्य एकैका पृथक् पृथगेकामेकां प्रति **प्रत्येकं** समाप्ता सुप्ताद्य**वस्था न भवति ततश्च** एकैकस्या अभावात् ता न सन्त्येवेति कृत्वा तासाम**सत्त्वात् कुतोऽस्य** पुरुषतत्त्वस्य **तासा**मेव भिन्नाना रूपे मेचकात्मके भवतः । असन्नेव त्वसावेवम्, अनवस्थात्वेऽचतुरात्मकत्वात्, खपुष्पवत् । त्वदुक्तेरेव च न स लक्ष्यो नार्थो न वस्तु, अलक्षणत्वात्, खपुष्पवत् ।

अथात इतश्चान्यतरोपादानपरित्यागायुक्तत्वादस्यावाच्यतैव । तथा स नैव

* * *

252/mj त्त्यात्मिका**मेकत्वाप**

* * *

१ भा] ॰भावक nayacakra-ms-ya । भावकं nayacakra-ms-bhā ॥
३ य] **यद्यन्यच्च** प्र॰ ॥
८ ल्प] ॰ल्पकत्वा॰nayacakra-ms-ya ॥
१५ अ] दृश्यतां पृ॰ २०१-- २ ॥

रूपे मेचकात्मके भवतः । असन्नेव त्वसावेवम्, अनवस्थात्वेऽचतुरात्मकत्वात्, खपुष्पवत् । त्वदुक्तेरेव च न स लक्ष्यो नार्थो न वस्तु, अलक्षणत्वात्, खपुष्पवत् ।

अथात इतश्चान्यतरोपादानपरित्यागायुक्तत्वादस्यावाच्यतैव । तथा स नैव

* * *

त्यात्मिका

किं वा पार्श्वशरक्षेपेण भयजननानुवृत्त्या ? तमेव पुरुषं निराकुर्महे, तद्यथा --**असन्नेव त्वसौ एव**मवस्थानामसत्त्वे, कुतः ? अनवस्थात्वादवस्थातोऽन्यत्वादनवस्थात्मकत्वादवस्थात्वाभावात् पुरुषो वन्ध्यापुत्रवत् । स्यान्मतम्--रूपाद्यवस्थाऽनात्मकस्य घटस्य अवस्थावतोऽस्तित्ववत् सुप्ताद्यवस्थाऽनात्मकस्य सुप्तादिचतुरवस्थावतः पुरुषस्यास्तित्वमिति, एतच्चायुक्तम्, अनवस्थात्वे सति अचतुरात्मकत्वात् । अवस्थाचतुष्टयाभावादेवानवस्थात्मनस्तच्चातुरात्म्याभावः सिद्धः । तस्मादनैकान्तिकाशङ्कानिवृत्त्यर्थमाह --**अनवस्थात्वेऽचतुरात्मकत्वा**दिति । **खपुष्पव**दिति दृष्टान्तो गतार्थः । अथवा किमनेन प्रयासेन उपपत्त्यन्तरैस्तदसत्त्वप्रतिपादनेन ? ननु **त्वदुक्तेरेव च न स लक्ष्यस्त्व**त्परिकल्पितः पुरुषो नासौ लक्ष्यः, अलक्षणत्वात् । अलक्ष्यत्वमिष्टत्वादसाध्यमिति चेत्, लक्ष्यत्वनिराकृतेरर्थनिराकरणार्थत्वाद् **नार्थ** इति ब्रूमः, अर्थोऽपि अर्यते इत्यलक्षणत्वाच्छब्दाभिधेयो ज्ञानज्ञेयो वा नेति विनिद्रावस्थाऽविनिद्रावस्था वा स्याद् न स पुरुषस्तल्लक्षणस्तदुभयाभावात् । - /ms निर्विकल्पत्वादेवार्थोऽपि नैवेति चेत्, निर्विकल्पज्ञानवद् वस्तुत्वमपि न भवति इत्येतत्प्रतिपादनार्थत्वादिदमेव गृहाण --**अवस्त्वेव** तत् त्वदिष्टं तत्त्व**मलक्षणत्वात् खपुष्पवत्** । § 786

**अथात** इत्यादि याव**दस्यावाच्यतैवे**ति । अथाचक्षीथाः --**अत** इति पुरुषत **इतश्चे**त्यवस्थातः **अन्यतरस्य** पुरुषस्यावस्थानां वा परित्यागैकान्तो न युक्तः, अवस्थात्यागे लक्षणाभावात् पुरुषाभावप्रसङ्गात्, अवस्थावतः पुरुषस्य वा त्यागेऽवस्थानामभावप्रसङ्गात् । न चैकतरस्योपादानं युक्तम्, उपादीयमानस्येतराभावेऽभावप्रसङ्गादेव अवस्थावस्थावद्वर्णननिर्विकल्पत्वसर्वगतत्वाभावप्रसङ्गात् प्रतिज्ञाव्याघाताच्च । तस्मा**दन्यतरोपादानपरित्यागायुक्तत्वादस्य** पुरुषस्यावस्थालक्षणत्वमवस्थाऽसत्त्वं वा न शक्यं वक्तुम् । किं तर्हि

२२ अ] दृश्यतां पृ० २०१-- २ ॥
१३ स्त्व] ०स्तत्परि० प्र० ॥
१५ अ] अर्थत इत्वरलक्षण०nayacakra-ms-ya । अर्थत इतारलक्षण० nayacakra-ms-bhā ॥
१५ वा] वा निति विनिद्रा० nayacakra-ms-ya । वा विनिद्रा० nayacakra-ms-bhā ॥
१८ म] ०मक्षण० प्र० ॥
२१ पु] पुरुष इतश्चे० प्र० ॥
२१ व] ०वस्थात्यः nayacakra-ms-bhā ॥
२४ अ] अवस्थावद्वर्ण०nayacakra-ms-ya ॥
२६ व] ०स्थासत्वं nayacakra-ms-bhā ॥

? तल्लक्षणत्वातल्लक्षणत्वाभ्यामवाच्यः स पुरुष इति । एतच्चायुक्तम्, यस्मात् **तथा स नैव स्यात्,** एत 253/mj

* * *

स्यात्, विनिद्रावस्थया सहैकत्वान्यत्वे प्रत्यवचनीयत्वात्, खपुष्पवत् । न तदेकं नान्यद्वा वाच्यं निरुपाख्यत्वात् । यत्तु सत् तद् विनिद्रावस्थया सहैकत्वान्यत्वे प्रति वचनीयम्, यथा विनिद्रावस्थास्वात्मा जाग्रदाद्यवस्थास्वात्मानो वा । अत एव अन्यतरत्यागोपादानायुक्तत्वादपि च ननूभययुक्तत्ववाच्यत्वाभ्युपगम एव पितृपुत्रवत् ।

यद्यपि च पुरुषस्त्वात्मैव अवस्था न तर्हि ना, अनवस्थत्वात्, खपुष्पवत् । अभ्यु-

* * *

स्यामपि कल्पनायां स पुरुषोऽसन्नेव, कस्मात् ? **विनिद्रावस्थया सहैकत्वान्यत्वे प्रत्यवचनीयत्वात् खपुष्पवत्,** विनिद्रालक्षणः पुरुषो न विनिद्रालक्षणो वा इत्येते द्वे अन्यत्वानन्यत्वे प्रति अवचनीयत्वादसन् पुरुषः । **न तदेकं नान्यद् वा वाच्यं** खपुष्पं विनिद्रावस्थया सह, किं कारणम् ? एकम् इति तावदवाच्यमसत्त्वात्, अन्यत् इत्यप्यवाच्यमविनिद्रावस्थात्वे सत्यप्यसत्त्वे **निरुपाख्यत्वाद्** वाग्बुद्धिगोचरातिक्रान्तत्वादिति खपुष्पे दृष्टान्ते हेतोः साध्येनाविनाभावित्वप्रदर्शनम् । **यत्तु सत् तद् विनिद्रावस्थयेत्यादि** वैधर्म्यदृष्टान्तः साध्याभावे हेत्वभावोपप्रदर्शनम्, मा मंस्थाः अस्मदिष्टसमुदय्यव- - /ms स्थास्वात्मनि सति अवचनीयताया दर्शनादनैकान्तिकता इति **विनिद्रावस्थास्वात्मानं जाग्रदाद्यवस्थास्वात्मनश्च** निदर्शयति अन्यानन्यत्वे प्रति वचनीयत्वात्--यथा विनिद्रावस्था स्वात्मनो विनिद्रावस्थातोऽनन्या जाग्रदवस्थादिस्वात्मभ्योऽन्या, तथा ता अपि तस्या अन्याः स्वात्मभ्योऽनन्याः सत्यश्च, न तथा पुरुषः, तस्मादसन्निति । § 787

किञ्चान्यत्, **अत एव** त्वदभिहितात् कारणा**दन्यतरत्यागोपादानायुक्तत्वादपि च ननूभययुक्तत्ववाच्यत्वाभ्युपगम एव पितृपुत्रवत्,** यथैकः पिता पुत्रश्चावश्यं नासौ स्वपितुः पुत्रत्वमन्तरेण स्वपुत्रं प्रति पितृत्वमनुभवतीति न पुत्रत्वं त्यजति नापि पुत्रत्वमेवोपादत्ते नापि पितृत्वमेव, ततोऽसौ पिता च पुत्रश्चेति वक्तव्यस्तद्द्वयधर्मयुक्तश्च दृष्टस्तथा स पुरुषो विनिद्रालक्षणालक्षणान्यतरत्यागोपादानायुक्तत्वादेव तल्लक्षणातल्लक्षणधर्मद्वययुक्तस्तद्धर्मद्वयवाच्यश्चावश्यं भवितुमर्हति तदन्यतरत्यागोपादानायुक्तत्वस्य तदविनाभावात् । एवं

---

२७ त] **तल्लक्षणत्वाभ्याम॰** प्र॰ ॥
२८ त] **तत्वा** प्र॰ ॥
५ य] दृश्यतां पृ॰ २०१-- २ ॥
२२ एव]
पितृत्रपुत्रnayacakra-ms-bhā ।
पितृप्रपुत्र॰ nayacakra-ms-pā
nayacakra-ms-vi
nayacakra-ms-raṃ
nayacakra-ms-hī ॥
२३ श्चाव] **॰वश्यमासौ** प्र॰ ॥
२३ स्व] **स्वं**nayacakra-ms-bhā ॥

तावत् पुरुष एव अवस्थाः इत्येतदयुक्तम्, अवस्थानामभावेऽनेकदोषप्रसङ्गात् । § 788

अभ्युपेत्यापि पुरुषस्वात्मत्वमवस्थानां चतसृणां पुरुषासत्त्वदोषं ब्रूमः -- **यद्यपि चेत्यादि** । यद्यपि च **पुरुषस्वात्मैव** चतस्रोऽप्य**वस्था**स्तथापि **न तर्हि ना**, नेदानीं पुरुषोऽस्ति, **अनवस्थत्वात्**, नास्यावस्थाः सन्तीत्यनवस्थः, तद्भावोऽनवस्थत्वम्, तस्मादनवस्थत्वादवस्थास्वरूपव्यतिरिक्तत्वात् तच्छून्यत्वात् खपुष्पवत् । अथवा नावस्थाऽनवस्था, पुरुषोऽवस्था न भवति, योऽवस्था न भवति स नास्ति यथा खपुष्पम्, अवस्थाश्च त्वयाभ्युपगताश्चतुरवस्थावर्णनानेकात्मकसर्वगतत्वभावनैकैकावस्थाभेदाभेदापत्त्यात्मका- विकल्प- - /ms रूपाभ्युपगमात् ततोऽन्यस्य खपुष्पस्थानीयत्वात् । प्रागवस्थानामेव सत्त्वमभ्युपगम्य **अनवस्थात्वेऽचतुरात्मकत्वात्** इत्युक्तम्, अधुना तु पुरुषमेवाभ्युपगम्यानवस्थात्मकं परपरिकल्पितमेष दोष उक्त 254/mj

* * *

पगमेऽपि नुः अवस्थानां चतसृणामप्यैक्यं स्यात् पुरुषस्वात्मत्वात् पुरुषवदिति । सर्वत्वसम्भाव्याभावात् सर्वाव्यापिता पुरुषस्य । विनिद्रावस्थैव हि जाग्रदवस्था विनिद्रावस्थास्वात्मत्वाद् विनिद्रावस्थावत्, एवमितरे अपि । जाग्रदवस्थैव विनिद्रावस्था जाग्रदवस्थास्वात्मत्वाज्जाग्रदवस्थावत्, एवमितरे अपि । सुप्तावस्थैव विनिद्रावस्था सुप्तावस्थास्वात्मत्वात् सुप्तावस्थावत्, एवमितरे अपि । सुषुप्तावस्थैव विनिद्रावस्था सुषुप्तावस्थास्वात्मत्वात् सुषुप्तावस्थावत्, एवमितरे अपि । यैवान्यावस्था सैवान्यापि

* * *

इति व्याख्ययोर्भेद इत्यसन् पुरुषो**ऽनवस्थत्वात् खपुष्पवत्** । अनवस्थस्य तस्य **अभ्युपगमेऽपि नुः** पुरुषस्य **अवस्थानां चतसृणामप्यैक्यं स्यात्** । कुतः ? **पुरुषस्वात्मत्वात्**, त्वया ह्युक्तं पुरुषस्वात्मैवावस्था नान्याः इत्यतस्तासामैक्यं तत्स्वात्मत्वात् **पुरुषवत्**, यथा हि पुरुषस्वात्मत्वात् पुरुष एक एव तथा ता अप्यवस्थास्तत्स्वात्मत्वादेकमिति चतुष्ट्वाभावात् चतस्रोऽवस्थाः इति बहुवचनानुपपत्तिः । ततश्चैकत्वात् **सर्वत्वेन** सर्वथा **सम्भाव्यो न भवति** पुरुषः, **सृ गतौ** पा० धा० ९३५, १०९५ इति सर्वत्वस्यानेकाश्रयत्वात् पुरुष एव सर्वम् इति यदाश्रयादुच्यते तत् सर्वं किमाश्रयं यदुक्त्वा सर्वं पुरुषस्य सर्वव्यापिता वर्ण्यते ? तत आह --**सर्वत्वसम्भाव्याभावात् सर्वाव्यापिता पुरुषस्य** प्राप्ता व्याचिख्यासितसर्वव्यापित्वविरोधिनी । § 789

---

४ नैकैका] एकैकावस्थाभेदानामभेदापत्त्यात्मकस्य अविकल्परूपस्याभ्युपगमादित्यर्थः ॥
६ अ] दृश्यतां पृ० २५२ पं० १ ॥
१६ पु] **पुरुषोवस्थात्वात्** प्र० ॥
२० च] **चतुष्काभा**°nayacakra-ms-ya ॥
२१ स] **सर्वता** प्र० ॥
२४ स] **सर्वत्रस**° nayacakra-ms-ya ॥

तत् पुनरेकत्वं विनिद्रावस्थास्वात्मत्वात् तासाम्, पुरुषस्वात्मत्वात् परस्परात्मकत्वं च सिद्धम् । तदिदानीं भाव्यते --**विनिद्रावस्थैव हि जाग्रदवस्था, विनिद्रावस्थास्वात्मत्वात्, विनिद्रावस्थावत्** । यथा विनिद्रावस्था विनिद्रावस्थास्वात्मत्वाद् विनिद्रावस्थैव तथा जाग्रदवस्थापि विनिद्रावस्थास्वात्मत्वाद् - /ms विनिद्रावस्थैवेतीत्थं विनिद्रावस्थया सहैक्यं जाग्रदवस्थायाः । विनिद्रावस्थास्वात्मत्वं च सर्वावस्थानां पुरुषस्वात्मत्वात् त्वयैवाभ्युपगतम् । **एवमितरे अपीति**, विनिद्रावस्थैव सुप्तावस्था विनिद्रावस्थास्वात्मत्वाद् विनिद्रावस्थावत्, विनिद्रावस्थैव सुषुप्तावस्था विनिद्रावस्थास्वात्मत्वाद् विनिद्रावस्थावत् । तथा **जाग्रदवस्थैव विनिद्रावस्था जाग्रदवस्थास्वात्मत्वाज्जाग्रदवस्थावत्**, अस्यापि पूर्ववद् व्याख्या । एवं जाग्रदवस्थया सहैक्यं विनिद्रावस्थाया व्याख्येयम् । **एवमितरे अपी**त्यतिदेशः, जाग्रदवस्थैव सुप्तावस्था जाग्रदवस्थास्वात्मत्वाज्जाग्रदवस्थावत्, जाग्रदवस्थैव सुषुप्तावस्था जाग्रदवस्थास्वात्मत्वाज्जाग्रदवस्थावत् । तथा **सुप्तावस्थैव विनिद्रावस्था, सुप्तावस्थास्वात्मत्वात्, सुप्तावस्थावत्** । **एवमितरे अपी**त्यतिदेशः, *सुप्तावस्थैव जाग्रत्सुषुप्तावस्थे सुप्तावस्थास्वात्मत्वात् सुप्तावस्थावत् । तथा **सुषुप्तावस्थैव विनिद्रावस्था, सुषुप्तावस्थास्वात्मत्वात्, सुषुप्तावस्थावत्** । **एवमितरे अपी**त्यतिदेशः, सुषुप्तावस्थैव जाग्रत्सुप्तावस्थे सुषुप्तावस्थास्वात्मत्वात् सुषुप्तावस्थावत् । एवमवस्थानां प्रत्येकं विशेष्य परस्परत ऐक्यं भावितम्, सामान्येनापि सर्वोपसंहारेणोच्यते --***यैवान्यावस्था**
255/mj **सैवान्यापि एकस्वात्मत्वात् सेवेति** । *

* * *

एकस्वात्मत्वात् सा इवेति पुरुष एवेदं सर्वम् इत्यतिदेशाभावो भेदाभावात् ।

उपवर्णनभिन्नरूपव्यतिकरसङ्कराभ्यां त्वेवमतथात्वमासामस्य च तत्तत्स्वात्मत्वादिति पुरुषावस्थाव्यवस्थाऽभावः । उक्तवद्वा व्यवस्थानुमतौ पुरुषातिदेश-

* * *

अथवावस्थानामपि प्रत्येकं भेदेषु परस्परात्मत्वापादनेन मनुष्यतिर्यगमरादिषु घटपटतृणादिषु चैक्यमुन्नेयम् इतरात्मकमितरत्, इतरात्मत्वात्, तत्स्वात्मवत् इति । **इति पुरुष एवे**त्यादि यावद् **भेदाभावा**दिति । इत्यस्मात् कारणादेकत्वाद् यत् प्रोक्तं **सर्वत्वसम्भाव्याभावात् सर्वाव्यापिता पुरुषस्ये**ति तदुपनयति — **पुरुष एवेदं सर्वम् इत्यतिदेशाभावो भेदाभावा**दिति । अतिदेशोऽतिसर्जनं
- /ms पुरुषात्मकत्वव्याख्या तद्भावनेत्यर्थः । पुरुषेण वास्याप्रत्यक्षेण इदंशब्दवाच्य-

---

८ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-bhānayacakra-ms-raṃnayacakra
nayacakra-ms-ya प्रतिषु नास्ति ॥
११ ए] एवमेवमव°nayacakra-ms-ya ॥
१२ *] ये चान्या विना ॥
१३ *] तुः प्र° ॥
१६ उ] दृश्यतां पृ° २०२-- १ ॥
२३ स] दृश्यतां पृ° २५४ पं° २ ॥

स्य प्रत्यक्षस्यातिदेशः, अनेन वा तस्याप्रत्यक्षस्यातिदेशः सर्वमेव तन्मयम् इति । § 790

किञ्चान्यत्, **उपवर्णने**त्यादि यावद् **व्यवस्थाभाव एवे**ति । उप सामीप्ये, सामीप्येन वर्णनमुपवर्णनं विशेषधर्मेण न सामान्यधर्मेण, सामान्यधर्मस्य दूरत्वात् । यथा--पुरुषोऽयम्, समुत्थायोपविष्टत्वात् पाण्यादिसञ्चलनाच्छिरःकण्डूयनादिति नोर्ध्वत्वादिति । उपवर्णनेन भिन्नानि रूपाण्यासां विनिद्राजाग्रत्सुप्तसुषुप्तत्वादिविशेषवर्णनेन, तैश्च रूपैर्भिन्नैर्व्यतिकरः सङ्करश्च तासां प्राप्ताविस्थमुक्तैकत्वात् । व्यतिकरो विनिद्रावस्थास्वात्मत्वं जाग्रदवस्थास्वात्मनः, जाग्रदवस्थास्वात्मत्वं विनिद्रावस्थास्वात्मनः, एवमितरयोरवस्थयोरपीतरेतरस्वात्मत्वप्राप्तिरेतयोश्च तत्स्वात्मत्वप्राप्तिस्तयोरेतत्स्वात्मत्वप्राप्तिः । ततश्च दानशीलतपोविशेषैर्नरकावाप्तिः, हिंसादिभिः स्वर्गावाप्तिः, स्वर्गे दुःखानुभवनम्, नरके सुखानुभवनम्, पुरुषतत्त्वाज्ञानाद् मुक्तिरिति । सङ्करस्तु क्षीरोदकसंयोगवदविवेचनीयविनिद्रावस्थास्वात्मत्वम् । इत्येतौ व्यतिकरसङ्करौ प्राप्तौ, ताभ्यां च **व्यतिकरसङ्कराभ्यां** हेतुभ्याम**तथात्वं** विनिद्रावस्थाया अविनिद्रावस्थात्वम्, एवं शेषाणामप्ययथास्वस्वरूपत्व**मासामवस्थानाम्**, **तत्स्वात्मत्वात्** पुरुषस्वात्मत्वात् पुरुषस्वात्माभिन्नविनिद्राद्यवस्थास्वात्मत्वादिति यावत्, तदेवैकत्वं कारणमाह --**तत्तत्स्वात्मत्वा**दिति, तासामतथात्वमित्थमुक्तम् । **अस्य** चेति पुरुषस्याप्यतथात्वमेव अपुरुषत्वमेव तत्स्वात्मत्वात् तत्स्वात्मवदिति । § 791 - /ms

एतमर्थमुपसंहरति --**इति पुरुषावस्थाव्यवस्था[ऽभावः]**, इत्थं पुरुषस्यावस्थानां च **व्यवस्था** विशेष्य असाधारणेन लक्षणेनावधृत्य व्याख्या व्यवस्था, तस्या **अभावः** स्वरूपसिद्धेरभावात् । मा भूदेष दोषः पुरुषस्यावस्थानां च व्यवस्थाया अभावः इति यदि पूर्वोक्तवद् व्यवस्थां पृथक् पृथग् मन्यसे पुरुषस्यापि सर्वावस्थाव्यापिनोऽवस्थानां च चैतन्यसमवस्थानाविर्भावतिरोभावोत्कर्षापकर्षभेदभिन्नानां प्राग्व्याख्यातसृष्टिवत् ततश्च **उक्तवद् वा व्यवस्थानुमतौ** सत्यां **पुरुषातिदेशस्त्याज्यः**, पुरुष एवेदं सर्वम् इत्येकपुरुषमयत्वातिसर्गस्त्यक्तव्यो जायते पृथक् पृथक् पुरुषस्यावस्थानां च स्वरूपव्यवस्थाभ्युपगमे पुरुषैककारण 256/mj

* * *

स्त्याज्यः । तदत्यागे यदर्थमयमतिदेशोऽद्वैतैकान्तार्थस्तस्यैवासिद्धिः । योऽसावेक एव पुरुषः सम्भाव्यते तस्याप्यनेकतैवमापद्यते, यत्स्वरूपाव्यतिरिक्तलक्षणा अवस्था विना भेदेनोच्यन्ते स पुरुषोऽपि पुरुषेणाभिव्याप्तत्वादनवस्थितैकत्वतत्त्वप्रतिष्ठः पुरुषः इत्यतिदेश्यः स्यात् पुरुषस्वात्मत्वादवस्थावत् ।

---

२ प्रा] प्राप्तमित्थ° प्र° ॥
४ त] तत्स्वात्मप्राप्तिस्तयोरेतत्स्वात्मप्राप्तिः प्र° ॥
१३ त्स्वात्म] °त्मत्ववदितिnayacakra-ms-bhā ॥
१४ पु] पुरुषावस्थाऽव्यवस्था, इत्थं इत्यपि पाठोऽत्र स्यात् ॥
२० पु] दृश्यतां पृ° १८९ पं° ५ ॥

प्रत्यक्षार्थेदंविषयतायां वा

* * *

मयत्वविरोधादिति । एष दोषो मा भूदिति **तदत्यागे यदर्थमयमतिदेशो**ऽतिसर्गः प्राग् व्याख्यातः पुरुष एवेदं सर्वम् इति, किमर्थमसावतिदेश इति चेत्, **अद्वैतैकान्तार्थः** अद्वैतमेकपुरुषमयम् इत्येतत्प्रतिपादनार्थः, **तस्यैवासिद्धिर**द्वैतैकान्तस्य । किं कारणम् ? यस्मादेकपुरुषाभ्युपगमोऽयमेकपुरुषासिद्धिमेव ते करोति । § 792

तत् कथमिति चेत्, **योऽसावेक एव** त्वया **पुरुषः सम्भाव्यते तस्याप्यनेकत्वमापद्यते । एव**मिति त्वदभिहितेनैव पुरुषस्वात्मातिदेशाद्वैतेन, का पुनर्भावना ? उच्यते --**यत्स्वरूपे**त्यादि याव**दवस्थाव**दिति । यस्य स्वरूपं यत्स्वरूपम्, कस्य स्वरूपम् ? पुरुषस्य, किं स्वरूपम् ? नित्यसर्वग- - /ms तसर्वात्मकत्वकारणत्वादि, तदव्यतिरिक्तं लक्षणमासां ता **अवस्था**स्तदव्यतिरिक्तलक्षणास्तत्स्वरूपपुरुषाव्यतिरिक्तलक्षणास्त्वया **विना भेदेनोच्यन्ते** तस्मात् पुरुषादभिन्ना एवोच्यन्ते इत्यर्थः, तद्यथा--पुरुष एवावस्थाः, नावस्था एव पुरुषः इत्यवधारणभेदादेव भेदोपदर्शनेन च भेदोऽभ्युपगम्यते, तत एव तस्य ताभ्यो नानात्वं तासां च त्वद्वचनादेव सिध्यति, यथा ऊर्ध्वग्रीवादिलक्षणो घटः, घट एव ऊर्ध्वग्रीवादयः, न पटो न पटचातुरश्र्यादयः इति तस्य तासु तासां च तस्मिन्नवधारणानवधारणाभ्यां भेद एव सिध्यति । न त्वभेदेऽवधारणभेदोऽस्ति, यथा घटस्वात्मैव घटः, न घट एव घटस्वात्मा इति । तस्मादवस्थानां विनिद्रादीनामवस्थावतश्च पुरुषस्य भेदस्त्वद्वचनादेवेति । किञ्च, **स पुरुषोऽपी**त्यादि, एवं च सति एकपुरुषमयत्वातिदेशात्यागे सोऽपि पुरुषः पुरुषान्तरेणाभिव्याप्तः पुरुषस्वात्मत्वादवस्थावदिति प्राप्तः । यथा विनिद्राद्यवस्थाः पुरुषस्वात्मैव नावस्थान्तरात्मिका इति कृत्वा पुरुषेणाभिव्याप्तास्तथा पुरुषोऽपि पुरुषस्वात्मत्वात् तदविनाभावात् पुरुषान्तरेणाभिव्याप्तः स्यात्, तथा तदपि पुरुषान्तरं पुरुषस्वात्मत्वात् तद्वदेवेति पुरुषानेकत्वं स्यात्, तस्यापि तथैवेत्यनवस्था च, ततश्च **पुरुषेणाभिव्याप्तत्वादनवस्थितैकत्वप्रतिष्ठः पुरुष** इति प्राप्तम्, अनवस्थिता एकत्वेन एकत्वे वा प्रतिष्ठाऽस्य सोऽयमनवस्थितैक- - /ms त्वप्रतिष्ठः पुरुषः स्यात् **पुरुषस्वात्मत्वादवस्थावत्,** यथावस्थाः पुरुषस्वात्मत्वादनवस्थितैकत्वप्रतिष्ठास्तथा पुरुषोऽपि स्यादिति । तथा **अनवस्थिततत्त्वप्रतिष्ठः,** तस्य भावस्तत्त्वमात्मस्वरूपम्, अनवस्थिता तत्त्वेन तत्त्वे वा प्रतिष्ठाऽस्य सोऽयमनवस्थिततत्त्वप्रतिष्ठः, न स्वरूपे प्रतिष्ठितः स्यात् पुरुषः, पुरुषस्वात्मत्वादवस्थावत् । यथावस्थाः पुरुषस्वात्मानोऽनवस्थितात्मस्वरूपव्यवस्थाप्रतिष्ठाः पुरुषस्वरूपव्यवस्था एवेष्यन्ते, तत्रैव तासां प्रतिष्ठा, न स्वात्मसु, तथा पुरुषोऽपि स्यात् । पुरुषान्तरातिदेश्यश्च पुरुषः स्यात्, पुरुषस्वात्मत्वात्,

२९ य] यमर्थ॰ प्र॰ ॥
५ क] यस्य प्र॰ ॥
६ त्वा] ॰दिति तद॰ प्र॰ ॥
२६ स्वात्मा] ॰त्मनो॰ प्र॰ ॥

अवस्थावत् । यथेमाः सुप्ताद्यवस्थाः पुरुषस्वात्मत्वात् पुरुष एवेदं सर्वम् इत्यतिदिश्यन्ते तथा पुरुषः पुरुषस्वात्मत्वात् पुरुषान्तरमेवायम् इत्यतिदेश्यः स्यात् । § 793
257/mj

अचेतनव्यक्तमूर्तानित्यादिरूपार्थपुरुषपरमार्थता । § 794

अवस्थास्वन्यत्वानेकत्व एव पुरुषः । अवश्यमन्यास्तास्तस्मात्, तद्रूपापत्त्यनिष्टत्वात्, अवस्थान्तरवत्, यतोऽवस्थास्वात्मत्वमस्य नेष्यते । पुरुषातिदेशात्तु पुनः स्वपरविषयकृतभेदद्वारान्यत्वासम्भवात् कस्यचित् कथञ्चिदप्यन्यस्यानुपपत्तौ ता अपि अन्यत्वापत्तिवत् पृथक् पृथक् पुरुषः । § 795

स्यान्मतम्--एतद्दोषभयादिदंशब्दवाच्यप्रत्यक्षार्थादन्यं पुरुषमभ्युपगम्य एता एवावस्थाः पुरुषः इति प्रत्यक्षार्थेदंविषयतया पुरुष एवेदं सर्वम् इति दृश्यस्पृश्यादि अतिदिश्यात्, यथा अयं देवदत्त एव इति अयंशब्दवाच्यो हि देवदत्तः प्रत्यक्षाप्रत्यक्षत्वयोः स एव तथा पुरुष एवेदम् इति । एतच्चायुक्तम्, यस्मादस्यां **प्रत्यक्षार्थेदंविषयतायां** सत्या**मचेतनव्यक्तमूर्तानित्यादिरूपार्थपुरुषपरमार्थता** प्राप्नोति, **आदि**ग्रहणादसर्वात्मककार्यानेकत्वादिरूपार्थपुरुषपरमार्थतापि, न चेतनाव्यक्तामूर्तनित्यसर्वात्मकसर्वगतकारणैकरूपार्थपुरुषपरमार्थतापि स्यादिति प्रसङ्गतोऽयं दोष आपादितः । एवं तावदन्यानेकत्वः पुरुष इति पुरुषस्वात्मापरित्यागेन अवस्थाभेदं तद्द्वारेणोक्त्वा उक्तः । § 796

इदानीमवस्थान्यत्वद्वारेणैव पुरुषानेकत्वं त्वदुक्तवद् ब्रूमः --**अवस्थास्तु अन्यत्वानेकत्व एव पुरुष** इत्येतत् प्रत्यात्य ?भेदोपन्यासवाक्यम्, तद्वचनस्मारणेन विचारार्थोपन्यास इत्यर्थः । अवस्थास्तु पुरुषोऽन्यत्वानेकत्वे सति एव, यतोऽवस्थास्वात्मत्वं पुरुषस्येष्यते ततस्तासामन्यत्वेनानेकः अन्योऽनेकश्चेति वा । तत् कथमिति चेत्, त्वदुक्तेरेवा**वश्यमन्यास्ताः** पुरुषादन्या विनिद्राद्यवस्थाः ताभ्यश्च सोऽन्य इति परस्परावधिकमन्यत्वं साध्यते । **तद्रूपापत्त्यनिष्टत्वा**दिति हेतुः, तयोश्चावस्थावस्थावतोस्तद्रूपापत्त्यनिष्टत्वं सिद्धम्, अन्यथावस्थानां विशेषितानामन्यत्वे साध्ये पुरुषपृथक्त्वेन तदसिद्धेराश्रयासिद्धिस्तद्रूपापत्त्यनिष्टत्वं वाऽसिद्धमाशङ्क्येत । अथवा पुरुषोऽवस्था इति चाविशेष्य पराभिमतं वस्तूभयमपि परस्परतोऽन्यदिति सामान्येन साध्यते इतरस्येतररूपापत्त्या अनिष्टत्वादित्यर्थः, अवधारणभेदाच्चेतररूपापत्त्यनिष्टत्वमापादितम् । किमिव ? **अवस्थान्तरवत्,** यथा विनिद्रावस्था सुप्ताव- - /ms

१ अ] दृश्यतां पृ० २०१-- २ ॥
८ दृ] दृश्यतां पृ० १८९ पं० २६ ॥
१६ प्र] प्रकृत्या भेदो० ? तदुक्त्या भेदो० ? ॥
१९ म] ०मन्यस्ताः प्र० ॥

२३ माश]
०शंकेतnayacakra-ms-bhā ।
०शंकेत nayacakra-ms-ya ॥

स्थारूपापत्त्या नेष्टा तथा त्वतोऽन्याश्चेति । तद्रूपापत्त्यनिष्टत्वासिद्धिः इति मा मंस्था इत्यत आह --**यतोऽवस्थास्त्वात्मत्वमस्य नेष्यते** पुरुषस्य, एतदवस्थारूपापत्त्या पुरुषानिष्टत्वादवस्थाद्वारेण पुरुषस्य अवस्थानां चान्यत्वानेकत्वं त्वदुक्तौ चैवमुपपादितम् । § 797

सत्यां **ता अपि** चतस्रोऽवस्था **अन्य** (Edtext outside numbered paragraph)**त्वापत्तिवत् पृथक् पृथक् पुरुषः**, चत्वारः प्र (Edtext outside numbered paragraph)भेदाः स्युः पुरुषाः । इदमपि त्वदुक्तिवदेव, तत् कथम् ? इति त (Edtext outside numbered paragraph)दुच्यते--यथा केनचिदुपपत्तिप्रकारेणासम्भाव्यमप्यन्यत्वमुच्यते तथा ता अप्यवस्थाः सम्भावनापादितान्यत्वाः पृथक् पृथक् स्युः । ततश्च ताः पुरुषस्त्वात्मत्वात् परस्परतोऽन्यत्वाच्च पुरुषाः पृथक् पृथक्, विनिद्रावस्था प्रत्येकं पुरुषः, एवं शेषा अपि प्रत्येकं पुरुषाः । केन पुनरुपपत्तिप्रकारेणान्यत्वम् ? अवधारणभेदादेव । एवं पुरुषातिदेशात् पुरुषबहुत्वं विनिद्राद्यवस्थानां पुरुषस्त्वात्मत्वादिति । § 798

**पुरुषातिदेशात् तु पुनरित्यादि** । पुरुष एवेदं सर्वम् इति पुरुषत्वेनावस्थानामतिदेशेऽन्यत्वं न सम्भवत्येव, कथम् ? **स्वपरविषयकृतभेदद्वारान्यत्वासम्भवात्,** स्वविषयकृतो घटस्य रूपादीनां प्रधानस्य सत्त्वादीनां चैकवस्तुगतानामेव धर्माणां भेदः, परविषयकृतस्तु तयोरेव वस्त्वन्तरात् पटादेः पुरुषाच्च भेदः, तदुभयभेदद्वारमन्यत्वं सम्भाव्येत । तत्तु अनभ्युपगतमन्यत्व-

- /ms द्वारद्वयं भेदद्वयासम्भवात् । ततोऽन्यत्वानुपपत्तिः **कस्यचिदिति** वस्तुनः **कथञ्चिदिति** रूपादिसत्त्वादिप्रकारेण तद्द्वारानभ्युपगमादेव । ततः पुरुषाद

अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः, पुरुषोऽपि न तर्हि पुरुषः पुरुषलक्षणत्वाद् विनिद्रावस्थावत् । एवं शेषा अपि । इति पुरुषाभाव एव, कुतोऽस्य सर्वगतता ? तदभाव एव त्वदभिप्राय एव एवं प्रतिपाद्यते, तदात्मत्वाभिमतनिरसनात्, उष्णत्वनिरसनेन अग्न्यभावप्रतिपादनवत् ।

यत्तु यत्नेन अलक्षणत्वमुक्तमतो ननूक्तवत् त्वयैव स्फुटीकृतमसत्त्वं सर्व-

* * *

258/mj **पपत्तौन्यस्यानु**

* * *

अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः, पुरुषोऽपि न तर्हि पुरुषः पुरुषलक्षणत्वाद् विनिद्रावस्थावत् । एवं शेषा अपि । इति पुरुषाभाव एव, कुतोऽस्य सर्वगतता ? तदभाव एव त्वदभिप्राय एव एवं प्रतिपाद्यते, तदात्मत्वाभिमतनिरसनात्, उष्णत्वनिरसनेन अग्न्यभावप्रतिपादनवत् ।

यत्तु यत्नेन अलक्षणत्वमुक्तमतो ननूक्तवत् त्वयैव स्फुटीकृतमसत्त्वं सर्व-

---

४ ताना] °नामेक
ध°nayacakra-ms-ya ॥
५ भ्युप] °पगमान्यत्व° प्र° ॥
८ अ] दृश्यतां पृ° २०२-- १ ॥
१२ मु] दृश्यतां पृ° २०२-- १ ॥
१५ अ] दृश्यतां पृ° २०२-- १ ॥
१९ मु] दृश्यतां पृ° २०२-- १ ॥

* * *

पपत्तौ

अथेत्यादि । **अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः** यदि प्रत्येकं पुरुषत्वं तद्बहुत्वं च दोषौ दृष्ट्वा पुरुषलक्षणापि विनिद्रावस्था पुरुषो नेष्यते ततः **पुरुषोऽपि न तर्हि पुरुषोऽस्तु पुरुषलक्षणत्वाद् विनिद्रावस्थावत्** । **एवं शेषा अपीति**, यथा विनिद्रावस्था पृथक् पुरुष इत्यापाद्य तत्परिहारार्थं पुरुषलक्षणत्वे सति अपुरुषत्वमाशङ्क्य पुरुषस्यापुरुषत्वं तद्वत् इत्यापादितं तथा प्रत्येकं सुप्ताद्यवस्था अपि पुरुष इत्यापाद्य तत्परिहारार्थं पुरुषलक्षणत्वे सति अपुरुषत्वमाशङ्क्य सुप्ताद्यवस्थानां तद्वत् पुरुषस्यापि पुरुषात्मनोऽपुरुषत्वमित्यापादनीयम् । **इति पुरुषाभाव एव,** इत्थं पुरुषस्याभाव एव प्रसक्तः । **कुतोऽस्य सर्वगतता ?** विद्यमानस्य हि सर्वत्वमसर्वत्वं सर्वगतत्वमसर्वगतत्वं वेति विचार्यं स्यात् । अथवा त्वदभिप्रतमेवैतत् तदभावप्रतिपादनम्, नास्मदभिप्रायः, एवमित्येतेन विधिना । कुतः ? **तदात्मत्वाभिमतनिरसनात्,** - /ms
यो यदात्मत्वेनाभिमतोऽर्थस्तं निरस्यन् वादी तमेवार्थं निरस्यन् दृष्टः, यथा उष्णो न भवत्यग्निः इति ब्रुवन्नौष्ण्येनाविनाभाविनमौष्ण्यात्मानमग्निमेव निरस्यति तथेहापि विनिद्राद्यवस्थालक्षणं पुरुषमुक्त्वा पुरुषस्वात्मैताः पुरुषान्न भिन्नाः सन्ति इति ता निराकुर्वंस्तदात्मानं पुरुषमेव त्वं निराकरोषीति **त्वदभिप्राय एवायं** पुरुषाभावः । एवं तावत् प्रवृत्त्योपलक्षितस्त्वदीयोऽभिप्रायो व्याख्यातः । § 799

नाभिप्रायमात्रादेवाभावः, किं तर्हि ? स्फुटमेव त्वयोक्तं नास्ति पुरुषः इति, तद्यथा --**यत्तु यत्नेने**त्यादि । सामान्येनायं न्यायोऽवतार्यते, भावना त्वस्य विशेष्य वक्तव्या--यथा अवस्थालक्षणः पुरुषः पुरुषलक्षणा अवस्था इति वातिदिश्यमानानां परस्परमेकत्वमन्यत्वमवक्तव्यत्वमसत्त्वं चेति विकल्पाः स्युः सविकल्पत्वे, न पुनरेते सन्ति कल्पनाऽविषयत्वाद् विकल्पातीतनिर्विकल्पपरमार्थत्वाद्यालक्षणत्वं त्वयोक्तं प्राक्, **अतो ननूक्तवत् त्वयैव स्फुटीकृतमसत्त्वं** प्रतिपादयितुमिष्टं वचनेनैव **सर्वस्यापि**, न केवलं पुरुषस्यैव, 259/mj

* * *

स्यापि, वयमपि च ब्रूमः--कुतोऽस्यापत्तिभवनम्, भेदत्वेनाभूतत्वात् परिणामित्वेनाभूतत्वाद् वन्ध्यापुत्रवत् । अव्यभिचरितानेकत्वैकगतिर्हि भेदभावः

* * *

अवस्थानामवस्थावतः पुरुषस्य चेति । **वयमपि च ब्रूमः,** न केवलं त्वद्वचनादेवासत्त्वं पुरुषस्य, त्वद्वचनसमर्थनाय वयमप्यसदेव सर्वं त्वदिष्टमिति ब्रूमः । कुतः ? त्वन्मते सर्वस्याभावात्, भवनं हि द्विविधं मया वक्ष्यमाणम्--इतरेतरापेक्षद्वैतवृत्ति सन्निधिभवनमापत्तिभवनं च । सन्निधिभवनमापत्तिभ-

---

१० स्य ] °स्य तथेहापि प्र° ॥
१० स्वा ] °स्वात्मैव ताः ? ॥
१८ ना ] °नावि° प्र° ॥
२५ त्व ] त्वद्वचनमनर्थनयना वयम° प्र° ॥

वनाभावे न भवितुमर्हति । तिष्ठतु सन्निधिभवनम्, इदमपि **कुतोऽस्यापत्तिभवनं पुरुषस्य ?** कथं नास्ति ? **भेदत्वेनाभूतत्वात् परिणामित्वेनाभूतत्वाद् वन्ध्यापुत्रवत्,** यथा वन्ध्यापुत्रो भेदत्वेन परिणामित्वेन वा अभूतत्वान्नास्ति तथा त्वदिष्टं सर्वमापत्तिं नानुभवतीत्यसत् । किमर्थमित्थं विशेष्यते भेदेन परिणामित्वेन वाभूतत्वात् इति, न पुनः अभेदत्वादपरिणामित्वात् इत्युच्यते ? - /ms उच्यते--भेदो न भवतीत्यभेदो भेदादन्यो वा स्यादेवमपरिणामीत्यभेदत्वादपरिणामित्वादिति, नास्य भेदोऽस्तीत्यभेदः नास्य परिणामित्वमित्यपरिणामित्वादभेदत्वादिति बहुव्रीहिसमासो वा स्यात् । बहुव्रीहिस्तावन्न घटते एव अन्यपदार्थत्वादन्यस्यार्थस्याभावात्, अतः समन्वयाभावः, समन्वयाभावात् तदभावः । तत्पुरुषोऽपि प्रसज्यप्रतिषेधपक्षे न घटते नञः क्रियापदसम्बन्धिनोऽसमर्थत्वात्, तस्माद् भेदादन्य इति पर्युदासः स्यात्, स च बहुव्रीहितुल्य एवार्थत इति भेदत्वेनाभूतत्वात् परिणामित्वेनाभूतत्वात् इति सुखग्रहणार्थं शङ्कापोहार्थं चेत्युक्तम् । भिन्नानां हि भावानामव्यभिचरितैकत्वापत्तीनां सर्वत्वं भवति, न त्वदिष्टस्यैकस्याभिन्नस्येति, तद् व्याचष्टे --**अव्यभिचरितेत्यादि** यावद् **भेदभावः सर्वत्वम्** । अव्यभिचरितमनेकत्वं यस्य तदिदमव्यभिचरितानेकत्वमेकम्, तस्य **गतिः** परिणामस्तदापत्तिः, सैकत्वापत्तिरनेकेन विना न भवतीति, यथा शुक्रशोणितादेरनेकस्यैकत्वापन्नस्याध्यात्मिकस्य । यथोक्तम्—

मातु+ओयं पितुसुक्कं तं तदुभयसंसिट्ठं कलुसं किब्बिसं
तप्पढमं आहारमाहारेत्ता जीवो गब्भत्ता+ए वक्कमति ।
सत्ताहं कललं होति सत्ताहं होति अब्बुदं ।
अब्बुदा जायते पेसी पेसीतो जायते घणं ॥ तन्दुलवै० १७
इत्यादि ।§ 803

भिन्नानां वैषम्येण परिणतानां शुक्रशोणितसंसृष्टाहारादीनामैक्यापत्त्या हि सर्वत्वं शरीरेन्द्रियादेः । तथा बाह्यमपि सर्वत्वं, भूम्यम्ब्वादिव्रीहितोयदेशकालादिभिन्नार्थानां वैषम्येण विपरिणाममापन्नानामैक्यापत्त्या सर्वत्वं दृश्यते, नान्यथेति । **हिशब्दो** यस्मादर्थे, यस्मादित्थं भिन्नार्थाव्यभिचरितैकगतिः स-

---

३१ ते] **भेदत्वेन** इत्यपि पाठोऽत्र स्यात् ॥
१ भ] **भवत्यभे॰** प्र॰ ॥
११ ग] **गतिपरि॰** प्र॰ ॥
११ स्त]
**॰स्तत्तदापत्तिः**nayacakra-ms-bhā ॥
१३ मा] **मातुं तेयं पितुं** प्र॰ । इमो खलु जीवो अम्मापि+उसंयोगे मा+ऊ+ओयं पि+उसुक्कं तं तदुभयसंसट्ठं कलुसं किब्बिसं तप्पढमया+ए आहारं आहारित्ता गब्भत्ता+ए वक्कम+इ । सत्ताहं कललं हो+इ सत्ताहं हो+इ अब्बुयं । अब्बुया जाय+ए पेसी पेसी+ओ वि घणं भवे ॥ १७ ॥ इति तन्दुलवैचारिकप्रकीर्णके पाठः । जीवे णं भंते गब्भं वक्कममाणे तप्पढमया+ए किमाहारमाहारे+इ ? गोयमा ! मा+उ+ओयं पि+उसुक्कं तं तदुभयसंसिट्ठं कलुसं किब्बिसं तप्पढमया+ए आहारमाहारे+इ । इति भगवतीसूत्रे पाठः १ । ८ । ६१ ॥
१७ बा] **वाक्यमपि** प्र॰ ॥
१७ स] सर्वत्वं भूम्यम्ब्वादेः, व्रीहि॰ ? ॥

र्वत्वम्, स हि भेदभावः सर्वत्वम्, तस्मान्नाभिन्नस्यैकस्य सर्वत्वं कस्यचित् । तस्मात् सर्वत्वाभावादयुक्तमुच्यते पुरुष एवेदं सर्वम् इति । § 804
260/mj

सर्वत्वम् । त्वदुक्तैकसर्वतायां तु प्रत्यक्षानुमानस्ववचनाभ्युपगमलोकविरोधाः, अविकल्पशब्दार्थादभ्युपगतधर्मधर्मिस्वरूपविशेषोभयविरोधाः, असिद्धादिहेतुता च, साध्यसाधनोभयधर्मधर्म्यसिद्ध्यादयो दृष्टान्तदोषाः । § 805

यथा च पुरुषे तथेतरद्रव्यार्थेष्वपि प्रतिस्वं योज्यं विनिद्रावस्थास्थानेऽभेदैकत्वं सामान्यलक्षणं क्रमयौगपद्यादयो निद्रादिवद् विशेषलक्षणमिति व्याख्याय । § 806

किञ्चान्यत्, **त्वदुक्तैकसर्वतायां त्वि**त्यादि । एक एव सर्वम् इत्येतस्यामेकसर्वतायाम्, ***सर्वैकताया**मिति वा पाठात् सर्वैकपुरुषमयतायां प्रत्यक्षत एव भिन्नानेकैकसर्वताया दर्शनात् **प्रत्यक्षविरोधः** । ग्रहणभेदा**दनुमानविरोधः**, ग्रहणभेदे हि न्याय्यो ग्राह्यभेद इति, भेदत्वपरिणामित्वादिभावाभावे सर्वत्वापत्तिभवनाभावाद्वानुमानविरोधः । त्वदुक्तास्मदुक्तैकार्थ्याभावे भेदाभ्युपगमात् **स्ववचनाभ्युपगमविरोधः**, लोके घटपटादिभेदप्रतीते**र्लोकविरोधः** । **अविकल्पशब्दार्था**दित्यादि, अविकल्पः शब्दार्थः इत्यभ्युपगम्य विकल्पव्यवहाराङ्गीकरणाच्चाभ्युपगमविरोधः, सर्वमेकम् इति विकल्पधर्मत्वेन धर्मित्वेन च तदुभयविशेषत्वाभ्यां चेष्टस्य तेनैवाभ्युपगमेन निराकरणादविकल्पशब्दार्थस्या**भ्युपगतधर्मधर्मिस्वरूपविशेषोभयविरोधाः** । **असिद्धादिहेतुता च**, - /ms हेतोः **अनतिरिक्तपरापराणीयोज्यायोरूपात्मकत्वात्** इत्यादेः प्रतिज्ञातैकपुरुषाभेदात् त्वया अस्माभिश्चोक्तेन न्यायेन पुरुषाभावाद् धर्म्यसिद्धेराश्रयासिद्धिः, त्वन्मतेनार्थान्तराभावेऽसाधारणता, अस्मन्मतेन विपक्ष एव भावाद् विरुद्धता साधारणानैकान्तिकता वा, सपक्षमभ्युपगच्छतो वा ते घटाद्यवस्थाभेदाद् वृक्षादिदृष्टान्तं वृक्षः इति पुरुषव्यतिरिक्तवृक्षाद्यवस्थाभेदाभावे साध्यसाधनोभयधर्मधर्म्यसिद्धयो दृष्टान्तदोषाः, **आदि**ग्रहणाद् यथासम्भवं कल्पनां कृत्वा वैधर्म्यदृष्टान्तदोषा योज्याः । § 807

---

७ *] **सत्वैक°** प्र° ॥
११ म] **°विरोधा लोके** प्र° ॥
१६ अ] दृश्यतां पृ° २४७ पं° ५ ॥
१९ णानैका] **°कान्तिका वा** प्र° ॥
१९ वा] **वा न**
**घटा°**nayacakra-ms-ya ॥
१९ घ] वटाद्यव° ? ॥
२१ सा] दृष्टान्ताभासो द्विविधः--साधर्म्येण वैधर्म्येण च । तत्र साधर्म्येण तावद्

दृष्टान्ताभासः पञ्चप्रकारः ।
तद्यथा--साधनधर्मासिद्धः १,
साध्यधर्मासिद्धः २, उभयधर्मासिद्धः ३,
अनन्वयः ४, विपरीतान्वयश्चेति ५ ।...
...वैधर्म्येणापि दृष्टान्ताभासः पञ्चप्रकारः,
तद्यथा--साध्याव्यावृत्तः १, साधनाव्यावृत्तः
२, उभयाव्यावृत्तः ३, अव्यतिरेकः ४,
विपरीतव्यतिरेकश्चेति । इति **न्यायप्रवेशे** ॥

एवं तावत् पुरुषमयत्वं सर्वस्यायुक्तमित्युक्तम् । अधुनातिदेशेन नियत्यादिवादेष्वपि दोषांस्तानेवाह — **यथा च पुरुषे तथेतरद्रव्यार्थेष्वपीति** नियति-काल-स्वभाव-भावेष्वपि स्वं स्वं प्रति **प्रतिस्वं** प्रत्येकं **योज्यम्** । तमतिदेशोपायमाचष्टे, तद्यथा --**विनिद्रावस्थास्थानेऽभेदैकम्,** विनिद्रावस्था सामान्यलक्षणं पुरुषस्य पुरुषवादे सुप्ताद्यवस्थाव्यापित्वात्, सुप्ताद्यवस्था अपि विशेषास्तस्य तदात्मत्वादिति यथा व्याख्यातं तथा नियत्यादावभेदैकत्वं नियत्यादेः सामान्यलक्षणमतीतानागतवर्तमानबाल्यकौमारयौवनक्रमयौगपद्याद्यो निद्रादिवद् विशेषलक्षणमिति व्याख्याय विकल्पद्वयप्रतिषेधस्तथैव कर्तव्यः--अथ किं या एता अवस्थास्ता एव नियत्यादिः ? उत नियत्यादिरेवावस्थाः ? - /ms यदि ता एव नियत्यादिः, समुदयवादः क्षणिकवादो विज्ञानमात्रतावादः शून्यतावाद इत्यादि । अथ नियत्यादय एवावस्थाः, तथाऽभेदैकत्वावस्थालक्षणत्वादिः 261/mj स एव प्रपञ्चो

* * *

इत्यतस्तत्त्वं तावत् संवदति यदयं भवति सोऽस्य भाव इति, सर्वगतत्वनित्यत्वदेशकालाभेदात् ।

यस्तु भवति स कर्तैवेति सम्प्रधार्यम्, भवतेः सन्निध्यापत्तिभवनद्वयार्थत्वादस्तिभवतिविद्यतिपद्यतिवर्ततीनां सन्निपातषष्ठानां सत्तार्थत्वात् । अस्त्यादिभवनं सन्निधिमात्रवृत्त्येव आपत्तिभवनपृथग्भूतम्, यदुपादानमेतदभिधीयते--अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते, वृक्ष इत्यस्तीति गम्यते पा°अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते । वृक्षः प्लक्षः अस्तीति गम्यते । इति पातञ्जलमहाभाष्ये पाठः ॥ म° भा° २ । ३ । १ ।

* * *

योज्यः । **इत्यतोऽस्मात् तत्त्वं तावत् संवदति,** शेषं न संवदति सर्वं त्वदुक्तम् । कतमत् संवदतीति चेत्, **यदयं भवति सोऽस्य भाव** इत्येतत् संवदति, तस्य भावस्तत्त्वं येन भूयते यो भवति स एव भावः, कर्तृलक्षणां षष्ठीं कृत्वा तस्य भावः स भावः, इतीदमस्मद्दर्शनेन सह संवदति । किं कारणम् ? **सर्वगतत्वनित्यत्वदेशकालाभेदात्,** सर्वगतत्वेन नित्यत्वेन च यथासङ्ख्यं देशकालाभ्यामभेदात्, तद्धि भवनं देशे क्वचिन्न न भवतीति सर्वगतत्वादभिन्नम्, कालतः सततं भवति न कदाचिन्न भवतीति नित्यत्वादभिन्नम् । तस्मादभेदादिष्यत एतत् । § 808

इदं पुनर्न तावदिच्छामः सम्प्रधार्यत्वात्, **यस्तु भवति स कर्तैवेति सम्प्रधार्यम्,** न हि कर्तरिविहिततिप्प्रत्ययान्तभवतिशब्दश्रवणादेव कर्तृत्वम्,

२४ त्या] °त्यादिदेष्वपि प्र° ॥
२६ स्थास्थानेऽभेदैक] अत्र °ऽभेदैकत्वम् इत्यपि पाठः स्यात् ॥
४ अ] तुलना पृ° २४६ पं° ३--पृ° २४७ पं° ४ ॥
६ शू] शून्यवादnayacakra-ms-ya ॥
११ द] दृश्यतां पृ° ३४ पं° २० ॥
१८ त] तत्वे प्र° ॥
२३ क्व] क्वचिन्न भवतीति प्र° ॥

अकर्तुराकाशादेरपि भवनादभवनव्यावृत्तिमात्रसत्तार्थत्वाद् भवनस्य, कारणपर्यायत्वात् करोतेरकारणकार्यमपि भवत्येव **भवतेः सन्निध्यापत्तिभवनद्वयार्थत्वादस्तिभवति-विद्यति-पद्यति-वर्ततीनां सन्निपातषष्ठानां सत्तार्थत्वा**दित्येतदस्वतन्त्रस्याव्यापृतस्यापि भवने कारणमाह । भवतेः सन्निध्यापत्तिभवनार्थत्वम्, अस्ति-विद्यति-सन्निपातानां सन्निधिमात्रभवनार्थत्वम्, पद्यतिवर्तत्योरापत्तिभवनार्थत्वमिति भागः सव्यापारत्वाद् निर्व्यापारत्वाच्च त्रयाणां भवतेः सामान्यभवनवाचित्वादिति अपरिणामित्वात् परिणामित्वादकर्तृत्वात् कर्तृत्वाच्च विशेषः । असतो भवनाभावा**दस्त्यादिभवनं सन्निधिमात्रवृत्त्येव,** सन्निधिमात्रा वृत्तिरस्येति सन्निधिमात्रवृत्ति तदस्तिभवन**मापत्तिभवनपृथग्भूतं** ततोऽन्यदीषद्भिन्नमव्यापृतमित्यर्थः । स्यान्मतम्--सर्वतन्त्रसिद्धान्तेन व्याकरणेन विरुद्धमस्वतन्त्रभवनम्, भवतेः कर्तृविहिततिप्प्रत्ययान्तत्वादिति । एतच्चायुक्तम्, तत्रैवानुज्ञातत्वात्, **यदुपादानमेतदभिधीयत** इत्यादि, इदं तु सन्निधिमात्रवृत्तिभवनमेवोपादायाभिहितं यत्राप्यन्यत् क्रियापदं न श्रूयते तत्राप्य**स्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते** । भवन्ती वर्तमाना विभक्तिः पूर्वाचार्यसंज्ञयोक्ता लडित्यर्थः, तत्परोऽस्तिः असिः, **अस् भुवि** पा॰ धा॰ १०६५ इति धातुः, **इक्श्तिपौ धातुनिर्देशे** पा॰ वा॰ ३ । ३ । १०८, **प्रथमपुरुषे** न मध्यमोत्तमयोः, अप्रयुज्यमानोऽपि गम्यतेऽर्थसद्भावादविनाभावादर्थेन । तदुदाहरति **--वृक्ष इत्यस्तीति गम्यते,** किमुक्तं भवति ? अस्ति भवति सन्निहितमित्यर्थः । निर्दिष्टं सन्निधिभवनमुभयोः समानलक्षणत्वादादौ । § 809 - /ms

262/mj

आपत्तिभवनं तु अस्तिभवनं सन्निहिततथावृत्ति कारणे कार्यस्य सत्त्वात्, यथा घटो भवति निर्वर्तते आपद्यते । § 810

सा च भोक्तृभोग्यद्वैतभूततायां सन्निधिसिद्धिः, न ततो न्यूनतायामधिकतायां वा व्यतिरेकाभावात् । न ज्ञेयमन्तरेण ज्ञातृत्वम्, ज्ञेयासत्त्वात्, खपुष्पज्ञत्ववत्, वैधर्म्येण इतरकुसुमज्ञत्ववत् । एवं हि ज्ञातुर्ज्ञातृत्वम् । न ज्ञातारमुप- § 811

**आपत्तिभवनं तु अस्तिभवन**मित्यादि याव**दापद्यत** इति । इदमपि चेषद्भिन्नं सन्निधिभवनमेव तथावृत्ति, सन्निहितस्य तथा वृत्तेरापत्तिभवनम् ।

---

३१ स्या] **°स्याव्यावृत्तस्यापि** प्र॰ ॥
३१ भ] दृश्यतां पृ॰ २३३-- १ ॥
१ मिति] विभागः द्वयोः सव्यापारत्वाद् इत्यपि पाठोऽत्र सम्भाव्यते ॥
२ रिणामित्वा]
**°त्वादकर्तृ°**nayacakra-ms-ya ॥
२ रिणामित्वा] **°दकर्तृत्वाच्च वि-शेषः**nayacakra-ms-bhānayacakra-ms-raṃnayacakra-ms-h
॥
५ म] **°मव्यावृत°** प्र॰ ॥
१० अ] **अस** प्र॰ ॥
२३ वृ] **वृत्तिरा°** इत्यपि पाठोऽत्र स्यात् ॥

अथवा तथा वृत्तिरस्य तथावृत्ति, सन्निहितं च तथावृत्ति च तदिति **सन्निहिततथावृत्ति,** किं तत् ? आपत्तिभवनम्, कुतः सन्निहितमेव तथा वर्तत इत्युच्यते ? उच्यते **--कारणे कार्यस्य सत्त्वात्,** कार्यं ह्यङ्कुरादि बीजादौ सन्निहितमेव तथा तथा देशकालाकारनिमित्तवशाद् व्यक्तव्यक्तिरूपेण वर्तते इति । तन्निदर्शयति **--यथा घटो भवती**ति, पूर्वमघटत्वेन मृत्त्वेन दृष्टं सन्निहितमेव मृदि घटभवनं व्यक्तमित्यर्थः । तत्पर्यायकथनम् **--निर्वर्तत आपद्यत** इत्यर्थः, सन्निधिभवनमेवापत्तीभवति । उक्तमापत्तिभवनमपि । § 812

- /ms अनयोरन्यूनाधिकरूपतया सिद्धिरुच्यते **--सा चे**त्यादि । सामान्यत्वात् सन्निधिभवनसिद्धिस्तावत् **सा च भोक्तृभोग्यद्वैतभूततायां सन्निधिसिद्धिः** सन्निधिभवनसिद्धिः, तद्धि सन्निधिभवनं द्वैतभूततायां सिध्यति नाद्वैततायां दर्शितैकभोक्तृभोग्यत्वायुक्तत्वादिदोषाद् **न ततो न्यूनतायां सिद्धिरधिकतायां वा** द्वैतात्, तृतीयस्याभावात् । न्यूनाधिकानुपपत्तौ कारणमाह **--व्यतिरेकाभावा**दिति, व्यतिरेकः पृथक्त्वेन एकस्यैव वृत्तिः, विनापि भावः । तदभावाद् न्यूनतायामसिद्धिः, यथा स्वामिना विना भृत्यस्य भृत्येन विना वा स्वामिनः । आधिक्येऽपि व्यतिरेकः, यथा भावव्यतिरिक्तं नास्तीति तथेह भोक्तृभोग्यव्यतिरेकाभावात् । अतो न्यूनाधिकाभावात्तद्वैते सन्निधिभवनं सिध्यति, नाद्वैतत्रैतादितायामिति । § 813

तत्प्रतिपादनार्थमुपपत्तिरुच्यते **--न ज्ञेयमन्तरेण ज्ञातृत्वम्,** भोग्यस्य ज्ञेयत्वाच्छब्दादिगुणपुरुषोपलब्धिद्वयपुरुषोपभोगार्थत्वात्तज्ज्ञेयमापत्तिभवनम्, तदन्तरेण न ज्ञातुर्ज्ञातृत्वम् । कुतः ? **ज्ञेयासत्त्वात्** । ज्ञेयस्यासत्त्वादिति वैयधिकरण्यात् ज्ञस्याधर्मत्वादसिद्धो हेतुरिति चेत्, न, ज्ञातृज्ञेययोः सम्बन्धित्वेन साध्ययोस्तदसत्त्वस्य धर्मत्वात् । अथवानुपपन्नं ज्ञातृत्वमसज्ज्ञेयत्वादिति प्रयोगकालेऽर्थव्याख्या, तच्च ज्ञेयस्यासत्त्वादगृहीतज्ञेयत्वादिति । दृष्टान्तः **खपुष्पज्ञत्ववत्,** यथा खपुष्पविषयं ज्ञातृत्वमसज्ज्ञेयत्वादनुपपन्नमेवमसज्ज्ञेयं ज्ञातृत्वम् ।

- /ms **वैधर्म्येण इतरकुसुमज्ञत्ववत्,** यथा चूतादिखपुष्पेतरकुसुमज्ञत्वं सज्ज्ञेयत्वादुपपद्यते तथा त्वदभिमताद्वैतज्ञत्वं द्वैते सत्युपपद्येत, तत्त्वैतस्य ज्ञातृज्ञेयव्य-

---

३ अ] अनयोरेववा ?न्यूना°nayacakra-ms-ya ॥
४ भो] भोक्तृ° प्रतिषु नास्ति ॥
६ त्वायुक्त] °क्तित्वा° प्र° ॥
८ पृ] पृथक्त्वनैकस्यैवnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līmnayacakra-ms-raṃnayacakra ॥
१० आ] अधिके°nayacakra-ms-ya ॥
११ न्यूनाधिकाभावा] °वात्त द्वैते प्र° । अत्र °वात् द्वैते इत्यपि पाठः स्यात् ॥
१३ न] तज्ज्ञेय°nayacakra-ms-bhā । तद् ज्ञेय° nayacakra-ms-ya ॥
१४ त्वा] °त्वात्त°त्वात् ?ज्ञेय° nayacakra-ms-bhā । त्वात्तद् ज्ञेय° nayacakra-ms-ya ॥
१६ स] [illegible]nayacakra-ms-ya ॥
१७ त्वा] °त्वादिप्रयोग° प्र° ॥
२१ त्व] तदभिम° प्र° ॥
२१ प] °पद्यतेnayacakra-ms-raṃnayacakra-ms-hī ॥
२१ त] तत्रैतस्य प्र° ॥

263/mj तिरेकाभावात् तदन्तःपातित्वाद

* * *

द्रष्टारमन्तरेण ज्ञेयत्वम् ज्ञातुरसत्त्वात्, वन्ध्यासुतज्ञेयघटत्ववत्, वैधर्म्येण इतरसुतज्ञेयघटत्ववत् । एवमेव हि ज्ञेयस्य ज्ञेयता । न भोग्यमन्तरेण भोक्तृत्वम्, भोक्तुरसत्त्वात्, खपुष्पमकरन्दभ्रमरवत्, वैधर्म्येण इतरकुसुममकरन्दभ्रमरवत् । एवमेव हि भोक्तुर्भोक्तृत्वम् । न भोक्तारमन्तरेण भोग्यम्, भोक्तुरसत्त्वात्, वन्ध्यासुतायौवनवर्धितकवत्, वैधर्म्येण इतरसुतायौवनवर्धितकवत् । एवमेव हि भोग्यस्य भो>ग्यत्वम्, तत्सम्बन्धित्वात् ।

यदपि च तथा तथा वर्तनं भवनं रूपादौ तदपि नैकैकस्मादपरिणामिनो वा

* * *

सत्त्वमिति । अथवा पृथक् साधनम्--ज्ञातृत्वमुपपद्यते सज्ज्ञेयत्वादितरकुसुमज्ञत्ववत् । वैधर्म्येणानुपपन्नमसज्ज्ञेयत्वात् खपुष्पज्ञत्ववदिति । **एवं हि ज्ञातुर्ज्ञातृत्वम्,** यो हि सज्ज्ञेयं जानीते स तु मुख्यो ज्ञाता, यथा सलिलं सलिलम् इति विद्वान् । यः पुनरसज्ज्ञेयं विजानीते स तु न ज्ञाता, यथा मृगतृष्णिकां सलिलम् इति विद्वान् । एवं तावत् ज्ञातैव, न ज्ञेयम् इत्येतद् दर्शनं निरस्तमद्वैतम्, अधुना ज्ञेयमेव, न ज्ञाता इत्येतन्निरस्यते --**न ज्ञातारमित्यादि,** ज्ञातार**मन्तरेण,** तत्पर्यायं दर्शयति --**उपद्रष्टार**मिति, ज्ञात्रा विना न **ज्ञेयत्वं ज्ञातुरसत्त्वात्,** अत्रापि पूर्ववत् असज्ज्ञातृत्वात् इति वा हेतुः । साधर्म्यदृष्टान्तो **वन्ध्यासुतज्ञेयघटत्वम्, वैधर्म्येण इतरसुतज्ञेयघटत्वम्** । विपर्ययेण वा पूर्ववत् साधनद्वयम्, परस्परापेक्षज्ञातृज्ञेयत्वसाध्यतया वा वैयधिकरण्यपरिहारेण हेतुर्वाच्यः । **एवमेव हि ज्ञेयस्य ज्ञेयता** भवितुमर्हति यदि केनचिदनुपहतेन्द्रियज्ञानेन ज्ञायते, यथा अनुपहतेन्द्रियबुद्धिपुरुषज्ञेयघटवत् मध्यस्थेन तर्कागमकुशलेन विपश्चिता प्रमात्रा वा ज्ञेयं साधनं यथेति । तथा **न भोग्यमन्तरेण भोक्तृत्वम्,** असद्भोग्यत्वात् खपुष्पमकरन्दभ्रमरवत्, वैधर्म्येण इतरकुसुममकरन्दभ्रमरवत् सद्भोग्यत्वाद् भोक्तृत्वमिति तत्साधर्म्येण वा, वैधर्म्येण खपुष्पभ्रमरवत्, परस्परावधिकं वा पूर्ववद् भोक्तृभोग्यत्वसाधनम् । अत्रापि च **एवमेव हि भोक्तुर्भोक्तृत्व**मिति ग्रन्थो द्रष्टव्यः । तथा **न भोक्तारमन्तरेण भोग्य**मसद्भोक्तृत्वाद् वन्ध्यासुतायौवनवर्धितकवत्, सद्भोक्तृकं भोग्यत्वादितरसुतायौवनवर्धितकवत्, पूर्ववदेवात्रापि व्याख्या यावद**एवमेव हि भोग्यस्य भोग्यत्व**मिति । युगपद्वा परस्परसम्बद्धसत्ताकौ - /ms
भोक्तृभोग्यौ, **तत्सम्बन्धित्वात्** तयोः सम्बन्धित्वादिति अयमर्थप्रदर्शनहेतुः, प्रयोगहेतुस्तु सम्बन्धित्वात् इत्येव । यथा सम्बन्धी भ्राता सम्बन्धिना इतरेण

८ पुष्प ] °ष्पज्ञत्ववदितिnayacakra-ms-bhā । °ष्पवदिति nayacakra-ms-ya ॥
९ ज्ञा ] ज्ञातुज्ञत्वम्nayacakra-ms-bhā ॥
२४ न्ध्यासु ] °सुत°nayacakra-ms-ya ॥

भ्रात्रा विना न भवति कनीयान् ज्यायसा ज्यायान् वा कनीयसा तथा भोक्तृभोग्यौ, यथा [स]दलङ्कारौ दम्पतीत्येवमादिदृष्टान्तैर्भोक्तृभोग्यसम्बन्धित्वसिद्धिरन्योन्याविनाभाविनीति प्रागुक्तं सन्निधिभवनं द्वैते सति सिध्यतीति ।

§ 814

अधुनेतरत् --**यदपि च तथा तथा वर्तनं भवनं रूपादौ** तेन तेन प्रकारेण अन्यथान्यथा चापत्तिभवनं रूपे रसे गन्धे स्पर्शे पृथिव्यादौ गवादौ घटादौ च सकलजगद्वर्तिविवर्तरूपं **तदपि नैकैकस्मात्**, एकमेव एकमेकैकं पुरुषादि, तस्मादेकस्मादेकस्मान्न भवति । किं तर्हि ? यदनेकमेकं त-
264/mj स्मादनेकस्मादेकस्माद्

* * *

सन्निधिमात्रभवनात्, आपत्तित्वात्, व्रीहिवत् । नाप्यद्वैते, अनर्थकापत्त्यभावात् । किन्तु सङ्घातात्मकत्वात् गृहघटपृथिव्यादिवत् परार्थत्वम् । तथा चक्षुरादयोऽप्याध्यात्मिका इति आ चक्षुरादेः परार्था यावच्च रूपादिद्व्यणुकादयः ।

भेदात्मकेन चानेन भवितव्यं कारणत्वात् तन्त्वादिवत्, परार्थार्थेन च शब्दाद्युपलब्ध्यर्थत्वात् । किं हि कारणं रूपादि दृष्टमेकं स्वार्थं च ?

* * *

भवति । **अपरिणामिनो वा सन्निधिमात्रभवनात्** न इति वर्तते । किं तर्हि ? परिणामिन एवापत्तिभवनयोग्याद् भवति । कुतः ? **आपत्तित्वात्** आपत्तिभवनत्वाद् **व्रीहिवत्**, यथा व्रीहेरनेकैकस्य रूपरसादिपरमाणुद्व्यणुकादिसङ्घाताद्यङ्कुराद्यापत्तिरङ्कुरादेर्वा भूम्यम्ब्वादिदेशकालादिसङ्घातत्वाद् व्रीह्यापत्तिस्तथैतदनेकात्मकैकमापत्तिभवनम् । **नाप्यद्वैते**, इत्थं तावत् स्वविषयद्वैते सति
- /ms आपत्तिभवनम्, परविषयद्वैते सत्येवापत्तिभवनमिदमुच्यते --**नाप्यद्वैते** परविषयद्वैताभावे भवत्यापत्तिभवनम्, **अनर्थकापत्त्यभावा**देवैकस्याद्वितीयस्य कस्मैचिदर्थमकुर्वतः । **किन्तु सङ्घातात्मकत्वात् परार्थत्व**मिति सम्बन्धः, सङ्घातात्मकभवनात् पारार्थ्यम्, संहत्यकारिणां हि पारार्थ्यं नानर्थक्यं न स्वार्थत्वं नान्योन्यार्थत्वं च केवलम् । दृष्टान्तो **गृहघटपृथिव्यादिवत्**, यथा गृहघटपृथिव्यादयः सङ्घातात्मकाः स्वतः पृथग्भूतपुरुषार्थाः नानर्थका न स्वार्था नान्योन्यार्थाः पुरुषार्थमेव चान्योन्यार्थाः स्त्रीशोभनार्थालङ्कारवत् । **तथा चक्षुरादयोऽप्याध्यात्मिका** इति दृष्टान्तबाहुल्यात् परार्थव्यापितां दर्शयति, **इत्या चक्षुरादे**रिति चक्षुरादयोऽपि सूक्ष्माध्यात्मिका विवेच्या यावत् **परार्था यावच्च रूपादिद्व्यणुकादयः**, किमङ्ग पुनर्गृहघटपृथिव्यादयः स्थूला ग्रामारामादयश्चेति

---

१ अधुनेत ] °तरद्यपि च nayacakra-ms-bhā । °तरद्यदि च nayacakra-ms-ya ॥
२ चा ] व्यापत्ति° प्र° ॥
१६ कालादिस ] °सङ्घाताद् nayacakra-ms-bhā ॥
२६ च ] चक्षुरादेरिति nayacakra-ms-bhā प्रतौ नास्ति ॥
२६ सू ] सूक्ष्माऽआ ?ध्यात्मिका nayacakra-ms-bhā ॥

? § 815

यत् पुनरिष्यत एकं कारणं पुरुषादि इति तन्न वयमभ्युपेमः । त्वन्मतेनाप्येकं चेत् किञ्चित् पारार्थ्यकारणमिष्यते तदभ्युपगम्य **भेदात्मकेन चानेन भवितव्यमि**ति प्रतिजानीमहे, **कारणत्वात् तन्त्वादिवत्,** तन्तुकपालादयो हि कारणत्वात् पटघटादीनां कार्याणां रूपादितुत्यंश्वादिसङ्घातरूपा अनेकात्मका एव कारणभावं बिभ्रतो दृष्टा नान्यथा तथा तेनापि त्वदिष्टेन कारणेन भवितव्यमनेकात्मकेन । **परार्थार्थेन च** भवितव्यम् इति वर्तते, परस्मै परार्थः, परार्थोऽर्थः कार्यं यस्य कारणस्य तेन कारणेन परार्थकार्येण भवितव्यं कारणत्वात् तन्त्वादिवदेव, यथा देवदत्तशीतत्राणाद्यर्थे पटकार्यास्तन्तवस्तथा तेन कारणेन त्वदिष्टेन भवितव्यम् । स कतमोऽर्थ इति चेत्, उच्यते --**शब्दाद्युपलब्ध्यर्थत्वात्,** **आदि**ग्रहणाच्छब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्त इत्याद्यन्तोपभोगद्वयं पुरुषस्यार्थः, सोऽस्यापत्तिभवनस्य परार्थार्थः । तस्माच्छब्दाद्युपलब्ध्यर्थत्वात् परार्थार्थेन तेन कारणेन भवितव्यम् । **किं हि कारणं रूपादि दृष्टमेकं स्वार्थं च ?** इति कारणस्यानेकैकत्वाविनाभावं पारार्थ्याविनाभावं च स्वार्थैक्याभावं च दर्शयति, विपक्ष एव नास्तीत्यभिप्रायः । **रूपादि**ग्रहणं तु पक्षत्वाद् रूपादीनां सङ्घातपारार्थ्यपरिणामित्वैः सन्निधिभवनवैलक्षण्यं दर्शयति । § 816

- /ms

265/mj

तदित्थं द्वैते त्वनेकात्मिकायाः प्रकृतेरात्मभिः सुखदुःखमोहैः परिणामानुक्रमेणारब्धाः शब्दादयोऽपि तदात्मका एव, तदात्मकत्वाभिव्यक्तकार्यत्वात्, मृत्पिण्डकार्यशिवकादिमृत्त्ववत् । सुखात्मकानां च शब्दादीनां प्रसादलाघवाभिष्वङ्गोद्धर्षप्रीतयः कार्यम्, दुःखात्मकानां शोषतापभेदोपष्टम्भोद्वेगापद्वेषाः, मोहात्मकानां वरणसदनापध्वंसनबैभत्स्यदैन्यगौरवाणि, तस्मात् सुखादीनामात्मत्वेनाभिव्यक्तं कार्यमेषां शब्दादीनाम् । यानि तैरारब्धानि शरीरादीन्याध्यात्मिकानि § 817

**तदित्थं द्वैते त्वि**त्यादि । द्विविधपुरुषोपभोगार्थ**मनेकात्मिकायाः प्रकृते**रित्यादिना ग्रन्थेन तदापत्तिभवनस्वरूपवर्णनम् । प्रक्रियन्ते विकारास्तत इति प्रकृतिः, प्रधीयन्तेऽस्मिन् महदादय इति प्रधानम्, बहूनां धानं बहुधानकम्, अमरणादविनाशादमृतम्, इत्याद्यन्वर्थनामिकायाः प्रकृतेरनेकात्मिकाया **आत्मभिः सुखदुःखमोहैः** प्रकाशप्रवृत्तिनियमात्मकैः प्राग-

---

१ रूपादितु] उणादौ नाम्युपान्तेति उ० ६०९ किदि तुटिः । इति हैमधातुपारायणे ६ । १२४ ॥
२ त] तथानेनापि ? ॥
४ य] तस्य प्र० ॥
७ णाच्छ] दृश्यतां पृ० १४ टि० ८ ॥
१७ प्र] दृश्यतां पृ० १२ पं० १९ ॥
२६ प्रा] दृश्यतां पृ० १३ पं० २० ॥

भिहिताचार्यपवनपाषाणवत् स्वपरेषां नर्तिकापर्णनावामात्मनश्च प्रतिपत्तिचलनधरणकरणैरिवेति । ते हि वैकारिकतैजसभूतादिविकाररूपाः सुखदुःखमोहाः प्रकाश[प्र]वृत्तिनियमात्मकाः सत्त्वरजस्तमोलक्षणा गुणाः साम्यावस्थायां प्रकृतिः इत्युच्यन्ते, वैषम्येण तु परिणामानुक्रममापन्नाः परस्पराविनिर्भागवृत्तयोऽङ्गाङ्गिभावेन परिणामाद् विकारीभवन्तः शब्दादीनारभन्ते,
- /ms **तैर्महदा- दिना परिणामानुक्रमेणारब्धाः शब्दादयोऽपि तदात्मका एव,** *शब्दादिपरिणामानुक्रमं साधनानुषङ्गेण स्वयमेव वक्ष्यति, तदात्मकत्वं तावत् साध्यते, तदात्मका एव सुखाद्यात्मका एव शब्दादयः, **तदात्मकत्वाभिव्यक्तकार्यत्वात्,** ते सुखादय आत्मा तदात्मा, तद्भावस्तदात्मकत्वं सुखाद्यात्मकत्वम्, तदात्मकत्वेनाभिव्यक्तं कार्यं येषां [ते] तदात्मत्वाभिव्यक्तकार्याः शब्दादयः, तद्भावात् तदात्मत्वाभिव्यक्तकार्यत्वात्, **मृत्पिण्डकार्यशिवकादिमृत्त्ववत्,** यद् यदात्मत्वेनाभिव्यक्तकार्यं वस्तु तत् तदात्मकमेव दृष्टम्, यथा मृदः कार्यं पिण्डः, तस्य कार्यं शिवकः, एवं क्रमेण स्तूपककुशूलकादि यावद् घटः कपालानि वा मृदात्मकान्येव कार्याणि, मौलस्य कारणस्यात्मना विना उत्तरोत्तरेषां कार्याणामभावादादौ मध्येऽवसाने च मृदात्मकत्वं दृष्टमेवं शब्दादयः सुखादीनां कार्यम्, शब्दादिकार्यं त्वाकाशादि, तत्कार्यं च गवादि घटादि, सर्वं सुखाद्यात्मकत्वेनाभिव्यक्तं तदात्मकमिति ग्राह्यम् । कथं सुखाद्यात्मकत्वेन शब्दादि कार्यमभिव्यक्तमिति चेत्, सुखाद्युपलब्धेः । **सुखात्मकानां चेत्यादिना** तद्दर्शयति याव**दात्मत्वेनाभिव्यक्तं कार्यमेषां शब्दादीना**मिति गतार्थम् । एवं तावद् भूतादिनाहङ्कारेणारब्धाः शब्दादयः ।

§ 818

**यानि तैरारब्धानी**त्यादि यावत् **सुखादिमया एव,** परिणामानुक्रमेण भूतानामाकाशादीनां शब्दादिभिः सुखादिमयैरारम्भं दर्शयति । तत्र **शरीरादीन्याध्यात्मिकानी**ति शरीरीभूतानि शब्दाद्यारब्धानि
266/mj

* * *

भूतादीनि वैकारिकारब्धानि चेन्द्रियाणि त्रयाणां सुखदुःखमोहानां सन्निवेशविशेषाः सुखादिमया एव, तथा पृथिव्यादयस्तन्मयकारणारब्धत्वात् । यद् यन्मयैः कारणैरारब्धं तन्मयं तत्, कार्पासिकपटवत् । भूतैरारब्धानि पुनः शरीरादीनि पटकुटिवत् परम्परारब्धत्वात् । अनेकात्मकैकपूर्वकं शरीरम-

---

२८ ध] अत्र **॰धारणकारणै॰** इत्यपि पाठः स्यात् ॥
२८ हि] सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥ --**साङ्ख्यका॰** ॥
४ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
५ सा] **साधुना॰**nayacakra-ms-bhā ॥
८ दात्म] **॰त्मत्वेना॰**nayacakra-ms-ya ॥
१० दात्म] **॰त्मनेनाभि॰** प्र॰ ॥
११ स्तू] **स्तूपकुशू॰**nayacakra-ms-ya ॥
१४ सु] **सुखानां** प्र॰ ॥
१५ स] **सर्वं च सुखा॰**nayacakra-ms-bhā ॥

न्वितविकारत्वाच्चन्दनशकलवत्, नैकैकपूर्वकं नापूर्वकमन्वितत्वात् । अन्वाह च--

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः
॥ श्वेताश्व° ४ । ५§ 821

* * *

**भूतादीनि** भूतादिमयानि त्रिगुणानि **वैकारिकारब्धानि च** श्रोत्रादीन्येकादशेन्द्रियाणि सर्वाण्येव **त्रयाणां सुखदुःखमोहानां सन्निवेशविशेषाः**, ततस्तन्मयता । बाह्यानि घटादीनि रूपादिसमूहत्वात् तेषां च सुखाद्यात्मकत्वात् तन्मयानि तदात्मकान्येव । **तथा पृथिव्यादयस्तन्मयकारणारब्धत्वा**दिति म- - /ms
हदादेः सकलस्य विकारस्य ब्रह्मादिस्तम्बान्तस्य च जगतः सुखादिमयकारणारब्धत्वात् । **यद् यन्मयै**रित्युपनयः, **तन्मयं** तदिति निगमनम् । दृष्टान्तः **कार्पासिकपटव**दिति, कार्पासविकारैस्तन्तुभिरारब्धः पटोऽपि कार्पासिक इति यथोच्यते तथा भूतानि सुखाद्यारब्धशब्दाद्यारब्धानि सुखाद्यात्मकानि । **भूतैरारब्धानि पुनः शरीरादीनि,** घटादीनि **आदि**ग्रहणात्, **पटकुटिवत् परम्परारब्धत्वात्,** यथा कार्पासिकतन्त्वारब्धपटमयी कुटिरपि कार्पासिकी इत्युच्यते तथा सुखाद्यारब्धशब्दाद्यारब्धभूताद्यारब्धपृथिव्यादिगवादिघटादिसरित्समुद्रमन्दरादीन्यपि तदात्मकानि । § 822

**अनेकात्मकैकपूर्वकं शरीर**मिति प्रतिज्ञा । किं पुनः कारणमेवं प्रतिज्ञायते ? प्रोक्तपुरुषाद्येककारणपूर्वकत्वनिराकरणार्थं वक्ष्यमाणेश्वरादिकारणपूर्वकत्वनिराकरणार्थं च । को हेतुः ? **अन्वितविकारत्वात्,** अन्विता विकारा यस्य तदन्वितविकारम्, हस्ताकुञ्चनप्रसारणाङ्गुल्युत्क्षेपणापक्षेपणपादप्रक्षेपाङ्गविवर्तनादिविकाराः शरीरावयवाश्च सुखादिभिः शब्दादिभिश्चान्विता विकारैः, तस्मादन्वितविकारत्वा**च्चन्दनशकलवत्,** यथा मृदुसुरभिशीतहरितरक्तश्वेतादिभेदस्पर्शरसरूपगन्धादिविकाराणि चन्दनशकलानि सुखाद्यन्वितानि परमाणुद्व्यणुकाद्यनेकात्मकैकचन्दनतरुपूर्वकाणि तथेदं शरीरमपि सुखाद्यनेकात्मकैककारणपूर्वकमिति **नैकैकपूर्वकम्** यथा **पुरुष एव** इत्यादि, **नापूर्वकम्** न निर्हेतुकं नासत्पूर्वकं वैनाशिकाद्यभिमतवदित्येतस्य साधनस्य व्यावर्त्यार्थोद्देशार्थम्, **अन्वितत्वा**दिति - /ms
सामान्येनास्यैवोक्तस्य निगमनार्थम्, अथवा एकैकपूर्वकत्वादिनिराकरणसाधनं वा पृथगेव । § 823

**अन्वाह चे**ति पूर्ववत् । **अजा**मिति न जायत इत्यजा नित्या, अथवा

---

३ भू] दृश्यतां पृ° २५७ टि° ४ ॥
७ ब्र] ब्रह्मास्त° प्र° ॥
१८ स्ताकुञ्च] °ञ्चप्रसा° प्र° ॥
१९ क्षेपाङ्ग] °निवर्त- नाº nayacakra-ms-vinayacakra-ms-raṃnayacakra-ms-hī ॥
२४ पु] दृश्यतां पृ° १८९ पं° ५ ॥

पुनः **अज गतिक्षेपणयोः** पा॰ धा॰ २३० इति क्षिप्रगमनादजा, इयं प्रकृतिः क्षिप्रपरिणतिगतिसाधर्म्याद् बहुप्रसवसाधर्म्याद्वा अजेवाजा । **एकाम**द्वितीयां सर्वगताम् । मा भूदेकेकेति अनेकात्मकेकां **लोहितशुक्लकृष्णां** दुःखसुखमोहात्मकरजःसत्त्वतमोमयीम् । **बह्वीः प्रजा** अनन्ताः, प्रजायन्त
267/mj इति प्रजाः, महदहङ्कारतन्मात्रादि

* * *

सुखं च दुःखं चानुशयं च वारेणायं सेवते तत्र तत्र ।
विशन्ति योनिं व्यतिरेकिणस्त्वयः अजस्तु जायामतिमत्यशुद्धः ॥
§ 826

उभा सखायौ सयुजा सपर्णौ समानं वृक्षं परिषस्वजाते ।
तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ मुण्डको॰ ३ । १ । १ § 828

* * *

क्रमेण ब्रह्मादिस्तम्बान्ताः **सृजमाना**मुत्पादयन्तीं **सरूपाः** सुखाद्यात्मिका आत्मरूपा आत्मसरूपाः, यतो ह्यजा बहुवर्णिकात्मस्वरूपप्रजासर्जिनी प्रधानीति गण्यते । ताम**जो ह्येको जुषमाणः** सेवमानः प्रीयमाणः, स हि न जायत इत्यजो नित्यत्वात्, एकः सन्निधिभवनस्याभिन्नस्यैकरूपत्वात् सर्वगतत्वाच्च, तामेव **जुषमाणोऽनुशेते** अनुशयमनुबन्धं च तस्या न मुञ्चति अनुधावतीत्यर्थः, यथा वत्सोऽजामनुधावति तथा तां प्रकृतिं पुरुषः । **जहात्येनां भुक्तभोगामजोऽन्यः**, असावेव पुरुषोऽन्य एव तस्या उपरतः संवृत्तो भुक्तभोगां दृष्टदृश्यां विदितात्मानात्मविशेषः प्रकृतिपुरुषान्तरज्ञो नर्तक्या इव विकारान् बाह्यान् भ्रूक्षेपक्रमकरवलनादीननुशयहेतूनन्तःकरणशरीरादिसमुद्भूताननात्मभूतानुपलभ्य भिक्षुरिव स्वभावावचिन्तनाद् विरक्तोऽहमनया वृथा क्लेशितो बहिरन्तरशुद्धयेति विरमति, सापि दर्शितविकारा
- /ms दृष्टाहमनेन इति व्रीडितेव विनिवर्तत इति । तथैतदर्थसम्बन्धिनी व्याख्यातेव

---

२९ इ] **ईर्यप्रकृतिः**nayacakra-ms-ya । **ऽर्यप्रकृतिः** nayacakra-ms-bhā ॥

१ अनेकात्म] **॰त्मकेकी** प्र॰ ॥

५ सु] सुखलेशस्य तद्व्याप्तत्वाद् यावदिदं लिङ्गं न निवर्तते तावदवश्यं दुःखेन भवितव्यम्, पर्यायेण संस्कारस्य सामर्थ्याल्लोकान्तरोपपत्तेः । तथा चाह --**सुखं च दुःखं च हि संशयं च वारेणायं सेवते तत्र तत्र** । इत्येवमस्या गाथायाः पूर्वार्धमात्रमुद्धृतं **युक्तिदीपिका**ख्यायां **साङ्ख्यकारिकावृत्तौ** ५५ ॥

७ उ] द्वा सुपर्णा सयुजा सखाया इति मुण्डकोपनिषदि पाठः ॥

११ य] **प्रत्या**nayacakra-ms-ya । **पत्या** nayacakra-ms-bhā । अत्र **प्रकृत्या** इत्यपि पाठः स्यात् ॥

१२ प्र] **प्रधानेति**nayacakra-ms-bhā ॥

१७ दृ] **दृष्टदृश्या**nayacakra-ms-ya । **दृश्या** nayacakra-ms-bhā ॥

१७ कृतिपुरुषा] **॰षांरज्ञो**nayacakra-ms-bhā । **॰षांराज्ञो** nayacakra-ms-ya ॥

द्वितीया गाथा—

> सुखं च दुःखं चानुशयं च वारेणायं सेवते तत्र तत्र ।
> विशन्ति योनिं व्यतिरेकिणस्त्रयः अजस्तु जायामतिमत्यशुद्धः ॥
> इति ।§ 831

**उभा** उभौ, सुपां डादेशादुभा । **सखायौ** अन्योन्यसहितावेव विभुत्वनित्यत्वाभ्याम् । **सयुजा** पूर्ववद् डादेशात् समानयुजौ समानस्य सकारादेशात् । सह पर्णाभ्यां **सपर्णौ** सपक्षौ शुद्ध्यशुद्धिपक्षौ । **सुयुजौ सुपर्णा**विति वा पाठः, सुष्ठु अतीव युक्तौ सर्वगतत्वादविभागेन सदा युक्तौ शोभनपर्णौ च परस्परबन्धैक्यापत्तिजनितविचित्रवर्णसुखासुखपक्षौ । **एकं वृक्षं** लोकाख्याश्वत्थम्, स्थत्वादचलत्वाद् वृक्षोऽश्वत्थसाधर्म्यात्, **परिषस्वजाते** परिष्वक्तवन्तौ । **तयोरेकः** तयोः शकुन्योरेकवृक्षपरिष्वङ्गिणोरेक एव शकुनिर्भोगसमर्थस्तस्य पिप्पलस्य **पिप्पलं** फलं **स्वादु** भोग्यविकारविशेषं विचित्ररसमत्ति खादति भुङ्क्ते पुरुष एव भोक्तृत्वाज्ञत्वात् । **अनश्नन्नन्यः** प्रकृतिसंज्ञः शकुनिरभुञ्जानः **अभिचाकशीति** आभिमुख्येन तस्यात्यर्थं काशते, शकुनिप्रस्तुतेः पुँल्लिङ्गम् । § 832
268/mj

अथ कथमेककारणत्वप्रतिषेधानन्तरं शब्दैकगुणप्रवृत्ति वियदभ्युपगम्यते ? न प्रवर्तेतैवम्, असन्द्भुतेः, पुरुषवद् वन्ध्यापुत्रवद्वा । § 833

शब्दे त्रैगुण्यमस्त्येवेति चेत्, अत्रिगुणं सुखादि एकस्वात्मत्वाव्यतिरिक्तत्वं § 834

एतदधुना परीक्ष्यते --**अथ कथ**मित्यादि यावद् **वियदभ्युपगम्यत** इति । यद्यनेकात्मकैककारणत्वमिष्यते एव**मेककारणत्वप्रतिषेधानन्तरं** पुरुषाद्येककारणत्वप्रतिषेधाहितसंस्कारतिरोधानकालमप्यप्रतीक्ष्य त्वया कथं **शब्दैक**- - /ms

१ सुखं] सुखलेशस्य तद्व्याप्तत्वाद् यावदिदं लिङ्गं न निवर्तते तावदवश्यं दुःखेन भवितव्यम्, पर्यायेण संस्कारस्य सामर्थ्याल्लोकान्तरोपपत्तेः । तथा चाह --**सुखं च दुःखं च हि संशयं च वारेणायं सेवते तत्र तत्र** । इत्येवमस्या गाथायाः पूर्वार्धमात्रमुद्धृतं युक्तिदीपिकाख्यायां साङ्ख्यकारिकावृत्तौ ५५ ॥
२ न्ति] योनिव्यति॰nayacakra-ms-bhānayacakra-ms-vi **नयचक्र** nayacakra-ms-bhā । nayacakra-ms-hī ॥
२ तिम] ॰सत्य॰nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ ॥
२ शु] ॰ऽशुद्धःnayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃ ॥
३ सु] सुपी डा॰ प्र॰ । सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः । ७ । १ । ३९ । इति पाणिनीयव्याकरणे ॥
८ स्थ] स्तत्वत्वाद॰ nayacakra-ms-ya ॥
१३ स्तुतेः] पुलिंगम् प्र॰ ॥

**गुणप्रवृत्ति** वियदभ्युपगम्यते ? अभ्युपगम्यतां तावद् रूपादिसृष्टौ व्यवहारानुपातिनामेषां लोके दृष्टानां द्वित्र्याद्यनेकस्पर्शरसगन्धगुणानामनेकैकत्वात् तदात्मकवाय्वादिसृष्टिरस्तु नाम, त्वन्मतेन सह घटमानमिदं तु न युज्यते शब्दैनैकगुणा प्रवृत्तिरित्थम्भूतेनास्य तच्छब्दैकगुणप्रवृत्ति वियत् **गण गुण सङ्ख्याने** शब्दैकसङ्ख्यानप्रवृत्ति एकस्मात् कारणाद् भवत् त्वन्मतविरोधात्, नानेकात्मकैकस्माच्छब्दस्पर्शादिद्वित्रिचतुःपञ्चगुणाद् भवद् वाय्वादिवत् त्वन्मताविरोधात् । प्रयोगश्चात्र **--न प्रवर्तेतैवम्,** शब्दैकगुणाकाशं तन्न भवेदित्यर्थः, **असन्द्रुतेः, गुणसन्द्रावो द्रव्यम्** पा॰ म॰ भा॰ ५ । १ । ११९ इति लक्षणाभावात्, बहूनां हि गुणानामेकीभवनमैक्यगमनं सन्द्रुतिः, तदभावोऽसन्द्रुतिः, ततोऽसन्द्रुतेर्न प्रवर्तेत, **पुरुषवद् वन्ध्यापुत्रवद्वे**त्येतदनिष्टापादनमिति । § 835

---

१ दृष्टानां] तेभ्यो भूतानि पञ्च पञ्चभ्यः ।...तत्र शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद् वायुः, रूपतन्मात्रात् तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी । तेभ्यो भूतानि इति वक्तव्ये पञ्च पञ्चभ्यः इति ग्रहणं समसङ्ख्याकतस्तदुत्पत्तिज्ञापनार्थम्, तेन एकैकस्मात् तन्मात्रादेकैकस्य विशेषस्योत्पत्तिः सिद्धा । ततश्च यदन्येषामाचार्याणामभिप्रेतम्--एकलक्षणेभ्यस्तन्मात्रेभ्यः परस्परानुप्रवेशादेकोत्तरा विशेषाः सृज्यन्ते इति, तत् प्रतिषिद्धं भवति । किं तर्हि ? अन्तरेणापि तन्मात्रानुप्रवेशमेकोत्तरेभ्यो भूतेभ्य एकोत्तराणां भूतविशेषाणामुत्पत्तिः । तत्र शब्दगुणाच्छब्दतन्मात्रादाकाशमेकगुणम् । शब्दस्पर्शगुणात् स्पर्शतन्मात्राद् द्विगुणो वायुः । शब्दस्पर्शरूपगुणाद् रूपतन्मात्रात् त्रिगुणं तेजः । शब्दस्पर्शरूपरसगुणाद् रसतन्मात्राच्चतुर्गुणा आपः । शब्दस्पर्शरूपरसगन्धगुणाद् गन्धतन्मात्रात् पञ्चगुणा पृथिवी ।--**साङ्ख्यका॰ युक्तिदीपिका**, का॰ ३८ । शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात् तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी । एवं पञ्चभ्यः तन्मात्रेभ्यः पञ्च भूतान्युत्पद्यन्ते । जे॰ साङ्ख्यका॰ वृ॰ A, का॰ २२ । एवं **गौडपादभाष्ये**ऽपि, का॰ २२ । **पञ्चभ्यः पञ्च** महा**भूतानि** शब्दतन्मात्रादाकाशम्, तदेकलक्षणम् । स्पर्शतन्मात्राद्वायुः, स द्विगुणलक्षणः । रूपतन्मात्रात् तेजः, तत् त्रिगुणलक्षणम् । रसतन्मात्रादापः, ताश्चतुर्गुणाः । गन्धतन्मात्रात् पृथिवी, सा पञ्चगुणा । एवं पञ्चभ्यः पञ्च महाभूतान्युत्पद्यन्ते । जे॰ साङ्ख्यका॰ वृ॰ B, का॰ २२ । शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात् तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी, इत्यादिक्रमेण पूर्वपूर्वानुप्रवेशेन एकद्वित्रिचतुष्पञ्चगुणानि आकाशादिपृथ्वीपर्यन्तानि महाभूतानीति सृष्टिक्रमः । **साङ्ख्यका॰ माठरवृ॰**, का॰ २२ । शब्दतन्मात्रादाकाशं शब्दगुणम्, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः, शब्दस्पर्शसहिताद्रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणम्, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः, शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायते । **साङ्ख्यतत्त्वकउ**, का॰ २२ ॥

**३ श]** इत्थंभूतलक्षणेपा॰ २ । ३ । २१ इति सूत्रेण तृतीया ॥

**४ ग]** १८५४ गण संख्याने,... ...१८९३ ग्राम १८९४ कुण १८९५ गुण चामन्त्रणे । इति **पाणिनीयधातुपाठे** । गणण् संख्याने, कुण गुण केतण् चामन्त्रणे इति **हैम**धातुपाठे १० । ३०६--३०९ ॥

**५ ना] नानैका॰**nayacakra-ms-ya । **नानेकैका॰** nayacakra-ms-bhā ॥

**६ त्व]** त्वन्मतविरोधात् ? ॥

**६ गु] ॰गुण**[मा ?]**काशं** प्र॰ ॥

अत्राह --**शब्दे त्रैगुण्यमस्त्येवेति चेत्** । सर्वस्योक्तसुखदुःखमोहमय-
269/mj त्वाच्छब्दोऽपि तदात्मा त्रिगुण

* * *

प्रकाशाद्यात्मना मा प्रवर्तिष्ट निर्गुणत्वादेकत्वाद् वैषम्यानुपपत्तेरपरिणामित्वादनापत्त्यात्मकत्वात् पुरुषवत् । शब्दादि वाप्येकात्मकाद्येव, आपद्यमानत्वात्, सुखादिवत् । अनेकात्मकं वा सुखादि, तत एव, शब्दादिवत् ।

नैव प्रवर्तते सुखादि, अप्रवृत्तिलक्षणत्वात्, पुरुषवत् । त्रयमपि न न प्रवर्तते, अविभक्तस्वतत्त्वस्य तथा प्रविभक्तत्वेन व्यवस्थानात्, मयूराण्डकरसगतग्रीवादिभाववत्, यत इह भाव एव यतः ।

* * *

एवेति चेदित्याशङ्कायाम्, एवं चेन्मन्यसे, साधूक्तम्, एतदेव त्वा वाचयितुमवोचम्--शब्दैकगुणवियदप्रवृत्तिप्रसङ्ग इति । ततश्च यत् पुन**रत्रिगुणं सुखादि** सुखमेव पृथक् प्रधानावस्थायां सत्त्वं तदत्रिगुणम्, एकसुखस्वात्मत्वादव्यतिरिक्तं तस्य भावस्तत्त्वं यस्य तत् सुख**मेकस्वात्मत्वाव्यतिरिक्ततत्त्वम्,** प्रकाशादिश्च तस्य तत्त्वस्यात्मा सर्वत्राभेदभावात्, तेन **प्रकाशाद्यात्मना मा प्रवर्तिष्ट** मा आपत्तिभवनमनुभूत्, **निर्गुणत्वात्** गुणसन्द्रावानात्मकत्वात्, **एकत्वात्** अननेकात्मकैकत्वात्, **वैषम्यानुपपत्तेरपरिणामित्वात्,** वैषम्यापत्तितो - /ms
हि परिणामित्वं स्यात्, साम्यावस्थायां तु गुणानां तदभावाद् वैषम्यानुपपत्तिः, अतोऽपरिणामित्वम् । **अनापत्त्यात्मकत्वात्** रूपान्तरप्राप्त्यनात्मकत्वात्, तस्यां ह्यवस्थायामेवंस्वरूपं सत्त्वम् । दृष्टान्तः **पुरुषवत्,** यथा पुरुषोऽपि निर्गुणत्वादिधर्मत्वान्न प्रवर्तते तथा सुखाद्यपि मा प्रवर्तिष्ट । निर्गुणत्वादिधर्मत्वे सत्यपि सुखादि प्रवर्तत एव चेत् तथा तद्धर्मत्वात् पुरुषोऽपि प्रवर्ततामेभ्य एव सुखादिवत्, गुणस्यान्यतमस्यैव वा श्वयथुरकस्मात् कुत उत्पन्नः ? । किञ्चान्यत्, **शब्दादि वाप्येकात्मकाद्येव** निर्गुणमेकं सममपरिणामि चैवमादि, **आपद्यमानत्वात्** प्रधानावस्थायां प्रवर्तमानत्वात्, **सुखादिवत्** । **अनेकात्मकमित्यादि** विपर्ययधर्मापादनं गतार्थं तत एवेति । § 836

आह --**नैवेत्यादि** । सिद्धसाधनमिदं मा प्रवर्तिष्ट इति, न प्रवर्तत एव सुखादि, **अप्रवृत्तिलक्षणत्वात्,** न हि सुखं मोहो वा प्रवृत्तिलक्षणम्, किं तर्हि ? रज एव प्रवृत्तिलक्षणम्, प्रत्येकं हि सत्त्वादयः प्रकाशप्रवृत्तिनियमलक्षणास्त्रयोऽपि, ततोऽप्रवृत्तिलक्षणत्वान्न प्रवर्तते सुखं पुरुषवत् ।

---

९ त्वा ] त्वाम् ॥
१० यितुम ] °मवोच
शब्दे° nayacakra-ms-bhā ।
°मवोचत शब्दे° nayacakra-ms-ya
॥
१२ स्वात्म ] °त्वात् व्यति° प्र° । अत्र
°त्वादव्यति° इत्यपि पाठः स्यात् ॥
१८ स्थायामेवंस्व ] °स्वं
दृष्टान्तःnayacakra-ms-bhā ॥
२२ वाप्येका ]
°काद्येवnayacakra-ms-bhā ॥
२२ स ] समनपरिणामि
चैवमाद्यपद्यमानत्वात्प्रधानावस्थानां प्र° ॥
२४ त ] त एवेति प्र° ॥

वैषम्यावस्थायां तु रजः प्रवर्तते प्रवर्तयति च सुखं मोहं च अप्रवृत्तिलक्षणत्वात् तयोरिति । अत्रोच्यते **--त्रयमपि न न प्रवर्तते,** प्रवर्तत एव, **अविभक्तस्वतत्त्वस्य तथा प्रविभक्तत्वेन व्यवस्थानात्,** यदविभक्तस्वतत्त्वं तेन तेन प्रकारेण प्रविभक्तत्वेन व्यवतिष्ठते तत् प्रवर्तत एव, **यथा मयूराण्डकरसगतग्रीवादिभावाः,** मयूराण्डकरसावस्थायां ग्रीवाबर्हादयोऽविभक्तस्वतत्त्वा
- /ms ग्रीवादित्वेन प्रविभक्तरूपा व्यवतिष्ठमानाः प्रवर्तमाना एव, नाप्रवर्तमानाः । यन्न प्रवर्तते तदविभक्तस्वतत्त्वं सत् कदाचित् प्रविभक्तत्वेन न व्यवतिष्ठते यथा पुरुषो यथा वा मयूराण्डकरसे हंसादिग्रीवादय इति । किं कारणम्
270/mj ? द्रव्यार्थनयविकल्पानां सत्कारण

* * *

नन्वविभक्तरसग्रीवाद्यापत्तिवत् प्रधानस्यैव च सापत्तिः । कस्य वा न मनोरथः... ...कल्पना । अविभक्तानेकार्थकारणमेवेदं विभक्तवृत्ति पृथिव्यादि मयूरग्रीवादि दध्यादि व्रीह्यादि, उक्तवक्ष्यमाणवत् ।

भिन्नात्मकतायां तु सत्त्वं न प्रकाशेत, अप्रवृत्तत्वात्, पुरुषवत् पूर्ववदनग्निप्रकाशवद्वा ।

* * *

वादिनामसदापत्तिप्रवृत्तेर्यतो यस्मादिह एतेषु वादेषु भाव एव यतः नियतः निःशब्दलोपात् । तस्मादप्रवृत्तिलक्षणं चेत्, न स्यात् सुखादि इति । § 837

आह **--नन्वविभक्तरसग्रीवाद्यापत्तिवत् प्रधानस्यैव च सापत्तिः ।** त्वदुक्तमयूराण्डकरसगताविभक्तग्रीवादिप्रविभागापत्तिभावदृष्टान्तसामर्थ्यादेव त्रिगुणसाम्यावस्थैकप्रधानापत्तिरेव सा [सि]ध्यति, न सुखाद्यापत्तिरिति । अत्रोच्यते **--कस्य वा न मनोरथः** कथं भवान् एकमेव कारणमनेककार्यतया विपरिवर्तमानम् इत्येतद् दर्शनं प्रतिपाद्येतेति । तस्य च कारणस्य प्रधानं पुरुषो नियतिः शब्दब्रह्म इत्यादिसंज्ञा त्वयेष्टा यास्तु सास्तु, किं नो विवादेन ? तदर्थ एव मे प्रयास एककारणमयत्वं त्वं प्रतिपादयितव्य इति, एष प्रतिपादितोऽसि, त्वमेव तु न वेत्थेति गतार्थं यावत् **कल्पनेति** ।
§ 838

तदुपपादयसे **--अविभक्तानेकार्थकारणमेवेदं पृथिव्यादि,** अविभक्तोऽनेकार्थो यस्मिंस्तदविभक्तानेकार्थम्, किं तत् ? कारणमस्य पृथिव्यादेः तदविभक्तानेकार्थकारणं पृथिव्यादि, न विभक्तसुखाद्यनेकार्थात्मकैककारण-

---

६ दा] °चित्तत्प्रवि°nayacakra-ms-bhā ॥
९ क] कस्य वा न मनोरथः कथं भवानेकमेव कारणमनेककार्यतया विपरिवर्तमानमित्येतत् प्रतिपाद्येतेति ? तस्य च यथेष्टमस्तु संज्ञाकल्पना इत्याशयको मूलपाठोऽत्र सम्भाव्यते ॥
१२ भि] दृश्यतां पृ° २७८ पं° ८, पृ° २०५-- २, २२३-- १, २ ॥
१५ दाप] °पत्तिर्प्रत्तेः, प्र ?वृत्ते°nayacakra-ms-bhānayacakra-ms-pā विना । अत्र °पत्तिप्रसक्ते° इत्यपि पाठः स्यात् ॥
१६ सुखा] °दिरिति प्र° ॥
१७ न] ननु विभ° प्र° ॥
२४ तिपा] °पादिपासि त्वामेव न तु वे°nayacakra-ms-bhā ॥

पूर्वकम् । विभक्ता वृत्तिरस्य पृथिव्यादेस्तद् **विभक्तवृत्ति** पृथिव्यादि, सा वृत्तिः पृथिव्युदकघटादित्वापत्तिः । **मयूरग्रीवादी**ति, ग्रीवाबर्हशिखण्डादिवृत्तिर्विभ- - /ms क्ता तदात्मानेकार्थाविभक्ताण्डकरसगतकारणैव । **दध्यादि**वृत्तिः क्षीरपूर्वा, **आदि**ग्रहणात् पुनः शुक्ररसरुधिराङ्गोपाङ्गादि । **व्रीह्यादि** पूर्वोक्तम्, **आदि**ग्रहणादाम्रपनसमातुलुङ्गादिपत्रपुष्पफलादिवृत्तिस्तदात्माविभक्तपूर्वा । दृष्टान्तबाहुल्यं व्यापित्वप्रदर्शनार्थम् । **उक्तवक्ष्यमाणवत्,** वत्करणं प्रत्येकमभिसम्बध्यते उक्तवद् वक्ष्यमाणवत् । पुरुषनियत्याद्यभिन्नैककारणवदित्युक्तवत्, घट एव सर्वम् इति विधिनियम एवं वक्ष्यमाणवत् । एवं तावत् कारणमयवादो यथास्माभिरिष्टस्तथा घटते, न यथा त्वयेष्ट इत्युक्तम् । § 839

इदानीं त्वत्पक्षे दोषा वक्ष्यन्ते--प्रकाशप्रवृत्तिनियमानां तु **भिन्नात्मकतायां सत्त्वं न प्रकाशेत** इति प्रतिज्ञा दिङ्मात्रत्वेन, **अप्रवृत्तत्वात्, पुरुषवत्** । त्वयैव हि प्रधानावस्थायामप्रवृत्ताः समा इतीष्यन्ते गुणाः सत्त्वादयः, तस्मात् सिद्धमप्रवृत्तत्वम् । **पूर्ववद्वे**ति प्रधानावस्थायामिवेत्यर्थः, यथा प्रधानावस्थायामप्रवृत्तत्वान्न प्रकाशते सत्त्वमेवमुत्तरकालमपि । तथा रजस्तमसोः प्रवृत्तिनियमनिषेधः कार्यः । **अनग्निप्रकाशवद्वा,** यथाग्निरप्रवृत्तोऽप्रवृत्तिलब्धात्मा अनग्निः, अनग्निश्च न प्रकाशते, तथा सत्त्वमलब्धप्रवृत्ति 271/mj

* * *

ननु प्रकाशात्मकत्वादेव सत्त्वस्य रजसा प्रवर्त्यत्वम्, अग्नेरिव सन्धुक्षणेन । यद्यप्रवृत्तोऽसावसंस्तर्हि अप्रवृत्तस्वात्मत्वाद् वान्ध्येयवत् । एवं हि कार्यं कारणे सद् यदि तद् वर्तते प्रवर्तते, अनारम्भात्, वर्ततेरस्त्यर्थत्वात् ।

न, प्रकर्षेणावृत्तत्वात् । रजोनुग्रहात् तद्रूपव्यक्तिः प्रकर्षेण वृत्तिः । न, रजसोऽपि सत्त्ववदपरिसमाप्तरूपत्वात् । रजसोऽपि हि तथा काशनं व्यक्तिरिति प्रकाशात्मकसत्त्वानुग्रहाद् भवति, अप्रवृत्तं च कथमन्यप्रवर्तने प्रवर्तेत ?

* * *

अप्रवृत्तत्वान्न प्रकाशेत । आह **--ननु प्रकाशात्मकत्वादेवे**त्यादि, अप्रवृत्तत्वमसिद्धं **सत्त्वस्य रजसा प्रवर्त्यत्वात् अग्नेरिव सन्धुक्षणेन,** यथाग्निर्भस्मच्छन्नः सन्नपि न प्रकाशते, तुषचीवरेन्धनादिभिस्तु सन्धुक्षितः प्रकाशते, न चाप्रकाशमानोऽग्निर्न भवतीति । अत्रोच्यते **--यद्यप्रवृत्तो**ऽग्निस्तस्यामवस्थायाम- - /ms

१ स्य ] °स्य देस्तद् प्र° ॥
२ ण्डा ] °ण्डकादि° nayacakra-ms-bhā ॥
४ पु ] पुरा प्र° ॥
७ माण ] °णत्वात् प्र° ॥
८ ए ] एवnayacakra-ms-ya ॥
८ माण ] °णत्वात् प्र° ॥
१० क ] °कतया प्र° ॥
१२ वृत्ताः ] °त्तः प्र° ॥
१६ ग्निश्च ] °श्च प्रकाशते तथाnayacakra-ms-ya । °श्च प्रकाशते । त । तथा nayacakra-ms-bhā । अत्र °श्च प्रकाशते न, तथा इत्यपि पाठः स्यात् ॥
१८ अप्र ] दृश्यतां पृ° २७५ पं° ११ पृ° २०६-- २ ॥
१८ ए ] दृश्यतां पृ° २०६-- १ ॥
२८ मा ] °ग्निर्भव°nayacakra-ms-ya ॥

सन्नेवासौ, अतोऽस्मदिष्टमप्रकाशत्वमेव गमयति, अग्नेर्हि एषा काचित् प्रकाशनस्य मात्रा सैवात्मा, प्रकाशनात्मप्रवृत्त्यभावात् तदासौ तर्ह्यसन् वन्ध्यापुत्रवत्, तथा सुखमप्यप्रवृत्तत्वादिति । **एवं हीत्यादि**, कारणे कार्यस्य सत्त्वमेवं हि स्याद् यदि तत् सत्त्वं प्रकाशात्मना प्रवर्तते, अनारम्भात् । इतरथा अर्थान्तरसम्बन्धारभ्यत्वादसत्कार्यवाद एवायमपि स्यात्, यथाहुरसत्कार्यवादिनः क्रियागुणव्यपदेशाभावादसत्, समवाय्यसमवायिकारणसम्बन्धे सति द्रव्याणि द्रव्यान्तरमारभन्ते, येषां चाधिकृतमारम्भसामर्थ्यं तैरारब्धे कार्यद्रव्ये तत्समवेता नियमत एव गुणाश्च गुणान्तरमारभन्ते इत्यारम्भवादः प्रसज्यते, स चानिष्टः । तस्मादनारम्भाद् वर्तते सत्त्वं प्रकाशनात्मना, यस्मादेवं **हि कार्यं कारणे सद् यदि** *सत्त्वं **वर्तते प्रवर्तते** । किं कारणम् ? **अनारम्भात्** आरम्भवादपरित्यागात् । कुतो वर्तते प्रवर्तत इति पर्यायकथनमिति चेत्, उच्यते— **वर्ततेरस्त्यर्थत्वात्**, वर्ततेऽस्ति भवति प्रवर्तत इति पर्यायाः । इतर आह **--न, प्रकर्षेणावृत्तत्वात्** । न हि वर्ततिः प्रवर्ततिपर्यायः प्रकर्षार्थेन प्रशब्देन विशिष्टाया वृत्तेरन्यार्थत्वात् वर्तनमात्रस्याविवक्षितत्वात् प्रकृष्टवृत्तिविवक्षितत्वात् । सा च **रजोऽनुग्रहात् तद्रूपव्यक्तिः प्रकर्षेण वृत्तिः**, रजसानुगृहीतस्य सत्त्वस्य बीजस्येवाबाद्यनुगृहीतस्योच्छूनाङ्कुरत्वादिवृत्तिः सृष्ट्यभिमुखी सृष्टिरेव वा सात्र विवक्षितेति । अत्रोच्यते **--न, रजसोऽपि सत्त्ववदपरिसमाप्तरूपत्वात्** । तस्यां ह्यवस्थायां रजःप्रवृत्तिलभ्यप्रकाशात्मरूपव्यक्तिसत्त्ववद् **रजसोऽपि हि** स्वरूपव्यक्तिरसमाप्तरूपैव सत्त्वात्
- /ms प्रतिलभ्यत्वात् । लब्धात्मवृत्ति हि स्वयं सद् रजः सत्त्वे प्रकाशनप्रवर्तनाय समर्थं स्यात्, अप्रकाशितस्य सत्त्वेन तस्य स्वरूपव्यक्तिरेव नास्ति, कुतः सत्त्वप्रकाशात्मप्रवर्तना रजसः ? **तथा काशनं** प्रवर्तकत्वेनाभि**व्यक्तिः**, काशनमेव हि **स्वरूपव्यक्तिरिति प्रकाशात्मके**त्यादि यावत् **प्रवर्ते**तेति गतार्थम्, अप्रतिलब्धात्मनाननुग्रहात् । § 840
272/mj

एवं तु नानयोरितरेतरानुग्राहिता उत्थाप्यसाहायकशक्तित्वाद् वाताहतनौद्वयवद् ग्लानशिबिकावाहकवत् । असम्पूर्णशक्तिता वाऽप्रकर्ष इति कारणतैव न स्यात् तस्य असम्पूर्णशक्तित्वादुप-

---

५ इ] **इतरथांतर**° प्र° ॥
६ वादिनः]
क्रियागुणव्यपदेशाभावादसत्कार्यम् । ९ । १ । १ । द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमारभन्ते । १ । १ । १० । इति **वैशेषिकसूत्रे** ॥
१० *] **तत्वं**nayacakra-ms-ya । **तत्व** तत्र ? nayacakra-ms-bhā ॥
१३ प्र] **प्रवर्ततिः** **प्रवर्ततिपर्यायः**nayacakra-ms-bhā । **प्रवर्तति प्रवर्ततिपर्यायः** nayacakra-ms-ya ॥
१४ वृ] **प्रवृ**°nayacakra-ms-ya ॥
१४ व] **वर्तमानमात्र**° प्र° ॥
१६ बीज] °**स्येवाद्यनुगृ**° प्र° ॥
२५ ए] दृश्यतां पृ° २०७-- १ ॥

हतबीजवत् । असदकरणादितश्चान्यतो न तत्स्वरूपव्यक्तिः । यदा च सुदूरमपि गत्वा प्रागवृत्तेरसत्कार्यत्वं मा भूदिति प्रकर्षः परिणामादेव तदा युवत्ववदात्ममात्रवृत्तित्वमेव परिणामस्यान्यत्र वृत्तस्यान्यत्रापरिणामकत्वात्, नान्यत्र वृत्तोऽन्यदन्यथा करोति ।

§ 841

**एवं त्वित्यादि** । **नानयोः** सत्त्वरजसोरितरेतरानुग्राहिता **उत्थाप्यसाहायकशक्तित्वात्,** सहायभावः साहायकम्, तस्मिंस्तेन तदेव वा शक्तिः, सा उत्थाप्या ययोस्तदानीमेव ते वस्तुनी उत्थाप्यसाहायकशक्तिनी, तद्भावादुत्थाप्यसाहायकशक्तित्वाद् **वाताहतनौद्वयवत्,** यथा जलेऽन्योन्याबद्धे द्वे नावौ नेतरेतरत्राणाय तथा सत्त्वरजसी । शिबिकावाहकवदितरेतरानुग्राहिता किं न भवेदिति चेत्, न, उत्थाप्यविशेषणात्, अयमेव हि दृष्टान्तो **ग्लानशिबिकावाहकवत्,** यथा ग्लानोऽनुत्थापितो न शक्नोति वोढुमुत्थाप्यसाहायकशक्तित्वात् तथानुत्थापिते सत्त्वरजसी न शक्नुतः परस्परं प्रवर्तयितुं स्वयमलब्धात्मके इति प्रकर्षवृत्तेरभावः, प्रकर्षवृत्त्यभावादसम्पूर्णशक्तितेत्यत आह --**असम्पूर्णशक्तिता वाऽप्रकर्ष इति** इत्थं **कारणतैव न स्यात् तस्य** सत्त्वस्य **असम्पूर्णशक्तित्वादुपहतबीजवत्,** यथोपहतं बीजमसम्पूर्णाङ्कुरोत्पादनशक्तित्वान्न कारणमेवं सत्त्वमपि स्यात् । अभ्युपेत्यापि कारणत्वं साम्यावस्थायां सत्त्वस्य **असदकरणादितश्चान्यतो न तत्स्वरूपव्यक्तिः,** तस्य सत्त्वस्य प्रकाशनस्वरूपप्रकर्षोऽन्यतो रजस्तमसोः पुरुषतोऽन्यतोऽन्यतो वा कुतश्चिन्न भवति असदकरणादिभ्यो हेतुभ्यः, तद्यथा --**असदकरणाद्** यथा मृदि सदेव कार्यं घटादि क्रियते न खपुष्पादि, स च मृदः स्वात्मनियतो घटात्मस्वरूपव्यक्तिप्रकर्षो नान्यतः पुरुषादेस्तन्त्वादेर्वापत्तिकारणाद् भवति, किं तर्हि ? स्वत एव भवति, तथा सत्त्वस्वरूपव्यक्तिप्रकर्षो नान्यतो भवति, किं तर्हि ? स्वत एव । एवम् **उपादानग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्** साङ्ख्यका० ९ इत्येतेभ्यो हेतुभ्यः सत्त्वगुणोऽन्यनिरपेक्षस्वरूपव्यक्तिप्रकर्ष इति ग्राह्यम् । एवं सत्त्वस्य प्रकाशनं तमसा सह योज्यं रजसश्च प्रवर्तनमिति । § 842

- /ms

१ लेऽन्योन्या] अन्योन्यमाबद्धे इत्यर्थः । दृश्यतां पृ० ३४ टि० ५ ॥

१७ अभ्युपेत्या] °त्यादि **कारणत्वं सावस्थायां** प्र० ॥

२० अ] असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥ ९ ॥--**साङ्ख्यका°** ॥

२३ स्व] **स्यरूप°** प्र० ॥

२४ उ] असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥ ९ ॥--**साङ्ख्यका°** ॥

*किञ्चान्यत्, **यदा च सुदूरमपी**त्यादि यावत् **परिणामकत्वात्** । सुदूरमपि विचाराध्वना **गत्वा** न प्रागवृत्तेरसत्कार्यपरिहारेण प्रकर्षः परिणामवादादृते, अतः परिणामः प्रकर्षेण वृत्तेः कारणमेषितव्यम् । यदा चैवं **तदा** परिणामाभ्युपगमेन पुनरप्येतदेवापन्नम्--परिणामादात्मन्येव वर्तते **युवत्ववत्, अन्यत्र वृत्तस्य परिणामस्यान्यत्रापरिणामकत्वात्,** जिनदत्ते वृत्तः परिणामो न साधुदत्ते कौमारयौवनादि प्रवर्तयति कौमारं वा यौवनं वा, किं तर्हि ? जिनदत्त एव करोति, **ना[न्यत्र वृत्तोऽ]न्यदन्यथा करोति** यथा, तथा न सत्वे प्रवृत्तिं कश्चिदन्यः कुर्यात्, स्वत एव प्रवर्तेतेति । § 843
273/mj

पूर्ववदुदाहरणादेवाप्रवृत्त्यात्मकत्वं सुखस्य, को हि विशेषो रजःप्रवर्तनादृते क्षीरदधिपरिणामकालवत् पश्चात् प्रवृत्तं पूर्वं च न प्रवृत्तमिति ? न, परिणामस्य तत्रैवोक्तत्वात् प्रकाशात्मैव वृत्तिः, इतरथा स प्रकाशो न स तथाऽप्रवृत्तत्वात् तथाऽभूतत्वाद् घटपटवत् । यैव च प्रवृत्तिः स एव प्रकाशः, तथावृत्तत्वात्, घटघटस्वात्मवत् । § 844

प्रवर्त्यप्रवर्तकत्वात् पल्लवपवनवन्नेति चेत्, न, तदात्मन एव प्रवृत्तत्वात् सन्निधिमात्रात् पूर्ववदप्रवर्तनात् । य एवासौ सत्वस्यात्मा प्रकाशः स प्रवर्तकस्तथा- § 845

एवं तावदप्रवृत्तप्रवृत्तिप्रतिषेधादनग्निप्रकाशदृष्टान्तप्रसङ्गागतवादमवतार्य पूर्ववदुदाहरणे प्रसङ्गमुत्थापयिष्यन्नाह --**पूर्ववदुदाहरणादेवे**त्यादि यावन्**न प्रवृत्त**मिति । नन्वेतत् त्वयाभ्युपगतं पूर्वावस्थोदाहरणादेव पाश्चात्यावस्था विशिष्टा इति । अन्यथा **हि को विशेषः** पूर्वपरावस्थयो **रजःप्रवर्तनादृते ?** तस्मात् स विशेषो रजःप्रवर्तनादेव । को दृष्टान्तः ? **क्षीरदधिपरिणामकालवत्,** यथा क्षीरावस्थातो दधित्वपरिणामावस्था विशिष्टा पूर्वं क्षीरकाले न दध्यासीत् पश्चाद् भूतमिति दृष्टम्, प्रकर्षवृत्त्या च विना न भवत्ययं विशेषस्तथा सोऽपीति । एतन्**न, परिणामस्य तत्रैवोक्तत्वात्,** नायं विशेषः परतः सिध्यति, कुतः ? परिणामस्य तत्रैव सुखेऽभ्युपगम्यास्माभिरुक्तत्वात् । यस्मात् **प्रकाशात्मैव वृत्तिः,** प्रकाशस्य यः स्वात्मा स एव वृत्तिः, प्र-

- /ms

१ *] चान्यत् किं nayacakra-ms-ya ‖
१ म] °मपीतिnayacakra-ms-ya ‖
२ विचारा] °रात्वना प्र° ‖
२ वादा] °दादृतेनः परि°nayacakra-ms-bhā । °दादतेन परि° nayacakra-ms-ya ‖
७ ना] दृश्यतां पृ° २०७-- १ ‖
९ पू] दृश्यतां पृ° २०७-- १ ‖
१५ प्र] दृश्यतां पृ° २०७-- २ ‖
१८ तिषेधाद] °दग्निप्र° प्र° । दृश्यतां पृ° २७० पं° ५ ‖
१८ म] °मवप ?सार्य प्र° ‖
१९ पू] दृश्यतां पृ° २७० पं° ४ ‖
२३ पू] पूर्वक्षी° प्र° ‖

काशस्यैव च वृत्तिः कालः, स च ततोऽनन्यः, क्षीरदधिपरिणामावस्थयोः कालाख्यत्वात् क्षीरदधित्वापत्तिः कालभेदात्, स च परिणामः सुखस्वात्मेति नान्यत् कारणं मृग्यं स्वात्मन एव परिणामात् । **इतरथा स प्रकाशो न सः**, स प्रकाश एव यदि प्रवृत्तिविशेषो न स्यादन्यात्मा स्यात् स एव प्रकाशात्मा न स्यात्, **तथाऽप्रवृत्तत्वात्** तेन प्रकाशात्मप्रकारेणाप्रवृत्तत्वात्, पर्यायेण तमर्थं स्फुटीकुर्वन्नाह --**तथाऽभूतत्वा**दित्यर्थः । दृष्टान्तो **घटपटवत्**, यथा घटः पटो न भवति तेन प्रकारेणाभूतत्वात् पटोऽपि घटो न भवति तथा स प्रकाशोऽप्रकाश एव स्यादिति । विपर्ययेण तत्स्वरूपसाधनमुच्यते --**यैव च प्रवृत्तिः स एव प्रकाशो** नान्यः कश्चिदर्थ इति प्रतिज्ञा, **तथावृत्तत्वात्** तथाप्रवृत्तत्वादित्यर्थः **घटघटस्वात्मवत्**, यथा घटप्रकारेण घटात्मनैव वृत्तत्वाद् घट एव घटस्वात्मा नान्यत् किञ्चित् तथा प्रवृत्तिरेव प्रकाश इति । § 846

इह रजः सन्निहितमपि प्राक् सन्निधिमात्रादेवाप्रवर्तकं स्वयमप्रवृत्तं सत्त्वाधीनप्रवृत्तित्वात्, किन्तु प्रवर्त्यमप्रवर्तनात् । कस्तर्हि **प्रवर्तकः** ? उच्यते --**य एवासौ सत्त्वस्यात्मा प्रकाशः** । कथमिति चेत्, उच्यते --**तथाप्रवर्त्यव्यक्तिस्वरूपः**, तेन तेन प्रकारेण शब्दादिनिर्वर्त्यप्रकारेण प्रवर्त्यव्यक्तिस्वरूपः प्रकाशो नर्तकाचार्य इव भ्रूक्षेपणादिप्रवर्तनाभिव्यञ्जनात्मना नर्तक्याः (Edtext outside numbered paragraph) प्रवर्तमानः प्रवर्तकः । किं कारणम् ? **तथाव्यापारणात्**, तेन व्यक्तिरूपेण प्रवर्तमानस्य रजसो व्यापारणात्, सत्त्वेनैव हि प्रकाशनरूपेण प्रवर्तमानेन रजः प्रवर्त्यते, तस्मात् स (Edtext outside numbered paragraph)त्त्वस्यात्मा प्रकाशस्तथाव्यापारणाद् रजसः प्रवर्तक इति त्वदभिमतप्रवर्तकत्वविपर्ययापत्तिरेव रजसः प्रवर्त्यत्वा (Edtext outside numbered paragraph)त् सत्त्वेन सत्त्वाधीनप्रवृत्तित्वात् सत्त्वस्यैव प्रवर्तकत्वात् पक्षधर्मविपरीतता चेति । तच्च सत्त्वस्य प्रवर्तकत्वं **रजःप्रवृत्त्यात्मरूपापादनात्**, रजसो हि प्रवृत्तिरात्मा, तदेव रूपं रजःप्रवृत्त्यात्मरूपम्, तदापाद्यते सत्त्वेन सत्त्वाप्रकाशिते प्रवृत्त्यभावात्, सत्त्वापादितं प्रवृत्त्यात्मकरूपं रजः, (Edtext outside numbered paragraph)तस्माद् रजःप्रवृत्त्यात्मरूपापादनात् स (Edtext outside numbered paragraph)त्त्वं प्रवर्तकम् **इ** (Edtext outside numbered paragraph)**तरतथात्मरूपापादनाद् रजोवत्** । **रजोऽपि हि** इत्यादि, रजसोऽपि हि प्रवर्तक (Edtext outside numbered paragraph)त्वमित्थमेव युज्यते, **रजोऽपि हि** यस्मात् त्वन्मतेन प्रवर्तमान**मितर**योः सत्त्वतमसो**स्तथास्वरूपापादनादृते किमन्यत् करोति** ? प्रवृत्तिरूपमेवापादयत् प्रवर्तकमितीष्यते, नान्यथा । यथा तत् पूर्वं प्रकाशनियमात्मभ्यामप्रवृत्तयोस्तयोः प्रवर्तनादेव प्रवर्तकमेवं सत्त्वमितर (Edtext outside numbered paragraph)तथास्वरूपापादनात् प्रवर्तकमस्तु, को दोषः ?

---

११ घ] घटपट° प्र° ॥

§ 847

**प्रवर्त्यप्रवर्तकत्वात् पल्लवपवनवन्नेति चेत्** । स्यान्मतम्--यैव प्रवृत्तिः स - /ms एव प्रकाशः इत्य- युक्तं प्रवर्त्यप्रवर्तकयोर्भेदात्, प्रवर्त्यं हि सत्त्वं प्रवर्तकं रजः, तस्मात् प्रवर्त्यप्रवर्तकत्वात् तयोर्भेदः पल्लवपवनवत्, यथा पल्लवपवनौ प्रवर्त्यप्रवर्तकौ परस्परतो भिन्नौ तथा सत्त्वरजसी इति । एतच्च **न, तदात्मन एव प्रवृत्तत्वात्,** तस्यात्मा तदात्मा, तदात्मनः प्रकाशात्मन एव प्रवृत्तत्वात्, सत्त्वरजसोर्भेदासिद्धेः पल्लवपवनवद् भेदसाधर्म्याभावादयुक्तोऽयं दृष्टान्त इति वक्ष्यति । तद्व्याख्यानार्थमाह

प्रवर्त्यव्यक्तिस्वरूपः, तथाव्यापारणाद् रजःप्रवृत्त्यात्मरूपापादनादितरतथात्मरूपापादनाद् रजोवत् । रजोऽपि हि इतरतथास्वरूपापादनादृते किमन्यत् करोति ?

एवं च पल्लववद् रज एवापद्यते तथा प्रकाशस्य प्रवर्त्यत्वात् । तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा प्रवृत्तेः कुतोऽपल्लवपवनभेदसाधर्म्यम् ? युज्यते हि पल्लव-

* * *

274/mj प्रवर्तनात्,--**सन्निधिमात्रात् पूर्ववद**

* * *

प्रवर्त्यव्यक्तिस्वरूपः, तथाव्यापारणाद् रजःप्रवृत्त्यात्मरूपापादनादितरतथात्मरूपापादनाद् रजोवत् । रजोऽपि हि इतरतथास्वरूपापादनादृते किमन्यत् करोति ?

एवं च पल्लववद् रज एवापद्यते तथा प्रकाशस्य प्रवर्त्यत्वात् । तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा प्रवृत्तेः कुतोऽपल्लवपवनभेदसाधर्म्यम् ? युज्यते हि पल्लव-

* * *

प्रवर्तनात्,

**एवं च पल्लववद् रज एवापद्यते,** एवं च कृत्वोक्तविधिना पल्लवस्थानीयं प्रवर्त्यं रज एव न प्रवर्तकम्, सत्त्वमेव च प्रवर्तकं पवनस्थानीयं न प्रवर्त्यमित्यापन्नम् । किं कारणम् ? **तथा प्रकाशस्य प्रवर्त्यत्वात्,** यस्मात् तेन प्रकारेण प्रवर्त्यत्वं रजसः प्रकाशेन तस्माद् रजसः प्रकाशेन प्रवर्त्यत्वादित्यर्थः, उक्तं हि **--रजसः प्रवृत्तिरात्मरूपम्, तदापादयति प्रकाशः प्रकाशाप्रकाशिते रजसोऽप्रवृत्तेः** इति । तस्मात् प्रकाशेन तथा प्रवर्त्यत्वाद् रजसः साधूक्तम् **--तदात्मन एव प्रवृत्तत्वा**दिति । एवं तावत् सत्त्वरजसोर्भेद-

---

७ व] दृश्यतां पृ॰ २७४ पं॰ ४ ॥
११ ए] दृश्यतां पृ॰ २०८-- २ ॥
१९ ए] दृश्यतां पृ॰ २०८-- २ ॥
२६ प्र] कृत्यानां कर्तरि वापा॰ २ । ३ । ७१ इति सूत्रेण उभयोरपि षष्ठीतृतीयाविभक्त्योर्न्याय्यत्वाद् वृत्तिकृता अस्य पदस्य प्रकाशेन इति व्याख्यानेऽपि न दोषः । दृश्यतां पृ॰ २०८-- २ ॥
२९ का] ॰शितरजसो॰nayacakra-ms-raṃ nayacakra-ms-hī ॥
१ दा] दृश्यतां पृ॰ २७३ पं॰ ६ ॥

मुपगम्य हेतोरसिद्धिर्विपर्ययत उक्ता, नैव वा सत्त्वव्यतिरिक्तं रजोऽभ्युपेम इत्यत आह --**तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद् वा प्रवृत्तेः**, व्याख्यातप्रकारस्य प्रकाशस्य तत्त्वमतिरिच्य नास्ति प्रवृत्तेः स्वरूपम्, तत एव हेतोः **कुतोऽपल्लवपवनभेदसाधर्म्यं** सत्त्वरजसोरभिन्नत्वात् पल्लवपवनयोर्भिन्नत्वात् ? 275/mj

* * *

व्यतिरिक्ततत्त्वरूपः पवनः प्रवर्तयति पल्लवं न तु तथाप्रकाशातिरिक्ततत्त्वरूपा प्रवृत्तिरस्ति ।

न तद्रूपत्वमतद्वृत्तित्वादिति चेत्, न, रजःस्वप्रवृत्तिवत् तदात्मन एव प्रवृत्तत्वात्, अन्यथा हि न प्रकाशेतेत्युक्तत्वादन्यथा तु प्रवृत्त्यभावात् ।

स्यान्मतम्--प्रकर्षेण काशनं प्रकाशनं... ... ...प्रवृत्तिवत् । न, सत्त्वस्यापि रजोवदपरिसमाप्तरूपत्वात्... ...प्रवर्तकाभावस्य चापर्याप्तत्वेनोक्तत्वात् ।

एवं चैकैव विनिद्रावस्थापुरुषत्ववत् प्रवृत्तिः प्रधानमिति तन्मात्रमेव तत् प्रवृत्त्यापत्तिरूपनिरूप्यत्वात् प्रवृत्तिस्वात्मवदित्यादि भङ्गचक्रावर्तनम्,

* * *

इति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं दर्शयति--यथेहापल्लवलक्षणः पवनो लोके भिन्न इति दृष्टः अपवनलक्षणश्च पल्लवः, **युज्यते हि पल्लवव्यतिरिक्ततत्त्वरूपः** - /ms **पवनः** पल्लवमाघ्नन् **प्रवर्तयति पल्लवं** पल्लवश्च तेनाहतः प्रवर्त्यते तद्व्यतिरिक्ततत्त्व इति **न तु तथाप्रकाशातिरिक्ततत्त्वरूपा प्रवृतिरस्ति** उभयोः शब्दाद्याविर्भावमात्रफलत्वात्, अतो वैषम्यमिति । § 848

**न तद्रूपत्वमतद्वृत्तित्वादिति चेत्** । स्यान्मतम्--प्रकाशनमात्रं सत्त्वस्य प्रवृत्तिर्निर्वर्तनं तु रजसः, तस्मात् सत्त्वस्याप्रवर्तकत्वादतद्वृत्तित्वान्न प्रवृत्तिरूपत्वमिति । एतच्च **न, रजःस्वप्रवृत्तिवत् तदात्मन एव प्रवृत्तत्वात्**, यथा रजसः स्वा प्रवृत्तिः प्रागवृत्तापि पश्चात् स्वत एव रजःस्वात्मनः प्रवर्तमाना रजसाऽविनाभूतत्वात् तदत्यागेन वृत्तेस्तदधीनत्वात् तद्रूपैव तदात्मन एव प्रवृत्तत्वात्, तथा सत्त्वप्रकाशप्रवृत्त्यनतिरिक्ततत्त्वरूपा रजःप्रवृत्तिर्नान्या प्रकाशाधीनत्वात् तदविनाभावात् तदपरित्यागेन वृत्तेस्तदात्मन एव प्रवृत्तत्वादिति । किञ्चान्यत्, **अन्यथा हि न प्रकाशेतेत्युक्तत्वात्**, उक्तं प्राक् **सत्त्वं न प्रकाशेत अप्रवृत्तत्वात् पूर्ववत् पुरुषवदनग्निप्रकाशवत् अप्रवृत्तस्वात्मत्वाद्**

---

२ र] रजोव्यपेम प्र° ॥
८ न] दृश्यतां पृ° २०९-- १ ॥
१० स्या] दृश्यतां पृ° २०९-- १ ॥
१३ ए] दृश्यतां पृ° २०९-- २ ॥
१७ रू] °रूपः पवनः पल्लवः पल्लवमा°nayacakra-ms-bhānayacakra-ms-denayacakra-ms-līm । °रूपः पल्लवः पवनः पल्लवमा° nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
२२ वृ] °त्तिनिर्व्वर्तनं°nayacakra-ms-bhā । °त्तिनिवर्तनं° nayacakra-ms-ya ॥
२४ वृत्ता] °त्तादि प्र° ॥
१ व] °वदग्नि° प्र° । दृश्यतां पृ° २७० पं° ५ ॥
१ अ] दृश्यतां पृ° २७१ पं° २ ॥

**वान्ध्येयवत्,** इति तथैव, **अन्यथा तु प्रवृत्त्यभावात्** प्रकाशाप्रकाशिते रजसोऽप्रवृत्तेः, तस्माद् रजसोऽप्यन्यथा वृत्त्यभावात् प्रकाश एव प्रवृत्तिरिति । **स्यान्मतम् प्रकर्षेण काशनं प्रकाशन**मित्यादि तदेव यावत् **प्रवृत्तिवदिति** प्रासङ्गिकम् । तत्रापि च **सत्त्वस्यापि रजोवदपरिसमाप्त[रूप]त्वा**दित्यादि अक्षरपरिवर्तन यथायोगं याव**दुत्थाप्यसाहायकशक्तित्वाद् वाताहतनौद्वयवद् ग्लानशिबिकावाहकवद्** यावच्च उपहतबीजवदिति वाच्यम् । तस्मादिदं व्याख्यातार्थं **प्रवर्तकाभावस्य चापर्याप्तत्वेनोक्तत्वा**दिति । § 849

§ 850

**एवं चैकैव विनिद्रावस्थापुरुषत्ववत् प्रवृत्तिः प्रधानमिति तन्मात्रमेव तत् ।** एवं च कृत्वा विनिद्रावस्थायाः पुरुषत्ववत् प्रवृत्तेरेव प्रधानत्वमिति तन्मात्रमेव तत् प्रधानं प्रवृत्तिमात्रमेव । किं कारणम् ? **प्रवृत्त्यापत्तिरूपनिरूप्यत्वात् प्रवृत्तिस्वात्मवदित्यादि भङ्गचक्रावर्तन**मिति विनिद्रावस्थापुरुषत्वापादनग्रन्थमर्थसादृश्यादतिदिशति । तद्यथा--यथा

प्रवृत्तिस्वात्मैव वा त्रीणीति पुरुषावस्थावत् ।

* * *

रूपनिरूप्यत्वाद् विनिद्रावस्थास्वात्मवदिति तथा प्रवृत्त्येकलक्षणमेव प्रधानं प्रवृत्त्यापत्तिरूपनिरूप्यत्वात् प्रवृत्तिस्वात्मवत्, *न ह्यसावितरात्मिका स्ववृत्तित्यागापत्तेः । तन्मात्रत्वे तु प्रधानस्यापि तद्वत् प्रकाशाद्यनात्मकत्वादसर्वगतत्वम् ।**विनिद्रावस्थैकलक्षण एव पुरुष आत्यन्तिकनिद्राविगमन**

276/mj

* * *

प्रवृत्तिस्वात्मैव वा त्रीणीति पुरुषावस्थावत् ।

* * *

रूपनिरूप्यत्वाद् विनिद्रावस्थास्वात्मवदिति तथा प्रवृत्त्येकलक्षणमेव प्रधानं प्रवृत्त्यापत्तिरूपनिरूप्यत्वात् प्रवृत्तिस्वात्मवत्, *न ह्यसावितरात्मिका स्ववृत्तित्यागापत्तेः । तन्मात्रत्वे तु प्रधानस्यापि तद्वत् प्रकाशाद्यनात्मकत्वादसर्वगतत्वम् ।

**अथ प्रवृत्तिलक्षणमपि न प्रवृत्तिमात्रमेव प्रधानं सर्वत्वात्,** न तु सर्वाणि एकस्यैव सर्वत्वात्, **प्रवृत्तिरपि सर्वत्वात् प्रवृत्त्यात्मिका सती न प्रवृत्तिमात्रैव प्रवृत्तिलक्षणत्वात् प्रधानस्वात्मवत् । ततश्च प्रतिगुणं तस्याः सर्वात्मकत्वात् तृणाद्यपि सर्वगतमिति किं प्रधानैकत्वम् इति कल्पनया ? अतल्लक्षणत्वा[द्वा] प्रवृत्तिगुणाभावः, ततश्च तत्तत्त्वत्रिगुणसर्वात्मकप्रधानाभावः ।** § 851

---

५ स] दृश्यतां पृ° २७१ पं° ५, पृ° २०९-- १ ॥
९ एवं] °चैकैकवि°nayacakra-ms-ya । दृश्यतां पृ° २०९-- २ ॥
१७ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१९ विनिद्रा] दृश्यतां पृ° २४८ पं° २ ॥
२३ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२६ अ] दृश्यतां पृ° २४९ पं° १ ॥
२६ न] वाक्यमिदं पृ° २४४ पं° १२ इत्यत्रापि दृश्यते ॥
१ त्वा] °त्वाप्रत्वात्प्र ?वृत्ति° प्र° ॥

अथ प्रवृत्तिलक्षणविपरीतमपि प्रधानं प्रधानमेव अवधारणभेदात्, गुणस्वात्मनि गुण एव लक्षणम् इत्यवधारणम्, प्रधाने तु प्रवृत्तिर्लक्षणमेव इतरयोरप्यत्यागात्, तद्ध्यनेकरूपं मेचकवत् । न, उक्तवदवधारणस्यान्याय्यत्वात् - /ms
प्रतिज्ञातव्याघाताद् घटरूपादित्ववत्, प्रधानत्वं प्रागुक्तं गुणानाम् अजामेकां लोहितशुक्लकृष्णाम् इत्यादि, इदानीं पृथक्स्वात्मानस्त उच्यन्ते इति तत्त्वं प्रधानस्य, न प्रधानत्वं तेषाम्, रूपादिघटत्वपक्षवत् । यदा च तेषामेव तत्त्वं ततस्तेषां [तथा] तथेतरेतरात्मसु अभावादवधारणभिन्नभिन्नार्थत्वाद् ननु तदेव सर्वासर्वगतत्वमिति लोकवदेव तत्त्वापत्तिः । § 852

अथ सर्वसर्वात्मकत्वादविकल्पशब्दार्थत्वा[द]लक्षणमेव कथं तर्हि त्रिगुणवर्णनमनेकात्मकसर्वगतत्वभावनं च ? यदि अस्यैकैकः प्रत्येकं गुणो न भवति ततोऽस्य कुतोऽसत्त्वात् तदेकत्वापत्त्यात्मिका अविकल्परूपता ? न हि पृथगवृत्ते रूपे मेचकात्मके भवतः । असदेव तु तदेवम्, अगुणत्वेऽत्र्यात्मकत्वात्, खपुष्पवत् । त्वदुक्तेरेव च [न] तल्लक्ष्यं नार्थो न वस्तु, अलक्षणत्वात्, खपुष्पवत् । § 853

अथात इतश्चान्यतरोपादानपरित्यागायुक्तत्वात् तल्लक्षणाभावादस्यावाच्यतैव, तथा तन्नैव स्यात् प्रवृत्त्या सहैकत्वान्यत्वे प्रत्यवचनीयत्वात्, न तदेकं नान्यद् वाच्यम्, निरुपाख्यत्वात् । यत्तु सत् तत् प्रवृत्त्या सहैकत्वान्यत्वे प्रति वचनीयम्, यथा प्रवृत्तिस्वात्मा प्रकाशनियमात्मानो वा अन्यतरोपग्राहपरित्यागायुक्तत्वादपि च ननूभययुक्तत्ववाच्यत्वाभ्युपगम एव पितृपुत्रवत् । § 854

प्रवृत्तिस्वात्मैव वा त्रीणीति पुरुषावस्थावदिति । यथैव हि यदि पुरुषस्वात्मा अवस्थाः न तर्हि ना अनवस्थत्वात् खपुष्पवदिति तथैव यदि प्रधानस्वात्मा गुणा न तर्हि प्रधानम्, अगुणत्वात्, खपुष्पवत् । अभ्युपगमेऽपि - /ms
तु प्रधानस्य गुणानां त्रयाणामप्यैक्यं प्रधानस्वात्मत्वात् प्रधानवदिति सर्वत्वसम्भाव्याभावादेव सर्वाव्यापिता । प्रवृत्तिगुण एव हि प्रकाशगुणः प्रवृत्तिस्वात्मत्वात् प्रवृत्तिवत्, एवमितरोऽपि । प्रकाश एव प्रवृत्तिः प्रकाशस्वात्मत्वात् प्रकाशवत्, एवमितरोऽपि । नियम एव च प्रवृत्तिः नियमस्वात्मत्वाद् नियमवत्, एवमितरोऽपि । य एव चान्यो गुणः स एवेतरोऽपि एकस्वात्मत्वात् स इव [इति] प्रकृतिरेवेदं सर्वम् इत्यतिदेशाभावो भेदाभावात् । § 855

---

३ अ] दृश्यतां पृ० २४९ पं० ६ ॥
६ अ] दृश्यतां पृ० २६६ पं० ६ ॥
११ त्वा]
°त्वालक्ष°nayacakra-ms-bhā ।
°त्वाल्लक्ष° nayacakra-ms-ya ।
दृश्यतां पृ० २५१ पं० ३, १६ ॥
१२ भा] °भावगं च प्र० ॥
१७ स्या]
°स्यादतैवnayacakra-ms-bhā ।
°स्यदतैव nayacakra-ms-ya ।
दृश्यतां पृ० २५२ पं० ३ ॥
२१ न]
ननुरूपयु°nayacakra-ms-ya ॥
२१ पितृपु]
°पुत्रत्ववत्nayacakra-ms-ya ॥
२४ त] तर्हि ता ना अन० प्र० । दृश्यतां पृ० २५३ पं० ६ ॥
२४ स्थ]
°स्थात्वात्nayacakra-ms-bhā ॥
२५ अ] अ० प्रतिषु नास्ति ॥
२६ स] सर्वत्रस० प्र० ॥

§ 856

एवं चैकैकपूर्वकवादापत्तेरेव किमनेकात्मकैकककल्पनया ? सङ्घातपारार्थ्यादिभिस्तस्य चेतनादन्यत्वे स्थिताचेतनत्वैकत्वपरिणामित्ववृत्ति उक्तवत् स्थापितात्म-

* * *

व्यवस्थाऽभाव एव । उक्तवद्वा व्यवस्थानुमतौ प्रधानातिदेशस्त्याज्यः । तदत्यागे यदर्थमयमतिदेशोऽद्वैतैकान्तार्थस्तस्यैवासिद्धिः, यत् तदेकमेव सम्भाव्यते प्रधानं तस्याप्यनेकतैवैवमापद्यते, यत्स्वरूपाव्यतिरिक्तलक्षणा गुणा विना भेदेनोच्यन्ते तत् प्रधानमपि प्रधानेनाभिव्याप्तत्वादनवस्थितैकत्वतत्त्वप्रतिष्ठं प्रधानम् इत्यतिदेश्यं स्यात् प्रधानस्वात्मत्वाद् गुणवत् । प्रत्यक्षार्थेदंविषयतायां वा व्यक्तमूर्तानित्यादिरूपार्थप्रधानपरमार्थता ।**उपवर्णनभिन्नरूपव्यतिकरसङ्क-**
277/mj **राभ्यां त्वेवमतथात्वमेषामस्य च तत्तत्स्वात्मत्वादिति प्रधानगुण**

* * *

एवं चैकैकपूर्वकवादापत्तेरेव किमनेकात्मकैकककल्पनया ? सङ्घातपारार्थ्यादिभिस्तस्य चेतनादन्यत्वे स्थिताचेतनत्वैकत्वपरिणामित्ववृत्ति उक्तवत् स्थापितात्म-

* * *

व्यवस्थाऽभाव एव । उक्तवद्वा व्यवस्थानुमतौ प्रधानातिदेशस्त्याज्यः । तदत्यागे यदर्थमयमतिदेशोऽद्वैतैकान्तार्थस्तस्यैवासिद्धिः, यत् तदेकमेव सम्भाव्यते प्रधानं तस्याप्यनेकतैवैवमापद्यते, यत्स्वरूपाव्यतिरिक्तलक्षणा गुणा विना भेदेनोच्यन्ते तत् प्रधानमपि प्रधानेनाभिव्याप्तत्वादनवस्थितैकत्वतत्त्वप्रतिष्ठं प्रधानम् इत्यतिदेश्यं स्यात् प्रधानस्वात्मत्वाद् गुणवत् । प्रत्यक्षार्थेदंविषयतायां वा व्यक्तमूर्तानित्यादिरूपार्थप्रधानपरमार्थता ।

गुणास्त्वन्यत्वानेकत्व एव प्रधानम् । अवश्यमन्ये ते तस्मात्, तद्रूपापत्त्यनिष्टत्वात्, गुणान्तरवत् । यतो गुणस्वात्मत्वमस्य नेष्यते । प्रधानातिदेशात् तु पुनः स्वपरविषयकृतभेदद्वारानभ्युपगमे कस्यचित् कथञ्चिदप्यन्यस्यानुपपत्तौ तेऽप्यन्यत्वापत्तिवत् पृथक् पृथक् प्रधानम् । अथ प्रधानलक्षणापि प्रवृत्तिर्न प्रधानं प्रधानमपि तर्हि न प्रधानं प्रधानलक्षणत्वात् प्रवृत्तिवत् । एवं शेषावपीति प्रधानाभाव एव, कुतोऽस्य सर्वगतता ? तदभाव एव त्वयाभिप्राय एवं प्रतिपाद्यते तदात्मत्वाभिमतनिरसनादुष्णत्वनिरसनेनाग्न्यभावप्रतिपादनवत् । § 857 - /ms

१० नेक] °कतैवेवमा° प्र° ॥
१४ त्त] ततस्वात्म° प्र° । दृश्यतां पृ° २५५ पं° २ ॥
२० नेक] °कतैवेवमा° प्र° ॥
२४ गु] गुणस्त्व° प्र° । दृश्यतां पृ° २५७ पं° २ ॥
२४ धान] °नवश्य° प्र° ॥
२६ स्व] स्वविषयकृत° प्र° ॥
२९ भा] °भाव एव त्वयात्वदभि ?प्राय एवंnayacakra-ms-ya । °भाव एवं nayacakra-ms-bhā । दृश्यतां पृ° २५८ पं° ३ ॥

कृतं भङ्गचक्रावर्तनम्, आपादितं चैकैकपूर्वकमिदं नानेकैकपूर्वकम् इत्येतदापन्नमित्याह --**एवं चैकैकपूर्वकवादापत्तेरेवे**ति अवधारणार्थत्वादेवकारस्य, ततश्च त्रिगुणप्रधानकारणकल्पनानर्थक्यमित्यत आह --**किमनेकात्मकैककल्पनया ?** यदि प्रवृत्तिलक्षणं प्रधानमेवैकं प्रकाशनियमप्रवृत्तिरूपेण प्रवर्तते प्रवृत्तिरेव वैका त्रिगुणरूपा ततश्चोभयथाप्येकैककारणवाद एवेति पृथगात्मकत्रिगुणकारणकल्पनाव्याख्या आयासमात्रम् । तस्मादेकात्मकैकमेव व्यक्त्यन्तरसहस्रकरणायानेकाकारं भवति, यथा प्राग्वर्णितपुरुषादिकारणपूर्वकानन्तप्रभेदजगत्सृष्टिसमर्थं यत् तदेवास्तु अनेकाकारम्, किं त्रिगुणम् इत्येतावता ? इति । § 858

किञ्चान्यत्, यद्यपि त्वदुक्तैर्हेतुभिः **सङ्घातपारार्थ्यादिभिः** प्रकृतेरन्यः पुरुषः सिध्यति

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ साङ्ख्यका० १७
इति,§ 861

ज्ञाएवं खलु सामी ! सुब्भिसद्दा वि पोग्गला दुब्भिसद्दत्ता+ए परिणमंति, दुब्भिसद्दा वि पोग्गला सुब्भिसद्दत्ता+ए परिणमति । सुरूवा वि पोग्गला दुरूवत्ता+ए परिणमंति, दुरूवा वि पोग्गला सुरूवत्ता+ए परिणमंति । सुब्भिगंधा वि पोग्गला दुब्भिगंधत्ता+ए परिणमंति, दुब्भिगंधा वि पोग्गला सुब्भिगंधत्ता+ए परिणमंति । सुरसा वि पोग्गला दुरसत्ता+ए परिणमंति, दुरसा वि पोग्गला सुरसत्ता+ए परिणमंति । सुहफासा वि पोग्गला दुहफासत्ता+ए परिणमंति, दुहफासा वि पोग्गला सुहफासत्ता+ए परिणमंति । प+ओगविससा वि य णं परिणया वि य णं सामी पोग्गला पण्णत्ता । इति ज्ञाताधर्मकथासूत्रे पाठः १२ । ६ ॥ताधर्म० * (Edtext outside numbered paragraph)त्ति । तत**स्तस्य सङ्घातपारार्थ्यादिभिश्चेतना** (Edtext outside numbered paragraph)**दन्यत्वे** स्थिताचेतन्यैकत्वपरिणामित्वानि वृत्तयोऽस्य तदिदं कारणं **स्थिताचेत** (Edtext outside numbered paragraph)**नत्वैकत्वपरिणामित्ववृत्ति,** तच्च सुखमिति वा दुःखमिति वा मोह इति वा परमाणव इति वा कारणमित्येव वा । **उक्तवत्,** उक्तेन तुल्यमुक्तवत्, यथोक्तं **भिन्नात्मकतायां तु सत्त्वं न प्रकाशेत अप्रवृत्त (Edtext outside numbered paragraph)त्वा**दित्यतः प्रभृति यावदेषोऽवधिः, तद्वदुक्तवदेव **स्थापितात्मस्वतत्त्वप्रवृत्तित्वात्,** आत्मस्वतत्त्वेन स्थापिताऽस्य प्रवृत्तिरित्यतः **किमिति न गम्यते** त्वया वक्ष्यमाणसाधनवत् अनन्ये सुखदुःखे

४ वादाप ]
॰पत्ति॰nayacakra-ms-bhā ॥
८ नाव्याख्या ] ॰ख्यायाममात्रं प्र॰ ॥
९ क ] ॰कार॰ प्र॰ ॥
१५ ल्या ] ॰ल्यार्थप्र॰जे॰ साङ्ख्यका॰ A, B । ॰ल्यार्थं प्र॰ मुद्रितसाङ्ख्यका॰ ॥

इति, किं स्वपक्षरागाद् मोहाद्वा ? मया वा **किमिति नोच्यते ?** तत्त्वकथायां प्रस्तुतायां किमनुवृत्त्या (Edtext outside numbered paragraph) आयतिलोपायशोभयादितो वा ? इति । किं पुनस्तत् साधनमिति चेत्, **सुखादनन्यदेव दुःखम्, अनात्मत्वेऽवरणाद्यात्मकत्वात्,** वरण-सदना-ऽपध्वंसन-बैभत्स्यदैन्य-गौरवाणि वरणादीनि, वरणादीन्यस्यात्मा कार्यं तद् वरणाद्यात्मकं तमः, न वरणाद्यात्मकमवरणाद्यात्मकम्, किं तत् ? दुःखम्, तस्यानात्मत्वे सति अवरणाद्यात्मकत्वात् सुखादनन्यत्वमेव । किमर्थं पुनः अनन्यदेव इत्यवधार्यते ? उच्यते --**अवधारणेन च** सुखादनन्यदेव इत्यनेन **वक्ष्यमाणसाधनान्तरापक्षिप्तान्यत्वो विपक्षाभावः सूच्यते,** वक्ष्यमाणं साधनं **सु** (Edtext outside numbered paragraph)**खादनन्य एव मोह** इति, तेनापक्षिप्तमन्यत्वं तमसोऽपीति विपक्षाभावः सोऽनेनावधारणेन सूच्यते । पुरुषस्तु स्यात् सुखादन्यत्वाद् विपक्षः, ततो व्यावर्तनार्थम् अनात्मत्वे सति इति विशेषणम् । **सुखस्वात्मव**दिति दृष्टान्तः । यथाऽवरणाद्यात्मकत्वात् सुख-स्वात्मा सुखादनन्य एवं दुःखमप्यवरणाद्यात्मकत्वात् सुखादनन्यदिति । **अ** (Edtext outside numbered paragraph)**न्यस्याभावा**दिति हेतोरव्यभिचारव्याख्यानम्, सुखादनन्यत्वेन दुःखे साध्येऽनात्मत्वविशेषणेन आत्मनि निरस्ते साधनान्तरनिरस्ते तमसोऽन्यत्वे न किञ्चित् सुखादन्यद-स्ति, तस्मादन्यस्य कस्य (Edtext outside numbered paragraph)चिदभावाद् विपक्ष एव नास्ति । विपक्षाभावादेवावृत्तिरसपक्षेऽस्य हेतोरित्यव्यभिचारी हेतुः । § 862

तथापि च **तस्य** कारणस्य **चेतनादन्यत्वे** सत्येवैतानि स्वरूपाणि स्थि-तानि, चेतनस्य परस्यार्थे प्रवृत्तेरचेतनस्य भोक्तृत्वाद् रूपादिपरिणामिनोऽचेत-नत्वाच्च तेनैवाचेतनत्वेनैकत्वं स्थितम्, न ह्याचैतन्यस्य भेदोऽस्ति, परिणामित्वं चास्य तत एव स्थितम्, आपत्तिभवनस्य रूपादिरूपस्य परिणामाख्यत्वात् तस्य च सन्निधिभवनाद्भिन्नत्वात्, यथोक्तं

स्वतन्त्रप्रवृत्तित्वात् किमिति न गम्यते मया वा किमिति नोच्यते सुखादनन्यदेव दुःखम्, अनात्मत्वेऽवरणाद्यात्मकत्वात्, अवधारणेन च व-क्ष्यमाणसाधनान्तरापक्षिप्तान्यत्वो विपक्षाभावः सूच्यते, सुखस्वात्मवत्, अन्य-स्याभावात् ।

मोहेऽन्यत्वमिति चेत्, तन्निवर्तयिष्यते । अवरणाद्यात्मकत्वात् कुतोऽन्य-त्व-

* * *

त्ताए परिणमंतितेच्चेव **ते पोग्गला सुब्भिगंधत्ता+ए परिणमंति ते चेव ते**

२ वृत्ते] चेतनो ह्यचेतनस्य भोक्तेति चेतनेऽचेतनस्य भोक्तृत्वं निर्बाधमेव ॥ ३ त्वा] °त्वाच्चं तेनै°nayacakra-ms-ya । °त्वा तेनै° nayacakra-ms-bhā ॥

५ थोक्तं] °क्तां तच्चैव ते पोग्गल परिणमंति ते nayacakra-ms-bhā । °क्तं तच्चेव ते प्पोग्गल परिणमंति ते nayacakra-ms-ya । दृश्यतां पृ° २५७-- १, २५८-- २ ॥

**पोग्गला दुब्भिगंध** * 278/mj

* * *

**स्वतत्त्वप्रवृत्तित्वात् किमिति न गम्यते मया वा किमिति नोच्यते सुखादनन्य-** देव दुःखम्, अनात्मत्वेऽवरणाद्यात्मकत्वात्, अवधारणेन च वक्ष्यमाणसाधनान्तरापक्षिप्तान्यत्वो विपक्षाभावः सूच्यते, सुखस्वात्मवत्, अन्यस्याभावात् ।

मोहेऽन्यत्वमिति चेत्, तन्निवर्तयिष्यते । अवरणाद्यात्मकत्वात् कुतोऽन्यत्व-

* * *

त्ताए परिणमंति

**मोहेऽन्यत्वमिति चेत्, तन्निवर्तयिष्यते,** व्याख्यातार्थस्फुटीक्रियायै चोद्योत्तरपक्षौ गतार्थौ न विव्रियेते । **अवरणाद्यात्मकत्वात् कुतोऽन्यत्वनिवृत्तिरिति चेत्,** स्यान्मतम्--वरणाद्यात्मकमोह 279/mj

* * *

निवृत्तिरिति चेत्, न, अवरणाद्यात्मकशब्दस्य विधिप्रधानपर्युदासात्मकत्वात् अनपुंसकवचनादप्रतिषेधेऽनपुंसकसुटि सर्वनामस्थानत्ववत् तटस्तटंतटीस्त्रीपुंनपुंसकास्त्रीपुंनपुंसकत्ववदेतत् स्यादेकस्मिन्नेव लिङ्गत्रयदर्शनात्, अवरणाद्यात्मकत्वेऽप्यन-

* * *

प्रतिषेधादेव अवरणाद्यात्मकाभ्यां सत्त्वरजोभ्यां मोहस्य प्रतिषेध्यस्यान्यत्वं सिद्धम्, तस्मान्न तदन्यत्वनिवृत्तिरिति । एतच्च **न,** अवरणाद्यात्मकत्वात् इति **अवरणाद्यात्मकशब्दस्य विधिप्रधानपर्युदासात्मकत्वात्** । नञो हि द्वयी गतिः--प्रसज्यप्रतिषेधः पर्युदासश्च, यथा ब्राह्मणो न भवत्यब्राह्मण इति ब्राह्मणस्य निवृत्तिप्रधानः प्रसज्यप्रतिषेधः, ब्राह्मणादन्योऽब्राह्मणः क्षत्रियादिरिति क्षत्रियादिविधानप्रधानः पर्युदासः, तथेहापि अवरणाद्यात्मकत्वात् इति वरणाद्यात्मकाद् मोहादन्यदवरणाद्यात्मकं शोषादिप्रसादाद्यात्मकं विधीयते, वरणाद्यात्मकत्वस्य तु न विधिर्न प्रतिषेधः पर्युदासात्मकत्वात्, न तु प्रसज्यप्रतिषेध इति । तदर्थसमर्थनार्थं दृष्टान्तमाह **--अनपुंसकवचनादप्रतिषेधेऽनपुंसकसुटि सर्वनामस्थानत्ववत्,** यथा नपुंसकादन्यत्र सुट् सर्वनामस्थानसंज्ञं भवतीति स्त्रीपुंसयोः सुटः सर्वनामस्थानसंज्ञा विधीयते, नपुंसके तु *शिः

---

३ *] दृश्यतां पृ° २०९-- २ ॥
१२ स्फुटीक्रिया] °यादौ प्र° ॥
२६ णा] °णात्मकंnayacakra-ms-bhā । °णात्मक nayacakra-ms-ya ॥
२७ तु] तु वि° प्र° ॥
२८ क] °वचनाप्रति°nayacakra-ms-vi विना nayacakra-ms-ya । nayacakra-ms-bhā प्रतौ तु एतच्चिह्नान्तर्गतः पाठो नास्त्येव ॥

१ *] शि सर्वनामस्थानम् । १ । १ । ४१ । सुडनपुंसकस्य । १ । १ । ४२ ।...शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्ज्ञसि शेः प्रतिषेधः प्राप्नोति, कुण्डानि तिष्ठन्ति वनानि तिष्ठन्ति ।... ...यत्तावदुच्यते

- /ms **सर्वनामस्थानम्** पा° १ । १ । ४१ इति विध्यन्तरविहिता सुटः सर्वनामस्थानता न विहिता न निषिद्धा, तथेहापि वरणाद्यात्मकत्वस्य न विधिर्न प्रतिषेधः शोषप्रसादाद्यात्मकत्वविधानादिति । § 863

स्यान्मतम्--वैषम्याददृष्टान्तोऽयम्, सम्बन्धिनः सुटः सर्वनामस्थानविधाने नपुंसकानपुंसकविषयत्वाविरोधाद् युज्येत सर्वनामस्थानसंज्ञा, विषयस्य तु नपुंसकानपुंसकत्वविरोधवद् वरणावरणाद्यात्मकत्वानुपपत्तिरिति । एतदपि च न वैषम्याय, अत्रापि तत्तुल्यत्वात्, **तटस्तटंतटीस्त्रीपुंनपुंसकास्त्रीपुंनपुंसकत्ववदेतत् स्यात् एकस्मिन्नेव लिङ्गत्रयदर्शनात्,** दृष्टं हि तटे लिङ्गत्रयं तटं तटस्तटी इत्येकस्मिन्नेव, यदा च नपुंसकलिङ्गं तदा न स्त्रैणं न पौंस्नम्, पुंस्त्वे न स्त्रीता न नपुंसकता, स्त्रीत्वे नेतरद्वयता, इत्यस्त्रीपुंनपुंसकत्वं च तथा वरणावरणाद्यात्मकत्वमस्तु, को दोषः ? सरूपैकशेषाकरणमनुकरणत्वाद् लिङ्गत्रयव्यक्त्यर्थमित्यदोषः । § 864

एवं तर्हि सुखदुःखयोरपि वरणाद्यात्मकत्वादवरणाद्यात्मकत्वासिद्धिरेव अवरणाद्यात्मकत्वसिद्धौ वाऽनन्यत्वासिद्धिरिति चेत्, नेत्युच्यते, **अवरणाद्यात्मकत्वेऽप्यनन्यत्वाद् वरणाद्यात्मकत्वस्य,** अवरणाद्यात्मके अपि सुखदुःखे वरणाद्यात्मकत्वतोऽनन्ये, तस्मादभिन्ने वरणाद्यात्मके एव प्रसादशोषादिकार्यभेदेऽपि कारणत्वानात्मत्वपरिणामित्वादिभ्यः । किमिव ? **अवर-**
280/mj **णसदनादिमोहात्मकत्ववत्,** यथा

* * *

न्यत्वाद् वरणाद्यात्मकत्वस्य अवरणसदनादिमोहात्मकत्ववत्, वक्ष्यमाणवच्च वरणाद्यात्मकत्वेऽप्यनन्यत्वादवरणाद्यात्मकत्वस्य प्रापितत्वात् ।

---

शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्ञसि शिप्रतिषेधः इति न अप्रतिषेधात् । नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति, किं तर्हि ? पर्युदासोऽयं यदन्यन्नपुंसकादिति, नपुंसके न व्यापारः, यदि केनचित् प्राप्नोति तेन भविष्यति, पूर्वेण च प्राप्नोति । इति पातञ्जलमहाभाष्ये । जश्शसोः शिः । nayacakra-ms-pā ७ । १ । २० ॥
५ म्ब ] °न्धिनाnayacakra-ms-bhā ॥
८ त ] त तु-ल्य°nayacakra-ms-bhānayacakra-ms-ramnayacakra-ms-hi । न तुल्य° nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-vi ॥
८ टीस्त्री ] °स्त्रीनपुंसकास्त्रीनपुंसकत्व°nayacakra-ms-ya ॥
१२ व ] वरणाद्यात्मकत्व° प्र° ॥
१४ त्वासिद्धिरेव ] °रेव वरणाद्या°nayacakra-ms-ya । °रेणाद्या° nayacakra-ms-bhā ॥
१६ णाद्यात्म ] °त्मकत्वे अपि सुखदुःखयो व°nayacakra-ms-pānayacakra-ms-ḍenayacakra- । °त्मकत्वे अपि सुखदुःखयोः व° nayacakra-ms-vi ॥
१७ दुः ] शि सर्वनामस्थानम् । १ । १ । ४१ । सुडनपुंसकस्य । १ । १ । ४२ ।...शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्ञसि शेः प्रतिषेधः प्राप्नोति, कुण्डानि तिष्ठन्ति वनानि तिष्ठन्ति ।... ...यत्तावदुच्यते शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्ञसि शिप्रतिषेधः इति न अप्रतिषेधात् । नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति, किं तर्हि ? पर्युदासोऽयं यदन्यन्नपुंसकादिति, नपुंसके न व्यापारः, यदि केनचित् प्राप्नोति तेन भविष्यति, पूर्वेण च प्राप्नोति । इति पातञ्जलमहाभाष्ये । जश्शसोः शिः । nayacakra-ms-pā ७ । १ । २० ॥

असाधनमिदं सर्वतुल्यत्वात् प्रसिद्धिविरुद्धसिद्ध्यतिप्रसंगात् । शक्यते हि वक्तुं घटः कटादनन्यः, तन्त्वनात्मकत्वात्, कटस्वात्मवत्, वैधर्म्येण पटवत् ।

* * *

मोहात्मकानि वरणादन्यानि सदनादीनि वरणात्मकमोहात्मकान्यपि अवरणात्मकानि, यथा वा मोहो वरणविलक्षणसदनापध्वंसनबैभत्स्यदैन्यगौरवधर्मापि वरणात्मक एव कार्यकारणयोरभेदाद् भेदाच्च, अन्यथा पौनरुक्त्यानर्थक्ये ग्रन्थदोषौ व्यपदेश्यव्यपदेशाभावदोषश्च स्युः, नेष्यन्ते च तथा । तस्माद् वरणावरणाद्यात्मकत्वं मोहस्य सदनादीनां चैषितव्यम् । यथा चैतत् तथा सुखदुःखे प्रसादशोषादयश्च वरणावरणाद्यात्मकाः स्युः । तस्मात् सुखदुःखयोरनन्यत्वहेतुव्यभिचारप्रदर्शनाय नासपक्षोऽस्तीति । किञ्चान्यत्, **वक्ष्यमाणवच्च वरणाद्यात्मकत्वेऽप्यनन्यत्वादवरणाद्यात्मकत्वस्य प्रापितत्वात्,** वक्ष्यति हि सुखादनन्यत् तमः प्रकाशादनन्यो नियम इति च, तत्र तमसो वरणाद्यात्मकत्वे प्रसादशोषादिकार्यादिकस्मादेव सुखादनन्यत्वं साधयिष्यते, तमसोऽप्यतस्तस्मादनन्यत्वाद् वरणाद्यात्मकमप्यवरणाद्यात्मकं तमः सत्त्वरजोवत् । *किञ्चान्यत्, अवरणाद्यात्मकत्वस्य वरणात्मके सत्येवानन्तरं प्रापितत्वात् तथा वक्ष्यमाणत्वादिति । § 865

इतर आह --**असाधनमिदं सर्वतुल्यत्वात् प्रसिद्धिविरुद्धसिद्ध्यतिप्रसङ्गात्,** प्रसिद्धिविरुद्धानामप्यर्थानां सिद्धिरेवं सति प्रसज्यते, अर्थान्तरधर्मनिवृत्त्या तदात्मत्वापादनात्, तद्यथा --**शक्यते हि वक्तुं घटः कटादनन्यः, तन्त्वनात्मकत्वात्,** यस्तन्त्वनात्मकः स कटादनन्यः, यथा **कटस्वात्मा,** यः कटादन्यः स तन्त्वनात्मको न भवति यथा पट इति **वैधर्म्येण पटवदि**त्युक्तम् । - /ms आचार्य आह --**अथ सर्वतुल्यता कथं दोषः, स्वमतेन परमतेन ?** इति प्रश्नः उभयथाप्यदोषः इति मन्यमानस्य । यदि ते स्वस्मिन्नेव मते दोषस्त**तस्तव** प्रसिद्धिविरोध**दोषासक्तिर्ममाभिमतैव त्वत्प्रतिवादिनो** मम तु सर्वानन्यत्वापादनमभिमतमेव **भावपक्षवत्,** यथा भावविधिविधिनयमतेऽनन्तरातीते सर्वानन्यत्वमिष्टम्, एतस्योदाहरणमात्रत्वादुत्क्रमेण स्वभावकालनियतिपुरुषपक्षवच्च वक्ष्यमाणविधिनियमवच्च यथास्वमभिमता एव । एवं तावत् परवाद्यभिप्रायवशात् त्वन्मते दोषासक्तिरिष्टा । न केवलं पराभिमतेरेव, किं तर्हि ? अपि च **स्वमतेऽपि** सर्वानन्यत्वम्, **सुखाद्यन्वयमात्रत्वात् सर्वस्य ननु घटः कटादनन्यः,** सुखदुःखमोहान्वितमेतद् बाह्याध्यात्मिकभेदरूपं जगदिच्छतस्ते त्रैगुण्यजात्यनुच्छेदेन सर्वं सर्वात्मकमेव त्रैगुण्यान्वयानतिरेकात् **को हि सत्त्वाद्यतिरिक्तः ?** यदि सत्त्वरजस्तमोतिरिक्तं किञ्चित् स्यात् सर्वसर्वात्मकवादे दोषः स्यात्, न त्वस्ति, तस्मात् तवैवादोषः । § 866

(right margin notes: - /ms beside lines 7 and 22)

९ दोष] °षाश्चnayacakra-ms-ya ॥
११ व] वरणाद्यात्मकाः प्र° ॥
१३ व] दृश्यतां पृ° २०५-- २ ॥
१७ *]
किंवान्यत्nayacakra-ms-bhā ॥

२२ क] घटःस्वात्मा प्र° ॥
२९ ता] °ता वnayacakra-ms-līṃ विना ॥
१ स] सर्वसर्वा° प्र° ॥

281/mj

अथ सर्वतुल्यता कथं दोषः, स्वमतेन परमतेन ? तव दोषासक्तिरभिमतैव त्वत्प्रतिवादिनः, भावपक्षवत् । स्वमतेऽपि सुखाद्यन्वयमात्रत्वात् सर्वस्य ननु घटः कटादनन्यः, को हि सत्त्वाद्यतिरिक्तः ? सत्कार्यवादत्यागो वा तत्राभावात् समुदय-क्षणिकशून्यवादापत्तेः । रूपादीनां चाप्यनेन न्यायेन अनन्यत्वात् प्रत्युदाहरणाभाव एव ते । § 867

तथा नियमोऽप्यभिन्नः प्रकाशात् । प्रकाशस्वात्मत्वप्रतिलम्भ एव हि तन्नियमः प्रकाशानन्यता । *भिन्नात्मकतायां सत्त्वं सत्त्वमेव न स्यात् प्रकाशो वा प्रकाश एव, तथाऽनियतत्वात् अन्यथा प्रकाशनाभावात्, रजोवत् प्रवृत्तिवत् । मूलत एव § 868

स्यान्मतम्--घटः कटे त्रिगुणोऽपि नास्तीति । ततश्च **सत्कार्यवादत्यागो वा तत्राभावात्,** यदि सत्त्वादिगुणे मृदादौ कटादिर्न स्यात् त्रिगुणोऽपि तथा घटोऽपि मा भूत्, अतोऽसन् घटः पश्चादुत्पन्नस्तत्र प्रागभूत इति असत्कार्यवादः सत्कार्यवादत्यागश्च प्राप्तः । किञ्चान्यत्, प्रकाशादिविविक्तस्वरूपगुणसमुदयाभ्युपगमाद् रूपादिस्कन्धसमुदयवाद एवायमपि देशभिन्नयुगपद्भाव्यनिर्देश्यगुणसमुदयमात्रत्वात् । क्षणिकवादश्च, अयुगपद्भाविपिण्डशिवकाद्यनिर्देश्यनिर्विकल्पार्थमात्रत्वात् । अत एव च शून्यवादापत्तिः, अनिर्देश्यस्वभावत्वात्, खपुष्पवत् । § 869

रूपरसगन्धस्पर्शसङ्ख्यासंस्थानादीनां घटादिषु दृष्टानामन्यत्वाद् विपक्षोऽस्ति इत्याशङ्केथाः, तत्रापि **रूपादीनां चाप्यनेने**त्यादि यावत् **प्रत्युदाहरणाभाव एव ते ।** रूपं रसादनन्यत् अगन्धाद्यात्मकत्वाद् रूपस्वरूपवदित्यादि **प्रसिद्धिविरुद्धसिद्ध्यतिप्रसङ्गोऽपि, ते त्वत्प्रतिवादिनो दोषासक्तिरभिमतै**वेति तदेव यावद् **भावपक्षव**दिति, पुनश्च **स्वमतेऽपि सुखाद्यन्वयमात्रत्वा**दित्यादि यावत् **समुदायक्षणिकशून्यवादापत्ते**रिति समानश्चर्चः । § 870

- /ms

यथा प्रकाशात्मना अनियतत्वाद् रजः सत्त्वं न भवति प्रवृत्तिश्च प्रकाशो न भवति तथा सत्त्वं सत्त्वं न स्यात् प्रकाशः प्रकाशो न स्यादिति । न केवलं

---

११ *] दृश्यतां पृ॰ २७० पं॰ ४ । पृ॰ २८६ पं॰ १० ॥
२६ सिद्धिविरुद्ध] दृश्यतां पृ॰ २८० पं॰ ३, पृ॰ २८१ पं॰ १, २, ३, ४ ॥
२६ ते] दृश्यतां पृ॰ २८० पं॰ ३, पृ॰ २८१ पं॰ १, २, ३, ४ ॥
२७ भा] दृश्यतां पृ॰ २८० पं॰ ३, पृ॰ २८१ पं॰ १, २, ३, ४ ॥
२७ स्व] दृश्यतां पृ॰ २८० पं॰ ३, पृ॰ २८१ पं॰ १, २, ३, ४ ॥
२८ स] दृश्यतां पृ॰ २८० पं॰ ३, पृ॰ २८१ पं॰ १, २, ३, ४ ॥

गुणान्तररूपापत्तिरहितस्य स्वात्माप्रतिलम्भ एव, किं तर्हि ? **मूलत एव** स-त्त्वमेव **तद्वा प्रकाश इति न स्या**दित्यस्तित्वमेव निराक्रियते, **अनियतत्वात्,** यदि तत् स्वत एवानियतं ततो नास्ति तत् सत्त्वं **वन्ध्यापुत्रवत्** न च तत् प्रकाशात्मकं **पुरुषव**दिति पूर्ववद् यथासङ्ख्यं दृष्टान्तौ । § 871

एवं सुखादनन्यद् दुःखमित्येतद् भावितम्, तमोऽनन्यत् इति भाव्यम्, तदपि यथा च प्रकाशादभिन्ना प्रवृत्ति**स्तथा नियमोऽप्यभिन्नः प्रकाशात्** । प्र-काशानतिरिक्तताप्रदर्शनार्थं नियमलक्षणमाह— **प्रकाशस्वात्मत्वप्रतिलम्भ एव हि तन्नियमः**, प्रकाशस्य स्वात्मा प्रकाशनमेव, तद्भावः प्रकाशस्वात्मत्वम्, त-त्प्रतिलम्भ एव हि तदात्मलाभ एव हि तन्नियमः, रूपस्य रसस्य वा प्रकाश्य-स्वरूपव्यक्तिर्नियमः, न हि छिन्नाभ्रनभसीव निराश्रयः कश्चिन्नियमोऽस्ति ? तत्पर्यायकथनं **नियमः प्रकाशानन्यता** प्रकाशस्वरूपमात्रम्, एतन्नियमलक्षणं निरुच्यते, नान्यः प्रकाशाद् भिन्नो नियम इति, तत्र दोषदर्शनात् । को दोष इति चेत्, उच्यते --**भिन्नात्मकतायां** प्रकाशाद् नियमस्य सत्त्वात् तम-सश्च **सत्त्वं सत्त्वमेव न स्यात् प्रकाशो वा प्रकाश एव** न स्यादिति वर्तते, **तथाऽनियतत्वात्,** गुणान्तररूपापत्तिरहितस्य सत्त्वस्य प्रकाशस्य चागुणान्त-रात्मनोऽगुणान्तरात्मापत्तिरहितत्वादित्यर्थः । शब्दो हि शब्दतया प्रकाशमानो रूपाद्यात्मव्यावृत्तस्वरूपेण नियत एव प्रकाशते, **अन्यथा प्रकाशनाभावाद्** व्यक्त्यभावादित्यर्थः । दृष्टान्तौ यथासङ्ख्यं

तद्वा प्रकाश इति न स्यात्, अनियतत्वात्, वन्ध्यापुत्रवत् पुरुषवत् ।

ननु प्रकाशात्मकत्वादेव सत्त्वस्य अग्नेरिव कुड्यादिना तमसा नियम्यत्व-मनन्यथावृत्तता । यद्यनियतोऽसावसंस्तर्हि अनियतत्वाद् वान्ध्येयवत् । एवं हि कार्यं कारणे सद् यदि तत् तत्र नियतमनन्यथावृत्ति, तत्र सन्निधिवर्ततेः सत्तार्थत्वात् ।

न, आधिक्येन अयतत्वात् । अधिको यमस्तमोनुग्रहादनन्यथाव्यक्तिरूप-ता ।

* * *

प्रवृत्तिवत्,**रजोवत्** - /ms, 282/mj

* * *

तद्वा प्रकाश इति न स्यात्, अनियतत्वात्, वन्ध्यापुत्रवत् पुरुषवत् ।

ननु प्रकाशात्मकत्वादेव सत्त्वस्य अग्नेरिव कुड्यादिना तमसा नियम्यत्व-मनन्यथावृत्तता । यद्यनियतोऽसावसंस्तर्हि अनियतत्वाद् वान्ध्येयवत् । एवं

---

३ स्वा ] °त्मप्र° प्र° ॥
५ प्र ]
प्रकाम्यस्वरू°nayacakra-ms-bhā ।
प्रकाम्यस्यस्वरू° nayacakra-ms-ya
॥
७ क ] कथं नियमः प्र° ॥
८ निरु ] निरुह्यते
nayacakra-ms-bhā । निरुद्ध्यध्य ?ते
nayacakra-ms-ya ॥
१५ व ] दृश्यतां पृ° २७१ पं° १, २ ॥
१५ पु ] दृश्यतां पृ° २७० पं° ४ ॥
१६ न ] दृश्यतां पृ° २७१ पं° १, २ ॥
२५ व ] दृश्यतां पृ° २७१ पं° १, २ ॥
२५ पु ] दृश्यतां पृ° २७० पं° ४ ॥
१ न ] दृश्यतां पृ° २७१ पं° १, २ ॥

हि कार्यं कारणे सद् यदि तत् तत्र नियतमनन्यथावृत्ति, तत्र सन्निधिवर्ततेः सत्तार्थत्वात् ।

न, आधिक्येन अयतत्वात् । अधिको यमस्तमोनुग्रहादनन्यथाव्यक्तिरूपता ।

* * *

- /ms **प्रवृत्तिवत्,**

इतर आह --**नन्वित्यादि** याव**दनन्यथावृत्तता** । **नन्वि**त्यनुज्ञापने, प्रकाशात्मकत्वादेव प्रदीपवत् सत्त्वस्य सर्वतोदिग्गतानियतप्रकाशस्य महदहङ्कारादिस्पर्शरूपादिपिण्डशिवकादिपूर्वोत्तरव्यक्त्यभिमुखतायां सत्यां प्रकाशनस्य सति नियामके कुड्यादौ अग्नेरिव कुड्यादिना आवरणेन नियम्यत्वम्, नाव इव वा सर्वदिग्गमनरोधिना लम्बनपाषाणेन गुरुणेव द्विधापि प्रदेशान्तरप्राप्तिरोधिना तमसा प्रकाशस्य दृष्टनियम्यत्ववद् नियम्यत्वम्, तच्च अनन्यथाप्रवृत्तता, एवमेव ते प्रवर्तितव्यं नातोऽन्यथेति । दृष्टत्वाच्चानपह्नवनीयो भेदो नियम्यनियामकयोः । तस्मादन्यो नियमः प्रकाशादिति । § 872

अत्रोच्यते --**यद्यनियतोऽसावसंस्तर्हि** यदि स्वयमेवानियतः प्रकाशोऽसंस्तर्ह्यसौ **अनियतत्वाद् वान्ध्येयवत्** । **एवं ही**त्यादि एतस्यैव व्याख्यानमनिष्टापादनद्वारेण । **कार्यं कारणेऽस्ति** इत्येतद् दर्शनमेवमेव घटते **यदि तत् तत्र नियत**मिति, किमुक्तं भवति ? **अनन्यथावृत्ती**त्युक्तं भवति, यथा वर्तितव्यं तथैव वर्तते नान्यथा, स्वात्मनैव च वर्तते ना-
- /ms न्येन केनचिद् वर्त्यते । तच्च अनन्यथा वृत्तिरस्य तदिदमनन्यथावृत्ति कार्यं कारणे सदिति शक्यमभ्युपगन्तुम् । किं कारणम् ? **तत्र सन्निधिवर्ततेः सत्तार्थत्वात्,** तत्र कारणे सन्निध्यर्थो वर्ततिः सत्तार्थः सन्निहितो वर्तते इति, **अस्ति-भवति-पद्यति-विद्यतिवर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इत्यत्र वर्ततेः सन्निधिभवनार्थवाचित्वाद् वर्तते नियतः सन्निहितोऽस्तीत्यर्थः । § 873

इतर आह --**न, आधिक्येन अयतत्वात्** । निशब्दस्याधिकार्थत्वादधिको यमो नियमः सोऽत्र विवक्षितः, न सन्निधिमात्रवृत्तिः । कोऽसाव**धिको यमः ? तमोऽनुग्रहाद्** यः, स **चानन्यथाव्यक्तिरूपता,** तमसानुगृहीतस्य सत्त्वस्य
283/mj शब्दादिरूपेण रूपान्तरनिवृत्त्यानन्यथावृत्तिरूपता शब्दोऽयं न रसो न

* * *

न, तमसोऽपि सत्त्ववत् पृथगपरिसमाप्तरूपत्वात्, तमसोऽपि हि तथा प्रकाशनं व्यक्तिरिति प्रकाशात्मकसत्त्वानुग्रहाद् भवति, अनियतं च कथ-

---

१० तोदिग्ग ] °दियतानि° प्र° ॥
११ का ] °कापू° प्र° ॥
१२ कु ] कुट्या° प्र° ॥
१३ गुरु ] °णेचnayacakra-ms-bhā ॥
१४ दृ ] दृष्टि°nayacakra-ms-ya ॥
१५ एव ] °मेतेnayacakra-ms-ya । °मेव तेन ? ॥
२४ स ] सन्नियतो प्र° ॥
२५ अ ] दृश्यतां पृ° ३४ पं° २० ॥
२९ चा ] चनन्यथाव्यक्तिरूपता प्र° ॥
३१ न ] दृश्यतां पृ° २७१ पं° १--पृ° २७३ पं° ५ ॥

मन्यनियमने प्रवर्तेत ? इत्यादिः पूर्ववद् ग्रन्थो यावद् न, परिणामस्य तत्रैवोक्तत्वात् ।

प्रकाशात्मैव तु नियमः । इतरथा स प्रकाशो न सः, तथाऽनियतत्वात् तथाऽभूतत्वात्, घटपुरुषवद् घटपटवद्वा । य एव नियमः स एव प्रकाशः, तथानियतत्वात् तथाप्रवृत्तत्वात्, घटघटस्वात्मवत् ।

* * *

रूपं नाऽनाकाशादिर्वा इति । तस्मात् सत्त्वं तमोनुगृहीतं तथा प्रकाशते न स्वत एव तस्मादन्यः प्रकाशान्नियम इति । एतच्चासत्, **तमसोऽपि सत्त्ववत् पृथगपरिसमाप्तरूपत्वात्,** सत्त्वप्रकाशननियमने स्वयं सत्त्वप्रकाशनाकाङ्क्षित्वात् तमस्त्वन्मतेनापरिसमाप्तमेव तमोनियमनापेक्षप्रकाशात्मकसत्त्ववत् । तद्व्याख्यानं **तमसोऽपि** **ही**त्यादि, तमः सत्त्वप्रकाशरूपव्यक्तिं सत्त्वप्रकाशनप्रतिलब्धतथानियतिं कुर्याद् नाप्रकाशिततथानियतिव्यक्ति । किं कारणम् ? तस्य तथा व्यक्तेः सत्त्वप्रकाशनप्रतिलभ्यत्वात् । यस्मात् **तथा प्रकाशनं व्यक्तिरिति** इतिशब्दस्य हेत्वर्थत्वाद् नियमनयोग्यतया हि तमसः प्रकाशनं सत्त्वस्य व्यक्तिः, सा च **प्रकाशात्मकसत्त्वानुग्रहाद्** भवति नान्यथेति सत्त्वाप्रकाशिततमोनियमनापरिसमाप्तरूपत्वम्, प्रकाशा- ननुग्रहे सत्यनियतत्वात् । न च स्वयमनियतं नियमयितुमन्यं समर्थं वन्ध्यापुत्रवदित्यत आह — **अनियतं च कथमन्यनियमने प्रवर्तेत ? इत्यादि**रत उत्तरः प्रागतीतग्रन्थातिदेशः **एवं तु नानयो**रित्यादिपूर्वोत्तरपक्षप्रपञ्चात्मको **यावन्न परिणामस्य तत्रैवोक्तत्वा**दिति । तद्यथा --**एवं तु नानयोरितरेतरानुग्राहिता,** उत्थाप्य**साहायकशक्तित्वात्, वाताहतनौद्वयवद् ग्लानशिबिकावाहकवत् । असम्पूर्णशक्तिता वाऽप्रकर्षः** अनियम इत्यर्थः, **इति कारणतैव न स्यादसम्पूर्णशक्तित्वादुपहतबीजवत् । असदकरणादिभ्यश्चान्यतो न तत्स्वरूपप्रकर्षः । यदा च सुदूरमपि गत्वा प्रागवृत्तेरसत्कार्यत्वं मा भूदिति प्रकर्षः परिणामादेव तदा परिणामस्यान्यत्र वृत्तस्या[न्यत्रा]परिणामकत्वाद् युवत्वव[दात्म]मात्रवृत्तित्वमेव, नान्यत्र वृत्तोऽन्यदन्यथा करोति परिणामित्वात् । एवं तर्हि पूर्ववदुदाहरणादेवाप्रवृत्त्यात्मकत्वं सुखस्य** नियतरूपेणाप्रवृत्त्यात्मकत्वमित्यर्थः, **को हि विशेषस्तमःप्रवर्तनादृते क्षीरदधिपरिणामकालवत् पूर्वं न प्रवृत्तं पश्चाच्च प्र-** - /ms

---

२ न] दृश्यतां पृ० २७१ पं० १--पृ० २७३ पं० ५ ॥
४ प्र] दृश्यतां पृ० २७१ पं० १--पृ० २७३ पं० ५ ॥
८ ना] **नाकाशा॰**nayacakra-ms-bhā । शब्दस्य आकाशगुणत्वात् नाऽनाकाशादिर्वा इति nayacakra-ms-ya प्रतिपाठः समीचीनोऽत्र भाति ॥
१२ त] **तमासत्व॰**nayacakra-ms-bhā । **तमसोसत्व॰** nayacakra-ms-ya ॥
१६ व] ॰ति **सत्वा॰** nayacakra-ms-ya ॥
१९ प्र] **प्रवर्ततेत्यादि॰** प्र॰ ॥
२० ए] दृश्यतां पृ० २७२ पं० १ ॥
२१ ए] दृश्यतां पृ० २७२ पं० १ ॥
२८ स्य] **॰स्यानिय॰** प्र॰ ॥
२८ रूपेणा] **॰णात्मप्र॰**nayacakra-ms-ya ॥

वृत्तमिति ? न, परिणामस्य तत्रैवोक्तत्वादित्येष ग्रन्थः समानोऽत्रापि । § 874

अत उत्तरस्तु ग्रन्थोऽर्थतः समानगमनिकोऽपि विशेष्य लिख्यते भावनार्थं विशेषणातुल्यत्वात्, तद्यथा — **प्रकाशात्मैव तु नियमः इतरथा स प्रकाशो न सः, तथाऽनियतत्वात्, तथाऽभूतत्वादि**त्यस्यैवार्थकथनं प्राक्तनव्याख्यानवत् । रूपादिस्वरूपनियतार्थप्रकाशनात् प्रकाशः [प्रकाशः] स्याद् नान्यथेति, त्वन्मतेन **घटपुरुषवत्,** यत् तथा अनियतं तन्न प्रकाशः, यथा
- /ms घटः पुरुषे न नियतो घटे च पुरुषः, यो यः प्रकाशः स तथानियत एव
284/mj यथा रूपरसादि । लोकप्रतीतोदाहरणमेव **घटपटवद्वे**ति । एवं तावत्, प्रका

* * *

नियम्यनियामकत्वाद् नौलम्बनपाषाणवन्नेति चेत्, न, तदात्मन एव तथानियतत्वात् सन्निधिमात्रात् पूर्ववदनियमनात् । य एवासौ सत्त्वस्यात्मा प्रकाशः स नियामकः, तथानियमविधेः, इतरकर्तृवत्, तमोनियमात्मरूपापादनादितरतथा-

* * *

शस्य रूपान्तरनिवृत्तिरूपं नियममन्तरेण प्रकाशनाभावप्रदर्शनाद् नियमात्मकत्वमुक्तम्, इदानीं **य एव नियमः स एव प्रकाश** इति तयोरनन्यत्वापादनम्, **तथानियतत्वात्** तेन प्रकारेण नियतत्वात् रूपप्रकाशनरूपेण रसाद्यात्मनिवृत्त्या प्रकाशस्य नियतत्वात्, **तथाप्रवृत्तत्वा**दित्यस्यैवार्थकथनं वृत्तिनियतिव्यक्तीनामैकार्थ्यात्, **घटघटस्वात्मवत्,** यत् तथानियतं यत् तथावृत्तं यत् तथाव्यक्तं तदेव तत्, यथा घट एव घटस्वात्मा । यत् पुनस्तदेव न भवति न तत् तथानियतं तथावृत्तं तथाव्यक्तं वा, यथा पुरुषः । § 875

इत्यादि, तमसोऽपि हि नियामकत्वमेवमेव युज्यते त्वन्मते यदीतरयोः सत्त्वरजसोरात्मरूपापादनं कुर्यात्, अन्यथा **इतर[तथा]स्वरूपापादनादृते** तमः **किमन्यत् करोति** ? तयोर्हि सत्त्वरजसो- (Edtext outside numbered paragraph) रात्मरूपापादनमेव (Edtext outside numbered paragraph), आत्मरूपमापाद (Edtext outside numbered paragraph)यन्नियामकमित्युच्यते । यथा तमः पूर्वं प्रकाशप्रवृत्त्यात्मभ्यामनियतयोः सत्त्वरजसोस्तथानियमनाद् नियामकमेवं सत्त्वमपीतरतथानियमात्मरूपापादनाद् नियामकमस्तु, को दोषः ? § 876

**नियम्यनियामकत्वाद् नौलम्बनपाषाणवन्नेति चेत्** । स्यान्मतम्--नियम्यं प्रकाशतत्त्वं सत्त्वम्, तमो नियामकम् । तस्माद् नियम्यनियामकत्वभेदाद् नैकत्वं सत्त्वतमसोः नौलम्बनपाषाणवत्, यथा नौः प्रवर्तमाना नियम्यते

१० निय] दृश्यतां पृ° २७३ पं° ६--पृ° २७४ पं° १ ॥
१२ त] दृश्यतां पृ° २७३ पं° ६--पृ° २७४ पं° १ ॥
१७ रू] रूपरसप्र°nayacakra-ms-ya ॥
२२ त्वाद्] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

लम्बनपाषाणेन नियामकेन, तयोश्चान्यत्वमेवं सत्त्वतमसोरिति । एतच्च **न, तदात्मन एव तथानियतत्वात्,** तस्यैवात्मा स एव वात्मा तदात्मा, तस्यैव प्रकाशात्मनो नियतत्वात्, तस्मादेव तेनैव वात्मना प्रकाशात्मन एव नियतत्वात्, सत्त्वतमसोर्भेदाभावाद् नौलम्बनपाषाणवद् भेदसाधर्म्याभावादयुक्तो दृष्टान्त इति वक्ष्यते । तद्व्याख्यानार्थमाह **--सन्निधिमात्रात् पूर्ववदनियमनात्,** इह तमः सन्निहितमपि प्राक् सन्निधिमात्रादेवानियामकं स्वयमनियतत्वात् स- - /ms त्त्वाधीननियतित्वात्, किन्तु नियम्यमनियमात्, कस्तर्हि नियामकः ? उच्यते **--य एवासौ सत्त्वस्यात्मा प्रकाशः स नियामकः** । कथमिति चेत्, उच्यते-- यस्मात् **तथानियम्यव्यक्तिस्वरूपः**, तेन प्रकारेण शब्दादिनियतिनियम्यव्यञ्जनस्वरूपः स एव प्रकाश एव । कुतः ? **तथानियमविधेः,** तेन हि प्रकारेण नियमस्य विधिः शब्दस्वरूपेण प्रकाशमानस्य शब्दस्य रूपाद्यनात्मना नियता प्रकाशमानता नियमविधिः, तस्माद्धेतोः प्रकाश एव नियमः । दृष्टान्त **इतरकर्तृवत्** कुम्भकारादिवत्, यथा मृद्द्रव्यं पिण्डशिवकादिभावेनाभिव्यज्यमानं तथा तथा प्रकाशयता कर्त्रा कुम्भकारेण नियमकारिणा निर्वर्त्यते नियम्यते नियते रूपेऽवस्थाप्यते नाप्रकाशमानमप्रवर्तमानं च सत्कार्यवादाभ्युपगमादसदकरणादिहेतुसामर्थ्याच्च, तस्मात् स कर्ता प्रकाशस्थानीयो नियामकः पिण्डशिवकादेर्नियम्यस्य तथा प्रकाशस्तमसः । कुतः ? **तमोनियमात्मरूपापादनात्,** सत्त्वेनैव हि तथा तथा प्रकाशमानेन तमसो नियमरूपमापाद्यते मृद इव तथा प्रकाशयता कर्त्रा कुम्भकारेण तदात्मलाभहेतुत्वात् । ततस्त्वदभिमतनियामकत्वविपर्ययापत्तिः, तमसो नियम्यत्वात् सत्त्वाधीननियतित्वात् सत्त्वस्यैव नियामकत्वात् पक्षधर्मविपरीतता सत्त्वापाद्यनियमात्मरूपता प्रसक्ता, सत्त्वाप्रकाशिते नियमाभावात् । सत्त्वापादितं हि तमसो नियमात्मरूपम्, तस्मात् तमोनियमात्मरूपापादनात् सत्त्वं नियामकम्,

रूपापादनात् तमोवत् । तमोऽपि हि इतर[तथा]स्वरूपापादनादृते किमन्यत् करोति ?

एवं च नौवत् तम एवापद्यते तथा प्रकाशस्य नियम्यत्वात् तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा नियमस्य कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम् ? भेदे लम्बनपाषाणो नावं निरुणद्धीति युज्यते, न तु तथाप्रकाशातिरिक्ततत्त्वरूपो मोहो नियामकोऽस्ति ।

न तद्रूपत्वमतद्वृत्तित्वादिति चेत्, न, तमःस्वनियमवत् तदात्मन एव नियतत्वात् । अन्यथा सत्त्वं सत्त्वमेव न स्यादित्युक्तत्वादन्यथा तु नियत्यभावात्

५ त्वा] °त्वात्मकत्वतमसो° प्र° ॥
१० ब्दादिनिय]
°नियतितंनियम्य°nayacakra-ms-ya
। °नियतियम्य° nayacakra-ms-bhā
॥
१२ नात्म] °त्माना प्र° । °त्मनो ? ॥
१८ र्निय] °यमस्य प्र° ॥

२५ रू] दृश्यतां पृ° २७४ पं° १--पृ° २७५ पं° ४ ॥
२७ ए] दृश्यतां पृ° २७४ पं° १--पृ° २७५ पं° ४ ॥
३१ न] दृश्यतां पृ° २७४ पं° १--पृ° २७५ पं° ४ ॥

।

* * *

285/mj तमोऽपि हि**इतरतथारूपापादनात् तमोवत्** ।

* * *

रूपापादनात् तमोवत् । तमोऽपि हि इतर[तथा]स्वरूपापादनादृते किमन्यत् करोति ?

एवं च नौवत् तम एवापद्यते तथा प्रकाशस्य नियम्यत्वात् तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा नियमस्य कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम् ? भेदे लम्बनपाषाणो नावं निरुणद्धीति युज्यते, न तु तथाप्रकाशातिरिक्ततत्त्वरूपो मोहो नियामकोऽस्ति ।

न तद्रूपत्वमतद्वृत्तित्वादिति चेत्, न, तमःस्वनियमवत् तदात्मन एव नियतत्वात् । अन्यथा सत्त्वं सत्त्वमेव न स्यादित्युक्तत्वादन्यथा तु नियत्यभावात् ।

* * *

तमोऽपि हि

**एवं च नौवत् तम एवापद्यते** । एवं च सत्त्वस्यैवोक्तविधिना नियामकत्वाद् नौस्थानीयं नियम्यं तम एव स्यात्, न नियामकम् । लम्बनपाषाणस्थानीयं सत्त्वमेव नियामकम्, न नियम्यं स्यात् । किं कारणम् ? **तथा प्रकाशस्य नियम्यत्वात्,** यस्मात् तेनोक्तप्रकारेण प्रकाशेन नियम्यत्वं मोहस्य तस्मात् तमसः सत्त्वेन नियम्यत्वादित्यर्थः । तस्मात् प्रकाशाप्रकाशिते तमसो नियत्यभावात् तमसः प्रकाशेन तथा नियम्यत्वात् **तदात्मन एव तथानियतत्वादिति** साधूक्तम् । एवं तावत् सत्त्वतमसोर्भेदमभ्युपेत्य विपर्ययापत्त्या **नियम्यनियामकत्वादित्यस्य** हेतोरसिद्धिरुक्ता । नैव वा सत्त्वव्यतिरिक्तं तमोऽभ्युपेम इत्यत आह --**तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद् वा नियमस्य** शब्दप्रकारेणाऽरूपादिप्रकारेण च यः प्रकाशस्तदनतिरिक्ततत्त्वरूपत्वान्नियमस्याभिव्यक्तेः **कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम्** ? न नौरनौः, कः ? लम्बनपाषाणः, तस्य नावो भेदः, तत्साधर्म्यमनौलम्बनपाषाणभेदसाधर्म्यम्, तत्तु कुतः सत्त्वतमसोर्भेदसाधर्म्यम् ? भेदाभावादित्यर्थः । ततो दृष्टान्तदार्ष्टान्तिकयोः साधर्म्याभावादयुक्तमिति वैषम्यं दर्शयति --**भेदे** सति **लम्बनपाषाणो** नौविलक्षणो **नावं** प्रवर्तमानां **निरुणद्धीति युज्यते । न तु**
- /ms **तथाप्रकाशातिरिक्ततत्त्वरूपो मोहो नियामकोऽस्ति** एतयोः शब्दाद्याविर्भावमात्रफलत्वात्, अतो न युज्यते । § 877

**न तद्रूपत्वमतद्वृत्तित्वादिति चेत्** । स्यान्मतम्--प्रकाशनमात्रं सत्त्वस्य वृत्तिर्नियमनं तु तमसः, तस्मात् सत्त्वस्यानियमनादतद्वृत्तित्वाद् वृत्तिभेदा-

५ रू] दृश्यतां पृ० २७४ पं० १--पृ० २७५ पं० ४ ॥
७ ए] दृश्यतां पृ० २७४ पं० १--पृ० २७५ पं० ४ ॥
११ न] दृश्यतां पृ० २७४ पं० १--पृ० २७५ पं० ४ ॥
१९ त] दृश्यतां पृ० २७४ टि० ९ ॥
२१ त] दृश्यतां पृ० २८४ पं० १ ॥
२३ निय] दृश्यतां पृ० २८४ पं० १ ॥

च न नियमनं सत्त्वस्य तमसश्च न प्रकाशनमित्यस्ति भेद इति । एतच्च **न, तमःस्वनियमवत् तदात्मन एव नियतत्वात्,** यथा तमसः स्वो नियमः प्रागवृत्तः पश्चात् स्वत एव तमःस्वात्मनः प्रवर्तमानस्तमसा विना अभूतत्वात् तदत्यागेन वृत्तेस्तदधीनत्वात् तद्रूप एवं तदात्मन एव प्रवृत्तत्वात् तथा सत्त्वप्रकाशप्रवृत्त्यनतिरिक्ततत्त्वरूपस्तमोनियमः सत्त्वाव्यतिरिक्तः प्रकाशा 286/mj

* * *

स्यान्मतम्--प्रकर्षेण काशनं प्रकाशनं... ... ...प्रवृत्तिवत् । न, सत्त्वस्यापि तमोवदपरिसमाप्तरूपत्वाद्... ...नियामकाभावस्य चापर्याप्तत्वेनोक्तत्वात् ।

एवं चैक एव विनिद्रावस्थापुरुषत्ववद् नियमः प्रधानमिति तन्मात्रमेव तत्, नियमापत्तिरूपनिरूप्यत्वात्, नियमस्वात्मवदित्यादि भङ्गचक्रावर्तनं नियमस्वात्मैव वा त्रीण्यपीति पुरुषावस्थावद् यावत् सुखादनन्यद् दुःखमिति । अत्र तु सुखादनन्य एव मोहः, अनात्मत्वेऽशोषाद्यात्मकत्वात्, सुखस्वात्मवदित्यादि साक्षेपपरिहारं पूर्ववत् प्रवृत्तिस्थाने नियमं कृत्वा ।

न चापीदमेकत एव तत्त्वम् । सामान्यविशेषभावात् स्यादेकत एव तत्त्वम् ।

* * *

धीनत्वात् तदविनाभावात् तदपरित्यागेन प्रवृत्तेस्तदात्मन एव प्रवृत्तत्वादिति । किञ्चान्यत्, **अन्यथा सत्त्व**मित्यादि, यदि स्वत एव नियमो न स्यात् ततोऽन्यथा सत्त्वं **सत्त्वमेव प्रकाशो वा प्रकाश एव न स्यात् तथाऽनियतत्वाद् रजोवत् प्रवृत्तिवत्** । मूलत एव तद्वा प्रकाश इति न स्यादनियतत्वाद् वन्ध्यापुत्रवत् पुरुषवदित्युक्तत्वादिति तथा । **अन्यथा तु नियत्यभावात्,** प्रकाशाप्रकाशिते तमसो नियत्यभावादनियतस्य चाभावात् प्रकाश एव नियम इति । § 878

**स्यान्मतम्--प्रकर्षेण काशनं प्रकाशन**मित्यादि यावत् **प्रवृत्तिव**दिति प्रासङ्गिकं तदेव चोद्यम्, तत्रोत्तरमपि **सत्त्वस्यापि तमोवदपरिसमाप्तरूपत्वा**दित्यादि अक्षरविपर्यासेन यथायोगाक्षरोपन्यासं यावत् **उत्थाप्यसाहायकशक्तित्वाद् वाताहतनौद्वयवद् ग्लानशिबिकावाहकवद्** यावच्च **उपहतबीजव**दिति वाच्यम्, तस्मादिदं व्याख्यातार्थम् **--नियामकाभावस्य चापर्याप्तत्वेनोक्तत्वात्** । § 879 - /ms

**एवं चैक एव विनिद्रावस्थापुरुषत्व**वदित्यादि यावद् **भङ्गचक्रावर्तन**मिति प्रागुक्तं भङ्गचक्रमावर्त्य व्याख्येयमिति तदेवातिदिशति समानत्वात् । तत्र तु **प्रवृत्तिरेव प्रधानं प्रवृत्त्यापत्तिरूपनिरूप्यत्वात् प्रवृत्तिस्वात्मवदिति** प्रवृत्तिमात्रत्वे

---

७ काश]
°शवृत्त्य°nayacakra-ms-bhā ॥
८ स्या] दृश्यतां पृ° २७५ पं° ५--२७६ पं° १ ॥
११ नं] दृश्यतां पृ° २७५ पं° ५--२७६ पं° १ ॥
१२ सु] दृश्यतां पृ° २७८ पं° १ ॥
१३ सुखा] दृश्यतां पृ° २७८ पं° १६ ॥
२० स] पृ° २८१ पं° ७ ॥
२३ चा] वा° प्र° ॥
३२ च]
°चंद्रक्रमा°nayacakra-ms-ya ॥
१ प्र] दृश्यतां पृ° २७५ पं° ७ ॥

प्रधानभङ्गचक्रकमावर्तितम्, इह तु प्रवृत्तिस्थाने नियमं कृत्वा प्रधानस्थाने प्रधानमेव च कृत्वा भङ्गचक्रावर्तनं तद्वदेव कार्यम् । पुनश्च **नियमस्त्वात्मैव वा त्रीण्यपीति पुरुषावस्थावद्** भङ्गचक्रावर्तनं द्वितीयं लिखितं यथा तथात्र प्रवृत्तित्रैगुण्यवद् नियमत्रैगुण्यं लिखितं द्रष्टव्यमिति । भङ्गग्रन्थपरिवृत्तिपरिमाणमप्याह **--यावत् सुखादनन्यद् दुःख**मितीयद्दूरम् । **अत्र तु** विशेषः **सुखादनन्यो मोह** इति प्रतिज्ञा, हेतुः **--अनात्मत्वेऽशोषाद्यात्मकत्वा**दिति, दृष्टान्तः **सुखस्त्वात्म**वदिति । **इत्यादि साक्षेपपरिहारं पूर्ववदिति अवधारणेन चोक्तसाधनान्तरापक्षिप्तान्यत्वो विपक्षाभावः सूच्यत** इत्यादिसर्वातीतव्याख्यानप्रपञ्चातिदेशः । तद्व्याख्यानोपायदिङ्मात्रप्रदर्शनं चैतत् **--प्रवृत्तिस्थाने नियमं कृत्वे**ति । § 880

**न चापीदमेकत एव तत्त्व**मित्यादीत्युत्तरस्य विकल्पोत्थापनग्रन्थस्य सम्बन्धः । सुखतो दुःखमोहयोरनन्यत्वं तत्त्वमुक्तम्, तत्त्वनेकतः । **सामान्यविशेषभावात्** सामान्यविशेषभेदभावात्, यथा वृक्ष इति सामान्यं कदम्ब इति विशेषः, यथात्र कदम्बो नियमाद् वृक्षः, वृक्षस्तु स्यात् कदम्बोऽन्यो
287/mj वेत्येकतस्तत्त्वं

* * *

किन्तूभयतोऽनन्यत्वादभिन्नत्वादेकत्वात्... ... ...सन्निहितापत्तिभवनसत्तार्थत्वमयथार्थं स्यात्... ...।

एवं त्वनभ्युपगमे इदं निरूप्यम्--अस्ति प्रधानं भेदानां कार्यकारणभावात् । एतत् कथं निरूप्यते ? इति अनेकात्मकत्वकारणकल्पना असद्वाद एव, सम्भाव्यविकल्पानुपपन्नार्थत्वात्, तदुक्तसत्यत्वानुपपन्नार्थसर्वोक्तानृतत्वपक्षवत् ।

* * *

तथा यदि सामान्यविशेषभावः स्यात् **स्यादेकत एव तत्त्वम्,** न तु तथेह
- /ms सुखदुःखमोहानां सामान्य- विशेषभावोऽस्तीति । **किन्तूभयतोऽनन्यत्वादभिन्नत्वादेकत्वा**दित्यादिना सत्त्वरजस्तमसामेकत्वापादनार्थः पूर्ववत् सर्व एव प्रक्रमभेदैः स एव तथैव ग्रन्थः प्रवृत्त्या प्रकाशविशेषितया मोहविशेषितया [च] नेयः, तथा च **भाष्य** एव सुलिखितत्वान्न विव्रियते । **सन्निहितापत्तिभवनसत्तार्थत्वमयथार्थं स्या**दित्यत्र तु विशेषः, आपत्तिभवनं सन्निधिभवनाविनाभावे युज्यते, नान्यथा, यदि तद्रूपादि बीजे न सन्निहित ततोऽङ्कुरस्यासत्त्वाद्यापत्तिः स्यात्, सत् कार्यं कारणे चेति द्वैविध्यं च भवनस्यैवमेव युज्येत आपत्त्यनापत्तिभेदादिति, शेषं पूर्ववत् । सत्त्वेन तमसा च सह भावनायां कृतायां पुनश्च तथैव तमसोऽपि सत्त्वेन रजसा तद्वदेव भावनाग्रन्थो निर-

३ निय] दृश्यतां पृ॰ २७६ पं॰ १ ॥
८ अ] दृश्यतां पृ॰ २७८ पं॰ २ ॥
१२ चा] **वापी॰** प्र॰ ॥
१३ योर] **॰रन्यत्वं** प्र॰ ॥
१६ म्बोऽन्यो] **वेत्यनेकत॰** प्र॰ ॥
२६ ना] **॰नार्थ पूर्ववत् सर्वमेव** प्र॰ ॥
३१ का] **कारणं**nayacakra-ms-vi ॥

वशेषो लिखित आचार्येणैवेति न विवृण्महे, स एवानुसर्तव्यः । सर्वत्र च भेदचोद्येषु **प्रवर्त्यप्रवर्तकत्वात् पल्लवपवनवन्नेति** चेत्, न, तदात्मन एवेत्यादि तदेव सत्त्वरजःसंयोगेऽपि, **प्रकाशार्थिप्रकाशभेदाद् नर्तकीनर्तकाचार्यवन्नेति** चेत्, न, तदात्मन एवेत्यादि सत्त्वरजः संयोगे सत्त्वतमःसंयोगे च, [नियदृश्यतां पृ° २८४ पं° १ ॥म्यनियामकत्वाद्] **नौलम्बनपाषाणवन्नेति** चेत्, न, तदात्मन एवेत्यादि सत्त्वतमःसंयोगे रजस्तमःसंयोगे च तत्र प्रकाशनप्रवर्तननियमनवचनानि च यथोपपत्ति योज्यानि । **कुतोऽपल्लवपवनभेदसाधर्म्यम्, कुतोऽनर्तकीनर्तकाचार्यभेदसाधर्म्यम्, कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम्** ? इति चोपनयेषु द्वयं द्वयं द्वयोर्द्वयोर्गुणयोः सम्भवित्वाच्चोदयित्वा - /ms परिहार्यमिति । एवं तावत् सुखदुःखमोहानां प्रकाशप्रवृत्तिनियमात्मकानामनन्यत्वात् **एकात्मकैककारणपूर्वकत्वम्** इति साध्वभ्यधामेति । § 881

**एवं त्वनभ्युपगम इदं निरूप्यमित्यादि** । एवमेकात्मकैककारणानभ्युपगमे **साङ्ख्यैरिदं** निरूप्यम्, कतमत् ? यत् तद् भिन्नात्मकत्वं परिगृह्य प्रयुक्ते कार्यकारणवीतेऽभिहितम् --**अस्ति प्रधानं भेदानां कार्यकारणभावात्**, आध्यात्मिकानां बाह्यानां च भेदानां कार्यकारणभावो **दृष्टः**, आध्यात्मिकानां कार्यात्मकानां वक्ष्यामः **सत्त्वरजस्तमांसि त्रीणि शब्दाद्यात्मभिर्व्यवतिष्ठमानानि परस्परार्थं कुर्वन्तीत्येवमादि, एतत् कथं निरूप्यते** ? वक्ष्यमाणेषु विचारविकल्पेषु यथा यथोच्यते तथा तथानुपपत्तिरेवेति इतिशब्दहेत्वर्थत्वाद् निरूपणाभाव एवेत्यभिप्रायः । तद्विचारोद्देशार्थं साधनमाह --**अनेकात्मकत्वकारणकल्पना असद्वाद एव सम्भाव्यविकल्पानुपपन्नार्थत्वात्**, अनुपपन्नसम्भाव्यविकल्पार्थत्वादित्यर्थः, येऽत्र सम्भाव्यन्ते विकल्पास्तेऽनुपपन्नार्था इति वक्ष्यति, तस्मादयमसद्वाद एव । दृष्टान्तः --**तदुक्तसत्यत्वानुपपन्नार्थसर्वोक्तानृतत्वपक्षवत्**, तेनैवोक्तस्तदुक्तः सर्वमनृतम् इति पक्षः, स एवोक्तस्तदुक्तो वा । असौ सत्यश्चेद् 288/mj

* * *

यदुच्यते सत्त्वरजस्तमांसि त्रीणि शब्दाद्यात्मभिर्व्यवतिष्ठमानानि परस्परार्थं कुर्वन्ति, सत्त्वं शब्दकार्यं प्रख्याय शब्दात्मना व्यवतिष्ठमानं रजस्तमसोः शब्दात्मभावाय प्रवृत्तिं ख्यापयति । अत्र प्रकाशात्मकेन सत्त्वेन प्रकाशात्मकयोरेव रजस्तमसोः शब्दात्मना व्यवतिष्ठमानेन शब्दात्मभावाय प्रवृत्तिर्व्यक्तिः प्रख्याप्यते, उताप्रकाशात्मकयोः ? यद्यप्रकाशात्मके रजस्तमसी शब्दात्मभावाय प्रख्याप्येते ततः सत्त्वं पुरुषस्यापि तर्हि शब्दात्मभावाय प्रवृत्तिं

३ प्र] दृश्यतां पृ° २७३ पं° ६ ॥
५ स] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१२ ए] दृश्यतां पृ° २७७ पं° १ ॥
१३ ए] एवं त्वऽनnayacakra-ms-ya । एवं चन° nayacakra-ms-bhā ॥
१३ एव] °मेकैकात्म°nayacakra-ms-ya ॥
१७ व] दृश्यतां पृ° २८८ पं° १ ॥
२६ स] दृश्यतां पृ° २८७ पं° २४ ॥
२७ स] दृश्यतां पं° २०, पृ° २९० पं° २१, पृ° २९१ पं° ६ ॥

प्रख्यापयिष्यति शब्दत्वायैनं प्रवर्तयिष्यति, अप्रकाशात्मकेन तेनापि शब्दभावाय प्रवर्तितव्यं प्रकाशकारकोपपत्तेः रजस्तमोभ्यामिव ।

* * *

न तर्हि सर्वमुक्तमनृतम्, अस्य सत्यत्वात् सर्वोक्तान्तःपातित्वाच्च, अथासत्यमिदं न तर्हि सर्वस्योक्तस्यानृतत्वमनेनानृतेन प्रतिपाद्यतेऽस्यानृतस्याप्रमाण- - /ms त्वादित्युभयथाप्यसद्वादस्तृतीयविकल्पाभावाच्च तथेयमपि त्रिगुणमेकं कारणम् इत्यनेकात्मकैककारणकल्पना असद्वाद इति । § 882

तत् पुनः कतमद् वचनम् ? इति तत् प्रदर्शयन्नाह --**यदुच्यते सत्त्वरजस्तमांसी**त्युद्देशवाक्यं यावत् **परस्परार्थं कुर्वन्ती**ति, निर्देशवाक्यं च **सत्त्वं शब्दकार्य**मित्यादि यावत् **प्रवृत्तिं प्रख्यापयती**ति एतदसद्वादधर्मेण पक्षीकृतं वाक्यम् । अत्र च द्वयं सम्भाव्यते तृतीयाभावात्, तद्दर्शयति --**प्रकाशात्मकेने**त्यादि यावत् **प्रख्याप्यत** इत्ययमेको विकल्पः । सत्त्वं प्रकाशात्मकं सत् तदा**त्मकयोरेव रजस्तमसोः** शब्दात्मना व्यवस्थाऽनेनेति स्वयं शब्दात्मना व्यवतिष्ठमानं तेनात्मनोपकुर्वत् तयोः **शब्दात्मभावाय** [प्रवृत्तिं प्रख्यापयति,] **प्रवृत्तिः प्रख्याप्यते** । का सा प्रवृत्तिः ? **व्यक्ति**रित्यर्थकथनम् । प्रवृत्तिं प्रख्यापयति इत्येतदेव स्फुटीकर्तुकामः **प्रवृत्तिः प्रख्याप्यते** इति विभक्तिविपर्यासेन विवृणोति आख्यातेनाभिहितकर्मकत्वात् प्रथमया । एष प्रथमः प्रश्नविकल्पः । द्वितीयस्तु **उताप्रकाशात्मकयो**रिति रजस्तमसोरप्रकाशात्मकयोर्वा तत् सत्त्वं शब्दकार्यं प्रख्याय शब्दात्मना व्यवतिष्ठमानं शब्दात्मभावाय प्रवृत्तिं ख्यापयति ? इति प्रश्नः । प्रकाशात्मकयोरित्येष विकल्पो न घटत एव, सत्त्वरजस्तमसां जात्यन्तरत्वाभ्युपगमात् प्रकाशप्रवृत्तिनियमकार्यत्वभेदात् सुखदुःखमोहात्मकभेदाच्च रजस्तमसी न प्रकाशात्मके इति ।
§ 883

अत्रोच्यते --**यद्यप्रकाशे**त्यादि यावद् **रजस्तमसी इवे**ति । **यद्यप्र-** - /ms **काशात्मके रजस्तमसी शब्दात्मभावाय प्रख्याप्येते** ततस्तद्वत् **सत्त्वं पुरुषस्यापि तर्हि शब्दात्मभावाय प्रवृत्तिं प्रख्यापयिष्यति**, तदर्थविवरणम् --**शब्दत्वायैनं प्रवर्तयिष्यति**, शब्दत्वपरिणामेनैनं परिणमयिष्यतीत्यर्थः । सत्त्वेन शब्दकार्यप्रख्यातिना शब्दात्मना व्यवतिष्ठमानेन पुरुषः शब्दात्मभावाय प्रवर्त्यतेऽभिव्यज्यते व्यवस्थाप्यते च, अप्रकाशात्मकत्वात्, यद् यदप्रकाशात्मकं तत् तत् सत्त्वेन शब्दकार्यप्रख्यातिना शब्दात्मना व्यवतिष्ठमानेन शब्दात्मभावाय प्रवर्त्यं व्यङ्ग्यं व्यवस्थाप्यं च दृष्टं यथा रजस्तमश्च, विपक्षाभावाद् व्यावृत्तिरवाच्या । तत्साधनव्याख्यानद्वारेण साधनान्तरोपन्यासद्वारेण वा ग्र- 289/mj न्थः **अप्रकाशात्मकेने**त्यादिः यावद्

५ स] **पूर्वोक्ता॰** प्र॰ ॥
२३ मोहात्म] **॰त्मकत्वभेदाच्च** इत्यपि पाठोऽत्र स्यात् ॥
३२ व्य] **व्यंज्यं**nayacakra-ms-ya । **ज्यं** nayacakra-ms-bhā ॥
३३ वा] **॰वाच्यौ** प्र॰ ॥
३४ त्या] **॰त्यादि**nayacakra-ms-ya ॥

* * *

अथोच्येत--अप्रकाशत्वान्नैकान्तः शक्यते कर्तुम् । पुरुषः सत्त्वान्न प्रकाशते, अप्रकाशकत्वे सन्निहितप्रकाशकारकत्वात्, प्रदीपेनेव वियत् । रजस्तमसी च प्रकाश्येते, अप्रकाशकत्वात्, प्रदीपेनेव पृथिवी । पुरुषोऽप्रकाशः, रजस्तमसी च प्रकाशे ।

एवं तावद् विकल्पसमजातित्वादनुत्तरमेव । अपि च नैव वियतोऽप्रकाशकत्वम्, यस्माद् रूपादिपृथग्भूतपृथग्विपरिणतिषु पृथिव्यादिषु नाप्रकाशनं घटते बोध्य-

* * *

**रजस्तमोभ्यामिवेति** । **अपिशब्दाद्** रजस्तमोभ्यामपि **तेनापि** च पुरुषेणाप्रकाशात्मकेन **शब्दभावाय प्रवर्तितव्यं** प्रकाशितव्यं व्यवस्थातव्यमित्येते प्रवृत्तिप्रकाशनियमाः पुरुषकार्याः स्युः, स प्रवर्तते प्रकाशते व्यवतिष्ठते परिणमतीत्यर्थः । कुतः ? **प्रकाशकारकोपपत्तेः**, तस्याप्रकाशकत्वे सति उपपन्नप्रकाशकारकत्वादित्यर्थः । यद् यदप्रकाशकत्वे सत्युपपन्नप्रकाशकारकं तेन तेन शब्दभावाय प्रकाशितव्यं प्रवर्तितव्यं व्यवस्थातव्यं यथा रजसा तमसा च । अथवा रजस्तमश्च यथा प्रवर्तत इत्यादि यथाभिव्यक्तार्थानुरूपं व्याख्यातव्यमिति । § 884

एतस्य साधनस्यानैकान्तिकत्वोद्भावनार्थं साधनद्वारेण परमतमाशङ्क्याह, **अथोच्येत--अप्रकाशत्वाद् नैकान्त** इत्यादि सोपसंहारहेतुकप्रकाशनाप्रकाशनसाधने यावत् **प्रकाशे** इति । **अप्रकाशत्वाद् नैकान्तः शक्यते कर्तु**मिति, - /ms अयं हेतुर्न शक्य ऐकान्तिकः कर्तुम्, यस्माच्छक्यते वक्तुमित्थमपि --**पुरुषः सत्त्वाद् न प्रकाशते** न व्यज्यत इति । कस्मात् ? **अप्रकाशकत्वे सन्निहितप्रकाशकारकत्वात्**, यदप्रकाशकत्वे सन्निहितप्रकाशकारकं तदप्रकाशमानं दृष्टम्, यथा **प्रदीपेनेव वियत्** । **रजस्तमसी च प्रकाश्येते अप्रकाशकत्वात् प्रदीपेनेव पृथिवी**त्येतत् पूर्वेण साधनेन व्याख्यातार्थं सत् **सन्निहितप्रकाशकारकत्वा**दिति न विशेष्यते । यथा च वियत्पृथिव्योरप्रकाशत्वसामान्ये सत्येव कारकसान्निध्येऽपि प्रकाशाप्रकाशौ दृष्टावेवं पुरुषस्याप्रकाशात्मकत्वेऽप्यप्रकाशतैव रजस्तमसोः सत्त्वस्य प्रकाशतैवेति विशेषोऽस्त्विति । § 885

अत्रोच्यते --**एवं तावद् विकल्पसमजातित्वादनुत्तरमेव,** प्रयत्नानन्तरीयकत्वे सत्येव मूर्तामूर्तत्वादिविशेषवद् घटशब्दयोरनित्यो नित्यश्चेति विशेषः

---

१८ अथोच्ये] °च्येत । प्रका°nayacakra-ms-bhā । °च्यते[ऽ?]प्रका° nayacakra-ms-ya ॥

१९ काश] °शक-त्वाद्nayacakra-ms-bhānayacakra-ms-vi ॥

२० श] **शक्यमैका**° प्र° ॥

२३ काश्ये] °श्यतेऽप्रका° प्र° ॥

२८ द्] साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसजतो विकल्पसमः । क्रियागुणहेतुकं किञ्चिद् यथा लोष्टः, किञ्चिच्च लघु यथा वायुः । एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात्, यथा लोष्टः, किञ्चिदक्रियम्, यथा आत्मा, विशेषो वा वाच्यः । इति **न्यायभाष्ये** ५ । १ । ४ ॥

स्यात् इति वचनवत् । किञ्चान्यत्, एत**दपि च नैव वियतोऽप्रकाशक-त्वं** त्वन्मतेनैव शब्दात्मना प्रकाशमानत्वादस्ति । यदपि च रूपविषयाप्रकाशनं पृथिव्यादिष्वेतदपि च नैवाप्रकाशनं घटते **यस्माद् रूपादी**त्यादि याव**न्नाप्रकाशत्वे प्रकाशन**मिति । **यस्मा**दिति हेतुर्वक्ष्यमाणार्थः, **नाप्रकाशनं घटत** इति साध्यम्, रूपादिरिति रूपरसगन्धास्तेजोम्भोभूमिषु, तेभ्यः पृथग्भूतावाकाशानिलौ शब्दस्पर्शात्मकौ, रूपादिपृथग्भूताभ्यां ख-वाताभ्यां पृथग्भूता विपरिणतिर्येषां तेषु **रूपादिपृथग्भूतपृथग्विपरिणतिषु पृथिव्यादिषु** - /ms पृथिव्यबादिषु तेजोरहितेषु विद्यमानः प्रकाशकत्वप्रकाशः स्वगतो विपरि- णतस्तिरोभूतः, किन्तु प्रकाश्यप्रकाशोऽस्त्याविर्भूतत्वात्, अतस्तेषां प्रकाश्यतैव 290/mj । क्वचिदत्यन्तमतिरोभूतत्वाद्

* * *

बोधकमनुष्यप्रकाश्यप्रकाशकत्ववत् । हेतुहेतुमत्त्वेऽपि तयोर्नाप्रकाशत्वे प्रकाशनम् ।

वियत्पृथिवीविशेषोपपत्तिवच्च ते एव प्रवर्तेते न पुरुष इत्यस्तु नाम, प्रकाशात्मके तर्हि रजस्तमसी शब्दभावाय प्रवृत्तेः सत्त्ववत्, वैधर्म्येण पुरुषवत् ।

असत्कार्यवादिता चातिस्फुटैव, सत्त्वे प्रवृत्तिनियमयोरभूतयोः शब्दात्मव्यवस्थानवचनादभ्युपगमात्, रजस्तमसोः प्रागसतो जात्यन्तरकार्यभूतस्य प्रकाशनस्या-

* * *

वज्रादिषु प्रकाशता च दृश्यत एव, तस्मात् खरपृथिव्यादिषु प्रकाशता स्वगतप्रकाशविपरिणामाद् विद्यमानप्रकाशकतैव **बोध्यबोधकमनुष्यप्रकाश्यप्रकाशकत्ववत्,** ज्ञानस्वभाव एव हि मनुष्यः प्रकाशात्मा प्रकाश्यो बोध्यो बोधकश्च दृष्टः, न कुड्यादिरचेतनः, तथा पृथिव्यादयः । **मनुष्य**ग्रहणमस्यैव रथ्यापुरुषस्योदाहार्यत्वात् । स्यान्मतम्--बोधकबोध्ययोर्हेतुहेतुमद्भावान्नोभयोरुभयधर्मतेति दृष्टान्तदार्ष्टान्तिकवैषम्यमिति । एतच्चायुक्तम्, यस्माद्धेतुहेतुमत्त्वेऽपि तयोः सूरिशिष्ययोर्द्वयोरपि प्रत्येकं **नाप्रकाशत्वे प्रकाशन**मिति । तस्माद् वियत्पृथिव्योरपि प्रकाशकत्वसाम्याद् दृष्टान्ताभावे पुरुषस्य रजस्तमसोश्च विशेषापादनासिद्धिः । अथापि त्वदनुवृत्त्या वियत्पृथिवीविशेषोपपत्तिमभ्युपेमः पुरुषस्याप्रकाशकत्वे सति अप्रवर्तनादि रजस्तमसोश्च प्रवर्तनादि तथापि ते **वियत्पृथिवीविशेषोपपत्तिवच्च ते एव प्रवर्तेते** रजस्तमसी **न पुरुष इत्यस्तु नाम,** नैवास्तीत्यभिप्रायः । किन्त्वयमन्य-

---

८ स्व ] **स्वगतोतो वि॰** प्र॰ ॥
२० ज्रादिषु ]
**प्रकाशकाशता**nayacakra-ms-bhā ॥
एतच्चिह्नान्तर्गतः पाठो
nayacakra-ms-ya प्रतिषु नास्ति ॥>
२६ स्मा ] **॰द्धेतुमत्त्वेऽपि** प्र॰ ॥
२७ त ] **तस्मान्न विय॰** प्र॰ ॥
३० त्तिव ] **॰वच्च त एव प्रवर्तते**nayacakra-ms-ya । **॰वच्च एव प्रवर्तते** nayacakra-ms-bhā ॥

स्ते दोषोऽनिष्ट आपद्यते **--प्रकाशात्मके तर्हि रजस्तमसी,** सत्त्वविलक्षणे न भवत इत्यर्थः, कुतः ? **शब्दभावाय प्रवृत्तेः, सत्त्ववत्,** यच्छब्दभावाय प्रवर्तते तत् प्रकाशात्मकं दृष्टम्, यथा सत्त्वम्, **वैधर्म्येण पुरुषवदिति,** यत् - /ms
प्रकाशात्मकं न भवति न तच्छब्दात्मभावाय प्रवर्तते यथा तव पुरुष इति । § 886

किञ्चान्यत्, **--असत्कार्यवादिता**ऽत्यन्तानिष्टा प्रसक्ता **एवमनभ्युपगमे** इति वर्तते, सा चासत्कार्यवादिता**ऽतिस्फुटैव,** कथम् ? **सत्त्वे प्रवृत्तिनियमयोरभूतयोः शब्दात्मव्यवस्थानवचनादभ्युपगमात्,** सत्त्वस्य कार्यं प्रकाश एवेष्टो न प्रवृत्तिनियमौ जात्यन्तरभूतरजस्तमस्कार्यत्वात्, तौ तत्रासन्तौ पुनस्तस्य कार्यावभ्युपगतौ, कुतः ? **व्यवस्थानवचनात् सत्त्वं शब्दकार्यं प्रख्याय शब्दात्मना व्यवतिष्ठमान**मिति ब्रुवताभ्युपगमादितीति । तदा यदि तत् सत्त्वमप्रवृत्तमनियतं वा पूर्ववदप्रवृत्तत्वादनियतत्वाच्च तयोस्तथारूपां शब्दात्मिकां प्रवृत्तिं न प्रख्यापयेद् नैव वा स्याद् वन्ध्यापुत्रवदित्युक्तत्वात् व्यवस्थानस्य च प्रकाशप्रवृत्तिनियमात्मकस्य प्रागसतः सत्त्वविषयस्यारम्भावस्थायां साम्यावस्थाविलक्षणायामभ्युपगतत्वादसतोः प्रवृत्तिनियमयोः सत्त्वाभ्युपगमादतिस्फुटा । किञ्चान्यत्, **रजस्तमसो**रित्यादि यावत् **प्रकाशनस्याभ्युपगमा**दिति, **असत्कार्यवादिताऽतिस्फुटैवेति** वर्तते । तस्मिन्नेव सत्त्वप्रकाशात्मव्यवस्थानोपकार 291/mj

* * *

भ्युपगमात्, पृथग्भूततत्त्वकारणाश्रयाभिव्यक्तेः वैशेषिकाभिमततन्त्वाश्रयपटवत् । तैर्यथास्वमकारणसद्भिः प्रकाशादिभिरारब्धं कार्यमपि भ्रान्तिमात्रम्, त्वदुक्तहेतुसामर्थ्यादेव तन्मयारब्धत्वादसदात्मकं हि तत् कार्पासिकतन्त्वारब्धपटकार्पासिकत्ववत् । तन्मयतन्मयं च असदात्मकं तन्मयतन्मयारब्धत्वात् कार्पासिकपटकुटेरपि कार्पासिकत्ववद् रूपादिसुखादिमयत्ववत् ।

* * *

वाक्ये **रजस्तमसोः शब्दभावाय प्रवृत्तिं प्रख्यापयतीति** वचनात् तयो रजसि तमसि च प्रागसतः प्रकाशस्य जात्यन्तरकार्यभूतस्य तदानीं प्रख्यापनादसतोऽभिव्यक्तिरुत्पत्तिर्वाभ्युपगता, यदि ते रजस्तमसी तथा प्रतिपद्येते व्यवतिष्ठेते प्रवर्तेते वा ततः सत्त्वेन प्रकाशितं स्यात् आचार्येणेव नर्तक्याः

---

२ ब्द] °ब्दाभा°nayacakra-ms-ya ॥
६ वा] °दिनोत्यन्ता° प्र° ॥
७ व] प्रवर्तते प्र° । दृश्यतां पृ° २८७ पं° ३ ॥
१० स] दृश्यतां पृ° २८८ पं° २, २० ॥
११ मा] अत्र °दिति इत्यपि पाठः स्यात् ॥
१२ पू] दृश्यतां पृ° २७० पं° ४, पृ° २८१ पं° ८ ॥
१५ तिस्फु] °स्फुटः प्र° ॥
२४ र] दृश्यतां पृ° २८८ पं° २ ॥
२७ व] °तिष्ठते प्र° ॥
२७ प्र] प्रवर्तितेnayacakra-ms-bhā । प्रवर्तते nayacakra-ms-ya ॥
२७ स्या] तस्यात् प्र° । अत्र तत् स्यात् इत्यपि पाठो भवेत्, तत् इति शब्देन च रजस्तमो वा ग्राह्यम् ॥

प्रागप्रतिपन्नाया अप्रवृत्ताया अव्यवतिष्ठमानायाः । तस्मात् प्रकाशोऽपि तयोः - /ms प्रागसन् पश्चाज्जात इत्यसत्कार्यवादिता । सेदानीं **वैशेषिका-** सत्कार्यवादितया तुल्येति भाव्यते --**पृथग्भूततत्त्वे**त्यादि, पृथग्भूतं तत्त्वमात्मा कार्यं तद्भावो यस्य स पृथग्भूततत्त्वो गुणः, स एवाश्रयः कारणं च, तस्मिंस्तस्मिन् गुणे सत्त्वे रजसि तमसि च **वैशेषिक**कल्पितपटादिकार्यस्य च तत्त्वादिषु परस्परसंयोगापेक्षेष्वसतो भवनवत् प्रकाशप्रवृत्तिनियमानां कार्याणां सत्त्वे प्रवृत्तिनियमयोरसतोः प्रकाशनियमयोश्च रजसि प्रवृत्तिप्रकाशयोश्च तमस्यसतां परस्परापेक्षप्रवृत्तिषु सत्त्वादिषूत्पत्तिर्भवनमुक्तं भवति । प्रागसन्तः प्रकाशप्रवृत्तिनियमाः शब्दाद्यारम्भकाल उत्पन्ना इति प्रतिपद्यस्व **पृथग्भूततत्त्वकारणाश्रयाभिव्यक्तेः वैशेषिकाभिततन्त्वाश्रयपटवत्** । § 887

किञ्चान्यत्, **तैर्यथास्व**मित्यादि । **वैशेषिका**भिमतकार्यादप्येतत् पापीयो भ्रान्तिमात्रत्वात् । उक्तन्यायेन ते सत्त्वादिषु प्रकाशादयः कारणेष्वसन्तः, **यथास्वम्** यो यः स्वो यथास्वम्, प्रकाशः सत्त्वे नास्ति इतरापेक्ष उत्पन्नः, एवमितरावपीति **तैरकारणसद्भिः प्रकाशादिभिरारब्धं** परस्पराश्रयणेन व्यक्तं प्रवृत्तं नियतं च यत् **कार्यं** त्रिगुणं शब्दादि तदप्यलातचक्रवद् **भ्रान्तिमात्रं** न परमार्थतोऽस्तीत्यापन्नम्, **त्वदुक्तहेतुसामर्थ्यादिव तन्मयारब्धत्वादसदात्मकं हि तत्, त्वयैवोक्तं** हि **यद्य यन्मयैरारब्धं तदात्मकं तदिति शब्दादीनां सुखाद्यात्मकत्वं शब्दाद्यारब्धानां भूतानां भूतारब्धानां च शरीरादिघटादीनाम्,** तस्माद् वयमपि तथैव ब्रूमः--शब्दादि असदात्मकं तन्मयैरारब्धत्वात् **कार्पासिकतन्त्वारब्धपटकार्पासिकत्ववत्,** यथा कार्पासिकैस्तन्तुभिरार- - /ms ब्धः पटः कार्पासिक इत्युच्यते तथा शब्दाद्यसन्मयं तन्मयप्रकाशाद्यारब्धत्वादिति । **तन्मयतन्मयं चे**ति यदपि च भूतादि शरीरादि घटादि **सर्वमसदात्मकं तन्मयतन्मयारब्धत्वात् कार्पासिकपटकुटेरपि कार्पासिकत्ववदिति** । तच्छास्त्रप्रसिद्धमेव वोदाहरणं **रूपादिसुखादिमयत्ववदिति** । शब्दस्यासन्मयत्वे साध्ये रूपादिसुखादिमयत्वमुदाहरणम्, रूपादीनामपि तथैवासन्मयत्वं शब्दादिसुखादिमयत्वदृष्टान्तेनापाद्यमिति । § 888
292/mj

अथोच्येत--एवमेव तत्कारणत्वं तत्र च शब्दादिकार्यसत्त्वम्, शुक्लरक्तकृष्णतन्त्वात्मिकाया रज्ज्वोः कार्यायास्तन्तुकारणत्ववत् ।

---

१ न्नाया ] °याःऽप्र° nayacakra-ms-ḍenayacakra-ms-līṃ । °याऽप्र° nayacakra-ms-raṃ nayacakra-ms-hī । °याः प्र° nayacakra-ms-bhā nayacakra-ms-pā nayacakra-ms-vi ‖
७ र ] रजसि प्रकाशयोश्च प्र° ‖
९ तिप ] °पद्यस्या प्र° ‖
१० का ] °करणा° प्र° ‖
१० याभिव्य ] °व्यक्तेःnayacakra-ms-bhā ‖
१७ य ] दृश्यतां पृ° २६६ पं° २ ‖
२२ भूता ] °दि चnayacakra-ms-ya ‖

नन्वेवं यथास्मदुक्तवद्वैकत्वं रजस्तमसी अपि सत्त्वमेव, प्रकाश-कारणत्वात्, सत्त्वस्वात्मवत् । अथ त्वन्मतेन, सर्वव्यक्तव्यापि चासत्कार्यत्वं प्रतिगुणं प्रकाशाद्योर्द्वयोः कार्यात्मनोः प्रागभूतत्वात् । § 889

बौद्धवद्वा असत्कार्यत्वम्, तथाभूतवस्तुनिर्मूलोत्पत्तित्वात्, द्वितीयक्षण— घटवत् । § 890

**अथोच्येत--एवमेव तत्कारणत्वम्,** तेषां सत्त्वादीनां कारणत्वमेवमेव युज्यते । **तत्र च** तेषु सत्त्वादिषु कारणेषु **शब्दादिकार्यसत्त्व**मेवमेव युज्यते प्रतिस्वं प्रकाशादिकार्याणां **शुक्लरक्तकृष्णतन्त्वात्मिकाया रज्जोः कार्यायास्त-न्तुकारणत्ववत्,** यथा प्रत्येकं शुक्लादिगुणास्तन्तवस्त्रयोऽपि त्रिगुणामेकां र-ज्जुमारभमाणाः कारणत्वं नातिवर्तन्ते ततस्तेषु सत एव त्रैगुण्यस्याविर्भावाद् रज्जोः सत्कार्यत्वं तथा सत्त्वादिकारणत्वं शब्दादिसत्कार्यता चेति । § 891

अत्रोच्यते --**नन्वेव**मित्यादि यावत् **सत्त्वस्वात्मव**दिति । एवमेव इति य-देतद् वचनं तस्य द्वयी गतिः, यथास्मदुक्तवदेकात्मकं कारणमनेकाकारविप-रिवृत्ति पुरुषवदित्यभ्युपगमादिति तद्दर्शयति सकारणम् — **यथास्मदुक्तव-द्वैकत्वं रजस्तमसी अपि सत्त्वमेव, प्रकाशकारणत्वं** च तयोर्यथाप्राग्व्याख्यातं सिद्धम्, अत एव तस्यां गतौ दोषः स एव पुरुषाद्यन्यतमैककारणवादाभ्युप-गम इति । **अथ त्वन्मतेन** जात्यन्तरसुखादित्रयकारणतदात्मककार्याभ्युप- - /ms गमेन एवमेव इत्येषा गतिरिति । इतर आह--एषा गतिरस्तु, को दोषः ? इति, अत्र दोषकुतूहलं चेद् ब्रूमः --**सर्वव्यक्तव्यापि चे**त्यादि, तदेव ह्यसत्कार्यत्वमित्थं भावनान्तरेणापाद्यते, सर्वव्यक्तं शब्दादि तन्तुपटादि च व्यापितुं शीलमस्य तदसत्कार्यत्वं सर्वव्यक्तव्यापि, कस्माद्धेतोः ? **प्रतिगुणं प्रकाशाद्योर्द्वयोः कार्यात्मनोः प्रागभूतत्वात्,** गुणं गुणं प्रति प्रतिगुणं सत्त्वे द्वयोः [प्रवृत्तिनियमयोः] प्रागभूतत्वादेव कार्यात्मनोः तथा रजसि प्रकाशनियमयोः तमसि प्रकाशप्रवृत्त्योः कार्यात्मनोरभूतत्वात् अन्यगुणकारणकार्यात्मनामन्यत्र व्यक्तिप्रवृत्तिनियतिकार्याणामसतामुत्पत्तेर्व्यवस्थानवचनात् प्रख्यापनवचनाच्च अभ्युपगतत्वात् । तस्माद् **वैशेषिककार्यवदसत्कार्यत्वम्** । § 892

न केवलं **वैशेषिकवदेव,** किं तर्हि ? **बौद्धवद्वा असत्कार्यत्वम्,** वरं हि **वैशेषिका**सत्कार्यतुल्यत्वं तदसत्कार्यत्वस्य कारणैः सह कश्चित् कालं तिष्ठत इति तैरिष्टत्वात् । इदं **बौद्धा**सत्कार्यतुल्यमेव ते प्राप्तम्, कुतः ? **तथाभूत-वस्तुनिर्मूलोत्पत्तित्वात्,** तेन प्रकारेण भूतं वस्तु शब्दो रूपम् इत्यादिना,

८ त्व ] °त्वमेव युज्यते प्र° ॥
११ नातिव ] °र्तन्ते[ऽ?]तस्तेषुnayacakra-ms-bhā ॥
१४ य ] यद्वास्म° प्र° ॥
२० व्यापि ] वेत्यादिnayacakra-ms-ya ॥
२१ रेणा ] °णपाद्यंते प्र° ॥
२५ न्य ] °न्यत्रा प्र° ॥
२९ त ] तदसत्कार्यस्य ? ॥

तथाभूतवस्तुनो निर्मूला उत्पत्तिः, तद्भावात् तथाभूतवस्तुनिर्मूलोत्पत्तित्वात् । किमर्थं पुन**र्निर्मूलोत्पत्तित्वा**दिति सिद्धे **तथाभूतवस्तु**ग्रहणम् ? दृष्टान्तद्वयेनार्थद्वयप्रदर्शनार्थम्, तद्यथा --**द्वितीयक्षणघटवत्,** यथा क्षणः क्षणान्तरेऽनुत्पन्न एवोत्तरस्मिन् पूर्वो निरुध्यते उत्तरश्च तदनन्तरमुत्पद्यते निर्मूलः नामोन्नामौ
293/mj तुलान्तयोरिव

* * *

असत्कार्याः शब्दादयः, कारणत्वात्, अन्यगुणात्मकसुखप्रवृत्त्यादिवत् इतरानुपकृताविद्यमानप्रकाशादित्रयसुखादिकारणवत् । प्रत्येकमितरानुपकृतविद्यमानप्रकाशादित्रयस्वकार्या वा सुखादयः, कारणत्वात्, शब्दादिवत् तन्त्वादिवद्वा ।

अथ प्रकाशात्मकयोरेव रजस्तमसोः शब्दभावाय व्यवतिष्ठते सत्त्वं तत एकात्मकैककारणत्वम्, तच्च नेष्यते ।

ततो यथैव कारणे कार्यस्य सत्त्वाद् घटेनैव घटः क्रियते तदात्मव्य-
- /ms क्तिप्रति-

* * *

इत्युक्तत्वात् । तत्सहचरितं च घटादि वस्तु पूर्वस्मिन् निरुद्धे पाश्चात्यस्य पाश्चात्यस्योत्पादाभ्युपगमाद् निर्मूलोत्पत्त्येवेति उभयं दृष्टान्तः साध्यं चोभयम्, तत्साधर्म्यादिदमपि सत्त्वादिप्रकाशादिकार्यं शब्दादि साङ्ख्यमतमिति योज्यम् । तस्माद् निर्मूलोत्पत्तिसाधर्म्याद् **बौद्धा**सत्कार्यवादतुल्यतेति । § 893

एवं प्रकाशाद्यसत्कार्यत्वे सिद्धे सर्वव्यक्तासत्कार्यत्वसाधनम् --**असत्कार्याः शब्दादयः कारणत्वात्,** यद् यत् कारणं तत् तदसत्कार्यं दृष्टम्, **अन्यगुणात्मकसुखप्रवृत्त्यादिवत्,** अन्यो गुणः सत्त्वाद् रजः, तस्यात्मा सुखम्, तच्च स्वयं साम्यावस्थायामेकप्रकाशात्मकार्यमपि सद् जात्यन्तररजस्कार्यप्रवृत्त्यात्मकमारम्भावस्थायामिष्टं त्र्यात्मकशब्दाद्यात्मव्यवस्थानवचनात्, तथा नियमात्मकमपि **आदि**ग्रहणात् । अतः सुखं सत्त्वगुणं प्रागसत्प्रवृत्तिनियमकार्यं पश्चात् तत्कार्यं दृष्टं कारणं च तद्वच्छब्दादयोऽसत्कार्याः कारणतां च बिभ्रतीति, एवमन्यगुणदुःखप्रकाशनियमवत् अन्यगुणमोहप्रकाशप्रवृत्तिवदित्येकैकमेव दृष्टान्तं कृत्वा योज्यम् । एतस्यार्थस्य स्फुटीकरणार्थमाह --**इतरानुपकृताविद्यमानप्रकाशादित्रयसुखादिकारणव**दिति, इतरेण रजसा तमसा चानुपकृतौ प्रागसन्तौ प्रवृत्तिनियमौ पश्चात् तदुपकारजनितौ सुखे कारणे दृष्टौ, **आदि**ग्रहणादेवं दुःखे प्रकाशनियमावितरानुपकृतौ प्रागसन्तौ पश्चात् तदुपकारजौ तथा मोहेऽपीति । यद्येवं नेष्यते ततः **प्रत्येकमितरानुप-**

१ स्तु ] °स्तुना प्र° ॥
३ न्न ] सप्तम्यन्तोऽयं निर्देशः ॥
१० अथ ] दृश्यतां पृ° २८८ पं° ३, पृ° २९५ पं° ९ ॥
१६ त्ये ] °त्त्येवेत् पुरुषदृष्टान्तःnayacakra-ms-ya ॥
२२ काशात्म ] °त्मक्षात्मकका ?र्यमपिnayacakra-ms-bhā ॥
२९ न्तौ ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

**कृतविद्यमानप्रकाशादित्रयस्वकार्या वा सुखादयः, कारणत्वात्, शब्दादि- वत्** - /ms **तन्त्वादिवद्वे**ति, स्वशब्दादेकस्यैव सत्त्वगुणस्य त्रयोऽपि प्रकाशादय आत्मीया एव कार्यास्तथेतरयोश्चेति पुरुषादिवाद एवैष संज्ञामात्रविप्रतिपत्तेरिति । एवं तावदप्रकाशात्मकयो रजस्तमसोः शब्दात्मना व्यवतिष्ठमानेन तत्प्रख्यातिना सत्त्वेन तदात्मप्रख्यापने दोषा उक्ताः । § 894

यदि चैवं सत्कार्यवादस्योत्खातमूलत्वप्रसङ्गभयादसत्कार्यवादस्य प्रतिष्ठितमूलत्वप्रसङ्गभयाच्च नेष्यतेऽयं विकल्पः अप्रकाशात्मकयोः इति ततः प्रकाशात्मकयोः इत्यस्तु, तत्रापि च दोषं वक्तुकाम इदमाह --**अथ प्रकाशात्मकयोरि**त्यादि याव**न्नेष्यत** इति गतार्थम् । § 895

**ततो यथैवे**त्यादि दृष्टान्तमेव तावत् प्रक्रियाप्रसिद्धमुपवर्णयति । **कारणे कार्यस्य सत्त्वाद् घटेनैव घटः क्रियते** इति, मृत्पिण्डघटेनोर्द्ध्वग्रीवकुण्डलौष्ठपृथुकुक्षिबुध्नादिघटः क्रियते प्रकाश्यते, करोतेः प्रकाशार्थत्वात्, यथा पृष्ठं कुरु पादौ कुरु, तच्च करणं विमलीकरणं प्रकाशनमित्यर्थः, कारणे कार्यस्य सत एव प्रकाशनात् सर्पस्फटाटोपमुकुलत्ववद् दीर्घकुण्डलकीभाववच्च, तत्र यथा सर्पेणैव सर्पः क्रियते तथेहापि 294/mj

* * *

नियतस्वसाधनक्रमसमावेशात् कारणघटेन कार्यघटोऽभिव्यज्यते तथाभूतव्यक्तिशक्तिस्थूलतापत्त्या मृद एव घटत्वात् तथैव सत्त्वेन सत्त्वमेव प्रकाश्यते शब्दादिप्रकाशेन अपृथग्भूतप्रकाशादितत्त्वमाकाशादि प्रकाश्यते शब्दादिप्रवृत्त्या शब्दादिनियमेन प्रवर्त्यते नियम्यते च । अपृथग्भूततत्त्वेनैव सत्त्वेन प्रकाशेन प्रवृत्तिसत्त्वेन अनपेक्षया

* * *

घटेनैव मृदा घटः पृथुकुक्ष्याद्याकाराः क्रियन्तेऽत्यन्तभिन्नेनान्येनान्यस्याकरणात् । किञ्चान्यत्, **तदात्मव्यक्तिप्रतिनियतस्वसाधनक्रमसमावेशात्**, घटात्मत्वस्य व्यक्तिः प्रागनुपलभ्यस्य पश्चादुपलब्धिः, सा प्रतिनियतानामात्मीयानां कुलालदण्डादीनां तत्क्रमस्य च कालाख्यसाधनत्वात् पिण्डशिवकादिभावेषु यथावस्थं व्याप्रियमाणानां क्रमेण व्यापारादित्यर्थः । तद्दर्शयति --**कारणघटेन कार्यघटोऽभिव्यज्यत** इति । कथं व्यज्यते इति चेत्, उच्यते --**तथाभूतव्यक्तिशक्तिस्थूलतापत्त्या,** पृथुकुक्ष्यादिप्रकारेण व्यक्तिशक्तिरस्यां मृदि शक्तिमत्यां सूक्ष्मावस्थानादुत्तरकालं देशकालाद्यवबन्धापगमात् स्थूलतापत्त्या इन्द्रियग्राह्यतया निर्माज्यर्दर्पणस्वरूपोपलब्धिवत् कर्मैव सद् वस्तु कर्तृ भव-

६ दि ] चेवं प्र॰ ॥
७ काशात्म ] ॰त्मयोः प्र॰ । दृश्यतां पृ॰ २९५ टि॰ ३ ॥
१२ पृथु ] ॰थिकुक्षि॰nayacakra-ms-bhā ॥
१३ णं ] दृश्यतां पृ॰ १७१ टि॰ ९ ॥
१४ कीभा ] ॰भावचnayacakra-ms-bhā । ॰भावत्व nayacakra-ms-ya ॥
२८ मृ ] मृदशक्ति॰ प्र॰ ॥
३० या ] निर्म्यज्य॰nayacakra-ms-ya । निर्मज्य॰ nayacakra-ms-bhā ॥

- /ms ति, **मृद एव घटत्वात्,** मृदेव हि घटो भवति, घटमात्मानमात्मना अवस्थान्तरमात्रविशिष्टमवस्थान्तरमात्रविशिष्टेन करोति, कर्तुरेव कर्मत्वाभ्युपगमात् । कुलालदण्डादीनां तर्हि साधनत्वाभावः स्वयमेव मृदः कर्तृकर्मत्वाभ्युपगमाद् घटस्यैवेति चेत्, न, अत एव तत्साधनत्वाद् वीरणादितोऽकरणादसदकरणादिहेतुभ्यो मृद्येव सन्तं घटं कुलालचक्रदण्डादयोऽभिव्यञ्जयन्तः कर्तृकरणसम्प्रदानापादानाधिकरणादिभावं प्रतिलभन्ते तद्विषयमेव न वीरणादिविषयं न तन्त्वादिविषयम्, तदात्मगतव्यक्तिशक्तिप्रतिनियतस्वसाधनक्रमसमावेशादेव तानि च कारणानि परस्परोपजनितकार्यसाधनशक्तीनि एकप्रबन्धेन प्रवर्तमानानि कारकाणि इत्युच्यन्ते, नान्यविषयाणि । तस्मात् कुलालादीनामपि तथैव कर्तृत्वादिभावोपपत्तेः घटेनैव घटः क्रियते इति साधूक्तम् । § 896

यदुक्तं भवति प्रकाशेनापृथग्भू (Edtext outside numbered paragraph)ततत्वेन सत्वेन इत्यादिप (Edtext outside numbered paragraph)र्यायैस्तदुक्तं भवति प्रवृत्तिसत्वेन प्रवृत्त्या स्वशक्त्या **व्यक्तिराविर्भावः, जनी प्रादुर्भावे** पा॰ धा॰ ११४९, प्रादुः प्राकाश्ये, प्रकाशो जन्म अभिव्यक्तिरित्यनर्थान्तरम् **प्रकाश** (Edtext outside numbered paragraph)**त्मकयोरेव** र (Edtext outside numbered paragraph)**जस्तमसोः** इति वचनादपृथग्भूतं तत्त्वं प्रकाशादीनामर्थान्तरनिरपेक्षमिति । यथा प्रकाश एव प्रवृत्तिरिति दर्शितं तथा प्रवृत्तिरेव प्रकाश इति दर्शयति --**आविर्भावेन प्रवृत्त्या प्रवृत्तिसत्वेन प्रवृत्तिसत्वमेवानपेक्षा स्वव्यक्तिः,** स्वतःपृथग्भूतप्रकाशनियमानपेक्षा स्वात्माभिव्यक्तिरित्यर्थः । तत्पर्यायकथनम् --**आविर्भावः प्रवृत्तिरिति । तथा नियमसत्वेन अनपेक्षणे**त्यादिना ग्रन्थेन प्रकाशप्रवृत्त्यनर्थान्तरभूतो नियम एव सत्वं रजश्चेत्यत आह --**स्वशक्त्याविर्भावेन स्वनियत्या,** का च सा ? **नियमसत्वमेवानपेक्षा स्वव्यक्तिः** पूर्ववत् स्वप्रवृत्तिः स्वनियम इत्येकोऽर्थ इति प्रागुपपादितत्वात् **प्रकाश एव प्रवृत्तिर्नियमश्च,** यस्मात् प्रकाशमानः प्रवर्तते नियतश्चार्थ इति । एवं **प्रवृत्तिरेवेतरद्वयम्,** यस्मात् प्रवर्तमानं प्रकाशते नियतं च, **नियम एवेतरद्वयम्,** नियतो ह्यर्थः प्रकाशते प्रवर्तते [च], तस्मादिहापि तदेव भावितमैक्यमिति । § 897

एवं दृष्टान्तमात्मनैवात्मानं प्रकाशयति करोतीति प्रतिपाद्य दार्ष्टान्तिकं प्रतिपादयति --**तथैव सत्वेने**त्यादि । यथा **कारणे कार्यस्य सत्वाद् घटेनैव घटः क्रियत** इत्युक्तं तथा कारणे कार्यस्य सत्वात् सत्वेन सुखप्रकाशादिकारणात्मना तदात्मकं **सत्वमेव प्रकाश्यते** मृद्घटावस्थावत्, तद्दर्शयति --**शब्दादिप्रकाशेनापृथग्भूतप्रकाशादितत्वम्,** किं तत् ? **आकाशादि,** रूपाद्य-

---

१ मात्म ]
°त्मानावस्था°nayacakra-ms-bhā ।
°त्मनामवस्था° nayacakra-ms-ya ॥
२ क ] **कर्तृत्वाभ्यु°** प्र ॥
८ ब ] **°बद्धेन°** प्र° ॥

९ का ] कारणानिnayacakra-ms-ya
॥
१२ का ] दृश्यतां पृ॰ २९३ पं॰ ६ ॥

पृथग्भूततत्त्वाया मृदो घटे तदपृथग्भूततत्त्वघटादिप्रकाशवत् प्रकाशापृथग्भूतेन प्रकाशापृथग्भूततत्त्वं **प्रकाश्यत** इत्यर्थः, प्रकाशापृथग्भूतावेव प्रवृत्तिनियमाव- पीति तद्दर्शयति **--शब्दादिप्रवृत्त्या शब्दादिनियमेन,** तदप्याकाशादि यथा प्र- काशापृथग्भावात् प्रकाश्यते तथा **प्रवर्त्यते नियम्यते चे**ति । तद् विस्तरेण पर्यायशब्दान्वाख्यानेन भावयति— **अपृथग्भूततत्त्वेने**त्यादि, अपृथग्भूततत्त्व- त्वादेव तेन **सत्त्वेन प्रकाशेन प्रवृत्तिसत्त्वेने**ति प्रकाशप्रवृत्त्योरैक्यं दर्शयति, - /ms **एव**कारेणावधारणार्थेन ततः पृथग्भूतार्थाभावं च दर्शयति । अत एव चाह

स्वशक्त्या व्यक्तिराविर्भावः । आविर्भावेन प्रवृत्त्या प्रवृत्तिसत्त्वेन प्रवृत्तिस- त्त्वमेवानपेक्षा स्वव्यक्तिराविर्भावः प्रवृत्तिः । तथा नियमसत्त्वेनानपेक्षेण स्वश- क्त्या आविर्भावेन स्वनियत्या नियमसत्त्वमेवानपेक्षा स्वव्यक्तिः । प्रकाश एव प्रवृत्तिर्नियमश्च, प्रवृत्तिरेवेतरद्वयम्, नियम एवेतरद्वयम् । अत एषामेकपुरुष- वृत्तश्यामायताक्षप्रलम्बबाहुत्ववदेकवस्तुस्वतत्त्वभूतानामव्यतिरेकैकवृत्तिता ।

सत्त्वसत्त्वेनैव सत्त्वसत्त्वं प्रकाश्यते व्यक्तिपरिणामेन व्यक्तीभवतीत्युक्तं

* * *

स्वशक्त्या,**--अनपेक्षया** 295/mj

* * *

**स्वशक्त्या व्यक्तिराविर्भावः । आविर्भावेन प्रवृत्त्या प्रवृत्तिसत्त्वेन प्रवृत्तिस- त्त्वमेवानपेक्षा स्वव्यक्तिराविर्भावः प्रवृत्तिः । तथा नियमसत्त्वेनानपेक्षेण स्वश- क्त्या आविर्भावेन स्वनियत्या नियमसत्त्वमेवानपेक्षा स्वव्यक्तिः । प्रकाश एव प्रवृत्तिर्नियमश्च, प्रवृत्तिरेवेतरद्वयम्, नियम एवेतरद्वयम् । अत एषामेकपुरुष- वृत्तश्यामायताक्षप्रलम्बबाहुत्ववदेकवस्तुस्वतत्त्वभूतानामव्यतिरेकैकवृत्तिता ।**

**सत्त्वसत्त्वेनैव सत्त्वसत्त्वं प्रकाश्यते व्यक्तिपरिणामेन व्यक्तीभवतीत्युक्तं**

* * *

**स्वशक्त्या,**

कथं तर्ह्येकमेव प्रकाशप्रवृत्तिनियमभेदप्रत्ययव्यपदेशभाग् भवति ? इत्यत्रोच्यते **--अत एषामेकपुरुषवृत्तश्यामायताक्षप्रलम्बबाहुत्ववत्,** यथैक- स्मिन् पुरुषे प्रवृत्तानि तदव्यतिरिक्तानि श्यामत्वमायताक्षत्वं प्रलम्बबाहुत्व- मित्येतानि भिन्नानीव तद्भेदप्रत्ययव्यपदेशभाञ्जि भवन्ति तथै**कवस्त्वि**त्यादिनोप- संहरति, **एकस्य वस्तुनः स्वतत्त्वभूतानां** तदभिधानप्रयोजनानां सत्त्वरजस्त- - /ms मसां तत्कार्याणां च प्रकाशनप्रवृत्तिनियमाना**मव्यतिरेकैकवृत्तिता । इति** परिसमाप्त्यर्थः, एवं तावदेतया भावनयापादितैक्यानां सत्त्वादीनां सत्त्वस्वात्म- त्वेनैव कर्तृकर्मत्ववृत्तिरुक्ता परस्परस्वरूपापादनेन भेदमभ्युपगम्य । § 898

इदानीं फलाभेदान्नैव भेद इति प्रतिपादयिष्यन्नाह **--सत्त्वसत्त्वेनैव स- त्त्वसत्त्वं प्रकाश्यते,** त्रयाणामपि सत्त्वरूपत्वस्यापादितत्वात् सत्त्वसत्त्वं रजःसत्त्वं

---

१ ग्भू] ॰ग्भूतत्वघटा॰ प्र॰ ॥
१५ पेक्ष] ॰प्रेक्ष्यया॰ प्र॰ ॥
२८ र] ॰रतिति एकस्यnayacakra-ms-bhā । ॰रति त एकस्य nayacakra-ms-ya ॥
३१ प] परस्वरूपा॰nayacakra-ms-bhā ॥

तमःसत्त्वमिति भिद्यते, तस्याभेदः फलाभेदादापाद्यतेऽधुना । यत् तत् सत्त्वं सत्त्वमेव भवति नान्यद् भवति रजस्तमो वा तत् सत्त्वसत्त्वं तेन सत्त्वसत्त्वेनैव प्रकाश्यते व्यज्यते तदेव सत्त्वसत्त्वस्यैव भवनं व्यज्यते स्फुटीक्रियते, पूर्ववत् कर्तृकर्मभावोऽवस्थावशात् । तद्दर्शयति --***व्यक्तिपरिणामेन,** मृत्सत्त्वे यद्
296/mj विद्यमानं सत्त्वसत्त्वं घटप्रकाशसत्त्वं तेनैव तद् व्यज्यते

* * *

भवति, सतो हि भावः सत्त्वम् । रजःसत्त्वेन सत्त्वसत्त्वम्, व्यक्तिर्व्यक्तिप्रवृत्तिपरिणत्या व्यक्त्यैवेत्युक्तं भवति । तमःसत्त्वेन सत्त्वसत्त्वम्, व्यक्तिर्व्यक्तिनियमपरिणामेन व्यक्त्यैवेत्युक्तं भवति । एवमेव च रजःसत्त्वं तमःसत्त्वं च । एवमेव च सत्त्वप्रकाशेन सत्त्वप्रकाशः प्रकाश्यते रजःप्रकाशस्तमःप्रकाशश्च रजःप्रकाशेन

* * *

स्वपरिणामेन, सदेव हि सत्त्वेन परिणमति नासत्, यथोक्तम् --**अत्थित्तं अत्थित्ते परिणमति** भसे नूणं भंते ! अत्थित्तं अत्थित्ते परिणम+इ नत्थित्तं नत्थित्ते परिणम+इ ? हंता गोयमा ! जाव परिणम+इ । जं णं भंते अत्थित्तं अत्थित्ते परिणम+इ नत्थित्तं नत्थित्ते परिणम+इ तं किं पयोगसा वीससा ? गोयमा पयोगसा वि तं वीससा वि तं । जहा ते भंते ? अत्थित्तं अत्थित्ते परिणम+इ तहा ते नत्थित्तं नत्थित्ते परिणम+इ ? जहा ते नत्थित्तं नत्थित्ते परिणम+इ तहा ते अत्थित्तं अत्थित्ते परिणम+इ ? हंता गोयमा ! जहा मे अत्थित्तं अत्थित्ते परिणम+इ तहा मे नत्थित्तं नत्थित्ते परिणम+इ, जहा मे नत्थित्तं नत्थित्ते परिणम+इ तहा मे अत्थित्तं अत्थित्ते परिणम+इ । इति भगवतीसूत्रे पाठः ॥गवतीसू॰ १ । ३ । ३२ इति । यदुक्तं भवति **व्यक्तीभवति** इति तदुक्तं भवति सत्त्वसत्त्वेन सत्त्वसत्त्वं प्रकाश्यते इति । सत्त्वसत्त्वम् इति च विशेषणं रजःसत्त्वतमःसत्त्वाभ्याम्, तयोरपि त्वन्मतप्रसिद्ध्या सत्यपि भेदेऽस्मदुक्तवदभेद एवेत्यभिन्नफलत्वादैक्यमापाद्यम् । किं कारणम् ? यस्मात् **सतो हि भावः**
- /ms **सत्त्वम्,** यस्मात् सदेव सद् भवति तस्मात् तदेव सत्त्वसत्त्वं तत्त्वं तद्भावः परिणाम इत्यनर्थान्तरम्, **तद्भावः परिणामः** तत्त्वार्थ॰ ५ । ४१ इति वचनात् । तद्धि प्रवर्तमानं न किञ्चिदपेक्षत इति **प्रवृत्तिनियमानपेक्षेण सत्त्वसत्त्वेनेति** । **एवं रजःसत्त्वेन सत्त्वसत्त्वं** प्रकाश्यत इति वर्तते । पूर्ववद् **व्यक्तिरिति**

---

३ स] सत्त्वस्य
सत्वस्यैवnayacakra-ms-ya ।
सत्वस्यैव nayacakra-ms-bhā ॥
४ *] व्यक्ति॰nayacakra-ms-ya
प्रतिषु नास्ति ॥
२२ स] सत्त्वं
सत्त्वंnayacakra-ms-ya । सत्त्वं
nayacakra-ms-bhā ॥
२४ ए] एवेत्वभि॰nayacakra-ms-ya
। एवेतत्वभि॰ nayacakra-ms-bhā ॥
२५ य]
यस्मात्तदेवnayacakra-ms-ya ॥
२५ देव] ॰व सत्वंस-
त्वंnayacakra-ms-pānayacakra-ms-vi
। ॰व सत्वं nayacakra-ms-bhā
nayacakra-ms-raṃ
nayacakra-ms-hī ॥
२८ त] ॰त एव
इतिnayacakra-ms-ya ॥

प्रकाशैकार्थ्यम्, किमुक्तं भवति ? **व्यक्तिप्रवृत्तिपरिणत्या** प्रकाशनप्रवर्तनपरिणामेन तयैव प्रवृत्त्यात्मिकया **व्यक्त्यैवेत्युक्तं भवतीत्यैक्यं** दर्शयति । **एवं तमःसत्त्वेनेत्यादि व्यक्तिनियमपरिणामेन** इत्यक्षरविपर्यासमात्रेण भेदादर्थैक्यापादनं गतार्थं यावद् **व्यक्त्यैवेत्युक्तं भवतीति**, सत्त्वेनैव व्यक्त्यात्मना प्रवृत्तेन नियतेनावश्यं भवितव्यम्, अन्यथा तत्स्वरूपाभावादित्युक्तत्वात् । एवमेव च रजःसत्त्वेन सत्त्वसत्त्वं प्रकाश्यते, व्यक्तिर्व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्यैवेत्युक्तं भवति, सतो हि भावः सत्त्वम् । तथा रजःसत्त्वेन रजःसत्त्वं प्रकाश्यते, व्यक्तिप्रवृत्तिपरिणतिर्व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्यैवेत्युक्तं भवतीति तथैव गमनीयम् । तथा रजःसत्त्वेन तमःसत्त्वं प्रकाश्यते, व्यक्तिनियतिपरिणतिर्व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्यैवेत्युक्तं भवतीति । तथा तमःसत्त्वेन सत्त्वसत्त्वं प्रकाश्यते व्यक्तिनियतिपरिणत्या नियमेनेवेति, नियतो हि भावो व्यज्यते प्रवर्तते । तथा तमःसत्त्वेन रजःसत्त्वं प्रकाश्यते, व्यक्तिप्रवृत्तिनियतिर्नियतिप्रवृत्तिपरिणत्या नियत्यैवेत्युक्तं भवति । तथा [तमःसत्त्वेन] तमःसत्त्वं प्रकाश्यते व्यक्तिनियतिपरिणत्या नियत्यैवेत्युक्तं भवतीति तदेव भावितम् । **एवमेव चेत्यादि**, यथा सत्त्वरजस्तमसां नवधा विकल्पा उक्तास्तथा सत्त्वप्रकाशेन - /ms
सत्त्वप्रकाशः प्रकाश्यत इति सत्त्वप्रकाशेन रजःप्रकाशस्तमःप्रकाशश्चेति त्रयः रजःप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्चेति त्रयः तमःप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाश इति त्रयो विकल्पाः, प्रकाश्यते प्रवर्त्यते नियम्यते इत्यनेनैव 297/mj

* * *

सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्च तमःप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्च प्रकाश्यते प्रवर्त्यते नियम्यते इति त्रयोऽप्यर्था ऐक्यमापादनीयाः । सर्वाप्येषा मृद्घटव्यक्तिस्थूलतेव सत्त्वप्रकाशादिप्रपञ्चा व्यक्तिरेकैव एकार्थविषयेति ।

तथा यदुच्यते--रजः शब्दकार्यम्... ... ...प्रकाशस्थाने प्रवृत्तिं कृत्वा... ...वायुम् । तथा तमः शब्दकार्यम्... ... ...लम्बनपाषाणम् ।

अतस्त्रीण्यप्येकम्, अपृथग्भूतसमवस्थानस्वरूपभेदात्मकत्वात्, वर-

---

२ रिणामेन] °मेनातयैवnayacakra-ms-bhā ‖ ३ क्तिनिय] °नियपरि°nayacakra-ms-bhā ‖ ५ वृत्तेन] नियते चावश्यंnayacakra-ms-ya । अत्र नियतेन चावश्यं इत्यपि पाठः स्यात् ‖ ५ रूपा] °पादिद्य ?भावा° प्र° ‖ १० स] सत्वं सत्वंnayacakra-ms-bhā । सत्वं nayacakra-ms-ya ‖ २४ त] तथा यदुच्यते--रजः शब्दकार्यं प्रवर्त्य शब्दात्मना व्यवतिष्ठमानं तद्भावाय इतरयोः प्रवृत्तिं करोति प्रवर्तयति । अत्रापि तथैव अनुगन्तव्यं प्रकाशस्थाने प्रवृत्तिं कृत्वा सत्त्वस्थाने रजः प्रख्यापनस्थाने प्रवर्तनं नर्तकाचार्यस्थाने च वायुम् । तथा तमः शब्दकार्यं नियम्य शब्दात्मना व्यवतिष्ठमानं तद्भावायेतरयोः प्रवृत्तिं व्यवस्थापयति नियमयति । अत्रापि तथैव दोषापादनमनुगन्तव्यं प्रकाशस्थाने नियमं कृत्वा सत्त्वस्थाने तमः प्रख्यापनस्थाने नियमनं नर्तकाचार्यस्थाने च लम्बनपाषाणम् । इत्याशयकोऽत्र मूलपाठः स्यादिति सम्भाव्यते ‖

णादितमस्त्ववत् ।

* * *

ग्रन्थेन त्रयोऽप्यर्था **ऐक्यमापादनीयाः,** प्रत्येकं नवस्वपि योज्या इत्यर्थः । एष दार्ष्टान्तिकोऽप्यर्थो व्याख्यातः, स इदानीं दृष्टान्तेन साधर्म्येणोपसंह्रियते **--सर्वाप्येषा मृद्घटव्यक्तिशक्तिस्थूलतेव** यथा प्रागुपवर्णिता कारणे कार्यस्य सत्त्वाद् मृद्यनभिव्यक्ताया घटव्यक्तिशक्तेः स्थूलता ऊर्ध्वग्रीवादिव्यक्तेन्द्रियग्राह्यता सा एकैव तथा **सत्त्वप्रकाशादिप्रपञ्चा व्यक्तिरेकैव,** एकार्थविषया सत्त्वमिति वा रज इति वा तम इति वा प्रधानमिति वा यथेच्छसि तथास्तु सर्वथाप्येकस्य कारणाख्यस्य वस्तुनः सूक्ष्मस्य स्थूलतैव व्यक्तिरिति तद्विषया व्यावर्ण्यते । **इति** विचारपरिसमाप्त्यर्थः, यत् प्रतिज्ञातं **सत्त्वं प्रकाशात्मकयोश्चेद् रजस्तमसोः शब्दभावाय व्यवतिष्ठते तत एकात्मकैककारणत्व**मिति तत् साध्वभ्यधामेति । § 899

**तथा यदुच्यते रजः शब्दकार्य**मित्यादिग्रन्थस्यापि समानदोषापादनार्थोऽतिदेशः **भाष्ये** एव सुलिखितातिदेशोपायत्वाद् न विव्रियते । विशेषणविन्यासोपायश्च सुलिखित एव **प्रकाशस्थाने प्रवृत्तिं कृत्वे**त्यादि सर्वमनुगन्तव्यं यावद् **वायु**मिति । **तथा तमः शब्दकार्य**मित्यादि तथैवानुगन्तव्यं यावद् **लम्बनपाषाण**मिति । एवं समापितप्रसङ्ग इदानीं साधनमाह **--अतस्त्रीण्यप्येक**मित्यादि [यावद् वरणादि]**तमस्त्वव**दिति । सत्त्वरजस्तमांसि त्रीण्यपि प्रकाशप्रवृत्तिनियमात्मकानि जात्यन्तराभिमतान्येकं वस्तुतः त्रित्वस्यातन्त्रत्वाद्
- /ms भिन्नमप्यभिन्नमिति पक्षार्थः । परमतापेक्षया त्रयाणामैक्यासिद्धेः साध्यम् । त्रीण्यपि च परस्य सिद्धानि धर्मित्वेन अस्माकं च वस्तुशक्तित्वभेदेनेतीत्थं साध्यते, अन्यथा त्रीणी चैकं च इति विरुद्धं स्यात् । **अपृथग्भूतसमवस्थानस्वरूपभेदात्मकत्वात्,** भूतं भवनं भावो भूतिरिति भावे निष्ठाविधानादपृथग्भवनमस्य सङ्गत्या एकीभावेनावस्थानस्य तदिदमपृथग्भूतसमवस्थानम्, तदेव स्वरूपं भेदाश्चात्मा येषां तानि सत्त्वादीनि अपृथग्भूतसमव-
298/mj स्थानस्वरूपभेदात्मकानि, तद्भावात् । क्षीरोदकवद् देशकालाभेदेन सहभवनेऽपि सङ्गत्यैक्यावस्थानस्वरूपत्वविशेषणात् क्वचित् कदाचित् पृथग्भवनाभावादित्युक्तं भवति । तत्स्वरूपभेदात्मकत्वं च वादिप्रतिवादिप्रसिद्धम् । दृष्टान्तः **--वरणादितमस्त्ववत्,** यथा वरणसदनापध्वंसनबैभत्स्यदैन्यगौर-

---

४ दार्ष्टान्तिकोऽप्य] °प्याख्यातःnayacakra-ms-bhā ॥
५ क्तिस्थू] **स्थूलतैव** प्र° ॥
६ क्ता] °**क्तया** प्र° ॥
८ मिति] °**ति च रज** प्र° ॥
८ धान] °**न इति** प्र° ॥
९ स्य] °**स्य तः स्थूल**° प्र° । अत्र °**स्य सतः स्थूल**° इत्यपि पाठः स्यात् ॥
१० स] दृश्यतां पृ° २९३ पं° ४ ॥
११ का] °**कारत्वमिति** प्र° ॥
१३ त] **त्वया** यदु°nayacakra-ms-ya ॥
१७ ए] **एवमसापितप्रसङ्गः** प्र° ॥
१९ व] वस्तुनः ? ॥
२१ प] **परस्परसिद्धानि** प्र° ॥
२३ भू] **भूतिनिति** प्र° ॥
२७ ग्भ] °**स्यादिगौर**° प्र° ॥
२९ त्स्य] °**स्यादिगौर**° प्र° ॥

वाणां परस्परतो भिन्नानां छादनस्तम्भनविशरणारोचनविषादाधोगमनधर्माणां भेदात्मकत्वे सत्यपि मोहात्मकतमःस्वारूप्यानतिक्रमेणैक्यमपृथग्भवनसमवस्थानस्वरूपभेदात्मकत्वात् तथास्मादेव हेतोः सत्त्वादीन्येकमिति । § 900

अत्राह --**अपृथग्भवनसमवस्थाने**त्यादि जात्यन्तरत्वसाधनानि यावद् **गुरुरित्युभाभ्यामन्य** इति, ननूक्तमन्वयवीत एव, अत्राह--कथं पुनरेतदुपलभ्यते सुखःदुखमोहा जात्यन्तराणि इति, अत्रोच्यते--सुखं लघ्वप्रवृत्तिशीलं प्रकाशकं दृष्टम्, सुखाश्च करणप्रकाशाः, तस्मात् प्रवृत्तिनियमाभ्यामन्ये । तथा दुःखं चलमप्रकाशकं प्रवृत्तिशीलं दृष्टम्, दुःखाश्च करणप्रवृत्तयः, तस्मात् प्रकाशनियमाभ्यामन्याः । तथा मोहो गुरुरप्रकाशको दृष्टः, - /ms मूढाश्च करणनियमाः, तस्मात् प्रकाशप्रवृत्तिभ्यामन्य इति । **एतेनाध्यात्मिकानां कार्यकारणात्मकाना**मित्यादिनोत्तरेण ग्रन्थेन तैर्यग्योनादिसंसारग-

६ सु] सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरु वरणकमेव तमः... ...॥ १३ ॥ **साङ्ख्यका॰** ॥

११ का] अत्र **नयचक्रवृत्तौ साङ्ख्यकारिकावृत्तियुक्तिदीपिकादि**प्राचीनग्रन्थेषु च **साङ्ख्य**मतनिरूपणप्रसङ्गे **कार्यकारणात्मक**शब्दप्रयोगो बहुषु स्थानेषु दृश्यते । किन्तु पूर्वापरसम्बन्धविचारणया तद्व्याख्यावलोकनेन च तत्र **कार्यकरणात्मक** इति पाठः समीचीन इति भाति, दृश्यतां पृ॰ १२ पं॰ १७, पृ॰ २२८-- २ । **साङ्ख्य**मते हि प्रकृतेर्विकारभूताः पदार्थाः कार्यकरणभेदेन द्विधा विभक्ताः । तथा च तद्ग्रन्थः--आह--करणं प्रत्याचार्यविप्रतिपत्तेः, एकादशविधमिति **वार्षगणाः**, दशविधमिति तान्त्रिकाः **पञ्चाधिकरण**प्रभृतयः, द्वादशविधमिति **पतञ्जलिः**, तस्माद् भवतः कतिविधं करणमभिप्रेतमिति वक्तव्यमेतत् । उच्यते --**करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्** । पञ्च कर्मेन्द्रियाणि पञ्च बुद्धीन्द्रियाणि मनोऽहङ्कारो बुद्धिश्चेत्येतत् सर्वं पुरुषार्थोपयोगि करणम्... ...। आह--करणमिति क्रियाकारकसम्बन्धगर्भोऽयं निर्देशः । कथम् ? येन [क्रियते] तत् करणमिति । तत्र वक्तव्यम् का क्रिया किं च तत् क्रियते यदपेक्ष्य बुद्ध्यादीनां करणत्वमिति? उच्यते, यदुक्तं का क्रिया इत्यत्र **ब्रूमः**--न तन्निर्वर्त्यमिहाभिप्रेतम् दण्डादिवत् । किं तर्हि ? तदाहरणधारणप्रकाशकरम् । तत्राहरणं कर्मेन्द्रियाणि कुर्वन्ति, विषयार्जनसमर्थत्वात् । धारणं बुद्धीन्द्रियाणि कुर्वन्ति, विषयसन्निधाने सति श्रोत्रादिवृत्तेस्तद्रूपापत्तेः । प्रकाशमन्तःकरणं करोति निश्चयसामर्थ्यात् । अपर आह--आहरणं कर्मेन्द्रियाणि कुर्वन्ति, धारणं मनोऽहङ्कारश्च, प्रकाशनं बुद्धीन्द्रियाणि बुद्धिश्चेति । एतदभिसन्धाय बुद्ध्यादीनां करणत्वमुच्यते इति । यत्तूक्तं किं कार्यमिति, उच्यते --**कार्यं च तस्य दशधा,** दशेति पञ्च विशेषाः पञ्च अविशेषाः । तदप्यत एव कार्यशब्दं लभते --**आहार्यं धार्यं प्रकाश्यं च,** तद्धि आहर्तव्यं धारणीयं प्रकाशयितव्यं च अतः कार्यमित्युच्यते, न निर्वर्त्यत्वात् । का॰ ३२, पृ॰ १३२--१३३ ।... ...व्याख्यातं करणपर्व, कार्यपर्व इदानीं वक्तव्यम्, तस्य च पुरस्तादुद्देशः कृतः--कार्यं च तस्य दशधा पञ्च विशेषाः पञ्च अविशेषा इति । साम्प्रतं तु निर्देशं करिष्यामः । आह--यद्येवं तस्मादिदमेव तावदुच्यतां के विशेषाः केऽविशेषा इति । उच्यते --**तन्मात्राण्यविशेषाः** । यानि तन्मात्राणि पञ्च अहङ्कारादुत्पद्यन्ते इति प्रागपदिष्टं ते खलु अविशेषाः ।... ...आह--अथ के पुनर्विशेषा इति । उच्यते--यानि खलु **तेभ्यो भूतानि पञ्च पञ्चभ्यः** उत्पद्यन्ते **एते स्मृता विशेषाः** का॰ ३८, पृ॰ १४० । इति **साङ्ख्य**कारिकाया **युक्तिदीपिका**यां वृत्तौ । **माठरादि**परम्परासु तु करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् । कार्यं च तस्य दशधाऽऽ हार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥ इति **साङ्ख्य**कारिका अन्यथा व्याख्याता दृश्यते, तद्यथा--त्रयोदशविधं करणं किं करोतीत्यत्रोच्यते--आहारकं धारकं प्रकाशकं च । अत्राहारकमिन्द्रियलक्षणम्,

299/mj ताध्यात्मिककार्यकारणात्मकभेदानां सुख

* * *

अपृथग्भवनसमवस्थान... ...एतेनाध्यात्मिकानां कार्यकारणात्मकानां भेदानाम्... ...मोहो गुरुरित्युभाभ्यामन्यः । ननु लक्षणभेदाहेतुत्वम्, अपृथग्भूतसमवस्थानस्वरूपलक्षणभेदात्मकत्वात्, वरणादिभिन्नलक्षणतमस्त्ववत् ।

---

धारकमभिमानलक्षणम्, प्रकाशकं बुद्धिलक्षणम् । अत्राहकिं तदस्ति यस्याहरणं धारणं प्रकाशनं च क्रियते ? अत्रोच्यते--कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च । शब्दस्पर्शरूपरसगन्धाः पञ्च वचनादानविहरणोत्सर्गानन्दास्तु पञ्च, एते दश विषयाः कार्यमित्युच्यते । तं दशविधं विषयं बुद्धीन्द्रियैः प्रकाशितमर्थं कर्मेन्द्रियाणि आहरन्ति धारयन्ति च । तद्यथा-तमःस्थितं घटं दीपेन प्रकाशितं हस्त
n299/mj आदत्ते धारयति । तदेवं यथा घटं तथा शेषाण्यपि । --जे॰ साङ्ख्यका॰ वृ॰ B, माठरवृत्तावपि एतदर्थक एव पाठः । त्रयोदशविधं करणं किं करोतीत्यत्रोच्यते--? धारणं कर्मेन्द्रियाणि कुर्वन्ति, प्रकाशं बुद्धीन्द्रियाणि कुर्वन्ति । तदाहरणधारणप्रकाशकरं किं तदस्ति यस्याहरणं धारणं प्रकाशं करणं करोतीत्यत्रोच्यते--कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च । कार्यमिति शब्दस्पर्शरूपरसगन्धाः पञ्च वचनादानविहरणोत्सर्गानन्दास्तु पञ्च, एते दश विषयाः कार्यमित्युच्यते । तं दशविधं विषयं बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाणि आहरन्ति धारयन्ति चेति । जे॰ साङ्ख्यका॰ वृ॰ A । तत्राहरणं धारणं च कर्मेन्द्रियाणि कुर्वन्ति प्रकाशं बुद्धीन्द्रियाणि । कतिविधं कार्यं तस्येति तदुच्यते--कार्यं च तस्य दशधा । तस्य करणस्य कार्यं कर्तव्यमिति दशधा दशप्रकारं शब्दस्पर्शरूपरसगन्धाख्यं वचनादानविहरणोत्सर्गानन्दाख्यमेतद् दशविधं कार्यम् । बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाणि आहरन्ति धारयन्ति चेति । इति **गौ**डपादभाष्ये । शब्दादयः पञ्च विषयाः वचनादयः पञ्च वृत्तयः एतानि दश तत्कार्याणि । [किञ्च] तत्कार्यं त्रिविधम्--आहार्यं प्रकाश्यं धार्यमिति । तत्र त्रिभिराहृतं पञ्चभिर्बुद्धीन्द्रियैः प्रकाशितं पञ्च कर्मेन्द्रियाणि धारयन्ति । इति **सुवर्णसप्तिशास्त्रव्याख्याभिधानायां साङ्ख्यकारिकावृत्तौ** [चीनभाषानुवादानुसारेण] । तत्र कर्मेन्द्रियाणि वागादीनि आहरन्ति यथास्वमुपाददते स्वव्यापारेण व्याप्नुवन्तीति यावत् । बुद्ध्यहङ्कारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति । बुद्धीन्द्रियाणि च प्रकाशयन्ति ।...कार्यं च तस्य त्रयोदशविधस्य करणस्य दशधा--आहार्यं धार्यं प्रकाश्यं च । आहार्यं व्याप्यम् । कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथायथं व्याप्याः, ते च यथायथं दिव्यादिव्यतया दशेति आहार्यं दशधा । एवं धार्यमप्यन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरम्, तच्च पार्थिवादिपाञ्चभौतिकम्, शब्दादीनां पञ्चानां समूहः पृथिवी, ते च पञ्च दिव्यादिव्यतया दशेति धार्यमपि दशधा । एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथायथं व्याप्याः, ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति । इति **साङ्ख्यकारिकायाः वाचस्पतिमिश्ररचितायां साङ्ख्यतत्त्वकौमुद्यां वृत्तौ** । कलविकरणाय नमः पाशुपतसू॰ २४ । अत्र कला नाम कार्यकरणाख्याः कलाः । तत्र कार्याख्याः पृथिव्यापस्तेजो वायुराकाशः । आकाशः शब्दगुणः । शब्दस्पर्शगुणो वायुस्तौ च रूपं च तेजसि । ते रसश्च जले ज्ञेयास्ते च गन्धः क्षिताविप ॥ शब्दस्पर्शरसरूपगन्धाः । तथा करणाख्याः श्रोत्रं त्वक् चक्षुः जिह्वा घ्राणं पादः पायुः उपस्थः हस्तः वाक् मनः अहङ्कारः बुद्धिरिति । इति **पाशुपतसूत्रस्य पञ्चार्थभाष्ये** Trivandrum Sanskrit Series, No 143. ‖
२ अ] अपृथग्भवनसमवस्थानस्वरूपभेदात्मकत्वेऽपि सुखदुःखमोहा जात्यन्तराणि लक्षणभेदात् । एतेन आध्यात्मिकानां कार्यकारणात्मकानां भेदानां सुखदुःखमोहमयत्वं बोध्यं समन्वयदर्शनात् । सुखं लघु अप्रवृत्तिशीलं दृष्टमित्युभाभ्यामन्यत् । दुःखं चलमित्युभाभ्यामन्यत् । मोहो गुरुरित्युभाभ्यामन्यः । इत्याशयको मूलपाठोऽत्र स्यादिति सम्भाव्यते ॥

* * *

दुःखमोहमयत्वातिदेशः कार्यकारणात्मकत्वात् तेषामपीति । अस्य ग्रन्थस्यार्थव्याख्यानं साधनैरेव क्रियते— सत्त्वरजस्तमांसि जात्यन्तराणि, लक्षणभेदात्, चेतनशरीरवत् । लक्षणभेदः **सत्त्वं लघ्वप्रवृत्तिशीलं दृष्टमित्यादि** तत्साधनैर्भाष्ये सुलिखितमिति न विवृण्महे । तथा रजस्तमसोरन्यत्वापादनसाधनान्यनुगन्तव्यानि यावद् **गुरुरित्युभाभ्यामन्य** इति । § 901

आचार्य उत्तरमाह --**ननु लक्षणभेदाहेतुत्व**मित्यादि यावत् **तमस्त्ववत्** । लक्षणभेदहेतूनां लघुत्वादीनामप्यहेतुत्वम्, एतेनैव प्रत्युक्तत्वात् । कथम् ? लघुत्वप्रकाशाप्रवृत्तिशीलत्वान्यप्येकम्, **अपृथग्भूतसमवस्थानस्वरूपलक्षणभेदात्मकत्वाद् वरणादिभिन्नलक्षणतमस्त्ववत्**, तथैव व्याख्येयं **लक्षण**शब्दाधिक्येन, विग्रहस्तु तत्स्वरूपमेव लक्षणम्, स एव भेदो यस्येति । तस्मात् तादृक्स्वरूपलक्षणभेदात्मकत्वमप्यहेतुः । अतो नान्यत्वं सत्त्वादीनामिति । § 902

300/mj

नापृथग्भूतता । सुखं मोहाद् गुरोरन्यत्, लघुत्वात्, लोहपिण्डादिव अर्कतूलः ... ... ...। पुनश्च सुखत्वदुःखत्वमोहत्वादयोऽप्यन्यत्वहेतवः स्युः । शरीरेन्द्रियगत आत्मैकदेशस्तदेकदेशभूताभ्यां रजस्तमोभ्यामन्यः, सुखत्वात्, लोष्टवत् । एवं दुःखमोहौ । § 903

सर्वेऽप्येते हेतवोऽप्रसिद्धसाध्यधर्मसमन्वयव्यावृत्तयः स्वत एवानुमाननिरा- § 904

इतर आह --**नापृथग्भूतते**त्यादि हेत्वसिद्धिप्रतिपादनसाधनानि लोकप्रसिद्धदृष्टान्तानि यावत् **प्रदीपादिव घट** इति । **लोष्टदृष्टान्तो** वक्ष्यते सुखदुःखमोहैः पुरुषभोग्यैरन्योन्यतोऽन्यैरुपेत इत्यतिदेशसाधनोक्तिकाल उत्तरत्र । अपृथग्भूतसमवस्थानस्वरूपमसिद्धम्, तत् कथमिति चेत्, साधनैरेवोच्यते --**सुखं मोहाद् गुरोरन्य**दित्यादि सुबोधत्वान्न व्याख्येयं परस्परान्यत्वसाधनकदम्बकं यथाभाष्यलिखितमनुगन्तव्यम् । **पुनश्चे**त्यादि, एत- - /ms

---

७ ल] **लक्षणभेदहेतुत्व°** प्र° । अत्र **लक्षणभेदहेतूनामप्यहेतुत्व°** इत्यपि पाठः स्यात् ॥
१४ सु] सुखं मोहाद् गुरोरन्यत्, लघुत्वात्, लोहपिण्डादिवार्कतूलः, दुःखादन्यत् प्रवृत्तिशीलात्, अप्रवृत्तिशीलत्वात्, आकाशादिव वायुः । दुःखं मोहादन्यदचलात्, चलत्वात्, पर्वतादिव घटः । मोहः सुखदुःखाभ्यामगुरुभ्यामन्यः, गुरुत्वात्, पृथिव्या इव अग्निः । दुःखमोहौ सुखात् प्रकाशकादन्यौ, अप्रकाशकत्वात्, प्रदीपादिव घटः । इत्याशयको मूलपाठोऽत्र स्यादिति सम्भाव्यते ॥
२१ ग्भू] °ग्भूतेत्यादि°nayacakra-ms-ya ॥
२६ पु] पुनरश्चे°nayacakra-ms-ya । पुनरश्चे° nayacakra-ms-bhā ॥

स्मादन्ये साधनप्रपञ्चात् सुखत्वात् दुःखत्वाद् मोहत्वादित्यादयोऽ**प्यन्यत्वहेतवः स्युः, आदि**ग्रहणात् प्रसादादयोऽपीति । तत्प्रयोगदिगुपप्रदर्शनार्थमाह --**शरीरेन्द्रियगत आत्मैकदेशस्तदेकदेशभूताभ्यां रजस्तमोभ्यामन्यः**, कार्यभूतस्य शरीरस्य कारणभूतानां चेन्द्रियाणामाध्यात्मिकानामेकदेशस्तदात्मभूतत्वं गतस्तदात्मभूताभ्यां रजस्तमोभ्यामन्यः, **सुखत्वात्, लोष्टवत्**, यथा लोष्टो भोग्यो हि पुरुषस्य भोक्तुरुपयोगार्थप्रवृत्तेः कपोतोन्नयनार्थक्षेपणादानादिषु सुखं दृष्टं चलनपीडनादिषु दुःखं लोष्टो नु कपोतो नु इत्यादिसंशयविपर्ययादिषु मोहः । तस्मात् सुखं दुःखमोहाभ्यामन्यद् लोष्टवत्, लोष्ट इव लोष्टवत् । **एवं दुःखमोहा**वित्यतिदेशः, दुःखं शरीरेन्द्रियगतं तदात्मैकदेशभूताभ्यां सत्त्वतमोभ्यामन्यद् दुःखत्वाल्लोष्टवत्, मोहः सत्त्वरजोभ्यामन्यो मोहत्वाल्लोष्टवदिति ।
§ 905

अत्र ब्रूमः --**सर्वेऽप्येत** इत्यादि । **सर्व**ग्रहणाद् लघुत्वादयो मोहत्वपर्यन्तास्त्वयोक्ता अन्यत्वहेतवोऽ**प्रसिद्धसाध्यधर्मसमन्वयव्यावृत्तयः** । एते हेतवोऽसिद्धा एवावधारणे इति वक्ष्यति, सिद्धत्वेऽपि अप्रसिद्धसाध्यधर्मसमन्वयाः पृथग्भूतसुखाद्यात्मकसत्त्वादिलघ्वादितूललोष्टादिवस्त्वभावात्, सर्वस्य त्रैगुण्याव्यतिरेकाच्च । न चैषां विपक्षाद् व्यावृत्तिरस्ति, तूललोष्टादेरेव
- /ms विपक्षत्वेन व्यवस्थानात् । विविक्तैकसुखात्मकाद्धि वस्तुनोऽन्यद् विविक्तदुःखाद्यात्मकं स्याद् विपक्षः, तत्तु नास्ति सर्वस्य त्रिगुणैकात्मकत्वात्, न पुरुषोऽसत्त्वात् तस्यापि सुखादन्यत्वादिति । ततश्च तूललोष्टादेरपि विपक्षत्वात् ततश्च लघुत्वादिहेतूनामव्यावृत्तेरप्रसिद्धसाध्यधर्मव्यावृत्तयस्ते हेतव इति विरुद्धत्वं हेतुदोषः । साध्यसाधनोभयानन्वयो धर्म्यसिद्धिश्च साधर्म्यदृष्टान्तः, साध्याव्यावृत्तादिदोषश्च वैधर्म्यदृष्टान्त इति दर्शयति । § 906
301/mj

कृतस्वपक्षप्रत्यक्षीकरणार्थाश्च । अनवधृतलघ्वादिधर्मतायामितरात्मकमपीति अतथातैव । असजातीयलक्षणव्यावृत्तार्थविषयतायामसिद्धं पक्षधर्मत्वमस्मान् प्रति भवन्तं च । तद्यथा-- § 907

१ स्माद ] °दन्य सा° प्र° ॥
२ दिगु ] °गुपद° nayacakra-ms-bhā ॥
६ क ] कपोतोनयना° प्र° ॥
८ लो ] लोष्ट इव लोष्टवत्nayacakra-ms-ya प्रतिषु नास्ति ॥
१४ व ] दृश्यतां पृ° ३०१ पं° २ ॥
१५ घ्वादितू ] °कुल° प्र° ॥
१८ स्याद् ] विपक्षतस्तु नास्ति सर्वस्य त्रिगुणैकत्वात्मक°nayacakra-ms-ya ॥
२० घुत्वादिहेतूनाम ] °मप्यावृत्ते° प्र° ॥
२२ साध्याव्यावृ ] °वृत्त्यादि°nayacakra-ms-ya । दृश्यतां पृ° २६० टि° ७ ॥

*णिच्छयतो सव्वलहुं सव्वगुरुं वा ण विज्ज+ए दव्वं ।
ववहारतो तु जुज्जति बायरखंधेसु ण इतरेसु ॥
बृहत्कल्प॰ ६५ § 909

किञ्चान्यत्, स्वत एवानुमाननिराकृतस्वपक्षप्रत्यक्षीकरणार्थाश्च एते हेतवः इति वर्तते, **अस्ति प्रधानं भेदानामन्वयदर्शनात्** इति प्रक्रम्य **सुखदुःखमोहान्विता आध्यात्मिका बाह्याश्च शब्दादयः कार्यात्मकास्त्रयाणामेककार्यभावात्, तदारब्धाश्चाकाशवाय्वनलाम्भोभूमयो भूताख्यास्तैर्यग्योनमानुषदैवानि शरीराणीन्द्रियाणि च तदात्मकानि त्रयाणामेककार्यभावात् सुखाद्यन्वितान्येव चन्दनशकलादिवत्** इत्येवमाद्यनुमानसिद्धं त्रैगुण्यम् अन्यत् सुखं दुःखमोहाभ्यां लघ्वेव च इत्येवमादिपक्षं निराकरोति तस्य स्वपक्षस्यानुमाननिराकृतस्यान्याविदितस्य सर्वलोकाप्रत्यक्षस्य सतः प्रत्यक्षीकरणार्था एते हेतवः संवृत्ता इतीत्थमनुमानविरुद्धप्रतिज्ञादोषोद्भावनवक्रोक्तिरेषा । § 910

किञ्चान्यात्, **अनवधृतेत्यादि यावदतथातैव** । लघुत्वात् इत्यादयो हेतवः किमवधारितार्था उतानवधारितार्थाः ? इति सम्प्रधार्यमेतत्, लघ्वेव सुखं न गुरु न चलं वा, तथान्येषामपि चलत्वादीनां चलमेव गुर्वेव प्रवृत्तिशीलमेवेति । तत्रा**नवधारितलघ्वादिधर्मतायां** सत्यामित-

१ *] पुनरपि शिष्यः प्राह--कथमेतदवसीयते एकैक आकाशप्रदेशोऽनन्तैरगुरुलघुपर्यायैरुपेतः ? उच्यते--इह द्विविधं वस्तु, रूपिद्रव्यमरूपिद्रव्यं च । तत्र रूपिद्रव्यं चतुर्धा, तद्यथा--गुरु, लघु, गुरुलघु, अगुरुलघु च । एतदप्युच्यते व्यवहारतः, निश्चयतः पुनर्द्विविधमेव गुरुलघु अगुरुलघु च । तथा चाह --**णिच्छयतो सव्वगुरुं सव्वलहुं वा ण विज्ज+ए दव्वं । ववहारतो तु जुज्जति बादरखंधेसु णऽण्णेसु** ॥ ६५ ॥ निश्चयतः निश्चयनयमतेन न किञ्चिद् द्रव्यं सर्वगुरु एकान्तगुरु, यदि स्यादेकान्तगुरु तत एकान्तेनैव पतनधर्मि स्यात्, न च पतति तस्मान्न विद्यते सर्वगुरु, नापि सर्वलघु एकान्तलघु, यदि स्यादेकान्तलघु ततो न कदाचित् पतति, अथ कदाचित् पतति तस्मान्न सर्वलघ्वपि । व्यवहारतः व्यवहारनयमतेन पुनर्युज्यते सर्वगुरु सर्वलघु च । केषु ? इत्याह--बादरस्कन्धेषु बादरत्वपरिणामपरिणतेषु अनन्तप्रादेशिकेषु स्कन्धेषु, नान्येषु सूक्ष्मपरिणामपरिणतेषु । तत्र गुरु द्रव्यं यथा--अयस्पिण्डः, लघु यथा--अर्कतूलम्, गुरुलघु यथा--वायुः, अगुरुलघु परमाण्वादि । निश्चयतः पुनरेवं द्विविधद्रव्यभावना--परमाण्वादेरारभ्य सङ्ख्यातप्रदेशात्मकोऽसङ्ख्यातप्रदेशात्मको यश्चानन्तप्रदेशात्मकः सूक्ष्मस्कन्धः कार्मणप्रभृतिक एते अगुरुलघवः, बादराः स्कन्धा औदारिकवैक्रियाहारकतैजसरूपा गुरुलघवः । इति **श्रीमलयगिरि**सूरिविरचितायां **बृहत्कल्पसूत्रनिर्युक्तिवृत्तौ** । ओरालियवे+उव्विय+आहारगतेय गुरुलहू दव्वा । कम्मगमणभासा+ई एया+इं अगुरुलहुया+इं ॥ ६५८ ॥ गुरुयं लहुयं उभयं नोभयमिति वावहारियनयस्स । दव्वं, लेट्ठुं दीवो वा+ऊ वोमं जहासंखं ॥ ६५९ ॥ निच्छय+ओ सव्वगुरुं सव्वलहुं वा न विज्ज+ए दव्वं । बायरमिह गुरुलहुयं अगुरुलहुं सेसयं सव्वं ॥ ६६० ॥ इति **श्रीजिनभद्रगणिक्षमाश्रमणविरचिते विशेषावश्यकभाष्ये** ॥

३ निराकृत] **॰तश्चप्रत्यक्षी॰** प्र॰ ॥

७ त] **तदाथानि**nayacakra-ms-ya । **तदानि** nayacakra-ms-bhā ॥

११ तिज्ञादोषोद्भा] **॰द्भवन॰** प्र॰ ॥

१४ उ] **उतानधारि॰** प्र॰ ॥

१६ त] **तत्वानव॰** प्र॰ ॥

**रात्मकमपीति** लघुचलगुर्वादित्र्यात्मकतयैव पक्षधर्मता स्यादेषां तथा सति **इत्यतथातैव** अनन्यतैवेत्यर्थः, **इति**शब्दहेत्वर्थत्वात् त्र्यात्मकैकत्वादित्यर्थः । **असजातीये**त्यादि याव**दस्मान् प्रति भवन्तं** चेति । अथावधारितार्था एते लघ्वादिहेतवो गुर्वाद्यसजातीयलक्षणव्यावृत्तार्थविषयास्ततस्तेषा**मसजातीयलक्षणव्यावृत्तार्थविषयतायां** विशेषतोऽपक्षधर्मतैव, मूलतस्तत्रा**स्मान् प्रति तावदपक्षधर्मत्वम्** । **तद्यथा--णिच्छयतो सव्वलहुं**ति गाथा,

* * *

अत्यन्तगुरुतायामेतदेव पतेत्, संयोगभावेऽपि पतनप्रतिबन्ध्यविषह्यगुरुत्वात्, तन्तुप्रतिबन्धानिवार्यपातोपलवत् । योगिनोऽपि च सुतरां पतनमेव स्यात्, शिलाबद्धशिलावत् । अत्यन्तलघुतायां न कदाचिदपि पतनं स्यात् । कन्यानुदरवत्तु व्यवहारोऽयमपेक्षाकृतो बादरस्कन्धविषयः । एवमेवापेक्षिकलोहपिण्डकार्कतूलगुरुत्वलघुत्वेऽनवस्थितैकत्वे ।

* * *

निष्कृष्य अवधार्य चयतः ज्ञानतः परमार्थनयतो वा सर्वथा लघु सर्वं वा लघु **न विद्यते** तथा **सर्वगुरु द्रव्यम्,** परमाणुद्विप्रदेशाद्यसङ्ख्येयान्तानां केषाञ्चिदनन्तप्रदेशानां च स्कन्धानां शेषद्रव्याणां चागुरुलघुत्वात्, ततः परमनन्तानन्तप्रदेशानां बादराणामापेक्षिकलघुगुरुपरिणामित्वात्, **व्यवहार**नयेन **तु युज्यते** लघुत्वं गुरुत्वं वा अन्योन्यस्मात् लघुर्गुरुर्वेति । वातं रातीति वातरा बदरप्रमाणा बादरा वा स्कन्धाः स्थूला इत्यर्थः । **ण इतरेसु,** *नेतरेसु, प्रागुक्तपरमाण्वादिषु सूक्ष्मेष्वगुरुलघुत्वमेवेत्यर्थः । § 911

**अत्यन्तगुरुताया**मित्यादि निरपेक्षैकान्तगुरुताया**मेतदेव पतेत्** पतनक्रियमेव स्यात् न तिष्ठेद् नोर्द्ध्वं गच्छेद् गुरुत्वात्, दृष्टान्तो वक्ष्यमाणः । स्यान्मतम्--पतेदेव गुरु यदि प्रतिबन्धी न स्यात्, अस्ति तु संयोगः प्रतिबन्धी पतनस्य फलस्येव वृन्तमिति, अतो विशेषयामः **--संयोगभावेऽपि पतनप्रतिबन्ध्यविषह्यगुरुत्वा**दिति, प्रतिबन्धिना यद् विषह्यं न भवति गुरु तत् पतेदेव, स चास्य नास्ति प्रतिबन्धी त्वयैकान्तगुरुत्वाभ्युपगमात् । **तन्तुप्रतिबन्धानिवार्यपातोपलवत्,** एकेन तन्तुना प्रतिबन्धिना सत्यपि संयोगभावे तद-

(Left margin: "- /ms" beside line 2; "302/mj" beside line 6; "- /ms" beside line 26)

१ क] °कत्रयैव प्र° ॥
३ भ] भवन्तंमि अथा°nayacakra-ms-bhā । भवन्तमि अथा° nayacakra-ms-ya । दृश्यतां पृ° ३०३ पं° १२, १३ ॥
४ घ्वा] °दहेतवो प्र° ॥
५ ता] °ताया विशेषतोः पक्ष°nayacakra-ms-bhā । °ताया विशेषहेतोः पक्ष° nayacakra-ms-ya ॥
१५ शेष] शेषद्रव्याणां धर्मास्तिकायादीनामित्यर्थः ॥
१७ घु] लघुगुरु° प्र° । अयमपि लघुगुरु° इति पाठः कथञ्चित् सङ्गच्छत एव, दृश्यतां पृ° ३०१ टि° १ ॥
१७ वा] वातं वातं रातीतिnayacakra-ms-bhā ॥
१८ मा] °माण प्र° ॥
१८ *] नतरेषु प्र° ॥
२० गुरुताया] °मेतेदेव पतेत् nayacakra-ms-bhā । अत्र °मेतत् पतेदेव इत्यपि पाठः स्यात् ॥

विषह्यगुरुत्वात् पतत्येव यथोपलस्तथैतत् पतेदेव सुखं लघुत्वशून्यगुरुत्वादिति । **योगिनोऽपि चे**त्यादि, योऽपि चास्य योगी प्रतिबन्धकस्तस्यापि च योगिनः प्रतिबन्धिनो गुरुत्वात् तत्पतनोपचयहेतुत्वात् **सुतरां पतनमेव स्यात्** पतेदेव तेनापि हि सह ***शिलाबद्धशिलाव**दिति पातहेतुत्वं द्रढयति । एवं तावदत्यन्तगुरुत्वे पतनमेव प्रसक्तम् । अथवा मा भूदेष दोष इत्यत्यन्तलघुत्वमिष्यते ततो**ऽत्यन्तलघुतायां न कदाचिदपि पतनं स्यात्,** पाताख्यो भाव एव न स्यात् तस्योत्पत्तिकारणाभावात्, तच्च कारणं गुरुत्वं पतनस्य, तदभावात् खपुष्पवत् न स्यात् । स्यान्मतम्--दृष्टविरुद्धमुच्यते गुरुलघुत्वदर्शनात् अर्कतूलो लघुर्गुरुर्लोहपिण्डः इति दृष्टत्वादिति । एष न दोषः, यस्मात् **ववहारतो तु जुज्जति** इत्युक्तत्वादित्यत आह — **कन्यानुदरवत्तु व्यवहारोऽयमपेक्षाकृतो बादरस्कन्धविषय** इति, यथा अनुदरा कन्या इत्यन्यासामुदरवतीनामुदरेण सदृशमुदरमस्या नास्तीत्युदरवत्येव अनुदरा इत्युच्यते व्यवहारतस्तथा बादरस्कन्धेषु लघुगुरुत्वे । यदपि च लोहपिण्डार्कतूलोदाहरणं तदपि तत्तुल्यापेक्षिकलघुगुरुत्वे एव साधयतीत्यत आह — **एवमेवापेक्षिके**त्यादि याव**दनवस्थितैकत्वे** । अल्पवाचिनि कनि **लोहपिण्डकः** पलमात्रप्रमाणोऽर्कतूल 303/mj

* * *

अथ ममात्र किम् ? द्रव्यं चैतदेवं लघुगुरुत्वापेक्षया तदेव दृष्टम्, न गुणाः । सत्त्वादयो गुणास्त्विमे लघुत्वादिलक्षणा मयोच्यन्ते, द्रव्यता तेषां सन्द्रावे एकत्वापत्तौ भवति ।

आ अद्यापि यदि गुणसन्द्रावो द्रव्यमिष्यते ततस्तवाप्येतद्द्रव्यमेव, कुतोऽस्यासन्द्रावः ? सत्त्वादयो गुणा लघुत्वादिलक्षणास्तत्सन्द्रुतिलक्षणं द्रव्यमेव, शब्दादिभावेन व्यवस्थानात्, शब्दादिस्त्वात्मवत् ।

अनापन्नतद्रूपस्य असन्द्रुतस्य शब्दादिभावापत्तिकालो व्यवस्थानशब्देनोच्यत

* * *

भाराल्लघीयान् **पलशतिका तुला, विंशतिस्तुला भारः** इति परिभाषितत्वात् । अयस्पिण्डो गुरुरपि लघुरर्कतूलो लघुरपि गुरुर्दृष्ट इत्यनवस्थितैकगुरुत्वल-

---

४ *] **शिलाबद्धशिलाब-द्ध॰**nayacakra-ms-ya ‖
५ अ] अत्र **अथ मा** इत्यपि पाठः स्यात् ‖
५ इ] **इत्यन्तल॰** प्र॰ ‖
९ व] **व्यव॰**nayacakra-ms-ya ‖
१० जु] **युज्यतीत्युक्त॰** प्र॰ । दृश्यतां पृ॰ ३०१ पं॰ ५ ‖
१५ अ] **अल्पबाधिनि कनि** प्र॰ । लोहपिण्डकः इत्ययं शब्दः कन्प्रत्ययान्तः, स च कन्प्रत्ययः अल्पवाची अल्पे पा॰ ५ । ३ । ८५ इति सूत्रेण विधीयमानत्वादित्याशयः ‖
२६ प] तुला स्त्रियां पलशतम्, भारः स्याद् विंशतिस्तुलाः । इति अमरकोषे २ । ९ । ८७ । पंचपलस+इया तुला, दस तुला+ओ अद्धभारो, वीसं तुला+ओ भारो । इति अनुयोगद्वारसूत्रे, सू॰ १३३ ‖
२७ व] **॰वस्थिकगु॰**nayacakra-ms-ya । **॰वस्थैकगु॰** nayacakra-ms-bhā ‖

- /ms घुत्वतत्त्वे गुरुलघुत्वे, आपेक्षिकत्वादस्मान् प्रति न गुरुत्वलघुत्वे परस्परतोऽन्ये, ततो नायस्पिण्डार्कतूलदृष्टान्तोऽस्ति । § 912

इतर आह **--अथ ममात्र किमित्यादि** याव**देकत्वापत्तौ भवती**ति । यदि युष्मत्सिद्धान्तेनानवस्थिततत्त्वे लघुगुरुत्वे युज्येते ततो युक्तमुक्तम्--अस्मान् प्रत्यसिद्धं लघुरेव इति । ततो ममात्र किम् ? यत् पुनरेतदुक्तं **भवन्तं च प्रत्यसिद्धम्** इति तदयुक्तमुक्तम् । यदपि च भवत्सिद्धान्तेनोक्तं तदपि नोपपद्यते, यस्माद् **द्रव्यं चैतदेवं लघुगुरुत्वापेक्षया तदेव दृष्टमिति न** गुरुलघ्वादयो **गुणाः** सत्त्वरजस्तमांसि च, लघ्वादिप्रकाशाद्यात्मका गुणास्त्विमे तल्लक्षणा मयोच्यन्ते, तेषां गुणानां **सन्द्रावे** सङ्गमे, तदर्थव्यक्तिः **एकत्वापत्ताविति**, तत्रैतस्मिन् गुणैकगमने द्रव्यता **भवति गुणसन्द्रावो द्रव्यम्** पा॰ म॰ भा॰ ५ । १ । ११९ इति लक्षणात्, ते च गुणाः परस्परतोऽन्ये, तस्मान्नासिद्धमित्यभिप्रायः । § 913

आचार्य आह **--आ अद्यापी**त्यादि याव**च्छब्दादिस्वात्मव**दिति । नन्वेतत्प्रतिपादनमेव वर्तते अनन्यत्वं गुणानाम्, तस्मादेकैककारणम् । यदि भवता गुणसन्द्रावो द्रव्यमिष्यते ततस्तवाऽप्येतद् **द्रव्यमेव**, न गुणाः पृथक्, सन्द्रुतानामेवावस्थानात् **कुतोऽस्यासन्द्रावः ?** न प्रधानावस्थायां नापि व्यक्तावस्थायामसन्द्रावः, यतोऽस्यासन्द्रावादद्रव्यत्वं स्यात् । तस्माद् द्रव्यमेव, न पृथग् लघ्वादयो गुणा इति । तत्रापि च प्रतिज्ञायते **--सत्त्वादयो गुणा लघुत्वादिलक्षणाः तत्सन्द्रुतिलक्षणं द्रव्यमेव, शब्दादिभावेन व्यवस्थानात्,** यो यः शब्दादिभावेन व्यवतिष्ठते स सोऽर्थो लघ्वादिलक्षणगुणसन्द्रुति द्रव्यमेव, **शब्दादिस्वात्मवत्,** यथा शब्दादिस्वात्मानः सत्त्वादिगुणसन्द्रुतिलक्षणं द्रव्यमेव शब्दादिभावेन व्यवस्थानात् तथा लघुगुरुत्वादिलक्षणाः सत्त्वादय इति । § 914

इति **व्यवस्थानशब्देनोच्यते,** अन्यथा व्यवस्थितमेव शब्दादिभावेन स्यात् सत्त्वमिति । एतच्च **न, पूर्वतुल्यत्वात्,** यथा प्रा (Edtext outside numbered paragraph)गुक्तं लघ्वादिलक्षणसत्त्वाद्यैक्यापत्तिर्द्रव्यम्, तच्च कदाचित् सत्त्वादि (Edtext outside numbered paragraph)पृथगवस्थानाभावात् तत्सन्द्रुतिलक्षणमेवोक्त (Edtext outside numbered paragraph)म्, तथेहापि न स कश्चित् कालोऽस्ति यः प्रवृत्तिनियमविरहितप्रकाशमात्रावस्थानोपलक्षितो यदि प्रधानावस्थायां यदि व्यक्तावस्थायामिति, अत आह **--नान्तरेण प्रवृत्त्याद्येकत्वगतिं व्यवस्थापत्तेरि**ति । **आदि**ग्रहणान्नियमो गृह्यते, प्रवृत्तिनियमावन्तरेण न व्यवस्थापत्तिरस्ति, अतो हेतो**र्नान्तरेण प्रवृत्त्याद्येकत्वगतिं व्यवस्थापत्तेः** पूर्वेण तुल्यत्वम्, इति नास्ति सत्त्वादिपृथक्त्वं तवापीति । § 915

**अनापन्नतद्रूपेत्यादि** याव**दुच्यत इति चेदि**ति । शब्दादिरूपमनापन्नस्य

---

१ र] °रतोनन्ये प्र° ॥
४ मु] दृश्यतां पृ° ३०१ पं° २ ॥
६ प्र] प्रसिद्धम् प्र° ॥
१६ स] संभूताना° प्र° ॥

१६ कु]
कुतास्या°nayacakra-ms-bhā ।
कुतस्या° nayacakra-ms-ya ॥

**सत्त्वस्यासन्द्भूतस्य** गुणान्तरासङ्गतस्य तदनात्मकस्य **स्वेनैव रूपेण स्थित-** - /ms
**स्य** प्रागारम्भादारभमाणस्य च यः **शब्दादिभावापत्तिकालो** यावदनिष्पन्नश-ब्दादित्वकाल इत्यर्थः सा ह्यवस्था

इति चेत्, न, पूर्वतुल्यत्वात् नान्तरेण प्रवृत्त्याद्येकत्वगतिं व्यवस्थापत्तेः ।

अतो यथाहेत्वैकान्तिकत्वत्प्रयुक्तलक्षणवैलक्षण्यविशेषणपक्षविरचनया त एवान्यत्वहेतवो विपर्ययसनीयाः--सुखं मोहाद् गुरोरनन्यत्, लघुत्वात्, लोह-पिण्डवदर्कतूलवत् शब्दभावव्यवतिष्ठमानसुखादिवद्वा । तथा दुःखात् प्र-वृत्तिशीलादनन्यत्, प्रवृत्तिशीलत्वात्, वायुवदाकाशवदित्यादि । मुक्त्वापि वा लक्षणभेदवैल-

* * *

तिष्ठमानम्**सत्त्वं शब्दकार्यं प्रख्याय शब्दात्मना व्यव** 304/mj

* * *

इति चेत्, न, पूर्वतुल्यत्वात् नान्तरेण प्रवृत्त्याद्येकत्वगतिं व्यवस्थापत्तेः ।

अतो यथाहेत्वैकान्तिकत्वत्प्रयुक्तलक्षणवैलक्षण्यविशेषणपक्षविरचनया त एवान्यत्वहेतवो विपर्ययसनीयाः--सुखं मोहाद् गुरोरनन्यत्, लघुत्वात्, लोह-पिण्डवदर्कतूलवत् शब्दभावव्यवतिष्ठमानसुखादिवद्वा । तथा दुःखात् प्र-वृत्तिशीलादनन्यत्, प्रवृत्तिशीलत्वात्, वायुवदाकाशवदित्यादि । मुक्त्वापि वा लक्षणभेदवैल-

* * *

तिष्ठमानम्

**अतो यथाहेत्वैकान्तिके**त्यादि यावद् **विपर्ययसनीयाः** । एतस्मादेव स-त्त्वाद्येकत्वाद् यो यो हेतुर्यथाहेतु **सुखं मोहाद् गुरोरन्यद् लघुत्वात्** इत्यादि त्वत्प्रयुक्तः स स हेतुर्विशेषेणास्मत्पक्षं साधयन्नैकान्तिको भवति । तं प्रति यथैकान्तिको भवति तथोच्यते --**सुखं मोहाद् गुरोरनन्यल्लघुत्वात्,** यद् यल्लघु तत् तद् गुरोरनन्यत्, **लोहपिण्डवदर्कतूलवत्,** यथा प्राग्वर्णितमापेक्षिकमर्क-तूलगुरुत्वं लोहपिण्डलघुत्वं चेति तद् द्वयं सहितं दृष्टान्तः । **शब्दभावव्यवतिष्ठ-मानसुखादिवद्वे**ति लौकिकार्थातिक्रमेऽपि त्वन्मतेनैव दृष्टान्तान्तरमिति । **तथा** - /ms
**दुःखात् प्रवृत्तिशीलादनन्यत्,** सुखमिति वर्तते । कुतः ? **अप्रवृत्तिशीलत्वाद् वायुवदाकाशवदि**ति पृथक्त्वाभावाद् दर्शयति, यथा वायुराकाशं वा सुखात्म-कं दुःखात् प्रवृत्तिशीलादनन्यत् तथेहापी**त्यादि**ग्रहणाद् दुःखं सुखादनन्यदप्र-वृत्तिशीलात्, प्रवृत्तिशीलत्वात्, यद्यत् प्रवृत्तिशीलं तत् तदप्रवृत्तिशीलादन-

१ स] **सत्वस्यासत्वस्या॰** प्र॰ ॥
११ स] दृश्यतां पृ॰ २८८ पं॰ २ ॥
२२ सु] दृश्यतां पृ॰ ३०० पं॰ १ ॥
२४ सुखं] **सुखं नोद्गुरो॰** प्र॰ ॥
२५ गुरोर] **॰रन्यत्** प्र॰ ॥
२५ प्रा]
**प्रागुवर्णि॰**nayacakra-ms-bhā ॥
२६ त] **तद्वयं** प्र॰ ॥
३० थेहा] **॰पीति आदि॰** प्र॰ ॥
३० द] एतच्चिह्नान्तर्गतः पाठो
nayacakra-ms-bhā प्रतौ नास्ति ॥
३१ वृत्तिशीला] **॰लादप्रवृत्तिशीलत्वात् यद्यप्रवृत्ति॰**nayacakra-ms-ya ॥

न्यद् वाय्वाकाशवत् । तथा सुखं दुःखमोहाभ्यामप्रकाशकाभ्यामनन्यत्, प्रकाशकत्वात्, घटप्रदीपादिसुखवत् । तथा दुःखं मोहादनन्यदचलात्, चलत्वात्, [घट]पर्वतादिदुःखवत्; तथा सुखात् प्रकाशकादनन्यत्, अप्रकाशकत्वात्, प्रदीपघटादिदुःखवत् । तथा मोहः सुखदुःखाभ्यामगुरुभ्यामनन्यः, गुरुत्वात्, पृथिव्यग्न्यादिगुरुत्ववत् । एवं च सुखत्वाद् दुःखत्वाद् मोहत्वात् प्रसादादिकार्यत्वादित्यादयोऽप्यनन्यत्वहेतव एव । प्रत्येकमितरगुणस्वरूपानन्यत्वं प्रतिज्ञाय तत्तद्रूपविनिवृत्तिहेतुतो यत् किञ्चिद् वस्तूदाहृत्य साध्यम्, सर्वस्य लोष्टादेर्लघुप्रकाशेतरादिपरस्परापृथग्भूतगुणात्मकत्वात् । तद्यथा--श-
305/mj रीरेन्द्रियगत आत्मैकदेशस्तदेकदेशभूताभ्यां रजस्तमोभ्यामनन्यः सुखत्वा

* * *

क्षण्यविशेषणपक्षविरचनां भेदलक्षणाभिमतेभ्य एव हेतुभ्योऽभेदसिद्धिः शक्या आपादयितुं स्फुटेनैव न्यायाध्वना--सुखं मोहादनन्यत्, अपुरुषत्वेऽचलत्वात्, मोहस्वात्मवत् । दुःखादनन्यत्, अनियमशीलत्वात्, दुःखस्वात्मवत् । दुःखं सुखात्... ...दुःखस्वात्मवत् ।

नन्वेवं विरुद्धाव्यभिचारिवदुभयानिश्चयः, न, उक्तत्वात्, भावितत्वाच्च सदा

* * *

ल्लोष्टवत्, सत्त्वरजोभ्यामनन्यो मोहत्वाल्लोष्टवत् । तथा शरीरेन्द्रियगत आत्मैकदेशस्तदेकदेशभूताभ्यां रजस्तमोभ्यामनन्यः प्रसादकार्यत्वाल्लोष्टवत्, एवं लाघवप्रसवादिभ्यः । तथा सत्त्वतमोभ्यामनन्यः शोषत्वाल्लोष्टवत् । एवं तापादिभ्यः । तथा सत्त्वरजोभ्यामनन्यो वरणत्वात्, एवं सदनादिभ्य इति । एवं तावद् यथाहेत्वैकान्तिकत्वं प्रति त एवान्यत्वहेतवः अनन्यत्वहेतवः
- /ms इत्युक्तास्त्वत्प्रयुक्तलक्षणवैलक्षण्यविशेषणपक्ष- विरचनया लघ्वादय एव ।

§ 916

अथवा **मुक्त्वापि वा** । लक्षणभेदहेतूनां सुखं मोहाद् गुरोरन्यल्लघुत्वाद् महालोहपिण्डार्कतूलवत् इत्यादिविशेषणमन्तरेण भेदो न शक्यः साधयितुमिति तद्रचनाकुसृतिर्यथा त्वया क्रियते तथैव मया कृता, किन्तु तां **मुक्त्वापि लक्षणभेदवैलक्षण्यविशेषणपक्षविरचनां** सत्त्वादिभेदलक्षणाभिमतेभ्य एव त्वदुक्तेभ्यो लघ्वादिहेतुभ्योऽभेदसिद्धिः शक्या आपादयितुं **स्फुटेनैव न्यायाध्वना** भ्रान्तिजननेन विनेत्यर्थः । तद्यथा **--सुखं मोहादनन्यत्, अपुरुषत्वेऽचलत्वात्, मोहस्वात्मवत्,** * अपुरुषत्वविशेषितः अचलत्वात् इति हेतुः पुरुषाद-

७ त] तत्तद्रूप° प्र° ॥
१२ दुः] दुःखं सुखादनन्यदनियमशीलत्वात् सुखस्वात्मवत्, मोहादनन्यदप्रकाशात्मकत्वात् मोहस्वात्मवत् । मोहः सुखादनन्यः अचलत्वात् सुखस्वात्मवत्, दुःखादनन्यः अप्रकाशकत्वात् दुःखस्वात्मवत् । इति मूलं सम्भाव्यते ॥
१७ आत्मैक] **°कदेशभूताभ्यां** प्र° ॥
१९ स] **सत्त्वतमोभ्या°** प्र° ॥
२१ च] °चना ल°nayacakra-ms-ya ॥
२३ मुक्त्वापि] °पि चापलक्षण°nayacakra-ms-ya ॥
२६ स] **सदादिभेद°** प्र° ॥
२९ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

चलाद् व्यावर्त्यते मा भूदनैकान्तिक इति । **दुःखादनन्यत्** सुखमिति वर्तते, **अनियमशीलत्वात्,** अत्रापि अपुरुषत्वविशेषणं द्रष्टव्यमधिकारात्, **दुःखस्वात्मवदिति** । तथा **दुःखं सुखादित्यादि** साधनचतुष्टयं सुखादनन्यत्वसाधनद्वयवदपुरुष[त्व]विशिष्टं दुःखमोहयोः संयोगनिष्पन्नमिति साधनषट्कं गतार्थं यावद् **दुःखस्वात्मवदिति** । § 917

इतर आह **--नन्वेवं विरुद्धाव्यभिचारिवदुभयानिश्चयः** । यथोक्तम् **--यथोक्तलक्षणयोर्द्वयोर्विरुद्धयोर्नित्यानित्यसाधकयोरेकत्र सन्निपतितयोर्हेत्वोरेकस्मिन् धर्मिणि शब्दे परस्परनिवारितव्याप्त्योः श्रावणकृतकत्वयोः शब्दत्वघटादिदृष्टान्तयोरुभयत्र संशयो भवति** इति, तथेह आवाभ्यामुक्तैरन्यत्वानन्यत्वहेतुभिरुभयानिश्चयोऽस्तु, मा भूत् त्वत्प्रोक्तानामेवैकान्तिकत्वमिति । § 918

अत्रोच्यते **--न, उक्तत्वात्,** नैष उभयानिश्चयो युज्यते, अस्माभिः ***भिन्नात्मकतायां तु** इत्यादि प्रक्रम्य **सुखं दुःखादनन्यत् अनात्मत्वे सत्यव- - /ms
रणाद्यात्मकत्वात् दुःखस्वात्मवदित्यादिभि**रैकान्तिकैर्हेतुभिरनन्यत्वस्य लिखितत्वात् । अथवा **नोक्तत्वादिति** त्वत्प्रयुक्तानामन्यत्वहेतूनां लघुत्वादीनामुक्तदोषत्वात् सर्वेऽ 306/mj

* * *

गुणेषु सन्द्रावस्य । विरुद्धाव्यभिचारिणि चोक्तम्--प्रत्यक्षागमबलीयस्त्वात् तत एव निश्चयोऽन्विष्यते प्र°बौद्धाचार्यदिङ्नागविरचितायाः प्रमाणसमुच्चयवृत्तेर्भोटभाषानुवादे परार्थानुमानपरिच्छेदेऽधोनिर्दिष्टः पाठ उपलभ्यते--गङ्-गि-च्.हे स्ग्र-ञिद् र्तग्-पर् खस्-लेन् पर् ब्येद्-प देइऽ-च्.हे ऽदि ग्तन्-च्.हिग्स् ञिद् दु ऽग्युर् रो श्.एन् । गल्-ते ऽदि ल यङ् म-र्तग् प-ञिद् क्यि ग्तन्-च्.हिग्स् ब्यस् प-ञिद् ल सोग्सं प ऽगऽ-श्.इग् स्तोन्-पर् मि ब्येद् न नि ऽग्युर् न । ग्ञिग् ढ्निग्स्-प न ऽगल् ब दङ् दोन् ग्चिग् ल मि स्निद्-पैऽ फ्यिर् थे-च्.होम् ग्यि ग्र्यु यिन् नो । ऽदि ल यङ् म्ङोन्-सुम् दङ् लुङ् स्तोब्स् दङ् ल्दन्-पैऽ फिर् दे-खोन् लस् ङेस्-प ब्ज्.अल्-पर् ब्यऽओ । Tanjur, Mdo, Narthang Edition, No. ९५ p. १३४ B अस्य चायमर्थः--यदा शब्दत्वं नित्यमभ्युपगम्यते तदा अयं =शब्दो नित्यः श्रावणत्वात् शब्दत्ववत् हेतुरेव स्यादिति चेत्, स्याद् यदि अत्रापि अनित्यत्वस्य हेतुः कृतकत्वादिः कश्चिन्न प्रदर्श्येत । उभयोरुपलब्धौ विरुद्धयोरेकस्मिन्नर्थेऽसम्भवात् सति संशयदर्शनादयमन्यः सन्दिग्ध इति केचित् । इति प्रशस्तपादभाष्ये बुद्धिनिरूपणे ॥

---

३ दुः ] दुःखादीत्यादिnayacakra-ms-ya ॥
३ दित्यादि ] एतच्चिह्नान्तर्गतः °साधन° इत्यत आरभ्य °वदिति इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
३ सु ] सुखानन्यत्व ? ॥
७ य ] एकस्मिंश्च द्वयोर्हेत्वोर्यथोक्तलक्षणयोर्विरुद्धयोः सन्निपाते
१२ अ ] **तस्माभिः** प्र° ॥
१३ * ] दृश्यतां पृ° २६० पं° ४ ॥
१३ सु ] दृश्यतां पृ° २७८ पं° १ ॥
१६ स ] दृश्यतां पृ° ३०० पं° ५ ॥

संशयहेतुः । अत्र च प्रत्यक्षागमबलीयस्त्वात् तत एव निश्चयोऽन्विष्यते । दिङ्नागविरचिते न्यायमुखेऽपि एतदर्थक एव पाठ उपलभ्यते । यद्यपि न्यायमुखग्रन्थः संस्कृतभाषायां नोपलभ्यते सम्प्रति तथापि Yuen-Chwang इत्यनेन १३०० वर्षेभ्यः पूर्वं विहितं चीनभाषानुवादमवलम्ब्य Giuseppe Tucci इत्यनेन विहिते English> भाषानुवादे निम्नलिखितः पाठ उपलभ्यते--Some object: the reason: because it is audible is not असाधारण, as you assume, but it must be a valid reason when we discuss against a वैशेषिक who thinks that soundness is eternal. My reply is that this argument can be valid until the opponent has not indicated that the reason of non-eternity is the fact of being product etc. But if validity can be reached in either way, since contradiction regarding one and the same object is inadmissible, this kind of reason proves to be a doubtful reason. Moreover in this world the force of direct perception and of authority of the scripture AGAMA is stronger than any argument and therfore we must search after truth on the basis of these two means of knowledge, p. ३४, ३५. ॥ समु° वृ° इति । बलीयस्त्वं चास्मद्धेतूनामाद्यहेतुभावनात् ।

* * *

प्येतेऽप्रसिद्धसाध्यधर्मसमन्वयव्यावृत्तयः, अनुमाननिराकृतपक्षाः, अनवधारणे विपर्ययहेतवः, अवधारणे चापक्षधर्मा एवेति । तस्मादनैकान्तिकाः । तेषां चैकान्तिका अस्मदुक्ता निवर्तका एवेति न तुल्यमावयोः । § 919

इत्यादि प्रक्रम्य अ (Edtext outside numbered paragraph)**नात्मत्वे सति अवरणाद्यात्मकत्वा**दित्यादिभिराद्यहेतुभिः प्रत्यक्षागमबलीयस्त्वमापादितम् । तस्मान्न समं ना (Edtext outside numbered paragraph)विति । § 920

इतश्चातुल्यमावयोः --**भावितत्वाच्च गुणेषु सदा सन्द्रावस्य,** बहुधा भावितं हि सदा सत्त्वादयो गुणाः सन्द्रुता एव प्रधानमहदहङ्कारादिसर्वावस्थासु न जातु पृथग्भूतसमवस्थाश्चेति । किञ्चान्यत्, **विरुद्धाव्यभिचारिणि चोक्तम्,** विरुद्धाव्यभिचारिण्यपि न परस्परनिवारितव्याप्तित्वमात्रात् संशय एव, किं तर्हि ? **प्रत्यक्षागमबलीयस्त्वात् तत एव निश्चयोऽन्विष्यते इति ह्युक्तम्,**

३० योऽन्वि ] न्वेष्यते प्र° । द्युक्तम् nayacakra-ms-bhā । द्युक्तम् nayacakra-ms-ḍe nayacakra-ms-līṃ । त्युक्तम् nayacakra-ms-vi । युक्तम् nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-hī ॥ ३० ह्यु ] [In the print edition

तयोर्विरुद्धाव्यभिचारिणोः पक्षधर्मयोर्यः प्रत्यक्षीकृतार्थेनागमेन बलीयान् प्रत्यक्षसंवादिना प्रत्यक्षेणागमेन च जनितबलाद्वा प्रत्यक्षेणैवागमेनैव वा यथाप्रसिद्धि यो बलीयांस्तत एव निश्चयोऽन्विष्यत इत्यादिव्याख्याविकल्पेषु प्रत्यक्षागमेन घटादिषु प्रसिद्धसाध्यानित्यत्वान्वयस्य कृतकत्वहेतोर्बलीयस्त्वात् ततोऽनित्य इति निश्चयः स्यात्, न तु श्रावणत्वस्य शब्दत्वे प्रत्यक्षीकर्तुं शक्योऽन्वयः शब्दत्वस्याप्रसिद्धत्वादिति, तद्वत् किमिह साधर्म्यमिति चेत्, उच्यते

मा मंस्थास्त्वदीया हेतवो बलीयांसः, अस्मत्पक्षसाधनत्वायेतो विपरिवर्तयितुं शक्यत्वात् । तद्यथा--सुखादन्यद् दुःखम्, प्रसादाद्यनात्मकत्वात्, पुरुषवत् । मोहश्च दुःखादन्यः, तत एव, तद्वत् । मोहादन्ये सुखदुःखे, वरणाद्यनात्मकत्वात्, पुरुषवत् ।

किं त्वान्मात्रादेव विपरिवर्तनम् ? त्रैलक्षण्यात् ? त्रैलक्षण्याच्चेत्, आदिलक्षण-

* * *

चास्मद्धेतूनामाद्यहेतुभावनात्, भिन्नात्मकतायां तु--**बलीयस्त्वं** 307/mj

* * *

मा मंस्थास्त्वदीया हेतवो बलीयांसः, अस्मत्पक्षसाधनत्वायेतो विपरिवर्तयितुं शक्यत्वात् । तद्यथा--सुखादन्यद् दुःखम्, प्रसादाद्यनात्मकत्वात्, पुरुषवत् । मोहश्च दुःखादन्यः, तत एव, तद्वत् । मोहादन्ये सुखदुःखे, वरणाद्यनात्मकत्वात्, पुरुषवत् ।

किं त्वान्मात्रादेव विपरिवर्तनम् ? त्रैलक्षण्यात् ? त्रैलक्षण्याच्चेत्, आदिलक्षण-

* * *

चास्मद्धेतूनामाद्यहेतुभावनात्, भिन्नात्मकतायां तु

यदि प्रसादाद्यात्मा न भवतीत्यनात्मकं दुःखमुच्यते, अथ आत्मैव नास्तीत्यनात्मकमित्युच्यते, द्विधाप्यसिद्धं दुःखस्यानात्मकत्वं धर्म्यसिद्धा (Edtext outside numbered paragraph)पत्तेः । कथमिति चेत्, उच्यते — **न दुःखं न सुखं नान्यद्** मोहः पुरुषो वा, त्वत्परिकल्पितं दुःखं

there is a footnote reference but no corresponding note.]

१ ध] °र्मथर्यत्पत्यक्षी°nayacakra-ms-bhā । °र्मयोर्यत्यक्षी° nayacakra-ms-ya ॥

३ योऽन्वि] न्वेष्यते प्र° । द्युक्तम् nayacakra-ms-bhā । द्युक्तम् nayacakra-ms-ḍe nayacakra-ms-līṃ । त्युक्तम् nayacakra-ms-vi । युक्तम् nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-hī ॥

६ त] तद्वक्तिमिदnayacakra-ms-ya । तद्वक्तिमित्याह nayacakra-ms-bhā ॥

१५ ता] °तायास्तु प्र° । दृश्यतां पृ° २७० पं° ४ ॥

२३ ता] °तायास्तु प्र° । दृश्यतां पृ° २७० पं° ४ ॥

प्रसादाद्यनात्मकत्वात् खपुष्पवत् स्यादिति धर्म्यभावादपक्षधर्मत्वम् । § 921

इतर आह --**मा मंस्थास्त्वदीया हेतवो बलीयांसः** अवरणाद्यात्मक- - /ms त्वादयः इति । तदबलत्वं च **अस्मत्पक्षसाधनत्वायेतो विपरिवर्तयितुं शक्यत्वात्** । तद्यथा--पूर्वहेतवस्तावदबलाः, यतः शक्यन्ते त इतोऽपि सुतरां पुरुषनिवृत्त्यर्थमनात्मत्वविशेषणादृतेऽपि विपरिवर्तयितुम् । **तद्यथा--सुखादन्यद् दुःखं प्रसादाद्यनात्मकत्वात् पुरुषवत्,** असमर्थसमासेनागमकेनाप्यर्थं गृहीत्वा नञिवोक्त्यनुसारेणोक्तम् । **मोहश्च दुःखादन्यः, तत एव, तद्वदिति** । **चशब्दाद्** दुःखादन्यौ सुखमोहौ शेषाद्यनात्मकत्वात् पुरुषवत्, तथैव व्याख्या, द्वे साधने समस्योक्ते **मोहादन्ये सुखदुःखे वरणाद्यनात्मकत्वात् पुरुषवदिति** तथैवेति । अत्रोच्यते --**किं त्वान्मात्रादेव विपरिवर्तनम् ? त्रैलक्षण्यात् ?** इति प्रश्नः । प्रतारणार्थभाववाचिप्रत्ययसहितपञ्चम्यन्तशब्दप्रयोगमात्रात् पक्षधर्मसादृश्यात् त्रैलक्षण्यशून्यान्न परिवर्तनमित्यभिप्रायः । स्यान्मतम्--न त्वान्मात्रात्, किं तर्हि ? **त्रैलक्षण्याच्चे**देवं चेन्मन्यसे, तदयुक्तम्; यस्मा**दादिलक्षणमेव नास्ति,** इह पक्षधर्मत्वमेव तावन्नास्ति यदाधारेण

---

५ अ] वृत्तिस्तर्हि कस्मान्न भवति ? अगमकत्वात् । इह समानार्थेन वाक्येन भवितव्यं समासेन च । यश्चेहार्थो वाक्येन गम्यते महत्कष्टं श्रितः इति नासौ जातुचित् समासेन गम्यते महत्कष्टश्रितः इति । एतस्माद्धेतोर्ब्रूमः--अगमकत्वादिति । न ब्रूमः अपशब्दः स्यात् इति । यत्र च गमको भवति, भवति तत्र वृत्तिः, तद्यथा--देवदत्तस्य गुरुकुलम्, देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्या इति । यद्यगमकत्वं हेतुः, नार्थः समर्थग्रहणेन, इहापि भार्या राज्ञः, पुरुषो देवदत्तस्य इति योऽर्थो वाक्येन गम्यते नासौ जातुचित् समासेन गम्यते भार्या राजपुरुषो देवदत्तस्य इति, तस्मान्नार्थः समर्थग्रहणेन । इदं तर्हि प्रयोजनम्--अयमस्त्यसमर्थसमासो नञ्समासो गमकः, तस्य साधुत्वं मा भूत् अकिञ्चित्कुर्वाणम्, अमाषं हरमाणम्, अगाधादुत्सृष्टम् इति । एतदपि नास्ति प्रयोजनम्, अवश्यं कस्यचिद् नञ्समासस्यासमर्थसमासस्य गमकस्य साधुत्वं वक्तव्यम्— असूर्यंपश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मणः, अलवणभोजी ब्राह्मणः इति । सुडनपुंसकस्येत्येतन्नियमार्थं भविष्यति--एतस्य वा असमर्थसमासस्य नञ्समासस्य गमकस्य साधुत्वं भवति नान्यस्येति । इति पातञ्जलमहाभाष्ये २ । १ । १ । अश्राद्धभोजी । किं योऽश्राद्धं भुङ्क्ते सोऽश्राद्धभोजी ? किं चातः ? यदासावश्राद्धं न भुङ्क्ते तदास्य व्रतलोपः स्यात्, तद्यथा--स्थायी यदा न तिष्ठति तदास्य व्रतलोपो भवति । एवं तर्हि णिन्यन्तेन समासो भविष्यति, न श्राद्धभोजी अश्राद्धभोजीति । नैवं शक्यम्, स्वरे हि दोषः स्यात् अश्राद्धभोजी ६ । २ । २ इत्येवं स्वरः प्रसज्येत अश्राद्धभोजी ६ । २ । १३९ इति चेष्यते । एवं तर्हि नञ एवायं भुजिप्रतिषेधवाचिनः श्राद्धशब्देनासमर्थसमासः न भोजी श्राद्धस्येति । स तर्हि असमर्थसमासो वक्तव्यः । यद्यपि वक्तव्यः अथवैतर्हि बहूनि प्रयोजनानि । कानि ? असूर्यपश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मणः, सुडनपुंसकस्य १ । १ । ४३ इति । इति पातञ्जलमहाभाष्ये ३ । २ । ८० ॥

६ न] **तहीकोक्य°**nayacakra-ms-bhā । **तहीकोक्त्य°** nayacakra-ms-ya । दृश्यतां पृ° २३२ टि° ७ ॥

७ मोहौ] **सुखाद्यात्म°**nayacakra-ms-ya ॥

१२ ण्या] **°ण्याचेदेवं**nayacakra-ms-bhā । **°ण्यचेदेवं** nayacakra-ms-ya ॥

१३ दाधा] **°धारणशिष°** प्र° ॥

शेषद्वयम् । कथं पक्षधर्मो नास्तीति चेत्, यस्माद्

मेव नास्ति, न ह्यनात्मनां नाम धर्मः कश्चिदस्ति, न दुःखं न सुखं नान्यत् ।

नन्वन्यपदार्थविषयत्वाद् बहुव्रीहेः नास्ति प्रसादाद्यात्मा वरणाद्यात्मा वा स कोऽप्यन्यः स्यात् सद्धर्मवान् । एवमपि यथा स्थूलशिरा राहुः इत्यत्र असत आख्या राहोः शिरोव्यतिरिक्तस्य । असदाख्यया व्यपदेशिवद्भावं कृत्वा व्यवहारो दृष्टस्तथेदमपि स्यात् । तदनभ्युपगमे धर्मधर्मिस्वरूपविरोधौ । धर्मिस्वरूपविरोधस्तावत्— आत्मनोऽनन्यदेव दुःखम्, प्रसादाद्यनात्मकत्वात्, आत्मस्वतत्त्ववत्, अन्यथा सुखान्यत्वप्रसादाद्यनात्मकत्वानुपपत्तेः । धर्मस्वरूपविरोधोऽपि चैवमेव । ततश्च प्रकृति-

* * *

ह्यनात्मनां नाम धर्मः कश्चिदस्ति,न 308/mj

* * *

मेव नास्ति, न ह्यनात्मनां नाम धर्मः कश्चिदस्ति, न दुःखं न सुखं नान्यत् ।

नन्वन्यपदार्थविषयत्वाद् बहुव्रीहेः नास्ति प्रसादाद्यात्मा वरणाद्यात्मा वा स कोऽप्यन्यः स्यात् सद्धर्मवान् । एवमपि यथा स्थूलशिरा राहुः इत्यत्र असत आख्या राहोः शिरोव्यतिरिक्तस्य । असदाख्यया व्यपदेशिवद्भावं कृत्वा व्यवहारो दृष्टस्तथेदमपि स्यात् । तदनभ्युपगमे धर्मधर्मिस्वरूपविरोधौ । धर्मिस्वरूपविरोधस्तावत्— आत्मनोऽनन्यदेव दुःखम्, प्रसादाद्यनात्मकत्वात्, आत्मस्वतत्त्ववत्, अन्यथा सुखान्यत्वप्रसादाद्यनात्मकत्वानुपपत्तेः । धर्मस्वरूपविरोधोऽपि चैवमेव । ततश्च प्रकृति-

* * *

ह्यनात्मनां नाम धर्मः कश्चिदस्ति,

इतर आह --**नन्वन्यपदार्थे**त्यादि यावत् **सद्धर्मवान्** । ननु बहुव्रीहेरन्य- - /ms
पदार्थविषयत्वात् तत्सूचनसमासान्तकप्रत्ययान्तत्वादनात्मकश्रुतेः नास्ति प्रसादाद्यात्मा [वरणाद्यात्मा] वा चित्रगुदेवदत्तवत् स कोऽपि वरणादिभ्यः प्रसादादिभ्यश्चान्यः सन्नेव, नासद्धर्मवान् धर्मी पक्षो भवितुमर्हतीति । § 922

अत्रोच्यते--नैतदुपपद्यते, बहुव्रीहेरप्यन्यपदार्थविषयत्वानैकान्त्यात्, **एवमपी**त्यादि याव**द्धर्मधर्मिस्वरूपविरोधा**विति । स्थूलं शिरोऽस्य स्थूलशिरा राहुः,

१२ नात्म ] °त्मनं प्र° ॥
२३ नात्म ] °त्मनं प्र° ॥
२५ त ] तत्सूचक° ? ॥
२५ श्रु ] °श्रुते प्र° ॥
२५ ना ] **नास्य**[वरणाद्यात्मा] प्रसादाद्यात्मा **वा** इत्यपि पाठोऽत्र स्यात् ॥
२७ श्चान्यः ] °न्यः **सद्धर्मवान्**nayacakra-ms-bhā । °न्यः सन्नेव, नासन्, धर्मवान् इत्यपि पाठोऽत्र स्यात् ॥
२८ प्य ] °**प्यन्यर्थविष**°nayacakra-ms-ya । °**प्यनर्थविष**° nayacakra-ms-bhā ॥
२९ विरोधा ] °**धादिति**nayacakra-ms-ya ॥

कपोऽतन्त्रत्वाद् बहुव्रीहेरेव तन्त्रत्वात्, तस्य चान्यपदार्थत्वव्यभिचारं दर्शयति तद्गुणसंविज्ञानपक्षाश्रयणेन, **भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि** पा°भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा--शुक्लवाससमानय लोहितोष्णीषाः प्रचरन्ति इति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति ।पा° म° भा° २ । १ । ६६, २ । २ । २४ । भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा--चित्रवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति । पा° म° भा° १ । १ । २६ ॥ म° भा° २ । १ । ६६, २ । २ । २४ इति वचनात्, न हि स्थूलशिरोलक्षितस्तद्व्यतिरिक्तो राहुरस्ति चित्रगवविशिष्टदेवदत्तवत्, तदेव हि स्थूलं शिरो राहुः, तद्व**दसत आख्या राहोः शिरोव्यतिरिक्तस्य** । आख्या व्यपदेशः स्थूलेन शिरसा व्यपदेशेन चित्राभिरिव व्यपदेशिनो देवदत्तस्य व्यतिरिक्तस्य, तद्वदव्यतिरिक्तस्यापि राहोस्तयाख्यया व्यपदेशिवद्भावं कृत्वा व्यवहारो दृष्टोऽसतोऽपि तथेदमपि स्यात् । तस्य व्यपदेशिवद्भावव्यवहारस्यानभ्युपगमे उक्तोपपत्त्या दृष्टमिमसदाख्यया व्यपदेशिवद्भावव्यवहारमनभ्युपगच्छतस्ते धर्मधर्मिस्वरूपविरोधौ दोषौ भवतः । **धर्मिस्वरूपविरोधस्तावदात्मनोऽनन्यदेव दुःखं** पुरुषादित्यर्थः । **प्रसादाद्यनात्मकत्वात्,** बहुव्रीहिसामर्थ्यात् प्रसादाद्यात्मनोऽन्यत्वादित्यर्थः । **आत्मस्वतत्त्ववत्,** पुरुषस्वात्मवदित्यर्थः । पुरुषत्वापत्तिश्च दुःखस्य धर्मिस्वरूपवैपरीत्यम्, अतो - /ms धर्मिस्वरूपविरोधः । किं कारणम् ? **अन्यथा सुखान्यत्वप्रसादाद्यनात्मकत्वानुपपत्तेः,** 309/mj पुरुषत्वापत्तिमन्तरेण सुखस्य दुःखादन्यत्वं वरणाद्यनात्मकत्वं

* * *

पुरुषयोरप्येकतैव । एवं दुःखमोहयोरपि ।

अथ मा भूदेष दोष इत्यनात्मविशेषणत्वात् तद्वत्, तथा सति यथा किम् ? दृष्टान्तः इदं तत् इति निदर्शयितुं न शक्यते । न हि सुखादन्यदस्ति किञ्चिदुक्तवदपुरुषम् । यच्च सुखादनन्यत् तदनात्मत्वे न प्रसादाद्यनात्मकं न लघ्वाद्यनात्मकं चेति निदर्शयितुं न शक्यते ।

* * *

दुःखस्य वा सुखादन्यत्वं प्रसादाद्यनात्मकत्वं मोहस्य ताभ्यामन्यत्वं प्रसादादिशोषाद्यनात्मकत्वं च नोपपद्यते भावितन्यायत्वात् सुखदुःखमोहानामैक्यवृत्तित्वस्य । तस्मात् पुरुषस्वरूपापत्तेः प्रसादादिशोषादि[वरणादि]कार्याणां सुखदुःखमोहानां धर्मिस्वरूपविपरीततेति । किञ्चान्यत्, योऽपि धर्मस्वरूपविरोधः सोऽपीत्थमुच्यते, तद्यथा --**धर्मस्वरूपविरोधोऽपि चैवमेव,** यथा पुरुषत्वापत्तौ सुखादीनां सुखाद्यात्मपरित्यागेन धर्मिस्वरूपविरोधः तथा पौंस्नापत्तौ त्रयाणामैक्यापत्तौ चान्यधर्मस्वरूपविरोधश्च । तत-

---

९ द] °**दस आख्या** प्र° ॥
१० देशेन] अत्र **चित्राभिर्गोभिरिव** इत्यपि पाठः स्यात् ॥
१७ त्तिश्च] °**श्च सुखस्य धर्मि**° प्र° ॥
१९ सु] **सुखदुःखाद**° प्र° ॥
२७ ता] **त्वाभ्या**°nayacakra-ms-ya । वाभ्या° ? ॥
३१ ध] **धर्मिस्व**° प्र° ॥

**श्च प्रकृतिपुरुषयोरप्येकतैव,** तस्माद्धेतोः पुरुषत्वापत्तेरनन्यत्वापत्तेश्च प्रकृतिः पुरुषादन्या पुमान् वा प्रकृतेरन्य इति नोपपद्यते । ततोऽस्मदभीष्टम् एकमेव कारणम् इत्येतद् दर्शनं साधीयः । **एवं दुःखमोहयोरपि,** यथा सुखं दुःखादन्यत् इत्येतत् ***किं त्वान्मात्रात् ? त्रैलक्षण्यात् ?** इत्यतः प्रभृति यावत् **प्रकृतिपुरुषयोरप्येकतैव** इत्युक्तं तथा दुःखं सुखमोहाभ्यामन्यत्, मोहः सुखदुःखाभ्यामन्यः इत्येतेष्वपि चतुर्षु सुखं मोहादन्यत् इति च साधने स एव ग्रन्थो योज्य इति । § 923

**अथ मा भूदेष दोष इत्यनात्मविशेषणत्वात् त्वद्वत्** । एतद्दोषपरिहारार्थं यथा त्वया **अनात्मत्वे सति अवरणाद्यात्मकत्वात् सुखं दुःखादनन्यद् मोहवत्** इत्याद्यभिहितं तथाहमपि अनात्मत्वे सति लघुत्वात् सुखं दुःखादन्यद् मोहवत् इत्याब्रवीमीति, अतो धर्मधर्मिस्वरूपविरोधौ प्रकृतिपुरुषदोषश्च नेति । अत्रोच्यते --**तथा सति यथा किम् ?** इति । एवं सति यथा किं सुखादन्यत् आत्मानं मुक्त्वेति । **दृष्टान्तः इदं तत् इति निदर्शयितुं न शक्यते** - /ms
इदं तत् सुखात् पुरुषाच्चान्यद् वस्त्विति समन्वयस्याभावः, *यदनात्मत्वे सति लघुत्वादिधर्मं तत् सुखात् पुरुषाच्चान्यदिति वस्त्वन्तराभावात् । तद्दर्शयन्नाह --**न हि सुखादन्यदस्ति किञ्चिदुक्तवदपुरुषम् ?** पुरुषव्यतिरिक्तं हि सर्वं परस्पराविविक्तसुखादिस्वतत्त्वमेवेत्युक्तम् । तस्मादन्यत् सुखमेव सर्वमिति समन्वयाभावः । अत एव चान्यत्वेन पक्षीकृते सुखादौ पुरुषव्यतिरिक्तसपक्षाभावात् सुखादेरपि सुखादन्यस्य विपक्षत्वाद् विपक्षाद्धेतोर्व्यावृत्त्यर्थं यदुच्यते **यच्च सुखादनन्यत् तदनात्मत्वे न प्रसादाद्यनात्मकं न लघ्वाद्यनात्मकं चेति निदर्शयितुं न शक्यते,** न च मोहादि सुखादन्यन्न भवतीत्यशक्यं दर्शयितुमिति विपक्षाव्यावृत्तिरपि । अतो विपक्ष एव सत्त्वाद् विरुद्धाश्च ते हेतव इत्यभिप्रायः । § 924

310/mj

अथ तु यद् विभक्तस्वतत्त्वं दुःखमोहाभ्यां सुखादन्यन्न भवति तत् प्रसादाद्यनात्मकमपि न भवति यथा सुखम् । तथा सति तथानियमवत् तथाप्रवर्तनात् तथाव्यक्तेश्च नियमप्रवृत्तिप्रकाशात्मकं सुखमेवेति ऐक्यं मोहादीनामभ्युपगतं त्वयैवेति को

४ *] दृश्यतां पृ० ३०७ पं० ५ ॥
७ ए] एवं प्र० ॥
९ अ] अनात्मकत्वे सवरणा० प्र० । दृश्यतां पृ० २७८ पं० २ ॥
११ इ] इत्यादि ब्रवीमि ? ॥
१४ *] यद्यानात्मत्वेnayacakra-ms-bhā । यथानात्मत्वे ? ॥ एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१७ सुखा] °दिभ्यतत्व°nayacakra-ms-bhā ॥
१८ सु] सुखादिपुरुष°nayacakra-ms-ya ॥
२० नात्म] °त्मकत्वंnayacakra-ms-bhā ॥
२० नात्म] °त्मकत्वं प्र० ॥

वादार्थ उभयोरपि ? तत्रैव त्ववरणाद्यात्मकत्वादिवद् विदोषा लघ्वादिहेतवोऽपि सुखादावपि च विपरिहारपक्षीकृतेऽपि च ।
§ 925

परधर्मेणापि सुखं दुःखादनन्यत्, चलाप्रकाशकत्वात्, अविभक्ताशेषगुणात्मकलोष्टवत् । एवं च स्थिते सुखं दुःखादनन्यत्, लघुत्वादप्रवृत्तिशीलत्वात् प्रका- § 926

**अथ त्वि**त्यादि यावत् **सुख**मिति । अथ मतं तव यद् विभक्तस्वतत्त्वं दुःखमोहाभ्यां तत् सुखं सुखादन्यन्न भवति तत् प्रसादाद्यनात्मकमपि न भवतीति विविक्तस्वरूपस्य सुखस्य दुःखादन्यत्वात् प्रसादाद्यात्मकत्वाच्च तदेव शक्यते वैधर्म्येण निदर्शयितुम् । अत एव च तमः सुखादन्यद् विविक्तस्वरूपमप्रसादात्मकमपुरुषं चेति साधर्म्यदृष्टान्तश्च स्यादिति । एवमितरसाधनेष्वपि उभयदोषपरिहार इति । अत्रोच्यते— **तथा सती**त्यादि यावत् **को वादार्थ उभयोरपि ?** इति । एवं सति तेन प्रकारेण नियमोऽयं यत् सुखादन्यन्न भवति तत् प्रसादाद्यनात्मकमपि न भवत्येवेति एतेन प्रकारेण नियमवत् - /ms सुखमेवानन्यत् प्रसादाद्यात्मकं भवति चेति **तथा** तस्य वस्तुनः **प्रवर्तनात् तथाव्यक्तेश्च नियमप्रवृत्तिप्रकाशात्मकं सुखमेवेति** तदभ्युपगमेनैवैक्यं मोहादीनामापन्नमस्मिन् साधने, एतदभ्युपगमवच्च शेषसाधनेष्वपि दुःखादन्यत् सुखं मोहश्च इत्येवमादिषु यद् यदनात्मत्वे दुःखादन्यन्न भवति तच्छोषादिवरणाद्यनात्मकमपि न भवति इत्येवं नियमाद् व्यक्तेः प्रवृत्तेश्चैक्यं मोहादीनामभ्युपगतं त्वयैवेतीतरेतरैकत्वाभ्युपगमः । **इतिशब्दो** हेत्वर्थे, इत्यतः **को वादार्थः** वादप्रयोजन**मुभयो**रावयोः ? त्वयैवैक्याभ्युपगमान्न वादार्थस्तव ममापि प्रतिपन्नार्थप्रतिपादनवैफल्यादिति । एवं तावदवरणाद्यात्मकत्वादिहेतवः प्रथमोक्तानन्यत्वपक्षस्यैव साधका अनात्मत्वविशेषणा अपि नान्यत्वपक्षस्येति प्रतिपादिताः । § 927

**तत्रै**वानन्यत्वपक्ष एव **त्ववरणाद्यात्मकत्वादिवद् विदोषा लघ्वादिहेतवोऽपि,** नान्यत्वपक्षे, तत्र सदोषा एवेत्यभिप्रायः । ननु लघ्वादयोऽनन्यत्वहेतव उक्ता एव, किं पुनरनुशयेन ? इति, अत्रोच्यते — **सुखादावपि च** न सत्त्वादिष्वेव, तत्रापि च **विपरिहारपक्षीकृतेऽपि च,** न यथा त्वया सुखं मोहाद् गुरोरन्यत् इति परिहारपक्षीकृते चैव । § 928

**परधर्मेणापि**दुखं सुखादनन्यत् लघुत्वात् इत्येतेनापि, न केवलम् अनात्मत्वे चलत्वादेवेतीत्थं विशिष्टेन प्रतिपादनविधिना अनन्यत्वहेतव इति । **अपि**शब्दात् स्वधर्मेण सुखं दुःखादनन्यल्लघुत्वात् इत्यादिभिः सुकरप्र-

११ त्म] °त्मकपुरुषं प्र° ॥
१८ नात्म] °त्मकत्वेnayacakra-ms-ya ॥
२६ उक्ता] दृश्यतां पृ° ३०४ पं° ३ ॥
२९ क्षीकृ] °कृताचेवnayacakra-ms-bhā । °कृतात्वेव nayacakra-ms-ya । अत्र कृतेष्वेव इत्यपि पाठः स्यात् ॥

तिपादनमेवेत्यर्थः । परधर्मेण तावत् **सुखं दुःखादनन्यत् चलाप्रकाशकत्वात्, चलमप्रकाशकं प्रवृत्तिशीलं दुःखम्** इति वचनाद् दुःखधर्मेण सुखं त- - /ms
तोऽनन्यदिति साध्यते । **अविभक्ताशेषगुणात्मकलोष्टवत्**दिति दृष्टान्तः प्रागुपवर्णितः, अविभक्ताः सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणात्मको लोष्ट इति त्रित्वैक्यानतिक्रमाच्च त एवाशेषगुणाः, तदात्मको लोष्टः 311/mj

* * *

शकत्वात् । तत्संयोगाच्च, एवं मोहादपि । परधर्मेण चलत्वादप्रकाशकत्वात् प्रवृत्तिशीलत्वात् तत्संयोगाच्च, एवं मोहादपि । एवं गुरुत्वादप्रकाशकत्वात् तत्संयोगाच्च, एवं मोहादपि । द्वाभ्यामप्यनन्यत् सहिताभ्याम् । एत एव सर्व इत्यनया दिशा अभ्यूह्याः स्वपरधर्माः प्रसादादयश्च । इतरेतरसंयोगेन च भङ्गविकल्पाः सङ्कलनीयाः । एवमेव चैत एव दुःखमोहयोरपि । अन्येऽप्यचेतनत्व... ...शरीराद्यापत्तित्वादिप्रकृतिधर्मैः । इत्यतः कुतः सङ्कलना प्रत्येकद्वित्रिचतुरादिसंयोगधर्मानन्त्यात् ।

* * *

चलाप्रकाशात्मकत्वाद् दुःखादनन्य इति स एव लोष्टो दृष्टान्तो भावितसुखाद्येकात्मकत्वात् । एवं तावत् परधर्मेण । **एवं च स्थिते**ऽस्वधर्मेणापि लोष्टाद्यर्थानां सुखाद्येकात्मकत्वे स्थितेऽनन्यत्वे लघुत्वादिहेतवोऽपि साधका इति तद्दर्शयति--**सुखं दुःखादनन्यल्लघुत्वात्** *लोष्टवदिति वर्तते । एव**मप्रवृत्तिशीलत्वात् प्रकाशकत्वात्** । एतानि च चत्वारि साधनानि, प्रत्येकं त्रीणि तान्येव समुदितान्येकमिति । अत्र द्विकसंयोगेनापि त्रीणि--लघ्वप्रवृत्तिशीलत्वात्, लघुप्रकाशात्मकत्वात्, अप्रवृत्तिप्रकाशात्मकत्वादिति । **एवं मोहादपीति**, मोहात् सुखमनन्यत् इत्यत्रापि त एव हेतवस्तावन्तः । परधर्मेण सुखस्य दुःखधर्माभ्यां प्रत्येकं द्वे समुदायेनैकमिति त्रीणि--चलत्वादप्रकाशकत्वाच्चलाप्रकाशकत्वादिति । **प्रवृत्तिशीलत्वादि**त्यपि, तत्संयोगेनेतराभ्यामपि सप्त साधनानि । **एवं मोहादपी**ति मोहादनन्यच्चलत्वादित्यादिभ्यस्तेभ्य [एव] । एवं सुखं दुःखादनन्यद् **गुरुत्वादप्रकाशकत्वात् तत्संयोगाच्चे**ति मोहधर्मेभ्यस्त्रिभ्यः । **एवं मोहादपी**ति तेभ्य एव मोहधर्मेभ्यस्त्रिभ्यो मोहादप्यनन्यत् सुखमिति । **द्वाभ्यामप्यनन्यत् सहिताभ्या**मिति दुःखमोहाभ्यामनन्यत् सुखं लघुत्वादित्यादिभ्यस्तेभ्य एव हेतुभ्यो द्वित्रिचतुरादिसंयोगेन तत् प्रत्येकं चानुगन्तव्यमित्यत आह --**एत एव सर्व इत्यनया दिशाभ्यूह्याः**, न केवलमेत एव लघुत्वादयश्चलत्वादयो गुरुत्वादयो वा स्वपरधर्मा हेतवः, किं तर्हि - /ms
? **स्वपरधर्माः प्रसादादयश्च**, प्रसादलाघवादयः शोषतापभेदादयो वरणसद-

१ काश ] °शत्वात् प्र° ॥
४ क्ताः ] °क्तः
सुख°nayacakra-ms-bhā । °क्ता
सुख° nayacakra-ms-ya ॥
१३ न्य ] °न्यदिति प्र° ॥
१४ स्थि ] स्थिते
स्वध°nayacakra-ms-ya ॥
१६ * ]
लोष्टादिवदितिnayacakra-ms-ya ॥
२७ त ] तत्nayacakra-ms-ya
प्रतिषु नास्ति ॥

नापध्वंसनादयश्च । **इतरेतरेत्यादि**, द्वित्रिचतुरादिसंयोगेन च भङ्गविकल्पाः सङ्कलनीयाः । **एवमेव चैत एव दुःखमोहयोरपी**ति सुखात् परस्परतश्चानन्यत्वं योज्यं प्रतिज्ञानां च प्रत्येकं द्वित्रिसंयोगेन चेति सुखस्य दुःखाद् मोहाद् द्वाभ्यां चानन्यतया तिस्रः, एवं दुःखस्य तिस्रः, मोहस्य तिस्रः, त्रयाणां परस्परतोऽनन्यतयैकैवेति दश प्रतिज्ञाः । एतासु सुखधर्मा लघ्वादयः, दुःखधर्माश्चलादयः, मोहधर्मौ गुर्वप्रकाशौ, प्रत्येकं द्विकादिसंयोगेन सप्तत्यधिकं शतं साधनानाम् । लाघवगौरवे त्वपनीय प्रसादादिशोषादिवरणादीनां च हेत्वग्रं पञ्चषष्टिसहस्राणि पञ्च शतानि च षट्त्रिंशानि । किञ्चान्यत्, न केवलमेत एव हेतवः, **अन्येऽप्यचेतनत्वे**त्यादि समासदण्डकमध्ये यावच्छ-

312/mj **रीराद्यापत्तित्वादिप्रकृतिधर्मैः** सामान्यभूते

* * *

नन्वेवं स्ववचनविरोधादि, न, तवात्मन एवोपालम्भात्, प्रधान… …
…अभ्युपगमात् । हेतुविरुद्धतोक्तावप्येवमेव । इति स्फुटमेव सुखं सदा व्यक्तशब्दस्पर्शरूपरसगन्धमेवेत्यभ्युपगम्यतां तेभ्य एव लघ्वादिहेतुभ्यो वियदादिवत् । स्वमतेन तु व्यक्तशब्दस्पर्शरूपरसगन्धवत्प्रतिज्ञायां वियद्वर्ज्यान्युदाहरणानि ।

* * *

रविशेषितैश्च अपुरुषत्वे सति सत्त्वात् प्रमेयत्वात् सर्वगतत्वादकृतकत्वादित्यादि

- /ms वा यावत् किञ्चिदिहास्ति सर्वं तदनन्यत्वे त्रिलक्षणतां प्रतिपद्यते धर्मजातमित्यतः कुतः **सङ्कलना** ? न शक्यमेव सङ्कलयितुं **प्रत्येकद्वित्रिचतुरादिसंयोगधर्मानन्त्या**दिति स्वपक्षसाधनहेतुसौलभ्यं दर्शयति भावितत्रैगुण्यैकात्मकलोष्टादिवस्तुन्यायव्यापित्वादिति । § 929

इतर आह --**नन्वेवं स्ववचनविरोधादी**ति, सुखं दुःखादनन्यत् इति प्रत्यक्षं सुखदुःखयोः प्रतिपुरुषं स्वानुभवेन पृथक्त्वसिद्धेः शरीरविकारादिभिरनुमेयत्वाच्च लोकप्रसिद्धेरभ्युपगतत्वाच्च त्वयापि स्ववचनेन च सुखं दुःखम् इति

---

१ तुरादिसंयोगेन ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
७ सा ] लघुत्वात्, अप्रवृत्तिशीलत्वात्, प्रकाशकत्वात्, लघ्वप्रवृत्तिशीलत्वात्, लघ्वप्रकाशकत्वात्, अप्रवृत्तिप्रकाशात्मकत्वात्, लघ्वप्रवृत्तिप्रकाशात्मकत्वात् इति सप्तानां सुखधर्माणां चलत्वात्, अप्रकाशकत्वात्, प्रवृत्तिशीलत्वात्, चलाप्रकाशकत्वात्, चलप्रवृत्तिशीलत्वात्, अप्रकाशकप्रवृत्तिशीलत्वात्, चलाप्रकाशकप्रवृत्तिशीलत्वात् इति सप्तानां दुःखधर्माणां गुरुत्वात्, अप्रकाशकत्वात्, गुर्वप्रकाशकत्वात् इति मोहधर्माणां च त्रयाणां सङ्कलनया सप्तदशानां हेतूनां सुखं दुःखादनन्यत् इत्यादिभिर्दशभिः प्रतिज्ञाभिर्गुणने सप्तत्यधिकं शतं साधनानां लभ्यते ॥
८ ष ] सुखानां शब्दस्पर्शरसरूपगन्धानां प्रसादलाघवप्रसवाभिष्वङ्गोद्धर्षप्रीतयः कार्यम्, दुःखानां शोषतापभेदोपष्टम्भोद्वेगापद्वेषाः, मूढानां वरणसदनापध्वंसनबैभत्स्यदैन्यगौरवाणि । इति पूर्वं पृ॰ १२ पं॰ १८--२० व्यावर्णितेभ्योऽष्टादशभ्यो धर्मेभ्यो लाघवगौरवयोरपनयने कृतेऽवशिष्टानां षोडशानां धर्माणां प्रत्येकं द्विकादिसंयोगेन च इयं हेत्वग्रसङ्ख्या बोध्या ॥

पृथगुच्चारणात् स्ववचनाभ्युपगमलोकप्रसिद्धिप्रत्यक्षानुमानविरोधदोषा अनन्यत्वप्रतिज्ञाया इति । एतच्चायुक्तम्, **तवात्मन एवोपालम्भात्,** यस्मादेव पुनः स्वसिद्धान्त एव स्ववचनादिविरोध उन्नीयते त्वया आत्मन एव, न मम, मामुद्दिश्यात्मनोऽपरिहारेण वचनवक्रतयोच्यते । कुत इति चेत्, उच्यते --**प्रधाने**त्यादि याव**दभ्युपगमात्** । प्रधानमेकं सुखदुःखमोहात्मकत्वादभिन्नगुणात्मकं साम्येन चावस्थितमिति कस्यायं स्ववचनविरोधः ? तथा परस्परमुपकुर्वन्ति सत्त्वादयः शब्दादिभावेन च व्यवतिष्ठन्ते प्रत्येकं सुखाद्यात्मनेति सुखादित्र्यात्मकत्वं न घटादावेकस्मिन्नेव चेति त्वयैवाभ्युपगतत्वादैक्यं नान्यत्वोक्तेश्चेति कस्य स्ववचनादिविरोधदोषाः ? इति स्वस्थेन चेतसा चिन्त्यताम्, मम तु त्वद्दोषोद्भावनपरप्रयासत्वाददोषः, एवमस्मद्दोषोत्कीर्तनद्वारेण स्वदोषोत्कीर्तनमेवैतद् भवत इति । § 930

किञ्चान्यत्, **हेतुविरुद्धतोक्तावप्येवमेव,** यथोक्तमेते हेतवः सप्रपञ्चाः सविशेषणनिर्विशेषणाः प्रतिज्ञादोषोद्भावनद्वारेण विरुद्धाव्यभिचार्युद्भावनद्वारेण - /ms चैतेऽस्मत्पक्षस्यानन्यत्वस्य साधका इति तथा हेतुविरुद्धताप्यन्यत्वपक्षे प्राग्व्याख्यातसमन्वयव्यावृत्त्यभावविधिना अनन्यत्वपक्ष एव दर्शनादिति । § 931

तदुपसंहारार्थमाह --**इति स्फुटमेवे**त्यादि यावद् **वियदादिव**दिति, **इति**शब्दोपसंहारार्थत्वात् । यदभिलष्यते त्वया प्रधानं नाम गुणसाम्यावस्थानं किञ्चिदस्तीति तन्नाभिलषणीयम् । **सुखं सदा व्यक्तशब्दस्पर्शरूपरसगन्धमेवेत्यभ्युपगम्यतां** स्फुटमेव, किमन्यापदेशेन परदोषाभिधानेन वा ? तत्त्ववादिनैव भवितव्यमृजुना । **तेभ्य एव लघ्वादिभ्यो हेतुभ्यो वियदादिवत्,** यथा आकाशवाय्वग्न्यब्भुवः पञ्च महाभूतानि व्यक्तशब्दादिभावानि तथा सुखमिति लघ्वादिभ्य एव हेतुभ्यः पृथिव्यामिव शब्दादयः पञ्चापि शेषेष्वपि चतुर्षु भूतेषु व्यक्ता इत्यभ्युपगम्यताम् । परिणतिविशेषात्तु हिङ्गुगन्धवत् सूपे लवणरसवच्चाप्सु कस्यचिदेव प्रत्यक्षता शब्दादेर्न शेषस्याभिभवादिभिरिति । परमतेनैवैतदुक्तम् । **स्वमतेन तु व्यक्तशब्दस्पर्शरूपरसगन्धवत्प्रतिज्ञायां वियद्वर्जान्युदाहरणानी**ति, **स्पर्शरसगन्धवर्णवन्तः पुद्गलाः** 313/mj

* * *

२ त] तदात्मनnayacakra-ms-bhānayacakra-ms-vi ॥
२ एवोपा] °पल° प्र° ॥
३ ना] °दितिविरोध प्र° ॥
३ न] न मन मोमुद्दिश्य प्र° ॥
४ नो] °त्मनोपरि°nayacakra-ms-pānayacakra-ms-ramnayacakra-ms-hī । °त्मने परि° nayacakra-ms-vi । °त्मनपरि° nayacakra-ms-ḍe nayacakra-ms-līṃ । °त्मपरि° nayacakra-ms-bhā ॥
५ त्वा] °त्वादिभिन्न°nayacakra-ms-bhā ॥
१८ य] यद्यभि° प्र° ॥
२० ग] °गन्धं वेnayacakra-ms-bhā । °गन्धवे° nayacakra-ms-ya ॥
२० न्या] °न्यापादनेनnayacakra-ms-ya ॥
२८ हेतु] दृश्यतां पृ° २३२-- १ ॥

त्रयविषयसमन्वय… … …वीतानां व्यवहारसम्प्रसिद्ध… … …हेतुत्वावधारणार्थानां चावीतानामतथार्थत्वात् समस्ततन्त्वार्थविघटनमेव ।

* * *

तत्त्वार्थ॰ ५ । २३ इति सामान्येन **अणवः स्कन्धाश्च** तत्त्वार्थ॰ ५ । २५ मूर्तत्वात् पृथिवीवद् वाय्वादयोऽपि । शब्दबन्धसौक्ष्म्यस्थौल्यादयस्तु स्कन्धेष्वेव पुद्गलेष्विति । आकाशस्यावगाहोपकारस्य नैते धर्माः सन्तीति वादपरमेश्वरमतम्, अतो **वियद्वर्ज्यान्युदाहरणानि** इत्युक्तम् । § 932

इत्थं सुखदुःखमोहानां जात्यन्तरत्वासिद्धिरापादिता । तस्मादेव च वीतावीतानां सुखादित्रैगुण्यकारणपूर्वकत्वानुमानस्यानुमानाभासतेत्यत आह -**-त्रयविषयसमन्वये**त्यादि यावद् **वीतानाम्, व्यवहारसम्प्रसिद्धे**त्यादि यावच्च **हेतुत्वावधारणार्थानां चावीतानामतथार्थत्वा**दिति । तेषां वीतावीतानां लक्षणं तद्यथा— प्रागनुमानं सप्रभेदं व्याख्याय तेषां यदेतत् सामान्यतो दृष्टं शेषवदेष हेतुरतीन्द्रियाणां भावानां समधिगमे, तस्य प्रयोगोपचारविशेषाद्

---

४ श ] **शब्दसम्बद्ध॰** प्र॰ । रूपरसगन्धवर्णवन्तः पुद्गलाः । ५ । २३ । शब्द**बन्ध**सौक्ष्म्यस्थौल्यभेदतमश्छायातपोद्योतवन्तश्च । ५ । २४ । अणवः स्कन्धाश्च । ५ । २५ । इति **तत्त्वार्थसूत्रे** ॥

४ य ] **॰यवस्तु** प्र॰ ॥

५ गाहोप ] गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः । ५ । १७ । आकाशस्यावगाहः । ५ । १८ । इति तत्त्वार्थसूत्रे ॥

७ स्मा ] **॰देव व वीता॰** प्र॰ ॥

१० चा ] दृश्यतां पृ॰ २३२-- १ ॥

११ प्रा ] प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् । तल्लिङ्गलिङ्गिपूर्वकमाप्त श्रुतिराप्तवचनं तु ॥ ५ ॥ सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात्… …॥ ६ ॥**साङ्ख्यका॰** ॥

१२ त ] तस्मात् सिद्धं सामान्यतो दृष्टादतीन्द्रियाणामर्थानां समधिगमः । तस्य प्रयोगमात्रभेदाद् द्वैविध्यम्--वीतः अवीत इति । तयोर्लक्षणमामनन्ति— यदा हेतुः स्वरूपेण साध्यसिद्धौ प्रयुज्यते । स वीतोऽर्थान्तरक्षेपादितरः परिशेषितः ॥ १ ॥ स्वरूपं हि साधनस्य द्विविधम्--साधारणमसाधारणं च । तत्र साधारणं साध्यसहभावि…। असाधारणं पुनः परिमाणमन्वयः सङ्घातपरार्थत्वमित्यादि । तत्र यदा हेतुः परपक्षम[न]पेक्ष्य यथार्थेन स्वरूपेण साध्यसिद्धावपदिश्यते तदा वीताख्यो भवति । यदा तु स्वसाध्यादर्थान्तरभूतानां प्रासङ्गिकाणां क्षेपमपोहं कृत्वा परिशेषतः साध्यसिद्धावपदिश्यते तदाऽवीताख्यो भवति । तद्यथा--न चेत् परमाणुपुरुषेश्वरकर्मदैवकालस्वभावयदृच्छाभ्यो जगदुत्पत्तिः सम्भवति परिशेषतः प्रधानादिति तदा पुनरवीताख्यो भवति । तत्र यदा वीतो हेतुः… …वाक्यभावमुपनीयते…तदा अवयविवाक्यं परिकल्प्यते । तस्य पुनरवयवाः— … …साध्यावधारणं प्रतिज्ञा । साधनसमासवचनं हेतुः । साध्यतेऽनेनेति साधनं लिङ्गम्, समासः संक्षेपः, साधनस्य समासवचनं साधनसमासवचनम् । साधनग्रहणं तदाभासप्रतिषेधार्थम्, न हि तानि साधनं संशयविपर्ययहेतुत्वात् । समासग्रहणमवयवान्तरावकाशप्रदानार्थम् । लिङ्गनिर्देशमात्रं हेतुः । यस्तु तस्य साध्यसहभावित्वलक्षणः प्रपञ्चः सोऽवयवान्तराणीत्युक्तं भवति । उदाहरणं **त्वत्र** नितन्नि ?**दर्शनं** दृष्टान्तः, तस्य साधनस्य साध्येन सहभावित्वनिदर्शनं दृष्टान्तः, तद्यथा— संहत्यकारिणां परार्थत्वं दृष्टं यथा शयनासनरथचरणानाम् ।…साध्यदृष्टान्तयोरेकक्रिया उपसंहारः उपनयः, साध्यस्य चक्षुरादिपारार्थ्यलक्षणस्य दृष्टान्तस्य च शयनादेरेकक्रिया उपसंहारः । तत्रार्थान्तरभूतत्वात् साध्यदृष्टान्तयोरञ्जसा नैकक्रिया उपपद्यते, तेनैव तस्यानिदर्शनादित्यतो धर्मसामान्याद् यथेदं

द्वैविध्यम्, वीत इति सामान्येन, विशेषेण तु स्वरूपाद् वीतसिद्धिः, यदा हेतुः परपक्षमव्यपेक्ष्य स्वेनैव रूपेण कार्यसिद्धावपदिश्यते तदा वीताख्यो भवति । परिशेषादावीतसिद्धिः, यदा नेदमतोऽन्यथा सम्भवति अस्ति चेदम् तस्मात् परिशेषतो हेतुरेवायम् इत्यवधार्य कार्यसिद्धावपदिश्यते तदा आवीताख्यो भवतीति प्रयोगलक्षणम्, स्वलक्षणं त्वस्य परपक्षप्रतिषेधेन स्वपक्षपरिग्रह-क्रिया आवीत इति । वीतस्य [आवीतस्य] वा भावः पञ्चप्रदेशः--प्रतिज्ञा हेतुः दृष्टान्त उपसंहारो निगमनमिति । तत्र साध्यावधारणं प्रतिज्ञा, साध-नसमासवचनं हेतुः, तन्निदर्शनं दृष्टान्तः, साध्यदृष्टान्तयोरेकक्रियोपसंहारः, प्रतिज्ञाभ्यासो निगमनमिति । पुरस्ताद् वीतस्य प्रयोगं न्याय्यं मन्यन्ते प-श्चादावीतस्येति । § 933 314/mj, - /ms

प्रयोगश्च--अस्ति प्रधानं भेदानामन्वयदर्शनात्, आध्यात्मिकानां भेदा-नां कार्यकारणात्मकानामेकजातिसमन्वयो दृष्ट इति चन्दनशकलादिदृष्टान्तं वक्ष्यति । सामान्यपूर्वकाणां च भेदानामित्यादि एकजातिसमन्वयप्रदर्श-नार्थसुखादित्रिगुणैकजातिसमन्वयं कार्यात्मकानां तत्सन्निवेशविशेषत्वं प-

---

तथेदमित्येकक्रिया उपचर्यते । यथा शयनादयः संहतत्वात् परार्था एवं चक्षुरादिभिरपि परार्थैर्भवितव्यम् । योऽसौ परः स पुरुषः । तद्वशात् प्रतिज्ञाभ्यासो निगमनम् । हेतुदृष्टान्तोपसंहारापेक्षया पुनरभ्यासस्तन्निगमनम्, तद्यथा--तस्मादस्ति पुरुषः । इत्येषामवयवानां विशिष्टार्थसमुदायो वाक्यमित्यतिदिश्यते ।... ... वीतः, तस्य पुरस्तात् प्रयोगं न्याय्यमाचार्या मन्यन्ते । किं कारणम् ? अवीतलक्षणाविरोधात्, अवीतस्य हि लक्षणं परिशेषतः साध्यानुग्रहः । तत्रान्वयादिना स्वरूपेणानधिगते प्रधानलक्षणे धर्मिणि परपक्षप्रतिषेधमात्रेण उपसंहारे क्रियमाणे परिशेषलक्षणं बाध्यते । कस्मात् ? इह प्रतिषेधमात्रमादावुच्यते, तेन यथा हेतुविरोधात् परमाण्वादिभ्यो न व्यक्तमुत्पद्यते तथा हेत्वभावात् प्रधानादपि नोत्पद्यते इति शक्यं कल्पयितुम्, अतस्तद्व्यवच्छेदोऽपि चावीताद् गम्यते, तथा सति कः परिशेषः स्यात् ? स्वरूपेण तु परिच्छिन्ने धर्मिणि उपसंहारो यथावदवकल्पते--न चेत् परमाण्वादिभ्य उत्पद्यते परिशेषतः प्रधानादेव व्यक्तमुत्पद्यते । परिशेष इति यथोक्तेभ्योऽन्वयादिभ्य इत्युक्तं भवति । तस्मात् प्राग् वीतप्रयोगः । इति सिद्धं सामान्यतो दृष्टादनुमानादतीन्द्रियाणामर्थानां समधिगम इति । इति **साङ्ख्य**कारिकाया युक्तिदीपिकावृत्तौ, का० ६ ॥

२ व्य] ०**व्यपेक्षश्चेन्नैव रूपेण** प्र० ॥

३ रिशेषादा] यद्यपि प्रायः सर्वत्र **साङ्ख्या**दिदर्शनग्रन्थेषु **अवीत**शब्दस्यैव प्रयोगो दृश्यते **नय**चक्रवृत्तौ तु सर्वत्रापि **आवीत**शब्दप्रयोग एवोपलभ्यते तथापि **आवीत**शब्दप्रयोगः शुद्ध एव प्रतीयते **कु**मारिलभट्टविरचिते **मीमांसाश्लोक**वार्तिकेऽपि **आवीत**शब्दस्यैव प्रयोगात्, तद्यथा--ततोऽप्यावीतहेतुभिरनैकान्तिक इति अक्षरचतुष्टयाधिकेनार्धश्लोकेनाह --**पक्षीकुर्याद् यदा सर्वांस्तदाप्यावीतहेतुभिः । अनैकान्तः** इति । ये हि विपक्षव्यतिरेकेणैवार्थं प्रतिपादयन्ति तेऽत्रावीतहेतवोऽभिधीयन्ते, यथा प्राणादयो निरात्मकेभ्यो घटादिभ्यो निवृत्ता जीवच्छरीरे दृश्यमानास्तद्व्यवच्छेदेनैव सात्मकत्वमवगमयन्तीत्यर्थः । इति **मीमांसाश्लोक**वार्तिकस्य जयमिश्रभट्टविरचितायां **शर्करिका**वृत्तौ अपोहवादे, का० १६६ ॥

**११** आ] आध्यात्मिकानां भेदानां कार्यकारणात्मकानां चैकजातिसमन्वयो दृष्ट इत्येवमादिः साधनप्रपञ्चः । इति **साङ्ख्य**कारिकाया **युक्तिदीपिका**वृत्तौ, का० ६, पृ० ४९ पं० ११ ॥

**१४** का] दृश्यतां पृ० १२ पं० १७ ॥

क्षीकृत्य **एककार्यत्वात्** इति हेतुमाह तथोत्तरत्रोपसंहारात् । **पञ्चानां पञ्चाना**मित्यादिवीप्सया व्याप्तिं दर्शयति । तथा करणात्मकानां नेयम् । प्रसादादिशोषादिवरणादिकार्यात्मकं दृष्टं गुणत्रयैकजातिसमन्वितम् । तैरारब्धान्याकाशादीनि भूतानि एकोत्तरगुणवृद्ध्या तत्कार्यत्वात् तत्समन्वयाच्च तत्पूर्वकाणि । तथा बाह्यानामपि तैर्यग्योनमानुषदैवानां तत्पूर्वकतेति । तस्मात् त्रैगुण्यसमन्वितत्वाद् भेदास्त्रिगुणपूर्वकाश्चन्दनशकलादिवत् । **शकलकपालामत्रभूषणप्रभृतीना**मिति व्याप्तिदर्शनार्थं साधनस्य दृष्टान्तबाहुल्यम् - /ms
। § 934

इतश्च अस्ति प्रधानं भेदानां परिमाणात् । आध्यात्मिकानां कार्यकारणात्मकानां परिमाणं दृष्टम् । सामान्यतस्त्रयः सुखदुःखमोहाः, कार्यकरणविशेषतः षोडश भावाः पञ्च भूतानि एकादशेन्द्रियाणि चेत्यादि रूपपरिमाणम् । प्रवृत्तिपरिमाणं द्विधा हिताहितप्राप्तिपरिहारार्थत्वात्, धर्मादिप्रयोजनत्वाच्चतुर्धा, धृतिसदाचार-कामसुख-कुतूहल-विनिवृत्तिप्रयोजनं पञ्चधा 315/mj

---

**६ काश्च]** भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य ॥ १५ ॥...किञ्चान्यत्, समन्वयात् । इह येन भेदानां समनुगतिस्तस्य सत्त्वं दृष्टम् । तद्यथा--मृदा घटादीनाम् । अस्ति चेयं सुखदुःखमोहैः शब्दादीनां समनुगतिः । तस्मात् तेऽपि सन्ति । ये च सुखादयोऽस्तमितविशेषास्तदव्यक्तम् । तस्मादस्त्यव्यक्तम् ।...इह शब्दस्पर्शरूपरसगन्धानां सन्निधाने स्वसंस्कारविशेषयोगात् सुखदुःखमोहाकाराः प्राणिनां बुद्धय उत्पद्यन्ते । यच्च यादृशीं बुद्धिमुत्पादयति तत् तेनान्वितम् । तद्यथा--चन्दनादिभिः शकलादयः ।**साङ्ख्यका° युक्तिदीपिका** । इतश्चास्ति समन्वयदर्शनात् । कस्य समन्वयात् ? भेदानामेव समन्वयात् । अस्मादेव कारणात् पूर्वकारणात् शकलकपालामत्रसुवर्णसमन्वयः । भूषणादीन् दृष्ट्वा तत्त्वेन दर्शयति । सामान्यप्रकरणाल्लोके भेदानामेकजातिसमन्वयो दृष्टः । तेषां धर्मार्मोऽ ?न्वयः, तस्मात् समन्वयदर्शनात् पश्यामोऽस्ति प्रधानम् । जे° साङ्ख्यका° वृ° B, का° १५, **माठरवृत्ता**वपि किञ्चित्पाठभेदेन एवमेव ॥

**१० क]** **°कारणं विशेषतः** प्र° । दृश्यतां पृ° २९८ टि° ३ ॥

**११ रू]** तत्र रूप-प्रवृत्ति-फललक्षणं व्यक्तम् । रूपं पुनर्महानहङ्कारः पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि । सामान्यतः प्रवृत्तिर्द्विविधा--हितकामप्रयोजना च अहितप्रतिषेधप्रयोजना च । विशेषतः पञ्च कर्मयोनयो धृत्याद्याः प्राणाद्याश्च पञ्च वायवः । फलं द्विविधं दृष्टमदृष्टं च । तत्र दृष्टं सिद्धितुष्ट्यशक्तिविपर्ययलक्षणम् । अदृष्टं ब्रह्मादौ स्तम्बपर्यन्ते संसारे कर्मप्रतिलम्भ इत्येतद् व्यक्तम् । इति **साङ्ख्यकारिकाया** वृत्तौ **युक्तिदीपिकायाम्**, का° २ ॥

**१३ धृ]** **साङ्ख्यग्रन्थेषु** प्राणादिवृत्तेर्हेतोर्निरूपणप्रसङ्गे धृत्यादीनां किञ्चिन्नामभेदेन इत्थं निरूपणमुपलभ्यते--प्राणाद्या वायवः पञ्च ।... प्राणाद्याः प्राणापानसमानोदानव्यानाः पञ्च ।...कुतः पुनरियं प्राणादिवृत्तिः प्रवर्तत इति ? उच्यते--सा कर्मयोनिभ्यः । महतः प्रच्युतं हि रजो विकृतमण्डस्थानीयाः पञ्च कर्मयोनयो भवन्ति--धृतिः श्रद्धा सुखा विविदिषा अविविदिषेति ।... ... तासां लक्षणविषयसतत्त्वगुणसमन्वया भवन्ति । तत्र लक्षणं तावत्--व्यवसायादप्रच्यवनं धृतिः । फलमनभिसन्धाय शास्त्रोक्तेषु कार्येषु अवश्यकर्तव्यताबीजभावः श्रद्धा । दृष्टानुश्रविकफलाभिलाषद्वारको हि बुद्धेराभोगः सुखा । वेत्तुमिच्छा विविदिषा । तन्निवृत्तिरविविदिषा ।...एतत् तावल्लक्षणसतत्त्वम् । आह च--वाचि कर्मणि

प्राणादिलक्षणाच्चेति प्रवृत्तिपरिमाणम् । फलपरिमाणं द्विविधम्--दृष्टमदृष्टं च । अदृष्टं कार्यकरणसामर्थ्यं प्रभुशक्तिः साधनसान्निध्यं विभुशक्तिश्चेति द्विधा । एवमशक्तिस्तद्विपरीता द्विधैव । शक्तिर्देव-गन्धर्व-यक्ष-रक्षः-पितृ-पिशाचाः, अशक्तिर्मानुष-पशु-मृग-पक्षिसरीसृप-स्थावराणि । शक्तेः प्रकृतिः शरीरनिमित्तम्, अशक्तेर्जराय्वण्डोद्भित्संशोकाः । मातापितृभ्यां जराय्वण्डं च, तत् षट्कोशिकम्, पृथिव्या उद्भिज्जम्, पृथिव्युदकसंशोकात् संशोकज-मित्यदृष्टफलपरिमाणम् । दृष्टफलपरिमाणं करणानि प्रवर्तमानानि क्रियान्ते सामान्यतश्चतुर्णां शक्त्यादीनामन्यतमं प्रत्ययं कुर्वन्ति । शक्ति रुक्ता । 316/mj

---

सङ्कल्पे प्रतिज्ञां यो ननु ? रक्षति । तन्निष्ठस्तत्प्रतिज्ञश्च धृतेरेतद्धि लक्षणम् ॥ १ ॥ अनसूया ब्रह्मचर्यं यजनं याजनं तपः । दानं प्रतिग्रहः शौचं श्रद्धाया लक्षणं स्मृतम् ॥ २ ॥ सुखार्थी यस्तु सेवेत विद्यां कर्म तपांसि वा । प्रायश्चित्तपरो नित्यं सुखायां स तु वर्तते ॥ ३ ॥ द्वित्वैकत्वपृथक्त्वं नित्यं चेतनमचेतनं सूक्ष्मम् । सत्कार्यमसत्कार्यं विविदिषन्तषितव्यं विविदिषायाः ॥ ४ ॥ विषपीतसुप्तमत्तवदविविदिषा ध्यानिनां सदा योनिः । कार्यकरणक्षयकरी प्राकृतिका गतिः समाख्याता ॥ ५ ॥ विषयसतत्त्वं पुनः सर्वविषयिणी धृतिः, आश्रमविषयिणी श्रद्धा, दृष्टानुश्रविकविषयिणी सुखा, व्यक्तविषयिणी विविदिषा, अव्यक्तविषयिणी अविविदिषा । गुणसमन्वयस्तु रजस्तमोबहुला धृतिः, सत्त्वरजोबहुला श्रद्धा, सत्त्वतमोबहुला सुखा, रजोबहुला विविदिषा, तमोबहुला अविविदिषेति । इति **साङ्ख्यकारिकाया** वृत्तौ **युक्तिदीपिकायाम्**, का० २९ ॥

१ णा] **°णाचेति** प्र० ॥

२ क] **°कारण°** प्र० ॥

४ पिशाचाः] अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥ ... ...अष्टविकल्पोऽष्टप्रकारोऽष्टभेद इत्यर्थः । तद्यथा--ब्रह्म-प्रजापती-न्द्र-पितृ-गन्धर्व-नाग-रक्षः-पिशाचाः । तैर्यग्योनश्च पञ्चधा भवति पशु-मृग-पक्षि-सरीसृप स्थावराः । मानुष्यश्चैकविधः जात्यन्तरानुपपत्तेः । इति **साङ्ख्यकारिकाया युक्तिदीपिकावृत्तौ** ॥

५ रा] सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।...॥ ३९ ॥ तत्र सूक्ष्मा नाम चेष्टाश्रितं प्राणाष्टकं संसरति । मातापितृजास्तु द्विविधाः--जरायुजा अण्डजाश्च । तेषां कोशोपहृताः कोशाः लोम-रुधिर-मांसा-ऽस्थि-स्नायु-शुक्रलक्षणाः । तत्र लोम-रुधिर-मांसानां मातृतः सम्भवः । अस्थि स्नायु-शुक्राणां पितृतः । तत्रैव अशितपीताभ्यां सह अष्टौ कोशानपरे व्याचक्षते । कथं पुनरेषां कोशत्वम् ? आवेष्टनसामर्थ्यात् । यथा कोशकारः कोशेनावेष्टितोऽस्वतन्त्रः एवं सूक्ष्मशरीरं सप्राणमेतैरावेष्टितमस्वतन्त्रं तत् तत् कर्मोपचिनोति । प्रभूतास्तु उद्भिज्जाः स्वेदजाश्च ।... ...मनुष्याणां तु जरायुजम् ।... ...तिर्यग्योनीनामपि चतुर्विधम्--जरायुजं गवादीनामण्डजं चैव पक्षिणाम् । तृणादेश्चोद्भिज्जं क्षुद्रजन्तूनां स्वेदजं स्मृतम् ॥ १ ॥ एवं त्रिविधा विशेषा व्याख्याताः ।--**साङ्ख्यका° युक्तिदीपिका** ॥

६ ष] अपि च शिष्टा वदन्ति--बहिःशरीरं षट्कोशिकमिति ।जे० साङ्ख्यका० वृ० B, का० ३९ । ग्रन्थान्तरेषु तु षाट्कौशिकपाठ उपलभ्यते ॥

६ उ] **उद्भिद्यं** प्र० ॥

८ श] एतच्च व्यक्तस्य रूपं प्रवृत्तिश्च परिकल्प्यते । फलमिदानीं वक्ष्यामः । आह--किं पुनस्तत् फलमिति । उच्यते--यः खलु **एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः** । तत् फलमिति वाक्यशेषः । एष इति वक्ष्यमाणस्य संमुखीकरणार्थमुच्यते । प्रत्ययसर्ग इति, प्रत्ययः पदार्थो लक्षणमिति पर्यायाः । प्रत्ययानां सर्गः प्रत्ययसर्गः n316/mj
पदार्थसर्गो लक्षणसर्ग इत्यर्थः । अथवा प्रत्ययो बुद्धिः निश्चयोऽध्यवसाय इति पर्यायाः, तस्य सर्गोऽयमतः प्रत्ययसर्गः प्रत्ययकार्यं प्रत्ययव्यापार इत्यर्थः । अथवा प्रत्ययपूर्वकः सर्गः प्रत्ययसर्गः बुद्धिपूर्वक इत्युक्तः ।... ...। स विपर्ययाख्यः, अशक्त्याख्यः, तुष्ट्याख्यः, सिद्ध्याख्यश्चेति । तत्राश्रेयसः श्रेयस्त्वेनाभिधानं विपर्ययः । वैकल्यादसामर्थ्यमशक्तिः । चिकीर्षितादूनेन निवृत्तिस्तुष्टिः । यथेष्टस्य साधनं सिद्धिः ।--**साङ्ख्यका° युक्तिदीपिका**, का० ४६ ॥

*सिद्धिरूहेन साधनं तारकम्, शब्देन सुतारम्, अध्ययनेन तारयन्तम्, वातादीन्याध्यात्मिकान्यभ्यतीत्य क्रियया तारक-सुतार-तारयन्तानामन्यतमेन - /ms प्रमोदम्, मानुषाद्याधिभौतिकात्ययेन तत्त्रयान्यतमेनैव प्रमुदितम्, शीताद्याधिदैविकात्ययेन तत्त्रयान्यतमेनैव मोदमानम्, यदा कुशलसंसृष्टव्यपाश्रयात् सन्देहातिक्रमात् तदन्यतमेन रम्यकम्, दौर्भाग्यातिक्रमेण सदाप्रमुदितमित्यष्टौ सिद्धयः । सन्निहितविषयसन्तोषाच्चिकीर्षितादर्थादूनस्य निवृत्तिरेकैव

१ *] आह--प्रागपदिष्टमष्टधा सिद्धिरिति, तदिदानीमभिधीयतामिति । उच्यते --**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ** । तत्रोहो नाम यदा प्रत्यक्षानुमानागमव्यतिरेकेणाभिप्रेतमर्थं विचारणाबलेनैव प्रतिपद्यते, सा आद्या सिद्धिः तारकमित्यपदिश्यते--तारयति संसारार्णवादिति तारकम् । यदा तु स्वयं प्रतिपत्तौ प्रतिहन्यमानो गुरूपदेशात् प्रतिपद्यते सा द्वितीया सिद्धिः सुतारमित्यपदिश्यते । कथम् ? सुखमनेनाद्यत्वेऽपि भवसङ्कटात् तरन्तीति । यदा त्वन्योपदेशादप्यसमर्थः प्रतिपत्तुमध्ययनेन साधयति सा तृतीया सिद्धिः तारयन्तमित्यपदिश्यते । तदेतत् तारणक्रियाया आश्रयत्वेऽपि अव्यावृत्तत्वाद् महाविषयत्वात् तारयन्तमित्यपदिश्यते । त एते त्रयः साधनोपायैराब्रह्मणः प्राणिनोऽभिप्रेतमर्थं प्राप्नुवन्ति ।... ...। एषां तु साधनोपायानां प्रत्यनीकप्रतिषेधाय दुःखविघातत्रयम् । दुःखानि त्रीणि आध्यात्मिकादीनि । तत्र चाध्यात्मिकानां वातादीनां सिद्धिप्रत्यनीकानामायुर्वेदक्रियानुष्ठानेन विघातं कृत्वा पूर्वेषां त्रयाणामन्यतमेन साधयति सा चतुर्थी सिद्धिः प्रमोदमित्यभिधीयते । कथम् ? निवृत्तरोगा हि प्राणिनः प्रमोदन्त इति कृत्वा । यदा त्वाधिभौतिकानां मानुषादिनिमित्तानां सिद्धिप्रत्यनीकानां सामादिना यतिधर्मानुगुणेन वोपायेन पूर्वेषां त्रयाणामन्यतमेन साधयति सा पञ्चमी सिद्धिः प्रमुदितमित्यभिधीयते । कथम् ? अनुद्विग्नो हि प्रमुदित इति कृत्वा । यदा तु शीतादीनि आधिदैविकानि द्वन्द्वानि सिद्धिप्रत्यनीकानि स्वधर्मानुरोधेन प्रतिहत्य पूर्वेषां त्रयाणामन्यतमेन साधयति सा षष्ठी सिद्धिर्मोदमानमित्यभिधीयते । कथम् ? द्वन्द्वानुपहता हि प्राणिनो मोदन्त इति कृत्वा । सुहृत्प्राप्तिः, यदा तु कुशलं संस्पृष्टं सन्मित्रमाश्रित्य सन्देहनिवृत्तिं लभते सा रम्यकमिति सप्तमी सिद्धिरपदिश्यते । रम्यो हि लोके सन्मित्रसम्पर्कः, तस्य संज्ञायां रम्यमेव रम्यकम् । दानम्--यदा तु दौर्भाग्यं दानेन अतीत्य पूर्वेषां त्रयाणामन्यतमेन साधयति सा अष्टमी सिद्धिः सदाप्रमुदितमित्यभिधीयते । सुभगो हि सदा प्रमुदितो भवति, तस्माद् दौर्भाग्यनिवृत्तिः सदाप्रमुदितम् । इत्येवमेताः सिद्धयोऽष्टौ व्याख्याताः । एतासां संश्रयेणाभिप्रेतमर्थं यतः संसाधयन्तीत्यतः पूर्वाचार्यागतं मार्गमारुरुक्षुस्तत्प्रवणः स्यादिति ।**साङ्ख्यका॰ युक्तिदीपिका**, का॰ ५१ ॥

४ शीताद्या] **॰द्याधिभौतिकात्ययेन** प्र॰ । दुःखम्..., आध्यात्मिकं द्विविधं शारीरं मानसञ्च । शारीरं तावद् वातपित्तश्लेष्मणां वैषम्यनिमित्तम् । तथा मानसं कामक्रोधलोभमोहविषादभयेर्ष्याऽरत्यविशेषदर्शननिमित्तम् । आधिभौतिकञ्च मनुष्यपशुमृगपक्षिसरीसृपस्थावरनिमित्तम् । आधिदैविकं शीतोष्णवातवर्षाशन्यवश्यायावेशनिमित्तम् । **साङ्ख्यका॰ युक्तिदीपिका**, का॰ १ ॥

४ य] **यादाकुश॰** प्र॰ ॥

६ स] तुष्टिस्तु सन्निहितविषयसन्तोषाच्चिकीर्षितादर्थादूनेन निवृत्तिः सामान्यत एकैव, प्रत्यर्थमनन्ता--शतेन तुष्टः सहस्रेणेति । शास्त्रे तु बाह्याध्यात्मिकानां सुखदुःखमोहानां प्राप्तिष्वपगमेषु वा व्यवस्थालक्षणा उपायनवत्वात् नव तुष्टयो भवन्ति । तासाम् --**आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः** । आध्यात्मिका इति शरीरशरीरिणोर्विशेषमुपलिप्समानेन योगिना यदानात्मनि आत्मबुद्धिरवस्थाप्यते सा खलु आध्यात्मिका सिद्धिः तुष्टिः सन्तोषः क्षेम

तुष्टिरुपायनवत्त्वाद् नवविधा तुष्टिः । प्रकृत्युपादानकालभाग्यकारणपूर्वक पुरुषान्यत्वापरिज्ञानाद् माध्यस्थ्यलाभोऽम्भःसलिलौघवृष्ट्याख्याः शरीरश- 317/mj
रीरिविशेषणोपायाश्चतस्र आध्यात्मिकास्तुष्टयः । बाह्याश्च विषयनिर्वेदजाः पञ्च

---

इत्यर्थः ।साङ्ख्यका॰ युक्तिदीपिका, का॰ ५० । आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः । बाह्यह्या ? विषयोपरमाश्चच ? पञ्च नव तुष्टयोऽभिमताः ॥ ५० ॥ अध्यात्मानं ज्ञापयन्ति इत्याध्यात्मिकाः, प्रकृत्याख्या उपादानाख्या कालाख्या भाग्याख्या चेति चतस्रस्तुष्टय आध्यात्मिकाः । यथा कश्चित् प्रकृतिमात्रं वेत्ति, न जानीते नित्या वा अनित्या वा चेतना वा अचेतना वा सगुणा वा अगुणा वा सर्वगता वा असर्वगता वेति । एतान् धर्मान्न वेत्ति, केवलमस्तित्वमात्रेण तुष्टः प्रव्रजितः, तस्य नास्ति मोक्ष एषा प्रकृत्याख्या तुष्टिः । उपादानाख्या यथा कश्चित् त्रिदण्डकुण्डकमण्डलुकृष्णाजिनाक्ष-सूत्रादीनामुपादानं कृत्वा प्रब्रवीति मम मोक्षो भविष्यतीति, एवं तुष्टो ज्ञानागमं न करोति तस्य नास्ति मोक्ष इत्येषा उपादानाख्या द्वितीया तुष्टिः । कालाख्या यथा--कश्चिदनभिगततत्त्वज्ञो ब्रवीति कालेन मोक्षो भविष्यतीति ज्ञानागमं न करोति, किं ज्ञानेन ? इति, एवं सन्तुष्टस्य नास्ति मोक्ष इत्येषा कालाख्या तृतीया तुष्टिः । भाग्याख्या यथा--कश्चिदनभिगततत्त्वज्ञो ब्रवीति भाग्येन मोक्षो भविष्यतीति ज्ञानागमं न करोति, किं ज्ञानेन ? इति सन्तुष्टस्य मोक्षो नास्तीति एषा भाग्याख्या चतुर्थी तुष्टिः । एवमेता आध्यात्मिकाश्चतस्रस्तुष्टयो भवन्ति । --जे॰ साङ्ख्यका॰ वृ॰ B । साङ्ख्यका॰ युक्तिदीपिकायां तु आध्यात्मिकतुष्टयोऽन्यथा व्याख्याताः ॥

२ लाभोऽम्भः] आद्या तुष्टिरम्भ इत्यभिधीयते । कस्मात् ? अमितं हि प्रधानतत्त्वं भाति जगद्बीजभूतत्वात् ।... ...द्वितीया तुष्टिः सलिलमित्यभिधीयते । कथं पुनरेतत् सलिलम् ? सति उपादाने विकारो लीयत इति ।... ...तृतीया तुष्टिः ओघः इत्यभिधीयते । कथं पुनरयं काल ओघ इत्युच्यते ? सलिलौघवत् सर्वाभ्यावहनात् ।... ...चतुर्थी तुष्टिर्वृष्टिरित्यभिधीयते । कथं पुनर्वृष्टिरित्युच्यते ? सर्वसत्त्वाप्यायनात् । यथा हि शीर्णानामपि तृणलतादीनां वृष्टिं प्राप्य पुनराप्यायनं भवति एवमेव सर्वेषां प्राणिनां भाग्यविपरिणामात् पुनराप्यायनं भवति । तस्माद् वृष्टिसाम्याद् भाग्याख्या तुष्टिर्वृष्टिरित्यभिधीयते ।--साङ्ख्यका॰ युक्तिदीपिका, का॰ ५० ॥

३ बा] बाह्या[स्तु पञ्च] तुष्टयो भवन्ति । ताश्च व्याख्यास्यन्ते । बाह्यविषयोपरमाश्च पञ्च । n317/mj
ताश्चेमाः--अर्जनरक्षणक्षयातृप्तिहिंसादोषाः । तत्रार्जनं नाम शब्दस्पर्शरूपरसगन्धान् विषयान् निमित्तं कृत्वा कृषिपशुपालनवाणिज्यादिषु प्रवर्तते, तत्र विषयोपार्जने क्लेशप्रयासादि दुःखं मत्वा विषयेभ्य उपरमति, उपरतश्च तुष्टिं लभते, एषा पञ्चमी तुष्टिः । रक्षणदुःखं यथा अर्जितानां धनधान्यानां राजचौरादिभ्यो यद् रक्षणं तदपि दुःखं कर्तुमित्युपरतश्च तुष्टिं लभते, एषा षष्ठी तुष्टिः । क्षयदुःखं यथा अर्जितानां रक्षणे कृतेऽप्युपभुज्यमानाः क्षीयन्त इति मत्वा उपरतश्च तुष्टिं लभत इत्येषा सप्तमी तुष्टिः । यथार्जितरक्षणक्षयादीनां प्रतीकारेऽपि कृते इन्द्रियाणां वैतृष्ण्यं नास्तीति सञ्चिन्त्य विषयेभ्यो विरमति उपरतश्च तुष्टिं लभते, एषा अष्टमी तुष्टिः । अर्जनरक्षणक्षयातृप्तीनां प्रतीकारेऽपि कृते अर्जनादिवृत्तेन हिंसामन्तरेण भूतोपरोधं विना न शक्यन्ते विषया उपार्जयितुमतो विषयेभ्य उपरतश्च तुष्टिं लभते, एषा नवमी तुष्टिः । एवमेताभिस्तुष्टिभिरज्ञानाद् मोक्षो नास्तीति केवलेन वैराग्येण तुष्टिः । एवमेता आध्यात्मिकाश्चतस्रो बाह्याः पञ्च नव तुष्टयो व्याख्याताः । आसां तुष्टीनां नवानामिह संज्ञा भवन्ति--अम्भः सलिलम् ओघो वृष्टिः सुतारं सुपारं सुनेत्रं मरीचिकम् उत्तमाम्भसिकमिति ।जे॰ साङ्ख्यका॰ वृ॰ B, का॰ ५० ॥

विषयेष्वर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनात् सुतारसुपारसुनेत्र[सु]मारीचोत्त-
माभयाख्या इति नव तुष्टयः । एकादशेन्द्रियवधाः बधिरान्धाघ्रमूकज-
डोन्मादकुणिकुष्टिक्लीबोदावर्तपङ्गुताः । पूर्वोक्तेभ्यः सिद्ध्युपायेभ्यो विपरीत-
318/mj नामानोऽष्टावसिद्धयः । तथा तुष्टिविपरीतनामानोऽ नाम्भसिक्यादयो नव
अतुष्टय इत्यशक्तिरष्टाविंशतिविधा । अश्रेयःप्रवृत्त्यहङ्कारममकारक्रोधमरण-

---

१ क्ष] **°क्षयासङ्ग°** प्र° । शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसङ्गहिंसादर्शनात् ।...विषयोपभोगसङ्गे कृते नास्तीन्द्रियाणामुपशम इति सङ्गदोषः । इति **साङ्ख्यका°** गौडपादभाष्ये, का° ५० ॥

१ सु] **सुतारं सुपार सुनेत्रं मारीचोत्तमारूयाख्या** प्र° । सुखार्थं च प्रवृत्तस्य भूयिष्ठं दुःखमेवेत्येतस्माद् दर्शनाद् माध्यस्थ्यं लभते सा पञ्चमी तुष्टिः सुतारमित्यभिधीयते । कथं पुनः सुतारमित्युच्यते ? सुखमनेन उपायेन तरन्ति विषयसङ्कटमिति सुतारम् ।...षष्ठी तुष्टिः सुपारमित्यभिधीयते । कथं पुनः सुपारमित्युच्यते ? सुखमनेन पारं विषयार्णवस्य प्रयान्तीति ।...सप्तमी तुष्टिः सुनेत्रमित्युच्यते । कथं पुनः सुनेत्रमित्युच्यते ? सुखमनेन आत्मानं कैवल्यावस्थां नयन्तीति सुनेत्रम् ।...अष्टमी तुष्टिः सुमारीचमित्युच्यते । कथं सुमारीचमित्युच्यते ? अर्चतेः पूजार्थस्य शोभनमर्चितं विषयसङ्गनिवृत्तस्य योगिनोऽवस्थानं भवति ।...नवमी तुष्टिरुत्तमाभयमित्यपदिश्यते । कथम् ? उत्तमं हि प्राणिनां सर्वेभ्यो भयेभ्यो हिंसाभयमिति तदपगमात् उत्तमाभयमिति । **साङ्ख्यका° युक्तिदीपिका**, का° ५० ॥

२ ए] एकादशेन्द्रियवधा सह बुद्धिवधैरशक्तिरुद्दिष्टा । सप्तदश वधा बुद्धेर्विपर्ययात् तुष्टिशक्तीनाम् ॥ ४९ ॥...इन्द्रियाणां स्वविषयग्रहणासामर्थ्यं वध इव वधः ।**साङ्ख्यका° माठरवृ°** । इह लोके कश्चिद् देवदत्तो वैराग्येण गृहीतो यज्ञदत्तमाहूय प्रब्रवीति भो यज्ञदत्त दुःखितोऽस्मि, किं करवाणि ? इति । स तेनोक्तः --**साङ्ख्य**ज्ञानस्याधिगमं कुरु, त्वं दुःखान्तं यास्यसीति । एवं यज्ञदत्तेनोक्तो देवदत्तोऽब्रवीत्--नाहं शक्नोमि साङ्ख्यज्ञानस्याधिगमं कर्तुं यस्माद्
n318/mj बधिरोऽस्मि गुरोर्वचनं न श्रृणोमि, शुश्रूषायामसमर्थः कुतो ज्ञानस्याधिगमं करिष्यामीति ? एवमेवान्ध्यमूकत्वोन्मादादयः इन्द्रियोपघाता विषयाय ?ग्रहणे असमर्था बोध्याः । एवमेते एकादशेन्द्रियवधा अशक्तिरित्युच्यते । सह बुद्धिवधैरशक्तिरुद्दिष्टा । बुद्धेर्वधा बुद्धिवधाः, तैर्बुद्धिवधैः सहाशक्तिरुद्दिष्टा । अत्राह--के ते बुद्धिवधाः कियन्तश्चेति ? सप्तदश वधा बुद्धेविपर्ययात् तुष्टिसिद्धीनाम् । ते च सप्तदश वधाः तुष्टिसिद्धिषु व्याख्यायमानासु व्याख्यास्यन्ते । जे° साङ्ख्यका° वृ° B, का° ४९ । बाधिर्यमान्ध्यमघ्रत्वं मूकता जडता च या । उन्मादकौष्ठ्यकौण्यानि क्लैब्योदावर्तपङ्गुताः ॥ १ ॥ तत्र बाधिर्यं श्रोत्रस्य, आन्ध्यं चक्षुषः, अघ्रत्वं नासिकायाः, मूकता वाचः, जडता रसनस्य, उन्मादो मनसः, कौष्ठ्यं त्वचः, कौण्यं पाणेः, क्लैब्यमुपस्थस्य, उदावर्तः पायोः, पङ्गुता पादयोः, इत्येवमिन्द्रियवधा एकादश । **साङ्ख्यका° युक्तिदीपिका**, का° ४९ ॥

५ श] अशक्तिश्च करणवैकल्यादष्टाविंशतिभेदा भवति इत्यनुवर्तते । तत्र बाह्यकरणवैकल्यं सह मनसा एकादशप्रकारम्, सप्तदशविधं बुद्धिवैकल्यम्, एतेऽशक्तिभेदाः ।**साङ्ख्यका° युक्तिदीपिका**, का° ४७ ॥

५ अ] पञ्च विपर्ययभेदा भवन्ति तमोमोहमहामोहतामिस्रान्धतामिस्रा इति । तत्र अश्रेयसि प्रवृत्तस्य प्रत्ययावरे श्रेयोभिमान आद्यो विपर्ययस्तम इत्यभिधीयते भौतिकेषु आकारेषु शिरःपाण्यादिषु आत्मग्रहो योऽयं व्यूढोरस्कः सितदशनस्ताम्राक्षः प्रलम्बबाहुः सोऽहमिति । तथा श्रवणस्पर्शनरसनघ्राणवचनादानविहरणोत्स-र्गानन्दसङ्कल्पाभिमानाध्यवसायलक्षणासु करणवृत्तिषु अहं श्रोता द्रष्टा चेत्येवमादिराद्यकालप्रवृत्तो ग्रहः

विषादास्तमोमोहमहामोहतामिस्रान्धतामिस्राः पञ्च विपर्यया इत्येतद् दृष्ट-फलपरिमाणम् । इत्थं रूप-प्रवृत्तिफलपरिमाणमाध्यात्मिकानां कार्यकारणात्मकानां भेदानां निर्दिष्टम्, अनेन तैर्यग्योनमानुषदैवेष्वपि सप्रपञ्चेषु ज्ञेयम् । तस्मात् परिमितत्वात् संसर्गपूर्वका भेदाः, व्रीहाविव संसृष्टा मूलाङ्कुर-पर्णनालकाण्डप्रसवतुषशूकपुष्पक्षीरतण्डुलकणभावाः यथा वा शुक्रशोणित-संसृष्टाः कललार्बुदमांसपेशिशरीरव्यूहबाल्यकौमारयौवनस्थाविरा भावा इति ।

§ 935

इतश्च अस्ति प्रधानं भेदानां कार्यकारणभावात् । शब्दाद्यात्मना व्यव-तिष्ठमानानि सत्त्वरजस्तमांसि प्रकाशप्रवृत्तिनियमैः परस्परार्थं कुर्वन्ति । सत्त्वं - /ms
शब्दाद्यात्मना व्यवतिष्ठमानं तद्भावायेतरयोः प्रवृत्तिं ख्यापयति, एवं रजः प्रवर्तयति, तमो नियमयति । शब्दाद्यारब्धानि पृथिव्यादीनि आरम्भोत्क्र-मेण धृतिसङ्ग्रहपक्तिव्यूहावकाशदानैः परस्परार्थं कुर्वन्ति । इन्द्रियाण्य- 319/mj

---

पूर्वस्मादवरो मोह इत्युच्यते ।...बाह्ये तु विषये ममेदमित्यभिनिवेशः पूर्वस्मादवरः [महामोहः] इत्युच्यते ।...क्रोधश्चतुर्थो विपर्ययः पूर्वस्मादवरः तामिस्र इत्यभिधीयते ।...मरणविषादः पञ्चमो विपर्यय पूर्वस्मादवरः अन्धतामिस्र इत्यभिधीयते ।**साङ्ख्यका॰ युक्तिदीपिका**, का॰ ४७ ॥

१ ता] **॰तामिश्रान्धतामिश्राः** प्र॰ ॥

४ त्वात्] संसर्गपूर्वकत्वे हि संसर्गस्य एकस्मिन्नद्वयेऽसम्भवात् नानात्वैकार्थसमवेतस्य नानाकारणानि कल्पनीयानि । तानि च सत्त्वरजस्तमांस्येवेति भावः ।--ब्रह्मसूत्रशाङ्करभाष्य**भामती** २ । २ । १ । तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात् संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसङ्गः, अनुमितत्वाविशेषात् ।--इति **ब्र**ह्मसूत्रशाङ्करभाष्ये २ । २ । १ ॥

४ मू] भेदानां परिमाणात् । यत् परिमितं तस्य सत उत्पत्तिर्दृष्टा तद्यथा--मूलाङ्कुरपर्ण-नालदण्डबुषतुषशूकपुष्पक्षीरतण्डुलकणानाम् । परिमिता महदहङ्कारेन्द्रियतन्मात्रमहाभूतलक्षणभेदाः, तस्मात् कारणपूर्वकाः । यदेषां कारणं तदव्यक्तम् ।**साङ्ख्यका॰ युक्तिदीपिका**, का॰ १५ ॥

५ शु] किञ्चान्यत्, कार्याश्रयिणश्च कललाद्याः । यदा सूक्ष्मशरीरमुत्पत्तिकाले मातुरुदरं प्रविशति मातुः रुधिरं पितुः शुक्रं तस्य सूक्ष्मशरीरस्य उपचयं कुरुते, मातुः कललार्बुदघनमांसपेशीगर्भकौमारयौवन-स्थाविरादयोऽन्नपानरसनिमित्ता निष्पाद्यन्ते, तेन उच्यते--कार्याश्रयिणश्च कललाद्या इति ।जे॰ साङ्ख्यका॰ वृ॰ B, का॰ ४३ ॥

६ मांस] **॰पेसि॰** प्र॰ ॥

९ स] **सत्त्वं सत्वाना व्यव॰** प्र॰ ॥

११ आ] **आरंत्क्रमेण**nayacakra-ms-ya । पृ॰ २६० टि॰ १ मध्ये वर्णितं सृष्ट्यारम्भक्रमं परित्यज्य अत्र तु **पृथिव्या** आदौ उपादानात् **आरम्भोत्क्रमेण** इति पाठः सङ्गतः प्रतीयते । अत्र अस्वारस्ये तु आरम्भात् क्रमेण इति पाठः कल्पनीयः, क्रमेण धृतिसङ्ग्रहपक्तिव्यूहावकाशदानैः इति च योज्यम् ॥

१२ धृ] **वृत्तिस॰** प्र॰ । सहभावे तु तेषामुपकारो न प्रतिषिध्यते, तद्यथा पृथिव्यादीनां धृतिसङ्ग्रहपक्तिव्यूहावकाशदानैः । --**साङ्ख्यका॰ युक्तिदीपिका**, का॰ १५, पृ॰ ८० पं॰ २६ । पृथिव्येव पृथिवीधातुः धृत्यादिधर्मधारणात् । — **नयचक्रवृ॰**, पृ॰ २६७-- १ । पञ्च महाभूतानि कृतानि--आकाशमवकाशने, भूमिर्विहरणे, आपः पिण्डीकरणे शुद्धौ च, अग्निराहारपचने, वायुर्व्यूहने । जे॰ साङ्ख्यका॰ वृ॰ B, का॰ ३९ ॥

१२ प] आह--कः पुनर्व्यक्तस्य परस्परकार्यकारणभाव इति ।

प्यन्योन्यविषयग्रहणसाहायकेनोपकुर्वन्ति । यच्च यस्य विषयं प्रख्यापयति अर्जयति पाति संस्करोति उपधत्ते वा तत् कारणमितरत् कार्यम् । स्थानसाधनात्मप्रख्यात्युपभोगैः करणार्थं करोति कार्यम्, करणं वृद्धिक्षतभग्नसंरोहणसंशोकपरिपालनैः कार्यार्थं करोति । एवं बाह्याध्यात्मिकानां दैवमानुषतैर्यग्योनानां सप्रपञ्चानामन्योन्योपकारः रक्षा-सङ्ग्रह-सेवन-पूजन-पोषणस्थिति-शुश्रूषादिविकल्पा वर्णाश्रमादीनां योज्याः । एककर्तृका भेदाः, परस्परोपकारकोपकार्यत्वात्, शयनादिवत् । तस्मादस्ति प्रधानमिति । § 936

इतश्च अस्ति शक्तिमदवस्थामात्रत्वाच्छक्तीनाम् । कार्यकारणानामधिष्ठितानामनधिष्ठितानां च स्वकार्यसमर्थास्त्रिषु कालेषु शक्तयोऽवतिष्ठन्ते । तद्यथा--प्राक् प्रवृत्तेः शक्त्यवस्थानमनुमीयते प्रवृत्त्युपलब्धेः, प्रवृत्तिकालेऽव-

---

उच्यते--गुणानां तावत् सत्त्वरजस्तमसां प्रकाशप्रवृत्तिनियमलक्षणैर्धर्मैरितरेतरोपकारेण यथा प्रवृत्तिर्भवति तथा प्रीत्यप्रीतिविषादात्मकाः साङ्ख्यका° १२ इत्येतस्मिन् सूत्रे व्याख्यातम् । तथा शब्दादीनां पृथिव्यादिषु परस्परार्थमेकाधारत्वम् । श्रोत्रादीनामितरेतरार्जनरक्षणसंस्काराः । करणस्य कार्यात् स्थानसाधनप्रख्यापनादिकार्यस्य करणाद् वृद्धिक्षतभङ्गसंरोहणसंशोषणपरिपालनानि पृथिव्यादीनां धृतिसङ्ग्रहपक्तिव्यूहावकाशदानैर्गवादिभावो देवमानुषतिरश्चां यथर्तुविधानेज्यापोषणाभ्यवहारं संव्यवहारेतरेतराध्ययनं वर्णानां स्वधर्मप्रवृत्तिविषयभावः । अन्यच्च लोकाद् यथासम्भवं द्रष्टव्यम् । **साङ्ख्यका**° **युक्तिदीपिका**, का° १५ ॥

**३ क**] **कार**°nayacakra-ms-ya । दृश्यतां पृ° २९८ टि° ३ ॥

**३ वृ**] देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् प्रशस्त° भा° देहस्येति । वृद्धिरवयवोपचयः भग्नक्षतयोर्विघटितविश्लिष्टयोरस्थिचर्ममांसभागयोः संरोहणं पुनः सङ्घटनम् । इति **प्रशस्तपादभाष्यकिरणावल्याम्** आत्मनिरूपणे । दृश्यतां टि° २ ॥

**५ दैव**] तैर्यग्योनमानुषदैवतानि च परस्परार्थत्वात् । व्यासभा° । परस्परार्थत्वादिति । मनुष्यशरीरं हि पशुपक्षिमृगसरीसृपस्थावरोपयोगेन ध्रियते, एवं व्याघ्रादिशरीरमपि मनुष्यपशुमृगादिशरीरोपयोगेन, एवं पशुपक्षिमृगादिशरीरमपि स्थावराद्युपयोगेन, एवं दैवशरीरमपि मनुष्योपहृतच्छागमृगकपिञ्जलमांसाज्यपुरोडाशसहकारशाखाप्रस्तरादिभिरिज्यमानं तदुपयोगेन, एवं देवतापि वरदानवृष्ट्यादिभिर्मनुष्यादीनि धारयतीत्यस्ति परस्परार्थत्वमित्यर्थः । इति **पातञ्जलयोगदर्शनव्यासभाष्यस्य** वाचस्पतिमिश्रप्रणीतायां **तत्त्ववैशारद्यां** वृत्तौ २ । २८ ॥

**५ का**] काराः ? ॥

**५ सेव**] **°सेचनपूजनपोषण°**nayacakra-ms-bhā ॥

**६ शुश्रूषा**] **°षादेर्विकल्पा**nayacakra-ms-ya ॥

**६ र्णा**] **°श्रयाश्रम्या ?दीनां** प्र° । ब्राह्मणक्षत्रियवैश्यानां वर्णानां ब्रह्मचारि-गृहस्थ-वानप्रस्थ-यतीनामाश्रमिणां च कार्याणि वर्णितानि **वैशेषिकदर्शनप्रशस्तपादभाष्ये** द्रष्टव्यानि धर्मनिरूपणे । स्मृत्यादिष्वपि धर्मशास्त्रेषु तद्वर्णनमस्ति ॥

**९ च**] **चा**nayacakra-ms-bhā । अत्र **वा** इत्यपि पाठः स्यात् ॥

**१० त**] किञ्चान्यत्, शक्तितः प्रवृत्तेश्च । इह यावती काचिल्लोके प्रवृत्तिरुपलभ्यते सा सर्वा शक्तितः । तद्यथा— कुम्भकारस्य दण्डादिसाधनविन्यासलक्षणायाश्च शक्तेः सन्निधानाद् घटकरणे प्रवृत्तिः, अस्ति व्यक्तस्य चेयं कार्यत्वात् तद्भावेन प्रवृत्तिरिति । अतस्तस्यापि शक्त्या भवितव्यम् । यासौ शक्तिस्तदव्यक्तमिति । आह--प्राक् प्रवृत्तेः

स्थानमपवर्गदर्शनात्, प्रवृत्त्युत्तरकालावस्थानं प्रवृत्तिव्यतिरेकेणावस्थानदर्शनात् । एवमाद्यन्तवद् व्यक्तमुपलभ्य व्यक्तशक्त्यवस्थास्ति, अनवस्थितशक्तेराद्यवसानाभावात् खपुष्पवत्, अवस्थितशक्तेरेव तद्भावाद् मृदः पिण्डादिभाववत् । तस्माद् व्यक्तशक्तिप्रवृत्त्युपलब्धेरस्ति प्रधानमिति । § 937

320/mj

इतश्च अस्ति प्रधानम्, वैश्वरूप्यस्याविभागप्राप्तेर्देशकालप्रमाणबलरूपप्रत्यासत्तेरवश्यम्भाव्युच्छेदानुच्छेदाभ्यां च निवृत्तेः । जलभूम्योः पारिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टम्, तथा स्थावराणां जङ्गमेषु, जङ्गमानां स्थाव- - /ms

---

शक्त्यभावः प्रवृत्त्यनुपलब्धेः ।... ... ...अत्र ब्रूमः--न, अप्रसिद्धत्वात् ।...तस्मात् प्राक् प्रवृत्तेः शक्तिः । यत् पुनरेतदुक्तं तावदेव प्रध्वंस इति, अत्र ब्रूमः--न, कार्यनिष्ठादर्शनात् । यदि प्रवृत्तिसमकालमेव प्रध्वंसः स्यात् कार्यनिष्ठैव न स्यात्, तन्निमित्तत्वात् कार्यस्य । ... ...तस्मान्नास्ति शक्तीनां प्रवृत्तिकाले विनाशः । प्रवृत्त्युत्तरकालमपि नास्ति । कस्मात् ? पुनः प्रवृत्तिदर्शनात् ।... ... तस्मात् त्रिषु कालेषु शक्तयोऽवतिष्ठन्ते ।--**साङ्ख्यका॰ युक्तिदीपिका**, का॰ १५ ॥

५ अ] किञ्चान्यत्, अविभागाद् वैश्वरूप्यस्य । इह यद् विश्वरूपं तस्याविभागो दृष्टः, तद्यथा--सलिलादीनां जलभूमी, विश्वरूपाश्च महदादयः, तस्मादेषामप्यविभागेन भवितव्यम् । योऽसावविभागस्तदव्यक्तम् । तस्मादस्त्यव्यक्तम् । आह--किं पुनस्तद् वैश्वरूप्यं को वा विश्वरूप इति ? उच्यते--वैश्वरूप्यमिति विशिष्टमवस्थानमाचक्ष्महे अस्तमितविशेषत्वमविभाग इति । विशेषस्य सामान्यपूर्वकत्वादिति योऽर्थस्तदुक्तं भवति अविभागाद् वैश्वरूप्यस्येति ।**साङ्ख्यका॰ युक्तिदीपिका**, का॰ १५ ॥

६ म्भाव्यु] **॰व्युच्छेदाभ्यां** प्र॰ ॥

६ ज] दृश्यतां पृ॰ ११ पं॰ २७ । यथा जलभूम्योरप्येतद् रसादिवैश्वरूप्यं स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेष्विति । एवं जात्यनुच्छेदेन सर्वं सर्वात्मकमिति । तेन मन्यामहे--अस्ति प्रधानं यत्र महदादि लिङ्गमविभागं गच्छति, इत्येवमवश्यम्भावी अविभागः । यत्राविभागस्तत् प्रधानम् । तस्मादस्ति प्रधानम् । इति जे॰ साङ्ख्यका॰ वृत्तौ B, किञ्चिच्छब्दभेदेन **माठरवृत्तौ** च, का॰ १५ ॥ सर्वं सर्वात्मकमिति । यत्रो**थो** ?क्तम्--जलभूम्योः पारिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टम्, तथा स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेषु इति । एवं जात्यनुच्छेदेन सर्वं सर्वात्मकमिति । देशकालाकारनिमित्तापबन्धान्न खलु समानकालमात्मनामभिव्यक्तिः इति व्यासभा॰ । सर्वं सर्वात्मकमिति । यत्रोक्तमिति तदेवोपपादयति । जलभूम्योरिति । जलस्य हि रसरूपस्पर्शशब्दवतः भूमेश्च गन्धरसरूपस्पर्शशब्दवत्याः पारिणामिकं वनस्पतिलतागुल्मादिषु मूलफलप्रसवपल्लवादिगतरसादिवैश्वरूप्यं दृष्टम् । सोऽयमनेवमात्मिकाया भूमेरनीदृशस्य वा जलस्य न परिणामो भवितुमर्हति, उपपादितं हि नासदुत्पद्यते इति । तथा स्थावराणां जङ्गमेषु मनुष्यपशुमृगादिषु रसादिवैचित्र्यं दृष्टम् । उपभुञ्जाना हि ते फलादीनि रूपादिभेदसम्पदमासादयन्ति । एवं जङ्गमानां पारिणामिकं स्थावरेषु दृष्टम्, रुधिरावसेकात् किल दाडिमीफलानि तालफलमात्राणि भवन्ति । उपसंहरति--एवमिति । एवं सर्वं जलभूम्यादिकं सर्वरसाद्यात्मकम् । तत्र हेतुमाह— जात्यनुच्छेदेनेति । जलत्वभूमित्वादिजातेः सर्वत्र प्रत्यभिज्ञायमानत्वेन अनुच्छेदात् । ननु सर्वं चेत् सर्वात्मकं हन्त भोः सर्वस्य सर्वदा सर्वत्र सर्वथा सन्निधानात् समानकालीना भावानां व्यक्तिः प्रसज्येत, न खलु सन्निहिताविकलकारणं कार्यं विलम्बितुमर्हतीत्यत आह--देशकालेति । यद्यपि कारणं सर्वं सर्वात्मकं तथापि यो यस्य कार्यस्य देशः यथा कुङ्कुमस्य कश्मीरः तेषां सत्त्वेऽपि पञ्चालादिषु न समुदाचार इति न कुङ्कुमस्य पञ्चालादिषु अभिव्यक्तिः, एवं निदाघे न प्रावृषः समुदाचार इति न तदा शालीनाम्, एवं न मृगी मनुष्यं प्रसूते,

रेषु, स्थावराणां स्थावरेषु, जङ्गमानां जङ्गमेषु । जात्यनुच्छेदेन सर्वं सर्वात्मकम्, देशकालाकारनिमित्तावबन्धात् तु न समानकालमात्माभिव्यक्तिः, ते मन्यामहे जलभूम्योरप्येतत् पारिणामिकं रसादिवैश्वरूप्यम्, अन्येषां च भूतानामन्यपरिणाम इति, एवं तदप्यन्यस्येत्यवश्यंभावी अविभागः । यत्र चाविभागस्तत् प्रधानम्, वैश्वरूप्यस्याविभागकारणपूर्वकत्वात्, मयूरबर्हवैचित्र्यस्येव तदण्डकरसपूर्वकत्वम् । तस्मादस्ति प्रधानमिति एभिः पञ्चभिर्वीतैः समन्वयपरिमाणोपकारशक्तिप्रवृत्तिवैश्वरूप्यगत्याख्यैः सामान्यसंसर्गैककर्तृशक्तिमच्छक्त्यविभागसंज्ञं प्रधानं सिद्धम् । अत एवैकत्वमर्थवत्त्वम्, 321/mj परार्थत्वं संहत्य कारिणां पारार्थ्याच्छयनादिवत् । अतः पुरुषास्तित्वमन्यत्वं तद्बहुत्वं च पुरुषाणाम् । प्रधानस्य आद्यन्तपुरुषार्थोपलब्ध्यनन्तरं

n321/mj न तस्यां मनुष्याकारसमुदाचारः इति । एवं नापुण्यवान् सुखरूपं भुङ्क्ते, न तस्मिन् पुण्यनिमित्तस्य समुदाचार इति । तस्माद् देशकालाकारनिमित्तानामपबन्धादपगमान्न समानकालमात्मनां भावानामभिव्यक्तिरिति । इति पातञ्जलयोगदर्शनस्य **व्यास**प्रणीतभाष्योपरि **वाच**स्पतिमिश्रविरचितायां **तत्त्व**वैशारद्यां वृत्तौ ३ । १४ ॥

**३** ते] ते इत्यव्ययं ततः इत्यर्थे वर्तत इति भाति, दृश्यतां पृ० ११ पं० २७ । **ते** इत्यव्ययस्य **ततः** इत्यर्थे दृश्यते बहुशः प्रयोगः पातञ्जलमहाभाष्येऽपि, तद्यथा--अब्रह्मदत्तं ब्रह्मदत्त इत्याह । ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । **nayacakra-ms-pā म॰ nayacakra-ms-bhā** १ । १ । २२, १ । २ । १, ७ । १ । ९० ॥

**७** स] यथाक्रमं समन्वयात् सामान्यं परिमाणात् संसर्गः उपकारात् एककर्ता शक्तिप्रवृत्तेः शक्तिमच्छक्तिः वैश्वरूप्यगत्या च अविभागः सिध्यति ॥

८ एवैक] [दश मूलिकार्थाः, तथाहि--] अस्तित्वमेकत्वमथार्थवत्त्वं पारार्थ्यमन्यत्वमथो निवृत्तिः । योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः ॥ १ ॥ तत्र भेदानां परिमाणात् का० १५ इत्येभिः पञ्चभिर्वीतैर्हेतुभिः प्रधानस्यास्तित्वमेकत्वमथार्थवत्त्वं च सिद्धम् । सङ्घातपरार्थत्वात् का० १७ इति परार्थता सिद्धा । तद्विपरीतस्तथा च पुमान् का० ११ इति प्रधानपुरुषयोरन्यत्वं सिद्धम् । रङ्गस्य दर्शयित्वा का० ५९ इति निवृत्तिः सिद्धा । पुरुषस्य दर्शनार्थम् का० २१ इति संयोगः सिद्धः । प्राप्ते शरीरभेदे का० ६८ इति वियोगः सिद्धः । जन्ममरणकरणानाम् का० १८ इति पुरुषबहुत्वं सिद्धम् । चक्रभ्रमवत् का० ६७ इति शेषवृत्तिः सिद्धा ।जे० साङ्ख्यका० वृ० B, तथा **माठर**वृत्तौ का० ७२ । प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता । पारार्थ्यं च तथाऽनैक्यं वियोगो योग एव च ॥ शेषवृत्तिरकर्तृत्वं मूलिकार्थाः स्मृता दश । पृ० २ । ... ... ...तत्रास्तित्वमेकत्वं पञ्चभिर्वीतैः सिद्धम् । अर्थवत्त्वं कार्यकारणभावः । पारार्थ्यं संहत्यकारिणां परार्थत्वात् । अत एवान्यत्वं चेतनाशक्तेर्गुणत्रयात् । जन्ममरणकरणानाम् का० १८ इत्येवमादिभिः पुरुषबहुत्वम् । पुरुषस्य दर्शनार्थम् का० २१ इति संयोगः । प्राप्ते शरीरभेदे का० ६८ इति वियोगः । सम्यग्ज्ञानाधिगमात् का० ६७ इति शेषवृत्तिः । तस्माच्च विपर्यासात् का० १९ इति पुरुषस्याकर्तृत्वमित्येते दश मूलिकार्थाः । **साङ्ख्यका॰ युक्तिदीपिका** पृ० ५ । एकत्वमर्थवत्त्वं पारार्थ्यं च प्रधानमधिकृत्योक्तम् । अन्यत्वमकर्तृत्वं बहुत्वं चेति पुरुषमधिकृत्य । अस्तित्वं वियोगो योगश्चेत्युभयमधिकृत्य । वृत्तिः स्थितिरिति स्थूलसूक्ष्ममधिकृत्य । इति **साङ्ख्यतत्त्वकौमुद्याम्**, का० ७२ ॥

**१०** आ] ॰षार्थयो **पल॰nayacakra-ms-ya** । प्रधानस्य पुरुषार्था प्रवृत्तिः, स चार्थो द्विविधः--शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तः । जे० साङ्ख्यका० वृ० A, B, माठरवृ०, का० ६६ ॥

निवृत्तिः व्रीह्युदकगत्या रङ्गनर्तकीवद्वेति प्रधानपुरुषसंयोगविभागावित्थम् । इयत्परिज्ञानफलं च शास्त्रम् । § 938

तथा **संव्यवहारप्रसिद्धे**रित्यादि याव**दावीताना**मिति व्याख्यातं द्रष्टव्यम् । एतेषामेव पञ्चानां वीतानां परिशुद्ध्यर्थाः पञ्चैव आवीताः । एवमेभिः पञ्चभिर्वीतैः प्रधानस्य परिग्रहं कृत्वा पुनरावीतैः करिष्यामः । परपक्षप्रतिषेधेन स्वपक्षपरिग्रहक्रिया आवीतः इत्यपदिष्टं पुरस्तात् । तस्यास्य प्रतिपक्षाः सर्वैकान्तिनः पुरुषेश्वराणुप्रवादाः विकारपुरुषा वैनाशिकाश्च । तेषां वैनाशिकप्रतिषेधमग्रे वक्ष्यामः, कस्मात् ? **किञ्चिद् वैनाशिका हीतर** इत्यतः प्रभृत्युपक्रम्य - /ms **अनुपलब्धेर्नास्ती**ति द्वितीयस्य शिरसो[ऽन]भ्युपगतस्यासत उत्पत्त्यभावाद् व्यभिचारप्रसङ्गे गते याव**दनागतेऽपि काले न भविष्यती**ति । § 939

किञ्चान्यत्, यदि व्यक्तस्यासत उत्पत्तिर्भवति अर्थार्थिभिस्तृणपांशुवालुकाः मुक्तामणिरजतसुवर्णानि क्रियेरन्, कस्मात् ? अभावक्रिया गुरुकार्या भावक्रिया लघ्वीति । न त्वेवं क्रियते, **तस्मादयुक्त**मित्यादि याव**दुक्तोत्तरत्वादसम्यग्विधिः** । किञ्चान्यत्, यदि व्यक्तस्यासत उत्पत्तिर्योन्यभावादेकत्वप्रसङ्गः, प्रधानाभावात् सामान्यमात्रमिदं व्यक्तं निर्विशेषमित्येतत् प्रसज्येत । कस्मात् ? **सामान्यपूर्वकत्वाद् विशेषाणाम्,** सामान्यपूर्वका हि लोके विशेषा दृष्टाः, तद्यथा--*क्षीरपूर्वका दधिमस्तुद्रप्सनवनीतघृतारिष्टकिलाटकूर्चिकाभावाः । न त्वसति भावः कश्चिदस्ति यत्पूर्वका व्यक्तविशेषाः स्युः । तस्मात् सामान्यमात्रमिदं व्यक्तं निर्विशेषमित्येतत्, न त्विदं तादृक् । तस्माद् नेदं व्यक्तमसत उत्पद्यते । न चेदं सत उत्पद्यते । पारिशेष्यात् प्रधानादेवेदं व्यक्तमुत्पद्यत इत्येतद् युक्तम् । तस्मादस्ति प्रधानमिति । एषोऽन्वयवीतस्यावीतः । § 940

---

१ र] **रङ्गमनर्त॰**nayacakra-ms-ya । रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् । पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ ५९ ॥ **--साङ्ख्यका॰** ॥

२ त्प] **॰त्परिमाणफलं**nayacakra-ms-ya ॥

६ आ] दृश्यतां पृ॰ ३१४ पं॰ ३ ॥

६ पु] **पुरस्तावत्**nayacakra-ms-bhā ॥

६ प्र] प्रतिपक्षाः पुनस्तस्य पुरुषेशाणुवादिनः । वैनाशिकाः प्राकृतिका विकारपुरुषास्तथा ॥ तेषामिच्छाविघातार्थमाचार्यैः सूक्ष्मबुद्धिभिः । रचिताः स्वेषु तन्त्रेषु विषमास्तर्कगह्वराः ॥ इति **साङ्ख्यका॰ युक्तिदीपिकावृत्तौ** प्रारम्भश्लोकेषु ॥

७ तेषां] प्रतिपक्षाः पुनस्तस्य पुरुषेशाणुवादिनः । वैनाशिकाः प्राकृतिका विकारपुरुषास्तथा ॥ तेषामिच्छाविघातार्थमाचार्यैः सूक्ष्मबुद्धिभिः । रचिताः स्वेषु तन्त्रेषु विषमास्तर्कगह्वराः ॥ इति **साङ्ख्यका॰ युक्तिदीपिकावृत्तौ** प्रारम्भश्लोकेषु ॥

८ किञ्चिद्] प्रतिपक्षाः पुनस्तस्य पुरुषेशाणुवादिनः । वैनाशिकाः प्राकृतिका विकारपुरुषास्तथा ॥ तेषामिच्छाविघातार्थमाचार्यैः सूक्ष्मबुद्धिभिः । रचिताः स्वेषु तन्त्रेषु विषमास्तर्कगह्वराः ॥ इति **साङ्ख्यका॰** युक्तिदीपिकावृत्तौ प्रारम्भश्लोकेषु ॥

८ वैनाशिका] **हीतक-र**nayacakra-ms-pānayacakra-ms-raṃnayacakra-ms-hī ॥

१३ ल] **लघ्विति** प्र॰ ॥

१७ *] क्षीरं द्रप्स-दधि-मस्तु-नवनीत-घृता-ऽरिष्ट-किलाट-कूर्चिकाभावेन परिणमति ।जे॰ साङ्ख्यका॰ वृ॰ A, माठरवृ॰, का॰ १६ ॥

१९ मित्येत] **॰मित्येतत न त्विदं**nayacakra-ms-ya । **॰मित्येतव ?न त्विदं** nayacakra-ms-bhā ॥

२० मुत्प] **॰त्पद्य इ॰** प्र॰ ॥

२१ यु] **व्यक्तं**nayacakra-ms-ya ॥

322/mj

**किञ्चान्यदित्यादि** तदेव **योन्यभावादनवस्थाप्रसङ्गः,** परिमाणस्य संसर्गपूर्वकत्वाविनाभावादित्यर्थः । प्रधानाभावाद् निष्परिमाणमिदं व्यक्तमव्यवस्थितमित्येतत् प्रसज्येत । कस्मात् ? सतां ह्यर्थानां लोके परिमाणं दृष्टं तुलामान-हस्त-व्याम-रज्ज्वात्मोपचयैः, न त्वसति भावः कश्चिदस्ति यः प्रतिपद्यमानः परिमाणेऽवतिष्ठेत । तस्माद् निष्परिमाणमिदमव्यवस्थितमित्येतत् प्रसज्येत, न त्विदं तादृक्, तस्माद् नेदं व्यक्तमसत उत्पद्यते । न चेदं सत उत्पद्यते । परिशेषतः प्रधानादेवेदम् । तस्मादस्ति तत् । § 941

- /ms किञ्चान्यत्, **एकजातिसमन्वयाभावप्रसङ्गा**दिति तदेव । **स्थालीघटे**त्यादि दृष्टान्तविशेषः सामान्यविशेषोत्थापनार्थमुच्यते । अत्र परो ब्रूयात्--विशेषमात्रस्य दर्शनादसत उत्पत्तिः, तद्यथा **--आकारो गौरवमित्यादिधर्मभेदा**दिति ।

---

२ धानाभावाद्] **निःपरि॰** प्र॰ ॥
४ व्या] व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् । इति अमरकोशे २ । ६ । ८७ ॥
५ स्माद्] **निःपरि॰** प्र॰ ॥
८ याभाव] **॰वाप्र॰** प्र॰ ॥
९ विशेषोत्था] nayacakra-ms-bhā विनान्यत्र **--॰स्थाप॰** nayacakra-ms-pā । **॰स्त्वाप॰** nayacakra-ms-ḍe nayacakra-ms-līṃ । **॰त्वाप॰** nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī ॥
१० आ] आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च । स्थितिर्भेदः क्षमा कृष्णच्छाया सर्वोपभोग्यता ॥ १ ॥ इति ते पार्थिवा धर्मास्तद्विशिष्टास्तथाऽपरे । जलाग्निपवनाकाशव्यापकास्तान् निबोधत ॥ २ ॥ स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत् । शैत्यं रक्षा पवित्रत्वं सन्तान्धानं चौदका गुणाः ॥ ३ ॥ ऊर्ध्वगं पावकं दग्धृ पाचकं लघु भास्वरम् । प्रध्वंस्योजस्वि च ज्योतिः पूर्वाभ्यां **सच ?** विलक्षणम् ॥ ४ ॥ तिर्यग्गतिः पवित्रत्वमाक्षेपो नोदनं बलम् । रौक्ष्यमच्छायता शैत्यं वायोर्धर्माः पृथग्विधाः ॥ ५ ॥ सर्वतोगतिरव्यूहो विष्कम्भश्चेति ते त्रयः । आकाशधर्मा विज्ञेयाः पूर्वधर्मविरोधिनः ॥ ६ ॥ संहतानां तु यत् कार्यं सामान्यं ते गवादयः । इतरेतरधर्मेभ्यो विशेषान्नात्र संशयः ॥ ७ ॥ तत्राकारादिभिर्धर्मैः पृथिव्या लोकस्य चोपक्रियते भूतान्तराणां च । तत्र आकारात् तावद् गवादीनां घटादीनां चाकारनिर्वृत्तिः, गौरवादेषामवस्थानम् । रौक्ष्यादपां सङ्ग्रहो वैशद्यं च भूतानाम् । वरणादनभिप्रेतानां छादनम् । स्थैर्याद् **वृत्तिः धृतिः ?** प्रजानां भूतान्तराणां च । स्थितेर्मात्रादिसन्निधानाद्यनुग्रहः, भेदाद् घटादिनिष्पत्तिः व्यूहश्चावयवानाम् । क्षान्तेरुपभोगयोग्यता । कृष्णच्छायत्वाद् रात्रिसम्पच्छायाकार्यप्रसिद्धिश्च । सर्वोपभोग्यत्वात् सर्वभूतानुग्रहः । एवं स्नेहादिभिर्लोकस्योपकारः क्रियते भूतान्तराणां च । स्नेहाद् रूपसम्पद् वायुप्रतीकारोऽग्निशमनं सङ्ग्रहश्च पृथिव्याः । सौक्ष्म्यादनुप्रवेशः । शौक्ल्याच्चन्द्रादिनिर्वृत्तिः । मार्दवात् स्नानावगाहनमेकक्रिया कठिनानां चावनमनम् । गौरवात् सन्तानाद्य भूतानुग्रहार्थं स्रोतस्त्वम् । शैत्यादुष्मप्रतीकारः । रक्षातः प्रजासु घोरशमनम् । पवित्रत्वाद् धर्मोपचयः, शौचविधिरलक्ष्येऽपि घातश्च । **सन्तान्धाना**द् द्रव्यसङ्घातः । तथा ऊर्ध्वगत्यादिभिर्धर्ममात्रेऽपि तेजसा लोकस्य चोपक्रियते भूतान्तराणां च । ऊर्ध्वगतेः पाकप्रकाशसिद्धिः, पावकत्वाद् द्रव्यशौचं च । दाहकत्वात् क्षारोत्पत्तिः शीतप्रतीकारो नभसश्चोष्मत्वं शब्दनिष्पत्त्यर्थम् । पाचकत्वात् स्वेद्यस्वेदनमन्नपक्तिः । पृथिव्यवयवानां क्रियायोग्यता तथा बाह्यान्तरपरिणामो रसलोहितमांसस्नाय्वस्थिमज्जाशुक्राणाम् । लाघवाद् दाह्यातिक्रमः । भास्वरत्वाद् द्रव्यान्तरप्रकाशनम् । प्रध्वंसित्वाद्

तत्रोत्तरम् --**ताद्रूप्येणोपकाराददोष** इति धर्मभेदपरिणत्या लोकवृत्तान्तनयनादित्युपकारभेदप्रदर्शनात् कार्यकारणभाववीतस्यावीतत्वलेशं च स्पृशतीति तस्मादेव ग्रन्थादवगन्तव्यं यावत् पुरस्ताद् व्याख्यातम्, यथा --**तैर्यग्योनमानुषदैवानि परस्परार्थं न कुर्वीरन्नि**ति । तत्र यदुक्तं भूतानां तत्समूहानां च व्यावृत्तेर्विशेषमात्रमिदं व्यक्तम्, तस्मादसत उत्पद्यते इति, **एतदयुक्त**मिति पुनरसत्समन्वयाशङ्कां निरस्य प्रपञ्चेन यावत् **तस्माद् युक्तमेतत्--योन्य-** 323/mj
**भावाद् भेदप्रसङ्ग** इति । एषोऽन्वयवीतस्यावीतः प्रसङ्गो व्याख्यातः । आचार्येणापि **तथैव व्यवस्था-तुल्यजातिसमन्वयादी**त्युक्तं तेनैव क्रमेण **आदि**ग्रहणात् त्रयः शेषा अप्यावीताः सूचिताः । § 942

मुक्तविधिना प्रतिपादितम्, एकत्वं पुरुषवदपरिणामित्वं (Edtext outside numbered paragraph)च सुखादीनाम् । तत एकत्वात् पुरुषवदपरिणामित्वादतथार्थत्वं चेति । तस्मा**दतथार्थत्वा**दनुमानाभासत्वादेतेऽर्था नोपपन्नाः, तद्यथा— भिन्नगुणत्वं वैषम्यात्मकत्वं विपरिणामः पुनः साम्यापत्तिश्चेति । तदनुपपत्तेर्जगत्सर्गसंहारकल्पना निर्मूला प्रधानाभावात् । तन्निर्मूलत्वात् पु (Edtext outside numbered paragraph)रुषार्थेन हेतुना प्रयुक्ता प्रवृत्तिरित्येतदपि वितथम्, तद्वितथत्वात् तद्विषयः (Edtext outside numbered paragraph)प्रत्ययोऽप्यज्ञानमेव, तदज्ञानत्वात् ज्ञानप्राप्यपुरुषार्थाभावोऽपीति **समस्ततन्त्रार्थविघटनमेवे**ति किमवशिष्यते **वार्षगणे तन्त्रे** ? सुभाषिताभिमतस्त्याज्योऽयमनुपपन्नपरोक्षार्थवादः । यद्युपपद्येत परोक्षार्थमपि तं गृह्णीयाम, न तूपपन्नः । तस्मात् सर्वसर्वात्मकत्वपरिग्रह एव न्याय्यः । § 943

तत्र कार्यकारणवीतस्य आवीतस्तावत् --**किञ्चान्यत्, कार्यकारणयोश्च व्यक्तमिदं द्विधा कृत्वा** कार्यराशिं कारणराशिं च कृत्वा **न असत उत्पत्तिः** सम्भवति इति वाक्यशेषः, **क्रमयौगपद्यप्रवृत्त्यसम्भवात्** । परस्परार्थात्मलाभत्वात् कार्यकारणयोरन्योन्यानुरूपात्मलाभाभावः । अतः क्रमेण प्र-

---

दग्धपक्वानामुपभोगः । ओजसः प्रजापालनम् । तथा तिर्यक्पातादिभिर्धर्मैः वायुना लोकस्य चोपकारः क्रियते भूतान्तराणां च । तिर्यक्पाताद् दृष्टिविक्षेपो गन्धसंवहनं च । पवित्रत्वात् पूतिद्रव्यपावनम् । आक्षेपनोदनाभ्यामुत्कर्षः, प्रथनं घर्माम्भसः, व्यूहश्च शरीरे रसादीनां धातूनां च, अग्नेश्चोपध्मानमभिघातश्चाकाशस्य । बलात् समीरणं सर्वेषाम् । रौक्ष्याद् विशोषणम् । अच्छायत्वादहोरात्रप्रसिद्धिः । शैत्यादुष्मप्रतीकारः । तथा सर्वतोगत्यादिभिर्धर्मैः नभसा लोकस्योपकारः क्रियते भूतान्तराणां च । सर्वत्र गतेः समन्तात् तुल्यदेशश्रवणानामेकश्रुतित्वम् । अव्यूहविष्कम्भाभ्यां सर्वेषामवकाशदानमित्युक्ताः पृथिव्यादयः ।--साङ्ख्यका° युक्तिदीपिका, का° ३८ । एत एव आकारो गौरवं रौक्ष्यम् इत्यादयः प्रथमतृतीयचतुर्थपञ्चमषष्ठश्लोकाः किञ्चित्पाठभेदेन पातञ्जलयोगदर्शनवैयासिकभाष्योपरि वाचस्पतिमिश्रविरचितायां तत्त्ववैशारद्यां वृत्तौ विज्ञानभिक्षुविरचिते योगवार्तिके च समुपलभ्यन्ते ॥

११ च]
किंचाऽनसतnayacakra-ms-ya ।
किंचानसत nayacakra-ms-bhā ॥

वृत्त्यभावश्चक्राक्षवत् असत्त्वादसद्वादिनः । तथा युगपदप्यभूतविनष्टयोरनपेक्षत्वात् खरविषाणवत् क्रियादिमध्यावसानेषु असत्त्वादेव प्रवृत्त्यसम्भवः । यदारभ्यते तत् क्रियते निष्ठां च गच्छतीति लोके दृष्टम्, तत् परस्परापेक्षामन्तरेण न सम्भवति चक्राक्षवदित्युक्तम् । तस्मात् **क्रमयौगपद्यप्रवृत्त्यसम्भवा- दकार्यकारणत्वप्रसङ्गः** । कार्यकारणभूतं चैतद् व्यक्तम् । तस्मान्नेदमसत उत्पद्यते । परिशेषतः प्रधानादेवेदमिति कार्यकारणवीतस्यावीतः । किञ्चान्यत्, निर्बीजमकस्मादुत्पद्यमानं व्यक्तमनेकदेशत्वाद् भेदानामसम्बद्धमुत्पद्येत, सम्बद्धं चोत्पद्यते, तस्मान्नेदमसत इति शक्तिवीतस्य आवीतः । *शेषस्तु प्रसक्तानुप्रसक्तविचारेण ***संस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनाम्, एवं लिङ्गमादिमद्धर्ममात्रं सत्त्वादीनां विनाश्यविनाशिनाम्, तस्मिन् विकारसंज्ञा** , तत्र यदुक्तं **विकारस्य विनाशित्वात् प्रधानस्य विनाशित्वम्** इति **एतदयुक्तम्, गुणव्यतिरिक्तगुणप्रवृत्तिकारणाभावादाकस्मिक्याः प्रवृत्तेरभावाच्चे**त्यादिभिः प्रत्यभिज्ञानार्थक्रियाहेतुकार्यनियमादिभिश्च हेतुभिरत्यन्तासदुत्पत्तिविनाशप्रतिषेधार्थः सर्वो ग्रन्थो वैश्वरूप्याविभागगतिवीतस्यावीतो द्रष्टव्य इति । एवमेषां प्रधानास्तित्वैक्यादिसाधनार्थं वीतानां तत्सद्भावस्य अन्यथा व्यक्तासम्भवस्य वा दर्शनेन त्र्यात्मकयोनिहेतुत्वमवश्यमित्येत

- /ms

१ भाव] **°वाश्च°** प्र° ॥
९ *] शेषस्तु सर्वो ग्रन्थो वैश्वरूप्याविभागगतिवीतस्यावीतो द्रष्टव्य इति वक्ष्यमाणेन अन्वयः ॥
९ *] यथा--संस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनाम्, एवं लिङ्गमादिमद्धर्ममात्रं सत्त्वादीनां गुणानां विनाश्यविनाशिनाम् । तस्मिन् विकारसंज्ञेति । इति पातञ्जलयोगदर्शनस्य **व्या**सप्रणीते भाष्ये ३ । १३ । इदं च वाक्यं **व्या**सभाष्येऽपि कुतश्चिदन्यग्रन्थादुद्धृतमिव प्रतिभाति । अस्य **वा**चस्पतिमिश्रप्रणीता व्याख्या--विमर्दवैचित्र्यमेव विकारवैचित्र्ये हेतुं प्रकृतौ विकृतौ च दर्शयति--यथेति । यथा संस्थानं पृथिव्यादिपरिणामलक्षणं आदिमद् धर्ममात्रं विनाशि तिरोभावि शब्दादीनां शब्दस्पर्शरूपरसगन्धतन्मात्राणां स्वकार्यमपेक्ष्य अविनाशिनाम् अतिरोभाविनाम् । प्रकृतौ दर्शयति--एवं लिङ्गमिति । तस्मिन् विकारसञ्ज्ञा । न त्वेवं विकारवती चितिशक्तिरिति भावः । **--तत्त्ववै°** । **वि**ज्ञानभिक्षुविरचितायां **यो**गवार्तिकाख्यायां व्याख्यायां त्वित्थम्—गुणिनित्यत्वेऽपि गुणानां विमर्दमुदाहरति--यथेति । यथेति न दृष्टान्ते, किन्तूदाहरणे, संस्थानमिति, अर्थविनाशेनाविनाशिनां शब्दादितन्मात्राणां पञ्चभूतरूपं संस्थानं धर्ममात्रमादिमत्, इत्यतो विनाशीत्यर्थः । एवमित्याद्यप्येवं व्याख्येयम् । लिङ्गं महत्तत्त्वम् । एवमहङ्कारादयो घटादयश्च स्वविनाशेनाविनाशिनां कारणानां धर्ममात्राणि विनाशिन इति बोध्यम् ।... तस्मिन् धर्मे विकारसंज्ञा परिणामसंज्ञेत्यर्थः । इति **यो**गवार्तिके ॥
१० लिङ्ग] पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥ इति **साङ्ख्य**कारिकाया **माठर**वृत्तौ **साङ्ख्य**तत्त्वकौमुद्यादिषु च पञ्च कर्मेन्द्रियाणि, पञ्च बुद्धीन्द्रियाणि पञ्च तन्मात्राणि मनो बुद्धिरहङ्कारः इत्येवमष्टादशविधं महदादि सूक्ष्मपर्यन्तं लिङ्गं वर्णितमस्ति, **युक्ति**दीपिकादिव्याख्यासु तु इयं कारिका अन्यथा व्याख्यातास्ति ॥
१३ त्या] **°त्यादि प्रत्य°** प्र° ॥
१५ धानास्तित्वैक्या] दृश्यतां पृ° ३२० टि° ६ ॥
१६ ना] **°नार्थं**nayacakra-ms-bhā । °नार्थानां ? ॥

अन्यः पुनराह--न सर्वसर्वात्मकत्वपरिग्रहो न्याय्यः, अन्यथा भवनद्वैतपरिग्रहाद् विध्युभयनयैकान्तोपपत्तेः । सन्निधिर्न हि सन्निधिमात्रवृत्तिरस्ति अनापन्नत्वादनाविर्भूतत्वादप्रवृत्तत्वादनियतत्वात् । अनापन्नत्वादिभ्यो नास्ति वन्ध्यापुत्रवत् सन्निधिः, पद्यतिवर्तत्यर्थप्रवृत्तत्वादेव सत्तायाः । न हि द्रव्यादिसद्भेदवत् पद्यतिवर्तत्योः सत्ताविशेषत्वेन उपादानम्, सत्तार्थाः इत्यविशेषेण वचनात् ।

* * *

तानामतथार्थत्व**दवधारणार्थानां चावी** 324/mj

* * *

अन्यः पुनराह--न सर्वसर्वात्मकत्वपरिग्रहो न्याय्यः, अन्यथा भवनद्वैतपरिग्रहाद् विध्युभयनयैकान्तोपपत्तेः । सन्निधिर्न हि सन्निधिमात्रवृत्तिरस्ति अनापन्नत्वादनाविर्भूतत्वादप्रवृत्तत्वादनियतत्वात् । अनापन्नत्वादिभ्यो नास्ति वन्ध्यापुत्रवत् सन्निधिः, पद्यतिवर्तत्यर्थप्रवृत्तत्वादेव सत्तायाः । न हि द्रव्यादिसद्भेदवत् पद्यतिवर्तत्योः सत्ताविशेषत्वेन उपादानम्, सत्तार्थाः इत्यविशेषेण वचनात् ।

* * *

तानामतथार्थत्व

**अन्यः पुनरि**त्यादि । **न सर्वसर्वात्मकत्वपरिग्रहो न्याय्यः, अन्यथा भवनद्वैतपरिग्रहाद् विध्युभयनयैकान्तोपपत्तेः** । तत्र भवति भावद्वैतम्, भवतो भावस्य भाव्यभवितृत्वाभ्यां भेदाभ्यां भावोपपत्तिः इत्येतत् प्रतिपादयिष्यते । न त्वेवं यथानन्तरदूषितं सन्निध्यापत्तिभवनद्वैतम् । तत्र तावद् यः **सन्निधिर्न हि** स **सन्निधिमात्रवृत्तिरस्ति,** कुतः ? **अनापन्नत्वात्,** आपत्तिरनाविर्भूतस्याविर्भावः, तत आह **--अनाविर्भूतत्वात्,** अनाविर्भवनमप्रवर्तनम्, अप्रवर्तनं चानियमः । अथवा आपत्तिर्विपरिणामो भावान्तरेणोपलब्धिः, आविर्भावो व्यक्तिः, प्रवृत्तिः सन्ततः परिणामप्रबन्धः, नियतस्वरूपत्वमविगतद्रव्यार्थभावस्थितिः, एभ्यो विपर्ययोऽनापन्नत्वादिः, तेभ्यो हेतुभ्यो**ऽनापन्नत्वादिस्वरूपेभ्यो नास्ति वन्ध्यापुत्रवत् सन्निधिः । आदि**ग्रहणादप्रवृत्तेरव्यक्तेरनियतेरित्यादिभ्यः । अतः सन्निधेरसत्पर्यायत्वात् सन्निधिभवनाभावः । ननूक्तम् **--अस्तिभवत्यादिषु अस्ति-वर्तती सन्निधिवाचिनौ, भवति-विद्यती सामान्यभवनवाचिनौ, पद्यतिरापत्तिभवनवाची** इति, सत्यमुक्तम्, अयुक्तं तूक्तम्, अस्त्यादीनां सन्निपातषष्ठानां सत्तार्थवाचित्वात् सर्वेऽप्यमी सत्तार्थमेवाविशेषेण ब्रुवते । सा च सत्ता पद्यति-वर्तत्येकार्थैवेत्यत आह **--पद्यति-वर्तत्यर्थप्रवृत्तत्वादेव सत्तायाः** । स्यान्मतम्--सद्विशेषद्रव्य-गुण-कर्मवद्

१७ स] **सर्वासर्वात्म°** प्र° ॥
१९ भा] **भव्यभवतृ°**
nayacakra-ms-bhā ॥
२० न] **त्वेवं** प्र° ॥
२८ अ] दृश्यतां पृ° २६१ पं° १८ ।
पूर्ववर्णनादत्र भेदो दृश्यते इत्यपि ध्येयम् ॥
३१ का] **°कार्थे चेत्यत** प्र° ॥

वर्ततिपद्यत्योरुपादानं सत्ताविशेषत्वेनेति । एतच्चायुक्तम्, यस्माद् **न हि द्रव्यादिसद्भेदे**त्यादि याव**दुपादान**मिति गतार्थम् । किं तर्ह्युपादानम् ? उच्यते--अस्त्यादितुल्यार्थत्वेन । कुतो ज्ञायते इति चेत्, **सत्तार्था इत्यविशेषेण वचनात्, अस्ति-भवति-विद्यति-पद्यति-वर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इत्यविशेषेणोक्तत्वात् सिद्धसेनसूरिणा । § 944
325/mj

यद्यपि चापत्तिभवननिरूपणं प्रधानमेव भवति महदादिविकारापत्त्या, तेन किल भूयत इति तदपि न, तस्यापि भाव्यमानत्वाद् भावयितारमन्तरेणानुपपत्तेः अनापन्नस्य च असत्त्वात्, अस्वतन्त्रत्वात्, शब्दादिवत् । § 945

भवति कर्ता यः स्वतन्त्रः, प्रवर्तनवृत्तत्वात्, तथाभवनवृत्तत्वात् तन्तुपटवत् । § 946

एवं तावत् सन्निधिभवनं नास्त्येव निरूपणानुपपत्तेः । आपत्तिभवनमपि नास्ति, कथमिति चेत्, **यदपि चापत्तिभवननिरूपणं** साङ्ख्यैः क्रियत इति वाक्यशेषः । **प्रधानमेव भवति** महदादिविकारापत्त्या, यस्मात् **तेन किल भूयत इति,** इतिशब्दहेत्वर्थत्वाद् महदादिभावमापद्यत इत्यस्मात् कारणात् प्रधानमेव भवति, तेनैव भूयते सत्त्वादिमयत्वाद् विश्वस्येति । **किल**शब्दः क्षेपे, एवं किल तेषां मतमिति, स च क्षेपोऽनुपपद्यमानत्वात् । कथमिति चेत्, उच्यते --**तदपि न, तस्यापि भाव्यमानत्वाद् भावयितारमन्तरेण भाव्यत्वानुपपत्तेः**, स्वत एव न भवतीत्यर्थः । भाव्यमानत्वं च वक्ष्यमाणोपपत्तिकत्वात् सिद्धम् । तच्चेद् व्यापृतं द्वितीयेन व्यापृततरेण विना न प्रवर्तितुमर्हति, अनापन्नत्वात्, **अनापन्नस्य च** सन्निधिमात्रस्यापादिता**सत्त्वात्** । तस्मादनापन्नस्य च स्वत एवापत्त्यभावात्तदुक्तापत्तिभवनं नोपपद्यत इति । किं कारणमनुपपन्नमिति चेत्, **अस्वतन्त्रत्वात्,** अन्यतन्त्रं हि तत् प्रधानाख्यमचेतनत्वात् । को दृष्टान्तः ? **शब्दादिवत्,** यथा शब्दादयः सत्त्वरजस्तमोमयत्वादस्वतन्त्रास्तदात्मकेन प्रधानेन भाव्यन्तेऽन्येन व्यापृता अपि व्यापारयित्रा तथा प्रधानमपि । § 947

४ स] दृश्यतां पृ° ३४ पं° २१ ॥
१५ दादिभा] °भावनापद्यतnayacakra-ms-bhā । °भावना इत्यादि भावनापद्यत nayacakra-ms-ya ॥
१९ ए] एव भव° प्र° ॥
२० व्या] व्यावृत्तं प्र° ॥
२० व्या] व्यावृत°nayacakra-ms-bhā । व्यावृत्त° nayacakra-ms-ya ॥
२१ स्या] °स्यपादि° प्र° ॥
२२ भावा] °वात्त्वदुक्ता° इत्यपि पाठोऽत्र स्यात् ॥
२३ अ] अभ्यअस्व ?तन्त्रं प्र° ॥
२४ य] तथा प्र° ॥
२४ त्वा] °त्वास्वत° प्र° ॥
२५ व्या] व्यावृता प्र° ॥

तस्मात् ततोऽन्यो **भवति** मुख्यः । कोऽसौ ? यः **कर्ता** । कः कर्ता ? अत आह **--यः स्वतन्त्रः** । कस्मात् ? **प्रवर्तनवृत्तत्वात्,** प्रवर्तयतः - /ms
क्रिया प्रवर्तनम्, तेन प्रवर्तनेन वृत्तत्वात् प्रवर्तयितृत्वेन वृत्तत्वादित्यर्थः । प्रवर्तयद्धि कारणं तद्भावमापद्यते, शब्दादि यथा प्रवर्तयत् सत्त्वरजस्तमोलक्षणं कारणं शब्दादिभावमापद्यते त्वन्मतेन । **तथाभवनवृत्तत्वात्,** तेन प्रवर्त्यमानरूपेण भवनम्, तेन वृत्तत्वात् प्रवर्तयितारमन्तरेणाभवनादवृत्तत्वात्, **तन्तुपटवत्,** यथा तन्तवः पटं प्रवर्तयन्तः पटस्य कारणमित्युच्यन्ते पटश्च तन्तुकार्यं तैः प्रवर्त्यत्वात् । नन्वेते प्रधानशब्दादिपटादिदृष्टान्ता अद्वैतवादं समर्थयन्तीति, उच्यते--प्रवर्तयितृत्वमात्रसाधर्म्यात् तदभ्युपगम्य भेदेन निदर्श्यते, अन्यथा पुरुषादिवदद्वैताभ्युपगमे विध्युभयैकान्तोत्थानाभावात् । भाव्यभावकभेदप्रसिद्धेश्च अभावितस्यासत्त्वाद् वन्ध्यापुत्रवदणुधर्मादयोऽपि भाव्यमाना एव स्युरित्येतत्साधर्म्याद् दृष्टान्ताः शब्दादयः । § 948

यद्येवं प्रस्तुतं धर्माधर्मावणवो वा कारणमस्त्येवेति सिद्धत्वात् किमनुमितेन कारणेन इति चेत्, नेत्यु 326/mj

* * *

धर्माधर्माण्वादीनामपि च तन्त्वंश्वादिवत् पूर्वपूर्वशक्ततारतम्येन सन्निहिततद्विधशक्तिः प्रतिविशिष्टबुद्धिः स्वतन्त्रोऽभिप्रायप्रवृत्त्यापत्तेः प्रवर्तयितृत्वात् कारणम्, शक्तिमत्प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात्, अधिकृतपक्तृवत् । सम्भवनधारणज्वलनविक्लेदनव्यापारेषु स्थालीकाष्ठतण्डुलादीनां प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यादुच्यते--देवदत्त एव पचति, तेन पच्यते, स पचति, तेन पचनं क्रियते, प्रयोजनमात्रार्थत्वात् क्रियायाः । साक्षाद्वा भवितृवत्, यथा च सम्भवनधारण-

* * *

च्यते --***धर्माधर्माण्वादीनामपि च तन्त्वंश्वादिव**दित्यादि यावत् **प्रतिविशिष्टबुद्धिः** । यथा पटस्तन्तुपूर्वकः, तन्तवोंऽशुपूर्वकाः, अंशवस्तुटिपूर्वकाः, तुटीनामपि प्रवर्तने शक्तास्ततः पूर्वे पूर्वे यावच्छताणुकः, ततोऽपि पूर्वे पूर्वे यावद् द्व्यणुकः परमाणुरित्यनुमीयते शब्दादितो यावत् प्रधानम्, तथा अण्वादीनामप्यचेतनानां प्रवर्तकौ धर्माधर्मौ । **आदि**ग्रहणात् काल-स्वभाव-नियत्यादिवाद्यन्तरपरिकल्पिताः । एवं पूर्वपूर्वशक्ततारतम्येन ईश्वरः **सन्निहिततद्विधशक्तिः** धर्माधर्माण्वादिप्रधानशब्दादेस्तथा तथा विनिवेशने सन्निहिता यस्य श-

२ प्र] दृश्यतां पृ° २४३-- १ ॥
६ वृ] प्रवृत्तत्वात्nayacakra-ms-ya ॥
१२ र्म्या] °र्म्यादष्टान्ताःnayacakra-ms-bhā । °र्म्यदृष्टान्ताः nayacakra-ms-ya ॥
१५ पू] दृश्यतां पृ° २४३-- १ ॥
२२ *] धर्माण्वा° प्र° ॥
२५ नुमीय] °यन्नेयन्ते ?nayacakra-ms-bhā ॥
२७ पू] पूर्वपूर्वपूर्व°nayacakra-ms-bhā । दृश्यतां पृ° ३२९ टि° ५ ॥
२७ त] °तद्विविध°nayacakra-ms-bhā । दृश्यतां पृ° २४३-- १ ॥

क्तिः सोऽस्ति । कात्र तद्विधविनिवेशनशक्तिर्मुख्या तस्येति चेत्, उच्यते--प्रतिविशिष्टा बुद्धिः, अतोऽसौ **प्रतिविशिष्टबुद्धि**र्विशिष्टबुद्धिभ्योऽपि स्थपतिकुलालादिभ्यः, प्रतिकर्तृ विनिवेशनप्रवृत्तिनिवृत्तिविनियोजनेषु ज्ञत्वात् स्वातन्त्र्याच्च तेषां भावानामीष्टे, न ते तस्येशते नाप्यात्मनः न च परस्परम्, अज्ञास्वतन्त्रत्वाभ्याम् । स तु प्रतिविशिष्टबुद्धित्वात् **स्वतन्त्रः**, तस्याभिप्रायेणैव प्रवृत्तिमापद्यन्ते धर्माधर्माण्वादयः । सोऽपि **चाभिप्रायप्रवृत्त्यापत्तेर्न** सन्निधिमात्रवृत्तिः, अतस्तेषां प्रवर्तयिता, **प्रवर्तयितृत्वात् कारणं** शक्तिमत् स एव, तेषां **शक्तिमता**मपि भाव्यत्वेनास्वातन्त्र्यात् तस्यैव **तत्प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात्** जगत्सर्गस्थित्यन्तरालप्रलयमहाप्रलयेषु, प्रवर्तनं प्रागौदासीन्येन स्थितानां धर्मादीनां सृष्टेः प्रवर्तनम्, प्रवृत्तानां पुनरुपसंहाराद् निवर्तनम्, विनियोगो दैव-मानुष-तैर्यग्योन-सरित्-समुद्रादि-तनु-करणाद्यवयवविभागविन्यासः, विष्णुमन्वादीनामधिकृतपुरुषाणामपि इहत्यपरमेश्वराभिप्रायानुरोधेन प्रवर्तमानाधिकृतराजस्थानीयादिपुरुषाणामिव तस्यैव प्रवर्तयितृत्वात् । अतस्तत्साधर्म्यप्रदर्शनार्थमाह **--अधिकृतपक्तृवत्** । तद्व्याख्यानार्थम्— **सम्भवनधारणे**त्यादि यावत् **प्रयोजनमात्रार्थत्वात् क्रियाया** इति । यथा हि राज्ञा नियुक्तः सूपकारः स्थालीकाष्ठतण्डुलादीनां सम्भवनधारणज्वलनविक्लेदनव्यापारेषु प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात् तत्तदात्मा भवति तथेश्वर इति । अथवा कर्तृकर्मकरणाधिकरणसम्प्रदानापादानानि
- /ms प्रतिकारकं पचादीनां क्रियाभेदाद् यथास्वशक्ति स्वातन्त्र्यात् कर्तॄणि, यथा अधिकरणं स्थाली निदर्शनमात्रं सम्भवनधारणे कुर्वती पचति इत्युच्यते, ज्वलनं कुर्वन्ति काष्ठानि पचन्ति इत्युच्यते, अधिश्रयणोदकासेचनतण्डुलावपनैधोऽप
327/mj

* * *

रोहणादिसमर्थं तथा भवत् पृथिव्युदकादि व्रीहिर्जायते भवति च भवति । सत्त्वतमःप्रकाशनियमप्रवृत्तिसत्त्वेऽपि प्रवर्तयितृत्वाद् रजोभवनवद्वा । दृष्टान्तबाहुल्यप्रदर्शनं प्रतिसिद्धान्तपरिदृष्टादृष्टादेः प्रवर्तयितृत्वख्यापनार्थम् ।

* * *

कर्षणादिक्रियाः कुर्वन् देवदत्तः पचति इत्युच्यते, इत्यादि प्रतिकारकं स्वातन्त्र्ये सत्यपि उपक्रमप्रभृत्यपवर्गपर्यवसानासु क्रियासु तस्यैव स्वातन्त्र्यात् सम्भवनादिप्रत्यक्षतायामपि पचनशक्तिमतामप्यधिकरणादीनां देवदत्तस्य प्र-

---

१ का] **काश तद्विध॰** प्र॰ ॥
६ ध] **धर्माण्वा॰** प्र॰ ॥
७ का] **कारण** प्र॰ ॥
८ क्तिम]
॰मत्(?ा)nayacakra-ms-bhā । अत्र कारणं शक्तिमतां स एव इत्यपि पाठः स्यात् ॥
११ ग्योन] **॰नात्सरित्॰** प्र॰ ॥
१४ अ] **इत॰** प्र॰ । अत्र **इत्यत॰** इत्यपि पाठः स्यात् ॥
१५ मा] **॰मात्रत्वात्** प्र॰ । दृश्यतां पृ॰ ३२७ पं॰ ९ ॥
१७ ज्व] **॰ज्वा॰** प्र॰ ॥
१७ प्र] **प्रवृत्तिविनियो॰** प्र॰ ॥
२० स] दृश्यतां पृ॰ १९४ टि॰ १ ॥

वर्तयितृत्वादेवोच्यते देवदत्त एव पचति इति, नान्यानि अनीश्वरत्वात् । तां मुख्यां कर्तृशक्तिं दर्शयति --**तेन पच्यते** तृतीयया कर्तरि विहितया **स पचती**ति वा प्रथमया तत्र विहिततिप्प्रत्ययसमानाधिकरणतया । पुनरपि स्फुटीकरणार्थमाह --***तेन पचनं क्रियत** इति यावदुक्तं भवति [तावदुक्तं भवति] तेन पच्यते स पचति इति । कुतः ? **प्रयोजनमात्रार्थत्वात् क्रियायाः**, प्रयोजनं परव्यापारणम्, विक्लेदव्यापारणार्थाः सम्भवनज्वलनादिक्रियाः, तासां च सर्वासां देवदत्तायत्तत्वात् स पचति तेन पच्यत इत्युक्तम् । § 949

दृष्टान्तान्तरमाह स्फुटीकरणार्थं व्यापित्वप्रदर्शनार्थं च --**साक्षाद्वा भवितृवत्** । तद्वर्णनम् --**यथा च सम्भवने**त्यादि यावद् **भवति च भवति**, न केवलं पचत्यादिबाह्यक्रियाविषयमेव प्रयोज्यत्वम्, किं तर्हि ? व्रीह्यादिभवनाद्यन्तःक्रियाविषयमपि प्रयोजनम् । **तथा भवत् पृथिव्युदकादि** बाह्यं **व्रीहिर्जायते भवती**त्यन्तर्भवनम् । सम्भवनधारणसमर्था पृथिवी, रोहणसमर्थमुदकम्, **आदि**ग्रहणाद् वर्द्धनसमर्था वायुकालादयः, तैः कारितस्य व्रीहिभवनस्य प्रत्यक्षतायामपि सत्यां व्रीहिर्जायते भवति अन्तःसन्निविष्टत्वातन्त्यात् तस्यैवेश्वरस्य प्रयोजकत्वादुच्यते --**भवति च भवती**ति, भवनमपि भवदेव भवतीति स्वरूपमात्र- लाभोऽपि तद्वशादित्यर्थः । § 950 - /ms

अथवा प्रस्तुतप्रधानकारणवादिसिद्धमेवेदं निदर्शनम् --**सत्त्वतमःप्रकाशे**त्यादि यावद् **रजोभवनवद्वा** । यथासङ्ख्यं सत्त्वस्य प्रकाशप्रवृत्तिस्तमसो नियमप्रवृत्तिश्चास्त्येवेत्युक्तं **सत्त्वं शब्दात्मना प्रवर्तमान**मित्यादिपरस्परोपकारवीते, प्रकाशादिलक्षणस्य सत्त्वस्य प्रवृत्तिर्गुरुवरणलक्षणस्य तमसश्च प्रवृत्तिर्यथासङ्ख्यम् इतरयोः ख्यापयति व्यवस्थापयति इति वचनात् । रजस्तु प्रवृत्तिलक्षणमेव प्रवर्तकमिष्टं विशेषतः, सत्यपि प्रवृत्तिसामान्ये करोति प्रवर्तयति इति वचनात् । तथा अदृष्टाण्वादिभूतकालादिप्रवर्तमानसामान्येऽपीश्वर एव प्रवर्तयितृत्वात् कारणमिति । **दृष्टान्तबाहुल्यप्रदर्शनं प्रतिसिद्धान्तपरिदृष्टादृष्टादेः प्रवर्तयितृत्वख्यापनार्थम्**, सिद्धान्तं सिद्धान्तं प्रति प्रतिसिद्धान्तं तेषु तेषु वैशेषिकादिसिद्धान्तेषु कल्पितानां परितोऽनुमानैर्दृष्टानामप्यदृष्टाणुप्रधानविष्ण्वादीनां प्रवर्तयिता ईश्वर इति दार्ष्टान्तिकोपनयनात् । § 951

---

१ ना]
नान्यनीश्वर°nayacakra-ms-bhā ।
नान्यमीश्वर° nayacakra-ms-ya ॥
३ प] पचतीवाnayacakra-ms-bhā
। पचतीव nayacakra-ms-ya ॥
४ *] एतच्चिह्नान्तर्गतः पाठो
nayacakra-ms-ya प्रतिषु नास्ति ॥
१० त्व] °त्वांnayacakra-ms-bhā ।
°त्वात् nayacakra-ms-ya ॥
११ व] °वन-
नाद्य°nayacakra-ms-ḍenayacakra-ms-līṃ
विना ॥

१३ व] वर्तन°nayacakra-ms-ya ॥
१८ न] नद्वाnayacakra-ms-bhā ।
°नाद्वा nayacakra-ms-ya ॥
१९ वृत्तिश्चा]
°श्चारवेत्युक्तंnayacakra-ms-ya ।
°श्चरेवेत्युक्तं nayacakra-ms-bhā ॥
१९ स] दृश्यतां पृ° ३१८ पं° ८ ॥
२४ बाहुल्य]
°ल्यमप्रद°nayacakra-ms-bhā ।
°ल्यमथद° nayacakra-ms-ya ॥

328/mj

इति स एव भवति, सर्वव्यक्तिप्रवृत्त्यात्मकत्वात् । एवमेव चास्याष्टमूर्तितोच्यते । § 952

इतरथा अदृष्टाणुप्रधानादेः प्रवृत्तिफलप्रकर्षापकर्षौ न स्याताम् । दृष्टौ च तौ । तयोरतो न विमर्दक्षमं कारणमस्तीश्वरकामचारेरणादृते । § 953

तनुकरणभुवनसाधनाय प्रवृत्तानि अदृष्टाणुप्रधानादीनि विशिष्टचेतनाधिष्ठिता- § 954

---

६ त] कः पुनरीश्वरस्य कारणत्वे न्यायः ? अयं न्यायोऽभिधीयते--प्रधानपरमाणुकर्माणि प्राक् प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते, अचेतनत्वात्, वास्यादिवदिति । यथा वास्यादि बुद्धिमता तक्ष्णा अधिष्ठितमचेतनत्वात् प्रवर्तते तथा प्रधानपरमाणुकर्माणि अचेतनानि प्रवर्तन्ते । तस्मात् तान्यपि बुद्धिमत्कारणाधिष्ठितानीति । तत्र प्रधानकारणिकास्तावत् पुरुषार्थमधिष्ठायकं प्रधानस्य वर्णयन्ति पुरुषार्थेन प्रयुक्तं प्रधानं प्रवर्तते, पुरुषार्थश्च द्वेधा भवति शब्दाद्युपलब्धिः गुणपुरुषान्तरदर्शनं चेति, तदुभयं प्रधानप्रवृत्तेर्विना न भवतीति । न, प्राक् प्रवृत्तेस्तदभावात् । यावत् प्रधानं महदादिभावेन न परिणमते तावन्न शब्दाद्युपलब्धिरस्ति न गुणपुरुषान्तरोपलब्धिरिति हेत्वभावात् प्रधानप्रवृत्तिरयुक्ता । अथास्ति, नासदात्मानं लभते न सन्निरुध्यत इति ? एवं च सति विद्यमानः पुरुषार्थः प्रधानं प्रवर्तयतीति न पुरुषार्थाय प्रधानस्य प्रवृत्तिः । न हि लोके यद् यस्य भवति स तदर्थं पुनर्यतत इति । सततं च प्रवृत्तिः प्राप्नोति कारणस्य सन्निहितत्वादिति, पुरुषार्थः प्रवृत्तेः कारणमिति पुरुषार्थस्य नित्यत्वात् सततं प्रवृत्त्या भवितव्यमिति । अथ विद्यमानोऽपि न प्रवर्तयति न तर्हि पुरुषार्थः कारणमिति । यस्याभावात् प्रधानं न प्रवर्तते यस्य च भावात् प्रवर्तते तत् कारणमिति ।... ...यदा भवन्तः सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति सा कुतो निवर्तत इति वक्तव्यम् । न चानिवृत्तायां साम्यावस्थायां वैषम्येण शक्यं भवितुम् । अथाङ्गाङ्गिभावस्यानियमाद् वैषम्यं भवति इति ? अत्रापि भवन्तं पर्यनुयुञ्महे--कथं साम्येनावस्थितमधिकं हीनं च भवति, नापूर्वोपचयो विद्यते न पूर्वहानमस्तीति ।... ...सोऽयं प्रधानवादो यावद् यावद् विचार्यते तावत् तावत् प्रमाणवृत्तं बाधते इति । ये परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रतीदमुच्यते--परमाणवः प्रवर्तन्त इति सततं प्रवृत्त्या भवितव्यम् । अथ कालविशेषापेक्षाः प्रवर्तन्ते, परमाणुभिः कालो व्याख्यातः । यथा अचेतनत्वात् परमाणवो बुद्धिमन्तमधिष्ठातारमपेक्षन्ते तथा कालोऽपीति, न हि तत्राचेतनत्वं निवर्तत इति । क्षीरादिवदचेतनस्यापि प्रवृत्तिरिति चेत्,...तन्न युक्तम्, साध्यसमत्वात् । यथैव परमाणवः स्वतन्त्राः प्रवर्तन्त इति साध्यं तथा क्षीराद्यचेतनं स्वतन्त्रं प्रवर्तत इति । यदि क्षीरादि स्वतन्त्रं प्रवर्तेत मृतेष्वपि प्रवर्तेत, न तु प्रवर्तते, अतोऽवगम्यते बुद्धिमत्कारणाधिष्ठितं तदपि । न चायं हेतुस्तस्मात् निवर्तते । एवं यावद् यावदचेतनं प्रवर्तते सर्वं तत् चेतनाधिष्ठितमिति । अयमपरो हेतुः--बुद्धिमत्कारणाधिष्ठितं महाभूतादि व्यक्तं सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवदिति ।(?") इति उद्योतकरविरचिते **न्यायवार्तिके** ४ । १ । २१ । उद्योतकरस्तु प्रमाणयति--भुवनहेतवः प्रधानपरमाण्वदृष्टाः स्वकार्योत्पत्तावतिशयबुद्धिमन्तमधिष्ठातारमपेक्षन्ते स्थित्वा प्रवृत्तेस्तन्तुतुर्यादिवत् । इति बौद्धाचार्यकमलशीलविरचितायां तत्त्वसङ्ग्रहपञ्जिकायाम्, का° ५० ॥

**इति स एव भवति,** इत्थमीश्वर एव भवति परमार्थतः । **सर्वव्यक्तिप्रवृत्त्यात्मकत्वात्,** सर्वासां व्यक्तीनां प्रवृत्तय आत्माऽस्य सर्वव्यक्तिप्रवृत्त्यात्मकः तद्विशिष्टबुद्धिशक्त्यावासरूपत्वात् तासाम्, **एवमेव चास्याष्टमूर्तितोच्यते** क्षिति-जल-पवन-हुताशन-यजमाना-ऽऽकाश-सोम-सूर्याख्याष्टमूर्त्तितास्य स्वशक्त्यावासरूपत्वात् तासु स एव भवति सा सा च । § 955

किञ्चान्यत्, प्रवृत्तिफलप्रकर्षापकर्षाभावप्रसङ्गादीश्वर एव कारणं नादृष्टादि न प्रधानादीत्यत आह — **इतरथेत्यादि** यावद् **दृष्टौ च तौ ।** यद्यदृष्टाण्वादेः प्रधानादेर्वा प्रवृत्तयः फलानि वा स्युः क्रियाणां पूर्वकृतकर्म- - /ms
फलप्रेरितानां तदनुरूपत्वात् फलानां च फलप्रेरितकर्मानुरूपत्वाद् मनुष्यनिर्वर्तनीया एव स्वभावमार्दवा 329/mj

* * *

न्येव प्रवर्तन्ते, सम्भूयैकार्थकारित्वात्, तक्षाधिष्ठितरथदारुगणवत् । तथा अचेतनत्वात् स्थित्वा प्रवृत्तेः तुर्यादिवत् ।

चेतनानधिष्ठितक्षीरदधिमेघादिवदनेकान्त इति चेत्, न, अदृष्टकर्तृकविषयप्रतिज्ञार्थाव्यतिरेकात् शब्दानित्यत्वसाधने प्रतिज्ञान्तर्नीतजलधिध्वन्यनित्यत्ववत् ।

* * *

दिक्रियाः कृत्वा मनुष्य एव पुनरपि स्यात्, मा भूत् सरागसंयमादिदेवगतिनिर्वर्तनीयक्रियासम्बन्धी तदनुरूपवैक्रियशरीरादिलब्ध्युत्कर्षभावः, तथा बह्वारम्भपरिग्रहादिनिरयायुःसंवर्तनीयकर्मभाक् तदनुरूपदुःखैकरसनारकत्वनिकृष्टफलानुभावी वा मा भूत्, परस्परानुरूपशालिबीजाङ्कुरादिहेतुकार्यभावप्रबन्धवद् विशिष्टविशिष्टबुद्धिस्वतन्त्रकारणप्रेरणाभावात् स्वानुरूपकार्यकारणानुबन्धसामर्थ्याभ्युपगमाच्च नादृष्टाद् न प्रधानादेर्वैषम्यं स्यात्, दृष्टं च वैषम्यमध्ययनविद्यागमानधिगमादि, उत्कर्षापकर्षयोरन्य**दतो न विमर्दक्षमं कारणमस्तीश्वरकामचारेरणादृते,** तदभिप्रायस्याप्रतिघातस्य प्रवृत्तिः कामचारः, तेन प्रेरणं भावानां प्रवर्तनं स्वाचाराणामप्यनिष्टफलसम्बन्धो दुराचाराणामिष्टफलसम्बन्धः, तस्मात् सर्वमीश्वरप्रवर्तितं प्रवर्तते, नान्यथा ।
§ 956

प्रयोगश्च --**तनु-करण-भुवनसाधनायेत्यादि** यावत् **तक्षाधिष्ठितरथदारुगणवदिति** । यथाप्रक्रियं शरीराणीन्द्रियाणि भुवनं च साधयितुमधितिष्ठद्भिरदृष्टैः प्रेरिताः परमाणवो **वैशेषिकाणां** प्रवृत्तानि सत्त्वादीनि प्रधानेन **साङ्ख्यानाम**न्येषां वा भूतानि काल-स्वभाव-नियत्याद्यधिष्ठितानीत्यभिमतानि प्रवर्त्यानि

३ ए] **एव चास्या॰** प्र॰ । दृश्यतां पृ॰ २४३-- २ ॥
५ स्व] **स्वशक्त्याव्यास॰** प्र॰ । अत्र सर्वशक्त्यावासरूपत्वात् इत्यपि पाठः स्यात् ॥
१० स्व] दृश्यतां पृ॰ २१४ टि॰ ११ ॥
१७ स] दृश्यतां पृ॰ २१४ टि॰ ११ ॥
१९ ब] दृश्यतां पृ॰ २१४ टि॰ ११ ॥
२३ मा] **॰माद्युत्कर्षा॰** प्र॰ ॥
२३ तो] **॰दतो विमर्द॰** प्र॰ ॥
३१ धिष्ठिता] **॰नीद्य॰** प्र॰ ॥

सप्रवर्तकानि **विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्त** इति प्रतिज्ञा । **सम्भूयैकार्थकारित्वा**दिति हेतुः, सम्भूयकारित्वं पूर्वपूर्वशक्ततारतम्यकारणानुमानोक्तेः, प- - /ms रमाणुसत्त्वादयः सम्भूय तन्वादित्वेनावस्थिताः परस्परेण सम्भूय गमनाभ्यवहरणसुखदुःखानुभवरूपाद्युपलब्धिसत्त्वगुणाधारतादि कार्यं कुर्वन्तो दृश्यन्ते, तत् सिद्धमेषां सम्भूयैकार्थकारित्वम् । **तक्षाधिष्ठितरथदारुगणवत्,** रथार्थो दारुसङ्घातो रथदारुगणः, स तक्ष्णा विशिष्टचेतनेनाधिष्ठितस्तथैतानि । **तथाऽचेतनत्वात्, तथे**ति तस्यामेव प्रतिज्ञायां **अचेतनत्वात्** इत्युपचयहेतुः, स एव रथदारुगणो दृष्टान्तः, वक्ष्यमाणो वा **तुर्यादिव**दिति । तनु-करण-भुवनानामचेतनत्वं च सिद्धम् । अथवा **स्थित्वा प्रवृत्तेस्तुर्यादिवत्,** यथा तुरिवेमशलाकानलिकारज्ञ्वञ्चनिकासूत्रादीनि प्रागप्रवृत्तानि कश्चित् कालं स्थित्वा प्रवर्तमानानि विशिष्टकुविन्दबुद्ध्यधिष्ठितानि पटनिष्पत्त्यै प्रवर्तन्ते तनुकरणभुवनानि तथेति । § 957

**चेतनानधिष्ठितक्षीरदधिमेघादिवदनेकान्त इति चेत्** । स्यान्मतम्--प्रतिविशिष्टबुद्धिना केनचिदनधिष्ठितेषु क्षीरदधिमेघादिषु सम्भूयैकार्थकारित्वाचेतनत्वस्थित्वाप्रवृत्तिधर्माणां दर्शनादनैकान्तिकता संशयहेतुतेति । एतच्च **न, अदृष्टकर्तृकविषयप्रतिज्ञार्थाव्यतिरेकात्,** अदृष्टोऽस्याः कर्ता विषयः सेयमदृष्टकर्तृकविषया प्रतिज्ञा, तस्याः प्रतिज्ञायास्तनुकरणभुवनधर्मिकायाः प्रतिविशिष्टबुद्ध्यधिष्ठितत्वसाध्यधर्मणः क्षीरदधिमेघादिधर्मिणामपृथ-
330/mj क्त्वात् प्रतिज्ञान्तःपातित्वाद् विपक्षाभावे हेतुव्यभिचाराभावाद्

* * *

स्थित्वाप्रवृत्तचेतनानधिष्ठितेश्वरवदनेकान्त इति चेत् ईश्वरस्य वा चेतनाधिष्ठितता तस्यापि चान्याधिष्ठिततेत्यनवस्था । न, चेतनाधिष्ठितप्रवृत्तित्वसाध्यधर्मत्वात् ।

देवदत्तादयस्तर्हि चेतनेश्वरानधिष्ठिताः प्रवर्तन्ते सोऽपि वेश्वरस्तद्वच्चेतनान्तराधिष्ठितः । उच्यते च त्वया चेतनानामपीश्वराधिष्ठानं पुरुषवादनिरसनाय--

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ महाभा॰ वन॰ ३० । २८§ 960

* * *

नानेकान्तः, **शब्दानित्यत्वसाधने प्रतिज्ञान्तर्नीतजलधिध्वन्यनित्यत्ववत्,** यथा अनित्यः शब्दः इति प्रतिज्ञाते कृतकत्वं देशकालाभ्यामनवरते जलधिध्वनौ

२ पू] पूर्वपूर्वपूर्व॰ nayacakra-ms-bhā । दृश्यतां पृ॰ ३२६ टि॰ ४ ॥
१० लिकार] रज्ज्वंचज ?निका॰ प्र॰ ॥
१० क] किञ्चित् nayacakra-ms-bhā ॥
११ कालं] स्थित्वा वर्त॰ प्र॰ ॥
२८ ज] ॰जलावि॰जलादि ?ध्वन्य॰ प्र॰ ॥

पुरुषादिभेदेन चानवरते सामादिशब्दे च दृष्टत्वादनेकान्त इति वचनं त- - /ms
दाभासचोदनम्, उदन्वत्सामादिशब्दानामप्युपादानभेदभिन्नानाम् शब्दः इति श्रोत्रग्राह्यत्वाभेदेन प्रतिज्ञातानां शब्दत्वानतिक्रमात् पक्षान्तर्नीतत्वात्, तदनित्यत्वं कृतकत्वाविनाभावि शब्दादन्यस्य नित्यस्य कृतकस्यादर्शनाच्च जायते, देशकालोपादानभेदभिन्नस्याभेदेऽपि सत्युपलभ्यधर्मणोऽनुपलभ्यत्वाच्छब्दव्यक्तिधर्मित्वाच्च जात्युत्तरं च, तस्मादनुत्तरमिति । § 961

**स्थित्वाप्रवृत्तचेतनानधिष्ठितेश्वरवदनेकान्त इति चेत्** । स्यान्मतम्--यथेश्वरः स्वयं प्रागप्रवृत्तान् स्थित्वा प्रवर्तयन्नपि चेतनान्तरेणानधिष्ठितः प्रवृत्तश्च तथा तन्वादीनि स्थित्वा प्रवृत्तानि स्युरित्यनेकान्तः । **ईश्वरस्य वा चेतनाधिष्ठितते**त्यादि, एवमनैकान्तिकत्वानिच्छायां वा चेतनाधिष्ठितोऽसावीश्वरः प्राप्तः स्थित्वा प्रवृत्तेरदृष्टाणुप्रधानादिवत्, अतोऽन्येश्वरता ग्रहाधिष्ठितस्त्रीपुरुषादिवत् । **तस्यापि चाधिष्ठातुरन्याधिष्ठिततेत्यनवस्था** स्यादिति । एतच्च **न, चेतनाधिष्ठितप्रवृत्तित्वसाध्यधर्मत्वात्,** नैष दोषः, चेतनाधिष्ठितप्रवृत्तित्वं हि साध्यते धर्मः, स चाचेतनानामेव तद्धर्मिविषयत्वात्, चेतनानां सिद्धत्वात् प्रयोजनाभावाच्च । तनुकरणभुवनसाधनप्रवृत्तादृष्टाणुप्रधानादीनि ह्यचेतनानि धर्मीणि चेतनाधिष्ठितत्वधर्मेण विशिष्टानि साध्यन्त इति प्रतिज्ञाविषयाज्ञानाददोष इति । § 962

**देवदत्तादयस्तर्हि चेतनेश्वरानधिष्ठिताः प्रवर्तन्ते,** सामर्थ्यादचेतनधर्मिविषयं चेतनाधिष्ठानं साध्यत इति प्रतिज्ञाविषयव्यवस्थायां चेतनानां देवदत्तादीनां चेतनेश्वरेणाधिष्ठानं न प्राप्नोति, ततो देवदत्तादिवच्चेतनानधिष्ठितानां तन्वादिसाधनार्थादृष्टाणुप्रधानादीनामनेकान्तः । **सोऽपि वेश्वरस्तद्वच्चेतनान्तराधिष्ठित** इति प्राप्तम् । **उच्यते च त्वया** इष्यत एव त्वया चेतनानामपीश्वराधिष्ठानम्, यथा—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ महाभा॰ वनप॰ ३० । २८ § 965

**पुरुषवादनिरसनाये**ति श्लोकवचनप्रयोजनमाह, मा भूत् पुरुषकारणवादप्रसङ्गः तदवस्थमात्रं तन्वदृष्टप्रधानाण्वादि इति, अत उक्तं भवता **अज्ञो जन्तुरनीशोऽय**मिति । § 966
331/mj

२ त्सा] ॰त्सादिश॰ प्र॰ ॥
७ वृ] ॰वृत्ति॰nayacakra-ms-ya ॥
९ ना] ॰धिष्ठितेत्यादि प्र॰ ॥
१४ चाचेत] ॰तनमेव प्र॰ ॥
१८ त्ता] ॰त्तायस्तर्हि प्र॰ ॥
१८ रा] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२० धिष्ठिता] ॰तानि nayacakra-ms-ya । ॰त nayacakra-ms-bhā ॥
२१ नां] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२१ सोऽपि] चेश्व॰nayacakra-ms-ya ॥

न, प्राग् विशिष्टबुद्धिचेतनप्रतिज्ञानात्, विशिष्टबुद्धित्वमपि चास्यार्थानामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात् । § 967

तन्वादीनि न विशिष्टबुद्धिना कृतानि पद्मनालकण्टकमयूरचन्द्रकादिवत् । न, दधिमेघादिवदुक्तोत्तरत्वात् । लघुप्रकाशगुरुवरणप्रवृत्तिनियमानां विशिष्टबुद्धिपूर्वकता, मिथःप्रत्यनीकसम्भूयैकार्थकारित्वात्, पाचकाधिष्ठितानलोदकौदनसाधनवत् । अन्योन्याभिभवनमिथुनवृत्तित्वविपरिणामादिति चेत्, न, परिणामस्यापि कार्यत्वात् । *धर्मान्तरैक्य... ... ...। § 968

अत्रोच्यते --**न, प्राग् विशिष्टबुद्धिचेतनप्रतिज्ञानात्,** प्रागस्माभिर्विशेषितम्--विशिष्टबुद्ध्यधिष्ठितानि तन्वादीनि । विशिष्टबुद्धित्वं चापराधीनं स्वातन्त्र्यम् । तत् कुतः सिद्धमिति चेत्, उच्यते— **विशिष्टबुद्धित्वमपि चास्यार्थानामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात्,** तन्वादीनि विशिष्टबुद्धिपूर्वकाणि अर्थक्रियायोग्यत्वेन सन्निविशिष्टावयवत्वात्, स्थानगमनशयनासनाहारादिप्रयोजनानि हि तन्वादिषु क्रियन्ते तत्क्रियायोग्यावयवसन्निवेशात् स्थपतिबुद्धिपूर्वकप्रासादवत् । तस्मादर्थक्रियायोग्यत्वेनार्थानां सन्निवेशकः स स्थपतिवत् । तस्माच्च विशिष्टबुद्धिरिति । § 969

अनैकान्तिकतोद्भावनार्थमाह --**तन्वादीनी**त्यादि यावत् **पद्मनालकण्टकमयूरचन्द्रकादिव**दिति । नहि प्रशस्तशुभवर्णगन्धरसस्पर्शस्य लक्ष्मीनिलयस्य जलाशयालङ्करणस्य कमलस्य ग्रहणधारणोपभोगादिसाधनभूते नाले केनचिदसूयया मा ग्रहीत् कश्चित् इति कण्टकाः कृताः, नीलोत्पलनालादिष्वप्यतिप्रसङ्गात् । न च मयूरचन्द्रकाणामिन्द्रचापवर्णप्रतिस्पर्धिविचित्रवर्णता कृता कुड्यादिषु चित्रकरेणेव केनचिद् विशिष्टबुद्धिना, चित्रकरवेतनदानाद्यभावप्रसङ्गादिति । अत्रोच्यते --**न, दधिमेघादिवदुक्तोत्तरत्वात्,** क्षीरदधिमेघादिवत् पद्मनालकण्टकमयूरचन्द्रकादीनां तन्वादिवच्चादृष्टकर्तृकविषयप्रतिज्ञार्थाव्यतिरेकादनैकान्तिक- त्वाभाव इत्युक्तोत्तरमेतत् । § 970 - /ms

एवं तावत् सामान्येन विशिष्टबुद्धिपूर्वकतोक्ता, प्रस्तुत**का**पिलमतापेक्षया चैवं प्रतिज्ञायते --**लघुप्रकाशे**त्यादि यावत् **पाचकाधिष्ठितानलोदकौद-**

---

५ मिथः] दृश्यतां पृ° २५२-- १ ॥
८ *] धर्मान्तरैक्यापत्तिर्हि परिणामः कार्यत्वाद् रथादिवद् विशिष्टबुद्धिमद्विहितः इत्याशयको मूलपाठः स्यादिति सम्भाव्यते ॥
१६ त] सुखं शाश्वतं नेतरेषाम् इति श्वेताश्वतरोपनिषदि पाठः ॥
१७ या] **तस्याश्च** प्र° ॥
१८ च] यावत्पनाल°nayacakra-ms-bhā । यावत् नीलालत्पनाल° nayacakra-ms-ya ॥
२१ च] °चन्द्रिका°nayacakra-ms-ya ॥
२२ र] यावत्पनाल°nayacakra-ms-bhā । यावत् नीलालत्पनाल° nayacakra-ms-ya ॥

**नसाधनव**दिति । यथा परस्परप्रत्यनीकयोरग्न्युदकयोरप्रत्यनीकत्वविधायिना विशिष्टबुद्धिना पाचकेनाधिष्ठितयोः सत्यपि मिथः प्रत्यनीकत्वे तद्बुद्धिवश-वर्तिनोः संहत्यकारित्वादोदनसाधनं दृष्टं तथा लघुगुरुणोः प्रकाशवरणयोः प्रवृत्तिनियमयोश्च मिथो विरुद्धयोरपि संहत्य महदादिभावेनैकार्थकारित्वाद् विशिष्टबुद्धिपूर्वकतेति । **अन्योन्याभिभवनमिथुनवृत्तित्वविपरिणामादिति चेत् ।** स्यान्मतम्--सत्त्वरजस्तमसामेवाङ्गाङ्गिभावः पुरुषार्थमुद्दिश्य प्रवृत्तानां वैषम्य-विपरिणामाद् महदादि 332/mj

* * *

अन्वाह च--

एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्
॥ श्वेताश्व° ६ । १२§ 973

* * *

साधनम्, नान्यः प्रयोक्तेति । एतच्च **न, परिणामस्यापि कार्यत्वात् ।** तद्व्याच-ष्टे --***धर्मान्तरेक्या**दि, परिणामो हि धर्मान्तरनिषेधो धर्मान्तराविर्भवनं च, तद्द्वयभूतं कार्यम्, स तु परिणामः कार्यत्वात् पूर्ववत् प्रतिज्ञार्थाव्यतिरेकाद् रथादिवत् सोऽपि विशिष्टबुद्धिमद्विहितः । तस्मादयुक्तम्--स्वत एव परिणमन्ते सत्त्वादय इति । § 974

**अन्वाह चे**ति जिनमतानुसारेण । **एको**ऽद्वितीयः प्रधानो वा **वशी** ज्ञत्वस्वातन्त्र्याभ्याम् **निष्क्रियाणा**मज्ञास्वतन्त्राणाम्, परतन्त्रा ज्ञा अपि हि निष्क्रिया एव । **बहूना**मनन्तानां प्रधानाण्वादीनां कर्मकरणसम्प्र-दानापादानाधिकरणप्रधानशक्तीनामनन्तानामपि प्रवर्तयितृत्वात् स्ववशीकर्तुं शक्तत्वाद् वशीति । **एकं बीजं** प्रधानं महदादिविपरिणत्या **बहुधा** ब्रह्मादिस्त- - /ms
म्बान्तानन्तभेदभिन्नजगत्तया **यः करोति** सृजति अधितिष्ठति आत्माभिप्राया-नुरूप्येण तथा तथा व्यवस्थापयति । **तमी**श्वरं स्वतो भिन्नस्य भाव्यभव-नस्य प्रधानादिसंज्ञस्य भावयितार**मात्मस्थ**मात्मनि स्थितं क्षित्याद्यष्टमूर्तिस-र्वगतं सर्वत्र तासां सद्भावाद् **येऽनुपश्यन्ति** तत्प्रसादादेव तज्ज्ञानानुसारेण योगाभ्यासप्रसादक्रमेण । केऽनुपश्यन्ति ? **धीरा** अविचलितयोगसमाधयः । को योगः ?

---

१ क] °चन्द्राकार-णामि°nayacakra-ms-bhā ॥
५ वृत्ति] °रचेतन°nayacakra-ms-ya । °रेचेतन° nayacakra-ms-bhā ॥
५ रिणामा] °कयोप्रत्य° प्र° ॥
११ शा] °त्वपरि°nayacakra-ms-ya ॥
१३ ना] ताभ्यः प्र° ॥
१४ *] अत्र **धर्मान्तरेत्यादि** इत्यपि पाठः स्यात् ॥
१४ र] °**निषेधान्न धर्मा**° प्र° । अत्र °**निरोधो धर्मा**° इत्यपि पाठः स्यात् ॥
२२ त्वा] °**त्वाशीति** प्र° ॥

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कः समाधिरित्येष षडङ्गो योग उच्यते ॥ अमृतर्कश्चैव समाधिश्च इति अमृतनादोपनिषदि अत्रिस्मृतौ च तृतीयचरणः । श्लोकोऽयम् अत्रिस्मृतावपि विद्यते ॥तनादोप० ६ § 977

तत्रेन्द्रियाणां विषयेभ्यो मनसश्च प्रत्याहरणं प्रत्याहारः । प्राणायामस्त्रिविधः--रेचकः कुम्भकः पूरक इति । तत्र रेचक आन्तरं वायुं बहिर्निष्काशयति नासिकाद्वारेण । पूरकः बाह्यमन्तः प्रवेश्य पूरयति । कुम्भकः पूर्णकुम्भवदस्पन्दं वायुं सामीप्येनावस्थापयति । ध्यानमिष्टदेवताचिन्तनं वा । धारणा यथाभ्यासं हृदयादिषु प्रदेशेषु मनसोऽवस्थापनम्, यथा पूर्वं नाभौ ततो हृदये कण्ठे नासिकाग्रे भ्रुवोर्मध्ये ललाटे मूर्द्धनीति । तर्कः शून्यागारगिरिकन्दराद्येकान्ते शुचौ देशे शरीरमृजु आयस्य दन्ताग्राणि जिह्वाग्रेण सन्धाय पल्यङ्क-स्वस्तिक-वीरासनाद्यासनं समपादादिस्थानं वा आस्थाय ध्यायतो मे समाधिर्भवतीति तर्कयेत् अनेनेत्थं कृतेन क्रियाविशेषेण आहार-विहार-स्वाध्यायादिना ध्यानसमाधिर्भवति इति तदुपायविचार ऊहस्तर्कः । ध्यानयोगाभिरतिः समाधिरित्येष षडङ्गो योगः । अनेन योगेन सर्वत्र क्षित्यादिमूर्तिमीश्वरं दृष्ट्वा पश्चाद् भावितात्मा तमात्मस्थमेव पश्यति--यदत्र मम शरीरे कठिनं सा पृथिवी परमेश्वरमूर्तिः, यद् द्रवं तज्जलम्, ऊष्मा तेजः, चलं वायुः, शुषिरमाकाशम्, यच्चैतन्यं स यजमानः, चक्षुः सूर्यः, जिह्वा सोमो *

* * *

अयं विधेरुभयभाक् । विधिर्व्याख्यातो लोकवदनपवादप्रवृत्तिः, तस्य उत्सर्गात् स विधीयते, सर्वसर्वात्मकत्वाद् निरपवादः प्रवर्तत एव । नियमः सन्निधिप्रयोज्यसतोरप्रवृत्तेः तयोरसत्सत्त्वात् ।

सादृश्यसामान्यं च शब्दार्थः, सर्वसर्वात्मकत्वेऽपि च सृष्ट्यर्थवत्त्वाद् नाविकल्पः । वाक्यमपि च पृथक् सर्वपदम्, तस्मात् सर्वसर्वात्मकत्वादेव । द्रव्यार्थभेदोऽर्थः ।

* * *

मनो वेत्यन्येष्वपि अवयवेषु यथासम्भवं येऽनुपश्यन्ति ते धीराः शाश्वतीं शान्तिमाप्नुवन्ति तेनैवेश्वरेण सायोज्यं निर्वाणं मोक्षमित्यर्थः । नेतरे प्रधान-पुरुष-नियत्यादिकारणिन इति । § 978

४ कु] **कुंभकधारक इति** प्र° ॥
७ वा] अत्र **वाशब्दस्य** किं प्रयोजनमिति न ज्ञायते । तस्य सार्थकत्वे कश्चन पाठोऽत्र त्रुटित इति सम्भाव्यते । अथ ध्यानम् । तद् द्विविधं सगुणं निर्गुणं चेति । सगुणं मूर्तिध्यानम्, निर्गुणमात्मयाथात्म्यम् । इति **शाण्डिल्योपनिषदि** ॥
८ ल] **ललाट** प्र° । नाभिकन्दे च हृन्मध्ये कण्ठमूले च तालुके । भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि धारयेत् ॥ इति जाबालदर्शनोपनिषदि ७ । १२ ॥
१७ *] **°मादि चेत्** प्र° ॥

नयस्वरूपाख्यानार्थमाह --**अयं विधेरुभयभाक्,** उभयं विधिं नियमं च भजत इत्युभयभाक् । **विधिर्व्याख्यातो लोकवदिति** पूर्वमिति स्मारयति । पुनः सङ्क्षेपेण व्याचष्टे --**अनपवादप्रवृत्तिः,** न कश्चिदर्थमयमपहरति किं **न एतेन यदि सामान्यं यदि विशेषः ?** इत्यादि, **तस्य** विधे**रुत्सर्गाद्** विधानात् **स** विधि**र्विधीयते,** कस्मात् ? **सर्वसर्वात्मकत्वाद् निरपवादः प्रवर्तत एव,** प्रवर्तते, न क्वचिद् व्याहन्यते, अयं हि नयः सर्वं सर्वात्मकम् इतीच्छति यत् प्राक् सूचितं सन्निध्यापत्तिव्याख्याने तदेवात्रापि वक्ष्यते, **नियमः सन्निधिप्रयोज्यसतोरप्रवृत्तेः,** यावेतावनन्तरोक्तौ सन्निधिर्भवति आपत्तिभवनसहाय ईश्वरप्रवर्त्यो वा प्रयोज्यः प्रधानादृष्टाण्वादिर्भावः तयोर्द्वयोरप्यप्रवृत्तेरसत्त्वम् । किं कारणम् ? **तयोरसत्सत्त्वात्,** तदुभयं ह्यसदेव सदित्युच्यते स्वतन्त्रस्य कर्तुर्ज्ञस्यैव भवनात् तद्विलक्षणस्याभवनापन्नस्याप्रवृत्तस्यासत्त्वात् खपुष्पवत् । तस्माद् नियमश्चेति विधिर्विधीयते नियम्यते चेति । ततोऽयं विधेरुभयभागिति । § 979

शब्दार्थोऽधुना --**सादृश्यसामान्यं च शब्दार्थः,** वाक्यार्थस्य वक्ष्यमाणत्वात् पदार्थ इति गम्यते । सदृशसन्निवेशमानैर्मीयत इति समानम्, समानं दृक्कं - /ms यत्र द्रष्टॄणां तत् सदृशम्, सदृशं समानम्, समानभावः सामान्यं जातिलिङ्ग-प्रत्यया-ऽभिधानेष्विति, नान्यापोहो न समानवस्त्वतिरिक्ततत्त्वादि वा तदनुपपत्तेः । एतत् सामान्यं शब्दार्थः । ननु सामान्यमविकल्पात्मकं पुरुषनियत्यादि सर्वसर्वात्मकत्वादिति पूर्ववादप्रसङ्ग इति चेत्, नेत्युच्यते, **सर्वसर्वात्मकत्वेऽपि च सृष्ट्यर्थवत्त्वात्,** जगत्सृष्टिलक्षणोत्सर्गव्यापित्वात् तदर्थवत्त्वादस्य नयस्य **नाविकल्पः** इति सम्भन्त्स्यते प्रकृतशब्दार्थः, अभिहितन्यायेन सत्त्वादिशब्दादितन्वादिविकल्पप्रत्ययस्य सत्यार्थत्वादद्वैतप्रत्ययस्यासत्यार्थत्वादिति पदार्थ उक्तः । वाक्यार्थोऽधुना — **वाक्यमपि च पृथक् सर्वपद**मिति, वाक्येऽवधारिते तदर्थावधारणसौकर्यात् । **आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी** वाक्यप॰ २ । १ इत्यादिषु वाक्यलक्षणविकल्पेषु अस्य नयस्य मतेन पृथक् सर्वं पदं वाक्यम्, वाक्यार्थः पृथक् पृथक् सर्वपदार्थ इति, यथा देवदत्त ! गामभ्याज शुक्लाम् इत्यत्रैकैकं पदं 334/mj

* * *

सङ्ग्रहदेशत्वाद् द्रव्यार्थः । द्रव्यमपि गुणसन्द्रावः, गुणानामेकीभावेन द्रवणं तेनापि तद्वशित्वात् ।

---

३ क] किश्चि॰ प्र॰ ॥
३ ति] दृश्यतां पृ॰ ३४ पं॰ ४ ॥
४ ना] ॰नात्म विधि॰ प्र॰ ॥
७ य] यथाक्त सूचितंnayacakra-ms-ya । यथाकः सूचितं nayacakra-ms-bhā ॥
८ व] ॰वत्यापत्तिभवनसहायमीश्वर॰ प्र॰ ॥
१३ तोऽयं] विधिरु॰ प्र॰ । दृश्यतां पं॰ ९ ॥
१७ ऽभिधा] ॰धाष्वितिnayacakra-ms-ya ॥
२२ त्वादित] ॰तत्वादि॰ प्र॰ ॥
२५ इ] दृश्यतां पृ॰ ११४ पं॰ १८ ॥
२७ य] यस्माnayacakra-ms-bhā ॥

उपनिबन्धनमस्य दुविहा पण्णवणा पण्णत्ता--जीवपण्णवणा अजीवपण्णवणा च प्रज्ञापनासू° १ । ९ । किमिदं भंते ! लो+एत्ति पवुच्चति ? गोयमा । जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि ।

* * *

वाक्यम्, किं कारणम् ? **तस्मात् सर्वसर्वात्मकत्वादेव,** यस्माद्देवदत्तोऽपि गवात्मकोऽभ्याजात्मकश्च तथा प्रवर्तनात् तत्तदापत्तेः, तान्यपि तथेति तस्मात् सर्वसर्वात्मकत्वात् पृथक् पृथक् सर्वं पदं वाक्यमिति । एतस्य विध्युभयनयस्य **द्रव्यार्थभेदोऽर्थः** पूर्वविरुद्धत्वान्नयानामविकल्पार्थाद् विधिविधिनयाद् विकल्पार्थद्रव्यार्थतया भिद्यते । § 980

- /ms आर्षोक्तानां नयानां कस्मिन्नन्तर्भावः ? इत्यत आह **--सङ्ग्रहदेशत्वाद् द्रव्यार्थः,** सङ्ग्रहनयस्यापि शतधा भेदात् तद्देशस्तदेकदेशो द्रव्यशब्दार्थः । कतमस्मिन् विग्रहे इति चेत्, उच्यते **--द्रव्यमपि गुणसन्द्रावः** । तद्व्याख्या--सम् एकीभावे, **द्रु गतौ** पा° धा° ९४५, तस्माद् **गुणानामेकीभावेन द्रवणम्,** कारणे कार्यस्य सत्त्वात् सतामेव सुखादीनां रूपादीनां पृथक् पृथक् सन्निहितानामैक्यगमनाज्जीवपुद्गलपरिणामः सङ्गमनम् । आह--विध्युभयनयत्वात् सन्निहिततद्विधशक्तीश्वरपृथक्त्वादण्वादीनां तदेकैकसर्वात्मकत्वाच्च तेषां भवतु एकीभावः, मा भूदीश्वरस्येति । नेत्युच्यते, **तेनापि तद्वशित्वात्** सन्निहिततच्छक्तिनापि सहेश्वरेणैकीभावे तच्छक्तिव्यक्तेर्नान्यथेति । अत एव चास्य नयस्याद्वैतवादाद् भेदः । § 981

आह--किं स्वमनीषिकयैतदुच्यते ? आहोस्विदस्त्यस्य किञ्चिदुपनिबन्धनमार्षमपि ? इति । अस्ति इत्युच्यते, **उपनिबन्धनमस्य--दुविहा पण्णवणा पण्णत्ता जीवपण्णवणा अजीवपण्णवणा** चेति । अथवा ***किमिदं भंते ! लो+एत्ति पवुच्चति ? गोयमा ! जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि** । § 982

---

१ दु] से किं तं पन्नवणा ? पन्नवणा दुविहा पन्नत्ता, तं जहा--जीवपन्नवणा य अजीवपन्नवणा य । इति प्रज्ञापनासूत्रे पाठः ॥
११ आ] अर्षोक्तानांnayacakra-ms-bhā । अथोक्तानां nayacakra-ms-ya ॥
१७ त] तदे° प्र° ॥
१९ क्तिव्य] °व्यक्ति° ? ॥
१९ ए] एवास्य nayacakra-ms-bhā ॥
२२ दु] दुविधnayacakra-ms-bhā ॥
२३ प] nayacakra-ms-bhānayacakra-ms-vi विना पन्नत्ता ॥
२३ *] किमिदं लो+एत्ति पवुच्च+इ गो+अमाnayacakra-ms-ya ॥
२५ जाव] ईसि°nayacakra-ms-bhā ॥

इति विध्युभयारस्तृतीयो नयचक्रस्य ॥

# ४ अथ चतुर्थो विधिनियमारः ।

335/mj

ओँ अर्हम् § 984

नन्वेवं त्वदुक्ता एवोपपत्तयः सर्वप्राणीश्वरत्वं साधयन्ति, सुखाद्यात्मसंवेद्यलक्षणत्वात् कर्मणः सुखाद्यदृष्टाणूनामपि च कर्मत्वात् कर्मप्रवर्तनाभ्युपगमात् § 985

**नन्वेव**मित्यादि । पूर्ववदस्मिन् दर्शने न परितुष्यत उत्थानमित्यभिसम्बन्धः । **ननु** इत्यनुज्ञापने, **ननु त्वदुक्ता एवोपपत्तयः** प्रत्येकं **सर्वप्राणीश्वरत्वं साधयन्ति,** बाह्याध्यात्मिकसुखदुःखमोहमात्रत्वाज्जगतः सदसद्वेद्यमोहान्तरायभेदानां **सुखादि**त्रयविपाकफलत्वानतिवृत्तेस्त**दात्मसंवेद्यलक्षणत्वात् कर्मणः**, सुखादिसंवेदनेनैव हि तत्कारणभूतं कर्म स्वकार्येण फलेन लक्ष्यतेऽनुमीयते सामान्यतोदृष्टानुमानेन देशान्तर- प्राप्त्या इव आदित्यगतिः । - /ms
अतः कारणे कार्यस्य सत्वात् कार्ये कारणोपचारात् सुखादयः कर्म, अन्नप्राणत्ववत् । अदृष्टं धर्माधर्माख्यं परैरिष्टमेव कर्मेति, आत्मापि कर्म, कथम् ? तद्याद्दृष्टमात्मनो रागादिकर्मविपाकपरिणत्यवस्थस्य प्रयोगपरिणामात् कर्मतामापन्नम् । पुनरपि सुखाद् रागादि, ततः पुनः कर्म, ततः सुखादि फलम् । तद्य जीवपरिणामात्मसात्कृतकार्मणयोग्यपरिमाणपरमाणुसमूह एवात्मस्थमेकीभूतं चात्मना, यथोक्तम्—

योगैः सकृत् स्वयोगाद् मूर्तः सन् बाह्यमर्थमादत्ते ।
आत्तस्य चानुभवनं बन्धं प्रति स च ततोऽन्यः ॥ § 988

तद्य संवेद्यम्, कर्तुः संवेदनात् । ततः संवेद्यलक्षणत्वात् कर्मणः **सर्वेश्वरते**ति सम्भन्त्स्यते । कर्म हि प्रतिप्राणि नियतकर्तृकं स्वविपाकसुखादित्वेन संवेद्यम्, तेनाणूनामेव कर्मत्वपरिणामापन्नानामात्मैकीभावेन वेदनं संवेदनम्, तेन च पुरुषेण तेषां तथा प्रयोजनात् कर्तृत्वम्, अतः **सुखाद्यदृष्टाणूनामपि च कर्मत्वा**दित्याह । प्राक् प्रतिपादितं हि द्व्यणुकत्र्यणुकादिसंयोगैः पृथिव्युदकव्रीह्यङ्कुरादिपरिवृत्तिरूपेणात्मनस्तेषां चैकत्वं सर्वसर्वात्मकत्वं च ।

---

५ रितुष्य ] ॰ष्यता प्र॰ ॥
६ न ] नन्व त्व॰ प्र॰ ॥
१४ रा ] रागादि फलं फलादि ततः पुनः कर्मnayacakra-ms-ya ॥
१६ चा ] वात्मना प्र॰ ॥
१७ मूर्तः ] सत्बाह्यमर्थ॰nayacakra-ms-bhā । सत्बाद्यमर्थ॰ nayacakra-ms-ya ॥
२१ संवेद्य ] ॰द्यं तेनाणू॰ प्र॰ ॥

तस्मात् कर्मकारणां जगत्प्रवृत्तिं साधयन्ति त्वदुक्ता एवोपपत्तयः । इतश्च कर्मपूर्वकं जगत्, **कर्मप्रवर्तनाभ्युपगमात् सर्वप्राणिनाम्,** कर्मवशादेव हि प्राणिनः शुभाशुभजातिकुलरूपाद्युत्कर्षापकर्षाः । यथोक्तम्-- § 989
336/mj

सर्वप्राणिनां कर्तृत्वात् कर्तुरेव भवितृत्वाभ्युपगमात् तस्यैव भवितुश्च प्रयोजनात् सर्वेश्वरता । § 990

ईश्वरात्तु कर्मणः प्रवर्तनं किं सतः, असतः ? तद्यद्यभूतस्य ततोऽद्वैतं तस्यापि तदात्मकत्वात् । भूतस्य चेत् प्रागपि तदस्ति, तच्च ईश्वरात्मैव तथाभूतेस्तथाप्रवृत्तेस्तदापत्तेः, तथापि सुतरामद्वैतम् तदात्मकत्वादेव । अथ यस्मै प्रवर्त्यते यथा तस्मात् तर्हि तत् तथाभूतं तद्वशात् तथेश्वरप्रवृत्तेः, ततस्तस्य प्रवर्तने स एवेश्वरः । § 991

स्वकर्मयुक्त एवायं सर्वोऽप्युत्पद्यते नरः ।
स तथा क्रियते तेन न यथा स्वयमिच्छति ॥ § 993

यथाहारः काले परिणतिविशेषक्रमवशात्
- /ms सुखं पथ्योऽपथ्योऽसुखमिह विधत्ते तनुभृताम् ।
तथा धर्माधर्माविति विगतशङ्कामपि कथां
कथं श्रोतुं नेया विषयविषवेगक्षतधियः ? ॥ § 997

किञ्चान्यत्, **कर्तृत्वात् प्राणिनाम्** इति वर्तते । मा भूवन्नकृताभ्यागमकृतप्रणाशकर्त्रन्तरफलसङ्क्रान्त्यादयो दोषा इति सदसदाचाराः प्राणिन एव कर्तारो भोक्तारश्चाभ्युपगन्तव्याः, अन्यथा हिताहितप्राप्तिपरिहारार्थानां शास्त्राणामानर्थक्यप्रसङ्गात् । ततः **कर्तुरेव भवितृत्वाभ्युपगमात्** । कः कर्ता ? यः स्वतन्त्रः । यः स्वतन्त्रो भविताऽपि स एव । स्यान्मतम्--नन्वीश्वरः प्रयोक्तृत्वात् कर्तेत्युक्तम्, नेत्युच्यते, **तस्यैव भवितुश्च प्रयोजनात्,** सर्वः प्राणी प्रत्येकं भविता प्रयोजयति आत्मना आत्मानं स्वकृतकर्मविपाकात्मकरागद्वेषभयगौरवादिधर्मचोदितः । यथोक्तम्—

प्रयत्न एवापरजन्मजोऽयं सूर्यादयः श्राद्धजनप्रवादाः ।
उत्पश्यतामेव हि दैवसिद्धिमुत्साहिनं श्रीर्भजते मनुष्यम् ॥
इति ।§ 1000

१७ श्रोतुं ] नेमा प्र° ॥
२२ यः ] कः स्व° प्र° ॥

तस्मात् तन्वादिप्रधानाण्वादिषु सत्स्वपि प्रवर्त्येषु तेषामेव कर्मसाद्भूतानां प्राणिनां भवितृत्वात् तत्तदापत्तेः सर्वप्राणिनां स्वातन्त्र्यात् कर्मवशप्रेरितकार्यकारणभावेन सततभवनात् तथाप्रवर्तकस्यैकैकस्य सर्वात्मकत्वात् **सर्वेश्वरता** इति साधूक्तम् । § 1001

इदानीं त्वदिष्टेश्वरकारणत्वे तु दोषा उच्यन्ते --**ईश्वरात् त्वि**त्यादि । इदं चिन्त्यम्--ईश्वरात् **कर्मणः प्रवर्तनं किं सतः, असतः ?** किं चातः ? **तद्यद्यभूतस्य** कर्मण ईश्वरः प्रवर्तकः **ततश्चाद्वैतं** पुरुषादिवादवत् प्राप्तं **तस्यापि तदात्मकत्वात्** कर्मणोऽपीश्वरात्मकत्वादीश्वरस्यैव कर्मत्वेनोत्पत्तेः । **भूतस्य चेत्,** अथ भूतस्य कर्मण ईश्वरात् प्रवृत्तिस्तत एतत् प्राप्तम् --**प्रागपि तत् कर्मास्ति,** कारणे कार्यस्य सत्त्वात् । **तच्चेश्वरात्मैव,** तनुकरणादिभाव्यवत् **तथाभूतेस्तथाप्रवृत्तेस्तत्तदापत्ते**रित्यादिभिर्युक्तिभिः, **तथापि सुतरामद्वैतं** तदात्मकत्वादेव पुरुषावस्थावदीश्वरभाव्यतदात्मकाण्वादिभवनवद् वा । **अथ यस्मै प्रवर्त्यते यथा** । अथाचक्षीथाः--न तत् कर्मेश्वरात्मकम्, किं तर्हि ? यस्मै प्राणिने शुभमशुभं वा नरनारकतिर्यगमरविचित्रभेदरूपेण येन येन प्रकारेण प्रवर्त्यते तेनेश्वरेण तत्तत्प्राण्यात्मकं तदिति । अत्रोच्यते — **तस्मात् तर्हि तत् तथाभूतम्,** प्रत्येकं प्राणिनः कारणात् तस्मात् तस्मात् तथा तथा भूतमित्यर्थः,

- /ms

337/mj

* * *

अथ तत्कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्तते, कृततां प्रति तावत् स्वातन्त्र्यं सिद्धं तस्यैव, तत्कृतं हि कर्मैव ईश्वरप्रसादमुत्पादयति । द्रव्यादिपञ्चकापेक्षसेवादिक्रियाफलप्रत्यक्षवत् ।

त्वदभिमतेश्वरस्तु यदि स्वतन्त्रः कर्मानपेक्षश्च प्रवर्तयति ततः प्रतिपुरुषनियामककर्माभावेऽनुपपन्नस्थानविग्रहेन्द्रियोपभोगाभ्युदयप्रत्यवायापवर्गादिविशेषमिदं जगत् स्यात्, तुल्यकारणत्वात्, पटतान्तवत्ववत् ।

* * *

**तद्वशात् तथेश्वरप्रवृत्तेः, ततस्तस्य प्रवर्तने स एवेश्वरः,** कृतं त्वदिष्टमीश्वराख्यमात्मवशेन तथा प्रवर्तयतस्तस्य तस्य प्राणिन ईश्वरत्वम्, नेश्वरस्य तथा प्रवर्त्यत्वात् कर्मकरवत् । § 1002

**अथ तत्कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्तते** । अथ मतम्--प्राणिभिः कृतमपि कर्म ईश्वरकृतमेव, ईश्वरवशात् प्रवर्तमानत्वात् । तद्यथा--द्वयोः पुरुषयोस्तुल्यपुरुषकारयोरपि राजा एकस्यैव प्रसीदति नेतरस्येति फलं राजवशेन दृष्टं न पुरुषकर्मवशेन तथेश्वरवशात् तत्क-

---

८ क]
कर्मत्वेनोपपत्तेःnayacakra-ms-ya ॥
११ रित्या]
°दियुक्तिभिःnayacakra-ms-bhā ॥
१४ न] नरकतिर्य° प्र° ॥

२५ कृ] क्षतंnayacakra-ms-ya ।
त्कंतं nayacakra-ms-bhā ॥
२८ साद]
°ददीश्व°nayacakra-ms-bhā ।
°दादीश्व° nayacakra-ms-ya ॥

र्मप्रवृत्तिरिति । अत्रोच्यते --**कृततां प्रति तावत् स्वातन्त्र्यं सिद्धं तस्यैव** प्राणितोषितेश्वरेण प्राण्यनुष्ठेयकर्मप्रत्ययप्रसादोत्पत्तेः, तत्र च राज्ञो निमित्तमात्रत्वात् । पुरुषकृतकर्मजन्यप्रसादराजवदेव ईश्वरस्याप्यन्यतरपुरुषकृतकर्मप्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्यम्, **तत्कृतं हि कर्मैवेश्वरप्रसादमुत्पाद-** - /ms **यति** अन्यतरेण कृतं नेतरेणेत्यर्थः, अन्यतरपुरुषकृतकर्मप्रत्ययस्येश्वरप्रसादस्य तेनोत्पाद्यत्वात् तस्मात् पुरुषकर्मापेक्षत्वादीश्वरप्रवृत्तेः कर्मप्राधान्यं प्रवृत्तौ फले चेति । स्यान्मतम्--राजवदेव कर्मणः प्रवृत्तौ तत्फलदाने चेश्वरोऽपेक्ष्यत्वात् प्रधानं कारणमिति । एतच्च न, यस्माद् **द्रव्यादिपञ्चके**त्यादि यावत् **प्रत्यक्षवत्** । द्रव्यं क्षेत्रं कालं भावं भवं चापेक्ष्य हि कर्मणां प्रवृत्तिः कृतानां च फलं प्रत्यक्षत उपलभ्यते । स एव पुरुषः कर्ता द्रव्यं दाता देयं वा द्रव्यं वस्त्रसुवर्णादि । क्षेत्रं ग्रामनगरारण्यरणभूम्यादि यत्र तत् प्राप्यते फलम् । कालः कस्मिंश्चित् काले दिवा रात्रौ पूर्वाह्णेऽपराह्णे सद्यश्चिराद्वेति । भावः प्रसन्नः कुपितः इत्यादि । भवो हस्तिमहामात्रयोः शरीरानुरूपाहाराभरणादिदानमिति । अत्र प्रयोगः--परत्रापि प्राणिकृतफलं प्रतिनियतद्रव्याद्यपेक्षम्, सुखादिक्रियायाः फलत्वात्, द्रव्यादिपञ्चकापेक्षसेवादिफलवत् । तस्माद् द्रव्यादिपञ्चकापेक्षमपि कर्म फलदाने स्वतन्त्रप्राणिनियतेः प्रधानम् । नेश्वरं च कर्मापेक्षते, परतन्त्रत्वात् तस्येति । § 1003

**त्वदभिमतेश्वरस्त्वि**त्यादि । अस्तु तावदीश्वरस्य स्वातन्त्र्यं कर्मानपेक्षा च तस्य जगदुत्पादनार्थं प्रधानादि प्रवर्तयतः, प्राणिनां कर्माकारणत्वे तदनपेक्षायां च दोष उच्यते--तद्यथा **ततः प्रतिपुरुषे**त्यादि, पुरुषं पुरुषं प्रति द्रव्यादिपञ्चकत्वेन नियामकं नियतं यदि कर्म न स्यात् ईश्वर एवाविशिष्टो हेतुः स्यात् ईश्वराख्यस्य कारणस्याविशिष्टत्वादविशेषः स्यात् । कस्य ? दैव-मानुष-तैर्यग्योनाख्यप्राणिगणस्य । कीदृग् विशेष इति चेत्, उच्यते-- 338/mj स्थानविग्रहेन्द्रियोपभोगलक्षणो विशेषो न स्यात् । कस्मात् ? तद्विशेषहेतो

* * *

अनपेक्षा च किं कर्मणः सतः, असतः ? यद्यसत एव, किम् ? क्रियाविलोपः । उक्तं च वः शास्त्रे--योगं साधयिष्यन्... ...निद्रातन्द्राप्रमादालस्यरहितश्च स्यात् इत्यादि । कर्माभावे च प्राणिनां सदा मुक्तत्वात् तन्वादिसृष्टिरीश्वरस्यानर्थिका । ततश्च भाव्यभावकभेदाभावाद् द्वैतकल्पनानिर्मूलता । अथ तु विद्यमानावेव धर्माधर्मौ नापेक्षते स ततोऽकृताभ्यागमकृतप्रणाशौ दोषौ स्याताम्, आक्षीणोदितकर्माशयबन्धमोक्षाभ्याम् ।

---

२ प्रा ] **प्राणिनोषितेश्वरेण** प्र° । अत्र प्राणिनो विनेश्वरेण इत्यपि पाठः स्यात् ॥
७ दाने ] **वेश्व°** प्र° ॥
१३ इ ] इत्यादिः ? ॥
१६ स्व ] **स्वतंत्र** । **प्राणि°**nayacakra-ms-bhā । स्वतन्त्रं प्राणि° ? ॥
१९ प्र ] **प्र°** प्रतिषु नास्ति ॥
१९ क ] **कर्मकारणत्वे**nayacakra-ms-ya । **कारणत्वे** nayacakra-ms-bhā ॥

* * *

रीश्वरस्य समानत्वात् । स तु विशेषो द्रव्य-क्षेत्र-काल-भाव-भवापेक्षनियतः प्रतिपुरुषं च नियामके कर्मणि तत्पञ्चकापेक्षविपाके सति विशिष्टे स्यात् । - /ms दृष्टश्च सोऽस्मदभीष्टप्रतिनियतद्रव्यादिविपाककर्मप्राणिगणेश्वरत्वे सति युज्यते--केषाञ्चिदभ्युदयः केषाञ्चित् प्रत्यवायः केषाञ्चिदपवर्ग इति । अत्र प्रयोगः **--अनुपपन्नस्थानविग्रहेन्द्रियोपभोगाभ्युदयप्रत्यवायापवर्गादिविशेषमिदं जगत् स्यात्, तुल्यकारणत्वात्, पटतान्तवत्ववत्,** यथा पटस्तन्तुकारणत्वाविशेषात् तान्तवः न मार्तिकः सौवर्णो वेति जात्याकृतिवर्णाद्यविशिष्टस्तथेदं जगत् स्यात्, न तु भवति । तस्मादयुक्तम् । अथवा प्रतिनियतद्रव्याद्यपेक्षविपाकानेकेश्वरकारणपूर्वकमेवेदं जगत्, प्रतिविशिष्टजात्याकृतिवर्णादिमत्वात्, घटपटरथादिवत् । तस्मात् कर्मापेक्षमीश्वरत्वं सर्वप्राणिनामिति ।

§ 1004

अभ्युपेत्यापि कर्मानपेक्षां तत्र दोषं ब्रूमः **--अनपेक्षा चे**त्यादि । **किमिय**मीश्वरस्य धर्माधर्मलक्षणस्य **कर्मणो**ऽनपेक्षा **सतः ? असतः ?** । किञ्चातः ? **यद्यसत एव** धर्माधर्मयोरसतोरेवानपेक्षा, **किमिति** प्रश्नः, ततः किमिति चेत्, उच्यते **--क्रियाविलोपः,** असतोर्हि तयोः खपुष्पखरविषाणयोरिव कापेक्षा ? ततश्च हिताहितप्राप्तिपरिहारार्थाः सर्वाः क्रिया विलुप्येरन्, इष्यन्ते च ताः, यस्मादुक्तं च वः **शास्त्रे--योगं साधयिष्य**न्नित्यादि गतार्थं यावद् **निद्रातन्द्राप्रमादालस्यरहितश्च स्यादित्यादि** इत्याचारविधायिग्रन्थस्मारणम् । किञ्चान्यत्, **कर्माभावे** चेत्यादि यावद् **निर्मूलता,** अकर्मत्वात् प्राणिनः सदा मुक्ताः स्युः । ततश्च तन्विन्द्रियविषयसम्बन्धिनो न भवन्ति । ततश्च तन्वादिसृष्टिरीश्वरस्यानर्थिका । ततश्च भाव्यभावक- - /ms भेदाभावः । तस्माद् **भाव्यभावकभेदाभावा**दीश्वरकर्मप्रधानाण्वादि**द्वैतकल्पनानिर्मूलता** । एवं तावदसतः कर्मणोऽनपेक्षा न युक्ता । **अथ तु विद्यमानावेव धर्माधर्मा**वभ्युदयप्रत्यवायनिःश्रेयसक्रियायां **नापेक्षते स** ईश्वरः स्वतन्त्रत्वात् प्रयोजनाभावाच्च तयोः विद्वद्व्याख्यानादिक्रियासु बलीवर्दानपेक्षणवदिति मन्यसे **ततोऽकृताभ्यागमकृतप्रणाशौ दोषौ स्याताम्** । कथम् ? यथासङ्ख्य**माक्षीणोदितकर्माशयबन्धमोक्षाभ्याम्** । यावत्क्षीणकर्मणोऽपि बन्धाभ्युदयप्रत्यवायसम्बन्धी अकृताभ्यागमः स्यात्, कुतः ? धर्माधर्मनिरपेक्षत्वात् स्वभावपुरुषादिवादिमतवत् । उदितात्यन्ताशुभकर्माशयस्य नारकादेरपि मुक्त्यभ्युदयसम्बन्धी कृतप्रणाशः स्यात् धर्माधर्मनिरपेक्षत्वात् पुरुष-

---

२ द्र] उदयखयखओवसमोवसमा जं च कम्मुणो भणिया । दव्वं खित्तं कालं भवं च भावं च संपप्प ॥ ५७५ ॥ इति **विशेषावश्यकभाष्ये** ॥

८ जा] जातिः पटत्वम्, आकृतिः संस्थानम्, वर्णो नीलादिः ॥

१० विपाका] °केनेके°nayacakra-ms-ya ॥

१९ स्यादित्या] **°दिरित्याचार°** प्र° ॥

२५ भ्यु] यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । १ । १ । २ ।--**वै° सू°** ।अधर्मोऽप्यात्मगुणः कर्तुरहितप्रत्यवायहेतुः ।--इति **प्रशस्तपादभाष्ये** ॥

स्वभावादिवादिमतवदेव, अनिष्टं चैतत् । एवं तावदीश्वरस्य कर्मानपेक्षा अनिष्टापत्तेरयुक्ता । § 1005
339/mj

अथ कर्मापेक्षः प्रवर्तते ततस्तान्येव कर्माणि ईश्वराणि, तेषां तस्यापि तथा भावयितृत्वात् । न स तानि तथा भावयति, तथा भाव्यमानत्वात्, अनापन्नस्यासत्त्वात् खरविषाणवत्, अस्वतन्त्रत्वाच्छब्दादिवत् । भवति कर्ता स्वतन्त्रः, तथा प्रवर्तनवृत्तत्वात्, तन्तुपटवत् । § 1006

ईश्वरस्यापि च कर्मणि वृत्तेः सर्व एव पुरुषः सन्निहिततद्विधशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः स्वतन्त्रः तथाप्रवृत्त्यापत्तेः आ ईश्वरात् प्रवर्तयितृत्वात् § 1007

**अथै**वंविधानिष्टापत्तिव्यावृत्त्यर्थं **कर्मापेक्षः प्रवर्तते** इति मन्यसे **ततस्तान्येव कर्माणि** कर्तॄणि स्वतन्त्राणि भवितॄणि **ईश्वराणि** । कस्माद्धेतोः ? **तेषां तस्यापि तथा भावयितृत्वात्,** यस्मात् तमपीश्वरं तेन तेन प्रकारेण भवन्तं भावयन्ति तान्येव कर्माणि, **न स तानि** कर्माणि **तथा भावयति,** कुतः ? **तथा भाव्यमानत्वात्** प्रधानेन शब्दादिवदिति वक्ष्यमाणदृष्टान्तत्वात् । यथा च पृथिव्युदकादीन् व्रीहिरेव तथा भावयति पृथिव्याद्यपेक्षोऽपि तथापत्तेः, न पृथिव्यादयस्तथानापत्तेः; एवं कर्माण्येवेश्वराणि तथा भावयितृत्वात्, न त्वदिष्टेश्वरस्तथा भाव्यमानत्वादिति । स्यान्मतम्--पृथिव्युदकादीन्यपि भावयन्ति एव *व्रीहिं व्रीहित्वेनानापन्नान्यपीति । एतच्चायुक्तम्, तेषामसत्त्वात्, असत्त्वं च
- /ms **अनापन्नस्यासत्त्वात् खर- विषाणव**दिति सन्निधिभवनदूषणे प्रक्रान्तमेव न्यायं दर्शयति । **अस्वतन्त्रत्वाच्छब्दादिव**दिति एष दृष्टान्तः सर्वत्र प्रधानकारणत्वसाधर्म्येणोपात्तः **कापिलान्** प्रति, यथा प्रधानस्वातन्त्र्यात् तत्कारणत्वं गमयति शब्दादि आरातीयकारणत्वाभावं चास्वातन्त्र्यात् तेषामिति नाव्यक्तमिति व्यक्तमित्येव वा प्रधानता भवतीति यथा त्वयैवोक्तं तथैवेश्वरोऽस्वतन्त्रत्वात् कर्मापेक्षत्वादकारणं तान्येव कारणानीति गमयति ताभिरेव त्वदुक्ताभिरुपपत्तिभिः । अतो यदुक्तं **त्वदुक्ता एवोपपत्तयः सर्वप्राणीश्वरतां साधयन्ती**ति तत् साधु । तद्भावयन्नाह — **भवति कर्ते**त्यादि प्राग्व्याख्यातार्थान्येव भवत्येकार्थपदानि यावत् **तन्तुपटव**दिति । यथा तन्तव एव पटनिष्पादनेन

५ स्या] दृश्यतां पृ॰ ३२५ पं॰ ३ ॥
१५ य] तथा चा प्र॰ ॥
१९ *] व्रीहिव्रीहित्वेनमनाप॰ प्र॰ ॥
२३ ना] नाव्यक्तमित्यव्यक्तस्येव वाnayacakra-ms-bhā । नाव्यक्तमिव व्यक्तस्येव वा nayacakra-ms-ya । अत्र न व्यक्तमित्यव्यक्तमित्येव वा इत्यपि पाठः स्यात् । अथवा नाव्यक्तमित्येव व्यक्तमित्येव वा इत्यपि पाठः स्यात् ॥
२६ त्व] दृश्यतां पृ॰ ३३५ पं॰ २ ॥
२८ व] ॰त्येकद्वेकार्थ॰ nayacakra-ms-bhā । ॰त्येकद्विकार्थ॰ nayacakra-ms-ya ॥

भवन्त**स्तथाप्रवर्तनवृत्तत्वात्** पटकारणानि तथा पुरुषा एव कर्तार इति ।

§ 1008

**ईश्वरस्यापि** चेत्यादि तासामेवोपपत्तीनामितोमुखतां भावयति अनेनापि ग्रन्थेन । यथा त्वया प्रागुपपादितं ब्रुवता **पूर्वपूर्वशक्ततारतम्येन सन्निहिततद्विधशक्तिर्विशिष्टबुद्धि**रिति तथेहापि ताभिरेवोपपत्तिभिस्तैरेव च तन्त्वंश्वादिभिर्दृष्टान्तैः **कर्मणि वृत्तेः** कर्मनिष्ठत्वात् सृष्टातिशयप्रकर्षस्य कर्मणां पुरुषत्वात् **सर्व एव पुरुषः सन्निहिततद्विधशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः**, प्रतिविशिष्टबुद्धिना तेनैश्वरेणान्यैश्च शास्त्रकारैर्विश्वदृश्वभिरपि प्रमाणीकृतास्तत्क्रियास्तत्क्रियाफलपरिज्ञानार्थत्वाच्छास्त्रकारप्रभृतीनां सिद्धशास्त्राणामनतिशङ्क्यत्वाच्च । स च **स्वतन्त्रः, तथाप्रवृत्त्यापत्तेः** तेन प्रकारेण कर्मिप्राणिप्रवृत्ति- वदीश्वरस्यापि प्रवृत्त्यापत्तेः, **एश्वरात् प्रवर्तयितृत्वा**दिति, **आ** - /ms
**ईश्वरात्** यावदीश्वरस्तावत् प्रवर्तयितृत्वा 340/mj

* * *

कारणम्, शक्तिमत्प्रवृत्त्यप्रवृत्तिदर्शनात्...पक्त्रादिवत्, यावदे[वदृश्यतां पृ० ३२८ पं० १ ॥मे]वास्य सर्वत्वात् सर्वमूर्तिता । अपि च उत्कर्षापकर्षदर्शनात् प्रवृत्त्यनुभवफल... ...पुरुषादृतेऽप्रवृत्तेरेव उत्कर्षापकर्षौ न निर्बीजेश्वरकामचारेरणात् ।

कर्मापेक्षत्वेऽपि नेश्वरवैयर्थ्यम्, तदभावे प्रवृत्त्यभावात्, दार्वाद्यपेक्षरथकारवदिति चेत्, न, इतरत्रापि तुल्यत्वात् । तद्यथा--ईश्वरापेक्षत्वेऽपि न कर्मवैयर्थ्यम्, तत एव, रथकारापेक्षरथदारुवत् । प्रवर्तयितृत्वाच्चेश्वरस्य तथा प्रवर्तकं कर्म, कर्मणः पुरुषः, इति पुरुष एवेश्वरः । एवं प्रतिघातप्रसङ्गोऽपीश्वरस्य, सापेक्षप्रवृत्तित्वात्, रथकारवत् । यथा रथकारे उपादानोपकरणासामर्थ्यवैकल्ययोः

* * *

दीश्वरस्य प्रवर्त्यत्वात् **कारणानि** सर्वपुरुषाः । **शक्तिमत्प्रवृत्ती**त्यादि, ईश्वरस्यापि तेषामेव शक्तिमतां पुरुषाणां शक्तिसाकल्यसन्निध्यसन्निध्योः **प्रवृत्त्यप्रवृत्तिदर्शना**दिति तदेवोपपत्तिजातं स्मारयति यावत् **पक्त्रादिवदिति, आदि**ग्रहणाद् **रजोवत् प्रवृत्तिवदि**त्यादि, पूर्ववदेव ग्रन्थं चातिदिशति --**यावदेवमेवास्य सर्वत्वात् सर्वमूर्तिता, एवमेव चास्य क्षित्याद्यष्टमूर्तितोच्यते** इत्येतस्मादवधेरारातीयो ग्रन्थः सर्वो द्रष्टव्यस्ताभिरेवोपपत्तिभिः सर्वप्राणीश्वरत्वे तद्वदेवेति । पुनरपि **चोत्कर्षापकर्षदर्शना**दित्यादिरीश्वरसर्गसाधनार्थो ग्रन्थः **प्रवृत्त्यनुभ-**

---

५ त] °तद्विविध°nayacakra-ms-bhā । दृश्यतां पृ० ३२६ पं० १, टि० ५ ॥
७ त] °तद्विविध°nayacakra-ms-bhā । दृश्यतां पृ० ३२६ पं० १, टि० ५ ॥
९ त्क्रिया] °याफल°nayacakra-ms-ya ॥
१५ प्र] दृश्यतां पृ० ३२८ पं० ३ ॥
२५ स] **°सन्निध्योः** प्र० प्र० ॥
२७ र] दृश्यतां पृ० ३२७ पं० २ ॥
२७ चा] **चादिशति** प्र० ॥
२८ स्मा] **°स्मादवेरारा°** प्र० ॥

वफलेत्यादिस्तद्वदेव यावत् **पुरुषादृतेऽप्रवृत्तेरेव उत्कर्षापकर्षौ न निर्बीजेश्वरकामचारेरणा**दिति कर्मकारणत्वार्थो गतार्थः । तस्मात् कर्मापेक्षत्वात् सर्वसर्वात्मकत्वात् सर्वेश्वरतेति । § 1009

**कर्मापेक्षत्वे** इत्यादि यावद् **रथकारवदिति चेत्** । स्यान्मतम्--कर्मापेक्षत्वेऽपि न व्यर्थमीश्वरकारणत्वम्, **तदभावे प्रवृत्त्यभावात्** । यत्र यदभावे प्रवृत्त्यभावः प्रवर्तकस्य तत्रेश्वरस्याप्यवैयर्थ्यं दृष्टम्, यथा रथकारप्रवृत्तौ रथार्थं दार्वाद्यपेक्षणमिति चेन्मन्यसे, तन्न, **इतरत्रापि तुल्यत्वात्** । तत् कथमिति चेत्, प्रयोगत एव दर्श्यते विपर्ययसिद्धिः, **तद्यथा--ईश्वरापेक्षत्वेऽपि न कर्मवैयर्थ्यम्, तत एव** हेतोः, **रथकारापेक्षरथदारुव**दिति विरुद्धैकान्तिकः । § 1010

तदुपसंहृत्याह --**प्रवर्तयितृत्वाच्चेश्वरस्ये**त्यादि यावत् **पुरुष एवेश्वर** इति
- /ms । प्रवर्तयिता हीश्वरः, दासस्य स्वामिवत् । तच्च प्रवर्तयितृत्वं कर्मणः सिद्धमुक्तविधिना प्रवर्त्यत्वं चेश्वरस्य, **तथा प्रवर्तकं कर्म, कर्मणः पुरुषः** प्रवर्तत इति प्रकृतत्वाद् गम्यते, **इति**शब्दो हेत्वर्थे, तस्मात् **पुरुष एवेश्वरः** सर्व इति । एवं कर्मेश्वरतापि तु यथैवं तथोत्तरत्र भावयिष्यते । पुरुषस्य तावत् सर्वस्येश्वरत्वमुक्तमिति । **एवं प्रतिघातप्रसङ्गो**ऽपीत्यादि । किञ्चान्यत्, प्रतिहन्यते च त्वदभिमतेश्वरः **सापेक्षप्रवृत्तित्वाद् रथकारवत्** । अस्य साधनस्य व्याख्या --**यथा रथकार** इत्यादि, **उपादानं** दारु, **उपकरणानि** वास्यादीनि, तेषाम**सामर्थ्यं** वैगुण्यं सतामेव **वैकल्यं** त्वन्यतमाभाव एव, तत्र **प्रतिघातो**
341/mj **दृष्टः** इति वाक्यशेषः । **तथे**त्यादि दार्ष्टा

* * *

प्रतिघातस्तथा अपचितकुशलमनुजिघृक्षतः उपचितकुशलं चोपजिघांसतस्तस्य यद्यप्रतिघातः स्यात् स्यात् स्वातन्त्र्यम्, न तु भवति, पुरुषकृतकर्मप्रत्ययेन ईश्वरप्रवृत्तिप्रतिघातदर्शनात् ।

यत्तूच्यते--सर्गादौ अप्रतिहतस्वशक्तिवशादेव शरीरादीन्युत्पाद्य प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामुपदिशति, मध्यकाले च तेषां स्वमर्यादानुष्ठानानुरूपेण फलेन इष्टेनानिष्टेन वा अनुग्रहं करोति, अयमनुग्रह एव तेषां तदृणमोक्षणवत्, मोक्षमार्गोपसेविनश्च सायोज्यं गमयति, अन्तकाले च शरीरेन्द्रियभूतवत् कुशलाकुशले संहृत्य प्रलयक्षपायां स्वापयति, यदपि चाकाङ्क्ष्यते तस्य सर्वज्ञत्वं सर्वकारि-

* * *

न्तिकम्, सापेक्षप्रवृत्तित्वसाधर्म्यानुगमेनोपनयनं रथकारे कार्यम्, वैधर्म्येण

१ पुरुषाद्] °दृप्रवृ° प्र° ॥
४ का] °कारत्ववदिति nayacakra-ms-ya ॥
६ स्याप्य] °प्यवैषम्यं प्र° ॥
६ र] रथार्थ- दार्वा°nayacakra-ms-pānayacakra-ms-raṃnayaca ॥
१३ प्र] प्रवर्तक इति ? ॥
२४ प्र] दृश्यतां पृ° ३४५ पं° २४ ॥
२६ अ] दृश्यतां पृ° ३४३ पं° १७ ॥

तु दर्शयति --**अपचितकुशलमनुजिघृक्षत** इत्यादिना । पुरुषमपचितशुभकर्माणमनुग्रहीतुमिच्छतस्तद्विपरीतं चोपहन्तुमिच्छत**स्तस्येश्वरस्य यद्यप्रतिघातः स्यात् स्यात् स्वातन्त्र्यम्, न तु भवति,** अपेक्ष्यस्य कर्मणः स्वकृतकर्मवशस्य **प्रत्ययेन** तद्वशेन **ईश्वरस्य प्रवृत्तिप्रतिघातदर्शनात्** । न चेदेवमिष्यते, शुभकर्माणं दुःखेनेतरं च सुखेन योजयेत् । तथा च अकृताभ्यागमकृतप्रणाशौ स्याताम् इत्युक्तम्, तच्च नेष्टम् । तस्मात् **पुरुषकर्मप्रत्ययेन** ईश्वरप्रवृत्तिप्रतिघातोऽस्ति, प्रवृत्तिप्रतिघाताच्च नैश्वर्यं तस्य प्रतिघात्यत्वात् पृथग्जनवदित्यनीश्वरः स इति । § 1011

**यत्तूच्यत** इत्यादि यावत् **प्रलयक्षपायां स्वापयतीति** । कालभेदेन सापेक्षनिरपेक्षप्रवृत्तिपक्षयोरभ्युपगमादुभयथापि सिद्धेः प्रवृत्तिप्रतिघातासम्भवाददोषः । तद्यथा --**सर्गादौ** धर्माधर्मविकलानां शरीरेन्द्रियविषयोत्पादने निरपेक्षोऽप्रतिहतस्वशक्तिवशादेव शरीरादीन्युत्पादयति, तांश्चो**त्पाद्य** बुद्धानां सुप्तोत्थि- तानां **धर्माधर्ममर्यादामुपदिशति** तपोदानयज्ञादि कुरुत, मा कार्ष्ट हिंसानृतस्तेया[गम्या]गमनादीनि इति, तयोश्च धर्माधर्मयोः सीमाच्छेदेन व्यवस्थां मर्यादामुपदेशेन व्यवस्थापयति । **मध्यकाले च तेषां** प्राणिनां यथास्वं धर्माधर्ममर्यादामनुतिष्ठतामनुष्ठानानुरूपेण **फलेनेष्टेन अनिष्टेन वा** विषयोपभोगलक्षणेना**नुग्रहं करोति** यदा तदा सापेक्षोऽप्रतिहतस्वशक्तिवशादेव । स्यान्मतम्--धर्मानुष्ठानफलोपभोगेन इष्टेनानुग्रहो युज्यते, कथमधर्मानुष्ठानफलोपभोगेनानिष्टेन युक्तः ? इत्यत्रोच्यते --**अयमनुग्रह एव तेषां तदृणमोक्षणादिति** । ये पुनस्तदुपदिष्टमोक्षमार्गप्रस्थितास्तांश्च **मोक्षमार्गोपसेविनः सायोज्यं गमयति** । कोऽसौ मोक्षमार्गः ? माहेश्वरो योगविधिः । तानात्मना सह युङ्क्ते इति सयुक्, तद्भावः सायोज्यं तेषामीश्वरसाद्भावः, तं गमयति नयति । एतद् मध्ये सापेक्षमैश्वर्यम् । **पुनरप्यन्तकाले च शरीरेन्द्रियभूतवत्,** यथा शरीरेन्द्रियाणि भूताख्यांश्च विषयानुपसंहरति तथा **कुशलाकुशले** तेषां धर्माधर्मावपि **संहृत्य** तान् पुरुषान् सर्गाहनि संसृतवतस्तेन धर्माधर्मफलेनेष्टानिष्टोपभोगात्मकेन दिवसव्यायामपरिश्रमाभिभूतान् बालकान् पुत्रकानिव पिता सर्वपुरुषान् संसारहेतुभूतधर्माधर्मानुपसंहृत्य **प्रलयक्षपायां स्वापयती**त्यन्तेऽपि निरपेक्षोऽप्रति

- /ms

342/mj

* * *

४ प्र] **प्रवृत्तिघात°** प्र° ॥
५ अ] दृश्यतां पृ° ३३८ पं° ५ ॥
९ स्वा]
**सापपती°**nayacakra-ms-bhā ।
**सायपती°** nayacakra-ms-ya ।
दृश्यतां पृ° ३४४ पं° १४ ॥
१२ तिह] °हतः प्र° ॥
१२ रीरा] °दीनुत्पा° ? ॥
१३ मा] **हिंसां मा**
**कार्ष्ट**nayacakra-ms-ya ॥
२७ र्मा] °धर्माधर्मावुपसंहृत्य ? ॥
२८ स्वा] **सापयती°** प्र° । दृश्यतां पृ° ३४४ पं° १४ ॥
२९ त्वा] सर्वकर्तृत्वसिद्धौ च
सर्वज्ञत्वमयत्नतः । सिद्धमस्य यतः कर्ता
कार्यरूपादिवेदकः ॥ ५४ ॥ अथ सर्वज्ञत्वं

त्वात् तदपि नैव, अस्यानर्थकार्थप्रवृत्तबालादिप्रवृत्तिवदज्ञक्रियासाधर्म्याद् धर्माधर्मोपदेशप्रवृत्तेरनर्थकार्थविषयत्वात् । यस्याभावे यस्याभावो यस्य च भावे यस्य ध्रुवो भावस्तत् कारणम्, इतरत् कार्यम् । न च धर्माद्यभावे शरीरादेरभावः, सर्गादौ शरीरादिनिर्वृत्त्यभ्युपगमात् । न च धर्मादिभावे ध्रुवः शरीरादेर्भावः, अदत्तफलकुशलाकुशलसंहारादन्तकाले ।

यथा चोपदेशेऽनभिज्ञत्वं तस्य तथा प्राणिनामप्यनुग्रहक्रियाया अपि यदा

* * *

हतस्वातन्त्र्यः स एवेष्टः । तस्मादुभयथापि अपेक्ष्यानपेक्ष्य च तदैश्वर्यसिद्धेरदोष एव दोषाभिमत्या त्वयोद्भावित इति परपक्षः । § 1012

अत्र वयं ब्रूमः--तत्कारित्वात् तज्ज्ञत्वमिति यत् सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव । कर्मणामेव तन्निरपेक्ष प्रवृत्तौ तस्य प्रतिघातादनैश्वर्यं सृष्टप्राणिसंसारकाले सर्गाद्यन्तयोश्च अकृताभ्यागमकृतप्रणाशादिदोषास्तदवस्था एवेत्यपरिहृतदोषत्वाद् न किञ्चिदेतत् । अन्योऽपि च दोषः --**यदपि चाकाङ्क्ष्यते तस्य सर्वज्ञत्वं सर्वकारित्वात्** करणस्य ज्ञानाविनाभावात् सर्वं चेत् करोत्यवश्यं सर्वमसौ वेत्तीति सर्वकारित्वात् सर्वज्ञ इति, **तदपि नैवो**पपद्यते, **अस्यानर्थकार्थप्रवृत्तबालादिप्रवृत्तिवदज्ञक्रियासाधर्म्याद**ज्ञोऽसौ बालवदसमीक्षितप्रवृत्तित्वादित्येतदनया कल्पनयास्माकं त्वया प्रत्यक्षीक्रियते, किं कारणम् ? **धर्माधर्मोपदेशप्रवृत्तेरनर्थकार्थविषयत्वात्,** अनर्थकौ धर्माधर्मावर्थौ ह्यस्य धर्माधर्ममर्यादोपदेशस्य । न च तयोर्धर्माधर्मयोः शरीरादिकारणत्वम्, विनापि धर्माधर्ममर्यादया सर्गादौ प्रभुसृष्टेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्माधर्ममर्यादायां सत्यामेव च प्रलयकाले शरीराद्यभावाभ्युपगमाच्चेश्वरसामर्थ्यादेव । तस्मात् तयोर्नास्ति कारणता, कारणलक्षणायोगात् । किं तत् कारणलक्षणमिति चेत्, उच्यते --**यस्याभावे** इत्यादि गतार्थं याव**दितरत् कार्यमि**ति । कथं तदयोग इति चेत्, उच्यते --**न च धर्माद्यभाव** इत्यादिना ग्रन्थेन तयोः कारणाभिमतयोरभावेऽपि शरीरादेः कार्यस्य भावं भावेऽपि चाभावमुपदेशसाफल्यानभिज्ञत्वं च दर्शयति याव**ददत्तफलकुशलाकुशलसंहारादन्तकाले** इति गतार्थत्वाद् न विव्रियन्तेऽक्षराणि । § 1013

---

कथं तस्य सिद्धं येनासौ निःश्रेयसाभ्युदयकामानां भक्तिविषयतां यायादित्याह--सर्वकर्तृत्वसिद्धौ चेत्यादि । तथा चाहुः **प्रशस्तमतिप्रभृतयः**--सकलभुवनहेतुत्वादेवास्य सर्वज्ञत्वं सिद्धम्, कर्तुः कार्योपादानोपकरणप्रयोजनसम्प्रदानपरिज्ञानात् । इह हि यो यस्य कर्ता भवति स तस्योपादानादीनि जानीते, यथा कुलालः कुम्भादीनां कर्ता तदुपादानं मृत्पिण्डमुपकरणानि च चक्रादीनि प्रयोजनमुदकाहरणादि कुटुम्बिनं च सम्प्रदानं जानीत इत्येतत् प्रसिद्धम्, तथेश्वरः सकलभुवनानां कर्ता स तदुपादानानि परमाण्वादिलक्षणानि तदुपकरणानि धर्माधर्मदिक्कालादीनि व्यवहारोपकरणानि सामान्यविशेषसमवायलक्षणानि सम्प्रदानसंज्ञाकांश्च पुरुषान् जानीते इति । अतः सिद्धमस्य सर्वज्ञत्वमिति । इति **कमलशीलरचितायां तत्त्वसङ्ग्रहपञ्जिकायाम्,** पृ० ४३--४४ ॥

१ य] दृश्यतां पृ० ३४५ पं० १९ ॥

११ णाशादिदोषा] ०षः **तद०** प्र० ॥

१३ ज्ञा] **ज्ञानाभावात्** प्र० ॥

१४ रोत्य] **०त्येवश्यं** प्र० ॥

किञ्चान्यत्, **यथा चोपदेश** इत्यादि यावत् **क्रियाया अपि** अनभिज्ञत्व-मिति वर्तते । न केवलमुपदेशानभिज्ञत्वमेव तस्य, किं तर्हि ? प्राणिनाम-नुग्रहक्रियानभिज्ञतापि इति तदतिदिशति । तत् कथं 343/mj

* * *

तदेदं व्यामूढ्यैव... ...किम्... ...उपभोगविभाजनानुग्रहक्रियया अतिग-रीयस्या ? इति अत्यन्तपरवशत्वमेवैश्वर्यमुच्यते । अनुग्रहोऽपि विपर्ययेणोच्य-ते, दुःखहेतुदुःखात्मकत्वाभ्याम्, विषकृतभोजनक्लेशनवत् । तत्सायोज्यगम-नेऽप्येवम् ।

एवं च तत् साध्वेव यत्त्वाशङ्क्यते त्वया आद्यन्तवद् मध्येऽपि ईश्वर-प्राधान्यादीश्वरवशादेव प्रवृत्तौ फलसङ्करप्रसङ्गः, तत्प्रसक्तौ क्रियाविलोपः, ततश्च सर्वनिर्मोक्षः सर्वानिर्मोक्षो वा  इति ।

* * *

भाव्यते इति चेत्, उच्यते --**यदा तदेदं व्यामूढ्यैवे**त्यादिर्भावनाग्रन्थः याव**दुप-भोगविभाजनानुग्रह- क्रिययाऽतिगरीयस्या** किमिति वर्तते ? तस्मिन् हि - /ms काले प्राणिनामन्धलकवत् प्रवृत्तेरीश्वरस्यैव तेषां शरीराद्युत्पादयामि, ध-र्माधर्ममर्यादां प्रणयामि, तत्र प्रवर्तयामि, तत्फलैरनुबध्नामि, तान् प्राणिनः फलानुरूपमिष्टमनिष्टं चोपभोगं विभज्यानुगृह्णामि इत्येवमादिका यानुग्र-हक्रिया तयानुग्रहक्रियया क्लिश्यमानस्यानेकपुरुषस्त्रीनपुंसकजनसाधारण-स्येव भृतकस्यातिक्लेशः । **इति** हेत्वर्थे, तस्मादतिक्लेशत्वा**दत्यन्तपरवशत्वमेवैश्वर्यं** शीतलिकापर्यायशब्दाभिधेयलूताव**दुच्यते** इति । § 1014

किञ्चान्यत्, **अनुग्रहोऽपि विपर्ययेणोच्यते** अननुग्रह एव सन् अनुग्र-हः इति । किं कारणम् ? **दुःखहेतुदुःखात्मकत्वाभ्याम्,** दुःखहेतुत्वादिष्टोप-भोगस्य हिंसाद्यात्मनोऽर्जन-रक्षण-क्षय-सङ्गदोषे दुःखात्मकत्वाच्च अनिष्टोप-भोगस्य, दुःखात्मकत्वाच्चाननुग्रह एवासौ । दृष्टान्तः --**विषकृतभोजन-क्लेशनवत्,** यथा कश्चित् क्रूरमूर्खनृपतिः स्ववशान् भृत्यान् विषमिश्र-माहारं भोजयन् अनुगृह्णामि वः इति ब्रूयात् तथा त्वदभिमतेश्वरोऽपीति । यच्चोक्तं **दुःखमपि तदृणमोक्षणवदनुग्रह एव** इति, एतदप्ययुक्तम्, संसारमोचकव्याधचण्डालादिमारितसत्त्वानुग्रहप्रसङ्गात् सत्त्वनिकायकलिक-लुषकृतात्मोपनिपातनेन अज्ञाबोधे सत्त्वानुग्रहवदज्ञानप्रसङ्गाच्च । **तत्सायोज्य-गमनेऽप्येवम्,** ईश्वरेण किल सायोज्यं मोक्षः, स्वात्मना सायोज्यं गमय-

---

१२ त] तदेवं व्यामु॰nayacakra-ms-ya । तवेदं व्यामू॰ nayacakra-ms-bhā ॥
१७ क्रि] ॰क्रिया यानुग्रह॰nayacakra-ms-bhā । ॰क्रिया याऽनुग्रह॰ nayacakra-ms-ya ॥
१८ स्या] ॰स्यापिक्लेशः प्र॰ ॥
१९ ब्दाभिधेय] ॰यल्लता॰ प्र॰ । लूता तु रोगे पिपीलिकोर्णनामयोः । इति हेमचन्द्रसूरयः ॥
२४ भृ] भृत्यान्न प्र॰ ॥
२६ दुः] दृश्यतां पृ॰ ३४१ पं॰ ६ ॥
२७ च] चाण्डाला॰nayacakra-ms-ya ॥
२८ निपात] ॰तनेनाज्ञाबाधेnayacakra-ms-ya ॥

- /ms न्नप्यसौ प्राणिगणमतिक्लेशभाजनमेव करोति सृष्टसंसारक्लिष्टेश्वरत्वस्योक्तलक्षणस्यामोक्षशब्दाभिधेयत्वादलमैश्वर्येण मोक्षेण च तादृशा सदा सर्वपुरुषव्यापारोद्वहनायासात्मना । तस्माद् वरमात्माधीनयथेष्टचेष्टं दौर्गत्यमपीति ।
§ 1015

**एवं च तद् यत्त्वाशङ्क्यते त्वया आद्यन्तव**दित्यादिना ग्रन्थेन विनेश्वरेण किलैते दोषाः इतीष्टास्ते सहापीश्वरेण तथैवेव भवन्तीति तद्दर्शयन्नाह --**साध्वेवे**त्यादि गतार्थं हेतुहेतुमद्भावप्रतिपादनक्रमेण यावत् **तत्प्रसक्तौ क्रियाविलोपः** । कुतः ? ईश्वरप्राधान्यादुक्तानन्तरदोषाच्चेति धर्माधर्मक्रियाः प्राणिनां न स्युः फलाभावादीश्वरवशादेव आद्यन्तमध्येषु फलसङ्करात् । **ततश्च सर्वप्राणिनां निर्मोक्षः** निःशेषमोक्षस्तद्वशादेव **सर्वानिर्मोक्षो वा** *प्रोक्त इति । § 1016
344/mj

यत्तु सर्वशास्त्रक्रियाविलोपपरिहारार्थं कर्माद्युपसर्जनतया ईश्वरप्राधान्यकारण्ये प्रोक्ते आदौ स एव स्वशक्तित एव साक्षाद् व्याप्रियते शरीराद्युत्पादने धर्माधर्ममर्यादां चोपदिशति, तदनु ध्यानात् पुण्यमुत्पाद्य धर्माधर्ममर्यादायाः परिपालकान् ब्रह्मादीनाधिकारिकान् विनियुङ्क्ते, अन्ते च धर्माधर्मौ संहृत्य शरीरादिवत् कुशलाकुशलाशयकलङ्कशुद्धं स्थापयति । इदमन्यथैवोद्ग्राह्यते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद् द्वैतम्, भाव्यते त्वन्यथा स एव स्वशक्तित एव इत्यवधारणादद्वैतार्थभावनात् साक्षादेवाप्रयोजनेन कस्यचित् । एवंनियमनायेयमपि भावना--तदनुध्यानात् पुण्यमुत्पाद्य इति । प्रत्युपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्त्वा । अद्वैतस्य त्यागस्तावद् धर्माधर्ममर्यादास्थापनवचनेन । मर्यादा नाम अनतिक्रमस्थानम्, सुखदुःखप्रवृत्तिसीमा । ततश्च सर्गादौ स्थानाद्यात्मके सुखदुःखेऽपि न स्याताम्, अनियतविषयत्वात्, प्रलयवत् । अन्ते च स्याताम्, अनियत- § 1017

**यत्तु सर्वशास्त्रे**त्यादि । एतद्दोषपरिहारार्थं **कर्माद्युपसर्जनतया ईश्वरप्राधान्यकारण्ये प्रोक्ते** । कथम् ? इति तद् भावयत्युत्तरेण ग्रन्थेन --**आदौ**

१ सृ] **कृष्टसं** प्र॰ । दृश्यतां पृ॰ ३४२ पं॰ ११ । क्लिष्टसं॰ ? ॥
२ स्या] **॰स्य मोक्ष॰** इत्यपि पाठोऽत्र स्यात् ॥
७ सा] **साद्येवे॰**nayacakra-ms-ya ॥
८ क्रिया] दृश्यतां पृ॰ ३३८ पं॰ १ ॥
१० *] अत्र **प्रसक्त** इत्यपि पाठः स्यात् ॥
१५ त] दृश्यतां पं॰ ८ ॥

स एव **स्वशक्तित** एवेत्यादिना यावच्छरीरादिवत् **कुशलाकुशलाशयकलङ्कशुद्धं स्वापयतीति** गतार्थः पूर्वपक्षः । **धर्माधर्ममर्यादायाः परिपालकान् ब्रह्मादीनाधिकारिकान् विनियुङ्क्ते** इति विशेषः । अत्रोत्तरमाहाचार्यः --**इदमन्यथैवोद्भाव्यते** इत्यादि । अन्यथा तावत् प्रतिज्ञायते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद् **द्वैतम्, भाव्यते तु** साध्यहेतुव्याख्यानं क्रियते **अन्यथा** । कथमिति चेत्, **स एव स्वशक्तित** एवान्यनिरपेक्ष **इत्यवधारणादद्वैतार्थभावनात्,** अदृष्टादीनां तच्छक्तीनां च स्वतो व्यतिरिक्तानां निरासेन **साक्षादेवाप्रयोजनेन कस्यचित्** कञ्चिदप्यन्यमप्रयोजयन् साक्षात् स्वशक्तित एव इत्यवधारयता चाद्वैतमेव भाव्यते भवता । पुनरप्याह— **एवंनियमनायेति,** अद्वैतनियमनायेय**मपि भावना** । कतमा सा भावना इति चेत्, **तदनु ध्यानात् पुण्यमुत्पाद्य** इत्येषाप्यद्वैतभावनैवेति । एवं तावत् प्रतिज्ञातं द्वैतम्, अद्वैतं भावितमित्युक्तम् । § 1018

**प्रत्युपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्त्वे**ति प्रतिज्ञातभाविते द्वैताद्वैते - /ms अपि त्यक्त्वा । तत्रा**द्वैतस्य त्यागस्तावद् धर्माधर्ममर्यादास्थापनवचनेन** कृत इति वाक्यशेषः । का मर्यादा ? उच्यते — **मर्यादा नाम अनतिक्रमस्थान**मिति मर्यादालक्षणमाह । विषयतस्तु **सुखदुःखप्रवृत्तिसीमा,** इत्यति विषये सुखमियति दुःखमिति धर्माधर्मयोः सीमनि स्वके स्वके व्यवस्थापनम्, धर्मस्य सुखप्रवृत्तिच्छेदेन अधर्मस्य दुःखप्रवृत्तिच्छेदेन अयमस्मादन्यः, अयमितरस्मादन्यः इति सीमाविभागः । ततः किमिति चेत्, **ततश्च सर्गादौ स्थानादी**त्यादीति, स्थानविग्रहेन्द्रियविषयाः स्थानादयः, तदात्मके **सुखदुःखेऽपि न स्याताम्** । कस्मात् ? **अनियतविषयत्वात्,** अनियतौ हि विषयौ तदा सुखदुःखयोः अविद्यमानस्थानादित्वादविद्यमानधर्माधर्मत्वाच्च । दृष्टान्तः --**प्रलयवत्,** यथा प्रलये धर्माधर्माभावादेवानियतविषये सुखदुःखे, ततश्चासती, तद्वत् सर्गादावपि स्यातामिति । किञ्चान्यत्, **अन्ते च स्याताम्** सुखदुःखे इति वर्तते । कुतः ? 345/mj

* * *

विषयत्वाद् नियतविषयत्वाद्वा, मध्यवत् । मध्ये वा न स्याताम्, अन्तवत् ।

अथोच्येत--अत एव न सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा, किं तर्हि ? धर्मोऽयमधर्मोऽयमिति । एतदपि तुल्यं पूर्वेण, असत्त्वात् । धारणाद्धानाद्वा धर्म इत्यर्थस्याभावे कथमसौ धर्मः, तद्विपर्ययो वा कथमधर्मः ?

अथ तु तस्य रुचेरेव सुखं दुःखं वा ततो धर्माधर्ममर्यादावचनमनर्थकम्, सदैव ईश्वरशक्तिमात्रवशादेव यथा तथा यस्य कस्यचित् सिद्धेः, आद्यन्तवत् ।

* * *

२ स्वा ] स्थाप° प्र° ॥
३ इ ] इति शेषःnayacakra-ms-ya ॥
८ साक्षा ] °दिवा° प्र° ॥
८ क ] किंचिद° प्र° ॥
२३ ध ] धर्माभावा° प्र° ॥

**अनियतविषयत्वात्,** विषयानियमोऽपि च रूपादिपञ्चकत्वाद्यभावादुपसंहरण-काले, **मध्यकालवत्** । अथवा **नियतविषयवत्त्वात्,** व्यवस्थापितधर्माधर्म-
- /ms मर्यादत्वात् सुखदुःखे तदा नियतविषये, तस्मात् तदापि स्यातां मध्यम-कालवत् सृष्ट्युत्तरकालवदित्यर्थः । तद्विपर्ययेण वा साधनम् **--मध्ये वा न स्यातां** सुखदुःखे नियतविषयत्वादिति वर्तते, **अन्तवदिति** । § 1019

**अथोच्येतेत्यादि** यावद्**धर्मोऽय[मधर्मोऽय]मिति** । स्यान्मतम् **--अत एवेश्वरस्यैव** कारणत्वाद् **न सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा** तत्स-मर्थनासमर्थेत्यर्थः, ईश्वरस्यैव सुखदुःखयोः प्रवर्तकत्वात् । यदि सा न प्रवर्तयति सुखदुःखे धर्माधर्ममर्यादा किमर्थमसौ तां व्यवस्थापयतीति चेत्, उच्यते, स्वरूपसंज्ञाव्यवस्थापनमसौ तयोर्लोकव्यवहारार्थं करोतीत्यत आह **--किं तर्हि ? अयं धर्मोऽयमधर्म** इत्येतावदुपदेशेनेति । अत्राचार्य उत्तरमाह **--एतदपि तुल्यं पूर्वेण, असत्त्वात्, *सर्गादावन्तवन्न स्यातामनियतविषयत्वात्, अन्ते च स्यातां नियतविषयत्वाद्वा मध्यवत्, मध्ये वा न स्यातामन्तव**दितीद-मेव दोषजालं प्राप्तम् । किं कारणम् ? **धारणाद्धानाद्वा धर्म** इति निरुक्तेर्यदि मर्यादां धारयति प्राणिनां सुखे चैतान् धत्ते ततो धर्म इत्येतस्या**र्थस्याभावे कथमसौ धर्म** उच्यते ? **तद्विपर्ययो वा कथमधर्म** इति तद्विपरीतार्थाभावे ? तस्मात् सुखस्थानादिधारणाद्धर्मः, सुखकारणं ह्यव्यभिचारि तदिष्यते, यस्याभावे यस्याभावो यस्य च भावे यस्य ध्रुवो भावस्तत् कारणमितरत् कार्यमिति कारणस्य धर्मस्य कार्यस्य च सुखस्याव्यभिचारात् । एवमधर्मेऽपि व्याख्या विपरीतार्था कार्या । तस्मादयुक्तम्--संज्ञाकरणमात्रेण मर्यादेति ।
§ 1020

**अथ त्वित्यादि** । स्यान्मतम् **--तस्येश्वरस्य रुचेरेवेच्छातः सुखं दुःखं वा**
- /ms न धारणधान- प्रवृत्त्यात्मकत्वाद्धर्मस्यान्यस्य वा कस्यचिदिति । अत्रोच्यते **--धर्माधर्ममर्यादावचनमनर्थकम्,** यदुक्तं **प्रतिबुद्धानां प्राणिनां धर्माधर्मम-र्यादामुपदिश्योत्तरकालं स्वमर्यादानुष्ठानानुरूप्येण** इत्यादि तत् सर्वमनर्थकं संवृत्तम् । तत्साधनार्थं हेतुमाह सदृष्टान्तम् **--सदैवेत्यादि** यावद् **यस्य कस्यचित् सिद्धेराद्यन्तवदिति** । सर्गस्यादौ मध्येऽवसाने च **सदैव** सर्व-काल**मीश्वरशक्तिमात्रवशादेवान्यस्य** कारणस्याभावेऽपि **यथा तथा** येन वा तेन वा प्रकारेण सुखस्य दुःखस्य वेष्टानिष्टशरीरादेरनियमेन **यस्य कस्यचित्** मारकस्याहिंसकस्य वा **सिद्धे**र्धर्माधर्माकारणत्वम् । तदकारणत्वा**दाद्यन्तवत्**

---

२ य] °वत्वात्nayacakra-ms-ya । अत्र **नियतविषयत्वात्** इत्यपि पाठः स्यात्, दृश्यतां पं° १६ ॥
१२ *] दृश्यतां पृ° ३४४ पं° १० ॥
२२ त] **तस्यैववे ?श्वरस्य**nayacakra-ms-ya ॥
२३ त्वाद्ध] °**द्धर्मा**°nayacakra-ms-ya ॥
२३ स्या] °**स्यातस्य वाक्यस्यवदिति** प्र° ॥
२४ प्र] दृश्यतां पृ° ३४१ पं° ४ ॥
२५ र्यादानुष्ठाना] °**नानुप्येण**nayacakra-ms-bhā । **नानुष्येण** nayacakra-ms-ya । अत्र °**नानुरूपेण** इत्यपि पाठः स्यात् । दृश्यतां पृ° ३४१ पं° ५ ॥
३० स्या] °**स्य हिंस**°nayacakra-ms-ya ॥

प्रथमावसानकालयोरिव तन्मर्यादावचनमनर्थकमिति । एवं तावदद्वैतत्यागः । § 1021

346/mj

तथा द्वैतमपि त्यक्तं साक्षाद्व्यापारवचनात् । साक्षाद्व्यापारो ह्यैश्वर्यम्, तस्मात् तदव्याहतवृत्तेः किं धर्मादिना, किमाधिकारिकैः ? अथ तैर्विना शक्तिर्व्याहन्यते तस्य तर्हि व्याहतशक्तित्वात्त्वेवमनीश्वरता इतरवत् । § 1022

ननु प्रधानोपसर्जनद्वैतप्रतिज्ञानात् तत्संवादेन भावनार्थं सर्गादौ साक्षाद्व्यापार उच्यते उपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसद्भावात् चित्राचार्यस्येव शिष्येण विनापि तथाऽदृष्टाद्यभावेऽपीश्वरस्य । न, आदिकरस्य कर्तृत्वात् । अव्यज्यमानप्रकारव्यक्तिरादिः, आदानात्, आदित्योदयादित्ववत् । प्रयोजनपरमार्थत्वाद् भवितृत्वस्य । § 1023

न केवलमद्वैतत्याग एव, किं तर्हि ? **तथा द्वैतमपि त्यक्तम्** । कुतः ? **साक्षाद्व्यापारवचना**दित्यादि यावत् **किमाधिकारिकै**रिति । **साक्षाद्व्यापारो ह्यैश्वर्यम्,** तद् व्याचष्टे --**तस्मात् तदव्याहतवृत्तेः** तस्य सर्वैः प्रकारैः सर्वकालं सर्वदेशे वाऽव्याहता वृत्तिरस्य, अतस्तदव्याहतवृत्तित्वात् **किं धर्मादिना ? आदि**ग्रहणादधर्मेण किम् ? स्थानविग्रहेन्द्रियविषयैर्वा प्राणिनां सुखदुःखाश्रयैः प्राणिभिर्वा किं क्रियते ? न किञ्चिदित्यभिप्रायः । **किमाधिकारिकैः ब्रह्ममनुविष्ण्वादिभि**र्धर्माधर्ममर्यादापालनार्थं विनियुज्यमानैर्वेति । **अथ** मन्यसे **तैर्विना शक्तिर्व्याहन्यते तस्ये**श्वरस्य तत**स्तर्ह्यस्य व्याहतशक्तित्वात् त्वेवमनीश्वरता** कार्यान्तराशक्तेः श्रमाद्वा **इतरव**दिति पृथग्जनवदित्यर्थः । § 1024

**ननु प्रधानोपसर्जने**त्यादि यावत् **तथाऽदृष्टाद्यभावेऽपीश्वरस्ये**ति । आह-- - /ms
द्वैतमेवोद्ग्राहितं भावितं प्रत्युपसंहृतं च, नान्यथोद्ग्राहभावनोपसंहाराः । कथम् ? प्रधानमुपसर्जनं च द्वैतं प्रतिज्ञातम्, तस्यैवार्थस्य **संवादेने**श्वरः प्रधानं न कर्मेत्येत**द्भावनार्थं सर्गस्यादौ स्वशक्तितः स एव साक्षाद् व्याप्रियते** इत्युच्यते । कस्मात् ? **उपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसद्भावात् चित्राचार्यस्येव शिष्येण विनापी**ति । यथा शिष्यमप्रधानं ग्राहयित्वा चित्रकर्माग्राहयित्वा वा प्रायेण तेन विना सह वा चित्रकर्मणि चित्रकराचार्यः प्रवर्तत एव स्वप्राधान्यात् सन्निध्यसन्निध्योरपि शिष्यस्य प्रवर्तकत्वादेवमीश्वरोऽप्यदृष्टादिसन्निध्यसन्निध्योः

१५ त ] तद्व्यावृत्तेः प्र° ॥
१७ णा ] °णाधर्मेण प्र° ॥
२३ प्र ] प्रत्युसंहृतं प्र° ॥
२४ धान ] °न उप° प्र° ॥
२५ स ] दृश्यतां पृ° ३४४ पं° २ ॥
२७ र्मा ] °र्म ग्राहयित्वा वा प्राणेयं तेन प्र° ॥

प्रवर्तते प्रधानत्वादिति भाव्यत्वादुद्ग्राहितद्वैतानुरूपभावनोपसंहारात्मकत्वाद् न कश्चिद्दोष इति । § 1025

एतच्च **न, आदिकरस्य कर्तृत्वात्** । आदिं करोत्यादिकरः, स एव च कर्ता, तस्यैव कर्तृत्वात् । कोऽसावादिरिति चेत्, उच्यते --**अव्यज्यमान-प्रकारव्यक्तिरादिः**, सत एवार्थस्याव्यक्तस्य केनचित् प्रकारेण व्यक्तिरादिः । **कुतः ? आदानादिति** आदानमादिः इत्यक्षरार्थनिरुक्तिमाह हेतुं दृष्टान्तं च **आदित्योदयादित्ववदिति**, यथा आदित्यस्योदयमध्याह्नास्तमयत्वप्रकारेण दिव-सविभागानां विद्यमानानां व्यक्तिरेवं तत्र । **प्रयोजनपरमार्थत्वाद् भवितृत्वस्य,**
347/mj यः प्रयोजयति परमार्थतः स कर्ता भविता

* * *

आदिकरत्वं च यथा व्रीहौ सम्भाव्यते, अव्रीहेर्मृदादेर्व्रीहित्वेन आदिकरत्वात् । तथा प्राक् पृथिव्यादीनामप्यादिकरत्वं पश्चादपि तथा, तदादित्वाद् व्रीहेः तथाभिव्यक्तेः तत्प्रयुक्तत्वात् । कस्मात् पृथिव्येव न भूतो व्रीहिः ? को वा ब्रवीति पृथिवी न भूत उदकादिश्च व्रीहिरिति व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वात् ? इतश्चेतश्च तदात्मकत्वात् तदव्यतिरिक्तत्वात् तत् तदेव ।

* * *

भूकृञोः सर्वधात्वर्थत्वात्, न प्रयोज्यः, इत्यस्मात् कारणाद् य आदिकरः स कर्ता, यश्च कर्ता स भवति, भूकृञोः सर्वधात्वर्थव्यापित्वात् । एतदुक्तं भव-
- /ms ति--यतः प्रकारान्तरेणाभिव्यञ्जयन् भावान्तरस्यादिकरत्वाद् भवति वस्तु तत एकैकस्य सर्वत्वम्, न सर्वस्यैकत्वं परस्परापेक्षाभिव्यञ्जनेनादिकरत्वादिति । § 1026

अस्मिंश्चार्थे व्यापकं दृष्टान्तमाह स्फुटीकरणार्थम् --**आदिकरत्वं च यथा व्रीहौ सम्भाव्यत** इति । तद्व्याख्या --**अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वादिति**, मृत्सलिलवाताकाशानामव्रीहीणां व्रीहिप्रकारेणाभिव्यक्तिं कुर्वन् व्रीहिरादिकरः, एतमर्थं हेतुत्वेन व्यापारयति सिद्धं कृत्वा पञ्चम्या **व्रीहित्वेनादिकरत्वादिति** । **तथा प्रागित्यादि**, एवं च कृत्वा व्रीहित्वात् **प्रागपि पृथिव्य**ब्वाय्वाकाशाना**मप्यादिकरत्वं पश्चादपि** तेन प्रकारेण **तथा** व्रीहिवदेव, **तदादित्वाद् व्रीहेः**, ते आदिः पृथिव्यादयो व्रीहेः प्राक् पश्चाच्चेति तेषामादिकरत्वम् तेन प्र-कारेणा**भिव्यक्तेः** । किञ्चान्यत्, **तत्प्रयुक्तत्वाद् व्रीहेः**, ते ह्यस्य प्रयोक्तारः, यो यस्य प्रयोक्ता स तस्य कर्ता यथा आदित्योदयादित्वमित्यत आह--तत्प्रयुक्तो व्रीहिः । § 1027

१ त्वा ] °दिति भाव्यत्वादिति भाव्यत्वा° प्र° ॥
३ क ] करोतीत्या° ? ॥
१९ ञ ] °ञयन् भवान्त°nayacakra-ms-bhā । °ञयन्नवान्त° nayacakra-ms-ya ॥
२५ व्रीहित्वेना ] °नादिति तथा प्र° ॥
३० यादित्व ] °मित्यक्तः आह प्र° ॥

**कस्मात् पृथिव्येव न भूतो व्रीहिः**, पृथिव्येव उदकमेव वायुरेव वा आकाशमेव वा, तत्प्रयुक्तत्वात् आदिकरत्वादादित्योदयादित्ववत् ? इति । अत्रोच्यते --**को वा ब्रवीति--पृथिवी न भूत उदकादिश्च व्रीहिरिति** तत्प्रयुक्तत्वात् **व्रीह्यादि वा पृथिव्यादि न भूतमिति तत्प्रयुक्तत्वात्** ? व्रीहिरपि पृथिव्यब्वाय्वाकाशादि भवति, पृथिव्युदकवाय्वाकाशाद्यपि च व्रीहिमाषाम्रजम्ब्वादि भवति, तत्कृताहारोऽपि पृथिव्यादि व्रीह्यादि; पृथिव्याद्यपि तत्कृताहारः, तत्कृताहारशरीरेन्द्रियबुद्ध्यादि तत्कृतमनुष्यतिर्यङ्नारकदेवादि च, तत्कृताहारव्रीहिपृथिव्यादि च तत्कृताहारशरीरेन्द्रियबुद्धिमनुष्यादि सर्वं परस्परतः सर्वात्मकं भवति, तत्प्रयुक्तत्वात् तथाभिव्यक्तेस्तदादिकरत्वादित्यादिहेतुभिः । - /ms कियद्वोदाह्रियते ? न्यायस्यास्य व्यापित्वात् सर्वं तदुदाहरणमेव । दिङ्मात्रप्रदर्शनार्थं तद्व्यापित्वप्रदर्शनार्थं चाह --**इतश्चेतश्चे**ति, यदि व्रीहितो व्रीहेरादिकरत्वम् अथ **पृथिव्यादितः पृथिव्यादे**रादिकरत्वमिति **तान्येवोदाहरणानि** । एवं तत्कृताहारशरीरेन्द्रियादिष्वपि द्रष्टव्यम्, सर्वस्यैकैकस्य सर्वात्मकत्वात् । तत आह --**तदात्मकत्वात् तदव्यतिरिक्तत्वात् तत् तदेवे**ति तस्य तस्य प्रकारस्य हेतुत्वं दृष्टान्तत्वं चेति । § 1028
348/mj

पुरुषकर्मस्वप्येवमेव । पुरुषः कर्मयोग्यानां पुद्गलानां कर्मत्वेन आदिकरः, तथाविधोपयोगगतेः प्रयोजनपरमार्थत्वाद् भवितृत्वस्य । तदपि च कर्म आदिकरम्, बाह्यमपि घटादि आदिकरम् । § 1029

एवं दृष्टान्तभूतं प्रस्तुतन्यायप्रसाधितं सर्वसर्वात्मकवादं प्रथयित्वा दार्ष्टान्तिकं पुरुषकर्मवादमीश्वरकारणनिराकरणायाह --**पुरुषकर्मस्वप्येवमेवे**त्यादि । **पुरुषः** कर्ता **कर्मयोग्यानां पुद्गलानां कर्मत्वेन आदिकरः** । *के कर्मयोग्याः पुद्गलाः ? उच्यते--परमाणुवर्गणा अग्रहणवर्गणा, अग्रहणवर्गणा द्विप्रदेशवर्गणा, एवं दशप्रदेशादिसङ्ख्येयप्रदेशवर्गणाः । समानजातीयानामेकशो बुद्ध्यावस्थापितानां पिण्डो वर्गणा, कुचिकर्णकाभीरसवर्णगोपिण्डवत् ।

---

१ पृ] पृथिव्याद्येव ? ॥
२ आकाश] °मेवा तत्प्र°nayacakra-ms-ya । °मेव तत्प्र° nayacakra-ms-bhā ॥
९ त] तत्तत्प्र°nayacakra-ms-bhā ॥
९ र] °रत्वादिहेतुभिः प्र° ॥
११ नार्थं] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२२ *] (?ा)क कर्मयोग्याः पुद्गलाः उच्यतेnayacakra-ms-bhā । कर्मयोग्याः पुद्गला उच्यन्ते nayacakra-ms-ya ॥
२५ कु] कुइयण्णगोविसेसोवलक्खणोवम्म+ओ विणेयाणं । दव्वा+इवग्गणाहिं पोग्गलकायं पयंसेंति ॥ ६३२ ॥ आह--किमर्थं पुनरेता वर्गणाः प्ररूप्यन्ते ? उच्यते--कुचिकर्णस्य गोमण्डलाधिपतेर्गावस्तासां परस्परं विशेषस्य यदुपलक्षणं परिज्ञानं तदौपम्यात् तद्दृष्टान्ताद् विनेयानामसंमोहार्थं

अनन्तप्रदेशवर्गणा अपि काश्चिद् ग्रहणयोग्याः काश्चिदग्रहणयोग्याः । ग्रहण-
योग्यायोग्यत्वं चातिस्थूलसूक्ष्मायोग्यत्वात् स्वेदेनेव परमाणुशर्कराणां, योग्य-
त्वाच्च मध्यमपरिमाणानाम् । तत्र या ग्रहणयोग्याः पुद्गलतो वर्गणाः ताश्च मा-
नेन सिद्धानामनन्ततमभागः अभव्यसिद्धीनामनन्तगुणाः । एष तावदौदारिक-
योग्यस्य जघन्यस्य विधिः । तदुपर्येकपरमाणौ प्रक्षिप्ते द्वितीयाप्यौदारिक-
- /ms योग्या एवमेकैकवृद्धान्यनन्तानन्तानि स्थानानि औदारिककारणत्वेन ग्रह-
णयोग्यानि । जघन्यादुत्कर्षस्थानमसङ्ख्येयगुणम्, यस्मात् परम्परोपनिधया
प्रथमस्थानादारभ्यानन्तस्थानेषु तेषु तेषु द्विगुणता भवति तस्मादसङ्ख्यगुणं स-
ङ्ख्येयगुणं वा, अनन्तरोपनिधया तु रूपाधिकमेव । तस्मिन्नुत्कृष्टौदारिकयोग्य-
द्रव्ये रूपे प्रक्षिप्ते जघन्यं वैक्रियशरीरस्याग्रहणयोग्यम् । एवं रूपाधिकवृद्ध्या
तान्यप्यनन्तानन्तानि स्थानानि पूर्ववत्, जघन्यादुत्कृष्टमसङ्ख्येयगुणम्, को
गुणकारः ? श्रेण्यसङ्ख्यतमभागः । तेषामग्रहणानामुपरि वैक्रियस्य जघन्यं ग्र-
349/mj हणयोग्यम् । तान्यपि स्थानानि पूर्ववदनन्तानन्तानि । पुनराहारकाग्रहणानि,
तथा तदुपरि तद्ग्रहणयोग्यानि तथैव । औदारिकशरीरयोग्येभ्यो वैक्रिय-
शरीरयोग्यान्यसङ्ख्येयगुणानि, ततोऽसङ्ख्येयगुणान्याहारकयोग्यानि, तावद-
सङ्ख्येयगुणानि ग्रहणाग्रहणानि पूर्वस्मात् पूर्वस्मात् । तदुपर्याहारकोत्कृष्टे

---

द्रव्यादिवर्गणाभिः, आदिशब्दात् क्षेत्रवर्गणाभिः कालवर्गणाभिः भाववर्गणाभिश्च समस्तमपि पुद्गलास्तिकायं विभज्य तीर्थकरगणधरादयः प्रदर्शयन्ति इति गाथाक्षरार्थः । अथ भावार्थ उच्यते--इह भरतक्षेत्रे मगधजनपदे प्रभूतगोमण्डलस्वामी कुचिकर्णो नाम गृहपतिरासीत् । स च तासां गवामतिबहुत्वात् सहस्रादिसङ्ख्यापरिमितानां पृथक् पृथगनुपालनार्थं प्रभूतान् गोपालांश्चक्रे । ते च तासु परस्परं मीलितासु गोषु आत्मीया आत्मीयाः सम्यगजानन्तः सन्तो नित्यं कलहमकार्षुः । तांश्च तथान्योन्यं विवदमानानुपलभ्यासौ तेषामव्यामोहार्थं कलहव्यवच्छित्तये शुक्लकृष्णरक्तकर्बुरादिभेदभिन्नानां गवां प्रतिगोपालं सजातीयगोसमुदायरूपा भिन्ना वर्गणा व्यवस्थापितवानिति एष दृष्टान्तः । अथोपनय उच्यते--इह गोमण्डलप्रभुकल्पस्तीर्थकरो गोपतुल्येभ्यः स्वशिष्येभ्यो गोसमूहसमानं पुद्गलास्तिकायं तदसंमोहार्थं परमाण्वादिवर्गणादिविभागेन निरूपितवानिति । इति श्रीमलधारिहेमचन्द्रसूरिविरचितायां विशेषावश्यकभाष्यटीकायाम्, पृ॰ ३२८ । ग्रामः सुघोषो नामाभून्मध्ये मगधनीवृतः । कुचिकर्णाभिधानश्च ग्रामणीस्तत्र विश्रुतः ॥ १ ॥ गवां शतसहस्राणि तस्य संजज्ञिरे क्रमात् । बिन्दुना बिन्दुना हन्त भ्रियते हि सरोवरम् ॥ २ ॥ गोपालानां पालनाय सोऽर्पयामास गास्ततः । भव्या मम न ते भव्या इत्ययुध्यन्त ते बहिः ॥ ३ ॥ कुचिकर्णो विभज्यैता आर्पयत् कस्यचित् सिताः । कृष्णाः कस्यापि कस्यापि रक्ताः पीताश्च कस्यचित् ॥ ४ ॥ पृथक् पृथगरण्येषु गोकुलानि न्यवेशयत् । भुञ्जानो दधिपयसी सोऽवसत् तेषु च क्रमात् ॥ ५ ॥ अन्वहं वर्धयामास गोष्ठे गोष्ठे स गोधनम् । अतृप्तो दधिपयसोः सुराया इव दुर्मदः ॥ ६ ॥ तस्याभवदथाजीर्णमधऊर्ध्वंसरद्रसम् । प्रदीपनान्तःपतितस्येव दाहो महानभूत् ॥ ७ ॥ हा धेनवो हा नवतर्णकाश्च हा शाक्वराः वः क्व कदा च लप्स्ये । स गोधनैरेवमतृप्त एव मृत्वाथ तिर्यग्गतिमाससाद ॥ ८ ॥ इति कलिकालसर्वज्ञहेमचन्द्रसूरिविरचितायां स्वोपज्ञयोगशास्त्रवृत्तौ २ । ११२ ॥

२ त्वात्] **स्वेदोरेव** प्र॰ ॥

३ ता] **तश्च** प्र॰ ॥

६ औ] **औदारिककारत्वेन** प्र॰ । अत्र **औदारिकशरीरत्वेन** इत्यपि पाठः स्यात् ॥

८ स्था] **॰स्थानेषु तेषु द्वि॰**nayacakra-ms-ya ॥

रूपे प्रक्षिप्ते जघन्यमग्रहणं तैजसस्य, जघन्यादुत्कृष्टमनन्तगुणम्, को गुणकारः ? अभव्येभ्योऽनन्तगुणः सिद्धानामनन्ततमभागः । तदुपरि रूपाधिके तैजसशरीरयोग्यं [जघन्यम्] । जघन्यादुत्कृष्टमनन्तगुणम्, को गुणकारः ? सिद्धानामनन्ततमभागोऽभव्येभ्योऽनन्तगुणः । अनेन विधिनोत्तरेषां भाषाप्राणापानमनःकर्मयोग्यानामग्रहणान्तरितानां ग्राह्याणामुत्तरोत्तरानन्तगुणमानेयाः । अन्तरं तु ग्राह्याणां जघन्यादुत्कृष्टो विशेषाधिकः सर्वत्र, को विशेषः ? तस्यैवानन्तभागः । अग्राह्याणां तु जघन्यादुत्कृष्टोऽनन्तगुणः, को गुणकारः ? सिद्धानामनन्ततमभागः अभव्येभ्योऽनन्तगुणः । एवं- विधैः पुद्गलैः सर्वत्र लोकेऽवगाढगाढनिचिते कर्मतया परिणमय्य तद्योग्यान् कायवाङ्मनःकर्मलक्षणानां त्रयाणां योगानां काययोगेन गृह्णाति तेनैव कार्मणशरीरतया परिणमयति पुरुषः स्ववीर्येण योगाख्येन, वाङ्मनःप्राणापानतया परिणमय्य काययोगेनैव वाङ्मनःप्राणापानतयालम्ब्य विसृजति । यथोक्तम्— - /ms

*जोगेहि तदणुरूवं परिणमयति गेण्हितूण पंचतणू ।
पा+उग्गे वालंबति भासाणमणत्तणे खंधे ॥ कर्मप्र॰ गा॰ १७ § 1032

तथा

मनसा वाचा कायेन वापि युक्तस्य वीर्यपरिणामः ।

---

९ लोकेऽव] **वगाढनिचिते**nayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-ram हीं॰ । **॰वगाढंढे ? गाढनिचिते** nayacakra-ms-vi ॥
१० का] **कर्मणाश॰**nayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃ ॥
१२ वा] **वाङ्मनसप्राणा॰** प्र॰ ॥
१३ *] **जोगेहिं**nayacakra-ms-ya ॥
१४ खंधे] तुलना--जोगणुरूवं जीवा परिणामेंतीह गेण्हि+ऊं दलियं । भासाणुप्पाणमणोचियं च अवलंब+ए दव्वं ॥ पञ्चसं॰ ६ । १३ । स्वकीययोगानुरूपं कर्मदलमिह अस्मिंल्लोके निरन्तरं व्यवस्थितं स्वप्रदेशैः गृहीत्वा जीवाः परिणमयन्ति स्वप्रदेशैरेकीकुर्वन्ति, यथा मृत्परमाणवः पयांसि तद्गताः पूर्पकपरमाणवो घृताद्यात्मनि स्थापयन्तीत्यर्थः । भाषानपानमनस उचितं च द्रव्यजातं वर्गणारूपमवलम्बयन्ति योगानुरूपमेव, किमुक्तं भवति ? भाषायोग्यं द्रव्यमवलम्ब्य जीवः प्रदेशैस्ततो भाषां विसृजति, यथा मन्दशक्तिः करेण यष्टिमवलम्ब्य भ्रमति, [illegible]रति, कूपाद्वा रज्जुमवलम्ब्य समुत्तरति । एवमानपानमपि, तत्पुद्गलावष्टम्भतो जीवः प्रदेशैः स्वयोगानुरूपं विसृजति, मनोयोग्यानि [illegible] स्वशक्त्यनुरूपं चिन्तयतीति गाथार्थः । इति **चन्द्रमहर्षिविरचितायां स्वोपज्ञपञ्चसङ्ग्रहवृत्तौ** ॥
१५ म] आह च--मणसा वयसा का+एण वा वि जुत्तस्स वीरियपरिणामो । जीवस्स अप्पणि जो स जोगसन्नो जिणक्खा+ओ ॥ १ ॥ ते+ओजोगेण जहा रत्तत्ता+ई घडस्स परिणामो । जीवकरणप्प+ओ+ए वीरियमवि तहप्पपरिणामो ॥ २ ॥ इति । मनसा करणेन युक्तस्य जीवस्य योगो वीर्यपर्यायो दुर्बलस्य यष्टिकाद्रव्यवदुपष्टम्भकरो मनोयोगः,...एवं वाग्योगोऽपि, एवं काययोगोऽपि । इति अभयदेवसूरिविरचितायां **स्था**नाङ्गसूत्रटीकायाम् ३ । १ । १२४ ॥

जीवस्यात्मनि यः खलु स योगसंज्ञो जिनैर्दृष्टः ॥* § 1034

तेजोयोगाद् यद्वद् रक्तत्वादिर्घटस्य परिणामः ।
जीवकरणप्रयोगे वीर्यमपि तथात्मपरिणामः ॥ इति ।§ 1036

कि कारणम् ? **तथाविधोपयोगगतेः**, बन्धनयोग्यपरिणामापन्नपुद्गलद्रव्यग्रहणपरिणतकृतप्रयोगपरिणामापत्तेः पुरुषस्येत्यर्थः । यथोक्तम्—

ऊष्मगुणः सन् दीपः स्नेहं वर्त्या यथा समादत्ते ।
आदाय शरीरतया परिणमयति चापि तं स्नेहम् ॥ § 1038

* * *

यथा चात्मनि अकर्मणां कर्मत्वेन आदिकरत्वं तथा कर्मणामपि आत्मन आदिकरत्वं तथाभिव्यक्तेः तत्प्रयुक्तत्वात् । कस्मात् आत्मैव न कर्मभूतः ? को वा ब्रवीति न कर्मभूतोऽसौ कर्माणि चात्मभूतानि नेति तथाविधोपयोगगतेस्तत्प्रयुक्तत्वात्... ... ...।

अन्योन्यकारितादिकरत्वात् कर्मकर्मिणोः सर्वसर्वात्मकता अचेतनज्ञानावरण... ... ...पालनपूरणपुरुषत्वात् ।

* * *

तद्वद् रागादिगुणः स योगवर्त्याऽऽत्मदीप आदत्ते ।
स्कन्धानादाय तथा परिणमयति तांश्च कर्मतया ॥ § 1040

*स्नेहाभ्यक्तस्याङ्गे लगदेव रजो मलीभवत्यपि वा ।
रागद्वेषस्नेहाभ्यक्तस्य तथा भवति कर्म ॥ § 1042

रूक्षयति रुष्यतो ननु वक्त्रं स्निह्यति च रज्यतः पुंसः ।
*औदारिकोऽपि ननु भाववशात् परिणमति देहोऽयम् ॥
§ 1044

तस्मादात्मा कर्ता करणयुक्तः कर्मत्वेन आदिकरः, पू (Edtext outside numbered paragraph)र्ववत् **प्रयोजनपरमार्थत्वाद्** भवितृत्वस्य । किमात्मैवादिकरः ? नेत्युच्यते, **तदपि च कर्म आदिकरम्**, तदपि च ज्ञानावरणादिकर्म ग्रहणयोग्यमौदारिकादिशरीरभेदादिविपाकं

१ *] कारिकेयं समुद्धृता सिद्धसेनसूरिविरचितायां तत्त्वार्थसूत्रटीकायाम्, अ° ७, पृ° ७० ॥
४ स] **संदीपः** प्र° ॥
५ चा] **वापि** प्र° ॥
६ स] **स्वयोगवर्त्या** इति **सिद्धसेन**सूरिभिस्तत्त्वार्थसूत्रटीकायामुद्धृतायामस्यां कारिकायां पाठः, अ° ५, पृ° ३४३ ॥

८ *] स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् । रागद्वेषक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥ ५५ ॥ इति प्रशमरतौ ॥
११ *] औदारिकोऽपि देहो भाववशात् परिणमत्येवम् । इति मलयगिरिसूरिभिरुद्धृतायामस्यां कारिकायां पाठः प्रज्ञापनासूत्रवृत्तौ, पृ° ४५५ ॥

पु (Edtext outside numbered paragraph)द्गलः, किं भवति ? नरनरकदेवतिर्यग्गतिसङ्ग्रहभवनवास्या (Edtext outside numbered paragraph)द्यनेकप्रभेदसर्वात्मशरीराणां तत्सम्बद्धात्मनां चादिकरं भवति । यथोक्तम्—

*जीवपरिणामहेतू कम्मतया पोग्गला परिणमंति ।
पोग्गलकम्मणिमित्तं जीवो वि तहेव परिणमति ॥ इति
|§ 1046

न केवलमाध्यात्मिकमेवादिकरम्, किं तर्हि ? **बाह्यमपि घटादि** [आदि]**करं सर्वादिकरम्** । § 1047

विपर्ययेणापि भावयितुकाम आह --**यथा चात्मनि अकर्मणामित्यादि** पूर्ववत् सचोद्यपरिहारं गतार्थं यावत् **को वा ब्रवीति न कर्मभूतोऽसौ कर्माणि चात्मभूतानि नेति तथाविधोपयोगगतेस्तत्प्रयुक्तत्वा**दित्यादिभिर्हेतुभिः । तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः ? का वान्या प्रकृतिः ? इति | § 1048

इतश्च **अन्योन्यकारितादिकरत्वात् कर्मकर्मिणोः सर्वसर्वात्मकते**ति । कारणमाह --**अचेतनज्ञानावरणे**त्यादि, अचेतनानि ज्ञानदर्शनावरणवेद्यमोहायुर्नामगोत्रान्तरायाख्यानि सप्रभेदानि कर्माणि पुद्गलात्मकान्यत्युदीर्णान्यप्यात्मनोऽक्षरानन्ततमभागमुपयोगस्वाभाव्याद् नावृण्वन्ति, शेषं केषाञ्चिदावृण्वन्ति एकेन्द्रियनिगोदसूक्ष्मापर्याप्तकादीनाम्, कर्मणां क्षयोपशमवैचित्र्यात् । 351/mj

* * *

अथैवं नेष्यते ततो नैवात्मा बध्येत कर्मणा तत्फलभूतैश्च तन्वादिभिर्न युज्येत विकर्मत्वाद् मुक्तवत् । प्रकृतीश्वरादिसृष्टिवशादेव न बध्येत न युज्येत च तन्वादिभिः, अमूर्तत्वात्, आकाशवत् ।

* * *

सव्वजीवाणं पि य णं अक्खरस्स अणंततमो भागो
णिच्चुग्घाडित+ओ । - /ms

---

१ *] जीवपरिणामहे+उं कम्मत्ता पोग्गला परिणमंति । इति मलयगिरिसूरिभिः प्रज्ञापनासूत्रवृत्तावुद्धृतायामस्यां कारिकायां पाठः, पृ° ४५५ ॥
२ म] °मंतीतिnayacakra-ms-ya । °मत्तीति nayacakra-ms-bhā ॥
३ घ] घटादिकं सर्वादिकरम् इत्यपि पाठोऽत्र स्यात् ॥
७ चा] वात्म° ? ॥
७ थाविधोप] °पभोग° प्र° ॥
१० कारिता] °तादिकरतादिकरत्वात्nayacakra-ms-ya ॥
२० स] णाणं तु अक्खरं जेण खरति ण कया+इ तं तु जीवातो । तस्स उ अणंतभागो न वरिज्जति सव्वजीवाणं ॥ ७२ ॥ येन कारणेन न कदाचिदपि तद् ज्ञानं जीवात् क्षरति भ्रंशमुपयाति तेन कारणेन ज्ञानमक्षरमुच्यते । कथमेतदवसीयते न

तं पि जदि आवरिज्जेज्ज तेण जीवो अजीवतं पावे ।
सुट्ठु वि मेहसमुद+ए हो+इ पभा चंदसूराणं ॥ नन्दीसू° ४२§ 1052

तथां

स्वल्पं रजो हि कलुषं च नभः करोति राहुर्गृणोति शशिनं बलवांश्च सोमः ।
पङ्को विनाशयति वारिगुणप्रकृष्टिं दोषा मुहूर्तरभसा बलवान् स्वभावः ॥ § 1054

तस्मात् कर्मकर्मिणोरन्योन्यादिकरत्वम् । केवलिनस्तु विगतसर्वावरणविघ्नमोहत्वाद् यद्यप्युपयोगावरणाभावात् तथाविधोपयोगगतिरसिद्धा तथापि वेद्यायुर्नामगोत्रकर्मचतुष्कतत्प्रयुक्तत्वादिहेतुसद्भावादन्योन्यादिकरत्वं सिद्धम् । *सिद्धानां तु कर्मनिर्मुक्ताव्याबाधपारिणामिकपरमसुखक्षायिकसम्यक्त्वज्ञानदर्शनवीर्यलब्ध्यादीनां चादिकरत्वम् । नन्वात्मपुद्गलैक्यापत्तिवचनादेव वा भेदप्रतीतेः स्ववचनविरोध इति । एतन्न, कस्मात्, **पालनपूरणपुरुषत्वात्, पॄपालनपूरणयोः** पा° धा° १०८६, पालयति सुखदुःखादिविपाकांस्तांस्तान् पुद्गलानात्मभावेनेति पाल्यते तैस्तथाविधोपयोगगत्येति वा पुरुषः, पूरयति तांस्तैः पूर्यत इति वा पुरुषः । पुमांसं गिलति पुंसा वा गिल्यत इति

---

कदाचिदपि ज्ञानं जीवात् क्षरति इति ? अत आह--तस्य अक्षरस्य अनन्तभागोऽतिप्रबलेनापि ज्ञानावरणोदयेन संसारस्थानां सर्वजीवानां नाव्रियते । उक्तञ्च--सव्वजीवाणं पि य अक्खरस्स अणंतो भागो णिच्चुग्घाडि+ओ नन्दीसू° ४२ इति । नित्योद्घाटो नाम नित्यापावृतः ॥ ७२ ॥ केन पुनराच्छाद्यते येन ज्ञानस्यानन्तभागो नित्यापावृतः ? इत्याह--एक्केक्को जियदेसो नाणावरणस्स हुंतऽणंतेहिं । अविभागेहाऽऽवरितो सव्वजियाणं जिणे मोत्तुं ॥ ७३ ॥ जिनान् केवलज्ञानिनो मुक्त्वा शेषाणां सर्वजीवानामेकैकको जीवप्रदेशो ज्ञानावरणीयस्य कर्मणोऽनन्तैः अविभागैः अविभागपरिच्छेदैः, येषां ततोऽप्यधो विभागः कर्तुं न शक्यते तेऽविभागपरिच्छेदाः, तैरावृतः ॥ ७३ ॥ यद्येवं कथमनन्तभागो ज्ञानस्य नित्यापावृतः ? इत्याह--जति पुण सो वि वरिज्ज्ेज्ज तेण जीवो अजीवयं गच्छे । सुट्ठु वि मेहसमुद+ए होति पभा चंदसूराणं ॥ ७४ ॥ यथा सुष्ठु अतिशयेनापि मेघसमुदये जाते तथास्वभावत्वात् चन्द्रसूर्याणां प्रभा भवति तथा प्रत्यक्षत उपलब्धेः, एवमेकैकस्य जीवप्रदेशस्य अनन्तैर्ज्ञानावरणाविभागपरिच्छेदैरावरणेऽपि तथास्वभावत्वाद् ज्ञानस्यानन्तभागो नित्योद्घाटित एव । यदि पुनः सोऽप्याव्रियेत तत एकान्ततो निश्चेतनत्वाज्जीवः अजीवतां गच्छेत् अजीवो भूयात्, घटवत् ॥ ७४ ॥ इति मलयगिरिसूरिविरचितायां बृहत्कल्पभाष्यवृत्तौ ॥

१ ज ] जवि आव°nayacakra-ms-bhā । जवि याव° nayacakra-ms-ya ॥
१ आव ] °रिज्जिज्ज nayacakra-ms-ya ॥
४ वा ] nayacakra-ms-vi विना वारिगुणावकृष्टिं प्र° । वारिगुणाप्रकृष्टिं nayacakra-ms-vi । वारि, गुणप्रकृष्टिं ? ॥
८ * ] सिद्धावातिकर्म°nayacakra-ms-ya ॥
९ चा ] वादि° प्र° ॥
१२ थाविधोप ] °पभोग° प्र° ॥

पुद्गलः, पूरणाद् गलनाद् वा पुद्गल इति निरुक्तिभेदेऽप्यर्थैक्यात् पुरुषपुद्गलशब्दयोरिन्द्रशक्रवदेकार्थत्वाददोषः । § 1055

**अथैवं नेष्यते** यथा मयोक्तं कर्मकर्मिणोरन्योन्यादिकरत्वं यदि न स्यात् ईश्वरवशात्, स्वभावादेः प्रकृत्यादेर्वा कुतश्चित् संसारवैचित्र्यं स्यादितीष्यते **ततो नैवात्मा बध्येत कर्मणा** संसारबीजभूतेन शुभाशुभेन, ततश्च **तत्फलभूतैः** शरीरेन्द्रियस्थानविषयैः **शुभाशुभैर्न युज्येत विकर्मत्वाद् मुक्तवत्** । 352/mj

* * *

यदि त्वदृष्टाभावेऽप्यसावीश्वरस्ततस्ते मुक्तानामपि तन्वादीनि असौ कुर्यात्, ईश्वरत्वात्, सर्गादिवत् ।

अत एव च सम्भूयकारित्वाचेतनत्वस्थित्वाप्रवृत्तीनामपक्षधर्मता ।

एवं च कृत्वा तदपि सर्वमसम्बद्धं यत् कर्मकारणैकान्तिन आहुः । त इत्थमाहुः--यदि प्रवर्तयितृत्वात् पुरुषकारः कारणं स्यात् ततः प्रधानमध्यमा-

* * *

मुक्तो वा बध्येत, तत एव, तद्वत् । स्यान्मतं मुक्तामुक्तविकल्पसम्भव एव - /ms
परमार्थतः सृष्टिवशव्यवस्थानादिति । तदपि नोपपद्यते, **प्रकृतीश्वरादिसृष्टिवशादेव न बध्येत** तनुकरणादिभिः, **न युज्येत** भुवनेन **च, अमूर्तत्वादाकाशवत्** । आकाशं वा बध्येत युज्येत च तन्वादिभिः, तत एव, त्वदभिमतपुरुष इव । अनिष्टं चैवमादि भवत इति । § 1056

किञ्चान्यत्, **यदि त्वदृष्टाभावेऽपीत्यादि** । मया तावदित्थमदृष्टाख्यकर्मत्वापन्नसर्वपुरुषेश्वरत्वमुक्तं तस्य तस्य तन्वाद्यादिकरत्वात् । तन्न चेदित्थमादिकरत्वमिच्छसि ततोऽपि त्वदनुवृत्त्याभ्युपगतेऽप्यदृष्टाख्यकर्माभावेऽपि मया दोष उच्यते --**असावीश्वरस्ततस्ते मुक्तानामपि** अभूततथाविधहेतूनामकर्मणां **तनु**करणानि भुवनानि **चासौ कुर्यात्, ईश्वरत्वात्, सर्गादिवत्** । तथा प्रलयकालेऽपि सर्वेषां कुर्यात्, तत एव, तद्वत् । मध्ये वा न कुर्यात्, ईश्वरत्वात्, प्रलयकालवत् । अनिष्टं चैतत् । अस्माच्चानिष्टात् कर्मात्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता । § 1057

**अत एव चेत्यादि** । कर्मात्मैक्यसर्वेश्वरत्वाभ्याम्, अणव एव कर्म, त एव सुखादयः । तस्माददृष्टात् सृष्टिः प्रधानात् सृष्टिः पृथगणुभ्योऽदृष्टचोदितेभ्यो वा सृष्टिः इति वादान्तरपरिकल्पं त्यक्त्वा अस्मदुक्तकर्मात्मैक्यसर्वसर्वात्मकसर्वेश्वरत्वाभ्युपगमोऽवश्यम्भावी । तस्मात् त्वयोक्त**सम्भूयकारित्वाचेतनत्वस्थित्वाप्रवृत्तीनामपक्षधर्मता** । एकत्वात् कस्य द्वितीयस्य केन सह स- - /ms

---

१ पु] पुद्गलाः प्र० ॥
१ पु] पुद्गला प्र० ॥
१ र्थैक्या] °क्यात् पुद्गलशब्दयो° प्र० ॥
१० ए] दृश्यतां पृ० २५६-- २ ॥
१३ मु] मुक्तमुक्तवि°nayacakra-ms-ya । मुक्तवि° nayacakra-ms-bhā ॥
१९ त] तन्निवेदित्थ° प्र० ॥
२१ हेतू] °तूनां कर्मणां प्र० । अत्र °तुकर्मणां इत्यपि पाठः स्यात् ॥
२३ ए] एतद्वत् प्र० ॥
२६ त] दृश्यतां पृ० ३३५ पं० ८ ॥

म्भूयैकार्थकारिता ? किं तदचेतनं चेतनात् पृथग्भूतम् ? सततसम्प्रवृत्त-पूरण-पालन-गलन-पुंगरणादिधर्मत्वाच्च का स्थित्वा प्रवृत्तिः ? इत्यसिद्धार्थत्वाद् विशिष्टचेतनाधिष्ठितत्वं तन्वादीनां न साधयितुमलमिति । यदपि विशेष्योक्तं *__मिथः प्रत्यनीकसम्भूयैकार्थ__कारित्वादिति तदसत्त्वं तु पूर्वोक्तमेव __णिच्छय-तो सव्वलहु__मित्यादिगाथया । तस्मान्नेश्वरपूर्विका सृष्टिः, किन्तु अनेकेश्वर-पूर्विकेति विज्ञेया । § 1058

ताश्च दृष्टाः, न हि दृष्टाद् गरिष्ठमन्यत् प्रमाणमस्ति । कस्मान्नाना न स्युरिति चेत्, उच्यते --__उत्कर्षार्थिकारणैकत्वात्,__ आत्मोत्कर्षार्थी पुरुष एव (Edtext outside numbered paragraph) कारणं न कर्मापि कारणमिति पुरुषकारकारणैकान्तवादमाशङ्कते, पुरुषकार-स्यैकत्व__मुत्कर्षार्थिपुरुषकारैकत्वम्,__ उत्कर्षार्थिनः पुरुषस्य क्रिया कारः, त-स्यैक__त्वात् प्रधानमध्यमाधमभेदभिन्नाः__ स्वाचारदुराचारविकल्पद्वयप्रभेदकृता लोकप्रसिद्धाः __पुरुषकारा न सिध्यन्ति,__ एक एवोत्कृष्टः प्राप्नोति । ततश्च तत्साध्यानामपि फलभूतानां प्रधानमध्यमाधमानां शुभाशुभानां भेदा न प्राप्नुवन्ति, एकैवोत्कृष्टा सिद्धिः प्राप्नोति, (Edtext outside numbered paragraph) न मध्यमाधमे सभेदे सिद्धी स्याताम् । नापि च पुरुषकाराणामसिद्धयः स्युः, ताश्च दृष्टा इति तदुपसंहृत्य साधनमाह --__सप्रभेदास्ताः सिद्धयोऽसिद्धयश्च नानाजातीया न स्युरव्यतिरिक्तकारणत्वात् तुल्यतन्तुपट__वदिति पुरुषकारस्यैव कारणत्वात् तद्व्यतिरिक्तकारणाभावाद् भवतः पुरुषकारैकान्तवादिनः कर्मानपेक्षत्वादिति । § 1059

__एवं च कृत्वे__त्यादि । अनेनैकान्तेश्वरपूर्वकवाददोषप्रकाशनेन कर्मैकान्त-वाददोषप्रकाशनमपि कृतं वेदितव्यमसम्बद्धत्वात् तस्य कर्मैकान्तवादस्य । कथं पुनस्ते कर्मैकान्तवादिन आहुः ? कथं वा तदसम्बन्धः ? इत्यतस्त-त्प्रदर्शनार्थं तावत् पुरुषकारं निराकुर्वन्तः कर्म समर्थयन्तः __त इत्थमाहु__रिति तदुपपत्तीर्दर्शयति, यथा --__यदि प्रवर्तयितृत्वात् पुरुष[कारः] कारणं स्या__दिति पुरुषकार एव कारणं न कर्मापीति चेन्मन्यस इत्येकान्तं सूचयति __तत__ इदमनिष्टं पुरुषकारकारणैकान्तिनस्ते प्राप्तम् । कतमदनिष्टम् ? उच्यते

धमभिन्नाः सिद्धयोऽसिद्धयो वा नाना न स्युः, उत्कर्षार्थिकारणैक-त्वात् । उत्कर्षार्थिपुरुषकारैकत्वात् प्रधानमध्यमाधमभेदभिन्नाः पुरुषकारा न सिध्यन्ति । सप्रभेदास्ताः सिद्धयोऽसिद्धयश्च नानाजातीया न स्युः, अव्य-तिरिक्तकारणत्वात्, तुल्यतन्तुपटवत् ।

कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्तयितृ । *द्विविधा च... ... ... इतरस्य । तत्र त्वदिष्टपुरुषकारव्यापारस्यावतार एव नास्ति स्व-

---

४ *] दृश्यतां पृ° ३३१ पं° ५ ॥
४ णिच्छ] दृश्यतां पृ° ३०१ पं° ४ ॥
५ अ] __अनेकैकेश्वर°__ प्र° । दृश्यतां पृ° ३३८ पं° १२ ॥

१८ *] द्विविधा च प्रवृत्तिः एकस्य पुरुषकारस्य साध्या असाध्या च इतरस्य । इत्याशयको मूलपाठोऽत्र सम्भाव्यते । तुलना--पृ° ३६६ पं° १४ ॥

शक्त्याधानासमर्थत्वात् । चेतनामात्रसारो हि पुरुषकारः शक्तिः, न च स पशुत्वे वर्तमानो मनु-

* * *

मध्यमाधमभिन्नाः सिद्धयोऽसिद्धयो वा नाना न स्युः,--**प्रधान** 353/mj

* * *

**धमभिन्नाः सिद्धयोऽसिद्धयो वा नाना न स्युः, उत्कर्षार्थिकारणैकत्वात् । उत्कर्षार्थिपुरुषकारैकत्वात् प्रधानमध्यमाधमभेदभिन्नाः पुरुषकारा न सिध्यन्ति । सप्रभेदास्ताः सिद्धयोऽसिद्धयश्च नानाजातीया न स्युः, अव्यतिरिक्तकारणत्वात्, तुल्यतन्तुपटवत् ।**

**कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्तयितृ । *द्विविधा च... ... ... इतरस्य । तत्र त्वदिष्टपुरुषकारव्यापारस्यावतार एव नास्ति स्वशक्त्याधानासमर्थत्वात् । चेतनामात्रसारो हि पुरुषकारः शक्तिः, न च स पशुत्वे वर्तमानो मनु-**

* * *

**मध्यमाधमभिन्नाः सिद्धयोऽसिद्धयो वा नाना न स्युः,**

इत्थं परपक्षे दोषमुक्त्वा स्वपक्षसाधनमाह --**कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्तयितृ** । **इति**शब्दो हेत्वर्थे, कार्याणामनेकभेदानां सिद्धीनामसिद्धीनां च परस्परतोऽतिरिक्तत्वात् कारणातिरेकेणावश्यं भवितव्यम्, तच्च कारणं **कर्मैव** पुरुषस्य त्वदभिमतस्य **प्रवर्तयितृ** प्रवर्तकमनेकभेदमिति ग्रहीतव्यम् । तस्य कार्यनानात्वानुमितस्य कारणसामान्यस्य कर्म इति संज्ञा क्रियते, पुरुषकारस्य पुरुषादीनां च कारणानां निराकृतत्वात् । तस्य सिद्ध्यसिद्धिभेदकार्यलिङ्गादनुमानं देशान्तरप्राप्त्यनुमेयादित्यगतेरिव, **द्विविधा** चेत्यादिना तल्लिङ्गासिद्धिपरिहारार्थं याव**दितरस्ये**ति गतार्थम्, प्रसिद्धं लिङ्गमित्यर्थः । **तत्रे**त्यादि, तत्र एतस्मिन् कारणवैचित्र्यानुमानलिङ्गे कार्ये **त्वदिष्टपुरुषव्यापारस्यावतार एव नास्ती**त्यावयोर्लोकस्येव प्रसिद्धे कार्यलिङ्गे त्वदभिमतकारणासम्भवोऽस्मन्मतकारणसम्भव एवेति च दर्शयति । कस्मात् ? **स्वशक्त्याधानासमर्थत्वात्** । कस्य स्वशक्तिरिति चेत्, चेतनस्य पुरुषस्य । **चेतनामात्रसारो हि पुरुषकारः शक्तिः**, हिशब्दो यस्मादर्थे, यतोऽस्यैषा शक्तिः एतां चाधातुम शक्तोऽसाविष्टे मनुष्यत्वे पशुत्वे वर्तमान इति स्वश- - /ms

४ माध]
धर्मभिन्नाःnayacakra-ms-ya । दृश्यतां पृ॰ ३६५ पं॰ १७ ॥
९ *] द्विविधा च प्रवृत्तिः एकस्य पुरुषकारस्य साध्या असाध्या च इतरस्य । इत्याशयको मूलपाठोऽत्र सम्भाव्यते । तुलना--पृ॰ ३६६ पं॰ १४ ॥
१४ माध]
धर्मभिन्नाःnayacakra-ms-ya । दृश्यतां पृ॰ ३६५ पं॰ १७ ॥
१७ र] ॰रतोरिक्त॰ प्र॰ ॥
१८ प्र] प्रवर्तयितुः प्रवर्तमने॰nayacakra-ms-bhā । प्रवर्तयितुः प्रवर्त्यमने॰ nayacakra-ms-ya ॥
२८ तोऽस्यैषा] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२८ ए] एषांnayacakra-ms-ya ॥

त्त्याधानासामर्थ्यं दर्शयति --**न च स** इत्यादि, सत्यपि चैतन्ये तां स्वां
354/mj चैतन्यशक्तिं कर्मबलाकृष्टनिकृष्ट

* * *

ष्यत्वे स्वचैतन्यशक्तिमाधातुं समर्थः, मनुष्यः सन्न तज्ज्ञानं पशौ, तस्यापि कर्मलभ्यत्वात् । अपि तर्हि गङ्गायाः स्रोतस्य... ...।

यायोऽपि च पुरुषः सोऽस्वतन्त्रः, कर्मपरवशत्वात्, वेतालाविष्टशवशरीरवत्, उपक्रमप्रभृति... ... ...प्राणांश्च जह्यात् ।

अतो यथाहारविशेषाभ्यवहरणखलरसादिविभजनाद्यसञ्चेतितक्रियासु अस्वतन्त्र एव ताः कर्मकृताः पुरुषो मत्कृता इत्यभिमन्यते, तत्कार्यतायां हि तासां कदाचिदकरणाभावादिहैव अमृतत्वप्रसङ्गः तथा कायेन्द्रियनिर्वर्तनेऽप्यनिष्टशरीरेन्द्रियादिर्न स्यात्, इष्टस्यैव करणं स्वातन्त्र्यात् स्यात् । तस्मात् सर्वमेव तत् कर्मण एव । तदतिरेकेण क आत्मनि प्रतिपद्येत ?

* * *

पश्वज्ञानकुशक्तौ वर्तमानो न विशिष्टेष्टमनुष्यचैतन्ये स्थापयितुं शक्त इति, विपर्ययेण **मनुष्यः सन्न तज्ज्ञानं पशौ आधातुं समर्थः** इति वर्तते । तस्यात्मनो यत् **स्वतत्त्वम्** इति त्वया प्रतर्कितं तन्न शक्नोति कर्मवशीकृतो योनिजात्यन्तरस्थो योनिजात्यन्तरेऽन्यत्राधातुम्, कुतः ? **तस्यापि कर्मलभ्यत्वात्,** पशोर्मनुष्यस्य वा चैतन्यस्य कर्मवशादेव तथाभावात् मनुष्यः पशुर्वा स्वजातिनामकर्मोदयादेव भवतीत्यर्थः, तदुदयस्य कारणान्तरदुर्निवारत्वात् । तत्र दृष्टान्तमाह --**अपि तर्हि गङ्गाया** इत्यादि, सम्भावनयैतदुच्यते, अपि चैतत् सम्भाव्यम्--*देवविक्रियोत्पातादिना गङ्गास्रोतस्यन्यथा प्रवृत्तस्य कर्मणोऽन्यथा प्रवर्तनमिति । एवं तावदभ्युपगम्य स्वतन्त्रं चेतनं पुरुषकारं च तस्योक्तम् । § 1060

नैव वाभ्युपगच्छाम एतत् सर्वं किञ्चित् कर्मव्यतिरिक्तम्, कुतः ? तत्त्वचिन्तायां कर्मव्यतिरिक्तकारणानवस्थानादित्येतद् दर्शयति --**यायोऽपि चे**त्यादि यावद् **वेतालाविष्टशवशरीरव**दिति । कर्मवेतालाविष्टो हि पुरुषोऽस्वतन्त्र इष्टानिष्टतुल्यप्रवृत्तिः परवशत्वात् पुरुषस्य, **उपक्रमप्रभृति** इत्यादि याव**ज्जह्या**दिति तत्स्वातन्त्र्याभावप्रतिपादनार्थो निमेषोपक्रमादारभ्य मरणापवर्गावसान इति गतार्थः । § 1061

हेतोः, नात्मनः, **कर्मणः** इति पञ्चम्या हेत्वर्थे विहितत्वात् । **तदतिरेकेण क आत्मनि प्रतिपद्येत ?** तस्मादेवं विद्वान् क आत्मनि एतदनुपपद्यमानं कर्मव्यतिरेकेण अभ्युपगच्छेत् ? नाभ्युपगच्छ (Edtext outside numbered paragraph)त्येव विद्वानित्यभिप्रायः । तस्मादहेतुः पुरुषस्तत्कारश्च । § 1062

- /ms पुनरपि --**अतो यथाहारविशेषेत्यादि** याव**दिहैवामृतत्वप्रसङ्गः** । मातु-

२० *] देवक्रियो॰nayacakra-ms-ya ‖

रोजः पितुः शुक्रञ्च प्रथमाहारः, ततः सत्ताहं कललं भवति तन्दुलवै० १७ इत्यादिना क्रमेण शरीरेन्द्रियादिकारणाहारः प्राणनादियात्रासमर्थः, तस्य च खलरसादिभावेन विभजनम्, इत्याद्यसञ्चेतिताव्यक्तक्रियासु अस्वतन्त्र एव गर्भादिषु सुप्तश्च । तास्तु क्रियाः कर्मकृताः पुरुषो मत्कृता इत्यभिमन्यते, तथा भासमानत्वात् । तत्कार्यतायां हि पुरुषकारकार्यतायां हि तासां क्रियाणां कदाचिदकरणाभावात् प्राणस्थितिहेत्वनुपरमणाद् मरणाभावः, तस्मादिहैवामृतत्वाय कल्पेतेति दृष्टेष्टविरोधदोषप्रसङ्गः । तथा कार्येन्द्रियनिर्वर्तनेऽप्यनिष्टशरीरेन्द्रियादिर्न स्यात् काणकुण्टबधिरादिः, सम्पन्नेन्द्रियजातिसंस्थानसंहननादियुक्त एव स्यात् । पुरुषकारकार्यनिर्वर्तने च धर्माद्यनुष्ठानविषयोपभोगादौ

अकारणमपि कर्म, सहायापेक्षत्वात्, भारोत्पाटवत् । एतदपि च न मन्तव्यम् अकारणमपि कर्म सहायापेक्षत्वात्, फलोपहाराय स्वामिनयोद्योगावपेक्ष्यौ अमात्यादिप्रकृतिश्च इति, यतस्तान्यपि हि स्वामिधर्माधर्मरज्जुयतिनिबद्धानि, तदायत्तत्वात् तद्भोग्यत्वात्... ...तन्तुपटवत् । यदि तानि स्वामिधर्माधर्मरज्जुयतिनिबद्धानि न स्युस्ततः सर्वाविशेषप्रसङ्गः ।

योऽपि स्वामिपुरुषकारः सोऽप्यधर्मफलत्वात् कर्मैव, क्लेशत्वात्, ज्वरवत् ।

* * *

तस्मात् सर्वमेव तत् कर्मण एवइष्टस्यैव करणं स्वातन्त्र्यात् स्यात् । 355/mj

* * *

**अकारणमपि कर्म, सहायापेक्षत्वात्, भारोत्पाटवत् । एतदपि च न मन्तव्यम् अकारणमपि कर्म सहायापेक्षत्वात्, फलोपहाराय स्वामिनयोद्योगावपेक्ष्यौ अमात्यादिप्रकृतिश्च इति, यतस्तान्यपि हि स्वामिधर्माधर्मरज्जुयतिनिबद्धानि, तदायत्तत्वात् तद्भोग्यत्वात्... ...तन्तुपटवत् । यदि तानि स्वामिधर्माधर्मरज्जुयतिनिबद्धानि न स्युस्ततः सर्वाविशेषप्रसङ्गः ।**

**योऽपि स्वामिपुरुषकारः सोऽप्यधर्मफलत्वात् कर्मैव, क्लेशत्वात्, ज्वरवत् ।**

* * *

**तस्मात् सर्वमेव तत् कर्मण एव**

स्यान्मतम् --अकारणमपि कर्म, सहायापेक्षत्वात् । पुरुषकारमकारणमपि कर्म सहायमपेक्षते कवलास्यप्रक्षेपादिवत् । यथोक्तम्—

---

१ स] दृश्यतां पृ० २५९ टि० ६ ॥
४ ग] गर्त्तादिषुnayacakra-ms-ya । गतार्थादिषु nayacakra-ms-bhā । दृश्यतां पृ० ११३ पं० १२ ॥
७ क] कल्पतेति प्र० ॥
८ का] कार्येन्द्रि० प्र० ॥
८ रीरेन्द्रिया] ०यादि न प्र० ॥
१४ ज्जु] ०रज्जुप्रतिनि० ? ॥
१५ र] ०रज्जुप्रतिनि० ? ॥
१९ त] तस्मात्तत् सर्वमेव तत्कर्मण एवnayacakra-ms-ya ॥
२२ ज्जु] ०रज्जुप्रतिनि० ? ॥
२४ र] ०रज्जुप्रतिनि० ? ॥
२८ त] तस्मात्तत् सर्वमेव तत्कर्मण एवnayacakra-ms-ya ॥

आलस्याद् यो निरुत्साहः स किञ्चिन्नाश्नुते फलम् ।
स्तनक्षीरादिपानं च पौरुषान्न विशिष्यते ॥ § 1065

अतो **भारोत्पाटवत्,** यथा भारं समुद्वहन् पुरुषः सहायमुत्क्षेप्तारं निक्षेपकं चान्तरेण स्वयमेव न शक्नोति वोढुमिति कारणमकारणं च दृष्टस्तथा कर्म पुरुषकारमन्तरेणेति कारणमकारणं चेति । § 1066

**एतदपि च न मन्तव्यमकारणमपीत्यादिना** तमेव पूर्वपक्षं व्याच- - /ms ष्टे । भारोत्पाटापेक्षभारो- द्वाहवदत्र किं सहायं कर्मणोऽपेक्ष्यमिति चेत्, उच्यते --**फलोपहारायेत्यादि,** फलमुपहरिष्यतः कर्मणस्तत्**स्वामिनः** कर्तुर्न**योद्योगावान्तरावपेक्ष्यौ,** बाह्या स्वामात्यादिप्रकृतिः । किं पुनः कारणम् एवं न मन्तव्यम् ? उच्यते --**यतस्तान्यपि हि स्वामिधर्माधर्मरज्जुयतिनिबद्धानीत्यादि** यावत् **तन्तुपटवत्** सहेतुदृष्टान्तकेन पदवाक्येन अमात्यादीनां धर्माधर्मकार्यत्वमापाद्य कर्मकारणावधारणात् पुरुषकारं निराकरोति **तदायत्तत्वात् तद्भोग्यत्वादित्यादिना** हेतुसौलभ्यं च दर्शयति । **तन्तुपटवदिति** तन्त्वायत्तपटवत् पटत्वेन तन्तूनामेव भोग्यत्ववत् । **यदि तानीत्यादि** एवमनभ्युपगमे **सर्वाविशेषप्रसङ्ग** इत्यनिष्टापादनम् । § 1067

**योऽपीत्यादि** । यदपि चोक्तं **स्वामिनयोद्योगावपेक्ष्यौ** इति **स्वामिपुरुषकारः सोऽप्यधर्मफलत्वात् कर्मैव,** न पुरुषकारो नाम कर्मातिरिक्तोऽस्तीत्यवधारणार्थं प्राक्प्रतिज्ञातं समर्थयति, **क्लेशत्वात्,** क्लेशो हि चिन्ताव्यायामरूपः, मनःशरीरायासात्मकत्वात्, **ज्वरवत्** । § 1068

356/mj

अथैतमधर्मफलं नेच्छसि न तर्हि दुःखमधर्मफलमिति प्राप्तम्, तत्कर्मणः प्राणातिपातादेर्धर्मफलप्राप्तिरिष्टप्राप्तिरिति प्राप्तम्, धर्माधर्मफलविपर्ययात् । पुरुषकारनैरर्थक्यं च । § 1069

स च यद्यहेतुको मुक्तानामपि स्यात् । सहेतुश्चेत् कर्मण एवाचेतनात्, युक्तिक्षमहेत्वन्तराभावात् । § 1070

---

३ भा] भारोत्पाद॰ प्र॰ । दृश्यतां पृ॰ ३६३ पं॰ २० ॥
४ का] कारणकारणं प्र॰ ॥
६ व्य] ॰व्यकार॰ प्र॰ ॥
९ स्वा] स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥ इति अमरकोषे २ । ८ । १७ ॥
१० र] ॰रज्जुप्रतिनि॰ ? ॥
११ स] सहेतुकदृष्टान्तेनnayacakra-ms-ya ॥
११ प] पटवाक्येन प्र॰ ॥
१५ स] सर्वाशेष॰nayacakra-ms-ya । सर्दाशेष॰ nayacakra-ms-bhā ॥
१६ पि] दृश्यतां पं॰ २ ॥
१८ णा] ॰णार्थःnayacakra-ms-bhā ॥

यदा च पुरुषस्य प्रवृत्तौ नास्ति कर्तृत्वं तदा द्रवतीति द्रव्यं कर्तृसाधनं न भवति । कर्मपरिग्रहविशेषस्तु द्रव्यं द्रूयते गम्यते...इति । भोग्येन कर्मपुरुषेण § 1071

अथेत्यादि । **अथैतं** पुरुषकारसङ्क्लेश**मधर्मफलं नेच्छसि** प्रज्ञोत्साहयुक्तस्य प्रशस्तत्वेनेष्टत्वाल्लोके ततो **न तर्हि दुःखमधर्मफलमिति प्राप्तं** शिरोरोगादि, क्लेशत्वात्, नयोद्योगपुरुषकारवत् । यथोक्तम्—

अनर्थपाण्डित्यमधीत्य यन्त्रितः सुतेषु दारेषु च नित्यशङ्कितः ।
निशासु जागर्ति हिनस्ति बान्धवान् नमोऽस्तु राज्याय वरं दरिद्रता ॥ इति ।§ 1074 - /ms

अथ प्रसिद्धिविरोधदोषभयाद् दुःखमधर्मफलमिति त्वयानुज्ञायते तत्साचिव्यक्रियायाश्च हिंसादेर्दुःखसाधनतां गतत्वात् **तत्कर्मणो** हेतोः **प्राणातिपातादेर्धर्मफलप्राप्तिः**, कासौ ? इष्टशरीरेन्द्रियविषयसुखसम्यग्ज्ञानारोग्यादिप्राप्तिः इत्येतत् प्राप्तम्; शुभाशुभयोरिष्टानिष्टविपर्ययफलाभ्युपगमात् धर्माद् नयोद्योगौ दुःखं वा इत्युक्तत्वादत एव प्राप्तम्, अधर्मफलाद् दुःखात् सुखं धर्मफलमिति प्राप्तम् । किं तत् ? इति तद्दिङ्मात्रं प्रदर्शयति **--इष्टप्राप्तिरि**ति इष्टशरीरेन्द्रियादिप्राप्तिरित्येतत् **प्राप्तम्** । किं कारणम् ? **धर्माधर्मफलविपर्ययात्** इत्यतः **पुरुषकारनैरर्थक्यं च** यादृच्छिकत्वाविशेषात् । अतो यदुक्तं कर्मैव कारणं पुरुषकारस्यापि कर्मफलत्वात् इति श्रेयान् पक्षः । यथोक्तम्-- § 1075

यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवोपतिष्ठते ।
तथा तथा पूर्वविधानुसारिणी प्रदीपहस्तेव मतिः प्रवर्तते ॥
§ 1077

अभ्युपगम्यापि पुरुषकारं दोषं ब्रूमः--स निर्हेतुकः सहेतुको वा स्यात् ? किञ्चातः ? **स च** पुरुषकारो **यद्यहेतुको मुक्तानामपि स्याद्** नयोद्योगलक्षणः न चेष्टस्तेषाम् । अथ मा भूदेष दोष इति सहेतुरिति ब्रूयात् ततः **सहेतुश्चेत् कर्मण एवाचेतनात्,** शुभादपि पुरुषकारात् सेवादिकादनर्थावाप्तेरशुभादपि प्राणातिपातादेरर्थावाप्तेर्धर्माधर्मफलसङ्करोक्तेरनुमातुं शक्यत एतत् अबुद्धिपूर्वकादचेतनकर्मवशादेवैतच्छुभाशुभवैचित्र्यम् । किं कारणम् ? **युक्तिक्षमहेत्वन्तराभावात्,** विचारितनिषिद्धत्वात् पुरुष-नियति-कालस्व- - /ms

४ क्लेश ] ॰शधर्म प्र॰ ॥ nayacakra-ms-bhā ॥
१० त्साचि ] ॰व्यक्तिव्यात्कि ?यायाश्चnayacakra-ms-bhā ॥
१० न ] ॰नतांगतत्वात्तत्वात्तत्कर्मणोnayacakra-ms-ya । ॰नतांगतत्वात्तत्वात्तत्वात्तत्कर्मणो
१२ शुभाशुभ ] ॰भयोरिष्टविपर्यय॰ प्र॰ ॥
२४ ए ] एवचे॰ प्र॰ ॥
२५ ङ्क ] संकारोक्ते॰ nayacakra-ms-bhā । संस्कारोक्ते॰ nayacakra-ms-ya ॥

भावादिहेत्वन्तराणां नात्रान्यद् विमर्दक्षमं कारणमस्त्यन्यदतो दैवाख्यात् कर्मणः । § 1078

**यदा चे**त्यादि । यस्मिन् काले एवं च कृत्वा **पुरुषस्य प्रवृत्तौ** साध्यायां **नास्ति कर्तृत्व**मिति *सिद्धे कर्मण एवेति च सिद्धे **तदा** तस्मिन् काले **द्रवतीति द्रव्यं कर्तृसाधनं न भवति** स्वतन्त्रस्य कर्तुरनुपपत्तेः । **कर्मपरिग्रहविशेषस्तु,**
357/mj तुशब्दो विशेषावधारणार्थः, कर्मसाधनमुपपन्नार्थं द्रव्यं द्रूयत

* * *

द्रव्यं क्रियते, कर्मपुरुषेणैव कर्मपुरुषः क्रियते, यथा व्रीहिणैव व्रीहिः क्रियते, कार्येणैव बीजव्रीहिणाङ्कुरव्रीहिः ।

यच्चापि पुरुषकारकारणैकान्तिन आहुस्तदपि सर्वमसम्बद्धम् । त इत्थमाहुः— एवंवादिनस्ते पुनः कार्यलक्षणत्वात् कर्मणोऽक्षरार्थाच्च कर्मव्यतिरिक्तः कर्ता अस्ति, घटस्येव कुलालः ।

ननु कर्मणैव करिष्यते । ननु सुदूरमपि गत्वा व्रीहेरप्यावर्तकत्वात् स्वरूपभेदादक्षरार्थाच्च निर्विवादकृतकत्वात् कर्मणः कर्तुरिव भावः तच्छक्तेः ।

* * *

इत्ययं विशेषोऽवधार्यते । तद्विग्रहं दर्शयति --**द्रूयते गम्यत** इत्यादि । तदिदानीं निरूप्यते --**भोग्येन कर्मपुरुषेण** तेन **द्रव्यं क्रियते** । किमुक्तं भवति ? **कर्मपुरुषेणैव कर्मपुरुषः क्रियत** इत्युक्तं भवति । तत्र दृष्टान्तः --**यथा व्रीहिणैव व्रीहिः क्रियत** इति । **कार्येणैव बीजव्रीहिणाङ्कुरव्रीहि**रिति तद्व्याख्या, एवं तावदवधारणेन कर्त्रर्थो निराकृतः, कर्मैकान्तवाद उपपादितः, चेतनाचेतनैक्यात् सर्वसर्वात्मकत्वाच्चायुक्त ईश्वरोऽन्यो हेतुरिति चेति । § 1079

**यच्चापी**त्यादि । न केवलं कर्तृसाधन एव दोषः, किं तर्हि ? कर्मैकान्तवादोऽप्ययुक्तः । तत्प्रदर्शनार्थमाह --**एवंवादिनस्ते पुनः कार्यलक्षणत्वात् कर्मणः**, कार्यं कर्म, यत् क्रियते तत् कर्म, **कर्तुरीप्सिततमं कर्म** पा॰ १ । ४ । ४९ इति लक्षणा**दक्षरार्थाच्चा**नुमेयः कर्ता । तस्मात् कर्मणोऽन्यं कर्तारं कर्मव्यतिरिक्तमन्तरेण कर्माभावाद् घटस्येव कुलालोऽवश्यैष्यः कर्ता । प्रयोगश्च--स्वतोव्यतिरिक्तचेतनकर्तृकं त्वदिष्टं कर्म, कार्यत्वात् क्रियमाणत्वात्, घटवदिति । § 1080

अत्रोत्तरं परः **ननु कर्मणैव करिष्यत** इति स्वत एव कर्मणा कर्म क्रियते न तद्व्यतिरिक्तेन कर्त्रेत्युक्तं प्राग् दृष्टान्ते **व्रीहिणैव व्रीहिः कार्येण बीजव्रीहिणा**
- /ms **कार्योऽङ्कुरव्रीहिः क्रियत** इत्युक्तं मयेति स्मारयति । इतर आह --**ननु सुदूर-**

४ *] सिद्धेः प्र॰ ॥
५ ह] ॰हावि॰ प्र॰ ॥
७ व्री] दृश्यतां पं॰ १९, पृ॰ ३६५ पं॰ १३ ॥
९ य] दृश्यतां पृ॰ ३५९ पं॰ १७ ॥
१२ व्री] दृश्यतां पृ॰ ३५८ पं॰ २४ ॥
१८ था] दृश्यतां पृ॰ ३५८ पं॰ २४ ॥
२० स] सर्वासर्वात्म॰nayacakra-ms-bhā ॥
२५ कुलालो] ॰लोवास्येष्यः प्र॰ ॥
२९ व्री] दृश्यतां पं॰ १ ॥

**मपि गत्वे**त्यादि, विचार्य विचार्याप्यात्मव्यतिरिक्तपुरुषाविनाभावित्वात् कर्मणस्त्वयाप्येतदभ्युपगन्तव्यं कर्मवादिना--कर्मव्यतिरिक्तः कर्ता पुरुषोऽस्तीति । कस्मात् ? **व्रीहेरप्यावर्तकत्वात्,** अस्यापि व्रीहिदृष्टान्तस्य क्षित्युदकाकाशवाताङ्कुराद्यावृत्तिरूपत्वात् तेषां च **स्वरूपभेदात्** स्वतःपृथग्भूतकर्त्रविनाभूतं कर्म सिध्यति अतो विपर्ययसाधनत्वमिति । किञ्चान्यत्, **अक्षरार्थाच्च,** क्रियत इति कर्म **कर्तुरीप्सिततमं कर्म** पा० १ । ४ । ४९ इति कर्मशब्दाक्षरार्थः । ततस्तस्य कृतकत्वं निर्विवादम्, तस्माच्च **निर्विवादकृतकत्वात् कर्मणः कर्तुरेव भावः** स्वतन्त्रस्य, पुरुष एव भवति, **कर्तुरेव भावः** सर्वस्येति पञ्चमीनिर्देशाद् वा पुरुषादेव सर्वं भवति कारणात् । एवं च त्वदुक्तहेतोरेव कर्मव्यतिरिक्तपुरुषसिद्धेः कर्मणश्च तद्व्यतिरिक्तस्य सिद्धेरावर्तकवैधर्म्येण कर्मणः कृतकत्वं कर्त्रर्थान्तरभूतस्यावधारणं च युक्तम् । कुतः ? **तच्छक्तेः,** तस्मादेव हि कर्तुः पुरुषात् कर्मणः कृतकत्वशक्तिः, कर्तुर्वा पुरुषस्य करणशक्तिः, न व्रीहिणैव व्रीहिवदावर्तकत्वेनेति । § 1081

358/mj

**न हि स क्रियमाणः, कर्मणोऽस्वतन्त्रत्वे सति अलब्धात्मवृत्तित्वादभवनमाभूतदेवदत्तवत् ।** § 1082

**शास्त्रनिराकरणमेवं त्वदुपदेशादिक्रियानिराकरणं च, कर्मप्रवृत्तिमात्रत्वात् तत्प्रतिपत्त्यप्रतिपत्त्योः ।** § 1083

**कर्मप्रवृत्तिमात्रत्वात् तथा शास्त्रार्थस्य अस्मदुपदेशादिक्रियाणां च प्रति-** § 1084

**न हि स क्रियमाण** इत्यादि यावदा**भूतदेवदत्तव**दिति तदेव भावयति । तस्याः कर्मशक्तेरस्वतन्त्रत्वमलब्धात्मवृत्तित्वात् । अस्वातन्त्र्याच्च कुतो भवनम् ? दृष्टान्तः--आभूतदेवदत्तो गर्भोपक्रमावस्थायां कार्यायामलब्धात्मवृत्तित्वादस्वतन्त्रः अस्वतन्त्रत्वादकर्ता, अकर्तृत्वाच्च न भवति कार्यावस्थाव्यतिरेकेण यथा देवदत्तः तथा कार्यावस्थायां कर्मापि क्रियमाणं न भवेत्, अनिष्टं चैतत् त्वयापि । तस्मात् कर्माभवति, तच्च पृथग्भूतपुरुषभवनादृते न भवतीत्यस्ति पुरुषः । § 1085 - /ms

४ क] °कर्तृवि°nayacakra-ms-ya ॥
७ निर्विवाद] °दकत्वात् प्र° ॥
११ क] कर्त्र्यर्थान्तर°nayacakra-ms-bhā । कर्त्रव्यार्थान्तर° nayacakra-ms-ya । कर्तुर्वार्थान्तर° ? ॥
१३ व्रीहिव] °वदवर्त° प्र° ॥
१४ क] दृश्यतां पं° २४ ॥
१६ शा] दृश्यतां पं° २३ ॥
२१ श] °शक्त्येस्व°nayacakra-ms-bhā । °शक्तेः स्व° nayacakra-ms-ya ॥
२२ ब्धात्म] °त्मकवृ° प्र° ॥
२३ अक] °र्तृकत्वाच्च प्र° ॥

किञ्चान्यत्, पुरुषकारप्रत्याख्याने सर्वशास्त्रवैयर्थ्यप्रसङ्गः । कथम् ? यथाक्रमं हितप्राप्त्यहितपरिहारावर्थौ सर्वशास्त्राणाम्, ताभ्यां च हिताहितप्राप्तिपरिहारार्थाभ्यां निरुक्तीकृतसत्यत्वानि प्रमाणान्तरसंवादेन चिकित्सितादीनि शास्त्राणि, यथा—

कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः ।
तद्वद् दन्ती, प्रभावात् तु विरेचयति सा नरम् ॥ चरकसं° १ । २६ । ६८
नागरातिविषामुस्ताक्वाथः स्यादामपाचनः ॥ चरकसं° ६ । १५ । ९८ § 1089

इत्यादीनि पुरुषतत्क्रिययोरभावे कर्मकारणैकान्ते निराकृतानि स्युरित्थम् । न चेष्यते तन्निराकरणं कस्यचित् प्रमाणान्तरसंवादिनः शास्त्रस्य प्रामाण्यदर्शनात् । **त्वदुपदेशादिक्रियाणां च** दृष्टार्थानां **निराकरणम्** एवमिति वर्तते, कर्मकारणैकान्ते पुनः पुरुषस्य स्वतन्त्रस्य तत्क्रियायाश्चाभावे परप्रतिपादनार्थं तच्छक्तियुक्तशब्दोच्चारणक्रिया न स्यात् कर्मत एव प्रवृत्तेः । **आदि**ग्रहणादोदनस्य मुखसंयोजनादिक्रियाश्च न स्युः, **कर्मप्रवृत्तिमात्रत्वात् तत्प्रतिपत्त्यप्रतिपत्त्योः**, त्वदुपदेशार्थप्रतिपत्तिः कर्मत एव परस्य, स प्रतिपद्यते विनाप्युपदेशेन, न प्रतिपद्यते वा सत्यप्युपदेशे । § 1090

**कर्मप्रवृत्तिमात्रत्वादित्यादि** यावत् **कर्मण एवेति चेत्** । **स्यान्मतम्**--यदुच्यते **शास्त्रनिराकरणमेवं त्वदुपदेशादिनिराकरणं च** **कर्मणोऽस्वतन्त्रत्वे सत्यलब्धात्मवृत्तित्वादाभूतदेवदत्तवदभवनम्**, **निर्विवादकृतकत्वात्** **कर्तुरेव** **भावस्तच्छक्तेः**, **व्रीहेरप्यावर्तकत्वात् स्वरूपभेदात्** **पुरुष एव भवति**, इत्यादि सर्वं नोपपद्यते, कर्मत एव भवति इत्युपपद्यते **कर्मप्रवृत्तिमात्रत्वात् तथा**
- /ms **शास्त्रार्थस्यास्मदुपदेशादिक्रियाणां च प्रतिपत्त्यप्रतिपत्त्योः कर्मप्रवृत्तिमात्रत्वात्** प्राज्ञपुरुषप्रतिपत्तिवद् बलीवर्दाद्यप्रतिपत्तिवच्च । तस्मात् **सर्वाण्येतानि कर्मण**
359/mj **एव** हेतोर्भवन्ति पूर्वोक्तन्यायवच्चिन्ताव्यायामादिशारीर

* * *

पत्त्यप्रतिपत्त्योः सर्वाण्येतानि कर्मण एवेति चेत्, अथ तदादिकर्म कुतः ? ब्रूयास्त्वम्--ओं पुरुषादेवेति । कर्मत एव न, व्रीहिवैधर्म्येणाकर्तृकत्वात्, आत्मादिवत्, नोत्क्षेपणवत् ।

कथमसम्बद्धम् ? यस्मान्न शुभमशुभं वा रूपादि इष्टकारणमनिष्टकारणं वा एकान्तेन किञ्चिदस्ति । तदेव शुभमशुभमिष्टकारणमनिष्टकारणं च । एक एव

---

५ क ] दृश्यतां पृ° २२५ टि° ५ ॥
१४ त ] तत्प्रतिपत्त्योः प्र° ॥
१४ देशा ]
°श्यार्थ°nayacakra-ms-bhā ॥
१४ तिप ] °पद्य विना° प्र° ॥
१७ शा ] दृश्यतां पं° ३ ॥
१९ प्याव ] °र्तकात् प्र° ॥

* * *

मानसक्लेशफलत्वात् तस्य, **इति चेदाशङ्कायाम्,** एवं चेन्मन्यसे । ततस्त्वमिदमसि तावत् प्रष्टव्यः **--अथ तदादिकर्म कुतः ?** इति । मम तावदभिप्रायः--कृतकत्वात् कर्मणः पुरुषादेव तदिति । तन्नेच्छता त्वया वक्तव्यम्--कुतस्तदादिकर्म यत एतत् सर्वं प्रतिपत्त्यप्रतिपत्तिक्लेशादि ? इति त्वदभिप्रायाकर्षणार्थः प्रश्नः, किं तदपि कर्मण एव उत पुरुषात् ? इति । **ब्रूयास्त्वम्--ओं पुरुषादेवेति,** एवं नामास्तु, को दोषः गत्यन्तराभावात्, **कर्मत एव** इत्यभिप्रायः स्यादित्यत्र ब्रूमः **--न, व्रीहिवैधर्म्येणाकर्तृकत्वात्,** व्रीहेरप्यावर्तकत्वात् कर्तृत्वमुपयाति, नासावतो व्रीहिरकृतकः, **अकर्तृकत्वात्,** ततश्चाक्रियमाणत्वान्नोपपद्यते कर्मणः कर्मत्वं तस्यादिकर्मणः । किमिव ? **आत्मादिवत्,** यथा आत्माकाशकालदिगादीनि न केनचित् क्रियन्त इत्यकर्माणि तथा आदिकर्मापि स्यात् । **नोत्क्षेपणवदिति** वैधर्म्यदर्शनम्, यथा उत्क्षेपणं कर्म तद्व्यतिरिक्तेनोत्क्षेप्त्रा विना न भवति तथेदमिति । § 1091

एवं पुरुषकारवादिना कर्मवादी दूषितः, कर्मवादिना च प्राक् पुरुषकारवादी । तस्माद् यदुक्तम् **एवं च कृत्वा तदपि सर्वमसम्बद्धं यत् कर्मकारणैकान्तिन आहुः, यच्च पुरुषकारकारणैकान्तिन आहुस्तदपि सर्वमसम्बद्धं परस्परदूषितत्वात्** इति तदुभयमिदानीं नैकट्येनाप्यसम्बद्धमिति प्रतिपादयितुकामः प्रश्नयति **--कथमसम्बद्धमिति** परवचनेन स्ववचनेन चैकत्वात् तयोः पृथक् कर्मपुरुषकाराभावादेवासम्बद्धमिति तत्प्रतिपादयिष्यन्नाह **--यस्माद् न शुभमशुभं** वेत्यादि यावत् **काय** इति । अयं तावद् दृश्यमानः कायः पुरुषो वास्तु यत्तेऽभिरुचितम्, न मे कश्चिदत्र पक्षपातः । तच्च यस्माद् न किञ्चिदत्र शुभमेवाशुभमेव वा बाह्यमपि कायाद् भिन्नमभिमतं रूपादि **इष्टस्य सुखस्य कारणं** चित्र-मयूर-स्रक्-चन्दन- भ्रम- - /ms रतादि **अनिष्टस्य वा** दुःखस्यातिविवर्णहुण्डसंस्थानाकारकण्टकशिवारुतादि । सर्वमप्येतदिष्टकारणमप्यनिष्टकारणमपि शुभमप्यशुभमपि इति गृहाण द्रव्यक्षेत्रकालभावपुरुषान्तरसंयोगविशेषाश्रयपरिणामविशेषापत्तेः सुरभि-मधुर-सुखस्पर्श-सुरूप-सुशब्देतरभावमुपलभ्यते अभक्षितभक्षितमोदकवत् पक्वापक्वाम्रफलवत् पद्मकेसरनालवत् जाताजातविपन्नाविपन्नसुरादिवत् स्वस्थास्वस्थस्त्रीपुरुषगीतरुतादिवत् । यथोक्तमार्षे **--तेच्चेव पोग्गला सुब्भिगंधत्ता+ए परिणमंति ते चेव ते पोग्गला दुब्भिगंधत्ता+ए परिणमंति** [ज्ञातृश्यतां पृ° २७८ टि° १ ॥ताधर्म°] इत्यादि । तस्माद् न शुभमशुभं वैकान्तेन किञ्चिदस्ति भिन्नजाति । किं तर्हि ? **[तदेव शुभम्]** तदेवाशुभम्, तत एव

---

९ व्रीहेर] °रस्याव° प्र° । दृश्यतां पृ° ३५७ पं° ६ ॥
९ ना] तमोवातो प्र° ॥
१५ ए] दृश्यतां पृ° ३५२ पं° ४ ॥
१६ य] दृश्यतां पृ° ३५७ पं° ३ ॥
१७ प] परस्य दूषि°nayacakra-ms-ya । परदूषि° nayacakra-ms-bhā ॥
१८ तिपा] पादितु° प्र° ॥
२४ र] °रततादि प्र° ॥
२४ संस्थाना] °नकार° प्र° ॥

360/mj च **इष्टकारणमनिष्टकारणं च,** यथा त्रिदोषघ्नमोदकादि प्रमाणा

* * *

ह्ययं पुद्गलकायः । भोक्तृभोग्यात्मकविपरिणामवृत्तित्वात्, अत आहारवच्छुभाशुभादिधर्मतास्य भोक्तृत्वाद् भोग्यत्वात् ।

नन्वन्नोदकशुभाशुभते प्रतिविशिष्टापशदयोगकृते, न, एकैकस्य सर्वरूपद्रव्यभवनपरमार्थत्वात् तदेव तत्, तत्परमार्थत्वात्, तद्वत् । अन्यथात्वेऽपि तदनतिरेकात्मकत्वात्, तन्तुयज्ञोपवीतवत् ।

* * *

प्रमाणकालाकालाहारितमिति स्वस्थसर्पदष्टाहारितविषवद्वा तथैक **एव ह्ययं पुद्गलकायः,** पुद्गल उक्तनिरुक्तिकः, कायः शरीरं चितत्वाद् रोगादिदुःखनिवासत्वाद्वा सर्वोऽपि बाह्याभ्यन्तरो मूर्तद्रव्यसङ्घातः कायः रूपादिसङ्घातत्वात् परमाणोरपि । पुद्गलस्य पुद्गलस्यैव वा काय इति विग्रह-समासौ । अथवा पृथक् परिकल्पनयानया किम् ? इन्द्रियप्रत्यक्षाभिमतः शरीराख्यः पुद्गलकायः स्वसंवेद्यज्ञानात्मकः क्रियादिलिङ्गानुमित आत्मकायो वा सोऽयमेक एव, न ह्यत्र काचिद् भेदबुद्धिः कार्या बन्धपरिणामैक्यापत्तेरेतन्नयदर्श- - /ms नात् । एक एव शुभाशुभादिधर्मा इति साध्यस्य कायस्य वक्ष्यमाणाहारदृष्टान्तसाम्यमापाद्य हेतुत्वेन तत्साधर्म्यमाह --**भोक्तृभोग्यात्मकविपरिणामवृत्तित्वा**दिति । यदि पुरुषकारवादिमतेन भोक्ता, अथापि कर्मवादिमतेन भोग्यः, तस्मात् कायो भोक्तृभोग्यात्मकः, तस्य विपरिणामो वृत्तिरस्येति कायः सम्बध्यते भोग्यस्य भोक्तुर्वा विपरिणाम इति, शुक्रशोणितं जनन्याहृतान्नरसादि चाद्युत्तरकारणमस्य शरीरस्य तदुभयं भोक्तृ भोग्यं च अन्योन्यभावापत्तेः, तथा चतुर्विधोऽप्याहारोऽशनादिराहर्त्राहार्यभावाद् भोक्तृ भोग्यं च, तच्च शुभाशुभेष्टानिष्टकारणमेवेति, कायचैतन्ययोर्वैक्यपरिणामापन्नस्यैव भोक्तृभोग्यपरिणामवृत्तित्वं सिद्धम्, **अत आहारवच्छुभाशुभादिधर्मतास्ये**ति, यथा आहारः शुभश्चाशुभश्च दृश्यते संस्कृतासंस्कृतः, संस्कृतोऽप्यशुभ एव संस्क्रियमाणान्नाद्यशुभत्वात्, संस्कारकाभिमतकर्पूरादेरपि कालान्तरे दौर्गन्ध्यादिदर्शनात्, सर्वपुद्गलानां प्रागुक्तविधिना शुभाशुभत्ववत् पुद्गलत्वादाहारः शुभोऽशुभश्चेति तथा काय इति । अथवा चेतनाचेतनयोरात्मशरीरयोरैक्यपरिणामात् तदेव भोक्तृ भोग्यं चेत्यनेनैवाहारदृष्टान्तेन सम्बद्धं प्रत्येकमपि साधयत्येतद् धर्मद्वयमित्यत आह --**भोक्तृत्वाद् भोग्यत्वा**दिति । एवं कर्तृत्वात् - /ms कर्मत्वादाहारवच्छुभोऽशुभश्च काय इति । अथवा सुखोऽपि दुःखोऽपि स एव कायः, सुखस्तावद् दुःखत्वादाहारवत्, दुःखः सुखत्वादाहारवत्, यत् परं

---

८ कालाका ] °कालहा° प्र° ‖
१२ या ] किं द्रिय° प्र° ‖
१२ त्य ]
°क्षमतःnayacakra-ms-bhā ।
°क्षमभिमतः nayacakra-ms-ya ‖
१५ शुभाशुभा ] °भातिधर्मा प्र° ‖
२३ प ] °विपरि° ? ‖
२५ संस्कार ] °रमाभि° प्र° । °राभि° ?
‖

प्रत्यसिद्धं तदितरेण सिद्धेन धर्मान्तरेण साध्यम् । एवमिष्टोऽप्यनिष्टत्वात्, अनिष्टोऽपीष्टत्वात् आहारवदेव । § 1092

इतर आह **--नन्वन्नोदकशुभाशुभते प्रतिविशिष्टापशदयोगकृते** । प्रतिविशिष्टकर्पूराद्येकान्तशुभद्रव्ययोगे सति जलादि अशुभगन्धमपि सत् सुरभीक्रियते अधिकगुणाभिभवभावनया, एवमशुच्यपशदद्रव्ययोगे सति तदुत्कृष्टगन्धाभिभवात् तद्भावनया कर्पूराद्यपि तद्गन्धीभवदुपलभ्यते । अथवा तदेव विनष्टं शुभतडाकादिगतमल्पं शुष्यच्छुष्यत् कर्पूरगन्धं भवदुपलभ्यते, नालिकेरफलानि सुरभीणि सन्ति पूतीभवन्ति दृश्यन्ते । तस्मादुभयधर्मता सर्वद्रव्याणाम्, तथा कायोऽपीति । एतच्च **न, एकैकस्य सर्वरूपद्रव्यभवनपरमार्थत्वात्** । *वीप्सया व्याप्तिं सर्वरूपद्रव्यभवनस्य भावकस्य भाव्यस्य च दर्शयति 361/mj

* * *

यथा चात्र परिणाम्यपरिणामकभावादेकत्वं तथात्मकर्मणोरपि । आत्मा परिणमयति तथाभवनसामर्थ्याद् गतिजात्यादिना पुद्गलान् पुद्गलाश्चात्मानं मिथ्यादर्शनादित्वेन, अन्योन्यपरिणामकत्वादनादित्वमेकत्वम् ।

* * *

एकैकस्येति । सर्वशुभाशुभेष्टानिष्टकारणत्वादिरूपो हि द्रव्यभवनपरमार्थः, एवं हि भवदेव भवद्द्रव्यं परमार्थतो भवति, नान्यथा । यथोक्तम् **--एगमेगस्स णं भंते जीवस्स एगमेगे जीवे मातित्ता+ए** इत्यादिप्रश्नः यावत् **आजातपुव्वे** । व्याकरणम् **--गोतम ! अस+ई अदुवा अणंतखुत्तो, एवं सव्वजीवाण वि एगजीवो, एगजीवस्स वि सव्वजीवा, तथा सव्वपोग्गला एगजीवस्स सव्वजीवाणं च आहारत्ता+ए उसासत्ता+ए भासत्ता+ए सरीरत्ता+ए इंदियत्ता+ए मणत्ता+ए आणापाणत्ता+ए** इत्याद्यार्षे ऐक्यापत्तौ ज्ञापकं सर्वज्ञोक्तत्वात् । § 1093

अत्रानुमानम् **--तदेव** तदिति प्रतिज्ञा मातृत्वादिभावेन यद् भवति शरीरादिभावेन वा तदेकैकं सर्वरूपमित्यर्थः, **तत्परमार्थत्वात् तद्वत्**, एतदुक्तं भवति--तत् तत्स्वरूपापन्नभवनपरमार्थत्वात् तत् तत्स्वरूपवत् । एवमितर- - /ms
मपि पक्षीकृत्य साध्यम् । यत्स्वरूपमिदं भवति कर्पूरं शरीरमन्नादि वा तत् तदेवेत्यर्थः, *यच्च यदेव न भवति [न तत्] तत्परमार्थं यथा खपुष्पं

---

३ श ] °पसद°nayacakra-ms-ya ॥
१० *] वीप्साया प्र° ॥
१७ भ] भवद्रव्यं प्र° । तव द्रव्यं ? ॥
१७ ए] दृश्यतां पृ° १८६ टि° १२ ॥
२१ उसा] जसास°nayacakra-ms-ya । जस° nayacakra-ms-bhā । रसत्ता+ए ? ॥
२५ वा] चा तदै°nayacakra-ms-bhā । च तदै° nayacakra-ms-ya ॥
२६ रू] °रूपापापात्तभ°nayacakra-ms-bhā । °रूपात्तभ° nayacakra-ms-ya । °रूपापत्तेर्भ° ? ॥
२८ त] तत्तत्तदेवे°nayacakra-ms-bhā ॥
२८ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥

खरविषाणं वा, भवन्मत्यान्यत् तत् तदन्यस्वरूपापत्तेः, स्यादहेयस्यान्तरङ्गस्य तत्त्वम् स्याद् बहिरङ्गस्य चान्यत्वमिति तदेव ह्यन्यत्वाभिमतमस्माभिस्तस्यैव तद्रूप[त्व]मिति साध्यते । तस्मान्नास्त्यन्यथात्वं न चासिद्धं तत्परमार्थत्वमिति । अभ्युपेत्यापि **अन्यथात्वेऽपि तदनतिरेकात्मकत्वात्** तदेव तत् इति वर्तते । तस्मात् तस्य वानतिरेकः, स आत्मास्येति तदनतिरेकात्मकम्, यद् यदनतिरेकात्मकमन्यथात्वेऽपि तदेव तद् दृश्यते । किमिव ? **तन्तुयज्ञोपवीतवत्,** तन्त्वनतिरेकात्मकत्वाद् यज्ञोपवीतस्य वलितस्यान्यथात्वेऽपि तन्त्वात्मकत्वमेव तथा सुखादिषु भावनीयम्, तदनतिरेकात्मकत्वं च भावितार्थमेव **ते च्चेव ते पोग्गला सुब्भिगंधत्ता+ए** ज्ञादृश्यतां पृ° २७८ टि° १ । पृ° ३५९ पं° २६ ॥ताधर्म° इत्यादिना । § 1094

त्यादिना याव**दनादित्वमेकत्वमि**ति परिणा (Edtext outside numbered paragraph)म्यपरिणा (Edtext outside numbered paragraph)मकयोरनियतदेशकालभावादिरूपतां दर्शयति त**थाभवनसामर्थ्याद् गतिजात्यादिना पुद्गला**निति, उपयोगलक्षण आत्मा गतिजातिशरीराङ्गोपाङ्गाद्यनुभवनोपयोगात्मतया तान् पुद्गलान् परिणमयतीति आत्मनः परिणामकत्वं तेषां परिणा (Edtext outside numbered paragraph)म्यत्वम् । **पुद्गलाश्चात्मानं मिथ्यादर्शनादित्वेने**ति मिथ्यादर्शनाविरतिप्रमादकषाययोगसुखदुःखोदयक्षयोपशमादिभावेन परिणमयन्ति, तद्भावेनात्मा परिणम्यते । स च मिथ्यादर्शनोदयादिभावो भवभ्रान्तिहेतुः, तद्वशस्य संसरणात् । एतस्य कर्मकर्मिद्वयस्या**न्योन्यपरिणामकत्वादनादित्वमेकत्व**मेव, एकत्वशब्देन पर्यायभूतेन तत्त्वं व्याचष्टे संसारस्य कर्मकर्मिसम्बन्धजत्वात् तस्य च सम्बन्धस्यानादित्वात् । यथोक्तम् --**पुव्विं भंते ! अंड+ए पच्छा कुक्कुडी ?** इत्यादि प्रश्नः । व्याकरणम् --**रोहा ! पु (Edtext outside numbered paragraph)व्विं पि एते पच्छा वि एते, दो वि एते सासता भावा, अणाणुपुव्वी एसा रोहा !** भगवतीसू° १ । ६ । ५३ इत्यादि । **मिथ्यादर्शन**ग्रहणं सर्वकर्मबन्धाधारभूतत्वाच्छेषस्यापि सर्वस्य सूचनम् । § 1095

**यथा चात्रे**त्यादि । एवं च **तदेव** तदिति सर्वं सर्वस्य बाह्यस्य परिणाम्यस्य परिणमयितुश्च तत्त्वम् । योऽधिकगुणस्य ताद्गुण्यं प्रतिपद्यते स परिणामी योऽधिकगुणो न्यूनगुणत्वमापादयति स परिणामक इत्युच्यते व्यवहारतः । निश्चयतस्तु परिणामिपरिणामकावाविर्भावतिरोभावमात्रभेदौ स्वत एव इत्यस्य नयस्य दर्शनम्, परिणामश्च द्रव्यमात्रम्, **द्रव्यं च भव्वे** पा°

३ मा ] °मार्थतत्वमिति प्र° ॥
५ तिरेकात्म ]
°त्मकत्वाद्यनति°nayacakra-ms-ya ॥
१२ रिणा ]
°णम्यस्यnayacakra-ms-bhā ॥
१२ योऽधिक ]
°धिगुणस्यnayacakra-ms-ya ॥
१३ रिणामी ] योधिगुणो प्र° ॥
१४ य ] °तश्चnayacakra-ms-ya ॥

५ । ३ । १०४, यद् यद् भवति स परमार्थोऽस्येति, तदप्येवं भावितं क्षीरादेर्यावच्च घटादेस्तावद् बोद्धव्यम् । तथाधिकृतस्याध्यात्मिकस्य कर्मकर्मिसंज्ञस्य शरीरशरीरिसंज्ञस्य वा भावनार्थमुपनयति --**तथात्मकर्मणोरपीति** । तद् व्याचष्टे

यदपि च रूपादि तदप्यात्मन एव तत्त्वम्, उपयोगात्मकत्वात् तदव्यतिरेकलभ्यरूपत्वात्, मत्यादिवत् । रूपादीनां देशकालादिभेदेन अगृह्यमाणत्वाद-

* * *

परिणयमती--**आत्मा** - /ms, 362/mj

* * *

**यदपि च रूपादि तदप्यात्मन एव तत्त्वम्, उपयोगात्मकत्वात् तदव्यतिरेकलभ्यरूपत्वात्, मत्यादिवत् । रूपादीनां देशकालादिभेदेन अगृह्यमाणत्वाद-**

* * *

**परिणयमती**

आह--यदुक्तं त्वया कर्पूरोदकाद्यचेतनानां परिणाम्यपरिणामकभावादेकत्वं चेतनाचेतनयोश्च जीवकर्मणोरिति तद्युक्तम् । किन्तु रूपादि उपयोगीभवदात्मा भवति आत्मापि रूपादीभवति तत्परिणामात् इत्येतन्नोपपद्यते स्वभावाविनाशादिति । अत्रोच्यते --**यदपि** चेत्यादि यावद् **मत्यादिवदिति** । यदपि च बहिर्भिन्नं विषयजातमुपयोगनिमित्तभूतं **रूपादि तदप्यात्मन एव तत्त्वम्** । रूपादितत्त्वमात्मानं च वक्ष्यामः । कुतो रूपाद्यपि आत्मन एव तत्त्वमिति चेत्, उच्यते --**उपयोगात्मकत्वात्,** मत्यादिचक्षुर्दर्शनादिभेदप्रभेद उपयोग आत्माऽस्य रूपादेर्विषयस्य सोऽयं तदात्मकः । कथं रूपादेर्विषयस्योपयोगात्मकत्वमिति चेत्, उच्यते --**तदव्यतिरेकलभ्यरूपत्वात्,** रूपं रसो गन्ध इत्यादिविषयस्वरूपाकारेणोपयोगेन अव्यतिरिक्त एकीभूत एवोपलभ्यते रूपादिर्विषयो नान्यथा, अन्यथा विषयस्वरूपानवधारणात् । तस्मात् तदनतिरेकलभ्यरूपत्वात् रूपादिर्विषय उपयोगात्मकः । यद् यदुपयोगात्मकं तत् तदात्मन एव तत्त्वम्, यथा मत्यादिचक्षुर्दर्शनादिभेद उपयोग इति । - /ms

§ 1096

स्यान्मतम्--रूपादीनां देशभेदेन युगपदवस्थायिनां रूपं रसो गन्ध इत्यादयः परस्परतो देशभिन्ना इति गृह्यन्ते । तस्य देशस्य परमाणुशो

---

१ त] तथेदं भावितंnayacakra-ms-bhā ॥
१४ क] कर्पूरादेकाद्य॰ प्र॰ ॥
१६ दात्मा] ॰त्मीभवति ? ॥
१९ मात्मा] ॰त्मनं चnayacakra-ms-bhā । ॰त्मनश्च ? ॥
२१ रूपादेर्विष] ॰र्विकस्य nayacakra-ms-bhā । ॰र्विकल्प nayacakra-ms-ya ॥
२२ योगात्म] ॰त्मकेणवि चेत् प्र॰ ॥
२४ रूपा] ॰दिवि॰nayacakra-ms-ya ॥
२४ अ] अन्यथाnayacakra-ms-bhā प्रतौ नास्ति ॥
२९ त] इतः पूर्वं कश्चन पाठोऽत्र त्रुटित इति भाति ॥

भेदे न रूपं रसो गन्धो वोपलभ्यते, देशसम्बन्धेन तूपलभ्यमाना भवन्ति । देशतोऽत्यन्तं भेदग्रहे तेषामभवनम् । तथा क्षणभेदे प्रथमक्षणेऽन्यद् रूपं द्वितीयक्षणेऽन्यदिति गृह्यते चेद् न रूपं नाम किञ्चित् स्यात् तन्निष्ठस्य
363/mj कालस्य रूपग्रहणाश्रयसम्बन्धाभावादित्यभवनात्मका

* * *

भवनात्मकत्वाद् निर्वस्तुत्वापत्तेः द्रव्यमेव तथातथाभवनलक्षणं सत्यं चक्षुरादिप्रत्ययोपयोगापदेशेन भवति भागिनेयाद्यपदेशविशिष्टैकत्वसत्यपुरुषवत् ।

यच्चोपयोगस्वतत्त्वं मत्यादि तदपि पुद्गलात्मतत्त्वम्, रूपाद्यात्मकत्वात्, अण्वादिवत् । उपयोगलक्षण आत्मा रूपाद्यात्मकेषु पुद्गलेषु उपयुक्तः रूपाद्यात्मक एव, सर्वात्मना ग्राह्ये उपयोगमयान् मृत्पिण्डः शिवकादितायामिव सोऽचेतन एव स्यात् पटेऽनुपयुज्यमानघटादिवत् । आत्मा पुद्गलस्वतत्त्व एव आत्मस्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तभावाव्यतिरिक्तरूपत्वाच्च ।

* * *

रूपादयः स्युः । **आदिग्रहणाद्** भावभेदेन एकगुणद्विगुणत्रिगुणकृष्णादिभेदेन अगृह्यमाणत्वाद् विशिष्टस्य सामान्यस्यैव ग्रहणात् । ततः किम् ? अभवनात्मकत्वाद् निर्वस्तुत्वापत्तिर्वन्ध्यापुत्रवत् । ततश्च **निर्वस्तुत्वापत्ते**रेतत् प्रतिपत्तव्यम् --**द्रव्यमेव तथातथाभवनलक्षणं सत्यं** न रूपादयो नाम केचिदिति । तथा तथेति रूपरसादिप्रकारेण भवति श्यामरक्तादितद्भेदप्रकारेण चेति सत्यम्, **द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४, द्रवति भवतीति । कथं पुनस्तद् द्रव्यमभिन्नं सद् रूपादिभेदेन भवतीति चेत्, **चक्षुरादिप्रत्ययोपयोगापदेशेन भवति** । चक्षुरादिप्रत्यया इत्यधिपत्यालम्बनहेतुसमनन्तरप्रत्ययाः, ते निमित्तमस्योपयोगस्य ज्ञानदर्शनाख्यस्य स चक्षुरादिप्रत्ययोपयोगः, तदपदेशेन रूपादि भवति ज्ञानापदेशेन चक्षूरूपादिप्रत्ययेनेत्यर्थः । यथोक्तम्—

रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्तते ।
विज्ञानं मणिसूर्यांशुगोशकृद्भ्य इवानलः ॥ इति ।§ 1099

दृष्टान्तः --**भागिनेयाद्यपदेशविशिष्टैकत्वसत्यपुरुषवत्,** यथैक एव पुरुषोऽनेकसम्बन्धिस्त्रीपुरुषापेक्षापदेशविशिष्टो भागिनेयो मातुलो भ्राता पतिः पिता देवरः श्वशुरः पुत्रो भ्रात्रीय इत्यादिर्भवति देवदत्त एक इत्येव च

१ ग ] गन्धश्चो॰nayacakra-ms-ya ॥
१ तू ] रूपल॰ प्र॰ ॥
२ तोऽत्य ] ॰त्यन्तभेद॰ nayacakra-ms-bhā ॥
३ त ] तन्निष्टस्य प्र॰ ॥
२० स ] सत्यम्nayacakra-ms-ya प्रतिषु नास्ति ॥
२० द्र ] द्रव्यति भवतीतिnayacakra-ms-bhā । भवति द्रव्यतीति nayacakra-ms-ya ॥
२८ म्ब ] ॰म्बन्धेस्त्री॰ प्र॰ ॥

सत्यस्तथा द्रव्यमेकमेव रूपादि भवति चक्षुराद्यपदेशादिति साधूक्तमेकमेव सर्वात्मकमिति । § 1100

एवमुपयोगात्मकत्वं पुद्गलस्य रूपादिप्रभेदस्योक्तम् । इदानीमुपयोगस्यापि पौद्गलात्म्यमुच्यते — **यद्योपयोगस्वतत्त्वं मत्यादि तदपि पुद्गलात्मतत्वमिति** पक्षः । कस्मात् ? **रूपाद्यात्मकत्वात्, अण्वादिवत्** । स ह्युपयोगलक्षण आत्मा परमाणुद्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषु उपयुज्यते कृत्स्नो व्याप्रियते सार्वात्म्येन व्याप्त उपयुक्तः समाप्त इत्यर्थः,* रूपाद्यात्मक एव, अप्रदेशसङ्ख्येयासङ्ख्येयानन्तप्रदेशपुद्गलवत् तदुपयोगात् तत्परिणामात् **तदेव** तदिति पूर्वोक्तन्यायाच्च । यद्येवं रूपाद्यात्मकत्वमात्मनो नाभ्युपगम्यतेऽसङ्ख्यातप्रदेशस्यापि रूपादिमदेकद्रव्योपयोगे तादात्म्यं ग्राह्ये यातीति - /ms, 364/mj
ततोऽसङ्ख्यातप्रदेशोऽपि

* * *

नन्वेवं पुद्गल एव आत्मा प्राप्तः, तस्योपयोगात्मनः पुद्गलत्वात्, कुतोऽस्य रूपाद्यात्मकता ? न, उपयोगात्मकत्वादेव रूपादीनामप्युक्तवत् ।

अनेन सर्वमपि कर्मकारणैकान्तवादिमतं पुरुषकारकारणैकान्तवादिमतं च असम्बद्धं बोद्धव्यम्, इतरेतरात्मकत्वात् ।

* * *

**सर्वात्मना** सार्वात्म्येन सर्वैः प्रदेशै**र्ग्राह्ये** द्रव्ये **उपयोगमयान्** उपयोगमगच्छन् अनुपयुज्यमानो**ऽचेतन एव पटानुपयुज्यमानघटादिवत् स्यादि**ति सम्भन्त्स्यते । कथं पुनरुपयोगं यान् यायात् ? **मृत्पिण्डः शिवकादितायामिव,** यथा मृत्पिण्डः कृत्स्नः शिवकादिभावे सार्वात्म्येन व्यापारं गच्छति तथा यदि न गच्छेदात्मा ग्राह्ये ततस्तादात्म्यमप्रतिपद्यमानः **सोऽचेतन एव स्यात् पटेऽनुपयुज्यमानघटादिव**दिति यथाक्रमं वैधर्म्येण साधर्म्येण च दृष्टान्तौ । चेतनो ह्युपयोगलक्षणस्तदभावादचेतनः स्यादिति एष दोषो रूपाद्यात्मकत्वाभावे स्यादात्मन उपयोगलक्षणस्य । तस्मात् सिद्धं रूपाद्यात्मकत्वमात्मन उपयोगात्मकत्वात् । अतः **पुद्गलस्वतत्त्वमेव मत्यादि** इति साधूक्तम् । इतश्च **आत्मा पुद्गलस्वतत्त्व एव, आत्मस्वतत्त्वे**त्यादि यावद् **भावाव्यतिरिक्तरूपत्वाच्च** । आत्मनः स्वतत्त्वमौदयिको भावः, उदये भव औदयिकः, कस्य ? कर्मणो

---

५ अ] अश्वादि॰nayacakra-ms-bhā । अंधादि॰ nayacakra-ms-ya ॥

७ उ] उपा॰ प्र॰ ॥

७ *] अतः परं **रूपाद्यात्मकत्वमात्मनो नाभ्युपगम्यतेऽसङ्ख्यातप्रदेशस्यापि** इत्यधिकः पाठो nayacakra-ms-ya प्रतिषु अत्र उपलभ्यते, किन्तु nayacakra-ms-bhā प्रतौ अयं पाठः पं॰ २५ मध्ये **यद्येवं** इत्यतः **परं** दृश्यते, तत्रैव च स उचितः ॥

९ त] दृश्यतां पृ॰ ३६० पं॰ ४ ॥

९ द्येवं] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु अत्र नास्ति । दृश्यतां टि॰ ६ ॥

१० रूपादिम] ॰मनेक॰nayacakra-ms-bhā ॥

१० तादात्म्यं] ॰त्म्यं ग्राह्यो प्र॰ ॥

१९ या] यान्यात् मृ॰ प्र॰ ॥

२७ उ] उदयेनnayacakra-ms-ya ॥

ज्ञानावरणीयादेरष्टविधस्यापि, स च तदुदयप्रवृत्तितोऽपृथग्भूतोऽव्यतिरिक्तो भावः स्वं तत्त्वमात्मनः, तदव्यतिरिक्तरूपश्चात्मा, तस्मा**दात्मस्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तरूपत्वाद्या**त्मा पुद्गलात्मतत्त्व एव तादात्म्यप्रतिपत्तेः रूपाद्यात्मकपरमाण्वादिवदित्यर्थः । § 1101

अत्राह --**नन्वेव**मित्यादि यावत् **कुतोऽस्य रूपाद्यात्मकता ?** इति । - /ms ननु भोः ! त्वदुक्तेन विधिना एतेनैव **पुद्गल एवात्मा प्राप्तः तस्योपयोगात्मनः पुद्गलत्वात्**, योऽयं पुद्गलोपयोगः रूपं रसः इत्यादिज्ञानात्मनः स चात्मोपयोग एव उपयोगव्यतिरिक्तस्य रूपादेरभावादुपयोगस्य रूपाद्यात्मकत्वादुपयोगरूपत्वाच्च रूपादीनाम् । तस्मात् **कुतोऽस्य** आत्मनो **रूपाद्यात्मकता ?** इति प्रस्तुतस्योपयोगस्य मत्यादेः पुद्गलात्मत्वमुपरुणद्धि एष विचार इति । अत्रोच्यते--एत**न्न, उपयोगात्मकत्वादेव रूपादीनामप्युक्तवत्** । नैष दोषः, रूपाद्यात्मकता आत्मनः, रूपादीनां चोपयोगात्मकता । यस्मादुपयोगात्मकत्वं रूपादीनामप्यनन्तरमेवोक्तम् । तस्माद् रूपादीनामप्युपयोगात्मकत्वादुक्तवत् पुद्गलोऽप्यात्मा आत्मापि पुद्गल एवेति रूपाद्यात्मकत्वमात्मनो न दोषाय । § 1102

**अनेन सर्वमपी**त्यादि यावद**दितरेतरात्मकत्वात्** । एवं च कृत्वा पुरुषस्य रूपादिमत्पुद्गलात्मकत्वात् पुद्गलस्यापि उपयोगात्मकपुरुषात्मकत्वात् तदुच्यते कर्मैव कारणम्, पुरुषकार एव कारणम् इत्यवधारितमुभयमप्येकान्तगतमसम्बद्धं बोद्धव्यमिति । उभयोरपि पक्षयोः सह दोषोक्तिरेषा । § 1103
365/mj

प्रत्येकप्रत्युक्तिभावनादिक् तु प्रवर्तयितृत्वात् पुरुषश्च कारणमुत्कर्षार्थी, तस्यैवोक्तवत् सर्वत्वात् कर्मापि । तस्यैव कर्मतापि । पुरुषकाराणां च तत्साध्यानां च सिद्धयोऽसिद्धयश्च नाना स्युरेव, पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्, अहिभोगविस्तरणकुञ्चनवत् । § 1104

तथानतिरेकातिरेकात् कर्मापि प्रवर्तयितृ । स एव हि पुरुषश्चेतनोऽचेतनश्च इष्टानिष्टविधिव्याप्रियमाणत्वात् । अथैवं नेष्यते ततोऽसौ भवेत् पशुवद् मनुष्यत्वेनापि । § 1105

इदानीं **प्रत्येकप्रत्युक्तिभावनादिक् तु, [तु]**शब्दो विशेषणार्थः, युगपत्प्रत्युक्तिदिक्तः प्रत्येकप्रत्युक्तिदिग् विशिष्यते । कर्मैकान्तवादप्रत्युक्तिदिक्

---

२ स्वं] स्वतत्त्वnayacakra-ms-ya ॥
३ तिरिक्त] °क्तभावाव्यतिरिक्तरूप° ? ॥
३ ता] तावदात्म्य°nayacakra-ms-ya । त्तावदात्म्य° nayacakra-ms-bhā ॥
४ माण्वा] °ण्वादित्यर्थः प्र° । दृश्यतां पृ° ३६३ पं° २३ । °ण्वात्मकत्वादित्यर्थः ? ॥
६ पु] पुद्गला प्र° ॥
१७ त] यदुच्यते ? ॥
१८ क] दृश्यतां पृ° ३५२ पं° ४ । पृ° ३५७ पं° ३ ॥
२० प्र] दृश्यतां पृ° ३६८ पं° ७ ॥

तावत् **प्रवर्तयितृत्वात् पुरुषश्च कारणमुत्कर्षार्थी, च**शब्दात् कर्म चेति, एकान्तप्रतिषेधस्य वक्ष्यमाणत्वात् । उत्कर्षमर्थयतीत्युत्कर्षार्थी, उत्कर्ष एवार्थः सोऽस्यास्तीति वा, **अर्थाच्चासन्निहिते** पा० वा० ५ । २ । १३५ इति इनिः, स चोत्कर्षो बाह्यो धनधान्यमित्रभूम्यादिसम्पत्, आन्तरस्त्वारोग्यज्ञानादिसम्पत्, कृतार्थस्य तदर्थारम्भोपरमादसन्निहितार्थोऽर्थीति । कस्मात् पुरुषश्च कारणमिति चेत्, उच्यते --**तस्यैवोक्तवत् सर्वत्वात् व्रीहिणैव व्रीहिः क्रियते** इत्यादिन्यायो- क्तवदसावेव पुरुषः प्राणादिमांश्चेतनः **कर्मापि, अपि**शब्दाद् नोकर्मापि प्राणापानभाषामनोद्रव्यादिपुद्गल आध्यात्मिको बाह्योऽपि रूपादिपुद्गलश्चेतनो यस्मात् तस्मात् स एव प्रवर्तयिता । तस्यैवास्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्म ? इति **तस्यैव कर्मतापि,** अपिशब्दात् पुरुषतापि पुद्गलतापि । § 1106 - /ms

तस्मादेव यदुक्तं **प्रधानमध्यमाधमाः पुरुषकारास्तेषां च सिद्धयोऽसिद्धयश्च प्रधानमध्यमाधमा नाना न स्युः** इति तदयुक्तमुक्तम् । **पुरुषकाराणां च तत्साध्यानां च सिद्धयोऽसिद्धयश्च नाना स्युरेव,** न न स्युः । किं कारणम् ? उत्कर्षपरम्पराया बहुप्रभेदाया अपि आ मुक्तेः **पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्** । स एवाव्यतिरिक्तो भिन्नश्च कारणम्, तस्यैव सर्वप्रभेदात्मकत्वाद् भिन्नत्वम्, तेषां च कर्मनोकर्मबाह्यरूपादिभेदपुद्गलानां पुरुषोपयोगात्मकत्वादव्यतिरिक्तत्वम् । तस्मात् पुरुषकारनानात्वं तत्साध्यसिद्ध्यसिद्धिनानात्वानि च स्युरेव, स चैक एव कारणं स्यादेव । को दृष्टान्तः ? **अहिभोगविस्तरणकुञ्चनवत्,** यथा अहिः स्फटाटोपकुण्डलकीकरणाद्ययुगपदवस्थायिधर्मै रूपादिभिर्युगपदवस्थायिभिश्च भिन्नोऽप्यव्यतिरिक्ताभिन्नाहित्वसत्यस्तदव्यतिरिक्तभिन्नकारणत्वात् प्रवर्तयिता तथा पाण्यादिसङ्घातसहवर्ती पुरुष उपयोगात्मा गत्याद्युत्कर्षार्थी तेषु युगपदयुगपद्भाविषु पुरुष एव सत्य इति । § 1107

उत्कर्षापकर्षाविष्टानिष्टौ, तयोर्विधिः तत्प्राप्त्युपायः प्रमादाप्रमादौ, तौ च दृश्येते । तस्मादयं पुरुषश्चेतनोऽचेतनश्च प्रमादाप्रमादयोरिष्टानिष्टविध्योर्व्याप्रियमाणत्वात् । अतोऽचेतनकर्मानुभावोपलम्भाच्चेतनपुरुषानुभावोपलम्भाच्चा (Edtext outside numbered paragraph)सौ तद्द्वयपरमार्थः । तस्माच्च कर्मापि प्रवर्तयितृ । **अथैवं नेष्यते** त्वया, यदि च पुरुषश्चेतनश्च (Edtext outside numbered paragraph)क्तिरेवेष्यते त-

६ त्वात्] दृश्यतां पृ० ३५८ पं० १ ॥
१२ प्र] दृश्यतां पृ० ३५२ पं० ५ ॥
१३ इ] **इति व तद०** nayacakra-ms-bhā ॥
१७ क] **कर्मनोबाह्य०** प्र० । दृश्यतां पं० १४ ॥
२० ल] **०लीकरणा०**nayacakra-ms-ya ॥

२१ तिरिक्ता] ०क्तभिन्ना० ? ॥
२३ यु] **युगपद्भावेषु** nayacakra-ms-ya । अत्र युगपदयुगपद्भाविभावेषु इत्यपि पाठः स्यात् ॥
२३ ए] **एव विसत्य**nayacakra-ms-bhā ॥

**तोऽसौ भवेत् पशुवद् मनुष्यत्वेनापि** गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञो यथा पशुर्भवत्यल्पचेतनस्तथा मनुष्यत्वेऽपि भवेत् । व्यक्तवर्णपदवाक्यादर्थप्रत्यायनसमर्थशब्दोच्चारणादिशक्तिश्च मनुष्यस्तद्वत् पशुरपि भवेत् । कृम्यादिवद् मनुष्यो (Edtext outside numbered paragraph)ऽपि जडः स्यात्, मनुष्यवत् कृमिरपि पण्डितः स्यादित्यादि । तस्मात् कर्मापि चेतनं पुरुषोऽप्यचेतनः, तच्चोभयमविभक्तमिति ग्राह्यम् । § 1108

**तथानतिरेकातिरेकात् कर्मापि प्रवर्तयितृ,** यथा पुरुषः पुद्गलात्मकर्मधर्मप्रभेदभिन्नोऽप्यव्यतिरिक्तः प्रवर्तयिता तथा कर्मापि तदनतिरिक्तातिरिक्तकार-
- /ms णत्वात् प्रवर्तयितृ । किञ्च, चेतनाचेतन- परमार्थत्वाच्च पुरुषस्यैवेष्टानिष्टविधिं प्रति व्यापारः, **स एव हि पुरुषश्चेतनोऽचेतनश्च,** कुतः ?

एवं च अविभक्तद्व्यात्मकतायां द्विविधः कर्माख्यपुरुषकारस्य प्रवृत्तिप्रबन्धः साध्योऽसाध्यश्च तीव्रमन्दादिहेतूपसेवनसञ्चितत्वात् साध्यासाध्यव्याधिवत्, चलनीयोऽविचाल्यश्च बद्धाबद्धमूलत्वाद् वृक्ष-हटवत्, निकाचितानिकाचितावयवत्वादयःशलाकाकलापवत् ।

* * *

366/mj निष्टविधिव्याप्रियमाणत्वात् ।**इष्टा**

* * *

**एवं च अविभक्तद्व्यात्मकतायां द्विविधः कर्माख्यपुरुषकारस्य प्रवृत्तिप्रबन्धः साध्योऽसाध्यश्च तीव्रमन्दादिहेतूपसेवनसञ्चितत्वात् साध्यासाध्यव्याधिवत्, चलनीयोऽविचाल्यश्च बद्धाबद्धमूलत्वाद् वृक्ष-हटवत्, निकाचितानिकाचितावयवत्वादयःशलाकाकलापवत् ।**

* * *

**निष्टविधिव्याप्रियमाणत्वात् ।**

**एवं च कृत्वा तस्यैव तु** उदितव**दविभक्तद्व्यात्मक**तायां चेतनाचेतनैकात्मतायां सत्यां **द्विविधः प्रवृत्तिप्रबन्धः** फलपरिणामप्रबन्धः प्राग्भवीय**कर्माख्यपुरुषकारस्य साध्योऽसाध्यश्च,** तत्सञ्चयहेतुभूतोपादानकालपरिणामद्वैविध्यात् । तद्दर्शयति --**तीव्रमन्दादिहेतूपसेवनसञ्चितत्वा**दिति, तीव्रेण योगपरिणामेन सञ्चितं कर्म तीव्रानुभावस्थितिप्रदेशं बद्धपुष्टनिकाचितं

---

२ तिरिक्तः] **॰क्तो प्रव॰** प्र॰ ॥
१७ त] **तस्यैव वतूदित॰** प्र॰ ॥
१८ नैकात्म]
**॰त्मकायां**nayacakra-ms-bhā ॥
२१ ब] अट्ठमे कम्मप्पवा+ए पुव्वे कम्मं पण्णविज्जति, जीवस्स य कम्मस्स य कहं बंधो ? तत्थ ते भणंति बद्धं पुट्ठं णिका+इयं । बद्धं जहा सु+इकलावो, पुट्ठं जहा घणणिरंतरातो कया+ओ, णिका+ईयं जहा तावे+ऊण पिट्टिया, एवं कम्मं रागदोसेहिं जीवो पढमं बंध+इ, पच्छा तं परिणामं अमुंचंतो पुट्ठं करेति, तेणेव संकिलिट्ठपरिणामेण तं अमुंचंतो किंचि णिका+एति । णिका+ईयं णिरुवक्कमं, उद+एण णवरि वे+इज्ज+इ, अन्नहा तं ण वे+इज्जति । इति उत्तराध्ययनसूत्रस्य **शान्तिसूरिविरचितायां टीकायां तृतीयाध्ययने गोष्ठामाहिलनिह्नववादे**; एतादृश एव पाठो **नेमिचन्द्रसूरिरचितायामुत्तराध्ययनसूत्रवृत्ताव**पि, किन्तु तत्र बद्धं जहा सु+इकलावो तंतुबद्धो, पुट्ठं जहा किट्टेण घणनिरंतरा+ओ कया+ओ इति विशिष्टः पाठः ॥

सुखदुःखफलमुपक्रमितुमशक्यत्वादसाध्यमवश्यं विपच्यते । मन्देन तु सञ्चितं मन्दानुभावादि शक्यत्वादुपक्रम्यम् । **साध्यासाध्यव्याधिवत्,** यथा व्याधिर्ज्वरातिसारादिर्निदानमन्दतीव्रत्वाभ्यां साध्योऽसाध्यश्च भवति तथा कर्माख्यपुरुषकारप्रवृत्तिप्रबन्धः । साध्यासाध्यस्वभावव्याख्यानं च **--चलनीयोऽविचाल्यश्च बद्धावद्धमूलत्वाद् वृक्षहटवत्** । यथासङ्ख्यं साध्यश्चलयितव्यः, इतरोऽविचाल्यो न कम्पयितव्यः । प्रथमो बद्धमूलो वृक्षवत्, द्वितीयो हटवदबद्धमूलः, दुःखविश्लेष्यः सुखविश्लेष्यश्चेत्यर्थः, **निकाचितानिकाचितावयवत्वात्,** - /ms 367/mj

* * *

परिणमनमपि च कर्मणः पुरुषकारस्य विषयो न च विषयः क्वचित्, अप्राप्तप्राप्तविपरिणामावस्थत्वात्, पुष्पतुग्दृढफलवत् ।

एवं च कृत्वा क्रियासहायश्च स फलं प्रयच्छति एकश्च, सापेक्षानपेक्षशक्तित्वात्, भारोत्पाटवत् । सोपक्रमस्य कर्मात्मात्मनः पुरुषात्मना... ...तृणदाहवद्वा ।

* * *

निकाचिताः कर्मप्रदेशाः तीव्रक्रोधाद्यशुभपरिणामेन, अनिकाचिता मन्दपरिणामेन । किमिव ? **अयःशलाकाकलापवत्,** यथा सूत्रमात्रोपनिबद्धा अयःशलाका एकशलाकापकर्षमात्रप्रयासेन सर्वाः प्रच्यवन्ते, प्रतप्तसम्पृक्तप्रहताः सङ्घर्षणादृते न शक्याः पृथक् कर्तुम्, तथा कर्मविधिः । § 1109

**परिणमनमपि** **चेत्यादि** यावत् **पुष्पतुग्-दृढफलवत्** । तस्यापि पूर्वकर्मणः तीव्रमन्दादिहेतूपसेवनसञ्चितस्य फलदानमिहत्य**पुरुषकारस्य** कृष्यध्ययनसेवावाणिज्याद्यनुष्ठानस्य **विषयो न च विषयः क्वचिदिति, अप्राप्तप्राप्तविपरिणामावस्थत्वात्,** यथासङ्ख्यं स्वयमप्राप्तविपरिणामावस्थं पुरुषकारविप-

---

३ रा ]
°रातीसा°nayacakra-ms-bhā ॥
५ नीयोऽविचा ] °चल्यश्च प्र° ॥
५ ह ] हट्ट°nayacakra-ms-pā ।
ज+इ तं काहिसि भावं जा जा दिच्छसि नारि+ओ । वायाविद्धुव्व हडो अट्ठि+अप्पा भविस्ससि ॥ उत्तराध्य° २२ । ४४ । यदि त्वं करिष्यसि भावं प्रक्रमाद् भोगाभिलाषरूपं या या द्रक्ष्यसि नारीस्तासु तासु इति गम्यते, ततः किम् ? इत्याह--वाताविद्धो हठः वनस्पतिविशेषः, स इव अस्थितात्मा भविष्यसि । इति उत्तराध्ययनसूत्रस्य नेमिचन्द्राचार्यरचितायां वृत्तौ ॥
६ रोऽविचा ]
°चल्यो nayacakra-ms-ya ॥
७ ह ] हट्ट°nayacakra-ms-ya ॥
१९ तु ] तोकम् तुगिति च तौतेः के किकि च इति हैमधातुपारायणे । भीण्शलिवलिकल्यतिमर्च्यर्चिमृजिकुस्तुदाधारात्राकापानिहानञ्शुभ्यः कः ॥ २१ ॥ एभ्यः कप्रत्ययो भवति ।... ...तुंक् हिंसावृत्तिपूरणेषु, तोकमपत्यम् ॥... ...॥ २१ ॥ तोः किक् ॥ ८६९ ॥ तुंक् वृत्त्यादावित्यस्मात् किक् प्रत्ययो भवति, ककारः कित्कार्यार्थः, इकार उच्चारणार्थः, तुक् अपत्यम् ॥ ८६९ ॥ इति सिद्धहेमशब्दानुशासनबृहद्वृत्तौ उणादिसूत्रेषु । एवं च पुष्पतुगिति फलविशेषः पुष्पजन्यं वा फलमित्यर्थः ॥
१९ दृढ ] °दृट्टफ° प्र° ॥
२१ सेवावा ]
°वणि°nayacakra-ms-bhā ॥

रिणाम्यं पुरुषकारेण विपाच्यते विषयत्वमानीयते उदीरणाकरणेनोदीर्यते, प्राप्तविपरिणामावस्थं तु *वैयर्थ्यान्न विषयीक्रियते पुरुषकारेण न विपाच्यते नोदीर्यते स्वयमेव विपक्वत्वात् । किमिव ? **पुष्पतुग्दृढफलवत्,** पुष्पतोकं दृढफलं च यथासङ्ख्यं दृष्टान्तौ । यथा दृढफलं स्वयमेव विपच्यमानं न पाच्यते पुरुषकारेण, पुष्पतोकं तु वृक्षायुर्वेदविधिना विपाच्यते । अथवा पुष्प-
- /ms तोकस्यैवोत्पन्नस्य दृढं फलमस्य भावीति दृढफलं तादृक्छक्त्यैवोत्पन्नमिति तस्यैव भवति तच्छक्तिविरहितस्य न भवतीति तदेवाप्राप्तपाककालं कद-लकाम्रादिफलं कोद्रवपलालादिवेष्टितं निखातं वा पार्श्वधूमादिभिर्विपाच्य-ते, नेतरदवश्यं विनाशीति । अथवा अप्राप्तविपरिणामावस्थं पुष्पतोकम-तिमृदुत्वादुपक्रमेणापि न पाच्यते पाचनायोग्यत्वात् कुथ्यति विलीयते वा, दृढफलं तु पाचनयोग्यं प्राप्तकालत्वात् पाच्यते । § 1110

इत्यादि यावत् तृ (Edtext outside numbered paragraph)**णदाहवद्वे**ति तस्यैव सहैकीभूतस्य आत्मनश्चेतनाचेतनत्वेन **पुरुषात्म-नेत्यादिना** सापेक्षान् उदयोपशमक्षयोपशमक्षयान् अवस्थाविशेषान् दर्शयति सोदाहरणान् । § 1111

**एवं च कृत्वा क्रियासहायश्च स फलं प्रयच्छति एकश्च** सहायीभूतायाः क्रियाया अपि तच्छक्तिमात्रत्वात्, क्रियासहायस्य पुरुषकारस्य फलप्रदानं **सापेक्षानपेक्षशक्तित्वात्, भारोत्पाटवत्,** यथा भारमुत्पाटयन् कश्चित् पुरुषः स्वयमेवोत्पाटयति, कश्चित् पुनः सहायापेक्षः, एवं पुरुषकारोऽपि फलप्र-दाने सहायां क्रियामपेक्षते कश्चित् कश्चिन्नेति सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य । तत्र

एवमनयैव दिशा पुरुषकारैकान्तवादः प्रतिषेध्यः । यत्रैकस्य स्वातन्त्र्यं तत्र तत्प्रदर्शिततत्त्वस्य इतरस्यापीति भावनीयम् । तथावगाहादिलक्षणैरस्तिकायैः

* * *

368/mj क्रमस्य कर्मात्मात्मनसोप

* * *

**एवमनयैव दिशा पुरुषकारैकान्तवादः प्रतिषेध्यः । यत्रैकस्य स्वातन्त्र्यं तत्र तत्प्रदर्शिततत्त्वस्य इतरस्यापीति भावनीयम् । तथावगाहादिलक्षणैरस्तिकायैः**

* * *

**क्रमस्य कर्मात्मात्मन**

---

१ रिणा ] ०णम्यं प्र० ॥
२ *] वैपर्यान्न प्र० । अत्र विपर्ययान्न इत्यपि पाठः स्यात् ॥
३ दृढ ] ०दृट्ट०nayacakra-ms-ya । दृढफलं नालिकेरादिकम् ॥
४ मेव ] विपाच्य० प्र० ॥
१० पा ] पच्यते प्र० ॥
१० कु ] कुथ्यति व्यलीयतेnayacakra-ms-ya । कुथ्यवि लीयते nayacakra-ms-bhā ॥
१३ हाय ] ०यश्चस्य पु०nayacakra-ms-bhā । ०यश्च पु० nayacakra-ms-ya । ०क्रियासहायश्च पुरुषकारस्य फलप्रदाने ? ॥

एवमनयेत्यादि यावद्भावनीयमिति । एवं तावद् द्व्यात्मकतया आत्मकर्मैकान्तवादप्रत्युक्तिदिगियं प्रदर्शिता । **अनयैव दिशा** अनयैव पुरुषकार इत्यापाद्योक्तन्यायेन तदेव वस्तु कर्मसंज्ञामात्रेण भावयित्वा **पुरुषकारैकान्तवादः प्रतिषेध्यः** । तद्यथा --**कर्म च कारणं प्रवर्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवावश्यम्भावि, तस्य चैकस्य उक्तवत् सर्वत्वादुपयोगत्वात् पुरुषतापि** इत्यादि सर्वमशेषं योजनीयम्, यत् परेणानभ्युपगतमन्यतरदितरत् तदितरस्मिन्नापाद्यमिति, तत आह --**यत्रैकस्य स्वातन्त्र्यं तत्र तत्प्रदर्शिततत्त्वस्य इतरस्यापीति भावनीयमिति** भावनोपायं प्रदर्शयति सामान्येन । तथा विशेष्य भावितमेवास्माभिरिति । § 1112 - /ms

369/mj

**ऐक्यं प्रवर्तकप्रवर्त्यन्यायात्, तद्द्रव्यत्वात्, पृथिव्यादिवत् । अवगाहादिद्रव्यं यथा वियदादि एवमात्माद्यपि, तस्यैव तथाभूतेः, उदकादिव्रीहित्वशिवकादिघटत्ववत् ।** § 1113

अविभक्तावगाहावगाह्यावगाहकमेकमेवेदं भवनं मिथ्याग्राहोत्थापितद्रव्यगुणकर्मसामान्यविशेषसमवायप्रभेदं सर्वगतेतराभिमतद्रव्य[मादृश्यतां पृ॰ ३७० पं॰ ८, पृ॰ ३७६ पं॰ २२ ॥त्र]मुत्क्षेपणादि तद- § 1114

न केवलं कर्मात्मनोरेवाभिन्नैक्यम्, किं तर्हि ? यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु वृत्तं भावितमस्माभिस्तथा **अवगाहादिलक्षणैरस्तिकायैः** अवगाहगतिस्थितिलक्षणैराकाशधर्माधर्माख्यैः सह कर्मात्मविचारोक्तात् **प्रवर्तकप्रवर्त्यन्यायाद् भावनीयमिति** वर्तते । यथा प्रवर्तक एव प्रवर्त्य इत्युक्तं तथा अवगाहादि प्रवर्तकं प्रवर्त्यं चोभयमेकमेव कर्मात्मवदिति । पुनरपि तद्भावनार्थमाह --**तद्द्रव्यत्वात्**, यद् यद् यद्द्रव्यं तत् तत् तत्तत्त्वम्, यथा प्राग् भावितं पृथिव्यादि व्रीह्यादि । पृथिव्यादिवत् तद्द्रव्यत्वमसिद्धमिति चेत्, नेत्युच्यते, **अवगाहादिद्रव्यं यथा वियदादि एवमात्माद्यपि**, यथावगाहोप-

---

१ या] यावदानीय॰nayacakra-ms-ya । याववानीय॰ nayacakra-ms-bhā ॥

४ क] दृश्यतां पृ॰ ३६५ पं॰ १ ॥

५ स] सर्वादुप॰ प्र॰ । दृश्यतां पृ॰ ३६५ पं॰ २ ॥

६ र] ॰रदितरस्मिन्नापाद्यमितिnayacakra-ms-bhā ॥

७ त] तत्तत्प्रदर्शि॰nayacakra-ms-bhā । तत्तत्प्रतिदर्शि॰ nayacakra-ms-ya । यच्चैकस्य स्वातन्त्र्यं तत् तत्प्रदर्शिततत्त्वस्य ? ॥

१८ अ] गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः । ५ । १७ । आकाशस्यावगाहः । ५ । १८ ।--तत्त्वार्थसू॰ ॥

२२ त] तत् तत्तत्त्वम् nayacakra-ms-ya ॥

२४ गाहा] ॰हादे द्रव्यंnayacakra-ms-bhā । ॰हादेव द्रव्यं nayacakra-ms-ya ॥

कारगुणमाकाशं गतिस्थित्युपकारगुणौ धर्माधर्माविवमात्मपरमाण्वादिद्रव्यमपि । कुतो हेतोः ? **तस्यैव तथाभूतेः**, तदेव ह्यात्मपुद्गलद्रव्यं तथा तथावगाहगतिस्थितिरूपेण भवति । किमिव ? **उदकादिव्रीहित्वशिवकादिघटत्ववत्**, यथोदकपृथिव्याकाशवातबीजाङ्कुरादय एव व्रीहीभवन्ति युगपद्भाविनो भावाः यथा च क्रमभाविनः शिवक-स्थासक-कुशूलकादय एव घटीभवन्ति तथा आत्माद्यप्यवगाहादि, अवगाहादि वियदादि, वियदाद्यवगाहादि, अवगाहाद्यात्मादि च भवतीति तस्य तस्य तद्द्रव्यत्वम्, तद्द्रव्यत्वात् प्रवर्तकप्रवर्त्यैक्यन्यायोऽवस्थितः । तस्माच्चात्मपुद्गलाकाशधर्माधर्मास्तिकाया एकं तत्त्वं
- /ms सर्वप्रभेदवृत्तमिति । § 1115

किञ्चान्यत्, **अविभक्तेत्यादि** याव**देकमेवेदं भवनम्** । अवगाहोऽवगाहमानादात्माण्वादेरविभक्तः अवगाह्यमप्याकाशमवगाहधर्मस्य स्वलिङ्गस्य पृथगसिद्धेरवगाहकादविभक्तं द्रव्यार्थविवक्षायां पर्यायस्याभावात् । तस्मा**देकमेवेदं भवन**मिति साधूक्तम् । तत् पुनरन्यत्र प्रतिवादिमते **मिथ्याग्राहोत्थापितेत्यादि** यावत् **सर्वगतेतराभिमतद्रव्य**मिति । कार्यद्रव्यं पटादि कारणद्रव्यात् तन्त्वादेरन्यत् तन्त्वादि च कार्यादन्यत्, एवं गुणाः पटरक्तश्यामत्वादयः पटात् कारणकार्याख्याः परस्परतश्च, कर्माप्युत्क्षेपणादि क्रियावद्द्रव्यसमवेतं सर्वगतासर्वगतद्रव्याद् गुणेभ्यः परस्परतश्च, द्रव्य-गुण-कर्मभ्यः परस्परतश्चान्ये सामान्यविशेषसमवाया इतीत्थंप्रभेदं तदेवास्मदुक्तं भवनं मिथ्याग्राहोत्थापितं कैश्चित् । यैश्चेत्थं विकल्पितं तान् प्रति **सर्वगतेतराभिमतद्रव्यस्वरूपमुत्क्षेपणादि, आदि**ग्रहणाद् रूपरसादिगुणगणः सामान्यविशेषसमवायाश्च, तच्च सर्वगतासर्वगतद्रव्यं परस्परतोऽन्योन्यान्यतरस्वरूपमात्रमिति प्रतिज्ञार्थः । **तदव्यतिरिक्तत्वा**दिति हेतुः, अनन्तरोक्तविधिना च तदव्यतिरिक्तत्वं सिद्धम् । तत्स्वरूपमात्रं तदव्यतिरिक्तम् अनयोः शब्दयोः कोऽर्थभेद इति चेत्, न
370/mj कश्चिदेतन्नयदर्शनेन, अपरस्तु शब्दबुद्ध्यादिभेदमिच्छतीति तन्मता

* * *

व्यतिरिक्तत्वात् घटघटभवनवत् । एवं पचिक्रियापि पृथिव्यादिकाष्ठादिस्वतत्त्वप्रतिनियता क्वचिदप्यनतिक्रान्तद्रव्यस्वरूपा पृथिव्यादिकाष्ठादिद्रव्यमात्रं भवनमेव ।

तच्च यदसौ भवति स तस्य भावः पुरुषादिनियमचेतनाचेतनविकल्पद्वैतविशेषणविनिर्मुक्तः । तदेव हि भवनं यत् सर्वात्मकमसद्व्यावृत्तार्थम् । अनेन हि प्रवर्तयितृत्वात् सर्वप्रभेदेन भूयते, न न भूयतेऽपि अभावेन

---

६ गाहा] °हादिरवगाहादिnayacakra-ms-ya । °हादिरवगाहादिरवगाहादि nayacakra-ms-bhā ॥
८ व] °वर्त्यैकान्या° प्र° ॥
१३ प्र] प्रवादि°nayacakra-ms-bhā ॥
१५ प] प+उरक्तश्यामत्वादयः पत्नात् प्र° ॥
१६ क] कर्माद्युत्क्षे° प्र° ॥
१६ म] °वेत प्र° ॥
१९ मु] दृश्यतां पृ° ३७० पं° ८, पृ° ३७६ पं° २२ ॥

प्रागभावादिना, तदात्मान-

* * *

पेक्षयैतदुक्तम् । दृष्टान्तः **घटघटभवनवत्,** यथा घट एव घटभवनं न ततोऽन्यत् ततस्तदव्यतिरिक्तम् । यद्यन्यत् स्याद् घटो न भवेद् भवनादन्यत्वाद् भवनव्यतिरिक्तत्वात् खपुष्पवत्, भवनं वा तस्य न स्यात् ततोऽन्यत्वात् पटभवनवदिति । अतो घटमात्रं घटभवनं तदव्यतिरिक्तं च एवं सर्वगतेतरद्रव्यमात्रमुत्क्षेपणादीति । § 1116

**एवं पचिक्रियापीत्यादि** । काष्ठादिपृथिव्यादिस्वतत्त्वे प्रतिनियता पचिक्रियाया वृत्तिः पूर्वोक्तसर्वपरिणत्यावृत्तिरूपत्वादन्योन्यस्वरूपापत्तेश्च - /ms तेषामैक्यापत्तिश्चेति अनतिक्रान्तं द्रव्यस्य स्वरूपं देशे काले वा यया पचिक्रियया सा **क्वचिदप्यनतिक्रान्तद्रव्यस्वरूपा** । सा चोत्क्षेपणादिवदेव **पृथिव्यादिकाष्ठादिद्रव्यमात्रं भवनमेव** । § 1117

भवनं भावोऽस्तिता इति पर्यायशब्दाः । **तच्च** भवनं **यदसौ भवति स तस्य भावः,** न ततोऽन्यः, **स्वभावसम्बन्धार्थस्तु षष्ठ्यपदेशः कशयत्यचेतसः** इति वचनात् स्वार्थाभिधायिन्येवाभेदे कर्तृलक्षणा षष्ठी--द्रव्यस्य भवनं द्रव्यमेव भवतीति । स च भावः **पुरुषादिनियमचेतनाचेतनविकल्पद्वैतविशेषणविनिर्मुक्तः,** पुरुष एवेदम्, नियतिरेव, काल एव इत्यादि चेतनमचेतनं च भवतीत्यनेन विकल्पेन द्वैतमिदं मनुष्यादि घटादि चेति विशेष्यते यत् पुरुषादिवादे जाग्रत्सुप्ताद्यवस्थाभेदेन क्रमयौगपद्यादिभेदेन वा तेन विशेषणेन विनिर्मुक्तः स भावो निर्विशेषण एव सर्वात्मकः, घटादि पटो भवति व्रीहिरुदकम् मनुष्यो नभो धर्माधर्मादि, पटोऽपि घटो व्रीह्युदकादि, इत्यविशेषेण सर्वं भवत्येवैकैकमिति **तदेव हि भवनं यत् सर्वात्मकमसद्व्यावृत्तार्थम्,** न ह्यसन्नाम किञ्चिदस्ति । किं कारणम् ? यस्मादनेन **प्रवर्तयितृत्वात् सर्वप्रभेदेन** व्रीह्युदकाकाशाङ्कुरादिना **भूयते, न न भूयतेऽपीति** द्विः प्रतिषेधाद् भवनमेवाभावव्यावृत्त्या नियम्यते भवत्येव, न न भवति इति । केन पुनर्न भवति ? **अभावेन प्रागभावादिना,** अस्मिन्

---

६ व] °वत् । अतोnayacakra-ms-bhā ॥ ८ त] °तत्त्वोnayacakra-ms-ya । °तत्त्वेतत्त्वो nayacakra-ms-bhā ॥ ९ प] पचिक्रियावृत्तिः पूर्वोक्तसर्वपरिणत्यावृत्तिरूपत्वादन्योन्यस्वरूपापत्तेश्च तेषामैक्यापत्तिश्चेति अनतिक्रान्तं द्रव्यस्य स्वरूपं यया पचिक्रियाया वृत्तिः पूर्वोक्तसर्व परिणत्यावृत्तिरूपत्वादन्योन्यस्वरूपापत्तेश्च तेषामैक्यापत्तिश्चेति अनतिक्रान्तं द्रव्यस्य स्वरूपं यया पचिक्रियया इति द्विर्भूतो nayacakra-ms-bhā प्रतौ पाठः ॥ ९ त्या] °त्याव्यतिरू°nayacakra-ms-ya ॥ १४ स] स चस्य भावःnayacakra-ms-bhā । स च स्वभावः nayacakra-ms-ya । दृश्यतां पृ° १८ पं° २२ । पृ° २१९ पं° १६, टि° ५ ॥ १९ चेति] विशिष्यतेnayacakra-ms-ya ॥ २१ न] नसोध°nayacakra-ms-ya । नसौध° nayacakra-ms-bhā ॥ २३ द्यावृत्ता] °त्त्यर्थम् प्र° ॥

- /ms हि नये न केनचित् प्रकारेण किञ्चिन्न भवतीति प्राक्प्रध्वंसान्यात्यन्ताभावा न सन्त्येव । कुतः ? **तदात्मानतिरिक्तत्वात्,** स स आत्मा तदात्मा तस्यात्मा [वा] तदात्मा, ततोऽनतिरिक्तत्वात् । यद् यद् यदात्मानतिरिक्तं तस्य तस्य
371/mj प्रागभावाद्यभावः, तेनाप्यात्मना भवत्येवेत्यर्थः ।

* * *

तिरिक्तत्वात् बालकुमारादिवत् । भूत्वा न भवति अभूत्वा च भवति, अन्यथाऽभावत्वापत्तेः ।

अचेतन इति च चेतनादन्य आत्मैवोक्तः पर्युदासवाचित्वान्नञः, नोच्यते चेतनो न भवत्यचेतन इति चेतना न भवत्यचेतना इति ज्ञानादि न भवत्यज्ञानादिर्वा इति ।

* * *

किमिव ? **बालकुमारादिवत्,** यथा बालः कुमारो युवा मध्यमः स्थविरो वा इति देवदत्त एव तेन तेन प्रकारेण भवति बालकाले कौमाराभावेन कौमारे[ऽ]बालभावेन यज्ञदत्ताद्यन्याभावेन खरविषाणाद्यत्यन्ताभावेन च सर्वः सर्वदा सर्वत्र सर्वथा च भवति स एव देवदत्तस्तत्तदात्मकस्तथा सर्वद्रव्यभवनमिति । **भूत्वा न भवत्यभूत्वा च भवती**ति, मृत्पिण्डकाले न न भवति घट[स्तद]व्यतिरिक्तात्मकत्वाद् देवदत्तबालकुमारादिवत्, कपालकाले न [न] भवति घटः तदव्यतिरिक्तात्मकत्वाद् देवदत्तबालकुमारादिवत् । कस्मात् ? **अन्यथाऽभावत्वापत्ते**रसत्त्वापत्तेः । यद्येवं नेष्यते त्वया प्रागभावादिनापि भवत्येव इति, ततस्तस्य देवदत्तादेर्वस्तुनो बालकुमारादिसर्वावस्थात्मपरित्यागे किं तद् देवदत्ताख्यं वस्तु ? कास्तास्तद्व्यतिरिक्ता बालाद्यवस्थाः ? इत्यभाव आपद्यते । न सन्त्यवस्थाः परस्परसम्बन्धाभावाद् वन्ध्यापुत्रवत् । नास्त्यवस्थावत्, अवस्थाव्यतिरेकेणानवधारणात्, वन्ध्यापुत्रवत् । § 1118

अत्राह--न चेतनोऽचेतनः इति नञा प्रतिषेधवाचिना सम्बन्धादचेतनरूपेण चेतनस्य भावाभाव इति । अत्र ब्रूमः **--अचेतन इति च चेतनादन्य आत्मैवोक्तः पर्युदासवाचित्वाद् नञः,** नात्यन्ताभाववाचित्वात् । स कोऽन्यश्चेतनादन्य आत्मैव इति चेत्, उच्यते--स्पर्शास्पर्शादिधर्मणस्तस्यैवोपयोगाद्यस्पर्शरूपादन्येन रूपेण स एव स्पर्शादिमान् ज्ञानावरणादिकर्मरूप आत्मा, तेन चेतनादन्येनाचेतन इति चेतन एवोक्तः, न तु भवन्मतात्यन्तचेतनाभावरूपेण,
- /ms प्रसज्यप्रतिषेधाख्यस्य विकल्पान्तरस्याभावाद् **नोच्यते चेतनो न भवत्यचेतनः इति** । तथा **चेतना न भवत्यचेतना इति** नोच्यते[ऽ]ज्ञानादि ज्ञानदर्शन-

---

४ भा] °भावत्वेनाप्यात्मनाnayacakra-ms-ya ॥
१२ बा] अत्र बालकालेऽकौमारभावेन इत्यपि पाठः स्यात् ॥
१४ स] सर्वसर्वदा प्र° ॥
१४ स] सर्वंnayacakra-ms-vi ॥
२१ र] °रास° प्र° ॥
२२ ना] नास्यव°nayacakra-ms-bhā । नास्याव° nayacakra-ms-ya ॥
२४ भा] भावाभावाभावnayacakra-ms-ya ॥
२६ र्शादिध] °धर्माण° प्र° ॥

वीर्यादि न भवतीति, किं तर्हि ? चेतनाया अन्याऽचेतना, का सा ? स्पर्शादीति । तथा **ज्ञानादि न भवतीत्यज्ञानादि** नोच्यते, किं तर्हि ? ज्ञानादेरन्यदज्ञानादि स्पर्शाद्येव । अचेतना[ऽ]ज्ञानयोर्भूय उदाहरणं चेतनात्मनो द्रव्यस्य निर्देशेनापरितुष्टस्य परस्य तदभिप्रेतपर्यायनिर्देशेन प्रतिपादनार्थम्, **अज्ञानादिर्वे**ति, कियती वोदाहरणमाला क्रियते ? योऽप्यज्ञान-संशय-विपर्ययज्ञानादिर्ज्ञानाद् भिन्न इत्यभिमतो धर्मकलापः सोऽपि ज्ञानाज्ञानात्मात्मरूपादेर्भिन्न एवेति तत्रापि न तु ज्ञानादिर्न भवत्यज्ञानादिरित्युच्यते, किं तर्हि ? ज्ञानादेरन्य एवाज्ञानादिरित्यात्मैव अज्ञानादिरूपेणोच्यते इति । § 1119
372/mj

यद्येष न्यायो नेष्यते ततः तथा सर्वतो व्यावृत्तेरयुक्तः प्रसज्यप्रतिषेधः, स्वतोऽपि व्यावृत्तेः खपुष्पवदसत्त्वात् । अन्यत्वाच्च तत्त्व एव प्रागभावादिव्यावृत्तेर्बालकुमारादिवत् तत्त्व एव चेतना । § 1120

सा पुनर्ज्ञानदर्शनादिसंवेदना निर्वृत्त्युपकरणलब्धितत्त्व उपयोगात्मा । अतो रूपादिमदप्यात्मा, चेतनत्वात्, अभिमतात्मवत्, तस्यैव तथाभूतत्वादा मुक्तेः । एवं च कृत्वा ज्ञानं न ज्ञानं पुद्गलात्मकत्वाद् रूपादिवत्, अज्ञानमपि च ज्ञानं तत एव तद्वत्, चेतनोऽचेतनः, अचेतनश्चेतन इत्यादि । § 1121

**यद्येष न्यायो नेष्यते**ऽन्यः स प्रसज्यप्रतिषेध इष्यते चेतनो न भवत्यचेतन इत्यादिरिष्यते त्वया **तत** एवं सति **तथा** तेन प्रकारेण **सर्वतो व्यावृत्तिः**, घटः पटो न भवतीति पटोऽपि घटो न भवतीति परस्परव्यावृत्तिवत् सर्वभावव्यावृत्तेश्चेतनाचेतनयोर्व्यावृत्तिः । ततश्च **सर्वतो व्यावृत्तेरयुक्तः प्रसज्यप्रतिषेधो** निर्विशेषव्यावृत्त्यर्थत्वाद् नञ इति । स्यान्मतम्--स्वतस्त्वव्यावृत्तिर्भविष्यति घटवदिति चेत्, उच्यते --**स्वतोऽपि व्यावृत्तेः**, स्वतोऽपि तर्हि व्यावृत्तं तत् परपरिकल्पितं वस्तु प्राप्नोति सर्वतो व्यावृत्तत्वात् **खपुष्पवत्** । तस्माच्चावस्तुत्वं स्वपरतो व्यावृत्तत्वात् खपुष्पवदेवेति । तत आह --**असत्त्वा**दिति । तस्मात् स्थितमेतत्--असत्त्वप्रसङ्गात् प्रसज्यप्रतिषेधाभावाच्च प्रागभावादिव्यावृत्तेरन्यत्वमर्थः बालः कुमारो न भवति इत्यादिषु । तत उपसंह्रियते मौल एव **अन्यत्वाच्च तत्त्व एव प्रागभावादिव्यावृत्तेर्बालकुमारादिवत् तत्त्वमेव चेतने**ति । § 1122 - /ms

३ र्शाद्येव ] °द्येवाचेतनाज्ञानयो° प्र° ॥
६ ज्ञा ] ज्ञानात्मात्मात्म-
रू°nayacakra-ms-bhā
॥
१८ य ] यद्येव कन्यायो प्र° ॥
१८ तिषेध ] °धाख्यंते
चेतनोnayacakra-ms-ya ॥
२३ व ] °वच्चेत्nayacakra-ms-ya ॥
२८ कु ] °कुमारादिरूपादिवत्
nayacakra-ms-ya ॥

**सा पुनरिदानीं चेतना किंस्वरूपा ? इति वाच्या, उच्यते --ज्ञानदर्शनादिसंवेदना,** साकारानाकारोपयोगौ सप्रभेदौ ज्ञानदर्शनग्रहणेन गृहीतौ, **आदि**ग्रहणेन सुखदुःखरागद्वेषभयादिसंवेदना गृहीता । सापि च **निर्वृत्त्युपकरणलब्धितत्त्व उपयोगात्मा,** इन्द्रियाणां चक्षुरादीनां निर्वृत्तिः पक्ष्मपुटकृष्णसारादित्वेन निष्पत्तिः, उपकरणं तु मसूरकातिमुक्तककदम्बक्षुरप्रानेकाकारतया प्रदेशानां निष्पत्तिः, एतन्नयदर्शनेन वाञ्जनपादाभ्यङ्गप्रदीपाद्यप्युपकारकमुपलब्धेः सर्वमुपकरणम् । लब्धिः पुनर्निर्वृत्तेः प्राक् पश्चाच्चात्मना पूर्वोपात्तं तद्योग्यनामकर्मोदयजं द्रव्यं ज्ञानदर्शनावरणयोर्वीर्यान्तरायस्य च क्षयक्षयोपशमौ, तत्तत्त्व उपयोगो ज्ञानदर्शनस्वतत्त्वव्यक्तिः, स एव चात्मा । ततः किमिति चेत्, **अतो रूपादिमदप्यात्मा,** यदेतद् रूपरसादिधर्म मूर्तपौद्गलमाध्यात्मिकमिन्द्रियपाण्याद्यवयवात्मकं शरीरं तदपि आत्मैव । कुतः ? **चेतनत्वात्,** *चेतनत्वं चास्यानन्तरं प्रतिपादितम् । किमिव ? **अभिमतात्मवत्,** यथा शुद्धोपयोगलक्षणः केवली आत्मा चेतनत्वात् तथेन्द्रियाद्यपि रूपादिमदिति । तत् समर्थयति **--तस्यैव तथाभूतत्वादा मुक्तेः,** स एव हि द्रव्यकेवली संसारावस्थ उपयोगात्मा तथाभूतो निरावरणज्ञानदर्शनः संवृत्तोऽभिमतात्मा, तस्मादा मुक्तेस्तस्यैव तथाभूतत्वादिहापि संसारे स एवेति रूपादिमतः पुरुषस्य मुक्तस्य चोपयोगात्मकत्वादविशेष एव । **एवं च कृत्वा ज्ञानं न ज्ञानं**
- /ms
373/mj **पुद्गलात्मकत्वाद् रूपादिवत्,** पुद्गलात्मकत्वं च ज्ञानस्यानन्तरं

* * *

एवं चायं सङ्ग्रहेषु द्रव्यप्रकृतिनयः । स च सङ्ग्रहैकदेशत्वाद् द्रव्यार्थः ।

द्रव्यशब्दोऽपि कर्तृसाधनः । द्रव्यमपि द्रवति याति न विच्छिद्यते भिन्नरूपव्याप्त्या । ननु कर्मणि कर्मसाधनत्वमुदितम् । ननु कर्मसाधनव्याख्यानेन तेनैव कर्तृसाधनत्वमेव व्यवस्थापितम्, द्रव्येणैव द्रव्यं क्रियते व्रीहिवत् इति कर्तरि तृतीयया कर्तृसाधनत्वाभ्युपगमात् ।

एतस्मिंश्च नये द्रव्यमेव शब्दार्थो नित्यः सर्वात्मकः । अन्वाह च-- पृथिवीधातौ किं सत्यम् ? विकल्पः । विकल्पे किं सत्यम् ? ज्ञानम् । ज्ञाने किं सत्यम् ? ओम् । तद् ब्रह्म ।

* * *

प्रतिपादितम् । **अज्ञानमपि च ज्ञानं तत एव तद्वत्, चेतनोऽचेतनः, अचेतनश्चेतन** इत्यनेकधा सर्वसर्वात्मकतां भावयति । **इत्यादिग्रहणान्निदर्शनमात्रमेतद् भावितम्,** अनया दिशा सर्वत्र भावनीयमिति । § 1123

---

६ प्रा ] ॰प्रागनेका॰ प्र॰ । दृश्यतां पृ॰ १८३ पं॰ २० ॥
१२ * ] चेतनस्यां चास्या॰nayacakra-ms-bhā । चेतनस्य चास्या॰ nayacakra-ms-ya ॥
१२ अ ] अभिहिता॰nayacakra-ms-bhā ॥
१५ त ] तथातथा॰nayacakra-ms-bhā ॥
१५ द ] ॰दर्शनसंवृ॰ प्र॰ ॥
३० णा ] ॰णान निद॰nayacakra-ms-bhā । ॰णान्न निद॰ nayacakra-ms-ya ॥

आह--आर्षोक्तेषु नयेषु कतमोऽयम् ? इति, अत्रोच्यते --**एवं चायं सङ्ग्रहेषु** । सङ्ग्रहः शतविकल्पः, **एक्केक्को य सतविधो सत्त णयसता हवंति ते चेवं** आवनि॰ ७५९ इति वचनात् । तेषु सङ्ग्रहेषु अयं विधिनियमनयो द्रष्टव्यो य एवं वर्णितः । तेऽपि च सङ्ग्रहाः सङ्ग्रहेण त्रिविधा भवन्ति द्रव्य-स्थितनयप्रकृतयः । *द्रव्यप्रकृतयः कर्म-पुरुषकाराद्येकान्तवादाः, स्थितप्रकृतयः पुरुष-काल-नियत्यादिवादाः, नयप्रकृतयः प्रकृतीश्वरादिकारणवादाः । तेषु चायं नयः स्थितप्रकृतीनां पुरुष-काल-नियति-स्वभावनयानां विरोधिनोरीश्वरनयस्य प्रधाननयस्य चाधिष्ठातृप्रधानाख्ययोर्विपक्षो **द्रव्यप्रकृतिनयो** विधिनियमभङ्गो द्रष्टव्यः । स च **सङ्ग्रहैकदेशत्वाद् द्रव्यार्थः,** नियमात्मकत्वात् पर्यायांशस्पर्शित्वेऽपि सङ्ग्रहैकदेशत्वाद् द्रव्यार्थ एवायमिति । § 1124

**द्रव्यशब्दोऽपि कर्तृसाधनः, द्रव्यमपि द्रवती**त्यादिपर्यायशब्दैस्तदर्थं व्याचष्टे, **द्रवति याति न *विच्छिद्यते भिन्नरूपव्याप्त्या** भिन्नानि रूपाणि चेतनाचेतनानि व्रीहिपृथिव्यादीनि देवमनुष्यादीनि च साकल्येन व्याप्नोत्येव न किञ्चिदपि त्यजतीति । चोदक आह --**ननु कर्मणि कर्मसाधनत्वमुदितम्,** कर्मकारणव्याख्यानेऽयं द्रव्यशब्दः कर्मसाधन एवोक्तः द्रूयत इति द्रव्यम् इति, कर्मवादश्च विधिनियमभङ्ग इत्युक्तम्, तत् कथमधुनाऽवधार्य द्रवतीति द्रव्यं कर्तृसाधनमुच्यत इति । अत्र विधिनियमनयो ब्रूते पूर्वोक्तमेव स्मारयन् --**ननु कर्मसाधनव्याख्यानेन तेनैव कर्तृसाधनत्वमेव व्यवस्थापित**मिति । तत् कथमिति चेत्, उच्यते --**द्रव्येणैव द्रव्यं क्रियते व्रीहिव**दिति कर्तरि - /ms
तृतीया द्रव्येण इति, तया कर्तृसाधनत्वाभ्युपगमात् प्रागस्माभिः पुरुषकर्मपृथिवीव्रीह्यादीनामात्मनैवात्मनः कर्तुः कर्मत्वस्य च विस्तरेण वर्णितवत् सत्यां कर्मतायामपि कर्तृत्वं द्रव्यत्वादिति सामान्यार्थस्याविच्छेदात् स्वातन्त्र्यात् । § 1125

**एतस्मिंश्च नये द्रव्यमेव शब्दार्थः,** न पर्यायार्थः पदार्थ इत्यर्थः । स च **नित्यो** विच्छेदा 374/mj

* * *

इति । स एष परमार्थः । एतदुक्तं भवति--अतः परं शब्दार्थव्यवहारो निवर्तते निर्विकल्पत्वात्, व्यवहारातीतोऽयमर्थः । अत्रानुवृत्तिव्यावृत्ती अन-

२ ण] ॰नय॰nayacakra-ms-ya ॥
२ ह] हवंतेवमितिnayacakra-ms-ya । दृश्यतां पृ॰ २९५-- १ ॥
५ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
७ चायं] नयस्थित॰ प्र॰ ॥
१० त्वात्] पर्यायाणांशस्प॰nayacakra-ms-bhā । पर्यायायांसेस्प॰ nayacakra-ms-ya ॥
१२ म] ॰मिति द्र॰nayacakra-ms-ya ॥
१३ *] विच्छेद्यते प्र॰ ॥
१३ रूप] ॰पमुपव्या॰nayacakra-ms-ya ॥
१४ रूपाणि] चेतनानि प्र॰ ॥
१६ द्रू] दृश्यतां पृ॰ ३५६ पं॰ ७ ॥
२० द्र] दृश्यतां पृ॰ ३५७ पं॰ १ ॥
२३ द्र] द्रव्यत्वादिसामान्या॰ ? ॥

न्तरोक्तपृथिव्यादिधातुविकल्पज्ञानसत्यत्वानुप्रबन्धसामर्थ्योपहितरूपे यथाभागं प्रसिद्धिं गच्छतः । अत्र उत्पादविनाशशब्दावपि तत्स्थितरूपावेव, ऊर्ध्वपदनम्... ... ...। अनित्यघटादिशब्दा अपि स्वतत्त्वबीजं द्रव्यमेवाविच्छिन्नमाहुः ।

* * *

भावादवस्थितत्वाद्वा **सर्वात्मक** एकैकस्य सर्वार्थरूपानुस्यूतत्वात् । **अन्वाह चेति** ज्ञापकमाह, एतमेव नयमनुवर्तमानोऽन्योऽप्याह । **पृथिवीधातावित्यादि** यावत् **तद् ब्रह्मेति** । पृथिव्येव पृथिवीधातुः, धृत्यादिधर्मधारणात् । तत्र **किं सत्यम् ? विकल्प** इति स्वयमेव पृष्ट्वा व्याचष्टे । न कदाचिदप्यत्र पृथिवी नामास्ति अश्मसिकतामृल्लोष्टवज्रादीन् विमुच्य, त एव हि विकल्पाः पृथिवी, न पृथिव्येव ते । **विकल्पे किं सत्यम् ? ज्ञानम्,** तेऽपि च विकल्पा ज्ञानादन्ये न सन्ति ज्ञानमेव आत्मकर्मलक्षणं चैतन्यं तथा तथा विजृम्भते, चैतन्यस्यैव व्यवहारमार्गपातित्वात् । **ज्ञाने किं सत्यम् ? ओम्,** अवति रक्षति पाति प्रीयते तृप्यति चेतनाचेतनभेदे सत्यप्येवमादिधात्वर्थात्मना विपरिणममानं कर्मात्मतयैकं भवति येन यथा परिकल्प्यते तत् तथानुवर्तत इत्योम् । **तदेतद् ब्रह्म । स एष परमार्थः,** तदेतत् तत्त्वं परमं ब्रह्म बृहदिति । तस्यार्थं कथयति **एतदुक्तं भवति--अतः परं शब्दार्थव्यवहारो निवर्तते निर्विकल्पत्वादिति,** इयं शब्दार्थव्यवहारगतिर्यावन्निर्विकल्पं ज्ञानमेवैतदिति, अतः परं

- /ms ब्रह्म इति यत् परं तत्त्वं तत्र ज्ञानमपि निर्विकल्पं सद् न क्रमते, तद्दर्शयति **--व्यवहारातीतोऽयमर्थः । अयमिति** व्याख्यातमधिगमोपायक्रममात्रं दर्शयति । § 1126

कथम् ओम् इत्येषोऽन्वयव्यतिरेकरहितः शब्दार्थो भवितुमर्हतीति चेत्, को ब्रूतेऽन्वयव्यतिरेकरहित इति ? यस्माद**त्रानुवृत्तिव्यावृत्ती अनन्तरोक्तपृथिव्यादिधातुविकल्पज्ञानसत्यत्वानुप्रबन्धसामर्थ्योपहितरूपे,** पृथिव्यादिधातूनामचेतनाभिमतानां विकल्पसत्यानां चेतनकर्मात्मनोकर्माभिमतानां च ज्ञानसत्यस्वरूपपुरुषत्वेन वान्वितव्यतिरिक्तानाम् ओम् इति कर्मात्मैक्यापत्त्या तत्सत्यत्वानुप्रबन्धेन शक्त्युपधानं नित्यमेवेत्यन्वयव्यतिरेकवानेवायं शब्दार्थ इति । ते चानुवृत्तिव्यावृत्ती यो यो भागो **यथाभागं प्रसिद्धिम**भिधानाभिधेयव्यवहारात्मिकां कर्म इति पुरुषः इति कर्मपुरुषकार इति एक एव इति वा प्रसिद्धिं **गच्छत** इति । § 1127

---

२ ऊ] ऊर्ध्वपदनमुत्पादः आविर्भाव इत्यर्थः, विनशनं विनाशस्तिरोभाव इत्यर्थः । इत्याशयको मूलपाठः सम्भाव्यतेऽत्र । ऊर्द्धपत्तिरुत्पत्तिरात्मलाभः प्रत्यक्षोपलब्धिः, विविधमदर्शनं विनाशोऽनुपलब्धिरभावः । इति वक्ष्यते नयचक्रवृत्तौ, पृ° २९७-- १ ॥
८ पृथिवीधातुः] °तुर्ववृत्यादि° प्र° ॥
१४ स] सत्येवमादि°nayacakra-ms-ya ॥
१६ त] तदतद्nayacakra-ms-ya । तदथतद् nayacakra-ms-bhā ॥
१९ त] तत्वज्ञान° प्र° ॥
२६ क] °कर्मात्मनेकर्माnayacakra-ms-ya । °कर्त्तात्मनेकर्मा° nayacakra-ms-bhā ॥
२६ वा] चान्वित° ? ॥

स च शब्दार्थोऽनाद्य[नु]प्रबन्धसामर्थ्योपहितानुप्रवृत्तित्वाद् नित्यः । **अत्रोत्पादविनाशशब्दावपि तत्स्थितरूपावेव** नासदुद्भवात्यन्तविनाशरूपाविति, तद्व्याचष्टे --**ऊर्ध्वपदन**मित्यादि गतार्थम्, यथासङ्ख्यमाविर्भावतिरोभावस्वरूपयोरपि भावाभिधायित्वादवस्थित एवार्थ उत्पद्यते विनश्यतीति चोच्यते तथा 375/mj

* * *

वाक्यार्थोऽपि च पृथक् सर्वं पदम्, सर्वसर्वात्मकत्वात् ।

निबन्धनमप्यस्य आर्षम्--जे एकणामे से बहुणामे आचाराङ्गसू० १ । ३ । ४ इति ।

* * *

तथा परिणममानः । **अनित्यघटादिशब्दा अपी**ति, अनित्यः प्रध्वस्तः इत्यादयो घटः पटः इत्यादयश्च शब्दाः पृथिव्यादिलक्षणा अपि नात्यन्तमुत्पन्नमभूतं वार्थं ब्रुवते, किं तर्हि ? **स्वतत्त्वबीजं द्रव्यमेवाविच्छिन्नमाहुः**, स्वतत्त्वं यदभूत्वा भवति भूत्वा च न भवति तदनित्यम्, समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययविधानात् । स एव तु दृश्यादृश्यपरिणामाभ्यां भवति न भवतीति स्वतत्त्वस्य अनित्यत्वस्य बीजं द्रव्यमेवार्थः । घटादि तावत्तदनित्यत्वम्, - /ms
तस्य बीजमवस्थितं द्रव्यं सामान्यमेव अङ्कुरादेर्व्रीहिवत् । तदेवाविच्छिन्नं महापृथिवीवदनुत्पादव्यययोगि अवृद्धम् अविचालि कूटस्थं ध्रुवं नान्यदिति पदार्थः । § 1128

**वाक्यार्थोऽपि च पृथक् सर्वं पदम्,** प्रत्येकं पदं वाक्यम् देवदत्त गाममभ्याज शुक्लाम् इत्यत्र देवदत्त एवेतरपदार्थपरिसमाप्तेः कर्मविभक्त्यन्ते गोशब्दे च तथापरिसमाप्तेरितरपदार्थानाम् । तच्च सर्वसर्वात्मकत्वादुक्तन्यायादुपपन्नम् । § 1129

न चैताः स्वमनीषिका उच्यन्ते, किन्तु निबन्धनमप्यस्य दर्शनस्य आर्षमस्ति यतोऽस्य दर्शनस्य विनिर्गम इति तद्दर्शयति --**जे एकणामे से बहुणामे,** यदेकस्य भावः तत् सर्वस्यापि यत् सर्वस्य तदेकस्यापि । § 1130

इति चतुर्थोऽरो नयचक्रस्य समाप्तः प्रथमश्च मार्गो नेमिरित्यर्थः ।

अ[1]र्धमेकपुस्तकं समाप्तम् ॥ छ ॥

---

१. अर्धमेकमेकपु०nayacakra-ms-pānayacakra-ms-raṃnayacakra-ms-hī । अर्धमेकमेकं पु० nayacakra-ms-vi । अर्धमेकं एकपु० nayacakra-ms-bhā ॥

---

३ ऊ] ऊर्ध्ववदन० प्र० ॥
१२ वा] चार्थंnayacakra-ms-bhānayacakra-ms-vi ॥
१३ स] समानकर्तृकयोः पूर्वकाले इति पाणिनीयव्याकरणे ३ । ४ । २१ ॥
१४ दृ] दृश्यपरि० प्र० ॥
१५ ता] तावतद०nayacakra-ms-bhā ॥
१६ देवा] ०वच्छिन्नं प्र० ॥
२५ भा] भावा प्र० । भवेत् ? । अत्र यदेकस्य नाम तत् सर्वस्यापि इत्यपि पाठः स्यात् ॥

376/mj

# ५ अथ पञ्चम उभयारः ।

377/mj

औँ अर्हम् § 1132

सत्यमेतद् भवतीति भावः इति । किन्त्विदं द्रव्यमेवार्थः इति विरुध्यतेऽभ्युपगमेन स्ववचनेन वा तदवयवेन वा, यत् तद् भवति तस्य भावत्वादपि, अतोऽन्यथाऽसत्त्वात् खपुष्पवत्, उभयम्--द्रव्यं भावश्च । § 1133

एवमनन्तरनयेनाभिहिते ब्रवीत्युत्तरः **--सत्यमेतद्** यदुच्यते त्वया **भवतीति भावः इति । किन्त्विदं द्रव्यमेवार्थः इति विरुध्यते, द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४, द्रवतीति द्रव्यं द्रूयत इति वा द्रव्यमिति कर्तृकर्मसाधनव्युत्पत्तिमात्रभेदे सत्यपि अर्थभेदाभावात् सर्वसर्वात्मकत्वाच्च द्रव्यमेव पृथिव्यादिव्रीह्यादिभावेन भवति नान्यः कश्चिद्भावोऽस्ति इत्येतदवधारणं विरुध्यते, केन सह विरुध्यते ? **अभ्युपगमेन,** यस्मात् त्वयैवाभ्युपगतं विशेषणं द्रव्यं भवतीति भावः इति भवनलक्षणस्य प्रकृत्यर्थस्य साध्यस्य द्रव्यलक्षणेन प्रत्ययार्थेन साधनेन कर्त्रा विशेषणात् तद्द्व्यर्थताभ्युपगतेति, विशेषणविशेष्ययोश्च भेदात् द्रव्यमेवार्थः इति पूर्वोऽभ्युपगमो विरुध्यते, इतरथा

- /ms वैयर्थ्यं पौनरुक्त्यं वा स्याद् द्रव्यं भवति इति । अथवा प्रकृष्टकालेनाभ्युपगमेन विरुध्यते इति किं चित्रमायत्याम् ? किन्तु **स्ववचनेन वा** विरुध्यते इति वर्तते, **वा**शब्दस्य विकल्पार्थत्वात् समुच्चयार्थत्वाद्वा अभ्युपगमेन स्ववचनेन च विरुध्यत इति, अत आह **--तदवयवेन वा,** भवति इति द्रव्यम् इति वा विशेषणविशेष्यभेदानुपादानेऽपि एकस्मिन्नेव पदे प्रकृतिप्रत्ययार्थभेदोपादानात्, **भू सत्तायां** प्रकृतिः, लट्प्रत्ययः कर्तरि, तौ प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः प्रधानोपसर्जनभावेन, यथा राजपुरुषौ पुरुषार्थमिति, तथा द्रव्यमित्यत्रापि **द्रु गतौ** पा॰ धा॰ ९४५ **कृत्यल्युटो बहुलम्** पा॰ ३ । ३ । ११३ इति कर्तृकर्माद्यन्यतमसाधने यत्प्रत्यये प्रकृतिप्रत्ययभेदाभ्युप-

६ ब्र] **प्रवी॰** प्र॰ ॥
६ भ] दृश्यतां पृ॰ ३७० पं॰ ३ ॥
७ द्र] दृश्यतां पृ॰ ३७३ पं॰ ६ ॥
८ क] दृश्यतां पृ॰ ३७३ पं॰ ३ ॥
१३ त] **तद्व्यर्थ॰** प्र॰ ॥
१६ मा] **॰मायत्यं** । प्र॰ ॥
१८ द्र] **द्रव्यमतीति वा** प्र॰ ॥
२० भू] भू सत्तायाम्--nayacakra-ms-pā धा॰ १ ॥
२० ल] वर्तमाने लट्--nayacakra-ms-pā ३ । २ । १२३ ॥
२० प्र] दृश्यतां पातञ्जलमहाभाष्ये ३ । १ । ६७ ॥
२३ य] अचो यत् nayacakra-ms-pā ३ । १ । ९७ ॥
२३ भेदा] **॰दात् गमात्** प्र॰ ॥

गमात् । किं कारणम् ? **यत् तद्भवति तस्य भावत्वादपि,** यत् तत् त्वदिष्टं द्रव्यं तद् भावोऽपि क्रियापि, क्रिया भावः प्रवृत्तिरिति पर्यायाः, भावस्यापि भावात् भवतीति भावः इति व्युत्पत्तेः द्रव्यम् इति भवति इति च वचनाद् भवनस्य द्रव्याद् भिन्नत्वात् । **अतोऽन्यथाऽसत्त्वात्,** यदि द्रव्यं भावोऽपि न स्यात् क्रियापि न स्यात् ततस्तदसत् स्यादभावत्वादक्रियत्वात् **खपुष्पवदिति** । तस्माद् द्रव्यक्रिययोः सत्त्वाद् यदुक्तं त्वया **द्रव्यमात्रमुत्क्षेपणादि** इति तदसत् । § 1134

378/mj

तत्र सम्मूर्च्छितसर्वप्रभेदनिर्भेदं बीजं द्रव्यम्, तथाभवन-विनाभूतसन्निधिवस्तुत्वव्यक्तिः क्रिया, प्रवृत्तिः क्रिया भावः, वदन-गतनियतक्रमाकाररूपपरिमाणमायाकारकपताकिकासन्ताननिष्काल-वत्, मायाकारकवद् द्रव्यादनुत्पादव्ययात्मकात् पृथिव्यादेर्मूलाद-यः, यथास्वं पताकिकामालावत् क्रियात्मानः । अद्रव्य- § 1135

तस्माच्च न एकं सर्वम् अनन्तरनयदर्शनम्, न सर्वमेकं पुरुष-नियत्यादिविकल्पविधिविधिनयदर्शनम्, नापि विध्युभयदर्शनं कर्त्रकर्तृभूतं प्रकृतिपुरुषमिदम्, नाधिष्ठात्रधिष्ठेयमिदमितीश्वरकारणं प्रधानोपसर्जनभूतं प्राङ्निर्दिष्टम्, किं तर्हि ? **उभयं** कर्तृ भवनस्य प्रधानं च तुल्यबलत्वाद-स्य भावो भवतीति सामान्येन, किं पुनस्तदुभयमित्यत आह --**द्रव्यं भावश्च** - /ms
। अत्र भावशब्दः क्रियावचनः *__क्रिया भावो धातुः__ पा० वा० १ । ३ । १ इति लक्षणात् । § 1136

तस्माद्द्वयं द्वयं सर्वं घटपटादि भवति पचत्यादिवत् । **तत्र सम्मूर्छित-सर्वप्रभेदनिर्भेदम्,** सम्मूर्छिताः संसृष्टाः अविनिर्भागेन सर्वे प्रभेदाः प-चिपठिभुजिगम्यासिशय्यादयः कृष्णगौरदन्तुरह्रस्वदीर्घतादयश्च यस्मिंस्तत् स-म्मूर्छितसर्वप्रभेदं तत् सर्वत्र स्वरूपसमवस्थानाद् निर्भेदं च तदगृहीततर-ङ्गादिप्रभेदसरःसलिलवत् तत् तेषां **बीज**माश्रयो **द्रव्य**मित्येतद् द्रव्यलक्षणम् । **तथाभवनविनाभूतसन्निधिवस्तुत्वव्यक्तिः क्रिया,** तेन प्रकारेण पचिपठिग-म्यादिना भवनं तथाभवनम्, तेन भवनेन विनाभूतः सन्निधिः शक्तिमन्मात्राव-स्था शक्त्यनभिव्यक्तिर्यस्य वस्तुनस्तत् तथाभवनविनाभूतसन्निधिवस्तु, तस्य

६ द्र] दृश्यतां पृ० ३६९ पं० ४, पृ० ३७० पं० ८ ॥
१४ क] **कर्तृकर्तृभूतं** प्र० ॥
१८ *] क्रियावचनो धातुः ।...भाववचनो धातुः । इति पाणिनीयवार्तिके १ । ३ । १ ॥
२० स्माद्द्व] nayacakra-ms-vi विना °द्द्वयं द्रव्यं सर्वं nayacakra-ms-ya । °द्द्वयं सर्वं nayacakra-ms-vi ॥
२१ भेद] °दं निर्भेदंnayacakra-ms-ya ॥
२२ ठिभुजिग] **°गम्याशिशुपादयः** प्र० ॥
२३ स] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२३ त] **तदागृ°**nayacakra-ms-ya ॥

भावो वस्तुत्वम्, तद्व्यक्तिः वस्तुशक्त्यभिव्यक्तिः क्रिया इत्येतत् क्रियालक्षणम् । **प्रवृत्तिः क्रिया भाव** इति पर्यायकथनम् । § 1137

तस्य द्वयस्य स्वतन्त्रस्य भावस्य निदर्शनम् --**वदनगते**त्यादि यावद् **निष्कालव**दिति । मायाकारकवदने व्यवस्थितः क्रमो यासामाकारा रूपाणि परिमाणानि च ता मायाकारकपताकिकाः, तासां सन्तानस्य निष्कालवत् । पृथक् तयोः स्वरूपव्याख्यानार्थमाह --**मायाकारकवद् द्रव्यादनुत्पादव्यात्मकात् पृथिव्यादेर्मूलादय** इति जगद् दार्ष्टान्तिकं दृष्टान्तेन मायाकारकेण समीकुर्वन् द्रव्यं व्याचष्टे क्रियां च **यथास्वं पताकिकामालावत् क्रियात्मान** इति च । या या स्वा यथास्वं पताकिकामाला अव्यवच्छेदेन नीलपीतादिवर्णा ह्रस्वदीर्घादितनुस्थूलादिसंस्थानप्रमाणा नियता एव क्रमेण निष्कसन्ति तथा पचति गच्छति इत्यादिक्रिया द्रव्याद् देवदत्तादेरिति । ततोऽन्या अपि च
- /ms तास्तेन विना न भवन्ति, सोऽपि ताभिर्विना न भवति, अथ च नियताकाररूपपरिमाणास्ताः स च तत्परिणतव्यक्तिरिति द्वयमपि भवतीति । § 1138

एवं तस्मिन्नेव द्रव्यक्रियात्मनि वस्तुन्यन्तर्भावात् पदार्थान्तरकल्पनावैयर्थ्यम् क्रियामात्रत्वाद् गुणाद्याश्रितपदार्थानाम् । द्रव्यजातिभेदपरिकल्पनावैयर्थ्यं च
379/mj सर्वद्रव्याणां क्रियावत्त्वादिति तत्प्रदर्शनार्थमाह—

* * *

द्रव्यवद्द्रव्यसंयोजनवियोजनोत्क्षेपणापक्षेपणादितथाभवनविशेषणसमवयनादयो भवनमेव द्रवति जानाति इच्छति द्वेष्टि ध्वनति यतते संयुनक्ति वियुनक्ति श्वेतते इत्यादि ।

पृथिव्यादिसंयोजनवियोजनोत्क्षेपणापक्षेपणतथाभवनविशेषणसमवयनादिभवनेन विना न द्रव्यभेदाः सम्भवन्ति यावदन्त्यं द्रव्यम्, पृथिव्यादिना विना न संयोजनवियोजनोत्क्षेपणापक्षेपणतथाभवनविशेषणसमवयनादयो न मूलादिभावो वेति द्रव्यभावपरिग्रहः ।

एवं च कृत्वोक्तम्--न हि किञ्चित् स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते वर्धते यावदनेन

* * *

**अद्रव्यद्रव्यवद्द्रव्यसंयोजने**त्यादयः, गुणादयस्तावत् क्रियैव इति प्रागुक्तम्, अधुनाप्युच्यते तद्द्वारेण जात्यभेदश्च । द्विविधं हि द्रव्यम्--अद्रव्यमनेकद्रव्यं च । नास्य द्रव्यं समवायिकारणमित्यद्रव्यमात्माकाशकालदिक्परमाण्वाख्यम् । द्रव्यवद् द्रव्यं तु द्व्यणुकादि महापृथिवीपर्यन्तम् । तस्य द्विविधस्यापि द्रव्यस्य जातिभेदाभावः, यस्मात् **संयोजनं** प्राप्तिः क्रिया परिणतिलक्षणा,

---

१ त ] तद्व्यक्तिः वस्तुत्वव्यक्तिः
वस्तुशक्त्यभिव्यक्तिःnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-lim ॥

६ पृ ] **पृथक्क तयोः** प्र॰ । अत्र पृथक् च तयोः इत्यपि पाठः स्यात् ॥

२९ अधुना ] ॰माद्युच्यते प्र॰ ॥

सैव संयोगो गुणोऽण्वाकाशादीनाम्, आत्माकाशादेरपि परिणमनक्रियावत्त्वादुक्तवदक्रियस्यासत्त्वात् । एवं **वियोजनं** विभागः क्रियामात्रं न गुणः । तथा रूप्यतेऽक्षिभ्यामिति रूपम्, रस्यते जिह्वयेति रसः, एवं गन्धस्पर्शशब्दा अन्ये च सङ्ख्यादयो नेया बुद्ध्या सङ्ख्यायमानत्वात् । **उत्क्षेपणापक्षेपणादी**ति ऊर्ध्वक्षेपणादिक्रिया द्रव्यधर्मो द्रव्यप्रभेदः । **तथाभवन**मिति सत्तासामान्यं द्रव्यस्यैव समानस्य भवनम्, यत् समानेन भूयते । **विशेषण**मिति विशेषः क्रियैव येन नीलादिना गमनादिना क्रियामात्रेण द्रव्यस्य विशेषेण भवनं स स विशेषः । **समवयनं** सम्बन्धः, सोऽपि संयोग एव, सम् इत्येकीभावेनावयवानामवस्थानं तन्त्वादीनां पटादित्वेन समवाय इहेति कार्यकारणयोरेकीभवनम् । **आदि**ग्रहणाद् यावत्समवायिद्रव्यं भेदात् समवायानन्त्यं दर्शयति षड्पदार्थपरिमाणाभावं [च] परिणामधर्मानन्त्यात् क्रियागुणादिपदार्थानन्त्याच्च । **भवनमेव** भाव एव क्रियैव, न गुणादयः सन्तीति **भवन**शब्देन क्रियां दर्शयति । - /ms इदानीं द्रव्यं दर्शयितुकाम आह --**द्रवती**त्यादि याव**च्छ्वेतत इत्यादि कारकं** तल्लकारेण कर्तृवाचिना द्रुद्रोषिद्विषिध्वनियतिसंयुजिवियुजिश्वितीनां साध्यानां क्रियाविशेषाणां सकर्तृकाणामभिधानात् । § 1139

तयोरन्योन्यरहितयोर्द्रव्यक्रिययोरभावप्रदर्शनार्थो ग्रन्थः --**पृथिव्यादिसंयोजने**त्यादि यावद् **द्रव्यभावपरिग्रहः** । आदौ तावद् भवनेन क्रियया भावेन विना न द्रव्यभेदाः सम्भवन्ति पृथिव्यादयो **यावदन्त्यं द्रव्यं** परमाणुद्रव्यमिति, **पृथिव्यादिने**त्यादि याव**न्न मूलादिभावो** वेत्युक्तानामेव द्रव्यभेदानामभावे संयोजनादयः क्रियाभेदा न सन्तीत्यादि तेनानिष्टापादनम् । तस्माद् **द्रव्यभावपरिग्रहो** युक्त इत्युपनयति, **इति**शब्दस्य हेत्वर्थत्वात् । § 1140

**एवं च कृत्वे**त्यादि याव**दपायेन वा युज्यत** इति **भाष्यकारेण साङ्ख्यादाहृत्योक्तो** ज्ञापकग्रन्थः 380/mj

* * *

वर्धितव्यमपायेन वा युज्यते पा॰दृश्यतां पृ॰ २८४-- २, २८५-- १ । प्रवृत्तिः खल्वपि नित्या । न हीदं कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते । तच्चोभयं सर्वत्र । इति पातञ्जलमहाभाष्ये पाठः ॥ म॰ भा॰ १ । २ । ६४ । न हि कश्चिदर्थो द्रव्यं स्वस्मिन्नात्मनि निर्भेदनिरुपाख्ये मुहूर्तमपि अवतिष्ठते, अपिशब्दाद् यावत् समयमपि नावतिष्ठते, वर्धते यावदनेन वर्धितव्यम्, यावदनेन अपेतव्यं तावदेव अपायेन युज्यते, सन्निहितव्यक्तियुक्तत्वात् ।

---

१० या] यावदवधारणे । २ । १ । ८ । यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामा यावच्छ्लोकम् । इति nayacakra-ms-pā सिद्धान्तकौमुद्याम् ॥

११ प] **परिणामाभावं** प्र॰ ॥

१३ व] **द्रव्यती॰** प्र॰ ॥

१४ ल्ल] दृश्यतां पृ॰ १२६ टि॰ ७ ॥

१७ त्यादि] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

१७ क्रि] क्रियायाnayacakra-ms-bhā ॥

२० तेनानिष्टा] **॰ष्टानपा॰** प्र॰ ॥

यदि तु द्रव्यमित्येवाक्रियमभविष्यत् ततो नाभविष्यत्, प्राक् तदा वा पश्चाच्च

* * *

सोऽयमस्मिन्नेव द्रव्यक्रियात्मकवस्तुवादे घटते, न परमतैकान्तद्रव्यपरिणामवादे नापि सततप्रवृत्तक्षणिकवादे । तद् व्याचष्टे **--न हि कश्चिदर्थो द्रव्यम्,** न हि किञ्चित् इति प्राप्तस्य सामान्यनपुंसकनिर्देशस्य अर्थः इति पुँल्लिङ्गेन विशेष्य व्याख्यानम्, यथोक्तम् **--अव्यक्ते गुणसन्देहे नपुंसकलिङ्गं प्रयोक्तव्यम्, जायमानं हि द्वयमेव जायते--पुमान् स्त्री वा, तथापि वक्तारो भवन्ति--किमस्य जातम् ? इति** पा॰दृश्यतां पृ॰ २४२ टि॰ ४ ॥ म॰ भा॰ १ । २ । ६९ । पुनरपि चार्थशब्दपर्यायमाह **--द्रव्यमिति** भाष्यकारमतेनैव, **स्वस्मिन्नात्मनि** द्रव्यात्मनीत्यर्थः, **निर्भेदनिरुपाख्ये** गमनस्पन्दननिमेषोन्मेषादिभेदविरहिते तस्य भेदविरहितस्य निरुपाख्यत्वात्, तद्धि द्रव्यं धर्मरहितमुपाख्यातुमशक्यम्, अनुपाख्यत्वाच्चासदेव स्यात्, अतस्तद् **मुहूर्तमपि नावतिष्ठते** परिणतिक्रियाविरहितम् । तद् व्याचष्टे **--अपिशब्दाद् यावत् समयमपि नावतिष्ठते** नालिकालवस्तोकप्राणोच्छ्वासनिःश्वासक्रमहान्या, ततः परं सूक्ष्मकालाभावात् । एतेन स्वात्मन्यनवस्थानवचनेन वृद्धिहानिसततसम्प्रवृत्तिरूपं सर्वं वस्तु इति द्रव्यप्रत्याख्यानमेव कृतम् । **वर्धते यावदनेन वर्धितव्यमिति** तु पुनः यत् परिमाणमस्य यावत् इति नियतपरिमाणां वृद्धिं पद्मादीनामिव साधिकसहस्रयोजनात् परतो न भूतां कदाचिदिति दर्शयता तस्यैव द्रव्यस्यावस्थितस्यावस्थाविशेष एव वृद्धिरिति दर्शितं भवति । तथापायोऽपि, **यावदनेनापेतव्यं तावदेवापायेन युज्यत** इति यावच्छब्दार्थमधिकृतं भावयति, यथा सूक्ष्मनिगोदापर्याप्तकजीवस्यावरणान्तरायक्षयोपशमकृतयोगोपयोगस्वरूपस्याक्षरानन्ततमभागोपलम्भमात्रेऽवश्यमवतिष्ठते ज्ञानदृष्ट्यावरणवीर्यान्तरायोदयजनितोपघातयोगोपयोगहानिः, न ततः परं हीयते, अन्यथा तस्यजीवत्वप्रसङ्गादिति । तस्माद् **यावद्वचनाद्** द्रव्यमेवावस्थितं वर्धतेऽपैति वा, न च वृद्ध्यपायरहितसमवस्थितत्वे सत्यपि, इत्येषोऽस्य ग्रन्थस्यार्थः । तस्मादयमपि ग्रन्थो द्व्यात्मकदर्शनेनैव नेतुं शक्यते, नान्यथेति प्रतिपत्तव्यम् । किं कारणम् ? **सन्निहितव्यक्तियुक्तत्वात्,** सन्निहितस्य अवस्थितशक्तेरेव व्यक्तिराविर्भावः सलिलसेकेन भूमिगन्धस्य, तस्या व्यक्तेर्युक्तत्वात् द्रव्यं च क्रिया च भवति इति ग्राह्यम्, अन्यथा तदयुक्तेरसत्कार्यवादप्रसङ्गादसम्भवाच्च । § 1141

- /ms
- /ms

द्रव्यमेव, क्रियैव इत्यनयोर्वादयोरयुक्तिरुच्यते । तत्र द्रव्यमेव इति तावन्न युज्यते । कथम् ? **यदि तु द्रव्यम् इत्येवाक्रिय**मभवनमभ-

---

१५ प्राणोच्छ्वास ] **॰निश्वास॰** प्र॰ ॥
१७ स ] **संवृत्ति॰** प्र॰ ॥
२३ रूप ] nayacakra-ms-vi विना **॰पस्त्याक्ष॰** प्र॰ । **॰पस्वक्ष॰** nayacakra-ms-vi ॥
२६ स ] **सपि**nayacakra-ms-bhā ॥
२७ नान्य ] **॰थेति पत्तव्यम्** प्र॰ ॥

**विष्यद्** वृद्धिव्ययरहितमपरिणामैकान्तरूपं यद्यभविष्यत् **ततो नाभविष्यदि**ति क्रियातिपत्तौ लृङ्, न भवनमेवापद्यत इति न भवत्येवेत्यर्थः, क्रिया भवनं प्रवृत्ति 381/mj

* * *

अप्रवृत्तत्वात्, खपुष्पवत् । भवदेव हि भवति । खपुष्पमपि वाऽभविष्यत्, अभवद्भवनात्, द्रव्यवत् । आत्माद्यपि च प्रवृत्तमेव, द्रव्यत्वात्, तन्तुवद् बीजवत् । तथा च चैतन्यादिलक्षणता आत्मादेस्तथाभवनप्रवृत्तिसामर्थ्यात् सत्यपि द्रव्यत्वतुल्यत्वे ।

अथ तु प्रवृत्तिरित्येवाद्रव्या ततो नैव स्यात् सा प्राक् पश्चात् तदा वाऽद्रव्यत्वा-

* * *

रित्यर्थः, यदि न प्रवर्तेत न परिणमेत् न क्रियापि स्यात् द्रव्यं **प्राक्** केनचिद् गमनादिप्रकारेणावृत्तम् **तदा वा** इति सामान्यकालवाचिना शब्देन इदानीमपि निर्देशकाले तदप्रवर्तमानम् **पश्चाच्चे**ष्यत्कालेऽप्यप्रवर्तिष्यमाणं न स्यादित्यर्थः, **अप्रवृत्तत्वात्** । किमुक्तं भवति ? प्राग् नासीत् इदानीमप्रवृत्तत्वात् **खपुष्पवत्** । इदानीं न स्यात् प्रागप्रवृत्तत्वात् खपुष्पवत्, पश्चान्न भविष्यति इदानीमप्रवृत्तत्वात् खपुष्पवदेवेत्यभूतं तत् स्याद् द्रव्यं क्रियाशून्यत्वात् परिणामशून्यत्वादप्रवृत्तत्वादित्यर्थः । **भवदेव हि भवति,** प्रवर्तमानमेव हि केनचिद्धर्मेण मृदिव शिवकादिना भवति, न निरुपाख्यम् । यदि निरुपाख्यमपि स्यात् खपुष्पमपि स्यात्, **खपुष्पमपि वाऽभविष्यद्** भवति भविष्यति [च] त्वदभिमत**द्रव्यवत् अभवद्भवना**दिति अक्रियभवनादित्यर्थः । § 1142

स्यान्मतम्, अनैकान्तिकमेतत्--अभवद्भवनात् खपुष्पमपि भवेद् द्रव्यवत्, द्रव्यमपि मा भूदप्रवृत्तत्वात् खपुष्पवदिति । कस्मात् ? आत्माकाशादीनामप्रवृत्तिभवनानां सत्त्वदर्शनादपरिणामित्वादित्यर्थ इति । एतच्चायुक्तम्, तद्विपक्षत्वासिद्धेः, यस्माद् **आत्माद्यपि च प्रवृत्तमेव द्रव्यत्वात् तन्तुवद् बीजवदि**ति । यथा तन्तवस्तन्त्ववस्थायां पटावस्थायां च प्रवृत्तत्वाद् भवन्त्येव तथा आत्मादयः, एवं बीजमेव ह्यङ्कुरादिभावेषु प्रवृत्तमेव तथात्मादय इति दृष्टान्तद्वयोपादानाद् न्यायव्यापिता प्रदर्श्यते । यथोक्तम् **--अस्ति-भवति विद्यति-पद्यति-वर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इति । तस्मात् तेन तेन प्रकारेण परिणममानं प्रवर्तमानं वस्तु भवतीत्युच्यते, स्वेन स्वेन च पारिणामिकेन प्रकारेण भवति परिणमतीति । अत्रोप- - /ms

२ लृ] **लृद्भवन॰** प्र॰ । लिङ्निमित्ते लृङ् क्रियातिपत्तौ nayacakra-ms-pā ३ । ३ । १३९ ॥
११ प्र] **प्रवर्तेन परिणामेत्**nayacakra-ms-bhā । **प्रवर्तेत परिणामेत्** nayacakra-ms-ya ॥
१२ त] **तदेवेति** प्र॰ ॥
१३ प] **पश्चात्वे॰**nayacakra-ms-bhā । अत्र **पश्चाद्वे॰** इत्यपि पाठः स्यात् ॥
२६ ए] **एवं**nayacakra-ms-ya प्रतिषु नास्ति ॥
२८ अ] दृश्यतां पृ॰ ३४ पं॰ २० ॥

चयहेतुमाह **--तथा च चैतन्यादिलक्षणतेत्यादि** यावत् **तुल्यत्वे** । सत्यपि तुल्ये द्रव्यत्वेऽस्त्येव जीवद्रव्याणामजीवद्रव्याणां च भवनविशेषः । तद्यथा--जीवद्रव्यस्य चैतन्यवीर्यामूर्त्यसङ्ख्यातप्रदेशावगाहादिस्तथाभवनप्रवृत्तिसामर्थ्यम्, अजीवद्रव्येष्वपि पुद्गलानां रूपरसादिकर्मदोषकर्मादि तथाभवनसामर्थ्यम्, यथासङ्ख्यं च धर्माधर्माकाशकालानां गतिस्थित्यवगाहवर्तनास्तथाभवनसामर्थ्यानि । तस्मा**दात्मादेर्द्रव्यत्वतुल्यत्वे सत्यपि तथाभवनप्रवृत्तिसामर्थ्याच्चैतन्यादि**प्रतिविशिष्ट**लक्षणतो**पपद्यते । § 1143

एवं तावद् द्रव्यस्य क्रियाविरहितस्याभाव उक्तः, तयैव युक्त्या क्रियाया अपि विना द्रव्येणासत्त्वमित्यत आह **--अथ तु प्रवृत्तिर्भूतिरित्येवाद्रव्या** प्रतिक्षणप्रवृत्त्युपरमलक्षणा भूतिरित्येव, **एवे**त्यवधारणा**दद्रव्या** द्रव्यविरहिता क्रियैवेत्यर्थः, **ततो नैव स्यात् सा** पूर्ववत् **प्राक् पश्चात् तदा वाऽद्रव्यत्वादभूतत्वात् खपुष्पव**दिति तथैव व्याख्येयं **निर्बीजत्वादस्थितत्वा**दित्यादिप-

382/mj र्यायैस्त्रिष्वपि कालेषु साधनानि

* * *

दभूतत्वाद् निर्बीजत्वादस्थितत्वात्... ...खपुष्पवत् । भवदेव हि भवति द्रव्यार्थतः । खपुष्पमपि वा स्यादद्रव्यत्वाद् भाववत् । भूतार्थसामर्थ्यादेव हि प्रवृत्तिः । गुणाद्यपि च द्रव्यमेव वृत्तत्वात् तन्त्वादिवत् । एवं क्रियापि द्रव्येण विना नास्ति ।

भवतीति भावः । यतोऽसौ भवतीति भावः तद् भवनम् । अत एव उभयनियमः--प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः, प्रत्ययपरैव प्रकृतिः ।

* * *

- /ms योजयद्भिरिति विशेषः । **भवदेव हि भवति द्रव्यार्थत** इति स्थितिरूपं द्रव्यार्थभवनमाचष्टे । एतदनिच्छतोऽस्थितभवनसाधर्म्यात् **खपुष्पमपि वा स्यादद्रव्यत्वाद् भाववत्** क्रियावत्, अनिष्टापादनमेतत् । **भूतार्थसामर्थ्यादेव हि प्रवृत्तिः**, द्रव्यार्थसामर्थ्यादेव यस्मात् प्रवृत्तिः क्रिया, न निर्बीजेत्यर्थः । अत्रापि पूर्ववदनैकान्तिकत्वाशङ्का--ननु निर्बीजगुणादिप्रवृत्तिर्दृष्टेति । अत्रोत्त-

४ सादिक ] nayacakra-ms-vi विनान्यत्र **°कर्मदोषाकर्मादि** nayacakra-ms-ya । **°कर्मादि** nayacakra-ms-vi ॥
५ गाह ] **°हा वर्तना तथा°** प्र° ॥
११ पू ] दृश्यतां पृ° ३८० पं° ५ ॥
१९ उ ] किमयं प्रत्ययनियमः--प्रकृतिपर एव प्रत्ययः प्रयोक्तव्योऽप्रकृतिपरो नेति, आहोस्वित् प्रकृतिनियमः--प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या प्रत्ययपरा नेति ? । कश्चात्र विशेषः ? तत्र प्रत्ययनियमे प्रकृतिनियमाभावः । तत्र प्रत्ययनियमे सति प्रकृतेर्नियमो न प्राप्नोति, अप्रत्ययिकायाः प्रकृतेः प्रयोगः प्राप्नोति...। अस्तु तर्हि प्रकृतिनियमः, प्रकृतिनियमे प्रत्ययानियमः, प्रकृतिनियमे सति प्रत्ययस्य नियमो न प्राप्नोति,... ...अप्रकृतिकस्य प्रत्ययस्य प्रयोगः प्राप्नोति । सिद्धं तूभयनियमात् । सिद्धमेतत्, कथम् ? उभयनियमात्, उभयनियमोऽयम्--प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिरिति । इति पातञ्जलमहाभाष्ये ३ । १ । २ ॥
२४ र्थ्यादेव ] **हि प्रवृत्तिः द्रव्यार्थसामर्थ्यादेव हि प्रवृत्तिर्द्रव्यार्थसामर्थ्यादेव** प्र° ॥
२५ पू ] दृश्यतां पृ° ३८१ पं° १३ ॥

रमाह --गुणाद्यपि च द्रव्यमेव वृत्तत्वात् तन्त्वादिवत् तन्तुबीजमृदादिवदिति प्राग्वत्, इह तु द्रव्यभवनमन्तरेण प्रवृत्त्यभाव इति प्रदर्श्योपनेयमिति विशेषः । एवं क्रियापि द्रव्येण विना नास्तीत्युक्तन्यायवदेव । § 1144

इति द्रव्यक्रियालक्षणं द्वैतमुक्त्वा अक्षरार्थन्यायेनापि प्रतिपादयिष्यन्नाह --**भवतीति भाव** इति । अत्र **भुवश्च** इतीष्टा कर्तरि णप्रत्ययं केचिदाहुः, इह तु भूयत इति भावे घञ्प्रत्ययः, स च येन भूयते स भाव इत्यर्थसामर्थ्याद् यो भवति स एव सम्बध्यत इति भवतीति भावः इत्युक्तम् । स च कर्ता, कर्ता च द्रव्यम्, तस्माद् भावशब्दो द्रव्यवाची, क्रियावाचित्वमपि **यतोऽसौ भवतीति भावः**, यस्माद्धेतोर्येन प्रकारेण यतो धर्मेण धर्माद् वा भवति तद्द्रव्यं स भाव इति, **इतिशब्दस्य** हेत्वर्थत्वाद् भवति इत्येतद् यतो भवति भावः सा क्रिया । कुतः पुनर्भवतीति भवति ? भवनसम्बन्धाद् भवतीति भवति तस्य द्रव्यस्य तस्मात् **तद् भवनं** भावः सा क्रिया प्रवृत्तिर्भवनमित्यर्थः । § 1145

**अत एवेत्यादि** तस्योभयार्थत्वदर्शनस्य दृढीकरणार्थं यावत् **प्रत्ययपरैव प्रकृति**रित्युत्तानार्थम् । क्विप्प्रत्यये चिदादीनां प्रथमैकवचने प्रकृतिमात्रप्रयोजनदर्शनात् अधुना इत्यादिषु च प्रत्ययमात्रश्रवणाद् 383/mj

* * *

उभयार्थवत्त्वप्रदर्शनाय च कोऽसौ भावो नाम ? यत् तद् भूयते केनापि, नोच्यते— योऽसौ भवति कोऽपि, अस्वशब्दोपादानसाध्यभावत्वाद् भावस्य । कस्य भावः ?

* * *

२ प्रा] दृश्यतां पृ° ३८१ पं° २ ॥
५ भु] दृश्यतां पृ° १७३ पं° २५, टि° ९ । विभाषा ग्रहः । ३ । १ । १४३ । णो वा, पक्षेऽच् । व्यवस्थितविभाषेयम्, तेन जलचरे ग्राहः, ज्योतिषि ग्रहः । भवतेश्च इति **काशिका**, भवो देवः संसारश्च, भावाः पदार्थाः । भाष्यमते तु प्राप्त्यर्थाच्चुरादिण्यन्तादच् भावः । इति **सिद्धान्तकौमुद्याम्** ॥
८ क्रियावा] °**वाचीत्वमपि**nayacakra-ms-ya ॥
९ भ] **भवति भावः**nayacakra-ms-ya ॥
११ भ] **भवति स भावः**nayacakra-ms-ya ॥
११ व] °**तीति भवनस**°nayacakra-ms-ya ॥
१५ ये] **विदा**° प्र° । पृथक् सर्वेषामिति चेत्, एकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात् । पृथक् सर्वेषामिति चेत्, एकशेषे पृथग्विभक्त्युपलब्धिः प्राप्नोति । किमुच्यते एकशेषे पृथग्विभक्त्युपलब्धिः इति ? यावता समयः कृतः न केवला प्रकृतिः प्रयोक्तव्या, न च केवलः प्रत्ययः प्रयोक्तव्यः इति । तदाश्रयत्वात् प्राप्नोति, यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिः तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति--अग्निचित् सोमसुदिति यथा । यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिः तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति--अधुना इयानिति यथा । इति **पातञ्जलमहाभाष्ये** १ । २ । ६४ । अधुना । ५ । ३ । १७ । इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे अधुनाप्रत्ययः स्यात् । इश्, यस्य ६ । ४ । १८४ इति लोपः, अधुना । इति nayacakra-ms-pā **सिद्धान्तकौमुद्याम्** ॥
१७ उ] अत्र **उभयार्थत्वप्रदर्शनाय** इति पाठः समीचीनो भाति, दृश्यतां पृ° ३८२ पं° ९ ॥

व्यभिचरतीति चेत्, अत एव तदर्थगतेरन्यत्र चोभयप्रयोगदर्शनादनुमीयते - /ms द्व्यर्थतेति । व्युत्पादनकालेऽपि प्रकृत्यर्थव्युत्पत्तिरन्यथा अन्यथा प्रत्ययार्थव्युत्पत्तिः शास्त्रेऽन्वयव्यतिरेकाभ्यां क्रियते । तत् किमर्थमिति चेत्, **उभयार्थत्वप्रदर्शनाय चेत्यादि** यावत् **कोऽपीति** । **कोऽसौ भावो नाम ?** इति प्रश्नोपक्रमं व्युत्पाद्यते क्रिया, **यत् तद् भूयते केनापि**, भूयते इति भावे लकारविधानात् यत् तत् इति च भवनमेव प्रकृत्यर्थो निर्दिश्यते । **नोच्यते--योऽसौ भवति कोऽपीति**, येन भूयते योऽसौ भवति कर्ता प्रत्ययार्थः स नोच्यते तस्मिन् प्रश्ने । तस्मात् प्रकृत्यर्थपरा व्युत्पादनैवम्प्रकारा । किं कारणम् ? **अस्वशब्दोपादानसाध्यभावत्वाद् भावस्य** । अस्मदुक्तानुकाराद् यथोक्तमन्यैर्द्रव्यभावयोरुक्तिक्रियालक्षणे भेदोपप्रदर्शने **स्वशब्दोपादानसिद्धभावं सत्त्वम्, अस्वशब्दोपादानसाध्यभावो भावः इत्येतदुक्तिक्रियाश्रयं सत्त्वभावयोः पृथक्त्वम्** इति । प्रसिद्धं हि लोके शास्त्रेषु च--क्रियावाचकमाख्यातं द्रव्याभिधायकं नामेति, **स्वभावसिद्धं द्रव्यं हि क्रिया चैव हि भाव्यते** पा॰ म॰ भा॰ १ । ३ । १ तथा **पूर्वापरीभूतं भावमाख्यातेन आचष्टे उपक्रमप्रभृत्यपवर्गपर्यवसानं परिनिष्पन्नं नाम्ना मूर्तं सत्त्वं यथासङ्ख्यं व्रजति पचति व्रज्या पक्तिः** निरुक्त॰ १ । १ इति । तस्माद् घटपटादिशब्दा द्रव्यस्य स्वशब्दाः, पचतिगच्छत्यादयः क्रियायाः, भावशब्दश्च द्वयोरपि दृष्टः । तत्रास्वशब्दस्य द्रव्यवाचिनो घटदेवदत्तादेरुपादानेन साध्यो भावः साध्यत्वम्, यासावनुमान-

---

१ त] एतत्समानार्थिका चर्चा **पातञ्जलमहाभाष्ये** इत्थमुपलभ्यते--लुप्ताख्यातेषु चोपसङ्ख्यानं कर्तव्यम्, निष्कौशाम्बिः निर्वाराणसिः ।... ... सिद्धं तु क्ताङ्क्तिदुर्गतिवचनात् प्रादयः क्तार्थे इति । तदर्थगतेर्वा । तदर्थगतेर्वा पुनः सिद्धमेतत् । किमिदं तदर्थगतेरिति ? तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः, तदर्थगतेरिति यस्यार्थस्य कौशाम्ब्या सामर्थ्यं स निसोच्यते । अथवा सोऽर्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः, तदर्थगतेरिति योऽर्थः कौशाम्ब्या समर्थः स निसोच्यते । **nayacakra-ms-pā म॰ nayacakra-ms-bhā** २ । १ । १ ॥

३ शास्त्रेऽन्व] कथं पुनर्ज्ञायते--अयं प्रकृत्यर्थः, अयं प्रत्ययार्थ इति ? सिद्धं त्वन्वयव्यतिरेकाभ्याम् । अन्वयाच्च व्यतिरेकाच्च । कोऽसावन्वयो व्यतिरेको वा ? इह पचति इत्युक्ते कश्चिच्छब्दः श्रूयते पच्छब्दश्चकारान्तः, अतिशब्दश्च प्रत्ययः । अर्थोऽपि कश्चिद् गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च । पठति इत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी; पच्छब्दो हीयते पठ्शब्द उपजायते अतिशब्दोऽन्वयी । अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी, विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वं चैकत्वं चान्वयी । ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते, यः शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते, यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोऽन्वयी । इति **पातञ्जलमहाभाष्ये** १ । ३ । १ ॥

३ उ] अत्र **उभयार्थत्वप्रदर्शनाय** इति पाठः समीचीनो भाति, दृश्यतां पृ॰ ३८२ पं॰ ९ ॥

१३ ते] दृश्यतां पृ॰ १२५ पं॰ ७ । एवं तर्हि कर्मसाधनो भविष्यति भाव्यते यः स भावः इति । क्रिया चैव हि भाव्यते, स्वभावसिद्धं तु द्रव्यम् । इति **पातञ्जलमहाभाष्ये** पाठः ॥

१६ क्तिः] दृश्यतां पृ॰ १२६ पं॰ २४ ॥

१७ त] **तत्र स्व॰** प्र॰ ॥

गम्या क्रिया न शक्या साधनात् पृथग् दर्शयितुं गर्भवद् निर्लुठिता सा परतः साधनत एव यथा आत्मानं लभते तथाभिधानेऽपीत्यस्वशब्दोपादान-साध्यभावो भावः क्रियेत्यर्थः । तद्भावादस्वशब्दोपादानसाध्यभावत्वाद् भावस्य प्रवृत्तिलक्षणस्यैवं प्रश्नप्रतिवचनसिद्धिरिति । § 1146

384/mj

योऽसौ भवति, नोच्यते--यत् तद् भूयते केनापि, स्वश-ब्दोपादानसिद्धभावत्वात् सत्त्वस्य । § 1147

लिङ्गादिमद् द्रव्यम्, क्रिया तद्रहिता । लिङ्गादिमत्त्वाद-लिङ्गादिमत्त्वाच्च भवतो भवनस्य च उभयमेव भावः । लिङ्गस-ङ्ख्यावतो द्रव्याद् वस्तुत्वेकत्वगतिः क्रिया § 1148

तद्विपर्ययेण तु द्रव्यभावस्य प्रश्नप्रतिवचने दृष्टे व्युत्पादनकाले । तद्यथा **--कस्य भावः** इति प्रश्नः, कस्य क्रिया प्रवृत्तिः ? कर्तरि षष्ठीं कृत्वा । तद-नुरूपं प्रतिवचनमपि **--योऽसौ भवती**ति यो भविता कर्तैव वा द्रव्यलक्षणः स उच्यते । नोच्यते--यत् तद् भूयते तद् भवनमेव । किं भूयते न भूयते केनापि ? इति अनिर्दिष्टकारकं हि भावसामान्यमेव भावस्याभिन्नत्वात् । किं कारणम् ? **स्वशब्दोपादानसिद्धभावत्वात् सत्त्वस्य,** स्वशब्देनैव पृच्छयते--कस्य भावः ? को भवतीत्यर्थः । न पृच्छयते--किं भूयते न भूयते केनापि ? इति । प्रतिवचनमपि तथोच्यते--योऽसौ कोऽपि भवतीति तस्य भावः स भवति तेन भूयते इति । नोच्यते--यत् तद् भूयते केनापीति, अविशदं भवनमात्रं न व्याक्रियते तस्यापृष्टत्वात् । किं कारणम् ? क्रियालक्षणभाव-व्युत्पादनविपर्ययेण प्रश्नव्याकरणदर्शनात् तथैवार्थप्रसिद्धेस्तद्वाचिशब्दप्रवृत्तेरपि तदनुरूपत्वादिति । § 1149 - /ms

किञ्चान्यत्, **लिङ्गादिम**दित्यादि यावद**ुभयमेव भाव** इति । द्रव्यं लिङ्ग-सङ्ख्या-काल-कारकयोगि, क्रिया तद्रहिता । *लिङ्गादिमत्त्वादलिङ्गादिमत्त्वाच्च भवतो द्रव्यस्य भवनस्य च यथासङ्ख्यं भिन्नं वस्तु भवद्-भवनभूतं द्विधा । तस्मादुभयवस्तुतश्चैकमिति प्रतिपाद्यमुपपत्त्येत्यतः प्रतिज्ञायते--**लिङ्गसङ्ख्यावत**

१ क्रि ] क्रिया नामेयमत्यन्तापरिदृष्टा अशक्या क्रिया पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठितः । साऽसावनुमानगम्या । कोऽसावनुमानः ? इह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचति इत्येतद् भवति, कदाचिन्न भवति । यस्मिन् साधने सन्निहिते पचति इत्येतद् भवति सा नूनं क्रिया । अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया । इति पातञ्जलमहाभाष्ये १ । ३ । १ ॥
२ ब्दोपादा ] **॰दानासा॰** प्र॰ ॥
१६ न ] न भूयतेnayacakra-ms-bhā प्रतौ नास्ति ॥
१८ अविश ] **॰शब्दं** प्र॰ ॥
१९ भा ] **॰भावाव्यु॰** प्र॰ ॥
२३ * ] **लिङ्गादिमत्त्वाच्च** प्र॰ ॥
२४ भ ] **तद्भवनभूतं तद्विधा**nayacakra-ms-ya ॥
२५ व ] **॰वस्तुतश्चैवामिति** प्र॰ । अत्र तस्मादुभयं वस्तु, तच्चैकमिति इत्यपि पाठः स्यात् ॥

इत्यादि । वस्तुत्वेनैकत्वं वस्तुत्वैकत्वम्, तस्य गतिः आपत्तिः, वस्तुत्वेनैकत्वमापन्ना **क्रिया स्वरूपतोऽन्यैव**, द्रव्यक्रियास्वरूपभिन्नमेकं वस्त्वित्यर्थः । - /ms कस्मात् ? **अलिङ्गसङ्ख्यत्वात्**, न लिङ्गसङ्ख्ये यस्य तदिदमलिङ्गसङ्ख्यं भवनम् । तद्धि वस्तुत्वेनैकत्वं गतं सद् द्रव्येण सहानन्यदप्यन्यदेव इति प्रतिज्ञार्थोऽनेन साध्यते अलिङ्गसङ्ख्यत्वात् इति हेतुना । दृष्टान्तः --**प्लक्षादिव भिन्नार्थानामेकसम्बन्धिविषयश्चार्थः**, यथा प्लक्षश्च धवश्च इत्यत्र चशब्दः प्लक्षधवयोरन्ययोः समुच्चेतापि समुच्चयमेकमेव सम्बन्धिनं विषयीकृत्य वृत्तत्वादनन्यत्वेऽपि सत्यन्यस्यैवार्थस्य वाचकस्तथा द्रव्यक्रियात्मकवस्तुत्वैकत्वान्यत्वमिति । अत्राह--द्रव्यादन्यत्वेन पक्षीकृतायां क्रियायां समुच्चयनक्रियैव यदि दृष्टान्तत्वेनोच्यते साध्यत्वाददृष्टान्तः । अथ मा भूदेष दोष इति द्रव्यान्तरसमुच्चयो यदि दृष्टान्त 385/mj उच्यते तथापि द्रव्यार्थत्यागः प्लक्षधवसमुच्चयाख्यादिसर्वसत्तार्थसङ्ग्रहार्थत्वाद्

* * *

स्वरूपतोऽन्यैव, अलिङ्गसङ्ख्यत्वात्, प्लक्षादिव भिन्नार्थानामेकसम्बन्धिविषयश्चार्थः ।

* * *

द्रव्यार्थस्य । अथ द्रव्यार्थं मा त्याक्षमित्येकमेवेष्यते पुनरपि दृष्टान्ताभावः द्रव्याद् भिन्नस्यार्थान्तरस्याभावादिति । अत्रोच्यते --**पदार्थाना**मिति पदार्थग्रहणाद् नैष दोषः । प्रातिपदिकार्थो हि क्रियासम्बन्धी अन्तरङ्गत्वात् क्रियायाः, न पदार्थो बहिरङ्गत्वात् । यथा पुत्रमिच्छति पुत्रीयतीति द्वितीया बहिरङ्गकर्माभिधायिनी पुत्रस्य इषिणान्तरङ्गेण सम्बद्धत्वात्, उक्तं च --**प्रातिपदिकानां क्रियाकृताः सम्बन्धा भवन्ति** पा॰प्रातिपदिकानां क्रियाकृता विशेषा उपजायन्ते तत्कृताश्चाख्याः प्रादुर्भवन्ति--कर्म करणमपादानं सम्प्रदानमधिकरणमिति । इति पातञ्जलमहाभाष्ये ॥ म॰ भा॰ २ । ३ । ५० इत्येषितुर्देवदत्तस्य पुत्रेणाभिसम्बन्धो न पदार्थेन विभक्त्यन्तेन, पदान्तरसन्निधौ तु तद्व्यक्तिः **कारकाणां प्रवृत्तिविशेषः क्रिया** पा॰न ब्रूमः कारकाणि क्रियेति । किं तर्हि ?

---

५ स] **॰संख्यादिति** प्र॰ ॥
५ प्लु] **प्लक्षादिवत्** प्र॰ ॥
६ श्चा] अलिङ्गसङ्ख्यत्वात् इति हेतोः साध्येनानुगमप्रदर्शनार्थं समुच्चयश्चार्थो दृष्टान्तत्वेन अत्र विवक्षित इति भाति । दृश्यतां पृ॰ ३८५ पं॰ १३ । चार्थे द्वन्द्वः । २ । २ । २९ । चार्थ इत्युच्यते, चश्चाव्ययम्, तेन समासस्याव्ययसंज्ञा प्राप्नोति । नैष दोषः, पाठेनाव्ययसंज्ञा क्रियते, न च समासस्तत्र पठ्यते । पाठेनाप्यव्ययसंज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति । यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसङ्ख्याभ्यां योगोऽस्ति । नेदं वाचनिकम्--अलिङ्गताऽसङ्ख्यता वा, किं तर्हि ? स्वाभाविकमेतत्, तद्यथा--समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्तेऽपरे न; न चेदानीं कश्चिदर्थवानिति सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वाऽनर्थक इति सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम् यत् प्राक् समासाच्चार्थस्य लिङ्गसङ्ख्याभ्यां योगो नास्ति समासे च भवति । स्वाभाविकमेतत् ।(?") इति पातञ्जलमहाभाष्ये २ । २ । २९ ॥
१० द्र] द्रव्यान्तरं समुच्चयो ? ॥
११ स] **॰सत्तार्थ॰**nayacakra-ms-bhā प्रतौ नास्ति ॥
१४ अ] **अ द्रव्यार्थं मा त्याक्षामि॰** प्र॰ ॥
१८ स] **सम्बन्धत्वात्** प्र॰ ॥

कारकाणां प्रवृत्तिविशेषः क्रिया । इति पातञ्जलमहाभाष्ये ॥ म॰ भा॰ १ । २ । १ इति वचनात्, क्रियया सम्बन्धमित्वा कर्मादित्वमेतीति पूर्वमेव क्रियया सम्बन्धः । यदि च क्रियासम्बन्धवत् प्रातिपदिकावस्थायामेव समुच्चयादिसम्बन्धोऽपि स्यात् ततः प्रातिपदिकार्थातिरेकात् सम्बोधनवद् यत्नान्तरविधेया प्रथमा स्यात्, द्वितीयादयश्च न स्युः, कर्माद्यधिके हि प्रातिपदिकार्थे ता विधीयन्ते । यदि तु समुच्चयाद्याधिक्ये कर्माद्यस्तीति द्वितीयादयः स्युस्ततः - /ms कर्माद्याधिक्येऽपि प्रातिपदिकार्थोऽस्तीति प्रथमैव स्यात् । अतः पदार्थोत्तरकालभाविनि वाक्यार्थ उपजायमाने तस्योपकुर्वन्तश्चादयः पदैरभिसम्बध्यन्त इत्यत उच्यते --**भिन्नानां पदार्थाना**मिति क्रियासम्बन्धव्युदसनार्थम् । स च समुच्चय **एकसम्बन्धिविषयः** । कोऽसावेकः सम्बन्धी ? वाक्यार्थः प्लक्षधवाद्येकदेशता अन्वाचयसमुच्चययोरानयननयनादि । उक्तं च --**चार्थे द्वन्द्वः** पा॰ २ । २ । २९, चस्य च कोऽर्थः ? समुच्चयोऽर्थोऽन्वाचयः समाहार इतरेतरयोगश्च पदार्थोत्तरकालभाविनः । तत्र समुच्चयः गामश्वं पुरुषं शकुनिं पशुमहरहर्नयमानो वैवस्वतो न तृप्यति सुरया इव दुर्मदीति । अन्वाचयो यथा--देवदत्त भिक्षामट यज्ञदत्तं चानय । पाणिपादं ब्राह्मण-क्षत्रिय-विट्-शूद्राः रामकेशवाविति समाहारेतरेतरयोगौ । ये च द्रव्याणां गुणानां क्रियाणां च दृश्यन्ते यथा घटश्च पटश्चेति रूपं च रसश्चेति हसति तिष्ठति रमते वेत्यादयः पदार्थोत्तरकालभाविनः समुच्चयविकल्पादयः न ते द्रव्यं न क्रिया न गुणः, किन्तु द्रव्यस्यैव क्रियात्वाद् वीरपुरुषविशेषणविशेष्यैकात्मवद् वस्तुत्वैकत्वगत्यनन्यान्यत्वभाजो धर्माः प्रवृत्तिरेवेति 386/mj

* * *

---

४ स] प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । सम्बोधने च ।nayacakra-ms-pā २ । ३ । ४६--४७ । दृश्यतां nayacakra-ms-pā म॰ nayacakra-ms-bhā २ । ३ । ४६ ॥

८ जा] **॰जायते तस्यो॰** प्र॰ ॥

११ मु] **॰च्चयोरान॰** प्र॰ ॥

१२ मुच्च] **॰च्चयार्थो॰**nayacakra-ms-ya ॥

१३ गा] अहरहर्नयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥ १ ॥ इति **पातञ्जलमहाभाष्ये** । २ । २ । २९ ॥

१७ य] **णत्वाच यथा**nayacakra-ms-ya ॥

१७ ते] चेत्यादयः ? ॥

१८ त्पाद] **॰दयः । न चेद्द्रव्यं** प्र॰ ॥

१८ गु] **गुणाः**nayacakra-ms-bhā ॥

१९ क्रियात्वाद्] समानाधिकरणेषूपसङ्ख्यानमसमर्थत्वात् । समानाधिकरणेषूपसङ्ख्यानं कर्तव्यम्, वीरः पुरुषो वीरपुरुषः । किं पुनः कारणं न सिध्यति ? असमर्थत्वात् । कथमसामर्थ्यम् ? द्रव्यं पदार्थ इति चेत् । यदि द्रव्यं पदार्थः, न भवति तदा सामर्थ्यम् भेदाभावात् । अथ हि गुणः पदार्थः, भवति तदा सामर्थ्यम् । अन्यो हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम् । नान्यत्वमस्तीतीयता सामर्थ्यं भवति, अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च, न चैतस्यैतावता सामर्थ्यं भवति । को वा विशेषो यद् गुणे पदार्थे सामर्थ्यं स्याद् द्रव्ये च न स्यात् ? एष विशेषः--एकं तयोरधिकरणम्, अन्यश्च वीरत्वं गुणः अन्यः पुरुषत्वम् । इति **पातञ्जलमहाभाष्ये** २ । १ । १ ॥

१९ ग] **॰गत्यान॰**nayacakra-ms-ya ॥

साधु भवति देवदत्तादौ यत् त्रिलिङ्गं तन्न भवति भवने, तथा एकस्मिन् द्वयोर्बहुषु वा भवत्सु याः सङ्ख्यास्ता न भवन्ति । प्रत्ययपरप्रकृतिव्यवस्थया तु प्रथमैकवचने, अतिक्रमकारणाभावात् । नपुंसकं च भवनस्याव्यक्तत्वात्, किमपि दृश्यते इति

तथा त्रिकालविषयाद् द्रव्यादन्यो भावो न च तेन विना कारकः त्रिकाल-

* * *

सम्बन्धः । यथात्र वीरशब्दः पुरुषसामानाधिकरण्याद् वस्तुत्वेनैकत्वं गत- - /ms स्तथा पुरुषशब्दोऽपि वीरसामानाधिकरण्यात्, अन्यथा वैयधिकरण्याद् घटपटादिवदसम्बन्धादिदोषाः स्युः । अथ च वीरो विशेषणं पुरुषो विशेष्य इति परस्परतो भिन्नार्थत्वमनयोः, इतरथा सामानाधिकरण्यात् तादात्म्यात् पौनरुक्त्यादिदोषाः स्युः । दृष्टं चानयोरैकात्म्यं सामानाधिकरण्यात्, विशेषणविशेष्यभावाच्चान्यत्वम् । एवं प्लक्षादिपदत्वेन दृष्टान्तपरिपूर्णत्वे सत्युत्तरकालभाविनश्चार्थस्यैकसम्बन्धिविषयत्वं प्लक्षधवाद्युपात्तैकसमुच्चयगोचरत्वमित्यनन्यत्वम्, अन्यत्वं तु प्लक्षधवयोरेवासौ समुच्चय इति, तथा द्रव्यादलिङ्गसङ्ख्यो भावो वस्तुत्वैकत्वगतिरनन्योऽन्यश्चेति । इत्थं वा व्याख्यानेऽन्यत्वैकान्तो द्रव्यार्थत्यागोऽन्वयत्यागश्चेति परिहृता दोषाः । § 1150

अतः परमलिङ्गसङ्ख्यत्वप्रसाधनायोत्तरो ग्रन्थः **साधु भवती**त्यादिर्यावद् **भवत्सु याः सङ्ख्यास्ता न भवन्ती**ति । एकस्मिन् द्वयोर्बहुषु वा देवदत्तादिभवितृषु लिङ्गसङ्ख्याभेदवत्सु यत् त्रिलिङ्गं सङ्ख्याश्चैकत्वाद्यास्ता न भवन्ति भवने नपुंसकलिङ्गमेकवचनमेव चानुमीयते तद्विशेषणे साधुशब्दे श्रूयते च साधु भवन्तं पश्य इत्यादि कारकादिव्यतिरेकेऽपि । तस्मादन्यद् भवनं भवद्भ्यो देवदत्तादिभ्यः स्वरूपतः सत्यपि वस्तुत्वैकत्वे । स्यान्मतम्--किमर्थं नपुंसकलिङ्गं प्रथमैकवचनं च ? इत्यत्रोच्यते **--प्रत्ययपरप्रकृतिव्यवस्थया तु प्रथमैकवचने,** किं कारणम् ? **अतिक्रमकारणाभावात्** । अवश्यं च प्रत्ययपरा प्रकृतिः प्रयोक्तव्या, **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** पा॰ २ । २ । ४६ इति सत्तामात्रेऽपि प्रथमाविधानात् ततोऽतिरिक्तार्थासम्भवात् प्रथमातिलङ्घने फलाभावात् वचनस्य च नान्तरीयकत्वात् सत्तामात्रार्थकारणत्वात् कारणान्तराभावात्, - /ms कारणाद्धि तदतिक्रमः स्यात् । **नपुंसकं च भवनस्याव्यक्तत्वात्,** अव्यक्ते गुणसन्देहे नपुंसकलिङ्गं प्रयोक्तव्यमिति । किं तथा लोके दृष्टमिति चेत्, उच्यते **--किमपि दृश्यते इति,** यथा हस्त्यश्व-

१२ क्षादिप] ॰पद- तेनnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-lmnayacakra-ms-ramnayacakra । ॰पदं, तेन, ? ॥
१३ ध] धवादि+उपा॰ प्र॰ ॥
१५ वा] च ? ॥
१९ व] ॰वस्तु पतत्रिलिङ्गं प्र॰ ॥
२० न] ॰नमेव वानु॰nayacakra-ms-ya । ॰ज्ञानु॰nayacakra-ms-bha ॥
२३ व] ॰स्थायाnayacakra-ms-ya ॥
२७ स्य] ॰स्य वचनान्त॰ प्र॰ ॥
२९ अ] दृश्यतां पृ॰ २४२ पं॰ ४ ॥

नरादिसमूहं दृष्ट्वा वक्तारो भवन्ति--किमपि दृश्यते, **इति**ः प्रदर्शने, एतदेव वाक्यमुदाहरणत्वेन प्रदर्शयति । § 1151

**तथे**त्यादि पूर्वसाधनवत् तस्मिन्नेव पक्षे हेत्वन्तरमुपचयरूपेणोच्यते । तेन प्रकारेण **तथा** यथा पूर्वं वस्तुत्वेकत्वगत्यनन्यदन्यत् इति पक्षीकृत्य साधितं तथात्रापि **त्रिकालविषयाद् द्रव्यादन्यो भावो न च तेन विना कारक** इति पक्षः, द्रव्येण विना न स्वयं कारको भावः, तत्सहवृत्तिरेवान्यत्वेऽपीत्यर्थः । 387/mj

* * *

त्वात्, द्रव्यं त्रिकालविषयम् क्रिया तु त्रिकाला गमनगन्तृवत्, वर्तमान एव देवदत्ते गन्तरि गतित्रैकाल्यम् अगमद् गच्छति गमिष्यति इति तथा अभूद् भवति भविष्यति इति ।

भावस्य द्रव्यादन्यत्वेन तदपृथक्कारकत्वेन च साध्यत्वाद् भावगमनयोरेकार्थत्वाद् दृष्टान्तः साध्यैकदेश इति चेत्, देवदत्तगमनयोस्त्रैकाल्यात्रैकाल्याभ्यां भेदसिद्धेर्द्रव्यभावयोरपि तद्वत्, युगपदयुगपत्तत्त्वखघटवत् ।

अथ द्रव्यार्थभेदत्वादस्य कथमिदं प्रागभावप्रध्वंसाभावात्मकं त्रैकाल्यम् ?

* * *

कस्मात् ? **त्रिकालत्वात्,** त्रयः काला अस्येति त्रिकालः, कोऽसौ ? भावः क्रियालक्षणः, **अभूद् भवति भविष्यति** इत्युपनेष्यमाणत्वाद् भेदेन त्रिभिरपि कालैरभिसम्बन्धदर्शनाद् भावस्य त्रिकालत्वं सिद्धत्वाद्धेतुः । **द्रव्यं त्रिकालविषयमिति,** भावस्य त्रिधा भिन्नकालत्वेऽपि एकरूपत्वाद् वर्तमानत्वेनावतिष्ठमानं तत्सम्बन्धि द्रव्यं तांस्त्रीनपि विषयीकरोतीति त्रिकालविषयम् इत्युच्यते, त्रिष्वपि कालेषु तदेव भवतीत्यर्थः । अत्रिकालं द्रव्यं त्रिकालविषयमिति **क्रिया तु त्रिकाला** वर्तमानविषयेत्युक्तं भवति । **गमनगन्तृव**दिति दृष्टान्तः । तद्व्याचष्टे **--वर्तमान एव देवदत्ते गन्तरि,** एवकारोऽवधारणे, त्रिष्वपि कालेषु गन्तुर्वर्तमानैककालतामवधारयति । **गतित्रैकाल्यम्,** गमनस्य त्रयोऽपि काला अनवधारितैकरूपा दृष्टाः । तन्निदर्शयति **--अगमद् गच्छति गमिष्यतीति, तथाऽभूदित्यादि**रुपनयो व्याख्यातार्थः । § 1152 - /ms

**भावस्ये**त्यादि परमताशङ्का । स्यान्मतम् **--भावस्य द्रव्यादन्यत्वेन तदपृथक्कारकत्वेन च साध्यत्वाद् भावगमनयोरेकार्थत्वाद्** द्रव्याद् भवनपृथक्त्वासिद्धिवद् गन्तुर्गमनपृथक्त्वासिद्धेर्**दृष्टान्तः साध्यैकदेश** इत्येतस्यां विचिकित्सायां कथं साधनमिति **चेत्,** उच्यते **--देवदत्तगमनयोस्त्रैकाल्यात्रैकाल्याभ्यां भेदसिद्धेर्द्रव्यभावयोरपि तद्व**दिति सामान्यविशेषयोः

---

१८ अ] दृश्यतां पं॰ २, १५ ॥
२१ म्ब] ॰न्धे प्र॰ ॥
२५ ग] **गतेत्रै॰**nayacakra-ms-bhā । **गतेत्रै॰ स्त्रै॰** ? nayacakra-ms-ya ॥
२७ त] **तथाभूत्यादि॰** प्र॰ । दृश्यतां पं॰ २, ८ ॥
३२ योस्त्रैकाल्यात्रैका] ॰काल्या भेद॰ प्र॰ ॥

साध्यसाधनत्वाभ्यां विवक्षितत्वाददोषः तद्विचिकित्सायामपि तुल्यत्वात्, **युगपदयुगपत्तत्वखघटव**दिति दृष्टान्तः, तस्य भाव**स्तत्त्व**म्, तदेव भवतीत्यर्थः । ननूक्तं द्रव्यभेदे द्रव्यार्थत्यागः, अत्यागेऽन्वयाभावः इति, नैष दोषः, **युगपदयुगपत्तत्व**विशेषणादात्मादिसर्वैक्याद् युगपत्तत्त्वं खं द्रव्यार्थात्माभेदात् खादेः द्रव्यात्मैव वाऽयुगपत्तत्वो घटः, तथा त्रैकाल्यात्रैकाल्यवस्त्वन्यानन्यत्वे द्रव्यभावयोः । § 1153

**अथेत्यादि** । अथ मतम् --**द्रव्यार्थभेदत्वादस्य** नयस्य द्रव्यार्थस्य च नित्यत्वात् **कथमिदं प्रागभावप्रध्वंसाभावात्मकं त्रैकाल्यं** युज्यत इति वाक्यशेषः । यत् प्राग् नासीदधुना भवति तद् वर्तमानमित्युच्यते, तच्च प्रागभूतम्, यद्विनष्टमतीतं प्रध्वस्तमभूतम्, यद् भविष्यति तदपि प्रागभूतमिदानीमभावात्, अङ्कुरघटकपालादिदर्शनात् । तच्च पूर्वापरकालतुल्यत्वाद् नित्यस्य
388/mj न युक्तम्, **नेर्ध्रुवे त्यब्**

* * *

न, प्रवृत्तिनित्यत्वात् । नित्यत्वस्यापि द्वित्वम् । कूटस्थस्य द्रव्यस्य तं तमात्मानं पर्यनुभवतः ध्रौव्यं कौटस्थ्यं च । इतरस्य तु तथा तथाभिव्यज्यमानस्य अकौटस्थ्यं सततसम्प्रवृत्तिरूपं नित्यत्वं च ।

अत एव भूताभूतभाक्त्वं द्रव्यादन्यो भावः इत्यस्यार्थस्य साधनम् । व्यतिक्रान्त्यव्यतिक्रान्तिभाक्त्वाद् भिन्नौ क्रियाद्रव्यभावौ, तद्यथा--कृतः कटो देवदत्तेन, कृतः कर्मणा विभागः । क्रिया व्यतिक्रामति, विभागः कर्म च न व्यतिक्रामतः शब्दार्थस्य पिण्डितत्वात् । न च व्यतिक्रमाव्यतिक्रमौ निर्निमित्तौ भवितुमर्हतः । दृष्टश्च कर्मविभागयोरव्यतिक्रमे करणस्य विभागविषयस्य व्यतिक्रमः । तत्र

* * *

नित्यमिति निरुक्तेः । तस्मादसिद्धं भावस्य त्रैकाल्यम्, द्रव्यार्थाभ्युपगमात् । द्रव्यस्यैव वा त्रैकाल्याभ्युपगमे भावस्य द्रव्यार्थवादत्याग इति । अत्रोच्यते
- /ms --**न** दोषः, **प्रवृत्तिनित्यत्वात्,** नात्रापि द्रव्यार्थत्यागः प्रवृत्तिनित्यत्वात्, भवनप्रवृत्तिर्भाव इत्यर्थः, सा च प्रवृत्तिर्नित्या सदा प्रवृत्तेर्वस्तुनो भावोऽपि नित्य एवेति न द्रव्यार्थत्यागो नात्रैकाल्यमिति । § 1154

इतर आह--कुतो नित्यत्वस्य द्वैतम् ? इति । अत्रोच्यते--वस्तुनो द्रव्यभवनात्मकस्योभयत्वादेव **नित्यत्वस्यापि द्वित्वं** सिद्धं यथा प्रागुपवर्णितं न

१ तु] तुल्यत्यते युगप॰ प्र॰ ॥
३ नू] दृश्यतां पृ॰ ३८४ पं॰ २४, पृ॰ ३८६ पं॰ ६ ॥
५ वा] चायुग॰ ? ॥
८ वा] वाक्यविशेषः प्र॰ ॥
१२ त्य] त्यग्नित्य॰ प्र॰ । अव्ययात् त्यप् । ४ । २ । १०४ ।...त्यब् नेर्ध्रुवे । त्यब् नेर्ध्रुवे वक्तव्यः । नित्यः । इति पातञ्जलमहाभाष्ये ॥
२४ व्या] ॰र्थत्यागःnayacakra-ms-ya ॥
२५ भ] भवनं प्रवृत्तिर्भावः ? ॥
२९ नित्य] नित्यस्यापिnayacakra-ms-ya ॥
२९ न] दृश्यतां पृ॰ २१ पं॰ २२, पृ॰ २१२ टि॰ ४ ॥

हि **तदेव नित्यमित्यादि** यावत् **तदपि हि नित्यं यस्मिंस्तत्त्वं न विहन्यते** पा॰ म॰ भा॰ १ । १ । पस्पशा॰ इति उक्तत्वात्, इदानीमपि तद्द्वित्वं प्रदर्श्यते --**कूटस्थस्ये**त्यादि, द्रव्यं हि कूटस्थं नित्यं पूर्वापरकालतुल्यत्वात्, तस्य कूटस्थस्य द्रव्यस्य सर्वप्रभेदनिर्भेदस्य बीजभूतस्य गमनस्थानादिसर्वात्मकत्वेनावस्थितस्य तं तमात्मानं पर्यनुभवतः तत्पर्यनुभवनात्मत्वादेव ध्रौव्यं कौटस्थ्यं च युज्यते । इतरस्य तु भावस्य तथा तथाभिव्यज्यमानस्य पर्यनुभूयमानस्य क्रमेण युगपद्वा सततप्रवर्तनात्मनो भावस्य प्रवृत्तेरकौटस्थ्यं सततसम्प्रवृत्तिरूपमव्यवच्छिन्नभवनात्मकं नित्यत्वं चेति नित्यत्वस्यापि द्वित्वम् इति साधूक्तम् । § 1155

**अत एवे**त्यादि । एतस्मादेव नित्यत्वद्वित्वादन्यदिदमपि कारणं **भूताभूतभाक्त्वं** द्रव्याद्वैधर्म्यमस्याः प्रवृत्तेरन्यत्वकारि **द्रव्यादन्यो भावः इत्यस्यार्थस्य साधनम्,** द्रव्यविलक्षणो भावः इत्यत्र हेतुरित्यर्थः । भूताभूता क्रिया, द्रव्यं भवदेव, वृत्ता वर्तमाना च क्रिया, द्रव्यं वर्तत एवेत्यर्थः । अथवा भूतं द्रव्यमभूतं करणं स्थितं गतं च यथासङ्ख्यं, **व्यतिक्रान्त्यव्यतिक्रान्तिभाक्त्वाद् भिन्नौ क्रियाद्रव्यभावौ, तद्यथा--कृतः कटो देवदत्तेन,** देवदत्तः कटकरणकाले करणोपरमे च कटस्यैकरूप एव, क्रिया तु वीरणसंयोगावस्थायामव्यतिक्रान्ता - /ms
कटनिष्पत्त्युत्तरावस्थायां व्यतिक्रान्ता । तथा **कृतः कर्मणा विभाग** इति द्वितीयमुदाहरणं कर्तृकर्मसमवायित्वात् क्रियायाः पचिभिदिवत्, वैयाकरणसिद्धान्तेन तु **कर्तुरीप्सिततमं कर्म** पा॰ १-४-४९, क्रियैव तु **वैशेषिकस्य,** इहाविशेषेण विभागहेतुः क्रिया, विभागश्च सन्तत्यनुपरमाद् 389/mj

* * *

देवदत्ते द्रव्ये कर्मणि वा करणलक्षणया प्रवृत्त्या भवितव्यमविच्छेदेन, सा च तदतद्भवनस्वरूपा ।

यथा च संयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम्, तत्सम्बन्धं चान्तरेण गमनं न भवति तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवति, अन्यतो भिन्नं स्वतत्त्वाद् द्रव्याद्वा न स्यात् कर्मेति न स्यात् । तथा भवद्वा कृतम् इति व्यपदेशं न जनयेत्, करणसम्बन्धाभावात्, आकाशादिवत् । तथा च तत् सद् असत्कारणमिति नित्यं स्यात् ।

* * *

द्रव्यवदवस्थित इति विवक्षितं तस्य, विभागः कटकर्तुश्चलनात्मकस्य कर्मण ईप्सिततमत्वात् कर्म चलनेन द्रव्यं देशान्तरं प्रापयता क्रियत इति

---

५ त्वादेव ] द्रव्यं कौ॰nayacakra-ms-bhā । द्रव्यकौ॰ nayacakra-ms-ya ॥
१४ भि ] भिन्नो क्रियाद्रव्यभावोnayacakra-ms-ya ॥
१८ क ] दृश्यतां पृ॰ २८३-- २ ॥
२९ क ] कर्मटकर्तु॰nayacakra-ms-ḍenayacakra-ms-līṃ । कर्मचटकर्तु॰ nayacakra-ms-raṃ nayacakra-ms-hī । कर्मचमोटकर्तु॰ nayacakra-ms-pā । दृश्यतां पं॰ ९ । विभागः कर्तुश्चलनात्मकस्य इत्यपि पाठोऽत्र स्यात् ॥

सा क्रिया व्यतिक्रामति, विभागः कर्म च न व्यतिक्रामतः, शब्दार्थस्य पिण्डितत्वाद् नामत्वादित्यर्थः । न च व्यतिक्रमाव्यतिक्रमौ निर्निमित्तौ भवितुमर्हतः । दृष्टश्च वर्तमानयोः कर्मविभागयोः द्रव्ययोरव्यतिक्रमे करणस्य क्रियाया विभागविषयस्य व्यतिक्रमः । न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद् भवतः विरोधात् प्रमाणान्तरापेक्षामन्तरेण, तस्मादेतदनुमेयं तत्र देवदत्ते द्रव्ये कटस्य कर्तरि कर्मणि वा कर्तरि चलने वीरणानां कटे वा कर्मणि करणलक्षणया प्रवृत्त्या भवितव्यमविच्छेदेन । **सा च** प्रवृत्तिः क्रिया **तदतद्भवनस्वरूपा,** तस्मिन् द्रव्येऽतस्मिंश्च करणे भवनमस्याः प्रवृत्तेः स्वरूपम्, तया च [व्यतिक्रमा]व्यतिक्रमविभागतया द्विरूपयाऽवश्यमव्यवच्छिन्नया[ऽ]कूटस्थया प्रवृत्तिभवनात्मिकया भवितव्यमिति । § 1156

किमिव ? **आकाशादिवत्** । ततः किं स्यात् ? **तथा च तद्** भ (Edtext outside numbered paragraph)वत् कर्म सत्त्वात् का (Edtext outside numbered paragraph)रणासम्बन्धाच्च स (Edtext outside numbered paragraph)**दसत्कारणमिति नित्यं स्यात्,** नित्यलक्षणयोगात् । किं नित्यलक्षणमिति चेत्, उच्यते --**सदकारण** (Edtext outside numbered paragraph)**वत्तन्नित्यम्** वै० सू० ४ । १ । १ इति नित्यलक्षणं **वैशेषिकमतेनेति** । एवं तावत् कर्म गमनादि करणसम्बन्धाद् भवति इत्युपपादितम् । § 1157

**यथा च संयोगेत्यादि** । इदमधुना गन्तृगमनदृष्टान्तयोर्भवितृभवनदार्ष्टान्तिकयोश्च प्रागुक्तवद् भेदानभ्युपगमे दोषाभिधित्सयोच्यते । ***संयोगविभागाः कर्मणां कार्यं सामान्यम्, गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणं कारणं सामान्यम्** वै० सू०द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् । १ । १ । १८ ।...द्रव्याणां द्रव्यं कार्यं सामान्यम् । १ । १ । २३ । गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् । १ । १ । २९ । संयोगविभागाश्च कर्मणाम् । १ । १ । ३० । कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् । १ । १ । ३१ । इति वैशेषिकसूत्रे पाठः ॥ इति वचनाद् देशान्तरसंयोगं द्रव्यस्य देशान्तरविभागं च गमनकर्मारभते गुरुत्वादिजनकं चोत्क्षेपणं कर्म । तस्मात् - /ms **संयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम्,** तयोः संयोगविभागयोस्त-

५ त] तत्त्व॰nayacakra-ms-bhā । तत्वत् nayacakra-ms-de nayacakra-ms-līṃ nayacakra-ms-raṃ nayacakra-ms-hī । तत्त्व nayacakra-ms-pā । ते तत्वत् nayacakra-ms-vi ॥
९ द्विरूप] ॰पतया॰nayacakra-ms-ya ॥
१० च्छिन्न] ॰न्नयाकूटnayacakra-ms-bhā । ॰न्नकूट॰ nayacakra-ms-ya ॥
११ य] यथारसंयो॰ प्र॰ ॥
१२ *] द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् । १ । १ । १८ ।...द्रव्याणां द्रव्यं कार्यं सामान्यम् । १ । १ । २३ । गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् । १ । १ । २९ । संयोगविभागाश्च कर्मणाम् । १ । १ । ३० । कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् । १ । १ । ३१ । इति वैशेषिकसूत्रे पाठः ॥

त्कारणस्य च कर्मणो यावद्द्रव्यभावाभावाद् **वै**शेषिकमतवत् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः, तत्सम्बन्धं चान्तरेण गमनं [न] भवति, गच्छति देवदत्तः इति हि गमनसम्बन्धाद् दृष्टम्, व्यतिलङ्घितगमनश्च गतः इत्युच्यते, तस्मात् तद्व्यतिक्रममन्तरेण गतम् इति न भवति । एष विधिः कर्मविशेषे गमने दृष्टः । **तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवती**ति क्रिया सिध्यति, **अन्यतो भिन्न**मिति **स्वतत्त्वात्** कर्मत्वात् **द्रव्याद्वा** कर्मत्वस्य स्वतत्त्वस्याश्रयो **न स्यात् कर्मेति न स्यात्,** क्रियमाणत्वाद्धि तत् कर्म करणे सति, करणव्यतिक्रमे च कृतम् इति न स्यात् । कर्मणि तु भिन्ने द्रव्यात् स्वतत्त्वाद्वा स्यादिति । **तथा भवद्वे**त्यादिना करणं भवदपि स्वसम्बन्धव्यतिक्रममन्तरेण **कृतम् इ**त्येतं **व्यपदेशं न जनयेत्,** तच्च दृष्टम्, किं कारणं न स्यादिति चेत्,

यथा च कर्म क्रियया विना न भवति तथा करणमपि भवनव्यक्तिमन्तरेण नैव भवेत्, तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात् । पूर्वः पूर्व उत्तरोत्तरकार्यकारणभावेन । ततश्च प्रागादिनिर्विशेषणं नास्ति भवनसम्बन्धव्यतिक्रमाभावात् खपुष्पवत्, असत्कारणत्वाद्वा, अभूतभवनसम्बन्धव्यतिक्रमत्वात् । व्यतिक्रमश्च तृणकर्मादौ कटविभागादिभवनभूततायाम् । द्रव्यं क्रिया च द्वयमेव

* * *

न्धाभावात् ।**करणसम्ब** 390/mj

* * *

यथा च कर्म क्रियया विना न भवति तथा करणमपि भवनव्यक्तिमन्तरेण नैव भवेत्, तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात् । पूर्वः पूर्व उत्तरोत्तरकार्यकारणभावेन । ततश्च प्रागादिनिर्विशेषणं नास्ति भवनसम्बन्धव्यतिक्रमाभावात् खपुष्पवत्, असत्कारणत्वाद्वा, अभूतभवनसम्बन्धव्यतिक्रमत्वात् । व्यतिक्रमश्च तृणकर्मादौ कटविभागादिभवनभूततायाम् । द्रव्यं क्रिया च द्वयमेव

* * *

न्धाभावात् ।

**यथा च कर्मे**त्यादि । यथा च गमनादि कर्म **क्रियया विना न भव**त्युक्तविधिना **तथा करणमपि भवनव्यक्तिमन्तरेण** भवनक्रियाविर्भावेन विना **नैव भवेत्,** न भवितुमर्हतीत्यर्थः । **तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात्,** तत्सम्बन्धे भवति इति भवति तत्सम्बन्धव्यतिक्रमे च भूतम् इति । **पूर्वः पूर्व उत्तरोत्तरकार्यकारणभावेने**ति क्रियासम्बन्धप्रबन्धं - /ms

४ इ] इति भवतिnayacakra-ms-bhā ॥
७ क] करणेऽसतिnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-jenayacakra-ms-ramnayacakra-ms-hī । कर्म, करणेऽसति करणव्यतिक्रमे च ? ॥
३० तिक्र] °क्रमन्त° प्र° ॥
३२ क्रियास] °सम्बन्धप्रबन्धप्रदर्शयतिnayacakra-ms-ya । nayacakra-ms-bhā ॥

प्रदर्शयति **ततश्च प्रागादिनिर्विशेषण**मित्यादि भवनसम्बन्धे तद्व्यतिक्रमे चासति प्राक्प्रध्वंसेतरेतरशक्तिसंयोगाद्यभावाभावादभावभेदरहितो **नास्त्य**भाव इत्यनर्थान्तरमिति अविशेषेणैकोऽत्यन्ताभाव एव स्यादभावः **भवनसम्बन्धव्यतिक्रमाभावात् खपुष्पवदि**ति, यथा खपुष्पं भवनसम्बन्धाभावात् तद्व्यतिक्रमाभावाच्च न भवेदेवं सर्वं घटादि स्यादिति । **असत्कारणत्वाद्वा,** तदा हि वस्तुनो भवनकारणं योऽसौ करणसम्बन्धो भवनसम्बन्धश्च स नास्ति तद्व्यतिक्रमो वेति सत्कारणाभावादकारणत्वादत्यन्ताभाव एव स्यात् खपुष्पवत् सर्वं घटादि । तदुपसंहृत्य हेतुमाह **--अभूतभवनसम्बन्धव्यतिक्रमत्वा**दिति, गतिस्थित्यादिकरणभवनसम्बन्धव्यतिक्रमसद्भावाद् गच्छति तिष्ठति करोति भवति गतस्थितकृतभूतव्यक्त्यात्मकदेवदत्तवस्तु भवदुपलभ्यते नान्यथेति । स्यान्मतम्--भवनस्य सततसम्प्रवृत्तस्याव्यतिक्रम इति । अत्रोच्यते **--व्यतिक्रमश्च तृणकर्मादौ,** तृणतन्त्वादीनां क्रियास्तृणकर्म, **आदि**ग्रहणात् संयोगः, यथासङ्ख्यं **कटविभागादिभवनभूततायाम्,** अत्रापि **आदि**ग्रहणात् पटविभागसंयोगादयो गृहीताः, भवनस्य भूततायामेवंलक्षणस्य भवति व्यतिक्रमः तृणं कटो भवति, गमनकर्म विभागो भवति संयोगश्चान्येन । स्यान्मतम्--कथं तृणं कटो भवति, कर्म विभागो भवति इत्येतदुच्यते ? इति । अत्रोच्यते,
- /ms अत्रापि ननूक्तम् **--द्रव्यं क्रिया च द्वयमेव सर्वमिद**मिति संयोगादि सर्वं
391/mj गुणक्रियात्वप्रतिपादनात् तस्य भवनस्य भूतता व्यतिक्रम इति ।

* * *

सर्वमिदम् । एवमेव च भावक्रियाश्रयः कारकाणां कर्मादिभावः ।

यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं स्यात् ततस्तया विना नैव वस्तु स्यात्, तत्त्वात्, देवदत्तबालादिवत् घटरूपादिवत् । दृष्टं चैतद् गमनादिक्रियया विनापि देवदत्ताख्यं वस्तु । अन्तरेणापि तु क्रियां भवत्येव वस्तु, तस्मात् ततोऽन्यत् तदन्तरेणापि भावात् घटपटवत् । दृश्यते हि देवदत्ते गच्छत्यधृतिं करोति यज्ञदत्तः । यदि द्रव्यपारमार्थ्यवत् क्रियापि स्यात् गमनवत् क्रियात्वात् स्थानमपि परमार्थ

* * *

**एवमेव** **चे**त्यादि । एवं कृत्वा **भावक्रियाश्रयः,** भाव एव क्रिया भावक्रिया । द्रव्यं भावः, स एव च क्रिया, द्रव्यस्य वा क्रिया । तदाश्रयो द्रव्यभवनाश्रयोऽयं **कारकाणां कर्मादिभावः** कर्मकरणादिभावः, न नियतरूपः

---

३ अ] अविशेषणैकात्य°nayacakra-ms-ya ॥
५ भ] भवेदेवं ? ॥
६ क] **कारण°** प्र° ॥
७ स] असत्कारणाभावा°nayacakra-ms-ya । वस्तुतस्तु अत्र **असत्कारणभावा°** इति पाठः समीचीनो भाति, असत्कारणत्वात् इत्यर्थः ॥
८ स] **सर्व** प्र° ॥
१० ना] नन्यथेतिnayacakra-ms-bhā । अन्यथेति nayacakra-ms-ya ॥
११ स्या] **°स्य व्यति°** प्र° ॥
१७ स] **सर्व-गुण°**nayacakra-ms-vinayacakra-ms-raṃ ॥

विचित्रक्रियाभवनसम्बन्धाद् भवति, देवदत्तः पचति ओदनं काष्ठैः स्थाल्याम्, ओदनो भवति, काष्ठानि ज्वलन्ति सन्धुक्षन्ति, स्थाली धारयतीत्यधिश्रीयते इत्येवमादिदर्शनात् । न हि किञ्चिज्जातिविशेषयोगाद् गोत्वादियोगादिवत् कर्मत्वकरणत्वाधिकरणत्वादियोगात् कर्मैवेदं करणमेवाधिकरणमेव नियतं नान्यदपि भवतीति । किं तर्हि ? अनियतशक्तिविषयम्, शक्तीनां कारकत्वात्, तदेव हि द्रव्यमन्यया क्रियया प्रमार्ष्टि नेत्रे इति नेत्रादि कर्म भवति, अन्यया करणम् नेत्रेण पश्यति इति, अन्ययाधिकरणम् नेत्रेऽञ्जनं तिष्ठति इत्यादि । तस्मात् सर्वप्रभेदनिर्भेदं बीजं वस्तु द्रव्यं तत्त्वम्, तद्भेदिभवनव्यक्तिः क्रिया । § 1158

**यदी**त्यादि एवमनिच्छतो दोषः, **यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वम्** आत्मा स्वरूपं **स्यात् ततस्तया विना** क्रियया **नैव वस्तु स्यात्, तत्त्वात्** तदात्मत्वात् स्वरूपत्वात्, यद् यत्तत्त्वं यदात्मास्वरूपं वा न तत् तेन विना भवति **देवदत्तबालादिवत्,** यथा देवदत्ततत्त्वा बालादयोऽवस्थाविशेषाः क्रमभाविनो न तेन विना भवन्ति तथैतदपि वस्तु क्रियया विना न स्यात्, **घटरूपादिव**दिति घटतत्त्वा रूपादयो युगपद्भाविनस्तेन विना न भवन्ति तथा क्रियया विना तद् वस्तु न स्यादिति विशेषः । **दृष्टं चैतद् गमनादिक्रियया विनापि देवदत्ताख्यं वस्त्वि**त्यनिष्टापादनमेतत् । दोषदर्शनादपि वस्तु भवतीत्येतदर्थं साधनमाह --**अन्तरेणापि तु क्रियां भवत्येव वस्तु तस्माद्** विना भावे दोषदर्शनात् **ततोऽन्यत्** क्रियातोऽन्यद् वस्तु इति प्रतिपत्तव्यम् । न केवलं दोषदर्शनादेव, किं तर्हि ? अन्यत्वहेतुरप्यस्तीत्यत आह — **तदन्तरेणापि भावात्,** यद् यदन्तरेणापि भवति तत् ततोऽन्यत् **घटपटवत्,** यथा घटः पटमन्तरेण भवन् पटादन्यः पटश्च घटमन्तरेणापि भवंस्ततोऽन्यस्तथा क्रियामन्तरेणापि भवद् वस्तु ततोऽन्यदिति । तन्निदर्शनान्तरं विचारान्तरास्पदमप्याह --**दृश्यते हि देवदत्ते गच्छत्यधृतिं करोति यज्ञदत्त** इति । अत्र यज्ञदत्तस्याधृतिकारणं गमनं देवदत्ताख्याद् वस्तुनोऽन्यत् पूर्वोत्तरकालतुल्येऽपि तस्मिन् यतोऽधृतिर्भवति, तस्माद् न क्रिया वस्तुनस्तत्त्वम् । § 1159 - /ms

**यदि द्रव्यपारमार्थ्यव**दित्यादि । यदि यथा देवदत्ताख्यस्य वस्तुनो द्रव्यं परमार्थस्तथा **क्रियापि स्यात् गमनवत् क्रियात्वात् स्थानमपि परमार्थ इति** प्रागेव स्थानक्रियया गमनविरोधिन्या देवदत्तोऽ 392/mj

* * *

इति तस्य गमनं नैव स्यात्, देवदत्तावरुद्धदेशे यज्ञदत्तवत् । अथ गमनतत्त्व एव देवदत्त इष्यते तथापि गमनक्रियापरमार्थदेवदत्तत्वात् स्थानं नैव स्यात् इति यानस्थानयोरभावात् पूर्ववद्धृतिः सततमधृतिर्वा स्यात् तथा । तथा

---

३ गोत्वादियोगा] °योगादि°nayacakra-ms-bhā प्रतौ नास्ति ॥
१२ य] **य आत्मा** प्र° । अत्र **यस्यात्मा** इत्यपि पाठः स्यात् ॥
२४ ग] **न गच्छ°** प्र° ॥
२५ स्तुनो] एतदन्तर्गतपाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

भवने[ऽपि] यथा देवदत्ते गच्छति अधृतिरस्य तथा तदात्मत्वाद् यावद्देवदत्तमधृतिप्रसङ्गः तत्कालवत्, देवदत्त एवास्याधृतिनिमित्तमिति । स्थित्यात्मकत्वाद्वास्य गच्छत्यपि देवदत्ते यज्ञदत्तस्य धृतिरेव सदा स्यात् स्थानकालवत् । यज्ञदत्त... ... ... धृतिरधृतिर्वा ।

* * *

वरुद्धः स्यात् । ततश्च तयावरुद्धत्वात् **तस्य** देवदत्तस्य **गमनं नैव स्यात्,** कदाचिदपि न गच्छेद् देवदत्त इत्यर्थः । **देवदत्तावरुद्धदेशे यज्ञदत्तवत्,** यथा देवदत्ताख्यं वस्तु देवदत्तत्वेनावरुद्धमिति तद्विरोधिनो यज्ञदत्तत्वस्यानवकाशात् तत्र यज्ञदत्तत्वं नैव जातु भवति तथा देवदत्ते स्थानेनावरुद्धे गमनं नैव जातु स्यादिति । **अथ** मा भूद् यज्ञदत्ताधृतिकारणस्य देवदत्तगमनस्याभाव इति **गमनतत्त्व एव देवदत्त इष्यते तथापि गमनक्रियापरमार्थदेवदत्तत्वात् स्थानं नैव स्यात्** कदाचिदपि, गमनेनावरुद्धत्वाद् देवदत्तस्य देवदत्तत्वावरुद्धदेवदत्ते यज्ञदत्तत्ववदेव । **इति**शब्दो हेत्वर्थे, ततश्च हेतो**र्यानस्थानयोरभावात्,** यानाभावात् तावत् **पूर्ववद्धृति**र्यथा प्राग् गमनोत्पत्तेर्गमनासत्त्वादधृत्यभावः तथा गमनाभावाद् गच्छत्यपि देवदत्ते यज्ञदत्तस्याधृत्यभावः देवदत्तसत्त्वात् गमनकालेऽपि, गमनाभावे यथा यज्ञदत्तस्य धृतिर्भवत्येवं **सततमधृतिर्वा**
- /ms **स्यादिति** । एवं स्थानाभावेऽपि धृत्यधृती स्यातामुक्तन्यायेन । **तथेति** तेन प्रकारेण प्रोक्तोपपत्तिक्रमप्रापिताभावप्रकारेण यानस्थानयोरिति । § 1160

**तथा भवने[ऽपी]**त्यादि । भवतु वा गमनं स्थानं वेत्यभ्युपगम्यापि दोष उच्यते । तत्र गमने तावद् **यथा देवदत्ते गच्छत्यधृतिरस्य तथा तदात्मत्वाद् यावद्देवदत्तमधृतिप्रसङ्गः,** यथा देवदत्तगमनकाले यज्ञदत्तस्याधृतिहेतुर्देवदत्तो गमनात्मत्वात् तथा यावज्जीवम् आत्मनो यावदायुर्यज्ञदत्ताधृतिहेतुरेव स्यात् गमनात्मत्वात् **तत्कालव**दिति तस्य देवदत्तस्य गतिपरमार्थत्वाद् वस्तुत्वावस्थानाच्च देवदत्तस्य गमनात्मनः पूर्वोत्तरकालतुल्यत्वात् । अतस्तद्विवरणार्थमाह --**देवदत्त एवास्याधृतिनिमित्तमिति,** इति— शब्दो हेत्वर्थे, यतो देवदत्तो गमनात्मैव तस्मात् सततमधृतिप्रसङ्गः । एवं तावदयं स्थानविरोधिन्या गतेर्भावेऽभिहितो दोषः । गतिविरोधिन्याः स्थितेरेव वा भावे **स्थित्यात्मकत्वाद्वास्य** देवदत्तस्य **गच्छत्यपि देवदत्ते यज्ञदत्तस्य धृतिरेव सदा स्यात् स्थानकालवद्** देवदत्तसद्भावादिति । § 1161

---

६ त] तस्या प्र° ॥
१२ रु] °रुद्धंरुद्धे
?देव°nayacakra-ms-bhā । °रुद्धत्वं
देव° nayacakra-ms-ya ॥
१४ व] °वद्धृत्तेर्यथा प्र° ॥
१४ त्त्वा] °त्वाद्धृत्यभावः प्र° ॥
१५ त्त]
°त्तस्यत्वात्nayacakra-ms-ya ॥
१६ कालेऽपि] °पि भावे
यथाnayacakra-ms-ya ॥
१९ भ] भवमु
वाnayacakra-ms-bhā । भवनमु वा
nayacakra-ms-ya ॥
२३ स्य]
ततस्यादत्तस्यnayacakra-ms-bhā ॥
२४ त्त]
°त्तत्वस्यnayacakra-ms-bhā ॥

एवं तावद् देवदत्तगतिस्थितिविषययज्ञदत्ताधृतिविचारद्वारेण दोषा उक्ताः । इदानीं यज्ञदत्ताधृतिविषयोऽपि विचारस्तथैव कर्तव्यः । अत्रापि यदि द्र-व्यपारमार्थ्यवदित्यादिग्रन्थो धृत्यधृतियज्ञदत्तशब्दोच्चारणेन यथासम्भवं योज्यः । प्रकारान्तरेणापि तु **यज्ञदत्तेत्यादि** यावद् **धृतिरधृतिर्वा** । यज्ञदत्तद्रव्यत्वं 393/mj

* * *

न, तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद् भवनमेवेदं ग-तिधृतिस्थित्यादि । भेदज्ञानव्यवहारौ तु शब्दभेदद्रव्यप्रवृत्तितत्त्वानुरूप्यात्, शब्द-

* * *

हि वस्तुस्वरूपम्, धृत्यधृतिक्रिये च तदव्यतिरिक्ते । ततो देवदत्तयानस्थान-योरपि देवदत्ताव्यतिरेकात् तद्वद् यावद्देवदत्तं गमनं स्थानं वेति धृतिरेवा-धृतिरेव वा स्याद् यज्ञदत्ततत्त्ववत्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत् । तस्मादेतेन क्रियाया अपि नित्यत्वादित्याह --**न, तदतद्भवनाविच्छेदात्म-कप्रवृत्तिनित्यत्वस्याकूटस्थत्वात्,** तद्भवनमतद्भवनं तदतद्भवनं च सरूपैक-शेषात् तदतद्भवनम् । तद्भवनं तावदस्तिभवत्यादिविषयम्, पुनः पुनर्भव-त्येवेति । अतद्भवनं स्थानाद् गमनं गमनाच्च स्थानमिति । तदतद्भवनं भवनसहिते ते एव स्थानगमने तथा धृत्यधृती । तस्याविच्छेद आत्मा यस्याः प्रवृत्तेरविच्छेदात्मिकायाः सा तदतद्भवनाविच्छेदात्मकप्रवृत्तिः, तस्या नित्यत्वम्, तदकूटस्थं कूटस्थद्रव्यनित्यत्वविलक्षणम्, तद्भावात् **तदतद्भव-नाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद् भवनमेवेदं गतिधृतिस्थित्यादि,** एता यानस्थानधृत्यधृत्यादिकाः परस्परविरोधिन्यः क्रियास्ता एता भवनमेव सततसम्प्रवृत्तिरूपभवनात्मकत्वाद् भवद्भवनविलक्षणं नित्यं च प्रवृत्तिभव-नमात्रमेवेत्यभिन्नं क्रियामात्रम् । अतो द्रव्यं क्रिया चोभयं नित्यं भावः । स्यान्मतम्--क्रियाभेदाभावाद् भेदज्ञानव्यवहाराभावः स्यात्, दृश्येते भेद-ज्ञानं भेदव्यवहारश्चेति । एतच्चायुक्तम्, तस्माद् **भेदज्ञानव्यवहारौ तु** गच्छति तिष्ठति धृतिं करोत्यधृतिं वा न वा इति द्वावप्येतौ **शब्दभेदद्रव्यप्रवृत्तित-त्त्वानुरूप्यात्,** शब्दो भेदो यस्या द्रव्यप्रवृत्तेः सा शब्दभेदद्रव्यप्रवृत्तिः, न शब्दोऽन्यो द्रव्यात्, प्रवृत्तिः क्रिया गुणोऽपि क्रियेति प्रागुक्तम् । रूपरस-गन्धस्पर्शभेदायाः प्रवृत्तेः शब्द- भेदा प्रवृत्तिरन्या, तस्यास्तत्त्वं वर्णात्मकत्वादि रूपम्, तदानुरूप्याच्छब्दभेदप्रवृत्तितत्त्वानुरूप्याद् भेदज्ञानं भेदव्यवहारश्च भ-

- /ms (beside line 10) · - /ms (beside line 27)

---

२ य] दृश्यतां पृ॰ ३९१ पं॰ ६ ॥
११ त्त] ॰त्ततत्ववत् प्र॰ । ॰त्तत्ववत् ? ॥
१२ न] दृश्यतां पृ॰ ३९५ पं॰ १० ॥
१३ म] ॰मतद्भवनं च सरूपैकशेषात् तदतद्भवनं तावद॰nayacakra-ms-ya ॥
१७ विच्छेदात्मि] ॰का सा तद॰ प्र॰ ॥
१७ त] तस्यापि नि॰ प्र॰ ॥
२१ भ] भवनवद्भवनवि॰ nayacakra-ms-ya ॥
२४ त] यस्माद् ? ॥
२६ द्र] ॰द्रव्यत्तिर्न शब्दोnayacakra-ms-bhā । ॰द्रव्यत्तिदर्शनार्न शब्दो॰ nayacakra-ms-ya ॥
२८ व] वर्णावर्णात्म॰ प्र॰ ॥

वति । शक्तिमतो द्रव्यस्य शक्तयो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः । यथोक्तम्—

शक्तिमात्रासहायस्य विश्वस्याद्भुतकर्मणः ।
*सर्वथा सर्वदा भावात् क्वचित् किञ्चिद् विवक्ष्यते ॥ वाक्यप° ३ । ७ । २ इति ।§ 1164

* * *

शक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायनवृत्तित्वात् नित्यप्रवृत्तिक्रमप्राप्तिविशिष्टवस्तुभागाभिनिवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुमयोग्यत्वात् । यथा देवदत्तो गच्छति इत्यत्र देवदत्तशब्दो द्रव्यांशविषयनियतशक्तित्वाद् गत्यादीन् नोपात्ते न वा व्युदस्यति तथाख्यातमपि देवदत्तं नोपात्ते न वा व्युदस्यति क्रियांशविषयनियतशक्तित्वात् नामाख्यातयोर्नियतवस्तुभागाभिनिवेशित्वात्, तदनुपात्ययं भेदप्रत्ययः । तथैव गतिस्थितिधृत्यधृत्यादिभेदव्यवहाराः सर्वभेदपर्यनुभवार्थत्वाद् नित्यप्रवृत्तेः ।

देवदत्तवस्तुना गतिरुपात्तैव तदात्मत्वात् अग्निनेवौष्ण्यम् । गच्छतिशब्देन

* * *

विवक्षापि च तासां **शब्दशक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायन-**

---

४ *] कथं पुनरेतदवगम्यते शक्तिः साधनम्, न पुनर्द्रव्यम् इत्याशङ्क्याह --**शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः । सर्वदा सर्वथा भावात् क्वचित् किञ्चिद् विवक्ष्यते** ॥ वाक्यप° ३ । ७ । २ । घटादयो भावा विश्वशब्दवाच्याः, ते च तत्तदुदकाहरणादिकार्यसाधिकानां शक्तीनां समूहरूपाः । अत एव ताः शक्तयः तत्र मात्रा भागाः इति शक्तिसमाहारमात्रं घटादयः । ताश्च शक्तयोऽनेकविधाः, काश्चित् स्वहेतोरेव दैवात् भवन्ति, आश्रयादिनाशं मत्वेव न च विनश्यन्ति यथा बोधप्रदीपानां प्रकाशशक्तयः । काश्चित् पौरुषेऽप्यन्तःस्थिता एव आश्रये निरुध्यन्ते यथा **बा**बो ?धादिशक्तयः, ता हि समभ्यासेन दृष्टद्रव्योपयोगेन जायन्ते । अन्याः सत्यो वा अपरपुरुषप्रयत्नेन विध्वंस्यन्ते, यथा विषस्य मारणशक्तिः बीजस्य अङ्कुरजननशक्तिः । अन्याः प्रभावातिशयवता विपरिवर्त्यन्ते, यथा योगिना सर्वभावानां रूपपरिवृत्तिराधीयते । काश्चित् कालपरिवासेन व्यज्यन्ते यथा धर्माधर्मशक्तिः फलदाने इत्याद्यनेकविधमुन्नेयम् । एवमनेकस्वभावत्वे शक्तिसमुदायस्य विचित्रे कार्ये यथाशक्ति भेदविवक्षायां प्रतिनियतसाधनभावोपपत्तिः । द्रव्यस्य तु साधनत्वे तस्यैकरूपत्वात् कार्यवैचित्र्यं न स्यादित्यर्थः । तदुक्तं भाष्ये गुणसमुदायः साधनम् इति । प्रधानक्रियाया एकैकशक्तिसाध्यत्वाभावात् समुदायग्रहणम्, गुणक्रियापेक्षया तु प्रत्येकं शक्तेः साधनता, तस्याश्च प्रधानक्रियापेक्षया वैचित्र्यात् कर्माकर्मादिविरूपताया वा प्रत्येकं साधनत्वेऽपि समुदायग्रहणं शक्तीनां साधनत्वेन आसां भेदात् एकस्य कार्यभेदोपपत्तिव्याख्यापनार्थम् । तेन अनेकशक्तेरपि पदार्थस्य सत्येव तथा स्थानेऽपि काचिच्छक्तिः क्वचिदुद्भूता विवक्ष्यते इति घटं पश्य, घटेनोदकमानय, घटे उदकं निधेहि इत्यादिकर्मकरणादिभावो नियमेन उपपद्यत इति न कारकसाङ्कर्यप्रसङ्गः । द्रव्यस्य तु एकस्वभावत्वात् कर्मकरणादित्वं नोपपद्यते इति गर्भीकृतेयमत्र शक्तिः शक्तेः साधनत्वे बोद्धव्या । इति वाक्यपदीयस्य तृतीयकाण्डे साधनसमुद्देशे हेलाराजकृतायां व्याख्यायाम् ॥

७ त्र] दृश्यतां पं° २१ ॥

**वृत्तित्वात्,** सत्यपि सर्वसर्वात्मकत्वे द्रव्यार्थनयस्य वर्णात्मकघटशब्दशक्तेः पृथुकुक्ष्यूर्ध्वग्रीवाद्याकारप्रत्यायने नियता वृत्तिर्नान्यत्र, रूपादिद्रव्यशक्तिप्रवृत्तिभेदनियतेन्द्रियग्राह्यत्ववच्छब्दशक्तिप्रवृत्तिभेदाद् भेदज्ञानव्यवहारावित्यर्थः । तद्व्याचष्टे --**नित्यप्रवृत्ती**त्यादिना, नित्यप्रवृत्तेः क्रमप्राप्त्या विशिष्टो यो वस्तुभागस्तदभिनिवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुं शब्देरयोग्यत्वादिति । तन्निदर्शयति --**यथा देवदत्तो गच्छती**त्यादि यावद् **न वा व्युदस्यती**ति गतार्थम् । **तथाख्यातमपी**त्यादि तद्वदेव गतार्थं यावत् **क्रियांशविषयनियतशक्तित्वा**दिति, **नामाख्यातयोर्नियतवस्तुभागाभिनिवेशित्वा**दिति तदेव कारणम्, **तदनुपात्ययं भेदप्रत्यय** इत्युपसंहरति, द्रव्यशक्त्यंशनियतशब्दप्रवृत्त्यनुपाति भेदज्ञानमित्यर्थः । **तथैव गतिस्थितिधृत्यधृत्यादिभेदव्यवहाराः** - /ms **सर्वभेदपर्यनुभवार्थत्वाद् नित्यप्रवृत्तेः** यासौ सततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भवनभेदान् पर्यनुभावयामि द्रव्यम् इति प्रवर्तते, यदि तान् नानुभवेत् क्रियाभेदान् द्रव्यं ततो न ते स्युः तेनापर्यनुभूयमानत्वात् खपुष्पवत् । सर्वभेदं निर्भेदं बीजं द्रव्यम् इति चेष्यते । तद्वा द्रव्यं न स्यात् भेदापर्यनुभवनात् खपुष्पवत्, एवं तद् द्रव्यं बीजं स्याद् यदि तान् भेदान् पर्यनुभवेत् । § 1165

आह--यथानन्तरोक्तं **देवदत्तशब्दो गत्यादीन् नोपादत्ते न च व्युदस्यति अंशनियतत्वा**च्छब्दशक्तीनां प्रवृत्तत्वाच्च तथा वस्तुनापि देवदत्तेन गत्यादयः किमनुपात्ताव्युदस्ताः ? नेत्युच्यते विशेषः — **देवदत्तवस्तुने**त्यादि, देवदत्तशब्देनानुपादीयमानापि हि **गतिर्वस्तुना** तेन **उपात्तैव** अंशनियत्यभावाद् विशेषहेतोश्च । को विशेषहेतुरिति चेत्, उच्यते --**तदात्मत्वात्,** गत्याद्यात्मको हि देवदत्तः तत्पर्यनुभवनात्, यद् यदात्मकं तेन तदुपात्तम्, **अग्नेनेवौष्ण्यम्,** यथा अग्नेरौष्ण्यमात्मेत्यग्निनोपात्तं तथा देवदत्तेन गतिरिति । § 1166

395/mj

च देवदत्त उपात्तः, शब्दस्य द्रव्यभेदपर्यनुभवनप्रवृत्त्यात्मत्वात् । § 1167

अर्थोपनिपातित्वात्तु वचसो [देवदत्त]शब्देनापि गत्यादि न नोपात्तम्, अर्थवत् तद्भवनार्थत्वात् । देवदत्तशब्दो हि द्वितीयादिविनाभूतः केवले कर्तर्येव प्रयुज्यते, कर्ता च क्रियायाः साधनत्वात् क्रियासु तथा तथा वर्तमानस्तथा तथा शब्दोऽपि तत्तदर्थवाची । यथाहुरन्ततः--अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते, वृक्षः अस्तीति गम्यते पा० म० भा० २ । ३ । १ । § 1168

३ हारा] °रादित्यर्थः प्र° ॥
१० हा] °हारःnayacakra-ms-bhā ॥
१६ रोक्तं] दृश्यतां पं° ३ ॥
२९ अ] दृश्यतां पृ° २६१ पं° ६ टि° २ ॥

एवं तावद् देवदत्तवस्तुना गतिरुपात्ता न देवदत्तशब्देन इति विशेष उक्तः । किं गच्छतिशब्देन गच्छत्यर्थेन च देवदत्तार्थ उपात्तो न ? इत्यत्रोच्यते --**गच्छतिशब्देन च देवदत्त उपात्त** इति, पुँल्लिङ्गं देवदत्ताभिसम्बन्धात् । शब्देन चेदर्थ उपात्तोऽर्थेन गच्छतिलक्षणेन देवदत्तार्थ उपात्त एव तदात्मत्वादिति विशेषः । यथा **न, तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद् भवनमेवेदं गतिस्थितिधृत्यधृत्यादि** इति गम्यादिप्रवृत्तिभवनेन भवद्भवनमुपात्तमेव उभयात्मत्वाद् वस्तुनो द्रव्यक्रियात्मद्वैरूप्यात् अर्थेन गन्त्राद्युपात्तं देवदत्तादि गमयतीत्युक्तं क्रियाया द्रव्यभेदपर्यनुभवात्मकत्वादिति तथा शब्देऽप्येष विधिः --**गच्छतिशब्दे[ने]**त्यादि, गच्छतिशब्देन च देवदत्त [उपात्त] उक्तवदुभयवस्तुत्वात् प्राक् **शब्दस्य द्रव्यभेदपर्यनुभवनप्रवृत्त्यात्मत्वा**दिति ।
§ 1169

एवं तावत् सर्वसर्वात्मकद्रव्यार्थनयत्वादसतो भेदान् कल्पितानाश्रित्य भेदज्ञानव्यवहारावुक्तौ, परमार्थतस्तु **अर्थोपनिपातित्वात् तु वचस** इत्यादि । **[देवदत्त]शब्देनापि गत्यादि न नोपात्तम्,** उपात्तमेव, अर्थवत् । कुतः ? **तद्भवनार्थत्वात्,** तस्य भवनं तद्भवनं गत्यादिभवनमेवार्थो देवदत्तशब्दस्येति देवदत्तार्थेनेव गत्याद्यर्थोऽप्युपात्त इति गृहाण । मा शङ्किष्ठाः--तद्भवनार्थत्वमसिद्धमिति, अत आह — **देवदत्तशब्दो ही**त्यादि । यदा स्वार्थ-द्रव्य-लिङ्ग-सङ्ख्या-कर्मादिवाचि प्रातिपदिकं, विभक्तयस्तदभिव्यञ्जिकाः, विवक्षावशाच्च कारकविशेषाश्रयणम्, कर्मादीनामपि कारकत्वात् कर्तृत्वमिष्टमेव
- /ms इति सिद्धान्तस्तदा विशेषानाश्रयणेऽपि द्वितीयादिविनाभूतो देवदत्तशब्दः केवले कर्तर्येव प्रयुज्यते, कर्ता च क्रियायाः साधनत्वात् क्रियामन्तरेण [न] भवति, क्रियाश्च आसिशयितिष्ठत्यादयः, तासु तासु स्वयमसौ कर्ता तेन तेन प्रकारेण वर्तमानस्तथा तथा शब्दोऽपि तत्तदर्थवाची । **यथाहुरन्तत** इति ज्ञापकम्, विचारावसाने वैयाकरणैरेतद् निश्चितम् --**अस्तिर्भवन्तीपर** इत्यादि । लड् भवन्ती इत्युच्यते । शेषं गतार्थम् । प्रथममध्यमोत्तमान्तमन्यदपि क्रियापदं भवत्येव दिङ्मात्रोल्लिङ्गनात् त्वमसि अहमस्मि तिष्ठति तिष्ठसि तिष्ठामि इत्यादीनां नियमाभावात्, क्रियापदेन विना न भवति इत्येष हि नियमः । § 1170

---

५ न] दृश्यतां पृ॰ ३९३ पं॰ १ ॥
६ व] ॰वनेन न भव॰nayacakra-ms-bhā ॥
७ ग] **गंत्वा-द्यु॰**nayacakra-ms-vinayacakra-ms-ḍenayacakra-ms-liṃ । **गत्वाद्यु॰** nayacakra-ms-raṃ nayacakra-ms-hī nayacakra-ms-pā ॥
१७ स्वा] **॰भ्यर्थे द्रव्य॰** प्र॰ । दृश्यतां पृ॰ ५६ पं॰ १३ ॥
१८ र्मादिवा] ॰वाचिप्रातिपदिकेnayacakra-ms-bhā ॥
१८ द] **॰भिष्वञ्जिकाः** प्र॰ ॥
२० विशेषानाश्र] **॰श्रयाणामपि** प्र॰ ॥
२२ ता] **तासु स्वय॰**nayacakra-ms-ya ॥
२४ अ] दृश्यतां पृ॰ २६१ पं॰ ५ ॥
२६ भ] **भत्येव** प्र॰ ॥
२६ स्मि] **ति तिष्ठसि** प्र॰ ॥
२७ देन] **विना भवति** प्र॰ ॥

396/mj

देवदत्तशब्दो न देवदत्तकर्त्रर्थप्रत्यायनार्थो नानर्थकः, अर्थप्रत्यायनार्थत्वाद् वचनप्रवृत्तेः । देवदत्तशब्देन देवदत्तार्थो विज्ञायमान एवानूद्यते स गच्छति इति विधानाय, गतिविधानं स्थानविपरीतदेवदत्तकर्तृकगमनप्रतिपादनाय यो गच्छति स देवदत्तः इति तथा योऽसौ स गच्छति इति । § 1171

तथा चेदमानर्थक्यं पौनरुक्त्यं च अविभक्तविध्यनुवादार्थं वक्तारं प्रति । प्रथमपदोपादानसन्निहितार्थव्यञ्जनं द्वितीयपदं तत्सन्निधिमात्रेण तथा प्रतिपत्तुः श्रोतुरुपकारकं नान्यस्य । § 1172

स एष उपात्तगत्यर्थो **देवदत्तशब्दो न देवदत्तकर्त्रर्थप्रत्यायनार्थो नानर्थकः** सम्यक्प्रत्यवेक्षायामिति वर्तते, तस्या **अर्थप्रत्यायनार्थत्वाद् वचनप्रवृत्तेः** अर्थं प्रत्याययिष्यामि इति वचनं प्रवर्तते तस्मान्नानर्थकम्, समीक्ष्यकार्युक्तित्वात् । प्रमाणान्तरोपलब्धत्वाच्च देवदत्तस्य न देवदत्तवाचकः, किं तर्हि ? **देवदत्तशब्देन देवदत्तार्थो विज्ञायमान एवानूद्यते,** ज्ञातार्थो ह्यनुवादो विध्यङ्गत्वात् । किमर्थोऽनुवाद इति चेत्, **स गच्छतीति विधानाय,** देवदत्तविशिष्टगतिविधानाय । गतिर्ह्यज्ञातार्थत्वाद् विधीयते देवदत्तकर्तृका । देवदत्तानुवादो गतिविधानार्थोऽस्तु, गतिविधानं किमर्थमिति चेत्, उच्यते --**स्थानविपरीतेत्यादि** । अध्यारूढदेवदत्तकर्तृसाधनं स्थानविपरीतं गमनं विवक्षितम्, तत्प्रतिपादनाय देवदत्तं गतिकर्तृत्वेन अध्यारोहयामि इति प्रयुज्यते । तन्निदर्शयति --**यो गच्छति स देवदत्त इति तथा योऽसौ स गच्छति इति** देवदत्तो गतिक्रियायाः कर्तेति अज्ञातार्थस्य ज्ञातार्थेनानूद्यमानेन विधानाद् द्रव्यक्रियावाचिनोश्चाभिन्नार्थत्वाच्च वस्तुतः । § 1173 - /ms

एवं सति पौनरुक्त्यमिति चेत्, अभ्युपगम्यते **तथा चेद**मित्यादि । एवं च कृत्वा देवदत्तः इत्युक्ते विशिष्टक्रियात्मककर्तृनिर्देशाद् गतेर्गतत्वाद् गच्छतिशब्दोऽनर्थकः पुनरुक्तं च तथा गच्छतिशब्दादेव विशिष्टकर्तृकगमनवचनाद् देवदत्तार्थगतेर्देवदत्तशब्दोऽपि । तौ च आनर्थक्यपौनरुक्त्यदोषौ न विभक्तविध्यनुवादार्थं वक्तारं श्रोतारं वा प्रति भवतः, *कं तर्हि प्रति ? उच्यते

---

१० त्य ] °त्यपेक्षाया° प्र° ॥
१० व ] वर्ततेस्याnayacakra-ms-bhā ॥
१० अ ] दृश्यतां पातञ्जलमहाभाष्ये २ । १ । १ । दृश्यतां पृ° १३३ टि° ११ ॥
१२ का ] °कारयुक्ति° प्र° ॥
१७ विप ] °रीतीत्यादि प्र° ॥
१९ त ] तप्दाnayacakra-ms-bhā ॥
१९ था ] योऽसौ गच्छतिnayacakra-ms-ya ॥
२४ ब्दा ] °ब्दादेविशि°nayacakra-ms-bhā । °ब्दादेर्विशि° nayacakra-ms-ya ॥
२६ नुवा ] °वादार्थ प्र° ॥
२६ * ] किं प्र° ॥

**--अविभक्तविध्यनुवादार्थं वक्तारं प्रति,** अविभक्तो विधिरयमविज्ञातार्थत्वाच्छब्दः अनुवादोऽयं विज्ञातार्थत्वाद् विध्यङ्गत्वाच्च इत्यविवेक्तारं वक्तारं श्रोतारं वाऽऽसाद्य आनर्थक्यं पौनरुक्त्यं वा स्यादन्यतरस्यैवानयोः, न विवेक्तारं वक्तारं श्रोतारं वा आसाद्य आनर्थक्यं पौनरुक्त्यं वा स्यादन्यतरस्यैवानयोर्विवेक्तारं विध्यनुवादार्थौ इति । § 1174

स्यान्मतम्--अस्तु स्वयं निश्चितद्रव्यक्रियात्मकैकवस्तुविध्यनुवादार्थं वचनं वक्तारं प्रति, कथं पुनः श्रोतुरिति चेत्, उच्यते--तस्यापि **प्रथमपदोपादानेत्यादि** यावच्छ्रोतुरुपकारकमिति । प्रथमं पदमत्र देवदत्तः इति गच्छति इति वा यथाविवक्षं प्रयुक्तम् । प्रथमपदमुपादानमस्य सोऽर्थः
397/mj प्रथमपदोपादानः,

* * *

प्रथमपदोपात्तार्थमेव द्वितीयपदम् उद्ग्राहितार्थविवरणार्थत्वाद् भाष्यग्रन्थवत्, नादित एव तदर्थज्ञानस्य कारकं तथाव्यक्तव्यञ्जनत्वात् प्रदीपवत् ।

* * *

सन्निहितश्च द्वितीयपदाभिधेयाभिमतः, तस्य व्यञ्जनशब्दो द्वितीयपदम्, **तत्सन्निधिमात्रेण** प्रयोगमात्रेण प्राक् प्रतिपन्न एवाभिव्यज्यते सोऽर्थस्तेनेत्यर्थः, **तथा प्रतिपत्तुः श्रोतुरिति** वक्तुरभिप्रायमूहितुं समर्थस्य गृहीतसङ्केतस्येत्यर्थः **उपकारकं** प्रतिपत्त्याधानसमर्थं, **नान्यस्येति** अविभक्तविध्यनुवादार्थस्याकृतसङ्गीतेर्वा । न स पुनः शब्दापराधो यदसौ तदर्थं न प्रतिपद्यते, यथा--न
- /ms हि स सूर्यस्यापराधो यदेनमुलूको न पश्यतीति । तस्मादेकार्थ्ये सत्यपि विध्यनुवादभिन्नार्थावेतौ । § 1175

अत्र प्रयोगः **--प्रथमपदोपात्तार्थमेव द्वितीयपदम्, उद्ग्राहितार्थविवरणार्थत्वात्,** उद्ग्राहितो गमनभवनाभिसम्बन्धी देवदत्तः, तद्विवरणार्थो गच्छतिशब्दः, देवदत्तः इत्युक्ते आगृहीतगतिरपि न परेण ज्ञायत इत्युक्तत्वात् । यदुद्ग्राहितार्थविवरणार्थं पदं तत् पूर्वपदोपात्तार्थमेव दृष्टम्, **भाष्यग्रन्थवत्,** यथा **वृद्धिरादैच्** पा० १ । १ । १ इति सूत्रेणैवोपात्तमर्थं **भाष्यग्रन्थे** पदानि विवृण्वन्ति--वृद्धिः इतीयं संज्ञा भवति आदैच्वर्णानामिति, साध्वनुशासनादिविचाराधारेण सूत्रेणैवोपात्तत्वात् । तथा चोक्तम्-- § 1176

सूत्रेष्वेव हि तत् सर्वं यद् वृत्तौ यच्च वार्तिके ।*

---

१ नु] °नुवक्तारंnayacakra-ms-ya ॥
१४ व्य] व्यञ्जनं शब्दो ? ॥
१४ ब्दो] **द्वियपदम्** प्र° ॥
२६ आ] **आदैव**आदैज् ?**वर्णा°** प्र° ॥
२६ सा] **साद्यनु°**nayacakra-ms-ya ॥
२८ *] न हि सूत्रत एव शब्दान् ग्रतिपद्यते । किं तर्हि ? व्याख्यानतश्चेति । परिहृतमेतत्--तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति । ननु चोक्तम्--न केवलानि चर्चापदानि व्याख्यानम्--वृद्धिः, आत्, ऐजिति । किं तर्हि ? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवतीति । अविजानत एतदेवं भवति । सूत्रत एव हि शब्दान् प्रतिपद्यते । इति **पात**ञ्जलमहाभाष्ये पस्पशाह्निके । एतदुपरि **कैयटविरचिते भाष्यप्रदीपोद्योते** पूर्वार्धमात्रमस्य श्लोकस्य उद्धृतं दृश्यते ॥

उदाहरणमर्थस्य प्रत्युदाहरणं पशोः ॥ इति ।§ 1178

स्यान्मतम्--प्रथमपदोपात्तार्थं चेत् प्रथमपदोच्चारणकाल एव तथा प्रतिपत्तुः श्रोतुरुपकारकं स्यात् तेनैव व्यक्तत्वादिति । अत्रोच्यते--कस्यचिद् भवत्यपि, केषाञ्चिद् **नादित एव तदर्थ[ज्ञान]स्य कारकम्, तथाव्यक्तव्यञ्जनत्वात्,** तेन प्रकारेण व्यक्तस्तथाव्यक्तः, देवदत्तशब्दोच्चारणमात्रेण श्रोतुः विशिष्टक्रियाविषयकर्तृको देवदत्तः इत्येतावत् तावदाधीयते बुद्धौ तस्मात् तथाव्यक्तः, तस्य व्यञ्जनो गच्छतिशब्दः नापूर्वं किञ्चिदाह तदनुवादित्वात्, अतस्तथाव्यक्तव्यञ्जनत्वात् **प्रदीपवत्,** यथा प्रदीपः प्रागभिव्यक्तं घटमपवरकस्थं व्यनक्तीति नादित एव तदर्थज्ञानस्य कारकः तथात्र वाक्ये गच्छतिशब्दोऽपीति । अथवा द्रव्यार्थवादे कुम्भकारोऽपि विद्यमानमेव घटं तथाभिव्यनक्ति नाविद्यमानमुत्पादयति प्रदीपवत् । तस्मात् कुम्भकारस्यापि व्यक्तव्यञ्जनत्वात् पिण्डाद्यवस्थायामपि व्यक्त एव घटः क्रियाक्रमाभिव्यक्तिप्रत्यक्षत्वात् प्रदीपाभिव्यक्तघटवत्, तथा देवदत्तो गच्छति इत्यत्रापि व्यक्तव्यञ्जनत्वाद् नादित एव तदर्थज्ञानस्य कारक इति । § 1179

398/mj

तथा च विनापि तथाभूतशब्दसन्निधिं पूर्वश्रुतशब्दोपात्तार्थवृत्तिरेव, तथानियतत्वात्, यथा प्रविश पिण्डीमिति । वक्तुर्विव-

---

१ ण] **॰णमंथस्य** प्र॰ ॥
२ ए] एतच्चिह्नान्तर्गतः **॰व तथा प्रतिपत्तुः** इत्यत आरभ्य **श्रोतुरपि भवन्ती दृष्टा त॰** पृ॰ ३९९ पं॰ १० इत्यन्तः पाठो nayacakra-ms-ya प्रतिषु **इतश्चासिद्धिः स्ववि॰** पृ॰ ४०० पं॰ १८ इत्यनन्तरं वर्तते ॥
४ त] दृश्यतां पं॰ २३ ॥
६ बुद्धौ] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
८ घ] **घटमपरमस्थं**nayacakra-ms-bhā । **घटमस्थं** nayacakra-ms-ya ॥
१४ ए] **एव च तद॰**nayacakra-ms-ya ॥
१६ य] वाक्यैकदेशप्रयोगाद्वा ॥ अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः पदेषु च पदैकदेशान् । वाक्येषु तावद्वाक्यैकदेशान् प्रविश, पिण्डीम्, प्रविश, तर्पणम् इति । पदेषु पदैकदेशान् देवदत्तो दत्तः, सत्यभामा भामा इति । एवमिहापि, संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येत्येतस्य वाक्यस्यार्थे संप्रसारणात्संप्रसारणस्येत्येष वाक्यैकदेशः प्रयुज्यते । ते निर्वृत्तस्य विधिं विज्ञास्यामः संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्य इति । इति **पातञ्जलमहाभाष्ये** १ । १ । ४४ । अस्य व्याख्या— प्रविशेति । प्रवेशनक्रिया कर्म योग्यमाक्षिपति, तत्र पिण्ड्यां प्रवेशासंभवाद् गृहप्रतिपत्तिः । एवं पिण्डीमिति कर्म योग्यां क्रियामाक्षिपद्भक्षणक्रियां प्रकरणवशात् प्रत्याययति, एवं संप्रसारणादित्येतन्निर्वृत्तार्थमाक्षेप्स्यतीत्यर्थः । यथा च पदैकदेशप्रयोगस्तथा सिद्धे शब्दार्थसंबन्धे इत्यत्र प्रतिपादितम् ॥ इति **कैयटविरचितायां प्रदीपाख्यायां पातञ्जलमहाभाष्यव्याख्यायाम्** १ । १ । ४४ । अस्य व्याख्या--वाक्येष्विति । स्वार्थबोधनाय वाक्येषु प्रयोक्तव्येष्वित्यर्थः । योग्या क्रिया दर्शनादिरपीत्यत आह--प्रकरणेति । तत्तद्वाक्यस्य वाक्यार्थे शक्तिग्रहणकाले तत्तदेकदेशस्यापि तत्तद्वाक्यार्थे शक्तिग्रहः, पदैकदेशस्य पदार्थ इवेति शक्त्यैव बोधः । पूर्वपरिहारे संप्रसारणपदस्य तज्जन्यवर्णे उपचारात्प्रयोगः

क्षायामन्यथोक्त्यानर्थक्यात् अर्थप्रकरणाद्यापादनाच्च अन्ते नाम्नः कर्तृत्वप्रतिपत्तिः श्रोतुरपि भवन्ती दृष्टा । तस्माद् वक्तृवत् प्रतिपत्तिः श्रोतुरपि । § 1180

मा च मंस्थाः--केवलोपपत्तिमात्रकमेवैतदुच्यते प्रथमपदोपात्तार्थवाचि द्वितीयपदम् इति । किन्तु लोकव्यवहारेऽपि प्रसिद्धिस्तथा दृष्टेति तद् दर्शयितुमाह --**तथा च विनापीत्यादि** यावत् **प्रविश पिण्डीमिति** इति । एवं च कृत्वा **तथाभूतस्या**नुवादमात्रभिन्नार्थस्य **शब्दस्य सन्निधि**मन्तरेणापि **पूर्वश्रुतशब्दोपात्तस्यार्थस्य वृत्तिरेव तथानियतत्वात्,** तथा हि तच्छब्दवृत्तिर्नियता यथा क्वचिदश्रूयमाणद्वितीयपदोऽपि तत्पदार्थविषयप्रतिपत्तिहेतुर्भवति तथैव च प्रतिपत्तारो दृश्यन्ते, यथा प्रविश पिण्डीम् इत्यत्र प्रविशशब्दश्रवणात् प्रवेशयोग्यं प्रकरणादिभिः सुषिरं गृहादि कर्मपदमत्र इति पिण्डीम् इति च कर्मपदश्रवणादनन्तरोक्तप्रविश्यसम्भवात् तद्योग्यभक्षिक्रियाकर्तृकर्मकम् इति प्रतिपद्यन्ते । - /ms तस्मात् प्रथमपदोपात्तार्थव्यञ्जनं द्वितीयपदम् इति साधूक्तम् । यथा देवदत्तशब्दोपात्तार्थवाची गच्छतिशब्दस्तथा गच्छति इति च तिपा उपात्त एव कर्ता, किं कारणम् ? **लः कर्तरि च** इति कर्तरि विहितलकारादेशत्वात् तिपः । कोऽसौ कर्ता इति चेत्, उच्यते--स च देवदत्त एव विशिष्टः, विशिष्टकर्तृविषयगमनविवक्षितत्वात् । अथवा गच्छतिः स्वांशोपात्तार्थविषयक एव तच्छब्दव्यवस्थाप्यस्वरूपत्वात्, *यो यच्छब्दव्यवस्थाप्यस्वरूपः शब्दः स स्वांशोपात्तार्थविषयक एव दृष्टः, यथा घटशब्दव्यवस्थाप्योर्ध्वत्वादिरिति । § 1181

एवमनिच्छतो दोष उच्यते --**वक्तुर्विवक्षायामन्यथोक्त्यानर्थक्या**दिति, देवदत्तकर्तृविषयां गतिं *प्रतिपिपादयिषता हि वक्त्रा गच्छतिः प्रयुक्तो यदि तमेवार्थं न ब्रूयादुक्तेर्वाच्यः कोऽर्थः स्यात् ? इत्यानर्थक्यं प्राप्तमिति । किञ्चान्यत्, **अर्थप्रकरणाद्यापादनाच्च,** *संसर्गविप्रयोगसाहचर्यविरोधार्थप्रक-

। अत्र त्वेकदेशेन शक्त्या तदर्थप्रतिपत्तिरिति भेदः । तदाह--आक्षेप्स्यतीति । आक्षेपोऽत्र बोधनमेव । भाष्ये इत्येतस्य वाक्यस्यार्थे इति । अत्र वाक्यपदं पदसमुदायपरम् । इत्येतस्य--इत्येतदर्थकस्य, संप्रसारणादुत्पन्नो यस्तस्मादित्यस्येति संप्रसारणस्य यत्कार्यं तस्येति च वाक्यस्यार्थे इत्यर्थः । इति **नागेशभट्टविरचितायाम्** उद्योताभिधायां **पातञ्जलमहाभाष्यप्रदीपस्य** व्याख्यायाम् १ । १ । ४४ ॥
८ स्य] **वृत्तेरेव** प्र॰ ॥
८ त] **तथाहि**nayacakra-ms-bhā प्रतौ नास्ति ॥
९ प] ॰पदेऽपि ? ॥
१० य] **तथा प्रविश** प्र॰ । तद्यथा प्रविश ? ॥
१२ प्र] **॰प्रविशिसम्भ॰** प्र॰ । ॰प्रवेशासम्भवात् ? ॥
१५ लः] दृश्यतां पृ॰ १२६ टि॰ ७ ॥
१८ *] **योग्यं यच्छ॰**nayacakra-ms-bhā ॥
१९ त्वा] **॰त्वादिविति** प्र॰ ॥
२१ व] **वक्तुवि॰** प्र॰ । **वक्तृवि॰** ? ॥
२२ *] **॰दुक्तेर्वान्यः**nayacakra-ms-bhānayacakra-ms-pānayacakr ॥
२३ ब्रूयादु] दृश्यतां पृ॰ १२७ पं॰ ११ । दृश्यतां **वाक्यपदीये** २ । ३१७, ३१८ ॥
२४ *] [In the print edition there is a footnote reference but no corresponding note.]

रणलिङ्गशब्दा * 399/mj

* * *

अनया च शब्दार्थगतिभावनया भवनमेवेदमेकरूपं देवदत्तभेदं गतिस्थित्यादिभेदं वा भवति, तेन तथा भूयत इति ।

ननु कारकाणां प्रवृत्तिविशेषः क्रिया । सर्वत्र प्रवृत्तिसम्भवे केनचित् फलोद्देशेन कारकवत्याः परिग्रहार्थं विशेषग्रहणम् । सर्वभावेषु हि प्रवृत्तिरस्ति सहभाविभिरसहभाविभिश्च विशेषैः प्रत्याश्रयं सहिता प्रादुर्भावतिरोभावात्मिका

* * *

न्तरसन्निध्यौचितीदेशकालव्यक्तिस्वरादिसामर्थ्यभेदैरर्थस्यानवगम्यमानस्य वक्त्रभिप्रायानुवर्तिभिर्व्याख्यातृभिर्विशेषेऽवस्थापनं दृष्टम्, तच्च तेनैव शब्देनोपात्तार्थत्वे घटते नान्यथेति । तथा श्रोत्राप्यश्रुतोऽपि गृह्यते स इति गच्छति इत्युक्ते को गच्छति ? देवदत्तः इति **अन्तेऽ**वसाने **नाम्नः कर्तृत्वप्रतिपत्तिः**, यद्यपि तिपा उपात्तं कर्तृत्वं तथापि यां तां गतिं गत्वा नामपदार्थ एव कर्ता इति प्रतिपत्तिः **श्रोतुरपि भवन्ती दृष्टा, तस्माद्धेतोस्तस्या** दृष्टायाः प्रतिपत्तेः, क्वेव ? **वक्तृवत्**, वक्तरीव वक्तृवत्, यथा वक्तरि **प्रतिपत्तिः** प्रागुपजाता गच्छतिं देवदत्तकर्तृविषयं प्रयुञ्जेऽहम् इति **श्रोतुरपीति** । एवम् अन्योन्याभिसम्बद्धद्रव्यक्रियावाचिनौ नामाख्यातशब्दौ इति साधूक्तम् । एवमुपपत्त्यन्तरं शब्दार्थोऽपि द्रव्यक्रिया- त्मकवस्तुविषय इति भावितम् । - /ms

§ 1182

**अनया चे**त्यादि । एतयापि **शब्दार्थगतिभावनया**स्मद्व्याख्यातया लोके दृष्टया **भवनमेवेदमेकरूपं** देवदत्तभेदं गतिभेदं स्थितिभेदं धृत्यधृतिहसनकथनादिभेदं **वा भवति** सर्वत्र व्यक्तेर्भवति । यस्मात् **तेन तथा भूयत इति,** इतिशब्दहेत्वर्थत्वाद् यस्मादेकमेव भवनं देवदत्तद्रव्यरूपं गतिस्थित्यादिक्रियारूपं च भवति, तेनैव तेन तेन रूपेण भूयते, न भवनशून्यमन्यत् किञ्चिदस्ति, भवनमेव भवतीति । § 1183

**ननु कारकाणा**मित्यादि । भवनमेवाविशिष्टं सर्वत्र क्रिया इत्यापादिते तदमृष्यता इदं **वैयाकरणेन** क्रियालक्षणमभिधीयते --**प्रवृत्तिविशेषः क्रिया**

---

१ *] प्रतिपादविषयताnayacakra-ms-bhā । प्रतिपादविषयता nayacakra-ms-ya ॥
१४ दृ] दृष्टा तं॰nayacakra-ms-ya ॥
१४ स्मा] ॰स्माद्धेतोस्तस्मा दृ॰nayacakra-ms-bhā । nayacakra-ms-vi विना ॰द्धतोस्तस्मा दृ॰ nayacakra-ms-ya । ॰द्धतोस्मात्दृ॰ nayacakra-ms-vi ॥
१६ च्छ] ॰तिदे॰ प्र॰ ॥
१७ म्ब] ॰म्बन्धद्रव्य॰ प्र॰ ॥
१८ त्त्य] ॰त्त्यनन्तरं प्र॰ ॥
२२ वा] चाभवति प्र॰ ॥
२२ व्य] व्याक्तेर्भवति nayacakra-ms-ya । व्या(?ा)क्तार्भवति nayacakra-ms-bhā । व्यक्तौ भवति ? व्यक्तीभवति ? ॥
२६ मेवा] ॰वावशिष्टं प्र॰ ॥

इत्येतन्न्यायः क्रियालक्षणम्, न सततसम्प्रवृत्तिमात्रम् । तत्र कारकाणाम् इत्येतस्य व्याख्यानमुद्भूतशब्दैः कारकस्यैव क्रियात्वं मा विज्ञायि भवता, कारकपृथग्भूता गृह्यताम् इति भेददर्शनार्था षष्ठी । विशेषग्रहणं पुनः किमर्थमिति चेत्, तत आह **--सर्वत्र प्रवृत्तिसम्भव** इत्यादि । **केनचित् फलोद्देशेने**ति सांव्यवहारिकमोदनादिफलमुद्दिश्यते, **कारकवत्या** इति स्वाश्रयपृथग्भूतकरणादिसाधनवत्या इत्यर्थः, सर्वा हि क्रिया कर्तृसमवायिनी कर्मसमवायिनी वा स्यात् पचतिभिनत्तिवत् फलवतीति एवंरूपायाः पचिपठिगम्यादेः **परिग्रहार्थं** भिद्यादेश्च **विशेषग्रहण**मिति । § 1184

प्रवृत्तिमात्रपरिग्रहे त्वत्पक्षे दोष उच्यते **--सर्वभावेषु हि प्रवृत्तिरस्ती**त्यादि, रूपादिभिः **सहभाविभिरसहभाविभि**र्गतिस्थित्यादिभिश्च **विशेषैः प्रत्याश्रयं** वस्तुनि वस्तुनि **सहिता** युक्तैव सा प्रवृत्तिः, **प्रादुर्भावतिरोभावात्मिके**ति रूप-

- /ms, 400/mj मस्याः कथयति, **प्रचयापचयफले**ति कार्यस्य प्रवृत्तिमाह क्रियायां

* * *

प्रचयापचयफला इत्युक्तं भाष्यकारेण--सर्वस्य मुहूर्तमप्यनवस्थानात् किं फलं लौकिकम् ? विशेषास्तूपजायमानाः स्वाश्रयात् कारकान्तराण्यपेक्षन्ते, यथा विक्लेदस्तण्डुलाश्रयः काष्ठादीन्यपेक्षते । तत्र या प्रवृत्तिः सा लोकव्यवहारानङ्गम् । तस्मात् प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामान्यम् ।

भावश्च क्रिया इति यदुच्यते तन्न सिध्यति । प्रवृत्तिसामान्यस्य कुतः क्रियात्वं फलोद्देशकारकसम्बन्धाभावात्, गच्छत्यादिव्यापिरूपता वा प्रवृत्तिविशेषत्वेनाभूतत्वात् कारकवत्, वैधर्म्यं तद्भेदवत् । तथा च द्रव्यद्वितीयतापि नैव प्रवृत्तिसामान्यस्य, असत्त्वात्, खपुष्पस्येव । असत्त्वं च अद्रव्यत्वे सति अगत्यादित्वात् खपुष्पवत् ।

* * *

गृहीत्वोक्तं **भाष्यकारेणे**ति तस्याः सर्वत्र वस्तुनि सम्भवन्त्याः स्वरूपफलसद्भावप्रदर्शनार्थमुक्तमिति ग्रन्थं योजयति, **सर्वस्य मुहूर्तमप्यनवस्थानात् किं फलं लौकिकं** सांव्यवहारिकम् ? इति व्यवहाराक्षमतां दर्शयति । विशेषग्रहणसामर्थ्यात् पुन**र्विशेषास्तूपजायमानाः** पच्यादय ओदनादिफलान्तरहेतवः **स्वाश्रयात् कारकान्तराण्यपेक्षन्ते** । तन्निदर्शयति **--यथा विक्लेदस्तण्डुलाश्रयः काष्ठादीन्यपेक्षते** इति । तदुपनयति **--तत्र या प्रवृत्ति**रित्यादि गतार्थं यावद् **न प्रवृत्तिसामान्य**मिति । इति विशेषग्रहणसाफल्यं व्याख्यातं भवति प्रवृत्तिसामान्यस्याक्रियात्वं च । § 1185

---

५ क] °कवृत्त्या प्र° ॥
१२ प्र] प्रचयाप्रचयफलेति कार्यसाप्रवृत्तिमहि प्र° ॥
१३ स] दृश्यतां पृ° ३७९ पं° ८, पृ° ३८० टि° १ ॥
१६ न] दृश्यतां पं° २९, पृ° २८५-- १, २९२-- २ ॥
१९ द्र] दृश्यतां पृ° २८५-- २ ॥
२९ वृत्तिसामान्य] °मिति विशेषnayacakra-ms-bhā ॥

**भावश्च क्रियेत्यादि** यावत् **कुतः क्रियात्वं फलोद्देशकारकसम्बन्धाभावात्** ? यदुच्यते द्रव्यं च क्रिया च इति यन्न्यायबलेन त्वयोच्यते द्रव्यक्रियात्मको भाव इति तन्न सिध्यति त्वदभिप्रेतक्रियाभावासिद्धेरित्यर्थः । इतश्चासिद्धिः स्वविशेषाव्यापित्वाद् न प्रवृत्तिसामान्यं क्रियेति । तत्प्रतिपादनार्थमाह — **गच्छत्यादिव्यापिरूपता वा** इति **कुतः** इति वर्तते । गत्यादिव्यापिनी न भवति त्वदिष्टप्रवृत्तिसामान्यलक्षणा क्रिया **प्रवृत्तिविशेषत्वेनाभूतत्वात्,** यद् यत् प्रवृत्तिविशेषत्वेनाभूतं तत् तद् गच्छत्यादीन् न व्याप्नोति यथा कारकं कारकाणां प्रवृत्तिविशेषत्वेनाभूतमक्रिया, अक्रियात्वं चावयोः सिद्धमिति दृष्टान्तः साधर्म्येण । ***वैधर्म्यं तद्भेदवदिति,** या या क्रिया सा सा प्रवृत्तिविशेषत्वेन भूता यथा गच्छतितिष्ठत्यादिक्रियाभेदाः द्रवण-पतन-सर्पण-रिङ्गणादयो वा गमनविशेषाः । तस्माद् गच्छत्याद्यव्यापित्वादप्यक्रियात्वं प्रवृत्तिसामान्यस्य - /ms **कारकवदिति** । § 1186

**तथा चेत्यादि** । एवं च कृत्वा द्रव्यं क्रिया च द्वौ भावाविति द्रव्यस्य भावस्य द्वितीयो भावः क्रिया इत्येतदपि प्रवृत्तिसामान्यक्रियावादिनो नोपपद्यते तस्याः क्रियायास्त्वदिष्टाया **असत्त्वात् खपुष्पस्येव,** यथा खपुष्पमसत्त्वाद् द्रव्यस्य द्वितीयं न भवति तथा प्रवृत्तिसामान्यमिति । असत्त्वमसिद्धं प्रवृत्तिसामान्यस्येति चेत्, असत् तदद्रव्यत्वे सति अगत्यादित्वात् खपुष्पवत्, अगत्यादित्वं च तदव्यापित्वादिति । तस्मात् प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामान्यम् इति **वैयाकरणपक्षः** । § 1187

401/mj

अभ्युपगता तावदस्मदभिमतिवत् सर्वभावविषया प्रवृत्तिर्भावानामात्मा फलान्तरहेतुहेतुभावाविभक्तवृत्तिः सर्वभावेष्वित्युक्तेः । अनन्तरोक्तविशेषद्वयसन्निधानात् फलान्तरहेतुत्वात् तेषामेव । § 1188

यथा च विशेषाः फलनिर्वृत्तौ कारकान्तराण्यपेक्षन्ते तथा मृद्भवनस्यापि घटफलनिर्वृत्तौ कारकान्तरापेक्षा, कर्ता कुम्भकारोऽस्य दण्डादिना उदकाद्याहृत्यै अततः शालायां घटं करोति । मालवनगरे सप्त वर्षशतानि आम एव घटो वर्षे § 1189

अत्रोच्यते --**अभ्युपगता तावदस्मदभिमतिवदित्यादि** । ननु त्वयापि प्रवृत्तिविशेषक्रियावादिना प्रवृत्तिसामान्यमेव क्रिया इत्येतदभ्युपगतमस्मदभिमतिवत् । कथम् ? इति तद्दर्शयति --**सर्वभावविषया प्र-**

---

२ क्रि ] क्रियत
इतिnayacakra-ms-ya । क्रिच इति nayacakra-ms-bhā ॥
३ इ ] दृश्यतां पृ० ३९७ टि० ७ ॥

९ * ] वैधर्म्ये ? ॥
१० त्या ] त्याक्रियाभेदः प्र० ॥
१८ त ] दृश्यतां पृ० ४०० पं० ३ ॥
२९ क्रियावा ] ०वादि प्रवृ० प्र० ॥

**वृत्तिर्भावानामात्मे**ति, आदावेव तावदभ्युपगतं त्वया **न हि किञ्चित् स्वात्मनि मुहूर्तमप्यवतिष्ठते वर्धते यावदनेन वर्धितव्यमपायेन वा युज्यते** इति ब्रुवता सर्वभावानां सततसम्प्रवृत्तिरात्मा स्वरूपमिति, स चाभ्युपगमोऽस्मन्मतिसाम्यात् प्रवृत्तिसामान्यक्रियात्वं समर्थयति, किं कारणम् ? **फलान्तरहेतुहेतुभावाविभक्तवृत्तिः सर्वभावेष्वित्युक्तेः**, फलं बीजादिप्रवृत्तेर्हेतुभूताया अङ्कुरादि, ततोऽन्यानि फलानि फलान्तराणि तदनुबन्धजन्मानि पर्ण-नाल-काण्ड-तुष-शूक-क्षीर-तण्डुलादीनि क्रमेण, हेतवः पूर्वे पूर्वे यथास्वम्, ततोऽपि पूर्वे पूर्वेऽन्तरिता हेतुहेतवः, त एव भावाः क्रियात्मानः, तैरेवाविभक्ता वृत्तिर्वर्तनं सततसम्प्रवृत्तिः सर्वभावेष्वित्युक्तत्वात् । कथमुक्तम् ? **न हि कि- - /ms ञ्चित् स्वात्मनि** इत्यादिवचनात् सर्वभावेषु बीजाङ्कुरमृत्पिण्डादिषूक्तम् । तच्च प्रवृत्तिसामान्यं तण्डुलविक्लेदादीनामपि तत्स्वारूप्यानतिवृत्तेः । किञ्चान्यत्, यदपि चोक्तं ***केनचित् फलोद्देशेन प्रवृत्तिविशेषः कारकाणाम्** इति स च विशेषः सहभाविनो रूपादयोऽसहभाविनो गमनस्थानादयश्च तैः प्रत्याश्रयं युक्ता तदात्मिका च इत्यनेनापि वचनेन सामान्यप्रवृत्तेरेवेति क्रियात्वमुक्तं भवति । किं कारणम् ? अनन्तरोक्तविशेषद्वयसन्निधानात् सर्वत्र तेषामेव च विशेषाणां सामान्यप्रवृत्त्यात्मकानामोदनाद्युद्देश्यफलरूपत्वात् सन्निधानाच्च फलान्तरहेतुत्वात् तेषामेव, त एव ह्योदनादिफलान्तरहेतवो नान्यः कश्चित्, अतः प्रवृत्तिविशेषात्मिकापि सैव सामान्यप्रवृत्तिरेवेति । § 1190

यदपि चोक्तं ***विशेषास्तूपजायमाना** इत्यादिस्तदनन्तरोक्तो ग्रन्थो यावद् **न प्रवृत्तिसामान्यं** लोकव्यवहारानङ्गत्वादिति, अत्रोच्यते--इहापि समानकल्पत्वाद् न दोषः, विशेषग्रहणानर्थक्यं च परपक्ष इत्यत आह--**यथा च विशेषा** इत्यादि प्रवृत्तिविशेषसामान्यलक्षणयोः क्रिययोरविशेषापादनग्रन्थो गतार्थः । पचेरोदनफलनिर्वृत्तौ कारकान्तरापेक्षावत् **मृद्भवनस्यापि घटफलनिर्वृत्तौ कारकान्तरापेक्षे**ति पिण्डादिषु सर्वेषु भवनमेव कुम्भकारादीनि मृदोऽन्यानि कारकाण्यपेक्षत इत्यर्थः । तान्युदाहरति **--कर्ता कुम्भकारोऽस्ये**त्यादि कर्तृकरणसम्प्रदानापादानाधिकरणानि कुलालद- - /ms ण्डाद्युदकाद्याहृत्यतच्छाला इति । कालोऽपि केषा- ञ्चित् कारकमिति तद्दर्शयन्नाह **--मालवनगरे सप्त वर्षशतानी**ति, तत्र आम एव घटो वर्षे 402/mj प्रदर्श्यते

* * *

१ न] दृश्यतां पृ॰ ३७९ पं॰ ८ ॥
५ वृत्तेर्हेतुभू] ॰भूतस्यांकुरादि प्र॰ ॥
७ पू] सर्वे पूर्वेnayacakra-ms-ya । पूर्वे nayacakra-ms-bhā ॥
९ न] दृश्यतां पृ॰ ३७९ पं॰ ८ ॥
११ त] तत्स्वरूप्या॰ प्र॰ ॥
१२ *] दृश्यतां पृ॰ ३९९ पं॰ ३ ॥
१५ भ] भवतिnayacakra-ms-ya प्रतिषु नास्ति ॥
१९ *] दृश्यतां पृ॰ ४०० पं॰ २ ॥
२७ च्छा] ॰च्छालाया इति प्र॰ ॥
२८ व] वर्षे त्रदर्श्यते प्र॰ ॥

प्रदर्श्यते सङ्गोप्यते च गोदोहे वा तडागादौ; तस्यैव क्षणमप्यनवस्थानमुदके प्रक्षिप्तस्य । प्रवृत्तिविशेषत्वेनाभूतत्वाद्यसिद्धतापि चैवमुक्तैव । अगत्यादित्वाच्च नासत्त्वम् । नन्वगमनस्थानं चाकाशं भवति इति सन्देहहेतुता ।

गत्यभावोऽप्रवृत्तिर्गतिनिवृत्तिरिति चेत्, अथ निरुपाख्यमेव गत्यभावमात्रस्थानं तत् प्राप्नोति अभावत्वादप्रवृत्तत्वात् खपुष्पवत् ।

* * *

**सङ्गोप्यते च** सङ्गोपितसाराणि द्रव्याणि इति ख्यापनार्थं, *गोदोहे वा तडागादाविति, तस्यैव आमस्य क्षणमप्यनवस्थानमुदके प्रक्षिप्तस्येति च कारकविशेषापेक्षाप्रदर्शनम् । § 1191

यदप्युक्तं **प्रवृत्तिसामान्यं प्रवृत्तिविशेषत्वेनाभूतत्वात् कारकवद् गच्छत्यादिव्यापि न भवति** इति तदपि नानुमानम्, असिद्धहेतुत्वात् । प्रवृत्तिसामान्यस्य प्रवृत्तिविशेषत्वेनाभूतत्वमसिद्धं प्रवृत्तिविशेषस्वरूपत्वादेव, तत्सामान्यस्य प्रवृत्तिविशेषस्वरूपत्वं च सर्वत्र भवनस्याविच्छिन्नत्वात् तदविनाभावाच्च गत्यादिविशेषाणां भवनस्वात्मवदिति तन्न्यायमनुस्मारयन्नाह -- **प्रवृत्तिविशेषत्वेनाभूतत्वाद्यसिद्धतापि चैवमुक्तैव । आदि**ग्रहणाद् विरोधाविरोधभावौ द्रव्यक्रिययोरेवमुक्तावेवेति । यदप्युक्तम् --**असत्त्वाद् द्रव्यद्वितीयतापि नैव प्रवृत्तिसामान्यस्यासत्त्वं च खपुष्पवदगत्यादित्वा**दिति, अत्रोच्यते--अगत्यादित्वाच्च नासत्त्वं हेत्वसिद्धेरेवोक्तवद् गत्यादिस्वरूपत्वात् सततभवनस्येति । § 1192

अभ्युपगम्यापि अगत्यादिहेतुसिद्धिमनैकान्तिकत्वं ब्रूमः --**नन्वगमनस्थानं चाकाशम्** अगच्छदतिष्ठच्च व्योम **भवति** अस्त्येव । तत्र किमगत्यादित्वादसत् स्यात् खपुष्पवत् ? उताकाशवत् सत् स्यात् ? **इति सन्देहहेतुते**ति - /ms । स्यान्मतम्--अगत्यस्तु, कथमस्थानमाकाशम् नित्यस्थितत्वात् ? तस्मात् अगतित्वात् इति संशयहेतुता स्यात्, अस्थानत्वात् इत्ययुक्तेति । अत्रोच्यते--अस्याप्यस्थानत्वमेव, यस्मात् पठ्यते **ष्ठा गतिनिवृत्तौ** पा॰ धा॰ ९२८, प्रवृत्ताया गतेर्या निवृत्तिः प्रतिबन्धः सा स्थितिर्वक्ष्यमाणवत् । न चास्य प्रवृत्तगतेराकाशस्य प्रतिबन्धो जातु प्रगतदेवदत्तगतिनिवर्तनवत् । अस्थानम् इति च स्थानादन्यद् गमनादि उच्यते न स्थानस्यात्यन्ताभाव एव, तस्मादाकाश-

---

६ *] गोदाहं वा तडागादाविति तथैवnayacakra-ms-ya । गोदोविति तस्यैव nayacakra-ms-bhā ॥
९ प्र] दृश्यतां पृ॰ ४०० पं॰ ६ ॥
११ प्र] एतच्चिह्नान्तर्गतपाठस्थाने प्रवृत्तिविशेषत्वेनाभूतत्वमसिद्धं प्रवृत्तिविशेषस्वरूपत्वादेव तत्सामान्यस्य प्रवृत्तिविशेषत्वेनाभूतत्वमसिद्धं प्रवृत्तिविशेषस्वरूपत्वात्सामान्यस्य इति द्विर्भूतः पाठः प्रतिषु ॥
१५ प्युक्त] दृश्यतां पृ॰ ४०० पं॰ ७ ॥
१९ ग] नन्वगमनं चाकाशम्nayacakra-ms-bhā । नन्वगमनमस्थानं चाकाशम् ? नन्वस्थानगमनं चाकाशम् ? ॥
२४ ग] गतिनिवर्तनवदस्थानमिति वृत्तौnayacakra-ms-ya ॥
२६ जा] जानु nayacakra-ms-ya ॥

मप्यस्थानगमनं सच्चेत्यनैकान्तिकहेतुता तदवस्थैव साधनयोरनयोरिति ।
§ 1193

**गत्यभावोऽप्रवृत्तिर्गतिनिवृत्तिरिति चेत्** । स्यान्मतम्--नन्वभावो गतेर्गतिनिवृत्तिरप्रवृत्तिः, तस्माद् गत्यभावमात्रत्वात् स्थितेरभावत्वाद् नास्थानं न स्थानवदेव चाकाशं गतेरेवाभावादिति । अत्रोच्यते --**अथ निरुपाख्यमेवेत्यादि** । उपाख्या संज्ञा, निर्गतोपाख्यं निरुपाख्यं त्वत्परिकल्पितगत्यभावमात्रस्थानं तत् प्राप्नोति, अभावत्वात् । अभावत्वं चास्याप्रवृत्तत्वात् खपुष्पवत् । आकाशादि च प्रवृत्तं स्थानवदस्थानं चेति वक्ष्यामः । § 1194
१403/mj

गतिविशेषणसामर्थ्यादिति चेत्, तदेवेदमस्मदिष्टं स्थानस्य सत्त्वं गत्यभावस्य गतिविशेषणयोगात् सिद्धम् । गतिविशेषणसामर्थ्यापादितस्थित्याद्युत्तरभावसत्यत्वात् अत एव च सर्वात्मकभवनस्वतत्त्वमालम्ब्य तत्स्वाभाव्यात् पूर्वोत्तरभावयोरेकस्याभिव्यक्त्या इतरस्य अनभिव्यक्त्या च भवनं भावः । विरोधिभावप्रादुर्भावे हि भावान्तरनिवृत्तिः भाव एव विरोधिभावप्रादुर्भावत्वादेव, यथा जागरणेन स्वप्नो निवर्त्यते । न हि क्रियान्तरमन्यङ्गीय क्रियान्तरं प्रादुर्भवतीह किञ्चित् । इहापि च गतिभवनमन्यङ्गीय न स्थितिभवनं प्रादुर्भवति । § 1195

**गतिविशेषणसामर्थ्यादिति चेत्** । स्यान्मतम्--यदि सर्वथा स्थानं निवृत्तिरभावः इत्यविशेष्य ब्रूयां खपुष्पवद् निरुपाख्यं स्यात्, किं तर्हि ? गत्या विशिष्टं स्थानं गतिनिवृत्तिः इति ब्रूमः । तस्माद् गत्यभावः इति सोपाख्यमिति । अत्रोच्यते --**तदेवेदमस्मदिष्टं स्थानस्य सत्त्वं गत्यभावस्य** स्थित्यभावस्य गमनस्य सत्त्ववद् **गतिविशेषणयोगाद्** भवन्मतविरुद्धं **सिद्धम्**, - /ms तस्मिंश्च सिद्धे स्थाने तद्वद् गतिस्थित्यादि सर्वक्रियापदाभिधेयं भावः सत्यमेव नासदिति सिद्धम् । तस्माच्च गतिविशेषणसामर्थ्यापादितस्थित्याद्युत्तरभावसत्यत्वात् **अत एव च सर्वात्मके**त्यादि यावद् **भवनं भाव** इति । येयं निरुक्तिः भवनं भावः इति साप्येतस्मादेव कारणाद् गतिस्थित्यादिसर्वात्मकमेव भवनस्वतत्त्वमालम्ब्य तदपरित्यागेन **तत्स्वाभाव्यात्** तत्तद्भवनानुभवस्वभावत्वात् पूर्वस्य गतिभावस्य उत्तरस्य च स्थितिभावस्य अथवा पूर्वस्य स्थितिभावस्य

१. प्रवृत्ता । प्रवृत्तायाnayacakra-ms-bhā । प्रवृत्ताऽप्रवृत्ताया nayacakra-ms-ya ॥

१ भा ] भावगते॰nayacakra-ms-bhā । ॰भागवते॰ nayacakra-ms-ya ॥
३ स्था ] स्थानतदेव प्र॰ ॥
६ च ] व प्र॰ ॥
२५ न ] ॰स्य तत्त्व॰nayacakra-ms-ya ॥

उत्तरस्य च गतिभावस्य यथाविवक्षाक्रमं यथापरिणतिक्रमं च यथासम्भ**वमेकस्याभिव्यक्त्या इतरस्यानभिव्यक्त्या च भवनं भाव** इति निरुच्यते । § 1196

स्यान्मतम्--विरोधिनो भावस्य उत्तरस्य स्थित्यादेः प्रादुर्भावाद् गतेर्विनाशः गतेर्वा प्रादुर्भावे स्थितेः, स चाभावो विनाशः पाकजोत्पत्तिवदिति । अत्रोच्यते--योऽप्यभावाभिमतो विनाशो **विरोधिभावप्रादुर्भावे हि भावान्तरनिवृत्ति**रितीष्टः, स च भावान्तरानभिव्यक्तिस्तस्य भावान्तरस्य स्थितेरन्यस्य गत्यादेः गतेर्वान्यस्य स्थित्यादे**र्भाव एव** नाभावः, विरोधिभावप्रादुर्भावत्वादेव । यथा जागरणेन स्वप्नो निवर्त्यते, *किमुक्तं भवति ? निवर्त्यतेऽनभिव्यक्तिं नीयत इत्युच्यते । यथा जागरणेन स्वप्नोऽनभिव्यक्तिं नीयते तथा स्वप्नेन जागरणम्, जाग्रतोऽपि च सुप्तवद् मन्द-मन्दतर-मन्दतमचैतन्यदर्शनात् सुप्तस्यापि जाग्रत इवाभिव्यक्त[व्यक्त]तरव्यक्ततमस्वप्नदर्शनात् तदेव हि चैतन्यं तीव्रमन्दावरणोदयक्षयोपशमापेक्षं निद्रा-निद्रा[निद्रा]-प्रचला-प्रचला[प्रचला]दिभेदं पटु-पटुतर-[पटु]तमेन्द्रियादिभेदं च दृश्यते । तस्मादेकस्यैव वस्तुनो- ऽभिव्यक्त्यनभिव्यक्तिकृते स्वप्नजागरणे, अन्यतरन्यङ्गयनेनान्यतरभवनात् सर्पस्फटाटोपकुण्डलकीभवनवत् । अत आह **--न हि क्रियान्तरमन्यङ्गीये**त्यादि गतार्थं याव**दिह किञ्चिदि**ति । एषा दृष्टान्तवर्णना । **इहापि च गतिभवन**मित्यादि गतार्थं दार्ष्टान्तिकवर्णनमपि । तस्मात् क्रियान्तरप्रादुर्भावे पूर्वभावनिवृत्तिः नाभाव इति । § 1197 - /ms

404/mj

स्यादेतत्--यथा भुक्तिक्रियाया निवृत्तिस्तृप्तिफलावसाना, प्रयोजनाभावे कारकानभिसम्बन्धाद् भुजेर्निवृत्तिर्न क्रियान्तरबाधनात् एवमेतदपि स्यात् । अत्रोच्यते--अत्रापि तु फलं तृप्तिः क्रियान्तरम् । बुभुक्षां हि बाधित्वा भुक्तिः प्रवर्तते, भुक्तिं च बाधित्वा तृप्तिः प्रवर्तते, क्रियाचक्रकाण्येतानि । § 1198

यदि स्थितिर्नाम अवस्तुकमभिधानं विवक्षाशब्दयोरप्रवृत्तिप्रसङ्गः । अथ द्रव्यमात्रं स्थितिः द्रव्यस्याविरोधाद् गतावपि स्यात् । यतस्तु खलु विरोध्यविरोधिभावा वाच्यवस्तुस्थितिः तस्माद् भवनानन्यत्व एव गतिविरोधिनी स्थितिः । § 1199

---

२७ च] nayacakra-ms-raṃ विना च यथासंख्यमे॰ प्र॰ । चायथासंख्यमे॰ ? ॥
४ विना] पिनाशः प्र॰ ॥
६ रितीष्टः] ॰ष्ट सा प्र॰ ॥
८ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
११ प्र] ॰प्नप्रद॰ प्र॰ ॥
१३ त] ॰तमेन्द्रि॰nayacakra-ms-ya ॥
१४ स्यैव] ॰व च वस्तुनो॰nayacakra-ms-bhā ॥

अत्राह --**स्यादेत**दित्यादि याव**देवमेतदपि स्या**दिति । यथा तु भुक्तिक्रियाया निवृत्तिस्तृप्तिफलावसाना तत् प्रयोजनमुद्दिश्य कारकप्रवृत्तेः, तस्मिंश्चावसिते प्रयोजने कारकाणि न प्रवर्तन्ते, तस्मात् कारकानभिसम्बन्धाद् भुजेर्निवृत्तिः न क्रियान्तरबाधनात् । एवं गतिरपि प्राप्तिफलावसाना प्रयोजनाभावे कारकानभिसम्बन्धाद् निवर्तते न क्रियान्तरबाधनात् । अतः संशेमहे--किं स्वप्नजागरणवत् क्रियान्तरन्यङ्गयने क्रियान्तरोद्भावस्तादात्म्ये सत्येव स्यात् ? उतात्यन्तनिवृत्तिरेव गतेः फलावसानभुजिक्रियावत् ? इति । **अत्रोच्यते— अत्रापि तु** मा मंस्थाः भुजिनिवृत्तिरभाव एव इति, किं तर्हि ? **फलं तृप्तिः क्रियान्तरं** प्रवृत्तेरेव क्रियात्वात्, **बुभुक्षां हि बाधित्वे**त्यादि यावत् **क्रियाचक्रकाण्येताती**ति । एतदुक्तं भवति--क्रियान्तरप्रादुर्भावेन विना न क्रियानिवृत्तिर्नापि पूर्वक्रियान्यक्करणमन्तरेण क्रियान्तरप्रादुर्भावः, बुभुक्षाभुक्तितृप्तिक्रियाचक्रवत् पूर्वपूर्वबाधया उत्तरोत्तरप्रादुर्भावात् समानमेतदपीति । तस्माद् नाभावो गतिनिवृत्तिः, भाव एव स्थितिरिति ।
§ 1200

- /ms एतदनिच्छोर्दोष उच्यते --**यदि स्थितिर्नामे**त्यादि । स्थितेर्भावत्वानभ्युपगमे द्वयी गतिः स्थितिशब्दस्य स्यात् तृतीयविकल्पाभावात्--यद्वा स्थित्यभिधानमवस्तुकम् ? यद्वा द्रव्यमात्रविषयं स्यात् ? किञ्चातः ? इदमतो भवति दोषजातम्--अवस्तुकत्वे **विवक्षाशब्दयोरप्रवृत्तिप्रसङ्गः**, यद्यवस्तुविषयं स्थितिशब्दवचनं वक्तुमिच्छा विवक्षा सा स्वनिश्चितमर्थं परं प्रत्याययामीति जायते, अर्थाभावाच्च न स्यात् । तथा च अभिधीयतेऽनेनेत्यभिधानं स्थितिशब्दः, तस्याभावः स्यादर्थाभावात्, काकवासितादिवदनर्थकं वा तत् स्यादिति । एवं तावदवस्तुकत्वे दोषः । **अथ द्रव्यमात्रं स्थितिः द्रव्यस्याविरोधाद् गतावपि स्यात्,** यथा देवदत्तसद्भावाद् गत्यविरोधाच्च देवदत्तो गच्छति इत्यत्र देवदत्ताभिधानं प्रवर्तते तथा देवदत्तस्तिष्ठति गच्छति च इत्येतदभिधानं प्रवर्तेत, उभयत्र द्रव्यस्यैव सत्त्वात् विशेषाभावाच्च । एवं दोषदर्शनाद् न गत्यभावमात्रं स्थितिः । **यतस्तु खल्वि**त्यादि, *विरोध्यविरोधिभावा वाच्यवस्तुस्थितिः, गतिस्थित्योः परस्परविरोधाद् देवदत्तद्रव्येण सहाविरोधाद् भावावेव गतिस्थिती द्रव्यवत्, ग्रन्थो गतार्थो यावद् **भवनानन्यत्व एव गतिविरोधिनी स्थिति**रिति । भवनानन्यत्व इति द्रव्यभवनादनन्यैव गतिः स्थितिर्वेति प्रवृत्तिभवनानन्यत्व एवेति यथाप्रक्रान्तमुपसंहरति । § 1201
405/mj

२८ तु] नुnayacakra-ms-bhā ॥
२९ सा] °सान प्र° ॥
५ सा] °सानेभुजि°nayacakra-ms-ya ॥
७ प्र] प्रवृत्तिरेव ? ॥
२४ *] विरोधाविरोधि° प्र° ॥
२४ विरोधिभा] °भावाचाव्यवस्तुस्थितिnayacakra-ms-bhā । भावावस्तुस्थितिः nayacakra-ms-vi । °भावावाव्यस्तुस्थितिः nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-līṃ nayacakra-ms-raṃ ॥
२८ थाप्र] °पक्रान्त° प्र° ॥

स्यादेतत्--स्थित्या विरोधवत् खपुष्पादिना गत्यभावेनापि विरोधः, तत्र तद्विरोधित्वात् तदविनाभावित्वे कुत एतद् भावविषयमेव अभावविषयमेवैतदिति वा कुतः ? यद्यभावोऽपि भावेन अभावेन वा भावो विरुध्यते तावुभौ भाववेव तर्हि विरोधित्वात् यत्किञ्चिद्वत् । अनुत्पद्यमानस्थितौ गतिनिवृत्तौ गतिस्थित्याद्येकभूतभवनाविनाभूतद्रव्यविनाशविषयं स्थानम् इत्यभिधानं स्यात् । तस्माद् गत्यभावलक्षित... ... ...। § 1202

एवं खपुष्पाद्यसत्तावाचिशब्दानां भावार्थत्वम्, यथा तिष्ठति पचति इत्य- § 1203

**स्यादेत**दित्यादि । स्यान्मतम्--विरोधित्वात् इत्येतदनैकान्तिकमभावत्वप्रसङ्गात् । गतेरभावो गत्या विरुध्यते प्रकाशाभावेनेव तमसा प्रकाशः, यथा त्वन्मतेनैव ननु प्राग् गतिरेव क्रियान्तरप्रादुर्भावेनानभिव्यक्तिं नीयमाना भाव एव इत्युक्तम्, तत्र **स्थित्या विरोधवत् खपुष्पादिना गत्यभावेनापि विरोधः । तत्र तद्विरोधित्वात् तदविनाभावित्वे** इति गतिरभावाविनाभाविनी स्यात् तद्विरोधित्वात्, यच्च यद्विरोधि तत् तेनाविनाभावि दृष्टम्, यथा--गतिः स्थित्या । खपुष्पादेर्वा भावत्वमेव स्यात्, गतिविरोधित्वात्, स्थितिवत् । एवं **तदविनाभावित्वे** सति **कुत एतद् भावविषयमेव** एतदभिधानं स्थितिः इति ? खपुष्पादिः इत्य**भावविषयमेवैतदिति वा कुतः ?** विशेषो वात्र वाच्य इति । - /ms
§ 1204

अत्र ब्रूमः **--यद्यभावोऽपी**त्यादि । खपुष्पादेर्विपक्षं कृत्वा भावत्वाद् नानिष्टापादनम् । किं *विशेषेणोक्तेन ? यथा स्थितेरभावत्वायुक्तिस्तथा खपुष्पादेरपीत्यभिप्रायः । तत् कथं भाव्यते ? इति तदुच्यते **--यद्यभावो भावेन अभावेन वा भावो विरुध्यते तावुभौ** यो विरुध्यते येन च विरुध्यते **भाववेव तर्हि विरोधित्वात् यत्किञ्चिद्व**दिति उदाहरणसौलभ्यं दर्शयति अहिनकुलादिवद् घटपटादिवद् घटकपालादिवद्वा सर्वत्र सहानवस्थानलक्षणविरोधदर्शनाद् देशतः कालतो वेति । तस्मात् खपुष्पादेरपि भावत्वाद् नानिष्टमिति । § 1205

यदपि च त्वया स्थित्यभिधानमभावविषयमिति मन्यते तस्यापीयमुपपत्तिः स्याद् भवन्ती, तद्यथा— गत्यभावमात्रविषयत्वं चानुत्पद्यमानस्थितिर्ग-

१० न्म ] °तेनेव प्र° ॥
१२ विनाभा ] °भावत्वेnayacakra-ms-bhā । °भावत्ते nayacakra-ms-ya ॥
१८ अत्र ] वा ब्रूमःnayacakra-ms-bhā ॥
१८ य ] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१८ भा ] भावाद्nayacakra-ms-ya ॥
१९ * ] विशेषेणा°nayacakra-ms-vi विना° ॥
२४ विरोघ ] °धाद्दर्शनाद् प्र° ॥

तिनिवृत्तिरिति, तथा च कल्प्यमानायाम**नुत्पद्यमानस्थितौ गतिनिवृत्तौ,** गतिस्थित्यादि एकभूतं भवनं प्रागुक्तन्यायकम्, तेनाविनाभूतं द्रव्यम्, तस्य विनाशोऽत्यन्तमभावः, तद्विषयं स्थानम् इत्यभिधानं स्यात्, न चैवं द्रव्यस्य कूटस्थनित्यत्वाद् भवितुमर्हति । तस्मादेव च तदनिष्टभयात् प्रतिपत्तव्यम्--गतिनिवृत्तिः स्थितिर्नाभावः, तथा खपुष्पादिश्चेति । तदुपसंहरति --**तस्माद् गत्यभावलक्षिते**त्यादि गतार्थम् । § 1206

अनन्तरं खपुष्पादिरपि प्रसङ्गतोऽभिहितो योऽसावभावाभिमतस्तत्रापि अभावः इति च नापदार्थ उच्यते, किं तर्हि ? नञः पर्युदासवाचित्वाद्
- /ms भावादन्यो भाव इति भावविशेषः, अब्राह्मणक्षत्रियादिवत् । **एवं खपुष्पाद्यसत्तावाचिशब्दानां भावार्थत्वम्,** एवमसद्भावाभिमतेष्वपि सदर्थविषयत्वमिति
406/mj न्याय

* * *

न्यथाभवनं तथा विनश्यति इत्यादि । खपुष्पादीनामपि ननु तथा अभवनम्, अन्यथा न तु अभवनम् । अगतिस्थितिरन्यथाभवनमेवं खपुष्पादिरपि, सति नियतत्वात् प्रकाराणाम् ।

एवं च एक एव पूर्वापरीभूतो भावः प्रवृत्तिरित्युच्यते स च एवान्तर्भावितस्वप्रभेदत्वात् प्रवृत्तिविशेष इत्युच्यते, भुजिविशेषवत्, यथा भुजावेव द्रव्यक्षेत्र-

* * *

व्यापितां दर्शयति । वक्ष्यते चास्योदाहरणमतिदेशश्चास्य । इदं तु तावत् प्रकृतं भाव्यते --**यथा तिष्ठति, पचति इत्यन्यथाभवनम्,** अन्येन प्रकारेण परिस्पन्दपरिणतस्य द्रव्यस्य ततः प्रकारादन्येन अपरिस्पन्दपरिणतिप्रकारेण भवनं तिष्थति आस्ते शेत इत्यादि, तण्डुलादिकठिनद्रव्यमृदूभवनं पचत्यादि । यथैताः क्रियाः अन्यथाभवनमात्रभेदाः प्रवृत्तिसामान्यं भवनं नातिवर्तन्ते तथा विनश्यति प्रध्वंसते नितिष्ठति इत्यादयोऽपि भवनप्रकाराः प्रवृत्तिसामान्यं भावत्वं च नातिवर्तन्ते । एवं क्रियापदवाच्यस्यार्थस्य अन्यथाभवनमात्रता व्याख्याता । येऽप्यत्यन्ताभावाभिमताः खपुष्पादिशब्दवाच्यास्तेषामपि ननु तथा अभवनम्, अन्येन प्रकारेण न त्वभवनम्, भवनमेव, नात्यन्ताभवनमित्यर्थः । कथम् ? **अगतिस्थितिः,** गतेरन्या स्थितिरगतिस्थितिः, न तु गत्यभावमात्रम्, गतेरेव प्रकारान्तरता । यथा सा स्थिति**रन्यथाभवनमेवं खपुष्पादिरपि** अन्यथाभवनम् । किं कारणम् ? **सति नियतत्वात् प्रकाराणाम्,** प्रकारत्वात् सन्नेव खपुष्पादिः, यो यः प्रकारः स सन्नेव, यथा गतिनिवृत्तिः

२८ मा] nayacakra-ms-pā विना °मानायामुद्यमानस्थितौ nayacakra-ms-ya । °मानायानुद्यमानस्थितौ nayacakra-ms-pā । °मानस्थितौ nayacakra-ms-bhā ॥
८ पुष्पा] °ष्पादिसत्वा° प्र° ॥
२२ वृत्तिसामान्यं] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२३ ते] निस्तिष्ठतिnayacakra-ms-ya ॥
३० तिनिवृ] °वृत्तिस्थि° प्र° ॥

स्थितिरुक्तन्याया सती । कथं खपुष्पादेः प्रकारता इति चेत्, उच्यते- -खपुष्पस्य च समवायरूपेणानभिव्यक्तिः अशोककुसुमादिप्रकारेणाभिव्य- क्तिरिति प्रकारत्वानतिवृत्तेः, द्रव्यक्रिययोः सर्वात्मकत्वादस्मिन् द्रव्यार्थनयभेदे सर्वं द्रव्यं क्रिया च गमनादि, द्रव्यभेदानां गमनादिक्रियाभेदानां चोक्तवद् भवनद्वयाभेदात् कतमत् खं कतमद्वा पुष्पाणां विकसनमन्यत् ? इति देवदत्तगमनभवनद्वयत्ववत् तदपीति खपुष्पादिरपि भावः । § 1207

**एवं चेत्यादि** । एवं च कृत्वा गमनस्थानादिक्रमभाविनीनामपि क्रियाणां - /ms सततसम्प्रवृत्तितादात्म्यानतिक्रमा**देक एव पूर्वापरीभूतो भावः प्रवृत्तिरित्युच्य- ते,** एवमेव च तदुपपद्यते यदुक्तं **पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचति** निरुक्त° १ । १ इत्यादीति सर्वधात्वैकार्थ्यस्य चानन्तरमापाद- यिष्यमाणत्वात् । कस्मात् स भावः प्रवृत्तिरित्युच्यते ? ब्रूमः--प्रकर्षेण वर्तनात् । स च प्रकर्षः सदा सर्वप्रभेदानुभवनरूपः, **स च एवान्तर्भावितस्वप्रभेद- त्वात् प्रवृत्तिविशेष इत्युच्यते** रूपादिगत्यादीन् स्वप्रभेदान् अन्तर्भावयन्नेव भावः सामान्यभवनलक्षणो भवन्, भेदानां परस्परतो विशेषाविशेषौ भेदानुस्यूत- त्वात्, न त्वदिष्टः कारकाणां प्रवृत्तिविशेषः सामान्यप्रवृत्तेर्भिन्नः कश्चिदिति । दृष्टान्तः **--भुजिविशेषव**दिति । तद्व्याख्यानम् **--यथा भुजावेवे**त्यादि यावत् **प्रकारमात्रं भिद्यत** इति । अशन-पान-खाद्य-स्वाद्यादिद्रव्यभेदेन 407/mj

* * *

कालभावभेदेन प्रकारमात्रं भिद्यते एवं गतिस्थित्योरस्तिम्रियत्योर्वा । सर्वैव वासौ ... ... ...क्रियैव ।

एवं च भुजिगतिस्थितिपत्त्यादीनामपि तथा तथा सर्वभावव्यापिता, भाष- तिजानातिश्वेतत्यादीनामपि पूर्वोत्तरव्यक्त्यव्यक्तिभवनैकत्वात् ।

* * *

कांसपात्र्यां पाणौ शरावे वेति क्षेत्रभेदेन प्रथमद्वितीयग्रासादिना दिन- रात्र्यादिना सायंप्रातराशादिना वा कालभेदेन तीव्रमन्दक्षुधितग्लानौषधस्वस्व- रसायनादिभावेन च प्रकारमात्रेणैव भिद्यते न भुजित्वेन । न हि तेषु प्रकार-

---

१ च ] चाnayacakra-ms-bhā nayacakra-ms-vi ‖
२ म ] °मद्याnayacakra-ms-ya ‖
६ पू ] दृश्यतां पृ° १२६ पं° २४ ‖
७ मा ] °मापायांतर्भाविद- यिष्य°nayacakra-ms-ya ‖
९ स ] स च एचान्त°nayacakra-ms-bhā । स एव चान्त° ? ‖
११ भ ] भव भे°nayacakra-ms-vi । भाव भे° nayacakra-ms-ḍe nayacakra-ms-līṃ । भवेत् ? ‖
११ विशेषा ] °विशेषो nayacakra-ms-ya ‖
११ विशेषौ ] भेदानुभ्युतत्वात्nayacakra-ms-bhā । भेदानुभ्युपगतत्वात् nayacakra-ms-ya ‖
२१ रा ] °रात्रा° प्र° ‖
२१ सा ] सायंप्रातराशादिनाnayacakra-ms-ya प्रतिषु नास्ति ‖
२१ स्व ] °स्वस्वरेसायना°nayacakra-ms-ya । °स्वरसायंना° nayacakra-ms-bhā ‖

भिन्नेषु कश्चिदभुजिर्भवति अक्रिया वा । किन्तु सर्वोऽप्यसौ भुजिरूपानतिक्रमाद् भुजिरेव, अथ च परस्परतः प्रकारमात्रभेदाद् भिद्यन्ते तथा सामान्यप्रवृत्तिरेव प्रवृत्तिविशेषः, वर्ततेरस्त्यर्थस्य सर्वगतिस्थित्यादिभेदात्मकत्वात् । **एवं गतिस्थित्योरस्तिम्रियत्योर्वे**ति विरोधिभावप्रादुर्भावोऽपि सामान्यभवनस्यैव प्रकारमात्रभिन्नस्य विस्पन्दितमिति तन्निगमयति **--सर्वैव वाऽसाविति** यावत् - /ms **क्रियैव** । तस्मादस्ति-भवति- विद्यति-पद्यति-वर्ततीनामेकार्थत्वात् प्रकारभेदाच्च ततो नासामान्यः प्रवृत्तिविशेषो भुजिसामान्यमात्रप्रकारभिन्नभुजिविशेषवदिति । § 1208

इति वर्तते । **भाष व्यक्तायां वाचि** पा° धा° ६१२ **ज्ञा अवबोधने** पा° धा° १५०८ **श्विता वर्णे** पा° धा° ७४२ **गडि वदनैकदेशे** पा° धा° ६५, ३६१ इत्येवमादीनां पूर्वोक्तपूर्वापरीभूतव्यक्त्यव्यक्तिलक्षणभवनैकत्वात् । एकमेव हि पूर्वापरीभूतं भवनं गतिस्थित्यादिवत् क्रियात्वादित्युक्तम् । तथा भाषत्यादीनामपि पूर्वापरीभूतैकभवनव्यक्त्यव्यक्तिलक्षणक्रियात्वानतिवृत्तेः सर्वभावव्यापितैव । पूर्वमभाषमाणो गच्छंस्तिष्ठन्नुदासीनो वा प (Edtext outside numbered paragraph)श्चाद् भाषते, तथा पश्यति जानाति इच्छति द्वेष्टि प्रयतते स्मरतीत्यादिषु तुल्यश्चर्चः । तस्मान्न काचिदपूर्वापरीभूता क्रियास्ति, क्रियात्वाच्च सर्वधात्वर्थाः सर्वधात्वर्थव्यापिनः इति साधूक्तम् । § 1209

किञ्चान्यत्, **एवं चे**त्यादि । न केवलमस्त्यादय एव सर्वधात्वर्थव्यापित्वात् सामान्यप्रवृत्तिमात्रत्वभावनायां निदर्शनम्, किं तर्हि ? **भुजिगतिस्थितिपक्त्यादीनामपि तथा तथा सर्वभावव्यापिता,** भुक्तेस्तावद् भुजेरभ्यवहरणार्थस्य उपयोगपर्यायत्वात् उपयोगस्यापत्त्यर्थत्वात् आपत्तेः परिणामार्थत्वात् परिणामस्य वृत्तिसत्ताभवनार्थत्वात् । तथा गतिरपि सर्वभावव्यापिनी गमन-चलन-स्पन्दन-परिणामाद्येकार्थत्वात्, द्रवति द्रोष्यति दुद्रावेति द्रुः, द्रोर्विकारो द्रव्यम्, **द्रव्यं च भव्ये** पा° ५ । ३ । १०४, द्रव्यं सदैव गत्यात्मकं विपरिणामात्मकमित्यर्थः । आर्षेऽपि यथा **--परमाणुपोग्गले णं भंते ! किं एयति वेयति चलति फंदति खोभति खुभति तं तं भावं परिणमति ? हंता गोतमा ! तदेव जाव परिणमति** भपरमाणुपोग्गले णं भंते ! एय+इ वेय+इ जाव तं तं भावं परिणम+इ ? गोयमा ! सिय एय+इ वेय+इ जाव परिणम+इ, सिय णो एय+इ जाव णो परिणम+इ । इति भगवतीसूत्रे पाठः ॥गवतीसू° ५ । ७ । २१२ इति । स्थितिरपि तिष्ठत्यास्तेऽस्ति स्वरूपं न त्यजति परिणमति तथा तथा भवतीत्यर्थः । पचति-कृषति-लिखत्यादयः पक्त्यादयः, तेषामपि पक्त्यादीनामस्त्याद्यविशेषः पाकस्य क्रियाफलत्वात् क्रियायाश्च हेतुफलरूपाभिन्नपरिणतित्वात् पच्यते पचत्यात्मानं बीजमङ्कुरीभवति जाय-

४ त] ततोन्यसामान्यःnayacakra-ms-ya । वतोन्यसामान्यः nayacakra-ms-bhā । ततोऽनन्यसामान्यः ? ॥

८ भु] भुज पालनाभ्यवहारयोः**--पा° धा°** १४५५ ॥

तेऽस्ति विपरिणमति इत्याद्येकार्थत्वात् । यथा कृषि-विलिखती तथात्मनः शिरां दर्शयति तथा तथा सर्वभाववृत्तेः कण्डूयत इत्याद्येकार्थम् । स्यान्मतम्--अस्तु भुज्यादीनां सर्वभावव्यापिता गतिस्थितिसत्ताविपरिणामाद्यनतिक्रमात्, पठि-हसि-विदि-श्विति-गड्यादीनां कथमिति चेत्, उच्यते

यदप्यादिनैगमनयदर्शनमनवबुध्य पूर्वनयनिपाति स्थितिस्वरूपनिरूपणं क्रियते सा तु द्रव्यावस्थाविशेषो गतिवत् प्रतिपत्तव्या इति अत्रापि यत्नप्रसाधितक्रियार्थान्तरत्वत्यागः अव्यक्तद्रव्यावस्थात्वात् । यत् तद् द्रव्यं ततोऽनन्या क्रिया, तदवस्थात्वात्, देवदत्तबालकुमारादिवत् । तथा चाभ्युपगमविरोधः ।

* * *

सर्वभावव्यापिता--**भाषतिजानातिश्वेतत्यादीनामपि पूर्वोत्तरव्यक्त्यव्यक्तिभवनैकत्वात् एवं च तथा तथा** - /ms, 408/mj

* * *

यदप्यादिनैगमनयदर्शनमनवबुध्य पूर्वनयनिपाति स्थितिस्वरूपनिरूपणं क्रियते सा तु द्रव्यावस्थाविशेषो गतिवत् प्रतिपत्तव्या इति अत्रापि यत्नप्रसाधितक्रियार्थान्तरत्वत्यागः अव्यक्तद्रव्यावस्थात्वात् । यत् तद् द्रव्यं ततोऽन्या क्रिया, तदवस्थात्वात्, देवदत्तबालकुमारादिवत् । तथा चाभ्युपगमविरोधः ।

* * *

सर्वभावव्यापिता

एवं तावत् प्रवृत्तिसामान्यमेव क्रिया प्रवृत्तिविशेष इत्युक्तम्, अधुना लक्षणान्तरं परीक्ष्यम्, अत आह --**यदप्यादिनैगमे**त्यादि ।

णेगेहिं मिणति माणेहिं णेगमो एस तस्स णेरुत्ती ।
संगहितपिंडितत्थं संगहवयणं समासेण ॥ आणेगेहिं माणेहिं
मिण+इत्ती णेगमस्स नेरुत्ती । सेसाणं पि णयाणं
लक्खणमिणमो सुणह वोच्छं ॥ २२२ ॥
संगहियपिंडियत्थं संगहवयणं समास+ओ बिंति ।...
...॥ २२३ ॥ इति आवश्यकनिर्युक्तौ पाठः ॥वनि॰ § 1212

इत्येवमादिनयलक्षणे द्रव्यक्रियात्मकद्वित्वाद्यनेकधा गमो नैगम इति निरुक्त्यपेक्षया द्रव्यक्रियाद्वित्वात्मकवस्तुवाद आदिनैगमनयदर्शनम्,

---

२२ इ ] इत्यादि दोषार्थंnayacakra-ms-ya । इत्यादोषार्थत्वात् nayacakra-ms-bhā ॥
२२ कृ ] कृष विलेखने--पा॰ धा॰ ९९० ॥
२२ विलिख ] ॰खति प्र॰ ॥
१ त ] तथा सर्व॰nayacakra-ms-bhānayacakra-ms-vinayacakra-ms-raṃ ॥
१ इ ] इति आद्येकार्थ्यम् प्र॰ । इत्याद्येकार्थ्यम् ? ॥
२१ मा ] ॰सेणंnayacakra-ms-pānayacakra-ms-vi ॥
२२ द्वित्वाद्य ] ॰द्यनेकमा गमो प्र॰ ॥
२३ निरुक्त्य ] ॰क्त्यापे॰ प्र॰ ॥

त्रित्वादिदर्शनानां द्वितीयादिनैगमत्वात् । एतद् **दर्शनमनवबुध्य पूर्वनयनिपाति** संग्रहनयं निपतितुं शीलं यस्य निरूपणस्य तदिदं **स्थितिस्वरूपनिरूपणं क्रियते** सङ्ग्रहनयदर्शनानुपाति । प्रथमाद् विधिभङ्गाद् व्यवहारनयादारातीया येऽतीताः पूर्वनयास्ते सङ्ग्रहनयभेदाः, तदनुपाति यदुत्तरं क्रियालक्षणं स्थित्युदाहरणद्वारेणोच्यते तत्स्वरूपनिरूपणाय तदविदितनयविषयविवेकैरेवोच्यते । कथं पुनस्तैः स्थितिस्वरूपनिरूपणं क्रियते ? उच्यते --**सा तु द्रव्यावस्थाविशेषो गतिवत् प्रतिपत्तव्या** इत्येवं निरूप्यते । यथा गतिर्द्रव्यस्यावस्थाविशेषो बालकुमारादिवद् द्रव्यादनन्या तथा स्थितिरिति । गतिस्थितिवच्च सर्वक्रिया इति । **अत्रापि** लक्षणान्तरे दोष उच्यते अविकल्पिते क इति चेत्, उच्यते — **यत्वप्रसाधितक्रियार्थान्तरत्वत्यागः**, प्राक् त्वया यत्नेन प्रसाधितमुक्तिवस्तुक्रियालक्षणाभिधानेन द्रव्यादर्थान्तरं क्रिया इति तस्य त्यागो दोषः । किं कारणम् ? **अव्यक्तद्रव्यावस्थात्वात्,** इह ह्यवस्थाशब्देनाव्यक्ताः क्रमभाविनो बालकुमारादयो धर्मा द्रव्यस्यैव देवदत्तादेरंशा एवोच्यन्ते, ते चांशास्तदवयवत्वात् ततोऽनन्ये । तस्मान्न ततोऽर्थान्तरमित्येतदापन्नम् । स चाभ्युपगतद्रव्यार्थान्तरभूतक्रियापदार्थत्यागो दोषः । एष प्रयोगेणैवोद्भाव्यते **--यत् तद् द्रव्यं ततोऽनन्येत्यादि** गतार्थं याव**दभ्युपगमविरोध** इति । § 1213

409/mj

एवमभिधानात्तु अव्युत्पत्तौ व्युत्पत्तौ वा स्ववचनादिविरोधः । तत्र तावदव्युत्पत्तौ अवस्थायास्ततोऽन्यत्वम्, तत्स्वादिविषयशब्दवाच्यत्वात्, देवदत्ताश्ववत् । शिलापुत्रकशरीरवन्नेति चेत्, न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात् अत्रापि शरीरावस्थाक्रियात्वात् । § 1214

व्युत्पत्तावपि कर्तरि षष्ठीयं द्रव्यस्यावस्था इति, सा यद्विषयं द्रव्यस्य कर्तृत्वं तामात्मनोऽक्रियात्वात् तदन्यगतिविचलनप्रतिबन्धात्मिकामवस्थां दर्शयति । § 1215

**एवमभिधानात्त्वव्युत्पत्तौ व्युत्पत्तौ** वेत्यादि । अत्र द्रव्यावस्था इत्यस्य शब्दस्यार्थद्वयकल्पना स्यात्--राजवृक्षादिशब्दवदव्युत्पत्तिर्व्युत्पत्तिर्वा राजपुरुषशब्दवत् । उभयथापि **स्ववचनविरोधः** । तद्व्याचष्टे **--तत्र तावदव्युत्पत्तौ अवस्थायास्ततोऽन्यत्वम्,** द्रव्यादन्यावस्था, **तत्स्वादिविषयशब्दवाच्यत्वात्,**

---

७ ल्पि ] nayacakra-ms-bhānayacakra-ms-ram̤ विनान्यत्र --°ल्पितैक इति ॥ ११ त ] ततो नान्येnayacakra-ms-ya ॥

२३ व्यु ] °व्युत्पत्तौ वे° प्र° ॥ २४ व्यु ] °व्युत्पत्तिर्वा प्र° ॥ २६ त्स्वा ] °दितिविष° प्र° ॥

तस्य स्वस्वामिसम्बन्धादिषष्ठीविषयेणावस्थाशब्देन वाच्यत्वं द्रव्यस्य, इतरथा द्रव्यशब्दोऽवस्थाशब्दो वानर्थकः स्यात्, इह यद्विशेषवाचिनोऽपि शब्दस्य वाच्यार्थोऽन्य इत्यवश्यमभ्युपगन्तव्यम्, **देवदत्ताश्ववत्**, यथा देवदत्ताश्व इत्युक्ते देवदत्तस्य स्वमश्वः सोऽस्य स्वामीति तेन स्वामिविषयेण अश्वशब्देन - /ms तस्य देवदत्तस्य वाच्यत्वात् ततोऽन्यत्वं दृष्टमेवं द्रव्यावस्थेति । § 1216

**शिलापुत्रकशरीरवन्नेति चेत्** । स्यान्मतम्--यथा शिलापुत्रकस्य शरीरम् इत्यत्र शिलापुत्रकादनन्यस्मिन्नपि शरीरे स्वादिविषयशब्दवाच्यत्वदर्शनादनैकान्तिकतेति । एतच्च **न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात्,** यद्यनन्यच्छिलापुत्रकाच्छिलापुत्रकशरीरं शिलापुत्रक एव शरीरं शरीरमेव शिलापुत्रकः इति घटकुटशब्दवत् पर्यायमात्रत्वात् प्रतीतपदार्थकं श्रोतारं प्रति अन्यतरप्रयोगानर्थक्यं स्याद् गतार्थत्वात् । तथा द्रव्यमेवावस्था द्रव्यावस्थेत्यन्यतरानर्थक्यम् । तस्मादन्यतरानर्थक्याद् नेदमुपपन्नम्, शिलापुत्रकशरीरवद् नानैकान्तिकतेति । किञ्चान्यत्, **अत्रापि शरीरावस्थाक्रियात्वा**दयुक्तम्, नन्वस्माभिरुपपादितम्--द्रव्यक्रियात्मकं सर्ववस्त्विति । तस्मादत्रापि शिलापुत्रकेण शीर्यते, शरारुत्वाच्छरीरमिति शरारु भवति, तेन शरारुणा भूयत इति द्रव्यक्रियाभिधानं नातिवर्तते । तथा च द्रव्यावस्था द्रव्यमवतिष्ठते द्रव्येणावस्थीयते इत्यवस्थानस्य क्रियात्वानतिवृत्तेस्ततोऽन्यत्वमेव । एवं तावदव्युत्पत्तौ । § 1217

**व्युत्पत्तावपि** सामासिकपदत्वात् समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्तरि विहितत्वात् **कर्तरि तु षष्ठीयं** द्रव्यस्यावस्था इति द्रव्यमवतिष्ठत इत्यादि प्राग्वत् । **सा यद्विषयमित्यादि** यावत् **तदन्यगतिविचलनप्रतिबन्धात्मिकामवस्थां दर्शयति** । **सा** षष्ठी **यद्विषयं द्रव्यस्य कर्तृत्वं** यां क्रियां साधयत् साधनं कर्तृ भवति तद् द्रव्यं ततोऽर्थान्तरभूतां तामवस्थानक्रियां दर्शयतीति सम्भन्त्स्यते । किं कारणम् ? **आत्मनोऽक्रियात्वात्** तस्य द्रव्यस्य स्वयमक्रियात्वात्, क्रियामन्तरेण कर्तुः कर्तृत्वाभावात् कर्तरि षष्ठी न स्यात्, - /ms ततस्तस्माद् द्रव्यादन्यत्र गतिरन्यस्य गतिर्द्रव्याद् विचलनं 410/mj

* * *

त्वन्मनोरथानुवृत्तेस्तु बलादेव अत्याज्याभिमततत्त्वद्रव्यशब्दार्थवशाद् द्रव्यादर्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, भवति भवनं वा द्रव्यम् इति भव्यार्थत्वात् प्रकृतिप्रत्ययार्थव्युत्पत्तेर्द्रव्यक्रिययोः सिद्धिः कर्तृभावनानात्वात् ।

---

२७ न्धादिष ] °षष्ठ्यविषयेणा°nayacakra-ms-bhā । °षष्ठ्यविषयिणो° nayacakra-ms-ya ॥

१ इ ] इह द्विशेष°nayacakra-ms-bhā । इह विशेष° ? इह तद्विशेष° ? ॥

३ स्वामीति ] तेन विषतेन स्वामि°nayacakra-ms-ya ॥

३ स्वा ] स्वादिविषयेण ? ॥

७ योगा ] °गादान°nayacakra-ms-bhā ॥

८ च्छिलापु ] °पुत्रकाच्छिलापुत्रकशरीरं शरीरमेवnayacakra-ms-ya । °पुत्रकशरीरं शिलापुत्रक एव शरीरं शरीरमेव nayacakra-ms-bhā ॥

१६ इ ] इति वस्था° प्र° ॥

२३ ष ] षष्ठी स्यात् प्र° ॥

२४ व्याद ] °दन्यामन्यत्रnayacakra-ms-ya ॥

यत् पुनरेतदुक्तम् अविशिष्टदेशसंयोगा वा स्थितिः इति तन्न युक्तं वाशब्दवर्ज्यम्, द्वाभ्यामविरोधात् ।

* * *

परिस्पन्दपरिणतिः पूर्वस्या औदासीन्यावस्थायाः प्रच्युतिः क्रियान्तरत्वावस्थातो वा । तयोरन्यगतिविचलनयोः प्रतिबन्ध आत्माऽस्या अवस्थानक्रियायाः सान्यगतिविचलनप्रतिबन्धात्मिका, तां दर्शयति षष्ठीति । अथवा तदन्यगतिरिति तस्मिंश्चान्यस्मिंश्च नियमेन गतिर्विचलनम्, शेषं पूर्ववत् । पूर्वस्मिन् व्याख्याने भेदोऽनयोः--गतिर्देशान्तरप्राप्तिः, चलनं स्वक्षेत्रेऽपि व्यापृततेति । इह पुनरभेद इति विशेषः । तस्माद् व्युत्पत्तावव्युत्पत्तौ च यदि द्रव्यं ततः अवस्था इति विरुध्यते । अथावस्था ततः द्रव्यम् इति विरुध्यते । **आदिग्रहणाद्** लोके तथा दृष्टत्वात् प्रत्यक्षविरोधः । तथानुमेयत्वादनुमानविरोधः । तद्रूढेश्च रूढिविरोधः । एवं **द्रव्यावस्थाविशेषः** इति क्रियालक्षणमभ्युपगमादिविरोधादयुक्तम् । कालसाधनयोगी भाव इत्येतयोः क्रादिष्वव्याप्तेरलक्षणमिति तैरेव निराकृतमिति । § 1218

**त्वन्मनोरथानुवृत्तेस्त्वि**त्यादि । द्रव्यस्यावस्थामात्रं क्रिया, नार्थान्तरम् इत्येष **साङ्ख्य**मतानुवर्तिनो भवतः परप्रत्ययो मनोरथः स नोपपद्यते, सर्वत्र द्रव्यक्रियात्मकभावापत्तिभावादुक्तवत् । अथापि त्वन्मनोरथमनुवृत्य द्रव्यमात्रदर्शनाभिमुखीभूयापि अवस्थाशब्दं श्रूयमाणमपि उज्झित्वा यद्यपि त्वदुपर्यनुकम्पाद्रवीकृतचेतसो न किञ्चिद् ब्रूमः, तथापि **बलादेवो**पपत्तेरेव - /ms **अत्याज्याभिमततत्त्वद्रव्यशब्दार्थवशात्**, अत्यागार्हमभिमतं तत्त्वं तव **साङ्ख्य**स्य च द्रव्यमेवार्थः, तदभिधायिनो द्रव्यशब्दस्य वशात् तदर्थवशाच्च पुनरपि सारं सारं **द्रव्यादर्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः**, सा क्रियापन्ना, कस्मात् ? **भवति भवनं वा द्रव्यमिति भव्यार्थत्वात्, द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४, भव्यशब्दश्च कर्तरि भावे वास्तु, तथा द्रव्यशब्दोऽपि । तत्र द्रव्यशब्दस्य भव्यार्थत्वात् प्रकृतिप्रत्ययार्थव्युत्पत्तिरवश्यम्भाविनी, ततश्च **प्रकृतिप्रत्ययार्थव्युत्पत्तेर्द्रव्यक्रिययोः सिद्धिः**, प्रकृत्यर्थस्य क्रियात्वात् प्रत्ययार्थस्य द्रव्यत्वात् । कथं व्युत्पत्तिरिति चेत्, उच्यते--साध्यसाधनभेदात्, यद् भूयते सा क्रिया, यद् भवति तद् द्रव्यम्, यत् तद् भवता वस्तुना भूयते स प्रकृत्यर्थो भावः, यत् तद् भवति तत् कर्तृ, तस्मात् **कर्तृभावनानात्वाद्** द्रव्यक्रियानानात्वात् स्यात्, नान्यथा । तस्माद् नयोत्थानप्रकृताद् द्रव्यशब्दार्थवशाद् भव्यभवत्यादिशब्दवशाच्च बलादेव द्वित्वसिद्धिरिति साधूक्तम् । § 1219

क्रिया द्रव्यादर्थान्तरम् इत्यनेन दर्शनेनाविरोधात्, उक्तिवस्तुक्रियालक्षणेन द्रव्यक्रियाश्रयेण च प्रागुक्तेन च न्यायेन चाविरोधादिति । § 1220

---

४ सा ] सा तदन्यगति॰ ? ॥
११ का ] भूतभविष्यद्वर्तमानादिकालयोगी भावः, कर्तृकर्मादिसाधनयोगी भावः इति लक्षणद्वयमत्र क्रियाया विवक्षितम् ॥
११ क्रा ] **कादि॰** प्र॰ ॥

यत् पुनरेतदुक्तम् **अविशिष्टदेशसंयोगा वा स्थितिः इति** लक्षणं तन्न **युक्तं वाशब्दवर्ज्यम्,** तत्रापि वाशब्दस्यानर्थक्यं विकल्पार्थासम्भवात् । कस्मात् पुनस्तदयुक्तम् ?

यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते--सर्वदा सर्वभावानां प्रवृत्तिसमन्वयाद् देवदत्तः इत्यपि नाप्रवृत्तिकं वस्तु, सर्वभेदसम्बन्धानुगुण्यात्तु नायं विशेषः तस्मान्न क्रिया इत्येवमर्थं विशेषग्रहणम् । इदमपि त्यक्तद्रव्यार्थोत्थानम् । यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे

* * *

विरोधात्, **द्वाभ्याम** * * 411/mj

* * *

यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते--सर्वदा सर्वभावानां प्रवृत्तिसमन्वयाद् देवदत्तः इत्यपि नाप्रवृत्तिकं वस्तु, सर्वभेदसम्बन्धानुगुण्यात्तु नायं विशेषः तस्मान्न क्रिया इत्येवमर्थं विशेषग्रहणम् । इदमपि त्यक्तद्रव्यार्थोत्थानम् । यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे

* * *

विरोधात्,

एवं तावत् प्रवृत्तिसामान्यक्रियात्वनिवृत्त्यर्थविशेषग्रहणप्रयोजने दोषाभिधानं कृतम्, अधुनेदमपि विशेषग्रहणप्रयोजनं दूष्यते **--यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते सर्वदे**त्यादि । सर्वदा इति प्रवृत्त्यनिवृत्तिं द- - /ms
र्शयति । **सर्वभावानामि**ति व्याप्तिः । कुतः ? **प्रवृत्तिसमन्वया**द्धेतोः **देवदत्त इत्यपि नाप्रवृत्तिकं** नाक्रियं **वस्तु** तेन शब्देनाभिधीयते, किं तर्हि ? सप्रवृत्तिकमेवोच्यते, यथा पचत्यादीनां क्रियावचनत्वमेवं देवदत्तादीनां द्रव्यवाचित्वाभिमतानामपि वाच्यस्यार्थस्य प्रवृत्त्या सत्तया गत्यादिसर्वभवनात्मिकया समन्वितत्वम् । ततः पचत्यादिवद् देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् **क्रियावचनो धातुः** पा॰ वा॰ १ । ३ । १ इति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात् पुनर्विशेषो न भवतीति निवर्त्यते । कस्मात् पुनर्देवदत्तादयो विशेषा न भवन्तीत्युच्यते **--सर्वभेदसम्बन्धानुगुण्यात् तु नायं विशेषः,** सर्वैर्हसिपठिगम्यादिभिर्भेदैर्देवदत्तभवनप्रवृत्तेः सम्बन्धेनानुगुणत्वात् प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवद्भवनभावविशेषे **तु**शब्दस्य विशेषार्थत्वात् । **तस्माद् न क्रिये**ति देवदत्तादेरक्रियात्वमुपसंहरति **इति**शब्दस्य समाप्त्यर्थत्वात्, **एवमर्थं विशेषग्रहण**मिति प्रकृतोपसंहारः, प्रवृत्तिविशेषः

३२ व] ॰वर्ज्यम्nayacakra-ms-ya । ॰वर्जम् nayacakra-ms-bhā ॥
८ *] ॰न्दः प॰ प्र॰ । दृश्यतां पृ॰ ४०६ पं॰ ७ ॥
८ *] दृश्यतां पृ॰ ४०९ पं॰ १ ॥
२६ स] सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः । तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ॥**--वाक्यप॰** २ । ४४ ॥

क्रिया न प्रवृत्तिसामान्यमिति न भवनमात्रं नापि देवदत्त इत्युपसंहारार्थः । अस्यापि विशेषग्रहणस्य सदोषत्वमुच्यते **--इदमपि त्यक्तद्रव्यार्थोत्थानम्,** इदं हि विशेषग्रहणप्रयोजनव्याख्यानमुत्थान एव द्रव्यार्थत्यागं कुरुते । **अपि**शब्दात् प्रागुक्तभवनसामान्यक्रियात्वनिवृत्त्यर्थं विशेषग्रहणमन्ते क्रियामेव त्यजतीति स्मारयति । **सर्वदा सर्वभावानां प्रवृत्तिसमन्वयात्** इति हेतुवचनेन **देवदत्त इति नाप्रवृत्तिकम्** इति नामवाच्यार्थस्वरूपवचनेन च प्रवृत्तिमात्रमेवेदं न द्रव्यं नामेति द्रव्यार्थस्य प्रागभ्युपगतस्य त्यागः कृतो भवति अनेनापि विशेषग्रहणप्रयोजनवचनेन द्वितीयेनेति । § 1221

किं कारणम् ? **अक्रियावचनत्वाद् देवदत्तवत्,** तदर्थस्याक्रियात्वादक्रियावचनत्वम्, तदर्थस्याक्रियात्वं सर्वभेदसम्बन्धानुगुण्यात् । स वा देवदत्तः क्रिया स्यात् सर्वभेदसम्बन्धानुगुणत्वात् वृतादिवत्, अनिष्टं (Edtext outside numbered paragraph) चैतदिति । किञ्चान्यत्, प्रवृत्तिसामान्यनिवृत्त्यर्थे देवदत्तादिद्रव्यनिवृत्त्यर्थे च विशेषग्रहणे द्विधापि **अस्वशब्दोपादानसाध्यभावादिलक्षण** (Edtext outside numbered paragraph)**वचनं चानर्थकं स्यात्** । यदुक्तम् **अस्व** (Edtext outside numbered paragraph)**शब्दोपादानसाध्यभावो भावः** इति भावलक्षणम्, **भावादि**ग्रहणात् **स्व** (Edtext outside numbered paragraph)**शब्दोपादानसिद्धभावं सत्त्वम्** इति द्रव्यलक्षणमुक्तित एव पृथगिति, वस्तुतोऽपि लिङ्गसङ्ख्यादिमदलिङ्गस (Edtext outside numbered paragraph)ङ्ख्यत्वं च द्वयोः पृथक्त्वं तथा त्रिकालात्रिकालविषयत्वं भूताभूतभेद इत्यादि पृथक्त्वलक्षणवचनमनर्थकं द्वयोरपि क्रियात्वादिति । § 1222

न केवलं द्रव्यार्थत्याग एव दोषः, किं तर्हि ? प्राग्व्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुबन्धं चेदम् । कथमिति चेत्, उच्यते **--यथा तत्रे**त्यादि ग्रन्थ उपसंहृते दोषासक्त्या चोद्यमेव उत्तरत्वेन समर्थयति । **भाष्यकारेण** कारकवत्याः फलोद्देशिन्याः क्रियात्वं प्रतिपाद्य उपसंहृतं **तस्मात् प्रवृत्तिविशेषः क्रिया, न प्रवृत्तिसामान्य**मिति, तत्र दोष आसज्यते--यदि प्रवृत्तिविशेषः क्रिया प्रवर्तते, ईहते, चेष्टते इत्यादीनां धातुसंज्ञा न प्राप्नोति, क्रियावचनानामेव धातुत्वात् तेषां चाक्रियात्वात् प्रवृत्तिविशेषक्रियात्वादित्येष दोषो

- /ms

विशेषग्रहणे वृतादीनां धातुसंज्ञा नैव प्राप्नोति अक्रियावचनत्वाद् देवदत्तवत्, अस्वशब्दोपादानसाध्यभावादिलक्षणवचनं चानर्थकं स्यात् । यथा च तत्रोच्यते— नैष दोषः, विशेष इति भवतः क्व सम्प्रत्ययः ? य उपादीयमानोऽन्यं निवर्तयति । यद्येवं वृतादयोऽप्युपादीयमाना विशेषान् निवर्तयन्ति, तथा चोक्तम्--सामान्यमपि यथा विशेषस्तद्वत् पा॰ म॰ भा॰ २ । २ ।

---

२ स्मार]
॰यतीतिnayacakra-ms-ya ॥
६ प्रा]
प्रत्याख्यात॰nayacakra-ms-ya ॥
९ त] दृश्यतां पृ॰ ४०॰ पं॰ ३ ॥
१० आस] ॰संज्य॰ प्र॰ ॥
१२ चा] वाक्रियत्वात् प्र॰ ॥

२४, ततश्चैषां सिद्धा धातुसंज्ञा । एवमिहापि प्रत्यु-

* * *

विशेषग्रहणे वृतादीनां धातुसंज्ञा नैव प्राप्नोति ।**यथा तत्र प्रवृत्तिसामान्य-निवृत्त्यर्थे विशेषग्रहणे तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे** 412/mj

* * *

विशेषग्रहणे वृतादीनां धातुसंज्ञा नैव प्राप्नोति अक्रियावचनत्वाद् देवदत्तवत्, अस्वशब्दोपादानसाध्यभावादिलक्षणवचनं चानर्थकं स्यात् । यथा च तत्रोच्यते— नैष दोषः, विशेष इति भवतः क्व सम्प्रत्ययः ? य उपादीयमानोऽन्यं निवर्तयति । यद्येवं वृतादयोऽप्युपादीयमाना विशेषान् निवर्तयन्ति, तथा चोक्तम्--सामान्यमपि यथा विशेषस्तद्वत् पा॰ म॰ भा॰ २ । २ । २४, ततश्चैषां सिद्धा धातुसंज्ञा । एवमिहापि प्रत्यु-

* * *

विशेषग्रहणे वृतादीनां धातुसंज्ञा नैव प्राप्नोति ।

**यथा च तत्रोच्यते नैष दोष** इत्यादि । एवं दोषेऽभिहिते स्यान्मतं प्रवृत्तिसामान्यनिवृत्त्यर्थविशेषग्रहणप्रयोजनदोषं परिहरामीति **विशेष इति भवतः क्व सम्प्रत्यय** इति प्रश्नोपक्रमं दोषवादिनैव परिहारमभिधापयिष्यतस्ते, दोषवादी किल ब्रूयात् **--य उपादीयमानोऽन्यं निवर्तयतीति** । परो ब्रूयात् **--यद्येवं वृतादयोऽप्युपादीयमाना विशेषान् निवर्तयन्तीति**, तर्हि गच्छत्यादयो विशेषा निवर्त्यन्ते न गच्छति न शेते न भुङ्क्ते वर्तत एव अस्ति भवति विद्यत एव केवलमिति । तस्मादुपादीयमाना गमनादीन् विशेषान् निवर्तयन्ति वृतादयः, तिष्ठत्यादिवत् । **तथा चोक्तं** भाष्यकारेण **--सामान्यमपि यथा विशेषस्तद्व**दिति ज्ञापकमिदम्, इति वर्तत्यादिर्विशेष एव उपादीयमानत्वे विशेषनिवृत्तिहेतुत्वात् तिष्ठत्यादिनिवृत्तिहेतुगच्छत्यादिवत् । **ततश्चैषां सिद्धा धातुसंज्ञा** वृतादीनामिति यथैष सामान्यप्रवृत्तिनिवृत्त्यर्थे विशेषग्रहणे परिहार **एवमिहापि प्रत्युच्येत** द्रव्यनिवृत्त्यर्थेऽपि विशेषग्रहणे परिहार उच्येत प्रत्युच्येत । **सर्वदा सर्वभावानां प्रवृत्तिसमन्वयाद् देवदत्तः इत्यपि नाप्रवृत्तिकं वस्तु,** तस्मात् तन्निवृत्त्यर्थं **सर्वभेदसम्बन्धानुगुण्यात् तु नायं विशेषः** इत्येतदर्थेऽपि विशेषग्रहणे देवदत्तस्य क्रियात्वं स्यात्, वृतादीनां तद्वदक्रियत्वाद्वा धातुसंज्ञा मा भूत्, स्वशब्दोपादानसिद्धतादिवचनानर्थक्यं चे[त्या]दिदोषापादने कृते स एव परिहार उच्यते त्वया **--विशेष इति भवतः क्व सम्प्रत्ययः ?** इत्यादि यावत् **सिद्धा धातुसंज्ञा** । § 1223 - /ms

१ वृ ] वृत्तादीनांnayacakra-ms-bhā । वृत्तानांदी nayacakra-ms-ya ॥
१० वृ ] वृत्तादीनांnayacakra-ms-bhā । वृत्तानांदी nayacakra-ms-ya ॥
१८ वृ ] वृत्ता॰ प्र॰ ॥
२२ त्यु ] ॰च्यतेnayacakra-ms-ya ॥
२२ उच्ये ] ॰च्यतेnayacakra-ms-ya ॥
२३ प्र ] दृश्यतां पृ॰ ४११ पं॰ २ ॥
२५ त्वा ] ॰त्वाद्वा संज्ञाnayacakra-ms-bhā । ॰त्वा संज्ञा nayacakra-ms-ya ॥
२६ क्यं ] चेदि दोषा॰ प्र॰ । अत्र चेति दोषा॰ इत्यपि पाठः स्यात् ॥
२७ विशेष ] दृश्यतां पृ॰ ४१२ पं॰ ३ ॥

413/mj

च्येत । एवं चोच्यमाने नन्वस्मद्धृदय एव दृष्टम्, नन्वस्माभिरप्यभिहितं प्रवृत्तिरेव प्रवृत्तिविशेष इति । एवं च कृत्वा प्रवृत्तिमात्रस्य... ...अनर्थकमुभयोरपि व्याख्याविकल्पयोः । न चाफलमेव, अनिष्टकृदपि । एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिवर्तनप्रवृत्तिविशेषत्वात्, पचादिवृतादिवत् । वृतादयोऽप्यक्रियाः, तच्छब्दानामधातुसंज्ञा च स्यात्, सर्वभेदसम्बन्धानुगुणविशेषत्वात्, देवदत्तवदेव । § 1224

यत् पुनरुच्यते न वयं वस्तुन्यसहभावतां निवृत्तिं ब्रूमः, किं तर्हि ? पचति... § 1225

एवं परिहारद्वयेऽपि समानमुत्तरमिदमुच्यते --**एवं चोच्यमाने नन्वस्मद्धृदय एव दृष्टम्** । **ननु** इत्यनुज्ञापने, अनुज्ञातं त्वयैतद् यदस्मद्धृदयक्षेत्रउप्तस्य दर्शनबीजस्य त्वद्वचनसलिलसेकेन फलमभिव्यक्तम् । तद्विवृणोति स्मारयन् --**नन्वस्माभिरप्यभिहितं प्रवृत्तिरेव प्रवृत्तिविशेषः इति,** यदुच्य-
- /ms ते वृतादिसामान्यमुपादीयमानं गमनादिविशेषं निवर्तयतीति तद्युज्येत यदि वृतादिसामान्यव्यतिरेकेण गमनादिविशेषः स्यात्, स तु सामान्यमेव इत्युक्तम् । तस्माद् न सामान्यं विशेषाभावादुपादीयमानं विशेषान् निवर्तयितुमर्हति खपुष्पादिविशेषानिव । अतः प्रवृत्तिविशेषत्वाभावादुभयत्र परिहारे विशेषग्रहणानर्थक्यदेवदत्तक्रियात्व-वृताद्यक्रियात्वदोषास्तदवस्था एवेति । तदुपसंहरति --**एवं च कृत्वा प्रवृत्तिमात्रस्ये**त्यादि गतार्थं यावद**नर्थकमुभयोरपि व्याख्याविकल्पयो**रिति । § 1226

एवं तावद् विशेषग्रहणमनर्थकम्, न केवलमनर्थकमेव, किं तर्हि ? अनर्थार्थमपीत्यत आह --**न चाफलमेव, अनिष्टकृद**पीति । तदनिष्टकृत्त्वं साधनेनैव भाव्यते --**एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिवर्तनप्रवृत्तिविशेषत्वात् पचादिवृतादिव**दिति, प्रवृत्तिविशेषत्वमन्यत्वं तन्निवर्तनं चेति द्रव्यादन्यस्य प्रवृत्तिसामान्यव्यतिरिक्तस्यार्थस्याभावादेवायुक्तम्, अभ्युपगम्यापि दोषः--देवदत्तः क्रिया स्यात्, अन्यनिवर्तनत्वे सति विशेषप्रवृत्तित्वात्, स गच्छत्यादिविशेषनिवर्तनो यज्ञदत्तादिविशेषनिवर्तनश्च सामान्यत्वात्, उपादीय-

२ ए] एवं च कृत्वा प्रवृत्तिमात्रस्य प्रवृत्तिविशेषत्वाद् विशेषग्रहणमनर्थकमुभयोरपि व्याख्याविकल्पयोः । इत्याशयको मूलपाठोऽत्र स्यात् ॥
९ प] पचति इत्युक्ते पचतिशब्दः क्रियान्तरनिवृत्तिविज्ञानमादधाति, अयं च धर्मो वृतादीनामप्यविशिष्टः । इत्याशयकोऽत्र मूलपाठः सम्भाव्यते ॥
१० स] **समानमिदमुत्तर-मिद॰**nayacakra-ms-ya ॥
१४ वृ] **वृत्तादि॰** प्र॰ ॥
१८ णा] **॰णार्थक्य॰** प्र॰ ॥
२५ स्याभावा] **॰वादेवेत्युक्तम्** प्र॰ ॥

मानत्वे सति अन्यनिवर्तनत्वात् प्रवृत्तिविशेषश्च । ततश्च पचत्यादिवद् वर्तत्यादिवच्च क्रिया, क्रियात्वात् तद्वाचिनः शब्दस्य धातुसंज्ञा, पूर्वप्रक्रान्तन्यायक्रमेण पच्यादिवद् वृत्यादयः, तद्वद् देवदत्तादय इति सर्वं क्रियैवेत्यापन्नम् । अनिष्टं चैतदावयोरिति । येऽप्यमी **वृतादयस्तेऽप्यक्रियाः, तच्छब्दानामधातुसंज्ञेत्यादि, सर्वभेदसम्बन्धानुगुणविशेषत्वाद् देवदत्तवदेव** । पचादीनां च गमनादिसर्वधात्वर्थ- व्यापित्वस्य प्रागुपपादितत्वात् सिद्धहेतुत्वात् - /ms साधीयः साधनमिदमपि, **च**शब्दसूचितत्वादनन्तरोदाहृतद्विविधक्रियावाचिशब्दप्रकृतत्वाच्च सर्वनामशब्दता च स्यात् । § 1227

**यत् पुन**रित्यादि याव**दयं च धर्मो वृतादीनामप्यविशिष्ट** इति । पचादिविशेषनिवर्तकत्वाद् वृतादयो धातुसंज्ञा भवन्ति इत्युक्ते परस्याशङ्का स्यात् नैव निवर्तयन्ति पचादीन् वृतादयः, विरोधाभावश्च वृताद्यन्तर्भावात् पचादीनाम्, अतो विशेषनिवर्तकत्वाभावाद् न धातुसंज्ञा वृतादयः स्युः इत्या 414/mj

* * *

अयं च धर्मो वृतादीनामप्यविशिष्टः । अत्र ब्रूमः--वस्तुनः प्रवृत्तौ... ... ... वैधर्म्येण ।

एवमयं स उभयनयः । नैगमदेशत्वाद्द्रव्यार्थोऽयम् । द्रव्यमपि भावसाधनम् ।

* * *

शङ्क्य तत्प्रतिसमाधानं **पुनरुच्यते--न वयं वस्तुन्यसहभावतां निवृत्तिं ब्रूमः**, निवृत्तिरत्रास्माभिर्नार्थधर्मप्रकल्पिता विवक्षिता, किं तर्हि ? शब्दधर्मप्रकल्पिता विवक्षिता, अर्थगता हि निवृत्तिरसहभावजनिता घटपटादिवदेकत्रासम्भवात्, शब्दगता तु विज्ञानप्रवृत्तिनिवृत्तिमात्रकृता सा, देवदत्ते सन्निहितसत्ताद्रव्यत्वगतिस्थितिवृत्त्यवृत्त्यादिसर्वधर्मसम्बन्धिन्यपि गच्छति देवदत्तः इत्युक्ते तिष्ठति आस्ते शेते इत्यादिक्रियाकलापं निवर्त्य देवदत्तं गच्छतिशब्दो गमनेनैव सम्बन्धयति तद्विषयैकविज्ञानाधानहेतुत्वात्, न तथा वस्तुनि निवृत्तिः सम्भवति सततसन्निहितसर्वधर्मात्मकत्वाद् देवदत्तस्य । तदुदाहरति **--किं तर्हि ? पचती**त्यादि गतार्थम्, उदाहृतार्थसंवादी दार्ष्टान्तिकोऽर्थः **--अयं च धर्मो वृतादीनामप्यविशिष्टः**, वर्तते, ईहते, चेष्टते इत्यादयोऽपि शब्दाः क्रियान्तरनिवृत्तिविज्ञानाधानधर्मिणो न वस्तुगतान् धर्मान् निवर्तयितुमलम्, - /ms शब्दानां बुद्धिप्रवृत्तिनिवृत्तिक्रियायां प्रभुत्वाद् वस्तुप्रवृत्तिनिवृत्त्योरप्रवृत्तत्वादिति । § 1228

**अत्र ब्रूमः--वस्तुनः प्रवृत्ता**वित्यादि यावद् **वैधर्म्येणे**ति । अवसितप्रयोजनमिदं वचः, त्वयैव वस्तुप्रवृत्तेः सर्वप्रवृत्तिविशेषसहिताया एवाभ्यनुज्ञात-

---

२ वृ] वृतादयः ? ॥
६ क्रिया] °याकविशब्द° प्र° ॥
८ य] यत्र पुन° प्र° ॥
१० वृ] वृताद्यंचद्यंश ? द्यंग ?भावात् प्र° ॥
२१ न्धि] सप्तम्यन्तोऽयं निर्देशः ॥
२३ व] वस्तुनि विवृत्तिः प्र° ॥
२५ संवा] °संभवादी प्र° ॥
२८ वृत्तिनिवृत्त्यो] °त्योत्तरप्र° प्र° ॥
३१ एवाभ्य] °भ्यज्ञात° प्र° ॥

त्वाद् भावितत्वाच्च, सम्भावनैव हि न, वस्तुप्रवृत्तिः सर्वप्रवृत्तिविशेषात्मिकेत्यतीतविचारेषु विस्तरेण चरितार्थमेतत् । कथं ? विशेषवान् वाग्व्यवहारो विशेषान्तरप्रवृत्तिनिवृत्तिविषयो न वस्तुन्यत्यन्तनिर्भेदात्मके प्रभवति इति भावयता भवतैव सुभाषितत्वात् किमस्माभिर्वाच्यं वृतादीनां पचादीनां वा धातुसंज्ञा प्राप्नोति न प्राप्नोतीति ? सर्वेषां धातूनामस्मदभिमतप्रवृत्तिसामान्यक्रियावचनत्वानतिवृत्तेर्वस्तुव्यवहारे शब्दव्यवहारे वेति न किञ्चिद् न प्रसिध्यति । त्वया तु पुनरसदर्थविषयत्वाद् भ्रान्तिज्ञानं शब्दार्थविषयं व्यवस्थापितं वस्त्वसंस्पर्शादित्यलं प्रसङ्गेन । § 1229

प्रकृतमुच्यते **--एवमयं स उभयनयो** योऽसौ मया आदावुद्दिष्टो विधिनियमात्मक उभयनय इति, विधिश्च नियमश्च सर्वत्र द्रव्यं क्रिया चेति विधिनियमम्, द्वन्द्वैकवद्भावात्, स एष निर्दिष्टः प्रत्यक्षीकृतस्ते । कस्य पुनरयमार्षाभिहितानां नयानां भेद इत्यत्रोच्यते **--नैगमदेशत्वाद् द्रव्यार्थोऽयम्,** न पर्यायार्थः । द्रव्यपर्यायसङ्गृहीतानां बहुभेदानां मध्ये द्रव्यार्थभेदेषु नैगम-सङ्ग्रह-व्यवहारेषु यो नैगमोऽनेकभेदस्तस्यैकदेशोऽयं तद्भेद इत्यर्थः । **एक्केक्को य सतविधो सत्त णयसता हवंति ते चेवं** आ इक्किक्को य सयविहो सत्त नयसया हवंति एमेव । अन्नो वि य आ वनि॰ २२६ इति वचनात् । § 1230

415/mj

द्व्यर्थता उक्तवत् । पदार्थो द्रव्यक्रिये । वाक्यमाख्यातशब्दः । तदर्थ उक्त उभयभाक् । नयविनिर्गमसूत्रम्--अत्थित्तं अत्थित्ते परिणमति भदृश्यतां पृ॰ २९६ टि॰ १ ॥गवतीसू॰ १ । ३ । ३२ इति । § 1231

द्रव्यशब्दः किंसाधनोऽत्राभिप्रेत इति चेत्, उच्यते **--द्रव्यमपि भावसाधनम्,** यत् तद् द्रूयते केनापि यो द्रवति गच्छति सततं प्रवर्तते तस्य यद् द्रवणं गमनं सततप्रवृत्तिः स भावस्तद् भवनम्, तत्साधनो द्रव्यशब्दः, कर्तृसाधनाविनाभाविभावसाधनव्याख्यानस्य सोपपत्तिकस्य विस्तरेण कृतत्वात् सैव **द्व्यर्थता उक्तवत्,** द्रव्यक्रियात्मकद्व्यर्थता परस्पराविनाभाविनी करणादीनां तदव्यतिरिक्तस्वरूपत्वात् सर्वत्र घटपटादिबीजाङ्कुरादिषु च सर्वैकात्म्यस्य सुभावितत्वादिति । **पदार्थो द्रव्यक्रिये उक्तवत्** इति वर्तते । **वाक्यमाख्यातशब्द** इति, आख्यातं साव्ययकारकवाक्यमेकमिति वाक्य-

- /ms

१ स ] सभाव॰ प्र॰ ॥
९ म ] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१० मा ] ॰मात्मनः उतनय nayacakra-ms-bhā । ॰मात्मः उतनय nayacakra-ms-ya ॥
१५ ह ] हवंतेवंnayacakra-ms-ya । दृश्यतां पृ॰ ३७३ पं॰ ११ ॥
२६ क्रियात्म ] ॰त्मद्व्य॰nayacakra-ms-ya ॥
२९ मेक ] ॰कविति प्र॰ ॥

म्, **तदर्थ उक्तः** वाक्यार्थ उक्तः **उभयभाक्** द्रव्यक्रियाद्यात्मकवस्तु भजते वाक्यार्थ इति विस्तरेणोक्तोऽनेन विधिनियमभङ्गेन नैगमैकदेशद्रव्यार्थेन ।
§ 1232

**नयविनिर्गमसूत्रम्--अत्थित्तं अत्थित्ते परिणमतीति,** अस्तित्वं भावो भावेऽस्तित्वे परिणमति । भावो भाव एव सततं वर्तते परितः समन्ताद् नमति परिणमति तं तं भावमापद्यते सदा कर्तृसहित एव । § 1233

इति उभयनयः पञ्चमोऽरः परिसमाप्तः ॥

# ६ अथ षष्ठो विधिनियमविध्यरः ।

416/mj

औँ अर्हम् § 1235

नन्वेवमुभयमप्यवस्तु, अनुपपन्नस्वावस्थत्वात्, खपुष्पवत् । स्वा अवस्थाः स्थित्युत्पत्तिविनाशाः । ता यदि भावस्य ततो द्रव्यमनवस्थमिति द्रव्यप्रभेदासम्भवः । भाव एव तु स तथाभूत आपद्यते, तद्भेदस्य तदात्मकत्वात्, मृद्वत् । प्रवृत्तिभाववचनात् तु प्रवृत्तावेव व्यतिरेकसम्भवाद् भावादेव सर्वस्य कृतत्वाद् § 1236

एवं विधिनियमभङ्गारे द्रव्यक्रियात्मकवादे संहृते षष्ठनय आह **--नन्वेवमित्यादि** विचाराश्रयं दोषापादनसाधनम् । **उभयमपि** द्रव्यं क्रिया च इत्य**वस्तु अनुपपन्नस्वावस्थत्वात्,** अनुपपन्नाः स्वा अवस्था अस्य, तद्भावादनुपपन्नस्वावस्थत्वात् **खपुष्पवदिति** । कास्ताः स्वा अवस्थाः ? उच्यते **--स्वा अवस्थाः स्थित्युत्पत्तिविनाशाः** । ताश्च द्रव्यस्य वा स्युः क्रियाया वा ? किञ्चातः ? **ता यदि भावस्य** ताः स्थित्यादयः प्रागुक्तथाभूतसन्निहितवस्तुत्वव्यक्तिलक्षणायाः क्रियाया इष्यन्तेऽवस्था इति **ततो द्रव्यमनवस्थं** प्राप्तम्, अनवस्थालक्षणत्वादुभयोरन्यतरकल्पनावैयर्थ्यादवस्थाव्यतिरिक्तलक्षणाभावात् । भवतु द्रव्यमनवस्थम्, को दोष इति चेत्, उच्यते **--द्रव्यमनवस्थमिति द्रव्यप्रभेदासम्भवः** प्राप्तः, **इति**शब्दस्य हेत्वर्थत्वादनवस्थत्वादित्यर्थः, द्रव्यप्रभेदा रूपादिगत्यादिविवर्ताः, ते न सम्भवन्ति अनवस्थत्वादसत्त्वात् खपुष्पस्येव । ततश्च यदुक्तं द्रव्यस्य लक्षणं तस्य हानिः । कतमस्य इति चेत्, उच्य- - /ms

---

५ भा ] सप्तम्यन्तोऽयं निर्देशः ॥
६ स ] तदाnayacakra-ms-ya ॥
६ स ] °सहित वेति उभयनयः पञ्चमोऽरः परिसमाप्तः प्र° । दृश्यतां पं° ५ ॥
२ न ] दृश्यतां पृ° ३०१-- १ ॥
९ स्वा ] स्वाऽवस्थाnayacakra-ms-pānayacakra-ms-ḍenayacakra-ms-līṃnayacakra-ms-raṃnayacakra-ms-hī । स्वावस्था nayacakra-ms-bhā ॥
१० उ ] उच्यंतेnayacakra-ms-bhā nayacakra-ms-pā ॥
१३ इ ] इष्यंते अवस्थाnayacakra-ms-ya । इष्यंता अवस्था nayacakra-ms-bhā ॥
१७ व ] °वस्थात्वा° प्र° ॥

ते, **सर्वप्रभेदनिर्भेदं बीजम्** इत्यस्य । तस्मान्नास्ति द्रव्यम्, अनवस्थत्वात्, खपुष्पवत् । § 1237

ततः किं प्राप्तम् ? **भाव एव तु स तथाभूत आपद्यते,** द्रव्यभूता क्रियैव आपद्यते, कस्मात् ? **तद्भेदस्य तदात्मकत्वात्,** स्थित्युत्पत्तिविनाशा हि द्रव्यभेदाभिमता द्रव्यस्यैव चेदात्मानो भवन्ति, तत एतदर्थादापन्नम्--क्रियाया आत्मेति, क्रियैव च द्रव्यं संज्ञामात्रभेदात् । **मृद्वदिति** दृष्टान्तः, यथा मृद्भेदाः पिण्डशिवकादयो मृदात्मकाः सन्तो मृद्भूता एव तथा स्थित्यादयो द्रव्यभूतभावभेदा एवेति द्रव्याभावेऽर्थापत्त्या स्थित्यादयः क्रियाया भेदा इत्यापन्नाः । § 1238

यदपि च कल्पितं प्रवृत्तिसामान्यव्यतिरेकेण **कारकवत्या** ओदनादिफलोद्देशिन्याः **परिग्रहार्थं विशेषग्रहणं** तदपि न कार्यम् । कस्मात् ? **प्रवृत्तिभाववचनात् तु** मत्पक्षे **प्रवृत्तावेव** व्यतिरेकसम्भवः,
417/mj

* * *

द्रव्यभावत्यागाद् द्वयविभागवचनं व्यर्थम्, ततश्च तथाभवनविनाभूतसन्निधानमपि निर्मूलम्, सर्वनिर्मूलता चैवम्, अव्यक्तिरपि असन्निहितत्वात् खपुष्पवत् । अथोच्येत--सन्निहिततथाभूतवस्तुतत्त्वव्यक्ति द्रव्यमेव स्थित्यादिस्वावस्थमस्तु, एवं तर्हि सर्वप्रभेदनिर्भेदत्वमसत्यं द्रव्यस्य क्रियायाश्चाक्रियात्वमव्यञ्जकत्वात् प्रागेव तथाभूतव्यक्तिव्यर्थत्वात् ।

अथैतच्चेदुभयं नेच्छति ततोऽविभागावस्थत्वाद् द्रव्यमविभागावस्थं तद्य-

* * *

प्रवृत्तिसामान्यमेव भावः इत्युक्तत्वाद् विशेषास्तत्रैव सम्भवन्ति । अतोऽस्य व्यतिरेकसम्भवाद् यदपि ओदनादि फलं तदपि प्रवृत्तिसामान्यमेव । तस्माद् **भावादेव** क्रियाया एव **सर्वस्येष्टस्य कृतत्वाद्** द्रव्यं भावः इत्येतत् त्यक्तम् । तत्त्यागाद् **द्वयविभागवचनं व्यर्थम्,** द्रव्यं क्रिया च वस्तु इत्युभयाभ्युपगमो मूलत एव विघटते । **ततश्च तथाभवनेन** प्रवृत्तिलक्षणेन **विनाभूतस्य सन्निधानमपि निर्मूलम्** । ततश्च यदि द्वे अपि द्रव्यक्रिये विभक्ते न स्तः ततस्तयोर्लक्षणमनुपपन्नम्, अतश्च विभागेन लक्षणाभावात् तयोरभावः खपुष्पवत्
- /ms
। तदभावात् क्रिया कुतः तथाभवनक्रियासन्निधिलक्षणं द्रव्यं प्रवृत्तिसामान्यं वा कुतः तथाभवनविनाभूतत्वात् खपुष्पवदेवेति । **सर्वनिर्मूलता चैवमिति** सन्निधिनिर्मूलत्वात् क्रियाया अव्यक्तिर्भेदानामव्यक्तिश्च तया विनेत्यत आह **--अव्यक्तिरपि असन्निहितत्वात् खपुष्पवत्** । § 1239

---

२ स] दृश्यतां पृ॰ ३७८ पं॰ १ ॥
६ द्र] द्रव्यस्य वेदा॰nayacakra-ms-ya । द्रव्यस्यवे भेदा॰ nayacakra-ms-ya । द्रव्यस्य भेदात्मानो ? ॥
८ स] सन्तिnayacakra-ms-bhā ॥
९ प] ॰र्थोपत्त्या प्र॰ ॥
११ क] दृश्यतां पृ॰ ३९९ पं॰ ४ ॥
१७ म] दृश्णतां पं॰ २५ ॥
२१ व] ॰वंत्यततोऽस्यnayacakra-ms-ya ॥
२३ ष्ट] ॰ष्टकृतत्वाद् प्र॰ ॥
२७ न्न] ॰न्नमतेतश्च प्र॰ ॥
३० क्रियाया] ॰या व्यक्ति॰ प्र॰ ॥

**अथोच्येते**त्यादि । स्यान्मतम्--भावस्य प्रागुक्तवत् स्थित्युत्पत्तिलया अकल्पमानाः समनन्तरोक्तदोषदर्शनात्, **सन्निहिततथाभूतवस्तुतत्त्वव्यक्ति द्रव्यमेव** उक्तवत् सम्मूर्च्छितसर्वप्रभेदं **स्थित्यादिस्वावस्थमस्तु,** ताश्च स्थित्याद्यवस्थाः क्रिययाभिव्यक्तिं नीयन्त इति । अत्रोच्यते **--एवं तर्हि सर्वप्रभेदनिर्भेदत्वमसत्यं द्रव्यस्य,** ते हि स्थित्यादिभेदा द्रव्यस्यैव संवृत्ता इति निर्भेदत्वोक्तिर्व्याहन्यते । किञ्चान्यत्, **क्रियायाश्चाक्रियात्वम्,** सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिः क्रियेष्यते, ते हि भेदाः क्रिययाभिव्यज्यन्ते चेद् भेदाः प्रागपि क्रियाभिव्यक्तेः सन्ति, तथाभूतत्वात् क्रियाया व्यक्तिकरत्वाभावः । तस्माच्चाव्यञ्जनात् क्रिया द्रव्यवत् खरविषाणवद्वा न क्रियेति । ततश्च द्रव्यस्याद्रव्यत्वात् क्रियायाश्चाक्रियात्वादशेषपक्षध्वंसित्वम्, अनुपपन्नस्वावस्थत्वाद् द्रव्यस्य क्रियायाश्च खपुष्पवदभाव इति । § 1240

ति, क्रियायाश्चाविभागावस्थद्रव्यविषयय (Edtext outside numbered paragraph)थासन्निधिव्यक्तिक्रियात्वादविभागस्यैव सन्निहितस्य व्यञ्जिका हि क्रिया । ततः किमिति चेत्, **ततो यदेव उत्पद्यते तदेव विनश्यति,** ऊर्द्धपत्तिरुत्पत्तिरात्मलाभः प्रत्यक्षोपलब्धिः, विविधमदर्शनं विनाशोऽनुपलब्धिरभावः । एकरूपत्वाच्च वस्तुनस्तदभिव्यञ्जनाच्च क्रियाया उत्पत्तिविनाशयोरप्यभेदाद् यदेवोत्पद्यते तदेव विनश्यति । किं कारणम् ? **युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्वावस्थत्वात्** । यदा चा (Edtext outside numbered paragraph)विभागावस्थं द्रव्यम् क्रिया च तद्व्यञ्जिका च तदामी युगपद्भाविनः पृथिव्यप्तेजोवाय्वाकाशकालादिभेदा रूपरसगन्धस्पर्शसङ्ख्यासंस्थानादिभेदाश्च ये चा (Edtext outside numbered paragraph)युगपद्भाविनो मृत्पिण्डशिवकादिभेदास्ते सर्वेऽप्यविभागा (Edtext outside numbered paragraph)वस्थामात्रमित्यापन्नाः । तस्मात् सर्वभेदानामविभागावस्थामात्रत्वादुत्पत्तिर्विनाश इत्यप्ययुगपद्भाविनौ भेदौ तयोश्च अविभागाव (Edtext outside numbered paragraph)स्थद्रव्यत्वम्, ततश्चैक्यम्, एकत्वाच्च यदेवोत्पद्यते तदेव विनश्यति इति साधूक्तं देशकालादिभेदाभावात् । § 1241

**अथैतच्चेदुभयं** द्रव्यनिर्भेदासत्त्वादद्रव्यं सन्निहिततथाभूतवस्तुव्यक्त्यभावादक्रियात्वं च **नेच्छति** भवान् सर्ववस्तुत्यागभयात् **ततोऽविभागे**त्यादि, **अविभागावस्थत्वात्,** विभागा भेदाः स्थित्याद्यवस्थाः, तदभावाद् द्रव्यमविभागमित्यसदापन्नम्, मा भूद् द्रव्यस्य भेदात्मकस्याद्रव्यत्वमिति

२ त्तिल ] °लयाः कल्पमानाःnayacakra-ms-bhā । °लयाः कल्समानाः nayacakra-ms-ya । स्थित्युत्पत्तिलयकल्पनायां ? ॥

३ स ] °सन्निहितत्वात् खपुष्पवत् तथाभूत-वस्तुतत्त्वव्यक्तिnayacakra-ms-ya ॥

४ स्थित्यादिस्वाव ] °स्थस्तु प्र° ॥

१४ त ] ऽतो°nayacakra-ms-bhā । अतो ? ॥

क्रियायाश्चाक्रियात्वमव्यञ्जकत्वात् प्रागेव तथाभूतव्यक्तिव्यर्थत्वाद् मा भूदिति किमापन्नम् ?

ञिका क्रिया, ततो यदेवोत्पद्यते तदेव विनश्यति युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्त्वावस्थत्वात् ।

अस्त्विति चेत्, ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्वादनुत्पन्नोऽविनष्टश्च सर्व एवेति स्ववचनादिविरोधाः, तथा चाङ्कुरपत्रादिनिराकरणादपि च लोकादिविरोधाः ।

* * *

-/ms, 418/mj ञिका क्रिये**द्रव्यमविभागावस्थम्** । **तद्य-**

* * *

ञिका क्रिया, ततो यदेवोत्पद्यते तदेव विनश्यति युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्त्वावस्थत्वात् ।

अस्त्विति चेत्, ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्वादनुत्पन्नोऽविनष्टश्च सर्व एवेति स्ववचनादिविरोधाः, तथा चाङ्कुरपत्रादिनिराकरणादपि च लोकादिविरोधाः ।

* * *

ञिका क्रिये

**अस्त्विति चेत्** । स्यान्मतम्--एकत्वादुत्पत्त्यादिभेदैक्याद् यदेवोत्पद्यते तदेव विनश्यति इत्यस्तु, तर्हि को दोष इत्यत्र दोषकुतूहलं चेद् ब्रूमः--यदि बीजाङ्कुराद्ययुगपद्भाविनामपि पृथिव्यादियुगपद्भाविभेदमूलत्वाद् यदेवोत्पद्यते तदेव विनश्यति **ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्व**मिति दोष उदाहरणेन स्फुटीक्रियते, यस्माद् बीजोच्छूनमूलादिपूर्वभेदानां पत्रनालाद्युत्तरभेदानां च -/ms विनाशावस्थत्वात् अङ्कुर एवैकः इति सत्यं ततोऽङ्कुरोत्पत्तावङ्कुर एव विनश्यति, ततश्च दृष्टेष्टविरुद्धावनुत्पत्त्यविनाशदोषौ स्याताम्, अङ्कुरोत्पत्तौ **तस्यैव** अङ्कुरस्यैव **विनाशित्वाद्** न बीजं विनष्टं नाङ्कुर उत्पन्नः, विनंष्टुरुत्पत्तुश्चाभेदात् । भेदे तु सति युज्येत बीजं विनष्टमङ्कुर उत्पन्नः इति । स चोत्पन्नश्चेद् न विनष्टः, विनष्टश्चेद् नोत्पन्न इत्युभयाव्यवस्थानाद् नोत्पन्नो न विनष्ट इति । अस्तु नामानुत्पन्नोऽविनष्टश्च, किंनामको ममायं दोषो न्यायलक्षणोक्त इति चेत्, उच्यते--नैक एव, किं तर्हि ? **सर्व एवेति स्ववचनादिविरोधाः**, उत्पद्यते चेद् न विनश्यति विनश्यति चेद् नोत्पद्यते, त्वया चोच्यते--यदेवोत्पद्यते तदेव विनश्यतीति, देशकालादिभेदाभावे कथमूर्द्ध्वपदनविविधादर्शनभेदेन तदेव

१८ त्यादिभेदैक्या] °**क्यादेवो**° प्र° ॥
२२ नाला] °**लादि+उत्त**° प्र° ॥
२२ च] चाविभागावस्थत्वात् ? ॥
२३ तोऽङ्कुरोत्प] °**त्पत्त्यायंकुर एव** प्र° । दृश्यतां पृ° ४२१ पं° १७ ॥
२७ न] **विनष्टः** प्रतिषु नास्ति ॥
२९ ए] **एवेति वचना**° प्र° ॥
१ न] **विधिनादर्शन**° प्र° । दृश्यतां पं° ७ ॥
१ त] **तदेति चाभेदेन** प्र° ॥

इति चाभेदेन निर्देशो विरुद्धार्थः ? अतः स्ववचनविरोधः । उत्पत्तिविनाशयोर्वा रूढिभेदादेकाधिकरणविरोधाल्लोके प्रतीतत्वाल्लोकविरोधः । प्रत्यक्षत एवोत्पादविनाशभेददर्शनात् प्रत्यक्षविरोधः । उत्पद्यमानघटवदुत्पद्यमानत्वाद् न विनश्यति विनश्यत्त्वाच्च नोत्पद्यते भिन्नघटवदित्यनुमानविरोधः । **तथा चाङ्कुरपत्रादिनिराकरणादपि च लोकादिविरोधा** इति व्याख्यानमनन्तरोक्तस्यार्थस्य 419/mj

* * *

क्षणिकवादातिशयोऽतः, तद्यथा--तत्र हि उत्पादादन्यो विनाशक्षणः जातस्य विनाशात्, इह तु उत्पाद एव विनाशः प्रसक्तः क्रियार्थकालरहितद्रव्योत्पादादित्वात् । शून्यवादता वा, सर्वस्याविनष्टानुत्पन्नास्थितत्वात् खपुष्पवत् ।

ननु पृथिवीद्रव्यत्वाभेदे स्त उत्पादविनाशौ तत्कालौ च तदंशबीजाङ्कुरभेदा-

* * *

लोकप्रतीतिद्वारेण सुखप्रतिपाद्यत्वादिति गतार्थम् । वचनद्वारेण तु प्राच्यं वाक्यम्, उक्त्याश्रयत्वादेषां दोषाणामिति । § 1242

एवं तावदुत्पादविनाशाद्यभावदोषः । न केवलमेत एव दोषाः, किं तर्हि ? *अनित्यतादोषश्च । स च क्षणिकवादं वातिलङ्घ्य अनित्यत्वदोषोऽतिशयेन वर्तत इति । **अत** इत्यस्मादेव हेतोः, कस्मात् ? यदेव उत्पद्यते - /ms तदेव विनश्यति इत्यभ्युपगमात् । स चैवमनित्यत्वातिशयदोषः प्रदर्श्यते, **तद्यथा--तत्र हीत्यादि** । **तत्र हि** क्षणिकवादे न हि यदेव उत्पद्यते तदेव विनश्यति, किं तर्हि ? क्षणोऽस्यास्तीति क्षणिक **इत्युत्पादादन्यो विनाशक्षणः** उत्पत्तुर्विनंष्टुश्चेत्यभ्युपगम्यते, भिन्नस्य कालस्य क्षणाख्यत्वात्, तस्मिंश्च काले **जातस्य विनाशाद्,** न जायमानस्य । स हि क्षणिकवादी नैकमेवोत्पादक्षणं विनाशक्षणं चेच्छति एकस्योत्पत्तिभङ्गासक्तिभयात् । यथोक्तं **यद्येकस्मिन् क्षणे जातः** इत्यादि । क्षणानां क्षणवर्तिनां च भेदात् जातस्य इति च नाशनंष्टृक्षणानां च भेदं सूचयति । **इह तु** यदेव उत्पद्यते तदेव विनश्यति इति वादे **उत्पादे एव विनाशः प्रसक्तः क्रियार्थकालरहितद्रव्योत्पादादित्वात्,** क्रियाशब्दवाच्योऽर्थः क्रियैव वार्थः क्रियाप्रयोजनो

४ घ]
घटवदुत्पद्यमान°nayacakra-ms-ya
प्रतिषु नास्ति ॥
५ त] तत्पूर्वाङ्कुरपत्रादिनिराकरणादपि ? ।
दृश्यतां पृ° ३०३-- २ ॥
८ क्ष] दृश्यतां पृ° ३०३-- २ ॥
१० ष्टा] दृश्यतां पृ° ३०३-- २ ॥
१२ न] दृश्यतां पृ° ४२० पं° २३ ॥
१५ प्रा] वाच्यंnayacakra-ms-ya ॥
१७ विनाशाद्य]
°द्यदोषभावःnayacakra-ms-ya ॥
१८ *] नित्यता° प्र° ॥
२२ श्य]
°श्यतींतिnayacakra-ms-bhā ॥
२३ उ]
उत्पतिस्तुर्वि°nayacakra-ms-bhā ।
उत्पत्तिस्तुर्वि° nayacakra-ms-ya ॥
१ उ] उत्पादे एव प्र° ॥

वा कालः क्रियार्थकालः, स एव ते **वैयाकरणस्येष्टः**, यद्यप्यन्येषामन्यथा, यथोक्तम् --**परिणामवती क्रियैव कालः** इत्यादि । तादृग्विधकालरहितं द्रव्यं क्रियात्मककालविनाभूतं तदेव उत्पादो विनाशोऽवस्थानं चेतीष्टत्वात् क्षणिकवादातिशायी अयं क्षणिकवादस्त्वदीय इति साधूक्तम् । नानित्यवादेऽपि तिष्ठति अनवस्थानादुत्पादादीनाम्, किं तर्हि ? **शून्यवादता वा,** यथा प्रागुक्तं सर्वस्याङ्कुरानुत्पादाविनाशवदनवस्थानमपीति शून्यतासाधनं गतार्थं यावत् **खपुष्पवदिति** । § 1243

**ननु पृथिवीत्यादि** यावद**भेदस्य चाव्यघात** इति । स्यान्मतम्--पृथिवीद्रव्यत्वं शिवकादिष्वभिन्नम्, तस्मिंश्चाभिन्ने तदुत्पादविनाशयोश्चाभेदे सत्येव पृथिवीद्रव्यत्वेनानुत्पन्नाविनष्टत्वे सत्यैक्ये च **स्त उत्पादविनाशौ तत्कालौ च,** तस्यैव पृथिवीद्रव्यत्वस्य चाशाभ्यां बीजाङ्कुराख्याभ्यां भेद इत्यस्ति भेदः कारकसद्भावादित्युत्पत्तिरस्ति तथा विनाशस्तत्कालौ च, **इतिशब्दस्य** हेत्वर्थत्वादेवं भेदस्या- भेदस्य च व्याघातो नास्ति, तस्मात् तदेवोत्पद्यते तदेव
- /ms
420/mj
विनश्यति पृथिवीद्रव्यत्वाभेदात् तदंशबीजाङ्कुर

* * *

दिति भेदस्याभेदस्य चाव्याघातः । एवं तर्हि पृथिवीत्वजातिमात्रमभिन्नं द्रव्यैकत्वविघातकम्, बीजस्य अङ्कुरस्य च नानात्वम् । तस्मान्न तदेवोत्पद्यते तदेव विनश्यति । ततश्च यथा बीजमङ्कुरात् पृथगेवेष्यते तथा पांश्वादित्वमपि पार्थिवत्वाद् भिन्नमेषितव्यमिति भेदनिर्भेदद्रव्यनिर्मूलनम् ।

अपि च त्वयैवापादितं भेदबहुत्वं द्रव्यैकत्वविघाति, तत्परिहारार्थमुत्थितेन पार्थिवत्वमपि नानैवोत्थापितम् । भेदकं चाभेदकादन्यदभेदकं च भेदकात्, भेदकत्वादभेदकत्वात्, यथा द्रव्यक्रिये ।

ननु घट उत्पद्यमान एव शिवकत्वेन पिण्डत्वेन विनश्यति इति स एवोत्पद्यते

* * *

भेदात् तत्कालौ च स्त इति नानित्यशून्यते दोषाविति । अत्रोच्यते --**एवं तर्हीत्यादि** यावद् **न तदेवोत्पद्यते तदेव विनश्यती**ति । अयमिदानीमस्मत्परिकल्पितो भेद एवापतितस्तवापि अश्मसिकतामृल्लोष्टवज्रादिभेदे सति पृथिवी नाम न कदाचिदन्यास्ति तद्व्यतिरेकेण, किन्तु पृथिवीत्वजातिमात्रम-

---

३ का ] **कालतः** प्र° ॥
३ एव ] **ते**
**वैया°**nayacakra-ms-bhā । **तैर्वैया°**
nayacakra-ms-ya ॥
४ प ] दृश्यतां पृ° १७ पं° ५ ॥
५ स्थानं ] **चती°** प्र° ॥
८ य ] दृश्यतां पृ° ४१८ पं° ३ ॥
११ का ] **°दित्वभिन्नम्** प्र° ॥
१२ स ] **सत्यैकेवस्त** प्र° ॥
१३ चा ]
**पांशाभ्यां**nayacakra-ms-bhā ।
**पाशाभ्यां** nayacakra-ms-ya ॥
१३ बीजाङ्कुरा ] **°रा-**
**भ्यां**nayacakra-ms-bhānayacakra-ms-ḍe
॥
२ जातिमा ] **°मात्रभिन्नं** प्र° ॥

भिन्नं तद्भेदव्यापि । तच्च द्रव्यमेकम् इत्यस्य त्वत्पक्षस्य विघातकं जातिमात्रमभिन्नं शेषं सर्वं भिन्नमिति सिध्यति, **बीजस्य अङ्कुरस्य च नानात्वम्,** बीजाद् विनश्यतोऽन्योऽङ्कुर उत्पद्यमानत्वात्, विनंष्टुर्मृतादन्य इव देवदत्तो यज्ञदत्तादुत्पद्यमान इति । तस्माद् **न तदेव उत्पद्यते तदेव विनश्यति,** अन्यनिवृत्त्यर्थावधारणस्य भेदसत्यत्वे सति आनर्थक्यात् । **ततश्च यथा बीजमित्यादिदृष्टान्तः** । यथा अङ्कुरादिकालेषु भिन्नेष्वपि व्रीहित्वसामान्याभेदे सति पृथगेव **बीजमङ्कुरादिष्यते** मा भूत् पूर्वोक्तोऽनुत्पादादिदोष इति त्वया **तथा पांश्वादित्वमपि** पांशुमृत्पिण्डादित्वमपि **पार्थिवत्वाद् भिन्नमेषितव्यम्** । ततः किमिति चेत्, ब्रूमः **--इति भेदनिर्भेदद्रव्यनिर्मूलनम्,** इत्यस्मात् पांश्वादित्वभेदाभ्युपगमात् सर्वप्रभेदनिर्भेदं द्रव्यं न भवति । ततश्च लक्षणाभावाद् द्रव्यमेव निर्मूलितं त्वयेति । § 1244

**अपि चेत्यादि** । त्वयैवापादितं भेदानां बहुत्वं द्रव्यैकत्वविघाति । कतमेन वचनेन इति चेत्, पार्थिवत्वादेकत्वमुत्पत्तुर्विनंष्टुश्च नेतरद्रव्यांशाभ्यां बीजाङ्कुराभ्याम्, ताभ्यां चानेकत्वम् इत्यनेन वचनेनापादितम् । किञ्चान्यत्, इदमप्यन्यदनिष्टं तत्परिहारार्थमुत्थितेन त्वयापादितम् । कथम् ? यच्चोदितोऽसि *बीजाङ्कुरनानात्वे क्षणिकातिशयः शून्यवादिता च भवतः इति तत्परिहारार्थमुत्थितेन **ननु पृथिवीद्रव्यत्वाभेद** इत्यादिना वचनेन पार्थिवत्वमपि नानैवोत्थापितम् । कथमिति तदुच्यते--अभेदकं पार्थिवत्वम्, बीजादि भेदकम्, **भेदकं चाभेदकादन्यत् अभेदकं च भेदकात्, भेदकत्वा**दिति स्वभावभेदं हेतुत्वेनाह, इतश्च अस्मादन्य**दभेदकत्वा**दिति, उभयोर्दृष्टान्तो **द्रव्यक्रिये,** यथा द्रव्यात् सर्वभेदनिर्भेदादन्या तथाभूतवस्तुत्वव्यक्तिलक्षणा क्रिया क्रियातश्च द्रव्यम्, तथा च पार्थिवत्वमभेदकत्वाद् बीजादेर्भेदकाद् भिन्नस्वभावं तद्वद् भेदकत्वात् नाना स्यात् क्रियाया इव द्रव्यमिति । § 1245

- /ms

आह **--ननु घट उत्पद्यमान** इत्यादि यावद् **घटत्वेनोत्पद्यत** इति । यत् त्वयोक्तं यदेव उत्पद्यते 421/mj

* * *

स एव विनश्यति, तथा घटत्वेन विनश्यन् घटत्वेनोत्पद्यते शिवकत्वेनेव विनश्यंश्छत्रकत्वेन । अयमपरिहार उक्तोत्तरत्वात्, शिवकेनैवोत्पत्तौ शिव-

---

७ निवृत्त्य] °त्त्यर्थव° प्र° ॥
१५ व्यांशा] °शाशाभ्यां प्र° ॥
१८ *] दृश्यतां पं° २ ॥
१८ क्ष] दृश्यतां पृ° ४१९ पं° १ ॥
१९ न] दृश्यतां पृ° ४१९ पं° ४ ॥
२६ या] यावत्nayacakra-ms-ya ॥
२६ घ] दृश्यतां पृ° ४२१ टि° १ ॥
२८ घ] अत्र प्रतिषु **घटत्वेनोत्पद्यते** इति पाठः प्रतीकत्वेन टीकायामुपलभ्यते, अग्रे तु यद्यपि घटत्वेन विनश्यन् **पटत्वेनोत्पद्यते**... ...देशान्तरभावान्तरान्तरितघटविनाशपटसम्भवयोरपि इति पाठ उपलभ्यते तथापि तत्र **पटशब्दस्थाने घटशब्द** एवोचित इति भाति । यदि तु नेदं रोचते तर्हि अत्रापि **पटत्वेनोत्पद्यते** इति अग्रेऽपि च घटत्वेन विनश्यन् **पटत्वेनोत्पद्यते**... ...देशान्तरभावान्तरान्तरितघटविनाशपटसम्भवयोरपि इति पाठः स्वीकर्तव्यः ॥

केनैव विनंष्टव्यं ततोऽभिन्नत्वात् घटोत्पादवत् । एवं त्वनुत्पत्तौ विनाश-स्याप्यभावाद् घटादिभवनाभावः, भवनसम्बन्धव्यतिक्रमाभावात् सर्वमभूतं नास्तीत्येवमाद्यापद्यते ।

अथोच्येत--ऐक्य एव मृत्कुम्भावस्थयोः मृद्रव्यस्यैव भवनस्य तथानियता

* * *

तदेव विनश्यति तत्रानुत्पत्त्यविनाशस्ववचनविरोधादिक्षणिकवादातिशयशून्य-तादोषा न सम्भवन्ति प्रत्यक्षवचनादीनां तथात्वात्, यस्माद् **घट उत्प-द्यमान एव शिवकत्वेनोत्पद्यमानः पिण्डत्वेन विनश्यति** पूर्वोत्तरकालयोर-पि सद्रव्यपृथिवीमृत्त्वाभेदवद् घटाभेदात् पिण्डावस्थायां शिवकाद्यवस्थायां मृदादियावत्परमाण्ववस्थायां कपालादियावत्परमाण्ववस्थायां च घट एव **इति स एवोत्पद्यते स एव विनश्यति, इति**शब्दस्य हेत्वर्थत्वात् उक्तहेत्वर्थ-त्वात् तस्माद् घट एव पिण्डत्वेनोत्पद्यमानः शिवकत्वेन विनश्यतिं, तस्माद् नानुत्पत्त्यादिदोषाः । यथा च पिण्डत्वेनोत्पद्यमानः शिवकत्वेन घट एव विनश्यति **तथा पुनर्घटत्वेन विनश्यन् घटत्वेनोत्पद्यते,** किमिव ? **शिवक-**

- /ms **त्वेनेव विनश्यंश्छत्रकत्वेन,** यथा शिवकत्वानन्तरं छत्रकत्वं जायमानं तदोत्पन्नं विनष्टं च तथा देशान्तरभावान्तरान्तरितघटविनाशघटसम्भवयोरपि अभेदो वस्तुत्वादिभ्यः पिण्डशिवकत्ववदिति । § 1246

अत्रोच्यते --**अयमपरिहार उक्तोत्तरत्वात्,** नन्वत्रोक्तमेव प्रागङ्कुरस्यैव विनाशित्वादिदोषजातम्, तस्य पिण्डशिवकसंज्ञामात्रपृथक्कृतादुक्तिमात्रभेदाद् न परिहारो भवति, यस्मादर्थतो यदेव शिवकोत्पत्तौ शिवकेनैव विनाशः इति तदेव अङ्कुरोत्पत्तावङ्कुरेणैव विनाशः इत्युक्तम् । ततोऽयं ते दोषो बलादापात्यते — **शिवकेनैवोत्पत्तौ शिवकेनैव विनंष्टव्य**मिति । किं कार-णम् ? **ततोऽभिन्नत्वात्,** यतो यदभिन्नं तदुत्पत्तौ तेनैव विनंष्टव्यम्, यथा त्वदुक्तानन्तर**घटोत्पादव**दिति । **एवं त्वनुत्पत्ता**वित्यादि । एवं चेदुत्पत्तिर्नेष्यते तस्यैवावस्थितस्य घटस्य नैवोत्पत्तिरस्ति अत्यन्तं घटाख्याद् भावादन्यत्वात् खपुष्पवत्, अनुत्पन्नस्य च विनाशाभावः खपुष्पवदेव, **विनाशस्याप्यभावाद् घटादिभवनाभावः, अपि**शब्दादुत्पत्तेरप्यभावाद् घटादीनामुत्पत्तिविनाशशून्य-त्वाद् भवनाभावः अस्तित्वाभावः, उत्पत्तिविनाशौ हि भवनसम्बन्धः, तद्व्यतिक्र-

---

३ भू] अभूतं नास्तीत्यनर्थान्तरम्--**वै॰ सू॰** ९ । १ । ९ । दृश्यतां पृ॰ ३०८-- २ ॥
१० पृथिवीमृत्त्वा] ॰भेदतद्घटाभेदात् प्र॰ ॥
१२ स्य] **हेत्वर्थात्** उक्तहेत्वर्थात्nayacakra-ms-ya ॥
१५ न्] **पटत्वे॰** प्र॰ । दृश्यतां टि॰ १ ॥
१७ घ] **पटस॰** प्र॰ । दृश्यतां टि॰ १ ॥
२० क] **॰कत्वसं॰**nayacakra-ms-ya ॥
२२ इत्यु] दृश्यतां पृ॰ ४१८ पं॰ ३ ॥
२२ त] ततोऽयं । त दोषोnayacakra-ms-bhā । ततोऽयं दोषो nayacakra-ms-ya ॥
२५ टोत्पाद] ॰दवितिnayacakra-ms-ya ॥
१ स] ॰सम्बन्धतद्व्यति॰nayacakra-ms-ya । सम्बन्धवद्व्यति॰ nayacakra-ms-bhā ॥

मस्य चाभावात् **सर्वमभूतं नास्तीत्येवमादि आपद्यते । आदि**ग्रहणादवस्तु असद् अभावो निरुपाख्यमित्यादि । § 1247

अत्र पुनः परिहारः **--अथोच्येतैक्य एवे**त्यादि । यथा सत्येवैक्ये मृत्कुम्भावस्थयोः सर्वसर्वात्म 422/mj

* * *

एव भवनभागा अभिव्यज्यन्ते तांश्च भावोऽपि तथाभिव्यनक्ति तथा उत्पत्तिस्थितिविनाशा अभिन्नस्यैवावस्थाः स्युः ।

नन्वस्माभिरपीदमुक्तम्--अनन्यत्वाद् द्रव्यस्वावस्थात्वे सति अविरोधात् पूर्वोत्तराभावादभिभवैक्यानापत्तेरविद्यमानपार्थक्यात् कस्यचिद् व्यक्त्यव्यक्ती नोपपद्येते, कुत उत्पादादिः ?

अपि च लोकप्रतीतव्यक्तिधर्मविपरीतत्वादुत्पादाद्यभावः, क्रियास्वावस्था-

* * *

कत्वाद् भिन्नयोरप्यभेदः तथा बीजाङ्कुरादिभेद इत्यभिप्रायः । यथा मृदः कुम्भावस्था युगपद्भाविनां रूपरसादीनामयुगपद्भाविनां च शिवकादीनां निय- - /ms
तानि भवनानि, मृद्द्रव्यस्यैव कर्तृ**भवनस्य** रूपादिशिवकादित्वेन तेन प्रकारेण नियता एव भवनभागा मायाकारकपताकिकावद् नानियताभिव्यक्तयोऽभिव्यज्यन्ते प्रथम**भवनशब्द**स्य कर्तृभवनार्थत्वात् । तांश्च भवनभागान् क्रियापि तथाभिव्यनक्ति नान्यथा, **भावशब्द**स्य द्वितीयस्य क्रियावाचित्वात् । यदि भिन्नस्य मृत्कुम्भाद्ययुगपदवस्था रूपादिपृथिव्यादियुगपदवस्था वा स्युः तास्तस्य मृद्द्रव्यस्यैव न स्युः, कस्मात् ? अन्यतरेणावरुद्धावकाशत्वाद् घटपटादिवत् । भवन्ति चैकस्य । तस्मादभिन्नमृत्कुम्भावस्थावदुत्पत्तिस्थितिविनाशा अभिन्नस्यैवावस्थाः स्युः, को दोषः ? इति । § 1248

अत्रोच्यते **--नन्वस्माभिरपीद**मित्यादि यावत् **कुत उत्पादादि**रिति । नन्वस्माभिस्ते एव नोपपद्येते इत्युक्तं व्यक्त्यव्यक्ती इत्यभिसम्बध्यते तथानियतभवनभागद्रव्यावस्थाया व्यञ्जनमव्यञ्जनं वेति । कस्मात् ? **अनन्यत्वात्** सर्वस्य सर्वात्मकत्वाच्च । तच्चानन्यद् द्रव्यमेव, तस्य च स्थित्युत्पत्तिविनाशा अनन्ये, किं कारणम् ? त्वयाभ्युपगतानां स्थित्यादीनां **द्रव्यस्वावस्थात्वात्,** द्रव्यस्यैव स्वावस्थाः स्थित्यादयः परस्परतोऽनन्याः इति हि समाश्रितस्त्वयायं पक्षः, परस्परभिन्नस्थित्यादीनां द्रव्यस्वावस्थात्वे सर्वपक्षार्थध्वंसित्वभयात् । तस्माद् द्रव्यस्वावस्थात्वादविरोधः स्थित्यादीनाम्, न यथा स्वप्नजागरणयोर्विरोधः । तस्माद् द्रव्यस्वावस्थात्वादविरोधः । अविरोधाच्चानन्यत्वमासाम् । अनन्यत्वाच्च पूर्वमिदम्, उत्तरमिदम् इति क्रमाभावः, ततः पूर्वोत्तराभावात्

---

५ स] सर्वासर्वात्म॰nayacakra-ms-ya । सर्वात्म॰ nayacakra-ms-bhā ‖
१८ क्रि] क्रियापि नक्तिnayacakra-ms-ya ‖
१९ प] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ‖
२३ उ] उत्पातादि॰ प्र॰ । दृश्यतां पं॰ २५ ‖
२४ प] ॰पंद्यतेnayacakra-ms-bhā । ॰पद्यते nayacakra-ms-ya ‖

कः केनाभिभूतो येनैक्यमापद्येरन् स्थित्यादयः यत एतत् स्यात् इयमनया क्रिययाभिव्यज्यतेऽवस्था नेयम् इति च । कस्मात् ? **अविद्यमानपार्थक्यात्,** - /ms पृथक्सिद्धानां हि ऐक्यापत्तिः स्यात् सति अविरोधे तन्तुपटत्ववत् । तस्माद- **भिभवैक्यानापत्तेः पूर्वोत्तराभावात् द्रव्यस्वावस्थात्वे सति अविरोधादनन्यत्वात् कस्यचिद् व्यक्त्यव्यक्ती नोपपद्येते** । **कुत**स्तदनुपपत्तेः तथानियतभवनभाग- व्यक्त्यव्यक्तिभावाभ्या**मुत्पादादि**भेदः ? इति तदवस्थो दोषः । § 1249

किञ्चान्यत्, **अपि चे**त्यादि । अभ्युपगम्याभिन्नार्थैक्यापत्तिविषये व्यक्त्य- व्यक्ती लोकप्रतीतव्यक्तिधर्मविपरीतत्वादुत्पादाद्यभाव इति ब्रूमः । लोके हि पूर्ववृत्तिव्यतिरिक्तो व्यञ्जकः प्रसिद्धोऽन्यः उदकाञ्जनदीपादियोगो भूगन्धच- क्षुरिन्द्रियशक्त्यभिव्यक्तिघटादिदर्शनहेतुर्यथासङ्ख्यम्, युजिक्रियासाधनभूयोगि 423/mj च

* * *

द्रव्यभेदनिषेधाद् द्रव्यमात्राभ्युपगमाद् व्यक्तिधर्मत्यागाद् व्यक्तिकारणाभावात् । अहेतुतो वा व्यक्तावव्यक्तेरपि तद्वत्तेति नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात् । परिणामाद् नैवमिति चेत्, न, उक्तदोषतुल्यत्वात् ।

* * *

भूदकादिद्रव्यजातमुपलभ्यते यथा न तु तथा तद्द्रव्यव्यतिरिक्तम्, **यदेवोत्प- द्यते तदेव विनश्यति** इति द्रव्यं च स्वावस्थाऽविभागं ब्रुवता त्वया न ततोऽन्यः संयोगः संयोगी वाभ्युपगम्यते द्रव्यक्रियापृथग्भूतः द्रव्यस्वाव- स्थामात्रत्वादुत्पादादीनाम् । किं कारणम् ? **क्रियास्वावस्थाद्रव्यभेदनिषेधात्,** उत्पादादयः क्रियायाः स्वावस्थाः इत्येतं पक्षं द्रव्यस्यापि परस्परभिन्नाः स- न्त्योऽवस्थाः इत्येतं च पक्षं यस्माद् निषिद्धवन्तो वयं द्रव्यनिर्मूलत्वादिदोषात् । तस्मादभ्युपगतं त्वया न किञ्चिद् द्रव्यव्यतिरिक्तमस्तीति । ततश्च तदभ्युपग- माद् व्यक्तिधर्मस्त्यक्तः, तद्विपर्ययधर्मणो द्रव्यमात्रस्याभ्युपगमात् । तत्त्यागाच्च व्यक्तिरनुत्तरमेव व्यक्तिकारणाभावादिति । § 1250

स्यान्मतम्--निर्हेतुका व्यक्तिरव्यक्तिर्वा द्रव्यधर्मः स्वभावः । यथोक्तम्—

सुदूरमपि सन्धाय सङ्क्षीणासूपपत्तिषु ।
न स्वभावागमावन्ते कश्चिन्न प्रतिपद्यते ॥  इति ।§ 1253 - /ms

---

७ वैक्या ] °क्यान्यपत्तेः प्र° ॥
९ व्य ] °व्यक्तव्यक्ति° प्र° ॥
१३ यु ] भुजि°nayacakra-ms-ya ॥
२३ प ]
परिस्पभिन्नाःnayacakra-ms-ya ।
पस्पभिन्नाः nayacakra-ms-bhā ॥
२५ द्र ]
द्रव्यव्यतिमस्तीतिnayacakra-ms-ya ।
द्रव्यतिमस्तीति nayacakra-ms-bhā
॥
२८ द्र ] द्रव्ये
धर्मःnayacakra-ms-bhā ॥
१ सु ] सुदूरमपि गत्वेह विहितासूपपत्तिषु ।
कः स्वभावागमावन्ते शरणं न प्रपद्यते ॥
१२३ ॥ इति हरिभद्रसूरिविरचिते
शास्त्रवार्तासमुच्चये समुच्चितायां कारिकायां
पाठः ॥

एतद्वायुक्तम्, **अहेतुतो वा [व्यक्तौ अ]व्यक्तेरपि तद्वत्तेति**, तेन तुल्यं तद्वत्, तद्भावस्तद्वत्ता, व्यक्तिवद्भाव इत्यर्थः । कथम् ? यथा व्यक्तिर्निर्हेतुका तथैवाव्यक्तिरपि निर्हेतुका । ततः किमिति चेत्, उच्यते --**इति नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्** निर्हेतुकत्वात् मृदवस्थायां घटाव्यक्तिवद् घटावस्थायामव्यक्तिर्घटस्य स्यात्, घटावस्थायां घटव्यक्तिवद् मृदवस्थायां व्यक्तिः स्यात्, मृत्पिण्डे घटव्यक्तिवद् गगनेऽपि स्यात्, वियत्यव्यक्तिवद् मृद्यप्यव्यक्तिर्वा स्यादित्यादि । § 1254

**परिणामाद् नैवमिति चेत्** । स्यान्मतम्--यथा त्वयोक्तं न तथा भवितुमर्हति परिणामाभ्युपगमात्, **अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरापत्तिः परिणामः**, तस्माद् मृत्पिण्डशिवकादिपरिणामैः स्थित्युत्पत्तिविनाशा भविष्यन्ति, न निर्हेतुकाः । तस्मादेव परिणामाद् व्यक्त्यव्यक्ती च स्त इति । एतदपि **न, उक्तदोषतुल्यत्वात्** । य एतेऽस्माभिर्भावत्वावस्थात्वपक्षे द्रव्यत्वावस्थात्वपक्षे च भिन्नाभिन्नात्मकद्वैधे दोषा उक्तास्ते तुल्या एव परिणामपक्षेऽपि द्रष्टव्याः परिणामावस्थयोः श्रुतिमात्रभेदात्, उत्पत्तिप्रादुर्भावत्वात् विनाशनिवृत्तित्वात् अवस्थितस्य इति च स्वशब्देनैव स्थितिवचनात् । परिणामोच्चारणेन च **नन्वेवमुभयमपि अवस्तु** इत्यादिरादितो ग्रन्थो योज्यो यावदयमेवावधिरिति । तस्मादपरिहारः परिणामः । § 1255

424/mj

अथ विनाशसामानाधिकरण्ये दोषदर्शनात् तदेवोत्पद्यते तदेवावतिष्ठते, अत्रापि तथा वा सर्वथा वा अवतिष्ठमाने उत्पत्तिः कुतः, उत्पद्यमाने वावस्थानम् ? इति स्ववचनादिविरोधाः पूर्ववत् । § 1256

व्यापिस्वतत्त्वानुमतांशुतन्तुवत्तु प्रदीर्घद्रव्यपूर्वोत्तरावस्था बीजाङ्कुरत्वादय § 1257

एवं तावदुत्पादविनाशयोः संयोगेनायं विकल्पः सप्रसङ्गपरिहारप्रच-
- /ms चर्चोऽभिहितः तथा वक्ष्यमाणेषूत्पादस्थितिसंयोगे स्थित्युत्पादसंयोगे स्थिति-

---

३ वा] वा व्यक्तेव्यक्तेरपिnayacakra-ms-pā nayacakra-ms-vi । वा व्यक्तेरपि nayacakra-ms-pā nayacakra-ms-vi विना ॥
४ क्तिर्निर्हेतु] °तुका ल तथैवा° प्र° । °तुका ते तथैवा° ? ॥
१२ रा] अत्र °रोत्पत्तिः इत्यपि पाठः स्यात् । दृश्यतां पृ° ४२३ पं° २३ । तुलना--अथ कोऽयं परिणामः ? अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः । इति पातञ्जलयोगदर्शनवैयासिकभाष्ये ३ । १३ ॥
१६ उ] दृश्यतां पं° २० ॥
१८ न] दृश्यतां पृ° ४१६ पं° २ ॥
२१ था] दृश्यतां पृ° ३०३-- २ ॥
२४ व्या] दृश्यतां पृ° ३०३-- १ ॥
२ त्पा] दृश्यतां पं° १ ॥
२ स्थित्यु] दृश्यतां पृ° ३०३-- २ ॥

विनाशसंयोगे विनाशोत्पादसंयोगे विनाशस्थितिसंयोगे त्रिकादिसंयोगेषु च समानः प्रचर्चो द्रष्टव्यः **यदेव उत्पद्यते तदेव विनश्यति** इत्यतः प्रभृति यावदयमवधिरिति, ग्रन्थयोजनया योजयिष्यते । § 1258

**अथ विनाशसामानाधिकरण्ये** इत्यादि । उत्पादविनाशैकाधिकरण्ये **दोषदर्शनाद्** निर्दोषोयऽमिति विकल्पान्तरमाश्रीयते --**तदेव उत्पद्यते तदेवावतिष्ठत** इति । अत्रापि न निर्दोषमेवेति ब्रूमः, अत्रापि हि द्वयी गतिः तेनापि उत्पत्तिप्रकारेणा**वतिष्ठमाने** यद्वा उत्पादेनैवावतिष्ठमानं तदेवोत्पद्यते तदेव विनश्यति चेति यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथावतिष्ठमानं तदेवोत्पद्यते तदेव विनश्यति च इत्युच्यते ? यदि तथोत्पादेनैव अवतिष्ठमानमुत्पद्यते विनश्यतीत्युच्यते तत उत्पादेनैवावस्थितत्वात् किमिति पुनरुत्पद्यते ? अथ सर्वथाप्यवतिष्ठमानमुत्पद्यत इति उच्येत ततस्त्र्यात्मकं सत् कथमुत्पद्यते ? उत्पत्तिरूपस्य चावस्थितत्वाद् नोत्पद्यत इति **उत्पत्तिर्द्विधापि कुत** इति, असम्भव इत्यर्थः । अस्ति चोत्पत्तिः । **उत्पद्यमाने वावस्थानं कुतः** इति वर्तते । यद्युत्पद्यते कथमवतिष्ठते ? यद्यवतिष्ठते कथमुत्पद्यते ? इति स्ववचनविरोधः **पूर्ववदिति**, यथाङ्कुरोत्पत्तिविनाशैकाधिकरण्योदाहरणे स्ववचनादिविरोधास्तथात्राप्युत्पत्तिस्थितिसामानाधिकरण्ये योज्या इति । § 1259

**व्यापीत्यादि** यावत् **प्रकल्प** इति । स्यान्मतम्--यथा **स्वतत्त्वानुमतांशुतन्तुवत्तु,** व्याप्नोतीति व्यापी, अविशेषितत्वात् सर्वस्य व्याप्यस्य कार्यस्य व्याप- - /ms कं कारणमुच्यते व्यापीति । व्यापिनः स्वतत्त्वमेव इत्यनुमतोंऽशुस्त्वयापि द्रव्यार्थवादाश्रयिणा, व्यापि स्वतत्त्वमस्येति वा विग्रहः, स च व्यापिस्वतत्त्वानुमतोंऽशुरेव तन्तुर्व्याप्यः, कारणमयत्वात् कार्यस्य । किमुक्तं भवति ? यथांशुमयस्तन्तुरतोंऽशुरेव तन्तुरिति दृष्टान्तः अंशुरपि तन्तुस्तन्तुरप्यंशुरिति वा, तथा बीजमयोऽङ्कुरो बीजमेवाङ्कुरः अङ्कुरोऽपि बीजं बीजमप्यङ्कुर इति वा दार्ष्टान्तिकः । तद् वर्णयति --**प्रदीर्घद्रव्ये**त्यादि, प्रकृष्टदीर्घत्वस्य द्राघीयसो द्रव्यस्य मेर्वादेरिव पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था व्यापिस्वतत्त्वानुमत**बीजाङ्कुरत्वादय** इति, अस्मिन् प्रकल्पे तदेवोत्पद्यते तदेवा 425/mj

---

३ स्थितिविना ] दृश्यतां पृ० ३०४-- १ ॥
३ विना ] दृश्यतां पृ० ३०३-- १ ॥
३ विना ] दृश्यतां पृ० ३०३-- २ ॥
३ त्रिका ] दृश्यतां पृ० ३०४-- २ ॥
४ स ] समानप्रचर्चो द्रष्टव्यः इत्यपि पाठोऽत्र स्यात्, समानप्रचर्चो विकल्पः इत्याशयः ॥
४ य ] दृश्यतां पृ० ४१८ पं० १ ॥
७ निर्दोषोय ] **अयं** विकल्प इत्यर्थः ॥
९ द्य ] **°द्यते देव** **विन°**nayacakra-ms-bhā । **°द्यते विन°** nayacakra-ms-ya ॥
१० स्थि ] **स्थित्युत्ति°** प्र° ॥
१२ त्वात् ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
१४ उ ] **उत्पत्तिर्विधापि** प्र° ॥
१७ पू ] दृश्यतां पृ० ४१८ पं० ४ ॥
२२ नु ] **°नुनातांशु°** प्र° ॥
२३ यिणा ] **°णो** प्र° ॥
२७ स्य ] **°स्या** प्र° ॥

* * *

इति प्रकल्पे बीजस्यांशूनां वा अनुत्पाद्यविनाशित्वाद् नित्यत्वादङ्कुरतन्त्वनुपपत्तिरेवेति त एव विरोधाः पूर्वस्तम्बनित्यत्वाद्वा बीजानुपपत्तेः ।

स्तम्बोत्तरबीजोत्पत्तेस्तु अङ्कुरवत् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च पूर्वाद्यभाव एव वाऽभेदत्वात् ।

अथोच्येत--यदुक्तं भवति यदेवोत्पद्यते तदेवावतिष्ठत इति तदुक्तं भवति उत्पत्तिरूपमेवावस्थानमिति खपुष्पवैलक्षण्येनैवमेवोच्यते । एवं सति यदेवोत्पद्यते

* * *

वतिष्ठते इत्युत्पत्तिस्थितिसामानाधिकरण्ये स्ववचनादिविरोधा न सन्ति, तस्य वस्तुनोऽवस्थामात्रभिन्नस्यानुत्पन्नाविनाशिनः स्थितस्यैवोत्पादादिति । अत्रोच्यते--एतस्मिन्नपि **प्रकल्पे बीजस्य** दार्ष्टान्तिकस्य **अंशूनां वा** दृष्टान्तभूतानां **वा**शब्दादन्यस्य वा कस्यचिद् वस्तुनः प्रदीर्घस्य **अनुत्पादित्वादविनाशित्वाच्च** नित्यत्वम्, **नित्यत्वात्** स्थितिरेव नोत्पादविनाशाविति कुतोऽङ्कुरो बीजात् ? कुतोंऽशुभ्यस्तन्तुः ? अतो**ऽङ्कुरतन्त्वनुपपत्तिरेवे**ति । ततः किमिति चेत्, **इति त एव विरोधाः**, उत्पत्त्यभावात् पूर्ववत् स्ववचनादिविरोधास्तदवस्था एवेति । **पूर्वस्तम्बनित्यत्वाद्वा बीजानुपपत्तेः** त एव विरोधाः इति वर्तते, ननु त्वदुक्तेनैव न्यायेन व्यापिस्वतत्त्वानुमतपूर्वस्तम्बबीजत्वं प्रदीर्घद्रव्यस्थितत्वं चेति पूर्वस्तम्बस्यानु**त्पाद्यविनाशित्वाद्** नित्यत्वम्, नित्यत्वाद् बीजानुपपत्तिः, अतोऽपि तदेव उत्पद्यते तदेवावतिष्ठते इति स्ववचनादिविरोधा इति दूषणं न्यायस्य व्यापितां दर्शयति । § 1260

अथ मा भूवन्नेते दोषा इति स्तम्बादुत्तरकालं बीजोत्पत्तिरिष्यते ततः **स्तम्बोत्तरबीजोत्पत्तेस्तु** हेतोः **अङ्कुरवदित्यादि** । यथाङ्कुरो बीजादुत्पद्य- - /ms
मानः स्थितादन्य उत्पद्यते पूर्वदोषभयात् पूर्वस्तम्बाच्च बीजं तथा सर्वमपि स्थितिभिन्नोत्पत्ति, तस्मात् **स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च** । यथाङ्कुरो बीजादिस्थितादुत्पन्नोऽनित्योऽव्यापी च तथा त्वदभ्युपगतप्रदीर्घद्रव्यात्मनोऽप्यनित्यत्वमव्यापित्वं च स्यात् तथैव । किञ्चान्यत्, एवं **पूर्वाद्यभाव एव वाऽभेदत्वात्**, पूर्वमिदं बीजादि, उत्तरमिदमङ्कुरादि इत्येतस्य वाऽभावः, कस्मात् ? अभेदत्वात्, अभिन्नं हि तद्वस्तु द्रव्यं न क्रिया, व्यापिस्वतत्त्वबीजाङ्कुरादिप्रादुर्भावस्य क्रियाविषयत्वात् तस्य प्रदीर्घत्व-

---

१६ किमिति ] वेदेति इति प्र॰ ॥
२१ दू ] दूषणन्यायस्य प्र॰ ॥
२८ त ] तचैवnayacakra-ms-bhā । तत्वैव nayacakra-ms-hī । तवैव nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-vi nayacakra-ms-raṃ ॥
३० वा ] चाभावः प्र॰ ॥
३० द्र ] nayacakra-ms-vi विनान्यत्र द्रव्यंमक्रिया प्र॰ । द्रव्यमक्रिया nayacakra-ms-vi ॥

कल्पनाभ्रान्तित्वात् किं पूर्वम् ? किमुत्तरम् ? इति पूर्वोत्तरस्थित्युत्पत्तिकल्पवचनानुपपत्तिः । § 1261

**अथोच्येत** इत्यादि यावत् **खपुष्पवैलक्षण्येनैवमेवोच्यत** इति । स्यात् परिहारार्थव्याख्याशङ्का— तदेवोत्पद्यते तदेवावतिष्ठते इत्यनेन वचनेन किमुक्तं भवति ? इति तदाचष्टे --**यदुक्तं भवति यदेवोत्पद्यते तदेवावतिष्ठत इति तदुक्तं भवति** इत्यर्थं कथयत्यनेन वचनेनेति । स पुनरयमर्थ एवं कथितो भवति --**उत्पत्तिरूपमेवावस्थानमिति** कथितो भवति । यदि नोत्पद्येताव-
426/mj स्थिताभिमतं नावतिष्ठेत अनु

* * *

तदेवावतिष्ठते इत्युत्पत्तिरेवावस्थानमित्यापन्नम्, उक्तस्थितित्यागात्, अतश्च क्षणिकत्वापत्तिः, उभयात्यागाभिमतौ वानेकान्तापत्तिः ।

अथोच्येत--उत्पादपूर्वत्व एते दोषा मा भूवन्निति तदेव विनश्यति तदेवोत्पद्यते । अत्रापि यदेव विनश्यति बीजं तदेवोत्पद्यत इत्यङ्कुराप्रादुर्भाव एव प्राप्त इति पूर्ववत् स्ववचनादिविरोधाः तत्पूर्वपत्राद्यपोहाच्च लोकादिविरोधाः । तदेव विनश्यति तदेवोत्पद्यते इति क्षणिकवादातिशयनादि च पूर्ववत् ।

* * *

त्पत्तिरूपत्वात् । तस्मादनुत्पन्नमस्थितं खपुष्पादि, तद्वैलक्षण्येन यदेव उत्पद्यते
- /ms तदेवावतिष्ठते, नानुत्पत्तिकमवतिष्ठते, तस्मादुत्पत्त्यनुमितमेवावस्थानं द्रव्यस्येति । अत्रोच्यते --**एवं सति यदेवे**त्यादि यावत् **क्षणिकत्वापत्ति**रिति । इत्थं तर्हीदं व्याख्यानं संवृत्तम्--यदेवेति यस्मादित्यर्थः अव्ययत्वाद् यच्छब्दस्य, यत एवोत्पद्यते तत एवावतिष्ठत इति प्रागुक्तोत्पत्तृस्थात्रैक्यवदुत्पत्तिस्थित्यैक्यापत्तिः, अत उत्पत्तिरेवावस्थानमित्यापन्नम्, किं कारणम् ? **उक्तस्थितित्यागात्,** उत्पत्तिरेव स्थितिरित्यनुमिमानेन स्थितिरुत्पत्तिरेव कृतेति योक्ता **व्यापिस्वतत्वानुमतांशुतन्तुवत् तु प्रदीर्घद्रव्यपूर्वोत्तरावस्था स्थिति**रिति सा त्यक्ता स्यात्, तत्त्यागादुत्पत्तिरेवावस्थानम्, न स्थितिर्नाना काचिदित्य**तश्च क्षणिकत्वापत्तिः,**

४ क्ष ] **॰ण्येनैवोच्यत** nayacakra-ms-ya ॥
५ व्या ] एतच्चिह्नान्तर्गतः **॰र्थव्याख्या॰** इत्यत आरभ्य **अथोच्येत उत्पादविनाशपूर्वतायामित्या॰** पृ॰ ४२७ पं॰ १८ इत्येतत्पर्यन्तः पाठो nayacakra-ms-vi nayacakra-ms-raṃ nayacakra-ms-hī प्रतिषु नास्ति ॥
५ नेन ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
५ नेन ] **मुकिमुक्तं**nayacakra-ms-bhā ॥
८ दि ] **नोत्पद्यतेवस्थि॰**nayacakra-ms-ya ॥
१० अ ] उत्पत्तेश्च क्षणिकत्वापत्तिः इत्यपि मूलं स्यात्, दृश्यतां टि॰ ७ ॥
१४ प्रा ] प्राप्तः, ततश्च पूर्ववत् स्ववचनादिविरोधाः इत्यपि मूलं स्यात् ॥
१४ स्व ] दृश्यतां पृ॰ ४१८ पं॰ ४ ॥
२२ त्तिस्थित्यैक्या ] **॰क्यात्पत्तिः**nayacakra-ms-bhā । **॰क्योत्पत्तिः** nayacakra-ms-ya ॥
२४ व्या ] दृश्यतां पृ॰ ४२४ पं॰ ४ ॥
१ का ] **काचिदित्युत्पतश्च** nayacakra-ms-ya । **काचिदित्यत्यतश्च** nayacakra-ms-bhā । अत्र **काचिदित्युत्पत्तेश्च** इत्यपि पाठः स्यात् ॥

उत्पद्यत उत्पद्यत एव नावतिष्ठते किञ्चिदिति सर्वं क्षणिकम् इत्युक्तं भवति । स्यान्मतम्--क्षणिकत्वदोषो मा भूदिति केनचित् प्रकारेण स्थितम्, उत्पद्यते केनचित् इतीष्यत इति । ततश्च **उभयात्यागाभिमतौ वानेकान्तापत्तिः,** यदि स्थित्युत्पत्ती न त्यक्ते त्वया ततस्तेऽभ्युपगमविरोधिनी स्याद्वादप्रक्रिया अनेकान्तवस्तुतत्त्वा आपद्यत इति । § 1262

**अथोच्येत--उत्पादपूर्वत्व एते दोषा** इत्यादि । यदेवोत्पद्यते तदेव विनश्यति, यदेवोत्पद्यते तदेवावतिष्ठते इत्युभयोरुत्पादप्रधानयोर्विकल्पयोर्ये दोषास्तानपरिहार्यान् प्रत्युच्चार्यानुमत्य चासौ तौ विकल्पौ त्यक्त्वा विकल्पान्तरे निर्दोषे मन्यमानः श्रयेत विनाशप्रधाने । तत्राद्यस्तावद् विकल्पः -- **तदेव विनश्यति तदेवोत्पद्यत** इति । अस्मिन्नपि विकल्पे दोष उच्यते--लोके तावत् प्रत्यक्षादिप्रसिद्धम् अङ्कुरोत्पत्तौ बीजं विनश्यति । तव पुनर्यदेव विनश्यति बीजं तदेवोत्पद्यते नाङ्कुर **इत्यङ्कुराप्रादुर्भाव एव प्राप्तः, इतिशब्दस्य** हेत्वर्थत्वात् ततश्च **पूर्ववत् स्ववचनादिविरोधाः, तत्पूर्वपत्राद्यपोहाच्च लोकादिविरोधाः,** अङ्कुराभावेऽङ्कुरपूर्वाणां पत्रकाण्डनालपुष्पफलशूकादीनामुत्तरेषां लोके प्रत्यक्षादिप्रमाणप्रसिद्धानामङ्कुरापलापवदपलापाल्लोकादिविरोधाः, पूर्ववद् वचनलोकद्वाराभ्यां दोषाभिधानमिति । § 1263 - /ms

**तदेवे**त्यादि, तदेव विनश्यति तदेवोत्पद्यते इति वचनेनानन्यभूतस्यैकस्मिन्नेव काले विनाश उत्पादश्चेति **क्षणिकवादातिशयः** पूर्ववत्, भिन्नकालविनाशोत्पादो हि क्षणिकवादः, स चानेनातिशय्यते । **आदिग्रहणादविन**ष्टानुत्पन्नास्थितत्वात् खपुष्पवद् बीजाङ्कुरशून्यता स्यादिति । § 1264

१427/mj

अथोत्पादैकाधिकरण्ये दोषदर्शनात् तदेव विनश्यति तदेवावतिष्ठते । अत्रापि तथा वा सर्वथा वा अवतिष्ठमाने कुतो विनाशो विनाशे वावस्थानम् ? इति त एव स्ववचनादिविरोधाः क्षणिकवादातिशयनादि च पूर्ववत् । § 1265

अथोच्येत--उत्पादविनाशपूर्वतायामेते दोषा मा भूवन्निति तदेवावतिष्ठते तदेवोत्पद्यत इत्युच्येत । अत्रापि तथा वा सर्वथा

१. तव्यस्येतिnayacakra-ms-bhā । नव्यस्येति nayacakra-ms-ya । अत्र तस्येति इत्यपि पाठः स्यात् ॥

१० श्र ] शयेत प्र° ॥
१५ शू ] °सूकादी° nayacakra-ms-bhā । °सूक्ष्मैकादी° nayacakra-ms-ya ॥
१७ व ] दृश्यतां पृ° ४१९ पं° ५ ॥
२० णाद ] दृश्यतां पृ° ४१९ पं° ३ ॥
२३ त ] दृश्यतां पृ° ४२४ पं° २ ॥
२ इ ] इत्युच्यते ? ॥

वा उत्पद्यमानेऽवस्थानं कुतः, अवतिष्ठमाने वोत्पत्तिः ? इति त एव स्ववचनादिविरोधाः क्षणिकवादातिशयनादि । § 1266

अथ यदेवावतिष्ठते तदेव विनश्यति, अत्रापि तथा वा सर्वथा वा विनश्यति कुतोऽवस्थानम्, अवस्थाने वा विनाशः ? इति पूर्ववत् स्ववचनादिविरोधाः क्षणिकवादातिशयनादि शून्यता वा । अवतिष्ठते वान्वयः, विनश्यति व्यतिरेकः । अनन्वयगोचरव्यतिरेकमात्रोपलब्धेश्च तदेवावतिष्ठते तदेव विनश्यति इति पूर्ववत् त एव स्ववचनादिविरोधाः । अवस्थितार्थविनाशाभ्युपगमेनाशेषसाधनावयवध्वंसः, § 1267

**अथोत्पादैकाधिकरण्य** इत्यादि द्वितीयविकल्पे विनाशप्रधानस्थितिपक्षेऽनन्तरोद्ग्राहितेऽपि उक्तवदेव दोषाः स्थानाभिधानेन तु योज्याः, योजनादिक्प्रदर्शनं तु **तथा वा सर्वथा** वेति स्थितिप्रकारेण विनश्येत् उत्पत्तिस्थितिविनाशप्रकारेण वा विनश्येत् इति विकल्प्यते । उत्पत्तिप्रधानविकल्पाभिहितदोषवदत्रापि विनाशप्राधान्येन स्थित्या सह योजितं **तथा वा सर्वथा वा** विनश्यति **अवतिष्ठमाने कुतो विनाशः ? विनाशे वा** कुतोऽव**स्थानम् ? इति** त एवाधिकृताः **स्ववचनादिविरोधाः क्षणिकवादातिशयनादि च पूर्ववत्** । एवं तावदुत्पादपूर्वयोर्विनाशपूर्वयोश्चोत्पादस्थितिविकल्पयोर्दोषा उक्ताः । § 1268

**अथोच्येत--उत्पादविनाशपूर्वतायामित्यादि** पूर्ववदुच्चार्य दोषांश्चानुमत्य त्यक्त्वा चतुरोऽपि विकल्पानिमौ निर्दोषौ विकल्पावित्याश्रयेत् । तत्राद्यस्तावत् **तदेवावतिष्ठते तदेवोत्पद्यत इत्युच्येते**त्यादि यावत् **क्षणिकवादातिशयनादी**ति पूर्ववदत्रापि व्याख्या कार्या अवतिष्ठमाने इत्युच्चारणेन तु योज्य इति । § 1269

किं कारणम् ? **तथाव्यवस्थानविनाशात्,** यथा स्फुटितपृष्ठत्वात् खरं खरविषाणम् आकाशस्फोटवदिति वचनवत् । तद्वैधर्म्येण साधनव्यवस्थां दर्शयति **--तथाव्यवस्थानाविनाश एव हि सपक्षमपि तत् स्यात्,** तद्धि साधनं साधनं भवत् पक्षेण सहापि सत्येव व्यवस्थितस्यार्थस्याविनाशे भवितुमर्हति, नाविनाशे । किमिव ? **अग्निरत्र धूमात् इति यथा,** यथा हि

---

८ वा] चान्वयः ? ॥
१० च] दृश्यतां पृ॰ ४२७ टि॰ १३ ॥
१५ वा] विनाशादितिnayacakra-ms-bhā । विनाशाविति nayacakra-ms-ya ॥
१५ उ] दृश्यतां पृ॰ ४२४ पं॰ २ ॥
१६ ह] योजितव्यम् इत्यपि पाठोऽत्र स्यात् ॥
२१ उ] दृश्यतां पृ॰ ४२५ टि॰ ७ ॥
२१ दोषांश्चानुम] ॰मत त्यक्त्वा प्र॰ ॥
२३ इ] इत्युच्यंतेत्यादिnayacakra-ms-ya । इत्युच्यत इत्यादि ? ॥
२४ मा] ॰मान प्र॰ ॥
२४ तु] अत्र ग्रन्थः इति शेषः । व्याख्याया विवक्षितत्वे तु **योज्या** इत्येव समीचीनः पाठः कल्पनीयः ॥

धूमो धूमरूपेण व्यवस्थितो व्यवस्थिते एवाग्नौ अग्नितया तद्वत्तया च प्रदेशे, यद्युभयव्युदासानुगृहीतसमुदायार्थसाध्यता यदि धर्मविशिष्टधर्मिसाध्यता सर्वथा व्यवस्थितस्य वस्तुनो व्याप्यो धूमांशो व्यापकेन अग्न्यंशेन व्याप्तस्तमंशं व्यवस्थित एव व्यवस्थितं गमयति अविनष्टमविनष्टोऽविनष्टस्येति स्यात् साधनत्वं साध्यत्वं च । त्वन्मते तु पुनर्विविधादर्शने विनाशेऽत्यन्ताभावेऽन्यभवनरूपे वा विपरीतात्मके त्वयेष्टयावस्थयावश्यं विनंष्टव्यमित्य**वस्थानविपरीतवृत्तित्वात्** अन्यथाभवनरूपत्वादस्य धूमाख्यस्यांशस्य पक्षधर्मत्वमसिद्धम् । अतः प्रदेशस्याप्यन्यथावृत्तत्वादभूतत्वाद्वा आश्रयासिद्धिः । विपरीतवृत्तेर्विरुद्धतापि च, पक्षधर्मत्वमभ्युपगम्य धूमं धूमरूपेणावस्थितमग्नेरग्निरूपेणावस्थानस्य अन्यथाभूतत्वात् । अथवा **अवस्थानविपरीतवृत्तित्वा**दिति, त्वन्मतेनेत्थं विरुद्धता, मन्मतसंवादेन तु त्वदीयसर्वहेतुविरुद्धता । अवस्थानविनाशद्वयरूप एवाग्निस्त्वयाभ्युपगतः, तत्र यावन्तमंशमग्नित्वव्यवस्थानरूपं स्पृशति तावता अग्न्यन्तरे सपक्षे च दृष्टः यावन्तं च (Edtext outside numbered paragraph)विनाशरूपं स्पृशति तावता अग्नित्वव्यवस्थाना (Edtext outside numbered paragraph)भावे तद्विपरीते वा विपक्षे दृष्टः तस्मादनैकान्तिक इति हेतुदोषाः । तस्यैवाग्नेरवस्थानविनाशद्व्यंशस्य तद्वतः प्रदेशस्य च द्व्यंशस्य व्यवस्थानांशमात्रे दर्शनाद् वनस्पतिचैतन्ये स्वापवदव्यापिपक्षध (Edtext outside numbered paragraph)र्मश्च साधनं तद्वृत्त्यवृत्त्योः । एवं दृष्टान्तेऽपि सा (Edtext outside numbered paragraph)ध्यसाधनधर्मधर्म्यसिद्धिदोषास्तदव्यावृत्त्यादिदोषाश्च योज्याः । § 1270

**अथ यदेवावतिष्ठते तदेव विनश्यती**ति स्थितिपूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्यं यावत् **क्षणिकवादातिशयनादी**ति गतार्थं **शून्यता वे**ति । अस्मिन् विकल्पेऽन्यथापि दोषाभिधित्सयाह — **अवतिष्ठते वान्वय** इत्यादि यावत् **स्ववचनादिविरोधा** इति । **अनन्वयगोचरे**त्यादि, अवस्थानमन्वयः, व्यतिरेको विनाशः, अन्वयशून्यो व्यतिरेक एवानन्वयः, स एव गोचरो व्यतिरेकः, अर्थशून्यो विनाश एव इत्यर्थः । त**न्मात्रोपलब्धेश्च सर्वत्रैव** *बीजाङ्कुरपत्रादौ तदेवावतिष्ठते तदेव विनश्यति इतीत्थमपि व्यप- देशो - /ms
न सम्भवतीति पूर्ववत् त एव विरोधा अनेनापि प्रकारेणेति । एवं तावत् पक्षदोषा अभिहिताः । न केवलं पक्षदोषा एव, किं तर्हि ? **अवस्थितार्थविनाशाभ्युपगमेनानेन** भवतोऽ

२ व्या ] व्याख्यातं तदेवnayacakra-ms-ya । व्याख्याततदेव nayacakra-ms-bhā ॥
४ इ ] इत्यादि यावत् स्ववचनविरोधा इतिnayacakra-ms-ya । इत्यादिविरोधा इति nayacakra-ms-bhā ॥
४ त्या ] °त्यादि २ अवस्था°nayacakra-ms-bhā । °त्यादि २ अनवस्था° nayacakra-ms-ya ॥
७ * ] बीजेङ्कुर° प्र° ॥

तथाव्यवस्थानविनाशात् । तथाव्यवस्थानाविनाशे एव हि सपक्षमपि तत् स्यात् अग्निरत्र धूमात् इति यथा, विनाशेऽवस्थानविपरीतवृत्तित्वात् ।

एवं त्रिकादियोगभङ्गेष्वपि यावद्योगम् ।

* * *

428/mj ध्वंस्यन्ते ।**शेषसाधनावयवा**

* * *

तथाव्यवस्थानविनाशात् । तथाव्यवस्थानाविनाशे एव हि सपक्षमपि तत् स्यात् अग्निरत्र धूमात् इति यथा, विनाशेऽवस्थानविपरीतवृत्तित्वात् ।

एवं त्रिकादियोगभङ्गेष्वपि यावद्योगम् ।

* * *

ध्वंस्यन्ते ।

**एवं त्रिकादियोगभङ्गेष्वपि यावद्योग**मिति । एते द्विकसंयोगभङ्गेषु षड्दोषा उक्ताः । तथा त्रिकादियोगभङ्गेष्वपि वाच्या इत्यतिदिशति, उक्तदिक्पातित्वात् तेषामपि विकल्पानाम् । तत्रैकस्त्रिकसंयोगः--यदेवोत्पद्यते तदेवावतिष्ठते विनश्यति चेति प्रथमः, यदेवोत्पद्यते तदेव विनश्यत्यवतिष्ठते चेति द्वितीय इत्युत्पत्तिप्रधानौ द्वौ त्रिकसंयोगौ, तथा विनाशप्रधानौ स्थितिप्र-
- /ms धानौ च । अथवा यदेवोत्पद्यते तदेवोत्पद्यते विनश्यति इत्यनुत्पत्तिदोषपरिहारार्थमुत्पत्तिस्वरूपं विनाशसमानाधिकरणमवधारयन् विकल्पयेत्, तथा
429/mj शेषेष्वपीति

* * *

अत्र पक्षेऽमी दोषा इत्यन्यदुत्पद्यतेऽन्यद् विनश्यतीत्यादि यथावस्तुबीजाङ्कुरकर्माद्यात्मधर्माणुस्थूलपृथिव्यादिवत् ।

* * *

द्वयोर्द्वयोरपि धर्मयोस्त्रिकसंयोगाः कार्याः । उत्पादेनाभिभवाद् विनाशस्य उत्पादस्य प्रादुर्भावाद् अवस्थानस्योत्पादेन सहभावादन्योन्याभिभवोद्भवमिथुनवृत्तयो हि गुणाः सत्त्वरजस्तमोभिधाना उत्पत्तिविनाशस्थित्याख्या भवन्तीति । तथा चतुष्कसंयोगाः पञ्चकसंयोगाः षट्कसंयोगाश्च सम्भवन्तो योज्याः । **यावद्योग**मिति सकलकरणोपायेन यावन्तो भङ्गास्तावन्त इत्यर्थः, यावन्ति वा दर्शनान्यर्थतः सम्भवन्ति तद्दर्शनानुसारेण तावन्तो भङ्गाः कार्या इत्यर्थः, अभिहितसामानाधिकरण्यानुपपत्तिदोषदिशा भङ्गोपचयाश्रयेण दोषोपचयमपि वर्धयद्भिर्व्याख्येयमित्युपायं दर्शयति । § 1271

**अत्र पक्ष** इति द्रव्यस्यावस्थामात्रं स्थित्यादयो न भिन्नाश्च परस्परत इत्यस्मिन् पक्षे**ऽमी दोषा** इति तस्माद् विपर्ययोऽस्त्विति तदुपसंहरति --**इत्यन्यदुत्पद्यतेऽन्यद् विनश्यतीत्यादि** । आदिग्रहणात् अन्यद् विनश्यति

२६ भावाद ]
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ॥साङ्ख्यका° ॥
२८ स ]
संभवतोnayacakra-ms-bhā ॥
२९ स ] संकल°
nayacakra-ms-bhā ॥

अन्यदुत्पद्यते, *अन्यदुत्पद्यतेऽन्यदवतिष्ठते, अन्यद् विनश्यति अन्यदवतिष्ठते, अन्यदवतिष्ठतेऽन्यदुत्पद्यते, अन्यदवतिष्ठतेऽन्यद् विनश्यति इत्यादिभङ्गाः सम्भवन्तो ग्राह्याः । **यथावस्तुबीजाङ्कुरकर्माद्यात्मधर्माणुस्थूलपृथिव्यादिवत्,** यद् यद् वस्तु यथावस्तु, बीजमन्यद् वस्तु विनश्यति अङ्कुरोऽन्य उत्पद्यते द्रव्यम्, कर्म गमनमुत्पद्यते स्थानं विनश्यति, **आदि**ग्रहणाद् निर्णयबुद्ध्यादिर्गुण उत्पद्यते संशयबुद्ध्यादिर्विनश्यति, आत्माकाशकालदिङ्मनोद्रव्याणि नोत्पद्यन्ते न विनश्यन्ति अवतिष्ठन्त एव, तथाणवोऽपि, पटादि स्थूलमुत्पद्यते पिण्डादि विनश्यति, धर्मोऽभिषेचनादिकर्मणोत्पाद्य उत्पद्यते गुणः संस्कारप्रयत्नादिश्च कारण- विनाशादिभिश्च विनश्यति, न विभुत्वादिरिति । § 1272 - /ms
430/mj

यत् तत् सत् ततोऽन्यत् कार्यम्, तदतुल्यविकल्पत्वात्, घटपटवत् । कथमतुल्यविकल्पता ? इह कार्यकारणयोर्द्वयोरपि सत्त्वं कार्यासत्त्वमेव वेत्येतद् विकल्पद्वयं स्यात्, इतरयोरभ्युपगतप्रतिपक्षत्वाद् वादाभावात् । § 1273

---

४ *] **अन्यदुत्पद्यतेऽन्यद् विनश्यति अन्यदवतिष्ठते**nayacakra-ms-bhā । **अन्यद् विनश्यति अन्यदुत्पद्यते अन्यदवतिष्ठते** nayacakra-ms-ya ॥ **११ र्मोऽभिषेच**] एवं श्रुतिस्मृतिविधिभ्यो धर्मो भवतीत्युक्त्वा इदानीमेषां धर्मसिद्धौ प्रकारविशेषमाह, तथाहि --**दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय** वै॰ सू॰ ९ । २ । १, श्रुतिस्मृतिपरिदृष्टानां स्नानादीनां दृष्टस्य मलापकर्षादेरनभिसन्धाने प्रयोगोऽभ्युदयाय भवति । के ते ? **अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थास्थ्य ? स्थ ?यज्ञदानप्रोक्षणदिङ्क्षत्रमन्त्रकालनियमाश्चादृष्टाय** वै॰ सू॰ ९ । २ । २, विशिष्टदेशकालापेक्षेण अम्भसा यः शरीरस्य संयोगस्तदभिषेचनं स्नानम् । नक्तंदिनं वासोऽनाहाररूप उपवासः । ब्रह्मशब्देनात्मा, ब्रह्मणि चरणमात्ममनसोर्यः संयोगः स्त्र्यादिपरिहाररूपो ब्रह्मचर्यम् । ज्ञानाद्यर्थिनो गुरुचर्यापरस्य तद्गृहेषु वसनं गुरुकुलवासः । शास्त्रविधिना [ग्रामा]न्निर्गतातोऽरण्यप्रस्थितो वावनप्रस्थः, तस्य कर्म वानप्रस्थांस्थ्यम् ? स्थम् ? । यज्ञाः पाकयज्ञादयः । दानं सुवर्णादिदानमभयदानं च । प्रोक्षणं सन्ध्योपासनादि । दिङ्नियमादयोऽन्ये विशेषाः, दिङ्नियमः प्राङ्मुखोऽन्नानि भुञ्जीत, नक्षत्रनियमःकृत्तिकास्वादधीत, मन्त्रनियमो देवस्य त्वेति निर्वपति, कालनियमो वसन्ते ब्राह्मणोऽग्नीनादधीत । एवमेतत् सर्वं दृष्टप्रयोजनतिरस्कारेण प्रयुज्यमानं धर्माय सम्पद्यत इति । इति [पुण्यनामधेय-मुनिश्रीपुण्यविजयमहोदयसकाशाल्लब्धायां हस्तलिखितायां प्राचीनतमायां] **चन्द्रानन्द**विरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ २४ A ॥ २ एतादृशी सदसत्कार्यविषयिका चर्चा प्रथमारे पृ॰ १६०--१७१, नवमारे पृ॰ ४७८-- २, दशमारे पृ॰ ५०६-- २ --५०९-- २ च दृश्यते । सापि चर्चा मूलनिर्णयेऽर्थपरिज्ञाने पाठसंशोधने चात्रानुसन्धेया ॥ **१३ य] यत् तत् सतोऽन्यत् कार्यम्** प्र॰ । दृश्यतां पृ॰ ४३५ पं॰ १५, पृ॰ ४३४ पं॰ ५, ५०६-- २, तुलना--पृ॰ १६० पं॰ ४, ४७८-- २ । **यत् सत् ततोऽन्यत् कार्यम्** इत्यपि पाठोऽत्र स्यादिति भाति ॥ **१४ इह**] दृश्यतां पृ॰ १६१ पं॰ २ ॥

तद् यदि तावदुभयसत्त्वं तत उपलब्धिलक्षणप्राप्तत्वे तदात्मकसत्त्वाविशिष्टत्वात् कारणस्यात्मवत् कारणाविर्भाववद् नित्यं कार्याविर्भावः स्यात् । अथ न कारणा- § 1274

अत्रानुमानं कारणकार्यनानात्वेऽभिधीयते --**यत् तत् सत् ततोऽन्यत् कार्यम्, तदतुल्यविकल्पत्वात्, घटपटवत्,** यत् त्वया कारणं कार्यं च सदित्यभिमतं तत्र बीजादेः पुरुषादेश्च कारणात् तनुभुवनाद्यङ्कुरादि कार्यमन्यदित्यभिप्रायः । पक्षीक्रियते तु सत् इत्यभिमताद् वस्तुनोऽन्यत् तत् कार्यमिति । विशेषहेतुः --**तदतुल्यविकल्पत्वा**दिति, सता तेनातुल्यो विकल्पोऽस्येति कार्यमभिसम्बध्यते, तस्य त्वया कारणादनन्यत्वेनेष्टत्वाद् नाश्रयासिद्धिदोषो हेतोः । **घटपटव**दिति दृष्टान्तः, यथा घटः पटेनातुल्यविकल्पो लोके पृथुकुक्षिबुध्नवृत्तोर्ध्वग्रीवाद्याकारादिविकल्पः पटाच्चतुरस्रदीर्घादिसंस्थानादिविकल्पादन्यो दृष्टस्तथा कार्यं सतोऽन्यदिति । § 1275

अत्राह --**कथमतुल्यविकल्पते**ति, असिद्धमतुल्यविकल्पत्वमिति चोदकाभिप्रायः । अत्र चत्वारो भङ्गाः सम्भाव्यन्ते--यो वा कारणं सत् कार्यं चेति, यो वा कारणं सत् कार्यमसत्, कार्यं सत् कारणमसत्, कार्यमसत् कारणं चेति वा । तेषु द्वौ सम्भवेताम्, न द्वौ । तद्यथा --**इह कार्यकारणयोर्द्वयोरपि सत्त्वं कार्यसत्त्वमेव वा इत्येतद् विकल्पद्वयं स्या**दिति कारणं सत् कार्यं च सत्, कारणमसत् कार्यं सत् इत्येतौ विकल्पौ भवितुमर्हतो नेतराविति । कस्मात् ? **इतरयोरभ्युपगतप्रतिपक्षत्वाद् वादाभावात्,** अभ्युपगतः प्रतिपक्षो यस्मिन् येन वा वादिना सोऽभ्युपगतप्रतिपक्षो विकल्पो वादी वा, तद्भावादभ्युपगतप्रतिपक्षत्वात्, किं भवति ? वादाभावो भवति अवसितप्रयोजनत्वात्, परश्चेदभ्युपगच्छति किमिति वादः क्रियते ? तौ च विकल्पौ सत् कारणमसत् कार्यम्, असत् कारणमसत् कार्यं च इति यदि त्वमभ्युपगच्छसि अवसितप्रयोजनः स्यामहम्, अतो वादाभावादिदं विकल्पद्वयं - /ms स्यादिति । § 1276

किञ्चातः ? उच्यते --**तद् यदि तावदुभयसत्त्वम्,** कार्यसत्त्वं कारणसत्त्वं च इत्ययं विकल्पः परीक्ष्यते, तिष्ठतु तावदसत् कारणं सत् कार्यमिति विकल्पः

---

१ त] दृश्यतां पृ° ४३४ पं° ७ ॥
३ अ] दृश्यतां पृ° १७० पं° १५--२२ ॥
४ य] यत् तत् सतोऽन्यत् कार्यम् प्र° । दृश्यतां पृ° ४३५ पं° १५, पृ° ४३४ पं° ५, ५०६-- २, तुलना--पृ° १६० पं° ४, ४७८-- २ । यत् सत् ततोऽन्यत् कार्यम् इत्यपि पाठोऽत्र स्यादिति भाति ॥
१४ म्भाव्य] °व्यास्तुः यो वाnayacakra-ms-bhā । व्यास्तु यो वा nayacakra-ms-ya । सम्भाव्यास्ते यो वा ? सम्भाव्यास्त्रयो वा ? ॥
२३ च] चेतोnayacakra-ms-bhā । चेते nayacakra-ms-ya ॥
२४ स्याम] nayacakra-ms-pā विनान्यत्र °महमहं ? ततोवादा° nayacakra-ms-ḍe nayacakra-ms-vi nayacakra-ms-raṃ । °महतो वादा° nayacakra-ms-bhā ॥

। अत्रोभयसत्त्वे **कारणाविर्भाववत् कार्याविर्भावः स्यादिति** पक्षार्थः सम्बध्यते, **उपलब्धिलक्षणप्राप्तत्वे** सति **तदात्मकसत्त्वाविशिष्टत्वात् कारणस्वात्मवत्,** यथावरणातिदूरातिसामीप्याद्यनुपलब्धिकारणविरहे सति सत्त्वात्मकं कारणमाविर्भवति नित्यं मृदादि तथानुपलब्धिकारणासत्त्वे सति तदात्मकसत्त्वाविशिष्टकार्यमाविर्भवेद् नित्यमिति । § 1277

**अथेत्यादि** । एतेन सत्त्वेऽपि आविर्भावानाविर्भावकृतं वैलक्षण्यमापद्यते कारणकार्ययोः, ततश्च सद्वि 431/mj

* * *

विर्भाववद् नित्यं कार्याविर्भावः सच्च कार्यमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वात् खपुष्पवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात् । अथैवमपि वैलक्षण्ये कारणसत्त्वनिश्चयो न निवर्तते आविर्भावात्मकं च तत् न तर्हि अनाविर्भावात्मकत्वात् कार्यं सत् खपुष्पवत् । इतरथा हि नित्यमेवाविर्भवेत् सत्त्वात् कारणवत्, कारणं वा नाविर्भवेत् अनाविर्भावकसत्त्वाविशिष्टत्वात् कार्यवत् ।

अथ न कार्यानित्यप्रादुर्भाववत् कारणप्रादुर्भावः सच्च कारणमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वात् खपुष्पवत्, इतरः कारणवत् । *खपुष्पमपि वा सत्, आविर्भावानुपलब्धेः, कार्यवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात् । अथैवमपि वैलक्षण्ये कार्यसत्त्वविनिश्चयो न व्यावर्तते अनित्याविर्भावात्मकं च तत् न तर्हि आविर्भावात्मकत्वात् कारणं सत्, न त्वेवं भवति । अतः कारणं सत्, उपलभ्यत्व आविर्भावकत्वात्, कृतवत् । कृतमपि कारणवत् सत्, उपलभ्यत्वे आविर्भावकत्वात्, कारणवदेव । न तु कार्यं सत्, उपलभ्यत्वे आविर्भावानुपलब्ध्यात्मकत्वात्, खपुष्पवत् । सत्त्वे वा विशेषो वक्तव्यः, अविशेषे वैलक्षण्यानुपपत्तेः । विशेषोन्नयनेऽपि विशेषस्यासदाश्रयत्वात् ततोऽन्यत्वमेव, तत्रासत्त्वमेव अघटपटवत् ।

* * *

लक्षणत्वादसत् कारणमापद्यतेऽभ्युपगमप्रत्यक्षादिविरुद्धम् । तस्यानैकान्तिकत्वचोदना --**ननु घटसत्त्वं पटसत्त्वविलक्षणमिति** । सतो हि घटात् पटो विलक्षणः संश्च दृष्टः, खपुष्पमसत्, तत्र सन्देहः--किं खपुष्पवदसत् कार्यं स्यात् ? घटविलक्षणपटवत् सत् स्यात् ? इति । अत्रोच्यते -

---

१ णा] °विर्भाववसत्कार्या° nayacakra-ms-pā nayacakra-ms-de nayacakra-ms-vi । °विर्भावसत्कार्या° nayacakra-ms-ram ॥
२ त्वा] °विशिष्टकारणस्वात्मवत् प्र° । दृश्यतां पृ° ४३४ पं° ७ ॥
४ णा] °णसत्त्वे प्र° ॥
१४ अ] दृश्यतां पृ° ४३४ पं° १४ ॥
१६ *] एतच्चिह्नान्तर्गतपाठस्य मूलत्वे सन्देहः ॥
२१ न] दृश्यतां पृ° ४३४ पं° १८ ॥
२२ स] दृश्यतां पृ° ४३४ पं° १९ पृ° १६३ पं° ४ ॥
२९ व] °वत्स्यात् nayacakra-ms-bhā । °व स्यात् nayacakra-ms-ya ॥

-न, **इतरेतरासत्त्ववैलक्षण्यात्,** घटः पटात्मना नास्ति पटोऽपि घटात्मना नास्त्येवेति असत्त्वांशाभ्यामेव वैलक्षण्यमनयोः, अतो विपक्षासिद्धेः सपक्ष एव वृत्तेर्नानैकान्तिकः । शेषो ग्रन्थः सत्कार्यवादविपर्ययेण तुल्यगमत्वादुक्तानुसारेणोह्यो याव**दनाविर्भावकसत्त्वाविशिष्टत्वात् कार्यवदि**ति प्रथमचक्रकं कार्यसत्त्वप्रसङ्गेन । § 1278

**अथ न कार्यानित्यप्रादुर्भाववदि**त्यादि कारणसत्त्वप्रसंगचक्रकं द्वितीयं - /ms यावदुपसंहारग्रन्थः **--अतः कारणं सत्, उपलभ्यत्व आविर्भावकत्वात्, कृतवदि**ति कृतघटवदित्यर्थः । स्यान्मतम्--कृतं घटादिकार्यमकृतात् कार्यात् कारणाच्चान्यद् विलक्षणं च तत् तस्मादसदिति । एतच्च न, विशिष्टं **कृतमपि कारणवत् सत्, उपलभ्यत्वे आविर्भावकत्वात्, कारणवदेवे**ति उपलभ्यत्वविशेषणमावरणाद्यभावप्रकाशाद्युपलब्धिप्रदर्शनमिति । शेषं प्रागुक्तसत्कार्यवादद्वितीयचक्रकविपर्ययेण तुल्यगमं यावत् **ततोऽन्यत्वमेवे**ति । तत्र किमुक्तं भवति ? तद्व्याख्यानार्थमाह **--तत्रासत्त्वमेवाघटपटवदि**ति । यथा घटाभाव एव पटोऽघटस्तथा विशेषोऽपि कल्प्यमानोऽसत्वांशद्वारेण स्याद् नान्यथेत्यविशेषाद् वैलक्षण्यानुपपत्तिरिति द्वितीयं चक्रकं समाप्तम् । § 1279
432/mj

अथैतत् साम्यमुभयसत्त्वाद् मा भूदित्यन्यतरसत्त्वं कार्यासत्त्वाभ्युपगमपरिहारेण कार्यमेव सत् इति । अत्र कार्यसमीपे एवकार इत्यन्यत्र प्रतियोगिनि सत्त्वे नियमः सत्त्वं कार्ये एव नियतं नान्यत् सत् इति, ततश्च न कारणं सत्, तथा च सतोऽसदिति असतश्च सदिति संज्ञा क्रियते, कार्यसत्त्वं खरविषाणादिसत्त्वतुल्यम्, नाममात्रे विसंवादः । कार्यासत्त्वनिवृत्त्येकान्तत्यागाच्चाभ्युपगमविरोधः स्ववचनादिविरोधाः । सदेवकारे तु सदनवधृतेः पूर्वदोषा एव । § 1280

अथोच्येत--सर्वथा सत्त्वादेककारणतया न कश्चिद् विशेषोऽस्ति, यदेव कारणकाले कार्यसत्त्वं तदेव कारणसत्त्वम-

४ त्वादु] दृश्यतां पृ० १६२ पं० १ ॥
६ प्र] **प्रसंगभंगचक्रकं**nayacakra-ms-ya ॥
८ कृत] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
९ स] **°सदनित्येतच्चन**nayacakra-ms-ya ॥
१० आविर्भाव] **°वत्वारणवदे°**nayacakra-ms-bhā ॥
११ प्रागु] दृश्यतां पृ० १६३ पं० १ ॥
१४ क] **कल्पमा°** प्र° ॥
१६ अ] दृश्यतां पृ० ५०८-- २, पृ० १६४ पं० १ ॥
१८ स] दृश्यतां पृ० ५०९-- १, पृ० १६४ पं० ४ ॥
२२ स्व] दृश्यतां पृ० ५०९-- १, पृ० १६५ पं० २, पृ० १६८ पं० ५ ॥
२४ अ] दृश्यतां पृ० १६५ पं० ४ ॥

पीति नावधारणकृतो दोषो नापि पूर्वस्तुल्यत्वापत्तिदोषः । एवमप्येकत्वाद् विशेषाभावः, ततो यथैव कारणमनुपादानसिद्धं सामान्यमन्तर्भाविताशेषविशेषसत्त्वात्मकमेवं कार्यस्यानुपादानसिद्धत्वात् सामान्यत्वादन्तर्भाविताशेषविशेषसत्त्वात्मकत्वात् कार्यमपि कारणवदेवाक्रमं स्यात् । § 1281

**अथैतत् साम्य**मित्यादि । पूर्वदोषपरिहारेणान्यतरसत्त्वपरिग्रहे कार्यमसत् इति नेच्छतोऽवश्यं कार्यमेव सत् इत्यवधारणपक्षः स्यात् । स च सत्कारणप्रतिषेधवादविपर्ययेण दोषाभिधानवदिहापि कार्यो यावद् **नाममात्रे विसंवाद** इति । एवं च सति **कार्यासत्त्वनिवृत्त्येकान्तत्यागाद्वाभ्युपगमविरोध** इत्यादि गतार्थं तथैव । अथ कार्यमेव सत् इत्यवधार्यमाण एते दोषा इति सत्त्वं नावधार्यते कार्यमस्त्येव कारणमप्यस्ति इतीष्टत्वादिति चेत्, अवैलक्षण्यादिकृताः पूर्वदोषा एव । § 1282

**अथोच्येत--सर्वथा सत्त्वा**दित्यादि याव**दनेकविषयत्वात् तुल्यत्वस्ये**ति । पक्षद्वयोक्तदोषपरिहारार्थमित्थं कल्पयेत् **--सर्वथा सत्त्वात्** सर्वपिण्डशिवकघटादिप्रभेदाभेदा**देककारणता,** तया **न कश्चिद् विशेषोऽस्ति,** यथैकस्यैवाहेः संवर्ते विवर्ते वाऽभिन्नस्य कारणस्य कारणता, नाहेः पृथग्भूतौ संवर्तविवर्तौ तथा तथा तस्यैवावस्थानात्, नाप्यहिः संवर्तो विवर्तो वा न भवति तथेति । तद् भावयति **--यदेव कारणे**त्यादि यावत् **कारणसत्त्वमपी**ति । - /ms **इति नावधारणे**त्याद्युपनयः, **इति**शब्दस्य हेत्वर्थत्वाद् यदि कार्यमेव सत् अथ कारणमेव सत् इत्युच्येत यदि सदेव कारणं कार्यं च इत्युच्यते सर्वथा तस्य कारणस्य स्वसंवर्तविवर्तैकरूपत्वाद् **नावधारणकृतो दोषो**ऽस्ति परमतापेक्षत्वादवधारणस्यापि । **नापि पूर्वः तुल्यत्वापत्तिदोषः** खपुष्पाद्यसद्विलक्षणप्रादुर्भावाप्रादुर्भावकारणकार्यावैलक्षण्यदोषो वास्ति, एकत्वात् । अनेकं हि तुल्यमतुल्यं वा स्यात् इदमनेन तुल्यं घटादि पटादि वा इति । निरस्तपूर्वापरीभावात्मनि कार्ये कतरद् भिन्नं कारणं नाम ? कारणात्मकभावितकार्यत्वाद्वा कतरत् कारणम् ? इति । न त्वस्ति भेदः, तस्माददोष इति । § 1283

त्यादि याव**दक्रमं स्या**दिति । विशेषाभावात् कारणवत् कार्यमनुपा (Edtext outside numbered paragraph)दानसिद्धम्,

---

७ च] चासत्कारण॰nayacakra-ms-ya । दृश्यतां पृ॰ १६४ पं॰ २ । चासत्कार्यप्रतिषेधवादविपर्ययेण ? ॥
१४ स] सर्वेnayacakra-ms-ya ॥
१५ टादिप्र] ॰प्रभेदाभेदाचैच्चे ?क॰nayacakra-ms-ya । ॰प्रभेदाचैक॰ nayacakra-ms-bhā । ॰प्रभेदाभेदाच्चैककारणतया ? ॥
१६ स्यैवाहेः] विवर्तेभिन्नस्यnayacakra-ms-ya ॥
२२ पू] पूर्वतु॰ प्र॰ । दृश्यतां पृ॰ १६६ पं॰ १ ॥
२३ का] ॰कार्याविलक्षणदोषो प्र॰ ॥

अनुपादानसिद्धत्वात् सामान्यम्, सामान्यत्वाच्चान्तर्भाविताशेषविशेषसत्त्वात्मकमेव, तस्य कार्यस्य **सामान्यत्वादनुपादानसिद्धत्वादन्तर्भाविताशेष**शिवकस्था (Edtext outside numbered paragraph)सकोशकुशूलघटादि**विशेषसत्त्वात्मकत्वात् कार्यमपि कारणवदेवाक्रमं स्यात्**, उपलभ्यते च क्रमेण प्राक् पिण्डः पश्चाच्छिवक इत्यादि । § 1284

अत्रोच्यते --**एवमप्येकत्वाद् विशेषाभावः** त्वयोक्तोऽधुना । ततः किम् ? **तत** इति

अथ मा भूदेष दोष इतीष्यत एवाक्रमं कारणे कार्यस्य सन्निहितत्वादहिवत् । यदि क्रमवदह्यादि कारणं स्यात् न स्यात् क्रमवत्त्वात् खपुष्पवत् । तस्मादक्रममेव सर्वम्, कारणत्वादेव कारणस्वात्मवत् तथा भेदेनाभवदपि सदेव । खपुष्पमपि तर्हि सत् कारणं च स्यादनुपलभ्यत्वात् कार्यवत् । कारणं वा असत् कार्यं च तथानुपलभ्यत्वात् खपुष्पवदेव ।

यदि तु न कारणानुपादानसिद्धत्ववत् कार्यमनुपादानसिद्धं सदिति च निश्चयो न व्यावर्तते तद्वैलक्षण्यान्न तर्हि कारणं सत्, असत्, सद्विलक्षणत्वात् खपुष्प-

* * *

433/mj कारणमनुपादाने**यथैव**

* * *

अथ मा भूदेष दोष इतीष्यत एवाक्रमं कारणे कार्यस्य सन्निहितत्वादहिवत् । यदि क्रमवदह्यादि कारणं स्यात् न स्यात् क्रमवत्त्वात् खपुष्पवत् । तस्मादक्रममेव सर्वम्, कारणत्वादेव कारणस्वात्मवत् तथा भेदेनाभवदपि सदेव । खपुष्पमपि तर्हि सत् कारणं च स्यादनुपलभ्यत्वात् कार्यवत् । कारणं वा असत् कार्यं च तथानुपलभ्यत्वात् खपुष्पवदेव ।

यदि तु न कारणानुपादानसिद्धत्ववत् कार्यमनुपादानसिद्धं सदिति च निश्चयो न व्यावर्तते तद्वैलक्षण्यान्न तर्हि कारणं सत्, असत्, सद्विलक्षणत्वात् खपुष्प-

* * *

कारणमनुपादाने

**अथ मा भूदित्यादि** यावत् **सदेवेति** । स्यान्मतम्--इष्यत एवाक्रमं कारणम्, अहाविव संवर्तविवर्तसद्भावात् कारणे कार्यस्य सन्निहितत्वात् । **यदि क्रमवदह्यादि कारणं स्यात् न स्यात् क्रमवत्त्वात्** अक्रमत्वाभावादित्यर्थः, अक्रमात् कारणादत्यन्तविलक्षणत्वात् **खपुष्पवत्** । युगपत्सन्निहितसर्वधर्मकं कारणमह्यादीष्टम्, नो चेत् संवर्तविवर्तावहाविवाकाशेऽपि स्यातामुभयोरक्रमतुल्यत्वात् । तस्माद् वियति अभूतैरहि- संवर्तविवर्तादिभिः सहैवाक्रममेव - /ms

५ था] दृश्यतां पृ० १६६ पं० ७ ॥
८ य] दृश्यतां पृ० १६७ पं० ३ ॥
१५ था] दृश्यतां पृ० १६६ पं० ७ ॥
१८ य] दृश्यतां पृ० १६७ पं० ३ ॥
२८ हैवाक्र] अक्रममेव कारणमहिः इत्यर्थो भाति । अत्र अक्रममेव अहेरा॰ इत्यपि पाठः स्यात् । अक्रम एव अहिरा॰ ? ॥

अहिरात्मरूपभूतेः, तस्मात् कारणत्वा**दक्रममेव सर्व**मह्यादिकारणस्वात्मवत् । किमर्थं तर्हि कारणवद् न भेदेन भेदा गृह्यन्ते तदैव इति चेत्, उच्यते --**कारणत्वादेव कारणस्वात्मवत्**, अहिः संवर्तविवर्तादिभेदेनाभवन्नपि कारणत्वेनैवाक्रमरूपेण भवन्नपि स एवास्ति गृह्यत एव सत्त्वात् तदेव कारणं तथा तथा तथा गृह्यत इत्यर्थ इति । अत्रोच्यते--एतदपि असत् अनुमानान्तरविरोधात्, **खपुष्पमपि तर्हि सत् स्यात् अनुपलभ्यत्वात् कार्यवत्** । कारणं च स्यात् खपुष्पम्, अनुपलभ्यत्वात्, कार्यवत् । कारणत्वे वा तथाभेदेनाभूतत्वात् सत् खपुष्पं स्यात् कार्यवत् । अथैवं नेष्यते **कारणमसत् कार्यं च** सत् त्वदिष्टं **तथानुपलभ्यत्वाद्** भेदेन क्रमभाविना अहिसंवर्तविवर्तादिप्रकारेणानुपलभ्यत्वादित्यर्थः **खपुष्पवदेवे**ति । न चैवमादीष्टम्, तस्मादनुपादानसिद्धं कारणं सत्, उपादानसिद्धं कार्यमसच्च सद् भवति । § 1285

**यदि त्वि**त्यादि । यथा कारणमनुपादानसिद्धं सत्त्वात् तथा कार्यमनुपादानसिद्धं सत्त्वात् इत्येतद् नेष्टमुपादानसिद्धमेवेष्टम्, असत्त्वापत्तिभयात् **सत् इति च निश्चयो न व्यावर्तते** भवतस्तत**स्तद्वैलक्षण्यात्** उपादानसिद्धत्ववैलक्षण्याद् **न तर्हि कारणं सत्** । कस्मात् ? अनुपादानादित्वात् सामान्यत्वा 434/mj

* * *

वदित्यादि पूर्ववच्चक्रकद्वयप्रवर्तनम् । तस्मादसत् कार्यम् ।

नन्वेवमसत्त्वादायत्यामपि नाविर्भवेत् कार्यं खपुष्पवत् । न, सविशेषणासत्त्वा-

* * *

दन्तर्भाविताशेषविशेषसत्त्वात्मकत्वात्, असत्, कार्यवैलक्षण्यात् **खपुष्पवदित्यादि पूर्ववच्चक्रकद्वयप्रवर्तन**मुपादानानुपादानविलक्षणत्वादिवचनेन आविर्भावानाविर्भावात्मकत्वादिवचनवद् नेतव्यम्-- § 1286

**यत् [तत् सत्] ततोऽन्यत् कार्यम्, तदतुल्यविकल्पत्वात् घटपटवद् द्रव्यक्रियावद्वा । कथमतुल्यविकल्पता ? इह कार्यकारणयोर्द्वयोरपि सत्त्वं कार्यसत्त्वमेव वेत्येतद् विकल्पद्वयं स्यात्, इतरयोरभ्युपगतप्रतिपक्ष-**

---

४ स] अत्र **सन्नेवास्ति** इत्यपि पाठः स्यात् ॥
९ भाविना] **°नोहिसंवर्त°** प्र° ॥
११ नुपादा] **°दानमसिद्धं** प्र° ॥
१४ स्त] **°स्तद्वैल°**nayacakra-ms-bhā ॥
१७ त] दृश्यतां पृ° १६८ पं° १ ॥
१८ न] दृश्यतां पृ° १६८ पं° १ ॥
२१ र्भाविता] **°ताशेषसत्त्वा°** प्र° । दृश्यतां पृ° ४३२ पं° ११ ॥
२१ त्वा] **°त्वादिसत्कार्य°** प्र° । °त्वात्, असत्, सत्कार्य° ? ॥
२२ दित्यादि] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२२ मुपादा] °दानुपा°nayacakra-ms-bhā ॥
२४ य] दृश्यतां पृ° ४३० पं° १, पृ° ४३५ पं° १५ । अत्र **यत् सत् ततोऽन्यत् कार्यम्** इत्यपि पाठः स्यात् ॥
२५ तु] **°तुल्यता** प्र° । दृश्यतां पृ° ४३० पं° २ ॥
२६ का] **कार्यमेवेत्येतद्** प्र° । दृश्यतां पृ° ४३० पं° २ ॥

त्वाद् वादाभावात् । तद् यदि तावदुभयसत्त्वं ततस्तदात्मकसत्त्वाविशिष्टत्वात् कारणस्यात्मवदुपलब्धिलक्षणप्राप्तत्वे यथा कारणस्यानुपादानोपलब्धिः तथा - /ms कार्यस्य स्यात् । अथ न कारणानुपादानवत् कार्यानुपादानं सच्च कार्यमिति निश्चितम्, तद्वैलक्षण्याद् न तर्हि सत् कारणमसत् सद्विलक्षणत्वात् खपुष्पवत्, इतरः कृतघटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात् । अथैवमपि वैलक्षण्ये कारणसत्त्वनिश्चयो न निवर्तते अनुपादानात्मकं च तत्, न तर्ह्यननुपादानात्मकत्वात् कार्यं सत् खपुष्पवत् । इतरथा हि नित्यमेवोपादीयेत सत्त्वात् कारणवत्, कारणं वोपादानवत् स्यात् उपलभ्यसत्त्वाविशिष्टत्वात् कार्यवत् इति प्रथमचक्रकम् । § 1287

अथ न कार्यानित्योपादानवत् कारणोपादानम्, सच्च कारणमिति निश्चितं तद्वैलक्षण्याद् न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वात् खपुष्पवत्, इतरः कारणवत् । खपुष्पमपि वा सत् अनुपादानानुपलब्धेः कार्यवत् । **नन्वित्यादीति** सोत्तरम् । अथैवमपि वैलक्षण्ये कार्यसत्त्वविनिश्चयो न व्यावर्तते उपादानात्मकं च तत् न तर्हि अनुपादानात्मकत्वाद् गन्धर्वनगरवत् कारणं सत्, न त्वेवं भवति, अतः कारणं सत् उपलभ्यत्वेऽनुपादानात्मकत्वात् कृतवत्, कृतमपि वा कारणवत् । न तु कार्यम्, अनुपादानानुपलब्ध्यात्मकत्वात् खपुष्पवत् । सत्त्वे वा विशेषो वक्तव्यः, अविशेषे वैलक्षण्यानुपपत्तेः । विशेषोन्नयनेऽपि विशेषस्यासदाश्रयत्वात् ततोऽन्यत्वमेव, तत्रासत्त्वमेव अघटपटवत् इति द्वितीयचक्रकप्रवर्तनं कृतमिति । § 1288

**तस्मादसत् कार्यमित्युपसंहृते** आह --**नन्वेवमित्यादि** । यद्येवमसत् कार्यं चेदुत्पद्यते ततो**ऽसत्त्वादायत्यामपि** बीजमृत्पिण्डाद्यवस्थानकालादुत्तर- - /ms कालेऽप्यङ्कुरो **नाविर्भवेच्छिवकादि** घटादि च **कार्यमसत्त्वात् [खपुष्पवत्]**, खपुष्पमप्यायत्यां वा प्रादुर्भवेत् असत्त्वात् अङ्कुरघटादिवदित्येतदनिष्टं प्रसक्तम् । तच्च नास्ति । तस्मात् सत् कारणे कार्यमिति । एतच्च **न, सविशेषणासत्त्वात्,** योऽयं हेतुरनिष्टापादनार्थमुक्तः **असत्त्वात्** इति एषोऽसिद्धः, **अभूतं नास्तीत्यनर्थान्तरम्** वै॰ सू॰ ९ । १ । ९ इति वचनादत्यन्तासत

८ णं] **चोपा॰** प्र॰ ॥
१० अ] दृश्यतां पृ॰ ४३१ पं॰ ६ ॥
१३ न] दृश्यतां पृ॰ ४३१ पं॰ ८ ॥
१३ अ] दृश्यतां पृ॰ ४३१ पं॰ ९ ॥
१६ त्] सत् इति वाक्यशेषः ॥
१६ न] न तु कार्यं सत् इत्याशयः ॥
२६ अ] **अभूतं नास्तीत्यनर्थान्तरम्**वै॰ सू॰ ९ । १ । ९, प्राक्प्रध्वंसोपाध्यभावेभ्यो यदत्यन्ताभावरूपं शशविषाणादि तद् अभूतं, नास्ति इति पर्यायशब्दाभ्यामव्यतिरिक्तमुच्यते, नास्य पर्यायशब्दैरर्थान्तरता कथ्यते, अतोऽस्य पर्यायशब्दैरेवोपदर्शनं लक्षणम्, नास्य देशकालादिनिषेधः । अन्यत्र तु **नास्ति घटो गेह इति** सतो घटस्य गेहसंयोगप्रतिषेधः वै॰ सू॰ ९ । १ । १०, नास्ति घटोऽस्मिन् देशे काले वेति देशादिनिषेधो घटादेः स्वरूपतो निषेधः क्रिय[त] इति । **नास्त्यन्यश्चन्द्रमा इति सामान्याच्चन्द्रमसि निषेधः** प्रतिषेधः *T* वै॰ सू॰ ९ । १ । ११, नास्ति द्वितीयश्चन्द्रमाः इति सङ्ख्याप्रतिषेधेन सामान्याच्चन्द्रत्वाख्याच्चन्द्रमा निवर्त्यते इति कृत्वा चन्द्रत्वं सामान्यं नास्तीत्युक्तं भवति । देशकालभावसामर्थ्योपाधीनामभावे तदत्यन्तासत एव प्रभेदश्चन्द्रत्वसामान्यनिषेध इति वर्णयन्ति । इति **चन्द्रानन्द**विरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ ३१ ॥

एवा 435/mj

* * *

दनन्यचन्द्रादित्ववत् । अत एव प्रकरणचिन्ता--किं घटादि कार्यमसदाविर्भवेदलातचक्रवत्, उतेतरचक्रवत् सदाविर्भवेत् ? अनैकान्तिकत्वात् ।

एवं तर्हि मयापि शक्यं वक्तुम्--यत् तदसत् ततोऽन्यत् कार्यम् तद्विकल्पासमर्थत्वाद् घटपटवदित्यादि । उत्तरमत्र वक्तुमशक्यम् । यद्येवमहमपि ब्रवीमि सत्कार्यसाधनान्यप्यशक्यानि निवर्तयितुं सोपनयसप्रपञ्चानां वक्तुं युक्तत्वात् । तथो-

* * *

सत्त्वात् । **अनन्यचन्द्रादित्ववत्,** यथा नास्त्यन्यश्चन्द्रमा इति द्वितीयचन्द्राभावादनन्योऽयमेवेति सामान्यात् प्रतिषिध्यते चन्द्रमाः तथा नास्ति घटो गेहे मृत्पिण्डे कपालावस्थायां वेत्यादीन्यसत्त्वानि सविशेषणानि अनन्यचन्द्रादित्वनिदर्शनसूचितानि तेषां च सतामेवासतामायत्यामाविर्भावदर्शनादिति । § 1289

**अत एव प्रकरणचिन्तेत्यादि** । **यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः** न्या॰ सू॰ १ । २ । ७ इति, यस्मादेव आविर्भवद् द्विविधं दृष्टम्--सदसच्च, तद्यथा--अलातचक्राद्यसत्, सच्च रथादिचक्रादि, तत्र सन्देहः **--किं घटादि कार्यमसदाविर्भवेदलातचक्रवत् उतेतरचक्रवत् सदाविर्भवेत् ?** इति । यत एव संशयो न तत एव हि निर्णयः, **अनैकान्ति**[कत्वात् । ऐकान्ति]को हि हेतुः स्यात्, धूमादत्राग्निर्यथा । इत्यसदेव कार्यमिति ।

§ 1290

**एवं तर्हीत्यादि** । सत्कार्यवादी पूर्वाभिहितसत्कार्यवादोपपत्तिभिर्विरुद्धाव्यभिचारिचिकीर्षयाह — **एवं तर्हि मयापि शक्यं वक्तुम्,** तद्यथा

---

४ ए] दृश्यतां पृ॰ १६९ पं॰ १ ॥
९ च] ॰चन्द्रादित्यवत् प्र॰ । अत्र **अनन्यचन्द्रादिवत्** इत्यपि पाठः स्यात्, दृश्यतां पृ॰ ३२०-- १ ॥
११ अ] आनन्यचन्द्रासत्व-
**निद॰**nayacakra-ms-bhā । **अनन्यचन्द्रासत्वनिद॰** nayacakra-ms-ya । अत्र **अन्यचन्द्रासत्त्वनिदर्शनसूचितानि** इत्यपि पाठः स्यात् ॥
१४ म] ॰मुप॰ प्र॰ । **यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः**न्या॰ सू॰ १ । २ । ७, विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणम्, तस्य चिन्ता विमर्शात् प्रभृति प्राग् निर्णयाद् यत् समीक्षणम्, सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते । प्रज्ञापनं तु--अनित्यः शब्दो नित्यधर्मानुपलब्धेरिति, अनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टं स्थाल्यादि । यत्र समानो धर्मः संशयकारणं हेतुत्वेनोपादीयते स संशयसमः सव्यभिचार एव । या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिश्च सा प्रकरणं प्रवर्तयति, कथम् ? विपर्यये हि प्रकरणनिवृत्तेः, यदि नित्यधर्मः शब्दे गृह्येत न स्यात् प्रकरणम् । सोऽयं हेतुरुभौ पक्षौ प्रवर्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते । इति न्यायभाष्ये ॥
१८ अ] **अनेका॰**nayacakra-ms-bhā । अत्र अनेका[न्तात्, ऐका]न्तिको हि हेतुः स्यात् इत्यपि पाठः स्यात्, दृश्यतां पृ॰ १६८ पं॰ ४ ॥
२१ पूर्वाभिहित] ॰**तासत्कार्य॰**nayacakra-ms-bhā ॥

**--यत् तदसत् ततोऽन्यत् कार्यम् तद्विकल्पासमर्थत्वाद् घटपटवदित्यादिस-** - /ms त्कार्यसाधनप्रपञ्चोऽतीतः सोऽत्र द्रष्टव्य इति पूर्वपक्षः । **उत्तरमत्र वक्तुमशक्यम्,** यथात्रासत्कार्यसाधनानि अनिवर्त्यानि तथा सत्कार्यवादसाधनान्यपीति । § 1291

सत्कार्यासत्कार्यवादयोः सिद्धिः, निवारयितुमशक्यत्वात् । स्यान्मतम्--अन्योन्यनिवारितयोरनयोर्वादयोरसिद्धिरेवेत्यसद्वादाश्रयणं श्रेय इति । एतच्चायुक्तम्, **उभयोरन्यतरस्य वा निषेधे प्रमाणाभावात्,** ज्ञानाभिधानयोः प्रमाणयोर्द्विरूपार्थविषयत्वादसद्विषययोरप्रामाण्यात् । तस्मादवश्यमुभयरूपार्थस्थितिसत्यत्वम् । § 1292

**यद्येव**मिति । यद्येवं ब्रवीषीति प्रत्युच्चार्याह **अहमपि ब्रवीमि--** एवमपि **सत्कार्यसाधनान्यप्यशक्यानि निवर्तयितुम्, सोपनयसप्रपञ्चानां वक्तुं युक्तत्वात्,** यथा त्वयोपनयसहितानि प्रत्यवस्थानसहितानि च पूर्वोत्तरपक्षप्रसङ्गेन, सत्कार्यासत्कार्यवादयोस्तुल्यं समर्थनमिति भवतो यदि मतिः

भयवादसिद्धिः, उभयोरन्यतरस्य वा निषेधे प्रमाणाभावात् । नन्वेवं तथार्थस्थितिसत्यत्वात् सर्ववादनाथानेकान्तवादाश्रयणं कृतम्, तदतत्समर्थविकल्पत्वात्, एकपुरुषपितृपुत्रादिवत् । न च तेन सह कस्यचिद् विरोधः, तस्मादयमाराध्यः शरणं च ।

यत् तद् भूयते द्रव्येण तस्य सर्वगतत्वं नित्यत्वं चोत्सर्गः, भूताभूतभेदात्मकस्तस्यैवापवादः, तस्य च विधानम्, इत्येष उभयविधिर्न भवति ।

* * *

436/mj भयवादसिद्धिः**तथो**

* * *

भयवादसिद्धिः, उभयोरन्यतरस्य वा निषेधे प्रमाणाभावात् । नन्वेवं तथार्थस्थितिसत्यत्वात् सर्ववादनाथानेकान्तवादाश्रयणं कृतम्, तदतत्समर्थविकल्पत्वात्, एकपुरुषपितृपुत्रादिवत् । न च तेन सह कस्यचिद् विरोधः, तस्मादयमाराध्यः शरणं च ।

यत् तद् भूयते द्रव्येण तस्य सर्वगतत्वं नित्यत्वं चोत्सर्गः, भूताभूतभेदात्मकस्तस्यैवापवादः, तस्य च विधानम्, इत्येष उभयविधिर्न भवति ।

* * *

भयवादसिद्धिः

ततः किम् ? इति चेत्, उच्यते **--नन्वेवं तथार्थस्थितिसत्यत्वात् सर्ववादनाथानेकान्तवादाश्रयणं कृतम्** त्वया इति वाक्यशेषः । अनेकान्तवादो हि वादनायकः सर्ववादविरोधाविरोधयोर्निग्रहानुग्रहसमर्थत्वात्, अरिविजिगीष्वादीनामिवोदासीननृपः । स चेत्थम्--स्यादन्यत् स्यादन-

---

११ न] दृश्यतां पृ० ८३ पं० २ ॥
२० न] दृश्यतां पृ० ८३ पं० २ ॥
३० त्वा] **०त्वादरविजि०** प्र० ॥

न्यत् कारणात् कार्यमित्यादि । कुतः ? **तदतत्समर्थविकल्पत्वात्,** तस्मिंश्चातस्मिंश्च विकल्पे समर्थत्वात्, कारणे कार्यं सदनन्यत्, असदन्यत् इति वा पक्षे समर्थो विकल्पोऽस्येति अनन्तरोक्तविकलादेशहेतुद्वयसमाहारैकरूपोऽयं हेतुः पक्षद्वयसाधनसमर्थः । को दृष्टान्तः ? **एकपुरुषपितृपुत्रादिवत्,** यथैक एव पुरुषोऽपेक्षाविशेषोपनीतैः पितृपुत्रभ्रातृभागिनेयमातुलादिभिरन्यैरन्योऽनन्यश्च तेन तेन प्रकारेण संश्चासंश्च कारणकार्यनित्यानित्यादिपर्यायार्पणीयश्चेति । अस्य हेतोर्भावना उक्तसाधनद्वयादेवाधिगम्या विकल्पभङ्गकैर्व्याख्यातैव । सदसद्वाद्युभयोपनीतहेतुसामर्थ्यादेवानेकान्तसिद्धिः । **न च तेन सह कस्यचिद् विरोधः,** तस्मात् परित्यक्तपक्षरागैरनभिनिविष्टैरात्महितगवेषिभिः कुशलैरन्यथा हितप्राप्त्यसम्भवात् आश्रयणीयः इति परिच्छिद्यायमाराध्यः शरणं च नयसमूहात्मकत्वादनन्यसाधारणोत्साह-प्रभु-मन्त्रशक्तियुक्त**भरत**चक्रवर्तिवद् विजिगीषुभिरिति । यद्यसौ सर्वैराराध्यः शरणं च वादानां किमर्थं वादिभिः सह व्युद्यते ? दृष्टश्च विवादः, तस्माद् विवादित्वाच्छेषवादिवदनाराध्योऽशरणं तवापि च दर्शनात् तेन सहेति । अत्रोच्यते--मम तेन सहाविरोध एव तवापि च, किन्तु वयं त्वत्प्रतिपत्त्यैकान्तवस्त्वनुपपत्तेर्ब्रूमः, वयं त्वदनुग्रहार्थं त्वदनुशासिन इति न दोषः । § 1293

- /ms

इदानीं नैगमनय उभयविधिरात्ममतस्वरूपं वक्तुकामः परमतं प्राग्दूषितं प्रत्युच्चारयन्नित्थमुपसंहरति — **यत् तद् भूयत** इत्यादि । यत् तद् भवति तेन भवता यद् भूयते द्रव्येण तस्य भवनसामान्यं क्षेत्रतः सर्व[गत]त्वं कालतो नित्यत्वं च सर्वात्मकं तस्य उत्सर्जनं विधानं स एव विधिः प्रागुक्तः, पश्चाद् द्वितीयः प्रवृत्त्यात्मकभूताभूतभेदात्मकस्तस्यैवापवादः, तस्य च विधानम् **इत्येष उभयविधिस्त्वयेष्ट एव न भवति ।** § 1294

437/mj

सत्ताद्रव्यत्वादिगगनादिसर्वगतत्वमण्वादिसहितनित्यत्वं चोत्सर्गः । आरब्धद्रव्यगुणानां कर्मणश्चानित्यत्वात् प्रागुक्तेभ्यो द्रव्यगुणकर्मणां परस्परतः स्वजातिप्रभेदेभ्यश्च कारणकार्यतया चान्यत्वमित्यपवादः । तयोर्विधिरेष विधिनियमविधिः । § 1295

---

५ न्यैर] °रन्योन्यश्च प्र° ॥
७ र्व्याख्या] °ख्यातैवः प्र° ॥
८ र्थ्यादिवानेकान्त] °सिद्धेःnayacakra-ms-ya ॥
११ च] च ननय° प्र° । च नः नय° ? ॥
१३ व्यु] व्युत्पद्यते प्र° । अत्र व्युद्यते विवादः क्रियत इत्यर्थः ॥
१४ त] तथापि प्र° । तवापि च तेन सह विरोधदर्शनात् इत्याशयः ॥
१५ व] °वत्वनु° प्र° ॥
१९ सा] °सामान्य nayacakra-ms-ya । अत्र °सामान्यस्य इत्यपि पाठः स्यात् ॥
२२ ए] एव न वतिnayacakra-ms-bhā । एव भवति nayacakra-ms-ya ॥

कस्तर्हीति चेत्, **सत्ताद्रव्यत्वादी**ति यावद् **नित्यत्वं चोत्सर्ग** इति । सत्ता महासामान्यम्, द्रव्यत्वं पृथिव्यादिषु सामान्यम्, **आदि**ग्रहणाद् गुणत्वकर्मत्वे च रूपादिगमनादिषु च सामान्यविशेषास्तद्भेदाः । **गगनादीनि** आकाशात्मदिक्कालद्रव्याणि विभक्तसर्वगतानि, द्रव्याणामेषां सर्वव्यापिता **सर्वगतत्वमण्वादिसहितनित्यत्वं चे**ति तेषां द्रव्याणामणूनां च नित्यत्वं कालव्यापिता पार्थिवादिचतुर्विधाणुद्रव्याणां चेति । **आदि**ग्रहणाद् मनोद्रव्यसहितानामिति विभुत्वपरिमण्डलत्वादिगुणसहितानाम्, ते च गुणास्तानि च द्रव्याणि नित्यानीत्यर्थः । एष **उत्सर्गः** सामान्यविधिः । § 1296

- /ms

**आरब्धद्रव्ये**त्यादि याव**दपवाद** इति । पार्थिवाप्यतैजसवायव्यैश्चतुर्विधैरणुभिः संयोगापेक्षैः समानजातीयैः समानजातीयानि द्व्यणुकादीनि तदाद्युत्तरवृद्ध्या महापृथिव्यादिपर्यन्तानि आरब्धानि, द्रव्याणि द्वे बहूनि वा द्रव्यान्तराण्यारभन्ते चतुर्विधान्येव, **येषामेवाधिकृतमारम्भसामर्थ्यं तैरारब्धे कार्यद्रव्ये तत्समवेता नियमत एव गुणाश्च गुणान्तरमारभन्ते** इति वचनाच्चित्रादय आरब्धगुणाः, तेषामुभयेषा**मारब्धद्रव्याणामारब्धगुणानां चा**नित्यत्वात् प्रागुक्तेभ्यो विशेषः तथा कर्मणश्च सप्रभेदस्य । एवं तावद् नित्यानित्यसर्वगतासर्वगतभेदेनान्यत्वम्, पुनश्च **द्रव्यगुणकर्मणां परस्परतः** द्रव्येभ्यो गुणानां कर्मणां च गुणेभ्यो द्रव्याणां कर्मणां च कर्मभ्यो द्रव्याणां गुणानां च परस्परत इति **स्वजातिप्रभेदेभ्यश्चान्यत्वम्,** द्रव्यजातेः परस्परतः पृथिव्या उदकादिभ्यः उदकस्य पृथिवीसहितेभ्योऽन्येभ्यः, एवं ज्वलनपवनगगनदिक्कालात्ममनसामितरेभ्योऽन्यत्वमिति सत्तासमवायसामान्यविशेषान्त्यविशेषेभ्यश्चान्यत्वं नित्येभ्यो[ऽ]नित्यानां चेत्यपवादः, तथा **कारणकार्यतया च, द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम्** वै॰ सू॰ १ । १ । १७ इत्यादि

---

१ त्ताद्र] **॰द्रव्यादीति** प्र॰ ॥
४ व्याणि] अत्र **विभुत्वात् सर्वगतानि** इति पाठः स्यात् ॥
७ हितानामिति] **विभुक्तप॰** प्र॰ ॥
११ आ] अत्र **आरब्धानि द्रव्याणि** । **द्रव्याणि द्वे बहूनि वा** इत्यपि पाठः स्यात् ॥
११ द्र] **द्रव्याणि द्रव्यान्तरमारभन्ते** वै॰ सू॰ १ । १ । ८, द्रव्ये च द्रव्याणि चेति विग्रहादेकमनारम्भकम् । समवायिकारणानि द्रव्याणि स्वात्मव्यतिरिक्तं कार्यद्रव्यमारभन्ते, आकाशाद्यन्त्यावयविद्रव्याणि तु द्रव्यं नारभन्ते, तुल्यजातीयानां मूर्तिक्रियारूपादिमतां द्वयोर्बहूनां वा कारणाना कार्यारम्भकत्वात् । न चैवंविधान्याकाशादीनि । मनसोऽस्पर्शवत्त्वाद् द्रव्याकारणत्वमन्त्यावयविद्रव्याणां चादृष्टत्वात् । **गुणाश्च गुणान्तरम्** वै॰ सू॰ १ । १ । ९, गुणौ च गुणाश्चेति पूर्ववत्, यथा तन्तुरूपादयः स्वाश्रयसमवेते पटद्रव्ये रूपादिगुणानात्मव्यतिरिक्तानारभन्ते । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ ७ B ॥
१२ येषा] दृश्यतां पृ॰ ३१४-- २ ॥
२१ श्चा] **॰श्चान्यत् नित्येभ्यो नित्यानां चेत्यपवादः तयोः कारणकार्यतया च** प्र॰ ॥
२२ द्र] वैधर्म्यान्तरमपि — **द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम्** वै॰ सू॰ १ । १ । १७, सामान्यशब्दः समानपर्यायः, क्षित्यादीनि त्रयाणां कारणं समानम्, आकाशादीनां केवलगुणकारणत्वेऽपि एकैकस्यानेकगुणत्वादाकाशादीनि समानं गुणेषु कारणम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम् । **तथा गुणः** वै॰ सू॰ १ । १

**संयोगविभागाः कर्मणां कार्यम्** वै॰ सू॰ १ । १ । २८ इत्यादि कारणकार्यनानात्वेन चान्यत्वमित्यपवादः । **तयोरुत्सर्गापवादयोर्विधिः** सामान्यविशेषयोर्विधिनियमयोरित्यर्थः । **एष विधिनियमविधिः,** न प्राक्तनस्त्वत्परिकल्पितः । § 1297 - /ms

438/mj

क्रिया हि प्रागभूतनिर्वृत्त्यर्था अनेकद्रव्यतायां भवति, अदृष्टवशादणुषु कर्म- § 1298

---

। १८, संयोगानां द्रव्यम् १ । १ । २५ इति अग्निसंयोगाद् गुणान्तरप्रादुर्भावात् ७ । १ । ५, ६ इति आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ५ । १ । १ इति वाक्येभ्यः संयोग एव द्रव्यगुणकर्मणां समानं कारणं नान्यो गुणः, तथाहि--तूलपिण्डस्य वेगवता तूलेन संयोगात् कर्म, द्वितूलकद्रव्यम्, तत्र च परिमाणं महदुत्पद्यतेऽन्ये गुणा यथायोगम् । **संयोगविभागानां कर्म** वै॰ सू॰ १ । १ । १९, स्वाश्रयमन्यतो विभज्य आश्रयान्तरेण संयोजयति अतः संयोगविभागानां समानं कारणं कर्म । **न द्रव्याणां व्यतिरेकात्** वै॰ सू॰ १ । १ । २०, यदि खलु द्रव्यस्य कारणं कर्म भवेत् तथा सति कृत्वापि संयोगं न निवर्तेत, निवृत्ते तु कर्मणि केवलस्य संयोगस्योपलम्भात् मन्यामहे न द्रव्यकारणं कर्म । **गुणवैधर्म्यान्न कर्मणाम्** वै॰ सू॰ १ । १ । २१, गुरुत्वद्रवत्वनोदनाभिघातसंयुक्तसंयोगाः स्वाश्रये पराश्रये च कर्मकारणम्, प्रयत्नादृष्टौ तु पराश्रये एव । तत्र तावत् कर्म [न] स्वाश्रये कर्मकारणम्, निष्क्रियद्रव्यानुपलब्धिप्रसङ्गात् । नापि पराश्रये तत्संयोगेनैव निवर्तितत्वात् । तस्मादेतैः कर्मकारणैर्गुणैः वैधर्म्यान्न कर्म कर्मकारणम् । अपरं वैधर्म्यम् — **द्रव्याणां द्रव्यं कार्यं सामान्यम्** वै॰ सू॰ १ । १ । २२, सजातीयानां द्वयोर्बहूनां द्रव्याणां द्रव्यं तन्तूनामिव पटः समानं कार्यम् । **द्वित्वप्रभृतयश्च सङ्ख्याः पृथक्त्वं संयोगविभागाश्च** वै॰ सू॰ १ । १ । २३, द्वयोर्द्रव्ययोर्द्वित्वं सामान्यं कार्यम्, त्रयाणां त्रित्वमित्यादि । तथैव द्विपृथक्त्वादि । द्वयोर्द्रव्ययोः संयुज्यमानयोः संयोगः विभज्यमानयोर्विभागः । एषामनेकाश्रितत्वात् समानत्वम् । **असमवायात् सामान्यं कर्म कार्यं न विद्यते** वै॰ सू॰ १ । १ । २४, अनेकस्मिन् द्रव्ये एकस्य कर्मणः समवायनिषेधाद् न द्रव्याणां द्वित्वबहूनां कर्म समानं कार्यमस्ति । **संयोगानां द्रव्यम्** वै॰ सू॰ १ । १ । २५, द्वयोर्बहूनां वा असमवायिकारणानां संयोगानां द्रव्यं समानं कार्यम्, तन्तुसंयोगानामिव पटः । **रूपाणां रूपम्** वै॰ सू॰ १ । १ । २६, द्वयोर्बहूनां वा कारणरूपाणां कार्यद्रव्याश्रितं रूपं समानं कार्यं यथा घटरूपं कपालरूपाणाम्, एवं रसादीनाम् । **गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्** वै॰ सू॰ १ । १ । २७, आदित्यरश्मीनामगुरुत्वात् पर्वते तथाभूतप्रयत्नाभावात् लोष्टस्य च हस्तेनासंयुक्तत्वादनुत्क्षेपणमिति गुरुत्वादीनामुत्क्षेपणं समानं कार्यम् । **संयोगविभागाः कर्मणाम्** वै॰ सू॰ १ । १ । २८, उभयकर्मजा ये संयोगा विभागाश्च ते कर्मणां समानं कार्यम् । **कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्** वै॰ सू॰ १ । १ । २९ इति यस्मिन् प्रकरणे द्रव्यादीनां कारणं समानं वर्णितं तस्मिन् कारणसामान्ये द्रव्यकर्मणां यतः कर्माकारणमुक्तमतस्तान्यप्यस्य कार्यं सामान्यं न भवन्तीति । एवं नाना द्रव्यगुणकर्माणीति सिद्धम् । प्रथमस्याध्यायस्याद्यमाह्निकम् । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ ८ B--९ B । दृश्यतां पृ॰ ३८९ पं॰ १७ टि॰ ६ ॥

यदप्युक्तं त्वया **यथाभूतसन्निहितवस्तुशक्तिव्यक्तिः क्रिया** द्रव्याभेदे **सर्वभेदप्रभेदनिर्भेदं बीजं द्रव्यम्** इति च तन्न भवति, यस्मात् **क्रिया हि प्रागभूतनिर्वृत्त्यर्था**, जगत्प्रलयकाले च का त्वदिष्टव्यापारलक्षणा क्रिया मदिष्टादृष्टचोदिताणुगतकर्मण्यसति ? सा ह्यदृष्टचोदिताणुकर्मजनिता धर्मनिर्वृत्त्यर्था जगत्सृष्ट्यर्था च स्यात्, कर्मैव च नः क्रिया, न हि सा निर्वृत्तमेव निर्वर्तयितुं क्रीडितमेवास्तु इति निरर्थकं वा प्रवर्तते । सा चा**नेकद्रव्यतायां** सत्यां **भवति**, अनेकद्रव्यत्वं चादृष्टचोदिताणुकर्म अन्तरेण न भवितुमर्हति, कस्मात् ? अदृष्टवशादणुषु कर्मसम्भवाद् द्व्यणुकाद्यनेकद्रव्योत्पत्तेः तत्समवायाच्च, ततश्चानेकाणुकृताग्न्यूर्ध्वज्वलनादिलोकस्थितिकरसर्वकार्योपपत्तेः नैकस्य कस्यचित् खवद् नित्यस्य क्रियास्ति । भेदबीजमात्रद्रव्यशक्तिव्यक्तौ वा न कश्चिदुपकारोऽस्त्यस्य जगतः, किं कारणम् ? यस्मादुक्तम् --**अणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितम्** वै॰ सू॰यथा नोदनाभिघातसंयुक्तसंयोगादृष्टेभ्यः पृथिव्यां कर्म तथा तेजसो वायोश्च, एतदनियतं कर्म । नियतं तु --अग्नेरूर्ध्वज्वलनं वायोश्च तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि वै॰ सू॰ ५ । २ । १४, अग्नेरवस्थाने तिर्यग् वा गमने पच्यमानस्याभस्मीभावः स्यादपांवादपाकात् ?, तथा वायोरतिर्यग्गमने पूयमानद्रव्याणां पवनाभावः अग्नेश्चाप्रबोधः, विनष्टशरीराणामात्मणां सर्गादौ पृथिव्यादिपरमाणुष्वाद्यं परस्परोपसर्पणकर्म न स्यात्, तथा लब्धभूमीनां योगिनां कल्पान्ते अभिसन्धाय प्रयत्नेन मनः शरीराद् व्यतिरिच्यावतिष्ठमानानां सर्गादौ नवशरीरसम्बन्धाय मनस आद्यं कर्म न भवेत् अदृष्टादृते । तस्मादग्नेरूर्ध्वज्वलनं वायोश्च तिर्यक्पवनमणूनां चोपसर्पणकर्म मनसश्चाद्यं कर्म एतानि प्राणिनामदृष्टेन कृतानि । हस्तकर्मणा मनसः कर्म व्याख्यातम् वै॰ सू॰ ५ । २ । १५, यथात्मसंयोगप्रयत्नाभ्यां हस्ते कर्म तथात्ममनःसंयोगात् प्रयत्नाच्च मनसः कर्म, एतत् सदेहस्य कर्म, तत्र जाग्रत इच्छाद्वेषपूर्वकात् प्रयत्नात् प्रबोधकाले तु जीवनपूर्वकात् । यतः संयोगो योगः स च कर्मकार्यः अतो योगाङ्गं कर्म, योगमोक्षौ च कर्माधिकारेऽप्युच्येते --आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखःदुखे तदनारम्भः वै॰ सू॰ ५ । २ । १६, यतो हेतोरात्मेन्द्रियमनोऽर्थसन्निकर्षो ज्ञानकारणत्वेन सुखदुःखे जनयति अतस्तदनारम्भः तस्य सन्निकर्षस्यानारम्भोऽनुत्पत्तिरुच्यत इति । तथाहि --आत्मस्थे मनसि शरीरस्य सुखदुःखाभावः स योगः वै॰ सू॰ ५ । २ । १७, यदा हि

---

१ य] दृश्यतां पृ॰ ३७८ पं॰ १ । अत्र यथाशब्दप्रयोगोऽपि साधुरिति प्रतीयते, दृश्यतां पृ॰ ४१८ पं॰ ५ ॥

१ द्र] **द्रव्यभेदे**nayacakra-ms-bhā ॥

१ स] **ह्यदृष्टा॰**nayacakra-ms-vi विना ॥

४ ह्य] दृश्यतां पृ॰ ३७८ पं॰ १ ॥

४ ध] **धर्मनिवृत्त्यर्था**nayacakra-ms-ya । कर्मनिर्वृत्त्यर्था ? ॥

६ इ] **इति रर्थकं**nayacakra-ms-ya । **इनिरर्थकं** nayacakra-ms-bhā ॥

८ णुका] **॰कादने॰** प्र॰ ॥

१० ख] **खवद्** गगनवदित्यर्थः ॥

आत्मनि मनोऽवस्थितं नेन्द्रियेषु तदा चतुष्टयसन्निकर्षस्यानारम्भात् तत्कार्ययोः सुखदुःखयोरभावरूपो विद्यमानशरीरस्यात्मनो वायुनिग्रहापेक्ष आत्मनो मनसा संयोगो योगः, योगाङ्गं प्राणायामकर्म किं नोक्तम् ? कायकर्मणा आत्मकर्म व्याख्यातम् वै० सू० ५ । २ । १८ इह आत्मशब्देन वायुः, यथा आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म तथात्मवायुसंयोगात् प्रयत्नाच्च प्राणायामकर्म । अपसर्पणमुपसर्पणमशितपीतसंयोगः कार्याया Tन्तरसंयोगाश्चेत्यदृष्टकारितानि वै० सू० ५ । २ । १९, मरणकाले पूर्वशरीराद् मनसो निःसरणमपसर्पणम्, शरीरान्तरेणाभिसम्बन्धो मनस उपसर्पणम्, शुक्रशोणितात् प्रभृति गर्भस्थस्य मात्रा उपयुक्तेनान्नपानेन नाड्यानुप्रविष्टेन सम्बन्धोऽशितपीतसंयोगः, कललार्बुदमांसपेशीघनशरीरादिभिरेकस्मिन्नेव संसारे ये सम्बन्धास्ते कार्याया ?न्तरसंयोगाः, ते तान्यपसर्पणादीनि अदृष्टेनैव क्रियन्ते, न प्रयत्नेन । तदभावे संयोगाभावोऽप्रादुर्भावः स मोक्षः वै० सू० ५ । २ । २०, एवंरूपस्य अनाद्यपसर्पणादिनिमित्तस्य अदृष्टस्याभावे जीवनाख्यस्य आत्ममनःसंयोगस्याभावोऽन्यस्य च शरीरस्याप्रादुर्भावो यः स मोक्षः । तमोवृत्तत ? त्वात् सर्वस्य ज्ञानानुत्पत्तौ तमो हेतुः, तत् पुनः द्रव्यगुणकर्मवैधर्म्याद् भाऽभावमात्रं भाऽभावः T तमः वै० सू० ५ । २ । २१, विनाशित्वेन नित्यैर्द्रव्यैर्वैधर्म्यादमूर्तत्वास्पर्शत्वप्रकाशविरोधैरनित्यद्रव्यैर्वैधर्म्यान्न द्रव्यं तमः, न च गुणः कर्म वा आश्रयानुपलब्धेः । तस्मात् प्रकाशस्याभावमात्रं तमः । कुत एतत् ? तेजसो द्रव्यान्तरेणावरणाच्च वै० सू० ५ । २ । २२, तेजसः सवितृप्रकाशादेर्बहिःसद्भावात् पर्वतगुहादौ च द्रव्यान्तरेणावृते अभावाद् मन्यामहे--तेजसोऽभावमात्रं तम इति । बाह्यं प्रदीपादिनिवर्त्यम्, अविद्यात्मकं तु ज्ञानज्योतिषा, इत्युक्तौ योगमोक्षौ । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ० २१ B--२२ B ॥ ५ । २ । १४ इति । न चेदेतदेवमिष्यते यदा अदृष्टपरिगृहीतेष्वणुषु कर्म न 439/mj

* * *

सम्भवाद् द्व्यणुकाद्यनेकद्रव्योत्पत्तेः । न चेदेतदेवमिष्यते तदा चैक्येन तदेकं द्रव्यं निष्क्रियत्वान्न किञ्चिदारभेत, ततश्च तदपि न भवेदेव कर्म, द्व्यणुकाद्यनेकद्रव्यद्रव्याभूतेः क्रियानिर्विषयतैव स्यात् । आरब्धद्रव्यभूतावपि च तदभावाल्लक्षणा-

* * *

भवति तदा चैक्येन स्तिमितगगनवत् तदेकं द्रव्यं निष्क्रियत्वाद् न किञ्चिदारभेत, ततश्चारम्भाभावात् तदपि न भवेदेव कर्म, कर्म ह्यारम्भस्वरूपं कल्प्यते, तस्य स्वरूपाभावात् खपुष्पवदभावः, तदभावाद् द्व्यणुकाद्यनेकद्रव्यं

---

२८ णुकाद्य ] °द्यनेकद्रव्याभूतेः ? ॥
३२ भ ] भवेदेव कर्म ह्यारम्भ°nayacakra-ms-bhā ॥
३३ णुका ] °कादने° प्र° ॥
३३ नेक ] °कद्रव्यं न भवेत्nayacakra-ms-bhā ॥

द्रव्यं न भवेत्, तदभूतेः **क्रियानिर्विषयतैव स्यात्,** यद्यनेकद्रव्यविषया न भवति आरम्भाभावादनेकद्रव्यत्वानुपपत्तेरेव अण्वाकाशाद्येकद्रव्यविषयापि न भवत्येव सा त्वदिष्टा अस्मदिष्टकर्मविलक्षणा तेषां नित्यैकस्तिमितगगनवदार-
- /ms म्भाभावात्, अगुणवतो द्रव्यस्य गुणारम्भात् कर्मगुणा अगुणा अक्रियाश्चास्मन्मतेन त्वन्मतेनापि गुणादीनां क्रियात्वात् क्रियायाश्च द्रव्यप्रधानाया निष्क्रियत्वादेवेति क्रियानिर्विषयता सुष्ठूच्यते । § 1299

च्चाकाशगुणस्य **शब्दस्येतरेभ्यो विशेषः सामान्यादीनां** चेति सामान्यस्य सामान्यविशेषाणामन्त्यविशेषाणां चेतरेभ्योऽनारभ्यत्वात्, समवायस्य चाश्रयित्वे सत्यपि परस्परतश्च स्वाश्रयस्य स्वा (Edtext outside numbered paragraph)नुरूपप्रत्ययाधानहेतुत्वादित्येवमादिविशेषहेतुसद्भावात् सर्वमन्यदेव । § 1300

एवं तावत् क्रिया द्रव्यं नारभत इत्युक्तम् । इदानीं त्वदिष्टं **द्रव्यं च**
440/mj **भव्ये** पा॰ ५ । ३ । १०४

* * *

रम्भानारम्भादिभेदाच्चान्यत्वादेवान्यत्वम्, गुणकर्मणां तदभूतेः द्रव्येभ्यो विशेषः

* * *

भवत्येव भवति द्रव्यम् इत्ययुक्तमिति वक्ष्यामः । कथम् ? अभ्युपेत्याप्यारब्धद्रव्यं कारणे कार्यस्यासत्त्वाद् वर्णितवर्णितोपपत्तिवत् कारणद्रव्येभ्योऽन्यत्वात् कार्यद्रव्याणां न हि तदेव द्रव्यं भवतीति । अथवायमप्यपवादविधिः **--आरब्धद्रव्यभूतावपि च** पूर्वद्रव्येभ्यः कारणभूतेभ्यः कार्यभूतानामन्यत्वाद् गुणकर्मत्वादिना तस्यैव वाऽभावाद् द्रव्यस्येति । किञ्च, **लक्षणारम्भानारम्भभेदाच्चान्यत्वादेवान्यत्व**मिति, विशेषप्रकरणे **क्रियावत्** वै॰ सू॰ १ । १ । १४ इत्यादि द्रव्यलक्षणम्, **द्रव्याश्रयी** वै॰ सू॰ १ । १ । १५ इत्यादि गुणलक्षण-

---

११ व] तुलना पृ॰ ३१३-- २ ॥
१३ म] **॰मप्यवाद॰** प्र॰ ॥
१५ वा] **वाभावाद्** प्र॰ ॥
१६ विशेष] **॰षकरणे** प्र॰ ॥
१६ क्रि] वैधर्म्यान्तरमपि **--क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम्** वै॰ सू॰ १ । १ । १४, उत्क्षेपणादिकं कर्म क्रिया यथासम्भवं यस्मिन् समवायेन वर्तते तत् क्रियावत् अन्यत्राकाशकालदिगात्मभ्यः । गुणा रूपादयो यत्र यथासम्भवं वर्तन्ते तद् गुणवत्, अयुतसिद्धानामाधार्याधारभूतानामिहेति यतः [स] समवायः, स यस्यास्ति तत् समवायि, कारणं च तदैदेव, समवायिनो वा कार्यस्य कारणम् । तत्र क्षित्यादीनि त्रयाणां द्रव्यगुणकर्मणां समवायिकारणम्, आकाशादीनि गुणानाम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम् । **द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्** वै॰ सू॰ १ । १ । १५, द्रव्यमाश्रयतीति द्रव्याश्रयी, अगुणवान् निर्गुणः, संयोगविभागेष्वकारणमनपेक्ष इति सापेक्षकारणम्, तथाहि--अङ्गुल्योराकाशसंयोगो द्व्यङ्गुलाकाशसंयोगे कर्तव्ये द्व्यङ्गुलोत्पत्तिमपेक्षते, अङ्गुल्योः परस्परविभागो द्व्यङ्गुलाकाशविभागं प्रति कार्यविनाशमपेक्षते, एवं संयोगविभागविभागलक्षण एव गुणः संयोगविभागेषु सापेक्षः कारणम् । **एकद्रव्यमगुणं संयोगविभागेषु अनपेक्षं कारणमिति कर्मलक्षणम्** वै॰ सू॰ १ । १ । १६, एकमस्य कर्मणो द्रव्यमाश्रयः, न द्वे, एकमेव वा-द्रव्ये वर्तत इत्येकद्रव्यम्,

म्, **एकद्रव्यादि** कर्मलक्षणम्, इत्थं लक्षणभेदाद् नानैव द्रव्यगुणकर्माणीति । द्रव्येष्वप्यनारम्भकेभ्यो गगनादिभ्यः पृथिव्याद्यारम्भकनानात्वम्, गुणानामपि संयोगविभागरूपादीनामारम्भकाणां विभुत्वाद्यनारम्भकेभ्यो नानात्वम्, कर्मणोऽवयविद्रव्यसंयोगविभागारम्भिणोऽनारम्भकेभ्यो भेदः, तदभावात् । तेषां *विरोधाविरोधकारणकार्यप्रकरणकृतं च नानात्व**मादि**ग्रहणात् । **गुणकर्मणां तदभूतेरिति** द्रव्यमेव द्रव्यं भवति, न गुणा न कर्माणि, गुणानामगुणाकर्मत्वात् कर्मणश्चागुणाकर्मत्वाद् - /ms

अनारभ्यत्वाच्च शब्दस्येतरेभ्यो विशेषः सामान्यादीनां च । ततस्त्वदुक्तद्रव्यस्वरूपलक्षणभवनानुपपत्तिरित्युभयस्याप्यभावः । द्रव्यादिषड्भेदस्य सप्रभेदस्यैव भावः ।

यदुच्यते यदयं भवति स्वयमेव यदनेन भूयते स एवास्य भाव इति नैष भावः । अन्येनान्येन भूयते सोऽन्य एवास्य भावः येन च भूयते सोऽपि चास्य भावः ।

भावेऽप्युभयता उभयोत्सर्गात्, द्विविधो हि भावः--स्वभावः संबन्धश्च ।

* * *

**भ्यत्वाद्रव्येभ्यो विशेषः । अनार** 441/mj

* * *

**अनारभ्यत्वाच्च शब्दस्येतरेभ्यो विशेषः सामान्यादीनां च । ततस्त्वदुक्तद्रव्यस्वरूपलक्षणभवनानुपपत्तिरित्युभयस्याप्यभावः । द्रव्यादिषड्भेदस्य सप्रभेदस्यैव भावः ।**

---

नास्य गुणाः सन्तीत्यगुणम्, संयोगविभागेषु कार्येषु स्वस्याश्रयस्य अन्यतो विभज्याश्रयान्तरेण संयोजनादुत्पाद्याद्यविनाश्यानपेक्षया संयोगविभागेष्वनपेक्षं कारणमिति । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० ८ ॥

५ *] वैधर्म्यान्तरमाह --**कार्याविरोधि द्रव्यं कारणाविरोधि च** वै० सू० १ । १ । ११, विनाशो विरोधः प्रतिबन्धः, क्वचित् द्रव्यादिना कार्येण कारणद्रव्यं समवाय्यसमवायिकारणाभ्यां च न विरुध्यते, तथाहि--अङ्गुलिद्रव्यं कार्यं द्व्यङ्गुलं जनयिष्यत् तदर्थेन कर्मणा तत्कृतेन संयोगेन ततो जातेन द्व्यङ्गुलेन न विरुध्यते नापि समवाय्यसमवायिकारणाभ्यां पर्व-तत्संयोगाभ्यां वा, मनोऽन्त्यावयविद्रव्याणि गुणकर्मभिः कार्यैः आकाशादीनि गुणैः, नित्यत्वादेषां न कारणःण ? णैः ?विरोधः । **उभयथा गुणः** वै० सू० १ । १ । १२, कार्यकारणोभयानुभयैरविरोधी विरोधी च परमाणुद्व्यणुकाद्यन्त्यावयविद्रव्येषु रूपादयः कारणैरविरोधिनः यथासम्भवं रूपरसगन्धस्पर्शा अकार्यकारणभूता अविरोधिनः परस्परेण विरोधिन आद्यमध्यान्त्यशब्दाः कार्योभयकारणैः, अदृष्टः कार्येण, स्पर्शवद्द्रव्यसंयोगेन वेगप्रयत्नौ, संयोगविभागौ सुखदुःखे इच्छाद्वेषौ परस्परतोऽकार्यकारणभूतौ विरुध्येते, ज्ञानं संस्कारसन्तानप्रतिपक्षैः संस्कारो ज्ञानमदढुःखादिभिरिति यथासम्भवमेतद् द्रष्टव्यम् । **कार्यविरोधि कर्म** वै० सू० १ । १ । १३, संयोगविभागसंस्काराणां कार्याणां मध्यात् संयोगेनैव कर्म विरुध्यते, न विभागसंस्काराभ्यां संयोगानुत्पत्तिप्रसङ्गात् । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० ७ B--८ A ॥

५ का] दृश्यतां पृ० ४३७ टि० ८ ॥

११ य] दृश्यतां पृ० ३८३ पं० १ ॥

१६ अ] **अन्यारभ्य०** प्र० ॥

यदुच्यते यदयं भवति स्वयमेव यदनेन भूयते स एवास्य भाव इति नैष भावः । अन्येनान्येन भूयते सोऽन्य एवास्य भावः येन च भूयते सोऽपि चास्य भावः ।

भावेऽप्युभयता उभयोत्सर्गात्, द्विविधो हि भावः--स्वभावः संबन्धश्च ।

* * *

भ्यत्वा

ततः किम् ? **ततस्त्वदुक्तद्रव्यस्वरूपलक्षणभवनानुपपत्तिः, सर्वप्रभेदनिर्भेदं बीजं द्रव्यम्,** तस्यैव द्रव्यस्य तथाभूतसन्निहितशक्तिव्यक्तिर्भावः इत्येवंस्वरूपलक्षणस्य भवनस्यानुपपत्तिः, द्रव्यभवनभिन्नभवनात्मकत्वाद् गुणादीनां द्रव्यान्तराणां सत्तासमावायाद्याश्रितपदार्थानां [च] । **इति**शब्दो हेत्वर्थे, तस्मात् कारणा**दुभयस्यापि** सामान्यस्य द्रव्यभवनस्यैकरूपस्योत्सर्गस्य क्रियाभवनस्य चापवादस्य भूताभूतादिभेदस्या**भावः** । कथं तर्हि तयोर्भाव इति चेत्, उच्यते--द्रव्यादिषड्भेदस्य सप्रभेदस्यैव पृथक्पृथक्स्वरूपस्यैव विशेषधर्मकस्य भावः । § 1301

यदपि च तत् स्वसन्मात्रं स्वरूपसत्त्वं तदपि नात्मनैव, **यदुच्यते--यदयं भवति स्वयमेवा**र्थान्तरनिरपेक्षं स्वतन्त्रम्, विभक्त्यन्तरेण तदेव व्यक्तीकरोति --**यदनेन भूयते** इति, स्वभावसम्बन्ध इत्यर्थः, अयं त्वयेष्टः **स एवास्य भाव** इति, **नैष** पुन**र्भावो** भवति । कस्तर्हि ? **अन्येनान्येन भूयते**ऽन्यापेक्षेण च तथा तद्भिन्नेन **सोऽन्य एवास्य भावो भावः** । कोऽसौ ? सत्ता महासामान्यम् । **येन च भूयते सोऽपि चास्य भावः,** सद्व्यपदेशार्हस्य द्रव्यादेः सतोऽपि भावः, न केवलं सत्तैव, यत्सम्बन्धाद् भवति इति भवति सापि सत्ता भावः सच्च द्रव्यादि भवतीत्यर्थः । § 1302

**भावेऽप्युभयता उभयोत्सर्गात्,** सत्तायामपि **उभयता** सामान्यविशेषता,
- /ms सोत्सृज्यते नियम्यते च, सोऽपि ह्युत्सृज्यते च भावः सर्वगतः इति, नियम्यते स्वगत एव इति । सत्तान्तरसम्बन्धनिरपेक्षसद्भावे[ऽ]सति मा भूत्
442/mj सम्बन्धानवस्था, **द्विविधो हि भाव** इति सर्वस्य वस्तुन उत्सर्गापवादौ पृथक्

१ य] दृश्यतां पृ॰ ३८३ पं॰ १ ॥
७ स] दृश्यतां पृ॰ ३७८ पं॰ १ ॥
१० मावायाद्याश्रित] आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः प्रशस्तपा॰ भा॰, आश्रितत्वं च परतन्त्रतयोपलब्धिः, न समवायलक्षणा वृत्तिः समवाये तदभावात् । इदं चाश्रितत्वं चतुर्विधेषु परमाणुषु आकाशकालदिगात्ममनःसु नास्तीत्यत आह--अन्यत्र नित्यद्रव्येभ्य इति । इति प्रशस्तपादभाष्यव्याख्यायां कन्दल्यां साधर्म्यवैधर्म्यप्रकरणे ॥
१३ रूप] ॰**स्यैवाविशेषधर्मकस्याभावः** प्र॰ । अत्र ॰स्यैवाविशेषधर्मकस्य भावः इत्यपि पाठश्चिन्त्यः । षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वम् । इति प्रशस्तपादभाष्ये ॥
१९ च] **स्व तथा** प्र॰ । अत्र २ **च तथा** इत्यपि पाठः स्यात्, तथा च अन्यापेक्षेण अन्यापेक्षेण च तथा इत्यपि पाठश्चिन्त्यः ॥
२० सो] सोपिnayacakra-ms-vinayacakra-ms-raṃ ॥
२२ स] **स च** द्रव्यादिnayacakra-ms-bhā । स च द्रव्यादिः ? ॥
२४ ह्यु] ॰**द्युत्सृ**॰nayacakra-ms-ya । **व्यत्सृ**॰ nayacakra-ms-bhā ॥

* * *

स्वभावः स्वरूपसत्ता, सम्बन्धः सम्बन्धसत्ता यत्सम्बन्धाद् द्रव्यगुणकर्मसु सदिति भवति ।

न तु भवत्येव भावः सन्, द्रव्यगुणकर्मवत् सत्तास्वतत्त्वासमवायात् । दण्डवत्तु अर्थान्तरापेक्षत्वाद् द्रव्यगुणकर्मणां सत्तादिसम्बन्धानुरूपप्रत्ययहेतुत्वं सामान्यादीनाम्, न त्वगृहीते विशेषणे विशेष्ये बुद्धिरनुप्रवर्तते ।

* * *

पृथग्विभिन्नरूपौ दर्शयति । तद्व्याख्या --**स्वभावः सम्बन्धश्चे**त्यादि गतार्थं यावद् **द्रव्यगुणकर्मसु सत् इति भवति,** स्वरूपसत्ता नार्थान्तरमपेक्षते सम्बन्धसत्ता त्वपेक्षत इत्यर्थः । § 1303

**न तु भवत्येवे**त्यादि । **न तु भावः** सत्ता **सन्,** द्रव्यगुणकर्मवत् सन्न भवति सद्भावसामान्येऽपि भावानां प्रतिस्वं स्वभावभेदात्, द्रव्यगुणकर्मसद्वैधर्म्यात् सन्न भवति न द्रव्यं भवति न घटादिर्भवति, द्रव्यत्वघटत्वादिसम्बद्धद्रव्यादिघटादिवद् न स द्रव्यादि भवतीत्यर्थः । किं कारणम् ? **सत्तास्वतत्त्वासमवायात्,** सत्तासमवायो द्रव्यत्व-गुणत्व-कर्मत्व-घटत्वादिस्वतत्त्वसमवायो वा सत्ताया यतो नास्ति, ते हि द्रव्यादयः सत्तास्वतत्त्वसमवायात् सद्द्रव्यघटादिव्यपदेशार्हा भवन्तीति । एषोऽपि विशेषः किमर्थं सत्तास्वतत्त्वसमवायाद् द्रव्यादि सद् भवति न पुनर्द्रव्यादिसमवायात् सत्तादिस्वतत्त्वानि द्रव्यादीनि भवन्ति इति चेत्, उच्यते--स्वरूपसत्तया सतामपि सामान्यसामान्यविशेष-विशेष-समवायानामसत्त्वात् स्वसद्भावादेव सतां सम्बन्धसद्भावशून्यानां सत्तादीनामितरेभ्यो विशेषः, स तु सम्बद्धद्रव्यादीनामस्तीति - /ms दर्शयति --**दण्डवत् त्वर्थान्तरे**त्यादि गतार्थं यावद् **विशेष्ये बुद्धिरनुप्रवर्तते** इति । *विशेषणस्वरूपप्रत्ययनिमित्तत्वाद् विशेषणानां सत्तादिसम्बन्धानुरूपप्रत्ययहेतुत्वं सामान्यादीनां स्वाश्रयेषु दण्डनिमित्तदण्डिप्रत्ययवत् द्रव्यगुणकर्मणां न त्वगृहीते विशेषणे, *श्वेत्यादिविशेषप्रत्ययस्य 443/mj

---

४ द] दण्डवत्तु अर्थान्तरसम्बन्धानुरूपप्रत्ययनिमित्तत्वाद् विशेषणानां सत्तादिसम्बन्धानुरूपप्रत्ययहेतुत्वं सामान्यादीनाम्, न त्वगृहीते विशेषणे विशेष्ये बुद्धिरनुप्रवर्तते इत्यपि मूलपाठः सम्भवेत् ॥
७ स्व] **स्वभावसम्बन्धश्चेत्यादि**nayacakra-ms-bhā । **स्वभावसम्बन्धन्येत्यादि** nayacakra-ms-ya ॥
१० स] **सद्द्रव्यगुणकर्मवत्**nayacakra-ms-ya ॥
१२ घ] **°घटादिसंबंधद्रव्यादि°** प्र° ॥
१३ न] अत्र **न सद्द्रव्यादि** इत्यपि पाठः स्यात् ॥
१८ द्र] **द्रव्यादीनि न भवन्ति** प्र° । अत्र **न** अधिकः ॥
१८ स] **सत्ताया** प्र° ॥
२० रेभ्यो] **विशेषस्तत्तु संबंधद्रव्यादीनामस्तीति** प्र° । अत्र **विशेषः, स तु सम्बन्धो द्रव्यादीनामस्तीति** इत्यपि पाठः स्यात् ॥
२२ *] **विशेषेण°** प्र° ॥
२३ सा] **सामादीनां** प्र° ॥
२४ *] **स्वेत्यादि°** प्र° । बुद्धिरिदानीं निरूप्यते --**द्रव्येषु ज्ञानं व्याख्यातम्** वै° सू° ८ । १, षण्णां पदार्थानां मध्याद्

* * *

एवमेव ह्युभयस्यैवोभयप्राधान्यस्यापि विधिः, न तु द्रव्यक्रिययोः उभयप्राधान्याभावात् तथाभूतार्थविषयत्वात् सन्निधानस्य व्यक्तेरपि तद्भवनतन्त्रत्वात् ।

* * *

गगनादिष्वतत्सम्बन्धिष्वभाववदिति । **एवमेव ह्युभयस्यैवोभयप्राधान्यस्यापि विधिर्यथास्माभिरुक्तः तथैव सामान्यस्य विशेषस्य च विधिः सम्भवति, अत्य-**

---

द्रव्येष्वेव ज्ञानं व्याख्यातम्, यथोत्पद्यते सन्निकर्षात् न तथा गुणादिषु । तस्य **मन आत्मा च** वै॰ सू॰ ८ । २ मन आत्मा च ज्ञानस्य कारणं व्याख्यातम् । इदानीं गुणादिषु ज्ञानमाह --**ज्ञाननिर्देशे ज्ञाननिष्पत्तिरुक्ता** वै॰ सू॰ ८ । ३, यत इन्द्रियसन्निकर्षेण ज्ञाननिष्पत्तिरुक्ता गुणादीनाम् । यतः **गुणकर्मसु असन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं कारणकारणं च** वै॰ सू॰ ८ । ४, गुणकर्मणां यतो द्रव्यं समवायिकारणं ततस्तेषु साक्षादिन्द्रियेण असन्निकृष्टेषु विज्ञाननिष्पत्तेः कारणस्य सन्निकर्षस्य तदेव द्रव्यं कारणं न गुणकर्माणि, तस्माद् गुणकर्मसु संयुक्तसमवायं ज्ञानम्, चशब्दो हेतौ । **सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम्** वै॰ सू॰ ८ । ५, सामान्ये सत्तादौ विशेषेषु चान्त्येषु तद्दर्शिनां द्रव्यसन्निकर्षादेव ज्ञानमुत्पद्यते, न सामान्यविशेषेभ्यः तेषु तदभावात् । अन्यत्र तु **सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु** वै॰ सू॰ ८ । ६, द्रव्यगुणकर्मसु द्रव्येन्द्रियसन्निकर्षात् सामान्याच्च सादेःसत्तादेः ? सामान्यविशेषाच्च द्रव्यत्वादेः सदिति द्रव्यमित्यादि च ज्ञानमुत्पद्यत इति । इह सूत्रे सामान्यं सत्ता, विशेषा द्रव्यत्वादयः, पूर्वसूत्रेऽन्यथा । तत्रापि **द्रव्ये द्रव्यगुणकर्मापेक्षम्** वै॰ सू॰ ८ । ७, चक्षुःसन्निकर्षाद् यज्ज्ञानं द्रव्ये सामान्यविशेषापेक्षं विषाणी इति, गुणापेक्षं शुक्लः इति, कर्मापेक्षं गच्छति इत्युत्पद्यत इति । द्रव्यादीनां च विशेषणत्वात् पूर्वमुपलम्भः, तेन विशेषणबुद्धेः कारणत्वं विशेष्यबुद्धेः कार्यत्वम् । **गुणकर्मसु गुणकर्माभावाद् गुणकर्मापेक्षं न विद्यते** वै॰ सू॰ ८ । ८, गुणे गुणकर्मणोरभावात् कर्मणि च गुणकर्मनिमित्तं गुणकर्मसु ज्ञानं न भवतीति । द्रव्यादौ ज्ञानस्य पूर्वोत्पत्तावनियमः, यथा **समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते** वै॰ सू॰ ८ । ९, श्वेतगुणसमवायिनः श्वेतश्वैत्यसामान्यात् श्वैत्यसामान्यज्ञानाच्च श्वेतगुणज्ञानं जायते, सामान्यगुणसम्बन्धोऽपि द्रष्टव्यः, अतो विशेषणबुद्धिः कारणं विशेष्यबुद्धिः कार्यम् । विशेषणविशेष्य[ताऽ]भावे तु **द्रव्येष्वनितरेतरकारणात्कारणायौगपद्यात्** वै॰ सू॰ ८ । १०, अणुत्वाद् मनसो यौगपद्याभावात् सत्यपि क्रमे घटपटज्ञानयोर्न कार्यकारणभावः विशेषणविशेष्यत्वायोगात् । **तथा द्रव्यगुणकर्मसु कारणाविशेषात्** वै॰ सू॰ ८ । ११, गौः शुक्ला गच्छतीति च द्रव्यगुणकर्मसु ज्ञानानां क्रमेणापि जायमानानां न कार्यकारणभावः विशेषणविशेष्यताऽभावादित्यस्य पूर्वोक्तस्य कारणस्याविशेषात् । अतो द्रव्यज्ञानं न गुणकर्मबुद्ध्योः कारणम्, गुणकर्मबुद्धी अपि न परस्य कारणम् । विशेषणन्यायाभावे तु **अयमेष कृतं त्वया भोजयैनमिति बुद्ध्यपेक्षम्** वै॰ सू॰ ८ । १२, अयम् इति सन्निकृष्टे एषः इति च किञ्चिद्विप्रकृष्टे प्रत्ययः, कृतं त्वया इति कर्मकर्तृप्रत्ययौ, भोजयैनम् इति कर्तृकर्मप्रत्ययौ । सन्निकृष्टापेक्षो विप्रकृष्टे प्रत्ययः, कृतम् इति कर्मापेक्षः कर्तरि, भोजय इति कर्त्रपेक्षः कर्मणि । कुतः सापेक्षा इति चेत्, **दृष्टेषु भावाददृष्टेष्वभावात्** वै॰ सू॰ ८ । १३, दृष्टेषु सत्सु यतः सन्निकृष्टादिषु विप्रकृष्टादिप्रत्यया भवन्ति नादृष्टेषु अतः सापेक्षा अपि सन्तो न कार्यकारणभूता विशेषणविशेष्यत्वायोगात् । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ २९ ॥

४ नादिष्व ] °स्वत° प्र॰ ॥

४ ए ]

एवमेवद्युभ°nayacakra-ms-bhā । एवमेवाद्युभ nayacakra-ms-ya ॥

५ स्यापि ] **विधेर्यथा°** प्र॰ ॥

न्तविशेषरूपत्वात् पदार्थषट्कभेदानाम्, तथा सामान्यविशेषद्वयविधिरपि भवितुमर्हति, **न तु** पूर्वनयेष्टो **द्रव्यक्रिययोः, उभयप्राधान्याभावादस्वातन्त्र्ये** कर्तृत्वाभावादिति । अस्माभिस्त्वदनुकम्पया अभ्युपगतेऽपि कर्तृत्वे स्वतन्त्रभवनात्मके द्रव्यस्यैव प्राधान्यमिति तद्विधानात् **क्रियायाः प्राधान्याविधानात्,** भवेद् द्रव्यं कर्तृ स्वातन्त्र्यात्, न क्रिया प्राधान्याभावात् इत्येवं युक्त्या प्राप्तेऽपि त्वदनुकम्पया तयोः कर्तृत्वे वाभ्युपगतेऽपि न भवितुमर्हति उभयप्राधान्याभावादित्यर्थः । किं कारणमुभयप्राधान्यं नास्ति इति चेत्, उच्यते **--तथाभूतार्थविषयत्वात् सन्निधानस्य,** द्रव्यं हि सन्निहितभवनमिष्यते तथातथाभवद्भावाभिमुखसन्निहितघटादिभवनगेहवत्, गेहसन्निहितघटवत् सर्वथा तेषां क्रियाव्यङ्ग्याभिमतानां द्रव्ये सन्निधानाभ्युपगमात् प्रदीपेनेव गेहे सन्निहितानां घटादीनां क्रियया न किञ्चित् प्रयोजनम्, सम्भाव्यमानमपि प्रयोजनमभिव्यक्तिमात्रं स्यात्, तस्या **व्यक्तेरपि तद्भवनतन्त्रत्वात्** द्रव्यभवनस्यैव प्रधानस्योपकारमात्रार्थत्वाद् व्यक्तेरप्राधान्यमिति । 444/mj

* * *

अयं तूभयप्रधानविधिः--आरब्धानारब्धद्रव्याणां स्वभावभेदाद् विशेषः, भावसत्त्वस्य अत्यन्तव्यञ्जनस्वातन्त्र्यादन्यथाभूतेः । पृथिव्युदकतेजोवाय्वाकाश-

* * *

**अयं तूभयप्रधानविधिरि**ति निगमनम् । **तु**शब्दो विशेषणार्थः, एवं ह्यसौ विशिष्टार्थाधिकारापरित्यागेनैव सामान्यविशेषयोर्विधिरिति । कीदृश इति चेत्, तन्निदर्शयति **--आरब्धानारब्धे**त्यादि सप्रभेदसद्पदार्थपरस्परान्यत्वप्रदर्शनार्थो ग्रन्थो यावत् **कर्मणि तु स्वभावसम्बन्धसद्भावाभ्या**मिति प्रायो गतार्थः, तथापि किञ्चिदुच्यते--पार्थिवादिपरमाणुद्व्यणुकाद्यारब्धानामपि स्वभावभेदाद् देशकालाभेदेऽपि नानात्वम्, परमाण्वाकाशादीनामनारब्धानां च तत एव, भावसम्बन्धाभिव्यङ्ग्याभेदेऽपि सति आरभ्याणां च कादाचित्कत्वादितरेषां नित्यत्वाद् विशेषः । **भावसत्त्वस्य** सत्तासत्त्वस्य स्वभावसद्भावेऽपि विशेषः, कस्मात् ? **अत्यन्तव्यञ्जनस्वातन्त्र्यात्,** इतरे व्यज्यन्ते स तु व्यनक्त्येवेति । **अन्यथाभूतेः**, एवमन्येन प्रकारेण भवनात् सर्वत्र सन्निहितमेव भवति इत्यभावात् **अन्यथाभूते**रिति । यद्येवं भावव्यञ्जनास्वातन्त्र्ये सत्येव न स्यात्, नैव स्यात् सत्ता सम्बन्धरहितत्वात् खपुष्पवत्, भावो हि सद्भावसद्व्यञ्जनस्वात- - /ms

२ न] °**नयेष्टो** nayacakra-ms-bhā ‖
३ क] स्वतन्त्रः कर्ता इति पाणिनीयव्याकरणे, १ । ४ । ५४ ‖
४ द्र] **द्रव्यस्यैव च प्राधान्यमिति द्विधानात्**nayacakra-ms-ya ‖
६ न] पूर्वनयेष्टो द्रव्यक्रिययोर्विधिर्न भवितुमर्हतीत्यर्थो भाति । दृश्यतां पं° ५ ‖
९ द्भावाभिमु] °मुखं सन्नि° ? ? ? ‖
१७ विशिष्टार्थाधिका] °**कारार्थपरि**°nayacakra-ms-bhā ‖
२६ नास्वा] °**स्वातन्त्र्ये व न स्यात्**nayacakra-ms-ya ‖
२६ स] सती एव इत्यर्थो भाति ‖

न्त्याभावात् खपुष्पवद् न स्यादिति । **पृथिव्युदके**त्यादि । एतान्यपि द्रव्याणि
445/mj इतरेतराभावात्मना न सन्ति, असतामेव

* * *

कालदिगात्ममनोद्रव्याणामितरेतरासतामेव भावादिसम्बन्धात् तथा तथान्यता, अन्यत्वे एव असति सत्त्वम् । गुणकर्मणोरप्येवमेव । न चास्यान्यस्मात् सदभिधानप्रत्ययौ स्वपरप्रकाशहेतुत्वात् प्रदीपवत्, स्वसद्भावेन सत एवासत्त्वं सम्बन्धसद्भावाभावात्, अगुणगुणवत् । एवं सामान्यं सामान्यमेव । कार्यद्रव्यादीनां स्वभावसद्भावो न भवतीति भवत्येव । किञ्चित् तु भवत्येव भवति परमाण्वाकाशकालदिगात्ममनो-

* * *

---

१ पृ] **अथातो धर्मं व्याख्यास्यामः**वै° सू° १ । १ । १, कस्यचिद् ब्राह्मणस्य वेदाभ्यासवशेन व्यपगतकल्मषस्येदं वेदवाक्यं प्रतिबभौ अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः छान्दोग्योप° ८ । २ इति । तत इदं वाक्यमालोच्य **कणभक्ष**माजगाम । ततोऽभ्युवाच--भगवन् ! अनेन वाक्येन अपहतशरीरस्य क्षेमसाधनता कथ्यते, तदुच्यताम्--क उपाय इति । ततो मुनिरभ्युवाच— धर्म इति । ततो जगाद ब्राह्मणः--को धर्मः कथंलक्षणः कान्यस्य साधनानि किं प्रयोजनं कांश्च प्रत्युपकरोतीति । अत एभ्यः प्रश्नेभ्योऽनन्तरं धर्मव्याख्यानप्रतिज्ञायाम् अथशब्द आनन्तर्यमभिधत्ते, अतःशब्दोऽपि वैराग्यप्रज्ञाकथापरिपाकादिकां शिष्यगुणसम्पदं हेतुत्वेनोपदिशति, यस्मादयं शिष्यो गुणसम्पदा युक्तस्ततोऽस्मै प्रश्नेभ्योऽनन्तरं धर्मं व्याख्यास्यामः । को धर्म इत्याह— **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः** वै° सू° १ । १ । २, यागदेवतापूजादिक्रियाणामाज्यपुष्पादिनिर्वर्त्यानां तदैव विनष्टत्वादुत्तरकालं फलदानाशक्तेर्यस्माद्धेतोरभ्युदयनिःश्रेयसे भवतः स धर्म इति बोद्धव्यः । अभ्युदयो ब्रह्मादिलोकेष्विष्टशरीरप्राप्तिरनर्थोपरमश्च । निःश्रेयसमध्यात्मनो वैशेषिकगुणाभावरूपो मोक्षः । कुत एवंलक्षणो धर्मो ज्ञायत इति चेत्, आम्नायात् तस्य प्रामाण्यम् । कथमित्याह **--तद्वचनादाम्नायप्रामाण्यम्** वै° सू° १ । १ । ३, तदिति **हिरण्यगर्भ**परामर्शः, हिरण्यं रेतोऽस्येति कृत्वा भगवान् महेश्वर एवोच्यते । आप्तेन उक्तत्वस्य सत्यताव्याप्तत्वादिहाप्तेन हिरण्यगर्भेणोक्तत्वादाम्नायस्य प्रामाण्यं साध्यते । ईश्वरश्च साधितस्तनुभुवनादीनां कार्यतया घटादिवद् बुद्धिमत्कर्तृकत्वानुमानेन । उक्तं धर्मस्वरूपं तल्लक्षणं च । साधनान्यस्येदानीं द्रव्याणि वक्ष्यामः, तत्र **पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि** वै° सू° १ । १ । ४, द्रव्यत्वाभिसम्बन्धाद् द्रव्याणि, नाधिकानीत्येवमर्थः इतिशब्दः । एवमुद्दिष्टानि द्रव्याणि । के पुनर्गुणा इत्याह **--रूपरसगन्धस्पर्शाः सङ्ख्या सङ्ख्याः *T* परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणाः** वै° सू° १ । १ । ५, एते सप्तदश कण्ठोक्ता रूपादयो गुणाः **च**शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दा गृह्यन्ते, एते यथावसरमुत्तरत्र वक्ष्यन्ते । कानि पुनः कर्माणीत्याह **--उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि** वै° सू° १ । १ । ६, एतान्येव पञ्च कर्माणि द्रष्टव्यानि, गमनग्रहणाद् भ्रमणरेचनादीनां ग्रहणम्, एवमुद्दिष्टानि द्रव्यगुणकर्माणि । तदनुषङ्गात् सामान्य-विशेष-समवाया अपि वक्ष्यन्ते । एवं षण्णां पदार्थानां साधर्म्यवैधर्म्यपरिज्ञानं विषयदोषदर्शनद्वारेण वैराग्योत्पत्तौ सत्यां निःश्रेयसे साध्ये धर्महेतुः । अभ्युदये साध्ये धर्महेतुत्वं पुनरमीषां समे यजेत इति पृथिव्याः, अपोंबूनि(?()अपः अम्बूनि ? अपाम् अम्बूनि ?(?)) नयति इत्यादि यथास्वमन्येषां द्रव्याणाम् । गुणानां तु कृष्णमालभेत इत्यादि । कर्मणां तु व्रीहीन् अवहन्ति इत्यादि । इति **चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ** P पृ° ७ ॥

९ द्र] **द्रव्यसत्वसम्ब°**nayacakra-ms-ya ॥

सत्तासम्बन्धात् सत्त्वं भवति द्रव्यत्वसम्बन्धाद् द्रव्यत्वं भवति । ततश्च सत्तातो द्रव्यत्वाच्चान्योन्यतश्च तेन तेन प्रकारेणान्यता, **अन्यत्व एवे**तरेतरासतां भावादिसम्बन्धा[द]न्यत्व एव **असति सत्त्व**मन्य[त्व] एवेति । **गुणकर्मणोरप्येवमेवे**ति, भाव-गुणत्व-कर्मत्वादिभिः सम्बन्धादितरेतरासतामेव सद्गुणकर्मत्वानि । एवं भावोऽसतां सम्बन्धात् सत्त्वं जनयति द्रव्यादीनामित्युक्तम्, तथा किं भावस्य सम्बन्धोऽन्येन जन्यते ? नेत्यत्रोच्यते --**न चास्ये**त्यादि । स हि स्वयं सम्बन्धादन्येषां सदभिधानप्रत्ययहेतुर्नान्यस्मात् सदभिधानप्रत्ययौ लभते, **स्वपरप्रकाशहेतुत्वात्, प्रदीपवत्,** न हि प्रदीपो घटादिप्रकाशनसमर्थः स्वप्रकाशने घटादीनपेक्षते तथा सत्तापि । तस्मात् तस्य स्वभावसद्भावेन सत एवासत्त्वं सम्बन्धसद्भावाभावात्, नेतरेतरासत्त्वात्, यथा गुणोऽगुणः इति - /ms नास्य गुणोऽस्तीत्यगुण उच्यते गुणः, न तु गुणो न भवतीति । कस्मात् ? गुणान्तरसम्बन्धाभावात्, न स्वयमगुणत्वादिति । **एवं सामान्यं सामान्यमेवे**ति गतार्थम्, एवं तावत् स्वत एव भावः सत्तान्तरानपेक्षः सन् । योऽप्यसौ स्वभावसद्भावः कार्यद्रव्यादीनां परतो भावसम्बन्धादाधेयस्तस्मादेवासन्निति न, किं तर्हि ? **तन्न भवतीति भवत्येव,** अभूत्वा भावात् भूत्वा चाभावात् कार्यस्य स्वसद्भावेनैवासत् सद् भवति सदप्यसद् भवतीति तस्य स्वसद्भावस्य कार्यस्य सदसद्भावद्वैरूप्यं **तदतत्समर्थविकल्पत्वात्, एकपुरुषपितृपुत्रत्वादिव**दिति भावितमेव । तस्मात् सर्वमन्यथान्यथैव सामान्यविशेषात्मकं भवति । **किञ्चित् त्वि**त्यादि । इदं पुनर्**भवत्येव भवति** स्वसद्भावादेव नाभूत्वा न सत्तासम्बन्धात्

---

१ कारेणान्य] °न्यतान्यताnayacakra-ms-bhā ॥
२ म्ब] **°संबंधान्यत्व एवा°**nayacakra-ms-bhā । **°संबंधान्यत्य एवा°** nayacakra-ms-ya ॥
२ म] **°मन्य एवेति**nayacakra-ms-bhā । **°मन्यवत्य एवेति** nayacakra-ms-ḍe । **°मन्यवन्य एवेति** nayacakra-ms-pā । **°मन्यदन्य एवेति** nayacakra-ms-raṃ nayacakra-ms-hī । **°मन्यवय एवेति** nayacakra-ms-vi ॥
२ गु] दृश्यतां पृ° ४४४ टि° ४ ॥
३ स] **सद्गुणकर्मत्वान्यत्वानि**nayacakra-ms-ya । सत्त्वं गुणत्वं कर्मत्वं परस्परतोऽन्यत्वं च इत्यर्थविवक्षायां nayacakra-ms-ya प्रतिपाठोऽपि साधुरेव ॥
९ स] **सत्येवासत्त्वं** प्र° ॥
११ सा] आनुषङ्गिकाः सामान्यादयस्त्रयः पदार्थाः, तत्र सामान्यं कथयति --**सामान्यं विशेष इति बुद्ध्यपेक्षम्** वै° सू° १ । २ । ३, भिन्नेषु पिण्डेष्वनुवर्तमानां गौर्गौः इति बुद्धिमपेक्ष्य एभ्य एव च परस्परतो व्यावर्तमानाम् अयमस्मादन्यः इति तदनुवृत्तिबुद्ध्यपेक्षं सामान्यं व्यावृत्तिबुद्ध्यपेक्षो विशेष इति । **भावः सामान्यमेव** वै° सू° १ । २ । ४, सत्ता सामान्यमेव, त्रिष्वपि द्रव्यादिष्वनुवर्तमानत्वात् न विशेषः । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ° ९ ॥
१२ स] **सतान्त°**nayacakra-ms-bhā । **सवान्त°** nayacakra-ms-ya ॥
१३ न्धादा] **°दावेय°** प्र° ॥
१४ चा] **च** । भावात्nayacakra-ms-pānayacakra-ms-bhā । **चभावात्** nayacakra-ms-pā nayacakra-ms-bhā विना ॥
१६ त] दृश्यतां पृ° ४३६ पं° २ ॥
१७ सामान्य] **°न्यावशे°** प्र° ॥

446/mj **परमाण्वाकाशकालदिगात्ममनोद्रव्यादि, आदिग्रहणात् समवाय**

* * *

**द्रव्यादि । विशेषेऽप्युभयता सामान्यविशेषान्त्यविशेषाभ्याम् । कर्मणि तु स्वभावसम्बन्धसद्भावाभ्याम् ।**

**अयं च नैगमैकदेशत्वाद् द्रव्यास्तिकः । द्रव्यमपि द्रव्यत्वसम्बन्धात् । जातिः**

* * *

विभुपरिमण्डलपरिमाणगुणादि । सर्वत्र चेतरेतरासत्त्वान्यथात्वमिति विशेषः, स्वभावसत्त्वं सामान्यम् । **विशेषेऽप्युभयतेति** सामान्यविशेषा द्रव्यत्वगुणत्वकर्मत्वादयः, अन्त्यविशेषा योगिनामेकाकाशदेशस्थाण्वन्यत्वकराः । **कर्मणि**
-/ms **तु स्वभावसद्भावेन कर्मत्वसम्बन्धसद्भावेन** चेतरेभ्यो भेदाभेदौ । एवं द्रव्यगुणयोर्द्रव्यत्वगुणत्वसम्बन्धसद्भावात् स्वभावसद्भावाचेत्येवमादिसाधर्म्यवैधर्म्याभ्यां षट्सु पदार्थेषु विशेषा एव **वैशेषिकं** विशेषप्रयोजनं वा **वैशेषिकमिति** विधिनियमयोर्विधिरुपपद्यते, न तु त्वदिष्टैकवस्तुविधिनियमविधिरिति । § 1304

अत्राह--किमयं द्रव्यास्तिकभेदः पर्यायास्तिकभेदः ? इति, उच्यते -- **नैगमैकदेशत्वाद् द्रव्यास्तिकः**, द्रव्यमस्तीत्यस्य मतिः, न पूर्ववद् द्रव्यमेवास्ति,

---

१ स] **इहेति यतः कार्यकारणयोः स समवायः**वै० सू० ७ । २ । २९, गुणादयः समवायिनो द्रव्ये अतः समवायं कथयति--इहेति यतः कार्यकारणयोः प्रत्यय उत्पद्यते इह तन्तुषु पटः, इह घटे रूपादयः, इह घटे कर्म इति [स] समवायः । कार्यकारणग्रहणस्योपलक्षणत्वात् जातेर्व्यक्तौ विशेषाणां च नित्यद्रव्येषु समवायः इत्युक्तं भवति । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० २८ ॥

७ विभु] किन्तु **नित्यं परिमण्डलम्** वै० सू० ७ । १ । २६, परमाणुपरिमाणं परिमण्डलम्, तन्नित्यम्, तस्य **अविद्या विद्यालिङ्गम्** वै० सू० ७ । १ । २७, परिमाणरहितस्य द्रव्यस्या[त्यन्त]मसम्भवः परमाणूनां परमाणुपरिमाणस्य सम्भवे लिङ्गम् । अविद्या असम्भवः, सम्भवो विद्या । **विभवाद् महानाकाशः** वै० सू० ७ । १ । २८, विभवाद् मूर्तद्रव्यैः समागतैरगच्छतः संयोगात् परममहत्त्वमाकाशस्यास्तीति गम्यते । **तथात्मा** तथा चात्मा *T* वै० सू० ७ । १ । २९, आकाशमिवात्मापि परममहान् द्रष्टव्यः असमासा[द्] दिक्कालावपि महान्तौ । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० २६ ॥

८ सा] **द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च**वै० सू० १ । २ । ५, क्षित्यादिषु यतो द्रव्यं द्रव्यम् इत्यनुवृत्तबुद्धिः, रूपादिषु च गुणो गुणः इति उत्क्षेपणादिषु कर्म कर्म इति तानि द्रव्यत्वगुणत्वकर्मत्वानि सामान्यानि, परस्परतश्च व्यावृत्तेर्विशेषाः । **अन्यत्रान्त्येभ्यो विशेषेभ्यः** वै० सू० १ । २ । ६, नित्यद्रव्येषु परमाण्वाकाशादिषु समवायेन वर्तमानास्तुल्याकृतिगुणेषु अयमन्योऽयमन्यः इत्यत्यन्तव्यावृत्तिबुद्धिहेतवस्तद्दर्शिनां विशेषकत्वाद् विशेषाः । एवं विशेषा व्याख्याताः ।(?") इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० ९ ॥

९ विशेषा] दृश्यतां पृ० २५ टि० १२ ॥

११ मादिसा] द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः । इति **प्रशस्तपादभाष्ये** । दृश्यतां पृ० ४४४ पं० ३२ ॥

१५ द्र] दृश्यतां पृ० ७ पं० ११ । **अस्ति नास्ति दिष्टं मतिः**पा० ४ । ४ । ६०, तदस्येत्येव, अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः, नास्तीति मतिर्यस्य स नास्तिकः, दिष्टमिति मतिर्यस्य स दैष्टिकः ॥ इति **पाणिनीयव्याकरणसिद्धान्तकौमुद्याम्** ॥

नाप्युत्तरवत् सदसद् नास्त्येव वा द्रव्यमिति । नैगमशब्दो *निरुक्तार्थभेदः, तेषु **द्रव्यमपी**त्यादि द्रव्यत्वसामान्यविशेषविशेषणसम्बन्धाद् द्रव्यम्, न भव्य-द्रवणगुणसन्द्रावसमुदायाद्यात्मकम् । § 1305

**जातिः शब्दार्थ** इति । सर्वशब्दानां जातिवाचित्वमेव, आकाशादीनामपि

१ ना]
**नाव्युत्तर**°nayacakra-ms-bhā ।
**वाव्युत्तर**° nayacakra-ms-ya ॥
१ म] **°मशक्तो निरु°** प्र° ॥
१ *] दृश्यतां पृ° ४०८ पं° १६, पृ° ४१४ पं° २३ ॥
२ द्र] दृश्यतां पृ° ४४४ पं° २७ ॥
२ भ] दृश्यतां पृ° २४४ पं° १९--२३ ॥
४ जा] तदित्थं पदापोद्धारे प्रदर्शिते तदर्थस्यापोद्धृतस्य सिद्धसाध्यरूपद्वययोगिनो मतभेदेन स्वरूपेण दर्शनार्थमाह
**--पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा । पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ ॥**
वाक्यप° ३ । १ । २, अर्थद्वारेण पदं परीक्ष्यते इति दर्शनभेदेन प्रथममपोद्धारपदार्थविचारः ।
तथाहि--सर्वेषामपि शब्दानां पदरूपाणां नामाख्यातादिस्वभावानां जातिवादिमते जातिरेवार्थः, न द्रव्यम् । द्रव्यवादिमते तु द्रव्यमेव, न जातिः । द्वितीयेन **वा**शब्देन पदार्थान्तरं
सूचितम्--जातिविशिष्टद्रव्याभिधानमिति । अत एव तदेव सङ्कलनारूपं पदार्थौ इति स्फुटीकृतम् । अन्यथा वार्थे प्रक्रान्ते वार्थोपसंहारोऽयं नोपपद्यते । तद्वदभिधाने त्वभिधानं तावद् द्वयोरपि समानम्, विरम्यव्यापाराभावाच्छब्दस्य । वार्थस्तु जातिद्रव्ययोर्गुणप्रधानभावः । यद्वा प्राधान्येनैव भिन्नविषयतया **पाणि**निदर्शने जातिद्रव्ये शब्देनाभिधीयेते इत्ययमत्र पक्षः पदार्थौ इत्युक्तः । तत्र नामपदस्य गौः इत्यादेर्गोत्वादिजातिनियतक्रियाविषयसाध-नैकार्थसमवेतसङ्ख्याजातिविशेषणभाव-मात्राभिधेयाया अनाश्रयाया जातेरनुपपत्तेः सामर्थ्यात् प्रतीतं द्रव्यम् । एवमाख्यातपदस्यापि विभिन्नक्रियाक्षणसम-वेताभिन्नाभिधानप्रत्ययहेतुक्रियाजातिविषया साक्षाद् वाचकशक्तिः । कारकादिजातिस्त्वत्र गुणभूता । नामपदगतया च कारकजात्या क्रियाजातिराख्यातपदगता व्यक्तिद्वारेण समन्वयमेति । द्रव्यजातिस्त्वेकार्थसमवायात् साधनशक्तिद्वारेण क्रियायोगमनुभवति ।
सङ्ख्याजातिरपि एकार्थसमवायात् स्वव्यक्त्या**त्त्या** ?त्मना शक्तिमुखेनैव क्रियान्वयमेतीति सर्वपदार्थसमन्वयोपपत्तौ कल्पते वाक्यार्थः । यथा वोत्क्षेपणादिक्षणैर[नेक ?]समयभाविभिरपि आवृत्त्या उत्क्षेपणत्वादिजातिरभिव्यज्यते तथा अधिश्रयणादिभिः क्रियाक्षणैः पचत्यादिक्रियाजातिरिति विचारयिष्यते । व्यक्तिद्वारकं चास्या नित्याया अपि साध्यत्वमुपपद्यते । उपसर्गादिरप्यत्र नामाख्यातसहभावी तदर्थस्य विशेषावद्योतकत्वाज्जातिपदार्थ एव । विशेषस्य विशिष्टविश्रान्तस्यैवावसायात् कर्मप्रवचनीयोऽपि सम्बन्धजातिनिष्ठ एव । गुणशब्दानामपि शुक्लादीनां गुणजातिर्वाच्या । संज्ञाशब्दानामपि डित्थादिशब्दानां जातिवाचित्वं समर्थयिष्यते । तदित्थं **वाजप्यायना**चार्यमतेन सार्वत्रिकी जातिपदार्थव्यवस्थोपपद्यते । **व्याडि**मते तु सर्वशब्दानां द्रव्यमर्थः तस्यैव साक्षात् क्रियासमन्वयोपपत्तेर्वाक्यार्थाङ्गतया चोदनाविषयत्वात्, यथाह--चोदनासु च तस्यारम्भात् इति । एकजातिसमन्वयवशेन चात्र सङ्केतोपपत्तिः । अनभिधीयमानापि जातिरुपलक्षणीक्रियते शब्दार्थे, यथा गृहादौ काकादि । आख्यातेऽपि च सा, भवनाधारद्रव्यप्राधान्यं **व्याडि**मते, देवदत्तः पचति इति द्रव्येणैव साक्षात् सामानाधिकरण्योपपत्तेः, क्रिया तु गुणभूता अत्र, व्यापाराविष्टं हि द्रव्यमाख्यातार्थः इदं तत् इति सर्वनामप्रत्यवमर्शयोग्यं चात्र द्रव्यमिति सार्वत्रिकीयं व्यवस्था, तथा च वक्ष्यति--द्रव्यधर्मा पदार्थे तु द्रव्ये सर्वोऽर्थ उच्यते वाक्यप° ३ । १ । १३ इति, अत एव शुक्लादीनामपि द्रव्यपदार्थता सिद्धा । तत्तदुपाधिव्यवच्छिन्नं वा ब्रह्म द्रव्यशब्दवाच्यं सर्वशब्दानां विषय इति वक्ष्यत एव । व्यक्तिपर्यायो वा द्रव्यशब्द इति जातिव्यक्तिविकल्पेन सर्वशब्दविषयः तथा च सर्वशब्दानाम् इत्यभिधानात् । पदादप्यपोद्धारे प्रकृतिप्रत्ययरूपस्यापि

447/mj जातिवज्जातिः इति

* * *

शब्दार्थः । अन्त्यं च पदं वाक्यार्थः ।

* * *

---

शब्दस्य यथायोगं क्रियाकारकसङ्ख्यादिरपोद्धारपदार्थो जातिव्यक्तिभेदेन समाम्नातः । उभयस्यापि वा शब्दात् प्रतीतेरुभयं पदार्थः, गुणप्रधानभावभेदाश्रयस्तु मतविकल्पः । नित्यत्वोपवर्णनं च सिद्धे शब्दार्थसम्बन्धे पा॰ म॰ भा॰ १ । १ । १ इत्यत्र भाष्ये यस्मिंस्तत्त्वं च न विहन्यते पा॰ म॰ भा॰ १ । १ । १ इति द्रव्यस्यापि नित्यत्वं प्रवाहनित्यतया शब्दात् सदैव प्रतीतेः । इति **वाक्यपदीयस्य पुण्यराजकृतायां वृत्तौ** ३ । १ । २ ॥
४ उ] कालाकाशदिशामेकत्वाद् नित्यत्वेनावस्थाभेदाभावाच्च कथं जातिः, येन व्याप्तिसिद्धिः ? इत्यत आह **--संयोगिधर्मभेदेन देशे च परिकल्पिते । तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥** वाक्यप॰ ३ । १ । १५, यथा सामान्यविशेषाणामन्वयिधर्मोपाधिरभेदः तथा आकाशस्यापि संयोगोपाधिर्भेद इति प्रकृतापेक्षः समुच्चयः । आकाशेन संयोगो विद्यते येषामाकाशाधिकरणानां घटादीनां ते संयोगिनः । आकाशं हि सर्वेषां मूर्तानामधिकरणम् । अवकाशदानाद्धि तदाकाशम् । मूर्तास्तु भावाः परस्परप्रतिबन्धका इति न तेऽवकाशदायिनः । संयोगिनां धर्मभेदः प्रत्यक्षादिप्रमाणसिद्धं परिमितत्वं तद्वशाद्वा लोकप्रसिद्धं परिमितदेशवृत्तित्वम् । यत्र हि देशे संयोगः परिसमाप्तो वर्तते स प्रदेशो भवत्याकाशस्यानेकः, कार्यं प्रति देशः प्रदेशः इति निर्वचनात् । गुणाश्च केचिद् व्याप्यवृत्तयो यथा रूपादयः, संयोगस्तु मूर्तिपरिच्छिन्नवस्तुवृत्तिरिति सर्वदा प्रदेशवृत्तिरेव । अतः संयोगस्य नियतदेशतया संयोगिनोऽपि नियतदेशवृत्तय इति संयोगिधर्मभेदेन आकाशस्य भेदो भवत्युपाधिकृतः, न स्वतः । यदाह--देशे च परिकल्पिते इति । देशभेदाच्च सामान्यमाकाशस्यापि विद्यते । अतश्च प्रतिदेशमिदमाकाशमिदमाकाशमित्य-भिन्नाभिधानप्रत्ययानुवृत्तिलक्षणमाकाश-सामान्यमाकाशशब्दगोचरोऽस्ति । एवं समानन्यायत्वात् कालादीनामपि प्रदेशपरिकल्पनेन सामान्यमुपवर्णनीयम् । तथाहि--कालस्य युधिष्ठिरादिसंयोगवशेन भेदे सति अभिन्नं कालसामान्यं कालशब्दवाच्यमस्ति । एवं मेरुं प्रदक्षिणमावर्तमानस्य सवितुर्लोकपालगृहीतैर्देशविशेषैर्ये संयोगाः तदुपाधिना सूर्येण दिशः संयोगे सति भेदेऽभिन्नं दिक्सामान्यं दिक्शब्दवाच्यं परिकल्प्यम् । आत्मा तु प्रतिशरीरमन्य एवेति तत्राप्यस्त्येव आत्मत्वसामान्यम् । एवं समवायस्यापि सम्बन्धिभेदान्नानात्वोपचारे सर्वत्र इहबुद्ध्यनुवृत्तेर्जातिः परिकल्पनीया । ननु च संयोगिदेशेनाकाशस्य देशपरिकल्पनेन संयोगिनामितरेतराश्रयत्वम्, नैतदस्ति, इतरेतरव्यावृत्तिरूपतैव रव्यादीनां मूर्तत्वात् परिच्छिन्नपरिमाणत्वं बोधयति, कल्पितास्त्वाकाशदेशाः लोकप्रसिद्धाः संयोगिवस्तुगतां परिच्छिन्नदेशतां ज्ञापयन्ति । सामान्यतया आकाशदेशत्वे रव्यादीनां प्रत्यक्षादिप्रमाणावसितरूपविरुद्धं व्यापित्वमारोपितं स्वगतेन परिमितत्वेन आकाशस्य प्रदेशकल्पनया निराक्रियते । यद्येवं कल्पिता देशाः कथमाकाशस्य स्वतो निरवयवस्य देशभेदनिबन्धनं कार्यं जातिप्रक्लृप्तिलक्षणं जातिशब्दलक्षणं वा कुर्युः, येन तद्गता जातिरभिधीयेत ? उच्यते--व्यक्तिस्थानीयानां देशानामद्वैतदर्शने यथाऽसत्यत्वम् असत्या व्यक्तयः स्मृताः वाक्यप॰ ३ । १ । २८ इति वक्ष्यते तथेहाप्याकाशस्य सत्यत्वे व्यक्तीनां न कश्चिद् विरोधः । अथवा मुख्या एवाकाशस्य देशा घटादीनामिवेत्याह — **अदेशानां घटादीनां देशाः सम्बन्धिनो यथा । आकाशस्याप्यदेशस्य देशाः संयोगिनस्तथा ॥** वाक्यप॰ ३ । १ । १६, इह देशोऽवयव उच्यते, घटादयश्चावयविनः स्वात्मनि निरवयवाः, ये हि तेषामवयवभूताः कपालादयस्ते आरम्भकाः कारणभूता व्यतिरिक्ता एव समवायसम्बन्धेन सम्बन्धिनः । एवमाकाशमपि केनचिदप्यनारब्धत्वादमूर्तं

उपचारात् । **अन्त्यं च पदं वाक्यार्थः,** यथा देवदत्तः काष्ठैः स्थाल्यामोद-
नं पचति इत्यत्रान्त्येन पचति पदव्यङ्ग्येन सह परस्परसंसर्गलक्षणस्यान्व- 448/mj
यव्यतिरेकवतोऽर्थस्य परिपूर्णत्वात् । स च वाक्यार्थः पूर्वपदज्ञानाहित-
संस्कारापेक्षोऽन्त्यपदप्रत्ययः, प्रत्येकं पदैर्हि स्वांशार्थविषयैरुत्पादितानि वि-

---

व्यापि निरवयवमित्यात्मभूतदेशाभावाद् रव्यादयः संयोगिन एवास्य देशाः तथा तद्भेदादाकाशभेदे सर्वत्राभिन्नप्रत्ययानुगमाज्जातिरपि कल्प्या । आकाशं ह्यवच्छिन्दन्तोऽर्था देशास्तस्य भवन्ति तत्कृतावच्छेदं चाकाशमपि तेषामधारभावापत्तेर्देश इत्यन्योन्यदेशत्वम् । मूर्तामूर्तयोर्मूर्तास्त्वव्यापकाः परस्परमवच्छेदका न भवन्तीत्याधार एवैतेषां देशः ।... ... ...। तदेवं **वै**शेषिकदर्शनाश्रयेण जातिपदार्थव्याप्तिरुपपादिता । इति **हे**लाराजकृतायां **वा**क्यपदीयवृत्तौ तृतीयकाण्डे जातिसमुद्देशे ॥

२ रिपू] **°पूर्वत्वात्** प्र° ॥

३ संस्कारापेक्षोऽन्त्य] (?")एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतम्, तस्य च साधारण्येन वाचकत्वव्यवस्थापितम् । इदानीं मतभेदेन केषाञ्चित् पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद् वितत्य स्वरूपप्रतिपादनाय द्वितीयकाण्डप्रारम्भः । तत्राचार्यमतभेदाश्रयेण तावद् वाक्योद्देशार्थमाह **--आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी । एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि । वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥** वाक्यप° २ । १, २, एतेऽष्टौ वाक्यविकल्पा आचार्याणाम् । तत्राऽखण्डपक्षे जातिः सङ्घातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिः इति त्रीणि लक्षणानि । खण्डपक्षे तु आख्यातशब्दः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक् सर्वपदं साकाङ्क्षम् इति पञ्च लक्षणानि । अत्रापि सङ्घातः, क्रमः इत्यभिहितान्वयपक्षे लक्षणद्वयम् । आख्यातशब्दः, पदमाद्यम्, पृथक् सर्वपदं साकाङ्क्षम् इत्यन्विताभिधानपक्षे लक्षणत्रयमिति विभागः । इह च पदप्रकृतिः संहिता [ऋक्प्रातिशाख्ये] इति प्रातिशाख्यम्, तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहितेत्यखण्डपक्षः, पदानि प्रकृतिर्यस्याः सेति खण्डपक्षः प्रादुर्भवति । तत्राख्यातशब्दो वाक्यमिति परस्ताच्छब्दार्थनिर्णय इति प्रकरणे दर्शयिष्यति, यथा--आख्यातशब्दो नियतं साधनं यत्र गम्यते । तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते ॥ वाक्यप° २ । ३२८ इति । केवलेन पदेनार्थः वाक्यप° २ । ४१ इत्यादिना श्लोकाष्टकेन सङ्घातो वाक्यम् इति दर्शयिष्यति । यथैक एव सर्वार्थः वाक्यप° २ । ७ इत्यादिना देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः वाक्यप° २ । १४ इत्यन्तेन ग्रन्थेन तथा अव्यक्तः क्रमवान् वाक्यप° २ । १९ इत्यादिना व्यावृत्तभेदो येनार्थः इत्यन्तेन चाखण्ड एव स्फोटलक्षणः शब्दो वाक्यमिति दर्शितम् । उक्तं च--येनोच्चारितेन सास्नालाङ्गूलखुरककुदविषाण्यर्थरूपं प्रतिपाद्यते स शब्दः पा° म° भा° १ । १ । १, तथा स्फोटः शब्दः ध्वनिः शब्दगुणः पा° वा° १ । १ । ७० इति । स्फोटश्च द्विविधो बाह्य आभ्यन्तरश्चेति । बाह्योऽपि जातिव्यक्तिभेदेन द्विविधः । तत्र जातिलक्षणस्य जातिः सङ्घातवर्तिनी इति व्यक्तिलक्षणस्य एकोऽनवयवः शब्दः इति आभ्यन्तरस्य तु बुद्ध्यनुसंहृतिः इत्यनेनोद्देशः । तत्र जातिव्यक्तिलक्षणस्य बाह्यस्य यथैक एव वाक्यप° २ । ७ इत्यादिना पुनः अव्यक्तः क्रमवान् वाक्यप° २ । १९ इत्यादिना ग्रन्थेन स्वरूपमुक्तम् । यदन्तः शब्दतत्त्वम् वाक्यप° २ । ३० इत्यादिना श्लोकचतुष्टयेन आन्तरस्य स्वरूपमुक्तम् । सन्त एव विशेषा ये वाक्यप° २ । ४९ इत्यादिना समानेऽपि त्वशब्दत्वे वाक्यप° २ । ५३ इत्यन्तेन श्लोकपञ्चकेन क्रमो वाक्यमिति दर्शयिष्यति । नियतं साधने साध्यम् वाक्यप° २ । ४७ इत्यनेन च श्लोकद्वयेन पदमाद्यम्, पृथक् सर्वपदं साकाङ्क्षम् इति लक्षणद्वयं व्याख्यास्यति । अन्यदपि **वा**र्तिककारीयं पारिभाषिकं शास्त्रे वाक्यलक्षणमस्ति आख्यातं साव्ययकारकविशेषणं वाक्यम् । एकतिङ्

पा॰ वा॰ २ । १ । १ इति च ।
जरन्मीमांसकोक्तं लौकिकमप्यस्ति
अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे
स्यात् मीमांसाद॰ २ । १ । ४६ इति ।
अनयोः सङ्घातपक्षेऽन्तर्भावः । एते अपि
प्रथममेव निघातादिव्यवस्थार्थम् वाक्यप॰ २
। ३ इत्यादिना विचारयिष्येते ।
इत्थमष्टावेव वाक्यविकल्पा मतभेदेन
n449/mj सम्पद्यन्ते इति बोद्धव्यम् । यत्पुनरनेन
[भर्तृहरिणा] वृत्तावुक्तम्
उदाहरणमात्रमेतत्, अन्यान्यपि
वाक्यलक्षणानि दर्शयिष्यति इति तद्
वार्तिककारीयवाक्यलक्षणादेरन्तर्भावमन-
पेक्ष्येति मन्तव्यम् । उद्दिष्टानां च
वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव
दर्शितक्रमेण स्वरूपमुन्मीलयिष्यतीति नार्थ
इह तत्प्रदर्शनेन । --- वाक्यलक्षणप्रसङ्गेन
च तथा वाक्यार्थस्य सम्बन्धस्य च मतभेदं
दर्शयिष्यति । तत्राखण्डपक्षे त्रिष्वपि
लक्षणेषु प्रतिभा वाक्यार्थः, यथा दर्शयिष्यति
विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः वाक्यप॰ २ । १४४
इति । अवशिष्टेषु पञ्चसु लक्षणेसु
मध्यादाख्यातशब्दो वाक्यमित्यस्मिन् पक्षे
क्रिया वाक्यार्थः, यथा वक्ष्यति क्रिया
क्रियान्तराद् भिन्ना वाक्यप॰ २ । ४१७
इत्यादि । यथा च प्रतिभा यत्प्रभूतार्था
यामनुष्ठानमाश्रितम् । फलं प्रसूयेत यतः
सा क्रिया वाक्यगोचरः ॥ इति ।
सङ्घातपक्षे क्रमपक्षे च संसर्गो वाक्यार्थः, स
च सम्बन्धे सति यत् त्वन्यदाधिक्यमुपजायते
। वाक्यार्थमेतं संप्राहुरनेकपदसंश्रयम् ॥
वाक्यप॰ २ । ४२ इत्यादिना दर्शयिष्यते ।
तथा सङ्घातपक्ष एव सर्वभेदानुगुण्यम्
वाक्यप॰ २ । ४४ इत्यादिना
प्रकारान्तरेणाभिहितान्वयपक्षे प्रतिपाद्यमाने
कार्यानुमेयः सम्बन्धो रूपं तस्य न विद्यते
। वाक्यप॰ २ । ४६ इत्यनेन श्लोकेन
विशेषविश्रान्तः पदानामेवार्थो वाक्यार्थ इति
लक्ष्यते । पदमाद्यं पृथक् सर्वपदं
साकाङ्क्षमित्यस्मिंस्तु पक्षद्वये संसृष्ट एव
प्रथमतरं प्रक्रम्यते वाक्यार्थः, यथा
निरूपयिष्यति--तेषां तु कृत्स्नो वाक्यार्थः
प्रतिभेदं समाप्यते । वाक्यप॰ २ । १८,
तथा पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु ॥
वाक्यप॰ २ । ४१४ इति । अभिधेयः
पदस्यार्थो वाक्यस्यार्थः प्रयोजनम् वाक्यप॰
२ । ११४ इत्यनेन प्रयोजनं वाक्यार्थत्वेन
प्रदर्शितम्, तत् केषाञ्चिद् मते
सर्वलक्षणसाधारणमिति न प्रयोजनं
वाक्यार्थो वाक्यलक्षणेषु पृथग् विभज्यते ।
तदेवं प्रतिभा, संसर्गः, संसर्गवशान्निराकाङ्क्षो
विशेषावस्थितः पदार्थ एव, संसृष्ट एवार्थः,
क्रिया, प्रयोजनं च इति षड् वाक्यार्था
इहोपदर्शिताः । संसर्गे संसर्गवशाद्
विशेषावस्थिते पदार्थे च
वाक्यार्थेऽभिहितान्वयः । संसृष्टे क्रियायां
चान्विताभिधानम् । प्रतिभायां त्वेकरसैव
प्रतिपत्तिरिति न तत्र काचिदभिहितान्वयचर्चा
। प्रयोजने त्वभिहितान्वय एव । ---
विधिनियोगभावनासंज्ञास्तु वाक्यार्था न
निरूपिताः, यस्माद् भावनाक्रिययोः
पर्यायता प्रायशो लक्ष्यते, केवलं
प्रकृत्यर्थप्रत्ययार्थतायामत्र
वैयाकरणमीमांसकयोर्विवादः । किञ्च,
भावना सकर्मिकैव अकर्मिकापि क्रियेति
सत्यपि भेदे साध्यत्वाविशेषादभेद एवानयोः
। यथा धात्वर्थरूपा क्रिया साध्यभूतैव तथा
भावनापीति कथमवान्तरभेदाद्
भेदोऽनयोर्भवेत् ? विधिनियोगौ तु
लिङ्लोट्कृत्यान्तेष्वेव
वाक्येष्वर्थावित्यसर्वविषयत्वादनादृताविहेति न
तत्प्रदर्शनं कृतम् । --- तत्तदनादिवाक्यार्थ-
विकल्पाहितवासनाप्रबोधजन्मा
क्रमवद्भिरिवाक्रमैर्बहीरूपतया अध्यस्तैः
पदार्थैश्चित्रीकृत इव
विकल्पविशेषोल्लिख्यमान आकारो
बहीरूपतया अध्यस्तो निर्विभाग एव
शाक्यानां वाक्यार्थ इति प्रायशः
प्रतिभासोदर एवासौ मन्तव्यः । वाक्यमपि
तत्तदनादिवाक्यविकल्पाहितवासनाप्रबोधज-
न्म क्रमवद्भिरिवाक्रमैः पदैश्चित्रीकृत इव
बहीरूपतया अध्यस्यमानो
विशिष्टविकल्पोल्लिख्यमान आकारविशेष एव
बहीरूपतया अध्यस्त इति प्रायशो
बुद्ध्यनुसंहृतिरित्यस्य सोदरमेवेति न
तन्मतानुसारेण वाक्यवाक्यार्थयोरिहासंग्रहो
वेदितव्यः । --- नैयायिकादीनां तु
पूर्वपूर्ववर्णस्मृतिसचिवोऽन्त्यो वर्णो
नश्यदवस्थानुभवविषयीक्रियमाणः पदं यथा,
तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव पदं
नश्यदवस्थानुभवविषयीक्रियमाणं वाक्यमिति
प्रायशः सङ्घातपक्ष एवान्तर्भवति । तथा
पूर्वपूर्वपदार्थस्मरणसचिवेनान्त्येन

ज्ञानानि संस्कारमादधति, अतोऽन्त्यपदज्ञानं पूर्वपदज्ञानसंस्कारपरिपाक- 449/mj
वशात् सम्बन्ध्यन्तरव्यवच्छेदि परस्परसंसर्गविषयमुपजायते इति 450/mj

* * *

अस्य निर्गमसूत्रम्--इमा णं भंते । रतणप्पभा पुढवी किं सासता, असासता ? गोतमा ! सिया सासता सिया असासता । से केणट्ठेणं भंते ! एवं वुच्चति--सिया सासता सिया असासतत्ति ? गोतमा ! दव्वट्ठया+ए सासता, वण्णपज्ञवेहिं गंधपज्ञवेहिं रसपज्ञवेहिं फासपज्ञवेहिं संठाणपज्ञवेहिं

* * *

सम्बन्धोऽन्वयव्यतिरेकवानन्त्यपदार्थव्यक्तिर्वाक्यार्थ इति । यथाह—

नादैराहितबीजायामन्त्येन ध्वनिना सह ।

---

पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इति प्रायशः संसर्गपक्ष एवास्यान्तर्भाव इति न तदसङ्ग्रहेणाव्याप्तिरत्र वक्तव्या । --- अथात्रानवयवे एकस्मिन् स्फोटात्मके वाक्ये प्रतिभालक्षणे च वाक्यार्थे वाक्यवाक्यार्थयोरध्यासरूपः सम्बन्धः, तद्वक्ष्यति— वाक्यवृत्तस्य वाक्यार्थे वृत्तिः वाक्यप० २ । २६३ इत्यादि । अवशिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योग्यताख्य एव शब्दार्थयोः सम्बन्धो **मीमांसकदृष्ट्या** । **शा**क्यदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे शब्दार्थे सर्वत्र कार्यकारणभाव एव, बाह्यार्थवादे तु तत्र सङ्केतलक्षणोऽसौ बोद्धव्यः । **नैयायिका**द्यनुसारेण च सङ्केतलक्षण एवासौ । इत्येवमत्र वाक्यवाक्यार्थसम्बन्धानां संक्षेपतः स्वरूपं बोद्धव्यम् । सम्बन्धेषु मध्यादत्र अध्यासमेव दर्शयिष्यति, पदकाण्डे तु सर्वानभिधास्यति । तत्र **वैया**करणस्याखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः, अध्यासश्च सम्बन्ध इति पदर ?वादिपक्षदूषणपरः परं टीकाकारो व्यवस्थापयतीत्यस्य काण्डस्य संक्षेपः ।(?") इति **पुण्यराज**रचितायां **वाक्य**पदीयटीकायाम् २ । १ । २ ॥

५ द] पूर्वं पृ० ३ पं० १४--१६ **नयचक्र**वृत्तिकृता उल्लिखितं **जीवा**जीवाभिगमसूत्रपाठमनुसृत्यैवात्र अयं मूलपाठो निर्दिष्टः, किन्तु अत्र अस्य नयस्य यतो निर्गमस्तन्निर्गमसूत्रम् **--इमा णं भंते रतणप्पभे**त्यादि यावत् **संठाणपज्ञवेहिं**ति इति **नयचक्र**वृत्तौ पाठदर्शनात् दव्वट्ठया+ए सासता, असासता वण्णपज्ञवेहिं गंधपज्ञवेहिं रसपज्ञवेहिं फासपज्ञवेहिं संठाणपज्ञवेहिं इत्यपि पाठः स्यात् ॥

९ ना] नादैः शब्दात्मानमवद्योतयद्भिर्यथोत्त- रोत्कर्षेणाधीयन्ते व्यक्तपरिच्छेदानुगुणसंस्कारभावनाबीजानि । ततश्चान्त्यो ध्वनिविशेषः परिच्छेदसंस्कार- भावनाबीजवृत्तिलाभप्राप्तयोग्यतापरिपाकायां बुद्धावुपग्रहेण शब्दस्वरूपाकारं सन्निवेशयति । इति भर्तृहरिविरचितायां **वाक्यपदीय**स्ववृत्तौ । **नादै**रिति ध्वनिभिः स्फोटमवद्योतयद्भिः इति शेषः । **आहि**तबीजायामिति, बीजानि शक्तयः, ता आधीयन्ते तस्यां शक्तिद्वारेण । **ध्वनिना** सह इति, तस्मिन् काले शब्दोऽवधार्यत इति सम्बन्धः । **आवृत्त**परिपाकायामिति, आवृत्तः परिपाको यस्या इति, परिपाकः कार्योत्पादनं प्रति विशिष्ट आत्मलाभः । स च बीजानामपि वर्तते । सह सन्निधानात् । यतः प्रतिध्वनिविभागं विशेषप्रतिपत्तेः तस्य वृत्तिलाभः, अन्त्यध्वनिकाले चावस्थानात् कालान्तरावभासोऽप्यस्ति । स तु बीजानामपि परिपाको बुद्धेरव्यतिरेकाद् बीजानां बुद्धेरेव सम्बन्धित्वेनोपात्तः, न तु बुद्धेः परिपाकः । आवृत्तः परिपाको यस्यामिति विग्रहः । **व्यक्त**परिच्छेदेति, व्यक्तपरिच्छेदो विशिष्टस्वरूपावधारणम्, व्यक्तस्य परिच्छेदः । **संस्कार**भावनेति, शक्तय एवाधीयन्ते, तास्तु संस्कारादिभिरुच्यन्ते । तथाहि--शक्तयश्चेतः संस्कुर्वन्ति विशिष्टं जनयन्तीति संस्कारशब्दोक्ताः तद्रूपभावनं च भावना, यतश्चेतनेनाकारेण भावयन्ति । विशिष्टोत्तरबुद्धिजनकत्वेन बीजानि । तेन

- /ms आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ वाक्यप॰ १ । ८४ इति ।§ 1308

स च कृतसङ्गीतेरेव पदादिशब्दार्थज्ञस्य पुरुष[स्य] प्रत्ययहेतुर्वाक्यार्थः शब्दो वा, नाकृतसङ्गीतेः, म्लेच्छप्रयुक्तशब्दार्थापरिज्ञानवत् । § 1309

नैताः स्वमनीषिका उच्यन्ते, किं तर्हि ? **अस्य** नयस्य यतो निर्गम-स्तन्निर्गमसूत्रम्--**इमा णं भंते** *रतणप्पभेत्यादि यावत् **संठाणपज्जवेहिं**ति ।
451/mj एतमेवागमं **भेदवचनादिति** हेतुत्वेनाह नयचक्रकारः,

* * *

---

संस्कारश्चासौ भावना च बीजं चेति समानाधिकरणसमासः । **परिच्छेदेति** स्फोटपरिच्छेदोपायाः संस्कारादयः, तेषां वृत्तिलाभो विशिष्टकार्योन्मुखता । **प्राप्तेति,** योग्यतैवात्र परिपाकः, स प्राप्तो यया स्फोटपरिच्छेदसमर्थेति यावत् । इति **वृषभदेवविरचितायां वाक्यपदीयस्ववृत्तेर्व्याख्यायाम्** । नादैर्ध्वनिभिराहितबीजायाम्, आहितं भावनाबीजं यस्यां सा तथोक्ता । आवृत्तपरिपाकायामिति, आवृत्तोऽभ्यस्तः परिपाको यस्याः सा तथोक्ता, प्रथमेन ध्वनिना किञ्चिद् भावनाबीजमाहितं तेन च कश्चित् परिपाकः कार्यजननशक्तिविशेषः, एवं द्वितीयेनेति । यद्यपि परिपाका भिन्नास्तथापि जातिमाश्रित्य आवृत्तवाचो युक्तिः अष्टकृत्वो ब्राह्मणा भुक्तवन्तः इतिवत् । आवृत्तेत्यस्य अन्या व्याख्या--आवृत्तोऽवधारणविघ्नभूतस्य रागादिकषयस्य परिपाकः परिपाचनं यस्यामिति, आवृत्तेन वा आवृत्त्या कषायपरिपाको यस्यामिति । क्वचित् तु आवृत्ति इति पाठः । बुद्धावन्तःकरणे शब्दोऽवधार्यते अन्त्येन ध्वनिना सह यदा अन्त्यो ध्वनिरवधार्यते तदा गौः इत्येवं शब्दोऽप्यवधार्यते इत्यर्थः । अवधारणापरपर्यायं ज्ञानमपि बुद्ध्याख्यान्तःकरणाधिकरणमिति **साङ्ख्या** मन्यन्ते । एतच्चावधारणं चित्रबुद्धिरिति **वार्तिककारीया** मन्यन्ते । अथवा अन्त्येन ध्वनिना सह पूर्वनादैराहितबीजायां बुद्धौ पश्चिमध्वन्यनन्तरं शब्दोऽवधार्यते गौरित्येकं पदमिति, यदवधारणं समस्तवर्णविषयं स्मरणमित्याचक्षते । परमार्थतस्तु प्रत्यक्षज्ञानमेवैतत् ध्वनिसंस्कृतश्रोत्रेन्द्रियजनितत्वात्, न ह्यन्यथा स्फुटप्रकाश उपपद्यत इति । इति **रामचन्द्रविरचितायां मण्डनमिश्रकृतस्फोटसिद्धेर्व्याख्यायां गोपालिकायाम्**, पृ॰ १३२ ॥

५ *] **रतप्पभे॰**nayacakra-ms-bhā। एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥॥

**५ ति]** दृश्यतां पृ॰ ४ टि॰ २ ॥

**७ अ]** अधुनोपलभ्यमानेषु **जीवाजीवाभिगमसूत्र**ग्रन्थेषु **संठाणपज्जवेहिं** इति पाठो नोपलभ्यते, किन्तु पूर्वमवश्यमासीत्, दृश्यतां पृ॰ ३ पं॰ १६ । अधुना तु अधोलिखितः पाठ उपलभ्यते--इमा णं भंते । रयणप्पभा पुढवी किं सासया असासया ? गोयमा ! सिय सासता सिय असासया । से केणट्ठेणं भंते ! एवं वुच्च+इ सिय सासया सिय असासया ? गोयमा ! दव्वट्ठया+ए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता । इति **जीवाजीवाभिगमसूत्रे** ३ । १ । ७८ । अस्य व्याख्या--इमा णं भंते इत्यादि । इयं भदन्त ! रत्नप्रभा पृथिवी किं शाश्वती अशाश्वती ? भगवानाह --**गौ**तम ! **स्यात्** कथंचित् कस्यापि नयस्याभिप्रायेणेत्यर्थः **शाश्वती** । **स्यात्** कथञ्चि**दशाश्वती** । एतदेव सविशेषं जिज्ञासुः पृच्छति--से केणट्ठेणमित्यादि । सेशब्दः अथशब्दार्थः, स च प्रश्ने, केन **अर्थेन** कारणेन भदन्त ! एवमुच्यते यथा स्यात् शाश्वती स्यादशाश्वतीति ? भगवानाह --**गौ**तम ! दव्वट्ठया+ए इत्यादि, द्रव्यार्थतया शाश्वतीति । तत्र द्रव्यं सर्वत्रापि सामान्यमुच्यते, द्रवति गच्छति तान् तान् पर्यायान् विशेषानिति वा द्रव्यमिति व्युत्पत्तेर्द्रव्यमेवार्थः तात्त्विकः पदार्थो यस्य न तु पर्यायाः स द्रव्यार्थः द्रव्यमात्रास्तित्वप्रतिपादको नयविशेषः,

असासता जीवाजीवाभि° ३ । १ । ७८ इति भेदवचनात् । वर्णादिपर्यायादिषु वर्णः पर्यवः समन्ताद् भविता एकवाक्यभावात् वर्णस्यैव परितो भवनाद् गमनाच्च । वर्णेभ्य

* * *

व्याचष्टे च --**वर्णादिपर्यायादि**ष्वित्यादि । पर्यायशब्दस्य परिगमनार्थस्य पर्यवशब्दस्य भाववाचिनो ग्रहणाद् वर्णादिपरिगमनानि यस्मिन् समन्ततो भावो वा, अवतेर्धातोर्भावार्थस्य रक्षणादिदण्डके पाठात्, वर्णादय एव पर्यायाः पर्यवा इति कर्मधारयो वा सरूपैकशेषत्वात् सङ्गृहीतसमासद्वयत्वात्, समन्ताद् गमनत्वात् समन्ताद् भावित्वाच्च पर्यायाणां पर्यवाणां च, अत्र केनार्थेन पर्यायपर्यवार्थयोरेकस्योक्तौ द्वितीयस्यापि सैव निरुक्तिः ? इति मन्यमान आह --**वर्णः पर्यवः समन्ताद् भविता एकवाक्यभावात्** द्रव्यगुणकर्मणां सप्रभेदानां सत्तासमवायसम्बन्धप्रधानानां संसृष्टरूपाणामेकवाक्यभावादिति, बहुव्रीहिं दर्शयति --**वर्णस्यैव परितो भावाद् गमनाच्चे**ति । § 1310

कथं पुनस्तत्परिगमनं पर्यवनं च ? इति तद् भावयितुं सोपपत्तिकं सनिदर्शनमाह --**वर्णेभ्य एवे**त्यादि यावद् **गृह्यन्त** इति । वर्णेभ्य एव रूपादिभ्यो गुणान्तरं चित्रवर्णो रक्तश्यामपाण्ड्वादिः 452/mj

---

तद्भावो द्रव्यार्थता, तया द्रव्यमात्रास्तित्वप्रतिपादकनयाभिप्रायेणेति यावत् शाश्वती, द्रव्यार्थिकनयमतपर्यालोचनायामेवंविधस्य रत्नप्रभायाः पृथिव्या आकारस्य सदा भावात् । वर्णपर्यायैः कृष्णादिभिः गन्धपर्यायैः सुरभ्यादिभिः रसपर्यायैः तिक्तादिभिः स्पर्शपर्यायैः कठिनत्वादिभिः अशाश्वती अनित्या, तेषां वर्णादीनां प्रतिक्षणं कियत्कालानन्तरं वा अन्यथाभवनात् अतादवस्थ्यस्य चानित्यत्वात् । न चैवमपि भिन्नाधिकरणे नित्यानित्यत्वे, द्रव्यपर्याययोर्भेदाभेदोपगमात्, अन्यथा उभयोरप्यसत्त्वापत्तेः, तथाहि शक्यते वक्तुं परपरिकल्पितं द्रव्यमसत् पर्यायव्यतिरिक्तत्वाद् बालत्वादिपर्यायशून्यवन्ध्यासुतवत्, तथा परपरिकल्पिताः पर्याया असन्तः द्रव्यव्यतिरिक्तत्वात् वन्ध्यासुतगतबालत्वादिपर्यायवत् । उक्तं च--द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः । क्व कदा केन किंरूपा दृष्टा मानेन केन वा ? ॥ १ ॥ इति कृतं प्रसङ्गेन । विस्तरार्थिना च **धर्मसङ्ग्रहणिटीका** निरूपणीया । इत्याचार्यश्री**मलयगिरि**विरचितायां **जीवाजीवाभिगमसूत्रवृत्तौ** ॥

६ अ] अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु इति पठितत्वात् इति नवमारसमाप्तौ नयचक्रवृत्तौ वक्ष्यते । **हैम**धातुपाठेऽपि ४८९ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु एकोनविंशतावर्थेषु इति पाठः । मुद्रिते **पाणिनीय**धातुपाठे तु ६०१ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु इति पाठ उपलभ्यते ॥

७ स] सरूपाणामेकशेष एकविभक्तौnayacakra-ms-pā १ । २ । ६४ ॥

१० ए] **एकवाच्यभावात्** प्र° ॥

१५ रं] एकं चित्रं रूपं नीलादिरूपैरेकरूपारम्भात् । यथा हि शुक्लादिर्विशेषो रूपस्य तथा चित्ररूपादिविशेष एव, यद्यपि शुक्लादिशब्दैर्न व्यपदिश्यते तथापि स्वशब्देन व्यपदेशादस्तित्वम् । अथ विरुद्धानां नीलादीनां कथमेकरूपारम्भकत्वम् ? यथा

* * *

एव वर्णान्तरं तदारम्भनियमादेव पृथिव्यादिषु भवति समन्ताद् गच्छति वा । तानि प्रागभावप्रध्वंसात्मकानि गृह्यन्ते, तस्मात् तैर्वर्णादिपर्यवैरशाश्वती, वर्ण एव च पर्यवो गुणः यथासम्भवं श्यामादिः संयोगविभागपृथक्त्वपरत्वापरत्वादिश्च, तैः

* * *

पाकजो वा **तदारम्भनियमादेवेति**, यथोक्तम् **--येषामधिकृतमारम्भसामर्थ्यम्** इति, **पृथिव्यादिषु वर्णान्तरं भवति समन्ताद् गच्छति वा । तानि**
- /ms वर्णादिपर्यवाः पर्याया वा घटादीनि वा द्रव्याणि आरब्धानि तैरप्यन्यारब्धद्रव्याणि **प्रागभावप्रध्वंसात्मकानि** वर्णाद्यनात्मकान्येव मृत्पिण्डाद्यवस्थानानि घटादीनि कपालादीनि च **गृह्यन्ते । तस्मात् तैः** प्रागभावप्रध्वंसात्मकैर्घटाद्यात्मभूतै**र्वर्णादिपर्यवैरशाश्वती** कार्यकारणभूतैरित्यर्थः । कर्मधारये वा **वर्ण एव च पर्यवो गुणो यथासम्भव**मित्यादि, गुणा इमे, तैः अशाश्वती इति च वर्तते वर्णादिपर्यवैरिति सम्बन्धः । **यथासम्भव**मारब्धानारब्धद्रव्यगताः केचिच्छ्यामादयोऽनारब्धचतुर्विधाणुगताः तदारब्धद्रव्यान्तरे कारणगुणपूर्वाश्च-
453/mj तुर्विधे, पार्थिवेष्वेव रक्ताद्याः पाकजाः,

---

शुक्लानामिति । यथा हि बहूनि शुक्लरूपाण्येकं शुक्लरूपमारभन्त इत्युपलब्धम्, तथा नीलादीनामपि चित्ररूपारम्भकत्वं दृष्टत्वादभ्युपगन्तव्यम् । इति **प्रशस्तपादभाष्यव्याख्यायां व्योमवत्यां** पृथिवीनिरूपणे । क्वचिदेकस्यामपि व्यक्तावनेकप्रकाररूपसमावेशः यत्र नानाविधरूपसम्बन्धसम्बन्धिभिरवयवैरवयवी आरभ्यते । कथमेतदिति चेत्, उच्यते--यथावयवैरवयव्यारब्धस्तथावयवरूपैरवयविनि रूपमारब्धव्यम्, अवयवेषु न शुक्लमेव रूपमस्ति नापि श्याममेव, किन्तु श्यामशुक्लहरितादीनि । न च तेषामेकं रूपमेवारभते नापराणीत्यस्ति नियमः, प्रत्येकमन्यत्र सर्वेषामपि सामर्थ्यदर्शनात् । न च परस्परं विरोधेन सर्वाण्यपि नारभन्त एवेत्यपि युक्तम्, चित्ररूपस्यावयविनः प्रतीतेररूपस्य द्रव्यस्य प्रत्यक्षत्वाभावाच्च । न चाववयवरूपाणि समुचितान्यत्र चित्रधिया प्रतीयन्ते तैरेवावयवी प्रत्यक्ष इति कल्पनाप्रामाण्यम्, अन्यत्रापि तथाभावप्रसङ्गेनावयविरूपोच्छेदप्रसङ्गः । तस्मात् सम्भूय तैरारभ्यते, तच्चारभ्यमाणं विविधकारणस्वभावानुगमाच्छ्यामशुक्लहरितात्मकमेव स्यात् चित्रम् इति च व्यपदिश्यते । इति **प्रशस्तपादभाष्यव्याख्यायां कन्दल्यां** पृथिवीनिरूपणे ॥

५ पा] दृश्यतां टि॰ ८ ॥
५ येषाम] **॰मधिपत्तिकृत॰** प्र॰ । दृश्यतां पृ॰ ४३७ पं॰ १२ ॥
६ इ] इत्यादि । ? ॥
७ ब्धा] **॰नि तैरप्यन्यारब्ध॰** nayacakra-ms-bhā प्रतौ नास्ति ॥
८ र्णाद्य] ॰द्यात्मका॰ ? ? ? ॥
१० क] **कथं धारये** प्र॰ ॥
११ व] **॰व इत्यादि** प्र॰ ॥
१३ केचिच्छ्या] इदानीं रूपादीनाह — **उक्ता गुणाः** वै॰ सू॰ ७ । १ । १, रूपादिसूत्रेणोद्दिष्टा इत्यर्थः । **गुणलक्षणं चोक्तम्** वै॰ सू॰ ७ । १ । २, द्रव्याश्रयी १ । १ । १५ इत्यादिना द्रव्यकर्मभ्यां वैधर्म्यं कथितमित्यर्थः । **इदमेवंगुणमिदमेवंगुणमिति चोक्तम्** वै॰ सू॰ ७ । १ । ३, तथा ह्युक्तं रूपरसगन्धस्पर्शवती पृथिवी २ । १ । १ इत्यादि । तत्र **पृथिव्यां रूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याः** वै॰ सू॰ ७ । १ । ४, घटादेः पार्थिवस्य विनाशात् तद्गतानामपि रूपादीनां विनाश आश्रयविनाशात् । **अग्निसंयोगाच्च** वै॰ सू॰ ७ । १ । ५, अग्निसंयोगाच्च पार्थिवेषु परमाणुषु रूपादीनां विनाशः कार्ये समवेतानां त्वाश्रयविनाशादेव । परमाणुष्वग्निसंयोगादेव कुतः ?

* * *

गन्धादिभिश्च । शाश्वती द्रव्यार्थतः । इति षष्ठो विधिनियमविध्यरः ।

* * *

संयोगविभागौ सक्रियेषु, पृथक्त्वं सर्वद्रव्येषु, परत्वापरत्वे दिग्देश-कालापेक्षे तल्लिङ्गे, **आदिग्रहणाद्** गन्धशब्द-ज्ञानादयोऽसाधारणगुणाः पृथि-

---

**गुणान्तरप्रादुर्भावात्** वै° सू° ७ । १ । ६, यस्माच्छ्यामादिगुणेभ्यो व्यतिरिक्तं गुणान्तरमुत्पद्यते ततः पूर्वे परमाणुगुणा विनष्टाः गुणवति गुणानारम्भात् । **एतेन नित्येष्वनित्यत्वमुक्तम्** वै° सू° ७ । १ । ७, एतेन गुणान्तरप्रादुर्भावेन नित्येषु परमाणुषु रूपादीनामनित्यत्वमुक्तं पार्थिवेष्वेव, यतः **अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात्** वै° सू° ७ । १ । ८, सलिलानलानिलपरमाणुरूपादयो नित्या [आ]श्रयनित्यत्वात् विरोधिगुणान्तराप्रादुर्भावाच्च नाग्निसंयोगाद् विनाशः । **अनित्येष्वनित्या द्रव्यानित्यत्वात्** वै° सू° ७ । १ । ९, अनित्येषु सलिलादिषु अनित्या रूपादय आश्रयविनाशे तेषामपि विनाशात् । **कारणगुणपूर्वाः पृथिव्यां पाकजाश्च** वै° सू° ७ । १ । १०, अनित्यायां कार्यरूपायां पृथिव्यां कारणगुणपूर्वा रूपादयो जायन्ते, नित्यायां तु परमाणुस्वभावायां पाकजाः पाकादग्निसंयोगाज्जाताः । **अप्सु तेजसि वायौ च कारणगुणपूर्वाः पाकजा न विद्यन्ते** वै° सू° ७ । १ । ११, कार्ये उदकाद्यवयविनि समवायिकारणरूपे रूपादय आरभ्यन्ते, पाकजास्तु जलाद्यणुषु नैव सन्ति विरोधिगुणान्तराभावात् । **अगुणवतो द्रव्यस्य गुणारम्भात् कर्मगुणा अगुणाः** वै° सू° ७ । १ । १२, अगुणस्य द्रव्यस्यैवोत्पन्नस्य कारणगुणैर्गुणा जन्यन्ते न गुणकर्मणाम्, अशेषावयवगुणैकार्थसमवायाभावात् कर्मत्ववत् । **एतेन पाकजा व्याख्याताः** वै° सू° ७ । १ । १३, अग्निसंयोगान्निवृत्तेषु श्यामादिषु पाकजा जायन्ते इति तेऽपि गुणरहिते सिद्धाः । संयोगवति संयोगारम्भवद् गुणवति पाकजा इति चेत्, न, **एकद्रव्यवत्त्वात्** वै° सू° ७ । १ । १४, एकद्रव्यवन्तः पाकजाः, ते कथं तत्रैवारभ्येरन् विरुद्धत्वात् ? संयोगस्य तु संयोगवती आरम्भो न दुष्यति अनेकद्रव्यत्वात् । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ° २५ ॥

५ त] काल इदानीं कथ्यते --**अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि** वै° सू° २ । २ । ६, एतान्यपरत्वव्यतिकरादीनि काललिङ्गानि । तत्र परेण दिक्प्रदेशेन संयुक्ते यूनि परत्वज्ञाने जाते स्थविरे चापरेण दिक्प्रदेशेन संयुक्तेऽपरत्वज्ञानोत्पत्तौ कृष्णकेशादिवलीपलितादिपर्यालोचनया येन निमित्तेन यूनि अपरत्वज्ञानं स्थविरे च परत्वज्ञानं जायते स कालः । तथा तुल्यकार्येषु कर्तृषु युगपत् कुर्वन्ति, अयुगपत् कुर्वन्ति इति यतः प्रत्ययो जायते स कालः । तथैकक्रियाफलमुद्दिश्य ओदनाख्यं भूयसीनामधिश्रयणादिक्रियाणां प्रबन्धप्रवृत्तौ तुल्यकर्तरि चिरमद्य कृतम्, क्षिप्रमद्य कृतम् इति यतः प्रत्ययौ भवतः स काल इति । तस्य गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः ।... ... ...**इत इदमिति यतस्तद्दिशो लिङ्गम्** वै° सू° २ । २ । १२, मूर्तं द्रव्यमवधिं कृत्वा यत एतद् भवति इदय ?मस्मात् पूर्वेत्यादिप्रत्ययः तद् दिशो लिङ्गम् । गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ° १३ ॥

५ ग] घ्राणग्राह्यो गुणो गन्धः । स च द्विविधः--सुरभिरसुरभिश्च । पृथिवीमात्रवृत्तिः ।... ... ...श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः ।... ... ... सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः,... ...सर्वेषामनुकूलतया वेदनीयं सुखम्, सर्वेषां प्रतिकूलतया वेदनीयं दुःखम्, इच्छा कामः, क्रोधो द्वेषः, कृतिः प्रयत्नः, विहितकर्मजन्यो धर्मः, निषिद्धकर्मजन्यस्त्वधर्मः, बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । इति **अन्नम्भट्टविरचिते तर्कसङ्ग्रहे** ॥

व्याकाशात्मादीनाम्, एकत्वादिसङ्ख्याः सर्वद्रव्यसाधारणा एव, **गन्धादिभिरिति** तृतीयानिर्देशादेभिश्चाशाश्वती । **[शाश्वती]** नित्या रूपादिमूर्तिसंस्थानसामान्यधर्मैर्द्रव्यार्थतो रत्नप्रभेत्यर्थः । § 1311

**इति षष्ठो** नयो नैगमभेदो द्रव्यास्तिकान्तःपाती परिसमाप्त *****इतिशब्द**-समाप्त्यर्थत्वात्, **विधिनियमविध्यर** इति नामनिर्देशोऽयं नयचक्रविभागविन्यस्तश्चक्रार इवार इति । § 1312

१454/mj

अयं च षड्भेदो द्रव्यास्तिक उपवर्णितः । एषु च पर्यवशब्दो भाववचनः, पर्यायशब्दः समन्ताद्गतिवचनः । विशेषेण तु यथादर्शनमेव विध्यादिषु प्रत्येकं व्याख्यातस्वरूपभेदमनुगन्तव्यं सर्वगतिसामान्यमत्यजद्भिः । द्रव्यशब्दार्थस्तत्र तत्र व्याख्यात एव । § 1313

**अयं** चेत्यतीतान् पञ्चैतं च षष्ठं सम्पिण्ड्य एकस्य त्रिशतभेदस्य सङ्क्षेपेण षड् भेदाः, तत्र [१]विधिः [२]विधि[विधिः ३विधिविधिनियमं] [४]विधिनियमः [५]विधिनियमं षष्ठश्चायं [६]विधिनियमविधिरिति **षड्भेदो द्रव्यास्तिक उपवर्णितः**, षडप्येते भेदा द्रव्यास्तिकस्यैवेत्यर्थः । § 1314

१. **एकदिक्कालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरम्**वै॰ सू॰ ७ । २ । २५, एकदिक्कौ पिण्डौ दिक्कृतयोः परत्वापरत्वयोः कारणम्, एककालौ वर्तमानकालसम्बद्धौ कालकृतयोः परत्वापरत्वयोः कारणम् । तौ च सन्निकृष्टविप्रकृष्टबुद्ध्यपेक्षया पिण्डौ कारणम् । **कारणपरत्वात् कारणापरत्वाच्च** वै॰ सू॰ ७ । २ । २६, परापरदिक्प्रदेशसंयोगावसमवायिकारणम् । तथैव परापरकालप्रदेशसंयोगौ । दिक्कालप्रदेशैः संयोगात् सन्निकृष्टविप्रकृष्टयोः पिण्डयोः सन्निकृष्टविप्रकृष्टबुद्ध्यपेक्षया सन्निकृष्टेऽपरत्वं विप्रकृष्टे च परत्वम् । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ॰ २८ ॥

१ ए] इदानीं सङ्ख्यादीनुपक्रमते, भेदव्यवहारहेतुः सङ्ख्या, साधुना रूपादिव्यतिरिक्तेत्येतदर्थमाह **--रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वं तथा पृथक्त्वम्** वै॰ सू॰ ७ । २ । १, एकोऽयम् इत्यादिप्रत्ययो न रूपादिनिमित्तः तत्प्रत्ययविलक्षणत्वात् । रूपादिनिमित्तो हि रूपवान् इत्यादिप्रत्ययः स्यात् । तस्मादर्थान्तरनिमित्तः । एकत्वैकपृथक्त्वे कार्येषु कारणगुणपूर्वे । द्वित्वादेरेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः । तथैव द्विपृथक्त्वादेः पृथक्त्वेभ्यः, किन्तु एकपृथक्त्वाद्यपरसामान्याभावः । **तयोर्नित्यत्वानित्यत्वे तेजसो रूपस्पर्शाभ्यां व्याख्याते** वै॰ सू॰ ७ । २ । २, यथा द्रव्यनित्यत्वात् तेजःपरमाणुरूपस्पर्शौ नित्यौ एवमेकत्वैकपृथक्त्वे नित्यद्रव्यवर्तिनी नित्ये, यथा चानित्ये तेजसि द्रव्यानित्यत्वाच्चानित्यौ रूपस्पर्शौ तथैव कार्यवर्तिनी अनित्ये एकत्वैकपृथक्त्वे । **निवृर्वृत्तिश्च** निष्पत्तिश्च *T* वै॰ सू॰ ७ । २ । ३, यथा च तेजसि कार्ये कारणगुणपूर्वा रूपस्पर्शयोरुत्पत्तिरेवमेकत्वपृथक्त्वयोः । एवं गुरुत्वद्रवत्वस्नेहानाम् । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ॰ २७ ॥

४ *] **इतिशब्दः**nayacakra-ms-ya । **इति इतिशब्दः** nayacakra-ms-bhā ॥

६ श्च] **॰श्चकार** प्र॰ ॥

७ ए] अत्र एषु च समन्ताद् भवनात् पर्यवः, समन्ताद् गमनात् पर्यायः । इत्यपि पाठः स्यात् ॥

७ प] दृश्यतां पृ॰ ४५१ पं॰ ३ ॥

एषु च षट्सु नयेषु **पर्यवशब्दो भाववचनः** समन्ताद् भवनात् पर्यवः सर्वात्मना भवनात् । **पर्यायशब्दः समन्ताद्गतिवचनः**, समन्ताद् गमनात् पर्यायः, द्रव्यस्य वर्णाद्यात्मना परितो गमनात् । अयं च विग्रहार्थः षण्णामपि सामान्येन द्रष्टव्यः, विशेषेण तु यथादर्शनमेव विध्यादिषु प्रत्येकं व्याख्यातस्वरूपभेदमनुगन्तव्यं सर्वगतिसामान्यमत्यजद्भिः, सर्वस्य सर्वात्मकत्वात् एकस्य सर्वात्मकत्वात् एकैकस्य सर्वात्मकत्वात् सर्वस्य चैकैकात्मकत्वात् सर्वगतिमेव यथादर्शनमाह । द्रव्यशब्दार्थस्तत्र तत्र व्याख्यात एव यथादर्शनं द्रव्यप्राधान्यात्, पर्यायोपसर्जनादिहान्ते पर्यायशब्दो व्याख्यातः । - /ms
§ 1315

इति द्रव्यार्थनयविकल्पाः समाप्ताः ॥

# ७ अथ सप्तम उभयोभयारः ।

455/mj

औँ अर्हम् § 1317

यद्यसत् कार्यं नोत्पद्येत असन्निहितभवितृकत्वात् खपुष्पवत् । खपुष्पमपि वोत्पद्येत असन्निहितभवितृकत्वात् कार्यवत् ।
§ 1318

खपुष्पसत्त्वस्याश्रयो नास्तीति चेत्, न, इतरत्रापि तुल्यत्वात् । घटस्य मृदोऽतत्त्वाद् घटादिसत्त्वस्याप्याश्रयो नास्त्येव उत्पत्स्यमानस्य असतः सत्तासमवायित्वात् । § 1319

इदानीं पर्यायनयप्रथमशिराप्रदिदर्शयिषया अनन्तरनिर्दिष्टवैशेषिकोभयविधिनिराचिकीर्षया चोत्तरः समनन्तरानुलोमत्वात् पूर्वविरुद्धत्वान्निवृत्तनिरनुशयत्वाच्च नयानामसत्कार्यवादमेव दूषयितुमाह --**यद्यसदित्यादि** । आस्तां तावदस्मन्मतम्, पूर्वनयमतेनैवैतत् त्वद्दर्शनमनुपपन्नमिति ब्रूमः, द्रव्यार्थिकनयानां सन्निहि तभवितृकभवनाभ्युपगमाद् नासत् कार्यमुत्पत्तुमर्हति, **असन्निहितभवितृकत्वात्, खपुष्पवत् । खपुष्पमपि वोत्पद्येतासन्निहितभवितृकत्वात् कार्यवत्** । षट्पदार्थसंसर्गवादस्य सत्तासमवायबलेन प्रवृत्तत्वात् सत्तासम-

---

४ द्र] **ष्टद्रव्यः** प्र° ॥
८ प] **पर्ययो°** प्र° ॥
८ शेषिकोभ] **°भयमविधि°** प्र° ॥
९ विरु]
°रुद्धान्निवृत्त°nayacakra-ms-bhā ।
°रुद्धान्निवृत्ति° nayacakra-ms-ya ।
दृश्यतां पृ° २२१ पं° ८ ॥
१२ अ] दृश्यतां पृ° ३१७-- २ पं° २ ॥
१३ पि] **चोत्पद्यतासन्नि°** प्र° । दृश्यतां पृ° ३२३-- १ । अत्र **वोत्पद्यतामसन्निहितभवितृकत्वात्** इत्यपि पाठः स्यात्, तुलना पृ° ३५१-- २ ॥

वायोन्मूलनात् तन्त्वस्यैवोन्मूलनमित्यभिप्रायेणायं सत्तासमवायविचारप्रस्ताव इति । § 1320

**खपुष्पसत्त्वस्याश्रयो नास्तीति चेत्** । स्यान्मतम्--कारणद्रव्येष्वाश्रयभूतेषु सत्स्वेव सत्तासमवायात् कार्यं प्रागसत् पश्चादुत्पद्यते, खपुष्पं तु निराश्रयत्वाद् नोत्पत्स्यते कार्यवैधर्म्यादिति । एतच्च **न, इतरत्रापि तुल्यत्वात्,** कार्यमपि हि निराश्रयमसत्त्वादेव खपुष्पवत्, अतो न कश्चित् कार्यखपुष्प- - /ms योर्वि- शेषः । किं कारणम् ? **घटस्य कार्यस्य मृदोऽतत्त्वात्,** मृद्द्रव्यस्य पिण्डादिरूपैर्भवितृणो न तत्त्वं त्वन्मते पिण्डादि कार्यमसत्त्वात् । तस्माद् **घटादिसत्त्वस्याप्याश्रयो नास्त्येव** खपुष्पादिसत्त्वस्येव । त्वन्मतेनैवोत्पत्स्यमान**स्य** पिण्डघटादेः कार्यस्य निःसत्तासमवायस्याऽ**सतः सत्तासमवायित्वात्** सत्तासमवायित्वाभ्युपगमात् **उत्पन्नं ह्याश्रयमाश्रयन्त्याश्रयिणः सत्तादयः** इति 456/mj सिद्धान्तात् तस्यां ह्यवस्थायां

* * *

अथाश्रयिसमवायादृतेऽपि कार्यं स्वेनैवास्तित्वेनोत्पन्नमाश्रयो भवति खपुष्पवैधर्म्येण, एवं तर्हि तस्य स्वत एव सतः किं तदतिरिक्तसत्तासम्बन्धकल्पनया प्रयोजनम् ? कार्यखपुष्पयोराश्रयकृतविशेषाभावो वा । यदसत् सद् भवति, विशेषहेतुर्वक्तव्यः--खपुष्पं कस्मान्नोत्पद्यते ? घटादि कस्मादुत्पद्यते ?

अथोच्येत--कारणवदकारणविशेषात् । यद्यकारणं नोत्पद्यते तत्पुरुषवाच्यं ततः कार्यं नोत्पद्यत एव कारणमेवोत्पद्यते इति स एव कारणवादः परिगृहीतः स्यात् । अथ बहुव्रीहिसमासाश्रयणम्, तन्नोत्पद्यतेऽविद्यमानकारणत्वाद् घटवत्;

* * *

स्वयमसतः कार्यस्याश्रयत्वाभावात् खपुष्पमुत्पन्नमाश्रयन्त्वाश्रयिण इत्यहो परमताकिङ्करत्वं भवतामिति । सत्तायाः समवायाभावे च कुतः कार्योत्पत्तिः ? इति । § 1321

**अथाश्रयीत्यादि** । अथैतस्मात् खपुष्पतुल्यत्वापत्तिदोषभयात् सत्ताया आश्रयिण्याः समवायादृतेऽपि सत् कार्यं तदाश्रयभूतं स्वेनैवास्तित्वेन स्वभावसत्तयैवोत्पन्नमाश्रयो भवति कदाचिदप्यनुत्पत्स्यमानस्य **खपुष्पस्य वैधर्म्येण**तीष्यते, तत **एवं तर्हीत्**यादि, इष्यत एवैतदस्माभिः स्वेनैव महिम्ना तत् सत् इति, न तु त्वया । त्वया चैवमस्माभिरिवेष्यमाणे खरविषाणाद्यसद्विलक्षणस्य **तस्य** कार्यस्य **स्वत एव सतः किं तदतिरिक्तसत्तासम्बन्धकल्पनया प्रयोजनम् ?** न किञ्चित् तेन कल्पितेनेत्यर्थः, सत्तासम्बन्धानर्थक्यम्, अतः

१० स्या] °स्यासतः सतः सत्ता°nayacakra-ms-bhā ‖
२३ माश्र] °श्रयंत्याश्रयिण प्र° ‖
२४ ता] °किंकत्वंnayacakra-ms-bhā । परमतकिङ्करत्वं ? ‖
२४ स] सत्ताया प्र° ‖
२६ अ] अथैव तस्मात् प्र° । अथ वैतस्मात् ? ‖

सर्वद्रव्यगुणकर्मादिकारणसमवायिकार्यसंसर्गवादो निवर्तते तस्मादेव । तदनिष्टानभ्युपगमे यो मया प्रागुक्तः **कार्यखपुष्पयोराश्रयकृतविशेषाभावो वा,** - /ms तत्र तुल्ये तयोरसत्त्वे कार्यमेवोत्पद्यते खपुष्पमेव नोत्पद्यत इति को विशेषहेतुः ? तद्व्यक्तिः --**यद्यसदि**त्यादि गतार्थं यावद् **घटादि कस्मादुत्पद्यत** इति, इत्यतः कार्यखपुष्पयोरविशेषदोषस्तदवस्थः । § 1322

**अथान्यथै**तद्दोषपरिहारार्थ**मुच्येत--कारणवदकारणविशेषात्,** यथासङ्ख्यं सकारणं घटादि खपुष्पमकारणमित्यस्ति विशेषः, कारणैः समवाय्यसमवायिभिर्घटादि सम्बध्यते न तु खपुष्पादीति । स एव स्वाभिप्रायं विवृणोति --**यद्यकारणं नोत्पद्यते तत्पुरुषवाच्य**मिति न भवति कारणमित्यकारणम् इत्थं तत्पुरुषसमासश्चेदिष्टः ततः **कार्यं नोत्पद्यत एव कारणमेवोत्पद्यते,** तस्यैव विधिविध्यादिप्राच्यनयदर्शनात् कार्यतयोत्पादात् **स एव कारणवादः परिगृहीतः स्यात्,** स च मया नेष्टः । तस्मात् तत्पुरुषे नैव विचारः कार्यः । **अथ** यस्य न कारणं तदकारणमिति **बहुव्रीहिसमासाश्रयणं** तन्नोत्पद्यते कार्यं तस्यां बहुव्रीहिकल्पनायामविद्यमानकारणत्वात् खपुष्पवत् । **घटवदि**ति वैधर्म्यम्, यथा घट उत्पद्यते न तथेति । ततः किम् ? ततोऽनुत्पन्नत्वात् तदनाश्रयः सत्तायाः, सत्तानाश्रयत्वात् तत्सम्बन्धाभावाच्च न 457/mj

* * *

एवं तर्हि सर्वासत्त्वप्रसङ्गः परमाण्वादीनामकारणत्वादनुत्पन्नत्वादनाश्रयत्वे सत्तासमवायाभावः, तेषां ह्याश्रयत्वे सत्त्वसमवाय इष्टः, ततः सत्तासमवायाभावात् कारणानां परमाण्वादीनामभावात् कार्यस्य कार्यसमवायिनां च खपुष्पाद् न कश्चिद् विशेष इति सर्वशून्यतेति सर्वविरोधाः ।

अथोच्येत--नित्योत्पन्नत्वात् स्वसद्भावेनैव सन्ति परमाण्वाकाशादीनि, कार्यद्रव्यगुणकर्मणामेव सत्तासमवायात् सत्त्वमिति । एवं तर्हि आकाशपरमाण्वादिषु अनुपनिपातिस्वरूपत्वादात्माभेदाच्च न केनचित् सम्बन्धोऽस्याः स्यात् । असति च सम्बन्धे यथा सत्ता सती एव पदार्थत्वात् स्वरूपसद्भावाच्च तथा तान्यपि द्रव्यगुण-

* * *

सत्कार्यमिति । अत्रोच्यते --**एवं तर्हि सर्वासत्त्वप्रसङ्ग** इत्यादि यावत् **सर्वशून्यतेति सर्वविरोधा** इति । परमाणवोऽकारणत्वाद् वियदादीनि च नोत्पद्यन्ते, अनुत्पन्नत्वादनाश्रयः सत्तायाः, तदनाश्रयत्वे सत्तासमवायाभावः, तेषां

---

३ तु] तुल्ये जयो° प्र° । तुल्येऽनयो° ? ॥
८ टा] °टादिभि सम्ब°nayacakra-ms-pānayacakra-ms-ḍe nayacakra-ms-bhā । °टादिभिः सम्ब° nayacakra-ms-raṃ nayacakra-ms-vi । °टादि अभिसम्ब° ? ॥
९ वा] °वाच्यं इतिnayacakra-ms-bhā । °वाच्य इति nayacakra-ms-ya । °वाच्यमिति ? °वाच्ये इति ? ॥
१३ हुव्रीहिस] °समाश्रयणं प्र° । दृश्यतां पृ° ३२०-- १ ॥
२१ त्वा] °त्वात् नाश्रयःnayacakra-ms-ya ॥
२१ य] °यत्वायत्वात् ?सत्ता°nayacakra-ms-bhā । °यत्व सत्ता° nayacakra-ms-ya ॥

**ह्याश्रयत्वे सत्त्वसमवाय इष्ट** इति तद्वैधर्म्यं दर्शयति । ततश्च सत्तास-
- /ms मवाया- भावात् खपुष्पवत् कारणानां परमाण्वादीनामभावः, तदभावात् कार्यमकारणत्वादनाधारं क्व समवैतु ? तस्मात् कारणासमवायित्वात् खपुष्पात् तस्य न कश्चिद् विशेषः, अतः प्रागुक्ताविशेषदोषस्तदवस्थः कार्यसमवायिभिः परमाणुभिः सहितस्य कार्यस्येदानीं प्रापितस्त्वयैव, कार्ये समवेतानां रूपादिघटत्वाद्युत्क्षेपणादीनां कार्यसमवायिनां चेति विग्रहान्तरात् । ततः किमिति चेत्, उच्यते **--इति सर्वशून्यता,** इति सर्वभावा न सन्तीति ब्रुवतः परमशून्यवादिता भवतः **इति**शब्दनिगमनार्थत्वात् । **इति सर्वविरोधाः,** इत्थं स्ववचनाभ्युपगमप्रत्यक्षानुमानरूढिविरोधाः सर्वासद्वादिनः प्रमाणाभावात् । कारणाकारणकार्याकार्यविरोधाविरोधलक्षणभेदसूत्राणां सदाद्यविशेषसूत्रस्य च सत्तासमवायप्राणोत्थानत्वात् किमवशिष्टं स्याच्छास्त्रस्य तन्नानात्वप्रयोजनस्य **वैशेषिकाख्यस्य** कार्यकारणखपुष्पाविशेषादिति । § 1323

इत्थं प्रागसतः सकारणस्य कार्यस्य खपुष्पाविशेषो मा भूदिति **अथोच्येत--नित्योत्पन्नत्वा**दित्यादि । स्वसद्भावेनैव सन्ति पृथिव्यादिचतुर्विधपरमाण्वाकाशकालदिगात्ममनांसि द्रव्याणि सत्तासमवायौ गुणाश्च विभुपरिमण्डलादयः । किन्तु **कार्यद्रव्यगुणकर्मणामेव सत्तासमवायात् सत्त्व**मिति । अत्रोच्यते --**एवं तर्ही**त्यादि यावत् **तत्पदार्थत्वव**दिति । यथाकाशपरमाण्वादिषु नोपनिपतितुं शीलमस्याः सत्तायास्तथा कार्यद्रव्यगुणकर्मस्वपि सत्तास्वरूपत्वादनुपनिपातिस्वरूपत्वम्, अनुपनिपातिस्वरूपत्वाद्यात्माभेदस्तस्याः सर्वपरमाण्वाकाशादिष्वगगनादिपदार्थेष्वात्माभेदाच्च न केनचित् सम्बन्धोऽस्याः
- /ms स्यात् । असति च सम्बन्धे यथा सत्ता सत्ताद्रव्यत्वगुणत्वादिसम्बन्धाभावे सत्येव पदार्थत्वात् स्वरूपसद्भावाच्च स्वात्मस्वरूपं स्वात्मनि आदधाति इत्येवंस्वरूपा तथा सत्तादिसमवायमन्तरेण तान्यपि कार्यद्रव्यगुणकर्माणि भवन्तु आकाशपरमाण्वादिवत् सत्तावन्तीति किं तद्व्यतिरिक्तसत्ताद्रव्यत्वादिसमवाय-
458/mj कल्पनया ? तस्माद्धेतुफलवन्ध्य

* * *

कर्माणि भवन्तु तत्पदार्थत्ववदिति सत्तासम्बन्धात् सन्ति द्रव्यादीनीत्ययुक्तम् ।

ततोऽनुपपन्नविकल्पत्वात् सत्तासमवायस्य सत्ताद्रव्यत्वगुणत्वकर्मत्वरूपत्वादिसम्बन्धात् सद्द्रव्यगुणकर्मरूपादय इत्याद्यविशेष-लक्षणविरोधाविरोधारम्भानारम्भादिविशेषधर्माभिधानमयुक्तं सर्ववाक्यानृतत्ववत् ।

---

३ णा ] °णात्सम° प्र° ॥
५ का ] कार्यसम°nayacakra-ms-pā ॥
१० का ] दृश्यतां वैशेषिकदर्शनस्य प्रथमाध्यायस्य प्रथममाह्निकम् । दृश्यतां पृ° ४३७ टि° ५, ८, पृ° ४४० टि° ५, ६ ॥
११ स ] सत्तासत्तासमवाय°nayacakra-ms-bhā । दृश्यतां पृ° ४५५ पं° ११ ॥
२० ग ] °गमनादि° प्र° ॥

* * *

त्वादभावः स्यात् सत्तासमवाययोः खपुष्पवदिति । **इति सत्तासम्बन्धात् सन्ति द्रव्यादीनि इत्ययुक्तम्,** तस्मात् सत्तासम्बन्धाद् द्रव्यं सद् गुणः सन् कर्म सच्चेत्ययुक्तम् । **आदिग्रहणाद्** द्रव्यत्वाभिसम्बन्धाद् द्रव्याणि पृथिव्यादीनि, गुणत्वाभिसम्बन्धाद् गुणा रूपादयः, कर्मत्वाभिसम्बन्धात् कर्माणि गमनादीनि इत्ययुक्तम्, **इतिशब्दस्य** निगमनार्थत्वाद् एवं तावद् यत् प्रत्यज्ञासिष्महि **--असन्निहितभवितृकत्वात् खपुष्पवत् कार्यमसदिति** पूर्वनयदर्शनेनैव तदुपापीपदामेति । § 1324

इत उत्तरमस्मादेव न्यायात् कटन्द्यां टीकायां च यत् पूर्वपक्षितं तदेव समर्थयितुमाह **--ततोऽनुपपन्नविकल्पत्वा**दित्यादि उद्देशवाक्यम् । सत्तासम्बन्धात् सन्ति, द्रव्यत्वाद् द्रव्याणि, गुणत्वाद् गुणाः, कर्मत्वात् कर्माणि, रूपत्वाद् रूपम्, **आदिग्रहणात्** पृथिवीत्वादिभ्यः पृथिव्यादयः, रसत्वादिभ्यो रसादयः, गमनत्वादिभ्यो गमनादय इत्यादि । **क्रियावद् गुणवत् समवायिकारणं द्रव्यलक्षणम् । द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् । एकद्रव्यमगुणं संयोग-विभागेष्वनपेक्षं कारणमिति कर्मलक्षणम्** वै° सू°दृश्यतां पृ° ४४० टि° ५ ॥ १ । १ । १४-१६ इत्यादिना द्रव्यादीनां नानात्वं विरोध्यविरोध्यारम्भानारम्भकार्यकारणादिभिश्च, सत्तादिभ्यश्च त्रिभ्यः **स[1]दनित्यं[2] द्र[3]व्यवत् का[4]र्यं का[5]रणं सा[6]मान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः** वै° सू° १ । १ । ७ इति षडविशेषमुखेन विशेषाभिधानं सत्तासमवायबीजं सर्वत्र तत् सर्वमयुक्तं वक्तुम् । कस्मात् ? **अनुपपन्नविकल्पत्वात्, सर्ववाक्यानृतत्ववत्,** यथा सर्वं मदीयं त्वदीयमन्यदीयं च

---

२ त्वा] °त्वाभावः प्र° ॥
७ ज्ञासिष्म] **°ष्महि सन्नि°** प्र° । दृश्यतां पृ° ४५५ पं° १ ॥
९ प] **°पक्षित्तं**nayacakra-ms-bhā । **°पक्षस्तं** nayacakra-ms-ya ॥
१३ वायिका] अत्र समवायिकारणमिति द्रव्यलक्षणम् इत्यपि पाठः स्यात्, दृश्यतां पृ° ४४० टि° ५ ॥
१५ विभागेष्व]
**°नपेक्ष**nayacakra-ms-ya ॥
१७ नानात्वं] दृश्यतां पृ° ४५७ टि° ५ ॥
१९ विशेषः] विज्ञातसाधर्म्यवैधर्म्याणां च द्रव्यादीनामभ्युदयनिःश्रेयसहेतुत्वात् साधर्म्यं तावत् कथयति **सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः** वै° सू° १ । १ । ७, सद् द्रव्यं सन् गुणः सत् कर्म इति सत्ता त्रयाणामविशेषः तथैव अनित्यत्वमन्यत्राकाशादिभ्यः । द्रव्यवदिति समवायिकारणवत्त्वमविशेषः परमाण्वाकाशादिवर्जम् । कार्यत्वमभूत्वा भवनं तथैवाविशेषोऽन्यत्र नित्यद्रव्येभ्यः । कारणत्वं कार्यजनकत्वं त्रयाणामविशेषः, क्षित्यादीनि द्रव्यगुणकर्मणां समवायिकारणम्, आकाशादीनि गुणानाम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम्, गुणास्तु रूपरसगन्धानुष्णस्पर्शसङ्ख्यापरिमाणैकपृथक्त्वस्नेहशब्दा असमवायिकारणम्, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना निमित्तकारणम्, संयोगविभागौष्ण्यगुरुत्वद्रवत्ववेगा उभयथा कारणम्, परत्वापरत्वद्वित्वद्विपृथक्त्वपारिमाण्डल्यादयोऽकारणम्, कर्माणि संयोगविभागेष्वसमवायिकारणम् । सामान्यानि च तानि द्रव्यत्वादीनि विशेषाश्च त इति सामान्यविशेषाः, तद्वत्ता त्रयाणामविशेषः । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ° ७ ॥

वाक्यमनृतम् इति ब्रुवाणस्य तस्य वाक्यं सत्यमनृतं सत्यानृतं वा स्यात् ? सर्वथा नोपपद्यते । यदि तद् वाक्यमप्यनृतं सत्यानृतं वा ततः सर्ववाक्यानृतत्वप्रतिपादनासमर्थम् स्वयमप्रमाणत्वात्, अप्रमाणत्वमसत्यत्वात् । अथ सत्यं न तर्हि सर्वमनृतम्, तस्य सर्वान्तःपातित्वात् तत्सत्यत्ववच्छेषस्यापि सत्यत्वात् सर्वथानुपपन्नं वाक्यमेवं सत्तासमवायात् सत् इत्यादिसदाद्यविशेषलक्षणविरोधारम्भादि

- /ms

459/mj

* * *

इह प्राक् सत्तासम्बन्धात् सतां वा असतां वा सदसतां वा द्रव्यादीनां सत्करी सत्ता ? न तावदसतां सत्करी सत्ता शशविषाणादीनामपि सत्कत्वप्रसङ्गात् । नापि सतां भूतत्वात् सत्तावत् प्रकाशितप्रकाशनवैयर्थ्यवत् । सतां च पुनः सत्तासम्बन्धात् सत्त्वादनवस्थाप्रसङ्गात् । प्राक् तत् सत्तासम्बन्धात् किमात्मकमिति स्वरूपावधारणं कार्यम्, अन्यथाऽसत्त्वात् । नापि सदसताम्, ऐकात्म्यानुपपत्तेः घटखपुष्पवत् । उभयदोषप्रसङ्गाच्च, यदसत् तत् खरविषाणतुल्यम्, यत् सत् तत्र सत्तासम्बन्धो व्यर्थः, सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न वै° सू° ९ । १ । १२ इति च त्वन्मतसिद्धानुपपत्तिरेवायं विकल्पः । तस्माद् विकल्पानुपपत्तेर्न सत्तासम्बन्धोऽभिधानप्रत्ययहेतुः ।

* * *

विशेषधर्मापादनवाक्यानि नोपपन्नानि, सर्वपदार्थानां वैशेषिकीयाणां सत्तासमवायमूलविशेषात्मकत्वाद् द्रव्यादिकार्योत्पत्तिविचारप्रकृतेश्च तदेव विचार्यते तत्प्राणत्वाद् वैशेषिकीयतन्त्रस्येति । § 1325

स्यान्मतम्--कथं पुनरनुपपन्नविकल्पत्वं सत्तासमवायस्य ? इति, अत्रोच्यते --**इह प्राक् सत्तासम्बन्धात् सतां** वेत्यादिविकल्पत्रयोपन्यासो गतार्थः, एवं भवन्मतं स्यात् । तदुत्तरम् --**न तावदसता**मित्यादि । लघुत्वादुत्क्रमेणासतां सत्तासम्बन्धात् सदभिधानप्रत्ययप्रतिषेधः प्रागिति । § 1326

**नापि सता**मिति वैयर्थ्यापादनं **भूतत्वात् सत्तावदि**ति गतार्थम् । **प्रकाशितप्रकाशनवैयर्थ्यव**दिति द्वितीयमुदाहरणं लोकसिद्धं शास्त्रसिद्धात् सत्तोदाहरणाद् भेदेनोपन्यस्तमिति विशेषः । न वैयर्थ्यदोष एवास्मिन् विकल्पे, किं तर्हि ? **सतां च पुनः सत्तासम्बन्धात् सत्त्वादनवस्थाप्रसङ्गा**दिति, विद्यमानानामेव पुनरपि सत्तासम्बन्धात् सत्त्वेष्टौ सत्ताया अपि तत्सत्त्वाभिधानप्रत्ययकर्याः सत्तान्तरसम्बन्धात् सत्त्वम्, तस्या अपि तथेत्यनवस्था स्यात् । किञ्चान्यत्, **प्राक् तत् सत्तासम्बन्धा**दित्यादि यावद**न्यथाऽसत्त्वा**दिति । तच्च

३ अ] अ सत्यं प्र° ॥
६ ण] अत्र °विरोधाविरोधारम्भानारम्भादि° इत्यपि पाठः स्यात् ॥
७ स] दृश्यतां पृ° ४६१ पं° ९ ॥
८ न] दृश्यतां पृ° ४६१ पं° १४ ॥
१९ त्वाद्] **वैशेषिकमतंच-स्येति**nayacakra-ms-bhā । **वैशेषिकयतं च तस्येति** nayacakra-ms-ya ॥
३० प्रा] **प्राक्त सत्ता°**nayacakra-ms-bhā । **प्रात्क सत्ता°** nayacakra-ms-ya । अत्र **प्राक् सत्ता°** इत्यपि पाठः स्यात्, एवं सति मूलमपि प्राक् सत्तासम्बन्धात् तत् किमात्मकम् इति कल्पनीयम् । **प्राक् च सत्ता°** ? ॥

द्रव्यादि पूर्वं सत्तासम्बन्धात् **किमात्मकम् ?** इति स्वरूपावधारणं कार्यम् । तस्यामवस्थायां सत्तासम्बन्धशून्यत्वाद् नैवास्ति तत्, अनवधृतात्मकत्वात्, खपुष्पवत् । **अन्यथाऽस- त्त्वात्** अनवधृतात्मकत्वे तस्यासत्त्वादिति । § 1327 - /ms

**नापि सदसतामिति** तृतीयविकल्पस्योत्तरम् । **ऐकात्म्यानुपपत्तेरि**त्य- नेकान्तवादाभ्युपगमस्य पूर्वाभ्युपगमेन विरोधात् । अथवा **ऐकात्म्यानुप- पत्ते**रिति अनार्हतनयेन प्रकाशतमसोरिवात्यन्तवैधर्म्यात् सत् सोपाख्यम् असद् निरुपाख्यम् तयोः सदसतोर्वैधर्म्यादिकत्र न युज्यते सदसत्त्वम् । **घ- टखपुष्पवदि**ति, घटः सोपाख्यः सत्त्वात्, असत्त्वात् खपुष्पं निरुपाख्यमिति वैधर्म्यादिकत्वाभावस्तयोरेवं सदसदात्मकं कार्यमित्ययुक्तम् । किञ्चान्यत्, **उभयदोषप्रसङ्गाच्च** । तद्व्याचष्टे --**यदसत् तत् खरविषाणे**त्यादि यावत् **त्व- न्मतसिद्धानुपपत्तिरेवायं विकल्प** इति । असत्पक्षे खपुष्पादविशेषः, सत्पक्षे सत्तासम्बन्ध 460/mj

* * *

नन्वगुणादिवद् द्रव्यादीनां सत्तासम्बन्धः प्रतिषिध्यते न तु स्वरूपसद्भाव इति सत्ता नैवासतां सत्करी । एष विकल्पोऽनुपपन्न इति त्वयैव तर्हि कृतम् । एवमपि नैवैतत्, सत्तासम्बन्धात् प्राक् स्वभावसद्भूतकार्यासत्त्वप्रतिपादन- द्वारेणायं विचारः प्रस्तुत एव ।

ननु स प्राग्विषयासत्सत्करत्वे शशविषाणादिसत्करत्वप्रसङ्गस्तदवस्थः, द्रव्यादीनां स्वत एवास्तित्वे सत्तासम्बन्धो व्यर्थः स्यादतोऽसत्सत्करत्वमेव सत्तायाः,

* * *

वैयर्थ्यम्, **सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न** वै॰ सू॰ ९ । १ । १२ इति च त्वन्मताविरुद्धमेवानुपपन्नत्वम् । **तस्माद् विकल्पानुपपत्तेर्न सत्तास- म्बन्धोऽभिधानप्रत्ययहेतुरि**ति निगमनम् । § 1328

आह --**नन्वगुणादी**त्यादि यावद् **नैवासतां सत्करी**ति । अस्तु तावत् सतामेव सत्करी सता नासताम्, यथा मथा प्रागुक्तो दृष्टान्तः स्वभावस-

---

१० त]
**तच्छविषा॰**nayacakra-ms-bhā ।
**तच्छशविषा॰** ? ॥
११ पुष्पा]
**॰ष्पादिविशेषः**nayacakra-ms-bhā ।
**॰ष्पाविशेषाः** nayacakra-ms-ya ॥
२१ स] सिकताभ्योऽनुत्पत्तेर्दध्नः क्षीराद्योत्पत्तेः प्रत्यक्षेण चाग्रहणात् सदसत् कार्यं कारणे । **सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न** वै॰ सू॰ ९ । १ । १२, सत्त्वासत्त्वयोर्युगपद्विरुद्धत्वान्न सदसत् कार्यं कारणे, तस्मादसदेव । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ ३१ । **नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात्**न्या॰ सू॰ ४ । १ । ४८, प्राग् निष्पत्तेर्निष्पत्तिधर्मकं नासत् उपादाननियमात्, कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यते इति । न सत्, प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति । न सदसत्, सदसतोर्वैधर्म्यात्, सत् इत्यर्थाभ्यनुज्ञा असत् इत्यर्थप्रतिषेधः, एतयोर्व्याघातो वैधर्म्यम्, व्याघातादव्यतिरेकानुपपत्तिरिति । इति **न्यायभाष्ये** ॥
२२ त्व] **त्वन्मतविरुद्धमेवानुपपन्नत्वम्** प्र॰ । **त्वन्मतसिद्धमेवानुपपन्नत्वम्** ? ॥
२५ प्रा] दृश्यतां पृ॰ ४४५ पं॰ ३ ॥

द्भावप्रतिपादनार्थं भावस्य यथा नास्य गुणोऽस्तीत्यगुणो गुण एव सन्नगुण इत्युच्यते तथा स्वभावसद्भावसन्नेव भावो नास्त्यस्य सन्नित्यसन्नुच्यते न तु स्वयमसन्निति, तथा द्रव्यादयोऽपि सन्तः, तेषां तु **सत्तया** सह **सम्बन्धः** - /ms **प्रतिषिध्यते न तु स्वरूपसद्भाव** इत्यतो **नैवासतां सत्करी** सत्ता, किं तर्हि ? सतामेव । तस्मादसतां सत्तासम्बन्धानभ्युपगमाददोष इति । § 1329

अत्रोच्यते --**एष विकल्पोऽनुपपन्न इति त्वयैव तर्हि कृतम्,** एवं ब्रुवता त्वयैव तर्हि असतां सत्करी सत्ता न भवति इत्येतदस्मदनुष्ठेयमनुष्ठितम्, अतोऽस्य सिद्धत्वादत्र वयं निश्चिताः संवृत्ताः । अपि च --**एवमपि नैवै**तदित्यादि । यद्यपि मया त्वदनभिज्ञताख्यापनार्थमुक्तम्--असतां सत्तासम्बन्धो नास्तीति । नैतदप्येवम् । किन्त्वसतामेव सत्तासम्बन्धः स्याद् वा न वा ? इति विचार्यम् । किं कारणमिति चेत्, उच्यते--शशविषाणादि**सत्क**रत्वप्रसङ्गः । सत्तासम्बन्धात् प्राक् तद्विषयो द्रव्यादि कार्यं तत् स्वभावेनैव किं सत् ? उत सत्तासम्बन्धात् सत् ? इत्येतस्मिन् सन्देहे स्वभावसद्भूतस्य कार्यस्यासत्त्वप्रतिपादनद्वारेणायं **विचारः प्रस्तुत एवे**ति कथं प्रस्तुतपरित्यागेन परिहारो युज्यत इत्यभिप्रायः । § 1330

अपि च **ननु स प्राग्विषयेत्यादि** । योऽयमस्माभिः प्रागुद्ग्राहितः **यद्यसत् सद् भवति** इत्यादिनोपपत्तिग्रन्थेन अगुणगुणस्थानीयसत्ताया एवाभाव इति यद्यविद्यमानं द्रव्यादिविषयं सत्ता स्वयमसती सन्तं कुर्यात् शशविषाणादीन् वन्ध्यापुत्रादिः सतः कुर्यादित्येष प्रसङ्ग आपिपादयिषितस्तदवस्थः । एतदनिच्छतो **द्रव्यादीनां स्वत एवास्तित्वे सत्तासम्बन्धो व्यर्थः स्यादि**त्येष वा दोषः
461/mj निर्विषयत्वात् सत्तासम्बन्धस्य, अनिष्टं

* * *

तद्याप्येवमनुपपन्नमसत्सत्करत्वम् । योऽपि चावयवार्थविकल्पेषु अन्त्यो व्युत्पत्तिविकल्पः सोऽप्येवमनुपपन्नः ।

न, साध्येनानभिसम्बन्धात्... ... ...असाधनत्वम् । प्रतिज्ञाविशेषो वा... ... प्रतिविशिष्टत्वम् । अथ द्रव्यादीनाम्... ... ...तेषामसत्त्वमसिद्धं द्रव्याद्यभ्युपगमे सत्त्वात् । प्रागुत्पत्तेरिति चेत्, सिद्धसाधनमेतत्, तदा तेषां सत्तासम्बन्धानभ्युपगमात् ।

नासता सम्बध्यते सत्ता विशेषणत्वाद् दण्डवत् । यथा विशेषणस्य दण्डस्य नासता दण्डिना सम्बन्धस्तथा सत्ताया अपि ।

अथ सम्बध्यते, सत्ताया एव हि सामर्थ्यात् तस्या आधारीभवति सद्द्रव्यादि,

* * *

१६ य] दृश्यतां पृ° ४५६ पं° ३, पृ° ४५९ पं° २ ॥
१९ स] संतnayacakra-ms-raṃ । संतं nayacakra-ms-pā nayacakra-ms-vi nayacakra-ms-bhā । सतं nayacakra-ms-ḍe ॥
१९ स्त] °स्तथावस्थःnayacakra-ms-ya ॥

चैतत् । अतोऽसत्सत्करत्वमेव सत्ताया इत्येष एव विकल्पो भवितुमर्हति । तच्चाप्येवमनुपपन्नमसत्सत्करत्वं विचारितविधिनेत्युपसंहरति । § 1331

**योऽपि चावयवार्थेत्यादि । अनुपपन्नविकल्पत्वात्** इत्यस्य साधनस्यावयवार्थाः **सतामसतां सदसतां वा द्रव्यादीनां सत्करी सत्ता** इति विकल्पाः, तेषु नासतां सत्करी इत्यस्य विकल्पस्य उपपाद- नार्थं यानि साधनानि - /ms
व्युत्पादितानि पूर्वपक्षीकृत्य व्यावर्तितानि च, तेषु योऽन्त्यो **व्युत्पत्तिविकल्पः** सुष्ठु व्युत्पाद्य व्यावर्तितः पूर्वपक्ष इत्यभिमतः **सोऽप्येवमनुपपन्न** इति विचारपर्यन्तस्योत्तरस्यानुपपत्तौ तुषकण्डवत् सर्वविचारनैरर्थक्यात् पूर्वपक्ष एवोत्तरपक्षो भवतीत्यभिप्रायः । § 1332

यत् तावदुक्तम् --**नासतामित्यादि** पूर्वपक्षो यावत् **सत्करत्वप्रसङ्गादिति** अत्र प्रक्रान्तं प्रशस्तमतिना — **न, साध्येनानभिसंबन्धादित्युत्तरं** यावद**साधनत्वमित्येष** प्रथमो व्युत्पत्तिविकल्पः । **प्रतिज्ञाविशेषो वेत्यादि** द्वितीयो गतार्थः सोत्तरो यावत् **प्रतिविशिष्टत्वम् । अथ द्रव्यादीनामित्यादि**स्तृतीयः सोत्तरो यावत् **तेषामसत्त्वमसिद्धम्, द्रव्याद्यभ्युपगमे सत्त्वादिति** । अत्र चोद्यम् --**प्रागुत्पत्तेरिति चेत्,** प्रागुत्पत्तेर्न सन्ति द्रव्यादीनि, तस्मादसत्त्वं सिद्धमिति । अत्रोत्तरम् --**सिद्धसाधनमेतत्, तदा तेषां सत्तासम्बन्धानभ्युपगमादिति** । § 1333

एतेषु त्रिषु व्याख्याविकल्पेषु असारबुद्ध्या **नासता सम्बध्यते सत्ता, विशेषणत्वात्, दण्डवत् । यथा विशेषणस्येत्यादि** साधनव्याख्या यावत् **सत्ताया अपीति** । § 1334

**अथ सम्बध्यत** इत्यादिना यावत् **तदवस्थ** इति पूर्वपाक्षिक एव परमतमाशङ्क्योत्तरमाह --**अथ** तव मतमसदपि द्रव्यादि सम्बध्यते सत्ताधेयस्वरूपत्वात् तत्प्रतिपाद्यसत्त्वात् **सत्ताया एव हि** हेतुभूतायाः * 462/mj

* * *

तद्वच्छशविषाणादिभिरपि सम्बध्येतेति शशविषाणादीनामपि सत्करत्वप्रसङ्गस्तदवस्थः । न, शशविषाणादिवदत्यन्तनिरात्मकत्वानभ्युपगमात् कार्यद्रव्यगुणकर्मणाम् ।

ननु असत् इत्यत्र नञ उत्तरपदाभिधेयनिवारणार्थत्वात् सत्प्रतिषेधार्थत्वात् कथमस्य सात्मकत्वम् ? न, अनेकान्तात्, अपुत्रब्राह्मणवदगुणगुणवत् ।

---

३ विक] °कल्पात् प्र° । दृश्यतां पृ° ४५८ पं° २ ॥
४ स] दृश्यतां पृ° ४५९ पं° १ ॥
८ पू] दृश्यतां पृ° ४५८ पं° १० ॥
१० य] सत् प्र° ॥
१० ना] दृश्यतां पृ° ४५९ पं° २ ॥
१२ त्व] °त्वमित्येव प्रथमो प्र° ॥
१४ स] सत्वादि प्र° ॥
२२ स] सत्तावेयस्व°nayacakra-ms-bhā । सत्तावेयंस्व° nayacakra-ms-ya ॥
२३ *] °मतिना न शाव्येनाnayacakra-ms-bhā । °मतिना नाशाच्येना nayacakra-ms-raṃ । °मतिना नाशाच्येना° nayacakra-ms-pā nayacakra-ms-ḍe । °मतिना नाशान्येना° nayacakra-ms-vi । °मतिना साध्येना° ? ॥

यथा नास्य पुत्रोऽस्तीत्यपुत्रो ब्राह्मणः नास्य गुणोऽस्तीत्यगुणो गुणः तथेहापि नास्य सदित्यसत् । न च तदपि निरात्मकं शशविषाणवत्, सत्तासम्बन्धादृतेऽपि यथा परपक्षे प्रधानादीनां सात्मकत्वं तथेहापि स्यात् ।

त्वत्पक्षे दृष्टान्ताभाव इति चेत्, सामान्यादिवद्वा,... ... ...सामान्यादिवदेव

* * *

सामर्थ्यात् तस्या आधारीभवति सद्द्रव्यादीति । एतदपि नोपपद्यते, यस्मात् **तद्वच्छशविषाणादिभि**रित्यादि गतार्थम् । एवं व्युत्पाद्य पूर्वपक्षं प्रशस्तमतिराहात्राप्युत्तरम् --**शशविषाणादिवदत्यन्तनिरात्मकत्वानभ्युपगमात्** । केषाम् ? **कार्यद्रव्यगुणकर्मणाम्** । द्विविधो हि भाव उक्तः स्वभावसद्भावः सम्बन्धसद्भावश्च इतरेतरासतां सात्मकानामेव **सविशेषणासत्त्वादनन्यचन्द्रादिव**दित्यादि पूर्वम् । तस्माच्छशविषाणादीनामेवात्यन्तासतामसत्त्वम्, न प्राक्पश्चादितरेतराद्यसतामनात्मकत्वम् । अतो द्रव्यादि सत्, तत्तु स्वकारणेषु समवेतं वस्त्वेव, सत्तासम्बन्धरहितमपि सात्मकमेव, न खरविषाणादिवद् निरात्मकम् । तस्माद् युक्तः सत्तासम्बन्धो द्रव्यादीनाम्, न खपुष्पादीनामिति ।

- /ms

§ 1335

अत्राह --**नन्वस**दित्यादि यावत् **कथमस्य सात्मक[त्व]**मिति द्रव्यादेर्निरात्मकत्वापादनार्थो ग्रन्थो गतार्थः उत्तरपदाभिधेयनिवारकत्वात् सत्प्रतिषेधार्थः, सत्प्रतिषेधार्थत्वादनात्मकमिति । अत्रोत्तरम् --**न, अनेकान्ता**दित्यादि यावत् **तथेहापि नास्य सदित्यस**दिति लौकिकशास्त्रीयदृष्टान्तद्वयेन व्यभिचारप्रदर्शनार्थो बहुव्रीहिसमासाश्रयेण अपुत्रब्राह्मणवदगुणगुणवदिति च गतार्थो ग्रन्थः । एवमनात्मकत्वे[ऽ]स्थिते तस्या व्यभिचार उच्यते --**न च तदपि निरात्मक**मित्यादि, वैधर्म्येण **शशविषाण**वदिति । सत्तासम्बन्धरहितत्वाद् निरात्मकं खरविषाणवदित्येतत् **साङ्ख्यबौद्ध**कल्पितप्रधानपुरुषपञ्चस्कन्धवत् स्यात् । अथवा सत्तासम्बन्धात् सात्मकमित्येवमुच्यमाने प्रधानादिवत् सत्तासम्बन्धादृतेऽपि सात्मकत्वदर्शनादित्यव्यापिता **तथेहापि स्या**दिति ।

§ 1336

**त्वत्पक्षे दृष्टान्ताभाव इति चे**दित्यादि पूर्वपक्षीकृत्य तदुत्तरम् --**सामान्यादिवद्वे**त्यारभ्य यावत् **सामान्यादिवदेव सात्मकं न घटादिवत् सात्म-**

---

३ त] दृश्यतां पृ॰ ३३३-- १ ॥
७ त] **तस्याधारीभवति** प्र॰ ॥
१० उक्तः] दृश्यतां पृ॰ ४४१ पं॰ ५ ॥
११ स] दृश्यतां पृ॰ ४३४ पं॰ २ ॥
१७ सा] **सात्मकमिति** प्र॰ ॥
१८ ना] **॰नार्थाग्रन्थो** प्र॰ ॥
१८ उ] **असत्** इत्यत्र नञ उत्तरपदाभिधेयनिवारकत्वादित्याशयः । दृश्यतां पृ॰ ३२४-- २ ॥
२० लौ] **लौकशास्त्री॰** प्र॰ ॥
२२ ए] अत्र एवमननात्मकत्वे स्थिते इत्यपि पाठः स्यात् ॥
२२ त] अत्र **तस्या** इत्यस्य सत्तायाः इत्यर्थः स्यात् । अत्र अस्वारस्ये तु **तस्य** इति पाठः कल्पनीयः ॥
२५ मा] ॰माने वच ?प्रधा॰nayacakra-ms-ḍenayacakra-ms-vi । ॰माने थ प्रधा॰ nayacakra-ms-raṃ nayacakra-ms-pā ॥
२८ इति] **चेत्यादि** प्र॰ ॥

कमिति **वा**शब्दावधारणार्थत्वव्याख्यानसहितो ग्रन्थः **वै**शेषिकपक्षे सत्तासम्बन्धरहितसात्मकदृष्टान्ताभावे चोदिते सामान्यविशेषसमवायानां सात्मकत्ववत् स्यादिति 463/mj

* * *

सात्मकं न घटादिवत् सात्मकम् । सामान्यादीनां सात्मकत्वमसिद्धमिति चेत्, न, स्वरूपभिन्नत्वे सति अभिन्नवाग्बुद्धिव्यवहारविषयत्वाद् यद् विशेषणं तत् सामान्यम् ।

अत्राप्युत्तरे बह्वेव सम्प्रधार्यम्, अत्यन्तनिरात्मकत्वानभ्युपगमात् इति वचनेन सदसत्त्वयोरपि विकल्पवत्त्वं वर्ण्यते--किञ्चित्सत् समस्तसदिति, एवमसदपि । संपूर्णनिरतिशयस्वात्मन एव तु सत्त्वाद् निरूप्यम्--कतमत् तत् क्व वा किञ्चित्सत्त्वमसत्त्वं वा ? एतर्हि निरूप्यते--नन्विदमेव तदेकसत्तासदसदपि असमर्थगववत् ।

* * *

गतार्थम् । **सामान्यादीनां सात्मकत्वमसिद्धमिति** चेदिति दृष्टान्ते साध्यधर्मासिद्धिचोदना । तत्परिहारः — **न, स्वरूपभिन्ने**त्यादि यावद् **विशेषणं तत् सामान्य**मिति दृष्टान्तसाधनम् । छत्रवस्त्रकम्बलादिविशेषणैश्छत्रिवस्त्रिकम्बलिनां सात्मकैरात्मरूपप्रत्ययकरैर्विशेषणत्ववत् स्वरूपभिन्नत्वे सति अभिन्नवाग्बुद्धिव्यवहारविषयत्वाद् विशेषणं सामान्यं सात्मकं चेत्यन्तमुत्तरमेतदिति । § 1337 - /ms

**अत्राप्युत्तरे वह्वेव सम्प्रधार्यम्,** अस्मान् प्रत्येतदप्युत्तरं न निश्चलमेवेत्यभिप्रायः । यस्मादेतदप्युत्तरं द्रव्यादीनां शशविषाणवदत्यन्तनिरात्मकत्वानभ्युपगमबलेन सप्रसङ्गमुत्थापितं **शशविषाणादीनामपि सत्करत्वप्रसङ्गस्तदवस्थः** इत्यतः प्रभृति समानप्रचर्चम्, अन्यदप्यत्र वक्ष्यामः **--अत्यन्तनिरात्मकत्वानभ्युपगमात्** इत्यनेनैव तावद्वचनेन सदसत्त्वयोरपि विकल्पवत्त्वं वर्ण्यते, द्विधा सत्--किञ्चित्सत् समस्तसदिति, एवमसदपीत्याभ्यां विकल्पाभ्याम् । **सम्पूर्णनिरतिशयस्वात्मन एव तु सत्त्वात्, तु**शब्दः परमतव्यावर्तनार्थः, यद्यपि मतं परस्य--सदसतोर्विकल्पवत्त्वमस्तु, को दोष ? इति, तन्न भवति, सत् सत्तरं सत्तममिति सतोऽतिशयाभावात् कुतो विकल्पः सत्त्वे ? तस्मात् सम्पूर्णमेव सत्त्वमेवमसत्त्वमपि । ततो नात्यन्तानात्मकं सात्मकं च इत्ययुक्तं वक्तुमित्यभिप्रायः । अस्तु वा विकल्पवत् सत्त्वमसत्त्वं च, तत् पुनर्निरूप्यं

---

१३ ग] गतार्थंnayacakra-ms-ya । **गतार्थं च** nayacakra-ms-bhā । अत्र उत्तरम् इत्यनेन अन्वये गतार्थम् इति गतार्थं च इति वा पाठः साधुरेव, ग्रन्थः इत्यनेन अन्वये तु गतार्थः इति वा गतार्थश्च इति पाठोऽवश्यं कल्पनीयः ॥
१६ कैरा] सामान्यं द्विविधं परमपरं च स्वविषयसर्वगतमभेदात्मकमनेकवृत्ति एकद्विबहुषु **आत्मस्वरूपानुगमप्रत्ययकारि** स्वरूपाभेदेनाधारेषु प्रबन्धेन वर्तमानमनुवृत्तिप्रत्ययकारणम् । इति **प्रशस्तपादभाष्ये** सामान्यनिरूपणे ॥
१७ कं] **वेत्यन्त॰** प्र॰ ॥
२१ स] **॰संग उत्था॰** प्र॰ ॥
२१ श] दृश्यतां पृ॰ ४६१ पं॰ ५ ॥
२२ अ] दृश्यतां पृ॰ ४६२ पं॰ २ ॥
२४ ए] **एवमदपी॰** प्र॰ ॥

त्वया **कतमत् तत्** स्वरूपतः **क्व वाश्रये** किञ्चित् सत्त्वमसत्त्वं वा ? इति विकल्प्यम् । § 1338

अत्राह **--एतर्हि निरूप्यते,** किमत्र निरूप्यम् ? **नन्विदमेव तदेकसत्तासदसदपि,** एकया स्वभावसत्तया सत् तदेवासत् सम्बन्धिसत्तयेति । ततस्तत् किञ्चित्सत् किञ्चिदसत् । किमिव ? **असमर्थगववत्,** यथा गोकार्यासमर्थो गौरेव सन्नगौरित्युच्यते नासौ गौर्न भवति तथेदमपि द्रव्यादि सदेवासदिति । - /ms, 464/mj

* * *

एवं तर्हि सामान्यसत्तायाः सत्ता अव्यक्तिः किञ्चित्सती न सम्पूर्णा सती एकसद्भावत्वात् स्वसत्तावत्, स्वभावसद्भावत्वात् असमवेतसत्ताकानि द्रव्यादीनि यथा । सा असर्वगता च व्यक्तिरेव वा न भवति एकजातीयापेतस्वरूपत्वात् घटवत् ।

उभयासम्पूर्णतायां च तद् न सत् असत्त्वात् खपुष्पवत्, नासत् सत्त्वाद् घटवत्, न सदसत् सदसत्ताऽभावात् । सदसद्द्वैधर्म्यनिराकरणायैव तु प्राय इयं प्रतिपत्तिर्भवतः ।

* * *

अत्र ब्रूमः **--एवं तर्हीत्यादि** । सामान्याख्यायाः सत्तायाः **सामान्यसत्तायाः सत्ता,** सा चा**व्यक्तिः** द्रव्यादिव्यक्तिरहिता **किञ्चित्सती, न सम्पूर्णा सती** स्वभावसत्तामात्रेण सती सम्बन्धिसत्तया न सती, सती चासती च विकल्पवतीत्यर्थः । कस्मात् ? **एकसद्भावत्वात्,** यदेकसत्तया सत् तत् सच्चासच्च दृष्टम्, तद्यथा **--स्वसत्तावत्,** यथा द्रव्यादि स्वभावसत्तया सदेकया सम्बिन्धिसत्तया असत् तथा महासत्तापि स्यादिति । एष एव हेत्वर्थोऽन्यया वाचोच्यते **--स्वभावसद्भावत्वात्, असमवेतसत्ताकानि द्रव्यादीनि यथे**ति गतार्थमेतदनिष्टापादनम् । **सा** सामान्यसत्ता **असर्वगता च** स्वविषयसर्वगता न भवतीत्येतदपि दोषापादनम्, न सर्वस्वविषयानुवृत्तिरित्यर्थः । **व्यक्तिरेव वा** द्रव्यादिव्यतिरिक्ता **न भवती**ति दोषापादनप्रतिज्ञान्तरम् । उभयत्रैक एव हेतुः **--एकजातीयापेतस्वरूपत्वा**दिति, एकप्रकारमेकजातीयम्, **प्रकारवचने जातीयर्** पा॰प्रकारवति चायम्, थाल् तु प्रकारमात्रे, पटुप्रकारः पटुजातीयः । इति पाणिनीयव्याकरणव्याख्यायां वैयाकरणसिद्धान्तकौमुद्याम् ॥ ५ । ३ । ६९, न तु **जात्यन्ताच्छ बन्धुनि** पा॰जात्यन्ताच्छ बन्धुनि

---

३ ए] इदमो र्हिल् पा॰ ५ । ३ । १६, सप्तम्यन्तात् काले इत्येव, हस्यापवादः, अस्मिन् काले एतर्हि । काले किम् ? इह देशे ।... ...अनद्यतने र्हिलन्यतरस्याम् पा॰ ५ । ३ । २१, कर्हि कदा, यर्हि यदा, तर्हि तदा, एतस्मिन् काले एतर्हि । इति nayacakra-ms-pā वै॰ सिद्धान्तकौमुद्याम् ॥

४ स] **संबंधेसत्त॰** प्र॰ । एवमग्रेऽपि ॥

६ स] सदितिnayacakra-ms-bhā ॥

१६ त्ता] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥

२५ दोषापाद] ॰दनप्रंति॰nayacakra-ms-raṃ । ॰दनं प्रति॰ ? ॥

५ । ४ । ९, ब्राह्मणजातीयः । बन्धुनि किम् ? ब्राह्मणजातिः शोभना । जातेर्व्यञ्जकं द्रव्यं बन्धु इति वैयाकरणसिद्धान्तकौमुद्याम् । अस्य व्याख्या--ब्राह्मणजातीय इति, द्व्येकयोः १ । ४ । २२ इतिवद् भावप्रधानो ब्राह्मणशब्दः, तस्य जातिशब्देन सह बहुव्रीहिः, ब्राह्मणत्वजात्याधारभूतः पिण्ड इत्यर्थः । ब्राह्मणजातिरिति, षष्ठीतत्पुरुषः भावप्रधानेन सह कर्मधारयो वा । जातेर्व्यञ्जकमिति, बध्यते जातिरस्मिन्निति बन्धु, शृस्वृस्निहि उणा° १० इत्यादिना अधिकरणे उप्रत्ययः । रूढोऽपि बन्धुशब्द आप्तपर्यायः पुंलिङ्गोऽस्ति तथापि स नेह गृह्यते बन्धुनि इति नपुंसकनिर्देशादिति भावः । इति ज्ञानेन्द्रसरस्वतीविरचितायां तत्त्वबोधिन्याम् ॥ ५ । ४ । ९, मा भूद् द्रव्यत्वसत्तादिवदनैकान्तिकत्वम् । तत एकजातीयादपेतं व्यावृत्तं स्वरूपं यस्याः सा एकजातीयापेतस्वरूपा, तद्भावादेकजातीयव्यावृत्तस्वरूपत्वाद् घटवत् सजातीयासजातीयव्यावृत्तस्वरूपत्वादित्यर्थः । यथा घट एकप्रकारेभ्यो व्यावृत्तस्वरूपो देशकालवर्णाकारादिभिर्विशिष्टत्वाद् घटान्तरस्वविषयव्यापी च न भवति व्यक्तिरेव च न भवति तथा सत्तापि स्यादिति । तस्मादयुक्तमसमर्थगववदेकसत्तासदसत्त्वं द्रव्यादेस्तथा सत्तायाश्चेति । § 1339

इतश्चायुक्तम्, वक्ष्यमाणदुर्निरूपविकल्पत्वात् खपुष्पवदसत्त्वादित्यनुपप- - /ms
न्नविकल्पत्वहेतोरेवैतानि व्याख्यानान्तराणि । तद्यथा **--उभयासम्पूर्णतायां चेत्यादि** । वस्तुनो द्रव्यादेः सामान्यस्य वा सत्त्वेनासत्त्वेन च किञ्चित्समस्तत्वाभ्यामसम्पूर्णतायां पुनरपि तद् निरूप्यमेव किं सदसम्पूर्णम्, उतासत्, आहोस्वित् सदसत् ? इति । तत्र यदि तावत् सत् **तत् सद् न** भवति, कस्मात् ? **असत्त्वात् खपुष्पवत्,** उभया 465/mj

* * *

योऽपि चासच्छब्दस्य नास्य सदित्यसदगुणगुणवत् सत्सत्तासम्बन्धरहितमित्यर्थः सोऽप्यनुपपन्नो विकल्पः कृत्तद्धितान्तरूपार्थविप्रकृष्टान्तरत्वात् ।

अथ नास्य सदिति सत्तापि स्वभावसत्तया सती यस्य नास्ति तदप्यसद् द्रव्यादि उच्यते गुरुत्वा भावाद् गुणागुरुत्ववत् । एतदेव ननु प्रस्तुतम्, सदादयः षडविशेषा द्रव्यादीनामेव त्रयाणां न सामान्यादीनामित्युक्त्वा सामान्यादीनां सत्त्वमुच्यमानं सदित्यसदिति च स्ववचनविरोधाय ।

* * *

सम्पूर्णत्वाभ्युपगमाद् नासिद्धमसत्त्वमसत्त्वस्यापीष्टत्वात् । **नासत्** न च तदसत् **सत्त्वाद् घटवत्,** सत्त्वमपि नासिद्धमुभयासम्पूर्णत्वेष्टेरेव । **न सदसत्,** नापि तत् सदसदुभयरूपमित्यर्थः, त्वन्मतेनैव **सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न** वै° सू° ९ । १ । १२ इति वचनात् । किञ्चान्यत्, **सदसत्ताभावात्,** यथा सत्तासम्बन्धात् सद् भवति तथा सदसत्तासम्बन्धात् सदसत् स्यात् असत्तासम्बन्धादसद् वा स्यात्, न चैवं भवितुमर्हत्यदृष्टानिष्टत्वात् । त-

१२ रू] °रूपादित्यर्थः प्र° ॥
१९ म्पू] °र्णतासत् प्र° ॥
२९ नासिद्ध] °द्धमसत्त्वस्यापी° प्र° ॥
३१ स] दृश्यतां पृ° ४६० टि° १ ॥

स्मादसत्ताऽभावात् सदसत्ताऽभावाच्च न सदसद् नासदसम्पूर्णमिति । अहं पुनरेवं तर्कयामि त्वया नोपलक्षिता **सदसद्द्वैधर्म्यनिराकरणायैव तु प्राय इयं प्रतिपत्तिर्भवतः** किञ्चित्सत् समस्तसदिति तथा किञ्चिदसत् समस्तासदिति ब्रुवतः, उभयासम्पूर्णतायां तदेव सच्चासच्चेति सदसतोः साधर्म्यमेव, न वैधर्म्यमिति प्रतिपन्नत्वादिति । § 1340

किञ्चान्यत्, नैत एव दोषाः, किं तर्हि ? **योऽपि चासच्छब्दस्ये**त्यादि यावत् **सत्सत्तासम्बन्धरहितमित्यर्थ** इति पूर्वपक्षप्रत्युच्चारणम् । योऽप्यसौ **नास्य सदित्यसदगुणगुणव**दिति तस्य बहुव्रीहिसमासाश्रयात् सामान्यविशेषसमवायैः सद्भिः शून्यं सत्तया न सम्बद्धं तस्मादसच्छब्दस्य सदर्थवाचित्व- - /ms मेवेति विकल्प इति । तत्रोत्तरमुच्यते --**सोऽप्यनुपपन्नो विकल्पः कृत्तद्धितान्तरूपार्थविप्रकृष्टान्तरत्वात्,** भवत्यस्ति वेति सत् कृदन्तरूपम्, अर्थश्चास्य द्रव्यभूतः, सतो भावः सत्तेति तद्धितान्तं रूपम्, अर्थश्चास्य **यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ** पा॰ वा॰ ५ । १ । ११९ इति सतोऽसाधारणं स्वरूपं सदन्तरव्यापि सामान्यं चेति शब्दतोऽर्थतश्चात्यन्तभेदादनयोः कथं सत्ता सत् स्यात् यदभावाद् नास्य सदित्यसद् द्रव्यादि भण्येत ? एवं तावत् सदुक्तौ नैव सत्तोक्तिः । § 1341

**अथ नास्य सदि**त्यादि । अथ मा भूच्छब्दार्थविप्रकृष्टत्वात् कृच्छब्देन तद्धितार्थानभिधानाच्छब्दार्थसङ्करदोष इति **सत्तापि स्वभावसत्तया सती** तस्याः सत्त्वात्, सा **यस्य नास्ति तदप्यसद् द्रव्यादि उच्यते,** यथा गुरुगुणाभावादगुरु द्रव्यं गुणः कर्म चोच्यते **गुरुत्वाभावाद् गुणागुरुत्ववत्** तथा सदभावसत्ताभावतुल्यत्वादसदित्युच्यमानमदोषमिति । § 1342

अत्रोच्यते --**एतदेव ननु प्रस्तुतम्, सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः** वै॰ सू॰ १ । १ । ८ इति 466/mj सदादयः षडविशेषा द्रव्यादीनामेव त्रयाणां न सामान्य

* * *

यत्तु सत् तत्समवायिकारणं तदस्यास्त्येव, तत् किमिति मत्वोक्तं नास्य सत् तदिदमसद् द्रव्यादि कार्यमिति ? यत्त्वस्य नास्ति समवेतं तदपेक्ष्य न युक्तं वक्तुं नास्य सत् तदिदमसत् इति । तद्धि सदेव न भवत्यावयोरपि मतेन । किं तर्हि ? नास्यासत् तदिदमनसत् । न हि खपुष्पं यस्य नास्ति सोऽसन्नित्युच्यते, संस्तु सत्वांश्च नियमाद् भवति प्रतिषेधद्वयार्थत्वात् ।

* * *

विशेषसमवायानामित्यविशेषाभिधानद्वारेण त्रयाणां त्रिभ्यो नानात्वं परस्प-

---

१ स] nayacakra-ms-vi विना सदरुत्तसदसम्पूर्ण॰ nayacakra-ms-ya । सदसत्तदसम्पूर्ण॰ nayacakra-ms-vi । सत्तदसम्पूर्ण॰ nayacakra-ms-bhā । सदसन्न सदसम्पूर्णमिति ? ॥

७ या] यावच्छत्सत्ता॰ प्र॰ ॥

८ स] समाश्रयात् प्र॰ ॥

९ द] ॰र्थवात्वमे॰ प्र॰ । ॰र्थवत्त्वमे॰ ? ॥

१७ कृ] कृच्छेन प्र॰ ॥

२१ त्वा] ॰त्वासदि॰ प्र॰ ॥

रतश्च लक्षणादिना व्याचिख्यासितं भवता । अस्माभिश्च द्रव्यव्यतिरिक्त-गुणाद्यभावात् सामान्याद्यभावाच्च सत्त्वेनाविशेष एव, विशेषे वान्यतरद् द्रव्यादित्रयं सामान्यादित्रयं वा खपुष्पतुल्यं स्यादित्यासञ्जितं प्रोक्तद्वारेण वाद-प्रस्तावादिति । तत्र सदादिषडविशेषो द्रव्यादित्रयविषय एव न सामान्यादित्रयविषय इत्युक्त्वा सामान्यादीनां सत्त्वमुच्यमानं सदित्यसदिति च स्ववचन-विरोधाय सदा मौनव्रतिकोऽस्मि इति वचनवत् । § 1343

**यत्तु सदित्यादि । यत् तु** सत्यं मुख्यं **सत् तत्समवायिकारणं** - /ms द्रव्यादिकार्यस्याश्रयः परमाणुतन्तुकपालादि घटपटादिपरिणामिकारणं **तद-स्यास्त्येव** बीजभूतं साधयिष्यमाणं तत्, **तत् किमिति मत्वोक्तं** मत्वर्थस-त्त्वादिना बहुव्रीहिणा **नास्य सदस्ति तदिदमसद् द्रव्यादि कार्यमिति ?** तस्य मुख्यस्य सतोऽस्तित्वादयुक्तं वक्तुम्, न च सद् न भवत्यसत् इति तत्पुरुषेण द्रव्यादिकार्यस्यासत्त्वादिति वा । § 1344

ननूक्तम्--सामान्यं समवायिसत्, तदस्य नास्ति यत्सम्बन्धाद् द्रव्यादिकार्यं सद्व्यपदेशं लभते इति तदपेक्षयोक्तम् असत्[1] इति । अत्रोच्यते **--यत्त्वस्य नास्ति समवेतमिति** सामान्यं **तदपेक्ष्य न युक्तं वक्तुं नास्य सत् तदिदमसत्** इति । यस्मात् **तत् सदेव न भवत्यावयोरपि मतेन, त्वन्म**-तेन तावत् सदविशेषाभावात् सामान्यादित्रयस्य द्रव्यादेरेव सदाद्यविशेषात्, अस्मन्मतेन द्रव्यादिव्यतिरिक्तसामान्यविशेषसमवायासत्त्वादेव तस्यैव विवाद-स्य प्रस्तुतत्वात् तस्यासत्त्वाद् द्रव्यादि कथं नास्त्यस्य सत् तदिदमसत् इति बहुव्रीहिणा वक्तुं शक्यम् । **किं तर्हि** युक्तं वक्तुम् ? **नास्यासत् तदिदमन-सदिति,** तस्मादसद् यस्य नास्ति तत् सदेव अनसदित्यर्थः । तन्निदर्शनम् **--न हि खपुष्पं यस्य नास्ति सोऽसन्नित्युच्यत** इति, सामान्यापेक्षया नपुंस-कनिर्देशे प्राप्ते पुंलिङ्गनिर्देशोऽर्थसामानाधिकरण्यादुत्तानार्थः । **संस्तु सत्वांश्च** - /ms **नियमाद् भवति,** सन्नस्यास्तीति सत्वान् यथा गौरस्यास्तीति गोमान् बहुव्रीहिः सदपेक्ष एव सत्येवार्थे युज्यते नान्यथेति तथा तत्पुरुषेऽपि योज्यमेतदेव वैधर्म्यनिदर्शनम् । कस्मात् ? **प्रतिषेधद्वयार्थत्वात्,** यथा प्रतिषेधद्वयमर्थव-देव दृष्टम् अनगुः इति तथा द्विः प्रतिषेधस्य प्रकृत्यर्थापत्तेः (?')नास्यासत् इत्युक्ते सत्वानेव भवितुमर्हति, नासन् सदर्थत्वात् । § 1345

---

२ भा] °भावच्च nayacakra-ms-bhā । °भावतच्च nayacakra-ms-ya ॥
८ द्र] **द्रव्यादे** प्र° । अत्र **द्रव्यादेः** इत्यपि पाठः स्यात् ॥
९ त] **तत्तत्किमिति** प्र° । तत् किमिति ? ॥
९ म] **मत्वर्थसत्वादिना**nayacakra-ms-ya । **मत्वमर्थमत्वादिना** nayacakra-ms-bhā ।
तदस्यास्त्यस्मिन्निति मतुप् ५ । २ । ९४, गावोऽस्यास्मिन् वा सन्ति गोमान् ।
भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥
इति nayacakra-ms-pā सिद्धान्तकौमुद्याम् ॥
११ तोऽस्तित्वाद] **°दु युक्तं** प्र° ॥
१५ स] **ऽसमवे°** प्र° । **असमवे°** ? ॥
२३ प्राप्ते] **पुल्लिंग°** प्र° ॥
२४ स] **भन्नास्या°**nayacakra-ms-ya । **तन्नास्या°** nayacakra-ms-bhā ॥
२६ द्व] **°द्वयार्थवत्त्वात्** ? ॥

467/mj

ननु द्विविधभावत्वात् सत्त्वासद्वचनेऽपि न दोषः । ननु तदेवेदं भवनं विचार्यते, तस्यैव द्वैविध्यस्यास्मान् प्रत्यसिद्धिः, उक्तवत् । § 1346

कस्मात् खपुष्पं दलमकरन्दादिषु कारणेषु न समवैति ? अद्रव्यत्वात् अभूतत्वात् असन्निहितत्वात् । कस्माच्चम्पकपुष्पं तु समवैति ? तद्द्रव्यत्वादेः । § 1347

यथा च द्रव्यादीनि प्राक् सन्ति सत्तयाभिसम्बध्यन्ते तथोत्पत्त्यवस्थायाः § 1348

अत्राह --**ननु द्विविधभावत्वात् सत्त्वासद्वचनेऽपि न दोषः**, स्वभावसत् सम्बन्धिसदिति च द्विविधं सदुक्तम्, तस्मात् सत्तायाः सामान्याख्याया अपि स्वभावसत्त्वमस्तीति नास्य सत् तदिदमसदिति वक्तुं युज्यत एवेति । § 1349

अत्रोच्यते--ननु तदेवेदं भवनं विचार्यते, किमेकविधमेव निरतिशयमस्मन्मतवत् ? उत त्वन्मतवत् किञ्चित्सत् समस्तसदिति स्वभावसत् सम्बन्धिसदिति च ? तस्यैव द्वैविध्यस्यास्मान् प्रत्यसिद्धिः । सत्तासम्बन्धरहितत्वमपि सत्तोपपत्तिरहितत्वमेव । **उक्तवत्**, यथानन्तरमेवोक्तम्--न किञ्चित्सत् समस्तसन्नाम स्वभावसत् सम्बन्धसन्नाम वेति विकल्पजातं सतोऽस्तीति । अथवा खपुष्पमप्यसन्निहितभवितृकत्वात् कार्यवद् भवेदित्यतीतं सर्वमेवोक्तं तत् सम्पूर्णनिरतिशयं सत्त्वमसत्त्वं चेत्येतस्य प्रतिपादनार्थमिति । § 1350

अत्र केनचित् पृच्छ्येत --**कस्मात् खपुष्पं दल-केसर-मकरन्दादिषु कारणेषु न समवैति** ? इति । वयमत्रोपपत्तिं ब्रूमः --**अद्रव्यत्वात्** निर्बीजत्वादित्यर्थः । द्रव्यं सामान्यमाश्रय इत्यादिपर्यायाः । कस्माद् निर्बीजम् ? इति चेत्, **अभूतत्वात्**, अतीतेऽधुनानागते काले न भूतं हि तत्, **भूत**शब्दस्य त्रिकालवाचित्वादाकाशभूतवत्, असत्त्वादकारणत्वादकार्यत्वादित्याद्यर्थः । तत् कुत इति चेत्, - /ms **असन्नि- हितत्वात्**, यत् सततं भवति तत् सन्निहितम्, सन्निहितमेव हि भवति, असन्निहितं नैव भवति, वन्ध्यापुत्र इव वन्ध्यायां बीजाधानादिभावेनासन्निहितः । अथवा **अद्रव्यत्वादसन्निहितत्वादभूतत्वा**दिति पर्यायशब्दा एवेति । § 1351

पुनः पृच्छेत् कश्चित् --**कस्माच्चम्पकपुष्पं** दलादिषु **तु समवैती**ति । **तु**शब्दः खपुष्पादस्य विशेषं दर्शयति । अत्रोच्यते विशेषः --**तद्द्रव्यत्वादे**रिति

११ स] सत्वाऽसद्व॰ प्र॰ । अत्र सत्ताऽसद्वचनेऽपि इत्यपि पाठः स्यात् ॥
१७ न] किंचित्समस्तसन्नाम प्र॰ ॥
१९ ख] दृश्यतां पृ॰ ४५५ पं॰ १ ॥
२० त्वं] वे-त्ये॰nayacakra-ms-vinayacakra-ms-raṃ ॥
२४ इति] चेत् भूतत्वात् प्र॰ ॥
२८ न्ध्यायां] बीजादानादि॰ प्र॰ ॥

त एव हेतवस्तुल्यव्याख्यानाः । एष खपुष्पचम्पकपुष्पयोर्विशेषोऽसत्त्वात् सत्त्वाच्च भवति । इयं च भावाभावयोः प्रश्नोपक्रमा स्वरूपविशेषव्याख्या ।

§ 1352

**यथा च द्रव्यादीनि प्राक् सन्तीत्यादि** । अत्रानुमानम्--यस्यामवस्थायामुत्पन्नमात्राणि द्रव्यादीनि सन्त्येव सत्तयाभिसम्बध्यन्त इतीष्यन्ते तस्या अवस्थायाः प्रागपि सन्तीति प्रतिज्ञा । तस्यामवस्थायां **सत्तयाभिसम्बध्यमानत्वात्,** यस्यामवस्थायां सत्तयाभिसम्बध्यन्ते तस्या अवस्थायाः प्रागपि सन्त्येव दृष्टानि यथा उत्पत्त्युत्तरकालं सत्तयाभिसम्बध्यमानानि उत्पत्त्यवस्थायां तान्येव । तथोत्पत्त्यवस्थायाः प्रागपि स्युरिति अभूतक्रियागुणव्यपदेशमुत्पत्त्यवस्थमपि कार्यं ततः प्रागपि सत् **सत्तया सम्बन्धित्वात्** तत्काल 468/mj

* * *

प्रागपि स्युः सत्तासम्बन्धित्वात् भवनात् इदानीं भावात् आकाशवत् । इदानीमपि सत्तया न सम्बध्येत कार्यम् । प्रागसत्त्वात् खपुष्पवत् ।

अन्यथाभूतत्वाद् नेति चेत्, अन्यथाभवनेऽपि तदनन्यथाभवनमेव मृत्तन्त्वादितद्भावानतिक्रमात् सजातीयासजातीयेतरस्वभावभूतत्वात् सुचिरादपि तत्तत्त्वात् दृढीभूतघटवत् ।

यदपि चोक्तं नास्य पुत्रोऽस्तीत्यपुत्र इति पुत्रान्तरसम्बन्धः प्रतिषिध्यते इति इदमपि नातिगमितार्थम्, अत्रापि हि पुत्रान्तरसम्बन्धो न प्रतिषिध्यते नञ उत्तरपदाभिधेयनिवारणार्थतत्पुरुषसमाससम्भवसामर्थ्यात्, बहुव्रीहावपि पुत्रात्मत्व-

* * *

द्रव्यादिवत् । किमुक्तं भवति **सत्तासम्बन्धित्वात्** इति ? अत आह -- **भवनात्,** अभूतक्रियागुणव्यपदेशाभिमतावस्थं कार्यं ततः पूर्वमपि वस्तुस्वरूपमेव, नाभावः, **इदानीं भावात् आकाशवदिति** तद्व्यक्त्यर्थम् । **इदानीमपि न सत्तया सम्बध्येत कार्यम्, प्रागसत्त्वात्, खपुष्पवदिति** विपर्ययेणानिष्टापादनसाधनम् । भवदेव हि भवति गगनवत्, नाविद्यमानमश्वविषाणवदिति । - /ms

§ 1353

**अन्यथाभूतत्वाद् नेति चेत्,** प्रत्यक्षं तन्तुभ्योऽन्यथा पटभवनात् प्रत्यक्षविरुद्धं प्रागपि सत् कार्यम् इति वचनमिति चेत्, तद् **न, प्रत्यक्षमन्यथाभवनेऽपि तदनन्यथाभवनमेव** प्रत्यक्षतः । किं कारणम् ? **मृत्तन्त्वादित-**

---

३ योर्विशेषोऽस] °सत्वासत्वाद्यnayacakra-ms-ya । सत्वाद्य nayacakra-ms-bhā ॥
४ स्व] स्वास्वरूप°nayacakra-ms-bhā ॥
७ इतीष्य] °ष्य-तेnayacakra-ms-vinayacakra-ms-raṃ ॥
१२ स] सत्ताया प्र° ॥
२५ रूप] °पमेव भावःnayacakra-ms-bhā ॥
२५ त] nayacakra-ms-vi विना तद्व्यक्तार्थम् nayacakra-ms-ya । तद्व्यक्तार्थम् nayacakra-ms-vi ॥
१ मृ] मृत्तत्वादि°nayacakra-ms-vi nayacakra-ms-raṃ । अत्र मृत्तत्त्वादितद्भावानतिक्रमात् इत्यपि पाठः स्यात् ॥

**द्भावानतिक्रमात्** अनतिक्रान्ततद्भावत्वादित्यर्थः । **दृढीभूतघटव**दिति दृष्टान्तो वक्ष्यते । हेतोरस्य व्याख्या --**सजातीयासजातीयेतरस्वभावभूतत्वात्,** घटस्य सजातीयानि घटान्तराणि, असजातीयानि पटादीनि, तेभ्य उभयेभ्य **इतरः** अन्यो घटः सजातीयासजातीयभिन्नो देशकालाकारप्रमाणरूपादिभेदात् । नन्वेवं सजातीयासजातीयभिन्नत्वे स्वकारणेभ्योऽपि भिन्नत्वात् प्रागसत्त्वमेव प्राप्तं कार्यस्येति । एतद्यायुक्तम्, **स्वभावभूतत्वात्** इति विशेष्योक्तत्वात् स्व-समवायिकारणभूतपरमाणुद्व्यणुकादिरूपरसाद्यात्मकपरिणामस्वभावेनैव भूत-त्वादिति तद्भावानतिक्रम एवैवं व्याख्यातो भवति । किञ्चान्यत्, **सुचिरादपि तत्त्वात्;** देशकालाकारादिभेदे सत्यपि मृदः पिण्डाद्यवस्थासु मृदवस्थाग-
- /ms तरूपादिस्वरूपानतिवृत्तेः परमाणुरूपादितत्त्व एव घटः, तस्मादन्यथाभवनेऽपि तदनन्यथाभवनमेव । किमिव ? **दृढीभूतघटवत्,** यथा मालवनगरे घटो दृढीभूत आर्द्रादि-सामिशुष्क-नव-युव-मध्यम-पुराणाद्यवस्थासु अन्यथाभव-नेऽपि घटत्वमनतिक्रामन् सप्तसु वर्षशतेषु नीतेष्वपि स एव तथा भवति एवं तदपि कार्यं द्रव्यादीति । § 1354

किञ्चान्यत्, **यदपि चे**त्यादि पूर्वपक्षप्रत्युच्चारणं यावत् **प्रतिषिध्यत** इति । तदुत्तरम् --**इदमपि नातिगमितार्थ**मित्यादि यावत् **सम्भवसामर्थ्या**दिति । तद् विव्रियते--यदपि सत एवासत्त्वप्रतिपादनार्थं दृष्टान्तत्वेनोक्तम्--नास्य पुत्रोऽस्तीत्यपुत्रः, न तु पुत्रो न भवतीति, तस्यान्यपुत्रत्वादिति । तदपि **नातिगमितार्थ**मिति दाक्षिण्यवचनमेतत्, मा निष्ठुरं वोचमिति । कथमग-
469/mj मितार्थम् ? यस्मादत्रापि पुत्रान्तर

* * *

मेव प्रतिषिध्यते नञा अतद्द्रव्यत्वात् स्वयं पुत्रीभावपरिणामशून्यत्वात् खपुष्प-वत् । तथा चान्वाह--

अङ्गादङ्गं सम्भवसि हृदयादभिजायसे ।
कौषीतकिब्रा॰अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे ।
आत्मा त्वं पुत्र माविथजानीथ स जीव शरदः शतम् ।
इति कौषीतकिब्राह्मणोपनिषदि पाठः । अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति इति बृहदारण्यकोपनिषदि पाठः ६ । ४ । ९ । अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम् । इति आश्वलायनगृह्यसूत्रे पाठः १ । १५ ॥ २ । ७ § 1356

१० त] **तत्त्वत्वात्** प्र॰ । **तत्त्वत्वात्** ? ॥
१२ मा] दृश्यतां पृ॰ ४०१ पं॰ ६ ॥
१३ सा] सामि त्वर्धे इति अमरकोशे ३ । २४८ । ततः सामिशुष्कोऽर्धशुष्क इत्यर्थः ॥

* * *

सम्बन्धो न प्रतिषिध्यते, अन्यस्य स्वामिपुत्रादेर्दृष्टत्वात् तस्य पुत्रोऽस्तीति बहुव्रीहिसमासार्थस्य प्रत्यक्षविरुद्धस्यासम्भवात् । किं तर्हि वक्तव्यम् ? **नञ उत्तरपदाभिधेयनिवारणार्थतत्पुरुषसमाससम्भवसामर्थ्यात्,** यथा भिक्षां देहि इति गृहबहिरन्तःस्थयोर्याचकदायकयोर्याञ्चादानसम्भववत् *को भिक्षां ददाति ? इति प्रश्ने प्रत्याख्यानदानसम्भववत् गवाक्षे गावः इत्यादित्यकिरणसम्भववद्वा उत्तरपदाभिधेयसम्भवः स्वयमेवासौ पुत्रो न भवति इत्युक्तं भवति, तच्च वक्ष्यते । तस्माद् नास्य पुत्रोऽस्तीत्यपुत्र इत्ययुक्तो दृष्टान्तः । अभ्युपगम्य बहुव्रीहिं **बहुव्रीहावपि पुत्रात्मत्वमेव प्रतिषिध्यते नञा** न पुत्रान्तरसम्बन्धः । कस्मात् ? **अतद्द्रव्यत्वात्,** तद् द्रव्यं तत् कारणं तद् - /ms
बीजं परिणामि अस्य तदिदं तद्द्रव्यम्, न तद्द्रव्यमतद्द्रव्यम्, तद्भावादतद्द्रव्यत्वात् **स्वयं पुत्रीभावपरिणामशून्यत्वात्** स्वयं स्वपुत्रत्वेनानुत्पित्सुत्वादित्यर्थः । **खपुष्पवदिति** गतार्थम् । यथोक्तम् --**अगणिरूपिता अगणिपरिणामिता अगणिसरीरेति वत्तव्वं सिया** भगवतीसू॰ ५ । २ । १८१ इति । ***तथा**
470/mj **चान्योऽप्यन्वाह--अङ्गादङ्गं सम्भवसी**त्यादि । तान्येव पितुः

---

५ भिक्षां]
देहीदेहीतिnayacakra-ms-ya ॥
५ दा] ॰**दापकयोर्याञ्चादापनसम्भववत्** प्र॰ । अत्र ॰**दापकयोः** इति पाठाभिरुचौ ॰**दापकयोर्याञ्चादापनसम्भववत्** इति पाठः समीचीन एव ॥
५ *]
काnayacakra-ms-bhānayacakra-ms-vinayacakra-ms-ram ॥
६ दा]
॰**दानदान**॰nayacakra-ms-bhā ॥
१३ य] **यथोक्तं गणिरूपिता** प्र॰ । अह भंते ! ओदणे कुम्मासे सुरा एऽए णं किंसरीराति वत्तव्वं सिया ? गोयमा ! ओदणे कुम्मासे सुरा+ए य जे घणे दव्वे ए+ए णं पुव्वभावपन्नवणं षडुच्च वणस्स+इजीवसरीरा त+ओ पच्छा सत्थातीया सत्थपरिणामि+आ अगणिज्झामिया अगणिज्झूसिया अगणिसेविया अगणिपरिणामिया अगणिजीवसरीरा[ति] वत्तव्वं सिया । सुरा+ए य जे दवे दव्वे ए+ए णं पुव्वभावपन्नवणं पडुच्च आ+उजीवसरीरा, त+ओ पच्छा सत्थातीया जाव अणगिकायसरीराति वत्तव्वं सिया । इति भगवतीसूत्रे पाठः ५ । २ । १८१ । अस्य व्याख्या--अहेत्यादि । ए+ए णंति एतानि, णमित्यलङ्कारे, किंसरीरत्ति केषां शरीराणि किंशरीराणि ? सुरा+ए य जे घणेत्ति, सुरायां द्वे द्रव्ये स्याताम्--घनद्रव्यं द्रवद्रव्यं च । तत्र यद् घनद्रव्यं पुव्वभावपन्नवणं पडुच्चत्ति अतीतपर्यायप्ररूपणामङ्गीकृत्य वनस्पतिशरीराणि, पूर्वं हि ओदनादयो वनस्पतयः । त+ओ पच्छत्ति वनस्पतिजीवशरीरवाच्यत्वानन्तरम् अग्निजीवशरीराणि इति वक्तव्यं स्यादिति सम्बन्धः । किम्भूतानि सन्ति ? इत्याह--सत्थातीयत्ति, शस्त्रेण उदूखलमुशलयन्त्रकादिना करणभूतेन अतीतानि अतिक्रान्तानि पूर्वपर्यायमिति शस्त्रातीतानि । सत्थपरिणामियत्ति शस्त्रेण परिणामितानि कृतानि नवपर्यायाणि शस्त्रपरिणामितानि । ततश्च अगणिज्झामियत्ति, वह्निना ध्यामितानि श्यामीकृतानि स्वकीयवर्णत्याजनात् । तथा अगणिज्झूसियत्ति अग्निना शोषितानि पूर्वस्वभावक्षपणात्, अग्निना सेवितानि वा जुषी प्रीतिसेवनयोः पा॰ धा॰ तुदादि॰ ८ इत्यस्य धातोः प्रयोगात् । अगणिपरिणाभिया+इति सञ्जाताग्निपरिणामानि उष्णयोगादिति । अथवा सत्थातीता इत्यादौ शस्त्रमग्निरेव, अगणिज्झामिया इत्यादि तु तद्व्याख्यानमेवेति । इति अभयदेवसूरिविरचितायां भगवतीसूत्रवृत्तौ ॥
१ *] **तथा व्यत्योष्यत्वाह** प्र॰ ॥

* * *

यदप्युक्तम् अगुणो गुणः इति तदपि गुणभूतोऽयमर्थो न भवति, किं तर्हि ? स्वतन्त्रं द्रव्यमेवेति गुणसन्द्राववादे गुणभावो गुणस्य प्रतिषिध्यते न गुणसम्बन्धो युगपदयुगपद्भाविता, भवनलक्षणद्रव्यत्वात्, सङ्ग्रहवादवद्वा । तस्माद् बहुव्रीह्यसदपि नासत्, सदेव ।

स्ववचनविरोधादेः सदप्यसत् सत्तासम्बन्धरहितत्वात् । सत्तासम्बन्धेन

* * *

शुक्राद्यङ्गानि पुत्राङ्गत्वेन परिणमन्ति क्षीरदधित्ववत् । **हृदयादभिजायसे** इति, प्रज्ञापि सैव पुत्रस्य या पितुः, अश्वादिप्रज्ञाया मनुष्यादिष्वभावात् । § 1357

**यदप्युक्तं** द्वितीयमुदाहरणं तत्रैव अगुणो गुणः इति शास्त्रीयं तदपि गुणभूतोऽप्रधानो द्रव्याश्रयी उपसर्जन इतीष्टोऽयमर्थो न भवति, किं तर्हि ? स्वतन्त्रं प्रधानं द्रव्यमेवेति, उत्तरपदाभिधेयनिवारणार्थत्वाद् नञः । न तु नास्य गुणोऽस्तीत्यगुणो गुणः, तस्य हि रूपादेः परस्परतोऽन्यरसादिगुणकस्य गुणसद्भावात् । सत्त्वादेर्वा गुणसन्द्राववादे गुणवत्त्वाद् गुणभावो गुणस्य गुणत्वमेव प्रतिषिध्यते, न गुणसम्बन्धः । स च दृष्टो गुणसम्बन्धः युगपदयुगपद्भाविता, [युगपद्भाविता] *रूपरसगन्धस्पर्शसङ्ख्यानादीनां गुणानां सम्बन्धः, अयुगपद्भाविमृत्पिण्डशिवकस्थासकादीनामयुगपद्भाविता, कृष्णनीलशुक्लरक्तादिवर्णादिभेदानामयुगपद्भावितादि शेषगुणानामिति । तथा सत्त्वादीनामङ्गाङ्गिभावेन
- /ms युगपद्भाविता, महदहङ्कारतन्मात्रादीनामयुगपद्भाविता *चेति । कस्मात् ? **भवनलक्षणद्रव्यत्वात्, द्रव्यं च भव्ये** पा° ५ । ३ । १०४ भवतीति द्रव्यं भव्यं भवनसम्बन्धयोग्यम्, गुणाः सन्द्रुत्यैव तिष्ठन्ति भवन्ति द्रवन्तीति गुणयन्ति गुण्यन्ते द्रूयन्ते ज्ञायन्ते चेत्येक एवार्थ इति । **सङ्ग्रहवादवद्वा,** यथा वा सङ्ग्रहनयवादे सर्वस्य सर्वात्मकत्वात् त एव रूपपरमाण्वादिद्रव्यविशेषाः स्वजात्यपरित्यागेन युगपदयुगपच्च भवन्ति द्रवन्ति द्रूयते भूयते तैरेवेत्युक्तम् । **तस्माद् बहुव्रीह्यसदपि नासत्, सदेवे**ति प्रस्तुतोपनयः । यथोक्तम्--अत्थित्तं अत्थित्ते **परिणमतीति णत्थित्तं णत्थित्ते परिणमति** भगवतीसू° १ । ३ । ३२ इति । तस्मात् सम्पूर्णनिरतिशयं सदसद् वेति । तस्मादसत् कार्यं न सत्तया सम्बध्यते सत्वाभावादसम्पूर्णसदसत्त्वाभावादित्युक्तम् । § 1358

तथा **स्ववचनविरोधादेः सदप्यस**दिति, यदपि सत् इति द्रव्यादि कार्यमिष्टं तदपि स्ववचनविरोधादेर्दोषादसदेव जायत इति पक्षः । स्ववच-

---

११ त्रैव] °व गुणो गुणः प्र° । °व गुणोऽगुणः ? ॥
१५ त्व] °त्वमेवं प्र° ॥
१६ यु] युगपद्भावितानayacakra-ms-ḍe । एतदनुसारेण स च दृष्टो गुणसम्बन्धः, युगपद्भाविता रूपरसगन्धस्पर्शसङ्ख्यानादीनां गुणानां सम्बन्धः इत्यपि पाठः स्यात् ॥
१७ *] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
२० *] वेति प्र° ॥
२२ भ] णत्थिति प्र° । दृश्यतां पृ° २९६ टि° १ ॥
५ ण] भावत्nayacakra-ms-bhā । भावात् nayacakra-ms-ya ॥

नादिविरोधाश्चानुमानविरोधद्वारेणैवोद्भावयिष्यन्ते, तत्र तावत् तस्यासत्त्वे हेतुः **--सत्तासम्बन्धरहितत्वात्** । *सत्तया सम्बन्धमनुभूय सत् इत्यभिधानं प्रत्ययं च लभते कार्यम्, विशेषणस्वरूपाभिधानप्रत्ययभाक्त्वाद् विशेष्यस्य, दण्ड-निमित्तदण्ड्यभिधानप्रत्ययभाग्देवदत्तवत् । सत्तासम्बन्धश्च सन्निहिताल्लिङ्गात् सदभिधानप्रत्ययदर्शनादनुमीयते, अतः सत्तासम्बन्धात् सद् भवति इत्युक्तं भवतीति परमतसमर्थनमेव तावदेतत् । तस्मात् **सत्तासम्बन्धेन भाव्यमानं सद् भवति,** * 471/mj

* * *

भाव्यमानं सद् भवति, यच्च भाव्यमानं सद् भवति तदारम्भकेभ्यो भवति द्रव्याद्यारब्धद्रव्यान्तरादिवद् भाव्यमानभवितृत्वात् ।

सत्तापि यदि द्रव्यादेर्भाविका ततः कारणम्, भावकत्वात्, आरम्भकवत् । सति सत्तान्तराधानाद् नेति चेत्, न, तुल्यत्वात्, एवमपि कारणमेव ते सत्ता सति सत्तान्तराधायित्वात् पटसत्ताधायितन्तुसंयोगवत्, वृत्तसत्त्वातिरिक्त-सत्त्वकारण-

* * *

परत आत्मानं लभते न स्वत इत्यर्थः । ततः किम् ? तत इदं भवति -- **यच्च भाव्यमानं सद् भवति तदारम्भकेभ्यो भवति** कारणद्रव्यादिभ्य इत्यर्थः - /ms । साध्यानुगतसाधनवचनात् साधर्म्यदृष्टान्त एषः, तन्निदर्शनं हेतुना[ऽ]व्य-वहितं प्रतिपत्तिलाघवार्थम् **--द्रव्याद्यारब्धद्रव्यान्तरादिवदि**ति, यथा द्रव्य-गुणकर्मभिर्द्रव्यगुणान्तराण्यारभ्यन्ते, कर्म च गुणैः संयोगविभागप्रयत्नगुरुत्व-संस्काराद‍ृष्टैः, तथा सत्तया आरभ्यते तत् सत् कार्यम् । हेतुरत्र **भाव्य-मानभवितृत्वा**दिति व्याख्यातार्थः । तस्मात् तस्यामवस्थायामसत् तद् द्र-व्यादिकार्यम् । असत् तत् इति च ब्रुवतः स्ववचनविरोधोऽनुमानविरोधश्च, प्रत्यक्षाभ्युपगमरूढिविरोधा अपि योज्यास्तथैव । एवं तावद् द्रव्यादिकार्य-मुत्पत्त्यवस्थायां स्वत एवास्ति इतीष्टमपि सत्तासम्बन्धाद् भवितृत्वात् असदेव इत्युक्तम् । § 1359

न केवलं द्रव्यमेवासत् तदा, किं तर्हि ? सत्तापि च नास्ति इत्यापाद-यिष्यते हेतुसद्भावेन कारणत्वादिभ्यः । कारणत्वात् तावत् **--सत्तापि यदि द्रव्यादेः** कार्यस्य भवतो **भाविका तत** उक्तविधिना **कारणम्, भावक-**

१० ता] सत्ता॰nayacakra-ms-bhā प्रतौ नास्ति ॥
११ *] सत्ताया nayacakra-ms-ya । सत्तायाः ? । nayacakra-ms-bhā प्रतौ तु एतदन्तर्गतः पाठो नास्त्येव ॥
१६ *] भव्यंnayacakra-ms-ya प्रतिषु नास्ति ॥
२६ साध्यानुग] ॰गतेसा॰nayacakra-ms-bhā ॥
२८ गुणैः] दृश्यतां पृ॰ ४३७ टि॰ ८ । प्रशस्तपादभाष्ये कर्मनिरूपणमपि द्रष्टव्यम् ॥
६ ते] हेतुमद्भावेनnayacakra-ms-vi विना । हेतुहेतुमद्भावेन ? ॥
६ का] nayacakra-ms-vi विना **कारणत्वात्तवत्** प्र॰ । **कारणत्वात्तद्वत्** nayacakra-ms-vi । कारणत्वं तावत् ? ॥

**त्वात्** भावयितृत्वादित्यर्थः, **तसिलादिष्वाकृत्वसुचः** पा० ६ । ३ । ३५ इति पुंवद्भावात् । **आरम्भकव**दिति पटस्य तन्त्वादिवदिति वक्ष्यते, इह तु सामान्येन यथारम्भकाः परमाणवस्तत्समवायिनः संयोगविभागा अदृष्टादिगुणाश्च सापेक्षा निरपेक्षाः क्रियाश्चादृष्टादिहेतुकाः कारणानि भावकानि यथासम्भवं द्व्यणुकादिकार्यद्रव्याणां गुणानां कर्मणां च तथा सत्तापि कारणमिति । § 1360

**सति सत्तान्तराधानाद् नेति चेत्** । स्यान्मतम्--स्वयमुत्पन्ने समवाय्यसमवायिकारणारब्धे द्रव्यादौ कार्ये स्वभावतः सत्येव सत्तान्तरं सम्बन्धिसत्त्व-
- /ms माधीयते तया सत्तया, तस्माद् नारम्भिका सा, अनारम्भकत्वाच्चाऽकारणमण्वादिवत्, अतो वैषम्यं दृष्टान्तदार्ष्टान्तिकयोः, भावकत्वं वा तस्या नास्तीति । एतच्च **न, तुल्यत्वा**दनन्तरोक्तदण्डादिवद् विशेषणस्वरूपसदभिधानप्रत्ययानुमितसत्तासम्बन्धनिवृत्तेः । अभ्युपेत्याप्यभावकत्वं सति सत्तान्तराधायित्वं च सत्तायाः **एवमपि कारणमेव ते सत्ता, सति सत्तान्तराधायित्वात्, पटसत्ताधायितन्तुसंयोगवत्,** यथा तन्तुभिः परस्परसंयोगापेक्षैरारब्धे पटे सति तत्संयोगः सत्तासमवायजं सम्बन्धिसत्त्वमादधानः कारणं दृष्टः तथा सत्तापि स्यादिति । स्यान्मतम्— आरम्भकाः परमाणवो न संयोगः, तस्माद् वैषम्यमिति । एतच्चायुक्तम्, संयोगस्याप्यारम्भकत्वेष्टेः कारणत्वमात्रसाधनाद् वा न दोष इति । अथवा **वृत्तसत्त्वातिरिक्तसत्त्वकारणत्वात् कारणमेव सत्ता**
472/mj इति

* * *

त्वात् तन्त्वादिवत् । तथा च द्रव्याद्यन्यतमदेव तत् ।

अत एव च नास्य सत् तदिदमसत् इति स्वान्वयवृत्ति सत्त्वव्यतिरेकवृत्ति च निरूपितमन्वयव्यतिरेकाभ्यां निष्कलं सत्त्वं यस्य तद् द्रव्यादि सिध्यत्येव, तदर्थमभिधानप्रत्ययहेतुना अन्येन सत्तादिना नार्थः, स्वत एव सिद्धप्रयोजनत्वात् । तत्र द्रव्यादिव्यतिरिक्तस्य सदभिधानप्रत्ययहेतोरनवकाशः स्वत एव सिद्धाभिधानप्रत्ययत्वात्, सत्तादिवत्, आकाशादिवत् । स्वगतपुत्रत्वसंसिद्धान्वयव्यतिरेका-

* * *

वर्तते, यस्माद् **वृत्तस्य** निष्पन्नस्य कारणान्तरैः स्वभावसतः ततोऽतिरिक्तं सम्बन्धिसत्त्वं करोति सत्ता तस्मात् कारणमेव । को दृष्टान्तः ? **तन्त्वादिवत्,** यथा वृत्तसत्त्वं तन्तुत्वं तदतिरिक्तपटसत्त्वकरं कारणं च तथा सत्तेति । अथवा यथा वृत्तस्य तन्तुभिरारब्धस्य पटस्य जन्मोत्तरकालमपि सत्त्वं कुर्वन्तस्तन्तव एव संयोगापेक्षाः कारणं पटस्येष्यन्ते तथा सत्तापि वृत्तसत्त्वातिरिक्तसत्त्वकर-

९ त्व] दृश्यतां पृ० ४७२ पं० १ ॥
११ सा] सापेक्ष-निर°nayacakra-ms-bhānayacakra-ms-vi ॥
१५ त्वाच्चा] °च्चारणमाणदिवत् प्र० । अण्वादिवत् इति वैधर्म्यदृष्टान्तोऽत्र विवक्षित इति भाति ॥
१७ रोक्त] दृश्यतां पृ० ४७० पं० २५ ॥
३१ द्र] दृश्यतां पृ० ४७३ पं० १८ ॥
७ कु] कुर्वत°nayacakra-ms-vi विना ॥
८ ए] एवं प्र० ॥

त्वात् कारणमेव स्यात्, आदिग्रहणात् कपालवीरणादिद्रव्याण्युदाहर्तव्यानीति । § 1361

**तथा च द्रव्याद्यन्यतमदेव तत्,** सामान्यं सत्ताख्यं द्रव्यं गुणः कर्म वा, नान्यत् स्यात् । यद्धि कारणं तद् द्रव्यं गुणः कर्म वा, नातोऽन्यद् दृष्टम्, यथा तन्तवस्तत्संयोगाश्च तत्क्रियाश्च । तस्मात् सामान्यं सदनित्यं - /ms द्रव्यवत् कार्यं कारणं सामान्यविशेषवच्च द्रव्यादिवत्, अतो द्रव्यादीनामेव सदादिषडविशेषा इति व्याख्या व्यर्था । § 1362

**अत एव चे**त्यादि । एतस्मादेव द्रव्याद्यन्यतमस्वरूपत्वात् सत्तायाः सामान्याख्यायाः नास्य सत् तदिदमसत् इति विगृह्य अस्य इत्यन्वयात् न इति च व्यतिरेकाद् द्रव्यगुणकर्माख्यस्य त्रयस्य सतोऽवधारणार्थं प्रतिषेधवाचिना नञा व्यवच्छेद्यं सत्त्वमभ्युपगम्य स्वान्वयवृत्ति सत्त्वव्यतिरेकवृत्ति च निरूपितमन्वयव्यतिरेकाभ्यां **निष्कलं** परिपूर्णं स्वरूपतोऽवधारितं च **सत्त्वं यस्य तद् द्रव्यादि** द्रव्यान्तरादिसद्व्यतिरेकेण स्वान्वयेन च यथा व्याख्यातं *सिध्यत्येव । तस्मात् **तदर्थं** द्रव्याद्यवधारणार्थ**मभिधानप्रत्ययहेतुनान्येन सत्तादिना नार्थः** न प्रयोजनं **स्वत एव सिद्धप्रयोजनत्वा**दित्युक्तोपसंहारः । § 1363

अत्र पृथक् साधनम् --**तत्रे**त्यादि । **द्रव्यादिव्यतिरिक्तस्य सदभिधानप्रत्ययहे**तोर्द्रव्यादाव**नवकाशः, स्वत एव सिद्धाभिधानप्रत्ययत्वात्,** यत्र स्वत एव सिद्धाभिधानप्रत्ययत्वं तत्रान्यस्य सदभिधानप्रत्ययहेतोर्नावकाशोऽस्ति यथा **सत्तासमवायविशे**षेष्विति । अथवाश्रयाश्रयिणोः पारतन्त्र्यस्वातन्त्र्यव्याख्याकुसृतिप्रत्युत्थानं मा कार्षीद् **वैशे**षिक इति निराशङ्क**माकाशादिव**दिति दृष्टान्तः, दिक्कालाकाशद्रव्याणि हि दिक्कालादिमुख्यसामान्यशून्यानीति । अथवा प्रस्तुतोदाहरणमेव दृष्टान्तः --**स्वगते**त्यादि ।

473/mj अन्वय

* * *

भिधानप्रत्ययो देवदत्तः पुत्र एव सून्वनपेक्षपुत्रत्वः, एवमत्र स्वभावसिद्धेरेव द्रव्यादित्वं नेतरसत्त्वात् । एवं सत्तानिराकरणं कृतम् । द्रव्यत्वाद्यप्येवमेव निराकार्यं व्याख्यातवत् ।

---

११ न्य] °न्यवदेव तत्nayacakra-ms-ya । °न्यवतत् nayacakra-ms-bhā ॥
१२ ना] तातोऽन्यद्nayacakra-ms-bhā । ततोऽन्यद् nayacakra-ms-ya ॥
१५ र्था] व्यर्थाःnayacakra-ms-bhānayacakra-ms-vi ॥
१९ व] °च्छेद्यां सत्वामभ्यु प्र° ॥
१९ स] °सत्वा° प्र° ॥
१९ व्य] °व्यतिरेकवृत्ति च निरूपितमन्वयव्यतिरेकवृत्ति च निरूपितमन्वय° प्र° ॥
२२ *] सिध्यतेवnayacakra-ms-bhā । सिध्यते च nayacakra-ms-ya ॥
२६ व्यादा] °दानवकाशः प्र° ॥
१ द्र] °द्रव्याणि रि दिक्कालादिमुख्य° nayacakra-ms-ya । °द्रव्याणि दि मुख्य° nayacakra-ms-bhā । °द्रव्याणि हि मुख्यसामान्यशून्यानीति ? ॥

एतेन सत्सत्करत्वपक्षेऽपि साक्षात्कृतमेव वैयर्थ्यम् । यस्तु (?')अनवस्था न, दृष्टान्तात् । तद्यथा--वाचा गमिते विनियोगार्थो न कृत इति तदर्थं प्रदीपप्रकाश उपादीयते, तस्योपादानं न व्यर्थम्, न च पुनस्तस्यान्यः प्रकाशः प्रकाशनार्थं उपादीयते, तथेहापि द्रव्यादिकार्येण उपभोगक्रिया नास्ति इत्यसत् अशक्तसदसत्त्वात्

* * *

व्यतिरेकयुक्तावभिधानप्रत्ययावश्वरथवदन्वयव्यतिरेकाभिधानप्रत्ययौ, तौ स्वगतेन पुत्रत्वेन संसिद्धौ यस्मिन् सोऽयं **स्वगतपुत्रत्वसंसिद्धान्वयव्यतिरेकाभिधानप्रत्ययो देवदत्तः पुत्र एव सून्वनपेक्षपुत्रत्वः** स्वसूनुमनपेक्ष्य व्याख्यातविधिना पुरुषान्तरस्य पितुः पुत्र एव सन्नपुत्रः स्वसून्वभावादिति यथा पुत्र एवापुत्र इत्युच्यते । इत्येवं दृष्टान्तार्थं भावयित्वा दार्ष्टान्तिकमुपनयति **--अत्र स्वभावसिद्धे**रित्यादि । स्वभावसद्भावसिद्धेरेव **द्रव्यादित्वम्, नेतरसत्त्वात्** न सम्बन्धिसत्त्वादिति, विचारफलं निगम्यते **--एवं** सदविशेषविचारद्वारेण **सत्ताया निराकरणं कृतम्** । § 1364

**द्रव्यत्वाद्यप्येवमेव निराकार्यम्,** द्रव्याद्यप्येवमेव द्रव्यत्वादिनिरपेक्षमित्यतिदिशति । द्रव्यं गुणः कर्म इत्यत्रापि द्रव्यत्वगुणत्व[कर्मत्व]सामान्यविशेषनिरपेक्षावभिधानप्रत्ययौ स्वत एव द्रव्यादीनां सुलभौ **व्याख्यातव**दिति, तत्रापि तुल्यप्रचर्चत्वात् । § 1365

**एतेन सत्सत्करत्वपक्षेऽपि साक्षात्कृतमेव वैयर्थ्यम्,** नास्य सदित्यसत्पक्षे यथाभिहितं विचारावसाने **--नासतः सत्करी सत्ता सद्द्रव्यादिव्यतिरिक्तस्य सत्ताद्रव्यत्वादेस्तत्सदभिधानप्रत्ययहेतोरनवकाशः स्वत एव सिद्धाभिधानप्रत्ययत्वात् सत्तादिव**दिति तथा तदेव सतां द्रव्यादीनां सत्करी सत्ता इत्यत्रापीति प्रत्यक्षीकृतमस्माकं त्वयैव वैयर्थ्यम्, सत्तासम्बन्धस्य स्वत एव सिद्धत्वादिति । § 1366

दनवस्था । **तस्यापि** मतिज्ञानोपयोगादारभ्य यावत् केवलोपयोगस्य **बाह्योपयोग्यद्रव्योपयोगप्रकाश्यत्वादनवस्था** । सोऽपि हि

**यस्त्वनवस्था** नेत्यादि याव**दर्थवत्प्रकाशनावस्थाव**दिति पूर्वपक्षप्रत्युच्चारणम् । अनवस्थादोषपरिहारार्थः प्रतिसमाधानविकल्पः **--नैष** दोषो **दृष्टान्ता**दित्यादि, दृष्टान्त**स्तद्यथा--वाचा गमिते** प्रकाशिते घट इति ज्ञानमात्राधाने कृते तावता जलाद्याहरणादि**क्रियाविनियोगार्थो न कृत इति तदर्थं** घटग्रहणधारणाद्यर्थं च **प्रदीपप्रकाश उपादीयते, तस्य** वाक्प्रकाशादन्यप्रकारस्य प्रदीपप्रकाशस्यो**पादानं न व्यर्थं न च पुनस्तस्यान्यः** प्रदीपोऽन्यो वा **प्रकाशः प्र-**

१५ सू ] सूचनपेक्ष° प्र° ॥
१५ स्व ] स्वसृतुमन° प्र° ॥
१६ स्व ]
स्वशूत्वभा°nayacakra-ms-bhā ।
स्वशून्यत्वभा° nayacakra-ms-ya ॥
१७ दृष्टान्ता ]
°न्तार्थभाव°nayacakra-ms-bhā ।
°न्तार्थाद्भाव° nayacakra-ms-ya ।
दृष्टान्तार्थान् भावयित्वा ? ॥
२६ स ] दृश्यतां पृ° ४७२ पं° ५ ॥
२९ स ] सत्वा°nayacakra-ms-bhā ॥

**काशनार्थ उपादीयते ।** तस्मात् तत्रैव व्यवस्थितत्वाद् नानवस्थादोषोऽस्तीत्येष दृष्टान्तः । उपनयः --**तथेहापि द्रव्यादिकार्येण** वस्तूद्भूतिप्रकाशमात्रेण स्वकारणोत्पादितमात्रेण वाक्प्रकाशितघटस्थानीयेन द्रव्यादेः कार्यस्योप**भोगक्रिया नास्ति,** पुरुषोपभोगार्थाश्च सर्वाः क्रिया **इत्यतः** कारणा**दसत्, अशक्तसदसत्त्वात्** अशक्तस्य स्वकार्यकरणे सत एवासत्त्वात्, 474/mj

* * *

क्षुत्प्रतीकाराशक्तासद्व्रीहिवत्, विचित्रोपभोगसिद्ध्यर्थं भिन्नेषु अभिन्नाभिधानप्रत्ययव्यवहारसिद्ध्यर्थं च सत्त्वविशेषणेन सम्बन्धः अर्थवत्प्रकाशनावस्थावत्(?') इति प्रतिसमाधानविकल्पः सोऽप्यनुपपन्नोऽवस्थादृष्टान्तासत्त्वात् अनेकान्तत्वात् । वाक्प्रकाशप्रकाशकप्रदीपवत् प्रदीपप्रकाशस्यापि इन्द्रियप्रकाश्यत्वात् तस्यापि बहुप्रभेदोपकरणप्रकाश्यत्वात् तेषामपि लब्धिप्रकाश्यत्वात् लब्धेरप्युपयोगफलाया-

* * *

अङ्कुरावस्थायामिव व्रीहेरकठिनावस्थायामिव वा **क्षुत्प्रतीकाराशक्तासद्व्रीहिवत् । विचित्रोपभोगसिद्ध्यर्थं** घटपटकटादिभिः परस्परव्यतिरिक्तैर्जलधारणत्वक्त्राणप्रच्छादनाद्युपभोगसिद्ध्यर्थं **भिन्नेषु** घटादिषु देशकालादिभिः समानजातीयेषु **अभिन्नाभिधानप्रत्ययव्यवहारसिद्ध्यर्थं च** सामान्यान्वितेषु **सत्त्वविशेषणेन** प्रकारान्तरेण **संबन्धः, अर्थवत** एव वाक्प्रकाशस्य पुनः **प्रकाशने** प्रदीपप्रकाशस्येव वाक्प्रकाशितघटविषयस्या**वस्थाव**दनवस्थादोषाभाववच्चेति योऽयं **प्रतिसमाधानविकल्पः सोऽप्यनुपपन्न** इत्यादि तदुत्तरं यावत् **प्रदीपादिप्रकाशनव**दिति । कस्मादनुपपन्न इति चेत्, उच्यते --**अवस्थादृष्टान्तासत्त्वात्,** असावेव प्रदीपदृष्टान्तः अवस्थावान् इत्यभिमतोऽवस्थावान् न भवति, **अनेकान्तत्वात्,** एकान्तरूपो हि निश्चितोऽर्थो दृष्टान्तः - /ms स्यात् स्यात् । त्वदुद्भाहितस्यार्थस्य तु न हि व्यर्थत्वैकान्तानुगतं प्रकाशनम्, यदि प्रदीपस्य प्रकाशान्तरेण प्रकाशनं व्यर्थं स्यात् तत्रैवावस्था स्यात्, सा तु नास्ति । यस्माद् ***वाक्प्रकाशप्रकाशकप्रदीपवत् प्रदीपप्रकाशस्यापि इन्द्रिय-**

---

९ भो ] °पयोगक्रि° प्र° ॥
१० भोगा ] °गार्थश्च प्र° । °गार्थं च ? ॥
११ क ] °कारणे प्र° ॥
१३ स ] दृश्यतां पृ° ३३२-- २ ॥
१८ स्था ] °स्थामिव प्र° ॥
२० देश ] देश-कालाकालादिभिःnayacakra-ms-ya । अत्र देशकालाकारादिभिः इत्यपि पाठः स्यात्, दृश्यतां पृ° ४६८ पं° १७ ॥
२१ सि ] °सिद्ध्यर्थं स्व-सामा°nayacakra-ms-bhānayacakra-ms-yi । °सिद्ध्यर्थ स्वसामा° nayacakra-ms-ḍe । °सिद्ध्यर्थे स्वसामा° nayacakra-ms-pā nayacakra-ms-raṃ ॥
१ अनेका ] °कान्तात्nayacakra-ms-bhā ॥
२ स्या ] अत्र स्यात् इत्येकं पदमपि निर्वहेत् ॥
४ * ] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
४ प्र ] प्रदीपवत्प्रकाश-स्यापिnayacakra-ms-bhā । प्रकाशस्यापि ? प्रदीपस्यापि ? ॥

**प्रकाश्यत्वात्,** इन्द्रियेण हि प्रदीपोऽपि प्रकाश्यते वाक्प्रकाशप्रकाशकप्रदीपवदिन्द्रियेणानुपलब्धस्यागृहीतस्य घटादेर्विचित्रोपभोगासिद्धेः । किमिन्द्रियेऽवस्था स्यात् ? नेत्युच्यते, **तस्यापि बहुप्रभेदोपकरणप्रकाश्यत्वात्,** तदपि
475/mj हीन्द्रियं निर्वृत्त्युपकरण योग्यात्मोपात्तेन्द्रियपर्याप्त्याख्यपुद्गलद्रव्यप्रकाश्य-

---

५ काश ]
°शनप्रदी°nayacakra-ms-bhā ॥
८ हीन्द्रियं ] निर्वृत्त्युपकरणेन्द्रियस्वरूपविषये कश्चन मतभेदः शास्त्रेष्ववलोक्यते । तथाहि --नयचक्रवृत्तिकारमतेन तत्स्वरूपं प्राग् वर्णितमेव, दृश्यतां पृ° १८३ पं° ११--२०, पृ° ३७२ पं° ११--२१ । **द्विविधानि**तत्त्वार्थसू° २ । १६, द्विविधानीन्द्रियाणि भवन्ति--द्रव्येन्द्रियाणि भावेन्द्रियाणि च । **निर्वृत्त्युपकरणे द्रव्येन्द्रियम्** तत्त्वार्थसू° २ । १७, तत्र निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम् । निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि, कर्मविशेषसंस्कृताः शरीरप्रदेशाः, निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः । उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्य अनुपघातानुग्रहाभ्यामुपकारीति । इति वाचकवरश्री+उमास्वातिप्रणीते **तत्त्वार्थभाष्ये** । अस्य **सिद्धसेनगणिकृता** व्याख्या--(?")द्विविधानीन्द्रियाणि भवन्ति सामान्यतः द्रव्यमयानि द्रव्यात्मकानि द्रव्येन्द्रियाणि, भावेन्द्रियाणि तु भावात्मकानि आत्मपरिणतिरूपाणीति । अत्र च पुद्गलद्रव्यमेवानन्तप्रदेशस्कन्धमात्मप्रयोगापेक्षमायतते निर्वृत्त्युपकरणरूपतया, सर्वाणीन्द्रियाणि अनन्तप्रदेशानि असङ्ख्येयात्मप्रदेशाधिष्ठितानि च द्रव्यात्मकानि भवन्ति । इतरत्र द्वये आत्मपरिणामो भावः प्रयत्नमातिष्ठते इति । उक्तमिन्द्रियं द्रव्यभावभेदतो द्विविधम्, अधुना स्वरूपतो निरूपयितुकाम आह, तत्र **निर्वृत्त्युपकरणे द्रव्येन्द्रियम्** तत्त्वार्थसू° २ । १७, तत्र इत्यनेन भाष्यकारः सूत्रं सम्बन्धयति, तत्र द्वितये द्रव्येन्द्रियं तावन्निर्धार्यते स्वरूपभेदाभ्याम् । निर्वर्तनं निर्वृत्तिः प्रतिविशिष्टसंस्थानोत्पादः । उपक्रियतेऽनेनेति उपकरणम् । निर्वृत्तिरेवेन्द्रियं निर्वृत्तीन्द्रियम् । उपकरणेन्द्रियमप्येवम् । उभयमेतत् पुद्गलपरिणामरूपमपि सत् इन्द्रियव्यपदेशमश्नुते भावेन्द्रियोपयोगकारणत्वात्, यस्माद्धि तत्साचिव्यं भावस्यैवोल्लिङ्गने समायाति । आत्मभावपरिणामस्य भाविनो यत् सहायतया क्षमं द्रव्यं तदिह द्रव्येन्द्रियं प्रस्थदारुवदेषितव्यम् । तत्र निर्वृत्त्युपकरणयोः स्वरूपमाविष्करोति **भाष्येणैव**--निर्वृत्तिरङ्गोपाङ्गनामेत्यादिना । निर्माणनाम नामकर्मान्तर्गतः कर्मभेदो वर्धकिस्थानीयः कर्णशष्कुल्याद्यवयवसन्निवेशविशेषरचनायामाहितनैपुणः, तथा औदारिकादिशरीरत्रयाङ्गोपाङ्गनामकर्मभेदो यदुदयादङ्गानि उपाङ्गानि च निष्पद्यन्ते शिरोङ्गुल्यादीनि, एतत् कर्मद्वयमुभयरूपद्रव्येन्द्रियप्रसाधनाय यतते । **भाष्यभावना** चैवं कार्या--निर्वृत्तिः किंरूपा ? इत्यत आह--अङ्गेति । अङ्गोपाङ्गनाम्ना प्रतिविशिष्टेन कर्मभेदेन निर्वर्तितानि जनितानि घटितानि इन्द्रियद्वाराणि इन्द्रियविवराणि । इन्द्रियशब्देन चात्र भावेन्द्रियमुपयोगरूपं विवक्षितम्, तस्य इन्द्रियस्य द्वाराणि अवधानप्रदानमार्गाश्चित्राः । शष्कुल्यादिरूपा बहिरुपलभ्यमानाकारा निर्वृत्तिरेका, अपरा तु अभ्यन्तरनिर्वृत्तिः । नानाकारं कायेन्द्रियमसङ्ख्येयभेदत्वात्, अस्य चान्तर्बहिर्भेदो निर्वृत्तेर्न कश्चित् प्रायः । प्रदीर्घत्र्यस्रसंस्थितं कर्णाटकायुधं क्षुरप्रः, तदाकारं रसनेन्द्रियम् । अतिमुक्तकपुष्पदलचन्द्रकाकारं किञ्चित्सकेसरवृत्ताकारमध्यविनतं घ्राणेन्द्रियम् । किञ्चित्समुन्नतमध्यपरिमण्डलाकारं धान्यमसूरवच्चक्षुरिन्द्रियम् । पाथेयभाण्डकयवनालिकाकारं श्रोत्रेन्द्रियं नालिककुसुमाकृति चावसेयम् । तत्राद्यं स्वकायपरीमाणं द्रव्यमनश्च, शेषाणि अङ्गुलासङ्ख्येयभागप्रमाणानि सर्वजीवानाम् । तथा चागमः--फासिंदि+ए णं भंते ! किंसंठि+ए पण्णत्ते ? गोयमा ! नाणासंठाणसंठि+ए । जिब्भिंदि+ए णं भंते ! किंसंठि+ए पण्णत्ते ? गोयमा !

खुरप्पसंठि+ए । घाणिंदि+ए णं भंते ! किंसंठि+ए पण्णत्ते ? गोयमा ! अतिमुत्तयचंदकसंठि+ए पण्णत्ते । चक्खुरिंदि+ए णं भंते ! किंसंठि+ए पण्णत्ते ? गोयमा ! मसूरयचंदसंठि+ए पण्णत्ते । सो+इंदि+ए णं भंते ! किंसंठि+ए पण्णत्ते ? गोयमा ! कलंबुयापुप्फसंठि+ए पण्णत्ते प्रज्ञापनासू° १९१, अभ्यन्तरां निर्वृत्तिमङ्गीकृत्य सर्वाण्यमूनि सूत्राण्यधीतानि । बाह्या पुनर्निर्वृत्तिश्चित्राकारत्वान्नोपनिबद्धुं शक्या, यथा मनुष्यस्य श्रोत्रं भ्रूसमं नेत्रयोरुभयपार्श्वतः, अश्वस्य मस्तके नेत्रयोरुपरिष्टात् तीक्ष्णाग्रम्, इत्यादिजातिभेदाद् बहुविधाकारा । इममेव चातिक्रान्तभाष्यार्थं पर्यायान्तरेण स्पष्टयति भाष्यकारः--कर्मविशेषसंस्कृताः शरीरप्रदेशाः । अथवा अङ्गोपाङ्गनामैवोपात्तमतीतभाष्ये, न तु निर्माणकर्म, तदुपादानायेदमुच्यते—कर्मविशेषेत्यादि । कर्मविशेषो नामकर्म, तस्यापि विशेषः अङ्गोपाङ्गनाम निर्माणकर्म च, आभ्यां कर्मविशेषाभ्यां संस्कृता विशिष्टावयवरचनया निष्पादिता निर्वर्तिताः औदारिकादिशरीराणां त्रयाणां प्रदेशाः प्रतिविशिष्टा देशाः कर्णशष्कुल्यादयः प्रदेशाः । कर्मविशेषाभिधानश्रवणादतिसम्प्रमुग्ध-बुद्धेर्व्यामोहस्तदवस्थ एव चेतसीत्यतस्तदवबोधार्थं भूयोऽप्याह--निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः । कर्मविशेषं नामग्राहमाचष्टे, निर्माणनाम च अङ्गोपाङ्गं च निर्माणनामाङ्गोपाङ्गे, मध्यव्यवस्थितो नामशब्द उभयं विशेष्यतयाक्षिपति, ते कर्मणी प्रत्ययः कारणं निमित्तं यस्या निर्वृत्तेः सा निर्माणनामाङ्गोपाङ्गप्रत्यया, मूलगुणनिर्वर्तना उत्तरगुणनिर्वर्तनापेक्षयोच्यते । उत्तरगुणनिर्वर्तना हि श्रवणयोर्वेधः प्रलम्बतापादनम्, चक्षुर्नासिकयोरञ्जननस्याभ्यामुपस्कारः, तथा भेषजप्रदानाज्जिह्वाया जाड्यापनयः, स्पर्शनस्य विविधचूर्णगन्धवासप्रघ-र्षादिभिर्विमलत्वकरणम् । एवंविधानेकविशेषनिरपेक्षा यथोत्पन्नवर्तिनी औदारिकादिप्रायोग्यद्रव्यवर्गणा मूलकारणव्यवस्थितगुणनिर्वर्तनोच्यते । इतिशब्द एवंशब्दार्थः, एवमेषोऽर्थः प्रवचनविद्भिराख्यात इति । सम्प्रति उपकरणेन्द्रियस्वरूपमाख्यातुमाह--उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्य अनुपघातानुग्रहाभ्यामुपकारीति । निर्वृत्तौ सत्यां कृपाणस्थानीयायामुपकरणेन्द्रियमव-श्यमपेक्षितव्यम्, तच्च स्वविषयग्रहणशक्तियुक्तं खड्गस्येव धारा छेदनसमर्था, तच्छक्तिरूपमिन्द्रियान्तरं निर्वृत्तौ सत्यामपि शक्त्युपघातैर्विषयं न गृह्णाति । तस्मान्निर्वृत्ते श्रवणादिसंज्ञके द्रव्येन्द्रिये तद्भावादात्मनोऽनुपघातानुग्रहाभ्यां यदुपकारि तदुपकरणेन्द्रियं भवति । तच्च बहिर्वर्ति अन्तर्वर्ति च, निर्वृत्तिद्रव्येन्द्रियापेक्षया अस्यापि द्वैविध्यमावेद्यते । यत्र निर्वृत्तिद्रव्येन्द्रियं तत्रोपकरणेन्द्रियमपि न भिन्नदेशवर्ति तस्येति कथयति तस्याः स्वविषयग्रहणशक्तेर्निर्वृत्तिमध्यवर्तिनीत्वात् । एतदेव स्फुटयति--निर्वर्तितस्य निष्पादितस्य स्वावयवविभागेन यदनुपहत्या अनुग्रहेण चोपकरोति ग्रहणमात्मनः स्वच्छतरपुद्गलजालनिर्मापितं तदुपकरणेन्द्रियमध्यवस्यन्ति विद्वांसः । आगमे तु नास्ति कश्चिदन्तर्बहिर्भेद उपकरणस्येत्याचार्यस्यैव कुतोऽपि सम्प्रदाय इति ।...निर्वृत्तेरादावभिधा जन्मक्रमप्रतिपादनार्थम्, तद्भावे ह्युपकरणसद्भावाच्छस्त्रशक्तिवदिति ।(?") इति **सिद्धसेनगणिकृतायां तत्त्वार्थभाष्यव्याख्यायाम्** । अथ एतदनुसारिणी हरिभद्रसूरिकृता व्याख्या--अनन्तरोक्तानि पञ्चापीन्द्रियाणि द्विविधानि भवन्तीति सूत्रसमुदायार्थः । अवयवार्थं त्वाह--द्विविधानीत्यादिना ।... ...निर्वृत्त्युपकरणे पुद्गलमये द्रव्येन्द्रियमिति सूत्रसमुदायार्थः । अवयवार्थं त्वाह--निर्वृत्तीन्द्रियमित्यादिना । निर्वर्तनं निर्वृत्तिः प्रतिविशिष्टसंस्थानोत्पत्तिः, सैवेन्द्रियं निर्वृत्तीन्द्रियम् । उपक्रियतेऽनेनेत्युपकरणम्, एतदेवेन्द्रियमुपकरणेन्द्रियम् । चः समुच्चये, द्विविधमेतद् द्रव्येन्द्रियं भावेन्द्रियोपकरणत्वाद् द्रव्यात्मकत्वाच्चेति । निर्वृत्तेर्लक्षणमाह—निर्वृत्तिरित्यादिना ।... ...इहाङ्गोपाङ्गनाम औदारिकादिशरीरत्रयाङ्गोपाङ्गनिर्वर्तकं यदुदयादङ्गोपाङ्गान्युत्पद्यन्ते शिरोङ्गुल्यादीनि,
n476/mj निर्माणनाम चात्र वर्धकिस्थानीयं कर्णशष्कुल्याद्यवयवसनिवेशविशेषरच-नायामाहितनैपुण्यमिति **आचार्याः** । तदित्थमङ्गोपाङ्गनाम्ना प्रतिविशिष्टेन कर्मणा

476/mj मञ्जन-पादाभ्यङ्ग-नस्य-पथ्यभोजन-प्रदीपादिबाह्यद्रव्यप्रकाश्यं ज्ञानात्मात्मप्र-
काश्यं च । तान्यपि हि निर्वृत्त्युपकरणतद्योग्यपर्याप्तिद्रव्याण्यञ्जनादिबाह्य-
द्रव्याणि चात्मन्युदितक्षीणोपशान्ताङ्गोपाङ्गनामकर्मोदयज्ञानदर्शनावरणवीर्यान्त-
रायक्षयोपशमापेक्षात्मलब्धिप्रकाश्यानि, तस्मात् **तेषामपि लब्धिप्रकाश्य-** 477/mj
**त्वा**दनवस्था । सापि लब्धिरात्मनः प्रणिधानाख्येन वीर्येणापनीते ज्ञानावर-

---

निर्वर्तितानि जनितानि...इन्द्रियद्वाराणि इन्द्रियविवराणि भावेन्द्रियावधानद्वाराणीति भावः । एतानि च नानासंस्थानादीनि, तथा चागमः--फासिंदि+ए णं भंते ! किंसठि+ए पण्णत्ते ?... ... ...कलंबु+आपुप्फसंठि+ए पण्णत्ते प्रज्ञापनासू° १९१, अभ्यन्तरां निर्वृत्तिमङ्गीकृत्य सर्वाण्यमूनि सूत्राण्यधीतानि, बाह्या पुनर्निर्वृत्तिश्चित्राकारत्वान्नोपनिबद्धुं शक्या अश्वमनुष्यादीनां बाह्यश्रोत्रादिभेदादिति । इममेवातिक्रान्तभाष्यार्थं पर्यायान्तरेण स्पष्टयन्नाह--कर्मेत्यादि । कर्मविशेषसंस्कृता इति, कर्मविशेषो नामकर्म, तस्यापि अङ्गोपाङ्गनाम निर्माणकर्म च, आभ्यां संस्कृता विशिष्टावयवरचनया निर्वर्तिताः शरीरप्रदेशाः औदारिकादीनां त्रयाणां प्रतिविशिष्टा देशाः कर्णशष्कुल्यादय इति । मुग्धमतिमोहव्यपोहायाह--निर्माणेत्यादि । निर्माणनाम च अङ्गोपाङ्गं च निर्माणनामाङ्गोपाङ्गे, ते प्रत्ययः कारणं यस्याः सा तथाविधा मूलगुणनिर्वर्तनेत्यर्थः, निगमनमेतत् नोत्तरगुणनिर्वर्तना, सा हि कर्णयोः वेधप्रलम्बतापादनं चक्षुर्नासिकयोरञ्जननस्याभ्यामुपकारः ब्राह्म्यादियोगाज्जिह्वायाः स्पर्शस्य गन्धादिभिर्विमलत्वकरणमिति । इत्यर्थ इत्येवमर्थोऽस्याः प्रवचनज्ञैराख्यात इति व्याख्याता निर्वृत्तिः । अधुनोपकरणमाह--उपकरणं बाह्यमभ्यन्तरं च । उपक्रियतेऽनेनेत्युपकरणम्, बाह्यकरणं शष्कुल्यादीति । तत्र अभ्यन्तरं खड्गस्थानीयाया निर्वृत्तेस्तद्धाराशक्तिकल्पं स्वच्छतरपुद्गलजालनिष्पादितं तदभिन्नदेशमेवेति, यदधिकृत्याह--निर्वर्तितस्येत्यादि, निर्वर्तितस्य निष्पादितस्य स्वावयवविभागेन निर्वृत्तीन्द्रियस्येति गम्यते, अनुपघातानुग्रहाभ्यामुपकारीति, यदनुपहत्या उपग्रहेण चोपकरोति तदुपकरणेन्द्रियमिति । तथाहि— निर्वृत्तौ सत्यामपि शक्त्युपघाते न विषयग्रहः, बाह्योपकरणघाते च नियमतः शक्त्युपघात इति तत्प्राधान्यतो बाह्यमभ्यन्तरं चेत्याह । इति हरिभद्रसूरिविरचितायां तत्त्वार्थभाष्यव्याख्यायाम् । इष्टानिष्टविषयोपलब्धाब्ध्य ?र्थानि भोक्तुरात्मनो यान्यमूनीन्द्रियाणि तेषामुक्तसामर्थ्यविशेषादुपनिपतितभेदानां प्रत्येकं भेदप्रतिपत्त्यर्थमाह **--द्विविधानि** तत्त्वार्थसू° २ । १६, विधशब्दस्य प्रकारवाचिनो ग्रहणम् । अयं विधशब्दः प्रकारवाची गृह्यते, विध-युक्त-गत-प्रकाराः समानार्था इति । द्वौ विधौ येषां तानि द्विविधानि द्विप्रकाराणीत्यर्थः । कौ च द्वौ प्रकारौ ? द्रव्येन्द्रियं भावेन्द्रियमिति । तत्र द्रव्येन्द्रियस्वरूपविज्ञानार्थमाह **--निर्वृत्त्युपकरणे द्रव्येन्द्रियम्** तत्त्वार्थसू° २ । १७, निर्वर्त्यत इति निर्वृत्तिः । कर्मणा या निर्वर्त्यते निष्पाद्यते सा निर्वृत्तिरित्युपदिश्यते । सा द्वेधा बाह्याभ्यन्तरभेदात् । सा निर्वृत्तिर्द्वेधा, कुतः ? बाह्याभ्यन्तरभेदात् । तत्र विशुद्धात्मप्रदेशवृत्तिराभ्यन्तरा । उत्सेध ङ्गुलस्यासङ्ख्येभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतच- क्षुरादीन्द्रियमानावमानावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः । तत्र नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या । तेषु आत्मप्रदेशेषु इन्द्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः स बाह्या निर्वृत्तिः । उपक्रियतेऽनेनेत्युपकरणम् । येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम् । तद् द्विविधं पूर्ववत् । तदुपकरण द्विविधं पूर्ववद् बाह्याभ्यन्तरभेदात् । तत्राभ्यन्तरं शुक्लकृष्णमण्डलम्, बाह्यमक्षिपत्रपक्ष्मद्वयादि । एवं शेषेष्वपीन्द्रियेषु ज्ञेयम् । इति अकलङ्कदेवविरचिते तत्त्वार्थराजवार्तिके ॥

**१ ण] °णात- द्यो°**nayacakra-ms-bhānayacakra-ms-pānayacakr **। °णात्तद्यो°** nayacakra-ms-vi ॥

**३ ब्धि] लब्ध्युपयोगौ**

**भावेन्द्रियम्**तत्त्वार्थसू॰ २ । १८, लब्धिरुपयोगस्तु भावेन्द्रियं भवति । लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीयकर्मक्षयोपशमजनिता च इन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवति । सा पञ्चविधा, तद्यथा-स्पर्शनेन्द्रियलब्धिः रसनेन्द्रियलब्धिः घ्राणेन्द्रियलब्धिः चक्षुरिन्द्रियलब्धिः श्रोत्रेन्द्रियलब्धिरिति । **उपयोगः स्पर्शादिषु** तत्त्वार्थसू॰ २ । १९, स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः । उक्तमेतत् उपयोगो लक्षणम् तत्त्वार्थसू॰ २ । ८ । उपयोगः प्रणिधानम्, आयोगस्तद्भावः परिणाम इत्यर्थः । एषां च सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः, सत्यां च लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्ति निर्वृत्त्यादीनामेकतराभावेऽपि विषयालोचनं न भवति । इति वाचकवरश्री+उमास्वातिप्रणीते **तत्त्वार्थभाष्ये** । अस्य **सिद्धसेनगणिकृता** व्याख्या--(?")लब्ध्युपयोगौ भावेन्द्रियम् । लब्धिः प्रतिस्वमिन्द्रियावरणक्षयोपशमः, स्वविषयव्यापारः प्रणिधानं वीर्यमुपयोगः, एतदुभयं भावेन्द्रियमात्मपरिणतिलक्षणं भवति । अत्राचार्यो लब्धिस्वरूपनिर्वर्णनायाह--लब्धिर्नामेत्यादि भाष्यम् । लाभो लब्धिः प्राप्तिः, नामशब्दो वाक्यालङ्कारार्थः, अथवा लब्धिरिति यदेतद् नाम अभिधानं तस्यायमर्थः--गतिजात्यादिनामकर्मजनिता लब्धिरुच्यते । गतिजाती आदिर्यस्य तद् गतिजात्यादि, गतिजात्यादि च तन्नामकर्म च गतिजात्यादिनामकर्म, तेन जनिता निर्वर्तिता मनुष्यगतिनामोदयाद् मनुष्यः तथा पञ्चेन्द्रियजातिनामोदयात् पञ्चेन्द्रिय इत्यतो मनुष्यत्वपञ्चेन्द्रियत्वादिलाभे प्रतिस्वं तदावरणकर्मक्षयोपशमो निर्वर्त्स्यते, तस्य क्षयोपशमस्य गतिजातिप्रभृतिनामकर्म कारणत्वान्निर्दिष्टमाचार्येण । आदिग्रहणेन यत् तदत्र नान्तरीयकं शरीरादिक्षयोपशम(437/m)लब्धेर्नामान्तःपाति तत् सकलमादीयते । अपरे तु आयुष्कमपि तदाश्रयत्वात् कारणमाचक्षते क्षयोपशमस्य । एवं विदूरवर्ति कारणमपदिश्याधुना प्रत्यासन्नतरकारणान्तरमाविष्करोति--तदावरणीयकर्मक्षयोपशमजनिता चेति । तस्याः खलु रूपादिग्रहणपरिणतेरावणीयमावारकमाच्छादकम्, बाहुलकात् कर्तरि व्युत्पत्तिः, तदावरणीयं च तत् कर्म च तदावरणीयकर्म, मतिज्ञानदर्शनावरणकर्मेत्यर्थः । तस्योभयस्य क्षयोपशमोऽभिहितलक्षणः, तज्जनिता च तन्निष्पादिता चेत्यर्थः । चशब्दः पूर्वकं कारणं समुच्चिनोति । ननु च क्षयोपशम एव लब्धिरुक्ता, तेन जनिता अन्या का भवेल्लब्धिः ? उच्यते--मतिज्ञानदर्शनावरणक्षयोपशमावस्थानिर्वृत्तौ यो ज्ञानसद्भावः क्षायोपशमिकः सोऽत्र लब्धिरुच्यते । कथं कृत्वोक्तं प्राक् क्षयोपशमो लब्धिरिति ? कारणे कार्योपचारमालम्ब्य नड्वलोदकं पादरोगवदित्यभिहितमतो न दोषाय । अन्ये पुनराहुः--अन्तरायकर्मक्षयोपशमापेक्षा इन्द्रियविषयोपभोयो ?गज्ञानशक्तिर्लब्धिरित्युच्यते । पुनः प्रत्यासन्नतमकारणनिर्दिदिक्षया भाष्यकृत् प्रतनुते ग्रन्थम्--इन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवतीति । इन्द्रियाण्याश्रयोऽवकाशो येषां कर्मणां तानीन्द्रियाश्रयाणि कर्माणि यावन्ति कानिचिद् निर्माणाङ्गोपाङ्गादीनि यैर्विना तानि न निष्पद्यन्ते तदुदयेन तद्विपाकेन निर्वृत्ता जनिता आत्मनो लब्धिरुद्भवति, स्वच्छे हि दर्पणतले प्रतिबिम्बोदयो भवति, न मलीमसे, तथा निर्माणाङ्गोपाङ्गादिभिरत्यन्तविमलतद्योग्यपुद्गलद्रव्यनिर्मापितानीन्द्रियाणि तस्याः क्षयोपशमलब्धेरतुलं बलमुपयच्छन्ति कारणतां बिभ्रतीति । सैषा लब्धिः कारणत्रयापेक्षा पञ्चप्रकारा भवति । तद्यथा--स्पर्शनेन्द्रियलब्धिरित्यादि भाष्यम् । यथा तत् पञ्चविधत्वं तस्यास्तथा दर्श्यते । स्पृष्टिः स्पर्शनम्, स्पर्शनं च तदिन्द्रियं चेति स्पर्शनेन्द्रियम्, एतदेव लब्धिः स्पर्शनेन्द्रियलब्धिः शीतोष्णादिस्पर्शपरिज्ञानसामर्थ्यमनभिव्यक्तमुपयोगात्मनेति यावत्, एवं जिह्वेन्द्रियादिलब्धयोऽपि वाच्याः । इति शब्दो लब्धेरियत्तामावेदयति । उक्ता लब्धिः, अधुनोपयोग उच्यते । यदि लब्धिनिर्वृत्त्युपकरणक्रमेणोपयोगस्ततोऽतीन्द्रियोपयोगाभावो निर्वृत्त्याद्यपेक्षाऽभावात् । एतदुक्तं भवति--अवध्यादीनामतीन्द्रियत्वादत्यन्ताभाव एव । विशेषो वाच्यः । उच्यते--न खलु सर्व उपयोगो लब्धिनिर्वृत्त्युपकरणेन्द्रियकृतः, किं तर्हि ? स एवैकस्त्रितयनिमित्त इत्यत आह--उपयोगः स्पर्शादिषु । स्पर्शरसगन्धवर्णशब्देषु ग्रहणरूपो व्यापार

णादिकालुष्ये जीवस्योपयोगलक्षणस्य प्रसादमात्रं ज्ञानमुपयोगस्तेन प्रकाश्य-ते

स्तत्प्रकाश्यत्वात् तस्यापि बाह्योपयोग्यद्रव्योपयोगप्रकाश्यत्वादनवस्था । तस्मात्

* * *

---

उपयोग गृह्यते स्पर्शनेन्द्रियादिनिमित्तः, नावध्याद्युपयोगः । अमुमेवार्थं स्पष्टयन् भाष्यकृदाह--स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः । स्पर्शादिविषयो मतिज्ञानव्यापारः प्रतिनियतविषयानुभवनमुपलम्भनमिति, अनेन शेषज्ञानव्युदासमादर्शयति, मतिज्ञानोपयोग एव लब्धिनिर्वृत्त्युपकरणापेक्षः प्रवर्तते न शेष इति । अत्रोपयोगसामान्यश्रुत्यपह्नुतावधान-श्चोदयति--स्पर्शादिविषयो य उपयोगः परिसमाप्तिव्यापार इत्युक्तम् । एतच्च परमाणुद्व्यणुकादिष्वपि दृष्टम् । परमाणुरपि हि सर्वात्मनोपयुज्यते द्व्यणुकादिस्कन्धपरिणामे, ततश्च सोऽप्युपयोगलक्षणं प्राप्नोतीत्यत आह भाष्यकारः--उक्तमेतदुपयोगो लक्षणमिति । अथवा भाष्यकारः स्वयमेवोपयोगविशेष-व्याख्यामातितनिषुराह--उक्तमेतदित्यादि । अभिहितमेतदुपयोगश्चैतन्यपरिणामो जीवस्य वैशेषिकं लक्षणम्, कः परमाण्वादिष्वत्र प्रसङ्गः ? अत्यन्तासम्बन्ध एव । तमेवोपयोगं पर्यायतः कथयति चैतन्यलक्षणं विशेषव्याख्यानदर्शनद्वारेण उपयोग इत्यादि । उपयोगस्तु द्विविधा चेतना--संविज्ञानलक्षणा अनुभवनलक्षणा च । तत्र घटाद्युपलब्धिः संविज्ञानलक्षणा, सुखदुःखादिसंवेदना अनुभवनलक्षणा । एतदुभयमुपयोगग्रहणाद् गृह्यते । प्रणिधानमवहितमनस्कत्वम् । एतदुत्कीर्तयति--स्पष्टो हि मतिज्ञानोपयोगो मानसोपयोगावश्यम्भावी द्रव्येन्द्रियाद्यपेक्षश्च, नावध्याद्युपयोगस्तथेति । आयोग इति स्वविषयमर्यादया स्पर्शादिभेदनिर्भासो ज्ञानोदयः स्पर्शनेन्द्रियादिजन्मा अभिधीयते । तद्भाव इति, उपयोगलाञ्छनो जन्तुः तच्छब्देनामृश्यते, तस्य भावः स्पर्शनादिद्वारजन्म ज्ञानमात्मनो भूतिरुद्भव इति यावत् । परिणामोऽप्यात्मन एव तद्भावलक्षणो नार्थान्तरप्रादुर्भावलक्षणः, स्पर्शनादिनिमित्तज्ञानस्यात्मपरिणतिरूप-त्वादित्यर्थः । सम्प्रति प्रवृत्तौ क्रमनियममापादयन्नाह--एषामित्यादि

भाष्यम् । एषामिति व्याख्यातस्वरूपाणां निर्वृत्त्युपकरणलब्ध्युपयोगेन्द्रिय णामयं प्रवृत्तिक्रमो यदुत निर्वृत्तिः प्राक्, तस्यां सत्यामुपकरणमुपयोगश्च भवति निर्वृत्त्याश्रयत्वादुपकरणस्य तद्द्वारजन्मत्वाच्चोपयोगस्य । एतच्च निर्वृत्त्यादित्रय लब्धीन्द्रियपूर्वकं दर्शयति--श्रोत्रादिक्षयोपशमलब्धौ सत्यां निर्वृत्तिः शष्कुल्यादिका भवति, यस्य तु लब्धिर्नास्त्येवंप्रकारा न खलु तस्य प्राणिनः शष्कुल्यादयोऽवयवा निर्वर्त्यन्ते, तस्माल्लब्ध्यादयश्चत्वारोऽपि समुदिताः शब्दादिविषयपरिच्छेदमापादयन्त इन्द्रियव्यपदेशमश्नुवते, एकेनाप्यवयवेन विकलमिन्द्रिय नोच्यते न च स्वविषयग्रहणसमर्थं भवति । अमुमर्थं भाष्येण दर्शयति--निर्वृत्त्यादीनामिति सूत्रोपन्यस्तक्रममङ्गीकृत्योच्यते । निर्वृत्त्युपकरणलब्ध्युपयोगानामन्यतमाभवे एकेनाप्यङ्गेन विकले सति समुदाये न जातुचित् शब्दादिविषयस्वरूपावबोधो भवत्यात्मनः विकलकरणत्वात्... ... ...। उपयोगः स्पर्शादिषु इति केचिद् भाषन्ते सूत्रमिदं न भवति, भाष्यमेव सूत्रीकृत्य केचिदधीयते । तदेतदयुक्तम्, अविगानेन सूत्रमध्येऽध्ययनात् प्रतिविशिष्टाचार्यसम्प्रदायगम्यत्वाद् विवरणाच्च निश्चीयते सूत्रतेति ।(?") इति **सिद्धसेनगणिविरचितायां तत्त्वार्थभाष्यवृत्तौ** । भावेन्द्रियमुच्यते --**लब्ध्युपयोगौ भावेन्द्रियम्** तत्त्वार्थसू॰ २ । १८,... ... ...इन्द्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः । यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते स ज्ञानावरणक्षयोपशमविशेषो लब्धिरिति विज्ञायते । तन्निमित्तः परिणामविशेष उपयोगः । तदुक्तं निमित्तं प्रतीत्य उत्पद्यमान आत्मनः परिणाम उपयोग इत्युपदिश्यते । तदेतदुभयं भावेन्द्रियमिति । इति **अकलङ्कदेवविरचिते** तत्त्वार्थराजवार्तिके ॥

काश्यत्वालब्धेरप्युपयोगफलायास्तत्र 478/mj

* * *

स्तत्प्रकाश्यत्वात् तस्यापि बाह्योपयोग्यद्रव्योपयोगप्रकाश्यत्वादनवस्था । तस्मात्

* * *

काश्यत्वा

*जं जं जे जे भावे परिणमति प+ओगवीससादव्वं । - /ms

---

११ *] दृश्यतां पृ° १८२, पृ° २१२ । एवं च नयविगप्पजायपरूवणं सोतूण वा+उलितो सीसो आह--भगवं ! किमेत्थ तत्तं ? अतः सिद्धांततो भण्णति--जं जं...॥ ७९४ ॥ तत्थ गुरू भणति सोम्ममुह ! जं जिणो जाणति तं तत्तं; किं पुण जिणो जाणति ? भण्णति--जं जं किंचि वत्थुं, जे जे के+इ भावे, तं तं वत्थुं ते ते सव्वे भावे व परिणमति, सव्वं वत्थुं सव्वभावपरिणामित्ति जं भणितं, तथाहि--एको भावः सर्वभावस्वभावः सर्वे भावाः सर्वभावस्वभावाः । एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः ॥ पयोगवीससत्ति, के+इ भावे प+ओगतो परिणमति के+इ वीससा, तं परिणामि वत्थुं तहा सव्वभावपरिणामिप्पगारेण जाणाति, जं पुण अपज्जवतं तत्थ जाणणा णत्थित्ति ।... ...सव्वणयसमूहमतं जिणमयंति ॥ इति **जिन**दासगणिमहत्तरविरचितायाम् **आवश्यकचूर्णौ** पृ° ४३५ । तथा चाधुना द्रव्यार्थिकपक्षसमर्थनार्थमाह **निर्युक्तिकारः**--जं जमित्यादि । यान् यान् भावान् घटादीन् परिणमति प्रयोगविस्रसाद्रव्यम्, तत्र प्रयोगेण घटादीन् विस्रसा अभ्रेन्द्रधनुरादीन्, द्रव्यमेव तदुत्प्रेक्षितपर्यायं कटककेयूराङ्गदादिव्यपदेशार्हसुवर्णवत् । अपि च, तत् तत् तथैव अन्वयप्रधानं पर्यायोपसर्जनं जानाति परिच्छिनत्ति जिनः । अपज्जवे जाणणा णत्थित्ति, अपर्याये निराकारे तथापरिणतिरहिते इत्यर्थः, जाणणा णत्थित्ति परिज्ञा नास्ति । न च ते पर्यायास्तत्र वस्तुसन्तः, द्रव्यमेव तथाकारवत् । ततश्च तदेव सत् केवलिनाप्यवगम्यमानत्वात् केवलस्वात्मवत् । इति **को**ट्याचार्यविरचितायां **विशेषावश्यकभाष्यव्याख्यायाम्**, पृ° ७५५ । अस्यैव द्रव्याथकनयमतस्य समर्थनार्थं **निर्युक्तिकारो**ऽप्याह--जं जं...॥ २६६७ ॥ प्रयोगश्चेतनावतो व्यापारः, विस्रसा स्वभावः, ताभ्यां निष्पन्नं द्रव्यं प्रयोगविस्रसाद्रव्यमुच्यते । तत्र प्रयोगनिष्पन्नं घटपटादि, विस्रसानिष्पन्नं त्वभ्रेन्द्रधनुरादि । तत्र प्रयोगविस्रसाद्रव्यं कर्तृ यान् यान् कृष्णरक्तपीतशुक्लत्वादीन् भावान् पर्यायान् परिणमति प्रतिपद्यते तं तहत्ति वीप्साप्रधानत्वाद् निर्देशस्य तत् तत् तथा तेन तेन रुपेण परिणमद् द्रव्यमेव जानाति जिनः केवली, न पुनस्तदतिरिक्तान् पर्यायानिति भावः, तेषामुत्प्रेक्षामात्रेणैव सत्त्वात्, न ह्युत्फणविफणकुण्डलिताद्यवस्थायामपि सर्पादिद्रव्यस्य स्वस्वरूपव्यतिरिक्तः कोऽपि पर्यायः संलक्ष्यते, सर्वावस्थासु अविचलितस्वरूपस्य सर्पादिद्रव्यस्यैव संलक्षणादिति । यदि पर्याया न विद्यन्ते तर्हि कथमुच्यते जे जे भावे परिणम+इ ? इत्याशङ्क्याह--अपज्जवे जाणणा नत्थित्ति, अपर्याये पर्यायरहिते वस्तुनि केवल्यादीनां परिज्ञा नास्तीति मन्यामहे, केवलमुत्प्रेक्षामात्रेणैव ते पर्यायाः, न पुनर्द्रव्यव्यतिरेकिणः केचनापि वास्तवास्ते विद्यन्ते । अतो द्रव्यमेव परमार्थसत् इति **निर्युक्तिगाथार्थः** । इति मलधारिश्रीहेमचन्द्रसूरिविरचितायां **विशेषावश्यकभाष्यव्याख्यायाम्**, पृ° १०६० । द्रव्यार्थिक आह--जं जं...॥ ७९४ ॥ यत् यत् आत्ममृदादिकं वस्तु यान् यान् भावान् पर्यायान् विज्ञानघटादीन् परिणमति तदात्वेन प्रतिपद्यते प्रयोगतो विस्रसातो वा । तत्र प्रयोगश्चेतनावतो व्यापारः, विस्रसा स्वभावः । तत् सर्वमुत्प्रेक्षितपर्यायं द्रव्यमेव

तं तह जाणाति जिणो अपज्जवे जाणणा णत्थि ॥ आवनि° ७९४§ 1369

इति बाह्यवस्तुपरिणामानुरूपोप्योगात् तत्प्रकाश्य उपयोगोऽपीत्यतः परं पुनरुक्तं भवति प्रकाश्यप्रकाशक

* * *

प्रकाश्यः प्रकाशः अतद्रूपभावाधिगम्यत्वात् । सत्तापि च द्रव्याद्यतद्रूपप्रत्ययेन प्रकाश्यते वाक्प्रकाशावगमितार्थप्रदीपादिप्रकाशनवत् ।

प्रधानमपि चैवं स्याद् भवत्परिकल्पिता सत्ता विश्वरूपोपभोगप्रतिपादनार्थत्वात् पुरुषार्थत्वाद् गुणत्रयवत् ।

कार्यमपि ते प्रागपि सदेव प्राप्नोति, अशक्तसदसत्त्वेनाध्यास्यमानत्वात् सत्क्रियमाणत्वात्, उत्पन्नमात्रद्रव्यादिवत् । यद्वा न तत् सत्क्रियते न भाव्यते वा केनचिदर्थान्तरेण, सद्भूतत्वात्, सत्तादिवत् । न तत्सत्ता सत्तान्तरमपेक्षते सत्तात्म-

* * *

चक्रकरूपेण । **तस्मात् प्रकाश्यः प्रकाशः** प्रकाशान्तरप्रकाश्यः प्रदीपप्रकाशोऽपि, **अतद्रूपभावाधिगम्यत्वा**दित्यवस्थादृष्टान्तासत्त्वसमर्थनोपसंहारः । सत्तायामप्यनवस्थाम**तद्रूपप्रकाश्यसाधर्म्या**दापादयितुमाह प्रस्तुतायाम् **--सत्तापि चे**त्यादि । **सत्तापि चा**श्रयस्य **द्रव्यादेरतद्रूपस्य** प्रत्ययेनात्मानं लभते, तेन **प्रकाश्यते, वाक्प्रकाशावगमि**तस्यार्थस्य **प्रदीपादिना प्रकाशनवत्,** न स्वत एवेत्यनवस्थादोषोऽत्रापि तदवस्थः । § 1370

किञ्चान्यत्, **प्रधानमपि चैव**मित्यादि । **साङ्ख्य**परिकल्पितं सकलजगत्कारणं प्रधानादिपर्यायं **स्याद्** भवता **वैशेषिकेण परिकल्पिता सत्ता**

---

उत्फणविफणत्वकुण्डलितादिपर्यायसमन्वित- सर्पद्रव्यवत्, तथाहि--न तत्र केवन उत्फणतादयः सर्पद्रव्यातिरिक्ताः पर्यायाः सन्ति प्रमाणेनानुपलब्धेः गगनकुसुमस्य मुवुलितार्धमुवुलितत्वादिपर्यायवत् । तस्मात् तदेव द्रव्यं तत्र परमार्थसदिति । किञ्च, तद् द्रव्यं तथैव अन्वयपर्यायोपसर्जनं जानाति परिच्छिनत्ति जिनो भगवान् केवली । n479/mj कस्मात् पर्याथोपसर्जनं जानाति, न तु पर्यायरहितमित्यत आह--अपज्जवे जाणणा नत्थित्ति । अपर्याये पर्यायरहिते यतो जाणणा परिज्ञा केवल्यादीनामपि नास्ति ततस्ते उत्प्रेक्षामात्रेण व्यवह्रियन्ते, न तु परमार्थतः सन्ति, ततो द्रव्यमेव तात्त्विकम् । इति **मलयगिरिविरचितायाम् आवश्यकनिर्युक्तिव्याख्यायाम्** । विस्तरेण त्वस्या **आवश्यकनिर्युक्तिगाथाया** अर्थो निम्निलिखिताभ्यो **जिनभद्रगणिक्षमाश्रमणविर**चित**विशेषावश्यकभाष्य**गाथाभ्योऽवसेयः--जं जाहे जं भावं परिणम+इ तयं तया त+ओऽणन्नं । परिण+इमेत्तविसिट्ठं दव्वं चिय जाण+इ जिणिंदो ॥ २६६८ ॥ न सुवण्णादन्नं कुंडला+इ तं चेय तं तमागारं । पत्तं तव्वव+एसं लभ+इ सरूवादभिन्नं ति ॥ २६६९ ॥ ज+इ वा दव्वादन्ने गुणाद+ओ नूण सप्प+एसत्तं । होज्ज व रूवा+ईणं विभिन्नदेसोवलंभो वि ॥ २६७० ॥ ज+इ पज्जवोवयारो लयप्पयासपरिणाममेत्तस्स । कीर+इ तन्नाम न सो दव्वादत्थंतरब्भू+ओ ॥ २६७१ ॥ दव्वपरिणाममेत्तं पज्जा+ओ सो य न खरसिंगस्स । तदपज्जवं न नज्ज+इ जं नाणं नेयविसयंति ॥ २६७२ ॥ **विशेषाव°** nayacakra-ms-bhā । आसां गाथानां व्याख्यानं तु **कोष्ट्याचार्य**— मलधारि**हेमचन्द्राचार्या**दिविरचितवृत्तिभ्योऽवसेयम्
॥

१ स्था] **°स्थान+अतद्रू°** प्र° ॥

**विश्वरूपोपभोगप्रतिपादनार्थत्वात् पुरुषार्थत्वाद् गुणत्रयवत्,** यथा सत्त्वरजस्तमोनामकं पुरुषार्थं प्रवर्तमानं पुरुषस्य विश्वरूपमुपभोगं प्रतिपादयितुं प्रवर्तमानं प्रधानमेव न ततोऽन्यद् व्यतिरिक्तं किञ्चित् तद्विकारत्वादेवं सत्तापि प्रधानमेव स्यात् । अनिष्टं चैतत् । § 1371

किञ्चान्यत्, **कार्यमपि त** इत्यादि यावद् **द्रव्यादिव**दिति । कार्यमपि तव द्रव्यादि जन्मकालात् **प्रागपि सदेव प्राप्नोती**त्येतदप्यनिष्टापादनम् । कथं तन्त्वादिकारणानि प्रागप्युत्तरकालभाव्यभिमतात्मसम्बन्धीनि ? **अशक्तसदसत्त्वेनाध्यास्यमानत्वा**दित्यादिहेतवो गतार्था यावत् **सत्क्रियमाणत्वा**दिति । **उत्पन्नमात्रद्रव्यादिव**दिति दृष्टान्तः । § 1372 - /ms

**यद्वे**त्यादि । अथैवं नेष्यते **न तत् सत्क्रियते** द्रव्याद्युत्पन्नमात्रं **न भाव्यते वा केनचिदर्थान्तरेण, सद्भूतत्वात्, सत्तादिव**दिति, **आदि**ग्रहणाद् द्रव्यत्वादिसामान्यविशेष-विशेष-समवायवत् । 480/mj

* * *

कत्वादत्यन्तानुप्रवृत्तसत्तावत् । अनर्थसत्ता चान्यत्रानाधेया, तत एव, स्वसत्तावत् ।

यदि तत् कारणसमवेतं स्वत एव सन्न भवति असदेव तर्हि तत्, स्वतो निरुपाख्यत्वात् अव्यपदेश्यत्वात् तथाऽविशिष्टत्वात् खपुष्पवत् असत् स्यात् । कार्यमपि वा प्राक् सदुत्पत्तेः, एभ्य एव, उत्पन्नमात्रद्रव्यादिवत् ।

* * *

**न तत्सत्ता सत्तान्तरमपेक्षते,** द्रव्यादीनामुत्पन्नानां स्वभावसत्ता सम्बन्धिसत्तां नापेक्षते सत्तासम्बन्धरहितत्वेऽपि **सत्तात्मकत्वात्, अत्यन्तानुप्रवृत्तसत्तावत्** महासामान्यवदित्यर्थः । **अनर्थसत्ता, अर्थः** इति द्रव्यगुणकर्मसु संज्ञानिय-

---

८ पुरुषा] **°षार्थ** प्र° । °षाय ? ॥
९ त्वा] **°त्वादेवसत्वाविधानमेव** प्र° ॥
१३ अ] दृश्यतां पृ° ४७३ पं° ७ ॥
१४ स] **°सदसत्वेस-त्वेना°**nayacakra-ms-ramnayacakra-ms-। **अशक्तसदसत्त्वे सत्त्वेनाध्यास्यमानत्वात् ?** ॥
२७ अ] बुद्धीनामर्थेन्द्रियापेक्षत्वे[ऽ]प्यर्थस्तावदुच्यते **--अर्थ इति द्रव्यगुणकर्मसु** वै° सू° ८ । १४, विनाप्यर्थत्वेन सामान्येन त्रिष्वेव द्रव्यादिषु तत्र प्रसिद्ध्यर्थशब्दः **प्रसिद्ध्यार्थशब्दः ? प्रसिद्धोऽर्थशब्दः ? प्रसिद्ध्यर्थमर्थशब्दः ?** परिभाष्यते । क्वेव ? यथा सामान्यविशेषेषु विना सामान्यान्तरेण यथा सत्तादिषु सामान्येषु सामान्यं सामान्यम् इति ज्ञानं तथा विशेषेषु विशेषान्तराभावेऽपि विशेषो विशेषः इति तद्दर्शिनां विज्ञानमेवं द्रव्यादिषु विनाप्यर्थत्वेन पारिभाषिकोऽर्थशब्दः । इन्द्रियाण्युच्यन्ते, तानि च न पञ्चात्मकानि, यतः **द्रव्येषु पञ्चात्मकं प्रत्युक्तम्** वै° सू° ८ । १५, यतो द्रव्येष्वारब्धव्येषु पञ्च भूतानि आरम्भकानि न विद्यन्ते अपि तु यानि आरभन्ते च वारि तानि स्वां स्वां जातिमारभन्ते । एवमिन्द्रियाण्यपि प्रतिनियतभूतकार्याणि, तथाहि **--भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने** वै° सू° ८ । १६, गन्धज्ञानं घ्राणम्, तस्मिन्नारब्धव्ये पृथिवी कारणं भूयस्त्वात्, शरीरापेक्षया तु भूयस्त्वम् । भूयस्त्वं च घ्राणे पृथिव्याः, पादादिना गन्धोपलब्ध्यभावात् । गन्धवत्त्वाच्च, यतश्च स्वसमवायिना गन्धेन घ्राणेन्द्रियं गन्धमभिव्यनक्ति अतस्तस्य गन्धवती पृथिव्येव कारणम्, भूतान्तराणि तु संयोगीनि स्वल्पान्येव । **तथापस्तेजो वायुश्च रसरूपस्पर्शज्ञानेषु रसरूपस्पर्शेषु** ***T***

मादनर्थाः सामान्य-विशेष-समवायाः, तेषामनर्थानां या सत्ता सापि **चान्य-त्रानाधेया** अनाश्रितेत्यर्थः । **तत एव** हेतोः, **स्वसत्तावदि**त्येतान्यनिष्टापादन-साधनानि । § 1373

पुनस्तत्रैव दोषः प्रकारान्तरेणोच्यते --**यदि तत् कारणसमवेत**मित्यादि । यदि कारणेषु समवेतमात्रं कार्यं **स्वत एव सन्न भवति,** सत्तासम्बन्धात् सद् भवति, सदेवेति सदेव न भवति, अगुणगुणत्वादिवदसदपीति, यद्येवमिष्यते तत एवमापन्नम् --**असदेव तर्हि तत्** । कुतः ? **स्वतो निरुपाख्यत्वात्,** निरुपाख्यत्वात् इति सिद्धे स्वतः इति विशेषणं वेदनादीनां स्वसंवेद्यानां निरुपाख्यानां सत्त्वात् तद्वदनैकान्तिकता मा भूदिति । तद्धि वेदनाद्यसाधार-

- /ms णरूपेण निरुपाख्यमपि स्वत एव वस्त्वात्मनैव सामान्यात्मना अंशान्तरेण पररूपेण च व्यावृत्तेन सोपाख्यमिति । तथा विविधं विशिष्टं वा अपदेश्यो व्यपदेश्यः, **न व्यपदेश्यः** प्रकारान्तरेण वेदनादिवद् व्यपदेश्यो न भवतीत्यर्थः, खपुष्पवैलक्षण्येन **तथाऽविशिष्टत्वा**दिति विशेषणेन हि सदादिना वस्त्वेव सामान्यांशादिना वेदनादि सम्बध्यते नावस्त्विति एवं साधर्म्यात् **खपुष्पवदसत् स्यादि**ति गतार्थम् । एतदनभ्युपगमे **कार्यमपि वा प्राक् सदुत्पत्तेः, एभ्य एव** हेतुभ्यः स्वतो निरुपाख्यत्वात् इत्यादिभ्यः, **उत्पन्नमात्रद्रव्यादिवत्** । § 1374

481/mj

यदपि च कर्त्रादिकारकव्यापारफलमुत्पन्नं वस्तुमात्रमशेष-विशेषणविनिर्मुक्तं कारणसमवेतमित्यात्मावधारणं कृत्वा चोदितं वस्तुमात्रस्य निरतिशयत्वात् सत्त्वादिविशेषणसम्बन्धनियमानुप-पत्तिः इति तत् तथैव, सत्ताद्यसम्बन्धात् कारणसमवेतसर्व-

---

**रसरूपस्पर्शविशेषात्** वै° सू° ८ । १७ इति, स्वसमवायिना मधुरापाकजेन रसेन रूपेण शुक्लभास्वरेण स्पर्शेन अपाकजानुष्णाशीतेन यतो रसन-नयन-स्पर्शनानि रसरूपस्पर्शानभिव्यञ्जन्ति अतो रसवत्त्वाद् रूपवत्त्वात् स्पर्शवत्त्वाच्च भूतान्तरैर्निमित्तैरनभिभूतत्वेन भूयस्त्वाच्च त्रिष्विन्द्रियेषु यथासङ्ख्यमापस्तेजो वायुश्च समवायिकारणानि द्रष्टव्यानि । आकाश तु स्वत एव श्रोत्रं कर्णशष्कुल्यावच्छिन्नं, न प्रकृतिरनारम्भकत्वात् । एवं प्रत्यक्षं व्याख्यातम् । अष्टमोऽध्यायः । इति चन्द्रानन्दविरचितायां **वैशेषिकसूत्रवृत्तौ** *P* पृ° ३० ॥

५ व] °ति **सदेवेति सदेव** इति कथञ्चिद् द्विर्भूतश्चेत् पाठस्तर्हि सत्तासम्बन्धात् सद् भवति, सदेव न भवति, अगुणगुणत्वादिवदसदपीति इति पाठः समीचीन इति प्रतिभाति ॥

५ अ] **अगुण-त्वादि°**nayacakra-ms-bhānayacakra-ms-hī ॥

६ स्व] **सतो** प्र° ॥

९ व] **वस्त्वात्मनैव**nayacakra-ms-ya । अत्र **च स्वात्मनैव** इत्यपि पाठः स्यात् ॥

१० त] **तथा विधं** प्र° ॥

१२ त] **तथाविशि°**nayacakra-ms-bhā ॥

१४ प्रा] nayacakra-ms-vi विना **प्राक् बवुत्पत्तेः** nayacakra-ms-ya । **प्राक् बदुत्पत्तेः** nayacakra-ms-vi । **प्राक् दुत्पत्तेः** nayacakra-ms-bhā ॥

कार्यातिशयाभावात् सत्तादिविशेषणसम्बन्धनियमानुपपत्तिरेव ।
§ 1375

यत्तु प्रत्युच्यते--न, कारणसामग्र्ये विशेषसद्भावात् । यत्तुल्यजातीयावयवारब्धं वस्तुमात्रं कार्यं तद् द्रव्यत्वेन सम्बध्यते । यत्तु कारणगुणारब्धं वस्तुमात्रं कार्यं तद् गुणत्वेन सम्बध्यते । यत् पुनर्गुरुत्वादिभिः स्वाश्रये स्वाश्रयसंयोगसहितैर्वा § 1376

**यदपि च कर्त्रादी**त्यादि । कर्त्रादीनां कारकाणां समवायिनामसमवायिनां च मृदादीनां देवदत्तदण्डादीनां च यो **व्यापारः** समेत्य स्वकार्यारम्भः, तस्य **फलं** घटादि कार्य**मुत्पन्नं वस्तुमात्रम्,** तस्यात्मावधारणं कार्यमित्यतः प्रागुद्ग्राहितार्थनिराकाङ्क्षीकरणार्थमाह **--अशेषविशेषणविनिर्मुक्तं** सत्त्व-द्रव्यत्वगुणत्व-कर्मत्वादिभिः सर्वैर्विशेषणैर्विनिर्मुक्तं सम्बन्धिसद्भावशून्यं स्वभावसद्भावमात्रं यत् तदुच्यते **कारणसमवेतं** तदात्मा **इती**त्थमात्मावधारणं कृत्वा स्वयमेव **यच्चोदितम्--वस्तुमात्रस्य निरतिशयत्वात् सत्त्वादि**द्रव्यत्वादि**विशेषणसम्बन्धनियमानुपपत्तिः**, न हि तस्यामवस्थायामिदं द्रव्यम्, मया द्रव्यत्वेनात्रैव निलयनीयं न गुणकर्मत्वाभ्याम् इति द्रव्यत्वस्य निलयननियमकारणं नास्ति, अतिशयाभावादेव । तथा गुणत्वकर्मत्वयोरपि गुणकर्मणोरिति । **तत् तथै**वेत्यादि त्वदुक्तमेव कारणमिति तदेवोच्चारयति यावद**नुपपत्तिरेवे**ति । **सत्तादि**ग्रहणात् सत्त्व-द्रव्यत्व-गुणत्व-कर्मत्व-घटत्व-रूपत्व-गमनत्वाद्यसम्बन्धात् कारणसमवेतसर्वद्रव्यगुणादिकार्यसत्ताद्रव्यत्वादिविशेषकृतसम्बन्धातिशयाभावादिति । § 1377 - /ms

एतस्य परिहारार्थं **यत् तु प्रत्युच्यते--न, कारणसामग्र्ये विशेषसद्भावा**दिति । तद्व्याख्यानं **--यत् तुल्यजातीयावयवे**त्यादि यावद् **द्रव्यत्वेन सम्बध्यत** इति द्रव्यत्वनिलयननियमः । पृथिव्यप्तेजोवायुपरमाणुभिर्द्वाभ्यां बहुभिर्वा स्वसंयोगापेक्षैस्तुल्यजातीयैरारब्धेऽवयविद्रव्यकार्ये द्रव्यत्वं निलीयत इत्यर्थः । **यत्तु कारणगुणे**त्यादि, **तैरारब्धे कार्यद्रव्ये नियमत एव [गुणा] गुणान्तरं तत्रस्था आरभन्ते** इति वचनात् तदारब्धे गुणान्तरे कार्ये गुणत्वनियमनात् गुणत्वेन सम्बध्यते । **यत् पुनर्गुरुत्वादिभिः स्वाश्रये** य-

---

११ वायिना] °नासमवा° प्र° ॥
१५ गु] °गुणकर्म° प्र° ॥
१५ म्ब] °न्धेसद्भा° प्र° ॥
१७ स] सत्वादि° प्र° ॥
१८ न] न हि तस्यामवस्थायाम् इदं द्रव्यम्, मया द्रव्यत्वेनात्रैव निलयनीयं न गुणकर्मत्वाभ्याम् इति द्रव्यत्वस्य निलयननियम**कारणमस्ति** इत्यपि पाठः स्यात् ॥
२० का] nayacakra-ms-vi विना °कारणनास्ति nayacakra-ms-ya । दृश्यतां टि° ५ ॥
२३ गुणादिका] °कार्ये ? ॥
२५ य] यस्तु प्र° ॥
२६ ख्या] °ख्याने यत्तुल्यजातीयावयावेत्यादिnayacakra-ms-bhā ॥

त्राश्रये गुरुत्वं समवेतं तत्र संयोगाभावे पतनकर्मारभ्यते, **आदि**ग्रहणात् प्रयत्ननोदनाभिघातसंयोगवेगाः कर्मारभन्ते । **स्वाश्रयसंयोगसहितैर्वे**ति तैरेव

---

५ त्र] **संगाभावे** प्र° ॥
५ र्मार] °**रभते** प्र° । अत्र **गुरुत्वम्** इत्यस्य कर्तृत्वविवक्षायाम् **आरभते** इति यथाश्रुतपाठोऽपि साधुरेवेति ध्येयम् ॥
६ प्र] दृश्यतां **प्रशस्तपादभाष्ये** कर्मनिरूपणम् । ([?]")एवमुक्तेषु द्रव्येषु गुणानुल्लङ्घ्य अल्पवक्तव्यत्वात् कर्माण्यभिधत्ते । तत्र **आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म** वै° सू° ५ । १ । १, स्वाश्रयसंयोगापेक्षित्वात् प्रयत्नस्य क्रियारम्भे आत्महस्तसंयोगः कर्मणः कारणम् । सापेक्षकारणत्वात् संयोगस्य प्रयत्नोऽपि कारणम् । अतो द्वाभ्यां हस्ते कर्म । **तथा मुसलकर्म हस्तसंयोगाच्च** वै° सू° ५ । १ । २, तथेति सङ्ख्यामात्रातिदेशः, तेन हस्तमुसलसंयोगो मुसलकर्मणः कारणं पूर्वाधिकृतश्च प्रयत्नः । न तु आत्महस्तसंयोगोऽसमवायिकारणं मुसलकर्मणि, आत्मसंयुक्तहस्तसंयोगादे[व] तत्सिद्धेः । **अभिघातजे मुसलकर्मणि व्यतिरेकादकारणं हस्तसंयोगः** वै° सू° ५ । १ । ३, वेगवद्द्रव्यसंयोगोऽभिघातः, उलूखलाभिघातादुत्पन्ने मुसलस्योत्पतनकर्मणि अकारणं हस्तमुसलसंयोगः पूर्वप्रयत्नस्याभिघाताद् विनष्टत्वात्, उत्पततु मुसलद्रव्यम् इतीच्छाया अभावात् प्रयत्नान्तरस्याभावः, संयोगस्य च कर्मारम्भे सापेक्षकारणत्वात् प्रयत्नरहितो हस्तमुसलसंयोगो न कारणमुत्पतनस्य । **तथात्मसंयोगो हस्तमुसलकर्मणि** वै° सू° ५ । १ । ४, यथैव हस्तमुसलसंयोगो मुसलोत्पतनकर्मणि न कारणं तथात्महस्तसंयोगोऽपि हस्तोत्पतनकर्मणि न कारणं संयोगस्य सापेक्षकारणत्वात् मुसलेन सहोत्पततु हस्तः इति [अभि]सन्धेरभावेन प्रयत्नस्य चाभावात् । कुतस्तयोरुत्पतनमिति चेत्, **मुसलाभिघातात्तु मुसलसंयोगाद्धस्ते कर्म** वै° सू° ५ । १ । ५, उलूखलाभिघातो मुसलस्योत्पतनकर्मणः कारणम् । हस्तमुसलसंयोगस्तु मुसलगतवेगापेक्षो हस्तकर्मणः कारणम्, नाभिघातोऽसमवेतत्वात् । **तथात्मकर्म हस्तसंयोगाच्च** वै° सू° ५ । १ । ६, आत्मेति शरीरैकदेशः, यथा चैतदप्रत्ययं हस्ते मुसले च कर्म तथैव हस्तावयवसंयोगाद् हस्तगतवेगापेक्षाद् हस्तोत्पतनकालेऽवयवे तस्मिन्नप्रत्ययं कर्म जायते । **संयोगाभावे गुरुत्वात् पतनम्** वै° सू° ५ । १ । ७, विभागान्निवृत्ते हस्तमुसलसंयोगे गुरुत्वात् पतनं भवति । **नोदनविशेषाभावाद् नोर्ध्वं न तिर्यग् गमनम्** वै° सू° ५ । १ । ८, नुद्यतेऽनेनेति नोदनं वेगप्रयत्नापेक्षः संयोगविशेषः, प्रेरकप्रयत्नाभावे नोदनाभावाद् नोर्ध्वं तिर्यग् वा केवलाद् गुरुत्वाद् मुसलादेर्गमनकर्म भवति । कुतो नोदनविशेषः ? **प्रयत्नविशेषान्नोदनविशेषः** वै° सू° ५ । १ । ९, अत्र इदं क्षिपामि इति इच्छाविशेषजः प्रयत्न उत्पन्नो हस्तादेर्द्रव्यस्य द्रव्यान्तरेण संयोगं नोदनाख्यं जनयति । **नोदनविशेषादुदसनविशेषः** वै° सू° ५ । १ । १०, दूरदेशप्रेरणेच्छाविशिष्टात् प्रयत्नाज्जातो नोदनविशेषो दूरदेशक्षेपणं करोति । **हस्तकर्मणा दारककर्म व्याख्यातम्** वै° सू° ५ । १ । ११, यद् गर्भस्य स्पन्दनादिकर्म तदात्मशरीरैकदेश-संयोगाज्जीवनपूर्वकप्रयत्नापेक्षाद् भवतीति सप्रत्ययम्, मातुः कार्यावस्करोपसर्पणकर्म गर्भस्याप्रत्ययमात्मसंयोगाददृष्टापेक्षाद् भवतीति । **तथा दग्धस्य विस्फोटनम्** वै° सू° ५ । १ । १२, व्यासक्ते मनसि यद् दग्धस्य हस्तादेर्विक्षेपणं तदपि जीवनपूर्वकप्रयत्नापेक्षादात्महस्तसंयोगाद् भवतीति नाप्रत्ययम् । **प्रयत्नाभावे गुरुत्वात् सुप्तस्य पतनम्** वै° सू° ५ । १ । १३, शरीरविधारकप्रयत्नाभावे सुप्तस्याङ्गानां पतनं गुरुत्वाद् भवति तदाभिसन्धेरभावात् । **तृणकर्म वायुसंयोगात्** वै° सू° ५ । १ । १४, वेगापेक्षाद् वायुतृणसंयोगात् तृणादीनां कर्म, तेषां प्रयत्नाभावात् । **मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारितानि** वै° सू° ५ । १ । १५, मणीनां तस्करं प्रति गमनं सूचीनां वा अयस्कान्तं प्रति धर्माधर्मकृतमित्यर्थः । **इषावयुगपत् संयोगविशेषात्कषाः कर्मान्यत्वे हेतुः** वै° सू° ५ । १ । १६, नोदनादाद्यं कर्म, संस्काराद् बहूनि कर्माणि इषावुत्पद्यन्ते । एकस्मिंस्तु कर्मणि प्रथमेणैवाकाशसंयोगेन विनष्टत्वात् कर्मण उत्तरसंयोगविभागा

गुरुत्वादिभिः स्वाश्रये 482/mj

* * *

आश्रयान्तरे कर्म आरभ्यते तद् वस्तुमात्रं कार्यं कर्मत्वेन सम्बध्यते इत्य-स्त्यतिशयः । एतद् निदर्शनमात्रम्, सर्वत्र कारणसामग्र्यनियामकसद्भावात् प्रतिनियत एव

* * *

---

नोत्पद्येरन्, तस्मादिषावनेकं कर्म । **नोदनादाद्यमिषोः कर्म कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च** वै० सू० ५ । १ । १७ ज्याशरसंयोगः प्रयत्नापेक्षो ज्यागतवेगापेक्षो वा नोदनम्, तत आद्यमिषोः कर्म नोदनापेक्षं संस्कारं करोति, निरपेक्षं तु संयोगविभागौ । ततः संयोगाद् विनष्टे कर्मणि नोदने विभागाद् विनिवृत्ते आद्यकर्मजसंस्कार उत्तरमिषौ कर्म करोति, तथोत्तरमुत्तरं पौनःपुन्येनेत्यर्थः । **संस्काराभावे गुरुत्वात् पतनम्** वै० सू० ५ । १ । १८, स्पर्शवद्द्रव्यसंयोगेन संस्कारविनाशाद् गुरुत्वं तत्पतनकर्म करोति । पञ्चमस्याद्यमाह्निकम् । आध्यात्मिकेषु तत्सम्बन्धेद्धेषु च कर्माण्युक्त्वा महाभूतकर्माणि व्याचष्टे — **नोदनाद्यभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म** वै० सू० ५ । २ । १, समस्तान् व्यस्तांश्च गुरुत्वद्रवत्ववेगप्रयत्नान पेक्षमाणो यः संयोगविशेषो नोदनादविभागहेतोः कर्मणः कारणं [तद् ?] नोदनम्, तथाहि--पपादादिभिर्नुद्यमानायां पङ्काख्यायां पृथिव्यां कर्म जायते । वेगापेक्षोऽभिघातादभिहन्यमानस्य विभागहेतोः कर्मणः कारणं संयोगोऽभिघातः, तथाहि--रथादिभिरभिघातात् पृथिव्येकदेशेषु दृश्यते कर्म । संयुक्तसंयोगाच्च, नुद्यमानाभिहन्यमानाभ्यां च संयुक्तेषु भवन्ति कर्माणि । **तद् विशेषेणादृष्टकारितम्** वै० सू० ५ । २ । २, यत् खलु विरुद्धक्रियवायुसंयोगात् सर्वस्यां पृथिव्यां कम्पादि कर्म प्रजानां शुभाशुभसूचनायोत्पद्यते तत् सर्वेषामेव शुभाशुभसूचनाद् विशेषेणादृष्टकारितम् । **अपां संयोगाभावे गुरुत्वात् पतनम्** वै० सू० ५ । २ । ३, विधारकवाय्वभ्रसंयोगाभावेऽपां गुरुत्वात् पतनकर्म भवति । **तद्**

**विशेषेणादृष्टकारितम्** वै० सू० ५ । २ । ४, सस्यानां समृद्धये विनाशाय वा सर्वजनानामदृष्टेन जनितं पतनकर्म अदृष्टकारितमुच्यते । **द्रवत्वात् स्यन्दनम्** वै० सू० ५ । २ । ५, विधारकाभावादपां स्यन्दनकर्म द्रवत्वाद् भवति । **नाड्या वायुसंयोगादारोहणम्** वै० सू० ५ । २ । ६, नाडीति रश्मिः, सवितुर्द्वौ रश्मी--शुचिश्च शुक्रश्च । शुचिरप आदत्ते शुक्रेण वृद्धिं करोति । शुच्याख्यया नाड्या वायुसंयुक्तया आदित्यप्रयत्नापेक्षयारोहणम् । **नोदनात् पीडनात् संयुक्तसंयोगाच्च** वै० सू० ५ । २ । ७, नोदनाच्चित्रदण्डादिभिरारोहणम्, पीडनाद् वस्त्रादिभिः, पीड्यमाननुद्यमानाभ्यां च संयुक्ते । **वृक्षाभिसर्पणमित्यदृष्टकारितम्** वै० सू० ५ । २ । ८, वृक्षमूले निषिक्तानामपां वृक्षोपरि गमनमदृष्टेन क्रियते इति । **अपां सङ्घातो विलयनं च तेजसः संयोगात्** वै० सू० ५ । २ । ९, n4
अपां सङ्घातः काठिन्यं दिव्येन तेजसा संयोगात्, दिव्यभौमाभ्यां तु विलयनम् । **तत्रावस्फूर्जथुर्लिङ्गम्** वै० सू० ५ । २ । १०, अस्ति दिव्यासु अप्सु तेजः इत्यत्र तेजसः अवस्फूर्जथुरभ्रान्निःसरणं लिङ्गमिति । **वैदिकं च** वै० सू० ५ । २ । ११, ता अग्निं गर्भं दधिरे वभूषा इति च वैदिकं वाक्यं दिव्यास्वप्सु तेजसो लिङ्गम् । **अपां संयोगाद् विभागाच्च स्तनयित्नुः** वै० सू० ५ । २ । १२, मेघाशनिशब्दः स्तनयित्नुः । विरुद्धदिक्क्रियाभ्यां वायुभ्यामपां प्रेर्यमाणानां तरङ्गाङ्गीभूतानां परस्पराभिघाताख्यात् संयोगाच्छब्दः । एकेनापि प्रकुपितेन वायुना व्यवच्छिद्यमानानामपां विभागाच्छब्दः । **पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम्** वै० सू० ५ । २ । १३, यथा नोदनाभिघातसंयुक्तसंयोगादृष्टेभ्यः पृथिव्यां कर्म तथा तेजसो वायोश्च । एतदनियतं कर्म ।(?") इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ० १९--२१ ॥

कपित्थफलवृन्तादौ गुरुत्वेन कर्मण्यारब्धे तत्संयुक्ते कीटे पतनमारभ्यते **आश्रयान्तरे । तच्चारब्धं** वस्तुमात्रं कर्म कार्यमितराभ्यां विशिष्टं **कर्मत्वेन सम्बध्यते । इत्यस्त्यतिशय** इति दर्शयन् निरतिशयत्वस्यासिद्धतामापादयति । **एतद् निदर्शनमात्रमित्यादि** यावद् **द्रष्टव्य** इति । **सर्वत्र घटत्व**-गोत्वादि
483/mj रूपत्वादि

* * *

सामान्यविशेषसम्बन्धो द्रष्टव्यः ।

अनेन यत्तदुत्पन्नं वस्तुमात्रं तत् स्वत एव परस्परतो विशिष्टमिति स्फुटीकृतम् । विशेषसद्भावस्तावदाहत्य भेरीमभ्युपगतः, तदुपवर्णनद्वारेण चाविशेषोऽपि । (?')अवि-

* * *

गमनत्वादिष्वप्यनया युक्त्या **सामान्यविशेषेषु कारणसामग्र्यस्य नियामकस्यातिशयिनः सद्भावात् प्रतिनियत एव सम्बन्धो द्रष्टव्यः ।** § 1378

इति परिहारे कृते प्रस्तुतनय आह **--अनेनेत्यादि** । त्वदीयेनैवेतेन परिहारवचनेन यत् तदुत्पन्नं कार्यं वस्तुमात्राभिमतं तत् स्वत एव कार-
- /ms णसामग्र्यातिशयादेव परस्परतो विशिष्टं न सत्ताद्रव्यत्वादि- सम्बन्धनमपेक्ष्येति स्फुटीकृतम्, तेनैव वस्तुभावनेन विशिष्टेन सत्तादिविशेषणसम्बन्धकृत्यस्याविशेषविशेषाभिधानप्रत्ययहेतोः प्रतिप्रापितत्वात् । § 1379

तत्र **विशेषसद्भावस्तावदाहत्य भेरीमभ्युपगतः सर्वत्र कारणसामग्र्यनियामकसद्भावात् प्रतिनियतः सामान्यविशेषसम्बन्धो द्रष्टव्यः** इत्युपसंहारवचनात् । **तदुपवर्णनद्वारेण चाविशेषोऽपि अभ्युपगतः** इति वर्तते । तुल्यजातीयसंयोगारभ्यकार्यत्वाविशेषस्य द्रव्यत्वनिलयनविषयविशेषणवर्णनद्वारेण गुणारब्धगुणान्तरविषयनिलयनगुणत्ववर्णनद्वारेण गुरुत्वाद्यारब्धतदाश्र-
484/mj याश्रयान्तरसमवेतकर्मविषयकर्मत्व

* * *

शेषविशेषणविनिर्मुक्तमपि न भवति(?') इत्येतदपि त्वयैव भावितम्, तुल्यजातीयावयवसंयोगादिभिन्नाविशेषविशिष्टवस्तुस्वतत्त्वप्रदर्शनादस्ति हि... ...नेतरद् नेतरत्र ।

पुनरपि च कारणसामग्र्या अविशेषेण योगादबादिष्वपि तुल्यजातीयाद्य-

---

१४ ग] °गमकत्वादि° प्र° ॥
१५ तिश] °शायिनःnayacakra-ms-vi । °शयेनः nayacakra-ms-ḍe । °शयेन nayacakra-ms-raṃ ॥
१९ स्तुभा] °भवनेन ? ॥
१९ त्तादिविशेष] °षेणस°nayacakra-ms-ya ॥
२० स्या] °स्याविशेष्य-विशेषाभिधान°nayacakra-ms-bhā ॥
२१ स] दृश्यतां पृ° ४८२ पं° २ ॥
२३ चा] वाऽवि° nayacakra-ms-ya । वावि° nayacakra-ms-bhā ॥
१ नाद] °दस्ति हि परस्परातिशयो द्रव्यादीनाम्, ततो नेतरद् नेतरत्र इत्याशयो भाति ॥

वयवसंयोगादपि द्रव्यत्वं भावितम् । एतेन पृथिव्यादिभिन्न... ...द्रव्यत्वमुक्तम् ।

तुल्यजातिभेदेऽपि च अविशेषविशेषणाविनिर्मुक्तत्वं वस्तुनः, द्वयोर्बहुषु वा इति वचनात् ।

* * *

निलयनद्वारेण च सर्वद्रव्यगुणकर्मणां नियतविषयस्वजातिगतविशेषवर्णनाद-विशेषोऽप्याहत्य भेरीमभ्युपगत इति द्रष्टव्यम् । तस्मात् कारणगत-विशेषाविशेषकृतातिशयादेव कार्यगतविशेषाविशेषविशेषणसम्बन्धिसिद्धिः । एवं तावद् विशेषणवर्णनद्वारेणोक्तम् । § 1380

किञ्चान्यत्, **अविशेषे**त्यादि । अविशेषविशेषणविनिर्मुक्तमपि न भवति इत्येतदपि त्वयैव भावितम् । तद्यथा --**तुल्यजातीयावयवसंयोगादिभिन्ने**त्यादि । तुल्यजातीयाः तुल्यप्रकारा अवयवाः, तेषां पार्थिवादीनां गन्धादिमत्त्वप्र-काराणां संयोगैर्द्रव्यं पार्थिवं कार्यं जायते, **आदि**ग्रहणाद् गुणकर्मणोरपि स्वकारणसान्निध्यप्रकारता प्रागुक्ता । तैः संयोगादिभिर्भिन्नत्वेऽप्यविशेषो द्र-व्यादीनामित्यनेनाविशेषेण विशिष्टमितरविलक्षणं वस्तुनः स्वतत्त्वं प्रदर्शितं त्व- - /ms या । तस्मात् तत्प्रदर्शना**दस्ति ही**त्याद्युपसंहारग्रन्थो गतार्थो यावद् ***नेतरद् नेतरत्रे**ति । § 1381

किञ्चान्यत्, **पुनरपि चे**त्यादि । रूपरसगन्धस्पर्शवत्सु पृथिव्यवयवेषु संयुक्तेष्वविशेषो दर्शितः । न केवलमेष एवाविशेषः सजातीयगतः स्फुटीकृत-स्त्वया, किं तर्हि ? तद्विजातीयेष्वपि द्रव्यत्वं तथा **कारणसामग्र्या अविशेषेण योगादबादिष्वपि** आप्येष्वपि कारणसामग्र्यास्तुल्यत्वात् **तुल्यजातीयाद्यवय-वसंयोगादपि द्रव्यत्वं भावितम्,** तुल्यजात्यवयवसंयोगाविशेषात् । **आदि**ग्र-हणात् तेजोवाय्ववयवसंयोगादपीति, **अतुल्यजातीयानामपि तुल्यजातीय-संयोगारम्भाविशेषात्** इत्युक्तत्वात् स्फुटीकृतमविशेषविशेषणमिति । अतोऽतिदिशति --**एतेन पृथिव्यादिभिन्ने**त्यादि गतार्थं यावद् **द्रव्यत्वमुक्त**मिति । § 1382

किञ्चान्यत्, **तुल्यजातिभेदेऽपि चे**त्यादि यावद् **द्वयोर्बहुषु वेति वच-नादि**ति । यापीयमवान्तरजातिर्घटत्वपटत्वाद्याख्या पृथिवीत्वजातिभेदः त-स्मिन्नपि च सति अविशेषविशेषणेनाविनिर्मुक्तत्वं वस्तुनः । कस्मात् ?

---

४ पृ] पृथिव्यादिभिन्नद्रव्याणामपि तुल्यजातीयाद्यवयवसंयोगारम्भाविशेषाद् द्रव्यत्वमुक्तम् इत्याशयो भाति ॥
१२ द्] विशेषविशेषणवर्णनद्वारेणोक्तम् ? विशेषवर्णनद्वारेणोक्तम् ? ॥
१६ पा] **पार्थिवकार्यं** प्र° ॥
१७ संयोगा] **°गादिभिन्नत्वे°** प्र° ॥
१८ नेना] **°नाविशेषेण विशेषेण विशिष्ट** nayacakra-ms-pā विना । **°नाविशेषेण विशेषणविशिष्ट°** nayacakra-ms-pā । नाविशेषेण विशेषणेन विशिष्ट° ? ॥
१९ *] नेतरं नेतरेत्रेति nayacakra-ms-bhā । नेतरं नेत्रेति nayacakra-ms-ya ॥
२३ अ] **अविशेषण**nayacakra-ms-bhā ॥
२४ योगाद] **°दपादिष्वपि** प्र° ॥
५ स्मि] **°न्नपि र सति** प्र° ॥

द्वित्रिचतुरादिसंयोगात् कार्यद्रव्यमुत्पद्यते इत्युक्तत्वात् । एवं तावत् सम्बन्ध्यन्तरनिरपेक्षे वस्तुमात्रे एव विशेषाविशेषविशेषणसम्बन्धः प्रतिप्राप्त इत्युक्तम् । § 1383

485/mj

जातिकल्पनावच्च यदुक्तं वस्तुमात्रमाविर्भूतमुक्तवद् नियामकतया अविशेषविशेषवृत्तिमात्रेण सामान्यविशेषेण सम्बध्यते तत एतदापन्नम्--स्वत एव वृत्तं वस्तु द्रव्यादिप्रत्ययत्वादिना सम्बध्यते । तस्मादेव तु सामान्यस्यापि प्रकाशकं तदेव, तदाश्रयत्वात् सामान्यविशेषादी[नाम्] । § 1384

तस्मादेव प्रविभक्तविषयान्वयाद् विचित्रोपभोगक्रियाप्रसिद्धेर्भिन्नेष्वभिन्नव्यवहारप्रसिद्धेश्च न विशेषणसम्बन्धः कल्प्यः । एतद् निदर्शनमात्रम्, सर्वत्र तु घटत्वादावपि कारणसामग्र्यनियामकसद्भावादेव तत्त्वम् । § 1385

किञ्चान्यत्, **जातिकल्पनावच्चे**त्यादि । यथा भवता जातिरन्यानाकाङ्क्षा वस्तुमात्रे वृत्तेन प्रकाशेन स्वत एव प्रकाशते तथा कारणसमवेतद्रव्यादीत्येतस्यार्थस्य प्रदर्शनार्थं **यदुक्तम्--वस्तुमात्रमाविर्भूत**मिति, **उक्तवद् नियामकतयेति सर्वत्र कारणसामग्र्यनियामकसद्भावा**दित्यनेनोक्तन्यायेन स्वेनैव महिम्ना वस्तु नियतत्वाद् विशेषणेन द्रव्यत्वादिना सम्बध्यते । तच्च द्रव्यत्वादि **अविशेषविशेषवृत्तिमात्रं सामान्यविशेषः**, अविशेषेण प्रागुक्तेन विशेषेण च वृत्तिर्यस्य तदिदमविशेषविशेषवृत्ति द्रव्यत्वादि, तत्परिमाणं तन्मात्रम्, तेना**विशेषविशेषवृत्तिमात्रेण सामान्यविशेषेण सम्बध्यते** वस्तुमात्रं तदाविर्भूतमिति । ततः किम् ? इति चेत्, तत **एतदापन्नम्--स्वत एव वृत्तं वस्तु द्रव्यादिप्रत्ययत्वादिना सम्बध्यते** विशेषणं व्यतिरिक्तमनपेक्ष्य सिद्धं प्रकाशते स्वत एव, प्रकाशान्तरेण नार्थ इत्युक्तं भवति । किञ्चान्यत्, **तस्मादेव त्वि**त्यादि । उक्तादेव न्यायात् सामान्यस्यापि प्रकाशकं तदेव वस्तुमात्रमाविर्भूतम्, तदाश्रयत्वात् सामान्यविशेषादी[नाम्] । § 1386

- /ms

यदप्युक्तं **विचित्रोपभोगक्रियाप्रसिद्ध्यर्थं सत्ताद्रव्यत्वादिसम्बन्धः कल्प्यते** इति सोऽप्यनेनैव प्रतिपादितः, प्रदीपवद् भूताद् वस्तुनः प्रकाशान्त-

---

७ एव ] **विशेषाविशेषणसम्बन्धः** प्र° ॥
७ प्र ] **इति°**nayacakra-ms-bhā । अति° nayacakra-ms-ya ॥
१८ न्या ] °न्यान्यानाकाङ्क्षाnayacakra-ms-bhā ॥
२० य ] दृश्यतां पृ° ४८१ पं° १ ॥
२० क ] एतदन्तर्गतः पाठः प्रतिषु द्विर्भूतः ॥
२३ प्रागुक्तेन ] **विशेषणेन च** प्र° ॥
२६ द्र ] **द्रव्यादिना सम्बध्यते**nayacakra-ms-bhā ॥
२८ त ] **कस्मादेव** प्र° ॥
३ प्युक्तं ] दृश्यतां पृ° ४७४ पं° १ ॥

रनिरपेक्षात् **तस्मादेव प्रविभक्तविषयान्वयात्,** प्रविभक्तो विषयो द्रव्यत्वस्य कारणसामग्र्यविशेषस्तुल्यजातीयावयवसंयोगादिः कारणगुणपूर्वक्रमः स्वाश्रयाश्रयान्तरक्रियारम्भिगुणादिकृतः तस्य कारणकार्यादिप्रविभागाद् व्यतिरेकात् सदनित्याद्यविशेषान्वयाच्च तादृक्प्रविभक्तविषयान्वयात् तस्मादेव वस्तुनो **विचित्रोपभोगक्रियाप्रसिद्धेर्भिन्नेष्वभिन्नव्यवहारप्रसिद्धेश्चे**ति द्विप्रकारं पुरुषार्थं दर्शयति । अनयोश्च पुरुषार्थयोरुक्तवद् वस्तुत एव सिद्धेर्न **विशेषणसम्बन्धः कल्प्यः,** सत्ताद्रव्यत्वादिविशेषणसम्बन्धो न युक्तः कल्पयितुमानर्थक्यादिति । § 1387 - /ms

**एतद् निदर्शनमात्रम्,** तद्भेदानामपि सम्बन्धकल्पनानर्थक्यमुक्तन्यायेनेत्यतोऽतिदिशति --**सर्वत्र तु घटत्वादावपि आदि**ग्रहणाद् गोत्वमनुष्यत्वादिषु **कारणसामग्र्यनियामकसद्भावादेव तत्त्वं** घटत्वगोत्वमनुष्यत्वादि स्वत एव, न सामान्यविशेषात् त्वत्कल्पितात्, इति त्वद्वचनादेव वस्तुत एव सर्वं त्वदिष्टं प्रतिप्राप्तं नार्थान्तरसम्बन्धात् । तदेव च विशेषणस्यापि सत्तादेः प्रकाशकमिति स्थितम् । § 1388

१486/mj

इदं तु प्रस्फुटतरं विशेषणसम्बन्धप्रकाशं वस्तु तत्सम्बन्धनियमाय त्वयैवाभ्युपगतमिति दर्शयितुं वचनं यदुक्तम्--अथवा विशेषणसम्बन्धमन्तरेणापि वस्तुमात्राणां परस्परातिशयोऽस्ति तेन विशेषणसम्बन्धनियमसिद्धिः इति । § 1389

चोद्यपरिहारोऽपि चैवं प्रसिद्धिमस्मदुक्तामेव सन्दर्शयति--कथं परस्परातिशय इति चेत्, कथं प्राक्... ...अतिशयः स्यात्; न, दृष्टान्तात् । यथा परपक्षे... ... ...अतिशयस्तथेहापि स्यात् इति । स्वसमयोदाहरणमपि चैतमेवार्थं द्रढयति यदुच्यते— सामान्यादिवद्वा... ...सस्वत एव स्यात् इति । § 1390

---

१. दृश्यतां पृ॰ ४८२ पं॰ २ ॥

---

६ स्तु] दृश्यतां पृ॰ ४८१ पं॰ ५ ॥
७ त] तकार-
ण॰nayacakra-ms-pānayacakra-ms-denayacakra-ms-ram
। तत्कारण॰ nayacakra-ms-vi ॥
८ विशेषा]
॰षायाधच्चnayacakra-ms-bhā ।
॰षायावच्च nayacakra-ms-ya ॥
१० व] वस्तुतnayacakra-ms-ya
प्रतिषु नास्ति ॥
१३ ए] दृश्यतां पृ॰ ४८२ पं॰ ३ ॥
२४ क] कथं प्राक् सत्तासम्बन्धाद्
द्रव्यगुणकर्मणां परस्परतोऽतिशयः स्यात्;
न, दृष्टान्तात्, यथा परपक्षे
सत्तासम्बन्धादृतेऽपि सत्त्वरजस्तमसां
परस्परतोऽतिशयस्तथेहापि स्यात् इत्याशयो
भाति ॥
१ स्त] दृश्यतां पृ॰ ४६२ पं॰ ७ ॥
२ सा] दृश्यतां पृ॰ ४६२ पं॰ ८ । यथा
सामान्यादि स्वत एवास्ति
अर्थान्तरसम्बन्धनिरपेक्षं तथा द्रव्याद्यपि
स्वत एव स्यात् इत्याशयोऽत्र भाति ॥

न द्रव्यादि अन्याधेयस्वप्रकाशं नाधेयसत्त्वादि नाप्रतिपूर्णसत्त्वादि सत्त्वात् § 1391

किञ्चान्यत्, **इदं तु प्रस्फुटतर**मित्यादि । विशेषणस्य सत्ताद्रव्यत्वादेः सम्बन्धः प्रकाशोऽस्मिन्निति **विशेषणसम्बन्धप्रकाशं वस्तु** । तेन वस्तुनैव प्रकाश्यते विशेषणमिति तदेव वस्तु प्रकाशनम् । तेन च वस्तुना नापेक्षितः सामान्येन सह सम्बन्धः, सामान्यमेव वस्तुना सह सम्बन्धमपेक्षत इति तत्सम्बन्धनियमाय त्वयैवाभ्युपगतमिति दर्शयितुं वचनोपन्यासः । कतमस्य वचनस्योपन्यासः ? उच्यते— यदुक्तं वस्त्वात्मावधारणे कृतेऽ**तिशयाभावाद् विशेषसम्बन्धाभाव** इति चोदिते विकल्पान्तरेण परिहारवचनं तद् व्यक्ततरं वस्त्वेवार्थान्तरनिरपेक्षं विशेषणानामपि प्रकाशकमिति । तद्यथा --**यदुक्तम् अथवा विशेषणसम्बन्धमन्तरेणापि वस्तुमात्राणां परस्परातिशयोऽस्ति, तेन विशेषणसम्बन्धनियमसिद्धिः** इत्येतद् वचनं यथोक्तकारणसामग्र्यसद्भावविशेषाविशेषन्यायप्राणकमिति । § 1392

**चोद्यपरिहारोऽपी**त्यादि । एतस्मिंश्चार्थे यच्चोदितम् --**कथं परस्परातिशयः इति चेदि**ति, तस्य व्याख्या --**कथं प्रागि**त्यादि गतार्थं याव**दतिशयः**
- /ms **स्यादि**ति । अस्य चोद्यस्य परिहारः सोऽपि **चैवं प्रसिद्धिमस्मदुक्तामेव सन्दर्शयति** । कोऽसौ परिहारः ? उच्यते --**न, दृष्टान्ता**दिति । तद्व्याख्या — **यथा परपक्ष** इत्यादि याव**दतिशयस्तथेहापि स्या**दिति गतार्थम् । § 1393

यदि परमते सत्त्वरजस्तमसां परस्परातिशयोऽस्ति, तव किम् ? इत्यत्राशङ्कानिषेधार्थं **स्वसमयोदाहरणमपि चैतमेवार्थं द्रढयती**ति स्ववचनं तद्वचनप्रदर्शनम् --**यदुच्यते सामान्यादिवद्वे**त्यादि सव्याख्यानं गतार्थं सोपनयं यावत् **सत्त्वत एव स्या**दिति । § 1394

अत्र प्रयोगाः --**न द्रव्यादि अन्याधेयस्वप्रकाशम्,** नान्येनाधेयोऽस्य द्रव्यादेः प्रकाश इति पक्षः, **नाधेयसत्त्वादि**विशेषणं द्रव्यादि **नाप्रतिपूर्णसत्त्वादि**विशेषणमिति वा पक्षः, **सत्त्वात्,** यत् सद् न तदन्याधेयस्वप्रकाशं
487/mj नाधेयसत्त्वादि नाप्रतिपूर्णसत्त्वादि दृष्टम्, **सामान्यादिवत्,** यथा सामान्य

* * *

सात्मकत्वात् प्रत्येकं सत्त्वात् स्वभावसद्भूतत्वात् सामान्यादिवत् । असदेव वा स्यात् सत्त्वसमवायलभ्यसद्भावत्वात् कार्यवत् । तस्माद् न सतामपि द्रव्यादीनां सत्करी सत्ता व्यर्थत्वात् इति साधूक्तम् ।

नापि सदसतां सत्करी सत्ता अभूतत्वात् सदसदात्मकत्वस्य त्वन्मतेनैव खपुष्पवत् । या तु त्वयोक्तोपपत्तिः सदसदेकात्म्यानुपपत्तेः इति सा नोपपत्तिः, त्वन्मतेनैव सदसदैकात्म्योपपत्तेः । अत्यन्ताविरुद्धत्वात् सदसदात्मकं कार्यं प्राक् सत्तासम्बन्धादपि, सामान्यादिद्रव्यादितदतत्सदसद्वत् ।

---

११ ऽतिश] दृश्यतां पृ° ४८१ पं° २ ॥
१९ दु] °दुक्तमेव प्र° ॥
२२ इ] इत्यशंका°nayacakra-ms-bhā ॥
२३ पि] चेवमेवार्थं द्रढतीति प्र° ॥

सामान्यादीनि स्वात्मना ... ... ...स्वसन्त्यपि न भवन्ति ।

* * *

विशेषसमवायाः सन्तो नान्यप्रकाशा नाधेयसत्त्वादयो नाप्रतिपूर्णसत्त्वादयः तथा द्रव्यादीनि । एवं **सात्मकत्वात् प्रत्येकं सत्त्वात् स्वभावसद्भूतत्वा**दिति हेतवः, मूलहेतोरेव पर्यायवाचिनो वा । एवमनभ्युपगमे **असदेव वा स्यात् सत्त्वसमवायलभ्यसद्भावत्वात्,** सत्त्वसमवायेन लभ्यः सद्भावोऽस्येति द्रव्याद्युत्पन्नमात्रं त्रयमभिसम्बध्यते । **कार्यवदिति** कारणावस्थायां यत् कार्यं स दृष्टान्तः । नन्वेवं सत्त्वसमवायलभ्यसद्भावं तस्यामवस्थायां कार्यं न भवतीति चेत्, न, त्वयैव निष्ठासम्बन्धयोरेककालत्वाभ्युपग- मेन परिहृतत्वात् । § 1395 - /ms

**तस्माद् न सतामपि द्रव्यादीनां सत्करी सत्ता व्यर्थत्वादिति साधूक्त**मिति प्रस्तुतदोषोक्त्युपपत्त्युपसंहारः । एवं तावदसतां सतां च द्रव्यादीनां सत्करी न भवति सत्ता इत्युक्तम् । § 1396

किञ्चान्यत्, **नापि सदसतां सत्करी सत्ता,** सन्तश्चासन्तश्च द्रव्यादयः सदसन्तो द्व्यात्मकाः, तेषां सदसतां सदभिधानप्रत्ययकरी सत्ता स्यादिति परस्याभिप्रेतं स्यात् तदपि न घटते । कस्मात् ? **अभूतत्वात् सदसदात्मकत्वस्य त्वन्मतेनैव खपुष्पवत्,** सत्तासम्बन्धात् प्राग् द्रव्यादि कार्यं सदसदपि न भवति असदेव तत् **स्वतो निरुपाख्यत्वा**दित्यादिहेतुभिः पूर्ववत् सत्तासम्बन्धलभ्यसत्त्वात् । अथ सत्तासम्बन्धनिरपेक्षमेवास्ति व्यर्थः सत्तासम्बन्ध इत्युक्तम् । तस्मादुभयथापि सदसत्त्वविकल्पो नास्ति । तस्मादभावात् खपुष्पवत् सत्तया न सम्बध्यते त्वन्मतेनैव, नास्मन्मतेनाप्यस्ति । § 1397

या तु त्वयोक्तोपपत्तिः सदसत्त्वाभावे **सदसदेकात्म्यानुपपत्तेः** इति सा नोपपत्तिः त्वन्मतेनैव सदसदेकात्म्योपपत्तेरत्यन्ताविरुद्धत्वं तयोः, **अत्यन्ताविरुद्धत्वात् सदसदात्मकं कार्यं प्राक् सत्तासम्बन्धादपि** । तद्यथा --
488/mj **सामान्यादिद्रव्यादितदतत्सदसद्वत्,** यथा सामान्यविशेषसमवायाख्यं

५ सा] सामान्यादीनि स्वात्मना सन्त्येव सम्बन्धसद्भावेनासन्ति, द्रव्यादीनि च कार्याण्युत्पन्नमात्राणि स्वसन्त्यपि न भवन्ति इत्याशयः प्रतिभाति ॥
७ ना] नान्याधेयस्वप्रकाशा ? ॥
७ ना] **॰प्रकाशनाधेय॰** प्र॰ ॥
७ त्त्वाद] **॰यो नाप्रतिपूर्णसत्त्वाद॰** nayacakra-ms-ya प्रतिषु नास्ति ॥
९ ए] **एवमभ्युपगमे** प्र॰ ॥
१२ स्था] **॰स्थानां** प्र॰ ॥
१३ निष्ठा] यच्चेदं किं गौर्गोत्वेनाभिसम्बध्यते अथागौः इति चोद्यं तन्न प्रतिसमाधानार्हं निष्ठासम्बन्धयोरेककालत्वादिति स्वकारणैः सत्तादिभिश्चि पिण्डस्याभिसम्बन्ध एवात्मलाभो न पूर्वं तस्य गोरूपता अगोरूपता वा इति प्रशस्तपादभाष्यव्याख्यायां **व्योमवत्यां** कर्मनिरूपणे ॥
१४ साधूक्त] दृश्यतां पृ॰ ४५९ पं॰ ३, ४७३ पं॰ ७ ॥
१९ अ] **भूतत्वात्** प्र॰ ॥
२१ अ] **असदधव तत्** प्र॰ ॥
२१ स्व] दृश्यतां पृ॰ ४८० पं॰ २ ॥
२३ इ] दृश्यतां पृ॰ ४६० पं॰ ६ ॥
२४ स] **सत्ताद्या**nayacakra-ms-bhā ॥
२५ स] दृश्यतां पृ॰ ४५९ पं॰ ५ ॥
१ प्रा] **प्राक्प्रत्तासम्ब॰**nayacakra-ms-ya । **प्राक्प्रवृत्तासम्ब॰** nayacakra-ms-bhā ॥
२ सामान्यादिद्र] **द्रव्यादौ** प्र॰ ॥

* * *

नन्वेवं तदव्यवहृतेः प्रागभावभेदवदभूतत्वमेव, अथ यदेतदभूतत्वं तत् किं भूतस्य आहोस्विदभूतस्य ? यदि भूतस्य ततः सदसदैकात्म्योपपत्तिरेव । अथ [अभूतस्य ?] अभूतत्वं ततो द्रव्यादेरभावहेतुर्वाच्यः । अहेतुतो[ऽ]भवने क्षणिकशून्यतादिव्युत्पत्तिवदभाव एव । न चेत्, पूर्ववत् सदसदैकात्म्योपपत्तिरेव ।

* * *

वस्तुत्रयं स्वभावसत् स्वेनात्मनास्ति तत्सत्, सम्बन्धसद्भावेन नास्तीत्यतदसत्, सच्चासच्चेत्यत्यन्तमविरुद्धत्वात् सदसत् त्वन्मतेनैव । तथा द्रव्यगुणकर्माख्यं कार्यत्रयमुत्पन्नमात्रं सामान्यादिवत् तदतत्सदसदिति सिद्धम् । तस्य दृष्टान्तद्वयस्य व्याख्या **सामान्यादीनि स्वात्मनेत्यादि** गतार्था यथाक्रमं यावत् **स्वसन्त्यपि न भवन्ति** । तस्मात् त्वन्मतेनैव सदसदैकात्म्यानुपपत्तेरसत्त्वं नास्ति, उपपत्तेरेव सत्त्वं सिद्धम् । तत् पुनरसत्त्वं कथं तर्हि ? इति, उच्यते--अभूतत्वादिति साधूक्तमिति । § 1398

इतर आह **--नन्वेवं तदव्यवहृतेः प्रागभावभेदवदभूतत्वमेव,** यथा तस्योत्पन्नमात्रघटद्रव्यादेः प्राक् कुशूल-कोस-स्थासक-शिवक-पिण्ड-मृदवस्थाभिरभावभेदैर्जलाद्याहरणादिव्यवहारो नास्तीति तत्र घटासत्त्वं तथा तदव्यवहृतेरभूतत्वमेव प्राक् सत्तासम्बन्धात् सदसदात्मकस्य कार्यस्य, को दोषः ? इति । अत्रेदं सम्प्रधार्यम् **--अथ यदेतदभूतत्व**मित्यादि विकल्पद्वयोपन्यासेन प्रश्नो गतार्थः । तत्रोत्तरम् **--यदि भूतस्य** द्रव्यादेरुत्पन्नमात्रस्याव्यवहारादभूतत्वमिष्यते तदेव भूतं वस्त्वात्मना तदेव चाभूतमव्यवहारात्मनेत्यतः सत्त्वासत्त्वाविरोधितेति **सदसदैकात्म्योपपत्तिरेव । अथा**भ्युपगमविरुद्धमैकात्म्यं मा भूदिति **अभूतत्व**मिष्यते **ततो द्रव्यादेरभावहेतुर्वाच्यः** कार्यस्य, केन हेतुना तदभूतं कार्यं स्वकारणेषु समवेतमुत्पन्नमात्रमस्मदुक्ताविरोधहेतुं अव्यवहारयोग्यत्वात् सदप्यसत् इत्येतं मुक्त्वा ? स्यान्मतम्--अहेतुत एवाभूतं तदभावे कारणाभावात् खपुष्पादिवदिति । एतच्चायुक्तम्, यस्मात् **अहेतुतो[ऽ]भवने** निष्कारणतोऽसत्त्वे **क्षणिकशून्यतादिव्युत्पत्तिवदभाव एव** स्यात् इति वाक्यशेषः । यथा पूर्ववस्तुनि निरुद्धे पश्चादुत्तर- - /ms मुत्पद्यमानं निर्हेतुकमिति प्राप्तं क्षणिकवादित्वम्, तस्याप्युत्पन्नस्याहेतुत एव

९ नास्तीत्य ] °त्येतदसत् प्र° ॥
१५ अ ] दृश्यतां पृ° ४८७ पं° ४ ॥
१६ प्रा ] प्रागभेदभाव-भेद°nayacakra-ms-bhānayacakra-ms-vi । प्रागभेदभावाभेद° nayacakra-ms-bhā nayacakra-ms-vi विना ॥
२३ स ] सच्चासत्त्वावि°nayacakra-ms-ya । सच्चावि° nayacakra-ms-bhā ॥
२६ दुक्ताविरोध ] °हेतुकम् प्र° ॥
२६ स्या ] स्यान्मतनहेतुतnayacakra-ms-bhā । स्यान्मतं न हेतुत nayacakra-ms-ya ॥
२७ पुष्पा ] °दिवति प्र° ॥
३ स्या ] °स्याहेतु एव वितासामंसतात् प्र° ॥

विनाशाशंसनात् । तच्चाद्रव्यत्वाद् निर्बीजत्वात् खपुष्पवदत्यन्ताभावः स्यात् तथेदमपि स्यात्, अनिष्टं चैतत् । यथा वाऽसिद्ध्ययुक्त्यनुत्पत्तिसामग्रीदर्शनादर्शनादिव्युत्पत्त्या सर्वं शून्यं निर्हेतुकोत्पत्तिस्थितिविनाशाभावसाधर्म्यात् खपुष्पवत् स्यात् । **आदि**ग्रहणात् प्रतीत्योत्पादसमुदायसन्तानादिसंवृतिव्युत्पत्तिवत् । **न चेत् पूर्ववदि**ति, मा भूदेषोऽत्यन्ताभावदोष इति सहेतुककार्याभूतत्वाभ्युपगमेऽस्मदुक्त**सदसदेकात्म्योपपत्तिरेव** प्राप्नोति । एवं तावत् प्राक् सत्तासम्बन्धात् सदसत् कार्यमिति प्रतिपादितम् । § 1399

489/mj

यदापि सत्तया सम्बद्धं तदापि सदसत् त्वन्मतेनैव । यत् तत् कार्यं सत्तया सम्बद्धं सदित्यभिधीयते ननु तत् स्वसत्तयैव सत् न सत्तासत्तया । सत्तापि आश्रयप्रतिलम्भात् सती एव अभिव्यज्यते कारणकार्याकारणाकार्यनित्यानित्यसम्बन्ध्यसम्बन्धिजातिमदजातिभेदात् तन्तुसमवायवत् । इतरेतराभावादिवर्णनैश्च सर्वत्र सदसदेकात्म्योपवर्णनमेव । अत इदं जैनेन्द्रत्वमेव प्रतिपद्य प्रज्ञाप्य च अविविक्तप्रज्ञान् प्रति संव्रियते । § 1400

किञ्चान्यत्, तिष्ठतु तावत् प्राक् सत्तया सम्बन्धात् कार्यस्य सदसत्वम् **यदापि सत्तया सम्बद्धं तदापि सदसत् त्वन्मतेनैव**, तद्यथा --**यत् तत् कार्यं सत्तया सम्बद्धं सदित्यभिधीयते** सत्तया विशेषणभूतया विशेष्यते दण्डेनेव दण्डी विशेष्यत्वात् **ननु तत् स्वसत्तयैव सत्** लब्धात्मलाभमेव दण्डविशिष्टदेवदत्तवत्, **न सत्तासत्तया,** न हि दण्डसम्बन्धाद् देवदत्तोऽसन् सन् क्रियते, *किं तर्हि ? सन्नेव दण्डित्वव्यपदेशभाग् भवति स्वसत्तया सन् दण्डिसत्तया चासंस्तदेति सदसन् । तथा सत्कार्यं सत्तासम्बन्धकाले सदेव स्वसत्तया खपुष्पाद्यवस्तुवैधर्म्यात् । तथा **सत्तापि** न वस्तुसत्तया असती सती क्रियते, किं तर्हि ? **आश्रयप्रतिलम्भात् सत्येवाभिव्यज्यते** । तदुभयं

---

५ य] यथा
वाऽसिद्धयुक्त्यानु°nayacakra-ms-ya
। यथावासिद्धयुक्त्यानु°
nayacakra-ms-bhā ।
अथवाऽसिद्ध्ययुक्त्यनु° ? ।
अत्रोपपत्तिप्रश्नः--अथ कथं स्वपरोभयाभावः
? ब्रूमः--एभ्यो हेतुभ्यः
असिद्ध्ययुक्त्यनुत्पादसामग्रीदर्शनादर्शनेभ्यः
।--इति नयचक्रवृत्तौ द्वादशेऽरे विस्तरेण
वक्ष्यते शून्यवादे ॥
५ ग्रीद]
°दर्शनादिव्यु°nayacakra-ms-ḍe ॥
८ भू] भूंदषो°nayacakra-ms-ya ।
भूदेतेषां° nayacakra-ms-bhā ॥
१९ य] सदापि प्र° ॥
२० ष] °षभूतया प्र° ॥
२२ न] न
सत्वासत्तयाnayacakra-ms-ya । न
सत्तया nayacakra-ms-bhā ॥
२२ म्ब] °म्बन्धा
देवदत्तोnayacakra-ms-bhā ।
°म्बन्धो देवदत्तो nayacakra-ms-ya
। °म्बन्धादेव देवदत्तो ? ॥
१ *] किंतु
तर्हिnayacakra-ms-bhā ॥

वस्तुसत्तया सदेव सत्तादि द्रव्यादि च सम्बन्धिसत्तया नास्तीत्यर्थः । कुतः ? - /ms **कारणकार्येत्यादिहेतोर्यावद् भेदादिति** । द्रव्यादि वस्तु कार्यं कारणं च, सत्ता त्वकार्यमकारणं च, नित्या सत्ता, द्रव्याद्यनित्यम्, सम्बन्धि द्रव्यादि, सत्ता असम्बन्धिनी, जातिमद् द्रव्यादि, अजातिः सत्ता इत्येभ्यो भेदेभ्यो भिन्नत्वात् । **तन्तुसमवायवत्**, यथा तन्तवः कारणादिधर्माणस्तथा द्रव्यादयः, यथा समवायोऽकारणादिधर्मा तथा सत्तेति । दृष्टान्तदार्ष्टान्तिकयोश्च सदसत्त्वयोजना स्वभावसम्बन्धसत्ताभ्यां कर्तव्या । तस्मात् सदसत्त्वैकात्म्योपपत्तिरेव । § 1401

किञ्चान्यत्, **इतरेतराभावादिवर्णनैश्च** त्वयैव **सर्वत्र सदसदैकात्म्योपवर्णनमेव** कृतम् इति वाक्यशेषः । **सच्चासत्** वै० सू० ९ । १ । ४ 490/mj इतीतरेतराभाववर्णनं घटः सन्नेव स्वात्मना पटाद्यात्मना

* * *

ननु मया विगृह्यैवात्र वादः सैद्धार्थीयमतावलम्बिनं त्वामेवोद्दिश्य । यदुच्यते सैद्धार्थीयैः (?')उपादाननियमदर्शनात् सत् कार्यं तिलतैलवत् तत्क्रियाद्यसत्त्व-

---

१३ स] इदानीमनुमानं व्याचिख्यासुस्तस्य विषयं दर्शयति --**क्रियागुणव्यपदेशाभावादसत्** वै० सू० ९ । १ । १, न तावत् कार्यं प्रागुत्पत्तेः प्रत्यक्षेण गृह्यते । नाप्यनुमानेन, सति लिङ्गे तस्य भावात्, लिङ्गाभावश्च तदीययोः क्रियागुणयोरनुपलब्धेः, न चान्यद् व्यपदेशशब्दसूचितं लिङ्गमस्ति, तस्मात् प्रागुत्पत्तेरसत् । पश्चात् **सदसत्** वै० सू० ९ । १ । २, सद्भूतं च कार्यं प्रध्वस्तमुत्तरकालमसदेव, न सतस्तिरोधानं क्रियागुणव्यपदेशाभावादेव । मध्ये तु **असतः सत् क्रियागुणव्यपदेशाश ?भावादर्थान्तरम्** वै० सू० ९ । १ । ३, प्रध्वंसात् पूर्वमुत्पत्तेरुत्तरकालमसतोऽर्थान्तरभूतं वस्तु सत् इत्युच्यते क्रियागुणव्यपदेशानां भावात् । **सच्चासत्** वै० सू० ९ । १ । ४, सदपि वस्तु भावान्तरनिषेधेन गौरश्वो न भवतीति, कार्याकरणेन नायं गौर्यो न वहति असत् इत्युपचर्यते । **यच्चान्यत् सतस्तदप्यसत्** वै० सू० ९ । १ । ५, सतश्च वस्तुनो यदन्यदत्यन्ताभावरूपं प्रागुपाधिप्रध्वंसाभावाविषयं शशविषाणादि तदप्यसदेव । असतामविशेषात् प्रागसति कथं कारकप्रवृत्तिर्नान्यत्रेति चेत्, न, विशेषग्रहणात्, तत्र **असदिति भूतप्रत्ययाभावाद् भूतप्रत्यक्षाभावाद्** ***T*** **भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च ज्ञानम्** वै० सू० ९ । १ ।६, प्रध्वंसासति **स ? असदिति** ज्ञानं भूतस्य वस्तुनः पूर्ववदिदानीं दर्शनाभावात् तस्य च भूतस्य वस्तुनः स्मरणाद् विरोधिनश्च कपालादेर्ग्रहणाद् विनाशं परिकल्प्योत्पद्यते, अन्यथा कथमिव न दृश्येत तथात्वस्याविशेषात् । प्रागभावे तु **तथाभावे भावप्रत्यक्षत्वाच्च तथाऽभावे भावप्रत्यक्षत्वाच्च ?** वै० सू० ९ । १ । ७, मृत्पिण्डावस्थायां प्रागभावे घटविषयं प्रत्यक्षज्ञानं नाभूत्, इदानीं तु घटविषयं विरूद्धं विज्ञानमुदभूत् स्मर्यते चाभावावस्था, तस्मादिदानीमयं भावः समभूत् पूर्वमस्याभाव एव चासीदिति प्रागभावे असत् इति निश्चयज्ञानम् । **एतेनाघटोऽगौरधर्मश्च व्याख्यातः** वै० सू० ९ । १ । ८, यथा हि स्थाल्यां घट इत्युत्पन्नविज्ञानस्य कारणान्तरितसम्यक्प्रत्यय उत्पद्यते नायं घटः, स्थालीयम् इति तदपि घटप्रत्ययस्याभावात् तस्य च स्मरणाद् विरुद्धस्य च स्थाल्यादेर्दर्शनाद् बोद्धव्यम् । एवमश्वे अगौः इति । त[था] सामान्यतो दर्शनाद् रात्रिस्नानादेर्धर्मत्वे सम्भाविते अधर्म इत्युत्पद्यत इति चेतनाचेतनातीन्द्रियभेदेनोदाहरणत्रयम् । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ० ३० B--३१ A ॥

* * *

नास्तीति । तथा **क्रियागुणव्यपदेशाभावादसत्** वै॰ सू॰ ९ । १ । १ इति **असदिति भूताप्रत्यक्षत्वाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च । तथाभावेऽभावात्** वै॰ सू॰ ९ । १ । ७ इति च प्रागभावप्रध्वंसाभाववर्णनं च । सर्वत्र सदसत्त्वमेव वर्णितमेकमत्यन्ताभावं मुक्त्वा शशविषाणादिवदेकान्तनिरात्मकत्वानभ्युपगमादिति । **अत इदं जैनेन्द्रत्वमेव** सदसद्वादित्वं **प्रतिपद्य** बहुधा **प्रज्ञाप्य च** मा भूदृजुजनेष्वविविक्तप्रज्ञेषु जैनानामेव गौरवं तत्त्वज्ञाः इति मम च लाघवम् अतत्त्वज्ञः इति त्वयैवं तानविविक्तप्रज्ञान् प्रति **संव्रियते** गूह्यते । § 1402

अत्राह--नाहं जैनेन्द्रत्वमभ्युपैमि, न चाविविक्तप्रज्ञान् प्रति संवृणोमि । **ननु मया विगृह्यैवात्र वादः सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न** वै॰ सू॰ ९ । १ । १२ इत्यनेन सूत्रेण । स पुनर्वादः ***सिद्धार्थसुतमतावलम्बिनं** सद- - /ms
सदेकात्म्यवादिनं **त्वामेवोद्दिश्य । यदुच्यत** इत्यादि **सैद्धार्थीय**मतप्रदर्शनार्थः पूर्वपक्षः । ते हि **सैद्धार्थीयाः** सदसदेकात्मत्वं वस्तुनोऽभिलषन्त इत्थमुपपत्तिं ब्रूयुः, तद्यथा --**उपादाननियमदर्शनात् सत् कार्यं तिलतैलवत्, तत्क्रियाद्यसत्त्वदर्शनादसद्** *वीरणेष्विव घटो मृद्यपीति । इतरथा अत्यन्तासत्कार्यवादे
491/mj न स्यादुपादाननियमः खपुष्पस्येव, अत्यन्तसति च तत्त्वस्थायामेव पटे

---

६ भू] भूतप्र॰ प्र॰ । अत्र **चन्द्रानन्द**विरचितवृत्तियुते **वैशेषिकसूत्रे असदिति भूतप्रत्ययाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च ज्ञानम्** इति पाठः, **वैशेषिकसूत्रमूलमात्र**[P]प्रतौ तु **असदिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च ज्ञानम्** इति पाठः, दृश्यतां पृ॰ ४८९ टि॰ ६ । **शङ्करमिश्र**विरचितोपस्कारसहिते **वैशेषिकसूत्रे** तु **असदिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षवत्** इति पाठः ॥
६ त] **तथाभावात्**nayacakra-ms-raṃ । **तथाभावभावात्** nayacakra-ms-bhā । अत्र **तथाऽभावे भावात्** इति समीचीनं भाति । अत्र **चन्द्रानन्द**विरचितवृत्तिसहिते **वैशेषिकसूत्रे वैशेषिकसूत्रमूलमात्र** [P]प्रतौ च **तथाभावे भावप्रत्यक्षत्वाच्च** इति पाठः, दृश्यतां पृ॰ ४८९ टि॰ ६ । **शङ्करमिश्र**प्रणीतोपस्कारसहिते **वैशेषिकसूत्रे** तु **तथाऽभावे भावप्रत्यक्षत्वाच्च**वै॰ सू॰ ९ । १ । ७, सामान्यवाच्यप्ययम् अभावशब्दः प्रकरणात् प्रागभावपरः, यथा प्रध्वंसे प्रत्यक्षज्ञानं तथा प्रागभावेऽपि, कुतः ? भावप्रत्यक्षत्वात्, भावस्य व्यूह्यमानवीरणादेः प्रत्यक्षत्वात् प्रत्यक्षेण विषयीक्रियमाणत्वात् । यद्वा भावस्याधिकरणस्य प्रतियोगिनश्च प्रत्यक्षत्वात् योग्यत्वादित्यर्थः । संसर्गाभावग्रहेऽधिकरणयोग्यतायाः प्रतियोगियोग्यतायाश्च तन्त्रत्वात् । चकारात् प्रतियोगिस्मरणं उक्तं च तर्कं समुच्चिनोति । इति ॥
९ अ] **अद इदं जैनेन्द्रत्वमेव सदसत्त्वादित्वं** प्र॰ ॥
१४ या] विगृह्येति विजिगीषया, न तत्त्वबुभुत्सयेति--**न्यायभा॰** ४ । २ । ५१ ॥
१४ स] दृश्यतां पृ॰ ४६० टि॰ १ ॥
१५ *] **सिद्धार्थो** नाम नरेन्द्रः, तस्य सुतः श्रमणो भगवान् **महावीरः वर्धमानः** इत्यपराभिधानः, तन्मतावलम्बिनं जैनमित्यर्थः ॥
१ *] **वीरणोष्विवद्घटो**nayacakra-ms-bhā । **वीरणोब्धिवद्घटो** nayacakra-ms-pā nayacakra-ms-ḍe । **वीरणोब्धिवद्घटो** nayacakra-ms-vi । **वीरणाब्धिवद्घटो** nayacakra-ms-raṃ ॥

* * *

दर्शनादसत्, दृष्टं तावत्... ... ..., इतरथा तन्तुपांस्वादिष्वविशेषः प्रागपि व्यापाराभावश्च स्यात्, दृष्टा तु क्रिया... ... ..., उभयैकान्ते दोषदर्शनात् सदेवासदेव वेति चायुक्त एकान्तः, सदसदात्मकत्वात् कार्यस्य उपादाननियमः क्रिया च युज्यते(?') इति, तन्न, विकल्पानुपपत्तेः । सदेवासत् सदसत् स्वेनैवात्मना सच्चासच्च अन्येनात्मना सद्...घटात्मना चासत् ? न तावत्... ... ...असत्त्वप्रतिपक्षश्च सत्त्वम् । सत् सोपाख्यमसन्निरुपाख्यम्... ... ...सदसत्त्वं न भवतीत्यर्थः । अत्र सतोऽसत्प्रतिपक्षत्वमसिद्धं तदङ्गत्वात् तदात्मकत्वात् तत्प्रवृत्तित्वात् घटोर्द्ध-

* * *

पटार्था कुविन्दस्य क्रिया न स्यात् । उपादाननियमतदर्थव्यापारौ सदसत्त्वे कार्यस्य हेतू, **दृष्टं तावदित्यादिना** समर्थयति । अनिष्टं चापादयति--तथानिच्छतः **तन्तुपांस्वादिष्वविशेषः स्या**दुपादानमेवानुपादानमेव वा, लब्धात्मपदार्थकारकव्यापाराभाववत् **प्रागपि व्यापाराभावः स्या**दिति च यथासङ्ख्यम् । निगमयति यथासम्भवं **दृष्टा तु क्रिये**त्यादि । **उभयैकान्ते दोषदर्शना**दिति सदेवाऽसदेव चेत्येकान्ते । सदेवासदेव वेति चायुक्त एकान्तः, सदसदात्मकत्वात् कार्यस्य सत्पक्षमाश्रित्योपादाननियमो युक्तः, असत्पक्षमाश्रित्य क्रिया युक्तेति । यदेतत् **सैद्धार्थीयं** मतं **तन्न, विकल्पानुपपत्ते**रित्यादि । **सदेवासत् सदस**दित्यादि प्रत्युच्चारणं संक्षेपेण विकल्पद्वयेन सोपपत्तिकं **स्वेनैवात्मना सच्चासच्च अन्येनात्मना** सदिति यावद् **घटात्मना चास**दिति । § 1403

**न तावदित्यादि** प्रथमं तावद् विकल्पं व्यवस्थाप्य सूत्रेण दूषणमाह सव्याख्यानं सोपवर्णनं याव**दसत्त्वप्रतिपक्षश्च सत्त्व**मिति गतार्थम् । सतोऽसता

---

३ दृ] दृष्टं तावत् पटार्थितायां तन्तूनामेवोपादानं न तु पांस्वादीनाम्, एवं पटार्थश्च कुविन्दस्य व्यापारो दृष्टः इत्याशयो भाति ॥

४ दृ] दृष्टा तु क्रिया पटार्था कुविन्दस्य तन्तूनामेव चोपादानम्; तस्मादुपादाननियमतदर्थव्यापाराभ्यां सदसत् कार्यम् । इत्याशयो भाति ॥

६ स] अत्र किं येनैवात्मना सत् तेनैव असत्, आहोस्वित् आपेक्षिकं सदसत्त्वम् अन्येनात्मना मृदादिना प्राक् सद् घटादि कार्यं घटात्मना चासत् ? इति विकल्पद्वयस्याशयो भाति ॥

७ न] न तावद् येनैवात्मना सत् तेनैवात्मना असत्, सदसतोर्वैधर्म्यात् । यदुक्तम् --**सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न** वै° सू° ९ । १ । ९, सत्त्वप्रतिपक्षोऽसत्त्वमसत्त्वप्रतिपक्षश्च सत्त्वम्, सत् सोपाख्यम् असन्निरुपाख्यम्, तयोर्वैधर्म्यात् एकस्मिन् कार्ये सदसत्त्वं न भवतीत्यर्थः । इत्याशयो भाति ॥

१३ हेतू] प्रथमाविभक्त्यन्तत्वे इयमेव वाक्ययोजना समीचीना । द्वितीयाविभक्त्यन्तत्वे तु हेतू समर्थयति इत्यन्वयो ज्ञेयः ॥

१३ दृ] **दृष्टां** प्र° ॥

१७ देव] **चेति**nayacakra-ms-ḍenayacakra-ms-vi ॥

१७ चा] **वायुक्त**nayacakra-ms-ya ॥

२१ स] **सच्चासच्चा** प्र° ॥

१ प्र] द्वितीयविकल्पस्य स्वरूपं दूषणं तत्परिहारादिकं च ज्ञातुं दृश्यतां पृ° ४९९, ५०० ॥

२ व्याख्यानं] **सोवर्णनं** प्र° ॥

२ तिप] **°पक्षं च** प्र° ॥

विरोधः प्रातिपक्ष्यं वैधर्म्यमेव हेतुः । मा मंस्थाः सोऽसिद्ध इति, अतस्तत्प्रदर्शनार्थमाह --**सत् सोपाख्य**मित्यादि वैधर्म्यस्फुटीकरणं यावत् **सदसत्त्वं न भवतीत्यर्थ** इति सुव्याख्यातम् । § 1404 - /ms

अत्राचार्य उत्तरमाह --**अत्र** त्वत्साधने **सतोऽसत्प्रतिपक्षत्वं** विरोधो वैधर्म्यमसिद्धम् । कुतः ? **तदङ्गत्वात्,** अङ्गमवयवस्तदेकदेशः, यद् यस्याङ्गं स तस्य प्रतिपक्षो न भवति, यथा घटस्योर्द्ध्वग्रीवादित्व 492/mj

* * *

ग्रीवादित्ववत् । भवन् सन् भवति प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थतदतत्प्रवृत्तव्यावृत्तसदसदात्मकः स्वतोऽत्यन्ताविभक्तवृत्तिपर्यनुभवोऽभूतखपुष्पविलक्षणोऽर्थान्तरभूतक्षणभङ्गविलक्षणश्चातीतानागतवर्तमानभिन्नभवनसदसदेकक्रियः आकाशवत् । तथा तन्तुपटाद्यपि क्रमभावि सदसत्, तथा युगपद्भावि खमपि, इतोऽपीतोऽपि ।

* * *

मिति । इतश्च प्रतिपक्षो न भवति, **तदात्मकत्वात्,** स आत्माऽस्य भावस्याभाव आत्मा, तद्भावात् तदात्मकत्वात्, **घटोर्द्ध्वग्रीवादित्ववदे**व । इतश्च, **तत्प्रवृत्तित्वात्,** स एवाभावोऽस्य सतः प्रवृत्तिः, तेनाभावरूपेण भावः प्रवर्तत इत्यर्थः । एक एव भावाभावरूपेणार्थो घटवद् मृत्पिण्डशिवकादिरूपादियुगपदयुगपद्भाविधर्मभावाभावप्रवृत्तिरिति । अथवा अङ्गमात्मा, आत्मा च प्रवृत्तिरित्यैकार्थ्यमेवेति व्याख्यानं तदङ्गत्वस्य । § 1405

यथा च तत् तन्तुपटादि क्रमभावि **तथा युगपद्भावि खमपि** स (Edtext outside numbered paragraph)दसद् भिन्नाभिन्नं च **इतोऽपि इतोऽपी**ति उभयात्मक (Edtext outside numbered paragraph)त्वं प्रदर्श्यत इति । (Edtext outside numbered paragraph) § 1406

**भवन् सन् भवती**ति सत्त्वं नाम भवत एव नाभवतः । भवनं च कीदृशम् ? अभावानुविद्धम्, इति तद्दर्शयति --**प्रत्येकवस्त्वि**त्यादि दण्डको यावत् **सदसदात्मकः,** एकमेकं प्रति प्रत्येकं वस्तुनः स्वरूपं प्रतिपत्तुं प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थं तत्प्रवृत्तं घटाख्यं शिवकादिव्यावृत्तं पटादिव्यावृत्तं च, तस्मात् तदेव घटाख्यं घटात्मना प्रवृत्तं भवति, पटशिवकाद्यात्मना व्यावृत्तं न भवति । अतः **सदसदात्मकः** । तस्मादभावो भावाङ्गं भावात्मा भावप्रवृत्तिरेव । एवं तावद् युगपद्भाविरूपादिभावेनापि भवन् स घटो नाभावेन स्वाङ्गात्मप्र-

---

१० वोऽभू] दृश्यतां पृ° ४९३ पं° १३ ॥
१८ ए] एवnayacakra-ms-bhā प्रतौ नास्ति ॥
१९ कादिरूपादियु] °युगपद्भाविधर्म° प्र° ॥
१९ मा] °मात्मा च प्रवृ°nayacakra-ms-bhā ॥
२१ भ] भवनं कीं°nayacakra-ms-ya ॥
२३ प्र] प्रति प्रत्ये वस्तुनःnayacakra-ms-bhā । प्रत्येकं वस्तुनः nayacakra-ms-bhā ॥
१ च] चाnayacakra-ms-bhā ॥
४ भ] भवन् सन् घटो ?, दृश्यतां पृ° ४९२ पं° १० ॥

वृत्तिस्वरूपेण विना भवतीत्युक्तं द्रव्यक्षेत्रापेक्षम् । कालभावापेक्षमप्युच्यते-- - /ms स एव च भविता घटः **स्वतोऽत्यन्ताविभक्तवृत्तिपर्यनुभवः** तामात्मनो वृत्तिं प्राक् पश्चाच्च परितोऽनुभवति । तस्माद्भवनात्मकत्वाद**भूतखपुष्पविलक्षणः,** केनचिद्रूपेण खपुष्पस्याभवनाद् घटस्य च पूर्वोत्तररूपैर्भवनात् । **अर्थान्तरभूतक्षणभङ्गविलक्षणश्च** प्राक् पश्चादिदानीं च भवनाद् भवनस्य प्रवर्तनस्य द्रव्यार्थतोऽत्यन्तमभिन्नत्वात् क्षणभङ्गवादेऽत्यन्तं क्षणे क्षणेऽन्यत्वाभ्युपगमात् तद्विलक्षण इति । नन्वेवं द्रव्यार्थभवनस्याभेदादभवनं निरवकाशमेवेति, एतच्च न भवतीत्यत आह --**अतीतानागतवर्तमानभिन्नभवनसदसदेकक्रियः,** यान्यतीतानि भवनान्यनागतानि च तानि वर्तमानभवनाद् भिन्नानि देशकालाकारनिमित्तादिभेदात्, तेभ्यश्च वर्तमानभवनम्, परस्परविलक्षणत्वाच्च परस्पररूपेण न सन्ति, अथ च भवनक्रियैकैव सर्वाणि तान्युच्यन्ते । कथम् ? **आकाशवत्,** यथा तवाप्याकाशं शब्दादिसमवायिनां घटादिसंयोगिनां चाधारभूतमेकमविच्छिन्नभवनमपि तेषु घटपटशब्दादिभवनाधारतया भिद्यमानत्वाद् भेदाभेदाभ्यां सच्चासच्च इत्येषणीयम्, अन्यथा तेषां घटशब्दादीनां सङ्करप्रसङ्गात्, तथास्मन्मतेनाप्यवगाहसामान्याद् भवत्येव अङ्गुलिघटाद्यवगाहैर्भेदादसच्च, तथोक्तभावनो घटो द्रव्यादि कार्यं चेति । यथाकाशं **तथा** भूतत्वात्

इतरथा नैव भवेद् वस्तु अपूर्वत्वात् खपुष्पवत्, वैधर्म्येण चम्पकपुष्पवत्, अपरत्वादभेदत्वादवर्तमानत्वात् वान्ध्येयवत् क्षणिकवादवत्, । तस्मान्न सदसतोः प्रतिपक्षत्वम् । न नैकात्म्यम्, विधिप्रतिषेधैकविषयत्वात्, भावितैकात्म्यचेतनाचेतनत्ववत् ।

यदपि च सत् सोपाख्यमसद् निरुपाख्यमिति तदपि नोपपद्यते सतोऽप्यनुपाख्यत्वात् । को हि प्रतिवस्तु प्रतिक्षणसत्त्वेन सदुपाख्यातुं शक्नोति ? असाधारणत्वात्

* * *

क्रमभावि सदसत् ।**तन्तुपटाद्यपि** 493/mj

* * *

इतरथा नैव भवेद् वस्तु अपूर्वत्वात् खपुष्पवत्, वैधर्म्येण चम्पकपुष्पवत्, अपरत्वादभेदत्वादवर्तमानत्वात् वान्ध्येयवत् क्षणिकवादवत्, । तस्मान्न सदसतोः प्रतिपक्षत्वम् । न नैकात्म्यम्, विधिप्रतिषेधैकविषयत्वात्, भावितैकात्म्य-

---

६ स्व ]
स्वतात्यंतावि॰nayacakra-ms-ya । स्वतोत्यंगोतावि॰
nayacakra-ms-bhā ॥
७ स्माद्भ ] ॰द्भावना॰ प्र॰ ॥
९ भू ]
॰भूतलक्षणभंग॰nayacakra-ms-bhā । ॰भूतलक्षणं भंग॰
nayacakra-ms-ya ॥
१३ भिन्नानि ] देशकालादिस्वरूपज्ञानार्थं दृश्यतां पृ॰ ३२० पं॰ ४, १८, २६ ॥
१५ भ ] भवनेnayacakra-ms-ya ॥
१५ तान्युच्य ]
॰च्यतेnayacakra-ms-raṃ ॥
१ स ] सत्nayacakra-ms-bhā ॥

चेतनाचेतनत्ववत् ।

यदपि च सत् सोपाख्यमसद् निरुपाख्यमिति तदपि नोपपद्यते सतोऽप्यनुपाख्यत्वात् । को हि प्रतिवस्तु प्रतिक्षणसत्त्वेन सदुपाख्यातुं शक्नोति ? असाधारणत्वात्

* * *

क्रमभावि सदसत् ।

**इतरथा नैवे**त्यादि । एवं सदसदात्मकत्वमनिच्छतो वस्तुनस्ते **नैव भवेद् वस्तु अपूर्वत्वात्** निर्बीजत्वात्, नास्य पूर्वमिति बहुव्रीहिसमासाश्रयेण न पूर्वमपूर्वं प्रागसत्त्वादिति तत्पुरुषाश्रयेण वा, **खपुष्पवत्** । **वैधर्म्येण चम्पकपुष्पवत्,** मूलाङ्कुरादिभवनेन पूर्वस्यैव सतश्चम्पकस्य पुष्पीभवनात् । तच्च सदसदात्मकं चम्पककुसुममिति । एव**मपरत्वा**दनुत्तरत्वाद**भेदत्वा**दिति योज्यम् । तस्माद् वर्तमानमेव न स्यात्, ततश्चा**वर्तमानत्वा**दपि नैव स्यात्, **वान्ध्येयवत् क्षणिकवादव**दिति च खपुष्पक्षणभङ्गवैलक्षण्यप्रस्तुतेरुदाहरणद्वयमेतत् । तन्निगमयति --**तस्मान्न सदसतोः प्रतिपक्षत्व**मिति । § 1407

इतश्च **न नैकात्म्यं** सदसतोरैकात्म्यमेव, द्विः प्रतिषेधस्य प्रकृत्यापत्तेः । कुतः ? **विधिप्रतिषेधैकविषयत्वात्,** विधिः अन्वयः, प्रतिषेधो व्यतिरेकः, तावुभावेकविषयौ इत्येतत् **प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थतदतत्प्रवृत्तिव्यावृत्तिसदसदात्मक** इति **अविभक्तस्वरूपपर्यनुभवोऽतीतानागतवर्तमानभिन्नभवनसदसदेकक्रियः** इत्यादिवचनात् सिद्धम् । तस्मात् सदसदैकात्म्यमेव **भावितैकात्म्यचेतनाचेतनत्ववत्,** यथा च चेतनाचेतनयोर्विधिप्रतिषेधैकविषयत्वेन भावयित्वा चेतनोऽचेतन इत्युक्तं तथेहापि द्रव्यादिसदसदैकात्म्याद् नास्ति सदसतोः प्रतिपक्षतेति । § 1408

**यदपि चे**त्यादि । सदसतोः प्रतिपक्षत्वभावनार्थं वैधर्म्यमुच्यते त्वयां **सत् सोपाख्यमसद् निरुपाख्यमिति तदपि नोपपद्यते, सतोऽप्यनुपाख्यत्वात् । को ही**त्यादि, वस्तुनि वस्तुनि रूपरसादौ *यो योऽसाधारण आत्मा पूर्वक्षणे उत्तरे च क्षणे विलक्षणस्तस्य भावः सत्त्वम्, तेन सत्त्वेन **प्रतिवस्तु प्रतिक्षणसत्त्वेन** च **सद्** वस्तु तदुपाख्यातुं केनचिदशक्यम्, **असाधारणत्वात्,** यदसाधारणं न तदुपाख्यातुं शक्यते **स्वसुखादिपर्यनुभववत्** । तस्माद् नायमेकान्तः सत् सोपाख्यमेवेति । स्यान्मतम्— न ब्रूमः सत् सोपाख्यमेव - /ms

---

१० स] सत्nayacakra-ms-bhā ॥
१४ स] सत एचंपकस्यnayacakra-ms-bhā । सत एवं चंपकस्य nayacakra-ms-pā nayacakra-ms-ḍe nayacakra-ms-vi । सत एव चंपकस्य nayacakra-ms-raṃ ॥
१७ प्र] दृश्यतां पृ° ४९२ पं° २ ॥
२२ दात्म] °त्मकमिति प्र° । दृश्यतां पृ° ४९२ पं° २ ॥
२५ इत्यु] दृश्यतां पृ° ३७२ पं° ७ ॥
२७ स] दृश्यतां पृ° ४९१ पं° ६ ॥
२९ *] दृश्यतां पृ° ४९१ पं° ६ ॥
१ क्ष] ययोरसाधारण प्र° ॥
२ च] च यद् वस्तु ? ॥
४ स्या] स्यान्मतं ब्रूमः प्र° ॥

इति, यतोऽस्य व्यभिचार उच्यते । किं तर्हि ? सत् सोपाख्यं निरुपाख्यं *

494/mj

* * *

स्वसुखादिपयनुभववत् ? । अथ च निरुपाख्यतायामपि नैव तदसत् सामान्यसोपाख्यत्वात् । अपि च त्वयापि... ... ...विशेषणसम्बन्धः कल्प्यः, अथ च न तदसद् निरुपाख्यत्वात्, सदसदेव तु सोपाख्यनिरुपाख्यत्वात् सामान्यवत्, सोपाख्यं निरुपाख्यं च सदसत्त्वात् सामान्यवत् । सामान्यं स्वसत् न सामान्यसद् वस्तुवदिति सदेवासत् सामान्यम् । सोपाख्यं स्वपरप्रत्ययाभिधानाधानात् निरुपाख्यं च वस्तुवदिति सोपाख्यमेव निरुपाख्यम्, वस्तुनि विपर्ययः । अतो व्यवस्थापितसोपाख्यनिरुपाख्यत्वात् सदसदेव सामान्यादिद्रव्यादिवत् ।

* * *

वा स्यात्, निरुपाख्यं त्वसदेव, तत् सता साधर्म्यं न भजत इति । एतदपि नोपपद्यते व्यभिचारादित्यत आह --**अथ च निरुपाख्यतायामपि नैव तदसत् सामान्यसोपाख्यत्वात्,** उप सामीप्ये, सामीप्येनाख्या उपाख्या प्रत्यासत्त्येत्यर्थः, सह उपाख्यया सोपाख्यम्, यदप्यसाधारणं सुखादिपर्यनुभवादि तदपि सामान्येनोपाख्यायते--किमपि सुखं दुःखमित्यादि । तस्मान्निरुपाख्यस्यापि सत्त्वदर्शनादयुक्तमुक्तम् — **असन्निरुपाख्यं सत् सोपाख्यमिति** । तस्मात् केनचिदात्मना सदेवासत् सोपाख्यं चेति नास्ति सदसतोर्वैधर्म्यम् । अथवा **सामान्यसोपाख्यत्वात्,** यथा सामान्यं स्वेनात्मना सोपाख्यं स्वसत्तया, न विशेषणात्मना सामान्यान्तरेण, न तु द्रव्यादिवस्तुवत्, इति सत् सोपाख्यं निरुपाख्यमसच्चेति दृष्टत्वात् तवैवैकत्र सदसतोर्नास्ति विपक्षता ।

§ 1409

किञ्चान्यत्, **अपि च त्वयापी**त्यादि, त्वत्कल्पनयैव सदसत् इत्येतत् प्रदर्शयितुमिदमुच्यते, प्राग्व्याख्यातार्थ एवैष ग्रन्थो यावद् **विशेषणसम्बन्धः कल्प्य** इति, इह तु प्राग् विशेषणसम्बन्धाद् विद्यमानमेव निरुपाख्यमितीष्टं त्वयैव इत्येतस्यार्थस्य प्रदर्शनार्थमुपन्यस्तः, अत आह --**अथ च न तदसद् निरुपाख्यत्वा**दिति निरुपाख्यत्वस्य सति दृष्टत्वाद् व्यभिचर उक्तः । असच्च तत् सम्बन्धासत्त्वात् तस्यामवस्थायाम्, सोपाख्यं च तदुत्तरकालं सत्तासम्बन्धोपाख्यत्वात् । एवं सोपाख्यनिरुपाख्यत्वाविरोधमापाद्य प्रस्तुतकार्यसदस- - /ms

६ *] °क्षस्तस्य प्र° ॥
१६ वा] चाnayacakra-ms-bhā ॥
१८ प्र] प्रत्यासत्तेत्यर्थः प्र° । प्रत्यासन्नेत्यर्थः ? ॥
१९ नुभ] °भावादि प्र° ॥
२१ नाद] °दयुक्तम्nayacakra-ms-bhā nayacakra-ms-raṃ ॥
२१ अ] दृश्यतां पृ° ४९१ पं° ६ ॥
२२ त्] सोपाख्यं निरुपाख्यं चेति ? ॥
२८ प्रा] पृ° ४७४ पं° २ ॥
२९ क] कल्प्यव इतिnayacakra-ms-bhā । कल्प्यत इति ? । दृश्यतां पृ° ४८५ पं° १८ ॥
३ म्ब] सम्बन्धसत्तात् प्र° । अत्र सम्बन्धसत्ताभावात् इत्यपि पाठः स्यात् ॥
४ सोपाख्य] °निरुपाख्य°nayacakra-ms-ya प्रतिषु नास्ति ॥

त्वाविरोधे साधनमाहाचार्यः --**सदसदेव तु सोपाख्यनिरुपाख्यत्वात् सामान्यवदिति ।** अथवा **सोपाख्यं निरुपाख्यं च सदसत्त्वात् सामान्यवदिति** सदसत्त्वैकात्म्ये साध्ये सोपाख्यनिरुपाख्यत्वं हेतुः सोपाख्यनिरुपाख्यत्वे च सदसत्त्वं प्रोक्तन्यायेन त्वयैवाभ्युपगतत्वात् । § 1410

शब्दस्य हेत्वर्थत्वात् एवं सामान्यस्य सदसत्त्वैकात्म्यम् । तदेव च **सोपाख्यं स्वपरप्रत्ययाभिधानाधानात्,** स्वात्मनि सम्बन्धिनि च प्रत्ययमभिधानं चा (Edtext outside numbered paragraph)धत्ते सती सत्ता सन्ति द्रव्यगुणकर्माणि इति च सामान्यम् तदेव **निरुपाख्यं च,** नास्योपाख्यास्ति, **वस्तुवत्,** वस्तुन इव सम्बन्धिसामान्या (Edtext outside numbered paragraph)दुपाख्या नास्ति सामान्यादेः सामान्याद्यन्तराभावात् । **इति सोपाख्यमेव निरुपाख्यम्,** इत्थमुक्तन्यायेन सोपाख्यनिरुपाख्यत्वयोर्वैधर्म्याभावः । **वस्तुनि विपर्यय** इति, द्रव्यादित्रये (Edtext outside numbered paragraph) वस्तुनि स्वतो निरुपाख्यता सामान्येन सोपाख्यता, स्व (Edtext outside numbered paragraph)तस्त्वसत्त्वं सम्बन्ध्यन्तरात् सत्त्वं च सत्तातो विपरीतम् । § 1411

सामान्यदृष्टान्तस्य सदसत्सोपाख्यनिरुपाख्यत्वैकात्म्यं दर्शयति -- **सामान्यं स्वसत्** स्वसत्तया सत् **न सामान्यसद् वस्तुवत्** सम्बन्धसत्तयेत्यर्थः । यथा त्वन्मतेनैव सामान्येन सम्बन्धाद् द्रव्यगुणकर्माख्यं वस्तु सम्बन्धसदिष्यते न तथा सामान्यं सामान्यस्य सामान्यान्तरसम्बन्धाभावात् ।

यत्तूक्तं पूर्वदोषपापीयस्त्वाद् न । तद्यथा--तत्र हि... ...हेतूपादानक्रियानियमाभावः, अस्मिन् पुनः सदसत्कार्यपक्षे द्विदोषता पापीयसी इति, तन्न, परिहृतपूर्वदोषत्वात् ।

* * *

सामान्यम्, इतिइति **सदेवासत्** 495/mj

* * *

यत्तूक्तं पूर्वदोषपापीयस्त्वाद् न । तद्यथा--तत्र हि... ...हेतूपादानक्रियानियमाभावः, अस्मिन् पुनः सदसत्कार्यपक्षे द्विदोषता पापीयसी इति, तन्न, परिहृतपूर्वदोषत्वात् ।

* * *

६ सोपाख्यं ] **निरूप्यं च** प्र° ॥
९ त्वैका ]
**°कात्म्यैकार्थं**nayacakra-ms-ya । कात्म्यैकार्थ्यं ? ॥
१४ त ] तत्र हि अत्यन्तासत्कार्यपक्षे उपादाननियमस्य अत्यन्तसत्कार्यपक्षे च क्रियाया अभावप्रसङ्गात् सदसत्कार्यपक्षयोर्हेतूपादानक्रियानियमाभावः इत्याशयो भाति ॥
१ त ] तत्र हि अत्यन्तासत्कार्यपक्षे उपादाननियमस्य अत्यन्तसत्कार्यपक्षे च क्रियाया अभावप्रसङ्गात् सदसत्कार्यपक्षयोर्हेतूपादानक्रियानियमाभावः इत्याशयो भाति ॥

सामान्यम्, इति

**अतो व्यवस्थापिते**त्यादि व्याख्यातदृष्टान्तसोपाख्यनिरुपाख्यत्वैककाष्ठीकृतहेतुधर्मयोः सदसत्त्वैककाष्ठीभूतसाध्यधर्माविनाभावः उपसंह्रियते । तस्मात् ताभ्यां धर्माभ्यां भिन्नौ विरुद्धौ च इत्यभिमताभ्यामेव प्रतिपद्यतां भवान्, **सोपाख्यनिरुपाख्यत्वात् सामान्यादिद्रव्यादिवत्,** सामान्यविशेषसमवायाः सामान्यादयः, द्रव्यगुणकर्माणि द्रव्यादीनि, सामान्यादयश्च द्रव्यादीनि च यथा सन्ति असन्ति च सोपाख्यनिरुपाख्यानि चेति सोपाख्यनिरुपाख्यत्वं सदसत्त्वैकात्म्ये हेतुः, सदसत्त्वमपि सोपाख्यनिरुपाख्यत्वैकात्म्ये तथैव हेतुस्त्वन्मतेनैव । उपनये तु द्रव्यादीनां दृष्टान्तत्वेनोपादानं त्वयैवेष्टत्वात् । अत्रापि सदसत्त्वैकात्म्ये सोपाख्यनिरुपाख्यत्वैकात्म्ये च निःसंशयमविपक्षतेति । § 1412

इदानीं स्याद्वादे परोक्तान् दोषान् परिहर्तुकाम आह --**यत्तूक्त**मित्यादि । टीकायां **प्रशस्त**मतौ स्याद्वादिनं प्रति **पूर्वदोषपापीयस्त्वाद् न** इत्युक्तौ दोषौ, तत्र सदसत्कार्यपक्षयोः **साङ्ख्यवै**शेषिकेष्टयोर्यथासङ्ख्यं क्रियानुपपत्त्युपादाननियमाभावदोषौ । यथोक्तम् --**उपादाननियमस्यासति सति च क्रियाया अभावप्रसङ्गात् सदसत् कार्यम् इति दोषद्वयं ब्रुवतो जैनस्य पूर्वदोषपापीयस्त्वं किलेत्थमुच्यते** । वै° सू° प्रशस्तमतिटीका, **तद्यथा--तत्र** हीत्यादि, यथासङ्ख्यं प्रत्येकदोषप्रदर्शनग्रन्थो गतार्थो याव**द्धेतूपादान-**
- /ms **क्रियानियमाभाव** इति, हेतवो दण्डाद्या घटस्य, मृदुपादानम्, क्रिया कुलालव्यापार इति । **अस्मिन् पुनः सदसत्कार्यपक्षे द्विदोषता पापीयसी** सदसत्पक्षाभ्यामेकैकदोषाभ्याम्, सत्त्वात् कार्यस्य घटार्थायाः क्रियाया अभावः, असत्त्वादुपादान[नियमा]भावः इत्येतद्विदोषत्वात् पापीयानेष पक्ष इति । अत्राचार्य आह --**तन्न, परिहृतपूर्वदोषत्वात्,** परिहृतावस्मिन् सदसदेकात्मककार्यपक्षे पूर्वोक्तौ क्रियाऽभावोपादाननियमाभावदोषाविति । § 1413
496/mj

तत्र हि सत्कार्यपक्षे क्रिया किं विरुध्यते ? साङ्ख्यो यदसौ एकान्तेन सन्नेव घटः इत्याह ततस्तस्य क्रिया निष्पन्नस्य न युज्यते कर्तव्याभावात् कृतवत् इति क्रियाऽभावदोषो भवति, न पुनः स्याद्वादिनः । यदि त्वसौ स्यादादिना कर्तव्यत्वमपि विदधीत ततः क एनमेवं ब्रूयात् ? असत्कार्यपक्षेऽपि उपादाननियमः किं विरुध्यते ? यदसौ एकान्तेन असदेव कार्यम्

६ का ] °काष्टी° प्र° ॥
११ सोपाख्य ]
°ख्यानिरु°nayacakra-ms-pā ॥
१७ पू ] पूर्णदोष° प्र° ॥
२५ स ] पञ्चम्यन्तोऽयं निर्देशः ॥
२६ त्वादुपादान ] °दानाभावः ? ॥

इति हेतूपादानेषु सन्निहितस्य क्रियाभिव्यङ्ग्यस्यार्थस्योपर्यवज्ञया ब्रूयात् तस्य (?')पटार्थितायां तन्तूपादाननियमो न § 1414

तत् परेणैवाभिवाचयति प्रश्नपूर्वकम् **--तत्र हि** सत्कार्यपक्षे **क्रिया किं विरुध्यते** केन हेतुना ? **साङ्ख्यो यदसावेकान्तेने**त्यादि यावत् **कृतवदि**ति । द्रव्यार्थतो हि मृत्पिण्डे घटोऽस्ति न पर्यायतः । **साङ्ख्यस्तु सन्नेव घटः** कार्यत्वपर्यायनिरपेक्ष **इत्याह ततस्तस्य क्रिया** करणं **निष्पन्नस्य** सर्वथा विद्यमानस्य **न युज्यते कर्तव्याभावात् कृतवत्** निष्पन्नघटवदित्येवं तस्य सत्कार्यवादिनः **क्रियाऽभावदोषो भवति, न पुन**राकाङ्क्षितकर्तव्यपर्यायद्रव्यार्थवादिनः **स्याद्वादिनः** स्यात् सन्नेव मृत्पिण्डे घटः केनचिद्धर्मेणासन्नपि इति वदतः परिहृतपूर्वोक्तसत्कार्यैकान्तवाददोषत्वात् । **यदि त्वसौ साङ्ख्यो**ऽपि **स्यादादिना कर्तव्यत्वमपि विदधीत** स्याद्वादिवत् कथंचित् कुतश्चित् इत्यादिनानेकान्तवाचिना विशेषणेन विशेष्य सदेव कार्यम् इति **ततः क एनमेवं ब्रूयात् ?** को वादी सुसमीक्षितवाक्यगुणदोषोऽपि क्रियाऽभावदोषस्ते प्राप्तः कर्तव्यत्वाभावात् कृतवत् इति वक्तुं शक्नुयात् परिहृतपूर्वदोषं वादिनं **साङ्ख्यम**न्यं वाभ्युपेतानेकान्तवादमिति । § 1415 - /ms

**असत्कार्यपक्षेऽपी**त्यादि, **वैशेषिकं** प्रत्यसत्कार्यवादिन**मुपादाननियमाभावदोष** उक्तो योऽयं स **किं विरुध्यते ?** इति पूर्ववत् प्रश्नोपक्रमं भाणयति । **यदसावेकान्तेने**त्यादि, यदसौ **वैशेषिकः** पर्यायार्थाश्रयेण क्रियागुणव्यपदेशाभावा**दसदेव कार्यम्** इति द्रव्यार्थतो हेतुषु तुर्यादिषूपादानेषु च तन्तुषु सन्निहितस्याव्यक्तस्य क्रियामन्तरेण क्रिययाभिव्यङ्ग्यस्य पटाख्यस्यार्थस्य उपरि **अवज्ञया** अनपेक्ष्य तं **ब्रूयात् तस्य पटर्थितायां तन्तूपादाननियमो न युज्यते तत्रासत्त्वात् तृणादिवत्,** यथा तृणाद्युपादानं पटार्थितायां न युक्तं तत्र तस्यासत्त्वादेवं तन्तूपादानमपीतीत्थमसत्कार्यैकान्तवादेऽप्यु**पादाननियमाभावदोषः,** सोऽनेकान्तवादे स्यादादिविशिष्टे नास्ति स्यादसत् कार्यम् इति दत्तसत्तावकाशमपि वदतः । **तथा यदि वैशेषिकोऽपि विशेष्य ब्रूयात् क एनं किञ्चिदपि ब्रूयात् ?** न तदा तस्य वादिनो विशेषितान्वयव्यतिरेकधर्मधर्मिव्यवस्थस्य तिलतुषशतभागमात्रमपि वाच्यमस्तीति । उक्तं च-- § 1416

---

९ रेणैवा ] °वाभिवावयति प्र° । °वाभिधापयति ? ॥
११ प ] पर्ययतः प्र° ॥
१३ स ] सत्कार्यैवादिनःnayacakra-ms-bhā । सत्कार्येर्वादिनः nayacakra-ms-ya । अत्र सत्कार्यैकान्तवादिनः इत्यपि पाठः समीचीनो भाति ॥
१४ वा ] °वाचिनःnayacakra-ms-ya ॥
१६ त्व ] तसौ सांख्येपि प्र° ॥
२० व ] वक्तुयात्nayacakra-ms-ya ॥
२३ उ ] उक्तौnayacakra-ms-ya ॥
२३ यो ] योऽयमुपादाननियमः स किं विरुध्यते इत्याशयः ॥
२६ याभिव्य ] °व्यंग्य पटाख्य°nayacakra-ms-ya ॥
१ स्य ] °स्यापर्यवज्ञयाnayacakra-ms-ya ॥
३ वा ] °वादेप्युपा° प्र° । °वादे य उपा° ? ॥

हेतुविसयोवणीतं जध वयणिज्जं परो णियत्तेति ।
जदि तं तहा पुरिल्लो दा+एंतो केण जिब्वंतो ॥

सन्मयत्रानुमानविषयतयाभ्युपगम्यमाने साध्ये दूषणवादिनोऽवकाश एव न भवति तदेव साध्यं हेतुविषयतया अभ्युपगन्तव्यमिति दर्शयन्नाह --हे+उविसयोवणीयं जह वयणिज्जं परो नियत्ते+इ । ज+इ तं तहा पुरिल्लो दा+इंतो केण जिप्पंतो ॥ हेतुविषयतयोपनीतमुपदर्शितं साध्यधर्मिलक्षणं वस्तु पूर्वपक्षवादिना अनित्यः शब्दः इत्येवं यथा वचनीयं परो दूषणवादी निवर्तयति सिद्धसाध्यताननुगमदोषाद्युपन्यासेन एकान्तवचनीयस्य तदितरधर्माननुषक्तस्य अनेकदोषदुष्टतया निवर्तयितुं शक्यत्वात्, यदि तत् तथा द्वितीयधर्माक्रान्तं स्याच्छब्दयोजनेन पुरिल्लः पूर्वपक्षवादी अदर्शयिष्यत् ततोऽसौ नैव केनचिदजेष्यत । ततश्चासौ तथाभूतस्य साध्यधर्मिणोऽप्रदर्शनात् प्रदर्शितस्य चैकान्तरूपस्यासत्त्वात् तत्प्रदर्शकः सन्नसत्यवादितया निग्रहार्ह इति । इति अभयदेवसूरिविरचितायां जेसलमेरस्थायां लिखितायां सन्मतिवृत्तौ, पृ° २२६ ॥ति° ३ । ५८§ 1418

497/mj

युज्यते तत्रासत्त्वात् तृणादिवत्, इत्युपादाननियमाभावदोषः, न पुनः स्याद्वादिनः । तथा यदि वैशेषिकोऽपि विशेष्य ब्रूयात् क एनं किञ्चिदपि ब्रूयात् ? एवमयं पूर्वश्रेयस्त्वार्थ आद्युद्ग्राहः ।

§ 1419

यत् पुनरिदमभिधीयते--सद्भागस्योपादाननियमः असद्भागस्य क्रिया च युज्यते, तौ च वस्तुनि स्त एवेति चेत्, न, विपर्ययप्रसङ्गात् । एकस्योभयात्मकैकवस्तुत्वे विशेषहेत्वभावात् कुत एतत्... ...?... ...पूर्वदोषपापीयस्त्वमेवेति ।--एतदपि न

८ व ] वणिज्जं प्र° ॥
९ दा ] दा+एंतोnayacakra-ms-vinayacakra-ms-ram ॥
९ जिब्वं ] जिब्वंतोnayacakra-ms-bhā । मुद्रिते सन्मतिप्रकरणे जिब्वंतो इति पाठः ॥
६ कु ] कुत एतत् सद्भागस्योपादाननियमोऽसद्भागस्य क्रिया च, न तूभयाभावः इति ? तस्मात् पूर्वदोषपापीयस्त्वमेवेति इत्याशयोऽत्र भाति ॥

किञ्चित् कार्यत्वादेव । कार्ये उपादानक्रिययोः स्वविषयनियतौ भावावेव, एकस्यो- § 1420

तस्मान्न स्तः स्याद्वादिनः पूर्वदोषौ, कुतः पापीयस्त्वम् ? ताभ्यां वा श्रेयस्त्वमेवेत्यत आह --**एवमयं पूर्वश्रेयस्त्वार्थः**, पूर्वाभ्यां वादाभ्यां श्रेयसो वादस्य भावः पूर्वश्रेयस्त्वम्, तदेवार्थोऽस्योद्ग्राहस्येति सोऽय**मा**- द्युद्ग्राहः पूर्वश्रेयस्त्वार्थः - /ms
परिहृतदोषवचनावकाशः तस्मिन्नाद्युद्ग्राहे प्रतिज्ञानिर्देशे दर्शित एव मया स्यात् सत् कार्यं स्यादसत् कार्यम् इति । स पुनस्त्वया स्वपक्षरागादस्मत्प्रद्वेषाद्वा नावबुद्धः । § 1421

**यत् पुनरिद**मित्यादि पूर्वपक्षः परस्य यावत् **पूर्वदोषपापीयस्त्वमेवे**ति । **जैने**नायं परिहारः पूर्वदोषपापीयस्त्वेऽभिहितः सदसत्कार्यवादिना --**सद्भागस्योपादाननियमः** मृदि सत्त्वाद् घटस्य मृदुपादाननियमः तस्य चा**सद्भागस्य क्रिया च** घटस्य **युज्यते** सदसदंशयोरन्यतराश्रयेण, **तौ चांशौ वस्तुनि स्त एवेति चेदि**त्याशङ्कायाम्, एवं चेन्मन्यसे इति **आर्हतीयं** परिहारमाशङ्क्योत्तरमाह--एतच्च **न, विपर्ययप्रसङ्गात्,** विपर्ययः सद्भागमाश्रित्य क्रियाप्रसङ्गोऽसद्भागमाश्रित्योपादाननियमप्रसङ्गः, अनिष्टौ च ते **जैनस्य, एकस्योभयात्मककैकवस्तुत्वे विशेषहेत्वभावात्** *उपादाननियमस्यासति सति च क्रियाया **अभावः** इत्येतयोर्हेत्वोरितरेतरांशव्यावर्तितयोरभावादपक्षधर्मता । एकं हि वस्तु सच्चासच्च, तस्मिन् सत्युभयात्मके **कुत एत**दित्यादि गतार्थं विपर्ययप्रसङ्गापादनं विशेषहेत्वभावाद् हेतुहेयनियमाभावात् । § 1422

अत्राचार्य आह --**एतदपि न किञ्चित्,** नोत्तरस्य गन्धोऽप्यस्तीत्यर्थः । कस्मात् ? **कार्यत्वादेव,** क्रियते इति हि कार्यम्, तस्मिन् **कार्ये उपादानक्रिययोः स्वविषयनियतौ भावावेव,** नाभावः, स्वो विषयः स्वविषयः, उपादानस्य - /ms,
सत्येव नियमः, तस्य तत्र नियतत्वाद् भावो विषयः, क्रियायाः पुनरसत्येव 498/mj

* * *

भयात्मकत्वात्, एकपुरुषनियतपितृपुत्रत्ववत् । न ह्येकस्य... ... ...न तूभयाभावः, एवम्... ... ...। अपि च विपर्ययप्रसङ्गापत्तावप्येवंविधार्थतैव । असद्भागमाश्रित्योपादाननियमाभाव एव अनुपादानसत्तादिभावसामान्यलभ्यस्वरूपत्वात् सद्द्रव्यादेः । सद्भागमाश्रित्य च क्रियाया अभाव एव सर्वस्य

---

१२ तिज्ञा] °ज्ञानिर्देशnayacakra-ms-ya ॥
१७ त] तस्यावातस्यैवा ?सद्भागस्य प्र° ॥
१९ आ] आर्हतीयंnayacakra-ms-hī विना ॥
२२ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥
२३ अभावः] दृश्यतां पृ° ४९५ पं° २० ॥
२४ व] वस्तु सच्चnayacakra-ms-bhā । अत्र वस्तु सदसच्च इत्यपि पाठः स्यात् ॥
२५ हेतुहेय] दृश्यतां पृ° १३८ टि° ९ ॥
१ न] न ह्येकस्य पुरुषस्य पितृपुत्रत्वनियमो नास्ति, स्वपुत्रमपेक्ष्य पितृत्वम्, स्वपितरमपेक्ष्य च पुत्रत्वम्, न तूभयाभावः । एवमत्रापि उभयात्मकैकवस्तुत्वात् उपादानक्रिययोः स्वविषयनियतत्वाद् नास्ति विपर्ययप्रसङ्गः । इत्याशयोऽत्र भाति ॥

सर्वात्मकत्वात् तथात्वादत्यन्तमसतोऽभावात् ।

यत्तूच्यते--सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न वै॰ सू॰ ९ । १ । १२, सदसच्छब्दार्थयो-

* * *

नियतत्वादभावो विषयः उक्तवत् । ते चोपादानक्रिये स्वे स्वे विषये नियते इति कथं ज्ञायते ? **एकस्योभयात्मकत्वात्,** सदसदात्मकं ह्येकं कार्यं मयाभ्युपगतं त्वया च दोषाभिधित्सया, तस्मादेकस्योभयात्मकत्वात्, यद् यदुभयात्मकमेकं तस्य तस्य स्वविषयनियतता दृष्टा, **एकपुरुषनियतपितृपुत्रत्ववत्** । **न ह्येकस्ये**त्यादि दृष्टान्तव्याख्यानं यावद् **न तूभयाभाव** इति । **एव**मित्यादि दार्ष्टान्तिकव्याख्यानमनियमाभावसाधर्म्यप्रदर्शनं दोषाभावप्रदर्शनम् । उभयैकत्वमेव च विशेषहेतुः, तस्य स्वविषयनियतत्वाद् नास्ति विपर्ययप्रसङ्गः । तस्मात् पूर्वाभ्यां श्रेयस्त्वमेव । § 1423

अभ्युपेत्यापि विपर्ययप्रसङ्गम् **अपि च विपर्ययप्रसङ्गापत्तावप्येवंविधार्थतैव अनेकान्तसिद्धेः** न पापस्य गन्धोऽपि, सदसदात्मनो वस्तुनो योऽसौ पर्यायार्थो**ऽसद्भागो** मृदि घटाभावस्त**माश्रित्योपादाननियमाभाव एव** । कस्मात् ? **अनुपादानसत्तादिभावसामान्यलभ्यस्वरूपत्वात् सद्द्रव्यादेः** । प्रागुत्पत्तेः कार्यमसदेव समवाय्यसमवायिकारणसान्निध्ये जायते, न तस्योपादानेनार्थः कश्चित्, उत्पन्नं सत् सत्तयाभिसम्बध्यते द्रव्यगुणकर्माख्यम्, द्रव्यत्वेन द्रव्यम्, गुणत्वेन गुणः, कर्मत्वेन कर्मेत्येभिर्भावैः सामान्याख्यैर्लभ्यं स्वरूपं वास्येति नैव कार्यस्योपादाननियमोऽस्ति इत्यनेकान्तः सिध्यति । **सद्भाग-** - /ms **माश्रित्य च क्रियाया अभाव एव,** यो घटस्य कार्यस्य सत्त्वमेव द्रव्यार्थतो वाञ्छति तस्य क्रियाया नास्त्येव प्रयोजनम्, नैव क्रियास्ति, इत्यनियमः । किं कारणम् ? तस्य वादिनः **सर्वस्य सर्वात्मकत्वात्,** मृत्पिण्डो हि युगपदयुगपद्भाविसर्वधर्मात्मकः । तेन प्रकारेण **तथा** द्रव्यार्थवादप्रकारेण, तथाभावस्तथात्वं सर्वसर्वात्मकत्वम्, तस्मात् **तथा[त्वा]दसद्** नाम किञ्चिन्नास्त्यतो**ऽत्यन्तमसतोऽभावात्** प्रत्येकनयविवक्षायामन्यतराश्रय इतरस्याभावाद् न ह्यत्र विशेषहेतुनार्थ एव । § 1424

**यत्तूच्यत** इत्यादि यावत् **सप्तम्यभिधानेन दर्शयती**ति सूत्रार्थः **कटन्द्यां** व्याख्यातः । 499/mj

---

६ स ] दृश्यतां पृ॰ ४६० टि॰ १ ॥
१३ न ] ननूभया॰ प्र॰ ॥
१४ म ] ॰मनियाभाव॰ प्र॰ ॥
१४ दोषाभा ] ॰भावाप्रद॰ प्र॰ ॥
१५ त ] तस्य विषयनि॰ प्र॰ । ततः स्वविषयनि॰ ?? ॥
१७ अभ्युपेत्या ] ॰त्यादि विप॰ प्र॰ ॥
१८ स ] स च सदात्मनोnayacakra-ms-bhā । स च दसात्मनो nayacakra-ms-ya ॥
२३ भ्यं ] ॰र्लभ्यस्वरूपं वास्येतिnayacakra-ms-ḍe । ॰र्लभ्यस्वरूपवास्येति nayacakra-ms-pā nayacakra-ms-raṃ nayacakra-ms-vi । ॰र्लभ्यं स्वरूपं चास्येति ? ॰र्लभ्यं स्वरूपमस्येति ? ॥
६ स ] सप्तभिधानेन दर्शयति प्र॰ ॥
६ क ] कटन्दी नाम कणादविरचितवैशेषिकसूत्राणां काचित्

* * *

र्विरोधादेकस्मिन्नेव कार्ये सदसच्छब्दयोरेकाधिकरणभावेन प्रयोगो नास्ति, सदेवासत् इत्यनुसन्धानं नास्त्येकाधिकरणभावेन इति सप्तम्यभिधानेन दर्शयति वै॰ सू॰ कटन्दी ९ । १ । १२ । --एतदपि न किञ्चित्, एकैकार्थे तत्त्वात्मनि इतरेतरभूताभूततत्त्वं जगद् वृत्तावृत्तपर्यायार्थाविभक्तद्रव्यार्थभावनायां सदेवासत् किं नूभयप्रत्यपेक्षाभावयितव्यस्वात्मनि । तथा च...।

यदप्युक्तम्--आपेक्षिकं सदसत्त्वम्, प्रागुत्पत्तेः मृदात्मना सत् कार्यं घटात्मना चासत्, निष्पन्नेऽपि घटे मृत्त्वदर्शनाद् मृदुपादानोपपत्तिः, घटात्मना चासत्त्वाद् घटार्थक्रियोपपत्तिरित्येवं किल आर्हत आह । अत्रोत्तरम्--न, असत्कार्यत्वसिद्धेः, एवं तर्हि मृदात्मनः कर्तव्यत्वाभावाद् घटात्मनः कर्तव्यत्वादसदेव कार्यम् । तस्मान्न प्रागुत्पत्तेः सदसत् कार्यम् वै॰ सू॰ कटन्दी इति ।--अत्र न

* * *

सदसतोर्वैधर्म्यात् इति किमुक्तं भवति ? परस्परविरोधात् समानाधिकरणभावेनैकस्मिन् प्रागुत्पत्तेः सच्चासच्च तदेव इति सदसच्छब्दार्थयोर्विरोधादेकस्मिन्नेव कार्ये कुतः सत्त्वं प्रागुत्पत्तेः ? किं तर्हि ? असत्त्वमेवेति सदसच्छब्दयोरेकाधिकरणभावेन प्रयोगो नास्तीति । तद् व्याचष्टे **--सदेवासत् इत्यनुसन्धानं नास्त्येकाधिकरणभावेने**ति बुद्ध्या निर्धारणं नास्ति, तदभावात् प्रयोगोऽनुपपन्नः । एषोऽर्थः कार्ये सदसत्ता न इति सप्तम्यभिधानेन दर्शितः, अन्यथा कार्यं सदसन्न इति लाघवार्थं ब्रूयात् । **एतदपि न किञ्चि**दित्याद्युत्तरं यावत् **स्वात्मनि** । एकस्मिन्नेकस्मिन् घटपटादावर्थे **तत्त्वात्मनि इतरेतरभूताभूततत्त्वं जगत्,** घटात्मना घटोऽस्ति पटात्मना नास्ति, पटोऽपि तथेति स्वेनात्मना भूतत्वमभूतत्वं चेतरात्मना, तस्माद् भूताभूततत्त्वं **जगदि**ति व्यापितां दर्शयति, न केवलं कार्यमेव सदसदिति । तथा
- /ms वृत्तावृत्ताभ्यां पिण्डशिवकपर्यायार्थाभ्यां क्रमभाविभ्यामविभक्तो द्रव्यार्थ एकः, तस्य **भावना** मृत्पिण्ड एव शिवकीभवति, शिवक एव च स्थासकीभवतीत्यादि यावद् घटो यावच्च पांशुर्यावच्च परमाणुरित्यवस्थासु पिण्डात्मना भवति शिवकाद्यात्मना न भवतीति पिण्डो भावाभावात्मकस्तथा शिवकोऽपि

---

प्राचीना व्याख्या । भो भो लक्ष्मण ! **वैशेषिककटन्दीपण्डितो** जगद् विजयमानः पर्यटामि । क्वासौ रामः ? तेन सह विवदिष्ये । इति मुरारिकविविरचिते अनर्घराघवनाटके पञ्चमाङ्के **रावणस्य** वचः ॥

१३ प्रा] दृश्यतां पृ॰ ४९१ पं॰ १५, पृ॰ ५०० पं॰ १२, पं॰ १७ ॥

१४ निष्प] दृश्यतां पृ॰ ५०२ पं॰ १६, पं॰ २१ ॥

१५ न] दृश्यतां पृ॰ ५०२ पं॰ ७ ॥

१८ अ] अत्र न पूर्वपक्षे नोत्तरपक्षे किञ्चित् सत्यम् इत्यपि पाठोऽत्र स्यात् ॥

२० स] **सामान्याधिक॰**nayacakra-ms-ya । **सामाधिक॰** nayacakra-ms-bhā ॥

२१ स] **सच्छब्दार्थ॰** प्र॰ ॥

२५ योगोऽनुप] **॰पपत्तेः** प्र॰ ॥

२ स्वेनात्म] **॰त्म भूतत्व॰** प्र॰ ॥

४ क्र] **क्रमभाविभक्तो द्रव्यार्थ** प्र॰ ॥

शिवकात्मना भवति न पिण्डात्मना, तथोत्तरास्वप्यवस्थासु इतरेतराभावस्वरूपेण स्वेन च भावरूपेण सदसदेव, सच्चासत् वै० सू० ९ । १ । ४ इति वचनात् । एवं सकलजगद्वृत्तावृत्तपर्यायार्थेनाविभक्तद्रव्यार्थभावनायां **सदेवासत्** । **किन्नूभयेत्यादि**, किं पुनर्युगपद्भाविनामयुगपद्भाविनां च पर्यायाणां रूपरसादीनां शिवकादीनां च प्रत्यपेक्षया भावयितव्यो यस्य वस्तुनः स्वात्मा तस्मिन् भावयितव्ये ? निःसन्दिग्धमेव तदा सदेवासदपीत्यर्थः । तदुपसंहरति — **तथा चेति** गतार्थम् । § 1425

त्यादि व्याख्या । **मृदात्मनः कर्तव्यत्वाभावात्**, क्रियते इति हि कार्यम्, न च मृत् क्रियते, घटो हि क्रियते, स चासन्निति । तदुपनयति --**तस्मान्न प्रागुत्पत्तेः स** (Edtext outside numbered paragraph)**दसत् कार्यमिति** । § 1426

**यदप्युक्तमापेक्षिकमि**त्यादि । स्याद्वादी किलेत्थं सदसत्त्वं समर्थयतीति पूर्वपक्षः । मृदात्मना घटस्य प्रागुत्पत्तेः सत्त्वम्, निष्पत्त्युत्तरकालमपि मृत्त्वदर्शनात्, तदात्मकत्वाद् मृदुपादानोपपत्तिः । घटात्मना चासत्त्वाद् घटार्थक्रियोपपत्तिरिति । अत्र किलोत्तरं **कटन्दीकार** आह

पूर्वपक्षो नोत्तरपक्षः सत्यः, को हि नाम सोऽनेकान्तवादी एवं ब्रूयात्--प्रागुत्पत्तेः मृदात्मना सत् कार्यं घटात्मना चासदिति ? एवं हि मृदोऽकार्यत्वे... ...को भेदः ? अभूत्वोत्पत्तिवाचिप्राक्छब्दोच्चारणादेव साक्षादसत्त्वैकान्ताभ्युपगमः । अन्येन मृदात्मना भवति स्वेन च घटात्मना न भवतीत्येवं ब्रुवन् प्रत्यक्षादिविरुद्धं मत्तोन्मत्तकादिवत् स्यात् । देशकालभेदलक्षणोभयपर्यायमात्रत्वादेवमयमसद्वाद एव स्यात् ।

* * *

500/mj एवं तर्ही--**न, असत्कार्यत्वसिद्धेः** ।

* * *

**पूर्वपक्षो नोत्तरपक्षः सत्यः, को हि नाम सोऽनेकान्तवादी एवं ब्रूयात्--प्रागुत्पत्तेः मृदात्मना सत् कार्यं घटात्मना चासदिति ? एवं हि मृदोऽकार्यत्वे... ...को भेदः ? अभूत्वोत्पत्तिवाचिप्राक्छब्दोच्चारणादेव साक्षादसत्त्वैकान्ताभ्युपगमः । अन्येन मृदात्मना भवति स्वेन च घटात्मना न भवतीत्येवं ब्रुवन् प्रत्यक्षादिविरुद्धं मत्तोन्मत्तकादिवत् स्यात् । देशकालभेदलक्षणोभयपर्यायमात्रत्वादेवमयमसद्वाद एव स्यात् ।**

* * *

---

९ स] दृश्यतां पृ० ४८९ पं० २८ ॥
१० ज] °जगद्वृत्ता° प्र° ॥
११ किन्नू] **कित्तभये°** प्र° । **किमुभये°** ? ॥
२० ए] एवं हि मृदोऽकार्यत्वेऽनेकान्तवादत्यागादेकान्तवादाभ्युपगमाच्च वैशेषिकाद् बौद्धाद्वा को भेदः । इत्याशयो भाति ॥

२६ त] नहीत्यादिnayacakra-ms-hī । नहित्यादि nayacakra-ms-ram ॥
१ ए] एवं हि मृदोऽकार्यत्वेऽनेकान्तवादत्यागादेकान्तवादाभ्युपगमाच्च वैशेषिकाद् बौद्धाद्वा को भेदः । इत्याशयो भाति ॥

## एवं तर्ही

**अत्र न पूर्वपक्ष** इत्यादि आचार्यो ब्रूते । अत्रैवं पूर्वोत्तरपक्षयोर्न किञ्चित् सत्यम्, प्रागतीतेषु पूर्वपक्षोऽपि कश्चित् सत्यः स्याद् विकलादेशवशार्पणात्, - /ms यथा **सद्भागमाश्रित्योपादानम् असद्भागमाश्रित्य क्रियाभाव** इत्यादिः । इह तु न पूर्वपक्षो नोत्तरपक्षः सत्यः । पूर्वपक्षासत्यत्वं तावत् **को हि नाम सोऽनेकान्तवादी**त्यादि । एवं ह्यसत्कार्यैकान्तवाद एवावस्थापितः, तदसत्कार्यमवस्थाप्य कोऽनेकान्तवादी **एवं ब्रूयात् ?** इत्यादि, **प्रागि**त्यादि तस्यैव प्रत्युच्चारणं यावद् **घटात्मना चासदि**ति, न ब्रूयादेवेत्यभिप्रायः । यदि ब्रूयादनेकान्तवादत्याग एकान्तवादाभ्युपगमश्च कृत इति तद्दर्शयति **--एवं हि मृदोऽकार्यत्वे** इत्यादि गतार्थो यावत् **को भेद** इति । य एवैष **वैशेषिको बौद्धो** वा **स्यादार्ह**तोऽपीति । § 1427

किञ्चान्यत्, **अभूत्वोत्पत्ती**त्यादि यावद**भ्युपगमः** । प्राक्छब्दो ह्यभूत्वोत्पन्नार्थवाची घटावस्थातः पूर्वावस्थावाचित्वात् । स चाभूत्वोत्पत्त्यर्थः प्राक्छब्दोच्चारणादेव साक्षादभ्युपगतस्तेन स्यात् । ततः किमर्थं विवदेताभ्युपगम्यासत्त्वैकान्तं मृदात्मना सद् घटात्मना चासत्कार्यम् इति ? तथापि भ्रान्तिमपि न ब्रूते । § 1428

किञ्चान्यत्, अत्यन्तासमीक्षितभाषिणैकान्तवादिनापि न तुल्यतामेत्यसौ, घटादन्यस्या मृदो य आत्मा तेनात्यन्तमन्यो घटो भवति स्वेन च घटात्मना न भवतीत्येवं ब्रुवन् प्रत्यक्षादिविरुद्धं मत्तोन्मत्तकादिवत् स्यात्, सोऽपि चैकान्तवादी प्रत्यक्षादिविरुद्धं किञ्चित् परिहरतीति । किञ्चान्यत्, **देशकाले**त्यादि । देशतो भेदो रूपरसादीनाम्, कालतो भेदः पिण्डशिवकादीनाम्, स भेदो लक्षणमेषां सहासहावस्थायिनामुभयेषां पर्यायाणां ते देशकालभेदलक्षणोभयपर्यायाः, तत्परिमाणं **देशकाल[भेद]लक्षणोभयपर्यायमात्रम्,** तद्भावात् त**न्मात्रत्वादेव**मनेन प्रकारेणा**यमसद्वाद एव स्यात्,** रूपं रसादन्यत्, तदपि विभज्यमानं कृष्णम्, पुनरप्येकगुणकृष्णमित्यादि आ च

---

७ त] नहीत्यादिnayacakra-ms-hī । नहित्यादि nayacakra-ms-raṃ ॥
१० स] दृश्यतां पृ° ४९७ पं° ४ ॥
१० इ] इत्यादिnayacakra-ms-ya ॥
१४ चा] वास° प्र° । दृश्यतां पृ° ४९९ टि° १ ॥
१८ ह्य] ह्यभूत्वोन्नार्थ° प्र° ॥
१९ चाभूत्वोत्प] °त्पत्तर्थःnayacakra-ms-ya । °त्पन्नार्थः ? ॥
२१ चा] वास° प्र° । दृश्यतां पृ° ४९९ टि° १ ॥
२२ भ्रा] भ्रांतिपिnayacakra-ms-bhā । भ्रान्तोऽपि ? ॥
१ ल] लक्षणभेदां सहा°nayacakra-ms-bhānayacakra-ms-pānayacakra-ms-ḍe । लक्षणभेदा सहा° nayacakra-ms-vi nayacakra-ms-raṃ ॥
३ त] तद्भावत्nayacakra-ms-ya । तद्भाववत् nayacakra-ms-bhā ॥
४ मित्या] °मित्योद्याव पर°nayacakra-ms-ya । °मित्येङ्गा पर° nayacakra-ms-bhā । अत्र आङ् अभिविधौ, ततो यावत् परमाणुशो विभागात् इत्यर्थ इति भाति । अत्र °मित्यादि आ पर° इत्यपि पाठः स्यात् ॥

501/mj परमाणुशो विभागादसदेव रूपम्, एवं रसादयः, तथा पिण्डादयो

* * *

इत्थं पुनः कोऽनेकान्तवादी ब्रूयात् आपेक्षिकमृदात्मसत्त्वमसद्वादिवत् । आपेक्षिकमृदात्मसद्विशेषणात्तु असदभिधानमेवेदम्, अभिधेयस्वतत्त्वनिरसननियतत्वात्, अग्न्यनुष्णत्वाभिधानवत् । अव्युदासे तु घटात्मनापि सन्नेव तद्भावत्वात् ।

सदसदात्मकवस्तुतत्त्वप्रत्यक्षीकरणार्थं जैनाः एकमेवात्मानं परमार्थं द्रव्यार्थपर्यायार्थोभयलक्षणमुपवर्णयन्ति, खपुष्पवदन्यथाऽसम्भवात् । द्रव्यशब्दं च

* * *

ऽपीत्यसद्वादः । **इत्थं पुनः कोऽनेकान्तवादी ब्रूयात्** यथासावसद्वादी ब्रूते--रूपं रसात्मना नास्ति रसोऽपि रूपात्मना कृष्णाद्यपि शुक्लाद्यात्मनेत्यादि ? न ब्रूयादेवेत्यर्थः । किं कारणम् ? धृतिसङ्ग्रहपक्तिव्यूहावकाशदानात्मकपृथिव्याद्यात्मकत्वाद् मृदादेर्घटादेश्च कथं मृदमेकामपेक्ष्य मृदात्मनैवास्ति **इत्यापेक्षिक[मृदात्]मसत्त्वमसद्वादिवत्** कः कुशलो ब्रूयात् इति सम्बध्यते । अत्र प्रयोगः **--आपेक्षिकमृदात्मसद्विशेषणात् त्वसदभिधानमेवेदम्** मृदात्मना सद् घटात्मना चासत् इति वचनम् । कुतः ? **अभिधेयस्वतत्त्वनिरसननियतत्वात्,** अभिधेयस्य मृत्पिण्डस्य स्वं तत्त्वं देशभिन्नरूपरससंस्थानादि कालभिन्नरूपरसशिवकादिपांस्वादि धृत्यादिलक्षणभिन्नपृथिव्यादि च, मृदात्मनैवास्ति घटो न रूपादिशिवकाद्यबादिस्वतत्त्वैरिति तान्यस्य स्वतत्त्वानि सन्त्येव निरस्तानि स्युः, तन्निरसने नियतत्वादस्य वाक्यस्य । यद् यद् वाक्यमभिधेयस्वतत्त्वनिरसननियतं तत् तदसदभिधानं दृष्टम्, यथा अनुष्णोऽग्निः इत्युक्तिः । अभिधेयस्वतत्त्वनिरसनमसिद्धम् इति मा मंस्थाः, सिद्धमेवाबाद्यात्मव्युद-

- /ms सनात् । § 1429

स्यान्मतम्--नावधार्य मृदात्मनैव सत्, नान्येन इति ब्रूमः, किं तर्हि ? मृदात्मना तावत् सन् घटो यदि रूपादिपिण्डादिशिवकाद्यबाद्यात्मभिरपि भवेद् भवतु नाम तदात्मत्वात्, को दोषः ? इति । अत्र ब्रूमः **--अव्युदासे तु घटात्मनापि सन्नेव तद्भावत्वात्,** ते भावा रूपादिशिवकाद्यबादिव्रीह्यादयो घटादयश्चास्या मृदः, तद्भावभावस्तद्भावत्वम्, तस्मात् तद्भावत्वात् घटात्मना प्राक् कार्यमुत्पत्तेः सत् तदात्मत्वाद् घटात्मत्वात् **अपिशब्दात्** सर्वात्मकत्वाच्छिवकादिपांश्वादिव्रीह्याद्यात्मनापि सत् । तथा चासत्कार्यत्वानुक्तिः, सत्कार्योक्तिरेव कृता तथा वदतेति । तस्मान्न स्याद्वादिन एवमाहुरेकान्तवादिन इवानपेक्ष्य पूर्वापरम् । § 1430

१६ धृ] द्रष्टव्यतां पृ॰ ३१९ पं॰ १ टि॰ १ ॥
१८ इत्यापेक्षिक] **॰कमसत्त्व॰** प्र॰ ॥
२० चा] **वासत्** प्र॰ ॥
२३ काद्य] **॰द्यपादि॰** प्र॰ ॥
२६ मेवा] **॰वापाद्या॰** प्र॰ ॥
२९ रूपादिपिण्डा] **॰ण्डादिवका॰** प्र॰ । ॰ण्डशिवका॰ ? ॥
२९ बाद्या] **॰द्यपा** प्र॰ ॥
२ काद्य] **॰वापाद्या॰** प्र॰ ॥

कथं तर्ह्याहुरिति चेत्, अत आह --**सदसदात्मके**त्यादि । द्व्यात्मकं वस्तुतत्त्वम् इत्येतस्यार्थस्य प्रत्यक्षीकरणार्थं **जैनाः** स्याद्वादिन एकमेवात्मानं परमार्थं द्रव्यार्थतः सत्त्वात् पर्यायार्थतोऽसत्त्वात् तदु**भयलक्षणमुपवर्णयन्ति** तादृग् वस्तु इति प्रतिपादितत्वात् । खपुष्पवदन्यथाऽसम्भवात् उभयरूपैकात्म्याभावादेकरूपस्य द्रव्यार्थात्मनः पर्यायार्थात्मनो वा निर्भेदत्वात् निर्बीजत्वाच्च खपुष्पवदभावप्रसङ्गात् सदसद्रूप एवात्मा वस्तुन इति । द्रव्यशब्दव्याख्या --**द्रव्यशब्दं च मृदादिरूपाद्यतीतानागतवर्तमानभेदाभेदार्थं** वर्णयन्तीति वर्तते । मृदः पिण्डशिवकादयः क्रमभुवः, सहभुवः रूपरसादयश्च भिन्नाः, त्रिषु 502/mj

* * *

मृदादिरूपाद्यतीतानागतवर्तमानभेदाभेदार्थं पर्यायशब्दं सर्वाभेदभेदार्थं मृदात्मानं द्रव्यार्थपर्यायार्थं घटात्मानं च द्रव्यार्थपर्यायार्थं च । द्रव्यं हि... ...द्रव्यार्थघटोऽत्यन्तसन्, पर्यायस्तु... ... ...असन् ।

इदमपि च कुतो मृद एव दर्शनम्, न पुनर्धृत्यादिवत् सङ्ग्रहादिदर्शनम्... ... अनिर्देश्यं च ? कुत एतत् असत्त्वाद् घटात्मना असदेव कार्यम् इति, न पुनर्मृत्तत्त्वघटसत्त्वात् तत्त्व एवानुभवक्रमप्राप्तेः तत्प्रत्यग्रादित्ववद् घटसत्त्वम् ?

यदपि चोच्यते--न, असत्कार्यत्वसिद्धेः । एवं तर्हि मृदात्मनः कर्तव्यत्वाभावाद् घटा-

* * *

कालेषु मृदादयः वर्तमानाश्च रक्तत्वादयो वृत्त हुण्डादयश्च, ते च भिन्ना अप्यभिन्नाः स्वां मूर्तिमनतियर्तमानत्वादिति भेदाभेदार्थमेव द्रव्यशब्दं वर्णयन्ति । **पर्यायशब्दं सर्वाभेदभेदार्थं** *तेष्वेव त्रिकालवर्तमानकालवर्तिषु जातिं भिन्दन्तं वर्णयन्ति । तस्मादुभयोरुभयार्थत्वम् । न केवलं शब्दार्थकथनमात्रादेवोभयार्थत्वम् । किं तर्हि ? वस्तुस्वरूपनिरूपणमपि क्रियते, तद्यथा --**मृदात्मानं द्रव्यार्थपयार्यार्थं** वर्णयन्तीति सम्बध्यते । **घटात्मानं च द्रव्यार्थपर्यायार्थं** चेति । तयोर्यथाक्रमं व्याख्या **द्रव्यं ही**त्यादि द्रव्यार्थस्य यावद् **द्रव्यार्थघटोऽत्यन्तसन्निति**, घटस्यैव पूर्वोत्तरावस्था मृदादिव्रीहिबीजादिमूलादिर्भवतीति प्रागपि भावितार्थम्, **पर्यायस्त्वि**त्यादि पर्यायार्थस्य याव**दसन्नि**ति तद्विपर्ययेण गतार्थम् । यथा च घटात्मा मृदप्येवं द्रव्यार्थपर्यायार्थाभ्याम् । § 1431

**इदमपि च कुत** इत्यादि । यदुच्यते --***निष्पन्नेऽपि घटे मृत्त्वदर्शनाद् मृदात्मकस्योपा**दानमिति, एषोऽपि विशिष्टपार्थिवमृत्त्वदर्शनेनैकान्तः कुतः सम्भवति सङ्ग्रहपक्तिव्यूहावकाशदानधर्मजलानलानिलगगनव्युदासेन

१३ व] वस्तु इतिnayacakra-ms-bhā । वस्तुत इति ? ॥
२४ न] दृश्यतां पृ॰ ४९९ पं॰ ७ ॥
२९ *] तेष्वेवत्रिष्वेवत्रिकाल॰ प्र॰ ॥
३१ स्तुस्व] ॰स्वरूपणमपि प्र॰ ॥
५ *] दृश्यतां पृ॰ ४९९ पं॰ ६ ॥

धृत्यादिधर्मपृथिव्यात्मकतैवेति ? तत् प्रदर्शयति --**न पुनर्धृत्यादिवत् सङ्ग्रहादिदर्शन**मित्यादि तस्मिन् वस्तुनि विद्यमानसर्वधर्मदर्शनानि याव**दनिर्देश्यं चे**ति । **तस्माद् न मृद एव दर्शनमुभयथापि** यदि मृदि मृदात्मदर्शनम् अथ घटे मृदात्मदर्शनमिति । § 1432

यदप्युच्यते --**घटात्मना चासत्त्वात् क्रियोपपन्नेत्येवं किल आर्हत आह** । अत्रापि **कुत** एतदित्याद्युत्तरम् । नैवमार्हतो ब्रूते --**घटात्मनाऽसत्त्वादसदेव**
- /ms **कार्य**मिति, किं तर्हि ? सन्नपि घट इति ब्रूते मृत्तत्त्वघटसत्त्वात् । तद्दर्शयति --**असत्त्वाद् घटात्मनेति कुत एतत्, न पुनर्मृत्तत्त्वघटसत्त्वात्,** तत् पुनः सत्त्वं मृत्तत्त्वस्य घटस्य **तत्त्व एवानुभवक्रमप्राप्तेः** क्रमजन्मघटपर्यायानुभवः क्रमेण प्राप्यते तत्त्वे द्रव्यार्थतोऽवस्थितस्वरूप एव वस्तुनि मृदाख्ये, **तत्प्रत्यग्रादित्ववत्**, यथा घटस्य प्रत्यग्रेषन्मध्यममध्यपुराणतादिभावा घटतत्त्वे व्यवस्थितस्यैव तथैव मृत्तत्त्व एवानुभवक्रमप्राप्तेः **घटसत्त्वम्** । तस्मादार्हतोक्त्यपरिज्ञानादसाधूक्तम् । § 1433

किञ्चान्यत्, **यदपि चे**त्यादि । एतस्य पूर्वपक्षस्योत्तराभिप्रायेणोच्यते --**न,**
503/mj **असत्कार्यत्वसिद्धे**रिति

* * *

त्मनः कर्तव्यत्वादसदेव कार्यम् । तस्मान्न प्रागुत्पत्तेः सदसत् कार्यम् वै॰ सू॰ कटन्दी इति ।--एतदपि नैव, असत्कार्यत्वसिद्धिवत् सत्कार्यत्वसिद्धेः... ...सत्कार्यत्वम् । न हि घटतायां मृत्तत्त्वस्याभावः । मृद आत्मैव घटात्मा, तत्त्यागे तत्स्वरूपानुपपत्तेः, अतीतानागतवर्तमानविचित्रविशेषाध्यासिस्वभावसद्भूतमृत्त्ववत् अतीतानागतवर्तमानविचित्रविशेषाध्यासिस्वभावसद्भूतघटवद् वा । एतेन सर्वोऽस्याद्वादः प्रत्युक्तः ।

* * *

यावत् **तस्मान्न प्रागुत्पत्तेः सदसत् कार्य**मिति गतार्थम् । अत्रोत्तरमाचार्य आह --**एतदपि नैव, असत्कार्यत्वसिद्धिवत् सत्कार्यत्वसिद्धे**रित्युपक्रम्य भावना यावत् **सत्कार्यत्व**मिति । यथा मृद्भावादप्रच्युतस्य घटस्य मृद्भावेनानुत्पाद्याविनाश्यस्य सत एव घटविवक्षया कर्तव्यत्वादसत्त्वमिष्टं त्वया तथाऽकर्तव्यत्वात् सततमप्रच्युतस्याकृतकस्य घटादिशिवकादिकर्तव्यात्मनो मृत्तत्त्वस्य मृत्तत्त्वविवक्षया कर्तव्यत्वाभावात् सदेव कार्यम् इति कस्माद् नेष्यते ? § 1434

---

१२ त्वा ] ॰त्वात्मक्रिया॰ प्र॰ ॥
१२ आ ] दृश्यतां पृ॰ ४९९ पं॰ ६ ॥
१६ प ] ॰पर्यानुभवः प्र॰ ॥
३० स ] सदसदसत्कार्य॰nayacakra-ms-bhā । दृश्यतां पृ॰ ५०० टि॰ ३ ॥
३२ भा ] भावानां प्र॰ ॥
२ था ] तथा कर्तव्य॰ प्र॰ ॥
२ स्याकृ ] ॰कृतकर्घ-टा॰nayacakra-ms-pānayacakra-ms-vinayacakra- । ॰कृतर्कघटा॰ nayacakra-ms-ḍe nayacakra-ms-raṃ ॥

**न हि घटतायामित्यादि,** शिवकादिवद् मृत्तत्त्वस्य घटस्य मृत्तत्त्वस्याभावे यद्यवस्थानं स्यादसन् घटः प्राक् पश्चाज्जायत इति स्यात्, तत्तु नास्ति, यस्माद् **मृद आत्मैव घटात्मा ।** कस्मात् ? **तत्त्यागे तत्स्वरूपानुपपत्तेः,** यत्त्यागे यत्स्वरूपानुपपत्तिः स तस्यैवात्मा । **अतीतानागतेत्यादि** यावद् **मृत्त्ववत्, यथा** मृत्पिण्डस्यातीतानागतवर्तमानेषु कालेषु ये विशेषाः शीतोष्णत्वादयः सार्द्रशुष्कखण्डितशकलादयश्च विचित्रास्तानध्यास्ते स्वभावो यस्य मृत्त्वस्य तत् - /ms तत्स्वभावम्, स एव सद्भावः परमार्थः, स एव परमार्थो भूतं मृत्तत्त्वं तान् विशेषान् विहाय न प्रवर्तते तेऽपि च तदिति स एवात्मा विशेषाणां मृत्त्वस्य [च] तथा घटात्मा मृद एवात्मा । अथवा **अतीतानागतवर्तमानविचित्रविशेषाध्यासिस्वभावसद्भूतघटवदिति** द्वितीयमुदाहरणम्, सैव व्याख्या । मृद आत्मा घटस्यात्मा घटस्यात्मा मृद आत्मेति द्विधापि प्रतिज्ञायते तेनैव हेतुना अनेनापि दृष्टान्तेनेति । § 1435

**एतेन सर्वोऽस्याद्वादः प्रत्युक्तः ।** कार्यसदसदात्मकैकवस्तुप्रतिपादनात्मकेन तदेकान्तप्रतिषेधात्मकेन च यत्नेन नित्यानित्याद्येकान्तवादः सर्वः प्रतिषिद्धो बोद्धव्यः उपादाननियमस्यासति सति च क्रियाया असम्भवाद् नित्यानित्यैकनानाकार्यकारणसर्वासर्वगतत्वादिरस्याद्वादः । नित्यत्वेनानित्यत्वमनित्यत्वेन च नित्यत्वमेकान्तरूपं बाध्यते, सापेक्षं च सर्वं सिध्यति, तद्यथा--सदा सत्त्वाद् नित्यत्वम्, सदा सत्त्वं द्रव्यार्थात्, नैकान्तानित्यत्वमतः । सदा चासत्त्वादनित्यत्वम्, सदा चासत्त्वं पर्यायार्थत्वात्, अतश्च नैकान्तनित्यत्वमिति । § 1436

504/mj

यदपि चोपादाननियमसत्त्वप्रतिषेधार्थमुत्तरम्--प्राक् प्रसिद्धव्यापारयोग्यद्रव्योपादानं क्रियानिमित्तं न कार्यसत्त्वनिमित्तम् । अथास्य व्यापारनियमः कुतः ?... ... ...न सिध्यति । § 1437

---

५ मृ] मृत्वस्या॰nayacakra-ms-bhā ॥
७ त] यत्स्वरूपा॰ प्र॰ ॥
९ मृ] मृत्त्वंडस्यnayacakra-ms-bhā । मृत्खण्डस्य ? ॥
११ प] परमार्थःnayacakra-ms-ya प्रतिषु नास्ति ॥
१४ विशेषाध्यासिस्व] ॰सभाव॰ प्र॰ ॥
१४ ण] ॰णं स्यैव व्या॰nayacakra-ms-bhā । ॰णस्यव व्या॰ nayacakra-ms-ya ॥
१५ मृ] मृदात्माnayacakra-ms-ya ॥
१७ स] सर्वास्याद्वादःnayacakra-ms-ya ॥
१९ उ] दृश्यतां पृ॰ ४९५ पं॰ २० ॥
१ चोपा] प्राग् निष्पत्तेर्निष्पत्तिधर्मकं नासत्, उपादाननियमात् । कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यत इति । इति न्यायभाष्ये ४ । १ । ४८ ॥

समर्थस्य करणेऽधिकारपरिग्रहात् स इति चेत्, समर्थस्यैव कार्यक्रियायाम् ... ...असदेव कार्यम् । एकीभावगतार्थस्य समर्थत्वात् सत्कार्यत्वमेव । § 1438

**यदपि चोपादाननियमसत्त्वप्रतिषेधार्थमुत्तर**मित्यादि । कर्तृ कारणम्, कर्म कार्यम् इति क्रियानिमित्तकौ शब्दौ, तत्र प्राक् प्रसिद्धव्यापारयोग्यद्रव्योपादानं तत् क्रियानिमित्तम्, न कार्यसत्त्वनिमित्तम् । अत्र स्याद्वादी किल पृच्छति --**अथास्य व्यापारनियमः कुत** इत्यादि यावद् **न सिध्यति** । § 1439

अत्र **वैशेषिक**पक्ष आशङ्क्यते --**समर्थस्य करणेऽधिकारपरिग्रहात् स इति चेत्** । एतस्य व्याख्या --**समर्थस्यैव कार्यक्रियाया**मित्यादि कारण- - /ms
निदर्शनो ग्रन्थो गतार्थो याव**दसदेव कार्य**मिति एतत् किलोपादाननियमकारणत्वेन उत्तरमसत्कार्यवादिनः । अत्राचार्यस्तदुत्तरमाह **--एकीभावगतार्थस्य समर्थत्वात् सत्कार्यत्वमेव**, ननु त्वयैव समर्थस्य करणेऽधिकारपरिग्रहादुपादाननियमः इति ब्रुवता सत्कार्यत्वं सभर्थितम्, सङ्गतार्थं समर्थम्,

४ स] समर्थस्यैव कार्यक्रियायामधिकारपरिग्रहादुपादाननियमः, तस्मादसदेव कार्यम् । इत्याशयो भाति । दृश्यतां पृ° ५०४ टि° १५ ॥

७ चोपा] प्राग् निष्पत्तेर्निष्पत्तिधर्मकं नासत्, उपादाननियमात् । कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यत इति । इति **न्यायभाष्ये** ४ । १ । ४८ ॥

७ र] यत् पुनरुक्तं प्रागुत्पत्तेः कार्यं नासदुपादाननियमादिति, **बुद्धिसिद्धं तु तदसत्** न्या° सू° ४ । १ । ५०, इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्यं बुद्ध्या सिद्धमुत्पत्तिनियमदर्शनात् । तस्मादुपादाननियमस्योपपत्तिः । सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्ति । इति **वात्स्यायनप्रणीते न्यायभाष्ये** । यत् पुनरेतत् नासदुपादाननियमादिति, **बुद्धिसिद्धं तु तदसत्** न्या° सू° ४ । १ । ५०, नायं सत्त्वादुपादाननियमः, अपि तु सामर्थ्यात् । इदमनेन शक्यं निर्वर्तयितुं नेदमनेन इत्येवं बुद्धिसिद्धं कार्यं कृत्वा यद् यस्योत्पत्तये समर्थं तत् तस्योपादीयते न सर्वं सर्वस्य, न सर्वस्मात् सर्वमुत्पद्यमानं दृष्टमिति । अथोत्पत्तिनियमेन कार्यनियमेन कार्यकारणनियमं प्रतिपद्यते तेनापि कार्यकारणशब्दयोरर्थो वाच्यः, किमुक्तं भवति कारणमिति किमुक्तं च भवति कार्यमिति । ननु करोतीति कारणं क्रियत इति कार्यम् । यद्यभिव्यक्तिः पूर्ववत् प्रसङ्गः । अथ विद्यमानेष्वपि करोत्यर्थो दृष्ट इति मन्यसे यथा केशान् कुरु, पृष्ठं कुरु इति । न तत्, विद्यमानानां हि रचनाविशेषः क्रियते पश्चात्, पृष्ठस्यापि मलापगमोऽविद्यमानः, इति न विद्यमाने कारणार्थं जात्वपि पश्याम इति । तस्मादसदेतत् । इति **उद्योतकरविरचिते न्यायवार्तिके** । यच्चोक्तमुपादाननियमादिति तत्र यदि पुरुषस्योपादाननियमः पटार्थी तन्तूनेवोपादत्ते न वीरणं कटार्थी वीरणमिति ततस्तदुपादानानां तत्र तत्र कार्ये सामर्थ्यपरिज्ञानात् । तच्च सामर्थ्यमानुमानिकम् । तदिदमुच्यते **--बुद्धिसिद्धं तु तदसत्** न्या° सू° ४ । १ । ५० इति तदसद्भावि कार्यमनेनैव कारणेन जन्यते नान्येनेत्यनुमानाद् बुद्धिसिद्धमेवेत्यर्थः । अथासत्कार्यपक्षे तन्तव एव पटस्योपादानं न वीरणादीत्ययं नियमो न स्यादिति ब्रूषे तदयुक्तम्, असत्त्वाविशेषेऽपि स्वकारणादुत्पन्नं किञ्चिदेव किञ्चित् कार्यं जनयितुं समर्थं नान्यदित्ययं स्वभावविशेषादुपपद्यत इति इति **वाचस्पतिमिश्रविरचितायां न्यायवार्तिकतात्पर्यटीकायाम्** ॥

८ क्रिया] °**नैमित्तिकौ** प्र° ॥

१० अ] **अर्थस्य**nayacakra-ms-ya । **अथस्य** nayacakra-ms-bhā ॥

३ का] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतिषु नास्ति ॥

एकीभावं गतो योऽर्थः स समर्थः साध्येन साधनाख्यः, तद्भावादेकीभावगतार्थस्य समर्थत्वात् सत्कार्यत्वमेव नासता खरविषाणेन सह कस्यचित् सामर्थ्यं तस्य वा केनचिदुपपद्यत इति । § 1440
505/mj

अथ कथं तन्तुतुर्यादेरेव कारणत्वेनोपादानं पटनिर्वृत्तौ, न पांशुवास्यादेः ? तस्यैव समर्थत्वात् तथा तथा पटादिकार्यं तन्तुषु वर्तते तथा अंशुषु तथा पक्ष्मतुटिरेणुपरमाणुषु तथा तुर्यादिष्वपि, पांस्वादिष्वपि च, कारणकारणत्वादणुवत् । § 1441

योऽप्युपचयहेतुः (?')प्राग् निष्पत्तेरसत् कार्यं क्रियागुणव्यपदेशाभावात् खपुष्प- § 1442

अस्य व्याख्यानम् --**अथ कथं तन्तुतुर्यादि** यावत् **कारणकारणत्वादणुवत् वै**शेषिकमेव पृच्छंस्तेनैव व्याख्यापयति । तुर्यादेरेव कारणत्वेनोपादानं पटनिर्वृत्तौ न पांशुवास्यादेरिति करणाधिकारपरिग्रहादेव सत्कार्यत्वं तस्यैव समर्थत्वात् **तथा तथा** तेन तेन प्रकारेण तत्तन्नियतनिजशक्तियुक्तार्थसमर्थत्वात्, पटादि कार्यं तन्तुषु वर्तते, तन्तुकारणेषु तथांशुषु प्रकारान्तरेण पटकारणभावं बिभ्रत्सु, तथा पक्ष्मतुटि-रेणु-परमाणूनामपि यथास्वशक्ति प्रकारान्तरैः पटकारणत्वात् पारम्पर्येण तत्र तत्रास्त्येव पटः तत्समवायव्यङ्ग्यत्वात् तदात्मकत्वाच्च । असमवायिपटोऽपि संयोगव्यङ्ग्यत्वात् संयोगिद्रव्येभ्यः संयोगस्याभिन्नत्वाद् द्व्यणुकत्र्यणुकाद्यनन्तप्रदेशस्कन्धसंयोगत्वपरिणतद्रव्याभेदात् त एव परमाणवः पटः, यथा संयोगिषु पटकारणेषु तदात्मकत्वात् - /ms
पटत्वं तथा तत्कारणपरमाणूनाम् । **तथा तुर्यादिष्वपि,** तुरि-वेम-शलाकाऽञ्च-

७ ग] योऽर्थः **असमर्थः** प्र° ॥
१० अ] नयचक्रवृत्तौ पाठस्याशुद्धत्वसन्देहादत्र मूले सन्देहः । नयचक्रवृत्तिपाठस्य समञ्जसत्वे तु अथ कथं तन्तुतुर्यादि एव पटनिर्वृत्तौ कारणम्, न पांशुवास्यादि ? इत्यपि मूलं स्यादत्र ॥
१६ न्तुतु] अत्र **°तुर्यादेरित्यादि** इत्यपि पाठः स्यात् ॥
१७ तु] तन्तुतुर्यादेरेव ? ॥
१९ त] **तथा तेन**nayacakra-ms-bhā ॥
२० त] **तथासुषु**nayacakra-ms-bhā । **तथातंतुषु** nayacakra-ms-ya ॥
२४ णुका] **°द्यनंतांतप्रदेश°** nayacakra-ms-bhā । आदिशब्दस्य अन्तशब्दस्य च परस्परमभिसम्बद्धत्वाद् द्व्यणुकत्र्यणुकादि इत्यत्र आदिशब्दः, अनन्तान्त इत्यत्र च अनन्तइत्यनन्तरम् अन्तशब्दः, इति विवक्षायां nayacakra-ms-bhā प्रतिपाठोऽपि साधुरेवेति ध्येयम् ॥
१ था] **संयोगेषु** प्र° ॥
२ तु] दव्वकारणं दुविहं--तद्दव्वकारणं अन्नदव्वकारणं च । तद्द्रव्यकारणं घटस्य मृत्पिण्डः, अन्यद्रव्यकारणं चक्रदण्डसूत्रोदकपुरुषप्रयत्नादयः । अथवा द्रव्यकारणं द्विविधं समवायिकारणमसमवायिकारणं च । समवातिकारणं पटस्य तन्तवः, तंतुसु पडो समवेत इति । असमवायिकारणं वेमनलका+अंछनिकातुरिविलेखनादीनि । अहवा निमित्तकारणं च नैमित्तिककारणं

निका-विलेखनिकादीनां कुविन्दप्रयत्नोत्थापितव्यापाराणां पटत्वं तदात्मकत्वाद् द्रव्याभेदात् । **पांस्वादिष्वपि च** भूम्यम्बुमारुतानलाकाशबीजसंयोगनिष्पाद्य-कर्पासात्मकत्वात् पटत्वं सिद्धम्, **तत्कारणकारणत्वात् परमाणुवत्** । एवं तावत् कार्यसदसत्त्वप्रतिषेधो न सिध्यति प्रतिषेधहेत्वयुक्तेः सदसत्त्वैकात्म्य-साधनसौस्थित्यप्रदर्शनाच्च सदसदेव कार्यमिति । § 1443

किञ्चान्यत्, **योऽप्युपचयहेतु**रित्यादि तेन किल सदसत्त्वनिषेधं कृत्वा कार्यासत्त्वसाधनार्थमुपचयहेतुरुक्तः, तद्यथा--प्राग् निष्पत्तेश्च कार्यस्याभावात् । कथम् ? इति तदुच्यते **--क्रिया-गुण-व्यपदेशाभावात्** । क्रिया त्व-क्षणादिका पटस्य तन्त्ववस्थायां गुणाश्च संयोगपरिणामादयः व्यपदेशश्च श-ब्दान्तरं लिङ्गं वा न सन्ति, तस्मात् क्रियागुणव्यपदेशाभावात् प्रागुत्पत्तेरसत्
506/mj कार्यं खपुष्पवदिति । **अस्याप्युपचय**

* * *

वत्(?') इति अस्यापि विरुद्धत्वम्, सदेव भवति कार्यम्, प्रागभूतक्रियागुण-व्यपदेशत्वात्, सत्ताऽसम्बन्धिद्रव्यादिवत् । अनैकान्तिकता च, असति च खपुष्पादौ सतिच जातमात्रे कार्यत्रये दृष्टत्वात् । ननु खपुष्पवदनेकान्तः, न, प्राग्विशेषणापक्षिप्तप्रसङ्गत्वात् ।

ननु... ...सदेव तु द्रव्यं न कार्यम् । ननु निष्पत्तिः... ...। निष्प-त्तिशब्दो हि... ...। प्रभूतस्य त्रिप्रकारा निष्पत्तिः नियता निश्चिता अधिका वा भवनमेव

* * *

हेतो**र्विरुद्धत्वं** दोष इत्याचार्य आह । अयमेव ते उपचयहेतुः परपक्षसाधनाय, **सदेव भवति कार्यं** जायते व्यज्यत उत्पद्यते, **प्रागभूतक्रियागुणव्यपदेशत्वात्, सत्ताऽसम्बन्धिद्रव्यादिवत्,** सविशेषणं स्वपक्षसाधनं वेदम् । यथा द्रव्यगुण-कर्माख्यं कार्यत्रयं स्वभावसत् त्वन्मतेनैव यावत् सत्तया न सम्बद्धं तावत् क्रियागुणव्यपदेशभाग् न भवति अथ च विद्यते स्वकारणेषु समवेतमात्रं - /ms
तथेदं समवेतकार्यमित्यस्मन्मतसिद्धिः । **अनैकान्तिकता च** क्रिया-गुण-व्य-पदेशाभावात् इत्यस्य हेतोरसति च खपुष्पादौ सति च जातमात्रे कार्यत्रये

च, कडस्स वीरणा निमित्तं, नैमित्तिकानि पुरुषप्रयत्नरज्जुकीलकादीनि । एवं घटपटादीनामपि । इति जिनदासगणिमहत्तरविरचितायाम् आवश्यकचूर्णौ, गा° ७३६, पृ° ३७२ ॥
६ स] **°सदसदसत्त्व°** प्र° ॥
८ स] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
९ स्याभा] °भावः, कथम् ? ॥
१८ न] ननु मया प्राग् निष्पत्तेरसत् कार्यं क्रियागुणव्यपदेशाभावात् इत्युक्तम् सदेव तु द्रव्यं न कार्यम् । इत्येतादृशं मूलमत्र भाति ॥
१८ न] ननु निष्पत्तिरुत्पत्तिरभूत्वा भावः अव्यक्तसद् व्यक्तसद् भवति इत्युक्तं भवति । अनुपनिलीनसत्त्वं च द्रव्यादित्रयं जातमात्रं सत्तासामान्येन सद् भवति । निष्पत्तिशब्दो हि भवनस्य सत्ताया वाचकः इत्याशयः स्यादिति भाति ॥
१ स] **सत्तासम्बन्धि°** प्र° ॥
१ नं] **चेदम्**nayacakra-ms-ya ॥
२ न] **संबंधं** प्र° ॥
३ भा] **°भाग् भवति** प्र° ॥
५ हेतोर] **°रति च** प्र° ॥

दृष्टत्वात् असदेव इति सन्दिग्धम् । § 1444

इतर आह **--ननु खपुष्पवदनेकान्तः** । प्रागुत्पत्तेरसत् कार्यमभूतक्रियागुणव्यपदेशत्वात् खपुष्पवत् स्यात्, उपजातमात्रद्रव्यादिवत् सत् स्यात् ? इति त्वत्साधनमपि संशयकारीति **चेत्** । एतच्च **न, प्राग्विशेषणापक्षिप्तप्रसङ्गत्वात्** । स्यादयं प्रसङ्गो यद्यविशेष्य क्रियागुणव्यपदेशाभावात् सत् कार्यम् इत्येतावद् ब्रूयाम्, किं तर्हि ? **प्रागभूतक्रियागुणव्यपदेशत्वात्** इति मया विशेष्योक्तम्, यस्य प्रागभूतः क्रियागुणव्यपदेशः पश्चाद् भविष्यति तत् सदेव, यथा तदेवोत्पन्नमात्रद्रव्यादि, न तु यस्य प्राक् पश्चात् इति कालाविभागेनैवासत्त्वं खपुष्पादेरिति । अतः प्राग्विशेषणादपक्षिप्तोऽनैकान्तिकत्वप्रसङ्गोऽस्य हेतोरिति । § 1445

अत्राह **--नन्वि**त्यादि यावत् **सदेव तु द्रव्यं न कार्य**मिति । मया प्राग् निष्पत्तेरसत् कार्यम् इति कालविशिष्टं यावदनुत्पन्नं तावद् नास्ति इति प्रतिज्ञाय क्रियाद्यभावात् इति हेतुरुक्तः, स तु निष्पन्ने द्रव्ये नास्ति, तस्मात् साधनधर्मवैकल्यादयुक्तो दृष्टान्त इति । § 1446

कस्मात् ? पद्यतेः सत्तार्थत्वात् । सा च **ते** त्रिप्रकारापि तवैव । त**द्यथा--सत्तासम्बन्धादेव द्रव्यादौ कार्ये नियता** कारणसमवायस्य सामान्यस्य च नित्यत्वात्, **निश्चिता** द्रव्यत्वगुणत्वकर्मत्वघटत्वरूपत्वोत्क्षेपणादि**स** (Edtext outside numbered paragraph)**त्त्वान्तरेभ्यो विविक्तत्वात् सत्तायाः, अधिका पुनर्भवनात्** कार्यस्य त्वन्मतेनैव कारणसमवाये जन्माभ्युपगमात् । एवं तावद् दृष्टान्तस्य का (Edtext outside numbered paragraph)र्यद्रव्यादित्रयस्य निष्पत्तिस्त्रिरूपा व्याख्याता । दार्ष्टान्तिककार्यस्याधुना **--उपादाननियमस्वसत्तानियता,** मृदाद्युपादाननियमेन घटादेः स्वसत्ता विद्यते, तया सत्तया नियता मृद्येव घटनिष्पत्तेः, तत्त्वतोऽसौ **घटत्वेन निश्चिता पटत्वादिव्यावृत्त्या,** तद्यथा — **तन्दुलविचयवत्,** विचिता निश्चितास्तण्डुलाः कचवराद्य (Edtext outside numbered paragraph)पनयनेन स्वरूपपरिग्रहेण च, * (Edtext outside numbered paragraph)**क्रियाया व्यापारेण** परिस्पन्देन अनिष्पत्तेः सकाशाद् **निश्चिता** अपनीता घटनिष्पत्तिः स्वरूपपरिग्रहेणेत्यर्थः । **अधिका युगपदयुगपत्पर्यायक्रमतथाभूतेः,** ये प्रा (Edtext outside numbered paragraph)ग् युगपद्भाविनो रूपादिपृथुबुध्नादिपर्यायाः पिण्डशिवकादयो नव-मध्यम-पुराणतादयश्चायुगपद्भाविनः तेषां क्रमेण शिवकादिकरणविधिना तथाभूतेः तेन प्रकारेण भवना**दधिका निष्पत्तिरिहापीति** । तस्माद् दृष्टान्तभूतस्य द्रव्यादित्रयस्य कार्यस्य निष्पत्तिवदव्यक्तसद् व्यक्तसद् (Edtext outside numbered paragraph) भवतीति समानमुपादाने सतः कार्यस्येति गतमानुषङ्गिकम् । स्थितं प्रागुक्तं सदसत्त्वं कार्यस्य । § 1447

११ ब्रू] ब्रूयात् प्र° ॥ । तवैवो° ? ॥

१३ त] तथैवो°nayacakra-ms-bhā

अत्र ब्रूमः **--ननु निष्पत्ति**रित्यादि । ननु निष्पत्तेः प्राक् इत्युक्तेऽपि निष्पत्तेरुत्पत्त्यभूत्वाभावादिसमानार्थत्वादव्यक्तसद् व्यक्तसद् भवतीत्युक्तं भ- - /ms वति । तद्यथा--अनुपनिलीनसत्त्वं च तद् द्रव्यादित्रयं जातमात्रं सत्तोपनिलयनात् प्रागनिष्पन्नं सत्तासामान्येन सत् सत्तासमवायात् सद् भवति व्यक्तसद् भवतीत्येषोऽर्थो निष्पत्तिशब्दस्येति । अत आह **--निष्पत्तिशब्दो** हीत्यादि । तद्व्याख्यानम् **--प्रभूतस्य** प्रारब्धभवनस्य **त्रिप्रकारा निष्पत्तिः**, तद्यथा **--नियता निश्चिता अधिका वा** । का सा ?

ते । यथा सत्तासम्बन्धादेव द्रव्यादौ कार्ये नियता निश्चिता सत्त्वान्तरेभ्यो विविक्तत्वात् सत्तायाः अधिका पुनर्भवनात्, एवमुपादाननियमस्त्वसत्तानियता तण्डुलविचयवत् क्रियाया व्यापारेण निश्चिता युगपदयुगपत्पर्यायक्रमतथाभूतेरधिका निष्पत्तिरिहापि ।

तस्मात् सदसत्क्रियागुणत्वात् सदसत एव क्रियागुणव्यपदेशाः । अन्यथा हेतुशक्त्युपादानानामभिधानमात्रप्रसङ्गः, असत्त्वाविशेषात् ।

यस्य तु विद्यमान एवार्थः... ... ...एतेषामर्थानामभावादभिधानमात्रप्रसङ्गः निष्पाद्यनिष्पादकत्वाविशेषादिति । अतश्चायुक्तं सत्कार्यत्वमेवेति ।

* * *

507/mj मेव ।**भवन**

* * *

ते । यथा सत्तासम्बन्धादेव द्रव्यादौ कार्ये नियता निश्चिता सत्त्वान्तरेभ्यो विविक्तत्वात् सत्तायाः अधिका पुनर्भवनात्, एवमुपादाननियमस्त्वसत्तानियता तण्डुलविचयवत् क्रियाया व्यापारेण निश्चिता युगपदयुगपत्पर्यायक्रमतथाभूतेरधिका निष्पत्तिरिहापि ।

तस्मात् सदसत्क्रियागुणत्वात् सदसत एव क्रियागुणव्यपदेशाः । अन्यथा हेतुशक्त्युपादानानामभिधानमात्रप्रसङ्गः, असत्त्वाविशेषात् ।

यस्य तु विद्यमान एवार्थः... ... ...एतेषामर्थानामभावादभिधानमात्रप्रसङ्गः निष्पाद्यनिष्पादकत्वाविशेषादिति । अतश्चायुक्तं सत्कार्यत्वमेवेति ।

* * *

मेव ।

**तस्मात्** सदसत एव क्रियागुणाः, तद्भावात् **सदसत्क्रियागुणत्वात् सदसत एव क्रिया-गुणव्यपदेशाः । अन्यथा हेतुशक्त्युपादानानामभिधानमात्रप्रसङ्गः**, यद्यसदेव कार्यं स्यात् हेतोर्दण्डादेः मर्दनादियोग्यतायाः शक्तेरुपादानस्य च मृदः, घटादौ मृदेवोपादीयते न तन्त्वादिरिति, एषां खरविषाणादिवदभावे अयमस्य दण्डादिहेतुः, इयमस्य शक्तिर्मार्दवादिर्मृद्द्रव्यस्य, मृदेव घट-

६ द्याख्या] °ख्यान प्रभू° प्र° ॥
१० क्रि] क्रिया व्यापा°nayacakra-ms-bhā । क्रियया व्यापा° ? ॥
२० क्रि] क्रिया व्यापा°nayacakra-ms-bhā । क्रियया व्यापा° ? ॥
६ द] दण्डादिर्हेतुः ? ॥

स्योपादानम् इति वचनमात्रमेवेदं सर्वं स्यात्, नार्थः कश्चित्, खपुष्पादिनिष्प-त्त्यर्थक्रियाहेत्वाद्यभाववद**सत्त्वाविशेषात्** । § 1448

यदि तु सदेव कार्यं स्यात् तत्रापि स एव दोष इत्यत आह --**यस्य तु विद्यमान एवार्थ** इत्यादि गतार्थं याव**देतेषामर्थानामभावादभिधानमात्रप्रसङ्गः निष्पाद्यनिष्पादकत्वाविशेषा**दिति । निष्पाद्यो 508/mj

* * *

तस्मादैकान्तिकपक्षयोरयुक्तत्वाद् युक्तमेतत् प्राक् सदसदेव प्रादुर्भवतीति ।

यदपि चोक्तम्--विकल्पत्रयानाश्रयाद् विकल्पान्तराश्रयणाच्च विकल्पानुपपत्तेः इति न दोषः, निष्ठासम्बन्धयोरेककालत्वात् । निष्ठा कारणसामग्र्य-व्यापार-

* * *

घटः, निष्पादकाः कुलालदण्डादयः, कुलालमृद्दण्डाद्यस्तित्ववद् घटास्तित्वात् किं दण्डादिना हेतुना क्रियते, न वा तुर्यादिना ? मृद एव मार्दवादिशक्तिर्न वज्रादेः, मृदेवोपादानं घटस्यानिष्पन्नत्वात् न तु निष्पन्नघट इति विशेषो नास्ति, सत्त्वाविशेषात् । **इति** प्रसङ्गपरिसमाप्त्यर्थः, तदुपसंहरति --**अतश्चायुक्तं सत्कार्यत्वमेवे**ति । ततः किमायातम् ? इदमायातम्--असत्कार्यायुक्तत्ववत् सत्कार्यत्वमप्यैकान्तिकं न युक्तम् । § 1449

**तस्मादैकान्तिकपक्षयो**स्तयो**रयुक्तत्वाद् युक्तमेतत्** प्रतिपत्तुं **प्राक् सदसदेव प्रादुर्भवतीति** स्याद्वादिन उपसंहरन्ति । एकान्तपक्षयोर्दोषदर्शनादनेकान्तपक्षे चादोषदर्शनात् सदसदेव कार्यमव्यक्तसद् व्यक्तसद् भवतीति स्थितमेतत्--त्रिधापि विकल्पानुपपत्तेः सत्तया न सम्बध्यते कार्यमिति । - /ms
§ 1450

कारणानां समवाय्यसमवायिनां तन्तु-संयोग-दण्डादीनां सामग्र्या अव्यापारकालः पटनिष्पत्तौ तुर्यादिव्यापारोपरमकाल इत्यर्थः । तमेव व्याचष्टे --**प्रागसतो वस्तुभावः** पटादिवस्तुजन्म **निष्ठानं समाप्तिरि**त्यादिपर्यायैः । सम्बन्धः कः ? इत्यत आह --**सम्बन्धः स्वकारणसत्तासमवायः**, स्वकारणेषु तन्तुषु कार्यस्य पटस्य सत्तया च समवायः । **तयोर्निष्ठासम्बन्धयोरेककालत्वम्** । तद्दर्शयति — **[स्वकारण]सत्तासम्बन्ध एव निष्ठाकालः**, स्वकारणैः सत्तया च कार्यस्य यः सम्बन्धः स एव निष्ठाकाल इति प्रतिज्ञाय **कुतः** इति हेतुं परिपृच्छय हेतुमाह --**समवायस्यैकत्वात्,** समवायो हि सम्बन्धः, स (Edtext outside numbered paragraph) चैको द्वयोरपि, नितिष्ठत एव सम्बन्धात् कारणसत्तादिभिः । तद्दर्शयति --**यस्मिन्नेव काले परिनिष्ठां गच्छत् कार्य**मात्मानं लभमानं पटाख्यं **कारणै**स्सत्त्वादिभिः **सम्बध्यते समवायसम्बन्धेन** समवाया- (Edtext outside numbered paragraph) ख्येन सम्बन्धेनेति **अयुतसिद्धिहेतुना** संयोगाद् युतसिद्धिहेतोरस्य विशेषं दर्शयति, **तस्मिन्नेव काले सत्तादिभिरपि** सम्बध्यते इति वर्तते । य एव कारणैः कार्यस्य समवायः स एव स-

त्ताद्रव्यत्वादिभिरप्येकः समवायः कालस्याभिन्नत्वात् । **तस्मादप्रविभागः**, त (Edtext outside numbered paragraph)द् यस्माद् नास्त्य-त्र कालप्रविभागो निष्ठासम्बन्धयोः तस्मात् प्राक् इत्येतदेव नोपपद्यते का (Edtext outside numbered paragraph)र्योत्पत्तेरसतः **स-दादिरनास्पदो विकल्प** इति, सता कार्येणासता सदसता वा सत्तायाः सम्बन्ध इत्यर्थाभावात् किमाश्रयोऽसौ विकल्पः स्यात् ? इति तांस्त्रीनपि विकल्पा (Edtext outside numbered paragraph)ननाश्रित्य निष्ठासम्बन्धयोरेककालत्वविकल्पो निर्दोष आश्रीयतामिति । § 1451

**यदपि चोक्त**मित्यादि । एतद्विकल्पपक्षत्रयपरिहारेण निर्दोषाभिमतं विक-ल्पान्तरमाश्रित्य यदुच्यते त्वया विकल्पानुपपत्तेः इति नासौ दोषः, विक-ल्पत्रयानाश्रयाद् विकल्पान्तराश्रयणाच्च । कस्माद् विकल्पान्तरादिति चेत्, *__निष्ठासम्बन्धयोरेककालत्वात्__ । का निष्ठा ? इत्यत आह

४ *] कथं तर्हि गोत्वं गोषु वर्तते... ...गवि अगवि वृत्त्यभावादिति चेत्, अथ मन्यसे यदिदं गोत्वं गोषु अनुवृत्तिप्रत्ययकारणं तत् किं गवि वर्तते आहोस्विदगवि ? यदि तावद् गवि, प्राग् गोत्वयोगाद् गौरेवासाविति व्यर्थं गोत्वम् । अथागवि, अश्वाद्यपि गोत्वयोगाद् गौः प्राप्नोति । न चान्या गतिरस्ति । तस्मान्न गोत्वादनुवृत्तिप्रत्यय इति । न, विकल्पानभ्युपगमात् । न गवि गोत्वं नागवि, प्राग् गोत्वयोगान्नासौ गौर्नाप्यगौरिति । किं कारणम् ? उभावेतौ विशेष्यप्रत्ययौ न विशेषणसम्बन्धमन्तरेण भवतः, न च प्राग् गोत्वयोगाद् वस्तु विद्यते न चाविद्यमानं गौरित्यगौरिति च शक्यं व्यपदेष्टुम्, यदेव वस्तु तदेव गोत्वेनाभिसम्बध्यते इत्यनास्पदो विकल्पः । एतेन सत्तासम्बन्धस्य सदसद्विकल्पो व्याख्यातः, न सतः सत्तासम्बन्धो नासतः, यदेव तद् वस्तु तदेव सत्तया सम्बद्धमिति सदसदाश्रयो दोषोऽनुपपन्न इति । तस्मादुपपन्ना जातिः । इति उद्योतकरविरचिते **न्यायवार्तिके** २ । २ । ६५ । अथास्तु सामान्यादावुपचरितं द्रव्यादौ मुख्यं सत् सत् इति ज्ञानम्, सत्तासम्बन्धस्तु विकल्पते--किं सत्ता सताम्, अथासताम् ? इति । यदि सताम्, अथ सत्तासम्बन्धात् पूर्वं सत्त्वं सत्तासम्बन्धेन विना चेति । सत्तासम्बन्धाभ्युपगमे तत्राप्ययं विकल्प इत्यनवस्था । विनेति चेत्, किं सत्तया ? अथासतां सत्तासम्बन्धात् सत्त्वमिति, अपारमार्थिकं तर्हि सत्त्वमुपाध्यपेक्षित्वात्, सदिति चासतां सत्तासम्बन्धेन सत्त्वं खरविषाणादीनामपि सत्त्वं स्यात् असत्त्वाविशेषात् । तथा सत्तायाश्चासत्त्वेन तद्योगान्न द्रव्यादिषु सत्त्वं स्यात्, स्वरूपेण च सत्त्वे द्रव्यादिषु तथा प्रसङ्गः, सत्तासम्बन्धेन चानवस्थेति । अतोऽर्थक्रियाकारित्वेन सत्त्वमिति **शाक्या** मन्यन्ते । वर्तमानकालसम्बन्धित्वेनेत्यपरे । तत्र यत्तदवोचाम किं सतां सत्तासम्बन्धात् सत्त्वमथासतामिति तदसत्, __**निष्पादसम्बन्धयोरेककालत्वात्**__ । तथाहि--पदार्थानां स्वकारणसत्तासम्बन्ध एवोत्पत्तिः, न पूर्वं सत्त्वम्, सत्कार्यवादप्रतिषेधात् । न चासतां स्वकारणसत्तासम्बन्धाभ्युपगमे खरविषाणादिषु तथाभावप्रसङ्गः, तदुत्पत्तिकारणाभावस्य तदभावेनैव निश्चयात् । नित्येषु पूर्वापरभावानुपपत्तेर्विकल्पानुपपत्तिः । न चापारमार्थिकं सत्त्वम्, सत्तासम्बन्धस्य परमार्थत्वात् । पृ॰ १२६... ... ... ... ...अथ किमिदं कार्यत्वं नामेति ? स्वकारणसत्तासम्बन्धः, तेन सता कार्यम् इति व्यवहारात् । अभूत्वा भवनमित्येके, अत्रापि अभूत्वा पश्चाद् भवनं स्वकारणैः सत्तया च सम्बन्ध एवेति । पृ॰ १२९... ... ...यच्चेदं किं गौर्गोत्वेनाभिसम्बध्यते, अथागौः ? इति चोद्यं तन्न प्रतिसमाधानार्हं __**निष्ठासम्बन्धयोरेककालत्वादि**__ति । स्वकारणैः सत्तादिभिश्च पिण्डस्याभिसम्बन्ध एवात्मलाभः, न पूर्वं तस्य गोरूपता अगोरूपता वा तत्सत्त्वस्यैवासम्भवात् । पृ॰ ६९० इति **व्योमशिवाचार्य**विरचितायां **प्रशस्तपादभाष्यटीका**यां **व्योमवत्याम्** ॥

कालः प्रागसतो वस्तुभावः निष्ठानं समाप्तिः...। सम्बन्धः स्वकारणसत्तासमवायः । तयोरेककालत्वम्, स्वकारणसत्तासम्बन्ध एव निष्ठाकालः, कुतः ? समवायस्यैकत्वात्, यस्मिन्नेव काले परिनिष्ठां गच्छत् कार्यं कारणैः सम्बध्यते समवायसम्बन्धेन अयुतसिद्धिहेतुना तस्मिन्नेव काले सत्तादिभिरपि, तस्मादप्रविभागात् प्राक् कार्योत्पत्तेरसतः सदादिरनास्पदो विकल्पः ।--एतदपि न, अनुपपन्नविकल्पत्वात् असम्बन्धात् अवस्तुत्वात् । कथं चावस्तुनः कारणैः सत्तया वा सम्बन्धः ? यदि तस्य स्यात् खपुष्पस्यापि स्यात् ।

* * *

सामग्र्यव्यापारकालः,--**निष्ठा कारण** 509/mj

* * *

कालः प्रागसतो वस्तुभावः निष्ठानं समाप्तिः...। सम्बन्धः स्वकारणसत्तासमवायः । तयोरेककालत्वम्, स्वकारणसत्तासम्बन्ध एव निष्ठाकालः, कुतः ? समवायस्यैकत्वात्, यस्मिन्नेव काले परिनिष्ठां गच्छत् कार्यं कारणैः सम्बध्यते समवायसम्बन्धेन अयुतसिद्धिहेतुना तस्मिन्नेव काले सत्तादिभिरपि, तस्मादप्रविभागात् प्राक् कार्योत्पत्तेरसतः सदादिरनास्पदो विकल्पः ।--एतदपि न, अनुपपन्नविकल्पत्वात् असम्बन्धात् अवस्तुत्वात् । कथं चावस्तुनः कारणैः सत्तया वा सम्बन्धः ? यदि तस्य स्यात् खपुष्पस्यापि स्यात् ।

* * *

सामग्र्यव्यापारकालः,

अत्रोच्यते **--एतदपि न, अनुपपन्नविकल्पत्वात्** । एषोऽपि विकल्पो नोपपद्यते, तदनुपपत्तेर्न दोषपरिहारः कृतः । कथमनुपपन्नोऽयं विकल्प इति चेत्, **असम्बन्धात्,** असम्बन्धोऽप्य**वस्तुत्वात्,** खपुष्पस्यावस्तुनः केनचित् सम्बन्धो नास्ति तथा प्रागुत्पत्तेरसतः कार्यस्य सम्बन्धो नास्ति । तस्य च कार्यस्य परिनिष्ठां गच्छतोऽसत्त्वादवस्तुत्वम्, **कथं चावस्तुनः कारणैः सत्तया वा सम्बन्धः ?** परिनिष्ठां गच्छत् इत्युत्पद्यमानमसदेवालब्धात्मकत्वात् तत् कार्यं तस्यामवस्थायां स्वकारणैः सत्तया वा न सम्बध्यते अवस्तुत्वात् खपुष्पवत् । **यदि तस्य स्यात् खपुष्पस्यापि स्यात्,** यदि कार्यं परिनिष्ठां गच्छदनिष्पन्नमसत् कारणैः सत्तया च सम्बध्यते ततः खपुष्पमपि परिनिष्ठां
- /ms गच्छत् स्वकारणैः सत्तया च सम्बध्येत, अवस्तु- त्वात् कार्यवत् । तस्मादयमपि विकल्पः असत् सत्तया सम्बध्यते इत्येतद्विकल्पान्तःपात्येवेति । § 1452

510/mj

सम्बन्धकाले तन्तुवद् वस्तुभावात्, भवदेव च सम्बध्यते परिनिष्ठानसम्बन्धयोरेककालत्वात् । तस्मात् सम्बन्धो वस्तुन एव

२५ इ] इत्युद्यमान°nayacakra-ms-bhā । अत्र **इत्युच्यमान°** इत्यपि पाठः स्यात् ॥

कार्यस्य । पुनरपीदं तदवस्थमेव, लोके हि सम्बध्यमानानां सत्त्वं दृष्टम्, न हि शशविषाणस्य सम्बध्यमानता दृष्टा, न हि परिनिष्ठायाः सम्बन्धाद् वा सत्त्वम्, यदि स्यात् तदा हि शश-विषाणमपि निष्ठां गच्छत् सम्बध्येत, कार्यमपि वा न सम्बध्येत । § 1453

समानत्वान्नेति चेत्, सति असति च सम्बन्धादर्शनतुल्यत्वात्, यथाऽसतः खपुष्पादेः समवायसम्बन्धेन द्विविधेन स्वकारणस-त्तादिभिः सम्बध्यमानता न दृष्टा तद्वत् सतोऽपि सम्बध्यमानता न दृष्टा; नहि सम्बध्यमानमविशिष्टमिहाधिकृतम् । § 1454

**सम्बन्धकाले तन्तुवद् वस्तुभावात्** । स्यान्मतम्--ननु सम्बन्धकालेऽस्ति कार्यमुत्पद्यमानमेव वस्तु भवति, पटकारणं तन्तव इव । **भवदेव च** परिनिष्ठां गच्छत् **सम्बध्यते परिनिष्ठानसम्बन्धयोरेककालत्वात्,** परिनिष्ठितं सम्बद्धं च इत्येकः कालः, कालप्रविभागाभावः । तस्मात् सम्बन्धो वस्तुन एव कार्यस्य नावस्तुन इत्युक्तमिति । § 1455

अत्रोच्यते --**पुनरपीदं तदवस्थमेव,** निष्पद्यमानावस्थाया उत्पत्तेः पूर्व-कालत्वात् प्रागुत्पत्तेश्च कार्यस्यासत्त्वादसतः सम्बध्यमानता खपुष्पादेरिव का ? नो चेत्, तस्यामवस्थायां कार्यं सदेव स्यात् स्वकारणैः सत्तया च स-म्बध्यमानत्वात् निष्पन्नकार्यवत् । **लोके हि सम्बध्यमानानां सत्त्वं दृष्ट**मिति साधर्म्यदृष्टान्तः । **न हि शशविषाणस्य सम्बध्यमानता दृष्टे**ति वैधर्म्यदृष्टान्तः, तदा न सम्बध्यते कार्यम् असत्त्वात्, खपुष्पवदित्यनिष्टापादनानुमानं वा । **न हि परिनिष्ठायाः सम्बन्धाद् वा सत्त्व**मिति, न हि परिनिष्ठा सम्बन्धो वान्यत्र दृष्टावपि सत्त्वमसतः कुरुतः खपुष्पादेः, सत एव निष्ठासम्बन्धदर्शनात् । यदि निष्ठायाः सम्बन्धाद् वा सत्त्वं स्यात् **तदा हि शशविषाणमपि निष्ठां गच्छत् सम्बध्येत** निष्ठितं च सम्बद्धं चेति भवेत्, असत्त्वात्, कार्यवत् । **कार्यमपि वा परिनिष्ठां गच्छत्** स्वकारणैः सत्तया च **न सम्बध्येत,** असत्त्वात्, ख-पुष्पवत् । **तदेति** च त्वदुक्तवद् निष्ठासम्बन्धयोरेककालत्वाभ्युपगमावस्थायां - /ms खपुष्पाद्यकार्यस्यापि तद्वदेकलाले निष्ठासम्बन्धौ स्यातां स्वकारणैः सत्तया चेत्यनिष्टापादनमेतदितश्चेतश्च । § 1456

**समानत्वान्नेति चेत्,** स्यान्मतम्--नैतदनिष्टापादनं घटते, कस्मात् ? **स-त्यसति च सम्बन्धादर्शनतुल्यत्वात्** । अस्य व्याख्या --**यथाऽसतः** इत्यादि

१९ प] न तु कार्यकारणयोः संयोगः, अयुतसिद्धत्वात् । युतसिद्धिरसम्बद्धस्य विद्यमानता, न पुनः कार्यं कारणासम्बद्धं विद्यते, जातः सम्बद्धश्चेत्येकः कालः । तस्मान्न कार्यकारणे संयुक्ते । इति उद्योतकरविरचिते **न्यायवार्तिके** २ । १ । ३३ ॥

१ त] **तथा हि** प्र° ॥
५ ख] **खपुष्पादिकार्यस्यापि** प्र° ॥
५ कार] **°रणेकः** प्र° ॥
८ य] **यथासतः** प्र° ॥

याव**दिहाधिकृत**मिति, यथैव असतः खपुष्पादेः समवायसम्बन्धेन द्विविधेन स्वकारणसम्बन्धेन सत्तासम्बन्धेन च सम्बध्यमानता न दृष्टा, **आदि**ग्रहणाद् द्रव्यत्वगुणत्वकर्मत्वादिभिश्चेति दृष्टान्तः । **तद्व**दित्यादि दार्ष्टान्तिकं गतार्थम्, **न हि सम्बध्यमानमविशिष्टं** यत् **किञ्चिदिहाधिकृतम्**, स्वकारणस्वसत्तादिवचनादिति । § 1457
511/mj

अत्र ब्रूमः--सम्बन्ध एव स न भवति, सत्सु अभूतत्वात्, शशविषाणवत् । विद्यमानविषयेणैव तेन भवितव्यम्, सम्बन्धत्वात्, द्व्यङ्गुलिसंयोगवत् । § 1458

यदि त्वात्मात्मीययोः पटव्यञ्जनयोः सद्भावे कारणानि तन्तवः, सम्बध्येरंस्तेन पटेन । स तु नास्ति । त एव तन्तवः परिनिष्ठां गच्छन्तः सम्बध्यन्त इति कालाविभागः कार्यकारणसत्तासम्बन्धस्य । तदा ते यदि तन्तव इत्येव, पुरुषादिकारणमात्रवादवदयं वादः स्यात् । सत्कार्यवादोऽपि न प्रतिपूर्येत, तन्त्वाकुण्डलनवत् पूर्वोत्तरकालतुल्यत्वात् सम्बन्धानर्थक्यं परिनिष्ठाऽपरिनिष्ठाऽविशेषश्च । अथ पटोऽपि, § 1459

**अत्र ब्रूमः--सम्बन्ध एव स न भवति, सत्सु अभूतत्वात्, शशविषाणवदि**त्यनिष्टापादनसाधनेनासत्सतोः सम्बन्धस्यातुल्यता प्रदर्श्यते । स्वकारणैः स्वसत्तया च कार्यस्य सम्बन्धः प्रागपि सत एवेति । तदर्थसाधनं चेदम् --**विद्यमानविषयेणैव तेन** समवायसम्बन्धेन **भवितव्यम्, सम्बन्धत्वात्,** यथा संयोगो द्वे अङ्गुली विद्यमाने एव विषयीकुरुते सम्बन्धशब्दवाच्यत्वात् तथा समवायोऽपि कार्यकारणे विद्यमाने एव विषयीकुरुते द्व्यादिपराधीनवृत्तित्वादिति । § 1460

अतः शब्दार्थव्यवहारद्वारेणात्रैव दोषाभिधित्सयेदमाह --**यदि त्वात्मे**त्यादि । स्वकारणानि स्वसत्ता इत्यत्र स्वशब्दस्य आत्मा-ऽऽत्मीय-धनपर्यायस्य इहात्मनि आत्मीये यथाविवक्षं वृत्तिः स्यात्, स च कार्योऽर्थः । तयोः पटव्यञ्जनयोः सद्भावे कुर्वन्ति कार्यं पटमिति कारणानि तन्तवः सम्बध्येरंस्तेन पटेन, **स तु नास्ति** पटः, तदभावे किंविषयं कारणानां कर्तृत्वमित्यर्थः
- /ms । व्यञ्जनसद्भावकर्तृत्वनिर्विषयाः त एव तन्तवः परिनिष्ठां गच्छन्तः सम्बध्यन्ते खपुष्पेणेव कार्यकारणनिरपेक्षाः परिनिष्ठिताः सम्बद्धाश्चेति कालावि-

---

१२ स्व ] स्वकारणसत्तादि॰nayacakra-ms-ya ॥ १ व्य ] ॰विवहार॰nayacakra-ms-ya ॥ २ स्व ] स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने । इत्यमरकोशे ॥

भागः कार्यकारणसत्तासम्बन्धस्येत्येतदापन्नम् । ततः को दोष इति चेत्, उक्तोऽसता सम्बन्धाभावः । पुनरपीत्थमुच्यते --**तदा ते यदि तन्तव इत्येव** कार्याभावात् कारणत्वव्यापारविमुखाः केवलं तन्तव इति पुरुषादिकारणमात्रमेवेदम् इतिवादवदयं वादः स्यात्, कुतोऽसत्कार्यवादः ? **सत्कार्यवादोऽपि साङ्ख्या**भिमतः प्रकृत्यन्तर्लीना विकाराः इति सोऽपि **न प्रतिपूर्येत,** स्तिमितसरःसलिलवद् गगनवद्वा निर्व्यापारकारणमात्रवादाभ्युपगमात् न प्रतिपूर्येतेति, मा वोचं न प्रतिपूर्यत एव इति निष्ठुरमिति सानुनयमुच्यते । किमिव ? **तन्त्वाकुण्डलनवत्,** यथा तन्तूनामाकुण्डलीकृतानां पुञ्जितानामित्यर्थः, कुविन्दतनन-पायन-प्रसारण-वयनादिक्रियानिरपेक्षाणां कारणत्वं नास्ति, तत्रात्यन्तं पटकार्यादर्शनात्, न हि कुण्डलितेषु पटो दृश्यते, तथा कारणमात्रमसम्पूर्णसत्कार्यमेतत्, **पूर्वोत्तरकालतुल्यत्वा**दिति, एवं निर्व्यापारपूर्वोत्तरकालतुल्यतन्तुमात्रतायां पटाख्यस्य कार्यस्य कश्चिद् गन्धोऽपि नास्ति, अतस्तेन सम्बन्धानर्थक्यं कारणानां तन्तूनां खपुष्पेणेव । किञ्चान्यत्, **प-**
512/mj **रिनिष्ठापरिनिष्ठाविशेषश्च,** दोषोपचयः, खपुष्पवत् कार्य

* * *

ततः स्वकारणसत्तासम्बन्धद्वयतन्तुपटद्वयसानाथ्यं नानेकान्तानाश्रयणे ।

असत्सम्बन्धपरिहारार्थं च निष्ठासम्बन्धयोरेककालत्वात् इत्येतदेव वाक्यं सभाष्यं प्रशस्तोऽन्यथा व्याचष्टे--सम्बन्धश्च सम्बन्धश्च सम्बन्धौ, निष्ठायाः

* * *

- /ms स्यात्यन्तमसत्त्वात् कारणानां चात्यन्तं पूर्वोत्तरकालतुल्यत्वादाकाशवत् किं कथं परिनिष्ठितं तिष्ठति न परिनितिष्ठति ? सर्वं हि सर्वदा सर्वथा परिनिष्ठितमपरिनिष्ठितं वा स्यादित्यविशेषः । एवमसम्पूर्णसत्कार्यकारणमात्रवादित्वं सम्बन्धानर्थक्यं निष्ठानिष्ठाविशेषश्चेति दोषाः स्वसिद्धान्तोपरोधिनस्ते ।

§ 1461

**अथ पटोऽपि ।** अथ मा भूवन्नेते दोषा इति पटोऽपि केनचिद् न्यायेन तन्तुष्वस्ति इत्यभ्युपगम्यते सोऽप्यभ्युपगमविरोधायैकान्तवादिनस्तेऽनेकान्तवादाभ्युपगमो जायत इत्यत आह --ततः **स्वकारणसत्तासम्बन्धद्वयतन्तुपटद्वयसानाथ्यं नानेकान्तानाश्रयणे,** पटस्य कार्यस्य स्वकारणैस्तन्तुभिः स्वसत्तया चेति द्वौ सम्बन्धौ तावेव कार्यं कारणानि च द्वावर्थाविति तदेव तच्चतुष्टयम्, अव्यक्तसन् पटः तन्त्ववस्थायां तन्तुभिः स्वकारणैः स्वसत्तया च

१३ मा] °मात्प्रतिपूर्येतेति प्र° ॥
१५ पु] पंजिताना° प्र° ॥
१६ पा] °पानयन° प्र° । दृश्यतां पृ° २२६ टि° ४ ॥
१८ पू] °पूर्वोतुल्यतन्तु° प्र° ॥
२८ प] परिनितिष्ठति न परिनितिष्ठति इत्यपि पाठोऽत्र स्यात् ॥
२८ रिनिष्ठितं] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१ प] पटोऽथ माnayacakra-ms-ya ॥
४ ना] नानेकान्तनाश्र° प्र° । नानेकान्तनाथानाश्रयणे ? ॥
४ स्व] स्वकार्यकारणै°nayacakra-ms-ya ॥

सम्बद्धः कुविन्दादिकारकव्यापारोत्तरकालं व्यक्तसन् भवति पटात्मना परिणतेरिति द्रव्यपर्यायात्मकस्याद्वादपरमेश्वराश्रयप्रभावलभ्यमेतद् वचनसामर्थ्यं नान्यथेति । तस्मादेषोऽपि विकल्पोऽसत्सम्बन्धदोषदुष्ट इति । § 1462

निष्ठां गच्छद् गतमित्येकोऽर्थः । कर्त्रादीनां **कारकाणां** कुविन्द-तुरिवेमादीनां **परिस्पन्दाद् वस्तुभावं** वस्तुभवनमापन्नं **निष्पन्नमव्यपदेश्याधारम्,** अव्यपदेश्य आधारोऽस्य तन्त्वादिः समवायि- (Edtext outside numbered paragraph) हेतुः, इह तन्तुषु पटः इतीहप्रत्ययाभिधानकारणस्य समवायसम्बन्धस्य निमित्तभूतं पटाख्यं कार्यं निष्ठितं निष्ठा इत्युच्यते । **तस्य** निष्ठितस्य **स्वकारणैः सत्तया च युगपत् सम्बन्धौ भवतः** । § 1463

**असत्सम्बन्धपरिहारार्थं** चेत्यादि । ***निष्ठासम्बन्धयोरेक[काल]त्वात्** इत्येतदेव वाक्यं सभाष्यमसत्सम्बन्धदोषपरिजिहीर्षया विद्वस्यन् प्रशस्तोऽन्यथा व्याचष्टे --**सम्बन्धश्च** सम्बन्धश्च **सम्बन्धौ, निष्ठायाः सम्बन्धौ निष्ठासम्बन्धौ,** न निष्ठा च सम्बन्धश्चेति । **तयोर्निष्ठासम्बन्धयो**

सम्बन्धौ निष्ठासम्बन्धौ, तयोरेककालत्वात् । निष्ठितं निष्ठा, कारकपरिस्पन्दाद् वस्तुभावमापन्नमव्यपदेश्याधारं कार्यं निष्ठितं निष्ठा इत्युच्यते, तस्य स्वकारणैः सत्तया च युगपत् सम्बन्धौ भवतः । **भाष्य**मपि परिनिष्ठां गच्छद् गतम् इत्येतमर्थं दर्शयति, वर्तमानसामीप्ये वर्तमानवद्वा पा॰ ३

---

१० *] दृश्यतां पृ॰ ५०८ पं॰ ३ ॥

१ वा] इदं तु ध्येयम् --**वाक्य**मिदं **भाष्यं** चेदं केन कदा च विरचितमिति न सम्यग् विज्ञायते । **कणाद**विरचित**वै**शेषिकसूत्राणां सङ्क्षिप्तव्याख्यानरूपो **वाक्य**नामकः कश्चिद् ग्रन्थ आसीत्, तदुपरि केनचिद् विरचितं **भाष्य**मासीत्, तदुपरि च **प्रशस्तमति**विरचिता काचित् **टीका** आसीदिति तु पूर्वापरग्रन्थपर्यालोचनया प्रतीयते, दृश्यतां पृ॰ ५१७ पं॰ ९ । त्रयमप्येतदिदानीं न क्वचिदप्युपलभ्यते । यत्तु **प्र**शस्तपादभाष्यमिदानीमुपलभ्यते तत्र नैवेयं चर्चा दृश्यते, अतः **प्र**शस्तपादभाष्यादवश्यं भिन्नमेवैतद् भाष्यम् । किञ्चान्यत्, **प्र**शस्तपादभाष्यं न साक्षाद् **वै**शेषिकसूत्राणां व्याख्यानभूतं किन्तु स्वतन्त्र एव निबन्धः । **त**त्त्वसङ्ग्रहपञ्जिका-**प्र**मेयकमलमार्तण्ड-**न्या**यकुमुदचन्द्रादिप्राचीनग्रन्थेषु च तस्य **पदार्थप्रवेशक**नाम्नैव उल्लेखः, वादि **देव**सूरिविरचित**स्याद्वाद**रत्नाकरे पृ॰ ९२० तु **प्रशस्तकर**भाष्यनाम्नापि निर्देशः, अन्यग्रन्थेषु केवलं भाष्यनाम्नापि निर्देशः, सम्प्रति तु **प्रशस्तपादभाष्य**नाम्नैव प्राचुर्येण व्यवहारः । एवं प्रशस्तपादभाष्यकर्तुः प्रशस्तः, **प्र**शस्तकरः, प्रशस्तदेवः, प्रशस्तकरदेवः, प्रशस्तपादः इत्यादीनि बहूनि नामानि उपलभ्यन्ते । प्रशस्तमतिः इत्यपि तस्यैव नामान्तरं स्यादिति प्रतिभाति । इदं त्ववधेयम् --**त**त्त्वसङ्ग्रहपञ्जिकायां **स**न्मतितर्कवृत्तौ **प्र**मेयकमलमार्तण्ड-**न्या**यकुमुदचन्द्रादिषु च **प्र**शस्तमतेर्बहूनि वचांसि उद्धृतानि दृश्यन्ते, किन्तु तत्र **त**त्त्वसङ्ग्रहपञ्जिकायां विशेषपरीक्षायां समवायपरीक्षायां च यत् **प्र**शस्तमतेर्मतमुद्धृतं तदेव केवलमुपलभ्यते यथाक्षरं **प्र**शस्तपादभाष्ये, अपराणि तु **प्र**शस्तमतेर्वचांसि नैवोपलभ्यन्ते **प्र**शस्तपादभाष्ये । अत एवं सम्भाव्यते--एकस्तावद् वैशेषिकसूत्राणां वाक्यतद्भाष्ययोश्च व्याख्यानभूतो ग्रन्थः **प्र**शस्तमतिना व्यरचि, अपरस्तु **वै**शेषिकमतवर्णनपरः स्वतन्त्र एव निबन्धस्तेन विरचितो यः सम्प्रति **प्र**शस्तपादभाष्यनाम्ना सर्वलोकप्रसिद्ध इति ध्येयम् ॥

१ ष्य] ॰ष्यमत्स॰nayacakra-ms-ya । ॰ष्यसत्स॰ nayacakra-ms-bhā ॥

१ या] **विद्वस्यत्प्रशस्तो** प्र॰ ॥

। ३ । १३१ इति । यथा कारकान्तरमुत्पद्यमानं दृष्टं कारकव्यापाराद् वस्तुभावमापन्नमव्यपदेश्याधारं निर्वृत्तं सत् स्वकारणैः सत्तया च सम्बध्यते तथा पटाख्यम् ।

तदपि न, समवायिकारणत्वविरोधात् स्ववचनाभ्युपगमविरोधौ । किञ्च, निष्ठितस्य कार्यस्य कारणैः सत्तया च सम्बन्धो युतसिद्धसम्बन्धः, कार्यस्य कारणेभ्योऽन्यत्र परिनिष्ठितत्वात् ।

* * *

513/mj निष्ठितं निष्ठा,**रेककालत्वात्** ।

* * *

सम्बन्धौ निष्ठासम्बन्धौ, तयोरेककालत्वात् । निष्ठितं निष्ठा, कारकपरिस्पन्दाद् वस्तुभावमापन्नमव्यपदेश्याधारं कार्यं निष्ठितं निष्ठा इत्युच्यते, तस्य स्वकारणैः सत्तया च युगपत् सम्बन्धौ भवतः । भाष्यमपि परिनिष्ठां गच्छद् गतम् इत्येतमर्थं दर्शयति, वर्तमानसामीप्ये वर्तमानवद्वा पा॰ ३ । ३ । १३१ इति । यथा कारकान्तरमुत्पद्यमानं दृष्टं कारकव्यापाराद् वस्तुभावमापन्नमव्यपदेश्याधारं निर्वृत्तं सत् स्वकारणैः सत्तया च सम्बध्यते तथा पटाख्यम् ।

तदपि न, समवायिकारणत्वविरोधात् स्ववचनाभ्युपगमविरोधौ । किञ्च, निष्ठितस्य कार्यस्य कारणैः सत्तया च सम्बन्धो युतसिद्धसम्बन्धः, कार्यस्य कारणेभ्योऽन्यत्र परिनिष्ठितत्वात् ।

* * *

निष्ठितं निष्ठा,

**भाष्यमपी**ति अस्य वाक्यस्य व्याख्याग्रन्थोऽप्ययं परिनिष्ठां गच्छद् गतमित्येतमर्थं दर्शयति । केन पुनर्लक्षणेन गतं सद् गच्छदित्युच्यते ? ब्रूमः --**वर्तमानसामीप्ये वर्तमानवद्वा** पा॰ ३ । ३ । १३१ इति । किमिव ? इत्यतो निदर्शनमाह --**यथा कारकान्तरमुत्पद्यमानं दृष्ट**मिति, कारकादन्यत् कारकं कारकान्तरमुत्पद्यमानमुत्पन्नमित्यर्थः । कस्मात् ? दृष्टम् इत्यक्षिगोचरापन्नार्थनिर्देशात्, इतरथा दृष्टं न स्यात्, उत्पद्यमानस्यानुत्पन्नत्वेऽक्षिगोचरत्वानुपपत्तेः । तत् पुनः कतमत् ? **कारकव्यापाराद्** देवदत्त-स्थालीकाष्ठादीनां व्यापाराद् **वस्तु[भावम्]** आत्मलाभ**मापन्नं** पूर्ववद**व्यपदेश्याधारं निर्वृत्तं** सदोदनाद्याख्यं **स्वकारणै**स्तण्डुलादिभिः **सत्तया च सम्बध्यते तथा पटाख्य**मिति । § 1464

अत्र ब्रूमः --**तदपि न, समवायिकारणत्वविरोधात् स्ववचनविरोधोऽभ्युपगमविरोधश्च** दोषावित्थं ब्रुवतः । क्रियावद् गुणवत् समवायिकारणं द्रव्यमुक्तम्, समवायिनो द्रव्यान्तरस्य गुणकर्मणोश्चारम्भकत्वात् । यदि पुनर्वस्तुभावं गतं कार्यं द्रव्यादित्रयं कारणैः सत्तया चाभिसम्बध्यते ततोऽनारम्भकाणि

१६ इ] **इत्यक्षगो॰** प्र॰ ॥
२२ गु] **गुणसमवायि॰** प्र॰ । दृश्यतां पृ॰ ४४० टि॰ ५ ॥

अकारणानि च तन्त्वादिकारणद्रव्याणि स्युः, ततश्च स्ववचनमभ्युपगमश्च निवर्तेते समवायिनां कार्याणां द्रव्यम् इति । **किञ्चेत्यादि** यावत् **परिनिष्ठितत्वादिति** । एतावपि स्ववचनाभ्युपगमविरोधौ, यस्मात् कार्यकारणगुणगुणिव्यक्त्याकृतीनामयुतसिद्धः समवायः सम्बन्ध उक्तोऽभ्युपगतश्च, इदानीं निष्ठितस्य कार्यस्य कारणैः सत्तया च सम्बन्धोऽभ्युपगतः, स च युतसिद्धसम्बन्धः, - /ms
कार्यस्य कारणेभ्योऽन्यत्र परिनिष्ठितत्वाद् घटाकाशवत् । § 1465
514/mj

यत्तूच्यते--समवायिकारणत्वनिवृत्तिरिति चेत्, न, अन्यत्रासमवायात् । यदि तस्य... ... तस्माददोषः वै॰ सू॰ प्रशस्तमति॰ इति, सोऽप्यपरिहारः, इच्छामात्रत्वात् स्वोक्तोपपत्तिविरुद्धार्थत्वात् तदसम्बद्धत्वात् अन्यत्र परिनिष्ठितत्वात् तन्तुष्विव घटस्य तत्राप्रवृत्तत्वात् तत्रानारम्भात् तदसम्बद्धोत्पत्तित्वात् । § 1466

कार्यस्य चोत्पत्तिवत् खपुष्पमुत्पद्यताम्, कारणैरसम्बद्धत्वात् । अकारणत्वादिति चेत्, पटाद्यपि मोत्पादि अकारणत्वात् खपुष्पवत्, तद्वोत्पद्यताम् । § 1467

यथा तन्त्वादीनि तेष्वसतः सतोऽप्यकारणानि कार्यस्य तथा सर्वत्र कारणं § 1468

**यत्तूच्यत** इत्यादि यावत् **तस्माददोष** इति द्रव्यसमवायिकारणत्वनिवृत्तिदोषपरिहारो योऽभिहितः **समवायिकारणत्वनिवृत्तिरिति चेदि**त्याशङ्क्य **--न, अन्यत्रासमवाया**दिति । तद्व्याख्यानं **यदि तस्ये**त्यादि सुलिखितत्वाद् न विव्रियते । **सोऽप्यपरिहार इच्छामात्रत्वात्,** कार्यस्य निष्ठितस्य कारणैः सम्बन्धोक्तिरन्यत्रसमवायाख्यायिनी **न, अन्यत्रासमवायात्** इत्युत्तरवाक्यं विरुणद्धि, तच्चेतरविरोधि, ततोऽनुपपत्तेर्विरुद्धार्थत्वादिच्छामात्रं ते वचो न परिहार इत्यत आह **--स्वोक्तोपपत्तिविरुद्धार्थत्वात्,** विरुद्धार्थत्व**मसम्बद्धत्वात्** **तैः** कारणैः कार्यस्य, तदसम्बद्धत्व**मन्यत्र परिनिष्ठितत्वात्,** किमिव ? **तन्तुष्विव घटस्य,** यथा तन्तुषु घटस्यानिष्ठितत्वादन्यत्र कपालेषु निष्ठितत्वात्

---

२५ श्च ] निवर्तेतेnayacakra-ms-ya ॥
२६ द्र ] द्रव्यं समवायिकारणम् इत्यपि पाठोऽत्र स्यात् ॥
२८ त्त्याकृतीना ] ॰नं अयु॰nayacakra-ms-bhā । ॰न अयु॰ nayacakra-ms-ya ॥
२८ श्च ] ॰श्चेदिदानीं प्र॰ ॥
१ य ] यत्तूच्यते--न, अन्यत्रासमवायात् इत्यपि पाठः स्यात् ॥
२ य ] **यदि तस्य** अन्यत्र समवायोऽभ्युपगम्येत स्यादयं दोषः, न तु तथाभ्युपगम्यते, **तस्माददोषः** इत्याशयोऽत्र भाति ॥
६ का ] कार्यस्य चोत्पत्तिवत् खपुष्पं कस्मान्नोत्पद्यते इत्यपि पाठोऽत्र स्यात् ॥
१२ निवृत्तिरिति ] **चेत्याशङ्क्य** प्र॰ ॥

तन्तुभिरसम्बद्धत्वमेवं द्रव्यादिकार्यस्य । तदसिद्धमिति चेत्, न, **तत्राप्रवृत्तत्वात्** तन्तुष्विव घटस्य इति वर्तते । तत्राप्रवृत्तत्वमन्यत्र प्रवृत्तत्वं च **तत्रानारम्भात्,** तत्र चानारम्भः **तदसम्बद्धोत्पत्तित्वात्,** तैः कारणैरसम्बद्धस्य पटस्योत्पत्तेरिष्टत्वात् तवैव आरम्भ-प्रवृत्ति-निष्ठास्तन्तुषु पटस्य न सन्ति घटस्येवाकाशस्येव खपुष्पस्येव वा । सामान्येनैक एव वा हेतुः **तदसम्बद्धोत्पत्तित्वा**दिति । § 1469

अनिष्टापादनं चात्र **--कार्यस्य चे**त्यादि । खपुष्पमुत्पद्यताम्, कारणैरसम्बद्धत्वात्, त्वदभिमतकार्यवत् । **अकारणत्वादिति चेत्,** निष्कारणं च खपुष्पम्, पटादि सकारणम्, तस्माद् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादयुक्तमिदमनिष्टापादनमिति चेत्, उच्यते **--पटाद्यपी**त्यादि, पटाद्यपि कार्यं मोत्पादि, अकारणत्वात्, खपुष्पवत् । अकारणत्वं चास्य कारणासम्बद्धत्वादाकाशवत् । **तद्वोत्पद्यता**मिति, कारणासम्बद्धस्य कार्यस्योत्पत्तिवत् खपुष्पं वोत्पद्यतामकारणत्वादित्युक्तमेव । § 1470 -/ms

**यथा तन्त्वादीनी**ति, तन्त्वादीनां कारणत्वं कार्येण सम्बन्धादृते नास्ति, तस्मात् तेष्वसतः 515/mj

* * *

यथायोगं स्वस्यैव कार्यस्य नासतो नान्यकार्यस्य वा असम्बन्धात् । तस्मादस्ति सम्बन्धः प्रागपि ।

योऽयं सम्बन्धसमवायशब्दार्थः सोऽपि एवमेव घटते । एकीभावेन बन्धः सम्बन्धः, अनेकसर्वात्मकत्वात् । एकीभावेन गतिः अयः अवगत्या समवायः कारणसत्कार्यैकत्वलक्षणः ।

तदापत्तिभयात् त्वयेदममार्गप्रमर्दनं क्रियते यदिदमव्यपदेश्याधारत्वम् । व्यपदेश्याधारं द्रव्यादिकार्यं समवेतं च स्वकारणैः प्रागपि, परिनिष्ठितत्वात्, विभुपरिमण्डलवियदादिवत् ।

* * *

सतोऽप्यकारणानि कार्यस्य अत्यन्तासतः खपुष्पस्येव घटस्येव वा कारणान्तरसाध्यस्येत्युक्तमुपनयति **--सर्वत्र कारण**मित्यादि, करोति इति कारणं कर्तृसाधनम्, खपुष्पादि घटादि वा तन्तुभिर्न क्रियते ततस्तत्राकारणानि, पटस्तु क्रियते तस्मात् तस्य कारणानि, *यो यो योगो **यथायोगं स्वस्यैव कार्यस्य** तन्तवः पटस्य कपालानि घटस्य, **नासतो नान्यकार्यस्य**

---

२१ म] °मन्येव प्र° ॥
२२ त] तद्वचनारब्धा तदसम्बद्धो° प्र° ॥
२२ स्योत्प] °त्पत्तेरिष्ट°nayacakra-ms-bhā । °त्पत्तौरदृष्ट° nayacakra-ms-ya ॥
२३ त] तत्रैवnayacakra-ms-bhānayacakra-ms-vi ॥
२३ घ] घटस्यैवाकाशस्यैव प्र° ॥
२४ पुष्प] °स्यैव nayacakra-ms-bhānayacakra-ms-raṃnayacakra ॥
१७ पुष्प] °ष्पमेव प्र° ॥
१८ स] सर्वत्वnayacakra-ms-pānayacakra-ms-raṃ । सर्वद्य nayacakra-ms-ḍe । सर्वस्व nayacakra-ms-vi ॥
२० *] यो योगो प्र° ॥
२१ पाला] °लादिनि nayacakra-ms-ya ॥

वा, कस्मात् ? असम्बन्धात्, कार्यकारणभावश्च सम्बद्धत्वे सति भवति, तस्माद्[स्ति] सम्बन्धः प्रागपि कार्योत्पत्तेस्तत्कारणैः सम्बन्धोऽस्ति । कथं तत् कार्यं तद् नितिष्ठति कारणैरसम्बद्धम् ? तस्मात् कार्यमव्यक्तसद् व्यक्तसद् भवति सम्बद्धं च सदा स्वकारणैः इत्यनुमीयते । § 1471

सम्बन्धसमवायशब्दार्थावप्येवमेव घटेते, नान्यथेत्यतो **योऽयमित्याद्याह** । सम् इत्येकार्थीभाववाच्ययमुपसर्गः, **एकीभावेन बन्धः सम्बन्धः** अनेकं कारणाख्यं वस्तु सदेकमेव कार्याख्यं भवति परस्परेण बध्यते तमर्थमाह, **अनेकसर्वात्मकत्वात्** अनेकस्य तन्त्वादेः प्रतिस्वमात्मानमपरित्यज्य सर्वैकसङ्घातभव- नेन पटादिकार्याख्येन परिणतेः । **एकीभावेन गतिः** गमनप- - /ms रिणतिरयः, अव अपगमने, **अवगत्या** अपगमनेन प्राच्यसंस्थानादिधर्माणां त्यागेन द्रव्यपर्यायाभ्यां तन्तुत्वापरित्यागेन पटत्वपरिणामः सम्बन्धः **समवाय** इत्यक्षरार्थानुसारेणोक्ता वस्तुनि स्फुटीकर्तुमाह **--कारणसत्कार्यैकत्वलक्षणः**, कारणेषु विप्रकीर्णेषु सत्कार्यमेकत्वमापन्नेषु पटीभवद् व्यक्तिं यातीत्येष परमार्थः । § 1472

**तदापत्तिभया**दित्यादि । एष द्रव्यपर्यायात्मकस्याद्वादपरमार्थवादं मा प्रपत्स्येऽहम् इत्यकस्माद्भयात् स्वपक्षरागसमुत्थात् परपक्षद्वेषाच्च त्वये**दममार्गप्रमर्दन**मस्थाने शक्तिक्षयायैवं क्रियते । कतमदमार्गप्रमर्दनमिति चेत्, उच्यते **--यदिदमव्यपदेश्याधारत्वं** प्राग् व्याख्यातम् । तत् पुनः किमर्थमारभ्यते ? इहेति यतः कार्यकारणयोः [सदृश्यतां पृ° ४४५ टि° १४ ॥] समवायः वै° सू° ७ । २ । २९ इति इहबुद्ध्यभिधानाभ्यां कार्यकारणगताभ्यां समवायोऽनुमीयते, सोऽत्र न सम्भवति कार्यस्यासत्त्वात्, तस्मादव्यपदेश्याधारकार्यसम्बन्धकल्पना क्रियते । अयमुत्पथगमनक्लेशो निरर्थकश्च, सोऽपि च मिथ्याभिधान एव । अव्यपदेश्याधारं द्रव्यादिकार्यमसमवेतं वा कारणैः प्रागुत्पत्तेरिति मा मंस्थाः, मन्यतां तु तत्रैवास्तीति । तथा च मन्तव्यम् —
- /ms, 516/mj **व्यपदेश्याधारं द्रव्यादिकार्यं समवेतं च स्वकारणैः प्रागपि** निर्वृत्तेस्त्वन्मतेनैव **परिनिष्ठितत्वाद्**

* * *

योऽपि च परिहारोऽभिहितः--न, अस्यासंयोगात्, न हि कारणसम्बन्धिभिः कार्यस्य संयोगोऽस्ति वै° सू° प्रशस्तमति°, सोऽपि न परिहारः, उक्तवदसंयोगासिद्धत्वात् ।

तत्त्वोपनिलयनात् सदाद्यभिधानार्थं कारणसमवेतस्य वस्तुन उत्तरकालं

२४ त] यद् ? ॥
२७ ब] सम्बन्धःnayacakra-ms-ya ॥
४ दाप] °त्तिरूपादित्यादि प्र° ॥
४ एष] एवnayacakra-ms-bhā । एवं ? ॥
६ या] °क्षययेवं प्र° ॥
१२ च] मिथ्याभिमान एव इति सम्यग् भाति ॥
१४ णैः] प्रागपितिnayacakra-ms-vi विना । अत्र प्रागपीति इत्यपि पाठः स्यात् ॥

सत्तासम्बन्ध इति बहूनां मतम् । वस्तूत्पत्तिकाले एव इति तु वाक्य-काराभिप्रायोऽनुसृतो

* * *

वस्तुभावमापन्नत्वात्, **विभुपरिमण्डलवियदादिवत्,** यथा विभुत्वपरिमाणान्याकाश-कालदिगात्मद्रव्याणि परिनिष्ठितत्वाद् विभुत्वगुणसमवेतानि व्यपदेश्याधाराणि च तथा द्रव्यादिकार्यम्, परिमण्डलपरिमाणाः परमाणवः परिमण्डलत्वेन समवेता व्यपदेश्याधाराश्च द्व्यणुकादिकार्ये, विभुत्वपरिमण्डलत्वगुणयोर्वाश्र-यभूतयोर्वाकाशपरमाण्वोर्द्व्यणुकादिव्यपदेश्याधारत्वं समवेतत्वं च सिद्धं तथा द्रव्यादिकार्यस्येति । एवं तावत् परिनिष्ठितसम्बन्धौ ब्रुवतो द्रव्यस्य सम-वायिकारणत्वनिवृत्तिप्रसङ्गपरिहारोऽसमर्थः । § 1473

**योऽपि चेत्यादि** । अस्मदुक्तस्य कार्यकारणयुतसिद्धिदोषस्य परिहारो योऽभिहितः --**न, अस्यासंयोगादिति** । तद् व्याचष्टे --**न हि कारणस-म्बन्धिभिः कार्यस्य संयोगोऽस्ति,** यथा द्वयोरङ्गुल्योराकाशे युज्यमानयोः संयोगस्य द्व्यङ्गुलाकाशसंयोगकारणस्य सम्बन्धिन्योर्युतसिद्धयोः संयोगो न तथा कारणसम्बन्धिभिः कार्यस्य द्रव्यादेः केश्चित् संयोगोऽस्ति यतो युत-सिद्धिदोष आपद्येत पृथक्सिद्धयोरिव । तस्मादसंयोगात् संयोगवैधर्म्यात् **पृथक्सिद्ध्यभाव इति** । § 1474

अत्रोच्यते --**सोऽपि न परिहारः, उक्तवदसंयोगासिद्धत्वात्** । यदि तत्र परिनिष्ठितं प्रवृत्तमारब्धं कथं तेनासम्बद्धम् ? इत्यादिना प्रपञ्चेन सम्बद्धमेव इत्युक्तं सम्बन्धसमवायशब्दार्थव्याख्यानेन च । तस्मादुक्तवदसंयोगस्यासिद्ध-त्वादपरिहारः । यदि तत्रोत्पन्नताद्यसिद्धिः सम्बन्धासिद्धिश्च स्यात् स्यादसंयोगः, ततः परिहारश्च युतसिद्धिदोषस्य स्यात् । एवं तावद् व्याख्यान्तरमप्ययुक्तम् । § 1475

इदानीं सूत्रकारमतं समर्थयतां वाक्य-भाष्य-टीकाकाराणां मतानि स-माहृत्य प्रधानानुगामित्वाच्छेषाणां सूत्रकारमतमेवेत्थं दूषयितुमाह--तत्त्वोप-निलयनात् सदाद्यभिधानार्थं कारणसमवेतस्य वस्तुन उत्तर * - /ms 517/mj

* * *

२७ माण्वोर्द्व ] प्रशस्तमतेरभिप्राय इति भावः ॥

३१ योऽभिहितः ] °द्व्यणुकादिदे ?र्व्यप° प्र° ॥

१ द्व ] °तः तास्यासं°nayacakra-ms-bhā । °तस्तास्यासं° nayacakra-ms-ya ॥

६ न ] न न परि°nayacakra-ms-bhā । सोऽपि न इत्येतावन्मात्रस्य मूलप्रतीकत्वे सोऽपि न, न परिहारः इति nayacakra-ms-bhā प्रतिपाठोऽपि सङ्गच्छेत ॥

७ इ ] दृश्यतां पृ° ५१४ पं° ३ ॥

८ व्या ] दृश्यतां पृ° ५१५ पं° ३ ॥

१३ धानानुगामित्वा ] nayacakra-ms-vi विना °त्वाद्येषाणां प्र° । °त्वाद्दोषाणां nayacakra-ms-vi ॥

१३ दू ] द्वष°nayacakra-ms-bhā । द्वेष° nayacakra-ms-ya ॥

१४ * ] अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगःवै° सू° ७ । २ । ११, अन्यतरकर्मजः संयोगः

भाष्यकारैः । सिद्धस्य वस्तुनः स्वकारणैः स्वसत्तया च सम्बन्ध इति प्राशस्तमतोऽभिप्रायः । तेषां त्रयाणामप्यसत्यता, परस्परविरुद्धार्थत्वात्, कुमारब्रह्मचारिपितृत्ववत् । इदमेव चोदाहरणमन्यत्र । एवं वक्तरि वा शास्त्रकारे सर्वेषामनुवर्तित्वात् स एवानाप्तोऽसत्यवादी वेत्येतदपि स्यात् । सदादिविकल्पानुपपत्तिश्च तदवस्थैव उक्तवत् ।

यत् पुनः द्रव्यादीनां स्वत एवाभिधानप्रत्ययविषयत्वं सत्त्वात् सत्तादिवत् । यथा सत्तादेः सदभिधानप्रत्ययौ स्वत एव, न सत्तायोगात्, एवं द्रव्यादीनामपि सदभिधानप्रत्ययौ स्वत एव, न सत्तायोगात् इत्युक्ते उच्यते--नैतत्, अतादात्म्यात् । द्रव्यादीनामसदात्मत्वात् सत्तानिमित्तं सदभिधानादि दण्डनिमित्तादण्डदण्डित्व-

* * *

कालं सत्तासम्बन्ध इति बहूनां मतम् । वस्तूत्पत्तिकाल एवेति तु वाक्यकाराभिप्रायोऽनुसृतो भाष्यकारैः । सिद्धस्य वस्तुनः स्वकारणैः स्वसत्तया च सम्बन्ध इति प्राशस्तमतोऽभिप्रायः । अस्मदभिप्रायः --**तेषां त्रयाणामप्यसत्यतेति** । कस्मात् ? **परस्परविरुद्धार्थत्वात्** । दर्शिता विरुद्धार्थता । किमिव ? **कुमारब्रह्मचारिपितृत्ववत्,** यदि पिता कथं कुमारब्रह्मचारी ? अथ कुमारब्रह्मचारी कथं पितेति ? **इदमेव चोदाहरणमन्यत्रेति**, स्वोक्तोपपत्त्यभ्युपगमविरुद्धार्थत्वादिष्वप्येतदेवोदाहरणं वाच्यमिति । **एवं वक्तरि वेत्यादि** । सर्वेषां वाक्य-भाष्य-टीकाकाराणां शास्त्रकारमतानुवर्तित्वात् स एवानाप्तोऽसत्यवादी वेत्येतदपि स्यादिति लोकानुवृत्त्या साशङ्कमिवोच्यते, मा भूत् तीर्थक-

---

श्येनस्योपसर्पणकर्मणा स्थाणुना । मल्लयोरुपसर्पणादुभयजः । संयोगजः कारणाकारणयोः संयोगात् कार्याकार्यगतः, यथा अङ्गुल्याकाशसंयोगाभ्यां द्व्यङ्गुलाकाशसंयोगः । **एतेन विभागो व्याख्यातः** वै॰ सू॰ ७ । २ । १२, अन्यतरकर्मजो विभागः श्येनस्यापसर्पणात् । उभयकर्मजो मेषयोरपसर्पणात् । विभागजस्तु अङ्गुल्योरन्योन्यविभागाद् विनष्टमात्रे द्व्यङ्गुलेऽङ्गुल्याकाशविभागः, कारणाकारणयोर्वा हस्ताकाशयोर्विभागाच्छरीराकाशविभागः । **संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः** वै॰ सू॰ ७ । २ । १३, युतसिद्ध्यभावान्न तौ स्त इत्यर्थः । **कर्मभिः कर्माणि गुणैर्गुणाः** वै॰ सू॰ ७ । २ । १४, युतसिद्ध्यभावान्न संयोगविभागवन्त इत्यर्थः । **युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते** वै॰ सू॰ ७ । २ । १५, कार्यकारणयोः परस्परेण संयोगविभागौ न विद्येते, यथा घटकपालयोः, युतसिद्ध्यभावात् । युतसिद्धिर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वम्, सा च नित्ययोः, युताश्रयसमवेतत्वं वाऽनित्ययोः त्वगिन्द्रियपार्थिवशरीरयोश्च । न च घटकपालयोः युताश्रयसमवायः, घटस्य तेष्वेव समवेतत्वात् । इति **चन्द्रानन्दविरचितायां** वैशेषिकसूत्रवृत्तौ P पृ॰ २७ B--२८ A ॥

१६ प्रा] **सत्ता सत्तासम्बन्धः** प्र॰ ॥
११ स] **सत्ता सत्तासम्बन्धः** प्र॰ ॥
१२ भिप्रायोऽनु] °नुसतोnayacakra-ms-bhā ॥
१३ प्रा] **प्रशस्त**°nayacakra-ms-ya ॥
१४ द] **दर्शित विरु**° प्र॰ ॥
१६ स्वो] दृश्यतां पृ॰ ५१४ पं॰ २ ॥
१९ वादी] **चे-त्ये**°nayacakra-ms-vinayacakra-ms-hī ॥

रगौरवाकृष्टमतिभिः अनाप्त एव इति निष्ठुरवचनकुपितैः सह तद्भक्तैः कलह इति । § 1476

किञ्चान्यत्, **सदादिविकल्पानुपपत्तिश्च तदवस्थैव उक्तवत्,** निष्ठासम्बन्धयोरेककालत्वात् इति ब्रुवतापि किं कार्यस्य सत्तया सम्बन्धः सतोऽसतः सदसतो वा ? इत्युपालम्भान्न मोचित एवात्मा । तद्यथा--कार्यस्य किं सत्तया सम्बन्धो निष्ठितस्यानिष्ठितस्य निष्ठितानिष्ठितस्य ? इति समानप्रचर्चत्वात्

- /ms न शब्दान्तरमात्रोच्चारणाद् दोषपरिहारः । § 1477

**यत् पुनर्द्रव्यादीनामित्यादि** । द्रव्यादीनां **स्वत एवाभिधानप्रत्ययविषयत्वं सत्त्वात्,** स्वतः सत्त्वात्, स्वभावसत्त्वादित्यर्थः । किमिव ? **सत्तादिवदित्यादि** सव्याख्यानमनिष्टापादनसाधनं **वैशेषिकं** प्रति गतार्थं यावद् **न सत्तायोगादित्युक्ते उच्यते** परिहारः किल **काणादैः --नैतत्, अतादात्म्यात्,** स आत्मा यस्य तत् तदात्म सत्तादि, तद्भावस्तादात्म्यम्, तद्वैधर्म्यादतादात्म्याद् द्रव्यादीनाम्, तद्व्याख्या याव**दभिधानादी**ति गतार्थम् । **दण्डनिमित्तादण्डदण्डित्वव**दिति दृष्टान्तः, यथा दण्डोऽस्यास्तीति दण्डी इति दण्डित्वमदण्डदण्डिनो दण्डनिमित्तमेवं **द्रव्यादेरसदात्मनः सत्तानिमित्तं सदभिधानादी**ति । § 1478

518/mj

वदिति । अत्र वयं सम्प्रधारयामः--कथमिदं तादात्म्यम् ? किं सतो भावात् उत सत्करत्वात् ? तद् यदि तावत् स्वतो भवनं ततः सर्वेणापि सता भूयते स्वत एवेत्युक्तम् । अथ सत्करत्वात्, तत् प्राक् प्रत्युक्तम् । यथा च सत्तायां स्वत एव सदभिधानप्रत्ययौ तदात्मत्वात् एवं द्रव्यादौ द्रव्यत्वादौ च तदात्मत्वं सदभिधानप्रत्ययकारणं सर्वत्र सति । § 1479

दण्डेऽपि च तादात्म्यादेव दण्डाभिधानप्रत्ययसिद्धौ स्वत एव दण्डिनि दण्ड्यभिधानप्रत्ययौ तादात्म्येन विना न भवतः । यथा च... ... ...। § 1480

अथोच्येत--दण्डोऽपि दण्डव्यतिरिक्ताद् दण्डत्वाद् दण्डाभिधानप्रत्ययभाक् । अनुदाहरणं तर्हि दण्डी, दण्डाद् दण्ड्यभावात् । दण्डत्वोपपादितदण्डाद् दण्डीति § 1481

---

२३ त्वा ] दृश्यतां पृ॰ ५०८ पं॰ ३ ॥
२४ स ] सत्ताया प्र॰ ॥
२५ प्र ] ॰प्रवर्च॰nayacakra-ms-ya । ॰प्रवर्त॰ nayacakra-ms-bhā ॥
२९ त्तादिव ] ॰वदि सव्याख्यान॰ प्र॰ ॥
४ ण्डित्व ] ॰त्वसंदंडादंडिनोnayacakra-ms-bhā । ॰त्वसदंडाद्दंडादंडिनो nayacakra-ms-ya ॥
१३ य ] यथा च स्वत एव भवति दण्डः तादात्म्यात् सत्तावत् एवं दण्ड्यपि इत्याशयः स्यात् । यथा च सत्ता स्वत एव भवति तादात्म्यात् एवं दण्डोऽपि इत्यपि वाशयः स्यात् ॥

**अत्र वयं सम्प्रधारयामस्त्वया** सह --**कथमिदं तादात्म्यम् ? किं सतो भावात्,** यत् सद् भवति तत् तस्य सतस्तादात्म्यमात्मलाभः स्वरूपानुभवनम् ? उत सत्करत्वम् ? इति । तद् यदि तावत् सतो भवनं ततः सर्वेणापि सता भूयते सत्तादिना द्रव्यादिना वा स्वत एवेत्युक्तम् । अथ सत्करत्वात् तादात्म्यात् सद् भवतीति, तत् प्राक् प्रत्युक्तम् । स्वतः सिद्धस्य द्रव्यादेः सत्ता सत्करी न भवति वैयर्थ्यात्, असतोऽसत्त्वात् खपुष्पवत्, सदसतः सम्भवाभावादित्युक्तम् । § 1482

**यथा च सत्तायामित्यादि** भावनार्थम् । द्रव्यादेर्द्रव्यत्वादेश्च स्वत एव सदभिधानप्रत्ययौ तदात्मत्वात् सत्तावदिति । सतश्च द्रव्यादेस्तदात्मत्वं सदात्मत्वं द्रव्यादेः, एवं द्रव्यत्वगुणत्वसत्तादिनित्यैकसर्वत्रगेषु सामान्य-सामान्यविशेष- - /ms शून्येष्वपि सदभिधानप्रत्ययौ । **सर्वत्र सतीति** सर्वव्यापितां न्यायस्यास्य दर्शयति । § 1483

किञ्चान्यत्, **दण्डेऽपि चेत्यादि** । योऽपि दण्डित्ववदिति दृष्टान्तः सोऽपि तादात्म्यादेव दण्डस्य भवनात्मत्वादेव दण्डाभिधानप्रत्ययसिद्धौ सत्यां स्वत एव दण्डिनि देवदत्ते दण्डी इत्यभिधानं प्रत्ययं च कुर्वंति तावभिधानप्रत्ययौ तादात्म्यात् इत्यनेनार्थेन विना न भवतः, अतोऽस्मदिष्टमर्थं साधयति, इतरथा दण्डिकुण्डल्यविशेषः स्यात् । साधनं चात्र--दण्डोऽपि स्वरूपाभिधानप्रत्ययकारी स्वत एव, तादात्म्यात्, सत्तावत्, तथा दण्ड्यपि तत एव तद्वत् । **यथा चेत्यादि,** एवं च सति दण्डत्वसामान्यविशेषनिरपेक्षः स्वत एव भवति दण्डः, तादात्म्यात्, सत्तावदिति सिद्धम् । § 1484

**अथोच्येतेत्यादि** । **वैशेषिको** दण्डमपि दण्डत्वाद् दण्डव्यतिरिक्ताद् मन्यते दण्डाभिधानप्रत्ययभाजम् । आचार्यो ब्रवीति --**अनुदाहरणं तर्हि दण्डी, दण्डाद् दण्ड्यभावात्** । दण्डस्य स्वतोऽसिद्धत्वाद् दण्डी न सिध्यति, परतः
519/mj सत्त्वसिद्ध्यर्थं चोदाह्रियते दण्डी, दण्डासिद्धेः कुतस्तत्सिद्धिः ? इति ।

* * *

चेत्, इतरेतराश्रयमिदम्, दण्डत्वतत्त्वाद् दण्डसिद्धिः, दण्डविशेषणसाधितदण्डिसिद्धेः पुनर्दण्डत्वतत्त्वसिद्धिः ।

दण्डीति च कथमिति निर्धार्यम् । यदि दण्डादेव, स्वतः सिद्धात् सिद्ध इत्युक्तम् । अथ दण्डत्वात्, दण्डत्वी भवतु, मा भूद्दण्डी, आत्मान्तरसङ्क्रान्तिश्चैवम् । वयं तु ब्रूमः--स्वत एव भवति, तदभावेऽसामान्यात्मकत्वमेव सर्वस्य स्यात् । यथा दण्डे एवं सत्यपि... ... ...।

यदप्युक्तम् (?')अतदात्मत्वाद् द्रव्यादीनां सदभिधानप्रत्ययौ सत्तायोगात्,

---

२७ स] °सत्तादिन्नित्यैकnayacakra-ms-bhā ॥
३ दृष्टान्तः] सोऽपि...अस्मदिष्टमर्थं साधयति इत्यन्वयः ॥
५ कु] **कुर्वंति** प्र° । कुर्वति इति सप्तम्यन्तं पदम् ॥
९ य] **तथाचेत्यादि** ? ? ? ॥
१४ द] **दण्डासिद्धे** प्र° ॥
२० य] **विशेष्टसिद्धे**nayacakra-ms-bhā ॥

न

* * *

**दण्डत्वोपपादितदण्डाद् दण्डीति चेत्,** दण्डत्वसामान्यविशेषाद् दण्डः सिध्यति, दण्डाद् दण्डीति, तत उदाहरणसिद्धिर्विशेषणादेव विशेष्यसिद्धेः, एवं चेन्मन्यसे, इदमापतितम्--दण्डत्वतत्त्वाद् दण्डः सिध्यति, दण्डत्वतत्त्वं पुनर्दण्डविशेषणसाधितदण्डित्वसिद्धेः सिध्यति, तदिदमितरेतराश्रयं जायते, इतरेतराश्रयाणि च न प्रकल्पन्ते, तद्यथा नौर्नावि बद्धा नेतरत्राणायेति तत्प्रतिपादनार्थो ग्रन्थः **--इतरेतरेत्यादिर्गतार्थो** यावत् **तत्त्वसिद्धिरिति** । § 1485

दण्डी इति च देवदत्तः स दण्डत्वाद् दण्डाद् वा कथम् ? इति निर्धार्यम् । दण्डोऽस्यास्तीति दण्डी देवदत्तः । स यदि दण्डादेव, स्वतः सिद्धात् सिद्ध इत्युक्तम् । **अथ दण्डत्वात्** दण्डत्वमस्यास्ति इति **दण्डत्वी भवतु, मा भूद् दण्डी,** युक्तं तावद् दण्डाद् दण्डी, न तु दण्डत्वात्, स्वत एव च भवेद्दण्डी । किञ्चान्यत्, **आत्मान्तरसङ्क्रान्तिश्चैवम्,** दण्डत्वादात्मान्तरं दण्डो दण्डी च, दण्डाद् दण्डत्वदण्डिनौ, दण्डिनो दण्डदण्डत्वे, दण्डः स्वत - /ms
एवाभवन् दण्डत्वाद् भवंस्तदात्मा भवति, एवं दण्ड्यपीति । वयं तु ब्रूमः--यत् तद् दण्डेन भूयते तस्यैव दण्डत्वात् यद्दण्डो दण्डो भवति तदेव दण्डो भवति आत्मानं लभते भावान्तरविविक्तं यत् तेन भूयते तदेव भवनं दण्डत्वं न तद्व्यतिरिक्ताद्, न दण्डत्वतत्त्वात् । एवं देवदत्तस्य दण्डिनोऽप्यात्मानुभवनं तत्त्वम् । **तदभावे[ऽ]सामान्यात्मकत्वमेव सर्वस्य स्यात्,** यदि सा दण्डदण्ड्यादिव्यक्तिः स्वत एव न भवति सत्ता-द्रव्यत्व-दण्डत्व-दण्डित्वादितत्त्वाद् भवति स्वत एव अभवन्ती नास्त्येव सा खपुष्पवत् । ततश्चासामान्यमेव सत्तादि स्यात्, तच्चानिष्टम्, स्वत एव भवतः समानस्याभावात् सामान्यमेव सामान्यं न स्यात् । तस्मात् स्वत एव दण्डो भवति स्वत एव च सदभिधानप्रत्ययौ, न सत्तायोगात् । **यथा दण्डे एवं सत्यपीत्यादि** गतार्थं साधनम् । एवं तावत् तादात्म्यात् सत्तादिषु सदभिधानादीत्ययुक्तम् । § 1486

**यदप्युक्तम्--अतदात्मत्वा**दित्यादि असत्तात्मकत्वाद् द्रव्यगुणकर्मणां सदभिधानप्रत्ययौ सत्तायोगात्, न स्वत इति । **तदपि न, अतदात्मकत्वा**दित्यादिरनैकान्तिकत्वात् अनैकान्तिकत्वप्रतिपादनार्थो ग्रन्थो यावद् **द्रव्यत्वादिवदिति** । तस्य भावना **--द्रव्यत्वादीनामतादात्म्ये** द्रव्यत्वगुणत्वकर्मत्वघटत्व 520/mj

---

२५ णादेव ] विशेष्टसिद्धेःnayacakra-ms-bhā ॥ २९ त्या ] °त्यादिग°nayacakra-ms-bhā ॥ १ त्वा ] °त्वाद्दण्डत्वा कथम्nayacakra-ms-bhā । °त्वाद्दण्डत्वात्कथम् nayacakra-ms-ya ॥ ५ भ ] भवद्दण्डी प्र° । भवन् दण्डी ? ॥ ७ व ] °वदण्डत्वाद्nayacakra-ms-bhā । °वद्दण्डत्वाद् nayacakra-ms-ya ॥ ८ त ] तदेवदत्तो भवति प्र° । अत्र न देवदत्तो भवति इत्यपि पाठो भावान्तरवैविक्त्यसूचनार्थं स्यात् । तथाच यद्दण्डो दण्डो भवति न देवदत्तो भवति इत्यपि विवक्षितं स्यात् ॥ १८ प्युक्त ] दृश्यतां पृ° ५१७ पं° ७ ॥ २० त्वा ] °त्वादिरनै°nayacakra-ms-bhā । °त्वादेरनै° ? ॥

* * *

स्वतः(?') इति, तदपि न, अतदात्मकत्वात्...द्रव्यत्वादिवत् । द्रव्यत्वादीनामतादात्म्ये स्वतः सदभिधानप्रत्ययौ, एकैकत्वात्, आत्मवत्, द्रव्यत्वादिषु स्वतो भवन्त्याः सत्तायाः सदभिधानं दृष्टमेवं द्रव्यादीनामपि स्वत एव ।

सत्तासम्बन्धाभावेऽपि असङ्ख्ययोरपि गुणत्वकर्मत्वयोरेकाभिधानप्रत्ययवत् सदभिधानप्रत्ययौ द्रव्यत्वादिष्वौपचारिकौ स्यातामिति चेत्, द्रव्यादिष्वप्यौपचारिकौ स्यातां तुल्यत्वात् ।

मनुष्यसिंहत्वादिवत् तथा अञ्जसा अनुपपत्तेर्नेति चेत्, ततस्ते स्वपक्षे एव दोषविधानम् । यदि तु... ... ...। एतत् पुनः स एव प्रष्टव्यः ।

यत् पुनरिदमुच्यते--सत्तायां सिद्ध इति चेत्,...आत्मानमात्मना न युक्तम-

* * *

रूपत्वोत्क्षेपणत्वादीनां सामान्यविशेषाणामसत्तात्मकत्वे **स्वतः सदभिधानप्रत्ययौ,** न सत्तातः । कस्मात् ? **एकैकत्वात्** । एकमेव द्रव्यत्वं सर्वद्रव्येषु, - /ms द्रव्यत्वान्तरानिष्टेः तत्र सत्तायोगो नेष्यते, अनुप्रवृत्त्यभावात् । तथापि च सत् इत्यभिधीयते प्रतीयते च, एवं गुणत्वादीन्यपि । तस्मादेकैकत्वात् स्वतः सत्त्वमा**त्मवत्** सत्तावदित्यर्थः, स च दृष्टान्तः स्वतो द्रव्यत्वादिभवने । तस्य वर्णना --**द्रव्यत्वादिषु** भिन्नेषु **स्वतो भवन्त्याः सत्तायाः** एकस्याः **सदभिधानं दृष्टमेवं द्रव्यादीनामपि स्वत** एवेति साधनेनोपपादितोऽर्थः । § 1487

आह --**सत्तासम्बन्धे**त्यादि । गुणत्वमेकं कर्मत्वमेकम् इत्येकाभिधानप्रत्ययौ असङ्ख्ययोरपि गुणत्वकर्मत्वयोरौपचारिकौ दृष्टौ तथा सदभिधानप्रत्ययौ द्रव्यत्वादिष्वौपचारिकौ स्यातामिति को दोषः ? अत्रोच्यते --**द्रव्यादिष्वपी**त्यादि तुल्यत्वापादनमौपचारिकत्वेन गतार्थम् । § 1488

आह --**मनुष्यसिंहत्वादिवत् तथाञ्जसाऽनुपपत्तेर्नेति चेत्,** यथा शौर्यक्रौर्यादिधर्माः सिंहे मुख्याः सिद्धाः सन्तो मनुष्ये शक्या उपचरितुं नासिद्धास्तथा द्रव्यादिषूपचरितौ स्यातां यद्यन्यत्राञ्जसा सिद्धौ सदभिधानप्रत्ययौ, न तु तौ क्वचित् सिद्धौ, भाक्तव्यवहारश्च आञ्जसादृते नास्ति, तस्माद् द्रव्यादिष्वेव मुख्याविति एवं चेन्मन्यसे **ततस्ते स्वपक्ष एव दोषविधानम्** । तद् भावयति --**यदि त्वि**त्यादि, सत्तादिष्वप्याञ्जसयोरसिद्धत्वादिति भावार्थः । **एतत् पुनः स एव प्रष्टव्य** इति, स्वभावसत्तापेक्षौ सदभिधानप्रत्ययाविच्छतां

---

२२ अ] अतदात्मकत्वात् इत्यनैकान्तिकः अतदात्मकत्वेऽपि स्वतः सदभिधानप्रत्ययदर्शनात् द्रव्यत्वादिवत् इत्याशयो भाति ॥
१० स्व] यथा दण्डे एवं सत्यपि स्वत एव सदभिधानप्रत्ययौ तादात्म्यात्, न सत्तायोगात् इत्याशयो भाति ॥
१९ न्य] अतदात्मकत्वात् इत्यनैकान्तिकः अतदात्मकत्वेऽपि स्वतः सदभिधानप्रत्ययदर्शनात् द्रव्यत्वादिवत् इत्याशयो भाति ॥

किं नः सत्तासम्बन्धकल्पनया ? तव पुनः सत्तासम्बन्धादिच्छतो दुष्प्रतिपादं भावसत्ताव्यतिरिक्ततादात्म्यवादिनः, तस्मात् त्वमेवासि प्रष्टव्य इति । § 1489

- /ms **यत् पुनरिदमुच्यते--सत्तायां सिद्ध इति चेदिति** सभाष्यं गतार्थम् । इयं पुनराशङ्का कं प्रति युक्ता ? द्रव्यादिव्यतिरिक्तां सत्तां स्वत एव सिद्धां
521/mj तदात्मिकामिच्छन्तम्, स पुनर्नान्यो **वैशेषिकात्**, तस्मा

* * *

भियोक्तुम्... ... ...तद्योगनिमित्तम्, यदा वा... ...तद्योगनिमित्तं ननूत्तरमप्येतदयुक्तम् । असत्तात्मनां द्रव्यादीनां मुख्यौ सदभिधानप्रत्ययौ कथं युक्तौ मनोरथवत् ?... ... ...।

नैव तु... ... ...दण्डित्वदण्डत्ववत् स्वत एव सतोः तत्सम्बद्धत्वात् सत्वतः सत्त्वात् सत्त्ववत् सदेव स्वम् । तस्मात् सर्वस्य सतोऽतादात्म्याभावात् सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्याद्यभावः सत्तादिवच्च स्वतः सत्त्वम् ।

यतश्चैवं तस्मात् सतो भावः सत्तेति व्युत्पत्तिर्द्रव्याद्यव्यतिरिक्तसत्तार्थैव

* * *

**दात्मानमात्मना न युक्तमभियोक्तुमित्युद्धट्टनाग्रन्थो** गतार्थो यावत् **तद्योगनिमित्तमिति । यदा वे**त्यादेरारभ्य यावत् **तद्योगनिमित्त**मित्येवंप्रकार उद्धट्टनाग्रन्थः पूर्वमास्ते । **ननूत्तरमप्येतदयुक्तं न, द्रव्यादिष्वञ्जसा सिद्धिः** इत्यादि वक्ष्यमाणमसम्बद्धम्, अतदात्मनिमित्तस्य सत्प्रत्ययस्यानुपपत्तेः **असत्तात्मनां द्रव्यादीनां मुख्यौ सदभिधानप्रत्ययौ कथं युक्तौ ?** इति एतदाचार्यवचनमन्तरे पतितं परस्याकौशलख्यापनार्थम् । **मनोरथवदि**ति **वैशेषिक**स्य मनोरथ एव द्रव्यादिव्यतिरिक्ता सत्तेति यदि भवेत्, स्यात् । तन्मतौ तु पूर्वोत्तरपक्षौ व्याख्यातावेव । द्रव्यादिभाक्तत्वनिवृत्तिः, स्वतः सत्त्वं सत्तादिवच्च इ[त्ये]तस्य वचनस्य व्याघातः इत्येतद्दोषद्वयदर्शनादिति **वैशेषिके**णोक्ते आचार्य आह --**नैव त्वि**त्यादि, दण्डित्वं दण्डत्वं च यथा **स्वत एव सतोः तत्सम्बद्धत्वात्**

२४ दु] **सतो** प्र° ॥
२५ भा] °न्यवांजसाnayacakra-ms-bhā । °न्यवाजसा nayacakra-ms-ya ॥
२९ य] यदा च ? ॥
२ नैव] नैव तु द्रव्यादिभाक्तत्वनिवृत्तिः, स्वतः सत्त्वं सत्त्वादिवच्चेत्येतस्य वचनस्य व्याघातः इत्येतद्दोषद्वयम् इत्याशयो भाति ॥
३ स] सदेव सर्वम् ? ॥
७ मित्युद्ध] **°द्यहदानाग्रन्थो** प्र° । °द्युद्धट्टदानग्रन्थो ? ॥
८ य] **यदा वेत्यादि यदा वेत्यादिरारभ्य** प्र° । **यदा चेत्यादेरारभ्य** ? ॥
८ उ] **उद्धहना°**nayacakra-ms-ya । **उद्धहदाना°** nayacakra-ms-bhā ॥
९ न] **न, द्रव्यादिष्वञ्जसा सिद्धेः** ? ॥
१२ ल] °लस्याख्याप°nayacakra-ms-ya ॥
१४ इ] **इतस्य** प्र° । इत्यस्य वचनस्य इत्यपि पाठोऽत्र स्यात् ॥
१६ य] **यथा यथा** प्र° । यथा तथा ? ॥
१६ स्व] यथा दण्डसम्बन्धात् प्राग् दण्डी जात्यादिभिर्लक्षणैः स्वतः सिद्धत्वात् सन्, दण्डोऽपि प्राग् दण्डिसम्बन्धाद् वृत्तद्राघिमादिना लक्षणेन स्वतः सिद्धत्वात् सन्, अतो दण्डयोगाद् दण्डीत्येतन्न्याय्यम्, तथा नीलद्रव्ययोगाच्छाठ्यादि नीलमित्येतन्न्याय्यम्, तथोष्णगुणयोगान्न प्रागग्नेरन्यद् विशेषलक्षणं सद्भावस्य प्रख्यापकमस्तीति असन्नग्निः, उष्णस्यापि प्रागग्नियोगादसत्त्वं निराश्रयगुणाभावात् । न चासतोः सम्बन्धो दृष्ट इष्टो वा । इति अकलङ्कविरचिते तत्त्वार्थराजवार्तिके १ । १ ॥

सत्तासम्बद्धत्वादित्यर्थः **सत्त्वतः सत्त्वात् सत्त्ववत् सदेव स्वम्, सत्त्वतः** सतः **सत्त्वात्** आत्मत्वात् स्वतः सत्त्वादित्यर्थः । एवं तावद् न्यायो यदुत सदेव सत्, सत्त्वमेव सत्, न सद्व्यतिरिक्ता सत्ता, न सत्तातोऽन्यत् सत् । तस्मात् सर्वस्य सतो नास्त्यतादात्म्यमसदात्मत्वम्, तदभावात् सदात्मैव सर्वमिति **भाक्तत्वनिवृत्त्याद्यभावः, नायं दोष** इत्यर्थः, **सत्तादिवच्च स्वतः सत्त्वमिति,** **आदिग्रहणाद् द्रव्यत्व-गुणत्व-कर्मत्ववत्** । § 1490

**यतश्चैवमि**त्यादि, यस्मात् स्वत एव सत्ता द्रव्यादीनां युक्ता तस्मात् सतो भावः सत्तेति या शब्दव्युत्पत्तिर्भेदषष्ठ्यापादनार्था सा द्रव्याद्यव्यतिरिक्त-
- /ms, 522/mj सत्तार्थैव ज्ञायते सतां भावः सत्तेति । किं कार-

* * *

कर्तरि षष्ठीवृत्तेः । यत् तत् सद्भिर्भूयते... ... ...सदित्यभिधानप्रत्ययकारणं सर्वत्र ।

अत इदमपि अप्रत्ययोद्ग्राहम्--... ... ...स्वतः सत्त्वमित्येतदयुक्तम् । अत्र हि सत्तादिवत् इति त्वदनुवृत्त्योच्यते । न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति । ततो द्रव्यादीनामकारणत्वादिदोषप्रसङ्गात् कुतोऽनुपपन्नता ममात्र निपतिता ? मम तु द्रव्यादीनामेकत्वान्नानुपपन्नम् ।

कर्तृणाऽकर्तृणा वा कारकेण यो भवति स एव भावः सामान्यम्, स एव विशेषोऽन्यभवननिरपेक्षः कर्ता भवद्भवनात्, तदेव द्रव्यं गुणः, स एव क्रिया, स एव विशेषो भावान्तराद् विशिष्यमाणत्वात्, वक्ष्यमाणवच्च स एव समवायः । एवमेव सम्बन्धाभावः प्रत्याख्यातः सहासत्त्वेन । नासंयोगः, नासमवायः । ताभ्यां

* * *

णम् ? **कर्तरि षष्ठीवृत्तेः** । तद्व्याख्यानम् --**यत् तत् सद्भिरि**त्यादि गतार्थं यावत् **सदित्यभिधानप्रत्ययकारणं सर्वत्रे**ति । § 1491

**अत इदमपी**त्यादि पूर्वोत्तरपक्षौ सव्याख्यानौ गतार्थौ **वैशेषिकस्यैव** यावदुपनयः, तत्र यदुक्तं **स्वतः सत्त्वम् इति एतदयुक्त**मिति, आचार्यो यथैतद-

---

१७ स] **सदेव सर्वम्** ? ॥
१८ स] **स्वत्वादि॰** प्र॰ ॥
१८ ए] एवnayacakra-ms-bhā । एष ? ॥
२ ष] **॰षष्ठ्यपादानार्था**nayacakra-ms-ya । **॰षष्ठ्यपवादानार्था** nayacakra-ms-bhā । ॰षष्ठ्युपादानार्था ? ॥
४ य] यत् तत् सद्भिर्भूयते यद् भवन्ति सन्तः सा सत्ता सदित्यभिधानप्रत्ययकारणं सर्वत्र इत्याशयो भाति ॥

६ स्व] द्रव्यादीनां स्वतः सत्त्वं सत्तादिवत् न तु सत्तायोगादिति चेत्, न, सत्तादिवत् स्वतः सत्त्वे द्रव्यादीनामकारणनित्यासम्बन्धाजातिमत्त्वप्रसङ्गात् । तस्माद्द्रव्यादीनां स्वतः सत्त्वमित्येतदयुक्तम् । इत्याशयो भाति ॥
१० स] न द्रव्यादन्ये गुणकर्मसामान्यविशेषसमवायाः सन्ति, द्रव्यस्यैवोभयपरिणामकारणापेक्षस्य गुणः कर्म सामान्यं विशेषः समवाय इत्येवमादिपर्यायान्तरेण परिणामः । इति तत्त्वार्थराजवार्तिके १ । १ ॥

प्रत्ययोद्ग्राहं भवति तथाह **--अत्र हि सत्तादिव**दित्यादि । सर्वमिदं त्वदनुवृत्त्या त्वां प्रतिपादयितुमुच्यते, न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति कर्तरि षष्ठी इत्युक्तत्वात् । द्रव्यादीनामकारणत्वादिदोषाः प्रसक्ताः, ततोऽनुपपन्नम् इत्येषा तत्प्रसङ्गात् **कुतोऽनुपपन्नता ममात्र निपतिता** अभ्यागता, त्वन्मतेन तु सत्तामभ्युपगम्य मया सत्तादिवद् द्रव्यादीनामनिष्टापादने कृते ? मम तु द्रव्यगुणकर्मणां सामान्यविशेषसमवायानां चैक[त्वा]न्नानुपपन्नमिति । § 1492

तद् व्याचष्टे **--कर्तृणा[ऽ]कर्तृणा वे**त्यादि । भवतीति भावः इति कर्तरि, भवनं भावः इति भावे, इत्यादिकारकविवक्षायां यो भवति **स एव भावः सामान्यम्,** देशकालादिभेदेऽपि भवनतुल्यत्वात् । **स एव विशेषोऽन्यभवन-निरपेक्षः कर्ता,** उक्तवत् कर्तरि षष्ठी इति भवतो भवनाद् भवदेव भवति, **तदेव द्रव्यं** भव्यं भवद्द्रवनादेव, कलनं गुणनं **गुणः** युगपदयुगपत्पर्यायत्वेन भवनात्, **स एव** भावः **क्रिया** भवनं भाव इति, **स एव विशेषो भावान्तराद् विशिष्यमाणत्वात्** अन्यनिरपेक्षत्वात् सदसदात्मकत्वात् सत्त्वेनासत्त्वेन च त-स्यैव विशिष्यमाणत्वात्, **वक्ष्यमाणवच्चे**ति कारणाकारणाद्यैक्यमनन्तरं वक्ष्यते, **स एव समवायः** । **एवमेवे**ति भवतः कर्तृत्वेन तस्यैव कारणत्वम्, त-देकीभावगत्या कार्यत्वापत्तेः प्रतिपादितेन विधिना **सम्बन्धाभावः प्रत्याख्यातः** समवायव्याख्यानात्, **सहासत्त्वेने**ति अनेनैवासत्त्व - /ms 523/mj

* * *

च सम्बन्धवत्त्वाद् नित्यत्वासत्त्वे न स्तः । अजातिमन्ति त्विति प्रतिपाद्यत एव ।

अथवा अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि, स्वतः सत्त्वात्, सामान्यादिवत् । कारणादि च सामान्यादि, स्वतः सत्त्वात्, द्रव्यादिवत् । तदात्मत्वात् स्वतः सत् सत्तादिवत् । उभयं द्रव्यादि सामान्यादि च वस्तुत्वात् ।

यदपि च चोदितं यद्येकः समवायो द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्म-त्वादिविशेषणैः सह

* * *

मपि प्रत्याख्यातम्, सदसदात्मकत्वात् । कर्तृत्वात् संयुक्तमेव कार्येणेति **नासंयोगः,** कार्यकारणप्रतिपादनात् **नासमवायोऽस्ति, ताभ्यां चेति** संयोग-

---

२० अ] ऽत्रnayacakra-ms-pānayacakra-ms-ramnayacakra-ms-vi । त्र nayacakra-ms-bhā nayacakra-ms-ḍe ॥
२३ त] द्रव्यादीनामकारणत्वादिदोषप्रसङ्गादित्यर्थः ॥
२५ वायानां] **चैकन्नानुप॰** प्र॰ । चैक्यान्नानुप॰ ? चैक्यं नानुप॰ ? ॥
४ भ] **भावनाद्** प्र॰ ॥
५ भ] भवद्भवनात्, तदेव कलनं ? ॥
५ गुण] नंnayacakra-ms-bhānayacakra-ms-raṃ प्रतिषु नास्ति ॥
१८ य] दृश्यतां पृ॰ ५२४ टि॰ ३ पं॰ १८ ॥
२२ ना] सम्बन्ध्यनित्यत्वेऽपि न संयोगवदनित्यत्वम्, भाववदकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव

समवायाभ्यां सम्बन्धवत्त्वाद् नित्यत्वासत्त्वे न स्तः । अजातिमन्ति त्विति प्रतिपाद्यत एव, द्रव्यव्यतिरिक्तायाः प्रतिषिषित्सितत्वात् । एवं तावत् कारणादित्वं द्रव्यादेः । § 1493

**अथवेत्यादि** । अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि **स्वतः** सत्त्वादुक्तात् सामान्यादिवत् । **कारणादि चेति**, कारणानित्यसम्बन्धजातिमत्त्वानि सामान्यविशेषसमवायानाम्, **स्वतः सत्त्वात् द्रव्यादिवत्** स्वसत्सत्त्वादित्यर्थः । **तदात्मत्वात्**, यद् यदात्म तत् **स्वतः सत् सत्तादिव**दित्युक्तम् । **उभयमिति** कारणाकारणनित्यानित्यसम्बन्धासम्बन्धजातिमदजातिमत्त्वानि द्रव्यादीनां सामान्यादीनां च सर्वस्य वस्तुत्वाद् द्व्यात्मकत्वं भवत्येवेतरेतररूपैकभवनाविशेषात् । § 1494

**यदपि चेत्यादि** । निष्ठायाः सम्बन्धस्य च सत्तयैककालत्वप्रतिपादनार्थं
524/mj समवायस्यैकत्वादेकः

* * *

सम्बन्धैकत्वात् पदार्थसङ्करप्रसङ्गः इति, स तदवस्थ एव, बहूनां सम्बन्धिनामेकसम्बन्धभावात्, वागादिगवाद्यभिधानवत् व्यवस्थानाभावात् सर्वस्य

---

इत्युक्तं तथा समवायोऽपीति । न ह्यस्य किञ्चित् कारणं प्रमाणत उपलभ्यत इति । कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तते ? न संयोगः सम्भवति, तस्य गुणत्वेन द्रव्याश्रितत्वात् । नापि समवायः, तस्यैकत्वात् । न चान्या वृत्तिरस्तीति । न, तादात्म्यात् । यथा द्रव्यगुणकर्मणां सदात्मकस्य भावस्य नान्यः सत्तायोगोऽस्ति एवमविभागिनो वृत्त्यात्मकस्य समवायिनो नान्या वृत्तिरस्ति । तस्मात् स्वात्मवृत्तिः । इति **प्रशस्तपादभाष्ये** समवायनिरूपणे संयोगसमवायाभ्यामसम्बन्धवतो नित्यस्य सत्तारहितस्य च भावस्य उदाहरणत्वेनोल्लेखः । अत्र भावः सत्ता इत्यर्थः । अस्य **प्रशस्तपादभाष्यस्य न्यायकन्दली** व्याख्या--किं पुनरयमनित्य आहोस्विन्नित्य इति संशये सत्याह--सम्बन्ध्यनित्यत्वेऽपीति । यथा सम्बन्धिनोरनित्यत्वे संयोगस्यानित्यत्वं न तथा समवायिनोरनित्यत्वे समवायस्यानित्यत्वं भाववदकारणत्वादिति । एतद् विवृणोति--यथेत्यादिना । युक्तो हि सम्बन्धिविनाशे संयोगस्य विनाशः, तदुत्पादे सम्बन्धिनोः समवायिकारणत्वात् । समवायस्य तु सम्बन्धिनौ न कारणम्, सम्बन्धिमात्रत्वात् । यथा च तौ न कारणं तथोपपादितम् । तस्मादेतस्य सम्बन्धिविनाशेऽप्यविनाशः, सत्तावदाश्रयान्तरेऽपि प्रत्यभिज्ञायमानत्वात् । किमसम्बद्ध एव समवायः सम्बन्धिनौ सम्बन्धयति सम्बद्धो वा ? न तावदसम्बद्धस्य सम्बन्धकत्वं युक्तम्, अतिप्रसङ्गात् । सम्बन्धश्चास्य न संयोगरूपः सम्भवति, तस्य द्रव्याश्रितत्वात् । नापि समवायः, एकत्वात् । न च संयोगसमवायाभ्यां वृत्त्यन्तरमस्ति । तत् कथमस्य वृत्तिरित्याह--कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तत इति । वृत्त्यभावान्न वर्तत इत्यभिप्रायः परस्य । समाधत्ते--नेति । वृत्त्यभावान्न वर्तते इत्येतद् न, तादात्म्याद् वृत्त्यात्मकत्वात् स्वत एवायं वृत्तिरिति । कृतको हि संयोगः, तस्य वृत्त्यात्मकस्यापि वृत्त्यन्तरमस्ति, कारणसमवायस्य कार्यलक्षणत्वात् । समवायस्य वृत्त्यन्तरं नास्ति, तस्मादस्य स्वात्मना स्वरूपेणैव वृत्तिर्न वृत्त्यन्तरेणेत्यर्थः । इति **न्यायकन्दल्याम्** ॥

१ स ] **संबंधवत्वाद्**nayacakra-ms-bhā । **संबंधत्वाद्** nayacakra-ms-ya ॥

२ द्र ] द्रव्यादिव्यतिरिक्ताया जातेरिति भावः ॥

३ द्र ] **द्रव्यत्वादेः**nayacakra-ms-ya ॥

६ जातिम ] **°मत्वादि सामान्य°**nayacakra-ms-bhā ॥

६ स ] **स्वत्वाद्रव्या°** प्र° ॥

१४ वा ] गौरुदके दृशि स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ इति अनेकार्थसङ्ग्रहे हेमचन्द्राचार्यविरचिते, श्लो° ६ ॥

सर्वा- १५

* * *

१६ इ] दृश्यतां पृ० ७०९ पं० ७ ॥

१६ स] सत्तानिराकरणप्रस्तावेऽपि प्रसङ्गागतः समवाय आचार्यश्रीमल्लवादिना इतः परं महता प्रचर्चेन निराकृतः । पूर्वपक्षिरूपेण प्रशस्तमतिमुद्दिश्य चायं विवादो ग्रन्थकृता विहित इति पूर्वापरसन्दर्भपर्यालोचनया प्रतिभाति । प्रशस्तमतेर्नामग्रहणपूर्वकमेतादृशः समवायसम्बन्धी पूर्वपक्षः तत्त्वसङ्ग्रहपञ्जिकायामपि समवायपरीक्षावसरे उद्धृतः कमलशीलेन । एतावांस्तु विशेषः --तत्त्वसङ्ग्रहपञ्जिकायां प्रशस्तमतेर्नामग्राहमुद्धृतः समवायसम्बन्धी ग्रन्थः प्रशस्तपादभाष्ये समवायनिरूपणे सम्पूर्णतया उपलभ्यते, एतच्च निम्नलिखितप्रशस्तपादभाष्यतत्त्वसङ्ग्रहपञ्जिकापाठावलोकनेन व्यक्तीभविष्यत्यत्रैव टिप्पणे । तत्त्वसङ्ग्रहे वैशेषिकाभिमतषड्पदार्थपरीक्षायां बहुत्रोद्धृतः पूर्वपक्षः प्रशस्तपादभाष्ये दृश्यत इत्यपि ध्येयम् । नयचक्रे तु समवायपरीक्षायामुद्धृतस्य पूर्वपक्षस्य कश्चिदंशः प्रशस्तपादभाष्ये उपलभ्यते, कश्चित्तु नोपलभ्यते । अत एवं सम्भाव्यते --वैशेषिकसूत्रोपरि प्रशस्तमतिविरचितायाः [सम्प्रति लुप्तप्रायायाः] टीकाया एव मल्लवादिना उद्धृतः स्यात् पूर्वपक्षः, तत्त्वसङ्ग्रहे तु प्रशस्तपादभाष्यादिति । विशेषजिज्ञासुभिर्द्रष्टव्यं पृ० ५१२ टि० ७ । न च संयोगवन्नानात्वम्, भाववल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च । तस्माद् भाववत् सर्वत्रैकः समवाय इति । यद्येकः समवायो द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात् पदार्थसङ्करप्रसङ्ग इति, न, आधाराधेयनियमात् । यद्यप्येकः समवायः सर्वत्र स्वतन्त्रस्तथाप्याधाराधेयनियमोऽस्ति । कथम् ? द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वमिति । एवमादि कस्मात् ? अन्वयव्यतिरेकदर्शनात् । इह इति समवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते । यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयिभावनियमः तथा द्रव्यत्वादीनामपि समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयनियमः इति । इति प्रशस्तपादभाष्ये समवायनिरूपणे । अस्य श्रीधरभट्टकृता न्यायकन्दली व्याख्या--किमयमेक आहोस्विदनेकः ? इत्यत्राह--न च संयोगवन्नानात्वमिति । यथा संयोगो नाना नैवं समवायः । कुतः ? इत्यत्राह--भाववल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च । यथा सत् सत् इति ज्ञानस्य लक्षणस्य सर्वत्राविशेषादवैलक्षण्याद् विशेषे भेदे लक्षणस्य प्रमाणस्याभावाच्च सर्वत्रैको भावस्तद्वत् इह इति प्रत्ययस्य लक्षणस्य सर्वत्रावैलक्षण्याद् भेदे प्रमाणाभावाच्च सर्वत्रैकः समवायः । उपसंहरति--तस्मादिति । चोदयति--यद्येकः समवाय इति । समवायस्यैकत्वे य एव द्रव्यत्वस्य पृथिव्यादिषु योगः स एव गुणत्वस्य गुणेषु कर्मत्वस्य च कर्मसु । तत्र यथा द्रव्यत्वस्य योगः पृथिव्यादिष्वस्तीति तेषां द्रव्यत्वं तथा तद्योगस्य गुणादिष्वपि सम्भवात् तेषामपि द्रव्यत्वम् । यथा च गुणत्वस्य योगो रूपादिष्वस्तीति रूपादीनां गुणत्वं तथा तद्योगस्य द्रव्यकर्मणोरपि सम्भवात् तयोरपि गुणत्वं स्यात् । एवं कर्मत्वेपीति पदार्थानां सङ्कीर्णता दर्शयितव्या । समाधत्ते--नेति । न च पदार्थानां सङ्कीर्णता । कुतः ? आधाराधेयनियमात् । न समवायसद्भावमात्रेण द्रव्यत्वम्, किन्तु द्रव्यत्वसमवायात्, द्रव्यत्वसमवायश्च द्रव्येष्वेव न गुणकर्मसु, अतो न तेषां द्रव्यत्वम् । एवं गुणकर्मत्वेपि व्याख्येयम् । एतत् सङ्ग्रहवाक्यं विवृणोति--यद्यप्येकः समवाय इत्यादिना । स्वतन्त्र इति, संयोगवत् सम्बन्धान्तरेण न वर्तत इत्यर्थः । व्यक्तमपरम् । पुनश्चोदयति--एवमादि कस्मादिति । द्रव्येष्वेव द्रव्यत्वं वर्तते गुणेष्वेव गुणत्वं कर्मस्वेव कर्मत्वमित्येवमादि कस्मात् त्वया ज्ञातमित्यर्थः । उत्तरमाह--अन्वयव्यतिरेकदर्शनादिति । द्रव्यत्वनिमित्तस्य प्रत्ययस्य द्रव्येष्वन्वयो गुणकर्मभ्यश्च व्यतिरेकः । गुणत्वनिमित्तस्य प्रत्ययस्य गुणेष्वन्वयो द्रव्यकर्मभ्यश्च व्यतिरेकः । तथा कर्मत्वनिमित्तस्य प्रत्ययस्य कर्मस्वन्वयो द्रव्यगुणेभ्यश्च व्यतिरेको दृश्यते

। तस्मादन्वयव्यतिरेकदर्शनाद् द्रव्यत्वादीनां नियमो ज्ञायते । अस्य विवरणं सुगमम् । सम वायाविशेषे कुत एवायं नियमो द्रव्यत्वस्य पृथिव्यादिष्वेव समवायो गुणत्वस्य रूपादिष्वेव कर्मत्वस्योत्क्षेपणादिष्वेव नान्यत्रेत्यत आह--यथेति । संयोगस्यैकत्वेऽपि कुण्डदध्नोराश्रयाश्रयिभावस्य नियमो दृष्टः शक्तिनियमात् कुण्डमेवाश्रयो दध्येवाधेयं न तु कुण्डमाधेयं दधि वाधारः तथा समवायैकत्वेऽपि द्रव्यत्वादीनामाधाराधेयनियमो व्यङ्ग्यव्यञ्जकशक्तिभेदात् । किमुक्तं स्यात् ? द्रव्यत्वाभिव्यञ्जिका शक्तिर्द्रव्याणामेव, तेन द्रव्येष्वेव द्रव्यत्वं समवैति नान्यत्रेति । एवं गुणकर्मस्वपि व्याख्येयम् । इति **न्यायकन्दल्याम्** । --- अथ **तत्त्व**सङ्ग्रहपञ्जिकास्था चर्चा उद्ध्रियते--(?")इहबुद्ध्यविशेषाच्च योगवन्न विभिद्यते । सर्वस्मिन् भाववत्त्वेष एक एव प्रतीयते ॥ ८२५ ॥ एवं तावद् **वै**शेषिकाणां मतेन इहबुद्धिलिङ्गानुमेयः समवायः । **नै**यायिकमतेन तु इहबुद्धिप्रत्यक्षगम्य एव, तथाहि--ते अक्षव्यापारे सति इह तन्तुषु पटः इत्यादिप्रत्ययोत्पत्तेः प्रत्यक्षत्वमाचक्षते । स चायं समवायो यथा संयोगः सम्बन्धिषु भिन्नः तथा नायं भिद्यते, किं तर्हि ? भाववत् सत्तावत् तल्लिङ्गाविशेषाद् विशेषलिङ्गाभावात् सर्वत्रैक एव समवायः । योगवदिति वैधर्म्यदृष्टान्तः... ... ...। --- यच्चोक्तम् इहबुद्ध्यविशेषात् इत्यादि तत्राह --**यद्ये**कः समवायः स्यात् सर्वेष्वेव च वस्तुषु । कपालादिष्वपि ज्ञानं पटादीति प्रसज्यते ॥ ८३५ ॥ गजादिष्वपि गोत्वादि समस्तीत्यनुषज्यते । ततो गवादिरूपत्वममीषां शाबलेयवत् ॥ ८३६ ॥ पटस्तन्तुषु योऽस्तीति समवायात् प्रतीयते । अस्ति चासौ कपालेषु तस्येति न तथेति किम् ॥ ८३७ ॥ नाश्रितः स कपाले चेन्ननु तन्तुष्वपीष्यते । आश्रितः समवायेन स कपालेऽपि नास्ति किम् ॥ ८३८ ॥ **तन्तौ** **य**ः समवायो हि पटस्येत्यभिधीयते । स घटस्य कपालेषु तद्धीरनवधिर्भवेत् ॥ ८३९ ॥ एवं यश्च गजत्वादिसमवायो गजादिषु । गोत्वादिजातिभेदानां स एव स्वाश्रयेष्व**पि** ॥ ८४० ॥ **यद्येक** इत्यादि । यद्येकस्त्रैलोक्ये समवायः स्यात् तदा कपालेषु [पट] इत्यादयोऽपि धियः प्रसूयेरन् अश्वादिषु च गोत्वादिर्विद्यत इत्येवं स्यात् । ततश्च सावलेयादिभेदवद् गजादिष्वपि
n525/m गवादिप्रत्ययो भवेत् । तथाहि--तन्तुषु पट इति यत्समवायबालात् प्रतीतिरुपवर्णिता स समवायस्तस्य पटस्य कपालादिष्वप्यस्तीति किमिति तथा प्रतीतिर्न भवेत् । स्यादेतत्--न कपाले पट आश्रितः, तेन तथा प्रत्ययो न भवतीति । एतदपि मिथ्या । यतस्तन्तुष्वपि पट आश्रित इति यत्समवायबलादुपवर्ण्यते स समवायः कपालेषु किं नास्ति, येन तत्र तन्तुष्विव पटोऽस्तीति तद्बुद्धिर्न भवेत् ? । किन्तु य एव तन्तुषु पटस्य समवाय इति निर्दिश्यते स एव पटस्य समवायः कपालेषु, तत् कथं सङ्करो न स्यात् ? **तत्** तस्मात् **धीरनवधि**ः अवधिरहिता **भवेत्**, ततश्च द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सम्बन्धस्यैकत्वात् पञ्चपदार्थविभागो न स्यात् । **एव**मित्यादिना गजादिषु गवादिबुद्धिप्रसङ्गं समर्थयते । --- आधाराधेयनियम**स्तदेकत्वे**ऽपि विद्यते । द्रव्येष्वेव हि तज्जातिः कर्मस्वेव च कर्मता ॥ ८४१ ॥ **आ**धारेत्यादिना अत्र प्रशस्तमतेरुत्तरमाशङ्कते । स ह्याह--यद्यप्येकः समवायस्तथापि पञ्चपदार्थसङ्करो न भवति, आधाराधेयनियमात् । तथाहि— द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वमिति । एवं द्रव्यत्वादीनां प्रतिनियताधारावच्छेदेन प्रतिपत्तिरुपजायते । यद्येवं तर्हि समवायः प्रतिपदार्थं भिन्नः प्रप्नोतीत्यत आह --**इ**हेति समवायोत्थविज्ञानान्वयदर्शनात् । सर्वत्र समवायोऽयमेक एवेति गम्यते ॥ ८४२ ॥ द्रव्यत्वादिनिमित्तानां व्यतिरेकस्य दर्शनात् । धियां द्रव्यादिजातीनां नियमस्त्ववसीयते ॥ ८४३ ॥ **इ**हेत्यादि । इहेति समवायनिमित्तस्य प्रत्ययस्य सर्वत्राभिन्नाकारतया अन्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । सत्यपि चैकत्वे द्रव्यत्वादिनिमित्तानां धियां प्रतिनियताधारावच्छेदेनोत्पत्तेः व्यतिरेकस्यानन्वयलक्षणस्य दर्शनाद् द्रव्यत्वादिजातीनां व्यतिरेको विज्ञायते तेन पञ्चपदार्थसङ्करो न भवति । कथं पुनः सम्बन्धाविशेषेऽप्यमीषामाधाराधेयप्रतिनियमो युज्यत इत्याह— तद्यथा कुण्डदध्नोश्च

कालः इत्युक्त्वा पुनरत्र यो दोषश्चोदितः सङ्करप्रसङ्गः इति स तदवस्थ एव दुष्परिहारः । **बहूनां सम्बन्धिनामेकसम्बन्धभावादिति** हेतुः, बहवो हि स- - /ms
म्बन्धिन एकसम्बधीभूताः, ततस्तेषां सङ्करः, **वागादिगवाद्यभिधानवत्**, यथा

---

संयोगैक्येऽपि दृश्यते । आधाराधेयनियमस्तथेह नियमो मतः ॥ ८४४ ॥ व्यङ्ग्यव्यञ्जकसामर्थ्यभेदाद् द्रव्यादिजातिषु । समवायैकभावेऽपि नैव चेत् स विरुध्यते ॥ ८४५ ॥ तद्यथेत्यादि । यथाहि कुण्डदध्नोः संयोगैकत्वेऽपि भवत्याश्रयाश्रयिप्रतिनियमः तथा द्रव्यत्वादीनां समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयप्रतिनियम इति । **स** इत्याधाराधेयनियमः । --- **आधाराधेय** इत्यादिना प्रतिविधत्ते --**आधाराधेयनियमो नन्वेकत्वेऽस्य दुर्घटः । द्रव्यत्वं द्रव्य एवेष्टं कथं तत्समवायतः ॥ ८४६ ॥ तस्यासौ समवायश्च गुणादिष्वपि विद्यते । गुणजात्यादिसम्बन्धादेक एव ह्ययं तयोः ॥ ८४७ ॥** न ह्यस्माकं रूपत्वादीनां रूपादिष्वाधेयनियमः सिद्धः, किन्तु भवतामेव । स च सर्वत्र समवायमेकमेव अभ्युपगच्छतां दुर्घट इत्यादिप्रसङ्गापादनं क्रियते । तथाहि--द्रव्ये एव द्रव्यत्वम् इत्येवं यो नियम इष्यते स समवायबलादेव, तस्य च द्रव्यत्वादेर्यः समवायः स एव गुणादिष्वप्यस्ति गुणत्वादिजात्या तेषां सम्बन्धत्वात् । यदि नाम सम्बन्धस्तथापि स एव तत्र समवायोऽस्तीति कथमवसीयते इत्याह--एक एवेत्यादि । तयोरिति द्रव्यत्वगुणत्वादिजात्योः । ततश्चाभिन्ननिमित्तत्वात् तत्सङ्करप्रसङ्गो दुर्निवार इति भावः । **अन्यथा गुणजात्यादिभिन्न एव भवेदयम् । योगिभेदात् प्रतिव्यक्ति यथा योगो विभिद्यते ॥ ८४८ ॥** **अन्यथेति**, यदि द्रव्ये द्रव्यत्वस्य यः समवायः स एव गुणादिषु गुणत्वादीनां न भवेत् तदा संयोगवत् प्रत्याधारं समवायो भिद्यते । यच्चोक्तं द्रव्यत्वादिनिमित्तानाम् इत्यादि तत्राह --**द्रव्यत्वादिनिमित्तानां व्यतिरेको न युज्यते । धियां निमित्तसद्भावादतस्तन्नियमोऽपि न ॥ ८४९ ॥** **द्रव्यत्वादीति**, न ह्यविकले निमित्ते सति कार्यस्य व्यतिरेकोऽभावो युक्तः, अतत्कार्यत्वप्रसङ्गात् । ततश्च धियां व्यतिरेकायोगात् तस्याप्याधाराधेयभावस्य नियमो न युक्तः । ननु द्रव्ये एव द्रव्यत्वमाश्रितं स्थितमित्यादिव्यपदेशतो नियमो भविष्यतीत्याह --**तदाश्रितत्वस्थानादि तस्मादेवाभिधीयते । समवायादतश्चैतन्न युक्तं तन्नियामकम् ॥ ८५० ॥** **तदाश्रितत्वेत्यादि** । तस्मादेव हि समवायादाश्रितत्वादिव्यवस्थानमुपवर्ण्यते भवद्भिः, तस्य च सर्वत्राविशिष्टत्वे कथमेष नियमो योक्ष्यते । तस्मादेतदप्याश्रितत्वादि न तस्याधाराधेयभावस्य नियामकं युक्तम्, आधाराधेयभावेन सहैकयोगक्षेमत्वादेषाम् । व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियमात् तर्हि नियमो भविष्यतीत्याह --**व्यङ्ग्यव्यञ्जकसामर्थ्यभेदोऽपि समवायतः । नान्यतस्तु स नित्यानामुत्पादानुपपत्तितः ॥ ८५१ ॥** **व्यङ्ग्येत्यादि** । द्रव्यत्वादिसामान्यव्यञ्जकत्वं द्रव्यादीनां यदुच्यते तत् समवायबलादेव । तथाहि--यत एव द्रव्यत्वं द्रव्ये समवेतं तत एव तेन तद् व्यज्यत इत्युच्यते । **अन्यत** इति सौगतोपवर्णितात् ज्ञानोत्पादनयोग्यस्वभावोत्पादनात् । यस्मान्नित्यानामपि सत्तादीनां समवाय इष्टः; न च नित्यानामुत्पत्तिर्युक्ता । एतदेव **न हीत्यादिना** समर्थयते --**न हि दीपादिसद्भावाज्ज्ञायन्ते यादृशा इमे । विज्ञानजनने योग्या घटाद्या जातयस्तथा ॥ ८५२ ॥** यश्चापि दधिकुण्डसंयोगो दृष्टान्तत्वेनोक्तः सोऽप्यस्माकमसिद्ध इति n526/mj
दर्शयति --**कुण्डदध्नोश्च संयोग एकः पूर्वं निराकृतः । न चासौ नियतस्तस्माद्युज्यतेऽतिप्रसङ्गतः ॥ ८५३ ॥** **कुण्डदध्नोरित्यादि** । पूर्वमिति संयोगपदार्थदूषणे । भवतु नाम संयोग एकः, तत्रापि तुल्य एव प्रसङ्ग इति दर्शयति--न चासावित्यादि । तस्मादिति संयोगात् दध्नि कुण्डम् इत्यादिबुद्धिप्रसङ्गोऽतिप्रसङ्गः संयोगस्य निमित्तस्य निर्विशिष्टत्वात् ।(?") इति **शान्तरक्षितविरचिततत्त्वसङ्ग्रहस्य कमलशीलविरचितायां व्याख्यायां तत्त्वसङ्ग्रहपञ्जिकायाम्** ॥

गौः इत्युक्ते वाग्-दिग्-भू-रश्म्यादिभिरेकस्य गोशब्दस्य वागादिशब्दपर्यायत्वात् तत्तदात्मासौ तत्तदर्थप्रतिपादनात् तत्तत्सम्बन्धात् अमुष्यैवेदं सम्बन्धि इति निर्धार्य व्यवस्थापयितुमशक्यत्वात् सर्वेषां दशानामिष्टः कारणकार्याधारः समवायोऽपि तथाधेयो द्रव्यत्वेनेव गुणत्वकर्मत्वा [This page consists 525/mj
merely of footnotes.] 526/mj

* * *

भिधानप्रत्ययौ स्याताम्, पदार्थलक्षणव्यवस्थानाभावात् षड्पदार्थनिवृत्तिर्वा । कथम् ? समवायस्यैकत्वाद् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद् द्रव्यभावः, गुणकर्मभावयोर्हानिः । तत्त्वविशेषणभेदाद्धि तद्भेदः स्यात्, छत्रिदण्डिवत् ।

* * *

दिभिश्च सम्बन्ध इहलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैकः समवायः, तस्माद् द्रव्यत्वसम्बन्धाद् यथा द्रव्ये द्रव्यबुद्धिं तथा गुणे कर्मणि च द्रव्यबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्यातामिति सामान्येन सङ्करदोष उक्तः ।

§ 1495

**पदार्थे**त्यादि द्वितीयः सङ्करप्रकारः । पदार्थानां षण्णां द्रव्यादीनां लक्षणव्यवस्थानस्याभावात् षडपि पदार्था निवर्तन्ते इति । **कथ**मित्यादि व्याख्या । समवायस्यैकत्वाद् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद् द्रव्यभावो द्रव्यत्ववत्, तयोश्च स्वरूपस्य गुणत्वस्य कर्मत्वस्य च हानिरिति दोषौ, **तत्त्वविशेषणभेदाद्धि तद्भेदः स्याच्छत्रिदण्डिव**दिति वैधर्म्यदृष्टान्तः, छत्रविशिष्टश्छत्री, दण्डविशिष्टो दण्डी, न तथेह द्रव्यत्वस्य क्वचिद् भेदोऽस्ति । § 1496

527/mj

कार्यकारणाधाराधेयसमवायात् तौ भविष्यत इति चेत्, तयोर्गुणकर्मणोर्गुणकर्मभावनिवृत्तौ द्रव्यभावसम्बन्धे गुणक-

३ वा] गौरुदके दृशि स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ इति अनेकार्थसङ्ग्रहे हेमचन्द्राचार्यविरचिते, श्लो॰ ६ ॥
५ द] गौरुदके दृशि स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ इति अनेकार्थसङ्ग्रहे हेमचन्द्राचार्यविरचिते, श्लो॰ ६ ॥
४ इ] **सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः**वै॰ सू॰ १ । २ । १८ इति, एकशब्देन अभेदः कथ्यते, न तु सङ्ख्या । लिङ्ग्यतेऽनेनेति लिङ्गं प्रत्ययः, येन लिङ्गेन सत् सत् इति प्रत्ययेन प्रतीयते सत्ता तस्य सर्वत्राविशिष्टत्वाद् विशिष्टस्य च प्रत्ययस्याभावादभिन्ना सत्ता । P पृ॰ १० । ...**द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यातः** वै॰ सू॰ ७ । २ । ३०, यथैकद्रव्यवत्त्वान्न द्रव्यं भावो गुणकर्मसु च भावान्न कर्म न गुण एवं समवायोऽपि । **तत्त्वं च** वै॰ सू॰ ७ । २ । ३१ इति, यथा सल्लिङ्गाविशेषा[देको भावस्तथा इहलिङ्गाविशेषा]देकः समवायो वृत्तिरहितो नित्यो निरवयवश्चेति सप्तमोऽध्यायः समाप्तः । इति चन्द्रानन्दविरचितायां वैशेषिकसूत्रवृत्तौ P पृ॰ २९ । दृश्यतां पृ॰ ५२४ पं॰ १७ ॥
८ प] दृश्यतां पृ॰ ५२९ पं॰ ४ ॥
१० द्र] अत्र द्रव्यभावो द्रव्यवत् इति पाठो यद्वा द्रव्यभावो द्रव्यत्वं द्रव्यवत् इति पाठः स्यादिति सम्भाव्यते ॥

मणामनाश्रयत्वाद् द्रव्यस्य द्रव्यभावनिवृत्तिः । कार्यकारणाधाराधेयसमवायस्यैकत्वाद् गुणकर्मणोर्द्रव्यीभूतत्वाद् गुणकर्मभावनिवृत्तौ गुणकर्मणामनाश्रयत्वाद् न द्रव्यं क्रियावदादिलक्षणं न गुणकर्माणि तथालक्षणानीति द्रव्यस्यापि द्रव्यभावनिवृत्तिः । तथा द्रव्यगुण... ...। परस्पर... षद्दार्थनिवृत्तिः । § 1497

**कार्यकारणे**त्यादि । कारणमाधारश्च द्रव्यम्, आधेये कार्ये च गुणकर्मणी, तयोर्भिन्नयोः कार्यकारणयोराधाराधेययोश्च समवायात् **तौ** गुणकर्मभावौ **भविष्यत इति चेत्** एवं चेन्मन्यसे, मा मंस्थाः, अत्रोत्तरम् --**तयोर्गुणकर्मणो**रित्यादि यावत् प्रथम**द्रव्यभावनिवृत्ति**रिति तावदुपदेशवचनम्, उपरितनो ग्रन्थस्तद्व्याख्या, गुणकर्मणोर्गुणकर्मभावनिवृत्तिद्वारेण द्रव्यस्य द्रव्यभावनिवृत्तिराख्यायते । तद्यथा--य उक्तः कार्यकारणाधाराधेयसमवायस्तस्यैवैकत्वात् यो द्रव्यभावेन गुणकर्मणोः समवायः स एकस्तेन द्रव्येण सम्बन्धात् ते गुणकर्मणी द्रव्यमेवैकं करोति, ततो गुणकर्मणी निवर्तेते, - /ms

---

१८ क्रि] दृश्यतां पृ° ४४० टि° ५ ॥

२० त] तथा द्रव्यगुणकर्मणां व्यवस्थितलक्षणानामभावाद् निवृत्तौ द्रव्यत्वगुणत्वकर्मत्वादीनामप्याश्रयाभावादनुपपत्तिः । परस्परसङ्करात् पदार्थलक्षणव्यवस्थानाभावात् षद्दार्थनिवृत्तिः । इत्याशयो भाति ॥

२ का] अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः । द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानामकार्यकारणभूतानां वा अयुतसिद्धानामाधार्याधारभावेनावस्थितानाम् इहेदम् इति बुद्धिर्यतो भवति यतश्चासर्वगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्धः । कथम् ? यथा इह कुण्डे दधि इति प्रत्ययः सम्बन्धे सति दृष्टस्तथा इह तन्तुषु पटः, इह वीरणेषु कटः, इह द्रव्ये गुणकर्मणी, इह द्रव्यगुणकर्मसु सत्ता, इह द्रव्ये द्रव्यत्वम्, इह गुणे गुणत्वम्, इह कर्मणि कर्मत्वम्, इह नित्यद्रव्येऽन्त्या विशेषाः इति प्रत्ययदर्शनादस्त्येषां सम्बन्ध इति ज्ञायते । इति **प्र**शस्तपादभाष्ये समवायनिरूपणे । अस्य **न्यायकन्दली** व्याख्या--तुभ्यं भवभिदे विश्वसंहारोत्पत्तिहेतवे । निर्मलज्ञानदेहाय नमः सोमाय शम्भवे ॥ अथ समवायनिरूपणार्थमाह--अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इह प्रत्ययहेतुः स समवायः । तदेतत् कृतव्याख्यानमुद्देशावसरे । के तेऽयुतसिद्धाः येषां सम्बन्धः समवायो भवेदत आह--द्रव्यगुणकर्मसामान्यविशेषाणामिति । कार्यकारणभूतानामकार्यकारणभूतानामिति अनियमकथनम् । अवयवावयविनामनित्यद्रव्यतद्गुणानां नित्यद्रव्यतत्समवेतानित्यगुणानां कर्मतद्वतां कार्यकारणभूतानां समवायः । नित्यद्रव्यनित्यतद्गुणानां सामान्यतद्वतामन्त्यविशेषतद्वतां चाकार्यकारणभूतानां समवायोऽयुतसिद्धानामिति नियमः । एवमाधार्याधारभावेनावस्थितानामित्यपि नियम एव । इहेदम् इति बुद्धिर्यतः कारणाद् भवति यतश्चासर्वगतानां नियतदेशावस्थितानामधिगतान्यत्वानामधिगतस्वरूपभेदानामविष्वग्भावोऽपृथग्भावोऽस्वातन्त्र्यं स समवायः भिन्नयोः परस्परोपश्लेषस्य सम्बन्धकृतत्वोपलम्भात् । एतदेव कथम् इत्यादिना प्रश्नपूर्वकमुपपादयति । यथा इह कुण्डे दधि इति प्रत्ययः कुण्डदध्नोः सम्बन्धे सति दृष्टः तथा इह तन्तुषु पटः इत्यादिप्रत्ययानां दर्शनादस्त्येषां तन्तुपटादीनां सम्बन्ध इति ज्ञायते । इह तन्तुषु पटः इत्यादिप्रत्ययाः सम्बन्धनिमित्ताः, अबाधितेहप्रत्ययत्वात्, इह कुण्डे दधि इति प्रत्ययवत् । इति **न्यायकन्दल्याम्** ॥

७ स्त] **°स्तस्यैवेकत्वात्** प्र° । अत्र **तस्यैकत्वात्** इत्यपि पाठः स्यात् ॥

तन्निवृत्तौ द्रव्यमाश्रय्यभावाद् नाश्रयो न च कारणं समवायिनां गुणकर्मणामभावात्, ततो द्रव्यस्य द्रव्यलक्षणं नास्ति **क्रियावद् गुणवत् समवायिकारणम्** वै॰ सू॰ १ । १ । १४ इति, क्रियागुणाभावाद् न द्रव्यं तद्वत् । § 1498

**न गुणकर्माणि तथालक्षणानीति**,इतिशब्दो हेत्वर्थे, यस्माद् न सन्त्येव तादृग्लक्षणानि गुणकर्माणि तेषामाश्रयिणां समवायिनामभावात् तन्निवृत्तौ **द्रव्यस्यापि द्रव्यभावनिवृत्तिः**, गुणवत् 528/mj

* * *

यच्च (?')न, बहूनामेकत्वात् । बहूनां द्रव्यादीनामेकः समवायः, न तु द्वयोर्द्वयोः... ... ...

* * *

समवायिकारणं क्रियावदद्रव्यमनेकद्रव्यं वा द्रव्यं स्यात्, तच्चेत्थं नाद्रव्यं नानेकद्रव्यं सम्भवति । तस्माद् गुणकर्मणां गुणकर्मभावनिवृत्तौ द्रव्यभावसम्बन्धे सति गुणकर्मणामनाश्रयत्वाद् द्रव्यस्य द्रव्यभावनिवृत्तिरिति द्रव्यपदार्थनिवृत्तिरुक्ता । अथवा त्वदिष्टेन द्रव्यत्वेन सर्वगतेन सम्बन्धे सति गुणस्य कर्मणो वा द्रव्यं द्रव्यत्वेन सम्बद्धमिति द्रव्यीभावः, तद्भावाद् गुणकर्मणी न
- /ms द्रव्याश्रिते, ततो द्रव्यलक्षणायुक्तेर्द्रव्यभावनिवृत्तिः, किं द्रव्यलक्षणमिति चेत्, उच्यते --**क्रियावद् गुणवत् समवायिकारणम्** वै॰ सू॰ १ । १ । १४ इति, तत्तु कार्यकारणाधाराधेयसमवायस्यैकत्वाद् गुणकर्मणोर्द्रव्यीभूतत्वात् *क्रियावदादिलक्षणं नास्ति, यस्माद् **न तु गुणकर्माणि तथालक्षणानीति** गुणस्य **द्रव्याश्रय्यादिलक्षणत्वात् एकद्रव्यादिलक्षणत्वात् कर्मणः** । एवं स्वलक्षणाभावापेक्षा द्रव्यस्य द्रव्यभावनिवृत्तिर्गुणकर्मलक्षणायुक्तेरिति । ततश्च **द्रव्यस्यापीत्यादि** आश्रयाभावाद् गुणकर्माभावमापाद्य आश्रय्यभावेऽपि द्रव्यस्याश्रयस्याभाव इति गतार्थम् । एवं गुणकर्मणोरपि गुणकर्मलक्षणाव्यवस्थानाद् गुणकर्मभावनिवृत्तिरुक्ता वेदितव्या । एवं तावद् द्रव्यगुणकर्मणां व्यवस्थितलक्षणाभावाद् निवृत्तिः । § 1499

**तथा द्रव्यगुणेत्यादि** । द्रव्यत्व[-गुणत्व-]कर्मत्वादीनामाश्रयाभावादनुपपत्तिः सामान्यविशेषाणाम् । **आदिग्रहणात्** सत्तायाः । तद् व्याचष्टे --**परस्परेत्यादि** भावितार्थं यावत् **षड्पदार्थनिवृत्तिरिति** । § 1500

---

१० त] ततो
द्रव्यलक्षणंnayacakra-ms-bhā ‖
१० क्रिया] दृश्यतां पृ॰ ४४० टि॰ ५ ‖
१५ ब] बहूनां द्रव्यादीनामेकः समवायः, न तु द्वयोर्द्वयोः । द्वयोर्द्वयोर्यथा संयोगः, न तथा द्वयोर्द्वयोः समवायः । तस्मान्नानित्यत्वं समवायस्य । इत्याशयो भाति ‖
७ द्र] **द्रव्यत्वेनासम्बद्धमिति द्रव्याभावः** प्र॰
‖
९ क्रि] दृश्यतां पृ॰ ४४० टि॰ ५ ‖
१० व्यी]
॰व्याभूत॰nayacakra-ms-ya ‖
११ *] दृश्यतां पृ॰ ४४० टि॰ ५ ‖
११ क्रियाव] **॰वदलक्षणं** प्र॰ ‖
१२ द्र] दृश्यतां पृ॰ ४४० टि॰ ५ ‖
१२ ए] दृश्यतां पृ॰ ४४० टि॰ ५ ‖

**यच्चेत्यादि । आधाराधेयभावेन भेदे सति संयोगवद् द्विवृत्तित्वात् समवायस्य ततश्चानित्यत्वं स्यात्** इति पूर्वपक्षं कृत्वा परिहारमाह **वैशेषिकः**

---

२१ य]
**यत्वेत्यादि**nayacakra-ms-bhā ।
**यत्त्वित्यादि ?** ॥
२१ द्] **द्विवृत्तित्वं ?** ॥
२२ श्चानित्य] समवायस्य द्विवृत्तित्वे सम्बन्धिनाशे संयोगवदनित्यत्वापत्तिरित्याशयो भाति ॥
२२ शेषिकः] दृश्यतां पृ° ५२४ टि° ३ । सम्बन्ध्यनित्यत्वेऽपि न संयोगवदनित्यत्वं भाववदकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव इत्युक्तं तथा समवायोऽपीति । न ह्यस्य किञ्चित् कारणं प्रमाणत उपलभ्यत इति । इति तु समवायनित्यत्वं समर्थितं **प्रशस्तपादभाष्ये** । अस्य **न्यायकन्दली** व्याख्या पृ° ५२३ टि° २ इत्यत्र द्रष्टव्या । अस्य **प्रशस्तपादभाष्य**मतस्य खण्डनं **तत्त्वसङ्ग्रहपञ्जिकाया**मित्थमस्ति--(?")यच्चोक्तं कारणानुपलब्धेर्नित्यः समवायः इति तत्राह— नित्यत्वेनास्य सर्वेऽपि नित्याः प्राप्ता घटादयः । **स्वा**धारेषु सदा तेषां **समवायादवस्थितेः** ॥ ८५४ ॥ नित्यत्वेनेत्यादि । यदि हि समवायो नित्यः स्यात् तदा घटादीनामपि नित्यत्वप्रसङ्गः स्वाधारेषु तेषां सर्वदावस्थानात् । तथाहि--समवायास्तित्वादेवैषां स्वाधारेष्ववस्थानमिष्यते, स च समवायोः नित्य इति किमिति सदाऽमी न सन्तिष्ठेरन् । स्वारम्भकेत्यादिना परस्योत्तरमाशङ्कते--स्वारम्भकविभागाद् वा यदि वा तद्विनाशतः । ते नश्यन्ति क्रिया**दाश्च** योगादेरिति चेन्न तत् ॥ ८५५ ॥ स्वाधारे **स**मवायो हि तेषामपि सदा मतः । तेषां विनाशभावे तु नियताऽस्यापि नाशिता ॥ ८५६ ॥ स्यादेतत्--घटादीनां ये स्वारम्भकावयवास्तेषां विभागाद् विनाशाद्वा घटादीनां विनाशः, यथा घटस्योद्वेष्टनपाकावस्थयोः क्रियादयः स्पर्शवद्द्रव्यसंयोगादिभ्यो विनश्यन्ति । यथोक्तम्--स्पर्शवद्द्रव्यसंयोगात् कर्मणो नाशः । कार्यविरोधि च कर्म वै° सू° १ । १ । १३ इति । तथा बुद्धेर्बुद्ध्यन्तराद् विनाशः शब्दस्य शब्दान्तरादिति परप्रक्रिया । तेन सत्यपि समवायेऽवस्थितिहेतौ सहकारिकारणान्तराभावाद् विरोधिप्रत्ययोपनिपाताच्च न नित्यत्वप्रसङ्गो घटादीनामिति परस्य भावः । न तदित्यादिना प्रतिषेधति । नैतद् युक्तम्, यतस्तेषामपि स्वारम्भकावयवानां कपालादीनां स्वारम्भकेष्ववयवान्तरेषु समवायः, **तेषामप्यन्येष्वन्येषु यावत् परमाणुरवशिष्यते । तस्य च परमाणोर्नित्यत्वात् नान्यथात्वमस्ति । ततश्च सर्वेषां स्वारम्भकेष्ववयवेषु समवायः** सर्वदास्त्येवेति कुतो विनाशो विभागो वा । न केवलं तदारब्धानां द्रव्याणाम्, क्रियादीनां च इति अपिशब्देन दर्शयति । यदि तु स्वारम्भकाणामवयवानां विनाशोऽभ्युपगम्येत तदा नियतमस्य समवायस्यापि विनाशः प्राप्नोति । कस्मादित्याह--सम्बन्धिनो निवृत्तौ हि सम्बन्धोऽस्तीति दुर्घटम् । न हि संयुक्तनाशेऽपि संयोगो **व्यव**तिष्ठते ॥ ८५७ ॥ यथा संयोगभावे तु संयुक्तानामवस्थितिः । समवायस्य सद्भावे तथा स्यात् समवायिनाम् ॥ ८५८ ॥ सम्बन्धिनो निवृत्तौ हीत्यादि । एतदेव घटयन्नाह--न हीत्यादि । ततश्च विनष्टसम्बन्धित्वान्नष्टसंयोगिसंयोगवदनित्यः समवायः प्राप्नोतीत्युक्तं भवति । सम्बन्धिनां वा स्थितिः प्राप्नोति, अविनष्टसम्बन्धत्वात्, अनुपरतसंयोगद्रव्यद्वयवत् । अन्यथा तत्सम्बन्धस्वभावहानिरुभयेषामपि प्रसज्येत । एकसम्बन्धिनाशेऽपीत्यादिना परः प्रत्यवतिष्ठते--एकसम्बन्धिनाशेऽपि समवायोऽवतिष्ठते । अन्यसम्बन्धिसद्भावाद् योगो नो चेन्न भेदतः ॥ ८५९ ॥ एवं मन्यते--यदि प्रथमे हेतौ विनष्टाशेषसम्बन्धित्वादिति हेत्वर्थोऽभिप्रेतः तदा पक्षैकदेशासिद्धता हेतोः । न ह्यशेषाणां सम्बन्धिनां विनाशः क्वचिदस्ति, प्रलयेऽपि परमाण्वादीनामवशिष्यमाणत्वात् । अथ यथाकथञ्चिद् विनष्टसम्बन्धित्वसम्बन्धमधिकृत्य हेतुरुच्यते तदाऽनैकान्तिकता । यदि नामैकः सम्बन्धी क्वचिद् विनष्टस्तथाप्यपरसम्बन्धिनिबन्धनाऽवस्थितिरस्य भविष्यति । यद्येवं संयोगस्याप्यनया नीत्या नित्यत्वं प्राप्नोतीत्याशङ्क्य परः प्रतिविधत्ते--न भेदत

**--न, बहूनामेकत्वात्, बहूनां द्रव्यादीनामेकः समवाय** इति **स्वरूपवर्णनं**
529/mj **द्विवृत्तिप्रतिषेधार्थम् । न तु द्वयोर्द्वयो**रित्यादि संयोगेन वैधर्म्यं

* * *

समवायस्य(?') इति, एतेनापि सङ्करप्रसङ्गस्तदवस्थ एव बहूनामेकस-
मवायाभ्युपगमात् । ततः षडपि पदार्था निवर्तिताः ।

* * *

गतार्थं यावत् **समवायस्ये**ति । आचार्य आह **--एतेनापी**त्यादि । एतेनानित्य-
त्वपरिहारवचनेनापि **सङ्करप्रसङ्गः** सामान्येन **व्यवस्थानाभावात् सर्वत्र स-
र्वाधेयवृत्तौ सर्वाभिधानप्रत्ययसङ्करः** विशेष्य च **पदार्थलक्षणव्यवस्थानास-
म्भवात् षड्पदार्थनिवृत्तिर्वे**त्यादिरुक्तः **तदवस्थ एव** दृढीकृतः, बहूनामेकस-
मवायाभ्युपगमात्, ततः सङ्करादुक्तात् षडपि पदार्था निवर्तिताः, तन्निवृत्तौ
- /ms समवाय्यभावात् समवायनिवृत्ते- स्तस्यासतः खपुष्पस्येव कुतो नित्यत्वम-
नित्यत्वं वा ? § 1501
530/mj

---

इति । संयोगो हि प्रतिसंयोगि भिद्यते, तेनास्यानित्यत्वं युक्तम्, समवायस्तु इहप्रत्ययनिबन्धनस्याभिन्नत्वादेक एव जगति, तेनास्यानित्यत्वमयुक्तमन्यत्रापि सम्बन्ध्यन्तरे तस्योपलभ्यमानत्वात् । यद्येवमित्यादिना प्रतिविधत्ते--यद्येवं ये विनश्यन्ति घटाद्याः समवायिनः । तेषां वृत्त्यात्मको योऽसौ समवायः प्रकल्पितः ॥ ८६० ॥ स एव व्यतिष्ठेत किं सम्बन्ध्यन्तरस्थितेः । अथान्य एव **सम्बन्ध[ः]** संयोगबहुतादिवत् ॥ ८६१ ॥ **तद्वृत्तिलक्षणस्यैव** समवायस्य संस्थितौ । पूर्ववत् ते स्थिता एव प्राप्नुवन्ति घटादयः ॥ ८६२ ॥ **एतेषामनवस्थाने तेषां वृत्त्यात्मकः कथम्** । समवायोऽवतिष्ठेत संज्ञामात्रेण वा तथा ॥ ८६३ ॥ अतः प्रागपि तद्भावान्न ते वृत्ताः स्युराश्रये । पश्चादिव तथा ह्येषा वृत्तिस्तेषामवस्तुनः ॥ ८६४ ॥ तथाहि--ये ते विनश्यन्ति घटादयः स्वकारणादिसमवायिनस्तेषां स्वकारणेषु वृत्त्यात्मको योऽसौ समवायः कल्पितः स एव किं तेषु विनष्टेषु सम्बन्ध्यन्तरेष्वस्ति आहोस्विदन्य एव यथा संयोगो बहुत्वं वा प्रतिसंयोगि भिद्यते । आदिशब्दाद् विभागादिपरिग्रहः । तत्र यद्याद्यः पक्षः तदा प्रागवस्थावदप्रच्युतप्रवृत्तित्वादवस्थिता एव घटादयः प्राप्नुवन्ति, तेषां वा घटादीनामनव-स्थानेऽनवस्थितप्रवृत्तित्वान्नावस्थितिः समवायस्य प्राप्नोति, अन्यथा न वृत्त्यात्मकः स्यात् । तथाभूतस्य च स्वतन्त्रस्यानुपकारिणो वृत्तिः समवाय इति वा नामकरणे संज्ञामात्रमेव स्यात्, न तु वस्तुतथाभावः । तथेति तद्वृत्त्यात्मक इत्येवम्, ततः संज्ञामात्रान्वयो दोषः, तं दर्शयति--अत इत्यादि । प्रागपि सम्बन्धिनाशात्, अविनष्टसम्बन्ध्यवस्थायामपीत्यर्थः, ते घटादयः स्वाश्रये वृत्तास्तस्य समवायस्य भावात् सद्भावबलान्न सिध्येयुः, पश्चादिव विनष्टसमवायिकारणवत् परमार्थतो वृत्त्यभावात् । तथाहीत्यादिना हेत्वर्थं दर्शयति । अथान्य एव संयोगविभागबहुतादिवत् । सम्बन्ध्यन्तरसद्भावे समवायोऽवतिष्ठते ॥ ८६५ ॥ संयोगादिवदेवं हि नन्वस्य बहुता भवेत् । एवमाद्यस्य सद्भावे बहु स्यादसमञ्जसम् ॥ ८६६ ॥ **अथान्य एवे**ति द्वितीयः पक्षस्तदा संयोगादिवत् समवायबहुत्वं प्राप्नोति । ततश्च न समवायो भेदवान् इत्यस्याभ्युपेतस्य हानिः । एवमादीत्यादिशब्देन... ...दोषान्तरपरिग्रहः ।(?") इति [जेसलमेरस्थायां] तत्त्वसङ्ग्रहपञ्जिकायां समवायपदार्थपरीक्षावसरे, [अत्र स्थूलाक्षरनिर्दिष्टः पाठो जेसलमेरस्थहस्तलिखितपुस्तकानुसारेण ज्ञेयः] । **सन्मति॰ वृ॰** पृ॰ ७०३ ॥

**७ स]** दृश्यतां पृ॰ ५२४ पं॰ २, पृ॰ ५२६ पं॰ १ ॥

यत्तु प्रत्युक्तम्--न, आधाराधेयनियमात् । यद्यप्येकः समवायः सर्वत्र स्वतन्त्रस्तथाप्याधाराधेयनियमोऽस्ति । कथम् ? द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वम् इति वै० सू० प्रशस्तमति० । एतदपि प्रत्युक्तम्... ... ...प्रतिनियतानि । § 1502

यत्तूच्यते--अवगम्यतां तावत्... ...समवायैकत्वेऽप्याधाराधेयनियमः स्यात् इति, इदमपि स्ववादविहितोत्तरमार्गम् । न तु तथा... ... ...। सर्वत्र तावद् द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं सम्बन्धिद्वयविशिष्टाभिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत् । द्रव्यगुणयोः... ... ...। तथा च... ...अनित्यतैव । § 1503

**यत्तु प्रत्युक्त**मित्यादि सङ्करदोषस्य यदुत्तरमुक्तम् **--न, आधाराधेयनियमा**दिति । **यद्यप्येक** इत्यादि तद्व्याख्या यावत् **कर्मस्वेव कर्मत्व**मिति, सर्वत्र चैकः समवायः इत्यनेन द्विवृत्तित्वपरिहारेणानित्यत्वमपि परिहृतमिति **वैशेषिकः** । आचार्य आह **--एतदपि प्रत्युक्त**मित्यादि गतार्थं यावत् **प्रतिनियतानी**ति । द्विवृत्तित्वमेवास्य इति च वक्ष्यति । § 1504

**यत्तूच्यते--अवगम्यतां तावदि**त्यादि इदं तस्य दोषपरिहारप्राणसर्वस्वमन्वयव्यतिरेकाभ्यामनियमातिप्रसङ्गाभावभावनं गतार्थं यावत् **समवायैकत्वेऽप्याधाराधेयनियमः स्यादि**ति । अत्राचार्य आह — **इदमपी**त्यादि, स्ववादेनैवोत्तरमार्गो विहितोऽस्य वचनस्य त्वया **इहेदम्** वै० सू० प्रशस्तदृश्यतां पृ० ५२७ टि० २ ॥मति० इत्यादिना समवायलक्षणं व्याचक्षाणेन आधाराधेयसम्बन्धज्ञानलक्षणत्वात् कार्यकारणयोश्चाधाराधेयभावात्

---

१३ न] दृश्यतां पृ० ५२४ पं० १९, पृ० ५२५ पं० २५ ॥
१६ ए] एतदपि प्रत्युक्तं सर्वत्रैकत्वे समवायस्य आधाराधेयनियमाभावात्, द्विवृत्तित्व एव हि द्रव्यादिषु द्रव्यत्वादीनि प्रतिनियतानि । इत्याशयो भाति ॥
१ अ] अवगम्यतां तावदन्वयव्यतिरेकदर्शनात् । इह इति समवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते । यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयिभावनियमः तथा द्रव्यत्वादीनामपि समवायैकत्वेऽपि आधाराधेयनियमः स्यात् इत्याशयो भाति, दृश्यतां पृ० ५२४ टि० ३ ॥
२ न] न तु तथा सङ्कराभावो घटते । यदि सर्वात्मकः समवायो द्रव्याद्याधार एक एव तदा किमिति सङ्करो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य इत्याशयो भाति ॥
५ द्र] द्रव्यगुणयोः द्रव्यकर्मणोः द्रव्यद्रव्यत्वयोः गुणगुणत्वयोः कर्मकर्मत्वयोश्च समवायः इत्यभिधानप्रत्ययौ दृश्येते । तथा च आधाराधेयभावेन भेदे संयोगवद् द्विवृत्तित्वात् समवायस्यानित्यतैव । इत्याशयो भाति । दृश्यतां पृ० ५२८ टि० ८ ॥
१२ ङ्ग] ०ङ्गभावभावभावतंnayacakra-ms-bhā । ०ङ्गभावभावगतं nayacakra-ms-pā nayacakra-ms-vi । ०ङ्गभावगतं nayacakra-ms-ḍe nayacakra-ms-raṃ ॥

सम्बन्धिनोः कुण्डदधिदृष्टान्तेन च सुभावितोऽयमर्थः, तेनैव वयं ब्रूमः -- **न तु तथेत्यादि**, न तु तथा सङ्करभावो घटते उत्तरप्रकारेण, कुण्ड-दधिसंयोगदृष्टान्ते यदि दधिमधूदकादिभिर्बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? तथा यदि सर्वात्मकः समवायो द्रव्य-गुण-कर्म-द्रव्यत्व-गुणत्व-कर्मत्व-सत्ताद्याधार एक एव भवति तदा कि-मिति सङ्करो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य यतः संयोगाद् वैधर्म्यमुच्यते त्वया **द्वयोर्द्वयोः** इत्यादिना । तत्र साधनम्--स-र्वत्र तावद् द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, साधयामश्चैतद् द्विवृत्तित्वं **सम्बन्धिद्वयविशिष्टाभिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत्**, यथा कुण्डदध्नोः संयोगे दध्ना कुण्डेन वा विशिष्टे तन्निमित्तमभिधानं प्रत्यय-श्च दृश्यते दधिकुण्डं कुण्डदधि वेति तद्विवृत्तित्वं च तथा समवायेऽपि **द्रव्यगुणयोरित्यादि** द्विवृत्तिवर्णनम् । तस्मात् त्वत्पूर्वपक्षितदोषासङ्गस्तदवस्थः समवायस्येत्यत आह --**तथा चेत्यादि** यावद**नित्यतैवे**ति गतार्थम् । § 1505

- /ms

531/mj

यत्त्विदम्... ...ज्ञानमित्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया, न हि... ...एवं ते समवायैकत्वे द्रव्येष्व-पि गुणज्ञानं स्याद् गुणज्ञानकारणत्वात् समवायस्य गुणवत् ।

§ 1506

एकत्वे योऽयं द्रव्यस्य द्रव्यभावेन सम्बन्धः स एव गुण-स्यापीति द्रव्यस्यापि गुणत्वम् । गुणत्वाभिसम्बन्धाच्च तस्य द्र-व्यभावहानिः । तस्य... ...निवृत्तिः । तस्य द्रव्यस्य गुण-भावेन सम्बद्धत्वाद् गुणीभूतत्वाद् गुणानाश्रयत्वादभाव इति गुण-भावनिवृत्तिर्गुणस्य तल्लक्षणानुपपत्तेः । क्रियावद् गुणवत् सम-

---

१९ दृ] °दृष्टान्तो प्र° ॥
२३ द्व] दृश्यतां पृ° ५२८ पं° १७ ॥
१ ता] **वावद्रव्य°** प्र° ॥
२ स] **सम्बन्धे द्वय°** प्र° ॥
४ दृ] दृश्येते ? ॥
५ द्र] द्रव्यगुणयोः द्रव्यकर्मणोः द्रव्यद्रव्यत्वयोः गुणगुणत्वयोः कर्मकर्मत्वयोश्च समवायः इत्यभिधानप्रत्ययौ दृश्येते । तथा च आधाराधेयभावेन भेदे संयोगवद् द्विवृत्तित्वात् समवायस्यानित्यतैव । इत्याशयो भाति । दृश्यतां पृ° ५२८ टि° ८ ॥
५ रित्यादि] द्विवृत्तित्ववर्णनम् ? ॥
५ द्विवृत्तिव] दृश्यतां पृ° ५२८ पं° १७ ॥
७ य] यत्त्विदमभिधीयते द्रव्यगुणकर्मणां द्रव्यत्वादिभिः परस्परव्यतिरिक्तैर्नियमाद् द्रव्येष्वेव द्रव्यज्ञानम् इत्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया । इत्याशयो भाति ॥
८ न] न हि समवायैकत्वेऽविशिष्टत्वाद् व्यतिरेको नियमश्चास्ति, अतो द्रव्येष्वेव द्रव्यज्ञानं न स्यात् । इत्याशयो भाति ॥
१३ त] तस्य द्रव्यस्य गुणभावेन सम्बद्धत्वाद् गुणवद् द्रव्यभावनिवृत्तिः इत्याशयो भाति ॥
१५ क्रि] दृश्यतां पृ° ४४० टि° ५ ॥

वायिकारणमिति द्रव्यलक्षणम् । द्रव्याश्रयी अगुणवान् संयोग-विभागेष्वकारणमनपेक्ष इति गुणलक्षणम् वै॰ सू॰ १ । १ । १४--१५ । ततश्च... ...। किं कारणम् ?... ...। § 1507

**यत्त्विद**मित्यादि परोक्तमेव ग्रन्थमतिदिशति याव**ज्ज्ञानमित्यादि,** द्रव्यादीनामाधाराणां द्रव्यत्वादिभिराधेयैः परस्परव्यतिरिक्तैर्विशेषणैर्नियमो भवति स्वतत्त्वानुरूपप्रत्ययोत्पत्तेरिति । अत्रोच्यते --**अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया** । कथम् ? **न ही**त्यादिना भावयति, **हि**शब्दो हेत्वर्थे, यस्मात् समवाय एकस्तस्माद् द्रव्यादिद्रव्यत्वादिभिरविशिष्टत्वाद् व्यतिरेको नियमश्च नास्ति, अतो द्रव्येष्वेव द्रव्यम् इति ज्ञानं न स्यात् । तस्य व्याख्या --एवमित्यादि, एवं ते समवायैकत्वे **द्रव्येष्वपि गुणज्ञानं स्याद**विशिष्टत्वाद् गुणेष्विव । **अपि**शब्दात् कर्मस्वपि । किं कारणम् ? **गुणज्ञानकारणत्वात् समवायस्य,** किमिव ? **गुणवदि**ति, गुणेष्विव गुणवत् इति साधनम् । § 1508

तदेव व्याचष्टे --**एकत्वे यो**ऽयमित्यादि यावद् **द्रव्यस्यापि गुणत्वम्** । यदि दधिमधूदकादीनां कुण्डसङ्कीर्णानामविवेके नियमेन अयमस्यैव स्वभावः इत्यशक्यमवधारयितुं संयोगे दधिकुण्डमेव, मधुकुण्डमेव, उदककुण्डमेव वा इति एकत्वात् संयोगस्य सर्वेणापि सम्बन्धात्, तथात्रापि यो **द्रव्यभावेन सम्बन्धः स एव गुणस्यापि इति** एतस्मात् कारणात् प्राप्तं गुणत्वं द्रव्यस्यापि गुणभावः, द्रव्यं गुणो भवतीत्यर्थः । **गुणत्वाभिसम्बन्धाच्च तस्य द्रव्यभावहानिः**, एवं गुणभावापत्तौ द्रव्यभावो हीयत इति पररूपतामापाद्य स्वरूपत्यागमापादयति । **तस्ये**त्यादि व्याख्यानसाधनं यावद् **निवृत्तिः** । द्रव्यं गुणभावेन सम्बद्धत्वात् त्यक्तद्रव्यभावं गुणवदिति । एवं तावद् द्रव्यस्य गुणत्वापत्तिर्द्रव्य[त्व]त्यागश्चानवस्थाने । § 1509 - /ms

**तस्य द्रव्यस्ये**त्यादि । तद् द्रव्यं गुणभावेन सम्बद्धमतो गुणीभूतं नाश्रयो गुणान्तरस्येति, द्रव्यमनाश्रितस्य च गुणस्याभावः, ततो गुणानाश्रयस्य द्रव्यस्याप्यभावः, तदभावादसति द्रव्ये कस्य गुणः ? इति **गुणभावनिवृत्तिर्गुणस्य तल्लक्षणानुपपत्तेः** । **क्रियावत्** इत्यादिसूत्रद्वयेन लक्षणं दर्शयति । ततश्चेत्याद्युद्दिष्टार्थोपनयः । **किं कारणम् ?** इत्यादि कारणप्रश्नपूर्वके पूर्ववदत्रापि द्रव्यत्वापत्तिगुणत्वत्यागौ द्वे अनवस्थाने । § 1510

532/mj

---

१ द्र] द्रव्यादि॰nayacakra-ms-bhā प्रतौ नास्ति ॥
११ गु] गुणत्वस्यापि ? ॥
१६ श्चा] ॰श्चनव॰ प्र॰ । गुणत्वापत्तिद्रव्यत्वत्यागौ द्वे अनवस्थाने इत्यर्थः ॥
१७ गु] गुणभूतंnayacakra-ms-ya ॥
२२ द्र] गुणत्वापत्तिगुण-त्वात्यागौnayacakra-ms-bhā । गुणस्य द्रव्यत्वापत्तिगुणत्वत्यागौ ? ॥

तथा योऽयं गुणस्य कर्मत्वेन… …न गुणकर्मणी तथालक्षणे । तयोरलक्षणत्वादसत्त्वादाश्रयत्वोपलक्ष्यद्रव्याभावः । तदभावादाश्रयिणां द्रव्यत्वादीनामप्यभावः । एवं द्विकसंयोगेन चतुर्विंशतिरनवस्थाचक्रकाणि भवन्ति तथा कार्यकारणयोः… … गुणस्येत्यादेः । § 1511

ननु सर्वगतत्वात् समवायस्य स्वतत्त्वेनापि सम्बन्धात् तत्त्वं सिध्यति । नन्वत एव सङ्कर उच्यते परतत्त्वेनापि सम्बन्धादतत्त्वमपीति । § 1512

एवं च स्वविषयसर्वगतानि तत्त्वानि समवायस्य सर्वगतैकत्वाभ्यां सर्वगतानि प्राप्तानि । *अतो द्रव्यगुणकर्मणाम्… …कर्मसु कर्मज्ञानम् । § 1513

**तथा योऽयं गुणस्य कर्मत्वेने**त्यादि कर्मणा सह पररूपापत्तिः स्वरूपत्यागश्च द्वे अनवस्थाने लक्षणायोगद्वारेण सव्याख्याने गतार्थे यावद् **न गुणकर्मणी तथालक्षणे** इति लक्षणाभावापादनम् । **तयोरलक्षणत्वादसत्त्वात्,** तयोर्गुणकर्मणोरलक्षणत्वादसत्त्वं खपुष्पवत्, तदसत्त्वा**दाश्रयत्वोपलक्ष्यद्रव्याभावः**, गुणकर्मणोरुपलक्षणयोराश्रयिणोरभावाद्वाश्रयो द्रव्यं नास्ति - /ms औष्ण्याभावेऽग्न्यभाववत् उपलक्षणाभावात् खपुष्पवद्वा । तस्मिंश्चासति द्रव्ये निराश्रययोर्गुणकर्मणोरभावाद् द्रव्यस्य चाभावादाश्रयिणां द्रव्यत्वादीनामप्यभावः, उक्तं हि **--उत्पन्नमाश्रयमाश्रयन्त्याश्रयिणः** इति । § 1514

एवमेतानि द्विकसंयोगेन द्रव्यस्य गुणेन सह कर्मणा च द्वे, गुणस्य द्रव्येण कर्मणा च सह द्वे, कर्मणो द्रव्येण गुणेन च सह द्वे, इति षट् चक्रकाणि । द्रव्यत्वेन गुणस्य कर्मणश्च द्वे, गुणत्वेन द्रव्यस्य कर्मणश्च द्वे, कर्मत्वेन द्रव्य[स्य] गुणस्य [च] द्वे, इति षट् । एवं द्वादश चक्रकाणि । एवं द्रव्यत्वस्य कर्मणा गुणेन च गुणत्वस्य द्रव्येण कर्मणा च कर्मत्वस्य द्रव्येण गुणेन च षट् चक्रकाणि । द्रव्यस्य गुणत्वेन कर्मत्वेन च, गुणस्य द्रव्यत्वेन कर्मत्वेन च, कर्मणो द्रव्यत्वेन गुणत्वेन च षट्, तान्यपि द्वादश । **एवं द्विकसंयोगेन चतुर्विंशतिरनवस्थाचक्रकाणि** भवन्ति । कस्मात् ? **तथा**

---

२ *] अतो द्रव्यगुणकर्मणां व्यवस्थितानामभावात् न द्रव्येषु द्रव्यज्ञानं गुणेषु गुणज्ञानं कर्मसु कर्मज्ञानम् । इत्याशयो भाति ॥
११ उ] दृश्यतां पृ० ४५५ पं० १८ ॥
१२ द्र] **द्रव्यगुणेन** प्र० ॥
१४ च] **चक्राणि**nayacakra-ms-ya ॥
१५ च] **चक्राणि** प्र० ॥
१७ गु] **गुणद्रव्यत्वेन** प्र० ॥

**कार्यकारणयो**रित्यादि यावद् **गुणस्येत्यादे**रिति हेतुं व्याख्यातमेवोपनयति ।
§ 1515

त्यादि । स्व (Edtext outside numbered paragraph)विषयसर्वगतानि हि तत्त्वानीष्यन्ते तत्समवायस्य सर्वग (Edtext outside numbered paragraph)तैकत्वाभ्यां तान्यधुना सर्वगतानि (Edtext outside numbered paragraph) प्राप्तानि, ततोऽभ्युपगमविरोधो जायत इति शेषपदार्थभाव उच्यते, **अतो द्रव्यगुणकर्मणा**मित्यादि प्राक्तन एव ग्रन्थो यावत् **कर्मसु कर्मज्ञान**मिति । तत्र व्य (Edtext outside numbered paragraph)वस्थितलक्षणानामभावात् इति लक्षणाभावद्वारेण निराकरणम्, इह तु व्यवस्थितानामभावात् इति सह तत्त्वैर्लक्षणैश्च तेषां निराकृतत्वादिति विशेषः आधेयज्ञानभेदनिमित्तनियमनिराकरणद्वारेण (Edtext outside numbered paragraph)चेति । § 1516

आह --**ननु सर्वगतत्वा**दित्यादि । समवायस्य सर्वगतत्वात् स्वतत्त्वेनापि सम्बन्धोऽस्ति, द्रव्यस्य द्रव्यत्वं स्वतत्त्वम्, एवं शेषयोरपि शेषद्वयम् । सर्वेण सह समवायसद्भावात् स्वेनापि तत्त्वेन सम्बन्धात् तद्भावस्तत्त्वं द्रव्यभावो गुणभावः कर्मभावो वा सिध्यतीति । अत्रोच्यते --**नन्वत एव सङ्कर उच्यते परतत्त्वेनापि सम्बन्धादतत्त्वमपीति** । **इति** हेत्वर्थे, यस्मात् परतत्त्वेनापि सम्बन्धस्तस्मात् तद्भावोऽपि अतद्भावोऽपीति सङ्करदोषाविमोक्षः, **अपि**शब्देन त्वदुक्तेनैव समर्थितत्वात् । किञ्चान्यत्, दोषोपचयश्च,

यदपि उक्तं... ... ...तदपि नैव, कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात् । समवायनिमित्तस्य तत्त्वस्य स्ववृत्तिप्रतिलम्भादेव लोकसिद्धिवद् भेदभावात् कारकशक्तित एव तु कुण्डदध्नोः संयोगैकत्वेऽप्याधाराधेयनियमः । यथा

* * *

च स्वविषयेएवं 533/mj

* * *

यदपि उक्तं... ... ...तदपि नैव, कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात् । समवायनिमित्तस्य तत्त्वस्य स्ववृत्तिप्रतिलम्भादेव लोकसिद्धिवद्

---

२० स्येत्या] °त्यादिरितिnayacakra-ms-ya ॥
२० रिति] हेतुव्याख्यानमेवो°nayacakra-ms-vinayacakra-ms-hī ॥
२० व्याख्या] °ख्यानमे° nayacakra-ms-ḍe विना ॥
८ य] यदप्युक्तं यथा कुण्डदध्नोः संयोगैकत्वेऽप्याधाराधेयनियमस्तथा समवायैकत्वेऽपि द्रव्यादीनामाधाराधेयभावनियमः इति तदपि नैव । इत्याशयो भाति । दृश्यतां पृ० ५२४ टि० ३ ॥
१४ य] यदप्युक्तं यथा कुण्डदध्नोः संयोगैकत्वेऽप्याधाराधेयनियमस्तथा समवायैकत्वेऽपि द्रव्यादीनामाधाराधेयभावनियमः इति तदपि नैव । इत्याशयो भाति । दृश्यतां पृ० ५२४ टि० ३ ॥

भेदभावात् कारकशक्तित एव तु कुण्डदध्नोः संयोगैकत्वेऽप्याधाराधेयनियमः । यथा

* * *

च स्वविषये

**यदपीत्यादि** । यदपि परेणोक्तं यथा कुण्डदधिसंयोगे दध्येवाधेयम्, कुण्डमेवाधारः इति नियमस्तथा द्रव्यमेवाधारो गुणकर्माद्येवाधेयम्, द्रव्यगुणकर्माण्येवाधारो द्रव्यत्वगुणत्वकर्मत्वान्येवाधेयानि इति, **तदपि नैव, कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात्,** तत्रापि त्वन्मतेनाधारयोः कुण्डदध्नोराधेययोश्च कुण्डत्वदधित्वयोस्तयोस्तत्त्वयोर्द्रव्यत्वादीनां च तत्त्वानां ये समवायास्तेषामप्येकत्वात् समवायिभेदोपचरितभेदानामाञ्जस्येनैकत्वात् पूर्वोक्तविधिना तदवस्थः सङ्करदोषः । § 1517

यद्यसङ्करेण नियमेन चार्थः वयमेव स्पष्टतरं ब्रूमः, तद्यथा --**समवायनिमित्तस्येत्यादि** । समवायस्य यद् निमित्तं तत्त्वं कुण्डदध्नोः कुण्डत्वं दधित्वं
534/mj च तस्य स्वत एवात्मप्रतिलम्भः, तयोश्च लोकसिद्धिवद्

* * *

त्वमेवात्थ न समानत्वात्  इति तथेहापि समानमुत्तरम्--समवायैकत्वेऽपि कारकशक्तेरेव नियमभेदः ।*… … …कस्मिंश्चिदेव ।

यत्तूच्यते--व्यङ्ग्यव्यञ्जक… …न सङ्करप्रसङ्गः   इति, एतच्च व्यङ्ग्यव्यञ्जक …असङ्करः स्यादेवम् । समवायस्य… …। तथा यदि य एव… …गुणकर्मभावविनिवृत्तिरिति सर्वं सर्वविकल्पं प्रपञ्चनीयं यथास्वार्थम् ।

* * *

भेदः स्ववृत्तिप्रतिलम्भादेव, त्वन्मतेऽप्याकाशकालयोरिव दधिकुण्डयोर्लोकेन
- /ms प्रतिपन्नो भेदो नार्थान्तरात् तथा ततो वयमपि लोकविरुद्धं मा वोचामेति लोकसिद्धिवद् भेदभावात् कारकशक्तित एव तु प्रतिपद्यते भेदसिद्धिं संयोगपरिणामकृतं सदप्यैक्यमनादृत्य तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्य

२४ धित्व] °योस्त° इत्यस्य द्विर्भूतत्वे **°त्वयोस्तत्त्वयो°** इत्यपि पाठः साधुः ॥
२५ वा] **°वायभेदो°**nayacakra-ms-ya ॥
५ *] समवायैकत्वेऽपि कारकशक्तेरेव आधाराधेयनियम इति न द्रव्यादिषु सर्वत्र द्रव्यत्वादि समवैति, किन्तु कस्मिंश्चिदेव इत्याशयो भाति ॥
६ व्य] यत्तूच्यते--व्यङ्ग्यव्यञ्जकत्वभेदाद् द्रव्यद्रव्यत्वादीनां भेदो घटप्रदीपवदिति तदाधाराधेयभेदनियमाद् न सङ्करप्रसङ्गः इत्याशयो भाति । दृश्यतां पृ° ५२४ टि° ३ ॥
६ ए] एतच्च व्यङ्ग्यव्यञ्जकभावे द्रव्यद्रव्यत्वादीनां पृथक् सिद्धे सति स्यात्, न तु सिद्धः, सिद्धे हि तस्मिंस्तदाधाराधेयभेदनियमोऽपि स्यात्, ततश्च असङ्करः स्यादेवम् इत्याशयो भाति ॥
७ स] समवायस्यैकत्वे कुण्डदधिसंयोगवद् आधाराधेयभेदनियमाभावात् तदवस्थ एव सङ्करप्रसङ्गः इत्याशयो भाति ॥
११ त] **तथात्ततो**nayacakra-ms-ya । अत्र **तथाऽन्ततो** इत्यपि पाठः स्यात् ॥
११ व] वयमपि…इति नियममसङ्कीर्णमाचक्ष्महे इत्यन्वयः ॥
१२ द्] **भेदाभावात्** प्र° ॥
१२ प्र] प्रतिपद्य भेदसिद्धिं ? ॥
१२ भेद] **°सिद्धि**nayacakra-ms-ya ॥

आधेयशक्तिर्दध्न इति नियममसङ्कीर्णमाचक्ष्महे । अस्यार्थस्य भावनाग्रन्थो गतार्थो यावदाधाराधेयनियम इति । अवश्यं चैतदेवम्, त्वया समवायमपि कल्पयित्वैतदेव प्रतिपत्तव्यम्; त्वद्वचनप्रामाण्यादेव । **यथा त्वमेवात्थेति** संयोगैकत्वेऽपि कारकशक्तित एव कुण्डदध्नोराधाराधेयनियमो भिन्न इत्युत्तरमात्थ । किं तदुत्तरमिति चेत्, उच्यते --**न, समानत्वादिति**, तथेहापि समानमुत्तरम् --**समवायैकत्वेऽपि कारकशक्तेरेव नियमभेदः** । तद्व्याख्या गतार्था यावत् **कस्मिंश्चिदेवेति** । § 1518

**यत्तूच्यते--व्यङ्ग्यव्यञ्जकेत्यादि** । व्यङ्ग्यव्यञ्जकत्वभेदात् द्रव्यद्रव्यत्वादीनां भेदो घटप्रदीपवदिति परिहारान्तरं गतार्थं यावद् **न सङ्करप्रसङ्ग** इति **वैशेषिकस्य** । आचार्यवचनं तु **एतच्च व्यङ्ग्यव्यञ्जकेत्यादि**, स्यादेतदेवम् यदि दार्ष्टान्तिकस्य द्रव्यद्रव्यत्वादेर्व्यङ्ग्यव्यञ्जकभावः प्रदीपघटदृष्टान्तवत् पृथक् सिद्धः स्यात्, न तु तदात्मभेदनियमः सिद्धः, सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, तदर्थोद्भावनं याव**दसङ्करः स्यादेव**मिति । तस्य हेतोरसिद्धिप्रतिपादनार्थं चाह --**समवायस्ये**त्यादि, उक्तोत्तरमेवैतत्, आधाराधेयभेदनियमाभावस्य तुल्यत्वाद् दृष्टान्तसाधर्म्यं न भजत एतदिति प्राग् विस्तरेण व्याख्यातार्थत्वात् । तदेव स्मारयति --**तथा यदि य एवेत्यादि** यावद् **गुणकर्मभावविनिवृत्तिरिति सर्वं सर्वविकल्पं प्रपञ्चनीय**मिति पूर्वोक्तार्थातिदेशः । - /ms
आ कुतः ? इति चेत्, उच्यते--अस्माद् ग्रन्थावधेः । **यथास्वार्थ**मिति यो यः स्वार्थो यथास्वार्थं द्रव्य-गुण-कर्म-द्रव्यत्व-गुणत्व-कर्मत्वसंयोगाव्यवस्थानचक्रकाण्येव व्याख्येयानि पूर्ववदिति । § 1519

535/mj

यत् पुनरिदमाशङ्कितं समवायैकत्वं पञ्चत्वव्यवहारेण विरुध्यते इति, तदेवमेव । § 1520

यत् पुनरिदं प्रत्युच्यते--न, आश्रयविशेषाद् भाववत्... ...तथा समवायैकत्वेऽपि... ... ...भविष्यति इति, इदं निर्मूलमेव व्यङ्ग्यस्याधारस्य वाऽनियमात् कुतस्तद्व्यङ्ग्यो व्यञ्जको वाधेयोऽर्थः ? कुतो वाश्रयाणां वैचित्र्यम् ? अजलचन्द्रवदेकत्वात् समवायस्य भावस्य च जलचन्द्रेण साधर्म्याभावात् कुतो नानात्वोपचारः ? भावो वा कुतः ? § 1521

एवमेतदुभयमुभयभाक् । सामान्यं भावः प्रकृत्यर्थः, यत् तत् तेन भूयते सा सत्ता, विशेषोऽपि प्रत्ययार्थः सः । § 1522

---

१६ त्व ] तद्वच° प्र° ॥
१६ वा ] °वात्रेति प्र° ॥
१२ व ] यथा भावस्यैकत्वेऽपि जलचन्द्रवदाश्रयविशेषाद् नानात्वोपचारः तथा समवायस्यैकत्वेऽपि व्यङ्ग्यव्यञ्जकभावभेदादाधाराधेयनियमादाश्रयविशेषात् पञ्चत्वव्यवहारो भविष्यति इत्याशयो भाति ॥

यत् पुनरिदमाशङ्कितमित्यादि । **समवायैकत्वं पञ्चत्वव्यवहारेण विरुध्यते इति यदाशङ्कितं त्वया तदेवमेव** ममापि प्रतिभाति विरुध्यत एवेति । § 1523

**यत् पुनरिदं प्रत्युच्यते** तस्याशङ्कितस्योत्तरं **वैशेषिकेण --न, आश्रयविशेषाद् भाववदित्यादि**, द्रव्यादिसद्भावत्रयं दृष्टान्तः, प्रतिदृष्टान्तश्च जलचन्द्रः, **तथा समवायैकत्वेऽ**पीत्यादि दार्ष्टान्तिकं गतार्थं यावद् **भविष्यतीति** । अस्योत्तरमाहाचार्यः **--इदं निर्मूलमेव,** व्यङ्ग्यस्याधारस्य वाऽनियमात् पूर्वोक्तादाश्रय एवासिद्धो व्यञ्जको व्यङ्ग्यो वा त्वदिष्टः, कुतस्तद्व्यङ्ग्यो व्यञ्जको वाधेयोऽर्थः ? **कुतो वाश्रयाणां वैचित्र्यम्,** समवायैकत्वे षड्पदार्थनिवृत्तेः सुभावितत्वात् ? **अजलचन्द्रवद्** व्योमचन्द्रव**देकत्वात् समवायस्य भावस्य च** सत्ताख्यस्य जलचन्द्रेण सह साधर्म्याभावात् **कुतो नानात्वोपचारः,** छायामात्रत्वाच्च जलचन्द्रस्याबहुत्वाद्वा ? **भावो वा कुतः,** भावोऽपि द्रव्यादिव्यतिरिक्तो नास्त्येवैकः तन्मूलत्वाद्वि[वा]दस्य इत्यलमतिविकाशिन्या सङ्कथया । § 1524

एवं स्वभावसत्-सम्बन्धसद्वस्तुभावभेदवादि**वैशे**षिकमतनिराकरणप्रपञ्चेनैतदायातमिति तद् दर्शयति **--एवमेत**दित्यादि उभयमुभयभाक् इत्यस्य
- /ms नयस्य स्वरूपम्, यत् तत् सामान्यं तदपि विधीयते निय- म्यते योऽपि विशेषः सोऽपि विधीयते नियम्यते चेति । तद् व्याचष्टेऽक्षरार्थं प्रदर्शयन् प्रकृतिप्रत्ययार्थाभ्याम् — **सामान्यं भावः प्रकृत्यर्थः,** तद् दर्शयति **--यत् तत् तेन भूयते सा सत्ता, भू सत्तायाम्** पा॰ धा॰ १ इति पाठात् सामान्यम्, तत् किं प्रकृत्यर्थमात्रमेव ? न इत्युच्यते, **विशेषोऽपि प्रत्ययार्थः स** तस्यैव भवितृत्ववाचिप्रत्ययार्थत्वात् स एव प्रकृत्यर्थः प्रत्ययार्थोऽपीत्युक्तः । योऽसौ भवति कर्तृवाचिप्रत्ययार्थः स विशेषः सामान्यमपि भवति सत्ता भावः भवनात्मकत्वात् भवनं सामान्यमन्तरेण तस्याकर्तृत्वादभवितृत्वात् स एव प्रत्ययार्थः प्रकृत्यर्थानतिक्रमेण वृत्त इति । § 1525
536/mj

---

२३ श्च] °श्च । जल°nayacakra-ms-pānayacakra-ms-hī । °श्चाजल° nayacakra-ms-bhā ॥
२५ वा] धानियमात्nayacakra-ms-bhā । धायनियमात् nayacakra-ms-ya ॥
१ स्य] °स्याञ्जल°nayacakra-ms-ya । °स्याजल° ? ॥
२ स्या] °स्य । बहु° nayacakra-ms-pānayacakra-ms-hī । °स्य बहु° nayacakra-ms-ḍe nayacakra-ms-raṃ nayacakra-ms-vi ॥
३ त्वा] °त्वाद्विदस्य प्र॰ । अत्र °त्वाद्वादस्य इत्यपि पाठः स्यात् ॥
३ तिविका] कासिन्या प्र॰ । दृश्यतां पृ॰ १०७ टि॰ ६ ॥
१२ वितृत्व] °त्वावाचि° प्र॰ ॥
१२ या] °यार्थोऽपि त्युक्तःnayacakra-ms-ya । °यार्थोऽपि युक्तः ? ॥

सामान्यं प्रवृत्तिः विधिर्भावः । विशेषोऽपि... ...नियमोऽभावः । एतदुभयं पूर्ववदेकत्वमनापद्यमानं सामान्यं विशेषश्च भवतः । प्रवृत्तौ निवृत्तिः... ...येन... यथा... ...येन हि... ...। यदि [असामान्यं प्रवृत्तिर्द्रव्यमन्वयो धर्मी विधिर्भावः । विशेषोऽपि निवृत्तिः पर्यायो व्यतिरेको धर्मोऽन्यत्वं नियमोऽभावः । इत्याशयो भाति, दृश्यतां पृ॰ ३७१-- १ ॥]स्य... ...खपुष्पवत् ।
§ 1526

एवं द्रव्यक्षेत्र... ... ...सदसत्त्वम् । प्रतिस्वं घटादि मृदादि कारणमपेक्षते निर्विशेषत्वे...इति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः । तद्भावाभावात्मको घट इति § 1527

स्यान्मतम्--विधिविधिनयमतवदेकत्वापत्तिः सामान्यविशेषयोरिष्टा, सैषा त्वदुक्तन्यायेनैवं त्वेकत्वापत्तिरपीति सा मा भूत् इति सर्वविकल्पभावैकत्व-व्युदासेन विशेषलक्षणमनयोः पर्यायादिभिर्विभक्तं वक्तुकाम आह **--सामान्यं प्रवृत्ति**रित्यादि यावद् **विधिर्भाव** इति तथा **विशेषो**ऽपीत्यादि यावद् **नियमोऽभाव** इति द्वावेतौ [भावा]भावौ पर्यायभेदात् । एतदुभयं **पूर्ववद्** विधिविध्यरविकल्पपुरुषादिवादवत् एकमेवेदम् इत्येवंविधं भावमनापद्यमानं सामान्यमपि सामान्यं विशेषश्च भवतः विशेषोऽपि विशेषः सामान्यं च भवत इति । § 1528

तद् दर्शयति **--प्रवृत्तौ निवृत्ति**रित्यादि, उभयमन्योन्याविनाभावि भावो वस्त्वित्यर्थः । भावाभावरूपं भवनं सद् वस्तु, तस्य सतो भावः सत्ता, यत् सता भूयते सततनियमेनेति प्रकृतिप्रत्ययार्थयोरुभयोरुभयं नियमो विधिश्च - /ms
। तावेव दर्शयति **येन** इति प्रत्ययार्थं **यथा** इति प्रकृत्यर्थं च, **येन ही**त्यादि कर्त्रा क्रियायां नियतेन नियतायां भवनमाह । **यदि [अ ?]स्ये**त्यादि अन्य-थानिष्टापादनं यावत् **खपुष्पव**दिति भवननियमेन आत्मलाभो भवत उक्तः,

---

१६ सा] सामान्यं प्रवृत्तिर्द्रव्यमन्वयो धर्मी विधिर्भावः । विशेषोऽपि निवृत्तिः पर्यायो व्यतिरेको धर्मोऽन्यत्वं नियमोऽभावः । इत्याशयो भाति, दृश्यतां पृ॰ ३७१-- १ ॥
१ ए] एवं द्रव्यक्षेत्रकालभावैः घटपटघटान्तरस्वक्षेत्रक्षेत्रान्तरस्वकाल-कालान्तरभावभावान्तरभावाभावाभ्यां सदसत्त्वम् । इत्याशयो भाति ॥
२ त्वे] कण्ठः स्वात्मना भवति न कपालाद्यात्मना कपालानि स्वात्मना भवन्ति न कण्ठाद्यात्मना इति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः । इत्याशयो भाति ॥

४ विधिविधिन] **॰नियमत॰** प्र॰ । विधिविधिनयमतस्वरूपं द्वितीयारे द्रष्टव्यम् ॥
७ त्या] **॰त्यादिर्यावद्** प्र॰ ॥
१४ या] **॰र्थयोरुभयोरुभयो निय-मो**nayacakra-ms-pānayacakra-ms-vinayacakra-
। **॰र्थयोरुभयो नियमो** nayacakra-ms-ḍe nayacakra-ms-raṃ । अत्र **॰र्थयोरुभयोर्नियमो** इत्यपि पाठः स्यात् ॥
१६ निय] **नियं भवन॰**nayacakra-ms-bhā ॥
१६ य] **यदि चेत्यादि ?** ॥

ततश्चावरणेन भवितृनियमेन भवनात्मलाभ इत्येतदुभयमुभयत्र विधिर्नियमश्चेति सामान्येनोक्तम् । विशेष्यापि वक्ष्यति । § 1529

**एवं द्रव्यक्षेत्रे**त्यादि यावत् **सदसत्त्व**मिति । द्रव्यतो घटो भवन्नात्मानुवृत्त्या पटादिव्यावृत्त्या घटान्तरव्यावृत्त्या च भावाभावात्मभ्यां भवति । क्षेत्रतो गृहे घटो न बहिर्न मंनय ? इति स्वक्षेत्रे भवन् परक्षेत्रे क्षेत्रान्तरे चाभवन् भवति । कालतो वर्तमाने काले भवन्नतीतानागतयोः कालान्तरयोरभवन् शिवकस्तूपकादिभिः पूर्वैरुत्तरैश्च कपालादिभिरभवन् शिवकावस्थायामेव वा पिण्डस्तूपकाभ्यां पूर्वोत्तराभ्यामभवन् शिवकत्वेन भवन् भवति इत्युच्यते । अथवा भावतः शिवकादिभिराकारैर्धर्मैर्वर्तमानैर्युरयु ?गपद्भाविभिर्युगपद्भाविभिश्च रूपरसादिभिर्भवन् भावान्तरैरुपयोगादिभिश्चाभवन् भवतीति **सदसत्त्वम्,** एवं सर्वभावानां भावा[-ऽभावा]त्मकत्वम् । § 1530

537/mj

तदभावे न भवति भावाभावभाव एव च भवति । तथा घटपटादिद्रव्यक्षेत्रकालभावभावाभावसत्ताया घटसामस्त्येऽपि न कश्चिद् विशेषः, वस्तुत्वात्, असामस्त्यवत् । यथैव... ...

...गुणावृत्त्यनावृत्तिभेदेषु । विवक्षया वैष विशेष उभयोरपि तत्त्वात् । § 1531

तथा घटस्तावदस्त्येव क्रियागुणव्यपदेशवत्त्वात् पटरथवत्, सर्वसर्वसमवायासत्त्वाद् योग्यस्यैव योग्येषु समवायात्, यथा रूपे घटः, तथा रसादिष्वपि भावनीयं § 1532

अथवा प्रतिपत्तिववस्तुप्रवृत्तेः वस्तुनि वस्तुनि वृत्तिः ? । **प्रतिस्वं घटादि मृदादि कारणमपेक्षते,** आदिग्रहणात् पटादि तन्त्वाद्यपेक्षते, **निर्विशेषत्व** इति कारणान्तरानपेक्षत्वात् स्वकारणापेक्षत्वाच्च भावाभावत्वेनाविशेषः, कण्ठः स्वेनात्मना भवति कपालाद्यात्मना न भवति, कपालानि स्वात्मना भवन्ति न कण्ठाद्यात्मनेति भावाभावाद्यात्मना परस्परतश्चासत्सु सत्सु च भेदं भेदं प्रति वृत्तत्वात् **इति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः** । तस्यार्थस्य भावना

- /ms

१८ त] ततश्चाकरणेन ? ॥

२० स] **ससत्त्व॰** प्र॰ ॥

२२ हिर्न] **मंतय** इतिnayacakra-ms-vi । **संनय** इति nayacakra-ms-raṃ । अत्र **मण्डपे** इति पाठः स्यात्, **मध्ये** इति वा भवेत् ? ॥

२५ पिण्ड] **पिण्डकस्तूपकाभ्यां**nayacakra-ms-bhā ॥

१ मा] **॰मानैर्युगपद्भाविभिर्युगपद्भाविभिश्च** प्र॰ । अत्र **॰मानैर्युगपद्भाविभिश्च** इत्यपि पाठः स्यात् ॥

१२ प्र] **प्रतिपत्तिववस्तुप्रवृत्तेः वस्तुनिवस्तुनिवृत्तिः** प्र॰ । अशुद्धोऽयं खण्डितो वा पाठ इति भाति । प्रतिवस्तु प्रवृत्तेः वस्तुनि वस्तुनि वृत्तिः ? प्रतिपत्तिवद् वस्तुप्रवृत्तेः वस्तुनिवृत्तिः ? ॥

१४ णा] **॰णांतपेक्ष॰**nayacakra-ms-bhā ॥

१७ वृ] वृत्तत्वात् प्रतिस्वावयव॰ ? ॥

**--तद्भावाभावात्मको घट इति तदभावे न भवति** भावाभावाभावे न भवति **भावाभावभाव एव च भवति** तद्भाव एव भवतीत्यर्थः । § 1533

एतस्यैवार्थस्य भावनार्थं साधनमाह **--तथा घटपटादिद्रव्यक्षेत्रकाल-भावभावाभावसत्ताया घटसामस्त्येऽपि न कश्चिद् विशेष** इति प्रतिज्ञा । **घटपटघटान्तरे**त्यादिदण्डकोक्तार्थचातुर्विध्यस्य सदसत्त्वमसामस्त्येन भावितम्, सामस्त्येऽपि तथेति साध्यार्थः । **वस्तुत्वा**दिति हेतुः । **असामस्त्यव**दिति दृष्टान्तः । **यथैवे**त्यादि चातुर्विध्येन दृष्टान्तवर्णना गतार्था यावद् **गुणावृत्त्य-नावृत्तिभेदेष्वि**ति । द्विगुणत्रिगुणकृष्णशुक्लत्वादिरावृत्तिः, शुक्लः कृष्ण इत्य-नावृत्तिः । तत्रैकगुणसत्त्वं द्विगुणासत्त्वम्, द्विगुणसत्त्वमेकगुणासत्त्वम्, शुक्लसत्त्वं कृष्णासत्त्वम्, कृष्णसत्त्वं शुक्लासत्त्वमित्यादि । § 1534

भावाभावात्मकत्वाविशेषे सामस्त्यासामस्त्यविशेषः क इति चेत्, उच्यते **--विवक्षया वैष विशेष उभयोरपि** सामस्त्यासामस्त्ययोः । कस्मात् ? **तत्त्वात्,** तद्भावस्तत्त्वं भावाभावत्वम्, तस्मात् **तत्त्वात्** भावाभावत्वाद् विवक्षाविशेषादेवैष **विशेषः** समस्तो घटः, असमस्तः कण्ठकपालादिः इत्यादि प्रागुक्तं चातुरात्म्यम्, सकलादेशवशाद् विकलादेशवशाच्च प्रतिपादनोपायत्वात् एवं भावाभावात्मकत्वं सर्वस्य सकलादेशेन भावितम्, विकलादेशेन प्रत्येकं भावयिष्यामः । § 1535

तत्र भावात्मकत्वं तावत् **--तथा घटस्तावदस्त्येव क्रियागुणव्यपदेशवत्त्वात्,** उदकाद्याहरणं क्रिया, गुणो रूपादि, व्यपदेशो लिङ्गं हेतुरपदेशः - /ms
लिङ्गम् इत्यादिशब्दो वा । **पटरथव**दिति भावात्मकत्वे दृष्टान्तः खपुष्पवैलक्षण्येन । वैधर्म्येण **सर्वसर्वसमवायासत्त्वा**दिति भावनाहेतुः, न हि सर्वं सर्वत्र समवैति तन्तुषु घटः कपालेषु वा पटः, तस्मात् सर्वसर्वसमवायासत्त्वाद् **योग्यस्यैव योग्येषु समवायात्** * 538/mj

* * *

प्रत्येकं सत्त्वात् । अथ पुनरेवं न स्यात् ततोऽसावसन्नेवापद्येत सिकतास्विव तैलम् । न च तथा स्थितौ घटो न भवति, रूपरसयोर्घटभावात् ।

ननु घट... ... ...पृथिव्यपि मृदादिः, इतरथा निर्मूलत्वात् । तथा च एकभवनात्मकत्वात् घटघटस्वात्मवत् तद्विशेष एव विशेषो नाभावः

---

१९ भा] भावाभावाभाव एवnayacakra-ms-ya । भावाभाव एव nayacakra-ms-bhā ॥
२२ घ] दृश्यतां पृ० ५३६ टि० २ ॥
२३ अ] **असामान्यवदिति** प्र० ॥
२५ शु] **शुक्ल कृष्ण** प्र० ॥
२ या] **चैष ?** ॥
३ त] **तस्मात्तत्त्वात्** प्र० ॥
९ त्त्वा] **०त्वाद्युदका०** प्र० ॥
९ व्य] हेतुरपदेशो लिङ्गं निमित्तं प्रमाणं कारणमित्यनर्थान्तरम् ।**वै० सू०** ९ । २ । ४ । दृश्यतां पृ० ४८९ टि० ६ ॥
१३ *] **०णानपेक्ष०** प्र० ॥
१६ न] ननु घटविशेषा रूपादयो यथा भावविशेषः तथा पृथिव्यपि मृदादिः इतरथा निर्मूलत्वात् । इत्याशयो भाति ॥
१६ इ] दृश्यतां पृ० ५३९ पं० १७ ॥

पृथिवीसामान्ये सत्येव ऊर्द्धत्वविस्तृतत्वादिः ।

* * *

अस्त्येव इति वर्तते, **यथा रूपे घटः** गुणसमुदायवाददर्शनेन, रूपं वा इति गुणमात्रवादे तदाधारो वा इत्यवयविवादे यथा रूपे घटोऽस्त्येव इत्यादि तथा रसादिष्वपि भावनीयमेकैकस्मिन् वृत्तत्वात् । § 1536

**अथ पुनरेवं न स्यात्** पटरथादिसाधर्म्येण खपुष्पवैलक्षण्येन वैकैकस्मिंस्तिलेष्विव तैलं **ततोऽसावसन्नेवापद्येत,** किमिव ? **सिकतास्विव** अविद्यमानं यथा सिकतासु प्रत्येकं समुदायेऽपि **तैलं** नास्त्येव तथा घटो रूपादावेकैकस्मिन्नसत्त्वादसन्नापद्येत, अनिष्टं चैतत् । एवं सामस्त्येन घटाद्यस्तित्वं रूपादीनां प्रत्येकं सत्त्वात्, इतरथा रूपवद् रसोऽपि रूपं स्यात् स्वरूपासत्त्वात्, न च रूपवद् रसोऽपि रूपं भवति रूपं वा रसवद् रसो भवति दृष्टविरुद्धत्वात् । यस्माद् रूपमेव रूपं रस एव रसो भवति नेतरभावमापद्यते तस्माद्रूपादयः सन्ति । § 1537

एवं तर्हि रूपादिमात्रत्वाद् न घट इति स्यादाशङ्का, सा मा भूत्, **न च तथा स्थितौ घटो न भवति** । यथा परस्परव्यावृत्तात्मत्वे सत्यपि रूपादयो
- /ms भवन्तीति स्थितिः, **तथा स्थितौ** एवं स्थिते तथा घटोऽपि भवति, न न भवति, **रूपरसयोर्घटभावात्** तयोरितरेतराभूतयोरेव घटत्वात् तयोराधारभूतयोर्वा घटत्वात् । तदुपनयति --**असामस्त्येन वा भावाभावात्मक एव घट** इति । § 1538

**ननु घटेत्यादि वैशेषिको** विशेषं भावात्मकमेव वाञ्छन् व्यावृत्त्यात्मकं विशेषं निराकुर्वन्नाह । यथा रूपादिष्वाधारेषु घटो भवति रूपादय एव वा सिद्धान्तान्तरदर्शनेन घटो न निर्मूलस्तथा **पृथिव्यपि मृदादिः** मृदश्म-सिकता-लोष्ट-वज्र-वृक्ष-गुल्म-लता-ऽवतान-वीरुदादिषु तदात्मिका, तस्या एव ते विशेषा रूपादय इव घटस्य नाभावो विशेषः, **इतरथा निर्मूलत्वाद**भावविशेषत्वे घटस्य रूपादीनां चासत्त्वमापन्नं खपुष्पवत्, न च तदिष्टम् । एवं न्यायाद् रूपादयो मृदादयश्च घटस्य पृथिव्याश्च विशेषो भाव इत्युक्तम् । **तथा चे**त्यादि भावविशेषत्वभावनाग्रन्थो यावद् **विस्तृतत्वादिः** । **एकभवनात्मकत्वा**दिति हेतुः एकमेव भवनमेकस्यैव वा भवनमात्माऽस्य इति विग्रहः, यदेकभवनात्मकं तद् नाभावविशेषः । दृष्टान्तः — **घटघटस्वात्मवत्,** यथा
539/mj घट एव घटस्वात्मा, नान्यत् खपुष्पाद्यसत् । स्यान्मतम्--अविशेषस्तर्हि प्राप्त

१८ पृथिवीसा] तथा च रूपादयो मृदादयश्च घटस्य पृथिव्याश्च भावविशेष एव एकभवनात्मकत्वाद् घटघटस्वात्मवत् । न चैवमविशेषः, तद्विशेष एव पृथिवीसामान्ये सत्येव उर्द्धत्वविस्तृतत्वादिः एतादृशमपि मूलमत्र स्यात् ॥
२६ घ] घटादिस्तित्वंnayacakra-ms-bhā ॥
३ स्या] **स्यादाकाशं सा मा** प्र॰ ॥
५ स्थि] ॰स्थितिवेवंस्थितेnayacakra-ms-ya ॥
७ वा] वा भावात्मक एवnayacakra-ms-bhā ॥
१० य] **यथा स्यादिष्टावारेषु** प्र॰ ॥
१२ ऽव] अवतन्वन्तीत्यवताना नाम विटपाः केतकीबीजपूरादयः । इति प्रशस्तपादभाष्यन्यायकन्दल्यां पृथिवीनिरूपणे ॥

* * *

नैकभवनात्मकत्वं पृथिवीभूतेरपि, तस्या अपि भावाभावात्मकत्वात् । ननु पृथिव्यपि उदकादि न भवति ।

न, उक्तोपन्यासवद् द्रव्यम् इति भवनात् । ननु द्रव्यमपि गुणः इति न भवति ।

न, सत् इति भवनात् । यदि सत् इत्येव भवति केन विशेषहेतुना सदेव सर्वम् इति भवति, न द्रव्यमेव इति ? यतस्तु... ... ...यथा तन्तुषु पटः ।

यद्येवम्, तर्हि भवति इत्युक्तेऽपि न भवति नार्थः इत्येवोक्तं भवति

* * *

एकभवनात्मकत्वाद् मृदादिरूपादीनां घटघटस्वात्मवत्, अनिष्टं चैतदिति । अत्रोच्यते --**न चैवमविशेषः**, घटस्वात्मन एव देशकालरूपादिविशेषवदात्मन्येव भावविशेषदर्शनात् । अत आह --**तद्विशेष एव विशेषो नाभावः** । कोऽसौ पृथिव्यादिविशेष इति चेत्, उच्यते --**पृथिवीसामान्ये सत्येव ऊर्द्ध्वत्वविस्तृतत्वादि**विशेषो नाभावः, तथा घटोऽपि मृदेकभवनात्मकाकारविशेषो भाव एव न पटाद्यभाव इति । § 1539 - /ms

अत्राचार्य आह--त्वदभिमतं **नैक**भवनात्मकत्वं पृथिवीभूतेरपि, कुतो घटघटस्वात्मनः ? कस्मात् **तस्या अपि पृथिवीभूतेः** भूमिभवनस्य **भावाभावात्मकत्वात्** । तन्निदर्शयति --**नन्वि**त्यादि, पृथिवीभवनमुदकाग्न्याद्यभवनम्, एतदेवास्य मूलमभावविशेषभवनम्, तन्मूलत्वात् किमित्यस्यासत्त्वापत्तिः ? एवमभावविशेषरहितभावविशेषसिद्धौ मां प्रति न किञ्चिद् निदर्शनमस्तीत्यभिप्रायः । § 1540

पर आह --**न, उक्तोपन्यासवद् द्रव्यम् इति भवनात्**, पृथिवी द्रव्यभवनाविनाभावेनैव भवति, पृथिव्युदकादि पृथिव्युदकादिषु वा द्रव्यम्, इतरथा निर्मूलत्वादित्यादिः स एव ग्रन्थो यथायोगं वाच्यः । अत्रोत्तरम् --**ननु द्रव्यमपि गुणः इति न भवती**त्यभावाविनाभाविभवनवचनम् । § 1541

**न, सत् इति भवना**दिति सत्त्वभवनव्याप्त्या भावस्यैव विशेष इति पूर्ववत् । अभाववाद्याह — **यदि स**दित्यादि, अनिष्टापादनमुखेनासद्वादसमर्थनमिदम् । **यदि सत् इत्येव भवति** सत्त्वाविशेषाद् द्रव्यगुणकर्मणामव्यतिरेकात् पर्यायमात्रत्वे **केन विशेषहेतुना सदेव सर्वम् इति भवति, न द्रव्यमेव इति ?** दृष्टं चेदम्, द्रव्यमेव न भवति, गुणकर्मणोरपि सद्भावात् । गुणकर्माभावाद् द्रव्यं सदिति भवति, गुणकर्मणी च तदभावात् सती

२९ ए] एवभवना॰ प्र॰ ॥
३१ न्ये] ॰न्येन भाव॰ प्र॰ ॥
२ नात्म] ॰त्मककाकार॰ प्र॰ । ॰त्मक आकार॰ ? ॥
८ सिद्धौ] मा प्र॰ ॥
१२ इ] दृश्यतां पृ॰ ५३८ पं॰ ३ ॥
१५ द्वा] ॰द्वासमर्थ॰nayacakra-ms-bhā ॥
१८ दृ] दृष्टंत चेदंnayacakra-ms-ya ॥

भवतः । न च द्रव्यादिव्यतिरेकेण सद् नाम किञ्चिदस्ति इत्युक्तत्वाद् दृष्टविरुद्धमुच्यते त्वयेति । अत्र वयं ब्रूमः --**यतस्त्वि**त्यादि चटकमर्कटिकया अभावाविनाभाविभावप्रतिपादनं **यथा तन्तुषु पट** इति गतार्थम् । § 1542

एवं तावद् भावैकान्तपक्षव्यावर्तनद्वारेणाभावसहितो भाव उक्तः, अतः परमभावैकान्तपक्षव्यावर्तन- द्वारेण भावसहित एवाभाव इत्येतत् प्रतिपाद- - /ms
यिष्यते --**यद्येव**मित्यादि अभावैकान्तवादिनं भावैकान्तवादी * 540/mj

* * *

परितो भवनाभावात् खपुष्पवत् । ननु परितः पटादावभवन्नेव कटः सिध्यति । ननु परितोवचनेन स्वात्मनोऽप्यभवनमुक्तं भवति । तथा... ...असत्त्वं पक्षधर्मोऽनर्थत्वैकान्ते, पटः कटादिर्न भवति नापि रूपादिः ।

ननु परितोऽप्यभवनमेव साधयति भावमपि । कटोऽपि कट इति भवन्नेव घटपटौ न भवति ।

न, गुणः इत्यभवनात् । ननु गुणोऽपि गुणः इति भवन्नेव कटपटौ न भवति ।

न, द्रव्यम् इत्यभवनात् । यदि न भवत्येव... ...घट इति भवति ।

नन्वेवम्... ... ...परस्परावबद्धनौद्वयवत् । न, व्यवस्थितोपकारिस्वरूपत्वात्,

* * *

उपालभते, यदि घटो भवति इत्युक्तेऽप्यभाव एवोक्तो भवति पटो न भवति इति तर्हि भवति इत्युक्तेऽपि न भवति नार्थः इत्येवोक्तं भवतीति प्राप्तम् । साधनमप्यत्र **परितो भवनाभावात् खपुष्पवदि**ति । स्यान्मतम् --**ननु परितः पटादावभवन्नेव कटः सिध्यति**, तस्मादनैकान्तिक इति चेत्, न, विपक्षाभावात्, **ननु परितोवचनेने**त्यादि, परितोवचनं सर्वत्रार्थम्, तेन स्वात्मनोऽप्यभवनमुक्तं भवति, तस्माद् नानैकान्तिकता । **तथे**त्यादिरस्य न्यायस्य प्राप्तिप्रदर्शनार्थो दण्डको याव**दसत्त्वं पक्षधर्मोऽनर्थत्वैकान्त** इति प्राग्व्याख्यातोऽर्थः कण्ठः कपाले नास्तीत्यादि, तस्य निदर्शनम् **पटः कटादिर्न भवति नापि रूपादि**रिति, अनिष्टं चैतत् । § 1543

---

२१ च]
चटमर्क॰nayacakra-ms-bhā ॥
२४ द्वारेण] ॰णा प्र॰ ॥
२५ *]
भावात्मकत्वात्nayacakra-ms-bhā ॥
५ न] नन्वेवं पृथिव्यादीनां
परस्परावबद्धत्वेऽव्यवस्थितस्वरूपत्वादनवस्था
स्यात् परस्परावबद्धनौद्वयवत् इत्याशयो
भाति ॥
९ इ]
nayacakra-ms-raṃnayacakra-ms-hī
विनान्यत्र इति न तर्हि
nayacakra-ms-pā
nayacakra-ms-ḍe
nayacakra-ms-vi । इते न तर्हि
nayacakra-ms-bhā ॥
१४ द] ॰दसत्वं प्र॰ ॥
१५ प्राग्व्याख्या] ॰ख्यातोर्थः
nayacakra-ms-ya । दण्डको...
...प्राग्व्याख्यातार्थः ? ॥
१५ त] तस्या प्र॰ ॥

अत्र भावाभाववादी उत्तरमाह --**ननु परितोऽप्यभवनमेव** त्वदुक्तं **साधयति अस्मदिष्टं भावमपि,** तद्यथा --**कटोऽपि कट इति भवन्नेव घटपटौ न भवति,** घटत्वपटत्वाद्यभावः कटस्य कटात्मभवनाविनाभावीति भावभवनाद् न मुच्यते । इतर आह--भवन् **न, गुण इत्यभवनात्,** अत्रापि गुणाभावानुविद्ध एव कटभावः गुणत्वेनाभवनात् । **ननु गुणोऽपीत्यादि** गुण इति विधिना भवन्नेव कट इति न भवति विशेषेण नियमेन व्यावृत्त्येति ।

§ 1544

- /ms इतर आह --**न, द्रव्यम् इत्यभवनात्,** अत्रापि द्रव्याभावानुविद्धस्त्वदभिमतो गुणभाव इति । अत्रोच्यते --**यदि न भवत्येवेत्यादि** चटकमर्कटिकया द्रव्यगुणयोर्भावाभावत्वमापाद्य कटादेर्द्रव्यविशेषस्यापादयति गतप्रत्यागतन्यायेन, ततो घटस्यापि यावद् **घट इति भवतीति** । एवमेकान्तभावाभाववादिनोः परस्परकृतचोद्यद्वयपरिहारः । एवमेव भावाभाववादिनं प्रत्यपि तद्विपर्ययेणेतरभावनया एकान्तवादिनां विध्यादिनयानां मतेषु परिहारः कार्यः । अथवा तच्चोद्यस्यात्रावकाश एव नास्ति, तेनापि उभयोभयनयेन सर्वैकान्तवादिनां सुनिवर्तितत्वात् सकलविकलादेशाभ्यां भावाभावत्वसिद्धेरिति ।

§ 1545

**नन्वेव**मित्यादि इदमप्यन्यच्चोद्यं विकलादेशपक्षे उभयोभयवादिनं प्रत्यनिष्टापादनं साधनेन गतार्थं 541/mj

* * *

धृत्यादिवृत्तजगदवस्थावत् । पृथिव्यादीनामनित्यत्वेऽपि अर्थभवनाविच्छेदाद् व्यवस्थितोपकारित्वं सिद्धमनवस्थानाभावश्च स्वत्वपरत्वाभ्यां तथा भावाभावयोः ।

यदि तु भावाभावयोर्न परस्परावबद्धत्वं ततः पटस्याभावे घटभावाभावः भाव एव अभावतुल्यत्वात्, पटवत् । यदि वा... ... ...।

ननु तस्य साक्षादेवाभवनमुभयतः । नन्वत एवेदम्... ...द्रव्यादित्वेन च । यदि त्वसौ पटः पटत्वद्रव्यत्वाभ्यां न भवेत्, न पटो भवेत्, पटत्वद्रव्यत्वाभ्याम-

* * *

यावत् **परस्परावबद्धनोद्वयव**दिति पूर्वपक्षः । अत्रोच्यते--तद् **न, व्यवस्थितोपकारिस्वरूपत्वात् धृत्यादिवृत्तजगदवस्थाव**दिति साधनेनानवस्थादोषपरिहारः । नित्यत्वे पृथिव्यादीनां व्यवस्थितत्वं परस्परोपकारित्वं च धृतिसङ्ग्रहपक्तिव्यूहावकाशदानक्रियाभिः सिद्धम्, ततोऽनवस्था नैवास्तीत्यत्र का चि-

---

१७ भा]
भाववादीnayacakra-ms-bhā ॥
२० भ] भवन् गुण प्र॰ । तन्न, गुण ? ॥
२५ च]
चकटमर्क॰nayacakra-ms-bhā ॥
२८ वा] ॰वादिनो प्र॰ ॥

२ त] **तश्चोद्यस्य** प्र॰ ॥
३ सुनिव] ॰**वर्तित्वात्** प्र॰ ॥
१६ राव] ॰**वद्धनोद्वय**॰ प्र॰ । दृश्यतां पृ॰ ३४ टि॰ ५ ॥
१७ नेना] ॰**नावस्था**॰ प्र॰ ॥

न्ता ? किन्तु **अनित्यत्वेऽप्यर्थभवनाविच्छेदात्** सततभवनस्याविच्छेदाद् भावे व्यवस्थितोपकारित्वस्य धृत्या भूमिरितरेषामात्मनश्चोपकुरुते जलं सङ्ग्रहेण अग्निः पक्त्या वायुर्व्यूहेन सर्वेषामवकाशदानादाकाशमित्यवस्थितोपकारिस्वरूपत्वं सिद्धमनवस्थानाभावश्च, अक्षरार्थो भाष्ये गमितः, **स्वत्वपरत्वाभ्या**मिति स्वरूपसिद्धौ पररूपसिद्धौ च तेषां परस्परावबद्धत्वे सत्यप्यनवस्था नास्ति, **तथा भावाभावयो**रिति, योऽसौ भवति घटः स पटो न भवति, यदसौ पटो भवति तद् घटो न भवति, घटो भवन्नेव पटो न भवति, पटो भवन्नेव घटो न भवति, तथा भवति न भवति चेत्यपि ज्ञेयम्, परस्परावबद्धव्यवस्थितोपकारिस्वरूपत्वाद् नानवस्थेति । § 1546

**यदि त्वि**त्यादि परस्परावबद्धभावाभावत्वाभावे द्वयोरप्येकान्तपक्षयोर्दोषाभिधानम् । पटस्याभावे घटभावाभावस्त्वदिष्टविघात्यापद्यते, कोऽसौ ? भाव एव, कस्मात् ? **अभावतुल्यत्वात् पटव**दित्यभावैकान्तपक्षे दोषः । भावैकान्तपक्षेऽपि **यदि वे**त्यादि घटपटादिसङ्कीर्णता दोषः । § 1547

एवमन्तरितद्रव्यत्वसत्त्वादिगुणत्वादिसामान्यविशेषाभ्यां भावाभावात्मकता, नान्तरिताभ्यामेव, किं तर्हि ? **ननु तस्य साक्षादेवाभवनमुभयतः**, सामान्यतो द्रव्यत्वेन स्वेन विशेषतोऽन्यद्रव्यत्वेन पटगतेन गुणत्वेन च घटस्याभवनात्, तथा तद्विपर्ययेण पटस्य, पटघटगतयोश्च द्रव्यत्वयोर्भेदात् तद्भेदवत् तद्व्यतिरिक्तद्रव्यत्वस्याभावात् । **नन्वत एवेद**मित्यादिना भावयति यावद् **द्रव्यादित्वेन चे**ति । घटो गुणत्वेन पटद्रव्यादित्वेन च साक्षान्न भवति घटद्रव्यत्वेन भवति, पटः पटद्रव्यत्वेन साक्षाद् भवति गुणत्वेन घटद्रव्यत्वेन च साक्षान्न भवतीति भावाभावात्मकत्वमेवानयोः । § 1548

**यदि त्वसा**वित्यादि अनिष्टापादनसाधनमभ्युपगमे, यदि पटः पटत्वद्रव्य-
542/mj त्वाभ्यां न भवेत्, न पटो

* * *

भवनात्, घटवद् गुणवद्वा । यतस्तु... ...तत एवेतराभ्यां भवति नीलोत्पलादिवत् । अतस्त्वन्यथा... ...खपुष्पवत् ।

कालतोऽपि च... ... ...। न यथा लोकवादः--पलालमग्निर्दहतीति । यदि तद् दह्यते एव,... ...।... ...भस्मीकरणानुपपत्तेः पूर्ववत् । देशः पलालस्य दह्यते तथापि... ...देशस्यापि भस्मीकरणानुपपत्तेः । अथाकाश-

---

२१ धृ] वृत्त्या प्र° ॥
२२ दानादाकाश] अत्र **°मिति व्यवस्थि°** इत्यपि पाठः स्यात् ॥
२३ स्व] **स्वत्वरत्वाभ्या°** प्र° ॥
२६ प] **पटो न भवति** प्र° ॥
३० घ] **घटभावस्त्व°**nayacakra-ms-bhā ॥
३० को] अत्र नयचक्रवृत्तौ कोऽसौ भाव एव इति पाठस्य कोऽसौ भाव एव ? न कश्चिदपि भावः इत्यभिप्रायश्चेद् विवक्षितस्तदा मूलेऽपि पटस्याभावे घटभावाभावः, अभावतुल्यत्वात्, पटवत् । इति पाठोऽवधेयः ॥
२ य] **यदि**nayacakra-ms-bhā प्रतौ नास्ति ॥
५ घ] **घटस्य भवनात्** प्र° ॥
१५ प] दृश्यतां पृ° ५४३ टि° ४ ॥
१६ देशः] दृश्यतां पृ° ५४३ टि° ४ ॥

व्यतिरेक... ... ...तदपि न... ... ...। तथा घटो न भिद्यते क्वचित् ।

* * *

- /ms भवेत् पटत्वद्रव्यत्वाभ्याममभवनात् घटवद् गुणवद्वा, घटो गुणो वा नैव न भवेत् तत एव तद्वत् । एवं घटगुणयोरपि साधनाभ्याममनिष्टमापाद्यम् । एतस्यार्थस्य भावना --**यतस्त्वि**त्यादि यावत् **तत एवेतराभ्यां भवती**ति । अवश्यं चैतदेवम्, अन्वयव्यतिरेकाभ्यामर्थस्यावधारणे प्रयोगस्य साफल्यात् । तद्यथा **नीलोत्पलादिवत्,** सिद्धे सति आरम्भो नियमार्थः, यथा रक्तनीलत्वयोः सिद्धयोरन्यतराभावेनान्यतरभावेन चोत्पलं नियम्यते रक्तमेव, नीलमेव वा इति तथा घटः पट इति वेति । तदर्थभावना **भाष्ये**ऽन्यतराभावाभावेऽन्यतरभावाभावे च सतोऽप्यभावप्रसङ्गापादनद्वारेण लोकप्रसिद्ध्यनुपातेन कृता । एतस्य न्यायस्यानभ्युपगमे द्वयोरप्यभावः, तद्दर्शयति --**अतस्त्वन्यथे**त्यादि अनिष्टापादनसाधनं गतार्थं यावत् **खपुष्पवदि**ति । एवं द्रव्यतो भावाभावात्मकता व्याख्याता । § 1549

**कालतोऽपि चे**त्यादि, विनाशोत्पादयोरेककालत्वात् पिण्डशिवकादीनां पिण्डो न भूतः शिवको भूत इत्येकमेव भूतमभूतं च कालभेदात् । अतीतानागताभ्यां वृत्तिभ्यामसंसृष्टतत्त्वा शिवकादिता वर्तमानैककाला । **न यथा लोकवाद** इति अविज्ञातार्थतत्त्वो लोको मिथ्या ब्रूत इति वैधर्म्योदाहरणं **पलालमग्निर्दहती**ति, एतत् स्ववचनानुमानप्रत्यक्षविरुद्धं वचनमिति । तद् भावयति --**यदि तद् दह्यत एवे**त्यादि यावद् **भस्मीकरणानुपपत्तेः पूर्ववत्** पलालकालवत्, कालस्य भिन्नत्वाभ्युपगमात् । परः परिहारं मन्येत --**देशः पलालस्य दह्यते** स च पलालमेवेति । तस्योत्तरम् --**तथापी**त्यादि गतार्थं यावद् **देशस्यापि भस्मीकरणानुपपत्ते**रिति । **अथाकाशव्यतिरेकेत्या[दि],** स्यान्मतम्--द्रव्यार्थिकनयमतेऽभेदात् - /ms पलालादिमूर्तद्रव्येष्वेव सम्भवादाकाशाद्यमूर्तिद्रव्यव्यतिरेकेण पलालमेव दह्यते नाकाशादीति । **तदपि ने**त्यादि, अभूततद्भावेऽर्थे च्विप्रत्ययः, तदन्तेन भस्मीकरणशब्देनान्यो दाहो वर्तते अन्यच्च पलालमिति भिन्नार्थत्वादपरिहारः

---

१८ घ] दृश्यतां पृ° ५४३ टि° ४ ॥
२१ वा] नैव भवेत्nayacakra-ms-ya ॥
२९ अ] अन्यस्त्वन्य°nayacakra-ms-bhā ॥
६ प] दृश्यतां पृ° ५४३ टि° ४ ॥
७ य] दृश्यतां पृ° ५४३ टि° ४ ॥
९ म] मनोंतदेशःnayacakra-ms-bhā । मनोंतर्देशः nayacakra-ms-pā nayacakra-ms-ḍe । मानांतर्देशः nayacakra-ms-raṃ । मानोंतर्देशः nayacakra-ms-vi ॥
९ देशः] दृश्यतां पृ° ५४३ टि° ४ ॥
१० देश] दृश्यतां पृ° ५४३ टि° ४ ॥
११ म] °मतोभेदात् प्र° ॥
१३ च्वि] च्विप्प्र°nayacakra-ms-bhā । कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः पा° ५ । ४ । ५० अभूततद्भावे इति वक्तव्यम् । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद् विकारशब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिर्योगे । nayacakra-ms-pā सिद्धान्तकउ ॥

। अथाप्येकत्वं पलालस्येष्यते द्रव्यार्थभेदात् ततस्तस्य दाह्यता नास्ति भस्मत्वाभूतेरिति । § 1550

**तथा घट** इत्यादि कालत एव भावाभावात्मकत्वविपर्ययेऽन्यदुदाहरणं पूर्ववद् गतार्थं [स]प्रसङ्गम् । भिदेः कपालविषयत्वाद् घटस्य ऊर्द्धताद्याकारत्वात् कालभेदादनुपपत्तिः । प्रस्तुतघटोदाह 543/mj

* * *

क्षेत्रतः शून्यं न प्रविश्यते... ... ...।

---

१८ ता]

०र्थप्रसंगम्nayacakra-ms-raṃ ॥

२१ क्षेत्र] नारकाद्यायुःप्रथमसंवेदनकाले एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन । यत उक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । न शून्यान्निर्गमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति अभयदेवसूरिकृतायां भगवतीसूत्रवृत्तौ ४ । १० । १७४ । ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते । एतच्च ऋजुसूत्रनयदर्शनम् । तथा च नयविद्भिः ऋजुसूत्रनयनिरूपणं कुर्वद्भिरिदमुक्तम्--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नाशून्ये न शून्याद् ? निष्क्रमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति मलयगिरिकृतायां प्रज्ञापनासूत्रवृत्तौ १७ । ३ । **ऋजु** वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात्, तदेव सूत्रयति परिच्छिनत्ति नातीतानागतम्, तस्यासत्त्वेन कुटिलत्वात् । तस्य **वचनं** पदं वाक्यं वा, तस्य **विच्छेदो**ऽन्तः सीमेति यावत् । ... ... ...। तस्य च पूर्वापरपर्यायैर्विविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः--पलालं न दहत्यग्निर्दह्यते न
n544/mj गिरिः क्वचित् । नासंयतः प्रव्रजति भव्यजीवो न सिध्यति ॥ पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । इति अभयदेवसूरिविरचितायां सम्मतिवृत्तौ १ । ५ । (?")तत्र ऋजुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रम् ऋजु सूत्रयति अन्यतो व्यवच्छिनत्ति सूत्रपातवत् । न ह्यतीतमनागतं वास्ति । यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात् न च पुत्रार्थिनी योषित् औपयाजिकादि विशिष्टदेवतासन्निधौ विदध्यात् । तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नापि अतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तित्येवमादयो न यथार्थाः । कथम् ? यतो नामशब्देन अविकृतरूपस्य द्रव्यस्याभिधानात् क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरैकाधिकरण्यमस्ति विरुद्धत्वात् । अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन् नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति । उक्तार्थसंवादी च श्लोको गीतः पुराविदा--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते । अत्रवाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नामशब्दः, तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम् । अन्यदा तु

## भावतोऽसंयतो न प्रव्रजति । एवमेव भव्यो न सिध्यति ।

---

पलालभावेन तस्याभाव एव, तद्भावेनाभावात्, पटवत् । तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यते इत्यनेन शब्देनोच्येत, क्रियाशब्दस्य विकाराभिधायित्वात् ? न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते । यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत् । विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात् । तस्माद् यावत् तत् पलालं तावन्न दह्यते यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति । एवं घटाद्युदाहरणभावना कार्या ।(?") इति **सिद्धसेनगनिविरचितायां** तत्त्वार्थभाष्यव्याख्यायाम् ५ । ३१ ॥ पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ ३१ ॥ इति **यशोविजयोपाध्यायविरचिते नयोपदेशे** । सूत्रपातवदृजुत्वादृजुसूत्रः । ७ ।... ...समयमात्रमस्य निर्दिदिक्षितम् । कषायो भैषज्यम् इत्यत्र च सञ्जातरसः कषायो भैषज्यम्, न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः । पच्यमानः पक्वः, पक्वस्तु स्यात् पच्यमानः स्यादुपरतपाक इति ।... ...एवं क्रियमाणकृत--भुज्यमानभुक्त--बध्यमानबद्ध-सिध्यत्सिद्धादयो योज्याः । तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासम्भवात् । कुम्भकाराभावः, शिवकादिपर्यायकरणे तदभिधानाभावात्, कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितप्रश्ने च कुतोऽद्यागच्छसि इति ? न कुतश्चित् इत्ययं मन्यते तत्कालक्रियापरिणामाभावात् ।... ...अतः पलालादिदाहाभावः प्रतिविशिष्टकालपरिग्रहात् । अस्य हि नयस्याविभागो वर्तमानसमयो विषयः अग्निसम्बन्धनदीपनज्वलनदहनानि असङ्ख्येयसमयान्तरालानि यतोऽस्य दहनाभावः । किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः, यस्मिंश्च पलालं न तस्मिन् दाह इति । यत् पलालं तद् दहतीति चेत्, न, सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाददोष इति चेत्, न, तदवस्थत्वात्, एकदेशदाहाभावस्योक्तत्वात् । निरवशेषदाहासम्भवादिति चेत्, न, वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावत् यदि निरवशेषस्य पलालस्य दाहस्यासम्भव इत्येकदेशदाहात् पलालदाहो नादाहः ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वम्, अतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति । तदवस्थत्वमपि एकसमये दाहाभावः इत्युक्तत्वात् । अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र, कस्मान्नादाहः ? अतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णीभवति, उभयोर्भिन्नकालावस्थत्वात् प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसम्बन्धात् । सर्वसंव्यवहारलोप इति चेत्, न, विषयमात्रप्रदर्शनात् । पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति । इति **तत्त्वार्थराजवार्तिके** १ । ३३ ॥ १ भा] नारकाद्यायुःप्रथमसंवेदनकाले एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन । यत उक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । न शून्यान्निर्गमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति **अभयदेवसूरिकृतायां** भगवतीसूत्रवृत्तौ ४ । १० । १७४ । ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते । एतच्च ऋजुसूत्रनयदर्शनम् । तथा च नयविद्भिः ऋजुसूत्रनयनिरूपणं कुर्वद्भिरिदमुक्तम्--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नाशून्ये न शून्याद् ? निष्क्रमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥

२ ॥ इत्यादि । इति मलयगिरिकृतायां प्रज्ञापनासूत्रवृत्तौ १७ । ३ । ऋजु वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात्, n544/mj तदेव सूत्रयति परिच्छिनत्ति नातीतानागतम्, तस्यासत्त्वेन कुटिलत्वात् । तस्य वचनं पदं वाक्यं वा, तस्य विच्छेदोऽन्तः सीमेति यावत् । ... ... ...। तस्य च पूर्वापरपर्यायैर्विविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः--पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् । नासंयतः प्रव्रजति भव्यजीवो न सिध्यति ॥ पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । इति अभयदेवसूरिविरचितायां सम्मतिवृत्तौ १ । ५ । (?")तत्र ऋजुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रम् ऋजु सूत्रयति अन्यतो व्यवच्छिनत्ति सूत्रपातवत् । न ह्यतीतमनागतं वास्ति । यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात् न च पुत्रार्थिनी योषित् औपयाजिकादि विशिष्टदेवतासन्निधौ विदध्यात् । तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नापि अतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तित्येवमादयो न यथार्थाः । कथम् ? यतो नामशब्देन अविकृतरूपस्य द्रव्यस्याभिधानात् क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरेकाधिकरण्यमस्ति विरुद्धत्वात् । अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन् नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति । उक्तार्थसंवादी च श्लोको गीतः पुराविदा--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते । अत्रवाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नामशब्दः, तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम् । अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात्, पटवत् । तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यते इत्यनेन शब्देनोच्येत, क्रियाशब्दस्य विकाराभिधायित्वात् ? न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते । यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत् । विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात् । तस्माद् यावत् तत् पलालं तावन्न दह्यते यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति । एवं घटाद्युदाहरणभावना कार्या ।(?") इति सिद्धसेनगनिविरचितायां तत्त्वार्थभाष्यव्याख्यायाम् ५ । ३१ ॥ पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ ३१ ॥ इति यशोविजयोपाध्यायविरचिते नयोपदेशे । सूत्रपातवदृजुत्वादृजुसूत्रः । ७ ।... ...समयमात्रमस्य निर्दिदिक्षितम् । कषायो भेषज्यम् इत्यत्र च सञ्जातरसः कषायो भेषज्यम्, न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः । पच्यमानः पक्वः, पक्वस्तु स्यात् पच्यमानः स्यादुपरतपाक इति ।... ...एवं क्रियमाणकृत--भुज्यमानभुक्त--बध्यमानबद्ध-सिध्यत्सिद्धादयो योज्याः । तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासम्भवात् । कुम्भकाराभावः, शिवकादिपर्यायकरणे तदभिधानाभावात्, कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितप्रश्ने च कुतोऽद्यागच्छसि इति ? न कुतश्चित् इत्ययं मन्यते तत्कालक्रियापरिणामाभावात् ।... ...अतः पलालादिदाहाभावः

* * *

रणे भावयितुमुपादानमस्येति । अथवा पूर्वं घटपटावुदाहृतौ, इह दर्शनविपर्ययेऽप्युदाहरणद्वयम्, तथा च क्षेत्रतो भावतश्च द्वे द्वे वक्ष्यति, भावनादृढीकरणार्थत्वात् क्रियान्तरगतत्वभावनातो न्यायप्राप्तिदर्शनात् । § 1551

---

प्रतिविशिष्टकालपरिग्रहात् । अस्य हि नयस्याविभागो वर्तमानसमयो विषयः अग्निसम्बन्धनदीपनज्वलनदहनानि असङ्ख्येयसमयान्तरालानि यतोऽस्य दहनाभावः । किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः, यस्मिंश्च पलालं न तस्मिन् दाह इति । यत् पलालं तद् दहतीति चेत्, न, सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाददोष इति चेत्, न, तदवस्थत्वात्, एकदेशदाहाभावस्योक्तत्वात् । निरवशेषदाहासम्भवादिति चेत्, न, वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावत् यदि निरवशेषस्य पलालस्य दाहस्यासम्भव इत्येकदेशदाहात् पलालदाहो नादाहः ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वम्, अतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति । तदवस्थत्वमपि एकसमये दाहाभावः इत्युक्तत्वात् । अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र, कस्मान्नादाहः ? अतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णीभवति, उभयोर्भिन्नकालावस्थत्वात् प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसम्बन्धात् । सर्वसंव्यवहारलोप इति चेत्, न, विषयमात्रप्रदर्शनात् । पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति । इति तत्त्वार्थराजवार्तिके १ । ३३ ॥

२ णा] **°णार्थत्वा क्रिया°**nayacakra-ms-bhā । **°णार्थस्त्वा क्रिया°** nayacakra-ms-ya । अत्र **°णार्थम्वा क्रिया°** इत्यपि पाठः सम्भवेत्, तथा च भावनादृढीकरणार्थं वा, क्रिया° इत्यपि भवेत् ॥

२ ग] **°गतभाव°**nayacakra-ms-bhā ॥

क्षेत्रतः शून्यमित्यादि प्रवेशगमनस्थानानुपपत्तिर्गतार्था, *तिष्ठतिगच्छ-

१ क्षेत्र] नारकाद्यायुःप्रथमसंवेदनकाले एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन । यत उक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । न शून्यान्निर्गमोऽस्तीह न च शून्यं प्रविश्यते** ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति **अभयदेवसूरि**कृतायां **भगवतीसूत्रवृत्तौ** ४ । १० । १७४ । ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते । एतच्च ऋजुसूत्रनयदर्शनम् । तथा च नयविद्भिः ऋजुसूत्रनयनिरूपणं कुर्वद्भिरिदमुक्तम्--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नाशून्ये न शून्याद् ? निष्क्रमोऽस्तीह न च शून्यं प्रविश्यते** ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति **मलयगिरि**कृतायां **प्रज्ञापनासूत्रवृत्तौ** १७ । ३ । **ऋजु** वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात्, तदेव सूत्रयति परिच्छिनत्ति नातीतानागतम्, तस्यासत्त्वेन कुटिलत्वात् । तस्य **वचनं** पदं वाक्यं वा, तस्य **विच्छेदो**ऽन्तः सीमेति यावत् । ... ... ...। तस्य च पूर्वापरपर्यायैर्विविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः--**पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् । नासंयतः प्रव्रजति भव्यजीवो न सिध्यति** ॥ पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । इति **अभयदेवसूरि**विरचितायां **सम्मतिवृत्तौ** १ । ५ । (?")तत्र ऋजुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रम् ऋजु सूत्रयति अन्यतो व्यवच्छिनत्ति सूत्रपातवत् । न ह्यतीतमनागतं वास्ति । यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात् न च पुत्रार्थिनी योषित् औपयाजिकादि विशिष्टदेवतासन्निधौ विदध्यात् । तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नापि अतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तित्येवमादयो न यथार्थाः । कथम् ? यतो नामशब्देन अविकृतरूपस्य द्रव्यस्याभिधानात् क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरैकाधिकरण्यमस्ति विरुद्धत्वात् । अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन् नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति । उक्तार्थसंवादी च श्लोको गीतः पुराविदा--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति** ॥ पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरु[illegible]त्रवाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नामशब्दः, तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम् । अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात्, पटवत् । तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यते इत्यनेन शब्देनोच्येत, क्रियाशब्दस्य विकाराभिधायित्वात् ? न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते । यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत् । विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात् । तस्माद् यावत् तत् पलालं तावन्न दह्यते यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति । एवं

तिविपर्ययेण प्रासङ्गिकमुदाहरणम् । § 1552

**भावतोऽसंयत** इत्यादि, अनादिकालसम्बद्धदर्शनचारित्रमोहनीयोदयजाया अविरतेः पृथग्भावः प्रव्रज्या प्रकर्षव्रजनं विरतिः, सा कथमसंयते

घटाद्युदाहरणभावना कार्या ।(?") इति **सिद्धसेनगनिविरचितायां तत्त्वार्थभाष्यव्याख्यायाम्** ५ । ३१ ॥ **पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति** ॥ ३१ ॥ इति **यशोविजयोपाध्यायविरचिते नयोपदेशे** । सूत्रपातवदृजुत्वादृजुसूत्रः । ७ ।... ...समयमात्रमस्य निर्दिदिक्षितम् । कषायो भैषज्यम् इत्यत्र च सञ्जातरसः कषायो भैषज्यम्, न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः । पच्यमानः पक्वः, पक्वस्तु स्यात् पच्यमानः स्यादुपरतपाक इति ।... ...एवं **क्रियमाणकृत--भुज्यमानभुक्त--बध्यमानबद्ध-सिध्यत्सिद्धादयो** योज्याः । तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासम्भवात् । कुम्भकाराभावः, शिवकादिपर्यायकरणे तदभिधानाभावात्, कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितप्रश्ने च कुतोऽद्यागच्छसि इति ? न कुतश्चित् इत्ययं मन्यते तत्कालक्रियापरिणामाभावात् ।... ...अतः **पलालादिदाहाभावः** प्रतिविशिष्टकालपरिग्रहात् । अस्य हि नयस्याविभागो वर्तमानसमयो विषयः अग्निसम्बन्धनदीपनज्वलनदहनानि असङ्ख्येयसमयान्तरालानि यतोऽस्य दहनाभावः । किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः, यस्मिंश्च पलालं न तस्मिन् दाह इति । यत् पलालं तद् दहतीति चेत्, न, सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाददोष इति चेत्, न, तदवस्थत्वात्, **एकदेशदाहाभावस्योक्तत्वात् ।** निरवशेषदाहासम्भवादिति चेत्, न, वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावत् यदि निरवशेषस्य पलालस्य दाहस्यासम्भव इत्येकदेशदाहात् पलालदाहो नादाहः ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वम्, अतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति । तदवस्थत्वमपि एकसमये दाहाभावः इत्युक्तत्वात् । अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र, कस्मान्नादाहः ? अतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णीभवति, उभयोर्भिन्नकालावस्थत्वात् प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसम्बन्धात् । सर्वसंव्यवहारलोप इति चेत्, न, विषयमात्रप्रदर्शनात् । पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति । इति **तत्त्वार्थराजवार्तिके** १ । ३३ ॥

१ *] **तिष्ठंतिग°**nayacakra-ms-bhā ॥

२ भा] नारकाद्यायुःप्रथमसंवेदनकाले एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन । यत उक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । न शून्यान्निर्गमोऽस्तीह न च शून्यं प्रविश्यते** ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति **अभयदेवसूरिकृतायां भगवतीसूत्रवृत्तौ** ४ । १० । १७४ । ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते । एतच्च ऋजुसूत्रनयदर्शनम् । तथा च नयविद्भिः ऋजुसूत्रनयनिरूपणं कुर्वद्भिरिदमुक्तम्--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नाशून्ये न शून्याद् ? निष्क्रमोऽस्तीह न च शून्यं प्रविश्यते** ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति **मलयगिरिकृतायां प्रज्ञापनासूत्रवृत्तौ** १७ । ३ । **ऋजु** वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात्, तदेव सूत्रयति परिच्छिनत्ति नातीतानागतम्, तस्यासत्त्वेन कुटिलत्वात् । तस्य **वचनं** पदं वाक्यं वा, तस्य **विच्छेदो**ऽन्तः सीमेति यावत् । ... ... ...। तस्य च पूर्वापरपर्यायैर्विविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः--**पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् । नासंयतः प्रव्रजति**

**भव्यजीवो न सिध्यति** ॥ पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । इति **अभयदेवसूरि**विरचितायां **सम्मति**वृत्तौ १ । ५ । (?")तत्र ऋजुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रम् ऋजु सूत्रयति अन्यतो व्यवच्छिनत्ति सूत्रपातवत् । न ह्यतीतमनागतं वास्ति । यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात् न च पुत्रार्थिनी योषित् औपयाजिकादि विशिष्टदेवतासन्निधौ विदध्यात् । तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नापि अतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तित्येवमादयो न यथार्थाः । कथम् ? यतो नामशब्देन अविकृतरूपस्य द्रव्यस्याभिधानात् क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरैकाधिकरण्यमस्ति विरुद्धत्वात् । अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन् नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति । उक्तार्थसंवादी च श्लोको गीतः पुराविदा--**पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति** ॥ पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते । अत्रवाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नामशब्दः, तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम् । अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात्, पटवत् । तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यते इत्यनेन शब्देनोच्येत, क्रियाशब्दस्य विकाराभिधायित्वात् ? न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते । यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत् । विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात् । तस्माद् यावत् तत् पलालं तावन्न दह्यते यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति । एवं घटद्युदाहरणभावना कार्या ।(?") इति **सिद्धसेनगणि**विरचितायां तत्त्वार्थभाष्यव्याख्यायाम् ५ । ३१ ॥ **पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति** ॥ ३१ ॥ इति **यशोविजयोपाध्याय**विरचिते **नयोपदेशे** । सूत्रपातवदृजुत्वादृजुसूत्रः । ७ ।... ...समयमात्रमस्य निर्दिदिक्षितम् । कषायो भैषज्यम् इत्यत्र च सञ्जातरसः कषायो भैषज्यम्, न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः । पच्यमानः पक्वः, पक्वस्तु स्यात् पच्यमानः स्यादुपरतपाक इति ।... ...एवं **क्रियमाणकृत--भुज्यमानभुक्त--बध्यमानबद्ध-सिध्यत्सिद्धादयो** योज्याः । तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासम्भवात् । कुम्भकाराभावः, शिवकादिपर्यायकरणे तदभिधानाभावात्, कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितप्रश्ने च कुतोऽद्यागच्छसि इति ? न कुतश्चित् इत्ययं मन्यते तत्कालक्रियापरिणामाभावात् ।... ...अतः **पलालादिदाहाभावः** प्रतिविशिष्टकालपरिग्रहात् । अस्य हि नयस्याविभागो वर्तमानसमयो विषयः अग्निसम्बन्धनदीपनज्वलनदहनानि असङ्ख्येयसमयान्तरालानि यतोऽस्य दहनाभावः । किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः, यस्मिंश्च पलालं न तस्मिन् दाह इति । यत् पलालं तद् दहतीति चेत्, न, सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाददोष इति चेत्, न, तदवस्थत्वात्, **एकदेशदाहाभावस्योक्तत्वात् ।** निरवशेषदाहासम्भवादिति चेत्, न,

n5

घटते ? एवमेवेति एकस्य भावाभावात्मकत्वाधिकारानुवृत्त्या भावतः सिद्ध-भव्यकालभेदादयुक्तमित्युदाहरति । § 1553

---

वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावत् यदि निरवशेषस्य पलालस्य दाहस्यासम्भव इत्येकदेशदाहात् पलालदाहो नादाहः ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वम्, अतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति । तदवस्थत्वमपि एकसमये दाहाभावः इत्युक्तत्वात् । अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र, कस्मान्नादाहः ? अतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णीभवति, उभयोर्भिन्नकालावस्थत्वात् प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसम्बन्धात् । सर्वसंव्यवहारलोप इति चेत्, न, विषयमात्रप्रदर्शनात् । पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति । इति तत्त्वार्थराजवार्तिके १ । ३३ ॥

१ तः] नारकाद्यायुःप्रथमसंवेदनकाले एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन । यत उक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । न शून्यान्निर्गमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति अभयदेवसूरिकृतायां भगवतीसूत्रवृत्तौ ४ । १० । १७४ । ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते । एतच्च ऋजुसूत्रनयदर्शनम् । तथा च नयविद्भिः ऋजुसूत्रनयनिरूपणं कुर्वद्भिरिदमुक्तम्--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नाशून्ये न शून्याद् ? निष्क्रमोऽस्तीह न च शून्यं प्रविश्यते ॥ १ ॥ नारकव्यतिरिक्तश्च नरके नोपपद्यते । नरकान्नारकश्चास्य न कश्चिद् विप्रमुच्यते ॥ २ ॥ इत्यादि । इति मलयगिरिकृतायां प्रज्ञापनासूत्रवृत्तौ १७ । ३ । **ऋजु** वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात्, तदेव सूत्रयति परिच्छिनत्ति नातीतानागतम्, तस्यासत्त्वेन कुटिलत्वात् । तस्य **वचनं** पदं वाक्यं वा, तस्य **विच्छेदो**ऽन्तः सीमेति यावत् । ... ... ...। तस्य च पूर्वापरपर्यायैर्विविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः--पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् । नासंयतः प्रव्रजति भव्यजीवो न सिध्यति ॥ पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । इति अभयदेवसूरिविरचितायां सम्मतिवृत्तौ १ । ५ । (?")तत्र ऋजुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रम् ऋजु सूत्रयति अन्यतो व्यवच्छिनत्ति सूत्रपातवत् । न ह्यतीतमनागतं वास्ति । यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात् न च पुत्रार्थिनी योषित् औपयाजिकादि विशिष्टदेवतासन्निधौ विदध्यात् । तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नापि अतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तीत्येवमादयो न यथार्थाः । कथम् ? यतो नामशब्देन अविकृतरूपस्य द्रव्यस्याभिधानात् क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरैकाधिकरण्यमस्ति विरुद्धत्वात् । अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन् नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति । उक्तार्थसंवादी च श्लोको गीतः पुराविदा--पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते । अत्रवाक्ये वाक्यार्थप्रतिपत्तये

544/mj

कुम्भं करोति इति आदावप्याह । न तथा घटते । यदि स कुम्भ एव मृदवस्थायाम्, न क्रियते, भूतत्वात्, अन्यमृद्वत् । अथाभूतः, न क्रियते सः, अभूतत्वात्, खपुष्पवत् । कथमसन् कुम्भ उच्यते वा ? § 1554

---

पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नामशब्दः, तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम् । अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात्, पटवत् । तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यते इत्यनेन शब्देनोच्येत, क्रियाशब्दस्य विकाराभिधायित्वात् ? न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते । यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत् । विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात् । तस्माद् यावत् तत् पलालं तावन्न दह्यते यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति । एवं घटद्युदाहरणभावना कार्या ।(?") इति **सिद्धसेनगनिविरचितायां तत्त्वार्थभाष्यव्याख्यायाम्** ५ । ३१ ॥ पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ ३१ ॥ इति **यशोविजयोपाध्यायविरचिते नयोपदेशे** । सूत्रपातवदृजुत्वादृजुसूत्रः । ७ ।... ...समयमात्रमस्य निर्दिदिक्षितम् । कषायो भेषज्यम् इत्यत्र च सञ्जातरसः कषायो भेषज्यम्, न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः । पच्यमानः पक्वः, पक्वस्तु स्यात् पच्यमानः स्यादुपरतपाक इति ।... ...एवं क्रियमाणकृत--भुज्यमानभुक्त--बध्यमानबद्ध-सिध्यत्सिद्धादयो योज्याः । तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासम्भवात् । कुम्भकाराभावः, शिवकादिपर्यायकरणे तदभिधानाभावात्, कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितप्रश्ने च कुतोऽद्यागच्छसि इति ? न कुतश्चित् इत्ययं मन्यते तत्कालक्रियापरिणामाभावात् ।... ...अतः पलालादिदाहाभावः प्रतिविशिष्टकालपरिग्रहात् । अस्य हि नयस्याविभागो वर्तमानसमयो विषयः अग्निसम्बन्धनदीपनज्वलनदहनानि असङ्ख्येयसमयान्तरालानि यतोऽस्य दहनाभावः । किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः, यस्मिंश्च पलालं न तस्मिन् दाह इति । यत् पलालं तद् दहतीति चेत्, न, सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाददोष इति चेत्, न, तदवस्थत्वात्, एकदेशदाहाभावस्योक्तत्वात् । निरवशेषदाहासम्भवादिति चेत्, न, वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावत् यदि निरवशेषस्य पलालस्य दाहस्यासम्भव इत्येकदेशदाहात् पलालदाहो नादाहः ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वम्, अतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति । तदवस्थत्वमपि एकसमये दाहाभावः इत्युक्तत्वात् । अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र, कस्मान्नादाहः ? अतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णीभवति, उभयोर्भिन्नकालावस्थत्वात् प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसम्बन्धात् । सर्वसंव्यवहारलोप इति चेत्, न, विषयमात्रप्रदर्शनात् । पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति । इति **तत्त्वार्थराजवार्तिके** १ । ३३ ॥

अथवैकमेवोदाहरणं द्रव्यादिचतुर्विधत्वं योजयति इत्याह **--कुम्भं करोति इत्यादावप्याह,** मृन्मर्दनकालेऽप्याह कुम्भं करोमि इति कुम्भकारः, **अपि**शब्दात् करणकाले निर्वृत्त्युत्तरकाले च कृतः कुम्भ इति । **न तथा घटते,** यथा लोको वदति इति वर्तते । यदि स कुम्भ एवानिर्वृत्तोऽपि मृदवस्थायाम्, न क्रियते, भूतत्वात्, **यद् भूतं तन्न क्रियते,** यथा अन्या मृत् । अथाभूतः क्रियत इति मन्यसे, न क्रियते सः, अभूतत्वात्, खपुष्पवत् । कथमसन् कुम्भ उच्यते वा ? § 1555

545/mj

अथोच्येत--सत्यम्, प्रागभूतः, इदानीं क्रियते, क्रियमाणश्च भवतीति । अत्रापि यद्यभूतो न तर्हि कुम्भः स क्रियते, भूतत्वेऽपि कृतकरणवैयर्थ्यान्न क्रियते । अथाभूतोऽपि कुम्भ उच्यते, पृथिव्यपि ते कुम्भ इति प्राप्ता । ततश्च क्रियाऽभावः । न च कस्याञ्चिदप्यवस्थायाम्... ... ...क्रिया । § 1556

कथं तर्हि सोऽक्रियमाणः कुम्भो जातः ? को वा ब्रवीति जातः इति, द्रव्यादितो जन्मविनाशसमत्वात् ? स न जायते इति किं शक्यो वक्तुम् ? ओम्, § 1557

**अथोच्येत** पक्षद्वयानाश्रयणेन परिहारसमर्थं मत्वा पक्षान्तरं संश्रित्य **सत्यं प्रागभूत इदानीं क्रियते, क्रियमाणश्च भवतीति** । अत्रापि भूताभूतत्वविकल्पद्वयानतिवृत्तिः, यद्यभूतो न तर्हि कुम्भः सः, पटादिवत् कुम्भत्वेनाभूतत्वाद् न क्रियते नापि कुम्भः इति वक्तव्यः । भूतत्वेऽपि पटादिवच्च सान्निध्ये कृतकरणवैयर्थ्याद् न क्रियते । अथाभूतोऽपि पिण्डादिः स्वपक्षे रागाद् लोकानुवृत्त्या वा कुम्भ उच्यते पृथिव्यपि ते कुम्भ इति प्राप्ता कुम्भत्वेनाभूतत्वात् त्वदिष्टक्रियमाणकुम्भवत् । **ततश्च क्रियाऽभावः**, पृथिव्यर्थक्रियावैयर्थ्यवत् कुम्भार्थक्रियाया अभावः । तद् भावयति **--न च कस्याञ्चिदप्यवस्थाया**मित्यादि यावत् **क्रिये**ति । द्रव्यतः सर्वप्रदेशात्मकस्य परमाणुमात्रेऽवरुद्धत्वान्न क्रिया, द्रव्यान्तरे त्वभावादभावः । क्षेत्रतो बुध्नमध्योर्ध्वादिभागावष्टब्धक्षेत्रवादित्वात् कतमो घटः क्रियते ? कालतः प्रतिक्षणमन्यान्यप्रदेशस्पन्दावरोधात्, भावतः

१ व्यादिच ] चतुर्विधत्वे ? ॥
१ क ] करोमि इत्यपि पाठः स्यादत्रेति चिन्त्यम् ॥
२ क ] **करोति**nayacakra-ms-ya ॥
४ य ] दृश्यतां पृ० ५४२ पं० ३ ॥
१६ यानाश्र ] **०श्रयेण परि०**nayacakra-ms-ya ॥
१८ तिवृ ] **०वृत्ते** प्र० ॥
१९ प ] **घटा०**nayacakra-ms-ya ॥
१९ कृ ] **कृते**nayacakra-ms-ya ॥
२४ त्वा ] **०त्वात् क्रिया** प्र० ॥
२५ क्षेत्र ] **०त्रव्यदित्वात्**nayacakra-ms-ya । **०त्रव्यापित्वात्** ? ॥
२६ म ] **०मन्यान्यान्यप्रदेश-स्पंदा०**nayacakra-ms-bhā । **०मन्योन्यप्रदेशास्पंदा०** nayacakra-ms-ya ॥

सर्वसंस्थानरूपादिसमाहारात्मकत्वे घटस्य भावं भावं प्रति पृथक्त्वात् का क्रिया ? यस्मात् क्रियमाणमेव तु क्रियते मृदाहरणादीति चतुर्धाप्येतदुदाहरणम् । § 1558

अपर आह **--कथं तर्हि सोऽक्रियमाणः कुम्भो जातः,** क्रियाया अभावादक्रियमाणोऽक्रिय- माणत्वात् कुम्भो जायते खपुष्पवदिति प्राप्तम्, - /ms
अनिष्टं चैतत्, लोकप्रसिद्ध्युपरोधित्वादिति । अत्रोच्यते — **को वा ब्रवीति जातः इति ?** अहं तु लोकमेवायुक्तवादिनं मन्ये, **द्रव्यादितो जन्मविनाशसमत्वात्,** य एव जातः स एव विनष्टो यत्रैव तत्रैव यदैव तदैव यथैव तथैवेति भावाभावयोर्भावो भवनम्, स एव भावाभावभावो वस्तु सदसदात्मकभवनम्, वस्तुत्वात् पूर्वाभाव एव भावोऽस्य पिण्डादेः, पूर्वभावस्याभावो विनाशः, स एव उत्तरोत्तरो भावो जन्म इति जन्मविनाशयोर्लक्षणम्, तयोस्तुल्यत्वाद् द्रव्यादितः । **स** भावाभावात्मकोऽर्थो **न जायत इति किं शक्यो वक्तुम् ?** इति । **ओमित्युच्यते,** स न जायते इति 546/mj

* * *

विनश्यत्त्वात्, पूर्ववत् । न विनश्यति इत्यपि शक्यं वक्तुं जायमानत्वादुत्तरवत् ।

एतदुदाहरणं निर्वर्त्यकर्मविषयासु विकार्यकर्मविषयासु च क्रियासु, सर्वास्वपि तास्वेषैव वार्ता । प्राप्यकर्मक्रियास्वपि च कासुचित् ।

एवं तावदुत्पन्नशब्दानां निर्विषयता । द्रव्यशब्देष्वपि भावाभावात्मकत्वात् सर्वभावानां कुतः तत्त्वोपनिपाति वचनम् ? भ्रूक्षेपादिवत्तु स्वाभिप्रायसूचनं कृतसङ्केतानां क्रियते ।

* * *

शक्यो वक्तुमिति । कस्मात् ? **विनश्यत्त्वात्,** घटावस्था हि जन्म, सा विनश्यदवस्थैव उक्तन्यायात्, **पूर्ववदिति** त्वदिष्टानन्तराघटावस्थावत् । **न विनश्यति इत्यपि शक्यं वक्तुं जायमानत्वादुत्तरवत्** घटावस्थावदिति । § 1559

---

५ अभावा] °वादिक्रियमाणोक्रियमाणत्वात् कुंभोnayacakra-ms-ya । °वात्क्रियमाणाक्रियमाणत्वात् कुभो nayacakra-ms-bhā । °वादक्रियमाणत्वात् ? । अत्र °वादक्रियमाणत्वात् कुतो इति °वादक्रियमाणोऽक्रियमाणत्वात् कुतो इत्यपि वा पाठोऽपि स्यात् ॥
७ द्र] द्रव्यतोnayacakra-ms-bhā ॥
८ त्रैव] °व चnayacakra-ms-ya ॥
९ भ] भवनं त एव प्र° ॥
९ स] सदासदात्मक° nayacakra-ms-ya । सदात्मक° nayacakra-ms-bhā ॥
१० पू] पूर्वभावो विनाशःnayacakra-ms-bhā ॥
११ विना] °नाशोर्लक्षणं तयोस्तुत्वाद्रव्यादितः प्र° ॥
१२ भा] भावात्मको°nayacakra-ms-bhā ॥
२३ त्व] दत्विष्ट°nayacakra-ms-pānayacakra-ms-ḍe विना । रत्विष्ट° nayacakra-ms-pā nayacakra-ms-ḍe ॥

एतदुदाहरणं निर्वर्त्यघटादिकर्मविषयासु करणपचनादिक्रियासु, विकार्य-पलालादिविषयाषु च दहनादिक्रियासु, सर्वास्वपि तास्वेषैव वार्ता--नास्ति काचित् क्रियेति । ग्रामं गच्छति इत्यादिप्राप्यकर्मिकासु कथमिति चेत्, **प्राप्यकर्मक्रियास्वपि च कासुचि**दिति गच्छतिप्रव्रजत्यादिषु भावितम्, कासुचित् तु हिमवदादित्यश्रवणदर्शनादिषु यद्यपि नैषा वार्ता, शब्दघटश्रवणद-
- /ms र्शनादिष्वेषैव वार्ता । किञ्च, कृत-दग्धगतादिशब्दैश्च क्तप्रत्ययान्तैर्याः क्रिया उच्यन्ते तासां निष्ठितत्वाद् भूतकालविहितत्वाच्च क्तस्य किञ्चिन्निष्ठितं किञ्चिद-निष्ठितं मृत्पलालादि कर्म इति कृताकृतत्वानुपपत्तेः सुतरां प्रयोगाभाव इति सुष्ठूच्यते --**यथा लोको वदति न तथा घटत** इति । § 1560

एवं तावदुत्पन्नशब्दानां क्रियावाचिनामाख्यातानां नाम्नां पाचकादीनां शुक्लादिगुणशब्दानां च निर्विषयता निरर्थकतेत्यर्थः । **द्रव्यशब्देष्वपी**त्यादि यावद् **वचन**मिति सर्वभावा भावाभावात्मका इत्युक्तं विस्तरतः, तद्वाच्य-भिमतानां शब्दानामुक्तन्यायेन तदसंस्पर्शात् कुतः **तत्त्वं** भावाभावात्मकं वस्तूपनिपतितुं वचनस्य शीलं धर्मः साधुकारिता वा कस्यचित् ? इति ।

§ 1561

एवं तर्हि शब्दार्थव्यवहारहानिरिति चेत्, न इत्युच्यते, अस्ति शब्दार्थ-
547/mj संव्यवहारः संज्ञासंज्ञि

* * *

अत्र चान्यापोहः शब्दार्थः । आह हि--शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिः अभिधत्ते इत्युच्यते ।

---

१ णं] निर्वर्त्यादित्रिविधकर्मस्वरूपं **वाक्यपदीये** श्लो॰ ३ । ७ ।४५--५४ **सिद्धहेमबृहद्वृत्तौ** २ । २ । ३ च विस्तरेण विलोकनीयम् । निर्वर्त्यं वा विकार्यं वा प्राप्यं वा यत् क्रियाफलम् । तद् दृष्टादृष्टसंस्कारं कर्म कर्तुर्यदीप्सितम् ॥ इति त्रिविधं कर्म ॥

४ तिप्र] **°प्रजत्यादिषु**nayacakra-ms-bhā । दृश्यतां पृ॰ १२६ टि॰ १५, अत्र **गच्छतिव्रजत्यादिषु** इत्यपि पाठः सम्भवेत् ॥

५ श्र] **कालाध्वनोरत्यन्तसंयोगे**पा॰ २ । ३ । ५,... ... एवं मन्यते--यत्र कश्चित् क्रियाकृतो विशेष उपजायते तन्नाख्यं कर्मेति । न चेह कश्चित् क्रियाकृतो विशेष उपजायते । नैवं शक्यम् । इहापि न स्यात्--आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छति ।... ...**कर्मण्यण्** पा॰ ३ । २ । १ कर्मणि निर्वर्त्यमानविक्रियमाणे इति वक्तव्यम् । इह मा भूत्--आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीति ।(?") इति **पातञ्जलमहाभाष्ये** ॥

७ क्त] **क्तक्तवतू निष्ठा**पा॰ १ । १ । २६ एतौ निष्ठासंज्ञौ स्तः । **निष्ठा** पा॰ ३ । २ । १०२ भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् इति । nayacakra-ms-pā **सिद्धान्तकौमुद्याम्** ॥

८ कृ] दृश्यतां पृ॰ ५४३ टि॰ ४ ॥

९ य] दृश्यतां पृ॰ ५४२ पं॰ ३, पृ॰ ५४४ पं॰ ६ ॥

१४ स्य] आ क्लेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥--nayacakra-ms-pā ३ । २ । १३४ ॥

* * *

सम्बन्धसन्निवेशात्मकः । भ्रूक्षेपादिवत्तु अक्षिनिकोचैः पाणिविहारैर्भ्रूक्षेपादिभिश्चाङ्ग-विकारैः स्वाभिप्रायसूचनं कृतसङ्केतानां क्रियते, अभिप्रेतार्थपर्यायमात्रत्वात् तासां क्रियाणाम्, तथा शब्दस्यापि अभिधेयाभिमतार्थपर्यायमात्रपरमार्थ-त्वात् तदर्थप्रतिपत्त्युपायः शब्दो भ्रूक्षेपादिवत् । संज्ञा संज्ञैव संज्ञापनात् । न वाचकः शब्दः, पुरुषाणां कृतसङ्केतानां प्रतिपत्त्युपायः, अकृतसङ्केतानां तु शब्दगडुमात्रसम्प्रत्ययनिमित्तत्वात् । यथोक्तम्—

*विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
तेषामत्यन्तसम्बन्धो नार्थाञ् शब्दाः स्पृशन्त्यपि ॥ इति

|§ 1564

एवं वस्तुनो भावाभावात्मकस्यानिर्देश्यत्वात् परमार्थस्यावाचकः, संवृतिसतस्तु व्यवहारस्य वाचक इवोपलक्षणभूतः शब्दः । § 1565

**अत्र चेत्यादि** । नयमतेन वस्तुस्वरूपं शब्दार्थसम्बन्धं चावधार्य शब्दार्थोऽधुनावधार्यते --**अत्र च** विधिनियमविधिनियमभङ्गे**ऽन्यापोहः शब्दार्थः** - /ms

---

२ भ्रू] **भ्रूत्क्षेप°**nayacakra-ms-ya । दृश्यतां पृ° २४२ पं° १०, पृ° २६७ पं° ११ । उद्योतकरस्तु प्रमाणयति--देवदत्तस्य रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः, मयेति प्रत्ययेन प्रतिसन्धीयमानत्वात्, कृतसमयानामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकपुरुषाणां प्रत्ययवत् । अस्यायमर्थः--यथा किल नर्तकीभ्रूभङ्गानन्तरमस्माभिर्वस्त्राणि प्रक्षेप्तव्यानि इत्येवं कृतसमयानां बहूनां नानाकर्तृकाः नानाभूताः प्रत्ययाः निमित्तस्य भ्रूभङ्गस्यैकत्वाद् मया दृष्टो मया दृष्टः इति प्रतिसन्धीयन्ते तथेहापि नानाविषयाः प्रत्यया निमित्तस्यैकत्वात् प्रतिसन्धास्यन्ते । यच्च तदेकं निमित्तं स आत्मेति । इति **तत्त्वसङ्ग्रहपञ्जिकायाम्**, श्लो° १८०--१८१ ॥

२ अ] अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्तेऽक्षिनिकोचैः पाणिविहारैश्च । इति **पातञ्जलमहाभाष्ये** २ । १ । १ ॥

६ न] दृश्यतां पृ° २४३ पं° १०--१४ ॥

७ डुमा] °मात्रमप्रत्ययनिमित्तत्वात् ? ? ? । दृश्यतां पृ° २४३ पं° १० ॥

८ *] दृश्यतां पृ° २४३ पं° ९, पृ° ४९८--१ । यदधिकृत्याह विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः इति । व्याख्या-- यदधिकृत्याहाचार्यः--विकल्पयोनयः विकल्पकारणाः शब्दाः विकल्पाः शब्दयोनय इति । पृ° १ । ३३४... ... यथोक्तम्--विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः इति । व्याख्या-- यथोक्तं भदन्त**दिन्नेन**--विकल्पयोनयः शब्दा विकल्पाः शब्दविकल्पाः शब्दयोनय इत्यादि । पृ° १ । ३३७ इति हरिभद्रसूरिविरचितायां स्वोपज्ञव्याख्यासहितायाम् **अनेकान्तजयपताकायाम्** । बौद्धाचार्यदिङ्नागस्यैव भदन्तदिन्नः इति नाम इति ध्येयम्, दृश्यतां टि° ९ ॥

९ ना] **नार्थां शब्दा**nayacakra-ms-ya । **नार्था शब्दा°** nayacakra-ms-bhā । दृश्यतां पृ° ४९८-- १ ॥

११ भू] °भूत**शब्दः** प्र° ॥

१३ ऽन्या] बौद्धमते अपोहः शब्दार्थः, प्रतिभा च वाक्यार्थः इति विज्ञायते, तथाहि--अपोहः पदार्थत्वेन कल्पितः । स वाक्यादपोद्धृत्य कल्पितस्य पदस्यार्थ इष्टः । वाक्यार्थस्तु प्रतिभालक्षण एव । यथोक्तम्--अपोद्धारे पदस्यायं वाक्यादर्थो विवेचितः । वाक्यार्थः प्रतिभाख्योऽयं तेनादावुपजन्यते ॥(?') इति । इति **तत्त्वसङ्ग्रहपञ्जिकायाम्**, पृ° २९४ ॥

। यस्मादाह --**शब्दान्तरार्थे**त्यादि, शब्दादन्ये शब्दाः शब्दान्तराणि, तेषामर्थान-

---

१ श] बौद्धाचार्य**दिङ्नाग**स्य वचनमिदम् । **दिन्नः दिन्नकः दत्तकः** इति च **दिङ्नाग**स्य नामान्तराण्यपि सन्ति । संस्कृतभाषायां **दत्त** इति **दत्तक** इति च रूपम्, तयोरेव प्राकृतभाषायां यथाक्रमं **दिन्न** इति **दिन्नक** इति च रूपं भवति । तत्र प्राचीन**जैन**ग्रन्थेषु नयचक्रवृत्तौ पृ° ६३ पं° ५, पृ° ९६ पं° ६, पृ° ५४५ टि° १, अनेकान्तजयपताकाव्याख्यायां पृ° १ । ३३७ इत्यादिस्थानेषु **दिन्न** इति, **सिद्ध**सेनगणिविरचितायां **तत्त्वा**र्थभाष्यव्याख्यायां ५ । २४ **दत्तक** इति, अन्यत्र च बहुषु स्थानेषु **दिङ्नाग** इति त्रिधापि नामनिर्देशो दृश्यते । प्राचीनेषु **चीन**देशीयग्रन्थेषु च **दिन्न** इति **दिन्नक** इत्यपि च **दिङ्नाग**स्य नाम उपलभ्यते, दृश्यतां On Yuan-chwang's Travels in India by Thomas-watters, Part II. p. 211-212 । **तेन** आचार्य**दिङ्नाग**स्योपरि **यद् उद्योत**करेणोक्तम्--यदि शब्दस्यापोहोऽभिधेयोऽर्थस्तदाभिधेयार्थव्यतिरेकेणास्य स्वार्थो वक्तव्यः, अथ स एवास्य स्वार्थस्तथापि व्याहतमेतत् **अन्यशब्दार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते इत्युच्यते** इति । अस्य हि वाक्यस्यायमर्थस्तदानीं भवति अभिदधाना अभिधत्ते इति न्या° वा° २ । २ । ६७ । तदेतद् वाक्यार्थापरिज्ञानादुक्तम् । इति **तत्त्वसङ्ग्रहपञ्जिकायाम्**, श्लो° १०१६ । **सन्मति वृ°** पृ° २०४ । न चान्यापोहमात्रं शब्दार्थः, विधिनिरपेक्षस्य व्यतिरेकस्याप्रसिद्धेरन्वयस्य च व्यतिरेकशून्यस्यानुपलब्धेः परस्परापेक्षाभ्यामन्वयव्यतिरेकाभ्यां सर्वत्रार्थाधिगतेः व्यतिरेकस्यैव प्राधान्यम् इत्ययुक्तम् । तथा चाह **दत्तक**भिक्षुरेव--**अर्थान्तरापोहं हि स्वार्थे कुर्वती श्रुतिः अभिधत्ते इत्युच्यते । हि शब्दो यस्मादर्थे, यथा वृक्षशब्दोऽवृक्षशब्दनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययतीत्युच्यते । एवं च निवृत्तिविशिष्टं वस्तु शब्दार्थः, न निवृत्तिमात्रम्, अलक्षणीयमेव च स्यान्निवृत्तिमात्रम्, अवस्तुत्वात्, खरविषाणकुण्ठतीक्ष्णतादिवर्णनवत्** । अत्र च न प्राग् विधिना घटं गृहीत्वा पश्चादन्यापोहं करोति, नाप्यन्यापोहं कृत्वा पश्चाद् घटं कालभेदेन गृह्णाति । क्रमेण हि ग्रहणे ह्रसिष्ठत्वात् क्षणिकत्वाच्च सर्वभावानां ध्वनेर्ज्ञानस्य च न युक्तं व्यापारद्वयानुष्ठानम् । सन्तानाच्चेत्, तदयुक्तमवस्तुत्वात् । एवं तर्हि घटग्रहणमन्यापोहश्च युगपदुभयं सिद्धम्, यथा सवितुरुदये सन्तमसविदलनं स्वरूपप्रकाशनं च स्वभावात् । एवं सति उभयमभिधेयं सामान्यं विशेषश्चेत्यवशेनापि प्रतिपत्तव्यमन्यापोहशब्दार्थवादिना । अन्वयव्यतिरेकयोस्तुल्यकक्षत्वाद् विधेय**उभय** ?मपि प्रधानमेवास्तु, न हि द्वयोरर्थयोर्धवखदिरवद् युगपदुपात्तयोरेकस्य गुणभावकल्पना श्रेयसी । ननु चान्वयस्य प्राधान्येऽभ्युपेयमाने प्रयत्नानन्तरीयकत्वमव्याप्तसपक्षं सद् नैवानित्यत्वं गमयेत् । केन चेदमुक्तं व्याप्तसपक्षं गमयति, अव्याप्तसपक्षं न गमयति इति ? एतावत्तु उच्यते--अन्वयनिरपेक्षो न गमयति व्यतिरेकः, नापि व्यतिरेकनिरपेक्षोऽन्वयः प्रतिपादकोऽर्थस्य, परस्परापेक्षतायां च शिबिकोद्वाहकादिवत् सर्वत्र प्राधान्यं क्वचिद् विवक्षावशाद्वा अन्यतरस्य गुणप्रधानकल्पनेति, यथाह **द्वादशशतिकायाम्-- यदप्युक्तम् अप्रसक्तस्य किमर्थं प्रतिषेधः ? इति, नैवैतत् प्रतिषेधमात्रमुच्यते, किन्तु तस्य वस्तुनः कश्चिद् भागोऽर्थान्तरनिवृत्त्या लोके गम्यते यथा विषाणित्वादनश्वः** इति । न चार्थाक्षिप्तो विशेषः, साक्षादभिधीयमानत्वात् । यथैव सामान्यमुच्यते तथा विशेषोऽपीत्युभयमत्र मुख्यं वाच्यमित्यतः सामान्यविशेषात्मकमेवाभिधेयम् । इति **सिद्ध**सेनगणिविरचितायां **तत्त्वार्थभाष्यव्याख्या**याम् ५ । २४ । स एव चायं समानरूपप्रतिभासी भेदो निर्दिष्ट आचार्य**दिङ्नागेन ।** कथमित्याह--**अर्थान्तरव्यावृत्त्या तस्य वस्तुनः कश्चिद् भागो गम्यत** इति, तथा **शब्दोऽर्थान्तरनिवृत्तिविशिष्टानेव भावानाह** इत्यादिना । आदिग्रहणात् **शब्दार्थान्तरापोहं कुर्वती श्रुतिरभिधत्त** इत्यादिपरिग्रहः पृ° २५१...आचार्य**दिङ्नाग** आह... ... ...**शब्दा[र्था]न्तरापोहं कुर्वती श्रुतिः**

पोहते घटशब्दः पटादिशब्दानां स्वतोऽन्येषां व्यवहारानुपातात् । **स्वार्थे कुर्वती श्रुतिः** इति वचनेन भावाभावात्मकमर्थं दर्शयति । **अभिधत्ते इत्युच्यत** इति, न परमार्थतोऽभिधत्तेऽर्थात्मनोऽनभिलाप्यत्वात् संज्ञापरमार्थत्वात् अभिधत्ते इवाभाति लक्षयन् सङ्केतवशादर्थमिति एष पदार्थः । 548/mj

* * *

प्रतिभा च वाक्यार्थः ।

* * *

---

**स्वार्थमभिधत्ते** इति । पृ° २५३ इति **प्रमाणवार्तिकस्ववृत्तेः** **कर्णकगोमिविरचितायां** टीकायाम् १ । १२९ । किमपोहो वाच्योऽथावाच्य इति । यदि वाच्यः, अनैकान्तिकः शब्दार्थः अन्यापोहः शब्दार्थः इति । अनवस्था वा, अथानपोहव्युदासरूपेणाभिधीयतेऽपोहः तस्याप्यन्य इत्यनवस्था । अथावाच्यः, शब्दार्थान्तरापोहं करोति इति व्याहतम् । यदि च शब्दस्यापोहो नाभिधेयार्थः, अभिधेयार्थव्यतिरेकेण स्वार्थो वक्तव्यः । अथ स एवास्य स्वार्थः तथापि व्याहतम् **अन्यशब्दार्थापोहं स्वार्थे कुर्वती श्रुतिः अभिधत्त इत्युच्यते** इति । तस्य वाक्यस्यायमर्थस्तदानीं भवति--अन्यदनभिदधानोऽभिधत्त इति । इति उद्द्योतकरविरचिते **न्यायवार्तिके** २ । २ । ६७ ॥

७ प्र] दृश्यतां पृ° ५४७ टि° ८ ॥

७ श] (?")परमार्थतस्तु वाक्यार्थ एक एव, सर्वोऽपि शब्दः प्रतिभाया एव हेतुरिति तत्स्व[illegible]नीं n549/mj प्रस्तावयितुमाह **--अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः । बालानां च तिरश्चां च यथाऽर्थप्रतिपादने** ॥ वाक्यप° २ । ११८ अपरैराचार्यैः सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः जडानामपि प्रतिभाहेतुरित्याह--बालानामित्यादि । आस्तां विदितसमयस्य किं न भविष्यत्यसौ प्रतिभाहेतुः । येऽप्यविदितसङ्केता अमी बाला जडप्राया वा तिर्यञ्चः तेषामप्यनादिवासनावशात् तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः शब्दः सम्बोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेण नियतैव काचित् प्रतिभा प्रबोध्यते इति तन्मूल एव सर्वः कश्चित् तेषां व्यवहारः । अनेनैतदुच्यते यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्ता सकलव्यवहारमूलभूताऽनपह्नवनीया । तदपह्नवे स्वात्मैव विप्रलभ्यते । तत् प्रतिभाभ्युपगमोऽवश्याश्रयणीयः ॥ ११८ ॥ अभ्यासात् प्रतिभाहेतुरित्युक्तम् । तत्राभ्यासः किमिदानीन्तन उत जन्मान्तरभावी ? तस्य च किं स्वरूपमित्याशङ्क्याह **--अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते** । स चाभ्यासोऽनागम इदानीन्तनो न भवति, न हि बालस्य तदैवोपदिष्टं केनचित्, इति जन्मान्तरभाव्येव । स च समय इष्यते सङ्केतस्वरूपोऽसाविष्यत इति स्वरूपमेवास्य स्फुटयितुमाह **--अनन्तरमिदं कार्यमस्मादित्युपदर्शकः** ॥ वाक्यप° २ । ११९ स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघातमात्रसमनन्तरमेव वाजिनोऽतियान्ति अङ्कुशाभिघातेन च गजाः, एवमन्येऽपि प्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्वन्तो लोकयात्रां निर्वाहयन्तीति स्थितम् । एवमखण्डमेव वाक्यम्, प्रतिभा च वाक्यार्थ इति समाश्रयणीयम् । पदपदार्थापोद्धारमाश्रित्य प्रतिनिध्यादिकल्पनं प्रासङ्गिकादिन्यायनिर्वाहश्च भविष्यतीति व्यवस्थापितम् ।... ... ...अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुबध्नन्नाह **--विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते । वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्** ॥ वाक्यप° २ । १४४, देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थमतिव्यतिरिक्तैव जायते । तां च वाक्यार्थं वैयाकरणा आहुः । कस्तस्या उपाय इत्याह--पदार्थैरुपपादितामिति । पदार्थैरसत्यैरेवोपाधिभूतैरुपपादितामभिव्य-क्तामिति ॥... ... ...(?") इति पुण्यराजविरचितायां **वाक्यपदीयटीकायाम्** ।

वाक्यार्थस्तर्हि कः ? उच्यते --**प्रतिभा च वाक्यार्थः** । शब्दाभ्यासवासनाजनिताऽर्थेषु प्रतिभा वाक्येभ्यो जायते तिरश्चां मनुष्याणां च यथाभ्यासं
549/mj स्वजातिनियता स्वप्रत्ययानुकारेण शूर-कातरादीनामिव

* * *

अयमृजुसूत्रदेशत्वात् पर्यायास्तिकः ।

* * *

व्याघ्रादिशब्दश्रवणात् कोप-हर्ष-भयादिनिमित्तेत्यादि यथावदनुगन्तव्यम् । वाक्यार्थप्रतिपत्त्युपायः पदार्थोऽसन् वाक्यादपोद्धृत्य उत्प्रेक्षया व्याख्यायते । § 1566

अयं पुनर्नयः कतमः शास्त्रविहितानामिति चेत्, ऋजुसूत्रदेशत्वात् प-
550/mj र्यायास्तिकः । एकैकस्य

* * *

परि समन्तात्... ...।

---

अभ्यासात् प्रतिभाहेतुः सर्वः शब्दः समासतः । बालानां च तिरश्चां च यथाऽर्थप्रतिपादने ॥ ८९२ ॥ अन्ये त्वाहुः--अभ्यासात् प्रतिभाहेतुः शब्दो न तु बाह्यार्थप्रत्यायक इति, दर्शयति--अभ्यासादित्यादि । शब्दस्य क्वचिद् विषये पुनः पुनः प्रवृत्तिदर्शनमभ्यासः । नियतसाधनावच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा प्रतिभा । सा प्रयोगदर्शनावृत्तिसहितेन शब्देन जन्यते, प्रतिवाक्यं प्रतिपुरुषं च सा भिद्यते । स तु तस्या अपरिमाणो भेदः शब्दव्यवहारस्यानन्त्यान्न शक्यते विधातुमित्यत आह --**समासत इति** । **अत्र दृष्टान्तमाह**-- बालानां च तिरश्चां चेत्यादि । यथैव ह्यङ्कुशाभिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ क्रियमाणायां प्रतिभाहेतवो भवन्ति तथा सर्वेऽर्थवत्सम्मता वृक्षादयः शब्दा यथाभ्यासं प्रतिभामात्रोपसंहारहेतवो भवन्ति, न त्वर्थं साक्षात् प्रतिपादयन्ति । अन्यथा हि कथं परस्परपराहताः प्रवचनभेदा उत्पाद्यकथाप्रबन्धाश्च स्वविकल्पोपरचितपदार्थभेदद्योतकाः स्युरिति । **तत्त्वसं° पं°** । अभ्यासात् प्रतिभाहेतुः सर्वः शब्दः समासतः । बालानां च तिरश्चां च यथाऽर्थप्रतिपादने ॥ विधिवि° । अभ्यासजनितां भावनामभ्यासशब्देनाह कार्ये कारणोपचारात् । नाभिधानाधीनोऽर्थबोधः शब्दात्, अपि त्वभ्यासाधीनः । यथा हि खलु कशाङ्कुशाभिघातादयोऽनभिधायका अपि वाजिगजादीनामभ्यासात् स्वतः प्रवृत्तिनिवृत्तिहेतुमर्थप्रतिभासां प्रतिभां भावयन्तः प्रवर्तका निवर्तकाश्च तथा सङ्केपतः सर्वः शब्दो व्युत्पन्नानामव्युत्पन्नानां चेह जन्मनीत्यर्थः । अयं च प्राग्भवीयोऽभ्यासोऽवश्याभ्युपेय इत्यत्र दृष्टान्तमाह--बालानां च तिरश्चां च यथाऽर्थप्रतिपादने । अर्थाभासप्रतिभोत्पादनेन चार्थप्रतिपादनमुक्तम् पृ° १० ।... ...विशिष्टसाधनावच्छिन्नक्रियाप्रतीत्यनुकूला प्रज्ञा प्रतिभा विधिवि° । साध्यसाधनेतिकर्तव्यतावच्छिन्नायाः क्रियायाः प्रतिपत्तावनुकूलां तत्प्रतिपत्त्या कार्येऽनुष्ठानलक्षणे कर्तव्ये सहकारिणीं कर्तव्यमिति प्रज्ञां प्रतिभामध्यगीष्महि पृ° २४७ इति **मण्डनमिश्रविरचितविधिविवेकस्य वाचस्पतिमिश्रकृतायां न्यायकणिकायां** व्याख्यायाम् ॥

७ प] **पदार्थासत्त्वाक्या°** प्र° ॥

१२ प] परि समन्तादेति गच्छतिति पर्यायः, सोऽस्तीति मतिरस्येति पर्यायास्तिकः । इत्येतादृशं मूलमत्र स्यादिति भाति । दृश्यतां पृ° ७ पं° ८--११ । परि भेदमेति गच्छतीति पर्यायः । पर्याय एवार्थः प्रयोजनमस्येति पर्यायार्थिकः । --**धवलाटी°** पृ° ८४ । परि समन्तादायः पर्यायः । पर्याय एवार्थः कार्यमस्य, न द्रव्यम्,... इति पर्यायार्थिकः । --**तत्त्वार्थराज°** १ । ३३ ॥

उपनिबन्धनमप्यस्य आर्षम्--आता भंते ! पोग्गले, णो आता ? गोतमा ! सिया आता

* * *

नयस्य शतधा भेदाभ्युपगमादृजुसूत्रदेशोऽयमृजुसूत्रभेदः,

एक्केक्को य सतविधो सत्त णयसता हवंति एवं तु ।
बितियो वि अ आदेसो पंच णयसता हवंतेवं ॥ आव॰ नि॰ ७५९§ 1569

इति वचनात् । ऋजु प्रगुणं सूत्रयति तन्नयत इति ऋजुसूत्रः, सूत्रपातवदृजुसूत्र इति वा । § 1570

---

५ ए] **एक्केक्को य सतविधो पंच नयसता हवंति एवं तु । बिति+ओ वि अ आदेसो सत्त णयसता हवंतेवं** प्र॰ । हस्तलिखितादर्शप्रतिस्थोऽयं पाठोऽशुद्धो भाति । दृश्यतां पृ॰ ३७३ पं॰ ११ टि॰ ३ । पृ॰ ४१४ पं॰ २४ टि॰ ९ । अत्र एक्केक्को य सयविहो सत्त णयसया हवंति एवं तु । अण्णोवि य आ+एसो पंच सया हुंति उ नयाणं ॥ ७५९ ॥ इति पाठो हरिभद्रसूरीणां मलयगिरिसूरीणां चाभिप्रेत इति आवश्यकनिर्युक्तिव्याख्यावलोकनादवसीयते । तथाहि तद्व्याख्या--अनन्तरोक्तनैगमादिनयानामेकैकश्च स्वभेदापेक्षया शतविधः शतभेदः, सप्त नयशतानि भवन्ति एवं तु । अन्योऽपि चादेशः पञ्च शतानि भवन्ति तु नयानाम्, शब्दादीनामेकत्वात् एकैकस्य च शतविधत्वादिति हृदयम् । अपिशब्दात् षट् चत्वारि द्वे वा शते । तत्र षट् शतानि नैगमस्य सङ्ग्रहव्यवहारद्वये प्रवेशात् एकैकस्य च शतभेदत्वात् । तथा चत्वारि शतानि सङ्ग्रहव्यवहार+ऋजुसूत्रशब्दानामेकैकनयानां शतविधत्वात् । शतद्वयं तु नैगमादीनामृजुसूत्रपर्यन्तानां द्रव्यास्तिकत्वात् शब्दादीनां च पर्यायास्तिकत्वात् तयोश्च शतभेदत्वादिति गाथार्थः । इति हरिभद्रसूरिविरचितायामावश्यकनिर्युक्तिवृत्तौ । एतादृशी एव मलयगिरीया वृत्तिः । जिनभद्रगणिक्षमाश्रमणविरचिते विशेषावश्यकभाष्ये तु इक्किक्को य सयविहो सत्त नयसया हवंति एमेव । अन्नोवि य आ+एसो पंचेव सया नयाणं तु ॥ २२६४ ॥ इति आवश्यकनिर्युक्तिपाठः । एक्केक्को य सयविहो॰ गाहा । एक्केक्को शतभेद इति सप्त शतानीति । बिति+ओ वि य आदेसो पंच सया । नणु किमिति ? तिन्नि वि सद्दनया एगो चेव, तेण पंच सया, णेगमसंगहववहार+उज्जुसुयसद्दा एत्थ उदाहरणं, एत्थ एक्को उ सयभेद इति पंच सया अपि । चसद्दादन्नो वि आदेसो--जहा छ मूलनया । णेगमो दुविहो संगहितो य असंगहितो य । संगहितो संगहं पविट्ठो, असंगहितो ववहारं पविट्ठो, एक्कोक्को य सयविहो, एवं छ स्सया । अहवा चत्तारि मूलनया--नेगमो संगहितो संगहं पविट्ठो, असंगहितो असंगहं पविट्ठो, तेण संगहववहार+उज्जुसुयसद्दा चत्तारि णया, ते विभज्जमाणा एक्केक्को सयविहो, एवं चत्तारि नयसता । अहवा दो मूलनया--दव्वट्ठियो य पज्जवट्ठियो य, एक्केक्को सयविहो एवं दो णयसया । अहवा दो नया--ववहारि+ओ णेच्छतितो य । उदाहरणं--वावहारियणयस्य कालतो भमरो, णेच्छतियणयस्स पंचवन्नो जाव अट्ठफासो । अहवा दो मूलणया--अप्पियववहारितो य अणप्पियववहारितो य । उदाहरणं--जीवो नारकत्वेनार्पितः जीवत्वेनानर्पितः, एवं तिर्यग्मनुष्यदेवत्वेनापि भाव्यः । अहवा दो नया--तीयभावपन्नवतो पडुप्पन्नभावपन्नवतो य । उदाहरणं--नेरतियाणं भंते ! किं एगिंदियसरीरा+इं आलाव+ओ । एवं एते उल्लोयेण णया भणिता ॥ ७५९ ॥ इति जिनदासगणिमहत्तरविरचितायाम् आवश्यकचूर्णौ ॥

७ ऋ] ऋजु प्रगुणं सूत्रयति तन्नयत इति ऋजुसूत्रः ।--तत्त्वार्थसर्वार्थसि॰ १ । ३३ । सूत्रपातवदृजुत्वादृजुसूत्रः । यथा ऋजुः सूत्रपातः तथा ऋजु प्रगुणं सूत्रयति तन्नयति ऋजुसूत्रः । पूर्वास्त्रिकालविषयानतिशय्य

**परि समन्ता**दित्यादिना पर्यायास्तिकशब्दार्थं सव्युत्पत्तिं स्वयमेव व्याचष्टे । § 1571

- /ms
551/mj
किमेताः स्वमनीषिका उच्यन्ते, आहोस्विदस्य नयस्य निबन्धनमस्त्यार्षम् ? इति, अस्ति इत्युच्यते,

* * *

परमाणुपोग्गलाले, सिया णो आता । से केणट्ठेण भंते ! एवं वुच्चति--सिया आता परमाणुपोग्गले सिया णो आता ? गोतमा ! अप्पणो आदिट्ठे आता परस्स आदिट्ठे णो आता भगवतीसू॰ १२ । १० । ४६९ ।

इति सप्तमोऽर उभयोभयभङ्गः ।

* * *

**उपनिबन्धनमप्यस्य यतो निर्गमस्तदस्त्यार्षम् । तद्यथा --आता भंते ! पोग्ग-**

---

वर्तमानकालविषयमादत्ते, अतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् । समयमात्रमस्य निर्दिदिक्षितम् । --**तत्त्वार्थराजवा॰** १ । ३३ । ऋजु प्राञ्जलं वर्तमानपर्यायमात्रं सूत्रयति प्ररूपयति इति ऋजुसूत्रः । --**न्यायकुमु॰** ६ । ७१ ॥

१ प] परि समन्तादेति गच्छतिति पर्यायः, सोऽस्तीति मतिरस्येति पर्यायास्तिकः । इत्येतादृशं मूलमत्र स्यादिति भाति । दृश्यतां पृ॰ ७ पं॰ ८--११ । परि भेदमेति गच्छतीति पर्यायः । पर्याय एवार्थः प्रयोजनमस्येति पर्यायार्थिकः । --**धवलाटी॰** पृ॰ ८४ । परि समन्तादायः पर्यायः । पर्याय एवार्थः कार्यमस्य, न द्रव्यम्,... इति पर्यायार्थिकः । --**तत्त्वार्थराज॰** १ । ३३ ॥

१ व्युत्प] ॰त्पत्तिnayacakra-ms-ya ॥

१० आ] आया भंते ! रयणप्पभा पुढवी, अन्ना रयणप्पभा पुढवी ? गोयमा ! रयणप्पभा पुढघी सिय आया, सिय नो आया, सिय अवत्तव्वं आयाति य नो आया+इ य । से केणट्ठेणं भंते ! एवं वुच्च+इ--रयणप्पभा पुढवी सिय आया सिय नो आया सिय अवत्तव्वं आताति य नो आताति य ? गोयमा ! अप्पणो आदिट्ठे आया, परस्स आदिट्ठे नो आया, तदुभयस्स आदिट्ठे अवत्तव्वं रयणप्पभा पुढवी आयाति य नो आयाति य । से तेणट्ठेणं तं चेव जाव नो आताति य ।... ...आया भंते ! परमाणुपोग्गले, अन्ने परमाणुपोग्गले ? एवं जहा सोहम्मे कप्पे तहा परमाणुपोग्गलेवि भाणियव्वे । इति भगवतीसूत्रे पाठः, १२ । १० । ४६९ । व्याख्या--आत्माधिकाराद् रत्नप्रभादिभावानामात्मत्वादिभावेन चिन्तयन्नाह--आया भंते इत्यादि, अतति सततं गच्छति तांस्तान् पर्यानित्यात्मा, ततश्च **आत्मा** सद्रूपा पृथिवी, **अन्न**त्ति अनात्मा असद्रूपेत्यर्थः । सिय आया सिय नो आयत्ति, स्यात् सती स्यादसती, सिय अवत्तव्वंति आत्मत्वेन अनात्मत्वेन च व्यपदेष्टुमशक्यं वस्त्विति भावः, कथमवक्तव्यमित्याह— आत्मेति च नो+आत्मेति च वक्तुमशक्यमित्यर्थः । **अप्पणो आ+इट्ठे**त्ति आत्मनः स्वस्य रत्नप्रभाया एव वर्णादिपर्यायैः आदिष्टे आदेशे सति तैर्व्यपदिष्टा सतीत्यर्थः **नो+आत्मा** अनात्मा भवति, पररूपापेक्षयाऽसतीत्यर्थः । **तदुभयस्स आ+इट्ठे अवत्तव्वं**ति तयोः स्वपरयोरुभयं तदेव वोभयं तदुभयम्, तस्य पर्यायैरादिष्टे आदेशे सती तदुभयपर्यायैर्व्यपदिष्टेत्यर्थः, अवक्तव्यम्, अवाच्यं वस्तु स्यात्, तथाहि--न ह्यसौ आत्मेति वक्तुं शक्या, परपर्यायापेक्षया अनात्मत्वात् तस्याः । नाप्यनात्मेति वक्तुं शक्या, स्वपर्यायापेक्षया तस्या आत्मत्वादिति । अवक्तव्यत्वं चात्मानात्मशब्दापेक्षयैव, न तु सर्वथा, अवक्तव्यशब्देनैव तस्या उच्यमानत्वात्, अनभिलाप्यभावानामपि भाव-पदार्थ-वस्तुप्रभृतिशब्दैरनभिलाप्यशब्देन वाऽभिलाप्यत्वादिति । एवं परमाणुसूत्रमपि । इति अभयदेवसूरिविरचितायां भगवतीसूत्रवृत्तौ ॥

ले इत्यादि । पुद्गलानामात्मा स्वरूपं **नो आत्मा** पररूपमिति भावाभावौ विधिनियमाविति प्रश्नो गौतमस्य इन्द्रभूतेर्गणधरस्य । व्याकरणं भगवानाह **--गौतम ! सिया आता परमाणुपोग्गलाले सिया णो आता,** भवत्यपि [न भवत्यपि] । **से केणट्ठेणेत्यादि** कारणप्रश्नः । **एवमिति** स्याच्छब्दार्थं प्रत्युच्चारयति । केनार्थेन स्यादात्मा परमाणुपुद्गलः, स्यान्नो आत्मा ? इति विवृणोति तमेव । को निश्चय इति प्रश्नः । भगवानाह **--गोतमा ! अप्पणो आदिट्ठे आता** आत्मना स्वरूपेण आदिष्टे अर्पिते विवक्षिते आत्मा भावो विधिः स्वरूपम् । **परस्स आदिट्ठे णो आता,** परस्य आदिष्टे नो आत्मा [अ]वृत्तिरभावो नियम इति । तथा द्विप्रदेशिकादिस्कन्धाः आकाशाद्यस्तिकाया घटपटादयश्चार्था यथा विस्तरशो व्याख्यातमिति । § 1572

---

१ पु] पुद्गलो नाम आत्मा इत्यपि पाठोऽत्र चिन्त्यः । पुद्गलः किमात्मा ? ॥

१ भा] **भावो विधि॰**nayacakra-ms-bhā ॥

३ सिया] **सि+आ**nayacakra-ms-ya ॥

६ त] **तत्मव** प्र॰ ॥

७ आ] **आत्मनो**nayacakra-ms-ya ॥

७ आ] **आह भावो** प्र॰ ॥

९ था] आया भंते ! दुप+एसि+ए खंधे, अन्ने दुप+एसि+ए खंधे ? गोयमा दुप+एसि+ए खंधे सिय आया १ । सिय नो आया २ । सिय अवत्तव्वं आया+इ य नो आयाति य ३ । सिय आया य नो आया य ४ । सिय आया य अवत्तव्वं आयाति य नो आयाति य ५ । सिय नो आया य अवत्तव्वं आयाति य नो आयाति य ६ । से केणट्ठेणं भंते ! एवं तं चेव जाव आ याति य नो आयाति य ? गोयमा ! अप्पणो आदिट्ठे आया १ । परस्स आदिट्ठे नो आया २ । तदुभयस्स आदिट्ठे अवत्तव्वं दुप+एसि+ए खंधे आयाति य नो आयाति य ३ । देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे दुप्प+एसि+ए खंधे आया य नो आया य ४ । देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे दुप+एसि+ए खंधे नो आया य अवत्तव्वं आयाति य नो आयाति य ६ । से तेणट्ठेणं तं चेव जाव नो आयाति य । आया भंते ! तिप+एसि+ए खंधे... ... ...जहा छप्प+एसि+ए एवं जाव अणंतप+एसि+ए । सेवं भंते सेवं भंतेत्ति जाव विहरति । इति भगवतीसूत्रे १२ । १० । ४६९ । अस्य व्याख्या--द्विप्रदेशिकसूत्रे षड् भङ्गाः । तत्राद्यास्त्रयः सकलस्कन्धापेक्षाः पूर्वोक्ता एव, तदन्ये तु त्रयो देशापेक्षाः । तत्र च **गोयमे**त्यत आरभ्य व्याख्यायते--अप्पणोत्ति स्वस्य पर्यायैः आदिट्ठेत्ति आदिष्टे आदेशे सति आदिष्ट इत्यर्थः, द्विप्रदेशिकस्कन्धस्य आत्मा भवति १ । एवं परस्य पर्यायैरादिष्टोऽनात्मा २ । तदुभयस्य द्विप्रदेशिकस्कन्धतदन्यस्कन्धलक्षणस्य पर्यायैरादिष्टोऽसाववक्तव्यं वस्तु स्यात्, कथम् ? आत्मेति चानात्मेति चेति ३ । तथा द्विप्रदेशत्वात् तस्य देश एक आदिष्टः, सद्भावप्रधानाः सत्तानुगताः पर्यवा यस्मिन् स सद्भावपर्यवः, अथवा तृतीयाबहुवचनमिदम्, स्वपर्यवैरित्यर्थः, द्वितीयस्तु देश आदिष्टः असद्भावपर्यवः परपर्यायैरित्यर्थः, परपर्यवाश्च तदीयद्वितीयदेशसम्बन्धिनो वस्त्वन्तरसम्बन्धिनो वेति । ततश्चासौ द्विप्रदेशिकः स्कन्धः क्रमेणात्मा चेति नो आत्मा चेति ४ । तथा तस्य देश आदिष्टः सद्भावपर्यवो देशश्चोभयपर्यवः ततोऽसावात्मा चावक्तव्यं चेति ५ । तथा तस्यैव देश आदिष्टोऽसद्भावपर्यवो देशस्तूभयपर्यवस्ततोऽसौ नो आत्मा चावक्तव्यं च स्यादिति ६ । सप्तमः पुनरात्मा च नो आत्मा चावक्तव्यं चेत्येवंरूपो न भवति द्विप्रदेशिके, द्व्यंशत्वादस्य । त्रिप्रदेशिकादौ तु स्यादिति सप्तभङ्गी । त्रिप्रदेशिकस्कन्धे तु त्रयोदश भङ्गाः... ... ...षट्प्रदेशिके त्रयोविंशतिरिति । इति अभयदेवसूरिविरचितायां भगवतीसूत्रवृत्तौ । दृश्यतां पृ॰ ५५१ टि॰ १ ॥

इति नयचक्रटीकायां सप्तमोऽर उभयोभयभङ्गः समाप्तः ॥
552/mj

# ८ अथाष्टम उभयनियमारः ।

553/mj

ॐ अर्हँ § 1574

सद्गुरुभ्यो नमः § 1575

भावाभावभावनायां यदि भावो विधिरभावो विशेषः, स च पराभाव इष्टो न स्वरूपस्यैव विशेषः, ततस्तदभावे स्वत्वं परत्वं चाव्यवस्थितं परत्वाभावविशेषतुल्यत्वात् । ततश्च द्वयोरपीतरेतरात्मापत्तेः स्वपरविशेषत्वाभावे भावाभावयोर्भेदेनोपनिपातो न स्यात् स्वतोऽप्यसत्त्वं परतश्च सत्त्वं स्यात् । § 1576

इदमिह सम्प्रधार्यम्--किमेतौ भावाभावौ द्वावपि प्रधानौ, भावः प्रधानं विशेष उपसर्जनम्, विशेषः प्रधानं भाव उपसर्जनम्, उभयमुपसर्जनम् ? यदि द्वावपि प्रधानौ ततस्तयोरङ्गाङ्गिभावो न स्यात् परस्परानपेक्षत्वादपरार्थत्वात् प्रधानत्वाद् विजिगीषुवत् । घटो घटभावेन स्वेनैव भवति न पटादिभावेन नाभावेन वा, § 1577

विधि-नियमभङ्गसमस्तवृत्तिसत्यत्वप्रतिपादनाधिकारे पूर्वनयदृष्टावपरितुष्टेरुत्तरनयसमारम्भः, तद्यथा— **भावाभावभावनायामित्यादि** । यदि भावाभावात्मकं वस्त्विति **भावो विधिरभावो विशेषः, स च पराभाव इष्टो न स्वरूपस्यैव** भावस्य **विशेषो** नियम इति, **ततस्तदभावे** स्वगतविशेषाभावे परस्यापि स्वगतविशेषाभावे **स्वत्वं परत्वं चाव्यवस्थितम्, परत्वाभावविशेषतुल्यत्वात्** । स्वं स्वं न भवति पराभावविशेषत्वात् परवत्, पराभावविशेषत्वं वस्तुत्वात् स्ववत् स्वभावविशेषशून्यत्वात् । परमपि परं न भवति स्वभावविशेषशून्यत्वात् स्ववत्, पराभावविशेषत्वात् पूर्ववत् पक्षे धर्मसिद्धिः । **ततश्च द्वयोरपि** स्वपरयो**रितरेतरात्मापत्तेः** स्वस्य स्वत्वं परस्य च परत्वम् इत्येष विशेषो नास्ति । सति च **स्वपरविशेषत्वाभावे भावाभावयोः** सामान्यविशेषयो**र्भेदेनोपनिपातो न स्यात्** । न स्यात् इति सम्भावनया, मा मुखनिष्ठुरं वोचमिति । एवमैक्यापत्तिरनयोः । नैक्यापत्तिरेव, किं तर्हि ? सङ्करोऽपीत्यत आह —

१५ भा] दृश्यतां पृ॰ ५३६ पं॰ १ ॥
२२ स्व] **सत्व** प्र॰ ॥
२४ स्या] **स्यात्र** प्र॰ ॥
२४ स] **सभा॰** प्र॰ ॥

**स्वतोऽप्यसत्त्वं** भावितार्थमेव, **अपि**शब्दात् परतोऽसत्त्वं त्वदभ्युपगतमेव, **परतश्च सत्त्वं स्यात्,** अनिष्टं चैतत् । § 1578

किञ्चान्यत्, **इदमिह सम्प्रधार्यम्--किमेतौ भावाभावौ द्वावपि प्रधानौ** विजिगीषू इवान्योन्यनिरपेक्षौ, **भावः प्रधानं विशेष उपसर्जनम्, विशेषः [प्रधानं] भाव उपसर्जनम्, उभयमुपसर्जनम् ?** इति । चतुर्षु विकल्पेषु त्रीन् विकल्पान् व्युदस्य भावोपसर्जनं विशेषप्रधानं नयस्यास्य मतं समर्थयिष्यामः । तत्र तावद् **यदि द्वावपी**त्यादि उभयप्राधान्येऽनिष्टापादनं यावद् **विजिगीषुव**दिति । 554/mj

* * *

पटोऽप्येवमेव । शिबिकावाहकवत् तुल्यशक्तीनामप्यर्थानामङ्गाङ्गिभाव इति चेत्, न, शिबिकावाहकवत् प्रधानभूतस्यान्यस्य कस्यचित् सामान्यविशेषयोः प्रयोजयितुरभावात् । उत्तरभावः प्रयोजयितेति चेत्, न, तदाऽभूतत्वात् उत्पन्नस्यापि तदात्मकत्वात् शिबिकावाहकवदस्वतन्त्रत्वात् ।

* * *

इतरस्य प्रधानस्यार्थं साधयितुमङ्गं प्रवर्तमानमङ्गिनमपेक्षते, अङ्ग्यप्यङ्गमित्यङ्गाङ्गिभावः, स **न स्यात् परस्परानपेक्षत्वात्** तयोः, परस्परानपेक्षत्व**मपरार्थत्वात्,** अपरार्थत्वं **प्रधानत्वात्,** यथा विजिगीषोः । ततो विरोधादेकत्र प्रवृत्त्यभावाद् वस्तु भावाभावात्मकं न भवतीति । § 1579

कथं तर्हि भवतीति चेत्, **घटो घटभावेन स्वेनैव भवति** स्वभवनप्राधान्येन, **न पटादिभावेन** उक्तसङ्कर-विशेषासत्त्वदोषभयात्, **नाभावेन वा** - /ms पटादेरात्मनो वा, उक्तदोषादेव । **पटोऽप्येवमेव,** स्वेनैव पटभावेन भवति न घटभावेनाभावेनैव वा । § 1580

**शिबिकावाहके**त्यादि यावच्चे**दि**ति । स्यान्मतम् **--परस्परनिरपेक्षत्वा**दित्यादिहेत्वसिद्धिः, तुल्यशक्तीनामप्यर्थानामङ्गाङ्गिभावदर्शनात्, यथा शिबिकावाहकानामिवेति । एतच्च **[न], शिबिकावाहकव**दित्यादि यावत् **प्रयोजयितुरभावा**दिति । न हेत्वसिद्धिः, शिबिकावाहकानामिव प्रधानभूत ईश्वरो यथा प्रयोजयिता संहत्यकारिणामङ्गाङ्गिभावहेतुरस्ति वहनक्रियायां न तथा कश्चित् सामान्यविशेषयोर्घटादेः पिण्डशिवकादेश्च प्रधानभूतोऽन्यः कश्चित् प्रयोजयितास्ति । तस्माद् वैधर्म्यादयुक्तदृष्टान्तमिदमुत्तरमिति । § 1581

**उत्तरभावः प्रयोजयितेति चेत्,** पिण्डस्योत्तरो भावः शिवकादिः, स प्रयोजयिता प्रधानभूतः, तस्यापि स्थासक-कोशक-कुशूलकादिरुत्तरो यावत् पश्चिमो घटः पुनरावृत्त्या **इति** एवं **चे**न्मन्यसे तदपि **न, तदाऽभूतत्वात्,** उत्तरस्य भावस्य तस्मिन् कालेऽनुत्पन्नत्वादसतः प्रयोजकत्वाभावात् कुतः प्रधान-

६ स] द्रष्टव्यं पृ° ५५५ पं° ७ ॥
१९ प्राधा] °धान्येतत्र पटा° प्र° ॥
२० टादेरा] °रात्मनोक्तदोषादेवnayacakra-ms-ya ॥
२२ प] पृ° ५५३ पं° ८ ॥
३० स्थास] °सकोशक°nayacakra-ms-bhā ॥

त्वं खपुष्पस्येव ? किञ्चान्यत्, अभ्युपेत्यापि तदुत्पत्ति**मुत्पन्नस्यापि तदात्मकत्वात्** मृत्पिण्डाद्यात्मकत्वादुत्तरोत्तरभावस्य स्वबीजादभिन्नत्वात् पूर्व एवोत्तरः, - /ms स कथमात्मानमेव प्रयोजयितुमर्हति ? भेदमभ्युपगम्यापि **शिबिकावाहकवदस्वतन्त्रत्वात्** परवशवर्तित्वादप्रवर्तकत्वं पूर्वोत्तरयोर्दिक्तः कालतो वा भिन्नयोरपि भावाभावयोरप्रधानत्वादीश्वराप्रेरितशिबिकावाहकवत् । एवं तावत् प्रधानयोरप्रवृत्तिः सामान्यविशेषयोः । § 1582

**अथ सन्मित्रवदि**त्यादि **अन्यतरोपसर्जनप्रधानभावेन सामान्यविशेषयोरविशिष्टते**ति पूर्वपक्षयति । यथा संहत्यकारिणोः सन्मित्रयोः परस्परमतानुवर्तिनोरर्थवशादेकस्योपसर्जनता इतरस्य प्राधान्यमि**ति चेत्** एवं चेन्मन्यसे, तदपि **न, वक्ष्यमाणे**त्यादि याव**दभावादि**ति । भवितुर्विशेषस्यैव प्राधान्यम् सामान्यस्य भवनस्यैवोपसर्जनत्वमित्युभयनियमेनार्थवत्त्वं भावशब्दस्य नान्यथा इति वक्ष्यतेऽस्य नयस्य मतम् । तस्माद् नान्यतरोपसर्जन-प्रधानभावः । § 1583

555/mj

अथ सन्मित्रवदन्यतरोपसर्जनप्रधानभावेन सामान्यविशेषयोरविशिष्टतेति चेत्, न, वक्ष्यमाणोभयनियमनयमतवदन्यतरोपसर्जनप्रधानभावाभावात् । § 1584

अथोपसर्जनावेव भावाभावौ ततस्तयोः प्रधानेनान्येनावश्यं भवितव्यं प्रवर्तयित्रा, तदभावे प्रवृत्त्यभावात् । न च भावाभावव्यतिरिक्तोऽर्थोऽस्ति । न च प्रधानेन विनोपसर्जनम् । न च प्रधानोपसर्जनभावेन विना दृश्यते भोक्तृभोग्यशरीराहारादिवस्तुप्रवृत्तिरिति तयोरेव प्रधानोपसर्जनता । § 1585

इत्युभयनियम उच्यते--भवत् प्रधानम्, भाव उपसर्जनम् । भवति विशेषः, § 1586

**अथोपसर्जनावेव भावाभावौ ततस्तयोः प्रधानेनान्येनावश्यं भवितव्यं** बलवताश्रयभूतेन द्वयोरिव राजपुरुषयोर्नृपतिना **प्रवर्तयित्रा, तदभावे प्रवृत्त्यभावात्** । दृष्टा हि प्रवृत्तिरबलयोर्बलवदाश्रया । एतावती च प्रवृत्तिः सामान्यविशेषयोर्भवन्ती भवेत्, सर्वथा चानुपपन्ना, भावाभावयोरेव पर्यायमात्रत्वात्

---

१ अभ्युपेत्या ] °त्यादि प्र° ॥
२ बीजा ]
°दिभिन्न°nayacakra-ms-ya ॥
११ य ]
°यमेनार्थवत्त्वंnayacakra-ms-ya ॥
१२ व ] पृ° ५५५ पं° ७ ॥

२५ ब ] अत्र यथाश्रुते बलवता आश्रयभूतेन इति पदच्छेदो विधेयः । अत्र बलवदाश्रयभूतेन इत्यपि पाठः स्यात् । दृश्यतां टि° २ ॥
२६ व ]
°वताश्रयाnayacakra-ms-bhā ॥

तत्त्वान्यत्वादिधर्माणां वस्त्वन्तराभावात्, भावः सामान्यं प्रवृत्तिर्द्रव्यं विधिरन्वयो धर्मी इति पर्यायाः, अभावो विशेषोऽन्यत्वं निवृत्तिः पर्यायो नियमो धर्मः इति पर्यायाः, गुणगुण्यादिकल्पनास्वपि भावाभावत्वव्यतिरिक्तार्थासम्भवाद् द्विधैव स्यात् । तच्चेत्थं वस्तु परीक्ष्यमाणं चतुर्धापि न घटते । तस्माद् भावाभावव्यतिरिक्तस्यार्थस्याभावादुपसर्जनयोरप्रवृत्तिरिति । स्यान्मतम्--प्रधानेन विनाप्युप- सर्जनयोः प्रवृत्तिर्भविष्यतीति । तदपि **न च प्रधानेन** - /ms **विना उपसर्जनम्** अस्ति इति वर्तते, भृतकादिरिव स्वामिना । तस्मादकल्पना इयमपीति । § 1587

स्यान्मतम्--उपकार्योपकारिभावेन विनापि भवति वस्त्विति । एतदपि **न च प्रधानोपसर्जनभावेनेत्यादि** यावद् **वस्तुप्रवृत्ति**रिति । भोक्ता प्रधानम्, तदर्थं भोग्यमुपसर्जनमोदनवर्धितकवच्छरीराद्यात्मनः । शरीरमेव भोक्तृ चेतनाधिष्ठितम्, तदर्थमुपसर्जन**माहारादि, आदि**ग्रहणाद् वस्त्रशय्यासनगृहादि, आहारार्थं शाल्यादि, शाल्याद्यर्थं सलिलादि । यथैतद् भोक्तृभोग्यादि गुणप्रधानभावेनैव प्रवर्तते न विना तेनेति । दृश्यते च **वस्तुनः प्रवृत्ति**रित्थं प्रत्यक्षीकृत**मिति तयोरेव** भावाभावयोः **प्रधानोपसर्जनता** गुणप्रधानभावः, तृतीयवस्त्वभावात् । § 1588

**इति**शब्दस्य हेत्वर्थत्वादेतस्मात् कारणादेवमवस्थिते कतरत् कथं नियतमित्यु**भयनियम उच्यते,** तद्यथा --**भवत् प्रधानं** कर्तृसाधनं प्रत्ययार्थः । **भाव उपसर्जनं** भावसाधनं प्रकृत्यर्थः । को भवतीति चेत्, उच्यते --**भवति विशेषः**, स एव भवति इति भावः णप्रत्ययान्तेन कर्तृवाचिना शब्देनोच्यते पूर्वनयव्याख्याव्युत्पत्तिवत् । अर्थतः प्रकृत्यर्थविवक्षायामपि कर्त्रर्थप्राधान्याद् भावसाधनत्वेऽपि कर्त्रर्थ एवोच्यते, अतस्तत्प्रदर्शनार्थमाह --**यत् तेन भूयते,** किमुक्तं भवतीति चेत्, उच्यते --**यदसौ भवति** भवनमापद्यते भवनक्रियामनुभवति स्वरूपप्रतिलम्भे गुणभूतं क्रियात्वं प्रतिपद्यमानोऽर्थो विपरिवर्तत इत्युक्तं 556/mj

* * *

यत् तेन भूयते यदसौ भवति नटपरमार्थनृपत्ववत् । भवित्रा भूयते, न भवनेन । तेन भूयते चेत् खपुष्पमपि भवेत् भवनस्य द्रव्यत्वापत्तेः ।

न तु भवनमविशेषं क्वचिदपि भवद् दृष्टम्, विशेषेण तु भवित्रा वशीकृतं दृष्टम्, क्रिया-घट-व्रीहि-देवदत्तादौ कारक-रूपादि-मूलादि-बालादिभेदं दृश्यत एव । इत्युभयं नियम्यते । इह विशेषः प्रधानं भावः, सामान्यमुपसर्जनम्, शिबिकावाहकयानेश्वरयानवत्, विशेषभवनमेव भावभवनम् ।

---

४ त] तथेत्थंnayacakra-ms-ya ॥
९ का] °कारोपका° प्र° ॥
११ च्छ] °च्छरीरादि आत्मनः इति पदच्छेदः ॥
१३ गु] **गुणधान°** प्र° ॥
१८ भ] दृश्यतां पृ° ३७७-- २ ॥
२० ण] दृश्यतां पृ° १७३ पं° २०, पृ° ३८२ पं° १३ ॥
२१ पू] दृश्यतां पृ° ५३६ पं° १३--१४ ॥
२९ बा] दृश्यतां पृ° ३७७-- २ ॥
३० इह] दृश्यतां पृ° ३७७-- २ ॥

* * *

- /ms भवति । किमिव ? **नटपरमार्थनृपत्ववत्,** यथा नटः परमार्थतो नट एव सन् राजवेषधारी राजक्रियास्वाज्ञापनादिषु च वर्तमानो नटत्वप्रधानस्तद्विशेषपरमार्थ एवं घटाख्यो विशेषो जलधारणादिभवनेषु वर्तमानो घटत्वप्रधानस्तद्विशेषपरमार्थो भवतीति भविता घटः कर्ता, तेन कर्त्रा **भवित्रा भूयते** स एव भवनीभवति **न भवनेन** न कर्त्रा **भूयते,** न भवनं घटो भवति, उपसर्जनत्वात् कर्तृ भवितुं न शक्नोति । **तेन** भवनेन **भूयते चेत् खपुष्पमपि भवेत्,** यद्यभवद् भवेत् अभवित्रा भवनमनुभूयेत खपुष्पेणाप्यनुभूयेत । न ह्यभवितृत्वात् खपुष्पं भवनमनुभवति तथा भवनमभवितृत्वाद् नानुभवतीत्यर्थः । कस्माद् नानुभवति भवनं भवनमिति चेत्, उच्यते **--भवनस्य द्रव्यत्वापत्तेः,** द्रव्यशब्दस्य कर्तृप्रत्ययान्तत्वाद् भवति इति द्रव्यं भव्यं कृत्यल्युटो बहुलं कर्तरि इति लक्षणाद् यदि भवति द्रव्यं स्यात् । अनिष्टं चैतदिति । § 1589

एवं तर्हि भविताप्यभवनः खपुष्पवद् न स्यादिति तुल्यमनिष्टापादनम् । यथा भवित्रा विना भवनं नास्ति, तद्विशिष्टं दृष्टम्, तथा भवितापि भवनेन विना नास्ति, तद्विशिष्टो दृष्ट इति । एतच्च **न तु भवनमविशेषं** सामान्यमात्रं **क्वचिदपि भवद् दृष्टम्, विशेषेण तु भवित्रा वशीकृतं दृष्टम्,** सत्यमेतत्, वयमपि न ब्रूमः--भवनं नास्त्येवेति, किं तर्हि ? विशेषप्रधानं स्वोपसर्जनं तु दृष्टमिति न तुल्यत्वमनयोः । क्व तद् दृश्यत इति चेत्, उच्यते **--क्रियाघटेत्यादि** । क्रियायां कारकं कर्ता, घटे रूपादिः, व्रीहौ मूलादिः, - /ms देवदत्तादौ बालादिः, एते भेदा यस्य तद् भवनसामान्यं भेदप्रधानं दृश्यते लोके विशेषेणोपसर्जनीकृतं प्रधनेन । § 1590

---

५ भ] भवताnayacakra-ms-bhā । भावता nayacakra-ms-ya । भावना । ? । भवता भूयते इति मूलसत्त्वे तु nayacakra-ms-bhā पाठोऽपि संगच्छतेऽत्र ॥
५ क] भवताnayacakra-ms-bhā । भावता nayacakra-ms-ya । भावना । ? । भवता भूयते इति मूलसत्त्वे तु nayacakra-ms-bhā पाठोऽपि संगच्छतेऽत्र ॥
६ भ] भवतीभवतिnayacakra-ms-ya ॥
६ क] **कर्त्ता** प्र° ॥
१० भ] **भवनमिति चेत्**nayacakra-ms-bhā ॥
११ द्र] द्रव्यं च भव्ये । ५ । ३ । १०४ । द्रव्यशब्दो निपात्यते भव्येऽभिधेये, द्रुशब्दादिवार्थे यत् प्रत्ययो निपात्यते । द्रव्यम् । भव्य आत्मवान् अभिप्रेतानामर्थानां पात्रभूत उच्यते । द्रव्योऽयं राजपुत्रः । द्रव्योऽयं माणवकः ।--nayacakra-ms-pā **काशिका** ॥
११ कृ] कृत्यल्युटो बहुलम् । ३ । ३ । ११३ । भावेऽकर्तरि च कारके इति निवृत्तम् । कृत्यसंज्ञकाः प्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति, यत्र विहितास्ततोऽन्यत्रापि भवन्ति । भावकर्मणोः कृत्या विहिताः कारकान्तरेऽपि भवन्ति ।...करणाधिकरणयोर्भावे च ल्युट् अन्यत्रापि भवति ।(?')...बहुलग्रहणादन्येऽपि कृतो यथाप्राप्तमभिधेयं व्यभिचरन्ति ।--nayacakra-ms-pā **काशिका** ।
१५ न] **ननु भवन**°nayacakra-ms-ya ॥
१७ व] **द्वयमपि** प्र° ॥
१७ ब्रू] **ब्रूतो**nayacakra-ms-bhā । **ब्रूवो** nayacakra-ms-ya ॥

**इत्युभयम्** अस्मात् कारणाद् **विधिर्नियमश्च नियम्येते** सामान्यमुपसर्जनमेव विशेष एव प्रधानम् इति विधिनियमौ नियतौ, न यथा पूर्वत्रोभयमते कामचारो वा विधिर्विधीयते नियम्यते च नियमो विधीयते नियम्यते चेति तुल्यकक्षौ, अनन्तरातीतनयमतवदुभयं चोभयम्--भावोऽपि भावो 557/mj

* * *

अस्य पर्यायनयभेदत्वात् सर्वद्रव्यार्थभवनं प्रतिपक्षः । नामद्रव्यार्थभवनं तावत्--नाम कारणं द्रव्यं तदेव कार्यं भवनात्मकत्वात् । घटस्य हि कुम्भकारचेतना कारणम्; न अमूर्तात्मा अकरणात् । सर्वमपि चैतद् नामैव । कुम्भकारो ह्यात्मान्तः-

* * *

भवत्यभावश्च, अभावोऽपि [अभावो भवति] भावश्चेति, सङ्करदोषात् । इहेत्यस्मिन् नये स्वरूपं घटो विशेषः, न पटाद्यभावः । स एव **विशेषः प्रधानं भावः**, **सामान्यं** क्रिया भवनं प्रकृत्यर्थ **उपसर्जनम**प्रधानम् । किमिव ? **शिबिकावाहकयानेश्वरयानवत्,** यथा शिबिकावाहकानां यानमीश्वरयानार्थत्वादप्रधानम् अतः शिबिकावाहकाः यान्ति इति नोच्यन्ते तैरुह्यमान ईश्वर एव प्रधानत्वात् याति इत्युच्यते तथा सामान्येन भवताप्यप्रधानेन भविता घट एव भवति इति प्राधान्यादुच्यते । तस्माद् निरूपितवस्तुस्वरूपमुपनयति **विशेषभवनमेव भावभवनमि**ति दार्ष्टान्तिकमर्थम् । § 1591

इत्थं पर्यायनयभेदोऽयम् । **अस्य** नयस्य **पर्यायनयभेदत्वात् सर्वद्रव्यार्थभवनं प्रतिपक्षः** । तत्र विध्यादयो द्रव्यार्थभवनभेदा व्याख्याता दूषिताश्च **समनन्तरानुलोमाः पूर्वविरुद्धा निवृत्तनिरनुशयाः** इति न्यायक्रमेण । ते च द्रव्यार्थभेदाः । नाम-स्थापनाद्रव्यभवनयोरव्याख्यातयोर्व्याख्यानं कृत्वा दूषयिष्यति । तत्र **नामद्रव्यार्थभवनं तावत्** स्वरूपतः नमयति प्रह्वीकरोति सर्वमात्मस्वभावेनेति **नाम, कारणं** करोतीति, **द्रव्यं** प्राग्व्याख्यातार्थम् । भवत एव वा यद् भवनं तद् द्रव्यं कारणं नाम इत्युच्यते । भवत्येव - /ms भवत्यवस्थितं विश्वस्य कारणं प्रागुक्तपुरुषादिकारणवदेकमेव नाम शब्दः । आह--करोतीति कारणमुक्तम्, कार्याभावात् किं क्रियते यत् कुर्वत् तत् कारणं कारणं स्यात् ? तस्मात् कार्याभावात् कारणत्वाभावः, कारणत्वाभावात् स्वलक्षणाभावात् खपुष्पवदसदिति; उच्यते **--तदेव** कार्यकार-

४ यं] वोभयं ? ॥
१० अ] अभावोऽपि [भावो भवत्य]भावश्च इत्यपि पाठोऽत्र भवेत् ॥
१३ या] ॰याभेदश्वभयानवत् प्र॰ । अत्र ॰याने ईश्वर यानवत् इत्यपि पाठो भवेत् ॥
१८ प] पर्यय॰ प्र॰ ॥
२० विरुद्धा] निवृत्ति॰nayacakra-ms-ya । दृश्यतां पृ॰ २२१ पं॰ ८, पृ॰ ४५५ पं॰ ७ । टिपृ॰ ७२ पं॰ ७ ॥
२१ द्र] द्रव्यद्रव्यार्थभेदाः ? ॥
२४ ए] एव धायद्nayacakra-ms-bhā । एव धावद् nayacakra-ms-ya ॥
२४ द्र] द्रव्यं कारण नामnayacakra-ms-ya । द्रव्यं नाम nayacakra-ms-bhā ॥
२६ किं] क्रियेते प्र॰ ॥

णमेव नाम **कार्यं** नासत् । कुतः ? **भवनात्मकत्वात्** । स हि शब्दो भवनात्मकः, भवनानि अवस्थाविशेषाः स्वप्नादिवत् पुरुषस्य बालादिवद्वा पिण्डादिरूपादिवद्वा घटस्य । तस्मात् स एव कारणं स्वावस्थाविशेषाणां कार्याणामिति । § 1592

अस्योद्दिष्टस्य कार्यकारणभावस्य निरूपणार्थमुदाहृत्य घटं **घटस्य** हीत्याद्यारभते । **घटस्य हि** कार्यस्य यस्मात् **कुम्भकारचेतना कारणं** कुम्भकरणसमर्थशरीरसहिता, चेतनारहितस्य अकरणात् । आत्मा तर्हि कारणमस्तु चेतनत्वादिति चेत्, तद् **न अमूर्तात्मा, अकरणात्** । ततः किम् ? कुम्भकारशरीरं कर्तृत्वाद् मूर्तत्वाद् मृदाद्यात्मकत्वाद् घटस्य मूर्तस्य कारणं सम्भाव्येत, मृत्सलिलाद्यात्मकत्वाद्वा घटस्य मृत्सलिलाद्येव कारणं सम्भाव्येत, यदस्तु तदस्तु कार्यं कारणं च, सर्वथा चेतन्यरहितस्य मूर्तद्रव्यस्य घटसजातीयस्यापि मूर्तिरहितस्यापि वा चेतनस्यासजातीयघटकारणत्वासम्भवाद् मूर्तचेतन्यात्मकः कुम्भकारः पृथिव्यप्तेजोवाय्वाकाशात्मानः संहत्य कुम्भकाराख्या भवन्ति । तच्च **सर्वमपि चैतद् नामैव** शब्द एव, शब्दब्रह्मण एवैकस्य विपरिवर्तस्वरूपं पृथिव्यात्मादि मूर्तामूर्तभेदप्रभेदं जगत् । § 1593

- /ms

558/mj

संनिविष्टशब्दानुबद्धचैतन्यस्वरूपत्वाच्छब्दात्मकः, तदनुरूपप्रवृत्तयोऽपि तदात्मिकाः, न तदभावे प्रवर्तते तन्तुवायवत् । न हि काचिदपि चेतनाऽशब्दास्ति । येऽप्यव्यक्तचेतनाः स्थावरा जङ्गमाश्च तेऽपि शब्दाभ्यासवासनाजनितान्तर्निविष्टस्वानुरूपचैतन्याः, हिताहितप्रवृत्तिव्यावृत्तिवृत्तत्वात्, कुम्भकारवत् । भगवदर्हदा-
§ 1594

अपर आह--शब्दस्वतत्त्वमाकाशम्, आकाशगुणो वा शब्दः श्रोत्रग्राह्यस्यार्थस्य शब्दसंज्ञत्वादिति केचित् प्रतिपन्नाः । तत् कयोपपत्त्येदमुच्यते--शब्द एव सर्वमिति ? अत्रोच्यते --**कुम्भकारो** हीत्यादि । हिशब्दो हेत्वर्थे, कुम्भकारस्तावदा**त्मान्तःसन्निविष्टशब्दानुबद्धचैतन्यस्वरूपत्वाच्छब्दात्मकः**, तदनुरूपान्तःशब्दानुबद्धचैतन्यप्रेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयः क्रिया अपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्रवृत्त्यात्मकघटवत् तद्भावे भावात् तदभावे चाभावात्, वैधर्म्येण **न तदभावे**, तदनुरूपान्तःसन्निविष्टचैतन्याभावे न **प्रवर्तते तन्तुवायवत्** । § 1595

---

७ अ] **अकारणात्** प्र॰ । अकारणत्वात् इत्यर्थविवक्षायां तु यथाश्रुतः अकारणात् इत्यपि पाठः साधुः ॥
८ अ] **अकारणात्** प्र॰ । अकारणत्वात् इत्यर्थविवक्षायां तु यथाश्रुतः अकारणात् इत्यपि पाठः साधुः ॥

स्यान्मतम्--तदनुरूपचैतन्यात्मकत्वमस्तु प्रवृत्तेश्चैतन्याविनाभावात्, शब्दात्मकत्वं तु साध्यमिति । अत्रोच्यते--किमत्र साध्यम् ? सिद्धमेवैतत्, **न हि काचिदपि चेतनाऽशब्दास्ति** अनादिकालप्रवृत्तशब्दव्यवहाराभ्यासवासितत्वाद् विज्ञानस्य चैतन्यमेव हि पश्यन्त्यवस्थानं मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नाम इत्युच्यते, कारणात्मकत्वात् कार्याणाम् । यथोक्तम् --**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतं रूपम्** वाक्यप॰ १ । १४२ इत्यादि । § 1596

स्यान्मतम्--शब्दव्यवहारानभिज्ञेष्वप्यव्यक्तचेतनेषु विज्ञानोत्थापितप्रवृत्तिसम्भवे व्यभिचरतीति चेत्, न इत्युच्यते, **येऽप्यव्यक्तचेतना** इत्यादि । कृमि-पिपीलिकादीनां जङ्गमानां व्रतती-त्रपु-सीसकचितकर्णिकादीनां स्थावराणां च **शब्दाभ्यासवासनाजनितान्तर्निविष्टस्वानुरूपचैतन्यास्तित्वं** प्रतिज्ञायते **हिताहितप्रवृत्तिव्यावृत्तिवृत्तत्वात् कुम्भकारवत्,** हिताहितयोः प्रवृत्तिव्यावृत्ती निमित्तसप्तमी सम्बन्धषष्ठी वा, हिताहितप्रवृत्तिनिवृत्त्योर्वृत्तत्वात्, इत्थम्भूतलक्षणा तृतीया वा हिताहितप्रवृत्ति

- /ms

559/mj

* * *

ज्ञापि तथोपश्रूयते--सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो णिच्चुग्घाडित+ओ नन्दीसू॰ ४२ ।

अतो यथैव कुम्भकारकरणशब्दचेतनावैचित्र्यवृत्तितारतम्याध्यासनस-

---

५ वैख] **वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् । अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥** वाक्यप॰ १ । १४२, सर्वशब्दनिबन्धनत्वमाह --**वैखर्या** इति । एतदिति व्याकरणम्, अद्भुतमाश्चर्यं परं पदमिति सम्बन्धः । अनेकप्रकरणस्य शब्दराशेरास्पदं प्रतिष्ठेत्याश्चर्यमेतत् । **अनेकतीर्थभेदाया** इति वैखरीमध्यमापश्यन्तीनामनेकमार्गभेदकतामाह । **त्रय्या** इति त्रयोऽवयवा वैखर्यादयो यस्या इति त्रयी । **परमिति** उत्कृष्टम् । **पदमिति** तत्सारत्वात् । इति **वाक्यपदीयस्य वृषभदेव**कृतायां टीकायाम् । परैः संवेद्यं यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी श्लिष्टा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च । तथा याऽक्षे या दुन्दुभौ या वेणौ [या] वीणायामित्यपरिमाणभेदा । मध्यमा त्वन्तःसंनिवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना । सा तु सूक्ष्मप्राणवृत्त्यनुगता क्रमसंहारभावेऽपि व्यक्तप्राणपरिग्रहैव केषाञ्चित् । प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती । सा चलाचला प्रतिलब्धसमाधाना च आवृता विशुद्धा च सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमाणभेदा ।... ...तथेतिहासेषु निदर्शनान्युपलभ्यन्ते--... ...। पुनश्चाह--स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥ १ ॥ केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ २ ॥ अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी ॥ ३ ॥--इति **भर्तृहरि**रचितायां **वाक्यपदीयवृत्तौ** ॥

९ व्र] वल्ली तु व्रतती लता इति अमरकोशे ॥

९ सी] **॰सीसकर्णिका॰**nayacakra-ms-bhā ॥

१२ वृत्तिव्यावृत्ती] निमित्तात् कर्मयोगे--nayacakra-ms-pā वा॰ २ । ३ । ३६ ॥

१२ स] षष्ठी शेषे--nayacakra-ms-pā २ । ३ । ५० ॥

मुपहितरूपा घटता नाम्नः साक्षाद् भवति तथा तथा, तथा तत्प्रभवमेव कुम्भकारशरीरमृदादि शब्दोपयोगात्मयोगवक्रताऽवक्रतादेः, रूपादिमदर्थविरचनात्मकत्वात्

* * *

व्यावृत्तिभ्यां वृत्तत्वात् । स्तम्भाद्याश्रयोपसर्पणं हितप्रवृत्तिवृत्तत्वं गर्ताग्न्यादिभयादन्यतो गमनमहितव्यावृत्तिवृत्तत्वं चेति सिद्धो हेतुर्वनस्पतिष्वपि । कृम्यादीनां तु त्रास-स्तम्भ-भ्रान्ति-पलायित-गतागतादिक्रिया भयाद्यविनाभाविन्यः सिद्धा एव, अतो हिताहितप्रवृत्तिव्यावृत्तिवृत्तता विद्यते शब्दानुविद्धचैतन्याविनाभाविनी यथा कुम्भकारे, तस्मात् तेषूभयेषु साध्यते । सुप्तदग्धादिषु तु जङ्गमेषु व्यक्तमेव पाणिप्रस्फोटनादि क्रियालिङ्गम्, तेन विज्ञानमविनाभावित्वात् सिद्धमेव, शब्दानुविद्धत्वं तु साध्यत इति । नैतत् स्वाभिप्रेतोपपत्तिबलादेव, किं तर्हि ? **भगवदर्हदाज्ञापि तथोपश्रूयते--सव्वजीवाणं पीत्यादि** । अक्खराणक्खरसुतादिभेदेन श्रुतज्ञानप्ररूपणायामेकेन्द्रियादिस्वामिकमुक्तं **सूत्रे** । तथा **भाष्येऽपि**-- § 1597

तं पि जति आवरिज्जेज्ज तेण जीवो अजीवतं पावे ।
सुट्ठुवि मेहसमुद+ए हो+इ पभा चंदसूराणं ॥ नइयं गाथा

सम्प्रति नन्दीसूत्रेण मिश्रितोपलभ्यते । नयचक्रवृत्तिकृतस्तु सा नन्दीसूत्रभाष्यगाथात्वेन सम्मता प्रतीयते । दृश्यतां टिपृ॰ ६८ पं॰ २--७ ॥न्दीसू॰ ४२§ 1599

**अतो यथैवे**त्यादि उक्तार्थोपसङ्ग्रहरूपेण दृष्टान्तदण्डको यावत् **साक्षाद् भवति तथा तथे**ति । कुम्भकारः शब्दानुविद्धचेतनात्मकः, तत्क्रियापि तदात्मिका विचित्रा पिण्डशिवकाद्यर्थपरिस्पन्दभेदा शब्दचेतनैव, तस्या वैचित्र्येण वृत्तेस्तारतम्येन उत्तरोत्तरोत्कर्षपरम्परया अध्यासनम्, तेन समुप- - /ms हितं रूपमस्या घटतायाः सा **कुम्भकारकरणशब्दचेतनावैचित्र्यवृत्तितारतम्याध्यासनसमुपहितरूपा घटता**, सा **साक्षाद्** नाम्नो **भवति तथा तथा** तेन तेन प्रकारेण पिण्डशिवकादिरूपादिपृथुबुध्नादिना चेति दृष्टान्तः । दार्ष्टान्तिकोऽर्थोऽधुना --**तथा तत्प्रभवमेव** शब्दचेतनाप्रभवमेव **कुम्भकार**मनुष्य**शरीरं मृदादि** मृत्सिकता-लोष्ट-वज्रा-ऽश्म-शिलादिपृथिवीकायतिर्यक्शरीरं च, **आदि**ग्रहणादप्तेजो-वायु-वनस्पतितिर्यक्शरीरं देवशरीरं नारकीयं च । तद् भावयति --**शब्दोपयोगे**त्यादि । शब्दात्मक उपयोगः श्रुतज्ञानं व्यक्ताव्यक्तम्,

२ श] दृश्यतां पृ॰ ३७८-- १ ॥
६ वृत्तिवृ] ॰वृत्तित्वं प्र॰ ॥
७ कृ] क्रम्यादीनांnayacakra-ms-bhā ॥
७ तु] मुnayacakra-ms-bhā । मू nayacakra-ms-ya ॥
१३ स] दृश्यतां पृ॰ ११० पं॰ ७, पृ॰ ३५१ पं॰ ४, टिपृ॰ ६७ पं॰ ७ ॥
१६ मुद] ॰दये हो+इ पहाnayacakra-ms-ya ॥

तत्सम्बन्धाद्वद्यः कायवाङ्मनःकर्मयोगः शुभोऽशुभो वा स आश्रवः पुण्यपापयोः, एकेन्द्रियादिजातिनाम्नस्तिर्यग्भेदस्य योगवक्रता विसंवादनं च, तद्विपरीतं योगावक्रत्वमविसंवादनं [च] शुभस्य मनुष्य-देवपञ्चेन्द्रियजात्यादिनाम्नः, **आदिग्रहणादविसंवादनग्रहणात्** । **आदेः** इति पञ्चमीनिर्देशाद्धेतोरित्यर्थः । कुम्भकारशरीरमृदादि तथा तथा तत्प्रभवमेव इति वर्तते । उक्तमिदं प्रक्रियायुक्त्या, न पुनर्हेतुना शब्दानुविद्धचैतन्यात्मकत्वमिति चेत्, एतर्हि ब्रूमः **--रूपादिमदर्थविरचनात्मकत्वात्,** रूप-रस-गन्ध-शब्द-स्पर्श 560/mj

* * *

कुम्भकारकार्यवत् ।

नाम्न एव च प्रभावाद् घटस्य घटत्वम्, न बहिर्निमित्तापेक्षम् । तथाहि— स्कन्दनादिनिमित्तानामनुपपत्तावपि जीवस्याजीवस्य वा निमित्तनिरपेक्षा संज्ञा क्रियते स्कन्दो रुद्र इन्द्र इति । प्रत्यक्षत्वात् सर्वलोकप्रसिद्धशब्दाभिधेयत्वाच्च तद्भूताः प्रत्यक्षाश्च गोपालादयो मुख्यया च वृत्त्योच्यन्ते तस्मात् त एव ते ।

* * *

सङ्ख्या--संस्थानादयो रूपादयः, ते यस्य सन्ति सोऽर्थो रूपादिमदर्थः, तस्य विरचना परस्परसम्बन्धानुरूप्येण घटना, स एवात्मा यस्य स्वरूपं मनुष्यतिर्यगङ्गोपाङ्गादिनामनिर्वृत्तकुम्भकारशरीरमृदादेरिति धर्मित्वेन सम्बध्यते - /ms । **कुम्भकारकार्यव**दिति दृष्टान्तः, यथा हि घटपिठरादि कुलालकार्यं तेन तेन मृन्मर्दनादिप्रकारेणान्तःसन्निविष्टशब्दानुविद्धकुम्भकारप्रवृत्त्या निर्वर्तितत्वात् तत्प्रभवं तदात्मकं कुम्भकारप्रवृत्त्यात्मकं रूपादिमदर्थविरचनात्मकत्वात् तथा कुम्भकारशरीरमृदाद्यप्यन्तः सन्निविष्टशब्दानुविद्धचैतन्यप्रवृत्त्यात्मकमिति । § 1600

अत्राह--प्रत्यक्षत एव दण्डादिबहिर्निमित्तादृते घटानिर्वृत्तेः कथमिदमवधार्यते--नाम्नः साक्षाद् भवति, न दण्डादिभ्य इति ? अत्रोच्यते **--नाम्न एव** **चे**त्यादि । दण्डादीनां सतामप्यकिञ्चित्करत्वाच्छब्दचैतन्यस्यैव **प्रभावात्** तत्प्रेरितप्रयत्नपरिस्पन्दजनितनिष्पत्ति**घटाख्यस्य वस्तुनस्तद्वस्तुत्वं घटत्वं** नाम्न एव महिम्नो लभ्यते **न बहिर्निमित्तापेक्षम्** । तत्प्रवृत्तीनामपि स्थाने

१ त] **तत्सम्बन्धाद्ध काय°**nayacakra-ms-ya । **तत्सम्बन्ध काय°** nayacakra-ms-bhā । तत्सम्बद्धकायवाङ्मनःकर्मयोगः इत्यपि पाठोऽत्र भवेत् ॥
१ का] कायवाङ्मनःकर्म योगः । स आश्रवः । शुभ पुण्यस्य । अशुभः पापस्य ।--**तत्त्वार्थ सू°** ६ । १--४ ॥
२ स्य] योगवक्रता विसंवादनं चाशुभस्य नाम्नः । विपरीतं शुभस्य ।--**तत्त्वार्थसू°** ६ । २१--२२ ॥
५ था] **तथा तथा**nayacakra-ms-bhā ॥
२४ घ] **घटादिनिर्वृत्तेः**nayacakra-ms-ya ॥
२७ निष्प] °निष्पत्तेर्घटाख्यस्य वस्तुनस्तद्वस्तुत्वं ?°निष्पत्तिर्घटाख्यस्य वस्तुनः, तद्वस्तुत्वं ? ॥
२७ घ] **घटत्वं**nayacakra-ms-bhā मध्ये नास्ति ॥
२८ म] **महिम्नः** इति पञ्चम्यन्तं पदम् ॥
२८ स्था] **स्थाने शब्द°**nayacakra-ms-bhā ॥

स्थाने शब्दचेतननियोजितानामात्मलाभात् तदात्मत्वम्, इतरथा तेषामतदात्मत्वे स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो घटस्य घटत्वं वस्तुत्वम् ? तस्मात् सर्वकारकसान्निध्येऽपि कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावः घटौदनपटवागादेः, अतः शब्दप्रभावप्रभवं सकलं जगदिति । **तथा हीत्यादि** तन्निरूपयति । हिशब्दो निदर्शने, एवं च कृत्वा स्कन्दरुद्रेन्द्राः **स्कन्दिर् शोष-**
- /ms **णे, रुदिर् अश्रुविमोचने, इदि परमैश्वर्ये** पा० धा० इति स्कन्दनेन निमित्तेन स्कन्दः, रोदनेन रुद्रः, इन्दनेन इन्द्रः इत्येतेषां **निमित्तानामनुपपत्तावपि** गोपशुपालादे**र्जीवस्याजीवस्य वा** काष्ठकुड्यपाषाणादे**र्निमित्तनिरपेक्षा संज्ञा क्रियते स्कन्दो रुद्र इन्द्रः इति,** गोपालादीनामेव तैस्तैः शब्दैः समध्यारोपवशाच्चोच्यते । स्यान्मतम्--भवतीति भवो रोदितीति रुद्र इन्दतीति इन्द्र इति देवताविशेषाः तन्निमित्तभूतार्थभाजः सन्त्यप्रत्यक्षाः समयान्तरप्रसिद्धाः, तन्मुख्यप्रवृत्तेरितरत्रोपचारो भविष्यतीति । एतच्चायुक्तम्, **प्रत्यक्षत्वादित्यादि** यावत् **त एव ते** । अप्रत्यक्षास्ते भव **-**कार्तिकेयादयः समयान्तरप्रसिद्धशब्दपरिकल्पगम्या न सर्वलोकप्रसिद्धशब्दाभिधेया यथा गोपालादयः प्रत्यक्षाः सर्वलोकप्रसिद्धशब्दाभिधेयाश्चेति तेषां सत्त्वं तच्छब्दात्मकत्वं चाप्रत्यक्षममुपचारगम्यं चेत्येतेभ्यः कारणेभ्य**स्तद्भूताः** स्कन्दादिशब्दभूताः **प्रत्यक्षाश्च गोपालादयो मुख्यया च वृत्त्योच्यन्ते तस्मात् त एव ते,** गोपालादय एव स्कन्दादयः, न समयान्तरपरिकल्पिताः सन्तीति । तस्माच्छब्दशक्तिप्रभावादेव
561/mj संज्ञा

* * *

येऽपि च ते समयान्तरपरिकल्पिताः स्कन्दरुद्रेन्द्राः तेषु एकस्मिन्नितरसंज्ञयोरपि प्रवृत्तिनिमित्तसद्भावात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः स्युः ।

अथान्यतमनिमित्तमात्रं तत्त्वमिष्यते इष्टार्थविवक्षया एवं तर्हि विवक्षितेष्टार्थविषयव्यवहरणादन्तर्निविष्टशब्दानुबद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतः, बहिर्निमित्तं तु त्यक्तम् ।

निमित्तप्रत्ययेन संज्ञाप्रवृत्तौ यावत्सम्भवं संज्ञासन्निवेशे भावकादयोऽपि ते प्राप्ताः । तथा च यावत् किञ्चिद् भवननिमित्तग्रस्तं तस्य सर्वस्येन्द्रस्कन्दादिरर्थः सर्वधातुभ्वर्थत्वात् पर्यायो घटकुटशब्दवत् । सम्भविघटनादिस्कन्दनादित्वाच्च सर्वसर्वत्वम् ।

* * *

सन्निवेशो न निमित्तान्तरात् । अभ्युपेत्यापि समयान्तरपरिकल्पितानां स्क-

२ त्व ]
त्वस्वरूप°nayacakra-ms-bhā ॥
५ स्क ] स्कन्दिरशोषणे रुदिरु अश्रु° प्र° ।
स्कन्दिर् गतिशोषणयोः ९७९, रुदिर् अश्रुविमोचने १०६७, इदि परमैश्वर्ये ६३ --पा° धा° ॥
८ कु ] °कुष्ठ° ? ॥

१० वो ] रोदतीति प्र° ॥
१३ त ] त एव तेपु प्रत्यक्षास्ते nayacakra-ms-bhā । त एव तेषु प्रत्यक्षास्ते nayacakra-ms-ya ॥
१४ रिक ]
°कल्पाःnayacakra-ms-bhā ॥

न्दादीनामस्तित्वं निमित्तनियमाभावदोष उच्यते --**येऽपि च त** इत्यादि । स्कन्देऽपि रोद[नमिन्द]नं च स्तः, अतः स रुद्र इन्द्रो वा किं न भवति ? तथा रुद्रेऽपि स्कन्दनेन्दने इन्द्रेऽपि रोदनस्कन्दने ततः स इतर इतरः स किं न भवति ? एकस्मिन्नितरयोरपि संज्ञयोः प्रवृत्तेर्निमित्तमस्त्येव । तस्मात् **त्रयोऽपि परस्परसंज्ञानिर्देश्याः** सङ्करेण **स्युः** । **अथ** मा भूदेष दोष इत्यन्यतममेव निमित्तमेकं तत्त्वमिष्यतेऽसङ्कीर्णसंज्ञाव्यवहारार्थं स्कन्द एव, न रुद्रो नेन्द्रः इतीष्टार्थविवक्षया **एवं तर्हि अन्यतमनिमित्तमात्र-** - /ms **तत्त्वया**ऽवधृतया संज्ञया **विवक्षितेष्टार्थविषयव्यवहरणादन्तर्निविष्टशब्दानुबद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतः, बहिर्निमित्तं तु त्यक्तमिति** दोषः, तुशब्दादनिष्टसम्परिग्रहेष्टत्यागौ विशेषयति । § 1601

किञ्चान्यत्, **निमित्यप्रत्ययेने**त्यादि । यदि स्कन्दनादिनिमित्तप्रत्ययेन संज्ञाप्रवृत्तिस्ततो **यावत्सम्भवं** याव[न्ति] निमित्तानि भवन-करण-शयन-भाषण-चङ्क्रमण-वर्तन-परिणमनादीनि सम्भवन्ति तावद्भिर्निमित्तैः **संज्ञासन्निवेशे** सति रोदनाद् रुद्रो भवनाद् भवो भावकः करणात् कारक इत्यादिसर्वव्यपदेशभाक्त्वाद् **भावकादयोऽपि ते प्राप्ताः** । ततश्च **तथा च यावदि**त्यादि, यत् परिमाणमस्य यावत्, यावदेव **किञ्चिद् भवननिमित्तग्रस्तं** सर्वमित्यर्थः । **तस्य सर्वस्य** घटपटादे**रिन्द्रस्कन्दादिरर्थः** सर्वधात्वर्थानां भ्वर्थत्वात् **पर्यायः**, तद्वाचिनश्च पर्यायशब्दा एव । किमिव ? **घटकुटशब्दवत्** । सर्व एव सर्वः, घटः स्कन्दः, पटः स्कन्दः, स्कन्दवैद्योऽपि स्कन्दः । एवं रुद्रेन्द्रादयश्च । स्कन्दोऽपि घटः पटश्चेत्यादि प्राप्तम् । एवं तावत् सर्वधातुभ्वर्थत्वात् सर्वसर्वत्वमविशेषात् । किञ्चान्यत्, विशेषतोऽपि **सम्भविघटनादिस्कन्दनादित्वाच्च सर्वसर्वत्वम्** । चेष्टा-कौटिल्याद्यभिसन्ध्यनभिसन्धिपूर्वकपरिस्पन्दार्थत्वात् परिणत्यर्थ 562/mj

* * *

एवमपि तु स्थितेऽर्थप्रतिपादनार्थत्वाच्छब्दप्रयोगस्य सर्वसर्वाभिधानलक्षणाव्यवस्थाव्यावर्तनार्थं बहिर्निमित्तनिरपेक्षं संज्ञामात्रसन्निवेशितं स्कन्दादित्वमभ्युपगन्तव्यम् ।

एवं हि सङ्केतमात्रत्वाच्छब्दार्थसम्बन्धस्य मुख्यार्थाः सर्वदेशभाषा इत्येत-

---

३ ने] एतदन्तर्गतः पाठो nayacakra-ms-ya मध्ये नास्ति ॥
४ इ] **इतरस्य किं** प्र° ॥
६ त्व] °मिष्यताnayacakra-ms-bhā । °मिष्यत्ता nayacakra-ms-ya ॥
९ ब] **बहिर्निमित्तं प्रत्यक्षमिति** प्र° ॥
१५ भा] °**भाक्तत्वाद्** प्र° ॥
१७ भ्व] **त्वर्थत्वात्** प्र° ॥ दृश्यतां पृ° २४४ पं° ३ ॥
१९ प] **पटः स्कन्दः**nayacakra-ms-bhā मध्ये नास्ति ॥
१९ स्क] स्कन्दवद्योऽपि इति पाठोऽत्र सम्भवेत्, घटः स्कन्दः पटः स्कन्दः स्कन्दवत्, योपि स्कन्दः स स्कन्दः इति च तस्याशयो ज्ञेयः ॥
२० धातु] °धातुः **त्वर्थत्वात्** प्र° ॥
२१ स] **सम्भवविघ°** प्र° ॥
२२ स] **सर्वसर्वसर्वत्वम्**nayacakra-ms-bhā ॥

दयत्वसिद्धम् । इदमप्यभियुक्तानामत एव स्मरणमुपपन्नम्--अनेकार्था धातवः... ... ... दृश्यताम् । इति चेतनाचेतनभेदस्य समस्तस्यास्य जगतो भावकं नाम । घटस्य द्रव्यं

* * *

- /ms त्वात् सर्वेषां ज्ञान-गत्यर्थानां स्कन्दन-शोषण-विसरण-रोदनेन्दन-सदन-स्तम्भनाद्यर्थानां यावतां यस्मिन्नर्थे सम्भवस्तस्य तस्य तथार्थत्वे सर्वसर्वत्वम् । वसनाद् वस्तुवास्तुनी, शयनस्थानासनाद्येकार्थत्वाच्च गतिनिवृत्ति-पर्यायाणां शेषधातूनां च वस्त्वर्थानतिवृत्तेः कतमद् द्रव्यं कतमेन निमित्तेन नाभिधीयते ? ततः सर्वसर्वत्वम् । § 1602

स्यान्मतम्--एवं तर्हि सुतरामतिप्रसङ्गापादनद्वारेण त्वयैव सर्वस्य बहिर्निमित्तापेक्षत्वं समर्थितम्, त्वत्पक्षेऽपि च सर्वसर्वाभिधानातिप्रसङ्गो दुर्निवार इति । एतच्चायुक्तमुक्तन्यायेनैव, **एवमपि तु स्थित** इत्यादि यावत् **स्कन्दादित्वमभ्युपगन्तव्य**मिति स्वप्रतिपिपादयिषितार्थप्रतिपादनार्थत्वाच्छब्दप्रयोगस्य प्रसक्तेऽपि सर्वसर्वत्वे सर्वसर्वाभिधानलक्षणाऽव्यवस्था प्राप्तैव, सा मा भूदिति तद्व्यावर्तनार्थं स्कन्दादिशब्दाः कस्मिंश्चिदर्थे बहिर्निमित्तनिरपेक्षाः संज्ञामात्रत्वेन सन्निवेशिताः सन्तो नियमेन तमेवार्थमभिदधतीति प्राप्तम्, इतरथा सर्वसर्वत्वे सर्वाभिधानाव्यवस्थाऽवश्यम्भाविनी । तस्मात् संज्ञासन्निवेशान्न मे कश्चिद् दोष इति । तस्माच्चोद्याभासमेतत् समानदोषत्वादिति । § 1603

ततो भवति इति प्रतिपादितत्वात् सिद्धो हेतुः । यद् यतो भवति तत् तस्य कारणं दृष्टम्, यथा मृद् मृदो भवतो घटस्य कारणं तथा नाम घटस्य कारणमित्येतमर्थमुपनयति **--अनये**त्यादि । यथा घटस्य मृद् द्रव्यं भवति तथा नामेत्यर्थः । **घटक्रियात्मकत्वं वा भावकत्वं** नाम्न इति वर्तते, शब्दो द्रव्यभावं घटकरणात्मकत्वात् पूर्वोक्तात् प्रतिपद्यते, तस्माद् घटं भावयति नाम, नाम्नो घटो भवतीत्यर्थः । § 1604

**एवं ही**त्यादि अस्य न्यायस्य व्याप्तिप्रदर्शनम् । एवं च कृत्वा सङ्केतमात्रत्वाच्छब्दार्थसम्बन्धस्य **मुख्यार्थाः सर्वदेशभाषा** इत्येतदयत्नसिद्धम् घटः कुटः कुम्भः क्षीरं पयः पालि दुग्धम् अग्निरातुरः *किचु मङ्गलः इत्यादीनां च सङ्केतवशादभिधित्सितैकार्थवाचित्वं सिद्धम्, *नियतनिरपेक्षत्वात् सङ्केतस्य

---

२ दृ] दृश्यतामिति । चेतनाचेतनभेदस्य इत्यपि योजनाऽत्र भवेत् ॥
५ विस] **°विशरण°** इति पाठोऽप्यत्र भवेत् । तुलना षद्लृ **विशरण**गत्यवसादनेषु **--पा° धा°** ८५४, १४२८ ॥
५ स] **°सदन°**nayacakra-ms-ya मध्ये नास्ति ॥
७ ग] ष्ठा गतिनिवृत्तौ— **पा° धा°** ९२८ ॥
१० स] **°सङ्गोपादान°** प्र° ॥
१४ स] **सर्वसर्वसर्वत्वे**nayacakra-ms-bhā ॥
२२ *] **किच्चु**nayacakra-ms-bhā ॥
२२ म] दृश्यतां टिपृ° ६३ पं° २० ॥
२३ *] **नियता°**nayacakra-ms-bhā । निमित्तनिरपेक्षत्वात् ? ॥

स्वोपयोगप्रतिपादनसमर्थत्वाच्च तेषां तेषां शब्दानां डित्थादिवत् । **इदमप्य-भियुक्तानामत एव स्मरणमुपपन्नम्**, नान्यथा, यथा --**अनेकार्था धातव** इति गतार्थं यावद् **दृश्यताम्** । **इति चेतनाचेतने**त्यादि, अनेन प्रकारेण यदुक्तं नाम त**च्चेतनाचेतनभेदस्य** कुम्भकार-घटादेः पृथिव्यादि-मनुष्य-नार-कतिर्यक्-सिद्ध-परमाणु-कालाकाशादेः **समस्तस्यास्य जगतो भावकं नाम** समस्तं जगद् नाम्नो भवति इति भावितम् । तस्मादेव घटो भवति, **घटस्य द्रव्यं** कारणम्, घटं भावयति नाम, - /ms

नाम, घटस्य ततो भवनात्, मृद्वत् । अनया [यथा घटो भवति तथा नाम्ना घटो भवति] घटक्रियात्मकत्वं वा भावकत्वम् । रूपाद्युपयोगभवनम-न्तर्निविष्टशब्दानुबद्धं तच्छब्दात्मकम् । तस्मान्नामद्रव्यस्यानुपसर्जनतैव । एष नामद्रव्यार्थनयः ।

अस्यापि नियमः । उपसर्जनत्वेनेष्यते, न प्राधान्येन । अर्थार्थत्वाच्छब्द-प्रयोगस्यार्थः प्रधानम्, न शब्दः । अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वाद् ज्ञानमेव प्रधानम् । न हि नाम्नो घटादि भवति । ततस्तु श्रोत्राभिघात एवोत्पद्यते । तथा च यदि नाम्नो घटोत्पत्तौ द्रव्यत्वं स्यात् ततो घटार्थिनो भवतु घट इति प्रब्रवीरन् ।

तस्मात् प्रवृत्ति-निवृत्तिकारणमर्थार्थिनां तदभावार्थिनां च क्षायोपशमिको

* * *

भवनात्,**घटस्य ततो** 563/mj

* * *

नाम, घटस्य ततो भवनात्, मृद्वत् । अनया [यथा घटो भवति तथा नाम्ना घटो भवति] घटक्रियात्मकत्वं वा भावकत्वम् । रूपाद्युपयोगभवनम-न्तर्निविष्टशब्दानुबद्धं तच्छब्दात्मकम् । तस्मान्नामद्रव्यस्यानुपसर्जनतैव । एष नामद्रव्यार्थनयः ।

अस्यापि नियमः । उपसर्जनत्वेनेष्यते, न प्राधान्येन । अर्थार्थत्वाच्छब्द-प्रयोगस्यार्थः प्रधानम्, न शब्दः । अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वाद् ज्ञानमेव प्रधानम् । न हि नाम्नो घटादि भवति । ततस्तु श्रोत्राभिघात एवोत्पद्यते । तथा च यदि नाम्नो घटोत्पत्तौ द्रव्यत्वं स्यात् ततो घटार्थिनो भवतु घट इति प्रब्रवीरन् ।

तस्मात् प्रवृत्ति-निवृत्तिकारणमर्थार्थिनां तदभावार्थिनां च क्षायोपशमिको

---

१ त्वाच्च ] तेषां शब्दानांnayacakra-ms-bhā ॥
२ अ ] कथमञ्जिरश्वत्यर्थेऽपि वर्तते ? अनेकार्था अपि धातवो भवन्ति ।--nayacakra-ms-pā म॰ nayacakra-ms-bhā ८ । २ । ४८ ॥
३ दृ ] दृश्यतामिति चेतनाचेतनेत्यादि प्र॰ । अत्र दृश्यतामिति । चेतनाचेतनेत्यादि इत्यपि योजना भवेत् ॥
१५ त ] ततोऽर्थार्थिनस्तदभावार्थिनश्च भवतु मा भूदिति वा प्रब्रवीरन् इत्यपि मूलमत्र सम्भवेत् ॥
२७ त ] ततोऽर्थार्थिनस्तदभावार्थिनश्च भवतु मा भूदिति वा प्रब्रवीरन् इत्यपि मूलमत्र सम्भवेत् ॥

* * *

भवनात्,

**रूपाद्युपयोगे**त्यादि । अथवा रूपाद्युपयोगो रूपादिज्ञानम्, तस्य **भवनमन्तर्निविष्टशब्दानुबद्धं तच्छब्दात्मकम्,** रूपणाद् रूपम्, रस्यत इति रसः, घ्रायत इति गन्धः, श्रोत्रग्रहणं शब्दः इति लक्षणात् तस्योपयोगस्य शब्दात्मकत्वाद् रूपादीनां च तदात्मकत्वाच्छब्दो रूपादिरपि भवति । **तस्माद् नामद्रव्यस्यानुपसर्जनतैव** प्राधान्यमेवेत्यर्थः । **एष नामद्रव्यार्थनयः** पूर्वपक्षः । § 1605

अत्रोत्तरमुभयनियमभङ्गारः शब्दनयो वक्ष्यत्यतः **--अस्यापि नियम** इत्यादि । एषोऽपि नामद्रव्यार्थभावो नियतः **उपसर्जनत्वेनेष्यते न प्राधान्येन,**
- /ms प्राधान्येन तु विशेषो नियत इत्युक्तः । न ब्रूमः-- शब्दो निमित्तमात्रव्यापृतो ज्ञानोपकारी नास्ति इति । ज्ञानस्यैव प्रधानस्योपकारकत्वेन वर्तते ज्ञानेनैव चोत्थाप्यते, अर्थप्रत्यायनार्थत्वाच्छब्दप्रयोगस्य । तस्मादर्थार्थत्वाच्छब्दप्रयोगस्यार्थः प्रधानं न शब्दः, तस्याशब्दार्थत्वात् । अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वाद् ज्ञानमेव प्रधानम् । न च ज्ञान-शब्दयोरैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम् । यस्मात् प्रत्यक्षमेव **न नाम्नः** शब्दाच्छ्रोत्राभिघातकाराद् **घटादि भवति,** न शब्दः कारणं घटस्य ततोऽनुत्पत्तेः । **ततस्तु शब्दाच्छ्रोत्राभिघात एवोत्पद्यते,** तस्माच्छब्दः श्रोत्राभिघाते हेतुर्न घटे न ज्ञाने । § 1606

**तथा चे**त्यादि यावत् **प्रब्रवीर**न्नित्यनिष्टापादनम् । यदि शब्दस्य घटोत्पत्तौ द्रव्यत्वं स्यात् ततो घटार्थिनो भवतु घट इति प्रब्रवीरन्; अरिविनाशार्थिनश्च राजानो विजिगीषवो न हस्त्यश्वं बिभृयुः, परबलमेति मा भूत् इति वा ब्रूयुः । न च तद् दृष्टमिष्टं वा । § 1607

**तस्मात् प्रवृत्ति-निवृत्तिकारणमर्थार्थिनां तदभावार्थिनां च क्षायोपशमिको भावः ज्ञानावरणक्षयोपशमनिमित्तं** ज्ञानमित्यर्थः, तत एव प्रवृत्तिनिवृत्तिदर्श-
564/mj नात् । सोऽपि द्रव्यार्थतां हित्वा

* * *

भावः । सोऽपि द्रव्यार्थतां हित्वा भवति । तेनापि विशेषेणैव भूयते । स हि भावागमः । शब्दो द्रव्यागमः । तथाह्याहुः--आगमतो जाणये अणुवयुत्ते

---

११ व्या] व्यावृतो प्र° ॥
१२ ना] **नाम्नीति** प्र° ॥
१७ तोऽनु] °नुपपत्तेः प्र° ॥
२१ प] परबलं मेतिnayacakra-ms-bhā ॥
२७ आ] से किं तं दव्वावस्सयं ? २ दुविहं पण्णत्तं तं जहा--आगम+ओ अ नो+आगम+ओ अ सू° १२ । से किं तं आगम+ओ दव्वावस्सयं ? २ जस्स णं आवस्स+एत्ति पदं सिक्खितं ठितं जितं मितं परिजितं नामसमं घोससमं अहीणक्खरं अणच्चक्खरं अव्वा+इद्धक्खरं अक्खलि+अं अमिलि+अं अवच्चामेलियं पडिपुण्णं पडिपुण्णघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं, से णं तत्थ वायणा+ए पुच्छणा+ए परि+अट्टणा+ए धम्मकहा+ए नो अणुपेहा+ए । कम्हा ? अणुव+ओगो दव्वमिति कट्टु सू° १३ । से तं आगम+ओ दव्वावस्सयं... ... ...सू° १४ ।... ... ...से किं तं आगमतो दव्वसु+अं ? २ जस्स णं सु+एत्ति पयं सिक्खियं ठियं जियं जाव णो अणुप्पेहा+ए । कम्हा ? अणुव+ओगो दव्वमिति कट्टु ।...से तं आगमतो दव्वसु+अं सू° ३३ । इति **अनुयोगद्वारसूत्रे** पाठ उपलभ्यते ॥

दव्वसुतं ।

ज्ञानमेव प्रधानम् । तत एव चास्योत्पत्तिः । प्रवृत्तिश्च तादर्थ्येन, शिबिकावाहकयानेश्वरयानवत् । अतस्त्वदुक्तिवदुपयोगविशेषभवनप्राधान्यं तत्कार्यत्वाच्छब्दस्य तत्कारणत्वाच्च ।

* * *

क्षायोपशमिको भावः क्षणे क्षणेऽन्यत्वाद् द्रव्यार्थतां त्यक्त्वा भवति क्षणिकत्वात् । **तेनापि विशेषेणैव भूयते,** विशेष एव भवति, उक्तशब्दार्थव्युत्पत्तिर्भवति, **भवत् प्रधानं भाव** इत्युपक्रम्य यावद् **बालादिभेदं दृश्यते एव** इत्यक्षरार्थो गतः । वस्त्वर्थतश्च भावितम् **--सामान्यमुपसर्जनं विशेषः प्रधानं भावः शिबिकावाहकयानेश्वरयानवदिति** । § 1608 - /ms

**स हि भावागमः,** यस्मात् क्षायोपशमिकभावो ज्ञानं भावागम उच्यते तस्मात् स प्रधानं भवति, मर्यादयाभिविधिना च गमोऽवबोधः, ततः शब्दस्यागमत्वम्, तत उत्थाप्यते शब्दो ज्ञानात् । तस्माच्छब्दो **द्रव्यागमः** । **तथाह्याहु**रिति शब्दद्रव्यागमत्वे ज्ञापकमार्षम् **--आगमतो जाणये अणुवयुत्ते दव्वसुत**मिति । § 1609

इतश्च ज्ञानमेव प्रधानम्, यस्मात् **तत एव चास्योत्पत्तिः** शब्दस्य ज्ञानादेवोत्पत्तिः, वक्तुर्ज्ञानिनोत्थापितत्वात्, ज्ञानमेव शब्दस्य कारणम् । प्रवृत्तोऽपि शब्दः **परतन्त्रो ज्ञानार्थत्वात्;** परतन्त्रो ज्ञानोत्पादनार्थत्वाच्छ्रोतरीत्यत आह **--प्रवृत्तिश्च तादर्थ्येन** । तन्मूलोत्पत्ति-तदर्थत्वाभ्यां ज्ञानं प्रधानमित्येतस्मिन्नर्थद्वये दृष्टान्तः **--शिबिकावाहकयानेश्वरयानव**दिति वैतनिकानां यानं यात्राप्रेरितमीश्वरेण प्रवृत्तमपीश्वरयानार्थम्, अतोऽपि द्विधापीश्वरप्राधान्यवद् ज्ञानप्राधान्यमिति । § 1610

**अतस्त्वदुक्तिव**दित्यादि । सामीप्येन सर्वात्मना योग उपयोगः रूपाद्यर्थसमीपे सर्वात्मप्रदेशानां तत्प्रवणता, **शब्दोपयोगात्मयोगवक्रताऽवक्रतादेस्**तिर्यग्-मनुष्यनामनिर्वर्तितं **मृदादि कुम्भकारादि** च यथासङ्ख्यं भवति **रूपादिमदर्थविरचनात्मकत्वात् कुम्भकारादिकार्यवद् नाम्नो भवति,**

आत्मा बुद्ध्या समर्थ्यार्थान् मनो युङ्क्ते विवक्षया । पा॰ शिक्षा ६ § 1612

इत्यादि सर्वं त्वदुक्तोपपत्तिजात**मुपयोगविशेषभवनप्राधान्यं** साधयति, **तत्कार्यत्वाच्छब्दस्य,** उप

७ व्युत्प ] °त्पत्तिभवतिnayacakra-ms-bhā ॥
८ भ ] दृश्यतां पृ॰ ८ पं॰ ७ ॥
८ बा ] दृश्यतां पृ॰ ५५५ पं॰ ७ ॥
९ सा ] दृश्यतां पृ॰ ५५६ पं॰ ५ ॥
१७ व ] वक्तुज्ञानेनो॰ प्र॰ ॥
१८ प ] परतन्त्राज्ञानोपादानार्थ॰nayacakra-ms-ya । परतन्त्रज्ञानोपादानार्थ॰ nayacakra-ms-bhā ॥
२४ श ] दृश्यतां पृ॰ ५५९ पं॰ ४ ॥
२७ स ] समेत्यार्थान्--nayacakra-ms-pā शिक्षा ॥

* * *

अथोच्येत--सामान्यमविशेषः, उभयोः परस्परकारणत्वाविशेषत्वात् । अथ कस्मादुपयोग एव नामत्वमापद्यते ? इति उपयोगत्वप्राप्तेर्नाम्नः सर्वत्र विशेषप्रधानत्वम् ।

तस्यापि वा नामशब्दस्य उरःप्रभृतीत्यादि[ना] नामद्रव्यार्थं हित्वा द्रव्यद्रव्यार्थोऽङ्गीकृतः मूर्तद्रव्याभ्युपगमात् । मूर्तममूर्तस्य द्रव्यं न भवति । नामशब्दो

* * *

योगस्य शब्दः कार्यम्, स एव कारणमुपयोगस्य कुम्भकारशरीरादेरिति तत्कारणं तदिति त्वयैव प्राग् भावितं विस्तरेणैतत् । § 1613

**अथोच्येते**त्यादि पूर्वपक्षो गतार्थो यावद**विशेषत्वा**दिति । **सामान्यमविशेषः**, तद्भवनमात्रत्वं न विशेष इत्येतदापन्नमिति भावितोऽर्थ **उभयोः परस्परकारणत्वाविशेषत्वा**दिति । § 1614

अत्रोत्तरम् --**अथ कस्मा**दित्यादि यावत् **सर्वत्र विशेषप्रधानत्व**मिति । उपयोग एव नामत्वमापद्यत इति विशेषस्योपयोगस्य प्राधान्यमुपयोगत्वप्राप्तेर्नाम्नः । **तस्यापि वा नामशब्दस्ये**त्यादि, नामशब्दः इति वीणा-वेणु-तालशब्दादिभ्यो विशिष्यते प्रकृतत्वादौपयोगित्वाच्च तस्य **उरःप्रभृतीत्यादि[ना]** नामद्रव्यार्थं **हित्वा** त्वया **द्रव्यद्रव्यार्थोऽङ्गीकृतः**, तद्यथोक्तम्—

आत्मा बुद्ध्या समर्थ्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥
मारुतस्तूपरि चरन् मन्द्रं जनयति स्वनम् ॥ ७ ॥ पा॰
शिक्षा § 1618

इत्यादिना **मूर्तद्रव्याभ्युपगमात्** । आर्षमपि ज्ञापकम्, नो+आगमतो द्रव्यं शरीरमुक्तम्, तद्यथा— **अहो णं इमेणं सरीरसमुस्स+एणं**

---

९ भा] दृश्यतां पृ॰ ५५९ पं॰ ४ ॥
११ भा]
भावितार्थोnayacakra-ms-ya ॥
१४ प्रा]
प्राधान्यामुप॰nayacakra-ms-bhā ।
प्राधान्यानुप॰ nayacakra-ms-ya ॥
१५ इति] **वीणावीणुताल॰** प्र॰ ॥
१८ स] वाक्यपदीय१ । ११६स्ववृत्तौ भर्तृहरिणापि समर्थ्यार्थान् इति पाठेनायं श्लोक उद्धृतः । समेत्यार्थान् --nayacakra-ms-pā **शिक्षा** ॥
२० मा] मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्--nayacakra-ms-pā **शिक्षा** ॥
२२ मुस्स] **॰स्स+एण** प्र॰ ॥ से किं तं नो+आगम+ओ दव्वावस्सयं ? २ तिविहं पण्णत्तं, तं जहा--जाणयसरीरदव्वावस्सयं भवि+असरीरदव्वावस्सयं जाणयसरीरभवि+असरीरवतिरित्तं दव्वावस्सयं सू॰ १५ । से किं तं जाणयसरीरदव्वावस्सयं ? २ आवस्स+एत्ति पयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुतचावितचत्तदेहं जीवविप्पजढं सिज्ञागयं वा संथारगयं वा निसीहि+आगयं वा सिद्धसिलातलगयं वा पासित्ता णं को+ई भणेज्ञा --**अहो णं इमेणं सरीरसमुस्स+एणं जिणदिट्ठेणं भावेणं आवस्स+एत्ति पयं आघवियं पण्णवियं** परूवि+अं दंसि+अं

**सामा+इ+एत्ति पदं आघवितं पण्णवितं** इत्यादि । तस्माच्छब्दकारणत्वत्यागेन मूर्तद्रव्यकारणत्वाभ्युपगमस्ते विरोधायापद्यते । अत आह --**मूर्तममूर्तस्य द्रव्यं न भवति** परिणामिकारणमित्यर्थः । यथा मूर्तममूर्तस्य कारणं न भवति इत्ययमभ्युपगमः तथा नामशब्दस्य मूर्तत्वादमूर्तोपयोगकारण्यं न युज्यते । § 1619

न हि मूर्तममूर्तत्वं नामूर्तमेति मूर्तताम् ।द्रव्यं त्रिष्वपि कालेषु च्यवते नात्मभावतः ॥ § 1621

--**नामशब्दो** (Edtext outside numbered paragraph) (Edtext outside numbered paragraph)

* * *

मूर्तः कुड्यादिप्रतिहतगतित्वाद् लोष्टादिवत् । तद् नाम नोपयोगस्य द्रव्यं मूर्तत्वाद् मृद्वत् । उक्तं हि--

नन्वन्योन्यानुगतस्वरूपत्वाद् निर्वृत्त्युपकरणेन्द्रियज्ञानतन्वात्मद्रव्यवद् द्रव्यं मूर्तममूर्तस्य ज्ञानस्य । द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यम् । शरीरादिकरणाद् भवान्तरात्मनस्तन्वादि द्रव्यम्, घटश्च घटाकाशस्य ।

* * *

मूर्त

न हि मूर्तममूर्तत्वं नामूर्तमेति मूर्तताम् ।द्रव्यं त्रिष्वपि कालेषु च्यवते नात्मभावतः ॥ § 1623

इति [प्रति]पद्यताम्, **कुड्यादिप्रतिहतगतित्वात्,** यस्य गतिः कुड्यादिभिः प्रतिहन्यते तद् मूर्तं दृष्टम्, यथा **लोष्टादीति** । **तद् नाम नोपयोगस्येत्यादि** अर्थप्रदर्शनसाधनम् । उपयोगो न मूर्तद्रव्यहेतुकः, **अमूर्तत्वात्, आकाशवत्,** न ह्याकाशं मृदादिदण्डादिमूर्तद्रव्यस्य कार्यमिति साधर्म्यदृष्टान्तः । **मृद्वदिति**

निदंसि+अं, जहा को दिट्ठंतो ? अयं महुकुंभे आसी, अयं घयकुंभे आसी, से तं जाणयसरीरदव्वावस्सयं सू° १६ ।... ...नामनिप्फण्णे सामा+इ+ए । से समास+ओ च+उव्विहे पं°, तं° णामसामा+इ+ए ठवणासामा+इ+ए दव्वसामा+इ+ए भावसामा+इ+ए । नामठवणा+ओ पुव्वं भणिया+ओ । दव्वसामा+इ+ए वि तहेव सू° १५० । इति **अनुयोगद्वारसूत्रे** उल्लेखः ॥

१२ न] नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्तताम् । द्रव्यं त्रिष्वपि कालेषु च्यवते नात्मभावतः ॥ इत्यपि पाठोऽत्र सम्भवेत् । तुलना--नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्तताम् । --**शास्त्रवार्तासमु°** ३ । ४१ । नामूर्तं मूर्ततामेति मूर्तं नायात्यमूर्तताम् । द्रव्यं कालत्रयेऽपीत्थं च्यवते नात्मरूपतः ॥ --**सन्मतिवृत्तिः** १ । ५३, पृ° ४५६ ॥

७ न] नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्तताम् । द्रव्यं त्रिष्वपि कालेषु च्यवते नात्मभावतः ॥ इत्यपि पाठोऽत्र सम्भवेत् । तुलना--नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्तताम् । --**शास्त्रवार्तासमु°** ३ । ४१ । नामूर्तं मूर्ततामेति मूर्तं नायात्यमूर्तताम् । द्रव्यं कालत्रयेऽपीत्थं च्यवते नात्मरूपतः ॥ --**सन्मतिवृत्तिः** १ । ५३, पृ° ४५६ ॥

वैधर्म्येण, यद् मूर्तद्रव्यहेतुकं न तदमूर्तं यथा मृदिति । अथवा नामूर्तस्य द्रव्यं नामशब्दः, **मूर्तत्वात्, मृद्वत्** । यदमूर्तस्यावगाहादेर्द्रव्यं न तद् मूर्तम्, यथा आकाशमिति । **उक्तं** **हीत्यादि** ज्ञापकमाह । **न हि मूर्तममूर्तत्वं** वर्णादिमत् पु[द्ग]लद्रव्यं मूर्तं सदवर्णाद्यात्मकत्वममूर्तत्वं न **गच्छति** न तथा परिणमति जीवा-ऽऽकाश-धर्मा-ऽधर्मत्वं न याति । **नामूर्तमेति मूर्तत्वम्,** नाप्याकाशाद्यमूर्तं मूर्तत्वं प्रयाति । **द्रव्यं त्रिष्वपि** अतीतानागतवर्तमानेषु **कालेषु,** न कदाचिदित्यर्थः, यस्माद् **नात्मभावम्,** यावद्द्रव्यभावी यो धर्मः स आत्मभावः, तमात्मभावं न कदाचित् **परित्यजति** द्रव्यमिति । § 1624

नन्वन्योन्यानुगतस्वरूपत्वाद् निर्वृत्त्युपकरणेन्द्रियज्ञानतन्वात्मद्रव्यवद् द्रव्यं मूर्तममूर्तस्य ज्ञानस्य । द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यम् । शरीरादिककरणाद् भवान्तरात्मनस्तन्वादि द्रव्यम्, घटश्च घटाकाशस्य ।

* * *

मूर्त

अत्राह --**नन्वन्योन्यानुगते**त्यादि यावद् **घटाकाशस्ये**ति । नात्मभावं त्यजति पररूपं नाप्नोति इत्येतदयुक्तम्, **अन्योन्यानुगतस्वपरत्वात्** क्षीरोदकवत् । अन्योन्यानुगतस्वरूपत्वनिदर्शनं **निर्वृत्ती**त्यादि यावद् **द्रव्यवत्** । वत्करणं
- /ms निर्वृत्त्युपकरणेन्द्रियज्ञानवत् तन्वात्मद्रव्यवच्च इति प्रत्येकं परिसमाप्यते । **द्रव्यं** कारणं **मूर्तममूर्तस्य ज्ञानस्य,** द्विविधं द्रव्येन्द्रियम्--निर्वृत्तिरुपकरणं च, निर्वृत्तिः पक्ष्मपुट-कृष्णसारादिद्रव्यनिष्पत्तिः, निर्वृत्तमुपकरोति इत्युपकरणं मसूरकाकाराश्चक्षुर्मध्यप्रदेशाः प्रकाशाञ्जनादयश्चोपकरणानि । एतद् द्विविधमपि ज्ञानस्य द्रव्यं दृष्टम् । तस्य व्याख्यानम् --**द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यम्** । तथा तन्वात्मवत् इत्यस्य व्याख्या --**शरीरादिकरणाद् भवान्तरात्मनः,** *कायादित्रिविधयोगकार्यं शरीराङ्गोपाङ्गादिनामकर्म, तस्य करणात् **तन्वादि** भवान्तरे जन्मान्तरे य आत्मा तस्य **द्रव्यं** कारणं भवति । **घटश्च घटाकाशस्ये**ति मूर्तो घटोऽवगाहानुमेयस्याकाशस्यावगाहात्मन इति । § 1625

567/mj

आगतं तर्ह्येतद् योऽर्थो द्रव्यं सोऽस्वतन्त्रो विशेषेण तथा तथा भाव्यते, ज्ञानमात्मा च विशेष एव भवति । तत्र यदि [सेन्द्रियाणि मतिश्रुतावधिमनःपर्यायज्ञानानि ततस्तेषामिन्द्रियकृतत्वाद-

---

९ स्व ] °स्वपत्वात् nayacakra-ms-ya । अत्र **स्वरूपत्वात्** इति पाठः समीचीनो भाति ॥
१२ ज्ञा ] **ज्ञानस्य द्रव्यं द्रव्येन्द्रियम्**nayacakra-ms-bhā ॥
१२ काकारा ] °**रश्चक्षु**° प्र° ॥
१५ श्चोप ] °**श्चोपकारणानि** प्र° । श्चोपकारकाणि ? ॥
१० * ] एतदन्तर्गतः पाठो nayacakra-ms-ya मध्ये नास्ति ॥

ज्ञानत्वात् केवलमेव] एकं ज्ञानं स्यात् । आत्मनश्च [अशरीरस्यैव स्वतन्त्रस्य कर्तृत्वात्] अशरीरेण सिद्धकेवलिना कृतं कर्मअन्वेष्यं स्यात् । न हस्तादिमद्रागिकृतमपि स्यात् कर्म, तस्यैव संसारित्वेष्टेः... ... आत्मनोऽन्यत्वात् । तथा आकाशघटयोरनावृत्यावृत्यात्मकत्वात् कुतो घटाकाशमाकाशघटो वा ? एवं कुतः सान्योन्यानुगमरूपता ? § 1626

अन्यरूपानुगमात्तु चेतनाचेतनयोरात्मभावत्यागात् द्रव्यस्य सामान्यभवन- § 1627

अत्रोच्यते --**आगतं तर्ह्येत**दित्यादि यावद् **विशेष एव भवती**ति । **योऽर्थो द्रव्यं** सामान्यं विशेषो वा प्रकृत्यर्थः प्रत्ययार्थो वा भवनं भाव इति योऽस्तु सोऽस्तु सर्वथा **सोऽस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते** द्रव्येन्द्रियादि तत् सर्वात्मना **ज्ञानमात्मा च विशेषः** स भावयति । यद्यपि भवत् सामान्यं भावस्तथाप्युपसर्जनम्, विशेषः प्रधानमित्युक्तं भवति । **तत्र यदी**त्याद्यनिष्टापादनं परस्य याव**देकं ज्ञानं स्या**दिति हेतुहेतुमद्भावेन गतार्थम् । सेन्द्रियाणि मति-श्रुता-ऽवधि-मनःपर्यायज्ञानानि, तानीन्द्रियकृतत्वादज्ञानानि स्युः, **केवलज्ञानमेवैकं ज्ञानं स्या**दिति । § 1628

किञ्चान्यत्, --**आत्मात्मनश्चे**त्यादि । आत्मैव स्वतन्त्रश्चेतनत्वात्, न शरीरम्, स्वतन्त्रश्च कर्ता । ततश्चा**शरीरेण** शुद्धेन **सिद्धकेवलिना कृतं कर्मान्वेष्यं स्यात्,** तच्चात्यन्तदुर्लभं मुक्तसंसारप्रसङ्गादनिष्टं च । **न हस्तादिमद्रागिकृतमिष्टमपि स्यात् कर्म, तस्यैव संसारित्वेष्टेः** पूर्ववद्धेतुहेतुमद्भावेना- पादनं याव**दात्मनोऽन्यत्वात्** । एवं प्राच्योदाहरणद्वयं व्यभिचारितम् । तृतीयमपि **तथाकाश-घटयोर्यथासङ्ख्यमनावृत्या[वृत्या]त्मकत्वात्,** आकाशमनावृत्यात्मकं चेदावृत्यात्मकघटीभवति घटश्चानावृत्यात्मकाकाशीभवति आवृत्यात्मकः संस्ततो घटाकाशम् इति स्यात्, तत्तु त्वन्मते न । आकाशमेवामूर्तम्, तद्विपरीतो घटो मूर्त एवेति **कुतो घटाकाश**मुदाहरणं घटते, घटात्मानापत्तेराकाशस्य, आकाशानात्मापत्तेर्घटस्य **आकाशघटो वा** तद्विपरीतगुण उदाहरणमिति ? § 1629 - /ms

**एवमि**त्यादि । अनेन प्रकारेण द्रव्यस्य भवने परिगृहीते दृष्टान्तस्य विपर्ययसाधनत्वात् **कुतः सान्योन्यानुगमरूपता** या त्वया प्रतिज्ञाता **एवं** मदुक्त-

११ इ] इति वा ? ॥
२१ द्र] द्रव्येन्द्रियादिवत् सर्वात्मना ? ॥
२३ म] °मनावृत्त्यात्मकत्वात् आकाशमावृत्त्यनावृत्त्यात्मकं प्र° । आवृतिरावरणम्, अनावृतिरनावरणमित्यर्थः ॥
२६ चेदावृ] °वृत्त्या° प्र° । एवमग्रेऽपि ज्ञेयम् ॥
१ आ] आकाशात्मानापत्ते° ? । घटाकाशस्योदाहरणत्वानुपपत्तिमभिधाय इदानीमाकाशघटस्योदाहरणत्वानुपपत्तिमभिदधाति — आकाशानात्मेत्यादि ॥

न्यायात् त्वन्मतेन च द्रव्यस्य कारणस्य सदा[ऽऽत्म]रूपापरित्यागात् ? इत्युक्तं परस्यानिष्टापादनम् । अत एव स्वमतविशेषप्रधानभवनसामान्योपसर्जनभवनप्रतिपादनार्थमाह --**अन्यरूपानुगमात्त्वि**त्यादि । **तु**शब्दः परमतव्यावृत्तिं स्वमतसिद्धिं च विशेषयति । **चेतनाचेतनयोरात्मभावत्यागात्** त्वदुक्तात् द्र-
568/mj व्यस्य सामान्यभवनमुप[सर्जनं] भवदेव

* * *

मुप[सर्जनमेकमेव भवति, न विशेषः] अर्थान्तराभाव-भवद्भवनाभ्यां केनचिदबाध्यत्वात् ।

यथा च विशिष्टः सामान्यनिरपेक्षो भवति तथा स्वविषयेऽप्येकवृक्षादिभवने द्विवचनादिविशेषान्तरनिरपेक्षेणैव तेनाभिन्नलिङ्गवचनादिना भवितव्यम् । यद्येकं नक्षत्रं कथं पुनर्वसू द्वौ, अथ द्वौ पुनर्वसू कथमेकं नक्षत्रम्, विरोधित्वादेकद्वित्वयोः ? इत्यादि सर्वं यथाविषयं प्रतिविधातव्यं घटपटदिवत् ।

प्रतीतेस्तादर्थ्यमेवेति चेत्, न, प्रत्यवयवप्रतीतेरेव एकत्वाद्यपेक्षयैकवचनादिशब्दप्रयोगप्रसिद्धेः । इदं त्वभिधानाभिधेयप्रत्यययोर्विसंवादात् प्रतीतिविरुद्धं कुमारब्रह्मचारिपितृत्ववत् ।

* * *

च भवति, तस्मादर्थान्तराभावाद् भवत एव भवनाच्च केनचिदविशेषो न बाध्यते । यथोक्तं त्वया प्राक् **वृक्षो वृक्षसामान्यमुपसर्जनीकृत्यैक एव भवति न द्व्यादिरपि, विशेषवशवर्तित्वाद् नाम्नः** इत्यादि । तस्मादिदमनिष्टं विशेषासत्त्वं प्रसक्तम् । तदसत्त्वात् सामान्यासत्त्वं दृष्टेष्टविरुद्धमापन्नमिति ।

§ 1630

- /ms किञ्चान्यत्, **यथा च विशिष्ट** इत्यादि । **यथा च सामान्येन** प्रतिपक्षेण विना विशेषस्त**न्निरपेक्षो भवति** भवत्येव **विशिष्टस्तथा स्वविषयेऽप्येकवृक्षादिभवने द्विवचनादिविशेषान्तरनिरपेक्षेणैव तेनाभिन्नलिङ्गवचनादिना भवितव्यम्** । त्वन्मते न पुनस्तथा भवति स विशेषः, नक्षत्रपुनर्वस्वादिसमानाधिकरणवचनलिङ्गादिभेददर्शनात् । तद् भावयति --**यद्येक**मित्यादि साधनद्वयमनिष्टापादनम् **विरोधित्वादेकद्वित्वयोरित्यादि सर्वं यथाविषयं प्रतिविधातव्य**मित्यतिदेशाद् लिङ्गकालादावप्यनिष्टापादनसाधनानि द्रष्टव्यानि ।

---

१ द्र]
**द्रव्यकारणस्य**nayacakra-ms-bhā ॥
४ स] सदा[**स्व**]रूपापरि॰ इत्यपि पाठोऽत्र भवेत् ॥
५ त्व]
**त्वदुर्क्तत्वात्**nayacakra-ms-bhā ॥
५ मु] अत्र कश्चित् पाठः खण्डितो भाति ॥
१७ य] तुलना--पृ॰ ५६८ पं॰ २२ ॥
१८ राभावाद्]
तुलना--अर्थान्तराभाव-भवद्भवनाभ्यां केनचिदबाध्यत्वात् --**नयचक्रवृत्ति३९४**-- १ ॥
१८ वृ] तुलना पृ॰ ३९३-- २ ॥
२२ नीकृ] ॰**कृत्यैव एव भवति**nayacakra-ms-bhā ।
॰**कृत्त्यैव भवति** nayacakra-ms-ya ॥
२ य] **तथा च** nayacakra-ms-ya ॥

यदि पुनर्वसू पुमांसौ न नक्षत्रं नपुंसकम्, पुंस्त्वात्, वृक्षवत् । अथ [नक्षत्रं न पुमांसौ] नपुंसकत्वात् कुण्डवदित्यादि । तथा तारा स्त्रीत्वात् इत्यादि योज्यम् । **घटपटादिवदिति** विशिष्टयोर्घटपटयोरिवान्योन्यस्वरूपापत्तिर्नास्ति विशेषाणाम्, सामान्याभावात् । दृष्टं च नक्षत्र-पुनर्वस्वादिषु । तस्मादयुक्त-मुक्तम् **--सामान्यनिरपेक्षो विशेष एव शब्दार्थो विवक्षितत्वा**दिति । § 1631

पुनर्वसूशब्दो द्व्यर्थो द्विवचनान्तत्वात्(?') इति प्रत्ययो नक्षत्राभिधेयविषयप्रत्ययेन विसंवदति, स चानेन । किमिव ? **कुमारब्रह्मचारिपितृत्ववत्,** यदि कुमारब्रह्मचारी कथं पिता ? अथ पिता कथं कुमारब्रह्मचारीति ? तद्वदिहेति । § 1632

**प्रतीतेस्तादर्थ्यमेवेति चेत्** । स्यान्मतम्--लोकप्रतीतत्वाद् नक्षत्रार्थ एव पुनर्वस्वर्थः पुनर्वस्वर्थ एव च नक्षत्रार्थ इति लोके प्रसिद्धमागोपालादि । तस्मात् सामान्यस्य विशेषत्वाददोषः, इतरथा नैरर्थक्यमेव स्यादिति । अत्रोच्यते **--न, प्रत्यवयवप्रतीतेरेवे**त्यादि । वयमपि लोकप्रतीतेरेव ब्रूमः, **द्व्येकयोर्द्विवचनैकवचने, बहुषु बहुवचनम्** पा॰ १ । ४ । २२--२१ इत्यर्थानामवयवमवयवं प्रति विवक्षितानामे**कत्वाद्यपेक्षयैकवचनादिशब्दप्रयोगप्रसिद्धे**र्यद्येकवचनान्तः शब्दोऽभिधानार्थेनाप्येकेन भवितव्यम्, न व्यादिना । अथ द्व्यादिः, नैकवचनेन शब्देन भवितव्यम्, उक्तवत् । - /ms

लक्षणं हि नाम शब्दानां प्रकृतिप्रत्ययादिविभागान्वाख्यानम् । प्रकृत्याद्यर्थाव्यवस्थायां लक्षणाव्यवस्थानात् कुतस्तज्ज्ञन्यलक्ष्यतत्त्वप्रतिपत्तिः शब्दव्यवस्था च, अविविक्तीभावितस्वलक्षणविषयत्वात्, अविविक्तीभावितस्वलक्षणविषयस्थाणुपुरुषप्रतिपत्तिव्यवस्थावत् ।

स वृक्ष आस्ते इति प्रतिपद्य पुनः एहि मन्ये रथेन यास्यसि इत्यस्मात् तद्विपरीतादपि तद्वदेव प्रतिपत्त्या प्रकृत्यादिलक्षणालक्षणीकरणं प्रतिपत्तेश्चाप्रतिपत्तित्वं यदृच्छाप्रवृत्तित्वात् ।

* * *

संवादात् प्रतीतिविरुद्धम्,**इदं त्वभिधानाभिधेयप्रत्यययोर्वि** 569/mj

* * *

लक्षणं हि नाम शब्दानां प्रकृतिप्रत्ययादिविभागान्वाख्यानम् । प्रकृत्याद्यर्थाव्यवस्थायां लक्षणाव्यवस्थानात् कुतस्तज्ज्ञन्यलक्ष्यतत्त्वप्रतिपत्तिः शब्दव्यवस्था च, अविविक्तीभावितस्वलक्षणविषयत्वात्, अविविक्तीभावितस्वलक्षणविषयस्थाणुपुरुषप्रतिपत्तिव्यवस्थावत् ।

स वृक्ष आस्ते इति प्रतिपद्य पुनः एहि मन्ये रथेन यास्यसि इत्यस्मात् तद्विपरीतादपि तद्वदेव प्रतिपत्त्या प्रकृत्यादिलक्षणालक्षणीकरणं प्रतिपत्तेश्चाप्रतिपत्तित्वं यदृच्छाप्रवृत्तित्वात् ।

---

५ इ] यदि तारा स्त्री न नक्षत्रं स्त्रीवाद् गङ्गावत्, अथ नक्षत्रं न स्त्री नपुंसकत्वात् कुण्डवदिति योज्यम् ॥

११ सा] दृश्यतां पृ॰ ५६८ पं॰ ३ ॥
२२ ए] दृश्यतां पृ॰ ५७१ पं॰ १७ ॥
७ ए] दृश्यतां पृ॰ ५७१ पं॰ १७ ॥

* * *

संवादात् प्रतीतिविरुद्धम्,

तद् भावयति --**लक्षणं हि नामेत्यादि** । शब्दानां लक्षणं **प्रकृतिप्रत्ययादिविभागान्वाख्यानम्,** तद्धि लक्ष्याञ्छब्दान् व्यवस्थापयामि इति । तेषां च प्रकृत्यादिविभागानामव्यवस्था, प्रकृत्याद्यर्थायथार्थत्वात् । तस्यां च शब्दविषय**प्रकृत्याद्यर्थाव्यवस्थायां** तदाश्रितलक्षणाव्यवस्था । **लक्षणाव्यवस्थानात् कुतस्तज्जन्यलक्ष्यतत्त्वप्रतिपत्तिः** शब्दतत्त्वप्रतिपत्तिः **शब्दव्यवस्था च ?** न स्तः । कस्मात् ? **अविविक्तीभावितस्वलक्षणविषयत्वात्** । **दृष्टान्तः--अविविक्तीभावितेत्यादि,** यथा विविक्तौ सन्ता[व]विविक्तौ भावितौ स्वलक्षणाभ्यां स्थाणुपुरुषौ, तत्र या स्थाणौ पुरुषप्रतिपत्तिर्व्यवस्था च मिथ्याप्रतिपत्तिव्यवस्थे ते, कस्मात् ? अविविक्तीभावितस्वलक्षणविषयत्वात्, तथा शब्दानां लक्ष्याणां प्रतिपत्तिव्यवस्थे । लक्ष्याप्रतिपत्त्यव्यवस्थाभ्यां चाभिधानाभिधेयविषयप्रत्ययद्वयविसंवादात् कुमारब्रह्मचारी पिता इति - /ms प्रत्ययवद् नक्षत्र-पुनर्वस्वाद्येकद्वित्वादिविरोध इति सम्बन्धः । § 1633

एवं तावत् सङ्ख्याविषयप्रकृतिप्रत्ययप्रतिपत्तिविरोध उक्तः । अतः परं पुरुषविषय उच्यते, तद्यथा — **स वृक्ष आस्त** इत्यादि याव**दप्रतिपत्तित्वम्** । सः इति शेषोपपदे आस्ते इति पुरुषविषयप्रकृतिप्रत्ययसंवादेन स्वयं प्रतिपद्य पुनः एहि मन्ये इति तद्विपरीतप्रतिपत्त्या प्रकृत्यादिलक्षणमलक्षणीकृतं प्रतिपत्तिश्चाप्रतिपत्तीकृता **तद्वदेवेति** लक्ष्यतत्त्वाप्रतिपत्त्यव्यवस्थाद्वारेणेति । 570/mj कस्मात् ? **यदृच्छाप्रवृत्तित्वा**दसमीक्षित

* * *

---

९ स्त] कुतस्तज्जन्यलक्ष्यतत्रे प्रतिपत्तिः **शब्दतत्त्वप्रतिपत्तिः शब्दव्यवस्था च**nayacakra-ms-bhā । **कुतस्तद्यन्यलक्ष्यतत्रे प्रतिपत्तिः शब्दव्यस्था च** nayacakra-ms-ya । कुतस्तज्जन्यलक्ष्यतत्त्वप्रतिपत्तिः शब्दव्यवस्था च ? इत्येवमपि पाठोऽत्र भवेत् ॥

९ अ] **अविभक्ती°** प्र° ॥

९ था] **विविक्तौ सन्ता°**nayacakra-ms-ya मध्ये नास्ति ॥

१४ न्ता] **°विवक्तौ** प्र° ॥

१७ द] दृश्यतां पृ° ५७१ पं° १८ ॥

१८ इति] शेषे प्रथमः । १ । ४ । १०८ । शेष इति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तः तत्र शेषे प्रथमपुरुषो भवति । पचति । पचतः । पचन्ति ।--nayacakra-ms-pā **काशिका** । शेष उपपदे प्रथमो विधीयते । उपोच्चारितं पदमुपपदम् ।--nayacakra-ms-pā **म°** nayacakra-ms-bhā १ । ४ । १०८ ॥

२० ए] प्रहासे च मन्योपपदे, उत्तम एकवच्च । १ । ४ । १०६ । प्रहासः परिहासः क्रीडा । प्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमपुरुषो भवति, मन्यतेश्चोत्तमः, स चैकवद् भवति । एहि मन्ये ओदनं भोक्ष्यस इति, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्ते पिता । मध्यमोत्तमयोः प्राप्तयोरुत्तममध्यमौ विधीयेते । प्रहास इति किम् ? एहि मन्यसे ओदनं भोक्ष्य इति । सुष्ठु मन्यसे, साधु मन्यसे ।--nayacakra-ms-pā **काशिका । एहि मन्ये रथेन यास्यसि** रथेन यास्यामीति त्वं मन्यसे इत्यर्थः ॥

२० दृच्छाप्र] **यदृच्छाप्रवृत्तत्वा° ?** । दृश्यतां पृ° ५७१ पं° १८ ॥

एहि मन्ये इति प्रस्तुतक्रियाविसंवादात् त्वं यामि, अहं यासि इति प्रयोगवदयथार्थमगमकमसाधु । प्रस्तुतप्रत्ययविसंवादाद्वा, देवदत्तो भूयत इति प्रयोगवत् । अङ्गीकृतपुरुषार्थवैयधिकरण्यवृत्तत्वात्, त्वं पचतीति प्रयोगवत् ।

अत्र प्रत्ययपरा प्रकृतिः प्रयोक्तव्या, प्रयोगकाले केवलयोः प्रकृतिप्रत्यययोरसम्भवात् तथाऽनर्थकत्वात् काकवासितवत् । शिक्षणार्थं तु चित्रभक्तिबिन्दु-

* * *

पौर्वापर्यप्रत्ययत्वाद् ब्रह्मचारिपितृत्ववदित्येव सम्बन्धः । अत्र प्रयोगः --**एहि मन्य** इत्यादि याव**दयथार्थमगमकमसाधु** इति प्रतिज्ञास्तिस्रः । प्रस्तुता क्रिया मन्यतिः, तया सामानाधिकरण्यं विसंवदति प्रत्ययस्योत्तमपुरुषाख्यस्य एहिशब्दप्रयुक्तमध्यमपुरुष[वि]संवादादिति हेत्वर्थः । **त्वं यामि, अहं यासि इति प्रयोगव**दिति तदर्थनिदर्शनं हेत्वर्थानुरूपेण यानार्थयोर्मध्यमोत्तमविशिष्टयोर्भेदे सति विसंवादादयथार्थागमकासाधुत्ववदिति । **प्रस्तुतप्रत्ययविसंवादाद्वे**ति द्वितीयो हेतुः । **देवदत्तो भूयत इति यथे**ति दृष्टान्तः । देवदत्त इति प्रथमानिर्दिष्टः कर्त्रर्थः प्रकृत्यर्थमात्रवाचिना भावसाधनेन भूयतेशब्देन सामानाधिकरण्यं नार्हति भवति इत्यनेन तु स्यात् तथा एहिशब्दप्रस्तुतमध्यमपुरुषान्तेन मन्येइत्युत्तमान्तायथार्थागमकासाधुत्वान्युपनेयानि । प्रस्तुतप्रत्ययविसंवादस्फुटीकरणार्थमाह --**अङ्गीकृतपुरुषार्थवैयधिकरण्यवृत्तत्वा**दिति । तस्य निदर्शनम् --**त्वं पचतीति यथे**ति । त्वम् इति युष्मदुपपदे पचति इति शेषोपपदविषयप्रथमपुरुषप्रयोगो विसंवदति तथा एहि मन्ये यास्यसि इति । § 1634

**अत्र प्रत्यये**त्यादि वाक्यावधिकेऽर्थे पदावधिके वा प्रतिपाद्ये वाक्यं पदं वा प्रतियोगिशब्दार्थापेक्षमेव गमयति केवलस्याप्रयोगात् । पदावधिके तावदयं नियमः--प्रत्ययपरा प्रकृतिः प्रयोक्तव्या, **प्रकृतेः परः प्रत्ययः** पा॰ म॰ भा॰ ३ । १ । २ इति व्यवस्थापितत्वात् प्रयोगकाले केवलयोः प्रकृतिप्रत्यययोरसम्भवात्, असम्भवश्च तथानर्थकत्वात् भू-लट्-तिप्-शपादीनाम्, किमिव ? **काकवासितवत्**, यथा वायसवासितादीनां न कश्चिदभिधेयोऽर्थोऽस्ति तथा भू-तिपादीनां केवलानाम् । § 1635

किमर्थं तर्हि भू **सत्तायाम्** पा॰ धा॰ १ **कर्तरि कृत्, लः कर्मणि च** पा॰ ३ । ४ । ६७, ६९ इत्यादि प्रकृतिप्रत्ययार्थर्थ ?पाठ इति चेत्, - /ms

११ र्थानुरू] दृश्यतां पृ॰ ५७१ पं॰ १८ । **॰रूप्येण** ? ॥
१२ या] **यानर्थ्ययोर्म॰**nayacakra-ms-bhā । **यार्थानर्थायोर्म॰** nayacakra-ms-ya । याधातोर्यावर्थौ तयोर्मध्यमोत्तमविशिष्टयोर्भेद इत्याशयो भाति । यार्थान्यार्थयोर्म॰ ? ॥
१५ का] **॰गमकसाधुत्व॰** प्र॰ ॥
१६ सा] **समाना॰** प्र॰ ॥
२५ अ] दृश्यतां पृ॰ ५७१ पं॰ १३ ॥
२६ ल] वर्तमाने लट् । ३ । २ । १२३ । तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् । ३ । ४ । ७८ । कर्तरि शप् । ३ । १ । ६८ ।--nayacakra-ms-pā ॥
२८ का] दृश्यतां टिपृ॰ ५८ टि॰ १ ॥
२ क] दृश्यतां पृ॰ १२६ पं॰ ११ टि॰ ७ ॥

उच्यते --**शिक्षणार्थं तु चित्रभक्तिबिन्दुविन्यसनवत् पृथगध्ययनम्** । शिष्यान् ग्राहयामि इति विभज्य प्रकृतिप्रत्ययार्थौ दर्श्येते । यथा एकामेव काष्ठादिभक्तिं लेखयिष्यंश्चित्रकराचार्यः शिष्यान् पूर्वं बिन्दुविन्यासान् कारयति पश्चात् संयोजयति ततः सा दर्शनीया चक्षूरमणीया पुष्प-वल्ली-गृह-मनुष्य-स्त्री-हस्त्यादिसंस्थाना संव्यवहारार्हा भक्तिर्भवति एवं प्रकृतिप्रत्ययार्थोपप्रदर्शनं **पृथक्** क्रियते, अपृथक्सिद्धसमुदायार्थप्रतिपत्त्युपायत्वात् । § 1636
571/mj

विन्यसनवत् पृथगध्ययनम् । एवमेव च कृत्वोक्तम्--प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः पा॰ म॰ भा॰ ३ । १ । ६७ । अत एव च प्रकृतिपरः प्रत्ययः प्रयोक्तव्यः प्रत्ययपरा च प्रकृतिः पा॰ म॰ भा॰ ३ । १ । २ । अत एव च प्रत्ययार्थानपायित्वाद् मन्यतेः प्रस्तुतसामानाधिकरण्यत्यागेन मन्ये इति उत्तमैकवचनप्रत्ययप्रयोगोऽयथार्थाभिधानम् । प्रत्ययपुरुषायथार्थत्वेऽप्येषैव भावना । इत्यर्थत्रयविषयमयथार्थत्वम् । इदं च द्रव्यतोऽयथार्थत्वम् । § 1637

प्रहासादिदमसत्यमेवेति चेत्, बह्वेव तर्हि लक्षणानामलक्षणीकरणं लक्ष्या- § 1638

**एवमेव च कृत्वोक्त**मिति ज्ञापकमाह । **प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत** इति प्राधान्येन प्रत्ययार्थो विवक्षितो गुणत्वेन प्रकृत्यर्थः । **अत एव चे**ति, - /ms यदुक्तं भाष्ये --**प्रकृतिपरः प्रत्ययः प्रयो- क्तव्यः, प्रत्ययपरा च प्रकृति**रिति प्रत्ययः परो विशेषः प्रधानं यस्याः सा प्रत्ययपरा प्रकृतिः, परशब्दस्य प्रधानार्थता वर्ण्यते । § 1639

एवं चानेन न्यायेन प्रत्ययार्थाद् नापैति प्रकृतिः, तत्परत्वात् । **अत एव च प्रत्ययार्थानपायित्वाद् मन्यते**रित्यादिना भावयित्वोपसंहरति यावद**यथार्थाभिधान**मिति । एहिशब्दप्रयोगप्रस्तुतसामानाधिकरण्यत्यागेनास्मत्समानाधिकरणोत्तमैकवचनप्रत्ययायथार्थत्वम् **अङ्गीकृतपुरुषार्थवैयधिकरण्यवृत्तत्वात् त्वं पचति इति प्रयोगव**दिति साधूक्तम् । एवं तावत् प्रकृत्ययथार्थत्वं प्रत्ययायथार्थ[त्व ?]द्वारेणानपायित्वादुक्तम् । § 1640

**प्रत्ययपुरुषायथार्थत्वेऽप्येषैकैव भावना** । प्रकृत्यविनाभावित्वात् प्रत्ययस्य प्रत्ययत्वात् **एहि मन्ये रथेन यास्यसि इत्यस्मात् तद्विपरीतादपि तद्वदेव**

२ कृतिप्र ] °प्रत्ययार्थो प्र° ॥
१७ द ] दर्श्येतिnayacakra-ms-ya ॥
१९ ए ] एवमेवं
चnayacakra-ms-bhā ॥
२५ प्र ] प्रकृतिnayacakra-ms-ya ॥
२८ अ ] दृश्यतां पृ॰ ५७० पं॰ ३ ॥
२९ त्वे ] °प्येषैव भावना इत्यपि पाठः सम्भवेदत्र ॥
२ ए ] दृश्यतां पृ॰ ५६९ पं॰ ५ ॥

**प्रतिपत्त्या प्रत्ययादिलक्षणालक्षणीकरणं प्रतिपृत्तेश्चाप्रतिपत्तित्वं यदृच्छाप्रवृत्तत्वादि**त्यादि यावदयमवधिः समानभावनः प्रत्ययपुरुषानुरूपेण योज्यत इति । **इत्यर्थत्रयविषयमयथार्थत्व**मिति निगमनम् **इति**शब्दनिगमनार्थत्वात्, अनया भावनया भावितमेव भवति अगमकमसाधु इत्यपि द्रष्टव्यं बुद्धिचक्षुषा । **इदं च द्रव्यतोऽयथार्थत्वम्,** यस्मात् नाहं त्वम् इत्यस्मद्युष्मद्द्रव्यविपर्ययेणायथार्थत्वमेतत् । यथा चैतत् तथा घटपटादिशेषोपपदविषयो भिन्नव्यवहारो निराक्रियते त्वं पचति इत्यादिकुट्टकादिप्रयुक्तभिन्नलिङ्गादिविपर्ययार्थशब्दप्रयोगवदिति । § 1641

**प्रहासादिदमसत्यमेवेति चेत्** । स्यान्मतम्--एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्ते पिता इत्येतदसत्यमेव प्रहासविषयत्वात् । अत एव लक्षणमुक्तम् **--प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च** पा॰ १ । ४ । १०६ इति, तथा द्विवचनबहुवचनविषयावप्युदाहृतौ यास्यथः, यास्यथ इति । § 1642 - /ms

572/mj

णामलक्ष्यीकरणं प्रतिपत्तेश्चाप्रतिपत्तित्वमसत्यत्वात् प्रत्याय्यार्थविपर्ययवृत्तत्वात् प्रहासोक्तिवत् । न च तेष्वसत्यमतिः । पर्वताधिकरणकर्मवच्च नासत्यमतिः । आधारोऽधिकरणम्... ... ...अन्यस्यानाधारत्वाद्वा । भूतमनागतमिति च विरुद्धार्थम् । शतभिषजः नक्षत्रम्, गोदौ ग्रामः, पुनर्वसू पञ्च तारकाः, आम्रा वनम्, § 1643

अत्रोच्यते **--बह्वेव तर्ही**त्यादि । बहूनां तर्हि लक्षणानां **धातुसम्बन्धे प्रत्ययाः** पा॰ ३ । ४ । १ **व्यत्ययो बहुलम्** पा॰ ३ । १ । ८५ इत्येवमादीनामलक्षणीकरणम् तल्लक्ष्याणां च अग्निष्टोमयाजी अस्य पुत्रो जनिता इत्येवमादीनामलक्ष्यीकरणम् । प्रतिपत्तेश्चाप्रतिपत्तित्वं **सर्वस्याऽसत्यत्वात्,** तदसत्यत्वं **प्रत्याय्यार्थविपर्ययवृत्तत्वात् प्रहासोक्तिव**दिति गतार्थम् । **न च**

---

५ पुरुषानु ]
°रूणnayacakra-ms-bhā । °रूप्येण ? ॥
६ इ ] **इत्यस्य°** प्र॰ ॥
७ येणाय ] **°यथार्थमेत्वतत्** प्र॰ ॥
११ इत्यादिकु ]
कुट्टकादि°nayacakra-ms-bhā प्रतौ नास्ति ॥
२० था ] एहि मन्ये ओदनं भोक्ष्यस इति, भुक्तः सोऽतिथिभिः । एतमेत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्वे
।--nayacakra-ms-pā
सिद्धान्तकौमुदी ७ । ३ । १०१ ॥
२१ धा ] धातुसम्बन्धे प्रत्ययाः । ३ । ४ । १ । धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः । तिङन्तवाच्यक्रियायाः प्राधान्यात् तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः । वसन् ददर्श । भूते लट् । अतीतवासकर्तृकं दर्शनमर्थः । सोमयाज्यस्य पुत्रो भविता । सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम् ।--nayacakra-ms-pā
सिद्धान्तकौमुदी ॥
१ व्य ] दृश्यतां पृ॰ १५४ पं॰ २६ ॥

तेषु लक्षणेषु लक्ष्येषु **चासत्यमति**र्भवति । किञ्चान्यत्, **पर्वताधिकरणकर्मवच्च नासत्यमतिः** । इह पर्वते वसति इत्येतस्मिन्नधिकरणार्थे पर्वतमधिवसति, अध्यास्ते इत्यादिकर्मत्वायुक्तेः । अत्र प्रयोगः--पर्वतमधिवसति इत्यादि असत्यमिदम्, स्वकारकव्यधिकरणवृत्तत्वात्, देवदत्तो भूयते इति यथेति । एतस्य भावनार्थ **आधारोऽधिकरण**मित्यादि याव**दन्यस्यानाधारत्वा**द्वेति गतार्थो ग्रन्थः । एतच्च क्षेत्रविषयमयथार्थत्वमुक्तम् । तथा कालविषयमयथार्थसाधनम्

573/mj **--भूतमनागतम् इति च विरुद्धार्थ**मिति । अत उत्तरं **शतभिषज** इत्यादि

* * *

देवमनुष्या उभौ राशी ? इत्यादिषु भावतोऽयथार्थता, द्रव्यक्षेत्रकालभावविषयविसंवादवृत्तत्वात् स्वोक्तार्थनिराकरणार्थत्वात्, उन्मत्तप्रलापवत् ।

ननु पुष्यस्य देवविशेषत्वात् तद्विषयौ नक्षत्रतारासामान्यार्थौ, घटविशेषविषयमृत्सामान्यार्थवत् । उक्तं हि--

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारयुक्तौक्ते ।

---

२ चा]
**चाश्रित्यमति॰**nayacakra-ms-bhā ।
**श्चामृत्यमति॰** nayacakra-ms-ya ॥
५ म] अधिशीङ्स्थासां कर्म । १ । ४ । ४६ । पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । अधिपूर्वाणां शीङ् स्था आस् इत्येतेषामाधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममधिशेते । ग्राममधितिष्ठति । पर्वतमध्यास्ते ।... ...उपान्वध्याङ्वसः । १ । ४ । ४८ । उप अनु अधि आङ् इत्येवंपूर्वस्य वसतेराधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममुपवसति सेना । पर्वतमुपवसति । ग्राममनुवसति । ग्राममधिवसति । ग्राममावसति ।--nayacakra-ms-pā **काशिका॰** ॥
७ आ] **आधारोऽधिकरणम्** । १ । ४ । ४५ । आध्रियन्तेऽस्मिन् क्रिया इत्याधारः । कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत् कारकमधिकरणसंज्ञं भवति । कटे आस्ते । कटे शेते । स्थाल्यां पचति ।(?") --nayacakra-ms-pā **काशिका** ।
७ श] शपत्यर्थमाह्वयति प्रत्याययतीति शब्दः ॥ ८ ॥ उच्चरितः शब्दः कृतसंगतेः पुरुषस्य स्वाभिधेये प्रत्ययमादधातीति शब्द इत्युच्यते । स च लिंगसंख्यासाधनादिव्यभिचारनिवृत्तिपरः ॥ ९ ॥ लिङ्गं स्त्रीत्वपुंस्त्वनपुंसकत्वानि । संख्या एकत्वद्वित्वबहुत्वानि । साधनमस्मदादि । एवमादीनां व्यभिचारो न न्याय्य इति तन्निवृत्तिपरोऽयं नयः । तद्यथा--लिङ्गव्यभिचारस्तावत् स्त्रीलिङ्गे पुंलिङ्गाभिधानं तारका स्वातिरिति । पुंलिङ्गे स्त्र्यभिधानम् अवगमो विद्येति । स्त्रीत्वे नपुंसकाभिधानं वीणा आतोद्यमिति । नपुंसके स्त्र्यभिधानम् आयुधं शक्तिरिति । पुंलिङ्गे नपुंसकाभिधानं पटो वस्त्रमिति । नपुंसके पुंलिङ्गाभिधानं द्रव्यं परशुरिति । संख्याव्यभिचारः--एकत्वे द्वित्वं नक्षत्रं पुनर्वसू इति । एकत्वे बहुत्वं **नक्षत्रं शतभिषज** इति । द्वित्वे एकत्वं गोदौ ग्राम इति । द्वित्वे बहुत्वं पुनर्वसू पञ्च तारका इति । बहुत्वे एकत्वम् आम्रा वनमिति । बहुत्वे द्वित्वं देवमनुष्या उभौ राशी इति । साधनव्यभिचारः--एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्ते पितेति । आदिशब्देन कालादिव्यभिचारो गृह्यते । विश्वदृश्वास्य सुतो जनिता, भावि कृत्यमासीदिति कालव्यभिचारः । सन्तिष्ठते प्रतिष्ठते विरमति उपरमति [इति] उपग्रहव्यभिचारः । एवमादयो व्यभिचारा अयुक्ताः । कुतः ? अन्यस्यार्थस्यान्यार्थेन सम्बन्धाभावात् । यदि स्यात् घटः पटो भवतु पटो [वा ?] प्रासाद इति । तस्माद् यथालिङ्गं यथासङ्ख्यं यथासाधनादि च न्याय्यमभिधानम् । इति **तत्त्वार्थराजवार्तिके** १ । ३३ ॥

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥
पा॰ म॰ भा॰ १ । १ । १§ 1646

तस्माद् विवक्षापूर्वकत्वाच्छब्दप्रवृत्तेर्विषयविशेषपरिग्रहेण गावी-गोणी-गोतागोपालिकादिवत् शब्दा गमकाश्चागमकाश्च ।

यद्येवं तर्हि कया विवक्षया आपः इति बहुवचनमेकस्मिन्नपि बिन्दौ, एक-

* * *

भावायथार्थप्रतिपादनं गतार्थं याव**दित्यादिषु भावतोऽयथार्थते**ति । एवं च न वाचकता शब्दस्य न वाच्यतार्थस्य, अयथार्थत्वात्, उक्तशब्दार्थवत् । **यथार्थाभिधानं च शब्दः** तत्त्वार्थभाष्यः १ । ३५ इत्युक्तम् । तत् सर्वमुपसंहृत्य साधनमाह --**द्रव्य-क्षेत्र-कालभावविषयविसंवादवृत्तत्वा**दिति हेतुर्व्याख्या- तार्थः । **स्वोक्तार्थनिराकरणार्थत्वा**दिति साधितार्थोपसंहारार्थो हे- - /ms तुः पृथगयाथार्थ्यप्रतिपादनार्थो वा । **उन्मत्तप्रलापव**दिति दृष्टान्तः । इदं च साधनमतीतप्रपञ्चेन भावितार्थमिति न विव्रियते । § 1647

**ननु पुष्यस्ये**त्यादि पूर्वपक्षो विवक्षाविशेषार्थशब्दप्रयोगन्यायाश्रयेण दोष-परिहारार्थो यावद् **गमकाश्चागमकाश्चे**ति । पुष्यः पुमान् देवो विशेषः, **तद्विषयौ** तदर्थौ **नक्षत्र-तारासामान्यार्थौ घटविशेषविषयमृत्सामान्यार्थवत्** सामानाधिकरण्यं तस्मादुपपन्नम् । अस्मिंश्च ज्ञापकमाह --**उक्तं ही**त्यादि **भाष्यकारेणोक्तम्** । **यस्तु प्रयुङ्क्ते** इति श्लोकः । **विशेषे** विवक्षिते प्रधाने गुण-भूताञ्छब्दान् प्रयुङ्क्ते यः **कुशलो**ऽर्थगत्यर्थत्वाच्छब्दप्रयोगस्य तद्दर्शयन्नाह विव-क्षापूर्वकत्वाच्छब्दप्रवृत्तेरिति --**यथावद्व्यवहारयुक्तौ** यो यः शब्दो व्यवहारकाले यस्य यस्य विवक्षितार्थस्य विशिष्टस्य विशिष्ट एव गमक इत्यभिमतः स एव स एव तत्र प्रयुज्यते नान्योऽन्यत्र वा गौणमुख्यादिभावेन स्वाभिधेयप्रत्याय-नसमर्थत्वात् सर्वशब्दानाम् । **सोऽनन्तमाप्नोति जयं परत्र** । कः ? **वाग्योग-विद्** य एवमुक्तविशेषविषयशब्दार्थसम्बन्धज्ञः । **दुष्यति चापशब्दै**रवाग्योगविद् विशेषविषयप्रयोगानभिज्ञः । **तस्माद् विवक्षापूर्वकत्वाच्छब्दप्रवृत्तेर्विषयविशेष-परिग्रहेण** साधुताऽसाधुता च शब्दानाम्, असाधुत्वाभिमतानामपि गव्यादीनां साधुत्वं विशेषविषयत्वात्, साधुत्वेनाभिमतानामपि गव्यादीनामसाधुत्वमिति । तद्दर्शयति --**गावीगोणी**त्यादिर्गतार्था भावना शब्दव्युत्पत्त्या । § 1648

९ भावाय] °**यथार्थाप्रति**° प्र॰ । °यथार्थत्वप्रति° ? ॥
११ च] तत्त्वार्थभाष्ये च नास्ति ॥
२० या] °**यथार्थ्य**°nayacakra-ms-bhā । °**यथार्थ**° nayacakra-ms-ya ॥
२६ हा] °**हारयुक्ते** इति पाठोऽत्र समीचीनः सम्भाव्यते । दृश्यतां पृ॰ १२८ पं॰ २१ ॥
२६ रिग्र] °**ग्रहणे**nayacakra-ms-ya ॥
२७ ग] गाव्यादी° ? । दृश्यतां टिपृ॰ ५७ पं॰ २२--२६ ॥
२८ ग] गवादीना° ? ॥
२ त्या] °**त्यादिगतार्था**nayacakra-ms-ya ॥

अत्राचार्य आह **--यद्येवं तर्हीत्यादि** यावत् **सिकता** इति । एषोऽपि
- /ms न्यायो व्यभिचाराद् न प्रभवति । उदाहरणैर्व्यभिचारयिष्यन्नविजानन्निव पृच्छति तमेव **कया विशेषविवक्षयेति । आप इति बहुवचनमेकस्मिन्नपि बिन्दौ**
574/mj दृष्टम्, नात्र सामान्यविशेषभावोऽस्ति । तथा **एकयोषिति दारा गृहाः**

* * *

योषिति दारा गृहाः इति, एकस्मिंश्च शर्कराकणे सिकताः इति । नित्यमपि वह्ववयववृत्तत्वादिति चेत्, एकघटेऽपि तर्ह्यत एव नित्यं बहुवचनं प्राप्तम्, *बिन्द्वादाविव आपः । अप्सु वा एकवचनं स्याद् घटवत् ।

अतिशय्येकात्मकनिरासेन विशेषविषयप्रयोगसाधुत्वेष्टौ कस्मात् तत एव न्यायात् बिन्दौ अप्छब्द एकवचनान्तो न प्रयुज्यते विशेषविषयत्वाद् गवादिवत् । स एकवचनान्त एव स्यात्, एकमिति गृहीतत्वात्, तन्तुपटवत् ।

तथा तटस्तटी तटमिति कतमं विशेषमुपादाय लिङ्गभेदः कतमद् वा सामान्यमतिदिश्यते ?

ननु स्थितिप्रसवसंस्त्यानविशेषविषयो लिङ्गभेदः । न तटतटीतटानां विषयविशेषः, अभिन्नस्वरूपत्वात्, घटघटस्वात्मवत् ।

* * *

बहुवचनं कया विवक्षयेति वर्तते । **एकस्मिंश्च सूक्ष्मशर्कराकणे सिकता** इति, किंशब्दस्य क्षेपार्थत्वात् **कया विवक्षया** किं तया विवक्षया विपरीतार्थयेति । **नित्यमपि बह्ववयववृत्तत्वादिति चेत्** । स्यान्मतम्--बहवोऽवयवाः परमाणुद्व्यणुकादयो बिन्दावपि, तदपेक्षया बहुवचनम् आपः इति । अत्रोच्यते — **एकघटेऽपीत्यादि** । **अत एव** त्वदुक्तात् बह्ववयववृत्तत्वात् इति हेतोरेकस्मिन् घटेऽपि **नित्यं बहुवचनं प्राप्तम्, *बिन्द्वादाविव आपः** इत्यनिष्टापादनद्वारेण परोक्तहेतुव्यभिचारः । **अप्सु** वेत्यादि, अप्छब्दादपि **एकवचनं स्यात्,** नित्यमपि बह्ववयववृत्तत्वात्, **घटवत्,** अनिष्टं चैतत् । § 1649

**अतिशय्येकात्मकेत्यादि** । यथास्माभिरुक्तोऽतिशयी एक एव आत्मा भवति यत् स[त्] किञ्चिदिति तस्य **निरासेन** त्वया **विशेषविषयप्रयोगो** गाव्यादिवत् साधुः इतीष्टः, तत्रेदं तेऽनिष्टमापाद्यते— **कस्मात् तत एव**
- /ms **न्यायात् बिन्दौ** वर्तमानोऽप्छ**ब्द एकवचनान्तो न प्रयुज्यते, विशेषविषयत्वात्, गवादि**[वदि]ति ? अतोऽयमपि न्यायो व्यभिचरतीति । किञ्चान्यत्, **सो**ऽप्छब्द **एकवचनान्त एव स्यात्,** बह्ववयवात्मकत्वेऽपि **एकम् इति गृहीतत्वात् तन्तुपटवदिति** गतार्थत्वान्न व्याख्यायते । § 1650

एवं तावदयं सङ्ख्याविषयो विचारो न घटते । लिङ्गविषयोऽपि विशेषप्रयोगसाधुत्वन्यायो न घटते । अर्थैकत्वे सङ्ख्याभेदानुपपत्तिवत् लिङ्गभेदानुप-

---

२२ *]
बिंद्वाविचार्यःnayacakra-ms-bhā ।
बिन्दाविवापः इति पाठोऽप्यत्र संभवेत् ॥
२६ *]
बिंद्वाविचार्यःnayacakra-ms-bhā ।
बिन्दाविवापः इति पाठोऽप्यत्र संभवेत् ॥
२६ य] यत्स किंचिदिति प्र॰ । यः स किञ्चिदिति ? ॥
२८ त्व] तया प्र॰ ॥

पत्तिरपीत्यत आह **--तथा तटस्तटीत्यादि** । **कतमं** वात्र **विशेषमुपादाय लिङ्गभेदः ? कतमद् वा सामान्यमतिदिश्यते** विशेषप्रतिपादनार्थम् ? न सम्भवतीत्यर्थः । § 1651

आह **--ननु स्थिति-प्रसव-संस्त्यानविशेषविषयो लिङ्गभेदः ।** 575/mj

* * *

गोचरविशेषोपपत्तौ वा सोऽपि नास्ति, न हि तटो गोचरः प्रसवस्य, संस्त्यानात्मकत्वात्, स्त्रीवत् । न तटी गोचरः संस्त्यानस्य, प्रसवात्मकत्वात्, पुरुषवत् । [न तटं गोचरोऽनुभयत्वस्य, संत्त्यानप्रसवात्मकत्वात्,] स्त्रीपुंसवत् । अथवा... ... तटीवत् । एवं लिङ्गाभाव एव । ततश्चासत्त्वमप्येषाम्, अक्रियाव्ययत्वे सत्यलिङ्गत्वात्, खपुष्पवत् ।

अथोच्येत--नन्वेवं संस्त्यानात्मकत्वादित्यादिना त्रिलिङ्गत्वं व्यवस्थापितमेव

* * *

संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान् ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥पा॰ म॰ भा॰ ४ । १ । ३ § 1654

स्थितिर्नपुंसकम्, स्त्री स्त्यानम्, प्रसवः पुमान्, ए[ते] चार्थाः सर्वमूर्त्तिर्तेषु सम्भवन्ति, अत्र यो विशेषो विवक्ष्यते तद्विषयो लिङ्गभेद इति । एतच्च **न तट-तटी-तटानां विषयस्य विशेषः**, एकत्वादर्थस्य स एव विशेषो नास्ति, यद्विषयो लिङ्गभेदः स्यात् स नास्ति, **अभिन्नस्वरूपत्वात्, घट-घटस्वात्मवत्**, यथा घट एव घटस्वात्मा तथा तट एव तटी तटं च, अभिन्नस्वरूपत्वाद् नास्ति विशेषः । आह--गोचरविशेषोपपत्तेर्भित्त्यादिसंस्थाना तटी कटकादिसंस्थानस्तटः कुड्यादिसंस्थानं तटमिति तस्माद् विषयविशेषोपपत्तेर्लिङ्गविशेषोपपत्तिरिति । अत्रोच्यते **--गोचरविशेषोपपत्तौ वा सोऽपि** विशेषो **नास्ति,** यस्माद् **न तटो गोचरः प्रसवस्य, संस्त्यानात्मकत्वात्,** संस्त्यानात्मकत्वं तस्यार्थस्य सिद्धं त्वयैवाभ्युपगतत्वात् त्र्यात्मकत्वस्य, **स्त्रीव**दिति स्तनकेशवत्याः प्रसवाभाववदिति । एवं शेषे साधने गतार्थे यावत् **स्त्री-पुंसव**दिति । एष बाह्यस्त्यादिनिदर्शनबलेन गोचरनिषेधः कृतः । अधुना तस्यैवार्थस्य

४ वा] चात्र ? ॥
१२ अ] अत्र मूलं यथायोगमूह्यम् ॥
१ स] **स प्रसवे** प्र॰ । किं पुनर्लोके दृष्ट्वा एतदवसीयते--इयं स्त्री अयं पुमान् इदं नपुंसकमिति ? लिङ्गम् । किं पुनस्तत् ? स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥... ... ...तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति ।... ...तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम् । अवश्यं च कश्चित् स्वकृतान्त आस्थेयः । कोऽसौ स्वकृतान्तः ?... ...संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमानिति । --nayacakra-ms-pā म॰ nayacakra-ms-bhā ४ । १ । ३ । संस्त्यान इति भावसाधनत्वं दर्शयति । सूतेरिति सू इत्येतस्य धातोः सप् प्रत्ययो भवति, सकारस्य पकारो भवतीत्यर्थः । औणादिको मसुन् प्रत्ययः । ह्रस्वश्च बाहुलकात् ।... ... ...संस्त्यानमिति तिरोभावः । प्रवृत्तिराविर्भावः । साम्यावस्था स्थितिः । --nayacakra-ms-pā म॰ nayacakra-ms-bhā प्रदीपः ॥

त्रित्वापेक्षया क्रियते --**अथवे**त्यादि साधनानि गतार्थानि यावत् **तटीवदि**ति । **एवं लिङ्गाभाव एव** तटत्वादीनां प्रसवादिधर्माभावे गोचरविशेषाभावादित्युपनयः । न लिङ्गाभाव एव दोषः, किं तर्हि ? **ततश्चासत्त्वमप्येषां मू**लोद्वर्तनेन, **[अ]क्रिया-ऽव्ययत्वे सति अलिङ्गत्वात्, खपुष्पवत्,** मा भूत् पचत्यादिस्वराद्याख्याताव्ययाभिधेयार्थवत् सत्त्वाशङ्केति **अक्रियाव्यय**विशेषणम् । **अथोच्येते**त्यादि । परेणोच्येत परिहारः --**नन्वेवं** प्रपञ्चनेन गोचरलिङ्गनिराकरणव्याख्यानेन (?')**संस्त्यानात्मकत्वादित्यादिना त्रिलिङ्गत्वं स्वं स्वं** लिङ्गव्य-
576/mj वस्थापनहेतुं परिगृह्णता **व्यवस्थापितमेव त्वया** । यथा न तटी, संस्त्यान

* * *

त्वया तटः पुंलिङ्गं प्रसवात्मकत्वात् पुरुषवदित्यादि । न, लिङ्गव्यवस्थापनहेत्वभावात् । प्रसवादीनामेकार्थे सन्निधिभावे वा स पुमानेव न स्यात्, स्त्रीत्वात्, देवदत्तादिवत् । न स्त्री, पुंस्त्वात् । न तौ, नपुंसकत्वात्, इतरवत् ।

पर्वतनदीभवनविषयं त्रिलिङ्गत्वं विशिष्टविषयमिति चेत्, न, पुमादिभिन्नबाह्वाद्येकलिङ्गत्वात् अर्धर्चादिषु च विशेषादर्शनादपरिहारात् । नन्वेकस्य दृष्टं त्रिलिङ्गत्वं भूतिर्भवनं भाव इति । न, यदि वयं लोके दृष्टत्वात् प्रतिपद्यामहे तटे दृष्टत्वादेव कस्माद् न प्रतिपद्यामहे ? तदेव दुर्दृष्टम् । अपि चेदं साध्यम्--असावप्येकोऽर्थो भावो वेति ।

* * *

प्रसवात्मकत्वात्, पुरुषवत् इत्यात्थ तथा तःतटः **पुंलिङ्गम्, प्रसवात्मकत्वात्, पुरुषवदिति, आदि**ग्रहणात् संस्त्यानानुभयत्वाभ्यामपि त्रयाणां त्रिलिङ्गत्वहेतुत्वमिति । एतच्च **न, लिङ्गव्यवस्थापनहेत्वभावात्** । ननूक्तम्--त एव हि प्रसवादयो लिङ्गव्यवस्थापनहेतवो न सन्तीति साधितमनन्तरमेव, तस्मान्न किञ्चिदेतत् । अभ्युपगम्यापि **प्रसवादीनामेकार्थे सन्निधिभावे वा स पुमानेव**

---

४ अ] **अथ चेत्यादि** प्र° ॥
६ प] पचत्यादि आख्यातम्, स्वरादि अव्ययम् ॥
७ अ] **अथोच्यते°** प्र° ॥
७ व्या] **व्यामत्रनयनो द्रव्यसंस्त्यानात्मकत्वादिना**nayacakra-ms-bhā ॥
७ त्वा] संस्त्यानात्मकत्वादिना इति nayacakra-ms-bhā पाठोऽपि समीचीनो भाति । दृश्यतां पृ° ५७५ पं° १ ॥
८ स्वं] **लिङ्गं व्यव°**nayacakra-ms-bhā ॥
११ पु] **पुमादिभिन्नेत्यादि** । अयमत्राशयः--पुंसः स्त्रियाः नपुंसकस्य च देहे विद्यमाना बाहु-जिह्वादयोऽवयवा पुमादिभिन्नविषया अपि एकलिङ्गत्वेन दृश्यन्ते, न हि पुमादिभिन्नविषयत्वेऽपि बाहौ लिङ्गभेदः, एवं च विशिष्टविषयत्वं न लिङ्गभेदे हेतुः । किञ्च, अर्धर्चादिषु विशिष्टविषयत्वाभावेऽपि लिङ्गभेदो दृश्यते । तस्माद् अर्थैकत्वे...लिङ्गभेदानुपपत्तिः पृ° ५७४ पं° २३ इति पूर्वोक्तो दोषोऽपरिहृत एव ॥
१९ इ] दृश्यतां पृ° ५७५ पं° २, ३ ॥
२० त] **तथातः पुंलिंगम्** प्र° । तथा अतः पुंलिङ्गम् ? तथात्थ पुंलिङ्गम् ? ॥
२३ व] **°वत्, इत्यादिग्रहणात्** ? ॥
१ पुमा] **पुमानेव स्यात्**nayacakra-ms-bhā ॥

न स्यात्, स्त्रीत्वात्, देवदत्तादिवत्, तस्य स्त्रीत्वं त्वयाभ्युपगतं त्रिलिङ्गत्वात् । तथा न स्त्री पुंस्त्वात्, न तौ स्त्रीपुंसौ नपुंसकत्वात्, इतरत्वेन दृष्टान्तोऽत्र । § 1655

**पर्वत-नदी**त्यादि । स्यान्मतम्--पर्वतः पुमान्, तद्विषयस्तटः । नदी स्त्री, तद्विषया तटी । भवनं नपुंसकम्, तद्विषयं तटम् । तस्मात् **त्रिलिङ्गत्वं विशिष्टविषयम**िति । एतच्च **न, पुमादिभिन्नबाह्वाद्येकलिङ्गत्वात्** । एकस्मिन् देहे बाहुः पुमान्, जिह्वा स्त्री, अक्षि नपुंसकमिति नियतलिङ्गत्वान्नैतदपि पुष्कलम् । किञ्चान्यत्, **अर्धर्चादिषु च विशेषादर्शनादपरिहारात्** न इति वर्तते, अर्धर्चः अर्धर्चं गोमयः गोमयमित्यादीनां स्त्रीलिङ्गाभावात् त्रिलिङ्गत्वं नैकार्थम् । § 1656

आह **--नन्वेकस्य दृष्टं त्रिलिङ्गत्वम्--भूतिर्भवनं भाव इति,** अतोऽव्यभिचार इति चेत्, **नेत्युच्यते, यदि वयमित्यादि, यदि** लोके प्रयोगो दृष्ट इत्येतावता प्रतिपद्यामहे त्वादृशा इव परप्रत्येयाः **तटे दृष्टत्वादेव कस्माद् न प्रतिपद्यामहे ?** किं विवादेन ? तस्मात् **तदेव दुर्दृष्टम्,** प्रसिद्धिरेव दुष्प्रसिद्धिरित्यर्थः । **अपि चेद**मित्यादि, भूतिर्भवनं भावः इत्येतेऽपि त्रयोऽर्था यथार्थाभिधानशब्दनयमतेन भिन्नाः, तस्मादेतत् **साध्यम्--असावप्येकोऽर्थो** [ना]नेक इति । अपि च **भावो वेति** एतदपि 577/mj

* * *

अपि च एकस्य त्रैलिङ्ग्यायुक्तिविचारे भूत्यादीनां नानाशब्दानामुपन्यासोऽतिविस्पर्धते, पर्यायनयविषयत्वाच्च भावशब्दस्यात्र कर्तैवैको भावः तस्मादेकभवनासत्त्वादर्थैकत्वमपि नैव ।

यदप्युक्तं नक्षत्रताराथातिदेश... ... ...अयं देवदत्तः, वृक्षोऽर्थो भवति । [नक्षत्रेण सामान्येन पुष्यस्य अतिदेशः यथा इदमा] देवदत्तस्य । अत्र युक्तौ, *देवदत्तस्येदंविषयत्वादतिदेशो युज्यते, न नक्षत्रेण पुष्यस्य अतद्विषयत्वात् । अर्थेन वा वृक्षोऽतिदिश्येत तद्विषयत्वात् । नक्षत्राद्यतिदेश्यो न भवति पुष्यः, अस्वविषयत्वात्, स्थाणुपुरुषवत् । यद्यतद्विषयेणाप्यतिदिश्येत घटादावपि नक्षत्राद्यतिदेशवृत्तिर्युक्ता स्यात्, अतद्विषयत्वात्, पुष्यवत् ।

* * *

२ देव] अत्र देवदत्तो वैधर्म्यदृष्टान्तो भाति । यथा देवदत्तः पुमानेव न तथा तटः पुमानेवेत्यर्थः ॥
२ स्त्री] **स्त्रीत्वं पुंस्त्वात्**nayacakra-ms-ya ॥
९ इत] **इतरत्वन** nayacakra-ms-bhā । **इतरत्वन** nayacakra-ms-ya । **इतरत्वेन** दृष्टान्तोऽत्र इति पाठोऽत्र सम्यग् विभाव्यते । **इतरत्वेन** वैधर्म्येणेत्यर्थः । इतरवत् ? ॥
१३ अ] ऋचोऽर्धमर्धर्चः । अर्धर्चाः पुंसि च । २ । ४ । ३१ । अर्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते । अर्धर्चः । अर्धर्चम् । गोमयः । गोमयम् । --nayacakra-ms-pā **काशिका** ॥
१७ प] **परप्रत्ययाः** प्र॰ ॥
२३ प्युक्तं] दृश्यतां पृ॰ ५७३ पं॰ ३ ॥
१ *] देवदत्तस्य इदमा अर्थेन वा वृक्षस्यातिदेशो युज्यते, न तु नक्षत्रेण पुष्यस्य अतद्विषयत्वात् इत्यपि पाठोऽत्र भवेत् ॥

साध्यम्--भावः क्रिया न कर्ता भूत्यादिशब्दाभिधेयः । स च शब्दनयस्य नास्ति, प्रकृत्यर्थस्य न्यग्भूतत्वात् । कर्त्रर्थस्यैव सद्भावात् मन्मतेन । § 1657

**अपि** चेत्यादि । तटशब्दस्यैकार्थस्य **एकस्य त्रैलिङ्ग्यायुक्तिविचारे** ना- - /ms नालिङ्गानां **भूत्यादीनां नानाशब्दा[ना]मुपन्यासो[ऽ]तिविस्पर्धते** । इतश्च न घटते तदुपन्यासः, द्रव्यार्थत्वात् सामान्यस्य भूति-भवन-भावाख्यस्यैकत्वात् तद्विषयमुदाहरणं स्यात्, न पर्यायनय[विषयम्, पर्यायनय]**विषयत्वाच्च भाव- शब्दस्यात्र कर्तैवैको** भवति इति **भावो** विशिष्ट एवैको घटादिः, न त्वेक एव भूत्यादिरूपो विशेषः कर्ता । तस्मा**देकभवनासत्त्वादर्थैकत्वमपि नैव,** सामान्यभवनस्यैकस्य न्यग्भूतत्वात् विशेषभवनस्य भूत्यादिविशिष्टैकरूपत्वात् नास्त्यर्थैकत्वमत्र नयेऽतो द्रव्यार्थकृतं भूत्यादिष्वैक्यं तद् मां प्रत्यसिद्धमित्यर्थः । तस्माददृष्टान्त इति । § 1658

किञ्चान्यत्, त्वया **यदप्युक्तं नक्षत्रतारार्थातिदेशे**त्यादि तदुक्तप्रत्युच्चारण- म् । सामान्यार्थातिदेशेन विशेषार्थातिसर्गे निदर्शनम् **--अयं देवदत्त** इति, **वृक्षोऽर्थो भवति** इति द्वितीयम् । *शेषं गतार्थं सभावनं यावद् **देवदत्तस्ये**ति पूर्वपक्षः । उत्तरपक्षस्तु **अत्र युक्तौ देवदत्तस्येद**मित्यादिना वैधर्म्यं निदर्शय- ति अतिदेशाभावभावनार्थं याव**दतद्विषयत्वा**दिति प्रथमनिदर्शनस्य । **अर्थेन** वेत्यादिना द्वितीयनिदर्शनवैधर्म्यं दर्शयति । **अर्थेन** सता **वृक्षोऽतिदिश्येत** प्र- त्यक्षः सन् परोक्षेण धर्मेण विशेषेण, न सामान्येन सता वा खपुष्पादिना वा । नक्षत्रादीनामतद्विषयत्वात् प्रत्यक्षनिर्देश्यस्य पिण्डस्य देवदत्तार्थस्य तद्विष- यत्वात् वृक्षस्यार्थविषयत्वाच्च वैधर्म्यम् । तस्मान्न दृष्टान्तः । नक्षत्राद्यतिदेश्यो न भवति पुष्यः, अस्वविषयत्वात्, स्थाणुनेव पुरुषः पुरुषेण वा स्थाणुरिति । - /ms यद्यतद्विषयेणाप्यतिदिश्येत घटादावपि नक्षत्रं तारा घटः इत्यतिदेशवृत्तिर्युक्ता स्यात् अतद्विषयत्वात् पुष्यवत् इत्यतिप्रसङ्गः । § 1659

578/mj

ननु पुरुषोऽपि... ... ...गवादि गोण्या । सत्यमुच्यते, न तु तद्गतविशेषविरोधेन... ... ...संवादव्युदसनवृत्तिः । एष प्र- कृत्यादिविसंवादेष्वपि अशेष आक्षेपपरिहारप्रपञ्च आयोज्यः ।

§ 1660

नन्वेवमाख्यातुराख्येयार्थगतविशेषैर्विना तदाख्यानासम्भवाद् नान्तरीयकं विशेषणोपादानम्, तानि च संख्यालिङ्गादिभेदा एव

---

२ भू] भूयादि॰nayacakra-ms-ya ॥
४ म] दृश्यतां पृ॰ ५५७ पं॰ ५ ॥
१० विष] तिविषयत्वाच्च प्र॰ ॥
११ न] नयेनो द्रव्यार्थ॰ प्र॰ ॥
१४ त] तस्माद्दृष्टान्तःnayacakra-ms-ya । तस्माद्दष्टान्तः nayacakra-ms-bhā ॥
१५ *] विशेषंnayacakra-ms-ya ॥
१९ त्त] ॰त्तस्येवमित्यादिना प्र॰ ॥
२० क्ष] ॰निर्देशस्य प्र॰ ॥
२२ त] तस्मान्ना प्र॰ । तस्मान्नासौ ? ॥
२२ न] नक्षत्रतारा प्र॰ ॥

। न, क्रियाव्युत्पत्त्यादिभेदेन व्याख्यानोपपत्तेः । उक्तं हि--क्रियाकारकभेदेन पर्यायवचनेन वाक्यान्तरेण च व्याख्या § 1661

**ननु पुरुषोऽपीत्यादि** अस्त्वविषयत्वासिद्ध्युद्भावनं यावद् **गवादि गोण्येति** । तदुत्तरम् --**सत्यमुच्यत** इत्यादि । शब्दो हि तेन प्रकारेण वाच्यविशेषं संवादिनं ब्रवीति, तत्सम्परिग्रहगुणेन सत्यमुच्यते सोऽर्थविशेषः, न तु तद्गतानां विशेषाणां विरोधेनोच्यते यथा स्त्री-पुं-नपुंसकादीनामेकद्विबहुत्वादीनां चैकार्थत्वेनेति संवाद-विसंवाददर्शनो ग्रन्थो यावत् **संवादव्युदसनवृत्तिरि**ति गतार्थः । एवं लिङ्ग-सङ्ख्याविसंवादवृत्तिहेतुप्रसङ्गेन चोद्य-परिहारप्रपञ्च उक्तः । **एष प्रकृत्यादिविसंवादेष्वपि अशेष आक्षेप-परिहारप्रपञ्च आयोज्यः** समानप्रचर्चत्वात् प्रकृति-प्रत्ययाद्यक्षरविशेषोच्चारणमात्रभेदः प्रहासादिदमसत्यमेव इति चोद्योपक्रमप्रभृतिर्यावदेतदवधि लिङ्गादिविशेषत्यागेन यथानुपूर्वोत्तरपक्षविरचनो नेय इति । § 1662

**नन्वेवमित्यादि** । नन्वाख्यातुराख्यानकर्मणि प्रवृत्तस्य आख्येयार्थगतविशेषैरवश्यम्भाविभिर्विना तदाख्यानासम्भवाद् नान्तरीयकं विशेषणोपादानम्, तानि च विशेषणानि सङ्ख्यालिङ्गादिभेदा एव, इतरथा अर्थोपदेशाभावः, अर्थप्रत्यायनार्थत्वाच्छब्दप्रयोगस्य अर्थपरतन्त्रस्यानन्तरीयकत्ववद् लिङ्गादिभेदनान्तरीयकत्वमिति । एतच्च **न, क्रियाव्युत्पत्त्यादिभेदेन व्याख्यानोपपत्तेः** । तद्दर्शयति --**उक्तं ही**त्यादि ज्ञापकेन **क्रिया-कारकभेदेने**ति, § 1663

द्रव्यवदाश्रयवृत्तिः स्वस्था परसाधना त्र्यभिहितता ?श्च । - /ms
द्वे शून्ये क्षयिणी चेत्यष्टौ ज्ञेयाः क्रियाभेदाः ॥ § 1665

कारकभेदाः कर्त्रादयः षडष्टौ वा कालोपायसहितास्त एव । **पर्यायवचनेन** घट-कुट-कुम्भादिना **वाक्यान्तरेण च स्थानिवदादेशोऽनल्विधौपा**° १ । १ । ५६ इत्यस्य **स्थान्यादेशपृथक्त्वात् स्थानिवदतिदेशो गुरुवद् गुरुपुत्रे**

---

१० रिग्र] **°ग्रहणगुणेन**nayacakra-ms-ya ॥
१६ प्र] दृश्यतां पृ° ५७१ पं° ६ ॥
१७ स्या] **°स्यार्थनान्तरीयकत्ववद्** इति पाठोऽत्र सम्यग् भाति ॥
१९ लिङ्गादिभेद] **°दानान्त°** प्र° ॥
२२ त्र्य] व्यवहिता च ? ॥
२३ व] **°वचने घट°**nayacakra-ms-ya ॥
२ स्थानिव] **°वदितिदेशे** प्र° । किमर्थं पुनरिदमुच्यते ? स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद् गुरुपुत्र इति यथा । अन्यः स्थानी अन्य आदेशः । स्थान्यादेशपृथक्त्वादेतस्मात् कारणात् स्थानिकार्यमादेशे न प्राप्नोति । तत्र को दोषः ? आङो यमहनः इत्यात्मनेपदं भवतीति हन्तेरेव स्यात् वधेर्न स्यात्, इष्यते च वधेरपि स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति तस्मात् स्थानिवदनुदेशः । एवमर्थमिदमुच्यते गुरुवद् गुरुपुत्र इति यथा । तद्यथा--गुरुवद् गुरुपुत्रे वर्तितव्यमिति गुरौ यत् कार्यं तद् गुरुपुत्रेऽतिदिश्यते एवमिहापि स्थानिवत् कार्यमादेशेऽतिदिश्यते ।... ... ...विशिष्टं स्थानिकार्यमादेशेऽतिदिशति गुरुवद् गुरुपुत्र इति यथा । तद्यथा--गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात् पादोपसंग्रहणाच्च । यदि च गुरुपुत्रोऽपि गुरुर्भवति तदपि कर्तव्यं भवति । --nayacakra-ms-pā म° nayacakra-ms-bhā १ । १ । ५६ ॥

**वर्तितव्यम् अन्यत्रोच्छिष्टभोजनात् पादग्रहणाच्च** पा. म. भा. १ । १ । ५६
579/mj इत्यादि ।

* * *

। क्रियाभेदेन दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषुपा॰ धा॰ ११०७... ...स वृक्षः । इहापि क्रियाकारकभेदाभ्यां पुष्यति... ...खपुष्पे । उपोद्घात... ...भेदलक्षणायाः अधिकरणयोग... ...व्याख्यायाः का कथं वाऽनुपपत्तिर्लिङ्गाद्यभेदेऽपि ? अनेकार्थैकशब्दग्रहणेनापि व्याख्यानाद् लिङ्गाद्यभेदेऽप्यर्थाधिगतिः । यथाह--वाग्दिग्भूरश्मि... ... ...॥ ... ...दृष्ट्या वा ।

अत एव च व्याकरणाध्ययने यत्न आस्थेयः । उक्तं हि--

*... ... ...॥
*अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ वाक्यप॰ १ । १३§ 1669

* * *

अथवा आचार्येणैव **क्रियाभेदेन दिवु क्रीडे**त्यादि व्याख्यातमेव यावत्

१२ *] अत्र वक्ष्यमाणाद् **अर्थप्रवृत्तितत्त्वानाम्** इति श्लोकात् पूर्वं वाक्यपदीये **प्राप्तरूपविभागाया यो वाचः परमो रसः । यत् तत् पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः** ॥ १ । १२ ॥ इति श्लोको दृश्यते । तस्य व्याख्यायां भर्तृहरिणा **तथा चोक्तम्** इत्युल्लिख्य **शब्दार्थसम्बन्धनिमित्ततत्त्वं वाच्याविशेषेऽपि च साध्वसाधून् । साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो व्याकरणं न वेद** ॥ इति श्लोक उद्धृतः । किन्तु नयचक्रवृत्तौ प्रतीकानां स्फुटमदर्शनादनयोरन्यतरः श्लोकोऽत्र मल्लवादिना विवक्षितोऽन्यो वा कश्चिदिति निर्णेतुं न पार्यते ॥

१५ *] अ[[**र्थस्य प्रवृत्तिर्व्यवहारः, तस्य तत्त्वानि । अर्थश्च प्रवृत्तिश्चेति वा द्वन्द्वः, अर्थो द्रव्यं प्रवृत्तिः क्रिया तयोस्तत्त्वात्, तेषां शब्दो निबन्धनम् । तत्त्वावबोध इति साधुत्वावबोधः । योग्यशब्दनिबन्धनेति योग्यस्तद्विवक्षाप्रतिपादनसमर्थः शब्दः । ... ... ...प्रत्ययात्मेति बुद्धिस्वरूपम् । बाह्येष्विति बुद्धिरेवोपदर्शिताभिधेयाकारा तेषु प्रत्यस्तेत्युच्यते । बाह्यत्वेन ग्रहणं न तु बाह्यं वस्त्वस्तीति । सति बाह्येऽर्थे तन्निबन्धना विवक्षा पूर्वत्र तत्त्वमित्युक्ता, सम्प्रति बुद्धिरेवेति विशेषः । इति वृषभदेवरचितायां टीकायाम्** ॥]]र्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥वाक्यप॰ १ । १३, अर्थस्य प्रवृत्तितत्त्वं विवक्षा, न तु वस्तुस्वरूपतया सत्त्वमसत्त्वं वा । **विवक्षा हि योग्यशब्दनिबन्धना** । योग्यं हि शब्दं प्रयोक्ता विवक्षाप्रापितसंनिधानेष्वभिधेयेषु प्रत्यर्थमुपादत्ते । तद्यथा--उपलिप्समानः प्रतिविषयं योग्यमेवेन्द्रियमुपलब्धौ प्रणिधत्ते । ... ... ...अथवार्थप्रवृत्तेः किं तत्त्वम् ? अर्थरूपाकारः प्रत्ययात्मा बाह्येषु वस्तुषु प्रत्यस्तः । स च शब्दनिबन्धनः । तत्त्वावबोधः शब्दानाम्, शब्दस्य तत्त्वमवैकल्यम्, अनपगतसंस्कारं साधुस्वरूपम्, तद्यस्याविकलम् । अन्ये तु तत्प्रयुयुक्षया प्रयुज्यमाना विकलाः स्युरपभ्रंशा इति । इति **भर्तृहरिरचितायां वाक्यपदीयस्ववृत्तौ** ॥

१ क्रिया] **क्रियाभेदोन दिव क्रीडे॰** प्र॰ । दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु --पा॰ धा॰ ११०७ ॥

**स वृक्ष** इति गतार्थ[म्] । **इहापीति** सिद्धं व्याख्यानं प्रदर्श्य प्रस्तुतं योजयति **क्रियाकारकभेदाभ्यां पुष्यती**त्यादि यावत् **खपुष्प** इति गतार्था व्याख्या । अथवान्या व्याख्या --**उपोद्घाते**त्यादि यावद् **भेदलक्षणाया** इति व्याख्यायाः का कथं वेहाऽनुपपत्तिर्लिङ्गाद्यभेदेऽपि इति सम्भन्त्स्यते । अथवायमपरो व्याख्यामार्गः, तद्यथा --**अधिकरणयोगपदार्थे**त्यादि यावत् **का कथं वानुपपत्तिर्लिङ्गाद्यभेदेऽपी**ति । सोदाहरणं त्वस्य व्याख्यानं तत्रान्त्वार्थसङ्ग्रहादिभ्योऽधिगन्तव्यम् । § 1670

इतश्च व्याख्या[ना]ल्लिङ्गाद्यभिन्नार्थगतिरुपपद्यते, **अनेकार्थैकशब्दग्रहणेनापी**त्यादि । व्याख्यातृभिरेकः शब्दोऽनेकार्थ इति ब्रुवद्भि**र्व्याख्यानाद् लिङ्गाद्यभेदेऽप्यर्थाधिगति**रभ्युपगतैवेति । तद् 580/mj

* * *

यदप्युच्येत--लिङ्गादिविचारखेदोऽयमकस्मात् क्रियते त्वया । अभिजल्पो हि शब्दार्थः । स च शब्द एव ।

सोऽयमित्यभिसम्बन्धाद् रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥ § 1673

* * *

दर्शयति --**यथाह--वाग्-दिग्-भू-रश्मी**त्यादि **श्लोको**ऽयमाचार्येणैव व्याख्यातः

---

३ ग] गतार्थाnayacakra-ms-bhā ॥

१० व्या] व्याख्याःnayacakra-ms-bhā ॥

१७ सो] **शब्दो वाऽप्यभिजल्पत्वमागतो याति वाच्यताम्** ।वाक्यप॰ २ । १२८, अभिजल्पत्वमध्यासरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः । अभिजल्पस्वरूपमाह **--सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा । शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्ष**ते ॥ वाक्यप॰ २ । १२९, सोऽयमित्यभिसम्बन्धोऽध्यासाख्य उच्यते, तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते तदाऽभिजल्पः शब्द उच्यते, अध्यासवशाच्छब्दार्थयोरेकात्मत्वेऽप्यर्थांशस्यैव प्राधान्यमुपयोगवशात् । **तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि । किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते** ॥ वाक्यप॰ २ । १३०, तयोः शब्दार्थयोरध्यासवशाद् रूढेर्नियमादेवाव्यभिचारिणि अपृथगर्थत्वे एकरूपत्वे सति किञ्चिदेव रूपं योगवशात् क्वचिदेव लोके शास्त्रे वा प्राधान्येन उद्रिक्ततयाऽवतिष्ठते । तत्र लोकेऽर्थांशस्यैव प्राधान्यमित्यपि दर्शयितुमाह — **लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते** । अर्थरूपतां प्रतिपन्नोऽर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते अयं गौरित्यादि । तत्रार्थ एव बाह्यतया प्रधानमवसीयते । शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यत इत्याह **--शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया** ॥ वाक्यप॰ २ । १३१, शास्त्रे हि स्वरूपप्रधानो निर्देशः क्वचिच्चार्थप्रधानोऽपीत्युभयरूपता शब्दस्य दृश्यते । इति **पुण्यराज**विरचितायां **वाक्यपदीयवृत्तौ** । अन्ये तु ब्रुवते शब्द एवाभिजल्पत्वमागतः शब्दार्थः इति । स चाभिजल्पः शब्द एवार्थः इत्येवं शब्देऽर्थस्य निवेशनम् सोऽयम् इत्यभिसम्बन्धः, तस्माद् यदा शब्दस्यार्थेन सहैकीकृतं रूपं भवति तं स्वीकृताकारं शब्दमभिजल्पमित्याहुः । **--सन्मतिवृत्तिः** १ । २, पृ॰ १८०--१८१ । **तत्त्वसंग्रहपञ्जिका** पृ॰ २८४--२८५ ॥

१ वा] दृश्यतां ५२४ टि॰ १ ।

स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं चिह्नशेफसोः
॥ ३ । ३ । २५ ॥ इति **अमरकोशे** ॥

यावद् **दृष्टा वे**ति ग्रन्थेनैव । एवं निरवशेषव्याख्येयविषयव्यापिता व्याख्यायाः - /ms प्रदर्शिता । **अत एव चे**त्यादि । व्याकरणं हि लक्ष्याधिगतये लक्षणं कथं नाम शब्दादर्थे ज्ञानमविपरीतं स्यात् इति । तस्माद् **व्याकरणाध्ययने यत्न आस्थेयः** । § 1674

**उक्तं ही**त्यादि श्लोकद्वयं व्याकरणस्तवनार्थं निदर्शयति । वागादिषु गोशब्द एकोऽनेकार्थः, एकस्मिन् पृथुबुध्नादिलक्षणेऽर्थे घट-कुट-कुम्भादिशब्दोऽनेकः प्रवृत्तः इत्येवमादेः प्रकाश्यस्यार्थस्य प्रकाशकं व्याकरणं स्थावर-जङ्गमानामिव प्रकाश्यानां सूर्यः । तथा न व्याकरणमन्तरेण वाच्यस्य सूक्ष्मस्य ज्ञानं वाचकस्य च शब्दस्य, यः शब्दः शब्दकर्मको वाचमेव ब्रूते हसतिजल्पत्यादिस्तद्विषयं च ज्ञानं न सम्भवति । तच्च सर्वं व्याकरणज्ञो वेद । तथा **अर्थप्रवृत्तितत्त्वाना**मित्यादि । अर्था अभिधेयाः, प्रवृत्तयः क्रियाः पुरुषहितहेतवोऽहितहेतवो वा, तेषामुभयेषां तत्त्वानि स्वान्यविपरीतानि रूपाणि शब्दैरेव ज्ञायन्ते । शब्दानां पुनस्तत्त्वं व्याकरणादृते न ज्ञायते । अथवार्थस्य प्रवृत्तितत्त्वानि यथास्वमेकैकस्यानन्तधर्मात्मविपरिणामाः, तानि शब्दैर्ज्ञायन्ते, शब्दा व्याकरणेनेति । अथवा अर्था धर्मार्थकाममोक्षाः, तद्धेतवः प्रवृत्तयः, तासां तत्त्वानि यथास्वं साध्यसाधनभावाः । इत्यादिव्याख्याविशेषेषु तद्विषयसम्यग्ज्ञानस्य शब्दाः कारणानि, शब्दज्ञानस्य तु व्याकरणमिति । § 1675

**यदप्युच्येते**त्यादि । स्त्रीपुंनपुंसकव्यक्तीनां विरुद्धानां पुष्यनक्षत्र-581/mj तारार्थानामयुक्तमैकाधिकरण्यम्,

* * *

तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि ।
किञ्चिदेव क्वचिद् रूपं प्राधान्येनावतिष्ठते ॥§ 1678

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ।
शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ॥ वाक्यप० २ । १२९, १३०, १३१§ 1680

दर्शनोत्प्रेक्षाभ्यामर्थमुपगृह्य तत्र न्यग्भूतस्वशक्तिः बुद्धौ परिप्लवमान आन्तरो विज्ञानलक्षणः शब्दात्मा श्रुत्यन्तरप्रवृत्तिहेतुरभिजल्प इति <u>भर्तृह-</u>

---

२ या] **यावद्दृष्टा**nayacakra-ms-bhā । **यावद्दृष्या** nayacakra-ms-ya ॥
२ अ] **एवेत्यादि**nayacakra-ms-ya ॥
१८ स्वा] स्वानि अविपरीतानि रूपाणीत्यर्थः ॥
१९ य] **यदप्युच्यत इत्यादि** ? ॥
४ द] अपि चायमभिजल्पोऽपि बुद्धिस्थ एव । तथाहि--बाह्ययोः शब्दार्थयोर्भिन्नेन्द्रियग्राह्यत्वादिभ्यो भेदस्य सिद्धेस्तयोरैक्यापादनं परमार्थतोऽयुक्तमेवेति बुद्धिस्थयोरेव शब्दार्थयोरेकबुद्धिगतत्वादेकीकरणं युक्तम् । तथाहि--उपगृहीताभिधेयाकारतिरोभूतशब्दस्वभावो बुद्धौ विपरिवर्तमानः शब्दात्मा **स्वरूपानुगतमर्थमविभागेनान्तः संनिवेशयन् अभिजल्प उच्यते** । स च बुद्धेरात्मगत एवाकारो युक्तो न बाह्यः तस्यैकान्तेन परस्परं विविक्तस्वभावत्वात् ।--**सन्मतिवृत्ति** १ । २, पृ० १८४ । **तत्त्वसंग्रहपञ्जिका** पृ० २८८ ॥

र्यादिमतम् । वसुरातस्य भर्तृहर्युपाध्यायस्य मतं तु स च स्वरूपानुगतमर्थमन्तरविभागेन संनिवेशयति ।

* * *

पुनर्वसू नक्षत्रम् इत्यादिसंख्याविरोधाद्ययुक्तेर्विज्ञानमपि तद्विषयमयुक्तम् इत्यादिवचनखेदोऽयमकस्मात् क्रियते त्वया । किं कारणम् ? **अभिजल्पो हि शब्दार्थः, हिशब्दो** यस्मादर्थे, शब्दार्थस्याभिजल्पत्वाद् न लिङ्गादिविचारखेदेनार्थः, असद्विषयत्वात्, खपुष्पविषयविचारखेदवत् । स्यान्मतम्--कोऽसावभिजल्प इति, अत्रोच्यते **--स च शब्द एव,** स - /ms चाभिजल्पः शब्द एव । § 1681

कथमिति चेत्, उच्यते **--सोऽयमित्यभिसम्बन्धा**दिति श्लोकः । योऽर्थः सोऽयं शब्दो घटः इत्यभेदोपचारसम्बन्धाद् यदा शब्दस्य रूपमर्थेनैकीकृतं भवति तदा यथा इन्द्रकः, चन्द्रकः इतीन्द्रचन्द्राद्यप्रत्यक्षार्थानभिज्ञोऽपि इन्द्रचन्द्रशब्दरूपापन्नं गोपालादिमर्थं प्रत्याययन् दृश्यते सोऽर्थेन एकीभूतः शब्द एव अभिजल्पः इत्युच्यते । एवं शब्दार्थयोः क्षीरोदकवदपृथगात्मत्वम् । **तयोरपृथगात्मत्वे** सत्य[व्य]भिचारिणि अन्योन्याविनाभावित्वेऽपि रूढिवशादेव **किञ्चिद् रूपं प्राधान्येनावतिष्ठते** शब्दरूपमर्थरूपं वा यथा लौकिका अर्थप्रधानाः शाब्दाः शब्दप्रधाना इति, तमर्थं प्रविभागेन दर्शयति--संव्यवहारकाले **[लोके]ऽर्थरूपता**मिति श्लोको गतार्थः । अग्निमानय इत्युक्ते लोके दहनादिलक्षणेऽर्थे सम्प्रत्ययः, न शब्दे । शास्त्रे तु **स्त्रीभ्यो ढक्** पा० ४ । १ । १२० इति स्त्रीवाचकेषु सार्थेषु शब्देषु, **भुजो कौटिल्ये** पा० धा० १४१८ इत्येवमादिषु अर्थेष्वेव सम्प्रत्ययः । तद्व्याख्या **--दर्शनोत्प्रेक्षाभ्या**मित्यादि । प्रधानादिदर्शनेन पुरुषस्य उत्प्रेक्षया वार्थमभिधेयत्वेन **उपगृह्य** पूर्वोक्तचन्द्रादिवत् साकारं **तत्र न्यग्भूतस्वशक्तिः** अस्वतन्त्रीकृताभिधानसामर्थ्यः **बुद्धौ परिप्लवमानः** अयमित्थमनेन शब्देनोच्यत इत्यान्तरो **विज्ञान- लक्ष-** - /ms **णः शब्दात्मा श्रुत्यन्तरस्य** बाह्यस्य ध्वन्यात्मकस्य **प्रवृत्तौ हेतुः** उत्थापकः सोऽभिजल्पाल्पोऽभिधेयाकारपरिग्राही बाह्याच्छब्दादन्य इति **भर्तृहर्यादिमतम् । वसुरातस्य भर्तृहर्युपाध्यायस्य मतं तु स च स्वरूपानुगतमित्यादि, स च** अभिजल्पः **स्वरूपानुगतमर्थरूपमन्तरविभागेन सन्निवेशयती**ति । § 1682
१582/mj

१. दृश्यतां पृ० ३१७-- १ ॥

८ इत्यादिसंख्याविरोधा]
°धाययुक्ते°nayacakra-ms-ya ॥
१२ त] तथा प्र० ॥
१३ इ]
इन्द्रत्वंचन्द्र°nayacakra-ms-bhā ॥
१९ ते] सोऽर्थो न प्र० ॥
२१ ढ] टक् प्र० । स्त्रीभ्यो ढक् । ४ । १ । १२० । स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते । स्त्रीभ्योऽपत्ये ढक् प्रत्ययो भवति । सौपर्णेयः । वैनतेयः । --nayacakra-ms-pā काशिका ॥
२४ द] दृश्यतां पृ० ३९६-- १ ॥
२७ श्रु] दृश्यतां पृ० ३९६-- १, २ ॥
१ रूपानुग]
°गतेपित्यादिnayacakra-ms-ya ।
°गतेपीत्यादि nayacakra-ms-bhā ॥

अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥
वाक्यप॰ २ । १३२ § 1684

इहैकमेवार्थवस्तु एकस्यामवस्थायामेकस्मिन् काले युगपत् पर्यायेण वोच्यते विरुद्धैर्धर्मैः । तद्यथा--ओदनं पचति, पाकमोदनस्य निर्वर्तयति, निर्वृत्तिं पाकस्य करोति । तत्र यदि [कर्मत्वं कथं शेषरूपत्वमोदनस्य] शेषरूपत्वं च पाकस्य । तस्मादविद्यमाना वा शक्तयो[ऽस्यार्थस्य शब्देन विवक्षावशात्] समध्यारोप्यन्ते । सर्वशक्तियोगे वा [नियतास्ताः शब्दः] प्रकाशयति । तत्राशक्तिपक्षे वस्तुगता शक्तिरप्रयोजिका । न हि तस्या वस्तुविषयाभ्यां सन्निधानासन्निधानाभ्यां किञ्चिदपि प्रयोजनमस्ति । योग्यशब्दनिबन्धना हि विवक्षा श्रोतृबुद्धौ § 1685

सत्यपि बाह्येऽर्थे तन्निरपेक्षं स्वातन्त्र्यमभिजल्पस्य प्रदर्शयितुमाह --**अशक्तेः सर्वशक्तेर्वे**त्यादि । या एता गति-स्थिति-जल्पि-चिन्त्यादिधातुवाच्याः क्रिया बाह्यार्थशक्त्यभिमताः तद्वान् वासौ बाह्योऽर्थोऽस्तु अशक्तिरेव वा द्वयोरपि शक्तिमदशक्तिपक्षयोस्ताः क्रियादिशक्तयो नियता एव जल्पनादि मनुष्यादीनामेव, सर्पणप्लवनाद्याः सर्पशकुनादीनामेव इति, सर्वा एव तु एकस्य क[स्य]चिदर्थस्य अनेकाः शब्दैरेव प्रकल्पिताः शब्दशक्त्युत्थापिता इत्यर्थः । § 1686

एतमेवार्थं **भाष्येण** विवृणोति --**इहैकमेवार्थवस्तु** इत्यादि । वस्तुत एक ओदन **एकस्यां** पचना**वस्थायामेकस्मिन्** मुहूर्तादौ **काले** बहुभिर्वक्तृभिर्**युगपदेकेन वा पर्यायेण** वक्त्रोच्यते **विरुद्धैर्धर्मैः** । **तद्यथे**ति निदर्शयति, **ओदनम्** इति देवदत्तादिकर्तृसमारूढक्रियं कर्म, **पाकमोदनस्य** इति षष्ठ्या सम्बन्धमात्रं पाककर्मत्वम्, **निर्वृत्तिं पाकस्य** इति च पाकसम्बन्धित्वमिति । § 1687

---

२१ अ] इदानीमर्थेषु न शक्तिः पृथगस्ति, किन्तु शब्दाधीनेति यथा ते शब्दैर्विधीयन्ते तथैवावगम्यन्त इति स्वमाहात्म्योपस्थापित एव शब्दार्थ इत्यष्टमं पक्षं दर्शयितुमाह **--अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता । एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥** वाक्यप॰ २ । १३२, अथवा सर्वशक्तिरर्थो व्यवस्थितः, तस्य प्रतिनियतशक्त्यभिधानं शब्देनेति नवमं पक्षं दर्शयितुमत्रैवोक्तम्--सर्वशक्तेर्वा इति । शक्त्यार्थः कदाचित् क्रियारूपतयाभिधीयते, कदाचित् सिद्धरूपतयेति नियता क्रियादिरूपता शब्दार्थतया प्रतिपाद्यते । इति **पुण्यराज**कृतायां **वाक्यपदीयवृत्तौ** ॥

१ क्त्रोच्य] **॰च्येत** प्र॰ ॥

**तत्र यदी**त्यादिना भावयति यावत् **पाकस्ये**ति । बाह्येऽर्थे विरुद्धधर्मसम्बन्धाभावाद् युगपदेककाले न घटते एवम् । नापि क्रमेण प्रयोगे, वस्तुन एकत्वात् पाकसमवायिन ओदनाख्यस्य पाकावस्थायाः कालस्य च । § 1688 - /ms

**तस्मा**दित्यादि पारिशेष्यात् **अविद्यमाना वे**त्यादिना प्रथमविकल्पे दर्शयति शब्दस्यैव शक्तिं यावत् **समध्यारोप्यन्त** इति । **सर्वशक्तियोगे वे**त्यादि द्वितीयविकल्पेऽपि शब्दशक्तिमेव दर्शयति यावत् **प्रकाशयती**ति । § 1689

**तत्राशक्तिपक्षे वस्तुगता शक्ति**ःनास्त्येव इत्यभ्युपगतत्वा**दप्रयोजिका** शब्दप्रयोगस्य, खपुष्पवदसत्त्वात् । **न हि तस्या** इत्यादि भावना गतार्था यावत् **किञ्चिदपि प्रयोजनमस्ति,** प्रयोजने हि 583/mj

* * *

तां तां शक्तिमध्यारोपयति । सर्वशक्तिपक्षे तु व्यवस्थितामव्यतिकीर्णां तां तां शक्तिमुपादाय स्वविषयनियताः शब्दाः प्रयुज्यन्ते । तस्मादुभयोरपि... ... ... सम्भवति ।

इदमप्यस्मदभिप्रायप्रसाधनफलम् । योग्यशब्दनिबन्धना [हि विवक्षा श्रोतृबुद्धौ तां तां शक्तिम्] अध्यारोपयति । तत्र वस्तु तावदनेनैव त्वद्वचनेन शब्दादन्यत् सिद्धम् । तदिदंसम्बन्धात्मकशब्दार्थयोर्भेदाद् यत्रासौ प्रयुज्यते शब्दो वक्तुमिष्यते च शक्तिश्च यत्राध्यारोप्यते तद् वस्तु सर्वस्यास्याधारभूतम् । योग्योऽनुरूपः शब्दः । तस्मादर्थात् सिद्धात् पश्चाद् भवति शब्दः । यथार्थरूपं तथा हि स योग्यः शब्दस्तस्यार्थस्य वाचकः । अर्थनिबन्धना हि विवक्षा, इतरथा वचनस्य

* * *

सति प्रयोगः स्यात् । तस्यामसत्यामपि बाह्यार्थशक्तौ मत्पक्षे सम्भवत्येव शब्दप्रयोगः, यस्माद् **योग्यशब्दनिबन्धने**त्यादि गतार्थं याव**च्छक्तिमध्यारोपयति** । **सर्वशक्तिपक्षे तु** मम विशेषेण **व्यवस्थितां** कुतश्चिदनादेया**मव्यतिकीर्णा**मनन्यशब्दवाच्यामित्यादि यावत् **प्रयुज्यन्ते** प्रयोगसाफल्यमस्तीति । तन्निगमयति— **तस्मादुभयोरपी**त्यादि यावत् **सम्भवती**ति पूर्वपक्षः । § 1690

इत्यादि, शब्दो हि समीक्षितप्रत्याय्यप्रत्यायकसम्बन्धो वक्तुमिष्यते, (Edtext outside numbered paragraph)न ह्यनामृष्टप्रत्याय्यप्रत्यायकभावः । विवक्षायाश्चार्थम (Edtext outside numbered paragraph)न्तरेणासम्भवात् **न च विवक्षामात्रेणे**त्यादि, च शब्दो (Edtext outside numbered paragraph)विवक्षितेऽनुरूपेऽर्थे प्रयुक्तः **श्रोतृबुद्धौ** तां (Edtext outside numbered paragraph) तां **शक्तिमाधातुं शक्नोति**, नान्यथा, श (Edtext ou-

---

९ न] न हि तस्येत्यादिnayacakra-ms-bhā । न हि स्येत्यादि nayacakra-ms-ya । दृश्यतां पृ॰ ५८५ ॥

११ व्य] दृश्यतां पृ॰ ५८५ ॥
२३ त] दृश्यतां पृ॰ ५८६ ॥
२५ व्य] दृश्यतां पृ॰ ५८५ ॥
१ त] दृश्यतां पृ॰ ५८६ ॥

tside numbered paragraph)ब्दस्यार्थस्य शब्दार्थस्य च शक्तिः शकनात्, शक्नोति वक्तुं शब्दः शक्यते वक्तुमर्थ इति । § 1691

अत्र वयं ब्रूमः --**इदमप्यस्मदभिप्रायप्रसाधनफलम्,** सामान्योपसर्जना विशेषा एव भवन्ति इत्येतमेव साधयति, एतदस्य त्वद्वचनस्य फलं भविष्यति । तद् भावयितुकामो **योग्यशब्दे**त्यादि प्रत्युच्चारयति याव**दध्यारोपयती**ति अशक्तिपक्षे शब्दशक्तिप्रदर्शनोपसंहारोऽन्त्यः, तत्फलत्वाच्छेषग्रन्थस्य । **तत्र वस्तु तावदि**त्यादि । अनेनैव तावत् त्वद्वचनेन शब्दादन्यद् वस्तु शक्त्याख्यं शक्तिमद्वा सिद्धम् । तत् पुनर्वस्तु कीदृशमिति चेत्, दर्शयति --**तदिदंस-** - /ms **म्बन्धात्मके**त्यादि, **सोऽयमित्यभिसम्बन्धात्** इत्येतस्मादेव वचनात् तच्छब्दवाच्यं वस्तु इदंशब्दवाच्याच्छब्दादन्यत् अर्थाद्वा तच्छब्दवाच्यादिदंशब्दवाच्यः शब्दोऽन्यः, आधाराधेययोर्भेदात् तदिदंसम्बन्धात्मकशब्दार्थयोः । **यत्रासौ प्रयुज्यते शब्दः वक्तुमिष्यते च** यद्विषया बुद्धिरुत्पादयितुमिष्टेत्यर्थः **शक्तिश्च यत्राध्यारोप्यते तद् वस्तु सर्वस्यास्य** शब्दशक्तिबुद्धि-विवक्षाख्यस्यार्थकलापस्या**धारभूतम्,** आधेयानामाधारप्राणतः सिद्धेः । **योग्यशब्दाच्च बाह्यार्थसिद्धिः,** ***योग्योऽनुरूपः शब्दः,** केनचिदर्थेन कश्चित् तदनुरूप एव शब्दो युज्यते पृथुबुध्नाद्यर्थेन घटशब्दः । तस्माद् घटाख्याद**र्थात् सिद्धात् पश्चाद् भवति शब्दः,** अनुशब्दस्य पश्चादर्थत्वात् सिद्धेऽर्थे पश्चाच्छब्देनार्थस्य योगोऽनुरूपः । **यथार्थरूपादिप**मि ?त्यादि, अथवा अनुरूपो योग्यः, यथार्थोऽनुशब्दः, **यथारूपं** यद् यद् रूपं यथारूपमनुरूपं यथा युज्यते तथेत्यर्थः । कथं च युज्यत इत्यत आह --**तथा हि स** इत्यादि, तेन हि प्रकारेणासौ योगमर्हति **योग्यः शब्दः** तमर्थं प्रत्याययिष्यामीति प्रयोगदर्शनात् **तस्यार्थस्य** वाचकत्वोपेत इत्यर्थः, यो ह्यर्थस्यावाचकः स नानुरूपो न योग्य इत्युक्तं भवति त्वयैव । यस्मा**दर्थनिबन्धना विवक्षा, हि**शब्दहेत्वर्थत्वात् । **इतरथे**ति अर्थप्रत्यायनादृते

प्रवृत्त्यसम्भवात् । न हि शब्दोऽनामृष्टप्रत्याय्यप्रत्यायकभावो वक्तुमिष्यते । न च विवक्षामात्रेण शब्दः श्रोतृबुद्धौ तां तां शक्तिमाधातुं शक्नोति । एवं चानेन त्वद्वचनेनैव विशेषलक्षणाः शक्तयः परिगृहीता एव त्वया । अस्मन्मतवदेव च विशेषस्वरूपप्रवृत्त्या विना न कश्चिच्छक्तिमानन्यः । विशेषा एव शक्तयः स्वार्थसत्यः । तासां च तेषु तेषु विवक्षैव व्यञ्जिका । विवक्षैव तां तां शक्तिमध्यारोपयति प्रागात्मनि पश्चात् प्रयोगाच्छ्रोतृबुद्धौ । शब्दनिरपेक्षैव विवक्षाध्यारोप्या शक्तिरर्थे,

* * *

---

७ भिप्रा] °प्रायसाधन°nayacakra-ms-ya ॥
७ न्धा] दृश्यतां पृ° ५८० पं° ३ ॥
१३ च] चाnayacakra-ms-bhā । चः nayacakra-ms-ya । वा ? ॥
१५ *] योग्यानु° प्र° ॥
१९ स्य] योगानुरूपः प्र° ॥
१ त] अर्थगत्यर्थः शब्दप्रयोगः । अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते--nayacakra-ms-pā म° nayacakra-ms-bhā २ । १ । १ ॥

प्रवृत्त्यसम्भवात् । न हि **शब्दवचनस्य** 584/mj

* * *

प्रवृत्त्यसम्भवात् । न हि शब्दोऽनामृष्टप्रत्याय्यप्रत्यायकभावो वक्तुमिष्यते । न च विवक्षामात्रेण शब्दः श्रोतृबुद्धौ तां तां शक्तिमाधातुं शक्नोति । एवं चानेन त्वद्वचनेनैव विशेषलक्षणाः शक्तयः परिगृहीता एव त्वया । अस्मन्मतवदेव च विशेषस्वरूपप्रवृत्त्या विना न कश्चिच्छक्तिमानन्यः । विशेषा एव शक्तयः स्वार्थसत्यः । तासां च तेषु तेषु विवक्षैव व्यञ्जिका । विवक्षैव तां तां शक्तिमध्यारोपयति प्रागात्मनि पश्चात् प्रयोगाच्छ्रोतृबुद्धौ । शब्दनिरपेक्षैव विवक्षाध्यारोप्या शक्तिरर्थे,

* * *

प्रवृत्त्यसम्भवात् । न हि शब्द

**एवं चानेनेत्यादि** । **सोऽयमित्यभिसम्बन्धात्** वाक्यप॰ २ । १२९ इत्यादिप्रक्रमम् **अशक्तेः सर्वशक्तेर्वा** वाक्यप॰ २ । १३२ इति विकल्प्य त्वदीयमेव वचनं पलायमानस्यापि ते बाह्यवस्तुसद्भावमनतिक्रमणीयं प्रतिपादयति बलात् तदनिच्छतोऽपि धरणिसखिमृगालिकापलायनवत् । अतः स्त्रीपुंनपुंसकैकद्विबहुत्वकर्त्रादि**विशेषलक्षणाः शक्तयः परिगृहीता एव त्वये**ति । § 1692

इतश्च **अस्मन्मतवदेव च**ेत्यादि । त्वद्वचनादेव **अस्यार्थस्याविद्यमानाः शक्तयोऽध्यारोप्यन्ते** इति विकल्पोत्थापनादसम्भवं शक्तिमतोऽन्यस्य वयमपि ब्रूमः । या सा विशेषाणां स्वरूपप्रवृत्तिस्तया विना न कश्चिच्छक्तिमान् नामान्यः, किन्तु **विशेषा एव** विशेषेणास्मदभीष्टाः शक्तयः इति यद्युच्यन्ते त्वया उच्यताम्, को वारयति ? ताश्च **स्वार्थसत्यः** स्वेन रूपेण सन्ति शक्तयो विशेषरूपेण स्त्री-पुं-नपुंसकादिभावेन शक्त्यन्तरव्यावृत्तरूपा विशेषा एव वर्तमानाः सन्तीत्यर्थः । **तासां च** शक्तीनां **तेषु तेषु** प्रवृत्तिवस्तुषु स्त्रीत्वादिषु **विवक्षैव व्यञ्जिका,** विवक्षया व्यज्यन्ते प्रकाश्यन्ते सत्य एव शब्दप्रयोगेण, सैव हि विवक्षा तटस्तटी तटम् इत्यादीन् सतो विशेषानभिव्यनक्तीत्यर्थः । का **विवक्षा ?** वक्तुमिच्छा, सैव **तां तां शक्ति**मर्थगतां शब्दमनपेक्ष्य - /ms सिद्धाम**ध्यारोपयति प्रागात्मनि** वक्तरि, **पश्चात्** प्रयोगा**च्छ्रोतृबुद्धौ,** नासतीम्, वक्त्रभिप्रायगहणार्थप्रयतनात् पुमानयमनेन विवक्षितः, स्त्री इयम्, नेतरे इत्याद्यनन्यबुद्धिव्यवस्थापनेन । § 1693

अत्र प्रयोगः --**शब्दनिरपेक्षैव विवक्षाध्यारोप्या शक्तिरर्थ** इति प्रतिज्ञा । **प्रत्याय्यत्वात्,** प्रत्यायकेन वक्त्रा श्रोतरि प्रत्ययाधानं प्रत्याय्यत्वं शक्त्याख्य-

---

११ ए] एवं चनेने॰ प्र॰ । एवं च तेने॰ ? ॥
१२ सोऽय] दृश्यतां पृ॰ ५८० पं॰ ३ ॥
१३ अ] दृश्यतां पृ॰ ५८२ पं॰ १ ॥
१४ त्व] त्वदीयमेव चनं प्र॰ ॥
१७ खिमृ] ॰सृगालिका॰ ? ॥
२५ अ] दृश्यतां पृ॰ ५८२ पं॰ ६ ॥
२६ इ] इत्यादीनसतो प्र॰ ॥
२७ ग] नासंतीnayacakra-ms-ya ॥
२९ ना] ॰गतnayacakra-ms-ya ॥
३१ बुद्धिव्य] व्यवस्थानेनnayacakra-ms-ya ॥
१ प्र] दृश्यतां पृ॰ ३९४-- २ ॥

585/mj स्यार्थस्य सिद्धमेव । यः प्रत्याय्यः स शब्दनिरपेक्ष

* * *

प्रत्याय्यत्वात्, अभिजल्पार्थावयववत्, प्रयोजकत्वाच्चास्याः शक्तेरेव विवक्षाबीजत्वात् ।

सर्वशक्तिपक्षेऽपि चास्मन्मतमेवोच्यते त्वया, अर्थार्थत्वाच्छब्दप्रयोगस्य व्यवस्थितामव्यतिकीर्णां तां तां शक्तिमुपादाय स्वविषयनियताः शब्दाः प्रयुज्यन्ते लिङ्गादिभिन्नसामानाधिकरण्यक्रियायां व्यतिकरापत्तेः । परमार्थतस्तु वादपरमेश्वरवाद एवायम्, एकैकद्रव्यानन्तपर्यायत्वात् ।

यत्तु विषयोद्ग्राहे विरुद्धैर्धर्मैर्युक्तमित्यभिधीयते एतन्नातिसम्यक्प्रत्यपेक्षित-

* * *

एव सिद्धः । **अभिजल्पार्थावयववत्,** यथा त्वत्प्रयुक्तस्याभिजल्पशब्दस्याभिधेयोऽर्थः समुदायः आभिमुख्येन जल्पोऽभिजल्पः तदिदंसम्बन्धात्मक एकीभावस्त्वया शब्दार्थयोर्व्युत्पादितः, स च प्रत्याय्योऽवयवार्थाभ्याम् अभिशब्दार्थेन जल्पार्थेन च, आभिमुख्येन जल्पोऽभिजल्पः इति समुदायार्थप्रतिपत्तेरवयवार्थप्रतिपत्तिपूर्वकत्वात् । मा भूद् विवक्षा-प्रयोगयोस्त्वदीययोरानर्थक्यमिति तावभ्युपगन्तव्यौ खपुष्पवैलक्षण्येन शब्दनिरपेक्षौ शक्त्याख्यौ त्वया प्रत्याय्यत्वात् तथा शक्त्याख्योऽर्थः, इतरथा अभिजल्पशब्दवैयर्थ्यं स्यादिति । किञ्चान्यत्, **प्रयोजकत्वाच्चास्या** इत्यादि । यदुक्तं त्वया **तत्राशक्तिपक्षे वस्तुगता शक्तिरप्रयोजिका, न हि तस्या वस्तुविषयाभ्यां सन्निधानासन्निधानाभ्यां किञ्चिदपि प्रयोजनमस्ति** इति, तदिदमितोमुखं युक्तिजातं विपरिवर्तते, शक्तेरेव विवक्षाबीजत्वात् प्रयोजकत्वाच्च । एवं तावदशक्तिपक्षोऽस्मन्मतसिद्धेस्त्वद्वचनादेव नास्ति । § 1694

**सर्वशक्तिपक्षेऽपि चास्मन्मतमेवोच्यते त्वया,** कस्मात् ? **अर्थार्थत्वाच्छब्दप्रयोगस्य व्यवस्थिताम्** इत्यादिना, तद्यथा--व्यवस्थितां शब्देनानानेयाम-
- /ms व्यतिकीर्णामनन्यशब्दवाच्यां तां तां शक्तिं स्त्रीपुंनपुंसकादिकां शक्त्यन्तरव्यावृत्त्या विवक्षितां विशिष्टामेव उपादाय स्वविषयनियताः शब्दाः प्रयुज्यन्तेऽभिन्नलिङ्गसङ्ख्यादिविशिष्टैकशक्तिविषयनियताः । किं कारणम् ? **लिङ्गादिभिन्नसामानाधिकरण्यक्रियायां व्यतिकरापत्तेः,** उक्तं प्राक् --**तारा-पुष्य-नक्षत्राणां स्त्री-पुं-नपुंसकानां व्यतिकरेण प्रयोगोऽपशब्दः** इति । अयं च सर्वशक्तिपक्षः । **परमार्थतस्तु वादपरमेश्वरवाद एवायम्** । कस्मात् ? **एकैकद्रव्यानन्तपर्यायत्वा**दस्मन्मतमेव, अहं हि त्वयैव सह विरुध्ये न वादपरमेश्वरेण । तेन च सह को विरोधः ? तस्य हि मतम्--एकैकं द्रव्यमनन्तपर्यायम्, सापेक्षनिरपेक्षाश्च परिणामाः पर्यायाः शक्तय इत्युच्यन्ते, द्रव्याणि चान्योन्यानुगतशक्तित्वात् सर्वशक्तीनि । यथाह-- § 1695

---

१७ ता] तौ अवयवार्थौ ॥
२३ त] दृश्यतां पृ॰ ५८२ पं॰ ७ ॥
२३ व्य] दृश्यतां पृ॰ ५८३ पं॰ १ ॥
२४ व्य] दृश्यतां पृ॰ ५८३ पं॰ १ ॥
३२ श] **शक्त्यन्तरा॰** प्र॰ । शक्त्यन्तराद् ?

॥
१ सा]
**सापेक्षाश्च**nayacakra-ms-bhā ॥

अण्णोण्णाणुगताणं इमं व तं वत्ति विहयणमयुत्तं ।
जध दुद्ध-पाणियाणं जावंतित विसेसपज्ञाया ॥ सम्मति॰ १ ।

४७§ 1697

**यत्तु विषयोद्ग्राह** इत्यादि । **अशक्तेः सर्वशक्तेर्वा** वाक्यप॰ २ । १३२ इत्येतस्याः कारिकाया विषयः शब्दोत्थापिताः क्रियादिपरिकल्पना इति, एतस्यार्थस्य निदर्शनार्थमुद्ग्राह्यते --**विरुद्धैर्धर्मैर्युक्तमित्यभिधीयत** 586/mj

* * *

स्वार्थम्, सर्वस्यास्याविरुद्धैकार्थत्वात् । ननु सर्व एव [अविरुद्धोऽर्थः] यदेव ओदनं पचति इति कर्म तदेव पाक ओदनस्य इति षष्ठ्योच्यते । पाकशब्देन च भावः कृतोच्यते, पचति इति तिङा कर्त्रर्थः, कृदभिहितभावद्रव्यवत्त्वात् कर्तुः साध्यत्वात् । यदा चौदनः प्रतीतो भवति तद्विषयक्रियासन्देहे किं करोति इति प्रश्ने ओदनस्याव्याख्येयत्वादस्यैव पचेर्विधानं पचति इति । तस्यैव पचतेरपूर्वस्य व्याख्याने पाकं करोति इति पचिना प्रतिवचनात् कर्मत्वम्, उक्तवत् । पाकस्य निर्वृत्तिं करोति इति कर्तृप्रत्ययार्थं व्याचष्टे । स्थाल्याद्यपि पचने वर्तते… …। इत्ये-

* * *

इत्यादिः स एव ग्रन्थः प्रत्युच्चार्यः --**इहैकमेवार्थवस्तु** इत्यादि याव**च्छेषरूपत्वं च पाकस्य** इत्युदाहृत्य **तस्मादविद्यमाना वा** शक्तय इत्यादिना भावयित्वा तदुपसंहारेऽभिहितम् --**तस्मादुभयोरपि पक्षयोरित्यादि** यावत् **सम्भवतीति** । इत्थं प्रत्युच्चार्योत्तरमाहाचार्यः --**एतन्नातिसम्यक्प्रत्यपेक्षितस्वार्थम्,** कस्मात् ? **सर्वस्यास्य** उदाहृतस्यार्थस्या**विरुद्धैकार्थत्वात्** । तद् भावयति --**ननु सर्व एवेत्यादि** । यदेव ओदनं पचति इति पचिविषयं कर्मौदनाख्यं तदेव पाक ओदनस्य इत्यनया षष्ठ्योच्यते, **अनभिहिते कर्मणि द्वितीया** पा॰ २ । ३ १--२ एकत्र, एकत्र च **कर्तृकर्मणोः कृति षष्ठी** पा॰ २ । ३ । ६५ इति षष्ठ्या तदेव कर्मोच्यते । पाकशब्देन च भावः पच्यर्थः कृता घञा उच्यते, पचति इति तिङा कर्त्रर्थः, स एव पाकं निर्वर्तयति इति निदर्श्यते वर्ण्यते न तिङेति । किं कारणम् ? **कृदभिहितभावद्रव्यवत्त्वात्,** उक्तं हि — **कृदभिहितो भावो द्रव्यवद् भवति** पा॰पा॰ म॰ भा॰ २ । २ । १९, ४ । १ । ३, ५ । ४ । १९, ६ । २ । १३९ ॥ म॰ - /ms

---

१ अ] **अण्णाण्णा॰**nayacakra-ms-bhā ॥
१ व] **च** प्र॰ ॥
२ म] **॰मयुक्तं** प्र॰ ॥
३ पाणिया] **॰यायं**nayacakra-ms-ya । **॰याय** nayacakra-ms-bhā ॥
५ त्तु] **विषयोद्ग्राहे** ? **विषयोद्ग्राहम्** ? ॥
१५ इ] दृश्यतां पृ॰ ५८२ पं॰ ३--पं॰ ५ ॥
१६ च्छेष] दृश्यतां पृ॰ ५८२ पं॰ ३--पं॰ ५ ॥
१७ त] **तस्या विद्यमाना** प्र॰ ॥
१७ त] पृ॰ ५८३ पं॰ २ ॥
२५ स] पृ॰ ५८३ पं॰ २ ॥
२५ न] च तिङेति ? तेन तिङेति ? ॥
१ द्र] **॰द्रव्यत्वात्**nayacakra-ms-ya ॥

भा० ३ । १ । ६७ इति पाकं करोति इति द्रव्यवत् कर्मणि द्वितीया, निर्वर्तयति इति च करोतीत्यर्थः । कुतः ? **कर्तुः साध्यत्वात्,** विक्लित्तिस्तन्दुलानां पाकः, तद्विषयः कर्ता साध्यते विक्लित्तिनिर्वृत्तिं करोति देवदत्तः, विक्लेदयति, पचति, पाकं निर्वर्तयति इत्येकार्थत्वात् पचिक्रियाव्यापृतत्वेन साध्यते देवदत्त इत्यर्थः । यदा चोदनः प्रतीतो भवति तद्विषयभुजिपच्यादिक्रियासन्देहे किं करोति इति प्रश्ने ओदनस्य प्रसिद्धस्यानूद्यमानस्याव्याख्येयत्वादस्यैव पचेर्भुज्यादिव्यतिरेकेण विधानं पचति इति, तस्यैव पचतेरपूर्वस्य व्याख्याने किं करोति इति पृष्टे पाकं करोति इति पचिना प्रतिवचनात् कर्मत्वम् **उक्तवदिति** अनभिहिते कर्मणि द्वितीया कृदभिहितभावद्रव्यवत्त्वादिति । **पाकस्य निर्वृत्तिं करोति इति कर्तृप्रत्ययार्थं व्याचष्टे,** - /ms करोति इति देवदत्तस्य व्यापारं विशिष्टं स्थाल्यादिव्यापारेभ्यः, सम्भवनधारणादीनां प्रकरणात् तत्प्रयोजकत्वात् **स्थाल्याद्यपि पचने वर्तते** इत्यादिना सामान्यकारकत्वं देवदत्ताधीनस्य विशिष्टस्य कारकान्तरप्रवर्तनाभावं च दर्शयति । इत्येवमादिभिरन्यान्यव्याख्यानप्रयोगैरेक एवार्थो व्याख्यायते, यथा **वृद्धिरादैच्** पा० १ । १ । १ इत्यस्यार्थः, वृद्धिः इतीयं संज्ञा भवति आदैचां वर्णानाम् आकारस्य च ऐचोश्चेत्यादिप्रतीतापेक्षव्याख्यानवत् । § 1698

587/mj

वमादिभिरन्यान्यप्रयोगैरेक एवार्थो व्याख्यायते । एवं सर्वत्र पाकः साध्यरूपतायामेव व्यवस्थितः साधनमाकांक्षतीति तस्मिन्नेव काले कर्मत्वं शेषरूपत्वं चाविरुद्धं तादर्थ्यात्, शेषस्याकारकविवक्षणात्, तस्मादविरुद्धा क्रियादिपरिकल्पना । तस्मादसम्यक्प्रत्यपेक्षितस्वार्थं वचस्त्वदीयमेवम् । § 1699

तस्माच्छब्दस्याप्रधानत्वात् कुतोऽस्य कल्पनाशक्तिः ? अत इत्थं कारिका पठितव्या-- § 1700

---

४ क] nayacakra-ms-pā म० nayacakra-ms-bhā २ । ३ । २ ॥
८ चिक्रियाव्या] °व्यावृत्तत्वेन प्र० ॥
११ प] पचते पूर्वस्यnayacakra-ms-ya ॥
१४ स] दृश्यतां पृ० ११४ टि० १ । nayacakra-ms-pā म० nayacakra-ms-bhā १ । ४ । २३ ॥
१५ भिर] °रन्योन्यान्य°nayacakra-ms-bhā । °रन्योन्य° nayacakra-ms-ya ॥
१६ आ] आदैचाnayacakra-ms-bhā । आदैच nayacakra-ms-ya । वृद्धिरादैच् । वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च । --nayacakra-ms-pā काशिका १ । १ । १ ॥
१३ च] एचोश्चेत्यादि प्र० । तुलना--तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥ --nayacakra-ms-pā शिक्षा ॥

शक्तेर्वा सर्वशक्तेर्वा स्वार्थेनैव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥§ 1702

अभिजल्पशब्दार्थत्वमपि स्वरागेणैवोक्तम्, अभिजल्पगत्यर्थाभावात् । स चाभिजल्पत्वमागतो वाच्यतां यायात् सोऽयमित्यभिसम्बन्धाच्छब्दस्यार्थेन सहैकीकरणात् । न च तत्, शब्दस्यैवार्थत्वात् । न हि कश्चित् अर्थः पृथगस्ति शब्दात्
§ 1703

**एव**मित्यादि । इत्थं व्याख्यानप्रकारेण सर्वत्र पाकः साध्यरूपतायामेव व्यवस्थितः साधनमाकांक्षतीति तस्मिन्नेव काले कर्मत्वं शेषत्वं च भजते, तस्माद् युक्तमविरुद्धम्, तादर्थ्यात् स एव साध्यरूपोऽर्थः कर्मरूपापन्नः शेषरूपापन्नश्च साधनाधीननिर्वृत्तिक उच्यते । कस्मात् ? **शेषस्याकारकविवक्षणात्,** सतामेव हि कारकाणामविवक्षा शेष उच्यते, तस्मादविरुद्धा क्रियादिपरिकल्पनाऽर्थशक्तिविषयैव न शब्दोत्थापिता । **तस्मा**दुद्ग्राहानुरूपोपसंहाराभावा**दसम्यक्प्रत्यपेक्षितस्वार्थं वचस्त्वदीयमेव**मित्युपसंहारः । **तस्मा**च्छब्दस्याप्रधानत्वादवस्थितमर्थमनुवर्तमानस्य उपसर्जनत्वात् **कुतोऽस्य कल्पनाशक्तिः ?** नास्तीत्यर्थः । **अत** इति उक्तन्यायादित्थं कारिका पठितव्या --**शक्तेर्वा सर्वशक्ते**र्वेत्यादि । विशेषाः शक्तय एवोपसर्जनीभूतसामान्याः, तदर्थो हि शब्दप्रयोगः, तस्य विवक्षितत्वात्, **यथार्थाभिधानं च शब्दः** तत्त्वार्थभाष्य १ । ३५ इत्यस्मन्मतमित्युभयनियमनयदृष्ट्या । **सर्वशक्तेर्वा** इति वादपरमेश्वरमतेनोक्तवत् **एकस्यैवार्थस्या**विरुद्धशक्तिविशेषस्यानेकशक्त्यात्मकस्य वा **स्वार्थेनैव प्रकल्पिता** न शब्देनाप्रधानेन - /ms **नियता** व्यवस्थिता **क्रिया**-कर्म-शेष-कर्त्रा**दिपरिकल्पना** । § 1704

**अभिजल्पशब्दार्थत्व**मित्यादि । यदपि च त्वया परिकल्पितम् अभिजल्पः शब्दार्थः इति तदपि स्वेन रागेणैव स्वदृष्टिपरितुष्ट्यैवोक्तम्, नोपपत्त्या । कस्मात् ? **अभिजल्पगत्यर्थाभावात्, अर्थगतिरेव शब्दगतिः** इति वक्ष्यते । **स च** शब्दो**ऽभिजल्पत्वमागतो वाच्यतां यायात्** आत्मानमेवार्थरूपापन्नं ब्रूयात् सम्भाव्येत, कयोपपत्त्या ? इत्यत आह --**सोऽयमित्यभिसम्बन्धाच्छब्दस्यार्थेन सहैकीकरणात्,** अस्मादेव त्वद्वचनात् । **न च तद्** यदभिजल्पत्वमागतो वाच्यतां यातीति । कस्मात् ? **शब्दस्यैवार्थत्वाद् न च**

११ विरु] °रुद्ध क्रियादि°nayacakra-ms-ya ॥
२० य] दृश्यतां पृ° ५७३ पं° ११ टि° २ ॥
२१ तेनोक्त] दृश्यतां पृ° ५८५ पं° ५ । वादपरमेश्वरमतेन । उक्तवदेकस्यैवार्थस्या° इत्यपि अन्वयोऽत्र स्यात् ॥
२५ रा] राशेनैव प्र° । रसेनैव ? ॥
२७ अ] दृश्यतां पृ° ५९१ पं° ३ ॥
२ स] सम्भाव्येत भयोरुपपत्त्याnayacakra-ms-bhā । सम्भाव्येतेतो ?भयोरुपपत्त्या nayacakra-ms-ya ॥

**तत्** । असम्भवं दर्शयति --**न हि कश्चि**दित्यादि यावत् **सम्बन्धेने**ति । येन
588/mj सहैकीक्रियतेऽर्थेन

* * *

त्वन्मतेन येन सहैकीक्रियेत शब्दः सम्बन्धेन ।...द्रव्यभवनोपसर्जनत्वात् तस्य विशेषस्य प्राधान्यमिति स्थितमेतत् । प्रयुज्यमाननाम्न्यपि बाह्ये येन येन विशेषेण भूयते तदुपसर्जनं तद् नाम, अर्थगत्यर्थत्वाच्छब्दप्रयोगस्य तद्वशप्रवृत्तित्वात्, भृत्यवत् । नाम च वचनादिविशेषवशम्, यथार्थशब्दत्वात् । वृक्ष इत्यत्र यद्यपि पञ्चकं

* * *

शब्दस्य रूपं स मुख्योऽर्थः, य एकीक्रियते सोऽप्रधानः इति शब्दादर्थस्य पृथक् सिद्धौ क्रियेतैक्यमनयोः, तत्तु नास्ति त्वन्मतेनार्थाभावात् । सम्बन्धस्यापि च द्विष्ठत्वात् पृथगर्थसिद्धिः, इतरथा सम्बन्धाभावात् । [अअत्र बहुतरः पाठः खण्डितः प्रतिभाति सर्वास्वपि प्रतिषु । अस्माभिः कल्पनयैवेत्थं पूरितः ॥तो येन येन विशेषेण भूयते तस्यार्थस्यैव प्राधान्यम्, नाम्नो द्रव्यभवनोपसर्जनत्वात् द्रव्यभवनस्योप- ?] सर्जनं तत्, तद्भावाद् **द्रव्यभवनोपसर्जनत्वात्** तदुपसर्जनमस्यात्यन्तापूर्वस्य मूर्तस्यामूर्तलक्षणं भवनं विशेषोऽमूर्तस्य मूर्तलक्षणम् । तस्मात् तस्य विशेषस्य प्राधान्यमिति स्थितमेतत् । इति स्थिते विशेषप्राधान्ये इत्थमान्तरनाम्न्यप्रयोगार्हे विशेषप्राधान्यं व्याख्यातम् । § 1705

- /ms **प्रयुज्यमाननाम्न्यपि बाह्ये येन येन विशेषेण भूयते** यो यो विशेषो भवति **तदुपसर्जनं** तस्यैव विशेषस्योपसर्जनं **तद् नाम** बाह्यम्, **अर्थगत्यर्थत्वाच्छब्दप्रयोगस्य,** अर्थपरतन्त्रो हि शब्दः प्रयुज्यते, तदेव हेतुत्वेनाह --**तद्वशप्रवृत्तित्वा**दिति, **भृत्यव**दिति दृष्टान्तः । भृत्यो हि स्वामिवशप्रवृत्तिः स्वामिपरतन्त्र उपसर्जनं तथा शब्द उपसर्जनमर्थः प्रधानम्, यत्र प्रयुज्यते तद्वशवर्ती शब्दः, विशेषोऽर्थ एव प्रधानमिति । § 1706

तद् दर्शयति --**नाम च वचनादिविशेषवशम्** । वचनं सङ्ख्या, आदिग्रहणाद् लिङ्ग-कालकारक-पुरुषोपग्रहा गृह्यन्ते विशेषाः, तद्वशं नाम । **यथार्थशब्दत्वा**दिति शब्दलक्षणं स्वसमयसिद्धं हेतुमाह । यो योऽर्थो य-

---

१४ न्धाभावा] °भावाद° प्र° ॥
१७ त]
ततद्भावात्nayacakra-ms-bhā ।
ततद्भावात् nayacakra-ms-ya ॥
१८ ना]
°नाम्नाप्रयोगार्हेnayacakra-ms-bhā ।
°नाम्नां प्रयोगार्हे nayacakra-ms-ya
॥
२६ पुरुषोप] °पग्राह
nayacakra-ms-bhā । °पग्राहं
nayacakra-ms-ya ॥
१ स्व] विद्याद् यथार्थशब्दं विशेषितपदं तु

**शब्दनयम्**तत्त्वार्थभा° १ । ३५ ।
शब्दस्वरूपमाह--विद्याद् यथार्थशब्दमिति ।
अनेन तु एवम्भूत इव एव ? प्रकाशितो
लक्ष्यते, सर्वविशुद्धत्वात् तस्येति । यतः स
एवमभ्युपैति--यदार्थश्चेष्टाप्रवृत्तस्तदा तत्र घट
इत्यभिधानं प्रवर्त्यं नान्यदेति ।
साम्प्रतसमभिरूढौ कस्मान्नाम्रेडिताविति
चेत्, उच्यते--तावपि स्मारितावेव । यत
आह--विशेषितपदं तु शब्दनयमिति ।
विशेषितपदमिति विशेषितज्ञानम्, यतः
साम्प्रतसमभिरूढयोरन्यादृशं ज्ञानम् ।

थार्थं शब्दस्तदभिधत्ते यथालिङ्गवचनकालकारकपुरुषोपग्रहमभिधत्ते । तथा चाचार्यसिद्धसेन आह--**यत्र ह्यर्थो वाचं व्यभिचरति नाभिधानं तत्** इति । तथा व्याख्यातारोऽपि 589/mj

* * *

प्रातिपदिकार्थस्तथापि विवक्षापूर्वकत्वाच्छब्दप्रवृत्तेः विवक्षितसंख्याभिधाय्येव वचनं विधीयते । वृक्षस्यैकत्वाचैकवचनम् एकस्य वचनमेकवचनमुच्यते, अनेनार्थः । तथा च लोके वृक्षशब्दप्रयोगे सामान्यमुपसर्जनं विशेषः प्रधानमिति गम्यते, एकार्थगतेर्द्व्यादिनिवृत्तेः । इतरथा सर्वगतिरगतिः सन्देहो वा स्यात् । वृक्षे प्रातिपदिक... ...भवति ।

ननु विशेषाणामप्यस्ववशत्वादनवस्थानात् सामान्यभवनप्राधान्यमेव । दृश्यते हि वचनादिस्तस्माद् विशेषादपयान्, यथा एकवचनं द्विवचनार्थं नक्षत्रं पुनर्वसू... ...हेतुः कर्म । सर्वत्राप्येवमेव च ।

* * *

प्रस्थिताः--**नाम-स्थापना-द्रव्य-भिन्नलिङ्गवाच्येष्टाकरणाद् भावयुक्तवाची शब्दः** इति । अस्यार्थस्य प्रख्यापनमुदाहरणं **वृक्ष इत्यत्रे**त्यादि सभावनम् । स्वार्थो लिङ्गं द्रव्यं सङ्ख्या कर्मादिकारकाणि इति पञ्चकः प्रातिपदिकार्थश्चतुष्कस्त्रिको वा सङ्ख्या-द्रव्यान्तः । तथाऽऽख्यातस्यापि सर्वस्य नामत्वाविशेषात् नमयति अर्थं गमयति इत्यादिनिरुक्तेर्यद्यपि पञ्चकं सम्भवति

---

नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रतीतिः साम्प्रतः । शब्दान्तरवाच्यश्चार्थः शब्दान्तरस्य नाभिधेयो भवतीत्येवं समभिरूढविज्ञानमिति ।--इति तत्त्वार्थसूत्रस्य सिद्धसेनगणिविरचितायां वृत्तौ १ । ३५, पृ° १२८ ॥
२ कार] **°कारकविशेषोपग्रह°** प्र° ॥
२ ना] **ऽनभिधानं**nayacakra-ms-bhā । **नभिधानं** nayacakra-ms-ya । **अनभिधानं ?** । शब्दनयः शब्द एव । सोऽर्थकृतवस्तुविशेषप्रत्याख्यानेन शब्दकृतमेवार्थविशेषं मन्यते ।...समानलिङ्गादिशब्दसमुद्भावितमेव वस्त्वभ्युपैति, नेतरत् । न हि पुरुषः स्त्री, यदीष्येत वचनार्थहानिः स्यात्, भेदार्थं हि वचनम् । अतः स्वातिः तारा नक्षत्रमिति लिङ्गतः, निम्बाम्रकदम्बा वनमिति वचनतः, स पचति त्वं पचसि अहं पचामि पचावः पचाम इति पुरुषतः । एवमादि सर्वं परस्परविशेषव्याघातादवस्तु । परस्परव्याघाताच्चैवमाद्यवस्तु प्रतिपत्तव्यम्, यथा शिशिरो ज्वलनः । तथा विरुद्धविशेषत्वात् तटस्तटी तटमित्यवस्तु, रक्तनीलमिति यथा । यद् वस्तु तदविरुद्धविशेषमभ्युपयन्ति सन्तः, यथा घटः कुटः कुम्भ इति । तथा चोच्यते — **यत्र ह्यर्थो वाचं न व्यभिचरत्यभिधानं तत्** । एवमयं समानलिङ्ग-संख्या-पुरुष-वचनः शब्दः ।--इति **तत्त्वार्थसूत्रस्य सिद्धसेनगणिविरचितायां** वृत्तौ १ । ३४, पृ° ११६ ॥
३ त] दृश्यतां पृ° ५७२ टि° ६ ॥
१५ ना] दृश्यतां पृ° ५९६ पं° ८ । **विशेषावश्यकभाष्यस्य कोट्टार्यवृत्ताव**पीदमुद्धृतम् । नामवाच्य-स्थापनावाच्य-द्रव्यवाच्यभिन्न-लिङ्गादिवाच्यानामभिलषितार्थाविधायित्वाद् शब्दनयो भावयुक्तमेवाभ्युपगच्छतीत्याशयः ॥
१५ प] दृश्यतां पृ° ५६ पं° १३ ॥
१६ प्रा] अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १ । २ । ४५ । धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।--nayacakra-ms-pā **सिद्धान्तकौमुदी** ॥
२ श्च] **°श्चतुर्थस्त्रिको** प्र° ॥

तथापि तु वक्तुर्विवक्षितपूर्विका शब्दप्रवृत्तिरिति सामस्त्योपगमं परित्यज्य - /ms प्रतिपिपादयिषितं विशेषमेकमेव ब्रूते शब्दः । एकद्विबहुवचनेषु प्राप्तेषु विवक्षितसङ्ख्याभिधायि एव वचनं विधीयते त्रयाणामन्यतमदेव, नेतरे । वृक्षस्यैकत्वाच्चैकवचनं व्यक्तिकृतम्, न सर्ववृक्षगतसामान्यं तेनाप्रयोजनात् । एवं द्विबहुवचनयोरपि । एकवचनम् इति समासद्वयसम्भवात् सन्देहेऽवधारयति किमेकस्य वचनमेकवचनमेकं च तद्वचनं च तदेकवचनमिति वा ? एकस्य वचनमेकवचनमुच्यते, अनेनार्थः, कर्मणि षष्ठीति शब्दव्युत्पादनेन । **तथा चेत्यादि** । एवं च कृत्वा **लोके** वृक्षशब्दप्रयोगे **सामान्यमुपसर्जनं [वि]शेषः प्रधानमिति गम्यते** । कुतः ? **एकार्थगतेर्द्व्यादिनिवृत्तेः** । **इतरथा** सामान्यप्राधान्यात् **सर्वगतिरगतिः सन्देहो वा स्यात्**, युक्ता तु विशेषगतिस्तद्वशवर्तित्वान्नाम्नः । तद्भावना गतार्था **--वृक्षे प्रातिपदिके**त्यादि यावद् **भवतीति** । § 1707

अत्राह **--ननु विशेषाणामपी**त्यादि । तेऽपि हि विशेषाः परतन्त्रा एव, ततो**ऽस्ववशत्वा[द]नवस्थानात् सामान्यभवनप्राधान्यमेव** । न हि वृक्षवदेकवचनमेव दृश्यते सर्वत्र, यदि स्यात् स्याद् विशेषप्राधान्यम्, तस्माद् विशेषव्यभिचारात् सामान्यप्राधान्यमेव न्याय्यम् । मा मंस्थाः--विशेषप्राधान्याव्यभिचार इति, **दृश्यते हि वचनादिस्तस्माद् विशेषादपयान्**, वचन-लिङ्ग-काल-कारकपुरुषोपग्रहादिविशेषाणां स्वस्थितिव्यतिक्रमः स्वसमानाधिकरणविशेषाच्चापगतिर्लोके दृश्यते । तदुदाहरणानि **--यथा एकवचनं द्विवचनार्थं** - /ms, **नक्षत्रं पुनर्वसू** इत्यादीन्युत्तानार्थानि यावद्**धेतुः कर्मे**ति । **सर्वत्राप्येवमेव च,** 590/mj यथान्त्यमुदाहृतमभेदिलिङ्गविशेषव्यभिचारे तथा प्राक्तनेष्वपि वचनादि-

* * *

अतो विशेषानवस्थानाद् विशेषो विशेष एव न भवितुमर्हति । ततोऽसौ नैव स्यात्, अविशिष्टत्वादनवस्थानादस्ववशत्वात् खपुष्पवत् । ततश्च सामान्यमपि नैव, प्रवर्तकाभावात् स्ववशत्वात् विविक्तवृत्तित्वात् मुक्तवत्, अर्थान्तराभावभवद्भवनाभ्यां केनचिदबाध्यत्वात् ।

अथ सोऽप्यस्ति भेदेनार्थः शब्दात् न तर्हि शब्द एव शब्दार्थोऽभिजल्पत्वमागतो वाच्यः । स यथा शब्दस्तथार्थोऽपि सम्बन्धेनैकीक्रियमाणत्वात् पृथक् सिद्धः क्षीरोदकवद् द्वयोरप्येकीकृतत्वे तुल्यत्वात् । अपि च प्रागुक्तवत् प्रत्याय्यत्वादभिजल्पार्थावयववदर्थोऽर्थ एव ।

* * *

विशेषव्यभिचारे तद्भावना । **अतो विशेषानवस्थानाद् विशेषो विशेष एव न भवितुमर्हति** सामान्याघ्रातरूपत्वाद् विशेषात्मानवस्थानात् । ततः किम् ? **ततोऽसौ नैव स्यात्**, भवनमेव नानुभवेत्, **अविशिष्टत्वादनन्त-**

१७ तिस्त] दृश्यतां पृ० ५६८ पं० ११ ॥
१८ प] **॰पयाद्वचन॰** प्र॰ ॥
१९ तिक्र] **॰क्रम** प्र॰ ॥
२१ विशेषाच्चा] **॰च्चागति॰** प्र॰ ॥
१ त] **तद्भावनातो विशेष॰** प्र॰ ॥

रोक्तात्, अविशिष्टत्वमनवस्थानाद् भावितवत्, अनवस्थानमस्ववृत्तित्वादस्ववशत्वाद् भावितवदेव । **खपुष्पवदिति** सर्वत्र दृष्टान्तः । पृथक् पृथग् वा विशेषाभावे हेतवस्त्वयोऽपि खपुष्पदृष्टान्ताः । **ततश्चेत्यादि** । ततश्च विशेषाभावात् **सामान्यमपि नैव** स्यादिति वर्तते । कस्मात् ? **प्रवर्तकाभावात्,** सामान्यस्य हि प्रकृत्यर्थस्य भवनादेः क्रियात्मनः प्रवर्तकः प्रत्ययार्थः कर्ता स्याद् विशेषः, तदभावान्न प्रवर्तते सामान्यम् । किमर्थं न प्रवर्तयति विशेषः सामान्यमिति चेत्, **स्ववशत्वात्,** स्ववशो हि विशेषो नासावस्ववशः, कस्मात् ? **विविक्तवृत्तित्वात्,** किमिव ? **मुक्तवत्,** यथा मुक्तात्मानः कर्मपारतन्त्र्यापेतत्वाद् विविक्तवृत्तयो न किञ्चित् प्रवर्तयन्ति न केनचित् प्रवर्त्यन्ते किन्तु स्वयमेव वर्तन्ते तस्मादप्रवर्तकत्वसामान्याद् दृष्टान्ताः, तद्वद् विशेषोऽप्रवर्तकः असन्नेव वा । प्रवर्तकाभावान्न सत् सामान्यं खपुष्पवदिति । तद्व्याचष्टे --**अर्थान्तराभाव-भवद्भवनाभ्यां केनचिदबाध्यत्वात्,** अर्थान्तरं च नास्ति विशेषात् । § 1708

अर्थाभावे मा भूदेष दोष इति **अथ सोऽप्यस्ति भेदेनार्थः** शब्दाद् यस्य तद्रूपमनेकं सदेकं क्रियते, किं ततः ? इदं भवति **--न तर्हि शब्द एव शब्दार्थोऽभिजल्पत्वमागतो वाच्यः,** किं तर्हि ? विशिष्टा शक्तिः शब्दादन्या सर्वशक्तिर्वार्थोऽन्य इति प्राप्तम् । तत एवेदं चायुक्तं त्वया यथोच्यते--*तं **शब्दमभिजल्पं प्रचक्षते, स च शब्दार्थ** इति, यस्मात् **स यथा शब्दस्तथार्थोऽपि सम्बन्धेनैकीक्रियमाणत्वात् पृथक् सिद्धः,** किमिव ? **क्षीरोदकवद् द्वयोरप्येकीकृतत्वे तुल्यत्वादिति** साध्यसाधनधर्मानुगमप्रदर्शनम् । **अपि चेत्यादि** अर्थार्थत्वमेवोक्तं प्राक् **प्रत्याय्यत्वात् अभिजल्पार्थावयववत्** इति तदर्थस्मारणं गतार्थं याव**दर्थोऽर्थ एवे**त्यवधारणम् । § 1709 - /ms

591/mj

यदा चैवं तदास्मन्मतमेव प्रतिपन्नम्, अर्थस्य तत्त्वात् । योऽसौ शब्दः सोऽयं न, अस्मादन्य एव सः । एवंविषय एव शब्दः, न शब्दविषयोऽर्थः । अर्यतेऽयं तेन शब्देनार्थः तेनोच्यते गम्यते । अर्थगतिरेव शब्दगतिः । § 1710

एवं च कृत्वा योग्यशब्दनिबन्धना हि [विवक्षा श्रोतृबुद्धौ तां तां शक्तिम्] अध्यारोपयति इति त्वदुक्तो ग्रन्थो युक्तोऽस्मिन् दर्शने । योग्य एव शब्दो नायोग्यः क्रीडितमेवास्तु इति प्रयुज्यते काकवाशितादिवदबुद्धिपूर्वो वा, अर्थविसंवादादेकीक-

११ व] **वचनवस्थान॰** प्र॰ ॥
१२ काभा] **॰भावात् सत्** प्र॰ । भावान्न स्यात् ? ॥
१५ अ] दृश्यतां पृ॰ ५६८ पं॰ १ ॥
२१ *] दृश्यतां पृ॰ ५८० पं॰ ४ ॥
२२ प्र] दृश्यतां पृ॰ ५८५ पं॰ १ ॥
१३ द] **॰दर्थोर्थ** प्र॰ । दृश्यतां पृ॰ ५९० पं॰ १२ ॥

तुमशक्यत्वात् । हिशब्दोऽपि च हेत्वर्थे, यस्माद् योग्यशक्ति... ... ...मर्यादया वा । § 1711

यदपि चोक्तं तयोरपृथगात्मत्वे इत्यादि श्लोकद्वयं तदपि चास्मन्मतफलमेव । तयोरपृथगात्मत्वं रूढेरतस्य तदुपचारात् पथि गमनवत्, इतरेतरप्रधानोपसर्जन- § 1712

**यदा चैव**मित्युक्तक्रमेण पृथक् सिद्धौ प्राधान्ये चार्थस्य **तदास्मन्मतं** यथार्थाभिधानशब्दत्व**मेव प्रतिपन्नम्, अर्थस्य तत्त्वा**त् । तद् व्याचष्टे --**योऽसौ शब्दः सोऽयं न** अर्थो न भवति शब्दः **अर्थ एवार्थः** इत्युक्तत्वादिति **अस्माद**र्थात् प्रत्यक्षनिर्देश्या**दन्य एवासौ सः** इति परोक्षनिर्देश्यो भेदेन । **एवंविषय एव** अर्थविषय एव **शब्दः, न शब्दविषयोऽर्थः** नाप्रधान इत्यर्थः । **अर्यतेऽयं तेन शब्देन अर्थः,** किमुक्तं भवतीति, **तेनोच्यते गम्यते, ऋ गतौ** पा°ऋ सृ गतौ--पा° धा° १०९८, १४९८ । ऋ गतिप्रापणयोः --पा° धा° ९३६ ॥ धा°, तस्यार्थः शब्दस्य विषयः, विषयिणो विषयपरतन्त्रत्वाद् **यार्थस्य गतिः शब्दस्यापि सैव,** नात्मनः पृथक् स्वतन्त्रा । एवं व्याख्यातमर्थप्राधान्यं पार्थक्यं च । § 1713

**एवं च कृत्वेत्यादि** गुणोत्कर्षमस्मन्मते दर्शयिष्यामः, *योग्यशब्देत्यादि यावदध्यारोपयति इति त्वदुक्तो ग्रन्थो युक्तोऽस्मिन् दर्शने । तद्भावयति --**योग्य एव शब्दः** पृथुबुध्नादिलक्षणस्यार्थस्य घटशब्दः **नायोग्यः** पटादिशब्दो - /ms यः कश्चित् **क्रीडितमेवास्तु इति प्रयुज्यते काकवाशितादिवदबुद्धि- पूर्वो वा,** कस्मात् ? **अर्थविसंवादात्,** अर्थेन विसंवादोऽस्य वाच्यवाचकसम्बन्धाभावः, **स च एकीकर्तुमशक्यत्वात्** सम्बन्धयितुम् । **हिशब्दोऽपि** चेत्यादि, **योग्यशब्दनिबन्धना** हि इत्यत्र **हिशब्दो** हेत्वर्थे, **यस्माद् योग्यशक्ती**त्यादि तद्व्याख्या गतार्था यावद् **मर्यादया वे**ति । § 1714

शब्दस्योपसर्जनत्वादर्थस्य प्राधान्या (Edtext outside numbered paragraph)द् द्व्यर्थतैव, किमिव ? **सन्मित्रवत्,** यथा स्निग्धयोर्मित्रयोः पृथक् सिद्धयोरेककार्यप्रवृत्तयोरितरेतरप्रधानोपसर्जनत्वनियमस्तथा शब्दार्थयोः, तत्तु त्वद्वचनादेव सिद्धम्, यथोक्तं त्वया--क्व (Edtext outside numbered paragraph)चिदेवेति यावद**वतिष्ठते** । § 1715

**यदपि** चेत्यादि । **सोऽयमित्यभिसम्बन्धात्** इति स्वलक्षणमभिजल्पस्य तदस्मन्मतं समर्थयतीत्युक्तम् । तदनन्तरं यत् स्वलक्षणव्याप्तिप्रदर्शनार्थं लोकगतशब्दार्थसंव्यवहारव्यवस्थापनार्थं **चोक्तं तदपि चास्मन्मतम्** अर्थस्यार्थान्तरत्वं शब्दादापन्नम् इत्येतत्**फलमेव** । कतमत् तत् ? **इदं श्लोक-**

१६ या] दृश्यतां पृ° ५८७ पं° २४ ॥
१७ *] दृश्यतां पृ° ५८२ पं° ९ ॥
१९ त्व] स्वत्वदुक्तोnayacakra-ms-ya ॥
१९ मेवा] पृ° ५९४ ॥
२६ सो] पृ° ५८० पं° ३ ॥
२७ लो] लोमगत° प्र° ॥
१ स्यार्था] °र्थानुरत्व प्र° ॥

**द्वयम्— तयोरपृथगात्मत्वे** वाक्यप॰ **इत्यादि** । वयमत्र निश्चिनुमः--**तयोरपृथगात्मत्वं रूढेः** लोकप्रतीतेः **अतस्य तदुपचाराद्** भिन्नयोरभेदोपचारात् । किमिव ? **पथि गमनवत्,** यथा पन्थाः पाटलिपुत्रं गच्छति इति पथोऽसद् गमनं पुरुषगत्यभेदोपचारात् तदविनाभावाद् द्व्यर्थत्वात् तयोरुच्यते तथा शब्दार्थयोरव्यभिचारादविनाभावादभेदोपचाराद् लोकरूढेरपृथगात्मत्वं पृथग्भूतयोरेवेति । किञ्चान्यत्,

भावात् सन्मित्रवत् । तथा लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते, व्याकरणशास्त्रे तु शब्दरूपतां प्रतिपन्नः प्रवर्तते, शब्दाधिगमार्थप्रवृत्तिर्विशेषो भवतिवत् । अर्थस्य च गोः सास्नादि भिन्नं रूपम्, तदर्थत्वाच्छब्दस्य गकारादिवर्णानुपूर्वी श्रोत्रनादमात्रम् । तद्धि न कदाचिदर्थो भवितुमर्हति कल्पितुं वा अव्यवस्थितत्वाद् व्यतिकीर्णत्वादनियतत्वात् । बाह्यार्थस्तु व्यवस्थितोऽव्यतिकीर्णो नियतश्च । तस्मान्न शब्दोऽर्थरूपतां प्रतिपन्नो वर्तते । प्रतिपन्नोऽपि स्वसम्बन्धादेव सम्बन्धस्य द्विष्ठत्वाच्छब्दार्थयोरेकीभावगतेः, नान्यथा उक्तवत् । साध्वसाधुत्वज्ञानस्य प्रयोजनं धर्मनियमोऽपि पृथगर्थसिद्धिं सूचयति ।

* * *

तरप्रधानोपसर्जनभावात्**इतरे** 592/mj

* * *

भावात् सन्मित्रवत् । तथा लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते, व्याकरणशास्त्रे तु शब्दरूपतां प्रतिपन्नः प्रवर्तते, शब्दाधिगमार्थप्रवृत्तिर्विशेषो भवतिवत् । अर्थस्य च गोः सास्नादि भिन्नं रूपम्, तदर्थत्वाच्छब्दस्य गकारादिवर्णानुपूर्वी श्रोत्रनादमात्रम् । तद्धि न कदाचिदर्थो भवितुमर्हति कल्पितुं वा अव्यवस्थितत्वाद् व्यतिकीर्णत्वादनियतत्वात् । बाह्यार्थस्तु व्यवस्थितोऽव्यतिकीर्णो नियतश्च । तस्मान्न शब्दोऽर्थरूपतां प्रतिपन्नो वर्तते । प्रतिपन्नोऽपि स्वसम्बन्धादेव सम्बन्धस्य द्विष्ठत्वाच्छब्दार्थयोरेकीभावगतेः, नान्यथा उक्तवत् । साध्वसाधुत्वज्ञानस्य प्रयोजनं धर्मनियमोऽपि पृथगर्थसिद्धिं सूचयति ।

* * *

तरप्रधानोपसर्जनभावात्

यथा प्रथमश्लोकोऽस्मन्मतं समर्थयति तथा **लोकेऽर्थरूपताम्** इत्येषोऽपि । गामभ्याज शुक्लाम् इति न शब्दे बुद्धिः, किं तर्हि ? अभिधेये लोकसिद्धा । **व्याकरणशास्त्रे शब्दरूपतां प्रतिपन्नः प्रवर्तते** । तुर्विशेषणे, **शब्दाधिगमार्थप्रवृत्तिर्विशेषो भवतिवदिति**, भवतिशब्दमधिगमयिष्यन् **भू सत्तायाम्**पा॰ धा॰ १ लट् कर्तरि इत्यादि करोति तस्माद् भिन्नौ । § 1716 -/ms

४ यो] पृ॰ ५८१ पं॰ १ ॥
१७ त] तद्विनाभावाद्व्यर्थता प्र॰ ॥
३१ तु] तुवि॰ प्र॰ ॥
३२ भ] द्भवति॰ प्र॰ ॥
१ ल] लड्कर्तरि
nayacakra-ms-bhā । लड्कर्तरि

nayacakra-ms-ya । वर्तमाने लट् ३ । २ । १२३ । कर्तरि कृत् । ३ । ४ । ६७ । लः कर्मणि च भावे चाकर्मकेभ्यः । ३ । ४ । ६९ । —
nayacakra-ms-pā ॥

इतश्च भिन्नौ, रूपभेदात् । **अर्थस्य चे**त्यादि, गोः सास्नादि भिन्नं रूपम् । तदर्थत्वाच्छब्दस्य गकारादिवर्णानुपूर्वीशब्दस्य श्रोत्रनादमात्रम्, तदर्थं शब्दप्रयोगाद् गकारादिवर्णानुपूर्वीमात्रोच्चारणम् । **तद्धि न कदाचिदर्थो भवितुमर्हति, कल्पितुं वा** न इति वर्तते, त्वया योऽभिजल्पः कल्पित एव स न भवत्यर्थः । कस्मात् ? **अव्यवस्थितत्वाद् व्यतिकीर्णत्वादनियतत्वात् ।**

§ 1717

**बाह्यार्थस्तु व्यवस्थितः** देशकालादिभिन्नशब्दशतसङ्कुलेऽपि घटशब्दस्य ऊर्ध्वग्रीवाद्ये स्वाभिधेये प्रयोगात् **[अ]व्यतिकीर्णश्च, नियतः** प्रतिपादनेऽवश्यवाच्यत्वात् तेनैव शब्देन स एव इति तत्रैव च बुद्ध्युत्पत्तेः । तस्माद् व्यवस्थिताव्यतिकीर्णनियतत्वेभ्यो बाह्योऽर्थोऽन्यः रूपभेदाच्छब्दान्तरात् कल्पिताच्च । तस्मान्न शब्दोऽर्थरूपतां प्रतिपन्नो वर्तते । अभ्युपेत्यापि रूढेरपृथगात्मत्वप्रतिपत्तिमव्यभिचारादनयोः प्रतिपन्नोऽपि स्वसम्बन्धादेव सम्बन्धस्य द्विष्ठत्वाच्छब्दार्थयोरेकीभावगतेः प्रतिनियतोऽभिधानाभिधेयसम्बन्धः पार्थक्यमन्तरेण न भवितुमर्हति घटशब्दार्थयोरित्युक्तम्, एकीकरणस्यान्यथाऽसम्भवात्, अत

- /ms आह **--नान्यथा उक्तवदिति** । किञ्चान्यत्, **शास्त्रे तूभयरूपत्वं प्रविभक्तं**

593/mj **विवक्षया** वाक्यप० २ । १३१ *

* * *

एवमेव च दर्शनोत्प्रेक्षाभ्यामित्यादि शब्दाद् बहिरर्थसिद्धौ घटते । इतरथा किं दर्शनम् ? कोत्प्रेक्षा ?...कुतोऽभिजल्पो हेयः ।

श्रुत्यन्तरप्रवृत्तिहेतुरित्येतदपि त्वत्कल्पिताभिजल्पे नैवोपपद्यते । ध्वनिः शब्दार्थाभ्यां न प्रवर्त्येत अकर्तृभ्यां करणकर्मभ्याम् । चेतनात्मत्वात् त्वात्मा स्वतन्त्रः कर्ता

* * *

इत्येतदप्यस्मन्मतमेवानुधावति । **यस्तु प्रयुङ्क्ते कुशलो विशेषे** पा० म०

---

१ स्य] चेत्यादि प्र० ॥
१ सा] लङ्कर्तरि
nayacakra-ms-bhā । लङ्कर्तरि
nayacakra-ms-ya । वर्तमाने लट्
३ । २ । १२३ । कर्तरि कृत् । ३ । ४
। ६७ । लः कर्मणि च भावे चाकर्मकेभ्यः
। ३ । ४ । ६९ । —
nayacakra-ms-pā ॥
२ स्नादि] सास्नादिरूपं
भिन्नतदर्थ॰nayacakra-ms-ya ॥
४ ग] गोः सास्नादि स्वरूपम्, गोशब्दस्य
तु गकारादिवर्णानुपूर्वी स्वरूपमित्याशयः ॥
७ क] काल्पः कल्पित एव
nayacakra-ms-ya ॥
८ बा] बाह्यवस्तुव्यव॰ प्र० ॥
९ ऊ] ऊर्ध्वग्रीवाद्यं प्र० । ऊर्ध्वग्रीवादौ ?
॥
१२ वा] ॰वाचत्वात् प्र० ॥
१२ तिप]
॰पत्तिव्यभि॰nayacakra-ms-ya ॥
१२ योः] अर्थरूपतां प्रतिपन्नोऽपीत्यर्थः ?
॥
१५ स्व] स्वं सम्बन्धादेव प्र० ॥
१६ शा] पृ० ५८१ पं० ४ ॥
१६ *] श्रोत्रानादरूपं प्र० । श्रोत्राधानरूपं
? ॥
२३ द] पृ० ५८१ पं० ५--६ ॥
१ य] पृ० ५७३ पं० ५, पृ० १२८ पं०
२१ ॥

भा॰ इत्यादिक्रमेण गोशब्दस्य सास्नादिमति साधुत्वं सिद्धेऽर्थे शब्दे सम्बन्धे च पृथक्, गोण्यादावसाधुत्वं रूढितः, अर्थविशेषविवक्षायां गोण्या आववने साधुत्वमित्यादि च नान्यथा घटते । तस्य च साध्वसाधुत्वज्ञानस्य प्रयोजनं धर्मनियमः **सिद्धे शब्दार्थसम्बन्धे** पा॰ वा॰ इत्यादिरुक्तः सोऽपि पृथगर्थसिद्धिं सूचयति । लोकेनाभिधेयेऽर्थे शब्दाः प्रयुक्ताः प्रयोजनेन वा, तत्रार्थस्य पृथक् सिद्धौ शब्दस्य च तद्विषयस्य धर्मार्थः प्रयोगनियमः साधोः स्वार्थः शास्त्रेण क्रियते भक्ष्याभक्ष्यनियमवदिति । तस्मान्नाभिजल्पोऽर्थः । § 1718

**एवमेव चे**त्यादि एतस्यैव कारिकात्रयाभिहितस्यार्थस्य वर्णकदण्डकोऽपि **दर्शनोत्प्रेक्षाभ्या**मित्यादि, प्रधानपुरुषेश्वरादिमयम् इत्यादिदर्शनानि शब्दाद् बहिरर्थसिद्धौ घटन्ते, वस्तुन्यभिन्ने घटादौ बाह्ये तु पुरुषाणां चोत्प्रेक्षा नित्यानित्यादित्वेन नियमेन सद्भावे, नान्यथा । **इतरथे**त्यादि, अभिजल्पा-ऽर्थैक्ये नियतबाह्यार्थाभावे प्रधानादिदर्शनासम्भवः । तत्र **किं दर्शनम् ?** नास्तीत्यर्थः । **कोत्प्रेक्षा ?** इत्यादि तद्ग्रन्थानुसारेणासम्भवं सोपपत्तिकं दर्शयति यावत् **कुतोऽभिजल्पो हेयः ?** इति सभावनं गतार्थम् । अर्थाभावे न घटते, अर्थसद्भावे युज्यत इति पिण्डार्थः । § 1719

किञ्चान्यत्, **श्रुत्यन्तरप्रवृत्तिहेतुः इत्येतदपि त्वत्कल्पिताभिजल्पे नैवोपपद्यते, अस्मदिष्टे तूपपद्यते** । तद्यथा--श्रुतेरन्या श्रुतिः श्रुत्यन्तरम्, अन्तरेकीभूताभिजल्पपृथग्भूतो ध्वनिर्व्यवहारानुपाती स्यात्, **स त्वदिष्टाभ्यां श-** - /ms

४ मेण] पृ॰ १२८ पं॰ १८, पृ॰ ५७३ पं॰ २५, टिपृ॰ ५७ पं॰ २२— २६ ॥
७ मः] टिपृ॰ २२ पं॰ ६ । कथं पुनरिदं भगवतः **पाणिने**राचार्यस्य लक्षणं प्रवृत्तम् ? **सिद्धे शब्दार्थसम्बन्धे** । सिद्धे शब्दे अर्थे सम्बन्धे चेति ।... ...कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति ? लोकतः ।... ...यदि तर्हि लोक एषु शब्देषु प्रमाणं किं शास्त्रेण क्रियते ? लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण **धर्मनियमः** क्रियते । किमिदं धर्मनियम इति । धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः । --nayacakra-ms-pā म॰ nayacakra-ms-bhā १ । १ । १ ॥
९ भ] **भक्ष्याभक्ष्यानियम॰** प्र॰ । भक्ष्याभक्ष्यादिनियम ? । लोके तावदभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम् । तत्र नियमः क्रियते--इदं भक्ष्यमिदमभक्ष्यमिति । तथा खेदात् स्त्रीषु प्रवृत्तिर्भवति । समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते--इयं गम्या इयमगम्येति ।... ... ...एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च तत्र धर्मनियमः क्रियते--शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवतीति । --nayacakra-ms-pā म॰ nayacakra-ms-bhā १ । १ । १ ॥
१० द] पृ॰ ५८१ पं॰ ५--६ ॥
१० व] **अभिन्ने** एकस्मिन् **वस्तुनि** घटादौ बाह्ये नित्यानित्यादित्वेन पुरुषाणामुत्प्रेक्षा घटते, न तु बाह्यार्थाभावे इत्याशयः । अत्रारुचौ तु **वस्तुनि भिन्ने** इति पाठः कल्पनीयः ॥
१४ तु] **तु**nayacakra-ms-bhā प्रतौ नास्ति ॥
१६ कु] कुतोऽभिजल्पो **हेयः** हेतुगम्यः इत्यर्थे यथाश्रुतमेव साधु । अन्यथा तु कुतोऽभिजल्पोऽहेयः इति कुतोऽभिजल्पो**ऽभिधेयः** इति वा पाठोऽत्र सम्भवेत् । दृश्यतां पृ॰ ५८१ पं॰ २५ ॥
१८ श्रु] पृ॰ ५८१ पं॰ ५--६ ॥
१८ रेकीभू] **॰भूताविजल्पपृथग्भूतो**nayacakra-ms-bhā । ॰भूतो **विजभ्यपृथग्भूतो** nayacakra-ms-ya । ॰भूतो **विभज्य** पृथग्भूतो ? ॥

594/mj **ब्दार्थाभ्यां न प्रवर्त्येत अकर्तृभ्याम**चेतनाभ्यां **करण-कर्मभ्याम्,**

* * *

प्रवृत्तिहेतुः श्रुत्यन्तरस्य भवितुमर्हति । शब्दार्थयोरेकीभूयान्तर्वर्तमानयोः कान्या श्रुतिः श्रुत्यन्तरमित्युच्येत ? केन च विशेषेण तत्प्रवृत्तिहेतुरुच्यते ?

अस्ति विशेषः । तद्यथा--घटार्थप्रत्यायनार्थं ध्वन्यात्मकशब्दोत्पत्तिकार्यदर्शनात् तदनुरूपः कारणभूतोऽनुमीयते घटशब्दः, नार्थः तद्विरूपत्वात् । तस्माच्छ्रुतिः श्रुत्यन्तरस्य प्रवर्तिका श्रुतित्वात्, नार्थो नाप्यात्मा ।

ननु तस्यापि श्रुत्यन्तरस्य श्रुतित्वात् पूर्वश्रुतिवदर्थप्रवर्तितः शब्दः, अर्थाभावे प्रयोगानर्थक्यात् । आभिमुख्येन जल्पत्यर्थं शब्दः, तमर्थोऽभिजल्पयति, तद्विषय एवाभिजल्प इत्युच्यते । एवं तावद् भर्तृहर्यादिदर्शनमयुक्तम् ।

* * *

यथासङ्ख्यं करण-कर्मत्वाच्छब्दार्थयोः । **चेतनात्मत्वात् त्वात्मा स्वतन्त्रः,** स्वातन्त्र्यात् **कर्ता,** स ***प्रवृत्तिहेतुः श्रुत्यन्तरस्य भवितुमर्हति** । यथोक्तम् --**आत्मा बुद्ध्या समर्थ्यार्थान्** पा० शिक्षा० ॥ ६ ॥ इत्यादि । इदं चायुक्तं श्रुत्यन्तरम् इति विभज्य कथनम्, **शब्दार्थयोरेकीभूयान्तर्वर्तमानयोः कान्या श्रुतिः श्रुत्यन्तरम् इत्युच्येत ?** तस्माद् विशेषाभावे कथमविभ्रान्तैरविभक्तः सन् विभक्तः शब्दात्मा उच्यते ? **केन च विशेषे[ण]** श्रुत्यन्तराभावेन **तत्प्रवृत्तिहेतुरुच्यते ?** चैतन्य-स्वातन्त्र्यकृतं कर्तृत्वविशेषमन्तरेण श्रुत्यन्तरासम्भवे कस्य प्रवृत्तिहेतुत्वम् ? § 1720

अत्राह --**अस्ति विशेषः । तद्यथा--घटार्थप्रत्यायनार्थ**मित्यादि । कारणानुरूपत्वात् कार्याणां ध्वन्यात्मकशब्दोत्पत्तिकार्यदर्शनादन्तर्निविष्टोऽपि तदनुरूपः कारणभूतोऽनुमीयते शाल्यङ्कुरदर्शनाच्छालिबीजवद् घटशब्दः, नोर्ध्वग्रीवादिलक्षणोऽर्थः तद्विरूपत्वात् । उपादानं च श्रुतेरनुरूपा श्रुतिरेव युक्ता, नार्थो घटादिर्वैरूप्यात् । तस्माच्छ्रुतिः श्रुत्यन्तरस्य प्रवर्तिका नार्थो नाप्यात्मेत्ययं विशेष इति । § 1721

अत्रोच्यते --**ननु तस्यापि श्रुत्यन्तरस्ये**त्यादि । एतदप्यनुमानं प्रतितर्कबाध्यम्, विज्ञानसन्निविष्टघटार्थप्रवर्त्या सा श्रुतिः श्रुतित्वात् । ननु प्रागुक्तम्--अर्थप्रत्यायनार्थं शब्दः प्रयुज्यते **न वायसवासितादिवद् निरर्थकः क्रीडितमेवास्तु इति वेत्यादि** । तस्माच्छ्रुतित्वात् पूर्वश्रुतिवदर्थप्रवर्तितः शब्दः, अर्थाभावे प्रयोगानर्थक्यादिति । § 1722

- /ms निरुक्त्यर्थोऽप्यभिजल्पस्य तथा घटते नान्यथा, **जप जल्प व्यक्तायां वाचि** पा० धा० ३९७, ३९८, आभिमुख्येन जल्पत्यर्थं शब्दः, तं प्रयुङ्क्तेऽर्थः

---

१ प्र] प्रवर्तेत प्र० ॥
१२ *] प्रतिपत्तिहेतुः प्र० ॥
१४ आ] पृ० ५६५ पं० १४ ॥
१६ योरेकीभू] °भूतया°nayacakra-ms-ya ॥
२७ श्रु] श्रुत्यन्तराभावे तत्प्रवृत्ति° इति चारुतरं भाति ॥
२८ वासिता] °तादिन्निरर्थकः प्र० ॥
३० इति] चेत्यादि प्र० । दृश्यतां पृ० ५११ पं० ६ ॥

अभिजल्पयति, **तद्विषय एवाभिजल्प इत्युच्यते,** यद्याभिमुख्येनावस्थितमर्थं जल्पति ततो जल्पः शब्दः, सोऽर्थो विषयोऽस्य तद्विषय एवाभिजल्पः शब्दः, एतदुक्तं भवति--अर्थविषयः शब्दः शब्दार्थकल्पनायां युक्ततरः स्यात्, अर्थोत्थापितशब्दाभिजल्पत्वपक्षेऽभिजल्पशब्दार्थपरिकल्पना युक्ततरा स्यात्, न तु त्वत्परिकल्पिते शब्दप्रेरिते । एवं तावद् भर्तृहर्यादिदर्शनमयुक्तम् ।
§ 1723

595/mj

यत्तु वसुरातो भर्तृहरेरुपाध्यायः स च स्वरूपानुगतमर्थमन्तरविभागेन संनिवेशयतीत्याह तेन द्वावपि शब्दोऽर्थश्चाभ्युपगतौ । न तु स तेन शब्दनयेनाभिहितानन्यान्यलिङ्गादिसामानाधिकरण्याभावादिदोषान् परिहर्तुं शक्नोति । ननु शब्दानुगतार्थमन्तरविभागेन इति ब्रुवता अर्थतन्त्रः शब्दोऽभिहितः, न शब्दतन्त्रोऽर्थः । ततोऽर्थतन्त्रत्वाच्छब्दप्रवृत्तेः तदवस्था दोषाः । § 1724

यथा च रूपादय एकैकभवनात्मका न पर्यायान्तरमपेक्षन्ते विशेषत्वात् तथा पुष्यतारानक्षत्रादिपुंलिङ्गादयः परस्परविरोधित्वाद् विशेषाणामिति कुतः सामानाधिकरण्यम् ? § 1725

**यत्तु वसुरातो भर्तृहरेरुपाध्यायःस च स्वरूपानुगतम् इत्याद्याह तेन द्वावपि शब्दोऽर्थश्चाभ्युपगतौ,** सम्बन्धस्य द्विष्ठत्वात् सम्बन्धिनोरभ्युपगतिः । प्राच्यादत्यन्धदर्शनात् तैमिरिकदर्शनमिदं तत्त्वदृष्टिं प्रत्यासीदति, न दूरापयातम्, अभिजल्पस्वरूपं तु पुनस्तेनापि निरस्तम् । *किञ्च **न तु स तेनेत्यादि** । एतस्मिन्नपि दर्शने यथा पुष्यशब्दार्थयोरन्तः सन्निवेशनमविभागेन स्वलिङ्गवचनकारकादिभेदयोरेवमिष्टाल्लिङ्गादेरन्यान्यलिङ्गादीनि अन्यशब्दार्थगतान्यपि सन्निवेशयिष्यति स इति सामान्योपसर्जनविशेषप्रधानवादिना शब्दनयेनाभिहितांस्तत्सामानाधिकरण्याभावादिदोषान् परिहर्तुमशक्त एव तथापि । कस्मात् ? **ननु शब्दानुगतेत्यादि** । स्वरूपमनुगतोऽर्थः, तमर्थमन्तरविभागेन इति ब्रुवता अर्थतन्त्रः शब्दोऽभिहितो [न] शब्दतन्त्रोऽर्थः, यद्यर्थमनुगतः शब्दोऽन्तरविभागेन सन्निवेश्येत ततः शब्दप्रेरितत्वाच्छब्दावधारणादर्थो व्युदस्तः स्यात्, किन्तु तद्विपरीतं शब्दावधारणव्युदसनादर्थप्राधान्यावलम्बनं कृतम् । ततो**ऽर्थतन्त्रत्वात्** अर्थप्रधानत्वा**च्छब्दप्रवृत्तेः**, प्रवर्तको हि शब्दस्यार्थः, तस्मात् **तदवस्था दोषाः** । शब्दप्राधान्यावधारणे तु परिहृताः - /ms

---

१६ स] पृ° ५८१ पं° ७ ॥
१९ स] पृ° ५८१ पं° ७ ॥
१९ स्तेनापि] **निरस्त** प्र° । न निरस्तम् ? ? ॥
२१ *] किञ्चान्यत् **स तेनेत्यादि** ?
?किञ्च, **वसुरातेनेत्यादि** ? ? ? ॥
२३ स्व] **सलिङ्ग°** प्र° ॥
२७ ण्या] **°ण्यादिभावादि°** प्र° ॥

स्युः । तस्मादुक्तवदेव विशेषप्राधान्यवादेऽर्थान्तरनिरपेक्षाणां पुष्य-तारा-नक्ष-त्रादिविशेषाणां नास्ति सामानाधिकरण्यम्, अतो विशेष एक एव व्यवस्थितः । § 1726

एषा तावद् वस्तुनोऽर्थपर्यायेषु भावना कृता शब्दगोचरातिक्रान्तेषु, व्य-ञ्जनपर्यायेष्वनेनातिदेशः क्रियते --**यथा चे**त्यादि । **रूपादयो** युगपद्भाव्यभिमता अप्येकैकभवनात्मका **न पर्यायान्तरमपेक्षन्ते विशेषत्वा**दिति दृष्टान्तः । **पुष्य-तारा-नक्षत्रादिपुंलिङ्गादयः परस्परविरोधित्वाद् विशेषाणा**मिति दार्ष्टान्तिकः । एकमेकमेव भवनं भवति न द्वितीय**मिति कुतः सामानाधिकरण्यम् ?** पुष्यः पुमान् स कथं स्त्री भवतीति तारा इति, नपुंसकं वा **नक्षत्र-म्** इति ? एवं वचन-काल-कारक-पुरुषोपग्रहादिभेदा न परस्परापेक्षा विशेषैकभवनादिति भावनीयम् । § 1727

596/mj

एवं चेतच्छब्दनयस्य दर्शनम्--यथार्थाभिधानं शब्दः तत्त्वार्थ-भा० १ । ३५, तथा नामस्थापनाद्रव्यभिन्नलिङ्गादिवाच्येष्टाकर-णाद् भावयुक्तवाची शब्दः  इति । § 1728

व्यवहारान्तःपातिस्थापनावाच्येष्टाकरणप्रदर्शनार्थं तु स्थाप-नाद्रव्यार्थस्वरूपमेव तावदाख्यायते । § 1729

स्थीयते यस्मिंस्तत् स्थानम् । केन स्थीयते ? विशेषाव-चनात् सर्वगतिरिति । क्व च स्थीयते ? आकारे स्थीयते । मर्यादया करणमभिविधिना वा आकारः । अभिविधिः § 1730

**एवं चेत**दित्याद्युक्तार्थोपनयः । तत्र शब्दनयस्य एतद्दर्शनम्--य-थार्थाभिधानमेव न्याय्यम् । लक्षणं च **यथार्थाभिधानं शब्दः** तत्त्वार्थभा० १ । ३५ । तथा **नाम-स्थापना-द्रव्य-भिन्नलिङ्गादिवाच्येष्टाकरणाद् भावयुक्त-वाची शब्दः** इति च लक्षणान्तरम् । तत्र विभागेन द्रव्यद्रव्यार्थवाच्यं पूर्वनयेषूक्तमिष्टं न करोतीति नैगमादिगोचरमनेनापि व्यावर्तितमेव शब्दन-

- /ms येन । व्यवहारगोचरनामद्रव्यार्थवाच्यमपीष्टं न करोतीत्यधुना व्यावर्तितम् । ऋजुसूत्रस्यार्थपर्यायस्य गोचरं च भिन्नलिङ्गादिवाच्यमिष्टं न करोतीति यथा वचनादि साधु इति मन्यमानः शब्दनयः प्रवर्तते युक्त्या च यथा तस्य मतं शब्दस्य तथा प्रकारान्तं प्रदर्शितम् । तथाचार्यसिद्धसेनोऽप्याह-- § 1731

---

२ वा]
°वादिर्थान्तर°nayacakra-ms-bhā ।
°वादिनार्थान्तर° nayacakra-ms-ya
। °वादिनोऽर्थान्तर° ? ॥
८ ए] एकnayacakra-ms-bhā प्रतौ
नास्ति ॥
२१ भ] भवनं
भवनंnayacakra-ms-bhā ॥
२२ ग] पृ० ५४१३ ॥
२५ ना] पृ० ५८९ पं० ९ ॥
२७ स्या] °स्यार्थस्य
गोचरंnayacakra-ms-ya ॥
२८ व] वाचनादि प्र० ॥
२८ त] तथा प्रकारान्तरेण ?तथाप्रकारं
तत् ? ॥
५ त] तथाचाचार्य° ? ॥

नामं ठवणा दवि+एत्ति एस दव्वट्ठियस्स णिक्खेवो ।
भावो उ पज्जवट्ठियपरूवणा एस परमत्थो ॥ सन्मति° १ । ६
त्ति ।§ 1733

अधुना सामान्यभेदं स्थापनाद्रव्यार्थमव्यावर्तितं व्यावर्तयितुकामः सम्बन्धयति **--व्यवहारान्तःपातिस्थापनावाच्येष्टाकरणप्रदर्शनार्थं तु,** व्यवहारनयान्तःपातिनी स्थापना, तद्वाच्यमिष्टं न करोति इत्येतत् प्रदर्शयिष्यते, स्थापनाद्रव्यार्थस्वरूपे चाविदिते न शक्यं तत् प्रदर्शयितुमिति **स्थापनाद्रव्यार्थस्वरूपमेव तावदाख्यायते ।** तत्र स्थानक्रियायाः कर्तुस्तिष्ठतः प्रयोजके समवेता ण्यन्तवाच्या **ण्यासश्रन्थो युच्** पा° ३ । ३ । १०७ इति लक्षणात् क्रिया स्थापना । तां वक्तुकामः स्थानमेव तावद् व्याचष्टे **--स्थीयते यस्मिंस्तत् स्थानम्,** भाव-करणा-ऽधिकरण-कर्मसाधनेष्वधिकरणं तावदाह । वक्ष्यमाणार्थसम्बन्धाद् भावः क्रिया स्थानम्, कर्त्रा तिष्ठता स्थीयते, अतस्तन्निर्णयार्थं पृच्छति **--केन स्थीयत** इति । तत्प्रतिवचनम् **--विशेषावचनात् सर्वगतिरिति । इतिशब्दो** हेत्वर्थे, यस्मात् सचित्तस्य देवदत्तादेरचित्तस्य वा घटादेः स्थानम् इति विशेष्यानुक्तमतः सामान्येन येन केनचित् स्थातव्यम् । यस्मिन् इत्यधिकरणस्योक्तस्य निर्णयार्थं पृच्छति **--क्व च स्थीयत** इति । उच्यते **--आकारे स्थीयते ।** आङ् मर्यादाभिविध्योः, मर्यादया करणमभिविधिनाभिव्याप्त्या वाऽऽकारः, भ्रूकुञ्चोः सर्वधात्वर्थव्यापित्वादा 597/mj

* * *

परिसमापनमभिव्याप्तिः प्रस्तुतस्य रूपस्य, तेन आकरणम्, तस्मिन् स्थानं मर्यादया वा । मर्यादा अन्यरूपविलक्षणता । अस्य स्थानस्य प्रयोजना स्थापना । ईषत् तिष्ठत ऐकाग्र्येण स्थानम्, स्वयं तिष्ठतोऽसद्भावेन सर्वत्र विशेष्य स्थाप्यमानं स्थानम्, अनिश्चितैकक्रियप्रयोज्यत्ववत् असद्भावेन वा अतद्भूतरूपेऽपि स्थूणेन्द्रवत्, तथाऽक्षादिषु ।

तस्माद् यथा बालादिविविधद्रव्यनामभावभेदोपपत्तौ देवदत्ताकारस्याभिन्न-

* * *

करणमाभवनमित्यर्थः । तत्राभिविधिं व्याचष्टे **--अभिविधिः परिसमापन-**

---

७ स्थाप] °पनाद्वाव्यनिष्टं न करोति प्र° ॥
८ र्तुस्ति] पृ° १९५ पं° ६ टि° १ ॥
९ ण्या] **ण्यासश्रन्थो युच्** । ३ । ३ । १०७ । अकारस्यापवादः । कारणा । हारणा । आसना । श्रन्थना । घट्टिवन्दिविदिभ्यश्चेति वाच्यम् । घट्टना । वन्दना । वेदना । इषेरनिच्छार्थस्य । अन्वेषणा । परेर्वा । पर्येषणा, परीष्टिः ।--nayacakra-ms-pā सिद्धान्तकौमुदी ॥
११ ता] **यावद्** प्र° ॥
११ क्ष्य] पृ° ५९७ पं° १२ ॥
१६ ता] **स्थीयतेतस्तन्नि°** प्र° ॥
१७ आ] आङ् मर्यादाभिविध्योः । २ । १ । १३ । इति सूत्रमपि पाणिनीयव्याकरणेऽस्ति ॥
१७ भिविधिनाभिव्या] **°व्याप्त्याव्याकारः** प्र° ॥
१ त] **तत्राभिविध्याचष्टे** प्र° ॥

- /ms मभिव्याप्तिः, कस्य ? प्रस्तु- तस्य रूपस्य स्वभावस्य वस्त्वात्मनः, तेन अभिविधिना प्रस्तुतरूपपरिसमापनेन आकरणमाभवनम्, तस्मिन् स्थानम्, मर्यादया वेत्यनर्थान्तरं योजयति । का मर्यादा ? अन्यरूपविलक्षणता रूपान्तरव्यावृत्तिर्नियम इत्यर्थः, न ह्यनाकारं किञ्चिदस्ति, सर्वमाकारपरिग्रहेण भवति तिष्ठतीति स्थानमाकारो मर्यादाभिविधिभ्याम् । अस्य स्थानस्य स्वतन्त्रस्थातृसमवायिनः प्रयोजके हेतुकर्तरि विहितो णिच्, तस्य भावः क्रिया प्रकर्षयोजना प्रयोजना प्रयोजकत्वं हेतुकर्तृत्वं स्थापना । किमुक्तं भवति ? ईषत् तिष्ठतो विप्रकीर्णरूपस्थानस्य स्थातुरैकाग्र्येण स्थानं तदैकाग्र्याधानम् । तद् व्याचष्टे --स्वयं तिष्ठतोऽसद्भावेन सर्वत्रेति अक्ष-वराटकाद्यसमाप्ताभिप्रेताकारं स्वयमेव तिष्ठदसद्भावेन तिष्ठति, तत्तु विशेष्य स्थाप्यमानं परिसमाप्तं स्थानं स्वविशिष्ट आकारेऽभिव्याप्य तिष्ठति इन्द्रोऽयं स्कन्दः इत्यादि रूपान्तरव्यावृत्त्या मर्यादया नियतं वेति । किमिव ? इत्यत आह --अनिश्चितैकक्रियप्रयोज्यत्ववत्, यथा पचि-पठि-गम्यादिक्रियावधारणाभावेनानिश्चितक्रियं स्वतन्त्रं कर्तारं हेतुकर्ता पच पच इति नियुङ्क्ते पचावेव स्थापयति क्रियान्तरव्यावृत्त्या तत्रैव स्थाने पच्याकारे नियमयति स स्थापनानियमः, एवं सर्वत्राऽऽकारे सद्भावस्थापनया नियमः प्रस्तुतरूपस्य परिसमाप्त्या रूपान्तरविलक्षणतया मर्यादया वेति स्थानार्थः । तं - /ms व्याख्याय स्थापनार्थो व्याख्यातः शब्दः व्युत्पत्त्या । एवं तर्हि असद्भावस्थापनाया नियमयितुरभावाद् न व्यापिता लक्षणस्येति चेत्; न इत्युच्यते, सुखप्रतिपाद्यत्वादादौ सद्भावस्थापना इत्थं प्रतिपादिता, तत्समानं प्रतिपादनमितरस्यामपीत्यत आह --असद्भावेन वा अतद्भूतरूपेऽपि स्थूणेन्द्रवत्, तदेव हि वस्तु व्यक्ताव्यक्ताकारपरिणामं स्वयं तथा तथा तिष्ठद् विशेष्याभीष्टे स्थाप्यते यथा स्थूणैवासंस्कृतावस्थायामप्यव्यक्ततरावयवाकारायां विशेष्यमाणा चित्रावस्थां व्यक्तावयवाकारामप्रत्यासीदन्ती इन्द्रः इति स्थाप्यते तस्मात् सापि स्थाने नियम्यते, अतो व्याप्येव लक्षणम् । एतेनाव्यक्ततरावस्था व्याख्यातेत्यतिदिशति तथाऽक्षादिष्विति गतार्थम् । § 1734

**तस्माद् यथा बालादी**त्यादि उक्तोपपत्तिनिगमनं सभावनमुदाहरणं याव**द् देवदत्तः** । बालत्वस्य कारणद्रव्याणि पीत्थकादीनि युवत्वादीनां चान्यान्या-

---

३ रू] रूपस्य भावस्यnayacakra-ms-ya ‖
३ त्य] °त्यनर्थावरयोजयति प्र° ‖
७ विल] °लक्षणंना प्र° ‖
८ स्था] स्थापनादि किमुक्तं प्र° ‖
११ स्था] स्थातुरेकाग्र्येण स्थानं तदेकाग्र्याधानम् प्र° ‖
१५ मा] °मान परि° प्र° ‖
१६ प] पश्चाकारेnayacakra-ms-bhā । पश्चाकारे nayacakra-ms-ya ‖
१६ स] सा प्र° ‖
१८ स्था] °स्थापनाया ? । दृश्यतां पृ° ५९७ पं° २० ‖
२३ द्] विशेषीभीष्टे प्र° ‖
२३ स्थू] स्थूणवा प्र° ‖
२८ का] °काराया विशि° प्र° ‖
१ व्याणि] पीत्थकादीनि प्र° । पीच्छकादीनि ? पीथकादीनि ? । दृश्यतां पृ° ५९८ पं° १० ‖

नीति द्रव्यभेद उपपन्नः, तथा पाचको लावकोऽध्यापक 598/mj

* * *

त्वात् तदाकारतत्त्वो देवदत्त एकः सर्वभेदोऽपि एवं चित्रलेप्यपुस्तादिभेदोपपत्तावपि तथा तिष्ठतस्तस्य तस्य स्थानस्य प्रयोजनात् सा स्थापना, तत्कर्मणस्तत्त्वापत्तेः ।

स्थापनया निक्षेपः स्थापनानिक्षेपः, स्थापना सद्भावासद्भावाभ्यां वस्तु निक्षिपति । यथा पुरुषाद् नामकर्म नामकर्मणो देवदत्तादिता तथा च चित्रकरादिः... ... ...।

* * *

इत्यादिर्नामभेदः, क्रियायाः क्षायोपशमिकवीर्यात्मकत्वाद् भावभेदश्चोपपन्नः, विविधशब्दादेवमादिभेदा गृहीताः । सत्यां चैवं **द्रव्य-नाम-भावभेदोपपत्तौ देवदत्ताकारस्याभिन्नत्वात् तदाकारतत्त्वो देवदत्त एकः सर्वभेदोऽपि** नान्योऽन्यश्च आकारपरमार्थत्वाभेदादिति भावयित्वा तेनोदाहरणेन दार्ष्टान्तिकेषु चित्रादिष्वपि भावयितुमाह **--एवं चित्र-लेप्य-पुस्तादिभेदोपपत्तावपि तथा तिष्ठतस्तस्य तस्य स्थानस्य प्रयोजनात् सा स्थापना** । किं कारणम् ? **तत्कर्मणस्तत्त्वापत्तेः**, चित्रकरकर्मणस्तदिन्द्रत्वापत्तेः पीथकादिद्रव्य-पाचकादिनाम-भावभेदकर्मणां देवदत्ताकारत्वापत्तिवदिति व्यापिता स्थापनायाः । स्याद्वादी तु सद्भावासद्भावद्रव्यनामभावादिभेदतत्त्वं वस्तु वाञ्छन्नेवं ब्रूते । स्थापनाद्रव्यार्थैकान्तवादिनस्तु [न] किञ्चिदाकारव्यतिरिक्तमस्ति, अतो भ्रान्तिमात्रं भेदाः । § 1735 - /ms

एषा च स्थापना निक्षेपानुयोगद्वारान्तर्गतार्थेऽभिहिता । तस्मात् स्थापनया निक्षेपः इति तृतीयासमासे स्थापनानिक्षेपः इत्यस्य व्याख्यानार्थमाह **--स्थापना सद्भावासद्भावाभ्यां वस्तु निक्षिपति** । सद्भावेनासद्भावेन च स्वात्मनि वस्तु स्थापयतीत्यर्थः । अतद्भूतात्मकं वस्तु तद्भावमाकारात्मानमापादयति आत्मानमात्मनेत्युक्तं भवति । किमिव ? **यथा पुरुषाद् नामकर्म,** प्रागमूर्तात्मा लक्षणतः सन्नात्मा कर्मत्वेन मूर्तात्मना परिवर्तते आभवति । ततश्च **नामकर्मणो देवदत्तादिता,** तस्मादुपात्तात् कर्मणो नारक-तैर्यग्योन-देवदत्ताख्यमनुष्यत्वापत्तिरेष दृष्टान्तः । दार्ष्टान्तिकः **तथा च चित्रकरादिरित्यादि** । तद्व्याख्या **--तत्रात्मवदतथाभूतस्य तथात्वापाद-**

---

१२ ए] **एकसर्व°** प्र° ॥
१४ यित्वा] **त्तेनो°** प्र° ॥
१५ स्त]
**°स्तदिद्रंत्वापत्तेः**nayacakra-ms-ya ।
**°स्तदिदंत्वापत्तेः** nayacakra-ms-bhā । nayacakra-ms-bhā पाठोऽपि समीचीन एव भाति, **तदिदन्त्वापत्तेः** तस्य इदन्त्वापत्तेरित्यर्थो भाति । अत्रार्थेऽरुचौ तु तदिन्द्रत्वापत्तेः इति पाठः कल्प्यः ॥
२० त्तेः] **पीथकाद्रव्य°** प्र° । दृश्यतां पृ° ५९७ पं° २८ ॥
२३ निक्षेपानु] विस्तरेणैतज्जिज्ञासुभिरनुयोगद्वारसूत्रादयो ग्रन्था विलोकनीयाः ॥
२४ अ] **अततद्भूतात्मकं** प्र° ॥
२६ य] दृश्यतां पृ° ५९९ पं° २० ॥
२७ स्मादुपात्ता] **°त्ताकर्मणो** प्र° ॥
२ त्वाप] **°पत्तिरेव** प्र° ॥

नात् **तदेकता चित्रकर्मादिदेवदत्तस्येति**, यथा जीव-कर्मणोरन्योन्यात्मापत्त्या भिन्नाभिमतयोरेकत्वापत्तिराख्याता तथा चित्रगतवर्णकादिदेवदत्तत्वापत्तिरपीत्यर्थः । अथवाभ्युपगच्छामो जीवकर्मणोरपि भेदम्, एक एव
- /ms जीवाख्योऽर्थः पारिणामिकजीवभव्याभव्यत्वादिभावापत्तिपरिणामः क्षायोपशमिकौदयिकादिपरिणामश्चैकद्वित्रिचतुरिन्द्रियतिर्यङ्नारकादिः सर्व एव देवदत्तः कर्मात्मैक्यादिति दृष्टान्तः । **महाश्वेतत्वादिदेवदत्ताकाराभेदश्चित्रे**ऽपीति दार्ष्टान्तिकोऽर्थः । तद् दर्शयति **--यथा च जीवत्वादि पूर्वरू**पमित्यादि दण्डको गतार्थः । अथवा जीवस्य कर्मपुद्गलानामपि *चाभेद एव, क्षायोपशमिकौदयिकादिपृथक्परिणामाभावादेक एव पारिणामिको भावः, अतस्तयोरपि ना-
599/mj स्ति

* * *

तत्रात्मवदतथाभूतस्य तथात्वापादनात् तदेकता चित्रकर्मादिदेवदत्तस्य । यथा च जीवत्वादि पूर्वरूपम्... ...। यथा च जीवत्वं तत्पूर्वम्... ...आकारतत्त्वैकत्वात् ।

यदि स्थापनया चित्रादि स्थाप्यं देवदत्तोद्देशेन देवदत्तस्वरूपमापद्यते तथा देवदत्तोऽपि कस्मान्न चित्रादिस्वरूपमापद्यते । तथेन्द्रतामक्षादिरापद्यते नाक्षतामिन्द्र इत्यत्र को विशेषहेतुः ?

नन्वसावपि इन्द्रनामगोत्रकर्मस्थाप्यत्वात् स्थापनानिक्षेपात्मकतां नातिवर्तते । अतो युज्यत एवैतत्, न न युज्यते ।

अथवा स्थापनाया निक्षेपः स्थापनानिक्षेपः । स्थापना आकारो वस्त्वात्मा निक्षिप्यते स्वात्मनि घटादिः कुम्भकारादिभिः, मुमुक्षुभिरात्मा । तथेन्द्रोऽपीन्द्रा-

* * *

परस्परतो भेदो धर्मभेदादित्यत आह **--यथा च जीवत्वं तत्पूर्वं** जीवपूर्वं पारिणामिकेन चैतन्येन सर्वपरिणामाभिमुखेनाऽव्यक्ताकारमसद्भावस्थापनं सततं तिष्ठत् स्थाप्यते तथा पुद्गलानामपि वर्णादिपारिणामिका भावा असद्भावस्थापनेन महाश्वेत-सिन्दूरादिवर्णकजातम्, अतस्तयोरेकता, कस्मात् ? **आकारतत्त्वैकत्वात्** बुद्ध्या[ऽऽ]क्रियमाणत्वेनाभेदात् तत्परिणामात्मकत्वात् तथा तथा स्थाननियमादभेद इति । § 1736

अत्र चोदयति **--यदि स्थापनयेत्यादि** । अयमभिप्रायः--यदि स्थाप्याकारानाकारवस्तुनोऽतिरिक्तस्योद्देश्यस्य देवदत्तस्य स्वरूपं चित्रादि

४ त्या ] भिन्नाभिन्नाभिमत-योºnayacakra-ms-bhā ॥
४ पा ] औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च । २ । १ । जीवभव्याभव्यत्वादीनि च २ । ७ ।(?") --तत्त्वार्थसूº । विस्तरार्थिभिरेतद्व्याख्या विलोकनीयाः ॥
१० *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२६ रिणा ] ºणामोभिमुº प्रº ॥
२८ म ] महाश्वेताº प्रº ॥
३० त ] तथा स्थाननियमाºnayacakra-ms-bhā ॥
७ स्योद्देश्य ] ºश्यस्य प्रº ॥

स्थाप्यवस्तु आपद्यते ततस्तद्वच्चित्रादेः स्थाप्यस्य स्वरूपं कस्माद् देवदत्तादिरुद्देश्योऽर्थो नापद्यते, तुल्ये स्थापयितृवशाद् व्यतिरिक्तार्थस्वरूपापत्तिहेतुत्वे स्थापनायाः ? **तथा इन्द्रतामक्षादिरापद्यते नाक्षतामिन्द्र इत्यत्र को विशेषहेतुः ?** इति सद्भावासद्भावस्थापनयोश्चोद्यमेतत् । अत्रोच्यते --**नन्वसावपीत्यादि** यावद् **न न युज्यते** । नैतदनिष्टम्, इष्यत एवैतत्, अतो न दोषः । यथा चित्र-लेप्यादि स्थाप्यमिन्द्रोद्देशेन इन्द्रो भवति तथेन्द्रोऽप्यक्षादिर्भवति । अपि च **सोऽपीन्द्रनाम- गोत्रकर्मस्थाप्य-** - /ms **त्वात् स्थापनानिक्षेपात्मकतां नातिवर्तते, पुरुषाद् नामकर्म नामकर्मणो देवदत्तादिता** इत्यादिग्रन्थेन भावितत्वात् । तस्मात् स्थापनानिक्षेपत्वे सत्येव जीवकर्मणोर्योगवक्रादिपरिणामवैचित्र्यं व्यक्ताकारवैश्वरूप्यममिहितचित्रलेप्यादिदृष्टान्तसाधर्म्यं नातिवर्तते । **अतो युज्यत एवैतत्, न न युज्यते,** द्विःप्रतिषेधस्य प्रकृत्यापत्तेः । एवं तावत् स्थापनया निक्षेपः इति तृतीयासमासे स्थापानानिक्षेपद्रव्यार्थनयव्यापिता दर्शिता । § 1737

**अथवेत्यादि** षष्ठीसमासेऽपि दर्शयितुमाह । **स्थापनाया निक्षेप** इति समासः कर्मणि षष्ठीं कृत्वा । किं कर्म ? स्थापनैव । का सा **स्थापना ? आकारः** । कोऽसावाकारः ? **वस्त्वात्मा** । स एव **निक्षिप्यते, क्व ? स्वात्मनि** । कः ? **घटादिः** । केन ? **कुम्भकारादि[भि]**रिति व्याख्यातः षष्ठीसमासार्थोऽपि वस्तुतः प्रस्तुते व्यापकत्वप्रदर्शनार्थमाह --**मुमुक्षुभिरात्मा स्वात्मनि निक्षिप्यते** इति वर्तते, कीदृश इति चेत्, कर्मामिश्रः स्थाप्यते स्वाकारेऽविविक्तः **सन्** विविक्तरूपत्वेन । तथेन्द्रोऽपी 600/mj

* * *

निन्द्रयोर्विवेकमजानतां पुंसां साक्षात् प्रदर्श्यते; यस्माद् न तदाकारविनाभूत इन्द्रो घट इव विकुक्षिविनाभूतः ।

अथवा स्थापनायां निक्षेपः स्थापनानिक्षेपः । न नाम्नि निक्षिप्यते, स्थापनायामेव निक्षिप्यते । यतो नामापि सहार्थेन तत्तन्त्वमेव । स्थानकरणजन्मानः शब्दाकारास्तद्गम्याश्चार्थाकाराः सर्वे स्थापनाविपरिणामविजृम्भितमात्रम् । तदभावे शब्दार्थयोरभावादाकाराग्रहणे च तयोरग्रहणात् ।

द्रव्यमपि स्थापनानिक्षेप एव आकारमयत्वाद् द्रव्यस्य । यथा श्रीपर्णीदारु द्रव्यमन्तर्लीनाकारं तस्य तस्याकारविशेषस्य ।

* * *

त्यादि अविविक्तविविक्तस्थानलक्षणस्थापनानिक्षेपात्मकत्वं जगतः प्रत्यक्षीक्रियते व्यापित्वाद् लक्षणस्यास्य, इन्द्रानिन्द्रयोर्विवेकमजानतां पुंसां स

१६ पु] दृश्यतां पृ॰ ५९८ पं॰ ४ ॥
१७ स्वात्मा] ॰त्म प्र॰ ॥
१८ कु] कुम्भकारादिनेति ? ॥
१९ प्र] ॰प्रस्तुतौ यपिकत्व॰nayacakra-ms-bhā । प्रस्तुतो यपिकत्व॰ nayacakra-ms-ya ॥
२० क] कर्ममिश्रः ? ॥
२ अ] अविविक्तस्थान॰nayacakra-ms-bhā ॥

इन्द्रः साक्षात् प्रदर्श्यते । कस्मात् ? **यस्माद् न तदाकारे**त्यादि, नयन-शब्दवर्णताद्याकारमन्तरेण इन्द्राभावात् तदाकारतत्त्व एवेन्द्र इत्युक्तत्वात् । - /ms किमिव ? **घट इव विकुक्षित्वादिविनाभूतः**, यथा घटो विकुक्षित्वाद्याकाराद्दृते नास्ति तदात्मक एवास्ति तथा इन्द्रोऽपि स्वाकारविनाभूतो नास्ति तदात्मैवास्तीति । § 1738

**अथवा स्थापनायामि**त्यादि सप्तमीसमासो वा । **स्थापनायां निक्षेपो स्थापनानिक्षेप** इति एवकारार्थो द्रष्टव्यः, तद् व्याचष्टे **--न नाम्नि** न शब्दे **निक्षिप्यते,** किं तर्हि ? स्थापनायामेव निक्षिप्यते । कस्मादिति चेत्, अत आह **--यतो नामापि सहार्थेन तत्तन्त्रमेव,** आकारतन्त्र एव शब्दोऽर्थश्च । तद् भावयति **--स्थानकरणे**त्यादि, अकारादयो वर्णाः प्रतिनियतकण्ठादिस्थानाकारजन्मानः सङ्गत्या नैरन्तर्येण उच्चरन्तः सुप्तिङ्गादिविशेषाकाराः तद्रम्याश्च नामाख्यातवाच्यद्रव्यक्रियार्थाकाराः सर्वेऽन्तर्भूताकारतत्त्वस्थापनाविपरिणामविजृम्भितमात्रम् । किं कारणम् ? **तदभाव** इत्यादि, आकाराभावे **शब्दार्थयोरभावादाकाराग्रहणे च तयोरग्रहणात् ।** § 1739

एवं तावन्नामनिक्षेपः स्थापनानिक्षेपान्तर्भूत उक्तः । द्रव्यनिक्षेपोऽपि स्थापनान्तर्भूत इति ब्रूमः, तद्यथा **--द्रव्यमपी**त्यादि, द्रव्यनिक्षेपोऽपि **स्थापनानिक्षेप एव आकारमयत्वाद् द्रव्यस्य, यथा श्रीपर्णीदारु द्रव्यं** कारणमन्त-**र्लीनाकारं तस्य तस्याकारविशेषस्य** तदव्यक्तसामान्यव्यक्तेस्तथाऽऽकारसम्परिग्रहमात्रमिति स्थापनैव द्रव्यमपि । एवं नामद्रव्यनिक्षेपौ स्थापनानिक्षेप एव । § 1740

601/mj

भावोऽपि स्थापनैव । क्रियोपयोगरूपादिनीलादिशिवकादिरूपभेदो भाव आकार एव । § 1741

अक्षाद्यसद्भावस्थापनायामपि रूपान्तरव्यावर्तनेन रूपान्तराकरणादभिप्रेताकारवृत्तो नामबुद्ध्यध्यारोपस्तत्कर्मणः द्रव्यार्थ-

---

३ व] °वर्मता°nayacakra-ms-bhā । °वर्त्मता° nayacakra-ms-ya ॥
१० ए] एवकारार्थेnayacakra-ms-bhā ॥
११ स्था] अष्टौ **स्थानानि** वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३ ॥...संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ १० ॥ स्वराणामुष्मणां चैव विवृतं **करणं** स्मृतम् ।--nayacakra-ms-pā **शिक्षा** ॥ योऽयं शब्दः... ...स्थानकरणाद्यनुगृहीतो विवर्तते । **--वाक्यप° स्ववृत्ति** १ । ४७ ॥
११ ण्ठा] °दिनास्था°nayacakra-ms-ya ॥
१२ दिस्था] **°स्थानकरणजन्मानः** इति पाठोऽप्यत्र समीचीनो भाति ॥
१४ त] मुद्रम्या°nayacakra-ms-bhā । पुद्रम्या° nayacakra-ms-ya ॥
१९ च] **चेतयो°** प्र° ॥
५ व्य] °व्यक्षेस्तथnayacakra-ms-bhā । °व्यक्षेपस्तथा nayacakra-ms-ya ॥

स्थापनेन्द्रस्थूणावत् । एतत्तत्त्वाध्यवसायादेव लिङ्गसमाचारदेवताप्रतिमानमस्करणादि लोके । § 1742

अत्रापि विशेषाकार एव परमार्थः । तस्यैकभवनस्य स्थापनानिक्षेपे कार्ये § 1743

**भावोऽपीत्यादि** । भावनिक्षेपोऽपि **स्थापनैव** आगमतो नो+आगमतश्च, आगमतस्तत्प्राभृतज्ञ उपयुक्त इत्युपयुक्तो भावः पारिणामिकः, क्षायोपशमिकश्चेष्टा जीवस्य वीर्यान्तरायक्षयोपशमजो भावः, पुद्गलानां तु रूपादिर्युग- - /ms
पद्भावी पारिणामिको भावो नीलादिर्वा तद्विशेषः शिवकादिरयुगपद्भावी वा इत्येवमादिरूपा भेदा यस्य सोऽयं **क्रियोपयोगरूपादिनीलादिशिवकादिरूपभेदो भावः** । **स आकार एव,** आभवनमेव पूर्वोक्तविधिना । § 1744

एवं निक्षेपत्रयं स्थापनानिक्षेप एव सङ्क्षेपतो रूपान्तरव्यावर्तनेन रूपान्तराकरणात्मकस्थापनास्वरूपानतिक्रमात् । एतल्लक्षणानुगृहीतत्वादसद्भावस्थापनाऽव्यक्ताकारा सती स्थापनेत्यापादयितुकामः पराशङ्कानिवृत्त्यर्थमाह --**अक्षाद्यसद्भावेत्यादि** । अत्रापि रूपान्तरं चेद् व्यावर्त्य रूपान्तरं नाऽऽकुर्यात् रूपान्तरस्य इन्द्रादेरक्षनिक्षेपप्रतिपाद्यस्यावरोधः प्रतिपत्तिर्न स्यात्, भवति तु । तस्मादविरुद्धोऽ**भिप्रेताकारे वृत्तो नाम्ना** शब्देन इन्द्रः इति **बुद्ध्या वाध्यारोपः तत्कर्मणः** अक्षनिक्षेपस्थापनाकर्मणः, किमिव ? **द्रव्यार्थस्थापनेन्द्रस्थूणावत्,** यथा रूपान्तरव्यावृत्त्या रूपान्तररा ?करणाद् द्रव्यार्थस्थापनेन्द्रार्था स्थूणा इन्द्रस्तथाऽक्षादिरिति । § 1745

**एतत्तत्त्वाध्यवसायादेव लिङ्ग-समाचार-देवताप्रतिमानमस्करणादि लोके,** नैतदुपपत्त्या प्रतिपाद्यं स्थापनैव सर्वम् इति, लोके रूढत्वात् । तथाहि--पाषण्डिनां लिङ्गग्रहणानि यथागममाकारविशेषप्रसिद्धेस्तत्सहचारिणो नियमा **अर्हद्रुद्रेन्द्रबुद्धा**दिदेवताप्रतिमास्थापनानि तन्नमस्कारजपस्तुतिबलिमाल्यादिभिरभ्यर्चनानि च प्रतिविशिष्टाकारनिबन्धनानि दृष्टानि, न हि दृष्टाद् गरिष्ठं प्रमाणमस्तीत्येवं स्थापनाद्रव्यार्थनयमतमुक्तम् । § 1746 - /ms

---

६ तो] **नोगमश्च**nayacakra-ms-ya । **नागमश्च** nayacakra-ms-bhā । **ऽनागमतश्च** इत्यपि पाठोऽत्र भवेत् ॥
७ आ] भावो द्विविधो वेदितव्यः पूर्ववदागमनो+आगमभेदात् । तत्प्राभृतविषयोपयोगाविष्ट आत्मा आगमः । जीवादिप्राभृतविषयेणोपयोगेनाविष्ट आत्मा आगमतो भावजीवो भावसम्यग्दर्शनमिति चोच्यते ।--तत्त्वार्थराजवार्तिक° १ । ५ ॥
१२ का] **°दियुगप** प्र° ॥
१३ रू] स्थापनाया आकारस्वरूपत्वाद् रूपान्तरव्यावर्तनेन रूपान्तरस्य **आकरणात्मकं** यत् स्थापनास्वरूपं तदनतिक्रमादित्याशयो भाति ॥
१३ क्ताका] **°कारसती** nayacakra-ms-ya ॥
१५ नेत्या] **°त्यादायितुकामः** प्र° ॥
१५ ना] **नाकुर्यात्** प्र° । दृश्यतां पृ° ६०२ पं° १४ ॥
१६ स्याव] **°वबोधः** इति सम्यग् भाति ॥
१६ भ] **भवि तु** प्र° ॥
१८ भिप्रेता] दृश्यतां पृ° ६०२ पं° २० ॥
२५ रू] **रूपान्तरकरकरणाद्**nayacakra-ms-bhā । **रूपान्तकरणाद्** nayacakra-ms-ya । दृश्यतां पृ° ६०१ पं° १२, १४ ॥
२५ म] **°त्येव** प्र° ॥

**अत्रापीत्यादि** । अस्यापि नयस्योत्तरमिदम् । आकारोऽपि द्विविधः--सामान्याकारो विशेषाकारश्च । तत्र विशेषाकारः स्वरूपमेव परमार्थः, न सामान्याकारः । तस्य परमार्थस्य एकभवनस्य स्थापनानिक्षेपे कार्ये सामान्याकारद्रव्यार्थ उपसर्जनं प्रधानस्य परमार्थस्य सद्भावस्याऽसद्भाव
602/mj उपकारित्वात्, पाण्यङ्गुलि

* * *

सामान्याकारद्रव्यार्थ उपसर्जनम् । परमार्थतस्तु अविकल्प्यतत्त्वत्वाद् न पाण्यादीनि स्वरूपतः । कुतस्तेषां स्थापना द्रव्यतः ?

क्षेत्रतो युगपद्भाविपर्यायेषु विशेषव्यतिरेकेणार्थाभावाद् नास्ति स्थापना । कालतो बालाद्ययुगपद्भाविपर्यायेष्वपि विशेषव्यतिरेकेणार्थाभावात् कथं स्थापना क्रियतां कस्य वा ? असद्भावस्थापनायाश्च [द्रव्यार्थत्वात् सद्भावस्थापनायाश्च पर्यायार्थत्वात् द्रव्यार्थप्राधान्ये] इतरनिराकरणम् । योऽपि नामबुद्ध्यध्यारोप उक्तः सोऽपि नामद्रव्यार्थपर्यायार्थयोर्विषयः । स च विशेषभवनमेव । द्रव्यद्रव्यार्थस्तु विध्यादिभङ्गेषु व्याख्यातो दूषितः ।

इतस्तु भाव[युक्तवाची शब्दः, नामस्थापनाद्रव्यवाच्येष्टाकरणात्] । स्थितमेवम्... ... ...युगपत्तत्त्वम् ।

* * *

त्वक्-पर्व-सन्धि-वर्ण-रेखा-ऽवयव-परमाणु-रूपादिभेदेष्विव प्रत्येकं विशेषतत्त्वभवनस्य इतरदुपसर्जनम् । परमार्थतस्तु तदत्यन्तविशेषे तत्त्वमविकल्प्यमस्ति, न तानि पाण्यादीनि स्वरूपतः, कुतस्तेषां स्थापना द्रव्यतः ? तथा **क्षेत्रतो युगपद्भाविपर्यायेषु विशेषव्यतिरेकेणार्थाभावाद् नास्ति स्थापना,** आकार आभवनमाकार्ये आकर्तरि वार्थे नास्ति स्थापनाया आकारत्वात् । कालतोऽप्ययुगपद्भाविपर्यायेषु बालादिष्वेकमेकं विशेषभवनं परमार्थः, तद् भावयति --**बालाद्ययुगपद्भावी**त्यादि यावत् **कथं स्थापना क्रियतां कस्य वा ?** इति गतार्थम् । § 1747

किञ्चान्यत्, सद्भावस्थापनायाः पर्यायार्थत्वादसद्भावस्थापनाया द्रव्यार्थमात्रत्वात् ते द्वे प्ररूपयता त्वया पर्यायार्थप्राधान्यावलम्बि[त्व]मित्थं निराकृतम्, द्रव्यार्थप्राधान्ये वा पर्याया निराकृता **अक्षाद्यसद्भावे**त्यादिना ग्रन्थेनेति तद् दर्शयति --**असद्भावस्थापनायाश्चे**त्यादि यावदि**तरनिराकरणम्** । § 1748

**योऽपि नामबुद्ध्यध्यारोप उक्तः अभिप्रेताकारवृत्त** इत्यादि **सोऽपि** न-
- /ms यान्तरयो**र्नामद्रव्यार्थ[पर्यायार्थ]योर्विषयः** । तत्र नामद्रव्यार्थविषयो नामा-

---

५ अ] अत्रापिnayacakra-ms-bhā ॥
१८ प] ॰पर्थ॰ प्र॰ ॥
१९ त] तदंत्यविशेषेnayacakra-ms-ya ॥
२२ द्र] द्रव्य प्र॰ ॥
२६ बा] बालादिष्टेकमेकविशेषभवनंnayacakra-ms-ya । बालादिष्टेकमेकमेकविशेषभवनं nayacakra-ms-bhā । बालादिष्वेकमेव विशेषभवनं इत्यपि पाठः स्यादत्र ॥
२७ ते] त द्वेnayacakra-ms-bhā । त द्वे nayacakra-ms-ya ॥
२९ अ] पृ॰ ६०१ पं॰ ३ ॥
३० बुद्ध] ॰बुद्ध्याध्या॰ प्र॰ । दृश्यतां पृ॰ ६०१ पं॰ १६ ॥

ध्यारोपः, पर्यायार्थविषयो बुद्ध्यध्यारोपः **--आगमतो जाण+ए उव+उत्ते भावसामा+इयं** ति । **स च विशेषभवनमेव । द्रव्यद्रव्यार्थस्त्वि**त्यादि अतिक्रान्तेषु विध्यादिभङ्गेषु द्रव्यद्रव्यार्थो **व्याख्यातो दूषितः** पुनर्न वाच्यः । § 1749

**इतस्तु भावे**त्यादि, अस्मिंश्च शब्दनये उभयनियमभङ्गलक्षणे विशेष एवैको भवतीति शब्दार्थव्याख्यानेन द्रव्यद्रव्यार्थवाच्यं नामस्थापनाद्रव्यार्थवाच्यं चेष्टं न करोतीति भावितमेव । अतो नयस्वरूपमुपनयति --***स्थित-मेव**मित्यादि यावद् **युगपत्तत्त्व**मिति । § 1750
603/mj

क्रियाफलाविसंवादोऽपि च विशेषैकभवनादेव । तद्युक्तं नामादिव्यवहारमङ्गीकृत्य क्रिया प्रवर्तते । नाग्निना शब्देन पच्यते न च [चित्रलिखितेन, तयोर्व्यवहाराक्षमत्वात्, किं तर्हि ? तथावृत्तिभावेनैव । मानमपि] न यथा मानप्रस्थकेन तथा तन्नाम्ना । § 1751

नामप्रत्ययनामकर्मतत्त्वात् तेनैवेति चेत्, न, चेतनभेद[नियतपृथिव्यादितत्त्वाभावे योगवक्रतादिविपरिणामाप्रवृत्तेः फलाभावाद्] नामकर्माद्यनुपपत्तेः । न च चित्रलिखिताग्निप्रस्थकाभ्यां दहनमाने तयोर्व्यवहाराक्षमत्वात् । § 1752

द्रव्यमपि च भव्यं तथा तथा भावे एव घटते, त्वन्मते द्रव्यभवने तु न । तथा प्रस्फुटम् अग्निर्द्रव्यम् इति पुंनपुंसकयोर्भावभेदे सामानाधिकरण्यं दृष्टम् । § 1753

एतस्य दर्शनस्य लोकसंव्यवहारव्यापितां दर्शयति **--क्रिया-फलाविसंवादोऽपि चे**त्यादि । ऐहिकमोदनादि पचिक्रियादेः स्थालीकाष्ठादिसाधनायाः फलम्, आमुष्मिकं स्वर्गादि दानादेरोदनादिसाधनायाः फलम्, न तत्र काष्ठस्थाल्यादीनि नाममात्राणि न चित्रलिखितानि वा, किन्तु तथाभूतानि पचेभागधिचेर्भागधेयानि तान्येव विशेषैकभवनानि । तद्युक्तं नाम-

---

३ आ] से किं तं भावसामा+इ+ए ? २ दुविहे पं°, तं°--आगम+ओ अ नो+आगम+ओ अ । से किं तं **आगम+ओ भावसामा+इ+ए ? जाण+ए उव+उत्ते** । इति **अनुयोगद्वारसूत्रे** १५० ॥
५ अतिक्रान्तेषु] **विबुद्ध्यादि°** प्र° ॥
६ श] **शब्देनयेनुभयमभङ्गलक्षणे** प्र° ॥
७ द्र] **द्रव्यंद्रव्यार्थ°** प्र° ॥
८ *] **स्थितमेतमित्यादि**nayacakra-ms-ya । **स्थितमित्यादि** nayacakra-ms-bhā ॥
१८ या] **यावद्यगत्तत्वमित्येव तस्य**nayacakra-ms-ya ॥
१ त] nayacakra-ms-bhā प्रतिपाठानुसारेण **तथेह** इत्यपि पाठोऽत्र स्यात् ॥

चित्रकाष्ठादिव्यवहारमङ्गीकृत्य भावभवनं क्रिया प्रवर्तते । **नाग्निना शब्देन पच्यते, न** **चेत्यादि** भावितार्थं याव**न्न यथा मानप्रस्थकेन तथा तन्नाम्ने**ति ।

§ 1754

**नामप्रत्ययनामकर्मतत्त्वात् तेनैवेति चेत्** । स्यान्मतम्--प्रागुक्तचैतन्यनामप्रत्ययायत्तं नामकर्म, तत्तत्त्वानि काष्ठादीनि, अतस्तेनैव नाम्ना लोके व्यवहार इति । एतच्च **न, चेतनभेदे**त्यादि यावद् **नामकर्माद्यनुपपत्ते**रिति, अत्रापि
- /ms चेतनभेदेषु यानि पृथिव्यादितत्त्वानि नियतानि तथाभूतियोग्ये विशेषात्मनि तेषामभावे तिर्यग्गतिनिर्वर्तनीययोगवक्रतादिविपरिणामाप्रवृत्तेः फलाभावः, तदभावात् कुतो नामकर्म ? कुतः काष्ठादिवनस्पतिपृथिव्यग्न्यादितिर्यक्शरीरत्वादीनि ? अतो विशेषैकभवनमेव क्रिया-फलादिव्यवहारहेतुः न नामशब्द इति सुष्ठूक्तम् । तथा चित्रकर्मेत्यत आह **--न च चित्रलिखिताग्नि-प्रस्थकाभ्यां दहन-माने तयोर्व्यवहाराक्षमत्वात्**, तथावृत्तिभावस्यैव व्यवहारक्षमत्वात् । § 1755

**द्रव्यमपि च भव्यं तथा तथेति** । **द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४, भवति इति भव्यं तेन तेन प्रकारेण लोकव्यवहारक्षमेण भवनाद् भाव एव घटते, त्वन्मते द्रव्यभवने तु न, अग्निप्रस्थकादि सर्वमेकभाव एव भूतं द्रव्यार्थाभेदात् को द्रव्यशब्देनात्यन्तविरुद्धार्थेन भेदवाचिना तथा तथा भवनार्थेन सम्बन्धः ? § 1756

अस्मिन्नर्थे निदर्शनमाह **--तथा प्रस्फुट**मित्यादि । **अग्निर्द्रव्यम् इति पुंनपुंसकयोर्भावभेदे सामानाधिकरण्यं दृष्टम्**, नान्यथा तत् । स्यान्मतम्--
604/mj द्रव्यशब्दस्य दारुसमानाधिकरणत्वाद् नपुंसकं

* * *

दारुप्रस्थकत्वाद्वा समानाधिकरणीकरणाद् दारुण्यपि स नावतिष्ठेत । तथाभूत... ... ...दहनोऽग्निः ।

एवं प्रतिपदार्थं भावनिक्षेपः शब्दनयस्यास्योक्तः, न यथर्जुसूत्र[म्] । अत्र च शब्दार्थोऽप्यसत्योपाधिसत्यः । यथोक्तम्--

---

२ का] काष्ठानिंदिव्य॰nayacakra-ms-bhā ॥
६ या] यावत्तयथा प्र॰ ॥
७ प] ॰पत्तिरितिnayacakra-ms-bhā ॥
७ अत्रापि] चेतनाभेदेषु प्र॰ ॥
१४ रिणा] ॰णातिप्रवृत्तेः प्र॰ ॥
१५ त] तथेहितिnayacakra-ms-bhā । तथेहेति ? ॥
१७ भ] भव्यं भव्यं प्र॰ ॥
२१ त] तथा तथा भावनार्थेनnayacakra-ms-ya । तथा भावनार्थेन nayacakra-ms-bhā ॥

असत्योपाधि यत् सत्यं तद्वा शब्दनिबन्धनम् वाक्यप॰ २ । १२८ ।§ 1758

*विशेषा उपाधयः [कुण्डलादयो विकारा असत्या यस्य सत्यस्य सर्वभेदानुयायिनः सुवर्णादेः सामान्यस्य] तदभिधीयते विशेषैरिव सामान्यम् । सते हितं

* * *

प्रस्थक इति; एतच्चायुक्तम्, यस्माद् **दारुप्रस्थकत्वाद्वा समानाधिकरणीकरणाद् दारुण्यपि स नावतिष्ठेते**त्यतिप्रसङ्गदोषः । कथम् ? यथा द्रव्यत्वाद् दारुप्रस्थकत्वाभेदस्तथा द्रव्यत्वात् पृथिव्युदकाद्यभेद इति दोष एव । स्वमते तु दोषाभावो गुणोत्कर्षश्चेत्यत आह **--तथाभूते**त्यादि गतार्थं यावद् **दहनोऽग्निः** । § 1759

उक्तार्थनिगमनम् **--एवं प्रतिपदार्थं** सर्वपदार्थेषु **भावनिक्षेपः शब्दनयस्यास्योक्तः, न यथर्जुसूत्र[म्],** नामादिचतुर्विधनिक्षेपाभिलाषिणो यथा - /ms ऋजुसूत्रनयस्य वर्तमानपर्यायग्राहिणो मतं तथा न भवतीति शब्दमतं दर्शितम् ॥ § 1760

**अत्र** चेत्यादि । **शब्दार्थोऽप्यसत्योपाधिसत्यः,** नानन्तरनयनिर्दिष्टोऽन्यापोहः । **यथोक्त**मिति शिष्टान्तरमतं च दर्शयति **--असत्योपाधि यत् सत्यं तद्वा शब्दनिबन्धन**मिति । तद्व्याचष्टे **--विशेषा उपाधय** इत्यादि तदीय एव ग्रन्थो यावत् **तदभिधीयत** इति । सुवर्णप्रकृत्युपमर्दे कुण्डलविकारस्य विशेषस्यासत्यस्य सामान्यवादिमते सत्यं प्रकृतिः सामान्यं प्रतिपाद्यम् । तथा पुरुषादिसामान्यस्य प्रतिपादका विशेषा उपाधयस्ते ते

---

२ अ] अन्ये त्वाहुः--यदसत्योपाधि सत्यं स शब्दार्थ इति । तत्र शब्दार्थत्वेनासत्या उपाधयो विशेषा वलयाङ्गुलीयकादयो यस्य सत्यस्य सर्वभेदानुयायिनः सुवर्णादेः सामान्यात्मनः तत् सत्यमसत्योपाधि । शब्दनिबन्धनमिति शब्दप्रवृत्तिनिमित्तमभिधेयमित्यर्थः ।--**तत्त्वसंग्रहपञ्जिका** पृ॰ २८४ । **सन्मतिवृत्ति** पृ॰ १८० ।
६ *] विशेषा उपाधयः [कुण्डलादयो विकारा असत्याः, सत्यं सर्वभेदानुयायि सुवर्णादि सामान्यम्] तदभिधीयते विशेषैरिव सामान्यम् । ईदृशमपि मूलमत्र सम्भवेत् ॥
७ स] **सामाना॰**nayacakra-ms-bhā । **सामानाधिकरण्यकरणाद्** ? ॥
८ स] **समानावतिष्ठेते॰**nayacakra-ms-bhā । **समानावतिष्ठते॰** nayacakra-ms-ya । (?()समानोऽवतिष्ठेते ? ॥
१२ पृथिव्युद] **॰दक्याद्यभेद**nayacakra-ms-bhā ॥
१२ न] **॰नयस्योक्तः**nayacakra-ms-bhā ॥
१८ म] **॰मत्तं दर्शयति**nayacakra-ms-bhā ॥
२० त] तुलना--सत्यं वस्तु तदाकारैरसत्यैरवधार्यते । असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥ अध्रुवेण निमित्तेन देवदत्तगृहं यथा । गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥ सुवर्णादि यथा भिन्नं स्वैराकारैरपायिभिः । रुचकाद्यभिधानानां शुद्धमेवैति वाच्यताम् ॥ **--वाक्यप॰** ३ । २ । २--४ । आसां कारिकाणां विस्तरार्थो वाक्यपदीयस्य हेलाराजरचितवृत्तितोऽवगन्तव्यः ॥
१ उ] **उपाध्यायास्थते**nayacakra-ms-ya ॥

प्रकृतिपुरुषेश्वराः स्वागमेषु । **विशेषैरिव सामान्य**मिति प्रतिपादनसाधर्म्येण दृष्टान्तः । तत्र शब्द उपनिबद्धो विकारप्रकृतित्ववदिति । तत् संहृत्याऽऽचार्यः
605/mj **सते हितं सत्यम्** इति

* * *

सत्यम्, कर्मणि चतुर्थी । भवद्व्यापि रूपादिशिवकादिपर्यायवृत्तितत्त्वं सत्यम् । असत्याः पुनरुपाधयोऽस्य द्रव्यं मृद् घट इत्यादिप्रवृत्तयस्तदाभाः । एवमेव च... ... आनीयताम् । सत्यस्य... ...तदाख्यानमुपसर्जनम्, गृहोपलक्षणकाकवत् । तथा जातिशब्दो विशेषार्थः । तद्वचनेनोक्तमपि विशेषवस्तु उक्तवत् । सापि चोक्तवत्, वाग्विसर्गकालोपलक्षणनक्षत्रदर्शनश्रुतिवत् । अन्यथा तच्छब्दार्थतायां

* * *

तद्धितार्थं व्युत्पाद्य विभक्तिमाह **--कर्मणि चतुर्थी**ति षष्ठ्यर्थे, **चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः** पा° २ । ३ । ७३ इति विहितत्वात् हिनोतेर्दधातेर्वा धातोः कर्मणि द्वितीयस्यां प्राप्तायां षष्ठीचतुर्थ्यौ विभाष्येते ।
§ 1761

अधुना स्वमतं तेन समीकुर्वन् भावयति **--भवद्व्यापी**त्यादि । **रूपादिशिवकादिपर्याया वृत्तिरस्य** तत्त्वस्य तदविकल्पं शिबिकावाहकयानेनेवेश्वर**स्तत्पर्यायवृत्तितत्त्वं याति** सततं वर्तते, देशभिन्नं रूपादि कालभिन्नं शिवकादि **सत्यम्** । **असत्याः पुनरुपाधयोऽस्य** लिङ्गाद्युपाध्युपायेन निदर्शनम् **--द्रव्यं मृद् घटः इत्यादिप्रवृत्तयस्तदाभाः** रूपादिशिवकादिपर्याय-
- /ms तत्त्वाभासाः । तद्वस्तुव्यापिवदाभासते सामान्यम्, तद्विशेषः परमार्थः सन् ।
§ 1762

---

२ कृतिपुरुषेश्व ] °श्वराप्वागमेषुnayacakra-ms-bhā । °श्वराविष्वागमेषु nayacakra-ms-ya । °श्वरादयः स्वागमेषु ? °श्वरा आगमेषु ? ‖
२ त ] तत् शब्दnayacakra-ms-bhā ‖
३ प्र ] °प्रकृतित्वदवदिति प्र° । °प्रकृतित्वादिति ? ‖
१२ च ] एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी । आशिषि आयुष्यं चिरजीवितं कृष्णाय कृष्णस्य वा भूयात् । एवं मद्रं, भद्रं, कुशलं निरामयं, सुखं शम्, अर्थः प्रयोजनं, हितं पथ्यं वा भूयात् । आशिषि किम् ? देवदत्तस्यायुष्यमस्ति । व्याख्यानात् सर्वत्रार्थग्रहणम् ।--nayacakra-ms-pā सिद्धान्तकौमुदी ‖
१५ म ] °मद्रकुशल°nayacakra-ms-ya ‖
१७ भ ] सचद्व्यापीnayacakra-ms-bhā ‖
१९ या ] °यानेनेतेश्वर° nayacakra-ms-ya । °याननेतिश्वर° nayacakra-ms-bhā । शिबिकावाहकयानेन इव ईश्वरः इति पदच्छेदः ‖
२० द्र ] द्रव्य मृद् प्र° ‖
२० स्तु ] °व्यादिवदा° nayacakra-ms-ya । °च्यादिवदा° nayacakra-ms-bhā ‖
२० सा ] सामान्यतद्विशेषःnayacakra-ms-ya । सामान्यद्विशेषः nayacakra-ms-bhā ‖
१ प ] परमार्थसन् ? ‖

**एवमेव चे**त्यादि एतद्दर्शनसंवादीदमिति ज्ञापकमेतेन लक्षणेन सङ्गृहीतं यावदा**नीयता**मिति । तद्व्याख्या --**सत्यस्ये**त्यादि यावत् **तदाख्यानमुपसर्ज-नमि**ति गतार्थम् । दृष्टान्तः --**गृहोपलक्षणकाकव**दिति । कतरद् देवदत्तस्य गृहम् ? इति प्रश्ने प्रतिवचनम्--यत्रासौ काकः इति काकशब्दो गृहार्थ-प्रतिपादनार्थत्वात् काकार्थ एव सन् गृहार्थ इत्युच्यते **तथा** उदितस्वार्थवत् **जातिशब्दो विशेषार्थ** इति । **तद्वचनेन** तदर्थत्वप्रकारेण वचनेन **उक्तमपि विशेषवस्तु** उक्तेन तु**ल्यमुक्तवत्** न परमार्थत उक्तमेव तद् **गम्यते** [अत्र कश्चित् पाठः खण्डितोऽशुद्धो वा भाति ॥इ ?]त्यादि जातिगतानां सत्ता-द्र-व्य-पृथिवी-मृद्-घट-कुण्ड-कुण्डिकादिलिङ्गसङ्ख्यादीनां संवादिनां विसंवादिनां च या सामानाधिकरण्यगतिस्तया निरूपितं यादृच्छिकमर्थवत्त्वमनर्थिकाया एव सत्यास्तस्याः । **सापि चोक्तव**दिति, तस्या अपि जातेरभिहितन्यायेन परार्थत्वादर्थवत्त्वम्, अनर्थकत्वं स्वार्थेन । किमिव ? **वाग्विसर्गकालोपल-क्षणनक्षत्रदर्शनश्रुतिवत्,** यथा **नक्षत्रं दृष्ट्वा वाचो विसृजन्ति** इति नक्षत्रद-र्शनमत्रातन्त्रम्, नक्षत्रदर्शनयोग्यः कालोऽत्र तदर्थेन पश्यतिना उक्तवदुक्तः, परमार्थेन तु पश्यतिः स्वार्थे एव वर्तते तथा जातिशब्दो विशेषार्थ इति । **अन्यथा** मुख्यन्यायेन तच्छब्दार्थताया 606/mj

* * *

पुनरुक्तदोषाद् विशेषशब्दाप्रयोग एव स्यात् ।

अत एव नियमार्था पुनः पुनः श्रुतिः, तदर्थत्वात् पूर्वश्रुतेः । नियमः स्वार्थव्यवस्थापनम् । सञ्चारि चैतत्, द्रव्यनय... ... ...। *युगपदयुगपत्... ... ...। यावच्च ... ... ...तावत् सर्वमनेन शब्दनयशब्दार्थेन व्याप्तम् । एवमेव च विशेषप्रधानशब्दार्थव्यवस्थापनार्थमिदमपि--

न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः ।
वाचको नियमार्थोक्तेर्जातिमद्वदपोहवान् ॥§ 1765

---

५ न] °संवादितिदमिति प्र° ॥
१० स्वा]
°स्वार्थवत°nayacakra-ms-bhā ।
°स्यार्थवत° nayacakra-ms-ya ।
°स्वार्थगतजातिशब्दो ? ॥
११ यादृच्छिक] °ककर्थबंधनम-न°nayacakra-ms-bhā ।
°किकिर्थबंधमन° nayacakra-ms-ya ॥
१३ त्यास्त] °स्तस्या प्र° ॥
१६ न] दृश्यतां पृ° १३५ पं° १३, टिपृ° ५८ पं° २०--२३ ॥
२३ *] युगपदयुगपत्तत्वस्य विशेषस्य प्रधानस्य उपसर्जनमात्रप्रवृत्तिरसत्योपाधिरर्थः ईदृशमपि मूलमत्र स्यात् ॥
५ न] न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः । वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः ॥प्र° समु° ५ । २ इति दिङ्नागेन यदुक्तं दूषणं तद् दिङ्नागस्याप्यपोहपक्षे समानमेवेति प्रतिपादनार्थमिदं प्रतिवचनं मल्लवादिनोक्तम् ॥

* * *

मित्यादि, **पुनरुक्तदोषात्** सामान्यशब्देनोक्तत्वाद् **विशेषशब्दाप्रयोग एव स्यात्, उक्तार्थानामप्रयोगः** पा॰ म॰ भा॰ २ । १ । १ इति न्यायात् । § 1766

- /ms **अत एवेत्यादि** । सत्यवृत्त्या नोक्तो विशेषः, उपाधिवृत्त्योक्तोऽप्यनुक्त एव । **नियमार्था पुनः पुनः श्रुति**र्विवक्षितार्था, कस्मात् ? **तदर्थत्वाद्** विशेषर्थत्वाद् विशेषणार्थत्वात् **पूर्वश्रुतेः** सामान्यश्रुतेः ब्राह्मणादेः । तस्माच्छ्रवणकालक्रमेण पुनः श्रुतिरिति विशेषशब्द उच्यते । कोऽसौ नियमो नाम ? इत्युच्यते --**नियमः स्वार्थव्यवस्थापनं** विवक्षितेऽर्थेऽवधारणम् । **सञ्चारि चैत**दिति, न पुनस्तत् सामान्यशब्देन उक्तवदुक्तं वस्तु व्यवस्थितमेव, किं तर्हि ? **सञ्चारि** विशेषपरम्परया । तत्र कारणं सञ्चरणे **द्रव्यनये**त्यादि, एवंसमवस्थस्यार्थस्य सत्त्वात् । § 1767

किं पुनः सत्यमिति चेत्, **युगपदयुगपदि**त्यादि । तस्य विशेषस्य प्रधानस्य प्रत्याय्यस्य प्रत्यायकत्वेन उपसर्जनमात्रप्रवृत्तिरसत्योपाधिरर्थः, तद्दर्शयति --**यावच्चे**त्यादि गतार्थम् **तावत् सर्वमनेन शब्दनयशब्दार्थेन व्याप्त**मिति । § 1768

**एवमेव चे**त्यादि एतन्न्याये व्याप्तिप्रदर्शनद्वारेण दर्शनान्तरं निराचिकीर्षुराह । **विशेषप्रधानशब्दार्थव्यवस्थापनार्थमिदमपी**ति तद्विचारवस्तुसूत्रम्-- § 1769

न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः ।

---

१३ र्विव] ॰**वक्षतार्था** प्र॰ ॥
१४ यु] **युगपदित्यादि**nayacakra-ms-ya ॥
१५ स्य] **प्रत्ययोस्य**nayacakra-ms-ya ॥
१९ नेन] **शब्देनय॰** प्र॰ ॥
३ न] इत आरभ्य अन्यापोहः शब्दार्थः इति बौद्धाचार्य**दिङ्नाग**स्य मतं निराक्रियते । तत्रेदमवधेयम् --**दिङ्नागे**नापोहवादोऽनेकेषु ग्रन्थेषु सिद्धान्तितः । तत्र दिङ्नागस्य कं ग्रन्थं लक्ष्यीकृत्य उभयनियमनयेनापोहवादोऽत्र प्रतिविहित इति निश्चेतुं न पार्यते तथापि पृ॰ ४१७--१ इत्यत्र **सामान्यपरीक्षाकार**लिखित एवात्रापि इति वक्ष्यमाणोल्लेखदर्शनात् **सामान्यपरीक्षा**न्तर्गतोऽपोहवादोप्यऽत्राभिप्रेतः स्यादिति सम्भाव्यते । दिङ्नागेन बहवो ग्रन्थाः संस्कृतभाषायां रचिताः, ते च प्रायः सर्वेऽपि नष्टाः । स[[दृश्यतां टिपृ॰ ९५ ॥]]र्वेषां स्वग्रन्थानां विषयसंग्रहाय यः **प्रमाणसमुच्चयो** वृत्त्या सह **दिङ्नागेन** रचितस्तत्र पञ्चमेऽपोहपरिच्छेदे विस्तरेणापोहनिरूपणं वर्तते । अतः सवृत्तिकस्य प्रमाणसमुच्चयस्य **विशालामलवतीटीकायाश्च** भोटभाषानुवादान् मुहुः पर्यालोच्यापोहपरिच्छेदादत्यन्तमुपयोगी अंशो भोटभाषानुवादतः संस्कृतभाषायां परिवर्त्य इहोपन्यस्यते इति नयचक्रेऽपोहचचार्यां सर्वत्र यथास्थानं सोऽनुसन्धेयः । --- [प्रमाणसमुच्चयान्तर्गतोऽपोहवादः] --- उक्तं प्रमाणद्वयम् । केचिच्छाब्दमपि प्रमाणान्तरं मन्यन्ते । तत्र-- न प्रमाणान्तरं शाब्दमनुमानात् तथाहि तत् । कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते ॥ १ ॥ --- यस्मिन् विषये शब्दः प्रयुज्यते तस्य येनाङ्गेनाविनाभावितया सम्बद्धस्त[[दृश्यतां **तत्त्वसंग्रहपञ्जिका॰** पृ॰ ४४१ ॥]]त् कृतकत्वादिवदर्थान्तरव्यवच्छेदेन द्योतयति । ततोऽनुमानान्न भिद्यते । ये तु जातिशब्दः n607/mj

स्वभेदान् सर्वानिवाभिधत्ते । उक्तेषु नियमार्थं भेदशब्दः इत्याहुस्तत्रोच्यते-- न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः । वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः ॥ २ ॥ --- **न जातिशब्दो भेदानां** [[एतदन्तर्गतः पाठः PSV2 मध्ये नास्ति ॥]]वाचक इति वक्ष्यति । जातिशब्दस्तावत् सदादिः द्रव्यादीनां न वाचक **आनन्त्यात्** । आनन्त्ये हि भेदानामशक्यः शब्देन सम्बन्धः कर्तुम् । न चाकृतसम्बन्धे शब्देऽर्थाभिधानं युक्तम्, स्वरूपमात्रप्रतीतेः । किञ्चान्यत्, **व्यभिचारतः** । सच्छब्दो हि यथा द्रव्ये वर्तते तथा गुणादिष्वपीति व्यभिचारात् संशयः स्यात्, नाभिधानम् । येऽपि मन्यन्ते जातिमात्रस्य तद्योगस्य वा वाचकः सम्बन्धसौकर्यादव्यभिचाराच्च इति तदयुक्तम्, **वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः** । तथाहि--सद् द्रव्यम्, सन् गुणः, सत् कर्म इति भेदार्थैर्द्रव्यादिशब्दैः सामानाधिकरण्यं न स्यात् । तच्च दृष्टम् । न हि सत्ता योगो वा द्रव्यं गुणो वा भवति, किं तर्हि ? द्रव्यस्य गुणस्य वा । [[एतदन्तर्गतः पाठः PSV2 मध्ये नास्ति ॥]]उक्तं च-- --- विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः । सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः ॥ वाक्यप॰ ३ । १४ । ८ सम्बन्धोऽप्यत्र सम्बन्धिधर्मवाच्योऽभिधीयते । तथा भावीकृत्योच्यते भावोऽप्यन्येन युज्यते ॥ ३ ॥ --- [[PSV1 मध्येऽत्रान्यादृशोऽनुवादः ॥]]सम्बन्धनेन सम्बन्धः । स रागादिवदन्यसम्बद्धः । तस्मात् सम्बन्धिधर्मेण सम्बन्धस्याभिधेयत्वात् स्वधर्मेण सम्बन्धवाचिशब्दाभाव इति अस्य जातिशब्दाभिधेयत्वं नोपपद्यते । --- ये तु विशेषशब्दैः सामानाधिकरण्यात् सम्बन्धसौकर्यादव्यभिचाराच्च जातिमन्मात्रं विवक्षितमित्याहुः तत्र-- त[[तद्वतो नास्वतन्त्रत्वाद् भेदाज्जातेरजातितः । अर्थाक्षेपेऽप्यनेकान्तस्तेनान्यापोहकृच्छ्रुतिः ॥ इति दिङ्नागस्य ग्रन्थान्तरस्थायाः कारिकायास्तु नयचक्रे खण्डनं दृश्यत इति ध्येयम् ॥]]द्वतो नास्वतन्त्रत्वादुपचारादसम्भवात् । --- **तद्वतो नास्वतन्त्रत्वात्** । तथापि स[[तुलना— तत्त्वसंग्रहपञ्जिका॰ पृ॰ ३१० ॥]]च्छब्दो जातिस्वरूपपात्रोपसर्जनं द्रव्यमाह, न साक्षात्, इति तद्गतघटादिभेदानाक्षेपादतद्भेदत्वे सामानाधिकरण्याभावः । न[[न ह्यसत्यां व्याप्तावित्यादि । व्याप्तिराक्षेपः । यथा रूपशब्देन मधुरादीनामनाक्षेपोऽतद्भेदत्वात् तैः शब्दैः सामानाधिकरण्यं न भवति रूपमाम्लम् इति । व्याप्तौ तु भवति (?')रूपं नीलम्, इति ।--**विशाला॰** पृ॰ २४३ $A$ ॥]] ह्यसत्यां व्याप्तौ सामानाधिकरण्यम् । यथा शुक्लशब्दः स्वाभिधेयगुणमात्रविशिष्टद्रव्याभिधानाद् द्रव्ये सतोऽपि मधुरादीन् नाक्षिपति ततोऽतद्भेदत्वमेवमत्रापि प्रसज्यते । किञ्चान्यत्, **उपचारात्** । स[[तुलना--यः पुनरस्मिन्नेव पक्षेऽपरो दोषोऽभिहितः--सच्छब्दोऽपि भूतार्थेन स्वरूपं जातिं वाह । तत्र प्रवृत्तस्तद्वत्युपचर्यमाणो गौणः स्यात्--इति सोऽपि समानः । --**मी॰ श्लो॰ वा॰ शर्करिका** पृ॰ ६१ ॥]]च्छब्दो हि भूतार्थेन स्वरूपं जातिं वाह । तत्र प्रवृत्तस्तद्वति उपचर्यते । न हि यो यत्रोपचर्यते स तमर्थं भूतार्थेनाह । सारूप्यस्यापि **असम्भवात्** । तद्वति च गुणसारूप्यं न प्रत्ययसंक्रान्तितो नापि गुणोपकारात् सम्भवति । कथं न प्रत्ययसंक्रान्तित इति चेत्, उपचारे-- भिन्नत्वाद् बुद्धिरूपस्य भृत्ये राजोपचारवत् ॥ ४ ॥ --- ]यथा यो भृत्यः स स्वामी इति भृत्ये स्वामिशब्दाभिधाने राज्ञि भृत्ये च समाना बुद्धिर्न भवति । उपचारश्च जातिशब्दस्य तद्वति । क्रमेणानभिधानाच्च कुन्दशुक्त्यादिशौक्ल्यवत् । --- यत्र समाना प्रतीतिस्तत्र क्रमेणाभिधानं दृष्टम्, यथा कुन्दस्य कुमुदस्य शुक्तेश्च शौक्ल्यमिति । जातितद्वतोर्युगपच्छब्दप्रयोगान्न प्रत्ययसंकान्तितः सारूप्यम् । गु[[अत्र भिक्षुणोक्तम्--किञ्चित् कुत्रचिद् वर्तमानमुपकारमासंजद्वर्तते यथा लाक्षा स्फटिकेऽनुरञ्जनोपकारेण वर्तते । वर्तते चेज्जातिर्द्रव्ये तया तस्यानुरञ्जनाद्युपकारः कर्तव्यः । ततश्च जातिबुद्ध्या विनैव तदुपकृतद्रव्यमात्रप्रतीत्या भवितव्यम् । न हि लाक्षानुरक्ते स्फटिके गृह्यमाणे तद्ग्रहणमपरमपेक्षते । न चैवमत्रास्ति तेन नास्ति उपकारकोतो द्रव्ये वृत्तिः--इति । तदुक्तम्--गुणोपकारतो द्रव्ये प्रकर्षः स्याद्विना धिया ।— इति ।--**मी॰ श्लो॰ वा॰ शर्करिका॰** पृ॰ ६५--६६ ॥]]णोपकारात् तादूप्ये प्रकर्षः स्याद् विना धिया ॥ ५ ॥

वाचको नियमार्थोक्तेर्जातिमद्भदपोहवान् ॥ इति ।§ 1771

जातिशब्दो विशेषार्थनियमोक्तेर्भेदानामवाचकः, व्यभिचारादानन्त्याच्च । जातिमतो वाचकत्वे च ये दोषास्तेऽन्यापोहाभिधानेऽपीति प्रतिज्ञा । § 1772

607/mj

--- यदि स्फटिकवद् गुणोपकारात् तद्वान् गुणस्वरूपः स्यात् तथा सति गुणप्रकर्षबुद्धिनिरपेक्षा द्रव्ये प्रकर्षबुद्धिः स्यात् । न हि स्फटिके रक्तबुद्धेर्भाव उपधानबुद्धिमपेक्षते, अ[[अविमले VT. ॥]]विमलेषु भेदबुद्ध्यभावात् । किञ्चान्यत्-- संसर्गरूपात् सर्वत्र मिथ्याज्ञानं प्रसज्यते । --- सर्वो हि शाब्दः प्रत्ययोऽर्थेषु संसर्गरूपेण व्यवच्छिन्नस्ततः स्फ[[स्फटिकवत् सर्वं ज्ञानमयथार्थं स्यात् PSV1 ॥]]टिकप्रत्ययवदयथार्थः स्यात् । किञ्चान्यत्-- सामान्यादिबहुत्वे च युगपच्च ग्रहीतृषु ॥ ६ ॥ उपकारो विरुध्येत स[[सर्वमेचकदर्शनम् ? ॥]]र्वैर्मेचकदर्शनम् । --- **सामान्यादिबहुत्वे च युगपच्च ग्रहीतृषु उपकारो विरुध्येत** । यदा च बहवो ग्रहीतारो भवन्ति गुणवतः शुक्लादेः तद्यथा--घटः पार्थिवो द्रव्यं सन् शुक्लो मधुरः सुरभिरित्येवमादि तदा गुणोपकारो विरुध्यते । न हि शक्यं तदा द्रव्येण एकगुणरूपेण स्थातुम्, अविशिष्टत्वात् । नाप्येकदेशेन गुणरूपमनुभवितुं शक्यम्, कृत्स्नस्य घटादिरूपप्रतीतेः । **सर्वैर्मेचकदर्शनम्** । अथ पुनः सर्वैर्घटत्वादिभिर्युगपदुपकारः कृत्स्नस्य क्रियते ततः सर्वेषां प्रत्येकं घटादिरूपग्रहणाभावाद् मेचकदर्शनं युगपत् स[[सर्वरूपप्रतीतेः VT. ॥]]र्वरूपापत्तेः स्यात् ।--PSV1 C. ed. – . N. ed. B– B, PSV2 N. ed. B– A, P. ed. – VT D. ed. B– A । ---

तुलना--व्यक्त्याकृतिजातयस्तु पदार्थः ॥ २ । २ । ६६ ॥... ... ...न व्यक्त्याकृतिजातयः पदार्थ इति केचित् । कुतः ? विकल्पानुपपत्तेः । सदित्येतदेव व्यापकत्वादुपादाय चिन्त्यते । सदित्यनेन पदेन पुनर्जातिरभिधीयते पिण्डो वा सम्बन्धो वा जातिमान् वा पदार्थः । तत्र न तावज्जातिरभिधीयते भेदार्थैरभिन्नविभक्तिकत्वात् । यद्ययं जातिवाचकः सच्छब्दो भवति सद् द्रव्यम् इति भेदवाचिना द्रव्यशब्देन सह सामानाधिकरण्यं न प्राप्नोति । न हि भिन्नार्थवाचकानां सामानाधिकरण्यं पश्यामः । न हि गवाश्वमिति सामानाधिकरण्यं दृष्टम् । अथ द्रव्यादिवृत्तित्वात् सत्ताया एव द्रव्यादिशब्दैः सह सामानाधिकरण्यम्, तथापि पारतन्त्र्यात् सत्ताया गुणत्वम्, गुणगुण्यभिधायिनोश्च शब्दयोः सामानाधिकरण्यं न दृष्टमिति यथा शङ्खस्य शौक्ल्यमिति । एतेन सम्बन्धो व्याख्यातः । सच्छब्दः पिण्डानां वाचको भविष्यतीति न युक्तं पिण्डानामानन्त्यात् । न ह्येकस्य शब्दस्यानेकद्रव्यगुणप्रपञ्चेन सम्बन्ध आख्यातुं शक्यः । न चानाख्याते शब्दार्थसम्बन्धे शब्दादर्थप्रतिपत्तिर्युक्ता स्वरूपमात्रप्रतीतेः व्यभिचाराच्च । सच्छब्दश्रवणाच्च द्रव्यगुणकर्माणीति परिप्लवमाना बुद्धिरवतिष्ठते । न च यस्मादभिधानात् परिप्लवते बुद्धिस्तदभिधानमिति युक्तं वक्तुम् । तस्मात् सच्छब्दो भेदानां न वाचक इति । जातिमन्मात्राभिधायकोऽपि सच्छब्दो न भवति । कस्मात् ? अस्वतन्त्रत्वात् । न हि सच्छब्दात् तद्भेदा घटादयो गम्यन्त इति तद्वद्घटादिभेदानाक्षेपात् सामानाधिकरण्याभावः । अथवा अस्वतन्त्रत्वादिति सच्छब्दः प्राधान्येन सत्तायां वर्तते । तत्र वर्तमानः तद्वत्युपचर्यते । यच्च यत्र वर्तमानमन्यत्रोपचर्यते न तत् तस्याभिधायकं मञ्चशब्दवदिति । उक्तं चात्र । किमुक्तम् ? तद्वतामानन्त्यात् न सच्छब्देनाभिधानं युक्तमिति । तद्वति च न गुणसारूप्यात् प्रत्ययसंक्रान्तिः यथा स्वामिशब्दस्य भृत्ये । न गुणोपरागात् यथा नीलः स्फटिक इति क्रमवृत्त्यभावाद् युगपदसम्भवाच्च अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च । तस्मान्न जातिमन्मात्राभिधायकोऽपि । असाधारणविशेषणविशेष्याभिधायको भविष्यतीति न युक्तम्, अन्यत्र प्रत्ययाभावप्रसंगात् । न चान्या गतिरस्ति । तस्मादन्यार्थापोहकृच्छ्रुतिरिरिति

अन्यशब्दार्थान्तरापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यत इति । **--न्यायवार्तिक** २ । २ । ६६ ॥

[This page consists merely of footnotes.] § 1773
608/mj

[This page consists merely of footnotes.] § 1774
609/mj

कथम् ? अन्यापोहकृच्छ्रुतिः । शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते इत्युच्यते । अर्थौ च स्वसामान्यलक्षणावुक्तौ, तृतीयार्थासम्भवात् । स्वार्थ एव तावदवधार्यः--कः स्वार्थः ? स्वार्थः स्वलक्षणोऽनन्यः प्रत्यक्षविषयः । स इह सविकल्पार्थे न सम्भवति स्वार्थः प्रत्यक्षविषयः । न च ततोऽन्यः स्वार्थः । शब्दान्तरार्थापोहश्च न स्वार्थः । तद्द्वयातिरिक्तश्च तृतीयो न कश्चिदन्योऽस्ति । तिष्ठतु तावत् स्वार्थः । § 1775

तथा च जाति-सम्बन्ध-जातिमदभिधानानामसम्भवादन्यापोहकृच्छ्रुतिः § 1776

**कथम् ?** इत्युपपत्तिप्रश्नः । भेद-जातिमदभिधानपक्षेषु दोषदृष्टेरर्थादापन्नम् **अन्यापोहकृच्छ्रुतिः** इत्यन्यापोहं वर्णयति ***शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिः अभिधत्ते इत्युच्यते** इत्यन्यापोह- वादिनोक्तम्, **अर्थौ च स्वसामान्यलक्षणावुक्तौ,** नातोऽन्यत् प्रमेयमस्ति इति ततोऽन्य**तृतीयार्थासम्भवात् स्वार्थ एव तावदवधार्यः**, तावच्छब्दस्य क्रमार्थत्वादर्थान्तरस्याप्यवधारयिष्यमाणत्वात्, शब्दान्तरार्थापोहमात्रोक्तौ दोषोऽसत्त्वप्राप्तिः, तस्मात् ताव- - /ms

५ अ] **अर्थाक्षेपेऽप्यनेकान्तस्तेनान्यापोहकृच्छ्रुतिः ।** इति प्रमाणसमुच्चयस्य पञ्चमेऽपोहपरिच्छेदे द्वादश्यां कारिकायां दृश्यते, किन्तु तस्य **दिङ्नागविरचितायां वृत्तौ शब्दान्तरार्थापोहं हि** इत्यादिव्याख्याया अदर्शनादिदं दिङ्नागस्यान्यस्माद् ग्रन्थादत्रोद्धृतं भाति ॥

१० स्वा] दृश्यतां पृ° ४१६-- १ ॥

१३ जा] उक्तं प्रमाणद्वयम् । केचित् शाब्दमपि प्रमाणान्तरं मन्यन्ते । [तत्र PSV१] **न प्रमाणान्तरं शाब्दमनुमानात् तथाहि तत् । कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते** ॥ ५ । १ ॥ शब्दो यस्मिन् विषये प्रयुज्यते तस्य येनाङ्गेनाविनाभावितया सम्बद्धस्तत् कृतकत्वादिवदर्थान्तरव्यवच्छेदेन द्योतयति ततोऽनुमानान्न भिद्यते । पृ° १५७ B... ... ...यस्माज्जातिशब्दः कथञ्चिदपि भेद-सामान्य-सम्बन्ध-जातिमद्वाचको न युज्यते **तेनान्यापोहकृच्छ्रुतिः** प्र° समु° ५ । १२ । तस्मात् **कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते** इति यद् [उक्तं] तदेव स्थितम् पृ° १६० । इति **प्रमाणसमुच्चयवृत्तौ** पञ्चमेऽपोहपरिच्छेदे दिङ्नागेनोक्तम् । PSV1 B– B ॥

१४ *] दृश्यतां पृ° ५४७--५४८ । तुलना--वाक्स्वभावोऽन्यवागर्थप्रतिषेधनिरङ्कुशः । आह च स्वार्थसामान्यं तादृग् वाच्यं खपुष्पवत् ॥ १११ ॥ इति **समन्तभद्ररचितायाम् आप्तमीमांसायाम्** ॥

१७ णावुक्तौ] **प्रमाणसमुच्चयवृत्त्यादौ** दिङ्नागेनोक्तौ । दृश्यतां टिपृ° १०° पं° १ टि° १ ॥

१ मात्रोक्तौ] **दोषो सत्वाप्राप्तिः** प्र° । दोषः सत्त्वाप्राप्तिः ? ॥

ताऽपरितोषात् स्वार्थे कुर्वती इत्युक्तः **कः स्वार्थः ?** उच्यते **--स्वार्थः स्वलक्षणः**, अन्यतोऽन्यः स्वः, **अनन्यः** स एवेत्यर्थः प्रमाणयोरपि नियतविषयावधृतेः **प्रत्यक्षविषयः** स स्वार्थ इति । **स इहे**त्यादि । **इह** शब्दार्थे **सविकल्पार्थे** सामान्यतः सविकल्परूपेऽध्यारोपापवादात्मनि **स न सम्भवति स्वार्थः प्रत्यक्षविषयः, स्वलक्षणमनिर्देश्यम्** प्र°दृश्यतां टिपृ° १०४ पं° १३ । प्रमाणसमुच्चयस्य प्रथमपरिच्छेदे स्वसंवेद्यमनिर्देश्यं रूपमिन्द्रियगोचरः इति कारिका दृश्यते । स्वलक्षणमनिर्देश्यं रूपमिन्द्रियगोचरः इति तु पाठभेदेन नयचक्रवृत्तौ अष्टमेऽरे पृ° ४३७-- २ इत्यत्र उद्धृता, अत इयं कारिका दिङ्नागस्य ग्रन्थान्तरादत्रोद्धृता प्रतीयते । प्रमाणसमुच्चयस्य द्वितीयपरिच्छेदस्य द्वितीयश्लोके तु स्वलक्षणमनिर्देश्यं ग्राह्यभेदात् तदन्यथा इति पाठो भाति ॥ समु° १ । ५, २ । २ ? इत्युक्तत्वात् प्रत्यक्षविषयस्य । स्यान्मतम्--प्रत्यक्षादर्थादन्योऽस्ति स्वार्थ इति चेत्, **तन्न च ततोऽन्यः** प्रत्यक्षार्थात् **स्वार्थः** । **शब्दान्तरार्थे**त्यादि । अन्यापोहः स्वार्थो न भवति, तद्द्वयातिरिक्तश्च तृतीयो न कश्चिदन्योऽस्ति, लक्ष्यद्वित्वावधारणात् ततश्च प्रमाणद्वित्वावधारणात् । तस्मात् तृतीयोऽर्थोऽपि नास्ति, कुतः स्वार्थः ? इत्यत आह **--तिष्ठतु तावत् स्वार्थः** असत्त्वादविचार्य इत्यर्थः । § 1777

भेदपक्षस्य जातिम (Edtext outside numbered paragraph)त्पक्षाविशिष्टत्वेष्टेः शब्दार्थाववधृत्य **उक्तं त्वया, न प्रत्यक्षविषयस्वार्थत्वेने**ति त्वद्वचनमेव ज्ञापकम् । § 1778

**तथा चे**त्यादि । एवं च कृत्वा शब्दवाच्यविचारे प्रस्तुते

इत्युक्तं त्वया न प्रत्यक्षविषयस्वार्थत्वेन । अनुमानविषयोऽपि नैवास्य स्वार्थः, अपोहार्थस्वरूपत्वात् । अग्निरनग्निर्न... ...। भेदोपादाने वाऽस्वार्थत्वमपोहार्थादन्यत्वात् परप्रत्यायनादित्वभिन्नार्थत्वाच्च ।

अथ क्वचिददृष्टोऽपि अन्यापोहः इत्यस्मादेव शब्दादवगन्तव्यः स्वार्थः, यस्मिन्नन्योऽपोह्यते स स्वार्थः । तदपि न, स्वार्थे इत्याधाराधेयादर्शनात् स्वरूपविधिविनाभूतत्वात् कस्मिन् स्वार्थेऽपोह्यते ? अन्यशब्दशब्दान्तरार्थयोरस्थितरूपत्वात् को ह्यसावन्यो यस्य यस्माद् वाऽपोहः क्रियेत ?

* * *

610/mj नामसम्भवात् अन्यापोहकृच्छ्रुतिः इति**जाति-सम्बन्ध-जातिमदभिधाना**

* * *

इत्युक्तं त्वया न प्रत्यक्षविषयस्वार्थत्वेन । अनुमानविषयोऽपि नैवास्य स्वार्थः, अपोहार्थस्वरूपत्वात् । अग्निरनग्निर्न... ...। भेदोपादाने वाऽस्वार्थत्वमपोहार्थादन्यत्वात् परप्रत्यायनादित्वभिन्नार्थत्वाच्च ।

अथ क्वचिददृष्टोऽपि अन्यापोहः इत्यस्मादेव शब्दादवगन्तव्यः स्वार्थः, यस्मिन्नन्योऽपोह्यते स स्वार्थः । तदपि न, स्वार्थे इत्याधाराधेयादर्शनात्

---

२६ ताऽप]
°ऽपरतोषात्nayacakra-ms-bhā ।
°परतोषात् nayacakra-ms-ya ॥

२६ वा] °वा न्यापोह° प्र° ॥

स्वरूपविधिविनाभूतत्वात् कस्मिन् स्वार्थेऽपोह्यते ? अन्यशब्दशब्दान्तरार्थयोरस्थितरूपत्वात् को ह्यसावन्यो यस्य यस्माद् वाऽपोहः क्रियेत ?

* * *

नामसम्भवात् अन्यापोहकृच्छ्रुतिः इति

स्यान्मतम्--अनुमानविषयः स्वार्थ इति । तच्चानुमानविषयोऽपि **नैवास्य शब्दस्य स्वार्थः, अपोहार्थस्वरूपत्वात्** । तद्दर्शयति --**अग्निरनग्निर्ने**त्यादि, तस्यापि चापोहार्थस्याख्येयत्वात्, न चाख्यातोऽसौ ईदृशः स्वार्थः इति विशेष्य । स्यान्मतम्--अग्निमत्त्वविशिष्टदेशादिः स्वार्थो भिन्नस्तत्सम्बन्धीति चेत् । एवं तर्हि **भेदोपादाने वा अस्वार्थत्वमपोहार्थादन्यत्वात्,** अपोहार्थस्यैव त्वयानुमानत्वेष्टेः । किञ्चान्यत्, **परप्रत्यायनादित्वभिन्नार्थत्वाच्च,** सचानुमानविषयः स्वार्थः आत्मनः प्रत्यायने लिङ्गादिवस्तुरूपः, परप्रत्यायने शब्दवाच्यो ज्ञानरूपो ज्ञानार्थत्वाच्छब्दप्रयोगस्येत्ययुक्तमस्य स्वार्थस्य द्वैरूप्यम् । एवं न प्रत्यक्षविषयो नानुमानविषयः स्वार्थो घटते शब्दस्य त्वन्मतादेव । § 1779 - /ms

**अथ क्वचिदित्यादि** । शब्दार्थविचारे प्रत्यक्षानुमानविषयत्वविचारोऽसम्बद्ध इति चेत्, तन्न, **तृतीयार्थासम्भवात्** इत्यादेः प्रदर्शितत्वात् । तथापि त्वदनुवृत्त्या यद्यपि प्रत्यक्षानुमानविषययोर**दृष्टोऽपि अन्यापोहः इत्यस्मादेव शब्दादवगन्तव्यः स्वार्थः,** अन्यस्यापोहो न स्वस्यार्थस्य, स्वार्थे चान्यस्यापोहो न निराश्रय उक्तदोषात् । तस्मात् **यस्मिन्नन्योऽपोह्यते स स्वार्थ** इति घटः इत्युक्ते अघटो न भवति पटादिः इति घटे पटाद्यपोहाद् घटः स्वार्थ इति शब्दविषय एव स्वार्थो निश्चित इति मतम् । तथापि **तदपि न स्वार्थ इत्याधाराधेयादर्शनात्,** स एवाधाराभिमतः स्वार्थ आधेयाभिमतश्च शब्दो न दृश्येते तौ **स्वरूपविधिविनाभूतत्वात्,** यस्मिन् अन्यस्य शब्दान्तरार्थस्यापोहं करोति इत्युच्यते स एवाधारोऽर्थो न विधीयते शब्दश्चाधेयः । तस्मात् - /ms
तयोरदर्शनात् **कस्मिन् स्वार्थेऽपोह्यते** इत्यभिसम्भन्त्स्यते, न चेद् विधीयते अन्यस्यार्थस्य **सूत्रोक्तस्य भाष्योक्तस्य** शब्दान्तरार्थस्य 611/mj

५ वा] **°वा न्यापोह°** प्र° ॥
११ अपोहा] **°हार्थः स्वरू°**nayacakra-ms-ya ॥
१२ आ] **आत्मान** प्र° । अत्र **आत्मने** इति पाठोऽपि समीचीनो भाति, स्वस्मै इदं स्वार्थम्, परस्मै इदं परार्थम् इत्याशयेन आत्मने इत्यपि पाठोऽत्राभिप्रेतो भवेत् ॥
१४ ज्ञा] **ज्ञानात् नानार्थत्वा°**nayacakra-ms-ya । **ज्ञानात् नानानार्थत्वा°** nayacakra-ms-bhā । अत्र **ज्ञानाधानार्थत्वा°** इत्यपि पाठो भवेत् ॥
१४ प्र] **सत्यक्षा°** प्र° ॥
१५ विचारोऽस] **°संबंध** प्र° ॥
१६ तृ] पृ° ६०९ पं° २ ॥
१७ क्षानुमान] **°नविषयो°** प्र° ॥
१८ अ] **अनस्यपोहे** प्र° ॥
२१ उ] दृश्यतां पृ° ६०९ पं° ११ ॥
२२ इ] **इ+इत्या°**nayacakra-ms-bhā ॥
२३ दृ] **दृश्यते** प्र° ॥
२५ अ] **अन्यार्थस्य**nayacakra-ms-bhā । अयं nayacakra-ms-bhā प्रतिपाठोऽपि समीचीन एव । **तेनान्यापोहकृच्छ्रुतिः** इति दिङ्नागप्रणीते **सूत्रे** योऽन्यार्थ उक्तः **शब्दान्तरार्थापोहं हि** इत्यादि **भाष्ये** च यः शब्दान्तरार्थ उक्तस्तस्य स्वरूपानवस्थानमित्याशयः ॥
२५ ब्दान्त] **°रार्थं च** प्र° ॥

* * *

योऽनन्यो न भवतीति चेत्, ननु स एव विधेरनन्यः प्रत्यक्षः । इतरथा अन्यो न भवति अनन्य इति व्यावृत्तिमात्रस्थितित्वादप्रतिष्ठितस्वार्थयोस्तदतयोर्ग्रहणाभावात् कुतः कोऽन्यः ? इतरेतराश्रयभावदोषश्च तस्मादन्यः, अन्यस्मात् सः इति ।

अथान्यापोहलक्षणवाक्यानुवृत्त्या व्यावृत्तिमान् स्वार्थो गृह्यते, न व्यावृत्तिमात्रं न सदसत् इति । *हिशब्दो यस्मादर्थे, यस्माद् वृक्षशब्दोऽवृक्षशब्दनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययति एवं निवृत्तिविशिष्टं वस्तु शब्दार्थः द्रव्यादि सन्, न निवृत्तिमात्रम् ।

* * *

च स्वरूपानवस्थानम्, विधीयमानस्वार्थानवस्थानात् । तस्मिंस्तु विधेयेऽवस्थिते शब्दान्तरमन्यः शब्दस्तदर्थश्च इति वक्तुं युज्येत अत आह --**अन्यशब्दशब्दान्तरार्थयोरस्थितरूपत्वात् को ह्यसावन्यो यस्य यस्माद् वापोहः क्रियेत** स्वरूपविधिविनाभूत इति, न सम्भवत्येषोऽर्थ इत्यर्थः । § 1780

**योऽनन्यो न भवतीति चेत्,** स्यान्मतम्--यथैव स्वार्थः अन्यो न भवति इत्यन्यस्यापोहेन प्रतीयते तथैवान्योऽपि अनन्यो [न] भवति इति तदपोहेन प्रतीयते इति चेद् मन्यसे, अत्र ब्रूमः --**ननु स एव विधे**रित्यादि, *स्वेन विधेयेनोपलक्षितस्य अनन्यस्य प्राणादन्यप्रतीतेरनन्यः स एव स्वार्थो विधेयः, तस्याग्रहणे अनन्यः इति बुद्धेरभावात् **अनन्यः** स्वार्थो विधेः इत्यापन्नम् । **इतरथा अन्यो** नेत्यादि यावद् **ग्रहणाभावात्,** यथा घटादन्यः पटः इत्युक्ते स न भवति, एवं पटादन्यो घटः सोऽपि न भवत्येव, द्वयोरपि व्यावृत्तिमात्रस्थितित्वात् । ततश्चाप्रतिष्ठितस्वार्थयोस्त[यो]रयं स्वः अन्यः स इति तदतयोर्ग्रहणाभावः । ततश्च कुतः कोऽन्यः ? कुतः कस्यापोहः ? इत्यपोहशब्दार्थाभावः । किञ्चान्यत्, **इतरेतराश्रयभावदोषः** । कथमिति चेत्, उच्यते --**तस्मादन्यः, अन्यस्मात् स इति** । **इति** हेत्वर्थे, यस्मादन्यबलात् स प्रसिध्यति तद्बलादन्यः, इतरेतराश्रयाणि च न प्रकल्पन्त इत्युक्तम् । एवं लौकिकान्यापोहशब्दार्थमात्रानुसारेण परीक्ष्यमाणेऽन्यापोहे न घटते स्वार्थः

- /ms । § 1781

६ प्र] दृश्यतां पृ० ४१६-- १ ॥
१० *] दृश्यतां पृ० ५४८ पं० १२--१४ ॥
१२ व] ॰वस्थानात् तस्मिंस्तु विधेये वस्थानात् तस्मिंस्तु विधेय इति द्विर्भूतः पाठः प्रतिषु ॥
१४ वापोहः] क्रियतेnayacakra-ms-ya ॥
१४ योऽन] ॰नन्यो भव॰nayacakra-ms-ya ॥
१७ अ] अन्योन्य भवतिnayacakra-ms-ya । अन्योन्यान्य भवति nayacakra-ms-bhā ॥
१८ *] स्वेन विधियेनोपालक्षितस्य प्र॰ ॥
२४ स्याग्र] ॰ग्रहणे+इत्यति बुद्धे॰nayacakra-ms-ya ॥
२५ इ] इति हेत्वर्थोnayacakra-ms-bhā । इतिर्हेत्वर्थे ? ॥
२६ इ] दृश्यतां पृ० ३४ टि० ४ ॥
२७ मा] माणोnayacakra-ms-ya ॥

खपुष्पतुल्यमिति दृष्टान्तः । अथवा अनुमानानुमेयसम्बन्ध एव वाच्यवाचकसम्बन्धः इति मन्यमानो **यथा कृतकत्वस्ये**त्यादि स (Edtext outside numbered paragraph)तत्स्वरूपव्याख्यानमुदाहृत्यानुमानम् **एवं शब्दो**ऽपीत्यादि दार्ष्टान्तिकं च सतत्स्वरूपव्याख्यानं निगमयति **प्रमाणत्वात्** इति हेतुधर्मं च (Edtext outside numbered paragraph) तयोस्तुल्यम् । शेषं गतार्थम् । उभयोरन्यापोहविशिष्टार्थप्रत्यायनतुल्यत्वादिति पिण्डार्थः । यथा वक्ष्यति निदर्शनम् --**न** (Edtext outside numbered paragraph) **प्रमाणान्तरं शाब्दमनुमानात्** प्र° समु° ५ । १ इति । § 1782

**अथान्यापोहे**त्यादि यावद् **न सदसदिति** अन्यापोहलक्षणवाक्यानुसारेण परीक्षामाह— अन्यापोहलक्षणवाक्यं **तेनान्यापोहकृच्छ्रुतिः** इति, तस्य व्याख्या --**शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते** इति, तदनुवृत्त्या व्यावृत्तिर्यस्मिन् विद्यते स्वार्थे स गृह्यते न व्यावृत्तिमात्रम्, **हिशब्दस्य** हेत्वर्थत्वात् । तद्दर्शयति --**हिशब्दो यस्मादर्थे,** तन्निरूपयति लौकिकोदाहरणेन --**यस्माद् वृक्षशब्द** इत्यादि यावत् **प्रत्याययति** इति । एवं **निवृत्तिविशिष्टं वस्तु शब्द**वाच्यार्थः, कतमोऽसौ ? **द्रव्यादि सन्** द्रव्य-पृथिवी-मृद्-घटत्वादि,

यथा कृतकत्वस्य अनित्यत्वविशिष्टः शब्दोऽनुमेय एवं शब्दोऽपि स्वमभिधेयमर्थान्तरव्यवच्छेदविशिष्टं द्योतयति प्रमाणत्वात् ।

अत्रापि विधिरेवाङ्गीकृतः, अव्यावृत्तस्वार्थार्थत्वात् देवदत्त ! गामभ्याज शुक्लाम् इति गवानयनविधायकवाक्यवत् । व्यावृत्तिव्यतिरिक्तस्य स्वार्थस्य विधानं त्वयैवोक्तम्, शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते, हिशब्दो यस्मादर्थे, यस्माद् वृक्षशब्दोऽवृक्षनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययति इति त्वद्वचनादेव स्वार्थविधानस्य प्रदर्शनात् । निवृत्तिविशिष्टं वस्तु शब्दार्थो द्रव्यादि सन् इत्यादिग्रन्थेनापि स्वार्थविधानमेव प्रदर्शितम् । अन्यथा सर्वत्रैव व्यावृत्तिमात्रम्, न स्वार्थो नाम कश्चिदस्तीति स्वार्थे कुर्वती श्रुतिरित्यनर्थकं स्यात् ।

* * *

**मात्रंन निवृत्ति** * 612/mj

* * *

---

६ तेना] दृश्यतां पृ° ६०९ टि° १ ॥
९ य] यस्मा
**वृक्ष°**nayacakra-ms-bhā । **यस्मादवृक्ष°** nayacakra-ms-ya । दृश्यतां पृ° ५४८ पं° १२--१४ । **सिद्धसेनगणिविरचितायां** तत्त्वार्थवृत्तावुद्धृतेऽस्मिन् **दिङ्नागवचने हिशब्दो यस्मादर्थे, यथा वृक्षशब्दोऽवृक्षशब्दनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययतीत्युच्यते एवं च निवृत्तिविशिष्टं वस्तु शब्दार्थः न निवृत्तिमात्रम्** तत्त्वार्थवृ° ५ । २४ पृ° ३५७ इति पाठदर्शनादत्र **यथा वृक्ष°** इत्यपि पाठः स्यात् ॥
२० कृ] दृश्यतां पृ° ६०७ पं° ९ ॥
२० *] °स्तरयं श्वः अन्यः प्र° ॥
१४ कृ] दृश्यतां पृ° ६०७ पं° ९ ॥

यथा कृतकत्वस्य अनित्यत्वविशिष्टः शब्दोऽनुमेय एवं शब्दोऽपि स्वमभिधेयमर्थान्तरव्यवच्छेदविशिष्टं द्योतयति प्रमाणत्वात् ।

अत्रापि विधिरेवाङ्गीकृतः, अव्यावृत्तस्वार्थार्थत्वात् देवदत्त ! गामभ्याज शुक्लाम् इति गवानयनविधायकवाक्यवत् । व्यावृत्तिव्यतिरिक्तस्य स्वार्थस्य विधानं त्वयैवोक्तम्, शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते, हिशब्दो यस्मादर्थे, यस्माद् वृक्षशब्दोऽवृक्षनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययति इति त्वद्वचनादेव स्वार्थविधानस्य प्रदर्शनात् । निवृत्तिविशिष्टं वस्तु शब्दार्थो द्रव्यादि सन् इत्यादिग्रन्थेनापि स्वार्थविधानमेव प्रदर्शितम् । अन्यथा सर्वत्रैव व्यावृत्तिमात्रम्, न स्वार्थो नाम कश्चिदस्तीति स्वार्थे कुर्वती श्रुतिरित्यनर्थकं स्यात् ।

* * *

मात्रं

अत्र ब्रूमः --**अत्रापी**त्यादि । त्वयैवं ब्रुवतापि अपोहातिरिक्तः स्वार्थ उक्तः, अतो **विधिरेवाङ्गीकृतः** । कस्मात् ? **अव्यावृत्तस्वार्थार्थत्वात्,** अव्यावृत्तस्वार्थोऽर्थोऽस्येत्यव्यावृत्तस्वार्थार्थमेतद् **व्यावृत्तिमान् स्वार्थो गृह्यते** इत्यादि वाक्यम् । यस्याव्यावृत्तस्वार्थार्थत्वं तद् वाक्यं विधिमङ्गीकुर्वद् दृष्टम्, यथा देवदत्त गामभ्याज शुक्लाम् इति गवानयनविधायकं वाक्यमगवादिदोहादिव्यावृत्तिमद्देवदत्तकर्तृकशुक्लगवकर्मानयनक्रियास्वार्थम्, तथा घटः पटो न भवति इत्यन्यापोहोपलक्षितस्वार्थवाक्यमिति त्वयैवोक्तम् । तद्यथा --**व्यावृत्तिव्यतिरिक्तस्ये**त्यादि परवाक्यप्रत्युच्चारणम् । तद्विवरणं च **हिशब्दो यस्मादर्थे** इत्याद्युपक्रम्य हेत्वर्थभावनोदाहरणं **वृक्षशब्दः** सव्याख्यादण्डकः सोत्त[र]पूर्वपक्षप्रत्युच्चारणं सव्याख्यानं यावत् **प्रदर्शना**दिति त्वद्वचनादेव स्वार्थस्य विधानं स्फुटीकृतम् । § 1783

किञ्चान्यत्, **निवृत्तिविशिष्ट**मित्यादि । **एवं निवृत्तिविशिष्टं वस्तु शब्दार्थो द्रव्यादि सन्** इत्यादिना ग्रन्थेन **कृतकत्वस्यानित्यत्वविशिष्टशब्दानुमेयत्वदृष्टान्ते**न सभावनेन **एवं शब्दोऽपि स्वमभिधेय**मित्यादिना स्वार्थविधानमेव प्रदर्शितम् । **अन्यथे**त्यादि । एवमनिच्छतस्ते दोषः--यथा वृक्षशब्दप्रयोगे पटाद्यवृक्षान्यशब्दार्थव्यावृत्तिरपि प्राप्ता, ततः सर्वत्रैव व्यावृत्तिमात्रम्, न स्वार्थो नाम कश्चिदस्ति, अतः **स्वार्थे कुर्वती श्रुतिः** इत्यनर्थकं स्यात् । § 1784

613/mj

यदपि च तत् सदित्यसन्न भवतीति तदप्यतिपरिश्लथम् । ननु युगपद्भूतपटाद्यभवनेनैव घटभवनं दृष्टम्, युगपद्भूतरसाद्यभव-

- /ms

१६ व्या] दृश्यतां पृ० ६११ पं० ४ ॥
२३ न] ०क्रियस्वा० प्र० ॥
२५ ए] दृश्यतां पृ० ६११ पं० ६ ॥
२६ स] सहावनेन प्र० ॥
२९ प] पट्टाद्य० प्र० ॥
३ न] पृ० ६१५ पं० १८ ॥

नेनैव च रूपभवनं दृष्टम् । अन्यथा तद्भवने घटो न भवेत् त्व- न्मतवदुक्तवच्च । अयुगपद्भाविष्वपि [अ]युगपद्भूतपिण्डादिशिव- कादिपूर्वोत्तरभवनाभवनेन च भवति सन् इति, अन्यथानुपपत्तेः । § 1785

यदि तु सदसन्न भवेत् ततोऽन्यापोहो निर्विषय एव भवेत् । ततश्च § 1786

*भेदो भेदान्तरार्थं तु विरोधित्वादपोहते प्र॰ समु॰ ५ । २८§ 1787

अत्राह--स्यादेतदेवं यदि [अ]वृक्षनिवृत्त्या गम्यते स्वार्थः कश्चिदिति, किं तर्हि ? वृक्षः सन्नित्यसन्न भवतीति तस्यापि वृक्षसत्त्वस्यावृक्षासत्त्वमात्रार्थत्वाद- न्यापोहमेव शब्दार्थमभ्युपगच्छामीति । अत्र ब्रूमः **--यदपि च तत् सदित्यसन्न भवतीति** सच्छब्दोऽसच्छब्दार्थं निवर्तयतीति ततः सत् इत्युक्ते असन्न भवति इत्ययमर्थो गम्यते ततोऽन्यापोह एवेति भवतोक्तं **तदप्यतिपरिश्लथम्,** दुर्ब- द्धदारुभारकवद् विशीर्यत इत्यर्थः । कस्मात् ? **[युगपद्]युगपद्भाविनोऽर्थ- स्यासत्त्वाविनाभाविन एव सत्त्वात्** । तत्र तावन्न**नु युगपद्भूतपटाद्यभवनेनैव घटभवनं दृष्टं युगपद्भूतरसाद्यभवनेनैव च रूपभवनं दृष्टम्,** यद् घटस्य सत्त्वं तत् पटस्यासत्त्वम्, रसस्यासत्त्वं रूपस्य सत्त्वम् । तस्मात् सदित्यसन्न न भवति, असद् भवत्येव । **अन्यथा तद्भवने घटो न भवेत्,** पटस्य सतो घटे भवने घट एव न भवेत्, पटसत्त्वेनावष्टब्धत्वे घटावकाशाभावात् । किमिव ? **त्वन्मतवत्,** तवैव हि **शब्दान्तरार्थापोहं स्वार्थे कुर्वती श्रुतिर- भिधत्ते** इति मतमितरेतराभावात्मकं च तत्त्वमिति । किञ्चान्यत्, **उक्तवच्च,** अनन्तरातीतनये **भावाभावभावनायाम्** इत्युपक्रम्य बहुधोक्तम् । तस्मान्न युक्तं **सदित्यसन्न भवति** इति । तथा रूपरसादियुगपद्भाविषु योज्यम् । एवं तावद् युगपद्भाविषूक्तम् । **अयुगपद्भाविष्वपि [अ]युगपद्भूतेत्यादि** । पिण्डो यदि न भवेत् कोशक-स्थासक-कुशूलकादिर्वा यदि न भवेत् ततः शिवको भवेत् । एवं कोशकादिष्वपि पूर्वोत्तरभावाभावे वर्तमानभावो भवेत्, न भावे । तथा कपाल-शकल-शर्करकादिभावेषु योज्यं बाल-कुमार-युव-म-

- /ms

५ भ] पृ॰ ६१५ पं॰ १८ ॥
७ य] पृ॰ ६१५ पं॰ १९ ॥
११ *] भेदो भेदान्तरार्थं तु विरोधित्वादपोहते । सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः ॥ इति सम्पूर्णा कारिका । दृश्यतां पृ॰ ४२६-- १ ॥
१६ ताव] दृश्यतां पृ॰ ६१५ पं॰ १९ ॥
१७ स] **सदित्यन्न न भवति** प्र॰ ॥
१८ प] पटस्यासतोnayacakra-ms-bhā । अयं nayacakra-ms-bhā पाठोऽपि कथञ्चित् सङ्गच्छेत ॥
१९ त्वेना] **॰नाचष्टत्वत्वे** प्र॰ ॥
२१ त] **तत्रैव** प्र॰ ॥
२१ भा] दृश्यतां पृ॰ ५५३ पं॰ २ ॥
३ भा] ॰भावतायाम्nayacakra-ms-bhā ॥

ध्यम-स्थविरेषु च तथैव प्रागनेकधा भावितम् अभवन्नेव भवति इति ।

§ 1788

अथैवं नेच्छसि **यदि तु सदसन्न भवेत्** तव **ततोऽन्यापोहो निर्विषय एव भवेत्** । तद्यथा--घटः इत्यघटो न भवतीति नैव स्यात्, घट इत्युक्ते[ऽ]घट एव स्यात् घटश्च न भवेत्, अघटासत्त्वाभावात् घटसत्त्वाभावाच्च । किं कारणम् ? सदसन्न भवति इति घटस्याघटत्वेनात्मासद्रूपेणापि पटदिना भवनात् । ततः को दोषः ? **ततश्च** इदं दोषजातमनिष्टमापद्यते **--भेदो भेदान्तरेत्यादि** यावदित्यादि **आदिग्रहणात् सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः** प्र॰ समु॰ ५ । २८ इति वा

- /ms, 614/mj

* * *

इत्यादि यथार्थं न भवति । नापोहेताप्येवं विरोध्यविरोधित्वात् ।

अथ युगपदयुगपद्भाविसर्वभावभेदभवनस्य भवननियमो घटाद्यसद्व्युदासेनेति । तदपि न, विदितभवनानुवादत्वात् सदभ्युपगमादसत्सत्त्वात् । नैव चैवं स्वार्थविशेषगतिः स्यात्, प्रतिपक्षापक्षेपणक्षीणशक्तित्वात्, *साध्यनिर्देशः प्रतिज्ञा

* * *

**यथार्थं** यथा त्वयाभिवाञ्छितं तथा **न भवति,** अनृतं तदित्यर्थः । अत्र प्रयोगः **--नापोहेताप्येवम्,** त्वदुक्तेन विधिना सन्नसन् न भवति इति **विरोधित्वात्** अस्मन्मतेन सन्नसन् भवति इत्यविरोधित्वात् द्विधापि पक्षधर्मसिद्धेः **विरोध्यविरोधित्वादिति** । यथा सदित्यसदेव अनपोहात् विरोधित्वेऽपि सति अविरोधित्वात् तथा वृक्षः शिंशपा इति अवृक्षाशिंशपादि नापोहेतेत्यन्यापोहाभावः ।

§ 1789

**अथ युगपदयुगपदित्यादि** यावद् **व्युदासेनेति** । स्यान्मतम्--नाहं ब्रवीमि युगपद्भाविनां घटादिरूपादीनां भावानां शिवकादिबालादीनां वाऽयुगपद्भाविनां भेदभवनेऽन्यस्याभवनं नास्तीति, किं तर्हि ? संवृतिसत्त्वाद् घट एवासन् सन्तानपतिताश्च रूपादय एवासन्तः क्षणिकत्वाद् घट-

---

५ य] दृश्यतां पृ॰ ६१५ पं॰ ११ ॥

९ घ] **घटस्य न**nayacakra-ms-ya ॥

१८ *] दिङ्नागवचनेनैव दिङ्नागमतमत्र निराक्रियते । तथाहि दिङ्नागेनोक्तमक्षपादं प्रति--**साध्यनिर्देश इत्यत्र सिद्ध्यभावे कृतार्थता । तथा चासिद्धदृष्टान्तहेतुवादः प्रसज्यते** ॥ ३ । ३ ॥ नैयायिकास्तु साध्यनिर्देशः न्या॰ सू॰ १ । १ । ३३ इति । अत्र सिद्ध्यभावे कृतार्थता । साध्यवचनं ह्यत्र सिद्धिनिवृत्तौ चरितार्थत्वात् साध्यविशेषे नावतिष्ठते । तथा चासिद्धदृष्टान्तहेतुवादः प्रसज्यते । यथा शब्दो नित्यः, अस्पर्शत्वात्, बुद्धिवत् [इति PSV१] । एवं चाक्षुषत्वादनित्य इति । इदमपि साध्यनिर्देशात् प्रतिज्ञा प्रसज्यते । --**प्र॰ समु॰ वृ॰** ३ । ३ । PSV1 C. ed. , N. ed. A. । PSV2 N. ed. A, P. ed. B । दृश्यतां पृ॰ ४३६--१ । **प्र॰ वार्तिकालं॰** पृ॰ ५५९, ५६३ । **प्र॰ वा॰ म॰** पृ॰ ४७० ॥

२० स] **सदसन्**nayacakra-ms-ya ॥

२३ य] **यप्दा**nayacakra-ms-bhā ॥

२४ त] **॰तंम नाहं** प्र॰ ॥

१ वा] **चायुग॰ ?** ॥

रूपादिसंवृतिसतां मुष्टिपङ्क्त्यादिवदसत्त्वात् सन्नसन्न भवतीति । तस्माद् **युगपदयुगपद्भाविसर्वभावभेदभवनस्य भवननियमः** सन्नेव तत्त्वत ?द् भवति इत्युच्यते **घटाद्यसद्व्युदासेनेति । इति** हेत्वर्थे, अस्मान्न्यायाददोष इति ।
§ 1790

अत्रोच्यते --**तदपि न, विदितभवनानुवादत्वात्,** एवंवादिनस्ते घटादिरूपाद्यसत्त्वात् तदप्रसिद्धौ घटो रूपादिर्वा भवति न भवति अपोह्यते नापोह्यते वा स्वार्थो न स्वार्थ इत्याद्यनुवादायुक्तिः, प्रसिद्धविदितार्थविषयत्वादनुवादस्य । अनुवदता च त्वया घटो रूपादि च सत् इत्यभ्युपगतम्, ततः **सदभ्युपगमात्** सुतरामसत्सत्त्वमापन्नम्, अतोऽ**सत्सत्त्वा**दुक्तदोषाविमोक्षस्तदवस्थ एव । § 1791

**नैव चैव**मित्यादि । रूपादिव्यतिरिक्तघटाद्यसत्त्वाभ्युपगमे अनिर्देश्यपर- - /ms
मनिरुद्धक्षणिकसन्तानिव्यतिरिक्तसन्तानरूपाद्यसत्त्वाभ्युपगमे च घटादिविशेषः स्वार्थ इति वचनमगतिकम्, नैव घटोऽयम् इति **स्वार्थविशेषगतिः स्यात्** अघटो न भवति इत्यर्थगतेरभ्युपगमे । कस्मात् ? **प्रतिपक्षापक्षेपणक्षीणशक्तित्वात्,** असन्न भवति इति प्रतिपक्षस्यापक्षेपणे क्षीणा शक्तिरस्य घटशब्दस्य, यत्र च शब्दे प्रतिपक्षापक्षेपणक्षीणशक्तित्वं तस्य स्वार्थविशेषवचनगतिर्नास्ति, यथा **अक्षपाद**पक्षलक्षणे **साध्यनिर्देशः प्रतिज्ञा** 615/mj

* * *

न्या° सू° १ । १ । ३३ इति वाक्ये साध्यविशेषागतिवत् । घटादिसंवृत्यर्थासत्त्वादगतिरेव सामान्यार्थस्यापि, असत्त्वेनाभ्युपगतत्वात् । अर्थविशेषश्च तवावाच्य एव ।

अस्मन्मतेन तु यदा तदाऽनेनैव विषयेण भवितव्यम्, उक्तवत् । तथा चान्यापोह उपेक्ष्यः ।

ननु चात्राप्यपोहो देशकालभेदानां परस्परतः । अत एवोपेक्ष्यः । भवतु वा

* * *

न्यायसू° १ । १ । ३३ इत्यस्मिन् वाक्ये साध्यहेतुदृष्टान्ताभासयोरपि असाध्यत्वनिवृत्तिलक्षितयोः साध्यत्वात् साध्यविशेषस्वार्थागतिः तथा[ऽ]घटो न भवतीति अघटनिवृत्तौ चरितार्थत्वाद् घटस्वार्थविशेषागतिः स्यात् । § 1792

स्यान्मतम्--साध्यसामान्यगतिवद् घटसामान्यगतिः स्यादिति । तन्न, **घटादिसर्वसंवृत्यर्थासत्त्वादगतिरेव सामान्यार्थस्याप्यसत्त्वेनाभ्युपगतत्वात् त्वयैव,**

---

२ रूपादिसंवृतिस] °सती प्र° ॥
९ स] सन्नेव **न त्वसन्** भवति इति सन्नेव **न त्वसद्** भवति इति सन्नेव **तद्** भवति इति वा पाठोऽप्यत्र सम्भाव्यते ॥
११ राम] °मसत्त्वमा°nayacakra-ms-ya ॥
२० सा] दृश्यतां पृ° ६१५ पं° १९ ॥
२८ अ] तुलना--सामान्यार्था गिरोऽन्येषां विशेषो नाभिलप्यते । सामान्याभावतस्तेषां मृषैव सकला गिरः ॥ ३१ ॥ --आप्तमीमांसा ॥
२९ त] तथा घटोnayacakra-ms-ya । तथा टो nayacakra-ms-bhā ॥
३१ अ] ऽघट°nayacakra-ms-ya । घट° nayacakra-ms-bhā ॥
१ त्वा] °त्वागतिरेव प्र° ॥

अत एव चास्माभिरेवमिति शिविशेषितमनन्तरातीतासद्वस्तु आम्नानात् असत्योपाधिसत्यशब्दार्थवादिनोऽस्य नयस्य मतेनापि सामान्यार्थावाच्यत्वाद् नास्ति शब्दस्य स्वार्थः । इतश्च नास्ति; यस्मात् **अर्थविशेषश्च तवावाच्य एव,** यथोक्तम्—

> नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
> तस्य पूर्वमदृष्टत्वात् सामान्यं तूपदेक्ष्यते ॥ इति ।§ 1795

सामान्यस्यासत्त्वाद् विशेषस्यावाच्यत्वात् कतमोऽन्यः स्वार्थ इति, नास्ति त्वन्मतेनैव । § 1796

अस्मन्मतेन तु अभिधेयो विधिनैवावश्यम्, यस्मादस्य च वाक्यस्य **यदा तदाऽनेनैव विषयेण भवितव्यम्,** शब्दाभिधेयेनार्थेन चेत् कार्यं सुदूरमपि - /ms विचाराध्वना गत्वा यस्मिन् कस्मिंश्चित् काले विशेषस्यैव वस्तुत्वादन्यस्यार्थस्याभावादनेन विशेषेणैव विषयेण भवितव्यम्, नान्येन । किमिव ? उक्तवत् । **ननु युगपद्भूतपटाद्यभवनेनैव** इत्यादि यावद् **भवनाभवनेन च भवति सन् इति, अन्यथाऽनुपपत्तेः । यदि तु सदसन्न भवेत्** इत्यादिना यावत् **साध्यविशेषागतिवत्** इत्येतदवधिना ग्रन्थेन असत्त्वस्यापादितत्वात् । **तथा चान्यापोह उपेक्ष्यः**, यस्मादन्या[न]पोहरूप एव भावस्तस्मादन्यस्यापोहो नास्तीत्युपेक्ष्योऽन्यापोहः । § 1797

आह --**ननु चात्राप्यपोहो देशकालभेदानां परस्परतः** । देशतः पटो घटो न भवति, घटोऽपि पटो न भवति इति परस्परतोऽपोहः सिद्धः, तथा रूपं रसो न भवति रसोऽपि रूपं न भवति इति । कालतः पूर्वक्षण उत्तरक्षणभाव्यर्थो नास्ति, उत्तरः पूर्वो न भवति(?') इति परस्परापोहसिद्धिरेवेति । अत्रोच्यते --**अत एवोपेक्ष्यः**, यस्मात् परस्परता विधिरूपैव इत्यनेकधा प्ररूपितं तस्माद् विधेरेव विशेषविषयस्य सत्त्वात् ततोऽन्यस्य शब्दार्थस्याभावात् पारस्पर्यस्य विशिष्टार्थविषयत्वाद् विधेरेव व्यावृत्तिरूपत्वाच्चोपेक्ष्योऽन्यापोह इति सुष्टूक्तम् । § 1798

616/mj

तत्रापोहः, तथापि सर्वविशेषयुक्तस्यैव स्वार्थस्य गमनमुपलक्ष्यते । न च पूर्वदृष्टस्य, अज्ञातज्ञानार्थत्वाच्छ्रोतुः । एवं च--

§ 1799

---

११ चास्माभिरेव] °मिह **विशेषित**° इत्यपि पाठोऽत्र सम्भाव्यते । तथा चानेन शब्दनयेन सामान्यस्याभ्युपगतत्वादसंगतिपरिहाराय टीकाकृद्भिः **त्वयैव** इति विशेषितमित्याशयो भवेत् ॥
१५ न] दृश्यतां पृ° ६१३ पं° १ ॥
२३ सा] दृश्यतां पृ° ६१५ पं° १ ॥
६ स्माद्] **विधिरेव** प्र° ॥

अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
तस्य पूर्वमदृष्टत्वे सामान्यादुपसर्जनात् ॥§ 1801

अतद्भेदत्वे सामानाधिकरण्याभावः, असदसच्छब्दाभिधेयवस्त्वविशेषत्वे साक्षादनुक्तेः सतः । § 1802

अभ्युपेत्यापि त्वदुक्तन्यायेनाऽन्यापोहमस्मदिष्टविधिरूपाभिधानमेव ब्रूमः --भवतु वा तत्रापोहः तथापि **सर्वविशेषयुक्तस्यैव स्वार्थस्य गमनमुपलक्ष्यते,** - /ms स्वरूपविधिविनाभूतस्यासम्भवादपोहस्य विशेषाणामेव सद्भावादित्युद्ग्राहितार्थवद् विधिरूपेणैवेति । § 1803

यदप्युक्तम्--पूर्वदृष्टसामान्येन धूमेनाग्न्यनुमानवदभिधानं सामान्यस्य शब्देन न विशेषस्य पूर्वमदृष्टत्वादिति; तद् **न च पूर्वदृष्टस्य,** न हि लोके पूर्वप्रतिपादनाय शब्दः प्रयुज्यते प्रकाशितप्रकाशनवैयर्थ्यवत् । क्षणिकत्वाच्च पूर्वदृष्टश्चिरनष्टः क्वासौ ? कथं वा शब्देनोच्यते ? ननूक्तम् पूर्वदृष्टसामान्येन इति, उक्तमिदम्, अयुक्तमुक्तम्, सामान्यस्य संवृत्याख्यस्यापोहाख्यस्य चासत्त्वात् । अतो न पूर्वदृष्टस्य गतिः शब्देन, अत आह **--न च पूर्वदृष्टस्य,** न हि स **पूर्वदृष्टः,** नापि पूर्वदृष्टेनार्थः, किं कारणम् ? **अज्ञातज्ञानार्थत्वाच्छ्रोतुः** श्रोता ह्यज्ञातार्थज्ञानेनाऽर्थी, तस्य ज्ञानाधानार्थः शब्दः प्रयुज्यते वक्त्रा न दृष्टज्ञानार्थम्, उक्तार्थानामप्रयोगात् । § 1804

एवं **चार्थशब्दविशेषस्येत्यादि** श्लोकः । एवं च कृत्वाऽज्ञातार्थत्वाद् विशेषार्थस्यैव सत्त्वादित्थमस्माभिः पठ्यते—

अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
तस्य पूर्वमदृष्टत्वे सामान्यादुपसर्जनात् ॥ इति ।§ 1807

यथासङ्ख्यमर्थविशेषस्य वाच्यता शब्दविशेषस्यैव वाचकतास्माभिरिष्यतेऽनयोरेव सत्त्वात्, न सामान्यार्थशब्दयोरसत्त्वात् । **तस्य** विशेषस्य **पूर्वमदृष्टत्वात्** स एवाज्ञातत्वाज्ज्ञाप्यते, केनोपायेन चेत्, उच्यते— **सामान्यादुपसर्जनात्** । § 1808

**अतद्भेदत्वे सामानाधिकरण्याभावः**अतद्भेदत्वे इति किमुक्तं भवतीति तद् व्याचष्टे **--असदसदित्यादि,** सत् इत्युक्तेऽसदपोह्यते असन्न भवति इति - /ms तदसदसत्, तदेवासदसच्छब्देनाभिधेयं वस्तु असद्व्यावृत्तिसामान्यम्, तस्य

७ स्व ] स्वरूपविधिनाभूतस्या°nayacakra-ms-ya । स्वरूपविधिनाऽभूतस्या° nayacakra-ms-bhā । दृश्यतां पृ° ६१० पं° ६ ॥
१६ द्भावा ] °दित्युद्युद्ग्राहि° प्र° । अत्र °दित्याद्युद्ग्राहि° इति पाठः सम्भाव्यते ॥
१८ ज्ञाता ] °तार्थंज्ञानेनार्थंnayacakra-ms-ya । °तार्थज्ञानेनार्थां nayacakra-ms-bhā ॥
२१ कृत्वाऽज्ञा ] ऽज्ञातज्ञानार्थत्वाद् इति पाठः सम्यग् भाति ॥
२७ दृ ] पृ° ४६०-- २ इत्यत्रापि °**दृष्टत्वे** इत्येव पाठः । नवमारे तु °**दृष्टत्वात्** इति पाठो निर्दिष्ट इति ध्येयम् ॥

विशेषा भेदा न भवन्ति घटादयः सत्वन्तः, तेषाम**सदसच्छब्दाभिधेयवस्त्व-विशेषत्वे साक्षादनुक्तेः सतः** सामानाधिकरण्याभाव इति वर्तते । § 1809
617/mj

कथं साक्षान्न ब्रवीति सत् ? यस्मादन्यापोहेऽपि तावत् साक्षात् प्रवर्तमानस्तद्गतं नित्यत्वादिभेदं नाक्षिपति किमङ्ग पुनरन्यापोहेन व्यवहिते तद्गतान् भेदान् घटादीनाक्षेप्स्यति ? एतदर्थव्यक्तीकरणार्थं सदित्यसन्न भवति इत्यवश्यं भवतिशब्दप्रयोगाद् भवति इत्यर्थो मुख्यः श्रयणीयोऽव्याहतः । भेदे तु भवत्यर्थसम्भेदनं स्यात् । असत्त्वविविक्तसत्त्वप्राप्तावेवात्ययस्ते, कुत एव तदन्यापोहः । भवत्यसम्भेदेऽविविक्तैकसत्त्वप्राप्तौ तवान्यापोहयत्नवैयर्थ्यमेव, घटस्य पटभावादपि । § 1810

एतद् भावयितुकामः प्रश्नयति **--कथं साक्षान्न ब्रवीति सद्**िति । तस्य भावनार्थं व्याकरणं जातिमत्पक्षतुल्यदोषत्वापादनाय च **--यस्मादन्यापोहेऽपी**त्यादि यावत् **तद्गतान् भेदान् घटादीनाक्षेप्स्यती**ति, जातिमतीवापोहेऽपि तावदसद्व्यावृत्तिमात्रे साक्षात् प्रवर्तमानोऽन्यापोहसामान्यगतं नित्यत्वादिभेदं नाक्षिपति अन्यापोहेऽपक्षीणशक्तित्वात्, **किमङ्ग पुनरन्यापोहेन व्यवहिते** सदित्यसन्न भवति इत्यसदसत्त्वेनावच्छिन्नेऽभिधेयभागेऽपोहवति **गतान् घटादीन् भेदानाक्षेप्स्यती**ति सम्भावनास्ति ? इति पिण्डार्थः । वक्ष्यत्यस्यार्थस्य तदुक्तमेव सभावनं दृष्टान्तम् । सच्छब्दाभिप्रायस्यैवोपवर्णनेनान्यापोहवादिनं तावदुद्भूट्टयन्निदमाह **--एतदर्थे**त्यादि यावत् **कुत एव तदन्यापोहः ?** एतस्यान्यापोहार्थस्य व्यक्तीकरणार्थं सदित्यसन्न भवति इति वाक्यमवश्यमुपादेयम्, सच्छब्दमात्रादनभिव्यक्तेः । तत्र चावश्यं भवतिशब्दः प्रयोक्तव्यः, क्रियापदमन्तरेण सच्छब्देन सह प्रयुक्तनञोरर्थाभावात् भवतिशब्दसहितयोः साफल्यात् । यथोक्तम् **--यत्राप्यन्यत् क्रियापदं न श्रूयते**

---

१८ तं] नित्यत्वादयो जातिधर्मा अपोहे संगच्छन्त इति दिङ्नागस्याभिप्रायमत्र निराकरोति । उक्तं हि दिङ्नागेन--**जातिधर्मव्यवस्थितिः** ॥ ५ । ३६ ॥ जातिधर्माश्चैकत्व-नित्यत्व-प्रत्येकपरिसमाप्तिलक्षणा अत्रैव तिष्ठन्ति, अभेदादाश्रयानुच्छेदात् कृत्स्नार्थपरिसमाप्तेश्च । एवं दोषाभावाद् गुणोत्कर्षाच्च शब्दोऽर्थान्तरनिवृत्तिविशिष्टानेव भावानाह । **--प्र॰ समु॰ वृ॰** ५ । ३६ ॥ PSV1 C. ed. , N. ed. B. । PSV2 N. ed. B. । दृश्यतां **तत्त्वसं पं॰** पृ॰ ३१६ । तुलना--अत्र भिक्षुणापोहपक्षे जातिपक्षतुल्यत्वमतिदिष्टम्, यथाह--जातिधर्मव्यवस्थितिः--इति । जातिधर्माश्चैकत्वनित्यत्वप्रत्येकपरिसमाप्तिलक्षणा अत्रैव तिष्ठन्ति इत्यर्थः । ते इमे वस्तुधर्मा अवस्तुन्यतिदिश्यमाना असूत्रपटकारित्वं सूचयन्तीत्याह--अपि चैकत्वनित्यत्वप्रत्येकसमवायिताः । निरुपाख्येष्वपोहेषु कुर्वतोऽसूत्रकः पटः ॥ १६३ ॥ इति । **--मी॰ श्लो॰ वा॰ शर्करिका** पृ॰ ७४ ॥

२० व] दृश्यतां पृ॰ ६१९ पं॰ ३ ॥

२३ त] **तदसन्यापोहः**nayacakra-ms-ya ॥

२ य] दृश्यतां पृ॰ २६१ पं॰ ५ ॥

**तत्राप्यस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते** पा॰ म॰ भा॰ २ । ३ । १ इति । तस्माद् भवतीत्यर्थः स एव मुख्यः श्रय-णीयः, कोऽसौ ? सदर्थ एव । स च **अव्याहतः** क्वचिदव्यावृत्तो भावे - /ms
सर्वत्रैवैष्टव्यः । भेदे तु घटे वर्तमानं सत्त्वं पटादिषु न वर्तते [इ]त्यसदपि स्यात्, एवं च भवत्यर्थसम्भेदनं स्यात्, मा भूदेष दोष इति तद्भयादस-म्भेदाय भेदानाक्षेप एव, गमिष्यमाणघटादिद्रव्यप्रभेदस्य तिरस्कृतपटाद्यपेक्षा सत्त्वस्य प्राप्तिर्मनोरथैरपि न लभ्येत, **असत्त्वविविक्तसत्त्वप्राप्तावेवाऽत्ययस्ते, कुतस्ततोऽन्यस्यापोहः ?** असदसत्त्वत 618/mj

* * *

अयं तु गुणधर्म एव स्वतोऽन्यान्... ...सामानाधिकरण्याभावः । स्यादेव-म्— अनाक्षिप्तैरव्याप्तैरपि सामानाधिकरण्यं भविष्यति विवक्षावशात् । न ह्यसत्यां व्याप्तौ सामानाधिकरण्यम्, रूपशब्देन मधुरादीनामनाक्षिप्तत्वाद-व्याप्तत्वात् तच्छब्दैः सामानाधिकरण्यं न भवति, व्याप्तौ तु भवति, यथा रूपमाम्लं रूपं नीलमिति ।

---

३ तीत्य] ॰त्यर्थ स एव प्र॰ ॥

६ भा] भावे त्तैवैष्टव्यःnayacakra-ms-ya । भावे न्नैवैष्टव्यः nayacakra-ms-bhā । दृश्यतां पृ॰ ६१८ पं॰ ७ । भावे सन्नैवैष्टव्यः इत्यपि पाठोऽत्र भवेत् ॥

८ भेदाना] ॰नापेक्षnayacakra-ms-ya ॥

८ अ] असत्त्वतnayacakra-ms-bhā ॥

९ अ] अयं तु गुणधर्म एव स्वतोऽन्यान् भेदानाक्षेप्तुमसमर्थत्वाद् नीलादिवत् । अतो घटादिभेदानामनाक्षिप्तत्वादतद्भेदत्वे सामानाधिकरण्याभावः इति अयं तु गुणधर्म एव स्वतोऽन्यान् व्यावर्त्य सत्त्वद्रव्याभिधानात्, नीलादिवत् । ततश्च घटादिभेदानामनाक्षिप्तत्वादतद्भेदत्वे सामानाधिकरण्याभावः इति वा कश्चिदाशयोऽत्र सम्भाव्यते । तुलना--पृ॰ ६०७ पं॰ २६ ॥

१० सा] तुलना--एवमपोहमात्राभिधाने दोषसाम्यमुक्त्वा जातिमदभिधानेऽपि तद्वतो नास्वतन्त्रत्वात् इत्यादिना सामानाधिकरण्याभावादि यद् **भिक्षुणोक्तं** तदपोहवदभिधानेऽपि समानमित्युपपादयिष्यन् पक्षपरिग्रहं तावत् करोति--अथान्यापोहवद्वस्तु वाच्यमित्यभिधीयते । इति अत्र **भिक्षु**राह--जातिशब्दः सदादिस्तद्विशिष्टमेव द्रव्यमभिदधन्न तद्गतमेव घटादिविशेषरूपमाक्षिपति । परतन्त्रो ह्यसौ सत्तां निमित्तीकृत्य द्रव्ये वर्तते, न तु स्वतन्त्रः सर्वविशेषणविशिष्टं द्रव्यं वक्ति । ततश्च घटादेस्तेन सच्छब्देनानाक्षेपान्नास्ति तद्वाचिना सामानाधिकरण्यम् । न ह्येकोपाधिविशिष्टे द्रव्येऽभिहिते परोपाधिना सामानाधिकरण्यं भवति । यथा मधुरशब्देन माधुर्योपाधिविशिष्टं खण्डद्रव्यमभिदधता तद्गतापरशुक्लाद्यनाक्षेपात् तेन न सामानाधिकरण्यं यथैतन्मधुरं श्वेतमिति तथैतेनापि न भाव्यं सन् घटः इति इति । तदेतत् सर्वमस्मिन्नपि पक्षे समानमित्याह--तत्रापि परतन्त्रत्वाद् व्याप्तिः शब्देन दुर्लभा ॥ १२० ॥ इति । तत्रापि ह्यसदपोहविशिष्टद्रव्यं प्रतिपादयन् सच्छब्दः परतन्त्रो वर्तते नासौ तद्गतमपरमघटादिव्यावृत्तं सदाक्षेप्तुं समर्थ इत्यभिप्रायः । अतश्च तथैव खण्डादिद्रव्ये मधुरादिभिः शब्दैरात्मीयामधुराशुक्लादिव्यावृत्तिमात्रप्रवृत्तेः परस्परं शुक्लमधुरत्वादिव्याप्त्यसम्भवेनाक्षेपो नास्ति । अतश्च मधुरं शुक्लमिति विशेषणं न भवत्येव । सच्छब्देनाप्यसद्व्यावृत्तिमात्र-विशिष्टद्रव्याभिधायिना अपरा तद्गताघटादिव्यावृत्तिराक्षेप्तुं न शक्यते तत् कथमत्रापि सन् घटः इति सामानाधिकरण्यम् । **--मी॰ श्लो॰ वा॰ शर्करिका** पृ॰ ६० ॥

५ न] तुलना पृ॰ ६०७ पं॰ २७ ॥

* * *

एवाभिधाने शक्त्यभावः दूरत एवान्यापोह इति न स्वार्थाभिधानं नान्यापोहं वा कुर्यात् सच्छब्दः । तस्मादप्रतिपत्तिरेव शब्दार्थ[स्य] स्यादिति । § 1811

अथ मा भूद् भवत्यर्थस्य सम्भेदनं पटाद्यसत्त्वेनेति सर्वत्र भवत्यर्थ एव चेदिष्यते ततः **भवत्यसम्भेदेऽविविक्तैकसत्त्वप्राप्तौ तवान्यापोहयत्नवैयर्थ्यमेव** प्राप्तम् । किं कारणम् ? **घटस्य पटभावादपि,** यदि सन् घट इत्युक्ते पटादिरपि सन्नेवेति सर्वस्य सत्त्वेनैवाक्रान्तत्वे च सन्नसन्न भवति इति किंविषयोऽन्यापोहः स्यात्, असन्नामकार्थस्यात्यन्तमभावात् ? इत्यलमत्युद्घट्टनेन, प्रस्तुतमस्तु । § 1812

**अयं तु गुणधर्म एवेत्यादि** । विशेषणं गुणः, तस्य धर्म एषः, **स्वतोऽन्यानित्यादि** गतार्थं यावत् **सामानाधिकरण्याभावः** । **सच्छब्दो** गुणः विशेषणात् नीलादिवदिति पिण्डार्थः । विशेषणमनुग्राहकमनुग्राह्यं विशेष्यं प्रधानम् । § 1813

**स्यादेनव**मित्यादि । टीकायां चोदितम् **--अनाक्षिप्तैरव्याप्तैरपि सामानाधिकरण्यं भविष्यति विवक्षावशात् इदं विशेष्यमिदं विशेषणम्**

- /ms इति । अत्र **भाष्येण** पर एवोत्तरमाह — **न ह्यसत्यां व्याप्तावित्यादि** साधर्म्यवैधर्म्याभ्यां यावद् **रूपमाम्रं रूपं नील**मिति । **अनाक्षिप्तत्वादव्याप्तत्वादिति** हेतवः । § 1814

619/mj

श्रुतगुणगतभेदाभेदत्वादनाक्षेपः । यथा [शुक्लशब्देन मधुरादीनाम् । अत्र च स्वरूपापोहगुणा गुणत्वेनोच्यन्तेऽनुग्राहकत्वापेक्षया, अपोह-गुण-द्रव्याणि च द्रव्यत्वेन अनुग्राह्यत्वापेक्षया । शुतुलना पृ॰ ६०७ पं॰ २७ ॥क्लशब्दो हि स्वाभिधेयगुणमात्रविशिष्टं द्रव्यमभिदधद् द्रव्ये सतोऽपि मधुरादीन् नैवाक्षिपति, ततश्चातद्भेदत्वम्, एवमिहापि सच्छब्दो हि पूर्वमसन्न भवतीत्यसत्त्वादवच्छिन्नमंशमात्रमभिधाय सत्वद् द्रव्यमभिदधद् नैवाक्षिपति तद्विशेषं तद्विशेषान् वा यत्तत्तद्वत्] सत्वन्मात्रवदिति सच्छब्दवाच्यार्थाभेदत्वं द्रव्यादीनां घटादीनां वा । § 1815

---

७ स] ॰सम्भेदे विवि॰ प्र॰ ॥
११ त्त्वेनैवाक्रान्त] ॰न्तत्वे व nayacakra-ms-ya । ॰न्तत्वेन ? ? ॥
१२ गु] गुण विशे॰ प्र॰ ॥
१२ णात्] नीलावदिवदितिnayacakra-ms-ya ॥
१६ नुग्रा] ॰ग्राह्यं विशेष्यं प्रधानnayacakra-ms-bhā । ॰ग्राह्य प्रधान nayacakra-ms-ya ॥
४ रू] रूपमंलंरूपं नीलमितिnayacakra-ms-ya । रूपं नीलमिति nayacakra-ms-bhā ॥

वक्ष्यमाणशुक्लदृष्टान्तभावनार्थमाह --**श्रुतगुणगतभेदाभेदत्वादनाक्षेपः** । श्रुतो गुणो विशेषणं शुक्लसदादि, तद्गता भेदाः शुक्लतरादयो [द्रव्यादयो ?] वा, तेषामभेदत्वं तद्वति, अनुवृत्तिपक्षेऽन्यापोहपक्षे वा जातिस्वरूपोपसर्जन-मात्रत्वाद् गुणभूतत्वादन्यापोहमात्रोपसर्जनत्वाद् गुणभूतत्वाच्चातद्भेदत्वादनाक्षेपः । कस्य ? ततो जातेरन्यस्यापोहाद्वान्यस्य तद्वत इति । दृष्टान्तः --**यथे**त्यादि उद्ग्राहितार्थभावनार्थमुदाहरणं पक्षद्वयसाम्यापादनम् । सत्त्वपक्षे **शब्दस्वरूपं** गुण एव, जाति-गुणौ गुणो द्रव्यं च, द्रव्यं तु द्रव्यमेव, उपकारी गुणः प्रधानं द्रव्यमित्यर्थः । विवक्षावशात्तु प्रतिपाद्यार्थस्य । अपोहपक्षे **शब्दस्वरूपं** गुण एव, अपोह-गुणौ गुणो द्रव्यं च, द्रव्यं च द्रव्यमेवेति पक्षद्वयेऽपि विशेषण-विशेष्यत्वविभागक्रमेण तुल्यदोषत्वापादनेन च सामानाधिकरण्याभावोत्कीर्त-नो ग्रन्थो यावत् **सत्वन्मात्रव**दिति प्रायो गतार्थः । विशेषस्तु विव्रियते--अत्र च स्वरूप-जाति-गुणा गुणत्वेनोच्यन्ते जाति-गुण-द्रव्याणि च द्रव्यत्वेनेति प-रेणोक्तत्वान्नोच्यते । **अत्र च स्वरूपापोहे**त्यादि याव**दनुग्राह्यत्वापेक्षये**ति तत्स-मानार्थोक्तेः सोऽपि द्रष्टव्यः । एतस्यार्थस्य भावना --**शुक्लशब्दो ही**त्यादि यावत् **ततश्चातद्भेदत्वं** शुक्लाभेदत्वमिति सत्त्वदभिधानपक्षे दोषोत्कीर्तनं निदर्श-नत्वेन गतार्थम् । **एवमिहापि सच्छब्दो हि पूर्वमसन्न** भवतीत्यादि दार्ष्टान्तिक-त्वेन सैव परिपाटी तुल्या यावत् **सत्त्वद्द्रव्यमभिद**धदिति नयेनेत्यतः प्रभृति उदकादिना द्रव्यभेदेन सत्त्वद् गुणरूपादिगुणभेदेन कर्मगमनादिकर्मभेदेन वा सत्त्वदिति । **तं विशेष**मिति एकं वापोहवन्तं द्रव्यादिभेदानामन्यतमं **तान् वि-शेषान्** वेति सर्वान् भेदान् वा **नैवाक्षिपति** इति वर्तते । **व?यत्तत्तद्व**दिति, *तिष्ठन्तु तावद् विशेषाणामन्यतमः सर्वे वा, किं तर्हि ? विवक्षितमेकं घ-टादि वा गुणादिविरहितं तद्वस्तु नैवाक्षिपति नाप्यारातीयं ततो द्रव्यादि वा तद्वद्वस्तु तं विशेषं तद्विशेषान् वा, नारातीयानामपि विशेषाणामविभि ?धा-तेति । **सत्वन्मात्रव**दिति, यथा सत्वान्निराक्रियते सत्वन्मात्रपक्षेऽनाक्षेपस्तथा त्वदिष्टेऽन्यापोहवत्पक्षेऽपि । **इति सच्छब्दवाच्यार्थभेदत्वं द्रव्यादीनां घटादीनां वे**ति भावितार्थानुसारेणोपसंहारः । § 1816 - /ms

१620/mj

१. °जातिगुण गुणत्वेनोच्यतेnayacakra-ms-ya । °जातिगुणत्वेनोच्यन्ते nayacakra-ms-bhā ॥

११ त्वाच्चा] **°च्चतद्भेदत्वादनापेक्षः** प्र° ॥
१३ स] **सत्वमात्र°** प्र° । दृश्यतां पृ° ६१९ पं° २५ ॥
१७ त] **तत्समानोर्थोक्तेः** प्र° । तत्समानोऽर्थोक्तेः इत्यपि पाठोत्र भवेत् ॥
२० भिद] **°दवदिति** प्र° ॥
२१ व] वर्ततेऽत्र यत्तत्तद्वदिति ? ॥
२२ *] तिष्ठतु ? ॥
२३ हितं] तद्वद्वस्तु ? ॥
२४ नारातीया] **°याणमपि विशे°**nayacakra-ms-ya । **°याणाम विशे°** nayacakra-ms-bhā ॥
२४ स] **यथा त्वनिराक्रियते** प्र° । यथा सत्वान्निराक्रियते इति पाठोऽत्र सम्भाव्यते । सदस्ति अस्येति सत्वान्, यथा स निराक्रियते त्वया सत्वन्मात्रपक्षेऽनाक्षेपात् तथाऽन्यापोहवत्पक्षेऽपीत्याशयो भाति ॥
१२ प] अत्र **°पक्षेऽनाक्षेपात्त**था इत्यपि पाठः स्यात् ॥

सच्छब्दो हि असत्त्वादवच्छिन्नं धर्मिणोंऽशमात्रमभिधत्ते, तत्सत्स्वरूपजातिविशिष्टद्रव्याभिधायित्वात्, शुक्लश्रुतिवत् । द्रव्यशब्दश्च अद्रव्यापोहमात्रमभिधत्ते न तद्विशेषम् । इत्थं तयोरवच्छिन्नभागमात्रविषयत्वादभेदवत्त्वान्निर्विषयत्वात् कुत एकार्थता ? इत्यसदसद्रूपेऽपि अतद्भेदत्वादनाक्षिप्तत्वादसामानाधिकरण्यम् । अत्रापि सच्छब्देन असद्व्यावृत्तिमात्रविशिष्टद्रव्याभिधानात् सतोऽपि द्रव्यादीनामनाक्षेपः, ततश्च तदभेदत्वम् । § 1817

ननु च तत्र दृष्टं सामानाधिकरण्यम्--शुक्लं खण्डम्, तच्च मधुरम्, शुक्लतरः § 1818

**सच्छब्दो** हीत्यादि कारणभावना । सदित्यसन्न भवति इति **असत्त्वादवच्छिन्नं धर्मिणोंऽशमात्रं सच्छब्दोऽभिधत्ते** न तस्यान्यं कश्चित्, अपोहनित्यत्वादंशवत् । मा मंस्थाः--*नैवं संभवतीति, अत आह --**तत्सत्स्वरूपजातिविशिष्टद्रव्याभिधायित्वात्,** व्याख्यातार्थ एवायं हेतुः, दृष्टान्तानुगुण्येन तु पक्षद्वयप्रसिद्ध्यापादनार्थं **तद्व**दिति सामान्येनोक्तः । **शुक्लश्रुतिव**दिति, अशुक्लनिवृत्तिमात्रं धर्म्यंशं शुक्लशब्दोऽभि[द]धत्तस्यैवांशान्तरं नाभिधत्ते यथा तथा सच्छब्दोऽसन्निवृत्तिमात्रमुक्तवा नान्यत् किञ्चिदिति । § 1819

- /ms **तदुपसर्जनं द्रव्यमाह** इत्यत्र **द्रव्यशब्दश्च** अद्रव्यं न भवति इत्येतावद**द्रव्यापोहमात्रमभिधत्ते** तेनैव न्यायेन, **[न] तद्विशेषं** न द्रव्यविशेषम् । ततः किमिति चेत्, **इत्थं तयोः** सद्द्रव्यशब्दयोर**वच्छिन्नभागमात्रविषयत्वा**दभेदवत्त्वम्, **अभेदवत्त्वाद्** निर्विषयत्वम्, **निर्विषयत्वात् कुत एकार्थता** सच्छब्दद्रव्यशब्दयोः ? इत्यतः **असदसद्रूपेऽपि** असद्व्यावृत्तिरूपे सत्यपि न सतो भेदा द्रव्यादयः, न द्रव्यस्य घटादयः, न सच्छब्दस्य द्रव्यादिशब्दाः, तस्मादतद्भेदत्वमनाक्षिप्तत्वात्, अतोऽसामानाधिकरण्यम् । अतद्भेदत्वानाक्षिप्तत्वापादनाय परदूषितपक्षसमानदोषापादनग्रन्थोऽयम् **अत्रापि सच्छब्देने**त्यादिरक्षरविपर्यासेनान्यापोहपक्षेऽपि यावत् **तदभेदत्व**मिति समानः । दृष्टमिष्टं च सामानाधिकरण्यं सत्त्वदभिधानेऽपोहवदभिधाने चेत्थं न प्राप्नोतीति । § 1820

अत्राह --**ननु च तत्र दृष्ट**मित्यादि । अनाक्षिप्तत्वमतद्भेदत्वं चानैकान्तिकं **शुक्लखण्डादिसामानाधिकरण्यदर्शनात्** । अथवा दृष्टविरुद्धं त्वयोच्यते शुक्लशब्दस्वरूप-जाति-गुणानां खण्डद्रव्यस्य *वात्यन्तभिन्नार्थत्वात् जातिमत्प-

१३ *] नैवं न भवतीति प्र° ॥
१६ व्या] व्याख्यार्थ एवायं हेतु दृष्टान्तोनुगुण्येनतुnayacakra-ms-bhā । व्याख्यार्थ एवायं हेतु दृष्टान्तो तु nayacakra-ms-ya ॥
१७ न्निवृत्तिमा] °मात्रं मुक्त्वा इति रम्यं भाति ॥
२१ त] दृश्यतां पृ° ६०७ पं° २६ ॥
२३ इ] इत्यत असद° प्र° ॥
२६ अ] असतो°nayacakra-ms-ya ॥
२९ भिधाने] वेत्थं न प्रा°nayacakra-ms-bhā । चेत्थं प्रा° nayacakra-ms-ya ॥
३ *] वात्यन्त° प्र° ॥

क्षेऽपोहवत्पक्षे चेति । पुनः **तच्च** खण्डं **मधुरम्** इति रूपरसयोर्भेदात् द्रव्यस्य रूपरसाभ्यां च भेदादसम्बद्धमेवेदम् । तथा शुक्लतरः शुक्लतमः इति गुण-जातिगतप्रकर्षभेदस्य द्रव्येणासम्बन्धः । तथा शुक्लशङ्खस्य जातिर्नित्या इति शङ्खद्रव्य-शुक्लगुण-जाति-तन्नित्यत्वानामत्यन्तं भेदादसम्बन्धः । स च दृष्टः ।
§ 1821

621/mj

शुक्लतमः, शुक्लशङ्खस्य जातिर्नित्येति । इह वा किं न दृष्ट-म्--सद्द्रव्यं सद्गुणः सत्कर्मेति ? एतदेव तु न प्राप्नोतीत्युच्यते ।
§ 1822

यथा चैते जातिमत्पक्षे सच्छब्दप्रयोगे घटाद्यनाक्षेपोऽतद्भेद-त्वमसामानाधिकरण्यं च दोषास्तथान्यापोहेऽपि, असाक्षाद्वचन-त्वात् । § 1823

भवत्साक्षाद्वचने च रूपनीलत्ववद् गुणपर्यायलक्षणं विशिष्टं भवदेव सद्यो वस्त्वभिधीयते प्राधान्येनेति नास्वतन्त्रविशिष्टं भव-द्वस्तु । तच्च सदसदुपसर्जनं जात्युपसर्जनं वा । § 1824

यथा चाहुः--सच्छब्देन सह भेदशब्दा असमानाधिकरणाः, तदभिधानेऽना- § 1825

अत्र दोषस्तादवस्थ्यादेवमुच्यते **--इह वा किं न दृष्टं सद्द्रव्यं सद्गुणः सत्कर्म इति ?** न हि दृष्टाद् गरिष्ठं प्रमाणमस्ति, तस्यानतिक्रमणीयत्वात् । किं तर्हि ? **एतदेव तु** दृष्टं सामानाधिकरण्यं गुणशब्दत्वे विशेषणद्वारेण शब्दस्वरूप-जात्युपसर्जने तद्वति वाच्येऽपोहवति वा **न प्राप्नोतीति उच्यते** परं प्रति दोषः । § 1826 - /ms

एतदुभयं तुल्यदोषमित्यापादयति **--यथा चैते जातिमदित्यादि** । यथा परपक्षे सच्छब्दप्रयोगे घटाद्यनाक्षेपोऽतद्भेदत्वमसामानाधिकरण्यं च दोषाः शुक्लशब्दमधुरानाक्षेपादिदृष्टान्तास्तथा अन्यापोहपक्षे सच्छब्देऽपि जातिमत्स-च्छब्दघटाद्यनाक्षेपादिदृष्टान्ताः । उभयत्र तुल्यो हेतुः **--असाक्षाद्वचनत्वादिति** । § 1827

तच्चैतत् सर्वं दोषजातमसत्योपाधिसामान्यसोपानारोहिसत्यभवदर्थ-विशेषसाक्षाद्वचनपक्षे नास्ति सामानाधिकरण्यं चोपपद्यते इति तत्प्रदर्श-नार्थमाह **--भवत्साक्षाद्वचने चेत्यादि यावज्ज्ञात्युपसर्जनं** *वेति । **रूपनीलत्व-**

---

४ शु] शुक्ला° प्र° ॥
१७ द्र] °द्रव्य° प्र° ॥
२० स] सद्गुणं प्र° । सन् गुणः ? ॥
२१ जा] °जाति+उप° प्र° ॥
२४ धुराना] °नाक्षेपत्वादिदृष्टान्ता° प्र° ॥
२९ जा] जातिम[त्पक्षव]त् सच्छब्द° इत्यपि संभवेत् पाठः ॥
६ *] चेति प्र° ॥

**व**दिति रूपजातिसामान्यासत्योपाध्यनुगतिद्वारेण नीलविशेषस्य सद्यो भवतः सत एवार्थस्य गतिररूपानीलत्वनिवृत्त्यसत्योपाधिद्वारेण वा यथा भवति त- थेहास्मदिष्टगुणपर्यायलक्षणं विशिष्टं भवदेव सद्यो वस्तु अभिधीयते प्राधान्येन मुख्ययैव वृत्त्या साक्षाद् । यत्तत्र द्रव्यघटपटादि भेदजातं गुण-कर्म-सामान्य- विशेषादि वा परिकल्पितं तदसत्, संवृतिसत्त्वात् । गुण-पर्यायलक्षणो हि विशेष एव सन्, न अङ्गुलिव्यतिरिक्तमुष्टिवद् बलाकादिव्यतिरिक्तपङ्क्त्यादिव- च्चेति द्रव्याद्यपि तदेव **इति** एतस्माद्धेतोः **नास्वतन्त्रविशिष्टं भवद्वस्तु** । त- **च्चो**क्तविधिनाऽपोहवत्पक्षापेक्ष**मसदसदुपसर्जनं** जातिमत्पक्षापेक्षं **जात्युपस-**
- /ms **र्जनं वा,** द्विधापि न दोष इति । § 1828

**यथा चाहु**रित्यादि । **टीकाकारै**र्यानि साधनान्युक्तानि जातिमत्पक्ष- दोषप्रदर्शनार्थानि तान्येवापोहवत्पक्षेऽपि तद्दोषप्रदर्शनार्थानि । तत्र **सच्छ- ब्देने**ति प्रथमे साधने भेदशब्दानां सामान्यशब्देन सह सामानाधिकर- ण्याभावः पक्षीक्रियते । द्वितीये भेदैः सह सामान्यस्य । तदभिधानं गुण- भूतेनान्यापोहेनापोहवतोऽभ्युपगतम्, लक्षणवाक्ये **शब्दान्तरार्थापोहं हि स्वार्थे**
622/mj **कुर्वती श्रुतिरभिधत्ते**

* * *

क्षिप्तत्वाद् भेदानाम्, शुक्लाभिधानानाक्षिप्तमधुरादिवत् । सच्छब्दो भेदैः स- हासमानाधिकरणः, सामान्यानभिधायित्वात्, शुक्लशब्द इव मधुरादिभिः स- हासामान्यवाची । द्रव्यादिशब्दो वा सच्छब्देन सहासमानाधिकरणः, अत- द्विशेषसम्बन्धित्वात्, मधुरशब्द इव शुक्लशब्देन । सच्छब्दो वा असद्व्यावृत्तिम- न्तं नाभिधत्ते, घटादिशब्दैः सहासमानाधिकरणत्वात्, अनित्यशब्दवत् । यथा चाह--

विद्यमानाः प्रधानेषु न सर्वे भेदहेतवः ।
विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिभिः ॥ वाक्यप० ३ । ५ । ४ § 1831

* * *

इति वचनात् । भेदानाक्षेपश्चान्यापोहे चरितार्थत्वादिष्टः । अतः सिद्धो हेतुः **--तदभिधानेऽनाक्षिप्तत्वाद् भेदानाम्,** तेषामेव च पक्षीकृतत्वात् । **शुक्लाभिधानानाक्षिप्तमधुरादिव**दिति दृष्टान्तोऽपि भावितार्थः । § 1832

द्वितीयेऽपि साधने **सच्छब्दे** पक्षीकृते भेदानाक्षेपात् कस्य तत् सामान्य- मपोहवद्वस्तु ? इति **सामान्यानभिधायित्वं** सिद्धं तस्य । दृष्टान्तः **--शुक्लशब्दो**

---

८ न] दृश्यतां पृ० १३ पं० ८ ॥
९ विधिनाऽपोह] °पोहावपेक्षापेक्षत्वमस- दुपसर्जनंnayacakra-ms-ya । °पोहावपक्षत्वमसदसदुपसर्जनं nayacakra-ms-ya ॥
१४ य] यथा बाहुरित्यादि प्र० । यथा वाहुरित्यादि ? ॥
१५ भूतेनान्यापोहेना] °पोटवतो°nayacakra-ms-bhā । °पोटगतो° nayacakra-ms-ya ॥
१ धुरादिव] °वदि दृष्टा° प्र० ॥

**मधुरादिभिः सहासामान्यवाचीति** । पूर्वत्र शुक्लशब्दसहयोगावधिका भेदशब्दा एव साध्याः दृष्टान्ताश्च, इह तु भेदशब्दावधिकाः सामान्यशब्दा इति विशेषः । § 1833

तृतीये **द्रव्यादिशब्दो वेति** साक्षाद् विशेषशब्द एव तद्वारेण विशेषार्थ एव वा साक्षात् पक्षः । **अतद्विशेषत्वम्,** असदसतः सामान्यस्य न विशेषा द्रव्यादयः, अनाक्षिप्तत्वादुक्तन्यायेन । न च तत् सामान्यं तेषां सम्बन्धि ते वा तस्येति सिद्धमतद्विशेषसम्बन्धित्वम् । **तद्विशेषासम्बन्धित्वात्, अतद्विशेषसम्बन्धित्वात्** इति वा पाठान्तरे । **मधुरशब्द इव शुक्लशब्देनेति** गतार्थो दृष्टान्तः । **सच्छब्दो वाऽसद्व्यावृत्तिमन्तं नाभिधत्ते,** अपोहवतः स्वार्थाभिमतस्याभिधानमेव वा - /ms निराकुर्महे । **घटादिशब्दैः सहासमानाधिकरणत्वात्,** सच्छब्दस्य घटादिशब्दैः सहासमानाधिकरणत्वं भेदानाक्षेपात् सिद्धम् । **अनित्यशब्दवत्,** अनित्यः शब्दः इत्युक्ते नित्यो न भवति इति नित्यत्वव्यावृत्तिमन्तं ब्रूते नासद्व्यावृत्तिमन्तम्, शब्दशब्देनैव च समानाधिकरणोऽनित्यशब्दो न घटादिशब्दैः । अतः साध्यसाधनधर्मद्वयं दृष्टान्ते दार्ष्टान्तिके च सिद्धमिति । § 1834

**यथा चाहेति** ज्ञापकं सम्प्रतिपन्नवाद्यन्तरमतप्रदर्शनं तस्यार्थस्य दृढीकरणार्थम् । **प्रधानेषु** विशेष्येषु **विद्यमाना** अपि **भेदहेतवो धर्माः सर्वे नोच्यन्ते,** कश्चिदेव विशिष्टो विवक्षितः केनचिद् विशेषणेन तद्वाचिना विशेषशब्देनोच्यतेऽर्थो विशेषान्तराव्यापारेण, तत्रैव चरितार्थत्वात् तस्य गुणभूतत्वात् । अत एव च ते विशेषशब्दाः इत्युच्यन्ते **व्यावृत्तार्थाभिधायित्वादिति** । एतेनैव यत्नेन त्वदीयेन च विधिप्रधानसत्वदभिधानपक्षदोषोक्तियत्नेन कृतप्रयोजनत्वान्न पृथग् दूष्यते । § 1835
623/mj

ननु चासदसच्छ्रुतेः सामान्यश्रुतित्वादयमप्रसङ्गः । केन तस्याः सामान्यश्रुतित्वम् ? यदा सा स्व[रूप]गुणमात्रविशिष्टं द्रव्यमाह तदा भेदानामनाक्षेपात् कस्य तत् सामान्यं यदभिदधतीति सामान्यश्रुतिः इत्युच्येत । न सच्छ्रुतिः...। § 1836

अथवा सच्छब्दो मुख्यया वृत्त्या भूतार्थेन स्वरूपेण प्रकाश्यमानः संवृतिसद्वस्तु स्वरूपव्यवहितमाह स तत्र वृत्तः स्वरूपव्यवहितेऽर्थे सति असद्व्यावृत्तिं न § 1837

---

६ स] सह सामान्य° प्र° ॥
८ च] च
सामान्यंnayacakra-ms-ya ॥
१० स्याभिधान] °नामवधा निरा° प्र° ॥
१५ त्वा] °त्वात्
च्छब्दस्यnayacakra-ms-bhā ।
°त्वात् शब्दस्य nayacakra-ms-ya ॥
१५ य] यथा वाह प्र° ॥
१७ र] °रतमप्र°nayacakra-ms-ya
। °रमप्र° nayacakra-ms-bhā ॥
१८ चिद्]
विशेषेणनnayacakra-ms-ya ॥
२३ विशेषान्त] °न्तरव्यापा° प्र° ॥
२६ स्व] तुलना--पृ° ६०७ पं° २६--२७ ॥
१ अ] तुलना--पृ° ६०७ पं° २९ ॥

अत्राह --**ननु चासदसच्छ्रुतेः सामान्यश्रुतित्वादयमप्रसङ्गः** । सच्छब्दनिवर्तितासदपोहः सर्वत्र वृत्तेः समानः, तद्वाचित्वाच्चासौ सामान्यशब्दः, भेदाश्च घटादयोऽसद्व्यावृत्त्या व्याप्तत्वादाक्षिप्तास्तद्भेदा एव । अतः सर्वोऽयं वाग्व्यायामो विफलः--सामानाधिकरण्यं नास्ति, भेदा न भवन्ति, सामान्यं न भवति, अनाक्षेपात् इत्यादिरप्रसक्त एव विचार इति । § 1838

अत्र ब्रूमः--त्वद्वचनानुवृत्त्यैव त्वमिदं प्रष्टव्योऽसि **--केन तस्याः सामान्यश्रुतित्वम् ?** केन हेतुना तस्या असद्व्यावृत्त्यर्थायाः सच्छ्रुतेः सामान्यश्रुतित्वम् - /ms ? नास्त्येव हेतुरित्यभिप्रायः । त्वन्मतेनैव **यदा सा स्व[रूप]गुणमात्रविशिष्टं द्रव्यमाह,** स्वरूपं गुणो विशेषणम्, तत् परिमाणमस्य तत् स्वरूपगुणमात्रम्, तेनैव विशिष्टं नाधिकेन, लक्षणवाक्येऽपि **शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती** इति वचनात् द्रव्यमसद्व्यावृत्तिगुणप्रमाणविशेषणमित्यर्थः । गुणधर्मत्वं च सत्त्वपक्षवद् भावितमेव । **तदा भेदानामनाक्षेपात् कस्य तत् सामान्यं यदभिदधतीति सामान्यश्रुतिः इत्युच्येतेति** । अत्र प्रयोगः **न सच्छ्रुतिः** इत्यादिर्गतार्थः । तस्मात् तदवस्थः प्रयोगो भेदानाक्षेपादिस्त्वन्मतादेवेति । § 1839

**अथवेत्यादि** याव**दपोहशब्दो द्रव्येषु वर्तते** । व्याख्यानविकल्पान्तरं **तद्वतो नास्वतन्त्रत्वात्** इत्यस्य । **सच्छब्दो मुख्यया वृत्त्या भूतार्थेन स्वरूपेण प्रकाश्यमान** इति शब्दस्वरूपमात्रेण बुद्ध्या गृह्यमाणः **संवृतिसद्वस्तु स्वरूपव्यवहितमाह । स तत्र वृत्तः स्वरूपव्यवहितेऽर्थे** सति व्यावृत्तेरसतः सन् असन्न भवति इति प्रसज्यप्रतिषेधासम्भवात् प्रतिषेधसमाश्रयोऽर्थः सत्तु[ल्य]एव स्यात् असन् इति, **नञिवयुक्तमन्यसदृशाधिकरणे** पा°दृश्यतां पृ° २३२ टि° ७ ॥ वा° ३ । १ । १२ इति परिभाषितत्वात् । अब्राह्मणो ब्राह्मणवदधीते इति ब्राह्मणसदृशे पुरुष एव प्रत्ययो नाश्वे न गवीति यथा न तु तथा किञ्चिदसत् सत्तुल्यमस्ति, सतोनस्यासत्त्वादसतोनत्वाभावात् ।

---

१ चा] **वासद°** प्र° ॥
२ ब्द] **निवृत्तितास°**nayacakra-ms-ya ॥
७ वृ] **वृत्ते** प्र° ॥
८ द्व्यावृत्त्य] **°त्तार्था°** प्र° ॥
१३ स] **सत्यपक्ष°**nayacakra-ms-ya ॥
१६ भिद] **°दवतीति** प्र° । स्त्रीलिङ्गत्वात् सामान्यश्रुतेः अभिदधती इति शतृप्रत्ययान्तोऽयं प्रयोग इति ध्येयम् ॥
१८ त] तद्वतो नास्वतन्त्रत्वाद् भेदाज्ज्ञातेरजातितः । अर्थाक्षेपेऽप्यनेकान्तस्तेनान्यापोहकृच्छ्रुतिः ॥ इति सम्पूर्णः श्लोकः प्रतिभाति । श्लोकोऽयं न **प्रमाणसमुच्चयादपि** तु **दिङ्नागस्यैव** ग्रन्थान्तरादुद्धृतोऽत्रेति प्रतीयते । अतोऽस्य पूर्वार्द्धं पृ° ४७३-- २, ४७५-- १ इत्यत्र यथा वक्ष्यते तथात्रास्माभिर्योजितम् । **प्रमाणसमुच्चये** तु यथायं श्लोकस्तथा पृ° ६०७ इत्यत्र दर्शितमस्माभिः ॥
१८ स्व] **°स्वरूपेण बुद्ध्या**nayacakra-ms-bhā ॥
२१ संवृ] **संप्रतिसद्वस्तु** प्र° ॥
२२ स] **सतु एव**nayacakra-ms-ya ॥
२४ अब्राह्म] **°ह्मणो ब्रा°**nayacakra-ms-bhā । **°ह्मणे ब्रॉ°** nayacakra-ms-ya ॥
२४ स] **तत्तु°**nayacakra-ms-ya ॥
१ स] सता ऊनस्य असत्त्वादसता ऊनत्वाभावादित्याशयो भाति । अत्रारुचौ तु सतोऽन्यस्यासत्त्वादसतोऽन्यत्वाभावात् इति पाठः कल्पनीयः ॥

तस्मादयुक्तमेवैतत् सदित्यसन्न भवति इति । 624/mj

* * *

करोति भूतार्थेन, उपचारादसदसद् ब्रवीति । सोऽपोहेऽपि तावददृष्टत्वात् तद्वति अप्रधानत्वादस्वतन्त्रः । न हि यो यत्रोपचर्यते स तमर्थं भूतार्थेनाह । तथा चोक्तम्--

मञ्चशब्दो यथाधेयं मञ्चेष्वेव व्यवस्थितः ।
तत्त्वेनाह तथापोहशब्दो द्रव्येषु वर्तते ॥§ 1842

स्वरूपेऽन्यापोहे च मुख्यया वृत्त्या वर्तित्वापोहशब्दस्तद्वति वर्तते, न मुख्यया वृत्त्या, उपचारात् । सच्छब्दो हि... ... ...मञ्चशब्दवत् ।

सोऽप्युपचारो न घटते । न तावत् प्रत्ययसंक्रान्तितः सारूप्यादुपचारः संभवति, सारूप्यासम्भवे प्रत्ययसंक्रान्त्यभावात् क्रमेणानभिधानाच्च । नापि गुणोप-

* * *

इत्थं सच्छब्दोऽसद्भावावृत्तिं न करोति भूतार्थेन, किं तर्हि ? उपचारादसदसद् ब्रवीति, अन्यस्यापोहं गौण्या वृत्त्या ब्रूते, स सच्छब्दोऽपोहेऽपि तावददृष्टत्वात् तद्वति अपोहवति दूरत एवादृष्टत्वादप्रधानः, अप्रधानत्वादस्वतन्त्रः न हि यो यत्रोपचर्यते स तमर्थं भूतार्थेनाहेति साध्येन मुख्यानभिधानेन हेतोरुपचाराप्रधानास्वातन्त्र्यानुगमं दर्शयति । तथा चोक्तम्--मञ्चशब्द इत्यादि तन्निदर्शनम् । मञ्चशब्दो मञ्चस्थान् मञ्चस्वरूपापन्नानेव ब्रूते न पुरुषत्वापन्नानिति । तथापोहार्थः शब्दोऽपोह एव व्यवस्थितोऽपोहवत्सु द्रव्येषु वर्तत इति दार्ष्टान्तिकम् । पूर्वत्र विशेषणत्वादस्वातन्त्र्यम्, इहाभिधानवृत्तेरेवोपचारादस्वातन्त्र्यदोष इति विशेषः । इत्थमस्माभिरुत्प्रेक्षितो दोषविकल्पः । - /ms

§ 1843

त्वदुक्तसत्त्वपक्षदूषणानुसारेणाप्येष दोष उच्यते । एतदनभ्युपगमेऽपि अयमन्योऽर्थोऽन्यापोहवत्पक्षदूषणः --स्वरूपेऽन्यापोहे चेत्यादि । स्वरूपमन्यरूपनिवृत्त्यात्मकमर्थान्तरनिवृत्त्यात्मकं च स्वार्थं मुख्यया वृत्त्या अभिदधानस्तद्वति उपचारेण वर्तते नाभिधानेना[पो]हशब्द इति समो न्यायः ।

---

१० म] मञ्चशब्दो यथाधेयं मञ्चेष्वेव व्यवस्थितः । तत्त्वेनाह तथा जातिशब्दो द्रव्येषु वर्तते ॥वाक्यप° ३ । १४ । ३५१ इति भर्तृहरेः कारिकात्र परिवर्त्योद्धृता ग्रन्थकारेण । मञ्चाः क्रोशन्ति(?') इति क्रियासम्बन्धस्याधेये मञ्चस्थे प्राणिन्युपपत्तेराधाररूपाभेदेनाधारवचनोऽपि मञ्चशब्दस्तदाधेयवचन इति निश्चीयते एवम् आनीयन्तां गावः इति क्रियासम्बन्धस्य जातावनुपपत्तेस्तदभेदापन्ना व्यक्तयः क्रियासमन्वयसमर्था जातिनिबन्धनेन शब्देनोपादीयन्त इत्यवगमः । इति हेलाराजकृतायां वाक्यपदीयटीकायां वृत्तिसमुद्देशे ३ । १४ । ३५१ ॥

१६ न] तुलना--पृ° ६०७ पं° ३० ॥

२४ सा] **साप्येन** प्र° ॥

२७ स] **°सत्वपक्ष°** nayacakra-ms-ya ॥

२७ ना] **नाभिधानेनाह शब्द** प्र° । नाभिधानेनाऽऽह शब्दः इत्यपि स्यादत्र पाठः ॥

७ स] सामान्योयःnayacakra-ms-ya ॥

उपचारादिति हेतुः । **सच्छब्दो** ही**त्यादिरुपनयः । **मञ्चशब्दव**दिति दृष्टान्तः तद्वति न वर्तते मुख्यया वृत्त्या इति साध्ये । एवमुपचारमभ्युपेत्य दूषणमुक्तम् । § 1844

**सोऽप्युपचारो न घटत** इति ब्रूमः । द्वयी हि उपचारस्य गतिः--सारूप्यात्, यथा यमलयोरन्यतरस्मिन् स एवायम् इति प्रत्ययसङ्क्रान्तेः, राज्ञो भृत्येऽमात्यादौ राजा इति वा प्रत्ययः । गुणोपकाराद्वा उपधानानु[रा]गादिव स्फटिके रक्तत्वादिबुद्धिः । तत्र **न तावत् प्रत्ययस-**
- /ms **ङ्क्रान्तितः सारूप्यादुपचारः सम्भवति सारूप्यासम्भवे प्रत्ययसङ्क्रान्त्यभावात्** स्वामिभृत्ययोर्भिन्नत्वात्, यदि सैव बुद्धिः सङ्क्रान्ता स्यादभिन्ना स्वामिनि भृत्ये
625/mj च स्वाम्यनुज्ञातमुक्तावलीव स्यात्, न तु भवति,

* * *

कारात्, स्फटिकवद् विशेषणप्रकर्षमगृहीत्वा विशेष्ये प्रत्ययप्रसङ्गात्, अयथार्थज्ञानोत्पत्तेः, युगपदसम्भवाच्च ।

स्वशब्दार्थप्रवृत्ति... ... ...।

मञ्चशब्दो यथाधेयं मञ्चेष्वेव व्यवस्थितः ।
तत्त्वेनाह तथा भावशब्दो द्रव्येषु वर्तते ॥ § 1847

विशेष एव वस्तु परमार्थतोऽस्ति, न द्रव्यार्थः सामान्यम् । तस्यासत्त्वाद् विशेष एव स्वतन्त्रः कल्पितसामान्योपसर्जनः, मञ्चशब्दवत् ।

इतश्च त्वन्मतिवद् भेदात् तद्वतो न वाचकः । भिन्ना हि व्यावृत्तिमन्तः

* * *

किं तर्हि ? राजवदमात्यः इति भिन्नैवाभेदोपचारा भवति । तस्मान्न प्रत्ययसङ्क्रान्तिर्न च सारूप्यमपोहापोहवतोः । अतो नोपचारो निमित्ताभावात् । किञ्च, **क्रमवृत्त्यभावाच्च,** न हि क्रमेण सकृदुच्चरितः शब्दः क्षणिकत्वादसदपोहे वर्तित्वा तद्वति वर्तते राज-भृत्यबुद्धिवत् । तस्मादपि नास्ति प्रत्ययसङ्क्रान्तिसारूप्यासम्भवादुपचारः । स्यान्मतम्--गुणोपकारादिति । **तन्नापि गुणोपकारात्, स्फटिकवद् विशेष[ण]प्रकर्षमगृहीत्वा विशेष्ये प्रत्ययप्रसङ्गात्,** यथा स्फटिके रक्तत्वादिप्रत्यय उपधानप्रकर्षमगृहीत्वा भवति तथा विशेषणप्रकर्षमगृहीत्वा विशेष्ये प्रत्ययः स्यात्, न तु भवति । किञ्च, **अयथार्थज्ञानोत्पत्तेः,** यथा स्फटिके रक्तत्वादिप्रत्ययो मिथ्याप्रत्ययस्तथा विशेषणसरूपप्रत्ययो विशेष्ये स्यात् । किञ्च, **युगपदसम्भवाच्च,** *यदा च बहवो ग्रहीतारो भवन्ति गुणवतः शुक्लादेः तद्यथा--घटः पार्थिवो द्रव्यं सञ्छुक्लो म-

८ त] तव न प्र॰ ॥
१० मु] ॰मुक्तावलीय स्यात्nayacakra-ms-bhā । ॰मुक्तावलीय स्यात् nayacakra-ms-ya ॥
२२ म] दृश्यतां पृ॰ ६२४ पं॰ ४ ॥
२९ भावा] ॰वाच प्र॰ ॥
२ *] एतदन्तर्गतः पाठः प्रमाणसमुच्चयवृत्तौ प्राय ईदृश एवोपलभ्यते । दृश्यतां पृ॰ ६०८ पं॰ १३ ॥

धुरः सुरभिः इत्येवमादिविशेषैस्तदा गुणोपकारो विरुध्यते । न हि शक्यं तदा द्रव्येण एकगुणरूपेण स्थातुम्, अनेकात्मकस्याविशिष्टत्वात् । नाप्येकदेशेन गुणरूपमनुभवितुं शक्यम्, कृत्स्नस्य घटादिरूपप्रतीतेः । अथ पुनः सर्वैर्घटत्वादिभिरुपकारो युगपत् कृत्स्नस्य क्रियते ततः सर्वेषां प्रत्येकं ग्रहीतॄणां घटादिरूपग्रहणाभावात् सर्वगुणसङ्करेण मेचकदर्शनम् युगपत् सर्वरूपापत्तेः स्यात् स्फटिकवदेव, न तु भवति । तस्मादयुक्तस्ताद्रूप्यात् प्रत्ययसङ्क्रान्तेरुपचारः, यमलादिवत्; नापि गुणोपकारात् स्फटिकवदिति । § 1848 - /ms

**स्वशब्दार्थप्रवृत्तीत्यादि** । अथवायमन्योऽर्थोऽस्य विकल्पस्यैव । **मश्वशब्द** इति श्लोकस्यान्त्यपादे पाठान्तरं **तथा भावशब्दो द्रव्येषु वर्तते** इति । तस्य व्याख्या **--विशेष एव वस्तु परमार्थतोऽस्ति, न द्रव्यार्थः सामान्यं** जातिर्घटादिष्वेकं भवत् किञ्चिदस्ति । **तस्य** सामान्यस्य **असत्त्वाद् विशेष एव स्वतन्त्रः कल्पितसामान्योपसर्जनो** यथा प्राक् प्रक्रान्तः । किमिव ? **मश्वशब्दवत्,** सैव व्याख्या गतार्था भावशब्दस्य गुणपर्यायवाचित्वात् । § 1849

**इतश्च त्वन्मतिवदित्यादि** । हेत्वन्तरमपि **भेदादिति** । जातिमत्पक्षदूषणवदसदसत्त्वपक्षदूषणं त्वयैव कृतम् **--तद्वतो न वाचक** इति । **भिन्ना हि व्यावृत्तिमन्तः सत्वन्त इवार्था घटादय** इति हेतु 626/mj

* * *

सत्वन्त इवार्था घटादयः । भेदानां चानन्त्ये सम्बन्धाशक्यत्वाद् व्यभिचाराच्चावाचक इत्युक्तं प्राक् त्वयैव ।

ननु चायं घटादिषु... ... ...।

यस्याभिधाता सोऽर्थोऽसदसन्मात्राख्यो भेदवत् सत्त्वं वा स्यात् सत्तामात्रं वा सत्तासम्बन्धो वा सत्वन्मात्रं वा ? तत्र--

नापोहशब्दो भेदानामानन्त्याद् व्यभिचारतः ।
वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः ॥ § 1852

तद्वतो नास्वतन्त्रत्वाद् भेदाद् जातेरजातितः ।
अर्थाक्षेपेऽप्यनेकान्तः सत्ताद्यर्थोऽप्यतो न सः ॥ § 1854

---

७ त्वा ]
°त्वाप्येकदेशेनnayacakra-ms-ya ॥
१६ टादिष्वे ]
°ष्टेकुंभवत्nayacakra-ms-ya ॥
२२ न ] ननु चायं घटादिषु
द्रव्यादिभेदानभिधानेन परिहृतो दोषः । न ह्यत्र भेदा अभिधीयन्ते, किं तर्हि ? तेषामसदसन्मात्रं सामान्यरूपम् । तस्यैकत्वात् सुकरः सम्बन्धः । व्यभिचारोऽपि नास्ति, तदभावे शब्दस्याप्रवृत्तेः इत्याशयो भाति । तुलना पृ° ६०७ पं° २४ ॥
२४ ना ] **दिङ्नागस्यैव** न जातिशब्दः इत्यादि कारिकाद्वयं किञ्चित् परिवर्त्य **दिङ्नाग**मतं प्रतिविधातुमत्र ग्रन्थकृतोपन्यस्यते । तुलना--पृ° ६०७ पं° ११ ॥
९ त ] दृश्यतां पृ° ६०७ पं° २० ॥

एवं सन्मात्रसत्ताद्यापादनवदिहापि... ... ...आरभ्यते--

* * *

व्याख्या त्वन्मतवदेव । के ते व्यावृत्तिमन्त इति चेत्, उच्यते--असदसन्तोऽर्था घटादयः । **भेदानां चानन्त्ये सम्बन्धाशक्यत्वाद् व्यभिचाराच्चावाचक इत्युक्तं प्राक्,** केन ? त्वयैव । § 1855

अत्राह --**ननु चायं घटादिष्वित्यादि** । सत्वन्मात्रपक्षे पूर्वमेव हि द्रव्यादिभेदानभिधानेनानन्त्यव्यभिचारदोषौ परिहृतौ तथेहापि असदसत्वन्मात्रपक्षे भेदानभिधानेन तद्दोषपरिहार इति तद्दर्शयति । § 1856

अत्र ब्रूमः --**यस्याभिधातेत्यादि** । यस्यार्थस्य शब्दो वाचक इष्यते **सोऽर्थोऽसदसन्मात्राख्यो भेदवत् सत्त्वं वा स्यात्,** भेदवती सभेदा स-
- /ms त्ता जातिरित्यर्थः, किं तदसदसन्मात्रमुच्यते, **सत्तामात्रं वा** भेदनिरपेक्षा सत्तैव वा, **सत्तासम्बन्धो वा, सत्वन्मात्रं वा ?** सदनुवृत्त्यभिधानपक्षवदेते चत्वारो विकल्पाः असदसत्वति व्यावृत्तिमत्यपि पक्षे सम्भवेयुर्गत्यन्तराभावात् । स्यान्मतम्--असदसत् इत्यभावपक्षोऽपि सम्भवतीति । तन्न, अभावस्य प्रतिषिद्धत्वात्, **शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते** इति त्वयैव स्वार्थवचनेन उक्तत्वादस्माभिः **स्वार्थ एव [ताव]न्निर्धायते** इत्यादिना यावद् **अनन्यः प्रत्यक्ष** इति ग्रन्थेन विचार्य **भाष्ये** प्रतिषिद्धत्वात् । परिशेषादेतावन्त एव विकल्पा भवन्तो भवेयुः असदसन्मात्रम् इति शब्दार्थस्य । तच्चासदसन्मात्रम् । विधिवादिमतवदपोहवादिमतेऽपि चतुष्टये स्थिते समान एवात्रापि विचारो ग्रन्थश्चेति तथैवाह --**नापोहशब्दो भेदानामित्यादि** श्लोकद्वयम् । अन्त्ये पादे तूपसंहारे विशेषः --**सत्ताद्यर्थोऽप्यतो न स** इति, मात्रशब्दलभ्यार्थैतावत्त्वात् । एतच्छ्लोकद्वयं व्याख्यातुकामः सम्बन्धयति --
627/mj **एवं सन्मात्रसत्ताद्यापादनवदिहापी**ति तुल्यदोषत्वविवक्षा भवन्तमन्यांश्च प्रतीति

* * *

न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः ।

---

९ अ] तत्रnayacakra-ms-bhā ॥
१० इष्य] इष्यते
सार्थासद॰nayacakra-ms-ya ।
इष्यते सद॰ nayacakra-ms-bhā ।
इष्यतेऽसावर्थोऽसद॰ ? ॥
११ स]
सभेदाशत्वाज्जाति॰nayacakra-ms-bhā
। सभेदांशत्वाज्जाति॰
nayacakra-ms-ya । भेदेन सहिता
सभेदा इत्यर्थः ॥
१४ स्या] स्यान्मतं मसदसत् प्र॰ ॥
१६ स]
सम्भवीतिnayacakra-ms-ya ॥
१७ ए] एवं
निर्धार्यतेnayacakra-ms-ya । दृश्यतां
पृ॰ ६०९ पं॰ २ ॥
१७ अ] दृश्यतां पृ॰ ६११ पं॰ १ ॥
१९ भा] भास्यnayacakra-ms-ya ॥
भांस्य nayacakra-ms-bhā । चास्य
इत्यपि पाठोऽत्र भवेत् ॥
२२ चा]
तच्चासदसन्मात्रnayacakra-ms-ya ।
तत्रासदसन्मात्रे इत्यपि पाठोऽत्र स्यात् ॥
२३ मा] दृश्यतां पृ॰ ६२६ पं॰ ४ ॥
१० न] दृश्यतां पृ॰ ६०७ पं॰ ११, २५
॥

वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः ॥
तद्वतो नास्वतन्त्रत्वाद् भेदाज्जातेरजातितः ।
अर्थाक्षेपेऽप्यनेकान्तः सत्ताद्यर्थोऽप्यतो न सः ॥§ 1861

जातिशब्दस्तावत् सदादिः । कस्मान्न वाचकः ? आनन्त्याद् भेदानाम् । आनन्त्ये हि भेदानामशक्यः शब्देन सम्बन्धः कर्तुम् । न चाकृतसम्बन्धे शब्देऽर्थाभिधानं न्याय्यम्, स्वरूपमात्रप्रतीतेरित्यादि यावद् न, गुणत्वादिव्यभिचारात् ।

* * *

गतार्थं याव**दारभ्यते । न जातिशब्द** इत्यादि तदारम्भः । पूर्वमपोहशब्देन सम्पन्नत्वाद् विश्रब्धं परवाचोयुक्त्यैव **न जातिशब्दः** इत्यादि परग्रन्थमेव उददिक्षत्, [अ]सदसद्विशिष्टसन्मात्र-भेद-सत्तासम्बन्ध-सत्वत्पक्षाणां त्वदिष्टानां विधिरूपाणां च परेष्टानामविशेषादिति । तद्यथा --**न जातिशब्दो भेदानां** वाचकः इति वक्ष्यति । **जातिशब्दस्तावत् सदादि**रिति, यस्मात् सच्छब्दो जातिसम्बन्धिनो जातिमुपादायात्मरूपेण द्रव्यादीनभेदोपचारादाह तस्मादभेदोपचारहेतुना व्यपदिश्यते जातिशब्द इति । यथा सिंहो माणव- - /ms
कः इति सिंहशब्दो माणवकगुणानुपादायाभेदोपचारप्रवृत्तेरभेदोपचारहेतुना व्यपदिश्यते गुणशब्द इति । **कस्मान्न वाचक** इति हेतुपरिप्रश्नः, यस्माद् वाङ्मात्रेण न श्रद्धीयते । उच्यते --**आनन्त्या**दिति हेतुः । कस्यानन्त्यात् ? **भेदानाम्**, यस्मात् ते पूर्वं प्रकृता न चान्यः श्रूयते । **आनन्त्येहि भेदानामशक्यः शब्देन सम्बन्धः कर्तुम्**, न हि पाटलिपुत्रादिस्था द्रव्यादय इहस्थेन सच्छब्देन सहाख्यातुं शक्याः । **कर्तुम्** आख्यातुम्, करोतेरनेकार्थत्वात् । आनन्त्याद्वा द्रव्यादीनाम्, तथाहि--ते घट-पट-रथादिभेदेनानन्ताः । एवं तावत् सम्बन्धिभेदाद् भेदमभ्युपगम्येदमुच्यते, न तु तस्य वस्तुनः स्वगतो भेदोऽस्ति । तत्रेदमेव कारणम्--यत् सम्बन्धान्तरविशिष्टाभिधायी शब्दः सम्बन्धान्तरविशिष्टशब्दवाच्यमसमर्थो वक्तुम्, गवाश्वादिवत् । तस्माद् भेदानामवाचकः । § 1862

---

१३ न] दृश्यतां पृ° ६०७ पं° ११, २५ ॥
१५ जा] पृ° ६०७ पं° १३ ॥
२३ न्त्ये] **तिभेदाना°** प्र° । दृश्यतां पृ° ४६०-- १ ॥
१ स] तुलना--सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ वाक्यप° ३ । १ । ३३, वक्ष्यमाणैराश्रयादिभिः स्वसम्बन्धिभिर्भिद्यमानोपचरितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिर्गोत्वाश्वत्वादिका अपरसामान्यं, नान्या परमार्थभिन्ना सा विद्यते । तथा गोः सत्ता गोत्वं नापरमन्वयि प्रतिभासते एवमश्वस्य सत्ता अश्वत्वमित्यादि वाच्यम् । तस्यामेव च गवादिभेदभिन्नायां सत्ताख्यायां जातौ सर्वे गवादयो डित्थादय आकाशादयश्च शब्दा त्राचकत्वेन व्यवस्थिता इत्यसांकर्येण नियतोपाधिवशाज्जात्यभिधायिनः सिद्धाः । इति वाक्यपदीयस्य हेलाराजरचितटीकायाम् ॥

**न चाकृतसम्बन्ध** इत्यनाख्यातसम्बन्धे **शब्द** इति द्विष्ठत्वेऽपि सम्बन्धस्य शब्दस्यैवाविनाभावित्वादर्थप्रत्यायकत्वं दर्शयति । अत्र चानन्त्यं पारम्पर्येणानभिधानहेतुः--ततो हि सम्बन्धाशक्यता, सम्बन्धाव्युत्पत्तेरनभिधानं **स्वरूपमात्रप्रतीतेरि**ति यत्र शब्दस्यार्थेन सम्बन्धोऽव्युत्पन्नो यथा म्लेच्छशब्दानां
628/mj तत्र

* * *

एतावच्च... ... ...स्वाधारो वा । न चास्ति सम्भवः । मात्रशब्दापादितसत्ताद्यर्थोऽप्यतो न सः । अलमतिप्रसङ्गेन ।

अथवा भेदादिति यस्माद् व्यावृत्तिमानसदसत्वान्... ... ...स एव दोषः, तेन सहाभूतसामान्यत्वात्, यथा सत्वदर्थसच्छब्दस्य घटादिभेदार्थत्वाभावात् तेन सहासामानाधिकरण्यं तथा तवापि असदसदर्थसच्छब्दस्य घटादिभेदार्थत्वाभावात् सामानाधिकरण्याभावः ।

* * *

शब्दमात्रमेव प्रतीयते नार्थ इत्यादिः सह टीकया भाष्यग्रन्थो द्रष्टव्यो
- /ms **यावद् न गुणत्वादिव्यभिचारादित्यवधिराचार्येण** यावत्कारितः सव्याख्यानः सामान्यपरीक्षाकारलिखित एवात्रापीति न लिख्यते । § 1863

तदुपसंहारः **--एतावच्चे**त्यादि यावत् **स्वाधारो वा । न चास्ति सम्भव** इति यथा विचारितमिति **मात्रशब्दापादितसत्ताद्यर्थोऽप्यतो न स** इत्युपसंहारः । **अलमतिप्रसङ्गे**नेति, *भेदात् इत्येतत्प्रसङ्गागतसाक्षाद्विधिवादिमतदूषणमिदं [स]प्रसङ्गमुक्तम् **--सत्ताद्यर्थोऽप्यतो न स** इति, मात्रग्रहणस्य एतावद्विषयसम्भवानतिवर्तित्वात् । § 1864

अधुना भवन्तं प्रति मात्रग्रहणात् तत्सम्भविनो विकल्पास्त एवेति तान् दूषयिष्यामः । तद्यथा— **अथवा भेदादिति यस्माद्व्यावृत्तिमानि**त्यादि, **भेदात्** इत्ययं हेतुर्व्यावृत्तिमत्पक्षे दोषमापादयितुमित्थं व्याख्यायते । **यस्माद्**

---

२ स] °संबंधः इत्य° प्र° ॥
३ चा] चात्यंतं पारंपर्येणाभिधान-
हेतुःnayacakra-ms-ya
॥
४ न्धाश] °शक्यता ना
संबंधान्युत्पत्तेरन°nayacakra-ms-ya
। °शक्यता ता संबंधान्यत्तेरन°
nayacakra-ms-bhā ॥
५ न्धोऽव्यु]
ऽव्युत्पत्तौnayacakra-ms-bhā ।
व्युत्पत्तौ nayacakra-ms-ya ॥
१४ ए] एतावच्चात्र भवेत्--भेदा वा,
सत्तामात्रं वा, सत्तासम्बन्धो वा, सत्तायाः
स्वाधारो वा । इत्याशयोऽत्र भाति ।
तुलना— पृ° ६२६ पं° ४ ॥
१४ या] यावन
गुण°nayacakra-ms-bhā ।
यावदगुण° nayacakra-ms-ya ।
दृश्यतां पृ° ४१९-- २ ॥
१६ सा] दिङ्गागरचिते सामान्यपरीक्षाग्रन्थे
न जातिशब्दो भेदानामानन्त्याद् व्यभिचारतः
। वाचको योगजात्योर्वा भेदार्थैरपृथक् श्रुतेः
॥ तद्वतो नास्वतन्त्रत्वाद् भेदाज्ञातेरजातितः ।
अर्थाक्षेपेऽप्यनेकान्तस्तेनान्यापोहकृच्छ्रुतिः ॥
इति श्लोकद्वयं तद्व्याख्या च विस्तरेण
सम्भाव्यते ॥
१८ न] नवास्ति प्र° । दृश्यतां पृ°
४१९-- २ ॥
१९ *] दृश्यतां पृ° ६२५ पं° ८ ॥
१९ दू]
°द्वषण°nayacakra-ms-bhā ।
°द्वेषण° nayacakra-ms-ya ॥
३ मा] दृश्यतां पृ° ६२६ पं° ४ ॥

**व्यावृत्तिमानसदसत्त्वा**निति पूर्वेभ्यः पक्षेभ्यो विशेषं दर्शयति । शेषं तुल्यं यावत् **स एव** अतद्भेदत्वे सामानाधिकरण्याभाव एव **दोषः** प्रतिज्ञातस्त्वां प्रत्यापाद्यते । कस्मात् ? *तेन सहाभूतसामान्यत्वात् । घटः इत्युक्ते यस्मिन्नसदसत्त्वं घटे स घटोऽन्यत्र घटान्तरे पटादौ च न वर्तते, अतो भिन्नः, भिन्नत्वाद्यातद्भेदा

४ *] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
४ प] **दिङ्नागेन सवृत्तिके प्रमाणसमुच्चये** पञ्चमेऽपोहपरिच्छेदे यदभिहितं तस्य प्रारम्भिकोंऽश इह पृ॰ ६०७— ६०८ इत्यत्रास्माभिर्भोटभाषानुवादात् संस्कृते परिवर्त्य प्रदर्शितः । ततोऽग्रेतनोंऽश इहोपन्यस्यते । स चात्रापोहपरीक्षायां यत्र
n629/mj यत्र यथा यथोपयुज्यते तथा तथानुसन्धेयः । **प्रमाणसमुच्चयान्तर्गतोऽपोहवादः**-- (?")[[भेदे जातौ च तद्योगे PSV2 । VT. मध्ये तूभयथा दृश्यते, दृश्यतां पृ॰ ६३० पं॰ २९, पृ॰ ६३१ पं॰ ३२ ॥]]भेदेषु जातौ तद्योगे दोषस्तुल्यो हि तेष्वपि ॥ ७ ॥ [[यतो जातिः स्वरूपं तद्वद्रूपं च न युज्यते ? ॥]]यतो जातिः स्वरूपं [[वा PSV1 ॥]]च तद्वद्रूपं न युज्यते । --- [[भेदस्वरूपेणा॰ PSV2 ॥]]भेदरूपेणाभिधानेऽपि अवश्यं जातिरूपेण भेदा[[भेदाभिधानम् ? ॥]]भिधाने [[जातिषु ? साक्षाद् भेदेषूपचार इति तद्वतीव सर्वो दोषो वाच्यः PSV1 ॥]]जातौ साक्षाद् भेदेषूपचारात् तद्वतीव सर्वत्र दोषो वाच्यः, जातावप्यभिधेयायां शब्दस्वरूपाध्यारोपेण जात्यभिधानात् सम्भवात् । जातियोगो जातिरूपेण[[॰धानात् सम्भवः PSV2 । ॰धानमिति सम्भवात् PSV1 ॥]] [[सदादि ? अभिधीयते PSV1 ॥]]सदादिनाभिधीयत इत्यत्रापि यथासम्भवं दोषो वाच्यः । [[यत् पुनरेतस्मिन्नेव पक्षे भिक्षुणोक्तम्--जातिविशिष्टेष्वभिधीयमानेषु स्वलक्षणान्येवाभिधेयानि प्राप्नुवन्ति, तेषामानन्त्यव्यभिचाराभ्यामवाच्यत्वमुक्तम्-- इति । तदुक्तम् --**तद्वांस्तु भेद एवेष्टः स च पूर्वं निराकृतः** इति ।--**शर्करिका** पृ॰ ६२ ॥ ...स तु... **न्या॰ र॰** पृ॰ ६०० ॥]]तद्वांश्च भेद एवोक्तः स च पूर्वं निराकृतः ॥ ८ ॥ --- [[जातिशब्दः पूर्वं निराकृतः न जातिशब्दो भेदानां वाचकः इति । स च जातिमत्यपि उक्तः तेन जातिमत्यपि उक्तम् ? ? ।--PSV1 ॥]]न जातिशब्दो भेदानां वाचकः इति [[पृ॰ ६०७ पं॰ ११ ॥]]पूर्वं निराकृतः स च जातिमान् । ननु चोक्तम्--जातिशब्दो जातिमन्मात्रस्य वाचको न तु भेदरूपेणेति । यद्येवम्, [[यच्चात्र भिक्षुणा जातिमन्मात्रं वाच्यं भविष्यतीत्याशङ्क्य विकल्पितम्--अथ जातिमत्त्वं किं जातितद्वतोः सम्बन्धः किं वा सामान्यरूपमिति । एवं च विकल्प्य पूर्वोक्तजातिसम्बन्धाभिधानदोषो योजनीयः इत्युक्त्वोक्तम्— **तद्वन्मात्रेऽपि सम्बन्धः सत्ता वेति विचारितम्**(?') इति ।(?") --**शर्करिका॰** पृ॰ ६२ । **न्या॰ र॰** पृ॰ ६०१ ॥]]तद्वन्मात्रेऽपि सम्बन्धः सत्ता वेति विचारितम् । --- तद्वन्मात्रं हि तद्वत्त्वं भावप्रत्ययः । [[तेन सम्बन्धो गुणो वा स्यात् ? । तुलना--किञ्च, अपोहवत्त्वमिति मतुबन्तादयं भावप्रत्ययः । स च सम्बन्धवाच्यपि स्मर्यते । यथाह--समासकृत्तद्धितेषु सम्बन्धाभिधानं भावप्रत्ययेन अन्यत्र रूढ्यव्यभिचरितसम्बन्धेभ्यः इति । न च सम्बन्धस्य वाच्यत्वमस्तीत्युक्तम् । --**शर्करिका॰** पृ॰ ६३ । **न्या॰ र॰** पृ॰ ६०१ ॥]]स च सम्बन्धे गुणे वा स्यात् । यथोक्तम्--समासकृत्तद्धितेषु सम्बन्धाभिधानं [भावप्रत्ययेन ?] अन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः इति । तत्रापि न[[पृ॰ ६०७ पं॰ ११ ॥]] वाचको योगजात्योर्वा भेदार्थैरपृथक् श्रुतेः इत्युक्तम् । [[यदपि चास्मिन् पक्षे भिक्षुणोक्तम्--यदा गोत्वविशिष्टः शाबलेयो गोशब्दस्य वाच्यत्वमित्यङ्गीकृतं तदासौ बाहुलेये नास्तीति तत्र गोशब्दप्रवृत्तिर्न स्यादिति । तदुक्तम् --**तद्वानर्थो घटादिश्चेन्न पटादिषु वर्तते । सामान्यमर्थः स कथम्**--इति । तदपि समानम् ।--**शर्करिका** पृ॰ ६३ । भिक्षुणोक्तम्--तद्वानर्थो घटादिश्चेन्न पटादिषु वर्तते । सामान्यमर्थः स कथमिति तद्वदवाच्यता ॥ इति । --**न्या॰ र॰** ६०१ ॥]]तद्वानर्थो घटादिश्चेन्न पटादिषु वर्तते । सामान्यमर्थः स कथम् ? --- अनेकवृत्ति हि सामान्यम् । तच्च यदि सामान्यवान् घटादिः, स पटादिषु अवर्तमानः कथं तेषां

घटादयः, तस्मात् तेन सहाभूतसामान्यत्वं सिद्धम् । यो येन सहाभूत-

सामान्यमिति यु[[न युज्यते PSV2 ॥]]ज्यते ? ननु च सामान्यवानभिधीयते, किमर्थं तत्र सा[[सामान्यमारोप्यते PSV2 ॥]]मान्यत्वमारोप्यते इति चेत्, यस्मात् सच्छब्दः सामान्यस्य वाचक इति प्रतिज्ञातम् । सत्तादिषु च सत्ताद्यभावात् त[[तत्र वृत्तिर्नोच्यते PSV1 ॥]]द्वान् नोच्यते । तस्मादर्थेऽव[[अवश्यं सामान्यमभ्युपगन्तव्यम् PSV1 ॥]]श्यमर्थसामान्यमभ्युपगन्तव्यम् । तच्चार्थे नास्ति । त[[**यस्मात्**VT. ॥]]स्मात् **श[[शब्दार्थः केवलः समः PSV1 । अत्र शब्दः केवलं तुल्यः PSV2 । इदमत्रावधेयम्--फ्ष्¹ मध्येऽयं कारिकांशो दृश्यते, फ्ष्² मध्ये तु न दृश्यते । अतोऽयं वस्तुतः कारिकांशो वृत्त्यंशो वेति निर्धारयितुं न पार्यते ॥]]ब्दस्तुल्योऽत्र केवलः** । तद्वान् घटादिः सच्छब्दवाच्यत्वात् तुल्यः, न तु तद्वता केनचित् [अपि VT.] । सत्तायोगौ च पूर्वं निषिद्धौ । **ना[[नानिमित्तः स चेष्यते इति निर्निमित्तं च तन्नेष्टम् इत्यपि वा पाठोऽत्र भवेत् ॥]]निमित्तः स च मतः** । शब्दश्च भिन्नेषु निमित्ताभावेऽभिन्नो न दृष्टः । ततश्च किं न ?ततश्च विशेषणविशेष्यत्वाभावः । अथापि [स्यात्]--अ[[अनन्यद्रव्यवर्ती सद्गुणः इत्यपि पाठश्चिन्त्यः ॥]]नन्यद्रव्यवर्तिनि सद्गुणे सच्छब्दाद् घटाद्याशङ्कायां विशेषणविशेष्यभावो भविष्यति नीलतरादिवदिति चेत्, **यद्येक[[शर्करिका पृ॰ ६४ । तुलना--तदुक्तम्--मा भूदर्थान्तरे वृत्तिर्यद्येकत्रासितादिवत् । प्रकर्षादिविशिष्टत्वम्(?') इति । एवं चाशङ्क्य दूषितम्--नैवं जातेरजातितः इति । --न्या॰ र॰ पृ॰ ६०१--६०२ ॥]]त्रासितादिवत् । तच्च नास्ति** । नीलशब्दो हि नीलतरादिष्वन्याभावे तद्वति न युज्यते । नीलत्वं सम्बन्धश्च न शब्दार्थ इत्युक्तम् । किञ्चान्यत्, **अभ्युपायेऽपि नैतज्जातेरजातितः** । नीलतरादिषु नीलसामान्याभ्युपगमेऽपि यथा नीलगुणस्त्रिधा भिन्न एवं घटत्वादिजातिमती सज्जातिर्नास्ति यतस्तद्विशेषानुपादाय [[द्रव्ये वर्तमानस्य इत्यपि पाठो भवेत् ॥]]द्रव्ये वृत्तौ घटादिविशेषे वृत्तिराशङ्क्येत । तस्मादिदमपि न कल्पनीयम् । --- नन्वेवमशब्दवाच्येष्वप्यर्थाक्षिप्तेषु घटादिषु तद्वानर्थोऽवश्यं घटत्वादिना केनचिदनुबद्ध इति विशेषणविशेष्यभावो भविष्यतीति चेत्, **[[शर्करिका. पृ॰ ६४ । न्या॰ र॰ पृ॰ ६०२ ॥]]अर्थाक्षेपेऽप्यनेकान्तः** । अ[[अर्थाक्षेपो नाम PSV1 ॥]]र्थाक्षेपो हि यत्रार्थसामर्थ्याद् निश्चय उत्पद्यते यथा दिवा[[देवदत्तो दिवा न PSV2 ॥]] न भुङ्क्ते इति रात्रिभोजने निश्चयः । अत्र तु सदित्युक्ते घटादिष्वनिश्चयात् [संशय इति PSV१] अर्थाक्षेपो नास्ति । [[यस्माज्जातिशब्दः PSV2 ॥]]तस्माज्जातिशब्दः कथञ्चिदपि भेद-सामान्य-सम्बन्ध-जातिमतां वाचको न युज्यते **तेनान्यापोहकृच्छ्रुतिः** । तस्मात् कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते पृ॰ ६०७ पं॰ ८ [[इति यत् तदेव स्थितम् PSV2 ॥]]इति स्थितम् । आह च--बहुधाप्यभिधेयस्य न शब्दात् सर्वथा गतिः । [[**नयचक्रवृत्ति**॰ पृ॰ ४२७-- २ । स्वसम्बन्धानुरूपेण --**शर्करिका**॰ पृ॰ ४६ ॥]]स्वसम्बन्धानुरूप्यात्तु व्यवच्छेदार्थकार्यसौ ॥ १२ ॥ अनेकधर्मा शब्दोऽपि येनार्थं नातिवर्तते । प्रत्याययति तेनैव न तु शब्दगुणादिभिः ॥ १३ ॥ [इति सङ्ग्रहश्लोकौ PSV१] --- यद्यन्यापोहपात्रं शब्दार्थः कथं नीलोत्पलादिशब्देषु सामानाधिकरण्यं विशेषणविशेष्यभा[[॰भावश्च कथं स्यात् PSV1 ॥]]वश्च स्यात् । कथं न स्यादिति चेत्, यस्माद् भिन्नः सामान्यविशेषशब्दानामपोह्य इति चेत्, नायं दोषः । तेऽपि-- अ[[**तत्त्वसं**॰ **पं**॰ पृ॰ ३०७ । **सन्मतिवृ**॰]]पोह्यभेदाद् भिन्नार्थाः स्वार्थभेदगतौ जडाः । एकत्राभिन्नकार्यत्वाद् विशेषणविशेष्यकाः ॥ १४ ॥ --- नीलोत्पलादिशब्दा अपोह्यभेदे सत्यपि स्वार्थविशेषव्यक्त्यर्थं स्थाणुकाकनिलयनवत् स्वापोहार्थमेकत्र स[[समुदयेन PSV1-2 ॥]]मुदिताः समानाधिकरणभूताः । तथाहि--ते प्रत्येकं स्वार्थविशेषे संशयहेतवः । शब्दान्तरसहितप्रकाश्यार्थासम्भवाच्च विशेषणविशेष्यभूताः । --- नन्वेकाधिकरणं यत् तद् नीलमपि नोत्पलमपि नेति कथं तद् [[नीलं चोत्पलं चेति चेत्, उच्यते--न हि तत् केवलं... ...PSV1 ॥]]नीलं च तदुत्पलं चेति नीलोत्पलमित्युच्यत इति चेत्, न[[**तत्त्वसं**॰ **पं**॰ पृ॰ ३०८ । **सन्मतिवृ**॰ ॥]] हि तत् केवलं नीलं न च केवलमुत्पलम् । समुदायाभिधेयत्वात्, ---

[[नीलोत्पलशब्दाभ्यां समुदिताभ्यां तदुच्यते न केवलाभ्याम्, केवलं तु वर्णवत् तन्निरर्थकम् । इत्यपि पाठः PSV1 VT. अनुसारेण सम्भाव्यते ॥]]नीलोत्पलशब्दाभ्यां ते समुदिते प्रतीयेते, न केवले, केवलयोस्तु **वर्णवत् तन्निरर्थकम्** । यथा **नी**शब्द--**ल**शब्दौ सन्तावपि नीलाभिधाने निरर्थकौ [एव PSV२] एवमत्र [अपि PSV१] ।--PSV1 C. ed. d. ed. B– A । N. ed. B– A । PSV2. N. ed. A– B । P. ed. B– B ॥ --- अस्य स**वृत्ति**कस्य **प्रमाणसमुच्चयस्य जि**नेन्द्रबुद्धिना विरचिता **विशालामलवती** व्याख्या भोटभाषानुवादात् संस्कृते परिवर्त्यात्रोपन्यस्यते-- --- **भेदेष्वि**त्यादिना तद्वत्पक्षेऽभिहितं दोषं पक्षान्तरेष्वतिदिशति । उत्तरार्धेन अत्रैवोपपत्तिमाह । जातिरूपं भेदेषु न युज्यते, शब्दस्वरूपं जातौ, शब्दस्वरूपवज्जातिरूपं सम्बन्धे । सम्बन्धिरूपेण सतोऽर्थस्य स्वयं वचनविषयीकर्तु**n631kmj**दवश्यमित्युक्तम् । ननु तद्वत्पक्षाद् भेदपक्षस्य को विशेष इति चेत्, तद्वत्पक्षे सज्जातिरूपेण सच्छब्देनाभिधानम्, भेदपक्षे तु द्रव्यादिरूपेण । एवं हि ते भेदरूपेणाभिहिता भवन्तीति विशेषः । तत्रापि द्रव्यत्वादिषु साक्षाद् भेदेषूपचार इति पूर्ववदेव दोषो वक्तव्यः--साक्षाद् उपचारप्रवृत्तत्वं कमेणानभिधानं गुणोपकारविरोधश्चेति । **सम्भवा**दिति जात्यभिधाने प्रकर्षः स्याद् विना धिया इत्यस्यासम्भवात् । सम्बन्धाभिधानेऽप्यत एव सम्भववचनम् । ननु पूर्वं सम्बन्धस्यानभिधेयत्वमुक्तं तत् कथमिदानीं सद्रूपेणाभिधानमाश्रीयते कथं चात्र अभेदोपचारः सम्बन्धस्याङ्गीक्रियते ? पूर्वं हि असत्त्वभूतत्वाद् आख्यातार्थे शब्दस्याभेदोपचारानुपपत्तेरनभिधानमुक्तम्, सम्बन्धोऽप्यसत्त्वभूत एव, तत् कथं तस्य सत्त्वं सच्छब्देनाभेदोपचारो वा ? अभेदोपचाराभावे च कुतः पूर्वोक्तदोषप्रसङ्गः ? अथ सत्तया अभेदोपचारेण स उच्यते कथं सद्योगशब्दयोः सामानाधिकरण्यानुपपत्तिरिति चेत्, नायं दोषः, सम्बन्धाभिधानमभ्युपगम्यास्य दोषस्योक्तत्वात् । यदि च सम्बन्धोऽभिधीयते तथापि तद्वत्पक्षदोषानतिक्रम एव जातिमता तुल्यसामर्थ्यात् इति दर्शनार्थमिदमुक्तम् । **तद्वांश्चे**त्यादिनास्य पक्षान्तरत्वमेव निराकरोति । **ननु चोक्त**मित्यादिना पक्षान्तरत्वं दर्शयति । अत्र भेदा भेदरूपेण नाभिधीयन्ते, किं तर्हि ? जातिमतां तेषां यन्निर्विशेषं रूपं सत्त्वेनारोपितं तदेव भेदरूपासंस्पृष्टमभिधीयते । तथा च भेदपक्षात् पक्षान्तरमेवेदमिति मन्यते । **यद्येवम्** इत्यादिना जातियोगपक्षयोरन्तर्भूतत्वादस्य पक्षान्तरत्वं निषेधति । कथं पुनस्तद्वन्मात्रं सत्ता सम्बन्धो वा भवतीति चेदुच्यते --**तद्वन्मात्रं हि** इत्यादि । मात्रशब्देन विशेषनिराकरणे सामान्यं सर्वानुगतिरूपं शब्दार्थ इत्युक्तं भवति । तच्च प्रवृत्तिनिमित्तत्वाद् भावप्रत्ययेन उच्यमानं सत्तां सम्बन्धं वा विहाय नान्यदुपलभ्यते, भावप्रत्ययस्य तत्रैव विहितत्वात् । इदमागमेन दर्शयितुमाह --**समासकृत्तद्धितेषु** इत्यादि सम्बन्धस्याभिधेयत्वे आगमः । राजपुरुषत्वं पाचकत्वम् औपगवत्वमित्येतेषु समासादिषु स्वस्वामि-क्रियाकारक-निमित्तनैमित्तिकस-म्बन्धा उच्यन्ते यथासंख्यम् । ततोऽत्रापि सच्छब्दः कृदन्तत्वात् सम्बन्धवाचकः स्यात् । अन्येऽस्यैवापवादं वदन्ति --**अन्यत्रे**त्यादि । अयं गुणवाचित्वे आगमः । रूढे... ...अत्र जातिमात्रमभिधीयते, न सम्बन्धः । अभिन्नरूपात् तद्धितात्... ...अत्र च गुण एवोच्यते । अव्यभिचरितसम्बन्धात्... ...अत्र तदेव सत्त्वमभिधीयते, न सम्बन्धः । **तद्वानर्थो घटादि**रित्यादिना अनेकत्रावर्तमानताया हेतुः प्रकाशितः । **सामान्यमर्थः स कथ**मिति प्रमाणफलम् । यदनेकत्र न वर्तते तन्न सामान्यम्, स्वलक्षणवत्, तद्वांश्च तथा, इति व्यापकाभावः । **सामान्यं ह्यनेकत्र वर्तते** इति व्यतिरेकः । **तच्चे**त्यादिना हेतोरेवार्थं विवृणोति । **कथ**मित्यादिभिः प्रतिज्ञार्थम् । **ननु चे**त्यादिना सिद्धसाध्यतामाह, तद्वतः सामान्यरूपत्वेनानिष्टत्वात् । तदनिष्टत्वं सामान्यरूपारोपस्य प्रकाशयन्नाह --**किमर्थ**मित्यादि । **यस्मा**दित्यादि सिद्धसाध्यतायाः प्रतिविधानम् । एवं मन्यते--सम्बन्धसौकर्यादव्यभिचारवचनाच्च सच्छब्दस्य सामान्यवाचित्वमाश्रीयते भेदशब्दैः सह सामानाधिकरण्याभ्युपगमाच्च, सामान्यविशेषभावाभावे सामानाधिकरण्यं नोपपद्यत इति । तथाहि--सामान्यशब्दाद् निर्विशेषं प्रवर्तमाना

बुद्धिर्विशेषशब्दैर्भेदान्तरेभ्यो व्यवच्छिद्य विशिष्टविषयेऽवस्थाप्यते । तत् सामान्याभावे नोपपद्यते । अत्र च सामान्येन तद्वानित्यभ्युपगमे विकल्पद्वयम्--किं सत्तादिसामान्यस्य तद्वत्त्वम् आहोस्वित् तद्वतो घटादेः समानत्वमिति । तत्र पूर्वस्यासम्भव इति दर्शयति --**सत्तादिषु चे**त्यादि । सत्तादिषु जात्यन्तरं नास्ति जातीनामजातित्वात् । ततोऽवश्यं द्वितीयविकल्पोऽभ्युपगन्तव्य इति दर्शयति --**तस्मा**दित्यादि । **अर्थे** इति प्रकृतत्वात् तद्वति घटादौ । स्यादेतत् ? ननु तत्रैवेति चेत्, अत्रोच्यते— **तच्चे**त्यादि । कस्मान्नास्तीति चेत्, **यस्मा**दित्यादि । **केवल**वचनेन अभिधेयं तुल्यं निराकरोति । शब्द एवाभिधायक एते[षां] तुल्यः, न वाच्यमेवं किञ्चिदपीत्यर्थः । **तद्वता केनचिदपि ने**ति, अभिधानसाम्येनैव एतेषां समानत्वम्, न त्वभिधेयेन तद्वद्वस्तुरूपेण केनचिदित्यर्थः । ननु सत्ता शब्दस्वरूपेण तद्वती अभिधीयते, सम्बन्धश्च सत्तारूपेण । तस्मात् सत्तायाः सम्बन्धस्य वा अभिधेयेन तद्वता तुल्यत्वं भविष्यतीति चेत्, उच्यते --**सत्तायोगौ चे**त्यादि । **भेदे जातौ च तद्योगे दोषस्तुल्यो हि तेष्वपि**(?') पृ° ६३० पं° २ इत्यादिना पूर्वमेव निराकृतं जातियोगयोस्तद्वत्त्वेनाभिधानम् । यदि घटादिषु शब्दः समानस्तदा स एव शब्दः शब्दत्वेन तद्वान् तेषां सामान्यं स्यादिति चेत्, उच्यते --**नानिमित्त** इत्यादि ।... ... ... निमित्तवतो यस्य शब्दस्य यत्र निमित्ताभावः तस्य तत्र योगो भवितुं नार्हति यथा दण्डशब्दस्य दण्डरहिते पुरुषे । घटादिष्वपि निमित्तवतो जातिशब्दस्य निमित्ताभाव इति कारणानुपलब्धिरुक्ता । **ततश्चे**त्यादौ यदि सामान्यमभिधेयं ततस्तद्विशेष्यार्थं घट इत्युच्यत इति सामानाधिकरण्यं स्यात् । सामान्याभिधानाभावे किं कस्य विशेष्यम् ? ततश्चाभ्युपगमहानिः । **अथापी**ति सामान्यविशेषभावाभावेऽपि प्रकारान्तरेण विशेषणविशेष्यत्वं ग्राहयति । द्रव्यान्तरे न वर्तत इति **अनन्यद्रव्यवर्ती सद्गुणो** घटादि द्रव्यम् । **सद्गुण** इति सत्तागुणवानित्यर्थः, सत्ता गुणोऽस्येति कृत्वा । अनेनातुल्यत्वमुच्यते । एवमतुल्यत्वे सत्यपि सच्छब्दाद् घटाद्याशङ्कायां विशेषणविशेष्यभावो भविष्यति नीलतरादिवत् । नीलगुणवद् द्रव्यं नीलतरादिद्रव्यान्तरेऽतद्गुणो n632and इति तदसामान्यम्, तथापि नील इत्युक्ते योऽयं नील इत्युक्तः स किं नीलतर आहोस्विन्नीलतम इति विशेषाशङ्का भवति, ततो नीलतरो नीलतम इति भेदशब्दैर्विशेष्यते एवं सदित्युक्ते यः सन् अयं किं घट आहोस्वित् पट इति घटाद्याशङ्का भवति ततस्तच्छब्दैर्विशेष्यते घटः पटो वेति । **यद्येकत्रासितादिव**दिति... ... ...तच्चेदं नास्ति । कुत इति चेत्, उच्यते --**नीलशब्दो ही**त्यादि । नीलशब्दो हि नीलगुणवद् द्रव्यमाह । तच्च नीलतरादिद्रव्यान्तरे न वर्तते । यन्नीलत्वं वर्तते तत्सम्बन्धो वा तस्य शब्दार्थत्वं न भवति । तस्मादत्रापि **नानिमित्तः स च मतः** पृ° ६३१ पं° १९ इत्येतत् समानमिति दार्ष्टान्तिकेन समानस्य दृष्टान्तस्याप्यसिद्धिरेव । **अभ्युपायेऽपीति,** यद्यपि दृष्टान्तः सिध्यति तथापि सत्तायां तत्तुल्यत्वं नास्ति । तद्दर्शयति --**नैतज्जातेरजातित** इति । न विद्यते घटत्वादिजातिरस्यां सत्ताजातावित्येवम् अजातिः सज्जातिः अजातिमतीति सत्तायां घटत्वादयो जातिविशेषा न सन्ति नीलगुणे नीलतरादिविशेषवत् यतस्तद्विशेषानुपादाय द्रव्ये वर्तेत ।... ... ...तस्मात् सच्छब्दाद् घटादिविशेषाशङ्का न युक्ता । नीलगुणस्तु अनेकभेदः । स एकत्रापि द्रव्ये वर्तमानः स्वविशेषानुपादाय [[यथानीलसम्भवं ? P. ed. ॥]]यथाभिसम्भवं वर्तत इति तद्वाचिनीलशब्दान्नीलतराद्याशङ्का युज्यत इति दर्शयति । **नन्वेवमि**ति प्रकारान्तरेण विशेषाशङ्कासम्भवमाह ।... ... ...**तद्वानर्थोऽवश्यमि**त्यादि । जातिमानर्थो हि शब्देनोपात्तः । स च नियोगादेव घटत्वादिसामान्येन केनचिदनुबद्धः । ततश्च तत्सामान्यभेदाक्षेपे घटादिविशेष आक्षिप्यत इति । इममपि विकल्पं निराकुर्वन्नाह --**अर्थाक्षेपेऽप्यनेकान्त** इति । **अर्थाक्षेपो ही**त्यादिना अर्थाक्षेपस्य स्वरूपमाह । तदभावमत्र दर्शयितुं **यथा दिवा न भुङ्क्ते** इति वैधर्म्यनिदर्शनम् । **अत्र त्वि**त्यादिना वैध[[वैधर्म्योपयोगे D. ed. । वैधर्म्योपयोगेन P. ed. ॥]]र्म्यप्रयोगे पक्षधर्ममुपदर्शयति । **आक्षेपो नास्ती**ति प्रमाणफलम् । यत्रार्थाक्षेपस्तत्र निश्चयः यथा दिवा न भुङ्क्ते इत्यत्र रात्रिभोजने । सदित्यभिधाने च घटादिषु न निश्चयः, किं

तर्हि ? सन्देहः । इति स्वभावविरोधः ।... ... ...**तस्मादि**त्यादिना यथोक्तजात्याद्यभिधाननिषेधोपसंहारेण स्वपक्षमेव दर्शयति ।... ... ... ...**आह** इति अर्थगम्यांशसन्दर्शनेन अन्यापोहमेव शब्दार्थं ग्राहयति । **बहुधे**ति शिंशपादिविशेषेण पुष्पितफलितादिविशेषेण चानेकविधत्वेऽपीत्यर्थः । **अभिधेय** इति शिंशपादिरर्थः । तस्यैव अनेकविधत्वेऽपि **न शब्दात् सर्वथा गतिः । स्वसम्बन्धानुरूप्या**दिति स्वसम्बन्धोऽविनाभावित्वं तदन्वयव्यतिरेकलक्षणम् । स च तत्सामान्यापेक्षया, न तु विशेषापेक्षया । तस्माद् यादृशः सम्बन्धः प्रत्यायकत्वमपि तादृशमेव युज्यते । इदमुक्तं भवति--सामान्यापेक्षयास्य सम्बन्धः, सामान्यं च व्यवच्छेदरूपमेव यथोक्तवत् अन्यस्यायोगात् । तस्माद् व्यवच्छेदमेव कुर्वन् प्रत्याययतीति । अथ केनांशेन प्रत्याययतीति चेत्, उच्यते **--अनेकधर्मा शब्दो**ऽपीत्यादि । स्वसामान्यधर्मैरनेकधर्मा । **येनार्थं नातिवर्तत** इति सामान्यधर्मेण वृक्षत्वादिना येन न व्यभिचरति **प्रत्याययति तेनैवे**ति अनेन स एव धर्मः प्रत्यायक इत्यर्थः । एवकारेण यद्व्यवच्छेदस्तद् दर्शयति **--न तु शब्दगुणादिभि**रिति । आदिशब्देन शब्दज्ञेयत्वादयो गृह्यन्ते । अप्रत्यायकत्वं तेषामव्यभिचारित्वात् । तथाहि--ते वृक्षार्थं विनापि रसादिषु दृष्टाः, न तु वृक्षशब्दत्वादि सामान्यम् । **यद्यन्यापोहमात्र**मित्यादि ।... ...**कथ**मित्यादि... ... ...। **कथं न स्यादिति चे**दित्यादि । **यस्माद् भिन्न** इत्यादि अपोह्यभेदेन सहचारादर्थभेदं दर्शयति । अयं हेतुः । ये भिन्नार्थास्ते न समानाधिकरणा न च विशेषणविशेष्यभूताः, घटपटादिशब्दवत्, नीलोत्पलादिशब्दा अपि तथेति व्यापकविरोधः । **ते**ऽ**पी**त्यादि । यद्यपि **अपोह्यभेदाद् भिन्नार्था**स्तथाप्यस्ति विशेषः **स्वार्थभेदगतौ जडाः** प्रत्येकमिति शेषः । स्वार्थः सामान्यमुत्पलशब्दस्योत्पलमात्रम्, तद्भेदा रक्तोत्पलादयः । नीलशब्दस्यापि नीलमात्रम्, तद्भेदा भ्रमरादयः । तद्गतौ जडाः संशयहेतवः । अनेन प्रत्येकं स्वार्थभेदे संशयहेतुत्वम् अर्थापत्त्या सहितानामेव निश्चयहेतुत्वं विशेष उक्तः । यस्मादेवमुत्पलनीलादिशब्दानां परस्परार्थे स्वार्थविशेषे प्रत्येकं संशयहेतुत्वं सहितानामेव निश्चयहेतुत्वं तस्मादेकस्मिन् वस्तुनि नीलोत्पलमित्यभिन्नकार्यत्वं विशिष्टार्थाभिव्यक्तिलक्षणं युज्यते । तस्मादे**कत्राभिन्नकार्यत्वात्** सामानाधिकरण्यं तस्माच्च विशेषणविशेष्यभाव उपपद्यते ।... ... ... **अपोह्यभेदे सत्यपि** इति, इदमपि पूर्ववदपोह्यभेदेनार्थभेदं दर्शयति । **स्वार्थविशेषव्यक्त्यर्थ**मिति स्वार्थविशेष उत्पलनीलादिशब्दानामुत्पलनीलादिः, तदभिव्यक्त्यर्थमिति । अनेनाभिन्नकार्यत्वमुक्तम् । **स्थाणुकाकनिलयनवत् स्वापोहार्थ**मिति नीलसामान्योत्पलसामान्ययोः [अपोहार्थम्] **एकत्र समुदिता** इति ।... ... ...**तथाहि--ते प्रत्येकं स्वार्थविशेषे संशयहेतवः** । अर्थापत्त्या सहितानां निश्चयहेतुत्वमुच्यते । यस्माद् नीलोत्पलादिशब्दाः प्रत्येकं स्वार्थविशेषे सन्देहहेतवः सहिता एव निश्चयहेतवः, तस्मात् सहिताः स्वार्थविशेषैकार्थव्यञ्जकाः समानाधिकरणभूताः । **शब्दान्तरसहितप्रकाश्यार्थासम्भवाच्चे**त्यादि । शब्दान्तरेण नीलादिशब्देन सहितस्य उत्पलशब्दस्य प्रकाश्यो विशिष्टोऽर्थः स उत्पलशब्दे केवले न सम्भवति । एवं नीलशब्देऽपि उत्पलशब्देन सहितस्य यः प्रकाश्यः स केवले न सम्भवतीति शब्दान्तरसान्निध्येन विशिष्टार्थे प्रवृत्तेः परस्परं विशेषणविशेष्यभावः ।... ...**नन्वेकाधिकरणं यत्** तदिति, विग्रहकाले नीलं च तदुत्पलं च इति क्रियते तस्मात् पृच्छति । अनेन यदुक्तं शब्दान्तरसहितेनैव शब्देन विशेष्यार्थः प्रकाश्यते इत्यत्राभ्युपगमबाधामाह । **न हि तत् केवलं नीलम्** इति केवलनीलनिषेधेन नीलशब्दमात्रवाच्यत्वस्य निषेधः । एवं **न च केवलमुत्पल**मिति उत्पलशब्दमात्रवाच्यत्वस्य केवलस्य । तथाहि--केवलनीलशब्देन केवलोत्पलशब्देन च यदभिधीयते तत् केवलं नीलं केवलं चोत्पलमिति प्रसिद्धम् । कस्मात् पुनः नीलोत्पलशब्दाभ्यां केवलाभ्यां तन्नाभिधीयत इति चेदुच्यते **--समुदायाभिधेयत्वा**दिति । यस्मात् सहिताभ्यामेव नीलोत्पलशब्दाभ्यां सोऽर्थोऽभिधीयते न केवलाभ्याम्, अन्यथा एकेन तदर्थस्याभिहितत्वे पर्यायशब्दवत् तयोः सह प्रयोगो नोपपद्यते । ततोऽनेन विग्रहकालेऽपि सहिताभ्यां

सामान्यस्तस्य तेन सामानाधिकरण्यं न भवति । **यथा सच्छब्दार्थे**त्यादिनिदर्शनदण्डकः, सच्छब्दानर्थोऽस्य सच्छब्दस्य सोऽयं सच्छब्दः सच्छब्दार्थः, तस्य घटादिभेदार्थत्वं नास्ति त्वन्मतेन, तदभावात् तेन सहासामानाधिकरण्यम्, - /ms साक्षाद्विधिवादिमत इव तवापि सच्छब्दो[ऽसद]सदर्थो घटादिभेदार्थो न भवति, अतस्तद्वदेव सामानाधिकरण्याभाव इति । § 1865
१629/mj

[This page consists merely of footnotes.] § 1866
630/mj

[This page consists merely of footnotes.] § 1867
631/mj

[This page consists merely of footnotes.] § 1868
632/mj

[This page consists merely of footnotes.] § 1869
633/mj

शब्दमात्रं हि... ...तन्निमित्ताभावात् छत्रिदण्डिवत् । भेदाद् व्यावृत्तिसामान्यानाम्... ... ...एकस्मिन्नर्थे यदा बहवो वक्तारो भवन्ति घटः पार्थिवो द्रव्यं सन् शुक्लः इत्येवमादिविशेषैस्तदा सोऽर्थो घटरूपेण कृत्स्नो वाभिधीयेत एकदेशेन वा ? न तावत् कृत्स्नः, वक्त्रन्तरस्य पार्थिवत्वेनाभिधानासम्भवप्रसङ्गात् । अन्यतरसामान्यविशेषणाभावः, कृत्स्नाभिधेयस्वरूपोपादानशब्दाभिहितत्वात्, घट- § 1870

**शब्दमात्रं** हीत्यादि त्वन्मतदोषोक्तिस्तुल्या तवापि यावत् **तन्निमित्ताभावात् छत्रिदण्डिवदिति** । यथा छत्रनिमित्तश्छत्री दण्डनिमित्तो दण्डी भिन्ननिमित्तत्वात् परस्पर[म]समानाधिकरणौ तथा व्यावृत्तिमत्सच्छब्दपक्षेऽपीति

१. यस्माद् व्यावृत्तिभानसदसत्त्वानर्थोऽन्यत्र न वर्तते ततो भिन्नः । भिन्नत्वाच्चातद्भेदत्वे स एव दोषः इत्याशयः सम्भाव्यते ॥

नीलोत्पलशब्दाभ्यां तदभिधीयत इत्यभ्युपगमाद् नाभ्युपगमबाधेति दर्शयति । ननु केवलाभ्यां किं प्रतीयते इति चेत्, न किञ्चिदपि, यस्माद् **वर्णवत् तन्निरर्थकम्** । कथं पुनरंशानां निरर्थकत्वे तत्समुदायस्यार्थवत्त्वमिति चेदुच्यते --**यथे**त्यादि ।--**विशालामलवती**.VT. D. ed. A– A, P. ed. A– B ॥
१७ ब्द] शब्दमात्रं हि तुल्यं नार्थः ।

शब्दश्च निमित्तमुपादाय प्रवर्तते, अतो व्यावृत्तिमत्पक्षे व्यावृत्तिमतां भेदान्न सामानाधिकरण्यम्, एकत्र तन्निमित्ताभावात् छत्रिदण्डिवत् इत्याशयोऽत्र भाति ॥
१९ याव]
यावत्तमित्ताभावात्nayacakra-ms-ya ॥
१ ब्द]
॰ब्दमपेक्षेपीतिnayacakra-ms-ya ॥

। ***भेदाद् व्यावृत्तिसामान्यानामि**त्यादि, विधिपक्षदूषणवदिहापि व्यावृत्तिसामन्यवद्भेदादन्यदेवासद्व्यावृत्तिसामान्यात् [अ]घटनिवृत्तिसामान्यम्, अतः सन् घटः इति भिन्नव्यावृत्तिविशिष्टसन्घटत्वसामान्ययोर्भेदादिति । अत ऊर्ध्वं तुल्यगमनीयमेव विधिपक्षदूषणेन सर्वमिति तद्व्याख्यैवेयं लिख्यते--एकस्मिन्नर्थे घटादौ घटत्व-पृथिवीत्व-द्रव्यत्व-सत्त्वादिभिन्नेषु वक्तृषु कश्चिद् घटः इति ब्रूते कश्चित् पृथिवी इत्यादि यावत् सन् इति, तत्र घटाभिधाने सोऽर्थो घटरूपेण कृत्स्नो वाभिधीयेत, एकदेशेन वा ? न तावत् कृत्स्नः, तस्मिन्नेव काले वक्त्रन्तरस्य पार्थिवत्वेनाभिधानासम्भवप्रसङ्गात्, न हि [अ]घटव्यावृत्तिरूपसामान्यं गृहीत्वाऽतद्रूपाभिप्रायिशब्दप्रयोगो युक्तः, स चेतरवक्तृवशात् कृत्स्नो घटरूपेण स्थित इत्यसम्भवो रूपान्तरस्य कृत्स्नस्यैकस्य । [अनेक ?]वृत्तिसामान्यरूपप्रतीतेस्तद्गतस्तत्सारूप्येण युगपद् वक्त्रभिप्रायभेदेन युक्तो भावः सन् घटः इति प्रयोगः । § 1871

अत्र साधनम् --**अन्यतरसामान्यविशेषणाभाव** इति प्रतिज्ञा । **कृत्स्नाभिधेयस्वरूपोपादानशब्दाभिहितत्वात्,** यत्र कृत्स्नाभिधेयस्वरूपं तदुपादानेन शब्देनाभिधीयते तत्रान्यस्य सामान्यविशेषण 634/mj

* * *

पार्थिवत्वादिवत् । अथास्यैकदेशं गृह्णाति, तदयुक्तमप्रतीतेः । न हि व्यावृत्तिसामान्यशब्दैस्तद्गत एकदेशो वक्तुं शक्यः, अतदसत्त्वत्सामान्यविषयत्वात्, यथा आचार्यो मातुल इति ।

अथापि स्यात्--असद्व्यावृत्तिजातिमति बह्वर्थाशङ्कायां घटादिभेदवाचि-

* * *

---

५ *] **भेदाद्वाभ्यावृत्ति॰**nayacakra-ms-bhā । भेदाद्वा व्यावृत्ति॰ इत्यपि पाठोऽत्र भवेत् ॥
९ त्वादिभिन्नेषु] **वक्तृषु वक्तृषु** nayacakra-ms-bhā । **वक्तृषु २** nayacakra-ms-ya ॥
११ गृहीत्वा] **॰त्वातद्रूपा॰**nayacakra-ms-ya । **॰त्वतद्रूपा॰** भ॰ ॥
१५ तीतेस्त] **॰स्मत्तद्गत॰**nayacakra-ms-bhā ॥
१९ आ] सम्बन्धिभेदेनैक एवार्थोऽनेकरूपत्वेन प्रतिभासत इत्यत्र भाष्ये पा॰ म॰ भा॰ ३ । ३ । १८ निदर्शनमुपन्यस्तं व्याचष्टे --**आचार्यो मातुलश्चेति** यथैको व्यपदिश्यते । सम्बन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः ॥ वाक्यप॰ ३ । ८ । ६३, उक्तमिदं भाष्ये--उपाध्यायस्य शिष्यो मातुलस्य भागिनेयं गत्वाह--उपाध्यायं भवानभिवादयतामिति । स गत्वा मातुलमभिवादयते । तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यं गत्वाह--मातुलं भवानभिवादयतामिति । स गत्वोपाध्यायमभिवादयत इति । अत्र च यथैकोऽर्थः कश्चित् प्रत्युपाध्यायो भवति कश्चित् प्रति मातुलो भवति तथा स प्रकारः पक्तिभावयोर्बोधे च । स्वगतविशेषापेक्षया सामान्यस्वभावोऽपि पचिर्भावं प्रति विशेषः, भावः पुनः पचिं प्रति सामान्यमेव । इति **वाक्यपदीयस्य** हेलाराजरचितवृत्तौ ३ । ८ । ६३ ॥
१ अ] तुलना--यदपि च **भिक्षुणा** शङ्कितम्--मा भूत् पिण्डान्तरेण विशेषणविशेष्यभावः । तस्मिन्नेव पिण्डे सत्तादिविशिष्टेऽभिहितेऽपरतद्गतविशेषाकांक्षायां विशेषणादिव्यवहारो भविष्यति सन् घटः इति । यथा नीलशब्देन नीलगुणेऽभिहिते तद्गतविशेषापेक्षया तरबादिविशेषणं भवति नीलतरो नीलतम इति इति । तदुक्तम्

प्रयोगस्याभावो दृष्टः, यथा परं प्रति त्वदुदाहृतघटपार्थिवत्वोक्तौ यदि घटत्वेन
- /ms समस्तं वस्तु विशिष्टं ततः पार्थिवत्वस्यावकाशाभावान्न युज्यते इति इष्टो दोषस्तथा यद्यघटत्वनिवृत्तिविशिष्टं वस्तु समस्तमुक्तं ततोऽपार्थिवनिवृत्तिविशिष्टं न युज्यत इति समानः । § 1872

**अथास्यैकदेशं** घटः इत्यघटनिवृत्त्या **गृह्णाति** एकः, अपरोऽपार्थिवनिवृत्त्या देशं पार्थिवः इति गृह्णातीति मतम् **तदयुक्तमप्रतीतेः**, न हि निमित्तान्तरैरुच्यमानस्य एकदेशप्रतीतिर्दृष्टा यथा आचार्यो मातुल इति तथा न हि व्यावृत्तिसामान्यशब्दैस्तद्वत एकदेशो वक्तुं शक्यः । कस्मात् ? **अतदसत्वत्सामान्यविषयत्वात्** । **अतस्य** अन्यस्य व्यावृत्तस्य असत्त्वम्, तदस्यास्ति सन् घटः इत्यादिसामान्ये, स विषयोऽस्य शब्दस्य सोऽतदसत्वत्सामान्यविषयः, यत्रातदसत्वत्सामान्यविषयत्वं शब्दे तस्यैकदेशो न शक्यो वक्तुम् । किमिव ? आचार्यो मातुल इत्यादिनिमित्तान्तरोक्तैकदेशानुक्तिवत् । § 1873

**अथापि स्यादित्यादि** परमताशङ्का । यथा विधिवादिमतमाशङ्क्यते तथापोहवादिमतम् **--असद्व्यावृत्तिजातिमतीत्यादि** शब्दविशेषितग्रन्थमर्थतस्तुल्यं यावद् **नीलतम इति वेति** । अस्य व्याख्या—
635/mj

* * *

शब्दैः सामानाधिकरण्यं भविष्यति तत्सामान्यगुणत्वात् तद्वाचिशब्दस्यापि तद्वच्छेद्यविषयत्वात् । यत्र यत्र तत्सामान्यगुणत्वं तत्र तत्र सामानाधिकरण्यं दृष्टम्, तद्यथा अनन्यद्रव्यवर्तिनि नीलगुणेऽनीलनिवृत्तिसामान्यस्य नीलतरादिद्रव्यवृत्तित्वात् तैः सह सामानाधिकरण्यं भवति नीलतरो नीलतम इति वा ।

न, सामान्यविशेषभावस्य तच्छब्दार्थाभावात् सम्प्रधार्यत्वात् । यतश्च नीलशब्दोऽपि न द्रव्यं नीलत्वेनाह, किं तर्हि ? अनीलवदभावम् । तत्र च न नीलादिभेदानां कस्यचिदपि सम्भवः । अनीलाभावभावत्वान्नेति चेत्, एवं विधिशब्दार्थता तर्हि । यस्मादेवं सतोऽपि न सामानाधिकरण्यम्, अभूतसामान्यविशेषत्वात् ।

---

**--यद्येकत्रासितादिवत्** पृ॰ ६३० इति । एवं चाशङ्क्य परिहृतम्--युक्तं तत्र नीलो गुणः प्रकर्षाप्रकर्षादिभेदभिन्नस्तरबादिभिर्विशेष्यते । सत्ताजातिस्तु घटादिजातिशून्या स्वात्मविशिष्टं पदार्थं प्रतिपादयन्ती नैव घटत्वादीनाकांक्षतीति न तत्र विशेषणाभिधानं भवति । तदुक्तम् **--नैतज्जातेरजातितः** पृ॰ ६३० इति । तदेतदपि समानम् । तवापि ह्यसदपोहे नैवाघटापोहोऽस्ति । अतश्चात्मन्यविद्यमानमघटापोहमसदपोहो नैवाक्षेप्तुं समर्थ इति तैर्नाघटापोहैर्विशेष्यते यथाऽनीलापोहः स्वगतैरप्रकर्षापोहैर्विशेष्यते । तदेतत् सर्वमाह--नात्मन्यविद्यमानत्वाद्विशेषापोहसूचनम् । तस्मान्न तैर्विशेष्यत्वं प्रकृष्टत्वेन नीलवत् ॥ १३२ ॥ इति । यत् पुनः अशब्दवाच्यैरेव घटादिभिः सज्ञात्याक्षिप्तैर्विशेषणादिव्यवहारो भविष्यति इत्याशङ्क्य **भिक्षुणा** दूषितम्--अनैकान्तिको घटाक्षेपः, पटेऽपि सङ्क्रान्तिसम्भवात् इति । तदुक्तम् **--अर्थाक्षेपेऽप्यनेकान्तः** पृ॰ ६३० पं॰ ७ इति । तदेतदपि [समानम्] । न ह्यसदपोहोऽनैकान्तिको धूमवदग्निमघटापोहमाक्षेप्तुं समर्थं इत्याह--अर्थाक्षेपोऽपि नास्त्येव सन्देहाल्लिङ्गलिङ्गिवत् । इति । **--मी॰ श्लो॰ वा॰ शर्करिका॰** पृ॰ ६४ ॥

२ प] तुलना--पृ॰ ६०८ पं॰ १४ ॥

* * *

यद्यपि तद्वद् घटादि पटादिषु न वर्तते तथापि एकत्रातद्व्यावृत्त्याधारे वर्तते सत्ता, ततो बह्वर्थाशङ्कास्ति, तस्यां च सत्यां **घटादिभेदवादिभिः शब्दैर्येषु** सा सत्ता वर्तते तैस्तद्वाचिभिः **सामानाधिकरण्यं भविष्यतीति** प्रतिज्ञा । **तत्सामान्यगुणत्वादिति** हेतुः, सा सामान्यगुणो येषां ते बहवोऽर्थास्तत्सामान्यगुणाः, तद्भावात् तत्सामान्यगुणत्वात् । **तद्वाचिशब्दस्यापि तद्व्यवच्छेद्यविषयत्वात्,** तया सत्तया व्यवच्छेद्याः सर्वे विषया अर्थाः, ते विषया अस्य शब्दस्य स तद्व्यवच्छेद्यविषयः, तद्भावात् तद्व्यवच्छेद्य- विषयत्वात् । - /ms **यत्र यत्रेत्याद्युपनयः** कार्यः । दृष्टान्तः --**तद्यथा अनन्यद्रव्यवर्तिनी**त्यादि, अनीलेतरो हि नीलगुणोऽनन्यद्रव्यवर्ती द्रव्ये नीलगुण एव वर्तते, नीलतरादिष्ववर्तमानेऽपि तस्मिन् नीलगुणसामान्ये अनीलनिवृत्तिसामान्यस्य नीलतरादिद्रव्यवृत्तित्वात् तैः सह सामानाधिकरण्यं भवति, यथा **नीलतरः** पटो **नीलतम इति** वेति । सोदाहरणोपसंहारे परिहारे वयमत्र ब्रूमः--तच्च **न, सामान्यविशेषभावस्य** नीलत्वनीलगुणद्रव्यादेरनीलत्वानीलगुणद्रव्यनिवृत्तिलक्षणस्य **तच्छब्दार्थाभावात् सम्प्रधार्यत्वात्,** नीलत्वजातिशब्दार्थस्यातद्व्यावृत्तिलक्षणस्य नीलगुणशब्दार्थस्य चाभावादनीलेतरजातिगुणद्रव्यदृष्टान्ताभावात् तत्सामान्यविशेषभावोऽत्रापि सम्प्रधार्यः । तद्भावनाहेतुः --**यतश्च नीलशब्दोऽपी**त्यादि, सोऽपि हि नीलशब्दो **न द्रव्यं नीलत्वेनाह** यत्तत्तरतमादिप्रकर्षभेदस्य सामान्यं स्यात्, **किं तर्हि ? [अ]नीलवदभावम**नीलत्वजातेरनीलगुणस्य वा निवृत्तिमाह । तत्र चाभावे न नील-नीलतर-नीलतमानां भेदानां कस्यचिदपि सम्भवः । तस्मादभावमात्राभिधानाद् नास्ति सामान्यविशेषभावः । § 1874

**अनीलाभावभावत्वाद् नेति चेत्** । स्यान्मतम्--अनीलत्वजातिगुणाभावो नीलगुणद्रव्यभाव एव, स च सामान्यं नीलादिभेदानाम्, इति चेन्मन्यसे । अत्रोच्यते --**एवं विधिशब्दार्थता तर्हि,** स एव नीलत्वजातिगुणाधारद्रव्यस्य विधिः । अस्तु, को दोष इति चेत्, उच्यते --**यस्मादेवं सतोऽपि न सामानाधिकरण्यं** त्वदुक्तन्यायेन **अभूतसामान्यविशेषत्वात्,** अनन्यद्रव्यव- - /ms र्तिनि नीलगुणे नील-नीलतरनीलतमप्रकर्षभेदाभावात् सामान्यविशेषत्वाभावः । तस्मादभूतसामान्यविशेषविषयत्वात् त्वदुक्तनील 636/mj

* * *

उपेत्यापि तु सामान्यविशेषत्वाभावमसदघटादिव्यावृत्तिमतां ब्रूमो जातेरजातितः । न ह्यभिधानप्रत्ययहेतावसदभावात्मिकायां सञ्ज्ञातावघ-

---

८ य] तुलना--पृ॰ ४७४-- १ ॥
८ अ] **अर्थशब्दस्य** प्र॰ ॥
१० अ] तुलना पं॰ २८ । पृ॰ ६३० पं॰ १ ॥
१६ व्ये] नीलगुणे इति सप्तम्यन्तमेतत् ॥
२६ द्यावृत्तिल] **॰लक्ष्याभ्यनील-गुण॰**nayacakra-ms-bhā । **॰लक्षभ्या नीलगुण॰** nayacakra-ms-ya । ॰लक्ष्यस्य नीलगुण॰ ? ॥
२७ स्य] **विधेः** प्र॰ ॥

टाभावाद्यात्मिका घटत्वादिजातिरस्ति यथा नीलगुणे द्रव्ये नीलप्रकर्षभेदः यतोऽसदसत्वतोऽघटाभावघटत्वादीनुपादाय प्रवर्तेत। न चाविद्यमानः स्वात्मन्यर्थो विशेषणेन शक्यते विशेष्यवस्तुन्यध्यारोपयितुं स्वरूपवत्। तस्मात्... ... ...सामानाधिकरण्यं स्यात्। न सद् घटादि विशेषयिष्यति, अविद्यमानतद्रूपत्वात्, नीलमिव मधुरम्।

अर्थाक्षिप्तास्तर्हि घटादयो भवितुमर्हन्ति, असद्व्यावृत्तिमतोऽन्यतमघटत्वादि-

* * *

नीलतरादिवत् सामानाधिकरण्याभाव इति दृष्टान्तासिद्धेः सच्छब्देऽसद्व्यावृत्त्या भेदानामसद्व्यावृत्तिपक्षे विधिपक्षे वा नास्ति सामानाधिकरण्यम्। § 1875

**उपेत्यापि तु, न** व्यावृत्तिमदभिधानं सच्छब्देन, असद्व्यावृत्तिमतः सतोऽभिधानमभ्युपगम्यापि **सामान्यविशेषत्वाभावमसदघटादिव्यावृत्तिमतां** ब्रूमः। कुतः ? **जातेरजातितः**, नास्यां जातिर्विद्यत इति [अ]जातिरिति विग्रहात् सामान्यानामसामान्याधारतां दर्शयति। **न ह्यभिधानप्रत्यय-हेतावित्यादि** यावत् **प्रवर्तेते**ति, सदभिधान-प्रत्य[य]योर्हेतुरसदभावात्मिका सज्जातिः सत्ता, तस्यां त्वघटाभावात्मिका घटत्वजातिर्नास्ति, **यथा नीलगुणे द्रव्ये नीलप्रकर्षभेद** इति दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यं दर्शयति। **यतोऽसदसत्वतो** वस्तुनः **अघटाभावघटत्वादीनुपादाय प्रवर्तेते**त्यसम्भवमन्योन्येषु दर्शयति। द्रव्याणि तावदपोहवादिनस्तेऽस्माकमसत्योपाधिसत्यविशेषविधिवादिनामिव घटाद्यभिधानानां न हेतवः। यान्यघटासत्त्वादीनि तत्कारणानि तानि नासदसत्तायां सन्ति। तस्माज्जातिरजातिरिति सिद्धम्। § 1876

ततः किम् ? ततो **न चाविद्यमानः स्वात्मन्यर्थः** सत्ता-नीलत्वादि**विशेषणेन** - /ms **शक्यते विशेष्यवस्तुनि** घटोत्पलादाव**ध्यारोपयितुम्**। किमिव ? **स्वरूपवदि**ति वैधर्म्यदृष्टान्तः, यथा स्वरूपं शब्दो विशेष्येऽध्यारोपयति न तथेहेति। **तस्मादित्यादि** प्रस्तुतोपसंहारो यावत् **सामानाधिकरण्यं स्यादि**ति गतार्थः। प्रयोगश्चात्र --**न सद् घटादि विशेषयिष्यति, अविद्यमानतद्रूपत्वात्**, अविद्यमानतद्रूपत्वं प्रतिपादितत्वात् सिद्धम्। **नीलमिव मधुरमि**ति दृष्टान्तो गतार्थः। § 1877

---

९ त] तस्मादसदपोहेऽघटापोहाभावात् स्वात्मन्यविद्यमानमघटापोहमसदपोहो नाक्षेप्तुं समर्थ इति सच्छब्दस्य न घटादिशब्दैः सामानाधिकरण्यम्, विशेषणविशेष्यभावे हि सामानाधिकरण्यं स्यात् इत्याशयो भाति ॥

१२ स] **सच्छब्दोसद्व्या°** प्र° ॥

१३ भिधा] **सच्छेन सच्छब्देन** प्र° ॥

१४ टादिव्यावृत्तिम] °मतां घटः कुतःnayacakra-ms-ya ॥

१५ ना] नास्याnayacakra-ms-ya ॥

२४ सामान्या] °न्यानामनान्याधारतां nayacakra-ms-bhā। °न्यानां मानाभ्याधारतां nayacakra-ms-ya। °न्यानामनन्याधारतां ? ॥

२७ ब्दो] विशेषोध्यारो°nayacakra-ms-ya। विशेषोध्यारो° nayacakra-ms-bhā ॥

४ ग] गतार्थं प्र° ॥

**अर्थाक्षिप्तास्तर्हीत्यादि** । यदि घटादयोऽतद्भेदत्वादनाक्षिप्ताः सामान्यनाम-सामान्यत्वात् अर्थतस्तर्ह्याक्षिप्ता भवितुमर्हन्ति । कुतः ? **असद्भावृत्तिमतोऽन्यतमघटत्वादिसामान्यविशेषानुबद्धत्वात्,** असद्भावृत्तिमद्धि वस्तु घटत्वादीनां सामान्यविशेषाणामन्यतमेनावश्यमनुबद्धम्, असच्चेन्न भवति अवश्यं सद् भवति, सच्च घटत्वाद्यन्यतमदिति परो मन्येत । § 1878
637/mj

सामान्यविशेषानुबद्धत्वात् । नैतदस्ति अर्थाक्षेपेऽप्यनेकान्तः ।... ... ...असद्भावृत्तिमता विशेषाक्षेपो युज्यते चेत् घटादिभेदानां व्यभिचाराद् द्रव्यत्वमात्राक्षेपस्तर्हि भविष्यति, तदपि न, गुणादिव्यभिचारात् । § 1879

एतावच्च... ... ...। न चास्ति सम्भवः । तेन नापोहकृच्छ्रुतिः । § 1880

*किमन्यत्वे न सामान्यभेदपर्यायवाच्यनुत् ? § 1881

अत्रोच्यते --**नैतदस्ति, अर्थाक्षेपेऽप्यनेकान्तः** । अस्य भाष्यं सव्याख्यानं गतार्थं याव**दसद्भावृत्तिमता विशेषाक्षेपो युज्यते चेत् घटादिभेदानां व्यभिचाराद् द्रव्यत्वमात्राक्षेपस्तर्हि भविष्यति,** मात्रग्रहणाद् द्रव्यत्वसामान्यविशेषमात्रं गृह्यते सद्विशेषणेनेति । अत्रोच्यते --**तदपि न, गुणादिव्यभिचारात्** । गुणकर्मणोरपि सद्भावात् किं द्रव्यं गुणः कर्म वा सत् स्यादसद्भावृत्तिमत् इति संशय एव । § 1882

---

६ अ] **असत्वेन**nayacakra-ms-bhā । **असत्वेन** nayacakra-ms-ya ॥
१० नेकान्तः] अयमत्राशयो भाति--अर्थाक्षेपेऽपि न नियमः, सच्छब्दादसद्भावृत्तिमतार्थेन घटादेरिव पटादेरप्याक्षेपसम्भवात् । तथा च सन् घटः इत्यत्र घटाक्षेपनियमाभावात् सच्छब्दस्य न घटशब्देन सामानाधिकरण्यम् । अथ मा भूद् व्यभिचाराद् घटादीनामाक्षेपः, द्रव्यत्वमात्राक्षेपो भविष्यति असद्भावृत्तिमता अव्यभिचारात् । तदप्ययुक्तम्, गुणादिव्यभिचारात् । सच्छब्दस्य गुणादिष्वपि सम्भवाद् द्रव्यत्वमात्रस्यापि नियमेनाक्षेपाभावादिति ॥
१२ ए] एतावच्चात्र भवेत्--अन्यापोहवन्तो भेदा वा, अन्यापोहो वा, अन्यापोहसम्बन्धो वा, अन्यापोहस्य स्वाधारो वा इत्याशयोऽत्र सम्भाव्यते । तुलना--पृ॰ ६२८ पं॰ १ ॥
१४ *] **अन्यत्वेऽपि न सामान्यभेदपर्यायवाच्यनुत्** इति दिङ्नागेनाभिहितं प्रमाणसमुच्चयादौ । तत्र सामान्य-भेद-पर्यायवाचिनामनपोहे विधिरेव वस्तुतः कारणमिति विधेरेव शब्दार्थत्वं सिध्यतीत्याशयेन उभयनियमनय उपक्रामति । तुलना--अत्र च भिक्षुणा वृक्षः शिंशपा इति सामानाधिकरण्यं दर्शयतोक्तं--वृक्षस्तरुरिति पर्यायाणां च परस्परमनपोह्यत्वम्, अन्यत्वेऽपि च सामान्यभेदपर्यायवाचिनामविरोधात् इति । तदिदमनपोहे कारणं नातीव बुध्यत इत्याह--सामान्याद्यनपोहश्च नाविरोधेन कल्पते । इति । किमिति नावकल्पत इत्याह--न हि शब्दस्वरूपाणां स्याद् विरुद्धाविरुद्धता ॥ १४९ ॥ इति । — **मी॰ श्लो॰ वा॰ शर्करिका॰** पृ॰ ६९, ७० ॥
१६ ते] **चेद् घटादिभेदानामव्यभि॰**nayacakra-ms-bhā । **चेद् घटादिभेदानामाव्यभि॰** nayacakra-ms-ya ॥
१ गुणा] दृश्यतां पृ॰ ६२७ पं॰ ७ ॥

**एतावच्चे**त्याद्युपसंहारः । पूर्वविधिवादिदूषणोपसंहारवदन्यापोहमात्रेऽपि उपसंहारः । **न चास्ति सम्भव** एतेषां विकल्पानां दोषवत्त्वात् **तेन नाऽपोह-कृच्छ्रुति**रिति । § 1883

इति । किं कारणमनारभ्यम् ? **विधिः** । विधिना हि सामान्योपस-र्जनं विशेषं शब्दोऽभिदधानो विरोधाभावात् तानपि गमयति तदङ्गभावाद् (Edtext outside numbered paragraph) [This page consists merely of footnotes.] (Edtext outside numbered paragraph)

* * *

भेदपर्यायवाच्यनुत् । त्वया पुनस्त्यक्तोऽन्यापोहवादः, अनिर्वाहकत्वात् । शा-ब्दान्तरार्थापोहं स्वार्थे कुर्वती [श्रुतिः] तदर्था स्यात् । सामान्यादिशब्दान्त-रार्थात्यागात्तु त्वदनिष्टो नन्वयमेव परमविधिः । विधानं विधिः ।

* * *

**विध्येकीभूता** (Edtext outside numbered paragraph)**र्थ**त्वादिति कारणं वक्ष्यति । **नन्विदमेव** विधिना वाच[क]त्वेऽनुमानं शब्दस्य--यदन्यत्वेऽपि सामान्यादीनां विशेषानुगुणानां गतिः । **स** (Edtext outside numbered paragraph)**मूह**श्च प्रकृतिप्रत्ययादीनां त-**थार्थान्तरवाचक** इति युक्त्या व (Edtext outside numbered paragraph)क्ष्यामः । § 1884

यथा विधिवादिनामन्यापोहवादिनश्च दोषास्तथा सामान्योपसर्जनविधिप्र-धानवादिनोऽपीति मा मंस्थाः, मा च मंस्था अन्यापोहवादिलक्षणवदतिप्रस-क्तत्वादपवादोऽस्याप्यारब्धव्यो लक्षणस्येत्यत आह— **किमन्यत्वे न सामान्य-** - /ms **भेदपर्यायवाच्यनुत् ?** अविरोधात् इति वाक्यशेषः । किम् इति प्रश्ने, *किं त्वं मन्यसे--अन्यत्वे सामान्य-भेद-पर्यायशब्दानामर्थं वृक्षश्रुतिर्नापोहते पृथिवी-शिंशपा-तर्वादिशब्दानामविरोधात्, विरोधाच्च पटादीनपोहत इति, यतोऽस्य विरोद्धाविरुद्धयोरन्यत्वादपोहानपोहप्रसङ्गे तुल्ये त्वयेव मयापि यथा **शब्दान्त-रार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते** इति लक्षणस्यातिप्रसङ्गभयादारब्ध-व्यम्

विधिः । नन्विदमेव विधिना वाचकत्वेऽनुमानं शब्दस्य । यदन्यत्वेऽपि न सामान्य-

---

२ ए] दृश्यतां पृ° ६२८ पं° १ ॥
२ दोष] **दोषबंधात्तेन** प्र° ॥
७ ना] **वापोह°** nayacakra-ms-bhā । **चापोह°** nayacakra-ms-ya । अर्थाक्षेपेऽप्यनेकान्तस्तेनान्यापोहकृच्छ्रुतिः इति यदुक्तं **दिङ्नागेन** तत् प्रतिविधातुमत्र मल्लवादिसूरिभिः तेन नापोहकृच्छ्रुतिः इत्युक्तम् ॥
७ वा] **°वाच्यनुदि** विगेधात्nayacakra-ms-ya । दृश्यतां पृ° ६३८ पं° ७ ॥
७ *] किं त्वं मन्यसे त्वयेव मयापि अतिप्रसङ्गभयादारब्धव्यम्--अन्यत्वेऽपि न सामान्यभेदपर्यायवाच्यनुदिति ? इति सम्बन्धः ॥

* * *

अन्यत्वेऽपि न सामान्य-भेद-पर्यायवाच्यनुत्, अविरोधात्— 638/mj

---

२ अ] **दिङ्गागेन प्रमाणसमुच्चयवृत्तौ** यदभिहितं तदत्र भोटभाषानुवादतः संस्कृते परिवर्त्योपन्यस्यते । तच्च यथायोगमत्रानुसन्धेयम्-- (?")तत्र अन्यत्वेऽपि न सामान्यभेदपर्यायवाच्यनुत् ॥ २५ ॥ --- अन्यत्वे तुल्येऽपि सामान्य-भेद-पर्यायशब्दानामर्थं शब्दो नापोहते । कुत इति चेत्, अविरोधात् । [[पर्यायशब्दे ? PSV1 । पर्यायशब्दस्तावत् तुल्यापोह्यः ? PSV2 VT. ॥]]पर्यायशब्दस्य तावदपोह्यस्तुल्यः, युगपदप्रयोगात् । [[न च स्वार्थप्रतिक्षेपो युक्तः ? VT. ॥]]स्वार्थश्च प्रतिक्षेप्तुं न युक्तः । सामान्यशब्देनापि स्वभेदेष्वर्थान्तरापोहो भेदशब्देन [[**अनुमन्यते** इत्यपि पाठोऽत्र स्यात् । अगृहीतो नास्ति ? PSV1 । न सह्यते ? PSV2 ॥]]न नानुमन्यते अर्थित्वात् । यथा शिंशपा न पलाशादि एवं घटाद्यपि न । एतेन [[सामान्यसामान्यशब्दार्थप्रतिक्षेपः प्रत्युक्तः PSV1 ॥]]सामान्यसामान्यशब्दार्थाप्रतिक्षेपोऽप्युक्तः । एवं सामान्यशब्दः स्वार्थमभिमतविषये [[निवेशयन् ? । प्रवर्तयन् ? ॥]]स्थापयन् भेदशब्देन भेदभेदशब्देन वा कथं [[**नापेक्ष्यते** इति PSV1मध्ये दृश्यते इत्यपि ध्येयम् ॥]]नोपेक्ष्यते ? एवमविरोधात् सामान्यादिशब्दार्थापोहो न युज्यते । समूहश्च तथार्थान्तरवाचकः । एवं च सामान्यविशेषशब्दयोः स्वार्थसामान्ये प्रवर्तमानयोर्द्वयोर्बहूनां वा तद्विशिष्टार्थान्तरवाचकत्वं यथापूर्वोक्तवदुपपद्यते । आह च-- [[**तत्त्वसं॰ पं॰** पृ॰ ३०७ । **सन्मतिवृ॰** । **तत्त्वार्थसिद्ध॰** वृ॰ पृ॰ ४१२ । **शर्करिका** पृ॰ ७२ ॥]]तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन नोज्झितः । नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः ॥ २६ ॥ अनेकमपि सामान्यं भेदेनाव्यभिचारिणा । उपात्तं न तयोस्तुल्या विशेषणविशेष्यता ॥ २७ ॥ [इति संग्रहश्लोकौ PSV१] --- किं पुनरत्र कारणं येन भेदशब्दो भेदान्तरशब्दार्थमपोहत इति चेत्, [[अत्र भिक्षुणा पलाशः शिंशपेति सामानाधिकरण्यं न भवतीति दर्शयतोक्तम्--भेदो भेदान्तरार्थं तु विरोधित्वादपोहते--इति । भेदशब्दा हि पलाशशिंशपादय एकं वृक्षत्वसामान्यमन्योन्यमपहृत्य राज्यमिव राजपुत्राः स्वविषये स्थापयन्तः परस्परविरोधिनो वर्तन्ते । तेनैकापोहेनैकः प्रवर्तमानः कथं तेन सामानाधिकरण्यं लभतामित्यर्थः ।--**शर्करिका** पृ॰ ६९ । **नयचक्र**--वृत्ति॰ पृ॰ ६१३ पं॰ ६, २७ ॥]]भेदो भेदान्तरार्थं तु विरोधित्वादपोहते । --- भेदार्था हि शब्दाः परस्परविरोधिनः सामान्यार्थापहारित्वाद् राजपुत्रवत् । त[[ततश्च ? ॥]]तः परस्परार्थं न सहन्ते, य[[यथा PSV2 ॥]]थायं [वृक्षः] शिंशपेति शिंशपाशब्दो वृक्षशब्देन सह प्रयुक्तो धवादिभ्यो वृ[[वृक्षत्वं व्यवच्छिद्य PSV1 ॥]]क्षत्वमाच्छिद्य स्वविषये स्था[[स्थापयति ? ॥]]पयन् । एवमितरत्रापि । एवं तावद् [[भेदशब्दे PSV1 । भेदशब्देन... ...शब्दार्थापोहो युज्यते(?') इत्यपि पाठोऽत्र स्यात् ॥]]भेदशब्द एकद्रव्यापहारित्वाद् भेदान्तरशब्दार्थम[[॰मपोहमानो युज्यते ? ॥]]पोहते [इति] युज्यते । --- अथ घटादिकमसम्बद्धं सामान्यान्तरभेदार्थं कुतोऽपोहत इति चेत्, यस्मात् सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः ॥ २८ ॥ --- वृक्षशब्देन तु घटादीनां पार्थिवत्वाद्यपहाराद् विरोधः । तेन तदपोहः क्रियमाणोऽनुमन्यते मित्रशत्रुवत् । अ[[अर्थाच्च तत् PSV1 ॥]]र्थतस्तत् तेना[[तेनापोह्यत इति गम्यते इत्यपि पाठः स्यात् ॥]]पोढमिति गम्यते । एतेन सा[[सामान्यान्तरभेदा गुणादयस्तद्भेदाश्च रूपादयः सम्बद्धसम्बन्धाद् मित्रमित्रशत्रुवद् मित्रशत्रुमित्रवच्चापोढा उपेक्षिताश्च वेदितव्याः इत्यपि पाठोऽत्र भवेत् ॥]] मान्यान्तरभेदानां गुणादीनां तद्भेदानां च रूपादीनां सम्बद्धसम्बन्धाद् मित्रमित्रशत्रुवद्मित्रशत्रुमित्रवच्च अपोह उपेक्षा च वेदितव्ये ।(?")--PSV1 C. ed. D. ed. B– A, N. ed. B– B । PSV2 N. ed. B– A, P. ed. A– B ॥ --- अस्य **जिनेन्द्रबुद्धिरचिता विशालामलवती** व्याख्या

---

भोटभाषानुवादात् परिवर्त्योपन्यस्यते--पूर्वं कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते पृ० ६०७ इत्युक्तम् । इदानीं तस्यापवादम् **--अन्यत्वेऽपी**त्यादिनाह । यः परमः परिहारोऽन्यापोहः स सामान्य-विशेष-पर्यायशब्दार्थपरिहारेणेति । **अन्यत्वे तुल्येऽपी**ति प्रसङ्गकारणमाह, प्रतिषेधस्य प्रसङ्गपूर्वकत्वात्, अन्यत्वं चापोहे निमित्तम् । **अविरोधादि**त्यनपोहकत्वे हेतुः । येऽविरुद्धास्ते परस्परमप्रतिक्षिपन्तो नापोहन्ते यथा द्रव्ये रूपादयः । एवं त्रयाणामविरोधित्वं युगपदभिधायेदानीं प्रत्येकं दर्शयितुमाह **--पर्यायशब्द**[**स्य**] इत्यादि । **अपोह्यस्तुल्य** इत्येकार्थत्वमाह । **युगपदप्रयोगा**दित्येकार्थत्वसाधनम् । तदेकार्थीकृतत्वादुभयोरप्रयोगः । यत्र शक्तौ सत्यामप्युभयोरप्रयोगस्तयोरेकार्थत्वम्, यथा विशेषयोः । य एकार्थास्तेऽविरोधिनो यथा द्रव्ये रूपादयो मित्राणि वा । पर्यायशब्दा अप्येकार्था इति व्यापकविरोधः । येऽविरोधिनस्ते परस्परतोऽप्रतिक्षिप्ता यथा त एव, पर्यायशब्दा अप्यविरोधिन इति व्यापकविरोध एव । **स्वार्थश्च प्रतिक्षेप्तुं न युक्त** इत्यनपोहत्वे हेत्वन्तरमाह । यो यस्य स्वार्थः स तेन नापोह्यते यथा विज्ञानेन स्वार्थः, पर्यायशब्दोऽपि पर्यायशब्दान्तरस्य स्वार्थः । **सामान्यशब्देनापी**त्यादि । सामान्यशब्दस्य वृक्षशब्दस्य यत् स्वसामान्यं वृक्षत्वं तद्विशेषाः स्वभेदाः शिंशपादयः, तेषु अर्थान्तरस्य घटादेर्वृक्षशब्देनापोहो **भेदशब्देन** शिंशपाशब्देन **अनुमन्यत** एव **अर्थित्वात्** । अर्थितो हि शिंशपाशब्देन घटाद्यपोहः । तदेवार्थित्वं दर्शयितुमाह **--यथे**त्यादि । अनेन घटाद्यपोहेनार्थित्वादेकार्थत्वद्योतकभेदशब्दः सामान्यशब्देनाविरुद्ध इति दर्शयति । यथा पलाशादिरूपः शिंशपाशब्दार्थो न भवतीति पलाशादयस्तत्प्रतिक्षेप्या एवं घटादिरूपोऽपि न भवतीति घटादयोऽप्यपोह्याः । ते च वृक्षशब्देनापोह्यन्ते । **एतेने**त्यादिना स्वसामान्यस्य वृक्षत्वस्य यत् सामान्यं पार्थिवत्वं तच्छब्दः पार्थिवशब्दः सामान्यसामान्यशब्दः तेन यदपोह्यमाप्यादि तच्छिंशपाशब्देनाप्यनुमन्यते, अर्थित्वात् । यथा शिंशपा न पलाशादि एवमाप्यत्वाद्यपि नास्ति ।... ...एवं **सामान्यशब्द** इत्यादि । यथा भेदशब्दोऽविरोधात् सामान्यशब्दार्थं न प्रतिक्षिपति एवं सामान्यशब्दोऽपि सदादिः **स्वार्थं** सत्तादिकम् **अभिमतविषये स्थापयन्नि**ति भेदेष्वनवस्थितत्वात् स्थापयन् गुणादितो व्यवच्छिन्ने द्रव्यादौ निवेशयन्... ...**भेदशब्देन** द्रव्यादिना **भेदभेदशब्देन वा** पार्थिव-वृक्ष-शिंशपादिशब्देन **कथं नोपेक्ष्यते ?** उपेक्ष्यत एव, अर्थित्वात् स्वविषये स्थित्या निर्विषयस्वार्थानुपपत्तेः । एतेनाभिमतार्थसाधनाद् भेदशब्दः सामान्यशब्दमुपकुरुते । ततश्च सामान्यशब्दस्तेनाविरुद्ध इति दर्शयति । **समूहश्चे**त्यादि अविरोधादप्रतिक्षेपे गुणोत्कर्षं दर्शयति, अथवा अन्योन्याप्रतिक्षेपे हेत्वन्तरमाह । परस्परार्थाप्रतिक्षेपे हि स्वार्थविशिष्टार्थवाचकत्वमुपपद्यते, नान्यथा ।... ... ...**एवं चे**ति परस्परार्थाप्रतिक्षेप एवेत्यर्थः, **द्वयो**रिति यथा वृक्षम् इति प्रकृतिप्रत्यययोः... ... ...। एवं नीलोत्पलमिति नीलोत्पलशब्दयोः... ...। **बहू**नामिति यथा राजपुरुषः सुरूप आगच्छति इति स्वार्थसामान्ये प्रवर्तमानानां सर्वेषामपि वाक्यपदानामितरेषां च वाक्यार्थवाचकत्वमप्रतिक्षेपे योजनीयम् । अर्थान्तरवाचक[त्वं] प्रागेव प्रतिपादितमित्याह **--यथापूर्वोक्तव**दिति । न हि तत् केवलं नीलं न च केवलमुत्पलम् पृ० ६३० पं० २२ इत्यादिना नीलोत्पलशब्दयोः समूहार्थस्य प्रत्येकं नैरर्थक्यदर्शनेन समूहस्यार्थान्तराभिधायकत्वमुक्तम् । **आह चे**ति सामान्यभेदशब्दयोरविरोधे सामान्यशब्देन भेदानामत्यागानुपादाने अधिकृत्य कारिकामाह— **तन्मात्राकाङ्क्षणा**दित्यादि । स्वभेदमात्राकाङ्क्षणादित्यर्थः । आकाङ्क्षा तेषु सन्देहव्यवच्छेदार्थिता । मात्रशब्दो भेदान्तराकाङ्क्षानिरासाय । तथाहि वृक्षशब्दात् पलाशादिविषयैवाकाङ्क्षोत्पद्यते, न घटादिविषया ।... ... ...तस्माद् **नोज्झितः** । ... ... ...ननूपात्तः, अनुज्झितत्वादिति चेत्, उच्यते **--नोपात्त** इत्यादि । नोपात्तो न प्रतिपादित इत्यर्थः । यो येषु संशयहेतुस्तेन ते न प्रतिपादिताः, यथा स एव, सामान्यशब्दोऽपि स्वभेदेषु संशयहेतुरिति कारणविरोधः । **साम्ये चैकार्थता तयो**रिति यत्र सामान्यविशेषश-ब्दाभ्यामुभयमपरिहृतमनुपात्तं च तत्रैकार्थत्वं तत्सामानाधिकरण्यमित्यर्थः । यथा

* * *

**विधिः । नन्विदमेव विधिना वाचकत्वेऽनुमानं शब्दस्य । यदन्यत्वेऽपि न सामान्य-**

* * *

---

सामान्यशब्देन स्वभेदा अप्रतिक्षिप्ता अत्यक्ताः किमेवं भेदशब्देनापि सामान्यम् ? इति पर्यनुयोगं परिहरन्नाह **--अनेकमपी**त्यादि । यद्यपि सामान्यमनेकं तथापि तद् भेदशब्देनोपात्तं प्रतिपादितमित्यर्थः, प्रतिपादनाद् भिन्नस्योपादानस्यासम्भवात् ।... ... ...**अव्यभिचारिणे**ति यस्माद् विशेषः सामान्यं न व्यभिचरति सामान्याभावे विशेषाभावात् तस्मात् तेनोपात्तम् । न **तयोरिष्टास्तुल्या ? विशेषणविशेष्यते**ति वृक्षः शिंशपादिव्यभिचारव्यवच्छेदमपेक्षत इत्यस्ति विशेषणविशेष्यभावः, शिंशपा तु वृक्षसामान्याव्यभिचारं नापेक्षत इति नास्ति । व्यभिचारिणोर्विशेषणयोस्तु विशेषणविशेष्यभावस्तुल्यो यथा नीलोत्पलयोः ।... ... ... **किं पुनरत्रे**त्यादि । सामान्ययोः स्वसामान्यापेक्षया भेदत्वात् पृथगनुपादानम् । **भेदो भेदान्तरार्थ**मिति वृक्षत्वस्य भेदः शिंशपादिः, परस्परतो भिद्यत इति कृत्वा । अत्र विषयेण विषयिनिर्देशाद् भेदो भेदान्तरं च शब्द इति विज्ञेयम् । भेदशब्दो भेदान्तरशब्दार्थमित्यर्थः । **विरोधित्वा**दिति हेतुः । **सामान्यार्थापहारित्वा**दिति विरोधित्वस्य कारणम् । **राजपुत्रव**दिति दृष्टान्तः । राजपुत्राणां पितरि मृते सामान्यार्थो राज्यम्, तस्य तैर्यथासर्वपराक्रममपहृतत्वाद् विरोधिनः, ततश्च परस्परार्थं न सहन्ते । ये सामान्यार्थापहारिणस्ते परस्परविरोधिनः, राजपुत्रवत्, सामान्यशब्दा अपि तथेति स्वभावः । ये विरोधिनस्ते परस्परार्थं न सहन्ते, तद्वदेव, भेदशब्दा अपि तथेति व्यापकविरोधः । **यथे**ति सामान्यार्थापहारित्वं दर्शति । **एकद्रव्यापहारित्वा**दिति सामान्यार्थापहारित्वस्यैवान्वाख्यानम् ।... ... ...विरोधः परिहारहेतुरुक्तः, स च सामान्यार्थापहारित्वात् । सामान्यान्तरस्य पार्थिवत्वादेर्ये भेदा घटादयस्तद्वाचकशब्दैः सह शिंशपाशब्दस्यैकार्थापहारित्वं नास्ति, किं तर्हि ? वृक्षशब्देन । तस्मात् परिहारहेत्वभावान्नापोह इति मन्यमान आह **--अथे**त्यादि । शिंशपासामान्यं वृक्षत्वम्, ततोऽन्यत्वात् पार्थिवत्वं सामान्यान्तरम्, तद्भेदो घटादिः, सोऽसम्बद्धः शिंशपाशब्देन विरोधाभावात्, तच्छब्देन शिंशापाशब्दस्यैकद्रव्यापहारित्वमपि नास्ति । तस्मात् तं **कुतोऽपोहते ?** अविरोधादस्यानपोह एवेत्यर्थः । **सामान्यान्तरभेदार्था** इति तमेव अपोहकारणं विरोधं दर्शयति । विरोधसामान्यमपोहस्य कारणम् । अत्र च यद्यपि न साक्षाद् विरोधस्तथापि परम्परयास्त्येव । तद्दर्शयति **--वृक्षशब्देन त्वि**त्यादि । **तेने**त्यादि । शिंशपाशब्दस्य मित्रं वृक्षशब्दः, तदर्थसामान्यवाचकत्वात् । तच्छत्रवो घटादिशब्दाः पार्थिवत्वापहारित्वात् । ततो वृक्षशब्देन **तेन** घटाद्यपोहः क्रियमाणः शिंशपाशब्देनानुमन्यते मित्रशत्रुवत् । **अर्थतस्तत् तेने**ति शिंशपाशब्दार्थः शिंशपासामान्यम्, तच्चाघटादिरूपत्वाद् घटादितो व्यावृत्तम् । तत एवार्थतो गम्यते । शिंशपाशब्दस्य तत्र व्यापारो नास्ति तथापि शिंशपाशब्देन तेन घटाद्यपोढमिति गम्यते, तद्वत्यार्थतस्तस्यापोढत्वात् । **एतेने**ति अनया युक्त्या पार्थिव[त्व]सामान्यात् सामान्यान्तरं द्रव्यत्वम्, तत्सामान्यं सत्ता, तद्भेदा गुणाः कर्माणि च, तेषामपि भेदा रूपादय उत्क्षेपणादयश्च यथासङ्ख्यं स्वविरोधिसामान्यशब्देनापोढा विशेषशब्देनोपेक्षिताश्च सम्बद्धसम्बन्धाद् वेदितव्याः । कथमिति चेदुच्यते— **मित्रमित्रशत्रुव**दित्यादि । अत्र मित्रमित्रेति द्विरुक्तिः परम्परया मित्रप्रतिपादनेच्छयावगन्तव्या, अन्यथा एकीकृतेनैव मित्रेण मित्रस्य प्रतीतेः । तत्र गुणकर्मणी शिंशपाशब्देन द्रव्यशब्देनापोह्यमानानि मित्रमित्रशत्रुवदनुमन्यन्ते । गुणविशेषा रूपादयः कर्मविशेषाश्चोत्क्षेपणादयस्तु शिंशपाशब्देन मित्रशत्रुमित्रवद् द्रव्यशब्देन... ...अपोह्यमाना उपेक्ष्यन्ते ।

**--विशालामलवती** VT. D. ed.

A– A, P. ed. A– A ‖

n640/r

## अन्यत्वेऽपि न सामान्य-भेद-पर्यायवाच्यनुत्, अविरोधात्

१ अ] दिङ्गागेन **प्रमाणसमुच्चयवृत्तौ** यदभिहितं तदत्र भोटभाषानुवादतः संस्कृते परिवर्त्योपन्यस्यते । तच्च यथायोगमत्रानुसन्धेयम्-- (?")तत्र अन्यत्वेऽपि न सामान्यभेदपर्यायवाच्यनुत् ॥ २५ ॥ --- अन्यत्वे तुल्येऽपि सामान्य-भेद-पर्यायशब्दानामर्थं शब्दो नापोहते । कुत इति चेत्, अविरोधात् । [[पर्यायशब्दे ? PSV1 । पर्यायशब्दस्तावत् तुल्यापोह्यः ? PSV2 VT. ॥]]पर्यायशब्दस्य तावदपोह्यस्तुल्यः, युगपदप्रयोगात् । [[न च स्वार्थप्रतिक्षेपो युक्तः ? VT. ॥]]स्वार्थश्च प्रतिक्षेप्तुं न युक्तः । सामान्यशब्देनापि स्वभेदेष्वर्थान्तरापोहो भेदशब्देन [[**अनुमन्यते** इत्यपि पाठोऽत्र स्यात् । अगृहीतो नास्ति ? PSV1 । न सह्यते ? PSV2 ॥]]न नानुमन्यते अर्थित्वात् । यथा शिंशपा न पलाशादि एवं घटाद्यपि न । एतेन [[सामान्यसामान्यशब्दार्थप्रतिक्षेपः प्रत्युक्तः PSV1 ॥]]सामान्यसामान्यशब्दार्थाप्रतिक्षेपोऽप्युक्तः । एवं सामान्यशब्दः स्वार्थमभिमतविषये [[निवेशयन् ? । प्रवर्तयन् ? ॥]]स्थापयन् भेदशब्देन भेदभेदशब्देन वा कथं [[**नापेक्ष्यते** इति PSV1मध्ये दृश्यते इत्यपि ध्येयम् ॥]]नोपेक्ष्यते ? एवमविरोधात् सामान्यादिशब्दार्थापोहो न युज्यते । समूहश्च तथार्थान्तरवाचकः । एवं च सामान्यविशेषशब्दयोः स्वार्थसामान्ये प्रवर्तमानयोर्द्वयोर्बहूनां वा तद्विशिष्टार्थान्तरवाचकत्वं यथापूर्वोक्तवदुपपद्यते । आह च-- [[**तत्त्वसं° पं°** पृ° ३०७ । **सन्मतिवृ°** । **तत्त्वार्थसिद्ध°** वृ° पृ° ४१२ । **शर्करिका** पृ° ७२ ॥]]तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन नोज्झितः । नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः ॥ २६ ॥ अनेकमपि सामान्यं भेदेनाव्यभिचारिणा । उपात्तं न तयोस्तुल्या विशेषणविशेष्यता ॥ २७ ॥ [इति संग्रहश्लोकौ PSV१] --- किं पुनरत्र कारणं येन मेदशब्दो भेदान्तरशब्दार्थमपोहत इति चेत्, [[अत्र भिक्षुणा पलाशः शिंशपेति सामानाधिकरण्यं न भवतीति दर्शयतोक्तम्--भेदो भेदान्तरार्थं तु विरोधित्वादपोहते--इति । भेदशब्दा हि पलाशशिंशपादय एकं वृक्षत्वसामान्यमन्योन्यमपहृत्य राज्यमिव राजपुत्राः स्वविषये स्थापयन्तः परस्परविरोधिनो वर्तन्ते । तेनैकापोहेनैकः प्रवर्तमानः कथं तेन सामानाधिकरण्यं लभतामित्यर्थः ।--**शर्करिका** पृ° ६९ । **नयचक्र--वृत्ति°** पृ° ६१३ पं° ६, २७ ॥]]भेदो भेदान्तरार्थं तु विरोधित्वादपोहते । --- भेदार्था हि शब्दाः परस्परविरोधिनः सामान्यार्थापहारित्वाद् राजपुत्रवत् । त[[ततश्च ? ॥]]तः परस्परार्थं न सहन्ते, य[[यथा PSV2 ॥]]थायं [वृक्षः] शिंशपेति शिंशपाशब्दो वृक्षशब्देन सह प्रयुक्तो धवादिभ्यो वृ[[वृक्षत्वं व्यवच्छिद्य PSV1 ॥]]क्षत्वमाच्छिद्य स्वविषये स्था[[स्थापयति ? ॥]]पयन् । एवमितरत्रापि । एवं तावद् [[भेदशब्दे PSV1 । भेदशब्देन... ...शब्दार्थापोहो युज्यते(?') इत्यपि पाठोऽत्र स्यात् ॥]]भेदशब्द एकद्रव्यापहारित्वाद् भेदान्तरशब्दार्थम[[°मपोहमानो युज्यते ? ॥]]पोहते [इति] युज्यते । --- अथ घटादिकमसम्बद्धं सामान्यान्तरभेदार्थं कुतोऽपोहत इति चेत्, यस्मात् सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः ॥ २८ ॥ --- वृक्षशब्देन तु घटादीनां पार्थिवत्वाद्यपहाराद् विरोधः । तेन तदपोहः क्रियमाणोऽनुमन्यते मित्रशत्रुवत् । अ[[अर्थाच्च तत् PSV1 ॥]]र्थतस्तत् तेना[[तेनापोह्यत इति गम्यते इत्यपि पाठः स्यात् ॥]]पोढमिति गम्यते । एतेन सा[[सामान्यान्तरभेदा गुणादयस्तद्भेदाश्च रूपादयः सम्बद्धसम्बन्धाद् मित्रमित्रशत्रुवद् मित्रशत्रुमित्रवच्चापोढा उपेक्षिताश्च वेदितव्याः इत्यपि पाठोऽत्र भवेत् ॥]] मान्यान्तरभेदानां गुणादीनां तद्भेदानां च रूपादीनां सम्बद्धसम्बन्धाद् मित्रमित्रशत्रुवद् n631/mj मित्रशत्रुमित्रवच्च अपोह उपेक्षा च वेदितव्ये ।(?")--PSV1 C. ed. D. ed. B– A, N. ed. B– B । PSV2 N. ed. B– A, P. ed. A– B ॥ --- अस्य **जिनेन्द्रबुद्धिरचिता विशालामलवती** व्याख्या भोटभाषानुवादात् परिवर्त्योपन्यस्यते--पूर्वं कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते पृ°

---

६०७ इत्युक्तम् । इदानीं तस्यापवादम् --**अन्यत्वेऽपी**त्यादिनाह । यः परमः परिहारोऽन्यापोहः स सामान्य-विशेष-पर्यायशब्दार्थपरिहारेणेति । **अन्यत्वे तुल्येऽपी**ति प्रसङ्गकारणमाह, प्रतिषेधस्य प्रसङ्गपूर्वकत्वात्, अन्यत्वं चापोहे निमित्तम् । **अविरोधादि**त्यनपोहकत्वे हेतुः । येऽविरुद्धास्ते परस्परमप्रतिक्षिपन्तो नापोहन्ते यथा द्रव्ये रूपादयः । एवं त्रयाणामविरोधित्वं युगपदभिधायेदानीं प्रत्येकं दर्शयितुमाह --**पर्यायशब्द**[स्य] इत्यादि । **अपोह्यस्तुल्य** इत्येकार्थत्वमाह । **युगपदप्रयोगा**दित्येकार्थत्वसाधनम् । तदेकार्थीकृतत्वादुभयोरप्रयोगः । यत्र शक्तौ सत्यामप्युभयोरप्रयोगस्तयोरेकार्थत्वम्, यथा विशेषयोः । य एकार्थास्तेऽविरोधिनो यथा द्रव्ये रूपादयो मित्राणि वा । पर्यायशब्दा अप्येकार्था इति व्यापकविरोधः । येऽविरोधिनस्ते परस्परतोऽप्रतिक्षिप्ता यथा त एव, पर्यायशब्दा अप्यविरोधिन इति व्यापकविरोध एव । **स्वार्थश्च प्रतिक्षेप्तुं न युक्त** इत्यनपोहत्वे हेत्वन्तरमाह । यो यस्य स्वार्थः स तेन नापोह्यते यथा विज्ञानेन स्वार्थः, पर्यायशब्दोऽपि पर्यायशब्दान्तरस्य स्वार्थः । **सामान्यशब्देनापी**त्यादि । सामान्यशब्दस्य वृक्षशब्दस्य यत् स्वसामान्यं वृक्षत्वं तद्विशेषाः स्वभेदाः शिंशपादयः, तेषु अर्थान्तरस्य घटादेर्वृक्षशब्देनापोहो **भेदशब्देन** शिंशपाशब्देन **अनुमन्यत** एव **अर्थित्वात्** । अर्थितो हि शिंशपाशब्देन घटाद्यपोहः । तदेवार्थित्वं दर्शयितुमाह --**यथे**त्यादि । अनेन घटाद्यपोहेनार्थित्वादेकार्थत्वद्योतकभेदशब्दः सामान्यशब्देनाविरुद्ध इति दर्शयति । यथा पलाशादिरूपः शिंशपाशब्दार्थो न भवतीति पलाशादयस्तत्प्रतिक्षेप्या एवं घटादिरूपोऽपि न भवतीति घटादयोऽप्यपोह्याः । ते च वृक्षशब्देनापोह्यन्ते । **एतेने**त्यादिना स्वसामान्यस्य वृक्षत्वस्य यत् सामान्यं पार्थिवत्वं तच्छब्दः पार्थिवशब्दः सामान्यसामान्यशब्दः तेन यदपोह्यमाप्यादि तच्छिंशपाशब्देनाप्यनुमन्यते, अर्थित्वात् । यथा शिंशपा न पलाशादि एवमाप्यत्वाद्यपि नास्ति ।... ...**एवं सामान्यशब्द** इत्यादि । यथा भेदशब्दोऽविरोधात् सामान्यशब्दार्थं न प्रतिक्षिपति एवं सामान्यशब्दोऽपि सदादिः **स्वार्थं** सत्तादिकम् **अभिमतविषये स्थापयन्नि**ति भेदेष्वनवस्थितत्वात् स्थापयन् गुणादितो व्यवच्छिन्ने द्रव्यादौ निवेशयन्... ...**भेदशब्देन** द्रव्यादिना **भेदभेदशब्देन वा** पार्थिव-वृक्ष-शिंशपादिशब्देन **कथं नोपेक्ष्यते ?** उपेक्ष्यत एव, अर्थित्वात् स्वविषये स्थित्या निर्विषयस्वार्थानुपपत्तेः । एतेनाभिमतार्थसाधनाद् भेदशब्दः सामान्यशब्दमुपकुरुते । ततश्च सामान्यशब्दस्तेनाविरुद्ध इति दर्शयति । **समूहश्चे**त्यादि अविरोधादप्रतिक्षेपे गुणोत्कर्षं दर्शयति, अथवा अन्योन्याप्रतिक्षेपे हेत्वन्तरमाह । परस्परार्थाप्रतिक्षेपे हि स्वार्थविशिष्टार्थवाचकत्वमुपपद्यते, नान्यथा ।... ... ...**एवं चे**ति परस्परार्थाप्रतिक्षेप एवेत्यर्थः, **द्वयो**रिति यथा वृक्षम् इति प्रकृतिप्रत्यययोः... ... ...। एवं नीलोत्पलमिति नीलोत्पलशब्दयोः... ...। **बहू**नामिति यथा राजपुरुषः सुरूप आगच्छति इति स्वार्थसामान्ये प्रवर्तमानानां सर्वेषामपि वाक्यपदानामितरेषां च वाक्यार्थवाचकत्वमप्रतिक्षेपे योजनीयम् । अर्थान्तरवाचक[त्वं] प्रागेव प्रतिपादितमित्याह --**यथापूर्वोक्त**वदिति । न हि तत् केवलं नीलं न च केवलमुत्पलम् पृ० ६३० पं० २२ इत्यादिना नीलोत्पलशब्दयोः समूहार्थस्य प्रत्येकं नैरर्थक्यदर्शनेन समूहस्यार्थान्तराभिधायकत्वमुक्तम् । **आह चे**ति सामान्यभेदशब्दयोरविरोधे सामान्यशब्देन भेदानामत्यागानुपादाने अधिकृत्य कारिकामाह— **तन्मात्राकाङ्क्षणा**दित्यादि । स्वभेदमात्राकाङ्क्षणादित्यर्थः । आकाङ्क्षा तेषु सन्देहव्यवच्छेदार्थिता । मात्रशब्दो भेदान्तराकाङ्क्षानिरासाय । तथाहि वृक्षशब्दात् पलाशादिविषयैवाकाङ्क्षोत्पद्यते, न घटादिविषया ।... ... ...तस्माद् **नोज्झितः** । ... ... ...ननूपात्तः, अनुज्झितत्वादिति चेत्, उच्यते --**नोपात्त** इत्यादि । नोपात्तो न प्रतिपादित इत्यर्थः । यो येषु संशयहेतुस्तेन ते न प्रतिपादिताः, यथा स एव, सामान्यशब्दोऽपि स्वभेदेषु संशयहेतुरिति कारणविरोधः । **साम्ये चैकार्थता तयो**रिति यत्र सामान्यविशेषशब्दाभ्यामुभयमपरिहृतमनुपात्तं च तत्रैकार्थत्वं तत्सामानाधिकरण्यमित्यर्थः । यथा सामान्यशब्देन स्वभेदा अप्रतिक्षिप्ता अत्यक्ताः किमेवं भेदशब्देनापि सामान्यम्

**त्वया पुनरुत्सर्गवाक्ये** महता क्लेशेन प्रतिपाद्यापवादवादेन **त्यक्तः** । किं कारणम् ? **अनिर्वाहकत्वात्,** किमनेन प्रतिज्ञातमर्थमनिर्वहता ? **शब्दान्त-रार्थापोहं स्वार्थे कुर्वती तदर्था** [अ]न्यापोहार्था स्यात्, तत्तु नोक्तमत्यन्तं

? इति पर्यनुयोगं परिहरन्नाह **--अनेकमपी**त्यादि । यद्यपि सामान्यमनेकं तथापि तद् भेदशब्देनोपात्तं प्रतिपादितमित्यर्थः, प्रतिपादनाद् भिन्नस्योपादानस्यासम्भवात् ।... ... ...**अव्यभिचारिणे**ति यस्माद् विशेषः सामान्यं न व्यभिचरति सामान्याभावे विशेषाभावात् तस्मात् तेनोपात्तम् । न **तयोरिष्टास्तुल्या ? विशेषणविशेष्यते**ति वृक्षः शिंशपादिव्यभिचारव्यवच्छेदमपेक्षत इत्यस्ति विशेषणविशेष्यभावः, शिंशपा तु वृक्षसामान्याव्यभिचारं नापेक्षत इति नास्ति । व्यभिचारिणोर्विशेषणयोस्तु विशेषणविशेष्यभावस्तुल्यो यथा नीलोत्पलयोः ।... ... ... **किं पुनरत्रे**त्यादि । सामान्ययोः स्वसामान्यापेक्षया भेदत्वात् पृथगनुपादानम् । **भेदो भेदान्तरार्थ**मिति वृक्ष n640/mj ः शिंशपादिः, परस्परतो भिद्यत इति कृत्वा । अत्र विषयेण विषयिनिर्देशाद् भेदो भेदान्तरं च शब्द इति विज्ञेयम् । भेदशब्दो भेदान्तरशब्दार्थमित्यर्थः । **विरोधित्वा**दिति हेतुः । **सामान्यार्थापहारित्वा**दिति विरोधित्वस्य कारणम् । **राजपुत्रव**दिति दृष्टान्तः । राजपुत्राणां पितरि मृते सामान्यार्थो राज्यम्, तस्य तैर्यथासर्वपराक्रममपहृतत्वाद् विरोधिनः, ततश्च परस्परार्थं न सहन्ते । ये सामान्यार्थापहारिणस्ते परस्परविरोधिनः, राजपुत्रवत्, सामान्यशब्दा अपि तथेति स्वभावः । ये विरोधिनस्ते परस्परार्थं न सहन्ते, तद्वदेव, भेदशब्दा अपि तथेति व्यापकविरोधः । **यथे**ति सामान्यार्थापहारित्वं दर्शति । **एकद्रव्यापहारित्वा**दिति सामान्यार्थापहारित्वस्यैवान्वाख्यानम् ।... ... ...विरोधः परिहारहेतुरुक्तः, स च सामान्यार्थापहारित्वात् । सामान्यान्तरस्य पार्थिवत्वादेर्ये भेदा घटादयस्तद्वाचकशब्दैः सह शिंशपाशब्दस्यैकार्थापहारित्वं नास्ति, किं तर्हि ? वृक्षशब्देन । तस्मात् परिहारहेत्वभावान्नापोह इति मन्यमान आह **--अथे**त्यादि । शिंशपासामान्यं वृक्षत्वम्, ततोऽन्यत्वात् पार्थिवत्वं सामान्यान्तरम्, तद्भेदो घटादिः, सोऽसम्बद्धः शिंशपाशब्देन विरोधाभावात्, तच्छब्देन शिंशापाशब्दस्यैकद्रव्यापहारित्वमपि नास्ति । तस्मात् तं **कुतोऽपोहते ?** अविरोधादस्यानपोह एवेत्यर्थः । **सामान्यान्तरभेदार्था** इति तमेव अपोहकारणं विरोधं दर्शयति । विरोधसामान्यमपोहस्य कारणम् । अत्र च यद्यपि न साक्षाद् विरोधस्तथापि परम्परयास्त्येव । तद्दर्शयति **--वृक्षशब्देन त्वि**त्यादि । **तेने**त्यादि । शिंशपाशब्दस्य मित्रं वृक्षशब्दः, तदर्थसामान्यवाचकत्वात् । तच्छत्रवो घटादिशब्दाः पार्थिवत्वापहारित्वात् । ततो वृक्षशब्देन **तेन** घटाद्यपोहः क्रियमाणः शिंशपाशब्देनानुमन्यते मित्रशत्रुवत् । **अर्थतस्तत् तेने**ति शिंशपाशब्दार्थः शिंशपासामान्यम्, तच्चाघटादिरूपत्वाद् घटादितो व्यावृत्तम् । तत एवार्थतो गम्यते । शिंशपाशब्दस्य तत्र व्यापारो नास्ति तथापि शिंशपाशब्देन तेन घटाद्यपोढमिति गम्यते, तद्गत्यार्थतस्तस्यापोढत्वात् । **एतेने**ति अनया युक्त्या पार्थिव[त्व]सामान्यात् सामान्यान्तरं द्रव्यत्वम्, तत्सामान्यं सत्ता, तद्भेदा गुणाः कर्माणि च, तेषामपि भेदा रूपादय उत्क्षेपणादयश्च यथासङ्ख्यं स्वविरोधिसामान्यशब्देनापोढा विशेषशब्देनोपेक्षिताश्च सम्बद्धसम्बन्धाद् वेदितव्याः । कथमिति चेदुच्यते— **मित्रमित्रशत्रुव**दित्यादि । अत्र मित्रमित्रेति द्विरुक्तिः परम्परया मित्रप्रतिपादनेच्छयावगन्तव्या, अन्यथा एकीकृतेनैव मित्रेण मित्रस्य प्रतीतेः । तत्र गुणकर्मणी शिंशपाशब्देन द्रव्यशब्देनापोह्यमानानि मित्रमित्रशत्रुवदनुमन्यन्ते । गुणविशेषा रूपादयः कर्मविशेषाश्चोत्क्षेपणादयस्तु शिंशपाशब्देन मित्रशत्रुमित्रवद् द्रव्यशब्देन... ...अपोह्यमाना उपेक्ष्यन्ते ।

**--विशालामलवती** VT. D. ed.

A– A, P. ed. A– A ॥

३ तिपाद्याप] ॰पवादन त्यक्तः nayacakra-ms-bhā ॥

३ त] **तदर्थान्यापोहार्था** प्र॰ ॥

५ त] **तत्तु त्यक्तमत्यन्तं** इति सम्यग् भाति ॥

सामान्यादिशब्दान्तरार्थापोहानिष्टेः । तस्मात् त्यक्तोऽन्यापोहः । ततः किम् ? ततः **सामान्यादिशब्दान्तरार्थात्यागात्तु त्वदनिष्टो नन्वयमेव परमविधिः ।** कोऽक्षरार्थो विधिरित्यत आह --**विधानं विधिरिति** । लक्षणतस्तु अनपवादं प्रतिपत्त्याधानं विधिः । स च विधिरेव शब्दार्थः सामान्याद्यन्यशब्दार्थेषु अव्याहतत्वात् परमः श्रेष्ठः । § 1885
641/mj

सामान्यानुदुक्तेः सामान्ये विशेषविध्यर्थो न व्याहन्यते । यथा न हि घटादि सामान्यानुपसर्जनं भवितुमर्हति, वस्तुत्वात्, आत्मवत् । यथा स सन्तानाख्यसामान्योपसर्जनस्तमन्तरेण न भवितुमर्हति आ मुक्तेरेवं घटशब्देनाप्यागृहीता मृदादयस्तच्छब्दार्थान्तःपातित्वादाकारादिवत् । § 1886

भेदास्तूच्यन्त एव, घटसामान्यस्य तदङ्गत्वात् तद्भवनभवनात्मकत्वात्, § 1887

तत्र तावत् --**सामान्यानुदुक्तेः सामान्ये विशेषविध्यर्थो न व्याहन्यते,** त्वयैव सामान्यं न नुदति इत्युक्तत्वादस्मदिष्टम्--उपसर्जनीकृतसामान्यो विशेषो विधिनैवोक्त इति । तस्य निदर्शनम् --**यथा न हि घटादी**त्यादि - /ms । साधनमिदम्--सामान्योपसर्जनमेव न सामान्यानुपसर्जनं भवितुमर्हति घट-पटादि बाह्यवस्त्विति प्रतिज्ञा । **वस्तुत्वा**दिति हेतुः । **आत्मव**दिति दृष्टान्तः, आन्तरोऽर्थो नामरूपसन्तानाख्य आत्मा, यथा स शरीरादिप्रतिक्षणदेशभिन्नरूपादिसुखविज्ञानादिविशेषतत्त्वोऽर्थः सन्तानाख्यसामान्योपसर्जनस्तमन्तरेण न भवितुमर्हति नरक-मनुजादिविशेषतत्त्वो वाऽऽ**मुक्तेः** यावद् मोक्षस्तावद् विशेषाः सामान्यानुविद्धा एव तथा घटादयोऽपि बाह्या इत्यत आह --**एवं घटशब्देनाप्यागृहीता मृदादय** इति साध्ये बाह्ये सामान्यमृदाद्युपसर्जनं घटविशेषार्थं दर्शयति । **तच्छब्दार्थान्तःपातित्वा**दिति आत्म-घटाद्यविशेषवाचिना सर्वनाम्ना वस्तुत्वसामान्यस्य साध्येनानुगतत्वं विशेषाविनाभाविनो दर्शयति । **आकारादिव**दिति प्रतिक्षणदेशादिभिन्नरूपादिविशेषपरमार्थस्य ऊर्द्धग्रीव-पृथुकुक्षित्वादिसामान्योपसर्जनस्य सद्भावात् । § 1888

एवं तावद् घटे विशेषशब्दार्थे पार्थिव-द्रव्य-सत्त्वादिसामान्यात्यागो युक्तः, विधिप्रधानशब्दार्थत्वात् । एवं तर्हि वृक्षः शिंशपा इति शिंशपाविशेषो

१३ मः ] श्रेष्ठःnayacakra-ms-ya प्रतौ नास्ति । तुलना--पृ॰ ६३९ पं॰ ४ ॥
१५ सामान्ये ] विशेषणविध्यर्थोnayacakra-ms-ya ॥
२० त ] ॰तत्त्वार्थःnayacakra-ms-ya ॥
२३ त ] तत्त्वो मुक्तेः॰nayacakra-ms-ya ॥
२४ त ] तच्छब्दार्थतःपाति॰ प्र॰ ॥
२ सा ] साध्यनानु॰nayacakra-ms-bhā । साध्यतानु॰ nayacakra-ms-ya ॥

विधिना कथमुच्यते वृक्षविधावनुपसर्जन इत्यत्रोच्यते — **भेदास्तूच्यन्त एव,** वृक्षः शिंशपा इत्यादिवद् घटस्य ये ये रूपादयो युगपदयुगपद्भाविनस्त एव मुख्यशब्दार्थत्वादुच्यन्ते, **घटसामान्यस्य तदङ्गत्वाद्** घटाद्युपसर्जनरूपादिविशेषपरमार्थत्वात् **तद्भवनभवनात्मकत्वात्,** स विशेषो भवनं भावः प्रत्येकं निर्विकल्परूपादिभवनमात्मलाभः, तद्भवन[भवन]मात्मास्य घटस्येति तद्भवनभवनात्मको घटः शिबिकावाहकयाने ईश्वरस्येव यानवत् इत्युक्तं
- /ms प्राक् । तन्निरूपयति-- **रूपादिरूपादिस्वरूपशब्दार्थत्व**वदिति, यद्यपि युगपद्भाविनो रूपादिस्वभावा एव सन्तो रूप-रस-गन्धस्पर्श-शब्दा एव निर्विकल्पा वस्तुत्वाच्छब्दार्थः प्रतिक्षणवर्त्ययुगपद्भाविनो वा विशेषास्तथापि सामान्योपसर्जनद्वारेण इति सामान्यशब्दाः प्रयुज्यन्ते, न तु कल्पितेन परमार्थसता वा विना तेन सामान्येन शब्दार्था भवितुमर्हन्तीति । तस्मात् सामान्यशब्दप्रयोगो विशेषप्रतिपादनार्थः, विशेषास्तु विवक्षिता एव परमार्थत्वादस्य नयस्य । § 1889

642/mj

रूपादिरूपादिस्वरूपशब्दार्थत्ववत् । पर्यायशब्दा अपि तद्विधानाः घटनविशेषस्य कुटनकुम्भाद्यर्थात्मकत्वात् । [न] हि कुटन[-कुम्भताभ्यां विना घटनम्, नापि घटनं विना कुटन-कुम्भते] । इत्येतदवगम्यताम्--सामान्यविशेषपर्यायशब्दार्थानामन्यत्वेऽपि विधिप्राधान्यादेव तान्नापोहते । § 1890

विध्यतिक्रमे त्वप्रस्तुतासत्त्वशब्दार्थापत्तेरन्यापोहायुक्तिश्च । विधिपक्षे तु साक्षादेव स्वार्थं ब्रूते । पर्यायशब्दस्य तावद् विधेय एवार्थः, दर्शनात्, द्विमातृवत् । विशेषणस्वरूपापन्नविशेष्यप्रतीतित्वाद् युगपदप्रयोगेऽपि स एव भेदः प्रतीयते । न हि स्वार्थानुपातित्वाद् विधिः स्वरससमापतितः प्रतिक्षेप्तुं युक्तः । § 1891

**पर्यायशब्दा अपी**त्यादि । ये पुनः पर्यायशब्दास्ते **तद्विधाना** एवमेव विशेषं विदधति, **घटनविशेषस्य कुटन-कुम्भाद्यर्थात्मकत्वात्,** तस्य कुटिलता कुटनम्, घटनं चेष्टा, कुम्भता वृत्तत्वम् । ताभ्यां घटन-कुटनाभ्यां विना नास्ति कुम्भता नाम काचित्, तया वा विना न घटन-कुटने स्त इति **[न ?] हि कुटने**त्यादिनान्योन्याविनाभावं दर्शयति । § 1892

---

२ घ] घटस्या
येयेnayacakra-ms-bhā ।
घटस्यापोष nayacakra-ms-ya ॥
४ यु]
युगपद्भाविनोnayacakra-ms-bhā ॥
५ स] स हि शेषो प्र॰ । स हि विशेषो ? ॥
६ मा] ॰मात्रलाभः प्र॰ ॥
७ या] ॰यानेश्वरस्येव याचनवत् प्र॰ ॥
९ द्वारेण] प्रति प्र॰ ॥

प्रकृतमुपसंहरति **--इत्येतदवगम्यता**मित्यादिना । इत्थं प्रतिपद्यस्व यथा घटः इत्युक्ते पटस्तत्प्रतिपक्षशब्दार्थोऽन्यस्तथैवाप्रतिपक्ष**सामान्य-विशेष-पर्यायशब्दार्था** अन्ये, ततस्तेषा**मन्यत्वे तुल्ये विधिप्राधान्यादेव तान् नापोहते,** नान्यत् कारणं विधेः । अतोऽस्माकमपवादलक्षणान्तरारम्भक्लेशादृते व्यापि युक्तं चासत्योपाधिसत्यविध्यर्थलक्षणशब्दार्थकथनं श्रेयोगुणप्रकर्षयुक्तं च ।
§ 1893

भवतस्तु **विध्यतिक्रमे त्वप्रस्तुतासत्त्वशब्दार्थापत्तेरन्यापोहायुक्तिश्च** । यदि - /ms
विधिर्नेष्यते ततो न केवलावव्यास्त्यतिप्रसङ्गदोषावेव, किं तर्हि ? एषोऽप्यनिष्टोपचयः--उदकाद्याहरणार्थिने घटः इत्युक्ते तत्राप्रस्तुतस्य अविवक्षितस्य पटादेरघटस्या**ऽसत्त्वं** व्यावृत्तिरविवक्षितोऽशब्दार्थ एव शब्दार्थ इत्येतदापन्नम् । अनिष्टं चैतदिति । § 1894

किञ्च; **विधिपक्षे**ऽस्मदिष्टे **साक्षादेव** अव्यवहितमेव **स्वार्थं ब्रूत** इत्येष च विशेषः । तद्यथा— **पर्यायशब्दस्य तावदि**त्यादि यावत् **प्रतिक्षेप्तुं युक्त** इति । पर्यायशब्दस्य घट-कुटादे**र्विधेय एवार्थः**, कस्मात् ? **दर्शनात्,** विधेयत्वदर्शनात्, तदेव हि विधेयं घटनं कुटनमुभयं वा । किमिव ? **द्विमातृवत्,** यथा विशेष[ण]द्वारेण विशेष्यप्रधाने निर्देशे राधकमाता, पूर्णकमाता, राधकपूर्णकमाता इति द्वाभ्यामन्यतरेण वा विशेष्यते सैव तथा **विशेषणस्वरूपापन्नविशेष्यप्रतीतित्वात्** सम्बन्धिविशिष्टरूपप्रतिपत्तेरित्यर्थः, **युगपदप्रयोगे**ऽपीति निमित्तभेदेऽप्यर्थैकत्वाद् युगपदप्रयोगेऽपि **स एव** निमित्तोपलक्षितो **भेदः प्रतीयते** । स्यान्मतम्--निमित्तभेदे निमित्तिभेदात् किमर्थं निमित्तान्तरापोहो न भवतीति, एतच्च **न हि स्वार्थानुपातित्वाद् विधिः स्वरससमापतितः प्रतिक्षेप्तुं युक्तः** । निमित्तान्तरेणापि तस्यैव विशेषार्थस्य 643/mj

* * *

अत एव सामान्यशब्देनापि स एव विशेषार्थः साक्षादव्यवहितवृत्तिना विधिना प्रतीयते । सर्वथा अव्यवहितवृत्तिना विधिना स्वभेदाः समाक्षिप्तास्तद्रूपपरमार्थत्वेनाङ्गाङ्गिभावगत्या ।

प्रतिषेधव्यापारनिराकाङ्क्षं विध्यर्थस्य प्रतिपत्तौ उपसर्जनत्वेनापोहबुद्धेरुत्पत्तेर्विधिः प्रधानोऽप्रधानोऽपोहः, यथा शिंशपाद्युपहारिवृक्षशब्दार्थेऽघटघटानवतारः ।

---

३ तिप ] प्रतिपाद्यश्व प्र° ॥
७ प्राधान्या ] °न्यादेवदत्तान् प्र° ॥
७ तिक्र ] °क्रमेण प्रस्तुत°nayacakra-ms-ya ॥
८ ब्दार्थाप ] °पत्ति° ? ॥
९ ला ] °लावव्याप्यति°nayacakra-ms-bhā । °लावध्यायति° nayacakra-ms-ya ॥
१० त ] तवाप्र°nayacakra-ms-bhā ॥
१२ ट ] °टस्यात्वं प्र° ॥
२२ अ ] अवविहतमेव nayacakra-ms-ya । अविहितमेव nayacakra-ms-bhā ॥
८ श ] °शब्दार्थे घटानवतारः इत्यपि पाठान्तरम् ॥

* * *

प्रतीतेः स एवार्थः स्वेनैव रसेन समापतितः प्रतिपादयितुमिष्टश्च किमिति प्रतिक्षिप्यते ? न हि स्वार्थप्रतिक्षेपो युक्तः । किं कारणम् ? दूरमपि गत्वा तेन विना तदगतेः घटः इत्युक्ते अघटो न भवति इति प्रतिषेधद्वयेनार्थान्तरं व्यावर्त्यापि घट एवावश्यं प्रतिपत्तव्यः, स च कुट एवेति कुटत्वेन विना घटत्वाभावात् कुटत्वस्याप्यविनाभाविनः स्वेनैव रसेन प्रतीयमानत्वादक्लेशेनागतो विधिरेव शब्दार्थः पर्याय इति । § 1895

- /ms

*किञ्चान्यत्, **अत एव** अविनाभावात् **सामान्यशब्देनापि** घटस्य पार्थिवादिना सामान्यसामान्यशब्देन वा द्रव्य-सत्त्वादिना विधीयमानः **स एव विशेषार्थो** घटाख्यः **साक्षादव्यवहितवृत्तिना विधिना प्रतीयते** । तानि हि भेदरूपाणि अनेकात्मकस्य वस्तुनः सामान्याद्याकारेणापि गृह्यमाणानि कथं न विधीयन्ते ? **सर्वथे**त्यादि, तस्मादव्यवहितविधिवृत्तिना शब्देन घटस्यैव **स्वभेदाः समाक्षिप्ताः** । यथोक्तम् --**सद्द्रव्यपृथिवीमृद्घटादिभिसम्बन्धादस्ति द्रव्यं पार्थिवो मार्तिको घट इति घटे सम्प्रत्ययः** इति । तत् कथमिति चेत्, उच्यते --**तद्रूपपरमार्थत्वेन,** तानि भेदरूपाणि एव सामान्यवदाभासमानानि अविद्यमानान्येव वा सामान्यादिरूपाणि भेदप्रतिपादनपरतया तस्यैव विशेषस्य परमार्थरूपत्वेनाङ्गाङ्गिभावं गतानि, असत्योपाधिसत्यशब्दार्थत्वात् । तथा चाङ्गाङ्गिभावगत्या तद्रूपपरमार्थरूपया **अव्यवहितवृत्तिना विधिना स्वभेदाः समाक्षिप्ता** इति वर्तते । § 1896

**प्रतिषेधव्यापारनिराकाङ्क्ष**मित्यादि यावद् **घटानवतार** इति । योऽपि त्वयान्यापोह इष्टः सोऽपि विधिमन्तरेण न भवति, यस्मात् अघटो न भवति इत्येतमविवक्षितं द्विःप्रतिषेधमनादृत्यानपेक्ष्य विधिरूपेण विवक्षित**विध्यर्थस्य** घटस्य **प्रतिपत्तौ** सत्यामुत्तरकालं भवति, नाप्रतिपत्तौ । तस्यैवं चरितविध्यर्थस्य घटस्य **उपसर्जनत्वेनापोहबुद्धे**रघटाभावबुद्धेरुत्पत्तेरवश्यात्मा **विधिः प्रधानोऽप्रधानोऽपोह** इति । किमिव ? **शिंशपाद्युपहारिवृक्षशब्दार्थे[ऽ]घटघटानवतारवत्,** यथा वृक्षः इत्युक्ते शिंशपादिभेदानामन्यतमेन विनार्थवान्न भवति वृक्षशब्द इति शिंशपादि उपहरन्नर्थवान्, तस्मिन् मूलादिमति शिंशपाद्यवश्यम्भाविविशेषस्वभावेऽर्थे[ऽ]**घटानवतारः,** अघटो न भवति इत्यस्य तु दूरत एव, नैवासौ शब्दार्थो गुडमाधुर्यगतिवदर्थापत्तिलभ्यत्वात् । **घटान-**

- /ms

---

९ *] किंचादन्यत एव प्र° ॥
१३ सा] तुलना--पृ° ६३९ पं° १७ ॥
२२ स] उद्धृतमेतत् प्रागपि नयचक्रवृत्तौ पृ° ३३ पं° १० इत्यत्र ॥
२३ इत्येत] °तदविव°nayacakra-ms-ya ॥
२३ प्र] प्रतिपत्तौ स्यामुत्तरकालं प्र° ॥
२४ त] तस्येवं प्र° । तस्यैव ? ॥
२५ र] °रवस्यात्माnayacakra-ms-ya ॥
२८ ब्दा] °शब्दार्थे घटाघटानवतारवत् इत्यपि पाठोऽत्र भवेत् ॥
१ भा] °भावेर्थघटान° प्र° । अत्र °भावेऽर्थे घटानवतारः, घटो न भवति इत्यस्य इत्यपि पाठः सम्भवेत् ॥

**वतार** इत्येव वा पाठः, घटस्य वृक्षार्थेऽवकाशाभाववदनुपात्तावृक्षापोहस्य कोऽवकाश इति । § 1897

644/mj

यदि तु सोऽप्यपोहपर एव स्यात् ततोऽवृक्षव्यावृत्तिव्यापृतत्वाद् वृक्षभेदं नाक्षिपेद् नानुमन्येत न व्युदस्येत्, अनर्थित्वात्, अवृक्षाभवनवत् । अवृक्षो घटादि... ... ...व्यापार एव नास्ति । § 1898

यदसौ वृक्षार्थं शिंशपादिभेदात्मकं स्वार्थमनन्यत्वेनाक्षिपति तस्मात् तेन सह सामानाधिकरण्यं प्रतिपद्यते तद्भवनविध्येकार्थीभावात् । § 1899

तद्भवनभवनविधिविनाभावे तु न युज्यते भेदाक्षेपाभावात् । भवनविधिविनाभूतं भेदानाक्षेपि न समानाधिकरणं वृक्षः शिंशपेति त्वदभिमतं वस्तु स्यात्, अभवत्त्वात्, वन्ध्यापुत्रवत् । § 1900

स्यान्मतम्--अत्रापि वृक्षः इति अवृक्षो न भवति इत्यपोह एवोच्यते, न शिंशपाद्युपहारः, तस्यैव *विसंवादस्थानत्वाद् न स्वार्थ इति । अत्रोच्यते -- **यदि तु सोऽप्यपोहपर एव स्या**दित्यादि । यदि तु सोऽपि वृक्षशब्दोऽपोहपर एवाभविष्यत् **ततः सोऽवृक्षव्यावृत्तिव्यापृतत्वाद् वृक्षभेदं** शिंशपादी**न्नाक्षि**[पेत्, आक्षि]पतीति चेष्टं शिंशपादिसामानाधिकरण्यदर्शनात् । तथा **नानुमन्येत** अनाक्षिप्तत्वात् तमर्थम्, अनुमन्यते तु । **न व्युदस्येत्** अपोह एव इत्यभावमात्रार्थत्वात् खपुष्पवत् । वक्ष्यति चोपसंहारे--शून्यमात्रत्वात् किं कः केन कस्माद्वापोहते ? इति । कुतोऽनाक्षेपाननुमत्यव्युदासा इति चेत्, उच्यते --**अनर्थित्वात्,** अनर्थी हि शिंशपादिना भेदेन वृक्षशब्दः, तस्मान्नाक्षेपादीन् कुरुते । किमिव ? **अवृक्षाभवनवत्** । तद्याख्या --**अवृक्षो घटादी**त्यादिर्गतार्थो यावद् **व्यापार एव नास्ती**ति । § 1901

**यदसावित्यादि** । विधिवादे त्वस्मत्पक्षे यस्मादसौ वृक्षशब्दो वृक्षार्थं घटादिभ्योऽन्यत्वेन शिंशपादिभेदात्मकं स्वार्थमनन्यत्वेनाक्षिपति तस्मात् तेन स- - /ms
ह सामानाधिकरण्यं प्रतिपद्यते--वृक्षः शिंशपेति, तद्भवनविध्येकार्थीभावात् । § 1902

---

३ वृक्षार्थेऽव] **°वशाभाव°** प्र° ॥
५ य] तुलना--पृ° ६४६ पं° ४ ॥
१४ टादि] अवृक्षो घटादि, तदभवनस्याप्रस्तुतत्वाद् वृक्षशब्दस्य तत्र व्यापार एव नास्ति तथाऽप्रस्तुतत्वाद् वृक्षभेदाक्षेपे वृक्षशब्दस्य व्यापार एव नास्ति ईदृशं किमपि मूलं सम्भाव्यते ॥
१४ त] **तस्येव** प्र° ॥
१६ *] विवादस्थानत्वाद् ? ॥
१६ व्यावृत्तिव्या] **°व्यावृत्तत्वाद्** प्र° ॥
१८ वृ] **वृक्षभेदान्** इत्यपि पाठोऽत्र भवेत् ॥
१९ व्यु] **व्युदस्येवपोह** प्र° ॥
२२ शू] दृश्यतां पृ° ६४५ पं° ४ ॥
२५ अ] दृश्यतां पृ° ६४६ पं° २३ ॥
१ न] **°विधिकार्थी°** प्र° ॥

**तद्भवनभवनविधिविनाभावे तु न युज्यते** । तत्समानाधिकरणं भवनं भवनमस्य तद्भवनभवनम्, तस्य तद्भवनभवनस्य **विधि**रात्मलाभः स्थितिराचारः, तेन *‌**विनाभावे** तद्विरहितत्वे **न घटते** घटां नोपैति, भवनविधिविनाभूतस्य **भेदाक्षेपाभावात्,** न ह्यभवतो भेदा आक्षेपकत्वं वास्ति यतः समानाधिकरणता स्यात् । साधनमप्यत्र--भवनविधिविनाभूतं भेदानाक्षेपि न समानाधिकरणं वृक्षः शिंशपा इति त्वदभिमतं वस्तु स्यात्, **अभवत्त्वात्,** वन्ध्यापुत्रवत् । अनुपपन्नसामानाधिकरण्यभेदाक्षेपानुमति त्वदिष्टं वृक्षः शिंशपा इति पदद्वयाभिधेयम्, अभवत्त्वात्, वन्ध्यापुत्रवत् । § 1903
645/mj

कुतोऽस्य भेदस्य भेदत्वम् ? कथं सोऽपि तर्ह्यभेदः ? यद्यसावपि भेदो न भवति न तर्हि वृक्षो भवति, अभूतशिंशपादिभेदत्वात्, घटवत् । सोऽप्येवमेव घटो न भवति, अभूतग्रीवादिभेदत्वात्, वृक्षवत् । यावत् परमाणुर्न भवति, अभूतरूपादिभेदत्वात्, विज्ञानवत् । एवं च सर्वमिदं शून्यमापद्यते । कः किं केन कस्माद्वापोहते ? § 1904

अथ कथञ्चिद् भवत्यपि वृक्षस्ततः स्वार्थाद्युक्तेः स एव विधिर्विषयः संवृत्तोऽर्थः । तदुपसर्जनश्चापोहोऽसत्त्वादसत्यः । असत्योपाधिः सत्यः शब्दार्थः । स च *विशेषार्थविधिः । § 1905

इतर आह --**कुतोऽस्य भेदस्य भेदत्वम्,** शिंशपादेर्वृक्षभेदाभिमतस्य तद्भेदत्वम् ? वृक्षसामान्यस्यानुवृत्तिलक्षणस्याऽवृक्षाभावत्वे सत्यसिद्धत्वात् कस्य भेदः शिंशपादिः ? तस्माद् भेदस्य शिंशपादेर्भेदत्वं कुतः ? नैवास्तीत्यर्थः । **कथं सोऽपि तर्ह्यभेदः ?** न भवति शिंशपादिर्वृक्षः अभेदोऽन्यस्मादनिवृत्तोऽनपोहः शिंशपावृक्षाभावाव्यावृत्तो वृक्ष एव न भवति, कुतो भेदः शिंशपादिर्वृक्ष इति । § 1906

अत्रोच्यते --**यद्यसावपी**त्यादि अनिष्टापादनसाधनम् । **यद्यसावपि भेदो न भवति** शिंशपादिः **न तर्हि वृक्षो भवती**ति वृक्षस्यैवावृक्षत्वमवस्तुत्वं प्रतिज्ञायते । हेतुः --**अभूतशिंशपादिभेदत्वात्** । **घटव**दिति दृष्टान्तः । **सोऽप्येवमेवे**त्यादि, यदि तु सोऽपि घटो न भवति भेद इतीष्यते तस्याप्यघटत्व**मभूतग्रीवादिभेदत्वात्, वृक्षवत्** । एवं ग्रीवादिरभूतकपालादित्वात् इत्यादि

३ तु] तु प्रयुज्यते तत्समाधिकरणीभवनं प्र° ॥
५ *] विना अभावे प्र° ॥
६ भ] भवनविधिभूतं प्र° ॥
६ अ] अभत्वात्nayacakra-ms-ya ॥
७ त्वा] दृश्यतां पृ° ६४७ पं° ६ ॥
१३ भेदाक्षेपानु] पृ° ६४४ पं° २ इत्यत्र निर्दिष्टा अनुमतिरत्राभिप्रेता ॥
१७ ए] पृ° ६४४ पं° १४ ॥
१ *] दृश्यतां पृ° ६४६ पं° १९ ॥

यावत् परमाणुर्न भवति, अभूतरूपादिभेदत्वात्, विज्ञानवत् । रूपादिरप्य- - /ms
रूपादि, अभूतरूपादिक्षणभेदत्वात्, विज्ञानवदेव । सर्वत्र वा सामान्येन न भवन्त्येतेऽर्थाः स्वभेदशून्यत्वात् खपुष्पवदिति । § 1907

**एवं चेत्यादि** प्रस्तुतदोषापादनोपसंहारः । **एवम्** अनेन विधिना **सर्वमिदं** दृश्यादि प्रत्यक्षाभिमतमनुमेयमभिधेयं वा वस्तु **शून्यमापद्यते** त्वन्मतेनैव । **कः किं केन कस्माद्वापोह**ते ? सर्वस्य शून्यत्वे कः किम् इत्यादि कर्तृकर्मकरणापादानभूतानां शब्दादीनामभावेऽपोहाभाव एवमित्यर्थः । § 1908

**अथ कथञ्चिदित्यादि** । मा भूदेष सर्वशून्यत्वदोष इति त्यक्त्वा भवनाभावमात्रार्थैकान्तापोहकल्पनां केनचित् प्रकारेण **भवत्यपि वृक्षो**ऽवृक्षो न भवति, शिंशपा भवत्यपि इतीष्यते शब्दार्थशून्यत्वदोषभयात् **ततो** वयं ब्रूमः **--स्वार्थाद्युक्तेः स्वार्थे कुर्वती श्रुतिरभिधत्ते** इत्यादिवचनात् **स एव विधिर्विषयः संवृत्तोऽर्थः** । तदिदानीं प्रस्तुतनयमतेन शब्दार्थं योजयति **--तदुपसर्जनश्चापोहोऽसत्त्वादसत्यः**, विशेषार्थस्य विधेरुपसर्जनोऽपोहः, स चासत्त्वादसत्यः, उक्तवदेव प्राग् विस्तरेण **असत्योपाधिः सत्यः शब्दार्थः**, स च विशेषमेव विदधाति नापोहते इत्येष शब्दार्थविधिरिति । § 1909
१646/mj

एतेन सामान्यशब्दार्थविशेषताप्युक्तैव । सामान्यस्य स्वार्थं विशेषशब्दोऽभिधत्ते तत्त्वेनात्मानं विदधदभेदत्वासत्त्वापत्तित्यागेन शिंशपादिसम्परिग्रहेण अत्यजन्नेवानुवृत्तिव्यावृत्ती तदुपसर्जनाशिंशपाऽभवनबीजतां यान् । § 1910

यदि तु सोऽप्यपोहपर एव स्यात् ततः शिंशपाशब्दो न विदध्याद् वृक्षार्थं व्यावृत्तत्वात् अर्थापत्त्या नानुमन्येत वोपात्तार्थाविरोध इति अशिंशपाऽभवनवत् । § 1911

१. इत्येव शब्दार्थ॰nayacakra-ms-ya । इत्येशब्दार्थ॰ nayacakra-ms-bhā ॥

३ रूपा] ॰रूपा । क्षण॰nayacakra-ms-ya ॥
४ भ] भवन्त्येतोर्थाःnayacakra-ms-bhā । भवन्त्यतोर्थाः nayacakra-ms-ya ॥
६ प्र] प्रयुक्तस्तुतदोषा॰nayacakra-ms-bhā । प्रयुक्तस्तुतद्दोषा॰ nayacakra-ms-ya ॥
६ शू] शून्यत्वोnayacakra-ms-bhā । शून्यत्वात् ? ॥
९ इ] इत्यादि कर्मकरणा॰nayacakra-ms-ya ॥
९ मात्रार्थैका] ॰कांत्यपोह॰ प्र॰ ॥
१० वृ] वृक्षो वृक्षोnayacakra-ms-bhā ॥
११ न] न भवति शिंशपा न भवति शिंशपा प्र॰ ॥
११ स्वा] पृ॰ ६०९ ॥
१२ इत्यादिव] ॰वचनाश एवnayacakra-ms-bhā । वचनांश एव nayacakra-ms-ya ॥
१४ यः] संवृतो॰ प्र॰ ॥
२० श] शब्दस्यार्थःnayacakra-ms-bhā । अयं nayacakra-ms-bhā पाठोऽपि समीचीन एव ॥
२ य] दृश्यतां पृ॰ ६४४ पं॰ १ ॥

**एतेन सामान्यशब्दार्थविशेषताप्युक्तैव** । यथान्यत्वे विशेषप्राधान्यात् - /ms सामान्य-भेद-पर्यायशब्दार्थास्तदङ्गत्वात् तदात्मकत्वाद्वा नापोह्यन्ते तथा विवक्षितशब्दार्थादन्यस्य विशेषशब्दार्थस्य विशेषशब्दार्थस्य वा **सामान्यस्य स्वार्थं विशेषशब्दो[ऽ]भिधत्ते** । कथम् ? **तत्त्वेनात्मानं** सामान्येन सहैकीभावं **विदधत्** आत्मन उपसर्जनभावे साहायकीकारयन् । किं करोति ? **स्वार्थं** विधत्ते इति वर्तते । **अभेदत्वासत्त्वापत्तित्यागेन,** न च वृक्ष-पार्थिव-मृद्-द्रव्य-सत्त्वसामान्यानि त्यक्त्वा विशेषमेव तैरेकान्तेन विविक्तं प्रतिपादयति तथारूपार्थासम्भवात् सामान्योपसर्जनत्वोपायप्रतिपाद्यविशेषात्मलाभत्वात्, नापि अवृक्षाशिंशपादि न भवति इत्यसत्त्वापत्तिमेव स्वार्थप्रतिपत्तिरहितां ब्रूतेऽभिधेयाभावे शब्दार्थव्यवहारोच्छित्तिप्रसङ्गात् । कोऽसौ विशेषशब्दस्तदर्थो वेति चेत्, उच्यते --**शिंशपादिः, तत्सम्परिग्रहेण** वृक्षादेः सदन्तस्यानुवृत्तेः सामान्यस्य सम्परिग्रहेण तदभावावृक्षाद्यसदन्तव्यावृत्त्यपोहपरिग्रहेण चात्यजन्नेवानुवृत्तिव्यावृत्ती, किं कारणं न ते त्यजति ? इति चेत्, उच्यते--यस्मात् **तदुपसर्जनाशिंशपाऽभवनबीजतां यान् स्वार्थमभिधत्ते** गच्छन् व्रजन्नित्यर्थः, स्वार्थानुवृत्तिसामान्योपसर्जनत्वस्य अशिंशपाया घटादेस्तत्राभवनलक्षणस्य च व्यावृत्तिसामान्यस्य स्वार्थः शिंशपाशब्दस्य शिंशपार्थः, स बीजं तयोरनुवृत्तिव्यावृत्त्योः, इतरथा किमसावपोहेताप्रतिपादयन् किञ्चित् ? § 1912

**यदि तु सोऽपीत्यादि** पूर्ववद् ग्रन्थ ईषद्विशिष्टः प्रसङ्गो यावद् **विशेषार्थ-** - /ms **विधिरित्युपनयः** । तत्र विशेष उच्यते--वृक्षः शिंशपा इत्यत्र **शिंशपाशब्दो न विदध्याद् वृक्षार्थं** शिंशपाविशेषात्मापन्नं **व्यावृत्तत्वादि**ति पूर्ववद् गमः, **अर्थापत्त्या नानुमन्येत वा** अवृक्षो न भवति इत्युक्तेऽर्थादापन्नं वृक्षो भवति इति, अयमर्थो मा भूत्, इष्यते चासौ, कुतः ? उपात्तार्थाविरोधात्, **उपात्तार्थाविरोध इति** अत्र **इतिशब्दस्य** हेत्वर्थत्वात् । **अशिंशपाऽभवन-** 647/mj वदित्यादिः **अवृक्षाभवनवत्** इत्यादितुल्यः सामान्यगमविपर्ययेण

* * *

५ स्य] प्रमाणसमुच्चयवृत्तौ सामान्यशब्दो विशेषशब्देन सहाविरुद्धः इत्येतद्दर्शनावसरे **भेदभेदशब्दो**ऽपि गृहीतः । दृश्यतां पृ° ६३८ पं° १० । अतोऽत्र **विशेषविशेषशब्दार्थस्य** इत्यपि पाठो भवेत् । तुलना--पृ° ६४३ पं° १ ॥

६ स्वा] स्वार्थमभिधत्ते इति अनन्तरमेवोक्तं वक्ष्यते च पुनरपि पृ° ६४४ पं° १६ इत्यत्र । अतः **स्वार्थमभिधत्ते** इति पाठोऽत्र सम्भाव्यते ॥

७ त्वा] **°त्वात्सत्वपत्ति°** प्र° ॥

७ क्त्वा] **विशेषव तैरेका°** प्र° ॥

११ न्तेन] **विवक्तं**nayacakra-ms-ya । **विक्तं** nayacakra-ms-bhā ॥

१२ स] **सदत्तस्या°**nayacakra-ms-bhā । **सदसत्तस्या°** nayacakra-ms-ya । अत्र **सदंशस्या°** इति सम्यग् भाति । एवमग्रेऽपि ॥

२० स] °सदंत°nayacakra-ms-ya । °संदंत° nayacakra-ms-bhā ॥

२५ व्या] **व्यावृत्तिव्यापृतत्वादिति** इति पाठोऽत्र सम्यग् भाति, दृश्यतां पृ° ६४४ पं° १ ॥

२५ अ] पृ° ६४४ पं° २ ॥

*... ...अभवत्त्वादवृक्षत्वाद्... ... ...विशेषार्थविधिः ।

यत्तु अविरोधादन्यत्वेऽपि सामान्यादिशब्दार्थानपोहः इत्युक्तं सोऽप्येवमेवाविरोधो घटते भवनविध्येकार्थीभूतत्वात् ।

समूहश्च तथार्थान्तरवाचकः । एवं च सामान्यविशेषशब्दयोः स्वार्थसामान्ये वर्तमानयोस्तद्विशिष्टार्थवाचकत्वम्, द्व्यादिसमूहस्य वाक्यार्थवाचकत्वम् ।

* * *

तदविनाभाविविशेषार्थगमनिकया नेयः **अभवत्त्वात् अवृक्षत्वात्** इत्यादिहेतुकः, अभावमात्राभ्युपगमाच्च हेतुसिद्धिः, तद्विपर्ययेऽस्मत्पक्षापत्तिः । शेषग्रन्थभावना पूर्वग्रन्थभावनातुल्या । एवं तावत् सामान्य-भेदपर्यायशब्दार्थानपोहवत् सामान्यसामान्यशब्दार्थानपोहोऽन्तर्निविष्टविशेषाभिधायिसामान्यशब्दार्थविधिश्चोक्तो विधेरेव शब्दार्थत्वात् । **यत्त्वविरोधा**दित्यादि । यदपि त्वया कारणमुक्तमन्यत्वेऽपि सामान्यादिशब्दार्थानपोहे तेषामविरोधात् इति **सोऽपि एवमेवाविरोधो घटते, भवनविध्येकार्थीभूतत्वात्** । सामान्याख्यं विशेषाख्यं च यत् किञ्चिद्वस्तु तत् सर्वं भवनमेव अन्योन्यात्मापत्त्या एकीभूतम्, स एव शब्दार्थो विवक्षितार्थोपकाराविनाभावित्वेन एकीभूतो विधीयमानत्वादेव अविरुद्धः इति युज्यते, नान्यापोहे, अन्यत्वाविशेषादभावतुल्यत्वाच्च कौ विरोधाविरोधौ ? इति । § 1913

**समूहश्च तथार्थान्तरवाचकः** । तद्व्याख्या --**एवं चे**त्यादि, **एवं च** कृत्वा विधिप्रधानशब्दार्थत्वात् **सामान्यविशेषशब्दयो**रित्यादि यावद् **वाक्यार्थ-**

---

२ *] अशिंशपा घटादि, तदभवनप्रतिपादन एवापक्षीणशक्तित्वात् शिंशपात्मकवृक्षार्थविधाने तस्य व्यापार एव नास्ति । यदसौ वृक्षार्थं शिंशपादिभेदात्मकमाक्षिपति तस्मात् तेन सह सामानाधिकरण्यं प्रतिपद्यते तद्भवनविध्येकार्थीभूतत्वात् । तद्भवनभवनविधिविनाभावे तु न युज्यते सामान्यविधानाभावात् । भवनविधिविनाभूतं सामान्याविधायि न समानाधिकरणं त्वदभिमतं वस्तु स्यात्, अभवत्त्वादवृक्षत्वात्, वन्ध्यापुत्रवत् । कुतोऽस्य सामान्यस्य सामान्यत्वम् ? कथं सोऽपि तर्ह्यसामान्यः ? यद्यसावसामान्यः न तर्हि शिंशपा भवति, अभूतवृक्षादित्वात्, घटवत् । सोऽप्येवमेव यावत् परमाणुर्न भवति, अभूतसामान्यत्वात्, खपुष्पवत् । एवं च सर्वस्य शून्यत्वे कः किं केन कस्माद्वाऽपोहते ? अथ कथञ्चिद् भवत्यपि शिंशपा ततः स्वार्थाद्युक्तेः स एव विधिर्विषयः संवृत्तोऽर्थः । तदुपसर्जनश्चापोहोऽसत्त्वादसत्यः । असत्योपाधिः सत्यः शब्दार्थः । स च विशेषार्थविधिः । ईदृशं किमपि मूलमत्र सम्भाव्यते ॥

८ अ] दृश्यतां पृ० ६३८ पं० ६ ॥

११ अ] तुलना--पृ० ६४४ पं० ८ ॥

११ सा] तुलना--पृ० ६४३ पं० ११ ॥

१४ पोहोऽन्त] °न्तर्विशिष्ट°nayacakra-ms-ya ॥

१६ भ] दृश्यतां पृ० ६४० पं० ४ ॥

१७ क्षितार्थोप] तुलना--पृ० ६४७ पं० २० ॥

१९ अ] तुलना--सामान्यद्यानपोहश्च नाविरोधेन कल्पते । न हि शब्दस्वरूपाणां स्याद्विरुद्धाविरुद्धता ॥ ३४९ ॥ इति **मी०** श्लो० वा० अपोहवादे ॥

२ स] अन्यापोहवादेऽभिहितमिदं दिङ्नागवचनं विधिप्रधानशब्दार्थत्व एव घटत इति दर्शयति । दृश्यतां पृ० ६३८ पं० ११ ॥

**वाचकत्वमिति** । प्रकृतिप्रत्यययोर्भवनसामान्यापरित्यागिनोस्तद्विशेषकर्तृपदार्थवाचित्वं समूहेन भवति इति । नीलोत्पलम् इति वृत्तिपदार्थभवनसामान्यवाचिनोः विशेषणविशेष्यत्वसम्बन्धलक्षणसामान्यविशेषभाविवृत्त्यर्थवाचित्वम्, तथा राजपुरुषादीनां राजाभिसम्बन्धविशेषणादीनां ज्ञेयम् । **द्यादिसमूहस्येति** देवदत्तस्तिष्ठति, देवदत्तो गेहे तिष्ठति, देवदत्त ! गामभ्याज शुक्लाम् इत्यादिद्वि-[त्रि-]चतुः-पञ्चादिपदसमूहानां **वाक्यार्थवाचकत्वम्,** उपात्तार्थाविरोधिसामान्योपकृतविध्यर्थत्वात् सर्वशब्दानामिति । § 1914

- /ms

648/mj

अयं च... ... ...।
नाक्षिपत्येव सद्भेदान् किं मुधा भ्रम्यते त्वया ॥§ 1916

अनेन प्रत्युक्तं प्रतिषेधसामानाधिकरण्यं वेदितव्यम् । आह च-- § 1917

तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन नोज्झितः ।
उपात्तस्तत्समाबन्धात् तत्त्वादेकार्थता तयोः ॥§ 1919

अनेकं च सामान्यमुपात्तमव्यभिचारिणा भेदेन । अतस्तयोश्चित्रा विशेषण- § 1920

**अयं चेत्यादि** श्लोकः । यदुक्तं त्वया घटादिभेदानाक्षेपित्वात् सच्छब्दस्य जातिस्वरूपोपसर्जनद्रव्यमात्राभिधानात् पारतन्त्र्याद् घटादिभेदाभेदत्वात् तैः सह सामानाधिकरण्याभावः इति, यथा परेषां दोषस्तथा तवापि असन्निषेधमात्राभिधानपारतन्त्र्याद् **नाक्षिपत्येव सद्भेदान्** घटादीनिति तुल्ये दोषसम्भवे **किं मुधा भ्रम्यते त्वया ?** इति । § 1921

**अनेनेत्यादि** तद्भावना । पारतन्त्र्यात् सच्छब्दानाक्षेपवचनेन सन् घटः इति सामानाधिकरण्यं न प्राप्नोतीति प्रत्युक्तं प्रतिषेधसामानाधिकरण्यं वेदितव्यम् । § 1922

---

३ इति] **वर्तिपदार्थ॰** प्र॰ । **वृत्तिः** समास इत्यर्थः ॥
१२ कृत] पृ॰ ६४७ पं॰ १२ । पृ॰ ६३९ पं॰ २२ ॥
१४ त] दृश्यतां पृ॰ ६३८ पं॰ १३ । दिङ्नागवचनमेव किञ्चित् परिवर्त्य प्रतिक्षिपति ग्रन्थकारः ॥
१६ अ] अनेकमपि सामान्यं भेदेनाव्यभिचारिणा । उपात्तं न तयोस्तुल्या विशेषणविशेष्यता ॥ इति यदुक्तं पृ॰ ६३८ पं॰ १५ **दिङ्नागेन** तदत्र प्रतिक्षिपति ग्रन्थकारः ॥
१६ अयं]
**चेत्यादि**nayacakra-ms-ya ॥
१६ य] दृश्यतां पृ॰ ६०७ पं॰ २६ ॥
३ टादिभेदाना] **॰नाक्षेपितत्वात्** प्र॰ ॥

**आह चे**त्युक्तार्थसङ्ग्रहकारिका । **तन्मात्राकाङ्क्षणा**दित्यादि, आत्मार्पणामात्रमाकाङ्क्षति सामान्यं स्वभेदे, अत**स्तन्मात्राकाङ्क्षणाद् भेदः** शिंशपा वृक्षेण **सामान्येन नोज्झितो**ऽन्यत्वेपि, किं तर्हि ? **उपात्त** एव कस्मात् ? **तत्समाबन्धात् तत्त्वात्,** तेन सह विशेषेण सामान्यस्यानुबद्धत्वे सति **तत्त्वात्** एकत्वापत्तेर्विशेषप्रवणत्वादन्यत्वे सत्यपि एककार्यत्वा**देकार्थता** सामान्यविशेषयोरन्योन्यापरित्यागे सति आत्मलाभादन्यतरत्यागे स्वरूपाप्रतिलम्भात् सामानाधिकरण्यम् । न हि वृक्षेण विना शिंशपा शिंशपां विना वा वृ- - /ms
क्षोऽस्तीति । अत्र यदुक्तम् **--नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः** दृश्यतां पृ° ६३८ पं° १४ ॥प्र° समु° ५ । २६ इति तत् कुतः संशयः ? कुतो वा साम्यैकार्थते ? संशयस्तावदन्यापोहमात्रोक्तेरनुपात्तत्वाद् विशेषाणां सामान्यशब्देन नास्ति, यद्युपात्ताः स्युर्विशेषाः स्यात् संशयः । साम्यमपि च नास्ति अनुपात्तत्वात्, कुतः समानाधिकरण्यम् ? उपात्तत्वान्न संशयः स्याद् वृक्षवदिति चेत्, न, उक्तत्वात् सामान्यादुपसर्जनाद् विधिविशेषार्थान्नियमे निश्चयदर्शनादिति । § 1923

किञ्चान्यत्, **अनेकं चे**त्यादि । इह विधिप्रधाने शब्दार्थे वृक्षः शिंशपा इति चोक्ते भेदशब्देन **अनेकं च सामान्यं** पृथिवी-द्रव्य-सदादि नाम-स्थापना-द्रव्य-भावाख्यं च सर्वम**प्युपात्तमव्यभिचारिणा भेदेन** शिंशपादिविध्येकार्थीभूतत्वात् । **अतस्तयोश्चित्रा** सामान्यविशेषशब्दयो**र्विशेषणविशेष्यता,** 649/mj

* * *

विशेष्यता । नामाद्यनेकं सामान्यं भेदेनाव्यभिचारिणोपात्तम् । ततः संशयव्यावृत्त्यर्थं भवत्येव विशेषणत्वं वृक्षस्य शिंशपायाश्च विशेष्यत्वम् ।... ...सत् । इत्थम्--

स्वार्थावबद्धशक्तिश्च भेदो भेदमपोहते ।
सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेः ॥§ 1926

* * *

विवक्षावशात् कदाचिद् वृक्षेण शिंशपा विशेष्यते कदाचिच्छिंशपया वृक्षः शिंशपा वृक्षः, वृक्षः शिंशपा इत्यनियमदर्शनात् । तस्यानियमस्य हेतुं दर्शयति

---

४ नो ] नास्तितोन्यच्चेति प्र° । नोज्झितोऽन्यत्वेऽपि इति नोज्झितोऽत्यक्तः इति वा पाठोऽत्र सम्भाव्यते ॥
५ त ] तत्समबंधातत्त्वात्nayacakra-ms-ya ॥
७ त्वाप ] °पत्तेर्विशेषणप्रव° प्र° ॥
७ पा ] शिंशपा विना वा न वृक्षोऽस्तीति प्र° ॥
११ साम्यैका ] कार्थः तेnayacakra-ms-bhā । °कार्थस्ते nayacakra-ms-ya ॥
१३ स्यात् ] संशयः स्यत्यमपिnayacakra-ms-bhā । संशयस्य त्वमपि nayacakra-ms-ya ॥
१३ सा ] दृश्यतां पृ° ६१६ पं° ४ ॥
१८ विधिविशेषा ] °षार्थन्नियमे निश्चिय°nayacakra-ms-bhā ॥
७ वृ ] वृक्षशिंशपाnayacakra-ms-ya ॥

--**नामाद्यनेक**मित्यादि, नामशिंशपा स्थापनाशिंशपा द्रव्यशिंशपा भावशिंशपा । कन्यायाः शिंशपा इति नाम्नि कृते कन्या नामशिंशपा । तच्च **सामान्यं** पूर्वोक्तविधिना सर्वस्य नामत्वात्, शिंशपैव वा नामाद्यपेक्षया सामान्यम् । तच्चेदं **भेदेन** वृक्षेणा**ऽव्यभिचारिणा** विध्येकार्थीभूतत्वा**दुपात्तम्** । ततः संशयः स्यादवृक्षशिंशपा कन्या नामशिंशपा । तद्व्यावृत्त्यर्थं वृक्षशिंशपामौदयिकभावात्मिकां भावशिंशपा[मा]नयेति भवत्येव विशेषणत्वं वृक्षस्य शिंशपायाश्च विशेष्यत्वम्, अनियमः, न तु यथोच्यते त्वया --**न तयोस्तुल्या विशेषणविशेष्यता** प्र॰दृश्यतां पृ॰ ६३८ पं॰ १६ ॥ समु॰ ५ । २७, दृष्टत्वान्नियमेन तुल्यत्वस्य । एवं तावन्नेयं यावत् **स**दिति । § 1927

- /ms

यदप्युच्यते त्वया—

भेदो भेदान्तरार्थं तु विरोधित्वादपोहते ।
सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः ॥ प्र॰पृ॰ ६३८ पं॰ १८ ॥ समु॰ ५ । २८§ 1930

इति, तत्रापि न तु विरोधित्वादपोहते, विरोधाभावादङ्गाङ्गिभावेन सामान्यविशेषभावापत्तेरुक्तन्यायेन सर्वस्य नामाद्यपेक्षस्य । कस्मात् तर्ह्यपोहते ? उच्यते--यस्मादित्थम्

स्वार्थावबद्धशक्तिश्च भेदो भेदमपोहते ।
सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेः ॥ इति ।§ 1932

स्वार्थेऽवबद्धा शक्तिरस्य शिंशपाशब्दस्य वृक्षसामान्यसहायस्य शिंशपायामेवावबद्धा, तस्या एव विवक्षितत्वात्तु शब्दान्तरार्थप्रतिपादनसहायभावाप्रतिपत्तेः । अतः स्वार्थावबद्धशक्तित्वाच्छिंशपाशब्दः खदिरादिमपोहते । किं कारणम् ? **सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेः**, येयमभिहितानां सामान्यशब्देन उपसर्जनसामान्यार्थेन विशेषाणां नियमार्था विशेषश्रुतिरिष्टायाः शिंशपायाः प्रतिपादनस्य तद्द्वारत्वाद् यथास्माभिः प्राग् विस्तरेण व्याख्याता सा सामान्यार्थविशेषार्थगुणप्रधानयुक्तविधेयार्थवती । तस्माद्धेतोस्तस्याः सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेर्भेदान्तरस्याविवक्षितत्वात् प्रयोजनाभावात् **स्वार्थावबद्धशक्तित्वाद् भेदः** शिंशपादि**र्भेदं** खदिरादि**मपोहते,** न तु विरोधित्वात्, सामान्यविशेषयोरन्योन्याविनाभावित्वे सामान्याविनाभा-

---

१६ विशेष्य] °ष्यतोnayacakra-ms-bhā । °ष्यते nayacakra-ms-ya ॥
१६ त] °तत्वातुnayacakra-ms-bhā । °तत्वात्रु nayacakra-ms-ya । विबक्षितत्वात् शब्दान्तरा° इति रम्यं भाति ॥
१८ रा] °रार्थाप्रति° प्र° ॥
१९ विशेषा] °षार्थविवित्वान्नियम°nayacakra-ms-bhā । °षार्थविविधान्नियम° nayacakra-ms-ya । °षार्थविधित्वान्नियम° ? ॥
१ उ] उपसर्जनीसामा°nayacakra-ms-bhā ॥

विना विशेषान्तरेण स्वरूपेणैव कथं विरुध्यते विशेषः शिंशपादिः खदिरादिना ? इति । § 1933
650/mj

एतेन सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः प्र° समु° ५ । २८ इत्यादि सर्वं प्रत्युक्तार्थमित्यलमतिप्रसङ्गेन । § 1934

यत्तूक्तं कथं पुनः शब्दस्यार्थान्तरापोहेन स्वार्थाभिधाने पूर्वदोषाप्रसङ्गः कथं वार्थान्तरापोहेन स्वार्थाभिधानम् ? § 1935

---

३ विशेषः] **शिंशपादि** प्र° ॥
५ सा] दृश्यतां पृ° ६३८ पं° २४ ॥
३ क] अत्रेदमवधेयम् --**दिङ्नागस्य** कतमस्माद् ग्रन्थादिदं सर्वमपोहवादिमतं केनचिद्विरचितया **तट्टीकया** सहात्र **मल्लवादिक्षमाश्रमणैरुद्धृतमिति** निर्णेतुं न पार्यते, दृश्यतां पृ° ६०६ टि° ७ । यथा तु **प्रमाणसमुच्चयेऽपोहपरिच्छेदे** दिङ्नागेनाभिहितं तथा भोटभाषानुवादात् संस्कृते परिवर्त्यात्रोपदर्श्यत इति सर्वत्र पूर्वोत्तरपक्षयोर्यथायोगमनुसन्धेयोऽयं **प्रमाणसमुच्चयग्रन्थः**-- --- कथं पुनः शब्दस्यार्थान्तरापोहेन स्वार्थाभिधाने पूर्वदोषाप्रसङ्गः ? यस्मात् अ[[**तत्त्वसं° पं°** पृ° ३०७ । **सन्मतिवृ°** पृ° ११६ ॥]]दृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात् । श्रुतेः सम्बन्धसौकर्यं न चास्ति व्यभिचारिता ॥ ३४ ॥ --- अन्वयव्यतिरेकौ हि शब्दस्यार्थाभिधाने द्वारम् । तौ च तुल्यातुल्ययोर्वृत्त्यवृत्ती । तत्र तुल्ये नावश्यं सर्वत्र वृत्तिराख्येया, क्वचिदानन्त्येऽर्थस्याख्यानासम्भवात् । अतुल्ये तु सत्यप्यानन्त्ये शक्यमदर्शनमात्रेणावृत्तेराख्यानम् । अत एव स्वसम्बन्धिभ्योऽन्यत्रादर्शनात् तद्व्यवच्छेदानुमानं स्वार्थाभिधानमित्युच्यते । अन्वयद्वारेण त्वनुमाने वृक्षशब्दादेकस्मिन् वस्तुनि शिंशपादिप्रतिभासी संशयो न स्यात् । तत्संशयवत् पार्थिवत्वद्रव्यत्वादिप्रतिभास्यपि संशयः स्यात् । यस्माद् वृक्षशब्दोऽपार्थिवादिषु न दृष्टस्तस्माद् व्यतिरेकेणैवानुमानम् । आह च-- वृ[[तुलना--विधिमुखेन शब्दे प्रवर्तमाने सर्वात्मकार्थग्रहणं प्राप्नोति । ततश्च यथानुलोम्येन वृक्ष-पार्थिव-द्रव्य-सत्-ज्ञेयशब्देभ्यश्चतुस्त्रिद्व्येकनिश्चयो भवति तथा प्रातिलोम्येनापि निश्चयेन भवितव्यम् । न च तथा दृश्यते । ज्ञेयशब्दाच्चतुर्षु सत्तादिषु सन्देहात् सच्छब्दात् त्रिषु द्रव्यादिषु द्रव्यशब्दाद् द्वयोः पार्थिववृक्षत्वयोः पार्थिवशब्दादेकत्र वृक्षत्वे । तस्मान्न विधिमुखेन प्रवृत्ताः शब्दाः । तदुक्तम् --**वृक्षत्वपार्थिवद्रव्यसज्ज्ञेयाः प्रातिलोम्यतः । चतुस्त्रिद्व्येकसन्देहे निमित्तं निश्चयेऽन्यथा ॥** इति --**मी° श्लो° वा° शर्करिका** पृ° ७२ । **न्या° र°** पृ° ६०९ ॥]]क्षत्वपार्थिवद्रव्यसज्ज्ञेयाः प्रातिलोम्यतः । चतुस्त्रिद्व्येकसन्देहे निमित्तं निश्चयेऽन्यथा ॥ ३५ ॥ इत्यन्तरश्लोकः । --- न च सम्बन्धद्वारं मुक्त्वा शब्दस्य लिङ्गस्य वा स्वार्थख्यापनशक्तिरस्ति, तस्यानेकधर्मत्वेऽपि सर्वथा गत्यसम्भवात् । न चास्ति स्वार्थे व्यभिचारो भेदानभिधानात् । एवं तावत् पूर्वदोषाभावः ।--PSV1 C. ed. , N. ed. A । PSV2 N. ed. B–A, P. ed. । --- अस्य सवृत्तिकस्य **प्रमाणसमुच्चयस्य जिनेन्द्रबुद्धिरचिता विशालामलवती** व्याख्यापि भोटभाषानुवादात् संस्कृते परिवर्त्येहोपन्यस्यते--(?")**कथं पुनरित्यादि** । शब्दोऽर्थान्तरव्यवच्छेदेन स्वार्थमभिधत्ते इत्यस्मिन् पक्षे... ...चतुर्षु पक्षेषु ये दोषाः पूर्वमुक्तास्ते कथं न स्युरिति पृच्छति । **अदृष्टेरन्यशब्दार्थे** इति [अन्य]शब्दार्थवचनं विपक्षो[illegible] 651/mj ।विपक्षेऽदर्शनादित्यर्थः । **स्वार्थस्यांशे[ऽपि] दर्शनादित्यत्र** स्वः [अर्थः] स्वार्थः । कः पुनरयमिति चेत्, विवक्षावत्पुरुषसमुदायः । तस्यांशोऽवयवो विवक्षावान् पुरुषः । **अंशेऽपीति** विवक्षावतोऽयं पर्यायः । एवमुक्तं भवति--यद्यपि यथोक्तस्वार्थांशा अनन्तास्तथाप्येकत्रापि दर्शनादिति । **अपि**शब्दोऽनेकत्रापीति द्योतयति । सपक्षव्याप्तेः प्रतिपादनानङ्गत्वादंशवचनम् । अव्यापकमपि गमकम् । **श्रुतेः**

**सम्बन्धसौकर्यम्**, यथोक्ताद्धेतोः । **न चास्ति व्यभिचारिता** स्वार्थाभावेऽभावात् । **अन्वयव्यतिरेकौ ही**त्यादिनेममेवार्थं प्रकाशयति । **द्वार**मुपायः, शब्दस्य लिङ्गत्वात् तस्य चान्वयव्यतिरेकलक्षणसम्बन्धबलेन गमकत्वात् । **तौ** **चे**त्यन्वयव्यतिरेकरूपोपाख्यानम् । लिङ्गस्य तत्तुल्य एव वृत्तिस्तदतुल्ये चावृत्तिरेवेत्येतद्धि अन्वयव्यतिरेकयोः स्वरूपम् । **तत्र तत्तुल्ये नावश्य**मिति नियमेनास्य सजातीये **सर्वत्र वृत्तिर्नाख्येया** । कुत इति चेत्, उच्यते --**क्वचि**दित्यादि । नहि वृक्षादिशब्दस्य वृक्षादौ सर्वत्र दर्शनसम्भवः, तेषामानन्त्यात् । यदृच्छाशब्देषु तु सर्वत्र दर्शनसम्भवः, तद्विषयस्यैकत्वादिति । तस्मात् **क्वचि**दित्युक्तम् । एवं तावदन्वयाभिधानसौकर्यम् । स्यादेतत्--तदतुल्यानामानन्त्याद् व्यतिरेकाख्यानस्यापि सर्वत्रासम्भव इति । अत आह --**अतुल्ये तु सत्यप्यानन्त्य** इति यत्र शब्दार्थाभावस्तेषामानन्त्ये सत्यपि स्वार्थाभावे शब्दाभावलक्षणो व्यतिरेको दर्शयितुं शक्यते, अदर्शनस्य अभावमात्रत्वात् । शब्दार्थयोः कार्यकारणभावसिद्धौ कारणार्थाभावे तत्कार्यशब्दाभावो भविष्यतीत्येतन्मात्रेणादर्शनं प्रतीयते । तत्राश्रयदर्शनं निष्प्रयोजनम्, तदभावेऽपि व्यतिरेकनिश्चयात् । न हि कारणाभावे कार्यसम्भवः । तस्माद् व्यतिरेकोऽपि वक्तुं सुकरः । **अत एवे**ति यस्माद् दर्शनस्य तत्तुल्ये सर्वत्रासम्भवः, तदतुल्ये त्वदर्शनस्य सम्भवस्तस्मात् **स्वसम्बन्धिभ्यः** सजातीयेभ्यो**ऽन्यत्र** विपक्षे**ऽदर्शनात् तद्व्यवच्छेदानुमान**मिति यत्र स्वार्थाभावेऽदर्शनं तद्व्यवच्छेदानामनुमानम् अनुमितिः **स्वार्थाभिधानमित्युच्यते** । एतेन यद्यपि अन्वयव्यतिरेकयोर्द्वयोरप्यनुमानाङ्गत्वं तथापि व्यतिरेकस्य प्राधान्यात् तद्द्वारेणैव गमकत्वमिति दर्शयति । **अन्वयद्वारेण त्वि**त्यादि । **तु**शब्दोऽवधारणार्थः । यद्यन्वयद्वारेणैवाभिधानमिष्यते तथा सति वृक्षशब्दस्यार्थादिसहितस्य शिंशपादिष्वनुगमोऽस्तीति वृक्षशब्दात् केवलादेकस्मिन् वस्तुनि शिंशपादिप्रतिभासी संशयो न स्यात्, अपि तु निश्चय एव स्यात् । अथ बहुषु दृष्टत्वात् संशय एवं तर्हि तत्र संशयवत् पार्थिवत्व-द्रव्यत्वादिप्रतिभास्यपि संशयः स्यात्, पार्थिवत्वादिषु बहुषु दृष्टत्वात् । निश्चयस्तु दृष्टः । यस्माद् बहुष्वपि वर्तमानो यदभावे न भवति तत् प्रतिपादयति, नेतरत् । तस्माद् व्यतिरेकद्वारेणैवानुमानम् । एतदेव दर्शयन्नाह --**यस्मादि**त्यादि । व्यतिरेकद्वारेणैव गमक इत्येतद् ग्राहयितुमन्तरश्लोकमाह । ज्ञेयशब्दः सद्द्रव्यपार्थिववृक्षत्वेषु चर्तुषु संशयस्य हेतुः, यस्मात् स तेषामभावेऽपि दृष्टः । एवमुत्तरेष्वपि वक्तव्यम् । सच्छब्दो द्रव्य-पार्थिव-वृक्षत्वेषु त्रिषु, द्रव्यशब्दः पार्थिववृक्षत्वयोर्द्वयोः, पार्थिवशब्द एकस्मिन् वृक्षत्वे । **निश्चयेऽन्यथे**ति निमित्तमिति वर्तते । **अन्यथे**त्यानुलोम्येन वृक्षशब्दः पार्थिवद्रव्यसज्ज्ञेयेषु चतुर्षु निश्चयस्य हेतुः । तथाहि--स तेष्वपि दृष्टः तेषामभावे चादृष्टः । एवमुत्तरेष्वपि वक्तव्यम् । पार्थिवशब्दादयोऽप्येवमेकैकहान्या द्रव्यत्वादिषु निश्चयहेतवो ज्ञेयाः । यदि च दृष्टवद् विधिना गमयेत् यथाक्रमं चतुस्त्रिद्व्येकार्थनिश्चयस्तर्हि प्रातिलोम्येन स्यात्, ज्ञेयशब्दादीनां सत्त्वादिषु दृष्टत्वात् । यस्मात् तदभावेऽपि दृष्टत्वात् सन्देहस्तस्माद् व्यतिरेकद्वारेणैव गमकत्वमिति । **सम्बन्धद्वारं मुक्त्वे**त्यादि । सम्बन्धोऽविनाभावः । स एव द्वारम् । अनुमानस्य निमित्तम्, तत् परित्यज्य **शब्दस्य लिङ्गस्येव स्वार्थख्यापनशक्तिर्नास्ति** । **इव**शब्द औपम्ये । यथा अर्थात्मकं लिङ्गमविनाभावसम्बन्धद्वारेण गमयत् स्वार्थं व्यतिरेकद्वारेणैव गमयति एवं शब्दोऽपीति ख्यापयितुं लिङ्गस्येव इति वचनम् । **तस्यानेकधर्मत्वे** इति शिंशपादिभेदेन पुष्पितफलितत्वादिभेदेन वा वृक्षाद्यर्थस्यानेकधर्मत्वेऽपि **सर्वथा गत्यसम्भवा**दिति । यदि सर्वथा पुष्पितफलितत्वादिना गम्यते तदा यथोक्तसम्बन्धं विना विधिनैव गम्येत । तच्च न संभवति, पुष्पितत्वादिविशेषेषु व्यभिचारात् । दृष्टवद् गतिर्हि विधिः । तस्माद् विधिना न गतिः, अपि तु अर्थान्तरव्यतिरेकद्वारेण । **भेदानभिधाना**दिति, तेषामन्योन्याभावेऽपि सत्त्वाद् व्यभिचारो भवति, न तु सामान्यस्याभिधेयत्वे, तस्याभिन्नत्वात् तदभावे च शब्दाभावात् ।(?")— **विशाला°** D. ed.

A– A, P. ed. B– B ‖

**एतेन सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः इत्यादि सर्व**मभिहितेन न्यायेन सामान्यविशेषभवनविध्येकीभूतार्थत्वादिना **प्रत्युक्तार्थम्;** प्रत्युक्तः प्रतिषिद्धोऽस्यार्थस्त्वदीयस्य एवमादिनो वचनस्य । **इत्यलमतिप्रसङ्गेन,** अन्यापोहशब्दार्थनिराकरणप्रसङ्गपरम्परागतस्तिष्ठतु विचारः, प्रकृतमस्त्वित्यर्थः । § 1936

**यत्तूक्तमि**त्यादि । **कथं पुनः शब्दस्यार्थान्तरे**त्यादि चोद्यं पराभिप्रायं गृहीत्वा स्वमतनिर्दोषताप्रदर्शनार्थं स्वमतं प्रत्युच्चारयतोत्थापितं यावत् **पूर्वदोषाप्रसङ्ग** इति, भेद-जाति-तत्सम्बन्ध-तद्वत्पक्षगता दोषास्तवापि आन- 651/mj
न्त्य-व्यभिचारादयः कथं न स्युरिति । ननु शब्दस्यार्थान्तरापोहेनेति परपक्षदोषाभिधानमात्रेण स्वपक्षासिद्धितः पृच्छति **कथं वार्थान्तरापोहेन स्वार्थाभिधानं** पक्षसिद्धिः इति वाक्यशेषः । पूर्वदोषाप्रसङ्गश्च कथमर्थान्तरापोहेन स्वार्थाभिधाने ? § 1937
652/mj

अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात् ।§ 1938

शब्दस्यान्वयव्यतिरेकावर्थाभिधाने द्वारम् । तौ च तुल्यातुल्ययोर्वृत्त्यवृत्ती । तत्र तुल्ये नावश्यं सर्वत्र वृत्तिराख्येया । क्वचिदानन्त्येऽर्थस्याख्यानासम्भवात् । अतुल्ये तु सत्यप्यानन्त्ये शक्यमदर्शनमात्रेणावृत्तेराख्यानम् । अत एव च स्वसम्बन्धिभ्योऽन्यत्रादर्शनात् तद्व्यवच्छेदानुमानम् । एवं च कृत्वा वृक्षशब्दाद्द्रव्यत्वाद्यनुमानमुपपन्नं भवति । अन्वयद्वारेण चानुमाने यस्मादनुगमोऽस्ति वृक्षशब्दस्य शिंशपादिषु तस्मात् केवलेनाप्यनुमानं प्राप्नोति । अथ बहुषु दृष्ट इति संशयो भवति एवं सति वृक्षार्थे पार्थिवत्व-द्रव्यत्व-सत्त्वेषु संशयः स्यात् । निश्चयस्तु दृष्टः । तथाहि--वृक्ष-पार्थिव-द्रव्य-सच्छब्दा § 1939

अत्रोच्यते त्वया **--अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात्,** अन्या-

४ प्र] प्रतिषिद्धोस्वार्थ° प्र° ॥
८ अ] अन्योऽपोह°nayacakra-ms-ya ॥
२४ न] तत्तु शब्दस्या°nayacakra-ms-bhā । तत्र शब्दस्या° ? ॥
२४ अ] अत्रेदमवधेयम् । दिङ्नागरचितस्य कस्यचिदपोहविषयकग्रन्थस्यांशोऽत्र केनचिद् विरचितया तट्टीकया सह प्रायो यथाक्षरमेव नयचक्रवृत्तिकृद्भिः सिंहसूरिक्षमाश्रमणैरिहोपन्यस्तः, तत्र कियद् दिङ्नागस्य कियच्च तट्टीकाकृत इति सम्यग् विवेक्तुं न पार्यते, मल्लवादिक्षमाश्रमनेनापि कियदत्र मूलरूपेणोपात्तमित्यपि न सम्यग् विज्ञायते । यावत्तु दिङ्नागेनाभिहितमित्यस्माकं प्रतिभाति तावदस्माभिः स्थूलाक्षरैरत्र वृत्तौ दर्शितम्, यथा तु प्रमाणसमुच्चये वर्तते तथा पृ° ६५० टि° २ इत्यत्र प्रदर्शितमस्माभिः प्राक् । तच्च सर्वत्र यथायोगमनुसन्धेयमत्र पूर्वोत्तरपक्षयोः ॥
३ ब्दार्थे] पृ° ४३२-- १, ४७२-- १ ॥

पोहेनार्थाभिधानसिद्धिः इति वाक्यशेषः । अनुमानानुमेयसम्बन्धो ह्य-
भिधानाभिधेयसम्बन्धः । तत्र यथा धूमस्य एकदेशे दर्शनादग्नेः अनग्नौ चाद-
- /ms शनादनग्निव्युदासेनाग्निप्रतीतिस्तथा **शब्दस्यान्वयव्यतिरेकावर्थाभिधाने द्वारम्**
। ***तौ च तुल्यातुल्ययोर्वृत्त्यवृत्ती । तत्र तुल्ये नावश्यं सर्वत्र वृत्तिराख्येया, क्व-
चिदानन्त्येऽर्थस्याख्यानासम्भवात्,** *न हि सम्भवोऽस्ति वृक्षशब्दस्य सर्ववृक्षेषु
दर्शने, नापि सर्वत्र लिङ्गिनि सर्वलिङ्गस्य सम्भवोऽग्निधूमादिवत् । यद्यपि
च क्वचिदस्ति डित्थादिषु सम्भवः, तथापि न तद्द्वारेणानुमानम्, सर्वात्म-
नाऽप्रतीतेः । गुणसमुदायो हि डित्थाख्योऽर्थः, न च सर्वे काणकुण्टादयो
डित्थशब्दाद् गम्यन्ते । एवमन्वयद्वारेणानुमानाभावः । § 1940

स्यादेतत्-व्यतिरेकस्याप्यसम्भवः । तत आह --**अतुल्ये तु सत्यप्यानन्त्ये
शक्यमदर्शनमात्रेणाऽदर्शनेऽप्रवृत्तेराख्यानम्,** अदर्शनमात्रत्वात्, अदर्शनं हि
दर्शनाभावमात्रम् । **अत एव चेति,** यस्माद्दर्शनस्य सर्वत्रासम्भवः सत्य-
पि च दर्शने सर्वथानुमानाभावः अत एव **स्वसम्बन्धिभ्य** इति यत्र दृष्टः
सोऽत्र सम्बन्धी अभिप्रेतः न तु अविनाभावित्वसम्बन्धेन, **अन्यत्रादर्शना**दिति
अभिधेयाभावेऽदर्शनात्, अन्यथा हि वृक्षशब्दस्य तस्मिन् वस्तुनि पृथिवी-द्र-
व्याद्यभावेऽपि दर्शनं वक्तव्यं स्यात्, तद्व्यवच्छेदानुमानमिति **यत्रैवादर्शनमुक्तं
वृक्षाभावेऽवृक्षे ततो व्यवच्छेदानुमानम् अवृक्षो न भवति इति । एवं च
कृत्वा वृक्षशब्दाद्द्रव्यत्वाद्यनुमानमुपपन्नं भवति ।** § 1941

**अन्वयद्वारेण** चानुमानेऽयं दोषः --**यस्मादनुगमोऽस्ति वृक्षशब्द-
- /ms स्यार्थादिसहितस्य शिंशपादिषु तस्मात् केवलेनाप्यनुमानं प्राप्नोति** । अथ
बहुषु पलाशादिष्वपि दृष्ट इति संशयो भवति एवं सति वृक्षार्थे पार्थिवत्व-द्र-
653/mj व्यार्थ-सत्तार्थाः सन्ति तेषु वृक्षशब्दस्य समानत्वात् संशयः स्यात्, निश्चयस्तु

* * *

आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवः । एवमर्थान्तरव्युदासेनार्थान्तराभिधान-

३ श] पृ° ४३२-- १, ४३३-- २ । तुलना पृ° ४५९-- २ ॥
५ *] पृ° ४३२-- १, तुलना--पृ° ४६१-- २ ॥
६ *] पृ° ६६२ पं° ११ । पृ° ४५९-- २ ॥
७ य] पृ° ६६२ पं° १४ ॥
८ त] पृ° ४३८-- २ ॥
८ गुण] तुलना--पृ° ४३६-- २, ४३८-- १, ४३९-- २ ॥
१० न] पृ° ४३३-- १ ॥
१० स्या] तुलना--पृ° ४५९-- १ ॥
११ अ] तुलना--पृ° ४६०-- १ ॥
१२ णाऽद] °ऽदर्शनेऽवृत्तेराख्यानम् इति पाठः सम्यग् भाति ॥
१३ अ] तुलना--पृ° ४६६-- २ ॥
१६ त्र] दृश्यतां पृ° ४६६-- २ ॥
१६ द] **अदर्शनम्** इत्यपि पाठोऽत्र सम्भाव्यते ॥
१७ य] **यथैवा°** प्र° ॥
१७ अ] तुलना--पृ° ४६६-- २ ॥
१८ ए] पृ° ४६६-- २ ॥
१९ ब्दा] **°ब्दादद्रव्य°** प्र° ॥
१९ नु] °नुगतोस्तिnayacakra-ms-ya ॥
२० श] **शब्दार्थादिसहितस्य** प्र° । दृश्यतां पृ° ४६८-- १; ४६९-- १ ॥
२२ अ] पृ° ४६८-- १, २ ॥

मुपपन्नम् । न च सम्बन्धद्वारं मुक्त्वा शब्दस्य लिङ्गस्य वा स्वार्थख्यापनशक्तिरस्ति । आह च—

बहुधाप्यभिधेयस्य न शब्दात् सर्वथा गतिः ।
स्वसम्बन्धानुरूप्यात्तु व्यवच्छेदार्थकार्यसौ ॥§ 1944

अनेकधर्मा शब्दोऽपि येनार्थं नातिवर्तते ।
प्रत्याययति तेनैव न तु शब्दगुणादिभिः ॥§ 1946

पूर्वदोषाभावश्च, यस्मात् श्रुतेः सम्बन्धसौकर्यं न चास्ति व्यभिचारिता भेदानभिधानात् इति ।

एतदयुक्तम् । यतस्तावन्वयव्यतिरेकावपीह न घटेते,

अन्यापोहार्थनैर्मूल्यात् स्वार्थस्यांशेऽप्यदर्शनात् ।
आस्तां ते शब्दसम्बन्ध आस्तां तेऽव्यभिचारिता ॥§ 1949

* * *

दृष्टः शब्दात् । वृक्षशब्दोऽवृक्षनिवृत्त्यैकार्थकोऽपार्थिवव्यावृत्त्यापि स्वार्थे वर्तते, तथाहि--वृक्ष-पार्थिवद्रव्य-सच्छब्दा आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवः । एवमर्थान्तरव्युदासेनार्थान्तराभिधानमुपपन्नम् । **न च सम्बन्धद्वारं मुक्त्वा शब्दस्य** इति यथा भेदाद्यनभिधानं पूर्वमुक्तं तद्दर्शयति । § 1950

**आह** **चेत्**येतमेवार्थं श्लोकद्वयेनापि दर्शयति । **बहुधाप्यभिधेयस्ये**ति, शिंशपादिभेदा अत्राभिप्रेता न द्रव्यादयः, तथाहि--वृक्षवद्भेदेषु संशयो दृष्टोऽर्थतस्तु द्रव्यादिषु निश्चयः । **स्वसम्बन्धानुरूप्यात्त्वि**ति, यस्मादसौ तज्जातीये दृश्यमानोऽर्थान्तरनिवृत्तिद्वारेणैव दृष्टोऽभिधायकः प्रागेवान्यत्रादृश्यमानस्तस्मात् सम्बन्धानुरूप्यात् तद्विशिष्टमेवार्थमाह । **अनेकधर्मा शब्दोऽपि** सामान्यधर्मैः खगुणत्वादिभिर्वृक्षार्थं तस्मिन् वस्तुनि नाभिधत्ते, तथाहि--ते विनापि वृक्षार्थेन रसादिषु दृष्टाः, न तु वृक्षशब्दोऽन्यत्र दृष्टः, तस्माद् वृक्षशब्देनैव प्रत्यायनमुपपन्नमित्युक्त्वा स्वपक्षसिद्धावुपपत्तिः । **पूर्वदोषाभावश्च,** यस्माच्छ्रुतेः **सम्बन्धसौकर्यम्** बहुत्वेऽपि तुल्यातुल्ययोर्वृत्त्यवृत्ती, सम्बन्ध-

---

१० ब] दृश्यतां पृ॰ ६३० पं॰ ११--१४ ॥
१३ अ] दृश्यतां पृ॰ ४३२-- १ ॥
१४ निवृ] **॰वृत्त्यैवार्थको** प्र॰ । तुलना पृ॰ ४६८-- २ ॥
१४ त] **तथापि वृक्ष॰** प्र॰ । **तथा वृक्ष॰** इति पाठोऽप्यत्र समीचीनो भाति । तुलना--पृ॰ ४६८-- २, ४६९-- १ ॥
१५ ब्दा] **॰च्छब्दानुलोम्येन** प्र॰ ॥
१७ न] पृ॰ ६६३ पं॰ ९ ॥
२१ आ] दृश्यतां पृ॰ ६३० पं॰ १०--१५ ॥
२२ अ] तुलना--पृ॰ ४४०-- २ ॥
२२ सा] **सामान्यधर्मैकगुणत्वादिभि॰** प्र॰ । **खम्** आकाशम्, खगुणत्वादिभिराकाशगुणत्वादिभिरित्यर्थः ॥
२४ त्वादिभिर्वृक्षा] **क्षार्थं**nayacakra-ms-bhā । **॰क्षार्थो** nayacakra-ms-ya ॥
१ न] **॰नमनुपपन्न॰**nayacakra-ms-ya ॥

सौकर्याद् **न चापि व्यभिचारिता** भेदानभिधानात् । एवं तावद् भेदाभिधाने ये दोषा उक्तास्ते परिहृता इति अन्यापोहवादिपक्षः । § 1951

आचार्योऽस्यापि दूषणं वक्तुकामः प्राक् तावत् तत्र यदिदं श्रुतिसम्बन्धसौकर्यमुच्यत इति परिहारबीजमेव दूषयितुमाह **--एतदयुक्तम्, यत** इत्यादि यावद् **न घटेते** इति । यस्मात् तावन्वयव्यतिरेकावपीह न घटेते, दूरत एव यावर्थाभिधानहेतू तुल्यातुल्यवृत्त्यवृत्तिभ्यां भवत इत्यभिमतौ । तस्मादयुक्तं सम्बन्धसौकर्यमिति प्रतिज्ञानम् । तदुपपादनार्थमाह - /ms **--अन्यापोहार्थनैर्मूल्या**दित्यादि श्लोकः । अपोहार्था- भावात् सम्बन्धाभावः, स्वार्थगन्धस्याप्यदर्शनात् संशयबीजमपि नास्ति, कुतो व्यभिचाराशङ्केत्युपन्यासः । § 1952

654/mj

स किमन्योऽर्थः स एव भवति उतान्यो न भवति ? यदि तावत् स एव भवति ततस्तच्छब्दोत्पाद्यविज्ञानविषयेऽव्यावृत्त्याऽन्याख्येऽर्थे विधिनैव प्रतिपन्ने किमपोहेन क्रियते, अर्थप्रतीतेर्वृत्तत्वात् । तदा ह्यर्थापत्त्या तदन्ययोरुभयोरपि तत्त्वं स्वतः सिद्धम् । तस्मात् स्यादप्यनयोरन्यापोहप्रत्ययः, असत्योपाधिसत्यशब्दार्थत्वात् । § 1953

अथान्यो न भवति ततोऽपि प्रश्नाव्यवस्था । अन्यत्वस्य चोभयविषयत्वात् तदग्रहे कोऽसावन्यः ? कुतो वा अन्यो न भवतीत्युच्यते ? § 1954

ततो यदिदमुक्तं चोद्यपक्ष एव **अर्थान्तरापोहेन स्वार्थाभिधाने** इति, अत्र अर्थान्तरं नाम अन्योऽर्थ इति यस्माद् भवति तस्मात् तत् तावद् विचार्यते **--स किमन्योऽर्थः स एव भवति** विधिनान्याख्योऽर्थ उच्यते **उतान्यो न भवती**त्यपोहेन ? इति द्वयी कल्पना स्यात् । तत्र **यदि तावद्** मतम्--अन्य इति **स एवान्याख्यो भवतीति** ततः सः इति शब्देनोत्पाद्यते यद् विज्ञानं

१ न] दृश्यतां पृ॰ ४३१-- २ ॥
५ भेदाभिधा] ॰धाने पि दोषा प्र॰ ॥
५ न] घटते प्र॰ ॥
६ ता] तावदन्वय॰nayacakra-ms-ya ॥
६ न] घटते प्र॰ ॥
८ र्थाभिधा] ॰धानहेतु प्र॰ ॥
९ स्वा] स्वार्थग्रंथस्या प्र॰ । दृश्यतां पृ॰ ६५५ पं॰ ११ ॥
२० व्य] व्यभिचारा २ शंके॰nayacakra-ms-bhā । व्यभिचाराव्यभिचाराशंका इत्यपि nayacakra-ms-bhā प्रतिपाठानुसारेण पाठः स्यात् ॥
२१ अ] पृ॰ ६५० पं॰ ३ ॥
२४ अ] तुलना--पृ॰ ६५८ ॥
१ ब्देनोत्पा] ॰त्पद्येतेnayacakra-ms-ya । ॰त्पद्यते nayacakra-ms-bhā । तुलना पृ॰ ६५८ ॥

तस्य विज्ञानस्य स्वार्थोऽभिधेय एवान्याख्योऽर्थः विषयः संवृत्तः स एव । ततश्च तस्मिन्नव्यावृत्त्याऽन्याख्येऽर्थे **विधिनैव प्रतिपन्ने किमपोहेन क्रियते ?** नार्थोऽपोहेनेत्यर्थः । कस्मात् ? **अर्थप्रतीतेर्वृत्तत्वात्,** अर्थप्रतीत्यर्थो हि शब्दप्रयोगः, अन्यापोहकल्पना च तदभिधानस्वरूपपरिज्ञानार्था तदर्थप्रतीतौ व्यर्था सा । § 1955

अथापि स्यादन्यापोहेन प्रयोजनमित्थं स्याद् नान्यथा । तद्यथा --**तदा** तस्मिन् विधिनान्यविज्ञानकाले यद्यन्यो भवति ततः स न भवति, अथ स भवति अन्यो न भवतीति अर्थादापन्नं तदन्ययोरुभयोरपि तत्त्वम् । तच्च स्वत एव सिद्धम् । तस्मात् स्यादप्यनयोस्तदन्ययोरन्यापोहप्रत्ययः । स चोपसर्जनो विधिर्न भवितुमर्हति, कस्मात् ? **असत्योपाधिसत्यशब्दार्थत्वात्** । इत्थमन्यप्रतिपत्तिर्विधिरेव, न व्यावृत्तिः । § 1956 - /ms

**अथ अन्यो न भवति,** अथ मा भूदेष दोष इत्यन्यो न भवतीति तस्याप्यन्याख्यस्यार्थस्य अन्यव्यावृत्तिरेव अन्यो न भवति इति स्यात् स्वरूपम् । ततः किम् ? **ततोऽपि प्रश्नाव्यवस्था,** सोऽपि योऽन्यो न भवतीत्युच्यमानोऽर्थः किं स एव भवति, उत अन्यो न भवति ? इति पृच्छ्यसे त्वम् । तत्र यदि स एव भवतीति ब्रूयास्त्वं पूर्ववद् विधिरर्थः । अथान्यो न भवति सोऽपि अन्यस्तथा प्रष्टव्यो योऽन्यो न भवतीत्युच्यते ततोऽप्यन्यः प्रष्टव्य इति प्रश्नानवस्था । कस्मात् ? सर्वत्रास्याक्षेपस्य तुल्यत्वादुक्तवत् । किञ्चान्यत्, **अन्यत्वस्य चोभयविषयत्वात्,** अन्य इति स उच्यतेऽन्यापेक्षया सोऽपि एतदपेक्षया अयमस्मादन्योऽयमस्मादन्यः इति तयोर्द्वयोरपि स्वरूपतः सिद्धौ द्विष्ठं सदन्यत्वं सिध्यति । ततस्तस्य अन्यत्वस्य उभयविषयत्वात् **तदग्रहे कोऽसावन्यः ?** तयोरन्याख्ययोर्विधिरूपेणाग्रहणे कोऽसावन्यो नाम यदपोहादन्यापोहः स्यात् ? **कुतो वा अन्यो न भवति इति उच्यते** यतोऽस्यान्यस्यान्यत्वं सिध्येत् ? यतोऽन्यो योऽन्यः इत्येतद्द्विष्ठत्वादन्यत्वस्य निर्धार्यमेतदन्यत्वम्, नान्यथा निर्धारयितुं शक्यमित्यभिप्रायः । § 1957

655/mj

एवं तु न स कश्चिदर्थो भविता । उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यांशोऽपि न दृश्यत एव । अन्यो न भवति इत्युच्यमाने उभयतोऽप्यभावादन्यव्यावृत्तेरभवनपरमार्थत्वादभूतस्वान्यत्वाद् वन्ध्यापुत्रवदविषय एव । स च निबन्धनमन्यापोहस्य स्यात् । § 1958

अथोच्येत--अन्योऽप्यनन्यो न भवति । यद्यन्य इत्यनन्यो न भवति ततोऽन्यस्यैवानुवदनात् कोऽसावन्योऽनन्यो नाम

---

६ स्वा]
स्वार्थोभिधेयnayacakra-ms-bhā ।
स्वार्थो विधेय ? ॥
७ त] तुलना--पृ° ६५८ ॥

१९ अ] तुलना पृ° ६५९ ॥
४ अ] तुलना पृ° ६५९ ॥

अन्यान्यत्वतदनन्यत्वातुल्यः शब्दार्थः ? अन्यशब्दार्थस्य च अनन्यशब्दार्थाद् भिन्नत्वेऽन्य इत्यनन्यो न भवतीत्यपोहार्थः स्यात्, अतुल्येऽन्यस्मिन्नवृत्तेः । § 1959

**एवं त्वि**त्यादि । इत्थमुक्तन्यायेन **न स कश्चिदर्थो भविता** न कदाचित् तादृग्विधो भवति, अन्योऽप्यन्यो न भवति सोऽपि स [न] भवतीति - /ms **उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यांशोऽपि** गन्धोऽपि **न दृश्यत एवे**ति । § 1960

अस्यार्थस्य भावना --**अन्यो न भवति इत्युच्यमाने** किं सम्प्रवृत्तम् ? **उभयतोऽपि** न भवति, न भवति इत्यन्यस्य व्यावृत्तिरेव, न कश्चिद् विधिगन्धोऽपीत्यतो**ऽन्यव्यावृत्तेः** हेतोः **अभवनमेव** परमार्थः, **तत्परमार्थत्वा**दात्मान्यत्वाभावः । ततश्च **अभूतत्वान्यत्वाद् वन्ध्यापुत्रवदविषय एव,** न हि वन्ध्यापुत्रादिरभावः शब्दार्थो भवितुमर्हति । **स च** अभावस्ते**ऽन्यापोहस्य निबन्धनं** प्राप्तः । ततश्चाप्रतिपत्तिरेव स्याच्छब्दार्थस्य, अत्यन्ताभावनिबन्धनत्वात्, वन्ध्यापुत्राप्रतिपत्तिवत् । एवं तावद् यदि स एव भवति, अन्यो न भवति इति च विकल्पयोर्विधिवादप्रसङ्गोऽन्यापोहनैर्मूल्यं चोक्तौ दोषौ । § 1961

अथ तद्दोषद्वयपरिहारार्थम् **अथोच्येत--अन्योऽप्यनन्यो न भवति,** अन्य इति न स एव भवति नाप्यन्यो न भवति, किं तर्हि ? ततोऽन्यस्मादन्योऽनन्यो न भवति, अन्यापोहशब्दार्थव्यापित्वाद् व्यावृत्त्यैव गमयति, अतो न विधिप्रसङ्गो नाभावमात्रता वेति । अत्रोच्यते --**यद्यन्य इति अनन्यो न भवति ततोऽन्यस्यैव अनुवदनादित्यादि** याव**दतुल्येऽन्यस्मिन्नवृत्ते**रित्युत्तरपक्षः । किमुक्तं भवति ? योऽयमन्यः सोऽन्य एव सन् अन्यः उच्यते, स एवानन्य एव, स्वयमेव भवति परमनपेक्ष्येत्यर्थः । ततः किम् ? ततो योऽसावनन्यो नाम सोऽन्य एव, स एवान्याख्यः अन्यः सन् अनन्यः इत्युक्तं भवति । तस्मात् तस्यैव अन्यत्वस्य अनन्यशब्देनापि अनुवदनात् **कोऽसावन्यः** पृथक् ततोऽन्यस्मा**दनन्यो नाम** ? नास्तीत्यर्थः । यदि - /ms स्यात् परापेक्षः स्यादिति निरूपयति --**अन्यान्यत्व-तदनन्यत्वातुल्यः शब्दार्थ** इति, अन्यस्मादन्यः अन्यान्यः, तद्भावोऽन्यान्यत्वम्, तस्माद् भिन्नेन अनन्यत्वेनातुल्योऽन्यान्यत्वात् कोऽसौ अन्यान्यत्व-तदनन्यत्वातुल्यः शब्दार्थः ? यथा

---

५ ए] तुलना पृ° ६५८ ॥
६ सो] **सोऽपि न भवतीति** इत्यपि पाठोऽत्र सङ्गच्छते ॥
१० उ] तुलना--पृ° ४३६-- २, ४३६-- २, ४३७-- १, ४५६-- २ ॥
१६ अ] तुलना पृ° ६५८ ॥
१६ रिहा] °हारार्थः **अथोच्येत** प्र° ॥
१९ अ] तुलना पृ° ६५९ ॥
१९ ना] **तावमात्रा वेति**nayacakra-ms-ya ॥
२० य] तुलना--पृ° ६५९ ॥
२३ तोऽन्य] **°न्यत्वस्यैवानु°** ? ॥
२६ ए] एव सnayacakra-ms-bhā प्रतौ नास्ति ॥
२६ त्वा] **°त्वात्तुल्यः** प्र° ॥
२८ त्वेनातुल्योऽन्या] **°न्योन्यत्वात्** प्र° । °न्योऽन्यत्वात् ? ॥
१ त्वा] **°त्वात्तुल्यः** प्र° ॥

वैधर्म्येण घटः इत्युक्ते घटान्यान्य-तदनन्यातुल्यो * 656/mj

* * *

योऽसौ तदतत्त्वातुल्यः स आत्मान्यत्वान्यः सन् अन्यः इत्युच्यते । अतुल्यं हि घटस्यान्यत्वं पटादस्मादन्यस्मात् । न हि घटस्य पटादितरान्यत्ववदन्यत्वम्, पटस्य वा घटादन्यत्वं घटान्यत्ववत् । यथोक्तद्विष्ठत्वतुल्यतायामपि तत एवात्मानन्यत्वं तत्त्वम् । न हि घटस्य तस्मादेव घटात् पटानन्यत्ववदनन्यत्वम् ।

नन्वेवं सोऽपि अन्यस्मादन्य एव भवन्नन्यः सन्ननन्यो भवति । तदनन्यत्वं तत्त्वमपोहमानोऽन्यापोहस्तदपोह एव भवतीति स्ववचनाद्यशेषपक्षविरोधापत्तिः ।

* * *

दृश्यते पटादिरपोह्यो घटशब्देन न तथेह कश्चिदनन्यशब्देन भिन्नोऽनन्योऽस्ति यतोऽस्यान्यस्यान्यान्यस्माद् भिन्नस्य पटवदवृत्तिः स्यात्, अन्योन्यापेक्षत्वादन्यत्वस्य, स च नास्तीत्थम् । किञ्चान्यत्— **अन्यशब्दार्थस्य चे**त्यादि अन्यापोहे न्यायं दर्शयति । यदा चान्यशब्दार्थादनन्यशब्दार्थो भिन्नो भवति तस्माच्चान्यशब्दार्थस्तदा अन्यः इत्युक्ते अनन्यो न भवति इत्यपोहार्थो विधेर्भिन्नः स्यात् । किं कारणम् ? **अतुल्येऽन्यस्मिन्नवृत्ते**र्घटपटवत् । न तु अस्ति, अन्यस्यैवान्यस्यानन्यत्वात् । तस्मात् स्वार्थापोह एव स्यात् । § 1962

इतर आह--स्यादेतदेवं यद्यन्य एवान्यत्वे स्थितोऽन्य उच्येत परापेक्षान्यत्वात् अनन्यः स एवान्य इति । किं तर्हि ? स्वापेक्षान्यत्व एव अन्यः इत्युच्यते । तद्भावयितुकाम आह --**योऽसा**वित्यादि यावद् **घटात् पटानन्यत्ववदनन्यत्व**मिति । योऽसौ तस्य अन्यस्य अतद्भावेन अतत्त्वेनातुल्य आत्मीयेन स स्वतोऽन्यस्मादेवान्यस्मादात्मान्यत्वान्यः आत्मान्यत्वान्यः सन् अन्यः इत्युच्यते । निदर्शनम् --**अतुल्यं हि घटस्यान्यत्वं पटादस्मादन्यस्मात्, न हि घटस्ये**त्यादिना घटान्यत्वस्य पटान्यत्वेनासङ्करं दर्शयति याव**दितरान्यत्ववदन्य-**

१ घ] **घटोनान्य॰** प्र॰ ॥
१ *] तुलना ६५९ पृ॰ ॥
१२ श] **॰शब्देनाभिन्नो** प्र॰ ॥
१२ तोऽस्यान्य] **॰न्यस्यानान्यस्माद्**nayacakra-ms-bhā । **॰न्यस्यानन्यस्माद्** इत्यपि पाठोऽत्र भवेत् ॥
१४ भि] **भिन्नपटव॰**nayacakra-ms-bhā ॥
१५ न्या] **नायं** प्र॰ । तुलना--पृ॰ ६५७ पं॰ १४ ॥
२० पोहार्थो] **विधिर्भिन्नः** प्र॰ ॥
२० यो] दृश्यतां पृ॰ ६५९ ॥
२२ घ] **घटात्पटात्पटानन्यत्वव-द॰**nayacakra-ms-bhā ॥
२२ स्मा] **॰स्मादेवादन्यस्मादात्मा**nayacakra-ms-ya । ॰स्मादेवान्यत्वादात्मा॰ ? ॥
२३ स्मादात्मा] **॰त्माऽन्यत्वान्यः** प्र॰ ॥
२४ टा] **पटाद्यस्माद॰**nayacakra-ms-bhā ॥
२४ प] **पटानत्वेना॰**nayacakra-ms-bhā । **पटाननत्वेना॰** nayacakra-ms-ya ॥
१ या] **ययदितरा॰**nayacakra-ms-bhā । **यायदितरा॰** nayacakra-ms-ya । **पटादितरा॰** इत्यपि पाठोऽत्र भवेत् ॥

**त्वम्, पटस्य** **वे**त्यादिना पटान्यत्वस्य घटान्यत्वासङ्करं यावद् **घटान्यत्ववदि**ति भावितार्थम् । एष दृष्टान्तः । § 1963

अयमर्थोपनयः **--यथोक्तद्वि[ष्ठ]त्वतुल्यतायामपी**त्यादि । त्वदुक्ता तद्विष्ठत्वादन्यतापरस्परापेक्षता, तस्यां तुल्यायामपीतरेतरापेक्षान्यतायां **तत एव स्व-** - /ms त एवात्मनोऽन्यत्वं तत्त्वम्, स एव घटोऽनन्यः । शेषः पूर्वेण तुल्योऽन्यत्वभावनाग्रन्थेनासङ्करप्रदर्शनग्रन्थः । तस्मादन्यत्वमपि स्वत एव अनन्यत्वमपि तथेति व्यवस्थिते भवत्यन्यापोह इति । § 1964

अत्रोच्यन्ते तव दोषाः **--नन्वेवमि**त्यादि यावत् **स्ववचनाद्यशेषपक्षविरोधापत्तिरि**ति । **ननु** इत्यत्रानुज्ञापयति परम् । नन्वित्थं सोऽपि योऽन्यः अन्यस्मादन्यस्वरूपात् स्वत एव सिद्धान्यत्वादन्याख्यादर्थादन्य एव भवन्नन्यः सन्ननन्यो भवति स एव भवति । तस्य अन्यस्य स्वात्मनि व्यवस्थितस्य

657/mj तदनन्यत्वं

* * *

अन्यापोह इति चानन्यापोहो न भवतीत्यपि न परिहार एव, अन्यापोह इत्यनन्याभावापोहो न भवतीति यतोऽर्थान्तरापोहेन स्वार्थापोहे वृत्त्यार्थेऽन्यविशिष्टोऽपोहः । यथा अपोह इत्यनपोहो न भवति तथान्यविशेषणापोह-

* * *

तत्त्वमात्मत्वमपोहमानोऽन्यापोहस्तदपोह एव भवति स्वापोह एव नान्यापोहस्त्वदिष्टः परापोह इत्यर्थः । इतीत्थं स्ववचनविरोधः अन्यापोहः इति वचनात् । तथाभ्युपगमादभ्युपगमविरोधः । लोकविरोधश्चेत्थं लोके दृष्टत्वात् स्वार्थप्रतीतेः । तथा प्रत्यक्षदर्शनात् प्रत्यक्षविरोधः । अनुमानविरोधश्चैवमनुमानात् । इत्यशेषाः पक्षदोषा आपन्नाः । विधिवादापत्तिश्चैवमिति । एवं तावद् वस्तुनो लक्षणानुसारेण दूषणमुक्तम् । § 1965

स्यान्मतम्--अन्यापोहशब्दार्थानुसारच्छायामात्रेण परिहरामीति । तद्यथा **--अन्यापोह इति च अनन्यापोहो न भवतीति,** अन्यविशेषणविशिष्टापोहस्य अनन्यविशेषणविशिष्टापोहः प्रतिपक्षः, स न भवतीत्यर्थः । स चान्योऽन्यस्मात् । अतोऽन्यापोह एवात्रापीति । § 1966

अत्रोच्यते **--इत्यपि न परिहार एव** । कस्मात् ? **अन्यापोह इति अनन्याभावापोहो न भवतीति यतः अर्थान्तरापोहेन स्वार्थापोहे वृत्त्यार्थेऽन्यविशिष्टोऽपोह** इति । किमुक्तं भवति ? अनन्यस्याभावोऽन्यः अन्यस्य वाऽभावोऽनन्यः प्रतिपक्षः । तद्वदपोहस्यानपोहः प्रतिपक्षः अनपोहस्यापोह इति भवति । तं दृष्टान्तत्वेन न्यायं दर्शयति **--यथा अपोह इत्यन-**

५ स्य ] एतचिह्नान्तर्गतः °टान्यत्वा° इत्यादिः °क्षता° इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
५ एवा ] एवात्मानो° प्र° ॥
१२ न ] दृश्यतां पृ° ६५९ ॥
२५ अ ] दृश्यतां पृ° ६६० पं° १३ ॥
२७ चा ] चानन्योnayacakra-ms-bhā ॥
२८ अ ] पृ° ६६० पं° १३ पं° ६५८ पं° १० ॥
१ स्वा ] स्वार्थेपोहेnayacakra-ms-ya ॥

**पोहो न भवतीति, तथान्यविशेषणा- पोहप्रदर्शनार्थ**मित्यादि दार्ष्टान्तिकम् । किमुक्तं भवति ? यथा अपोहः इत्युक्ते अनपोहो न भवति इति पदार्थे द्विःप्रतिषेधप्रकृत्यापादनादपोह एवार्थो भवति तथा अन्यविशेषणविशिष्टस्यापोहस्य प्रदर्शनार्थम् अन्यापोहः इत्युक्तेऽन्यस्याभावोऽनन्यः, सोऽर्थोऽस्येति अन्याभावार्थोऽन्यशब्दः, तद्भावोऽन्याभावार्थान्यशब्दता, सत्यां च तस्या**मन्याभावार्थान्यशब्दतायाम् अन्यापोहः इत्यनन्याभावस्यान**न्यापोहस्य तद्व्यावृत्तेः **अपोहो न भवति** इत्येषोऽर्थः संवृत्तः । तस्य चेदनन्याभावस्यानन्यस्यापोहो न भवति न तर्हि अनन्यानपोहो न भवति तत्प्रतिपक्षत्वादन्यानपोहस्येति यथा विशेष्यविपक्षव्यावृत्तिस्तथेह एतस्मिन् अन्यो न भवति इत्यन्यशब्दार्थे त्वदीये **अन्यापोहः इत्य[न]न्याभावस्यापोहो न भवति,** स्वस्यानन्यस्याभावोऽन्योऽनन्याभावः, तस्यापोहो न भवतीत्यन्यापोह एव न भवति, अनन्यापोहः स्वापोह एवेत्यनन्याभावार्थः । स चानिष्टस्ते शब्दानुसारेणापि दोषः प्राप्तः । स्यान्मतम्--अन्यस्यैवापोहो नानन्यस्य इत्यवधारणाददोष इति । तच्च न, यस्मात् तत्रापि कोऽन्यः ? *कोऽनन्यः ? कोऽपोहः ? कोऽनपोहः ? इति विचारणायामनन्याभाव एव उक्तवदनवधारणात् अन्यस्यैव नानन्यस्य इति विधिवादापत्तेः अनन्यस्यापोह एव नानपोहः इति स्वस्यापोहानपोहाभ्याम[वधारणा]नवधारणाभ्यां विधिप्रतिषेधादन्यानन्यविचारे च

- /ms

658/mj

* * *

प्रदर्शनार्थमन्यापोह इत्युक्तेऽन्याभावार्थान्यशब्दतायाम् अन्यापोहः इत्यनन्याभावस्यापोहो न भवति । अनन्यापोहः स्वापोह एव ।

एवं प्रक्रमेऽपि च न स कश्चिदर्थो भवितेति स्वार्थस्यांशोऽपि न दृश्यत एव । अनन्यो न भवति इत्युच्यमाने उभयतोऽप्यभावादनन्यव्यावृत्तेरभवनपरमार्थत्वादभूतस्वानन्यत्वाद् वन्ध्यापुत्रवदविषय एव । स च निबन्धनमन्यापोहस्य स्यात् ।

येषामपि चार्थान्तराणामपोहेन स्वार्थाभिधानं तत्र यत् तदर्थान्तरं तत् किं भवदेवापोह्यत उताभवत् ? यदि तावद् भवदर्थान्तरं भवति ततस्तच्छब्दोत्पाद्यविज्ञानविषयेऽव्यावृत्त्या सिद्धे विधिवृत्तैकगतिगुरुतरप्रतिपत्त्यात्मके बहुतरविषये विधिवादे प्रतिपन्ने किमपोहेन पुनः क्रियते, अर्थप्रतीतेर्वृत्त-

५ द्विःप्र] °प्रतिषेध कृत्या°nayacakra-ms-bhā । °प्रतिषेधः प्रकृत्या° nayacakra-ms-ya । °प्रतिषेधे प्रकृत्या° ? ॥
७ अ] अन्यान्याभावा°nayacakra-ms-bhā ॥
८ अ] अपोहो भवतीnayacakra-ms-ya ॥
९ र्हि] अनस्यानपोहो प्र° । अन्यस्यानपोहो इत्यपि पाठोऽत्र विचारणीयः ॥
९ व्याव] °वृत्त°nayacakra-ms-ya ॥
१४ अ] अनन्यो भवतिnayacakra-ms-ya ॥
१७ *] कोन्यःnayacakra-ms-ya ॥
१८ स्यापोहान] °नपोह्यस्याम°nayacakra-ms-bhā ॥

त्वात् । तदा ह्यर्थापत्त्या

* * *

विधिप्रसङ्गात् सर्वथान्यापोहे नैर्मूल्यमित्ययमपि न निःसरणोपायः । स्थित-
- /ms मेतत् --*अनन्याभावस्य अपोहो न भवतीति यतोऽर्थान्तरापोहेन स्वा-
र्थाभिधाने न स्यात् । § 1967

*एवं प्रक्रमेऽपि चेत्यादि** । एवमापादितशब्दार्थन्यायेऽपि च **न स कश्चिदि**त्यादिनापोहनैर्मूल्यमापादयन्नुपसंहरति पूर्वान्यविकल्पदूषावद् विपर्ययेणानन्यविकल्पदूषणं याव**दभूतत्वानन्यत्वाद् वन्ध्यापुत्रवदविषय एव, स च निबन्धनमन्यापोहस्य स्यादि**ति गतार्थम् । § 1968

*येषामपि चार्थान्तराणामित्यादि** । यदप्युक्तम् **अर्थान्तरापोहेन स्वार्थाभिधाने** इति, अत्र अर्थान्तराणि अर्थेभ्योऽन्यानि तेषामर्थान्तराणां मध्ये **यत् तदर्थान्तरं** सोऽर्थादन्योऽर्थः **तत् किम् ?** इति पूर्ववद् विकल्पद्वयम् । **भवदेवार्थान्तरमपोह्यत उताभवत् ?** इति प्रश्नः । **यदि तावदित्यादि** प्रथमविकल्पे दूषणम्, स एव भवन्नर्थोऽर्थान्तरत्वे स्थितः स भवतीति चेदि**ष्टस्तच्छब्दोत्पाद्यविज्ञानविषयः**, तस्य विषयस्य सिद्धत्वात्, तस्मिन्नव्यावृत्त्या सिद्धे सा च प्रतिपत्तिरस्मदिष्टाया विधिवृत्तैकगतेर्लघीयस्या एकार्थविषयाया गरीयसी तेषामर्थानां भूयसां प्रतिपत्तिः, स च विधिवाद एव भूयोर्थविषयो गरीयःप्रतिपत्त्यात्मकश्च, तस्मिंश्च **विधिवृत्तैकगतिगुरुतरप्रतिपत्त्यात्मके बहुतरविषये विधिवादे प्रतिपन्ने किमपोहेन पुनः क्रियते**, सर्वार्थविषयस्य स एव इति विधिप्रतिपत्तेः प्रागेव वृत्तत्वात् । त्वमेव हि बहुतरार्थविषयशब्दविधिवादी संवृत्तोऽनन्तार्थशब्दवादी चेत्यतः किमपोहकल्पनया क्रियते ? **तदा ह्यर्थापत्त्येत्यादि** । स्वार्थश्च विवक्षितोऽर्थः ये चान्येऽर्था अर्थान्तराणि, तदेतदुभयं स्वत एव सिद्धात्मस्वभावं विधिनैव । यत् पुनरत्र सन् घटः इत्युक्ते सत्
- /ms इत्यनुगमसामान्यज्ञानम् असन्नघटश्च न भवति इति व्यावृत्तिसामान्यज्ञानं
च, तदुभयमर्थापत्त्या यदि भवति भवतु गुडमाधुर्यवदुपसर्जनीकृतात्मस्व-
659/mj रूपम्, को

* * *

४ *] पृ॰ ६५७ पं॰ २ ॥
५ भ] भवतीति
भवतिnayacakra-ms-bhā ॥
६ स्वार्थाभि] ॰धाने त स्यात् प्र॰ । न स्यात् पूर्वदोषप्रसङ्ग इत्याशयो भाति । स्वार्थाभिधानं ते स्यात् इत्यपि पाठोऽत्र विचारणीयः ॥
१० *] पृ॰ ६५५, ६५९, ६६० ॥
१० *] पृ॰ ६५४ पं॰ १ ॥
१३ अ] पृ॰ ६५० पं॰ ३ ॥
१५ उ] त्रताभ॰ प्र॰ ॥
१६ स्त] पृ॰ ६५४ पं॰ २ ॥
१७ विधिवृ]
॰वृत्त्यैक॰nayacakra-ms-ya
॰वृत्त्येक॰ ? ॥
१८ भू] ॰भूतोर्थ॰ प्र॰ ॥
१९ विधिवृ]
॰वृत्त्यैक॰nayacakra-ms-ya ॥
२१ स] सर्वार्थविषयस्य विधिवादस्य इत्यर्थो भवेत् । सर्वार्थविषयस्य स एवेति विधेः प्रतिपत्तेः ? ॥
२४ त] पृ॰ ६५४ पं॰ ३ ॥

स्वार्थार्थान्तराणां तत्त्वं स्वतः सिद्धमित्यनुगमसामान्यज्ञानं व्यावृत्तिसामान्यज्ञानं च यदि भवति भवतु, असत्योपाधिसत्यशब्दार्थत्वात् ।

अथार्थान्तरं न भवति ततोऽनवस्था प्रश्नस्य । अर्थान्तरस्य चोभयविषयत्वात् तदग्रहे किमिदमर्थान्तरम् ? कुतो वार्थान्तरं न भवतीत्युच्यते ?

एवं तु न स कश्चिदर्थो भविता । उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यांशोऽपि न दृश्यत एव । अर्थान्तरं न भवतीत्युच्यमाने उभयतोऽप्यभावादर्थान्तरव्यावृत्तेरभवनपरमार्थत्वादभूतस्वार्थान्तरत्वाद् वन्ध्यापुत्रवदविषय एव । तच्च निबन्धनमन्यापोहस्य स्यात् ।

अथोच्येत--अर्थान्तरमप्यनर्थान्तरं न भवति । यद्यनर्थान्तरं [न भवति ततोऽर्थान्तरत्वस्यैवानुवदनात् कोऽसावर्थान्तरार्थान्तरत्वतदनर्थान्तरत्वातुल्यः शब्दार्थः ? अर्थान्तरशब्दार्थस्य चानर्थान्तरशब्दार्थाद् भिन्नत्वेऽर्थान्तरमित्यनर्थान्तरं न भवतीत्यपोहार्थः स्यात्] अतुल्येऽन्यस्मिन्नवृत्तेः ।

योऽसौ तदतत्त्वातुल्यः [स आत्मान्यत्वान्यः सन् अर्थान्तरम् इत्युच्यते । अतुल्यं हि घटस्यार्थान्तरत्वं पटादस्मादर्थान्तरात् । न हि घटस्य पटादितरार्थान्तरत्ववदर्थान्तरत्वम्, पटस्य वा घटादर्थान्तरत्वं घटार्थान्तरत्ववत् । यथोक्तद्विष्ठत्वतुल्यतायामपि तत एव आत्मानर्थान्तरत्वं तत्त्वम् । न हि पटस्य] तस्मादेव पटाद् घटानर्थान्तर[त्व]वदनर्थान्तरत्वम् ।

नन्वेवं तदप्यर्थान्तरादर्थान्तरम् एव भवदर्थान्तरं सदनर्थान्तरं भवति ।

* * *

वारयति ? **असत्योपाधिसत्यशब्दार्थत्वात्** पूर्ववत् । एवं **तावद् भवदर्थान्तरं चेद् भवति** तत उक्तो दोषः । § 1969

**अथार्थान्तरं न भवती**ति मन्यसे **ततोऽनवस्था प्रश्नस्य** पूर्वव्याख्यातान्यशब्दार्थप्रश्नानवस्थानवत् । **अर्थान्तरस्य चोभयविषयत्वा**दित्यादि शेषम् **अन्यत्वस्य चोभयविषयत्वात्** इत्यादिना तुल्यं यावत् **तच्च निबन्धनमन्यापोहस्य स्या**दिति । § 1970

**अथोच्येते**त्यादि यावद् **न भवतीति** पूर्ववदेव पूर्वपक्षः । उत्तरपक्षोऽपि **यद्यनर्थान्तर**मित्यादि तथैव याव**दतुल्येऽन्यस्मिन्नवृत्ते**रिति । § 1971

***योऽसौ तदतत्त्वातुल्य** इत्यादि पूर्ववदेव पूर्वपक्षः यावत् **तस्मादेव पटाद् घटानर्थान्तरवदनर्थान्तरत्व**मिति । तत्रोत्तरपक्षो **नन्वेवं तदप्यर्थान्तरादर्थान्त-**

२४ अ] पृ॰ ६५४ पं॰ ६ ॥
२६ या] तावद्यद्यnayacakra-ms-ya ॥
२७ अ] अथोच्यतेत्यादिnayacakra-ms-bhā । अथोच्येतेत्यादि nayacakra-ms-ya प्रतौ नास्ति । दृश्यतां पृ॰ ६५५ पं॰ ५ ॥
२८ तु] ॰तुल्येतस्मिन्न-वृत्ते॰nayacakra-ms-bhā ॥
२९ *] पृ॰ ६५६ पं॰ १ ॥
१ त] तदप्यर्थान्तरमित्यादि nayacakra-ms-ya । तुलना--पृ॰ ६५६ पं॰ ५ ॥

660/mj रमित्यादि यावदशेषपक्षविरोधापत्ति

* * *

तदनर्थान्तरत्वं तत्त्वमपोहमानोऽर्थान्तरापोहस्तदपोह एव भवतीति स्ववचनाद्यशेषपक्षविरोधापत्तिः । अपरिहारस्तु तुल्याक्षर एव ।

एवं तु प्रक्रमे न स कश्चिदर्थो भविता उभयतोऽप्यभावप्रसङ्गादर्थान्तरस्वार्थस्यांशोऽपि दृश्यते न स कश्चित् । कुतः स्वार्थस्यांशेऽपि दर्शनमिष्टं त्वया ? उभयतोऽप्यभावादन्यव्यावृत्तेरभवनपरमार्थत्वादभूतस्वान्यत्वाद् वन्ध्यापुत्रवदविषय एव । स च निबन्धनमन्यापोहस्य स्यात् ।

तदभावेऽन्यशब्दार्थार्थान्तरशब्दार्थापोहशब्दार्थस्वार्थशब्दार्थनैर्मूल्यादन्वयव्यतिरेकनैर्मूल्यम्, तन्नैर्मूल्यादन्यापोहार्थनैर्मूल्यम् । ततः स्वार्थस्यांशेऽप्यदर्शनात् क्व सोऽन्वयः ? के चान्येऽनन्तास्तद्भेदाः ? एकस्मिन्नपि हि श्रुतिसम्बन्धाभाव एव स्वार्थाभावस्योक्तत्वात् । क्लेशेनापि महता न शक्यः सम्बन्ध इत्थमापादयितुम् । अतोऽलं सम्बन्धसौकर्येण वाङ्मात्रसारेण ।

* * *

रितीषदक्षरविपर्यासेन गतार्थः । **अपरिहारस्तु तुल्याक्षर एवेति** । अत्र **अर्थान्तरापोह इत्यनर्थान्तरापोहो न भवति** इति पूर्ववत् परेण परिहारेऽभिहिते **इत्यपि न परिहार एव अन्यापोह इत्यनन्याभावापोहो न भवतीति यतः** इत्यादिः स एव ग्रन्थोऽत्रापि तुल्यार्थ इति न विशेष्य लिख्यते तथा तु द्रष्टव्य इत्यतिदिश्यते । § 1972

**एवं तु प्रक्रमे न स** इत्यादिः स एव ग्रन्थस्तुल्यार्थो **यावदन्यापोहस्य स्यादिति** । विशेषस्तु अर्थान्तरस्वार्थस्यांशोऽपि दृश्यते न स कश्चित्, कुतः स्वार्थस्यांऽशेऽपि दर्शनमिष्टं त्वयेति । § 1973

तदित्थं प्रतिपादितमन्यापोहार्थनैर्मूल्यमुपसंह्रियते --**तदभावेऽन्यशब्दार्थे**- /ms **त्यादिना** । नान्यशब्दार्थः, नार्थान्तरशब्दार्थः, नापोहशब्दार्थः, न स्वार्थशब्दार्थः इति प्रसङ्गानुप्रसङ्गागतानामेषां शब्दार्थानां नैर्मूल्यम्, तन्निर्मूलत्वादन्वयव्यतिरेकयोर्नैर्मूल्यम्, तन्नैर्मूल्यादन्यापोहार्थनैर्मूल्यम् । यद्बलात् त्वयोच्यते — **अन्वयव्यतिरेकौ हि शब्दार्थस्याभिधाने द्वारम्, तौ च तुल्यातुल्ययोर्वृत्त्यवृत्ती** इति, तयोरभावादपोहार्थनैर्मूल्यं स्वार्थस्य च त्वदिष्टस्योक्तत्वात् । § 1974

---

१ विरोधाप ] °पत्तिरितीयदक्षर°nayacakra-ms-ya ॥
१४ र्या ] °यासेनेनnayacakra-ms-bhā ॥
१५ स्तु ] °स्तुस्तुल्याक्षरnayacakra-ms-bhā ॥
१७ अ ] पृ° ६५७ पं° १ ॥
१९ न ] विशिष्यnayacakra-ms-ya ॥
२० ए ] एवं उ प्रकमेnayacakra-ms-ya । तुलना--पृ° ६५५ पं° १, पृ° ६५८ पं° ३ ॥
२३ स्यांशोऽपि ] एतच्चिह्नान्तर्गतो **दृश्यते** इत्यत आरभ्य **स्वार्थस्यांशेऽपि** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२६ ना ] नर्थांतरणशब्दार्थोnayacakra-ms-bhā ॥
१ हि ] **शब्दस्यार्थाभिधाने** इति सम्यग् भाति । दृश्यतां पृ° ६५२ पं° २ ॥

ततः **स्वार्थस्यांशेऽप्यदर्शनात् क्व सोऽन्वयः** ? के चान्येऽनन्तास्तद्भेदाः ? तदभावात् किमानन्त्येन कल्पितेन यस्मादेकस्मिन्नपि श्रुतिसम्बन्धाभाव एव, स्वार्थाभावस्योक्तत्वात् । ततश्च यत् त्वया कल्प्यते--**स्वार्थस्यांशेऽपि दर्शनाच्छ्रुतेः सम्बन्धसौकर्यम्** दृश्यतां पृ० ६५० टि० १, पृ० ६५२ पं० १, पृ० ६५३ पं० ७ ॥प्र० समु०, क्लेशेनापि महता न शक्यः सम्बन्ध इत्थमापादयितुम्, अतोऽलं सम्बन्धसौकर्येण वाङ्मात्रसारेण महतापि क्लेशेन दुरुपपादेन, त्यज्यता 661/mj

* * *

आस्तां तेऽव्यभिचारिता । यत्तूक्तं त्वया--व्यभिचारतः प्र० समु० ५ । २ इति । तत्र विधिवादे तदतदात्मकसंशयज्ञानस्य प्राप्तत्वात् किमिव न प्राप्तम् ?

अत्र तूक्तन्यायेन संशयादि अनास्पदम् । तदतद्भावात्मकभावाभावात्मकशब्दार्थत्वादस्वार्थत्वादन्वयव्यतिरेकविषयत्वासत्वात् ।

अथवा--

अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽप्यदर्शनात् ।
श्रुतेः सम्बन्धदौष्कर्यं न नास्ति व्यभिचारिता ॥§ 1977

तस्य व्याख्या त्वन्मतवदेव । यथोक्तम्--वृक्षशब्दस्यावृक्ष शब्दस्य वा स्वाभिधेयेषु

* * *

मित्यर्थः । एवम्--**अन्यापोहार्थनैर्मूल्यात् स्वार्थस्यांशेऽप्यदर्शनात्** । **आस्तां ते शब्दसम्बन्धः** इत्यनेन पादत्रयेण श्लोकस्य **अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात्** । **श्रुतेः सम्बन्धसौकर्यम्** इत्येतत् पादत्रयं दूषितम् । § 1978

चतुर्थपादेन यत् त्वयोक्तं ***न चास्ति व्यभिचारिता** इति **सा** ताव**दास्तां** स्वपक्षगतापोहवादिन**स्तवाव्यभिचारिता** विप्रकृष्टत्वात् । भेदपक्षे संशयदोषापादनार्थं **यत्तूक्तं त्वया--व्यभिचारत** इति, **सच्छब्दो हि यथा द्रव्ये वर्तते तथा घटादिष्वपीति व्यभिचारात् संशयः स्यात्, नाभिधानम्** प्र० समु० वृ० इति । अत्र ब्रूमः --**तत्र विधिवादे स चासश्च** विधेय-व्यावर्त्यौ भावौ, तयोस्तस्यातस्य च भावस्य सम्भवो यस्यात्मा तद् भवति **तदतदात्मकं** संशयज्ञानम्, तस्य **संशयज्ञानस्य प्राप्त- त्वात् किमिव न प्राप्तमभिधानं** - /ms

---

२ क्व ]
क्वासन्वयःnayacakra-ms-bhā ।
क्वासावन्वयः इत्यपि पाठश्चिन्त्यः, तुलना—
पृ० ६६४ पं० १४ ॥
७ त ] तद्भावात्nayacakra-ms-bhā
॥
२२ अ ] पृ० ६५३ पं० १० ॥
२३ * ] पृ० ६५०, ६५२, ६५३ पं० ७
॥
२५ स्व ] स्वपक्षगता अपोहवादिनस्तव
इति पदच्छेदः ॥
२८ घ ] प्रमाणसमुच्चयवृत्तौ तु गुणादिष्वपि
इति पाठ इति ध्येयम् । दृश्यतां पृ०
६०७ पं० १५ ॥

निश्चयो विपर्ययो वाऽनध्यवसायो वा ? सर्वं प्राप्तमित्यर्थः । तत् सर्वं विधिवाद एव घटते । § 1979

**अत्र तूक्तन्यायेन** अन्यापोहार्थनैर्मूल्यात् स्वार्थांशस्याप्यदर्शनात् त्वत्पक्षे **संशयाद्यनास्पदम्,** **आदि**ग्रहणाद् विपर्यया-ऽनध्यवसाय-निर्णया अप्यनास्पदा निर्विषया इत्यर्थः । कस्मात् ? **तदतद्भावात्मकभावाभावात्मकशब्दार्थत्वात्,** स चासश्च भवन् भावो भवति इत्युक्तमस्माभिः, तस्याभाव आत्मा यस्य शब्दार्थस्य त्वदभिमतस्य, तस्य भावात् तदतद्भावात्मकभावाभावात्मकशब्दार्थत्वात् । तद्व्यक्तिः— **अस्वार्थत्वात्,** न भवति न भवति इत्युभयतोऽपि अभावविषयत्वात् । तद्व्यक्तिः **--अन्वयव्यतिरेकविषयत्वासत्त्वा**दिति, संशयविपर्ययावपि निर्विषयौ विध्यर्थाभावात्, अनध्यवसायोऽपि स्वार्थभावात्मकस्याध्यवसायस्य पर्युदासेना[ऽन]ध्यवसायोऽध्यवसायादन्य इति भवति, उभयतोऽप्यभावे कुतोऽनध्यवसायः निर्विषयत्वात् खपुष्पवत् ? इति ।
§ 1980

**अथवे**त्यादि पाठान्तरम् । पूर्वार्द्धं तदेव । **तस्य व्याख्या--त्वन्मतवदेव,** अदर्शनादन्यशब्दार्थे इति प्रथमपादार्थस्त्वद्व्याख्यात एव, स्वार्थस्य चांशेऽप्यदर्शनात् त्वन्मतवदेवेति द्वितीयपादार्थः । § 1981
662/mj

सर्वत्र दर्शने नास्ति सम्भवः, नापि सर्वत्र लिङ्गिनि सर्वलिङ्गस्य सम्भवोऽग्निधूमादिवत् । यद्यपि क्वचिदस्ति डित्थादिषु सम्भवस्तथापि न तद्द्वारेणानुमानम्, सर्वात्मनाऽप्रतीतेः । गुणसमुदायो हि डित्थाख्योऽर्थः । न च सर्वे काणकुण्टादयो गुणास्तस्य डित्थशब्दाद् गम्यन्ते । तस्मात् तद्द्वारेणानुमानासम्भवः । अनेन यदपि तदेकदेशे दर्शनमिष्टं स्वार्थांशे तदप्यदर्शनमेवेत्युक्तं भवति सर्वात्मस्त्वदर्शनात् । § 1982

अन्वयानुक्त्युदाहृतेः व्यावृत्त्या डित्थार्थगतेरुदाहरणमेतदिति चेत्, न, तत्प्रतिपत्तिनिर्मूलत्वात् अनवगतपर्युदासकस्वार्थत्वात्, अविदिते देवदत्ते न भवत्यदेवदत्तः इति वचनवत् । § 1983

एवं च शब्दस्यार्थाभावाद् यः सम्बन्धाशक्यत्वं दोषः पूर्वमुक्तः स इहापि । इति श्रुतेः सम्बन्धदौष्कर्यम् । § 1984

- /ms तं भावयति **--यथोक्त**मित्यादि टीकाग्रन्थ एव । **वृक्षशब्दस्यावृक्षे**त्यादि यावद् **दर्शने नास्ति सम्भवः, नापि सर्वत्र लिङ्गिनी**त्यादि शब्दस्यानुमानत्वात्

११ या] °यानास्पदम् nayacakra-ms-ya ॥
१४ प] पर्युदासेऽनध्यवसायो इत्यपि भवेदत्र पाठः ॥
१५ त] पृ° ६५२ पं° १ ॥
२९ चां] वांशेऽप्य° प्र° ॥
१ वृ] तुलना--पृ° ६५२ पं° १२ ॥

सर्वत्रानुमेये दर्शनासम्भवोऽपि अयोगुडाङ्गाराग्न्याद्यनुमेये धूमादिलिङ्गादर्शनवदिति । अत्र परो ब्रूयात्--ननु डित्थादिस्वाभिधेये सर्वत्र दर्शनमिति, अत्र त्वयोत्तरं यदुक्तम् --**यद्यपि क्वचिदित्यादि** स एव **टीकाग्रन्थो** यावदनु**मानासम्भव** इति वयं त्वन्मतादेव ब्रूमः । अनेनोत्तरवचनेन त्वदीयेन यदपि तदेकदेशे दर्शनमिष्टं स्वार्थांशे तदप्यदर्शनमेवेत्युक्तं भवति **काण-कुण्टादयः सर्वे गुणास्तस्य** गुणसमुदायात्मकस्य **न गम्यन्ते** इति वचनात् सर्वात्मस्वदर्शनाच्छब्दस्य सर्वात्मनाऽप्रतीतेरुदाहरणेऽभिहितत्वाददर्शनं स्वार्थांशेऽपि समर्थितम् । तत एव चानुमानासम्भव इत्युच्यतेऽस्माभिः, क्वचिददर्शनादिति । § 1985

अत्र ब्रूयास्त्वम् --**अन्वयानुयुक्त्युदाहृते**रित्यादि याव**देतदिति चे**दिति । एतदुक्तं भवति--(?')डित्थः इत्यपि अडित्थो न भवति इति व्यावृत्त्या डित्थार्थगतेरन्वयाभावादेव डित्थोदाहरणमिति । एतच्च **न, तत्प्रतिपत्तिनिर्मूलत्वात्,** नैतदडित्थव्युदासमात्रमुपपद्यते प्रतिपत्तेरभावप्रसङ्गात् न भवति न भवति इत्युभयतोऽपि अभावमात्रत्वात्, प्रतिपत्तिनिर्मूलत्वं कस्मात् ? **अनवगतपर्युदासकस्वार्थत्वात्,** अनवगतः पर्युदासो यस्य स्वार्थस्य सोऽनवगतपर्युदासकस्वार्थः, तद्भावादनवगतपर्युदासकस्वार्थकत्वाद् नास्ति प्रतिपत्तेर्बीजम् । दृष्टान्तः--अविदिते देवदत्ते न भवति अदेवदत्तः इति वचनमप्रतिपत्तेरेव कारणं निर्मूलत्वात् तथैतदिति । § 1986

तद्भावयति --**एवं च शब्दस्ये**त्यादि यावत् **स इहापी**ति । यथा पूर्वमुक्तम् --***आस्तां ते शब्दसम्बन्धः, अर्थाभावात्**(?') इति सम्बन्धाशक्यत्वं दोषः स एव । ततोऽन्यस्य चार्थस्याभावादलब्धात्मकेऽर्थद्वये शब्दस्य केन सहाविनाभावः सम्बन्धः स्यात् ? इति श्रुतेः सम्बन्धदौष्कर्यम् । § 1987
663/mj

यः स वृक्षशब्दस्तदितरो वा तस्य तेनार्थेन न शक्यते सम्बन्धः कर्तुम्, तेन सहात्यन्तमदृष्टत्वात्, श्रावणत्वनित्यानित्यत्ववत्

---

१ नास] **°सम्भवेपि** प्र° ॥
३ नु] **°नुमेय धूमा°** प्र° ॥
४ य] तुलना--पृ° ६५२ पं° १३ ॥
५ द] तुलना--पृ° ४६२-- १, ४६५-- २ ॥
६ का] पृ° ६५२ पं° १४ ॥
७ स] **सर्वात्मदर्श°**nayacakra-ms-bhā ॥
७ ना] **°नाशब्दस्य** प्र° ॥
१० त्वा] **°त्वादर्शनं**nayacakra-ms-bhā । **°त्वाद्दर्शनं** nayacakra-ms-ya ॥
११ अ] (?')अन्वयानुत्त्युदाहृते° इति पाठोऽत्र सम्भाव्यते । अन्वयोक्तिरहितमेतदुदाहरणमित्याशयो भाति ॥
१६ इ] **इत्यस्य डित्थो न**nayacakra-ms-ya ॥
१६ त] **तद्भावानव°** प्र° ॥
१८ स्वा] **°स्वात्वाद्**nayacakra-ms-bhā ॥
२० त] **तथैववदिति** प्र° । तथैव तदिति ? ॥
४ *] पृ° ६५३ पं° ११, २६ ॥

। न च सम्बन्धद्वारं मुक्त्वा शब्दस्य लिङ्गस्य वा स्वार्थख्यापन-शक्तिरस्ति । स च सम्बन्धो नास्ति उक्तवत् । § 1988

अत एव न नास्ति व्यभिचारिता, असाधारणधर्मत्वात् । *यो ह्यसाधारणः पक्षधर्मः स यावता भेदेन सर्वसङ्ग्रहस्तत्र संशयहेतुः तद्वता तत्सङ्ग्रहादेकान्तव्यावृत्तेश्च प्र॰न्यायमुखेऽपि एतदस्ति, तथाहि Prof. Giuseppe Tucci इत्येभिर्विहिते English भाषानुवादे इत्थमुपलभ्यते--Some say; it is logical to admit only four kinds of reasons called inconclusive, because they are in both ways in the affirmative as well as in the negative instances. But how can the cause: because sound is audible, be an inconclusive one ? I reply: because it is too--narrow असाधारण. When the predicate of the middle term is too narrow it includes all the possible varieties of the predicate to be proved. Therefore it is absolutely a doubtful reason. In fact it

---

५ *] तथा च **आचार्येणा**प्ययं व्यतिरेकी कथितः । तथाचाह--यो ह्यसाधारणः साधनधर्मः स यावता भेदेन सर्वसंग्रहस्तत्र संशयहेतुः, तद्वता तत्संग्रहादेकान्तव्यावृत्तेश्च ।--**प्र॰ वार्तिकालं॰** पृ॰ ६२९ । युक्तं तावत् चतुर्विधस्य [अनैकान्तिकस्य] उभयत्र सत्त्वात् संशयहेतुत्वम् । श्रावणत्वस्य कथम् ? असाधारणत्वात् । यो ह्यसाधारणः साध्यधर्मः स यावता भेदेन सर्व[भाव PSV१]संग्रहस्तत्र संशयहेतुः, तद्वता तत्संग्रहादेकान्तव्यावृत्तेश्च । **--प्र॰ समु॰ वृ॰** PSV1 C. ed. , N. ed. B, PSV2 N. ed. A । अस्य व्याख्या--**युक्तं तावदिति** । चतुर्विधस्य संशयहेतुत्वे कारणमुभयत्र सत्त्वमस्ति । ततः प्रमेयत्वादिना संशयो जन्यते । श्रावणत्वे तन्नास्तीत्याह — **श्रावणत्वस्य कथमिति** केन प्रकारेणेति कारणादर्शनात् पृच्छति । **असाधारणत्वा**दिति कारणमाह । यद्यसाधारणः संशयहेतुत्वं कुत इत्यत आह **--य** इत्यादि । **साध्यधर्म** इति **पक्षधर्मः** । अनेन सम्बद्धत्वमुक्तम् । असम्बद्धे चाक्षुषत्ववद् विचाराभावात् । **यावता भेदेने**ति नित्यानित्यभावभेदेन वा साश्रवानाश्रवभेदेन वा तीर्थकरव्यवस्थापितभावभेदेन वा **सर्वभावसङ्ग्रहस्तत्र** तेषु भावेषु **संशयहेतुः** । **तद्वतां तत्संग्रहादि**ति असाधारणधर्मवतां तैः संग्रहात् तेषु वा संग्रहात् **एकान्तव्यावृत्तेश्चे**ति एकान्तो निर्णयः, तद्व्यावृत्तिरभावः, अनेन एकत्र भावे साधनाभावमाह ।— **विशाला॰** D. ed. B– A । P. ed. ॥

५ ता] अत्र VT. मध्ये **तद्वतां** इति पाठो भाति ॥

८ व्या] तुलना टिपृ॰ ८४ पं॰ १३ ॥

is merely included in the subject possessing that particular nature: thus it is deprived of one of the neccessary aspects of the reason, that is it does not reside in any positive instance. न्यायमुख पृ° ३२--३३ ॥ समु° वृ° ? । § 1989

तदुपसंहृत्य प्रतिज्ञायते --**यः स वृक्षशब्दो** यस्य स वृक्षोऽर्थः **तदितरो** वेत्यवृक्षशब्दावृक्षार्थयोः सम्बन्धो वृक्षशब्दार्थयोः प्रतिपत्त्यर्थः, तस्य **शब्दस्य** - /ms तेनार्थेन लोकप्रसिद्धेन वा त्वदभिप्रायान्न **शक्यते सम्बन्धः कर्तुमि**ति पक्षः, **तेन सहात्यन्तमदृष्टत्वात् श्रावणत्वनित्यानित्यत्ववदि**ति गतार्थं साधनम् । **न च सम्बन्धद्वारं मुक्त्वा शब्दस्य लिङ्गस्य वा स्वार्थख्यापनशक्तिरस्ती**ति त्वयैवोक्तोऽयं न्याय इति दर्शयति । **स च सम्बन्धो नास्ति उक्तवत्,** उक्तं सम्बन्धदौष्कर्यम् । § 1990

**अत एवेत्यादि** । एतस्मादेव सम्बन्धदौष्कर्याद् यदुक्तं त्वया भेदाभिधानपक्षे दोषजातं व्यभिभिचारः, सोऽपोहपक्षे न चास्ति व्यभिचारितादोषः, भेदानभिधानादिति । तदपि न भवति, **न नास्ति व्यभिचारिता** अस्त्येव सम्बन्धदौष्कर्यस्योक्तत्वात् **न नास्ति** अस्त्येव **व्यभिचारितादोष** इति 664/mj

* * *

इदमपि चात्र अन्वयव्यतिरेकौ शब्दस्यार्थाभिधाने द्वारम् इत्युक्त्वा पुनरन्वयस्य निराकरणं तत् केनाभिप्रायेणेति न विद्मो यदन्वयविषय एकदेशे निरूप्यते त्वया वृक्ष इत्यवृक्षो न भवतीत्यवृक्षव्युदासेन ।

नन्वेवं... ... ...क्वासावन्वय इति सर्ववृक्षार्थदर्शनासम्भवात् ।

लिङ्गोकदेशसम्भविलिङ्गवत्तु न स्वार्थांशमात्रे सम्भवति प्रत्यक्षवृक्ष[मूलादिभेदानन्त्ये सम्बन्धाशक्यत्वे प्रतिपत्त्यभावात्] ।

अवृक्षव्यवच्छिन्नस्यापि स्वार्थस्य नानुमानाय नाभिधानाय स्याद् वृक्षशब्दः,

* * *

पक्षः । **असाधारणधर्मत्वा**दिति हेतुः । असाधारणधर्मत्वं सपक्षासपक्षयोरदृष्टत्वात् तद् व्याचष्टे --*यो ह्यसाधारणः पक्षधर्म इत्यादि यावदेकान्तव्यावृत्तेश्चे**ति तद्व्याख्यया गतार्थम् । § 1991

---

१० भिप्रा ] °**प्रायाच्च शक्यते**nayacakra-ms-bhā । **प्रायोत्वशक्यते** nayacakra-ms-ya ॥
१५ न ] पृ° ६५३ पं° १४ पृ° ६५० पं° २५ ॥
१६ जातं ] एतच्चिह्नान्तर्गतो °**भिचार** इत्यत आरभ्य **सम्बन्धदौष्कर्यस्यो**° इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१७ त ] **सदपि**nayacakra-ms-bhā ॥
२ * ] **बाह्यसाधारणः** प्र° ॥

किञ्चान्यत् --**इदमपि चात्रे**त्यादि । अन्वयस्य निर्मूलनीतत्वाद् यद्
**अन्वय-व्यतिरेकौ शब्दस्यार्थाभिधाने द्वारम्** इत्युक्त्वा पुनरन्वयस्य निराकर-
णं तद् भवतः केनाभिप्रायेणेति न विद्मः । किमज्ञानाद् अस्मद्बुद्धिपरिभवाद्
इहपरलोकाभ्यामयशसश्चाभीरुत्वात् ? इति । कतमदन्वयनिराकरणमिति
चेत्, उच्यते — **यदन्वयविषय एकदेशे निरूप्यते त्वया वृक्ष इत्यवृक्षो न**
**भवतीत्यवृक्षव्युदासेन ।** § 1992

कथं पुनरनेनान्वयो निराक्रियत इति चेद् ब्रूमः --**नन्वेव**मित्यादि याव-
त् **क्वासावन्वय इति** इति भावना गतार्था । तत्र कारणमाह --**स-**
- /ms **र्ववृक्षार्थदर्शनासम्भवात्,** भेदानन्त्याद्यासम्भव उक्तः । स्वार्थदेशव्याप्यन्वयो
नास्तीति चोक्तो गुणसमुदायमात्रत्वात् गुणभूतेषु चावयवेष्वसत्त्वं दर्शन-
स्योक्तं त्वयैव । तस्मादन्वयाभावेऽनुमानानुमेयसम्बन्धाभावादनुमानानुपप-
त्तिवदभिधानाभिधेयभावस्यानुपपत्तिरिति । § 1993

स्यान्मतम्--लिङ्ग्येकदेशसम्भविलिङ्गवदभिधेयैकदेशसम्भव्यभिधानदर्शनाद-
स्त्यन्वयोऽभिधानं चेति । अत्रोच्यते तदप्यभ्युपेत्य --**लिङ्ग्येकदेशे**त्यादि ।
लिङ्गिनामग्नीनामेकदेशेऽग्नावेकस्मिन् सम्भवतो धूमस्य लिङ्गस्याग्नेर्गमकत्व-
वत् तु न स्वार्थांशमात्रे सम्भवतीति शब्दादभिधेयप्रतिपत्तिर्न भवितुमर्हति
। **प्रत्यक्षवृक्षे**त्यादि, अयं वृक्षः इति प्रत्यक्षस्यापि मूलादिमतः साक्षादुप-
लभ्यमानस्य संज्ञाव्युत्पत्तिकाले सम्बन्धकरणं नास्ति । शिंशपादिभेदान-
न्त्ये जातिशब्दस्य भेदैरनन्तैः सम्बन्धाशक्यत्वे प्रतिपत्त्यभाववदेकांशेऽपि स्वा-
र्थाख्ये मूलादि-कोटरादि-ह्रस्व-दीर्घ-तनु-विशालादिभेदानन्त्ये सम्बन्धाशक्य-
त्वं क्वचिददृष्टत्वात्, किमङ्ग पुनरत्यन्तपरोक्षस्वर्गादिशब्दस्वार्थांशमात्रेऽपि तद्व-
देवाप्रतिपत्तेः ? नो चेद् धवखदिराद्यनन्तभेदाभिधानं वृक्षशब्दस्य स्याददृष्ट-
स्वार्थांशत्वात् । § 1994

अत्रानिष्टापादनसाधनम् --**अवृक्षव्यवच्छिन्नस्यापि स्वार्थस्य नानुमानाय**
- /ms **नाभिधानाय स्याद् वृक्षशब्दः** न प्रभवतीत्यर्थः । **तदेकदेशवर्तित्वात्,** *स्वार्थस्य
धर्मिणः पक्षस्यानुमेयस्य अभिधेयस्य एकदेशे वर्तितुं शीलमस्य धर्मः साधु
665/mj वा वृत्तिरस्येति तदेकदेशवर्ती । किमुक्तं भवति ? अव्यापिपक्षधर्मत्वात्

* * *

५ अन्व] पृ॰ ६५२ पं॰ २ ॥
८ य] तुलना पृ॰ ४५९-- २ ॥
९ क्वा] **क्वासाबंधय इति**nayacakra-ms-bhā । **त्कासासंबंधय इति** nayacakra-ms-ya ॥
१६ स] **॰संभवव्यभिधान॰** प्र॰ । संभवेऽप्यभिधान॰ ? ॥
१९ स्वा] **स्वार्थासमात्रे** प्र॰ ॥
२५ व] **॰वदेकशेपि**nayacakra-ms-bhā । **॰वदेकस्वोपि** nayacakra-ms-ya । **॰वदेकदेशेऽपि** इत्यपि भवेत् पाठः ॥
२७ *] एतच्चिह्नान्तर्गतः पाठः प्रतिषु द्विर्भूतः ॥
६ अ] तुलना--ननु चान्योऽप्यस्ति असिद्धः । स च द्विधा । प्रतिज्ञार्थैकदेशासिद्धः, यथा अनित्यः शब्दोऽनित्यत्वात् । अव्यापकासिद्धश्चेति, यथा सचेतनास्तरवः स्वापात् । --**न्यायप्रवेशकवृत्ति॰** पृ॰ २३. ।

तदेकदेशवर्तित्वादव्यापिपक्षधर्मत्वात्, अवनस्पतिव्यवच्छिन्नचैतन्यसाधनार्थस्वाप-वत् । अशेषपक्षाव्यापि... ... ...।

स्वापोदाहरणनिरपेक्षादृष्टदेशवर्तित्वाभ्युपगमे त्वतुल्येऽपि वृत्तिप्रसङ्गः । तस्मादेव वानन्त्यादकृतसम्बन्धजातिशब्दभेदवाचित्वेऽप्यदोषः, तदर्थांशेऽदृष्ट-

* * *

समस्तानुमेयावृत्तित्वादित्यर्थः । **अवनस्पतिव्यवच्छिन्नचैतन्यसाधनार्थस्वापवत्**, यथा सचेतना वनस्पतयः इति प्रतिज्ञायां स्वापात् इति हेतुर्धर्मिणो वनस्पतेरेकदेशे शिरीषादौ वर्तमानोऽपि तालादिषु अवर्तमानो न चैतन्यानुमानाय प्रभवति अव्यापित्वात्, तथा वृक्षशब्दोऽपि अवृक्षव्यावृत्त्यर्थो वृक्षस्वार्थांशवृत्तिर्नानुमानाय नाभिधानाय प्रभवति । एतत् पुनः स्वार्थांशवृत्त्यभ्युपगत्याऽनिष्टापादनम् । नैव वृत्तिरस्ति इत्युक्तमेव, वक्ष्यामश्च अनुमानस्यापि स्वार्थाभावम् । § 1995

स्यान्मतम्--साध्याशेषानित्यत्वाव्यापिप्रयत्नानन्तरीयकत्ववदनुमानं स्यात्, वनस्पत्यव्यापिस्वापवदनुमानाभासः स्यात् ? इति सन्देह इति । एतच्च न, **अशेषपक्षाव्यापी**त्यादि, प्रयत्नानन्तरीयकं हि सपक्षं न व्याप्नोति, स्वापस्तु पक्षमेव न व्याप्नोतीति परिहारः । वृक्षशब्दो ह्यशेषमवृक्षाद् व्यवच्छिन्नं वृक्षार्थं नामवृक्षं मनुष्यादिं स्थापनावृक्षं चित्रादिं वास्मन्मतेन साध्यधर्मसामान्येन समानं सपक्षं न तु न व्याप्नोति, नाप्यनुमानेऽत्र दोषः, स्वार्थांशवृत्तित्वादव्यापिपक्षधर्मत्वाद् वनस्पतिचैतन्ये स्वापवदित्युदाहृतम् । तस्माद् ***नानुमानाय स्याद्वृक्षशब्द** इति साधूक्तम् । तत्र कः सम्बन्धः साध्यानित्याव्यापिप्रयत्नानन्तरीयकत्वानुमानत्वप्राप्तेरिति । § 1996 - /ms

स्यान्मतम्--उक्तस्वापदृष्टान्तमनपेक्ष्य वृक्षशब्दो यत्र न दृष्टस्तानपि स्वार्थादन्यान् गमयति दृष्टस्वार्थानुमानसाधर्म्यादंशे दृष्टशक्तित्वादिति । एतच्चायुक्तम्, अपोह्ये वृत्तिप्रसङ्गात् । अत आह --**स्वापोदाहरणनिरपेक्षादृष्टदेश-**

---

प्रतिज्ञार्थस्यैकदेशः सन्नसिद्ध इति विग्रहः, प्रतिज्ञार्थस्यासिद्धत्वात् हेतुरपि तदेकदेशः सन्नसिद्ध इत्यर्थः । अव्यापकासिद्ध इति, इह पक्षधर्मो यो न भवति स एवोच्यतेऽसिद्धः । ततोऽसिद्धस्यैवेह विचार्यमाणत्वात् पक्षस्य इत्यध्याहृत्य समसनीयम् । यथा पक्षस्य धर्मिरूपस्याव्यापकः सन्नसिद्धोऽव्यापकासिद्ध इति । इह पक्षीकृतेषु तरुषु पत्रसङ्कोचलक्षणः स्वाप एकदेशे न सिद्धः । न हि सर्वे रात्रौ सङ्कोचभाजो न्यग्रोधादावदर्शनात् तस्य किन्तु क्वचिदेवेति । **--न्यायप्रवेशकवृत्तिपञ्जिका** पृ° ५७ ॥
९ य] **यथा चेतना**nayacakra-ms-bhā ।
तुलना--पृ° ४२८ पं° १८ ॥
१३ प्र] **न भवति** प्र° ॥
१६ ए] **त एव न** प्र° ॥
१७ म] **मनुष्यादिवत्स्थापनावृक्षं मनुष्यादिस्थापनावृक्षं मनुष्यादिस्थापनावृक्षं चित्रादिं चास्म**°nayacakra-ms-bhā । **मनुष्यादिस्थापनावृक्षं ३ चित्रादि वाऽस्म**° nayacakra-ms-ya ॥
१८ न] **ननु न**nayacakra-ms-ya । अयमपि nayacakra-ms-ya प्रतिपाठो विचारणीयः ॥
१९ *] पृ° ६६४ पं° ७ ॥
२२ म] **°मनुपेक्ष्य** प्र° ॥
३ स्वार्थाद] **°दन्यानु** प्र° ॥

**वर्तित्वाभ्युपगमे तु अतुल्येऽपि वृत्तिप्रसङ्गः**, अतुल्ये साध्यविपक्षे वृत्तिः स्यादवृक्षे घटादौ वृक्षश्रुतेः, अदृष्टदेशवर्तित्वात्, मूलादिमति पलाशादौ स्वार्थांशे वा वृत्तिवत् । **तस्मादेव वानन्त्यादकृतसम्बन्धजातिशब्दभेदवाचित्वेऽप्यदोषः,**
666/mj **तदर्थांशेऽदृष्टत्वात्**, अदृष्टस्वार्थांशत्वादित्यर्थः,

* * *

त्वात्, अपोहस्वार्थवत् । इति कुतोऽन्वयव्यतिरेकौ कुतो वा पक्षधर्मत्वं कुतस्त्रैलक्षण्यं कुतोऽनुमानत्वं शब्दस्य ?

यदि लिङ्गवच्छब्दस्त्रिलक्षणोऽन्यापोहेन स्वार्थं गमयति ततो वृक्षशब्दस्यावृक्षाव्यवच्छिन्नेषु वृत्तिः स्यात्, अनुमानत्वात्, अन्वयप्रदर्शनार्थप्रयुक्तघटादिवत् । न तु वृक्षेषु वृत्तिः स्यात्, पक्षत्वाद् वृक्षाणां सपक्षशब्दार्थावच्छिन्नार्थत्वात् कृतकस्येव नित्येषु । तस्मात् तत्तुल्ये नास्ति वृत्तिः शब्दस्य ।

* * *

**अपोहस्वार्थवदिति** अवृक्षो न भवति इत्यवृक्षापोहस्य स्वार्थो मूलादिमानन्तः कोटरादिभेदेन, तद्वाचित्वे चादोषो दृष्ट एवं भेदवादिनोऽप्यानन्त्येऽपि भेदानामकृतसम्बन्धेऽपि दोषाभावः स्यात् । त्वन्मतस्वार्थेऽपि वा तद्वद् दोष एव स्यादिति कुतस्तुल्यातुल्ययोर्वृत्त्यवृत्तिभ्यामन्वयव्यतिरेकौ ? कुतो वा शब्दस्याभिधेयस्य पक्षस्य धर्मत्वं लिङ्गवल्लिङ्गिनः ? कुतस्त्रैलक्षण्यम् ? **कुतोऽनुमानत्वमिति**, एवं च शब्दलिङ्गगतपक्षापक्षसपक्षविसंवादे साधर्म्याभावाल्लिङ्गशब्दयोः कुतोऽनुमानत्वं शब्दस्य ? इति । § 1997

तद्व्याख्या --**यदि लिङ्गवच्छब्द** इत्यादि, यदि कृतकत्वादिलिङ्गवच्छब्दस्त्रिलक्षणोऽन्यापोहेन **स्वार्थं गमयतीति** मन्यसे **ततो वृक्षशब्दस्यावृक्षाव्य-**

---

४ वा] तानंत्या प्र॰ । **चानन्त्या॰** ? ॥
४ त] **तथादर्थांशे दृष्टत्वात्**nayacakra-ms-ya ॥
१८ चा] **वादोषौ** प्र॰ ॥
१८ च] अत्रेदमवधेयम् । nayacakra-ms-ya प्रतौ **शब्दलिङ्गगतपक्षापक्ष॰** इत्यत्र २३० पत्राङ्कः समाप्यते । तदनन्तरं २३४ तमे पत्रे प्रमादात् २३१ इत्यङ्को लिखितः, २३१ तमे २३२ इत्यङ्कः, २३२ तमे २३३ इत्यङ्कः, २३३ तमे तु २३४ इत्यङ्को लिखितः । nayacakra-ms-ya प्रतौ प्रमादादेवं लिखितेष्वप्यशुद्धाङ्केषु तत्रैव पत्राणां वामकोणे शुद्धाङ्का अप्युपन्यस्ताः । nayacakra-ms-pā प्रतावपि शुद्धाङ्कानुसार्येव पाठः । किन्तु nayacakra-ms-ya प्रतिमवलम्ब्य कैश्चिदन्यलेखकैर्याः प्रतयो लिखितास्तैस्त्वेतदपरिज्ञानादशुद्धाङ्कानुसारेण स्वप्रतयो लिखिता इति २३० पत्रानन्तरम् २३४ तमं पत्रं लिखितमिति तासु भूयान् पाठव्यत्ययः सञ्जातः । अतस्तासु **॰मिष्यिते** इत्यत आरभ्य **अत्रशब्दवाच्यस्याग्निविशिष्टस्य धू॰** इत्यन्तो वक्ष्यमाणः पाठोऽकस्मादत्रापतितः । अतः सर्वथा सोऽसम्बद्धः । अस्माभिस्तु यथा nayacakra-ms-bhā प्रतौ nayacakra-ms-pā प्रतौ च पाठो दृश्यते यथा च nayacakra-ms-ya प्रतौ शुद्धाङ्केषु पत्रेषु पाठो लिखितस्तथैवात्रोपन्यस्त इति स एवोपादेयः ॥
२१ प] **पक्षापक्षविसंवादे**nayacakra-ms-bhā ॥
१ श] **॰शब्दस्यावृक्षादच्छिन्नेषु**nayacakra-ms-bhā । **॰शब्दस्याव्यवच्छिन्नेषु** nayacakra-ms-ya ॥

**वच्छिन्नेषु** वृक्षादभिधेयात् स्वार्थांशाख्यादन्यत्रातुल्ये सपक्षे **वृत्तिः स्यात्** पक्षधर्माद् वृक्षशब्दादन्यस्यावृक्षशब्दादिवाच्ये ततो व्यवच्छिन्ने कृतकत्वानित्यत्वाश्रये घटे इव वृत्तिः स्यादनुमानत्वात् **अन्वयदर्शनार्थप्रयुक्तघटादिवदि**ति गतार्थम् । **न तु वृक्षेषु वृत्तिः स्यात्,** किं कारणम् ? **पक्षत्वाद् वृक्षाणाम्,** पक्ष एव वृक्षशब्दाख्यस्य धर्मस्य धर्मिणो वृक्षार्थाः सपक्षादवच्छिन्नाः, तेष्वेव न तु वृत्तिः स्यात्, अनुमानत्वादेव, त्वदभिमताऽवृक्षान्निवृत्तिमात्रं वृक्षता नान्यस्मिन्नपि साध्यधर्मसामान्येन समानेऽर्थे, अतस्त्वदभिमत्या तुल्यत्वं येषु साध्याद् वृक्षाद् भिन्नेषु अर्थान्तरेषु [तेषु] वृक्षशब्दस्य वृत्तिर्नास्ति पक्षधर्माभिमतस्य । कस्मात् ? **सपक्षशब्दार्थावच्छिन्नार्थत्वात्** । किमिव ? **कृतकस्येव नित्येष्विति** । **तस्मा**दिति वैधर्म्येण, **तस्मात्** सपक्षाभावात् **तत्तुल्ये नास्ति वृत्तिः शब्दस्य,** किं तर्हि ? तत्रैव वृत्तिः । तस्मात् त्रैलक्षण्याभावाद् नानुमानं शब्दः । § 1998 - /ms

667/mj

तत्रैव वृत्तावसपक्षवृत्तिगतदोषापत्तिः । हेत्वपवादनियतव्यवस्थानियमाद् नेति चेत्, न, पक्षसपक्षासपक्षव्यवस्थायां तद्व्यवस्थाभावात् तदसिद्धावसिद्धिः । § 1999

आपत्त्यनभ्युपगमे त्वन्यापोहान्यथात्वं सपक्षावच्छिन्नस्यापि सपक्षत्वात् सपक्षापक्षेपणक्षीणशक्तेश्च पक्षा[स]पक्षयोर्विशेषं गमयितुं नालम्, साध्यनिर्देशवत् । § 2000

किञ्चान्यत्, त्वन्मतवत् **तत्रैव वृत्तावसपक्षवृत्तिगतदोषापत्तिः** । सपक्षादन्यो वा सपक्षाभावो वा स्यादसपक्षः, स च साध्यधर्मसामान्येन समानोऽर्थः सपक्षः पक्षादन्यः पक्षाभावोऽपक्ष ए[व]वा सपक्षः । इह तत्रैव वृक्षार्थे वृत्तत्वात् वृक्षशब्दस्तद्धर्मोऽपि सन् विरुद्धोऽसाधारणानैकान्तिको वा स्यात् ।
§ 2001

**हेत्वपवादे**त्यादि यावद् **नेति चेत्** । स्यान्मतम्--**स हेतुर्विपरीतोऽस्माद् विरुद्धोऽन्यस्त्वनिश्चितः** प्र°दृश्यतां टिपृ° ७४ पं° ४ --टिपृ° ७५ पं°

---

३ त] ततोऽव्यवच्छिन्ने ? ॥
५ घ] घटादिवदि गतार्थंnayacakra-ms-ya । घटादिति गतार्थं nayacakra-ms-bhā ॥
६ व] °वच्छिन्नार्थैस्तेष्वेवnayacakra-ms-bhā ॥
७ भिम] °मतवृ°nayacakra-ms-ya । °मतिवृ° nayacakra-ms-bhā ॥
९ स] समानोर्थतस्त्वदभिमत्या प्र° ॥
१० स] सपक्षधर्मार्थावच्छि°nayacakra-ms-ya ॥
२१ त] तस्यादितिnayacakra-ms-bhā ॥
२१ स] सपक्षः सपक्षादन्यःnayacakra-ms-ya ॥
२ प] पक्षादन्यः पक्षाभावोऽपक्ष एव सपक्षः इत्यपि पाठो भवेत् । पक्षादन्यः पक्षाभावोऽपक्षः, पक्ष एवासपक्षः इत्यपि पाठोऽत्र चिन्त्यः ॥

१ ॥ समु° ३ । २२ इति लक्षणात् त्रिलक्षणस्य हेतोरपवादो हेत्वाभासो विरुद्धोऽसाधारणः साधारणोऽसिद्धो वेति नियमितत्वादस[पक्ष]वृत्तिगतदोषाभावोऽस्य वृक्षशब्दस्येति । एतच्च **न, पक्षसपक्षासपक्षव्यवस्थायां तद्व्यवस्थाभावात्,** हेतु-हेत्वाभासव्यवस्था पक्ष-सपक्षा-ऽसपक्षव्यवस्थायां सिद्धायां सिध्येत् । तदसिद्धावसिद्धिः, हेतु--तदाभासव्यवस्थानियमस्य पक्षादिव्यवस्थाश्रयत्वात् । पक्ष एव तावदव्यस्थित **उभयतोऽप्यभवनपरमार्थत्वात्** इत्युक्तत्वात् । सपक्षस्तु अनन्तरन्यायो नास्ति । असपक्षस्तु स एव पक्षस्त्वन्मताभ्युपगमात् स्यात् सपक्षाभावमात्रत्वात्, इतरथा नैव स्यादुक्तवदेव । तस्माद्धेत्वादिनियमादसपक्षवृत्तिगतदोषापत्तिस्तदवस्थैव । **आपत्त्यनभ्युपगमे त्वित्यादि** । यद्येवमापत्तिदोषं नाभ्युपैषि असपक्षवृत्तिगतं ततो**ऽन्यापोहान्यथात्वं** दोषः, अन्यापोहोऽपि तर्हि अन्याभावात् तदपोहाभावाच्च स्वार्थापोह एव स्यात् । कस्मात् ? **सपक्षावच्छिन्नस्यापि सपक्षत्वात्,** सपक्षादन्यः पक्षस्ततोऽवच्छिन्नोऽसपक्षो वा स एव सपक्षः ततः पक्षादन्यः । पक्ष एव पक्षादन्यः सपक्षादन्यत्वात् । ततोऽन्यापोहः पक्षापोहः स्वार्थापोह इत्यापन्नः । § 2002

किञ्चान्यत्, **सपक्षापक्षेपणक्षीणशक्तेश्च,** सपक्षादन्योऽसपक्षः पक्ष इत्युक्ते सपक्षव्यावृत्तिमात्रे चरितार्थत्वात् पक्षा[स]पक्षयोर्विशेषं गमयितुं नालं पक्ष एवायं नासपक्षः इति । कस्मात् ? **उक्तकारणात्** । किमिव ? **साध्यनिर्देशवत्,** यथा **साध्यनिर्देशः प्रतिज्ञा** न्यायसू° १ । १ । ३३ इत्यक्षपादपक्षलक्षणं सिद्धिनिवृत्तौ चरितार्थत्वात् साध्यविशेषं पक्षमेवासिद्धहेतु-दृष्टान्तेभ्यो व्यतिरिक्तं न गमयितुमलं विपक्षापक्षेपणक्षीणशक्तित्वात् तथा सपक्षादन्योऽसपक्षः इत्यसपक्षात् पक्षं विशेष्य न गमयितुमलं सामान्यमात्रवृत्तेः । त्वया तु विशेषवृत्तेः पक्ष एवासपक्षावच्छिन्नवृत्तिरिष्यते, तत्तु न सिध्यतीत्थं न्यायात् । § 2003

668/mj

तद्विषयपक्षधर्मत्वादेव तुल्ये वृत्तिर्वृक्षार्थ इति चेत्, अननुमानं तर्हि शब्दः पक्ष एव वृत्तत्वाद् द्विलक्षणत्वादसाधारणवत्, [एतुल-

---

४ वृ] °द्वृत्ति° nayacakra-ms-ya ॥
५ हेतु] हेतुहेतुत्वाभास°nayacakra-ms-ya । हेत्वाभास° nayacakra-ms-bhā ॥
७ उ] पृ° ६५५ पं° २ ॥
१० न्या] °न्यायो नास्ति प्र° । °न्यायेन नास्ति ? ॥
१३ ना] नाभ्युपैष्यसपक्ष°nayacakra-ms-bhā । अभ्युपेत्यसपक्ष° nayacakra-ms-ya ॥
१६ स] सपक्षादन्यःnayacakra-ms-bhā ॥
२० न्योऽस] सपक्षः पक्ष इत्युक्ते प्र° ॥
२४ मेवा] °वासिद्धतुदृष्टान्तेभ्योऽव्यति° प्र° । दृश्यतां पृ° ६१४ टि° १ । ननु साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गो यथा[ऽ?]नित्यः शब्दश्चाक्षुषत्वात्, नित्यः शब्दोऽस्पर्शत्वाद् बुद्धिवच्चेति ।— न्यायवार्तिक° १ । १ । ३३ ॥

ना--पृ० ६७० पं० १४ ॥कलक्षणत्वाद्वा अन्वयव्यतिरेकाभावाद् विरुद्धवत्] तद्विषयमात्रार्थत्वादन्यापोहशब्दार्थत्वस्य । व्यतिरेकस्य स्वार्थासम्भवादपि व्यर्थतैव वा, पक्षमात्रस्याप्यलक्षणत्वात्, अव्यक्तश्रुतिवत् । गुणसमुदायो हि वृक्षाख्योऽर्थ इति वृक्षस्य मूलकोटराद्यानन्त्ये वाच्यत्वाभावः संवृतिमात्रत्वात् समुदायस्य तदर्थागतेः । तस्मात् तद्द्वारेणानुमानासम्भव उक्तवत् । तस्मात् तदेकलक्षणतापि नास्ति, कुत एवान्यापोहः § 2004

यच्च वृक्षशब्दो [वृक्षार्थवृत्तिः] तत् कथम् ? गुणसमुदायसंवृत्यर्थत्वात्, सेनाशब्दवत् । § 2005

स्यान्मतम् --**तद्विषय** इत्यादि याव**च्चे**दिति । स एव वृक्षार्थो विषयः पक्षः, तस्य पक्षस्य धर्मो वृक्षशब्दः, तस्मात् तद्विषयपक्षधर्मत्वादेव तुल्ये वृत्तिर्वृक्षार्थे, तच्च दृष्टम्, पक्षस्य धर्मो हेतुः इत्यनयैवोक्त्या गतत्वाद् विशेषार्थगतिरेवेत्यर्थः । § 2006

अत्रोच्यते --**अननुमानं तर्हि शब्दः**, अनुमानाभास इत्यर्थः, **पक्ष एव वृत्तत्वात्**, तच्च कारणत्वेनाह, **द्विलक्षणत्वादसाधारणव**दित्यादि गतार्थं यावत् **तद्विषयमात्रार्थत्वादन्यापोहशब्दार्थत्वस्ये**ति, स एव विषयस्तद्विषयो वृक्षः, तन्मात्रमेव वाच्यम् इत्युक्तमन्यापोहशब्दार्थत्वम् । अतोऽसाधारणविरुद्धते । § 2007

किञ्चान्यत्, **व्यतिरेकस्य स्वार्थासम्भवादपि व्यर्थतैव वा,** अन्यापोहो हि व्यतिरेकमात्रम्, **न भवति न भवति इत्यभवनपरमार्थत्वादुभयतोऽप्यभाव एव वन्ध्यापुत्रवत्, न स्वार्थः कश्चित्**(?') इत्युक्तम् । तस्माद् वृक्षशब्दस्य व्यर्थतैव **पक्षमात्रस्याप्यलक्षणत्वादव्यक्तश्रुतिवत्,** यथा म्लेच्छप्रयुक्तशब्दार्थो व्यावृत्तिमात्रार्थत्वात् स्वार्थमात्रस्याप्यलक्षणाद् व्यर्थो *हिस्तिमिस् इत्यादि तथा वृक्षशब्दः स्यादिति तदर्थाभावप्रदर्शनार्थमाह --**गुणसमुदायो** हीत्यादि । **तस्मात् तद्द्वारेणानुमानासम्भव उक्तव**दिति प्रागुक्तं तन्मतमेव स्मारयति, संवृतिसतः सामान्यसमुदायाख्यस्यासत्त्वाद् विशेषाणामृजु-वक्र-निर्विवरकोटरादीनामवाच्यत्वादिति । **तस्मात् तदेकलक्षणतापि नास्ति, कुत**

४ व्य] तुलना--पृ० ६७१ पं० १ ॥
६ वृ] तुलना--पृ० ६७१ पं० १२ ॥
८ त] तुलना--पृ० ६७१ पं० ४; पृ० ६७३ पं० २ ॥
१२ य] तुलना--पृ० ६७३ पं० ५ ॥
१२ प] तुलना--साध्यधर्मो यतो हेतुः **प्र० समु०** ३ । ७ । दृश्यतां टिपृ० ७४ पं० ३ टि० ३ ॥
१४ ग] **॰गतिरिवेत्यर्थः** प्र० ॥
१५ अ] **अननुमाना॰** प्र० ॥
१५ त] तत्र ? ॥
१९ द्विल] दृश्यतां पृ० ६७० पं० १ ॥
२१ व्य] तुलना--पृ० ६७१ पं० १ ॥
२३ म] पृ० ६५५ पं० २, ३ ॥
२४ *] हिस्तमिश्रnayacakra-ms-ya ॥
२५ गु] तुलना--पृ० ६५२ पं० १४, पृ० ६७१ पं० ३, पृ० ६७३ पं० १ ॥
१ त] तुलना--पृ० ६७१ पं० १४ ॥

एव स्वार्थाद्भिन्नस्याभूतस्य प्रतिपत्तिरन्यस्य यतोऽन्यापोहः सिध्येत्, स तु
- /ms नास्त्यन्यः, तदभावात् तत्प्रतिपत्तिनिश्चयलभ्यप्रतिपत्तिलभ्योऽन्यो नास्ति, त-
त्प्रतिनिश्चयलभ्यो हि तुल्यातुल्यविवावेकात्मेति । § 2008

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।अनागमविकल्पा तु स्वयं
विद्योपवर्तते ॥ वाक्यप० २ । २३५ § 2010

**वृक्ष** (Edtext outside numbered paragraph)

* * *

वृक्षशब्दस्य समुदायार्थवृत्तितैवेति चेत्, न, अभ्युपगतमूलादिसपक्षत्वात् तद-
तुल्यत्वाद् वृक्षार्थस्य तुल्यातुल्यवृत्त्यवृत्त्यादिवचनवैयर्थ्यमेव । संवृत्तिसत्यत्वाच्च
समुदायस्यापि वृक्षवदनर्थत्वात् सेनावनादेरपि व्यर्थत्वमेव ।

रूपादिसत्यत्वप्रतिपादनार्थेऽपि च डित्थाद्युदाहरणे रूपादिपरस्पर-
व्यावृत्त्याऽन्वयाभावे व्यतिरेकस्याभावात् न किञ्चित् सत्यम्, सजातीयास-
जातीयव्यावृत्तस्वरूपत्वादत्यन्तापूर्वत्वादनिर्देश्यस्वलक्षणत्वात् । तस्मादतुल्ये प-
क्ष एव वृत्तिः शब्दस्य । नास्त्येव वार्थे वृत्तिः

एवं सर्वत्रातुल्ये [पक्ष एव वृत्तेः] लिङ्गवच्छब्दोऽनुमानं न भवति प्र-
माणमेव वा न भवति ।

* * *

शब्दस्य समुदायार्थवृत्तितैवेति चेत् ।

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।अनागमविकल्पा तु स्वयं
विद्योपवर्तते ॥ वाक्यप० २ । २३५ § 2012

स्यान्मतम्--वृक्षशब्दः समुदायेनार्थेनार्थवान्, मूलादीनां च समुदायो वृ-
क्ष उच्यते, तस्मात् समुदायार्थवत्त्वाददोष इति । एतच्च **न, अभ्युपग-**
तेत्यादि, अभ्युपगतानां मूलादीनां तदात्मत्वेनैकत्वे स (Edtext outside numbered paragraph)पक्षत्वम्, सपक्षादन्यत्वं पक्षत्वम्,
तेनातुल्य[त्व]मन्यत्वं स (Edtext outside numbered paragraph)पक्षाद् वृक्षार्थस्य, तदतुल्यत्वात् तुल्यातुल्यवृत्त्यवृत्त्यादिवचनवैयर्थ्यमेव
। किञ्चान्यत्, संवृतिसत्यत्वाच्च समुदा (Edtext outside numbered paragraph)यस्यापि वृक्षवदनर्थत्वात् सेनावनादेरपि व्यर्थत्वमेव ।
अ (Edtext outside numbered paragraph)वृक्षो न भवति
वृक्षः इत्यस्य मूलादिस्वरू (Edtext outside numbered paragraph)पसत्तामात्रत्वेनाप्यतुल्य एव वृत्तिः, रूपादिभेदसमुदा (Edtext

२ त्तिर]
°रतस्यnayacakra-ms-bhā ॥
२ त] तत्प्रतिनिश्चय° ? ॥
५ शा] दृश्यतां पृ० २४२ पं० ३, टिपृ०
७९ ॥
६ शा] दृश्यतां पृ० २४२ पं० ३, टिपृ०
७९ ॥

outside numbered paragraph)यसंवृत्यर्थत्वात् । § 2013

एवं सर्वत्रातुल्ये [पक्ष एव वृत्तेः] लिङ्गवच्छब्दोऽनुमानं न भवति प्रमाणमेव वा न भवति ।

* * *

शब्दस्य समुदायार्थवृत्तितैवेति चेत् ।

रूपादिसत्त्वादर्थवान् स्यादिति चेत्, तदपि न, रूपादिसत्यत्वप्रतिपादनार्थेऽपि च डित्थाद्युदाहरणे त्वयैव काण-कुण्टादिगुणसमुदायान्वयाभावोक्त्याऽन्यापोहप्रयासे क्रियमाणे रूपादिपरस्परव्यावृत्त्याऽन्वयाभावे व्यतिरेकस्याभावात् न भवति न भवति इत्यभवनपरमार्थत्वाद् न किञ्चित् सत्यम् । तत्कारणमाह— **सजातीयासजातीयव्यावृत्तस्वरूपत्वा**दिति, तत्सत्यस्यापि पुनः क्षणातिपातित्वात् क्षणे क्षणेऽत्यन्तान्यत्वाद् द्वितीयक्षणे तदभावात् कतमद् रूपम्, अत्यन्तापूर्वत्वाद् निर्बीजत्वादनिर्देश्यस्वलक्षणत्वात् ?

स्वलक्षणमनिर्देश्यं रूपमिन्द्रियगोचरः प्र॰दृश्यतां पृ॰ ६०९ टि॰ ८ पं॰ १४ ॥ समु॰ १ । ११ ?§ 2015

इति ह्युक्तम् । तस्मादतुल्ये पक्षे सपक्षासपक्षव्यावृत्त्या तत्रैव वृत्तिः शब्दस्य । नास्त्येव वार्थे वृत्तिः, अथवा शब्दस्याप्रामाण्यं प्रतिपन्नमेव त्वया, यस्मादेतत् त्वन्मतानुसार्येव ज्ञापकम् --**शास्त्रेषु प्रक्रियाभेदै**रित्यादि श्लोको गतार्थः । § 2016

**एवं सर्वत्रातुल्य** इत्यादि । लिङ्गवच्छब्दोऽनुमानं [न] भवति प्रमाणमेव वा न भवतीत्युक्तस्यार्थस्य यथाप्रतिज्ञं प्रतिपादितस्योपसंहारः प्रोक्तार्थक्रमसङ्ग्रहात्मकः । § 2017
670/mj

शब्दवत्तु लिङ्गे द्वैलक्षण्यमेव स्यात्, [पक्ष एव वृत्तत्वात्, असाधारणवत्] । एकलक्षणत्वमन्वयव्यतिरेकाभावाद् विरुद्धवत् । सपक्षवृत्त्यभावादन्यत्र वृत्त्यसम्भवादन्वयाभावाद् व्यतिरेकव्यापारावकाशाभावादेकलक्षणं वा शब्दवल्लिङ्गमपि । § 2018

सन्निहिततायामप्यननुमानत्वम्, तावन्तरेणाप्यनुमानत्वोपपत्तेः, साध्यधर्मसाधनव्याप्तिवत् । § 2019

---

१५ रूपादिस] ॰सत्वा॰ प्र॰ । ॰सत्यत्वा ? ॥
१९ मुदाया] ॰दायाभावो॰nayacakra-ms-ya ॥
५ वा] चार्थे प्र॰ ॥

८ य] ॰यथाप्रतिज्ञां प्रतिपादित॰nayacakra-ms-ya । यथाप्रतिपादित॰ nayacakra-ms-bhā ॥

## ततस्तयोरकारणत्वादेकलक्षणं शब्दवल्लिङ्गमपि । अनुमानत्वादेकलक्षणत्वाच्च § 2020

लिङ्गमपि शब्दवन्न भवति इत्युपपादयिष्यामीत्यत आह **--शब्दवत्तु लिङ्गे द्वैलक्षण्यमेव स्यादि**त्यादि । प्रथममेव तावदनुमानत्वाच्छब्दवद् द्विलक्षणं लिङ्गमिति साधयति, ततो *****द्विलक्षणत्वादसाधारण** इत्यादि यदुक्तमनन्तरं शब्दे दोषजातं तत् सर्वं लिङ्गस्य शब्दवदित्येवोक्तक्रमेण ज्ञेयम् । § 2021

एकलक्षणत्वमन्वयव्यतिरेकाभावात् पक्षधर्मत्वमात्रं विरुद्धवदिति शब्दे यदुक्तं तद् लिङ्गे स्यात् । तद्व्याख्या **--सपक्षवृत्त्यभावात्,** किमुक्तं भवति ? **अन्यत्र वृत्त्यसम्भवात्,** पक्षादन्यत्रावृत्तेरित्यर्थः । अत एवान्वयाभावाद् व्यतिरेकव्यापारावकाशाभावः, तस्माद् व्यतिरेकव्यापारावकाशाभावादेकलक्षणं वा शब्दवल्लिङ्गमपि, शब्दस्य चैकलक्षणं प्रागुक्तं विरुद्धवदन्वयव्यतिरेकाभावादिति । § 2022

- /ms **सन्निहि[त]तायामप्यननुमानत्व**मर्थप्रतिपत्तावकारणत्वम्, **तावन्तरेणाप्यनुमानत्वोपपत्तेः,** विनापि ताभ्यामर्थगतेस्तयोः सन्निधानमप्यकारणम् । किमिव ? **साध्यधर्मसाधनव्याप्तिवत्,** यथा यत् कृतकं तदनित्यम् इति कृतकत्वस्यानित्यत्वेनाविनाभावेन व्याप्तत्वादविनाभाविनोऽनित्यत्वस्य गतिः कृतकत्वादिष्टा, न तु यदनित्यं तत् कृतकम् इत्यनित्यत्वस्य कृतकत्वेनाविनाभाविना, व्याप्तौ सत्यामप्यगतेः अन्यत्र तदभावे सत्यविवक्षितत्वात् प्रयत्नानन्तरीयकत्वादौ त्वन्मतेन यथा तथेहाप्यन्वयव्यतिरेकौ सन्निहितावप्यकारणम्, शब्दार्थे ताद्धर्म्यमात्रात् तद्गतेः । तस्मादन्वयव्यतिरेकसन्निधानेऽपि अकारणत्वान्नार्थः शब्दार्थगतौ ताभ्याम् । यथानुमानविचारेऽभिहितम्—

> प्रतिषेध्याप्रचारेण यस्माद् व्याप्तिरपेक्ष्यते ।
> *लिङ्गस्य लिङ्गिनि व्याप्तिस्तस्मात् सत्यप्यकारणम् ॥ प्र॰ समु॰ २ । २२ १/२ § 2025

इत्यादिकारिकार्थानुगमः कार्यः । § 2026

---

८ *] पृ॰ ६६८ पं॰ २ ॥
११ दु] पृ॰ ६६८ पं॰ २, ३ ॥
११ स्या] स्याद्व्याख्याnayacakra-ms-ya ॥
१३ ल] ॰लक्षणं शब्द॰nayacakra-ms-ya ॥
१३ प्रा] दृश्यतां पृ॰ ६६८ पं॰ २ ॥
१९ स] संनिहितायाम- प्य॰nayacakra-ms-bhā । संनिहियामप्य॰ nayacakra-ms-ya ॥
२० ग] गतेरत्र तदभावेnayacakra-ms-ya ॥
२२ प्र] प्रतिपन्नान्तरीय॰ प्र॰ ॥
२२ ता] तात्वर्म्य॰nayacakra-ms-bhā । त्वर्म्य॰ nayacakra-ms-ya ॥
२३ प्र] दृश्यतां पृ॰ ४४३-- २, ४५८-- २ ॥
२४ व्याप्तिर] ॰रपेहते प्र॰ । दृश्यतां पृ॰ ४५९-- १ ॥
२ *] लिंगल्य लिं॰nayacakra-ms-bhā । लिंगलिं॰ nayacakra-ms-ya ॥
३ इत्यादिकारिकार्थानु] ॰नुसमः प्र॰ ॥

ततः किम् ? ततस्तयोरकारणत्वात् पक्षधर्मत्वमात्रकारणत्वादेकलक्षणं शब्दवल्लिङ्गमपि, अनुमानत्वादेकलक्षणत्वाच्च विरुद्धोऽपि तेऽनुमानम् इत्यापन्नम् एकलक्षणत्वाच्छब्दवदभिमतत्रिलक्षणलिङ्गवच्च । मा शंकिष्ठा एकलक्षणत्वमसिद्धमित्यत आह स्मारणार्थमुक्तन्यायसिद्धस्यैकलक्षणत्वस्य --**उक्तवच्छब्दवदिति** । 671/mj

* * *

विरुद्धोऽपि तेऽनुमानं स्यात् उक्तवत् । शब्दोऽपि वा नानुमानं विरुद्धवत् । व्यर्थतैव वा, स्वार्थस्याप्यभावोऽनध्यवसायवद् विपर्ययवद्वा । अग्निरत्र धूमादिति स्वार्थानुमाने गुणसमुदायो हि धूमाख्योऽर्थः । बहलकुटिलत्वाद्यानन्त्ये च धूमत्वाभावः । तस्मात् तद्द्वारेणानुमानासम्भव इति तदेकलक्षणतापि नैव, कुत एवान्यापोहः ?

पक्षधर्म्येव वा धर्मस्याधारः प्राप्नोतीति तस्मिन्नेव वृत्तिः स्यात् पक्षधर्ममात्रलक्षणा, न तुल्यान्वयात्मिका । अन्यत्र च वृत्तौ सत्यां व्यतिरेकाकाङ्क्षा स्यात् । सा तु सपक्षाभावान्नास्तीत्यन्वयव्यतिरेकाभावः ।

* * *

**शब्दोऽपि वा नानुमानं विरुद्धवदिति** शब्दस्यानुमानत्वाभावे लिङ्गस्यापि प्राप्तमेवा[न]नुमान[त्वम्], द्वयोरपीत्यभिप्रायः । § 2027

**व्यर्थतैव** वेत्यादि शब्दवद् लिङ्गस्य वैयर्थ्यं प्राग्व्याख्यातविधिना योज्यम् । **स्वार्थस्येति** पक्षधर्ममात्रस्याप्य**भावोऽनध्यवसायवत्** म्लेच्छशब्दज्ञानवत्, ***विपर्यय[व]द्वेति** विरुद्धज्ञानवत् । तद् भावयति --**अग्निरत्र धूमादित्य**स्मिन्नपि **स्वार्थानुमाने गुणसमुदायो हि धूमाख्योऽर्थ** इति, वृक्षस्य मूलादिकोटराद्यानन्त्ये वाच्यत्वाभाववत् **बहल-कुटिलत्वाद्यानन्त्ये च धूमत्वाभावः** ज्ञातसम्बन्धत्वा- भावात् संवृतिमात्रत्वाच्च समुदायस्य तदर्थागतेः । **तस्मात् तद्द्वारेणा[न]नुमान**मित्यलक्षणं लिङ्गं स्वार्थमात्रस्यापीति । **इति तदेकलक्षणतापि नैव,** इत्थमुक्तं स्वार्थमात्रालक्षण[त्वम् । स्वार्थमात्रालक्षण]त्वे **कुत** -/ms

---

३ श]
शब्दलिंग॰nayacakra-ms-bhā । शब्दलिंग॰ nayacakra-ms-ya ॥
५ त्रिल]
॰लक्षलिंगवत्वnayacakra-ms-ya ॥
९ मा] ॰शंष्टो एक॰ प्र॰ ॥
११ त] तुलना पृ॰ ६६८ पं॰ ६ ॥
१७ कु] तुलना--पृ॰ ६६८ पं॰ ७, पृ॰ ६७३ पं॰ २ ॥
१८ प] पक्षधर्म्येव च धर्मस्याधारः इत्यपि भवेत् पाठः ॥
१९ व्य] व्यर्थत्तेत वे॰ प्र॰ ॥
२० भा] भावो... ...
...नध्य॰nayacakra-ms-ya ॥
२१ *] विपर्ययद्वेति
nayacakra-ms-bhā । विपर्ययाद्वेति nayacakra-ms-ya ॥
२२ गुण] तुलना पृ॰ ६५२ पं॰ १४, पृ॰ ६६८ पं॰ ५, पृ॰ ६७३ पं॰ १ ॥
२२ त्वाभा] ॰भाववत्
nayacakra-ms-bhā । ॰भावात्
nayacakra-ms-ya ॥
१ त] तस्मान्न तद्द्वारेणानुमानम् इत्यपि पाठो भवेत् ॥
१ मा]
॰मात्रत्वालक्षण॰nayacakra-ms-ya ॥

**एव** तस्यागृहीतत्वात् स भवति धूमो नाधूमोऽन्यो भवति इतिविषयत्वादुभयप्रतिपत्तेरभावेऽन्याभावा**दन्यापोहः ?** कुतः अग्निरित्यनग्निर्न भवति, धूम इत्यधूमो न भवति इति च ? दूरत एवैतन्न घटामियर्ति । § 2028

**पक्षधर्म्येव** **वेत्यादि** । यथैव वृक्ष एव, न कश्चित् सपक्षः इति प्रसञ्जिता शब्दार्थवृत्तिस्तथा अग्निः इति पक्षो धर्मी धूमस्य धर्मस्याधारः प्राप्नोति अनुमेयत्वादिति सपक्षस्य तुल्यादेरभावः, तदभ्युपगमे पक्षाभावः प्रागुक्तशब्दानुमानविषयवत्, इति तस्मिन्नेव वृत्तिः स्यात् पक्षमात्रे सपक्षाभावात् । सा कीदृशी ? इति चेत्, उच्यते --**पक्षधर्ममात्रलक्षणा** । किमुक्तं भवति ? **न तुल्यान्वयात्मिका,** अन्वयार्थाभावाद् न स्याद् वृत्तिः । **अन्यत्र चे**त्यादि, पक्षधर्मस्य **चान्यत्र** सपक्षे सत्यां वृत्तौ तुल्ये तद्वदतुल्येऽपि वृत्तिः स्यात् इत्याशङ्काया व्यावृत्तये व्यतिरेकाकाङ्क्षा स्यात्, सा तु सपक्षस्यैवाभावान्नास्ति व्यतिरेकाकाङ्क्षा । तस्मादन्वयव्यतिरेकौ न स्तः । § 2029

672/mj

अथ च भवति ज्ञानं ततः प्राप्ते प्रत्यक्षे शाब्दलैङ्गिकेऽपि ज्ञाने, अन्वयव्यतिरेकवियुततथ्यज्ञानत्वात् अविकल्पकत्वात्, सन्निकृष्टार्थवत् । § 2030

अत इदं पूर्वापरासमीक्षयैवोक्तं न प्रमाणान्तरं शाब्दमनुमानादिति । § 2031

नाप्रमाणान्तरं शाब्दमनुमानात् तथाहि तत् ।
कृतकत्वाद्यपि स्वार्थमात्मापोहेन नाशयेत् ॥§ 2033

यदि न प्रमाणान्तरं [शाब्दमनुमानात्, तथाहि--तत् स्वार्थमन्यापोहेन भाषते] कृतकत्वादिवत् ततोऽन्यापोहार्थकृता दोषा न शब्द एवैकस्मिन्, किं तर्हि ? तद्विधदोषजालोपनिपातसम्बन्ध्येव तेऽनुमानमपि । नन्वेवं कृतकत्वाद्यप्यनुमानं स्वार्थमात्मापोहेन नाशयेदेव, अन्यापोहेन... ... ..., अन्यापोहशब्दार्थवत् । § 2034

---

३ त] तस्य गृ॰nayacakra-ms-bhā ॥
४ ना] नाधूमोन्यो न भवतिnayacakra-ms-ya ॥
५ टा] ॰मियत्ति प्र॰ ॥
९ प] पक्षधर्म्येच वेत्यादि प्र॰ । पक्षधर्म्येव चेत्यादि ? ॥
१८ प] पक्षो धर्माnayacakra-ms-bhā । पक्षधर्मो nayacakra-ms-ya ॥
२ त्र] नेत्यादिnayacakra-ms-ya ॥
५ ना] पृ॰ ६७४ ॥

धूम इत्यधूमो न भवतीति निरन्वया प्रतिपत्तिरप्रतिपत्तिरेव, ग्राह्यदर्शनरहितत्वात् स्थाणवस्थाण्वप्रतिपत्तिवत् । § 2035

**अथ च भवति ज्ञानमिति** । विनाप्यन्वयव्यतिरेकाभ्यां भवति ज्ञानम् धूमोऽयम्, अग्निरयम्, वृक्षोऽयम् इति । ततः किम् ? **ततः प्राप्ते प्रत्यक्षे** । कतमे ते प्राप्ते ? **शाब्द-लैङ्गिकेऽपि ज्ञाने** प्रत्यक्षे एव प्राप्नुतः । कस्मात् -/ms ? **अन्वयव्यतिरेकवियुततथ्यज्ञानत्वात् अविकल्पकत्वात् सन्निकृष्टार्थवदिति** व्याख्यातोतार्थसङ्ग्रहः । साधनं स्वार्थपरार्थानुमानयोः शाब्दलैङ्गिकयोः प्रत्यक्षत्वासञ्जनं गतार्थम् । § 2036

किञ्चान्यत्, **अत इदमित्यादि** । स्वप्रतिपाद्यवस्तुधर्मत्वे सति अन्वयव्यतिरेकाभ्यां तस्य गमकत्वात् अनुमानं शाब्दम्, नानुमानादन्यत् प्रमाणम् इत्येतदपि अत एव पूर्वापरासमीक्षयैवोक्तम्, अन्वयव्यतिरेकरहितत्वस्योक्तत्वात् प्रत्यक्षत्वस्योपपादितत्वात् । § 2037

एष तु पाठो घटमान उपलक्ष्यते --**नाप्रमाणान्तरमित्यादि** श्लोकः । **यदि न प्रमाणान्तरमित्यादि** तदेव प्रत्युच्चारयति यावत् **कृतकत्वादिवदिति** । **ततोऽन्यापोहार्थेत्यादि** दोषोपन्यासः । **न शब्द एवैकस्मिन्निति** यथा मयोक्ताः शाब्दप्रत्यक्षप्रसङ्गादिदोषाः अन्यापोहार्थकृताः केवले, किं तर्हि ? **तद्विधदोषजालोपनिपातसम्बन्ध्येव तेऽनुमानमपि** । तत् कथमिति चेत्, तर्हि तदेवं प्रकाश्यते --**नन्वेवं कृतकत्वाद्यप्यनुमानं** स्वार्थं परार्थं वा त्रिलक्षणं लिङ्गं शब्दवदुक्तविधिना **स्वार्थमात्मापोहेन नाशयेदेव,** न न नाशयति, इयं प्रतिज्ञा । हेतुः --**अन्यापोहेनेत्यादि** गतार्थः, दृष्टान्तश्च याव**दन्यापोहशब्दार्थवदिति** साधनम् । § 2038

तस्य भावना साधनम् --**धूम इति अधूमो न भवति इति निरन्वया प्रतिपत्तिरप्रतिपत्तिरेवेति** प्रतिज्ञा । **ग्राह्यदर्शनरहितत्वादिति** हेतुः । **स्थाणवस्थाण्वप्रतिपत्तिवदिति** दृष्टान्तः, यथा 673/mj

* * *

---

७ ग्रा ] ग्राह्यधूमदर्शन॰ इत्यपि पाठोऽत्र भवेत् । ग्राह्याग्राह्यदर्शन॰ ? ॥
१३ स ] ॰संग्रहः स्वार्थपरार्थ॰nayacakra-ms-ya ॥
१५ स्योप ] ॰पयादित्वात्nayacakra-ms-bhā । ॰पयाचितत्वात् nayacakra-ms-ya ॥
१६ ना ] नाप्रमाणमित्यादिnayacakra-ms-ya ॥
१७ श ] शाब्द ? ॥
२२ शा ] शब्दिप्रत्यक्ष॰nayacakra-ms-bhā । शाब्दे प्रत्यक्ष॰ ? ॥
२३ मिति ] चेत् एतर्हिnayacakra-ms-bhā ॥
२३ इ ] इति धूमोnayacakra-ms-bhā ॥
२३ प्र ] प्रतिपत्तिरेवेतिnayacakra-ms-ya ॥
२४ ग्रा ] ग्राह्यामदर्शन॰ प्र॰ । ग्राह्यधूमदर्शन॰ इत्यपि पाठोऽत्र भवेत् । ग्राह्याग्राह्यदर्शन॰ ? ग्राह्यस्य दर्शन॰ ? ॥
१ स्था ] स्थाण्वप्रतिपत्ति॰nayacakra-ms-bhā ॥

गुणसमुदायो हि धूमाख्योऽर्थः [बहलपाण्डुत्वाद्यानन्त्ये च धूमत्वाभावः, तस्मात् तद्द्वारेणानुमानासम्भव इति तदेकलक्षणतापि नैव] कुत एवान्यापोहः, अगृहीतब्राह्मणाब्राह्मणार्थाप्रतिपत्तिवत् । एवं तावद्धूमार्थ एव न निश्चीयते, किं पुनर्यत्रासौ वर्तते ?

यच्च धूमोऽग्निमत्प्रदेशधर्म इति तदपि नन्वल्पबहुताप... ... ... गुणसमुदायोऽसौ, नाग्निदेशौ नाम कौचिदपि स्तः । तज्ज्ञानाभ्यां तु तदर्थाध्यारोपणेन... ... ...इत्यादि यावदन्योपादानमात्मनश्च त्यागः । सपक्षासपक्षयोरप्येवमेव यावदात्मनश्च ।

* * *

स्थाण्वस्थाणुविषयविज्ञानरहितस्य ग्राह्यस्य [द]र्शनाभावादप्रतिपत्तिर्निरन्वयत्वात् तथा धूम इत्यधूमो न भवतीति । § 2039

तद्व्याख्या --**गुणसमुदायो** हीत्यादि पूर्ववदेव भावनीयं पाण्डुत्वाद्यक्षरविशेषं यावत् **कुत एवान्यापोहः, अगृहीतब्राह्मणाब्राह्मणार्थर्थाप्रतिपत्तिव**दिति साधनेनैव भावितमप्रतिपत्तित्वम् । **एवं तावद्धूमार्थ एव न निश्चीयते, किं पुनर्यत्रासौ** धूमो गुणसमुदाये परमार्थेऽग्नौ **वर्तते ?** सोऽपि न निश्चीयतेऽग्निरित्यर्थः । ताभ्यां चाग्निधूमाभ्यां ततोऽन्ययोरनग्न्यधूमयोरपोहौ स्याताम्, तदभावात् कुतस्तावपि ? इति । § 2040

- /ms

**यच्च धूम** इत्यादि धर्मेऽग्नौ सिद्धे तद्वति प्रदेशे च धर्मिण्यग्निमति सिद्धेऽग्निमत्प्रदेशधर्मो धूमः सिध्येत्, तत् सर्वमसिद्धमिति तद्दर्शयति --**तदपि नन्वल्पबहुतापे**त्यादि समासदण्डको यावद् **गुणसमुदायोऽसौ, नाग्निदेशौ नाम कौचिदपि स्त** इति तमेव तदुक्तं न्यायं दर्शयति । § 2041

**तज्ज्ञानाभ्यां त्वि**ति अग्निदेशज्ञानाभ्यां **तदर्थाध्यारोपणेने**त्यादिना तमेवाशेषमतीतं ग्रन्थमतिदिशति **यावदन्योपादानमात्मनश्च त्याग** इति ग्रन्थावधिं च दर्शयति समानप्रचर्चत्वादिति । एवं तावत् पक्षधर्मस्य चानुपपत्तिर्व्याख्याता किं भवदेव भवति उताभवत्, अन्यदनन्यत्, अपोहश्च गुणसमुदायपरमार्थश्च स्वार्थः इत्यादिविकल्पैरात्मापोहात् । **सपक्षासपक्षयोरप्येवमेवे**त्यतिदिशति, तैरेव विकल्पैर्विचार्यमाणयोः सपक्षासपक्षयोरप्यभावात् । सपक्षासपक्षावपि भवन्तावेव भवत उताभवन्तौ अन्यावनन्यावपोह्योहौ गुणसमुदायस्वार्थौ चेत्यादिविकल्पैरात्मापोह इति समानत्वात् । आ कुत आरभ्य

---

१ कु] तुलना--पृ° ६६८ पं° ७, पृ° ६७१ पं° ४ ॥
११ द] पृ° ६५७ इत्यत्र कदाचिद् भवेदतिदिष्टः पाठः ॥
११ ग्रा] **ग्राह्यस्पर्शनाभावा°** प्र° ॥
१२ गु] तुलना--पृ° ६६८ पं° ५ पृ° ६७१ पं° ३ ॥
१७ पा] **पाण्डुरत्वाद्य°**nayacakra-ms-bhā ॥
२७ इत्यादि] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२८ ग्र] **ग्रन्थाविधिं**nayacakra-ms-ya । **ग्रन्थाविविधिं** nayacakra-ms-bhā ॥
१ अन्याव] **°वनन्यापोह्यो** nayacakra-ms-bhā । **°वन्यापोह्यो** nayacakra-ms-ya ॥
१ स्वार्थौ] **वेत्यादि°** इति सम्यग् भाति ॥

ग्रन्थ इति चेत्, उच्यते --**किमन्यत्वे न सामान्य-भेद-पर्यायवाच्यनुत् ? विधिः । ननु** इत्येतस्माद् ग्रन्थावधेरारभ्यातीतो ग्रन्थो योज्यः । कियदवधिरिति चेत्, उच्यते--इदमस्मिन्नन्तरे **यावदात्मनश्चेति** । § 2042 - /ms
674/mj

यथा कृतकत्वादेर्न पक्षस्तेनैव न्यायेन न पक्षोऽन्यापोहवादिनः । एवं नास्य सपक्षो नासपक्षः । § 2043

एवमनुमानमप्रमाणमेव, अतत्तत्प्रत्ययात्मकत्वात्, अलातचक्रधीवत् । शाब्दमपि नाप्रमाणान्तरम्, अप्रमाणमेवानुमानवत् । § 2044

इदमपि चात एव पूर्ववदलक्षणं यत् त्वयोक्तम्-- § 2045

तथाङ्गं येन रूपेण लिङ्गिनं नातिवर्तते ।
तेनैवानेकधर्मापि गमकं नेतरेण तु ॥§ 2047

एतस्य ग्रन्थस्योपरि उपसंहारग्रन्थः प्रागुक्तन्यायप्राण एव --**यथा कृतकत्वादेर्न पक्षः** अनित्यः शब्दः, अग्निरत्र इति वा स्वार्थपरार्थयोस्तेनैव न्यायेन न पक्षोऽग्निविशिष्टो देशोऽनित्यत्वविशिष्टः शब्दो वान्यापोहवादिनः न भवति न भवति इत्यभवनपरमार्थत्वादुभयतोऽप्यभावमात्रत्वात् । तस्मिंश्चासति प्रदेश-शब्दादिधर्मिणि पक्षे कुतस्तस्य पक्षधर्मः ? इति पक्ष-धर्मौ न स्तः । **एवं नास्य सपक्षो नासपक्ष** इति तथा भावितार्थमेव बहुधा । § 2048

**एवमनुमानमप्रमाणमेव, अतत्तत्प्रत्ययात्मकत्वात्, अलातचक्रधी**वदिति । पक्ष-सपक्षाऽसपक्षव्यवस्थानाद्धि त्रैलक्षण्यव्यवस्थातश्चानुमानप्रामाण्यमिष्यते । तदेवं पक्षाद्यतथार्थत्वात् अतस्मिंस्तदिति प्रत्ययोऽनुमानम् इति सुभावितार्थम् । तस्मादतत्तत्प्रत्ययात्मकत्वादनुमानमप्रमाणम्, अलातचक्रे भ्रमदृष्टेः पुंसोऽचक्रे चक्रम् इति प्रत्ययवदिति । तस्मात् साधूक्तम्-- § 2049

नाप्रमाणान्तरं शाब्दमनुमानात् तथाहि तत् ।
कृतकत्वाद्यपि स्वार्थमात्मापोहेन नाशयेत् ॥ इति ।§ 2051

२ किम] पृ॰ ६३७ पं॰ ५--पृ॰ ६३८ पं॰ १ ॥
२ वा] ॰बाध्यतुत् प्र॰ ॥
३ न] न तु प्र॰ ॥
३ द] ॰दवधेरिति प्र॰ ॥
११ इ] इयम॰nayacakra-ms-ya ॥
१४ ग] गमयतीतरैर्न तु ? ॥
१८ अग्निर] ॰रत्रेति रत्रेति वा प्र॰ ॥
१९ वा] वान्योपोह॰ प्र॰ ॥
२० माण] ॰णमेव तत्तत्प्र॰ प्र॰ ॥
२३ स्थाना] ॰नाद्धित्रै॰ प्र॰ ॥
३ मिष्य]
॰मिष्येतेnayacakra-ms-ya । दृश्यतां पृ॰ ६६६ टि॰ २ ॥
४ ना] दृश्यतां पृ॰ ६७२ पं॰ ४ ॥

अप्रमाणादनुमानात् परपरिकल्पितं **शाब्दमपि नाप्रमाणान्तरं** नार्थान्तरम्, **अप्रमाणमेवानुमानव**दिति प्रकृतोपसंहारार्थः । § 2052

- /ms **इदमपि चात एव पूर्ववदलक्षणम् । न प्रमाणान्तरं शाब्दम्**प्र॰ समु॰ ५ । १ इति श्लोको यथा न [ल]क्षणं तथेदमपि लिङ्ग-लिङ्गिनोर्गमक-गम्यनियमार्थकम् । कतमत् तदिति चेत्, उच्यते— **यत् त्वयोक्तम् तथाङ्ग**मित्यादि । लिङ्गमङ्गं धूम-कृतकत्वादि **लिङ्गिनम्** अग्न्यनित्यत्वादिविशिष्टं देश-शब्दादिमर्थं **नातिक्रम्य वर्तते येन रूपेण,** केन च नातिवर्तते ? धूम इत्यधूमो न भवति, कृतक इत्यकृतको न भवति इत्यधूमाकृतकनिवृत्त्यात्मना नातिक्रामति, **तेनैव** च रूपेणान्यतो व्यावृत्त्यात्मकेन गमयति, सत्त्व-द्रव्याद्यनेकधर्मापि संस्तैस्तु व्यभिचारान्न गमयति सत्त्वादिसामान्यधर्मैरिति । एष तावद् गमकनियमः । गम्यनियमोऽपि **गम्यन्त** इत्यादि । लिङ्गिनः अनुबन्धिनः
675/mj सामान्यधर्माः सत्त्व-द्रव्यत्वादयो गम्यन्ते

* * *

गम्यन्ते तेऽपि लिङ्गेन लिङ्गिनो येऽनुबन्धिनः ।
*विशेषा न तु गम्यन्ते तस्यैव व्यभिचारिणः ॥§ 2055

लिङ्गानुबन्धिनस्त्वर्था गमयन्ति न लिङ्गिनम् ।
*व्यभिचाराद् विशेषास्तु प्रतीताः प्रतिपादकाः ॥ प्र॰ १६ १/२
समु॰ २ । १८ १/२§ 2057

किमङ्गम्... ... ...।... ... ...॥... ... ...।... ... ...॥... ... ...।... ... ...॥

यत्तूक्तं न सर्वत्र लिङ्गिनि लिङ्गं सम्भवति यथा अग्निरत्र धूमात् तदिदमप्यप्रेक्ष्यवादितया । यदि लिङ्ग्येव तत् सर्वं कथं तस्य लिङ्गं नास्ति ? अथ नास्ति लिङ्गं कथं तद्वान् ।

अग्निधूमोदाहरणे च अग्निरत्र इति निर्देशादग्निमत्त्वेन देशस्य साध्यत्वादग्निमति प्रदेशे सर्वत्र धूमवत्त्वं लिङ्गमस्त्येव ।

* * *

तेरविनाभावाल्लिङ्गस्य । **विशेषास्तौष-कारीषादयो न गम्यन्ते तस्यैव, व्यभिचारित्वाद्** लिङ्गस्य विशेषैः सहादृष्टत्वात् । एवं लिङ्गस्यान्यव्यावृत्तं सामान्यं

---

१० य] **यथा नक्षणं** प्र॰ । यथाऽलक्षणं ? ॥
११ व्याद्य] तुलना--पृ॰ ६५३ पं॰ ५ ॥
१२ र्मापि] **संस्तैस्त्वाव्यभि॰**nayacakra-ms-ya । **संस्तैस्त्वाद्यभि॰** nayacakra-ms-bhā । संस्तैस्तद्यभि॰ ॥
१४ अ] **अनुबन्धनः सान्यधर्माः** प्र॰ ॥
१७ लिङ्गेन] ये लिङ्गिन्यनुबन्धिनः ? ॥
२० *] दृश्यतां पृ॰ ४५७-- २ ॥
२ *] सांख्यकारिका**युक्तिदीपिका**याम् पृ॰ ४५ उद्धृतमेतत् ॥
३ न] दृश्यतां पृ॰ ६५२ पं॰ १३, पृ॰ ६६२ पं॰ १ ॥

गमकम्, नाव्यावृत्तमन्यतः सत्त्वादि । लिङ्गिनः सामान्यं गम्यं निवृत्तमन-ग्न्यादिभ्योऽग्नित्वं सत्त्वादि चाग्नित्वानुबद्धमव्यभिचारादिति । § 2058

लिङ्गे त्वयं पुनर्विशेषः --**लिङ्गानुबन्धिनस्त्वर्था** इत्यादिश्लोकः । पूर्वोदाहृताः सामान्यधर्माः सत्त्वादयो लिङ्गस्य धूमस्य **न गमयन्ति,** उक्तकारणत्वात् । **विशेषास्तु** केचिद् लिङ्ग्यविनाभाविनः **प्रतीताः प्रतिपादकाः** पाण्डुत्व-बहुल-त्वादय इति । § 2059

एतत् पुनः कथं पूर्ववदलक्षणम् ? इत्यत आह --**किमङ्ग**मित्यादि श्लोकत्रयं क्षेपप्रस्तारेणोपन्यस्तं समस्तस्य त्वदुक्तस्यार्थजातस्य पूर्वोक्तेन न भवति, न भवति इत्यभवनपरमार्थत्वात् खपुष्पवदभावेन गम्यगमकनियमो नास्त्येवेति गतार्थम् । § 2060

किञ्चान्यत्, **यत्तूक्त**मित्यादि पूर्वपक्षप्रत्युच्चारणं याव**द्धूमा**दिति । यत् **स्वार्थस्यांशेऽपि दर्शनाद्** गमकत्वं समर्थयतोक्तं **न सर्वत्र लिङ्गिनि लि-ङ्गं सम्भवति** इति, **तदिदमप्यप्रेक्ष्यवादितया,** न वादिताकौशलमित्यभिप्रायः - /ms
। तद् व्याचष्टे --**यदि लिङ्ग्ये**वेत्यादि । लिङ्गमस्यास्तीति लिङ्गि, **यदि तत् सर्वं लिङ्गि** भस्माङ्गारायोगुडपाकाद्यग्न्याख्यं वस्तु **कथं तस्य लिङ्गं नास्ति** लिङ्गाभावे लिङ्गित्वस्यैवाभावात् ? मत्वर्थीयनिर्देश्यस्य लिङ्गित्वाभ्युपगमादेव लिङ्गास्तित्वमित्यभिप्रायः । **अथ नास्ति लिङ्गं कथं तद्वान् ?** लिङ्गमस्यास्ति इति लिङ्गवान् लिङ्गीत्यर्थः, मत्वर्थीयनिर्देश्यो न भवितुमर्हति सोऽर्थस्त-न्निमित्तत्वाभावादिति स्ववचनविरोधि ते वचनमिति । § 2061

**अग्निधूमोदाहरणे चे**त्यादि । इदं तावत् प्रष्टव्योऽस्ति--अग्निरत्र धूमात् इति इदमः प्रत्यक्षविषयस्य प्रातिपदिकस्य सप्तम्यन्तनिर्देशे अत्र इति प्र-त्यक्षोपलभ्यधूमाधारप्रदेशाभिसम्बन्धो धूमवत्त्वाद्धूमादिति यथा अग्निरत्र इति धूमाधारप्रदेशप्रत्यक्षनिर्देशादग्नेः परोक्षस्य जिज्ञासितत्वात् तद्वत्त्वेन देशस्य 676/mj

* * *

अयोगुडाङ्गाराद्यग्नौ धूमासम्भवादिति चेत्, न, अग्निसत्त्वस्य सिद्धत्वात् त-द्विषयलिङ्गालिङ्गत्वात् तदलिङ्गित्वात् प्रत्यक्षाविषयवत् । तदसिद्धौ पक्षध-र्मादिनिर्मूलत्वात् ।

अत्र इत्यभिधेयस्य लिङ्गित्वादग्निधूमवत्तयोश्च विभागविवक्षायां साध्य-

* * *

साध्यत्वात्, इतरथा अत्र इत्यनर्थको निर्देशः स्यात्, तस्मात् सर्वलोकप्र-

---

८ चा] चाग्निनानुब°nayacakra-ms-ya ॥
९ स्त्व] °स्त्वार्था प्र° ॥
१२ यं] क्षेपप्रश्नारे°nayacakra-ms-bhā । प्रेपप्रस्तारे° nayacakra-ms-ya ॥
१३ भा] भावे गम्य°nayacakra-ms-bhā ॥
१३ स्त्वा] पृ° ६५२ पं° १ ॥
२३ वादिता] नवाधिवाकौशल° प्र° । न वादिवाक्कौशल° ? ॥
२३ र्थीय] °यनिर्देशस्य लिंगि°nayacakra-ms-bhā । °यनिर्देश्य लिंगि° nayacakra-ms-ya ॥
२ धू] समाधार° प्र° ॥

सिद्धेऽग्निमति प्रदेशे साध्ये सर्वत्र धूमवत्त्वं लिङ्गमस्त्येव । न च सर्वाग्निमत्प्रदेशसाध्यत्वम्, तत्र दृष्टान्ताभावादसाधारणतादिदोषप्रसङ्गात् । तस्मादस्ति सर्वत्र लिङ्गिनि लिङ्गमिति । § 2062

**अयोगुडाङ्गाराद्यग्नौ धूमासम्भवादिति चेत्** । स्यान्मतम्--सर्वत्र लिङ्गिनि लिङ्गं नास्ति, अयोग्नौ गुडाग्नावङ्गाराग्नौ च कनज्ज्वलत्स्वपि धूमस्य प्रत्यक्षत एवादर्शनादिति । एतच्च **न, अग्निसत्त्वस्य सिद्धत्वात्** । न हि अग्निरत्र इति प्रतिज्ञायां प्रतीतमग्निसामान्यं साध्यते, अग्निसत्तायाः प्रतीतत्वाल्लोके प्रत्यक्षोपलब्धधूमबलेन अत्र इति देशविशिष्टस्याप्रत्यक्षस्य सिसाधयिषितत्वात् अयोगुडाङ्गारभस्मच्छन्नाद्यग्निष्वपि धूममात्रायाः कस्याश्चिद् दर्शनात् तदविनाभावात् । **तद्विषयलिङ्गालिङ्गत्वा**दिति, अयोगुडाङ्गारादिविषयस्य लिङ्गस्य धूमस्यालिङ्गत्वात् असत्त्वादविवक्षितत्वादप्रत्यक्षत्वाद्वेत्यर्थः । **तदलिङ्गित्वात् प्रत्यक्षविषयव**दिति, ते ह्ययोगुडाङ्गाराद्यग्नयो न लिङ्गिनो लिङ्गाभावात् तेषां तस्यामवस्थायाम्, देशे च तस्मिन्नतिज्ञातत्वात् । लिङ्ग्यते च लिङ्गदर्शनबलेन लिङ्गि वस्तु । न हि ते लिङ्ग्यन्ते लिङ्गादर्शनाद् लिङ्गनिरपेक्षप्रसिद्धेश्च, यथा प्रत्यक्षोपलब्धिकाले । तस्मात् तेषामलिङ्गित्वात् प्रत्यक्षवदलिङ्गं धूमस्तेषाम् । यत्र चासौ लिङ्गं तत्र लिङ्गिनि देशे सिद्धत्वादेव लिङ्गम्, तत्राऽसिद्धेरग्नित्वेन देशे लिङ्ग्येवेति । § 2063

स्यान्मतम्--अयोग्न्यादीनामप्यसिद्धत्वात् पक्षान्तर्गतत्वे सति उच्यते--न सर्वत्र लिङ्गिनि अग्निमति दृश्यते धूम इति । एतदयुक्तम्, **तदसिद्धौ पक्षधर्मादिनिर्मूलत्वात्,** तेषामप्ययोग्न्यादीनां साध्यत्वे धूमः सर्वत्र धर्मिण्यभावादव्यापी पक्षधर्मोऽसिद्धो वनस्पतिचैतन्ये स्वापवत् स्यात् । देशविशेषानपेक्षाग्निसामान्यसाध्यत्वे सपक्षाभावादसाधारणत्वम् अत्र इत्यभिधानवैयर्थ्यं च

---

७ अ] °गुंडागारा°nayacakra-ms-bhā । °गुंडागारा° nayacakra-ms-ya ॥
९ च] च सत्स्वपि धूमस्य इत्यपि पाठोऽत्र स्यात् ॥
१० प्र] ऽप्रतीत° प्र° ॥
११ अ] अयोगुंडागारा°nayacakra-ms-bhā । अयोगुडागारा° nayacakra-ms-ya ॥
१२ अ] वयोगुंडांगारा°nayacakra-ms-bhā । अयोगुंडागारा° nayacakra-ms-ya ॥
१३ त] तदलिंगत्वात् प्र° ॥
१४ योगु] °गुंडांगारा°nayacakra-ms-bhā । °गुडागारा° nayacakra-ms-ya ॥
१५ त] तस्मिन् विज्ञातत्वात् इत्यपि पाठो भवेत् । यदि त्वत्र लिंगेन सम्बन्धो विवक्षितस्तर्हि तस्मिन्नविज्ञातत्वात् इत्यपि पाठो भवेत् ॥
१६ न्ते] लिंगदर्शनाद् प्र° ॥
१६ व] °वदिलिंगnayacakra-ms-bhā । °वतिलिंगं nayacakra-ms-ya ॥
१७ त्र] लिंगिनिर्देशेnayacakra-ms-bhā ॥
२० त] तत्रात्सिद्धे°nayacakra-ms-bhā । तत्रत्सिद्धे° nayacakra-ms-ya ॥
२१ ग्नित्वेन] देशो ? ॥
१ प] पक्षधर्मोऽसिद्धो इत्यपि पाठः स्यात् । तथा चायं प्रतिज्ञार्थैकदेशासिद्धो हेतुर्ज्ञेयः । दृश्यतां पृ° ६६५ टि° १ ॥
३ पेक्षाग्नि] एतच्चिह्नान्तर्गतः **सामान्य°** इत्यत आरभ्य **ऽप्रत्यक्षाग्नि°** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ द्विर्भूतः ॥

स्यात् । तन्मा भूदिति अत्र शब्दवाच्यस्याग्निविशिष्टस्य धूमविशिष्टत्वेन स्वयमात्मनैव आत्मनः साध्यत्वात् साधनत्वाच्च लिङ्गित्वं लिङ्गत्वं चेत्यत आह --**अत्र इत्यभिधेयस्य लिङ्गित्वादग्निमद्धूमवत्तयोश्च विभागविवक्षायां साध्यसाधनधर्मभावादिति** । स एव हि प्रदेशोऽग्निमत्त्वेन साध्योऽप्रत्यक्षाग्निकत्वात्, * 677/mj

* * *

साधनधर्मभावाल्लिङ्गिनि लिङ्गस्यासम्भवो न सम्भवति तयोस्तत्रैव प्रधानोपसर्जनभावेन परस्परं नियतभावत्वात् ।

अग्निमत्प्रदेशपरिचिच्छित्सायाम्... ... ...तत्सम्बन्धिमत्प्रतिपत्तिश्च, यदि च तस्य देशस्य... ... ...तल्लिङ्गतां लभते, तयोरेकवस्तुधर्मत्वात् । नासम्भवन् धूमो लिङ्गतां लभते अपक्षधर्मत्वात् । वनस्पतिचैतन्ये स्वापवद् धूमः सन्देहहेतुः स्यात् पक्षाव्यापिसाधनधर्मत्वात् तत्प्रतिपत्त्याधानाधारधर्मभावात्मकप्रत्ययाव्यवस्थानकारणत्वात् स्थाणुपुरुषभावाभावप्रतिपत्तिवत् ।

* * *

धूमवत्त्वेन साधनं प्रत्यक्षधूमकत्वात् । तस्माद्विशिष्टदेशसाध्यसाधनधर्मभावाद् **लिङ्गिनि** साध्ये **लिङ्गस्य** साधनस्य **असम्भवो न सम्भवति**, सम्भव एव सम्भवतीत्यर्थः । कस्मात् ? **तयोस्तत्रैव प्रधानोपसर्जनभावेन परस्परं नियतभावत्वात्**, अग्निः प्रधानं धूमनिर्वृत्तौ, धूमस्याग्निपरिणामत्वात् तन्निर्वर्त्यत्वात् । धूम उपसर्जनमग्निनिर्वृत्तौ, तत्परिणामत्वाभावादतन्निर्वर्त्यत्वात् । धूमः प्रधानमग्निगतौ, तल्लिङ्गत्वात् तमन्तरेणानिर्वृत्तेरनुपपत्तेरविनाभावात् । उपसर्जनमग्निर्धूमगतौ, अप्रत्यक्षत्वात् तत्कालदेशयोः, अन्यथा भवत्येवेत्युक्तत्वात् तेनान्योन्यप्रधानोपसर्जनभावेन नियमेन भवन्तौ तौ धर्मावग्निधूमाख्यौ देशस्यैकस्य भेदविवक्षायां साध्य-साधने भवतः । § 2064

तद्व्याख्या --**अग्निमत्प्रदेशपरिचिच्छित्सा**यामित्यादि पूर्वं गमकत्वेन लिङ्गस्य धूमस्य प्राधान्यं गम्यस्य लिङ्गिनोऽग्नेर्गुणभावं दर्शयति यावत् **तत्सम्बन्धिमत्प्रतिपत्तिश्चे**ति । ततः परं **यदि च तस्य देशस्ये**त्यादिना निर्वृत्तावग्नेः प्राधान्यं धूमाप्राधान्यं च यावत् **तल्लिङ्गतां लभत** इति । पक्षधर्मत्व-सपक्षानुगति- विपक्षव्यावृत्तिरूपतां व्याख्याय धूमस्य पूर्वेणाग्निसाध्यतां गमयति - /ms । उत्तरेणाग्निविशिष्टदेशसाध्यत्वं व्याख्याय तद्बलनिर्वृत्तधूमप्रत्यक्षतायां त्रैलक्षण्येन गमकत्वं धूमस्य व्याचष्टे । **तयोरेकवस्तुधर्मत्वा**दिति, एतदुक्तं भवति--सम्भवतोरेव लिङ्गलिङ्गिनोः साध्यसाधनभावोऽन्वयप्राधान्यात् नापोह-

---

४ अ ] दृश्यतां पृ॰ ६६६ टि॰ २ ॥
४ योश्च ] ॰श्चाविभाग॰nayacakra-ms-bhā ॥
२२ * ] अविविक्षि॰nayacakra-ms-bhā ॥
२६ अग्निम ] ॰मत्प्रदेशपरिविच्छित्साया॰nayacakra-ms-bhā । ॰मत्प्रक्षेपरिविच्छित्साया॰nayacakra-ms-ya ॥
२८ या ] यावाल्लिंगतांnayacakra-ms-ya ॥
१ त ] दृश्यतां पृ॰ ६८१ ॥
४ प्राधान्या ] ॰न्यान्यापोह॰nayacakra-ms-ya ॥

प्राधान्यात् । न चेदिच्छसि ततोऽनिष्टापादनसाधनम् **--नासम्भवन् धूमो लिङ्गतां लभते, अपक्षधर्मत्वात्** । त्वन्मतादेव सर्वलिङ्गिन्यसम्भवात् सिद्ध-मपक्षधर्मत्वम् । यत्र यत्रापक्षधर्मत्वं तत्र तत्र तल्लिङ्गत्वाभावः, यथा तस्मिन् प्रदेशेऽनग्निधूमादेरधूमायोग्न्यादिकाले वा । किञ्चान्यत्, प्राक्च्छब्दे व्याख्यात-मधुना लिङ्गेऽप्युच्यते **वनस्पतिचैतन्ये स्वापवदित्यादि** । अग्निमानयं देशः धूमवत्त्वात् इत्यस्मिन् साधने त्वदभिमत्या **धूमः सन्देहहेतुः स्यात्, प-क्षाव्यापिसाधनधर्मत्वात्,** तद्व्याख्या **--तत्प्रतिपत्त्याधानेत्यादि** दण्डकहेतुः । तस्य प्रतिपत्तिस्तत्प्रतिपत्तिः, तस्या आधानं तत्प्रतिपत्त्याधानम्, तस्याधारो धर्मः, तस्य भाव आत्मा यस्य स भवति तत्प्रतिपत्त्याधानाधारधर्मभावात्मकः प्रत्ययो यथास्माभिर्व्याख्यातः । तस्य प्रत्ययस्याव्यवस्थाने कारणीभवति स धूमस्त्वन्मतेन पक्षाव्यापिसाधनधर्मत्वात् सर्वत्र लिङ्गिन्यभावादनियतलिङ्गिस-म्भवत्वात् । किमिव ? **स्थाणु-पुरुषभावाभावप्रतिपत्तिवत्** । यथा स्थाणाव-
678/mj भवन् वस्त्रसंयमनादिधर्मः पुरुषे च भवन्

* * *

यत्तु तदन्यत्रायोगुडाङ्गाराग्न्यादावदर्शनं तर्क्यते धूमस्य तत्र दर्शनाभावे लिङ्ग-त्वाव्याख्यानाददोष एव । लिङ्गिन्यदर्शने तु स्याद् दोषः ।

एवं चानेनैव न्यायेन यस्तद्विपरीतः प्रकाश्यप्रकाशकत्वभेदपाठः सोऽप्यसम्यक्--

सम्बन्धो यद्यपि द्विष्ठः सहभाव्यङ्गलिङ्गिनोः ।
आधाराधेयवद्वृत्तिस्तस्य संयोगिवन्न तु ॥*§ 2067

---

४ प्राधान्या] °न्यतनुवेदमिच्छ-सिnayacakra-ms-bhā । °न्यननु चेदिच्छसि nayacakra-ms-ya ॥

१३ प्र] **प्रदेशेरग्नेप्रमादेर्धूमायोग्न्यादि°** प्र° ॥

१८ प्रा] पृ° ६६५ पं° १ ॥

१९ स] ननु द्विगतत्वात् सम्बन्धस्य संयोगिवल्लिङ्गिधर्मणा लिङ्गेन भवितव्यमिति चेत्, नैतदस्ति, **सम्बन्धो यद्यपि द्विष्ठः सहभाव्यङ्गलिङ्गिनोः ।... ...॥--प्र° समु° वृ°** २ । १९ ॥

२ आ] दृश्यतां पृ° ४४९-- २ ॥

८ *] न हि यादृशी व्यापकधर्मे व्याप्तिः तादृश्येव व्याप्यधर्म इति । तथा चाह--सम्बन्धो यद्यपि द्विष्ठः सहभाव्यङ्गलिङ्गिनोः । आधाराधेयवद्वृत्तिस्तस्य संयोगिवन्न तु ॥**--हेतुबिन्दुटीका** पृ° १९ । द्विष्ठत्वात् सम्बन्धस्य कथमुभयत्रैकाकारता व्याप्तेर्न स्यादित्याशङ्क्य यद्यपि इत्यनेन द्विष्ठं सम्बन्धं वास्तवमभ्युपगम्यापि प्रतिविधत्ते । कयोरसावित्याह--अङ्ग इति । अंगेज्ञर्ज्ञानपरस्य ग्रहणादंग्यते लिङ्ग्यते प्रतीयतेऽनेन परोक्षार्थ इति अङ्गं लिङ्गम्, तेन लिङ्गलिङ्गिनोरित्यर्थः । किंभूतः स इत्याह--सहेति । तयोरेव युगपद्भाविप्रकृतत्वात् द्विष्ठत्वाभ्युपगमादेव च सहभावित्वाभ्युपगमोऽप्यायातः । यद्यपिशब्दसान्निध्यात् तथापि इत्यर्थतो द्रष्टव्यम् । तस्य सम्बन्धस्य वृत्तिर्वर्तनम्, तयोर्लिङ्गलिङ्गिनोरित्यर्थात् । कयोरिव सेत्यत आह--आधाराधेययोरिवेति सप्तम्यन्तत्वाद् वतिः । यथा आधाराधेयभावलक्षणः सम्बन्धो द्विष्ठोऽपि नैकरूपया वृत्त्या द्वयोर्वर्तते । यत एवैकसम्बन्धयोगेऽपि नाधारस्याधेयत्वमाधेयस्य वाधारत्वं तथा लिङ्गलिङ्गिनोर्व्याप्तिरपि धूमत्वादावन्यथा अन्यथा च वह्नित्वादौ । अत एव धूमत्वादिरेव व्याप्यतया गमको न प्रमेयत्वादिः । वह्नित्वादिरेव व्याप्यतया गम्यो न तु तार्णत्वादिर्नापि धूमो गम्यो वह्निर्गमक इति । --हेतुबिन्दुटीकालोक° पृ° २६४ ॥

* * *

स्थाणुः इति प्रतिपत्त्याधानाधारभावात्मकप्रत्ययाव्यवस्थानकारणत्वात् द्विविष- - /ms
यसन्देहकृदेकदोभयत्राभावात् किं स्थाणुः स्यात् किं पुरुषः स्यात् तथा वयोनिलयनादिः पुंसि अभवन् स्थाणौ भवन्नुभयविषयं संशयं करोति । यत्र दृष्टस्तत्र निश्चयहेतुरेव स्थाणौ वयोनिलयनं पुरुषे च वस्त्रसंयमनम्, तत्र भवनात् । तथायमपि अग्निरत्र धूमात् इति सन्देहहेतुः स्यात् साध्ये भवनानियमात् । § 2068

**यत्तु तदित्यादि** । यत् त्वयेदं साध्यादन्यत्रायोगुडाङ्गाराग्न्यादावदर्शनं प्रत्यक्षतस्तर्क्यते धूमस्य तत्र सपक्षे लिङ्गस्य सर्वत्र दर्शनाभावे लिङ्गत्वाव्याख्यानाददोष एव । लिङ्गिन्यदर्शने तु स्याद् दोषः, लिङ्गी चात्र प्रदेशः प्रत्यक्षधूमसम्बन्धी, तत्र सर्वत्र दृश्यत एव । तस्माद् भ्रान्तवचनमेतत् **सर्वत्र लिङ्गिन्यदर्शनान्न दृष्टवत् प्रतिपत्तिः** इति । § 2069

लिङ्गे लिङ्गि भवत्येव लिङ्गिन्येवेतरत् पुनः ।नियमस्य विपर्यासे
सम्बन्धो लिङ्गलिङ्गिनोः ॥§ 2071

य (Edtext outside numbered paragraph)स्माल्लिंङ्गे लिङ्गि भवत्येव तस्माद्युक्तं यदग्निवद् धूमो द्रव्यत्वादीनामपि प्रकाशको न तैक्ष्ण्यादीनाम् । यस्माच्च लिङ्गिन्येव लिङ्गं भवति नान्यत्र तस्माद् युक्तं यद् धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिरिति । एवं हि अवधारणवैपरीत्येन सम्बन्धो लिङ्गलिङ्गिनोः ।

ननु च लिङ्गमपि लिङ्गिनि भवत्येव यथा कृतकत्वमनित्यत्वे--

कामं लिङ्गमपि व्यापि लिङ्गिन्यङ्गि तु तत्ततः ।व्यापित्वान्न तु
तत्तस्य गमकं गोविषाणवत् ॥§ 2072

सत्यपि द्विगतत्वे सम्बन्धस्य न कदाचिदाधार आधेयधर्मा भवति नाप्याधेय आधारधर्मा तथा न कदाचिल्लिङ्गं लिङ्गि भवति लिङ्गि वा लिङ्गम् । संयोगी

---

१३ त्रा] °त्रायोगुंडागारा°nayacakra-ms-ya । °त्रायोगुडांगारा° nayacakra-ms-bhā ॥
१४ ना] °नात्वदिष्टवत्nayacakra-ms-ya ॥
३ स] अत्र **सम्बन्धो** इति पाठ एव नयचक्रवृत्तौ सम्मतः । प्रमाणसमुच्चयटीकायां विशालामलवत्यामपि स एव पाठः । हेतुबिन्दुटीकाया **आलोके**ऽप्येवमस्य व्याख्या--**लिङ्गे** साधने सति **लिङ्गी** साध्यं **भवत्येव** । अनेन व्यापकधर्मगता व्याप्तिर्दर्शिता । **इतरल्लिङ्गं पुनर्लिङ्गिन्येव** साध्य एव भवतीति । अनेन व्याप्यधर्मगता व्याप्तिरुक्ता । उक्तेन प्रकारेण **नियमस्य** अवधारणस्य **विपर्यासे** वैपरीत्ये, विपर्यासश्चैकत्रायोगव्यवच्छेदेन विशेषण[म]परत्रान्ययोगव्यवच्छेदेन । तस्मिन् विपर्यासे सति लिङ्गलिङ्गिनोरसस्सम्बन्धो व्याप्तिरित्यर्थः ।--पृ° २६३ । किन्तु मुद्रितायां प्रमाणमीमांसायां हेतुबिन्दुटीकायां च ऽ**सम्बन्धो** इति पाठान्तरं दृश्यत इति ध्येयम् ॥
४ का] दृश्यतां पृ° ४५८-- १ ॥

तु यथैकस्तथा द्वितीय इति न तद्वदिह । § 2073

यद्यपि किञ्चिल्लिङ्गं लिङ्गिनि भवत्येव न तु तत्तेन व्यापित्वेन लिङ्गिनं गमयति । तद्यथा--विषाणित्वेन गोव्यापित्वेऽपि न गोप्रकाशकत्वम्, व्यापित्वात्तु तदेव गोत्वेन प्रकाश्यं भवति, तद्वदिहेति । *किं

तथाहि --**लिङ्गे लिङ्गि भवत्येवे**त्यादि श्लोकः । यस्माच्च लिङ्गे लिङ्गि भवत्येव तस्माद् युक्तं यदग्निवद् धूमो द्रव्यत्वादीनामपि प्रकाशको न तैक्ष्ण्यादीनाम् । यस्माच्च लिङ्गिन्येव लिङ्गं भवति नान्यत्र तस्माद्युक्तं यद् धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिरिति । एवं हि

- /ms अवधारण- वैपरीत्येन सम्बन्धो लिङ्गलिङ्गिनोः । § 2074

ननु च लिङ्गमपि लिङ्गिनि भवत्येव यथा कृतकत्वमनित्यत्वे, **कामं लिङ्गमपि व्यापीत्यादि** । यद्यपि किञ्चिद् लिङ्गं लिङ्गिनि भवत्येव, न तु तत्वेत्तेन व्यापित्वेन लिङ्गिनं गमयति । तद्यथा— *विषाणित्वेन गोव्यापित्वेऽपि न गोप्रकाशकत्वम्, व्यापित्वात्तु तदेव गोत्वेन प्रकाश्यं भवति तद्वदिहेति । § 2075

१680/mj

कारणम् ? § 2076

प्रतिषेध्याप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते ।
लिङ्गस्य लिङ्गिनि व्याप्तिस्तस्मात् सत्यप्यकारणम्
‖§ 2078

कृतकत्वस्य हि अनित्यार्थव्यापित्वेऽपि नित्यत्वप्रतिषेधेन गमकत्वम् । एवमनित्यत्वस्य कृतकार्थव्यापित्वेऽपि अकृतकत्वप्रतिषेधेन गमकत्वम् । तस्माद् यदनित्यार्थेऽपि कृतकत्वव्यापित्वं तेनाकृतकत्वानवकाशादनित्यत्वेन कृतकत्वस्याकृतकत्वप्रतिषेधेन गम्यतैव स्याद् न गमकत्वम् । § 2079

१. कारिकेयं हेतुबिन्दुटीकापृ° १८-प्रमाणमीमांसापृ° ३८ पं° १९दिष्वप्युद्धृता । इदं पुनरत्रावधेयम्--पृ° ४५५-- २, ४५७-- १, ४५७-- २, इत्यादावत्र **लिङ्गी** इति पाठो वक्ष्यते । प्रमाणमीमांसादिष्वपि **लिङ्गी** इति पाठः । अत्र तु **लिङ्गि** इति पाठदर्शनादस्माभिः स एव पाठोऽत्रादृतः ॥

५ त] **तद्वदिहेति** प्रमाणसमुच्चयवृत्तौ न दृश्यते ॥
६ *] **कस्मात्** इति **कुतः** इति वा पाठः प्रमाणसमुच्चयवृत्तेर्भोटभाषानुवादानुसारेणात्र भाति । तथापि **किं कारणम्** इति पाठोऽत्र स्यादिति संभाव्यते । दृश्यतां पृ° ४५८-- २ ॥
७ त्वादीना] °**नामस्ति प्रका**° प्र° ॥
१२ *] **विषाणत्वेन** प्र° ॥
१४ प्र] दृश्यतां पृ° ६७७ पं° २२ । पृ° ४५८-- २ ॥

तुल्यमिति चेत्, न, विषाणित्वे व्यभिचारात् । आह च--
§ 2080

नाशिनः कृतकत्वेन व्याप्तेरकृतकं न तत् ।
*नित्याभावस्तु व्याप्तत्वात् कृतकार्थे न दर्श्यते
॥§ 2082

विषाणित्वेन गौर्व्याप्तोऽविषाणित्वं निवर्तयेत् ।
विषाणित्वेन गौर्व्याप्तोऽगवार्थं न निवर्तयेत् ॥
इति निर्दिष्टं स्वार्थानुमानम् प्र॰PSV१ C. ed. पृ॰ ३१ B--३२ A । PSV२ P. ed. पृ॰ ११३ B--११४ । दृश्यतां पृ॰ ४५५-- २ ॥ समु॰ वृ॰ २ । १९ १/२--२४ १/२ ।§ 2085

किं कारणम् ? **प्रतिषेध्याप्रचारेणे**त्यादि श्लोकः । कृतकत्वस्य हि अनित्यार्थव्यापित्वेऽपि नित्यत्वप्रतिषेधेन गमकत्वम्, तथा अनित्यत्वस्य कृतकार्थव्यापित्वेऽपि अकृतकत्वप्रतिषेधेन गमकत्वम् । तस्माद् यदनित्यार्थेऽपि कृतकत्वव्यापित्वं तेनाकृतकत्वानवकाशादनित्यत्वेन कृतकत्वस्याकृतकत्वप्रतिषेधेन गम्यतैव स्यान्न गमकत्वम् । तुल्यमिति चेत्, न, *विषाणित्वे व्यभिचारादिति । § 2086

**आह चे**त्यादि एतस्यार्थस्य निदर्शने भावनार्थे कारिके **--नाशिनः कृतकत्वेने**त्यादि **विषाणित्वेने**त्यादि च । *पूर्वया कारिकया कृतकत्वेनानित्यत्वं

१५ तु] एतदन्तर्गतः पाठः प्रमाणसमुच्चयवृत्तौ न दृश्यते ॥
१ ना] उक्तमर्थं कारिकाद्वयेन सङ्गृह्णाति **--नाशिनः कृतकत्वेने**त्यादि । अनित्यत्वस्य कृतकत्वेन व्याप्तेः अनित्यत्वात् तदकृतकं न इत्ययमप्रस्तुत एवार्थः प्रतीयते इति क्रियालोपेन निर्दिशति । यः प्रस्तुतो नित्यत्वाभावोऽनित्यत्वं स तेन व्याप्तत्वात् कृतकत्वार्थे न दर्श्यते । इममेवार्थं स्फुटीकर्तुं द्वितीयया कारिकया दृष्टान्तमाह । **अविषाणित्वं निवर्तये**दिति विषाणित्वं गमयेदित्यर्थः । **अगवार्थं न निवर्तये**दिति गवार्थस्य न साधनमित्यर्थः ।(?")
**--विशाला॰** D. ed. B– A । P. ed. A ॥
३ *] नित्याभावो न व्यापित्वात् कृतकार्थे प्रदर्श्यते ? । व्यापित्वात् कृतकार्थे तु नित्याभावो न दर्श्यते ? । अनित्यत्वं त्वभिव्याप्त्या कृतकेऽर्थे न दर्श्यते ? ॥
७ विषाणित्वेन] गौर्व्याप्तोऽविषाणित्वनिवर्तकः ? ॥
२४ गो] गौर्व्याप्तो नागवार्थनिवर्तकः ? ॥
२५ इ] इत्यन्तरश्लोकौ [इति सङ्ग्रहश्लोकौ PSV२] । निर्दिष्टं स्वार्थानुमानम् ।(?') इति प्रमाणसमुच्चयवृत्तौ पाठः ॥
१ ग] **गमकत्वे**nayacakra-ms-bhā । **गमत्वे** nayacakra-ms-ya ॥
१ *] **विषाणत्वे**nayacakra-ms-ya ॥
७ कृ] **कृतकत्वेत्यादि** प्र॰ । दृश्यतां पृ॰ ४५९-- १ ॥
११ *] **पूर्विकया**nayacakra-ms-ya ॥

व्याप्तं न साधनमविवक्षितत्वात् । यस्माद् नित्याभावोऽनित्यत्वं कृतकेऽर्थे न प्रदर्श्यते--यदनित्यं तत् कृतकमिति, किं तर्हि ? नित्याभावेनाकृतकाभावस्य कृतकस्य व्याप्तेर्विवक्षितत्वात् कृतकत्वेऽर्थेऽनित्यत्वं प्रदर्श्यते--यत् कृतकं तदनित्यमपिमिति । द्वितीयया तस्यार्थस्य स्फुटीकरणार्थं विवक्षिताविवक्षितयोर्व्याप्त्योर्व्यभिचाराव्यभिचारनिदर्शनं क्रियते । विषाणित्वाद् गौः इति व्यभिचरति, गोत्वाद् विषाणी इति न व्यभिचरति, अतो न गमयति [गमयति] चेति प्रतिषेध्याप्रचाररूपा व्याप्तिर्गमयति न विधेयप्रचाररूपेति **निर्दिष्टं स्वार्थमनुमानं** गम्यगमकनियमव्यवस्थोक्तेर्मयैव न **वाद**विधिकारादिभिरित्याहोपुरुषिकयोपसंहरत्यान्यापोहिकः । § 2087

- /ms

१681/mj

अत्रोच्यते-- § 2088

तद्भावदर्शनादेव साध्यसाधनधर्मयोः ।
विधेः संयोगिवद्वृत्तिराधाराधेयवन्न तु ॥§ 2090

तद्भावदर्शनं यत् तद् भवति तेनैव भूयते तद्भावस्य दर्शनादेव धूमोऽग्निं गमयति । अतदभावान्वयशब्दार्थतायामधूमस्य पटस्याभावो घटो वन्ध्यापुत्रो वा स्यात्, तथानग्नेः पवनस्याभाव उदकं खपुष्पं वा स्यादसम्बद्धम् । तत्र इत्यभूतान्वयसाधनार्थातथार्थत्वात् । तद्भावदर्शनादेव तु साध्यसाधनधर्मयोस्तथाभूतान्वयदर्शनात् संयोगिनोरिव वृत्तिरिष्टा, न त्वाधाराधेयवदतुल्या, द्वयोरपि लिङ्गिन्याधारे परस्परप्रत्ययाधाराधेयप्रधानोपसर्जनभावेनाविनाभावादेकवस्तुधर्मत्वात् कृतकानित्यत्ववत् । § 2091

अत्रास्माभिरुच्यते --**तद्भावदर्शनादेवे**त्यादि श्लोकस्तद्विपरीतार्थः संयोगिवद् नाधाराधेयवदिति । **तद्भावदर्शनं यत् तदि**त्यादि, स एवाग्निर्धूमो भवति, तेनैवाग्निना धूमेन भूयते तद्देशेन्धनादिसम्बद्धेन, नान्येन अयोग्न्यादिनाऽबादिना वा धूमेन भूयते, न सोऽग्निर्धूमो न भवति भवत्येवेति **तद्भावस्यास्व**-

१. दृश्यतां पृ° ४५९-- २ ॥

११ कृ]
कृतकोर्थnayacakra-ms-bhā ।
कृतकोर्थः nayacakra-ms-ya ॥
१२ क]
°कत्वेऽर्थnayacakra-ms-ya ॥

१४ ना]
°नादिसंबंधेनnayacakra-ms-ya ।
°नातादिसंबंधेन nayacakra-ms-bhā ॥
१४ न] सोग्निधूमो प्र° ॥

निवृत्तिहेतुभावाभूतस्य **दर्शनादेव धूमो** धूमो भवन्नेवाग्निं **गमयति,** न यत्र न दृष्टस्तदवच्छेदेन त्वन्मतेन अधूमो न भवति यतस्तस्मादनग्निर्न भवति इति, तद्भावाग्रहणे दोषदर्शनात् । को दोष इति चेत्, उच्यते **--अतदभावान्वयशब्दार्थतायां** विधिरूपतद्भावान्वयशब्दार्थविपरीतकल्पनायाम् अग्निरत्र धूमात् इत्यस्मिन्ननुमानेऽग्निधूमविपक्षव्यावृत्तिमात्रेष्टावनिष्टम् **अधूमस्य पटस्याभावो घटो वन्ध्यापुत्रो वा स्यात्,** अनिष्टं चैतत् । एष लिङ्गे दोषः । लिङ्गिन्यपि **तथानग्नेः पवनस्याभाव उदकं खपुष्पं वा स्यादसम्बद्धम्,** अनिष्टं चैतदपि । किं कारणम् ? **तत्रेत्यभूतान्वयसाधनार्थातथार्थत्वात्,** यत्र धूमस्तत्राग्निः इत्यन्वयसहितः साधनार्थस्तथार्थः सत्यस्तद्भावात् तत्प्रदेशसम्बन्ध्यग्निधूमभावात्, अन्यथा त्वदिष्टातदभावात्मकस्य अभूतान्वयसाधनार्थस्यातथार्थत्वादनन्तरनिर्दिष्टानिष्टप्राप्तिः । अत एव तर्हि अस्मदिष्ट**तद्भावदर्शनादेव तु साध्यसाधनधर्मयोः** अग्निधूमयो**स्तथाभूतान्वयदर्शन**हेतोः **संयोगिनो-** र- - /ms ङ्गुल्यो**रिव** यथैकस्य तथा द्वितीयस्यापि तद्भावाविशिष्टा **वृत्तिरिष्टा, न त्वाधाराधेयवदतुल्या,** यथा आधार [आधार] एव, आधेय आधेय एव, न विपर्ययेणेति । कस्मात् ? **द्वयोरपि लिङ्गिनि आधारे** देशेन्धनादौ **परस्परप्रत्ययाधाराधेयप्रधानोपसर्जनभावेनाविनाभावात्,** प्राग्व्याख्यातनिर्वर्तकगम्यभावेन **एकवस्तुधर्मत्वात्, कृतकानित्यत्ववत्,** यथा हि प्रागभाव-प्रध्वंसाभावलक्षण एक एव ह्यभूत्वा भवन् भूत्वा चाभवन् कृतकश्चानित्यश्च भावः साध्य-साधनाख्यां लभते तथेह अग्नि-धूमाख्य एक एव 682/mj

* * *

एवं च सपक्षे साध्यसाधनधर्मयोः सहभावदर्शनार्थमन्वयवृत्त्या साधर्म्यदृष्टान्त उच्यते तथाप्रत्यक्षसम्बन्धित्वविवक्षायाः ।

प्रसिद्धस्य धर्मस्य साधनत्वादप्रसिद्धस्य साध्यत्वात् कुतो लिङ्गलिङ्गिव्यतिकरदोषाशङ्का ? धर्मिण एवैकस्य लिङ्गत्वाल्लिङ्गित्वाच्च, अलिङ्गत्वाद् धूमस्यापि अलिङ्गित्वाच्चाग्नेः ।

यत् पुनरिदं सम्बन्धवादिनः प्रति लिङ्गलिङ्ग्यैकरूप्यापादनमेषोऽन्यायः । कोऽयं नियमः सम्बन्धिना द्वितीयसम्बन्धिरूपेण भवितव्यमिति । न हि

---

१६ वृत्तिहेतु ] °तुतावाभूत्यस्यnayacakra-ms-ya । °तुताथाभूत्यस्य nayacakra-ms-bhā । °तुभावभूतस्य इत्यपि पाठोऽत्र भवेत् । °तुतयाभूतस्य ? ॥
१६ नादेव ] **धूमो भवन्नेवाग्निं**nayacakra-ms-bhā ॥
१८ थान ] **°नग्नेरपवनस्य** प्र° ॥
१९ निर्दिष्टा ] **°ष्टानिर्दिष्टप्राप्तिः**nayacakra-ms-ya ॥
५ अ ] अत एतर्हिnayacakra-ms-ya । अयमपि पाठः संगच्छेत ॥
१० य ] **यथैवास्य तथापि द्वितीय°** प्र° ॥
११ त्वाधाराधेय ] एतदन्तर्गतः **°वदतुल्या** इत्यादिः **°धाराधेय°** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१२ आ ] **आधेयोधेय एव**nayacakra-ms-bhā ॥
१४ प्रा ] पृ° ६७७ पं° १० ॥
१४ ग्व्याख्यात ] **निर्वनक°**nayacakra-ms-ya ॥
१४ चा ] **राभवन्** प्र° ॥

चैत्रा-

* * *

साध्य-साधनव्यपदेशं लभते प्रदेशेन्धनादिर्भावः । तस्मात् साध्य-साधनधर्मयोर्लिङ्गिन्याधारे परस्परप्रत्ययाधाराधेयप्रधानोपसर्जनभावेनाविनाभावात् संयोगिवद्वृत्तिः, न तु कुण्डबदरयोराधाराधेययोरिव वृत्तिः, अनुमाने तुल्यकक्षत्वादुभयोरिति । § 2092

**एवं च सपक्षेत्यादि** । एतमेव चास्मदुक्तं न्यायमुपोद्वलयति साधर्म्यदृष्टान्तप्रयोगो लोकप्रसिद्धो न्यायशास्त्रे च । तद्यथा--यत्र धूमस्तत्राग्निः, यत् कृतकं तदनित्यम् इति सपक्षे **साध्य-साधनधर्मयोः** अग्निधूमयोः कृतकानित्यतयोश्च तद्वति देशान्तरे वस्त्वन्तरे वा घटादौ **सहभावदर्शनार्थमन्वयवृत्त्या साधर्म्यदृष्टान्त उच्यते** । कस्मात् ? **तथाप्रत्यक्षसम्बन्धित्वविवक्षाया** हेतोः, प्रसिद्धस्य साधनधर्मत्वेन अप्रसिद्धस्य च साध्यधर्मत्वेन विवक्षितत्वादित्यर्थः । § 2093

- /ms यत् पुनरत्राशङ्क्यते त्वया **--लिङ्गस्य लिङ्गित्वं लिङ्गिनो वा लिङ्गत्वं प्रसक्तम्** इति, एतस्या आशङ्काया अनुपपत्तिरेव, **प्रसिद्धस्य धर्मस्य साधनत्वादप्रसिद्धस्य साध्यत्वात् कुतो लिङ्गलिङ्गिव्यतिकरदोषाशङ्का** लिङ्गैकदोषाशङ्कानुपपत्तिरेवेत्यर्थः । धर्मिण एवैकस्य प्रदेश-शब्दादेर्लिङ्गत्वाद् लिङ्गित्वाच्चालिङ्गैकदेशत्वाद्वा लिङ्गिनः, धर्म्येव लिङ्गं लिङ्गी चेति कृत्वा नाग्निर्लिङ्गी न धूमो लिङ्गं तथा कृतकानित्यत्वे । तस्मा**दलिङ्गत्वाद् धूमस्यापि** नालिङ्गित्वादेव, **अलिङ्गित्वाच्चाग्नेः** नालिङ्गत्वादेव । तस्मात् प्रत्यक्षेतरसम्बन्धित्वविवक्षितत्वाद् न सङ्कीर्येयातां लिङ्गलिङ्गिनौ । अतः प्रसिद्धधर्मलिङ्गद्वारेण अप्रसिद्धधर्मलिङ्गिद्वारेण चैकस्यैव साधनत्वात् साध्यत्वाच्च व्यवस्थितमेव लिङ्गलिङ्गित्वमिति । § 2094

**यत् पुनरिदं सम्बन्धवादिनः प्रतीत्यादि** । यदेतद् लिङ्गलिङ्ग्यैकरूप्यापादनमेषोऽन्यायः, **कोऽयं नियमः--सम्बन्धिना द्वितीयसम्बन्धिरूपेण भवितव्यम् इति ?** नैष नियमोऽस्ति प्रत्यक्षाप्रत्यक्षत्वविशेषदर्शनाद् धूमाग्न्यादिषु । तद्-

---

१७ वृ] **प्रवृत्तिः** प्र° ॥
१७ ए] **एवमेव**nayacakra-ms-bhā ॥
१८ ना] **°नासमन्वय°**nayacakra-ms-ya । **°नामन्वय°** nayacakra-ms-bhā ॥
२० न्धित्व] **°विवक्षया** प्र° । हेतोः इति पञ्चम्यन्तनिर्देशाद् °विवक्षायाः इति पाठो युक्तः प्रतीयते, तुलना पृ° ६९२ पं° २२ ॥
२० सा] **साधर्म्यत्वेन** प्र° ॥
१३ ङ्क्य] तुलना पृ° ६९० पं° २७ पृ° ६७८ पं° १७ ॥
३ वा] **लिंगित्वं** प्र° ॥
६ दोषाश] **°शंकायांति लिंगैक°**nayacakra-ms-bhā । **°शकायां लिंगैक°** nayacakra-ms-ya । **°शङ्का आयाति** । **लिङ्गैक°** ? **°शङ्का** । **लिङ्गिलिङ्गैक्य°** ? ॥
८ श] **°शब्दादेलिंगत्वाद्** nayacakra-ms-ya ॥
१० लिङ्गित्वाच्चा] **°च्चालिङ्गै°**nayacakra-ms-bhā । °च्चालिङ्गैकदोषत्वाद्वा ? । **°च्च लिङ्गैकदेशत्वाद्वा** इत्यपि पाठोऽत्र चिन्त्यः ॥
१२ ध] **धर्म्येस्येव**nayacakra-ms-bhā । **धर्मस्येव** nayacakra-ms-ya ॥
३ अ] **अन्यालिंगित्वा°** प्र° ॥
५ त्य] **प्रत्यक्षतर°** प्र° ॥

र्शयति --**न हि चैत्राश्वे**त्यादि, स्व-स्वाम्यादिसप्तविधसम्बन्धेषु चैत्राश्वादिसम्बन्धिनां प्रत्यक्षाप्रत्यक्षाणां न हि नियमोऽस्ति--एकः प्रत्यक्ष इति द्वितीयेनापि प्रत्यक्षेण 683/mj

* * *

श्वादिसम्बन्धिनामेकः प्रत्यक्ष इति द्वितीयेनापि प्रत्यक्षेण भवितव्यम् । तथा संयोगित्वसाध्यसाधकत्व... ... ...यथैकः संयोगी तथा द्वितीयः ।

अत एव चैवं वक्तुमयुक्तम्--यथाहि सत्यपि द्विगतत्वे सम्बन्धस्य न कदाचिदाधार आधेयधर्मा भवति नाप्याधेय आधारधर्मा तथा न कदाचिल्लिङ्गं लिङ्गि भवति लिङ्गि वा लिङ्गम् । संयोगी तु यथैकस्तथा द्वितीय इति तद्वदिह न भवति प्र॰दृश्यतां पृ॰ ६७९ पं॰ १--३ ॥ समु॰ वृ॰ २ । ११ १/२ इति ।

तन्न घटते । ननु तद्वदेवेह । संयोगिनोरपि न यथैकस्य संयोगस्तथा द्वितीयस्य, संयोगित्वात्, स्थाण्वादिसंयोगवत् ।

यत्तूक्तम्--इदं पुनर्वक्तव्यम्--केन प्रकारेण सम्बन्धादेकस्मात् प्रत्य-

---

६ इ] **स्वार्थालोचनमात्रत्वादव्युत्पन्नस्य तद्गतेः** ।प्र॰ समु॰ २ । ३७, ... ... ...इदं पुनर्वक्तव्यम्--केन प्रकारेण सम्बन्धादेकस्मात् प्रत्यक्षादिति । यदि स्वत्वादिना ततः स्वामिसम्बन्धित्वात् स्वस्य स्वाम्यायत्तत्वादुत्तरकालं स्मृतिरनर्थिका । अथान्यथा, तन्नोक्तम् । लिङ्गग्रहणे तुल्यमिति चेत्, न, तस्य सम्बन्धित्वेनाग्रहणात् । अनुमेयस्थं लिङ्गं धूमादित्वेन पूर्वं गृह्यते पश्चात् तस्याग्न्यादिभिरविनाभावित्वं स्मर्यते । स्वस्वाम्यादिसम्बन्धात् [एकस्मात् PSV१] शेषसिद्धिरनुमानमिति यदुक्तं तदयुक्तम् । कस्मात् ? **अव्युत्पन्नस्य तद्गतेः** । दृष्टः स्वस्वाम्याद्यनभिज्ञानामप्यविनाभावित्वमात्रोपलब्धेर्निश्चयः । न चागृहीतः सम्बन्धोऽनुमानस्य कारणम्, ज्ञानकारणत्वेन तस्य ज्ञापकत्वात् । न चावश्यं सर्वत्र स्वस्वाम्यादीनामव्यभिचारः । तस्मात् सम्बन्धादनुमानं न भवति । उपलब्धसम्बन्धस्य न पुनरव्यभिचारापेक्षानुमितिर्युक्ता तस्यैवाभिव्यञ्जकत्वापत्तेः । अत्र चाग्नितोऽपि धूमानुमितिप्रसङ्गः, सम्बन्धाविशेषात्, अविशिष्टो ह्यग्निधूमयोर्निमित्तनैमित्तिकसम्बन्धः । यस्य त्वविनाभावित्वं सम्बन्धोऽभिमतस्तस्यायमदोषः । इति **प्रमाणसमुच्चयवृत्तौ** द्वितीये स्वार्थानुमानपरिच्छेदे PSV1 C. ed. D. ed. , N. ed. B– A । PSV2 N. ed. B, P. ed. B– A । अस्य **विशालामलवती** व्याख्या--**इदं पुनर्वक्तव्यमि**त्यादि । स्वादिसम्बन्धिनः स्वत्वादिरूपेणैव आहोस्विद् रूपान्तरेण ग्रहणं स्यात् ? यदि स्वत्वादिरूपेण स्वम् इत्येवं गृह्यते तर्हि स्वामिसम्बन्धित्वात् स्वस्य स्वाम्यभावे स्वत्वस्यानुपपत्तेः स्वामिनिश्चयापेक्षत्वात् लिङ्गदर्शनात् पूर्वमेव स्वामिप्रतिपत्त्या भवितव्यम्, अन्यथा इदमस्य स्वम् इत्येवं ग्रहणं न सम्भवति । ततश्चोत्तरकालं सम्बन्धस्मृतिरनर्थिका स्यात्, स्वामिनः प्रागेव सिद्धत्वात् शेषानुपपत्तेः । शेषेण सिद्धेश्चानुमानत्वस्येष्टत्वात् । **अथान्यथा** प्रकारान्तरेण ग्रहणमिष्यते **तन्नोक्त**मिति लक्षणस्यापरिपूर्णत्वम् । **लिङ्गग्रहणे तुल्य**मिति यद्यविनाभावित्वेन लिङ्गं गृह्यते अविनाभावित्वमपि प्रतियोग्यन्तरापेक्षमेवेति लिङ्गग्रहणात् पूर्वमेव साध्यप्रतिपत्त्या भवितव्यम् । तथा च साध्ये प्रतियोगिनि सिद्धे सम्बन्धस्मृतेरानर्थक्यम् । अथान्यथा, तन्नोक्तमिति तुल्यम् । **न, तस्ये**त्यादि । **अनुमेयस्थ**मिति । धर्मिणि धूमादेः सत्त्वमात्रं गृह्यते, न सम्बन्धित्वमिति । कदा तर्हि तद् गृह्यत इत्याह --**पश्चा**दित्यादि । **अव्युत्पन्नस्य तद्गते**रिति स्वस्वामिसम्बन्धाद्यनभिज्ञस्यापि शेषप्रतिपत्तेरित्यर्थः । कथं पुनस्तद्गतिरित्याह

क्षादिति । यदि स्वत्वादिना

* * *

भवितव्यं चेति । **तथा संयोगित्वसाध्यसाधकत्वे**त्यादि गतार्थे यथासङ्ख्यं निदर्शने यावद् **यथैकः संयोगी तथा द्वितीय** इति, **न हि** इति वर्तते, उक्तादेव न्यायादयुक्तमेवं भवितुम् । § 2095

**अत एव चैवं वक्तुमयुक्तं** यथा त्वया यत एवं विस्रब्धमुच्यते गुणदोषविचारनिरपेक्षेण निःशङ्केन । कतम[द]युक्तमिति चेत्, इदं तद् दर्श्यते- - /ms ऽस्माभिः **--यथा हि सत्यपि द्विगतत्वे** इत्यादि यावत् **तद्वदिह न भवतीति** संयोगिनोरतुल्य आधाराधेयोरिव न भवतीति । § 2096

**तन्न घटत** इति । तत्र वयं तन्न घटत इति ब्रूमः । तद्यथा -- **ननु तद्वदेवेह** आधाराधेयवदेव, **संयोगिनोरपि** लिङ्गलिङ्गिनोर्धूमाग्न्योर्न **यथैकस्य** प्रत्यक्षस्य **संयोगस्तथा द्वितीयस्याप्रत्यक्षस्येति** पक्षः, **संयोगित्वादिति**

---

--**दृष्ट** इत्यादि । कार्यकारणभावसम्बन्धे हि यथा कार्यकारणभावसम्बन्धः शास्त्रे विवेचितः तथैवाप्रतीतत्वमत्र विवक्षितम्, न सर्वथेति वेद्यम् । शास्त्रे ह्येकस्यैव भावस्य स्वरूपात्यागात् परिणामेन कार्यकारणभावो व्यवस्थाप्यते । य एवं कार्यकारणभावसम्बन्धं न प्रतिपादयन्ति तेऽप्यन्यथा तं प्रतिपद्य अविनाभावित्वमात्रोपलब्धेरनुमेयं निश्चिन्वन्ति । शास्त्रदृष्टः कार्यकारणभावोऽनुपपन्न एव । यस्मात् कार्यकारणयोरेकत्वे इदं कार्यमिदं कारणमित्येतदेव न स्यात् । अथ तयोर्येनैवं स्वभावातिशयः कश्चिदस्ति, भेदप्रसङ्गः । सत्त्वादिष्वपि स्वभावभेद एव भिन्नप्रकारान्तरकारणम् । ननु कार्यकारणभावत्वे सत्यपि न भेदः, त्रैगुण्यजात्यभेदादेकत्वमिति चेत्; न, कार्यकारणाभ्यां भिन्नस्य त्रैगुण्यस्यानुपलक्षणात् । नित्यस्य क्रमेण युगपद्वा परिणामो न सम्भवति । ततस्तत्कारणवत्कार्यकारणव्यवस्था कुत इत्यलं प्रसङ्गेन । स्यादेतत्--सोऽगृहीत एव तदनुमानस्य कारणमित्याह --**नेत्यादि** सुगमम् । **नावश्य**मित्यादि । ननु स्वस्वरूपसिद्धिः स्वाम्यपेक्षैव, तद्व्यभिचारः कुत इति चेत्, अयमाशयः--अनुमानकाल एव स्वत्वेन गृहीतं लिङ्गं प्रतियोगिनं प्रतिपादयति, आहोस्वित् सम्बन्धग्रहणकाले तथा परिच्छिन्नमनुमानकाले चान्यथोपलभ्यमानमिति । यद्यनुमानकाले इदमस्य स्वम् इत्येवं निश्चितं गमकमिष्यते, अत्रोक्तो दोषः--स्वामिसम्बन्धित्वात् स्वत्वस्य पृ० ६८३ पं० ३१ इत्यादिना । तस्माद् द्वितीयं दर्शनमभ्युपगन्तव्यम्, ततश्च व्यभिचारः, स्वस्वामिनोः परम्परया व्यतिरेकभावसम्भवात् तथाऽनुमातुं न शक्यते--अत्रात्मना तत् पूर्वं स्वत्वेन गृहीतं तस्माद् यत्रेदमस्ति तत्रास्य स्वामी नियमेन भवितुमर्हतीति । भूपतेः सम्पत्त्याद्यभावेऽपि केवलस्य छत्रादेरधिपत्यभावे च दर्शनसम्भवात् । एवमन्यत्रापि यथासम्भवं व्यभिचारः कल्पनीयः । स्यादेतत्--स्वस्वामिभावादिना सर्वः सम्बन्धो न गमकः, किं तर्हि ? यत्राव्यभिचार इत्याह --**उपलब्धसम्बन्धस्य** **ने**त्यादि । यदि यथोक्तसम्बन्धग्रहणेऽपि पुनर्लिङ्गस्य व्यभिचारित्वमव्यभिचारित्वं चापेक्षते ततोऽविनाभावित्वमेवानुमानस्य कारणं भवेत्, न स्वस्वाम्यादिसम्बन्धाः । अविनाभावस्यानुमानकारणत्वे स्यादेतत्, स यथोक्तसम्बन्धे सति भवति, ततो निर्देश इति चेत्, तदयुक्तम्, तस्मिन् सत्यपि तदभावात् **सम्बन्धस्याविशिष्टत्वा**दिति निमित्तनैमित्तिकसम्बन्धो द्विष्ठ इति स यथैकत्र तथा द्वितीयेऽपीति उभयत्र गमकभावः स्यात् ।--VT. P. ed.

A– A ‖

११ भ] **भवितव्यमेवेति** इति **भवितव्यमिति** इति वा पाठः सम्यक् प्रतीयते ‖

१२ विस्र]

**विश्रब्ध॰**nayacakra-ms-ya ‖

१५ घ] **घटवदिति**nayacakra-ms-ya ‖

१७ स्या] **॰स्य प्रत्यक्षस्येविवक्षः** प्र॰ ‖

हेतुः । **स्थाण्वादिसंयोगिवदिति** दृष्टान्तः, यथा हि स्थाणुश्येनयोः संयोगिनोः स्थाणोरकर्मणः श्येनस्य सकर्मणश्च संयोगः सकर्माकर्मकत्वाभ्यामतुल्यः तथा मल्ल-द्व्यङ्गुलाकाशादिसंयोगसंयोगिनां तथा चैत्राश्वादीनामप्यत्यन्तप्रियवाहनादित्वाद्युपलक्षितत्वे प्रत्यक्षाप्रत्यक्षादित्वेनैव विशेष इति । § 2097

**यत्रूणायत्तूक्त**मित्यादि सम्बन्धवादिनमेव प्रति आन्यापोहिकेन पर्यनुयुज्य यदुक्तं दोषजातम्— 684/mj

* * *

ततः स्वामिसम्बन्धित्वात् स्वस्य स्वाम्यायत्तत्वादुत्तरकालं स्मृतिरनर्थिका । अथान्यथा, तन्नोक्तम् । प्र॰ समु॰ वृ॰ २ । ३७ इति ।

अत्र ब्रूमः--न किञ्चिदत्र नोक्तम् । तत्सम्बन्धिप्रत्यक्षात् तथैवानुमानाव-

* * *

यदि स्वस्वामिभावेन प्रत्यक्षः सम्बन्ध्येकस्ततो द्वितीयस्य स्वस्य स्वामिनो वा तेन सहैव गतत्वादन्योन्यापेक्षत्वाच्च सम्बन्धस्य शेषसिद्ध्यर्थं स्मृत्यानर्थक्यम् । दृश्यते च स्मृतिबलेन शेषसिद्धिः । तस्मात् स्वत्वादिप्रत्यक्षत्वादयुक्तमुक्तम् । **अथान्यथा,** अथ मा भूदेष दोष इति स्वस्वामित्वादिभ्योऽन्येन केनचित् प्रकारेण प्रत्यक्षः सम्बन्ध्येकः ततस्तत्सम्बन्धस्मरणादनुमानमिति मन्येथाः **तन्न** भवति तस्य प्रकारस्यानु**क्तत्वात् स्वस्वाम्यादिभावेन सम्बन्धात् इति वचनात् स्व-स्वामिभावेन वा प्रकृति-विकारभावेन वा कार्यकारणभावेन वा** - /ms **निमित्त-नैमित्तिकभावेन वा मात्रा-मात्रिकभावेन वा [सहचरिभावेन वा] वध्य-घातकभावेन वा कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति इति** तेभ्योऽतिरिक्तस्यावचनादेतेषामेव वचनादिति । § 2098

एतस्मिन् परोक्ते दोषजाते परिहारं ब्रूमः **--न किञ्चिदत्र नोक्तम् ।** वक्तव्यमशेषमुक्तमित्यभिप्रायः । 685/mj

* * *

तारणात् । द्वयोस्तु सम्बन्धिनोरुपलब्धे सम्बन्धेऽन्यतरप्रत्यक्षत्वोत्तरकालमुपलब्धचरसम्बन्धानुसारिणी स्मृतिः किमित्यनर्थिका स्यात्, अग्न्यपेक्षधूमवत् ?

---

११ ङ्गुलाकाशा ] °दिसंयोगिसंयोगिनांnayacakra-ms-bhā । °दिसंयोगिनां इत्यपि पाठोऽत्र भवेत् ॥
२१ प ] पर्यनुयुज्यता यदुक्तंnayacakra-ms-bhā ॥
२२ दोष ] दोषयुक्तम्nayacakra-ms-ya ॥
१० प्र ] प्रत्यक्षतःnayacakra-ms-ya ॥
१३ त्वाद ] दन्योपेक्ष°nayacakra-ms-ya । दृश्यतां पृ॰ ६८५ पं॰ २६ ॥
१७ यु ] °दयुक्तम् । अथा°nayacakra-ms-bhā ॥
२१ त ] ततस्तंबंध°nayacakra-ms-bhā । तत् संबंध° nayacakra-ms-ya । ततः सम्बन्ध° इति तत्सम्बन्ध° इति वा पाठोऽप्यत्र समीचीन एव ॥
२२ भ ] वार्षगणतन्त्रभाष्येऽभिहितमिदम् । दृश्यतां पृ॰ ६८५ पं॰ ३, २०, टि॰ १, पृ॰ २४० पं॰ १२ ॥
२३ किञ्चिद ] °दत्त प्र॰ ॥

एवं च कृत्वोक्तम्--कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति । तस्मादिदानीमिन्द्रियप्रत्यक्षादर्थात् पूर्वं समुदाये कृतसम्बन्धमतिरविशिष्टस्यार्थस्यास्तित्वं प्रतिपद्यते, यथा पूर्वं धूमाग्न्योः सम्बन्धं दृष्ट्वा धूमदर्शनादग्नेरस्तित्वं प्रतिपद्यते इति ।

यत्तु तेन प्रत्युच्यते--लिङ्गग्रहणे तुल्यमिति चेत् प्र°दृश्यतां पृ° ६८३ टि° २ ॥ समु° वृ° २ । ३७, तत् तथैव । अहमप्येवं ब्रुवे--लिङ्गिसम्बन्धित्वाल्लिङ्गस्य [लिङ्ग्यपेक्षमेव लिङ्गत्वमिति यदि लिङ्गं गृहीतं तेन सहैव] लिङ्गी गृहीतः । अथान्यथा, तन्नोक्तम् ।

* * *

यस्मादुक्तभेदात् सम्बन्धादनुमानम्, तच्च तत्सम्बन्धिप्रत्यक्षात् **एकस्मात् प्रत्यक्षात्** इति वचनात् तेनैव प्रकारेणानुमानावतारणात् । तद्व्याचष्टे --**द्वयोस्तु सम्बन्धिनो**रित्यादि यावदग्न्यपेक्षधूमवत् । यथा धूमः प्रत्यक्ष एको बहुल-वर्तुलोर्द्ध-पाण्डुत्वादिविशेषेणाग्न्यविनाभाविरूपेण विशिष्टः प्रत्यासन्ने देशेऽग्निं गमयति विशेषाणामविनाभाविनां गमकत्वादश्वस्याभरण-मर्दनप्रियत्वादिविशेषाश्चैत्राविनाभाविनश्चैत्रं सम्बन्धादेव गमयन्ति तथा चैत्रस्य वा विशेषा आरोहक-पोषक-तद्गुणरक्तत्वादयोऽश्वाविनाभाविनोऽश्वं गमयन्त्येवेत्युपलब्धे सम्बन्धेऽन्यतरप्रत्यक्षत्वोत्तरकालं यत्रायं प्रत्यक्षोऽश्वश्चैत्रो वा तत्रेतरोऽपि इति या उपलब्धचरसम्बन्धानुसारिणी स्मृतिः सा किमित्यनर्थिका स्यात् ? नैवानर्थिकेत्यर्थः । किमिव ? **अग्न्यपेक्षधूमवत्** । यथाग्निजन्यात्मलाभो धूमः प्रोक्तविशेषयुक्तोऽग्नेः सम्बन्धस्मरणात् प्रत्यक्षोऽप्रत्यक्षस्य सम्बन्धिनोऽनुमानायालम्, अग्निर्वा प्रत्यक्षोऽप्रत्यक्षस्य तत्परिणामत्वाद् भाविभूतदेशकालसम्बन्धी सम्बन्धिन एवैकस्य प्रत्यक्षत्वात् **सम्बन्धाद्वादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम्** इति वा पाठात् सम्बन्धिन एव प्रत्यक्षस्य समानाधिकरणोक्तेः । § 2099

**एवं च कृत्वोक्तमि**त्यस्यैव लक्षणस्य **भाष्यं** ज्ञापकमाह **कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्ष** इत्यादि सामान्यवाचिना किंवृत्ते[न] याव**दग्नेरस्तित्वं प्रतिपद्यत** इति । **अवशिष्टस्याविशिष्टस्ये**ति वा पाठः, **अवशिष्टस्य** अप्रत्- - /ms

२७ द्य] वार्षगणतन्त्रभाष्येऽभिहितमेतदिति प्रतीयते । दृश्यतां पृ° २४० पं° १२ टिपृ° ७८ पं° १९ । तुलना कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति(?') इति भाष्यवचनात् । --**विशाला°** D. ed. B ॥
२७ ए] दृश्यतां पृ° २४० पं° ११ ॥
२७ व] °वर्तलोद्ध्वपाण्डु°nayacakra-ms-bhā । °वर्तलोच्चपाण्डु° nayacakra-ms-ya ॥
१ स] **संबंधिन्यतर°** प्र° । (?')**सम्बन्धिनीतर°** इत्यपि पाठोऽत्र स्यात् ॥
३ न्धिनोऽनुमा] °**मानावालामग्निर्वा** प्र° ॥
५ रिणा] °**णामद्** nayacakra-ms-ya ॥
८ स] **संबंधादेक°** प्र° ॥
९ म्] दृश्यतां पृ° २४० पं° ११ ॥
१० स] **समाधिक°**nayacakra-ms-bhā ॥
१५ अ] **अविशिष्टस्याविशिष्टस्येति**nayacakra-ms-bhā । **अविशिष्टस्याविशिष्टश्चेति** nayacakra-ms-ya ॥
२५ अ] **अविशिष्टस्य** प्र° ॥

क्षस्य, **अविशिष्टस्य** दर्शनकालतुल्यस्य तद्देशवर्तिनो वेति । शेषो गतार्थो ग्रन्थः । § 2100

त्यादि तत्तुल्यत्वप्रदर्शनं गतार्थं यावद् **लिङ्गी गृहीत** इति । **अ (Edtext outside numbered paragraph)थान्यथा तन्नोक्तमिति**, यथान्यांस्त्वमुद्धट्टयसि स्वाम्यादित्वेनाग्रहणेऽन्यथा ग्रहणं चेत् तन्नोक्तमिति तथा वयमपि त्वामुद्धट्टयामः--अन्यथा लिङ्गे ग्रहणं स्वस्वाम्यादिषु अन्यथेति चेन्मन्यसे तन्नोक्तमिति । § 2101

**यत्तु तेनेत्यादि** । स्वामिसम्बन्धित्वात् स्वस्य स्वाम्यपेक्षमेव स्वत्वमित्युत्तरकालं स्मृतेरानर्थक्यं प्राप्तम् इत्यत्र **तेन** आन्यापोहिकेन **प्रत्युच्यते** परमतमाशङ्क्य **--लिङ्गग्रहणे तुल्यमिति चेत्** । स्यान्मतम्— स्मृतेरानर्थक्यं स्व-स्वाम्यादिसम्बन्धिप्रत्यक्षत्वात् इत्येतल्लिङ्ग-लिङ्गिनोः सम्बन्धाविशेषात् समानं दोषजातमिति । **तत् तथैव,** यद्येष दोषः स्यात् स्वस्वाम्यादित्वे लिङ्गेऽपि स्यादेवायं लिङ्गलिङ्गिनोरन्योन्यापेक्षत्वात् । अथ तत्र नेष्यते, स्वस्वाम्यादिष्वपि मा भूदिति सुष्ठच्यते **--अहमप्येवं ब्रवे,** कस्मात् ?

यत्तूच्यते--न, तस्य सम्बन्धित्वेनाग्रहणात् । लिङ्गमनुमेयस्थं पूर्वं धूमादित्वेन गृह्यते पश्चात्तस्याग्न्यादिभिरविनाभावित्वं स्मर्यते प्र॰ समु॰ वृ॰ २ । ३७ इति । तदिहापि तुल्यम्, अनुमेयस्थं [स्वं पूर्वं गृह्यते पश्चात् तत्रस्थश्चैत्रोऽविनाभावीति स्मर्यते] न तद्देशसम्बन्धीति, देशादिस्थानग्निधूमवत् ।

यत्तूक्तम्--स्वस्वाम्यादिसम्बन्धाच्छेषसिद्धिरनुमानम् इत्ययुक्तमिदम्, कस्मात् ? अव्युत्पन्नस्य तद्गतेः । दृष्टः स्वस्वाम्यादिसम्बन्धानभिज्ञानामपि अविनाभावित्वमात्रोपलब्धेर्निश्चयः, न चागृहीतः सम्बन्धोऽनुमानस्य कारणम्, ज्ञानकारणत्वेन तस्य ज्ञापकत्वात् प्र॰ समु॰ वृ॰ २ । ३७ इति ।

एतदयुक्तम्, अविनाभावित्वस्य सहचरिभावसम्बन्धत्वात् तस्मादपि यो निश्चयः सोऽपि स्वाम्याद्यर्थव्युत्पन्नानामेव भवति तदादित्वात् सहचरिभावस्य ।

* * *

सम्बधित्वाल्लिङ्गस्येलिङ्गि 686/mj

* * *

यत्तूच्यते--न, तस्य सम्बन्धित्वेनाग्रहणात् । लिङ्गमनुमेयस्थं पूर्वं धूमादित्वेन गृह्यते पश्चात्तस्याग्न्यादिभिरविनाभावित्वं स्मर्यते प्र॰ समु॰ वृ॰ २ । ३७

---

३ तु] °तुल्यस्यातद्देश°nayacakra-ms-ya ‖
१३ स्वा] तुलना पृ॰ ६८४ पं॰ १ ‖
१८ ग्र] °ग्रहे तुल्य°nayacakra-ms-ya ‖
१८ त्वा] °त्वादत्र तत्र प्र॰ ‖
२० ब्र] ब्रूते प्र॰ ‖
२८ न] दृश्यतां पृ॰ ६८३ टि॰ २ ‖
२९ स्व] दृश्यतां पृ॰ ६८३ टि॰ २ ‖
३१ न] दृश्यतां पृ॰ ६८३ टि॰ २ ‖

इति । तदिहापि तुल्यम्, अनुमेयस्थं [स्वं पूर्वं गृह्यते पश्चात् तत्रस्थश्चैत्रोऽविनाभावीति स्मर्यते] न तद्देशसम्बन्धीति, देशादिस्थानग्निधूमवत् ।

यत्तूक्तम्--स्वस्वाम्यादिसम्बन्धाच्छेषसिद्धिरनुमानम् इत्ययुक्तमिदम्, कस्मात् ? अव्युत्पन्नस्य तद्गतेः । दृष्टः स्वस्वाम्यादिसम्बन्धानभिज्ञानामपि अविनाभावित्वमात्रोपलब्धेर्निश्चयः, न चागृहीतः सम्बन्धोऽनुमानस्य कारणम्, ज्ञानकारणत्वेन तस्य ज्ञापकत्वात् प्र° समु° वृ° २ । ३७ इति ।

एतदयुक्तम्, अविनाभावित्वस्य सहचरिभावसम्बन्धत्वात् तस्मादपि यो निश्चयः सोऽपि स्वाम्याद्यर्थव्युत्पन्नानामेव भवति तदादित्वात् सहचरिभावस्य ।

* * *

सम्बधित्वाल्लिङ्गस्ये

अत्र **यत्तूच्यते** त्वया--मा मंस्था लिङ्गग्रहणे तुल्यमिति, लिङ्गे त्वस्ति विशेषः **--न, तस्य सम्बन्धि[त्वे]नाग्रहणात्** । न हि लिङ्गं सम्बन्धित्वमात्रेण गृह्यते, किं तर्हि ? **अनुमेयदेशस्थं धूमादित्वेन पूर्वं गृह्यते, पश्चात् तस्याग्न्यादिभिरविनाभावित्वं स्मर्यते, आदि**ग्रहणाच्छब्दस्य कृतकादित्वेन प्राग् ग्रहणं पश्चादनित्यत्वाविनाभावित्वेन स्मर्यत इति सर्वत्र व्यापीति । अत्रोच्यते **--तदिहापि तुल्य**मित्यादि । तत्तुल्यत्वभावनम् **--अनुमेयस्थ**मित्यादि याव**न्न तद्देशसम्बन्धी**ति गतार्थम् । देशादिस्थानग्निधूमवदिति दृष्टान्तः, यथाऽग्निरभवन् धूमो देशादिस्थः प्राग् गृह्यते प्रत्यक्षोऽप्रत्यक्षाग्नेरन्यत्वात् ततः पश्चात् अग्निरिह इत्यनुस्मर्यते तथाश्वः स्वं चैत्रादन्यो गृह्यते ग्रामादिस्थः ततः पश्चात् तत्रस्थश्चैत्रोऽविनाभावीति स्मर्यते इहाग्निः इति धूमसम्बन्ध्यग्निस्मरणवदिति तुल्यमिति । § 2102

**यत्तूक्त**मित्यादि । **स्वस्वाम्यादिसम्बन्धेन सम्बन्धाच्छेषसिद्धिरनुमानम्** इत्यस्य लक्षणस्य दोषस्तेनोक्तः, अत्र ब्रूमः **--अयुक्तमिदम् । कस्मात् ? अव्युत्पन्नस्य तद्गते**रित्यादि तन्मतप्रत्युच्चारणं याव**ज्ज्ञापकत्वा**दिति, स्वस्वाम्यादिसम्बन्धानभिज्ञा अपि धूमादग्निमविनाभावसम्बन्धाद् निश्चिन्वन्तो दृश्यन्ते, स च मा भूदगृहीतसम्बन्धत्वान्निश्चयः, ज्ञानकारणत्वं हि ज्ञापकस्य हेतोर्लिङ्गादेर्गृहीतस्वरूपस्य नोत्पादकबीजादिवदिति । § 2103

**एतदयुक्तम्** । कस्मात् ? **अविनाभावित्वस्य सहचरिभावसम्बन्धत्वात्,** न विना भवति सह भवति सह चरतीत्येकोऽर्थः । तस्मादपि सहचरिभावस-

---

३१ स्व ] दृश्यतां पृ° ६८३ टि° २ ॥
२ ग्र ] ग्रहणतुल्य° प्र° ॥
१४ भाव ] °भावम्nayacakra-ms-ya ॥
१४ प्र ] प्रत्यक्षे प्रत्यक्षाग्ने° प्र° ॥
१६ स ] °संबंधात्वान्नि°nayacakra-ms-bhā ॥
१७ बीजा ] °जादितिnayacakra-ms-bhā ॥
२४ स ] सहचारि° प्र° । दृश्यतां पृ° ६९६ पं° १६ ॥
२५ च ] चरतीत्यर्थःnayacakra-ms-ya ॥
२९ च ] °चरितभावसंबंधत्वाद्nayacakra-ms-ya ॥

म्बन्धाद् यो निश्चयः सोऽपि स्वस्वाम्याद्यर्थव्युत्पन्नानामेव भवति, नाव्युत्पन्नानाम् । कस्मात् ? **तदादित्वात्** स्वस्वाम्यादित्वात् **सहचरिभावस्य,** सप्तानां सम्बन्धाना 687/mj

* * *

अविनाभावगम्यातिरिक्तार्थविषयत्वेन तु सहचरिभावादृतेऽपि स्वस्वाम्यादिसम्बन्धव्युत्पन्नबुद्धेरेवानुमानं दृश्यते । तद्यथा--काकभवन-तत्स्वीकृततत्प्रसवकाल-तत्कृतनीडप्रसवा-ऽण्डभेद-विवृद्धि-पोषण-काकशावकसहचरण-काकीपृष्ठगमनानि न कारणानि कोकिलत्वज्ञानस्य व्यापित्वाविनाभाविरूपोपेततायामपि स्वस्वामिभावप्रत्यवगमनादारात् । पश्चात् तत्प्रतिपत्तिः स्वस्वामिसम्बन्धेन भवति कोकिलशावकोऽयम्, तत्स्वभाषासमन्वितत्वात्, इतरकोकिलवत् ।

एवं स्वस्वाम्यादिसम्बन्धा अनुमापकाः, अनुमेयव्यक्तिकाले तथोपलभ्यमानत्वात्, तत्प्रसिद्धलिङ्गवत् ।

* * *

मन्यतमत्वात् तस्यापि । **स च** सहचरिभावोऽविनाभावो **गृह्यमाण एवानुमानकारणं** ज्ञातज्ञानोत्पत्तिहेतुत्वाज्ज्ञापकस्य । तस्मादविनाभावसम्बन्धज्ञानं स्वस्वाम्याद्यन्तःपाति व्युत्पन्नानामेव नाव्युत्पन्नानामिति । § 2104

अथवा विनाप्यविनाभावित्वेन स्वस्वाम्यादिव्युत्पत्तेरनुमेत्यत आह -- **अविनाभावगम्यातिरिक्ता- र्थविषयत्वेन त्वि**त्यादि याव**दितरकोकिलव**दिति साधनेनोपसंहारोऽस्यार्थस्य । - /ms

व्यापको यः स एवांशो ग्राह्यो व्याप्यस्तु सूचकः ।
अनेकधर्मणोर्नान्यो ग्राह्य-ग्राहकधर्मणोः ॥ § 2107

इत्येतल्लक्षणवैपरीत्येन सहचरिभावादृतेऽपि स्वस्वाम्यादिसम्बन्धव्युत्पन्नबुद्धेरेवानुमानं दृश्यते, **तद्यथा— काकभवने**त्यादि समासदण्डको व्यापक-व्याप्यत्वाभ्यां सहचरिभावप्रदर्शने यावद् **व्यापित्वाविनाभाविरूपोपेततायामपी**ति, काकाज्जन्म व्यापीति तत्स्वीकृतस्तत्प्रसवकालः, तत्कृतनीडप्रसवः, अण्डभेदः, विवृद्धिः, काकेन काक्या च पोषणं वात्सल्येन, तस्य द्वितीयेन काकशावकेन सहचरणम्, काक्याः पृष्ठतो गमनमित्येतानि पूर्वपूर्वकाणि व्यापकानि साध्यानि उत्तरोत्तराणि व्याप्यानि साधकाभिमतानि अविनाभावसम्बन्धीनि धर्मान्तराणि सन्त्यपि न कारणानि तानि कोकिलत्वज्ञानस्य । यावदा कुतः ? **स्वस्वामिभावप्रत्यवगमनादारात्,** यावत् स्वस्वामिसम्बन्धं नावैति तावत् कोकिलत्वाप्रतिपत्तेः पश्चात् तत्प्रतिपत्तिः स्व-

५ स्व ] स्वाम्यादित्वात् सहचरितभावस्यnayacakra-ms-ya ॥ १४ एवानुमा ] °नुमाकारण°nayacakra-ms-ya ॥ २८ ज्ञा ] ज्ञातं ज्ञानोत्प°nayacakra-ms-ya ॥ ३० स्वा ] °स्वामित्वादि°nayacakra-ms-ya ॥

९ का ] काकाजन्मध्यापीति प्र° । काकजन्मव्यापीनि ? ॥ ९ प्र ] °प्रसवोर्णभेदः प्र° ॥ १३ स्वामिभा ] °भावा प्रत्य° प्र° ॥

स्वामिसम्बन्धेन भवति, तत उत्तरकालं कोकिलशावकोऽयं न काकशावकः इति परित्यज्याविनाभाव्यभिमतांस्तांस्तान् धर्मान् व्यापकान् व्याप्यांश्च तथा लोके प्रतिपत्तारो वक्तारश्च भवन्ति, **कोकिलशावकोऽयम्** इत्यनुमिमते च **तत्स्वभाषासमन्वितत्वात्** विशिष्टमाधुर्योपेतस्वरत्वात्, **इतरकोकिलवदिति** । **आदि**ग्रहणात् स्वस्वामिसम्बन्धवत् प्रकृतिविकारादिशेषसम्बन्धा अपि व्युत्पन्नानामेवानुमानकारणम् । § 2108

अतोऽत्र साधनं संहतार्थमुच्यते --**एवं स्वस्वाम्यादिसम्बन्धा अनुमापका** इत्थमुक्तन्यायेन । कस्मात् ? **अनुमेयव्यक्तिकाले तथोपलभ्यमानत्वात्,** अनुमेयस्य अग्नि-कोकिला-ऽनित्यत्वादेरर्थस्य व्यक्तिकाले तेनैव स्वस्वाम्यादिप्रकारेणोपलभ्यमानत्वात् । किमिव ? **तत्प्रसिद्धलिङ्गवत्,** तेन तेन प्रकारेण प्रसिद्धं धूमादिलिङ्गं तस्य सम्बन्धिनोऽनुमापकमग्न्यादेः स्वस्वाम्यादिप्रकारेणैव सम्बन्धात्, यथा कोकिलशावकस्तज्जातीयानुकारिस्वरेणैवेति । § 2109

- /ms

688/mj

यदप्युक्तम्--न चावश्यं सर्वत्र स्वस्वाम्यादीनामव्यभिचारः । तस्मात् सम्बन्धादनुमानं न भवति । उपलब्धसम्बन्धस्य न पुनरव्यभिचारापेक्षानुमितिर्युक्ता, तस्यैवाभिव्यञ्जकत्वापत्तेः प्र॰ समु॰ वृ॰ २ । ३७ इति, एतदपि न, शेषसिद्धिवचनेनाव्यभिचारिविधिवृत्तेरुपात्तत्वात् । इदं हि सर्वाभासव्युदासेन सम्बन्धानुमानविधानम् । प्रत्यक्षेतरसम्बन्ध्यनुमेयः प्रत्यक्षाद्यविरुद्धार्थः पक्षो धर्मधर्मिसमुदायाख्यो निर्दोष एवानेन शेषसिद्धिवचनेन गृहीतः । यथायोगं सम्बन्धादेकस्मात् प्रत्यक्षात् प्रत्यक्षवद्वा प्रसिद्धात् पक्षधर्मसम्बन्धाच्छेषेण शेषस्य सिद्धिरिति शेषसिद्धिवचनादेव विरुद्धासाधारणधर्मव्युदासः । सिद्धिवचनं साधारणानैकान्तिकवदसिद्धिर्मा भूदिति । असिद्धिर्व्यभिचारिधर्मता । तद्यथा--स्वाम्यसम्प्रदानचैत्रान्यथात्वम्... ... ...अतिप्रियसुतवत् । § 2110

किञ्चान्यत् --**यदप्युक्त**मित्यादि सम्बन्धवादिनो दोषवचनम् । **न चावश्य**मित्यादि प्रत्युच्चारणम् । एतदुक्तं भवति--स्वस्वाम्यादिसम्बन्धादनुमानं न भवति, तदव्यभिचारार्थं विशेषाकाङ्क्षित्वात् उपलब्धेऽपि स्वे स्वामिनि वाश्वे चैत्रे वा स्वतन्त्रजीवदत्यन्तावियोगा आकाङ्क्ष्यन्ते । तेषामेवाव्यभिचारात् त एव

१५ आ] पृ॰ ६८७ पं॰ १ ॥
१० न] तुलना--पृ॰ ६८३ टि॰ २ ॥
११ नु] ॰मानं भवति प्र॰ ॥
१२ न्ता] ॰न्तावियोषा प्र॰ ॥

हि अनुमापकाः स्युः, न स्वस्वाम्यादिसम्बन्धः सत्यपि तस्मिन्ननुमानाभावाद् व्यभिचारीति । एवं प्रत्युच्चार्य आचार्य उत्तरमाह **--एतदपि न, शेषसिद्धिवचनेनाव्यभिचारिविधिवृत्तेरुपात्तत्वात्, सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम्** इत्यस्मिन् स्वार्थानुमानलक्षणे शेषसिद्धिवचनेन विधिवृत्तिरव्यभिचारिण्येवोपात्ता, तस्मादयमदोषः । § 2111

तत् कथमिति भाव्यत इति चेत्, उच्यते **--इदं हि सर्वाभासव्युदासेनेत्यादि** । पक्ष-हेतु-दृष्टान्ताभासाः सर्वे तेनैव सम्बन्धानुमानविधानेनापोद्यन्ते । प्रत्यक्षादितरः शेषः सम्बन्धी स्वादिना विशिष्यमाणो देशादिः सम्बन्ध्यतेऽनुमेयोऽनुमानाभासभेदैः प्रत्यक्षादिविरोधैरविरुद्धार्थः पक्षो धर्मधर्मिसमुदायाख्य उत्तरत्रावय[व]विधाने परार्थानुमाने वीताख्ये साध्याभिधानम् इति वक्ष्यमाणो निर्दोष एवानेन शेषसिद्धिवचनेन गृहीतः । यथायोगं स्व-स्वामि-निमित्त-नैमित्तिकादिषु तेन तेन सम्बन्धेन सम्बन्धात् प्रत्यक्षादिति प्रत्यक्षस्य धर्मादुपलब्धात् प्रसिद्धादिति यावत् । तत्रैको यः प्रत्यक्षः स पक्षधर्मः, शेषोऽनुमेयः । कृतकत्वाद्यप्रत्यक्षत्वादव्यापीति चेत्, अत आह **--प्रत्यक्षवद्वा,** प्रत्यक्षवत् प्रत्यक्षः प्रसिद्धः, तस्मात् प्रसिद्धत्वात्, सम्बन्धी पक्षधर्मोऽश्वः स्वम्, तस्य पक्षधर्मस्य सम्बन्धात् प्रागुपलब्धादनुस्मर्यमाणाच्छेषेण शेषस्य चैत्रस्य सिद्धिरिति शेषसिद्धिवचनादेव विरुद्धासाधारणधर्मव्युदासः यत्र यत्राश्वः स्वं तत्र तत्र देवदत्तः स्वामी इत्यत्यन्तावियोगादिसम्बन्धान्वययुक्तत्वात् सपक्षवृत्तिः विपक्ष एव वा वृत्तिः कुतः ? शेषाय शेषे वा प्रत्यक्षादेकस्मात् सम्बन्धात् इत्येतावता सिद्धे सिद्धिवचनं सिद्धिरेव नासिद्धिः इत्यवधारणात् प्रमेयत्वाद् नित्यः इति साधारणानैकान्तिकवदसिद्धिर्मा भूदिति । का पुनरसिद्धिः ? **व्यभिचारिधर्मता** । **तद्यथा--स्वाम्यसम्प्रदानेत्यादि** याव**दतिप्रियसुतव**दिति । **चैत्रान्यथात्वं** मरणम् । शेषं गतार्थम् । § 2112 - /ms

689/mj

इत्थं हि व्यभिचारिविशेषव्यावर्तनेनापि स एव सम्बन्धी गमकः सम्बन्ध्यन्तरस्य । न ते विशेषा गमकाः, तत्समर्थनार्थत्वात् । न हि वात्याप्रसङ्गव्यावर्तनेन धूमस्य व्यञ्जकत्वम्, बह्वेव ह्यवात्या घटपटादि ; न हि तद्वदग्नेरगमको धूमः । न वाऽवात्येति व्यञ्जकमग्नेर्भवितुमर्हति घटपटाद्यधूमतायामसत्यामेव । धूमतैव हि सती वह्नितायाः व्यञ्जिका । § 2113

१२ भिचा] °चारविधि° प्र° ॥
१४ तेऽनु] °नुमेवोनुमा°nayacakra-ms-bhā । °नुमेवानुमा nayacakra-ms-ya ॥
१७ त] °तत्रैवकायः प्र° ॥
२३ प्र] (?')अथवा केचिदेवमाहुः --एकस्मात् प्रत्यक्षादिति प्रत्यक्षशब्दोऽयं प्रसिद्धत्वस्योपलक्षणम् । प्रत्यक्षात् प्रसिद्धादित्यर्थः ततः प्रत्यक्षात् प्रत्यक्षकार्याद्यान्यस्यापि ज्ञानस्य विषये लिङ्गे प्रत्यक्षव्यपदेशो भवति ।(?") --विशालामलवती P. ed. B– A ॥
१ द] °दितिप्रि° प्र° ॥

तथा कृतकत्वस्य [अनित्यत्वोपलब्धसम्बन्धस्य] अनित्यत्वाव्यभिचारप्रदर्शनार्थं व्यतिरेक उच्यते । यद्युपलब्धसम्बन्धस्य पुनरव्यभिचारित्वापेक्षमनुमानं न स्यात् व्यतिरेकवचनं न स्यात् । नापि च तस्यैवाभिव्यञ्जकत्वमापद्यते । तथा च कृतकत्वस्यानित्यत्वोपलब्धसम्बन्धस्य पुनरव्यभिचारापेक्षानुमितिर्युक्ता, तस्यैवा- § 2114

**इत्थं हि व्यभिचारिविशेषव्यावर्तनेनापि स एव सम्बन्धी** धूमादिरश्वादिर्वा **गमकः सम्बन्ध्यन्तरस्य** प्रत्यक्षोऽनुमेयस्य द्वितीयस्यैकः सम्बन्ध्यन्तरस्य सम्बन्धित्वात् । **न ते विशेषा** व्यावर्त्या विधेया वा **गमकाः तत्समर्थनार्थत्वात्,** यथा **न हि वात्याप्रसङ्गव्यावर्तनेन धूमस्य व्यञ्जकत्वम्,** अधूमो वात्या, सा न भवत्ययं धूमः इति वात्यायां निवर्तितायामग्नेर्न गमको भवति धूमो यत्रादृष्टस्तद्य- वच्छेदमात्रेण, यस्माद् बह्वेवावात्या घट-पटादि, न हि तद्वदग्नेरगमको धूमः, न वाऽवात्येति व्यञ्जकं गमक**मग्नेर्भवितुमर्हति घटपटाद्यधूमतायामसत्यामेव,** किं तर्हि ? **धूमतैव हि सती वह्नितायाः** सम्बन्धिनी सम्बन्धिन्या **व्यञ्जिकेति** । तस्माच्छेषसिद्धिवचनाद् निरस्तव्यभिचाराशङ्कं सम्बन्धानुमानमेव प्रत्यक्षैकत्वविशेषणाभ्यां निरस्तसर्वाभासम् । § 2115

- /ms

किञ्चान्यत्, त्वयापीष्यत एतत् प्रसिद्धसम्बन्ध्येवाप्रसिद्धसम्बन्धिनो गमकं यदव्यभिचारस्वरूपावधारणार्थं व्यभिचारिविशेषव्यावृत्तिरुच्यत इत्यतस्तत्प्रदर्शनार्थमाह --**तथा कृतकत्वस्ये**त्यादि । अनित्यः शब्दः, कृतकत्वात्, यद् यत् कृतकं तत् तदनित्यम् इति सम्बन्धविधिना प्रदर्श्य कृतकत्वस्यैवानित्यत्वाव्यभिचारप्रदर्शनार्थं यदनित्यं न भवति तत् कृतकमपि न भवति(?') इति व्यतिरेक उच्यते, यद्युपलब्धसम्बन्धस्य पुनरव्यभिचारित्वापेक्षमनुमानं न स्यात् व्यतिरेकवचनं पक्षधर्मसाध्यानुगतिसमर्थनार्थं न स्यात्, तत्तु दृष्टम्, नापि च तस्यैव व्यतिरेकवचनस्याभिव्यञ्जकत्वमापद्यते । **तथा च** एवं च कृत्वास्मन्न्यायेन कृतकत्वस्यानित्यत्वोपलब्धसम्बन्धस्य व्यतिरेके पुनरव्यभिचारापेक्षाऽनुमितिर्युक्ता, न तु त्वन्मतेन । किं कारणम् ? **तस्यैवाभिव्यञ्जकत्वव्यक्तेः,** योऽसौ पुनरव्यभिचारः स तस्यैव पक्षधर्मस्याभिव्य-

---

१ धू] **धूमस्याव्यञ्जकत्वम्** प्र° ॥
१ र्तिता] **°तायामग्नेर्नाम-**
**को**nayacakra-ms-bhā । **°तामग्नेर्नामको** nayacakra-ms-ya ॥
१४ ब] **वह्वेवावात्या°** nayacakra-ms-ya । **बह्वेवात्या°** nayacakra-ms-bhā ॥
१५ घ] विधिरूपा धूमतैव गमिका, न त्वधूमताया अभावः । न हि वात्यादिगता या अधूमता तदभाववत्त्वेऽपि घटपटादेरग्निगमकत्वं दृश्यते । तस्माद् धूमतैव गमिकेत्याशयः । यदि त्वयमाशयो न रोचते तदा न वाऽवात्येति व्यञ्जकं गमकमग्नेर्भवितुमर्हति घटपटादि धूमतायामसत्यामेव इति पाठः कल्पनीयः ॥
१६ न्धिन्या] **°न्यां व्यञ्जकेति** nayacakra-ms-bhā । **°न्यां व्यञ्जकतेति** nayacakra-ms-ya ॥
१७ ग] **गमकमुदव्यभि°** प्र° ॥
१८ ना] **°नार्थना स्यात्** प्र° ॥

ञ्जकत्वमभिव्यनक्ति, न स्वयमेवानुकंपाकम्पते । **तथेहापीति** - /ms, 690/mj

* * *

भिव्यञ्जकत्वव्यक्तेः । तथेहापि, चैत्राश्वोदाहरणं स्वस्वामिसम्बन्धस्योपलक्षणार्थमग्निधूमानित्यकृतकत्वादिषु । सोऽत्र, तद्वत्सत्त्वात्, पूर्ववत् ।

नन्वेवमविनाभावोपवर्णनमेवेदम् । एवमेवैतत्, आधाराधेयसंयोगिवद्वृत्त्यभेदात् त्वदुक्तस्य व्यावर्तितत्वादस्मदभिहितेस्तु पूर्वत्वात् । त्वया न ज्ञातमनुमानस्वरूपं सत् मया ज्ञातम् । यथा त्वमाह तथा सम्बन्धानुमानैकदेशस्य भाष्यमात्रमेवेदम्, तदनतिरिक्तार्थत्वात्, वृद्धिरादैजर्थव्याख्यानवत् । एवं च द्रव्यार्थासत्यो-

* * *

तत्साधर्म्यं योजयति । **चैत्राश्वेत्यादि**, यच्चैत्राश्वोदाहरणमत्रानुमानलक्षणभाष्ये तत् स्वस्वामिसम्बन्धस्योपलक्षणार्थमग्निधूमानित्यकृतकत्वादिषु तुल्यन्यायत्वात् । **सोऽत्र** स इत्यप्रत्यक्षोऽग्निचैत्रानित्यत्वादिधर्मः अत्र इति प्रदेशे प्रत्यक्षाद् धूमाश्वकृतकत्वादेः पक्षधर्मात् **साध्यार्थः** पक्षोऽवगम्यताम् । **तद्वत्सत्त्वादिति** हेतुः, सोऽस्मिन् सम्बन्धी वह्निचैत्रशब्दादिरस्तीति तद्वान् धूमाश्वकृतकत्वादिः, स एव धर्मः सन् तस्य भावात् तद्वत्सत्त्वात् । यत्र यत्र तद्वत्सत्त्वं तत्र तत्र सोऽस्ति, **पूर्ववत्**, यथा पूर्वोत्तरधूमादिरग्न्यादिना सम्बन्धात् तत्स्वामिक एव तथेहापीत्येवमादीनामुपलक्षणार्थं चैत्राश्वोदाहरणमिति । § 2116

अत्राह --**नन्वेवमविनाभावोपवर्णनमेवेदम्** । नन्वित्थमविनाभावसम्बन्धो मदिष्ट एव, अव्यभिचाराकाङ्क्षानुमानत्वादिति । अत्रोच्यते--वयमपि ब्रूमः -- **एवमेवैतत्** अविनाभावसम्बन्धात् स्वस्वाम्यादिविकल्पादनुमानम् । कस्मात् ? **आधाराधेयसंयोगिवद्वृत्त्यभेदात्**, आधाराधेयवद्वृत्तेः संयोगिवद्वृत्तेश्चाभेदात् यत्त्वयोक्तम् --**आधाराधेयवद्वृत्तिस्तस्य संयोगिवन्न तु** प्र° समु° इति, तस्य व्यावर्तितत्वात् । किञ्चान्यत्, **अस्मदभिहितेस्तु पूर्वत्वात्**, दिन्न-वसुबन्ध्वादिभ्यो बुद्धाच्च पूर्वकालत्वात् कापिलस्य तन्त्रस्य आर्हतैकदेशनयमतानुहारित्वाच्च तदनुमानस्य तच्चास्मन्मतोपजीवनमेव । **त्वया न ज्ञातमनुमानस्वरूपं सत् मया ज्ञातमिति** । § 2117

तद्व्याख्या --**यथा त्वमित्यादि** । भाष्यमात्रमेवेदमिति पक्षः, सम्बन्धानुमानैकदेशस्यैवैतल्लक्षणस्य भाष्यमात्रं त्वत्प्रयासफलम्, **तदनतिरिक्तार्थ**- - /ms
**त्वात्**, यद् यतोऽनतिरिक्तार्थव्याख्यानं तत् तदेकदेशस्यैव भाष्यमात्रम् यथा

---

२२ स्व ] स्वयमेवाभिव्यञ्जकः ? स्वयमेवाभिव्यनक्ति ? ॥
७ इ ] **इत्यत्रप्रत्यक्षो°** प्र° । इत्यत्राप्रत्यक्षो° ॥
८ त ] **तद्वानुमाश्व°** प्र° ॥
८ स ] **स्वत्तस्य** प्र° ॥
९ पू ] पूर्वोऽत्र धूमादि° ? ॥
१५ त ] **तत्वेहा°** प्र° ॥

१९ विनाभा ] **°भावोपर्णन°** प्र° ॥
२२ संयोगिव ] °वन्निनितिnayacakra-ms-bhā । °वन्निति nayacakra-ms-ya । दृश्यतां पृ° ६७८ पं° ६ ॥
२५ मात्रं ] एतच्चिह्नान्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥

वृद्धिरितीयं संज्ञा भवति आदैचां वर्णानाम्, संज्ञाधिकारः संज्ञासम्प्रत्ययार्थः इत्यादि **वृद्धिरादैच्** पा॰ १ । १ । १ इत्यस्य, तथेदं त्वदीयमविनाभावसम्बन्धव्युत्पादनमस्मज्ज्ञातस्य सम्बन्धानुमानैकदेशस्य भाष्यमात्रम्, तदपि सर्वं न विदितमित्यभिप्रायः । **कापिलमपि** चास्मदुपज्ञमेव द्रव्यार्थविकल्पैकदेशत्वादिति चाभिप्रायः । अत आह --**एवं च द्रव्यार्थासत्योपाधिसत्यार्थव्याख्यानुज्ञा कृता त्वया** सामान्योपसर्जनो विशेषः शब्दार्थः इति द्रव्यार्थस्याप्यनुज्ञानादभ्युपगतं भवति द्रव्यार्थवादिमतानुमानलक्षणानुज्ञानात् । तस्यां चासत्योपाधिसत्यार्थव्याख्यानुज्ञायां **लिङ्गिनो लिङ्गत्वं प्रसक्तम्** इत्यस्याभावः, न

691/mj

* * *

पाधिसत्यार्थव्याख्यानुज्ञा कृता त्वया । तस्यां च नहि लिङ्गिनो लिङ्गत्वं प्रसञ्जयितुं शक्यम् ।

तथापि स्यात् विवक्षाभेदात् तथा तथा स्वस्वाम्यादिगम्यगमकत्वात् । तद्यथा देवदत्त यज्ञदत्तयोः संयुक्तयोरन्योन्यं लिङ्गत्वं लिङ्गित्वं च भवति तथा स्वस्वाम्यादिषु । तथाहि राज्ञो लाजपेयातरणं तत्करणाज्ञया... ... ...।

न, संयोगित्व एकरूपत्वाद् अग्नितोऽपि धूमानुमितिप्रसङ्गः । तत्काल एव च धूमोऽस्ति । न, असम्भवात् । प्रत्यक्षत्वाद्धूमोऽसाध्यः, साध्यस्त्वग्निरप्रत्यक्षत्वात् संयोग्येकरूपत्वाद्यानिष्टापादनमनपेक्षितार्थम् । संयोगित्व... ... ...।

यत् पुनरिदमुक्तम्--यस्य त्वविनाभावित्वं सम्बन्धोऽभिमतस्तस्यायमदोषः प्र॰ समु॰ वृ॰ २ । ३७ इति । अत्र गुणदोषाभिमानः... ... ...।

* * *

हि लिङ्गिनोऽप्रत्यक्षस्य लिङ्गत्वं प्रत्यक्षत्वं प्रसञ्जयितुं शक्यमृद्धिमद्भिर्बुद्ध-बोधिसत्त्वादिभिरपि यथोक्तोऽस्माभिरव्यतिकर इति । § 2118

**तथापि स्यादित्यादि** । न हि लिङ्गस्य लिङ्गित्वे लिङ्गिनो वा लिङ्गत्वे कश्चिद् दोषोऽस्ति **विवक्षाभेदात् तथा तथा स्व-स्वाम्यादिगम्यगमकत्वात्,** स्वं वा गम्यत्वेन गमकत्वेन वा विवक्ष्येत स्वामी वा यदा तदा विवक्षितस्यान्यतरस्य गम्यत्वं गमकत्वं वा यथाविवक्षं दृश्यते, **तद्यथा--देवदत्ते**त्यादि दृष्टान्तः, यथा कस्मिंश्चित् कालेऽन्यतरकर्मणा देवदत्तो यज्ञदत्तेन युक्तो भवति यज्ञदत्तो वा देवदत्तेन तयोश्चान्योन्यं लिङ्गत्वं [लिङ्गित्वं] च पर्यायेण विवक्षावशाद् भवति

- /ms युगपद्वोभयकर्मजसंयोगित्वात् तथा स्वस्वाम्यादिष्विति । **तथाहीत्यादि राज्ञो**

२१ तानु ] ॰नुमानं लक्ष॰nayacakra-ms-ya ॥
३० त ] तस्या प्र॰ ॥
१ लिङ्गि ] दृश्यतां पृ॰ ६८२ पं॰ १६ ॥
३ अ ] दृश्यतां पृ॰ ६८३ टि॰ २ ॥
६ य ] दृश्यतां पृ॰ ६८३ टि॰ २ ॥
७ मृद्धि ] **॰मद्भिर्बुधबोधि॰** प्र॰ ॥
१२ व्य ] ॰व्यतिकरमितिnayacakra-ms-ya । ॰व्यति nayacakra-ms-bhā ॥
१४ स्वाम्या ] **॰म्यादीगम्य॰** प्र॰ ॥
१५ योश्चा ] ॰श्चान्यलिंगत्वंnayacakra-ms-ya ॥

विशेषितस्य **लाजपेयातरणं तत्करणाज्ञयेत्**यादि गतार्थमग्निना धूमानुमानमिति । § 2119

अत्राह **--न, संयोगित्व एकरूपत्वादि**त्यादि । नाग्नेः पूर्वं पश्चाद्वा धूमः संयोगी न धूमो वाग्नेरिति मत्वाऽनिष्टमापाद्यते **--अग्नितोऽपि धूमानुमितिप्रसङ्ग** इति; किं तर्हि ? **तत्काल एव चाग्न्युप**लब्धिकाल एव **धूमोऽस्ति** इति भवत्येवानिष्टापादनमिदं व्यतिकरप्रसङ्ग इति । § 2120

अत्रोच्यते **--न, असम्भवात्,** न सम्बन्धाविशेषादग्निलिङ्गत्वं [धूमलिङ्गित्वं] च प्राप्तम्, किं तर्हि ? **प्रत्यक्षत्वाद्धूमोऽसाध्यः** साधनं तु, **साध्यस्त्वग्निरप्रत्यक्षत्वा**दनुमेयत्वादसाधनम् । धूमोऽपि साध्यश्चेत् प्रत्यक्षमप्रमाणं स्यात् तदप्रामाण्ये चानुमा निर्बीजा स्यात् । अनुमितिः इत्यपशब्देन परानुकरणं दोषश्चैष स्यादिति । किञ्चान्यत्, संयोग्येकरूपत्वानुमानाद्यानिष्टापादनम् **अग्नितोऽपि धूमानुमानप्रसङ्गः** इति यदेतद् भवत्साधनमेतदनपेक्षितार्थम् । तत्प्रदर्शनार्थं साधनम् **--संयोगित्वे**त्यादि गतार्थमनिष्टापादनम् । § 2121

**यत् पुनरिद**मित्यादि स्वपक्षे दोषाभावप्रदर्शनार्थं यदुक्तं त्वया **यस्य त्वविनाभावित्व**मित्यादि 692/mj

* * *

अग्न्यादिसम्बन्धी... ... ...लिङ्गी ।

इत्थमुक्त्वा यत् पुनरिदमुच्यते--अग्नितोऽपि धूमानुमितिप्रसङ्गः इति न्याययदिग्मूढेन तत् । इह देशसाध्यतामुक्त्वा लिङ्गिलिङ्गतत्त्वव्यवस्थानवृत्तेरेवं वक्तव्यम्— अग्निमतोऽपि धूमवदनुमाप्रसङ्गः... ... ...उभयतोऽपि तन्मतुबर्थस्य तथा तथेष्टवद्वृत्तेः । धूमविषय एतदेव स्यात् । अथत्र पुनर्नास्ति दोषगन्धोऽपि । धूमवत्त्वस्य हि लिङ्गत्वं युक्तम्, लिङ्गित्वमपि तद्देशविवक्षाया अग्निमत्त्वविशिष्टस्य देशस्यैव । न ह्यग्निमत्त्वस्य युक्तं लिङ्गत्वं साध्यत्वात् । अत एव मया तत्प्रधानमेवोच्यते--अग्नितोऽपि धूमानुमितिप्रसङ्ग इति ।

* * *

याव**ददोष** इति । वयं तु ब्रूमोऽत्र **गुणदोषाभिमान** इत्यादि साध्य-साधनधर्मवद्देशाद्यनुमेयत्वमुक्त्वा पुनस्तस्यैव दोषाभिधानादप्रत्यभिज्ञातम् **अग्न्यादिसम्बन्धी**त्यादिना त्वयैवाभ्युपगतमिति दर्शयति तस्यैव देशस्य लिङ्गत्वं [लिङ्गित्वं] च न धर्मयोरग्निधूमयोरिति यावद् **लिङ्गी**ति त्वन्मतमेवेदमिति प्रत्यभिज्ञापयति । § 2122

---

२२ ला] त्वाजपेया° प्र° ॥
१ त] तत्कारणा° प्र° । दृश्यतां पृ° ६९५ पं° १५ ॥
२ संयोगित्व] °त्वरूपत्वा°nayacakra-ms-ya ॥
३ न] °नमितिदंnayacakra-ms-ya ॥
५ वा] °वात् सत्यं बंधाविशे° प्र° ॥
६ द] °दनुपेक्षि°nayacakra-ms-ya ॥
६ पु] पुनरित्यादिnayacakra-ms-ya ॥
११ अ] दृश्यतां पृ° ६८३ टि° २ ॥
१२ धू] धूमवत्त्व[विशिष्ट]स्य हि देशस्यैव लिङ्गत्वं युक्तम् इत्यपि पाठोऽत्र स्यात् ॥

- /ms इत्थमुक्त्वा यत् पुनरिदमुच्यते--अग्नितोऽपि धूमानुमितिप्रसङ्ग इति, न्यायदिग्मूढेन तदिति । कथं पुनरमूढा ब्रुवत इति चेत्, ब्रूमस्त्वां शिक्षां ग्राहयन्तः, तद्यथा --इह देशसाध्यतामुक्त्वा *लिङ्गिलिङ्गतत्त्वव्यवस्थानवृत्तेरेवं वक्तव्यमित्यादि, तां न्यायव्यवस्थामनुवर्तमानेन त्वयेत्थं वक्तव्यम् अग्निमतोऽपि धूमवदनुमाप्रसङ्ग इत्याद्युपदेशग्रन्थो यावदुभयतोऽपि तन्मतुबर्थस्य तथा तथेष्टवद्वृत्तेरिति तत्कारणोक्तिम् । धूमविषय एतदेव स्याद् धूम एव देशविशेषानपेक्षोऽनुमापकः स्यादग्निरेव वानुमेयस्तदाऽग्नितो धूमानुमानं धूमादग्न्यनुमानवत् स्यात् प्रसङ्गः संयोगिनोरविशेषात् । अथ पुनर्देशस्य साध्य-साधनत्वान्नास्ति दोषगन्धोऽपीति । § 2123

तद् भावयति --धूमवत्त्वस्य हीत्यादि । धूमवत्त्वधर्मविशिष्टस्य देशस्यैव लिङ्गत्वं युक्तम्, धूमवत्त्वेन सिद्धस्य तस्य साधकत्वात् । *लिङ्गित्वमपि तद्देशविवक्षाया हेतोः अग्निमत्त्वविशिष्टस्य देशस्यैव लिङ्गित्वं युक्तम् । अग्निविषये तु देशे लिङ्गत्वं न युक्तम्, किं कारणम् ? न ह्यग्निमत्त्वस्य युक्तं लिङ्गत्वं साध्यत्वात्, साध्यत्वं लिङ्गित्वात्, लिङ्गित्वमसिद्धत्वात् । अस्मन्मतेन तु लिङ्गत्वमपि अग्निमत्त्वविशिष्टस्य देशस्यैव शक्यं भावयितुम्, अग्निप्रत्यक्षत्वे धूमाप्रत्यक्षत्वे च कदाचित् । अत एव मया तत्प्रधानमेव देशप्रधानमेवोच्यते--अग्नितोऽपि धूमानुमितिप्रसङ्ग इति । § 2124

693/mj

नन्वेवं देशमुपेक्ष्याग्नेरेव लिङ्गित्वं स्यादनुमेयत्वात् । न चासौ लिङ्गी भवितुमर्हति लोके सिद्धत्वादननुमेयत्वात् । तथा चोक्तम्--
§ 2125

न धर्मी धर्मिणा साध्यो न धर्मस्तेन धर्म्यपि ।
धर्मेण धर्मः साध्यस्तु साध्यत्वाद्धर्मिणस्तथा ॥ प्र॰ समु॰ ३ । १३ § 2127

उपचारादेवेदमुच्यत इति चेत्, अत्र तत्त्वं मृग्यते, सुहृत्सूपचारः... ... ... साध्यत्वाद्धर्मिणस्तथा । § 2128

---

८ ब्रू] ब्रुवस्त्वा शिक्षां प्र॰ ॥
८ *] लिंगिलिंगितत्त्व॰nayacakra-ms-ya । लिङ्गलिङ्गितत्त्व॰ इत्यपि पाठोऽत्र भवेत् ॥
८ त] तन्मतुपर्यस्यnayacakra-ms-bhā । तन्मनुपर्यस्य nayacakra-ms-ya ॥
९ त] तत्कारणोक्तिं प्र॰ । तत्कारणोक्तिः ? ॥
१० ए] एतदेवं स्यात् इत्यपि भवेत् पाठः ॥
११ अ] अत्र इत्यपि भवेत् पाठः । अथ पुनर्देशस्य साध्यसाधनत्वं नास्ति दोषगन्धोऽपीति इत्यपि पाठः सम्भवेत् ॥
११ *] लिंगत्व॰ प्र॰ ॥
१३ विव] ॰वक्षयाnayacakra-ms-ya ॥
१५ तु] लिंगित्वमपि प्र॰ ॥

एवं त्वग्निमद्देशस्य लिङ्गत्वम्, धूमवत्त्वसाधकलिङ्गानन्यत्वात्, धूमवत्त्वस्वात्मवदेव । § 2129

अत्राह --**नन्वेवं देशमुपेक्ष्य** अनादृत्य **अग्नेरेव लिङ्गित्वं स्याद्** भवितुं योग्यम् । कस्मात् ? **अनुमेयत्वा**दिति । अत्रोच्यते --**न चासौ लिङ्गी भवितुमर्हति** अग्निः, कस्मात् ? **लोके सिद्धत्वात्,** अतो ऽ**ननुमेयत्वात्** । § 2130

**तथा चोक्तं** त्वया यथास्मन्मतं धर्मविशिष्टो धर्म्येव साध्यः साधनं च इत्यत्र त्वद्वचनमेव ज्ञापकम् । **न धर्मी धर्मिणे**त्यादि श्लोकः । **न धर्मी धर्मिणा साध्यो** यथाग्निर्धूमेन, सिद्धत्वादग्नेस्तद्धर्म- त्वाभावाद् धूमस्य । **न** - /ms **धर्मो** धर्मिणा इति वर्तते, यथाग्निनोष्णस्पर्शः, सिद्धत्वात् तद्धर्मत्वाभावाच्च । **तेन धर्म्यपि** तेन धर्मेणाऽनन्तरनिर्दिष्टेन विभक्तिपरिणामनिर्देशात् **धर्म्यपि** न साध्यः, यथा--अस्ति प्रधानम्, भेदानामन्वयदर्शनादिति, धर्म्यसिद्धेरेव धर्मासिद्धेः । पारिशेष्याद् **धर्मेण धर्मः साध्यस्तु** । ननु धर्मयोरपि परस्परं धर्मत्वासिद्धिर्धर्मित्वाभावे, तस्मादयुक्तं साध्य-साधनत्वमिति । नेत्युच्यते **साध्यत्वाद्धर्मिणस्तथा,** तेन प्रकारेण तथा अनेकधर्मणो धर्मिणो वस्तुनः सिसाधयिषितधर्मविशिष्टस्य साध्यत्वात् सिद्धधर्मविशिष्टस्य साधनत्वात् । तथा चाह --**साध्यत्वापेक्षया चात्र धर्म-धर्मिव्यवस्था न गुण-गुणित्वेनेत्यदोषः** इति । § 2131

**उपचारादेवेदमुच्यत इति चेत्** । स्यान्मतम्--सत्यम्, परमार्थतो लिङ्ग-लिङ्गिभाव एकस्य वस्तुनः सिद्धसाध्यधर्मविशिष्टस्य तथापि उपचारकृताद्धर्मभेदाद् भिन्नमिवाभिन्नमप्युच्यते इति । एतच्चायुक्तम्, यस्माद**त्र तत्त्वं मृग्यते सुहृत्सूपचार** इत्यादि यावत् **साध्यत्वधत्वाद्धर्मिणस्तथे**ति गतार्थं सव्याख्यानम् । तस्थात् सिद्धमग्निमत्त्व-धूमवत्त्वविशिष्टस्यैव देशस्य लिङ्गत्वं लिङ्गित्वं च । § 2132

तदुपसंहृत्य त्वां प्रति यदसिद्धं प्रस्तुतमग्निमद्देशलिङ्गत्वं तत् साधयामः । तद्यथा --**एवं तु अग्निमद्देशस्य लिङ्गत्व**मिति प्रतिज्ञा । हेतुः --**धूमवत्त्वसाधकलिङ्गानन्यत्वा**दिति । दृष्टान्तः --**धूमवत्त्वस्वात्मवदेव,** यथा धूमवत्त्वं स्वात्मा देशस्य तदनन्यत्वात् लिङ्गं तथाग्निमत्त्वस्वात्मा तदनन्य[त्वा]द्देशस्य लिङ्गमेव, - /ms तदनन्यत्वं च प्रतिपादितमेवेति । § 2133

---

१६ इ] इत्यग्र प्र॰ ॥
२८ ध] धर्मा प्र॰ ॥
१२ ध] धर्मा प्र॰ ॥
१८ त] तद्धर्मित्वा॰ ? ॥
२० ध] धर्मिणोnayacakra-ms-ya ॥
२२ निर्दिष्टेन] विभक्तिनुपरिणाम॰nayacakra-ms-bhā । विभक्तिविपरिणाम॰ ? ॥
१ ध] धर्मेण धर्मः साध्यतु ननु धर्मयोरपिnayacakra-ms-ya । धधर्मयोरपि nayacakra-ms-bhā ॥
४ अ] अनेकधर्मणो धर्मोणो वस्तुनःnayacakra-ms-bhā । अनेकधर्मणोऽधर्मणो वस्तुनः nayacakra-ms-ya ॥ अनेकधर्मणो वस्तुनः इत्यपि पाठोऽत्र स्यात् ॥
५ त्वा] ॰त्वात्त--सिद्ध॰nayacakra-ms-ya ॥

694/mj

नाग्निमत्त्वस्य लिङ्गत्वं व्यभिचारित्वात् प्रमेयत्ववत् । § 2134

न, धूमवस्तुत्वानुमानभूतेन लिङ्गत्वं नियतम् । अव्यभिचारित्वोपपादनेनाग्न्यविनाभावित्वेनैव धूमत्वसिद्धेः । § 2135

अथात्र किं प्रतिपत्तव्यं धूमलिङ्गादग्निप्रतिपत्तिवदग्नेरपि धूमप्रतिपत्तिः स्यात् । § 2136

अथ किंविषयः सम्प्रधारः ? दर्शितन्यायदेशसाध्यताया युक्तमेव लिङ्गस्य लिङ्गिनो वा लिङ्गित्वं लिङ्गत्वं वा । धूमवत्त्वलिङ्गित्वापत्तौ तु प्रमेयत्ववदग्निमत्त्वव्यभिचाराल्लिङ्गत्वाभाव एव । न हि सर्वत्राग्नौ धूमस्याशङ्क्यमनुमानम्, अनुगमाभावात् । देशासाध्यतायामपि सिद्धसाधनन्यायविरोधदोषः । § 2137

अत्राह --**नाग्निमत्त्वस्य लिङ्गत्वं व्यभिचारित्वात्,** व्यभिचरति ह्यग्निमत्त्वं प्रदेशस्य धूमवत्त्वादृतेऽपि देशान्तरे कालान्तरे चायोगुडाङ्गारादिषु दृष्टत्वात् । किमिव ? **प्रमेयत्ववत्,** यथा नित्यः शब्दः, प्रमेयत्वात्, आकाशवत् इत्युक्ते प्रमेयत्वं घटादावनित्ये विनापि नित्यत्वेन दृष्टं तथा अग्निमत्त्वं धूमवत्त्वेनेति व्यभिचारित्वादनन्यत्वस्यासाधकत्वम् । धूमवत्त्वस्य तु भवति अग्निमत्त्वेन विना न दृष्टत्वादिति । § 2138

अत्र ब्रूमः --**न, धूमवस्तुत्वानुमाने**त्यादि । धूमस्य हि वस्तुत्वे[न] आत्मलाभेनैवानुमानभूतेनाग्न्यविनाभूतेन लिङ्गत्वं नियतं पाण्डुत्वबहुलत्वाविच्छिन्नमूलत्वादिरूपेण धूमत्वनिश्चयकरेण, तत्र लिङ्गित्वदोषप्रसङ्गस्यावतार एव नास्ति प्रत्यक्षत्वात् सिद्धत्वादेव लिङ्गत्वात् । तथाग्नेरपि प्रत्यक्षत्वे धूमस्य लिङ्गिनो लिङ्गत्वम् । **अव्यभिचारित्वोपपादनेने**त्यादि, यदि तु अग्निमत्त्वं प्रमेयत्ववद् धूमं व्यभिचरेत् ततो धूमस्य धूमत्वमेव सन्दिह्येत बाष्पनीहारादिभावेनाबद्धमूलादित्वात् । तस्मात् सन्दिग्धासिद्धो हेतुः स्याद्धूमः, कुतोऽस्य लिङ्गत्वम् ? अग्न्यविनाभावित्वेनैव तु बद्धमूलत्वादिरूपेण धूमत्वसिद्धेः स्यात् पक्षधर्मत्वाल्लिङ्गत्वम्, तथाग्नेरपि धूमसिद्धौ लिङ्गत्वम् । § 2139

इतर आह --**अथात्र किं प्रतिपत्तव्यं धूमलिङ्गादग्निप्रतिपत्तिवदग्नेरपि धूमप्रतिपत्तिः स्यात्,** वस्तुनो लिङ्गलिङ्गित्वाविशेषात् । प्रतिपत्तौ तु दृष्टो विशेष इत्यभिप्रायः । § 2140

११ चा ] वायोगुडा°nayacakra-ms-ya ॥

१ त्वेन ] विनानान दृष्ट°nayacakra-ms-bhā । विना दृष्ट° nayacakra-ms-ya ॥

२ लाभेनैवा ] °वनुमा°nayacakra-ms-ya ॥

३ धू ] धूमस्य लिंगत्वम्nayacakra-ms-bhā ॥

४ न्दिह्येत ] °त वाप्यनीहा°nayacakra-ms-bhā । °त तवाप्यनीहा° nayacakra-ms-ya ॥

आचार्योऽत्रापि अविशेषमापादयितुकामस्तमेव वाचयितुं चाह **--अथ किंविषयः सम्प्रधार** इति । इतर आह **--दर्शितन्यायदेशसाध्यतताया** हेतोः, दर्शितोऽयं न्यायः--देश एवाग्निमत्त्वेन साध्यः साधनं धूमवत्त्वेनेति । तस्मात् युक्तमेव लिङ्गस्य लिङ्गिनो वा लिङ्गित्वं [लिङ्गत्वं] वा, न विरुध्यत एतत् । किन्तु **धूमवत्त्वलिङ्गित्वापत्तौ** **त्वि**त्यादि । सत्यपि संयोगित्वाविशेषे धूमसंयोगित्वमेवाग्नेर्गमकं दृष्टम् यत्र यत्र धूमस्तत्र तत्राग्निः इति । धूमवत्त्वस्य लिङ्गित्वे **प्रमेयत्ववदग्निमत्त्वव्यभिचाराल्लिङ्गत्वाभाव एव** । तस्मादग्नेरन्यथा संयोगित्वमन्यथा धूमस्य, यस्माद् **न हि सर्वत्रे**त्यादि यत्र यत्राग्निस्तत्र तत्र धूमः इति आशङ्क्यमनुमानम् **अनुगमाभावात्** सर्वत्राग्नौ धूमाभावात् । मा भूदेष दोष इति देशासाध्यतेष्यते, तस्यां च **देशासाध्यतायामपि सिद्धसाधनन्यायविरोधदोषः** धूमादग्निः इति अग्नेः सिद्धत्वात् **साध्यत्वेनेप्सितः पक्षः** [न्यायमुख°दृश्यतां टिपृ° १२८ पं° ३ ॥] इति लक्षणानवतारः प्रकाशितप्रकाशनवच्च वैयर्थ्यमिति । § 2141 - /ms

695/mj

अग्निसाधनवदेव हि धूमसाधनेऽपि विनाग्निना धूमस्य दृष्टत्वाद् व्यभिचाराद् नानुमानसम्भवः । § 2142

सम्भाव्यते तु धूमदर्शनात् अग्निरत्र इति अग्निदर्शनाद्वा धूमोऽत्र इति, अग्ने रन्धनगृहत्ववत् । यत्र धूमासम्भवस्तत्राग्नेरप्यसम्भवोऽन्तर्जलवत् । अन्वयार्थः सम्भवार्थत्वेन इतरवत् । प्रतीतिरपि तथा । अथवालं भवतु । § 2143

अग्निरत्र इति प्रतिज्ञायाम् अग्निरेवात्र इति नावधार्यते तावत् तत्र पृथिवीन्धनादिसद्भावात् । नापि अग्निरत्रैव इत्यवधार्यते प्रत्यक्षादिप्रसिद्धिविरुद्धार्थत्वात् । नापि अग्निरत्र भवत्येव इत्यवधार्यते सदाग्निधूमाभावात् तत्र । § 2144

तस्माद् विवक्षिते देशे काले भवत्यग्निरिति प्रतिज्ञार्थः, अव्युत्पत्तिविध्यनवधृतेः, रक्तमिदं करवीरपुष्पम् इति प्रतिज्ञावत् । § 2145

---

७ वा] वाnayacakra-ms-ya प्रतौ नास्ति ॥
८ धू] धूमत्वलिंगित्वा°nayacakra-ms-ya ॥
१० आ] अशक्यमनुमानम् ? ॥
११ पि] सिद्धसाधनं न्याय° ? ॥

अत्र ब्रूमः --**अग्निसाधनवदेव** **ही**त्यादि अग्नि-धूमयोरविशिष्टगम्यगमकभावापादनग्रन्थो गतार्थः । वासगृहेऽपनीताग्निके [धूमोऽग्निना] *विना दृष्टोऽरणिनिर्मथने वाऽभूताग्निके तस्मात् तुल्यो व्यभिचारः । § 2146

कथं पुनरनुमानसम्भवः ? **सम्भाव्यते तु धूमदर्शनादग्निरत्रेति अग्निदर्शनाद्वा धूमोऽत्रेति,** तत् पुनः प्रमाणान्तरगते देशेऽग्नित एव धूमः, बद्धमूलत्वादिभिर्धूमाद्वाग्निरिति । तत्र दृष्टान्तः --**अग्ने रन्धनगृहत्ववदिति** त्वरिततरणकरणार्थाज्ञाप्ताग्निहस्तसूपकारके रन्धनगृहे धूमः सम्भवति इति । वैधर्म्येण **यत्र धूमासम्भवस्तत्राग्नेरप्यसम्भवोऽन्तर्जलवदिति** । धूमोऽग्नेरन्यत्र न सम्भवतीत्यन्वयस्यार्थः सम्भवार्थत्वेन **इतरव**दिति धूमवत्, यथा धूमोऽग्नौ
- /ms सम्भवति स कदाचित् क्वचित् तथाग्निर्धूमे सम्भवति इत्यन्वयार्थः शक्यत एव, प्रतीतिरपि तथा । **अथवालिलं भवत्विति** अलमियता क्रीडितेनेति वस्तुतः प्रतिपत्तितश्च प्रतिपादितमपि अस्माभिर्न प्रतिपद्यसे लिङ्ग-लिङ्गित्वाविशेषं किमर्थम् ? यद्यपि न प्रतिपद्यसे तथाप्यत उत्तरमवयवनिरूपणेनापि प्रतिपादयिष्यामः । § 2147

**अग्निरत्र इत्यस्यां प्रतिज्ञाया**मित्यादि । अग्निरेवात्र इति नावधार्यते तावत् तत्र पृथिवीन्धनादिसद्भावात् तदभावेऽग्नेरेव दुर्लभत्वात्, देशस्यैव वाऽभावात् तदाधेययोरग्निधूमयोरप्यभावापत्तेः । **नापि अग्निरत्रैव इत्यवधार्यते** तत्प्रदेशाग्नितोऽन्येषामग्नीनामनग्नित्वाभ्युपगमे **प्रत्यक्षादिप्रसिद्धिविरुद्धार्थत्वात्** प्रतिज्ञादोषात्, तत्प्रदेशव्यतिरिक्तेषु प्रदेशेष्वग्न्यभावात् यत्र यत्राग्निस्तत्र तत्र धूमः इति दृष्टान्तो न शक्यो वक्तुम्, अतस्तन्निरासः । **नापि अग्निरत्र भवत्येव इत्यवधार्यते** भवतिप्रयोगव्यवहारेण, न न भवत्यपि कदाचिदिति । किं कारणम् ? **सदाग्निधूमाभावात् तत्र** तस्मिन् देशे कादाचित्काग्निव्युदासो निरर्थकः सततमग्निधूमयोरभावात् । § 2148

---

१६ न]
°नचदेवnayacakra-ms-bhā ।
°नंचदेव nayacakra-ms-ya ॥
१७ *] एतदन्तर्गतः पाठो
nayacakra-ms-bhā प्रतौ नास्ति ॥
२१ दृष्टोऽर] °रणिनिमर्थने वा
भूताग्निकेnayacakra-ms-ya ॥
२१ म्भाव्य] °व्यतोसु धूम प्र° ॥
२२ र] °रत्वन°nayacakra-ms-ya
। नत्वन° nayacakra-ms-bhā ॥
२ रित] तुलना--पृ° ६९१ पं° ५ ॥
१५ स]
°संभवोन्नर्जल°nayacakra-ms-bhā
। °संभवेन्निर्जल° nayacakra-ms-ya
॥
१७ अ] अथवालिरुव-
त्वितिnayacakra-ms-bhā ।
अथवालिसरुवत्विति
nayacakra-ms-ya ॥
१९ वा]
चाभावात्nayacakra-ms-bhā ॥
१९ त]
तदाचययो°nayacakra-ms-ya ॥
२० तिप्र] °प्रयोगाव्यवहारेण प्र° ।
°प्रयोगाध्याहारेण ? ॥
२० न] न
भवत्यपिnayacakra-ms-ya ॥
२३ कादाचित्काग्निव्युदा]
°दासोनर्थकःnayacakra-ms-bhā ॥

**तस्माद्विवक्षिते देशे** तस्मिंस्तस्मिन् **काले भवत्यग्निःइति प्रतिज्ञार्थः ।** कस्मात् ? 696/mj

* * *

धूमश्च पक्षधर्मोऽनुबद्धरूप एवाग्निना भवति अग्निसहचरित्वाग्निनिमित्तत्वख्यापनार्थम् । इह क्वचित् सहचरिभावः, क्वचिच्च निमित्तनैमित्तिकभावः । इह तु द्व्यवयवमेव लिङ्गम् । तत्राविनाभावी [सहचरी । सहचरावग्निधूमौ ।] सहचरोऽस्मिन् विद्यत इति सहचरी । अस्मिन् विद्यत एवाग्निर्धूमे, न न विद्यत एव, न च न विद्यतेऽपि क्वचित् । तस्मिन् हि किल सति विद्यत एवाग्निः, न न विद्यते वात्यादिवत्, न च न विद्यतेऽपि धूमासहचरायोग्निधूमवत्, न वा सपक्षसहचरे न विद्यत एव कृतकमिव नित्ये । एवमसिद्धविरुद्धानैकान्तिकव्युदासेन सहचरिभावानुमानं सिध्यति ।

नन्वेवं किमर्थं निमित्तनैमित्तिकभावोपादानम् ? न, अग्निवद् व्यभिचारि-

* * *

**अव्युत्पत्तिविध्यनवधृतेः**, विधिनैवाव्युत्पादितावधारणेनोक्तत्वात् रक्तमिदं करवीरपुष्पम् इत्यव्युत्पन्नरक्तश्वेतविशेषणाय पुरुषायेव तन्निरूपणार्था रक्तमेव, *श्वेतमेव वा इत्यवधारणानपेक्षा प्रतिज्ञा । § 2149

**धूमश्च पक्षधर्मोऽनुबद्धरूप एवाग्निना भवति** । किमर्थम् ? **अग्निसहचरित्वाग्निनिमित्तत्वख्यापनार्थम्** । तद्व्याख्या --**इह क्वचि**दित्यादि, रूपस्पर्शयोः सहचरिभावः, दण्डादि निमित्तम् घटो नैमित्तिक इति निमित्तनैमित्तिकभावः, तावेतौ सहचरिनिमित्तनैमित्तिकभावावयवौ, तदेव हि तत्, इह तु द्व्यवयवमेव लिङ्गम् । **तत्राविनाभावी**त्यादि, सहचरिभावं तावदादौ निरूपयामः, सोऽविनाभाव एव । तद्व्याख्या निरूपणार्था --**सहचरा**वित्यादि सहचरो यस्मिन् विद्यत इति सहचरी धूमस्याग्निरिति इनिप्रत्ययः सप्तम्यर्थे, अस्य त्रिविधोऽर्थः --**अस्मिन् विद्यत एवाग्निर्धूमे** अग्नित एव चायमिति पक्षधर्मावधारणम् । **न न विद्यत एवे**ति सपक्षाननुगतो विपक्ष एव सन् इति विरुद्धासाधारणानैकान्तिकाशङ्का मा भूदिति । **न च न विद्यतेऽपि क्वचित्** सहचरी धूम इति साधारणानैकान्तिकाशङ्का मा भूदिति - /ms

२६ पु] पुरुषायैवातन्निरू° प्र° ॥
२७ *] श्वेतमेवेत्यव°nayacakra-ms-ya । श्वेतमेवत्यव° nayacakra-ms-bhā ॥
५ च] °चरिताभावःnayacakra-ms-bhā । °चरितः nayacakra-ms-ya ॥
८ घ] घटादिnayacakra-ms-ya ॥
१४ भा] °भावावयवौ प्र° ॥
२५ त] तदेव हि तदिह तु द्व्यवयमेवnayacakra-ms-ya । तदेतदतदिह तुंद्यंवयवभेव nayacakra-ms-bhā ॥
२५ य] अस्मिन् ? ॥
२८ चा] वाय°nayacakra-ms-bhā ॥
२९ इति] विरुद्धसाधारणानैकान्तिका मा भूदिति प्र° ॥
३० णानैकान्तिका] °कशङ्काnayacakra-ms-ya ॥

वा । तद्याचष्टे --**तस्मिन् हि किल सती**ति, पराभिमतस्य धूमे लिङ्गिनि अग्निलिङ्गत्वस्य व्युदासार्थं तदुदाहरणानि, **सति विद्यत एवाग्निर्न न विद्यते** वात्यादिवदित्यसिद्धव्युदासेन । **न च न विद्यतेऽपि धूमासहचरायोग्निधूम**वदिति साधारणानैकान्तिकाशङ्काव्युदासेन । **न वा सपक्षसहचरे न विद्यत एव कृतकमिव नित्य** इति विरुद्धासाधारणानैकान्तिकाशङ्काव्युदासेन । एव**मसिद्धे**त्याद्युक्तोपसंहारो गतार्थः । § 2150

**नन्वेव**मित्यादि । एवं तर्हि असिद्धविरुद्धानैकान्तिकव्युदासेन सहच-
- /ms रिभावानुमानसिद्धौ सत्यां **किमर्थमनर्थकनिमित्त-नैमित्तिकभावोपादानम् ?** तस्मादेकावयवमेवास्त्विति । § 2151

एतच्च **न, अग्निवद् व्यभिचारित्वाद् धूमस्यापि,** यथाग्निर्धूमं व्यभिचरति अयोग्न्यादावभावात् तथा धूमोऽपि अग्निमपनीताग्निकवासगृहादौ अरणिनिर्मथनादौ चेति समानम् । तद्याख्या **यदि हे हि स सदे**त्यादि सदृष्टान्तोपनया सभावना गतार्था प्रागुक्तन्याया । सन्निहितनिमित्त-सहचरिप्र-
697/mj ख्या

* * *

त्वाद् धूमस्यापि । यदि हि स सदा... ... ...। पाण्डूर्धगतिबहलोत्सङ्गोकदेशबद्धमूलपुनःपुनरुत्थायिधूम[स्याग्निमन्तरेणाभावाद् निमित्तनैमित्तिकभाव एषितव्यः] । बलाकापताकावच्च [सहचरिभावोऽप्येषितव्यः,...निमित्तनैमित्तिकभावे सत्यपि] धूमेऽग्नेर्व्यभिचारदर्शनात् ।

सहचरिनिमित्तोपपत्तौ तु न काचिद् व्यभिचारदिक् । देशान्तरासञ्चारिधूमस्य तत्कालसन्निहिताग्निनिमित्तत्वाद् विशिष्टस्यैव धूमस्याग्नौ गमकत्वम्, विशेषणार्थवत्त्वात् । स यथाग्निमत्त्वं गमयति तथा सन्निहिताग्निनिमित्तत्वमपि ।

एवं चाग्नेरपि गृहीतत्वाद् न प्रत्यक्षादि प्रमाणान्तरमपेक्ष्यते कृतकत्वेने-

* * *

पनेन विशिष्टधूमग्रहणं तस्मिन्नेव देशे काले च नानुत्पन्नो नातीतो नापनीतो वाग्निः इत्येतस्या[र्थ]स्य प्रख्यापनार्थम् । सत्यपि सहचरिभावे निमित्तभूतं तमग्निमन्तरेण धूमस्यैवाभावाद् निमित्तनैमित्तिकभाव एषितव्यः । ततस्तदवधारणार्थानि लिङ्गानि दर्शयन्नाह --**पाण्डूर्धगती**त्यादि । **पाण्डु**विशेषणं बाष्पनीहारादिव्युदासार्थम् । **ऊर्धगत्या बहलत्वेन** च धूमिकाव्युदासः । **उत्सङ्गि**ग्रहणात् शरावाकारोर्द्धविस्तारित्वं सूच्यते, पार्श्वविस्तारित्वाद् धूमिकादीनाम् । **एकदेशबद्धमूल**ग्रहणादभूता-ऽपनीताग्नि-वात्यादिव्युदासोऽनेक-

९ धू]
धूमसहचरायो॰nayacakra-ms-bhā
। धूमसहचरयो॰ nayacakra-ms-ya
॥
९ विरुद्धासा] ॰सावधार॰ प्र॰ ॥
१३ ना] नानीतो या॰ ॥
१४ ना] नायतीतो प्र॰ ॥
१५ पा] पाण्डूर्वगती॰ प्र॰ ॥
१७ बा] बाप्यन्नीहा॰ प्र॰ ॥
२१ श] सरावा॰ प्र॰ ॥

त्र भ्रमणादित्वात् तेषाम् । **पुनःपुनरुत्थायि**धूमग्रहणा[द]पनीताग्निकवासगृहारणिनिर्मथनावस्थाव्युदासः । तस्मात् सलिल-बलाकयोः सहचरिणोरिवाग्निधूमयोर्व्यभिचारदर्शनाद् निमित्तनैमित्तिकभावोऽपीष्ट इति । सोऽपि निमित्तनैमित्तिकभावः सहचरिभावेन विना व्यभिचरत्येवेति दर्शयन्नाह --**बलाकापताकावच्चे**त्यादि यावद् **धूमेऽग्नेर्व्यभिचारदर्शना**दिति भावना गतार्था, नैमित्तिकसद्भावे निमित्ताभावदर्शनात् स्थपतिकृतप्रासादादिवदिति ।
§ 2152

तदुभयगतदोषपरिहारेण द्व्यवयवगुणप्रकाशनार्थं चाह --**[सह]चरिनिमित्तोपपत्ता**वित्यादि यावद् **विशेषणार्थवत्त्वा**दिति । उभयविशेषणसम्पत्तौ - /ms
सत्यां काचिद् व्यभिचारदिग् न सम्भवति । तत् कथम् ? इति तद् दर्शयति --**देशान्तरासञ्चारी**त्यादिना भावयन्, तत्कालसन्निहिताग्निनिमित्तत्वाद् धूमस्य व्यभिचारमलविशुद्धस्य तैर्विशेषणैर्विशिष्टस्यैव सहचरिण्यग्नौ गमकत्वम्, इतरथा धूमस्यापि अग्नेरिव धूमे व्यभिचाराद् विशेषणसामर्थ्यादेवानुमानार्थवत्त्वम्, विशेषणानुपादानेऽग्निमत्त्वमेव न गमयति उभयतोऽपि सहचरित्वे निमित्तनैमित्तिकत्वे वाऽसति यस्मात् तस्मात् **स यथाग्निमत्त्वं गमयति तथा सन्निहिताग्निनिमित्तत्वमपि** गमयति इति वर्तते, यथाग्निमत्त्वेन विना नास्ति धूमवत्त्वं तथा तन्निमित्तत्वमन्तरेण नास्तीत्यग्निमत्त्ववन्निमित्तत्वमपि गमयति उभयत्राव्यभिचारादिति । § 2153

स्यान्मतम्--लिङ्गत्वादग्निः प्रत्यक्षं प्रमाणान्तरमपेक्षेत धूमवदिति । तन्न भवति, **एवं चे**त्यादि । एवमुक्तबद्धमूलत्वादिविशिष्टधूमपरिग्रहेऽग्नेरपि गृहीतत्वाद् न प्रत्यक्षादिप्रमाणान्तरमपेक्ष्यते । किमिव ? 698/mj

* * *

वानित्यत्वस्य । स एव निमित्तमग्निर्धूमस्य सहचरश्च । न हि तस्याग्नितोऽन्यद् निमित्तं भवितुमर्हति सहचरं वा... ... ...क्रियेत । पूर्वप्रत्यक्षसम्बन्धस्मरणादन्यतरेणेतरस्याभिव्यक्तिः प्रत्यक्षवत् ।... ... ...।

... ... ...अनित्यं सर्वं प्रयत्नानन्तरीयकम्, आर्हतत्वस्याभ्युपगम्यमानत्वात् । स्ववचनानपेक्षायामपि तान्यपि सिद्धप्रयत्नानन्तरीयकान्येव लोकप्रत्यक्ष... ... ...विहितवृत्तित्वात्, कुड्यादिवत् । जीवशरीरं नात्यन्तक्त ?शरीरचित्त... ... ...स्वयं प्रवृत्तत्वात् स्थपतिवत् । चेतनविहितवृत्ति च... ... ...सवितृगति... ... ...।

* * *

कृतकत्वेनेवानित्यत्वस्य, तद्यथा प्रागभावप्रध्वंसाभावाख्यमेकमेव [व]स्त्व[ध्रु]व-

१ प] °त्तादित्यादि प्र° ॥
५ भिचार] रदिङ्गसंभवति प्र° ॥
६ रिण्य] °ण्यर्गौगत्वम् प्र° ॥
८ र्थ्यादेवानुमाना] °नार्थत्वम्nayacakra-ms-ya ॥
८ णानुपा] °पादानाग्निम° प्र° ॥
१० वा] वासति प्र° । चासति इत्यपि पाठोऽत्र भवेत् ॥
१३ धू] धूमवथा तन्नि°nayacakra-ms-bhā । धूमत्वं तथा तन्नि° nayacakra-ms-ya ॥

मनित्यं कृतकं चोच्यते, ध्रुव स्थैर्ये, ध्रुवं स्थिरम्, **नेर्ध्रुवे त्यप्** पा॰ म॰ भा॰ ४ । २ । १०४ नित्यम्, न नित्यमनित्यमिति कृतकम् इत्युक्ते तदेवानित्यमध्रुवमित्युक्तं भवति उत्पादविनाशयोरध्रौव्याभेदात् तथा धूमग्रहणेऽग्निग्रहणं प्रदेशात्माभेदात् । स एव निमित्तमग्निर्धूमस्य सहचरश्च, **न हि तस्येत्यादि** यावत् **क्रियेतेत्यादि, नहि तस्य** धूमस्य **अग्नितोऽन्यद् निमित्तं** प्रदेशपरिणामात्मकाद् देशान्तरस्थाग्निपाषाणाम्बुकुम्भादि **भवितुमर्हति सहचरं वा** तदसम्बद्धत्रैलोक्यलिङ्गित्वप्रसङ्गात्, परिणाम्यभेदपरिणामान्तरसाध्यत्वे परिणामान्तरसाधनत्वात् एवमस्यैव हेतु-हेतुमद्भावभावनार्थमाह - **-पूर्वप्रत्यक्षेत्यादि** यथा पूर्वं प्रत्यक्षकालेऽग्निना सम्बद्धो धूमोऽग्निश्च धूमेन तथान्वयकाले तस्य सम्ब[न्ध]स्य स्मरणाद् यत्राग्निस्तत्र धूमः, यत्र धूमस्तत्राग्निः इत्यन्यतरेण विवक्षितेन हेतुनोपात्तस्य इतरस्य साध्यस्याभिव्यक्तिः प्रत्यक्षकाले इव **प्रत्यक्षवत्** । § 2154

- /ms

स्यान्मतम्--धूमविज्ञानकालेऽग्निविज्ञानस्याभावात्... ... ...। § 2155

... ... ...अनित्यत्वप्रयत्नानन्तरीयकत्वयोरन्योन्यव्याप्तिं प्रतिज्ञाय हेतुमाह **--आर्हतत्वस्याभ्युपगम्यमानत्वा**दिति अन्यापोहाभ्युपगमात् स्ववचनादेव जैनेन्द्रं मतमभ्युपगतं त्वयेति वक्ष्यामः । § 2156

**स्ववचनानपेक्षायामपी**त्यादि । यद्यपि स्वं वचनमनपेक्ष्यापि अनित्यं सर्वं प्रयत्नानन्तरीयकं न भवति इति ब्रूषे तथापि ते वचनं न्यायापेतमेवेदम् । तद्यथा **--तान्यपी**त्यादि, तान्यपि अभ्रेन्द्रचापादीनि **सिद्धप्रयत्नानन्तरीयकान्येवे**ति प्रतिज्ञा, **लोकप्रत्यक्षे**त्यादि समासदण्डको हेतुर्यावद् **विहितवृत्तित्वा**दिति । **कुड्यादिदृष्टान्तः** । तद्व्याख्या **लोकप्रत्यक्षे**त्यादिविशेषणप्रयोजनानि च पिण्डार्थेन विद्युदादीनां चैतन्यं तावत् साध्यते--जीवशरीरं वातादयः, अनण्वादित्वे स्पर्शादिमत्त्वात्, गोवत् । तस्यापि गोर्मृतस्य जीवत्वाभावाद् मा भूदनैकान्तिकते[ति] जीवशरीरत्वेऽपि तु **नात्यन्तक्तशरीरचित्ते**त्यादि यावत् **स्वयं प्रवृत्तत्वा**दिति विशेषणव्याख्या । **स्थपतिव**दिति स्थपतेश्चैतन्यवत्

- /ms

। वातादिचैतन्ये सिद्धे **चेतनविहितवृत्ति** चेत्यादिना विद्युदभ्रमेघशब्दादीनां

२४ कं ] चोच्यते वस्थैर्येnayacakra-ms-bhā ॥
२६ ध्रु ] ध्रु स्थैर्ये--पा॰ धा॰ ९४३ ॥
१ त्यादि ] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१ ए ] एवंस्यैवnayacakra-ms-bhā । एकस्यैव ? । परिणाम्यभेदपरिणामान्तरसाध्यत्वे परिणामान्तरसाधनत्वादेकस्यैव हेतुहेतुमद्भावभावनार्थमाह इत्यपि पाठोऽत्र भवेदिति ध्येयम् ॥
४ स्यैव ] हेतुसद्भावभावनार्थ॰nayacakra-ms-ya ॥
१८ स ] सम्बद्धस्य इत्यपि पाठोऽत्र स्यात् ॥
२० स्याभावा ] इतः परं पाठस्त्रुटितः सर्वासु प्रतिषु ॥
२१ थापि ] ते क वचनंnayacakra-ms-ya ॥
२६ रीर ] ॰रचेत्तेत्यादि प्र॰ ॥

चेतनवातप्रयत्नोत्थता दर्श्यते, **सवितृगती**त्यादिना * * 699/mj

* * *

याप्याधाराधेयवद्वृत्तिः--

*लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत् पुनः ।
नियमस्य विपर्यासे सम्बन्धो लिङ्गलिङ्गिनोः ॥§ 2159

यस्माल्लिङ्गे लिङ्गी भवत्येव तस्माद् युक्तं यदग्निवद् धूमो द्रव्यत्वादीनामपि प्रकाशको न तैक्ष्ण्यादीनाम् । यस्माच्च लिङ्गिन्येव लिङ्गं भवति नान्यत्र तस्माद् युक्तं यद् धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिः । एवं ह्यवधारणवैपरीत्येन सम्बन्धो लिङ्गलिङ्गिनोः । प्र° समु° वृ° २ । २० १/२ ।

एषापि तद्भावदर्शनविधेरेव गमयति न व्यावृत्तिबलेन । न हि योषिद्गण्डपाण्डुत्वं गमयत्यग्निम्, अभूताग्निधूमकत्वात् । धूमभूतं गमयति धूमभूताग्नित्वात् तद्भावस्य तद्भावत्वेनैव गमकत्वात् ।

यथा चेदं तथा द्रव्यत्वादिसामान्यस्यापि धूमभूतेर्गमकत्वमग्नेः पाण्डुत्ववत् । अग्नेरपि द्रव्यत्वसामान्यगतिरग्निभूतत्वात् । यत्तु धूमो दीप्त्यादिविशेषाणामगमकस्तत् तद्भावदर्शनविधेरेव तथा चान्यथा च दृष्टत्वाद् व्यभिचारात् ।

* * *

इन्द्रधनुषः । तस्माद् विद्युदादीनि प्रयत्नानन्तरीयकानि अनित्यानि चेत्यनित्यप्रयत्नानन्तरीयकत्वयोरन्योन्यगम्यगमकता । § 2160

एवमविनाभावित्वकुतर्कस्य विनाभावेनास्माभिः **तद्भावदर्शनादेव साध्यसाधनधर्मयोः विधेः संयोगिवद्वृत्तिः** यथाप्रतिज्ञमुक्ता, न त्वाधाराधेयवद्वृत्तिः इति प्रतिपादयिष्यामः **--याप्याधाराधेयव**दित्यादि । यामपि आधाराधेयवद्वृत्तिं मन्यसे **लिङ्गे लिङ्गी भवत्येवे**त्यादि श्लोकः । तद्व्याख्या **--यस्माद् लिङ्गे** धूमे **लिङ्गी** अग्निर्**भवत्येव** न [न] भवत्यपि **तस्माद् युक्त**मित्यवधारणार्थप्रदर्शनम् । **यस्माच्च लिङ्गिन्येवे**त्यादि यावद् **द्रव्यत्वादिभि**रित्यादि तद्विपरीतावधारणप्रदर्शनं गतार्थम् । सामान्यस्य गम्यत्वं लिङ्गिनि न विशेषाणाम्, लिङ्गस्य च विशेषाणां केषाञ्चिद् गमकत्वं न सामान्यस्य दृष्टम्, तत् सर्वमविनाभावादाधाराधेयवद्वृत्तेरिति पूर्वपक्षः । § 2161

---

३ *] न ध्रुवे त्यप्र प्र° । त्यबू नेर्ध्रुवे । त्यबू नेर्ध्रुवे वक्तव्यः । नित्यः । --nayacakra-ms-pā म° nayacakra-ms-bhā ४ । २ । १०४ ॥
४ *] क्रियतेत्यादिnayacakra-ms-ya ॥
८ *] दृश्यतां पृ° ६७९ पं° ४--८ ॥
९ विद्युदादीनि] दृश्यतां पृ° ६७९ पं° ४--८ ॥
९ स्य] विनास्माभिःnayacakra-ms-bhā ॥
११ मु] मुक्ता प्र° ॥
११ ग] गमकत्वंnayacakra-ms-ya ॥

अत्रोत्तरम् --**एषापीत्यादि** । इयमपि आधाराधेयवद्वृत्तिः **तद्भावदर्शनविधेरेव** यत्र दृष्टस्तद् **गमयति** दर्शनबलेन, न यत्रादृष्टस्तद्भवच्छेदेन व्यावृत्तिबलेनेति । अत्रापि **न हीत्यादि** यावनत् ? **योषिद्वण्डपाण्डुत्वं** न गमयति अग्निम्, अभूताग्निधूमकत्वात्; धूमभूतं तु पाण्डुत्वं गमयत्यग्निं धूमभूताग्नित्वात्, विधेरेव तद्भावस्य तद्भावत्वेनैव गमकत्वात् । § 2162

**यथा चेदमित्यादि**, पाण्डुत्वादिविशेषस्य धूमभूतत्वेन गमकत्ववद् द्रव्यत्वादिसामान्यस्यापि धूमभूतेर्गमकत्वमग्नेरिति भावना यावत् **पाण्डुत्ववदिति** । एवं तावद्धूमभूतसामान्य-विशेषधर्माणां गमकत्वं तुल्यम् । *विधेरेव गम्य-
- /ms त्वनियमाविशेषः । तथाहि --**अग्नेरपि द्रव्यत्वसामान्यगतिः, अग्निभूतत्वात्** । नोदकादितद्व्यतिरिक्तद्रव्यत्वगतिः, अतद्भूतत्वात् । **यत्तु धूमो दीप्त्यादीत्यादि**,
700/mj दीप्ति-तैक्ष्ण्यादिविशेषा *

* * *

तद्भावदर्शनानुबन्धेन हि बुद्ध्युत्पत्तिरनुमानम् । धूमवत्त्वमग्निमत्त्वानुबद्धमेवेत्यैकान्तिकग्रहणेऽनुमानं भवति, अव्यभिचारात् । व्यभिचारात्त्वनुमानाभासम्, तद्यथा वृक्षक्षुपादिवज्ज्वलनतैक्ष्ण्यादिव्यभिचारेण । तथाविधदर्शनबुद्ध्यनुबद्धमेवानुमानमपि... ... ...। तदतत्पक्षद्वयगतैकान्तमनाश्रित्य ज्ञानमनवधृतार्थमनध्यवसायो विपर्ययश्चानुमानाभासौ ।

व्यावृत्तेस्त्वनुमानाप्रामाण्यापत्तिः, अत्यन्ताज्ञानादनध्यवसायवत्, ग्राह्यवृत्त्यननुरोधिप्रतिपत्तेर्वा विपर्ययवत् ।

* * *

गतिरपि तद्भावदर्शनविधेरेव, **तथा चान्यथा च** दीप्ति-तैक्ष्ण्यादिरूपेण तद्विरहितत्वेन च **दृष्टत्वाद् व्यभिचारात्**, नात्यन्ताभूतशीतादिव्यभिचारादसम्बद्धादगतिः, किं तर्हि ? सम्बद्धव्यभिचारादेव । § 2163

किञ्चान्यत्, **दर्शनविधेरेवा**नुमानलक्षणोपपत्तेः स एवैषितव्य इत्यत आह --**तद्भावदर्शनानुबन्धेन हि बुद्ध्युत्पत्तिरनुमान**मित्येतदनुमानलक्षणम् । तद् व्याचष्टे --**धूमवत्त्व**मित्यादि, यदा धूमवत्त्वं प्रदेशस्याग्निमत्त्वानुबद्धमेव इत्यैकान्तिकं ग्रहणं तदानुमानं भवति धूमादग्निरत्र इति, तस्याग्नेरेकान्तेनैव ग्रहणमव्यभिचारात् । व्यभिचारात् त्वनुमानाभासम्, तद्यथा--वृक्ष-क्षुपादिव-

२० अ] **अत्रोत्तरमेषामपीत्यादि** प्र° । अत्रोत्तर**मियमपीत्यादि** इत्यपि पाठोऽत्र भवेत् ॥
२१ या] अत्र किञ्चिदशुद्धं त्रुटितं वा प्रतीयते । न हीत्यादि **भावना**, योषिद्वण्डपाण्डुत्वं न... ... इति चेत् पाठस्तदा सम्यक् सङ्गच्छते ॥
२२ अभूताग्नि] °**धूमत्वात्**nayacakra-ms-ya ॥
२४ विधेरेव] **विधिरेव** प्र° ॥
३ *] **विधिरेव** प्र° ॥
३ त] **तथा व्यग्नेपि** प्र° । तथा चाग्नेरपि इत्यपि पाठोऽत्र स्यात् ॥
९ *] पृ° ६८९ पं° २ ॥
१२ द्भाव] °**दर्शनेविधिरेव** प्र° ॥
१३ स] °**संबंद्धाद**°nayacakra-ms-ya ॥
१६ स] **संबंधव्यभि**° प्र° ॥
१८ ल] °**लक्षणं च**nayacakra-ms-ya ॥

ज्ज्वलनतैक्ष्ण्यादिव्यभिचारेण, यथा यदा तु वृक्षः क्षुपो वात्र, धूमात् इति तदानुमानाभासं भवति, विनापि वृक्षादिना दृष्टत्वाद् व्यभिचाराद् दर्शनबलेनैव । तदुपसंहारः **तथाविधदर्शनबुद्ध्यनुबद्धमेवानुमानमपी**त्यादि गतार्थ एवं सन्देहानुमानाभासश्च । अनध्यवसाय-विपर्ययानुमानाभासावपि, तद्यथा --**तदतत्पक्षे**त्यादि । स चासश्च पक्षौ तदतत्पक्षौ, तयोर्द्वयम्, तद्गतमेकान्तं भूतमेव, अभूतमेव इत्यनाश्रित्य यथा अग्निरत्रैव, अग्निरत्र भवत्येव एवमाद्यनिश्चितासन्दिग्धरूपं ज्ञानमनवधृतार्थमनध्यवसायः, विपर्ययश्चाभूते भूतप्रत्ययः, भूते चाभूतप्रत्ययः, स्थाणौ पुरुषप्रत्ययवत् । एतावप्यनुमानाभासौ । तत्परिणामाव्यवच्छेदेन तथाविधदर्शनबुद्ध्यनुबद्धमेवानुमानं - /ms दृष्टवत्, तथैवानुमानाभासोऽपि । § 2164

त्वन्मत्या **व्यावृत्तेस्त्वनुमानाप्रामाण्यापत्तिः** न भवति न भवति इत्युभयतोऽप्यभवनपरमार्थत्वादर्थान्तरमभावो वाऽत्यन्तमदृष्टत्वात् अग्निर्न भवति, उदकमनग्निः स न भवति घटः खपुष्पं वा इति अज्ञानमेवेत्यप्रामाण्यापत्तिः पूर्वोक्तन्यायेन । कस्मात् ? **अत्यन्ताज्ञानादनध्यवसायव**दित्यप्रामाण्यम् । तथा विपर्ययवदप्रामाण्यापादनार्थमाह --**ग्राह्यवृत्त्यननुरोधिप्रतिपत्तेर्वा विपर्ययव**दिति । ग्राह्यस्याग्नेर्विधिरूपेण वृत्तिरग्निभवनम्, तदनुरोधिनी न भवति या प्रतिपत्तिः सा ग्राह्यवृत्त्यननुरोधिनी, तस्याः प्रतिपत्तेर्ग्राह्यवृत्त्यननुरोधिन्या हेतोरप्रामाण्यं व्यावृत्त्यनुमानस्य, पुरुषे स्थाणुप्रत्ययवदिति प्रागुक्तन्यायबलेनानिष्टापादनं गतार्थम् । तस्माद् दृष्टवदेवानुमानतदाभासौ यथादृष्टज्ञानानुबद्धत्वादिति । § 2165
701/mj

एवं च तदपि न दूषणं यत् किल सम्बन्धानुमानलक्षणस्य अस्येदं कार्यं कारणम् वै° सू° ९ । १ । १८ इत्यादेश्चोक्तं दूषणम्, उक्तविधिवृत्तिभावनत्वादनुमानस्य । § 2166

लिङ्गेन न विना लिङ्गी... ... ...।

---

२४ म] °मपीतिnayacakra-ms-ya ॥
१ ग] गतार्थं एवं सन्देहानुमानाभासं च प्र° । गतार्थमेवं सन्देहानुमानाभासं च ? ॥
७ अभूत] °तमेवेत्यना° प्र° । तमेव वेत्यना° ? ॥
९ त] तथाविधिदर्श° प्र° ॥
१५ वाऽत्य] °त्यन्तरंमनेदृष्टत्वात्nayacakra-ms-bhā ॥
१५ अज्ञान] °नमेवोत्यप्रा°nayacakra-ms-bhā । °नमेवोत्पत्यप्रा° nayacakra-ms-ya ॥
१६ व] °यत्रवदिति प्र° ॥
१९ व्यावृत्त्य] °त्यननुमानस्य प्र° । °त्याऽनुमानस्य ? ॥
२१ लिङ्गी] लिङ्ग एवेतरत् पुनः इत्यपि द्वितीयपादोऽत्र स्यात् ॥

*लिङ्गे चेल्लिङ्गिनियमस्तैक्ष्ण्यं किमिति नेष्यते ॥§ 2168

न यथाह--[लिङ्गे लिङ्गी भवत्येव । न तु लिङ्गिनि लिङ्गं भवत्येव लिङ्गिसत्त्वेऽपि लिङ्गाभावाद्] अयोग्निवत् । लिङ्गिनि देशे धूमो भवन्नेव पक्षधर्मो भवति । § 2169

यथा वाह--लिङ्गिन्येव लिङ्गं भवति नालिङ्गिनि, तदपि न घटते, नियमेन तस्य सद्भावे तत्रैवाग्नौ लिङ्गत्वात् । § 2170

**एवं च तदपी**त्यादि । अतिदेशेन सम्बन्धानुमानलक्षणस्य **सम्बन्धादेकस्मात्** इत्यादेः **अस्येदं कार्यं कारणम्** वै॰ सू॰ ९ । १ । १८ इत्यादेश्च यत् किल दूषणं सम्बन्धस्याविशिष्टत्वाद् धूमादग्निद्रव्यादिवद् दीप्तितैक्ष्ण्यादीनामपि गम्यत्वम्, धूमपाण्डुत्वादिविशेषगमकत्ववद् द्रव्यसत्त्वादिसामान्यस्यापि गमकत्वम्, अग्नेर्वा गमकत्वं धूमवत्, धूमस्य वाग्निवद् गम्यत्वम्(?') इत्येते दोषाः प्रसक्ता दृष्टवद् विधिवृत्तेरनुमानोक्तेः यथा दृष्टस्तथा सन्देहानध्यवसायविपर्ययनिश्चयकृदित्यभ्युपगमादिति । एतदपि न दूषणम्, उक्तविधिवृत्तिभावनत्वादनुमानस्येति । § 2171

किञ्चान्यत्, **लिङ्गे लिङ्गी भवत्येव** इत्यस्याः कारिकाया योऽर्थोऽवधारण- - /ms णवैपरीत्येनाऽनुमानमि- त्युक्तस्तस्य दूषणार्थमाहाचार्यः **--लिङ्गेन न विना लिङ्गी**त्यादि श्लोकः । **न यथाहे**त्यादि परमतप्रदर्शनं याव**दयोग्नि**वदिति नियमविपर्ययेण सोदाहरणम् । अत्रोत्तरम् **--लिङ्गिनि देशे**ऽग्निमति **धूमो भवन्नेव पक्षधर्मो भवति,** नाभवन् असिद्धत्वादलिङ्गत्वात् । आबद्धमूलत्वादिविशेषणावधृतपक्षधर्मत्वस्यैव लिङ्गत्वाल्लिङ्गिनि लिङ्गं भवत्येव वात्यादिव्युदासेन । तस्य च धूमस्याग्निगततैक्ष्ण्यादिलिङ्गत्वं न भवति, न दृष्टत्वाद् धूमे तस्याग्नेरदृष्टत्वात् तैक्ष्ण्यादिना च सह विधिवृत्त्येति । § 2172

**यथा वाहे**त्यादि । **लिङ्गिन्येव** इत्यस्यावधारणस्य निरूपणम्--यदा भवति लिङ्गं तदा नालिङ्गिनि भवति उदकादौ धूम इति । तदपि न घटते, कस्मात्

---

२१ *] दृश्यतां पृ॰ ७०२ पं॰ ९--१० ॥
२३ स] पृ॰ २४० पं॰ ११ ॥
२ दू] वैशेषिकमतपरीक्षावसरे प्रमाणसमुच्चयवृत्तौ द्वितीयपरिच्छेदे विस्तरेणापादितमिदं दूषणं दिङ्नागेन । विस्तरार्थिभिः Gaekwad's Oriental Series, Baroda इत्यत्र प्रकाशितस्यास्मत्सम्पादितस्य वैशेषिकसूत्रस्य सप्तमे परिशिष्टे पृ॰ १८४— १९६ इत्यत्र सवृत्तिकात् सटीकाच्च प्रमाणसमुच्चयादुद्धृता वैशेषिकानुमानपरीक्षा विलोकनीया ॥
२ दृ] **दृष्टवष्विविवृत्ते॰**nayacakra-ms-bhā । **दृष्टविष्विविवृत्ते॰** nayacakra-ms-ya ॥
२ त्येव] पृ॰ ६७९ पं॰ ४ ॥
३ कारिकाया] **योर्थावधा॰** भा । **यार्थावधा॰** nayacakra-ms-ya ॥
११ आ] **अबंधमूल॰** प्र॰ ॥
१७ तैक्ष्या] **॰क्ष्ण्यादिलिंगं न भवति** प्र॰ ॥
१८ न] न भवति, दृष्टत्वाद् धूमे तस्याग्नेः, अदृष्टत्वात् तैक्ष्ण्यादिना च सह विधिवृत्त्येति इत्यपि पाठोऽत्र भवेत् ॥
१९ लिङ्गि] पृ॰ ६७९ पं॰ ४ ॥

? **नियमेने**त्यादि, तस्य धूमस्य सद्भावे बद्धमूलत्वादिविशेषपरिच्छिन्ने **तत्रैवाग्नौ** नान्यत्रायोग्न्यादौ **लिङ्गत्वम्** । किं कारणम् ? अग्निरत्र इति अत्रशब्दस्याधिकरणवाचिनोऽर्थवत्त्वे अत्रशब्दवाच्यैतत्प्रदेशसम्बन्धिन्येवाग्नौ लिङ्गित्वात्, अन्यथाऽनुमानाभावदोषस्योक्तत्वात् । तस्मात् स एव तस्यैव लिङ्गमिति सिद्धम् । यत् पुनर्धूमगतद्रव्यत्वाद्यग्न्यप्रकाशनं तत्तु अस्मदिष्टदर्शनविधेरेव तथा व्यभिचारात् । § 2173
702/mj

लिङ्गे चेल्लिङ्गिनियमस्तैक्ष्ण्यं किमिति नेष्यते ?§ 2174

अदर्शनमिति चेत्, तन्न, प्रचुरहरिततृणेन्धनो धूमस्तार्णाल्पतादिविशेषानग्नेर्गमयति । बहल... ... ...[धूमो बहुतापादिविशेषान् गमयति] हस्तलगृहाङ्गणगतस्तौषस्तौषाग्निं गमयति । इति लिङ्ग एव लिङ्गिनो भावः । § 2175

अथोच्येत--*विशेषा न तु गम्यन्ते तस्यैव व्यभिचारिणः प्र° समु° २ । १८ । न, तैक्ष्ण्यादिवचनात् । तत्रापि चोक्तमेव तद्भावदर्शनविधेरेव तदिति । § 2176

न च लिङ्गिन्येव लिङ्गमिति नियमो वासगृहवत् । शक्यते च लिङ्गे धूमे नियमादग्निरिति वक्तुम्, असन्धुक्षितानग्नित्वात् । § 2177

किन्तु यथा च त्वयोच्यते ***लिङ्गे लिङ्गी भवत्येव** इति, तत्र **लिङ्गे चेल्लिङ्गिनियमः तथा चेदं दोषजातम्--तैक्ष्ण्यं किमिति नेष्यते ?** धूमत्वावधारणकारणविशेषाणां दीप्ततर-मन्दप्रकाशनादिविशेषसहचरत्वाद् धूमादग्निगतिवत् तदवधारणकारणविशेषसहचराग्निविशेषः कस्मान्नेष्यते तेभ्य एव धूमावधारणकारणविशेषेभ्यः ? । § 2178 - /ms

स्यान्मतम् --**अदर्शनमिति चेत्, तन्ने**ति दर्शनमस्ति इत्युच्यते । **तद्यथा प्रचुरहरिते**त्यादि, यत्र दोग्धारः पुरुषा एव दोहयन्तीभिर्विरहिताः, गोकुले हरिततृणाकीर्णे नवावासे गवां मशकनिवारणार्थं हरिततृणेन्धनोऽग्निः क्रियते तत्रैतद्दण्डकोक्तविशेषो धूमस्तार्णाल्पतादिविशेषानग्नेर्गमयति । तथा

२३ वा] °वाचिनोर्यथावत्वेnayacakra-ms-ya ॥
२५ वा] °वाचेतत्प्र° प्र° ॥
२५ न्धिन्येवाग्नौ] लिङ्गित्वात् प्र° ॥
५ थाऽनु] °नुमानदोषाभावस्यो° प्र° ॥
५ स्योक्त] पृ° ६७६ पं° ६ ॥
७ *] दृश्यतां पृ° ६७५ पं° २ ॥
८ *] पृ° ६७९ पं° ४ ॥
११ त्वा] °त्वाचकरणविशेषाणां प्र° ॥
१२ न्ती] °न्तीतिर्विरहिता प्र° ॥
१५ त] तत्रैव तद्दण्ड°nayacakra-ms-ya ॥
१५ स्तार्णाल्प] °ल्पतापादि° इत्यपि पाठोऽत्र भवेत् । तुलना--पृ° ६७३ पं° ५ ॥

**बहलेत्यादिना** तापाभिवृद्ध्या विशेषः । **हस्तला** मृत्पात्रकाराः शिल्पिनः, तद्गृहाङ्गणगतस्तौषस्तौषाग्निं गमयतीति विशेषाणामपि लिङ्गित्वदृष्टेर्लिङ्गे धूम एव लिङ्गिनोऽग्नेर्भावः । तस्माद् नावधारणवैपरीत्येन लिङ्गलिङ्गिता, न च विशेषागम्यतेति । § 2179

**अथोच्येतेत्यादि** । स्यान्मतम्--मया विशेष्योक्त एवादोषोऽस्य **विशेषा न तु गम्यन्ते**, के ? ये **तस्यैव व्यभिचारिण** इति । एतदपि **न, तैक्ष्ण्यादिवचनात्,** त्वया हि ***दीप्तितैक्ष्ण्यादयो विशेषा न गम्यन्ते** इति कारिकार्थं विवृण्वतोक्तत्वात् तैक्ष्ण्यादीनां च गम्यतत्व[स्य] दर्शितत्वादिति । § 2180

किञ्चान्यत्, मया तत्रापि चोक्तमेव तद्भावदर्शनविधेरेव तदिति, तदपि च विशेषाणां गम्यगमकत्वं साध्यसाधनधर्मयोस्तद्भावेन दृष्टयोर्विधिरूपेण संयोगिवद् वृत्तेर्दृष्टबलेनैव न व्यावृत्त्येत्यभिहितमेव । तस्मात् ***लिङ्गे लिङ्गी भवत्येव** इत्ययुक्तमुक्तम् । ***लिङ्गेन न विना लिङ्गी** इत्यादि श्लोकश्च साधूक्तः । § 2181

यदप्युक्तं लिङ्गिन्येव लिङ्गम् इति, तदपि **न च लिङ्गिन्येव लिङ्गम्**
- /ms **इति नियमो वासगृहवत्,** यथा वासगृहेऽपनीताग्निके लिङ्गिनाग्निना विनापि धूमस्य दृष्टत्वादरणिनिर्मथनावस्थस्येति । शक्यते च लिङ्गे धूमे नियमादग्निः
703/mj इति वक्तुम्, कस्मात् ? **असन्धुक्षितानग्नित्वात्,** न ह्यसन्दीप्ते *

* * *

एवं च लिङ्गं लिङ्गिनि व्यापित्वादेव गमकत्वं भजते कृतकानित्यत्ववत् ।
त्वन्मतिवत् साध्यधर्मस्य लिङ्गित्वे साधनधर्मस्य लिङ्गत्वेऽपि ब्रूमः--

यथा लिङ्गमपि व्यापि तथा लिङ्गमप्यङ्ग्यपि ।
उभयं लिङ्गं लिङ्गि वा न यत् तद् गोविषाणवत् ॥§ 2184

यथा लिङ्गमपि व्यापि संयोगिवद्वृत्तौ... ... ...तथा लिङ्गमप्यङ्ग्यपि ।

* * *

न्धनावस्थोऽरण्यवस्थो वाग्निरधूमकः, अधूमत्वादनग्निरेव **अगि रगि लगि गत्यर्थः** इत्यङ्गनाद् गमनादग्निः । अनिन्धनो न गच्छति न दहति, अगच्छ-

---

१६ अ] **अथोच्यतेत्यादि** प्र॰ ॥
१७ ए] **एवादोषस्यापि शेषाननु**nayacakra-ms-ya । **एवादोस्यापि शेषा ननु** nayacakra-ms-bhā । **एवादोषो** विशेषा न तु ? एव **दोषो** विशेषा न तु ? ॥
१७ *] दृश्यतां पृ॰ ६०६ टि॰ ७ । प्रमाणसमुच्चयवृत्तौ **अनेकधर्मणोऽर्थस्य न लिङ्गात् सर्वथा गतिः** । २ । १२ । इति कारिकार्धस्य विवरणे एतद् वाक्यं विलोक्यत इति ध्येयम् ॥
२५ ग] **गम्यतत्वदर्शितत्वा॰** प्र॰ । **गम्यत्वस्य** दर्शितत्वा॰ इत्यपि पाठः सम्भाव्यते ॥
१ मेव] पृ॰ ६८१ पं॰ २ ॥
२ *] पृ॰ ६७९ पं॰ ४ ॥
३ *] पृ॰ ७०१ पं॰ ३ ॥
८ लिङ्गिनाग्निना] **विना धूमस्य**nayacakra-ms-ya ॥
१३ नाव] ॰स्थस्य चेति ? ॥
१३ *] **केषे तस्यैव**nayacakra-ms-bhā । **केषा तस्यैव** nayacakra-ms-ya ॥
१५ अ] दृश्यतां पृ॰ ६१ पं॰ ७ टि॰ ३ ॥
११ अ] **अगच्छन्ननदहनग्निरेव** प्र॰ ॥

न्नदहन्ननग्निरेव । भस्मच्छन्नस्यापि बाष्पोष्मपुद्गलनिश्चरणात् सेन्धनत्वं सधूमत्वं च परमार्थतः तत्परिणामादग्न्यभिहतकाष्ठतृणादीन्धनानां सन्दीपनप्रज्वलनज्वालाङ्गारमुर्मुरभस्मच्छन्नोष्ममात्राद्यवस्थासु श्लक्ष्णधूमपरिणामाशून्यत्वात् सर्वत्र धूमेऽग्निर्नियतः तथाग्नौ धूमः । § 2185

एवं च कृत्वात्र प्रयोगः --**लिङ्गं** धूमो **लिङ्गिन्यग्नौ व्यापित्वादेव गमकत्वं भजते** विधिवृत्त्यैवेत्यर्थः । **कृतकानित्यत्ववदि**ति दृष्टान्तः, यथा कृतकत्वमनित्यतां व्याप्नुवद् गमयति तथा धूमोऽप्यग्निमिति । एवं लिङ्ग एव लिङ्गीत्यपि ग्राह्यम् । § 2186

**त्वन्मति**वदित्यादि । अस्मन्मतेन साध्यं साधनं च एकमेव इत्युक्तत्वात् परस्परव्यापित्वाद् विधिरूपेणैवोभयतोऽपि गम्यगमकता न व्यावृत्त्येत्यत्र किं चित्रम् ? त्वन्मतेनापि भेदं कृत्वा साध्यधर्मस्याग्नेर्लिङ्गित्वे साधनधर्मस्य धूमस्य लिङ्गत्वेऽपि ब्रूमः --**यथा लिङ्गमपि व्यापी**त्यादि श्लोकः । यथोच्यते त्वया—

कामं लिङ्गमपि व्यापि लिङ्गिन्यङ्गि तु तत्ततः ।
व्यापित्वान्न तु तत्तस्य गमकं गोविषाणवत् ॥ प्र॰ समु॰ २ ।
२१ १/२ इति ।§ 2189

विधेयार्थप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते ।लिङ्गस्य लिङ्गिनि
व्याप्तिस्तस्मात् सत्येव साधनम् ॥§ 2191

अत (Edtext outside numbered paragraph)

* * *

... ... ...अत एव च... ... ...न यत्तद् गोविषाणवत् । विषाणं हि प्रमेयत्ववद् व्यभिचारि... ... ...इतरवदगौरव्यभिचारी--। किं कारणम् (Edtext outside numbered paragraph) ?

विधेयो भावः । तस्य प्रकर्षेण गतिः प्रचारोऽनुत्पिञ्जलगमनिका, न धूमसामान्याग्निमद्वतिवत् । यस्माद् व्याप्तिरेवंविधाऽपेक्ष्यतेऽस्मदिष्टा द्वैविध्येन उभयाव्यभिचारात्मिका यत्र यत्र... ... ...तस्मात् सत्येव व्याप्तिः साधनम् ।

धूमो यथाग्निसान्निध्यार्थविशेषणैरात्मलाभादग्निसान्निध्यं गमयति तथा

* * *

एव चे

१४ निश्च ] °निश्चयंरणात् प्र॰ ॥
१६ तृणा ]
°णादीत्ववनानांnayacakra-ms-bhā ।
°णादीत्वचनानां nayacakra-ms-ya ॥
१८ रिणामा ] °मात् सून्य° प्र॰ ॥
२० ए ] एवं प्र॰ ॥
२२ स्य ] लिंगित्वेऽपि प्र॰ ॥
१ लिङ्ग ] °मभिव्यापी° प्र॰ ॥
२ य ] न यथोच्यते इत्यपि पाठः स्यादत्र ।
तुलना--पृ॰ ७०४ पं॰ १३ ॥
५ व ] दृश्यतां पृ॰ ६५९ पं॰ १० ॥

विधेयार्थप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते ।लिङ्गस्य लिङ्गिनि
व्याप्तिस्तस्मात् सत्येव साधनम् ॥§ 2193

त्यादि सहेतुकं प्रतिज्ञातं निगमयति । **नियत्तं न यत्तद् गोविषाणव**दिति, **य**च्छब्दो यस्मादर्थे, **त**च्छब्दस्तन्निर्देशे, यस्माद् गोविषाणवदेकतो न व्यभिचरति तस्मादुभयं (Edtext outside numbered paragraph)लिंगं लिङ्गि वेति ग्राह्यम् । तद्व्याख्या --**विषाणं ही**त्यादि असाधर्म्यदर्शनं गो-विषाणयोः कृतकानित्यत्वयोश्च गतार्थम् । प्रमेयत्ववद् व्यभिचारि विषाणित्वम् । **इतरो** धूमः, तद्वद् गौरव्यभिचारीति । § 2194

विधेयो भावः । तस्य प्रकर्षेण गतिः प्रचारोऽनुत्पिञ्जलगमनिका, न धूमसामान्याग्निमद्वतिवत् । यस्माद् व्याप्तिरेवंविधाऽपेक्ष्यतेऽस्मदिष्टा द्वैविध्येन उभयाव्यभिचारात्मिका यत्र यत्र... ... ...तस्मात् सत्येव व्याप्तिः साधनम् ।

धूमो यथाग्निसान्निध्यार्थविशेषणैरात्मलाभादग्निसान्निध्यं गमयति तथा

* * *

एव चे

**किं कारण**मित्थमिति चेत्, अस्मदुक्ताया व्याप्तेर्विधिरूपाया एव गम्यगमकत्वादिति । अत आह --**विधेयार्थे**त्यादि श्लोकः । अत्रापि न यथा त्वयोच्यते --**प्रतिषेध्याप्रचारेण** इत्यादि । तद्व्याख्या **विधेयो भाव** इत्यादि, भावग्रहणमभावरूपाया व्याप्तेर्निराकरणार्थम् । कस्मात् ? अर्थत्वादेव । **तस्य** भावस्य, नाभावः प्रतिषेध्यः तत्राप्रचारः, स चाप्रमाणफलं भवितुमर्हति अर्थान्तरस्यात्यन्ताभावस्य चाविवक्षितत्वात् प्रागुक्तदोषसम्बन्धाच्च, **प्रकर्षेण गतिः प्रचारो** वस्तुयथाभावावगम इत्यर्थः, **अनुत्पिञ्जलगमनिके**ति तदर्थगमनम् अव्यथागमनम् । वैधर्म्येण न यथा त्वदिष्टमिति दर्शयति --**न धूमसामान्याग्निमद्वतिव**दिति एकतो व्याप्तिं विषाणित्वादिकल्पां दर्शयति । यस्माद् **व्याप्तिरेवंविधा** परस्परसंसृष्टा**ऽपेक्ष्यते** गतावर्थस्य **तस्मात् सत्येव व्याप्तिः साधन**मित्यभिसम्भन्त्स्यते, विशब्दस्य द्वैविध्यार्थत्वात् । तद्दर्शयति—अस्मदिष्टा द्वैविध्येन व्याप्तिरुभयाव्यभिचारात्मिका, तस्मात् किम् ? स्फुटमेवान्वयात्मको दृष्टान्तो नोच्यतेऽस्माभिः, **यत्र यत्रे**त्यादिरुभयव्याप्तिप्रदर्शनो गतार्थो यावत् **सत्येव साधन**मित्युपसंहार इति । तस्माद् दृष्टान्तलक्षणमपि **साध्येनानुगमो हेतोः** प्र॰ समु॰ ४ । २ इत्यादि प्रयोगनियमाभिधानात्मकमनर्थकम्, मुधा भ्रान्तं चात्र त्व[ये]ति । § 2195

- /ms

१६ प्र] पृ॰ ६७७ पं॰ २२, पृ॰ ६८० पं॰ २ ॥
१७ न] **मध्यथा॰** प्र॰ ।
उत्पिञ्जलगमनिका अव्यथागमनमित्यर्थः । उत्पिञ्जलसमुत्पिञ्जपिञ्जलाभृशमाकुले ॥ ३ । ३० ॥ उत्पिञ्जयतीति उत्पिञ्जलः । समुत्पिञ्जयति समुत्पिञ्जः । पिञ्जयतीति पिञ्जलः । भृशमत्यर्थमाकुले । --अभिधानचिन्तामणिस्वोपज्ञवृत्तिः ॥
२० व्या] **व्याप्तिरेवविधा** प्र॰ ॥
२१ अस्म] **अस्मद्दिष्टा** प्र॰ । अस्मदुद्दिष्टा ? ॥
२२ मित्यु] **॰त्युक्तपसंहारः** प्र॰ । ॰त्युक्तोपसंहारः ? ॥
१ सा] दृश्यतां टिपृ॰ १३३ पं॰ ९ ॥
२ त्व] **त्वति**nayacakra-ms-bhā । **त्वावि** nayacakra-ms-ya ॥

**धूमो यथेत्यादि** । एवं कृत्वा यथाऽग्निसान्निध्यार्थैर्विशेषणैर्धूमात्मलाभादग्निसान्निध्य[मेवातुलना--पृ॰ ७०५ ॥ग्निसान्निध्य]साधकं तथा कृतकत्वं घटादौ, घकारा-ऽकार-टकारा-ऽकारविसर्जनीयानां पूर्वस्य पूर्वस्य विनाश 705/mj

* * *

कृतकत्वमनित्यत्वसान्निध्यादात्मलाभादनित्यत्वसान्निध्यं गमयति... ... ... घटकृतकत्ववत् ।

अस्मादेव च न्यायाद् यदप्युक्तं नाशिनः कृतकत्वेन प्र॰ समु॰ २ । २३ इत्यादि तदप्येवमध्येयम्--

नाशिनः कृतकत्वेन व्याप्तेस्तत् कृतकं कृतम् ।
अनित्यत्वं त्वभिव्याप्त्या कृतकेऽर्थे प्रदर्श्यते ॥§ 2198

येयम्... ... ...स्थापितम्... ... ...कृतकत्वस्यानित्यत्वम् ।

विषाणित्वेन गौर्व्याप्तो विषाणित्वं प्रसाधयेत् ।
गव्येवानियमात् तत्तु न गवार्थप्रसाधनम् ॥§ 2200

* * *

उत्तरोत्तरोत्पत्तेः कारणम्, तत एव विनाशादनित्यत्वादुत्पत्तेः कृतकत्वस्यात्मलाभादनित्यत्वसान्निध्यमेवानित्यत्वसान्निध्यं गमयतीत्युभयतो व्याप्तिः सत्येव कारणम् । शिवकादिविनाशक्रमेण एतदर्थभावना गतार्था — **अग्निसान्निध्यार्थेत्यादि** यावद् **घटकृतकत्ववदिति** । तथा शब्देऽपि भावयितव्यं प्रयत्नानन्तरीयकानित्यत्वयोरिति । § 2201

अस्मादेव च न्यायाद् यदप्युक्तं त्वया **--नाशिनः कृतकत्वेन** प्र॰ समु॰ २ । २३ इत्यादि कारिकया एकतो व्याप्तिगमकत्वप्रदर्शनार्थं तदप्येवमध्येयम्—

नाशिनः कृतकत्वेन व्याप्तेस्तत् कृतकं कृतम् ।
अनित्यत्वं त्वभिव्याप्त्या कृतकेऽर्थे प्रदर्श्यते ॥§ 2204

तद्व्याख्या --***येयमित्यादि** यावत् **कृतकत्वस्यानित्यत्वमिति** गतार्थं **स्थापितम्** इत्यनुवर्तनादिति । § 2205

---

४ का] घकाराकारटकारविसर्ज॰nayacakra-ms-bhā । घटाकाराकारविसर्ज॰ nayacakra-ms-ya ॥
५ विना] विनाशोनित्यत्वा॰ प्र॰ । विनाशेऽनित्यत्वा॰ ? ॥
२० सा] ॰सानिध्य॰ प्र॰ ॥
२० सा] ॰सानिध्य॰ प्र॰ ॥
२२ ए] एतदर्थं nayacakra-ms-bhā प्र॰ ॥
१ ना] दृश्यतां पृ॰ ६८० पं॰ ८ ॥
३ का] कारिकाया प्र॰ ॥
६ म] ॰मव्ययम् प्र॰ ॥
६ अ] अनित्यत्वं त्वदभिव्याप्त्या कृतकेऽर्थे प्रदर्शिते प्र॰ । अनित्यत्वमपि व्याप्त्या कृतकेऽर्थे प्रदर्श्यते ? ॥
७ *] जेयमि॰ प्र॰ ॥

एतस्मादेव न्यायाद् योऽप्युक्तो *विषाणित्वेन गौर्व्याप्तः प्र° समु° २ । २४ इत्यादि श्लोकः सोऽपीत्थं पठितव्यः-- § 2206 - /ms

विषाणित्वेन गौर्व्याप्तो विषाणित्वं प्रसाधयेत् ।§ 2207

गोत्वाद् विषाणी इति संयोगिवद् विधिवृत्तेः साधयेद् विषाणितां गोत्वं तत्रैव नियतत्वात् । विषाणित्वं पुनरस्मादेव न्यायाद् § 2208

गव्येवानियमात् तत्तु न गवार्थप्रसाधनम् ।§ 2209

706/mj

तावद् द्वयमप्युक्तम्--अनुमानमभिधानं चाधाराधेयवद्वृत्त्या न गमयति, अत्र च पक्षे कांश्चिद् दोषानत्यदिशाम । संयोगिवद् विधिवृत्त्या गमयति, अत्र च पक्षे गुणानभ्यधाम । § 2210

यत् पुनर्निरुक्तीकृत्यान्वयासम्भवं व्यतिरेकासम्भवमाशङ्क्योक्तं स्यादेतद् व्यतिरेकस्याप्यसम्भवः इति, तद् युक्तमेवोक्तम्, अन्वयव्यतिरेकयोरभावात् । अन्वयव्यतिरेकौ हि प्रत्ययात्मकौ, न वस्तुगते तुल्यातुल्ययोर्वृत्त्यवृत्ती, विशेषस्यैव वस्तुत्वादस्य नयस्य । तत्रान्वयाभाव उक्त एव त्वया । न च सम्भवोऽस्ति सर्वावृक्षार्थव्यतिरेकस्य, आनन्त्यात्, सर्ववृक्षार्थान्वयवत् । § 2211

**तावदि**त्यादिरुक्तार्थोपसंहारः । द्वयमप्युक्तम्, अन्यापोहविशिष्टार्थैकदेशान्वयदर्शनादनुमानमभिधानं चाधाराधेयवद्वृत्त्या न गमयतीत्युक्तम्, अत्र च पक्षे कांश्चिद्दोषानत्यदिशाम अदीदृशाम, पाठान्तरं **संयोगिवद् विधिवृत्त्या** उभयतो व्याप्त्या **गमयतीत्यु[क्तम्, अ]त्र च पक्षे गुणानभ्यधामे**त्येवं शब्देन स्मारयति । § 2212

---

१२ न्या] न्यायाद् योष्युक्तोnayacakra-ms-ya । न्यायाद् द्युक्तो nayacakra-ms-bhā ॥
१३ *] दृश्यतां पृ° ६८० पं° १० ॥
२० त्या] °त्यादिभक्त्यर्थोnayacakra-ms-bhā । °त्यादिभक्त्यार्थो° nayacakra-ms-ya ॥
२३ अ] पृ° ६८१ ॥
२३ कांश्चिद्दोषा] °षानतिदिशाम यदीदृशान पाठान्तरंnayacakra-ms-ya । °षानतिदिशा यदीदृशान पाठान्तरं nayacakra-ms-bhā । °षानतिदिश्यादीदृशाम, पाठान्तरं ? । °षानत्यदिशाम, अदीदृशाम पाठान्तरम् । संयोगिवद्... ... इत्यपि योजना समीचीना ॥
२३ म] गमयतीत्युत्र च पक्षेnayacakra-ms-bhā । गमयतीत्यत्र च पक्षे nayacakra-ms-ya । nayacakra-ms-ya प्रतिपाठोऽप्यत्र संगच्छत इति ध्येयम् ॥

किञ्चान्यत्, **यत् पुनर्निरुक्तीकृत्येत्यादि** । त्वया ***अन्वयव्यतिरेकाव-र्थानुमाने द्वारम्** इत्युक्त्वा गुणसमुदाये डित्थाख्येऽर्थे काण-कुण्टाद्यवय-वान्वयानभिधानादन्वयासम्भवं निरुक्तीकृत्य अन्वयासम्भववद् व्यतिरेकास-म्भवमाशङ्क्योक्तं **स्यादेतद् व्यतिरेकस्याप्यसम्भव** इति, तद् युक्तमेव त्वयोक्त-म्, अस्मदुक्तसंयोगिवद्विधिवृत्तिमन्तरेणान्वयव्यतिरेकयोरभावात् । तयोरेव तावद् लक्षणम्--अन्वयव्यतिरेकौ हि प्रत्ययात्मकौ, समानभवनानुवृत्तिप्रत्य-योऽन्वयः, तद्विपरीतो व्यतिरेकः, न वस्तुगते तुल्यातुल्ययोर्वृत्त्यवृत्ती त्वदुक्ते । कस्मात् ? विशेषस्यैव वस्तुत्वादस्य नयस्य स्याद्वादेऽनेकात्मकत्वात् । तत्रान्वयाभाव उक्त एव त्वयाऽस्माभिश्च त्वन्मतवत् । § 2213

व्यतिरेकाभावोऽधुनोच्यते **न च सम्भवोऽस्तीत्यादि** । वृक्षशब्दस्य श-क्तिर्नास्ति सर्वानवृक्षान् व्यतिरेचयितुम् । कस्मात् ? **आनन्त्यात्, आनन्त्ये हि भेदानाम्** प्र० समु० वृ० ५ । २ इत्यादिग्रन्थव्याख्यानन्यायवदवृक्षार्थानां घटपटादीनामानन्त्याद् व्यतिरेचनाभावे न्यायो द्रष्टव्यः । **सर्ववृक्षार्थान्व-यवदिति** दृष्टान्तः, यथा सर्वे वृक्षार्था आनन्त्यात् सम्बन्धाशक्यत्वादन्व-याभावाच्चानभिधेयास्तथा बहुतरव्यावर्त्यघटपटाद्यनन्ततरत्वादव्यतिरेकः, तथा धूमस्य उदकादिसर्वानग्निव्यतिरेचने सामर्थ्याभावो वाच्यः सर्ववृक्षानन्त्याद-न्वयवदिति । § 2214 - /ms

707/mj

यत्तूच्यते--अतुल्ये सत्यप्यानन्त्ये शक्यमदर्शनमात्रेणावृत्तेराख्यान-म् । अत एव स्वसम्बन्धिभ्योऽन्यत्रादर्शनात् तद्व्यवच्छेदेनानुमान-म् प्र० समु० वृ० ५ । ३४ इति । अत्र ब्रूमः--न, § 2215

दृष्टवद्विधिरूपेण न चेल्लिङ्गं प्रकाशयेत् ।
सर्वत्रादर्शनान्न स्यात् सर्वथा वाऽगतिर्भवेत् ॥ § 2217

१ *] तुलना--पृ० ६५२ पं० २ ॥
१ स्या] तुलना पृ० ६५२ पं० १६ ॥
२ यु] **युक्तमेत त्वयोक्तम् अस्मादुक्त°** प्र० ॥
८ त] तयोरेवं ? ॥
१४ स] **सर्वान् वृक्षान्** nayacakra-ms-bhā ॥
१६ आ] दृश्यतां पृ० ६०७ पं० १४ पृ० ६२७ पं० ६ ॥
१७ अ] तुलना--पृ० ६५२ पं० ३ ॥
१९ दृ] **दृष्टवद् विधिरूपेण यदि लिङ्गं प्रकाशयेत् । सर्वथाऽप्रतिपत्तिः स्यात् सर्वथा वा गतिर्भवेत्** ॥ प्र० समु० ३ ।
१४ इति दिङ्नागमतनिराकरणायेयं कारिका । पृ० ४७१-- १ इत्यत्र वक्ष्यमाणं टिप्पणमप्यत्र द्रष्टव्यम् ॥
२२ न] चेल्लिङ्गं न ?लिङ्गं चेन्न ? ॥
२३ प्र] प्रकाशकम् ? ॥
१ स] सर्वस्यादर्शनान्न स्यात् इत्यपि भवेत् पाठः, दृश्यतां पृ० ७०८ पं० १४ । ततः प्रकाशकं न स्यात् ? लिङ्गं न लिङ्गमेव स्यात् ? ततो न लिङ्गमेव स्यात् ? ॥
७ स] सर्वथा वा गतिर्भवेत् इत्यपि पाठः । दृश्यतां पृ० ७१७ पं० ६ ४७१-- २ ॥

*लिङ्गमपदेशः कारणं निमित्तम् [इत्यनर्थान्तरम्]... ... ... भेदाविवक्षैकत्वापादितैकत्वं सामान्यं लिङ्गं तथाभावितैकत्वस्य लिङ्गिनो गमकं तद्भावेनैव । एवं लिङ्गं गमकं लिङ्गी गम्यश्चेत्यदोषः । § 2218

अत्र परिहारस्त्वयोक्त आशङ्क्यते --यत्तूच्यत इत्यादि । अन्वयगतदोषाभावं व्यतिरेकगतं गुणं च दर्शयति ग्रन्थः --अतुल्ये सत्यप्यानन्त्ये इत्यादि । ततोऽन्यस्याभावमात्रं सामान्यतो व्यतिरेचनीयं तद्भेदरूपाणि असंस्पृशता शब्देन लिङ्गेन वा । तस्माददोष इति परिहारः । § 2219

अत्र ब्रूमः --न, दृष्टवदित्यादि । यदि दृष्टवद् विधिरूपेण लिङ्गं लिङ्गिनं न प्रकाशयेत् सर्वत्र लिङ्गिन्यदर्शनात् तल्लिङ्गं लिङ्गमेव न स्यात्, अगतिर्वा सर्वथा भवेत् कस्यचिदप्यर्थस्येति पिण्डार्थः । § 2220

एतद्व्याख्या --लिङ्गमपदेशः कारणं निमित्तमित्यादि पर्यायकथनम् । शब्दः परार्थः, धूमादिः स्वार्थः । वाच्यवाचकसम्बन्धस्यानुमानानुमेयसम्बन्धस्य चाविशिष्टत्वादेकध्येन द्विविधस्याप्यनुमानस्य ग्रहणम् । तत्र विशेषस्यैव वाच्यत्वादनुमेयत्वाद्यार्थस्य सामान्यस्यासत्त्वादसत्योपाधिसत्यशब्दार्थत्वं त्वयोक्तत्वात्, अस्माभिर्यथा **अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते** सामान्यस्यासत्त्वाद् विशेषस्यैव सत्त्वात्, न ह्यभावो वाच्यः खपुष्पवत् । **त-**
- /ms **स्य** सामान्यस्यासत्त्वादेव **पूर्वमदृष्टत्वे** विशेषस्यैव **दृष्टस्य** कल्पितासत्यसामान्योपसर्जनद्वारेण वाच्यत्वाच्छब्दस्यापि तथैव वाचकत्वात् सामान्योपसर्जनोपायेन । तथानुमानेऽपि विधिः । § 2221

तत्त्वाल्लिङ्गं शब्दो धूमादि वा कथं गमकं भवति ? उच्यते--भेदानामविवक्षया सामान्यस्य एकत्वादापादितं तेषामेकत्वं भेदानां यस्मिंस्तल्लिङ्गं **भेदाविवक्षापादितैकत्वं सामान्यं लिङ्गं** तद्भावापन्नो धर्मो धूम-शब्दादिः, **तथाभावितैकत्वस्य** तेन शब्द-धूमादिप्रकारेण भावितमेकत्वं शाखादिभिन्नावयववतस्तरो 708/mj

* * *

यदि तु न तथा प्रकाशयतीतीष्टं किन्त्वन्यापोहेन ततो नैव प्रकाशकं स्यात् सर्वस्यादर्शनात् प्रतिद्रव्यमपोह्यस्यादर्शनात् ।

---

१० *] तुलना— हेतुरपदेशो लिङ्गं निमित्तं प्रमाणं कारणमित्यनर्थान्तरम् --वै॰ सू॰ ९ । २० ॥
१६ व्य] व्यतिरेवचनीयं प्र॰ । ततोऽन्यत्राभावमात्रं सामान्यतो व्यतिरेके वचनीयं ? ॥
१९ असंस्पृ] °स्पृताnayacakra-ms-bhā । °स्पृता nayacakra-ms-ya ॥
२० धू] धूमादि प्र॰ ॥
२१ त्वा] एतच्चिह्नान्तर्गतो °दसत्यो° इत्यत आरभ्य सत्त्वात् इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२१ अ] दृश्यतां पृ॰ ६१६ पं॰ ३ ॥
२ त] तत्वाल्लिंगं प्र॰ । तस्माल्लिङ्गं ? तल्लिङ्गं ? तथा लिङ्गं ? ॥
२ ए] एकत्वादापितंnayacakra-ms-bhā । एकत्वापितं nayacakra-ms-ya । एकत्वापादितम् इत्यपि पाठः स्यात् ॥

न हि स वा भवति ततोऽन्यो वा, अदृष्टत्वात्, वन्ध्यापुत्रवत् । न च तदतुल्यमतच्छब्दमतद्रूपं तथा तथाऽदृष्टं प्रतिपत्तुं शक्यम् । अप्रतिपन्ने च तस्मिन् कस्य कथं वापोहः स्यात् ?

अपितृत्ववत् स्यादिति चेत् । यथा पितुरन्योऽपिता सर्वो व्यावृत्तिबुद्धिमात्रेण

* * *

स्तापादिभिन्नकर्मवतश्चाग्नेर्लिङ्गिनश्च, वाच्य-लिङ्ग्यभेदात् प्रागुक्तन्यायेन आत्मनैवात्मनो वाचका आत्मनैवात्मनोऽनुमेयाः, तद्भावदर्शनादेव सामान्यस्य विशेषप्रतिपादनार्थत्वाच्छिबिकावाहकयानेश्वरयानवद् गमकं तद्भावेनैव, अग्नेरेव धूमत्वात् बद्धमूलादिविशिष्टतया धूमस्यैवाग्नित्वादादिमध्यान्तेषु अरण्यादीन्धनसन्धुक्षणमुर्मुराद्यवस्थधूमादिपुद्गलाग्नित्वात् । एवमुक्तन्यायेन लिङ्गं गमकं लिङ्गी गम्यश्चेत्यदोष इत्यतीतं न्यायं स्मारयति । § 2222

**यदि तु न तथे**त्यादि परमते दोषः । यदि येन प्रकारेण दृष्टस्तेनैव प्रकारेण लिङ्गं दृष्टं तेनैव च प्रकारेण विधिना प्रकाशयतीतिष्टं न, त्वया तु किमिष्टम् ? अन्यापोहेनेति । ततः किम् ? **ततो नैव प्रकाशकं स्यात्** । कस्मात् ? **सर्वस्यादर्शनात्**, यथा विधेयमदृष्टं त्वन्मतेन तथा व्यावर्त्यमपि किञ्चिन्न दृष्टमवृक्षानग्न्याख्यम्, घटपटादिभेदानामानन्त्याद् द्रव्यं द्रव्यं प्रति **प्रतिद्रव्यमपोह्यस्यादर्शनात्** किं तद् वृक्षादग्नेरर्थादन्यदवृक्षानग्न्याख्यम् ? अदृष्टमेव भवेत् । यतश्च बुद्धेर्व्यावृत्तिरिष्टा, न ह्यदृष्टार्थम् अयं भवति, अयं न भवति इत्यन्वयव्यतिरेकौ भवितुमर्हतो बुद्धेः, दृष्टानेव बुद्धिरन्वियादर्थान् तेभ्य एव च व्यावर्तेत, यथा देवदत्तोऽयं यज्ञदत्तो न इत्यादि, नात्यन्तादृष्टखपुष्पवन्ध्यापुत्रादिविषया । § 2223 - /ms

एतदर्थप्रदर्शनार्थमाह --**न हि स** वृक्षोऽग्निर्वा **भवति ततोऽन्यो वा** घटादिः, **अदृष्टत्वात्, वन्ध्यापुत्रवत्** । दृष्ट एव स वा भवति अन्यो वा ततः । **न च तेन** दृष्टेनाऽ**तुल्यमतच्छब्दम्**, न स वृक्षशब्दोऽग्निशब्दो वा शब्दोऽस्य तदिदमतच्छब्दमवृक्षोऽनग्न्यादि वा । तथा न तस्य रूपं रूपमस्या**तद्रूपम्** । किं कारणम् ? यस्मात् **तथा तथा** तेन तेन प्रकारेणाऽ**दृष्टं** घटपटकुड्यादिभेदप्रकारेणादृष्टत्वात् प्रतिपत्तुमशक्यम् । ततश्चाऽ**प्रतिपन्ने** चेत्यादि व्याख्यातार्थभेदरूपेणाग्रहणम्, तत एवान्योऽपि नास्ति, सति चाग्रहणेऽन्यस्य चाभावात् **कस्य कथं वापोहः स्यात् ?** प्रागुक्तविधिना किं केन कुतोऽपोह्यते इत्यादिग्रन्थोऽत्र योज्य इति । § 2224

---

६ था ] दृश्यतां पृ° ४७०-- १ ॥
१२ स्तापादिभिन्न ] °भिन्नधर्मवत° ? ॥
१६ द ] दृष्टः शब्दो धूमादिर्वात्र विवक्षितो भाति । दृष्टं तेनैव ? ॥
१७ व्या ] व्यावृत्य°nayacakra-ms-ya ॥
२८ वृ ] वृक्षानग्ने°nayacakra-ms-bhā ॥
२९ ग्नेर ] °रर्थान्यदवृक्षा° प्र° ॥
२९ ए ] एवमत्रा भवति nayacakra-ms-bhā । एवमत्रान भवति nayacakra-ms-ya ॥
३० क ] क कथंnayacakra-ms-bhā ॥
१ विधिना ] दृश्यतां पृ° ६४५ पं° ४ ॥
५ इत्यादिग्र ] °ग्रन्थोक्तयोज्यः प्र° ॥

**अपितृत्ववत् स्यादिति चेत्,** स्यादियमाशङ्का, **यथेत्यादि** तद्व्याख्या, पितुरन्ये सर्वे पुरुषा अनाश्रितभेदरूपास्तदन्वयादृतेऽपि दृष्टात् पितुरन्यत्वव्यावृत्तिबुद्धिमात्रेण स्वभेदानपेक्षा निरवयवा एव
709/mj

* * *

निरवयव एव प्रतीयते तथाग्निवृक्षाभ्यामन्येऽवृक्षाज्वलनाः सर्वेऽपि व्यावृत्तिबुद्धिमात्रेण निरवयवाः प्रतीयेरन्, को दोषः ?

सर्वस्यादर्शनान्न स्यात् । युक्तं पितुरपितुश्च दृष्टस्य व्यक्तग्रहणोत्तरकालं पितुः पर्युदासेनान्यस्यापितृत्वं प्रतिपाद्येत, न तु पितुरेवादर्शने । स हि पितरि... ... ... प्रत्ययोत्पत्तिः ।

यथा त्विदं त्वयेष्टं तुल्ये वृत्तिरतुल्ये चावृत्तिः । तत्र तुल्ये नावश्यं सर्वत्र वृत्तिराख्येया, क्वचिदानन्त्येऽर्थस्याख्यानासम्भवात्, न हि सम्भवोऽस्ति वृक्षशब्दस्य सर्ववृक्षेषु दर्शने । नापि सर्वत्र लिङ्गिनि सर्वलिङ्गस्य सम्भवः, अग्निधूमादिवत् । यद्यपि च क्वचिदस्ति डित्थादिषु सम्भवः तथापि गुणसमुदायमात्रस्य काणकुण्टादेर्दर्शनासम्भवः, सत्यपि च दर्शने सर्वथाऽनुमानासम्भवः इति तथा सर्वस्यादर्शनात् पितृकल्पस्य... ... ...तदपोहस्य वा[ऽ]प्रतिपत्तिः ।

यदि हि स्वार्थः परार्थश्च सम्पिण्ड्य विधिना गृहीतः स्यात् तत एवं प्रतिपद्येत अयं वृक्षः, अयं न भवति इति, नात्यन्ताविदितवृक्षावृक्षशब्दार्थतायाम् ।

* * *

प्रतीयन्त इति दृष्टान्तस्तथाग्निवृक्षाभ्यामन्येऽवृक्षाज्वलना वृक्षज्वलनपर्युदासेनानन्ता भेदा अपि व्यावृत्तिबुद्धिमात्रेण निरवयवाः प्रतीयेरन् को दोष इति । § 2225

अत्र दोषकुतूहलं चेद् ब्रूमः --**सर्वस्यादर्शनाद् न स्यात् । युक्तं** पितुरस्मद्दर्शनेन विधिरूपेण **दृष्टस्य अङ्गादङ्गं सम्भवसि कौषीतकिब्रा° २७** इत्यादि-
- /ms न्यायात् स्वपुत्रस्य गुणसमुदायरूपस्य प्राणान् दत्तवतः पर्युदासेनान्यस्य भ्रात्रादेः स्वजनस्य पितृविपरीतबुद्धेरध्यासेन ग्राह्यस्य एष पिता देवदत्तः, नेमे वसुरातादयः इति पितुरपितुश्च व्यक्तग्रहणोत्तरकालं परजनस्य चान्यस्यापितृत्वं प्रतिपाद्येतेत्येषोऽस्ति न्यायः । त्वद्दर्शने पुनर्गुणसमुदायस्य **न तु पितुरेवादर्शने** युक्तम् इति वर्तते न घटते पितुरेव ग्रहणासम्भवे असति वा पितरि

१४ तु] तुलना पृ° ६५२ पं° २ ॥
१७ था] तुलना--पृ° ६६२ पं° २, पृ° ७०९ पं° १८ ॥
२१ पि] तुलना पृ° ४७०-- १ ॥
२४ अ] **अङ्गादङ्ग संभवसि**nayacakra-ms-ya । दृश्यतां पृ° ४६९ पं° ३ टि° १ ॥
२७ बुद्धेर] **रव्यासेन** प्र° ॥
२९ ग्रा] **ग्राह्यस्यैष्य पिता** nayacakra-ms-ya । **ग्राह्यशैष्यपिता** nayacakra-ms-bhā ॥
५ प] स्वजनस्यपं° १७ इति प्रागभिहितत्वादत्र परजनस्य च इत्युक्तम् ॥
५ प्र] प्रतिपद्येते° ? । तुलना--पृ° ७१० पं° ७ ॥

गुणसमुदायमात्रार्थग्रहणाभिधानाभावप्रकारेणोक्तेन । **स हि पितरी**त्यादिना दर्शनविधिं पितुः पितृदर्शनाच्चापितॄणां तदितरभेदानां च कथयति दर्शनविधिं यावत् **प्रत्ययोत्पत्ति**रिति ग्रन्थेन । एषा दृष्टान्तवर्णना । दार्ष्टान्तिकासमञ्जसतेदानीम् । **यथा त्वदिम**त्यादि यथा त्वयेष्टं तुल्ये वृत्तिरतुल्ये चावृत्तिः इत्युद्ग्राहेण यावत् **सर्वथानुमानासम्भव** इति ग्रन्थो व्याचक्षाण एव गतः परमतम् । न्यायेन त्वदुक्तेनैव **तथा सर्वस्यादर्शनात् पितृकल्पस्ये**त्यादिना दार्ष्टान्तिकवैषम्यापादनं गतार्थं यावत् **तदपोहस्य वा[ऽ]प्रतिपत्ति**रिति । त्वन्मतेन कस्यचिदेव स्वार्थस्य परार्थस्य चादर्शनादपि पितृत्वप्रत्ययाभाव एवेति पिण्डार्थः । अथवा सर्वस्यादर्शनात् इत्यादिना प्रकारान्तरेण दोषं ब्रूमः -- **यदि हि स्वार्थ** इत्यादि, वृक्षः इत्युक्तेऽस्मदुक्तेन न्यायेन सामान्योपसर्जनो विशेषः समस्तः शिंशपादिरभिहितः स्यात् तेनापोढश्चावृक्षः सभेदो घटपटादिः सम्पिण्ड्य अयमन्योऽस्माद् वृक्षात् 710/mj

* * *

वृक्षशब्दादंह्रिपशब्दोऽन्यत्वादवृक्षः, तथा तदर्थः, अग्नेर्वह्न्यादिरन्योऽनग्निः ।

न हि क्वचित्... ... ...। तत्र सामान्यशब्दार्थेषु तावत् सदित्यसन्न भवति इत्यत्र द्वयी वृत्तिः--अनङ्गीकृतार्थान्तरवृत्तिः सच्छब्दः, अङ्गीकृतार्थान्तरवृत्तिर्वा । तत्र तावदनङ्गीकृतार्थान्तरतायामपोहः केवल उच्यते । सदित्युक्ते असन्न भवति इति द्विनञ्प्रयोगात् भवत्येव इति सिद्धे सत्यारम्भो नियमार्थः--यो न भवति यथा वा न भवति तस्य द्विविधस्याप्यसद्भवनस्यात्र सम्बन्धित्वं नास्ति ।

* * *

इति गृहीतः स्यात् तत एवं प्रतिपद्येत **--अयं वृक्षः** अयमेव वृक्ष एव **भवति,** ततोऽन्योऽयं घटपटादिरवृक्षो वृक्षो **न भवती**ति । किं कारणम् ? - /ms
प्रत्यक्षत्वादुभयस्य । नात्यन्ताविदितवृक्षावृक्षशब्दतायां न चात्यन्तादृष्टवृक्षावृक्षस्वरूपतायां वा सा प्रतिपत्तिर्भवितुमर्हति अयं वृक्षोऽयं न भवति इति, खपुष्पवन्ध्यापुत्रादिवदिति । § 2226

एतदर्थनिदर्शनार्थं दृष्टान्तमाह **--वृक्षशब्दादंह्रिपशब्दोऽन्यत्वादवृक्षस्तथा तदर्थः, अग्नेर्वह्न्यादिः,** उभयत्र वा सत्त्वद्रव्यत्वादिसामान्यविशेषधर्मोऽन्योऽनग्निरवृक्षश्चेति विदितसकलवृक्षावृक्षाग्न्यनग्न्यादिशब्दार्थस्यैव तज्ज्ञानं दृष्टम् । तथाकाशशब्दादिषु ख-गगन-वियदादि-सत्त्व-द्रव्यत्वादिधर्मापेक्षं तदतत्त्वं योज्यम् । § 2227

---

७ दार्ष्टान्तिका ] °समाजसते°nayacakra-ms-ya ॥
८ ग ] गत पर°nayacakra-ms-ya ॥
१० त ] तुलना--पृ° ७१२ पं° १ ॥
१५ त ] तेन द्विविघेनाप्यसता न भवितव्यम् इत्यपि पाठोऽत्र स्यात् । तुलना--पृ° ७११ पं° २० ॥
१७ प्र ] प्रतिपाद्येत ? । तुलना पृ° ७०९ पं° १८ ॥
१९ तिप ] °पत्तुर्भवि°nayacakra-ms-ya ॥
२० श ] °शब्दोऽनन्यत्वा°nayacakra-ms-ya ॥

**न हि क्वचि**दित्यादि । न हि किञ्चिद्दर्शनमात्राद्वा तद्वृत्तिनिर्नियमो वा भवतः, कस्मात् ? व्यभिचारात्, वृक्षान्वयोऽपि व्रश्चकपुरुषव्यभिचाराद् व्रश्चनधर्माभावव्यभिचारादवृक्ष एव । अवृक्षघटोऽपि घटमानपादप-तरु-शाखिभेदवृक्षव्यभिचाराद् वृक्षः, वृक्षो[ऽ]वृक्षो घटो[ऽ]घटश्च । अन्योऽपि हि भवन्न[न]न्यो भवति पीलु-हस्ति-वृक्षादिवत् सामान्य-विशेष-पर्यायशब्दार्थेभ्यः ।
§ 2228

तत्र सामान्यशब्दार्थेषु तावदुदाहरणम्--सदित्यसन्न भवति इति, अत्र हि द्वयी वृत्तिश्चिन्त्यते— अनङ्गीकृतार्थान्तरवृत्तिः सच्छब्दः अङ्गीकृतार्थान्तरवृत्तिर्वा स्यात् ? तत्र प्रथमं तावद् व्युदस्तभेदसामान्यमात्रवृत्तिरनङ्गीकृतार्थान्तरवृत्तिः शब्दः । स कीदृश इति चेत्, तन्निरूपणार्थमाह --**अपोहः केवलो** व्यावृत्त्यर्थो निर्निबन्धन **उच्यते** । तदुदाहरणम् --**सत् इत्युक्ते असद् न भवति इति द्विनञ्प्रयोगात्** प्रकृत्यापत्तेः **भवत्येव इति** विध्यर्थ एव ज्ञायते । ततः किं संवृत्तम् ? **सिद्धे सति आरम्भो नियमार्थ** इति असद् न भवति
- /ms इति द्वाभ्यां प्रतिषेधाभ्यां नियम्यते विहितं सत्त्वमेव । तत् कथमिति चेत्, उच्यते --**यो न भवति खपुष्पादिः यथा वा न भवति** घट-पटादिप्रकारेण तस्य द्विविधस्याप्यसद्भवनस्यात्र वृक्षे सम्बन्धित्वं नास्तीत्युक्तं भवति । स
711/mj च प्रतिषेधः । विधिप्रधानः पर्युदासस्ततोऽन्यत्र

* * *

इत्थं च विधिप्रधानपर्युदासात्मकासच्छब्दार्थत्यागः प्रसज्यप्रतिषेधमात्रार्थत्वादन्याभावादर्थान्तरापोहस्वार्थाभिधानलक्षणाभ्युपगमत्यागः ।

अथैतेभ्य एव दोषेभ्योऽङ्गीकृतार्थान्तरवृत्तिरपोह इष्यते तत इदं विघटते— सदित्यसन्न भवतीति । प्रतिस्वसत् सर्वमपि घटादीति सदेवासदपि भवति इतरेतराभावादिभ्यः । असतापि हि तेन सता केनचिद् भवितव्यम्, प्रत्येकवृत्तित्वात्, यथा घट इत्यघटो न भवति वृक्ष इत्यवृक्षो न भवति ।

* * *

विधिः, असच्छब्दश्च तदर्थः, इत्थं चोक्तन्यायेन असच्छब्दार्थो विधिप्रधानप-

---

२० वृ] वृक्षान्वयेऽपि ? ॥
२४ व्र] वृक्षक॰ प्र॰ ॥
८ भिचारा] ॰राद्वृक्षो वृक्षो वृक्षो घटो घटश्चnayacakra-ms-bhā । ॰राद्वृक्षो वृक्षो घटो घटश्च nayacakra-ms-ya ॥
९ ति] दृश्यतां पृ॰ ७१५ पं॰ ८ ॥
१४ त] तत्रnayacakra-ms-ya प्रतौ नास्ति ॥
१५ सा] तुलना--पृ॰ ७१३ पं॰ १६ ॥
१६ प्र] प्रवृत्त्यापात्तर्भवत्येवnayacakra-ms-bhā । प्रवृत्त्यापांतर्भवत्येव nayacakra-ms-ya ॥
१९ स] ॰सभवन॰nayacakra-ms-bhā । ॰संभवन॰ nayacakra-ms-ya ॥
२० स] संबंधं नास्ती॰nayacakra-ms-ya ॥
२४ च] प्रतिषेधो न पर्युदास॰nayacakra-ms-bhā । प्रतिषेधो विधिप्रधानः पर्युदास॰ nayacakra-ms-ya ॥
२७ घ] घटादीति सदित्यसन्न न भवति इत्यपि पाठः स्यात् । तुलना--पृ॰ ७१२ पं॰ १२ ॥

र्युदासात्मकस्त्यक्तः स्यात् । स एव वृक्षो भवति सत्त्वात्, सतोऽन्यस्यासतोऽत्यन्ताभावात् प्रसज्यप्रतिषेधमात्रम[स]त् प्रसक्तं प्रतिषिद्धमित्येषोऽर्थः स्यात् । तस्मात् **प्रसज्यप्रतिषेधमात्रार्थत्वात्** ततश्च अयमस्मादन्यः इत्यन्यस्याभावात् अन्यापोहः शब्दः इत्यस्या**भ्युपगमस्य त्यागः** कृत इति दोषः स्यात् । किञ्चान्यत्, तत एव ***अर्थान्तरापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते**

इत्येतस्य अर्थान्तरापोहेन स्वार्थाभिधानम् इति लक्षणस्य त्यागः कृतः स्यात्, एषोऽप्यभ्युपगमत्यागदोषोऽपर इति । एवं तावदनङ्गीकृतार्थान्तरवृत्तिः सदित्यसन्न भवतीति सामान्यशब्दार्थेऽन्यापोहो न युक्तो विधिरेव युक्त इति । § 2229

**अथैतेभ्य एवेत्यादि** । अथ मा भूवन्नेते पर्युदासात्मकान्यशब्दार्थार्थान्तरापोहस्वार्थाभिधानलक्षणाभ्युपगमत्यागदोषा इति तेभ्य एव भ**यादङ्गीकृतार्थान्तरवृत्तिरपोह इष्यते तत इदं विघटते सदित्यसन्न भवतीति** । कस्मात् ? **प्रतिस्वसत् सर्वमपि घटादीति, इतिशब्दस्य** हेत्वर्थत्वात् प्रतिस्वं सर्वस्य सत्त्वात्, सर्वं हि **प्रतिस्वं** प्रत्यात्म प्रत्येकमात्मना सदेवासदपि भवति, न ह्यसन्न भवति । कुतः ? **इतरेतराभावादिभ्यः**, प्राक्प्रध्वंसेतरेतरसंयोगसमवायाप्रमाणसामर्थ्यादिभेदेन सदेवासद् भवति इति *विस्तरत उत्पतद्भिरेव - /ms प्रतिपादितमस्माभिः--घटो घटात्मना सन् भवति असन्नेव पटात्मना इत्यादि । § 2230

अत्र प्रयोगः --**असतापि हि तेन सता केनचिद् भवितव्य**मिति प्रतिज्ञा, यो भवति येन प्रकारेण च भवति तेन द्विविधेनाप्यसता भवितव्यमित्यर्थः । कस्मात् ? **प्रत्येकवृत्तित्वात्,** प्रतिस्वमात्मरूपेण वर्तमानत्वात्, अथवा सत्त्वात्, यः सन् प्रत्येकं वा वर्तते सोऽसन्नपि केनचित् प्रकारेण दृष्टो भावः, यथा घटादन्यः पटो घटत्वेनासन्नेव पटत्वेन सन् दृष्ट इति तद्वदिदमपि असदेव सद् भवतीति, *तथा प्रत्येकवृत्तित्वादिति । एवमनङ्गीकृतार्थभेदत्वे सद् भवत्येवासत् । अभ्युपगतमपि चैतत् त्वयापि, विस्मृतमधुना मया स्मार्यमेतत् --**यथा घट इत्यघटो न भवति वृक्ष इत्यवृक्षो न भवतीति** एवमाद्यन्यापोहशब्दार्थवादित्वाद् भवतः । एष सच्छब्दसामान्यार्थ उक्तः । § 2231

712/mj

१० *] पृ॰ ५४७ पं॰ १, १२, टि॰ ९ ॥
११ अ] दृश्यतां पृ॰ ६५३ पं॰ १ ॥
११ ब्दा] °ब्दार्थान्तरा°nayacakra-ms-ya ॥
१२ त] तत इदं विघटते २ तत इदं विघटते प्र॰ ॥
१५ इ] इशब्दस्य प्र॰ ॥
१९ *] विस्तरसnayacakra-ms-bhā । विस्तरश ? ॥
२० स] सन्नnayacakra-ms-ya ॥
२१ अ] अथवा सत्त्वात्nayacakra-ms-bhā प्रतौ नास्ति ॥
२१ *] यथाnayacakra-ms-bhā ॥
१ ए] एवमङ्गीकृतार्थभेदत्वे ? ॥

द्रव्यादिसामान्यशब्दार्थेष्वपि अनङ्गीकृतार्थान्तरतायां तेनैव न्यायेन भावितवदभ्युपगमत्यागः । अर्थान्तरापोहतायां प्रतिस्वसन्न्यायाद् यथायोगं योज्यं तथैव । § 2232

ननूच्यमानसच्छब्दवदेतत्सिद्धिः । अत्र ब्रूमः--यदि सच्छब्दोऽसच्छब्दोऽपि भवति तत एव घटशब्दाद्युदाहरणमवकाशं लभते, अन्यथा कुतोऽस्यावकाशः ? सच्छब्द एव हि सन्नसच्छब्दो भवत्येव इतरथा घटस्य सतः पटाद्यसत्त्वाभावे कस्य सतः शपनाच्छब्दः स्यात् सच्छब्दः । एवमर्थतः सच्छब्दोऽसच्छब्दो न भवति § 2233

**द्रव्यादिसामान्यशब्दार्थेष्वपि** द्विविधा सैव, अ[ङ्गीकृतान]ङ्गीकृतभेदार्थवृत्तित्वात् । तत्र **तावदनङ्गीकृतार्थान्तरतायामि**त्यादिः स एव न्यायः प्राक्तनः ***अद्रव्यं न भवति इति [द्वि]नञ्ययोगाद् द्रव्यमेवेति सिद्धे सत्यारम्भो नियमार्थः, यो न भवति येन न भवतीत्यादि** स एव ग्रन्थो विधिप्रधानपर्युदासात्मकाद्रव्यशब्दार्थत्यागादिदोषापादनः **प्रसज्यप्रतिषेधमात्रार्थत्वा**दित्येतदर्थातिदेशो गतार्थो यावद् **भावितवदभ्युपगमत्यागः** । द्वितीयविकल्पेऽपि **अर्थान्तरापोहतायामि**त्यादि तमेव न्यायमतिदिशति — **प्रतिस्वसन्न्यायात्**, प्रतिस्वद्रव्यत्वात् सर्वद्रव्याणां **द्रव्यमित्यद्रव्यं न [न] भवति इतरेतराभावादिभ्य** इत्यादि यथायोगं योज्यं तथैव । § 2234

- /ms अत्राह **--ननूच्यमानसच्छब्दवदेतत्सिद्धिः**, सिद्धं सच्छब्दमसत्स्वरूपविनिर्मुक्तं मन्यमानश्चोदयति यः सच्छब्दः [स] सतः शपनादाह्वानात्, अतः शब्दाद् यथा सच्छब्द एव सदर्थवाच्येव च नासच्छब्दो नासदर्थवाची वा तथा सद्वस्त्वपि स्यादिति । घटशब्दादिरपि विशेषशब्दस्तदर्थश्च तथा न पटादिशब्दस्तदर्थो वा भवितुमर्हतीति । तस्मादयुक्तमुच्यते सन्नसन् भवतीति । § 2235

अत्र ब्रूमः **--यदि सच्छब्दोऽसच्छब्दोऽपी**त्यादि । नाभ्युपगच्छाम एतत् सच्छब्दोऽसच्छब्दो न भवति इति, तथोदाहरणत्वासम्भवात् सच्छब्दासच्छब्दत्व एवोदाहरणत्वसिद्धेः । यदि हि सच्छब्दोऽसच्छब्दोऽपि **भवति तत एव** लोकेऽन्यापोहवादे च **घटशब्दाद्युदाहरणमवकाशं लभते, अन्यथा कुतोऽस्य** घटाद्युदाहरणस्या**वकाशः ?** § 2236

---

३ अ] **अनङ्गीकृताङ्गीकृत°** इत्यपि भवेदत्र पाठः ॥
४ मित्या] °त्यादिnayacakra-ms-ya ॥
११ प्रा] **प्राक्तनो द्रव्यं न** प्र° ॥
१७ *] दृश्यतां पृ° ७१० पं° २२ ॥
१७ भा] **भाविततदभ्युप°** प्र° ॥
१९ द्र] दृश्यतां पृ° ७११ पं° १७ ॥
२० स] **सशब्दः** प्र° ॥
२२ स] **सदवाच्येव** प्र° ॥
२२ ना] **नावदर्थ°** प्र° ॥

तद् व्याचष्टे **--सच्छब्द एव हि सन्नसच्छब्दो भवत्येव,** सदेव शब्दयन् घटादि पटाद्यशब्दनादसच्छब्दो भवत्येव, इतरथा घटस्य सतः पटाद्यसत्त्वाभावे सत्त्वाभावः, सत्त्वाभावात् सङ्करादिदोषाद्यासत्त्वे कस्य सतः शपनाच्छब्दः स्यात् सच्छब्दोऽङ्गीकृतभेदार्थत्वे ? तस्मादयुक्तमुक्तम् सच्छब्दवदसन्न भवति सद्वस्त्विति । एवमर्थतः सतः शब्दः सच्छब्दः इत्यर्थद्वारेण सच्छब्दोऽसच्छब्दो न भवति इत्ययुक्तम् । § 2237
१713/mj

इत्ययुक्तम् । शब्दतोऽपि चास्ति सच्छब्दोऽन्य एव । सदेर्धातोः सच्छब्दोऽप्यन्य एव । एवं द्रव्यादिशब्देषु वाच्यम् । § 2238

विशेषशब्दार्थेषु तु घट इत्यघटो न भवति इत्यत्रापि न न भवत्यघटः । तद्यथा आमच्छिद्रादिघटा एवाघटा अचेष्टत्वात् । घटयन् वा घटः स्यात् । तदभावादप्यघटो भवत्येव । अघटोऽपि च घटो भवति, घटते घटयति वा तन्तुतन्तुवायगवाश्वादिः । § 2239

तथा प्रत्यक्षप्रसिद्धेरनन्यत्वं सिद्धं गोशब्दस्य वागादिषु वर्तमानस्य, तच्छब्द- § 2240

शब्दतोऽपि च अस्तिसच्छब्दः असेर्धातोः शत्रन्तस्य सत् इति रूपसिद्धेर्यः सच्छब्दः सोऽन्य एव । सदेर्धातोः क्विबन्तस्य यः सच्छब्दः सोऽप्यन्य एव, सदिप्रकृतिः सच्छब्दो न भवत्येव असिप्रकृतिः सच्छब्दः । तस्माच्छब्दतोऽपि सच्छब्दो[ऽसच्छब्दो] भवत्येव न न भवतीति । § 2241

**एवमित्यादि** । यथा सच्छब्दस्य रूपसिद्धिकृतनानात्वकृते सत्त्वासत्त्वे तथा द्रव्यशब्दस्यापि द्रष्टव्ये । तथा द्रोर्विकारो द्रव्यम्, द्रोरवयवो वा द्रव्यम्, **द्रव्यं च भव्ये** पा॰ ५ । ३ । १०४ भवतीति भव्यं द्रव्यम्, द्रवतीति द्रव्यं द्रूयते - /ms

१. ॰रपि र विशेष॰nayacakra-ms-ya । ॰र विशेष॰ nayacakra-ms-bhā ॥

२२ भ] भवत्येव॰ प्र॰ ॥
६ दोषा] ॰दोषाद्य सत्त्वे प्र॰ ॥
८ ना] ॰नात् सब्दः स्यात् सच्छाङ्गीकृत॰nayacakra-ms-bhā । ॰नात् शब्दः स्यात् शब्दोङ्गीकृत॰ nayacakra-ms-ya ॥
१० आ] आमच्छिद्रादि, अचेष्टत्वात् । इति आमश्छिद्रादि, अचेष्टत्वात् । इति वा मूलं चिन्त्यम् ॥
१० च] वास्ति॰ प्र॰ ॥
१२ अ] असद्वातोःnayacakra-ms-ya ॥
१२ स] सदिति प्रकृतिः प्र॰ । सदतिप्रकृतिः ? ॥
१३ असिप्र] ॰कृतिसच्छब्दः प्र॰ ॥
१८ न] न भवतीnayacakra-ms-bhā ॥
२५ त] तद्यथा--? ॥
२७ था] दृश्यतां टिपृ॰ १६ पं॰ २४--टिपृ॰ १७ पं॰ ६ ॥

वा, द्रवणाद् गुणानां गुणसन्द्रावो द्रव्यम्, इत्यादिव्युत्पत्त्या पृथिव्यादिस्वभेदापेक्षया च द्रव्यशब्दः सन्नद्रव्यशब्दश्च । **द्रव्यादिशब्देषु** इति **आदि**ग्रहणात् पृथिव्युदकादिसामान्यशब्देष्वपि स्वभेदापेक्षेषु **वाच्य**मित्यतिदेशार्थः । एवमर्थेऽपि द्रष्टव्यम् । एवं तावद् महासामान्यापरसामान्यशब्दार्थेषु सर्वस्यादर्शनादयुक्तोऽन्यापोहः । § 2242

**विशेषशब्दार्थेष्वि**त्यादि । तुशब्दो भेदाङ्गीकरणाकरणविकल्पाभावं सामान्यशब्दार्थाद् विशेषशब्दार्थेषु दर्शयति । घट इत्यघटो न भवति इत्यत्रापि न [न] भवत्यघटो भवत्यघट इति । तद्यथा--आमच्छिद्रादीति, आमघटश्छिद्रघटो न भवति, **आदि**ग्रहणाच्चित्रलेप्यादिघट इत्यादयो घटा एवाघटा घटनसामर्थ्याभावादचेष्टत्वात् । घटयन् वा घटः स्यात् प्रयोक्तृकर्तरि, तदभावादप्यघटो भवत्येवेति । किञ्चान्यत्--अघटोऽपि च घटो भवति चेष्टार्थवत्त्वात् स्वतन्त्रः प्रयोक्ता च, तद्दर्शयति **--घटते घटयति वा तन्तुतन्तुवायग[वा]श्वादि**रिति प्रकृत्यन्ताद् ण्यन्ताद्वा कर्तर्यचो विहितत्वात् । § 2243

**तथा प्रत्यक्षे**त्यादि । गौरित्यगौर्न भवति इत्येतदपि न युक्तम्, यस्माद् गौरगौर्भवति, अगौरपि गौर्भवति इत्येतत् प्रदर्श्यते । तत्र हि द्वयी शब्दानां गतिः--एकः शब्दोऽनेकार्थः, अनेकः शब्द एकार्थो भवति । तत्र य एकोऽनेकार्थः स चिन्त्यते । गोशब्दस्य तावद् वागादिषु वर्तमानस्य एकत्वं
- /ms, 714/mj प्रत्यक्षप्रसिद्धम्,

* * *

विशेषानिरूप्यत्वात् तत्सम्बन्धाशक्यत्वम् । तस्मादेकात्मत्वं गोशब्दस्य । तस्मिंश्चैकात्मत्वे शक्तिभेदात् तत्तदर्थप्रत्यायनशक्तयः प्रकल्प्याः, एकपुरुषपितृपुत्रादिवत् प्रतिसम्बन्धमन्यथावृत्तेः ।

गदनादिविशेषनिरूप्यान्यत्वे वा गवान्तरवद् गौरेवेति गौरित्यगौर्न भवतीत्यपि न, वागादिगवानां व्यतिरेकात् ।

* * *

सकृदुच्चरितस्य वाग्दिग्भूरश्म्यादिषु दृष्टत्वात् । अतः प्रत्यक्षप्रसिद्धेरनन्यत्वं सिद्धम्, तच्चानाशङ्कनीयम्— किमन्योऽनन्यो गोशब्द इति । तस्मादन्याय्यमन्यत्वम् । स्यान्मतम्--भिन्नार्थगतेर्गोशब्दस्यान्यत्वम्, सादृश्यात्तु स एव इति

---

४ ब्दो] भेदोंगीक॰nayacakra-ms-bhā । भेयोंऽगीक॰ nayacakra-ms-ya ॥

७ त] तद्यथामिच्छमश्छि ?द्रादीति आमघटच्छिद्रघटो प्र॰ ॥

११ घ] घटत्वा घटःnayacakra-ms-ya ॥

१५ प्र] प्रयोक्त कर्तरि प्र॰ ॥

१५ च] चाnayacakra-ms-bhā ॥

१९ त] तंपु तंतवायnayacakra-ms-bhā । तंतुतंतवाय nayacakra-ms-ya ॥

२० क] कर्तुयवो वि॰nayacakra-ms-ya । कर्तुयवों वि॰ nayacakra-ms-bhā । नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । --nayacakra-ms-pā ३ । १ । १३४ ॥

३ वाग्दिग्भू] ॰भूरित्यादिषु प्र॰ । दृश्यतां पृ॰ ५२४ पं॰ ५ ॥

४ स] स एव भवतीतिnayacakra-ms-ya ॥

भवतीति, एतच्च न, **तच्छब्दविशेषानिरूप्यत्वात्,** अयमुदात्तोऽनुदात्तः स्वरितो वाचि वर्तते, अयं दिशि इत्यादिविशेषरूपस्यानिरूप्यत्वाद् नास्त्यन्यत्वं प्रत्यक्षस्यानुमानाद् बलीयस्त्वाच्च । ततः किम् ? **ततस्तत्सम्बन्धाशक्यत्वम्,** अनिरूप्यात्मरूपाणामसतां पृथगनुपलब्धनानार्थैः सह न शक्यः सम्बन्धः कर्तुम् । अकृतसम्बन्धानां च शब्दानामर्थप्रत्यायनमन्याय्यम्, म्लेच्छप्रयुक्तशब्दश्रवणादप्यर्थप्रतीतिप्रसङ्गात् । तस्मादेकात्मत्वं गोशब्दस्य । तस्मिंश्चैकात्मत्वे सति शब्दस्य शक्तिभेदात् सम्बन्धिभिरभिव्यक्तात् तत्तदर्थप्रत्यायनशक्तयः प्रकल्प्याः, किमिव ? **एकपुरुषपितृपुत्रादिवत्,** यथैक एव पुरुषोऽनेकशक्तिसम्बन्धिभेदापेक्षया पिता पुत्रो मातुलो भागिनेय इत्यादिव्यपदेशभाग् भवति तथा गोशब्दोऽपि वागादिषु । कस्मात् ? **प्रतिसम्बन्धमन्यथा वृत्तेः,** स एव सम्बन्धं सम्बन्धं प्रति [प्रतिसम्बन्धं] सम्बन्धिजनितमन्यत्वमन्यथान्यथा वर्तते । तस्मादेकत्वाद् गोशब्दस्य वागादिभिन्नार्थवाचित्वाद् गौरेव वागादिरगौर्भवति, अगौरपि गौर्भवति । § 2244

स्यान्मतम्--निमित्तभेदाद् गोशब्दा भिद्यन्ते, तानि च निमित्तानि गदन-गर्जन-गमन-गिरणादीनि, पृषोदराद्याकृतिगणत्वाद् रूपसिद्धेरन्यत्वमेवेति । - /ms एतच्चोक्तविधिना न युक्तमप्यभ्युपगम्य **गदनादिविशेषनिरूप्यान्यत्वे वा गवान्तरवद् गौरेव,** यथा हि गोशब्दः सास्नादिमत्येकस्मिन्नप्यर्थे गमननिमित्ते वृत्तोऽपि खण्ड-मुण्ड-शाबलेय-बाहुलेय-सौरभेयादिभेदेषु गवान्तरेषु गौरेव । **इति** *हेत्वर्थे, यस्मात् खण्डादिविशेषापेक्षया सामान्यशब्दो गोशब्दस्तस्मात् पूर्ववदस्मिन्नपि पक्षे **गौरित्यगौर्न भवतीत्यपि न,** कस्मात् ? **वागादिगवानां व्यतिरेकात्,** तद्यथा गौः इत्युक्ते वागादिषु न व्यतिरिच्यते गोत्वं *गोशब्द[वत्] वागित्युक्ते दिगादिभ्यो व्यतिरिच्यते वाग् न दिक् इति । ततः गौरगौरपि भवति इति गतार्थमुदाहरणम् । § 2245

715/mj

एकोत्तरशतनामत्वाद्यम्भसो विषमविषं भवति अविषमपि विषं भवतीत्यादि । तथा पीलुवृक्षो वृक्षत्वादपीलुर्भवति धवादिवत्, हस्तिवत् पीलुर्वा । अतः पीलुरपीलुरपि पीलुश्च, अपीलुरपीलुरपि पीलुश्च । एवं हरिरामार्जुनादयोऽपि । § 2246

---

४ ल] °लब्धा°nayacakra-ms-bhā ॥
७ त] तदर्थ°nayacakra-ms-bhā ॥
७ स] °वृत्तेः स्म एवnayacakra-ms-ya । °वृत्तेस्म एव nayacakra-ms-bhā । °वृत्तेस्तमेव ? ॥
७ गिर] °गराणा° प्र° । दृश्यतां पृ° ११४ टि° ६ ॥
९ *] हेत्वर्थोnayacakra-ms-bhā ॥
१० भ] भवतीत्यपि म तस्माद् प्र° ॥
१० वागादिग] °गवानं व्यतिरेकातिरेकात् nayacakra-ms-ya । गवानां व्यतिरेकाव्यतिरेकात् ? ॥
११ *] गोशब्दो वा । वागित्युक्ते ? ॥

एवं तावदनेकार्थैकशब्दत्वेऽन्यापोहाभावः । अनेकशब्दैकार्थत्वेऽपि तद्यथा --**एकोत्तरशतनामत्वाद्याम्भस** इत्यादि । सलिलमुदकममृतं वा जीवनं विषम् इत्याद्येकोत्तरं शतमुदकनामानि **निरुक्ते** पठ्यन्ते । ततो विषमविषं भवति, अविषमपि विषं भवति, अपानीयं ग्रन्थिसर्पादिविषं मारणात्मकं न, जीवनात्मकम् । जीवनात्मकमप्युदकादि मारणात्मकं दुष्प्रयोगादित्यादि गमनिका । **आदि**ग्रहणाद् घृतमघृतमित्यादि । तथा पीलुवृक्षः वृक्षत्वादपीलुर्भवति धवादिवत्, हस्तिवत् पीलुर्वा । हस्त्यपि पीलुरपीलुर्भवति हस्तित्वाद् मनुष्यवत् । तथा विपर्ययेणाहस्तित्वादपीलुर्भवति पीलुवृक्षः, अवृक्षत्वादपीलुर्हस्तीति । **अत** इत्युपसंहरति । पीलुरपीलुश्च पीलुश्च, अपीलुरपीलुरपि पीलुश्चेति । **एवं हरिरामार्जुनादयोऽपि** इति च व्यापितामप्यस्य न्यायस्योदाहरणबाहुल्येन
- /ms दर्शयति । शक्र-सिंह-वासुदेव-मण्डूक-वानर-हयादिषु हरिशब्ददर्शनादहरिर्ह-

---

११ नामानि ] अर्णः । क्षोदः । क्षद्म । नभः । अंभः । कबन्धम् । **सलिलम्** । **वाः** । वनम् । घृतम् । मधु । पुरीषम् । पिप्पलम् । क्षीरम् । **विषम्** । रेतः । कशः । जन्म । बृबूकम् । बुसम् । तुग्र्या । बुर्बुरम् । सुक्षेम । धरुणम् । सिर । अररिन्दानि । ध्वस्मन्वत् । जामि । आयुधानि । क्षपः । अहिः । अक्षरम् । स्रोतः । तृप्तिः । रसः । **उदकम्** । पयः । सरः । भेषजम् । सहः । शवः । यहः । ओजः । सुखम् । क्षत्रम् । आवयाः । शुभम् । यादुः । भूतम् । भुवनम् । भविष्यत् । महत् । आपः । व्योम । यशः । महः । सर्णीकम् । स्वृतीकम् । सतीनम् । गहनम् । गभीरम् । गंभरम् । ईम् । अन्नम् । हविः । सद्म । सदनम् । ऋतम् । योनिः । ऋतस्य योनिः । सत्यम् । नीरम् । रयिः । सत् । पूर्णम् । सर्वम् । अक्षितम् । बर्हिः । नाम । सर्पिः । अपः । पवित्रम् । **अमृतम्** । इन्दुः । हेमः । स्वः । सर्गाः । शंबरम् । अभ्वम् । वपुः । अंबु । तोयम् । तूयम् । कृपीटम् । शुक्रम् । तेजः । स्वधा । वारि । जलम् । जलाषम् । इदमित्येकशतमुदकनामानि ॥ १ । १२ ॥ इति यास्क**निरुक्ते नै**घण्टुककाण्डे १०१ नामानि । नीरं वारि जलं दकं कमुदकं पानीयमम्भः कुशं तोयं **जीवन**जीवनीयसलिलार्णांस्यम्बु **वाः** संवरम् । क्षीरं पुष्करमेघपुष्पकमलान्यापः पथःपाथसी कीलालं भुवनं वनं घनरसो यादो निवासोऽमृतम् ॥ ४ । १३५ ॥ कुलीनसं कबन्धं च प्राणदं सर्वतोमुखम् । --**अभिधानचिन्ता॰** । शेषश्चात्र--जले दिव्यमिरासेव्यं कृपीटं **घृत**मङ्कुरम् । **विषं** पिष्पलपातालमलिलानि च कम्बलम् ॥ पावनं षड्रसं चापि वल्लूरं तुसितं पयः । किट्टिमं तदतीसारं सालूकं पङ्कगन्धिकम् । अन्धं तु कलुषं तोयमतिस्वच्छं तु काचिमम् ॥ --अभिधानचिन्तामणिस्वोपज्ञवृत्तिः ४ । १३५ ॥

१ अ ] ऽ**विषमपि**nayacakra-ms-ya । **विषमपि** nayacakra-ms-bhā ॥

१ मा ] **मरणा॰** प्र॰ ॥

६ ध ] **धनादि॰**nayacakra-ms-ya ॥

११ ह ] द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ।--अमरकोश॰ ३ । ३ । १९३ ॥

२२ ह ] हस्तवत्त्वादित्यर्थः ॥

३ त्वा ] **॰त्वात्ऽपीलु॰** प्र॰ ॥

३ अपीलु ] **॰लुपीलुरपि**nayacakra-ms-ya ॥

६ इ ] **इति व व्यापी॰**nayacakra-ms-bhā । **इति व्यापि॰** nayacakra-ms-ya ॥

६ बाहु ] **॰हुल्येन न दर्शयति**nayacakra-ms-ya ॥

८ श ] यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥--**अमरकोष॰** ३ । ३ । १७४ ॥

रिश्च । रामो रम्यवर्ण-दाशरथि-बलदेव-जामदग्न्येषु अर्जुनस्तृण-सुवर्ण-वृक्ष-पाण्डवकार्तवीर्येषु दर्शनादित्यादि तच्चातच्च पूर्ववत् । § 2247
716/mj

एवं श्रुतिमात्रतत्त्वो गवादिरेकः शब्दोऽनेकार्थगमकशक्तियुक्तः एकादित्य[तपन--प्रकाशन... ...अनेकार्थ]कारित्ववत् । § 2248
प्रत्यर्थवृत्ति... ... ... § 2249

संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥§ 2251

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दस्यार्थव्यवच्छेदे विशेषस्मृतिहेतवः ॥ वाक्यप॰ २ । ३१७; ३१८§ 2253

अथोच्येत--सर्वथाऽदृष्टत्वात् स्थिते तु स्वार्थस्याभावे सामान्याभावमात्रनिवृत्तिरभावभेदासंस्पर्शात् । § 2254

अथ स्वार्थाभावाभावमात्रत्वे कः शब्दार्थः (?')वृक्ष [इत्य-वृक्षो न भवति' इति] तच्छब्दधूमलिङ्गाभ्यामन्यावपोह्याववृक्षानग्नी भेदासंस्पर्शेन । तत्र च प्रसह्यप्रतिषेधार्थे तन्मात्रमेव च गम्येत । न वृक्षपर्युदासेन घटादिरर्थात्माऽन्यः कश्चिल्लभ्यते । § 2255

एवं **श्रुतिमात्रे**त्यादि । अनेनोक्तन्यायेन श्रुतिमात्रतत्त्वो गवादिरेकः शब्दो[ऽप्र]तिलब्धविभागोऽनेकार्थगमकशक्तियुक्तः । किमिव ? **एकादित्ये**त्यादि यावत् **कारित्वव**दिति गतार्थः प्रोक्तार्थोपसंहारः । § 2256

स्यान्मतम्--एकस्यानेकार्थकारित्वे विभागप्रतिपत्त्यभावादव्यवच्छेदप्रसङ्ग इति । त**न्न, प्रत्यर्थवृत्ती**त्यादि यावद् **विशेषस्मृतिहेतवः** इति यथासङ्ख्यं सकरभाद्युदाहरणभावितार्थं कारिकाद्वयं निमित्तान्तरादेकार्थावच्छेदाख्यान-

---

१० रा] बले रामो नीलचारुसिततित्रिषु ।--**अमरकोष**॰ ३ । ३ । १४० । रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे च सितश्वेतमनोज्ञेषु च वाच्यवत् ॥ --**विश्व**॰ ॥

१२ अ] अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्याद् धवले पुनरन्यवत् ॥ नपुंसके तृणे नेत्ररोगे स्यादर्जुनी गवि । उषायां बाहुदानद्यां कुट्टन्यामपि च क्वचित् ॥ --**मेदिनी** ॥

१३ सं] दृश्यतां पृ॰ १२७ पं॰ ११--१४ । टिपृ॰ ५६ टि॰ १ ॥

१३ सा] तुलना पृ॰ ७०५ ॥

१६ स] सकरभा धेनुरानीयताम् इत्यत्र करभसंसर्गाद् विशिष्टा एव धेनुरवगम्यते । एवमन्यान्यप्युदाहरणानि टिपृ॰ ५६ टि॰ १ इत्यतोऽवसेयानि ॥

म् । **आदिग्रहणाद्** गौण-मुख्य-स्तुति-निन्दादिभावार्थकृतव्यवच्छेदादिति ।
§ 2257

**अथोच्येतेत्यादि** । अथ परेणोच्येत--ननूक्तमेव *__गुणसमुदायमात्रस्य काणकुण्टादेर्दर्शनासम्भवः, सत्यपि च दर्शने सर्वथानुमानासम्भवः सर्वप्रकारेणादृष्टत्वात्__ इति निराकाङ्क्षीकृते मूलत एव पुनरिदानीं को विचारः--दर्शनं स्यात् न स्यादिति ? स्थिते तु स्वार्थस्याभावे सामान्यरूपस्याभावमात्रस्य निवृत्तिरभावभेदासंस्पर्शात् वृक्ष इत्यवृक्षो न भवति अग्निरित्यनग्निर्न भवति इत्यवृक्षानग्न्यभावभेदासंस्पर्शेनोच्यते, न वाऽभावस्य भेदाः सन्ति । तस्मात् सर्वाभावभेददर्शनेन विनैवापोहो गमक इति । § 2258

- /ms अत्रोच्यते --**अथ स्वार्थाभावाभावमात्रत्वे त्वदिष्टे कः शब्दार्थ** इति पृच्छति **वृक्ष** इत्यादि प्रत्युच्चार्यात्राप्यपोहाभावमापादयितुकामः । **तच्छब्दो** वृक्षशब्दः परार्थेऽनुमाने स्वार्थे धूमश्च लिङ्गे, ताभ्यामन्या[व]पोह्यावृक्षानग्नी घटादिभेदरूपाण्यसंस्पृश्येत्यभिमतोऽर्थः, तत्र च प्रसह्यप्रतिषेधार्थे वृक्षो न भवत्यवृक्षः इति तन्मात्रमेव च गम्येत, न च गम्यत इत्यभिप्रायः । वृक्षादन्योऽवृक्ष इति न वृक्षपर्युदासेन घटादिरर्थात्माऽन्यः कश्चिल्लभ्यते, अन्य-
717/mj स्यासत्त्वादविवक्षितत्वाच्च वृक्ष एव व्याख्येयो विवक्षित

* * *

वृक्ष एव व्याख्येयः । स स्वयमनवगतः कथमभावं विशेषयितुं शक्नुयात् अवृक्षो मदभावः इति, तस्य भावेन लभ्यात्मलाभत्वात् ।

ततश्च वृक्ष इत्यवृक्षो न भवतीतीदमुक्तं भवेत्--योऽभावाभावः स वृक्षः । ततो घटपटादीनामभावनिवृत्तिमात्रत्वाद् वृक्षशब्दार्थवत्त्वं प्राप्तम्, कुतोऽपोहस्तेषां स्यात् ।

सर्वथा वा गतिर्भवेत् । सर्वदर्शननिराकाङ्क्षतायां शब्दादनुमानाद्वा वृक्षोऽग्निरिति च विशेषवचनप्रत्ययानर्थक्यं स्यात्, अभावाभावमात्रस्यैकत्वात्, भेदविषयवचनानुमानव्यवहारनिर्विषयत्वात् अभूतभेदविषयत्वात् खपुष्पादिवत् ।

अत्रोच्येत--नाप्यशेष... ... ...। किं तर्हि ? स्वसम्बन्धि-

* * *

त्वात्, स स्वयमनवगतः कथमभावं विशेषयितुं शक्नुयात् **अवृक्षो** वृक्षाभावो **मदभावः** इति, खपुष्पमिव वन्ध्यापुत्रः ? कस्मात् ? तस्याभावस्य भावेन

२२ अ] **अथोच्यते°** प्र° ॥
२८ *] तुलना--पृ° ६५२ पं° १४ । पृ° ६६२ पं° २ पृ° ७०९ पं° ९ ॥
२ स्या] **स्यात् न** nayacakra-ms-ya प्रतौ नास्ति ॥
५ सा] तुलना पृ° ७१७ पं° २७ ॥
७ वा] **वाभावस्य** प्र° । **चाभावस्य** इत्यपि भवेत् पाठः ॥
८ भेद] **°दादर्शनेन** प्र° ॥
१५ श्च] द्विवचनान्तमिदं पदम् ॥
२१ भिम] **°मतोर्थसूत्रं च** प्र° ॥
२२ च] प्रसज्यप्रति° ? ॥
२२ स] पृ° ७०७ पं° १२ पृ° ७१९ पं° १९ ॥
२३ अवृक्षो] **अवृक्षो भावो मद°**nayacakra-ms-bhā ॥

लभ्यात्मलाभत्वात् स स्वयमसन् कथमसतो विशेषणं स्यात् ? उभयत्र चान्वये व्यतिरेके च घटादीनां भेदरूपाणां सपक्षासपक्षयोरसंस्पृश्यत्वेनेष्टत्वाद् न किञ्चित् केनचिद् विशेषयितुं शक्यम् । § 2259

**ततश्चे**त्यादि । अस्मादुक्तन्यायादेष शब्दार्थः संवृत्तः, वृक्ष इत्यवृक्षो न भवति इत्युक्ते इदमुक्तं भवेत् सम्भाव्येत **योऽभावे**त्यादि, अभावस्याभावो वृक्ष इत्युक्तं स्यात्, नान्यदभावनिवृत्तेः । ततो घटपटादीनामभावनिवृत्तिमात्रत्वाद् वृक्षतावद् वृक्षशब्दार्थवत्त्वं प्राप्तम्, कुतोऽपोहस्तेषां स्यात् ? तत्संस्पर्शे हि स्यादपोहस्ते वृक्षो न भवतीति । इत्थमपोहाभावः, अनिष्टं चैतत् । § 2260

किञ्चान्यत्, **सर्वथा वा गतिर्भवेत्,** अभावाभावमात्रं हि वृक्षोऽग्निर्वा स्यात्, न सपक्षासपक्षभेदसंस्पर्शेन दृष्टवत् । अतः सर्वदर्शननिराकाङ्क्षता, तस्यां च सत्यां शब्दाद् वृक्षादनुमानाद्वा धूमादभावाभावमात्रवृक्षाग्नित्वाददृष्टभेदासंस्पर्शादेव त्वदुक्तात् वृक्षोऽग्निः इति च विशेषवचनप्रत्ययानर्थक्यं स्यात् । कस्मात् ? **अभावाभावमात्रस्यैकत्वा**दिति स्वपरार्थानुमानयोः सामान्येन हेतुः **खपुष्पादिव**दिति दृष्टान्तः । विशेष्य वा हेतुः **--भेदविषयवचनानुमान-** - /ms **व्यवहारनिर्विषयत्वात्, अभूतभेदविषयत्वा**दिति सामान्येन । स एव दृष्टान्तः सर्वत्र, अन्तेऽभिहितत्वात् । अयमन्यो व्याख्याविकल्पः, तद्यथा विकल्पः -- **सर्वथा वाऽगतिर्भवेत्** प्रश्लेषलभ्याकारत्वात् । **अगति**रज्ञानं वृक्षशब्दोच्चारणाद् भवेत् सर्वथा । कस्मात् ? गन्तव्याभावात् । गन्तव्याभावश्चाभावाभावमात्रवृत्तित्वाच्छब्दानुमानयोरिति । § 2261

**अत्रोच्येते**त्यादि । स्वभेदाभावव्यावृत्तिलक्षणान्यापोहेऽनन्तत्वादसम्भवसम्बन्धाभिधानादिदोषा उक्ताः । सामान्याभावाभावमात्रे सर्वैकत्वानर्थक्यापोहाभावदोषा उक्ताः । तेषां पक्षद्वयानभ्युपगमात् परिहारः **--नाप्यशेषे**त्यादि । किं तर्हि ? इति पक्षान्तरं श्रयते निर्दोषं मन्यमानः, स्वसम्बन्धिवृक्षस्याग्नेर्वा 718/mj

* * *

सामान्यधर्मेषु तदनुबन्धिभेदेषु चाविनाभाविषु दर्शनसंस्पर्शेन तद्व्यतिरिक्तेष्वदर्शनसंस्पर्शेनान्यापोहस्य प्रवृत्तत्वाददोषः । अत एव चेदं स्वसम्बन्धिभ्योऽन्यत्रादर्शनात् तद्व्यवच्छेदानुमानम् । यत्र दृष्टः सोऽत्र सम्बन्ध्यभिप्रेतो न त्वविनाभावित्वसम्बन्धेन । अन्यत्रादर्शनादिति अनुमेयाभावेऽदर्शनात्, अन्यथा हि वृक्षशब्दस्य धूमस्य च तस्मिन् वस्तुनि पृथिवीद्रव्याद्यभावेऽपि दर्शनं व-

२४ संस्पृ] °स्पृशात्वे° प्र° ॥
२ स] सभाव्येतnayacakra-ms-ya । सभावोत nayacakra-ms-bhā ॥
६ वृ] वृक्षता भवेद् ? ॥
१४ पोह] °हस्तेषां वृक्षो न भवतीति ? । °हस्ते वृक्षो न भवन्तीति ? तुलना पृ° ७१८ पं° २४ ॥
१५ वृक्षाग्नित्वा] °त्वादृष्टभेदा°nayacakra-ms-bhā ॥
१६ स] °संभवसंभवसंबंधा° प्र° ॥
१८ सा] पृ° ७१६ पं° २० ॥
१९ स] पृ° ७१७ पं° २१ ॥
२१ त्वान] पृ° ७१७ पं° २० ॥
२३ क्यापोहा] पृ° ७१७ पं° १७ ॥

क्तव्यं स्यात् । तद्व्यवच्छेदानुमानमिति यत्रैवादर्शनमुक्तं वृक्षाभावेऽवृक्षेऽग्न्यभावेऽनग्नौ वा ततो व्यवच्छेदानुमानम्--अवृक्षोऽनग्निर्वा न भवतीति । एवं च कृत्वा वृक्षशब्दाद् धूमाच्च द्रव्यत्वाद्यनुमानमुपपन्नं भवति । इतरथा तु द्रव्यादीनामप्यन्यत्वादतुल्य एव वृत्तेरपक्षधर्मत्वानैकान्तिकत्वविरुद्धत्वानुमानाभावदोषाः स्युः । द्रव्यादित्यागे तदविनाभाविनः स्वार्थस्य चासम्भव एव । तस्मात् स्वसम्बन्ध्यभावेऽदर्शनादनुमानस्य सिद्धिः इति ।

एवं तर्हि यदि सत्तादीनि विशेषणानि वृक्षो भवन्ति स वा तानि भवति एकभवनात्मकोऽर्थोऽस्य वृक्षशब्दस्य तत्स्वात्मवत् ततोऽनन्यत्वात् द्रव्यादिवृक्ष-

* * *

सत्ताद्रव्यत्वादिसामान्यधर्मास्तदनुबन्धिनो भेदाश्च शिंशपादयः तेष्वविनाभाविषु दर्शनसंस्पर्शेन तद्व्यतिरिक्तेषु घटादिष्वदर्शनसंस्पर्शेन जलादिषु चान्यापोहस्य प्रवृत्तत्वान्न सम्भवन्त्युभयपक्षगता दोषाः । § 2262

**अत एव चेद**मित्यादि एतत्पक्षसंश्रयदर्शनार्थं भाष्यग्रन्थमाह **स्वसम्बन्धिभ्योऽन्यत्रादर्शनादि**त्यादि । अस्य व्याख्या टीकाग्रन्थो **यत्र दृष्ट** इत्यादिः याव**दवृक्षोऽनग्निर्वा न भवती**ति गतार्थः । **एवं च कृत्वे**त्यादि याव**दुपपन्नं भवती**ति, अनेकाविनाभाविनां पृथिवीद्रव्यत्वादीनां वृक्षशब्दाद् धूमाच्चानुबन्धिनामनुमानं युज्यते तद्दर्शनस्पर्शेन, वृक्षत्वात् पृथिवी द्रव्यं सच्च धूमत्वाच्च वृक्षवदग्निवच्चेति । **इतरथा त्वि**त्यादि, अत्यन्तव्यतिरेके सम्बन्धित्वाभावेऽनुबन्धिनां द्रव्यादीनामप्यन्यत्वादतुल्ये विपक्ष एव वृत्तेरपक्षधर्मत्वानैकान्तिकत्वविरुद्धत्वानुमानाभावदोषाः स्युः । अनुबन्धिनां द्रव्यादीनां त्यागे तदविनाभाविनो वृक्षस्य स्वार्थस्यासम्भव एवेति च दोषः । ततः प्रत्याय्यप्रत्यायनयोरर्थशब्दयोरनुपपत्तिः । **तस्मात् स्वसम्बन्ध्यभावे**त्याद्युक्तोपसंहारः, सम्बन्धिनोऽर्थान्तरस्य भावे दर्शनात् सम्बन्धिन एव भावाभावेऽदर्शनाच्चानुमानस्याभिप्रेतस्य सिद्धिरिति । § 2263

- /ms

अत्रोत्तरमुच्यते --**एवं तर्ही**त्यादि । **यदि सत्तादीनी**त्यादि सत्ताद्रव्यपृथिव्यादीनि विशेषणानि वृक्षस्य वृक्षादभिन्नानि सन्ति वृक्षो भवन्ति तानि वृक्ष एवेत्यर्थः, स वा वृक्षस्तानि भवति तेन तानि विशेष्यन्ते देवदत्तपाण्यादिवदेकभवनात्मनेत्येतदापन्नम् । तस्मिन्नेकभवने प्रयोगः शाखादिम-

१ अ] तुलना--पृ॰ ६५२ पं॰ २२ ॥
५ स्व] स्वसम्बन्ध्यभावादर्शनात् इत्यपि भवेदत्र पाठः । nayacakra-ms-bhā प्रत्यनुसारेण सम्बन्ध्यभावादर्शनात् इत्यपि भवेत् ॥
७ अ] पृ॰ ६५२ पं॰ ४ ॥
१८ य] पृ॰ ६५२ पं॰ १८ ॥
२१ इ] इत्यादिnayacakra-ms-ya ॥
२२ ए] पृ॰ ६५२ पं॰ २२ ॥
३ वृ] वृक्षवाद॰nayacakra-ms-bhā । वृक्षत्वाद॰ nayacakra-ms-ya ॥
३ त्वा] ॰त्वान्नै॰nayacakra-ms-ya ॥
५ त] तस्मात् सम्बन्ध्य॰nayacakra-ms-bhā ॥ अयमपि पाठः समीचीनो भाति, व्याख्यायां सम्बन्धिनोऽर्थान्तरस्य इति दर्शनात् ॥
७ ना] ॰नात्मतेत्येतदापन्नम् ? ॥

ति दर्शनमित्युच्यतेऽस्यार्थः स एकभवनात्मकोऽर्थोऽस्य वृक्षशब्दप्रयोगस्य । किमिव ? **तत्स्वात्मवत्** सत्ताद्रव्यत्वादिवृक्षस्वात्मवद् वृक्षस्य सत्ताद्रव्यत्वादिस्वात्मवत् एकभवनात्मवदित्यर्थः । कस्मात् ? उक्तन्यायेन **ततोऽनन्यत्वात्** तेभ्यस्तस्य तस्माद् वा तेषामनन्यत्वात् द्रव्यादिवृक्षभावदर्शनाद् वृक्षद्रव्यादिभावदर्शनादित्यर्थः । 719/mj

* * *

भावदर्शनाद् द्रव्याद्यभावदर्शनानभ्यनुज्ञानादतिस्फुट एवायं विधिवादस्त्वयाभ्युपगतः भवनपरमार्थार्थाभ्युपगमात् । यत् कोऽपि भवति [तद् भवनपरमार्थत एव... ...] वैधर्म्येण खपुष्पवत् । योऽप्यसौ [व्यावर्तते सोऽपि भवनपरमार्थत एव] भवत एव व्यावृत्तेः, देवदत्तादिव्यावृत्तिवत्, न खपुष्पादिवत् ।

एवं भवद्भवननिरूपणे स्थित एवार्थ; स चान्यश्चेत्यन्यापोहपरिग्रहे सर्वथा वा गतिर्भवेत् । अनुगमो विधिरेव ।

अथवा अनिर्वाहकैकान्तव्याख्याविकल्पप्रदर्शनात् सर्वथा वा विकल्पानां गतिरनेकान्तः स एवैवं भवेत् । विधिविकल्पोऽपि सदाद्यात्मकार्थग्रहणात् । अपोह-

* * *

कस्मात् ? **द्रव्याद्यभावदर्शनानभ्यनुज्ञानात्** । पृथिवीद्रव्यसत्त्वाभावे दर्शनं वृक्षस्य वृक्षाभावे वा पृथिव्यादिभावदर्शनं वृक्षात्मविषयं नाभ्यनुज्ञायते यस्मात् तस्मादेकभवनात्मकत्वानुज्ञानादन्याभावा**दतिस्फुट एवायं विधिवादस्त्वयाभ्युपगतः**, पूर्वेष्वपि पक्षेषु स्फुट एव विधिवादः, अस्मिंस्त्वतिस्फुटः । कस्मात् ? **भवनपरमार्थार्थाभ्युपगमात्**, वृक्षशब्दस्य सद्द्रव्यपृथिवीमृदादिवृक्षैकभवनात्मकः परमार्थतोऽर्थ इत्यभ्युपगतत्वात् । **यत् कोऽपि भवती**त्यादिना भवनमेवेति दर्शयति यावद् **वैधर्म्येण खपुष्पव**दिति । **योऽप्यसा**वित्यादि व्यावर्त्याभिमतोऽपि भवनपरमार्थत इति दर्शयति । **भवत एव व्यावृत्ते**रिति हेतुः, भवन्नेव व्यावर्तते कर्तरि षष्ठीविभक्त्युत्पत्तेः, पर्वते प्रतिहतस्य देवदत्तस्य व्यावृत्तिवत् सत एव व्यावृत्तेरित्यपादानलक्षणा पञ्चमी वा, यो भवति पर्वतादिः तस्माद् भवत एव पर्वतादेर्देवदत्तादेर्व्यावृत्तिवत् न खपुष्पादिवदिति विधिवाद एव स्फुटीकृतः । § 2264 - /ms

---

१३ तेऽस्या]
ऽस्योस्यार्थःnayacakra-ms-bhā ॥
१६ य] यः कोऽपि इति चेत् पाठः स्यात् तदा यः कोऽपि भवति [स भवनपरमार्थत एव] इति मूलं सम्भावनीयम् ॥
२३ विष]
°षयन्नाभ्य°nayacakra-ms-bhā ।
°षयत्वाभ्य° nayacakra-ms-ya ॥
२८ य] **व्यावृत्त्या°** प्र° ॥
१३ व्या] **यत्कोऽपि** प्र° । अत्र यः कोऽपि इत्यपि भवेत् पाठः ॥

ततः किम् ? तत इदम् --**एवं भवद्भवने**त्यादि । इत्थं भवदेव भवतीति निरूपणेऽयमस्य स्थित एवार्थः— स चान्यश्चेत्ययमन्यापोहपरिग्रहः, तस्मिंश्च सति सर्वथा वा गतिर्भवेत्, *‌**अनुगमो विधिरेवे**त्युपसंहरति । § 2265

**अथवा अनिर्वाहके**त्यादि, ये त्वमी व्याख्याविकल्पाः कल्पिता विधिवादेऽन्यापोहवादे *चैकान्तरूपास्ते सर्वे न निर्वहन्तीत्युपेक्ष्याः । तत्प्रदर्शनात् सर्वथाशब्दो विमर्दरमणीयः परिनिष्ठितोऽतीतसर्वविचारस्यायं पिण्डार्थ इत्येतदाख्यानार्थः । कोऽसौ पिण्डार्थ इति चेत्, उच्यते--वेति वाशब्दो विकल्पार्थः, **विकल्पानां गति**रिति विकल्पानामेव ज्ञानं निश्चयः परिनिष्ठा सर्वथा घटो घटोऽप्यघटोऽपीत्यादि निश्चयः । का सा गतिः ? **अनेकान्तः, स एव एवं भवेत्** स एवानेकान्तो विमर्दक्षमो विचारपर्यवसानेऽवतिष्ठेतेत्थम्, सर्वन्यायपरिशुद्धिफलत्वादस्य सर्वविकल्पाः, सङ्क्षेपेण विधि-प्रतिषेधौ, तावुभावित्थं गृहीताविति दर्शयति --**विधिविकल्पोऽपि सदाद्यात्मकार्थग्रहणा**दिति
- /ms विधिम्, **अपोहविकल्पोऽपि स्वसम्बन्ध्यन्यप्रतिषेधार्थत्वा**दिति प्रतिषेधम् । एतौ त्वद्वचनादेवापतितौ । तेन सर्वथा विकल्पानां वा गतिः स्याद्वादः । स च द्रव्यार्थपर्यायार्थावेकान्तत्यागरूपैकवाक्यमत्यात्मकौ, तयोर्विषयविभागेन श-
720/mj ब्दार्थमुपसंहृत्य

* * *

विकल्पोऽपि स्वसम्बन्ध्यन्यप्रतिषेधार्थत्वात् । द्रव्यार्थतः... ... ...स्यादनपोह इत्यादि । न च तेन [सदृश्यतां पृ° ४३६ पं° ३, १८--२१ ॥ह कस्यचिद् विरोधः, आराध्यत्वाच्छरणत्वाच्च] सर्वेषामपि ।

ततश्चेदमपि दुरधीतमेवान्यापोहवादिना--[पृ° ७०७ ॥दृष्टवद् विधिरूपेण यदि लिङ्गं प्रकाशयेत् ।सर्वथाऽप्रतिपत्तिः स्यात् सर्वथा वा गतिर्भवेत् ॥ प्र° समु° ३ । १४ इति]

यत्तूक्तम्--अन्वयद्वारेण चानुमानेऽयं दोषः--यस्मादनुगमोऽस्ति वृक्षशब्दस्यार्थादिसहितस्य शिंशपादिष्वपि तस्मात् केवलोऽपि शिंशपावाची स्याद् वृक्षशब्दः । अथ बहुषु पलाशादिष्वपि दृष्ट इति संशयो भवति, *एवं सति वृक्षार्थे सत्त्वद्रव्यत्वपार्थिवत्वानि सन्ति तेषु वृक्षशब्दस्य समानत्वात् संशयः स्यात्, निश्चयस्तु दृष्टः, अवृक्षनिवृत्त्याऽर्थाभिधानवदपृथिव्यद्रव्यासत्त्वव्यावृत्त्या वृक्षाभिधानात् । *यथा हि वृक्षशब्दोऽवृक्षनिवृत्त्यैकार्थकोऽपार्थिवव्यावृत्त्यापि

---

१४ स] पृ° ७०७ पं° १२, पृ° ७१७ पं° १८ ॥
१६ *] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१६ *] वैकान्त°nayacakra-ms-ya ॥
१९ दाख्या] °दाख्या--नार्थःnayacakra-ms-bhā । °दाख्यापनार्थः इति पाठोऽप्यत्र सम्भाव्येत ॥
२० तिषेध] °ध्यम् प्र° ॥
७ अ] तुलना--पृ° ६५२ पं° २३ ॥
८ *] एवं सति वृक्षार्थे सत्त्वद्रव्यत्वपार्थिवत्वादिषु कस्मान्निश्चयो भवति इत्यपि मूलं स्यादत्र । दृश्यतां पृ° ७२१ पं° १४ ॥
९ *] यथा हि वृक्ष[पार्थिवद्रव्यसच्छब्दा आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवस्तथा प्रतिलोम्येन] संशयहेतवः इत्यपि पाठोऽत्र भवेत् ॥

स्वार्थे वर्तते तथा वृक्षपार्थिवद्रव्यसच्छब्दा आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवः, प्रातिलोम्येन संशयहेतव इति ।

* * *

दर्शयति यथासङ्ख्यम् --**द्रव्यार्थत** इत्यादि गतार्थं सोदाहरणं यावत् **स्यादनपोह इत्यादि** । **आदि**ग्रहणादन्यदपि यत् किञ्चिदन्यैरप्युद्ग्राहितं वस्तूदाहरणमेवास्य सर्वगतासर्वगतकारणकार्यत्वादीत्यभिप्रायः । **न च तेनेत्यादि** यावत् **सर्वेषामपीति** वादपरमेश्वरत्वप्रदर्शनं स्याद्वादस्य गतार्थम् । § 2266

**ततश्चेदमपि दुरधीतमेवान्यापोहवादिना** इत्युक्तार्थानुसारेणातिदेशेन दूषयति कारिकाम्, अन्यापोहस्य केवलस्य दूषितत्वाद् दर्शनबलेनैव शब्दार्थप्रतिपत्तेर्व्याख्यातत्वात् अन्ते वा स्याद्वादोपसंहारादेकान्तविधिवाददूषणस्य प्रकाशितप्रकाशनवद् वैयर्थ्यादिति । § 2267

**यतूक्तमित्यादि** यत् परेण दोषजातमुपन्यस्तं विधिवादिनं प्रति तत् परिहर्तुकामः पूर्वपक्षयति । वृक्षो मञ्चकः क्रियते इत्याद्यर्थप्रकरणशब्दान्तरसन्निध्यादिभिः शिंशपादिष्वपि दृष्टत्वात् सर्वत्र सर्वथा केवलोऽपि शिंशपावाची स्याद् वृक्षशब्दः, अनिष्टं चैतत् केवलस्याप्रत्यायनात् । § 2268

**अथ बहुष्वित्यादि** सोऽन्यापोहवाद्येव परमतमाशङ्कते । बहुषु पलाशादिष्वपि दृष्टोऽयं वृक्ष[शब्द]स्तस्मात् कतम एषां विवक्षितः स्यात् ? **इति** सामान्यात् **संशयो भवती**त्याशङ्क्य तत्रापि दोषं ब्रूयादन्यापोहवादी **एवं सती**त्यादि, वृक्षार्थे सत्त्वद्रव्यत्वपार्थिवत्वानि दृष्टानि, तेषु निश्चयो दृष्ट इत्यनैकान्तिकमेतत् । केन पुनर्न्यायेनेति चेत्, अवृक्षनिवृत्याऽर्थाभिधानवदपृथिव्यद्रव्यासत्त्वव्यावृत्त्या वृक्षाभिधानाद् व्यावृत्तिबलेनेति । अस्य च न्यायस्य गुणोपचयवर्णनम् --**यथा हि वृक्षे**त्यादि गतार्थं यावत् **संशयहेतव** इति । - /ms
§ 2269

721/mj

अत्र ब्रूमः--गुणदोषाभिमानस्ते स्वपक्षरागात् । अन्वयद्वारेण चानुमानेऽयं गुणः--दृष्टबलेनैवार्थादिभिः सह शिंशपादिषु वृक्षशब्दस्य दृष्टत्वान्निश्चयो भवति केवलात् संशयो यथादर्शनमनुमानप्रवृत्तेः । एवमेव च वृक्षार्थ[भवनेन विना वृक्षो न भवतीति वृक्षशब्दात् तद्भवनं यथा प्रतीयते तथा पार्थिवद्रव्यसत्त्वानि प्रतीयन्ते, तैर्विना] वृक्षभवनस्यैवादर्शनात् । विधिरूपेण दर्शनसामर्थ्येनैव

---

१८ इत्याद्य] पृ० ६५२ पं० २३ । दृश्यतां पृ० १२७ पं० ११--१४, टिपृ० ५६ टि० १ ॥

१८ न्निध्या] °ध्यादिभिः शिंशपादिभिः शिंशपादिष्वपि प्र० । अत्र °दिभिः शिंशपादिभिः शिंशपा° इति पाठो द्विर्भूतः प्रतीयते ॥

२३ अ] तुलना--पृ० ६५२ पं० २४ ॥

२५ ए] तुलना--पृ० ६५२ पं० २४ ॥

२७ निश्च] **निश्चयो न** दृष्टnayacakra-ms-ya ॥

२८ अ] तुलना--पृ० ६५३ पं० १२ ॥

च वृक्षपार्थिवद्रव्यसच्छब्दा आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवः, प्रातिलोम्येन संशयहेतवः । एवं गम्यताम्… … …। § 2270

यदप्यनियतशिंशपं गम्यते तत्रापि विशेषादर्शनादगतिर्विशेषदर्शनाद् गतिः । यथा अविभातैकदेश… … …तथा वृक्षशब्दात्… … …संशयः, तद्भावदर्शनन्यायवत् । § 2271

वयं त्व[त्र] ब्रूमः --**गुणदोषाभिमानस्ते स्वपक्षरागादिति** । व्याख्या --**अन्वयद्वारेण चानुमानेऽयं गुण** इत्यादि, दृष्टबलेनैव हि अर्थ-प्रकरण-विशेषणादिभिः सह शिंशपादिषु दृष्टत्वान्निश्चयो भवति, तैर्विना न दृष्टत्वात् केवलात् संशयः, किं कारणम् ? यथादर्शनमनुमानप्रवृत्तेः । विशेष एवार्थादिरपि शिंशपादिवत्, विशेषादर्शनादेव पलाशाद्यपि । वृक्षशब्दसामान्यात् संशयो भवति अदृष्टत्वाद् विशेषविरहितस्य । निश्चयस्तु विशेषसहितस्य दृष्टत्वात् । यदप्युच्यते--सत्त्व-द्रव्यत्व-पार्थिवत्वादिषु कस्माद् निश्चयो भवति ? इति, तत्रापि दृष्टबलादेव, **एवमेव च वृक्षार्थे**त्यादि यावद् **वृक्षभवनस्यैवादर्शना**दिति एतदुक्तं भवति--यथा वृक्षः स्वार्थभवनेन विना न भवतीति वृक्षशब्दात् तद्भवनं प्रतीयते तथा पार्थिवद्रव्यास्तित्वैर्विना वृक्षत्वस्याभवनाद् वृक्षत्वभवनप्रतीतिवत् पार्थिव-द्रव्य-सत्त्वानि प्रतीयन्ते तैर्विना तस्यैवादर्शनादिति । यदपि च वृक्षशब्दात् पार्थिव-द्रव्य-सत्त्वत्र्यर्थगतिः पार्थिवशब्दाद् द्रव्य-सत्त्वद्व्यर्थग- - /ms तिः द्रव्यशब्दात् सत्त्वगतिः प्रातिलोम्येन सदाद्यानुलोम्येन चोत्तरेषु पूर्वस्मात् संशय इति तदपि विधिरूपेण दर्शनसामर्थ्येनैव च **वृक्षपार्थिवद्रव्यसच्छब्दा आनुलोम्येने**त्यादि तत्प्रदर्शनं गतार्थं यावत् **संशयहेतव** इति दर्शनस्यैव निश्चय-संशयहेतुत्वात् । § 2272

**एवं गम्यता**मित्यादिरुक्तोपसंहारो तु[य ?]दर्थप्रकरणादिसहिताद् वृक्षशब्दाच्छिंशपावृक्षत्वतत्त्वाद् धवादिभ्योऽर्थेभ्योऽन्यस्माच्छिंशपादिशब्दाद् विशेषात्मकादिव विशेषदर्शनादेवेति । § 2273

**यदप्यनियतशिंशप**मित्यादि । योऽयं वृक्षशब्दोच्चारणे कदाचिच्छिंशपाया गतिः कदाचित् तदगतिरित्यनियमः स विशेषादर्शनादगतिः विशेषदर्शनाद् गतिः । तत्र निदर्शनम् --**यथा अविभातैकदेशे**त्यादि धूमविषयं प्राग्वर्णितं दर्शनं संशयाय, विशिष्टं तु निश्चयायेति दृष्टान्तः । दार्ष्टान्तिकोऽर्थः **--तथा**

---

२ द्वा] °द्वारेणnayacakra-ms-ya ॥
३ रेण] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१५ न] नष्टत्वात्nayacakra-ms-ya ॥
१८ ए] अर्थादिः-- अर्थप्रकरणलिङ्गादिः ॥
२१ प्रा] आतिलो° प्र° ॥
२३ तु] अत्र कश्चित् पाठः खण्डितः प्रतीयते ॥
८ पावृ] वृक्षतत्त्वाद्nayacakra-ms-bhā ॥
१० त] °तसंशयमित्यादिnayacakra-ms-ya ॥
१३ प्रा] प्राग्वर्णंनंnayacakra-ms-ya ॥
१४ या] °यायाविशिष्टं प्र° ॥

**वृक्षशब्दा**दित्यादि यावत् **संशयः** । केन पुनर्न्यायेनैतदेवम् ? इति तद् व्याचष्टे --**तद्भावदर्शनन्यायवत्**, यथोपवर्णितं प्राग् देश एवाग्निधूमात्मकस्तद्भावेन दृष्टो विधिना आत्मानमेवात्मना साधयतीत्यादि स एवात्रापीति ।
§ 2274

722/mj

एवं वृक्षत्वस्य पृथिवीत्वादिभिस्त्रिभिः पृथिव्या द्रव्यसत्त्वाभ्यां द्रव्यस्य सत्त्वेनानुलोम्येन तथा दर्शनात् प्रातिलोम्येन तथाऽदर्शनाच्च निर्णयसंशयौ । § 2275

अथ मन्येत--तावेतौ न युक्तौ दर्शनादुभयतोऽपि अविशेषो निश्चय एव वा स्यात् । मन्मते तु युक्तौ, अतुल्यत्वात् स्वार्थाभावे वृत्त्यवृत्त्योः । संशयहेतवस्तावद् वृक्षादिशब्दाः, शिंशपादिस्वार्थाभावेऽपि पलाशादौ वृत्तेः । निश्चयहेतवस्तु वृक्षावयवान् व्याप्नुवन्तस्तदनुबन्धिनश्चार्थान्, स्वार्थाभावेऽवृत्तेः । § 2276

न दर्शनस्यैवोत्सर्गापवादभूतत्वाद् वस्तुनोऽतुल्यत्वात्, स्थाणुपुरुषोर्द्धत्वसामान्यशकुनिनिलयनवस्त्रसंयमनविशेषदर्शनवत् । § 2277

ननूक्तम्--अवृक्षादावदर्शनात् *तद्व्यवच्छेदानुमानं स्वार्थाभिधानम् प्र॰ समु॰ वृ॰ ५ । ३४ इति । एवं च सति क्व तद् दर्शनम् ? § 2278

**एवं वृक्षत्वस्ये**त्यादि प्रकृतोपसंहारः, शिंशपादिविशेषेषु पृथिव्यादिसामान्येषु च तुल्यमप्यनेकत्र वृत्तं वृ[क्ष]त्वं स्वार्थेन सहैव वृत्तेः पृथिवीत्वादिभिर्गम्यते त्रिभिरानुलोम्येन पृथिवी-द्रव्य-सत्त्वैः पृथिवी, द्रव्य-सत्त्वाभ्यां द्रव्यं, सत्त्वे त्वेकमेव आनुलोम्येन तथा दर्शनात् । सत्त्वाद्युत्तरोत्तरसंशयस्तु प्रातिलोम्येनादर्शनादेव तथेति यावद् **निर्णयसंशया**विति गतार्थः । § 2279

**अथ मन्येते**त्यादि परमतमाशङ्कते । तावेतौ निश्चयसंशयौ न युक्तौ दर्शनादुभयतोऽपि वृक्षदर्शनस्य धव-शिंशपयोरविशेषो निश्चय एव वा स्यात् । मन्मते पुनरन्यापोहे स्वार्थाभावे [वृत्तेः] संशयो युज्येत अवृत्तेश्च निश्चयः, कस्मात् ? **अतुल्यत्वात् स्वार्थाभावे वृत्त्यवृत्त्योः**, ते हि स्वार्थाभाववृत्त्यवृत्ती यथासङ्ख्यं संशयनिश्चयहेतू । तद् व्याचष्टे--संशयहेतव- - /ms

---

१५ प्राग् ] देश वाग्नि॰nayacakra-ms-ya ॥
१५ तीत्या ] ॰त्यादिः प्र॰ ॥
२६ * ] दृश्यतां पृ॰ ६५० पं॰ २० ॥
२९ प्र ] प्रकृतोपसंहारो गतार्थ इति वक्ष्यमाणेन सम्बन्धः ॥
३ वृ ] वृत्तं वृत्वंnayacakra-ms-bhā । वृत्तं वृत्तं nayacakra-ms-ya ॥
४ स ] सत्वे त्वेकमेव प्र॰ । सत्त्वेकमेव ? ॥

स्तावद् वृक्षादिशब्दाः शिंशपादिस्वार्थाभावेऽपि पलाशादौ वृत्तेः, सदादिशब्दाश्च द्रव्यादिस्वार्थाभावेऽपि गुणादौ वृत्तेः संशयहेतवः । निश्चयहेतवस्तु वृक्षावयवाञ्छाखादीन् व्याप्नुवन्तः पार्थिवमृद्द्रव्यत्वादींश्चानुबन्धिनोऽर्थान् स्वार्थस्याभावे न वर्तन्ते, ततस्ते व्यावृत्तिबलेनैव निश्चयहेतव इति । § 2280

एतच्च **न, दर्शनस्यैवोत्सर्गापवादभूतत्वात्,** वृक्षभवनदर्शनमेव हि पलाशशिंशपादिषूत्सर्गेण प्रवृत्तं [संशयाय] शिंशपाभवननियतमपवादभूतं निश्चयाय । कस्मात् ? **वस्तुनोऽतुल्यत्वात्,** वस्त्वेव हि विशिष्टमतुल्यं शिंशपापलाशाख्यं परस्परतः, तदुपकारित्वात् सामान्यवृक्षभवनस्य **सामान्यादुपसर्जनात्** इत्युक्तन्यायत्वात् । किमिव ? **स्थाणु-पुरुषे**त्यादि दृष्टान्तो यावद् **दर्शनव**दिति यथा ऊर्द्धत्वं सामान्यं स्थाणुः स्यात् पुरुषः स्यात् इति संशयहेतुः, शकुनिनिलयनं स्थाणुरेव इति निश्चयहेतुर्विशिष्टत्वात्, वस्त्रसंयमनं वा पुरुष एव इति, तथैव वृक्षशिंशपादिष्वपि दर्शनादेव । § 2281

- /ms अत्राह **--ननूक्त**मित्यादि । वृक्षादेरभावो हि अवृक्षादि, तत्रैवादर्शनम्, ततो व्यवच्छेद्यमानं यत् तदवृक्षादि न भवतीति तदेव स्वार्थाभिधानमिति ।
723/mj एवं च सति क्व तद् दर्शनं यत् त्वयेष्टम् ? यतो

* * *

नन्वदर्शनाद् दर्शनस्यैव सिद्धिरेवम् । यदि दर्शनं नाभ्युपगम्यते वृक्ष इत्यत्रावृक्षाभाव एवोक्तः स्यात् तत इदमदर्शनमेवावृक्षे । तत्रावृक्षस्यैवाभावः, कुतस्तददर्शनमवृक्षस्य वृक्षदर्शनेनैव व्याप्तत्वात् । तस्माद् दर्शनमेवैवं सिध्यति ।

अपितृवदवृक्षादर्शनं व्यतिरेक इति चेत्, न उक्तवत् । व्यवस्थाकारि... ... स्थिते हि वृक्षे दर्शने त्ववृक्ष इति स्यात् । स तु तव कदा... ... ...तच्च नेष्यत एव ।

विधिप्राधान्ये तु पृथिवीत्वाद्युत्तरभवनं वृक्षभवनविज्ञानविध्यापाद्यं तदात्म-

* * *

दर्शनोत्सर्गापवादाभ्यां वस्तुनोऽतुल्यत्वात् संशयनिश्चयाविष्येयाताम्, तत्तु नास्ति दर्शनम् । वयं ह्यानन्त्यव्यभिचारादिदोषान् दर्शनपक्षेऽपेक्ष्यादर्शनसाधनार्थ[म]वृक्षाद्यभावो वृक्षादिशब्दार्थ इति कल्पयामो दर्शनस्यैवाभावात् तद्दोषासंस्पर्शाददर्शनमात्रस्याभिन्नत्वादिति । § 2282

अत्रोच्यते **--नन्वदर्शना**दित्यादि । ननु दर्शनस्यैव सिद्धिरेवम् अदर्शनस्यादर्शनात् । तद् व्याचष्टे— यदि दर्शनमन्वयो विधिर्नाभ्युपगम्यते वृक्ष

९ सा] पृ० ६१४ पं० ४ ॥
९ ऊ] ऊर्द्धत्वसामान्यं nayacakra-ms-bhā ॥
१२ व्य] व्यवच्छेदानुमानम् इति पाठोऽत्र सम्यग् भाति, तुलना--पृ० ६५० पं० २० ॥
१६ य] ततोnayacakra-ms-bhā ॥
१८ प] °पक्षेऽपक्षादर्शन°nayacakra-ms-ya ॥
२३ न] नन्वनादित्यादिnayacakra-ms-ya ॥

इत्यत्रावृक्षस्याभाव एवोक्तः स्यात्, न वृक्षो नाम कश्चित् स्यात् । ततः किम् ? तत इदमदर्शनमेवावृक्षे, व्यतिरेक एवेत्यर्थः । ततश्चाभावमात्रमेव खपुष्पादीत्यादिप्रागुक्तवन्न किञ्चिदुक्तं स्यात् अवृक्षाभावो वृक्षः इत्यभावमात्रत्वात् । तत्रावृक्षस्यैवाभावो वृक्षीभूतत्वात् सर्वस्यावृक्षाभावस्य कुतस्तददर्शनमवृक्षस्य वृक्षदर्शनेनैव व्याप्तत्वात् ? वृक्षदर्शनबलादेव चावृक्षादर्शनसिद्धिः, वृक्षदर्शनाच्च अयं वृक्षः, अयं घटादिरवृक्षः इति सिद्धिः, नादृष्टे । तस्माद् दर्शनमेवैवं सिध्यति नादर्शनमिति । § 2283

**अपितृवदवृक्षादर्शनं व्यतिरेक इति चेत्** । स्यान्मतम्--**पितुरन्योऽपिता सर्वः** इत्यादिप्रागुक्तवददर्शनमिति । एतच्च **न, उक्तवत्** पितृकल्पस्य दर्शनं स्यादत्रापि, न चेत् प्रागुक्तवदेवानुपपत्तिः, प्रत्यक्षदर्शनबलेन हि अयं वृक्षः, अयमन्योऽस्माद् घटादिरवृक्षः इति व्यवस्थिते विधिना दृष्टेऽन्यापोहलक्षणम- दर्शनं स्यात्, नान्यथेति । एतदर्थप्रदर्शनो ग्रन्थः --**व्यवस्थाकारी**त्यादि - /ms
यावत् **स्थिते हि वृक्षे** विधेये **दर्शने त्ववृक्ष इति स्यात्** विधिना दर्शनान्वये सति सिध्यत्येतदिति दर्शयत्येष ग्रन्थः । व्यावृत्तिपक्षे त्वनिष्टापादनम् --**स तु तव कदे**त्यादि यावत् **तच्च नेष्यत एव** त्वयेति विभक्तिपरिणामाद् । घटादिभ्यो व्यावृत्तौ सत्यां वृक्षादिसिद्धिः तत्सिद्धौ घटादिव्यावृत्तिसिद्धिरित्यनवस्था परस्परतः स्यात् । सा मा भूदिति दर्शनं व्यवस्थापकमेषितव्यं विधिना व्यावर्त्यव्यावर्तकयोर्वृक्षादिसदाद्यवृक्षाद्यसदाद्योरिति । § 2284

कथं पुनर्विधिप्राधान्ये तद्दोषाभावः ? उच्यते --**विधिप्राधान्ये तु पृथिवीत्वाद्युत्तरे**त्यादि साधनं यावत् **स्वात्मव**दिति । वृक्ष-पृथिवी-द्रव्य-सन्तो वृक्ष-शिंशपा-कुब्ज-कुसुमित-मूल-स्कन्ध-शाखादयश्च वृक्षादयः पूर्वे चोत्तरे च भावा विधिना दृष्टाः, पार्थिवभवनं वृक्षभवनविज्ञानविध्यापाद्यमेव वृक्षात्मकत्वात् 724/mj

* * *

कत्वात् ततोऽनन्यत्वाद् वृक्षस्वात्मवत् । तथा वृक्षादिपूर्वभवनं शिंशपाद्युत्तरभवनविज्ञानविध्यापाद्यं तदात्मकत्वात् ततोऽनन्यत्वाद् वृक्षमूलादिवत् ।

व्यावृत्तिप्राधान्ये तु दृष्टवत् पार्थिवत्वाद्यसिद्धौ वृक्षो नैव वृक्षः स्यात् पार्थिवत्वेनासिद्धत्वात् तोयवत् । तथा पार्थिवं द्रव्यत्वेनासिद्धत्वात् पार्थिवं नैव स्यात्, गुणवत् । एवं द्रव्यं न द्रव्यं स्यात् सत्त्वेनासिद्धत्वात् खपुष्पवत् । तथा सदपि न सत्, द्रव्यादित्वेनासिद्धत्वात् ।

---

३ प्रा] तुलना--पृ° ७१६ ॥
६ स्त] °स्तद्दर्श° प्र° ॥
१० वृ] वृक्षावृक्षदर्श°nayacakra-ms-ya ॥
१७ स] पृ° ७०८ पं° ६ ॥
१८ उ] पृ° ७०९ पं° ३ ॥
२३ पितृ] पृ° ७०९ पं° १० ॥
१४ घ] पटादिव्यावृत्तिसिद्धि°nayacakra-ms-bhā । पटादिव्यावृत्त्यसिद्धि° nayacakra-ms-ya ॥
१४ सा] सामान्यभूदिति प्र° ॥
१५ व्या] व्यावृत्त्यव्यावृत्तकयो°nayacakra-ms-bhā । व्यावृत्त्यव्यावृत्तकयो° nayacakra-ms-ya ॥

* * *

ततोऽनन्यत्वाद् वृक्षस्वात्मवत्, वृक्षात्मकत्वं च पार्थिवत्वादीनां पूर्वमापादितं मूलाद्युत्तरभवनानां चेत्यतस्तदेकात्मकत्वसिद्धौ सत्यां साधनस्य साधीयस्त्वम् । तथा पृथिवीभवनमेव द्रव्यभवनम्, द्रव्यभवनमेव सद्भवनमिति । **तथा वृक्षादिपूर्वे**त्यादि साधनं तद्विपर्ययेण उत्तरभवनधर्मापादनम्, तदनतिरिक्तात्मकत्वात् ततोऽनन्यत्वात्, वृक्षमूलादीति दृष्टान्तः । शिंशपाद्युत्तरभवनविज्ञानविध्यापाद्यो वृक्षः, तदात्मकत्वात्, मूल-स्कन्ध-पलाशादिधर्मात्मना वृक्ष एव यथा भवन् दृष्टस्तथा शिंशपाद्यात्मना वृक्ष एव भवतीति । एवं विधिरूपेण दृष्टवदेवानुमानं विधिप्राधान्ये युज्यतेऽभिधानं च । § 2285

- /ms त्वन्मते **व्यावृत्तिप्राधान्ये तु** दोषः । तद्यथा **--दृष्टवत् पार्थिवत्वाद्यसिद्धौ** पार्थिवद्रव्यसदेकात्मकभवनमेव वृक्षभवनमनिच्छतोऽस्मन्मतं ते **वृक्षो नैव वृक्षः स्यात् पार्थिवत्वेनासिद्धत्वात् तोयवत्**, यथा तोयं पार्थिवत्वेनासिद्धं वृक्षो न भवति एवं वृक्षोऽपि वृक्षो नैव स्यात् । **तथा पार्थिवं द्रव्यत्वेनासिद्धत्वात् पार्थिवं नैव स्यात्, गुणवत्**, यथा गुणस्य द्रव्यत्वेनासिद्धत्वादपार्थिवत्वं तथा पार्थिवस्यापि अपार्थिवत्वं स्यात् । **एवं द्रव्यं न द्रव्यं स्यात्, सत्त्वेनासिद्धत्वात्, खपुष्पव**दिति । पार्थिवद्रव्यसत्त्वासिद्धयोऽसिद्धा इति चेत्, न, व्यावृत्तिप्राधान्येऽन्यत्वात् स्वार्थानुबन्धिभेदानामपि व्यावृत्तत्वात् स्वार्थाभावाभावशब्दार्थत्वात् । प्रसिद्धिविरोधदोष इति चेत्, तत्रैव व्यावृत्तिप्राधान्याभ्युपगमाद्दोषो न ममेति । **तथा सदपि न सत्, द्रव्यादित्वेनासिद्धत्वात्** खपुष्पवत् इति वर्तते । एवं पूर्वं पूर्वं नात्मरूपभाक् स्यात्, उत्तररूपेणाभूतत्वात्, अग्निवदिति यथावद् गतार्थमनिष्टापादनम् ।
§ 2286

यदप्युक्तम्—

गुणत्व-गन्ध-सौरभ्य-तद्विशेषैरनुक्रमात् ।

---

१ भ] °भावनानां प्र° ॥
२ मूला] **°मूलादीनि** इत्यपि पाठोऽत्र स्यात् ॥
१४ स्वार्थानु] **°नुवत्विभेदा°** प्र° । **°नुवर्तिभेदा°** इत्यपि स्यादत्र पाठः ॥
२१ ब्दा] **°शब्दार्थत्वाभावात्**nayacakra-ms-ya ॥
१ य] पृ° ७२७ पं° १२ **तदपि** इत्यनेनास्यान्वयः ॥
२ गु] सवृत्तिके **प्रमाणसमुच्चये** द्वितीये स्वार्थानुमानपरिच्छेदे दिङ्नागेन यदभिहितं तदत्र भोटभाषान्तरतः संस्कृते परिवर्त्योपन्यस्यते-- अनेकधर्मणोऽर्थस्य न लिङ्गात् सर्वथा गतिः । अनुबन्धिव्यवच्छेद इतरएवान्य ?स्मात् प्रतीयते ॥ २ । १२ १/२ ॥ --- वह्नेर्दीप्तितैक्ष्ण्यादयो यावन्तो विशेषास्ते सन्तोऽपि धूमेन न गम्यन्ते व्यभिचारात् । ये पुनरनुबन्धिनो यदभावेऽग्निर्न भवति तेषां द्रव्यत्वगुणत्वादीनामद्रव्यादिभ्यो व्यावृत्तिरेव प्रतीयते, यथाग्नेरनग्नितो व्यावृत्तिमात्रं स्वसम्बन्धानुरूप्यात् प्रतीयते, तथाहि--अयमनग्नौ सर्वत्र न दृष्टः, अन्यत्र च दृष्टः । गुणत्वगन्धसौरभ्यतद्विशेषैरनुक्रमात् । अद्रव्यादिव्यवच्छेद एकवृद्ध्योत्पलादिवत् ॥ २ । १३ १/२ ॥ --- तत्र गुणत्वेन अद्रव्याद् गन्धत्वेनापार्थिवादद्रव्याच्च

---

सौरभ्येणासुरभिसाधारणात् सौरभ्यविशेषेणानुत्पलादेर्व्यवच्छेद एकैकवृद्ध्या क्रियते । अन्यथा दृष्टवद् विधिरूपेण यदि लिङ्गं प्रकाशयेत् । [[**सर्वत्रादर्शनान्न स्यात्** इति पाठो **विशालामलवत्या**मादृतो भाति ॥]]सर्वत्राप्रतिपत्तिः स्यात् सर्वथा वा गतिर्भवेत् ॥ २ । १४ १/२ ॥ --- यदि च यथा धूमोऽग्नौ दृष्टस्तथोत्तरकाले प्रकाशयति कदाचिदपि नैव प्रकाशयेत् । यथानग्नौ सर्वत्र न दृष्टस्तथा सर्वत्राग्नावपि न दृष्टः । यदि च यथा दृष्टस्तथा प्रकाशयति [तथा सति] दीप्तितैक्ष्ण्यादयो विशेषा अपि गम्येरन् । यस्मात् सामान्यरूपेणैवानग्निप्रतिषेधेन प्रकाश्यते तस्माद् विधिनापि तदेवास्य रूपं दृष्टमिति प्रतीयते न विशेषरूपम् । सामान्यं यद्यपि भवेदाश्रयाणामदर्शनात् । ततोऽन्यत् तद् न दृश्येत, भेदो वैकत्र दर्शनात् ॥ २ । १५ १/२ ॥ --- अग्नित्वं [[तावदग्नावन्यत् PSV2 ॥]]तावदग्नितोऽन्यत् सामान्यं नास्ति । सत्त्वेऽपि तद्दर्शनस्य न सम्भवः, सर्वेषामाश्रयाणामदर्शनात् । द्वित्वादीनाम-नेकसाधारणानामाश्रयाग्रहणे[ऽ]ग्रहणं दृष्टम् । कस्यचित् सादृश्यवादिनः सा[[न सम्भवः इत्यर्थः ॥]] दृश्यस्यापि न । अथ सामान्यमेकाश्रयग्रहणेऽपि समस्तं गृह्यते तथा सति आश्रयवद् नाना स्यात् । यथा चानुमेयं केनचिदंशेन गम्यते तथाङ्गं येन रूपेण लिङ्गिनं नातिवर्तते । तेनैवानेकधर्मापि गमयेदितरैर्न तु ॥ २ । १६ १/२ ॥ --- धूमोऽपि धूमत्वपाण्डुरत्वादिना येनांशेनाग्निं न व्यभिचरति तेनैव गमयति, न द्रव्यत्वादिभिः, व्यभिचारात् । आह च— गम्यन्ते तेऽपि लिङ्गेन ये लिङ्गिन्यनुबन्धिनः । विशेषा न तु गम्यन्ते तस्यैव व्यभिचारिणः ॥ २ । १७ १/२ ॥ लिङ्गानुबन्धिनस्त्वर्था गमयन्ति न लिङ्गिनम् । व्यभिचाराद् विशेषास्तु प्रतीताः प्रतिपादकाः ॥ २ । १८ १/२ ॥ इत्यन्तरश्लोकौ । (?") --PSV1 C. ed. D. ed. B– A, N. ed. B– A । PSV2 N. ed. B– A, P. ed. । दृश्यतां पृ० ६७४--६७५ । --- अस्य जिनेन्द्रबुद्धिना रचिता **विशालामलवती** टीकापि भोटभाषानुवादात् संस्कृते परिवर्त्येहोपन्यस्यते --**अनुबन्धिव्यवच्छेद** इति । अनुबन्धिना सम्बन्धिना येनांशेनाग्निः प्रतीयते तस्य द्रव्यत्वादेः विपक्षादन्यस्माद् व्यवच्छेदो व्यावृत्तिः प्रतीयते । के पुनरनुबन्धिनो विशेषा इति चेत्, **यदभावेऽग्निर्न भवती**त्यादि । ननु धूमस्य प्रकाशकत्वाद् यदभावे धूमो न भवति इति वक्तव्यम्, कुत एवमुच्यत इति चेत्; अयमेवार्थोऽनेन प्रकारेणोक्त इति न दोषः । तथाहि--यदभावेऽग्निर्न भवति तदभावे धूमोऽपि न भवत्येव । अथवा ये सम्बन्धिन इति धूमस्यैवानुबन्धिन इति योज्यम् । ये धूमस्यैवानुबन्धिनस्तानेव दर्शयितुमाह --**यदभावे** इत्यादि । यदभावेऽग्निर्न भवति त एव धूमस्यानुबन्धिनः । अनुबन्धिनामन्यस्माद् व्यावृत्तिः प्रतीयत इत्यत्रोदाहरणमाह --**यथाग्नेरनग्नितो व्यावृत्तिमात्र**मित्यादि । कस्माद् व्यावृत्तिमात्रं गम्यते न विशेष इत्याह— **स्वसम्बन्धानुरूप्या**दित्यादि । अयं कारको हेतुः, न लिङ्गम् । **तथाहि--अय**मिति तत्सम्बन्धानुरूप्यमाह । **अनग्नौ सर्वत्र न दृष्ट** इत्यनेन व्यावृत्तेः प्राधान्यं विपक्षे सर्वत्रादर्शनेन कथयति **अन्यत्र च दृष्ट** इति **च**शब्देन क्वचिददर्शनमपीति द्योतनेनान्वयाप्राधान्यम् । एवं यस्मादन्वय उपचरितो व्यावृत्तिस्तु मुख्यः सम्बन्धः स च सामान्येनैव सम्भवति न विशेषेण तस्मात् तदानुरूप्याद् व्यावृत्तिद्वारेण अत्राग्निरेव, नानग्निर्भवति इति अनग्नितो व्यावृत्तिमात्रं प्रतीयते न विशेषः । यथा चाग्नित्वेन सम्बन्ध एवं द्रव्यत्वगुणित्वादिभिरपीति तेषामप्यद्रव्यत्वादिभ्यो व्यावृत्तिरेव प्रतीयते । व्यावृत्तिद्वारेणैव हेतुर्गमक इत्यत्र हेत्वन्तरमाह— **गुणत्व-गन्ध-सौरभ्य-तद्विशेषै**रित्यादि । **एकवृद्ध्ये**ति एकैकवृद्ध्येत्यर्थः । **गुणत्वेन अद्रव्यादि**ति इदं द्रव्यं गुणत्वात् इति गुणत्वेनाद्रव्यव्यवच्छेद उत्पलादौ क्रियते । तथाहि--तत् सर्वत्राद्रव्ये न दृष्टम्, द्रव्ये दृष्टम् । अत्राद्रव्यव्यवच्छेद आद्ये न वृद्धिरेकस्मिन् । यदपेक्षया गन्धेनैकवृद्ध्या व्यवच्छेदः क्रियते तत्प्रदर्शनार्थं गुणत्वेन अद्रव्यात् इत्युक्तम् । अत एव गुणत्वस्याप्येकवृद्ध्या व्यवच्छेदं प्रति अङ्गभावोऽस्ति । यदि तेनाद्रव्यव्यवच्छेदो विधीयते तर्हि गन्धेनैकवृद्ध्या व्यवच्छेदः क्रियते, नान्यथा । तथा च कारिकायां द्वन्द्वसमासान्तत्वेन गुणत्वशब्दस्याविरोधः

पदान्तरेण तुल्यसामर्थ्यात् । **गन्धत्वेनापार्थिवादद्रव्यत्वाच्चे**ति इदं पार्थिवं द्रव्यं च गन्धत्वात् इति अपार्थिवादद्रव्याच्च व्यवच्छेदः क्रियते । **सौरभ्येण असुरभिसाधारणा**दिति सौरभ्येण पूर्वाभ्यामसुरभिसाधारणाच्च व्यवच्छेदः क्रियते । गन्धविशेषसुरभिसाधारणं सामान्यं सुरभिसाधारणम्, यद् न सुरभिसाधारणं तत् तथोक्तम् । गन्धाभाव इत्यर्थः । **सौरभ्यविशेष** उत्पलादौ गन्धविशेषः । एवमद्रव्यादिव्यवच्छेद एकैकवृद्ध्योत्पलादिषु गुणत्वादिभिः क्रियमाणो दृष्टः । स कथम् ? यदि विपक्षाद् व्यावृत्तिद्वारेण हेतुर्गमकः, अन्यथा न युज्यते । दृष्टवद् विधिद्वारेण सर्वत्र सर्वेषां द्रष्टृणां निर्विशेषत्वात् समाना प्रतीतिः स्यात् । तस्मात् व्यावृत्तिद्वारेणैव हेतुर्गमक इत्यभ्युपगन्तव्यम् । ये तन्नेच्छन्ति तान् प्रत्याह --**दृष्टव**दित्यादि । दृष्टेन तुल्यं दृष्टवत् । यथा पूर्वं सम्बन्धकाले लिङ्गमुपलब्धं तथा यदि प्रकाशयेदित्यर्थः । विधिरूपेण अग्निरत्र भवति इति, न व्यतिरेकरूपेण अत्राग्निरेव, नानग्निः इत्येवम् । **सर्वत्रादर्शनात्** प्रकाशनं **न स्या**दिति विज्ञेयम्, प्रकाशयेत् इत्यस्य प्रकृतत्वात् **यदि च यथाग्नौ दृष्ट** इत्यादि । यद्येवमभ्युपगम्यते विधिवादिना यस्मादग्नावेव धूमो दृष्टः, नानग्नौ, तस्मात् प्रत्याययति इति, तथा सति प्रतिषेधद्वारेणैव प्रकाशयेत् । तस्मात् तेनैवमभ्युपगन्तव्यं यस्मादग्नौ दृष्ट एव, नादृष्टः, तस्मात् स तं गमयति इति । ततश्च नैव प्रकाशयेत् । यस्मात् स सर्वत्राग्नौ न दृष्टः, देशावस्थादिभिन्ने सर्वत्राग्नौ दर्शनस्यासम्भवात् । **यदि चे**ति दोषान्तरमाह । यदा धूमोऽग्नौ दृष्टस्तदा दीप्त्यादिविशेषाणामन्यतरेण युक्त एव दृष्टः । ततश्च तेऽपि प्रकाश्येरन् । तथा च न । तस्माद्दर्शनमात्रमनुमेयप्रतीतेर्न कारणम्, तद्भावेऽपि तदभावादिति । ननु प्रतिषेधवादिनापि दर्शनमिष्यत एव, तथाहि--कार्यत्वेनाविनाभावित्वाद् धूमो हुतभुजो हेतुः, कार्यकारणभावश्च दर्शनादर्शनाभ्यां स[हि]ताभ्यां सिध्यति न केवलाददर्शनादिति चेत्, उच्यते --**यस्मा**दित्यादि । एतद् दर्शयति--यस्माद् धूमेनाग्निः सामान्यरूपेण प्रकाश्यते, न दीप्त्यादिविशेषरूपेण, तस्मात् कार्यकारणभावसिद्धये **विधिनापि तदेवास्य रूपं दृष्टमिति** कार्यकारणव्यपदेशसिद्धेः कारणत्वेन **प्रतीयते, न विशेषरूप**मित्याशयः । दीप्त्यादिविशेषदर्शनं कार्यकारणव्यपदेशसिद्धेर्न कारणम्, तदभावेऽपि धूमदर्शनात् ।... ... ...स्यादेतत्--सामान्यमेकमेव वस्तु व्यक्तिषु ताभ्यो भिन्नं ताभ्योऽभिन्नं वास्ति । तस्य च प्रतिव्यक्ति सर्वात्मना परिसमाप्तत्वादेकस्यामेवाग्निव्यक्तौ दर्शनमुपपद्यते ततः **सर्वत्रादर्शनात्** प्रकाशनं **न स्यात्** इत्येतन्न युज्यत इति, उच्यते --**सामान्यं यद्यपी**त्यादि । **यद्यपी**त्यनेन तदभाव एव, तथाप्यभ्युपगम्य दोष उच्यते इत्येतद् दर्शयति । **अग्नित्वं तावद् नास्ती**त्यादि । यदि व्यक्तिभ्योऽन्यत् सामान्यं स्यात् [तथा सति] बुद्धौ प्रतिभासेत, न चास्ति प्रतिभासः ।... ...यद्यनन्यत् तथापि व्यक्तिवत् तत् सामान्यमेव न स्यात् । तथाप्यभ्युपगम्य तद्दर्शनासम्भवं साधयितुमाह --**तत्सत्त्वेऽपी**त्यादि । यदनेकसाधारणमगृहीतसमस्ताश्रयं तद् द्रष्टुं न शक्यते, यथाऽगृहीतसमस्ताश्रयं द्वित्वादिकम्, अग्नित्वमपि तथेति व्यापकविरोधः । **सादृश्यस्यापि ने**ति आश्रयादभिन्नत्वात् सादृश्यस्य भेदेनोपन्यासः । अत्रापि स एव प्रयोगो वक्तव्यः । अथैकग्रहणेऽपि समस्तं गृह्यते तथा सति तस्य प्रत्येकं सर्वात्मना परिसमाप्तत्वाद् गुणवद् नानात्वं स्यात् ।... ...अनेकत्वाच्च तत् सामान्यमेव न स्यात् आश्रयवत्, सामान्यस्यैकत्वेनेष्टत्वात् । **तथे**त्यादि ।... ...अङ्गं लिङ्गमुच्यते । **नातिवर्तत** इति न व्यभिचरतीत्यर्थः । **अनेकधर्मापी**ति सामान्यविशेषधर्मैः । **धूमत्व-पाण्डुरत्वादिने**ति... ... ...। **न द्रव्यत्वादिभि**रिति ।... ...उक्तार्थमेव संग्रहश्लोकाभ्यां सुखेन प्रतिपादनाय **गम्यन्ते तेऽपि लिङ्गे**नेति । तेऽपि अनुबन्धिनो द्रव्यत्वादयो गम्यन्ते... ...। **लिङ्गानुबन्धिनस्त्वर्था** इति अविशिष्टा द्रव्यत्वादिसामान्यधर्माः । **विशेषास्त्वि**ति धूमत्वादयः । ते चाविशिष्टद्रव्यत्वादिसामान्यापेक्षया विशेषा इत्युच्यन्ते, न त्वसाधारणरूपापेक्षया ।(?")--VT. D. ed. A– B, P. ed. A– B ॥

अद्रव्यादिव्यच्छेद एकवृद्ध्योत्पलादिवत् ॥ प्र° समु° २ ।
१४§ 2289

इति व्यावृत्तिप्राधान्ये गुणवत्त्वादिभिरद्रव्यादिव्यच्छेद एकवृद्ध्या युज्यते । § 2290

725/mj726/mj727/mj

दृष्टानुवृत्तेः... ... ... ॥§ 2291

दृष्टानुवृत्तेरेव नादृष्टावच्छेदादानुलोम्यान्निश्चयः प्रातिलोम्याद्वा संशयः । यतस्तत्र तुल्येऽन्यत्वे शुक्लत्वाद् गुणे निश्चयो न द्रव्य-कर्मणोः, तयोश्चापोहो न सत्त्वगुणयोः । § 2292

तत्रानुबन्धितत्त्वदर्शनानैवान्यत्वमिति चेत्, शुक्लं तर्हि नीलाद्यपि स्यात्, रूपादनन्यत्वात्, शुक्लगुणस्वरूपवत् । एवमेव [रूपं रसाद्यपि स्याद् गुणादनन्यत्वाद्, गुणस्वरूपवत्,... ... ...] द्व्यणुकाद्यपि । द्व्यणुकमुत्क्षेपणादि रूपादि च स्यादाश्रितत्वात् । संशयो न स्यात् शौक्ल्यैकात्म्यात् । § 2293

व्यावृत्तिप्राधान्ये तु—

दृष्टवद् यदि सिद्धिः स्याच्छौक्ल्यरूपगुणाश्रितात् । - /ms
क्रमवत् प्रातिलोम्येऽपि द्वित्र्येकार्थगतिर्भवेत् ॥ प्र° समु° ३ ।
४४ इति ।§ 2296

३ दृ] यदि यथा दृष्टं तथा प्रतीयते न व्यवच्छेदद्वारेण [तर्हि] यथा क्रमेण शौक्ल्येन त्रयाणां रूपत्व-गुणत्वा-ऽऽश्रितत्वानां प्रतीतिर्भवति, गुणत्वाद् द्वयो रूपा-ऽऽश्रितत्वयोः, गुणत्वाच्चैकस्याश्रितत्वस्य, एवं प्रातिलोम्येनापि आश्रितत्वात् त्रयाणां गुणत्वरूपत्व-शौक्ल्यानां स्यात् गुणत्वाद् द्वयो रूपत्व-शौक्ल्ययोः रूपत्वाच्चैकस्यैव शौक्ल्यस्य । न हि आश्रितत्वादयो गुणत्वादिषु न दृष्टाः । अथ यथा आश्रितत्वं गुणत्वादिषु दृष्टं तथा कर्मादिष्वपीति सन्देहो भवति, शौक्ल्यमपि रूप-गुणा-ऽऽश्रितेषु दृष्टमित्यतस्तेषु साधारणत्वात् सन्देहः स्यात् । व्यावृत्तिद्वारेण प्रतीतौ तु न दोषः । यथा गुणत्वाभावेऽभावाच्छौक्ल्यं रूपत्वे हेतुः तथा गुणत्वाश्रितत्वयोरपि तयोरभावेऽभावादिति । आश्रितत्वं तु गुणत्वाद्यभावेऽपि दृष्टमिति नास्ति तस्माद् गुणत्वादिनिश्चयः ।— **विशालामलवती प्रमाणसमुच्चयटीका** VT. P. ed. B– A ॥

९ द्वित्र्ये] प्रतिष्वत्र **द्वित्र्येकार्थगति°** इति पाठो विलोक्यते तथापि **प्रमाणसमुच्चये त्रिद्व्येकार्थगति°** इति पाठः प्रतीयते, स च समीचीनतरः सङ्गतार्थश्चेति विभाव्य **त्रिद्व्येकार्थगति°** इति पाठोऽत्रादरणीयो भाति ॥

१२ इ] इतिnayacakra-ms-bhā प्रतौ नास्ति ॥

तदपि **दृष्टानुवृत्ते**रित्यादि श्लोकः, क्रमेण द्वित्र्येकार्थगतिवत् प्रातिलोम्ये द्वित्र्येकार्थगतिर्न भवति तथा दर्शनाददर्शनाच्चेति । तद्व्याख्या--दृष्टानुवृत्तेरेव नादृष्टावच्छेदात् नादृष्टा[न]नुवृत्तेरानुलोम्याद् निश्चयः प्रातिलोम्याद्वा संशयः । कस्मात् ? यतस्तत्र तुल्येऽन्यत्वे शुक्लत्वाद् गुणे निश्चयो द्रव्य-कर्मणोर्नेति, तयोश्चापोहो न सत्त्व-गुणयोः । शौक्ल्य-रूपादीनामेकात्म्याद् निश्चयः, दर्शनादेव चैकानेकात्मभ्यामाश्रितगुण-रूपादिभिर्गुण-रूप-शौक्ल्येषु संशय इति । § 2297

**तत्रानुबन्धितत्त्वदर्शनाद् नैवान्यत्वमिति चेत्** । स्यान्मतम्--वृक्षात् पार्थिव-द्रव्य-सत्त्वानीवानन्यानि शौक्ल्याद् रूपगुणाश्रितानुबन्धीनि । तस्मात् तत्र निश्चयोऽनपोहश्च । येऽन्ये तेषामरूपागुणानाश्रितानामपार्थिवत्वादिवद् वृक्षादपोह इति । § 2298

अत्र ब्रूमः --**शुक्लं तर्ही**त्यादि । नीलरक्तपीताद्यपि शुक्लं स्यात्, रूपादनन्यत्वात्, शुक्लगुणस्वरूपवत् । **एवमेवे**त्यादि गतार्थान्यनिष्टापादनानि यावद्

728/mj **द्व्यणुकाद्यपी**ति । द्व्यणुकं कार्यद्रव्यमाश्रितं परमाण्वो

* * *

अन्यत्वमेव तर्ह्यतुल्यं शौक्ल्यादेः । रूपादयो नान्ये शौक्ल्यादेः, अनिष्टापत्तेः । अरूपादित्वे शौक्ल्यस्य तच्छौक्ल्यमेव न स्यात् अरूपादित्वात् उत्क्षेपणादिवत् । तस्मात् तेन सहानन्यत्वाद् रूपादेर्न तदपोहः । ये पुनरन्येऽपि आश्रितादेस्तु गुणादयः तेषामपोहानपोहाभ्यां संशयः । अथैतदेव कुतः ? अस्मदिष्टान्वयदर्शनादेवैतत् सिद्धम् । एवं तावदानन्त्यानुक्तिव्यभिचारदोषयोरन्यापोहपक्षेऽपि भावः ।

अनन्तरस्यापि च भावः, यस्मात्

* * *

रुत्क्षेपणादि रूपादि च स्यादिति **आश्रितत्वात्** इत्यस्माद्धेतोः । संशयो न स्यात् कर्म-गुणेषु सप्रभेदेषु अनुबन्धिवदनन्यत्वात् तदुपायप्रदर्शनं सवर्गुणादिपरिक्रमेण । कस्मात् ? शौक्ल्यैकात्म्यात् त्वदिष्टादिति । § 2299

---

१६ मेण] प्रतिष्वत्र **द्वित्र्येकार्थगति॰** इति पाठो विलोक्यते तथापि **प्रमाणसमुच्चये त्रिद्व्येकार्थगति॰** इति पाठः प्रतीयते, स च समीचीनतरः सङ्गतार्थश्चेति विभाव्य **त्रिद्व्येकार्थगति॰** इति पाठोऽत्रादरणीयो भाति ॥

१७ प्रातिलोम्ये] प्रतिष्वत्र **द्वित्र्येकार्थगति॰** इति पाठो विलोक्यते तथापि **प्रमाणसमुच्चये त्रिद्व्येकार्थगति॰** इति पाठः प्रतीयते, स च समीचीनतरः सङ्गतार्थश्चेति विभाव्य **त्रिद्व्येकार्थगति॰** इति पाठोऽत्रादरणीयो भाति ॥

१९ का] **कार्यं द्रव्य॰**nayacakra-ms-ya ॥

१ अ] अनन्तरस्याप्यभावः । कथम् ? यस्माद् **व्याप्तेरन्यनिषेधस्य तद्भेदार्थैरभिन्नता । साक्षाद्वृत्तेरभेदाच्च जातिधर्मव्यवस्थितिः** ॥ प्र॰ समु॰ ५ । ३६ सामान्यशब्दस्य हि योऽर्थान्तरव्युदासो व्यापारः स स्वभेदाप्रतिक्षेपेणेति भेदश्रुत्या सह सामानाधिकरण्यमुपपद्यते । इत्यादि **दिङ्नागमतं** निराकर्तुमत्र प्रारभते । दृश्यतां पृ॰ ७२८ टि॰ ९ ॥

अत्राह --**अन्यत्वमेव तर्ह्यतुल्यं शौक्ल्यादेः** । एवं तर्हि नानन्यत्वम्, किं तर्हि ? अन्यत्वमेव । मा भूदेतदनिष्टमिति तद् दर्शयन्नाह --**रूपादयो नान्ये** - /ms **शौक्ल्यादेः**, कस्मात् ? **तद्रूपानुबन्धित्वात्**, वृक्षादिव पार्थिवत्वम् । किं कारणम् ? **अनिष्टापत्तेः** । किं तदनिष्टमिति चेत्, अरूपादित्वे शौक्ल्यस्य तच्छौक्ल्यमेव न स्यात्, अरूपादित्वात्, उत्क्षेपणादिवदिति । **तस्मात् तेन सहानन्यत्वात्** शौक्ल्येन **रूपादेर्न तदपोहः** न रूपाद्यपोहः । ये पुनरन्येऽपि ततस्तेषामपोहानपोहाभ्यां संशयः । *के पुनस्ते ? उच्यन्ते— आश्रितादेस्तु गुणादयः, तद्यथा--गुणोऽयमाश्रितत्वात् इत्याश्रित एव नियमाद् गुणो नाऽनाश्रितोऽस्तीति । आश्रितस्तु गुणः कर्म सामान्यं विशेषः समवायो वेत्यनियमः । तस्मात् तेन सहाश्रितत्वेन तेषां गुणादीनामन्यत्वादपोहोऽनपोहश्चेति संशयः स्यादिति । § 2300

आचार्य आह --**अथैतदेव कुतः ? शौक्ल्यादिवद्रूपादिषु निश्चयः, आश्रितत्वाद् गुणादिषु संशयः** इति त्वया यतः प्रत्यवगतं तद् वक्तव्यं विशेषकारणं व्यावृत्तिप्राधान्यवादिना, विधिना दर्शनमन्तरेण वस्तुनो न शक्यम्, अस्मदिष्टवस्त्वन्वयदर्शनादेवैतत् सिद्धम्, तदभावे तन्नियमानियमाप्रसिद्धेः । § 2301

**एवं तावदित्यादि** । भेदपक्षे परं प्रति उक्तयोरानन्त्यानुक्ति-व्यभिचारदोषयोः **अदृष्टेरन्यशब्दार्थे** प्र॰ समु॰ ५ । ३४ इत्यादिनाप्यपरिहृतत्वात् सविशेषयोरन्यापोहपक्षेऽप्यस्तित्वं दर्शितमित्युपसंहारः । § 2302

**अनन्तरस्यापि च भावः** । यदप्युक्तम् **अनन्तरस्यापि** जातिसम्बन्धाभिधानपक्षयोरुक्तस्य [This page consists merely of foot- 729/mj

१३ ए] स एवंnayacakra-ms-bhā ॥ n729/mj

१६ वृक्षा] वृक्षादि पार्थि॰nayacakra-ms-ya ॥

२७ *] तौ पुनस्ते प्र॰ ॥

२९ आ] आश्रितास्तुnayacakra-ms-ya ॥

३० शौक्ल्या] ॰दितद्रूपा॰ nayacakra-ms-ya । ॰दिद्रूपा॰ nayacakra-ms-bhā ॥

२ योरान] ॰नन्त्या[द]नुक्ति॰ इत्यपि पाठः स्यादत्र ॥

४ अ] दृश्यतां पृ॰ ६५० टि॰ २ ॥

७ अ] दृश्यतां पृ॰ ६५० पं॰ ११--२६ । **दिङ्नागेन सवृत्तिके प्रमाणसमुच्चये** पञ्चमेऽपोहपरिच्छेदे यदभिहितं तदत्र भोटभाषान्तरात् संस्कृते परिवर्त्योपन्यस्यते-- व्याप्तेरन्यनिषेधस्य तद्भेदार्थैरभिन्नता । साक्षाद्वृत्तेरभेदाच्च जातिधर्मव्यवस्थितिः ॥ ५ । ३६ ॥ --- अनन्तरस्याप्यभावः । कथम् ? **व्याप्तेरन्यनिषेधस्य तद्भेदार्थैरभिन्नता** । सामान्यशब्दस्य हि योऽर्थान्तरव्युदासो व्यापारः स स्वभेदाप्रतिक्षेपेणेति भेदशब्दैः सह सामानाधिकरण्यमुपपद्यते । त[[तस्मादस्य भेदार्थैः PSV1 ॥]]स्मात् स्वभेदार्थैः पृथक्छ्रुतिदोषो नास्ति । योऽर्थ उभयशब्दाभिधेयः तत्रार्थान्तरे सामानाधिकरण्यम् । तथा हि स्वार्थाव्यभिचारः, [[केवलेऽन्यत्रावृत्तेः ? ॥]]केवलस्यान्यत्रावृत्तेः । पश्चिमस्यापि दोषस्याभावः । कथम् ? **साक्षाद् वृत्तेरभेदाच्च** । अर्थान्तरमुपादाय स्वभेदेषु शब्दो न वर्तते । तस्मात् पारतन्त्र्येण स्वभेदानाक्षेपदोषो भाक्तदोषश्च न स्तः । नापि भेदानवस्थानादव्यापकत्वाद्यानभिधानासामान्यदोषौ स्तः, अर्थान्तरापोहमात्रस्याभिन्नत्वादद्रव्यत्वाच्च । तत एव सामान्यविशेषान्तरयोगानुसरणमपि न कर्तव्यम्, साक्षादर्थान्तरनिषेधात् । एवं पूर्वोक्तदोषाभावादर्थान्तरापोह एव शब्दार्थः साधुः । अ[[कुतः ? जातिधर्म...PSV1 ॥]]तश्च **जातिधर्मव्यवस्थितिः** । जातिधर्माश्चैकत्व-नित्यत्व-प्रत्येकपरिसमाप्तिलक्षणा

730/mj notes.]

* * *

अत्रैव व्यवतिष्ठन्ते, अभेदादाश्रयानुच्छेदात् कृत्स्नार्थप्रतीतेश्च । एवं दोषाभावाद् गुणोत्कर्षाच्च शब्दोऽर्थान्तरनिवृत्तिविशिष्टानेव भावानाह ।— PSV1 C. ed. D. ed. B– A, N. ed. B– A । PSV2 N. ed. , P. ed. B– A । --- अस्य **जिनेन्द्रबुद्धिरचिता विशालामलवती** टीकापि भोटभाषानुवादात् संस्कृते परिवर्त्येहोपन्यस्यते--**व्याप्तेरन्यनिषेधस्ये**ति । **व्याप्तिः** स्वभेदाप्रतिक्षेपः, अन्यनिषेधो यथोक्तं सामान्यम्, तस्य **व्याप्तेः** स्वभेदेषु व्यापकत्वादित्यर्थः । **अन्यनिषेधस्ये**ति कृद्योगलक्षणेयं कर्तरि षष्ठी । **तद्भेदार्थैरभिन्नते**ति अन्यापोहभेदार्थवाचकैर्द्रव्यादिशब्दैः सदादिशब्दस्य सामानाधिकरण्यमित्यर्थः । **सामान्यशब्दस्य ही**त्यादि । **सामान्यशब्दस्य यो व्यापारः** प्रतीयते, स च कीदृश इति चेत्, **अर्थान्तरव्युदासः, स स्वार्थाप्रतिक्षेपेण** । एतेन व्यापकत्वमाह । यथा जात्यभिधाने जात्यन्तराणां प्रतिक्षेपस्तथार्थान्तरापोहाभिधाने न द्रव्यत्वादिविशेषाणाम् ।... ... ...**हि**शब्दो यस्मादर्थ **इति**शब्दस्तस्मादर्थोऽर्थे, यस्मादेवं तस्माद् भेदार्थैर्द्रव्यादिशब्दैः सच्छब्दस्य सामानाधिकरण्यमुपपद्यते ।... ...तस्मादेकमेव वस्तु सत्त्वद्रव्यत्वाभ्यां व्यज्यमानं सद् द्रव्यम् इति सद्द्रव्यशब्दाभ्यामभिधीयते । **तथा हि स्वार्थाव्यभिचार** इति, समुदायार्थो हि विशिष्टः, यदि पदं तद्वाचकं स्यात् तदा तदभावेऽपि पदस्य वृत्तेस्तत्प्रतीतिर्न स्यात् । यस्मात् समुदायस्तद्वाचकं शब्दान्तरमेव तस्मादव्यभिचारः । **पश्चिमस्यापी**ति त[[पृ॰ ६०७ पं॰ २५ ॥]]द्वतो नास्वतन्त्रत्वात् इत्यस्य । **साक्षाद्वृत्ते**रिति... ...। अत्र सत्तादिगुणान्तरानपेक्षया असदपोहवस्तुनि शब्दः प्रवर्तते । तद् दर्शयति --**अर्थान्तरमुपादाये**त्यादि । **तस्मात् पारतन्त्र्येणे**ति, यमुपादाय द्रव्ये शब्दः प्रवर्तते सोऽर्थान्तरापोहो न जात्यादिवत् किमप्यर्थान्तरम्, ततो व्यवधानाभावात् कुतः पारतन्त्र्यम् ? तदेव हि वस्तु असदादिभ्यो व्यावृत्तं साक्षादभिधीयते, तस्माद् यस्तस्य भेदः [स] तत्राभेदाद् न प्रतिक्षिप्यते । भाक्तदोषोऽप्यत एव नास्ति । न ह्यन्यत्र मुख्ये वर्तमानः शब्दो द्रव्यादिषूपचर्यते । **नापी**त्यादि, भेदानामानन्त्यमनवस्थानम्, **तस्मादनभिधानदोषो नास्ति** तद्वां[[पृ॰ ६२९ पं॰ ७ ॥]]श्च भेद एवोक्तः स च पूर्वं निराकृतः इत्यनेनोक्तः । **व्यापकत्वादसामान्यदोषोऽपि नास्ति** यः त[[पृ॰ ६२९ पं॰ १४ ॥]]द्वानर्थो घटादिश्च इत्यादिनोक्तः । कुतो नास्तीत्याह --**अर्थान्तरापोहमात्रस्याभिन्नत्वा**दिति, अभेदात् इत्येतदनेन व्याख्यायते । भेदसद्भावे हि आनन्त्यदोषः स्यात् असामान्यदोषश्च, अन्यस्यान्यत्रावृत्तेः । अर्थान्तरापोहमात्रं त्वभिन्नम्, तत्र कुतोऽस्य दोषस्यावकाशः ? ननु यो ज्ञानस्य सामान्याकारः सामान्यं व्यवस्थाप्यते सोऽपि ज्ञानादभिन्नत्वादन्यत्रावर्तमानः कथं सामान्यम् ? इति चेत्, उच्यते --**अद्रव्यत्वा**दित्यादि । स विज्ञानस्याकारोऽपि सामान्यरूपेणापरिनिष्पन्नत्वात् सामान्यमद्रव्यसदेव । नेदमनिष्टमेव ।... ... ...**तत एवे**ति साक्षाद्वृत्तेः । तत्र सत्ताया विशेषणरूपेणाभिधानाद् वस्तुस्वरूपस्य व्यवधानम् । तेन सम्बन्धिनो हि घटत्वादयः, न सत्तया सम्बन्धिनः, जातौ जात्यभावात् । तस्मात् तद्वारेण अनेकार्थाकाङ्क्षाया न कारणम् । अत्र तु साक्षादसन्निषेधेन स्वार्थे शब्दो वर्तते, तस्मात् तस्य विशेषाकाङ्क्षाकारणत्वमुपपद्यते सामान्यान्तरयोगाभावेऽपि **साक्षादर्थान्तरनिषेधा**दिति, अर्थान्तरनिषेधोपायभूतं स्वार्थाभिधानमेवमुच्यते, साक्षात् स्वार्थाभिधानादित्यर्थः । एतेन तत एव इत्यस्यार्थो दर्शितः । अत्र च वस्तुसज्जात्यन्तरयोगनिषेधो विवक्षितः, नोपचरितजात्यन्तरयोगोऽपि ।... ... ... **अत्रैव व्यवतिष्ठन्त** इति ।... ... ...नित्यत्वेन कल्पनमप्युपपद्यते **कृत्स्नार्थप्रतीते**स्तु प्रत्येकं परिसमाप्तिः ।... ... ... **गुणोत्कर्षा**दिति जातिधर्मव्यवस्थाया अत्रैव युक्तत्वात् ।--VT. D. ed. A– A P. ed. B– B ॥

असन्निषेधाभावत्वाद् विशेषार्थविभिन्नता ।§ 2304

सामान्यशब्दस्य हि योऽर्थान्तरव्युदासो व्यापारः स स्वभेदाप्रतिक्षेपेण प्र° समु° वृ° ५ । ३६ इति वाङ्मात्रेणोक्तम् । स स्वभेदप्रतिक्षेपेणैव, तस्य सन्नियमार्थत्वादसत्प्रतिषेधस्याभावत्वात् भेदानां परस्परतः सदसत्त्वात् भेदश्रुत्या सह सामानाधिकरण्यमनुपपन्नम् । सम्बन्धस्यापि भेदैरभावस्यानुपपत्तेः कस्य वा ते भेदाः ? तस्मादपृथक्छ्रुतिदोषोऽस्त्येव ।

सुकरो हि [शब्दस्यान्यापोहेन सम्बन्धः, शतुलना--पृ° ६०७ पं° १६ ॥ब्दो जातिमात्रस्य तद्योगस्य वा न वाचको भेदार्थैरपृथक्छ्रुतेः । तथा हि सद् द्रव्यं सन् गुणः सत् कर्म इति भेदार्थैर्द्रव्यादिशब्दैः सामानाधिकरण्यं न स्यात्, तच्च दृष्टम् । न हि सत्ता योगो वा द्रव्यं गुणो वा भवति, किं तर्हि ?] द्रव्यस्य गुणस्य वा । तथैव हि अन्यापोहस्य न

* * *

समानाधिकरणाभावप्रसङ्गदोषजातस्य [अ]भाव इति । तद्यथा **--व्याप्तेरन्यनिषेधस्य तद्भेदार्थैरभिन्नता** प्र° समु° ५ । ३६ । सदित्यसन्न भवति इत्यसतो निवृत्तिः सर्वद्रव्यगुणकर्मघटरूपोत्क्षेपणादिभेदव्यापिनी, तस्या असन्निवृत्तेः सर्वभेदव्यापित्वात् तैरभिन्नार्थत्वात् सामानाधिकरण्यमुपपन्नमिति । एतन्न, यस्मा**दसन्निषेधाभावत्वाद् विशेषार्थविभिन्नता** । तद्व्याख्या **--सामान्यशब्दस्य** हीत्यादि, **सामान्यशब्दस्य हि** सदादेर्योऽर्थान्तरव्युदासः असन्न भवति इति कृत्यं **व्यापारः स** त्वयेत्थमवधारितः **स्वभेदाप्रतिक्षेपेणे**ति वाङ्मात्रेणोक्तं प्रागुक्तं विस्मृत्येति पूर्वपक्षप्रत्युच्चारणम् । अत्र तु वयं ब्रूमः **--स स्वभेदप्रतिक्षेपेणै**वेति । कस्मात् ? **तस्य** सच्छब्दस्य **सन्नियमार्थत्वात्**--असन्न भवति इति द्विःप्रतिषेधस्य प्रकृत्यापत्तेः सत्त्वेन नियतत्वा**दसत्प्रतिषेधस्याभावत्वात्** । ततः किम् ? ततो **भेदानां परस्परतः सदसत्त्वात्**, इतरेतराभावत्वादसत्त्वम्, सन्नियमात् सत्त्वम्, अतः स्वभेदाः प्रतिक्षिप्ता एव, सन्तोऽप्यसन्त एव न भवन्तीति प्राप्तम् । ततश्च **भेदश्रुत्या** द्रव्यगुणादिकया घटपटादिकया च **सह सामानाधिकरण्यमनुपपन्न**मसन्निवृत्तेरभावसाधनत्वात्, अभावेन चैकविभक्तित्वमनुपपन्नं भेदानां सद्द्रव्यं सद्गुणः सन् घटः इत्यादि । न विभक्तिमात्रसामानाधिकरण्यानुपपत्तिरेव, किं तर्हि ? पदस्याप्यनुपपन्नं सामानाधिकरण्यं विभक्तिभेदेनापि सद् द्रव्यस्य गुणस्य वा इत्यादि । सम्बन्धस्यापि भेदैर्द्रव्यादिभिरभावस्यानुपपत्तेः **कस्य वा ते भेदाः** सच्छब्देनाभिन्नासत्त्वनिवृत्तिमात्रोपादानात् ? **तस्मादपृथक्छ्रुतिदोषोऽस्त्येव ।** - /ms

१९ स] समाधिकरणाभाव°nayacakra-ms-bhā ॥

२० व्या] दृश्यतां पृ° ७२८ टि° ९ ॥

१२ स] सन् गुणः इति सम्यक् प्रतिभाति । तुलना--पृ° ६०७ पं° १७ ॥

१६ स] तुलना--पृ° ६०७ पं° १८ ॥

१७ क] कस्य धातो भेदाः nayacakra-ms-bhā । कस्य धातोर्भेदाः nayacakra-ms-ya ॥

§ 2305

तद्व्याख्यानार्था टीका तदीयैव --**सुकरो** ही**त्यादिका** दृष्टान्तत्वेन गतार्था यावद् **द्रव्यस्य गुणस्य** वेति । **तथैव** हीति दार्ष्टान्तिकत्वेन त्वन्मतप्रदर्शनमेव
- /ms यावत् **सामानाधिकरण्यं न स्यात् । यथा न हि सत्ता द्रव्यं गुणो वा** भवतीत्यादि **तथा न हि सदसन्निषेधाभाव**स्त्वन्मतोऽस्मन्मतस्य प्रतिषेधद्वयविधेयस्य सतः सभेदस्यानभ्युपगमे **द्रव्यं भवति गुणो वा, किं तर्हि ?**
731/mj **द्रव्यस्य गुणस्य वा** भावा

* * *

वाचकः, भेदार्थैरपृथक्छ्रुतेः । तथा हि सद् द्रव्यं सन् गुणः सत् कर्म इति भेदार्थैर्द्रव्यादिशब्दैः सामानाधिकरण्यं न स्यात् । यथा न हि सत्ता द्रव्यं गुणो वा, भवति, किं तर्हि ? द्रव्यस्य गुणस्य वा, तथा न हि सदसन्निषेधाभावो द्रव्यं भवति गुणो वा, किं तर्हि ? द्रव्यस्य गुणस्य वा भावाभावः । आह च--

*विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः ।
सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः ॥ वाक्यप॰ ३ । १४ । ८ § 2308

यत्तु सत्तासम्बन्धाभिधानपक्षाभ्यामपोहपक्षे विशेषहेतुप्रतिपादनार्थमुक्तम्--तत्र हि सत्तासम्बन्धयोर्गुणत्वाद् वस्तुनश्च गुणित्वात् सामानाधिकर-

* * *

भावः, सदसन्मात्रमित्यर्थः, इतीयं व्याख्या त्वन्मतानुसारिण्येवेति **आह चे**ति ज्ञापकमप्याह --***विभक्तिभेदो नियमादि**त्यादि । § 2309

---

१७ त] **तदैयैव सुकरा** nayacakra-ms-hī प्र॰ ॥
३ भा] ऽभावाभावः, असदसन्मात्रमित्यर्थः ? ? ? ॥
४ *] अत्रेदमवधेयम् । नयचक्रवृत्तौ **विभक्तिभेदो नियमादित्यादि** इत्येव प्रतीक उपलभ्यते । न्यायवार्तिके २ । २ । ६६ दिङ्नागमतनिराकरणप्रसङ्गे **विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः । सामानाधिकरण्यस्यासिद्धिः सद्द्रव्यशब्दयोः ॥** इति कारिका उद्योतकरेण पूर्वपक्षरूपेणोपन्यस्ता, अतः सा दिङ्नागस्येति सम्भाव्यते । भर्तृहरेर्वाक्यपदीये ३ । १४ । ८ तु **विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः । सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः ॥** इति कारिका दृश्यते । एतच्चास्माभिरत्र पृ॰ ७३१ टि॰ ३ इत्यत्र विस्तरेणोपदर्शितम् । अतोऽत्र मल्लवादिक्षमाश्रमणानां कीदृशी कारिकाभिमतेति निर्णेतुं न पार्यते । तथापि भर्तृहरेः कारिका **दिङ्नागेनापि** पृ॰ ६०७ पं॰ १९ इत्यत्रास्मिन् प्रसङ्गे निर्दिष्टा, अतोऽस्माभिरपि सैव कारिका सम्भावनयात्रोपन्यस्तेति सुधीभिर्विभावनीयम् ॥
९ आह] **वेति** प्र॰ । तुलना--पृ॰ ६०७ पं॰ १८ ॥
१२ *] **विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः । सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः** ॥वाक्यप॰ ३ । १४ । ८, पटस्य शुक्ल इति द्रव्यगुणाभिधायिपदप्रयोगे शाब्दो गुणप्रधानभावः । तथाहि--अत्रोपसर्जनं प्रधानोपकारपरिणतं स्वार्थमाचष्ट इति गुणविभक्तिं षष्ठीमुपादत्ते । प्रधानं तु स्वात्मन्यवस्थितमपरोपकारीति प्रथमया

**यत्तु सत्तेत्यादि** । सत्ता-सम्बन्धाभिधानपक्षयोरपृथक्छ्रुतिदोषोऽस्ति, नापोहपक्षे विशेषहेतुसद्भावादिति तस्य विशेषहेतोः प्रतिपादनार्थमुक्तम् - **-तत्र हीत्यादि** । सत्तासम्बन्धा[भिधा]नपक्षयोर्गुणो सत्ता 732/mj

* * *

ण्याभावो युक्तः, इह तु अर्थान्तरापोहो यस्मिन् वस्तुनि क्रियते तद् द्रव्यं शब्दार्थः नापोहमात्रम् । स च सच्छब्देन व्याप्तः, अपरित्यागात्, न तु साक्षादुक्तः ।

तद्यथा--सच्छब्दः [असन्निवृत्त्युपसर्जनं द्रव्यमाह, न साक्षात्,] संज्ञ-योत्पत्तेः, तस्माद् विशेषार्थैर्द्रव्यादिशब्दैः सच्छब्दस्य सामानाधिकरण्यं वा-क्यार्थे युक्तं सद्द्रव्यं सद्गुणः सत्कर्म...। तथा हि स्वार्थाव्यभिचारो विशेषश-ब्दसहितस्य । यस्मादवयवशब्दार्थाभ्यामन्यः समुदायार्थः, तस्य च वाचकौ तौ समुदितौ, न तु सच्छब्दो द्रव्यार्थमाह न द्रव्यशब्दः सदर्थम् । कथं तर्हि यत् सत् तद् द्रव्यं यद् द्रव्यं तत् सदिति ? उभयशब्दव्युदासानुगृहीतस्य शब्दद्वयाभिधेयस्य समुदायार्थस्यैकत्वात् तथोच्यते, न तु सदर्थस्य द्रव्यश-ब्देनाभिधानात् ।

* * *

सम्बन्धौ विशेषणत्वात्, तद्वस्तु गुणीत्यतः सामानाधिकरण्याभावो युक्तः । **इह त्व**र्थान्तरापोहः सदित्यसन्न भवतीति नासद्भावमात्रमेवोच्यते, किं तर्हि ? अर्थान्तरापोहेन विशिष्टं वस्त्वेव सदित्युच्यते, यस्मिन् वस्तुनि सोऽपोहः

---

युज्यते इति नियतो विभक्तिभेदो व्यधिकरणे विषये । वीरः पुरुष इत्यादौ तु समानाधिकरणे विषये द्वावपि द्रव्यशब्दौ स्वनिष्ठं स्वार्थमाचक्षाते । तथा च तत्र प्रथमैव । सामर्थ्यनिबन्धनस्तु गुणप्रधानभाव उक्तो विशेष्यं स्यादनिर्ज्ञातम् वाक्यप॰ ३ । १४ । ७ इत्यादिना । एवं च सत्यपि गुणप्रधानभावे शाब्दाशाब्दत्वकृतो विशेषः सामानाधिकरण्यवैयधिकरण्ययोरिति षष्ठीसमानाधिकरणयोः समासयोर्भेदः । इति हेलाराजकृतायां **वाक्यपदीयटीकायां** वृत्तिसमुद्देशे ॥ यत् पुनरेतद् भेदार्थैरभिन्नविभक्तिकत्वात् इति तन्न, समानार्थापरिज्ञानात् । न ब्रूमः सत्ताशब्देन सामानाधिकरण्यम्, अपि तु सत्तायाः प्रधानसाधनवाचिना सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते । गुणकर्मशब्दैर-पीतरेतरविशेषणविशेष्यभावापन्नैस्तान्येव । एवं च सति युक्तं सामानाधिकरण्यमुभयोः सद्द्रव्यशब्दयोः, एकविषयत्वात् । यदा पुनरयं सत्ताशब्दः सत्ताप्रधान एवाङ्गभूतं साधनमभिधत्ते न तदा सामानाधिकरण्यं द्रव्यस्य सत्तेति भवति । तस्मात् सामानाधिकरण्यानुपपत्तिरदोषः । **[[दिङ्नागमतस्य निराकरणमत्र प्रस्तुतम्, अतोऽयं श्लोको दिङ्नागस्यैव कस्मिंश्चिद् ग्रन्थान्तरे भवेदिति सम्भाव्यते । यस्तु भर्तृहरेः श्लोको दिङ्नागेनोद्धृतः स पृ॰ ६०७ पं॰ १९ इत्यत्र द्रष्टव्यः ॥]]विभक्तिभेदो नियमाद् गुणगुण्यभिधायिनोः । सामानाधिकरण्यस्यासिद्धिः सद्द्रव्यशब्दयोः ॥** इति तदनेन प्रत्युक्तम् ।— **न्यायवार्तिकम्** [जेसलमेरस्थं हस्तलिखितम्] २ । २ । ६६ ॥

१६ उ] उभयशब्दव्युदासानुगृहीतस्य शब्दद्वयाभिधेयत्वात्, न तु सदर्थस्य द्रव्यशब्देनाभिधानात् इत्यपि मूलं स्यादत्र । तुलना--पृ॰ ७३३ पं॰ ३, पृ॰ ७३३ पं॰ ५ ॥

१७ त] **तद्वत्तु** इति पाठः शोभनः । तद्वद्वस्तु ? ॥

२३ इ] तुलना--पृ॰ ७३३ पं॰ २ ॥

१ र्थान्त] **॰न्तरापोहे** इत्यपि पाठः स्यात् ॥

२ व] **वस्तुनि अपोहः**nayacakra-ms-ya ॥

क्रियते तच्च द्रव्यं शब्दार्थः, नापोहमात्रम् । स चापोहविशिष्टोऽर्थो द्रव्यादिः सच्छब्देन व्याप्तोऽपरित्यागात्, न तु साक्षादुक्तः । § 2310

तद्व्याख्या --तद्यथा सच्छब्द इत्यादि । कस्मादनभिधानमिति चेत्, संशयोत्पत्तेः, उपात्तत्वे सति अनभिहिते संशयः स्यात् । तस्मात् सामानाधिकरण्यं विशेषार्थैर्द्रव्यादिशब्दैः सच्छब्दस्य वाक्यार्थे युक्तं न पदार्थे । तद्दर्शयति --सद्द्रव्यं सद्गुण इत्यादि । तथा हि स्वार्थाव्यभिचारो विशेषसहितस्येति विशेषशब्दप्रयोगः । कोऽसौ वाक्यार्थ इत्यत आह --यस्मादवयवशब्दार्थाभ्यामन्यः समुदायार्थः, सद्द्रव्यशब्दार्थावयवावसदद्रव्यनिवृत्त्युपलक्षितौ - /ms ताभ्यामन्य उभयशब्दव्युदासानुगृहीतः समुदायार्थः, तस्य च वाचकौ तौ समुदितौ न विपरीतार्थौ, तद् दर्शयति --न तु सच्छब्दो द्रव्यार्थमाह, न द्रव्यशब्दः सदर्थमिति । यथोक्तम्-- § 2311

> अपोह्यभेदाद् भिन्नार्थाः स्वार्थभेदगतौ जडाः ।
> एकत्राभिन्नकार्यत्वाद् विशेषणविशेष्यकाः ॥ प्र° समु° ५ ।
> १५ इति ।§ 2313

अत्र चोद्यम् --कथं तर्हीति यत् सत् तद् द्रव्यम्, यद् द्रव्यं तत् सत् इति भिन्नार्थत्वेन युक्तम् ? इति । अत्र तेनैवोच्यते --उभयशब्दव्युदासानुगृहीतस्य असदद्रव्यनिवृत्त्यनुगृहीतस्य संहतशब्दद्वयाभिधेयस्य समुदायार्थस्यैकत्वात् तथोच्यते, न तु सदर्थस्य द्रव्यशब्देनाभिधानादिति पूर्वपक्षः । § 2314

733/mj

अत्रापि शक्यं वक्तुम्--आश्रितस्य गुणिण ?त्वाद् गुणगुणिनोर्भेदात् सामानाधिकरण्याभावस्तदवस्थः । इह तु जातियोगौ यस्मिन् वस्तुनि वर्तेयातां [तद् द्रव्यं सदित्युच्यते... ...] शब्दद्वयाभिधेयत्वात् । § 2315

पश्चिमस्यापि दोषस्य भाव एव, साक्षादवृत्त्यादिदोषजातस्य सातिशयस्योक्त- § 2316

---

४ स] तुलना पृ° ६०७ पं° २६ ॥
४ योत्प] °संशयोत्पत्तेरूपत्तत्वे सति प्र° ॥
५ उ] अनुपात्तत्वे इत्यपि चिन्त्यम्, दृश्यतां पृ° ६३८ पं° १४ ॥
८ अ] दृश्यतां पृ° ६३० ॥
९ क] कथं तर्हीति । यत् सत् तद् द्रव्यम्, यद् द्रव्यं तत् सत् इति भिन्नार्थत्वे न युक्तमिति । इत्यपि योजना स्यादत्र ॥
११ श] तुलना--पृ° ७३३ पं° ३ ॥
१३ न] तुलना--पृ° ७३३ पं° ५ ॥
१ प] दिङ्नागेन क्वचिद् ग्रन्थे यत् स्वमतं प्रतिपादितं तदत्र निराक्रियते । प्रमाणसमुच्चयवृत्तावपि पश्चिमस्यापि दोषस्याभावः । कथम् ? साक्षाद्वृत्तेरभेदाच्च अर्थान्तरमुपादाय स्वभेदेषु शब्दो न वर्तते । तस्मात् पारतन्त्र्येण स्वभेदानाक्षेपदोषो भाक्तदोषश्च न स्तः । नापि भेदानवस्थानादव्यापकत्वाच्चानभिधानासामान्यदोषौ स्तः, अर्थान्तरापोहमात्रस्याभिन्नत्वादद्रव्यत्वाच्च इत्यभिहितं दिङ्नागेनेति ध्येयम् । दृश्यतां पृ° ७२९ पं° २ ॥

उत्तरपक्षस्तु --**अत्रापि शक्य**मित्यादि । सत्ता-योगपक्षगतो विभक्तिभेदप्रसङ्गदोषोऽत्रापि शक्यो वक्तुम्, आश्रितस्य गुणित्वात् । तद्यथा--सदभावाभाव आश्रितः, द्रव्याद्यभावाभाव आश्रयः, तयोश्च गुणगुणिनोर्भेदात् तदभिधायिनोः सामानाधिकरण्याभावस्तदवस्थः । या त्वयोक्तोपपत्तिः साऽपि जातियोगपक्षयोरपि क्रमत इत्यतस्तत्प्रदर्शनार्थमाह --**इह तु जाति-योगौ यस्मिन् वस्तुनी**त्यादि । सत्तातः सच्छब्दः तत्सम्बन्धाद्वा सति वर्तते वस्तुनि द्रव्यादिभेदवति सत्त्ववत् सत् इत्यभेदोपचाराद् मतुब्लोपाद्वा, त्वयोक्तापोहवृत्तिवद् वर्तेयातां जातियोगौ सदेव सत्त्ववत् इति । शेषस्त्वदुक्तोपपत्तिग्रन्थवत्तुल्यगमो याव**च्छब्दद्वयाभिधेयत्वा**दिति गतार्थः । तस्मात् तदवस्थ एवापृथक्छ्रुतिदोषः । § 2317

किञ्चान्यत् --**पश्चिमस्यापि दोषस्य भाव एव,** नाभावः । यदुक्तं जातिमत्पक्षे—

तद्वतो नास्वतन्त्रत्वाद् भेदाज्जातेरजातितः § 2319

इत्यादि दोषजातं तस्याभावोऽन्यापोहपक्षे सा (Edtext outside numbered paragraph)क्षाद्वृत्तेः, तत्र हि स (Edtext outside numbered paragraph)च्छब्दः सत्तामुदापाय द्रव्ये वर्तमानस्तद्भेदान् घटादीना[क्षे]प्तुमसमर्थः । अ (Edtext outside numbered paragraph)त्र पुनरसत्प्रतिषेधेन साक्षाद्वर्तत इति तस्य ये विशेषास्तान् न प्रतिक्षिपति । तस्मादिहानाक्षेपदोषो नास्ति । भा (Edtext outside numbered paragraph)क्तदोषोऽप्यत एव नास्ति, न ह्यन्यत्र मुख्या वृत्तिर्द्रव्यादिषूपचर्यते । नापि भेदानवस्थानादनभिधानदोषः, कस्मात् ? अ (Edtext outside numbered paragraph)भेदात्, न ह्यर्थान्तरापोहो भेदेषु भिद्यते, अ (Edtext outside numbered paragraph)भावात् । तन्मात्रं च शब्देनोच्यते, न (Edtext outside numbered paragraph)भेदाः । तथा सा (Edtext outside numbered paragraph)मान्यदोषोऽपि नास्ति । यत्तूक्तम्—

१ अ] **अवापि**nayacakra-ms-ya ॥
१ गु] गुणत्वात् इत्यपि भवेदत्र पाठः । आश्रितस्य [गुणत्वादाश्रयस्य च] गुणित्वात् इत्यपि पाठोऽत्र चिन्त्यः ॥
१४ या] **पात्त्वयोक्तो॰** प्र॰ ॥
१५ योक्तोप] पृ॰ ७३२ पं॰ १ ॥
१ इ] तुलना--पृ॰ ७३२ पं॰ १ ॥
३ त्व] **त्तयोक्तापोहनिवृत्तिवत्** प्र॰ । त्वदुक्तापोहवृत्तिवत् ? ॥
३ त्ति] **॰ग्रंथवस्तुल्य॰** प्र॰ ॥
३ च्छ] तुलना--पृ॰ ७३२ पं॰ २५ ॥
५ प] तुलना--पृ॰ ७३५ पं॰ १४ ॥
९ त] दृश्यतां पृ॰ ६०७ पं॰ २५ टि॰ ५, पृ॰ ६२३ पं॰ १७, पृ॰ ६२५ पं॰ ८, पृ॰ ६२८ पं॰ ३, पृ॰ ७३५ पं॰ २४ ॥

सत्वान् घटादिरर्थो न पटादिषु न वर्तते § 2320

अद्रव्यत्वाच्च भेदाच्च... ।... ... ... ॥ § 2322

**साक्षादवृत्त्यादिदोषजातस्य** (Edtext outside numbered paragraph)

* * *

त्वादस्माभिः । सच्छब्दोऽपोहमात्रस्वरूपोपसर्जनं द्रव्यमाह, न साक्षादित्यादि सर्वं प्रागुक्तम् ।

यत्तूक्तं परं प्रत्याशङ्क्य--स्यादेतत्--अपोहविशिष्टार्थत्वे... ...तुल्यं शब्दार्थस्य समानत्वम् । ततः--

नाप्यर्थान्तरापोहो नाम [भावान्तरम्... ... ...] ... ...नास्ति सामान्यदोष इति । अत्र ब्रूमः--तद्वत्त्वं च त्वदुक्तवत् । ननु भावान्तरतैव... ... ... ।

* * *

सातिशयस्योक्तत्वादस्माभिः,

अद्रव्यत्वाच्च भेदाच्च... ।... ... ... ॥ § 2324

तदेव स्मारयन्नाह **--सच्छब्दोऽपोहमात्रस्वरूपोपसर्जनं द्र** (Edtext outside numbered paragraph)**व्यमाह, न साक्षादित्यादि सर्वं प्रागुक्तं जा** (Edtext outside numbered paragraph)**तिमद्वदपोहवान्** इत्युपक्रम्य । तत्र च जातिमतीवापोहवत्यपि सर्वे दोषा यथा सङ्गतास्तथा प्रतिपादिता इति न पुनर्लिख्यते । § 2325

नाप्यर्थान्तरापोहो नाम [भावान्तरम्... ... ...] ... ...नास्ति सामान्यदोष इति । अत्र ब्रूमः--तद्वत्त्वं च त्वदुक्तवत् । ननु भावान्तरतैव... ... ... ।

* * *

सातिशयस्योक्तत्वादस्माभिः,

स्यान्मतम्--जातिमत्त्ववदपोहवत्त्वमप्ययुक्तमिति, तदाशङ्क्यते **--यत्तूक्तम**न्यापोहवादिना परं प्रति आशङ्क्य तद्यथा **--स्यादेतदपोहविशिष्टार्थस्तर्थत्व**

---

१० स] सदस्यास्तीति सत्वान्, दृश्यतां पृ॰ ६२८ पं॰ १९ । प्रमाणसमुच्चये **तद्वानर्थो घटादिश्च न पटादिषु वर्तते** इति तद्वानर्थो घटादि**श्चेन्न** पटादिषु वर्तते इति वा पाठो दृश्यते । दृश्यतां पृ॰ ६२९ पं॰ १४ । अत इदं कारिकार्धं **दिङ्नागस्य** ग्रन्थान्तरादत्रोद्धृतं प्रतीयते । **सत्वान्** सत्तावान् **घटादिरर्थो न** न सच्छब्दार्थ इत्याशयः, कस्मादिति चेत्, **पटादिषु न वर्तते** स हि घटादिरर्थः पटादिषु न वर्तते, तस्मात् **सामान्यमर्थः स कथम् ?** सामान्यं ह्यनेकवृत्ति, घटादिरर्थस्तु पटादिषु न वर्तते तस्मात् स न सामान्यमित्याशयोऽत्र भाति ॥

१० टा] तुलना--पृ॰ ६२९ पं॰ १४ ॥

१६ व] **वर्तंते** प्र॰ ॥

१ त] तदाशङ्क्य ते**[न]** यत्तूक्त॰ इत्यपि पाठोऽत्र भवेत् ॥

३ विशिष्टा] **॰ष्टार्थंस्त इत्यादि**nayacakra-ms-bhā । **॰ष्टास्त इत्यादि** nayacakra-ms-ya ॥

इत्यादि यावत् **तुल्यं शब्दार्थस्य समानत्वम्** शब्दस्य च समानत्वमर्थस्य च अपोहपक्षेऽपि इति वाक्यशेषः । इत्थं पूर्वपक्षीकृत्योत्तरमाह--ततः **अद्रव्यत्वाच्च भेदाच्चे**ति कारिकया **च**शब्दा[द् भा]ष्ये लिखितम् । तद्व्याख्या --**नाप्यर्थान्तरापोहो नामे**त्यादि याव**न्नास्ति सामान्यदोष** इत्यपोहपक्षे जातिमत्पक्षगतदोषाभावप्रतिपादनं विशेषप्रदर्शनादिति त्वदभिप्रायं प्रदर्श्य वयमत्रोत्तरं ब्रूमः --**तद्वत्त्वं च त्वदुक्तवत्** । अस्य व्याख्या --**ननु भावान्तरतैवे**त्यादि । यदि परमताभ्युपगमात् सामान्यवत्पक्षे सत्सामान्यान्वयात् सामान्य[व]द्विशेषणस्य सामान्यस्यार्थान्तरत्वं पारतन्त्र्यादि च ब्रूषे सामान्यवद् व्यावृत्तेरपि अर्थान्तरत्वं विशेषणत्वं पारतन्त्र्यादि च ननु तदवस्थमेव, तद्वतोऽन्यप्रत्ययात्मकत्वात् सामान्यवत् तद्व्यावृत्तेरपि । अथ स्वमतेन ब्रूषे न सामान्यं न व्यावृत्तिमिदिति कुतस्तद्विशिष्टवस्त्वभिधानं खपुष्पशेखरविशिष्टवन्ध्यापुत्राभिधानवत् । § 2326 - /ms

735/mj

अपि च भावान्तर... ... ...। यथा जातिस्वरूप... ... ...अनाक्षेपस्तथा यथाकथञ्चित्... ... ...अस्वातन्त्र्यहेतुत्वात् ।

§ 2327

यदि चार्थान्तरापोहो न भावान्तरं कथमिदम्--यत् सत् तद् द्रव्यं यद् द्रव्यं तत् सदिति ? उभयशब्दव्युदासानुगृहीतस्य शब्दद्वयाभिधेयस्य समुदायस्यैकत्वात् तथोच्यते न तु सदर्थस्य द्रव्यशब्देनाभिधानात्, अर्थान्तरापोहो यस्मिन् वस्तुनि क्रियते तद् द्रव्यं शब्दार्थो नापोहमात्रम् । तस्मादपरिहृतः पश्चिमदोषोऽपि । § 2328

---

१० स्य] **°स्यासमानत्वं शब्दस्य चासमा°**nayacakra-ms-bhā । **°स्यासमानत्वं शब्दस्य च समा°** nayacakra-ms-ya ॥
१४ अ] दिङ्नागस्य ग्रन्थान्तरादियं कारिकात्रोद्धृता प्रतीयते, प्रमाणसमुच्चये तु नेयं कारिका दृश्यते । किञ्चान्यत्, प्रमाणसमुच्चयवृत्तौ अर्थान्तरापोहमात्रस्य **अभिन्नत्वादद्रव्यत्वाच्च** इति पाठ उपलभ्यत इति ध्येयम् । दृश्यतां पृ° ७२९ पं° ४, पृ° ७३३ पं° २१ ॥
१७ का] **कारिकाया** प्र° । कारिकायां इत्यपि पाठोऽत्र स्यात् ॥
१८ च] **चशब्दाख्ये**nayacakra-ms-bhā ॥
१८ नं] **विशेषदर्श°**nayacakra-ms-ya ॥
२३ न्त्या] °दिव ननुnayacakra-ms-bhā । °दिषुव ननु nayacakra-ms-ya ॥
२४ ब्रू] द्रूपे न nayacakra-ms-ya । द्रूयते न nayacakra-ms-bhā ॥
२८ क] कथमिदम्--यत् सत् तद् द्रव्यं यद् द्रव्यं तत् सदिति ? अर्थान्तरापोहो यस्मिन् वस्तुनि क्रियते तद् द्रव्यं शब्दार्थो नापोहमात्रम् । तस्मादपरिहृतः पश्चिमदोषोऽपि । इत्यपि मूलं स्यादत्र ॥

**अपि च भावान्तरे**त्यादि । अत्र प्रस्तुतार्थोपकारापकारानङ्गत्वाद् भावान्तराभावान्तरत्वाभ्यां विचारिताभ्यां न किञ्चित् प्रयोजनमस्ति, किन्तु इदमत्र प्रस्तुतार्थोपयोगिकम्, तद्यथा--बुद्धिस्थस्य शब्दप्रयोगजनितज्ञानोपलक्षितस्यान्वयव्यतिरेकद्वारेणावधारितस्यार्थस्याऽऽ**नुगुण्येन** वशवर्तितया अयं भवति, अयं न भवति इति तयोर्विधिप्रतिषेधयोर्भेदेन प्रत्ययः शब्दार्थसम्बन्धज्ञस्य शब्दप्रयोगादुत्पद्यते, सामान्योपसर्जनविशेषशब्दार्थपक्षे वा । द्वयोरपि च पक्षयोरुपसर्जनीकृतविशेषणत्वाद् भेदानाक्षेपादस्वातन्त्र्यादनभिधानं तुल्यमित्येष विचारप्रयासार्थः । तद् दृष्टान्तेन दर्शयति **--यथा जातिस्वरूपे**त्यादिना तद्वत्पक्षवादिमतेन याव**दनाक्षेप** इति, दार्ष्टान्तिकेन च **तथा यथाकथञ्चि**दित्यादिना याव**दस्वातन्त्र्यहेतुत्वा**दिति सुष्ठूच्यते--**पश्चिमस्यापि दोषस्य सातिशयस्य भाव एवेति** । § 2329

यदप्युक्तम्--अर्थान्तरापोहोऽसदघटनिवृत्तिः सन् घट इति, तस्मात् सामान्यदोषोऽपोहपक्षे नास्तीति, तदपि प्रत्यासन्नमात्मोक्तं विस्मृत्य त्वयाभिहितमिति बोधयितुकाम इदमेव तावत् प्रत्युच्चारयति **--यदि चार्थान्तरापोहो न भावान्तर**मित्यादि । अभावान्तरत्वादर्थान्तरापोहस्यापोहवानर्थः शब्दवाच्यो न भवति, अतो नापोहो विशेषणं नापोहवान् सोऽर्थ इति यदि त्वयेष्टमिति अस्य विरोधापादनार्थमुच्यते— **कथमिद**मित्यादि पूर्वपक्षितमस्माभिर्याव**न्न तु सदर्थस्य द्रव्यशब्देनाभिधाना**दित्येतस्य सूचनं सूत्रेण यावद् **नापोहमात्र**मिति गतार्थम् । किमुक्तं भवतीति चेत्, उच्यते--यदि द्रव्यं यद्यद्रव्यमर्थान्तरापोहः तद्वांस्त्वर्थः त्वत्स्वशब्दार्थत्वेन विवक्षितत्वादुच्यत एव बुद्धिस्थान्वयव्यतिरेकार्थभेदप्रत्ययोत्पत्तिदर्शनादित्युक्तं भवति । न हि लोके शब्दप्रयोगजनितप्रत्ययपरिच्छेद्यापलापेनान्यः शब्दार्थः शक्यः कल्पयितुं सुदूरमपि गत्वा प्रतिपत्तिशरणावस्थानाद् वादानामिति नायं निःसरणोपायः । तस्मादपरिहृतः पश्चिमदोषोऽपीति । एतेन **अस्वातन्त्र्याद् भेदाज्ञातेरजातितः**

इति सव्याख्याविकल्पा दोषहेतवोऽपरिहृता वेदितव्याः, तेषां त्वदुक्तन्यायाध्वानतिक्रमात् परिहारहेतूनां तद्विकल्पानुसारित्वाच्चेत्यलं प्रसङ्गेन । § 2330

736/mj

अत्र च संघातः शब्दार्थ उत्पत्तावभिव्यक्तौ वा । यद्यप्राप्तयौगपद्यानि पदानि कार्यात् प्रसिद्धाद् व्यवस्था लोकप्रसिद्धेरेव

---

३ अ] **यत्र** प्र° ॥
७ स्तुता] °**तार्थो**° प्र° ॥
१० प] पृ° ७३३ पं° ४ ॥
१७ क] तुलना--पृ° ७३२ पं° ७ ॥
२६ न्न] पृ° ७३२ पं° २५ ॥
२७ सू] **सूचनसूत्रेण** प्र° ॥
१ निःस] °**शरणो**° प्र° ॥

१ प] **दपहृत**nayacakra-ms-ya ॥
२ अ] दृश्यतां पृ° ६२३ पं° १७, पृ° ६२५ पं° ८, पृ° ६२८ पं° ३, पृ° ७३३ पं° १३ ॥
४ च] पृ° ४४८ टि° २ ॥

वा, अनवस्थिततर्कत्वात् पुरुषाणाम् । आगममात्रं त्वेतत् पदसमूहोऽनियतानुपूर्व्यो वाक्यम् । § 2331

प्रस्तुतनयमतः शब्दार्थो विधीयते --**अत्र च** विधि[नियम]नियमे **सङ्घातो** वर्ण-पद-वाक्यादीनां **शब्दार्थ उत्पत्तावभिव्यक्तौ** वेति । यदि वर्णादयो जन्यन्ते यद्यभिव्यज्यन्ते कार्य-नित्यपक्षयोर्द्वयोरपि अविरुद्धः सङ्घातो वाक्यादिः शब्द इति । स्यान्मतम्--उत्पन्नमात्रप्रध्वंसित्वाद् वर्णादीनां यौगपद्याभावे कुतः सङ्घात इति, अत्रोच्यते--यद्यप्राप्तयौगपद्यानि पदानि - /ms कार्यात् प्रसिद्धाद् व्यवस्था लोके, किं तत् कार्यम् ? अर्थप्रतिपादनम्, तद्यथा--वर्णादीनां तिरोहितानां परिणामान्तरमापन्नानां विनष्टानां वा बुद्धौ संस्कारमाधायाऽभिधेयविज्ञानोत्पत्तिनिमित्तत्वं तदभावे तदभावात् प्रयोगानन्तरीयकत्वाच्च प्रत्ययस्यानुमीयते । लोकप्रसिद्धेरेव वा व्यवस्था, दृष्टा हि लोके तेषां वर्णपदादीनां शब्दानामर्थप्रत्यायनासम्भवादर्थप्रत्यायकस्तत्समुदाय इति शक्तिः प्रसिद्धा । सन्निदानीं समुदायः समुदायिभ्यो वर्णादिभ्यस्तदसम्भविकार्यान्तरदर्शनादन्य इति केचिदाहुः, तस्मादेव कार्याद् मा भूदहेतुकमर्थप्रत्यायनं तेषु तस्य प्रतिदेशं समस्तेषु वा देशैः सामस्त्येन वा वृत्त्यसम्भवान्न व्यतिरिक्त इत्यपरे । पूर्ववर्णज्ञानाहितसंस्कारापेक्षान्त्यवर्णे *संहृताशेषशेषावयवः समुदायोऽभिधाता पूर्ववर्णजनितबुद्धिपरिपाकादित्येके । सिकतातोयवद् देशान्तरेषु असतोऽन्त्येंऽशे कुतः सम्भवः प्रत्यायनस्य ? किन्तु तिलतैलवत् सर्वावयवेषु तिरोहिताभिमतेषु सूक्ष्मतामापन्नेषु वितत्य व्यवस्थितो बुद्धिसंस्कारपरिपाकसमुदायोऽभिव्यञ्जकः प्रत्ययस्येत्यपरे । स च समुदायात्मा शब्द एक एवाभिन्नः प्रत्यायकोऽर्थस्यैकप्रत्ययदर्शनात्, अनेक एव वा प्रत्यवयवाहितसंस्कारबलाधेयार्थज्ञानत्वादित्येवमादीनि विचारान्तराण्येवैतानि । पुरुषमतिसमुत्थापितशुष्कतर्कविषयत्वात् किं न एतैः, यदि व्यतिरिक्तः यद्यव्यतिरिक्तः अन्त्ये शेषसमस्तेष्वभिन्नो भिन्नो वा प्रत्यायकः समुदायोऽवयवा एव वा ? योऽस्तु सोऽस्तु, सर्वथाऽर्थप्रत्यायनात् फलात् समुदायः शब्द इत्येतावदुपयुज्यते । किं कारणम् ? अनवस्थिततर्कत्वात् - /ms पुरुषाणाम्, यथोक्तम् --**यत्नेनानुमितोऽप्यर्थः** वाक्यप॰ १ । ३४ इत्यादि तथा **हस्तस्पर्शादिवान्धेन** वाक्यप॰ १ । ४२ इत्यादि । किं तर्हि प्रतिपत्तव्यम् ? **आगममात्रं त्वेतत् पदसमूहो वाक्य**मिति । यथोक्तम्—

४ श ] शब्दार्थोऽभिधीयते इति पाठः समीचीनो भाति ॥
७ मा ] ॰मावयोभिधेय॰nayacakra-ms-bhā । ॰मावयोरभिधेय॰ nayacakra-ms-ya ॥
८ संस्कारा ] ॰रापेक्ष्यन्त्य॰nayacakra-ms-bhā ॥
१५ * ] संहृताशेषदोषावयवःnayacakra-ms-ya । संहृताशेषशेषावयवः nayacakra-ms-bhā । nayacakra-ms-bhā प्रतिपाठोऽपि शोभन इति ध्येयम् ॥
१९ य ] यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः । अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥(?") इति सम्पूर्णा कारिका । दृश्यतां पृ॰ ३६ पं॰ ४ ॥

जो हेतुवादपक्खंमि हेतु+ओ आगमे य आगमि+ओ ।
सो ससमयपण्णव+ओ सिद्धंतविराध+ओ इतरो सम्मति°
३ । ४५ त्ति ।§ 2334

स चाऽ**नियतानुपूर्व्यः** पदसमूहः । अनुपूर्वभाव आनुपूर्व्यम्, तदनियतं यस्य सोऽनियतानुपूर्व्यः * *

* * *

अयं च शब्दैकदेशत्वात् पर्यवास्तिकः । परिः समन्तादर्थे, अव गत्यर्थे । परितोऽवनं पर्यवः । समन्ताद् द्रवति । कोऽसौ ? भेदो भावोपसर्जनः । सोऽस्तीति यस्य मतिः स पर्यवास्तिकः ।

निर्गमवाक्यमप्यस्य--दुवालसंगं गणिपिडगमेकं पुरिसं पडुच्च सादियं सपज्जवसियं नन्दीसू° ४२ इत्यादि ।

इति विधिनियमनियमोऽष्टमोऽरः । समाप्तश्च द्वितीयो मार्गः ।

* * *

पदसमूहः, तद्यथा--देवदत्त गामभ्याज इति कदाचित्, कदाचिच्च देवदत्त गामभ्याज शुक्लाम्, देवदत्त महिषीं गृष्टिं कल्याणीम् इति पात्रमाहर, आहर पात्रं सौवर्णं च इत्यादि । व्याकरण-साङ्ख्य-वैशेषिक-बौद्धाद्यन्यतमग्रन्थमात्रं सर्वागमसमूहात्मकार्हतागमो वा वाक्यम्, वाक्यार्थोऽपि तदभिधेयोऽर्थः । उक्तः शब्दार्थः । § 2335

अयं पुनर्नयः क्वान्तर्भवति, द्रव्यार्थे किं पर्यायार्थे ? उच्यते --**अयं च शब्दैकदेशत्वात् पर्यवास्तिकः ।**

मूलनिमेणं पज्जवणयस्स उज्जुसुतवयणविच्छेदो ।
त स्स तु साहपसाहा सद्दविकप्पा सुहुमभेदा ॥ सम्मति° १
। ५§ 2338

इत्यार्षेऽपि सप्तनयशताम्नानात् पर्यवास्तिकभेदस्य शब्दनयस्य भेद इत्यर्थः । § 2339

---

२० हेतुवा] °वायपक्खंमि हे+उ+ओnayacakra-ms-ya ॥
२१ प] परिक्खंमिnayacakra-ms-bhā ॥
१ विरा] °राह
२ *] °समस्तेप्यभिन्नोnayacakra-ms-ya ॥
२ *] हस्तस्पर्शादिवान्धेन विषमे पथि धावता । अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ इति सम्पूर्णा कारिका ॥
४ स] **समन्तादवति** इति पाठः सम्यग् भवेत् ॥
८ स] तुलना पृ° ७ पं° ११ ॥
९ दु] दृश्यतां पृ° ३ पं° ७, टिपृ° ५ पं° २३ ॥
१० वा] **वाक्याभिर्थो°** प्र° ॥
१२ मूल] °निमेषणंnayacakra-ms-bhā । निमेषण nayacakra-ms-ya ॥
१३ उज्जुसु] °सुय°nayacakra-ms-ya ॥
१३ त] तस्स Unayacakra-ms-ya ॥
१४ इ] इत्यार्थे°nayacakra-ms-bhā । इत्यर्थे° nayacakra-ms-ya ॥

पर्यवास्तिक इति कः शब्दार्थः ? उच्यते --**परिरुपसर्गः समन्तादर्थे, अव गत्यर्थे** धातुः । परितोऽवनं समन्ताद् गमनं पर्यवः । तदाचष्टे --**समन्ताद्भवति** । इत्थमक्षरार्थमुक्त्वा वस्तुतो दर्शयति— **कोऽसौ ? भेदो भावोपसर्जनः**, यो भवति घटादिर्भेदः स भवनक्रियोपसर्जनः पर्यवः । सोऽस्तीति यस्य - /ms नयस्य मतिः स पर्यवास्तिक इति तद्धितप्रत्ययान्तार्थः प्रकृत्यर्थेन विशेषितो ज्ञेयः । § 2340

किमेताः स्वमनीषिका एवोच्यन्ते, अस्ति किञ्चिद् निबन्धनमस्यार्षमपीति ? अस्ति इत्युच्यते, तद्यथा --**निर्गमवाक्यमप्यस्य--दुवालसंगं गणिपिडगमेकं पुरिसं पडुच्चे**त्याद्यार्षग्रन्थं साक्षित्वेनाऽऽहैतन्मतसंवादिनम् । यद्यप्ययमागमोऽनेकपुरुषान्वयेन सदा व्यवस्थितस्तथापि प्रत्येकं पुरुषविशेषाश्रित एव निश्चयाय क्रियासामान्योपसर्जनविशेषपरमार्थत्वाद् भवत्यर्थस्य । तच्च द्वादशाङ्गं गणिपिटकमत एव साद्यं सपर्यवसानं च क्षणिकमेवेत्यर्थः । **इत्यादि**ग्रहणादन्यापि प्रकृतिस्थित्यनुभावप्रदेशबन्धादिप्ररूपणा एकसमयमात्रविषया मिथ्यादर्शनादिपरिणामाध्यवसायप्ररूपणा च द्रष्टव्या । § 2341

**इति** परिसमाप्तौ, इत्थं परिसमाप्तो विधिनियम[१]योर्नियमोपप्रदर्शनो गुण-प्रधानभावेनायमष्टमोऽरः । समाप्तश्च [२]द्वितीयो मार्ग उभयविकल्पभेदोपदर्शनः ॥

# ९ अथ नवमो नियमारः ।

738/mj

ओँ अर्हँ § 2343

सद्गुरुभ्यो नमः § 2344

यदि भेदप्रधानो भावः कथमसौ ? स भवितारमन्तरेण स्वरूपमपि प्राप्तुमसमर्थोऽस्वतन्त्रत्वादसन् खपुष्पवत् । तदभावे

१. °यमोर्नियमो+एवोपदर्शनो प्र° ॥
२. द्वितीयोर उभयविकल्प°nayacakra-ms-ya ॥

१५ न्ताद ] °दर्थेऽवnayacakra-ms-ya । °दर्थो अव nayacakra-ms-bhā ॥
० दाच ] तथाचष्टेnayacakra-ms-ya ॥
० म ] समन्तादवति इति पाठः सम्यग् भवेत् ॥
० दुवाल ] °सिंगंnayacakra-ms-bhā ॥
० ग ] °मेगंnayacakra-ms-ya ॥
० पुरुषान्व ] °न्वयेन दा व्यव°nayacakra-ms-ya ॥
० सा ] साद्यसप°nayacakra-ms-ya ॥
० णाद ] °दन्यपिnayacakra-ms-bhā । °दन्यदऽपि nayacakra-ms-ya ॥
० प्र ] सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते । स बन्धः । प्रकृतिस्थित्यनुभावप्रदेशास्तद्विधयः ।--तत्त्वार्थसू° ८ । २--४ ॥

भेदा एव विप्रकीर्णाः स्युः । ततश्च भेत्तव्याभावाद् भेदा अपि न भवितुमर्हन्तीति धर्मधर्मिस्वरूपविरोधः । घटादिभेदाभावः, भेत्तव्याभावात्, गगनोदुम्बरकुसुमवत् । ततश्चात्यन्तनिरुपाख्यत्वात् स्ववचनाभ्युपगमानुमानप्रत्यक्षविरोधा अपि । § 2345

पृथिवी घटो भवति इत्यत्र यदि विशेष एव भवति तर्हि सामान्यस्याभावे विशेषोऽपि नास्त्येव । असति च विशेषे कुतः सामान्यस्यासत्प्रधानोपकारिता ? § 2346

विधि-नियमसर्वभङ्गवृत्त्यात्मकैकतत्वाधिकारे वर्तमान उभयनियमभङ्गारदर्शनेऽप्यपरितुष्यत उत्तरनयस्य नियमभङ्गस्योत्थानम् । तस्मिंस्तु दूषिते स्वमतप्रदर्शनं युक्तमिति तद्दूषणार्थमाह **--यदि भेदप्रधानो भाव** इत्यादि यावद् **धर्म-धर्मिस्वरूपविरोधः** । यद् भेदो भवति प्राधान्येन, अन्वयोऽस्योपसर्जनम् इत्युक्तं तत्र तमेवंविधं भावमवधारयामः **--कथमसौ ?** इति, स
- /ms त्वयेष्टोऽन्वयो भावो भवितुर्भेदस्य क्रिया भेदातिरेकेण भवितारं कर्तारमन्तरेण स्वरूपमपि प्राप्तुमसमर्थो निश्चयोये ? । कस्मात् ? अस्वतन्त्रत्वादकर्तृत्वादभविता, अभवितृत्वादसन् खपुष्पवत् । **तस्य** अन्वयस्य भावस्य **अभावे भेदा एव विप्रकीर्णा** भेद्यवस्तुरहिताः **स्युः** । ततश्च भेत्तव्यस्यान्वयस्याभावाद् भेदा अपि न भवितुमर्हन्ति । *भिद्यमानो हि भेदः, कुतो भिद्यतेऽसौ निर्भेद्यत्वात् खपुष्पवदिति भेदाभावाद् धर्मधर्मिणोः स्वरूपाभावे अन्वयोपसर्जनो भेदप्रधानः शब्दार्थः इत्येतद् वाक्यं निराकृतधर्मधर्मिस्वरूपकं संवृत्तम् । तदुपसंहृत्य साधनमाह **--घटादिभेदाभावः, भेत्तव्याभावात्, गगनोदुम्बरकुसुमवदिति** । उभयोर्भेत्तृभेत्तव्ययोरभावः, न गगनकुसुमादुदुम्बरकुसुम[मु]दुम्बरकुसुमाद्वा गगनकुसुमं भेत्तृ भेत्तव्यं वेति दृष्टान्तः, तथा उपसर्जनप्रधानयोः सामान्य-भेदयोरिति दार्ष्टान्तिकोऽर्थः । **ततश्चात्यन्तेत्यादि** । इत्थं **निरुपाख्यत्वाच्छून्यत्वापत्तौ स्ववचना-ऽभ्युपगमा-ऽनुमान-प्रत्यक्षविरोधा अपि** प्राप्ताः, ते चानिष्टा इति । § 2347

किञ्चान्यत्, पृथिवी घटो भवति इत्यत्र निर्धार्यम्--किं पृथिवी भवति न घटः, उत घटो भवति न पृथिवी, उभयं वा भवति, न भवति ? इति । तत्र **यदि विशेष एवेत्यादि**, सामान्यस्योपसर्जनस्याभावे विशेषोऽपि
739/mj नास्त्येवेतीदानीमेवोक्तत्वादसति च घटे विशेषे कुतः सामान्यस्यासतोऽ *

* * *

---

८ केक]
°कतत्वाधि°nayacakra-ms-bhā ।
°कत्वाधि° nayacakra-ms-ya ॥
१२ इ] दृश्यतां पृ° ७३७ पं° २ ॥
१४ र्थो] ऽनिश्चयाय ?निश्चयेन ? ऽनिश्चेयः ?निरुपाख्यः ? ॥
१७ *] विद्यमानो प्र° ॥
२८ स्याभावे] °विशेषणोवे नास्त्ये°nayacakra-ms-ya ॥
२९ नास्त्येवेतीदा] पृ° ७३८ पं° ४ ॥
२९ *]
°निरूपणाख्य°nayacakra-ms-ya ॥

अथ पृथिव्यादेरन्वयित्वं प्रवृत्तेर्भवति ततश्चोपसर्जनत्वं सामान्यस्य नास्ति । उभयस्मिंस्त्वसति स यद्यभाव एव भेदः, *तेनैव भेदेन न भूयेत अभावत्वात् खपुष्पवत् । न ह्यभावो भावो भवति । अथ भाव एव ततो भावाव्यतिरेकाद् भूतत्वादुभयथापि न पुनर्भूयेत, भूतघटादिवदाकाशादिवत् । न हि भूत एव भवति, तथाऽसत्त्वापत्तेः । यदि भूतमेव भवेत् ततस्तदसत् स्यात्, उत्पद्यमानत्वात्, अजातघटादिवत् ।

भेदेषु भवनान्वय औपचारिकः [इति चेत्], नन्वन्वयद्रव्यं स्वात्मन्येव तिष्ठति, ततश्च तदवस्थामात्रं घटादिभेदा इति घटादिभेदा एवौपचारिका इत्युक्तं भवति । यथा अङ्गुलिर्वक्रा भवति इत्युक्ते वक्रता अङ्गुलेः भेदावस्थामात्रमित्यौ-

* * *

सत्प्रधानोपकारिता ? इति । **अथेत्यादि** । अथ मा भूत् पृथिव्यादिसामान्योपसर्जनत्वे द्वयोरपि सामान्य-विशेषयोरभावदोष इति **पृथिव्यादेरन्वयित्वं प्रवृत्तेर्भवति** सत्त्वात्, **ततश्चोपसर्जनत्वं सामान्यस्य नास्ति** - /ms स्वतत्त्वव्यापित्वात् भावत्वात् प्रवर्तमानत्वाद् भेदवत्, इत्थमप्युपसर्जनत्वनिवृत्तिः । § 2348

**उभयस्मिंस्त्व**ति सामान्ये पृथिव्यां भेदे च घटे द्वयेऽपि **असति** भावेऽन्वये भवितरि च विशेषे **स यद्यभाव एव भेदो** येन भूयते भेदेन स भेद इतीष्यते **तेनैव भेदेन न भूयेत अभावत्वात्,** अभावत्वमभवनक्रियात्मकत्वात्, **खपुष्पवत् । न ह्यभावो भावो भवती**ति दृष्टान्तार्थप्रदर्शनात् । **अथ भाव एव,** मा भूदेष दोष इति अन्वयस्वभाव एवासौ भेदो भाव एवेष्यते **ततो भावाव्यतिरेकाद्** भावात्मकत्वादन्वयात्मकत्वाद् **भूतत्वादुभयथापि** प्रधानोपसर्जनत्वाभ्यां पृथिवी-घटत्वाभ्यां **न पुनर्भूयेत,** भूतत्वात्, **भूतघटादिवत् आकाशादिवद्** वैयर्थ्यात् । तद्दर्शयति **--न हि भूत एव भवती**ति । कस्मात् ? **तथाऽसत्त्वापत्तेः । यदि भूतमेव भवेत्** उत्पन्नमेवोत्पद्यते **ततस्तदसत् स्यात्, उत्पद्यमानत्वात्, अजातघटादिव**दित्यसत्त्वापत्तिः, अनिष्टा च सेति न भावो भवति नाभावो भवत्युभयं पृथिवी घटश्चेति । § 2349

**भेदेष्वि**त्यादि । स्यान्मतम्--भेदेषु घटादिष्वेव पृथक् सत्सु परमार्थतः योऽसौ भवति भवति इति **भवनान्वयः** स **औपचारिक** इति । अत्रोच्यते

---

१ *] येन भूयते भेदेन तेनैव न भूयेत इत्यपि मूलमत्र स्यात् ॥
१४ व्या] °व्यापितत्वात्° प्र° ॥
१७ एव]
भेदोप्यनुभूयतेnayacakra-ms-ya । भेदोत्यनुभूयते nayacakra-ms-bhā ॥
२२ प्र] प्राधानो प्र° ॥
२६ ना]
नाभावोnayacakra-ms-bhā । न भावो° nayacakra-ms-ya । अत्रेदमवधेयम्--लेखकप्रमादात् °ति न भावो भवति न भावो भव° इति द्विर्भावोऽप्यत्र संभवति, तथाङ्गीकारे तु अनिष्टा च सेति न भावो भवत्युभयं पृथिवी घटश्चेति इति पाठोऽप्यत्र सम्भवेत् ॥

**--नन्वन्वये**त्यादि । ननु त्वयैव स्वद्रव्ये पृथिव्यादि तिष्ठति स्वात्मन्येव ततश्च **तस्य** पृथिव्यादिद्रव्यान्वय[स्या]**वस्थामात्रं घटादिभेदा** इति घटादिभेदा - /ms एवौपचारिकाः, पृथिव्यादिसामान्यमेव तत्त्वम् इत्युक्तं भवति । किमिव ? 740/mj इत्यत आह --यथाङ्गुलि

* * *

पचारिकत्वं वक्रतायाः, नाङ्गुलेः, न हि वक्रत्वमङ्गुलिर्भवति अनुत्पन्नत्वात् खपुष्पवत् । भेदत्वाच्च रूपवत् ।

अत उक्तन्यायात् त्रिभुवनं भिन्नाभिमतमप्यभिन्नमेव द्रव्याश्रितत्वाद् भेदानाम् । पर्यायप्रवृत्तेः सर्वथैव भवनविध्यनुपपत्तिः ।

विशेषस्वरूपप्रत्यवेक्षायां भवनं स्वेनैव महिम्ना पृथग् वर्तते । तद् यदि पूर्वं भवनमस्वतन्त्रं पृथक् चावृत्ति ततो निर्मूलत्वादसन् घटः खपुष्पवत् । नापि स स्वयमेव भावः, विशेषप्रधानपक्षहानेः । नाप्यस्य भावः, ततश्च असत्त्वाविशेषात्

* * *

रित्यादि, यथा अङ्गुलिर्वक्रा भवति इत्युक्तेऽङ्गुलेरवस्था वक्रताऽङ्गुलेः सामान्यस्य भेदावस्थामात्रमित्यौपचारिकत्वं वक्रतायाः, नाङ्गुलेः । यस्माद् न वक्रत्वमङ्गुलिर्भवति, वक्रत्वस्याऽनवस्थात्वादङ्गुलेः । अङ्गुलिरेव वक्रीभवति, न वक्रतैवाङ्गुलीभवति । कस्मात् पुनर्न वक्रत्वमङ्गुलीभवति ? उच्यते **--अनुत्पन्नत्वात् खपुष्पवत्** । एवं तावदयुगपद्भाविकालभिन्नाभिमतपर्यायेषु द्रव्यमात्रत्वमुक्तम् । युगपद्भाविदेशभिन्नाभिमतपर्यायेष्वपि **भेदत्वाच्च रूपवत् तदवस्थामात्रम्** इति वर्तते । यथा घट एव चक्षुरादिग्रहणापदेशविशिष्टत्वात् रूपं रसो गन्धः इत्यादिभेदेनोच्यतेऽङ्गुलिर्वा, विज्ञानमात्रस्य तत्र भेदत्वाद् वस्तुनो घटस्याभिन्नत्वात्, एवं पृथिव्यादिसामान्यभेदा घटादयोऽश्म-सिकतादय[श्च] विज्ञानमात्रेणेति । § 2350

---

१ न] **नन्वत्वयेत्यादि**nayacakra-ms-ya । **नन्वयेत्यादि** nayacakra-ms-bhā । अत्रेदमवधेयम् अत्र यदि **ननु त्वयेत्यादि** इति प्रतीकः शुद्ध इत्यभ्युपगम्यते तदा **ननु त्वयैव तदवस्थामात्रं घटादिभेदा** इति घटादिभेदा एवौपचारिका इत्युक्तं भवति इति मूलमत्र सम्भाव्यते ॥
१ स्वा] **स्वात्मनोव**nayacakra-ms-bhā । **स्वात्मन्येन** nayacakra-ms-ya । स्वात्मनैव ? ॥
२ पृथिव्यादि] °**द्रव्यस्यावयवस्थामात्रं**nayacakra-ms-ya । अत्र **द्रव्यस्यावस्थामात्रं** इति पाठोऽपि सम्भवेत् ॥
३ भ] **भवतीति**nayacakra-ms-ya ॥
१४ अ] अङ्गुलिर्वक्रीभवति इत्यपि पाठोऽत्र स्यात्, दृश्यतां पं॰ १० ॥
१५ भेदा] **भेदवस्था**° प्र॰ । **तदवस्था**° इत्यपि पाठोऽत्र सम्भवेत् दृश्यतां पं॰ १२ ॥
१७ तैवाङ्गुलीभ] °**भवतीति**nayacakra-ms-bhā ॥
१९ त्व] **त्वयुक्तम्** प्र॰ ॥
२० त] दृश्यतां पं॰ ८, पृ॰ ७३९ पं॰ २३ ॥

किञ्चान्यत्, **अत उक्तन्यायादित्यादि** । अतीतविध्यादिद्रव्यार्थिकनयेषु एक-सर्वगत-नित्यकारणवस्तुमात्रविजृम्भितं स्तिमितसरस्तरङ्गादिव[त्] त्रिभुवनं भिन्नाभिमतमप्यभिन्नमेव, द्रव्याश्रितत्वाद् भेदानामवस्थादिसंज्ञानां पुरुषादिवादेषु प्रतिपादितत्वात् द्रव्यस्य पर्यायानाश्रितत्वाच्च । **पर्यायप्रवृत्तेरित्यादि**, इति सर्वथैव भवनविध्यनुपपत्तिरेवं पूर्वातीतद्रव्यनयदर्शनेन । § 2351

**विशेषस्वरूपेत्यादि** । तस्यापि च विशेषस्य स्वरूपं प्रत्यपेक्ष्यमाणमन्वयसामर्थ्यादृते न लभ्यते, तद्यथा--पूरयति पालयति कार्यस्यात्मनोऽवस्थादेः स्वरूपमिति कारणं भवनमन्वयः स्वेनैव महिम्ना पृथग् वर्तते भेदादृतेऽपि यथोपवर्णितमनेकधाऽतीतनयेषु । **तद् यदि पूर्वं भवनमस्वतन्त्रं पृथक् चावृत्ति** यथा त्वयेष्टं स्यात् ततः किम् ? **ततो निर्मूलत्वादित्यादि**, निर्मूलत्वा**दसन् घटः खपुष्पवत्** । स्यान्मतम्--किं घटस्य मूलेन भवनेन ? किं न स स्वयमेव भवति ? इति, एतच्च **नापि स** घटः **स्वयमेव भावः**, कस्मात् ? **विशेषप्रधानपक्षहानेः** । यदि विशेष एव भावस्ततो घट एव विशेषः, स एव भावो भवनम्, तेन भूयतेऽन्वयेन भावेनेत्यतस्तथाभावत्वाद् घटस्यापि भावमात्रं सामान्यमर्थोऽर्थः ? - /ms 741/mj

* * *

खपुष्पवदेवाविशेष इति पूर्वोक्तवदाविर्भावादिभेदानुपपत्तिविरोधाः ।

ननु विशेषः प्रत्यक्षत एवोपलभ्यते । दृश्यमानत्वेऽपि तथा तस्याभवनादसत्त्वं दृष्टम्, यथा मृगतृष्णिकागन्धर्वनगरयोः । मृगतृष्णिकागन्धर्वनगरयोर्हि प्रत्यक्षत्वेऽपि शीतादिविशेषासत्त्वादसत्त्वं दृष्टं तथा विशेषस्य प्रत्यक्षत्वेऽप्यसत्त्वम् ।

अथोच्येत--शीतादिर्जीवाजीवादिश्च विशेषो मृगतृष्णिकासलिले गन्धर्वनगरे च नास्तीति विशेषासत्त्वात् स्यादसत्त्वम्, नावश्यं विशेषे विशेषैर्भाव्यं यतो विशेषासत्त्वादसत्त्वं कल्प्येत । यदि स्युर्विशेषे विशेषा अविशेष एव स्यात्, विशेषवत्त्वात्, सद्द्रव्यपृथिव्यादिसामान्यवत् ।

अपि च वयमप्येतदेव ब्रूमः--अन्वय एव स्यादिति । स च नास्ति खपुष्पवत् ।

* * *

४ प] पर्यायाप्रवृत्तेः ? ? ॥
५ रित्या] ॰त्यादिः । अथ सर्वथैवnayacakra-ms-bhā ॥
७ प्र] प्रत्यवेक्ष्यमाण॰ ? ॥
८ ल] लभ्येतोnayacakra-ms-bhā । लभ्यते nayacakra-ms-ya ॥
१० न्त्रं] पृथक्त्वावृत्ति यथा त्वयेष्टंnayacakra-ms-bhā । पृथक्त्वावृत्तित्ते ?र्यथात्वयवेष्टं nayacakra-ms-ya ॥
११ निर्मूल] ॰त्वादि निर्मूल॰nayacakra-ms-ya ॥
१२ न] न स्वयमेवnayacakra-ms-ya ॥
१६ सा] सामान्यामर्थnayacakra-ms-bhā । सामान्यमर्थं nayacakra-ms-ya । सामान्यमेवं इत्यपि पाठोऽत्र स्यात् ॥

घटादिविशेषजातमपि । तत्प्राधान्याद् विशेषस्य भावानुरोधात् सामान्योपसर्जनविशेषप्रधानप्रति[ज्ञा]हानिः । एवं तावद् घटो भाव इत्ययुक्तम् ।
§ 2352

स्यान्मतम्--घटस्य भावो विशेषस्य सम्बन्धिनः सम्बन्धषष्ठ्या । यथा घटस्य विनष्टस्य कपालान्यभावस्य भावहेतुत्वान्निरुद्धस्य, कपालानि हि घटनिरोधहेतुकानि उत्पद्यन्ते तदुपकारित्वात् । किमिव ? यथाङ्कुरस्य बीजं निवर्तमानमुपकारीति । एतच्च **नाप्यस्य भावः** । कस्मात् ? **ततश्चासत्त्वाविशेषात् खपुष्पवदेवाविशेष इति पूर्वोक्तवदाविर्भावादिभेदानुपपत्तिविरोधा** इत्यनेनातीतं ग्रन्थमतिदिशति **यदेतदसत्त्वं नाम त्वया क्वचिद् मन्यते ततोऽन्यत् कार्यम्, तदसमर्थविकल्पत्वात्, घटपटवत् । विकल्पासामर्थ्यं चासत्कार्ययोरि**त्यादि यावत् स्ववचनादिविरोधोपसंहारेण **विशेषविरोधोऽप्रयोगप्रसङ्गात् स्वरूपविरोध** इति । § 2353

- /ms आह **--ननु विशेष** इत्यादि । सामान्योपसर्जनो विशेषः **प्रत्यक्षत एवोपलभ्यते** । तस्माद् दृष्टविरुद्धेयं कल्पनेति । अत्रोच्यते **--दृश्यमानत्वेऽपि** प्रत्यक्षव्यभिचारप्रदर्शनसाधनम् । यथा दृश्यते **तथा तस्याभवनादसत्त्वं दृष्टम्** । **यथा मृगतृष्णिके**त्यादि दृष्टान्तः । तद्व्याख्या **--मृगतृष्णिका-गन्धर्वनगरयोर्ही**त्यादि, भवनस्य पृथग्भावेन भवनात् परमार्थसत्त्वात् सलिल-नगरयोरसत्त्वं दृष्टं यथा तथा सामान्योपसर्जनतायां विशेषस्य प्रत्यक्षत्वेऽप्यसत्त्वमिति । § 2354

**अथोच्येत त्वया शीतादि**रित्यादि । मृगतृष्णिकासलिले शीत-मृदु-द्रवतादिविशेषाभावात् गन्धर्वनगरे दृश्यमानजीवाजीवविशेषधर्माभावात् स्यादसत्त्वम् । नाऽवश्यं विशेषे घटादौ पृथिवी[वि]शेषाणामश्मसिकतादिभेदैर्भाव्यं यतो विशेषासत्त्वं कल्प्येत । यदि स्युर्विशेषे विशेषा अविशेष एव स्यात्, सामान्यमेव अन्वय एव स्याद् **विशेषो विशेषवत्त्वात्, सद्द्रव्यपृथिव्यादिसामान्यवत्** । § 2355

अत्राचार्य आह **--अपि च वयमप्येतदेव ब्रूमः--अन्वय एव** अविशेषं
742/mj सामान्यमेव **स्या**दिति । *

* * *

आकृतिविशेषनिर्वृत्तौ निर्वृत्तिर्घटादीनां रूपादीनां च ।

मृगतृष्णिका त्वाकृतजलविशेषापि किं शीतादिभेदा न भवति ? भा-

---

२ इ] **इत्यतयुक्तम्** प्र° । इति न युक्तम् ? ॥
५ हेतुत्वान्निरुद्ध] **°द्धस्या** प्र° ॥
८ त्तिविरोधा] **°धादित्यने°**nayacakra-ms-ya ॥
९ य] दृश्यतां पृ° १६० पं° ४--पृ° १६१ पं° १ । तुलना--पृ° ४३० पं° १ ॥
११ स्व] पृ° १७१ पं° ३ ॥
१७ प] परमार्थतोऽसत्त्वात् ? ? ॥
१७ न] **°नगरसत्त्वं**nayacakra-ms-bhā ॥
१८ स्य] **°स्य च प्रत्य°**nayacakra-ms-bhā ॥
१८ क्ष] **°क्षत्वेव्यस°** प्र° ॥
२२ घ] **घटाघटादौ** प्र° । **घटपटादौ** इत्यपि भवेदत्र पाठः ॥
२४ स] **सद्द्रव्यपृथि°** भा । **सद्द्रव्यत्वपृथि°** nayacakra-ms-ya ॥
२७ *] पृ° १७२ पं° ३ ॥

वाभावादेव । यथा चासौ तथा घटादिर्विशेषोऽन्वयभावाभावान्नास्ति । यदि विशेष एव प्रधानं स्यात् सलिलभावानन्वितं मृगतृष्णिकादिवद् घटाद्यप्यसत् स्यात्, निरुपाख्यत्वात् इदं तत् इति नोपाख्यायेत । ततो न किञ्चित् स्यात् पृथिव्यादिसामान्येनानुपष्टब्धत्वात् खपुष्पवत् ।

तथा कस्मादुदकादिना न व्यज्यते पृथिवी विभिन्नेन ? अत्यन्तवैलक्षण्याद्वा कश्चिदेवावाच्योऽर्थः कस्मान्न स्यात्, अन्वयरहितत्वात् ?

अत एव च जीवकर्मसम्बन्धसन्तत्याख्यान्वयाभावात् संसारमोक्षाद्यनुप-

* * *

यदि तथाभवनेन विशेषेणाऽऽकृत्याख्येन विना भवेदन्वयो विशेष एव निःसामान्यः, स च नास्ति खपुष्पवत् । नापि सामान्यमेव निर्विशेषं घटादि, किं तर्हि ? **आकृतिविशेषनिर्वृत्तौ निर्वृत्तिर्घटादीनां** सामान्यभवनस्य विशेषात्माभिव्यक्तेः, तथा **रूपादीनां** रूप-रस-गन्धादिविशेष घटावस्थानात् आक्रियमाणविशेषस्य तथा तथा वस्तुनो भवनात् । § 2356

तद्वैधर्म्यं मृगतृष्णिकायामित्यत आह --**मृगतृष्णिका त्वाकृतजलविशेषापि किं शीतादिभेदा न भवति ?** इति कारणनिर्णयार्थं प्रश्नः । व्याकरणं चास्य **भावाभावादेव । यथा चासा**विति यथा मृगतृष्णिकादिर्भावाभावान्नास्ति **तथा घटादिर्विशेषोऽन्वयभावाभावान्नास्ति** । परस्य तु दोषः --**यदि विशेष एव प्रधानं स्यात् सलिलभावे**त्यादि सलिलभवनेनानन्वितं घटाद्यपि मृगतृष्णिकाकल्पमसत् स्यात् **निरुपाख्यत्वात्,** उपाख्या हि भवनप्राणिका, किमित्युपाख्यायेतेत्यत आह --**इदं तदिति नोपाख्यायेत** पृथिवी इति द्रव्यं सद् घटः इति वा । ततः किम् ? **न किञ्चित् स्यात्,** कस्मात् ? **पृथिव्यादिसामान्येनानुपष्टब्धत्वात् खपुष्पवत्** । § 2357 - /ms

किञ्चान्यत् **तथा कस्मा**दित्यादि । यदि विशेषः सामान्यनिरपेक्षः स्यात् ततो यथा घटः पटः इति वा विशिष्टया वृत्त्या पृथिव्यादि व्यज्यते तथोदकज्वलनानिलाकाशादिना कस्मान्न व्यज्यते पृथिवी विभिन्नेन अत्यन्तमन्यस्य पृथिवीद्रव्यस्य वैलक्षण्याद्वा सर्वस्य द्रव्यगणस्य व्यतिरेकेण निरन्वयो निरुपाख्यः कश्चिदेवावाच्योऽवेद्यरूपोऽर्थः कस्मान्न स्यात्, अन्वयरहितत्वात् ? § 2358

---

११ निर्विशेषं ] एतच्चिह्नान्तर्गतो **घटादि** इत्यत आरभ्य **विशेष°** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१४ आ ] **अक्रिय°** प्र° ॥
१४ विशेष ] **°षणस्य**nayacakra-ms-ya ॥
१७ चा ] **वासौ** प्र° ॥
१९ प्र ] **प्राधान्यं**nayacakra-ms-bhā । विशेषे एव प्राधान्यं स्यात् इति यद्यर्थस्तदा nayacakra-ms-bhā प्रतिपाठोऽपि सङ्गच्छते ॥
२१ किमित्युपाख्या ] **°ख्यायेत्यय** प्र° ॥
२१ नो ] **नोपाख्यायन**nayacakra-ms-bhā । **नोपाख्येयेन** nayacakra-ms-ya ॥
२६ पृ ] पृथिवीविभिन्नेन इत्यपि योजना भवेत् ॥
२६ म ] **°मन्यस्था** प्र° । **°मन्यस्मात्** इति पाठोऽत्र समीचीनः सम्भाव्यते ॥

**अत एव चेत्यादि** । यस्मादन्वयरहितस्य निरुपाख्यस्याभावस्तस्माद् मिथ्यादर्शनादिप्रत्ययजीवकर्मसम्बन्धसन्तत्याख्यान्वयाभावाद् नरकादिगतिविशेषसुखदुःखफलाख्यसंसारविशेषार्थप्रवृत्तयोः पुण्यपापकर्मणोरनुपपत्तिः, तदनुपपत्तेः संसारानुपपत्तिस्तत्प्रतिपक्षसम्यग्दर्शनादिपरिणामविशेषानुपपत्तिः, तत *

743/mj

* * *

पत्तिः, अनियततथाप्रवृत्तेः । सत्यां च तथानियतप्रवृत्तौ पृथिवी घटः इत्यन्वयप्राधान्यमेवैषितव्यम्, विशेषस्तु पृथिवीमनुवर्तते । लोके प्रधानं ह्यनुवृत्यते, न गुणः ।

सदापि विशेषानुवृत्तेरुक्तवद् नेति चेत्, एतद्वद् विशेषाभावात् ।

अतस्त्यक्तेमौ सामान्यविशेषैकान्तपक्षौ अवचनीयं वस्तु प्रतिपत्तव्यम् । नाप्यभावं न तदुपसर्जनं न भाव एव नाविशेषं न विशेषोपसर्जनं न विशेष एव नोभयोपसर्जनं नोभयप्रधानं वस्तु । अवचनीयभावविशेषकारणकार्यैकानेकप्रधानोपसर्जनं वस्तु ।

* * *

स्तत्प्राप्यमोक्षानुपपत्तिरपि, ततः शास्त्राभ्यासादिपुरुषकारानुपपत्तिः, अनियततथाप्रवृत्तेः । अथ मा भूवन्नेते दोषा इति तथानियतप्रवृत्तिरिष्यते ततः **सत्यां च तथानियतप्रवृत्तौ** जीवकर्मसम्बन्धसंसारमोक्षादिकायां जीवो नारकः संसारी मुक्तः इत्यादिवत् **पृथिवी घटः इत्यन्वयप्राधान्यमेवैषितव्यम्, विशेषस्तु** घटः **पृथिवीमनुवर्तते** जीवत्वं नारकत्वादिः । कस्मात् ? यस्माद् **लोके प्रधानं ह्यनुवृत्यते न गुणः**, गुणस्त्वनुवर्तते न प्रधानं नीलोत्पलवदिति । § 2359

- /ms

**सदापि विशेषानुवृत्तेरुक्तवद् नेति चेत्**, । स्यान्मतम्--ननूक्तम्—

अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
तस्य पूर्वमदृष्टत्वात् सामान्यादुपसर्जनात् ॥ § 2362

इत्यादिप्रपञ्चेन विशेष एव सामान्येनाऽनुवृत्यते न विशेषेण सामान्यमिति । [एतच्च न,] **एतद्वद् विशेषाभावात्**, स एव हि विशेषो नैवास्तीति पूर्वनयेषु बहुधा भावितम् । तस्मान्न विशेषैकान्तपक्षः सामान्यं शक्नोत्यत्यन्तं निवर्तयितुं नापि सामान्यैकान्तपक्षो विशेषपक्षम् । § 2363

---

५ *] °षनिवृत्तौnayacakra-ms-bhā ॥
१९ ना] नरक° प्र° ॥
२० ह्य] नुवृत्यतेnayacakra-ms-ya । °नुवृत्र्यते nayacakra-ms-bhā ॥
२३ अ] अर्थशब्दावि° प्र° । दृश्यतां पृ° ६१६ पं° ३ ॥
२५ सामान्येनाऽनु] नुवृत्यतेnayacakra-ms-ya । °नुवृत्र्यते nayacakra-ms-bhā ॥
२६ ए] एतद्वद्विशेषाभावात् प्र° । अत्र एतन्न विशेषाभावात् इत्यपि पाठश्चिन्त्यः ॥

अतस्त्यक्तेमौ सामान्य-विशेषैकान्तपक्षौ वक्ष्यमाणमनन्तरं वस्तु प्रतिपत्तव्यम् । अवचनीयं भवनविशेषाभ्यां कारणकार्यत्वाभ्यामेकानेकत्वाभ्यां प्रधानोपसर्जनत्वाभ्याम् इत्यादिभिर्विकल्पैर्विकल्प्यमानमवक्तव्यतत्त्वं वस्तु भवति । **नाप्यभावं** निरन्वयम् **न तदुपसर्जनं** भावोपसर्जनं विशेषप्रधानं वस्तु इत्यभिसंबध्यते, **न भाव एव** निराकृतविशेषः, तथा **नाविशेषं** विशेषशून्यम्, **न विशेषोपसर्जनं** सामान्यप्रधानमिति, **न विशेष एवा**ऽत्यन्ततिरस्कृतसामान्यः, **नोभयोपसर्जनं वस्तु** अत्यन्तनिराकृतस्वातन्त्र्यसामान्यविशेषम्, **नोभयप्रधानम**त्यन्तस्वतन्त्रतुल्यकक्षसामान्यविशेषम्, सर्वविकल्पेष्वेष्वभावापत्तिदोषदर्शनात् । कीदृक् तर्हि वस्तु भवति ? इत्यत आह **--अवचनीयभावविशेषे**त्यादिः समासदण्डको गतार्थ उक्तपर्यायविकल्पयुगलकैः । - /ms

§ 2364

744/mj

एवं हि भवति भवनमग्नीन्धनवत् । यथा नैकत्वम् [अग्नेरिन्धनेन सह इन्धनस्याग्निना वा सह] । यदि स्यादेकत्वमग्नेरिन्धनेन दग्धेन्धनवदग्निरिन्धनरहितत्वाद् न प्रवर्तेत, अनिन्धनस्याप्रवृत्तेश्चाभावतैवाग्नेः स्यात् । न प्रवर्तेत, एकत्वात्, दग्धेन्धनवत् । § 2365

यथेन्धनमग्निरहितमप्यनुपजाताग्निकं प्रवर्तते तथेन्धनरहितोऽप्यग्निः प्रवर्त्स्यति सूक्ष्मावस्थ इति चेत्, को वा ब्रवीति इन्धनमग्निरहितम् इति । तदपेक्ष- § 2366

एतस्यार्थस्य भावनार्थमुदाहरणम् **--एवं हि भवति भवनमग्नीन्धनव**दिति । तत्र तावदग्नीन्धनयोरेकत्वं नानात्वमुभयत्वमनुभयत्वमन्यतरप्रधानोपसर्जनता वा स्यात् ? इति विकल्प्य **सर्वथाप्यवक्तव्यतैव** इति वक्ष्यमाणो दृष्टान्तार्थः, तद्विकल्पानुपपत्तेः । § 2367

---

१ अत] °स्त्यक्षेमौnayacakra-ms-bhā । °स्तत्क्षेमौ nayacakra-ms-ya ॥
४ ना] न्याय्यभावं प्र° ॥
४ न] त तदुप°nayacakra-ms-bhā । तत्तदुप° nayacakra-ms-ya ॥
५ निराकृत] °तविशेषं प्र° ॥
६ सा] सामान्यं प्रधान° प्र° ॥
८ विक] °कल्पोष्वष्व-भावा°nayacakra-ms-bhā । °ल्पोष्वणुभावा° nayacakra-ms-ya । °ल्पेष्वभावा° इत्यपि पाठोऽत्र स्यात् ॥
१० युग] °लकेःnayacakra-ms-bhā । °लके nayacakra-ms-ya ॥
२० ए] दृश्यतां पृ° ४९२-- २ ॥
२२ वा] व प्र° ॥
२२ स] दृश्यतां पृ° ४८६-- २ ॥

तत्रैकत्वं तावन्न घटत इति ब्रूमः । कथम् ? **यथा नैकत्व**मित्यादि । तच्चैकत्वमग्नेरिन्धने [न] सह इन्धनस्याग्निना वा सह स्यात्, **सहयुक्तेऽप्रधाने** *तृतीया, इन्धनमेवाग्निरेव वा स्यात् । तन्न तावदग्नेरिन्धनेन सहैकत्वं घटते, तेनसहैकत्वात् तत्प्राधान्याद् वक्ष्यते दोषोऽसत्त्वम् । **यदि स्यादेकत्वमग्नेरिन्धनेन दग्धेन्धनवदग्निरिन्धनरहितत्वाद् न प्रवर्तेत,** यथा दग्धेन्धनोऽग्निर्न प्रवर्तते तथास्याप्रवृत्तिः । **अनिन्धन[स्याद्दृश्यतां पृ॰ ४८१-- २, ४८४-- २ ॥ऽ]प्रवृत्तेश्चाभावत्वेवाग्नेः स्यात् अस्ति-भवति-विद्यति-पद्यति-वर्ततयः सन्निपातषष्ठाः सत्तार्थाः** इति वचनात् प्रवृत्तिसत्तार्थत्वादप्रवृत्तेरसत्तापर्यायत्वात् । तदुपसहृत्य साधनमाह **--न प्रवर्तेत, एकत्वात्, दग्धेन्धनवत्** । यथा दग्धेन्धनोऽग्निरिन्धनेन सहैकत्वादिन्धनाव्यतिरेकेणाप्रवर्तमानत्वादेकत्वादप्रवृत्तेरसंस्तथाग्निरिति । § 2368

- /ms अत्राह **--यथेन्धन**मित्यादि यावत् **सूक्ष्मावस्थ इति चेत्** । यथेन्धनमग्निना सहैकत्वेऽप्यनुपजाताग्निकं प्रवर्तमानं दृष्टं तथाग्निरपीन्धनेन सहैकत्वे प्रवर्तितुमर्हति सूक्ष्मावस्थः कार्यानुमेयोऽप्रत्यक्ष इत्यर्थः । तस्मा[द]नैकान्तिकत्वादहेतुस्तदेकत्वमिति चेन्मन्यसे, अत्र ब्रूमः --***को वा ब्रवीती**त्यादि । अग्निरहितावस्थायामिन्धनत्वस्यैवाभावाद् विपक्षाभावेऽनैकान्तिकाभासता । तद्व्याचष्टे **--तदपेक्षत्वादिन्धनत्वस्य** दीपनोऽग्निरिन्धन-दीपन-दहन-भस्मीकरणार्थत्वात् तत्परिणतावेवेन्धनम् इध्यते दह्यते दीप्यते इति इन्धनमग्नित्वपरिणतावेव एकत्ववादिनो विशेषेण अतत्परिणतावग्नित्वेन्धनत्वयोर

745/mj

* * *

त्वादिन्धनत्वस्य इन्धनमग्नित्वपरिणतावेव । अदह्यमानमनिन्धनं भवति, कारकाणामेव कारकत्वात् । सूक्ष्मावस्थत्वेन च विशेषावस्थाप्राप्तिः सा सामान्य-

---

२ स] सहयुक्ते
प्रधानेnayacakra-ms-bhā । **५६५**
सहयुक्तेऽप्रधाने २ । ३ । १६ । सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । पुत्रेण सहागतः पिता । एवं साकं-सार्धं-समंयोगेऽपि ।
--nayacakra-ms-pā **सिद्धान्तकौमुदी** ॥
३ *]
तृतीयेननमेवा॰nayacakra-ms-ya ।
तृतीयेनमेवा॰ nayacakra-ms-bhā ॥
३ त] त ।
अग्ने॰nayacakra-ms-bhā । तत्र न तावदग्ने॰ ? न तावदग्ने॰ ? ॥
४ य] दृश्यतां पृ॰ ४८४-- १--२ ।
तुलना पृ॰ ४८६-- २ ॥
५ द] **दग्नेत्व+उवदग्नि॰**
nayacakra-ms-bhā । **दग्नेत्वनवदग्नि**
nayacakra-ms-ya ॥
७ अ] दृश्यतां पृ॰ ३४ पं॰ २१ पृ॰ १९० पं॰ २३ पृ॰ १९१ पं॰ ७ पृ॰ ३२४ पं॰ २७ ॥
९ प्र] **प्रवर्तेतैकत्वात्** प्र॰ । **प्रवर्तते एकत्वात् ?** ॥
१० त्वा] **॰त्वादिन्धनात्यव्यति॰** प्र॰ ।
**॰त्वादिन्धनतो व्यति॰** इत्यपि पाठोऽत्र सम्भवेत् ॥
१२ य] दृश्यतां पृ॰ ४८७-- १ ॥
१३ त] **यथा** प्र॰ ॥
१४ त]
तस्मान्नैका॰nayacakra-ms-ya ॥
१५ *] दृश्यतां पृ॰ ४८७-- १ ॥
१६ क्षाभावेऽनैकान्तिका]
॰कताभा॰nayacakra-ms-ya ॥
१८ इध्य] **इष्यते**nayacakra-ms-ya ॥
१९ वादिनो] **विशेषणातत्परिणता॰**nayacakra-ms-bhā ॥

विशेषकार्यकारणगुणप्रधानानामनन्यत्वे सिद्धे स्यात् ।

अत्रोच्येत--अग्नेरिन्धनेन सहैकत्वम् । यद्यप्यग्नेरिन्धनेन सहैकत्वादप्रवृत्तेरसत्त्वं सम्भाव्यते तथापि आदिवदिन्धनाग्न्येकत्वाद् न दोषः, दृष्टत्वात्, सहभावश्च द्विष्ठ इति ।

अथ भेदे प्रवृत्तिः कथम् ? कस्मान्नेन्धनमग्निः, दहनैकत्वात्, अन्तवत् ? अन्ते

* * *

भावात् **ञि+इन्धी दीप्तौ** पा० धा० १४४९ इति स्मृतेर्विरोधित्वाद्यानिध्यमानस्यानिन्धनत्वम् । अत आह **--अदह्यमानमनिन्धनं भवत्यनिध्यमानम्** । किं कारणम् ? **कारकाणामेव कारकत्वात्,** कर्तृ-कर्मादिशक्त्यावेशावस्थायामेव कर्तृकर्मादिकारकत्वं कारकाणामसङ्कीर्णात्मलाभं स्यात्, नान्यथा, सर्वमृद्घटादित्वप्रसङ्गात् । § 2369

यदप्युक्तम् **--सूक्ष्मावस्थाग्निरिन्धनरहित** इति, तदपि नोपपद्यत इत्येतत्प्रदर्शनार्थमाह **--सूक्ष्मावस्थत्वेन चे**त्यादि । इन्धनाव्यतिरेकेण दीप्तिसामान्यावस्थस्याग्नेः सूक्ष्मातीन्द्रियेन्धन**नीलालीना**ग्निका दीप्तिविशेषाव- - /ms स्थाप्राप्तिर्या **त्वयोच्यते** एवं गुण्यवस्थस्य गुणावस्थाप्राप्तिः कार्यावस्थस्य कारणावस्थाप्राप्तिश्च सा सामान्य-विशेष-कार्य-कारण-गुण-प्रधानानामनन्यत्वे सिद्धे **स्यात्** तथा वक्तुं युज्येत, तदपि तु चिन्त्यमेवैतेषामनन्यत्वं सामान्यविशेषाद्यवस्थयोर्भेदासिद्धेः । सिद्धश्चेद् भेदः कथमग्नीन्धनयोरेकत्वमुच्यते ? § 2370

**अथोच्येते**त्यादि । स्यान्मतं तव--नाहं ब्रवीमि अग्नेरिन्धनेन सहैकत्वम्, किन्तु **इन्धनस्याग्निना सहैकत्वम्** । तद्व्याख्या **--यद्यप्यग्ने**रित्यादि, सत्यं यथा अग्नेरिन्धनेन सहैकत्वेन कृतादेकत्वादप्रवृत्ति**र्दग्धेन्धनवत्, अनिन्धनस्य अप्रवृत्तेश्चासत्त्वं सम्भाव्यते** दोषः तथैकत्वेऽ**सत्त्व**दोषसम्भावनायां सत्यामपि अदोषत्वेऽस्ति न्यायः । तद्यथा **--आदिवदिन्धनाग्न्येकत्वात्,** इन्धनस्याग्निना सहैकत्वान्न भविष्यति दोषः । कस्मात् ? **दृष्टत्वात्,** दृष्टा हीन्धनेऽनुपजाताग्निके प्रागव्यक्तस्याग्नेः पश्चाद् व्यक्तिरुत्तराधरयोररण्योर्निर्मथनेन

---

८ स्मृतेर्विरोधित्वा ] °**त्वशानिध्य**°nayacakra-ms-ya । °**त्वा सान्निध्य**° nayacakra-ms-bhā ॥
९ अ ] दृश्यतां पृ० ४८२-- २ ॥
११ स्थाया ] °**यामपि**nayacakra-ms-ya ॥
१३ य ] दृश्यतां पृ० ७४४ पं० ५ ॥
१७ स्थाप्राप्तिश्च ] °**श्च सामान्य**°nayacakra-ms-ya ॥
१८ मेवैतेषाम ] °मन्य ? ? ? । तुलना--पृ० ४८७-- २ ॥
१९ व ] °**स्थयो भेदा**°nayacakra-ms-ya ॥
२३ य ] पृ० ७४४ पं० २ ॥
२३ अग्नेरिन्ध ] °**न्धयनेन**°nayacakra-ms-bhā । **न्धयिनेन** nayacakra-ms-ya ॥
२४ वृत्तेश्चा ] °**श्चसत्व**° प्र० ॥
२४ त ] **तथैवकत्वे**nayacakra-ms-bhā ॥
२५ आ ] **आदिधदि**° प्र० ॥

। किञ्च, यस्मात् **सहभावश्च द्विष्ठ इति, इतिशब्दस्य** हेत्वर्थत्वाद् यथा अग्निना सहेन्धनं भवत्येवमग्निरपीन्धनेन सह भवतीत्यतः प्रागग्न्युत्पत्तेः सत एवाग्नेर्व्यक्तिवदग्नावपीन्धनस्य सत्त्वमेव, अन्यथा सहभावानुपपत्तेरिति ।

§ 2371

अत्र ब्रूमः--एतदेव त्वं पृच्छ्यसे --**अथ भेदे प्रवृत्तिः कथम्** ? अग्नीन्ध-
746/mj नयोरेकत्वे को विशेष *

* * *

वेन्धनत्वापत्तिरग्नेः, इन्धनैकत्वात्, प्राग्वत् ।

विकल्पाच्चैकत्वव्याघातः । एकत्वे कुतोऽयं विशेषः--इदं न सहेदं सहेति । मथनक्रियाधारकरणाद्यनुपपत्तेश्च ।

अथापि कथञ्चिदेकत्वं तथापि एकम् एकमेव इति न वक्तव्यम्, एकत्वात्, एकदेवदत्तहस्ताद्यनेकत्ववत् । हस्तोऽप्येक एवेति न वक्तव्यः, अङ्गुल्याद्यनेकत्वात् । अङ्गुलिरपि पर्वादिबहुत्वात् । पर्वापि स्कन्धबहुत्वात् । स्कन्धोऽपि परमाणुबहुत्वात् । यावदणो रूपाद्यनेकत्वात् । रूपादेः प्रतिक्षणमन्यत्वात् । प्रतिक्षणैकस्यापि अत्यन्तानेकत्वात् ।

* * *

हेतुर्येन सहभावस्य द्विष्ठत्वात् इत्युच्यते त्वया ? अत्रानिष्टापादनसाधनमपि तद्यथा --**कस्मान्नेन्धनमित्यादि** । इतरेतरैकरूपापत्त्यभ्युपग-
- /ms माद् व्यक्तेन्धनाग्नित्वाभ्यामरण्यवस्थायामिव ज्वालावस्थायामिव च **इन्धनमग्निर[ग्निर]पीन्धनमेव स्यात्** । तत्र तावदिन्धनमग्निरेव स्यात्, **दहनैकत्वात्, अन्तवत्** अन्तकालवत् केवलाग्निकालवत् ज्वालाङ्गाराद्यवस्थावदित्यर्थः । **अन्ते** वेति तद्विपर्ययेण **इन्धनत्वापत्तिरग्ने**र्ज्वालाद्यवस्थस्य **इन्धनैकत्वात् प्राग्वत्** अरण्यवस्थावत्, अनिष्टं चैतत् ते । § 2372

किञ्चान्यत् --**विकल्पाच्चैकत्वव्याघातः** । इन्धनेन सहाग्निरेकः, अग्निना सहेन्धनम् इति विकल्पाभ्युपगमादेकत्वप्रतिज्ञाहानिः, भेदे हि सत्येतौ विकल्पौ युज्येते, तदेकत्वे विकल्पानुपपत्तेः । अतस्तद्दर्शयन्नाह --**एकत्वे कुतोऽयं**

---

१ स ] सहाभावश्च प्र° । सहासहभावश्च ?, दृश्यतां पृ° ४८४-- २, ४८५-- १, ४९२-- १ ॥
१ द्विष्ठ ] इति इति इतिशब्दस्यnayacakra-ms-bhā ॥
३ न ] °नरस्य प्र° ॥
३ भावानु ] °नुत्पत्ते°nayacakra-ms-ya ॥
५ अ ] दृश्यतां पृ° ४८८-- २ ॥
६ * ] दृश्यतां पृ° ४८७-- २ ॥
१८ क ] दृश्यतां पृ° ७५५ पं° ४ ॥
१९ मा ] °मात् । व्यत्यक्तेन्धना°nayacakra-ms-bhā । °मात् । व्यक्तत्वेन्धना° nayacakra-ms-ya । °माद् व्यक्ताव्यक्तेन्धना° ? ॥
१९ स्थाया ] °यामत्र चnayacakra-ms-ya ॥
२० द ] दहनैकस्यात्nayacakra-ms-ya । दहनैनैकस्यात् nayacakra-ms-bhā ॥
२३ चैत ] चैतत्वे प्र° ॥
२४ विक ] दृश्यतां पृ° ७५६ पं° १ ॥

**विशेषः--इदं न सहेदं सहेति** विकल्पानुपपत्तिप्रदर्शनं गतार्थं पुरुषाद्येक-कारणमात्राद्वैतवादिनामिवेति । किञ्चान्यत्, **एकत्वे मथनक्रियाधारकरणाद्य-नुपपत्तेश्च एकत्वव्याघातः** इति वर्तते, (?')अधरारणिराधारो मथनक्रियायाम्, करणमुत्तरारणिः, अतः कर्म इत्येवमादिकारकव्यापारादिभेदः सर्वो लोक-प्रसिद्धो नोपपद्यते, अग्नीन्धनयोरेकत्वात्, आकाशमथनाद्यभाववत् । दृष्टश्चैष कारकव्यापारभेदव्यवहारः, तस्मादयुक्तमेकत्वम् । § 2373

त्वगादिपर्वावयव**स्कन्धबहुत्वात्, स्कन्धोऽपि परमाणुबहुत्वात् एकमेव इति न वक्तव्यम्** इति वर्तते, **यावदणोरिति**, मू (Edtext outside numbered paragraph)र्तद्रव्यमेव पर्यन्तावधित्वात् किमणुरेक इति वक्तव्यः ? नेत्युच्यते, **अणो रूपाद्यनेकत्वात्**, रूप-रस-गन्ध-स्पर्शबहुत्वाद् रूपाद्यात्मकत्वात् । रूपं रसो गन्धः स्पर्शो वा एकः इति वक्तव्यः ? नेत्युच्यते, **रूपादेः प्रतिक्षणमन्यत्वात्**, रूपमपि क्षणे क्षणेऽन्यदन्यदुत्पद्यते विनश्यति * (Edtext outside numbered paragraph)चेत्यन्यत्वादनेकमेकत्वाद् रूपमिति न वक्तव्य (Edtext outside numbered paragraph)म् । एवं रसो गन्धः स्पर्शश्च वाच्य इति । स्यान्मतम्— देशभिन्नेषु अङ्गुलि-पर्व-त्वग्रूपादीनामनेकत्वात् एकम् **इत्यवक्तव्यं स्यात्**, कालभिन्नस्तु क्षणिक एक एव रूपाद्यन्यतमोऽसाधारणोऽर्थः किमिति एकः इति नोच्यते इति । अत्रोच्यते **--प्रतिक्षणैकस्यापि अत्यन्तानेकत्वात्**, क्षणे क्षणे ह्येकः प्रतिक्षणैकः, क्षणं क्षणं प्रति वर्तत इति वीप्सार्थकर्मप्रवचनीयत्वात् प्रतेः, सोऽप्यनेकः परस्परासङ्कीर्णरूपः केनचित् कदाचिद**सम्बध्यमानत्वाद**समानोऽसाधारणः, असमानश्चानेकः, समानत्वे ह्येकत्वं स्यात् । तस्माद**सम्बन्धादसमानत्वाद-नेकत्वेऽप्यवक्तव्य एव**, स (Edtext outside numbered paragraph)म्बद्धो ह्यर्थः सामान्येनोच्येत अयं सः इति इत्थमयम् इति वा । तत्तु नास्ति सामान्यमित्यवक्तव्यः । एवं तावदेकत्वेऽग्नीन्धनयोरवाच्यत्वमुक्तम् । § 2374

**अथापि कथञ्चिदि**त्यादि । त्वन्मतानुवृत्त्याभ्युपगम्यापि अग्नीन्धनैकत्वं **कथञ्चित्** केनचिन्न्यायान्तरेण, द्रव्यार्थिकदिशेत्यभिप्रायः । तथापि **यदेकमित्य**-भिमतं **तदेकमिति न वक्तव्यं** स्यात्, एकमेव इति न वक्तव्यमित्यर्थः । कस्मात् ? **एकत्वात्**, यत्रैकत्वं तत्र एकमेव इत्यवक्तव्यं दृष्टम्, **एकदेवदत्तहस्ताद्यनेकत्ववत्**, यथैक इत्यभिमतोऽपि देवदत्तो हस्तपादाद्यवयवबहुत्वात् एक एव इति न वक्तव्य एवमग्नीन्धनयोरिति दार्ष्टान्तिको वक्ष्यते ।

१ स] सदेहंnayacakra-ms-bhā । संदेहं nayacakra-ms-ya । दृश्यतां पृ° ७५६ पं° १ ॥
६ त] तस्मामयुक्त°nayacakra-ms-ya ॥
७ अ] तुलना पृ° ७५६ पं° ३ ॥
८ चिन्न्या] °न्नाया°nayacakra-ms-bhā । न्नया° ॥
९ त] तदेहमितिnayacakra-ms-bhā । तदेहमि nayacakra-ms-ya ॥
१२ ग्नीन्ध] °नयोरपिnayacakra-ms-ya ॥

- /ms **हस्तोऽप्येक एवेति न वक्तव्यः, अङ्गुल्याद्यनेकत्वात्,** अङ्गुलि-प्रकोष्ठ-बहिरन्तस्तलादिबहुत्वात् ।

अथ मा भूवन्नमी दोषा इत्यग्नीन्धनयोरन्यत्वमभ्युपगम्यते तेन तर्हीदमापतितम्— तस्येन्धनात् पृथग्भूतं रूपमाख्येयं यथान्येषां घटादीनां पटादिभ्यः पृथग्भूतं रूपमाख्यायते । रूपाख्यानमशक्यं कर्तुम्, न ह्यन्यदन्यसाधारणम्, अग्नेरिन्धनं पृथग् निर्देष्टुं न शक्यते सामान्यविशेषैकान्यत्वानवस्थिततत्त्वघटपटसंवृतिवत्, अनिरूप्य[माण]स्वसन्नापद्येताग्निः,

* * *

747/mj पर्वापि**अङ्गुलिरपि पर्वादिबहुत्वात्,**

* * *

अथ मा भूवन्नमी दोषा इत्यग्नीन्धनयोरन्यत्वमभ्युपगम्यते तेन तर्हीदमापतितम्— तस्येन्धनात् पृथग्भूतं रूपमाख्येयं यथान्येषां घटादीनां पटादिभ्यः पृथग्भूतं रूपमाख्यायते । रूपाख्यानमशक्यं कर्तुम्, न ह्यन्यदन्यसाधारणम्, अग्नेरिन्धनं पृथग् निर्देष्टुं न शक्यते सामान्यविशेषैकान्यत्वानवस्थिततत्त्वघटपटसंवृतिवत्, अनिरूप्य[माण]स्वसन्नापद्येताग्निः,

* * *

पर्वापि

- /ms **अथ मा भूवन्नित्यादि** । एतत्पक्षत्यागेन पक्षान्तरपरिग्रहे कारणमाचक्षाणः पक्षान्तरं ग्राहयति — **अग्नीन्धनयोरन्यत्वपक्षो निर्दोष** इति मन्यमानेनाभ्यु**पगम्यते चेत् त्वया** सोऽपि निर्दोष इति मा मंस्थाः, **तेन तर्हीत्यादि, तेन** अग्नीन्धनयोरन्यत्वाभ्युपगमेन कारणेन **इदमापतितम्--तस्याग्नेरिन्धनात् पृथग्भूतं रूपमाख्येयं** घटादेरिवाकाशस्य सौषिर्यम् । निर्दिष्टे हि पृथग्भूते रूपेऽन्यत्वं सिध्येच्छक्यं च प्रतिपत्तुम्--अयमस्मादन्य इति । किमिव ? **यथान्येषामित्यादि,** अन्येषां घटादीनामग्नीन्धनादीनामन्येभ्यः पटादिभ्यश्चान्येषाम् । तत्तु त्वया [न] शक्यतेऽग्नेरिन्धनात् पृथग्भूतं तत्त्वं दर्शयितुम् । यस्माद् **न हि अन्यदन्यसाधारणम्, हि**शब्दो यस्मादर्थे, यस्माद् घटादि पटाद्यन्यसाधारणरूपं न भवति तन्त्वादीनां तस्माच्छक्यते ततः पृथग्भूतेन तत्त्वेन निर्देष्टुम्, न तथेन्धनात् पृथग्भूतमसाधारणमग्नेस्तत्त्वं घटस्येव जलाहरणादि पटादिविलक्षणं शक्यं वक्तुम् । § 2375

स्यान्मतम्--कथं त्वयाधुना घटात् पटोऽन्यः इति विशेषेण नानात्वेन पृथिवी घटः इति च सामान्यकृतैक्येन निर्दिष्टं रूपम् ? तथाग्नीन्धनयोरपि

---

१७ अ] पृ॰ ७५६ पं॰ ५ ॥
१८ म] मन्यमानोभ्युप॰ nayacakra-ms-ya ॥
१९ सो] सोऽपि दोषnayacakra-ms-bhā । सोऽपि दोष nayacakra-ms-ya ॥
२० त] पृ॰ ७५६ पं॰ ६, पृ॰ ४९५--१ ॥
२२ तिप] ॰पत्तुमदस्माद॰ प्र॰ ॥
२३ टादीनाम] ॰मग्नीन्धनादिभ्यः पटादिभ्यश्चान्येषाम् । न तु त्वया शक्यते॰ ? ॥
२७ म] ॰मग्नेस्तत्रंnayacakra-ms-bhā । ॰मग्नेः सूत्रं nayacakra-ms-ya ॥

शक्यत एव वक्ष्यमाणं दाह्यदाहकत्वादीति । 748/mj

* * *

अनिन्धनत्वेऽरूपत्वात्, खपुष्पवत् ।

अथोच्येत--यदेतज्ज्वाला देशे । तद्वा कुतोऽनिन्धनम् ? यदि स्याद-निन्धनोऽग्निः सततमेव निरवशेषदग्धेन्धनोऽपि भवेत्, अग्नित्वात्, ज्वालावत् ।

अथोच्येत--यद्यप्यग्नेरिन्धनेन सहान्यत्वं नास्ति तथापि इन्धनस्य अग्निना सहान्यत्वमस्ति दृष्टत्वात् । दृष्टं हीन्धनमग्निविनाभूतमपि यथेन्धनमाहरति काष्ठमाहरतीति ।

तद्विषय एवैष उपचारः । तदन्यत्वे स नैव स्यात् । अत एव तु इन्धनत्वं सिध्यत्यु-

* * *

अत्रोच्यते--न मम किञ्चिदवक्तव्यवादिनः सामान्य-विशेषाद्येकत्व-नानात्वाभ्यां व्यवस्थितमस्ति वस्तु किञ्चित्, किं तर्हि ? त्वन्मतानुवृत्त्या प्रतिपादनार्थं संवृत्या **सामान्य-विशेषैकत्वान्यत्वाभ्यां पृथिवीघटपट**वत् इत्युदाहियते, न मन्मतेन, मन्मतेन तु तावनवस्थिततत्त्वावेवेति तत् प्रदर्शयन्नुदाहरति-- **सामान्य-विशेषे**त्यादि, सामान्य-विशेषयो**रेकत्वान्यत्वाभ्यामनवस्थितं तत्त्वं** ययोस्ताविमौ - /ms **घटपटौ सामान्यविशेषैकान्यत्वानवस्थिततत्त्वघटपटौ**, तयोः **संवृतिः** उपचारः, अभ्युपगत्य परकल्पनेन **उदाहरणम्**, तया तुल्यं **संवृतिवत्**, यथा संवृत्या घटपटाविष्टावपि असाधारणरूपौ निर्दिश्येते न तथाग्नीन्धने इत्यर्थः । तस्मादनिरूप्योऽनिरूप्य[माण]**स्वसन्नापद्येत अग्निः**, कस्मात् ? **अनिन्धनत्वे सति अरूपत्वात् खपुष्पवत्**, उपादानस्वरूपात् पृथगनिरूपितात्मरूपत्वादित्यर्थः । घट-पटादिष्वप्येतत् साधनम्--अमृत्त्वे सति अरूपत्वाद् घटोऽसन् खपुष्पवत्, अतन्तुत्वे सति अरूपत्वात् पटोऽसन् खपुष्पवदित्यादि योज्यम् ।

§ 2376

**अथोच्येत--यदेतज्ज्वाला देशे** । अथाचक्षोथास्त्वम्--इन्धनात् पृथगग्नेरस्ति रूपम्, तद्यथा— **ज्वाला गगनदेशे** । तस्माद् मयाऽऽख्यातं ते पृथगिन्धनादग्निरूपम् । तस्मादरूपत्वासिद्धेर्नासत्त्वमिति । अत्र ब्रूमः **--तद्वा कुतोऽनिन्धनम् ? यत्तज्ज्वालारूपमग्नेर्**गगनदेशे **तदपीन्धनसहितमेव**, अग्नित्वपरिणतेन्धनपुद्गलानामाकाशदेशेऽवस्थानाज्ज्वालाधृतेः । न ज्वाला अनिन्धना, अग्नित्वात्, अङ्गाराद्यग्निवत् । वैद्युतस्यापि उदकेन्धनत्वान्नानैकान्तिकत्वम् । अतोऽग्निरिन्धनात् पृथग्भूतो नास्ति । यावच्चेन्धनं तावदेवाग्निः, निष्ठितेन्धनो विध्यात इत्युच्यते । तस्मान्नेन्धनात् पृथगग्निर्वक्तुं शक्यः । एवमनिच्छतो दोष

१३ विशेषा]
°षादेकत्व°nayacakra-ms-ya ॥
१६ सा] पृ° ७५७ पं° १ ॥
२६ अ] पृ° ७५७ पं° ३, ४९५--१ ॥
२८ रूप] °त्वसिद्धे° प्र° ॥
२९ य]
यत्वज्वाला°nayacakra-ms-bhā ।
यत्र ज्वाला° nayacakra-ms-ya ॥

उच्यते--**यदि स्यादनिन्धनोऽग्निः सततमेव निरवशेषदग्धेन्धनोऽपि** मुर्मुराद्य-
- /ms वस्थो- त्तरकालमपि **भवेत्, अग्नित्वात्, ज्वालावत्** । अनिष्टं चैतत् । एवं तावत् पूर्वोक्तैकत्ववदिन्धनेन सहाग्नेरन्यत्वं न वक्तव्यम् । § 2377

**अथोच्येते**त्यादि विकल्पान्तरं पूर्ववत् । इन्धनस्यान्यत्वं हुतवहात्, **दृष्टत्वात्,** लोके हि दृष्टम्— इन्धनमाहरति काष्ठमाहरतीति, न हि दृष्टाद् गरिष्ठं प्रमाणमस्ति । ग्रन्थश्च **यद्यप्यग्नेरि**त्यादि याव**दाहरती**ति गतार्थः पूर्वपक्षः ।
749/mj अत्रोत्तरम् --**तद्विषय एवैष उपचारः,** अग्नित्वपरिणतिकाल

* * *

पचारतः, गौणस्य मुख्यमूलत्वात् । ञि+इन्धी दीप्तौ पा॰ धा॰ १४४९ इति दीप्तिस्वभावोऽग्निरेवेन्धनम् । पूर्वोक्ताच्च तद्वृत्तित्वात् स्वात्मवद् नान्यत्वम् ।

काष्ठशब्दव्यवहारेऽपि अग्निकाष्ठयोरन्यत्वव्याघातः । यदायं तदा ततोऽन्यो नास्ति । ननु यदैव काष्ठमनग्निकं दृष्टं तदैवान्यत्वम् । अथाभेदवृत्तिरन्यत्वे न प्राप्नोति ।

* * *

सिद्धयथार्थेन्धनत्वं मुख्यमपेक्ष्य तद्विषयमग्न्यपरिणतेऽपि दारुणि इन्धनत्वमुपचाराद् भवति । **तदन्यत्वे** अग्नीन्धनान्यत्वे **स** उपचारो **नैव स्यात्,** मुख्येन्धनाभावात्, खरविषाणतीक्ष्णकुण्ठादिसाधर्म्याभावे तदुपचाराभावात् ।
§ 2378

**अत एव त्वि**त्यादि । अग्निपरिणतदारुमुख्येन्धनत्वादेव तदपरिणतावपि इन्धनत्वं सिध्यत्युपचारतः, कस्मात् ? गौणस्य मुख्यमूलत्वात्, सिद्धे हि मुख्ये सिंहे शौर्य-क्रौर्यादितत्साधर्म्याद् माणवकः सिंह उच्यते नासति मुख्ये सिंहे । चित्रकरादिवद्वा, चित्रालेखनादिक्रियापरिणत्यवस्थालब्धचित्रकरत्वव्यपदेशो नासति तत्क्रियापरिणामे । तस्याग्नित्वपरिणतावेवेन्धनत्वसंवादिनीं स्मृतिं ज्ञापिकामाह --**ञि+इन्धी दीप्तौ** पा॰ धा॰ १४४९ इति, ननु स्मरन्त्यभियुक्ताः वैयाकरणाः शब्दार्थसम्बन्धज्ञा **दीपन इत्यग्निम्,** दीप्तिस्वभावोऽग्निरेवेन्धनं दीप्त्यर्थत्वादिन्धेः । § 2379

- /ms किञ्चान्यत्, **पूर्वोक्ताच्च तद्वृत्तित्वात् स्वात्मवद् नान्यत्वम्** । यथा प्रागेकत्वे **यद्यग्निरिन्धनेन सहैकः स्यात् ततो दग्धेन्धनवदेकस्याप्रवृत्तेरभावतैव स्या**दित्यादि ग्रन्थोक्तेन न्यायेनैकत्वं निषिद्धं यावत् **सहासहत्वद्विष्ठत्वा**दिति, तथा अन्यत्वे **दग्धेन्धनवदन्यस्या**प्रवृत्तेरभावतैव **स्या**दित्यादिस्तुल्यार्थगमविशेषेण

४ अ] पृ॰ ७५७ पं॰ ३ ॥
६ याव]
॰दाहतीतिnayacakra-ms-bhā ।
॰दाहेतीतिnayacakra-ms-ya ॥
१६ चाराभा] ॰भाववत् इति पाठोऽत्र समीचीनो भाति ॥
१९ सि]
सिध्यन्नुपचारःnayacakra-ms-ya ॥
२० शौ]
सौकर्यादि॰nayacakra-ms-ya ॥
२५ त्वा] ॰दिन्धः प्र॰ ॥
२६ त] तद्वृत्तित्स्वात्मवद् प्र॰ ॥
२७ य] पृ॰ ७४४ पं॰ २ ॥
२८ स] पृ॰ ७४५ पं॰ ५ ॥
२९ त्यादिस्तु]
॰स्तुत्योर्धगम॰nayacakra-ms-bhā ॥

ग्रन्थो योज्यः, अन्यत्वेऽप्यभावापत्तिसाम्यात् । **स्वात्मवद् नान्यत्वमि**ति, अग्निस्स्वात्माऽग्नेर्यथान्यो न भवति तथा तदिन्धनमपि, **तद्वृत्तित्वात्,** तस्य वृत्तिस्तद्वृत्तिः, सैव वा वृत्तिस्तद्वृत्तिः, तद्वृत्तिरेव वृत्तिरस्य तद्वृत्तिरग्निः, दीप्तिरेवेन्धनत्ववृत्तिः, दीप्तिरूपवृत्तित्वादग्नेरेवेन्धनमग्न्यात्मवत् । **अदह्यमानं हीन्धनमेव न भवति कारकाणामेव कारकत्वा**दित्यादि व्याख्यातत्वात् । एवं तावदिन्धनोदाहरणेऽग्न्यन्यत्वव्याघात उक्तः । § 2380

काष्ठोदाहरणेऽपि तद्यथा **--काष्ठशब्दे**त्यादि । काष्ठशब्दव्यवहारेऽपि अग्निकाष्ठयोरन्यत्वं व्याहन्यते, तद्यथा **--यदायमि**त्यादि, काष्ठेन्धनोऽग्निस्ततोऽन्यो नास्ति स्वेन्धनात् । वैद्युतोऽप्युदकेन्धनपृथग्भूतो नास्ति । अत्राशङ्का **--ननु यदेव काष्ठमनग्निकं दृष्टं तदा** तेना[ग्निना]विना दृष्टत्वादन्यत्वसिद्धिरिति । अत्र वयं ब्रूमः **--अथाभेदवृत्तिः** दृष्टा हीयमभेदवृत्तिः दीप्यमानं काष्ठमिन्धनम् 750/mj

* * *

कस्मान्नाग्निः काष्ठं काष्ठं वाग्निः प्राग्वत् पश्चाद्वद्वा [त]दन्यत्वात् ? यदि काष्ठं कथमनग्नि ? काशृदीप्तौ पा॰ धा॰ ६४७, ११६२ इत्यशेषविरोधाः ।

दारुण्यपि शोधनावखण्डनार्थयोस्तावत् सिद्धमेव । दान-रक्षणार्थयोरसम्भवात् तदर्थदारु त्वनुदाहरणम्, अनिन्धनत्वादाकाशवत् ।

सहासहभवनं द्विष्ठत्वात् सिद्धे ह्यन्यत्वे स्यात् । तत्तु न सिद्धम् ।

* * *

इति, सा चाभेदवृत्तिरन्यत्वे **न प्राप्नोति,** अदीप्यमानाकाशेन्धनत्वाप्राप्तिवत् । **कस्मादि**त्यादि परस्पररूपापादनेनानिष्टापादनं यथासङ्ख्यं **प्राग्वत् पश्चाद्वद्वा [त]दन्यत्वादि**ति गतार्थं साधनद्वयम् । § 2381

किञ्चान्यत् **--यदि काष्ठं कथमनग्निः ?** काशनात् काष्ठमग्नित्वमेव काशनाद् दीपनादङ्गनात्, नान्यथा । तस्मात् काष्ठमनग्नि तत् इति स्ववचनविरोधः । तथा इन्धनमनग्नि इत्यपि स्ववचनविरोधः, यस्मात् काष्ठं नियमादग्निः अग्निरपि नियमात् काष्ठमेवमिन्धनमग्निश्च, ततः स्ववचनविरोधः । - /ms
तद्भावनार्थं तदर्थसंवादिनीं स्मृतिं ज्ञापिकामाह **--काशृ दीप्तौ** पा॰ धा॰

३ वृ] वृत्तितस्यnayacakra-ms-bhā ॥
४ त्व] ॰वृत्ति दीप्ति॰ प्र॰ ॥
४ अ] पृ॰ ७४५ पं॰ १ ॥
८ य] पृ॰ ७५८ पं॰ २ ॥
१० म] ॰मनग्नित्वं[[सिध्यन्नुपचारःnayacakra-ms-ya ॥]] दृष्टं प्र॰ ॥
१० तेना] तेन विना इत्यपि शोभनः पाठः ॥
२० क] कस्माद्वित्यादि प्र॰ ॥
२२ क] कथमनग्नि ? ॥
२४ इ] इन्धनमग्नीत्यपिnayacakra-ms-ya । इन्धनग्नीत्यपि nayacakra-ms-bhā ॥
२५ ग्निश्च] ॰श्चे प्र॰ ॥
२६ ज्ञा] ज्ञापका॰nayacakra-ms-bhā । ज्ञापक॰ nayacakra-ms-ya ॥
२६ का] कासृ॰ प्र॰ ॥

६४७, ११६२ काशतेरौणादिके कर्तृवाचिनि क्थन्प्रत्यये काष्ठम् इति रूपसिद्धेरित्यस्माद्धेतोरशेषविरोधाः । तथा दृष्टत्वात् प्रत्यक्षविरोधः । लोके रूढत्वाद् रूढिविरोधः । एवमनुमितत्वादनुमानविरोधः । तथाभ्युपगमादभ्युपगमविरोध इति । § 2382

किं दारुण्यपि शक्यमित्थं भावयितुम् ? **दाञ् दाने** पा॰ धा॰ १०९१ देञ् **रक्षणे** पा॰ धा॰ ९६२ **दो अवखण्डने** पा॰ धा॰ ११४८ **दैप् शोधने** पा॰ धा॰ ९२४ इत्येतेषां चतुर्णामन्यतमस्य रुप्रत्ययान्तस्य दारु इति रूपसिद्धेः । को हि नाम शक्यं न शक्नुयाद् वक्तुम् । **शोधनावखण्डनार्थयोस्तावत् सिद्धमेव, दह भस्मीकरणे** पा॰ धा॰ ९९१ एकार्थत्वात् तथापि **दानरक्षणार्थयोरसम्भवात् तदर्थदारु त्वनुदाहरणम्,** तन्नोदाहरणत्वेन विवक्ष्यते । कस्मात् ? **अनिन्धनत्वादाकाशवत्,** दीप्त्यर्थासम्भवाद् दारुशब्दस्याविवक्षितत्वाददोषोऽत्र गगनाविवक्षावत् । § 2383

किञ्चान्यत्, **सहासहेत्यादि** । सहभवन[म]सहभवनमित्येतद् द्वयमपि द्विष्ठम्, अतो यद्येकं काष्ठम[ग्निना]ग्निर्वा काष्ठेन अथ नाना सर्वथाप्यनयोरन्योन्याविनाभाविनोर्भवति एतत्, तत्तु द्वयमेकमन्यदिति वा न शक्यते वक्तुम्, तस्मान्न तदन्यत् । § 2384

751/mj

अथापि कथञ्चिदन्यत्वम्, अन्यत् अन्यदेव इति न वक्तव्यम्, अन्यत्वात् हस्ताद्यन्यानन्यदेवदत्तवत्, यावद् रूपादिक्षणान्तरान्यानन्यपरमाणुवत् । § 2385

अभावस्तर्हि ते, अग्न्यनग्नित्वव्यावृत्तेः, खपुष्पवत् । ननु भिन्नव्यवस्थानलक्षणत्वादनुभयत्वमपि न वचनीयम् । यदि [दा]ह्यदाहकत्वलक्षणनियमो न स्यात् ततोऽग्निरपि § 2386

**अथापि कथञ्चिदित्यादि** । पूर्ववदभ्युपेत्य त्वन्मत्या **अन्यत् अन्यदेव इति न वक्तव्यम्, अन्यत्वात्, हस्ताद्यन्यानन्यदेवदत्तवत्,** हस्ता-ऽङ्गुलि-

- /ms पर्व-त्वक्-स्कन्ध-परमाणु-रूप-रस-क्षणिकत्वाद्यन्यत्वेऽपि देवदत्त एवैकस्तथा

---

१ क्थ] थन्प्र॰ प्र॰ ।
हनि-कुषि-नी-रमि-काशिभ्यः क्थन् पा॰ उणादि २ । २ । हथो विषण्णः । कुष्ठः । नीथो नेता । रथः । काष्ठम् ।(?")
--nayacakra-ms-pā सिद्धान्तकौमुदी ॥
२ स्माद्धेतोर] ॰रशेषः विरोधाःnayacakra-ms-bhā ।
॰रशेषः विरोधः nayacakra-ms-ya ॥
२ लो] लोकेनnayacakra-ms-ya ॥
७ रु] कप्रत्य॰ प्र॰ ।
दा-धेट्-सि-शद-सदो रुः । ३ । २ । १५९ । दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ।
--nayacakra-ms-pā सिद्धान्तकौमुदी ॥
१० त्व] ॰त्वमुदाहरणं तन्नोदारुत्वेन प्र॰ ॥
१३ स] पृ॰ ७९८ पं॰ ४ ॥
१५ ए] एततु । तत्तु प्र॰ ॥
२३ अ] पृ॰ ७५९ पं॰ १ ॥
२४ ह] पृ॰ ७४६ पं॰ ५ ॥
२५ स्त] ॰स्तथा मर्थ गृह्यतेnayacakra-ms-ya ॥

तथा गृह्यते चक्षुरादिव्यपदेशविशिष्टरूपाद्यात्मकघटवत् सम्बन्ध्यन्तरापेक्षविशिष्टपितृत्वादिव्यपदेशात्मकदेवदत्तवच्च स एवैकः, अन्यथा तदेकत्वाभावे तद्भेदाभावाद् भेदास्त एव अन्ये इति वक्तुमशक्याः, देवदत्तात्मकत्वाद् घटाद्यात्मकत्वाच्च, तत्प्रतिपादनोपायप्रदर्शनो ग्रन्थः **--यावद् रूपादिक्षणान्तरान्यानन्यपरमाणुवदि**ति भावनोदाहरणं भावितार्थमेवमन्यत्रापि घटादौ भावयितव्यमिति । § 2387

अत्राह **--अभावस्तर्ही**त्यादि । *ते अग्नीन्धने न **स्तस्तर्हि,** कस्मात् ? **अग्न्यनग्नित्वव्यावृत्तेः,** व्यावृत्ताग्न्यनग्नित्वादित्यतः एकत्वेऽग्निरेवेन्धनम् अन्यत्वेऽनग्निः । तथा इन्धनानिन्धनत्वव्यावृत्तेः इत्यपि भवति हेतुः तत्पर्यायार्थत्वात्, **खपुष्पवत्,** यथा खपुष्पं नाऽग्निर्नानग्निः तदेकत्वानेकत्वव्यावृत्तेरसच्च तथा अग्नीन्धने [नतथा अग्नीन्धने असती स्याताम् इत्यर्थविवक्षायां न इत्येतदनावश्यकम् ॥] स्याताम्, उभयमपि नेत्यर्थः । § 2388

अत्र वयं ब्रूमः **--ननु भिन्ने**त्यादि । एत**दप्यनुभयत्वं न वचनीयम्,** कस्मात् ? **भिन्नव्यवस्थानलक्षणत्वात् । भिन्नं** विविक्तमसङ्कीर्णं **व्यवस्थानं** काष्ठमेवेदं दाह्यशक्त्यादिलक्षणम्, अग्निरेवायमौष्ण्यदाहकादिलक्षणः इति, तदेव व्यवस्थानं चिह्नं लक्षणमस्य उभयस्य, तद्भावाद् **भिन्नव्यवस्थानलक्षणत्वात्** संवृतिसद्घट-पटवद् नानुभयत्वम् । तस्माल्लक्षणसद्भावाद् नास्ति इत्यप्यवचनीयमेव । § 2389

दग्नित्वादित्यतो दहनमन्तरेणैव पाकः स्यात्, न तु भवति । तदुपसंहरति **--इत्यनुभयताप्यवक्तव्यैवे**ति । अनुभयं चेन्नास्ति उ (Edtext outside numbered paragraph)**भयमस्ति तर्हि,** तच्चोभयं **भिन्नव्यवस्थानवृत्तम् ।** § 2390

स्यान्मतम्--दाह्यदहनादिलक्षणत्वासिद्धिः, तल्लक्ष्यधर्म्यसिद्धेरिति । एतच्च न, यस्मात् सिद्धं सत्त्वं धर्म-धर्मिणोरिति तत्प्रसाधनार्थमाह **--यदि [दा]ह्यदाहकत्वे**त्यादि । यदि दारु दाह्यमेव, दाहकोऽग्निरेव इति लक्षणनियमो न स्यात् तयोर्व्यवस्थित**स्ततोऽग्निरपि दह्येत काष्ठवत्, पच्येत ओदनवत्** पाच- - /ms कत्वलक्षणाव्यवस्थानात् पाक्यत्वात्, ततो **भुज्येत च** ओदनवदेव **पृथक्,** अनिष्टं चैतत् । तस्माद् व्यवस्थितं पाचकदाहकत्वादिलक्षणमग्नेः । **तथेन्धनमपि** दाह्यपाक्यादिव्यवस्थितभिन्नलक्षणं यदि न स्यात् **पृथगेव दहेद्** विनापि अग्निना काष्ठतृणादि संहतम्

---

७ अ] पृ० ७५९ पं० ३ ॥
७ *] तेग्नी° nayacakra-ms-ya । भेग्ऽनी° nayacakra-ms-bhā ॥
८ ग्नित्वा] °दित्यःnayacakra-ms-bhā । अत्र °दिभ्यः इति पाठोऽपि भवेत् ॥
९ इ] **इन्धननिबन्धनत्व°** प्र° ॥
१३ न] पृ० ७५९ पं० ४ ॥
१७ संवृतिस] **°सन्घट°** प्र° ॥
२० य] पृ० ७५९ पं० ४ ॥
२१ दाह] °हकश्चेत्यादिnayacakra-ms-bhā ॥
२५ पा] °पाक्यदि°nayacakra-ms-bhā । °पाकादि° nayacakra-ms-ya ॥

दह्येत काष्ठवत्, पच्येत ओदनवत्, भुज्येत च पृथक्, तथेन्धनमपि पृथगेव दहेत्, पचेच्चोदनादिकमग्निवदित्यनुभयताप्यवक्तव्यैव । भिन्नव्यवस्थानवृत्तमुभयमस्ति ।

भिन्नव्यवस्थानवृत्तोभयत्वानभ्युपगमे तु सर्वात्मकैकभाव एवात्यन्ताभाव एव वोभयत्वं स्यात् ।

अनुभयप्रतिषेधादुभयत्वमिति चेत्, न, अन्यत्वावक्तव्यत्वात् ।

अन्यत्वप्रतिषेध एकत्वमिति चेत्, न, तस्याप्यवक्तव्यत्वात् ।

एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एव । तस्मात् सर्वथाप्यवक्तव्यतैव ।

* * *

752/mj **मग्निवपचेच्चोदनादिक**

* * *

दह्येत काष्ठवत्, पच्येत ओदनवत्, भुज्येत च पृथक्, तथेन्धनमपि पृथगेव दहेत्, पचेच्चोदनादिकमग्निवदित्यनुभयताप्यवक्तव्यैव । भिन्नव्यवस्थानवृत्तमुभयमस्ति ।

भिन्नव्यवस्थानवृत्तोभयत्वानभ्युपगमे तु सर्वात्मकैकभाव एवात्यन्ताभाव एव वोभयत्वं स्यात् ।

अनुभयप्रतिषेधादुभयत्वमिति चेत्, न, अन्यत्वावक्तव्यत्वात् ।

अन्यत्वप्रतिषेध एकत्वमिति चेत्, न, तस्याप्यवक्तव्यत्वात् ।

एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एव । तस्मात् सर्वथाप्यवक्तव्यतैव ।

* * *

मग्निव

अथैवं नाभ्युपगम्यते ततो ***भिन्नव्यवस्थानवृत्तोभयत्वा[न]भ्युपगमे तु** प्राप्तं कीदृगुभयम् ? तद्यथा --**सर्वात्मकैके**त्यादि एकं सर्वात्मकं नित्यं सर्वगतमनुत्पादव्ययं काल-नियति-स्वभावप्रधान-पुरुषादीनामन्यतमद् भावतत्त्वमसदलीकनिरुपाख्यमवस्तु अत्यन्तासत् खपुष्पादि वेत्येत**दुभयं स्यात्**, एकत्वान्यत्वानुभयत्वाभावे गत्यन्तराभावात् । तच्च न भवति, निष्ठितत्वादेषां पक्षाणाम् । § 2391

**अनुभयप्रतिषेधादुभयत्वमिति चेत्** । स्यान्मतम्--अनुभयमुभयाभावोऽसत्त्वम् असत्त्वस्य प्रतिषिद्धत्वादुभयं तत्प्रतिपक्षः **सती एव द्वे वस्तुनी** भवितुमर्हत इति । तदपि **न, अन्यत्वावक्तव्यत्वात्**, एतदुभयत्वमन्यत्वमेव परस्परभिन्नलक्षणे अग्नीन्धने अन्योन्यस्मादन्ये इति, तच्चान्यत्वं विचारितम्— असदेव इति

२३ *] पृ० ७६० पं० १ ॥
२४ प्रा] प्राप्त की० प्र० ॥
२६ स] ०सदनीहनिरु० प्र० ॥
२९ अ] पृ० ४९२--२ ॥
३२ विचारित] ०ततम् प्र० ॥

। तस्मादस्याप्यवक्तव्यत्वमसत्त्वात् । अवक्तव्यत्वान्नानुभयत्वप्रतिषेधादुभयत्वम् । § 2392

**अन्यत्वप्रतिषेध एकत्वमिति चेत्** । स्यान्मतम्--अन्यत्वप्रतिषेधे तर्हि एकत्वमेव सिध्यतीति । एतच्च **न, तस्याप्यवक्तव्यत्वात्,** एकत्वस्याप्यसत्त्वस्य - /ms
उत्पततैव मयोक्तत्वादवक्तव्यतैव । इत्थमेकत्वान्यत्वोभयत्वानुभयत्वानि प्रतिषिद्धानि । § 2393

स्यादाशङ्का--सामान्यविशेषयोरग्नीन्धनयोश्चैकत्वाद्यभावेऽपि अन्यतरप्रधानोपसर्जनतया प्रवृत्तेरस्तु वक्तव्यतैवेति । एतच्चायुक्तम्, एकत्वाद्ययुक्तिवत् तदयुक्तेरिति तदतिदिशन्नाह **--एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एवेति** । यस्मादेतयोः सामान्यविशेषयोरप्रवृत्तेरग्नीन्धनयोश्चासत्त्वमेवैकत्वान्यत्वपक्षयोरिति प्रतिपादितं तस्मादनयोरसतोः का प्रधानोपसर्जनता खपुष्पवन्ध्यासुतयोरिव ? सा हि सतोरेव स्वामिभृत्ययोर्दृष्टेति । किञ्च, अन्यत्वपक्ष एवैषा प्रधानोपसर्जनता युज्यते, स च निषिद्धः । अग्नीन्धनयोश्च प्रवृत्तेरेतावतां गतिः 753/mj

* * *

एवं यद्येकत्वं विशेषस्य भावेन नान्यता, ततोऽनात्मनो भावस्य खरविषाणवदप्रवृत्तेरभावतैव स्यात् । न प्रवृत्तिः, अनात्मत्वात्, खरविषाणवत् ।

ननु यथा विशेष एकोऽपि रूपरसादिर्घटपटादिर्वा भावरहितः प्रवर्तते तथा सूक्ष्मावस्थ एकको भावः प्रवर्त्स्यतीति चेत्, को वा ब्रवीति विशेषो भावरहित इति ? विशिष्यते विशेष इति सत एव विशेषत्वात् तदपेक्षत्वाच्च विशिष्यते स तस्मात् तेन वा स इत्यादिना । अविशिष्यमाणोऽविशिंषन् वा न विशेषो भवति, कारकाणामेव कारकत्वात् । को वाऽऽश्वासो विशेष एकैक एव प्रवर्तते इति संवृतिसद्धटपटवत् ?

* * *

स्याद् यदुत एकत्वं नानात्वमुभयत्वमनुभयत्वमग्न्युपसर्जनमिन्धनप्रधानत्वमिन्धनोपसर्जनमग्निप्रधानत्वमिति, सर्वथापि न घटते, **तस्मात् सर्वथाप्यवक्तव्यतैवेति** दृष्टान्तवर्णनमिदं कृतम् । § 2394

**एवमित्यादि** प्रस्तुतसामान्यविशेषादिदार्ष्टान्तिकवर्णनार्थ उत्तरो ग्रन्थः । सामान्यविशेषयोस्तावत् तद्यथा--**यद्येकत्वं विशेषस्य** घटादेर्**भावेन** अन्वयेन पृथिव्यादिना, किमुक्तं भवति ? सामान्यमेव निर्विशेषं भवत्येकमित्यतस्तत्प्रदर्शनार्थमाह **--नान्यतेति** । ततः किम् ? **ततोऽनात्मनो भावस्य** - /ms
अश्मसिकतामृल्लोष्टवज्रादिघटादिविशेषात्मकलाभरहितस्यानात्मत्वं पृथिव्यादेः

१ त्व] °त्वमसत्वमसत्वादव्यक्तव्यानुभयत्वप्रतिषेधावुभयत्वम् nayacakra-ms-bhā । °त्वमसत्वादव्यक्तव्यच्चानुभयत्वप्रतिषेधावुभयत्वम् nayacakra-ms-ya ॥
२४ मुभ] °भयत्व+अनु°nayacakra-ms-ya । °भयत्वा+अनु° nayacakra-ms-bhā ॥
२८ य] पृ° ७६० पं° १७ ॥
२९ त्येक] °कमित्येत° प्र° ॥

सामान्यस्य, अनात्मत्वाच्च खरविषाणवदप्रवृत्तिः, **अप्रवृत्तेरभावतैव स्यात् खरविषाणवदेव** । तत् साधनेन दर्शयति --**न प्रवृत्तिरिति** गतार्थम् । § 2395

**ननु यथेन्धने**त्यादि स एव **ननु यथा विशेष एकोऽपि** इत्यादिः पूर्वपक्षः । किन्तु रूपादियुगपद्भाविपर्यायं विशेषवादिनं प्रति सिद्धमुदाहृत्य भाववादी त्वन्मते तत्प्रवृत्तिवद् मन्मते **सूक्ष्मावस्थ एकको भावः प्रवर्त्स्यति** इति ब्रूयात् । अत्रावक्तव्यवादी स्वमतेनोत्तरं ब्रूते --**को वा ब्रवीती**त्यादि निःसामान्यविशेषप्रवृत्त्यभावापादनेन दृष्टान्तासिद्धिं वर्णयति । **सत एव विशेषत्वात्,** सन्नेव विशेषीभवति सामान्यमेव नासत् खपुष्पादीत्यर्थः । **तदपेक्षत्वाच्चे**ति, रूपं रसाद् विशिष्यमाणं सम्बन्धिरसमपेक्ष्य विशेषो भवति, तथा रसोऽपि रूपम्, *घट-पटौ चाऽन्योन्यम्, नात्यन्तासत् खपुष्पममपेक्ष्येति । तद्दर्शयति कारकव्याख्यया **विशिष्यते स तस्मात् तेन वा स इत्यादिना** । कारकत्रये दर्शिते सम्भवीन्यन्यान्यपि कारकाण्यूह्यानीत्यादिग्रहणम् । **अविशिष्यमाणे**
754/mj **ण** इत्यादि, यदि

* * *

सूक्ष्मावस्थाप्राप्तिरपि अवयवावयविसामान्यविशेषकार्यकारणानां भेदे सिद्धे स्यात् ।

तथा च तदनुपपत्तिः, अभावत्वापत्त्यभ्युपगमात् । प्रागभाव-प्रध्वंसाभावात्मकत्वादवस्थयोः सूक्ष्मस्थूलयोः ।

अथाभावत्वमेव भावस्य ततश्च चक्षुरादिलक्षणरूपादीनामाकाशादीनां चोत्पत्तिरसती ।

* * *

भावेन रहितो विशेषस्ततो **विशेषः** इति निर्देशमेव नार्हेत्, विशिंषन्नन्यमन्येन च विशिष्यमाणो विशेषो भवति व्यापारावेशादेव कारकाणां कर्त्रादीनां **कारकत्वात्,** विशेषणक्रियावेशाभावे ह्यविशेष एव स्यादिति । तस्मात् स्थितमिदम्--सामान्यमेव विशेषः सामान्यापेक्ष एव वेति । तथा च कुतः पृथक् प्रवृत्तिर्विशेषस्य सामान्याविनाभावात् ? **को वाऽऽश्वासः ?** **न मनोर-**
- /ms **थोऽपि करणीयः --रूपं रसो वा घटपटादिर्वा विशेष एकैक एव प्रवर्तत इति,** त्वन्मनोरथानुवृत्त्या संवृतिसत्त्वेनाऽभ्युपगतयोर्घटपटयोरिवान्यत्वप्रतिपत्तेर्निमित्तभूतमिति स्वप्नेऽप्येवं मा मंस्था इत्यभिप्रायः । § 2396

---

३ य] पृ॰ ७४४ पं॰ ५ ॥
३ विशेष] एकोकोपि इत्यादिnayacakra-ms-ya । एककोऽपि ? एकैकोऽपि ? ॥
३ इ] इत्यादिnayacakra-ms-ya ॥
४ प्र] प्रतिषिद्ध॰ प्र॰ ॥
७ भा] ॰भावोपापादनnayacakra-ms-ya ॥
७ स] अत प्र॰ । पृ॰ ७५८ पं॰ १२ ॥
९ स] सम्बन्धरस॰ प्र॰ ॥
१० *] घटपटो वाnayacakra-ms-bhā । रसघटो वा nayacakra-ms-ya ॥
१० ना] नासत् प्र॰ ॥
११ व्या] व्याख्याया प्र॰ ॥
१२ अ] पृ॰ ७५८ पं॰ १३ ॥
२४ ए] एवेति प्र॰ ॥
२७ त्व] त्वन्मतोरनुवृत्त्या संवृतिसत्येना॰ प्र॰ ॥

*__सूक्ष्मावस्थे__त्यादि । यापि **प्राप्तिदिक् काचित्** त्वयोन्नीयते केनचिन्नयान्तरेण **सूक्ष्मावस्थो** भावो विशेषरहितस्तिष्ठति इति साप्यवयवानामवयविनो विशेषाणां सामान्यात् कारणात् कार्याणां **भेदे सिद्धे स्यादि**ति सम्भाव्येत, नान्यथा । प्रधानावस्था हि सूक्ष्मा सत्त्वरजस्तमसां समता, सा महदादिविषयस्थूलावस्थापेक्षैव, त एव हि गुणाः सूक्ष्माः स्थूलाश्च, ते चावस्थे परस्परापेक्षे, सर्पस्फटाटोपकुटिलगतिस्थितिकुण्डलकीभवनादिवत् सर्पमन्तरेण न ते विशेषा भावं न तानन्तरेण स इति, एवं च सूक्ष्मावस्थोक्त्यैव त्वयाभ्युपगतं भवति, स च सूक्ष्मतां यान् भावो बाल-युव-मध्यम-स्थविराद्यवस्थाविशेष एव भवति तद्व्यतिरेकेणानवस्थानात् । **तथा च तदनुपपत्तिः**, एवं च सति भावस्यान्वयाख्यस्य भावत्वानुपपत्तिः, **अभावत्वापत्त्यभ्युपगमात्** । कस्मात् ? **प्रागभाव-प्रध्वंसाभावात्मकत्वादवस्थयोः सूक्ष्म-स्थूलयोः**, यथा घटः प्रागभूत्वा भवति भूत्वा च न भवतीत्यभावात्मकत्वादसन्नेव प्राक् पश्चाच्च । एवमसूक्ष्मः सूक्ष्मो भवति पुनश्च न भवति, तथा स्थूलोऽपीत्यभाववादित्वमापन्नं भाववादिनस्तेऽभ्युपगमहानिश्च । § 2397

**अथ** मा भूदभ्युपेतहानि**रित्यभावत्वमेव भावस्या**भ्युपगच्छसि **ततश्च चक्षुरादिलक्षणे**त्यादि । यद्यसत्त्वं सामान्यस्येष्टं तस्माच्चासतः सामान्या**च्चक्षुरादि[लक्षण]रूपादीनामाकाशादीनां** चावस्थाख्यानां विशेषाणां निर्बीजाना**मुत्पत्तिरसती,** रूपस्य चक्षुर्लक्षणम्, **आदिग्रहणा**च्छ्रोत्र-त्वगजिह्वा-घ्राणानि शब्द-स्पर्श-रस-गन्धानां लक्षणानि, लक्ष्या रूपादयः, शब्दाद्यात्मकानि चाकाशादीनि भूतानीत्यादिसर्वशास्त्र-लोकगतव्यवहाराभावप्रसङ्गाद् भावस्याभावत्वमपि नाभ्युपगन्तव्यमिति । § 2398 - /ms

755/mj

अथोच्येत--विशेषस्य भावेन सहैकत्वम् । यदि भावः विशेषान् व्याप्नोति न तु विशेषो भावं तस्माद् विशेषेण सह भावस्यैकत्वं नास्ति, विशेषस्य त्वस्ति भावेन सह भावोपग्रहान्तर्भावितवृत्तेर्विशेषत्वात् । § 2399

अथ भेदवृत्तिः कथम् ? कस्मान्न समानभूतः सन्नविशेषरूप एव संवृत्तो भाववत् ? भावो वा विशिष्टत्वाद् विशेषरूपः, तदेकत्वात्, विशेषवत् ? § 2400

**अथोच्येते**त्यादि । प्राग**ग्नीन्धनैकत्वे**--अग्नेरिन्धनेन सहैकत्वे दोषादिन्धनस्याग्निना सहैकत्वे दोषाभावं मन्यमानेन यथा परिहारः परेणोच्यते तथेह

१ *] पृ° ७४५ पं° २ ॥
७ ता] तावनंतरेण प्र° ॥
८ विरा] ३ °राव्यव° प्र° ॥
१५ ग] °गच्छमिnayacakra-ms-bhā । °गच्छति nayacakra-ms-ya ॥
१५ त] ततचक्षुश्चरादि°nayacakra-ms-bhā ॥

**भावस्य** विशेषेण सहैकत्वे दोषाद् विशेषस्य भावेन सहैकत्वे दोषाभावं मन्यमानः परिहारमाह--तद्यथा--**यदि भावः** सामान्यं पृथिवीत्वादि घटपटादीनश्म-सिकतादींश्च विशेषान् **व्याप्नोति,** न तु विशेषोऽश्म-घटादिर्भावं पृथिवीत्वं व्याप्नोति एकदेशवृत्तित्वात् । तस्माद् विशेषेण सह घटेन पटेन वा पृथिव्या एकत्वं नास्ति, घटस्य त्वस्ति विशेषस्य सामान्येन पृथिव्यादिना भावेन सह । कस्मात् ? **भावोपग्रहान्तर्भावितवृत्तेर्विशेषत्वात्, भावस्य** सामान्यस्य उपग्रहेण तेनोपगृहीतत्वात् तस्मिन्नन्तर्भाविता वृत्तिः वर्तनमस्तित्वं विशेषस्य भावात्मरूपापन्नत्वात् कारणाद् विशेषस्य विशेषत्वम् नान्यथा । त-
- /ms स्माद् भावोपग्रहान्तर्भावितवृत्तेर्विशेषत्वाद् विशेषस्य सामान्येन सहैकत्वमस्तु भावाव्यतिरिक्तात्मत्वात्, को दोष इति । § 2401

एतावत् पृच्छ्यते सामान्यविशेषैकत्ववादी समानोपालम्भानिवृत्तेः **--अथ भेदवृत्तिः कथम् ?** इति । पूर्ववदेव दृष्टा भेदेन वृत्तिर्लोके[ऽ]नयोः । तद्यथा--पृथिवी इत्यविशेषेण घट-पटादिष्वभिन्ना भावस्य, घट पटो न भवति इति घटा-पटादेर्भिन्ना विशेषस्य, *ते च वृत्ती परस्परविभिन्ने, तयोः कोपपत्तिरेकत्वे परस्पररूपानापत्तौ नानात्वकृतायाम् ? इति तद्दर्शयति अनिष्टापादनद्वारेण **--कस्मान्न समानभूतः सन्नविशेषरूप एव संवृत्तः ?** योऽयं घटो रूपादिर्वा विशेषः पटादिभ्यो रसादिभ्यो वा व्यावृत्तोऽपि मृद् मृदेव इत्यव्यावृत्तः समानभूतः स सन् सन्, भवति भवति, पृथिवी पृथिवी इत्येव वा निर्विशेषः कस्मान्न भाववद् भवति, प्रतिषेधद्वयस्याविशेषानिष्टापादनात् ? दृष्टं विशेषं समर्थयति— **भावो वा विशिष्टत्वाद् विशेषरूपः कस्मान्न संवृत्तः** इति वर्तते, **तदेकत्वाद् विशेषवत्,** मृद्द्रवनपृथिवीत्वत्यक्तरूपो रूपरसादिविशेष एव कस्मान्न भवति ? उभयत्र **तदेकत्वात्** इति हेतुः । इतरेतरस्वरूपे दृष्टान्तौ । दृष्टा चेयं सामान्यविशेषयोरनुवृत्तिव्यावृत्तिभ्यां भेदवृत्तिः । अनिष्टापादनसाधनं च **--भावो विशेष एव स्यात् तदेकत्वात् तत्स्वात्मवत्,** विशेषो वा भाव एव स्यात् तदेकत्वा[त् त]त्स्वात्मवत्, मृत् स्याद् घट एव तदेकत्वात् घटस्वात्मवत्, घटो वा मृदेव स्यात् तदेकत्वात् तत्स्वात्मवत् । § 2402
756/mj

विकल्पाच्चैकत्वव्याघातः । कुतोऽयं विशेषः--इदं सहेदं न सहेति, द्विष्ठत्वात् सहासहभावस्य, विशेषणक्रियाधारकरणाद्यनुपपत्तेश्च । § 2403

अथापि कथञ्चिदेकत्वं तथाप्येकम् एकमेव इति न वक्तव्यमित्यादि पूर्ववद् यावत् परमाणुवदिति । § 2404

---

११ अ] पृ॰ ७४५ पं॰ ६ ॥
१४ *] तेन वृत्तीnayacakra-ms-ya ॥
१७ व्यावृ] °वृत्ताःnayacakra-ms-bhā । °वृत्त्यः nayacakra-ms-ya ॥
१८ स] सत् प्र॰ ॥
२५ त्वा] °त्वात् स्वात्म°nayacakra-ms-ya ॥

अथ मा भूवन्नमी दोषा इत्यन्यत्वं भावविशेषयोः । तत्र यदि भावस्य विशेषेण सहान्यत्वमभ्युपगम्यते तत इदमापतितं तेन तर्हि तस्य विशेषपृथग्भूतं रूपमाख्येयं यथान्येषां घटादीनां पटादिपृथग्भूतं रूपमाख्यायते । रूपाख्यानमशक्यं कर्तुम्, न ह्यन्यदन्य- § 2405

किञ्चान्यत् --**विकल्पाच्चैकत्वव्याघातः । एकत्वे कुतोऽयं विशेषः--इदं न सहेदं सहेति ?** भावो विशेषेण सहैको न विशेषो भावेन, विशेषो भावेन सहैको न भावो विशेषेण इत्येतौ विकल्पौ नैकत्वे घटेते, विशेष- - /ms हेत्वभावात्, अन्यत्व एव च घटेते, **द्विष्ठत्वात् सहासहभावस्येति** । इतश्च नोपपन्नमेकत्वं भावेन सह विशेषस्य **विशेषणक्रियाधारकरणाद्यनुपपत्तेश्च,** विशेषणक्रिया कर्तरि विशिंषति समवेता विशेष्ये वा कर्मणि पृथिवी-घटादौ, तौ तस्या यथाविवक्षमाधारौ, येन पटादिना विपक्षभूतेन विशिष्यते तत् करणम्, भावस्यैव वा विशेषः यतो विशिष्यते घटोऽयं पटादिर्न भवति इति सोऽर्थोऽपादानम्, यस्मै विशिष्यते प्रतिपाद्यते स सम्प्रदानं श्रोता इत्येषां कारकाणां क्रियायाश्च विपूर्वशिषिधातुवाच्याया भिन्नार्थनिबन्धनत्वादेकत्वे सत्यनुपपत्तिः । दृष्टश्चायं कारकव्यवहारो भेदनिबन्धनः । तस्माद् दृष्टत्वादयुक्तमेकत्वम् । § 2406

अभ्युपेत्याप्येकत्वं न युक्तमेवेति ब्रूमः --**अथापि कथञ्चिदित्यादि** पूर्ववदेकत्वप्रतिषेधेनावक्तव्यप्रसाधनं तमेव ग्रन्थमतिदिशति **पूर्ववद् यावत् परमाणुवदिति** सावधिकं सहेतुदृष्टान्तापाद्यावक्तव्यत्वनिष्ठं तुल्यगमकत्वाद् व्याख्यातार्थमेवेति । एवं सामान्यविशेषयोरेकत्वे दोषा उक्ताः । § 2407

एतद्दोषभयात् पक्षान्तरं निर्दोषं मन्यमानश्चेत् परो गृह्णीयात् --**अथ मा भूवन्नमी दोषा इति,** किं तत् पक्षान्तरम् ? **अन्यत्वं भाव-विशेषयोः** । तत्राप्येकत्ववद् द्वयी गतिः--भावस्य विशेषेण सहान्यत्वं विशेषस्य वा भावेनेति । तत्र तावद् **यदि भावस्य विशेषेण सहान्यत्वमभ्युपगम्यते तत इदमापतितं** दोषजातम् --* **तेन तर्ही**त्यादि यावत् **संवृतिघट-पटव** दिति तुल्यगमं पूर्ववत् । **तस्य** भावस्य **विशेषपृथग्भूतमिती**ह सामान्यविशेषप्रस्तुतेर्विशेष्यते । शेषं तथैव गमनीयं **रूपाख्या- नमश क्यं कर्तुमि**त्यादि । उपसंहारसाधनम् -- - /ms **अनिरूप्यमाणस्वत्वसन्नापद्येत, अविशेषत्वेऽरूपत्वात्, खपुष्पवत्,** [अ]विशेषत्वं भावस्य विशेषादत्यन्तमन्यत्वात् पृथिव्या अश्मसिकताद्यवस्थाविशेषमन्त 757/mj

६ विक] पृ॰ ७४६ पं॰ २ ॥
९ द्विष्ठ] पृ॰ ४९६--१ ॥
१८ अभ्युपेत्या] ॰त्याप्येकत्वन्न युक्त॰nayacakra-ms-bhā । ॰त्याप्येकत्वान्न युक्त॰ nayacakra-ms-ya ॥
१८ अ] पृ॰ ७४६ पं॰ ४ ॥
२० त्व] ॰त्वनिष्टं प्र॰ ॥
२३ न्न] ॰न्नस्यंnayacakra-ms-bhā । ॰न्नश्यं nayacakra-ms-ya । पृ॰ ७४७ पं॰ १ ॥
२६ *] पृ॰ ७४७ पं॰ १ ॥
२६ व] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥

* * *

साधारणम्, सामान्यविशेषैकान्यत्वानवस्थिततत्त्वसंवृतिघटपटवत् । अनिरूप्यमाणस्त्वसन्नापद्येत, अविशेषत्वेऽरूपत्वात्, खपुष्पवत् ।

अथोच्येत--रूपं पृथग् भावस्य विशेषाद् व्यावृत्तिरूपादनुप्रवृत्तौ । तद्वा कुतोऽविशेषम् ? यदि स्याद् भावो विशेषरहितस्ततो निरवशेषविशेषाभावेऽपि खपुष्पादावनुप्रवृत्तिरूपः स्याद् भावत्वाद् घटादिवत् ।

यद्यपि सामान्यस्य विशेषेण सहान्यत्वं नास्ति तथापि विशेषस्य सामान्येन सहान्यत्वमस्ति दृष्टत्वात् । दृष्टो हि विशेषो भावविनाभूतोऽपि यथा भिन्नो घट इति ।

भावविषय एवैष भेदोपचारः । तदन्यत्वे स नैव स्यात्, अभावत्वात्, खपुष्पवत् । अत एव तत्सिद्धिः; भिन्नसमानाधिकरणस्य मुख्यमूलत्वाद् गौणस्य । पूर्वोक्ताच्च तद्वृत्ति-

* * *

रेणास्थानात् तदात्मत्वमनिच्छत एकान्तेनाविशेषत्वम्, अविशेषत्वे सत्यरूपत्वं भावस्य तदतिरेकेणानिरूप्यरूपत्वात् । तस्मादसत्त्वमापन्नं वस्तुनोऽन्यत्वे पृथग्रूपावश्यम्भावात् तदाख्यानाशक्यत्वे चासत्त्वम् । § 2408

इत्युक्तेऽन्यत्ववादिना **अथोच्येत--रूपं पृथग् भावस्य विशेषाद् व्यावृत्तिरूपादनुप्रवृत्तौ** दृष्टम् इति वाक्यशेषः । अत्र ब्रूमः **--तद्वा कुतोऽविशेषम् ?** यदेतद् घटाश्मादिषु पृथिवीत्वानुवृत्तिलक्षणं रूपं तद् विशेषेण विना नैवास्तीति तदवस्थं पृथग्रूपाख्यानाशक्यत्वम् । अभ्युपेत्यापि त्वदनुवृत्त्या निर्विशेषं भावमत्यन्तान्यत्ववादिनस्ते दोषं ब्रूमः **--यदि स्याद् भावो विशेषरहितस्ततो निरवशेषविशेषाभावेऽपि खपुष्पादावनुप्रवृत्तिरूपः स्याद् भावत्वाद् घटादाविव** । अनिष्टं चैतत् । § 2409

**अथोच्येतेत्यादि** । उक्तदोषभयात् सामान्यस्य विशेषेण सहान्यत्वम् इत्येतद् विशेषप्रधानमन्यत्वं मा भून्नाम तथापि **विशेषस्य सामान्येन सहान्यत्वमस्ति दृष्टत्वात्, दृष्टो हि** विशेषो भावविनाभूतोऽपि विशेष एव भावरहितः क्व दृष्ट इति तद्दर्शयति **--यथा भिन्नो घट** इति, भेदो हि घटस्य प्रध्वंसाभावो विनाशपर्यायः, स च विशेषो भावादत्यन्तविलक्षणो दृष्टश्च, अतोऽन्यत्वं विशेषस्य भावादिति । § 2410

अत्रोच्यते **--भावविषय एवैष भेदोपचारः** । भिदिक्रियाविशेषणविशिष्टावस्थानुभाविनो भावस्यैव घटाख्यस्याव्यवच्छिन्नमृत्पिण्डशिवकादिभवनानुविद्धस्य उत्पन्न-नव-मध्यम-पुराण-विशरणावस्थाक्रमेणावयवसङ्घातजनितात्मलाभस्यायमपि कपालावस्थाविशेषः । तस्मादविनश्वराण्वादिपुद्गलसङ्घात-विसङ्घातविषयपरिणामत्वात् उत्पन्नो विनष्टः इत्याद्युपचारो भावस्यैव

१३ त्य] °रूपं भावस्य प्र° ॥
१५ चा] वास° प्र° ॥
१७ त] तथा प्र° । पृ° ७४८ पं° १ ॥
२२ वृत्तिरूपः] °रूपस्या भावत्वाद् प्र° ॥
२३ अ] पृ° ७४८ पं° ४ ॥
२९ भा] पृ° ७४८ पं° ६ ॥
३३ उ] उपपन्नो प्र° ॥

नाभावस्य खपुष्पादेः सम्भवति । यदि मन्येथा भावादभेदोपचार इति, **स भावादन्यत्वे** खपुष्पवद् **नैव स्यात्**, भिन्नः उत्पन्नः इति वा नोपचर्येत घटः, **अभावत्वाद्** विशेषत्वात् **खपुष्पवत्** । § 2411
758/mj

त्वाच्च स्वात्मवद् नान्यत्वम् । भावादन्त्यविशेषस्तु नैव पृथग्भूतः, विशेषत्वात्, घटवत् । यदा चायं भावाव्यतिरिक्त एवोपलभ्यते तदा न कदाचिदप्यभावो भवति खपुष्पवत् । § 2412

ननु यदेव सामान्यमविशेषं तदेवान्यत्वम्, न, अविशेषात् । सिद्धे ह्यन्यत्वे सहासहभवनं द्विष्ठत्वात् स्यात्, तत्तु न सिद्धम् । § 2413

किञ्चान्यत्, **अत एव तत्सिद्धिः** । अवश्यं चैतदेवम्--भावविषय एवैष भेदोपचारः, भेदोपचारादेव भेदसिद्धिः, भावादेव वा भेदोपचारसिद्धिः । किं कारणम् ? **भिन्नसमानाधिकरणस्य मुख्यमूलत्वाद् गौणस्य,** भिन्नो घटः इति घटेन समानाधिकरणो भेदोपचारो गौणो मुख्यं भेदमनुप्रवृत्तिसहचरितमवस्थाविशेषं नव-तरुण-मध्य-जीर्णादिकं सर्पस्येव स्फटाटोप-कुटिलगति-कुण्डल-प्रसृत-दीर्घवृत्त्यात्ताद्यवस्थाविशेषं भावस्यापेक्ष्य विनष्टेऽपि भिन्नः इत्युपचारः क्रियते, गौणस्य मुख्यमूलत्वात् । अभिन्न एव वा भावे कपालाद्यवस्थायां भेद उपचर्यते स्तिमितसरःसलिलवदनुत्पादव्ययत्वाद् भावस्य पुरुष-कालादिकारणमात्रस्य । § 2414

किञ्च, **विशिष्यते विशेषः इति सतो विशेषत्वात् तदपेक्षत्वाच्च विशिष्यते स तस्मात् तेन वा स इत्यादिना अविशे[शिं]षन्नविशिष्यमाणो वा न विशेष एव कारकाणामेव कारकत्वात्** पृ॰ ७५३ इत्यादिग्रन्थेन **पूर्वोक्ताच्चे**त्यतिदिशति । किञ्च, **तद्वृत्तित्वाच्च पूर्वोक्ताच्च** इति वर्तते विशेषवृत्तित्वाद् **भावस्य विशेषस्वात्मवद् न विशेषेभ्योऽन्यत्वम्,** तथा च भाववृत्तित्वाद्वा भाववद् विशेषस्य भावाद् नान्यत्वम्, तद्वृत्तित्वं चानयोरतीतन्यायेन सुभावितम्, घटपटादिभावानुवृत्तिरूपत्वेऽपि पृथगनिर्देश्यरूपत्वात् । § 2415 - /ms

स्यान्मतम्--अन्त्यविशेषस्तु परमाणुष्वन्यप्रत्ययहेतुत्वाद् व्यावृत्तिरूप एवेति चेत्, तन्न, यस्माद् **भावादन्त्यविशेषस्तु नैव पृथग्भूतः, विशेषत्वात्, घटवत्,** यथा घटो विशेषो भावात्मकस्तद्वृत्तित्वात् स्वात्मवद् भावादपृथग्भूत-

१ भा ] भावाददोपचारnayacakra-ms-bhā ॥
२ स्या ] स्यान्न प्र॰ ॥
२ वा ] धा तोपच॰nayacakra-ms-ya ॥
३ अ ] अभव॰ प्र॰ ॥
१४ स ] सर्पस्यैव प्र॰ ॥
१९ वि ] पृ॰ ७५३ पं॰ ५ ॥
२१ पू ] पृ॰ ७४९ पं॰ २ ॥
२४ ना ] नानत्वंnayacakra-ms-bhā । नानात्वं nayacakra-ms-ya ॥
२५ ग ] ॰गनिर्देशारूप॰ प्र॰ ॥
२७ भावाद ] ॰दत्यन्तविशे॰ प्र॰ ॥
२८ स्वा ] तत्स्वात्मवद् ? ॥

स्तथान्त्यविशेषोऽपि । तद् व्याचष्टे --**यदा चायमित्या[दि], न कदाचिदप्यभावो भवति, खपुष्पवत्** इति वैधर्म्यदृष्टान्तः । भावाव्यतिरिक्तविशेषोपलब्धेर्भावा[द्] विशेषस्यान्यत्वं व्यावृत्तम्, अतोऽसिद्धमन्यत्वमित्युपनयः । § 2416

अत्राह --**ननु यदेव सामान्यमविशेषं तदेवान्यत्वम्,** ननु भावोऽनुवृत्तिलक्षणो निराकृतसर्वघटपटादिविशेषो न क्वचित् कुतश्चिद् व्यावर्तते, अतो विशेषात् परस्परव्यावृत्तिलक्षणादन्यः इति सिद्धमिति । एतच्च **न अविशेषात्,** उक्तं प्रागनेकधा निराकृतसर्वविशेषस्य भावस्यात्मलाभाभावादभावत्वम्, अविशेषत्वाच्च खपुष्पवदसतः कुतोऽन्यत्वम् ? § 2417

किञ्च, यदपि च भावो विशेषेण सह भवति न विशेषः, विशेषो भावेन
759/mj सह न भावः, तौ च

* * *

अथापि कथञ्चिदन्यत्वम्, अन्यत् अन्यदेव इति न वक्तव्यम्, अन्यत्वात्, हस्ताद्यन्यानन्यदेवदत्तवद् यावद् रूपादिक्षणान्तरान्यानन्यपरमाणुवत् ।

अत्यन्ताभावस्तर्हि तौ, विशेषाविशेषत्वाभावात्, खपुष्पवत् ।

ननु भिन्नव्यवस्थानलक्षणत्वादनुभयत्वमप्यवचनीयम् । यदि ह्यनुवृत्तिव्यावृत्तिलक्षणनियमो न स्यात् ततो रूपादिरपि विशेषः प्रवर्तेत भाववत् । भावोऽपि चानुवृत्तिरूपः व्यावर्तेत, खपुष्पवत् । भिन्नव्यवस्थानलक्षणमुभयत्वमस्तु ।

* * *

परस्परमसह इति वृत्तिभेद उच्यते स चासिद्धः, तयोरन्यत्वस्यासिद्धत्वात् ।
- /ms ***सिद्धे ह्यन्यत्वे सहासहभवनं द्विष्ठत्वात् स्यात्, तत्तु न सिद्धम्,** । तस्मादयुक्ता सहासहभवनकल्पनाऽन्यत्वं च तयोः । § 2418

अभ्युपगम्यापि ब्रूमः --त**अथापि कथञ्चिदि**त्यादि यावत् **परमाणुव**दिति स एव तुल्यगमो ग्रन्थोऽन्यत्वनिषेधार्थः **अन्यत् अन्यदेव इति न वक्तव्य**मिति प्रतिज्ञाय **अन्यत्वात्, हस्ताद्यन्यानन्यदेवदत्तवद् यावद् रूपादिक्षणान्तरान्यानन्यपरमाणुव**दिति सव्याख्यानोपायप्रदर्शनेन गतार्थः । § 2419

एवमेकत्वान्यत्वयोर्निषिद्धयोराह परः --**अत्यन्ताभावस्तर्हि तौ, विशेषाविशेषत्वाभावात्, खपुष्पवत्** । भाव-विशेषयोरविशेष एकत्वम्, विशेषोऽन्यत्वम्, तयोः प्रतिषिद्धत्वाद् विशेषाविशेषत्वाभावः, यस्य विशेषाविशेषत्वाभावस्तस्यासत्त्वम्, यथा खपुष्पस्येति । § 2420

गत्यन्तराभावात् । तच्चानिष्टं **सर्वात्मकैकभावोभयत्वमत्यन्ताभावोभयत्वं वा**

---

३ व्या]
व्यावृत्त्यम् nayacakra-ms-bhā ॥
२० *] पृ० ७५० पं० ५ ॥
२२ त] पृ० ७५१ पं० १ ॥
२४ ह]
हस्तादन्या° nayacakra-ms-ya ।
हस्ताद्वन्या° nayacakra-ms-bhā ।
पृ० ७५१ पं० १ ॥
२४ रा]
°रान्यान्यपर° nayacakra-ms-ya ।
°रान्यान्यन्यापर°
nayacakra-ms-bhā ॥
२६ अ] पृ० ७५१ पं० ३ ॥
२७ विशेष] °योरविशेष योरविशेष प्र° ॥

। § 2421

अत्रोच्यते **--ननु भिन्ने**त्यादि । अनुभयत्वमसत्त्वम्, तदपि अवचनीयम्, कस्मात् ? **भिन्नव्यवस्थानलक्षणत्वात्,** यथाग्नीन्धनयोर्दहन-दाह्यादिव्यवस्थाने भिन्ने लक्षणे स्त इत्यनुभयत्वं नास्तीत्युक्तं तथेह भाव-विशेषयोरपि अनुवृत्ति-व्यावृत्ती व्यवस्थाने भिन्ने लक्षणे स्त इत्यनुभयत्वमपि अवचनीयम् । पूर्ववच्च गमनीयमिति तत्प्रसाधनार्थमाह **--यदि ह्यनुवृत्ती**त्यादि । अनिष्टापादनोदाहरणे तु विशेष **--ततो रूपादिरपी**त्यादि, रूपं विशेषो रसोऽपि **प्रवर्तेत** पृथगेव भावात् स्वेनैव रूपेण व्यावृत्तिरूपरहितत्वात् **भाववत्** । **भावोऽपि चानुवृत्तिरूपः** सन् रूपादेः **पृथगेव व्यावर्तेत** अनुप्रवृत्तिरूपर- - /ms
हितत्वात् **खपुष्पवत्** । यद्यनुप्रवृत्ति-व्यावृत्ती सामान्य-विशेषयोर्भिन्नव्यवस्थाने न स्यातां स्यादेष प्रसङ्गः प्रस्तुते, यस्माद् भावो रूप-रसादिष्वनुप्रवर्तमानो दृश्यते विशेषश्च रूप-रसादिभ्यः परस्परं व्यावर्तमानः तस्मान्नानुभयत्वमप्यस्ति । किन्तु **भिन्नव्यवस्थानलक्षणमुभयत्वमस्तु** अन्यत्वमित्यर्थः । एतदनभ्युपगमे दोष उच्यते **--भिन्नव्यवस्थाने**त्यादि यावदु

भिन्नव्यवस्थानलक्षणवृत्तोभयत्वानभ्युपगमे तु सर्वात्मकैकभाव एवात्यन्ताभाव एव वोभयत्वं स्यात् ।

अनुभयत्वप्रतिषेधादुभयत्वमिति चेत्, न, अन्यत्वावक्तव्यत्वात् । अन्यत्वप्रतिषेध एकत्वमिति चेत्, न, तस्याप्यवक्तव्यत्वात् । एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एव । तस्मात् सर्वथैवावक्तव्यतैव । द्रव्य-गुण-कारणकार्यादिष्वप्येवमेव ।

अतोऽन्यथोक्तौ वस्तुविसंवादः, अन्यस्यानन्यत्वेन एकस्यानेकत्वेन उभयस्यानुभयत्वेनावधारणात्, घटपटविपर्ययावधृतिवत् ।

अयं च नियमो नियम एव वस्तु इतीच्छति, सामान्यविशेषैकत्वान्यत्वैकान्तायतस्त्ववृत्तेरेव निश्चितनियताधिक्ययमनात् ।

* * *

एवोभयत्वं स्यात्, अत्यन्ताभावे खपुष्प एव वा,**भयत्वं स्यात्** । **सर्वात्मकैकभाव** 760/mj

* * *

भिन्नव्यवस्थानलक्षणवृत्तोभयत्वानभ्युपगमे तु सर्वात्मकैकभाव एवात्यन्ताभाव एव वोभयत्वं स्यात् ।

अनुभयत्वप्रतिषेधादुभयत्वमिति चेत्, न, अन्यत्वावक्तव्यत्वात् । अन्यत्वप्रतिषेध एकत्वमिति चेत्, न, तस्याप्यवक्तव्यत्वात् । एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एव । तस्मात् सर्वथैवावक्तव्यतैव । द्रव्य-गुण-कारणकार्यादिष्वप्येवमेव ।

अतोऽन्यथोक्तौ वस्तुविसंवादः, अन्यस्यानन्यत्वेन एकस्यानेकत्वेन उभ-

---

१३ भि] पृ० ७५१ पं० ३ ॥
२५ अ] पृ० ७५२ पं० ३ ॥
२५ ख] सप्तम्यन्तं पदम् ॥

यस्यानुभयत्वेनावधारणात्, घटपटविपर्ययावधृतिवत् ।

अयं च नियमो नियम एव वस्तु इतीच्छति, सामान्यविशेषैकत्वान्यत्वैकान्तायतत्ववृत्तेरेव निश्चितनियताधिक्ययमनात् ।

* * *

एवोभयत्वं स्यात्, अत्यन्ताभावे खपुष्प एव वा,

**अनुभयत्वप्रतिषेधादि**त्यादिः पूर्ववत् तुल्यगमो ग्रन्थो यावत् **सर्वथैवावक्तव्यतैवे**ति दृष्टान्ताग्नीन्धनोपसंहारवद् दार्ष्टान्तिकभावविशेषोपसंहारेण गतार्थः । § 2422

एवमापाद्यावक्तव्यतां सामान्यविशेषयोरतिदिशति **--द्रव्य-गुण-कारण-कार्यादिष्वपि एवमेवे**ति । **एवं हि भवति भवनमग्नीन्धनवत्** इत्युपक्रम्य स एव दृष्टान्तग्रन्थो यावत् **सर्वथाप्यवक्तव्यतैव** इति । तस्योपरि ***यद्येकत्वं गुणस्य द्रव्येण सह नान्यते**त्यादि द्रव्य-गुणयोः परस्परेण सहैकत्वान्यत्वानुभयत्वोभयत्वप्रधानोपसर्जनत्वप्रतिषेधेन **सर्वथैव अवक्तव्यता** इत्युपसंहारो यावत् तावदशेषो ग्रन्थो योज्यः । तथा कारण-कार्ययोरपि पुनः सैव ग्रन्थयोजना । **आदि**ग्रहणात् सर्वगताऽसर्वगत-नित्या-ऽनित्या-ऽवस्था-ऽवस्थावद्-भोज्य-भोक्त्रादिविकल्पेषु समानः प्रचर्च इति स्थितमवचनीयं वस्त्विति । § 2423

**अतोऽन्यथोक्तौ वस्तु[वि]संवाद** इति प्रतिज्ञा । **अन्यस्यानन्यत्वेने**त्यादि याव**दवधारणादि**ति हेतुः । **घट-पटविपर्ययावधृतिवदि**ति दृष्टान्तः । यथा घटे - /ms पटः इत्यवधार्यमाणे पटे च घटः इत्यवधार्यमाणे विसंवादः एवम**न्यत्वमनन्यत्वेने**त्यादि योज्यम्, **एकत्वा-ऽन्यत्वोभयत्वा-ऽनुभयत्वाऽन्यतरप्रधानोपसर्जनत्वैरवधार्य**माणं वस्तु विसंवदते परस्पर[त] इति वस्तु व्याख्यातम् । § 2424

एवं वस्तुतोऽक्षरार्थतश्च नियमस्वरूपमुक्त्वा शब्दार्थमाह **--अत्र चै**वंविधभावतायाम**भिजल्पः शब्दार्थः** । प्रागेषोऽभिजल्पः शब्दार्थः प्रासङ्गिको व्यक्त्यादिवस्तुप्रत्याख्यानप्रसङ्गेनोक्त इति न **पुनर्व्याख्यायते** । तत्सूचनार्थं त्वाह **--आह ही**त्यादि तल्लक्षणकारिकाः सूचयंस्तमेव ग्रन्थं समर्पयति **शब्दो वाप्यभिजल्पत्वमागत** इत्यादिद्व्यर्धकारिकया । ***शेषमभ्यूह्यमित्यादि** । § 2428

५ अ] पृ॰ ७५२ पं॰ ३ ॥
५ ख] सप्तम्यन्तं पदम् ॥
६ अ] पृ॰ ७५२ पं॰ ५ ॥
६ त्या] ॰त्यादिnayacakra-ms-ya ॥
१० ए] पृ॰ ७४४ पं॰ १ ॥
११ दृ] दृष्टान्तोnayacakra-ms-ya ॥
११ *] पृ॰ ७५३ पं॰ १ ॥
१७ अतोऽन्य] ॰न्यथोक्तो प्र॰ ॥
१८ याव] ॰ववृत्तिव॰ प्र॰ ॥
१८ घ] घट प्र॰ ॥
२१ व] वस्तुव्याख्यानं प्र॰ ॥
१८ प्रा] प्रागोथाभि॰nayacakra-ms-bhā । प्रागेवोभि॰ nayacakra-ms-ya ॥
२२ व्य] पृ॰ ५८० पं॰ १, ११ ॥
३ त] तल्लक्षण-कारिकारिकाःnayacakra-ms-bhā ॥
९ श] दृश्यतां पृ॰ ५८० टि॰ १ ॥
९ *] शेषभृत्तह्य॰nayacakra-ms-bhā ॥

कथं पुनस्तेन ग्रन्थेनावक्तव्यतोक्ता ? इति चेत् तत्प्रदर्शनार्थमाह **--सोऽयम् इत्येकीकृतत्वाच्छब्दरूपस्यार्थेन** सोऽयम् **इत्यभेदसम्बन्धवशेनैकीकृतं यदा** इति वचनादन्य**त्वमवक्तव्यमित्युक्तं भवति । अर्थेन इत्येकत्वं शब्दा**[द] भिन्नेनार्थेनैकीकरणं **द्विष्ठत्वादेकीकरणस्य** अनेकमेकं क्रियते शब्दरूपमर्थेन इति वचनादेकत्**वमवक्तव्यमित्युक्तं भवति** । एताभ्यामेव युक्तिभ्यामुभयत्वमनुभयत्वं च प्रधानोपसर्जनते चावक्तव्यानीति ज्ञेयानि । व्याख्यातः शब्दार्थ । **स एष पदार्थः** । § 2429

762/mj

सङ्घातो वाक्यम्, देवदत्त गामभ्याज शुक्लाम् इति प्रत्येकवृत्तिसामान्यविशेषैकत्वान्यत्वानेकार्थस्थत्वात् । § 2430

एवं च कृत्वा दिक्प्रदर्शनमात्रेण शब्दोऽर्थप्रत्यासत्त्या ब्रवीति इत्युच्यते । § 2431

वाक्यार्थस्तर्हि कः ? वाक्ये ज्ञाते वाक्यार्थो ज्ञायत एवेत्याह **--सङ्घातो वाक्यम्** । वर्णसङ्घातः पदम्, एकाक्षरस्यापि स्वरव्यञ्जनसङ्घातत्वात् । पदसङ्घातो वाक्यम् । कस्मात् ? इति चेत्, उच्यते— **देवदत्त गामभ्याज शुक्लाम् इति प्रत्येकवृत्तिसामान्यविशेषैकत्वान्यत्वानेकार्थस्थत्वात्**, यस्माद् देवदत्तादीनि [पदानि] पदार्थसामान्ये प्रत्येकं वर्तमानानि विशिष्टसंसर्गेऽर्थे वर्तन्ते स वाक्यार्थः, यथोक्तम् **--सामान्यवर्तिनां पदानां विशेषेऽवस्थानं वाक्यार्थः** , तयोश्च सामान्यविशेषयोरेकत्वान्यत्वोभयत्वानुभयत्वाद्यनेकात्मकार्थत्वस्यावचनीयत्वेन परिग्रहादनेकार्थे स्थितः शब्द एकरूपेणावधारयितुमशक्यत्वादवक्तव्यस्तदर्थ इति । § 2432

**एवं च कृत्वा** यदप्युक्तम्—

सामान्यार्थस्तिरोभूतो विशेषो नोपजायते ।

५ स] इदानीमभिहितान्वयपक्षसमाश्रयणेन संघातपक्षस्य प्रदर्शनायाह **--केवलेन पदेनार्थो यावानेवाभिधीयते । वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकम् ॥ सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते । वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम्** ॥ वाक्यप॰ २ । ४१--४२, केवलेनेति । केवलं पदं यस्यैवार्थस्य वाचकं वाक्यस्थमपि तदेवाभिदधाति । ततः समुदाये पदानां परस्परान्वये पदार्थवशाद् यदाधिक्यं संसर्गः स वाक्यार्थः । उक्तं च--यदत्राधिक्यं वाक्यार्थः सः पा॰ म॰ भा॰ २ । ३ । ४६ इति । अनेकपदसंश्रयमित्यनेन **सङ्घातो वाक्य**मिति दर्शितम् । वाक्यार्थस्य चास्य जातिवत् प्रत्येकपरिसमाप्तिः, केषाञ्चिन्मते संख्यादिवत् समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह **--स त्वनेकपदस्थोऽपि प्रतिभेदं समाप्यते । जातिवत्, समुदायेऽपि संख्यावत् कल्प्यते परैः** ॥ वाक्यप॰ २ । ४३(?")--इति वृषभदेवविरचितायां **वाक्यपदीयवृत्तौ** ॥
७ त्वोभ] **॰भयत्वाद्यनेका॰**nayacakra-ms-ya ॥
८ सा] **सामान्योऽर्थ॰**nayacakra-ms-ya । **सामान्योर्थ॰** nayacakra-ms-bhā । देवदत्तादीनां च

उपात्तस्य कुतस्त्यागो निवृत्तिः क्वावतिष्ठताम् ॥ वाक्यप॰ २ ।
१५§ 2435

इति, तदपि प्रत्युक्तमेव यथाविचारितनिश्चितमवक्तव्यं सर्वथा वस्त्विति **दिक्प्रदर्शनमात्रेण शब्दोऽर्थप्रत्यासत्त्या** विज्ञानाधानमात्रेण **ब्रवीति** इत्युच्यते । § 2436

763/mj

एवमेव च भावयुक्तवाची इति युज्यते यदवक्तव्यमिति पर्यवणमात्रमाह । § 2437

शब्दनयदेशत्वात् पर्यवास्तिक एषः । भुवो भिन्नधात्वर्थ-वाचित्वात् पर्यवति भवतीति § 2438

**एवमेव** चेति यदपि **लक्षणकारेण** शब्दनयलक्षणमुक्तम् **--नाम-स्थापना-द्रव्यवाच्येष्टाकरणाद् भावयुक्तवाची शब्दः** इति, **भावः** पर्यायो नियमो गुणो वा, **तद्युक्तवाची** तद्युक्तमर्थं ब्रूते इति शब्दनयमतं तदपि एवं **युज्यते यदवक्तव्यमिति पर्यवणमात्रमाह,** सामान्यविशेषैकत्वान्यत्वानेकात्मकस्य वस्तुनो वाचा वक्तुमशक्यत्वात् ।

---

भागाभिमतानामर्थयोगाभ्युपगमे **सामान्येऽवस्थितानां पदानां विशेषेऽवस्थान**मित्येतस्मिन् सत्येकान्ते परिगृह्यमाणे **सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते । उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम्** ॥ वाक्यप॰ २ । १५, इह सामान्यवृत्तिरुच्चारितो देवदत्तादिशब्दः सामान्यार्थसम्बद्ध एव तिरोभवति । तत्र येन शब्देनाविर्भावकाल एव विशिष्टोऽर्थो न प्रतिलब्धः स शब्दः सामान्यार्थः तिरोभूतो विशेषेऽवस्थातुं न पुनरुत्सहते । न च सामान्यविशेषयोर्विवक्षा युगपत् संभवति । विशेषविवक्षायां हि सर्वस्यानियमेन सामान्यादवच्छेदो विज्ञायते । तत्रोपात्तस्य नित्ये शब्दार्थस बन्धे कुतस्त्यागः ? युक्तिनिरूपणेषु चार्थात्मसु अभिधानक्रियायोगाभावे विनिवृत्तोऽनवधार्यमाणात्मा शब्दः शब्दोपक्रमस्यार्थस्याभावादविषयः क्वावस्थाप्यताम् । इति भर्तृहरिरचितायां **वाक्यपदीयस्ववृत्तौ** । यत् पुनर्मीमांसकैरुच्यते यथा पदसंघात एवाकांक्षायोग्यतासन्निधानवशात् परस्परसमन्वितो वाक्यं संसर्गश्च वाक्यार्थ इति तद् दूषयितुमाह **--सामान्यार्थ** इति । इह **देवदत्त गामभ्याज शुक्लां दण्डेन** पा॰ म॰ भा॰ १ । १ । १ इति देवदत्तादीनि पदान्येव वाक्यम् । तत्र देवदत्तपदं तावद् यदि सामान्यमात्रे प्रथमं वर्तते तत्तस्य गवादिपदकाले वाचः क्रमवर्तित्वात् तिरोधानादसत्त्वमेवेति कुतः पदान्तरश्रवणकाले तदर्थप्रतीतिः । असत्त्वादेव च न पदान्तरसन्निधाने तस्य विशेषेऽवस्थानम् ? अभ्युपगम्यापि स्मर्यमाणतया पदान्तरसंनिधाने विद्यमानत्वं पदस्य न विशेषेऽवस्थानं युज्यत इत्याह **--उपात्तस्येति** । सामान्यलक्षणस्य सकलपदार्थसाधारणस्यार्थस्य पूर्वमुपात्तस्य वाच्यत्वेन परिगृहीतस्येदानीं पदान्तरसंनिधाने त्यागः कुतो युज्यते, शब्दार्थसम्बन्धस्यानित्यताप्राप्तेः ? न च तथा मीमांसकस्याभ्युपगम इति । तदप्यभ्युपगम्योच्यते **--निवृत्त** इति । स्वार्थान्निवृत्तोऽसौ पदान्तरसंनिधाने शब्दः क्वेदानीमवतिष्ठताम् ? शब्दान्तरबोध्येऽर्थे तस्य वाचकभावविरहात् स्थितिः कथं युज्यते ? ॥--इति वृषभदेवविरचितायां **वाक्यपदीयवृत्तौ** ॥

८ दिक्प्र] पृ॰ ७६५, पं॰ ९ ॥

२० ना] पृ॰ ५८९ पं॰ ९, पृ॰ ५९६ पं॰ ८ ॥

२१ वा] **वाचा वा वक्तु**॰nayacakra-ms-bhā ॥

**शब्दनयदेशत्वात् पर्यवास्तिक एषः,**
तस्स तु सद्दविकप्पा साह-पसाहा सुहुमभेदा सन्मति॰ १ ।
५§ 2441

इति वचनाच्छब्दनयेऽन्तर्भूतः । किं कारणं भावयुक्तवाचित्वे पर्यायग्रहणं न सामान्यग्रहणं भावशब्दस्य सामान्यवाचित्वे ? इति चेत्, उच्यते **--भुवो भिन्नधात्वर्थवाचित्वात्,** भूवादयः सर्वधातवो भ्वर्थे, भूवादय **इति वदे**रौणादिक इञ्प्रत्यये भूवादयः सर्वधातवः । तस्मान्न सत्तार्थ एव भूः, भू-कृञोः सर्वधात्वर्थवाचित्वात् । **पर्यवति भवतीति भावः,** पर्यवणं च प्रवेशनम्, **अव रक्षण-गति-कान्तिप्रीति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थयाचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दहनभाव-वृद्धिषु** पा॰ धा॰ ६०० इति पठितत्वाद् भावः पर्यवः प्रवेशः । समन्तादवः पर्यव इति परिशब्दः समन्तादर्थः, अवशब्दः प्रवेशार्थः । तद् वस्तुतो दर्शयति **--समन्तात् प्रविशति एकतामन्यतामुभयतामनुभयतां च योऽर्थः स पर्यवः,** अस्ति इत्यस्य मतिरास्तिकः, **पर्यवे आस्तिकः पर्यवास्तिक** इति मूलसंज्ञास्य नयस्य शब्दस्य । § 2442

764/mj

भावः, समन्तात् प्रविशति एकतामन्यतामुभयतामनुभयतां च योऽर्थः स पर्यवः, पर्यवे आस्तिकः पर्यवास्तिकः । § 2443

उपनिबन्धनमस्य--तदुभयस्स आदिट्ठे अवत्तव्वं आता ति य णो आता ति यभगवती॰ १२ । १० । ४६९ इति । § 2444

इति नियमभङ्गो नवमोऽरः ॥ § 2445

किमेताः स्वमनीषिका उच्यन्त उतास्त्यस्योपनिबन्धनमार्षमपि ? इति, अस्ति इत्युच्यते-- **उपनिबन्धनमस्य तदुभयस्स आदिट्ठे** इत्यादि । **इमा णं भंते रयणप्पभा पुढवी आता नो आता ?** इति पृष्टे भगवद्वचनम् ॥

२१ भ्व] भ्वार्थ प्र॰ । दृश्यतां पृ॰ २४४ पं॰ ३ टि॰ ३ ॥
२२ भू] भूञञोः प्र॰ ॥
३ अ] एत एवार्था अग्रेऽपि पृ॰ ५४७--२ इत्यत्र वक्ष्यन्ते । हैमधातुपारायणेऽपि एत एवार्था दर्शिताः । सम्प्रति प्रचलिते पाणिनीयधातुपाठे माधवीयधातुपाठे च अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु इति पाठ उपलभ्यत इति ध्येयम् । दृश्यतां पृ॰ ४५१ टि॰ २ ॥
४ श्र] ॰स्रवण॰nayacakra-ms-bhā ॥
४ अ] अस्तांत्य मति॰nayacakra-ms-ya । आस्तांत्य मति॰ nayacakra-ms-bhā । दृश्यतां पृ॰ ७ पं॰ ११ । अस्तिनास्तिदिष्टं मतिः ४ । ४ । ६० । तदस्य इत्येव अस्ति परलोकः इत्येवं मतिर्यस्य स आस्तिकः । नास्ति इति मतिर्यस्य स नास्तिकः । दिष्टम् इति मतिर्यस्य स दैष्टिकः । --nayacakra-ms-pā सिद्धान्तकौमुदी ॥

--गोतमा ! सि+आ आता सि+आ णो आता । से केणट्ठेणं भंते एवं वुच्चति सि+आ आता सि+आ णो आता ? इति हेतुपरिप्रश्नः । भगवांस्तदुत्तरमाह— गो+अमा ! अप्पणो आदिट्ठे आता, परस्स आदिट्ठे णो आता, तदुभयस्स आदिट्ठे अवत्तव्वं आता ति य णो आता ति य इति । एवमवक्तव्यत्वमात्मानात्मपर्यायाभ्यामादेशेऽत्र ज्ञापकनिबन्धनत्व उच्यते ।
§ 2446

इति नियमभङ्गो नवमोऽरः श्रीमल्लवादिप्रणीतनयचक्रस्य टीकायां न्यायागमानुसारिण्यां सिंहसूरिगणिवादिक्षमाश्रमणदृब्धायां समाप्तः ॥

# १० अथ दशमो नियमविध्यरः ।

765/mj

ॐ अर्हँ § 2448

॥ जयन्ति श्रीपार्श्वजिनेन्द्राः ॥ § 2449

नैवंविधो नियमो युज्यते स्ववचनविरोधादिदोषादनेकावस्थापत्तावनियतत्वाच्च । तद्यथा--इदं तत् तदेवोद्यते तदेव चापोद्यते त्वया । ततश्चासत् तत्, स्वयंविहितनिवर्तित्वात्, सर्वोक्तानृतत्वपक्षवत् । एकत्वादि प्रतिषिध्य व्यवस्थाप्य च परस्परतः पुनश्चापोद्यते । § 2450

दृष्टान्ते यदुक्तम् अग्नेरिन्धनपृथग्भूतं रूपमाख्येयम् इत्यादिना च प्रतिषिद्धं सोऽपि च प्रतिषेधोऽप्रत्ययः, यथोक्तम्--(?')अग्नेरिन्धनपृथग्भूतं तत्त्वमशक्यं दर्शयितुम्, न § 2451

विध्यादिसकलभङ्गात्मकसम्यग्दर्शनाधिकारे वर्तमाने विकलनयस्वरूपज्ञानमूलत्वात् सम्यग्दर्शनस्य विध्युभयविकल्पचतुष्टयात्मकौ मार्गौ व्याख्याय नियमविकल्पचतुष्टयात्मके तृतीये मार्गे वर्तमाने तत्र नियमभङ्गं प्रथममुक्त्वा अभिजल्पशब्दार्थ[त्व]माभिमुख्येन दिक्प्रत्यासत्त्या न साक्षाद् वस्तुनः सामान्यविशेषयोरेकत्वान्यत्वाद्यनेकदुरुपरवधारावस्थत्वादवक्तव्यता इत्यनन्तरं नियमनयेऽभिधानात् अत्राप्यपरितुष्यन् नियमविधिभङ्गारस्त्वाह **--नैवंविधो**

० मा ] ०मार्कर्ष० प्र० ॥
० इ ] पृ० ५५१ टि० १ ॥
० म् ] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
० आ ] आयाnayacakra-ms-ya ॥
० आ ] आयाnayacakra-ms-ya ॥
० ति ] येति प्र० ॥
१४ अ ] पृ० ७६२ पं० ३, पृ० ४९८--२ ॥
१६ निय ] नियमनयो भिधानात्nayacakra-ms-bhā । नियमनयोभिधात् nayacakra-ms-ya ॥

**नियमो युज्यते स्ववचनविरोधादिदोषादनेकावस्थापत्तावनियतत्वाच्च,** इदं हि त्वदीयं वचनं लोकाभाणक एव संवृत्तः । **तद्यथा--इदं तत्तदेवोद्यते तदेव** - /ms **चापोद्यते त्वया,** तदेव व[द]स्यपवदसि चेत्यर्थः । ततः किम् ? **ततश्चासत् तदशो**भनं नास्ति वेत्यर्थः । कस्मात् ? **स्वयंविहितनिवर्तित्वात्,** आत्मना विहितमेव निवर्तयितुं शीलमस्येति स्वयंविहितनिवर्ति त्वद्वचनम्, तद्भावात् स्वयंविहितनिवर्तित्वात् । किमिव ? **सर्वोक्तानृतपक्षवत्,** यथा सर्वमुक्तमनृतम् इति वदता यदेवोदितं सर्वमुक्तमनृतम् इति विधिना तदेवानृतत्वेन व्याप्तत्वात् प्रतिषिध्यमानमपोद्यते तथेदमपि त्वदीयं सर्वमवक्तव्यम् इति । § 2452

एतस्य प्रतिपादनार्थ**मेकत्वादि प्रतिषिध्य व्यवस्थाप्य च परस्परतः पुनश्चापोद्यते** । तद्यथा--प्रागेव तावत् सामान्य-विशेषयोरेकत्वे प्रतिषिद्धेऽन्यत्वमुपस्थितमर्थात्, तद्बलेन प्रतिषेधात् । तदन्यत्वं विधाय पुनः प्रतिषिद्धम् । § 2453

तं प्रतिषेधग्रन्थं दर्शयति अप्रत्ययत्वेन --**यथोक्तम्**--**अ** (Edtext outside numbered paragraph)**ग्नेरिन्धनपृथग्भूत**मित्यादि यावद**सन्नापद्येतेत्यादि** । **आदि**ग्रहणात् सयुक्तिकं सर्वं ग्रन्थं सन्दिशति । **तदेतत् पुन** (Edtext outside numbered paragraph)**स्त्वया** स्वयमेवापोदितं निराकृतम् । कथम् ? इति चेत्, उच्यते— **न** (Edtext outside numbered paragraph)**नु ज्वाला देशे,** यत् तदिन्धनपृथग्भूतं रूपमग्नेः पृच्छ्यते तज्ज्वाला आकाशदेशे गृहाणेति निरूपणेनान्यत्वं स्फुटीभूतमपि पुनः **तद्वा कु** (Edtext outside numbered paragraph)**तोऽनिन्धनम्** इत्यनिन्धनप्रत्याख्यानेन **ज्वालारूपमिन्धनसहितमेव इति ब्रुवता** । तथा चेदमुक्तं भवति--अदीप्यमानं प्राग (Edtext outside numbered paragraph)निन्धनमकाष्ठं च सद्दारूदकादि पश्चाद् दीप्तिस्वभावमिन्धनं काष्ठं भवतीति । त (Edtext outside numbered paragraph)च्च यत्सम्पर्कादिध्यते दीप्यते च दारूदकादि [तत्] (Edtext outside numbered paragraph) तस्याग्ने रूपमिति । एतच्च अन्यत्वप्रतिषेधार्थं वचनमन्यत्वमेव समर्थयति अतोऽप्रत्ययम् । यद्यन्यत्वं समर्थितमेव परिगृह्येत स्यात् सप्रत्ययम्, न तु परिगृहीतम् । तस्मादन्यत्वप्रतिषेधोऽप्रत्ययः, तत्समर्थनात् । ए (Edtext outside numbered paragraph)वं दृष्टान्तवर्णनऽन्य (Edtext outside numbered paragraph)त्वप्रतिषेघोऽप्रत्ययः । § 2454

कथं प्रतिषिद्धम् ? इति चेत्, उच्यते--तद्यथा

ह्यन्यदन्यसाधारणम्, सामान्यविशेषैकत्वान्यत्वानवस्थिततत्त्वघटपटसंवृतिवत् अनिरूप्यस्त्वसन्नापद्येतेत्यादि । तदेतत् पुनस्त्वयैवापोदितं ननु ज्वाला देशे

३ व] वस्यपवदमिवेत्यर्थःnayacakra-ms-bhā । वश्यपवदमिवेत्यर्थः nayacakra-ms-ya ॥
७ व] वदतो प्र° ॥

इत्यन्यत्वं स्फुटीभूतमपि तद्वा कुतोऽनिन्धनम् ? ज्वालारूपमिन्धनसहितमेव इति ब्रुवता ।

उपसंहारेऽपि यदुक्तं विशेषस्य भावपृथग्भूतं रूपमाख्येयम्... ... ...। एतदपि त्वयैवापोदितमन्यत्वप्रतिषेधवचनम् । ननु भवद्विशेषसमुदायकृतमेकत्वं रूपरसादिघटैकत्वविशेषवत्, अतोऽन्यत्वप्रतिषेधोऽतिस्फुट एव स्ववचनविरोधः ।

* * *

ख्येयम् इत्यादिना च प्रतिषिद्धं सोऽपि च प्रतिषेधोऽप्रत्ययः ।--**दृष्टान्ते**
766/mj **यदुक्तम् अग्नेरिन्धनपृथग्भूतं रूपमा**

* * *

ह्यन्यदन्यसाधारणम्, सामान्यविशेषैकत्वान्यत्वानवस्थिततत्त्वघटपटसंवृतिवत् अनिरूप्यस्वत्वसन्नापद्येतेत्यादि । तदेतत् पुनस्त्वयैवापोदितं ननु ज्वाला देशे इत्यन्यत्वं स्फुटीभूतमपि तद्वा कुतोऽनिन्धनम् ? ज्वालारूपमिन्धनसहितमेव इति ब्रुवता ।

उपसंहारेऽपि यदुक्तं विशेषस्य भावपृथग्भूतं रूपमाख्येयम्... ... ...। एतदपि त्वयैवापोदितमन्यत्वप्रतिषेधवचनम् । ननु भवद्विशेषसमुदायकृतमेकत्वं रूपरसादिघटैकत्वविशेषवत्, अतोऽन्यत्वप्रतिषेधोऽतिस्फुट एव स्ववचनविरोधः ।

* * *

ख्येयम् इत्यादिना च प्रतिषिद्धं सोऽपि च प्रतिषेधोऽप्रत्ययः ।

किञ्चान्यत्, **उपसंहारेऽपीत्यादि** । भाव-विशेषयोरेकत्वं प्रतिषिध्यान्यत्वं व्यवस्थाप्य तत्प्रतिषेधिदार्ष्टान्तिकोपसंहारे **यदुक्तं विशेषस्य भावपृथग्भूतं रूपमाख्येयम्** इत्यादि तमेव ग्रन्थं तदुक्तं दर्शयति, **एतदपि त्वयैवापोदितमन्यत्वप्रतिषेधवचनम्** । § 2455

कथम् ? इति तद्दर्शयति --**ननु भवद्विशेषेत्यादि** । ननु विशेषा एव भवन्ति, न सामान्यं नाम किञ्चिदस्ति । ते च विशेषा एव भवन्तः समुदिता एकम् इत्युच्यन्ते । नैकं किञ्चिदनेकात्मकं वस्तु, किं तर्हि ? एकैक एवैको विशेषोऽन्योऽन्यो भवतीति परमार्थः प्रणिधानवद्भिरभ्रान्तैरवगम्यते, भ्रान्तास्तु विशेषा एव भवन्तः समुदिता एकश्च एकम् इत्युपासते । किमिव ? **रूपरसादिघटैकत्वविशेषवत्**, यथा रूप-रस-गन्ध-स्पर्श-सङ्ख्या संस्थानादयो धर्मा विविक्ता भिन्नेन्द्रियग्राह्याः समुदिता एको घटः इत्युच्यन्ते तथा भ्रान्त्या
767/mj समुदायैकत्वे[ऽ]सत्यपि विशेषा एव रूपं रसो न भवति रसोऽपि

९ अ] पृ° ७४७ पं° २ ॥
२१ त] तत्प्रतिषेधेnayacakra-ms-ya ॥
२१ दुक्तं] पृ° ७५६ पं° ६ ॥
२७ विशेषोऽन्यो] °न्यो भव°nayacakra-ms-bhā ॥
२८ भ] भवन्तुःnayacakra-ms-bhā । भवन्तु nayacakra-ms-ya ॥
२९ ङ्ख्या] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥

* * *

ननूभयतोऽपि प्रतिषेधाददोषः । किंविषया तर्ह्यवक्तव्यता ? न तावद् भावस्य विशेषस्योभयस्य वा । एकत्वान्यत्वोभयत्वानुभयत्वानि प्रविभागेनाप्रविभागेन वा स्युः । अप्रविभागतस्तावदेकत्वं नास्ति प्रतिषिद्धत्वात्, प्रविभागतोऽपि नास्ति निषिद्धत्वादेव । सिद्धे चैकत्वे तद्बलेनान्यत्वं व्यावर्त्येत । तथैव प्रविभागतोऽप्रविभागतो वान्यत्वं नास्ति यद्बलेनानुभयत्वं व्यावर्त्येतैकत्वं वा । तथानुभयत्वमपि नास्ति यद्बलेनैकत्वान्यत्वोभयत्वानि व्यावर्त्येरन्, यस्य वाच्यतां गृहीत्वाऽवाच्यं वा व्यावर्त्येत ।

* * *

रूपं न भवति इत्यादीतरेतराभूतेर्विर्विशेषगुणः अन्योऽन्यो न भवतीति समुदायकृतादेकत्वाद् भ्रान्तिहेतुकात् पृथगेकत्वविलक्षणं विविक्तं विशेषविषयं प्रतिपादयितुं ***विशेषस्य भावपृथग्भूतं रूपमाख्येयम्** इत्यादिना पृथगेकत्वमन्यत्वं विशेषाणां स्वरूपेणावधारयितव्यमिति वचनादेवान्यत्वं समर्थितम्, **अतोऽन्यत्वप्रतिषेधोऽतिस्फुट एव स्ववचनविरोधो** दार्ष्टान्तिकोपसंहारेऽपीति । § 2456

ब्रूयास्त्वम् --**ननूभयतोऽपि प्रतिषेधाददोषः** । एकत्वं प्रतिषिध्य पुनरन्यत्वमपि प्रतिषिद्धमेव, तथोभयत्वमनुभयत्वं च प्रतिषिध्यावक्तव्यतैव समर्थितेति । अत्रेदमसि त्वं प्रष्टव्यः --**किंविषया तर्ह्यवक्तव्यता ?** यद्युभयप्रतिषेध एव कतमत् तद्वस्तु यदवक्तव्यम् ? किं तद् भावो विशेष उभयं वा ? इति निर्धार्यम्, वस्तुत्वे सति विकल्पत्रयानतिवृत्तेः । तत्र **न तावद् भावस्य, न विशेषस्य, न उभयस्य वा,** नकारानुवर्तनात् । भावस्य एकत्वान्यत्वोभयत्वानुभयत्वानि प्रविभागेनाप्रविभागेन वा स्युः । अप्रविभागेनैकत्वं यथा --**पुरुष एवेदं सर्वम्** शुक्लयजु॰ सं॰ ३१ । २ इत्यादि । प्रविभागेन सति द्वितीये तेन सहासम्पर्कादेकं स्यात्, यथा— - /ms

न सिंहवृन्दं भुवि भूतपूर्वमाशीविषाणामपि नास्ति वृन्दम् ।
एकाकिनस्ते विचरन्ति धीरास्तेजस्विनां नास्ति सहायकृत्यम् ॥
§ 2459

इत्येकशब्दस्यासहायार्थत्वात् । § 2460

**अप्रविभागतस्तावदेकत्वं** भावस्य विशेषस्य उभयस्य वा **नास्ति,** द्वितीयरहितस्य रूपाख्यानाशक्यत्वेन त्वयैव **प्रतिषिद्धत्वात्** । **प्रविभागतोऽपि नास्ति**

---

९ गु] ॰गणःnayacakra-ms-bhā ॥
१० गेक] एतदन्तर्गतः **॰कत्व... ...वधा॰** इति पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
११ *] पृ॰ ७५६ पं॰ ६ ॥
१२ न्य] **॰न्यत्व विशे॰**nayacakra-ms-ya ॥
१३ अ] पृ॰ ७६८ पं॰ २३ ॥
१८ क] **कतमवस्तु**nayacakra-ms-ya ॥
२२ पु] पृ॰ ७१ टिपृ॰ ५९ पं॰ २ ॥
२५ ए] एकाकिनस्ते विचरन्ति **वीराः** इति तत्त्वार्थराजवार्तिके १ । ५ । ३० ॥

**सहासहभवनस्य द्विष्ठत्वात्** इत्यादिना **निषिद्धत्वादेव** । तथा विशेषस्योभयस्य चैकत्वं नास्तीत्युक्तम् । **सिद्धे चैकत्वे तद्बलेनान्यत्वं व्यावर्त्येत,** सम्भाव्येतैकत्वं परिगृह्य तद्द्वारेण तदुपायेनान्यत्वस्य व्यावर्तनम्, तत्तु नास्त्यैकत्वम्, तदभावादन्यत्वप्रतिषेधाभावः । § 2461

768/mj

कथम् ? एकशब्दो ह्यन्यनिरपेक्षसंख्यार्थोऽप्रविभागैकशब्दार्थत्वात् । स च न घटते एकत्वान्यत्वोभयत्वानुभयत्वविकल्पानामन्योन्यापेक्षत्वात् । अथासहायवचन एकशब्दस्तथापि सहगतेर्द्व्याद्यर्थेनाव्यतिरेकादेकत्वं नास्ति । अन्यार्थे तु साक्षादन्यत्वमेव विशेषविषयम् । तथा चानन्यत्वमपि प्रतिपक्षाक्षेपादवक्तव्यनिर्विषयता वान्यथा । एवमन्यत्वो- § 2462

स्यान्मतम्--अन्यत्वं सिद्धम्, तद्बलेनैकत्वोभयत्वादि प्रतिषिध्यत इति । तच्च नान्यत्वं सिद्धम्, **तथैव प्रविभागतो[ऽप्रविभागतो] वान्यत्वं नास्ति** घटपटयोरिव जीव-शरीरयोरिव वा सम्भाव्यमानम्, त्वयैव तस्यापि निषिद्धत्वात्,

- /ms **यद्बलेनान्यत्वद्वारेणानुभयत्वं व्यावर्त्येतैकत्वं वा** । § 2463

**तथानुभयत्वमपि नास्ति** एकत्वान्यत्वयोर्लक्षणभेदनियमादित्युक्तम् **यद्बलेन एकत्वान्यत्वोभयत्वानि व्यावर्ते[र्त्ये]रन्, यस्य वाच्यतां गृहीत्वेति** इदं वाच्यमेकत्वमन्यत्वमुभयत्वं वा दृष्टमिदं तु तद्वन्न भव[ती]त्यवाच्यं तथेदं वाच्यमनुभयं तद्वत् तानि न वाच्यानीत्यति वाच्यबलाद**वाच्यं वा व्यावर्त्येत** इतरव्यवस्थापूर्वत्वादितरव्यावर्तनस्यान्वय-व्यतिरेकाभ्यामर्थाधिगमाच्च । § 2464

**कथमिति** तत् कथं भाव्यते ? इति पृच्छति । उच्यते --**एकशब्दो ह्यन्यनिरपेक्षसङ्ख्यार्थोऽप्रविभागैकशब्दार्थत्वात्,** हिशब्दो यस्मादर्थः, यस्मादेकशब्दः सङ्ख्यावाचित्वेऽन्यनिरपेक्षां सङ्ख्यां सङ्ख्येयप्राधान्येनाह--सङ्ख्यान्तरव्यावर्तनार्थार्थम् एकोऽयं न द्वि-त्र्यादयोऽर्थाः इति लोके तस्मात् एकः इत्युक्ते नान्योऽस्ति इत्युक्तं भवति, **स चार्थो न घटते,** न स निरपेक्षः, यस्माद् **एकत्वान्यत्वोभयत्वानुभयत्वविकल्पानामन्योन्यापेक्षत्वात्** प्रागुक्तविधिना । § 2465

---

१ हा] पृ० ७५६ पं० २ ॥
२ स] सम्भाव्यते चैकत्वंnayacakra-ms-ya ॥
१४ व्या] व्यावृत्त्ये°nayacakra-ms-bhā । व्यावृत्ते° nayacakra-ms-ya ॥
१६ य] तस्यnayacakra-ms-bhā ॥
१८ वा] वा च्या वर्त्येतरव्यवस्थापूर्वस्थादितर°nayacakra-ms-ya ॥
२१ ङ्ख्या] °र्थोप्रविभाग एक°nayacakra-ms-ya । °र्थाप्रविभाग एक° nayacakra-ms-bhā ॥
२२ स] संख्येमप्रा°nayacakra-ms-bhā । संख्येनप्रा° nayacakra-ms-ya ॥
२४ न] ने प्र° ॥

**अथासहायवचन एकशब्दः** । अथ मा भूदेष दोषोऽन्यनिरपेक्षसङ्ख्यार्थत्वकृत इत्यसहायवाची विकल्प्यैतैकशब्दस्तस्मादस्त्येकत्वम्, तदस्तित्वादन्यत्वाद्यप्यस्तीत्यवक्तव्यविषयसद्भावसिद्धिरिति । अत्र ब्रूमः --**तथापी**त्यादि, सहैति इति सहायः, सहाऽयनं सहगतिर्द्वयोर्बहूनां वा भवतीति **सहगतेर्द्व्याद्यर्थेनाव्यतिरेकादेकत्वं नास्ती**ति तदवस्थमवक्तव्याविषयत्वम्, किन्तु अन्यत्वमेव च सिध्येदिति पुनरन्यत्वमेव । एवमेकशब्दोऽर्थापत्त्यान्यत्ववाचीत्युक्तम् । § 2466

**अथ**अन्य एकः, सोऽपि ततोऽन्य एकः, इत्ये**कशब्दोऽन्यार्थवाची** ततोऽन्यार्थे तु **साक्षादन्यत्वमेव विशेषविषयम्**, ततोऽन्य**त्वनिषेधो**ऽतिस्फुट एव **स्ववचनविरोध** इत्युक्तम् । किञ्चान्यत्, **तथा चानन्यत्वमपि** । यथा चैकशब्दोऽस्मदुक्तन्यायेनान्यत्वे वर्तते तेन प्रकारेण **तथानन्यत्वमपि** सिध्यति, अनन्यत्वेन विनान्यत्वस्याभावात् । तत आह --**प्रतिपक्षाक्षेपादि**ति 769/mj

* * *

भयत्वादावपि । इत्येकत्वादिप्रतिषेधाः किम् ? कथमवक्तव्यम् ? ते तु निषेध्यानामतथात्वे निर्मूलत्वादवक्तव्यमेव व्यावर्तयन्ति ।

न, पराभिप्रायगतैकत्वाद्येकान्तव्यावर्तनार्थत्वात् । अथ त एकत्वादयो विद्यमानाः प्रतिषिध्यन्ते ततस्तत्रावक्तव्यत्वनिर्विषयता । अथाविद्यमानाः कथं परेण प्रतिपन्नाः ? न ह्येषां भवतैकान्तभवनं व्यावर्त्यानेकान्तभवनं प्रतिपाद्यते वादपरमेश्वरवादवत् ।

* * *

गतार्थं यथाव्याख्यातमेकत्वान्यत्वयोः परस्परप्रतिपक्षत्वात् तथोभयत्वानुभयत्वयोश्चेति । एवं तावदेकत्वं सिद्धप्रतिपक्षबलात् सिद्धं सद् व्यावर्त्यते नान्यदेत्यवक्तव्यनिर्विषयता **वान्यथेत्युक्तम्** । § 2467

अनेन शेषमुक्तं भवतीत्यतिदिशति --**एवमन्यत्वोभयत्वादावपीति** । **आदि**ग्रहणादनुभयत्वे वायं न्यायोऽवतार्यः । **न तावद् भावस्य विशेषस्य उभयस्य वा कथञ्चिदपि प्रविभागतोऽपविभागतो वान्यत्वमस्ति उभयत्वमस्ति** इत्युपक्रम्य **अन्यत्वासिद्धावेकत्वा**भावमुभयत्वाभावमुभयत्वासिद्धौ चैकत्वान्यत्वाभावं वाऽऽपादयित्वा भावयितव्यमिति । § 2468

तदुपसंहरति --**इत्येकत्वादिप्रतिषेधाः किं कथमि**त्यादि यावद् **व्यावर्तयन्ती**ति । एवमुक्तविधिना **एकत्वादिप्रतिषेधाः किम्** ? के ते प्रतिषेधाः ? न

---

३ त्वाद्य ] °द्यपी° प्र° ॥
३ त ] तथातीत्यादिnayacakra-ms-ya ॥
५ द्व्याद्य ] °द्यर्थेन व्यतिरे°nayacakra-ms-ya । °द्यतिरे° nayacakra-ms-bhā ॥
६ ए ] एकमेवशब्दो° प्र° ॥
१० म् ] पृ° ७६६ पं° ६ ॥
२० प्र ] °प्रत्यक्ष°nayacakra-ms-ya ॥
२१ व्या ] व्यावर्ततेnayacakra-ms-ya ॥
२१ ना ] नान्यवेत्यnayacakra-ms-bhā ॥
२७ वाऽऽपा ] °पादयिता भावयितमिति प्र° ॥

भवन्तीत्यर्थः । तत्प्रतिषेधाभावात् **कथमवक्तव्य**मिति निरुपपत्तिकं निर्विषयं चेत्यर्थः । **ते तु** एकत्वादिप्रतिषेधा **निषेध्यानामतथात्वे** निषेध्यत्वाभावे निर्मूला **निर्मूलत्वादवक्तव्यमेव व्यावर्तयन्ती**ति । § 2469

- /ms अत्राह --**न, पराभिप्रायगतैकत्वाद्येकान्तव्यावर्तनार्थत्वात्** । न निर्मूलाः प्रतिषेधाः, न च निर्विषयमवक्तव्यम्, एकत्वादिप्रतिषेधतथार्थत्वात् । *ते हि पराभिप्रायगतानामेकत्वादीनां प्रतिषेध्यानामेकान्तानां व्यावर्तनार्थाः, तस्माद-दोष इति । § 2470

अत्रोच्यते --**अथ त एकत्वादय** इत्या[दि] यावत् **कथं परेण प्रतिपन्ना** इति । यदि तावदेकत्वादयः परेण यथा विद्यन्ते तथैव प्रतिपन्नाः सन्तः प्रतिषिध्यन्ते ततस्तत्रावक्तव्यत्वनिर्विषयतोक्ता । अथाविद्यमाना अत्यन्तम-भूतत्वात् खपुष्पवदसन्तस्ते कथं प्रतिपत्तुं शक्यन्ते ? अतोऽप्रतिपन्नत्वादेव न प्रतिषेध्या इति प्रतिषेधानुपपत्तिः । § 2471

स्यान्मतम्--स्याद्वादेऽपि सामान्य-विशेषयोः किमेकत्वं नानात्वमुभयत्वम-नुभयत्वमवक्तव्यत्वम् ? इति पृष्टे प्रतिषेधाः क्रियन्ते--नैकत्वं नान्यत्वं नोभयत्वं नावक्तव्यत्वम्, किं तर्हि ? स्यादेकत्वं स्यादन्यत्वं स्यादुभयत्वं स्यादनुभयत्वं स्यादवक्तव्यमित्यादि । एतच्चायुक्तं तद्वैधर्म्यादिति तद्दर्शयति— **न ह्येषां भव-तेत्यादि** । स्याद्वादो हि वादानामीष्टे निग्रहानुग्रहसमर्थत्वात्, तस्मिंश्चैकत्वादयो
770/mj भवन्त *

* * *

अवक्तव्यशब्दस्य तु प्रतिपक्षः सम्भाव्यते, नञ्युक्तत्वात्, अब्राह्मणवत् । अपि च त्वयापि दिक्प्रत्यासत्त्या वक्तव्योऽर्थ इत्यभ्युपगतम् । स चावक्तव्य एव नञा प्रतिषिध्यते । तस्मादर्थादापन्नो द्विनञ्प्रयोगः प्रतिषेधप्रतिषेधत्वात् प्रकृतिं गमयति अनब्राह्मणवत् ।

संवृत्यैव वाग्व्यवहार इति चेत्; अपरमार्थस्तर्ह्यवक्तव्यत्वम्, संवृतिसत्यपदसमुदायार्थत्वात्, मण्डूकजटाभारकृतकेशालङ्कारवन्ध्यापुत्रख-पुष्पमुण्डमालाख्यानवत् । धर्मधर्मिविभागव्यवस्थाऽभावात् पक्षाद्यसाधन-त्वात् सम्भावनीयमवक्तव्यत्वं वस्तुनः, नान्यथा ।

* * *

एवैकान्तग्राहनिषेधेन निगृह्यन्तेऽनुगृह्यन्ते चानेकान्तप्रतिपादनात्, न तद्वदव-क्तव्यवादिना भवतामेव तेषामेकत्वादीनामे**कान्तभवनं व्यावर्त्यानेकान्तभवनं प्रतिपाद्यते** । तस्मादसत्प्रतिषेधादसमञ्जसोऽयं दृष्टान्तः --**वादपरमेश्वरवाद-वदिति** । तत्र ह्यनेकान्तरूपेण स्यादैक्यं स्यान्नानात्वम् इत्यादि वक्तव्या

---

२ त्वाभावे] निर्मूलान्निर्मूलत्वा° प्र° ॥
४ व्याव] °वर्तकार्थत्वात् न निर्मूलाःnayacakra-ms-bhā । वर्तकार्थत्वात् नर्मूलाः nayacakra-ms-ya ॥
५ *] ते भि पराभिप्रायगतामेकत्वा° प्र° ॥
११ अ] नोप्रति° प्र° ॥
१४ ना] नानात्वंnayacakra-ms-ya ॥
१८ *] कथयमि °त्यादि प्र° ॥

एव सन्तः एकान्तरूपेणावक्तव्याः इत्युच्यन्ते सप्रतिपक्षत्वाद् भावानाम्, तथा ह्याह-- § 2472

- /ms

सप्रतिपक्षाण्येतानि यतस्तस्मान्न तानि वाच्यानि ।
एकान्तेन हि वदतो मिथ्यावादः प्रसज्येत ॥ इति । § 2474

अत्र साधनमाह नियमविधिनयः --**अवक्तव्यशब्दस्य तु प्रतिपक्षः सम्भाव्यते, नञ्युक्तत्वात्, अब्राह्मणवत्** । सम्भाव्यमानप्रतिपक्ष एवावक्तव्यशब्दस्तदर्थो वेति पक्षः । **नञ्युक्तत्वा**दिति शब्देऽर्थे च हेतुर्योज्यः, तथा दृष्टान्तोऽपि **अब्राह्मणवदि**ति ब्राह्मणो न भवत्यन्यो वा ब्राह्मणादित्यब्राह्मणः सत्येव ब्राह्मणे प्रतिपक्षे क्षत्रियादिर्भवति तथा प्रतिपक्षे वस्तुनि वक्तव्ये सत्यवक्तव्यशब्दोऽर्थो वा भवितुमर्हतीति । § 2475

**अपि च त्वयापी**त्यादि । न केवलं सम्भावनयास्मदीयया वक्तव्य[त्वमवक्तव्य]त्वं च वस्तुनः, किं तर्हि ? **त्वयापि** अभिजल्पशब्दार्थवा दिना **दिक्प्रत्यासत्त्या वक्तव्योऽर्थः** इत्यभ्युपगतम्, अत्र चावयोर्मतिसंवादः, **स चावक्तव्य एव** त्वन्मत्या योऽभिजल्पेनोच्यतेऽर्थः सोऽ**वक्तव्य** इति वक्तव्य एव नञा प्रतिषिध्यते । तस्मा**दर्थादापन्नो द्विनञ्प्रयोगो**ऽयम्--अवक्तव्य इत्यवक्तव्यः, स च **द्विनञ्प्रयोगः प्रतिषेधप्रतिषेधत्वात् प्रकृतिं गमयति, अनब्राह्मणवदि**ति । अथवा कश्चिल्लोके ब्रूयात्--अवक्तव्यो न भवति अब्राह्मणो न भवति इति प्रयोगवत् सोऽनवक्तव्यद्विनञ्प्रयोगात् प्रतिषेधप्रतिषेधत्वात् प्रकृतिं गमयेदिति । एतेन स्ववचनाभ्युपगमविरोधावुद्भाव्य स्वयं वक्तव्यत्वे साधनमाहेति पिण्डार्थः । § 2476

**संवृत्यैव वाग्व्यवहार इति चेत्** । स्यान्मतम्--न शब्दः कश्चिदर्थं ब्रूते, यथोक्तम्—

*विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
तेषामत्यन्तसम्बन्धो नार्थाञ् शब्दाः स्पृशन्त्यपि ॥ § 2479

* * *

अथ यस्यावक्तव्यस्य एते देशाः सामान्यविशेषैकत्वान्यत्वादयस्तद्विशेषात् किं तदव्यतिरिक्तं व्यतिरिक्तं वा ? अवक्तव्यस्य स्वावयवतथानियमादेव तस्य व्यवस्थानात् ।

---

१० ब्दोऽर्थो] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१३ दिक्प्र] पृ° ७६२ पं° ३, पृ° ७६५ पं° १२ ॥
१३ चा] वाधयो°nayacakra-ms-ya । बाधयो nayacakra-ms-bhā ॥
१४ व] अवक्तव्य एव ? ॥
१८ योगा] °गात् प्रतिषेधत्वात्nayacakra-ms-ya ॥
१९ विरोधा] °धादुद्भा°nayacakra-ms-ya । °धायुद्भा° nayacakra-ms-bhā ॥
२३ *] पृ° ५४७ पं° ७ टि° ५ ॥

* * *

*येन येन विकल्पेन यद् यद् वस्तु विकल्प्यते ।
- /ms परिकल्पित एवासौ स्वभावो न हि विद्यते ॥
त्रिंशिकाविज्ञ॰ § 2481

इत्यादि । तत्र कः शब्दार्थः ? का वा चिन्ता--मयोक्तं सत्यं न त्वयोक्तमिति ? तस्मात् संवृतिसत्यव्यवहारगोचरत्वाददोषं सर्वमिति । § 2482

अत्र ब्रूमः --**अपरमार्थस्तर्हि अवक्तव्यत्वम्** । कस्मात् ? **संवृतिसत्यपदसमुदायार्थत्वात्,** यस्त्वया पदसङ्घातोऽभ्यधायि वाक्यमिति शब्दस्तदर्थश्च स संवृतिमात्रार्थत्वादपरमार्थः । दृष्टान्तः— **मण्डूकजटेत्यादि** । मण्डूकजटाभारेण कृतः केशालङ्कारो नटकेशभारको यस्य वन्ध्यापुत्रस्य [स] मण्डूकजटाभारकृतकेशालङ्कारवन्ध्यापुत्रः, तस्य खपुष्पदाम्ना मुण्डमाला कृता, तस्या आख्यानं सुरभिः पञ्चवर्णा स्वाकारगगनकुसुममयी इत्यादि वर्णनं संवृतिसत्यपदसमुदायार्थत्वान्न परमार्थ स्तथेदं सर्वमपीति नास्त्यवक्तव्यता । § 2483

किञ्चान्यत्, **धर्मधर्मीत्यादि** । आ विदितमित्थं भवत्यवक्तव्यं वस्तु, प्रतिपादनप्रमाणाभावात् । प्रतिपादनप्रमाणाभावो **धर्मधर्मिविभागव्यवस्थाभावात्,** तदभावोऽ**वक्तव्यत्वात्** । धर्म-धर्मिणौ हि विभागेन व्यवस्थितौ पुनः समुदितौ पक्षः स्यात्, यथा साध्यधर्मविशिष्टो धर्मी पक्षः--अनित्यः शब्द इति । तस्य धर्मिणः कृतकत्वादिरन्यो धर्मो व्यवस्थित एव हेतुः स्यात् । तौ च साध्यसाधनधर्मौ सहितौ धर्म्यन्तरे प्रदर्श्येते यत्र यत् कृतकं तदनित्यं दृष्टम्, यथा घटः इति स दृष्टान्त **इतीदं धर्मधर्मिविभागव्यवस्थानात्मकं**
- /ms **साधनं नोपपद्यते** निरस्तधर्मधर्मिविभागव्यवस्थत्वात्, धर्मधर्मिनिरसनं चाव-

१ *] आध्यात्मिकबाह्यविकल्प्यवस्तुभेदेन विकल्प्यानामानन्त्यं प्रदर्शयन्नाह--येन येन विकल्पेनेति । यद् यद् वस्तु प्रकल्प्यते आध्यात्मिकं बाह्यं वान्तशो यावद् बुद्धधर्मा अपि परिकल्पित एवासौ स्वभाव इति, अत्र कारणमाह--न स विद्यत इति । यद् वस्तु विकल्पविषयस्तद् यस्मात् सत्ताभावान्न विद्यते तस्मात् तद् वस्तु परिकल्पितस्वभावमेव, न हेतुप्रत्ययप्रतिपद्यस्वभावम् । तथाहि--एकस्मिन् वस्तुनि तदभावे च परस्परविरुद्धानेकविकल्पप्रवृत्तिर्दृष्टा, न चैकं वस्तु तदभावो वा परस्परविरुद्धानेकस्वभावो युज्यते । तस्मात् सर्वमिदं विकल्पमात्रमेव तदर्थस्य परिकल्पितरूपत्वात् । उक्तं च सूत्रे--न खलु पुनः सुभूते धर्मास्तथा विद्यन्ते यथा बालपृथग्जना अभिनिविष्टाः इति ।— इति **वसुबन्धु**रचितानां **त्रिंशिकाविज्ञप्ति**कारिकाणां **स्थिरमति**विरचिते **भाष्ये** Bibliothèque de l'Ecole des Hautes des Hautes Etudes ॥

४ संवृतिस] ॰**सत्यं** प्र॰ ॥

५ अ] **अवक्तव्य**

**कस्मात्**nayacakra-ms-ya ॥

६ ङ्घातोऽभ्य] पृ॰ ७६२ पं॰ १ ॥

७ म] मण्डूकजटाभारकृतकेशालङ्कारवन्ध्यापुत्रखपुष्पमुण्डमालाख्यानवत् सकलमिदमनालम्बनं समयव्यावर्णनं स्यादिति ।--इति **तत्त्वार्थसूत्रस्य** **सिद्धसेनीयवृत्तौ** पृ॰ ३१९, ५ । १ ॥

१३ ध] **धर्मधर्मीत्यादि** प्र॰ ॥

१३ आ] आः विदितम् इत्थं भवत्यवक्तव्यं वस्तु ॥

क्तव्यत्वाद् भावविशेषैकत्वान्यत्वादिनिरसनद्वारेण वस्तुनस्तस्य च निर्विषयत्वस्यानन्तरोक्तत्वात् । तस्मान्निरस्तधर्म-धर्मिसङ्ग्रहात्मकत्वात् पक्षादि असाधनम् खरं खरविषाणम्, स्फुटितपृष्ठत्वात्, 772/mj

* * *

यदि सामान्यकृतैकत्वोभयत्वकृतान्यत्वयोर्विशेषेणाक्रान्तेः सामान्यकृतैकत्वोभयत्वकृतान्यत्वविशेषाव्यतिरिक्ततायामवक्तव्यार्थसंवादादवक्तव्यत्वस्य नियमत्वात् तथा तथा विशेषादव्यतिरिक्तं ततो व्यतिरेकादन्यत्वाक्षान्तेः, ननु विशेषमात्रमेवैवम् । यथा भिन्नोऽप्येको

* * *

आकाशस्फोटवत् इति पक्षादिवत् । तस्मात् पक्षाद्यसाधनत्वात् सम्भावनीयमवक्तव्यत्वं त्वत्परिकल्पितस्य वस्तुनो नान्यथेत्युद्धट्टकोऽयम् । § 2484

अभ्युपेत्यापि अवक्तव्यतां दोषं ब्रूमः--इदमसि त्वं प्रष्टव्यः **--अथ यस्येत्यादि** । अवक्तव्यात्मकस्य देशिनो य एते देशाः सामान्यविशेषैकत्वान्यत्वादयो यैस्तदवक्तव्यमिष्यते तेषां यो विशेषोऽवयवस्तस्मात् किं तदव्यतिरिक्तमित्यादि अयं हि नियमविधिनयो विशेषवादी तमेव स्वाभिप्रेतं विशेषं गृहीत्वा चोदयति । § 2485

स्यान्मतम्--सामान्यविशेषैकत्वादिनिराकरणेनैवावक्तव्यं जात्यन्तरं वस्तु नियमितं निश्चितनियताऽधिकभावेन, तत्र कुतस्तदव्यतिरिक्तत्वादिप्रश्नोत्थानम् ? इति, अत्रोच्यते--अवक्तव्यस्य विशेषाषस्वावयवतथानियमादेवास्ति तस्य वस्तुनो व्यवस्थानात् तत् किं तैरव्यतिरिक्तं व्यतिरिक्तं वा इत्यादि प्रश्नोत्थानं तदवयवत्वाच्च तस्य सामान्यविशेषैकत्वाद्याशङ्कासम्भववदिति तदुपपत्तिं प्रदर्शयन् परमतमाशङ्कते--तद्यथा **यदि सामान्येत्यादि** । सामान्यमेव साङ्ख्यादीनामेकं वस्तु च । *विशेष एव बौद्धस्य । उभयं वैशेषिकस्य परमतो[ऽ]न्यत् । तत्रावक्तव्यवादे यदि तत् सामान्यकृतमेकत्वं विशेषीभूतमाक्रम्य विशेषः स्वरूपं वस्तुन्यर्पयन् सामान्यकृतैकत्वविशेषं व्यावर्तयेत् न सामान्यमेव इत्यविशेषापादनेन यदि चोभयत्वकृतमन्यत्वं न सामान्यं - /ms च विशेषश्चैव इति, ततस्तदेकत्वान्यत्वयोरपि विशेषेणाव्यतिरिक्ततायां सत्यामवक्तव्यार्थः संवदेत्, नान्यथा, तेषामेकत्वादिविशेषाणां स्वातन्त्र्ये सति अवक्तव्यत्वनिवृत्तेः, विशेषाणां हि वस्तुपरतन्त्रत्वे सति अवक्तव्यार्थो नियम्यमानः संवदतीत्यत आह **--[अ]वक्तव्यत्वस्य नियमत्वात्,** तस्य च नियमस्य **तथा तथा** तेन तेन प्रकारेण सामान्यविशेषैकत्वान्यत्वोभयत्वादीनामात्मान्त-

२ त्वात्] पृ° ७६८ पं° ४ ॥
१० क्त] °क्तव्यंnayacakra-ms-ya । °क्तत्वं nayacakra-ms-bhā ॥
१३ यो] विशेषावयवस्मात्nayacakra-ms-ya ॥
१७ मितं] पृ° ७६१ पं° १० ॥
१८ त] °तथास्ति तस्यnayacakra-ms-bhā ॥
२१ प्र] प्रदर्श्ययत्परमत°nayacakra-ms-ya ॥
२२ *] विशेषाnayacakra-ms-bhā ॥
२३ प] परस्परतोऽन्यत् ?परमतेऽन्यत् ? ॥

रनिवृत्तावात्मान्तरत्वापत्तेर्विशेष्यमाणस्य नियमत्वादवक्तव्यत्वस्य विशेषत्वमेव, तस्मादव्यतिरिक्तं विशेषादवक्तव्यं वस्तु । यदि पुनर्विशेषव्यतिरिक्तं स्यात् ततो व्यतिरेकादन्यत्वं विशेषाणां वस्तुनः परस्परतश्चैकत्वादीनां स्यात् । तच्चान्यत्वं न विषहते वस्तु, एकान्तापत्तेरवक्तव्यत्वलोपात् । इष्टं चावक्तव्यं त्वयेत्यत आह— **ततो व्यतिरेकादन्यत्वाक्षान्तेः**रिति । इत्थं विशेषाव्यतिरेकोपपत्तिरवक्तव्यवस्तुन इति । § 2486

इत्यादिः स एव ग्रन्थो यावत् **एकत्वाक्षान्तेः** इत्युभयवादिपक्षेऽप्युपपत्तिरव्यतिरेकस्य तथैव योज्येति । § 2487

तथा **भावोपवेनाऽऽक्रान्तेर्विशेषकृतैकत्वोभयकृतान्यत्वभावाव्यतिरिक्ततायामवक्तव्यार्थसंवादादवक्तव्यत्वस्य नियमत्वात् तथा तथा विशेषादव्यतिरिक्तं ततो व्यतिरेकादन्यत्वाक्षान्तेः** इति पठित्वा भाववादिपक्षेऽप्युपपत्तिरव्यतिरेकस्य तथैव योज्या ।

विशेषः स्वरूपादव्यतिरिक्तत्वाद् विशेष एवाभ्युपगम्यते । यस्य भावेन सहैकत्वान्यत्वादि विचार्यते यस्माच्च भाव एकत्वान्यवादिभिरवक्तव्य उच्यते एष विशेषोऽप्येकैकः । अव्यतिरेको ह्येकलक्षणम् । स च वस्तु विशेषाव्यतिरिक्तत्वात् तत्स्वात्मवत्, भवतीति भाव इति सत्तार्थत्वात् तस्य । ततश्च विशेषमात्रमेव । तदेकत्वात् कुतोऽवचनीयता तस्य । न हि विशेषोऽवचनीयः, विशेषाव्यतिरिक्तत्वात्, तत्स्वात्मवत् । तथा च निर्धारितार्थावक्तव्य-

* * *

सामान्यविशेषाभ्यामाक्रान्तेः भावविशेषकृतैकत्वान्यत्वभावविशेषाव्यतिरिक्त-

773/mj तायाम्**तथा**

* * *

**विशेषः स्वरूपादव्यतिरिक्तत्वाद् विशेष एवाभ्युपगम्यते । यस्य भावेन सहैकत्वान्यत्वादि विचार्यते यस्माच्च भाव एकत्वान्यवादिभिरवक्तव्य उच्यते एष विशेषोऽप्येकैकः । अव्यतिरेको ह्येकलक्षणम् । स च वस्तु विशेषाव्यतिरिक्तत्वात् तत्स्वात्मवत्, भवतीति भाव इति सत्तार्थत्वात् तस्य । ततश्च विशेषमात्रमेव । तदेकत्वात् कुतोऽवचनीयता तस्य । न हि विशेषोऽवचनीयः, विशेषाव्यतिरिक्तत्वात्, तत्स्वात्मवत् । तथा च निर्धारितार्थावक्तव्य-**

* * *

**सामान्यविशेषाभ्यामाक्रान्तेः भावविशेषकृतैकत्वान्यत्वभावविशेषाव्यतिरिक्ततायाम्**

एवमवक्तव्यवादिमतसंवादाद् विशेषाव्यतिरिक्तं वस्तु । ततः किम् ?

- /ms यद्येवं विशेषाव्यतिरिक्तं तत एतदायातम् --**ननु विशेषमात्रमेवैवं** निय-

---

७ भा ] भावाक्रान्तेर्विशेष° इत्यपि पाठोऽत्र सम्भवेत् ॥
७ क्रा ] °क्रान्तेर्वि°nayacakra-ms-bhā । °क्रान्तवि° nayacakra-ms-ya ॥
८ था ] विशेषत्वाद्°nayacakra-ms-bhā ॥
१० त ] तथैवतयोज्या प्र° ॥

मविधिनयमनोरथपूरणम् । तद् भावयति **--यथा भिन्नोऽपीत्यादि,** यथा परस्परविविक्तासाधारणरूपत्वाद् विशेषाणां **भिन्नोऽप्येको विशेषो रूपादिः स्वरूपाद्** रूपाद्यात्मनोऽ**व्यतिरिक्तत्वाद् विशेष** एवेति दृष्टान्तवर्णनं वक्ष्यमाण-त्वा**दभ्युपगम्यत** इति त्वयापीष्टमित्यनुमानयति । § 2488

स्यान्मतम्--*तत् कथं मयाभ्युपगतम् ? इति तत्प्रदर्शनार्थमाह **--यस्य भावेनेत्यादि,** योऽसौ त्वया किं भावेन सह विशेषस्य एकत्वम्, अन्यत्वम् ? इत्यादिविचारे**ऽभ्युपगतो यस्माच्च विशेषाद्** भाव एकत्वान्यत्वादिभिरवक्तव्य इत्युच्यते **एष विशेषोऽपि एकैकः** । कस्मात् ? **अव्यतिरेको ह्येकलक्षणम्,** यद्धि न कुतश्चिद् व्यतिरिच्यते तद् एकम् इत्युच्यते, यथा **पुरुष एवेदं सर्वम्** शुक्ल यजु. सं. ३१ । २ इत्यादि । स च ***विशेषभावो वस्तु,** अवक्तव्यस्य **विशेषाव्यतिरिक्तत्वात्,** उक्तविधिना सिद्धो हेतुः, **तत्स्वात्मवदि**ति विशेषाव्य-तिरिक्तं विशेषस्य विशेष एव विशेष इति यथा तथा[ऽ]**वक्तव्याख्यमिति** सम्बन्धः । § 2489

मा भूत् प्रागुक्तसामान्यपर्यायभावशब्दबुद्धिरित्यसंमोहार्थं **भावो वस्तु** इति वस्तुपर्यायत्वं दर्शयन्नाह **--भवतीति भाव इति सत्तार्थत्वात् तस्य, त-तश्च विशेषमात्रमेव** इति सामान्यशङ्कानिरासो **वस्तु**पर्यायश्चेत्युपनयार्थः । **मात्र**ग्रहणात् सिद्धे स्फुटीकरणार्थमिष्टतोऽवधारणार्थं च **एव**कारग्रहणम् । स्थितमिदमेक एव विशेषस्तदवक्तव्यसामान्यमिति, तस्मिंश्च स्थिते **तदेकत्वात् कुतो[ऽ]वचनीयता ?** द्वितीयाभावात् केन सहैकत्वान्यत्वाद्यवक्तव्यता तस्य विशेषमात्रस्य भावस्य ? इति । § 2490 - /ms

तद्भावना **--न हि विशेष** इत्यादि, नावचनीयो विशेषः, **विशेषाव्य-तिरिक्तत्वात्, तत्स्वात्मवदि**त्युक्तार्थोपसंहारार्थं साधनं गतार्थम् । एवं निर्धा-रितो विशेषः, निर्धारितत्वाद् वाच्य एव स्यात्, अनिर्धारिते ह्यवाच्यः स्यात् । § 2491

774/mj

वचनाद् यादृच्छिकव्यवहारप्रसङ्गः । तस्मादवक्तव्य-सामान्यार्थो विशेष एव इति वक्तव्यः, विशेषाव्यतिरिक्तत्वात्, तत्स्वात्मवत् । अथ तथाप्यवचनीयमेवावचनीयसामान्यमिच्छ-सि एवं तर्हि विशेषो विशेष इत्यवचनीयः, विशेषाव्यतिरिक्त-त्वात्, अवक्तव्यसामान्यवत् । तस्याप्यवाच्यत्वे वस्तुनश्चावाच्यत्वे तयोः परस्परमवचनीयत्वादुभयतोऽप्यवचनीयं सामान्यं वचनीयं प्रसक्तम्, तथा विशेषोऽपि । § 2492

---

५ *] क्व कथंnayacakra-ms-bhā ‖
८ ए] एषो विशेषेपि एवैकःnayacakra-ms-ya । एषो विशेषे एवैकः nayacakra-ms-bhā ‖

१० *] विशेषो भावो ? ‖
२२ त्वा] °त्वात्स्वात्मव°nayacakra-ms-ya ‖

**अथ विशेषव्यतिरिक्तं वस्तु, अवक्तव्यत्वात् । नन्वेवं तस्य भावत्वे वक्तव्यतैव अभावत्वेऽपि वक्तव्यतैव । तथा त्वदुक्तवद- प्यवस्तुता अभूतावक्तव्यत्वात्, यथा च वस्तु विशेषाद् व्यतिरिक्तं तथा विशेषोऽपि वस्तुनो व्यतिरिक्तः । एवं च तदेवासत्त्वमनयोः ।** § 2493

**तथा चेत्यादि** । एवं निर्धारितमपि विशेषं स्वपक्षरागादवाच्यमेव म[न्य]से **तथा च निर्धारितेत्यादि** यावत् **प्रसङ्गः**, अयमबुद्धिपूर्वको यदृच्छया क्रियते व्यवहारस्त्वया निर्धारितार्थावक्तव्यवचनात्, उष्णत्वेन निर्धारितस्याग्नेः शीतोऽग्निः इति वचनव्यवहारवत् । § 2494

**तस्माद् विशेष एव इति निर्धारितो[ऽ]वक्तव्यसामान्यार्थो विशेष एव इति वक्तव्यः**, नावक्तव्यः, **विशेषाव्यतिरिक्तत्वात् तत्स्वात्मवत्** । § 2495

**अथ तथेत्यादि** । स्वपक्षरागेणैव विशेषाव्यतिरिक्तत्वेऽ**प्यवचनीयमेवावचनीयसामान्यमिच्छसि एवं तर्हि विशेषो विशेषः इत्यवचनीयः, विशेषाव्यतिरिक्तत्वात्, अवक्तव्यसामान्यवत्** । स्यान्मतम्— सिद्धमेव विशेषावाच्यत्वमिति । एतच्च न, त्वया विशेषस्य एकत्वादिवाच्यत्वेनाभ्युपगम्य प्रतिषेधेनावक्तव्यत्वप्रतिपादनस्य कृतत्वात् । § 2496

**तस्यापि विशेषस्यावाच्यत्वे वस्तुनश्चा**वक्तव्यसामान्य**स्यावाच्यत्वे**ऽवक्तव्यसामान्येन विशेषो न वाच्यो विशेषेण सामान्यमवाच्यम्, तयोश्चावचनीययोः **परस्परमवचनीयत्वम्** । ततः किम् ? **ततश्चोभयतोऽप्यवचनीयमवचनीयं** सदवचनीयं **सामान्यमिति** द्विःप्रतिषेधस्य प्रकृत्यापत्ते**र्वचनीयं प्रसक्तम्, तथा विशेषोऽपीति** वचनीयत्वमेव स्याद् द्वयोरपीति । एवं तावद् विशेषाव्यतिरिक्तत्वा- - /ms दवक्तव्यं वक्तव्यमेव इत्युक्तम् । § 2497

**अथ विशेषव्यतिरिक्तमित्यादि** । अथा मा भूवन्नमी दोषा इति वस्तुनो विशेषाद् व्यतिरिक्तत्वमिष्येतेति । अत्रापि पूर्वं प्रश्नोत्थाने चोद्योपक्रमे विशेषव्यतिरिक्तकारणमाह --**[अ]वक्तव्यत्वादि**ति, यस्मात् सामान्यविशेषैकत्वादिविशेषैर्वक्तव्यैरवक्तव्योऽर्थो भिन्नलक्षणस्तस्माद**वक्तव्यत्वादेव** स्वलक्षणाद् भिन्ना[द्] व्यतिरिक्तं विशेषाद् वस्त्वित्युपपत्तिः । इयमेव भावैकत्वोभयान्यत्वयोः पूर्ववद् व्यतिरिक्तत्वे योज्योपपत्तिरस्मिन्नपि पक्षे । § 2498

775/mj

---

८ उ] उष्णत्वेनानिर्धा॰ प्र॰ ‖
१२ अ] अ तथेत्यादिnayacakra-ms-ya ‖
१२ मेवाव] ॰यमेववावचनीय॰nayacakra-ms-ya ‖
२२ व्य] ॰व्यमेवमित्युक्तम्nayacakra-ms-ya ‖
२४ त्व] ॰त्वमिष्यतेतिnayacakra-ms-ya ‖
२७ भा] भावयिकत्वो॰nayacakra-ms-ya ‖

वस्तु असत्, अविशेषत्वात्, खपुष्पवत् । विशेषोऽप्यसन्, वस्तुव्यतिरिक्तत्वात्, खपुष्पवत् । तथा च सामान्यविशेषैकत्वान्यत्वादिविकल्पप्रपञ्चनमाकाशरोमन्थवत् परिक्लेशमात्रफलमयथार्थत्वात् । § 2499

अथावक्तव्यविशेषव्यतिरेकाव्यतिरेकम्, तथापि द्विर्विशेषांशवृत्तेर्विशेषप्रधानावक्तव्योपसर्जनपक्षता । तस्या अपि च रूपं निरूप्यम्--किमेकत्वनिषेधेऽन्यत्वम्, अन्यत्वनिषेधे § 2500

**नन्वेवं तस्य** विशेषव्यतिरिक्तत्वाद् द्वयी गतिः **--अत्यन्तभावो वा[ऽभावो वा]**, नान्यास्ति । **भावत्वे वक्तव्यतैव, अभावत्वेऽपि असत् इति वक्तव्यतैवेत्यवक्तव्यत्वनिवृत्तिरेवमस्मन्न्यायेन** दोषः । § 2501

किञ्चान्यत्, **तथा त्वदुक्तवदप्यवस्तुता**, तेन प्रकारेण **तथा** विशेष्यषव्यतिरिक्तत्वन्यायेन त्वदुक्तेनैव तदवक्तव्याख्यं वस्तु अवस्तु स्यात्, कस्मात् ? **अभूतावक्तव्यत्वात्**, भावैकत्वाविशेषद्वारेण ह्यवक्तव्यत्वमुक्तम्, तद्व्यतिरिक्तत्वे तस्याभूतावक्तव्यत्वम्, **अभूतावक्तव्यत्वाच्च खपुष्पवद**[व]स्त्विति । भावपक्षेऽपि भवत्येव भवतीति भावस्य वक्तव्यत्वादभूतावक्तव्य[त्व]म्, तस्मात् त्वन्मतेनैव भावपक्षेऽपि **अभूतावक्तव्यत्वात् प्रधानादिवत्** तदवस्त्विति । § 2502

किञ्चान्यत्, **यथा चेत्यादि** । **यथा च तद**वक्तव्याख्यं वस्तु **विशेषा[द्] व्यतिरिक्तमिष्यते तथा विशेषोऽप्यवक्तव्या**ख्याद् वस्तुनो **व्यतिरिक्तः**, व्यतिरेकस्य द्विष्ठत्वात् । **एवं च**सतितदे**वासत्त्वमनयोर्**वस्तुविशेषयोः प्राप्तम् । त्वदिष्टं वस्तु असत्, **अविशेषत्वाद्** विशेषव्यतिरिक्तत्वात्, **खपुष्पवत्** । **विशेषोऽप्यसन्, वस्तुव्यतिरिक्तत्वात्, खपुष्पवत्** । नो चेत्, खपुष्पं स्यात्, विशेषव्यतिरिक्तत्वात्, वस्तुवत्; खपुष्पं सत्, वस्तुव्यतिरिक्तत्वाद्वा, विशेषवत् । - /ms § 2503

**तथा चेत्यादि** । एवं तस्य वस्तुनोऽसत्त्वं सामान्य-विशेषयोः किमेकत्वमन्यत्व[म]वक्तव्यम् इत्यादि **विकल्पप्रपञ्चनमाकाशरोमन्थवत् परिक्लेशमात्रफलमयथार्थत्वादिति** आकाशकुसुमसौरभादिविचारायथार्थत्वादिवदयथार्थत्वमस्य विचारस्योक्तविधिना सिद्धमिति । एवं व्यतिरेकपक्षेऽप्यवक्तव्यत्वाभावः । § 2504

**अथावक्तव्यविशेषव्यतिरेकाव्यतिरेकम्** । स्यान्मतम्--सामान्यविशेषैकत्वान्यत्वाद्यवक्तव्यत्ववद् व्यतिरेकाव्यतिरेकत्वाभ्यामवक्तव्यं वस्त्वभ्युपगच्छामि,

---

८ अ] अत्यन्तभावो[ऽभावो] वा इत्यपि पाठः स्यादत्र ॥
१२ स्तु] °स्तु स्याnayacakra-ms-bhā । °स्तु स्य nayacakra-ms-ya ॥
१७ क्त] °क्तव्यं वस्तुnayacakra-ms-bhā ॥
२५ त्व] °त्व[म]वक्तव्य[त्व]म् इत्यपि पाठश्चिन्त्यः ॥
२७ स्य] °स्य विचारस्य विचार° प्र° ॥
३० तिरेकाव्य] एतच्चिह्नाङ्कितः °व्यतिरेकत्वा° इत्यन्त आरभ्य विशेष° इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥

अतोऽनर्थको विचारक्लेशो विशेषेण सहाव्यऽप्यस्य व्यतिरे**[काव्यतिरे]क-त्वाभ्यामप्यवक्तव्यत्वादवक्तव्यौ विशषव्यतिरेकाव्यतिरेकौ यस्मिंस्तद्** वस्तु **अवक्तव्यविशेषव्यतिरेकाव्यतिरेकमित्येष** मे पक्ष इति । § 2505
776/mj

एकत्वम्, तयोर्निषेधेऽनुभयत्वम्, अनुभयत्वनिषेधे चोभयत्व-म् ? प्रतिषेध्यविपक्षरूपमाश्रयितव्यम्, अथ नाश्रीयते किम् ? यद्याश्रीयते निषिध्यमानप्रतिपक्षरूपता ततः साङ्ख्यादिवादगतान-न्यत्वादिदोषोपादानम् । अथ नाश्रीयते ततः प्रतिपक्षरूपानाश्रयणे सर्वविकल्पानामेक- § 2506

अत्रोच्यते --**तथापि द्विर्विशेषांशवृत्तेर्विशेषप्रधानावक्तव्योपसर्जनपक्षता** । विशेषस्य भावविशेषैकत्वादेर्भाव-विशेषैकत्वान्यत्वाद्यवक्तव्यधर्मांशवृत्तिलाभवद् व्यतिरिक्ताव्यतिरिक्तत्वविशेषावक्तव्यत्वधर्मांशवृत्तिलाभाद् विशेष एवावक्तव्य-त्वेन विशेष्यत्वाद् गौर-दन्तुरत्वद्वयविशेषणविशेष्यदेवदत्तवत् प्रधानोऽवक्तव्यस्य चोपसर्जनता च स्यात् । ततश्च **विशेषप्रधानावक्तव्योपसर्जनपक्षते**यमप्रत-र्कितोपस्थिता, अनिष्टा च सेति । § 2507

किञ्चान्यत्, **तस्या अपि च रूपं निरूप्यम्,** कथं निरूप्यमिति चेत्, उच्यते --**किमेकत्वे**त्यादि, द्वाभ्यां न्यायाभ्यामन्यतरेणावश्यंभाव्यत्वाद् निरूप्य-म्, तद्यथा --**एकत्वे निषेध्येऽन्यत्वमापतति, अन्यत्वे निषेध्ये चैकत्वम्,** त-योर्निषेधेऽनुभयत्वम्, अनुभयत्वनिषेधे चोभयत्वम् । तस्मात् **प्रतिषेध्यविप-क्षरूपमाश्रयितव्यम्,** तच्च **तस्य** विशेषप्रधानावक्तव्योपसर्जनस्य **द्विर्विशेषांश-वृत्तेराश्रीयते** त्वया । **अथ नाश्रीयते किम् ? इति** पृच्छामो गतिद्वयान-तिवृत्तेरिति ****किमिति** तत्त्वयैव निरूपयितुम् । द्विधापि च दोषः । § 2508 - /ms

तत्र तावद् **यद्याश्रीयते निषिध्यमानप्रतिपक्षरूपता ततः** पर्यायेण **साङ्ख्यादिवादगतानन्यत्वादिदोषोपादानम्,** यदा विशेषान्यत्वं निषिध्यते त-दा साङ्ख्यमतमेकत्वमुपात्तं स्यात् । य[द्य] वयवैकत्वं निषिध्यते त-दा वैशेषिकाभिमतान्यत्वोपादानम्, **आदिग्रहणात्** पुरुषकालादिकार-

---

१ स] सहा[वक्त]व्यस्य इत्यपि पाठोऽत्र भवेत् ॥
१० र्मांश] °शावृत्ति° प्र° ॥
१६ न्यायाभ्या] °भ्यामनन्य° प्र° ॥
१७ ए] एकत्वेनिषेधे प्र° । एकत्वनिषेधे ? ॥
२१ *] किमिति वत्त्वयैवnayacakra-ms-ya । किमि त्वयैव nayacakra-ms-bhā । किमिदं त्वयैव ? ॥
२२ य] यथाश्रीयतेnayacakra-ms-ya ॥
२४ स्या] स्याद्यवयवैकत्वंnayacakra-ms-bhā । स्याद्यदनेकत्वं nayacakra-ms-ya ॥
२४ ते] तदास्त प्र° । अत्र भूयान् पाठव्यत्यासः प्रतिषु दृश्यते ॥एतच्चिह्नान्तर्गतः ७७६— ७७९ पृष्ठस्थः पाठः पृ° ७८१ पं° ११ इत्यत्र एतच्चिह्नाङ्कितपाठात् परतो विद्यते सर्वत्र । तथापि पूर्वापरसम्बन्धं पर्यालोच्य तत उद्धृत्यात्र निवेश्यतेऽस्माभिः ॥

णवादोपादानं कार्यमात्रसमुदायवादोपादानं च, तत्र ये दोषास्त्वयैवावक्तव्यवादिनाभिहितास्त एवाशेषास्तवापतन्ति । § 2509

अथ मा भूवन्नमी दोषा इति नाश्रीयते प्रतिषेध्यप्रतिपक्षरूपं ततः **प्रतिपक्षरूपानाश्रयणे सर्वविकल्पानामित्यादि** यावत् **कुत आयाता अवक्तव्यता ?** प्रतिषेध्यप्रतिपक्षरूपमनाश्रित्य प्रतिषिद्धेऽन्यतमविकल्पे निवर्त्ये तावति कृतार्थः सन् विकल्पान्तरमपि निवर्तयेत्, अनेनैव क्रमेण एकैकं निवर्त्य सर्वविकल्पेषु विशेषैकत्वादिषु निवर्तितेषु **अत्यन्तमसत् स्यात्,** न सद्वस्तु, ततश्च **कुत इयमवक्तव्यता आयाता ?** विकल्पान्तरप्रतिषेधेन हि विकल्पान्तराभ्युपगमे तदेकान्तनिराकरणद्वारेणावक्तव्यत्वस्यागमनं स्यात्, न हि सर्वविकल्पातीतस्य खपुष्पादेरवक्तव्यता स्यात् । § 2510
777/mj

त्वादीनां निवृत्तावत्यन्तमसत् स्याद् वस्तु, कुत आयाता अवक्तव्यता ? अनवधारणपरिग्रहात्तु स्याद्वादं वादपरमेश्वरं शरणं प्रपन्नोऽसि । तथापि तेऽभ्युपगमविरोधः । § 2511

अथैकान्ताभ्युपगमे दोषात् स्याद्वादाभ्युपगमेऽभ्युपगमविरोधादसदेव तद्वस्त्विति चेत्, एतदप्यशोभनं विशेषद्वारनिषेधानुपपत्तेस्ततोऽप्यमुकऽप्ययुक्त ?भावविशेषैकान्यत्वाद्यवक्तव्यत्वात् । § 2512

अथ प्रतिपादनमात्रम्, ननूभयलक्षणोपपत्तेरवक्तव्यतैव । एवं तर्हि ननु प्रतिपादनम् इत्यप्यवचनीयम्, अत्यन्तासत्त्वात्, खपुष्पवत्, विशेषवचनस्य विशेषाविशेषाद्येकत्वाद्यवक्तव्यत्वात् प्रतिपाद्यप्रतिपादकयोरप्येकत्वान्यत्वोभयत्वानुभयत्वाद्यवक्तव्यत्वात् । § 2513

स्यान्मतम्--अनवधारितैकत्वादिविशेषं सर्वाकारम् एकमपि अन्यदपि अवक्तव्यमपि इत्यादि परिगृह्यते तद् वस्तु इति चेत्, एवं तर्हि ? **अनवधारणपरिग्रहात्त्वित्यादि** । सर्वेषां विकल्पानामेकत्वादीनामवधारणमन्तरेणानुमत्या परिग्रहाद् **एकं द्रव्यमनन्तपर्यायम्** इति वस्त्वभ्युपगम्यम्--स्यादेकं स्यान्नाना स्यादुभयं स्यादनुभयं स्यादवक्तव्यमिति । **तदपि स्याद्वादं वादपरमेश्वरं शरणं** - /ms

---

४ क्ष ] °रूपाराश्रयणेnayacakra-ms-bhā । °रूपाश्रयणे nayacakra-ms-ya ॥
४ ता ] °ता प्रतिपक्षरूप°nayacakra-ms-bhā ॥
६ स ] सन्निकल्पा° प्र° ॥
७ स्या ] स्यान्न द्वस्तुnayacakra-ms-bhā । स्यात्तद्वस्तु ? ॥
२५ हा ] °हिृत्वित्यादिnayacakra-ms-ya ॥

प्रपन्नोऽसीति न किञ्चिद् वक्तव्यः संवृत्तः, तथापि वादपरमेश्वरशरणगमनं तेऽभ्युपगमविरोधाद् मनस्विनो विजिगीषुतां निरुणद्धि, तेनापि सह विरुद्धत्वात् पूर्वमिति । § 2514

अथैकान्तेत्यादि । अथ मतम्--निषेध्यप्रतिपक्षैकान्ताभ्युपगमे त एव मदुक्ता दोषाः, स्याद्वादाभ्युपगमेऽभ्युपगमविरोधः, तद्भावादेकान्तवादगतदोषविदूरीकरणार्थं पर्यायेण प्रतिषिद्धप्रतिपक्षसद्भावमनभ्युपगम्य [अ]सदेव तद् वस्त्विति चेदेतदुच्येत त्वया । एतदप्यशोभनम्, विशेषद्वारनिषेधानुपपत्तेस्ततोऽप्यमुकेप्ययुक्ते ?त्यादि, यद्यत्यन्तासदेव तद्वस्तु तस्य खपुष्पवदत्यन्तासत्त्वाद् भावविशेषैकत्वान्यत्वमवक्तव्यम् इत्ययुक्तम्, विशेषधर्मासत्त्वे विशेष्यत्वाभावात्, खपुष्पवत् । एवं प्रत्येकमेकत्वान्यत्वाभ्यां भाव-विशेषयोरवक्तव्यत्वमयुक्तमसत्त्वे । उभयत्वेनाप्ययुक्तम्, सदाश्रयत्वाद्योभयलक्षणत्वस्य एकत्वान्यत्वयोः सत्त्वात्, तद्द्वारेण चानुभयत्वस्यात्यन्तासत्त्वस्याप्यवक्तव्यता सिध्यतीत्यभिप्रायस्य त्वयैव कृतत्वात् । § 2515

अथोच्येत--प्रतिपादनमात्रम्,

> उपायः शिक्ष्यमाणानां बालानामुपलापनाः ।
> अतत्त्वे वर्त्मनि स्थित्वा ततस्तत्त्वं समीयते ॥ वाक्यप० २ ।
> २४० § 2518

* * *

अथोच्येत--सर्वस्यास्यावक्तव्यार्थप्रतिपादनवचनाददोषः । ननु यद्यवचनीयं [कथं प्रतिपादनम् ? अथ प्रतिपादनं कथमवचनीयम् ?]

अथोच्येत--अवचनीयमित्येतदप्यवचनीयमेव, वस्तुत्वात्, तदर्थवत् । तत् किं कथञ्चिदवचनीयं सर्वथा वा ? सर्वथा वा चा वक्तव्यत्वे प्रत्यक्षादिविरोधाः ।

* * *

इति विशेषैकत्वान्यत्वादि असदेव प्रतिपादनार्थं कल्प्यते, गतिरियं प्रतिपादनस्य ग्रामादिपथोपदेशे दिगादिप्रदर्शनवत् चित्रभक्तिबिन्दुविन्यसनवदिति ।

---

६ त] सद्nayacakra-ms-ya ॥
७ स्त्विति] वेदेतदुच्येता प्र० ॥
९ त्त्वे] विशेशिष्टत्वा°nayacakra-ms-bhā ॥
११ व्य] °व्यमयु°nayacakra-ms-ya ॥
११ ण] °णस्यnayacakra-ms-ya ॥
१२ त्त] °त्तताnayacakra-ms-ya ॥
१५ उ] उपायाः शिक्षमाणानां बालानामुपलापनाः । असत्ये वर्त्मनि स्थित्वा ततस्तत्त्वं समीहतेवाक्य प० २ ।
२४० तस्मादुपायाः शास्त्राणि जिज्ञासूनामबुधानामपलापनाः प्रतरणा एव बोद्धव्याः । यस्मात् तत्रासत्यरूपे शास्त्रप्रक्रियामात्रेऽर्थे स्थित्वा अविद्यामुत्सृज्य सत्यं विद्यास्वरूपं ब्रह्म समीहते प्राप्नोतीति यावत् । इति वाक्यपदीयटीकायां पुण्यराजकृतायाम् ॥
१५ ला] °लापनाnayacakra-ms-ya ॥
२४ थोप] °पदेशिnayacakra-ms-bhā ॥

*रत्र **ननू भयलक्षणोपपत्तेः**, प्रतिषेध्यप्रतिपक्षासत्त्वे ह्येकत्वान्यत्वयोः सत्त्वमितरेतरनिषेधार्थापत्तिविहितमुभयलक्षणत्वमापद्येत, अनिष्टं चैतत् । तस्मात् तत्रा**वाच्यवस्तुनि तयोश्चैकत्वान्यत्वयोः स्वरूपेणावक्तव्यतैवे**ति । § 2519

अत्र ब्रूमः --**एवं तर्हि ननु प्रतिपादनम् इत्यप्यवचनीयमेव**, यत् तदेकत्वादिप्रतिपादनमसत् कल्पितमुपायत्वाभिमतं तत् प्रतिपादनम् इत्यवचनीयम्, **अत्यन्तासत्त्वात्, खपुष्पवत्** । प्रतिपादनम् इति चोच्यते त्वया, प्रतिपादनं हि लोके विशेषवचनं दृष्टं यो गौरः स देवदत्तः इति तद्वैधर्म्येण । तच्चासत्त्वाद्विशेषवचनं प्रतिपादनं **[न] युक्तम्** । § 2520

किञ्चान्यत्, **विशेषवचनस्य विशेषाविशेषाद्येकत्वाद्यवक्तव्यत्वात्**, वचनमपि किं विशेषोऽविशेष एकोऽन्य उभयमनुभयमवक्तव्यम् ? इत्येवमादिविकल्पेषु अवक्तव्यम् । अतो **विशेषवचनस्याप्यवचनीयत्वात् प्रतिपादनं प्रतिपादनम् इत्यवचनीयम्** । § 2521

किञ्चान्यत्, **प्रतिपाद्यो** यः शब्दो **यश्च प्रतिपादकस्तयोरप्येकत्वान्यत्वोभयत्वानुभयत्वादि अवक्तव्यम्, तस्मादपि प्रतिपादनम् इत्यवचनोयम्** । तदवचनीयत्वे च तत्सत्त्वमवश्यंभावि वक्तव्यवदिति । § 2522

**अथोच्येतेत्यादि** । **न प्रतिपाद्यप्रतिपादकभेदोऽस्त्यवक्तव्यस्य, नापि केचिद् विशेषाः प्रतिपादकाः प्रतिपाद्यात्** सामान्याद् भिद्यन्ते, किन्तु सर्वस्य सविशेषणसविशेष्यस्यास्य वाक्यसङ्घातस्यैकस्यैवोक्तप्रकारेण**वक्तव्यार्थप्रतिपादनवचना[द]दोष** इति । § 2523

अत्र ब्रूमः --**ननु यद्यवचनीयमि**त्यादि गतप्रत्यागतेन विरोधापादनं गतार्थम् । § 2524

**अथोच्येत** त्वया --**अवचनीयम् इत्येतदपि** वचनमवचनीयमेव, अहो पुनरहमवचनीयवादी यत् किञ्चिदवचनीयमपि प्रतिपद्ये, यत् किन्तु सहार्थेन प्रतिपाद्य-प्रतिपादकभेदरहितं समस्तवृत्तिवचनमेतदपि नोच्यत एव **वस्तुत्वात्, तदर्थवदि**ति । § 2525 - /ms

चे ?त्यादि, उभयथा च सर्वथा, यदि केनचित् प्रकारेण यदि सर्वथेत्यर्थः । तत्र **यदि केनचित् प्रकारेणावचनीयं** यथा सामान्यविशेषैकत्वान्यत्वादिविकल्पानामन्यतमेन त्वयैव **उत्कोत्का तस्या**वक्तव्यत्वप्रतिपादनस्य **कृतत्वादेकत्वेनान्यत्वेनो**भय (Edtext outside numbered paragraph)त्वेनानुभयत्वेनान्यतरोपसर्जनप्रधानतया च तथा तथा वचनीयत्वात् प्रत्यक्षं श्रूयमाणत्वात् **प्रत्यक्षविरोधः** । स्वयमुक्तेः स्ववचनविरोधः । स्वयमभ्युपगमादभ्युपगमविरोधः । भिन्नव्यवस्थानलक्षणत्वादिनानुमानेन तथा तथा

१ *] रत्रत्रय°nayacakra-ms-ya ॥
२ ण]
°लक्षणस्तत्व°nayacakra-ms-ya ॥
५ त्वाभिम] °मतं
प्रतिपा°nayacakra-ms-bhā ॥
१६ अ]
अथोच्यतेत्यादिnayacakra-ms-ya ॥
१७ नापि] केनचिद् प्र° ॥
१७ स] सर्वस्य
विशेषण°nayacakra-ms-ya ॥

चोक्तप्रकारेणानुमानादनुमानविरोधः । * (Edtext outside numbered paragraph)लोके शास्त्रेषु च वाच्य-वाचकभेदप्रसिद्धेर्लोकागमविरोधौ । एवं तावत् केनचित् प्रकारेणावक्तव्यत्वे स्व (Edtext outside numbered paragraph)वचनादिविरोधाः । **सर्वथाऽप्यवक्तव्यत्वे तथैव प्रत्यक्षादिविरोधा** (Edtext outside numbered paragraph) स्त एव, सर्वथाप्यवचनीयमिति वचनात् तद्द्वारेण शेषदोषप्रसङ्गनात् । § 2526

अत्रेदानीं चिन्त्यतां परमनिश्चये त्वदीये--तत् तावत् प्रत्यक्षमुच्यमानं श्रूयमाणं वचनीयं तस्यावचनीयत्वे द्वयी गतिः --**तत् किं कथञ्चिदवचनीयं सर्वथा वा ?** इति पर्यनुयुज्य दूषणम्

इत्येवंविधमवस्तु सर्वथाप्यरूपत्वात् सर्वेण वा[ने]न विरोधात् खपुष्पवत्, इतरः प्रत्यक्षरूपादिवत् । तस्मान्नावक्तव्यं वस्तु । नापि निर्विचारवक्तव्यम्, एकान्तवादप्रसङ्गात् तत्र चोक्तदोषत्वात् । न विशेषः, समुदायत्वात्, रथादिवत् । न भावः, त्वयैव प्रतिषिद्धत्वात् । कुत एतदेकत्वाद्यवक्तव्यता ?

* * *

779/mj वे--**सर्वथा**

* * *

**इत्येवंविधमवस्तु सर्वथाप्यरूपत्वात् सर्वेण वा[ने]न विरोधात् खपुष्पवत्, इतरः प्रत्यक्षरूपादिवत् । तस्मान्नावक्तव्यं वस्तु । नापि निर्विचारवक्तव्यम्, एकान्तवादप्रसङ्गात् तत्र चोक्तदोषत्वात् । न विशेषः, समुदायत्वात्, रथादिवत् । न भावः, त्वयैव प्रतिषिद्धत्वात् । कुत एतदेकत्वाद्यवक्तव्यता ?**

* * *

**वे**

**इत्येवंविधमवस्तु** । इतिशब्दो हेतूपसंहारार्थः, एतस्मात् कारणादवक्तव्याख्यं यदेवंविधं विकल्पितं त्वया वस्त्विति तदवस्तु । कस्मात् ? **सर्वथाप्यरूपत्वात्,** सर्वैः प्रकारैः सर्वथा, यदि सामान्यविशेषैकत्वान्यत्वादिविकल्पैर्वाच्यमवाच्यमथ तैरव्यतिरेक-व्यतिरेकादिविकल्पैर्वाच्यमवाच्यमत्यन्तासदेव वा सामान्य-विशेषशब्दप्रतिपाद्य-प्रतिपादकादिविकल्पैर्वा वक्तव्यमवक्तव्यं चेत्याद्युक्तविधिना सर्वथा विचार्यमाणस्य रूपं नावतिष्ठते तस्मात् **सर्वथाप्यरूपत्वात् खपुष्पवदवस्तु तत्** । § 2527

किञ्चान्यत्, **सर्वेण वा[ने]न विरोधात् अवस्तु** इति वर्तते, उक्तविधिनैव
- /ms सर्वेण स्ववचनादिना **प्रमाणेनानेन विरुध्यत** एव, अतोऽप्यवस्तु । **खपुष्पवदेव** इति साधर्म्यदृष्टान्तः । **इतरः प्रत्यक्षरूपादिवदिति** वैधर्म्यदृष्टान्त

---

१ अत्रेदानीं ]
रिंत्यतांnayacakra-ms-bhā ।
रित्यांतां nayacakra-ms-ya ॥
१ त्व ] तदीयेnayacakra-ms-ya ॥

१ मानं ] श्रयमाणं प्र° ॥
२२ रूप ]
°पक्कत्खपुष्प°nayacakra-ms-bhā ।
°पत्वकपुष्प° nayacakra-ms-ya ॥

इत्यर्थः, यस्य रूपमस्ति तत् सर्वेण न केनचिद् विरुध्यते, यथा प्रत्यक्षं स्वसंवेद्यं सर्ववादिनं प्रति **ज्ञानसुखादि रूपादिवत्** इति विज्ञानमात्र-शून्य-वादिनो मुक्त्वाऽन्यान् प्रति **तस्मान्नावक्तव्यं वस्तु** इत्युपसंहारः । § 2528

**नापि निर्विचारवक्तव्यम्, एकान्तवादप्रसङ्गात् तत्र चोक्तदोषत्वात्,**न द्रव्यं न कारणं न सामान्यम् इति पूर्वोद्ग्राहितविकल्पप्रतिषेधेन नैकत्वं तेषामेव यथा त्वयैवावक्तव्यवादिना निषिद्धम् । § 2529

स्यान्मतम्--विशेषस्तर्हि **घटादिरस्तु वस्तु । *तदपि रथादिवदिति न भवति वस्तु,** सत्यपि 780/mj

* * *

किं तर्हि वस्तु ? रूपादय एव समुदायिनः, त एव हि भवन्ति, यत् तत् तैर्भूयते स भावः । न सामान्याख्यः, अरूपादित्वात्, खपुष्पवत् ।

को हि स पृथिव्यादेर्विनाभावः ? पृथिवी काऽस्मादिना विना ?... ... ... केऽणवो रूपादिभ्यो विना ? अभिवचनमात्रमेवैते । आत्मा च न नामान्यः कश्चिदस्ति, अरूपादित्वात्, खपुष्पवत् । यथा चक्रेषाक्षोद्ध्याद्यङ्ग-समूहे रथसंज्ञा, हस्त्याद्यङ्गसमूहे सेनासंज्ञा, समुदायो विभज्यमानोऽङ्गेषु तिष्ठति परतो वा परतो रूपादिष्वेव तिष्ठति, रूपादय

* * *

विशेषत्वे **समुदायत्वाद् रथादिवत्** । **न भावः** सामान्याख्यो विशेषप्रतिपक्षोऽपि तत्प्रतिषेधार्थापत्त्या प्रसक्तोऽपि, त्वयैव प्रतिषिद्धत्वात् । **कुत एतदेकत्वाद्यव-क्तव्यता ?** भाव-विशेषयोरेवासिद्धौ कुतः पुनस्तद्गतैकत्वान्यत्वादिधर्मद्वारानुग-म्यमवक्तव्यत्वमिति । § 2530

किं तर्हि वस्तु ? इति चेत्, उच्यते --**रूपादय एव समुदायिनः** । समुदायोऽसन्नपि परमार्थतो येषां संवृतिसन्नस्तीति **समुदायिनः । त एव हि भवन्ति,** न समुदायो नाम कश्चिदित्यवधारयति । **यत्तत्तैर्भूयते स भावः** भवनं भूतिर्भावसाधनो भावशब्दः, ते हि तस्या भवनक्रियायाः कर्तारः श-ब्दार्थसंव्यवहारेण, योऽन्यैः परिकल्प्यते **समुदायः** कारणं द्रव्यमित्यादिः स **न भावः सामान्याख्यः** कश्चिदस्ति । कस्मात् ? **अरूपादित्वात्,** समस्ता रूपादयो हेतुत्वेनोच्यन्ते, **रूपाद्यन्यतमानात्म- कत्वादि**त्यर्थः । किमिव ? - /ms **खपुष्पवत्** । § 2531

---

३ त] तस्मांतावक्तव्यं प्र॰ ॥
३ संहारः] °हारस्तापिnayacakra-ms-ya ॥
४ न] दृश्यतां पृ॰ ७६० पं॰ ५, पृ॰ ७५३ पं॰ १ ॥
५ त्प] °प्रतिषेधोनानैकत्वं प्र॰ । °प्रतिषेधेनानेकत्वम् इति °प्रतिषेधे नानैकत्वम् इति वा पाठोऽप्यत्र भवेत् ॥
७ *] तदापिnayacakra-ms-ya ॥
१७ प्र] °तिपक्षोपि तत्प्रतिपक्षोपि तत्प्र॰ प्र॰ ॥
२० म्य] °म्यवक्त॰nayacakra-ms-ya ॥
२५ मुदायः] °दाय कारणं प्र॰ ॥

एवं साधनेन भावस्य **सामान्यस्या**भावं प्रदर्श्य वस्तुतो दर्शयति **--को हि स पृथिव्यादेर्विने**त्यादि । पृथिव्युदकाग्निपवनाकाशात्मकालदिगादिसमुदायमात्ररूपादिपृथग्भूतः **कोऽसौ भावः ?** तद्व्यतिरेकेण नास्तीत्यर्थः । एवं **पृथिवी काऽम्मादिना विने**त्यादि यावत् **केऽणवो रूपादिभ्यो विनेति** गतार्थः । **अभिवचनमात्रमेवैते**, आभिमुख्यार्थवचनम्, रूपाद्यधिगमार्थमित्यर्थः । रूप-रस-गन्ध-स्पर्शशब्दा **रूपादयः** रूप-वेदना-विज्ञान-संस्कारा वा, तद्व्यतिरिक्तमन्यत् पृथिव्यादि तदभिवचनमात्रम्, **अत आह--आत्मा च न नामान्यः कश्चिदस्ति, अरूपादित्वात्, खपुष्पवत्** । § 2532

रूपादिसमुदायमात्रप्रतिपादनाय दृष्टान्तमाह **--यथा चक्रेषाक्षे**त्यादि । चक्राद्यङ्गसमूहे रथसंज्ञा, हस्त्याद्यङ्गसमूहे सेनासंज्ञा । यथा समुदायो विभज्यमानोऽङ्गेषु तिष्ठति, तान्यप्यङ्गानि विभज्यमानानि आत्मांशेषु, **परतो वा परत** इति यावत् परमाणुशो विभज्य रूपादिष्वेव तिष्ठति, प्रत्येकमेकैकमङ्गं परमाणुपर्यन्तं विभज्य सुष्ठु निभाल्यमानोऽपि रथो न दृश्यते तथा सेना वनं पुरुषोऽन्यो वार्थो न दृश्यतेऽङ्गव्यतिरिक्तः, किन्तु **तत्समुदाय आभासते, रूपादय एव प्रत्यवभासन्ते समुदितास्तथेति** । § 2533

१781/mj

एव प्रत्यवभासन्ते समुदितास्तथा । यदि सोऽङ्गेषु सात्मा स्यात् तत उपलब्धिधर्मा सन्नग्रहणनिमित्तानामभावे रूपादिवदुपलभ्येत वस्तुत्वात् । § 2534

रूपादिव्यतिरिक्तोऽस्ति चेत् समुदायः खपुष्पाद् भवेदरूपत्वात् रूपादिभ्य इव । अथानर्थान्तरताया रूपाद्यसम्भविभारवहनादिकार्यं रथादौ दृष्टं तत् कथम् ? तत् तेष्वेव रूपादिषु दृष्टम् । नन्वविवादसिद्धमावयोः--शिबिकावाहकेभ्यो व्यतिरिक्तात् सहायादृतेऽपि § 2535

**यदि सोऽङ्गेष्वि**त्यादि । **सात्मा** सात्मक आत्मावात्साआत्मवान्
- /ms स्याद् यदि रथोऽन्यो वा रूपाद्यात्मव्यतिरिक्तेनात्मना **ततः स उपलब्धिधर्मा** सन्नग्रहणनिमित्तानामतिदूर-सन्निकर्षा-ऽभिभवाद्युपलब्धिप्रतिब-

१. पृथिव्याकाशादिनाnayacakra-ms-ya ॥

१ स्या] °स्य भावं प्र° ॥
२ स] पृथिव्यापृथिव्यादे-र्विनाnayacakra-ms-bhā । पृथिव्यापृथिव्यादेविना nayacakra-ms-ya ॥
९ च] चक्रेखात्वेषाक्षे° nayacakra-ms-ya । चकेषात्केषाक्षे° nayacakra-ms-bhā ॥
१४ वा] वार्थौnayacakra-ms-bhā । वाप्तौ nayacakra-ms-ya ॥

न्धिनामभावे **रूपादिवदुपलभ्यते वस्तुत्वात्, न** [पुन]रुपलभ्यते । तस्मादसन् रथादिः समुदायः । § 2536

ततोऽन्यत्वे त्वनिष्टापादनम् --**रूपादिव्यतिरिक्तोऽस्ति चेत् समुदायो**ऽतदात्मकोऽनुपलभ्यमानोऽपि **खपुष्पाद् भवेदरूपत्वादरूपाद्यात्मकत्वाद् रूपादिभ्य इव**, न ह्यतदात्मकस्य समुदायस्योत्पत्तौ रूपादयो हेतुभावं प्रतिपद्यन्ते व्योमकुसुमस्य, तत्र घटादिसमुदायस्य रूपादयो हेतवो भवन्ति खपुष्पादिसमुदायो नेति रूपादय एव वा घटादिसमुदायस्य हेतवो न व्योमकुसुमादीत्यत्र को विशेषहेतुः ? § 2537

**अथानर्थान्तरतायामित्यादि** यावत् **कथम्** ? स्यान्मतम् यद्यनर्थान्तरं **रूपादिभ्यो रथादिसमुदायः, रूपादिष्वदृष्टं भारवहनादि कार्यं तत्रासम्भवि** - /ms **रथादौ दृष्टं लोके, तत् कथम्** ? प्रतिनियतकारणसाध्यत्वात् कार्याणाम्, तन्तु-पटादिवत् । अत्र प्रयोगः --**स्वतो व्यतिरिक्तसहकारिसम्बन्धिनो रूपादयः, स्वासम्भविकार्यदर्शनात्, चक्षुरादिवत्**, यथा कृष्णसारादि चक्षुर्व्यतिरिक्तमिन्द्रियमुपलब्धिकारणं सहकारिचक्षुषा सम्बद्धमनुमीयते चक्षुष्यसम्भवद् रूपज्ञानं कार्यं दृष्ट्वा तथा **रूपाद्यसम्भविभारवहनादिकार्यदर्शनाद्** रथादिसमुदायान्यत्वमनुमेयमिति । § 2538

अत्रोच्यते --**क्व तर्हि तद् दृष्टम् ? तद्** भारवाहनादि कार्यं **तेष्वेव रूपादिषु दृष्टम्**, अतः स्वासम्भवित्वविशेषणासिद्धिः । सिद्धत्वमभ्युपेत्याऽपि अनैकान्तिकं कार्यदर्शनम्, तद्दर्शयति --**नन्वविवादे**त्यादि, आवयोरविवादेन **शिबिकावाहकेभ्यश्चतुर्भ्यो व्यतिरिक्तात् सहायादृतेऽपि शिबिकावहनं दृष्टं कार्यम्**, अतोऽनैकान्तिकं तत् । § 2539

**तथा प्रत्येकवस्त्वि**त्यादि याव**दलातचक्रवदि**ति भारवहनादिक्रियायाः समुदायिष्वेव सम्भवं समुदाये चासम्भवं दर्शयितुं समुदायप्रतिषेधार्थं न्यायमाह । तेन प्रकारेण **तथा** रूपादिनो वस्तुनः **प्रत्येकं वृत्तिस्तामनतिक्रामन्त एव स्वां वृत्तिमवतिष्ठन्ते रूपादयः, स्ववृत्त्यत्यागव्यवस्थयैव क्रियां भारवहनादिकामारभन्ते तेषामेव वस्तुत्वात्, अन्यथा** वस्तुनो विपर्यये निर्विवरं देशभेदेन स्थितानां रूपादीनामेव 782/mj

* * *

शिबिकावहनं दृष्टं कार्यम् । तथा प्रत्येकवस्तुवृत्तिमनतिक्रामन्त एव स्वां वृत्तिमवतिष्ठन्ते रूपादयः तेषामेव वस्तुत्वात्, अन्यथा समुदायाख्यस्यार्थस्य

---

१ न ] न तूपलभ्यते ? ॥
१ स ] °सन्वथादिः प्र° ॥
७ पुष्पादिस ] °समुदाये ? ॥
१० म्भ ] °म्भवति रथादौnayacakra-ms-ya ॥
१४ व ] °वाद्nayacakra-ms-ya ॥
१६ मुदा ] °दायोnayacakra-ms-ya ॥
२० स ] साहाया° प्र° ॥
२२ भा ] भारवहनक्रियायाःnayacakra-ms-ya ॥
२३ न्या ] न्याह्यमाह प्र° ॥
२४ था ] रूपादिवस्तुनःnayacakra-ms-ya ॥

परिकल्पनामात्रत्वादनवस्थितैकस्वतत्त्वादलातचक्रवत् ।

ननु घटादाववस्थितैकरूपत्वेऽपि सत्त्वम्, न, समुदायत्वात् साध्यत्वात् । रूपरूपादिस्थितैकरूपत्वेऽपि सत्त्वमिति चेत्, न, रूपसामान्यसमुदायसाध्यत्वात् ।

प्रत्येकं वृत्ता रूपादिव्यक्तिर्भेदरूपैव अवस्थितैकरूपा । एतन्मात्रसत्यमेव वस्तु । तस्य त्वभिवचनमात्रं समुदायवचनम् । रथः शब्दविकल्पतो वस्तुविपरीतः संवृतिसन् शब्दार्थमात्रमेव संसारानुबन्धवत् । परमार्थतस्तु पश्चात् पूर्वं चाभावादङ्गेषु नास्ति रथः ।

* * *

वस्तुत्वात् ततोऽन्यथा **समुदायाख्यस्यार्थस्य परिकल्पनामात्रत्वादनव-**
- /ms **स्थितैकस्वतत्त्वत्वात् अलातचक्रवत्;** यथा अलातस्य भ्राम्यतश्चक्रवदाभानं भ्रान्तपरिकल्पनामात्रं निर्विवरत्वात् तथा रूपादीनां निर्विवराणां परमाण्वादिवदाभानं भ्रान्तपरिकल्पनामात्रम्, किमङ्ग पुनः सविवर-सविवरतर-सविवरतमघट-पटादिनगरादि-पृथिव्यांसव्यंशसमुदायानाम् ? न ह्येषां समुदायानामेकं स्वं तत्त्वमवस्थितं रूपादिवत् परस्परविविक्तमस्ति, अतोऽलातचक्रवदसन्तो रूपादिपरतत्त्वव्यपदेशभाक्त्वात् । तस्मादसतः समुदायस्य भा[र]व[ह]नादि[का] का क्रिया ? इति । § 2540

आह --**ननु घटादाविति** यावत् **स्वत्वसत्त्वमिति** अनैकान्तिकत्वोद्भावनम्, **अवस्थितैकस्वरूपं घटादि सद्भावादिति** । § 2541

अत्रोच्यते --**न, समुदायत्वात्,** नानैकान्तिकत्वमस्य हेतोः, **समुदायत्वाद्** घटस्य शकटादिवदेव **साध्यत्वाद् घटसत्त्वस्या**नैकान्तिकाभासतेत्यर्थः । § 2542

**रूपरूपादिस्थितैकरूपत्वेऽपि सत्त्वमिति चेत्,** शुक्ल-नोलादिरूपेषु रूपसामान्यं सच्चानवस्थितैकरूपं च दृष्टम्, तस्मादनैकान्तिकत्वमिति चेत्, **न, रूपसामान्यसमुदायसाध्यत्वात्,** शुक्लादिविविक्तरूपव्यतिरिक्तसामान्यरूपस्य समुदायाख्यस्य सत्त्वासिद्धेरवस्तुत्वाद् विपक्षासिद्धेर्नानैकान्तिकता । § 2543

अधुना वस्तुतत्त्वं निरूपयति --**प्रत्येकं वृत्ता रूपादिव्यक्तिर्भेदरूपैव** न सामान्यम्, सा च **अवस्थितैकरूपा** परस्परविविक्तेकरूपेत्येत**न्मात्रसत्यमेव वस्तु । तस्य** तु वस्तुनो**ऽभिवचनमात्रम्,** आभिमुख्येन प्रतिपत्तिनिमित्तं **समुदायवचनं** घटः इति पटो रथः इत्यादि वा । **उच्यमान एव स** रथः **शब्दविकल्पितो वस्तुविपरीतः संवृतिसन् शब्दार्थमात्रमेव** परिकल्प[ना]मात्रार्थ-
- /ms त्वाच्छब्दस्य । किमिव ? **संसारानुबन्धवत्,** यथा संसारस्यानुबन्धहेतुः माता
783/mj मे, पिता मे, भ्राता, भार्या, पुत्रः

* * *

---

११ स्व ] स्वतंत्रत्वात् प्र° ॥
१५ मुदायाना ]
°मेकस्वंतत्व°nayacakra-ms-bhā ।
°मेकः स्वतत्व° nayacakra-ms-ya ॥
२३ स ]
सत्वानवस्थि°nayacakra-ms-ya ।
सच्चावस्थितैकरूपं च ? ॥
२७ सा ] स च प्र° ॥
३१ स्यानुब ] °बन्धहेतुधर्माता प्र° ॥

यथोच्ये[त] सत् कार्यम्, तद्यथा रूपादिभिः... ... ...

यदेतत् सन्नाम ततोऽन्यदेव तु कार्यम्, तदतुल्यविकल्पत्वात्, रूपादिखपुष्पवत् । इह शब्दादीनां कारणानामाकाशादीनां च कार्याणामुभयेषामपि सत्त्वं कार्याकाशसत्त्वमेव वा इत्येतद् विकल्पद्वयं स्यात्, इतरयोरभ्युपगतप्रतिपक्षत्वाद् वादाभावात् । तद्यदि तावदु-

* * *

इत्यादिरनुपकारिष्वप्युपकारिबुद्ध्या व्यवहारोऽतत्त्वः प्रेमवासनावशाद् भवति तथा समुदायोऽतत्त्वव्यवहारवासनया स्व[र]सात् क्रियते, नात्र कश्चित् परमार्थः । § 2544

कस्तर्हि परमार्थः ? **परमार्थतस्तु पश्चात् पूर्वं चाभावादङ्गेषु** प्राक् चक्राक्षादिसंयोगाद् यथा रथस्यात्मा नास्ति चक्रादिविसंयोगीकृतेषु च पश्चान्नास्ति तथा **संयुक्तावस्थायामप्यङ्गेषु स्वात्मरहितत्वान्नास्ति रथ इति ।** § 2545

**यथोच्ये[ते]**त्यादि । अनेनैव न्यायेन किञ्चित् कार्यं घटपटादि बुद्धिपूर्वकं पुरुषेण क्रियते स्वत एव च कारणात् कार्यमुत्पद्यत इत्येतद् मृषेत्येतदुक्तं भवति । तत् पुनः कार्यमुत्पद्यते कारणादिति यथान्ये मन्यन्ते यथा तु युज्यत इति प्रदर्शनार्थमाह तैर्यथोच्यते सत्कार्यम् --**तद्यथा रूपादिभिरि**त्यादि, शब्दादितन्मात्राण्यत्र **रूपादि**ग्रहणेन गृहीतानि वाचोयुक्तिमात्रेण प्रक्रियावशाद् भिन्नत्वात् । इयमाकाशादीनां भूतानां शब्दाद्येकोत्तरोत्कर्षेण सन्निवेशात् कार्यत्वे प्रक्रिया (?ा)गरान्तरे व्याख्यातत्वान्न पुनर्व्याख्यायते । § 2546

साधनम् --**यदेतत् सन्नाम ततोऽन्यदेव तु कार्यं** सद्व्यतिरिक्तस्वभावम्, सत्स्वभावं न भवतीत्यर्थः कस्मात् ? **तदतुल्यविकल्पत्वात्,** यस्य येनातुल्यो विकल्पस्तत् ततोऽन्यदेव, अन्यस्वभावम्, तदात्म न भवतीत्यर्थः किमिव ? **रूपादिखपुष्पवत्,** यथा रूपादयः सन्तः खपुष्पमसत्, तत् तैस्तुल्यविकल्पं न भवति तथा कारणैः सद्भी रूपादिभिः कार्यमाकाशादि तुल्यविकल्पं न भवति, तस्मात् खपुष्पवत् सतस्ततोऽन्यस्वभावमिति । § 2547 - /ms

एतस्य साधनस्यासिद्धपक्षधर्मशङ्कानिराकरणार्थं व्याख्यानमारब्धुकामः स्वयमेव पृच्छति परोक्त्या व्याख्यापयितुम् **कथमतुल्यविकल्पः ? इति** । चतुर्षु भङ्गेषु द्वौ भङ्गावुपयोज्याविति तावेवोपन्यस्यति— **इह शब्दादीनामि**त्यादि । शब्दादयः **कारणानि, वियदा[द]यः कार्याणि, तेषामुभ-**

---

१० पू] पूर्वं च भावा॰nayacakra-ms-ya ॥
१५ स्व] सत एव इत्यपि पाठोऽत्र भवेत् । तुलना पृ॰ १६८ पं॰ ८ ॥
१५ मुत्प] ॰त्पद्येत nayacakra-ms-ya ॥
१६ त] ततः पुनःnayacakra-ms-ya ॥
२० क्रिया] पृ॰ २६५--२६६ ॥
२१ य] दृश्यतां पृ॰ ४३० पं॰ १ ॥
२२ र्थः] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२४ त] ततैस्तुल्य॰nayacakra-ms-ya ॥
२७ मा] ॰मासुकामःnayacakra-ms-ya ॥

येषामपि सत्त्वमित्येको विकल्पः । द्वितीयः --कार्याण्याकाशादीन्येव सन्तीति । न कारणसत्त्व-कार्यासत्त्वविकल्पो नोभयासत्त्वविकल्पो वा । कस्मात् ? उक्ताभ्यामित योस्तयोरभ्युपगतस्य सत्कार्यवादस्य प्रतिपक्षत्वाद् मत्पक्षत्व-मेवातो वादाभावादेतौ द्वावेवोपयोज्यौ । § 2548

784/mj

भयसत्त्वं ततः सत्त्वाविशेषात् कारणानां शब्दादीनां कार्याणां चाकाशादीनामविशेषे सति यथा स्वरूपतत्त्वा एव शब्दादय उत्पद्यन्ते तथाकाशादयोऽपि तत्स्वतत्त्वा एवोत्पद्येरन् सत्त्वाविशेषाद् रूपादिवत् । तस्मात् तदतुल्यविकल्पत्वात् सतोऽन्यस्वभावं कार्यम् । अथ न रूपादिप्रादुर्भाववद् भूम्यादिप्रादुर्भावः तच्च कार्यं सदेवेति निश्चितं ततः कार्यमेव सद् न रूपादि । रूपादि असत्, सद्विलक्षणत्वात्, खपुष्पवत्, स्वरूपतत्त्वेन भूतत्वात् सतः कार्याद् § 2549

तत्रापि --तद् यदि तावदुभयसत्त्वं प्रथमविकल्प इष्टः सत्त्वाविशेषात् कारणानां शब्दादीनां कार्याणां चाकाशादीनामविशेषः, सति चाविशेषे यथा स्वरूपतत्त्वा एव शब्द-स्पर्श-रूप-रसगन्धतत्त्वा एव शब्दादय उत्पद्यन्तेऽभिव्यज्यन्ते वा तथाकाशादयोऽपि तत्स्वतत्त्वा एवोत्पद्येरन् नोनाधिकस्वभावाः ।
- /ms कस्मात् ? सत्त्वाविशेषात्, रूपादिवत् । शब्द-स्पर्शाद्येकोत्तरपरतत्त्वोत्पत्तिर्माभूत्, इष्यते च सा । तस्मात् तदतुल्यविकल्पता सिद्धा, ततस्सतोऽन्यस्वभावं कार्यम् आकाशाद्यसदित्यर्थः । § 2550

एतत्प्रसङ्गभयादथ न भूम्याद्येकोत्तररूपादिपररूपोत्कर्षापकर्षवैषम्यरहितविविक्तस्वरूपरूपादिप्रादुर्भाववद् भूम्यादिप्रादुर्भावो वैलक्षण्यादतुल्यविकल्पतेतीष्यते तच्च कार्यं सदेव इति निश्चितं ततः कार्यमेव सदस्तु, न रूपादि, स्वपररूपापप्रादुर्भाववैलक्षण्यादनयोरसतः सद्विलक्षणत्वात् रूपाद्यसत् स्यात्, सद्विलक्षणत्वात्, खपुष्पवत् । सद्विलक्षणत्वं हेतोर्दर्शयति --स्वरूपतत्त्वेन भूतत्वाद् रूपादेः पररूपतत्त्वाविर्भाविनः सतः कार्याद् विलक्षणत्वादिति । § 2551

१ विक ] विकल्पौ प्र° ॥
२ विक ] °त्पद्येत nayacakra-ms-ya ॥
३ मित ] °रयोरभ्युप° nayacakra-ms-ya ॥
३ ग ] °गतस्यासत्का° प्र° ॥
१५ स्व ] स्वास्वरूप°nayacakra-ms-bhā ॥
१६ द्येर ] °रं तोनाधिक° प्र° ॥
१८ इ ] इष्यंते चासा प्र° ॥
१८ त ] ततस्ततो° प्र° ॥
२२ का ] कार्यं संवेदेति प्र° ॥
२३ स्व ] स्वपररूपा°nayacakra-ms-ya । पररूपा° nayacakra-ms-bhā ॥

**अथैवमपीत्यादि** । रूपादिस्वतत्त्वप्रादुर्भाववैलक्षण्येऽपि **रूपादि सत् स्वतत्त्वप्रादुर्भावात्मकं चेष्यते ततस्तद्वैलक्षण्या[त्] कार्यमसत्** प्राप्नोति, **अस्वतत्त्वाविर्भावात्मकत्वात्**, एकोत्तररूपादिपररूपतत्त्वोत्पत्तिरस्वतत्त्वाविर्भावः । तच्च सद्वैलक्षण्यं कस्येव ? इत्यत आह --**अलातचक्रवदिति**, यथा उल्मुकं भ्राम्यमाणं कणमात्रस्वतत्त्वत्यागेन चक्राभासमुत्पद्यमान[म]सदेवं कार्यमपीति । **अथ मा भूद्दोष इति सदेव कार्यमिष्यते ततः सत्त्वे स्वत एव प्रादुर्भवे[त्]** कार्यम्, यथा रूपं सद् रसरूपमनादाय प्रादुर्भवति रसोऽपि रूपरूपं तथा स्पर्श-शब्द-गन्धाः परस्पररूपम्, किन्तु स्वेनैव रूपेणाविर्भवन्ति तथाकाशादिकार्यमपि स्वरूपेणैवाविर्भवेत्, पररूपेण तु एकाद्युत्कर्षेणाविर्भवति इतीष्ट[मतोऽनिष्ट]स्तुल्याविर्भावस्ते प्राप्तः **सत्त्वात्, रूपादिवत्** । इत्येवं प्रादुर्भाववैलक्षण्यादतुल्यविकल्प- त्वमापादितं सद्भ्यो रूपादिभ्यः कार्यस्य । - /ms तदनिच्छतः प्रादुर्भावाविशेषप्रसङ्गपयेवसानकं चक्रकं तत्रैव प्रसङ्गे स्थितं **सत्त्वाद् रूपादिवत्** इत्युत्थाप्य **सत्त्वाद् रूपादिवत्** इत्येव । § 2552
785/mj

विलक्षणत्वात् । अथैवमपि रूपादि सत् स्वतत्त्वप्रादुर्भावात्मकं चेष्यते ततस्तद्वैलक्षण्यात् कार्यमसत्, अस्वतत्त्वाविर्भावात्मकत्वात्, अलातचक्रवत् । अथ सदेव कार्यमिष्यते ततः सत्त्वे स्वत एवाविर्भवेत्, सत्त्वात्, रूपादिवत् । सत्त्वाद् रूपादिवत्... ... ...सत्त्वाद् रूपादिवत् । भूम्यादिकार्यासत्त्वं सद्वैलक्षण्यादस्वरूपोत्पत्तेः... ... ...भूम्यादिवत् । तस्मादतुल्यविकल्पत्वात् सतोऽन्यस्वभावमेव कार्यम् । § 2553

एवं तु अनाविर्भाव्यत्वाद् न प्रत्यक्षव्यक्तयः पृथिव्यादयः प्रतिनियतचक्षुराद्यविषयत्वात् खपुष्पवत् । रूपाद्येव तु यत् किञ्चित् प्रत्यक्षम्, स्वत एवाविर्भवितृत्वात्, इतरवत् । प्रत्यक्षत्वाद्यविरोधात् तदेव भवति । § 2554

अथैवमुभयसत्त्वं त्यक्त्वान्यतरसत्त्वं कार्यासत्त्वाभ्युपगमपरिहारेण कार्यमेव सदिति । तत्र कार्यसमीप एवकार इत्यन्यत्र सच्छब्दार्थे तत्प्रतियोगिनि नियमः सत्त्वं कार्य एव नियतं § 2555

---

१ अ] अथेदम॰nayacakra-ms-ya ॥
२ अ] अश्वतत्व॰nayacakra-ms-bhā । अधतत्व॰ nayacakra-ms-ya ॥
५ भ्रा] भ्रम्य॰ प्र॰ ॥
७ एव] प्रादुर्भवे कार्य प्र॰ ॥
९ एकाद्यु] ॰द्युत्कार्याणा॰ प्र॰ ॥
१२ सा] ॰पर्यवसानंnayacakra-ms-ya ॥
१२ च] चक्रकनिरूपणं प्रकारान्तरेण पृ॰ १७० इत्यादौ द्रष्टव्यम् ॥

पुनरिदानीं भूम्यादिप्रादुर्भावतुल्यं रूपादिप्रादुर्भावं कार्यासत्त्वभयादिच्छत-स्तथैव **भूम्यादिकार्यासत्त्वं सद्वैलक्षण्यादसत्त्वरूपोत्पत्ते**रुत्थाप्य तत्पर्यवसानमेव चक्रकं तद्विपर्ययेण यावद् **भूम्यादिवदिति** गमनीयम् । **तस्मादतुल्यविकल्पत्वात् सतोऽन्यस्त्वभावमेव कार्यमि**त्युपसंहारार्थः । § 2556

किञ्चान्यत्, **एवं** **त्वि**त्यादि । रूपादिषु विषयेषु चक्षुरादीनां प्रतिनियतं ग्रहणं चक्षुषा रूपमेव, जिह्वया रस मेएव इत्यादि ग्रहणं **व्यक्ति**रविर्भावः **स न स्यात्, चक्षुराद्यविषयत्वात्,** रूपादय एव हि प्रतिस्वं नियताश्चक्षुरादीनां विषयाः, पृथिव्यादयस्तु न प्रतिविविक्तरूपादिस्वतत्त्वा इत्यनाविर्भाव्याः, त-स्मादनाविर्भाव्यत्वाद् **न प्रत्यक्षव्यक्तयः पृथिव्यादयः प्रतिनियतचक्षुराद्यविषयत्वात् खपुष्पवत्** । **आदि**ग्रहणादनुमानाद्यविषयतापीति रूपादिसमुदाय-स्यावस्तुतेत्थमुक्ता । § 2557

**रूपाद्येव** **त्वि**त्यादि । **यत्** **किञ्चित्** इति सामान्यवचनाद् विशेष्य प-क्षीक्रियते --**रूपमेव प्रत्यक्षम्, स्वत एवाविर्भवितृत्वात्, इतरवदि**ति सामान्य-वचनाद् रसवदिति विशेष्य दृष्टान्तः । एवं शेषाणामपि रसादीनां विशेष्य

- /ms प्रत्यक्षत्वमितरदृष्टान्तसाध्यत्वादविरुद्धम् । प्रत्यक्षपूर्वकत्वादनुमानत्वाद्यविरोधः । तस्मात् **प्रत्यक्षत्वाद्यविरोधात् तदेव भवति रूपाद्येव वस्त्विति सिद्धम्** । § 2558

**अथैवं** दोषवदित्यु**भयसत्त्वपक्षमुक्तदोषभयात् त्यक्त्वा अन्यतरं सत्** कारणं रूपादि कार्यं वाकाशादि इतीष्यमाणे कार्यसद्वादिनो मे प्रातिपक्ष्येण कार्यासत्त्वाभ्युपगमे वादावसानं मा भूदिति **कार्यासत्त्वाभ्युपगमपरिहारेण** कारणसत्त्वपक्षं त्यक्त्वा कार्यसत्त्वपक्षमेकमेवाश्रयेस्त्वं ततः **कार्यमेव सत्** इत्यवधार्यमाणः पक्षः स्यात् । तन्मतं कः पुनर्वादी कार्यमेव सत्, न

786/mj कारणम् इति प्रतिपद्यते *

* * *

नान्यत् सदिति । ततश्च रूपादि न सत् । रूपादेरसत्त्वे कार्यस्य सत्त्वे विपरीता संज्ञा क्रियते सतोऽसदिति असतश्च सदिति । कार्यसत्त्वं खरविषाणादीनां सदिति नामवद् नाममात्रमेव । कार्यासत्त्वनिवृत्त्येकान्तत्यागाद्याभ्युपगमविरोधवत् स्ववचनादिविरोधाः— यदि कार्यं कथं सत् ? अथ सत् कथं कार्यम् ? कारणे कार्यसत्त्वन्यायात्तु स एवोभयसत्त्ववादः, तत्र चोक्ता दोषाः । सदेवकारे तु सदनवधृतेः पूर्वदोष एव ।

---

६ या ] रसमेव गृह्णाति इति विवक्षायां यथाश्रुतमपि साधु ॥
१८ अ ] तुलना पृ० ४३२ पं० १, पृ० १६४ पं० २ ॥
१९ का ] कार्यास॰nayacakra-ms-ya ॥
२१ त्य ] त्यक्षाnayacakra-ms-bhā । त्वक्षा nayacakra-ms-ya ॥
२१ मेवाश्र ] ॰श्रयत्वंnayacakra-ms-ya ॥
२२ कः ] वःnayacakra-ms-ya ॥
२३ * ] ॰सत्वभयादिस्थितस्त-थैवnayacakra-ms-bhā । ॰सत्वंयावच्छितस्तथैव nayacakra-ms-ya ॥

* * *

यस्य सिद्धान्ते रूपादयो न स्युराकाशादय एव स्युः ? इति, अत्रोच्यते-- तस्यैव उभयसद्वादिनः **साङ्ख्यस्य** कारणे कार्यसत्त्वसिद्धान्ताद् भवेदयं पक्षः, कारणाविनाभावित्वात् कार्यस्य कार्याभ्युपगमेऽभ्युपगतमेव कारणम्, किन्तु न नियम्यते कारणमसदेव सदेव वा इति, यदि स्यादस्तु को वारयति ? कार्यं तु सत्त्वेन नियम्यते । तत्रापि च द्वयी गतिः--कार्यमेव सत् सदेव कार्यमिति वा, **तत्र कार्यमेव सत् इति कार्यसमीपे एवकारः क्रियते यत एवकारस्ततोऽन्यत्रावधारणम्** इति कार्यं सदेव इत्यवधार्यमाणे कार्यस्य सत्त्वेन नियमात् सत्त्वस्य कार्येणानियमात् कारणेऽपि सत्त्वमिति पूर्वविचारितोभयसत्त्वपक्ष एव आपततीत्यवधारणवैफल्यं स्यात्, तच्चानिष्टम्, तस्मादेवकारप्रयत्नसाफल्यात् कार्यशब्दार्थादन्यत्र **सच्छब्दार्थे तत्प्रतियोगिनि नियमः**-- कार्यमेव सदिति । तद्दर्शयति --**सत्त्वं कार्य एव नियतं नान्यत् सदिति** । ततः किम् ? **ततश्च रूपादि न सदिति** ते प्रसक्तम् । तस्य **रूपादेः** प्रत्यक्षमुपलभ्यमानस्यासत्त्वे **कार्यस्या**सतः प्रत्यक्षाद्यनुपलभ्यस्य **सत्त्वे विपरीता स्वमनीषिकया संज्ञा क्रियते सतोऽसदिति असतश्च सदिति सङ्गीत्याग्निमङ्गलनामवत् पश्चिमापश्चिमत्ववत्** । यदपि च **कार्यसत्त्वं खरविषाणादीनां सत् इति नामेति नामवद् नाममात्रमेव नार्थ** इति । - /ms
§ 2559

किञ्च, **कार्यासत्त्वनिवृत्त्येकान्तत्यागाच्च** अभ्युपगतस्य एकान्तेन सत् कार्यम् इत्यस्य च त्यागः, न हि कार्यमसदपि केनचित् प्रकारेणेष्यते त्वयेति **अभ्युपगमविरोधव[त्] स्ववचनादिविरोधाः** । **यदि कार्यं कथं सत् ? क्रियत इति हि कार्यम्** । **अथ सत् कथं कार्यमिति** स्ववचनविरोधः । लोके कार्यासत्त्वं मत्वा तत्सिद्ध्यर्थप्रयत्नदर्शनाद् रूढेर्लोकविरोधः । कुम्भकारादिवेतनदानादनुमानविरोधः । तथा दर्शनात् प्रत्यक्षविरोध इति । § 2560

राशिवत् सार्थवत्... ... ...।... ... ...॥§ 2562

नन् शुद्धशब्दप्रयोगादेव स सन् । न, शब्दान्तरवाच्यत्वादेवानन्यत्वात्, तद्यथा--

नृरथाश्वद्विपवती... ... ...।... ... ...॥§ 2564

तत्र चोक्ता (Edtext outside numbered paragraph) (Edtext outside numbered paragraph)

---

५ स] सदेवnayacakra-ms-ya प्रतौ नास्ति ॥
७ त्र] दृश्यतां पृ॰ १६४ पं॰ ३ ॥
११ त] न तत्प्रतियोगिनि नियमः कार्यसदेवदिति प्र॰ ॥ तुलना पृ॰ १६४ पं॰ ३ ॥
१३ तः] किंमततश्चnayacakra-ms-bhā । किमत्ततश्च nayacakra-ms-ya ॥
१७ स] सदिति नामवद् इत्यपि पाठोऽत्र भवेत् ॥
१९ निवृ] ॰वृत्त्यै॰ प्र॰ ॥
२३ त्सिद्ध्य] ॰द्ध्यप्रय॰nayacakra-ms-ya ॥
२४ कारादिवेत] ॰चेतन॰ प्र॰ ॥

* * *

**यथा च पृथिव्याद्येवमात्मापि**

नरादिपृथक्प्रवृत्तेस्तत्र स्यादसत्त्वम्, न त्वात्मनि । एतदपि न, अनन्यत्र प्रवृत्तेरपि समुदायिभ्यः समुदायस्यानर्थान्तरत्वात्, तद्यथा--यथा च शिख-रादिभ्यः... ... ...।

* * *

दोषाः

राशिवत् सार्थवत्... ... ...।... ... ...॥§ 2566

ननु शुद्धशब्दप्रयोगादेव स सन् । न, शब्दान्तरवाच्यत्वादेवानन्यत्वात्, तद्यथा--

नृरथाश्वद्विपवती... ... ...।... ... ...॥§ 2568

**अतुल्यविकल्पत्वात् सतोऽन्यदेव तु कार्यम्** इत्यादि उपक्रम्य चक्रकद्वये, तयेव चावस्थिता इति । एवं तावत् कार्यमेव सत् इत्यवधारणे दोषाः । § 2569

नरादिपृथक्प्रवृत्तेस्तत्र स्यादसत्त्वम्, न त्वात्मनि । एतदपि न, अनन्यत्र प्रवृत्तेरपि समुदायिभ्यः समुदायस्यानर्थान्तरत्वात्, तद्यथा--यथा च शिख-रादिभ्यः... ... ...।

* * *

दोषाः

अथ मा भूवन्नमी दोषा इति सदेव कार्यम् इत्यवधार्यते यत एवकार-स्ततोऽन्यत्रावधारणम् इति सत्त्वेन कार्यं नियतं सत्त्वं त्वनियतं कारणस्यापि
- /ms सत्त्वाभ्युपगमात् **सदनवधृतेः पूर्वदोष एव** उभयसत्त्ववाददोष एवेति । § 2570

**यथा च पृथिव्यादि एवमात्माऽपि,** यथा पृथिवी-घटादीनि रूपा-दिभ्योऽन्यानि न सन्ति तथा रूप-वेदना-विज्ञान-संज्ञा-संस्कारेभ्यः स्क-न्धेभ्योऽन्य आत्मा नास्ति, किं तर्हि ? संवृत्या तत्समुदाये प्रज्ञाप्यते तत्सन्ताने वा, यथा **राशिवत् सार्थवदि**त्यादि दृष्टान्ताः समुदायासत्त्वप्रतिपाद-नार्था रूपादिमात्रवस्तुत्वप्रतिपादनाः । दृष्टान्तबाहुल्यं चेतसि भावनोत्पादनार्थं दृढीकरणार्थं च तदर्थस्य । § 2571

---

१९ व] °वध्यते प्र° । पृ° ४३२ पं° ६, पृ° १६५ पं° ३ ॥
१ विज्ञा] °विज्ञानंज्ञासं-स्का°nayacakra-ms-bhā । °विज्ञानसंज्ञानसंस्का°nayacakra-ms-ya ॥
२ रा] अयं श्लोक इति द्वादशेऽरे पृ° ५३०-- २ वक्ष्यते ॥

अत्राह --**ननु शुद्धशब्दप्रयोगादेव स सन्** आत्मा इति शुद्धपदेन शब्दान्तरेणोच्यमानत्वाद् रूपादिवदेव तेभ्योऽन्य इति । एतच्च, **न, शब्दान्तरवाच्यत्वादेवानन्यत्वात्, तद्यथा--नृ-रथा-ऽश्वद्विपवतीत्यादि** । § 2572

शब्दान्तरवाच्यत्वानैकान्तिकोद्भावनार्थं तद्वैधर्म्यापादनार्थमाह पुनरपि --**नरादिपृथग्क्प्रवृत्तेस्तत्र स्यादसत्त्वं तत्रान त्वात्मनि,** नराऽश्वादीनां पृथग्क् समूहात् प्रवृत्तिदर्शनात् तत्समूहादन्यत्रादर्शनात् सेनायाः स्यादसत्त्वम्, आत्मनस्तु मा भून्नामरूपापृथग्भावात् तदात्मत्वाच्च । तत्रोच्यते— **एतदपि नोत्तरम्, अनन्यत्र प्रवृत्तेरपि समुदायिभ्यः समुदायस्यानर्थान्तरत्वात् । तद्यथा— यथा च शिखरादिभ्य** इत्यादि । § 2573

788/mj

तत्रापि शिखरादिविभागादेव न स्यादिति चेत्, न, बुद्धिविभागेऽप्यनन्यत्वात् पानकवत्, तद्यथा--मरिचक्षोद... ... ...[युक्तितो मिश्रितेषु] पानकम्... ... ... सुखितो दुःखितः... ... ...। माधुर्य... ... ...तथैव पुरुष... ... ...। § 2574

औदासीन्याच्च तत्त्वेषु अहंमानाकुशलसंस्कारानुशयाद् आत्मास्ति इत्यहंकारः प्रवर्तते । ततो न पञ्चस्कन्धव्यतिरिक्तः पुरुषः । § 2575

**तत्रापि शिखरादिविभागादेव न स्यादिति चेत्,** स्यान्मतम्--बुद्ध्या विभज्यमानाः शिखरादयः पृथगुपलभ्यन्ते पृथक्छिखरी, न तद्वद् रूपादिभ्य आत्मेति । तदपि **न, बुद्धिविभागेऽप्यनन्यत्वात् पानकवत्** । **तद्यथा--मरिचक्षोदेत्यादि** यावत् **पानकमिति** दृष्टान्तवर्णनम् । दार्ष्टान्तिकवर्णनं तु **स सम्प्रयुक्तविज्ञानादि**धर्मव्यतिरिक्तात्माभावसाधर्म्यात् तद्यथा --**सुखितो दुःखित** इत्यादि । **माधुर्येत्यादि** पानकाङ्गद्रव्यगुणविचारोऽर्थान्तरसाधनाय नालमिति दृष्टान्तः, दार्ष्टान्तिकः **तथैव पुरुषेत्यादि** । तृष्णाच्छेदादिप्रयोजनसिद्धिर्यथा तदतिरिक्तार्थाभावेऽपि तथा कर्मफलसम्बन्धादिसंव्यवहारप्रयोजनसिद्धिः पञ्चसु रूपादिषु स्कन्धेष्वेव, अतस्तदतिरिक्तात्मपरिकल्पनावैयर्थ्यमिति । § 2576 - /ms

---

३ स] म सन् प्र° ॥
७ ए] एतरच्चnayacakra-ms-ya ॥
८ नृ] न्यरथा°nayacakra-ms-ya । ऽन्यरथा° nayacakra-ms-bhā । द्वादशेऽरे पृ° ५३१-- १ श्लोकोऽयं निर्दिष्टः ॥
१८ मा] नाnayacakra-ms-ya ॥
१८ प्र] चवृत्ते° प्र° ॥
१९ पृ] पृथगुच्छिखरी प्र° ॥
२० न] र तद्वद्रूषा°nayacakra-ms-bhā । रतद्रूपा° nayacakra-ms-ya ॥
२१ म] तुलना द्वादशेऽरे पृ° ५३१-- १ इत्यत्र द्रष्टव्या ॥
२१ क्षो] °क्षोद्रे°nayacakra-ms-bhā । क्षौद्रं मधु चेद् विवक्षितं तदा °क्षौद्रे° इति समीचीनः पाठः ॥
२२ त] तथा ? । तुलना द्वादशेऽरे पृ° ५३१-- २ ॥
१ मा] तुलना द्वादशेऽरे पृ° ५३०-- १ ॥
३ त] तुलना द्वादशेऽरे पृ° ५३१-- २ ॥

कुतः पुनरात्मग्राहः प्रवर्तते ? इत्यत्रोच्यते --**औदासीन्याद्यातत्त्वेष्वीष्वित्यादि** । तत्त्वविचारं प्रत्यौदासीन्यात् पञ्चस्कन्धतत्त्वविपरीतात्मपरिकल्पनया विपर्ययज्ञानीभूतत्वाच्चित्तस्य माना-ऽतिमानादिसप्तमानान्तर्गताहंमानाकुशल-संस्कारानुशयात् अहंमानाख्याकुशलधर्मनिक्षिप्तवासनापरिपाकात् **आत्माऽस्ति इत्यहङ्कारः प्रवर्तते, ततो न पञ्चस्कन्धव्यतिरिक्तः पुरुष इति** । § 2577
789/mj

एष च रूपादितत्त्वस्य वस्तुव्यवस्थागतिविनिर्मुक्तेर्घटादिस-मुदायवस्त्वन्तरसंक्रान्तिः स्यात्, सा चोभयावस्तुत्वापादनाय इति प्रतिपत्तेः समभिरूढः यस्य शतसंख्यस्यापीदमेव लक्षणम् ।

वत्थूणं संकमणं होति अवत्थू णये समभिरूढे ।
आव. नि. ७५७ § 2579

इति । तत्रायं तस्य गुणसमभिरूढो नाम प्रभेद एव । अयं च नियमविधिः । अस्य चोत्पत्ति[वि]गति-स्थितिभिरपि नैव सम्बध्यते [वस्तु] उत्पातादित्रयसङ्क्रान्तेरप्यभावात् तदुभय-
§ 2580

---

५ औदासीन्याद्यात ] तत्त्वेषीत्यादिnayacakra-ms-bhā । तत्त्वेऽपीत्यादि ? ॥
२ मा ] मानसंयोजनं कतमत् । सप्त मानाः--मानोऽतिमानो मानातिमानोऽस्मिमानोऽभिमान ऊनमानो मिथ्यामानश्च । मानः कतमः ? हीनात् श्रेयानस्मि, सदृशेन सदृशोऽस्मीति वा या चित्तस्योन्नतिः । अतिमानः कतमः ? सदृशात् श्रेयानस्मि श्रेयसा सदृशोऽस्मीति वा या चित्तस्योन्नतिः । मानातिमानः कतमः ? श्रेयसः श्रेयानस्मीति या चित्तस्योन्नतिः । अस्मिमानः कतमः ? पञ्चसूपादानस्कन्धेषु आत्मात्मीयाभिनिवेशाद् या चित्तस्योन्नतिः । अभिमानः कतमः ? अप्राप्ते उत्तरे विशेषाधिगमे प्राप्तो मयेति या चित्तस्योन्नतिः । ऊनमानः कतमः ? बह्वन्तरविशिष्टादल्पान्तरहीनोऽस्मीति या चित्तस्योन्नतिः । मिथ्यामानः कतमः ? अगुणवतो गुणवानस्मीति या चित्तस्योन्नतिः । मानसंयोजनेन संप्रयुक्त आत्मात्मीयौ न संजानाति । असंज्ञानात् आत्मात्मीयग्रहः अकुशलसमुदाचारः कुशलासमुदाचारश्च । तेनायत्यां दुःखाभिनिवृत्तौ दुःखेन संयुज्यते । इति **अभिधर्मसमुच्चये असङ्ग**विरचिते नवसु संयोजनेषु मानसंयोजननिरूपणे पृ° ४५ Visva Bharati Studies 12 । मानो हि नाम सर्व एव सत्कायदृष्टिसमाश्रयेण प्रवर्तते । स पुनश्चित्तस्योन्नतिलक्षणः । तथाहि--आत्मात्मीयभावं स्कन्धेषु अध्यारोप्य अयमहमिदं मम इत्यात्मानं तेन तेन विशेषेणोन्नमयति, अन्येभ्योऽधिकं मन्यते । स च अगौरवदुःखोत्पत्तिसंनिश्रयदानकर्मकः । अगौरवं गुरुषु गुणवत्सु च पुद्गलेषु स्तब्धता कायवाचोरप्रसृतता, दुःखोत्पत्तिः पुनरत्र पुनर्भवोत्पत्तिः । स च पुनश्चित्तोन्नतिस्वरूपाभेदेऽपि चित्तोन्नतिनिमित्तभेदात् सप्तधा भिद्यते--मानोऽतिमान इत्येवमादि ।... ... ... इति **स्थिरमति**विरचिते **त्रिंशिकाविज्ञप्तिभाष्ये** पृ° २८ ॥
४ त ] ततो पञ्च°nayacakra-ms-ya ॥

एवं वस्तुतोऽस्य नयस्य दर्शनं प्रदर्शितम् । अधुना कतमनयविकल्पोऽयम् ? इत्येतन्निश्चयार्थमाह— **एष च रूपादितत्त्वस्येत्यादि** । एष नयो रूपादिमात्रमेव वस्तु, तच्च वस्त्वन्तरं समुदायाख्यं न सङ्क्रामति इतीच्छति, अतो घटादिसमुदायवस्त्वन्तरसङ्क्रान्तेरयथार्थत्वदोषाद् वस्तुव्यवस्थाया या गतिस्तां विमुञ्चेत्, अतो **वस्तुव्यवस्थागतिविनिर्मुक्तेर्घटादिसमुदायवस्त्वन्तरसङ्क्रान्तिः स्यात्, सा चोभयावस्तुत्वापादनाय,** रूपादयस्तत्समुदाय- - /ms श्चावस्तुनी स्याताम्, रूपादयः समुदायरूपापत्तेः स्वरूपेऽनवस्थितत्वादवस्तु, समुदायो रूपादिरूपवत् स्वरूपेण तस्याव्यवस्थितत्वादवस्त्विति उभयावस्तुत्वमापादयेत् सा वस्त्वन्तरसङ्क्रान्तिरितीत्थं **प्रतिपत्तेः समभिरूढ** एवं मत्वा एकीभावेनाभिमुख्येन एक एव रूपादिरर्थ एव इति या या संज्ञा तां तां समभिरूढः **यस्य शतसङ्ख्यस्यापीदमेव लक्षणम् एक्केक्को य सतविधो** आव॰ नि॰ ७५९ त्ति शतसङ्ख्यं सप्रभेदमेवम्भूतं व्याप्नोत्येतद् लक्षणम् । तत्साक्षीक्षिभूतं तत्संवादि निर्युक्तिलक्षणमाह-- § 2581

वत्थूणं संकमणं होति अवत्थू णये समभिरूढे आव॰ नि॰ ७५७ इति ।§ 2582

**तत्रायमित्यादि** । **तत्रैतल्लक्षणंणे वत्थूतो संकमणं होति अवत्थू णये समभिरूढे** आव॰ नि॰ ७५७ त्ति तस्य शतभेदस्य **सप्तनयशतारनयचक्रे** समभिरूढे शतधा भिन्ने कतमः समभिरूढोऽयम् ? इति मृग्यमाणे **गुणसमभिरूढो नामायं** पर्यायसमभिरूढादन्य**स्तत्प्रभेद एव** प्रवक्ष्यमाणः ।

---

६ ए] एव चnayacakra-ms-ya । एवं च nayacakra-ms-bhā ॥
६ इ] इति अतोnayacakra-ms-ya ॥
६ सा] सचो॰ प्र॰ ॥
८ रू] रूपादयपश्चादिवस्तुनीnayacakra-ms-bhā । स्तत्समुदायपश्चादवस्तुनी nayacakra-ms-ya ॥
१० स] समुदयोnayacakra-ms-bhā ॥
११ स्व] स्वरूपेन तस्य व्यवस्थि॰nayacakra-ms-bhā । स्वरूपेण तस्यावस्थि॰ nayacakra-ms-ya ॥
१४ एकीभा] भावना॰nayacakra-ms-bhā ॥
१८ ए] दृश्यतां पृ॰ ५५० टि॰ १ ॥
१८ व] सम्प्रति समभिरूढमाह --वत्थु+ओ संकमणं हो+इ अवत्थु नये समभिरूढे । वस्तुनो घटाख्यादिकस्य संक्रमणम्--अन्यत्र कुटाख्यादौ गमनम्, किम् ? भवति अवस्तु, असदित्यर्थः, नये पर्यालोच्यमाने, कस्मिन्नये इत्याह--समभिरूढे, सम् एकीभावेन अभिरोहति व्युत्पत्तिनिमित्तमास्कन्दति शब्दप्रवृत्तौ यः स समभिरूढः । एष हि पर्यायशब्दानामपि प्रविभक्तमेवार्थमभिमन्यते यथा घटनाद् घटः...कुटनात् कुटः...। न शब्दान्तराभिधेयं वस्तु द्रव्यं पर्यायो वा तदन्यशब्दवाच्यवस्तुशब्दरूपतां संक्रामति, न खलु पटशब्दवाच्योऽर्थो जातुचिदपि घटशब्दवाच्यवस्तुरूपतामास्कन्दति, तथानुपलम्भात् आस्कन्दने वा वस्तुसांकर्यापत्तिः । तथा च सति सकललोकप्रसिद्धप्रतिनियतविषयप्रवृत्तिनिवृत्त्यादिव्यवहारोच्छेदप्रसङ्गः । इति **मलयगिरिसूरिविरचितायाम् आवश्यकनिर्युक्तिवृत्तौ** पृ॰ ३७६--३७७ ॥
२ स्त] ॰स्तत्प्रदेशnayacakra-ms-ya ॥
१५ व] दृश्यतां ५११-- २ ॥

**अयं च नियमविधिः**, अस्यैव गुणसमभिरूढस्य पुनरिमे भेदाः--विधिः १
790/mj विधिविधिः २

* * *

मभूतं रूपादि च भूतम्, तयोर्वस्त्वन्तरसंक्रान्तेर्ननूभयं व्याहन्यते। स्थितिरपि च भावनात्मिका भवन्त्येव भवतीत्यतो भवनव्याप्तेर्भवनं सर्वत्र संक्रामति वस्त्वन्तरमिति न वस्तुतैव स्थितेरपि।

अथ तथा तथा भाव एव भवतीति तस्यैवैकस्याभिव्याप्तिः, तन्न, प्रतिवस्तु तथा भवनस्य भूतत्वाद् नन्वभवनेनापि व्याप्तिरस्त्येवैवमिति भावाभावयोः संक्रान्तेरवस्तुता। तस्मात् स्थित्युत्पत्तिविगतिनिरपेक्षरूपादिमात्ररूपतायां सर्वसिद्धिः। मूढसमभिरूढस्य दर्शनेन तूत्पादव्यययोग एव रूपादीनाम्।

* * *

विध्युभयम् ३ विधिनियमः ४ उभयम् ५ उभयविधिः ६ उभयोभयम् ७ उभयनियमः ८ नियमः ९ नियमविधिः १० नियमोभयम् ११ नियमनियमः १२ इति द्वादशधा भिन्नस्य शतभेदसमभिरूढैकदेशस्यायं **नियमविधिर्नाम भेद इति**। § 2583

किञ्चान्यत्, यथा चायं घटादिवस्त्वन्तरसङ्क्रान्तिं नेच्छति रूपादीनां त**थास्य चोत्पत्ति[वि]गति-स्थितिभिरपि नैव सम्बध्यते नयस्य, उत्पातादित्रयसङ्क्रान्तेरप्यभावात्**। यद्युत्पत्त्यादिवस्त्वन्तरसङ्क्रान्तिः स्यात् कुतोऽस्य सम-
- /ms भिरूढता स्यात् ? इति। कथम् ? इति दर्शयति— **उत्पत्ति-विगत्योस्तावत् प्रागभाव-प्रध्वंसाभावात्मकत्वात्**, उत्पत्तिः प्रागभावः, विनाशः प्रध्वंसाभावः, तदुभयमभूतम्, रूपादि च भूतम्, तयोर्भूताभूतयोर्वस्त्वन्तरसङ्क्रान्तेर्ननूभयं व्याहन्यते, भूतं चेत् कथमभूतम् ? अथाभूतं कथं भूतं रूपादि वस्तु ? इति। § 2584

उत्पत्ति-विनाशानाश्रिता स्थितिर्भूतत्वाद् न व्याहन्यते रूपादिनेति चेत्, उच्यते--सत्यं भूता, **स्थितिरपि च भवनात्मिका भवन्त्येव भवतीत्यतो भवनव्याप्तेः** सर्वप्रकारैः सर्वं भवति घटोऽपि रूपमपि रसोऽपि इत्यादि **भवनं सर्वत्र सङ्क्रामति वस्त्वन्तरमिति न वस्तुतैव स्थितेरपीति**। § 2585

**अथ तथा तथेत्यादि**। अथ मन्यसे तेन तेन प्रकारेण घटरूप-रसादिना **भाव एव भवतीति तस्यैवैकस्याभिव्याप्तिर्न** वस्त्वन्तरसङ्क्रान्तिरिति। **तन्न**, कस्मात् ? **प्रतिवस्तु तथा भवनस्य भूतत्वात्**, रूपस्य रसाद्यात्मना रसस्य

---

१७ स]
°संक्रान्तींnayacakra-ms-bhā।
संक्रान्ती nayacakra-ms-ya।
°संक्रान्तीर्नेच्छति ?॥
१८ उ] उत्पूर्वस्य पततेः प्रयोग
एकादशेऽरेऽपि प्रारम्भे दृष्टः॥
२४ उ] तुलना--तत्त्वार्थसिद्धसेनीयवृत्तौ पृ°
३८९ पं° ६, सू° ५। २९॥
२४ रू] रूपादिने
चेत्nayacakra-ms-ya॥
२८ भ] भवत्येव प्र°। अस्य तुलना
एकादशे द्वादशे चारे द्रष्टव्या॥
१ भ]
भवनव्युत्पत्तेःnayacakra-ms-ya॥
२ त] तत्रnayacakra-ms-ya॥

रूपाद्यात्मना गन्धस्यापि शेषात्मना परस्परव्यावृत्तात्मना सर्वस्य वस्त्वुवस्तुनः प्रत्यु[प]हतत्वात् **नन्वभवनेनापि व्याप्तिरस्त्येवैवमिति** भावमभावः सङ्क्रामति अभावं वा भाव इति महती सङ्क्रान्तिः, तस्या एव हेतोरवस्तुता । § 2586
791/mj

एवं हि नियमो भवति । यदि वस्तु, तथाऽविद्यमानत्वात् सामान्यादयः समुदयश्च त्याज्याः, विशेषा एव परिग्राह्याः, ततोऽधिकतरमसत्, तस्य विक्षेपेण विधिरुच्यते । इत्येष नियमस्य विधिरनन्तरातीतनयप्रतिक्षेपेण तया वा विचारप्रसिद्धोत्सर्गविधिवृत्तात्मात्मीयापवादनियमक्रियया । § 2587

शब्दार्थस्तु पर्यवोऽनेकता गुणः, पर्यायः पर्यवो वा, स एवास्तीत्यस्य मतिः पर्यवास्तिकः । पृथक् पदानि वाक्यार्थः । § 2588

तस्मात् स्थित्युत्पत्तिविगतिनिरपेक्षा रूपादयः, **तन्मात्ररूपं** तन्मात्रत्वं चेदम्, तद्भावस्तन्मात्ररूपता, तस्यां च **स्थित्युत्पत्ति-विगतिनिरपेक्ष-रूपादिमात्ररूपतायां सर्वसिद्धिः**, सर्वं सिध्यति नात्र कश्चिद् दोषः । § 2589 - /ms

अन्यस्य शतभेदसमभिरूढमध्यपतितस्य **मूढसमभिरूढस्य दर्शनेन तूत्पाद-व्यययोग एव रूपादीनामिति**, सोऽप्यस्ति कश्चिदामूढः किं तेन ? इत्ययं तन्नेच्छति आमूढत्वात् तस्य । § 2590

एवं चायं गुणसमभिरूढनियमविधिरुक्तः, अत्राप्यवक्तव्यलक्षणस्याप्यनन्तरस्य नियमस्य विधेस्तद्भावनार्थमाह **--एवं हि नियमो भवतीत्यादि** । कथम् ? यदि वस्तु, तेन प्रकारेणाविद्यमानत्वात् सामान्यादयः समुदयाश्च त्याज्याः, किन्तु विशेषा एव रूपादयो देशभिन्नाः प्रत्यक्षादिप्रमाणगोचरत्वात् परिग्राह्या इत्युक्तं ततोऽधिकतरमसत्, तस्यासतो विक्षेपेण विधिरुच्यते, यदि वस्तु ततोऽस्यैवं नियमो युज्यत **इत्येष नियमस्य विधिरनन्तरातीत-नयप्रतिक्षेपेण** पूर्वतरातीतविचारप्रसिद्धपुरुषादिवादोत्सर्गविधिवृत्तानां तदनन्तरातीतानां च विध्युभयादिवृत्तानामात्मात्मीयानामपवादेन नियमः क्रिय-

---

२ व] तस्त्युnayacakra-ms-ya । तस्य ? ॥
३ प्र] प्रत्यह॰nayacakra-ms-bhā । प्रत्याहतत्वात् ? ॥
३ भा] भावनभावः प्र॰ ॥
३ अ] अभावं भावाभाव इति nayacakra-ms-ya । अभावं भा--भाव इति nayacakra-ms-bhā । अभावं भाव इति ? ॥
१२ म] महतीं प्र॰ । महतां ? ॥
२२ एव] हेतुतो॰nayacakra-ms-ya । हेततो॰ nayacakra-ms-bhā ॥
२४ तो] ऽधिक्षेपेण ? ॥
२५ विक्षेपेण] विधिव्यतेnayacakra-ms-bhā ॥
२ रा] ॰तीताविचार॰ प्र॰ ॥
३ यादिवृत्तानामा] ॰मात्मीया॰nayacakra-ms-ya ॥

ते विधीयते इत्थं **तया वा विचारप्रसिद्धोत्सर्गविधिवृत्तात्मात्मीयापवाद-नियमक्रिययेति** व्याख्यातो नयः । § 2591

**शब्दार्थस्तु पर्यव** इति परिगमनम्, तच्चानेकता **गुणः गण गुण सङ्ख्याने** , रूपादयः परस्परविशिष्टा गुणाः सम्यक् ख्यानात्, स च गुणः **पर्यायः** परितो गमनात् **पर्यवो वा** पूर्ववत् । **स एवास्तीत्यादिव्याख्या** गतार्था । § 2592

- /ms *पृथक् पदानि वाक्यार्थः, स्वेन स्वेनार्थेन युक्तानि देवदत्त गामभ्याज शुक्लाम् इत्यत्र देवदत्तादिपदान्येव वाक्यम्, तेषामेवार्थो व्याख्यातार्थः, उक्त-रूपात् समुदायासत्त्वात् । § 2593

792/mj

अस्योपनिबन्धनं यतो निर्गमस्तद्यथा--कतिविहे णं भंते भावपरमाणू पण्णत्ते ? गोयमा ! चतुव्विहे, तं जहा--वण्णवंते रसवंते गंधवंते फासवंते भग० २० । ५ । ६७० इति । वर्णवन्त इत्यादिनिर्देशे त एव वर्णादयः परस्परवन्तः । मतुपिह संसङ्गे । § 2594

इति दशमो भङ्गो नियमविधिनयः । § 2595

**अस्य** नयस्योपनिबन्धनमार्षमुच्यते **यतो निर्गमस्तद्यथा--कतिविहे णं भंते भावपरमाणू पण्णत्ते** इति प्रश्ने व्याकरणं **गोयमा ! चतुव्विहे, तंजहा--**

---

७ निय ]
°मक्रियेतिnayacakra-ms-ya ॥
७ ग ] पाणिनीयधातुपाठे ३२१ गण संख्याने, ३५९, संकेत, ३६० ग्राम, ३६१ कुण ३६२ गुण चामन्त्रणे इति चुरादौ दृश्यते ॥
१६ * ] दृश्यतां पृ० ४४८ टि० २ ॥

१७ व्या ]
व्याख्यार्थःnayacakra-ms-ya । वाक्यार्थः ? ॥
१७ अ ] तुलना पृ० ५१८-- २ ॥
१ प ] पन्नत्तेnayacakra-ms-ya ॥
१ च ] च+उव्विहेnayacakra-ms-ya ॥

**वण्णवंते रसवंते गंधवंते फासवंते** इति । **वर्णवन्त** इत्यादि, भावे वर्णादावेव पृष्टे तद्वन्तोऽन्ये केऽर्था व्याकृताः ? इति चेत्, उच्यते, न केचित्, किन्तु **त एव वर्णादयः परस्परवन्तः**, रस-गन्ध-स्पर्शा वर्णवन्तः, वर्णस्तद्वान्, रसवर्जा रसवन्तः, गन्धवर्जा गन्धवन्तः, स्पर्शवर्जाः स्पर्शवन्त इति मतुपा निर्दिष्टाः, यस्माद् **मतुपिह संसङ्गे**, परस्परसंसक्ता एव वर्णादय इति । § 2596

*भूमिम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने ।

२ वंते] क+इविहे भंते ! परमाणु पन्नत्ते ? गोयमा ! च+उव्विहे परमाणू प॰ तंजहा--दव्वपरमाणू खेत्तपरमाणू कालपरमाणू भावपरमाणू । दव्वपरमाणू णं भंते क+इविहे प॰ ? गोयमा च+उव्विहे प॰ तं॰ अच्छेज्जे अभेज्जे अडज्झे अगेज्झे । खेत्तपरमाणू णं भंते क+इविहे प॰ ? गोयमा च+उव्विहे प॰ तं॰ अणद्धे अमज्झे अपदेसे अविभा+इमे । कालपरमाणू पुच्छा, गोयमा च+उव्विहे प॰ तं॰ अवन्ने अगंधे अरसे अफासे । भावपरमाणू णं भंते क+इविहे प॰ ? गोयमा च+उव्विहे प॰ तं॰--वन्नमंते गंधमंते रसमंते फासमंते । सेवं भंते २ त्ति जाव विहरति । भगवतीसू॰ २० । ५ । ६७० परमाण्वाद्यधिकारादेवेदमाह— क+ईत्यादि । तत्र द्रव्यरूपः परमाणुर्द्रव्यपरमाणुः एकोऽणुः, वर्णादिभावानामविवक्षणाद् द्रव्यत्वस्यैव विवक्षणादिति । एवं क्षेत्रपरमाणुः आकाशप्रदेशः । कालपरमाणुः समयः । भावपरमाणुः परमाणुरेव वर्णादिभावानां प्राधान्यविवक्षणात् सर्वजघन्यकालत्वादिर्वा । च+उव्विहेत्ति एकोऽपि द्रव्यपरमाणुर्विवक्षया चतुःस्वभावः । अच्छेज्जत्ति छेद्यः शस्त्रादिना लतादिवत्, तन्निषेधादच्छेद्यः । अभेज्जत्ति भेद्यः सूच्यादिना चर्मवत्, तन्निषेधादभेद्यः । अडज्झेत्ति अदाह्योऽग्निना सूक्ष्मत्वात् । अत एवाग्राह्यो हस्तादिना । अणद्धेत्ति समसंख्यावयवाभावात् । अमज्झेत्ति विषमसंख्यावयवाभावात् । अप+एसेत्ति निरंशोऽवयवाभावात् । अविभा+इमेत्ति अविभागेन निर्वृत्तोऽविभागिम एकरूप इत्यर्थः विभाजयितुमशक्यो वेत्यर्थः । इति **भगवतीसूत्रस्य अभयदेव**सूरिरचितायां वृत्तौ ॥

३ न्त] **इत्यादिर्भावे** प्र॰ ॥

४ न्तोऽन्ये] **कोर्था** प्र॰ ॥

६ स्त] **तद्वान्** रस-गन्ध-स्पर्शवानित्यर्थः ॥

२ म] **मतुवा** प्र॰ ॥

४ *] **तदस्यास्त्यस्मिन्निति मतुप्** । ५ । २ । ९४... ...**मतुप्प्रभृतयः सन्मात्र इति** चेदतिप्रसंगः मतुप्प्रभृतयः सन्मात्र इति चेदतिप्रसंगो भवति इहापि प्राप्नोति--व्रीहिरस्य यवोऽस्येति । तस्माद् भूमादिग्रहणं कर्तव्यम् । के पुनर्भूमादयः ? **भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुपादयः ॥** भूम्नि गोमान् यवमान् । निन्दायां ककुदावर्ती संखादकी । [अश्वस्य दशनः संखादक उच्यते] । प्रशंसायां रूपवान् वर्णवान् । नित्ययोगे क्षीरिणो वृक्षाः कण्टकिनो वृक्षाः । अतिशायने उदरिणी कन्या । संसर्गे दण्डी छत्री । तत् तर्हि भूमादिग्रहणं कर्तव्यम् । न कर्तव्यम् कस्मान्न भवति--व्रीहिरस्य यवोऽस्येति । उक्तं वा किमुक्तम् ? अनभिधानादिति । इतिकरणः खल्वपि क्रियते ततश्चेद् विवक्षा । भूमादियुक्तस्यैव च विवक्षा । गोमान् यवमान्, भूमादियुक्तस्यैव सत्ता कथ्यते, न हि कस्य[illegible] n793/mj नास्ति । संखादकी ककुदावर्ती, निन्दायुक्तस्यैव सत्ता कथ्यते, न हि कश्चिन्न संखादकी । रूपवान् वर्णवान् प्रशंसायुक्तस्यैव सत्ता कथ्यते, न हि कस्यचिद् रूपं नास्ति । क्षीरिणो वृक्षाः, कण्टकिनो वृक्षा इति नित्ययुक्तस्यैव सत्ता कथ्यते, न हि कस्यचित् क्षीरं नास्ति । उदरिणी कन्येति अतिशायनयुक्तस्यैव सत्ता कथ्यते, न हि कस्यचिदुदरं नास्ति । दण्डी, छत्री, संसर्गयुक्तस्यैव सत्ता कथ्यते, न हि कस्यचिद् दण्डो नास्ति । यावतीभिः खल्वपि गोभिर्वाहदोहप्रसवाः कल्पन्ते तावतीषु सत्ता कथ्यते, कस्यचिच्चतसृभिः कल्पन्ते कस्यचिच्छतेनापि न प्रकल्पन्ते । सन्मात्रे चर्षिदर्शनात्, सन्मात्रे च पुनः ऋषिर्दर्शयति मतुपम्--यवमतीभिरद्भिर्यूपं प्रोक्षतीति ।(?")--इति **पातञ्जल**महाभाष्ये ॥

संसङ्गेऽस्ति विवक्षायां भवन्ति मतुपादयः ॥ पा० म० भा० ५ । २ । ९४§ 2598

१793/mj

तद्यथा--भूमनि गोमान् यवमान् । निन्दायां ककुदावर्ती व्यादाय हासी । प्रशंसायां रूपवान् शीलवान् । नित्ययोगे क्षीरिणो वृक्षाः कण्टकिनो वृक्षाः । अतिशायने क्रोधी मानी । संसङ्गे दण्डी छत्री । अस्तित्वमात्रे यवमतीभिः प्रोक्षतीति । तत्रायम् वर्णवन्तः इत्यादिनिर्देशे मतुप्प्रत्ययः संसङ्गेऽस्मिन्नयदर्शने । स्याद्वाददर्शने तु द्रव्यपरमाण्वपेक्षो वा, यथा-- § 2599

दव्वं पज्जववियुतं दव्वविजुत्ता य पज्जवा णत्थि ।
उप्पाद-ट्ठिति-भंगा हंदि दवियलक्खणं एयं ॥ सम्मति० १ । १२§ 2601

- /ms

इति परमार्थो जिनमते । किन्तु प्रत्येकनयव्याख्यानाद् भावमात्रं त्वनेन गृहीतम् ।

इति दशमो भङ्गो नियमविधिनयः समाप्तः ॥

# ११ अथैकादशो नियमोभयारः ।

794/mj

---

१. क+ड०nayacakra-ms-ya ॥

---

५ भू] भूमिति गोमान् यवमान्nayacakra-ms-bhā । भूमान् गोमान् nayacakra-ms-ya ॥ ५ अ] अतिशायिनोnayacakra-ms-ya ॥ ७ तीभिः] प्रेक्ष० प्र० ॥ ० म] मत्प्रत्ययःnayacakra-ms-ya । मत्तप्रत्ययः nayacakra-ms-bhā ॥ ० व] ०वि+उतं दव्ववि+उत्ता य पज्जवा णत्थि उप्पाय०nayacakra-ms-ya । परस्परनिरपेक्षं चोभयनयप्रदर्शितं वस्तु प्रमाणाभावतो न संभवतीत्याह --दव्वं पज्जववि+उयं दव्ववि+उत्ता य पज्जवा णत्थि । उप्पायट्ठि+इभंगा हंदि दवियलक्खणं एयं ॥ १ । १२ ॥ द्रव्यं पर्यायवियुक्तं नास्ति मृत्पिण्ड-स्थास-कोश-कुसूलाद्यनुगत-मृत्सामान्यप्रतीतेः । द्रव्यविरहिताश्च पर्याया न सन्ति अनुगतैकाकारमृत्सामान्यानुविद्धतया मृत्पिण्ड-स्थास-कोशकुशूलादीनां विशेषाणां प्रतिपत्तेः । अतो द्रव्यार्थिकाभिमतं वस्तु पर्यायाक्रान्तमेव, न तद्विविक्तम्, पर्यायाभिमतमपि द्रव्यार्थानुषक्तं न तद्विकलम् परस्परविविक्तयोः कदाचिदप्यप्रतिभासनात् । किंभूतं पुनर्द्रव्यमस्तीत्याह --उत्पादस्थितिभङ्गा यथाव्यावर्णितस्वरूपाः परस्पराविनिर्भागवर्तिनः, हंदि इत्युपप्रदर्शने, द्रव्यलक्षणं द्रव्यास्तित्वव्यवस्थापको धर्मः, एतद् दृश्यताम्, यतः पूर्वोत्तरपर्यायपरित्यागोपादानात्मकैकान्वयप्रतिपत्तिस्तथाभूतद्रव्यसत्त्वं प्रतिपादयतीत्युत्पाद-व्ययध्रौव्यलक्षणं वस्त्वभ्युपगन्तव्यम् । एतच्च त्रितयं परस्परानुविद्धम्, अन्यतमाभावे तदितरयोरप्यभावात् । इति अभयदेवसूरिरचितायां सन्मतिवृत्तौ पृ० ४१० ॥

ओँ अर्हँ § 2604
सद्गुरुभ्यो नमः § 2605

इदमशक्यं श्रोतुमपि यद् यत्तद् रूपादिभवनमेव भाव इति व्यवस्थाप्य वस्तुसंक्रान्तिप्रतिषेधि नोत्पयत्त्भाव इति वचनम् । अवश्यं हि तैः केनापि प्रकारेण भवितव्यं भावरूपेणाभाव-रूपेण वा । तत्र चात्यन्तभवनेन यद् भवनं तद् व्यावर्तितम्, अत उत्पादविनाशेनैवैषां भवनमव्यावर्तितम्, तद्व्यावर्तनेऽभावता तेषाम् । ननु तैर्यत् तद् भूयते स एव भाव इति भवतैवोक्तम् । § 2606

ननु तैर्भूयतेऽनुत्पादित्वेनैव । न तर्हि तैर्भूयतेऽनुत्पाद-विनाशित्वात् खपुष्पवत् वैधर्म्येण पृथिवी-शिवक-स्तूपकादिवत्, अकालत्वेऽकालत्वात् । उत्पादाद्यनभ्युपगमादकालत्वम् । § 2607

नयचक्रसम्यग्दर्शनाधिकारे प्रत्येकनयस्वरूपपरिज्ञानपूर्वकत्वान्नयचक्र-ज्ञानस्य अनन्तरनयदर्शने चापरितोषादुत्तरोत्थानमिति स एव सम्बन्धः, पूर्वस्य दूषणं स्वमतप्रक्रिया च सहोच्यते नियमोभयनयेऽस्मिन्नित्यत आह -- **इदमशक्य[म्]** इत्यादि । इदं श्रोतुमप्यशक्यं कुतो वक्तुं स्ववचनादिविरोधात् ? कतमदशक्यम् ? **यद् यत्तदि**त्यादि, **यद्** यस्मादित्यर्थः, **यत्तदि**ति व-चनमभिसम्बध्यते रूपादिभवनमेव भाव इति स्वमतं व्यवस्थाप्य वस्तुस-ङ्क्रान्तिप्रतिषेधि नोत्पत्त्यभाव इति । § 2608

कथं पुनरेतदशक्यम् ? इत्यत आह --**अवश्यं ही**त्यादि । तैरवश्यं हि रूपादिभिः केनापि प्रकारेण भवितव्यं भावरूपेणाभावरूपेण वा अत एव त्वद्वचनात् **हि**शब्दस्य वचनहेत्वर्थत्वात् । तदवधारयितुमाह --**तत्र चे**त्यादि, तयोश्च भावाभावयोरत्यन्तभवनेन यद् भवनं तद् व्यावर्तितं द्रव्यार्थिक-मतमेषु पर्यवास्तिकनयेषु, अतो भवनव्यावर्तनाद् भावरूपेण भवनाभावात परिशषादुत्पादविनाशेनैवैषां रूपादीनां भवनमव्यावर्त्त र्तितम् । किं कारणम् ? यस्मात् **तद्व्यावर्तनेऽभावता तेषां** रूपादीनामुत्पाद-विनाशरूपेणापि भवने व्यावर्तिते खपुष्पवदभावता स्या[त्], तद्धि केनचिद्रूपेणाभवनादत्यन्तासत्, तथा मा भूदित्युत्पाद-विनाशरूपं भवनमिष्टं त्वयापीति तद्दर्श्यते --**ननु तैर्यत्तद् भूयते स एव भाव इति भवतैवोक्तं** जन्मभङ्गभवनाभ्युपगमात् । § 2609 - /ms

१५ य]
°भयेऽस्मि°nayacakra-ms-ya ॥
१९ त्य] पृ° ६६ पं° ९ ॥
२५ विना] °विनाशने चैषांnayacakra-ms-bhā ।
°विनाशने वैषां nayacakra-ms-ya ॥
२८ व]
भवनत्वया°nayacakra-ms-ya ॥
२८ नु] तैर्यनुद्भूयते प्र° ३ ॥

इतर आह --ननु **तैर्भूयतेऽनुत्पादित्वेनैवे**ति मयोक्तत्वादयुक्तमिति । अत्रोच्यते --**न तर्हि तैर्भूयते**, ***अनुत्पादविनाशित्वात्, खपुष्पवत्, वैधर्म्येण**

795/mj **पृथिवी-शिवक-स्तूपकादिवदुत्पाद**

* * *

उत्पादविनाशावेव हि वस्तूनां भवनस्य बीजम्, रूपादय इव तन्त्वादिभवनबीजम्, तदभावे तदभावात् तद्भावे तद्भावात् । इतरथा हि अनुत्पादविनाशत्वादपर्यायत्वाद् निर्मूलत्वान्न स्याद् वस्तु वन्ध्यापुत्रवत् ।

अपि च प्रतिपक्षविनिर्मुक्तमेवानित्यत्वं वस्तुनः । तानि क्षणिकानीत्यवधार्यताम् । यो हि भाव उत्पन्नः स नंष्टा चेद् नाशविघ्नः [कः] ? यदि हि उत्पन्नः सन् भावो

* * *

विनाशरूपभवनात्मकत्वात् । इतश्च न भूयते **अकालत्वेऽकालत्वात्,** तावेव साधर्म्य-वैधर्म्यदृष्टान्तौ, नास्य कालोऽस्तीत्यकालः, अकालत्वे सति अकालत्वात्, कालस्याकालत्वात् कालवत् सत्त्वाशङ्का स्यात्, मा भूदिति अकालत्वे सति अकालत्वात् इति विशेष्यते । त्वदुक्तिवद**ुत्पादाद्यनभ्युपगमादकालत्वम्, आदिग्रहणाद्** विनाशानभ्युपगमात् । § 2610

कस्मात् ? **उत्पादे**त्यादि । यस्मा**दुत्पाद-विनाशावेव वस्तूनां** रूपादीनां **भवनस्य बीजम्** । **हि**शब्दो हेत्वर्थे, उत्पाद-विनाशधर्मवस्तुभवनम्, तद्बीजत्वात् । किमिव ? **रूपादय इव तन्त्वादिभवनबीजं तदभावे तदभावात् तद्भावे तद्भावात्,** रूपादिसमुदायो हि तन्तु-पटादयस्तदभावे न सन्ति तद्बीजत्वात् तद्भाव एव च भवन्ति एवं वस्त्वपि उत्पाद-विनाशबीजत्वात् तदात्मभवनकमिति । § 2611

एवमनभ्युपगमे दोषः --**इतरथा ही**त्यादि यावद् **वन्ध्यापुत्रवदि**ति । **अनुत्पादविनाशत्वाद**पर्यायम्, **अपर्यायत्वा**न्निर्मूलम्, **निर्मूलत्वान्न स्या**दिति क्रमेण हेतुहेतुमद्भावेन गतार्थ[म्] । प्रत्येकं वैते हेतवः । तस्मादुत्पादविनाशात्मना वस्तुना भवितव्यमनित्येनेति । § 2612

**अपि चे**त्यादि । नानित्यसामान्यमात्रेण सन्तुष्यामः कालान्तराव-

- /ms स्थायिनां पृथिव्युदकरूपादीनामुत्पाद-विनाशदर्शनानुमितेनानित्यवस्तुप्रतिपक्षनित्यसंस्पर्शसम्बन्धिना, कालान्तरावस्थानस्यापि अनित्यप्रतिपक्षत्वात्, किं

---

२ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१२ ता] भावेच nayacakra-ms-ya ॥
१४ दुक्तिव] °तदुत्पा° nayacakra-ms-bhā । °त्वदुत्पा° nayacakra-ms-ya ॥
१८ व] °भवन इत्यत आरभ्य एव च इत्यन्त एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥ ४ ॥
१८ त] तद्भावे nayacakra-ms-ya ॥
१९ त] तद्भाववत् nayacakra-ms-ya ॥
२० विना] °नाशा° प्र° ॥
२३ अ] उत्पाद° nayacakra-ms-ya ॥
२५ म] °मित्येनेति nayacakra-ms-ya ॥
२८ स] सम्बन्धिन । nayacakra-ms-bhā ॥ ५ ॥

तर्हि ? प्रतिपक्षविनिर्मुक्तमेवानित्यत्वं वस्तुनः । **तानि रूपादीनि क्षणिकानीत्यवधार्यताम्,** क्षणोऽस्यास्तीति क्षणिकः, परमनिरुद्धः कालः [क्षणः], स एवास्यास्ति न द्वितीयादिसमयान्तरावस्थायीनीति निश्चीयताम् ।
§ 2613

न्यायोऽप्यत्र --***यो हि भाव उत्पन्नः स नंष्टा चेन्नाशविघ्नः [कः] ?** । तद्व्याख्या --**यदि ह्री**त्यादि । उत्पत्ति-विनाशावनन्तरसाधितौ, स उत्पन्नः सन् भावो विनाशस्वभावश्चेत् तस्य विनाश 796/mj

* * *

विनाशस्वभावः तस्य को विनाशप्रतिबन्धी विघ्नो येनावतिष्ठेत ह्रसिष्ठमपि कालं सः ? न चेन्नैव विनंक्ष्यति । अथ पुनरेवं नेष्यते कदाचिदपि स नैव विनंक्ष्यति पूर्ववत् । अस्ति विघ्नः--विनाशहेत्वसान्निध्यम् । कः कस्य विनाशहेतुः ? यथा घटस्याश्माद्यभिघातो विनाशहेतुः, अग्निसंयोगः पार्थिवरूपादीनामपां च विनाशहेतुः ।

साध्यं विनाशहेतुत्वं त्वया, मया स्वयमेवेति । तत्र विशेषहेतुर्वाच्यः ।
तस्मिन् सति पश्चादग्रहणाद् घटादिविनाशे स स हेतुः ।

तुल्यं स्वयं विनाशेऽपि तथानुत्पत्तितोऽग्रहः । यथासंख्यनिर्देशा हि स्वयमेव पार्थिवघटरूपादयो घटाकारेणोत्पद्यमाना घट इत्याख्यां लभन्ते, ते पुनः विनष्टा उत्पत्तेरेव

* * *

धर्मणः सतः को विनाशप्रतिबन्धी विघ्नः येनावतिष्ठेत ह्रसिष्ठमपि कालं सः, उत्पन्नमात्र एव विनाशं नानुभवेत्, अनन्तरासत्त्वे सति तत्स्व भावत्वाद् विनाशक्षणवत् ? § 2614

**न चेन्नैव विनङ्क्ष्यति,** अस्य भाष्यं यावत् **पूर्ववदि**त्यनिष्टापादनसाधनमेवमनिच्छत इति गतार्थम् । § 2615

कालान्तरावस्थाय्यनित्यवादी आह --**अस्ति** विनाशे **विघ्नः** । कोऽसौ ? **विनाशहेत्वसान्निध्यम्** । तेनैव व्याख्यापयितुकामः पृच्छति --**कः कस्य विनाशहेतुर्य**त्सन्निधाना-ऽसन्निधानाभ्यां विनाशा-ऽविनाशौ ? इति । स ब्रूयात् --**यथा घटस्ये**त्यादि, अश्म-मुसलाद्यभिघातो घटविनाश-

---

१ प्र] तुलना--पृ॰ ५२९-- १ ॥
२ का] कालः स एवस्या स्तिnayacakra-ms-bhā । कालाक्षः स एवस्यास्ति nayacakra-ms-ya ॥
३ राव] ॰स्थायिनीति प्र॰ ॥
५ *] तुलना--पृ॰ ५२९-- १ ॥
५ स] तुलना--पृ॰ ५२८-- २ । नंष्टा चेन्नाशविघ्नः को न चेन्नैव विनंक्ष्यति । इति तत्त्वार्थसूत्रस्य सिद्धसेनीयवृत्तावपि उद्धृतोंऽशः पृ॰ ३२९ ॥
६ न्त] ॰सावितौ प्र॰ । ॰भावितौ ? ॥
७ स] सद्भावो प्र॰ ॥
१९ तिष्ठेत] द्धसिष्ट॰nayacakra-ms-bhā । द्विशिष्ट॰ nayacakra-ms-ya ॥
२४ अ] तुलना पृ॰ ५२९-- १ ॥
२७ अ] अस्ममु॰ प्र॰ ॥
२७ भिघा] ॰घातो विनाश॰nayacakra-ms-ya ॥

हेतुः, अग्निसंयोगः पार्थिवानां रूपादीनामपां च विनाशहेतुः, तत्सान्निध्ये विनाशोऽसान्निध्येऽवस्थानमिति । § 2616

अत्रोच्यते --**साध्यं विनाशहेतुत्वम्** । कथं साध्यम् ? इति, त्वया साध्यं तेनाऽश्माद्यभिघातेन घटस्य विनाशोऽग्निसंयोगा[त्] पार्थिवरूपादीनामपां
- /ms चेति, मया स्वयमेवेति, तत्रावयोः कतरस्य वचस्तथ्यम् ? तस्मादन्यतरासिद्धत्वादहेतुः कथं निर्धार्यते हेतुरेव इति विशेषहेतुर्वाच्यः । § 2617

इतर आह--अस्ति विशेषहेतुः, **तस्मिन् सति पश्चादग्रहणात्** तदसान्निध्ये ग्रहणात् तत्सन्निधावग्रहणाद् घटादिविनाशे स स हेतुरिति निश्चीयते । § 2618

अत्रोच्यते--इदमज्ञापकम् यस्मात् **स्वयं विनाशेऽपि** अस्मत्पक्षे **तुल्यमेवासति** ग्रहणं तेषाम् । कस्मात् ? यस्मात् **तथानुत्पत्तितोऽग्रहः**, अभिघातादिसान्निध्यात् प्राक् तथोत्पत्तेर्ग्रहणम्, पश्चादग्रहणं तत्सान्निध्ये तथानुत्पत्तेः । § 2619

कथं कृत्वा का भावना ? अत आह --**यथासङ्ख्यनिर्देशा हिपार्थिवघ-**
797/mj **टरूपादयः**, पृथिव्यां *

* * *

विनाशकारणत्वात् । तत्राश्माद्यभिघातेनान्येषां रूपादीनामुत्पादो निरुध्यते । अन्ये रूपादयो न पुनस्तथोत्पन्नाः । तस्मात् तदानीं घटत्वेनाग्रहणम् । तेनाभिघातेन स न विनाशितः ।

तथा पार्थिवा अपि रूपादयोऽग्निसम्बन्धसामर्थ्यात् तथा नोत्पद्यन्ते । तथाऽपामपि अग्निसम्बन्धस्तत्सन्ततौ भूयस्तथोत्पत्तिनिरोधे हेतुः । उत्पन्नानां विनाशः स्वयमेव ।

स्वयं विनाशि घटादि, जातत्वात्, प्रदीपशिखावत् । तद्यथा--

जातिरेव हि भावानां विनाशे हेतुरिष्यते ।
यो जातश्च न च ध्वस्तो नश्येत् पश्चात् स केन च । § 2622

* * *

पञ्चवर्ण-षड्रस-द्विगन्धाः, अष्ट स्पर्शाः, शेषेषूदक-तेजो-वायुषु हीनतरा इति या या सङ्ख्या **यथासङ्ख्यं** यथासम्भवमित्यर्थः । रूपादय एव घटाकारेणोत्पद्यमाना घट इत्याख्यां लभन्ते समुदायविशेषात्, ते पुनः स्वयमेव विनष्टा उत्पत्तेरेव विनाशकारणत्वात्, तत्राश्माद्यभिघातेन सन्ततिपतितानामन्येषां

---

१ अ] अस्ति संयोगः प्र० ॥
३ सा] तुलना पृ० ५२९-- १ ॥
४ तेनाऽश्मा]
°श्माद्यभि°nayacakra-ms-bhā ।
°श्मद्यभि° nayacakra-ms-ya ॥
५ स्व]
स्वयमेवेतीतिnayacakra-ms-ya ॥
६ इति]
विनाशहेतु°nayacakra-ms-ya ॥
७ त] पृ० ५२९-- १ ॥
११ त] तथा
तथाnayacakra-ms-bhā ॥
१३ य] यथासंख्या° प्र० । तुलना--पृ० ५३०-- १ ॥
१४ *] तुलना पृ० ५२९-- १ ॥
२८ त] तत्रास्माद्यभि° प्र० ॥

रूपादीनामुत्पादो निरुध्यते, तस्मादभिघातप्रत्ययवशादन्ये रूपादयो न पुनस्तथोत्पन्नास्तस्मात् सन्ततिनिरोधात् तदानीमभिघातकाले घटत्वेन रूपाद्यग्रहणम्, तेनाभिघातेन स घटो न विनाशितः । **तथा पार्थिवा अपीत्यादि** - /ms तेष्वपि रूपादिषु सैव भावना, अत्राग्निसम्बन्धसामर्थ्यमन्येषां तत्सन्ततौ रूपादीनामुत्पित्सूनां निरोधकं न पूर्वेषां विनाशकम् । तथापामपि अग्निसम्बन्धस्तत्सतन्तौ भूयस्तथोत्पत्तिनिरो[धे] हेतुः, उत्पन्नानां विनाशः स्वयमेव भवति । अन्त्यानां त्वपामतिमंतसन्ततत्वात् सन्तत्युत्पादनासामर्थ्यात् सर्वविनाश एवान्यासामपामनुत्पन्नत्वात् । एवं स्वयमेव विनाशो जातानां नान्येन केनचिद् विनाशितत्वादिति । § 2623

अत्राह--कथमिदमवगन्तव्यम्--दृश्यमानऽभिघातादौ विनाशहेतौ स्वयमेव विनष्टा घटादयो न तु तेन हेतुना विनाशिता इति ? *कोशपानेन प्रत्याय्यः स्वयं विनाश इति । § 2624

एतदधुनानुमानेन प्रत्याय्यसे **--स्वयं विनाशि घटादि, जातत्वात्, प्रदीपशिखावत्,** एतदनुमानम् । साक्षीक्षिभूतोऽयमागमो[ऽपि] तदर्थसंवादी, तद्यथा **--जातिरेव हि** इत्यादि । तथा— 798/mj

* * *

ततस्त्रैवं प्रतिक्षणनश्वरतायां रूपादीनामभूतार्थतथात्वादसत्त्वं समुदायवत् ।

यथा हि समुदायस्य तथाभूतदेशाभेदभवनाभावादसत्त्वं तथा रूपादेरप्यसत्त्वं तथाभूतकालाभेदभवनाभावाद् रूपादिरूपकालालभेदादित्यर्थः । यदि तद् यथा रूपरूपं रूपं तथा रूपं तद्रूपं स्याद् द्वितीयक्षणादिषु कदाचित् ततस्तदिति कृत्वा रूपमुच्येत । इदं तु तदभावपरम्परापतितमसदेव समुदायवत् । यथा समुदायः स्वरूपेणासन्नेव रूपादीनामेवं रूपमपि पृथक्त्वानवस्थितार्थत्वात् ।

* * *

जहुक्खित्तंमि लेट्ठुंमि उप्पादेडेअत्थि कारणं ।

---

१ रूपादीना] ॰मुत्पादे निरुध्यते प्र॰ ॥
३ तेनाभिघातेन] तेन घटोnayacakra-ms-ya ॥
३ पा] पार्थिवत्वा अपी॰nayacakra-ms-ya ॥
५ रूपादीना] ॰मुत्पत्तिस्ततांnayacakra-ms-ya ॥
५ त] तथाणुमपिnayacakra-ms-ya । तथामपि nayacakra-ms-bhā ॥
६ त] ॰न्ततो भूयस्ततोत्पत्तिनिरोहेतुः प्र॰ ॥
७ त्व] भवति अन्त्यानां त्वपामतिमतत्वात्nayacakra-ms-ya । भवति मंतत्वात् nayacakra-ms-bhā ॥
८ एवा] एवमन्यासा॰nayacakra-ms-ya ॥
११ *] दृश्यतां टिपृ॰ ६२ पं॰ १२ ॥
१५ जा] जातिरेव हि भावानां विनाशे हेतुरिष्यते । यो जातश्च न च ध्वस्तो नश्येत् पश्चात् स केन च ॥ इति शीलांकाचार्यरचितायां **सूत्रकृताङ्गवृत्तौ** पृ॰ २४ ॥
२५ हुक्खित्तंमि] लेडंमि nayacakra-ms-ya । तुलना पृ॰ ५२९--२ । यतोऽप्युक्तम्--यथ उक्खित्ते

पडणे कारणं णत्थि अण्णत्थुक्खेवकारणात् § 2627

इति । तस्मात् प्रतिक्षणमुत्पत्तेरेव विनाशित्वं सिद्धं रूपादीनाम् ।

§ 2628

ततः किम् ? **ततस्तत्रैवं प्रतिक्षणनश्वरतायां** सत्यां **रूपादीनामभूततथार्थत्वम्**, अभूतार्थतथात्वात् समुदायवदेवासत्त्वमर्थस्य रूपादेस्तेन प्रकारेण देशाभेदभवनात्मनाऽभावस्तदभूतमर्थत[था]त्वं प्रतिक्षणनश्वरताया उक्तत्वात् । ततश्चाऽ**भूतार्थतथात्वादसत्त्वम्**, किमिव ? **समुदायवत्** । § 2629

यद् रूपं भवति तत् तस्मिन्नेव क्षणे न भवति, पुनरपि क्षणान्तरे भवदेव न भवति, पुनरपि न भवति इत्येवमभावपरम्परयाऽऽघ्रातत्वाद**सदेव समुदायवत्** । § 2630

तद्व्याख्या --**यथा हि समुदायस्ये**त्यादि । रूपादित्वेन सन्तो रूपादयो

- /ms देशाभेदेन घटादि- समुदायात्मना न सन्ति, **तथाभूतदेशाभेदभवनाभावात्** समुदायस्य संवृतिसतः परमार्थतोऽसत्त्वात् । **तथा रूपादेरपि** रूपादिपरमार्थतया भवतोऽपि एकस्मिन् क्षणे रूपादिपरमार्थोऽस्त्येव, स तु क्षणान्तरं न प्रतीक्षते कालतो भेदात् पूर्वक्षणरूपादुत्तरक्षणरूपमन्यदेव, एवं रसादयोऽपि, अतः **कालाभेदभवनाभावाद्** देशाभेदभवनाभावसमुदायवन्न सन्ति । तस्य स्फुटीकरणार्थमाह --**रूपादिरूपकालालभेदादित्यर्थ** इति । तस्योत्तरकालाप्रतीक्षित्वात् तदेवेदम् इत्यशक्यं वक्तुं रूपम्, ततोऽत्यन्तमन्यत्वात्, रसादिवत् । तस्यान्यत्वमावीतेन समर्थयितुमाह कृत्वा कल्पनया **इत्थं स्याद्** यदि स्यादिति, तद्यथा— **यदि तद् यथा रूपरूपं रूपं** रसादिव्यतिरिक्तं रूपात्मकमेव रूपं तत्त्वे तेनैवात्मना रूपेण **तथा रूपं तद्रूपं यदि स्याद् द्वितीयक्षणादिषु कदाचित्**, न कदाचिदपि भवतीत्यर्थः, यदि स्यात् **ततस्तदिति कृत्वा रूपमुच्येत**, न तु भवति प्रतिक्षणनश्वरत्वात्, किं तर्हि ?

एवं नियमो नियमितोऽसत्त्वेन विशेषः, तत् किमभाव एव, न, अभावार्थस्तु । यत् तत् प्रतिक्षणमभवनं तस्य तत्तु भवनमपि अत्यन्ताभावविपरीतवृत्ति कथमनर्थतायां स्यात् । न तत् क्षणे क्षणे न भवेत्, अत्यन्ताभावत्वात्, खपुष्पवत् ।

---

लोढम्मि उक्खेवे अत्थि कारणं । पडने कारणं णत्थि अण्णं उक्खेवकारणात् ॥ इति । यथाप्यत्रक्षेपःप्युत्क्षेपः ? पतनकारणं नान्यत् एवमिहापि जातिमेव कारणत्वेन विनाशस्य वर्णयामो नान्यदिति नास्त्यहेतुकता विनाशस्य जातिहेतुकत्वाद्यास्योद्गमनमेव [विनाशस्य] हेतुरिति कृत्वा एषापि गाथा सुनीता भवति--एविमे संखता धम्माः संभवन्ति सकारणाः । स भाव एव धम्माणां यं विभोंति समुद्गताः ॥--इति चन्द्रकीर्तिरचितायां **मध्यमकवृत्तौ** पृ० २२२--२२३ ॥

१ प] पठणे प्र० ॥

१ ण] नत्थि अण्णक्खुक्खेका°nayacakra-ms-ya ॥

९ यो] देशभेदेन प्र० ॥

१५ कालाप्र] °प्रतीक्षितत्वात्nayacakra-ms-ya ॥

१६ मा] °माधीतेन प्र० । दृश्यतां पृ० ३१४ टि० २ ॥

२० प्र] प्रतिपक्षनश्व° प्र० ॥

ननु स नित्यवादवत् भवनव्यपदेशः सत्त्वे घटते । अन्यथा हि कुतोऽस्य भवनलक्षणालक्ष्यस्योपाख्या ?

अभावो वार्थोऽस्येति अस्यशब्दनिर्देश्योऽन्योऽर्थः सन् सम्बध्यते अभावस्याश्रयभूतत्वात्, इतरथा निराश्रयौ प्रागभावप्रध्वंसाभावौ न स्याताम् । न हि भावमनाश्रित्य

* * *

परम्परापतितम्,**इदं तु तदभाव** 799/mj

* * *

एवं नियमो नियमितोऽसत्त्वेन विशेषः, तत् किमभाव एव, न, अभावार्थस्तु । यत् तत् प्रतिक्षणमभवनं तस्य तत्तु भवनमपि अत्यन्ताभावविपरीतवृत्ति कथमनर्थतायां स्यात् । न तत् क्षणे क्षणे न भवेत्, अत्यन्ताभावत्वात्, खपुष्पवत् ।

ननु स नित्यवादवत् भवनव्यपदेशः सत्त्वे घटते । अन्यथा हि कुतोऽस्य भवनलक्षणालक्ष्यस्योपाख्या ?

अभावो वार्थोऽस्येति अस्यशब्दनिर्देश्योऽन्योऽर्थः सन् सम्बध्यते अभावस्याश्रयभूतत्वात्, इतरथा निराश्रयौ प्रागभावप्रध्वंसाभावौ न स्याताम् । न हि भावमनाश्रित्य

* * *

परम्परापतितम्,

उक्तस्फुटीक्रियार्थमुपसंहृत्य साधनमाह --**यथा समुदायः स्वरूपेणासन्नेव रूपादीना**मिति दृष्टान्तः, **एवं रूपमपी**ति साध्यनिर्देशः असन्नेव इति वर्तनात् । **पृथक्त्वानवस्थितार्थत्वा**दिति हेतुः प्रतिक्षणवृत्तित्वात् पृथक्त्वानवस्थितार्थत्वम् । अतो रूपं स्वरूपासत् । § 2631 - /ms

एवं नियमो नियमितोऽसत्त्वेन विशेषो रूपादिः । अथ किं विशेषस्यासत्त्वेन नियम एव तत् किमभाव एव ? नेत्युच्यते, **अभावार्थस्तु**, अभावश्चासावर्थश्च भावश्चेत्यर्थः । कथम् ? **यत् तत् प्रतिक्षणमभवनं तस्य** रूपादिवस्तुनस्**तत्तु भवनमपि** क्षणे क्षणे वृत्तं खपुष्पाभावाद्**यत्यन्ताभावविपरीतवृत्ति** सत् **कथमनर्थतायाम्** अवस्तुतायां **स्यात् ?** किं पुनः स्यात् ? इत्थं स्यात्--नास्ति, न तत् क्षणे क्षणे न भवेत्, अत्यन्ताभावत्वात्, खपुष्पवत्, अनिष्टं चैतत् (?')प्रतिक्षणं न भवति न भवति, इति विशेषाभ्युपगमादित्यतः सोऽभावः सन्नर्थो वस्तु चेत्यर्थः खपुष्पाद्यत्यन्ताभावविपरीतवृत्तित्वात् । § 2632

---

७ त] तुलना ५१६-- २ ॥
२२ रू] रूपरूपस्वरूपासत्nayacakra-ms-ya । रूपरूपासत् nayacakra-ms-bhā । रूपं रूपस्वरूपासत् ? रूपरूपं स्वरूपासत् ? ॥
२४ ए] एतत् nayacakra-ms-ya ॥
२६ स्तुन] त्तत्तुnayacakra-ms-bhā । तत्तु nayacakra-ms-ya ॥
३० ख] खपुष्पदात्यन्ता°nayacakra-ms-ya ॥

**ननु स***इत्यादि तस्य भवनाग्रातत्वं दर्शयति प्रतिक्षणमत्यन्तवि[ल]क्षण-वादे *नित्यवाद इवेति **नित्यवादवत्,** यथा साङ्ख्यादिनित्यवादे रूपं रूपमेव रूपमेवैकं भवति तथेहापि तद्रूपमेव रूपमेव इत्यादि भवति इति **भवनव्य-पदेशः सत्त्वे घटते, अन्यथा हि कुतोऽस्य** तस्यात्यन्तभेदस्यात्यन्तान्व[य]र-हितस्य भवतिइति भवनेन लक्षणेनालक्ष्यस्य **उपाख्या ?** दूरत एव न युक्ता भाव इत्युपाख्या । § 2633

**अभावो वार्थोऽस्येति बहुव्रीहिसमासो वा,**अभावोऽर्थोऽस्य इति **अस्यशब्दनिर्देश्योऽन्योऽर्थः** सन्नसतः **सम्बध्यते** बहिरर्थत्वाद् बहुव्रीहेः । क-
800/mj स्मात् ? **अभावस्याश्रयभूतत्वात्** भाव एव

* * *

प्रागभावप्रध्वंसाभावौ भवितुमुत्सहेते । तदुपपदनञ् वा तदर्थ इति न भाव-मन्तरेणोत्सहते । ननु रूपादिभावोऽर्थः क्षणिकतायां सत्यामपि नाभावम-न्तरेण नोत्सहते भवितुम् । न चाभावो भवितुमुत्सहते, नञुपपदत्वात्, अब्राह्मणवत् ।

नन्वेवं कथमुत्पन्ने पुत्र-घटादावर्थे आश्वासः, विनष्टे चानाश्वासः ? नन्व-विषय एवायं व्यवहारः, वस्तुनि क्षणिकेऽस्यासम्भवात्, उक्तवत् । एवमेव च वैराग्यभावना घटते, तदर्थश्चायमारम्भः । संवृत्या व्यवहारस्तु सन्तानविषय-त्वात् । सूक्ष्मोऽनुमेयो महतो[त्पादेनो]त्पादो विनाशेन विनाशः । महोत्पादः सूक्ष्मोत्पादः इति, भङ्गोऽप्येवम् । महतात्तु सन्तान उत्पादविनाशयोः, सूक्ष्मता तत्प्रवृत्तेः । महत्युत्पाद आश्वासो विनाशेऽनाश्वासः । इतरयोर-नुमेयता ।

* * *

ह्याश्रयो भवितुमर्हति एकक्षणविज्ञानवद् रूपादिसचदसद्विचारस्य । **इतरथा निराश्रयौ प्रागभावप्रध्वंसाभावौ न स्याताम्, इष्टौ च तौ न हि भाव-**
- /ms **मनाश्रित्य प्रागभाव-प्रध्वंसाभावौ भवितुमुत्सहेते,** असद्विशेषत्वादत्यन्ताभाव-वैलक्षण्यात् । **स चाश्रयोऽर्थ एव** तयोः, पूर्वमसद्रूपमुत्पत्त्यवस्थायां सत् पश्चात्तु असदित्युच्यमानत्वात् । § 2634

**तदुपपदनञ् वा तदर्थ इति न भावमन्तरेणोत्सहते**(?')अभावः, इति भावोपपदनञ्प्रयोगः प्रतिषेधवाचित्वात् सिद्धार्थ एव नासिद्धार्थविषयः । **ननु रूपादिभावोऽर्थः क्षणिकतायां सत्यामपि** रूपादिरर्थो भावो **नाभावमन्तरेण**

१ *] एतदन्तर्गतः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
१ न्त] °विक्षणादेnayacakra-ms-ya ॥
२ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
४ स्यात्य] °त्यन्तात्वरहितस्यnayacakra-ms-bhā । °त्यन्तसत्त्वरहितस्य ? ॥
५ णेनाल] °लक्षस्यnayacakra-ms-bhā ॥
२५ योऽर्थ] एवत्तयोःnayacakra-ms-bhā । एतयोः nayacakra-ms-ya ॥
२६ प] पश्चाच्च सदि°nayacakra-ms-ya ॥
२९ रूपादिर] °रथो प्र° ॥

**नोत्सहते** उत्सहत एव **भवितुम् । न चाभावो** भवितुमुत्सहते, **नञुपपदत्वात्, अब्राह्मणवत्,** यथा ब्राह्मणादन्यस्य अब्राह्मणः इति निर्देशस्तथा रूपादेर्भावादन्यस्य अभावः इति निर्देशो युक्तः सत्यामेव क्षणिकतायाम् न भवति इत्यभावानुविद्धो भाव एव भवतीति भावाद्रूपादेरित्यसत एवार्थत्वम् । § 2635

आह **--नन्वेवमित्यादि** । क्षणिकत्वादसत्त्वे कथमुत्पन्ने पुत्रादौ घटादौ चार्थे भूतम् इत्याश्वासोऽनेन मया कार्यं कार्यं, दग्ध-मृत-प्रध्वस्तेषु चानाश्वासः गतं कार्यम् इति ? एष व्यवहारो नोपपद्येत, अविषयत्वात् । सविषयत्वे वास्य व्यवहारस्य पुत्रादेरक्षणिकत्वे युक्त आश्वासः कालान्तरविनष्टत्वेऽनाश्वासश्चेति । अत्रोच्यते **--नन्वविषय एवायं व्यवहारः, वस्तुनि क्षणिकेऽस्यासम्भवात्, उक्तवत्,** यथा तथाभूतदेशाभेदभवनाभावाद् रूपादिसमुदयोऽभावस्तथा तथाभूतकालाभेदभवनाभावात् तदभाव-तदभावपरम्परापतितमेव रूपाद्यपि इत्युक्तन्यायेन रूपाद्यसत्त्वे कुतोऽवतार आश्वासाऽनाश्वासव्यवहारस्य ? **एवमेव च वैराग्यभावना** शरीर-स्वजन-द्रव्यादिनैर्मम्यात् क्वचिदप्यनाश्वासात् संसारहेतुरागादिप्रातिकूल्येन घटते, तदर्थश्चायमारम्भ इति गुणोपचयः क्षणिकभावे । § 2636 - /ms

801/mj

न तर्हि सूक्ष्मौ स्त एव अकारणत्वात् खपुष्पवदुत्पादविनाशौ । सूक्ष्मोत्पादभङ्गयोरकारणत्वमसिद्धं परस्परकारणत्वात् । जातिर्विनाशस्य कारणं जातेर्विनाशः, तयोर्युगपद्भावात्, यतः § 2637

> नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः ॥
> एवमेव च सन्तानसिद्धिः । अन्यथा न कारणं न क्रिया ।
> क्षणिकाः सर्वसंस्कारा अस्थितानां कुतः क्रिया ।
> भूतिर्येषां यैषा ? क्रिया सैव कारकं सैव चोच्यते ॥ § 2641

यच्च व्यवहाराविषयत्वमुक्तं तन्न भवति, यस्मात् स युज्यते **संवृत्या व्यवहारस्तु सन्तानविषयत्वात्** । तद्विषयनिर्धारणार्थमुत्पाद-विनाशौ विकल्पयति **--सूक्ष्मोऽनुमेयो महतो[त्पादेनो]त्पादो विनाशेन विनाश** इति,

---

४ भावा ]
°नुचित्वोnayacakra-ms-bhā ।
°नुचितो nayacakra-ms-ya ॥
८ हारो ] नापद्येत प्र° ॥

११ य ] दृश्यतां पृ° ७९८ पं° ३ ॥
१३ आ ] आश्वासनाश्वास° प्र° ॥
२७ म ] महतोत्पादो विनाश इति प्र° ॥

द्वयोः प्रत्येकं द्वैविध्याच्चातुर्विध्यम्, तद्दर्शयति **--महोत्पादः सूक्ष्मोत्पाद** इति, **भङ्गोऽप्येवमित्यतिदेशेन** च तद्विवेकप्रदर्शनम् **महत्तात्ता सन्तान उत्पाद-विनाशयोः सूक्ष्मता तत्प्रवृत्तेः,** तयोर्महोत्पाद-भङ्गयोः प्रवृत्तिदर्शनाद् बुभुक्षा-तृप्त्योरिव । तत्र सन्तानस्य पुत्रघटादेर्महत्युत्पादे भवत्याश्वासो विनाशेऽनाश्वासः, इतरयोः सूक्ष्मोत्पाद-भङ्गयोरुच्छ्वासनिःश्वासानुमितभ्रान्ति-विश्रान्त्योरिवानुमेयता । § 2642

इतर आह **--न तर्हि सूक्ष्मौ स्त एव अकारणत्वात् खपुष्पवदुत्पाद-विनाशाविति** । सन्तानगतावेव यौ तौ नाशोत्पादौ स्तः, सकारणत्वात्, चक्रस्थघटस्येवोत्पाद आहतघटस्येव विनाश इति । § 2643

अत्रोच्यते **--सूक्ष्मोत्पाद-भङ्गयोरकारणत्वमसिद्धं परस्परकारणत्वात्** । तद्विवृणोति— **जातिर्विनाशस्य कारणं जातेर्विनाशः, तयोर्युगपद्भावात्** । किमिव ? इत्यत आह **--यतो नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः,** यथा तुलाया एकोऽन्तो नमति उन्नमति अपर एकस्मिन्नेव क्षणे तद्वद् रूपोत्पत्ति-रूपान्तरविनाशाविति । **एवमेव च सन्तानसिद्धिः** युगपदुत्पादविनाशे रूपनैरन्तर्यात् सन्ततम् अनवरतं भवनात्, **अन्यथा** उक्तन्यायादन्यथा **न कारणं** सर्वथा विनाशोत्पादयोर[न]वस्थाने **न क्रिया** कर्तुर्भवितुरभावात् । § 2644

- /ms

एतदर्थसंवादि ज्ञापकमाह **--क्षणिकाः सर्वसंस्कारा** इति श्लोकः, उत्पत्तेः सकारणत्वात् प्रत्ययजन्मानः संस्काराः । क्षणमात्रावस्थायिनां द्वितीयं **क्षणमस्थितानां कुतः क्रिया** तेषाम् ? का तर्हि क्रिया लोके परिगृहीता क्रियते घटः इति ? *किं कारकं करोति कटं कुम्भकारः इत्यादि ? अत्रोच्यते **--भूतिर्येषां** जन्मैव **क्रिया, सैव** च **कारकम्** आत्मनैवात्मानं निवर्तयतीति जन्मैव विनाशकारणमित्युक्तम् । § 2645

802/mj

अन्यदन्यदेव हि रूपाद्युत्पद्यमानं दृश्यते प्रत्यक्षत एव तद्यथा वहतीवोदके । § 2646

अथ सन्तानवत् सूक्ष्मोत्पादविनाशयोरप्यन्तरे वस्तु रूपादि दृश्येत । सन्तानो वावस्थितो न दृश्येत स्वोत्पादविनाशयोरन्तरे, सूक्ष्मोत्पादविनाशवत् । § 2647

---

५ योरुच्छ्वास ] निश्वास° प्र° ॥
११ द्विवृ ]
°मृणोतिnayacakra-ms-bhā ।
°सृणोति nayacakra-ms-ya ॥
१४ दुत्पाद ]
°विनाशैnayacakra-ms-ya ॥
१५ भ ]
भवान्यथाnayacakra-ms-ya ॥
१७ ज्ञाप ]
ज्ञापनमाहnayacakra-ms-ya ॥
१८ स्थायिनां ]
द्वितीयक्षण°nayacakra-ms-ya ॥
१९ म ] °मवस्थितानां प्र° ॥
२० * ] किं वारकम् प्र° । किं वा कारकम् इत्यपि पाठोऽत्र भवेत् ॥
२२ नैवात्मानं ] निर्वर्त्तयतीति
जन्मैवंnayacakra-ms-bhā ॥

न हि दृष्टेऽनुपपन्नं नाम । तथाहि-- § 2648

यद्येकस्मिन् क्षणे जातम्... ...।
... ... ...॥§ 2650

अन्ते क्षयदर्शनादादौ क्षयोऽनुमीयते प्रदीपशिखावत् । § 2651

अथवा नायमर्थो युक्तिसाध्यः प्रत्यक्षत्वात्, **अन्यदन्यदेव हि रूपादि उत्पद्यमानं दृश्यते प्रत्यक्षत एव, तद्यथा--वहतीवोदके,** यथा स्रोतसि नद्यादीनां वहदुदकमन्यदन्यदेवाऽऽगच्छति गतं तु गतमेव, अथ च मन्दबुद्धेर्भ्रान्तस्य सन्तानेऽनवरते स्रोतसि तदेव इति मिथ्याप्रत्यय उपजायते तथा सर्वरूपादिषु । § 2652

अत्राह **--अथ सन्तानवदित्यादि** । यथा सन्तानोऽवस्थितो दृश्यते स्वोत्पाद-विनाशयोरन्तरे तथा सूक्ष्मोत्पाद-विनाशयोरप्यन्तरे वस्तु रूपादि दृश्येत । सूक्ष्मोत्पाद-विनाशौ स्वान्तरेऽप्युपलभ्यमानस्वव्यपदेशहेतुकौ स्यातामुत्पादविनाशत्वात् सन्तानोत्पादविनाशवत् । सन्तानगतौ वोत्पाद-विनाशौ स्वान्तरानुपलभ्यस्वव्यपदेशहेतुकौ स्यातामुत्पाद-विनाशत्वात् - /ms सूक्ष्मोत्पाद-विनाशवत् । § 2653

अत्रोच्यते **--न हि दृष्टेऽनुपपन्नं नाम ।** उक्तं हि बुद्धिमान्द्यादुदकस्रोतोवदवस्थानदर्शनमसतः सन्तानस्य । प्रत्यक्षं दृश्यमानत्वादेव वा न चोद्यम्, न हि प्रमाणज्येष्ठं प्रत्यक्षमतिक्रम्योपपन्नमिति प्रत्यक्षविरुद्धं प्रतिपत्तुं योग्यम्, प्रत्यक्षस्य प्रमाणान्तरेणाबाध्यत्वात् । **तथाही**त्येतस्यार्थस्य संवाद्युपपत्त्यन्तरवाचि ज्ञापकमाह, **यद्येकस्मिन् क्षणे जात**मिति श्लोकः, यद्युत्पत्तिरेव विनाशकारणं न स्यात् द्वितीयक्षणाद्यवस्थानवत् सदावस्थानमेव स्यात् विनाशहेत्वभावादित्युक्तम्, न चैतदेवं भवति । तस्माज्जन्मैव विनाशहेतुरात्मनः, तद्विनाश एव चोत्तरोत्पत्तिकारणमिति स्थितमेतत्--क्षणिकं रूपादि बाह्यं वस्त्विति । § 2654

एताभ्यामेव महोत्पाद-भङ्गाभ्यां सन्तानजाभ्यां प्रतिक्षणं सूक्ष्मोत्पाद-भङ्गावनुमेयौ, तद्यथा— **अन्ते क्षयदर्शनादादौ क्षयोऽनुमीयते प्रदीपशिखावत्,** यथा प्रदीपशिखा उत्पत्तिकालादारभ्य क्षीयमाणाऽन्ते निवातेऽपि सर्वथा क्षीयते, सा च क्षणान्तरावस्थाने सति न क्षीयते कदाचिदित्युक्तम्, क्षीयते

६ था] श्रोतसिnayacakra-ms-ya ॥
७ व] वददुहक°nayacakra-ms-ya । वददुक° nayacakra-ms-bhā ॥
८ ते] श्रोतसिnayacakra-ms-ya ॥
१४ रानुप] °लभ्यव्यप°nayacakra-ms-ya । °लम्बव्यप° nayacakra-ms-bhā ॥
१६ हि] दृष्टेमुपपन्नंnayacakra-ms-bhā । दृष्टे+उपपन्नं nayacakra-ms-ya ॥
१६ उ] पृ° ८०२ पं° १० ॥
१६ क] °श्रोतो° प्र° ॥
१९ स्य] संवादाद्युप° प्र° ॥
२२ त] तस्माद्यन्मयैवnayacakra-ms-ya ॥
२५ प्र] क्षणिकंnayacakra-ms-ya ॥

तु सर्वा । तस्मादादित आरभ्य उपरतेत्यनुमीयते प्रत्यक्षेव वा । तथा

803/mj घटादिरपि जन्मनः

* * *

अयं च नयः (?')प्रतिक्षणमन्यो भवन्नेव भवति, इत्यभ्युपगच्छति, अतो नियमोभयं वाञ्छति । निक्षेपचतुष्टये च भावनिक्षेपविकल्पमनागमतो भावमुपयोगं प्रतिपद्यते, उपयोगैवम्भूतस्य नयस्यैकदेशत्वात् । पर्यायमूलनयभेदश्चैषः । समन्तादयते पर्ययत इति पर्यायः । स एवास्त्यर्थोऽस्येति पर्यायास्तिकः । इन्द्रानुभवनकाले तदुपयोगकाल एव वेन्द्रः, अन्यदाऽनिन्द्रः, तद्भावस्यैव तद्भूतत्वात् । अत्र च प्रतिक्षणातिक्रामित्वाद् वस्तुनो बुद्धिस्थो योऽर्थः स शब्दार्थः ।

* * *

- /ms प्रभृति क्षीयते, अन्ते क्षयदर्शनादिति । तथा बुद्धिरपि क्षणिकेति उक्तं वस्तु । § 2655

नयमतेनाऽधुना योज्यते --**अयं चे**त्यादि । अयं च नयः प्रतिक्षणमन्यो भवन्नेव भवति इत्यभ्युपगच्छति अतो नियतं विदधाति नियमयति चेति नियमोभयं वाञ्छति । निक्षेपचतुष्टये च भावनिक्षेपविकल्पमनागमतो भावमुपयोगं क्षायोपशमिकं भावमौदयिकं पारिणामिकं वा भावमुपयोगसाद्भूतं विज्ञानलक्षितं बाह्यं रूपादि प्रतिपद्यते । उपयोगैवम्भूतस्य नयस्यैकदेशत्वात्, आगमानुपयोगैवम्भूतादेर्विशिष्यते ।

---

२ भ्य ]
उपरतोत्य° nayacakra-ms-ya ।
उपरतोन्य° nayacakra-ms-bhā ॥
१४ अ ] अयं
नयःnayacakra-ms-ya ॥
१७ योग ]
°गसाद्भूतंnayacakra-ms-bhā ।
°गमद्भुतं nayacakra-ms-ya ॥
१९ आ ]
आगमोऽनुपयोगै°nayacakra-ms-ya
। आगपयोगै° nayacakra-ms-bhā
। तुलना— पृ° २४ पं° ६, ५१८-- २ ॥

वंजणमत्थमतदुभयमेवंभूतो विसेसे[ति] । आIn the print edition there is a footnote reference but no corresponding note.व॰ नि॰ ७५८§ 2657

त्ति सामान्यलक्षणात् । पर्यायमूलनयभेदश्चैषः समन्तादयते पर्ययत इति पर्यायाक्षरार्थत्वात् । स एवास्त्युपयोगसाद्भूतोऽर्थोऽस्येति पर्यायास्तिकः । § 2658

१804/mj

यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यं वस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते ॥
वाक्यप॰ २ । १३३§ 2660

सन्तानवृत्तश्च क्रमो वाक्यार्थः । § 2661

१. °सद्भू°nayacakra-ms-ya ॥

१ वंज] इदानीमेवंभूतमाह **--वंजण+अत्थतदुभ+ए एवंभू+ओ विसेसे+इ** ॥ ७५८ ॥ व्यज्यतेऽनेन व्यनक्तीति व्यञ्जनं शब्दः, अर्थस्तु तद्गोचरः, तच्च तदुभयं च तदुभयं शब्दार्थलक्षणमेवंभूतो नयो विशेषयति । इदमत्र हृदयम्--शब्दमर्थेन विशेषयति अर्थं च शब्देन । तथा चाह **भाष्यकृत्**--(?')वंजणमत्थेणऽत्थं च वंजणेणोभयं विसेसे+इ । जह घडसद्दं चेट्ठावया तहा तं पि तेणेव विशेषा॰ २२५२, अस्या गाथाया लेशतो व्याख्या--व्यञ्जनं शब्दमर्थेन विशेषयति अर्थवशाद् नैयत्ये व्यवस्थापयतीत्यर्थः, यथा स एव तत्त्वतो घटशब्दो यश्चेष्टावन्तमर्थं प्रतिनियतं व्यवस्थापयतीति भावः । यथा वा घटशब्दवाच्यत्वेन प्रसिद्धा चेष्टा सा घटनाद् घट इति व्युत्पत्त्यर्थपरिभावनाबलाद् योषिदादिमस्तकारूढस्य घटस्य जलाहरणादिक्रियारूपा द्रष्टव्या, न तु स्थानभरणक्रियारूपा । एवमुभयम्--शब्देनार्थमर्थेन शब्दं विशेषयति, अत्रैव चोदाहरणमाह--जह घडसद्दमित्यादि, यथा घटशब्दं चेष्टावतार्थेन नियमयति स एव तत्त्वतो घटशब्दो यश्चेष्टावन्तमर्थं प्रतिपादयति, तथा तमप्यर्थं तेनैव शब्देन नियमयति यथा घटशब्दवाच्या चेष्टा घटनाद् घट इति व्युत्पत्तिबलेन योषिदादिमस्तकारूढस्य घटस्य जलाहरणक्रियारूपा द्रष्टव्येति ।... ...एवंभूतशब्दव्युत्पत्तिश्चैवम्— एवंशब्दः प्रकारवचनः, एवं यथा व्युत्पादितस्तं प्रकारं भूतः प्राप्त एवंभूतः शब्दः, तत्समर्थनप्रधानो नयोऽप्येवंभूत उपचारात्, एवंभूतशब्दसमर्थना चास्य प्रागेवोपदर्शिता यथा यस्मिन्नर्थे शब्दो व्युत्पाद्यते स व्युत्पत्तिनिमित्तमर्थो यदैव स्वरूपतो वर्तते तदैव तं शब्दं प्रवर्तमानमभिप्रैति, न शेषकालम् यथोदकाद्याहरणवेलायां योषिदादिमस्तकारूढो विशिष्टचेष्टावान् घटो घटशब्दवाच्यः, न शेषः, घटशब्दप्रवृत्तिनिमित्तशून्यत्वात् पटादिवत्, तथा घटशब्दोऽपि तत्त्वतः स एव द्रष्टव्यो यश्चेष्टावन्तमर्थं प्रतिपादयति, न शेषः, शेषस्य स्वाभिधेयार्थशून्यत्वादिति । इति मलयगिरिरचितायाम् **आवश्यकनिर्युक्तिवृत्तौ** पृ॰ ३७७--३७८ ॥

२ प] **विशेषावश्यकभाष्ये** २१८५ तमेयं गाथा ॥

३ रा] **पर्ययमूल**°nayacakra-ms-bhā ॥

३ सा] **°रार्थात्**nayacakra-ms-bhā ॥

तदुदाहरणम् --**इन्द्रेत्यादि** । इन्द्रोऽनिन्द्रश्चेन्द्रः, **इदि परमैश्वर्ये** पा० धा० ६३, पारमैश्वर्यानुभवनकाल एवेन्द्रोऽन्यदाऽनिन्द्रः । इन्द्रोपयोगकाल एव वोपयोगेन्द्रः, तत्क्षणानन्तरमनिन्द्रस्तदुपरमात् । पुरन्दरादित्वस्य त्वनवकाश एव क्षणिकत्वादुपयोगस्य च तदर्थस्य च । तथा पूर्दारणकाले तदुपयोगे वा पुरन्दरोऽपुरन्दरोऽन्यदा । कस्मात् ? **तद्भावस्यैव तद्भूतत्वात्,** स एव भाव उपयोगीभूतः पुरन्दराद्यन्यतमपर्यायस्तत्क्षण एव च नान्यदेति भावितार्थम् ।
§ 2662

शब्दार्थः कोऽत्र ? इत्यत्रोच्यते --**अत्र च प्रतिक्षणातिक्रक्रामित्वाद्**
- /ms **वस्तुनो बुद्धिस्थो योऽर्थः स शब्दार्थः,** क्षणे क्षणेऽन्यदेव वस्तूत्पद्योत्पद्याऽतिक्रामदपि बुद्धौ तिष्ठति, यस्तु क्षणो बुद्धिस्थः सोऽर्थः शब्दस्य रूपं रसो गन्धः इत्यादि । एतत्संवाद्यागमान्तरं ज्ञापकमाह नयवादानां जैनागमप्रभवत्वात् --*[१]**यो वाऽर्थो बुद्धिविषय** इत्यादि व्याख्यातार्थानुसारित्वान्न व्याख्यायते । **केश्चिदिष्यते** इति अस्याऽनागमोपयोगैवम्भूतस्य मतमित्यर्थः । § 2663

वाक्यार्थस्तर्हि कः ? उच्यते --**सन्तानवृत्तश्च क्रमो वाक्यार्थः,** विज्ञानसन्ताने रूपादिबाह्यार्थसन्ताने च य उत्पत्ति-विनाशक्रमः स वाक्यार्थः वाक्यवर्णपदादिशब्दानामानुपूर्व्योच्चारणं प्रतिस्वं जन्म-निरोधानुग्रहक्रमः । § 2664
१805/mj

उपनिबन्धनं यतोऽस्य निर्गमस्तद्यथा--इमा णं भंते ! रयणप्पभा पुढवी किं सासता असासता ? गोयमा ! दव्वट्ठया+ए सासता वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं

१. इति पर० प्र० ॥

१२ *] अथवा बुद्ध्युपारूढ एव शब्दस्यार्थो न बाह्य इति दशमं पक्षं दर्शयितुमाह --**यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः । स बाह्यं वस्त्विति ज्ञातः शब्दार्थः केश्चिदिष्यते ॥** २ । १३३ ॥ शब्दस्य बुद्ध्युपारूढस्य वैकल्पिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनः बाह्यं वस्तु विकल्पजननद्वारेण निबन्धनं यस्य स तथाभूतः स च वैकल्पिकोऽर्थो भ्रमवशाद् दृश्यविकल्प्यैल्प्यै ?काकारेण अबहीरूपोऽपि बहीरूपतयाध्यस्तोऽध्यस्तमेव वस्त्ववगच्छामि शब्दादिति शब्दनिमित्तमिति शब्दार्थ इष्यते ।--इति **वाक्यपदीय** स्य पुण्यराजरचितायां टीकायाम् । **बुद्धिविषयः** इति बुद्धौ विपरिवर्तमानः, बुद्धिस्थ इति यावत् । **बाह्यवस्तुनिबन्धन** इति सदसद् बाह्यं वस्तु निबन्धनमक्षरचिह्नस्थानीयं स्वरूपमुपदर्शयितुं प्रक्रम्यते यस्य स बाह्यवस्तुनिबन्धनः । **बाह्यं वस्त्विति ज्ञातः** इति बुद्धिरूपत्वेनाविर्भावितो बाह्यतयाध्यवसित इत्यर्थः । तथाहि-यावद् बुद्धिरूपमर्थेष्वप्रत्यस्तं बुद्धिरूपमेवेति तत्त्वभावनया गृह्यते तावत् तस्य शब्दार्थत्वं नावसीयते तत्र क्रियाविशेषसम्बन्धाभावात्, न हि गामानय दधि खादेत्यादिकाः क्रियास्तादृशि बुद्धिरूपे सम्भवन्ति । क्रियायोगसम्भवी चार्थः शब्दैरभिधीयते । अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः । यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थः । इति तत्त्वसंग्रहपञ्जिकापृ० २८५नुसारेण अस्याः कारिकाया भावार्थः ॥
१७ निरोधानु] ०नुक्रमः ? ॥

संठाणपज्जवेहिं असासता जीवाजीवाभि॰ ३ । १ । ७८ ।
§ 2665

इत्येकादशो नियमोभयभङ्गः ।

मा मंस्थाः--स्वमनीषिकयैवोच्यत इति । जैनागमोऽप्येवमित्यत आह --उपनिबन्धनं यतोऽस्य *निर्गमस्तद्यथा--इमा णं भंते इत्यादिग्रन्थो गतार्थः, अशाश्वतत्वेन पर्यायाणां निर्देशात् । § 2667

इति नयचक्रटीकायामेकादशोऽरो नियमोभयभङ्गः स[1]माप्तः ॥

# १२ अथ द्वादशो नियमनियमारः ।

806/mj

ओँ अर्हँ § 2669

सद्गुरुभ्यो नमः § 2670

अन्ते क्षयाद् यद्येवं ततो वस्तुवत् प्रसिद्ध्यभ्युपगमः कृतो भवति । वस्तुव्यवस्थासिद्ध्युपहितनियमानतिक्रमाद् निष्ठितं तर्हि तत्, अन्तवत्त्वात्, घटादिवस्तुवत् । निष्ठितत्वात् कृतकत्वादारब्धमपि । एवं ते पूर्वनिर्वृत्तवस्तुनिबन्धनाः, क्रियात्वात्, अन्तवत् । § 2671

पूर्वनयमतापरितोषकारणमुत्तरनयोत्थानम्, उत्तरोत्तरसूक्ष्मेक्षिकया च पूर्वस्य दोषदर्शनात् स्वमतसौस्थित्याभिमानाद्यारम्भ इत्यत आह --**अन्ते क्षयाद् यद्येवम्** यदि त्वयान्ते क्षयदर्शनात् स्वरसेनैव वस्तुनः क्षय एवादावप्यनुमीयते, ततः किम् ? ततो **वस्तुवत् प्रसिद्ध्यभ्युपगमः कृतो भवति,** वस्तुनीव वस्तुवत्, यथा वस्तुनः प्रसिद्धस्य लोके स्थितस्य घटादेः क्षयो भवतीति प्रसिद्धिस्तथा त्वयाभ्युपगतमिति प्राप्तम्, विनाशस्योत्पादस्य च प्रसिद्धवस्तुविषयत्वात् । इतरथा खरविषाण- स्येव स्थित्यभावे विनाशोत्पाद- - /ms योरप्यभावः प्रतिसन्धानाभावात्, स्थितस्य भवत एव हि भवनमितीत्थमभ्युपगमस्ते । § 2672

तस्माद् **वस्तुव्यवस्थासिद्ध्युपहितनियमानतिक्रमात्** इत्यस्माद्धेतोर्भवत एवोत्पाद-विनाशप्रतिसन्धानाद् व्यवस्थितं वस्तु सिद्धं नियतमुत्पाद-विनाश-

१. सम्पूर्णःnayacakra-ms-ya ॥

५ *] निगमः प्र॰ ॥
५ इ] दृश्यतां पृ॰ ४५०--४५१ ॥
६ अ] अशाश्वतेनnayacakra-ms-ya ॥
९ सौस्थित्या] ॰त्याहिमाना॰ प्र॰ ॥
१० स्व] स्वरसोनैव प्र॰ ॥
११ प्र] प्रसिद्ध्युपगमःnayacakra-ms-ya ॥

व्यपदेशभाग् भवतीत्येतं नियमं नातिक्रामति खपुष्पादिवैलक्षण्येनोपहितम्, अतो वस्तुव्यवस्थासिद्ध्युपहितनियमानतिक्रमाद् निश्चयेन स्थितं **निष्ठितं** व्यवस्थितमिति गृहाण त्वद्वचनादेवेत्यतश्चाह --**निष्ठितं तर्हि तत्, अन्तवत्त्वात्, घटादिवस्तुव**दिति दृष्टान्तः, यथा मृत्पिण्डाद्यवस्थानामन्ते घटोऽस्त्येव अवस्थित एवान्तव[त्त्वा]त् तथा मृल्लोष्टाद्यवस्थास्वपि । **निष्ठितत्वात्**, कृतं तद् वस्तु घटादिवस्तुवदेव । ततश्च **कृतकत्वा**दारब्धमपि घटादिवस्तुवदेवेति हेतुहेतुमद्भावेनाऽऽरम्भ-क्रिया-निष्ठाः साधिताः उपसंहृत्यैकत्वेनाह --**एवं त** इत्यादि । आरम्भ-क्रिया-निष्ठाः पूर्वनिर्वृत्तवस्तुनिबन्धनाः, *क्रियात्वात्, अन्तवत्, अन्त इवान्तवत्, यथा अन्ते निवृत्तिकाले क्रिया भवनं जन्म आत्मलाभः सा पूर्वनिर्वृत्तवस्तुनिबन्धना तथा प्रारम्भादिक्रियाः । § 2673
807/mj

कुतः क्रिया, क्षणिकत्वात् ? उक्तं हि-- § 2674

क्षणिकाः सर्वसंस्कारा अस्थितानां कुतः क्रिया ।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते । § 2676

तिष्ठतु तावत् क्रियाभ्युपगमादि । क्षणिकशब्दार्थतत्त्वान्वीक्षणादेव क्षणभङ्गवादस्य भङ्गः शक्यते कर्तुम् । न हि क्षणिकशब्दार्थः क्षणेन स्वेन तद्वता चार्थेन स्वामिना विना घटते इति तस्य क्षणस्य स्वामी तत्समवस्थायी द्रव्यार्थोऽर्थो भवितुमर्हति । § 2677

न, पर्यायविषय एव तत्स्वामित्वोपपत्तेः । द्विविधो हि क्षणः उत्पत्तिक्षणो विनाशक्षणश्च तदनन्तरम् । अनन्तरवचनमन्तरालावस्थानव्युदासार्थम् । योऽयमुत्पत्ति- § 2678

इतर आह --**कुतः क्रिया, क्षणिकत्वात्** ? अन्तेऽपि च क्रियात्वं नाभ्युपगम्यते मया क्षणिकत्वादभावत्वात् प्रागुक्तविधिना, किमङ्ग पुनरारम्भकरणाद्यवस्थासु अवस्थितवस्त्वनभ्युपगमात् ? **उक्तं** **ही**त्यादि ज्ञापकम् । - /ms

१ भ] भवतीत्येतन्नियमं नाति°nayacakra-ms-bhā । भवतीत्येतन्नियमन्नाति° nayacakra-ms-ya ॥
७ सा] साविताः प्र° ॥
७ उप] उपसंह्यत्यैक-त्येनाहnayacakra-ms-bhā ॥ उपसंह्यत्यैकन्येनाह nayacakra-ms-ya ॥ उपसंहृत्यैकध्येनाह ? ॥
८ *] क्रियादत्वात् प्र° । क्रियावत्त्वात् ? ॥
१० पू] पूर्वनिवृत्त°nayacakra-ms-bhā ॥
२४ अ] अस्थित°nayacakra-ms-bhā ॥

**क्षणिकाः सर्वसंस्कारा** इत्यादिश्लोकः प्रत्याप्राग्व्या ?ख्यातार्थ इति न पुनर्व्याख्यायते । § 2679

अत्रोच्यते --**तिष्ठतु तावदि**त्यादि । यदन्यद्रव्यार्थनयदर्शनस्योक्तक्षयोत्पादादिक्रियाभ्युपगमादि वस्तुव्यवस्थासिद्धिकारणं वा क्षणभङ्गाभावप्रतिपादनसमर्थं तत् तावदास्ताम्, किं तर्हि ? क्षणिकशब्दार्थतत्त्वान्वीक्षणादेव क्षणभङ्गवादस्य भङ्गः शक्यते कर्तुम्, कस्मात् ? क्षणिकशब्दस्य स्व-स्वामिलक्षणास्त्यस्तिमत्सम्बन्धवाचिठन्प्रत्ययान्तस्य स्थितार्थाभावेऽभिधेयाभावप्रसङ्गात् । तद्दर्शयति --**न हि क्षणिकशब्दे**त्यादि, क्षणोऽस्यास्तीति क्षणिको यथा दण्डोऽस्यास्तीति दण्डिकः, यथा चैत्रेण दण्डसम्बन्धिना स्वामिना दण्डेन स्वेन च [विना] दण्डिकः इति शब्दो नार्थवान् भवत्येवं क्षणिकशब्दोऽपि क्षणेन स्वेन तद्वता चार्थेन स्वामिना विना नार्थवान् । भा भूत् सोऽनर्थक इति तस्य क्षणस्य स्वस्य दण्डस्येव चैत्रष्ठन्प्रत्ययान्तः स्वामी तेन सह समवस्थातुं शीलं यस्य स द्रव्यार्थलक्षणोऽर्थो जैनेन्द्रव्युत्पादितोत्पाद-विनाशपर्यायार्थसहचारिस्थितद्रव्यार्थवद् भवितुमर्हति, इतरथा क्षणोऽस्यास्तीति क्षणिकः इति न शब्दोब्दार्थो घटते सोऽवस्थातृद्रव्याभिधायित्वे तु घटते । § 2680

नान्तराले किञ्चिदस्ति इत्यस्यार्थस्य दर्शनार्थम्, तस्य ज्ञापकं प्रा (Edtext outside numbered paragraph)गुक्तम्-- § 2681

अत्राह --**न, पर्यायविषय एव तत्स्वामित्वोपपत्तेः**, पर्यायान्तरस्य स्वपर्यायान्तरं स्वामीत्यस्त्यस्तिमत्सम्बन्ध उपपद्यते, तदर्थवाची च तत्प्रत्ययः । तद् व्याचष्टे --**द्विविधो हि क्षण** इत्यादि, द्वैविध्यम् **उत्पत्तिक्षणो विनाशक्षणश्च तदनन्तर**मिति । तस्य स्फुटीकरणम्

क्षणानन्तरो विनाशक्षणः स एव तस्यास्ति पर्यायस्य पर्यायः ।

एवमपि न युक्तोऽपदेश इतराभाव इतरस्यापि तथाऽभावात् । यदा दण्डो विद्यते चैत्रोऽपि विद्यते तदास्य तेन तद्वत्ता न्याय्या स्यात् । इह तु यदोत्पत्तिक्षणो न तदा विनाशक्षणः यदा च विनाशक्षणो न तदोत्पत्तिक्षण इति उत्तरेण प्राच्यापदेशो न युक्तः । यदपि च निदर्शनमुक्तं तदपि युगपत् सतोस्तुलान्तयोर्युज्येत, न तु विद्यमानाविद्यमानयोः क्षणयोर्यौगपद्यं घटखपुष्पयोरिव । नत्युन्नत्योश्च सत्त्वाद् यौगपद्यं स्यात् । अतोऽसमञ्जसता दृष्टान्तदार्ष्टान्तिकयोः । नश्यतः सत्त्वे सहावस्थानमुत्पद्यमानेन, असत्त्वे

---

३ द]
°दर्शनंस्योक्त°nayacakra-ms-bhā ॥
७ वा] **वाचि+उत्प्रत्य°** प्र° । अत इनिठनौ --nayacakra-ms-pā ५ । २ । ११५ ॥
८ न] तुलना--यश्चायं मत्वर्थीयः क्षणिका इति स कथम् ? यदि निरुक्तन्यायेन क्षयः क्षण इति क्षणोऽस्यास्तीति क्षणिक इति तन्न युक्तं कालभेदात् । यदा क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः । अथ पुनर्भाव एवानन्तरेण विनाशेन विशिष्यमाणः क्षणिक इत्युच्यते तथापि तेनैव तदेव तद्वन्न भवतीति न युक्तो मत्वर्थीयः । **न्यायवा°** ३ । २ । १४ ॥
१५ सोऽव] **वस्थास्तुद्र°** प्र° ॥
१५ व्याभिधा] **°धायित्वे घटते**nayacakra-ms-ya ॥
१७ स्वामीत्य] **°त्यस्यास्तिमत्स°** प्र° ॥

तदवस्थमसमञ्जसत्वम् ।

* * *

808/mj लावस्थानव्युदासार्थम्,--**अनन्तरवचनमन्तरा**

* * *

क्षणानन्तरो विनाशक्षणः स एव तस्यास्ति पर्यायस्य पर्यायः ।

एवमपि न युक्तोऽपदेश इतराभाव इतरस्यापि तथाऽभावात् । यदा दण्डो विद्यते चैत्रोऽपि विद्यते तदास्य तेन तद्वत्ता न्याय्या स्यात् । इह तु यदोत्पत्तिक्षणो न तदा विनाशक्षणः यदा च विनाशक्षणो न तदोत्पत्तिक्षण इति उत्तरेण प्राच्यापदेशो न युक्तः । यदपि च निदर्शनमुक्तं तदपि युगपत् सतोस्तुलान्तयोर्युज्येत, न तु विद्यमानाविद्यमानयोः क्षणयोर्यौगपद्यं घटखपुष्पयोरिव । नत्युन्नत्योश्च सत्त्वाद् यौगपद्यं स्यात् । अतोऽसमञ्जसता दृष्टान्तदार्ष्टान्तिकयोः । नश्यतः सत्त्वे सहावस्थानमुत्पद्यमानेन, असत्त्वे तदवस्थमसमञ्जसत्वम् ।

* * *

लावस्थानव्युदासार्थम्,

नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः इति ।§ 2682

एवं निरन्तरयोः क्षणयोर्योऽयमुत्पत्तिक्षणानन्तरो विनाशक्षणः स चापकर्षकालपर्यन्तकालच्छेदेन बुद्ध्या विभज्यमानो यो विभागं न प्रयच्छति स एव तस्यास्ति पर्यायस्य पर्यायः, तस्मात् क्षणिकशब्दः क्षणस्य क्षणान्तरापेक्षत्वादर्थवान्, अतो न दोषो द्रव्यार्थपरिग्रहोऽवस्थितार्थोऽन्वेष्य इति ।

§ 2683

अत्रोच्यते --**एवमपि न युक्तोऽपदेशः** क्षणोऽस्यास्तीति क्षणिकः इति पर्यायान्तरापेक्षयापि । कस्मात् ? **इतराभाव इतरस्यापि तथा[ऽ]भावात्,** यथा दण्डाभावे दण्डिकत्वेन चैत्रस्याप्यभावाच्चैत्रो दण्डिक इति नोच्यते एवमुत्पत्तिक्षणस्य विनाशक्षणस्य वा परस्परमितरकाल इतरस्यात्यन्तमसत्त्वाद् विनाशक्षण उत्पत्तिक्षणवान्न भवति उत्पत्तिक्षणोऽपि विनाशक्षणवान्न भवति खरविषाणवत्त्वेन चैत्राभाववत् । **यदा दण्डो विद्यते चैत्रोऽपि विद्यते तदास्य** चैत्रस्य **तेन** दण्डेन **तद्वत्ता** दण्डवत्ता दण्डिकता न्यायादनपेता **स्या**दिति वैधर्म्येण निदर्शनम् । **इह तु यदोत्पत्तिक्षण** इत्यादिना उत्पत्ति-विनाशक्षणयोरसाधर्म्यं दर्शयति यावत् **प्राच्यापदेशो न युक्त** इति गतार्थम् ।

§ 2684

यदपि च

नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः § 2686

२८ न्या] द्यापादपेता प्र° ॥
३० प्रा] दृश्यतां पृ° ८१३ पं° ४ ॥
३३ ना] पृ° ८०१ पं° ४ ॥

इति हेतुहेतुमत्त्वनिदर्शनमुक्तं तदपि अर्थान्तरभूतयोर्युगपत्सतोस्तुलान्तयोर्युज्येत, न तु विद्य- मानाविद्यमानयोः क्षणयोर्यौगपद्यं घटखपुष्पयोरिव, तथा नत्युन्नत्योश्च सत्त्वाद् यौगपद्यं स्यात्, अतोऽसमञ्जसता दृष्टान्त-दार्ष्टान्तिकयोः । स्यान्मतम्--नाशोत्पत्त्योर्यौगपद्ये सति सामञ्जस्याद-दोष इति । इत्येतच्चायुक्तम्, नश्यतः सत्त्वे सहावस्थानमुत्पद्यमानेन, असत्त्वे तदवस्थमसमञ्जसत्वम् । तस्मादयुक्त उत्तरेण प्राच्यस्यापदेशः क्षणोऽस्यास्तीति क्षणिक इति । § 2687

809/mj

स्यादियमाशङ्का तयोरन्यतरस्तिष्ठत्यतो व्यपदेशसिद्धिरिति ।

§ 2688

अथ स्थाता कश्चिद् द्वयोरपि ततो

यद्येकस्मिन् क्षणे जातम्... ... ...।
... ... ...॥ § 2691

एवं द्वयोः क्षणयोरसम्बन्धात् क्षणिकशब्दार्थो नास्ति यद्यन्तरालावस्थानव्युदासार्थत्वेऽनन्तरशब्दस्य । § 2692

अथात्मलाभ एवानन्तरविनाशी । अनन्तरश्च विनाशश्चानन्तरविनाशः, सोऽस्यास्तीति क्षणिकशब्दोऽर्थवान् । न हि रूपादिविनाश[व्यतिरिक्त उत्पादः, य उत्पादः स एव विनाशः, सोऽस्यास्तीति] क्षणिकः । यथोत्पादवानङ्कुर इत्युच्यते । स चोत्पादादनर्थान्तरमङ्कुरः, उत्पादातिरिक्ताङ्कुरासम्भवात् । § 2693

एवं ते य उत्पादः स एव विनाशः, न विनाशातिरिक्त उत्पादक्षणः, § 2694

स्यादियमाशङ्का--तयोः पूर्वोत्तरक्ष[ण]योरन्यतरस्तिष्ठत्यतो व्यपदेशसिद्धिरिति, तत्प्रत्युच्चारणम् --**अथ स्थाता कश्चिद् द्वयोरपि क्षणयो**रिति, यद्युत्तरो यदि पूर्वो यथेच्छसि तथास्तु, तिष्ठतु नाम, तथाभ्युपगतेऽपि दोषः --**ततो यद्येकस्मिन्** इत्यादिश्लोकः त्वयोक्तो विनाशकारणाभावादन-

---

३ न] नेत्युन्नत्योश्चnayacakra-ms-ya । नेत्युत्पन्नत्योस्य nayacakra-ms-bhā ॥
६ स्माद] °दयुक्तंnayacakra-ms-bhā ॥
२२ पूर्वोत्त] °त्तरपक्षयोर°nayacakra-ms-bhā ॥
२३ त] प्रत्युच्चारणम्nayacakra-ms-ya ॥
२५ य] दृश्यतां पृ° ८०२ पं° ५ ॥

न्तकालावस्थानमिति दोष एव । एवं तावद् द्वयोः क्षणयोः सम्बन्धाभावात् क्षणिकशब्दार्थोऽसन् यद्यन्तरालावस्थानव्युदासार्थत्वेऽनन्तरशब्दस्य **व्यपदेशसिद्धिः** इति वर्तते । § 2695

**अथात्मलाभ** इत्यादि । अथ मा भूदेष दोष इति उत्पत्त्यनन्तरविनाशक्षणः इति अनन्तरशब्द उत्पत्तिक्षणमेवाह, स एवोत्पत्तिक्षणो**ऽनन्तरविनाशी** समानाधिकरणसमासत्वात् । तद्दर्शयति— **अनन्तरश्च विनाशश्चे**त्यादिना । तस्यैवात्मलाभस्य विनाशधर्मः सम्बन्धिनः सम्बन्ध्यस्तीति क्षणिकशब्दोऽर्थवान् । तद्व्याख्या --**न हि रूपादिविनाशे**त्यादि यावत् **क्षणिकः**
- /ms । *क्वास्य सम्बन्धिवाचिप्रत्ययता दृष्टेति चेत्, दर्श्यते --**यथोत्पादवानङ्कुर इत्युच्यते** नात्राङ्कुरव्यतिरिक्त उत्पादो न चोत्पादव्यतिरिक्तो मतुपर्थो य उत्पादवानङ्कुर इत्युच्यते, दृष्टश्चायं व्यपदेशस्तेनैव तस्य । तद्दर्शयन्नाह -- **स चोत्पादादनर्थान्तरमङ्कुरः,** कस्मात् ? **उत्पादातिरिक्ताङ्कुरासम्भवादिति ।**

§ 2696

अत्र ब्रूमः --**एवं ते य उत्पाद** इत्यादि तन्मतप्रत्युच्चारणं याव**दुत्पादातिरिक्तासम्भवादिति,** तच्चानिष्टं तवैव, क्षणिकशब्दार्थसमीकरणव्याख्याप्रवृत्तेन त्वया तस्यैव विनाशितत्वात् । कथम् ?
810/mj

* * *

उत्पादातिरिक्तासम्भवात् । न च स यस्य क्षणः, न च योऽसौ क्षणः, । अतः सा क्षणिकता नास्त्येव । तस्मात् प्रस्तुतविरोधित्वादयुक्तेयं व्याख्या । अपि चेहापि इनिप्रत्ययान्तविनाशशब्दनिर्देशोऽयुक्तः, तदर्थासम्भवात् । तस्मादिन उपादानादयुक्ता कल्पना, बहुव्रीहेर्वा, भेदव्यवहारमभ्युपगम्य शब्दार्थविचाराङ्गीकरणात् ।

अनन्तरविनाशक्षणे क्षणद्वैविध्यादसम्बन्धः । उत्पादार्थेन विरोधिनो विनाशस्यानवकाशात् तदा क्षणिकार्थासत्त्वमेव । इतराभावे इतरस्यापि तथाऽभावाद् व्यपदेशाभावः । उत्पादविनाशयोश्चैकार्थनिपातिनोः परस्परनिराकृतार्थत्वादसत्यार्थत्वम्, कुमार-

* * *

इति तद्दर्शयति --**न च स यस्य क्षण** इति, न च सोऽर्थो यस्तेन क्षणेन तद्वत्क्षणिक उच्यते स्वामी दण्डेनेव दण्डिकश्चैत्रः, त्वयैव उत्पादक्षणातिरिक्तार्थासम्भवात् इत्युक्तत्वात् । **न च योऽसौ क्षण** इति, सोऽपि क्षणो नास्ति यश्चैत्रदण्डित्वव्यपदेशकारणदण्डस्थानीयस्वत्वभाक् येन सम्बन्धात् क्ष-

४ अ] तुलना **तत्त्वसं॰** पृ॰ १४२ पं॰ २० ॥
४ थात्म] दृश्यतां पृ॰ ८१० पं॰ १२, २१, पृ॰ ८११ पं॰ २४ ॥
४ उत्प] पृ॰ ८०८ पं॰ ११ ॥
९ *] **क्वस्य** प्र॰ ॥
१० म] **मनुपर्वो** प्र॰ ॥
११ त] **दर्शयन्नाह**nayacakra-ms-ya ॥
१२ उत्पादा] **॰दारनर्थातुर॰** प्र॰ ॥
२८ त] तद्वान् क्षणिकः ? ॥
३० भा] **॰भाका॰** प्र॰ ॥

णोऽस्यास्तीति क्षणिक उच्यते ततोऽन्यः । **अतः सा क्षणिकतात्वऽत्र नास्त्येव शब्दार्थ इत्यर्थः । तस्मात् प्रस्तुतविरोधित्वा[त्] शब्दार्थविरोधित्वादयुक्तेयम् आत्म[लाभ] एवानन्तरविनाशी इति व्याख्या ।** § 2697

किञ्चान्यत् --**अपि चेहापीत्यादि** । क्षणिकशब्दार्थसमीक्रियार्थम् अनन्तरविनाशी इत्यत्र इनिप्रत्ययान्तविनाशशब्दनिर्देशोऽप्ययुक्तस्तस्याप्यर्थासम्भवात्, न केवलं क्षणिकशब्द एव उक्तन्यायेन । तस्मादिन उपादानादयुक्ता कल्पना । इतश्चायुक्ता **बहुव्रीहेर्वा,** अनन्तरं विनाशोऽस्येत्यनन्तर- विनाशः इत्येवोच्यमानेऽपि अयुक्तमेवाभिहितन्यायाद् बहुव्रीहेरपि चित्रगुवद् भिन्नार्थविषयत्वात् तदर्थासम्भवाच्चेति । स्यान्मतम्--आत्मवान् देवदत्तः, उत्पादवानङ्कुरः इत्यभिन्नार्थे मतुपादिप्रत्ययदर्शनात् पदमेकाक्ष[र]म् इत्याद्यभिन्नार्थबहुव्रीहिद[र्श]नाच्चादोष इति । एतच्चायुक्तम्, भेदव्यवहारमभ्युपग[म्य]शब्दार्थविचाराङ्गीकरणाद् वस्तुनस्तथात्वे तद्विरोधाच्च । § 2698 - /ms

किञ्चान्यत्, **अनन्तरविनाशक्षणे क्षणद्वैविध्यादसम्बन्धः, आत्मलाभ एवानन्तरविनाशी** इति ब्रुवतः स एवोत्पादो विनाशश्चेत्येकार्थद्विधावृत्तिप्रसङ्गो[ऽ]सम्बन्धश्च सः, तयोश्चोत्पाद-विनाशयोः परस्परविरोधात् पूर्वदोषानतिवृत्तेश्च । **उत्पादार्थेनेत्यादि,** आत्मलाभस्य उत्पादपर्यायत्वात् विरोधिनो विनाशस्यानवकाशात् तदा क्षणिकार्थासत्त्वमेव । अनन्तरवचनेऽपान्तरालव्युदासार्थव्याख्यापत्तेः प्रागुक्तदोषसम्बन्धादयुक्तम्, तद्दर्शयति --***इतराभाव** इत्यादि गतार्थं साधनं यावद् **व्यपदेशाभाव** इति । § 2699
811/mj

ब्रह्मचारित्वपितृत्ववत् । ततस्तस्यामसत्यतायां द्रव्यार्थसत्यत्वापत्तिरेव । उत्पादानर्थान्तरत्वाच्च सर्वस्य मतुपर्थाभाव एव सर्वत्र रूपादावपि । न चातदात्वेऽप्यस्य प्रयोगो दृष्टः, अतीतानागतकालापेक्षदण्डदण्डिसहभावपरिग्रहादेव आसीद् भविता च दण्डी इति प्रयोगात् । § 2700

---

१ अतः] इत आरभ्य एतच्चिह्नान्तर्गतो **दृष्टान्तो वा** इत्यन्तः पृ० ८१२ पं० २७ पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
३ आ] दृश्यतां पृ० ८०९, पृ० ८११ ॥
४ स] °समीपक्रियार्थसमनन्तर°nayacakra-ms-bhā । पृ० ८०९ पं० २४ ॥
१० तुपा] मनुषादिnayacakra-ms-bhā ॥
१३ आ] पृ० ८०९ पं० ६ ॥
१४ द्विधा] °मृत्ति°nayacakra-ms-bhā ॥
१६ उत्पा] उत्पादविपर्या°nayacakra-ms-bhā ॥
१७ व] °वचनोपान्त°nayacakra-ms-bhā ॥
१८ व्या] °व्यास्या°nayacakra-ms-bhā ॥
१८ *] तुलना पृ० ८०८ पं० २ ॥

अतो यदुच्यते आत्मलाभ एव विनाशः इति, एषाऽयुक्ता कल्पना । § 2701

किञ्चान्यत्, **उत्पाद-विनाशयोश्चे**त्यादि साधनं यावत् **पितृवत्** स्ववचन-विरोधदोषोद्भावनम्, तद्यथा--उत्पादविनाशावेकार्थनिपातिना[व]सदर्थौ, प-रस्परनिराकृतार्थत्वात्, - /ms **कुमारब्रह्मचारित्वपितृत्ववत्,** यथा कश्चिद् ब्रूयात् पिता मे कुमारब्रह्मचारी इति, तत्र कुमारब्रह्मचारित्वं पितृत्वेन निराकृतं पितृत्वं कुमारब्रह्मचारित्वेन, अतस्तौ जन्म-क्षयधर्मावपि तथा विरुद्धौ क्षण एकस्मिन् वृत्तावित्यसत्यार्थौ । § 2702

ततः किम् ? ततः सत्यां **तस्यामसत्यतायां द्रव्यार्थसत्यत्वापत्तिरेव,** यदि वस्तुन उत्पादविनाशौ न स्तः सच्च तद्वस्त्विष्यते ततोऽवस्थितं तदिति प्राप्तमर्थादेव । तच्चानिष्टं ते । § 2703

किञ्चान्यत् **--उत्पादानर्थान्तरत्वाच्च सर्वस्य मतुपर्थाभाव एव सर्वत्र रूपादावपीति** प्राप्त इति वाक्यशेषः । यथा त्वयोक्तम् **--आत्मलाभ एव विनाशः, मतुपर्थोऽपि स एव, उत्पादवदङ्कुरत्ववदुत्पादातिरिक्तार्थासम्भवात् सर्वमुत्पादमात्रम्** इति, तथा च कतमोऽन्योऽर्थ उत्पादाद् यतस्तेनोत्पादेन तद्वानङ्कुरादिरुत्पादवानिति व्यपदिश्येत तद्व्यतिरिक्तासम्भवात् ? एवं रूपादेरप्युत्पादमात्रत्वात् उत्पादवद् रूपं, रसो गन्धः शब्दः स्पर्शो वा उत्पादवान् इति नैव कश्चिदर्थः स्यात्, तदभावात् उत्पादवत् इति व्यर्थको निर्देशो मतुपर्थप्रत्ययान्तः स्यात् । § 2704

स्यान्मतम्--असहमानेभावेऽपि अतदात्वे मतुपर्थप्रत्ययदर्शनाद् व्यभिचारिणो दूषणहेतवस्त्वदीयाः, तद्यथा--दण्डी आसीत्, दण्डी भविता इत्यादि । अत्रोच्यते **--न चातदात्वेऽप्यस्ये**त्यादि । न चैवं मन्तव्यम्--असहभूतयोस्तत्तद्वतोरतदात्वे मतुपर्थप्रत्ययान्तनिर्देश इति, किं तर्हि ? अतीताऽनागतकालापेक्षदण्ड-दण्डिसहभावपरिग्रहादेव आसीद् भविता च दण्डी इति प्रयुज्यते **धातुसम्बन्धे प्रत्ययाः** पा॰ ३ । ४ । १ इति लक्षणात् प्रयोगसाधुता च । अतस्तदवस्थत्वादनुत्तरम् । § 2705

---

४ निपा] ॰पातेनासदर्थौ॰ ? ॥
८ स]
॰सद्यार्था॰nayacakra-ms-bhā ।
सदर्थौ ? ॥
१४ म]
मनुपथाभावnayacakra-ms-bhā ॥
१९ म]
मतुपर्वेपिnayacakra-ms-bhā ॥
२० म] ॰पातेनासदर्थौ॰ ? ॥
२३ म]
मतुपर्वप्रत्य॰nayacakra-ms-bhā ॥
२५ धातु] (?")धातुसम्बन्धे प्रत्ययाः । ३ । ४ । १ । धात्वर्थानां सम्बन्धे काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः । तिङन्तवाच्यक्रियायाः प्राधान्यात् तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः । वसन् ददर्श । भूते लट् । अतीतवासकर्तृकं दर्शनमर्थः । सोमयाज्यस्य पुत्रो भविता सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम् । इति nayacakra-ms-pā **सिद्धान्तकौमुद्याम्** ॥ धात्वोः सम्बन्धो धातुसम्बन्धः । धात्वर्थश्चात्रोपचाराद्धातुशब्देनोच्यते । ...तत्र धातुसम्बन्धे कालान्तरविहितानां प्रत्ययानामन्यस्मिन् काले साधुत्वाभ्यनुज्ञानार्थमिदं सूत्रम् ।--इति **कैयटविरचिते प्रदीपे** ॥

अत उपसंहरति --**अतो यदुच्यते** इत्यादिर्गतार्थ उपसंहारः । एवमुक्त- - /ms
दोषत्वात् आत्मलाभ एव विनाश इत्ययुक्ता कल्पना । § 2706
812/mj

अथापि एतान् दोषानुपेक्ष्य यद्युत्पादादनर्थान्तरमुत्पद्यमानमङ्कुरादि ततो घटाद्युत्पद्यतेऽङ्कुरोऽपि । अत उत्पादमात्रत्वाद् घटाद्यङ्कुरादीनां घटादयोऽङ्कुर एव, अङ्कुरस्वरूपानर्थान्तरत्वात्, अङ्कुरस्वात्मवत् । यथा च स एवं घटाद्यपि । ततश्च स[र्वसा]र्वात्म्यम् उत्पादानर्थान्तरत्वात् । ततश्च सर्वजगद्द्रव्यार्थापत्तिरपि । ततो मूलद्रव्यार्थः कारणद्रव्यार्थोऽप्यापद्यते । यदेव कारणं कार्यमपि तदेव, तदासादितरूपवत्त्वात्, उत्पादासादिताङ्कुरोत्पादानर्थान्तरत्ववत् । § 2707

ननु कार्येणैव कारणरूपमासाद्यते, न, तुल्यपरिप्रश्नार्थत्वात् । § 2708

**अथापी**त्यादि एतानुक्तान् दोषानुपेक्ष्या[ऽ]वमत्य दोषाः प्रत्यक्षविरोधादय उच्यन्ते । तद्यथा— **यद्युत्पादादनर्थान्तरमुत्पद्यमानमङ्कुरादी**ति तदुक्तमेव स्मारयति दूषयितुम्, ततः किम् ? ततो घटादि उत्पद्यतेऽङ्कुरोऽपि, अत उत्पादमात्रत्वाद् घटाद्यङ्कुरादीनामभे[दः], घटादयोऽङ्कुर एव ते प्राप्ताः, कस्मात् ? अङ्कुरस्वरूपानर्थान्तरत्वात्, अङ्कुरस्वात्मवत् । प्रत्यक्षतश्च घटादयोऽङ्कुराद् भिन्ना इति प्रत्यक्षविरोधः । लोके तथा प्रसिद्धत्वाल्लोकविरोधः । कार्य-कारणादिभेदादनुमानविरोधः । तथा शब्दार्थव्यवहाराभ्युपगमादभ्युपगमविरोधः । **यथा च स एवं घटाद्यपि,** यथाङ्कुर एव घटादयोऽपि अङ्कुरस्वरूपोत्पादानर्थान्तरत्वादङ्कुरस्वात्मवत् एवं घटादिरेवाङ्कुरोऽपि घटादिस्वरूपोत्पादानर्थान्तरत्वात् तत्स्वात्मवत् । **ततश्चेति स[र्वसा]र्वात्म्य**मिति सर्वं सर्वात्मकं घटोऽपि पटोऽपि अङ्कुरोऽपि अङ्कुरो घटो रथः पुरुषो महिषोऽपि महिषः पुरुषः महिषो मेषोऽश्वो हस्त्यपीत्यादि सर्वसर्वात्मकत्वमुत्पादानर्थान्तरत्वात् पुरुषाद्येककारणानर्थान्तरचेतनपुरुषत्वादिवत् । § 2709

१ इत्या] इत्यादिनिर्गतार्थnayacakra-ms-bhā ॥
२ आ] दृश्यतां पृ° ८०९ पं° ६, पृ° ८१० पं° १२, पृ° ८११ पं° १४ ॥
१३ व] °वमत्याnayacakra-ms-bhā ॥
२१ रूपोत्पा] °त्पादनार्था°nayacakra-ms-bhā ॥
२२ स] सार्वात्म्य° इत्यपि पाठोऽत्र स्यात् ॥
२३ स] सर्वात्मं घटोपिnayacakra-ms-ya ॥

**ततश्च सर्वजगद्द्रव्यार्थापत्तिरपि,** सर्वमेव न विशेषो नाम कश्चिदिति प्राप्तम् । अनिष्टं चैतत् क्षणिकम् इत्यत्यन्तविशेषमात्रवस्तुवादिनस्ते । § 2710

किञ्चान्यत्, न केवलं सर्वजगद्द्रव्यार्थापत्तिरेव, ततो मूलद्रव्यार्थः कारणद्रव्यार्थोऽप्यापद्यते । तत् कथम् ? इति भावयति **--यदेव कार-**
- /ms **णं कार्यमपि तदेवेति** पक्षोऽनिष्टापादनार्थः । **तदासादित- रूपवत्त्वादिति** हेतुः, तेन कारणेन आसादितं रूपमस्य कार्यस्य, यथा तन्तुरूपमासादितः पटः कारणरूपासादितकार्यरूपत्वात् कारणमेव कार्यम्, किमिव ? **त्वदभिमतोत्पादासादिताङ्कुरोत्पादानर्थान्तरत्ववत्,** यथा उत्पादेनाऽऽत्मरूपमासादितोऽङ्कुरः तदनर्थान्तरत्वादुत्पाद एव तथा तन्त्वादिकारणरूपासादितं पटादि कार्यं कारणमेवेति । § 2711

वयं ब्रूमः कारणेन कार्यमात्मसात् कृतं तन्त्वादिना पटादीति, त्वं ब्रूयाः का (Edtext outside numbered paragraph)र्येण पटादिना आत्मसात् कृतास्तन्त्वादय इति, कतरस्य वचसा विशेषनिर्णयोऽस्त्वावयोः ? § 2712

आह **--ननु कार्येणैव कारणरूपमासाद्यते,** पटेनैव तन्तवः पटरूपमासाद्यन्ते, तस्मादन्यतरासिद्धो हेतुर्विपर्ययाभ्युपगमाद् दृष्टान्तो वा साधनधर्मविकल इति । एतच्च

ननूक्तवस्तुवादवद् भवदेव भवति, तस्मात् तेनैव भवता द्रव्येण कारणेन कार्यरूपमासाद्येत । अन्यथा खपुष्परूपमप्यासाद्येतैव, निर्बीजमप्युत्पादादेव भवेत्, तस्योत्पादादर्थान्तरत्वेनाभूतत्वात्, अङ्कुरवत् ।

यत्तूत्तरेण प्राच्यस्य न युक्तो व्यपदेश इत्यस्योत्तरमुच्यते न, भाविधर्मव्यपदेशात् इति । भाविनं क्षणं सन्धायोच्यते क्षणोऽस्यास्तीति क्षणिक इति, मरणधर्मिवत् । तस्यैव चासौ भावस्य व्ययः प्राच्यस्येति न्याय्य एव व्यपदेशः भाविक्षणसन्धानं च प्रथममेवोपात्तं मया आत्मलाभानन्तरम् इत्युक्तत्वात् । अतोऽनन्तरशब्दलोपं कृत्वा ठन्प्रत्यय उत्पाद्यते

* * *

813/mj **प्रश्नार्थत्वात्,न, तुल्यपरि**

* * *

ननूक्तवस्तुवादवद् भवदेव भवति, तस्मात् तेनैव भवता द्रव्येण कारणेन कार्यरूपमासाद्येत । अन्यथा खपुष्परूपमप्यासाद्येतैव, निर्बीजमप्युत्पादादेव भवेत्, तस्योत्पादादर्थान्तरत्वेनाभूतत्वात्, अङ्कुरवत् ।

यत्तूत्तरेण प्राच्यस्य न युक्तो व्यपदेश इत्यस्योत्तरमुच्यते न, भाविधर्मव्यपदेशात् इति । भाविनं क्षणं सन्धायोच्यते क्षणोऽस्यास्तीति क्षणिक इति,

---

५ प] पक्षोपिऽनिष्टा°nayacakra-ms-bhā ॥ °त्पादनार्था°nayacakra-ms-bhā ॥
८ त्पादासादिताङ्कुरोत्पा]
१२ वा] दृश्यतां पृ° ८१० टि° ३ ॥

मरणधर्मिवत् । तस्यैव चासौ भावस्य व्ययः प्राच्यस्येति न्याय्य एव व्यपदेशः भाविक्षणसन्धानं च प्रथममेवोपात्तं मया आत्मलाभानन्तरम् इत्युक्तत्वात् । अतोऽनन्तरशब्दलोपं कृत्वा ठन्प्रत्यय उत्पाद्यते

* * *

प्रश्नार्थत्वात्,

विशेषमपि चात्र ब्रूमः --**ननूक्तवस्तुवादवदित्यादि** यावद**सादयेत** इति । ननु पूर्वमुत्पततैव मयोक्तम् **आर्हतवादवदुत्पाद-विनाशवता वस्तुना** स्थितिमतापि भवितव्यं भूतत्वात् इत्यादि, तच्च भवदेव भवति नाभवत्, भवच्च कारणं द्रव्यमेव उत्पादं विनाशं कार्यं वात्मसात् करोति आसादयति । तस्मात् तेनैव भवता द्रव्येण कारणेन आसाद्येते कार्योत्पादाविति । - /ms नाभवत् कार्यमासादयितुमर्हति कञ्चिदर्थम्, असत्त्वात्, खपुष्पवत् । यद्येवं नेष्यते, अतस्त्वन्यथा खपुष्परूपमप्यासाद्येतैव, निर्बीजमपि उत्पादादेव भवेत्, उत्पादो हि भवता निर्बीजोऽभ्युपगतः, स चोत्पादो निर्बीजः कारणानि आत्मसात् करोतीतीष्टः, तस्मात् तेनोत्पादेन आत्मसात्क्रियेत खपुष्प-वन्ध्यासुताद्यपि । किं कारणम् ? तस्य खपुष्पादेरुत्पादादर्थान्तरत्वेनाऽभूतत्वात्, यद् यदुत्पादादर्थान्तरत्वेनाभूतं तत् तेनाऽऽसाद्यमानमात्मसात्क्रियमाणं दृष्टम्, यथा अङ्कुर उत्पादेनेत्यापन्नम्, अनिष्टं चैतत् । अङ्कुरं वोत्पादो नासादयेत्, अर्थान्तरत्वेनाभूतत्वात्, खपुष्प-वन्ध्यासुतादिवत् । § 2713

**यत्तूत्तरेणेत्यादि** । यदस्माभिर्दूषण[मुक्तपृ° ८०८ पं° २ ॥]म्--उत्तरेण विनाशेन प्राच्यस्यासतस्तत्काले तेन वा विनाशेन सम्प्रति असता न युक्तो व्यपदेशः इति, अस्योत्तरं परिहारान्तरं यदुच्यते त्वया— **न भाविधर्मव्यपदेशादिति** । तद्व्याख्या --**भाविनं क्षणं सन्धाय उच्यते क्षणोऽस्यास्तीति क्षणिकः इति** असहभाविनापि भाविना तद्वत्ता भवति । किमिव ? **मरणधर्मिवत्,** यथा भाविना मरणधर्मेण तद्वान् मनुष्यादिः प्राणी व्यपदिश्यते तथा प्रथमक्षणो द्वितीयक्षणेनाऽसहभाविनापि भाविना क्षणिक इत्यपदोषो व्यपदेशः । § 2714

त्यादि, मैवं मंस्थाः--प्रतिबध्यमानेन इदानीं हेत्वन्तरमुपात्तमिति, किं तर्हि ? भाविक्षणसन्धानं च प्रथममेवोपात्तं मया आत्मलाभानन्तरम् इति विशेष्योक्तत्वात् । § 2715

**तस्यैव चासौ भावस्य व्ययः प्राच्यस्येति न्याय्य एव व्यपदेशः,** यदि तावत् कालान्तरभाविना मरणधर्मेणापि व्ययात्मकेन तस्यैव धर्मः इति व्यपदिश्यते - /ms भावः किमिति पुनरात्मलाभानन्तरभाविना विनाशेनाऽऽत्मीयेन प्रथमक्षण

---

७ मु] °मुतातवैवnayacakra-ms-ya ॥

१२ अ] असतस्त्व°nayacakra-ms-bhā ॥

२० विना] विनाशे सम्प्रतिnayacakra-ms-ya ॥

२७ त] दृश्यतां पृ° ८१५ पं° २१, पृ° ८१७ पं° २३ ॥

२७ य] यदि भावकाला° प्र° ॥

एव क्षणिक इति नोच्यते ?

क्षणिक इति तस्योत्पन्नस्य व्यापारस्थितिरिक्तताज्ञापनार्थं यद्वत् क्षणिक आस्ते क्षणिकं निकेतनमिति ।

एतदपि परिकृशमेव । युक्तं यद् मरणधर्मिणि स्थित एवार्थे आत्माख्येऽभावविलक्षणे भावान्तरविलक्षणे च मरणधर्मिव्यपदेशः । कृतकत्वानित्यत्वधर्मसम्बन्धिस्थितघटाद्यनित्यत्वस्य कृतकत्वेन व्यपदेशवदवस्थितपुरुषमरणव्यपदेशः । घटाद्यनित्यधर्मिव्यपदेशवद् मरणधर्मिव्यपदेशः ।

* * *

814/mj **चेभाविक्षणसन्धानं**

* * *

क्षणिक इति तस्योत्पन्नस्य व्यापारस्थितिरिक्तताज्ञापनार्थं यद्वत् क्षणिक आस्ते क्षणिकं निकेतनमिति ।

एतदपि परिकृशमेव । युक्तं यद् मरणधर्मिणि स्थित एवार्थे आत्माख्येऽभावविलक्षणे भावान्तरविलक्षणे च मरणधर्मिव्यपदेशः । कृतकत्वानित्यत्वधर्मसम्बन्धिस्थितघटाद्यनित्यत्वस्य कृतकत्वेन व्यपदेशवदवस्थितपुरुषमरणव्यपदेशः । घटाद्यनित्यधर्मिव्यपदेशवद् मरणधर्मिव्यपदेशः ।

* * *

चे

**अतोऽनन्तरशब्दलोपं कृत्वा**अनन्तरक्षणोऽस्यास्ति इति विगृह्य अनन्तरशब्दलोपं कृत्वा **ठन्प्रत्यय उत्पाद्यते क्षणिक इति,** यथा देवदत्तो [देविकः] देविल इति वा **ठाजादावूर्ध्वं द्वितीयादचः** पा॰ ५ । ३ । ८३ इति । किमर्थं पुनरेवमुच्यते ? ब्रूमः --**तस्योत्पन्नस्य व्यापारस्थितिरिक्तताज्ञापनार्थम्,** उत्पन्नं क्रियाविरहितं स्थितिविरहितं चेति ज्ञापयितुम् । तदुदाहरणे यथासंख्यम् --**यद्वत् क्षणिक आस्ते** निःकर्मेत्यर्थः, **क्षणिकं निकेतनं** स्थितपुरुषादिरहितं गृहमित्यर्थः । § 2716

---

१९ ठ]
**ठप्रत्यय**nayacakra-ms-bhā ।
**प्रत्यय** nayacakra-ms-ya ॥
२० ठा] **ठाजादूर्ध्वं द्वितीयादचः** ।
५-३-८३ । अस्मिन् प्रकरणे यष्ठोऽजादि-प्रत्ययश्च तस्मिन् प्रत्यये परे प्रकृतेर्द्वितीया च ऊर्ध्वं सर्वं लुप्यते । अनुकम्पितो देवदत्तो देविकः, देवियः देविलः, देवदत्तकः । अनुकम्पितो वायुदत्तो वायुदत्तकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम्, वायुकः । पितृकः । **चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः,** अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः । **अनजादौ च विभाषा लोपो वक्तव्यः,** देवदत्तकः, देवकः । **लोपः पूर्वपदस्य च,** दत्तिकः, दत्तियः, दत्तिलः, दत्तकः । **विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः,** देवदत्तः, दत्तः, देवः । सत्यभामा, भामा, सत्या । **उवर्णाल्ल इलस्य च,** भानुदत्तः, भानुलः, **ऋवर्णादपि** सवित्रियः, सवितृलः । चतुर्थादनजादौ च लोपः पूर्वपदस्य च । अप्रत्यये तयैवेष्ट उवर्णाल्ल इलस्य च ॥ १ ॥--इति **पाणिनीयसिद्धान्तकौमुद्याम्** ॥

अत्रोच्यते --**एतदपि परिकृशमेव, युक्तं यद् मरणधर्मिणी**त्यादि । द्रव्यार्थनर्थेन स्थितस्य जनन-मरणे युज्येते बालाद्यवस्थानियमपरम्पराक्रियानुभाविनः सव्यापारस्य स्थितस्यैवार्थस्यस्यांक्षणिकस्यात्माख्यस्याभावविलक्षणस्य भावान्तरविलक्षणस्येति दृष्टान्तस्य वैधर्म्यं दर्शयति, विपर्ययसाधनाद् विरुद्धो हेतुरिति । एवं स्थितमेव जायते जातं च म्रियते स्थित्यविनाभाविनी जन्म-मरणे मरणाविनाभावि च जन्मेति एवं लोके दृष्टत्वात् । उपदृष्टान्तश्च --**कृतकत्वानित्यत्वे**त्यादि, कृतकत्वधर्मा अनित्यत्वधर्मा - /ms चा[व]स्थित एव घटादिः शब्दानित्यत्वप्रतिज्ञायां दृष्टान्त उच्यते यत् कृतकं तदनित्यं दृष्टं यथा घटादिः इति नास्थितो नात्यन्ताभावो नापि ततोऽर्थान्तरभूतो वा तद्धर्मासम्बन्धी आकाशादिरिति तद्वदवस्थितघटाद्यनित्यत्वस्य कृतकत्वेन व्यपदेशवदवस्थितपुरुषमरणव्यपदेशो जन्मना तदविनाभावादिति दृष्टान्तस्य स्वपक्षसाधनतामापाद्य दार्ष्टान्तिकत्वोपसंहारं करोति — **घटाद्यनित्यधर्मिव्यपदेशवद् मरणधर्मिव्यपदेशः** । § 2717

815/mj

आयुष्कजननमरणपरिणतो विद्यमान एवात्मा जायते म्रियते च, असति च, क्रियानुपपत्तेः, तथा चाभियुक्ताः पठन्ति--मृङ् प्राणत्यागे पा॰ धा॰ १४०४ इति, व्यवस्थितो जीवः प्राणांस्त्यजत्युपादत्ते च, तत्र तद्भूतत्वात् किं सन्धानेन ? § 2718

यदप्युक्तं तस्यैव चासौ भावस्य व्यय इति न्याय्य एव व्यपदेश इति तदपि न किञ्चित्, § 2719

**आयुष्कजनने**त्यादि । आयुःकर्मणा व्यवस्थितेन जीवस्य जनन-मरणे नासता खपुष्पादिना नार्थान्तरेणात्मापरिगृहीतपरमाण्वाकाशादिना वा । यथोक्तम्—

आयुगवसेन जीवो जायति जीवति य आ+उगस्सुद+ए ।
अण्णायुगोद+ए वा मरति तु सव्वायुणासे वा ॥ § 2722

---

१ रिकृ]
°कृतमेवायुक्तंnayacakra-ms-ya ॥
२ द्र] **द्रव्यार्थतः** इत्यपि पाठोऽत्र भवेत् ॥
२ न] एतच्चिह्नान्तर्गतः °**न स्थितस्य** इत्यत आरभ्य **स्थितस्यैवार्थ**° इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
८ चा] **वा स्थितः** इति **च स्थितः** इति वा पाठोऽप्यत्र भवेत् ॥
१० त] **वद्धर्मा** प्र॰ ॥
१२ सा]
साधकता°nayacakra-ms-ya ॥
१३ देश] °**शिवद्** प्र॰ ॥
२३ आ] आयुष्कवशेन जीवो जायते जीवति चायुष्कस्योदये । अन्यायुष्कोदये वा म्रियते तु सर्वायुर्नाशे वा ॥
२३ जा] जायते nayacakra-ms-ya ॥

तस्मात् तयोर्जन्म-मरणयोर्द्वयोरपि तत्रायुःकर्मणि स्थिते विद्यमान-त्वा[द्] विद्यमान एवात्मा स्वयमुदीर्णायुःकर्मपरिणतो जायते स एव म्रिय-ते भुक्तायुःकर्मत्वात् । **असति च क्रियानुपपत्तेः**, नात्यन्तासति [ख]पुष्पे जन्म-मरणादिक्रियोपपद्यते नाप्यर्थान्तरे तत्परिणामशून्ये गगनादौ । **तथा चाभियुक्ताः पठन्ती**ति ज्ञापकमाह । के पुनरभियुक्ताः ? अर्थप्रवृत्तितत्त्व-निबन्धनशब्दस्वरूपपरिज्ञानलक्षणे व्याकरणेऽभियुक्ताः वैयाकरणाः । यथाह-- § 2723

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ वाक्यप॰
१/१३ § 2725

- /ms तस्मादर्थतत्त्वस्य व्यवस्थापनार्थायाः प्रवृत्तेरर्थतत्त्वं व्यवस्थापयितुं प्र-वृत्तत्वाद् वैयाकरणाः पठन्ति **--मृङ् प्राणत्यागे** पा॰ धा॰ १४. । ४ इति, व्यवस्थितो जीवो म्रियते प्राणानुपात्तानिन्द्रियाऽऽयुर्बलोच्छ्वास-लक्षणांस्त्यजति उपादत्ते च तानेव जायत इति । **तत्र तद्भूत-त्वात्** तत्रैवम्प्रकारेऽवस्थितप्राणोपादानत्यागलक्षणजन्म-मरणात्मकायुष्कर्म-साद्भूतात्मस्वरूपत्वात् **किं सन्धानेन ?** किं प्रयोजनं कल्पितेन सन्धानेन ? नास्तीत्यर्थः । § 2726

किञ्चान्यत् **--यदप्युक्त**मित्यादि । तस्यैव भावस्य व्ययत्वाद् विनाशेनोत्पादस्य क्षणोऽस्यास्तीति क्षणिकः इति व्यपदेशो न्यायादनपेत इति त्वया यदुक्तं **तदपि न किञ्चित्,** नार्थोऽनेनायुक्तत्वात् । तद्दर्शयति
816/mj **--उत्पद्यमान-विनश्यतोरपि तावदि**त्यादि, यावेतावुत्पत्तृ-विनंष्टारौ भावौ

* * *

उत्पद्यमानविनश्यतोरपि तावदभूतत्वात् खपुष्पयोरिव सम्बन्धाभावः, किमङ्ग पुनरुत्पादविनाशयोरसत्त्वभूतत्वादवस्तुत्वाद्यासम्भाव्यप्रवृत्त्योरेव ? अपि चा-त्रापि षष्ठ्यर्थानुपपत्तिः असम्बन्धादसहभावात् । नन्वसहभवनेऽपि षष्ठी

---

१ स्थिते] विद्यमाने एव विद्यमान एवात्मा ? ॥
३ क्रियानुप] °पपत्तोnayacakra-ms-bhā । °पपत्तिः ? ॥
४ णा] **°णादिक्रिययोप°** प्र॰ ॥
८ अ] दृश्यतां पृ॰ ५७९ टि॰ २ ॥
१० ना] **°नार्थयो**nayacakra-ms-ya ॥
१२ प्राणानुपात्ता] पञ्चेन्द्रियाणि आयुः मनोवाक्कायबलानि उच्छ्वासश्चेति दशविधाः प्राणाः, तेषामुपादानं जन्म, उपात्तानां तेषां त्यागो मरणमिति भावः ॥
१४ का] **°कारे अनवस्थित°** प्र॰ ॥
१४ त्या] **°त्यायलक्षणाज°**nayacakra-ms-bhā । **°त्यात्मलक्षणाज°** nayacakra-ms-ya ॥
१५ स] **संबंधानेन** प्र॰ ॥
१५ स] **साधनेन**nayacakra-ms-bhā । पृ॰ ८१३ पं॰ २२, २८ ॥
१७ य] पृ॰ ८१७ पं॰ २३, पृ॰ ८१३ पं॰ २६ ॥
१९ ना] **नार्थोनना°** प्र॰ ॥

विकारविषया, तद्यथा--धानानां सक्तवः, तन्दुलानामोदनः । एतदपि न, द्रव्यपर्यायसहवृत्तेः, घटस्य विनाश इति यथा मृद्द्रव्यस्यैव । अतः सहभाविनोरेव सम्बन्धादुपपद्यतेऽत्रापि षष्ठी भावस्य व्यय इति । अन्यथा हि अद्रव्ययोस्तूत्पादविनाशयोर्निर्बीजयोर्वस्त्ववक्तव्यम् ।

* * *

तावेतावपि त्वन्मते न स्तः, उत्पाद एवाङ्कुरः इति वचनात् । तयोश्चा**भूतत्वा**दभावत्वं **खपुष्पयोरिव सम्बन्धाभावः** । तस्मात् उत्पत्तैव विनंष्टा इत्ययुक्तं वक्तुम्, **किमङ्ग पुनरित्यादि** दूरत एव उत्पद्यमान-विनश्यदर्थाभावे तत्प्रभावलभ्ययोरुत्पाद-विनाशयोः सम्बन्धकथा, कुतः ? **तयोरसत्त्वभूतत्वात्** ? असत्त्वभूतत्वम**वस्तुत्वाच्च,** न वस्तुनी स्तो ययोस्तावुत्पाद-विनाशाववस्तु, तद्भावादवस्तुत्वात्, तौ चासम्भाव्यप्रवृत्ती खपुष्पव**दसम्भाव्यप्रवृत्त्योरेव** सम्बन्धाभावः इति वर्तते । § 2727

किञ्चान्यत् --**अपि चात्रापीत्यादि** । यथैव अस्त्यस्तिमत्सम्बन्धाभावादसहभाविनोरुत्पाद- विनाशयोः क्षणिकः इति ठन्प्रत्ययाभावः तथा तस्यैव - /ms भावस्य व्ययः इति षष्ठ्यर्थानुपपत्तिरपि असम्बन्धात्, सम्बन्धलक्षणा हि विभक्तयः, कारकाविवक्षायां शेषे सम्बन्धे प्रातिपदिकार्थव्यतिरेके षष्ठीविधानात्, सम्बन्धाभावश्चासहभावादिति । § 2728

आह --**नन्वसहभवनेऽपि षष्ठी विकारविषया** विकारलक्षणा । प्रकृत्युपमर्दश्च विकारः, **तद्यथा--धानानां सक्तवः तन्दुलानामोदन** इति, न ह्यत्र प्रकृतिर्विकृत्यवस्थायामस्ति, अथ च प्रकृतौ षष्ठी श्रूयते धानानां तन्दुलानाम् इति । § 2729

अत्र ब्रूमः --**एतदपि न,** कस्मात् ? **द्रव्य-पर्यायसहवृत्तेः,** द्रव्यं प्रकृतिर्धानातन्दुलादिः पर्यायेण विशेषेण विकारेण सह वर्तते, धानातन्दुलादिप्रकृतेरेव सक्त्वोदनत्वादिविकारपरिणामात् तथा तथा व्यवस्थानात् । किमिव ? **घटस्य विनाश इति यथा मृद्द्रव्यस्यैव** पिण्ड-शिवकादिक्रमभाविधर्मिणो रूपादिसहभाविधर्मणश्च घटस्यैव कपालत्वेन मृदात्मनः परमाण्वादिसङ्घातपरिणाम्यवयवसंस्थानान्तरेण वर्तनं विनाशो घटस्येस्यैव इत्युच्यते । तस्मात् स्वजात्यपरित्यागवृत्तेराविर्भाव-तिरोभावौ सर्वभावानाम् । अतः सहभाविनोरेव सम्बन्धादुपपद्यतेऽत्रापि षष्ठी भावस्य व्ययः इति भावो वीयते, भवन्नेव वर्तते व्येति उदेति वेत्युक्तं भवति द्रव्यार्थापरित्यागेनैवोत्पाद-व्ययवृत्तेः । अतोऽ**न्यथा ह्यद्रव्ययोस्तूत्पाद-विनाशयोर्निर्बीजयोर्वक्र स्त्ववक्तव्य**मिति वक्तुमेवाशक्यमेतत्, भाव एवासौ वस्तुत्वाभिमतो नास्ति, कुतोऽस्योत्पादो - /ms विनाशो वा धर्मो द्रव्यार्थस्यस्याभावे खपुष्पस्येव ? § 2730
817/mj

७ त्तैव] विनष्टा प्र० ॥
१५ र्था] ०र्थोनु० प्र० ॥
२३ प] पर्ययेण प्र० ॥

भवन्ती हि मृद् द्रव्यार्थेन भवति, तद्यथा शिवकस्य स्तूपकीभाव उत्पादात् स्तूपकः, सैव च स्तूपकत्वेनोत्पद्यमाना व्येति । भवनाद्धि भावः । § 2731

एवं तु भाव एव न सः, पूर्वमभावात् पश्चादभावात् पूर्वं पश्चाच्चाभावात्, वन्ध्यापुत्रवत् । यथा तु त्वदुद्ग्राह एवं प्राक् पश्चाद् मध्ये चाभावात् । तद्यथा--त्वया ह्युच्यते तस्यैव चासौ भावस्य व्यय इति । भावस्य इति कर्तृलक्षणा षष्ठी स्यात् कर्मलक्षणा वा ? यदि कर्तृलक्षणा स एव भावो व्येति, न भवत्युत्पाद एव । यदि कर्मलक्षणा ततो विनाशकर्तृकः केनोत्पादो निवर्त्येत ? तस्मात् स एव न भवत्युत्पाद इति मध्येऽप्यभावः । § 2732

तद्वैधर्म्येण द्रव्यार्थवादिन एवोत्पाद-विनाशोपपत्तिप्रदर्शनार्थमाह **--भवन्ती हि मृद् द्रव्यार्थेन** भवन्त्येव भवन्ती स्वरूपमत्यजन्ती **भवति** उत्पद्यते, **तद्यथा--शिवकस्य स्तूपकीभाव उत्पादात् स्तूपक** इति निदर्शनम् । **सैव च** मृद् भवन्ती **व्येति,** तन्निदर्शनम् **--स्तूपकत्वेनोत्पद्यमाना शिवकत्वाद् व्येतीति । भवनाद्धि भावः, भावस्य व्ययः** इत्यत्र योऽयं भावशब्दः सोऽप्येवमस्मदुक्तद्रव्यार्थविषय एव घटते यदर्थस्य व्यय उच्यते, नान्यथा, यत्त्वभवत् खपुष्पादि अद्रव्यं तन्नोत्पद्यते न व्येति वा । § 2733

**एवं त्वित्यादि** । इत्थमुक्तन्यायेन त्वयोक्तो भावः **स भाव एव न** भवति । कस्मात् ? **पूर्वमभावात्,** भवनाभावादित्यर्थः । [तथा पश्चादभावादिति] **भाव एव स न** इति वर्तते । एवमेतौ प्रत्येकं हेतू, समुदितावपि, तद्यथा **--पूर्वं पश्चाच्चाभावादिति** । त्रयाणामपि हेतूनां **वन्ध्यापुत्रवत्** इत्येक एव दृष्टान्तः । त्वन्मतेनैव चैते हेतवः सिद्धाः, उत्पादक्षणस्यैव सत्त्वाभ्युपगमात् । अतो **भाव एव न स** इति साधूक्तम् । § 2734

स्यात् प्रत्याशा--वर्तमानक्षणे भावो भवितुमर्हतीति । सापि न कार्या प्रत्याशा, कस्यामप्यवस्थायामसत्त्वात्, तत आह **--यथा तु त्वदुद्ग्राह एवं प्राक्**
- /ms **पश्चाद् मध्ये चाभावात्** भाव एव न सः इति वर्तते । प्राक् पश्चाच्चाभावत्वमद्रव्यत्वादस्मन्मतेनोक्तम् । अधुना त्वन्मते वर्तमानक्षणेऽप्यसत्त्वे साधिते प्राक् पश्चाच्चाभावत्वं सिद्धमेव भवतीति तत् साधयितुमाह **त्वद्वचनादेव, तद्यथा— त्वया ह्युच्यते तस्यैव चासौ भावस्य व्ययः** इति व्यपदेशप्रसिद्धिसाधनार्थेन वचनेन । तस्य चायमर्थो भावस्य इति कर्तृलक्षणा षष्ठी स्यात् कर्मलक्षणा

---

१३ उ] उत्पद्यते इत्यपि पाठोऽत्र सम्भाव्यते ॥
१६ य] यद्यर्थस्य ? ॥
१९ पू] पूर्वमभावात् पश्चादभावात् भवनाभावादित्यर्थःभाव एव न सः इत्यपि पाठोऽत्र भवेत् ॥
२५ क] **कस्याम०** प्र० ॥
२७ सा] **साध्येते** प्र० ॥
२९ ह्युच्य] पृ० ८१३ पं० ५, २६ ॥

वा ? यदि कर्तृलक्षणा स एव भाव उत्पादो व्येति विनश्यति न भवति, *तेनैव वीयते न भूयते विनश्यतीत्युक्तं भवति, कोऽसौ न भवति ? उत्पाद एव । यदि कर्मलक्षणा ततो **विनाशकर्तृकः** केनोत्पादो निवर्त्येत ? इत्ययुक्त एव भावः । 818/mj

* * *

अपि च तन्दुलानामोदन इत्यत्र स्वकालसमवस्थायिद्रव्यवृत्तविकारान्तरं गच्छेयुस्तन्दुलाः । त्वन्मते तु तस्या अपि स्वकालसमवस्थायिद्रव्यवृत्तविकारान्तरगतेरसम्भवात् तदासावसन्निहित एव भावः कथं व्येति इत्युच्यते ? यदि यदा सन्निहितस्तदैव व्येति नैव तर्ह्युत्पद्यते, न सन्निहितः, न भवति । अथोत्पद्यते भवति सन्निहितः, न तर्हि व्येति उत्पादव्यययोर्विप्रतिषेधात्, कुत एव तत्त्वद्वचनं तस्यैव भावस्य व्यय इति ।

एवं चोत्तरोऽप्यस्य विनाशक्षणो नैव भवति यतस्तदपेक्षः क्षणिक इत्युच्येत, अनुत्पन्नत्वात्, खपुष्पवत् आकाशवद्वा ।

द्वयाभावे तु यदि सदेव चेद् वस्त्विष्यते तत आर्हताभिमतद्रव्यार्थसद्भावे क्षणे क्षणे

* * *

तस्मात् स एव न भवत्युत्पाद इति मध्येऽप्यभावः । तस्मात् प्राक् पश्चाद् मध्ये चाभावाद् भावस्य व्ययः इति वचनात् क्षणिकशब्दो नार्थवान् स्यात् । § 2735

अपि च तन्दुलानामोदनः इत्यत्र ओदनस्य विकारस्यात्मलाभकाले द्रव्यार्थतस्तन्दुलानां समवस्थायित्वादोदनेन सह स्थास्नुत्वाद् विकारान्तरमोदनत्वं तत्र द्रव्ये वृत्तं **गच्छेयुः** आपद्येरंस्तन्दुलाः, सम्भवेदियं गतिरिदृशी । त्वन्मते तु तस्या अपि स्वकालसमवस्थायिद्रव्यवृत्तविकारान्तरगतेरसम्भवात् तद्वैधर्म्यात् तदासावसन्निहित एव भाव उत्पादस्त्वदिष्टोऽसन्नेव कथं व्येति इत्युच्यते ? खपुष्पवदसन्निहितः केन न्यायेन व्येति इति शक्यते वक्तुम् ?

§ 2736

स्यान्मतम्--यदा सन्निहितस्तदा व्येति इत्युच्यते इति ननूक्तम् । अत्रोच्यते, सम्प्रधारः स एव वर्तते--तदेवायुक्तमिति, **यदि यदा सन्निहितस्तदैव व्येति नैव तर्हि उत्पद्यते, न सन्निहितः, न भवति,** नास्तीत्यर्थः । **अथोत्पद्यते भवति सन्निहितः, न तर्हि व्येति** । कस्मात् ? **उत्पादव्ययोर्विप्रतिषेधात्,** विरुद्धः प्रतिषेधो विप्रतिषेधः, उत्पादो व्ययेन विरुध्यते व्ययश्चोत्पादेन, अतो विरुद्धत्वात् परस्परनिवारितत्वाद् विप्रतिषेधात् **कुत** - /ms

---

२ *] तेचैव धीयतेnayacakra-ms-bhā । तेचैव विधीयते nayacakra-ms-ya ॥
३ विना] विनाशकर्ता कः ? केनोत्पादो निवर्त्येत ? इत्यपि पाठोऽत्र स्यात् ॥
२२ अ] व्यापिnayacakra-ms-bhā ॥
३० योर्विप्र] पृ० ८२० पं० ११ ॥

**एव तत्तद्वचनं तस्यैव भावस्य व्ययः इति ?** दूरत एव न घटते भावाभावादिति । § 2737

एवं तावदुत्पादक्षण एव विनाशक्षण इति वक्तुमयुक्तम्, विप्रतिषेधात् न केवलमयमेव न घटते, किं तर्हि ? **एवं चोत्तरोऽप्यस्य विनाशक्षणो नैव भवति यतस्तदपेक्षः क्षणोऽस्यास्तीति क्षणिक इत्युच्येत,** तस्याभावादेव न घटत इत्यर्थः । कस्मात् ? **अनुत्पन्नत्वात् खपुष्पव**दिति गतार्थम्, **सौ**त्रान्तिकं प्रति **आकाशव**दिति वा । एवं तावदुत्पाद-विनाशौ न युक्तावेकक्षणे क्षणान्तरे वा क्षणिकशब्दाभिधेयो यतः स्यात् । § 2738

तथा च द्वयाभावे तु उत्पाद-विनाशक्षणाभावेऽपि यदि सदेव चेद् व-
819/mj स्त्विष्यते तत इदमापन्नम्—

* * *

पर्यायनयसद्भावाच्चोत्पादविनाशाभ्युपगमात् क्षणिकाः सर्वभावा इति क्षणिकशब्दार्थवत्तोपपद्यते ।

एवमेव च जातिरेव हि इति श्लोक इत्थं पठितव्यः—

जातिरेव हि भावानामनाशे हेतुरिष्यते ।
योे जातश्च न च ध्वस्तो नश्येत् पश्चात् स केन च ॥ § 2741

स्थितश्च जायते च न च ध्वंसते घटद्रव्यार्थात्मा । न तावदस्थितः, अनुत्पादविनाशात्मकत्वात्, असंस्कृतत्रयवत् ।

उत्पादविनाशमात्रात्मकतायां तु निर्बीजायां तयोरभावः प्राप्तः, भावितवत् स्थितमेवोत्पद्यते विनश्यति च... ... ...।

* * *

आर्हताभिमतस्थितद्रव्यार्थसद्भावे क्षणे क्षणे पर्यायनयसद्भावाच्चोत्पादविनाशाभ्युपगमात् क्षणिकाः सर्वभावा इति क्षणिकशब्दार्थवत्तोपपद्यते, नान्यथेति । § 2742

- /ms एवमेव च यथा व्याख्यातं तथा **जातिरेव** हि इति श्लोक इत्थं पठितव्यः, तद्यथा --**जातिरेव हि भावानामनाशे हेतुरिष्यते,** पश्चार्द्धं तदेव । त्वया तु भावानामनाशे इत्यत्र संहितापाठजो **मकारो विकार**सहितपाठाद् विनाशितः केनचिदजानता दुर्लिखितत्वाद्वाऽन्येन दुरुपदेशाद्वा, यस्मादुक्तविधिना स्थित एवार्थ उत्पद्यते नास्थित इति प्रतिपादितं तस्मादुत्पत्तिरेवावस्थाने कारणम्, अवस्थितस्यैवोत्पत्तेर्जातं च स्थितं चेत्यतो न ध्वस्तं तस्योत्पत्तिकाल एवाविनष्टस्य सततावस्थानात्मकस्य पश्चात् को विनाशहेतुः ? इति न कदाचिदपि विनाशः । § 2743

मा मंस्थाः--साहसमिदं स्थितं जायते जातं च न ध्वंसत इति, तदर्थं प्रतिज्ञायते --***स्थितश्च जायते च न च ध्वंसते घटद्रव्यार्थात्मे**ति । तस्य

---

१ ए] एव
त्तद्वचनंnayacakra-ms-bhā ॥
५ इ] उच्यतेnayacakra-ms-ya ॥
७ ए] एव ताव॰ प्र॰ ॥
२१ आ] दृश्यतां पृ॰ ८२४ पं॰ १५ ॥
२४ जा] पृ॰ ७९७ पं॰ ७ ॥
३३ *] दृश्यतां पृ॰ ८२० पं॰ २५ ॥

युगपत् प्रतिपादयितुमशक्यत्वात् क्रमेण प्रतिपाद्यते, स्थितत्वं तावत् **न तावदस्थित** इति प्रतिज्ञायते, अस्थितत्वप्रतिषेधे स्थितत्वं सिध्यतीति । कस्मात् ? **अनुत्पादविनाशात्मकत्वात्,** यदुत्पादात्मकं विनाशात्मकं च न भवति तन्नास्थितम्, स्थितमेव । **असंस्कृतत्रयवत्** यथा प्रतिसङ्ख्यानिरोधः, अप्रतिसङ्ख्यानिरोधः, आकाशम् इत्येतत् त्रयं बु[द्ध्य]बोध्यत्वाद् रूपादिवत् सत् प्रत्ययेनाजनितत्वादसंस्कृतं त्रयम् इति सङ्ख्याशब्दवाच्यत्वाच्च सच्च नास्थितं च तथा घटोऽपीति । § 2744

त्वन्मतेन चोत्पाद-**विनाशमात्रात्मकतायां तु निर्बीजायां** स्थितार्थशून्यायां **तयो**रुत्पादविनाशयो**रभावः प्राप्तः । यदप्युक्तं तस्यैव चासौ भावस्य व्ययः इति एतदपि न किञ्चित्**(?') 820/mj

* * *

इति क्षणिकाः सर्वसंस्काराः इति श्लोकोऽप्येवं पठितव्यः--

सर्वेऽप्यक्षणिका भावाः क्षणिकानां कुतः क्रिया ।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ॥§ 2747

भावा वस्तूनि । ते सर्वेऽप्यक्षणिकाः स्थितिक्रियाभ्याम् । एवं ते स्थितिक्रियाभ्यामक्षणिकाः । यदि क्षणिकाः स्युस्तत एषामुत्पादविनाशौ नैव स्याताम्, व्यापारस्थितिरिक्तत्वात्, खपुष्पवत् ।

यद्यक्षणिका भावास्तत उत्पादविनाशव्यतिरिक्तव्यापारासम्भवात् तदतिरिक्तत्वाद् नन्वस्थिता एव खपुष्पवत् । पुनर्व्यापाररिक्ता क्षणिकतैवैषा संवृत्ता ।

एतदपि नैव, भूतिर्येषां क्रिया सैव भवति इत्यभ्युपगमात्, व्यापाररिक्तता हि द्रव्यार्थवस्तुनो भूतेरेव ।

* * *

इत्युपक्रम्य शब्दतोऽर्थतश्च यावद् **विप्रतिषेधात्** इति भावितेन तुल्यं **भावितवदि**त्यतिदिशति **स्थित- मेवोत्पद्यते विनश्यति** चेत्यादि । § 2748 - /ms

योऽपि श्लोकः **क्षणिकाः सर्वसंस्काराः** इत्यादि सोऽप्येवं पठितव्यः एतस्मात् कारणात् **इति**शब्दस्य हेत्वर्थत्वात् । तद्यथा --**सर्वेऽप्यक्षणिका भावाः क्षणिकानां कुतः क्रिया ?** पश्चार्द्धं त्वत्पाठवत् । उत्पन्नस्याविनाशप्रतिपादनार्थः श्लोकः । तद्व्याख्या --**भावा वस्तूनीति** पर्यायः, ते **सर्वेऽप्यक्षणिकाः स्थित्या क्रियया च** उत्पत्ति-विनाशात्मिकया सततभवनक्रियात्मका इत्युक्ताः एवं ते स्थिति-क्रियाभ्यामक्षणिका इत्युपसंहृतार्थव्याख्यैव । त्वन्मतवद् यदि क्षणिकाः स्युः तत एषामुत्पाद-विनाशौ नैव

४ प्र] दृश्यतां पृ° १०४ पं° ५-७ टि° १, टिपृ° ४९ पं° २६ ॥
५ यं] दृश्यतां पृ° १०४ पं° ५ ॥
७ घ] घटापीति प्र° । घटाद्यपीति ? ॥
९ य] पृ° ८१५ पं° ११; पृ° ८१८ पं° ४ ॥
२६ क्ष] पृ° ८०१ पं° ६ ॥
३१ इ] इत्युक्ता एवांत प्र° ॥

स्याताम्, व्यापार-स्थितिरिक्तत्वात्, खपुष्पवदित्यनिष्टापादनसाधनमिदं गतार्थम् । तस्मात् स्थितस्यैवोत्पाद-विनाशसिद्धेरक्षणिका भावाः । § 2749

अत्राह --**यद्यक्षणिका** इत्यादि । यदि स्थितातोऽक्षणिकश्च भावस्तस्योत्पाद-विनाशौ न स्तः, उत्पाद-विनाशव्यतिरिक्तश्च नान्यः कश्चिद् व्यापारः सम्भवति, तदसम्भवात् **तदतिरिक्तत्वम्**— उत्पाद-विनाशातिरिक्तत्वम्, उत्पाद-विनाशातिरिक्तत्वादनुत्पन्न-विनष्टत्वादपि नन्वस्थिता एव युष्मदुक्तविधिना खपुष्पवत् **अस्थितानां कुतः क्रिया ?** इत्युक्तम् । पुनर्व्यापाररिक्ता निर्व्यापारक्षणिकतैव संवृत्तेषेति । § 2750

अत्रोच्यते--एतदपि नैव, भूतिर्येषां क्रिया सैव भवति इत्यभ्युपगतमस्माभिः प्रागेव **स्थितश्च जायते च न ध्वंसते च** इति **व्यापाररिक्तता**
- /ms व्यापारयुक्तैव हि द्रव्यार्थवस्तुनः । कस्मात् ? **भूतेरेव,** एवं हि भवद् वस्तु
821/mj भवेत् यदि भवत्येव भवति तत् पुनर्भवनं त्वदिष्टं निर्बीजमन[व]स्थितं

* * *

अभ्युपगतमपि चैतद् भूतिर्येषां भावानां स एव व्यापार इति, नाभूतिः उत्पन्नस्यात्यन्तविनाशो वा । उत्पादविनाशावाविर्भावतिरोभावावस्थितस्यैव । तस्माद् निर्व्यापारक्षणिका न भवन्ति भावा नाप्यस्थितक्षणिकाः । सैव च भूतिः कारकम्, भव्यभवनद्रव्यार्थत्वात् ।

एवं च तदप्यकस्मात् खिन्नं नंष्टा चेत् इत्यादि । स्थितस्यैवार्थस्योत्पदानमुत्पादो विशेषेणादर्शनं विनाशः । तत्र को नंष्टा ? को नाशो यस्य विघ्नश्चिन्त्यते ? को विनंक्ष्यति ? विनाश एव नास्ति कुतोऽस्य हेतुर्यत उच्यते--साध्यं विनाशहेतुत्वम् इति । अपि च वयमित्थं पठामः--

भवितुर्भावविघ्नः को न चेन्नैव तथा भवेत् ।
विघ्नः स्वयं विनाशो वा कः कस्य विनाशहेतुः ॥§ 2753

प्रतिपक्षसंस्पर्शविनिर्मुक्तो भाव एव भाव इति निर्धार्यः । यथा हि भाव उत्पन्नः

* * *

न भवति जन्मेति, तद् दर्शयति --**अभ्युपगतमपि चैत**दित्यादि । मयाभ्युपगतमेव प्रागुक्ता भूतिर्येषां भावानां स एव व्यापार इति नाभूतिरभावः प्रागसदुत्पादो नाप्युत्पन्नस्यात्यन्तविनाशः प्रध्वंसाभावः, कौ तर्हि तावुत्पादविनाशौ ? आविर्भाव-तिरोभावाववस्थितस्यैवेति विस्तरशश्चरितार्थम् । तस्मादेवंविधक्रियायुक्तत्वाद् निर्व्यापारक्षणिका न भवन्ति भावा नाप्यस्थितक्षणिकाः । § 2754

६ न] नन्नस्थिता प्र° ॥
७ अ] पृ° ८०१ पं° ६ ॥
८ तैव] संवृत्त्यैवेति nayacakra-ms-ya । संवृत्त्यैवति nayacakra-ms-bhā ॥
१० प्रा] पृ° ८१९ पं° ६ ॥
२९ स्थित] °तस्येवेतिnayacakra-ms-ya ॥

अत एव कारकं **सैव च भूतिः कारक**माविर्भाव-तिरोभावात्मिका स्थितस्यैव, कस्मात् ? **भव्यभवनद्रव्यार्थत्वात्,** भवति इति भव्यं कर्तरि, भूयते यत् तेन तद् भवनं भावे, कर्तृ-भावसाधनलभ्यात्मनोऽङ्गुलिवक्रर्जुत्ववदात्मनैवात्मनः साध्यसाधनत्वात् । § 2755

**एवं च तदपि अकस्मात् खिन्नम्** । एवं स्थितार्थाविर्भावतिरोभावमात्रोत्पादविनाशत्वे यत् पठ्यते ***नंष्टा चेत्** । इत्यादिः श्लोकः सोऽप्यकस्मात् खेदः । स्थितस्यैवार्थस्योत्पादनमुत्पादः, विशेषेणादर्शनं विनाशोऽन्यथा दर्शनं प्राग्वददर्शनम् । तत्र को नंष्टाऽत्यन्तादृश्यात्मना त्वन्मतः ? को नाशः प्रध्वंसाभावात्मको यस्यैवंलक्षणस्य विघ्नश्चिन्त्यते ? को विनङ्क्ष्यति ? न कश्चिदपि भावो विनङ्क्ष्यतीत्यर्थः । कस्मात् ? विनाशाभावादेवैतत् स- - /ms
र्वमुन्मत्तकप्रलपितस्थानीयमविचारक्षमम्, अत आह--विनाश एव नास्ति कुतोऽस्य हेतुर्यत उच्यते --**साध्यं विनाशहेतुत्व**मिति । § 2756

**अपि च वयमित्थं पठामः**, भ्रष्टाम्नायस्तु त्वदीयः पाठः, मदीयस्त्वभ्रष्टः, श्रूयताम्, **तद्यथा--भवितुरि**त्यादि श्लोकः । अस्य व्याख्या --**प्रतिपक्षसंस्पर्शविनिर्मुक्त** इत्यादि । द्रव्यार्थनित्यत्वाद् **भाव एव भाव इति निर्धार्यो** न प्रतिपक्षः क्षणिकः, तं प्रागभावप्रध्वंसाभावात्मकम् * 822/mj

* * *

स भविता चेत् पुनरस्य तथा, भवने को विघ्नः ? यदि हि भावो भूतः कोऽस्योत्तरकालमपि भवतो भवने विघ्नः ? सदा हि तेन भवता भावेन भवितव्यम् ।

न चेन्नैव तथा भवेत् । अथ पुनरेवं नेष्यते ततोऽभवनधर्मत्वादधुनापि नैव भवेत्, नैव कदाचिदपि भवेत् तथा ।

अस्ति भवने विघ्नः--स्वयंविनाशो विनाशहेतुसान्निध्यं वा । कः कस्य विनाशहेतुर्वा ? यथा घटादीनामश्माद्यभिघातोऽग्निसम्बन्धः पार्थिवरूपादीनामपां च विनाशहेतुः । जन्मैव विनाश इति वा ।

साध्ये विनाशतत्त्वे ते, स्वयमेव प्रतिलयः ।§ 2758

ततः कथमिदं निर्धार्यते ?

* * *

---

६ *] पृ० ७९५ पं० ५ ॥
७ स्योत्पा] ०म्यदन० प्र० ॥
८ न] ०नम् को नंष्टाnayacakra-ms-ya ॥
१२ सा] पृ० ७९६ पं० ५ ॥
१४ प्र] तुलना--पृ० ७९५ पं० २० ॥
१६ ध्वंसाभावात्म] ०त्मकसंस्पृश्यnayacakra-ms-ya ॥
१६ *] ०स्माच्चिन्वंnayacakra-ms-bhā । ०स्माद्विवं nayacakra-ms-ya ॥
२५ सा] साध्यौ विनाशतत्वेत्तnayacakra-ms-ya । साध्ये । विनाशतत्वेत्त ? nayacakra-ms-bhā । साध्यौ विनाशतत्त्वेन ? साध्यं विनाशतत्त्वं ते ? ॥

संस्पृश्य प्रतिपक्षं भवत्येव भवति इति निर्धार्यः । कथं निर्धार्यः ? उच्यते **--यथा हि भाव उत्पन्नः स भविता** भूतोऽस्ति **चेत् पुनरस्य तथा भवने को विघ्नः ?** नास्त्येवेत्यभिप्रायः । तद्विवृणोति— **यदि हि भावो भूतः कोऽस्य उत्तरकालमपि भवतो भवने विघ्नः ? सदा हि** पूर्वं पश्चात् तदानीं च त्रिष्वपि कालेषु **तेन भवता भावेन भवितव्यम्,** न न भवितव्यं कदाचित् । § 2759

*__न चेन्नैव तथा भवेत्__ । तद्व्याख्या **--अथ पुनरित्यादि,** अथैवं नेष्यते--अधुना भवितृत्वात् त्रिष्वपि कालेषु भवत्येवेति, अतोऽसावभवनधर्मा, ततश्च अभवनधर्मत्वादधुनापि नैव भवेत्, इदानीं भवितृष्वेव न दृष्टः सन् नैव कदाचिदपि भवेत् तथाऽधुनात्वेन खपुष्पवदित्यापन्नम् । अनिष्टं चैतत् । § 2760

इतरावाहतुः **अस्ति भवने विघ्नः** बौद्ध-वैशेषिकौ यथासङ्ख्यम् **--स्वयंविनाशो विनाशहेतुसान्निध्यमिति** च, **वा**शब्दात् । वयमत्र पृच्छामः यथा **--कः कस्य विनाशहेतुर्वा ?** इति निदर्श्याविति, अशक्यमित्यभिप्रायः । - /ms वैशेषिको ब्रूयात् **--यथा घटादीनामश्माद्यभिघात** इत्यादि पूर्वनयवद् निदर्शना[नि] गतार्थानि । बौद्धोऽपि **जहुक्खित्तंमि लेट्ठुंमि** इत्यादि जन्मैव विनाश इति ब्रूयात् । तयोर्युगपदुत्तरम् **--साध्यौध्येविनाशतत्वे त्तते** इत्यादि । क्षणिकवादि[न्] ब्रूयास्त्वम्--जातस्य स्वयं विनाशः प्रागभावप्रध्वंसाभावलक्षण इति, वयं तु ब्रूमः--प्रतिलय इति उक्तन्यायेन । वैशेषिक त्वं ब्रूयाः--तेनाश्माभिघाताग्निसंयोगादिना घटपार्थिवरूपोदकानां विनाश इति, वयं ब्रूमः--स्वयमेव प्रतिलय इति । ततः कथमिदन्यतरासिद्धान्निर्धार्यते ? § 2761

823/mj

तस्मिन् सति पश्चादग्रहणात् । इदमसंज्ञापकम्, स्वयं विनाशेऽपि हि भावेऽकृतके क्रमनियमप्राप्तवृत्तौ प्राग् दृष्टस्तथा न गृह्यतेऽन्यथा गृह्यते । ततस्तेषां तथाऽनुपलब्धिर्विनाशः । § 2762

---

१ थं] निर्धार्यते यथा हिnayacakra-ms-ya ॥
७ *] तुलना--पृ° ७९६ पं° २ ॥
१० दित्या] °त्यादिपन्नम्nayacakra-ms-ya ॥
१३ म] °मवपृच्छामःnayacakra-ms-ya ॥
१४ कः] तुलना पृ° ७९६ पं° ३ ॥
१६ ग] गतार्थोनिnayacakra-ms-ya ॥
१६ ज] पृ° ७९८ पं° ७ ॥
१६ ज] जन्मैतिवnayacakra-ms-bhā । जन्मेतिव nayacakra-ms-ya । जन्मेति च ? ॥
१८ विनाशः] प्राग्भाव°nayacakra-ms-ya ॥
१८ ध्वंसा] °सभावश्चक्षणnayacakra-ms-bhā ॥

कथं कृत्वा ? यथासंख्यनिर्देशा हि मृद्रूपादयः शिवकाख्यां लभन्ते स्वेन रूपेण चाविनष्टाः तत्तत्स्वभावभूतेरेव लीनाः पिण्डत्वेन उत्पन्नाः स्तूपकत्वेन स्तूपक इत्युच्यन्ते अभिघातप्रत्ययवशाद्वा कपालानि । अतस्तदानीं शिवकादेरग्रहणं न स्वयमभावाद् विनाशनाद्वा । § 2763

अन्यतरासिद्धिव्युदासार्थमाहतुः **--तस्मिन् सति पश्चादग्रहणा**दिति पूर्वनयव्याख्यावदनुगन्तव्यम् । तत्रोत्तरं द्वयोरपि --***इदमसंज्ञापकम्,** यस्मात् **स्वयंविनाशेऽपि भावे** स्वयंविनाशो हि भावस्याविर्भाव-तिरोभावात्मकः प्रतिलयो भाव उक्तः, स च उक्तवद् भावत्वादेवाकृतकः, तस्मिंश्चा**कृतके भावे** - /ms **क्रमनियमप्राप्तवृत्तौ,** क्रमेण नियमः क्रमनियमः, क्रमनियमेन प्राप्ता वृत्तिर्यस्य स क्रमनियमप्राप्तवृत्तिर्भावोऽकृतकः, मृत्पिण्ड-शिवक-स्थासकादिक्रमेण नियतैव वृत्तिः प्राप्यते, पिण्डाच्छिवकः शिवकात् स्तूपक इत्यादि स्वयमेव, कर्त्रादिकारकान्तराण्यपि नियतमृत्पिण्ड-चक्र-सूत्रोदककुलालादिरूपाणि क्रमेण भवन्त्येव भवन्ति । तस्मिंश्च क्रमनियमप्राप्तवृत्तौ भावे प्राग् दृष्टो घटत्वाभावकपालत्वेनाऽऽविर्भवंस्तिरोभवंश्च घटत्वेनाश्माभिघातादिनिमित्तभवनप्रकारेण न गृह्यते घटत्वेन, कपालत्वेन गृह्यते, ततस्तेषां सिध्यत्येवास्मन्मतेन तिरोभूतावग्रहणं घटपार्थिवरूपाद्युदकानां तेन रूपेणानुपलब्धिर्विनाशो विशेषेणादर्शनमन्यथोपलब्धिरेवानुपलब्धिरिति । § 2764

तस्य भावनाप्रश्नः **--कथं कृत्वा ?** इति । व्याकरणम् **--यथासङ्ख्यनिर्देशा हीत्यादि, मृत्** इति द्रव्यार्थभवनैक्यादेकसङ्ख्ययोच्यते, **रूपादयः** इत्याविर्भाव-तिरोभावपर्यायार्थभवनभेदाद् बहुत्वसङ्ख्ययोच्यन्ते, उभयेऽपि **शिवकाख्यां लभन्ते स्वेन रूपेण चाविनष्टाः** । कस्मादविनष्टा आत्मना ? इति चेत्, **तत्तत्स्वभावभूतेरेव** तेन पिण्डाश्माभिघातादिस्वपरापेक्षेण स्वभावेन भवनाद् **लीनाः**--तिरोभूताः **पिण्डत्वेन** कर्तृप्रत्ययवशाच्च **उत्पन्नाः स्तूपकत्वेन स्तूपक इत्युच्यन्ते** मृद्रूपादयः, **अभिघातप्रत्ययवशाद्वा कपालानी**ति । सर्वज्ञो हि

७ *] इदमदसं॰ प्र॰ ॥
१२ शिव] शिवकाद्रूपक प्र॰ ॥
१६ गृह्य] गृह्यतेतस्तेषांnayacakra-ms-ya ॥
१७ तिरो] ॰भूतोचग्र॰nayacakra-ms-ya । ॰भूतेचग्र॰ nayacakra-ms-bhā ॥
१९ कृ] न्यत्वाnayacakra-ms-ya ॥
१९ थास] ॰संख्यानिर्देशा हीत्यादिnayacakra-ms-bhā । ॰संख्यनिर्देशनीत्यादि nayacakra-ms-ya । तुलना--पृ॰ ७९६ पं॰ ७ ॥
२१ प] पर्यार्थभव॰nayacakra-ms-ya ॥
२३ तेन] पिंश्माभिघाता॰ प्र॰ ॥
२४ व] भवन्नाल्लीनाःnayacakra-ms-bhā । भवन्नालीनाः nayacakra-ms-ya ॥

*जं जं जे जे भावे परिणमति पयोग-वीससादव्वं ।
तं तह जाणाति जिणो अपज्जवे जाणणा णत्थि ॥ आव॰ नि॰ ७९४§ 2767

इति वचनात् तथा तथा पश्यति । तदुपसंहरति --**अतस्तदानीं शिवकादेरग्रहणं न स्वयमभावाद् विनाशनाद्वे**त्युभयोरपि उत्तरोक्तिः । § 2768
१824/mj

पार्थिवा अपि रूपादयोऽग्निसम्बन्धसामर्थ्यात् पूर्वरूपतिरोभावे पुनरन्यथोत्पन्नाः । एवमपामग्निनाऽल्पतराविर्भूतेः अन्त्यानामपामतिसूक्ष्मत्वादभिव्यक्तावसामर्थ्यमिति अग्रहणम्, न तेन विनाशनात् । § 2769

मा चाधृतिं कार्षीः । सर्वेऽन्येऽपि वस्तुवाद्युद्ग्राहाः त्वदुद्ग्राहवदार्हततामेवानुपतन्ति । § 2770

येऽप्याहुः-- § 2771

राशिवत् सार्थवत्... ... ...
... ... ... ॥§ 2773

एष स्याद्वाद एव, अनेकान्तार्थत्वात् । § 2774

शक्त्यन्तरत्वतादात्म्यान्यानन्यत्वप्रकल्पनात् ।§ 2775

शक्त्यन्तरं नरादिषु प्रत्येकमसत् सेनायां दृष्टं प्रबलरिपुविजयनम् । तदात्मना तु § 2776

**पार्थिवा अपी**त्यादि तद्ग्रन्थवदेवात्रापि ग्रन्थः, विशेषस्तु **पूर्वरूपतिरोभावे पुनरन्यथोत्पन्ना** इति व्याख्यातार्थानुसारेण विशेषश्चाग्निसम्ब-
- /ms न्धान्धसामर्थ्यम् । **एवमपामि**त्यादि, विशेषस्तु **अग्निनाऽपामल्पतराविर्भूतेर**र्थान्तरापेक्षानपेक्षस्थितार्थभवनव्याप्तेरेवाऽपामल्पतराविर्भूतिरग्निसम्ब— न्धसामर्थ्यात्, अतो**ऽन्त्यानामपामतिसूक्ष्मत्वादभिव्यक्तावसामर्थ्य[म्]**, न स्फुटं

१. पृ॰ ७९६ पं॰ ६ ॥

१ *] दृश्यतां पृ॰ ४७८ टि॰ १ । पृ॰ १८२ पं॰ १३, पृ॰ २१२ पं॰ ११ ॥
१८ पा] तुलना--पृ॰ ७९७ पं॰ ४ ॥
१९ व्याख्याता] °तानुसा°nayacakra-ms-ya ॥
१९ र्थानुसारेण] विशेश्चा°nayacakra-ms-ya ॥
२० अ] अविनामल्पतरा° प्र॰ ॥

ग्रहीतुं शक्यते प्रत्यक्षतः, अनुमीयन्ते तु तिरोभूता इति अनेन प्रकारेणाऽग्रहणं न तेनाग्निसंयोगेन विनाशनादिति । तस्मात् साधु अवोचाम--आर्हतं द्रव्यार्थवादमेव पर्यायार्थाकाङ्क्षं क्षणिकवस्तुवादः समर्थयतीति । § 2777

**मा चाधृतिं कार्षीरि**त्यादि । ममैव क्षणिकवादिन आर्हतत्वमापतितमनिच्छतोऽपि इत्यनुतापं मा कार्षीः, किं तर्हि ? विध्यादिभङ्गान्तपातिनः सर्वेऽन्येऽपि वस्तुवाद्युद्ग्राहास्त्वदुद्ग्राहेण तुल्या आर्हततामेवानुपतन्ति वस्तूद्ग्राहस्याऽनेकान्तत्वापत्तेः, स च तेषां पूर्वाभ्युपगमविरोधो व्यसनम्, परव्यसनमाश्वासकरमिति तद्व्यसनदर्शनादात्माश्वासनं कुरु धृतिं भावय । § 2778

अनन्तरातीतनयदर्शनं तावद् भावयामः **--तद्यथा--येऽप्याहू राशि**वदित्यादि एष श्लोकः स्याद्वाद एव अनेकान्तार्थत्वात् । तद्व्याख्याश्लोकमाह **--शक्त्यन्तरत्वतादात्म्ये**त्यादि, सेनायां भाविते सर्वदृष्टान्तेषु राशि-सार्थादिष्वपि भावितमेव भविष्यतीति लाघवार्थ[म्] । शक्त्यन्तरं नरादिषु प्रत्येकमसत् सेनायां समुदितनरादिचतुरङ्गायां दृष्टं प्रबलरिपुविजयनम्, तदात्मना सेनात्मना तु प्रत्येकं 825/mj

* * *

प्रत्येकं तान्येव हि नराद्यङ्गानि सेनेति तेनैव तयोरेकत्वनानात्वाङ्गीकरणाद् द्रव्यार्थपर्यायार्थानुपातः कृतो भवति ।

नरादिसामान्यतादात्म्येऽपि च रूपान्तरनिरूपितरूपत्वात् सेनाऽन्यापि तेभ्यः रूपरसार्थान्तरत्ववत् ।

नृरथाश्वद्विपवती... ... ...।
... ... ...॥§ 2781

तथा शिखरादिभ्योऽन्योऽनन्यश्च शिखरी । तथा मरिचक्षोदादिभ्योऽन्यदनन्यच्च पानकम् । तथात्मापि सुखादिभ्योऽन्योऽनन्यश्च । तथा माधुर्याम्लादिरपि । तद्वत्सिद्धेषु कटुत्वादिषु संहतेषु पानकद्रव्यं स्वतत्त्वमपि तद्वत्सिद्धत्वात् मधुररसवत् । न हि तद्वत्... ... ...।

* * *

तान्येव हि नराद्यङ्गानि सेनेति तेनैव तयोः नरादिसेनाख्यवस्तुनोः समुदायि- - /ms

२३ अ] अनुमीयतेnayacakra-ms-ya ॥
२३ प्र] प्रकारेणnayacakra-ms-ya ॥
१ अ] अवोचामार्हतद्र॰nayacakra-ms-ya । अवोचमार्हतद्र॰ nayacakra-ms-bhā ॥
१ आ] पृ॰ ८१९ पं॰ १० ॥
३ चा] चावृत्तिं प्र॰ ॥
५ दु] ॰दुद्ग्रहेण प्र॰ ॥
६ म] ॰मेविरोधाnayacakra-ms-ya ॥
८ येऽप्या] ॰प्याहुःnayacakra-ms-ya । पृ॰ ७८७ पं॰ २ ॥
१० श] पृ॰ ८२५ पं॰ २४ ॥
१० भा] भावितेषु प्र॰ ॥
१३ ना] सेना तुnayacakra-ms-ya । तदात्मता सेनात्मता तु इत्यपि भवेदत्र पाठः ॥

समुदाययोरङ्गा-ऽङ्गिनोरेकत्व-नानात्वे वादिना उद्ग्राहयताऽङ्गीकृते, तदङ्गीकरणाद् **द्रव्यार्थ-पर्यायार्थानुपात** उभयनयात्मकस्याद्वानुपातः कृतो भवति ।
§ 2782

उभयनयात्मकत्वे साधनमाह **--नरादिसामान्यतादात्म्येऽपि चेत्यादि** यावद् **रूप-रसार्थान्तरत्ववदिति** । यथा हि भवनसामान्येन भवदपि रूपं रसादर्थान्तरम्, रसोऽपि रूपाद् रूपान्तरेण निरूपितरूपत्वात्, तथा गन्धादे[ः], गन्धादिरपि ताभ्याम्, तच्च रूपं शक्त्यन्तरं तयोः, तत्र वृतौ रूप-रसौ ततोऽन्यौ परस्परतः, एवं नरादय एव सेनेति तत्सामान्यतादात्म्ये सत्यपि ***सेनाऽन्यापि तेभ्यः, अपि**शब्दादनन्यापि तत्समुदायमात्रत्वात् तदात्मत्वात् । तस्मादेष प्रागेव न्यायः, तद्यथा— **नृ-रथा-ऽश्वेत्यादि** श्लोकः, शक्त्यन्तरादन्या तादात्म्यादनन्येति । **तथा शिखरादिभ्य** इति । शिखरसान्वादिषु प्रत्येकमसत्त्वादन्यः समुदितेषु तेष्वेव सत्त्वादनन्यः शिखरी तेभ्यः । **तथा मरिचेत्यादि** । **युक्तितो मिश्रितेषु** इति वचनात् पानकस्य मरिचादिभ्योऽन्यता षड्रसत्वाच्च पृथगतदात्मत्वादनन्यता वातादिरोगकोपोपशमादिशक्त्यन्तरसत्त्वाऽसत्त्वाभ्यां पृथक् समुदाये चेति । **तथा आत्मापि** सुख-दुःखेच्छा-द्वेषादिसहक्रमभाविपर्यायात्मकत्वादनन्यः तेषां सुखादीनामात्मपरिणाममात्रत्वात् तदभेदाच्च,
- /ms अन्यस्तु, प्रत्येकं तेषां विरोध्यविरोधिभेदात् तावत्परिसमाप्तेश्च शक्त्यन्तरतदात्मत्वाभ्यामन्या-ऽनन्यत्वप्रकल्पनात् । **तथा माधुर्याम्लादिरपि,** ते मधुरादयो धर्मा येषां सन्ति ते तद्वन्तः, तेभ्यस्तद्वद्भ्यः सिद्धानि कटुत्वादीनि, तेषु संहतेषु **पानकद्रव्य**माम्, अत्र प्रतिज्ञा **स्वतत्त्वमपी**ति, **अपि**शब्दात् परतत्त्वमपि,
826/mj **तद्वत्सिद्धत्वात्, मधुररसवत्,** यथा रसः पृथिव्याद्यनभ्युपगमेऽपि

* * *

तथैव पुरुषद्रव्यं स्कन्धा अपि । अरूपमपि स्याद् रूपम्...विज्ञानात्मत्वात् । एवं पञ्चापि । आत्मापि त एवेत्यात्मानात्मा च । तस्मात् त एवाप्राज्ञा य आत्मानं स्कन्धा एव इत्याहुः । भेदवादे... ... ...। औदासीन्याच्च तत्त्वेषु मिथ्याभिनिवेशात् ज्ञानसुखाद्यन्यानन्यात्मकस्याद्वादनिरूपितमात्मानं न पश्यसि । तस्मात् सामान्यविशेषात्मक-

* * *

रूपादिसहभाविधर्मान्तरसङ्गतिमन्तरेणानुपलब्धेः स्वतत्त्वः परतत्त्वश्च तथा पानकमपि । **न हि तद्वदित्यादि** दृष्टान्तव्याख्या गतार्था । § 2783

---

३ रू] रूपा° प्र° ॥
४ र] रम्
सोऽपिnayacakra-ms-bhā ॥
६ प] परस्परःnayacakra-ms-ya ॥
७ *] सतान्यापिnayacakra-ms-ya
॥
८ त] °देवnayacakra-ms-ya ॥
८ त] पृ° ७८७ पं° ५ ॥
९ रा] पृ° ७८७ पं° ८ ॥
१० म] पृ° ७८८ पं° २ ॥
११ रिचादिभ्योऽन्य] °न्यत्वा प्र° ।
°न्यत्वात् ? ॥
११ ता]
षड्रसत्वाच्चnayacakra-ms-bhā ।
षमुसत्वाच्च nayacakra-ms-ya ॥
१२ न] °नन्य
वातादि°nayacakra-ms-bhā ॥

**तथैव पुरुषद्रव्य**मित्यादि, स्कन्धमात्रे नात्मप्रकारः समानीयते । कथं न समाप्यते ? यस्मात् **स्कन्धा अपि** इत्युद्देशः । निर्देशो[ऽ]**रूपमपि स्याद् रूप**मित्यादि, रूपादिचक्षुरादिविषयेन्द्रियाविज्ञप्त्याख्यं रूपं विज्ञानात्मसात्कृतं रूप्यते तस्मात् तदरूपमपि विज्ञानात्मत्वात् । **एवं पञ्चापी**त्यतिदिशति, वेदनादीनामपि रूपादिस्वाभाव्यौदारिकानौदारिकादिभेदलक्षणसम्बन्धाविनाभावात् परस्पराविनिर्भागवृत्त्यभ्युपगमात् । यथोक्तम्—

यथाऽनलकलापौ द्वौ तिष्ठतोऽन्योन्यसंश्रितौ ।
एवं नाम च रूपं च तिष्ठतोऽन्योन्यसंश्रिते ॥ § 2786

इति । **आत्मापी**ति सोऽपि विज्ञानात्मक**स्त एव** रूपादयः स्कन्धा **इत्यात्माऽनात्मा च** शक्त्यन्तरतदात्मत्वाभ्यामेव । तस्मात् **सैद्धार्थीय**स्थित्यनतिक्रमादुद्ग्राहितवस्तूनामयुक्तं तैरपि पठितमेकान्तेन— **राशिवत्** इत्यादि । § 2787

**तस्मात् त एवाप्राज्ञा ये** स्कन्धव्यतिरिक्ताव्यतिरिक्तात्मान**मात्मानं स्कन्धा एव इत्याहु**रित्युद्घटना । इतश्चाप्राज्ञता तेषामेव **भेदवाद** इत्यादि, यथातीतनये रूपादिसमुदायमात्रं तत्त्वम् इति समुदायो रूपादीनां विशेषाणां सामान्यमभ्युपगतं ततो न विशेषवाद्यसाविति निराकृतस्तथेहापि पञ्चानां - /ms
स्कन्धानां समुदायः सामान्यमेवेति निराकार्यो जायसे **सैद्धार्थीयै**स्तदुभयमिच्छद्भिः, अतो मा *ग्रहीर्वस्त्विति । किञ्चान्यत् --**औदासीन्याच्चे**त्यादि । तत्त्वपरिज्ञाना[ना]दराद् मिथ्याभिनिवेशात् अहमस्मि तत्त्वदर्शी इत्यात्माभिमानाच्च भवतस्त्वदुद्ग्राहप्रापितं ज्ञान--सुख्याखाद्यन्यानन्यात्मकस्याद्वादनिरूपितम् अहं सुखी दुःखी रक्तो द्विष्टो वास्मि इत्यात्मानं [न] पश्यसि । तस्मात् तादात्म्य 827/mj

* * *

त्वानतिक्रमाद् रूपादिसमुदायमात्रवादिनोऽपि सैद्धार्थीयत्वापत्तिर्वस्तुवादित्वात् । एवं शेषवादेष्वपि । इत्यलं प्रसंगिन्या संकथया । विरम वस्तुवादात् ।

एवं तु गृह्यताम्--निःस्वभावमिदं सर्वं सुप्तोन्मत्तादिवत् । तददाकारप्र-

---

२८ प्र] °प्रकारैःnayacakra-ms-ya ॥
१ रू] रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च । इति **अभिधर्मकोशे** १ । ९ । पञ्च चक्षुरादीनीन्द्रियाणि पञ्च रूपादयो विषयाः अविज्ञप्तिश्चेति त्रिविधो रूपस्कन्धः ॥
२ त] तदरूपरूपमपिnayacakra-ms-bhā ॥
९ राशिव] पृ° ७८७ पं° २ पृ° ८२४ पं° २४ ॥
१२ श्चाप्रा] °प्राज्ञाता प्र° ॥
१२ इत्या] **इत्यादिति** प्र° ॥
१६ *] **ग्रहीर्थस्त्विति** प्र° ॥
१७ त] तत्त्वपरिज्ञायामनादरात् इति विवक्षायां तत्त्वपरिज्ञानादरात् इत्यपि पाठः साधुः ॥
१८ ज्ञा] **ज्ञानमुख्याद्यन्यानन्यात्म°** nayacakra-ms-bhā । **ज्ञानमुख्याद्यन्यात्म°** nayacakra-ms-ya न सुखाद्यन्या-ननन्यात्मकस्याद्वादनिरूपितम् अहं सुखी दुःखी रक्तो द्विष्टो वास्मि इत्यात्मानं पश्यसि इत्यपि पाठः स्यात् ॥

कल्पनानुपातिविज्ञानत्वात् परमार्थतस्तत्तदाकारशून्यमिदं शून्यमेवेति कल्पयितुं न्याय्यं शून्यगृहवत् प्रवेष्टृस्थातृनिर्गन्तृकल्पोत्पादादिरहितम् ।

स च स्वभावो न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः । अथ कथं स्वपरोभया-

* * *

शक्त्यन्तरोद्ग्राहपुरस्कृतसामान्यवि[शे]षात्मकत्वानतिक्रमाद् रूपादिसमुदायमात्रवादिनोऽपि ***सैद्धार्थीय**त्वापत्तिर्वस्तुवादित्वादिति साधूक्तम् । § 2788

**एवं शेषवादेष्वपीति** अतिदेशः । एवं शेषेषु पुरुषादिवादेष्वपि स्याद्वाद एवा[प]द्यते बलात्, तत्र तत्र तथैव योजितम् । इत्यलं प्रसङ्गिन्या सङ्कथया, कियदुच्यते ? विरम वस्तुवादात्, एकान्तनिश्चयपुरस्क्रिया--वस्तुवादाभ्युपगमयोः सम्बन्धाभावात् । § 2789

किं तर्हि ? एवं तु गृह्यताम् --**निःस्वभावमिदं सर्वं सुप्तोन्मत्तादिवत्** । यथा सुप्तस्य संवृतेऽप्यवकाशे हस्तियूथादिदर्शनं निःस्वभावविषयं तदतत्स्वभावशून्यं तथा जाग्रतोऽपि, यथा वा मत्तस्य मद्याद्याकुलस्य । सुप्त-मत्तस्थानीया एव हि रक्त-द्विष्ट-मूढाः पाखण्डिनः । तदतदाकारप्रकल्पनानुपातिविज्ञानत्वात् तदतत्स्वाभाव्येन विज्ञानकल्पिताकारं सुप्त-मत्तादिविज्ञानविषयवत् किमपि किमपि *इत्याभावासात् परमार्थतो नास्ति कश्चिदाकारः, शून्यं तैस्तैराकारैरिदं गृह्यमाणमपि बुद्ध्या ग्राहकाकारपरिप्लवाद् ग्राह्याकारभ्रान्तेश्च, तस्मान्न ग्राहकम्, शून्यमेवेति कल्पयितुं न्याय्यम्, किमिव ? **शून्यगृहवत् प्रवेष्टृ-स्थातृ-निर्गन्तृकल्पोत्पादादिरहितम्**, यथा शून्यगृहे न प्रवेष्टा न स्थाता न निर्गन्ता उत्पत्ति-स्थिति-विनाशसम्बन्धी तथोत्पाद-स्थिति-भङ्गरहितमिदं ज्ञानविज्ञेयाभिमतमित्युद्देशः । § 2790

ब्रूमः--एभ्यो हेतुभ्यः **असिद्ध्ययुक्त्यनुत्पादसामग्रीदर्शनादर्शनेभ्यः** । असिद्धावयुक्तौ च कः स्वभावः ? उत्पादे सति स्वः परो वा भावः स्यात्, अनुत्पादे कुतः सः ? (Edtext outside numbered paragraph) (Edtext outside numbered paragraph)

४ *] पृ॰ ८२४ पं॰ ८ ॥
६ ए] एव+एवान्यतेnayacakra-ms-ya ॥
६ योजित] ॰तेमित्यलंnayacakra-ms-ya ॥
६ स] संकषाया प्र॰ ॥
७ विर] विरम स्तुवादात् nayacakra-ms-ya ॥
७ पु] ॰पुरस्कृया॰nayacakra-ms-ya ॥
१० व] ॰वका हस्ति॰nayacakra-ms-ya ॥
११ म] मयाद्या॰nayacakra-ms-ya ॥
१३ ल्पिताका] ॰कारे सुमत्तादिnayacakra-ms-ya । तुलना--पृ॰ ५५३-- १ ॥
१४ *] इत्यभावात् ? ॥
१६ भ्रा] भ्रान्ते तस्मा॰nayacakra-ms-ya ॥
१७ शून्य] तुलना--पृ॰ ५५३-- १ ॥
१८ न] स्थाता निर्गन्ता nayacakra-ms-ya ॥
१८ स] सम्बन्धाnayacakra-ms-ya ॥

* * *

असिद्धेद्धिस्तावद् न दीर्घे दीर्घत्वं परायत्तत्वाद् दीर्घत्वस्य । यदि हि स्वविषयमेवैतत् स्यात् अनामिकाह्रस्वत्वं न स्यात्, अपरापेक्षत्वात् । तस्याश्चाह्रस्वत्वे मध्यमादीर्घत्वाभावः । तस्माच्चानामिकाह्रस्वत्वाभावः, तयोः परस्परायत्तत्वात् । कदा मध्यमा दीर्घा सेत्स्यति यदानामिका ह्रस्वा भवेत् अनामिका च कदा ह्रस्वा भवति यदा मध्यमा दीर्घा सेत्स्यतीतीतरेतराश्रयत्वादसिद्धिः ।

न ह्रस्वेऽपि दीर्घत्वं तत्प्रतिद्वन्द्वित्वात् । तस्य वा दीर्घत्वे दीर्घत्वाभावाद् दीर्घत्वं

* * *

सा (Edtext outside numbered paragraph)मग्र्यां दर्शनेऽपि न स्वो भावः । अदर्शने पु (Edtext outside numbered paragraph)नर्नैव स्वभाव इत्युपसंहारो भविष्यति । § 2791

स च स्वभावश्चिन्त्यमानो हेतुतो[ऽहेतुतो] वा स्यात् । यदि हेतुतः स्वतः परतः उभयतो वा स्यात् । स च स्वभावो न स्वतो नापि परतो न द्वाभ्यां

---

२ भावो ] सटीके **विशेषावश्यकभाष्य** उपन्यस्तोऽयं शून्यवादपूर्वपक्षः शून्यवादविचारणायामत्र यथायोगं तेषु तेषु स्थलेष्वनुसन्धेयः--(?")युक्तिं चात्र **व्यक्त**चेतोगतां **भगवान्** व्यक्तीकुर्वन्नाह— जह किर न स+ओ पर+ओ नोभय+ओ नावि अन्न+ओ सिद्धी । भावाणमवेकखा+ओ वियत्त ? जह दीह-हस्साणं ॥ १६९२ ॥ --- **व्यक्त** ! भवतोऽयमभिप्रायः--यथा किल न स्वतः, न परतः, न चोभयतः, नाप्यन्यतो भावानां सिद्धिः संभाव्यते । कुतः ? इत्याह--अपेक्षातः--कार्यकारणादिभावस्यापेक्षिकत्वादित्यर्थः, ह्रस्व-दीर्घव्यपदेशात् । तथाहि--यत् किमपि भावजातमस्ति तेन सर्वेणापि कार्येण वा भवितव्यम्, कारणेन वा । तत्र कार्यं कारणेन क्रियत इति का n827/mj वतस्य कार्यत्वव्यपदेशः, न तु कार्यस्य कार्यत्वं स्वतः सिद्धं किमप्यस्ति । एवं कारणमपि कार्यं करोतीति कार्यायत्त एव तस्य कारणत्वव्यपदेशः, न तु तस्य कारणत्वं स्वतः सिद्धं किञ्चिदस्ति । तदेवं कार्यादिभावः स्वतो न सिध्यति । यच्च स्वतो न सिद्धं तस्य परतोऽपि सिद्धिर्नास्ति, यथा खरविषाणस्य । ततश्च न स्वतः कार्यादिभावः, नापि परतः । स्व-परोभयतस्तर्हि तस्य सिद्धिरिति चेत् । तदयुक्तम्, व्यस्तादुभयतस्तत्सिद्धेरभावात् तत्समुदायेऽपि तदयोगात् । न हि सिकताकणेषु प्रत्येकमसत् तैलं तत्समुदाये प्रादुर्भवति । --- अपिच, उभयतःसिद्धिपक्ष इतरेतराश्रयदोषः प्राप्नोति । यावद्धि कार्यं न सिध्यति न तावत्कारणसिद्धिरस्ति, यावच्च कारणं न सिध्यति न तावत् कार्यं सिद्धिमासादयति । अत इतरेतराश्रयदोषः । तस्माद् नोभयतोऽपि कार्यादिभावसिद्धिः । नाप्यन्यतः अनुभयत इत्यर्थः, स्वपरोभयव्यतिरेकेणान्यस्य वस्तुनोऽसत्त्वेन निर्हेतुकत्वप्रसङ्गात् । एवं ह्रस्व-दीर्घलक्षणे दृष्टान्तेऽपि अपेक्षातः इत्यस्य ह्रस्व-दीर्घत्वासिद्धिलक्षणेन साध्येनान्वयो भावनीयः । तथाहि--प्रदेशिन्या अङ्गुष्ठमपेक्ष्य दीर्घत्वं प्रतीयते, मध्यमां त्वपेक्ष्य ह्रस्वत्वम्, परमार्थेन त्वियं स्वतो न ह्रस्वा, नापि दीर्घा । तदेवं न स्वतो ह्रस्व-दीर्घत्वयोः सिद्धिः । ततः परतः उभयतः अनुभयतश्च तत्सिद्ध्यभावो यथोक्तवद् भावनीयः, तदुक्तम्-- न दीर्घेऽस्तीह दीर्घत्वं न ह्रस्वे नापि च द्वये । तस्मादसिद्धं शून्यत्वात् सदित्याख्यायते क्व हि ? ॥ १ ॥ ह्रस्वं प्रतीत्य सिद्धं दीर्घं, दीर्घं प्रतीत्य ह्रस्वमपि । न किंचिदस्ति सिद्धं व्यवहारवशाद् वदन्त्येवम् ॥ २ ॥ --- इतश्च सर्वजगच्छून्यता । कुतः ? इत्याह-- अत्थित्त-घडेगाणेगया व सव्वेगया+इदोसा+ओ । सव्वेऽणभिलप्पा वा सुण्णा वा सव्वहा भावा ॥ १६९३ ॥ --- नन्वस्तित्व-घटयोरेकत्वम्, अनेकत्वं वा

? यद्येकत्वम् तर्हि सर्वैकता प्राप्नोति--योयोऽस्ति स स घट इत्यस्तित्वे घटस्य प्रवेशात् सर्वस्य घटत्वप्रसङ्गः स्यात्, न पटादि पदार्थान्तरम् । घटोवा सर्वसत्त्वाव्यतिरेकात् सर्वात्मकः स्यात् । अथवा, यो घटः स एवास्तीति घटमात्रेऽस्तित्वं प्रविष्टम्, ततोऽन्यत्र सत्त्वाभावादघटस्य सर्वस्याप्यभावप्रसङ्गतो घट एवैकः स्यात् । सोऽपि वा न भवेत्, अघटव्यावृत्तो हि घटो भवति, यदा च तत्प्रतिपक्षभूतोऽघट एव नास्ति, तदा किमपेक्षोऽसौ घटः स्यात् ? इति सर्वशून्यत्वमिति । अथ घट-सत्त्वयोरन्यत्वमिति द्वितीयो विकल्पः तर्हि सत्त्वरहितत्वादसन् घटः, खरविषाणवदिति । अपिच, सतो भावः सत्त्वमुच्यते, तस्य च स्वाधारभूतेभ्यो घटादिभ्यः सद्भयोऽन्यत्वेऽसत्त्वमेव स्यात्, आधारादन्यत्वे आधेयस्याप्यनुपपत्तेः । तदेवमस्तित्वेन सह घटादीनामेकत्वा-ऽन्यत्व-विकल्पाभ्यामुक्तन्यायेन सर्वैकतादिदोषप्रसङ्गात् सर्वेऽपि भावा अनभिलप्या वा भवेयुः, सर्वथा शून्या वा स्युः सर्वथैव तेषामभावो वा भवेदित्यर्थः । अपिच, यद् नोत्पद्यते तत्तावद् निर्विवादं खरविषाणवदसदेव, इति निवृत्ता तत्कथा । यदप्युत्पत्तिमल्लोकेऽभ्युपगम्यते तस्यापि जाता-ऽजातादिविकल्पयुक्तिभिरुत्पादो न घटते इति शून्यतैव युक्तेति । ॥ १६९३ ॥ एतदेवाह-- --- जाया-ऽजायो-भय+ओ न जायमाणं च जाय+ए जम्हा । अणवत्था-ऽभावो-भयदोसा+ओ सुणया तम्हा ॥ ॥ १६९४ ॥ --- इह तावद् न जातं जायते, जातत्वादेव, निष्पन्नघटवत् । अथ जातमपि जायते, तर्ह्यनवस्था, जातत्वाविशेषेण पुनः पुनर्जन्मप्रसङ्गात् । अथाजातं जायते, तत्रोत्तरमाह--अभाव ति सूचकत्वात् सूत्रस्य, तर्ह्यभावोऽपि खरविषाणलक्षणो जायताम् अजातत्वाविशेषात् । अथ जाताजातरूपं जायते, तदप्ययुक्तम्, कुतः ? इत्याह--उभयदोषात् प्रत्येकोभयपक्षोक्तदोषापत्तेरित्यर्थः । किञ्च, एतज्जाताजातलक्षणमुभयमस्ति वा न वा ? । यद्यस्ति, तर्हि जातमेव तत्, न पुन829/mj, तत्र चोक्तो दोषः । अथ नास्ति, तथापि नोभयं तत्, किन्त्वजातमेव, तत्रापि चाभिहितमेव दूषणम् । नापि जायमानं जायते, पूर्वोक्तविकल्पद्वयानतिवृत्तेः, तथाहि-तदपि जायमानमस्ति, न वा ? यद्यस्ति, तर्हि जातमेव तत् । नास्ति चेत्, तर्ह्यजातमेव । पक्षद्वयेऽपि चास्मिन्नभिहित एव दोषः । उक्तं च— (?")गतं न गम्यते तावदगतं नैव गम्यते । गतागतविनिर्मुक्तं गम्यमानं न गम्यते ॥ १ ॥ इत्यादि । यस्मादेवम्, तस्मादनवस्थादिदोषप्रसङ्गेन, वस्तूनामुत्पादायोगाज्जगतः शून्यतैव युक्तेति ॥ १६९४ ॥ --- प्रकारान्तरेणापि वस्तूत्पत्त्ययोगतः शून्यतासाधनार्थमाह-- हे+ऊपच्चयसामग्गिवीसुभावेसु नो व जं कज्जं । दीस+इ सामग्गिमयं सव्वाभावे न सामग्गी ॥ १६९५ ॥ --- हेतवः--उपादानकारणानि, प्रत्ययास्तु निमित्तकारणानि, तेषां हेतु-प्रत्ययानां या सामग्री तस्या विष्वग् भावेषु पृथगवस्थासु यत् कार्यं न दृश्यते, दृश्यते च सामग्रीमयम् संपूर्णसामग्र्यवस्थायां पुनर्दृश्यत इत्यर्थः । एवं च सति कार्यस्य सर्वाभाव एव युक्त इति शेषः । सर्वाभावे च न सामग्री-नैव सामग्रीसद्भावः प्राप्नोतीत्यर्थः । ततः सर्वशून्यतैवेति भावः । इदमत्र हृदयम्-हेतवश्च प्रत्ययाश्च स्वजन्यमर्थं किमेकैकशः कुर्वन्ति, संभूय वा ? न तावदेकैकशः, तथाऽनुपलब्धेः । तत एकैकस्मात् कार्यस्याभावात् सामग्र्यामपि तदभाव एव स्यात्, सिकताकणतैलवदिति । इत्थं च सर्वस्यापि कार्यस्योत्पत्त्यभावे सामग्रीसद्भावो न प्राप्नोति, अनुत्पन्नायाः सामग्र्या अप्ययोगात् । ततश्च सर्वशून्यतैव जगतः । उक्तं च— हेतु-प्रत्ययसामग्रीपृथग्भावेष्वदर्शनात् । तेन ते नाभिलाप्या हि भावाः सर्वे स्वभावतः ॥ १ ॥ लोके यावत् संज्ञा सामग्र्यामेव दृश्यते यस्मात् । तस्माद् न सन्ति भावा भावे सति नास्ति सामग्री ॥ २ ॥ इत्यादि । अस्य च व्याख्या-पृथग्भावेष्वदर्शनात् कार्यस्य इति शेषः । तेन ते घटादयो भावाः सर्वेऽपि स्वभावतः स्वरूपतो नाभिलाप्याः, पृथगेकैकावस्थायां कार्यस्यानुत्पादात्, उत्पत्तिमन्तरेण च घटादिसंज्ञाऽप्रवृत्तेः, संज्ञाऽभावे चाभिलप्तुमशक्यत्वादिति । कुतः पुनः पृथगवस्थायां संज्ञाऽप्रवृत्तिः ? इत्याह--लोके यावदित्यादि, लोके यावत् संज्ञा घटोऽयम् इत्यादिसंज्ञाप्रवृत्तिः, तावत् संपूर्णं कार्यं संपूर्णसामग्र्यामेव यस्माद्

नाप्यहेतुतः, अत्रोपपत्तिप्रश्नः

भावः ? असिद्ध्ययुक्त्यनुत्पादसामग्रीदर्शनादर्शनेभ्यः ।

* * *

स्वपरोभयाभावः ?--**अथ कथं** 828/mj

* * *

भावः ? असिद्ध्ययुक्त्यनुत्पादसामग्रीदर्शनादर्शनेभ्यः ।

* * *

स्वपरोभयाभावः ?

क्रमेणैते हेतवः प्रतिपाद्या इत्यत आह --**असिद्धेर्द्धिस्ताव**दित्यादि । अङ्गुलिर्मध्यमा दीर्घा, अनामिका ह्रस्वा, तयोर्दीर्घाया मध्यमाया दीर्घा इति यः स्वभावो ***दीर्घत्वं तन्न** तावद् **दीर्घे** स्वात्मनि अस्ति । कस्मात् ? **परायत्तत्वात्** तस्या मध्यमायास्तस्य दीर्घत्वस्य, तद्धि तस्या दीर्घत्वमनामिकाह्रस्वत्वायत्तम्, तां ह्यनामिकां ह्रस्वामपेक्ष्य मध्यमा दीर्घा इत्युच्यते, यत् स्वात्मन्यसिद्धं खरविषाणादिवत् तत् कथं परतः सिध्येत् । § 2792 - /ms

स्यान्मतम्--स्वायत्तमेवेति । तन्न, अनामिकाह्रस्वत्वाभावप्रसङ्गात्, **यदि हि स्वविषयमेवैतत् स्यात्** यद्यात्मायत्तमेव मध्यमाया दीर्घत्वम् तथानामिकाह्रस्वत्वं **न स्यात्, अपरापेक्षत्वात्,** सापि दीर्घैव स्यात्, यथा हि मध्यमाऽनामिकानिरपेक्षा दीर्घेष्यते तथानामिकाऽपि मध्यमानिरपेक्षा स्वत एव दीर्घेष्यतां मध्यमावत्, न तु भवति तस्या ह्रस्वत्वेष्टेः । § 2793

अथाह्रस्वैवेष्यते तत**स्तस्याश्चाह्रस्वत्वे मध्यमादीर्घत्वाभावः,** तस्या अनामिकायाः स्वात्मनि ह्रस्वत्वाभावे मध्यमाया दीर्घत्वं न स्यात्, तामेवापेक्ष्य

---

दृश्यते, पृथग्भावे च सामग्र्यामप्यभावात् सिकतातैलवद् न सन्त्येव भावाः, भावासत्त्वे च कुतः सामग्रीसद्भावः ? इति ॥ १६९५ ॥ --- प्रकारान्तरेणापि शून्यतासिद्ध्यर्थमाह-- परभागादरिसण+ओ सव्वाराभागसुहुमया+ओ य । उभयाणुवलंभा+ओ सव्वाणुवलद्धि+ओ सुण्णं ॥ १६९६ ॥ --- इह यत् तावद् दृश्यं तदसदेव, अनुपलम्भात्, खरविषाणवदिति निवृत्ता तद्वार्ता । दृश्यस्यापि च स्तम्भ-कुम्भ-कुड्यादेः पर-मध्यभागयोरसत्त्वमेव, अर्वाग्भागान्तरितत्वेन तयोरप्यदर्शनात्, आराद्भागस्यापि च सावयवत्वात् पुनरन्यः खल्वाराद्भागः, तस्याप्यन्यः पुनस्तस्याप्यन्य इत्येवं तावत् यावत् सर्वारातीयभागस्य, परमाणुप्रतरमात्रत्वेनातिसौक्ष्म्यता, पूर्वेषां चाराद्भागानामन्यस्यान्येनान्तरितत्वेनानुपलब्धेः । ततश्चोक्तन्यायेन परभागसर्वारातीयभागलक्षणोभयभागानुपलम्भात् सर्वस्यापि वस्तुजातस्यानुपलब्धेः शून्यं जगदिति । उक्तं च— यावद्दृश्यं परस्तावद् भागः स च न दृश्यते । तेन ते नाभिलाप्या हि भावाः सर्वे स्वभावतः ॥ १ ॥(?") तदेवमुक्तयुक्त्या सर्वस्यापि भूतादेरभावः प्राप्नोति, श्रूयते च श्रुतौ भूतादिसद्भावोऽपीति संशयः । इति पूर्वपक्षः ॥ १६९६ ॥ --- --इति मलधारिहेमचन्द्रसूरिविरचितायां **विशेषावश्यकभाष्यटीकायाम्** पृ॰ ७२२-७२५ ॥

४ अ] तुलना--पृ॰ ५५३-- १ ॥

९ अ] तुलना--पृ॰ ५५३-- १ ॥

११ *] तुलना--पृ॰ ८३१ पं॰ १६, पृ॰ ८३३ पं॰ ३, ५५३-- १ ॥

१५ य] तुलना--पृ॰ ८३३ पं॰ २२ ॥

१६ य] **यथाद्यात्मा॰**nayacakra-ms-ya ॥

२० स्या] तुलना--पृ॰ ८३३ पं॰ २३, ५५४-- २ ॥

ह्रस्वामनामिकां दीर्घा इति व्यपदेशात् सा चेदनामिका ह्रस्वा न भवति कामन्यामपेक्ष्य दीर्घा स्याद् मध्यमा ? इति तस्या दीर्घत्वाभावः । तस्माच्च मध्यमादीर्घत्वाभावाद् दीर्घत्वप्रतिपक्षस्यानामिकाह्रस्वत्वस्याभावः, तयोः परस्परायत्तत्वात् । तद् भावयति --**कदा मध्यमे**त्यादि यावत् **सेत्स्यती**ति गतार्थमितरेतराश्रयत्वभावनम् । **इतीतरेतराश्रयत्वादसिद्धिः**, इत्थमुक्तेतरेतराश्रयत्वान्न सिद्धिः परस्परप्रतिबद्धाम्बुस्थवाताहतनौद्वयवद् विशीर्यते ह्रस्वदीर्घत्वकल्पना । एवं तावद् दीर्घे दीर्घत्ववृत्तिमिच्छतः प्रसङ्गादुभयोरप्यभाव
- /ms आपादितः । § 2794

स्यान्मतम्--ह्रस्वे तर्हि दीर्घता भविष्यति, त्वदुक्तविधिना ह्रस्वापेक्षत्वाद् दीर्घत्वस्यानामिकाह्रस्वत्वायत्ता भिहि मध्यमादीर्घता भवितुमर्हति, अतः सिध्यति दीर्घत्वं तथा ह्रस्वत्वमितरापेक्षत्वादिति । अत्रोच्यते **--न ह्रस्वेऽपि**
831/mj **दीर्घत्वम्, तत्प्रतिद्वन्द्वित्वात्** *दीर्घस्य ह्रस्वत्वेन विरोधात्

* * *

ह्रस्वमेव संवृत्तम्, तस्य दीर्घत्वाभावात्मकत्वात् कुतो दीर्घत्वमागतमन्यत् ? ह्रस्वत्वाभावाच्च नास्ति दीर्घत्वम् । तथापि पुनर्दीर्घत्वह्रस्वत्वयोर्भावाभ्युपगमे ह्रस्वत्वप्रतियोगिनो दीर्घत्वस्याभावान्न दीर्घत्वम् ।

न द्वये, उक्तन्यायात् स्वपरयोः प्रतिद्वन्द्वित्वाद्वा । एषोऽपीतरेतरयोगश्चिन्त्यः--किं ह्रस्वे वर्तमाने दीर्घत्वे दीर्घं भवति उत दीर्घ एव वर्तमाने ? यदि ह्रस्वे वर्तमानं दीर्घत्वमुभयत्र भावं लभते ततो ह्रस्वे वर्तमानं दीर्घत्वं ह्रस्वस्य तदात्मतां तत्प्रत्ययं

* * *

ह्रस्वत्व-दीर्घत्वयोः परस्परविरोधात् तमःप्रकाशवत् जीवित-मरणवच्चैकत्र कुतो भावः ? **तस्य वा दीर्घत्वे दीर्घत्वाभावात्** *ह्रस्वस्यतस्य दीर्घत्वाभ्युपगमे दीर्घादपसृत्य ह्रस्वे स्थितं दीर्घत्वं ह्रस्वमेव संवृत्तमिति प्रसक्तमतो दीर्घत्वाभावः । कस्मात् ? **तस्य** ह्रस्वत्वस्य **दीर्घत्वाभावात्मकत्वात्** । यद्धि लोके दीर्घं न भवति तदुच्यते ह्रस्वमिति । तस्मात्तस्य दीर्घत्वाभावात्मकत्वात् **कुतो दीर्घत्वमागतमन्यत् ? ह्रस्वत्वाभावाच्च नास्ति दीर्घत्वम्**, दीर्घत्वस्य ह्रस्वे वृत्तेर्दीर्घत्वावष्टब्धस्यानवकाशाद्ध्रस्वत्वस्य ह्रस्वाभावे क्व दीर्घत्वं वर्तेत ? अतोऽपि दीर्घत्वाभावः । § 2795

**तथापि पुनरि**त्यादि । पुनरपि च दीर्घत्व-ह्रस्वत्वयोर्भावाभ्युपगमेऽपि ह्रस्वत्वप्रतियोगिनो दीर्घत्वस्याभावान्न सिध्यति दीर्घत्वम्, स्वात्मनि परत्र वा वृत्त्यसम्भवात् । § 2796

---

१ इ] तुलना--पृ० ८३१ पं० १७, पृ० ८३४ पं० १५ ॥
२ तिब] °**बद्धांबुस्थ**°nayacakra-ms-ya । तुलना— पृ० ३४ पं० ९ ॥
७ न] तुलना--पृ० ८३४ पं० १७ ॥
८ *] **दीर्घेन ह्रस्वत्वेन**nayacakra-ms-ya ॥
१८ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२१ त] **उच्यते**nayacakra-ms-ya ॥

स्यान्मतम्--उभयत्र वर्ततेऽन्यापेक्षत्वादुभयोः ह्रस्वमपेक्ष्य [दीर्घं सिध्यति दीर्घमपेक्ष्य] ह्रस्वं सिध्यतीति । एतच्च **न द्वये,** कस्मात् ? **उक्तन्यायात्,** - /ms यथा ****दीर्घे दीर्घत्वं न परायत्तत्वात्** इत्युपक्रम्य यावत् **इतरेतराश्रयत्वाद-सिद्धिः** इत्युक्ता[द्] न्यायान्न सिध्यति दीर्घता, तथा ह्रस्वेऽपि न वर्तत इत्यधुनोक्ता[द्] न्यायान्न सिध्यति, द्वयोरन्यतरत्राप्यसिद्धस्य कुत उभयत्र सिद्धिः ? **स्व-परयोः प्रतिद्वन्द्वित्वाद्वा,** यथा दीर्घत्वं दीर्घे ह्रस्वे च वर्तते तथा ह्रस्वत्वमपि दीर्घे ह्रस्वे च वर्तते, अत उभयोरुभयत्र भावो विरोधी, तयोः सहवृत्तिरयुक्ता विरोधित्वादेव परस्पर[म्] इत्युक्तम् । तस्मान्न स्वतो न परतो नोभयतश्च दीर्घत्वं सिध्यति ह्रस्वत्वं वा, **एवं ह्रस्वत्वेऽपि** इत्यतिदेक्ष्यमाणत्वात् । § 2797

किञ्चान्यत्, उभयत्र दीर्घत्ववृत्तिरेषा, सा त्वितरेतरयोगः, एषोऽपि चिन्त्यः--किं ह्रस्वे स्वाश्रयाद्दीर्घादन्यत्र वर्तमाने दीर्घत्वे दीर्घं भवति ? उत स्वाश्रये दीर्घ एव वर्तमाने दीर्घत्वं भवति ? इति निर्धार्यम् । किञ्चातः ? **यदि ह्रस्वे** इत्यादि, यदि ह्रस्वे वर्तमानं दीर्घत्वमुभयत्र भावमितरेतरयोगं लभत इतीष्यते प्रथमविकल्प इति, ततः किम् ? ततो ह्रस्वे वर्तमानं दीर्घत्वं ह्रस्वस्य दीर्घतां न 832/mj

* * *

चाकुर्वाणं दीर्घस्य तदात्मतां तद्बुद्धिं च न कुर्यात्, ततोऽन्यत्र वृत्तत्वात्, ह्रस्वादीर्घत्वप्रत्ययवत् ।

दीर्घ एव वर्तमाने दीर्घत्वे दीर्घं भवति ततो दीर्घ एव दीर्घतां करोति तत्प्रत्ययं चाधत्ते, किन्तु ह्रस्वेन तत्प्रत्ययेन च नार्थः ।

अथ तत्र दीर्घतां न करोति न वा तत्प्रत्ययमादधाति ततो ह्रस्वे कथं दीर्घत्वं कुर्यात्, ततोऽन्यत्र वृत्तत्वात्, ह्रस्वादीर्घप्रत्ययवत् ।

अथोच्येत--ह्रस्वे दीर्घतां नैव करोति तत्प्रत्ययमपि नादधाति । एतदपि न, ह्रस्वदीर्घयोः परस्परापेक्षसिद्धेर्लोके दृष्टत्वात् तत्प्रत्ययस्य च । तद्यथा--सिद्धार्थक... ...।

* * *

करोति न च दीर्घप्रत्ययमाधत्ते, तत् स्वाधारस्य तदात्मतां तत्प्रत्ययं चाकुर्वाणं ह्रस्वस्य दीर्घस्यानाधारस्य दीर्घतां दीर्घः इति बुद्धिं च कथं कुर्यात् ? न कुर्याद् नादध्यात् तद्बुद्धिं च, ततोऽन्यत्र वृत्तत्वात्, यद् यतोऽन्यत्र वर्तते तत्

---

२८ तेऽन्या] °न्योन्यापेक्ष° ? ॥
२९ ए] एतच्च द्वयेnayacakra-ms-ya । पृ° ८३४ पं° २२ ॥
३० *] पृ° ८३० पं° १--५ ॥
६ ए] पृ° ८३३ पं° २ ॥
६ इत्य] °तिदेक्ष्यमाण°nayacakra-ms-ya ॥
८ ए] तुलना— पृ° ८३३ पं° २ ॥
९ भ] भवत्यतः स्वा°nayacakra-ms-ya ॥
१० माने] दीत्वे भवतिnayacakra-ms-bhā ॥
१३ तां] एतदन्तर्गतो न इत्यत आरभ्य दीर्घताम् इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥

तस्य तत्तां न करोति न च तद्बुद्धिमादधाति, **ह्रस्वादीर्घत्वप्रत्ययवत्,** यथा ह्रस्वे दीर्घत्वं न करोति नादधाति तत्प्रत्ययं तथा दीर्घत्वं दीर्घे दीर्घप्रत्ययं च न कुर्याद् नादध्यादिति । § 2798

अथ मा भूदेष दोष इति दीर्घ एव दीर्घत्ववृत्तिरिष्यते, अत्र ब्रूमः **--दीर्घ**
- /ms **एव वर्तमान** इत्यादि । तत इदमापन्नम्--दीर्घ एव वर्तमानं दीर्घत्वं दीर्घतां करोति तत्प्रत्ययं चाधत्ते तत्रेति, इष्यत एतत्, किन्तु ह्रस्वेन दीर्घेतरेण इतरेतरयोगार्थं कल्पितेन नार्थः न च तत्प्रत्ययेन, स्वाधारबलादेव तत्सिद्धेः । § 2799

इतरेतरयोगप्रस्तुतेश्चायमपि दोषः **--अथ तत्रे**त्यादि । ह्रस्व-ह्रस्वप्रत्यय-वैयर्थ्यदोषपरिहारार्थमितरेतरयोगे सत्यपि तत्र दीर्घे दीर्घतां न करोति न दीर्घप्रत्ययं वाऽऽदधातीति मन्यसे तत इदमन्यद्दोषजातं प्राप्तम्--*ह्रस्वेऽपि दीर्घत्वं न करोति न च दीर्घप्रत्ययमाधास्यतीति प्राप्तम् । एतदर्थप्रदर्शनम्—**ह्रस्वे कथ**मित्यादि गतार्थं पूर्ववत् साधनं याव**द्ध्रस्वादीर्घप्रत्ययव**दिति । § 2800

**अथोच्येतै**तद्दोषपरिहारार्थं त्वया--ह्रस्वे दीर्घतां नैव करोतीति दीर्घप्रत्यय-मपि नादधातीति । एतदपि नोपपद्यते, ह्रस्व-दीर्घयोः परस्परापेक्षसिद्धेर्लोके दृष्टत्वात् तत्प्रत्ययस्य च, तस्यैव चैकस्य वस्तुनोऽर्थान्तरापेक्षस्य ह्रस्वत्व-दीर्घ-त्वदर्शनात् । § 2801

**तद्यथा--सिद्धार्थके**त्यादि दण्डकोक्तानां सिद्धार्थकादारभ्य मेरुपर्य-न्तानामितरेतरापेक्षह्रस्वादीनां दीर्घाणां च दृष्टानां ह्रस्वे वृत्तस्य दीर्घत्वस्य
833/mj दीर्घाकरण-दीर्घप्रत्ययानाधानाभ्युपगमेऽत्यन्तं दीर्घाभाव

* * *

नैव दीर्घम्... ...ह्रस्वत्ववत् । तत्प्रत्ययोऽपि न... ...ह्रस्वप्रत्ययवत् ।

एवं ह्रस्वत्वेऽपि । उभयोभयपक्षस्तु प्रत्येकाभिहितदोषैर्न विमुच्यते प्र-त्येकमसिद्धयोरपेक्षायामप्यसिद्धेर्विप्रतिषेधाच्च । यद्यहेतुतः खपुष्पमपि स्यात् ।

एवं घटादीनामपि स्वरूपसिद्धिरेव नास्ति । न घटे घटत्वं परायत्तत्वाद् घटत्वस्य । यदि हि स्वविषयमेवैतत् स्याद् घटो नाघटोऽपि स्यात् । भ-वति त्वितरेतरः । तस्य चाघटत्वेऽन्येऽपि घटा अघटा एवेति घटाभावः । तदभावेऽघटाभावः, घटापेक्षत्वादघटत्वस्य ।

* * *

- /ms एव प्रसक्तः । अत्रानिष्टापादनसाधनम् **--नैव दीर्घ**मित्यादि गतार्थं यावद्

---

२८ त्वं] दीर्घदीर्घे प्रत्ययं प्र° ॥
२ मानं] दीर्घत्वं दीर्घतां न करोतिnayacakra-ms-ya । दीर्घतां न करोति nayacakra-ms-bhā ॥
८ *] ह्रस्वेति nayacakra-ms-ya ॥
९ मा] °मादधास्यतीति प्र° । °मादधातीति इत्यपि पाठोऽत्र स्यात् ? ॥
१० पू] पूर्वसाधनंnayacakra-ms-ya ॥
१० द्ध्र] पं° १, २० ॥
१२ रा] °पेक्ष्यसि°nayacakra-ms-bhā ॥
२८ प्र] प्रसक्तमात्रा° प्र° ॥ ॥

ह्रस्वत्ववदिति । तथा तत्प्रत्ययोऽपि नेति गतार्थं यावद् ह्रस्वप्रत्ययवदिति ।
§ 2802

एवं **ह्रस्वत्वेऽपीत्यतिदेशः । यदि ह्रस्वे ह्रस्वत्वम्** इत्युपक्रम्य दीर्घशब्द-स्थाने ह्रस्वशब्दं कृत्वा स एव ग्रन्थो वाच्यो यावदयमवधिरिति । **उभ-योभयपक्षस्तु** ह्रस्वमपि दीर्घं ह्रस्वं च, दीर्घमपि दीर्घं ह्रस्वं च इत्ययमपि उभयोभयपक्षः प्रत्येकमभिहितैर्दोषैर्न विमुच्यते, प्रत्येकमसिद्धयोरपेक्षायाम-प्यसिद्धेः पृथविसद्धिमूलत्वादपेक्षायाः । किञ्चान्यत्, **विप्रतिषेधाच्च** ह्रस्वत्व-दीर्घत्वयोर्विरोधादप्रवृत्तिरित्युक्तत्वात् । एवं तावन्न स्वतो न परतो नोभयतश्च ह्रस्व-दीर्घे सिध्यत इति । § 2803

स्यान्मतम्--अहेतुतः सिध्यत इति । अत्रोच्यते --**यद्यहेतुतः खपुष्पमपि स्यात्,** अहेतुतश्च न सिध्यति दीर्घत्वम्, अहेतुकत्वात् खपुष्पवत् । यदि सिध्येत् खपुष्पमपि सिध्येत्, अहेतुकत्वात्, दीर्घत्ववत् । § 2804

स्यान्मतम्--आपेक्षिकेषु ह्रस्व-दीर्घादिषु स्यादयं न्यायः, न तु घटादिष्वपि । नैवं मन्तव्यम्, यस्मात्, **एवं घटादीनामपि स्वरूपसिद्धिरेव नास्ति** । तद् व्याचष्टे --**न घटे घटत्वं परायत्तत्वाद् घटत्वस्ये**त्यादि यो दीर्घत्वप्रतिषेधे न्यायः स एवात्रापि दीर्घस्थाने घटं कृत्वा ह्रस्वस्थाने पटाद्यघटं घटान्तरं च कृत्वा । - /ms
घट एवाघटो दृष्ट इतरस्य घटस्येतरघटत्वाभावात् देश-कालाकारादिभेदाच्च परस्परतः । तस्मात् परायत्तं घटान्तरे पटादौ चायत्तम् । § 2805

**यदि हि स्वविषयमेवैतत् स्यात् घटो नाघटोऽपि स्यात्** । कथं पुनर-घटोऽपि भवति ? इत्यत आह --**भवति त्वितरेतरः । तस्य चाघटत्वे** एवं तस्य घटस्यैवाघटत्वे यथाऽसावघटस्तथान्येऽपि घटा अघटा एवेति घटाभावः । पटादयस्त्वघटा एव सिद्धाः । तस्य घटस्याभावेऽघटाभावः, कस्मात् ? घटापेक्षत्वादघटत्वस्य, सोऽप्येवमघटो न भवतीति, अघटः तस्मादन्यो घटः पटो वा, एतद्धटत्वा 834/mj

* * *

कदा घटः सेत्स्यति प्रत्येकव्यक्त्यात्मा यदासौ घटोऽघटो भवति, कदाऽघटो सेत्स्यति यदासौ घटो भवतीतीतरेतराश्रयत्वादसिद्धिः ।

एवं तर्हि दर्शितदिगघट एव घटत्वं तथादृष्टत्वादिति चेत्, अघटेऽपि

---

१ स्व ] ह्रस्वत्वेत्यतिदेशः nayacakra-ms-ya । दृश्यतां पृ॰ ८३१ पं॰ २१, पृ॰ ८३५ पं॰ १३ ॥
१ य ] तुलना पृ॰ ८३० पं॰ १ ॥
२ उ ] तुलना--पृ॰ ८३५ पं॰ ७ ॥
८ य ] तुलना--पृ॰ ८३५ पं॰ ८ ॥
११ टादिष्व ] ॰ष्वतिnayacakra-ms-bhā ॥
१३ न ] पृ॰ ८३० पं॰ १ ॥
१७ य ] पृ॰ ८३० पं॰ १ ॥
१७ टो ] न घटो॰nayacakra-ms-bhā ॥
१८ व ] भवत्वितरे॰nayacakra-ms-ya ॥
१८ त ] तुलना--पृ॰ ८३० पं॰ २ ॥
२० स्य ] घटस्यnayacakra-ms-bhā ॥
२० स्याभा ] ॰भावोऽघटा॰nayacakra-ms-ya ॥ ॰भावो घटा॰ nayacakra-ms-bhā ॥
२१ त ] ऽस्माद॰nayacakra-ms-bhā ॥

न घटत्वं प्रत्यक्षत एवाघटे घटत्वाभावात् प्रतिद्वन्द्वित्वाच्च ह्रस्वदीर्घत्ववत् । अघटस्य वा घटत्वे घट एव सोऽघटः संवृत्तः को घटो नामाघटादन्यः, घटत्वाभावात्मकत्वादघटत्वस्य...।

न द्वये, यथा घटे घटत्वं न वर्तते परायत्तत्वाद् घटत्वस्य तथाऽघटेऽपि न वर्तते । द्वयोरन्यतरत्राप्यसिद्धेः कुत उभयत्र वर्तते प्रतिद्वन्द्वित्वात् स्वपरयोरपि ।

अयमपि चेतरेतरयोगश्चिन्त्यः किमघटे वर्तमाने घटत्वे घटो भवति उत घट एव वर्तमाने ? यदि अघटे वर्तमानं घटत्वमुभयत्र भावं लभते ततोऽघटे घटत्वमघटस्य तदात्मतां तत्प्रत्ययं चाकुर्वाणं घटस्य तदात्मतां तत्प्रत्ययं च न कुर्यात्, ततोऽन्यत्र वृत्तत्वात्, पटाघटत्वप्रत्ययवत् । घट एव वर्तमाने घटत्वे घटो भवति ततो घट एव घटतां करोति तत्प्रत्ययं चाधत्ते, किन्तु अघटेन तत्प्रत्ययेन च नार्थः । अथ तत्र घटतां न करोति

* * *

यत्तत्वाद् घटत्वस्य, परस्परायत्तवृत्तित्वाद् घटत्वाघटत्वयोः । तद्दर्शयति **--कदा घटः सेत्स्यति प्रत्येकव्यक्त्यात्मा** घटान्तरव्यावृत्तविविक्तव्यक्तस्वरूपः । **यदासौ घट** इत्यादि पूर्ववद् ग्रन्थो नेयो दीर्घ-ह्रस्वयोरिव घटाघटयोर्या**वदितरेतराश्रयत्वादसिद्धिः** । एवं तावद् घटे नास्ति घटत्वम् । § 2806

स्यान्मतम् **--एवं तर्हि दर्शितदिगघट** इत्यादि, अधुना व्याख्यातदिशा **अघट एव घटत्वं** वर्तते **तथादृष्टत्वादिति** मन्यसे **चेत्**, अत्रापि ब्रूमः **--अघटेऽपि न घटत्वम्, प्रत्यक्षत एवाघटे** पटादौ **घटत्वस्याभावात् प्रतिद्वन्द्वित्वाच्च** विरोधिन्यघटे घटत्वं विरोधि कथं स्यात् ? विरोधिनोः सहाभावे दृष्टान्तः **--ह्रस्व-दीर्घत्ववत् । अघटस्य वा घटत्वे**[ऽ]घटे चेद् वर्तते घटत्वं **घट एव सोऽघटः संवृत्तः**, तस्मात् **को घटो नामाघटादन्यः** ? इति घटाभावः, कस्मात् ? **घटत्वाभावात्मकत्वादघटत्वस्ये**त्यादि पूर्वोक्तदीर्घह्रस्वत्ववदिहापि नेयम्

- /ms । § 2807

स्यान्मतम्--उभयत्रेति । **तन्न द्वये, यथा घट** इत्यादि ह्रस्व-दीर्घयोरिव घटाघटयोः प्रत्येकमसिद्धेर्भावितमेवमिहापि स एव न्यायो यावत् **परयोरपीति** । § 2808

**अयमपि** चेत्यादि, एषोऽपि स एव न्यायः, किन्तु अघटे घटत्वमिति पूर्वोपक्रमः अघटे घटाकरण-प्रत्ययानाधानप्रदर्शनस्य सुकरत्वात् शेषं पूर्ववत्, स्ववचनविरोधोद्भावनं च कथं त्वयोच्यते मन्यते च घटः ? इति शेषं तथैव नेयं घटाघटार्थविशेषेण यावत् **पटप्रत्यय**वदिति स एव गमः । § 2809

---

१२ प] पृ॰ ८३० पं॰ ३ ॥
१३ विविक्त]
°क्तस्वरूपः nayacakra-ms-ya ॥
१६ द] पृ॰ ८३० पं॰ २४ ॥
२२ पू] पृ॰ ८३१ पं॰ ७ ॥
२२ स्व] **ह्रस्ववदि°**
nayacakra-ms-bhā ॥
२४ था] पृ॰ ८३१ पं॰ ४ ॥
२७ अ] तुलना पृ॰ ८३१ पं॰ २२ ॥
३० टा]
°टार्थविशेषणं nayacakra-ms-ya ॥
३० प] पृ॰ ८३३ पं॰ १ ॥

835/mj

तत्प्रत्ययं च नाधत्ते ततोऽघटे कथं घटत्वं तद्बुद्धिं च कुर्यात्, ततोऽन्यत्र वृत्तत्वात् पटाघटप्रत्ययवत् । अथोच्येत अघटे घटतां नैव करोति तत्प्रत्ययमपि नादधाति । एतदपि न, अघटघटयोः परस्परापेक्षसिद्धेर्लोके दृष्टत्वात् तत्प्रत्ययस्य च । तद्यथा-- सिद्धार्थक... ...। नैव घटः... ...अघटत्ववत् । तत्प्रत्ययोऽपि न... ... पटप्रत्ययवत् । § 2810

एवमघटत्वेऽपि । नाघटेऽघटत्वम् [इत्युपक्रम्य घटशब्दस्थानेऽघटशब्दं कृत्वा यावद्यमवधिः] घटत्ववदनुसर्तव्यम् । § 2811

उभयोभयपक्षस्तूभयदोषापत्तेर्विप्रतिषेधाच्च । सिध्यत्यहेतुतश्चेत् खपुष्पाद्यपि स्यात् । § 2812

एवं सर्वार्थेष्वपीत्यसिद्धिरेव । § 2813

अथान्तरेणापीतरेतरयोगं स्वत एव सिध्यति घट इति चेत्, यद्यस्ति घट एकस्ततस्तस्य सत्त्वैकत्वघटत्वानां युक्तिस्तेषामेकत्वेऽन्यत्वे वा न सम्भवति । यदद्यस्त्येको घट इति त्रयाणामेकत्वं ततो यत्रैकत्वं तत्रास्तित्वस्यापि निष्कलेनैव स्वतत्त्वेन § 2814

**एवमघटत्वे**ऽपीत्यतिदेशोऽपि पूर्ववदेव । तस्य दिशं दर्शयति --**नाघटेऽघटत्व**मित्यादिना स्वयमेव ग्रन्थकारो **याव**त्कारेण यावद् **घटत्ववदनुसर्तव्य**मिति गतत्वान्न्यायस्य । § 2815

**उभयोभयपक्षस्तूभयदोषापत्ते**रिति समानपूर्वोत्तरपक्षव्याख्यः पूर्वातीतग्रन्थेन गतार्थः, **विप्रतिषेधाच्च** इत्यपि तथैव । § 2816

स्यान्मतम्--स्व-परोभयवृत्तिहेतुमार्गेणासिद्धावपि अहेतुतः सिद्धिरिति । तच्च नाहेतु[तः] खपुष्पवदसिद्धेः, तत्रापि *****सिध्यत्यहेतुतश्चेत् खपुष्पाद्यपि स्या**दिति पूर्ववदनिष्टापादनं नेयम् । § 2817

**एवं सर्वार्थेष्वपीति** घटासिद्ध्या पट-रथ-कटादिनिरपेक्षसिद्धाभिमतसर्वार्थर्थासिद्धिरित्यतिदेशः । **इत्यसिद्धिरेवे**ति यथाप्रतिज्ञमसिद्धिहेतुः सिद्ध इत्युपसंहारः । § 2818

अनन्तरोक्तायुक्तिहेतुसिद्धिरधुनोच्यते, तत्सम्बन्धप्रदर्शनार्थं तावदाह -- -/ms
**अथान्तरेणापीतरेतरयोगं** विनापि वस्तूनामन्योन्यापेक्षया घटसिद्धेर्बीजमस्ति,

---

१७ म] पृ॰ ८३३ पं॰ २ ॥
२० उ] पृ॰ ८३३ पं॰ २ ॥
२३ त] तथापि ? ॥
२३ *] सिध्यत॰nayacakra-ms-bhā । तुलना--पृ॰ ८३३ पं॰ ३ ॥
२९ रेणा] ॰णापांतरे॰ प्र॰ ॥

कुतः ? **स्वत एव सिध्यति** स्वयमेव **घट इति चेद्** मन्यसे, अत्र ब्रूमः --**यद्यस्ति घट** इत्यादि, अस्ति इत्युक्तत्वात् सन् घटः, स च एको द्रव्यमेकवचनोक्तत्वात्, ततस्तस्य घटस्य सत्त्वैकत्वघटत्वानां किं युक्तिरयुक्तिः ? इति विचारे तदविनाभावो युक्तिः, सा तु तेषां त्रयाणामेकत्वेऽन्यत्वे वा न सम्भवति । तत् कथम् ? इति यद्य*स्त्येको घट इति **त्रयाणामर्थानाम्**
836/mj अस्त्येक-घटशब्दवाच्यानामेकत्वं चेदिष्यते ततो यत्रैकत्वमि

* * *

भवितव्यम्, अनर्थान्तरत्वात् । यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति घट इव घटस्वतत्त्वस्य । अस्तित्वस्वतत्त्वं च सर्वभावाः । तथा यत्रास्तित्वमित्यादि पूर्ववत् साधनं कृत्वा तदेकत्वेन तूपनयः--एकत्वस्वतत्त्वं च सर्वस्मिन्नेवैकैकस्मिन् । अस्तित्वैकत्वाभ्यामनन्ये सर्वभावाः पटादयः । यदस्ति तद् घटाव्यतिरेकात् सर्वमेव घटः । एकश्च घटस्तदनन्यदस्तित्वम्, संश्च घटः तदनन्यदेकत्वम्, तत् सतो घटादव्यतिरिक्तमिति घट एव सर्वसिद्धिः । तथा यत्र घटत्वं तत्रास्तित्वैकत्वयोरपि निष्कलेनैव स्वतत्त्वेन भवितव्यम्, अनर्थान्तरत्वात् । यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति, घट इव घटस्वतत्त्वस्य । अतो घटादनन्यत्वेऽस्तित्वैकत्वयोरेक एको घटादिरपादिः सर्वो

* * *

त्यादि तद्दोषप्रदर्शनम्, **यत्रैकत्वम**स्ति **तत्रास्तित्वम**पि निष्कलं निरवशेषं स्वेनैव तत्त्वेन भवितुमर्हतीति प्रतिजानीमहे तावत् । कुतः ? **अनर्थान्तरत्वात्** । **यत्र यस्ये**त्याद्यन्वयप्रदर्शनं हेतोः साध्येन । **तत्र तस्ये**त्याद्युपनयः, **निष्कलमेव स्वतत्त्वं भवती**ति साध्यार्थः । उदाहरणम् --**घट इव घटस्वतत्त्वस्ये**ति, घटस्वतत्त्वं यथा घटे निरवशेषमस्ति तदनर्थान्तरत्वात् तथैकत्वेऽस्तित्वस्वतत्त्वं निरवशेषमिति । ततश्चा**स्तित्वस्वतत्त्वं च सर्वभावा** इति कृत्वा सर्वभावानां घटत्वप्रसङ्गः, यदस्ति तद् घटाव्यतिरेकात् सर्वमेव घट इत्युपसंहारो वक्ष्यते । § 2819

**तथा यत्रास्तित्वमित्यादि पूर्ववत् साधनं कृत्वे**त्यतिदेशाद् **यत्रास्तित्वं तत्रैकत्वस्यापि निष्कलेनैव स्वतत्त्वेन भवितव्यम्, अनर्थान्तरत्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति घट इव घटस्वतत्त्वस्ये**ति ।
- /ms **तदेकत्वेन तूपनय** इति विशेषः, तद्यथा --**एकत्वस्वतत्त्वं च सर्वस्मिन्नेवैकैकस्मिन्**, सर्वस्य प्रत्येकमेकैकस्यैकत्वादिति । साधनद्वयेऽप्य**स्तित्वैकत्वाभ्याम**नन्ये **सर्वभावाः पटादय** इत्यनन्यत्वापादनं तुल्यम् । पूर्वत्र **एकश्च घटस्तदनन्यदस्तित्व**मिति, द्वितीये **संश्च घटः तदनन्यदेकत्व**मिति, पूर्वस्मिन्

४ य] चेदस्त्येको ? ॥
४ *] तुलना--पृ॰ ५५५-- १ ॥
५ य] तुलना--पृ॰ ८३६ पं॰ १५, पृ॰ ५५५-- १ ॥
२३ क्ष्य] पं॰ ६, २४ ॥
२५ सा] तुलना--पृ॰ ५५५-- १ ॥
३० प] तुलना--पृ॰ ५५५-- २, ५५७-- २ ॥

साधने घटः सर्वत्वमापद्यते द्वितीये सर्वं घटत्वमापद्यते । अथवा **तदनन्यदेकत्व**मिति द्वितीयसाधनव्याख्याविकल्पः, **संश्च घटस्तदनन्यदेकत्वम्,** तच्च कतमत् ? इति प्रश्ने व्याकरणम् **--तत् सतो घटादव्यतिरिक्तमिति घट एव सर्वसिद्धि**रिति । पूर्वस्मिंस्तु तच्च कतमत् ? इति प्रश्ने सर्वभावा इति व्याकरणमिति विशेषोऽस्मात् तस्य घटे सर्वभावा एकत्वाव्यतिरिक्ताः सिध्यन्तीत्यर्थः । एवं तावदस्तित्वैकत्वाभ्यामनन्यत्वापादनेन घटस्य सर्वत्वं घटे सर्वभावसिद्धिरिति दोषाः । § 2820

किञ्चान्यत् **--तथा यत्र घटत्व**मित्यादि, इदानीं घटत्वेऽस्तित्वैकत्वयोः स्वतत्त्वापादनं तदेव साधनं सभावनम् । उपसंहारः **--अतो घटादनन्यत्वेऽस्तित्वैकत्वयोरेक एको घटादिः** घटो घटो * * * 837/mj

* * *

भेदेन घटः, तथा च प्रत्यक्षादिविरोधाः । व्यक्ताव्यक्तद्रव्यगुणकर्मोत्पादस्थितिभङ्गसाधनदूषणादिषु ते चापाद्याः ।

एते चेन्नेष्यन्ते घटो नास्तीति प्रतिपत्तव्यम् । तथा च सर्वे भावाः । यत्र घटस्यावृत्तिस्तत्र सर्वभावानामवृत्तोक्तिरेव, घटानर्थान्तरत्वात् । अर्थान्तरतायां वा अस्तित्वसामान्यशून्यत्वाद् एकत्वविशेषशून्यत्वाच्चासत्त्वमेव घटस्य खपुष्पवत् ।

* * *

रथः पट इत्यादिः, **अपादिरित्य**पग्नि-वायु-भूम्यादि सर्वं सर्वात्मकमेकैकम् । अत आह **--सर्वो भेदेन घटः** प्रत्येकमित्यर्थः । भवतु सर्वं सर्वात्मकम्, दोषः कः ? इति चेत्, उच्यन्ते दोषाः **--तथा च प्रत्यक्षादिविरोधाः** । घटादीनां प्रत्यक्षमसर्वात्मकत्वात् प्रत्यक्षविरोधः, प्रत्यक्षपूर्वकत्वादनुमानादीनामनुमानादिविरोधा योज्याः । § 2821 - /ms

**व्यक्ताव्यक्ते**त्यादि । ते च प्रत्यक्षादिविरोधा व्यक्तादिभावेषु । व्यक्तं शब्दादि पृथिव्यादि गवादि घटादि चैकैकमस्त्यैकस्ति, एषा**मस्त्येकशब्दानां त्रयाणामेकत्वमन्यत्वं वा स्यात्** इत्यादिप्रक्रान्तन्यायेन अस्तित्वस्वतत्त्वमेकत्वं शब्दस्वतत्त्वं च इत्यापाद्य यावत् सर्वसर्वात्मकत्वम्, तदभ्युपगमे प्रत्यक्षादिविरोधाः । अव्यक्ते सत्त्व-रजस्तमसां च प्रत्येकमस्त्येकाव्यक्तानां त्रयाणामित्यादि, अस्त्येक-सत्त्वानामित्यादि, अस्त्येक[रज-

---

३२ मा] एतच्चिह्नाङ्कितः **°मापद्यते** इत्यत आरभ्य **°नन्यदे°** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
७ त] तुलना--पृ° ५५५-- २ ॥
९ *] पृ° ५५५-- १ ॥
९ *] **रूपनय**nayacakra-ms-bhā ॥
९ *] **सर्वस्मिन्नेवै°**nayacakra-ms-bhā । **सर्वत्रैवै°** nayacakra-ms-ya ।
तुलना--पृ° ५५५-- २ ॥
१९ उ] **उच्यते**nayacakra-ms-ya ॥
२३ म] **°मस्त्येकमस्त्येकशब्दानां** प्र° । अत्र **°म्, अस्त्येकशब्दानां** इत्यपि पाठः स्यात् ॥
२४ प्र] पृ° ८३५ पं° १२ ॥
२५ त] **°तत्वमेकत्वमेकत्वं**nayacakra-ms-bhā ॥

सामित्यादि, अस्त्येकत]मसामित्यादि, तथा पृथिव्यादीनामपि प्रत्येकं गवादीनां च नेयम्, तथा द्रव्य-गुण-कर्मणामिति, तथोत्पाद-स्थिति-भङ्गानाम्, तथा साधनस्य तद्भेदानां प्रतिज्ञादीनाम्, दूषणस्य तद्भेदानां च स्ववचनविरोधाद्यसिद्ध्यादि-साध्यधर्मवैकल्यादीनामपि प्रोक्तन्यायेन प्रत्यक्षादिविरोधा आपाद्या व्यापित्वादस्य न्यायस्य । **एते चेन्नेष्यन्ते घटो नास्तीति प्रतिपत्तव्यम्,** अथैतान् प्रत्यक्षविरोधादिदोषान् नेच्छसि तदा घटो नास्ति इत्येतत् प्रतिपद्यस्वेति स्वमतशून्यतापादनम् । § 2822

**तथा च सर्वे भावा** इत्यतिदेशः । यथा घटस्यायुक्त्या नास्तित्वं प्रतिपादितमस्त्येक[घटानां] त्रयाणामनन्यत्वे तथा पट-रथादि-सर्वभावानां प्रतिपाद्यम् । अतोऽतीतन्यायेन योजयितुमुपायं प्रदर्शयन्नाह --**यत्र घटस्यावृत्तिस्तत्र सर्वभावानामवृत्तेत्तिरेव** । कस्मात् ? **घटानर्थान्तरत्वात्,** घटाद[न]र्थान्तरत्वं सर्वभावानां भावितमेव, क्व ? अस्तित्वैकत्वयोरनर्थान्तरत्वे घटस्य पटादीनामप्यस्तित्वैकत्वानर्थान्तरत्वाद् घटानर्थान्तरत्वम्, अतश्च घटानर्थान्तरत्वात् सर्वभावानां घटावृत्ताववृत्तिरेवेत्यस्त्येकघटानामनर्थान्तरत्वे दोषः । § 2823

- /ms

अथोच्येत--अर्थान्तरमिति । अस्त्येकत्वाभ्यां घटस्याऽ**र्थान्तरतायां वा,** सामान्यमस्तित्वम्, विशेष एकत्वं घटस्य, ततस्तौ सामान्य-विशेषौ न स्तः, निःसामान्यत्वाद् निर्विशेषत्वाच्चा**सत्त्वमेव घटस्य खपुष्पवत्** स्यादिति । § 2824

838/mj

अथ घटपटादयो भावाः परस्परविपरीतस्वभावा एव सत्यपि अस्तित्वैकत्वाभेदे, भेदार्थं प्रधानादिप्रवृत्तेः । तत एवमभ्युपगमे यथा घटः पटादस्त्यात्मकादेकात्मकात् तदनन्यात्मकाच्च विपरीतः संवृत्तस्तथा घटो घटात्मस्वरूपादपि विपरीतः प्राप्तः, अस्तित्वैकत्वविपरीतत्वात्, घटविपरीतपटात्मवत् । इति पुनरपि नास्ति घटः । एवं सर्वभावा अपि, पटानन्यत्वैकत्वास्तित्वविपरीतस्वाभाव्यात् खपुष्पवदेव । ततश्च निःस्वभावभावापत्तिरेव ।
§ 2825

अथोच्येत--पटादीनां परस्परविपरीतता सिध्यति असर्वगतत्वादव्याप्तेः, न ह्यस्तित्वैकत्वयोः सर्वगतत्वाद् व्याप्तेः । § 2826

---

२ विरोधाद्य ] °द्यसिद्ध्यादि° प्र° ॥
३ ए ] एतिnayacakra-ms-ya । एवेति nayacakra-ms-bhā । दृश्यतां पृ° ५५६-- १ ॥
४ विरोधादिदोषा ] °षानैच्छसि तथा घटोस्ति प्र° ॥
११ घ ] घटस्याnayacakra-ms-bhā ॥
१४ स्या ] तुलना--पृ° ८४०--८४१ ॥

एतदेकत्वे कुत इदं यत् ते सर्वगते, न घटः । नन्वेवं सर्वेषामेकरूपेण भवितव्यम्, अनन्यत्वात्, प्रतिवस्तुतत्त्ववत् ।
§ 2827

अत्राह --अथेत्यादि । घट-पटादयो भावाः परस्परविपरीतस्वभावा एव सत्यपि अस्तित्वैकत्वाभेदे । किमर्थं किं कारणं वा ? उच्यते --*भेदार्थं प्रधानादिप्रवृत्तेः, प्रधानं हि प्रकृति-बहुधानकादिपर्यायं पुरुषोपभोगं शब्दाद्युपलब्धिरूपमाद्यं गुण-पुरुषान्तरोपलब्धिरूपं चान्त्यमुद्दिश्य पुरुषार्थं प्रवर्तमानं शब्दादि-पृथिव्यादि-गवादि-घटादिभेदानन्तरेण न शक्नोति पुरुषार्थं कर्तुम्, अतो भेदार्थं प्रधानादिप्रवृत्तेर्घट-पटादयः परस्परविभिन्नस्वभावा एव । तस्मान्न सर्वात्मात्मदोषः अस्त्येकघटानाम् इत्यत्र । ततो घटः पटादस्त्यात्मकाद् विपरीतोऽधुनाभ्युपगतः, एवमभ्युपगते पुनरेष दोष आपद्यते--यथा घटः पटादस्त्यात्मकादेकात्मकात् तदनन्यात्मकाच्च विपरीतः संवृत्तः, एवं हि वैपरीत्यं स्याद् नान्यथा, ततश्च तथा घटो घटात्मस्वरूपादपि विपरीतो घटास्तित्वैकत्ववतदनन्यत्वलक्षणात् प्राप्नोति, अस्तित्वैकत्वाभ्यां विपरीतत्वात्, - /ms
घटविपरीतपटात्मवदिति घटात्मनैवाभावात् पुनरपि नास्ति घटः । § 2828

एवं सर्वभावा अपीत्यतिदेशादेकैको भावः कट-रथादिरभावः स्यात् । कस्मात् ? पटानन्यत्वैकत्वास्तित्वविपरीतस्वाभाव्यात् खपुष्पवदेव । तदुपसंहारः --ततश्च निःस्वभावभावापत्तिरेवेति गतार्थः । § 2829

अथोच्येतेत्यादि । स्यान्मतम्--पटादीनां परस्परविपरीतता सिध्यति असर्वगतत्वादव्याप्तेः, न त्वस्तित्वैकत्वयोर्विपरीतता, कस्मात् ? सर्वगतत्वाद् व्याप्तेरिति, अस्तित्वैकत्वाभ्यां हि व्याप्ता *घटादयो यस्मात् कुतस्तयोर्वैपरीत्यं यतो व्यावृत्तेः कल्प्येत ? घटादयस्तु परस्परविपरीताः स्युर्व्यावृत्तात्मत्वात् । अतो न निःस्वभावापत्तिरस्तित्वैकत्वव्याप्तेरिति । § 2830

अत्र ब्रूमः --एतदेकत्वे कुत इदं यत्ते इत्यादि । ताभ्यामस्तित्वैकत्वाभ्यां घटैकत्वेऽभ्युपगम्यमाने कुतोऽयं विशेष आयातः--तयोरेव अस्तित्वैकत्वयोः सर्वगतत्वं न घटस्य, घटस्यैवासर्वगतता नास्तित्वे 839/mj

* * *

अथैतन्नेष्यते, अर्थान्तरत्वमेवेष्यते, ततो घटबहुत्वं तर्हि प्राप्तम्--अस्त्यपि घटो भेदेन, एकोऽपि घटः, घटोऽपि घट इति त्रयो घटाः स्युः । अथ घट एवैको घट इष्यते ततः सिद्धस्तर्हि नास्ति घट इति, अस्तित्वार्थान्तरत्वात्

२ *] भेदार्थः प्र° ॥
४ पु] पुरुषाथं प्र° nayacakra-ms-bhā । पुरुषा प्र° nayacakra-ms-ya ॥
७ स] सार्वात्म्यदोषः इति सर्वात्मतादोषः इति वा पाठोऽपि भवेदत्र ॥
८ पु] पुनरदोषnayacakra-ms-ya ॥
१४ त्वास्तित्व] एतचिह्नाङ्कितः °विपरीत° इत्यत आरभ्य पटादीनां इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१८ व्या] °प्तेरित्यत्र स्ति°nayacakra-ms-bhā ॥
१८ *] घटादय यस्मा कुत°nayacakra-ms-bhā ॥
१९ क] कल्प्येतेnayacakra-ms-ya ॥
२१ ए] एता° प्र° ॥

खपुष्पवत्, नैक इति च । एकत्वास्तित्वत्यागाच्च रूपादिषु घटैकदेशेष्वपि न घट इति प्राप्तम्, भूतित्यागान्न भूतिमात्रम् । ततश्चानस्तित्वो घटः ।

अथोच्येत परिहारः--बह्वेवास्ति बह्वेव नास्ति, क्वचिदस्तित्वमेव नास्तित्वमेव वा, तस्माद् घटान्तरपटान्तराद्यस्तित्वविशेषणार्थम् अस्ति घटः इत्युच्यते । तथैकमपि बह्वेव,

* * *

कत्वयोरिति ? अत्र साधनम् --**नन्वेवमित्यादि सर्वेषामस्तित्वैकत्वघटानामपि एकरूपेण भवितव्यमिति** पक्षः । **अनन्यत्वादिति** हेतुः । **प्रतिवस्तुतत्त्ववदिति** दृष्टान्तः, यथा वस्तु वस्तु प्रति यदात्मस्वरूपं घटादौ तत् तदनन्यत्वादेकरूपमेव दृष्टम्, रूपरूपत्वमसाधारणं न तद्रसाद्यात्मकमपीत्यविशिष्टं तथास्त्येकघटानामपीति नास्ति सर्वगतत्वासर्वगतत्वविशेष इति तदवस्था निःस्वभावता । § 2831

- /ms **अथैतन्नेष्यते** निःस्वभावत्वमनन्यत्वं च **अर्थान्तरत्वमेवास्त्येकघटानामिष्यते** चेत् **ततो घटबहुत्वं तर्हि प्राप्तमिति** ब्रूमः, यस्माद**स्त्यपि घटो** भेदेन **एकोऽपि घटो** भेदेन इति वर्तते, तथा **घटोऽपि घट इति त्रयो घटाः स्युः**, अनिष्टं चैतत् । **अथ** मा भूदेष दोष इति **घट एवैको घट इष्यते,** न त्वस्तित्वैकत्वे घट इति, **ततः सिद्धस्तर्हि नास्ति घट इति** । कस्मात् ? **अस्तित्वार्थान्तरत्वात् खपुष्पवत्** । **नैक इति च** *सिद्धं तर्हि इति वर्तते । किञ्चान्यत्, एकत्वास्तित्वत्यागाच्च रूपादिषु घटैकदेशेष्वपि न घट इति प्राप्तम्, एकत्वत्यागात्, एकैकत्वाच्च रूपादीनां रूपादिष्वभावे घटस्य रूपादयोदीनां समुदायो घट[ः] *संवृतिसन् इत्येतन्निवर्तते । तथा क्षणिक इत्येकक्षणावलम्बिनोऽस्तित्वं क्षणिकवादेऽभ्युपगतं ***भूतिर्येषां क्रिया सैव** इति, **भूतेरस्तित्वस्य त्यागान्न भूतिमात्रमिति** च प्राप्तम् । अनिष्टं चैतदुभयमपीति । ततः किम् ? **ततश्चानस्तित्वो घट** इति प्राप्तम्, नास्त्यस्तित्वं यस्य सोऽनस्तित्वः, यो घट इत्युच्यते सोऽनस्तित्वः, तच्च विज्ञानमात्रमिदं सर्वं बाह्यार्थशून्यमिति वक्ष्यमाणः पक्षोऽभ्युपगतो भवतीति । § 2832

**अथोच्येतेत्यादि** । अत्र यदि परिहारः परेणोच्येत तद्यथा --**बह्वेवास्ति**
- /ms घटपटादि प्रत्येकवृत्तेरस्तित्वस्य, तथा **बह्वेव नास्ति** घट-पटाद्येव परस्परव्यावृत्तस्वरूपापन्नत्वात् । तच्च **क्वचिदे**कैकस्मिन्नर्थे न सर्वत्रास्तित्वमेव नास्तित्वमेव वा । तस्माद् घटस्य पटाद् विशेषणार्थम् अस्ति घटः इति घटस्यैवास्तित्वमुच्यते, तथैकमपि बह्वेव घट-पटादि, तदेव द्वित्रिचतुरादिसङ्ख्य-

---

१६ *] पूर्वापरपर्यालोचनया **सिद्धस्तर्हि** इति पाठः पूर्वानुसारेणात्र भवेत्, पूर्वत्र वा **सिद्धं तर्हि नास्ति** इति पाठो भवेदेतदनुसारेणेति ध्येयम् ॥
१८ त्वा] **०च्च रूपादिष्वभावे घटरूपादयो**nayacakra-ms-bhā ॥
१९ *] **संवृत्ति०** प्र० ॥
२० *] पृ० ८०१ पं० ७ ॥
२२ य] **यस्य नोनस्तित्वो** प्र० ॥
२३ त] ततश्च ? ॥
२४ भ] **भवति**nayacakra-ms-bhā ॥
२६ घ] **घटपटादेः**nayacakra-ms-ya । **घटपटाद** nayacakra-ms-bhā ॥

मपि, तस्मात् एकम् इति द्यादेर्विशेष्योच्यते । तत्रैवंविधे वस्तुनि अस्त्येको घटः इति अस्त्येक-घटानां त्रयाणाम 840/mj

* * *

तदेव द्यादिसङ्ख्यमपि, तस्मात् एकम् इति द्यादेर्विशेष्योच्यते । तत्र अस्त्येको घटः इति त्रयाणामनन्यत्वे सर्वैकत्वप्रसङ्गः अन्यत्वे वा घटबहुत्वप्रसङ्गश्च कुतः ?

एतन्न परिहारवचनम्, सर्वसमयाप्रसिद्धेः, अस्तित्वस्य रूपान्तराभावात् । तदभेदे तु सर्वैक्यम् अन्यत्वपक्षे वा घटबहुत्वम् । तथापि च नास्तित्वमेव खपुष्पवत् । इतरेतरासत्त्वाभ्युपगमाच्च कुतोऽस्तित्वं तेषाम् । अनन्यत्वेऽप्य-सत्त्वमुक्तवत् ।

अथोच्येत--भिन्नास्तित्व एव घटः, आत्मलाभे भिन्नप्रकारत्वात्, पटकट-धीवत्, कटो हि नास्ति पटः इति बुद्धिः पटबुद्धिभिन्नप्रकारेणात्मानं लभते पटबुद्धिश्च कटबुद्धेः, ते च भिन्नास्तित्वे दृष्टे तथा घटोऽपि भिन्नास्तित्वः ।

* * *

नन्यत्वात् सर्वैक[त्व]प्रसङ्गः, अन्यत्वे वा अस्त्यपि एकोऽपि घटोऽपि घटः इति घटबहुत्वप्रसङ्गश्च, कुत आयातावेतौ प्रसङ्गौ ? इति परिहारः । § 2833

अत्र ब्रूमः --**एतन्न परिहारवचनम्** । कस्मात् ? **सर्वसमयाप्रसिद्धेः,** अस्ति इत्यस्य तद्भावोऽस्तितत्त्वं तन्न कस्यचित् साङ्ख्यादीनां समये सिद्धं बहु इति । कस्मात् ? **अस्तित्वस्य रूपान्तराभावात्,** यदि स्याद् रूपान्तरं घ-टेऽन्यत् पटेऽन्यदस्तित्वं रथादिषु च शेषेष्वन्यदन्यच्च स्यात् ततो नानारूपमेव स्यात्--किञ्चिदस्ति किञ्चिन्नास्ति किञ्चिदस्ति च नास्ति चेति, अनिष्टं चैतत् । तस्मादयुक्ता कल्पना--घटान्तर-पटान्तराद्यस्तित्वेभ्यो विशेषणार्थम् अस्ति घटः इति, तथा एको घटः इत्यपि ज्ञेयम् । तस्मादभेद एवास्तित्वस्य, तस्मिंश्च **तदभेदे तु** घटादीनामस्तित्वादनन्यत्वपक्षे सर्वेषामैक्यम्, अन्यत्वपक्षे वा घटबहुत्वमिति तदवस्थौ प्रसङ्गौ । § 2834

किञ्चान्यत् --**तथापि च नास्तित्वमेव,** एवमप्यस्तित्वसामान्यशून्यत्वादेक-त्वविशेषशून्यत्वाच्च नास्तित्वमर्थान्तरतायां खपुष्पवत् । **इतरेतरासत्त्वाभ्युपग-माच्च** इत्यतो हेतोः **कुतोऽस्ति[त्वं] तेषां** घटादीनामिति ? अनन्यत्वेऽपि प्रत्यक्षादिविरोधसर्वैक्यदोषापादनद्वारेणासत्त्वमुक्तवदिति । § 2835

**अथोच्येत--भिन्नास्तित्व** एवेत्यादि । भिन्नमेवास्तित्वं घटस्य पटाद्यस्तित्वात् प्रत्येकमसाधा- रणात्मलाभादिदेश-काला-ऽऽकार-निमित्तादिभेदेन, तदिदं प्रतिज्ञायते--भिन्नभवनो **भिन्नास्तित्व एव घट** इति । कुतः ? **आत्मलाभे** - /ms

---

३० द्यादेर्विशेष्यो ] °षोच्यतेnayacakra-ms-ya ॥
१३ स ] सर्वैक्यप्रसङ्गः इत्यपि पाठोऽत्र भवेत् ॥
१६ स्ति ] °स्तितत्वं प्र° । °स्तित्वं ? ॥
१६ स ] समयसिद्धंnayacakra-ms-ya ॥
१८ द ] °दन्यत्व प्र° ॥
१९ किञ्चिद ] °दस्ति नास्तिnayacakra-ms-ya ॥
२४ मेव ] पृ° ८३७ पं° ५, पृ° ८४१ ॥
२७ स ] °सत्त्वैक्य° प्र° ॥
२७ मुक्त ] पृ° ८३७ पं° १ ॥

**भिन्नप्रकारत्वात्,** आत्मलाभे जन्मनि उपलब्धौ घटस्य घटान्तरात् पटादिभ्यश्च देश-काला-ऽऽकार-निमित्तादिप्रकारो भिन्न एव व्यावृत्तात्मरूपत्वात् । किमिव ? **पट-कटधीवत्,** तद्व्याख्या **--कटो हि नास्ति पट** इत्यादि, यथा
841/mj कटः इति बुद्धिः पटबुद्धेर्भिन्नेन

* * *

एतदपि न, उक्तसत्त्वतुल्यत्वात् । येन प्रकारेणैकस्यात्मलाभस्तेन प्रकारेण सर्वभावानामप्यात्मलाभः, अस्तित्वेन भवनाविशेषात्, अभिन्नास्तित्वो घटः, नञ्सहितः स एव हेतुः, एकघटवत् । तथैकत्वमपि ।

यदि तु ताभ्यामपि घटोऽन्यस्ततो घटस्य शून्यत्वम्, अस्तित्वैकत्वशून्यत्वात्, खपुष्पवत् । अनन्यत्वे तु सर्वभावा अपि ततोऽनन्ये, तदस्तित्वैकत्वाभ्याम् अनर्थान्तरत्वाद् घटवत् ।

अथैवं घटादिसर्वभावघटत्वं नेष्यतेऽ[न]र्थान्तरत्वं च न त्यज्यते ततो घटोऽपि घटो मा भूत्, भवनविशेषहेत्वभावात्, पटवत् ।

* * *

प्रकारेणात्मानं लभते पटबुद्धिश्च कटबुद्धेः, ते च कटपटधियौ परस्परतो भिन्नास्तित्वे दृष्टे, तथा घटोऽपि भिन्नप्रकारात्मलाभत्वात् पटादिभ्यो भिन्नास्तित्व इति । § 2836

**एतदपि न, उक्तसत्त्वतुल्यत्वात्,** इदमपि अनन्तरोक्तपटादिव्यतिरिक्ताभिमतघटास्तित्वेन तुल्यं घटाभिन्नास्तित्वम्, तस्मादुक्तसत्त्वतुल्यत्वादसत्त्वमेवेत्यर्थः । **भिन्नप्रकारत्वा**दित्यस्य वा हेतोर**भिन्नप्रकारत्वा**दिति प्रयोगेऽपि अस्तित्वव्याप्तिसाधनत्वे तुल्यत्वं वेति द्विधापि उक्तसत्त्वतुल्यत्वाद् न त्वदभिमतभिन्नास्तित्वो घट इति सम्बन्धः । तस्य व्याख्यानं समानार्थद्वयस्येत्यत आह --***येन प्रकारेणैकस्यात्मलाभस्तेन प्रकारेण सर्वभावानामप्यात्म-**
- /ms **लाभोऽस्तित्वेन भवनाविशेषात्** । नानारूप्ये[पृ॰ ८४० पं॰ १४ ॥ऽस्तित्वं] नास्ति[त्व]मस्तित्वनास्तित्वं वा स्यादित्युक्तम् । तस्मादात्मलाभस्याभिन्नरूपत्वाद**भिन्नास्तित्वो घटः** । *विरुद्धाव्यभिचारी वाऽयम् अभिन्नास्तित्वो **नञ्सहितः स एव हेतु**रिति अभिन्नप्रकारात्मलाभत्वात् इति प्रयोक्तव्य इत्यभिप्रायः । **एकघटव**दिति दृष्टान्तः, यथैव हि घट आत्मलाभक्षणेऽत्यन्तमभिन्नास्तित्वस्तथा घटान्तराणि पटादयश्चेति । तथैकत्वमपीति नेयम् । एवमेकत्वास्तित्वाभ्यामभिन्नो घटः । § 2837

---

३१ उ] nayacakra-ms-ya प्रतौ **उत्पत्तौ** इति लिखित्वा अनन्तरम् **उपलब्धौ** इति पाठः कृतः ॥
१ व्या] **व्यावृत्त्यात्म॰** प्र॰ । पृ॰ ८३९ पं॰ २४ ॥
१८ भिन्न] पृ॰ ८४० पं॰ ६ ॥
१९ त्वं] चेतिnayacakra-ms-ya ॥
२० भिन्ना] पृ॰ ८४० पं॰ ६ ॥
२१ *] पृ॰ ८६६ पं॰ ५ ॥
२४ *] विरुद्धाव्यभिचारिणः स्वरूपमत्र टिपृ॰ ८४ पं॰ १४ इत्यादौ विलोकनीयम् ॥
२४ न] नञ्सहित एवnayacakra-ms-ya । पृ॰ ५५७--१ ॥
२६ ए] एवघट॰ प्र॰ ॥
२६ य] यथै[क ए]व हि इत्यपि भवेत् पाठः, दृश्यतां पृ॰ ८६६ पं॰ २३ ॥

**यदि त्वित्यादि । यदि तु ताभ्यामपि घटो**ऽस्तित्वैकत्वाभ्या**मन्यस्ततो घटस्य शून्यत्व**मस्तित्वैकत्वशून्यत्वात् सामान्य-विशेषवत्त्वासत्त्वादसत्त्वमेव खपुष्पवदिति प्रागुक्त इत्यर्थान्त रपक्षदोषोपसंहारः । **अनन्यत्वे त्वि**त्यादिनाऽनर्थान्तरपक्ष-दोषोपसंहारो गतार्थो यावद् **घटव**दिति । तस्मात् स्थितमेतदाद्युक्तम्--घटवत् पटाद्यपि घट इति । § 2838

**अथैव**मित्यादि । अथैवं न्यायापादितमपि घटादिसर्वभावघटत्वं नेष्यते प्रसिद्ध्यादिबलेन केनचिद[न]र्थान्तरत्वं च न त्यज्यते **ततो घटोऽपि घटो मा भूत्, भवनविशेषहेत्वभावात्,** 842/mj

* * *

एवमनभ्युपगमे वा घटो घट एवेष्टोऽस्तित्वैकत्वाविशेषात् एव[म]घट एव घटः स्यात्, तस्मादेव हेतोः, घटवत् ।

नन्वयमेव रूपादिष्वपि तद्विषयविज्ञानाभिधानविपर्ययोऽपि योज्यः । बहुत्वप्रसङ्गो वा । तस्मान्न सन्ति घटादयः ।

नन्वेवमसत्त्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यते । ननु तत् सर्व-सिद्धान्तेष्वपि प्रत्यक्षसिद्धमतथा मत्वा मोक्षाय यत्यते । इत्ययुक्तेर्घटादीनां शून्यता । तथानुत्पादादपि शून्यत्वं वस्तुनः ।

* * *

अस्तित्वैकत्वानर्थान्तरत्वे घटभवनात् पटादिभवनानां न कश्चिद् विशेषोऽस्ति, न च तत्कारणम्, तस्माद् भवनविशेषहेत्वभावात् पटवद् घटोऽपि घटो मा भूदिति घटस्य घट[त्वा]भावः । एवमनभ्युपगमे वा तुल्ययोरस्तित्वैकत्वयोः सतोः सर्वत्र वर्तिनोर्घटो घट एव नियतरूपो न त्वघटो घट इष्टः, कस्मात् ? अस्तित्वैकत्वाविशेषात् एव[म ?]घट एव घटः स्यात् तस्मादेव हेतोर्घटवदघट एव सन्नपीति । § 2839 - /ms

**नन्वयमेवे**त्यादि तदेवानुज्ञापयन् रूपादिष्वनिष्टमापादयति । यथास्तित्वैकत्वे सत्येव घटादीनां विपर्ययः पटादित्वेन प्रापितः तथा रूपं लोके रूपमेव न रसः इति सिद्धमपि रूपं न स्यात् रसोऽपि रसो मा भूद् रूपं स्यात् इति तद्विषयविज्ञानाभिधानविपर्ययोऽपि योज्य इति । § 2840

**बहुत्वप्रसङ्गो वा** अस्तित्वैकत्व-घटत्वैकत्वपक्षे दोषा एते मा भूवन्नित्यन्यत्वपक्षाभ्युपगमे घटबहुत्वप्रसङ्ग उक्तवत् स्यात् । तस्मान्न सन्ति घटादय इति । § 2841

---

३० म] पृ° ८३७ पं° २६, पृ° ८४० पं° १८ ॥
१ र] °रदोषो°nayacakra-ms-ya ॥
१ त्यादिना] °नानार्थान्तर° प्र° । पृ° ८६७ पं° ११ ॥
२ मेत] पृ° ८३६ पं° ९ । आदावुक्तमित्यर्थः ॥
६ मा] भूदित् प्र° ॥
१८ त्व] त्वपटो प्र° ॥
१९ ए] एवं घटnayacakra-ms-bhā ॥ एवं पट एव घटः इत्यपि पाठोऽत्र भवेत् ॥
२१ य] तथाnayacakra-ms-ya ॥
२५ प] °पक्षnayacakra-ms-ya ॥
२६ उ] पृ° ८३९ पं° १३ ॥

आह --**नन्वेवमसत्त्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यते,** श्रम-ऽऽतङ्क-भयादिवेदनार्दितानां तत्प्रतीकारात् तदुपशमे सुखं बुभुक्षा-पिपासार्दितानां च तृप्तिः प्रत्यक्षतो दृश्यते तस्मात् प्रत्यक्षविरोधादयुक्ता कल्पनेति । § 2842

अत्रोच्यते --**ननु तत् सर्वसिद्धान्ते**त्यादि । अव्युत्पन्ना-ऽविशुद्धमहाजनप्रत्यक्षादिभ्रान्तिविज्ञानाप्रमाणीकरणेनैव रूपादिविषयजन्यतृप्तिसुखादिषु अनाश्वासादतथात्वाच्च मृगतृष्णिकातोयाद्यनाश्वासवद् मोक्षायैव यतितव्यमिति प्रवृत्तसर्वमोक्षार्थशास्त्रेषु सिद्धत्वादितीत्थ**मयुक्तेर्घटादीनां शून्यता** । § 2843

**तथानुत्पादा**दित्यादि । अयुक्तेः शून्यत्व[व]दनुत्पादादपि वस्तुनः शून्यत्वं प्राप्नोति वस्तुवादिनः, उत्पत्ति-विनाशयोरसत्त्वेऽनुत्पन्नाविनष्टत्वात् खपुष्पवदित्युपसंहरिष्यमाणशून्यत्वात् । आद्यन्तयोर्जाताजातयोरनुत्पादादसदिति ।
- /ms, 843/mj तत्र आदिरुत्पत्तिः, अन्तः क्षयः, तावाद्यन्तौ विद्ययातां न वेति द्वौ

* * *

आद्यन्तौ विद्येयातां न वा ? यदि न स्तस्ततोऽसत्त्वे तयोः सर्वभावानामनाद्यन्तत्वात् स्थितिरेव । सा च प्रत्यक्षादिविरुद्धा । स्थितवस्तुत्वाद् विपरीतमवस्तु खपुष्पवत् । अनुत्पादाभ्युपगमेन सर्वसिद्धान्तव्याघातश्च ।

अथोच्येत--साङ्ख्यानामेव तावत् सत्कार्यवादित्वादव्याघात इति । नाव्याघातः, प्रधानादीनां नित्यनिष्ठितत्वाभ्युपगमादारम्भाभ्युपगमात् आरम्भमन्तरेण क्रियाऽभावात् क्रियामन्तरेण च निष्ठानाभावात् । अतस्तानि आरब्धान्येव, निष्ठितत्वात्, घटवत् । आरब्धत्वात् कृतकत्वात् पर्यवसानवन्त्यपि । यत्त्वेवं न भवति तदसत् प्रधानादि खपुष्पवत् ।

* * *

विकल्पौ च, तयोः कतरमिच्छसि ? यदि न स्त इतीच्छसि ततोऽसत्त्वे तयोः सर्वभावानामनाद्यन्तत्वाद् घटादीनां नित्यता स्यात् स्थितिरेव, सा च प्रत्यक्षादिविरुद्धा स्थितिः, उत्पत्तिविनाशदर्शनात् । प्रत्यक्षपूर्वकत्वादनुमानादीनामनुमानादिभिरपि विरुध्येत । किञ्चान्यत्, स्थितवस्तुत्वाद् विपरीतमवस्तु, उत्पन्नमवस्तु प्राप्नोति, स्थितवस्तुविपरीतत्वात्, खपुष्पवत् । किञ्चान्यत्, अनुत्पन्नमेव सर्वं वस्तु इत्यभ्युपगमे सर्वसिद्धान्तव्याघातश्च, वैशेषिकसिद्धान्ते तावदुत्पत्तिमभ्युपेत्योक्तम् --**द्रव्याणि द्रव्यान्तरमारभन्ते, गुणाश्च गुणान्तरम्** वै॰ सू॰ १ । १ । ८, ९, **क्रिया-गुणव्यपदेशाभावादसत्** वै॰ सू॰ ९ । १ इत्यादि प्रागसत्कार्योत्पत्तिव्याख्यानात् । § 2844

अत्राह--त्वयोक्तं **सर्वसिद्धान्तव्याघातोऽनुत्पादाभ्युपगमेन** इति, तदयुक्तम्, तिष्ठन्तु तावत् पुरुषादिवादाः, **साङ्ख्यानामेव** तावत् सत्कार्यवादित्वाद-

---

२८ न] पृ॰ ८६७ पं॰ १४ ॥
१ न] पृ॰ ८६७ पं॰ ११ ॥
३ अनाश्वासा] °दितिथात्वा°nayacakra-ms-ya ॥
५ अयुक्तेः] शून्यवद° nayacakra-ms-bhā । तुलना--पृ॰ ८६७ पं॰ २२ ॥
७ दित्युप] पृ॰ ८४६ पं॰ २१ ॥
१८ च] चेnayacakra-ms-bhā ॥
१८ न] नाम्न इती॰ प्र॰ ॥
१९ स्यात्] स्थितिरेवंnayacakra-ms-ya ॥

व्याघात इति । अत्र ब्रूमः, एतत् त्वन्मतं तावत् प्रत्युच्चारयामः--तद्यथा **--अथोच्येत--साङ्ख्यानामेवे**त्यादि । तस्योत्तरम् **--नाव्याघात** इत्यादि, **नाव्याघातो** व्याघात एव, द्विःप्रतिषेधस्य प्रकृत्यापत्तेः । कथमसत्कार्यानभ्युपगमात् ? इत्युच्यते— **प्रधानादीनां नित्यनिष्ठितत्वाभ्युपगमात्,** नित्यं निष्ठितमेव प्रधान-महदहंकारादिव्यक्ताव्यक्तज्ञाख्यं सर्वम् इत्यभ्युपगमादारम्भोऽभ्युपगतो भवति, आरम्भमन्तरेण क्रियाऽभावात् क्रियामन्तरेण च निष्ठानाभावात् । - /ms तदुपसंहृत्य साधनमाह **--अतस्तानी**त्यादि, तानि प्रधानादीनि **आरब्धान्येव, निष्ठितत्वात्, घटवत्,** घटनिष्ठान-क्रिया-ऽऽरम्भाणां लोकप्रसिद्धत्वादुदाहरण-सिद्धेः प्रधानादीनां तदुपनयसिद्धिः । एवमारब्धत्वात् कृतकत्वसिद्धिः, तथा कृतकत्वा[त्] पर्यवसानवन्त्यपि तस्मादाद्यन्तवन्तः प्रधानादयः । § 2845

**यत्त्वेवं न भवती**त्यादि वैधर्म्यदृष्टान्तः साधनान्तरं वा गतार्थमाद्यन्तवत्त्वाभावे खपुष्पवदसत्त्वापादनं प्रधानादीनाम्, **आदि**ग्रहणात् पुरुषादिष्वपि प्रसङ्गः समानचर्चः । § 2846

844/mj

अथ त्वेवमपि नैवाभ्युपगम्यते आरम्भादि ततो नित्यवृत्तत्वादनारब्धत्वादकृतकत्वादनिष्ठितमसदाकाशवत् । § 2847

नन्वाकाशं शुद्धपदवाच्यत्वाद् निर्वृत्तं निष्ठितं सदेव प्रमाणज्ञानवत् । कुतोऽस्य शुद्धपदता ? आङ् ईषदर्थ उपसर्गः, काशृ दीप्तौ पा. धा. ६४७, आकाशते मृगतृष्णिकावदाभासत इत्याकाशम् । यदि च खादिशुद्धपदार्थप्रतिपत्तिस्ततो विज्ञानमात्रमेवेदं सर्वमिति नाभ्युपगच्छेम । अस्माकं हि खादिशुद्धपदार्थानामपि विज्ञानमात्रता । अनेन सर्वे शब्दा असदर्था एव । § 2848

अथ मा भूद् विज्ञानमात्रताप्रसङ्ग इति प्रधानादिरादिः, तदेव कारणं तन्मात्रं चेदं § 2849

अनेनैव साधनेन गतार्थत्वेऽपि उपपत्त्यन्तरनिराकरणार्थमाकाशदृष्टान्तेनानिष्टापादनसाधनम्— **अथ त्वेवमपि नैवाभ्युपगम्यते आरम्भादी**त्यादि यावदा**काशव**दिति । § 2850

आह **--नन्वाकाश**मित्यादि आकाशासत्त्वासिद्धिप्रदर्शनार्थमनुमानम् । *शुद्धपदवाच्यत्वान्निर्वृत्तं निष्ठितं सदेव तत् प्रमाणज्ञानवदिति । अत्रोच्यते **--कुतोऽस्य शुद्धपदता ?** इति हेत्वसिद्ध्यापादनम्, तस्य समासपदतां दर्शयति **--आङीषदर्थ उपसर्गः, कासृश्रृ दीप्तौ** धातुः, **आकाशत** इत्याकाशम्, कुग-

२६ *] पृ॰ ८४६ पं॰ १९ ॥ --पा॰ धा॰ ६२३ ॥
२६ त्वा] ॰न्निर्वृत्तमनिष्ठितं प्र॰ ॥
२८ का] (?")कासृ शब्दकुत्सायाम्

**तिप्रादयः** पा० २ । २ । १८ इति समासत्वात् । कोऽस्यार्थः ? इति तत्प्रदर्शनार्थमाह **--मृगतृष्णिकावदाभासत इत्याकाशमिति**, यथा मृगतृष्णिका, जलार्थत्वेनासती तद्वदाभासते तथाकाशमप्यविद्यमानं विद्यमानवद् विज्ञानेन गृह्यते विज्ञानस्यैव तथा तथोत्पादात् । § 2851

स्यान्मतम्--ख-वियद्-व्योमादिशुद्धपदवाच्यत्वान्नासिद्धिरिति । एतच्चायुक्त-
- /ms म्, **यदि च खादि- शुद्धपदार्थेत्यादि** । यदि वयं शुद्धपदवाच्यमपि शब्दार्थं प्रतिपद्येमहि ततो विज्ञानमात्रमेवेदं सर्वम् इति नाभ्युपगच्छेम, न ब्रूयाम, अस्माकं हि वियद्-गगन-खा-ऽम्बर-व्योम-माया-शून्य-घट-पटादिशब्दानामपि विज्ञानव्यतिरिक्तो नैवार्थोऽस्ति इति सिद्धम्, तत्प्रतिपादनार्थं च यतिष्यामहे । § 2852

**अनेनेत्यादि** । एतेन खादिशुद्धपदार्थापलापेन सर्वे शब्दाः क्रिया-कारक-सम्बद्धार्थवाचिन एव इति नैरुक्ताभिमतानां व्युत्पत्तिपक्षे यादृच्छिकशब्दानां वाऽव्युत्पत्तिपक्षे डित्थादीनां नञादिप्रतिषेधसहितानां केवलानां वा न कश्चिद् वाच्योऽर्थोऽस्त्यन्यत्र विज्ञानाधाननिमित्तमात्रत्वादसदर्था एव सर्वशब्दा इति । § 2853

**अथ मा भूदित्यादि** । स्यान्मतम्--निष्ठितत्वादेर्विज्ञानमात्रताप्रसङ्गः, स मा भूदित्यन्यथाऽऽदिरिष्यते, कः ? **प्रधानादिरादिः** प्रधान-पुरुष-काल-स्व-
845/mj भावादि, तदेव च कारणम्, तन्मात्रं चेदं घट * * * *

* * *

कार्यम्, पूर्वप्रत्युपसंहारसमाहितत्वात् । ततो भूतानामेव सत्त्वमादिः ।

स सोपसंहारः किं नित्यः, अनित्यः ? यदि नित्यस्ततोऽकृतकत्वादनारब्धत्वादनिष्ठितत्वादसन् खपुष्पवत् । अथादिनित्यतायां दोषात् नित्यनिष्ठितमिष्यतेऽतः पूर्ववदेव सत्त्वानुपपत्तिः । अन्तनित्यतायामसत्त्वमेव ।

अथ नित्यत्वदोषदर्शनादादिरनित्य इष्यते स किं जातः अजातः ? यदि जातः, अनुत्पादस्तर्ह्यस्य, जातत्वात्, निर्वृत्तघटवत् । अथाजातः, तथाप्यनुत्पादः अजातत्वात् खपुष्पवत् । अनुत्पन्नत्वादसत् । जाताजातश्चेद् विरोधादसम्भव उभयदोषवत्त्वाच्च ।

* * *

पटादि कार्यम्, कस्मात् ? **पूर्वप्रत्युपसंहारसमाहितत्वात्**, कार्यात् प्रागपि तस्मिन्नेव प्रधानाद्यन्यतमकारणमात्रत्वे समाहिता एव विकारा उत्तरकालमपि तत्रैवान्तर्लीनाः, ततो भूतानां विद्यमानानामेव घटादीनां सत्त्वं नित्यत्वमादिः नाऽऽरम्भादिरिति । § 2854

---

३ त्वान्ना ] °न्न सिद्धि° प्र° ॥
६ खा ] °खापरं°nayacakra-ms-ya । °खापर° nayacakra-ms-bhā ॥
१६ * ] °संबंधार्थ°nayacakra-ms-ya ॥
१६ * ] निरुक्ता°nayacakra-ms-bhā ॥
१६ * ] कश्चिद्विस्त्यन्यत्रnayacakra-ms-ya ॥
१६ * ] °दशदर्थाnayacakra-ms-ya । °दर्था nayacakra-ms-bhā ॥
३० म्भा ] °म्भादितिnayacakra-ms-ya ॥

इत्यत्र पृच्छ्यसे --**स सोपसंहार** इत्यादि । स आदिः प्रधानादिकारणाख्यः सहोपसंहारेण किं नित्यः ? उताहोस्विदनित्यः ? इति निर्धार्यः । - /ms तत्र यदि नित्यस्तत आदिरेव न भवति अकृतत्वादनारब्धत्वात् । ततः किम् ? ततश्चानिष्ठितः, अनिष्ठितत्वादसन् खपुष्पवत् । § 2855

**अथाऽऽदिनित्यतायामि**त्यादि । एतद्दोषभयाद् नित्यनिष्ठितं पूर्वोत्तरतुल्यकालवृत्तीष्यतेऽतः पूर्वोक्त एव दोषः --**नित्यवृत्तत्वादनारब्धत्वादकृतकत्वादनिष्ठितं खपुष्पवदाकाशवद्वे**त्यादीति तदेवातिदिशति यावद् **विज्ञानमात्रार्थता,** पूर्ववदेव सत्त्वानुपपत्तिरिति । एवमुत्पत्तिनित्यत्वे स्थितिनित्यत्वे वाऽसत्त्वमुक्तम् । अन्तनित्यत्वं विनाशनित्यता, तस्यां **त्वन्तनित्यतायामसत्त्वमेव** । एवं तावदादेर्नित्यत्वे दोषः । § 2856

**अथ नित्यत्वे**त्यादि । आदेर्नित्यत्वे दोषं दृष्ट्वा तत्परिहारार्थमादिरनित्य इतीष्यते तत्र त्रयी गतिः--जातस्याजातस्य जाताजातस्य वा ? *किं जातः ? किमजातः ? इति विकल्पद्वयप्रश्नादेव तत्संयोगजस्य तृतीयस्य विकल्पस्य सिद्धेः । ***यदि जात** इत्यादिना द्वयोराद्यविकल्पयोरुत्पादाभावः, अनुत्पन्नत्वादसदिति गतार्थम् । **जाताजातश्चे**दिति तृतीयविकल्पस्य ***विरोधादसम्भवः** । किञ्च, **उभयदोषवत्त्वाच्च,** यो जातत्वे दोषो यश्चाजातत्वे ताभ्यां युक्तो जाताजातत्वपक्षोऽतस्त्याज्यः । एवमुत्पादे दोषाः । § 2857
846/mj

निष्ठायामपि त एव विकल्पाः । यदि निष्ठितो नितिष्ठति, न नितिष्ठति, निष्ठितत्वात्, निर्वृत्तघटवत् । अनिष्ठितोऽपि न नितिष्ठति, अनिष्ठितत्वादसत्त्वादकर्तृत्वात्, खपुष्पवत् । नोभयमुक्तवत् । § 2858

अन्तेऽपि किं विनष्टो विनश्यति अविनष्टो विनष्टाविनष्टोवा ? यदि विनष्टो विनश्यति, न विनश्यति, विनष्टत्वात्, विनष्टघटवत् । नाविनष्टोऽक्षतघटवत्, अभूतविनश्यद्भावत्वात् अक्षतघटवत् आकाशवद्वा । नोभयमुक्तवत् । इत्थमनुत्पन्नास्थिताविनष्टत्वात् खपुष्पवदभाव एव स्याद् वस्तु । § 2859

---

३१ स] पृ॰ ८६९ पं॰ ४ ॥
२ स] एवञ्चिह्नाङ्कितः ॰दसन् इत्यादि ॰नित्यत्वे इत्यन्तः पाठो nayacakra-ms-bhā प्रतौ नास्ति ॥
३ अ] पृ॰ ८७० पं॰ ३ ॥
४ त्वाद] पृ॰ ८४४ पं॰ १ ॥
६ पू] पूर्ववदेवास॰nayacakra-ms-ya ॥
१० *] पृ॰ ८४७ पं॰ ९ ॥
१२ *] पृ॰ ८४७ पं॰ ९ ॥
१३ *] पृ॰ ८४६ पं॰ ३ ॥
१४ दोष] ॰दोषवंधाच्चnayacakra-ms-bhā । ॰दोषबंधाच्च nayacakra-ms-ya ॥

अथोच्येत--किं न एताभ्यामाद्यन्ताभ्यां वस्तुनोऽस्वरूपाभ्यां विचारिताभ्याम् ? वस्तु विचार्यम् । एतौ हि वस्तुन आत्मलाभात् पूर्वोत्तरकालौ । तदभावेऽपि वस्तु भवितुमर्हत्येव तन्मध्ये । § 2860

*निष्ठायामपीत्यादि । किं निष्ठितो नितिष्ठति अनिष्ठितो निष्ठितानिष्ठितो वा ? इति त एव विकल्पाः, तेष्वपि त्रिषु दोषा उत्पादवदुक्तन्यायेन नीता एव यावद् **नोभयम् उक्तवदिति** । अनिष्ठितोऽसन्, असत्त्वादकर्ता, अकर्तृत्वाच्च खपुष्पवन्न नितिष्ठतीति वि[शेषः] शेषं गतार्थम् । § 2861

**अन्तेऽपीत्यादि** । विनाशेऽपि किं विनष्टो विनश्यति अविनष्टो विनष्टाविनष्टो वा ? **यदि विनष्टो विनश्यति** इतीष्यते इत्युपक्रम्य त्रिष्वपि विकल्पेषु यावद् **नोभयमुक्तवदिति** । **नाविनष्टोऽक्षतघटवदि**त्यस्य व्याख्यानम् --**अभूतविनश्यद्भावत्वात्**, अभूतोऽनुत्पन्नो विनश्यद्भावोऽस्येति अभूतविनश्यद्भावः, तस्मादभूतविनश्यद्भावत्वात् **अक्षतघटवदिति** । **आकाशवदिति**

- /ms वा अभूतविनश्यद्भावत्वात् इत्यस्यैव हेतोर्दृष्टान्तान्तरम्, अस्यानुगमप्रदर्शनं कृत्वा प्रसङ्गः कार्यः *शुद्धपदवाच्यत्वादित्यादिर्यावद् **विज्ञानमात्रतेत्यादि** । **नोभयमुक्तवत्** न विनष्टाविनष्टं विनश्यत्यसम्भवात्, असम्भवो विरोधादुभयदोषाच्चेति पूर्वोक्तन्यायानुसारेण । इत्थं नोत्पत्ति-स्थिति-भङ्गाः सिध्यन्ति, तदसिद्धेरनुत्पन्ना-ऽस्थिता-ऽविनष्टत्वात् खपुष्पवदभाव एव स्याद्वस्त्विति । § 2862

**अथोच्येत--किं नः ? इत्यादि** । स्यान्मतम्--किमेताभ्यामाद्यन्ताभ्यां वस्तुनोऽस्वरूपाभ्यां विचारिताभ्यां प्रयोजनम् ? वस्तु विचार्यम् । एतौ हि आद्यन्तौ वस्तुन आत्मलाभात् पूर्वोत्तरौ कालौ, वस्त्वात्मलाभात् पूर्वः काल आदिरुच्यते उत्तरोऽन्तः । तयोरभावेऽपि वस्तु भवितुमर्हत्येव तन्मध्ये, तस्मादस्ति वस्त्विति । § 2863

847/mj

तन्मध्ये मध्यं वा मध्यक्षणो वोभयमपि किं जातमजातं वा स्यात् ? यदि जातमनुत्पादस्तर्हि अस्य, जातत्वात्, निर्वृत्तघटवत् इत्यादि स एव ग्रन्थस्तुल्यदोषत्वात् । § 2864

---

३ *] पृ० ८६९ ॥
६ तीति] विशेषं गतार्थम्nayacakra-ms-bhā । विशेषं गतार्थम् nayacakra-ms-ya । नितिष्ठतीति, शेषं गतार्थम् इत्यपि पाठोऽत्र स्यात् ॥
७ विनाशेऽपि] किंचिन्नष्टोnayacakra-ms-ya ॥
९ ष्टोऽक्ष] ऽकृतघटव°nayacakra-ms-bhā ॥
१३ ङ्गः] कोर्थः प्र° ॥
१३ *] पृ० ८४४ पं० ३ ॥
१४ अ] पृ० ८४५ पं० ७ ॥
१६ सिद्धेर] पृ० ८४२ पं० २६ ॥

पूर्वोत्तरकालावपि न स्तः, विनष्टानुत्पन्नत्वात्, तदपेक्षत्वात् तन्मध्यवस्त्वभावः, दग्धेन्धनज्वालावत् । असत्तु भवति पूर्वोत्तरकालयोरसत्त्वात् खपुष्पवत् । § 2865

अथोच्येत--आदौ मध्येऽन्ते च कार्यं तत्त्वोपनिलयनात् प्रागसदेव, आदौ मध्ये च तदर्थं प्रवृत्तेः । तत्त्वोपनिलयनादुत्तरकालमस्ति, तदर्थमप्रवृत्तेः । एतदसत्यम्, तदसत्त्वानतिवृत्तेः । असदेव स्यात् तत्, आदिमध्यान्तेष्वप्यभूतत्वात्, खपुष्पवत् । § 2866

अत्र ब्रूमः **--तन्मध्ये मध्यं** **वे**त्यादि । तयोः पूर्वोत्तरकालयोर्मध्ये यत् तद्वस्तु भवितुमर्हतीति मन्यसे यो वा पूर्वोत्तरकालयोर्मध्यक्षणश्चिन्त्यते तदुभयमपि किं जातमजातं वा वस्तु स्यात् ? यदि जातमनुत्पादस्तर्ह्यस्य, जातत्वात्, *निर्वृत्तघटवदित्यादि स एव त्रिषु विकल्पेषु योज्यो दोषापादनग्रन्थस्तुल्यदोषत्वात् । § 2867

किञ्चान्यत्, यावपि च तौ कालौ पूर्वोत्तरौ तावपि न स्तस्त्वन्मतादपि विनष्टानुत्पन्नत्वात्, **तदभावे** तयोः कालयोरभावे **तदपेक्षत्वात् तन्मध्यवस्त्वभावः** । किमिव ? **दग्धेन्धनज्वालावत्** यथेन्धनाश्रया ज्वाला इन्धनापेक्षा - /ms भवन्ति इति सम्भाव्या अपि निर्दग्धे तस्मिन्निन्धने न सन्ति तदपेक्षत्वात् तदभावे तथा पूर्वोत्तरकालापेक्षम् मध्यम् इत्यभिमतं वस्तु तदपेक्षत्वात् तदभावे नास्तीति प्रसक्तमेव । यद्वा पूर्वोत्तरयोः कालयोर्नास्ति तस्य मध्येऽस्तित्वं कया युक्त्या सम्भाव्येत ? न सम्भाव्यमित्यभिप्रायः । **असत्तु भवती**त्यादि, अत्र साधनम्--असत् तत्, पूर्वोत्तरकालयोरसत्त्वात्, खपुष्पवदिति । § 2868

**अथोच्येते**त्यादि । **आदौ** आरम्भे **मध्ये** क्रियाकाले **अन्ते** **चो**त्पन्नमात्रे क्रियापरिसमाप्तौ **कार्यं** द्रव्यादि द्रव्यत्वादि**तत्त्वोपनिलयनात् प्रागसदेव** । कस्मात् ? **आदौ मध्ये च तदर्थं प्रवृत्तेः**, न हि तदर्थित्वं सति तस्मिन्नुपपद्यते । **तत्त्वोपनिलयनादुत्तरकालमस्ति,** कस्मात् ? **तदर्थमप्रवृत्ते**रुपरतक्रियत्वात्, न ह्यसति तस्मिंस्तदर्थी न प्रवर्तते । § 2869

---

७ काल] °योर्मध्यऽक्षण°nayacakra-ms-bhā ॥
८ जा] पृ° ८४५ पं° २० ॥
९ *] निवृर्त्त°nayacakra-ms-bhā ॥ निवृत्त° nayacakra-ms-ya ॥
९ एव] त्रिषु योज्योnayacakra-ms-ya ॥
१७ अ] असत्तु प्र° ॥
२० क्रियाका] °कालेते चो°nayacakra-ms-ya । °कालंते चो° nayacakra-ms-bhā ॥
२१ व्य] द्रव्यादि°nayacakra-ms-bhā ॥

अत्र ब्रूमः --**एतदसत्यम्, तदसत्त्वानतिवृत्तेः** । असदेव स्यात् पुनरपि तदादि-मध्या-ऽन्तेष्वप्यभूतत्वात् खपुष्पवदिति । एवं तावदनुत्पादादपि शून्याः सर्वभावाः । § 2870

१848/mj

सामग्रीदर्शनादपि । इह यावती संज्ञा घट इति पट इति रूपमिति वा सा सामग्रीमात्रमेव । का सामग्री ? भावानां भावान्तरं प्रति व्यापारः, यथा तन्तूनां पटं प्रति व्यापारः । तत्र च व्यापृतानामेकैको नावयवी, प्रत्येकमसत्त्वे च समुदितावप्यसत्त्वम् । § 2871

न तावद्धेतुषु प्रत्यये च सामग्री अस्ति, नापि तत्स्वरूपपृथक्त्वेषु प्रत्यक्षतः तत्सान्निध्य एव तदर्थप्रवृत्तेः घटपटवत् । यच्च येषु नास्ति स्वरूपेण तस्य सामग्र्यामपि कुतोऽस्तित्वम् ? न हि सिकताकणेष्वदृष्टं तोयं कुम्भेऽपि दृष्टम् । § 2872

इतश्च नास्ति वस्तु, **सामग्रीदर्शनादपि,** सामग्र्यां भावा दृश्यन्ते घटपटादयो न प्रत्येकं स्वरूपेण, यच्च स्वरूपेण नास्ति तस्य सामग्र्यामपि कुतोऽस्तित्वं सिकतातोयवत् ? इत्युपनयार्थो भविष्यति । तद्भावना --**इह** लोके **यावती**त्यादि । घटः इति संज्ञा कपालसामग्र्याम्, पटः इति तन्तुसामग्र्याम्, रूपम् इति तत्सन्ताने क्षणोत्पत्तिविनंष्टरूपसन्ताने, **वा**शब्दादन्यद्वा यत् किञ्चिद् रसादि मुष्टिपङ्क्त्यादि वा देश-कालभिन्नावयवसंहारमात्रं

- /ms **सामग्रीमात्रमेवेति** । **का सामग्री ?** उच्यते --**भावानां भावान्तरं प्रति व्यापारः** । तत्प्रदर्शनम् --**यथा तन्तूनां पटं प्रति व्यापारः,** अवयविनोऽवयवत्वेन व्याप्रियमाणा अवयवा एव तथा तथावस्थिताः सामग्री इत्युच्यन्ते, अवयववैकल्ये तदभावात् । **तत्र चे**त्यादि, इत्थम्भूतायां च सामग्र्यां व्यापृतानां तन्त्वाद्यवयवा[ना]मेकैकोऽवयवो नावयवी सम्भवति तच्छक्त्यभावात्, प्रत्येकमसत्त्वे च समुदितावप्यसत्त्वमित्यवयविनः सर्वथाप्यभाव एव स्यात् । § 2873

तद् भावयति --**न तावदि**त्यादि । हेतुप्रत्ययसामग्रीपृथग्भावेष्वसम्भवात् नास्ति, **हेतुषु** तन्तुषु पटो नास्ति, **प्रत्यये** निमित्तकारणेषु तुरी-वेम-

१. °त्वानिवृत्तेःnayacakra-ms-ya ॥

२६ ध्या] °ध्यान्तेष्वव्यभू° प्र° ॥
१२ ता] °तातोयावत् प्र° ॥
१२ इत्युप] पृ° ८४८ पं° २३ ॥
१४ त्तिविनंष्ट]
°विनंसृरूप°nayacakra-ms-ya ।
°विनंस्वरूप° nayacakra-ms-bhā ॥
१६ ग्रीमात्र]
°त्रमिवेतिnayacakra-ms-ya ॥
१९ अ]
अवयवैकल्येnayacakra-ms-ya ॥

शलाकादिषु च नास्ति, तस्मान्नास्ति **सामग्री** तदवयवीत्यर्थः । **नापि तत्स्व-रूपपृथक्त्वेषु प्रत्यक्षत** इति प्रत्यक्षेणैव हि प्रमाणेन तन्तुस्वरूपे तुर्यादिस्वरूपे वा पृथगनुपलब्धा सामग्री पटाख्या, अनुमीयतेऽपि च नास्ति इति, **त-त्सान्निध्य एव तदर्थप्रवृत्तेः**, सन्निहितेष्वेव हेतु-प्रत्ययेषु तन्तु-तुर्यादिषु पटार्थी पटो नास्ति इति मत्वा तदर्थप्रयतते, ततो नास्ति, किमिव ? **घट-पटवत्**, यथा घटे सन्निहितेऽपि पटार्थी पटो नास्ति इति मत्वा तदर्थं प्रवर्तते पटे वा सन्निहिते घटार्थी घटार्थम् । **यच्च येषु नास्तीस्त्युपनयो** गतार्थो यावत् **कुम्भेऽपि दृष्टं न हि** इति वर्तते । § 2874
१,२849/mj

ननु सिकताकणेषु प्रत्येकमदृष्टः कुम्भः सामग्र्यां दृष्टः । न, सामग्रीतुल्यत्वात् । अस्माभिर्यदि दृष्टः स्याद् नैवमुच्येत साम-ग्र्या अप्यभाव इति । नन्वेतदेव साध्यते--अस्ति सामग्रीति ।
§ 2875

अवयवास्तर्हि सन्तीति चेत्, न, आ रूपादिभ्योऽवयविन-श्चासत्त्वस्योक्तत्वात् । रूपादयस्तु रूपणादिनिरूपितविज्ञानसाराः, तेषां पृथक्त्वं हेतुत्वं च बुद्धौ वृत्तेः संघटते, बुद्धिव्यतिरेकेण स्वरूपाभावात् । § 2876

हेत्वाद्यभावे सामग्र्यभावाद् न सन्ति सर्वभावाः, इतरेतराश्र-यदोषाच्च । तथाऽदर्शनात् । § 2877

अत्राह **--ननु सिकताकणेषु प्रत्येकमदृष्टः कुम्भः सामग्र्यां दृष्ट** इत्य-नैकान्तिकदोषोद्भावनं परः कुर्यात्, कुम्भत्वस्य सिकताकणेषु प्रत्येकम-दृष्टस्य दर्शनादिति । अत्र ब्रूमः **--न, सामग्रीतुल्यत्वात्**, नानैकान्तिकः - /ms

---

१. हेतुप्रत्ययसामग्र्यां पृथग्भावेऽपि मद्वचो न यदि । ननु शून्यत्वं सिद्धं भावानामस्वभावत्वात् ॥ २१ ॥ यदि मद्वचो हे[तुषु] नास्ति महाभूतेषु सम्प्रयुक्तेषु विप्रयुक्तेषु वा, प्रत्ययेषु नास्ति, उरःकण्ठोष्ठजिह्वादन्ततालुनासिकमूर्धप्रभृतिषु प्र[यत्नेष्वपि नास्ति, नोभयसा]मग्र्यामस्ति हेतुप्रत्य-यसामग्रीविनिर्मुक्तं पृथग् वास्ति तस्मान्निःस्वभावावम्, निःस्वभावत्वाच्छून्यम् । एवं ननु शून्यत्वं सिद्धं निःस्वभावत्वादस्य मदीयवचसः । यथा चैतद् मद्वचनं निःस्वभावत्वाच्छून्यं तथा सर्वभावा निःस्वभावत्वाच्छून्या इति ।--इति नागार्जुनविरचितायां **स्वोपज्ञवृत्तिसमेतायां विग्रहव्यावर्तन्याम्** ॥

२. तुरि°nayacakra-ms-bhā ॥

---

२५ लाकादिषु ] °षु नास्तिnayacakra-ms-ya ॥
२५ त ] तत्स्वरूपपृथक्तसु प्र° । तुलना--पृ° ८४९ पं° २५ ॥
२८ एव ] एतदर्थ°nayacakra-ms-ya ॥
१ र्थ ] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
३ य ] पृ° ८४८ पं° ८ ॥
१७ अ ] अ ब्रूमःnayacakra-ms-ya ॥

प्रत्येकमसत्त्वात् समुदायेऽप्यसत् इति, यस्मात् सामग्रीसाध्यतयैव तुल्यः कुम्भोऽपि विपक्षाभिमतः साध्यत्वात् पक्ष एव, तस्यापि कुम्भपरिणामस्य समुदायत्वात् तस्माद्विपक्षासिद्धेरनैकान्तिकचोदनाभासं जात्युत्तरमिदम् । तद्व्याख्या **--अस्माभिर्यदि दृष्टः स्याद् नैवमुच्येत— सामग्र्या अप्यभाव इति,** तदेव स्मारयति प्रस्तुतम्, नन्वेतदेव साध्यते--अस्ति, नास्ति सामग्री इति तस्यैवोपन्यासात् तद्विपक्षाभिमत्याऽनैकान्तिकत्वचोदनं पाठमात्रमेतत्--प्रत्येकमदृष्टस्य सिकतासु कुम्भस्य दर्शनमिति । एवं तावत् सामग्री नास्तीति प्रतिपादितम् । § 2878

**अवयवास्तर्हि सन्तीति चेत्,** स्यान्मतम्--पटस्य तन्तवोऽवयवाः सन्तीति । **तन्न,** कस्मात् ? **आ रूपादिभ्योऽवयविनश्चासत्त्वस्योक्तत्वात्,** तद्यथा तन्तवोंऽशुषु, अंशवस्तुटिषु, तुटयः पक्ष्मसु, पक्ष्माणि स्वावयवेषु न सन्ति इत्यदि यावत् परमाणुशो विभागः तावदवयव्येव । परमाणुरविभागत्वाद् निरवयवः सन्निति चेत्, सोऽपि रूप-रस-गन्ध-स्पर्शभेदेनाऽवयव्येव । एवं तर्हि रूपादयोऽवयवा एव नावयविन इति चेत्, तेऽपि न स्वतो रूपादित्वं लभन्ते, यस्माद् **रूपादयस्तु रूपणादिनिरूपितविज्ञानसाराः,** रूप्यत इति रूपम्, रस्यत इति रसः इत्यादिविज्ञानेनैव निरूप्यन्ते रूपादयः, तत्स्वरूपं विज्ञानेन सह प्रकल्पते । तत्र रूपादीनां परस्परतः पृथक्त्वं हेतुत्वं च बुद्धौ वृत्तेः सङ्घटते, न तस्यामवृत्तेः स्वात्मनैव । [न] तस्माद् बहिरस्तित्वं जनयितुमर्हतस्ते हेतु-पृथक्त्वे बुद्धिव्यतिरेकेण स्वरूपाभावात् । § 2879

- /ms

तदुपसंहृत्याह **--हेत्वाद्यभावे सामग्र्यभावात्,** हेतु-प्रत्यय-स्वरूपपृथक्त्वानामभावे रूपादीनां का सामग्री ? सामग्र्यभावे का द्रव्यता ? इति द्रव्याभावः, द्रव्याभावे सर्वाभावप्रसिद्धिः । तस्मादयुक्तमुक्तम्--अवयवी सामग्री विद्यते, अवयवा एव वा सन्तीति । § 2880

850/mj

सर्वथाप्ययुक्तयः प्रत्यक्षत उपलभ्यन्ते तथापि न सन्ति तस्य दर्शनस्यासम्भवात् । तदपि च दर्शनं नास्त्येव । यावद्दृश्यं तावत् परभागः । आराद्भाग एव दृश्यते, न परमध्यभागौ । तस्माददर्शनमेव वस्तुनः, न ह्याराद्भागमात्रमेव वस्तु । § 2881

१९ प] °रिमाणस्यnayacakra-ms-bhā ॥
२२ न] नन्वेत साध्यतेnayacakra-ms-ya ॥
६ प] पक्ष्मादिnayacakra-ms-ya ॥
१२ स] सहnayacakra-ms-ya प्रतौ नास्ति ॥
१२ प्र] प्रकल्प्यतेnayacakra-ms-bhā ॥
१५ ग्र्य] °ग्र्याभा° प्र° ॥
१७ द्र] द्रव्याभावःnayacakra-ms-ya प्रतौ नास्ति ॥
१७ मुक्त] °मुक्तवयवीnayacakra-ms-ya ॥

अथ मतम्--आराद्भागस्तावद् ग्रहीष्यते नियमात् प्रत्यक्षतः तथा मध्यपरभागावपि ग्रहीष्येते । न, तत्रापि त्रिभागत्वतुल्यत्वात् । § 2882

किञ्चान्यत् --**इतरेतराश्रयदोषाच्च,** अवयविसद्भावेऽवयवास्तदवयवत्वात् सिध्यन्ति हेतुत्वाच्च, तेषु चावयवेषु सत्सु तदवयवित्वात् कार्यत्वादवयवी सिध्यतीति तदिदमितरेतराश्रयम्, इतरेतराश्रयाणि च न प्रकल्पन्ते तद्यथा--नौर्नावि बद्धा नेतरत्राणायेति । एवं सामग्रीदर्शनादपि न सन्ति सर्वभावाः । § 2883

इतश्च न सन्ति **तथाऽदर्शनात्,** अदर्शनादपि तेनैव प्रकारेण न सन्ति । § 2884

तत्र परमताशङ्का --**सर्वथाप्ययुक्तय** इत्यादि । न सन्ति युक्तयो येषामर्थानामयुक्त[य]स्ते यद्यपि युक्तितो नोपलभ्यन्ते **प्रत्यक्षत उपलभ्यन्ते** दृश्यन्ते, दृश्यमानाश्च निराकर्तुं न शक्यन्ते, अतो दर्शनावगृहीतसद्भावाः सन्तोऽर्थाः कल्पयितव्या इति यदि कल्प्येरं**स्तथापि न सन्ति, तस्य दर्शनस्यासम्भवात्** । तद्व्याख्या --**तदपि च दर्शनं नास्त्येव** । कथं दर्शनं नास्ति ? उच्यते--यतो **याव**दित्यादि, यावद्दृश्यं तावत् परभागः, दृश्याभिमतस्य हि - /ms वस्तुन आराद्भाग एव दृश्यते, न परमध्यभागौ दृश्येते, तैश्चावश्यमारान्मध्यपरभागैर्भवितव्यं वस्तुनः, तत्र यद्याराद्भागो दृश्यत इति प्रत्यक्ष[त्व]मिष्यते पर-मध्यभागयोरदर्शनादप्रत्यक्षता तस्य किं नेष्यते ? तस्माददर्शनमेव वस्तुनः, न ह्याराद्भागमात्रमेव वस्त्विति । § 2885

**अथ मत**मित्यादि । स्यादियं ते मतिः--आराद्भागस्तावद् ग्रहीष्यते नियमात् प्रत्यक्षतः, तथा मध्य-परभागावप्यनुमानात् कालान्तरे प्रत्यक्षतो ग्रहीष्येते, तस्मान्नादर्शन[मे]वेति । § 2886

अत्र ब्रूमः --**न, तत्रापि त्रिभागत्वतुल्यत्वात्,** आराद्भागेऽपि दृश्याभिमते त्रयो भागाः सम्भवन्त्येव आरान्मध्य-पराख्याः सावयवत्वात्, विभज्यमानं हि सावयवं त्रिधा व्यवतिष्ठते ततस्तथात्रापि पर-मध्यभागादर्शनं त्रिभागतुल्यत्वात् समस्तवस्त्वदर्शनवदिति । एवं तावत् सावयवस्य त्रिभागत्वाद् दर्शनासम्भवः । § 2887

१851/mj

१. दृश्यन्तेnayacakra-ms-bhā प्रतौ नास्ति ॥

२६ दोषा] °षाश्च प्र° ॥
२७ चा] वावय° प्र° ॥
१ राश्र] °श्रयत्वम्nayacakra-ms-ya ॥
१ क] प्रकल्प्यन्ते प्र° । तुलना--पृ° ३४ पं° ९ ॥
९ क] कल्पेरं°nayacakra-ms-ya ॥
१८ स्मान्नाद] °दर्शनतेतिnayacakra-ms-ya । तुलना--पं° १४ ॥
२२ व] °वस्तुद°nayacakra-ms-bhā ॥
२२ त्रिभाग] °गस्यादर्श°nayacakra-ms-ya ॥

अथ मतमभागं द्रक्ष्यते परमाणवस्तर्हि गृह्यन्ताम् । तेष्वदृश्यमानेषु भागवद् दृश्यत इति का कथा, भागवति वा परमाणुसंघातेऽगृह्यमाणे तदंशो निर्भागपरमाणुर्दृश्यत इति ? यदा च परमाणुः [न गृह्यते तदा कुतो भागवान् ग्रहीष्यते भागवति वाऽगृह्यमाणे तदंशा निर्भागपरमाणवो] ग्रहीष्यन्ते ?
§ 2888

अयं तु व्यवहारो विज्ञानोत्थापित एव । विज्ञानमसत्यपि बाह्यार्थे तथा तथा विपरिवर्तमानमन्तरेव बाह्यार्थवदाभासते विज्ञानत्वात् स्वप्नविज्ञानवत् । § 2889

तत्रापि जाग्रद्गृहीतोऽर्थः कारणमिति चेत्, तत्र च तत्र च विज्ञानमेव कारणम् । यदि वाऽविज्ञानोऽर्थः कश्चिदस्ति स दर्श्यताम् । स्वप्ने त्वनर्थकं विज्ञानमेवार्थः । § 2890

**अथ मतमभागं द्रक्ष्यत** इति । यन्निर्विभागमाराद्भागे तन्मात्रं गृह्यत इति चेन्मन्यसे ततश्च तेऽनिष्टमिदम् **--परमाणवस्तर्हि गृह्यन्ताम्,** न
- /ms हि परमाणवोऽतीन्द्रियाः सन्तः कस्यचित् दृश्याः इतीष्टाः, **तेष्वदृश्यमानेषु** निर्भागेषु **भागवद् दृश्यत इति का कथा** भागान्तरादृश्यत्वात् सिकतातैलवद्वा प्रत्येकं दर्शनाभावे तत्समुदायेऽपि दर्शनाभावात् ? **भागवति वा परमाणुसङ्घाते** परमध्यभागाग्रहणाद**गृह्यमाणे तदंशो** निर्भागपरमाणु**र्द्रक्ष्यत इति का कथा** इत्य[नु]वर्तनान्नास्ति दर्शनम् । अस्यार्थद्वयस्य व्याख्या **--यदा च परमाणुरित्यादि ग्रहीष्यन्त** इति गतार्थम्, **कुतः** इत्यनुवर्तनात् । § 2891

दृश्य-दर्शनव्यवहारस्तर्हि कथमसति दृश्ये सम्भवति ? इति चेत्, उच्यते **--अयं तु व्यवहारो विज्ञानोत्थापित एव** । विज्ञानं चासत्यपि बाह्येऽर्थे तेन तेनाकारेण विपरिवर्तमानमन्तरेव बाह्यार्थवदाभासते वस्तुत्वाद् विज्ञानत्वात् । किमिव ? **स्वप्नवत्,** स्वप्ने इव स्वप्नवत्, यथा सुप्तः संवृतेऽवकाशेऽप्यसम्भविनं हस्तियूथ-पर्वताद्याकारं पश्यति असत्येव हस्तियूथादिबाह्येऽर्थे तथा तथान्तर्विज्ञानपरिणामात् एवं जाग्रत्स्वस्थरूपादिविज्ञानान्यपि अन्तर्वर्त्तिबहिरर्थाभासानि, न कश्चित् तद्व्यतिरिक्तोऽर्थ इति । यथोक्तम्-- § 2892

---

९ म] मतभागं॰nayacakra-ms-ya ॥
१६ नुव] ॰वर्तमानात्nayacakra-ms-bhā ॥
१७ स] संभवीति चेत्nayacakra-ms-ya ॥
१८ चा] च सत्य॰nayacakra-ms-ya । व सत्य॰ nayacakra-ms-bhā ॥
२१ त] तथावध्यन्तर्वि॰nayacakra-ms-bhā । तथावप्यन्तर्वि॰ nayacakra-ms-ya ॥

> द्यौः क्षमा वायुराकाशं सागराः सरितो दिशः ।
> अन्तःकरणतत्त्वस्य भागा बहिरवस्थिताः ॥ वाक्यप॰ ३ । ७ । ४१ इति ।§ 2894

**तत्रापि जाग्रद्गृहीतोऽर्थः कारणमिति चेत्,** स्वप्नेऽपि हि दृष्ट-श्रुता-ऽनुभूत-परिकल्पितसुखदुःखादि-रूप-रसाद्याकारमेव विज्ञानमुत्पद्यते नात्यन्तानुपलब्धखपुष्पाद्याकारम्, तस्माद् बाह्यार्थ एव कारणमिति चेन्मन्यसे, अत्र - /ms वयं ब्रूमः **--तत्र च तत्र च विज्ञानमेव कारणम्,** स्वप्ने जागरणे च 852/mj

* * *

अत्र च विज्ञानं शब्दार्थः । तच्च कल्पनामात्रमेव । बुद्ध्यनुसंहृतिर्वाक्यार्थः ।

अयं च विकल्प एवम्भूतैकदेशः । परि समन्तादवगमः, नैःस्वाभाव्यात् परितोऽवगमोऽवगममात्रम् । सोऽस्यास्तीति मतिः पर्यवास्तिकोऽयं नयः । भावोऽपि भाव एव । उपयोग एव ।

* * *

विज्ञानेनैव उत्थापितोऽर्थः अर्थः इति शक्यते प्रतिपत्तुम्, नान्यथा । *विज्ञानेनाविनाभावितस्यार्थस्य जागरणेऽपि स्वरूपाभावादनु[प]लम्भे कुतः पुनः स्वप्नकारणत्वम् ? तत आह **--यदि वाऽविज्ञानोऽर्थः कश्चिदस्ति स दर्श्यताम्,** त्वया ज्ञानेन प्रकल्पितो न शक्यो दर्शयितुमर्थ इत्यभिप्रायः । मया पुनः शक्यतेऽर्थेन बाह्येन [विना] विज्ञानमेवार्थ इति, तद्यथा **--स्वप्ने त्वनर्थकं विज्ञानमेवार्थ** इति दर्श्यते । तस्मात् स्वपज्जाग्रदवस्थयोरप्यव्यभिचारि विज्ञानमेवार्थ इति न्याय्या कल्पना । § 2895

अत्र नये कः शब्दार्थः ? इत्यत्र ब्रूमः **--अत्र च विज्ञानं शब्दार्थः,** विज्ञानमेव हि शब्दो वाचकाभिमतो विज्ञानोत्थापितः, तदुपलक्ष्योऽपि रूप-रस-घट-पटादिर्बाह्यो वाच्यो विज्ञानमेव, यथोक्तम् --***विज्ञप्तिमात्रमेवेदं भो जिनपुत्र यदिदं त्रैधातुकम्** इत्यादि ।

> यदन्तर्ज्ञानरूपं [तद्] बहिर्वदवभासते ।
> सोऽर्थो विज्ञानरूपत्वा[त् त]त्प्रत्ययतयापि च ॥ आल॰ परी॰ । ६ ।§ 2898

---

२४ द्यौः] दृश्यतां पृ॰ १०५ पं॰ २२, टिपृ॰ ५० पं॰ ४ ॥
२ त] तत्र च विज्ञा॰nayacakra-ms-bhā ॥
२ जा] जागरणकारणे चnayacakra-ms-ya ॥
१० *] विज्ञानेन विनाभावितस्या॰ ? ॥
११ य] यदि चाविज्ञानो ? ॥
१८ टा] ॰टादिबा॰nayacakra-ms-ya ॥
१८ विज्ञान] ॰नमेव चnayacakra-ms-bhā ॥
१८ *] टिपृ॰ ५० पं॰ १२ ॥ महायाने त्रैधातुकं विज्ञप्तिमात्रं व्यवस्थाप्यते । चित्तमात्रं भो जिनपुत्रा यदुत त्रैधातुकम् इति सूत्रात् । चित्तं मनो विज्ञानं विज्ञप्तिश्चेति पर्यायाः । चित्तमत्र ससंप्रयोगमभिप्रेतम् । मात्रमित्यर्थप्रतिषेधार्थम् । इति **विंशतिकाविज्ञप्तिमात्रतासिद्धेः** वसुबन्धुरचितायां स्ववृत्तौ ॥

इत्यादि । एवं तर्हि प्रमाण-प्रमाणाभासाविशेष इति चेत्, इष्यत एतत्, यस्मात् तच्च विज्ञानं कल्पना कल्पनामात्रमेव, अनियतदेश-काला-ऽऽकार-निमित्त-नैमित्तिकत्वाज्जाग्रदवस्थाभिमतविज्ञानस्यापि सुप्त-तैमिरिकादिविज्ञानवदप्रामाण्यात् । एष पदार्थः । § 2899

वाक्यार्थस्तर्हि कः ? उच्यते --***बुद्ध्यनुसंहृतिर्वाक्यार्थः**, विज्ञानस्यैव
- /ms पौर्वापर्यार्थाभासवि- ज्ञानानुसंहारेण सम्बन्धनविज्ञानं वाक्यं वाक्यार्थश्चेति । § 2900

**अयं च विकल्प एवम्भूतैकदेशः** । शतधा भिन्नस्य एवम्भूतस्यैकदेशोऽयं नयः । तस्य चैवम्भूतस्य पर्यवास्तिकभेदत्वादक्षरार्थो गमयितव्यः पर्यवास्तिकः इत्यत आह **--परि समन्तादवगमः**, परिरुपसर्गः समन्तादर्थः, अवतिर्धातुरवगमार्थः, यथाऽऽह **--अव रक्षण-गति[-कान्ति]-प्रीति-तृप्त्य-वगमनप्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दहन-भाव-वृद्धिषु** पा॰ धा॰ ६०॰ इ[त्य]त्रावगमस्य विवक्षितत्वात् **नैःस्वाभाव्यात् परितोऽवगमः** परीक्ष्यमाणस्य
853/mj बाह्यार्थस्य विज्ञान

* * *

द्रव्यशब्दश्चैष षड्वपि द्रुर्गतिः तस्या विकारो द्रव्यमिति तथा तथा प्राग् व्याख्यातो यथादर्शनं तथागतैः ।

उपनिबन्धनमस्य से किं तं भावक्खंधे ? भावक्खंधे दुविहे पण्णत्ते, तंजहा--आगमतो अ

* * *

व्यतिरिक्तस्य सर्वयुक्तिदिक्तः स्वभावाभावा**दवगममात्रम्** विज्ञानमात्रमेवेत्यर्थः । **सोऽस्यास्तीति मतिरस्येति** स पर्यवो यस्यास्तीति मतिः स नयः, पर्यवोऽतीतः षड्वकारोऽपि, **अस्ति नास्ति दिष्टं मतिः** पा॰ ४ । ४ । ६० इति ठक्प्रत्ययान्तरूपसिद्धेः पर्यव एवास्ति इति मन्यमानः पर्यवास्तिकोऽयं नयः । § 2901

स च भावोऽर्थः शब्दो[ऽ]न्यवाच्याभिमतं विज्ञानलक्षणमेव वस्त्वित्यत आह **--भावोऽपि भाव एव**, भवतीति भावो घटपटादि द्रव्यगुण-कर्मादि

२३ क] विज्ञानं कल्पनामात्रमेव इत्यपि पाठोऽत्र स्यात् ॥
२४ त्वाज्जा]
°ज्जाग्रदवस्थभि°nayacakra-ms-ya ।
°ज्जाग्रत्स्वस्थभि°
nayacakra-ms-bhā ।
°ज्जाग्रत्स्वस्थाभि° इत्यपि पाठः समीचीनो भाति, दृश्यतां पृ॰ ८५१ पं॰ २० ॥
१ *] पृ॰ ४४८ टि॰ २ ॥
९ द] दृश्यतां पृ॰ ७६३ पं॰ १२--१४ । टिपृ॰ ९४ पं॰ १८ ॥
१७ युक्तिदिक्तः]
°रिक्तःnayacakra-ms-ya ॥
१८ र] अस्य इति पदेन सोऽस्यास्ति इत्यत्र विद्यमानः अस्य इत्यंशः परामृश्यत इति भाति ॥
१९ प] पर्यवास्तिकोऽतीतः ? ॥
१९ अ] पृ॰ ४४६ टि॰ ५ ॥
२२ वा]
°वाद्याभि°nayacakra-ms-bhā ।
शब्दान्यवाच्याभिमतम् इति
शब्दान्यबाह्याभिमतम् इति वा पाठोऽप्यत्र भवेत् ॥
२२ ण]
°णमेवस्त्वि°nayacakra-ms-bhā ॥

वा इति मा ग्रहीदिति **भाव एव** उपयोगो भावो न द्रव्यादीति । स च भावः क्षायिकः क्षायोपशमिक औपशमिकः पारिणामिको वा, स चोप- - /ms योग एव साकारोऽनाकारो वा प्रमाण-प्रमाणाभासादिविकल्पशून्यः । तस्मात् पर्यवास्तिकनयभेद एवम्भूतैकदेशोऽत्यन्तविशुद्धविज्ञानपर्ययमात्रग्राही नयोऽयमिति । § 2902

यथा विध्यादिविकल्पेषु आद्येषु षट्सु द्रव्यास्तिकेषु पर्यवशब्दो द्रव्यप्राधान्यात् तदर्थत्वेन व्याख्यातस्तथेहाप्यारातीयेषु उभयोभयादिविकल्पेषु द्रव्यशब्दः पर्यवप्राधान्यात् तदर्थत्वेन गमयितव्य इत्यत आह--**द्रव्यशब्दश्चेष षट्स्वपी**त्यादि । *__द्रुगतिरिति द्रु द्रु गतौ__ पा० धा० ९४४-९४५, द्रुशब्दो गत्यर्थः, **तस्या गतेर्विकारे यत्प्रत्यये** कृते द्रव्यम् इति रूपं भवति । द्रव्यमेवार्थो द्रव्यार्थः । स पुन**स्तथा तथा** तेन तेन प्रकारेणातीतोभयोभयादिविकल्पेषु प्राग्व्याख्यातः यद् यद् दर्शनं **यथादर्शनं** तेषां षण्णां स्वेन स्वेन दर्शनेन पर्यायार्थ एव स स षड्विकल्पोऽपि **तथागतेः** तथा तथा परितो गमनात् । § 2903

इति व्याकरणोपसंहारः, आगमभावस्कन्धस्योपयोगलक्षणस्य विज्ञानस्वरूपमात्रत्वा (Edtext outside numbered paragraph)त्, **आदि**ग्रहणाच्छ्रुतमावश्यकं सामायिकमन्यद्वा नामादिनिक्षेपानुक्रमेणाधिगमनीयं यत् किञ्चित् तत् सर्वमागमत उपयोग एव ज्ञानमेवेत्यर्थः । § 2904

किमेतत् स्वाभिप्रायविवरणमात्रम् ? आहोस्विदस्य दर्शनस्य उपनिबन्धनमार्षमप्यस्ति ? इत्यत्रोच्यते--अस्त्युप**निबन्धनमस्य, से किं तं भावक्खंधे ?** इति प्रश्नोपक्रमो ग्रन्थो यावत्

नो+आगमतो अ । से किं तं आगमतो भावक्खंधे आगमतो भावक्खंधे जाण+ए उव+उत्ते । से त्तं आगमतो भावक्खंधे अनुयोगद्वारसू० ५४--५५ इत्यादि ।

अयं नियमस्यापि क्षणिकवादस्य नियमः--तदपि वस्तु विज्ञानमेव ।

इति नियमनियमभङ्गो नाम द्वादशो भङ्गो द्वादशारनयचक्रस्य ।

* * *

त्तं आगमतो भावक्खंधे**से** 854/mj

---

२ थेहाप्या] ०प्यागती० प्र० ॥
४ *] टिपृ० ११५ पं० ११ ॥
५ त] टिपृ० १६ पं० ३०, टिपृ० ५२ पं० ३२ ॥
९ ना] ०नाक्षिमेतत्nayacakra-ms-bhā । ०नाक्षमेतत् nayacakra-ms-ya ॥
११ से] अथ भावस्कन्धनिरूपणार्थमाह **--से किं तं भावखंधे ? भावखंधे दुविहे पण्णत्ते तंजहा--आगम+ओ अ नो+आगम+ओ अ ।** अत्रोत्तरं भावखंधे दुविहे इत्यादि । भावश्चासौ स्कन्धश्च भावस्कन्धः, भावमाश्रित्य वा स्कन्धो भावस्कन्धः । स च द्विविधः प्रज्ञप्तः तद्यथा--आगमतश्च नो+आगमतश्च । **से किं तं आगम+ओ भावखंधे ? आगम+ओ भावखंधे जाण+ए उव+उत्ते । से तं आगम+ओ भावखंधे ।** तत्रागमतः स्कन्धपदार्थज्ञस्तत्र चोपयुक्तः तदुपयोगानन्यत्वाद् भावस्कन्धः । इति मलधारिहेमचन्द्रसूरिविरचितायाम् **अनुयोगद्वार**सूत्रवृत्तौ ॥

* * *

नो+आगमतो अ । से किं तं आगमतो भावक्खंधे आगमतो भावक्खंधे जाण+ए उव+उत्ते । से त्तं आगमतो भावक्खंधे अनुयोगद्वारसू॰ ५४--५५ इत्यादि ।

अयं नियमस्यापि क्षणिकवादस्य नियमः--तदपि वस्तु विज्ञानमेव ।

इति नियमनियमभङ्गो नाम द्वादशो भङ्गो द्वादशारनयचक्रस्य ।

* * *

त्तं आगमतो भावक्खंधे

**अयं नियमस्यापि क्षणिकवादस्य**क्षणिकमेव वस्तु इत्यस्यापि दर्शनस्य **नियमः--तदपि** क्षणिकं **वस्तु विज्ञानमेव,** न रूपादि तद्व्यतिरिक्तं बाह्यमस्ति, - /ms किं तर्हि ? विज्ञानान्तर्विपरिणाम- विजृम्भितमात्रमेवेति **नियमनियमभङ्गो नामा**ऽऽदितो विधिभङ्गादारभ्य गम्यमाने **द्वादशो भङ्गो द्वादशारनयचक्रस्य** श्रीमन्**मल्लवादि**कृतस्य टीकायां श्रीमत्**सिंहसूरि**गणिरचितायां समाप्तः ॥ § 2905

# १३ अथ द्वादशारान्तरम् ।

855/mj

ओँ अर्हँ § 2906

सद्गुरुभ्यो नमः § 2907

एतदपि पूर्ववदेवैकान्तत्वादयुक्तम्, सम्भविविकल्पानुपपत्तेः । § 2908

एवं ब्रुवत एवं विज्ञानवचसी निःस्वभावे । § 2909

अथा मा भूदयं दोष इति सस्वभावे विज्ञान-वचसी अभ्युपगच्छसि, सर्वं निःस्वभावमित्यभ्युपगमविरोधः । वचसोऽपि सस्वभावत्वे न तर्हि सर्वं निःस्वभावमिति स्ववचनविरोधश्च दोषः । § 2910

विध्यादिसर्वभङ्गात्मकैकवृत्तिसम्यग्दर्शनाधिकारे प्रत्येकवृत्तिमिथ्यादर्शनत्वापादनार्थं प्रवृत्तत्वादाह --**एतदपि पूर्ववदेवैकान्तत्वादयुक्तम्,** यथा क्षणिकमेव रूपादिसमुदायमेव [अ]वक्तव्यमेव सामान्य-विशेषैका-ऽन्यत्वादीनीती

---

७ ग] गण्यमाने ? ॥

१२ मुदा] ॰दायमेव वक्तव्यमेव सामान्यविशेषैकान्यत्वा॰nayacakra-ms-bhā । ॰दायमेव सामान्यविशेषैन्यत्वा॰ nayacakra-ms-ya । ॰दाय एव वक्तव्यमेवावक्तव्यमेव इत्यपि पाठोऽत्र सम्भाव्यते ॥

१२ सामान्य] ॰विशेषैन्यत्वा॰nayacakra-ms-ya ॥

?त्येकान्तवादानामयुक्तत्वमेकान्तत्वात्, युक्तत्वे वा जैनेन्द्रत्वमनेकान्तप्रतिष्ठग-तित्वाद्वेत्युक्तं तथैतदपि सर्वं निःस्वभावम् इति मतम् । कस्मात् ? **सम्भ-विविकल्पानुपपत्तेः**, अस्मिन्नपि मते ये विकल्पाः सम्भवन्ति सङ्ग्रहेण विज्ञान-वचसोर्नैःस्वाभाव्यं स्वाभाव्यं वा इत्यनयोरेव भेदा वक्ष्यमाणास्ते सर्वथा नोप-पद्यन्ते, तदनुपपत्तेरस्यापि मतस्यायुक्तिः । अतो जैनकल्पितानेकान्तरूपत्वं वस्तुनः श्रेय इत्युपसंहारो भविष्यति । § 2911

तद्यथा --एवं सर्वं निःस्वभावमिति **ब्रुवतो**ऽतीतासिद्ध्यादियुक्तिप्रकारेण तव इति प्रत्युच्चारणं प्रथमैवंशब्दात् । द्वितीयैवंशब्दाद् विज्ञान-वचसोरपि त्वयोक्तयोः सर्वान्तःपातित्वादविशेष्य सर्वं निःस्वभावम् इत्युक्तत्वाद् विज्ञान- - /ms
तत्त्वाद्यतिप्रसक्तं **विज्ञान-वचसी निःस्वभावे** इत्येतद् वचः, अनिष्टं च तद् विज्ञान-वचसोरप्रत्यायनप्रसङ्गात् । यदा हि विज्ञानमसत् तदा निःस्वभावमिदं सर्वम् इत्यनिश्चितम् स्वयमनिश्चित्यास्मान् प्रतिपिपादयिषतस्ते पक्षादिसाध-नवचनासत्त्वं च । तस्मात् परप्रत्यायनमयुक्तम् विज्ञानवचसोर्निश्चितप-क्षादित्वेनाभूतत्वात् उन्मत्तविज्ञान-प्रलापवदिति निःस्वभावविकल्पो ज्ञान-व-चसोः सर्ववस्तुनैःस्वाभाव्यं व्यावर्तयतीति दोषः । § 2912

**अथ मा भू**दित्यादि । एतद्दोषभयात् सस्वभावे विज्ञानवचसी त्वदीये चेदभ्युपगच्छसि सर्वं निःस्वभावम् इत्यस्याभ्युपगमस्य विरोधः, केन ? ज्ञान-वचन[स]स्वभावत्वाभ्युपगमेनेत्यभ्युपगमविरोधः 856/mj

* * *

एवं च घटाद्यपि सत्, व्यवहारवृत्तत्वात्, तद्वाक्यवत् । तच्छून्यत्वे तु प्रत्य-क्षादिविरोधाः । सर्वनैःस्वाभाव्ये तु प्रत्यक्षादिविरोधाः स्फुटा एव । सर्वशून्य-वादगतपक्षधर्माद्यभावश्च न साध्यः ।

अपि च विज्ञानाभ्युपगमाद् विज्ञानमात्रमेवेदं सर्वम्, सर्वस्य सतो विज्ञानलक्षणत्वात् । स च पुरुष एव ज्ञः । तन्मयं चेदम् । यथोक्तं प्राक्--

* * *

प्रतिज्ञादोषः । न केवलमभ्युपगमविरोध एव ज्ञानविषयः, वचसोऽपि प-क्षादिलक्षणस्यान्ते सस्वभावत्वे यत् प्रागुक्तं तन्न तर्हि सर्वं निःस्वभावम्, इदानीं सस्वभावत्वाभ्युपगमात् **इति स्ववचनविरोधश्च दोषः, इति**शब्दस्य हेत्वर्थत्वात् । इत्थं साधन-दूषण-प्रतिपाद्य-प्रतिपादनव्यवहारमार्गानुपातिनः सतस्तेऽनुमान-[आगम-]लोकविरोधा अपीत्यत आह-- § 2913

**एवं च घटाद्यपि स**दिति प्रतिज्ञायते त्वां प्रत्यसिद्धत्वात् सर्वलोकप्र-सिद्धमपि । अनन्तरोक्तसस्वभावत्वे विज्ञान-वचसोः इति स्मारयति **एवंश-**

६ व ] वरोनिष्टं प्र॰ ॥
१३ दीये ] चेदभ्युप॰ प्र॰ ॥
२२ क्षादिल ] लक्षणंस्यातेnayacakra-ms-bhā । ॰लक्षणस्याते nayacakra-ms-ya । ॰लक्षणस्य ते ? ॥
२४ स्य ] हेतत्वात्nayacakra-ms-ya ॥
२५ लोक ] ॰केविरोधा आपीत्यत आह nayacakra-ms-bhā । ॰कविरोधापीत्यताह nayacakra-ms-ya । ऽनुमान-लोकविरोधावपीत्यत आह ? ॥

ब्दः । कस्मात् सद् घटादि ? इति चेत्, उच्यते— **व्यवहारवृत्तत्वात्, तद्वाक्यवत्,** असिद्ध्ययुक्त्यनुत्पाद-सामग्रीदर्शना-ऽदर्शनपक्ष-परायत्तोभ-
- /ms यविरो- धादिविकल्पहेतुखपुष्पादिदृष्टान्तबुद्धि-वचसां सस्वभावत्ववद् घटादीनां व्यवहारवृत्तानां सस्वभावत्वं स्यादिति । **तच्छून्यत्वे तु प्रत्यक्षादिविरोधाः,** तस्य तस्य वचनस्य श्रोत्रेन्द्रियप्रत्यक्षस्य पक्षाद्यवयवविभागस्य घटादिप्रतिपाद्यार्थसहितस्य तद्विज्ञानस्य च तव मम च स्वसंवेद्यस्य शून्यत्वे प्रत्यक्षादिविरोधाः सस्वभावत्वमनिच्छतः । इच्छत अभ्युपगम-स्ववचनविरोधावुक्तावेव । **आदि**ग्रहणादनुमानाऽऽगमविरोधौ, **अर्हद्-बुद्ध-कपिल-कणाद-ब्रह्मा**दिप्रोक्तैरागमैः सह विरोधित्वात् । लोकविरोधस्तु प्रसह्यैवोपात्तस्त्वया घटादयो बाह्यार्थाः ज्ञान-वचने च सन्ति इति प्रपन्नं सर्वलोकमवमत्य शून्याः सर्वभावाः इति प्रवृत्तत्वात् । एवं ज्ञान-वचनशून्याशून्यत्वयोरभ्युपगमविरोधादिसर्वदोषाः । *सर्वनैःस्वाभाव्ये तु सर्वेऽपि प्रत्यक्षादिविरोधाः स्फुटा एव ज्ञान-वचनयोः सर्वान्तःपातित्वाद् यथा योजितं तया दिशेत्येवं तावत् पक्षदोषाः सामान्यत उक्ताः । § 2914

दोषदिक्प्रदर्शनार्थं तयैव दिशाह--**सर्वशून्यवादगतपक्षधर्माद्यभावश्च न साध्यः,** असिद्ध्यादिपक्षासिद्धौ परायत्तादिहेतवो न सिध्यन्त्येवानयोक्तदिशेति स्फुटत्वान्नात्राभिनिविशामहे । § 2915

**अपि च विज्ञानाभ्युपगमा**दित्यादि यावत् **सतो विज्ञानलक्षणत्वा**दिति
- /ms । त्वयैवाभ्युपग- [त]मसिद्ध्यादिहेतुभिर्बाह्यार्थनैःस्वाभाव्यमापाद्य विज्ञानमात्र-
857/mj मेवेदं सर्वं स्वप्नसिंहादिवज्जाग्रत्सिंहदर्शन

* * *

पुरुष एवेदं सव यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ऋग्वेदः १० । ८ ।
९०§ 2918

ननु विज्ञानशब्देनोत्प्रेक्षामात्रमुच्यते नार्थवत्त्वं विज्ञानस्य । यथोक्तं तदभावे तदप्यसत्... ...स्वप्नमुदाहरद्भिः ।

एतदप्ययुक्तम्, जागरितव्यतिरिक्तस्वप्नोदाहरणादेव विज्ञानमात्रत्वव्याव-

१ त] **त्वद्वाक्यवत्** ? ॥
१ अ] पृ० ८२८ पं० १ पृ० ८३० पं० १ ॥
१ प] **भयविरोधादिविकल्प** इति अधिकः पाठोऽत्र nayacakra-ms-ya प्रतौ, स तूपरितनपंक्तितो लेखकानवधानादिहायातः ॥
३ त] तच्छून्यहेतुnayacakra-ms-bhā ॥
६ भाव] °**वमनि**°nayacakra-ms-ya ॥
७ विरोधा] पृ० ८५५ पं० ५ ॥
९ प्र] **प्रयत्वं** प्र० ॥
११ *] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
१७ या] **यावें** सतोnayacakra-ms-ya । --र्वे सतो nayacakra-ms-bhā ॥ यावत् सर्वसतो ? ॥

र्तनात् । यदि तन्मात्रं किं स्वप्नोऽस्वप्नः ? स्वप्नस्य जागरणाद् विशेषणं न घटते, उभयोरप्यभावतुल्यत्वात् ।

* * *

पुत्रजन्मादि-भय-हर्ष-सुख-दुःखादिविज्ञानमपि इत्यतः सर्वस्य विज्ञानलक्षणस्यैव सत्त्वात् तस्य च सर्वत्वात् सर्वमेतद्विज्ञानमात्रम्, स च पुरुष एव ज्ञः, तन्मयं चेदमतीतानागताभिमतमपि वर्तमानमेव स्तिमितसरःसलिलतरङ्ग-बुद्बुदाद्यवस्थावत् सुषुप्त-सुप्त-जागरित-तुरीयाख्यचतुरवस्थामात्रभेदमभिन्नमस्त्येवास्तीत्यभ्युपगतं भवति । **यथोक्तं** विधिविधिनयारभङ्गे **प्राक्-पुरुष एवेदं सर्व**मित्यादि । एतत् पुरुषसूक्तं व्याख्यातं तत्रैवेति न पुनर्विव्रियते । § 2919

अत्राह **--ननु विज्ञानशब्देन उत्प्रेक्षामात्रमुच्यते नार्थवत्त्वं विज्ञानस्य । स्वप्न**सिंहदर्शनभयादिवत् इत्युदाहृत्य कल्पनामात्रत्वस्य प्रतिपादितत्वाद् ग्राह्याभावः, ग्राह्याभावे ग्राहकत्वस्याभावः । **यथोक्तं तदभावे तदप्यस**दिति प्रत्युच्चारणमेव तदर्थं यावत् **स्वप्नमुदाहरद्भि**रिति । § 2920

अत्रोच्यते--एतदप्ययुक्तम्, जागरितव्यतिरिक्तस्वप्नोदाहरणादेव विज्ञानमात्रत्वव्यावर्तनात् । सप्रतिपक्षत्वाच्च भावानां प्रमाण-प्रमाणाभासत्व[व]त् साध्य-दृष्टान्तभेदाभ्युपगमोऽवश्यंभावी । **यदि तन्मात्रं किमि**त्यादि, यदि - /ms विज्ञानमेव स्वप्नो[ऽ]स्वप्नो न भवति, तस्मिन् स्वप्ने सिंहदर्शनमसदेव भयनिमित्तम्, *विबुद्धस्य भयापगमोऽसत्त्वे स्वप्नसिंहस्य, जाग्रत्सिंहदर्शनं च साक्षान्मृत्युनिमित्तं सत्यमेव, प्रीतिहेतुश्च जाग्रत्पुत्रदर्शनम्, स्वप्ने[ऽ]तदपेक्षं विबुद्धे प्रीत्यपगमात् । भिन्नौ तौ इत्यवगम्य जाग्रद्विज्ञानव्यतिरिक्तस्वप्नोदाहरणं युज्यते । तत्तु त्वत्पक्षे स्वप्नस्य जागरणाद् विशेषणं न घटते, कस्मात् ? **उभयोरप्यभावतुल्यत्वात्** खपुष्पस्य वन्ध्यासुतादिवेति । § 2921

858/mj

४ स] **सर्व एवद्विज्ञान॰** प्र॰ ॥ सर्वं चेद्विज्ञान ? ॥
६ त्] **सुषुप्त॰**nayacakra-ms-ya प्रतौ नास्ति ॥
६ भिन्न] **॰मस्तेवा॰** प्र॰ ॥
७ पु] पृ॰ १३६ पं॰ ८, पृ॰ १४४ पं॰ ११, पृ॰ १८९ पं॰ ५, टिपृ॰ ५९ पं॰ २ ॥
१४ माणाभास] जागरज्ञानं प्रमाणरूपं स्वप्नज्ञानं प्रमाणाभासरूपमिति विवक्षायां **॰सत्वात्** इति साधु ॥
१६ मेव] सर्वशून्यतायां चेष्यमाणायां स्वप्नास्वप्नादिव्यवहाराभावप्रसङ्ग एवेति दर्शयन्नाह--**सव्वाभावे च क+ओ सुमिणो सुमिणोत्ति सव्वमलियं ति** विशेषावश्यकभा॰ १७०५ सर्वाभावे च सर्वशून्यतायां चाभ्युपगम्यमानायां स्वप्नोऽयम्, अस्वप्नोऽयम् इति कुतः ? किंकृतोऽयं विशेष इत्यर्थः । इति मलधारि**हेमचन्द्र**सूरिविरचितायां **विशेषावश्यकभाष्यटीकायाम्** ॥
१७ *] **विशुद्धस्य**nayacakra-ms-bhā । **विशुस्य** nayacakra-ms-ya । पृ॰ ८५८ पं॰ ५ ॥
१९ पेक्षं] **विशुद्धे** प्र॰ ॥
१९ मा] **॰मान्नौतावित्यवग-म्य**nayacakra-ms-ya ॥

प्रतिपाद्यमत्यपेक्षयेति चेत्, न, उभयोरप्यभावतुल्यत्वात् । खपुष्पव्युदसनेन च स्वप्नसिंहदर्शनवदिति वचनं घटते । ननु विज्ञानविषया चास्तिता स्थितैव । निर्भेदं च नास्तित्वं नास्त्येव । सत्त्वमेव तत् तथा । § 2922

अथोच्येत--विज्ञानास्तित्वमपि कः प्रतिपद्यते कल्पनामात्रत्वात् ? विज्ञानाद्धि विज्ञानं तद्विज्ञेयाभावे कुतस्तत् ? स्वप्ने तत्कारणस्य विज्ञेयस्याभावात् । विबुद्धेऽप्येवमेव । § 2923

एवमपि विज्ञान-विज्ञेया-ऽविज्ञाना-ऽविज्ञेयतदतद्भेदाभ्युपगमात् सद्वाद एवाभ्युपगतोऽत्र त्वया । § 2924

**प्रतिपाद्यमत्यपेक्षयेति चेत्** । स्यान्मतम्--भाव्यदृष्टान्तयोर्जागर-स्वप्नविज्ञानयोरर्थाभावतुल्यत्वं तथापि त्वत्प्रसिद्धाभावार्थेन स्वप्नेनैव जागराभावार्थत्वप्रतिपादनं सुकरं त्वन्मत्यनुवृत्त्या *क्रियते । अयं हि प्रतिपाद्यस्य मतेरनुरोध उपायः प्रतिपादयितुमभावतुल्यत्वेऽपीति । § 2925

एतच्च **न, उभयोरप्यभावतुल्यत्वात्,** मतेरप्यमतेर्भेदेन विशेषणं प्रतिपाद्यस्य प्रतिपादकादेरप्रतिपाद्याद् विशेषणम् इत्याद्यप्यभावतुल्यत्वान्न घटत एव । किञ्चान्यत्, स्वप्नदृष्टान्तोऽपि खपुष्पव्युदसनेन च स्वप्नसिंहदर्शनवत् इति वचनं घटते खपुष्पं न भवति सिंह इति । स्वप्नदृष्टान्तव्याख्याने च वृथाभय-हर्षादि विशेषणमवृथाभय-हर्षादिना विना न भवितुमर्हति । § 2926

**नन्वि**त्यनुज्ञापयति । किञ्चान्यत्, **विज्ञानविषया चास्तिता ननु स्थितैव,** विज्ञानमात्रम् इति ब्रुवता विज्ञानास्तित्वमभ्युपगतमेव त्वया, ततश्च सर्वं
- /ms निःस्वभावम् इत्येतद् मिथ्या । § 2927

किञ्च, **निर्भेदं च नास्तित्वं नास्त्येव,** कुतश्चित् सतो वस्तुनो विशेष्य सदेव शक्यं वक्तुं नास्तीति खपुष्पस्य पुष्पं नास्ति नाशोकस्य इति, नाविशेष्य । तस्मान्न शून्यत्वं सर्वस्य, सर्वमिति सत्त्वमेव तत् **तथा** तेन प्रकारेण स्वप्नविज्ञानसिंहादेरपि नास्तित्वमन्यास्तित्वं साधयतीति । § 2928

**अथोच्येतेत्यादि । *विज्ञानास्तित्वमपि कः प्रतिपद्यते, कल्पनामात्रत्वात् ?** असिद्ध्यादिहेतुभ्य एव स्वप्नवन्नास्ति विज्ञानमपि, विजानाति इति हि

८ भा] तुलना पृ० ८५७ पं० १७ ॥
८ योर्जाग] °गरणस्व°nayacakra-ms-ya ॥
९ जा] जागरणोभा°nayacakra-ms-ya ॥
१० *] क्रियाव प्र° ॥
१३ त्वान्न] घट एवnayacakra-ms-bhā । घ एव nayacakra-ms-ya ॥
१४ दृ] °दृष्टान्ते ? ॥
१६ र्षादिना] विना भवितु°nayacakra-ms-ya ॥
१७ चा] वास्तिताnayacakra-ms-bhā ॥
१८ त] तश्चnayacakra-ms-bhā ॥
२० स्तुनो] विशेषस्यnayacakra-ms-ya ॥
२४ *] विज्ञाननास्ति° प्र° ॥

विज्ञानं स्यात्, सा च विज्ञानक्रिया कर्तृत्वं वा विज्ञानस्य नास्ति विज्ञेय- कर्माभावात् स्वप्ने । तत् प्रदर्शयन्नाह **--विज्ञानाद्धि विज्ञानं तद्विज्ञेयाभावे कुतस्तत् ?** विजानाति इति विज्ञानस्य विज्ञानत्वं स्यात्, तद्विज्ञेये कर्मण्य- सति कुतः ? नास्ति कुतश्चित् कारणात्, **स्वप्ने तत्कारणस्य विज्ञेयस्याभावात्** । **विबुद्धेऽप्येवमेवे**ति जाग्रद्विज्ञानस्यापि स्वप्नविज्ञानवद् विज्ञेयाभावे विज्ञान- त्वाभावात् का विज्ञानास्तित्वाशा ? इति । § 2929

अत्रोच्यते **--एवमपी**त्यादि । विजानाति विज्ञानम् इत्यविज्ञानात् स्व- प्नाज्जाग्रद्विज्ञानं विशेष्यते त्वयैव, अविज्ञानम् इति च स्वप्नो जाग्रद्विज्ञानात्, तथा विज्ञेयम् इत्यविज्ञेयात् स्वप्नविषयादर्था 859/mj

* * *

तथा विज्ञान-भावादिषु नञः का गतिः ? किं प्रागादिविशेषेण ना- स्ति उताविशेषेणव ? यदि विशेष्य नास्ति ततः प्राक्पश्चादितरेतरासाम- र्थ्यासंयोगेभ्यो ननु निर्वृत्ताऽध्वस्त-तत्-समर्थ-सम्बद्धघटास्तित्वमेव प्रसज्यते ।

अथोच्येत--नैव निर्वृत्तास्तित्वादिप्रसङ्गः, वन्ध्यापुत्रादिवदविशेष्य अत्यन्तं नास्तीत्युच्यते । अथ कथं पुनर्वन्ध्यापुत्रो न भवति ? यदि तद्विषयोऽत्य- न्ताभावः स्यात् वन्ध्यापुत्रो न सम्भवेत् । सम्भवति तु स्वयं भवितृत्वेन । तद्यथा--भवच्च तद् द्रव्यं चेतनमचे-

* * *

भासाज्जाग्रद्विषयो रूपादिरर्थः, जाग्रद्विषयाच्च विज्ञेयात् अविज्ञेयम् इति - /ms स्वप्नविषयं वस्तु तच्चातच्च भेदेनाभ्युपगम्यते ज्ञान-वचनविषयतया सद्वाद एवाभ्युपगतोऽत्र त्वया । नो चेद् विज्ञान-विज्ञेयाऽविज्ञाना-ऽविज्ञेय-ज्ञान- वचनविशेषणभेदाभावादभावाविशेषात् तूष्णींभावस्ते समाश्रयणीयः स्यात् । § 2930

किञ्चान्यत्, **तथा विज्ञाने**त्यादि । विज्ञानमपि विज्ञानं [न] भवति, भावो भावो न भवति इत्यादिषु नञः का गतिः ? विचार्य त्वया वाच्य- म्, किमत्र निश्चितं सत्त्वमसत्त्वं विज्ञानादेः ? किं प्रागादिविशेषेण नास्तीति उताविशेषेणैव ? इति निर्धार्य ब्रूहि । तत्र **यदि विशेष्य नास्ति** इत्युच्यते **ततः प्राक्पश्चादितरेतरासामर्थ्यासंयोगेभ्यः** यथा घटः प्राग् नास्ति मृदाद्यवस्थायां पश्चात् कपालत्वे इतरेतरतया पटत्वे असामर्थ्ये छिद्रबुध्नत्वे असंयोगे गेहे नास्तीति ततो यथासङ्ख्यं **ननु निर्वृत्ते**त्यादि, प्रागभावे निर्वृत्तोऽस्ति इति न- ञ् विशेषयति, पश्चादभावेऽपि अध्वस्तोऽस्ति इति, इतरेतराभावे सोऽस्ति,

२७ विज्ञाना ] °नाद्विज्ञानंnayacakra-ms-ya ॥ २ त ] तत्कारणविज्ञे°nayacakra-ms-ya ॥ १८ य ] °यतयाः प्र° ॥ २२ विज्ञा ] विज्ञानमविज्ञानं न भवति, भावोऽभावो न भवति इति पाठोऽप्यत्र सम्भाव्यते ॥ २५ दि ] विशेष नास्ति प्र° ॥ २६ रा ] °रास्यम- र्था+असंजोगेभ्यःnayacakra-ms-ya । तुलना पृ° ८५९ पं° २१ ॥ पृ° ८७२ पं° १७ ॥

[अ]सामर्थ्याभावे समर्थोऽस्ति, गेहसंयोगाभावे बहिःसंयोगोऽस्ति इति । तस्मादस्तित्वमेव घटस्य नञ् विशेषयति । § 2931

**अथोच्यते--नैवे**त्यादि । अथ मा भूदेवं निर्वृत्तास्तित्वादिप्रसङ्ग इत्यविशेष्य नास्ति, न भवति इत्यादिपर्यायैरसिद्ध्यादिहेतुभ्यो वन्ध्यापुत्रादिवदविशेषाप्याऽत्यन्तं नास्तीत्युच्यते एवं चेन्मन्यसे, अत्रापि ब्रूमः -- **अथ कथं पुन**रित्यादि, बन्ध्यापुत्रनास्तित्वमपि अत्यन्ताभावाभिमतमसिद्धम्, अतो निर्वृत्ता-ऽध्वस्त-तत्-सामर्थ्य-सम्बन्धप्रमाणादिविशेषप्रतिषेधवाचिनैव नञा सामानाधिकरण्याद् भवत्येवेति वयं सम्भावयामः । § 2932

**यदि तद्विषय** इत्यादि । यदि वन्ध्यापुत्रोऽत्यन्ताभावः स्यात् निर्वृत्त्यादिमत्प्रागभावादिस्वभावेषु न सम्भवेत्, सम्भवति तु स्वयं भवितृत्वेन, तस्मान्नात्यन्ताभावः, किं तर्हि ? सम्भवत्येवास्य निर्वृत्त्यादि भवितृत्वभाक्स्वर्थेषु । तद्यथा--भवच्च तत् सम्भाव्यते द्रव्यं चेतनमचेतनं च द्विविधम् । 860/mj

* * *

तनं च । तत्र चेतनस्य अनाद्यनन्तभवभावित्वम्, कर्मपरिवर्तान्यथात्वात्, इतरद्रव्यवत् । अनन्तरभववन्ध्या... ... ...प्रबन्धात्मकत्वात् अवन्ध्यात्वेऽपि तद्भावानतिरिक्तत्वात् तद्वद् बालकुमारवद्वा ।

अचेतनस्यापि तद्भावानतिरिक्तत्वादनाद्यनन्तविपरिवर्तान्यथात्वाद विरुद्धं वन्ध्यापुत्रत्वम् तदन्योन्यानुगतिमन्तरेण तदभावात् शरीरारम्भवत् ।

* * *

**तत्र चेतनस्ये**त्यादि, इदं हि चेतनमात्मद्रव्यमनाद्यनन्तभवेषु भवितुमुत्सहते, कुतः ? **कर्मपरिवर्तान्यथात्वात्**, अनाद्यनन्तकर्मबन्धसन्तानस्य विपरिवर्तास्तिर्यङ्-नर-नरका-ऽमरभवाः, ते चानाद्य[न]न्ता भवनशीला एव स्वजात्यपरित्यागेनाऽन्यथाऽन्यथाऽन्यथाभवन्तः, **इतरद्रव्यवत्** *पुद्गलद्रव्यवत्, यथा पुद्गलद्रव्यं रूप-रस-गन्ध-स्पर्शलक्षणमूर्त्याचैतन्यापरित्यागेन भूम्युदक-वह्नि-पवन-वनस्पति-त्रस-शरीरिशरीर-शीतोष्ण-तमश्छाया-ऽऽतपोद्योतादिपरिवर्तमन्यथा तथा चानुभवति तथा चेतनात्मकर्मपरिवर्तानुभाविमनुष्यस्त्रीवन्ध्यावात्वाभ्यां प्रच्युत्य जन्मान्तरे मनुष्यत्वोत्पत्तौ

---

१ मा] भूदेवnayacakra-ms-ya ‖
५ अ] पृ॰ ८७२ पं॰ १७ ‖
७ त] तविषयnayacakra-ms-ya ‖
८ भावा] ॰वाद्विस्व॰nayacakra-ms-bhā । ॰दिष्वभावेषु इत्यपि पाठोऽत्र चिन्त्यः । पृ॰ ८७२ पं॰ १७ ‖
९ त्येवा] ॰वास्य न निर्वृत्त्यादि प्र॰ ‖
९ भा] ॰भावार्थेषुnayacakra-ms-ya ‖
१९ र्तास्ति] ॰र्यङ्गरका॰nayacakra-ms-ya ‖
१९ भ] भवंशीलाnayacakra-ms-bhā । भवशीला nayacakra-ms-ya ‖
२० रित्यागेनाऽन्य] ॰न्यथाभवन्तnayacakra-ms-ya ‖
२१ *] पुद्गलस्य द्रव्यवत् प्र॰ ‖
२१ मू] ॰मूर्त्याचे॰nayacakra-ms-ya । मूर्ति आचैतन्यापरित्यागेन इति पदच्छेदः । अचेतनस्य भाव आचैतन्यम् ‖
२४ स्त्रीव] ॰वन्ध्यावाभ्यां प्रत्युव्युत्य॰nayacakra-ms-ya । ॰वन्ध्यावाभ्यां प्रत्युद्युत nayacakra-ms-bhā । ॰वन्ध्याभवाभ्यां प्रच्युत्य ? ‖

स्त्रीत्वोत्पत्तौ वा पुत्रवत्त्वे *द्रव्यार्थभेदात् सैव वन्ध्या पुत्रवती जायत इत्यत्र वन्ध्यापुत्र इत्येनमर्थं दण्डकेन दर्शयति— **अनन्तरभववन्ध्ये**त्यादिना यावत् **प्रबन्धात्मकत्वात् अवन्ध्यात्वे**ऽपि, कस्मात् ? **तद्भावानतिरिक्तत्वात्**, तस्मात् पूर्वस्माद् भावादनतिरिक्तः सकर्मा चेतनः, **तद्वत्** पूर्ववन्ध्यात्ववत् पुत्रवत्त्वपर्यायसम्भूतावपि **बालकुमारवद्वे**ति दृष्टान्तान्तरं लोकसिद्धम्, यथा बालः कुमारो युवा इत्यादिपर्यायेष्वपि स एव भवति तथा वन्ध्या-पुत्रवत्त्वावस्थयोरेक एव जीव इति । एवं तावच्चेतनस्यानाद्यनन्तभवभावित्वात् तद्भावानतिरिक्तत्वाच्च तत्त्वे वन्ध्यापुत्रास्तित्वमुक्तम् । § 2933 - /ms

अचेतनस्यापि ब्रूमः । तद्यथा--वन्ध्याशरीरगतानां पुद्गलानामुत्सृष्टानां केश-नख-दन्त-मूत्रशकृत्-स्वेद-रस-रुधिर-मांसादीनां मृत्त्व-व्रीह्यादित्वसम्भूतौ [अ ?]वन्ध्यया स्त्रिया पुंसा वाऽऽहारितानां रक्त-शुक्रत्वादिभावेन चोपात्तानां पुत्रत्वेनोत्पत्तावपि वन्ध्यापुत्रास्तित्वं तद्भावानतिरिक्तत्वादनाद्यनन्तविपरिवर्तान्यथात्वात् इत्यादिना न्यायेनाविरुद्धं वन्ध्यापुत्रत्वम् । तत् साधयति --**तदन्योन्यानुगतिमन्तरेण तदभावात्**, यद् यदन्योन्यानुगतिमन्तरेण न भवति तत् तत् तस्यैव तदेव वा, **शरीरारम्भवत्**, यथा शरीरं तेषां पुद्गलाना[मना]द्यनन्तभवभाविपरिवर्तान्यथात्वादन्योन्यानुगतिमन्तरेणाभावाच्च तान्येव तानि जीव-पुद्गलद्रव्याणि तथा वन्ध्याया एव पुद्गलाः पुत्रपुद्गला इत्यप्यविरुद्धं वन्ध्यापुत्रत्वम् । तस्मादस्ति वन्ध्यापुत्रः । § 2934
861/mj

तस्मात् सर्वमिदं सर्वस्वभावमशून्यमिति प्रतिपत्तव्यम् अशून्यगृहवत् प्रवेष्टृस्थातृनिर्गन्तृकल्पोत्पादस्थितिविनाशसहितमेव सर्वमेकमनेकात्मकं व्यवहारप्रव्यक्तापरिकल्पिततदतदाकारं स्वतः परत उभयतश्चास्त्येव । § 2935

अथ कथं स्वपरोभयभावः ? संसिद्धिसंयुक्त्यनुत्पादसामग्रीदर्शनसदादर्शनेभ्यः । § 2936

संसिद्धिस्तावत् तदात्मभेदैकीभावेन सद्भावः । दीर्घत्वं दीर्घेऽस्त्येव अपरायत्तत्वात् । यदि त्वस्वविषयमेतत् स्यात्, नानामिका मध्यमादीर्घतायामपि कनिष्ठिकातो दीर्घा स्यात्, न च मध्यमा शक्रयष्टिदीर्घतायाम् । एवं ह्रस्वत्वमपि । § 2937

**तस्मात् सर्वमिद**मित्यादि । सर्वशून्यवादे साधन-दूषणासम्भवात् प्रतिपाद्य-प्रतिपादकव्यवहाराभावात् विज्ञानमात्रपक्षस्यापि सर्वैकज्ञपुरुषमात्र- - /ms

---

१ *] द्रव्यार्थभेदात् प्र॰ ॥
१० स] ॰संभूतौ वध्याया स्त्रिया पुंसा वाnayacakra-ms-ya । ॰संभूतौ बन्ध्याया पुंसा वा nayacakra-ms-bhā ॥
१७ इत्य] इत्यस्यविरुद्धंnayacakra-ms-ya ॥

त्वाभ्युपगमापत्तेः स्वप्न-वन्ध्यापुत्रादिदृष्टान्तानां च सर्वसर्वात्मकत्वे सति असिद्धेः इदं सर्वस्वभावमशून्यम् इति प्रतिपत्तव्यम् त्वदुक्तार्थविपर्ययेण अशून्यगृहवत् प्रवेष्टव-स्थातृ-निर्गन्तृकल्पैरुत्पाद-स्थिति-विनाशैः सहितमेव सर्वमेकमनेकात्मकमङ्गुलिवक्रप्रगुणत्वादिवत् विचित्रवर्णकृकलासवद्वा व्यवहारेण प्रव्यज्यमानैः सह-क्रमभाविभिरपरिकल्पितैरेव सत्यैर्भेदैर्नित्यादिभिस्तच्चातच्च वस्तु तदतदाकारविपरिणामदर्शनाद् **व्यवहारप्रव्यक्तापरिकल्पिततदतदाकारं स्वतः परत उभयतश्चास्त्येव,** न नास्ति इति ग्राह्यमुक्तन्यायात् । § 2938

अत्राह **--अथ कथं स्व-परोभयभावः ?** इति । अत्र ब्रूमः **--संसिद्धिसंयुक्त्यनुत्पादसामग्रीदर्शन-सदादर्शनेभ्यो** हेतुभ्यः । § 2939

**संसिद्धिस्तावत्**सम् इत्येकीभावे, सर्वे भावा भेदाभिमताः सामान्यान्तर्भूताः परस्परमेकीभूताः सिध्यन्तीत्यत आह **--संसिद्धिस्तदात्मभेदैकीभावेन सद्भावः,** संसिद्धिः सहभावः सहनिर्वृत्तिर्युगपद्वृत्तिरित्यनर्थान्तरम् । तद् भावयति **--दीर्घत्वं दीर्घेऽस्त्येव, अपरायत्तत्वात्** स्वायत्तत्वादेवेत्यर्थः । तद्धि दीर्घत्वं स्वायत्तमेवानामिकायाः । **यदि स्वत्वस्वविषयमेतत्** कनिष्ठिकाह्रस्व-
- /ms त्वापेक्षमनामिकादीर्घत्वं त्वन्मतेन **स्यात् नानामिका मध्यमादीर्घतायामपि कनिष्ठिकातो दीर्घा स्यात्,** मध्यमां दीर्घां दृष्ट्वा स्वगतेन ह्रस्वत्वपरिणामेन ह्रस्वा सती दीर्घा पुनर्न स्यादेवार्थान्तरापेक्षयापि स्वात्मन्यविद्यमानदीर्घत्वात् खपुष्पवत् मध्यमायत्तह्रस्वत्वात्, भवति तु दीर्घापि स्वायत्तकनिष्ठिकापेक्षस्वगतदीर्घत्वपरिणामात् । तस्मात् स्वायत्तं दीर्घत्वमनामिकायाः । तथा **न च मध्यमा शक्रयष्टिदीर्घतायां** शक्रयष्ट्यपेक्षमध्यमाह्रस्वपरिणामात् स्वगताद्
862/mj ह्रस्वेति न चानामिकापेक्षात् स्वदीर्घत्व

* * *

स्वगतनानारूप्यानतिक्रमात्तु एकपुरुषपितृपुत्रत्वादिवत् तथा तथा नियमवृत्तेर्ह्रस्वत्वदीर्घत्वाव्याघातः । एवं नेतरेतराभावेतरेतराश्रयासिद्धयः । ह्रस्वेऽपि च दीर्घत्वं दीर्घत्वेऽपि ह्रस्वत्वम्, अप्रतिद्वन्द्वित्वात्, इष्टह्रस्वदीर्घस्वात्मवत् । एवमेव चेतरेतरयोगविचारानवतारः ।

* * *

परिणामात् **दीर्घा स्यात्** इति वर्तते, भवति तु । तस्मादनामिकाया मध्यमायाश्च कनिष्ठिकापेक्षाभिमतं दीर्घत्वं स्वायत्तमेव दीर्घतरापेक्षे ह्रस्वत्वे संवृ-

---

३ अ] दृश्यतां पृ० ८२७ पं० १८ ॥
४ ला] °लाश° प्र° ॥
५ हारेण] एतदङ्कितः **प्रव्यज्य°** इत्यत आरभ्य **व्यवहार°** इत्यन्तः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
९ अ] पृ० ८२७ पं० ६ ॥
११ इत्येकीभा] **°भावे सर्वे भावा भेदाभिमताः सामान्यान्तर्भूताः परस्परमेकीभावे सर्वे भावा भेदाभिमताः सामान्यान्तर्भूताः परस्परमेकी°** प्र° ॥
१५ य] यदि **ह्यस्वविषय°** इत्यपि पाठोऽत्र भवेत् । दृश्यतां पृ० ८६२ पं० ७--८ ॥
१७ रिणा] **°णामेनाह्रस्वा** प्र° ॥

तेऽपि सत्त्वतो ह्रस्वतरापेक्षया दीर्घत्वस्यावस्थितत्वात् । **एवं ह्रस्वत्वमपीत्यनेनैव** न्यायेन कनिष्ठिकाया ह्रस्वत्वमपि स्वायत्तमेव इत्यतिदिशति । **यदि ह्यस्व-विषयमेतत् स्यात् न कनिष्ठिकाऽनामिकादीर्घतायामपि सपर्वावयवादिभ्यो दीर्घा स्यात्, न चानामिका मध्यमादीर्घतायामिति ।** § 2940

कस्माद्धेतोः ? **स्वगतनानारूप्यानतिक्रमात्तु** यस्मादात्मगता एव तास्ताः सापेक्ष-निरपक्षाः परिणामशक्तयो ह्रस्व-दीर्घ-स्थूल-कृश-लघु-गुरु-नित्या-ऽनित्य-मूर्ता-ऽमूर्त-चेतना[-ऽचेतना]दयः पुद्गलाना- मन्येषां चाकाशा- - /ms ऽऽत्म-कालादीनां स्वे स्वे परिणामा जैनेन्द्रदर्शनात् सर्वसर्वात्मकद्रव्यार्थ-नये वा *विधि[वि]ध्यादिभङ्गान्तरे । किमिव ? **एकपुरुषपितृपुत्रत्वादिवत्,** यथैक एव पुरुषः स्वपुत्रापेक्षया *पितृत्वेन परिणतः स्वपित्रपेक्षया च पुत्र-त्वेन तथा मातुल-भागिनेय-भ्रातृ-श्वशुर-पौत्र-दौहित्र-भ्रात्रीयप्राच्योदीच्य-ह्रस्व-दीर्घ-पण्डित-मूर्ख-स्वामि-दासादिशक्तिभिः परिणमति स्वगताभिरापेक्षिकैश्च ज्ञान-दर्शन-सुख-दुःख-क्रोध-हर्ष-भयादिभिरुत्पाद-व्यय-ध्रौव्यलक्षणत्वाद् व-स्तुत्वात् । न च ताः शक्तयस्तत्राविद्यमानाः सम्भाव्यन्ते खपुष्पादाविव । न च तासां शक्तीनां परस्परविरोधो नाप्यनवस्था न च सङ्करः स्वपुत्रापेक्ष-या पितृत्वस्य नियतत्वात्, एवं शेषाणामपीत्यत आह दार्ष्टान्तिकम् --**तथा तथा नियमवृत्तेः ह्रस्वत्व-दीर्घत्वाव्याघात** इति एतद् विरोधाभावोपनयनम्, - /ms तथा सङ्करा-ऽनवस्थादोषाभावोपनयनमपि द्रष्टव्यम् । § 2941

एवं **नेतरेतराभावेतरेतराश्रयासिद्धय** इति । अनेनैव **स्वगतनानारूप्यान-तिक्रमात्त्वेकपुरुषपितृ-पुत्रत्ववत् तथा नियमप्रवृत्तेर्ह्रस्वत्व-दीर्घत्वाव्याघात** इति दोषपरिहारन्यायेन ह्रस्वसद्भावो दीर्घस्याभावो न भवतीति सहानवस्थान- - /ms दोषपरिहारः कृतो भवतीति तस्मादेव हेतोरुक्तदृष्टान्तवत् । तथा ***इतरेत-राश्रयत्वादसिद्धिः** इत्येषोऽपि दोषो नास्ति उक्तवत् स्वाश्रयत्वादेव । § 2942

अत एवाप्रतिद्वन्द्वित्वम्, विरुद्धाभिमतसर्वधर्माविरोधवृत्तत्वात् अत, इत्थं साधनम् --**ह्रस्वेऽपि च दीर्घत्व**मिति पक्षः, द्वितीयो **दीर्घत्वेऽपि ह्रस्वत्व**मिति । एक एव हेतुः --**अप्रतिद्वन्द्वित्वा**दिति । 863/mj

२ ह्य] ह्रस्ववि° nayacakra-ms-ya ॥
३ स] दृश्यतां पृ° ८६६ पं° १३ ॥
४ ताया] °यामर्तिं nayacakra-ms-ya ॥
५ स्व] पृ° ८६२ पं° २१ ॥
६ ल] °लघुगुरुल-घुनित्या° nayacakra-ms-bhā । लघु-गुरु-गुरु लघु ? ॥
९ *] विधिद्यादिर्भ nayacakra-ms-bhā । °विव्यादिर्भ nayacakra-ms-ya । पृ° २४२ पं° १ ॥
१० य] **यथैव** प्र° ॥
१० *] **पुत्रत्वेन** प्र° ॥
११ श्व] **स्वसुर**° प्र° ॥
१२ स्व] स्वमताभि° nayacakra-ms-bhā । स्वमत्यभि° nayacakra-ms-ya ॥
१७ वृत्तेः] ह्रस्वदीर्घ nayacakra-ms-ya ॥
१९ स्व] पृ° ८६२ पं° १ ॥
२२ *] पृ° ८३० पं° ५ ॥
२४ त्वा] °त्वातद इत्थं nayacakra-ms-bhā । °त्वात्तद इत्थं nayacakra-ms-ya ॥ °त्वादत इत्थं इति पाठः सम्भाव्यते ॥
२५ ह्] पृ° ८३० पं° ६ ॥

* * *

संयुक्तेरपि च स्वपरोभयभावः । इह भाव एव भावो नाभावः । स च तदतदतीतानागतवर्तमानेषु अविशिष्ट एक एव [तद्भावे भावात्] तदभावेऽभावात् घट-पांशु-कर्पासतन्तु-पटवत् । इति सर्वसर्वैक्यम् । तत्र अस्त्येको घटः इति त्रयाणामेकत्वे यत्रैकत्वं तत्रास्तित्वस्यापि निष्कलेन स्वतत्त्वेन भवितव्यम्, अनर्थान्तरत्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति एकस्मिन्नेकत्वस्वतत्त्ववत् । अस्तित्वस्वतत्त्वं च सर्व-

* * *

**इष्टह्रस्व-दीर्घस्वात्मवत्,** इष्टस्य ह्रस्वस्य स्वात्मा तेन स्वात्मना ह्रस्वत्वेनाप्रतिद्वन्द्वित्वाद् ह्रस्वे भवत्येवं ह्रस्वे दीर्घत्वं भवति दीर्घेऽपि ह्रस्वत्वं ह्रस्वात्मवदिति विरोधदोषोऽपि परिहृत इत्थम् । § 2943

योऽपि तदनन्तरमितरेतरयोगदोषोद्भावनाय विचारः कृतस्तस्यानवतार एव, स्व-परोभयेभ्यो भवने सर्वभेदानां विरोधाभावप्रतिपादनादेव तद्गतदोषपरिहारस्यापि कृतत्वात् । अत आह— **एवमेव चेतरेतरयोगविचारानवतार** इति गतार्थम् । एवं तावत् स्व-परोभयभावः संसिद्धेः सिद्धः । § 2944

**संयुक्तेरपि च स्व-परोभयभावः** । तद् भावयति --**इह भाव एव भावो नाभाव** इति सर्वभेदशक्ति भवत्येव भवति वस्तु न न भवति इत्युक्तत्वात् । **स चे**त्यादि, स च भावः **तदतदतीता-ऽनागत-वर्तमानेषु** तस्मिन्नतस्मिंश्च वृत्ते वर्तमाने वर्त्स्यति च देश-कालविशिष्टाभिमतेषु **अविशिष्ट एक एव** । - /ms कस्मात् ? **[तद्भावे भावात्] तदभावे[ऽ]भावात्,** तेषु तेषु स्वभेदेषु भवत्स्वेव भवति अभवत्सु [न] भवति अत**स्तद्भावे भावात् तदभावे चाभावा**दविशिष्ट एव तेभ्य एकः । किमिव ? **घट-पांशु-कर्पास-तन्तु-पटवत्,** यथा घटः कपाल-शकलादिक्रमेण पांशुभूतः, पांशुर्मृत्, मृदि कर्पासबीजसम्बन्धात् कर्पासीभूतायां तन्तवः, तन्तुभ्यः पट इति क्रमेण घट-पटैकत्ववत् सर्वसर्वैक्यमिति स्थितेऽस्मिन्न्याये **तत्र अस्त्येको घटः इति त्रयाणा**मेकत्वमेव, सति **चैकत्वे यत्रैकत्वं तत्रास्तित्वस्यापि निष्कलेन स्वतत्त्वेन भवितव्यम्,** कस्मात् ? **अनर्थान्तरत्वात्** । अस्य हेतोः साध्येनान्वितत्वं प्रदर्श्यते --**यत्र यस्ये**त्यादि यावत् **स्वतत्त्वं भवती**ति गतार्थम् । किमिव ? **एकस्मिन्नेकत्वस्वतत्त्वव-**

---

८ स्य] ह्रस्वस्वात्मा nayacakra-ms-ya । इष्टस्य ह्रस्वस्य स्वात्मा ह्रस्वे भवति इत्यन्वयः ॥
९ स्वा] ह्रस्वस्वात्मवत् ? ॥
१३ र] पृ॰ ८३१ पं॰ २२ ॥
१४ भावः] संसिद्धिः प्र॰ ॥
१८ व] वर्त्स्यते प्र॰ ॥
२० ति] एतदन्तर्गतः पाठो nayacakra-ms-ya प्रतौ नास्ति ॥
२० चा] वाभावा॰nayacakra-ms-ya । ॰दाभावा॰ nayacakra-ms-bhā ॥
२१ घ] घटपांसु॰nayacakra-ms-bhā । घटपटांशु nayacakra-ms-ya ॥
२२ पां] पांसु॰nayacakra-ms-bhā ॥
२२ क] कार्पास॰ nayacakra-ms-ya ॥
२५ य] पृ॰ ८३५ पं॰ ११ ॥

त्, यथैकस्मिन् वस्तुनि एकत्वस्वतत्त्वं ततोऽनर्थान्तरत्वान्निष्कलमेव भवति तथैकत्वेऽस्तित्वमपि निष्कलमेव भवितुमर्हतीति । **अस्तित्वस्वतत्त्वं च सर्वभावा** इति परेणानिष्टमापादयितुमुक्तम्, मम तु सर्वशक्ति एकं वस्त्विच्छत इष्टमेवेति न दोषः । § 2945

864/mj

भावाः । यत्रास्तित्वमित्यादि साधनं पूर्ववत् । अस्तित्वैकत्वाभ्यामनन्ये सर्वभावाः घटादयः, एकश्च घटस्तदनन्यदस्तित्वम्, संश्च घटस्तदनन्यदेकत्वम् इति घटे सर्वसिद्धिः । § 2946

तथा घटत्वं यत्र तत्रास्तित्वैकत्वयोरपि निष्कलेनैव स्वतत्त्वेन भवितव्यम्, अनर्थान्तरत्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति घट इव घटस्वतत्त्वस्य । अतो घटादनन्यत्वेऽस्तित्वैकत्वयोरस्तित्वैकत्वाव्यतिरेकाद् घटवत् सर्वः पटादिरपि घटः । तथाऽपादिः । ऊर्ध्वमध्यबुध्नदेशभेदेऽप्यभिन्नः स एवैकोऽस्ति च घटः । बालकुमारादिभेदे स एवैको नरः । तथा सर्वभावाः । § 2947

तथा च सर्वात्मकमेकमेवास्ति वस्त्विति प्रत्यक्षादिप्रमाणैरुपलभामहे । अन्यथा प्रत्यक्षादिविरोधाः । § 2948

किञ्चान्यत्, **यत्रास्तित्वमित्यादि** द्वितीयमनिष्टापादनं परेणोक्तं तदपीष्टमेवेति पूर्ववत् परिहार इति मन्यमानस्तथैव **साधनं पूर्ववदि**त्यतिदिशति । तद्यथा --**यत्रास्तित्वं तत्रैकत्वस्यापि निष्कलेनैव स्वतत्त्वेन भवितव्यम्, ततोऽनर्थान्तरत्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वम्, अस्तित्वेऽस्तिस्वतत्त्ववत्, एकत्वस्वतत्त्वं च सर्वस्मिन्नेकैकस्मिन्** एकैकमस्त्येकं चेत्यतोऽ- **स्तित्वैकत्वाभ्यामनन्ये सर्वभावाः** । के च ते ? **घटादयः** घट-पटादयः । **एकश्च घटस्तदनन्यदस्तित्वम्,** एकघटादनन्यदस्तित्वम्, तस्मादेक-घटाभ्यामनन्यस्मादस्तित्वादनन्ये सर्वभावाः । अत एकस्मादव्यतिरेकात् सर्वमेव घटः पटादिः । **संश्च घट** इति सत्त्वेनैकत्वाव्यतिरेकद्वारेण पघटैकत्वास्तित्वाभ्यां सर्वभावघटत्वं यथा एवं **घटे सर्वसिद्धिः** अस्तित्वाव्यतिरेकादेकत्वाव्यतिरेकत्वाच्चेति घटे सर्वसिद्धिरुक्ता । § 2949 - /ms

**तथा घटत्व**मित्यादिना घटे अस्तित्वैकत्वाव्यतिरेकत्वादनर्थान्तरत्वादिनाऽस्तित्वैकत्वाव्यतिरेकाद् घटवत् सर्वः पटादिरपि घटः । **तथाऽपादिः**

---

१७ य] पृ° ८३६ पं° २ ॥
१८ म]
सामान्य°nayacakra-ms-bhā । स
मन्य° ? ॥
२० य] **यत्रस्यानर्थान्तरत्वं तत्रस्य** प्र° ॥
२७ त्वाव्य]
°व्यतिरिक्तत्वा°nayacakra-ms-ya ।
तुलना-पं° १७ ॥
२८ त] पृ° ८३६ पं° ६ ॥
२८ त्वाव्य] तुलना पं° १७ ॥
२९ त] पृ° ८३६ पं° ८ ॥

उदकादिरपि घट एव यावान् भावः, न मे कश्चिद्दोषः, मत्पक्षसाधना एव ते हेतवः । तन्निदर्शनम्--देशमात्रभेदे तावत् **ऊर्ध्वमध्यबुध्नदेशभेदेऽप्यभिन्नः स एवैकोऽस्ति च घटः**, कालमात्रभेदेऽपि **बाल-कुमारादिभेदे स एवैको नरः, तथा सर्वभावाः**, परस्परतो देश-काला-ऽऽकारादिमात्रभेदेऽपि एक-भवनाविशिष्टत्वादभिन्न एक एव भावो भिन्न इवाभाति । § 2950

**तथा चेत्यादि** । एवमुक्तन्यायेन सर्वात्मकमेवकमेवास्ति नित्यं सर्वगतं सर्वभेदस्वभावं च वस्त्विति प्रत्यक्षादिप्रमाणैरुपलभामहे । अतो**ऽन्यथा**

865/mj **प्रत्यक्षादिविरोधाः**, घटस्य कपाल-मृत्-कर्पास

* * *

एते चेन्नेष्यन्ते सर्वं घटोऽस्त्येक इति प्रतिपत्तव्यम्, घटानर्थान्तरत्वात्, घटस्वात्मवत् ।

विपरीतस्वभावाभावबहुत्वाद्याशङ्कानवतार एव अन्यत्वानभ्युपगमात् ।

अथोच्येत--नन्वन्यथा तावद् नास्त्येव घटः । घटः पटत्वेन नास्ति पटोऽपि घटत्वेनेत्यादि । घटो हि घट एवोपलभ्यते न त्वसौ पटोऽपीति । अथ पुनः सामान्ये घटस्यास्तित्वैकत्वे स्यातां ततः सर्वरूप उपलभ्येत घटः ।

को वा ब्रवीति नोपलभ्यत इति ? (?')न भोः ! अहमुपलभ्यमानमेव सर्वरूपं सन्तं

* * *

तन्तु-पट-व्रीह्युदकादिपरिवर्तस्य प्रत्यक्षं दर्शनात् प्रत्यक्षविरोधस्तद्भावमेव सर्वात्मकमनिच्छतः । तादृग्विधार्थानुमेयत्वादनुमानविरोधः लोका-ऽऽग-

- /ms मा-ऽभ्युपगम-स्ववचनविरोधाः स्वपरलोकप्रसिद्धसाधनदूषणसंव्यवहाराभ्युपगमादस्त्येकत्वाव्यतिरेकाच्च तेषाम् । § 2951

**एते चेन्नेष्यन्ते** मा भूवन्नेते दोषा इति मदुक्तं यावत् किञ्चित् तत् **सर्वं घटोऽस्त्येक इति प्रतिपत्तव्यम्**, कस्मात् ? **घटानर्थान्तरत्वात्, घटस्वात्मवदि**ति साधनमुपसंहारार्थम् । एवं तावत् त्रयाणामेकत्वे नास्ति दोषः । § 2952

यत् पुनरुक्तम् अस्त्येकघटानां त्रयाणां नानात्वे विपरीतस्वभावत्वं घटबहुत्वमभावत्वं च प्राप्नुयुः इति विकल्पान्तराशङ्कया विचारान्तरं कृतं तत्र ब्रूमः **--विपरीतस्वभावा-ऽभाव-बहुत्वाद्याशङ्कानवतार एव, अन्यत्वानभ्युपगमात्** सर्वशक्त्येकवस्तुतदात्मभेदैकीभावेन संसिद्धिसद्भावाभ्युपगमाद-

---

१ का] °दिपरि घटnayacakra-ms-ya ॥
१ न] ये प्र° ॥
६ र्वात्म] त्यकमेवास्तिnayacakra-ms-ya । पृ° ८६१ पं° ११ ॥
८ प्र] पृ° ८३७ पं° १ ॥
२१ विरोधाः] °धाः परलोक°nayacakra-ms-bhā ॥
२३ ए] पृ° ८३७ पं° ३ ॥
२७ रु] पृ° ८३७ पं° २०, पृ° ८३९ पं° १, पृ° ८४० पं° २ ॥
३० स] पृ° ८६३ पं° २३, पृ° ८६१ पं° १७ ॥

प्रतिज्ञातव्यास्यारोपणं तत् स्वमतिविलसितमात्रमेव ते । तस्माद् तद्विकल्पगतदोषा नास्मान् बाधन्त इति । § 2953

**अथोच्येत--नन्वन्यथा तावदित्यादि** । इदं तावद् नास्तित्वं प्रत्यक्षादिप्रमाणसिद्धम्--घटादि अन्यदन्येन प्रकारेण उष्ट्राद्यप्य[न्य]दन्येन घटोऽपि पटादुष्ट्रोऽपि गर्दभादन्योऽन्यथा प्रत्यक्षादिभिरुपलभ्यते नास्तीति, तद्यथा--घटः पटत्वेन नास्ति पटोऽपि घटत्वेनेत्यादि । तद् भावयति **--घटो हीत्यादि**, **हि**शब्दो यस्मादर्थे, यस्माद् घटो घट एवोपलभ्यते न त्वसौ पटोऽपीति - /ms उपलभ्यते, तस्मात् प्रत्यक्षत एव घटः पटत्वेन नास्ति । अथ पुनस्त्वन्मतेन यदि सामान्ये घटस्य तस्यास्तित्वैकत्वे स्यातां ततस्त्वदुक्तन्यायेन सर्वरूप उपलभ्येत घटः पट-कट-रथादिरूपः, न तूपलभ्यते, तस्मान्नास्ति पटादित्वेनेति पररूपेणाभावः । तथा स्वरूपेणाप्यभावः पररूपासत्त्वादिति प्राप्तः खपुष्पवदिति । § 2954

अत्र ब्रूमः **--को वा ब्रवीतीत्यादि** । सर्वरूप उपलभ्यत एव, नोपलभ्यते इति त्वन्मुखादेतच्छ्रूयते । **न भो** इत्यादि, त्वं नाम सर्वात्मकमुपलभ्यमानमप्यपलप्य शून्यं कर्तुमिच्छसि, न पुनरहमुपलभ्यमानमेव सर्वरूपं सन्तं कर्तुं शक्नोमि इत्यहो साहसम् । उपलब्धिः सर्वलोकप्रत्यक्षा * 866/mj

* * *

कर्तुं शक्नोमि(?') इत्यहो साहसम् । घटो मृत्, मृदः पृथिवीत्वम्, पृथिव्या द्रव्यत्वं द्रुविकारत्वात्, द्रव्यस्य भव्यत्वाद् भव्यस्य भवितृत्वाद् भवितुः सर्वत्वात् सर्वं हि भवद् भवति इति सर्वस्य सर्वत्वात् सर्वरूपो घट उपलभ्यते हस्तवत् ।

अथोच्येत--भिन्न एवासावर्थो भिन्नप्रकारत्वात् वादिप्रतिवादिमतिवचनवत् । न, तुल्यत्वात् । येन प्रकारेणैकस्यात्मलाभस्तेन प्रकारेणास्तित्वैकत्वादिना सर्वभावानामप्यात्मलाभः । सर्वोऽप्यभिन्नोऽसावर्थः, नञ्सहितः स एव हेतुः, एकवत् । न हि ताभ्यामस्ति-

* * *

त्वयाऽपलप्यमाना पूर्वोक्तसर्वप्रमाणविरोधितां ते वचसः सम्पादयति । तस्मादयुक्तो भवतोऽभिप्राय इति ग्रन्थो गतार्थत्वान्न विव्रियते । § 2955

तद् वस्तु घटाख्यं भवत् सर्वरूपं भवति इत्येतद् भावयितुमाह **--घटो मृत्**, मृन्मयत्वात् मृत्त्वं घटस्य सिद्धम्, मृदः पृथिवीत्वं तदंशत्वात्, पृथिव्या द्रव्यत्वं द्रुविकारत्वात् सत्ताविकारत्वात्, द्रव्यस्य भव्यत्वात्, भव्यस्य भवितृत्वात्, भवितुः सर्वत्वात्, सर्वं हि भवद् भवति, तच्च सदस्ति भाव इति

२ बा] वाधन्तnayacakra-ms-bhā । व्यधत्त nayacakra-ms-ya ॥
३ अ] अथोचेतnayacakra-ms-bhā । अथोच्यते nayacakra-ms-ya ॥
८ प] पटत्वेनास्तिnayacakra-ms-ya ॥
१४ न] न भोः प्र° ॥
१६ *] पृ° ८६६ पं° १४ ॥
२६ विरोधितां] ते चसःnayacakra-ms-ya ॥
३० स] सत्वाधिकारत्वात् प्र° ॥

घट-पटादि सर्वं परस्परस्वरूपम्, तस्मात् सर्वस्य सर्वत्वात् सर्वरूपो घट उपलभ्यते । किमिव ? **हस्तवत्,** यथा हस्तोऽङ्गुलपर्व-सन्धि-रेखादिसर्वरूप उपलभ्यते सदेकाङ्गुलाद्यात्मकत्वात् तथा घटोऽपि सदेकात्मकपटादिरूप उपलभ्यत एवेति न किञ्चिदेतत् **अन्यथा तावन्नास्त्येव घटः** इति, अन्यथा - /ms तथापि च घटस्य सत्त्वाद[न्य]थात्वासिद्धेरिति । § 2956

**अथोच्येत**--अन्यत्वं तर्हि साधयामि **भिन्न एवासावर्थो** घटः पटादिभ्यो **भिन्नप्रकारत्वात् वादि-प्रतिवादिमतिवचनवत्** वर्ण-संस्थान-प्रयोजनादिप्रकार-भेददर्शनाच्च नासिद्धिर्हेतोः । अतोऽन्यत्वे सिद्धे तदुपलब्धिरपि भिन्नप्रकारैवेति न स्यात् सर्वसर्वरूपोपलब्धिरिति । § 2957

एतच्च **न, तुल्यत्वात्,** नैतदुत्तरं तुल्यत्वादस्य हेतोरस्मत्पक्षसाध-नत्वेन । तद्भावना --*__येन प्रकारेणैकस्यात्मलाभो__ घटस्य **तेन प्रकारेणास्तित्वैकत्वादिना सर्वभावानामप्यात्मलाभो** देश-कालभेदाभिम-तोद्र्ध्व-मध्या-ऽधोभाग-नव-युव-मध्य-पुराणादिना । अतः प्रतिज्ञायते -- **सर्वोऽप्यभिन्नोऽसावर्थ** इति । **नञ्सहितः स एव हेतुः** आत्मलाभे भिन्नप्र-कारत्वात् इति यस्त्वयोक्तः आत्मलाभेऽभिन्नप्रकारत्वात् इति स वक्तव्यः । **एकवदिति** दृष्टान्तः, यथैको घटः पटो वा भवन्नूर्ध्वादि-नवादि-देश-कालप्र-कारेण भिन्न इत्यभिमतोऽप्यभिन्न एव अस्तित्वैकत्व-घटत्वाभेदात् एवं पटादिः तथा सर्वभावा अभिन्नप्रकारात्मलाभत्वाः स्युः । § 2958
867/mj

त्वैकत्वाभ्यां घटस्यान्यत्वमस्ति घटाद्वा सर्वभेदभाजस्तयोर-न्यत्वम् । ततस्तदनन्यत्वे तेषामपि घटात्मकत्वं तदनर्थान्तरत्वात् घटस्वात्मवत् । § 2959

नन्वेकत्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यते । ननु तत् स-र्वसिद्धान्तेष्वपि प्रत्यक्षसिद्धमतथा मत्वा मोक्षाय यत्यते । इति संयुक्तेरपि सर्वभावाः सन्ति । § 2960

तथानुत्पादादपि सर्वभावाः सन्ति । यदि हि तद् वस्तूत्प-द्येत विनश्येद् वा ततः प्रागभाव-पश्चादभाववद् मध्येऽप्यभाव-स्वाभाव्यान्न स्यादेकरूपं त्वदिष्टशून्यता वा स्यात् । § 2961

---

२ प] °सर्वं°nayacakra-ms-bhā ॥
३ स] सदेकाद्यात्मक°nayacakra-ms-bhā ॥
४ अ] पृ° ८६५ पं° ३ ॥
६ अ] अथोच्येतेnayacakra-ms-bhā । अथोच्यते nayacakra-ms-ya ॥
१० त्वा] °त्वात्ऽस्यnayacakra-ms-ya । त्वात्स्य° nayacakra-ms-bhā ॥
११ *] पृ° ८४१ पं° १ ॥
१४ स] पृ° ८४१ पं° २ ॥
१४ ला] °लाभेऽभिन्न°nayacakra-ms-bhā ॥ nayacakra-ms-ya ॥

मा मंस्था असिद्धो हेतुरित्यत आह --**न हि ताभ्यामस्तित्वैकत्वाभ्यां घटस्यान्यत्वमस्ति** स त्वेक एव घटो यस्मात् **घटाद्वा सर्वभेदभाजस्तयोर**स्तित्वैकत्वयो**रन्यत्वम् न हि** इति वर्तते, सर्वान् पट-कटादीन् भेदान् स्वग- - /ms तानूर्ध्वादि-नवादीनिव भजमाना[द्] घटादस्तित्वैकत्वयोरनानात्वम् । § 2962

ततः किम् ? **ततस्तदनन्यत्वे** घटास्तित्वैकत्वानन्यत्वेऽभिहितन्यायेन सिद्धे **सर्वे भावाः पटादयोऽपि ततोऽनन्ये, तदस्तित्वैकत्वाभ्यामनर्थान्तरत्वात्, घटवदि**त्युक्तत्वात् । अत आह --**तेषामपि घटात्मकत्वं** पटादीनां **तदनर्थान्तरत्वात्** घटास्तित्वैकत्वानर्थान्तरत्वात् **घटस्वात्मव**दिति भावितार्थोऽयमतीतार्थोपसंहारः । § 2963

अत्राह --**नन्वेकत्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यते** इति । इत्थं सर्वमेकं सर्वात्मकम् इति ब्रुवतस्ते प्रत्यक्षदृष्टं भेदेनाऽशनायितभुक्त्यनन्तरा तृप्तिर्बुभुक्षाविरोधिनी तदनन्तरभावि च सुखं दुःखविरोधीत्येवमादि विरुध्यते, न हि प्रत्यक्षविरुद्धं प्रतिज्ञातुं योग्यमिति । § 2964

अत्र ब्रूमः --**ननु तत् सर्वसिद्धान्तेष्वपि प्रत्यक्षसिद्धमतथा मत्वा मोक्षाय यत्यते** इति । ननु विषयसुखानामतथात्वात् दुःखप्रतीकारमात्रत्वात् दुःखसन्मिश्रत्वात् दुःखभूयिष्ठत्वात् अनात्यन्तिकत्वाच्च दुःखत्वमेव, तृप्तेरपि गृद्ध्यभिलाषजननहेतुत्वादतृप्तित्वमेवेति मत्वा निराबाधमपराधीनमात्यन्तिकमैकान्तिकं विषयसुखविपरीतं कथं नाम मुक्तिसुखं निर्द्वन्द्वं प्राप्नुयाम इति शास्त्रप्रामाण्यात् सर्वसिद्धान्तप्रसिद्धप्रवृत्तित्वान्न त्वया पुनरन्या विमतिः का-**र्येति संयुक्तेरपि सर्वभावाः सन्तीति** ग्राह्याः । § 2965

शब्दाद् यत्त्वया तर्क्यते तस्योपपत्तिः सम्भाव्येतोत्पत्ति-विनाशसद्भावे । किं तर्हि ? **न तु कस्यचिद् वस्तुन आदिः** उत्पत्तिः **अन्तः** विनाशो **वास्ति ।** कस्मात् ? **वस्तुत्वात्यागात्,** न हि वस्तु स्वरूपं वस्तुत्वं त्यजति । किमिव ? **शिवकादि-कपालादिघ (Edtext outside numbered paragraph)ट-मृद्वत्,** यथा हि घटः शिवकस्तूपक-च्छत्रक-कुशूल-घटावस्थासु भेदाभिमतासु मृत्त्वाभेदाद् मृदेव, कपाल-शर्करिका-धूलि-तुटि-परमाणुष्वपि मृत्तत्त्वाद् मृदेवाद्यन्तरहिता, तथान्यदपि विज्ञानादि वस्तुत्वात्यागादिति नास्त्युत्पादः, तदभावाद् विनाशाभावः । किञ्च, **प्रत्यक्षमेवानाद्यनन्तत्वात्** मृच्छिवक-कपालादिविपरिवर्तेष्वपि रूपादितत्त्वस्योत्पाद-विनाशाभावादनाद्यनन्तं मूर्तम्, मूर्तवच्चामूर्तमपि वस्तुत्वात्यागादनुत्पाद-विनाशाभ्यामनाद्यनन्तम् । तस्मात् सततम[व]स्थानमेव वस्तुनः । § 2966

**तथानुत्पादादपि सर्वभावाः सन्ति । यदि हि** इत्यादि, **यदि हि तद्** - /ms

२ घ] घटा सर्वnayacakra-ms-ya ॥
४ योर] °रनन्यत्वम् ? ॥
५ स्त] पृ° ८४१ पं° ५ ॥
६ स] सर्वभावा घटा°nayacakra-ms-ya ॥
१५ त्वा] मोक्षायायत्यते प्र° । प° । पृ° ८४२ पं° २३ ॥
१६ स] °सन्मिश्र प्र° ॥
१९ वृत्तित्वान्न] °न्न या पुन°nayacakra-ms-ya ॥
२१ त] पृ° ८४२ पं° २५ ॥

**वस्तूत्पद्येत** उत्पन्नत्वाच्च विनश्येदेवेत्युत्पद्येत **विनश्येद् वा,** ततः किम् ? **ततः प्रागभाव** उत्पत्तेः, **पश्चादभावो,** विनाशात्, **तद्वद् मध्येऽप्यभावस्वाभाव्यान्न स्यादेकरूपमिति** भेदवद्वा स्यात्

न तु कस्यचिद् वस्तुन आदिरन्तो वास्ति वस्तुत्वात्यागात् शिवकादिकपालादिघटमृद्वत् प्रत्यक्षमेवानाद्यनन्तत्वात् ।

अतोऽसौ तथावस्थित एक एव भावो निर्भेदः, भेदासम्भवात् । उत्पादविनाशाभ्यां हि भेदः सम्भाव्येत ।

नन्वनिष्ठितं प्राक्, पश्चादारम्भात् क्रियातो निष्ठा । यदि निष्ठितं स्याद् निष्ठितत्वान्नारभ्येत निष्पन्नघटवत् ।

इदं विप्रतिषिद्धम् । यद्यनिष्ठितम्, अनिष्ठितत्वादसत्त्वात् खपुष्पवन्नारभ्यते, इतरो घटवत् । किं न खपुष्पादद्रव्यादेर्वारभ्यते ?

* * *

868/mj स्यात्, वा**त्वदिष्टशून्यता वा** *

* * *

न तु कस्यचिद् वस्तुन आदिरन्तो वास्ति वस्तुत्वात्यागात् शिवकादिकपालादिघटमृद्वत् प्रत्यक्षमेवानाद्यनन्तत्वात् ।

अतोऽसौ तथावस्थित एक एव भावो निर्भेदः, भेदासम्भवात् । उत्पादविनाशाभ्यां हि भेदः सम्भाव्येत ।

नन्वनिष्ठितं प्राक्, पश्चादारम्भात् क्रियातो निष्ठा । यदि निष्ठितं स्याद् निष्ठितत्वान्नारभ्येत निष्पन्नघटवत् ।

इदं विप्रतिषिद्धम् । यद्यनिष्ठितम्, अनिष्ठितत्वादसत्त्वात् खपुष्पवन्नारभ्यते, इतरो घटवत् । किं न खपुष्पादद्रव्यादेर्वारभ्यते ?

* * *

स्यात्, वा

तदुपसंहरति --**अतोऽसौ तथावस्थित एक एव भावो निर्भेद** इति, **भेदासम्भवात्** भेदसम्भवकारणाभावात् । तद्दर्शयति वैधर्म्येण--**उत्पादविनाशाभ्यां हि भेदः सम्भाव्येत,** स तूक्तविधिनानाद्यनन्तत्वान्न सम्भवतीति । § 2967

अत्राह --**नन्वनिष्ठित**मित्यादि । ननूक्तं **द्रव्याणि द्रव्यान्तरमारभन्ते** पृथिव्यादिपरमाणुद्रव्याणि स्वतः स्वात्मनि द्वे बहूनि वा परस्परसंयोगापेक्षाणि आरभन्ते कार्यद्रव्यमन्यत् । **गुणाश्च** आरम्भकचतुर्विधद्रव्यसमवेतास्तैरारब्धे कार्यद्रव्ये नियमत एव स्वतः परात्मनि **गुणान्तर**मारभन्ते । कर्म संयोग-

२ भा] ॰भावस्वा भावस्वा प्र॰ ॥
१३ *] पृ॰ ८४२ पं॰ १८ ॥
२६ त्वान्न] ॰न्न
भवतीतिnayacakra-ms-ya ॥
२८ न्व] पृ॰ ८४३ पं॰ २० ॥
२८ द्र] पृ॰ ८४३ पं॰ १३ । इदमत्र
बोध्यम्- द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्वै॰ सू॰ १ । २ । ८, ९ इति वैशेषिकसूत्रद्वयं किञ्चित्प्राचीनविवरणसहितमत्रोट्टङ्कितं भाति । तुलना--पृ॰ ४३७ पं॰ १०-१३ ॥

विभाग-संस्कारानारभते परतः परात्मनि । इत्यादिना आरम्भवचनेनानिष्ठितं प्राक्, पश्चादारम्भात् क्रिया, क्रियातो निष्ठेत्यनिष्ठितम् । तत्र यदि निष्ठितं स्याद् निष्ठितत्वान्नाऽऽरभ्येत निष्पन्नघटवदिति । § 2968

अत्र ब्रूमः --**इदं विप्रतिषिद्धमित्यादि** । विप्रतिषेधं भावयति **यद्य-निष्ठितमित्यादिना** । अनिष्ठितत्वादसत् खपुष्पवत्, असत्त्वात् तद्वद् नारभ्यते नारभते । **इतरो घटवदिति** वैधर्म्यदृष्टान्तः, * 869/mj

* * *

तद्रूपशक्तिविवर्तमात्रं त्वेतत् सर्वम् भावैक्यात् । अतो नानिष्ठितं वस्तु, अनारब्धारब्धत्वात् शिक्यकादिवत् ।

अथैवमपि वस्तुनोऽवस्थानं नेष्यते ततोऽनारब्धानि तानि द्रव्यान्तराणि, अनिष्ठितत्वात्, खपुष्पवत् । अथोच्येत--आदिः प्रत्यक्षत एव भेदहेतुर्दृश्य-ते । स किं नित्योऽनित्यः यदि नित्यः सर्ववस्तुनित्यता, आदिस्वरूपत्वात् तन्नित्यत्वाच्च । क्रियमाणनिष्ठितयोश्चा-

* * *

यथा घटो मृद्रूपादित्वेन निष्ठित एव सन्नाकारान्तरव्यक्तिरूपेणारभ्यते पृथुबुध्नोर्द्धग्रीवादिना न तथारभ्येतेति । तद्यक्तिः--किं न खपुष्पादद्र-व्यादेर्वारभ्यते ? इति द्रव्य-गुण-कर्मादिभेदवद्वस्तुविपरीतत् कुतश्चिदनार-म्भाद् निष्ठितादेवोत्पत्तिरभिव्यक्तिरारम्भः । § 2969

एतदुक्तं भवति सङ्क्षेपतः--तद्रूपशक्तिविवर्तमात्रं त्वेतत् सर्वमिति । किं कारणम् ? **भावैक्यात्,** एकस्यैव पुरुषादेर्भावस्य कारणमात्रस्य विजृम्भित-त्वात् कार्यत्वावस्थामात्रभेदेन । § 2970

तदुपसंहृत्याह --**अतो नानिष्ठितमित्यादि** । निष्ठितमेव वस्तु नानिष्ठितम्, कस्मात् ? **अनारब्धारब्धत्वात्** अनारब्धं कार्याभिव्यक्तिरूपेण आरब्धकेमेव - /ms च कारणलीनशक्त्यवस्थत्वेन, यच्चानारब्धारब्धं तद् निष्ठितमेव नानिष्ठित-म्, किमिव ? **शिक्यकादिवत्,** यथानारब्धमपि शिक्यकत्वेन सूत्रं शक्त-त्वाद् निष्ठितमेवमन्यदपि वस्त्विति पथा यज्ञोपवीतसूत्रादिदृष्टान्तैर्भावयितव्यम् । § 2971

**अथैवमपीत्यादि** । इत्थं युक्त्या प्रतिपादितमप्यवस्थानं वस्तुनो ने[ष्यते त]तस्ते अनिष्टापादनमिदम् --**अनारब्धानि तानि द्रव्यान्तराणि** आरब्धाभिम-तान्यपि, **अनिष्ठितत्वात्, खपुष्पवद**त्यन्तासत्त्वादित्यभिप्रायः । § 2972

---

६ *] मूर्तत्वात्nayacakra-ms-bhā । मूर्तत्वा nayacakra-ms-ya ॥
१४ क्तिरू] °रूपेतोवध्यतेnayacakra-ms-bhā । °रूपतोवध्यते nayacakra-ms-ya । °रूपतो व्यज्यते ? ॥
१८ मा] °मात्रत्वे तत् प्र° ॥
१९ भा] भाव्यैक्यात् nayacakra-ms-bhā । भाव्येक्यात् nayacakra-ms-ya ॥
२२ अनार] °ब्धंकार्माभि°nayacakra-ms-bhā । °ब्धकर्माभि° nayacakra-ms-ya ॥
२२ आ] आरब्धं केवलकारण° ? ॥
२३ य] °यच्चारनारब्धा प्र° ॥
२५ प] यथाnayacakra-ms-ya । येथा nayacakra-ms-bhā ॥
२८ अ] पृ° ८४३ पं° २१ ॥

**अथोच्येतेत्यादि** । **आदिरुत्पत्तिः प्रत्यक्षत एव** घटादे**र्दृश्यते,** स च भेदे हेतुर्घटादेर्वस्तुनः, यदि ह्यनुत्पन्नाविनष्टं स्यात् स्यादभिन्नमिति । अत्र पृच्छ्यसे **--स किमित्यादि, स** आदिरारम्भः स प्रत्यक्षाभिमतः **किं नित्योऽनित्यः ?** इति निर्धार्यः । किञ्चातः ? **यदि नित्यः सर्ववस्तुनित्यता,** सर्वेषां घटादीनां च वस्तूनामविशेषेण नित्यत्वमे[व] स्यात्, **आदिस्वरूपत्वात् तन्नित्यत्वाच्च** । अनिष्टं चैतद् ब्रुवतः । § 2973

किञ्चान्यत्, **क्रियमाण-निष्ठितयोश्चाभावात् तथाजन्यभेदाभावः** । आदेर्नित्यत्वादादेरेव च वस्तुत्वादारम्भ एवादिसंज्ञोऽस्ति न क्रिया-निष्ठे स्तः, तयोश्च क्रियमाण-निष्ठयोरभावात् तथा जनयितव्यस्य तेन प्रकारेण घ- - /ms टादित्वेन उत्पाद्यस्य भेदस्याभावः । ततश्चास्मदिष्टोऽवस्थानपक्ष एव जयति । § 2974

870/mj

भावात् तथाजन्यभेदाभावः । आदिप्रत्यक्षप्रमाणीकरणाच्च क्रिया निष्ठाप्रत्यक्षद्वयपरित्यागः । तयोश्च दृष्टव्यभिचारमितर- त्रैकस्मिन् प्रत्यक्षं कथं प्रमाणीकरिष्यत इति पुनरपि तद्धानिः । § 2975

अथादिनित्यतायां दोषान्निर्वृत्तनित्यत्वमभ्युपगच्छसि, इत्थं हि निर्वृत्तनित्यतायां सर्वैक्यं नास्ति पृथग्विभिन्नस्वरूपत्वात् । § 2976

नन्वेवमपि नारम्भो न क्रिया इति भेदाभाव एव । अथादिर- नित्योऽभ्युपगम्यते ततः स किं जातोऽजातः ? यदि जातस्त- स्यैवानुत्पादः, अजातत्वात्, निर्वृत्तघटवदित्यादिः, तत्वदुक्तवदेवेदं न युज्यते । § 2977

अन्तोक्तमपि च [त्वदुक्तदोषाविमोक्षान्न युज्यते पूर्ववदित्य- न्तेऽप्युत्पादाभावः] एवमनुत्पादात् सर्वभेदैक्यसिद्धिः । § 2978

किञ्चान्यत्, **आदिप्रत्यक्षेत्यादि** । **आदिः प्रत्यक्षत एव भेदहेतुर्दृश्यत** इति विशेष्य आदिदेरेव प्रत्यक्षं प्रमाणीकृतं न क्रिया-निष्ठे, तयोः प्रत्यक्षयोरपि परित्यागश्च कृतः, स च प्रत्यक्षविरोधादयुक्तः । **तयोश्चेत्यादि,** तयोश्च प्रत्य- क्षयोः क्रिया-निष्ठयोरप्रमाणीकरणे प्रत्यक्षमप्यप्रमाणमिति दृष्टो व्यभिचारः, तद्दर्शनादादेरपि प्रत्यक्षस्य तद्वदेवाप्रामाण्यात् पुनरप्यादेः प्रत्यक्षस्य त्याग इति सर्वथा त्वयैव प्रत्यक्षमप्रमाणीकृतम् । एवं तावदादेर्नित्यतायां दोषः । § 2979

१ आ] पृ° ८७० पं° १०, २७ ॥
३ स] सत्प्रत्य° ? ॥
२४ आ] पृ° ८६९ पं° ४, पृ° ८७० पं° २७ ॥
२५ प्र] प्रत्यक्षोरपिnayacakra-ms-ya ॥
२९ क्ष] °क्षप्रमा°nayacakra-ms-ya ॥

**अथादिनित्यतायामित्यादि** । एतद्दोषभयादादिनित्यत्वपक्षं त्यक्त्वा निर्वृत्तनित्यत्वमभ्युपगच्छसि दोषाभावं च यस्मान्न परैकतेति, इत्थं हि निर्वृत्तनित्यतायां त्वयोक्तं सर्वैक्यम्, तच्च नास्ति *पृथग्विभिन्नस्वरूपत्वादिति । § 2980

अत्र ब्रूमः --**नन्वेवमपी**त्यादि । यदि नित्यनिष्ठितमेव वस्तु [त]तो नारम्भोऽस्ति न क्रिया इत्यभ्युपगतत्वात् कुतो भेद आरम्भः क्रिया लभ्यते ? इति भेदाभाव एवास्मदिष्टः प्रसक्तः । एवं तावदादिनित्यतायां दोषः । § 2981

**अथे**त्यादि । एतद्दोषभयादादेरनित्यताभ्युपगम्यते चेत् त्वया तत इत्थं पर्यनुयोज्योऽसि— **स किमादिर्जातोऽजातः ?** इत्यादि त्वत्पर्यनुयोगवदेव त्रिष्वपि विकल्पेषु त्वदुक्तदोषवद्दोषा इति दिशं दर्शयति --**यदि जातः तस्यैवानुत्पादः, अजातत्वात्, निर्वृत्तघटवदित्यादि**रिति प्रथमविकल्पमुक्त्वा शेषं ग्रन्थमतिदिशति --**तत्त्वदुक्तवदेवेदं न युज्यते** इत्यजातजाताजातविकल्पयोरपि त्वदुक्ता एव दोषा इत्युत्पादाभावः । § 2982 - /ms

इत्यादि स एव पर्यनुयोगः, विशेषस्तु अत्र **अन्तप्रत्यक्षप्रमाणीकरणाच्च आरम्भ-क्रियमाणप्रत्यक्षद्वयपरित्यागः, तयोश्च दृष्टव्यभिचारमितरत्रैकस्मिन् प्रत्यक्षं कथं प्रमाणीकरिष्यते ? इति पुनरपि तद्धानि**रिति वाच्य इत्यतिदेशफलम् --**एवमनुत्पादात् सर्वभेदैक्यसिद्धिः** । § 2983

**अन्तोक्तमपि चे**त्यादि, अन्तेऽप्युत्पादाभावो विनष्टा-ऽविनष्ट-विनष्टाविनष्टविकल्पेषु त्वदुक्तदोषाविमोक्षात् याव**दथोच्येत--अन्तः प्रत्यक्ष एव भेदहेतुर्दृश्यत** इति अस्मिन् पूर्वपक्षे

सामग्रीदर्शनादपि सर्वास्तित्वसिद्धिः । तथा च तदेवैकं सर्वात्मकम् । सामग्री अशेषभावानां भावान्तरं भावान्तरं प्रति वृत्तिः । यथा पृथिव्यादिसामग्र्याः कर्पास-तद्रूपाद्यणुपक्ष्म-तन्तु-पटादिकं प्रति । एतत्संवादेन घटपटादीति दृश्यते संज्ञा यतः प्रवर्तते चेतनाचेतनं जगत् ।

यदि सामग्र्यशेषता सर्वस्य सर्वत्र वृत्तेस्तिलेषु तैलवत् सिकतास्वपि तैलं स्यात् ।

* * *

नित्यस किं नित्योऽ 871/mj

* * *

सामग्रीदर्शनादपि सर्वास्तित्वसिद्धिः । तथा च तदेवैकं सर्वात्मकम् । सामग्री अशेषभावानां भावान्तरं भावान्तरं प्रति वृत्तिः । यथा पृथिव्यादिसामग्र्याः कर्पास-तद्रूपाद्यणुपक्ष्म-तन्तु-पटादिकं प्रति । एतत्संवादेन घटपटादीति दृश्यते

१ अ] पृ० ८४५ पं० ३ ॥
२ ग] गच्छतिnayacakra-ms-bhā ॥
३ *] पृथग्विन्नnayacakra-ms-bhā ॥
४ व] वस्तु वो नारम्भोnayacakra-ms-bhā ॥
७ अ] पृ० ८४५ पं० ५ ॥
९ दुक्त] °दोवद्दोषाnayacakra-ms-ya ॥
१० दित्या] °त्यादेरितिnayacakra-ms-ya ॥
१४ त्व] पृ० ८४६ पं० ४ ॥
१४ द] पृ० ८६१ पं० ४ ॥

संज्ञा यतः प्रवर्तते चेतनाचेतनं जगत् ।
यदि सामग्र्यशेषता सर्वस्य सर्वत्र वृत्तेस्तिलेषु तैलवत् सिकतास्वपि तैलं स्यात् ।

* * *

नित्य

किञ्च, **सामग्रीदर्शनादपि** पुरुष-नियति-काल-स्वभाव-भावाद्यन्यतम-कारणात्मकस्यावस्थादिभेदसामग्र्यामेवैवं दर्शनादपि हेतोः **सर्वास्तित्वसिद्धिः** । **तथा च** तेन प्रकारेणोत्पत्ति-विनाशाभावादिप्रोक्तकारणतया **तदेवैकं सर्वात्मकं** स्वं परमुभयं चेत्येतमर्थं सम्पादयति सामग्री स्वावयवात्मकत्वात् तस्याः । सा च सामग्री दृश्यते प्रत्यक्षतः । किंलक्षणा सामग्री ? इति चेत्, उच्यते --**सामग्री अशेषभावानां भावान्तरं भावान्तरं प्रति वृत्तिः** एकैकस्मिन्नभिन्नैकात्मकवस्तुभेदमात्रे भावे भेदान्तरस्यैकैकस्य वृत्तिर्या सा सामग्री इत्युच्यते । तद्दर्शयति --**यथा पृथिव्यादिसामग्र्या** इत्यादि, पृथिव्युदक-वह्नि-पवन-गगना-ऽऽत्मादिसर्वसमूहात्मकः कर्पासः तद्रूपादयः, तत्समूहोऽणुः, अणुसमूहाः पक्ष्माणि, [त]त्समूहास्तन्तवः, तत्समूहः पट इति तं तमर्थं प्रति सामग्री पृथिव्यप्युदकादि-तद्रूपादि-पटादिसमूहात्मिका वस्तुनोऽनेकशक्त्यात्मकस्यैकस्य व्यक्ता-ऽव्यक्तशक्त्यपेक्षत्वात् सर्वसर्वात्मकत्वात् सामग्र्यामेवं दर्शनम् । § 2984

- /ms

**एतत्संवादेने**त्यादि । एतेन सर्वसर्वात्मकैकवस्तुभेदसामग्रीदर्शनत्वेन संवादि रूपादि पृथिव्यादि परस्परसामग्री घट-पटादीति दृश्यते संज्ञा यतेतः प्रवर्तते चेतनाचेतनं जगत् यथा विधिविधिनयभङ्गे प्राग् व्याख्यातम् । तस्मात् संसिद्ध्यादिभ्योऽपि हेतुभ्यश्चेतना[चेतना]त्मकैकवस्तुविजृम्भितमात्रमिदं सिध्यतीति । § 2985

अत्राह --**यदि सामग्र्यशेषते**त्यादि । यद्यशेषं स्वभेदसामग्रीमात्रं सर्वस्य सर्वत्र वृत्तेर्यथा तिलेषु तैलं सत् तथा सिकतास्वपि तैलं स्यात् तत्राभाववत् तिलेष्वप्यभाव एव स्यात्, न तु भवति । तस्मान्नाशेषं सामग्रीमात्रमिति । § 2986

१872/mj

१. चेत्यतमर्थंnayacakra-ms-ya ॥

६ सा] पृ° ८४८ पं° १ ॥
७ स्या] °स्वावस्था ? ॥
८ स] सर्वात्यक प्र° ॥
११ भावा] भावानांतरं २ प्रति वृत्तिंnayacakra-ms-bhā । भावानंतरं २ प्रति वृत्तिं nayacakra-ms-ya ॥
१२ भा] भावो प्र° ॥
१३ ग्र्या] °ग्र्यादि पृथि°nayacakra-ms-ya ॥
१५ त्स] समूहा°nayacakra-ms-ya ॥
१८ ग्र्या] °मेव ? । पृ° ८७१ पं° १० ॥
१९ एत] एतसं°nayacakra-ms-ya ॥
२० ते] पृ° ८४८ पं° १ ॥
२१ ते] चेतनं जगत् nayacakra-ms-ya ॥
२१ विधिविधिन] पृ° १७५ ॥

ननु यथा तिलेष्वप्यव्यक्तं तैलं नोपलभ्यते तथा सिकतास्वप्यनभिव्यक्तं तैलं नोपलभ्यते सिकतानामेव तथा तथा विपरिवृत्तेः सिकतानामभावे तिलमूलाद्यभावात् । तद्वदुदक… … …द्रव्येषु… … …भावमन्यस्यात्मनि । § 2987

तथा सदा दर्शनात् । संसिद्ध्यादिहेतुभिः सम्पादितसर्वात्मकैकत्वादत्यन्तसत्यास्तेऽदर्शनादसन्त इति कल्प्येरन् । तदपि नास्त्येवादर्शनम्, भावितवदेकभवनात्मकत्वात् । तस्मात् स एवातीतः…। यथोक्तम्-- § 2988

तदेजति तन्नैजति तद् दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ शुक्लयजु॰ वा॰ सं॰ ४० । ५§ 2990

अत्रोच्यते --**ननु यथे**त्यादि । को वा ब्रवीति--सिकतासु नास्ति तैलं तिलेष्वेवास्तीति ? किन्तु यथा तिलेष्वप्यव्यक्तं स्वाभिव्यक्त्युपायाद्यंतद्यन्त्रपीडनादेर्मर्क्षते नोपलभ्यते चर्वणादिक्रियासु क्षीरवदास्वाद्यमानकृत्तिलानां मूलाङ्कुराद्यवस्थासु च तथा सिकतास्वप्यनभिव्यक्तं तैलं नोपलभ्यते सिकताभूप्रदेशोप्ततिलबीजस्याङ्कुर-मूल-पर्णादिप्रभवे सिकतानामेव तथा तथा विपरिवृत्तेः सिकतानामभावे तिलमूलाद्यभावात् सिकतास्वेव तैलमस्ति तद्वदुदकादिद्रव्येषु समासदण्डकोक्तेषु द्रव्येष्वस्ति तैलं याव**द्भावमन्यस्यात्मनी**ति तिलतयोत्पन्नजीवद्रव्यस्यापि तैलवत्त्वात् व्यक्ताव्यक्तरूपेण सर्वस्य सर्वत्र भावात् समानमेतत् । § 2991 - /ms

**तथा सदा दर्शनात्,** सर्वदा भावस्य भागान्तरादर्शनेऽपि दर्शनमेव । कस्मात् ? संसिद्ध्यादिहेतुभिः सम्पादितसर्वात्मकैकवस्तुत्वात् प्राक्पश्चादितरेतर-देश-प्रमाण-सामर्थ्य-संयोगात्यन्ताभावानां प्रतिपक्षभूता भावा एवात्यन्ताभूताभिमतवन्ध्यापुत्रान्ता इत्युक्तत्वादत्यन्तसत्यास्ते सन्तोर्थ्याऽर्थाः अदर्शनाद् दृष्टृष्टिशक्तिवैकल्याददृश्यमानभागान्तरा असन्त इति कल्प्येरन् न

१२ प्य] °प्यक्तंnayacakra-ms-bhā ॥
१२ त्त्युपाया] °याद्यत्पी°nayacakra-ms-bhā । °याद्दन्तपी° ? ॥
१३ मान] °नक्षत्ति°nayacakra-ms-ya ॥
२० भा] भावांतरातदर्श°nayacakra-ms-ya ॥ भावांतरातदर्श° nayacakra-ms-bhā । पृ॰ ८५० पं॰ १५ ॥
२१ प्रा] पृ॰ ८५९ पं॰ २ ॥
२३ स] सन्तोऽप्यर्था इत्यपि स्यादत्र ॥
२४ नाद्] द्रष्टृशक्ति° ॥
२४ ल्प्येर] °रस्तन् परnayacakra-ms-ya ॥ तुलना-पृ॰ ८५० पं॰ १३ ॥

परमार्थतोऽसन्तो न वा न दृश्यन्ते, यस्मात् **तदपि नास्त्येवादर्शनम्,** कस्मान्नास्ति ? यस्माद् भावितं सामग्रीदर्शनहेतौ एकभवनात्मकम् इति, तद्वद् **भावितवदेकभवनात्मकत्वात्** अतीतन्यायभावितसर्वात्मकभवनात्मकत्वात्, निर्विभागस्य हि वस्तुनः पर-मध्यभागाः शक्तिभेदात् कल्पिता अपि
- /ms वस्त्वभेदात् तदेव ते, भागस्य दृश्यत्वात् ततोऽपृथक्त्वाद् भागान्तराणामपि दर्शनमेव । निर्विभागमेव हि सद्वस्तु, विभागेनेक्षणं भ्रान्तिः इत्युक्तम् । **तस्मात् स (?ा)वातीत** इत्यादि गतार्थम् । तस्मात् सदा दर्शनमेव नादर्शनम् । § 2992

**यथोक्त**मित्यादिना प्रागतीतं न्यायं ज्ञापकत्वेनाह । **तदेजति तन्नैजति** इत्यादि ऋग्द्वयं तत्रैव व्याख्यातत्वान्न विव्रियते । न्यायं तु सप्रभेदं स्मारणार्थमतिदिशति

पुरुष एवेदं सर्व यद् भूतं यच्च भाव्यम् ।उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ऋग्वेदः १० । ८ । ९० § 2994 &

भावितानेकार्थद्रव्यार्थभेदवत् ।

यः पुनर्भेदः सोऽसत्येव भेदे भेदाभिमानः तस्याभिन्नस्य क्रमाभिव्यक्तेः एकद्रव्यस्वतत्त्वरूपादिवत् ।

इति द्वादशारान्तरम् ।

* * *

भेदव--**भावितानेकार्थद्रव्यार्थ**

* * *

पुरुष एवेदं सर्व यद् भूतं यच्च भाव्यम् ।उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ऋग्वेदः १० । ८ । ९० § 2997

भावितानेकार्थद्रव्यार्थभेदवत् ।

यः पुनर्भेदः सोऽसत्येव भेदे भेदाभिमानः तस्याभिन्नस्य क्रमाभिव्यक्तेः एकद्रव्यस्वतत्त्वरूपादिवत् ।

इति द्वादशारान्तरम् ।

४ भा] भागा प्र° ॥
५ त] तपृथ°nayacakra-ms-ya ॥
७ स] एवातीति nayacakra-ms-ya ॥
९ त] **तन्नेजति** प्र° । पृ° १९२ पं° ३, टिपृ° ६९ पं° १ ॥
१० इत्यादि] अत्र ऋग्द्वयम् इत्युक्तम्, तत्र **तदेजति** इत्यादि प्रथमा ऋक्, द्वितीया का ऋगत्र विवक्षितेति स्फुटं न ज्ञायते, तथापि **पुरुष एवेदं सर्वम्** इत्यादि पुरुषसूक्तं त्वत्र विवक्षितं भवेदिति भाति । दृश्यतां पृ° १८९ पं° ५, पृ° १९२ पं° ३ ॥
१३ भावितानेका] °**कार्थ्य°**nayacakra-ms-ya । °**क्यर्थ्य°** nayacakra-ms-bhā ॥

* * *

भेदवदिति द्रव्यार्थनयेषु षट्सु विध्यादिभेदेष्वाद्येषु यथा भावितं प्राक् **य** (Edtext outside numbered paragraph)**थालोकग्राहमेव वस्तु** इत्यादिषु स एवाशेषो ग्रन्थोऽत्रावतारयितव्यः । § 2999

**य पुनर्भेदो** घटः पट इत्यादिः **सोऽसत्येव भेदे भेदाभिमानः**, कस्मात् ? **तस्याभिन्नस्य** वस्तुनः **क्रमाभिव्यक्तेः**, क्रमेण हि शक्तिमतः शक्तिमात्रा अभिव्यज्यमाना भेदा इवाभासन्ते पुरुषग्रहणशक्त्यपेक्षया, न तु परमार्थतो भेदोऽस्ति । किमिव ? **एकद्रव्यस्त्वतत्त्वरूपादिवत्**, यथैकमेव घटाख्यं वस्तु चक्षुरादिग्रहणापदेशविशिष्टं रूपादिव्यपदेशभाग् भवति यथा चक्षुषा गृह्यमाणं रूपम् जिह्वया रसः घ्राणेन गन्धः श्रोत्रेण शब्दः त्वचा स्पर्श इति तथा सर्वस्याभिन्नस्यैकस्यैव घट-पटादिभेदाभावसनमभिमानमात्रमेवेति । एवं तावच्छून्यवादः पुरुषादिद्रव्यार्थवादेन निवर्तितः । § 3000

इति द्वादशारान्तरं स[1]माप्तम् ॥

# १४ अथ नयचक्रतुम्बम्

874/mj

ओँ अर्हँ § 3002

सद्गुरुभ्यो नमः § 3003

एतदपि नैवैकान्तेन युक्तमिति प्रक्रान्तमेव । तत्तश्च विधिविधिनयादारभ्य विधिविध्यन्तरानुक्रमेण यावद् द्रव्यक्रियोभयनयः तावद् द्रव्यार्थांशावधृतेः ततः परं पर्यायार्थभेदानामुत्तरोत्तरैकान्तायुक्तत्वप्रक्रान्त्या यावच्छून्यवादस्यापि एकान्तायुक्तत्वमधुना प्रक्रान्तम् । § 3004

तेषामुपरि यथालोकपरिग्रहमेव वस्तु इति विधिः । तद्व्यावर्तितसामान्यविशेषोद्धारार्थं विधिनियमविधिः । तन्निवर्तनार्थमुभयोभयनयः यावदयमवधिः । § 3005

---

१. समाप्तः प्र॰ ॥

---

१ इ ] इत्यादिnayacakra-ms-bhā ॥
३ पु ] पुरुषाग्रहण प्र॰ ॥
७ भेदा ] भेदाभासनं भेदानामवभासनमित्यर्थो भाति ॥

८ वादेन ] निर्वर्तित इति द्वा॰ nayacakra-ms-ya । निवर्त्तत इति द्वा॰ nayacakra-ms-bhā ॥

अतः परं तुम्बं नयचक्रस्य वर्तिष्यते । तदपि किं द्रव्यार्थैकान्तमतं सत्यं किमसत्यम् इत्यस्मिन् सन्देहेऽभिधीयते **--एतदपि नैवैकान्तेन युक्त-** - /ms **मिति प्रक्रान्तमेव,** कथमित्यत आह **--ततश्चे**त्यादि, **ततश्च** सर्वसंग्रहात्मकाद् विधेर्विधिनयारादारभ्य उत्तरोत्तरैकान्तायुक्तत्वप्रक्रान्त्या तेषु तेष्वरान्तरेषु विचारितमेव किं पुरुष एवावस्था अवस्था एव पुरुषः इत्यादिविकल्पपर्यनुयोगोपक्रमेणेति तदनुस्मारयति **--विधिविध्यन्तरानुक्रमेण** विधिविधेर्भेदानां पुरुष-नियति-काल-स्वभाव-भावानां पूर्वपूर्वदूषणेनोत्तरोत्तरव्यवस्थानम्, ततः परं विध्युभयादीनामनुक्रमस्य परिपाट्याः क्रमेण विधिना यावत् कोऽवधिर्द्रव्यार्थदूषणमिति चेत्, उच्यते--यावद् द्रव्य-क्रियोभयनयः उक्तस्तावद् द्रव्यार्थांशावधृतेः ततः परं पर्यायार्थभेदात्, तेषामपि पर्यायार्थभेदानामुत्तरोत्तरैकान्तायुक्तत्वप्रक्रान्त्या यावच्छून्यवादः, शून्यवादस्यापि एकान्तायुक्तत्वमधुना विधिविधिनयमते प्रक्रान्तम् । § 3006

तदेकान्तायुक्तत्वख्यापना तु एकान्तवादानां परस्परसंयुक्तत्वमापाद्य प्रत्येकशो द्विशो यावद् द्वाद[श]शः सप्रभेदस्तेषामुपरि विधिनयः प्रथमोक्तो द्रष्टव्यः, तत्स्मारणं **यथालोकपरिग्रहमेव वस्त्विति विधि**रिति, तदुत्थानादिग्र- - /ms न्थग्रहणात् समस्तारसूचनम् । § 3007

**तद्व्यावर्तिते**त्यादि, तेन विधिनयेन व्यावर्तितयोः सविकल्पयोः सामान्यविशेषयोरुद्धारार्थं विधिनियमविधिः, ततस्तन्निवर्तनार्थमुभयोभयनय इत्ययमपि क्रमो यावत् पुनरयमवधिरिति । § 3008

875/mj

यथा चानेन शून्यवादे पूर्वपक्षत्वसम्बन्धस्तथा षड्विधेन द्रव्यार्थेन । यथा च तैः सम्बन्धः शून्यवादस्य तथा विध्यादीनां द्वादशानामपि यथारुचितमभिसम्बन्धः, शून्यवादस्यापि येन केनचिदन्तरितस्य सम्बन्धोपपत्तेः । एवमेव चास्य नयचक्रमित्य-

---

२ नैवैका] °कान्ते युक्त°nayacakra-ms-ya ॥
५ पु] दृश्यतां पृ° २४६ ॥
५ अ] अवस्था नास्ति nayacakra-ms-ya ॥
७ णेनोत्त] °त्तरेत्तेरव्य°nayacakra-ms-ya । °त्तरेत्तरेत्तरव्य° nayacakra-ms-bhā ॥
८ या] यादृक्षोवधि° प्र° ॥
९ दू] °दूषणमेतिnayacakra-ms-bhā । °दूषणे सति nayacakra-ms-ya ॥
१३ त्व] °युक्तस्य ख्यापनाnayacakra-ms-bhā । °युक्तत्वस्यापना nayacakra-ms-ya ॥
१४ द्वा] द्वादशः सप्र°nayacakra-ms-bhā । द्वादशारशः सप्र° nayacakra-ms-ya ॥
१५ स्त्विति] विधि° नास्ति nayacakra-ms-ya ॥
१८ य] °भय इत्यमपि nayacakra-ms-bhā ॥
१९ म] °मविधि°nayacakra-ms-ya ॥

न्वर्थसंज्ञा स्यात् । एवं तावदस्मादन्त्यात् सर्वनयोत्थानं न विरुध्यते । यथा चास्मादेवं सर्वेभ्योऽपि । § 3009

**यथा चानेने**त्यादि, यथा चानेन विधिविधिनयेनैकान्तायुक्तत्ववादिना शून्यवादे पूर्वपक्षत्वसम्बन्धस्तथैकैकेन षड्विधेन द्रव्यार्थेन । **यथा च तै**रित्यादि, यथा च द्रव्यार्थभेदैः प्रत्येकं विधिविधिनयेनैव योगः शून्यवादस्य तथा शून्यवादे प्रतिषिद्धेऽपि तदनन्तरमेव विध्यादीनां द्वादशानामप्यराणां यथारुचितमभिसम्बन्धः, शून्यवादस्यापि **येन केनचि**देकादशानामन्यतमेनान्तरितस्य सम्बन्धोपपत्तेः, प्रत्येकं जगत्स्वभावप्रतिपादनसमर्थानां व्यापिनां **येन केनचि**दिति वचनात् यदि विध्यरनयादीनां समनन्तरेणैकाद्यन्तरितेन उत्तरेषां वा पूर्वेण समनन्तरातीतेनैकाद्यन्तरितातीतेनेत्यविरुद्धः क्रमेणोत्क्रमेणोत्क्रमक्रमाभ्यां वा सम्बन्धोऽस्तीत्यर्थः, तस्माच्च सर्वभावव्यावर्तनानन्तरसम्बन्धा[द्] द्वादशानामन्यतमादरादनन्तरस्यानन्तरस्योत्थानं तत्तदरदूषणार्थं क्रमः । तेन क्रमेण सम्बन्धेन सर्वकुमतपक्षाणां मिथ्यादृष्टिप्रणीतशास्त्राणां व्यवस्थायाश्चेष्टनार्थं सर्वमिदं **नयचक्र**शास्त्रं क्रमते सर्वैक्यभावापादितस्याद्वादानपेक्षसर्वनयमिथ्यादृष्टित्वात् तत्र तत्र च तत्तद्दौर्विहित्यस्य प्रतिपादितत्वात् परस्परविहिह ?तपक्षाणां क्रमेणोक्तार्थानुसारेण सर्वेषामन्योन्यदूषणत्वात् । § 3010 - /ms

**एवमेवे**त्यादि । एवं च कृत्वास्य शास्त्रस्य नयादीनां चक्रं **नयचक्रं** नयसमूह इत्यन्वर्थसंज्ञा स्यात्, नयानां स्वपरमतसाधन-दूषणसमर्थानां समूहत्वात् । नयन्तेऽर्थान् प्रापयन्ति नयन्ति गमयन्तीति नयाः, वस्तुनोऽनेकात्मकस्यान्यतमैकात्मकैकान्तपरिग्रहात्मका नया इति, तेषां चक्रम् । एवं तावदस्मादन्त्याच्छून्यवादनयात् सर्वनयोत्थानं न विरुध्यते । § 3011

---

४ वा] °वादपूर्व°nayacakra-ms-ya ‖
४ स्त] °स्तथैनैकैकेन थद्विधेन द्रव्यार्थन यथा व तै°nayacakra-ms-bhā । °स्तथैनैकैकेन वद्विधेन द्रव्यार्थ यथा चैतै° nayacakra-ms-ya ‖
७ म] °मपि संबंधnayacakra-ms-ya ‖
९ य] यदि ध्यरनयानां सम°nayacakra-ms-bhā ‖
१० विरुद्धः] क्रमेणोत्क्रमेणोत्क्र-माभ्याnayacakra-ms-bhā । क्रमेणोत्क्रमत्क्रमाभ्यां nayacakra-ms-ya ‖
११ भा] °भादयावर्तना°nayacakra-ms-bhā ‖
१२ र] °रस्योत्थानंnayacakra-ms-ya ‖
१३ स्थाया] °याश्चेष्टेनार्थंnayacakra-ms-ya ‖
१४ च] °चक्रंnayacakra-ms-ya ‖
१५ द्दौर्विहित्य] °र्हित्यस्य nayacakra-ms-bhā । °हितास्य nayacakra-ms-ya ‖
१५ र] °रवि[र]हित°? ‖
१७ च] चक्रत्वास्य प्र° ‖
१७ न] नयादीचक्रं nayacakra-ms-bhā । नयानां चक्रम् इति पाठोऽत्र समीचीनो भाति ‖
१९ न] नयन्ति नास्ति nayacakra-ms-bhā ‖
२१ ताव] °दस्माकं दन्त्या°nayacakra-ms-bhā ‖

**यथा चास्मादेवं सर्वेभ्योऽपि** । यथैतस्मान्नयादुत्थानं सर्वनयानामन्त्याद-विरुद्धं तथा सर्वेभ्योऽपि, सर्वस्मादेकैकस्मादपि नयात् सर्वनयानामुत्थान-मविरुद्धमेव, सर्वस्य सर्वेण सह विरोधित्वे सति विवादसद्भावात् । § 3012
876/mj

एषामशेषशासननयाराणां भगवदर्हद्वचनमुपनिबन्धनम् । तेषां द्रव्यार्थ-पर्यायार्थनयौ द्वौ मूलभेदौ, तत्प्रभेदाः संग्रहादयः । तेषामुपग्राहकं जिनवचनं तद्यथा-- § 3013

इमा णं भंते ! रयणप्पभा पुढवी किं सासता असासता ? गोतमा ! सिता सासता, सिता असासता । से केणट्ठेणं भंते ! एवं वुच्चति--सिता सासता, सिता असासत त्ति ? गोतमा ! दव्वट्ठता+ए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं संठाणपज्जवेहिं असासता । जीवाजीवाभि॰ ३ । १ । ७८ § 3014

**एषामित्यादि** । एषामशेषनयानां किं निबन्धनमि[ति] चेदुच्यते --**एषामशेषशासनाननयाराणाम्**, अशेषशासनान्येव **जैमिनीयोपनिषदा**दीनि नयाः अरसंस्थानीयानि स्याद्वादतुम्बस्य **नयचक्रस्य**, तेषामशेषशासननयाराणां च **भगवदर्हद्वचनमुपनिबन्धनम्** । जिनशासनमहासमुद्रस्यैव तरङ्गा एते । तथा च तत्र तत्र भावितम् । यथाचार्य**सिद्धसेन**श्चाह-- § 3015

भद्दं मिच्छादंसणसमूहम+इयस्स अमतसादस्स ।
जिणवयणस्स भगवतो संविग्गमुसुहाभिगम्मस्स ॥ सम्मति॰
३ । ६९ इति । § 3017

- /ms

तेषां चाशेषशासनाराणां द्रव्यार्थ-पर्यायार्थनयौ द्वौ समासतो मूलभेदौ, तत्प्रभेदाः संग्रहादयः,

तित्थकरवयणसंगहविसेसपत्थारमूलवाकरणी ।
दव्वट्ठि+ओ य पज्जवणयो य सेसा विकप्पा सिं ॥ सम्मति॰
१ । ३ § 3020

इत्यादिव्याख्यानात् । § 3021

तत्र द्रव्यार्थस्य विकल्पाः षट् संक्षेपेणात्रोक्ताः, पर्यायार्थस्य षट् । तेषामुपग्राहकं जिनवचनं तद्यथा --**इमा णं भंते ! रयणप्पभा पुढवी किं**

१ य] **यथैच तस्मान्नया॰** प्र॰ । अत्र **यथा चैतस्मान्नया॰** इत्यपि पाठः संभवेत् ॥
१७ सिद्ध] **॰सेन आह ?** ॥
१९ हाभिग] **॰गमस्स** प्र॰ ॥
२३ प्पा] सिnayacakra-ms-bhā ॥
२५ संक्षेपेणा] **॰णोत्रोक्ताः** प्र॰ ॥

**सासता असासता** इति पृष्टे व्याकरणं **सिया सासता, सिता असासता** इति समग्रादेशात् । पुनः **से केणट्ठेणं भंते ! *एतं एवं वुच्चति— सिता सासता, सिता असासता** इति व्याख्यापनार्थः प्रश्नः । तस्य विकलादेशाद् व्याकरणम्, रत्नप्रभायाः स्वतत्त्वमुभयात्मकं विभागेन विदधाति, तद्यथा - **-दव्वट्ठता+ए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रस ज्जवेहिं फासपज्जवेहिं संठाणपज्जवेहिं असासत त्ति ।** § 3022

**तदनुयातवृत्तिसाधनं नाभिक्रिया,** तस्या रत्नप्रभायाः शाश्वताशाश्वतधर्म-स्वतत्त्वायाः कारणाभ्यां द्रव्यार्थपर्याया[र्था]भ्यां प्रत्येकषड्विकल्पाभ्यां कारितं स्वतत्त्वमनेकान्तात्मकं विदधतो 877/mj

* * *

तदनुयातवृत्तिसाधनं नाभिक्रिया । तद्यथा--विधि-विधि[विधि-विध्युभय-विधिनियम-उभय-उभयविधि-उभयोभय-उभयनियम-नियम-नियमविधि-नियमोभय-नियमनियमा] एकप्रबन्धेनान्योन्यापेक्षवृत्तयः सत्यार्थाः, एतद्भङ्गनियतस्याद्वादलक्षणः शब्दः स्यान्नित्यः स्यान्नित्यानित्यः स्यादनित्यः, विध्यादिद्वादशविकल्पनियताकृतक-कृतकाकृतककृतकत्वानेकान्तविकल्पात्मकत्वात्, घटवत् ।

* * *

जिनवचनस्यानुगमाद् द्वादशानामराणामशेषशेषशासनसंग्राहिणामित्थं तुम्बक्रिया स्याद्वादनाभिकरणम्, तत्प्रतिबद्धसर्वारावस्थानात्, अतोऽन्यथा विशरणात्, यथोक्तम्-- § 3023

---

१ सा] सासतामसासता प्र० । दृश्यतां पृ० ३, ४५० ॥
१ अ] असासतामिति प्र० ॥
२ *] एवं एवंnayacakra-ms-bhā । अत्रेदमवधेयम्--पृ० ३, ४५० मध्ये नयचक्रे जीवाजीवाभिगमसूत्रत उद्धृते पाठे जीवाजीवाभिगमसूत्रे च एतं इति पदं नोपलभ्यते । अतोऽत्र भंते एवं वुच्चति इति पाठ एव समीचीनो भाति ॥
३ अ] असासतामितिnayacakra-ms-ya । असासताितिति nayacakra-ms-bhā ॥
३ व्या] व्याख्यानार्थःnayacakra-ms-ya ॥
४ त्त्व] °त्वनुभया° प्र० ॥
५ स] °पज्जतेवेहिंnayacakra-ms-bhā ॥
६ वेहिं] दृश्यतां पृ० ३ पं० १६, पृ० ४५० पं० १०, पृ० ४५१ टि० १ ॥
७ त] तदनुपातवृत्तेसाध-नnayacakra-ms-bhā । तदनुपातवृत्तेसासधन nayacakra-ms-ya ॥
८ प्र] द्रव्येक° प्र० ॥

- /ms जम्मि कुलं आयत्तं तं पुरिसं आयरेण रक्खाहिं ।
ण हु तुंबम्मि विणट्ठे अरया साहारणंया होंति ॥ इति

§ 3025

तद्यथा--विधिविधीत्यादि साधनदण्डको यावद् घटवदिति दृष्टान्तः । एवं तुम्बकरणं सविकल्पद्वादशा[र]नयचक्रैकवाक्यानयनसाधनम् । तत्र विधिभङ्गाश्चत्वार आद्या उभयभङ्गा मध्यमाश्चत्वारो नियमभङ्गाश्चत्वारः पाश्चात्या यथासङ्ख्यं नित्यप्रतिज्ञाः ४ नित्यानित्यप्रतिज्ञाः ४ अनित्यप्रतिज्ञाश्च ४ । विधिः विधेर्विधिः विधेर्विधिनियमौ विधेर्नियम इति प्रथमभङ्गचतुष्टयम्, मध्यमं विधिनियमौ विधिनियमयोर्विधिः विधिनियमयोर्विधिनियमौ विधिनियमयोर्नियम इति, पाश्चात्यमपि नियमो नियमस्य विधिः नियमस्य विधिनियमौ नियमस्य नियम इत्येते द्वादशाप्यरनया एकप्रद्यद्येप्रबन्धेनान्योन्यापेक्षवृत्तयः सत्यार्था इति ससंपिण्डरूपेण प्रतिज्ञा, एतद्भङ्गनियतस्याद्वादलक्षणः शब्द इति, स्यान्नित्यः स्यान्नित्यानित्यः स्यादनित्यः शब्द इति, तत्संक्षेपस्त्रिविधो हेतुरपि **विध्यादिद्वादशविकल्पनियताकृतक-कृतकाकृतक-[कृतक]त्वानेकान्तविकल्पात्मकत्वा**दिति प्राग्व्याख्यातभङ्गार्थसमाहारात्मक एवायं
878/mj प्रतिज्ञावत् तन्नयदर्शनविकल्पैकवाक्यात्मकत्वाद् **घटव**दिति

१ ज] इयं गाथा **अणहिलपुरपत्तने खेतरवसीपाडा**मध्ये विद्यमानायाम् **आवश्यकनिर्युक्ते**र्हस्तलिखितायां तालपत्रात्मिकायां प्रतौ दृष्टाऽस्माभिः, मुद्रितायां तु न दृश्यते । **आवश्यकसूत्र**स्य **हारिभद्र्यां** वृत्तौ पृ० २६३ इत्थमुपलभ्यते-- आह च— सुत्तत्थेसु अचिंतण आ+एसे वुड्ढसेहगगिलाणे । बाले खम+ए वा+ई इड्ढीमा+इ अणिड्ढी य ॥ १ ॥ ए+एहिं कारणेहिं तुंबभू+ओ उ होति आयरि+ओ । वेयावच्चं ण करे कायव्वं तस्स सेसेहिं ॥ २ ॥ जेण कुलं आयत्तं तं पुरिसं आयरेण रक्खेज्जा न हु तुंबम्मि विणट्ठे अरया साहारया होंति ॥ ३ ॥ वाले सप्पभ+ए, तहा इड्ढिमंतंमि आग+ए पाणगादिग+ए आयरि+ए लहुत्तं, एवं वादिम्मि वि, अणिस्सरपव्व+इयगा य ए+ए त्ति जणापवादो, सेसं कंठं । **आवश्यकसूत्र**स्य **मलयगिरि**विरचितायां वृत्तौ त्वेवमुपलभ्यते--तथा चाह--सुत्तत्थेसु अचिंतण... ...॥ १ ॥... ...॥ २ ॥... ...॥ ३ ॥ आदेशे प्राघूर्णके, वृद्धे, शैक्षके, ग्लाने, तथा बाले लघुवयसि, क्षपके च... ... ...एतदेवाह --**जेण कुलं आयत्तं तं पुरिसं आयरेण रक्खेह** । न हु **तुंबम्मि विणट्ठे अरगा साहारगा हुंति** ॥ १३३ ॥ येन पुरुषेण कुलमायत्तं तं पुरुषमादरेण रक्षेत्, यतो न हु नैव तुम्बे विनष्टे अरकाः साधारकाः साधारा भवन्ति । इति **आवश्यकनिर्युक्तेर्मलयगिरि**सूरिविरचितायां वृत्तौ इच्छाकारसामाचारीवर्णने ॥

१ र] **रक्खाहि**nayacakra-ms-bhā ॥

२ ण] **ण हि**nayacakra-ms-bhā ॥

७ विधिः] **विधिर्विधिनियमौर्विधेनियम इति**nayacakra-ms-bhā ॥ **विधिर्विधिनियमोर्विधिनियम इति** nayacakra-ms-ya ॥

८ योर्विधिः] **विधिनियमयोर्विधिनियमयोर्विधिर्नियमनियमयोर्नियम इति**nayacakra-ms-ya ॥

१० ए] **एकप्रद्यव्य ?द्येना॰**nayacakra-ms-ya । **एकप्रद्यद्येना॰** nayacakra-ms-bhā । एकप्रघट्टेना॰ ? ॥

११ स] दृश्यतां पृ० ८८० पं० ७ ॥

१३ निय] **॰ताकृतककृतकाकृतकत्वा+अनेकान्त॰**nayacakra-ms-ya । **॰ताकृतकाकृतकत्वा+अनेकान्त॰** nayacakra-ms-bhā । दृश्यतां पृ० ८७८ पं० ४ ॥

१४ प्राग्व्या] **॰व्यातभ॰**nayacakra-ms-bhā । **॰व्याख्यार्थभ॰** nayacakra-ms-ya ॥

* * *

व्याख्यानदिग्दर्शनसाधनं तु तद्यथा--व्यवहारैकता... ... ...शून्यताऽनित्यः शब्दः, व्यवहृत्येकत्व... ... ...क्षणिक-शून्यता-कृतकत्वात्, घटवत् ।

* * *

दृष्टान्तः परस्परापेक्षवृत्तिसमस्तनयमतैकमत्यानुवृत्तिर्नित्य-नित्यानित्य-अनित्य-त्वानेकान्तविकल्पात्मकानुगताकृतक-कृतकाकृतक-कृतकत्वानेकान्तविकल्पात्मकः सिद्ध एवेति प्राग्व्याख्या[ता]र्थत्वात् । § 3026 - /ms

**व्याख्यानदिग्दर्शनसाधनं तु** एतस्यानन्तराभिहितनाभिक्रियानेकान्तत्वप्रख्यापनसाधनस्य व्याख्यानदिशं दर्शयत्येतत् साधनम् अतीतानां द्वादशानामराणां प्रत्येकं यथासङ्ख्यप्रस्थानार्थोपन्यासार्थत्वात्, **तद्यथा--व्यवहारैकते**त्यादिदण्डकप्रतिज्ञोपन्यासो याव**च्छून्यता[ऽ]नित्यः शब्द** इति । हेतु**र्व्यवहृत्येकत्वे**त्यादिदण्डको यावत् **क्षणिकशून्यताकृतकत्वा**दिति । § 3027

विधिनयस्य तावद् यथालोकग्राहमेव वस्तु, यथा लोकेन परिगृहीतमेव नित्यानित्य-कारण-कार्यैक-नानात्वाद्यशक्यप्राप्त्यप्रयोजनत्वाविचारेण शक्यप्राप्तिप्रयोजनवत्कर्मफलसम्बन्धमात्रपरिज्ञानमपौरुषेयानाद्यनिधनागमगम्यमिति दर्शनम् । § 3028

विधिविधिस्तु क्रियाविधायिवाक्यपरिज्ञानस्याप्यशक्यप्राप्त्यप्रयोजनत्वादिदोषाविमोक्षात् स्ववचनादिविरोधाद् वस्तुतत्त्वपरिज्ञानाविनाभावादयुक्तेः सर्वैककारणमात्रत्वम् । तच्च पुरुष-कालनियति-स्वभाव-भावाद्यन्यतमात्मकम्, आत्मप्रभेदमात्रावस्थाभेदमात्रव्यवहृतेरिति । § 3029

तस्यापि विधिविधेरवस्थावस्थावद्भेदोपादानावश्यंभावात् परमशून्य-क्षणिकाद्यनभिप्रेतवादप्रसङ्गाच्चासन्निधिव्यावृत्तभवनवृत्तिद्वैतवादः श्रेयान् प्रकाश-प्रवृत्ति-नियमात्मभोग्यसत्त्व-रज-स्तमोमय- प्रकृतिव्यापारस्योदासीन- - /ms भोक्तृपुरुषोपभोगार्थप्रवृत्तेरिति विधिर्विधीयते नियम्यते चेति विधिविधिनियमनयदर्शनं न सर्वमेकात्मकं, किं तर्हि ? सर्वं सर्वात्मकम् इति । § 3030

अस्यैव वा विकल्पान्तरं विध्युभयनयदर्शनस्य प्रकृति-पुरुषयोर्गुणत्रय-व्यवस्थानुपपत्तेः स्थित्युत्पत्तिविनाशानात्मकत्वादसत्त्वापत्तेश्च भावद्वैतं भाव्य-

---

४ त्यानुवृत्तिर्नित्य ] °र्नित्यनित्या+अनित्य-त्वाऽनेकान्त°nayacakra-ms-bhā । °र्नित्यानित्या+अनित्यत्वानेकान्त° nayacakra-ms-ya ॥
५ ताकृ ] °कृतक° नास्ति nayacakra-ms-bhā ॥
५ त्वा ] °त्वाऽनेका°nayacakra-ms-bhā ॥
७ ए ] एवंस्या°nayacakra-ms-bhā ॥
११ व ] °हत्यैकत्वे° प्र° ॥
१२ ता ] ततद्यथा°nayacakra-ms-ya । दृश्यतां पृ° ११ पं° ३ ॥
१४ व ] °जनत्वकर्म°nayacakra-ms-ya ॥
२० स्थाव ] °वतभेदो°nayacakra-ms-bhā ॥
२१ ङ्गाच्चा ] °च्च सन्निध्यापत्तिभवनवृत्ति° ? । दृश्यतां पृ° २६१ पं° १५ ॥
२४ न ] °नयमद°nayacakra-ms-ya ॥
२५ ल्पान्त ] °न्तर प्र° ॥

भवितृभेदात् प्रतिविशिष्टबुद्धिस्वतन्त्राधिष्ठात्रधिष्ठेयास्वतन्त्रत्वद्वैविध्यादीश्वरेशितव्यात्मकं द्वैतमिदमिति । § 3031

एतस्यापि प्रकृतिपुरुषस्य परस्परात्मानापत्तौ कर्म-फलसम्बन्धाभावे संसार-मोक्षाद्यनुपपत्तेरीश्वरस्यापि च प्रवर्त्यपुरुष कर्मवशप्रवृत्तेरनीश्वरत्वादेकैकस्य सर्वत्वमीश्वरत्वं च सर्वस्य च चेतनाचेतनात्मकस्य परिवृत्त्यान्योन्यात्मकत्वानुभवनात् सर्वपुरुषाणां कर्मकृतत्वात् कर्मणां पुरुषकृतत्वादात्मनैवात्मनः कार्यकारणत्वादेकं सर्वं सर्वं चैकमिति विधिनियम्यत्वाद् विधिनियमनयदर्शनमिति । § 3032

879/mj

एषां चतुर्णां द्रव्यार्थत्वादकृतकनित्यत्वैकान्तः । भवितृ-भवनयोर्द्रव्य-क्रिययोरन्यतरप्रधानोपसर्जनत्वानुपपत्तिरभावापत्तेः, अतो विधिनियमौ प्रधानावेव द्रव्य-भावपरिग्रहात्मकावित्युभय[नय]दर्शनम् । § 3033

- /ms अस्यापि मतस्य परस्परनिरपेक्षस्वातन्त्र्ये द्रव्यभावयोरनुपपन्नस्थित्युत्पत्तिविनाशस्वावस्थयोरभावत्वं खपुष्पवत् । अतः परतः स्वतश्च तद्व्यत्त्याकृत्याख्यं गुणप्रधानभावेन द्रव्यादि सत् परतः सत्तादि स्वत इत्यसदपि भवतीति विधिनियमेमौ विधीययेते इति विधिनियमविधिनयदर्शनम् । § 3034

अस्यापि असदुत्पत्तिवाञ्छिनो नयस्यासन्निहितखपुष्पादिवत् सतोऽसतः सदसतो वा सताऽसता सदसता वा सम्बन्धाभावात् सत्करत्वाभावाच्चासदुत्पत्त्ययुक्तेः प्रवृत्तिनिवृत्तिरूपमितरेतराभावलक्षणमभवद् भवति वस्त्विति उभयोभयनयदर्शनम् । § 3035

अस्यापि दर्शनस्य पराभावस्य स्वरूपविशेषासम्भवेऽनवस्थानाद् द्वयोरपि अभाव-संकररूपादिदोषादयुक्तेर्भवितृप्रधानं भवनोपसर्जनत्वमिति उभय[नियम]नयमतम् । § 3036

एतेषु च चतुर्षु [उ]भयविध्यादिषु कृतकाकृतकत्वादनित्यनित्यत्वावलम्बिचतुरवयवः प्रतिज्ञाहेतुव्याख्याविकल्पः । § 3037

---

१ द्वैविध्यादीश्व] °श्वरेसितव्यात्मकं प्र° । °श्वरेशितव्यात्मकम् इत्यपि पाठोऽत्र भवेत् ॥
४ पुरुष] एतदन्तर्गतः पाठो नास्ति nayacakra-ms-ya ॥
५ च] चा चे°nayacakra-ms-bhā ॥
६ त्वा] °त्वात्तुभ°nayacakra-ms-bhā ॥
७ त्वादा] °दात्मनःnayacakra-ms-bhā ॥
७ का] °कारत्वा° प्र° । दृश्यतां पृ° ३५० ॥
८ विधिनिय] °यमेनय° प्र° ॥
१५ विधिन] °नयमद° प्र° ॥
१७ न्धाभावात्] °त् सत्करत्वाभावात् सत्करत्वाभावाच्चा°nayacakra-ms-ya ॥
१८ प्र] प्रवृत्तिरूप°nayacakra-ms-ya ॥
१८ ण] °णभवद् भवति विस्त्वितिnayacakra-ms-bhā । °णमभवद् भवति स्त्विति nayacakra-ms-ya ॥
२२ म] °मतमतेषु चnayacakra-ms-bhā । °मतेषु च nayacakra-ms-ya ॥

अस्यापि नयस्य भेदप्राधान्येऽन्वयाभाव उपसर्जनत्वाद् भेदस्यापि तदविनाभाविनोऽभावो गगनोदुम्बरकुसुमवत् सामान्य-विशेषयोरन्यतरोभय- - /ms प्रधानोपसर्जनपक्षविकल्पानामत्यन्ताभावाभिमुखानां त्यागादग्नीन्धनवत् तत्त्वान्यत्वोभयासत्ता[ऽ]वक्तव्यता श्रेयसीति नियमनयमतमेतत् । § 3038

एतदपि मत[म् 'अ]वक्तव्यम् इति वक्तव्यत्वानतिवृत्तेः स्ववाग्विरोधादेरनिरूपितवस्तुस्वतत्त्ववादिनश्चावादित्वप्रसङ्गाद् रूप-रसाद्यत्यन्तविविक्तदेशभिन्नविशेषसमुदयमात्रं वस्त्विति नियमस्य विधिः । § 3039

इदमपि नयमतमशोभनम्, द्रव्यभवनव्यावृत्तौ प्रतिज्ञातायां कोऽत्राभेदभावो नाम समुदायियी ? *संवृतिसमुदायिनामुत्पाद-विनाशव्यतिरिक्तस्वरूपाभावादभावत्वापत्तेः क्षणे क्षणेऽत्यन्तभिन्नरूपाद्यसाधारणानिर्देश्यपरमार्थत्वाद् वस्तुन इति नियमो विधीयते नियम्यते चेति नियमोभयनयमतम् । § 3040

अस्यापि नयमतस्यासाधुता, क्षणोऽस्यास्तीति क्षणिक इति शब्दव्युत्पत्तौ ठन्प्रत्यय-षष्ठ्यर्थाभ्यां सहभाविभावाभ्युपगमादनिर्वहनीयत्वादभावपरमार्थवस्तुत्वादसिद्ध्यादिभ्यः शून्यत्वमेव वस्तुन इति । § 3041

एतेषु चतुर्षु नियम-नियमविध्यादिषु कृतकत्वादनित्य इति हेतु-प्रतिज्ञाव्याख्याविकल्पः, सर्वत्र व्याख्यातार्थ**घटव**दिति दृष्टान्तः । *एष सर्वार्थपिण्ड[ने]नैकः साधनप्रयोगः सहव्याख्यानदिक्प्रदर्शनेन कृतः । § 3042
880/mj

एवं सर्वप्रभेदेष्वपि । स्यादेकः स्यादेकानेकः स्यादनेकः, स्यात् कारणं स्यात् कारणकार्ये स्यात् कार्यम्, स्यात् सर्वगतं स्यात् सर्वगतासर्वगतं स्यादसर्वगतम्, विधि-विधिनियमनियमस्वभावत्वात् विध्यादिद्वादशात्मकत्वात्, घटवदिति भावितमेव नयचक्रशास्त्रेणानेन । § 3043

एवं च जिनशासनमेकान्तसत्यमेव, सम्यक्सम्प्रसिद्ध्युपनिबन्धनसम्प्रतिष्ठितार्थत्वात्, सदसदर्थ... ... ...। § 3044

**एवं सर्वप्रभेदेष्वपी**ति एकानेक-कारणकार्य-सर्वगतासर्वगत-सामान्य-विशेष-धर्मिधर्मादिवस्तुप्रभेदेष्वपि एवं नेतव्यमिति अतिदिशति । तन्निदर्श-

१ प्राधा] °न्याऽन्वया° nayacakra-ms-bhā ‖
३ त्यागाद] °दग्वीत्वन°nayacakra-ms-ya । °दधीत्वन° nayacakra-ms-ya ‖
५ तिवृत्तेः] **स्ववाग्निरो°** प्र° ‖
६ न्त] **°विवित्तादेश°** प्र° ‖
७ मुद] **°दाय°** nayacakra-ms-ya ‖
८ व्यावृत्तौ] **प्राज्ञतायां** प्र° ‖
८ तिज्ञातायां] **कोशभेदभावो** प्र° ‖
९ *] **संवृत्ति°** प्र° । संवृतिसत्समु° ? ‖
१७ *] एकसर्वार्थ°nayacakra-ms-ya ‖

नार्थं द्वादशानां विकल्पानां त्रिधा सम्पिण्डनेन चतुरश्चतुरो विकल्पानेकव्याकृत्याह **--स्यादेक** इत्यादि तयैवानुपूर्व्या । तत्र स्यादेक इति चत्वारो - /ms विकल्पाः सङ्क्षिप्य पक्षीकृताः, **स्यादेकानेक** इत्युभयविकल्पाः, **स्यादनेक** इति नियमविकल्पाः । एवं स्यात् कारणं, स्यात् कारणकार्यं, स्यात् कार्यमेवेति । तथा स्यात् सर्वगतं, स्यात् सर्वगतासर्वगतं, स्यादसर्वगतमेवेति । इत्थं नित्यैककारणसर्वगतोभयानित्यानेककार्यासर्वगतविकल्पानां पृथक् पृथग् द्वादशधा भिन्नानां [सं]गृह्य प्रतिज्ञाय हेतुरपि सङ्क्षिप्योच्यते तथैव **--विधि-विधिनियम-नियमस्वभावत्वात्** । **विधि**ग्रहणेन विधिविकल्पाश्चत्वारो गृहीताः, **विधिनियम**ग्रहणेनोभयविकल्पाः, **नियम**ग्रहणेन नियमविकल्पाश्चत्वारः, विधिश्च विधिनियमौ च नियमश्च विधि-विधिनियम-नियमा इति विग्रहात्, तद्व्यक्त्यर्थमाह **--विध्यादिद्वादशात्मकत्वा**दिति, **घटव**दिति दृष्टान्तः, **भावितमेवे**ति व्याख्यातमेव द्वादशनयव्याख्यानप्रपञ्चात्मकेन **नयचक्र**शास्त्रेणानेनेत्यतीतावेक्षणम्, तन्त्रयुक्तिरतिदेशो नाम, प्रकृतस्यातीतेन साधनमतिदेशः इति लक्षणात् । घटो हि विध्यादिद्वादशविधभवनसमूहात्मकः तेषामन्यतमाभावे न भवति, परस्परापेक्षायामेव भवतीति विस्तरेण चरितार्थमेतत् । § 3045

**एवं चेत्यादि** । एवं च समाप्त**नयचक्र**शास्त्रोक्तविध्यादिद्वादशारशास्त्रान्तराधारनाभीभूतस्याद्वादप्रतिबन्धकृतैकवाक्यतायां सर्वशास्त्रप्रवृत्तीयत्तायां च सत्यामित्थं प्रतिपादितायां यदर्थापत्त्या शास्त्रोत्थाने प्रतिज्ञातं - /ms विध्यादिवृत्त्येकात्मकत्वाज्जैनशासनसत्यत्वप्राप्तिरिति तत् सिद्धम् । § 3046

तच्चोपसंहृत्य साधनमिदम् **--जिनशासनमेकान्तसत्यमेवे**ति प्रतिज्ञा, **सम्यक् सम्प्रसिद्ध्युपनिबन्धनसम्प्रतिष्ठितार्थत्वा**दिति हेतुः । समीचीनसम्प्रसिद्धिः सम्यक्सम्प्रसिद्धिः, सामान्यविशेषविकल्पान्योन्याजहद्वृत्त्या वस्तुतत्त्वनिष्पत्तिः, सा सम्यक्सम्प्रसिद्धिरुपनिबन्धनं प्रत्यक्षा-ऽनुमाना-ऽऽगमलोकप्रसिद्धसंव्यवहाराविरोधिनी, तेनोपनिबन्धनेन सम्प्रतिष्ठितोऽर्थो यस्य तदिदं जिनशासनं सम्यक्सम्प्रसिद्ध्युपनिबन्धनसम्प्रतिष्ठितार्थम्, तद्भावादेकान्तसत्यमेव तत् । 881/mj दृष्टान्तः **--सदसदर्थे**त्यादि, संश्च असंश्च

* * *

एतदन्यतरैकान्तशास्त्रप्रबन्धस्तु विघटितार्थः, प्रस्तुतवस्तुविच्छेदपरमार्थत्वात्, दश दाडिमानीत्यादिवाक्यवत् ।

एषोऽर्थो भावित एवातीतसमस्तनयचक्रशास्त्रेण ।

---

२ इ] इत्यादि तयैवानुपूर्व्या तत्र स्यादेक इत्यादि तयैवानुपूर्व्या तत्र स्यादेक प्र° । अत्र द्विर्भूतः प्रतिषु पाठः ॥
६ त] °विकल्पानां पृथग् द्वादशधाnayacakra-ms-bhā । °विकल्पान् पृथक् पृथग् द्वादशधा भिन्नानागृह्य प्रतिज्ञाय इत्यपि पाठोऽत्र विचारणीयः ॥
१० विधिनिय] °मविधिनियमा प्र° ॥
१९ र्थाप] दृश्यतां पृ° ९ पं° २२ ॥
२५ स] संप्रतिवितोnayacakra-ms-ya । संप्रतितो nayacakra-ms-bhā ॥

* * *

अर्थोऽभिधेयो यस्य घट-भवत्यादेः पदस्य संगृहीतानेकभेदानेकान्तात्मकः, तेन सहाव्यभिचारिणां प्रत्यक्षानुमानादिप्रमाणानां प्रबन्धेनाव्यवच्छिन्नप्रमाणप्रमेयसम्बन्धार्थाभिधानप्रत्ययायाथात्म्येन संसिद्धा **नयचक्र**शास्त्राभिहिता बहुभेदा घटादिनामपदाभिधेया भवत्यादिक्रियापदाभिधेयाश्चार्थाः सांसिद्धिकनिदर्शनाः, सिद्धादेशनैमित्तिकवाक्यार्थवत् । सदाद्यनेकान्तार्थविषयत्वात् सत्यत्वं प्रमाणत्वाव्यभिचारीति भावितमेव व्याख्यातप्रकार**सम्यक्सम्प्रसिद्ध्युपनिबन्धनसम्प्रतिष्ठितार्थत्वा**दिति । एवं स्वपक्षसंसिद्धिसाधनाभिधानवर्त्मप्रदर्शनं शास्त्रार्थोपसंहारात्मकं कृतम् । § 3047 - /ms

परपक्षविक्षेपक्षमसा[ध]नाभिधानदिक्प्रदर्शनमपि शास्त्रार्थोपसंहारात्मकं क्रियते --**एतदन्यतरैकान्तशास्त्रप्रबन्धस्तु विघटितार्थः** । एतेषामुक्तानां विध्यादिनयानां परस्परभिन्नप्रस्थानानां सर्वशास्त्रमतानुवृत्त्या संहृत्योक्तानां सदसत्पक्षद्वयतया द्रव्यार्थ-पर्यायार्थद्वित्वानतिवर्तिनां तयोरन्यतरस्यैकान्तस्य शास्त्रस्य प्रबन्धः पुरुषपरम्परयाऽऽगमाव्यवच्छेदपरम्परया सदेव, असदेव, नित्यमेव, अनित्यमेव इत्यादिर्विघटितार्थ इति पक्षार्थः । शास्त्रवचनं साङ्ख्यादीनां दूष्यमाणमेव, लौकिकघट-भवत्यादिप्रयोगेभ्यो दृष्टान्तभूतेभ्य उत्कालपक्षीकाक ?रणार्थं मा भू[द्] दृष्टान्त-दार्ष्टान्तिकयोरप्रविवेक इति **प्रस्तुतवस्तुविच्छेदादपरमा ?र्थत्वा**दिति हेतुः, प्रस्तुतं वस्तु दुःखविमोक्षोद्देशसाध्यसाधनसम्बन्धविधानं प्रमाणमेव संसिद्धिनिरूपणं च, तद्विच्छेदो व्याघातः विघ्नोऽन्यथाभावः तदनिर्वाहः, महासरःपुण्डरीकजिघृक्षार्थप्रवृत्ताप्राप्तपङ्कनिमग्नपुरुषवत् । स परमार्थो यस्य एतयोर्द्रव्यपर्यायार्थयोरन्यतरैकान्तशास्त्रप्रबन्धस्य [स] प्रस्तुतवस्तुविच्छेदपरमार्थः स्वाभिप्रेतविपर्ययहेतुः, तद्भावात् प्रस्तुतवस्तुविच्छेदपरमार्थत्वाद् विघटितार्थः । किमिव ? **दश दाडिमानीत्यादिवाक्यवत्,** यथेदमसम्बद्धावयवार्थमेकवाक्यभावानापत्तेर्विघटितार्थं प्रस्तुतवस्तुविच्छेदपरमार्थत्वात् तथोक्तद्रव्यार्थपर्यायार्थान्यतरविकल्पैकान्तशास्त्रप्रबन्धो विघटितार्थ इत्येषोऽर्थो भावित एव अतीतसमस्त**नयचक्र**शास्त्रेणेत्येवमनेन समस्तेन ग्रन्थेनैतदभिहितं ***विधिनियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवत् जैनादन्यच्छासनमनृतम्,** जैनमेव शासनं सत्यं विधिनियमभङ्गवृत्त्यात्मकत्वाद् **भवतिवद्** घटवद्वेति, एकमेव वा साधनं - /ms

---

४ माण] °प्रमेयंnayacakra-ms-bhā ॥
६ सिद्धादेश] सत्यत्वप्रमा° प्र° ॥
७ स] °नैमित्तिवाक्या°nayacakra-ms-ya ॥
१६ दू] दूप्याणमेवnayacakra-ms-ya ॥
१६ त्यादिप्र] °प्रयोगेन्यो प्र° ॥
१८ प्र] वस्तुत° प्र° ॥
१९ माण] °मेव सिद्धि°nayacakra-ms-ya ॥
१९ संसिद्धिनिरूप] °पणं व तद्वि° प्र° ॥
२१ पु] °पुरुषात् प्र° । दृश्यतां सूत्रकृताङ्गे द्वितीयश्रुतस्कन्धे प्रथमं पुण्डरीकाध्ययनम् ॥
२४ द] दृश्यतां पृ° १२४ पं° ८, टिपृ° ५५ ॥
२७ *] दृश्यतां पृ° ९ ॥

तत् साधर्म्य-वैधर्म्याभ्यां सर्वैकान्तवादिदूषणायानेकान्तवादिपक्षसाधनाय च प्रभवतीति यथाप्रतिज्ञं व्याख्यातम् । § 3048

882/mj

एवं च वृत्तिवचनमशेषभङ्गैकवाक्यतायामेव प्रतिभङ्गमपि वृत्तिरिति ख्यापनार्थम् । स्याद्वादतुम्बप्रतिबद्धसर्वनयभङ्गात्मिकैकैव वृत्तिः सत्या, रत्नावलीवत्, अन्यथा वृत्त्यभाव एव । तथैव च सर्वैकान्तप्रक्रमः । § 3049

सर्वनयात्मकैकवृत्तिजैनसत्यत्वसाधनप्रवृत्त्यैवार्थापत्त्याशेषशासनासाधुत्वप्रतिपादनं कृतम्, विध्यादिनयानामेकभावे सर्वभावात् एकाभावे सर्वाभावात्, वर्षणाभिधानमेघाभ्युन्नतिवचनवत् प्रतिज्ञादावितरभङ्गार्थाव्यभिचारात्, तथाहि--अयमेव प्रयोगार्थः, एक § 3050

एतदुभयं कुतो लभ्यमिति चेत्, उच्यते--वृत्तिवचनात् । तद्भावनार्थमाह --**एवं च** कृत्वा विधिनियमभङ्गव्यतिरिक्तत्वादिति सिद्धे वृत्तिवचनमशेषभङ्गैकवाक्यतायामेव प्रतिभङ्गमपि वृत्तिरिति व्याख्यापनार्थम् । किमुक्तं भवति ? स्याद्वादतुम्बप्रतिबद्ध**सर्वनयभङ्गात्मत्मिकैकैव वृत्तिः सत्या रत्नावलीवत्,** यथा प्रतिविशिष्टजाति-वर्ण-च्छाया-सार-शुद्धि-प्रभावा-ऽर्थ-संस्थानादिगुणगणोपेतमणिगणसमूहात्मिकै[कै]व रत्नावलीत्युच्यते यथास्थानविन्यासरत्वा, न प्रत्येकम्, तथा विध्यादिनयाराणामपि तुम्बप्रतिबद्धारवृत्तिवत् स्याद्वादप्रतिबद्धैकान्तनयवृत्तिः, अन्यथा वृत्त्यभाव एवेति च चक्रदृष्टान्तसाधर्म्याद् **नयचक्रशास्त्र**यथार्थनामत्वादेव दृष्टान्तान्तरप्रतिपादनेन नार्थो वा, **तथैव च सर्वैकान्तप्रक्रम** इति, एवं च कृत्वा सर्वेषामेकान्तनयानामवृत्तिरेवासत्यत्वादिति प्रक्रान्तमेव तत्र तत्र । एतच्च सर्वनयात्मकैकवृत्तिजैनसत्यत्वसाधनप्रवृत्त्यैवार्थापत्त्या शेषशासनासाधुत्वप्रतिपादनं कृतम्, तदसाधुत्वप्रतिपादनेन च जैनसत्यत्वप्रतिपादनं कृतं भवति अन्योन्याविनाभावाद् जैनशासनसत्यत्वेतरशासनासत्यत्वसाधनयोरेकस्य साधनस्य साधर्म्य-वैधर्म्यदृष्टान्ताभ्यामन्वय-व्यतिरेकप्रदर्शनात्मकाभ्यामर्थद्वयप्रतिपादनाद् **विध्यादिनयानामेकभावे सर्वभावात्** परस्परापेक्षत्वादेकाभावे सर्वाभावादिति । § 3051

- /ms

१४ वृ] अत्र **वृत्तिरिति ख्यापनार्थम्** इति समीचीनं भाति ॥
१६ प्र] °प्रभवा° प्र° ॥
२३ प्र] °प्रवृत्त्येवा° प्र° ॥
२५ सा] **साधनस्य साधर्म्यवैधर्म्यं दृष्टान्ताभ्या°**nayacakra-ms-bhā । **साधनसाधर्म्यं दृष्टान्ताभ्या°** nayacakra-ms-ya ॥
२६ भा] °भावेकसर्व-भावात्nayacakra-ms-bhā । °भावेकसर्वभावात् nayacakra-ms-ya । अत्र °भावे **सर्वभावात्** इति °भावे वा **सर्वभावात्** इति पाठो वा समीचीनो भाति ॥

किमिव ? **वर्षणाभिधानमेघाभ्युन्नतिवचनव**दित्यादि । यथा वृष्टिर्मेघोन्नमनमन्तरेण न सम्भवतीत्यविनाभावादुच्यते तथा विध्यादीनामेकस्मिन्नप्युक्ते शेषनया अप्युक्ता एव अन्योन्याविनाभावात् **प्रतिज्ञादावितरभङ्गार्थाव्यभिचारा**दिति यथैकस्यां नित्यप्रतिज्ञायामनित्योभयावक्तव्यादिप्रतिज्ञावश्यंभाविता तथा तत्साधनधर्माणां हेतूनां तदन्वय-व्यतिरेकप्रदर्शन-साधर्म्य-वैधर्म्यदृष्टान्तानां चार्थाव्यभिचाराद् द्वादशानामभिधानं कृतमेव भवत्यर्थतः, ततो निःशङ्कमेकस्मिन्नपि नये विवक्षिते शेषनयाविनाभावात् स्याच्छब्दादिविशेषितानेकान्तसाधनप्रक्रियैव साधीयसीति प्राप्तम्, अत आह— **तथाहि--अयमेव प्रयोगार्थो** योऽस्माभिरुपसंहृत्य शास्त्रपिण्डार्थत्वेनोक्तो विधिविध्यादीति, एक एव - /ms, 883/mj

* * *

एव चायं हेतुः । अन्यतमप्रयोगेऽपि च सामर्थ्यात् सर्वसम्भवात् यस्मिन् कस्मिंश्चित् साधने प्रयोगविधयो भवन्ति । तेषामेकैकयोगे द्वादश भङ्गाः, द्विकयोगे षट्षष्टिः, त्रिकसंयोगे द्वे शते विंशे, चतुष्कयोगे चत्वारि शतानि पञ्चनवतानि, पञ्चकयोगे सप्त शतानि द्विनवतानि, षट्कयोगे नव शतानि चतुर्विंशानि, सप्तकयोगे सप्त शतानि द्विनवतानि, अष्टकयोगे चत्वारि शतानि पञ्चनवतानि, नवकयोगे द्वे शते विंशे, दशकयोगे षट्षष्टिः, एकादशकयोगे द्वादश, द्वादशक एक एव । एवं तावच्चत्वारि सहस्राणि पञ्चनवतानि प्रतिज्ञानाम् । तासां चैकैकस्यां हेतूनां चत्वारि सहस्राणि पञ्चनवतानि । एवं च भङ्गानामेका कोटी, सप्तषष्टिः शतसहस्राणाम्, एकोनसप्ततिश्च सहस्राणां पञ्चविंशा --१६७६९०२५ । एवमियमनेकान्तवाददिगुपदर्शिता ।

* * *

चायं हेतुः प्रत्येकनयविवक्षया भिद्यते, अन्यतमप्रयोगेऽपि च सामर्थ्यात् सर्वसम्भवात्, तत्र यस्मिन् कस्मिंश्चित् साधने नित्यानित्यादीनामन्यतमस्मिन् पक्षे प्रयोगविधयो भवन्ति विकल्पा भङ्गा इत्यर्थः । तेषां द्वादशानां भङ्गानामेकैकयोगे द्वादश भङ्गाः । द्विकयोगे षट्षष्टिः--विधिश्च विधिविधिश्च सहितावेको भङ्गः, एवं विधिरेकैकेनैकादशानां योज्यः, तथा विधिविधिः तथा विधिविधिनियमःमौ विधिनियमश्च । एवमष्टानामपि शेषाणां भङ्गानां ***द्विकयोगे षट्षष्टि**र्भवति । एतेनैव संयोगविधिना **त्रिकसंयोगे द्वे शते विंशे** इत्यादिनाऽऽचार्येणैव भङ्गविधिरुक्तो यावद् **द्वादशक [एक] एवे**ति । एवं सर्वसंग्रहेणैताः प्रतिज्ञाः, एवं तावच्चत्वारि सहस्राणि पञ्चनवतानि । तासां

---

७ ङ्क] **निःशंकमेव कस्मिन्नपि** प्र° ॥
२५ ष] **षट्द्वष्टिः**nayacakra-ms-bhā ॥
२७ त] **तथा विधिनियमः**nayacakra-ms-bhā ॥
२७ म] °**मष्टान्यानामपि** प्र° ॥
२८ *] द्विकादिभङ्गसंयोगानयनाय करणगाथा तद्व्याख्या चास्य ग्रन्थस्य प्रथमे विभागे पृथक् टिप्पणेषु पृ° ८७ इत्यत्र द्रष्टव्ये ॥
२९ द्वा] **द्वादश एवेति**nayacakra-ms-ya ॥
३० स] **सर्वसंग्रा**° प्र° ॥

चैकैकस्यां हेतूनां चत्वारि सहस्राणि पञ्चनवतानि विकल्पशो भवन्ति । हेतौ हेतौ च प्रतिज्ञा अपि तावत्य एव सर्वस्य परस्पराविनाभावेन नयभङ्गानामुक्तत्वात् । एवं चेत्यादि, [प्रति]ज्ञाभङ्गा हेतुभङ्गाश्चान्योन्यगुणिता भङ्गानामेका कोटी सप्तषष्टिः शतसहस्राणामेकोनसप्ततिश्च सहस्राणां पञ्चविंशेति । § 3052

एवं तावद् नित्यादिप्रतिज्ञासु द्वादशानां भङ्गानां भेदा उक्ताः । एवं कारण-सर्वगतैकत्वादिप्रतिज्ञासु विध्यादिद्वादशभङ्गभेदाः प्रत्येकं नेतव्याः । - /ms एवमियमनेकान्तवाददिगुपदर्शिता, *कोऽस्य भगवतो महतो महानुभावस्य स्याद्वादमहासमुद्रस्यानन्तनयतरङ्गभङ्गावारपारीणस्य संख्यां कर्तुं शक्नुयात् । किन्त्वस्यां दिशि प्रदर्शितायां विपश्चिता दिगनुपातिना शेषं तथाऽनुगन्तव्यम् । § 3053

884/mj

एवं च न स कश्चिद् यो न हेतुः, तृणादिरपि यस्यां कस्याञ्चिदपि प्रतिज्ञायां हेतुर्भवति, सर्वस्य सर्वात्मकत्वेन सर्वद्रव्यपर्यायार्थविपरिवृत्तेः । § 3054

येन त्वेवंविधं साधनं न ज्ञातं नासौ कस्यचिद् वस्तुनस्तत्त्वतो ज्ञाता, तदेकदेशमात्रस्यैव परिग्रहीतृत्वात्, अनवधार्यस्यावधारयितृत्वात्, त्वगङ्गारकितमात्रनियतपलाशस्तत्त्वग्राहिवत् । § 3055

एवं चानेकान्ते सम्यगवलोकिते **न स कश्चिद् यो न हेतुः, तृणादिरपि यस्यां कस्याञ्चिदपि** अनित्यः शब्दः इत्यादिकायां **प्रतिज्ञायां हेतुर्भवति** अनेकान्तवादिनः, न न हेतुः, कस्मात् ? **सर्वस्य सर्वात्मकत्वेन सर्वद्रव्यपर्यायार्थविपरिवृत्तेः**, एकैको द्रव्यार्थः सर्व एकैकसर्वद्रव्यार्थतया विपरिवर्तते सर्वपर्यायार्थतया च, तथा सर्वपर्यायार्थः सर्वद्रव्यार्थपर्यायार्थतया विपरिवर्तते । तेषु तेषु नयदर्शनेषु च विषयव्यवस्थापनविदग्धेषु विस्तरेण प्रदर्शितं सर्वद्रव्यपर्यायार्थविकल्पात्मकमेकैकं वस्तु । तस्मात् सर्वमेकात्मकम्, एकं च सर्वात्मकम्, सर्वं च सर्वात्मकम् इत्यादि । तत एवैकं यो वेद स सर्वं वेद, यः सर्वं वेद स एवैकं वेद । यथोक्तम्—

जे एकं जाणति स सव्वं जाणति, जे सव्वं जाणति स एकं
जाणति आचाराङ्ग° सू° १२९ इति ।§ 3057

१ न ] °नवशतानिnayacakra-ms-ya ॥
४ स्राणा ] °मेकोन्नस°nayacakra-ms-bhā ॥
६ ए ] एषां ताव° प्र° ॥
८ वाद ] °दिगुप्रद° प्र° । अत्र °दिगुपप्रद° इत्यपि पाठो भवेत् ॥
८ * ] भोस्य प्र° ॥
१८ न ] हेतुनां स्तृणादिरविnayacakra-ms-bhā ॥

तथा-- § 3058

एको भावः सर्वभावस्वभावः सर्वे भावा एकभावस्वभावाः । - /ms
एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः ॥
इति ।§ 3060

स्याद्वादिनां च सर्वभावस्वभावैकभावविक्त्वादेकभावस्वभावसर्वभावविक्त्वाद् **यः कश्चित् तृणादिरप्यर्थो हेतुर्भवत्येव यस्यां कस्याञ्चित् प्रतिज्ञायामिति** साधूक्तम् । § 3061

**येन त्वेवंविधमित्यादि** साधनं स्याद्वादसत्यत्ववैधर्म्यमात्रप्रकाशनं परप्रवादप्रयासविफलीकरणसाधनं वा । य एवंविधस्याद्वादाधिगम्यानेकान्तात्मकवस्तुज्ञानरहितः पुमान् **नासौ कस्यचिद् वस्तुनो**ऽवयवमात्रस्यापि **तत्त्वतो ज्ञाता तदेकदेशमात्रस्यैव परिग्रहीतृत्वात्,** नित्यानित्याद्यनन्तधर्मात्मके वस्तुनि नित्यमेव, अनित्यमेव वा इत्यादि अभिनिविष्टबुद्धित्वात् । तदेव व्याचष्टे— **अनवधार्यस्यावधारयितृत्वात्,** इदमेव, इत्थमेव इत्यवधारणायोग्यस्यावधारणक[तृ]त्वात् । किमिव ? **त्वगङ्गारकितमात्रनियतपलाशस्वतत्त्वग्राहिवत्,** यथा मैत्रविषये कश्चित् परिशटितसकलपफ ?लपलाशं पलाशं तरुमवलोक्य कस्मिंश्चित् कालविशेषे ब्रूयात् ([?]')सर्वकालमेवेते निष्पत्रपुष्प-फलच्छाया इति । चैत्रमासे वाऽङ्गारकितमिव वनदवज्वालामालापरीतमिव वाशोककुसुमसदृशकुसुमं मृगगणभयजननमवलोक्य ब्रूयाद् रक्त एवायं सर्वकालमिति । स तत्काल-क्षेत्रमात्रनियतपलाशस्वतत्त्वग्राहित्वाद् द्व्यङ्गुलमात्रप्रज्ञाभिराभीरीभिरपि संवेद्यं यथर्तुवशापदेश्यनानारूपानेकान्ताङ्कुर 885/mj

* * *

भगवांस्त्वर्हन् यदेतत् सर्वं नाम तत्र निरावरणज्ञानः, तस्य यथाभूतप्रभेदस्य सम्यगभिधातृत्वात्, मैत्र इव त्वगङ्गारकितादिभेदपलाशस्वतत्त्वस्य ।

* * *

किसलयता-पत्र-कुसुम-फलादिविचित्रावस्थं स्वतत्त्वतेतो न वेत्ति द्राघीयःकाल- - /ms
विसर्पिविज्ञानहीनत्वात् तदन्यतमावस्थामात्रावलेहिह्वसिष्ठज्ञत्वात्, एवमेकान्तवादिनो वस्तुतत्त्वानभिज्ञत्वमिति । § 3062

युगपदनन्तद्रव्यपर्यायपरिणतिविषयाव्याहतनिरावरणनिर्निमित्ताविर्भावाक्षलिङ्ग-शब्दादिनिमित्तान्तरा[न]पेक्षकेवलज्ञानोऽर्हन् भगवान् ।

यद् यद् यान् यान् भावान् परिणमति हि
विस्रसा-प्रयोगाभ्याम् ।

---

१४ स] °सकलपलाशं तमवलोक्यnayacakra-ms-ya ॥
१९ नानारूपानेका] °कांताकुरु° प्र° ॥
२८ य] दृश्यतां पृ° १८२ पं° १३, पृ° २१२ पं° १९, पृ° ४७८ पं° ४ टि° १ ॥

तत् तदवेति तथाऽर्हन् ज्ञानं नापर्ययेऽस्तीति ॥ § 3065

ज्ञानस्य सर्वार्थेष्वव्याहतवृत्तित्वादनवधृतविषयत्वात् तस्य च वस्तुनोऽनन्तत्वाद् युगपदनन्तार्थवृत्तिज्ञान एव तद्वस्तुस्वतत्त्वं वेत्ति, नान्यः, स चार्हन्नेवेत्यत आह **--भगवांस्त्वर्हन् यदेतत् सर्वं नाम तत्र निरावरणज्ञानः**, सर्वाख्ये वस्तुनि निरावरणमव्याहतमस्य ज्ञानमित्यर्थः । **तस्य यथाभूतप्रभेदस्य सम्यगभिधातृत्वात्,** तस्य सर्वाख्यस्य वस्तुनो **यथाभूतं** यद् यद् भूतं यथाभूतम् वीप्सार्थत्वाद् यथाशब्दस्य येन प्रकारेण भूतं वा वस्तु सप्रभेदं सप्रतिपक्षनित्यकारणैकसर्वगतादिसंग्रह-विशेषप्रस्तारात्मकानन्तभेदप्रभेदम्, तच्च वस्तु तैरनन्तैर्भेदैरवयवैरशेषैः सह स्याद्वादेऽनेकनयविकल्पमुक्तम्, अतः सर्वाख्यवस्तुनिरवशेषावयवप्रभेदकविषयसम्यगभिधायित्वमस्य सिद्धम्, समस्तनयात्मकत्वात् स्याद्वादस्य, यस्य यथाभूतनिरवयवप्रभेदवस्तुविषयं सम्यगभिधातृत्वं स तत्र निरावरणज्ञानो दृष्टः, तद्यथा **--मैत्रक इव त्वगङ्गारकितादिभेदपलाशस्वतत्त्वस्य** देश-काला[-ऽऽका]र-प्रमाणादिविशिष्टस्य शिशिर-वसन्त-निदाघ-वर्षा-शरद्धेमन्तेषु तां तामवस्थां बिभ्रतं तथा विशेष्य त्वन्मात्रोऽङ्गारकितः किशलयितः पत्रित इत्यादि ब्रुवन् मैत्रकः पलाशं निरवयवप्रभेदं तत्र निरावरणज्ञान इति प्रसिद्धः, न रेवतीद्वीपमध्यजातसंवृद्धोऽदृष्टदेशान्तरो मौर्यकुमारोऽन्यथा ब्रुवन् एकावस्थामात्राभिधायी वा मैत्रकमुग्धकुमारोऽन्यः तथा अर्हन् यथाभूतमित्यादि सर्वावयवप्रभेदं वस्तु निरवशेषं ब्रुवन्ननुमीयतां तत्र निरावरणज्ञान इति । तत्र निरावरणज्ञानत्वेन व्याप्तत्वाद्धेतोर्विवक्षितधर्मसाध्यत्वाद् न विरुद्धादिदोषाः साधनस्य अस्य, प्रसाधितत्वाच्च सर्वस्य सर्वत्र हेतुत्वप्रज्ञ क्व ? प्तेरर्हत्संदेशकथनव्यापृतस्याद्वादिसर्वज्ञत्वप्रसङ्गोऽप्यनिष्टो न भवति, अनुमातुरपि सर्वभावस्वभावज्ञत्वात् । स्याद्वादिनः न्यायव्यवहारलोपप्रसङ्गः सपक्ष-विपक्षादिव्यवस्थालोपप्रसङ्गादिति चेत्, न, प्रत्येकनयविवक्षाविषयायाः परमतापेक्षविपक्षादिव्यवस्थायाः प्रक्लृप्तेः परिहृताशेषदोषाशङ्कमेवैतत् साधनमिति । § 3066

886/mj

सत्स्वपि पूर्वाचार्यविरचितेषु सन्मति-नयावतारादिषु नयशास्त्रेषु तस्मिंश्चार्षे सप्तशतारनयचक्राध्ययने सत्यपि दुःषमाकालदोषबलप्रतिदिनप्रक्षीयमाणमेधायुर्बलोत्साहसंवेगश्रवणधारणादिशक्तीन् भव्यजनाननुग्रहीतुं संक्षिप्तग्रन्थं बह्वर्थमिदं नयचक्रशास्त्रं श्रीमच्छ्वेतपटमल्लवादिक्षमाश्रमणेन विहितं भरतचक्र-

१ त] तदवेति प्र° ॥
८ क्ष] नियत्य° nayacakra-ms-ya ॥
१० व] निचशेषावयव° प्र° ॥
१४ स्थां] बिभ्रतां प्र° ॥
२१ व्या] °व्यावृत्त°nayacakra-ms-ya ॥
२२ अनुमा] °मानरपिnayacakra-ms-ya ॥

वर्तिना चक्ररत्नमिव जैनानां वादिचक्रवर्तित्वविधये । तदेतदेवं द्वादशारनयचक्रं सिद्धम् । § 3067

## इति नयचक्रतुम्बम्

अधुना तु शास्त्रप्रयोजनमुच्यते--सत्स्वपि पूर्वाचार्यविरचितेषु **सन्मति-नयावतारादिषु** नयशास्त्रेषु अर्हत्प्रणीतनैगमादिप्रत्येकशतसंख्यप्रभेदात्मक**सप्तनयशतारनयचक्राध्ययनानुसारिषु** तस्मिंश्चार्षे **सप्तशतारनयचक्राध्ययने** च सत्यपि **द्वादशारनयचक्रोद्धरणं** दुःषमाकालदोषबलप्रतिदिनप्रक्षीयमाणमेधायुर्बलोत्साह-श्रद्धा-संवेग-श्रवण-धारणादिशक्तीनां भव्यसत्त्वानां श्रवणमेव तावद् दुर्लभम्, श्रुत्वापि तत्त्वावबोधः, बुद्ध्वा तत्त्वमन्यप्य ?स्य व्यवहारकाले परप्रत्यायनं प्रत्यादरो दुर्लभः, सत्यपि आदरे ग्रन्थार्थसंस्मरणं तदुद्ग्राहणम् उद्ग्राहितार्थप्रतिपादनं चात्यन्तखेदायेति मत्वा तत्खेदखिन्नान् विस्तरग्रन्थभीरून् संक्षेपाभिवाञ्छिनः शिक्षकजना[न]नुग्रहीतुं कथं नाम अल्पीयसा कालेन **नयचक्र**मधीयेरन्निमे सम्यग्दृष्टयः इत्यनयानुकम्पया संक्षिप्तग्रन्थं बह्वर्थमिदं **नयचक्र**शास्त्रं श्रीमच्छ्वेतपट**मल्लवादिक्षमाश्रमणेन** विहितं स्वनीति-स्वपराक्रमविजिताशेषप्रवादिविजिगीषुचक्रविजयिना सकल**भरतविजय**वासिनृपतिविजिगीषुचक्रविजयिना **भरतचक्रवर्तिना** देवतापरिगृहीताप्रतिहतचक्ररत्नेन स्वपुत्रपरम्परानुयायिजगद्व्यापिविपुलविपुलविमलयशसा चक्ररत्नमिव तदिदं **नयचक्र**रत्नं चक्रवर्तिनामिव चक्ररत्नं पुत्रपौत्रादिनृपतीनां **विहितं** कृतम् । किमर्थमिति चेत्, **चक्रवर्तिनामिव चक्रवर्तित्वविधये वादिनां जैनानां** जिनशासनप्रभावनाभ्युद्यतानां **वादिचक्रवर्तित्वविधये** वादिचक्रवर्तित्वं विधेयात् इत्येवमर्थम्, इत्येतस्य **नयचक्र**शास्त्रस्य विधाने प्रयोजनमभिहितम् । **तदेतदेवं द्वादशारनयचक्रं सिद्धं** प्रतिष्ठितमव्याहतं चक्रवर्तिचक्ररत्नवदेव अन्याविप्रधृष्याचिन्त्यशक्तिपराभिभवनप्रभुशक्तियुक्तं च सिद्धम् । **सिद्ध**नामग्रहणं च मङ्गलं कल्याणं शिष्य प्रशिष्यपरम्परया प्रतिष्ठातुमर्हति प्रतिष्ठितसिद्धविजयावहजगन्मूर्धस्थ**सिद्ध**वत् प्रतिष्ठितं यशस्करमिति । § 3069

- /ms 887/mj

इति [1]श्रीमन्मल्लवादिक्षमाश्र[2]मणपादकृतनयचक्रस्य तुम्बं समाप्तम् ।

ग्रन्थाग्रम् १८००० । शुभं भ[3]वतु ॥

१. श्रीमल्ल॰nayacakra-ms-ya ॥

२. ॰श्रवण॰nayacakra-ms-bhā यमू॰ ॥

३. भवतु ॥ इत्यतः परं ५७२ तमे पत्रे nayacakra-ms-bhā प्रतावीदृशी प्रशस्तिर्दृश्यते-- श्री आर्यरक्षितगुरोः प्रसृते विशाले गच्छे लसन्मुनिकुले विधिपक्षनाम्नि । सूरीश्वरा गुण-

७ द्ध ] ॰द्धारणं प्र॰ ॥
८ ण ] ॰णसाधा॰nayacakra-ms-ya ॥
१५ माश्र ] ॰श्रवणेनnayacakra-ms-bhā ॥
२१ इ ] इत्येतमर्थं प्र॰ ॥
२३ व्याह ] ॰हितं प्र॰ ॥
२५ प्र ] प्रतिष्ठितयश॰nayacakra-ms-bhā ॥

**निधान**सुनामधेया आसन् विशुद्धयशसो जगति प्रसिद्धाः ॥ १ ॥ तत्पट्टपद्मतरणिस्तरणिर्भवाब्धौ श्री**धर्ममूर्ति**रिति सूरिवरो विभाति । सौभाग्यभाग्यमुखसद्गुणरत्नरत्नगोत्रः पवित्रचरितो महितो विनेयैः ॥ २ ॥ तेन स्वश्रेयसे ज्ञानभाण्डागारे हि लेखिते । नन्दता**न्नयचक्रो**रुतुम्बपुस्तकमुत्त[म]म् ॥ ३ ॥ **पुंजो मुंजो**पमो लक्ष्म्या मन्त्रि**गोविन्द**नन्दनः । श्रीगुरोराज्ञया सुज्ञः शास्त्रमे[व]मलीलिखत् ॥ ४ ॥ --- ग्रन्थाग्रम् १८००० इत्यनन्तरं ३०९ तमे पत्रे nayacakra-ms-ya प्रतावीदृशी प्रशस्तिः-- यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

१ ॥ संवत् १७१० वर्षे पोसवदि १३ दिने श्री**पत्तन**नगरे पं० श्री **यशविजयेन** पुस्तकं लिखितं । शुभं भवतु । उदकानलचौरेभ्यो मूखषकेभ्यो विशेषतः । कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥ १ ॥ भग्नपृष्ठिकटिग्रीवा दृष्टिस्तत्र अधोमुखी । कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥ २ ॥ पूर्वं पं० **यशविजय**गणिना श्री**पत्तने** वाचितम् ॥ छ ॥ आदर्शोऽयं रचितो राज्ये श्रीविज**यदेव**सूरीणाम् । सम्भूय यैरमीषामभिधानानि प्रकटयामि ॥ १ ॥ विबुधाः श्री**नयविजया** गुरवो **जयसोम**पण्डिता गुणिनः । विबुधाश्च **लाभविजया** गणयोऽपि च **कीर्तिरत्ना**ख्याः ॥ २ ॥ **तत्त्वविजयमु**नयोऽपि प्रयासमत्र स्म कुर्वते लिखने । सह **रविविजयै**र्विबुधैरलिखच्च **यशोविजय**विबुधः ॥ ३ ॥ ग्रन्थप्रयासमेनं दृष्ट्वा तुष्यन्ति सज्जना बाढम् । गुणमत्सरव्यवहिता दुर्जनदृग् वीक्षते नैनम् ॥ ४ ॥ तेभ्यो नमस्तदीयान् स्तुवे गुणांस्तेषु मे दृढा भक्तिः । अनवरतं चेष्टन्ते जिनवचनोद्भासनार्थं ये ॥ ५ ॥ --- श्रेयोऽस्तु ॥ सुमहानप्ययमुच्चैः पक्षेणैकेन पूरितो ग्रन्थः । कर्णामृतं पटुधियां जयति चरित्रं पवित्रमिदम् ॥ ६ ॥

# The TEI Header